श्रीमद्भट्टाकलङ्कदेवविरचितः

न्यायविनिश्चयः

स्याद्वादविद्यापतिश्रीमद्वादिराजाचार्यरचित-

न्यायविनिश्चयविवरणसहितः

[प्रथमः प्रत्यक्षप्रस्तावः]

श्रीमज्ज्ञानमयो दयोन्नतपदव्यक्तो विविक्तं जगत्,
कुर्वन् सर्वतनूमदीक्षणसखैर्विश्वं वचोरश्मिभिः ।
व्यातन्वन् भुवि भव्यलोकनलिनीपण्डेष्वखण्डश्रियम्,
श्रेयः शाश्वतमातनोतु भवतां देवो जिनाह्वःपतिः ॥ १ ॥

विस्तीर्णदुर्नयमयप्रबलान्धकार-
दुर्बोधतस्त्वमिह वस्तु हितावबद्धम् ।
व्यक्तीकृतं भवतु नः सुचिरं समन्तात्
सामन्तभद्रवचनस्फुटरत्नदीपैः ॥ २ ॥

गूढमर्थमेकलङ्कवाङ्न्यायागाधभूमिनिहितं वदथिनाम् ।
व्यक्तयत्यलमनैन्तवीर्यवाग्दीपवर्तिरनिशं पदे पदे ॥ ३ ॥

यत्सूक्तसारसलिलप्लपनेन सन्तः
क्लेतोमलं सकलमाशु विशोधयन्ति ।
लक्ष्यं न यत्पदमतीव गभीरमन्यैः
ते मां पुनन्तु मतिसौगतवीर्यमुख्याः ॥ ४ ॥

प्रणिपत्य स्थिरभक्त्या गुरून् परानप्युदारबुद्धिगुणान् ।
न्यायविनिश्चयविवरणमभिरमणीयं मया क्रियते ॥ ५ ॥

विद्यासागरपारगैर्विरचिताः सन्त्येव मार्गाः परे,
ते गम्भीरपदप्रयोगविषया गम्याः परं तार्किकैः ।
बालानां तु मया सुखोचितपदन्यासक्रमश्चिन्त्यते
मार्गोऽयं सुकुमारबुद्धिकृतया लीलागमाम्वेषिणाम् ॥ ६ ॥

---

१ समन्तभद्राचार्यस्येति वचनविशेषणम्, पक्षे समन्तात् भद्रकारस्येति । २ अकलङ्काचार्यस्येति वाक्यविशेषणम्, पक्षे अकलङ्करहितस्येति । ३ अनन्तवीर्याचार्यसम्बन्धीति वाग्विशेषणम्, पक्षे अनन्तसामर्थ्यविशिष्टस्येति । ४ न्यायविनिश्चयविवरणकर्तुर्वादिराजस्य गुरोर्मम । ५ वादिराजेन ।

अभ्यस्त एव बहुशोऽपि मयैव[1] पन्था,
जानामि निर्गममनेकमनन्यदृश्यम् ।
तन्मामिहादरवशेन कृतप्रचारं
के नाम दूषणशरैः परिपन्थयन्ति ॥ ७ ॥

अथवा,

येषामस्ति गुणेषु सस्पृहमतिर्ये वस्तुसारं विदुः
तेषामत्र मनः प्रविष्टमसकृत्तुष्टिं परां गच्छति ।
ये वस्तुव्यवसायशून्यमनसो दोषाभिदित्सापराः
क्लिश्नन्तोऽपि हि ते न दोषकणिकामप्यत्र वक्तुं क्षमाः ॥ ८ ॥

अपि च,

यस्य हृद्यमलमस्ति लोचनं वस्तुवेदि सुजनः स मद्यति ।
मत्सरेण परमद्यते[2] परो विद्यया तु परया न मद्यते ॥ ९ ॥

तदास्तां प्रस्तुतमुच्यते—

जयति सकलविद्यादेवतारत्नपीठं
हृदयमनुपलेपं यस्य दीर्घं स देवः ।
जयति तदनु शास्त्रं तस्य यत्सर्वमिथ्या-
समयतिमिरं[3]घाति ज्योतिरेकं नराणाम् ॥ १० ॥

शास्त्रस्यादौ अद्भुतमहिमोदयाधिष्ठानभगवदर्हत्परमेष्ठिनिरुपमगुणस्तवनं कृतः कुर्वन्ति शास्त्रकारा इति चेत्? तस्य परममङ्गलत्वेन शास्त्रोपयोगित्वात्[4] । भगवद्गुणस्तवनं खलु परमं[5]मङ्गलम्; मलस्य पापस्य गालनात्, मङ्गस्य सुकृतविशेषस्य च कार्यत्वेन लानात्[6] । सति च तत्कृते मलाभावे सुकृतविशेषे[7] च शास्त्रं निर्विघ्नपारगमनं वीर[8]पुरुषमायुष्मत्पुरुषं च भवतीति मलहरण-सुकृतविशेषकरणाभ्यामुपपन्नं शास्त्रोपयोगित्वं मङ्गलस्य । सदाचारपरिपालनमपि मङ्गलस्य प्रयोजनमिति चेत्; न; तस्य शास्त्रोपयोगित्वाभावात्[9] । अकृततत्परिपालनस्याधर्मोत्पत्तेः शास्त्रमेव विहन्यत इति चेत्; अधर्मनिवारणादेव तर्हि तस्य तदुपयोगित्वम्, तच्च मङ्गलादेव सिद्धमिति किं तदर्थेन[10] तत्परिपालनेन ?

---

१ मयैव ब०, प०, स०, आ० । २ पमद्यते ब०, परिमद्यते प० । परः दुर्जनः परं केवलं मत्सरेण अद्यते व्याकुलीक्रियते इत्यर्थः । ३ –रपूति– ब०, स० । ४ तुलना–"अहवा बहुमेयगयं णाणावरणादिदव्व-भावमलभेदा । ताइं गालेइ पुढं जदो तदो मंगलं भणिद ॥ अहवा मंगं सोक्खं लादि हु गेण्हेदि मंगलं तम्हा । एदेण कज्जसिद्धिं मंगह गच्छेदि गंथकत्तारो ॥"–तिलोय० गा० १४, १५ । ५–पे शा– ता० । ६ "मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च" –पात० म० १।१।१ । ७ स्फुटार्थं अभि०पृ० २। ८ सदाचारपरिपालनस्य शास्त्रोपयोगित्वम् । ९ अधर्मनिवारणञ्च । १० तदर्थे तन्न परि– ब०, प०, स०, आ० । अधर्मनिवारणार्थेन ।

मङ्गलादेव चरितब्रह्मचर्यप्रतिरोधनम् ।
तदर्थं न सदाचारपरिपालनमर्थयत् ॥११॥
न लोकेन कृतं कार्यं हेतावन्यत्र सस्पृहम् ।
सिद्धस्य निरपेक्षत्वादनवस्थितिरन्यथा ॥१२॥
सिद्धे पापप्रतिध्वंसे सदाचारानुपालनात् । ५
मङ्गलस्यैव वैयर्थ्यं किन्न स्यादित्यसम्मतम् ॥१३॥
वैदंभाये वैदंभाचारपालनस्याप्यसम्भवात् ।
तत्प्रयोजनभावेन सैन्येष्टत्वात् स्वयं परैः ॥१४॥
नैस्तिकत्वसमाधानं मङ्गलादिति चेत् , नैवं ।
कः शास्त्रस्योपयोगः स्यात् ? आदेयत्वं भवेद्यदि, ॥१५॥ १०
आदेयं युक्तिसामर्थ्यादुक्तत्वं यदि तद्वृथा भवेत् ।
नास्तिकत्वनिषेधेऽपि नादेयं तद्युक्तिकम् ॥१६॥

शास्त्रनिर्वहणानङ्गमपि सदाचारपरिपालनादिकं मङ्गलस्य प्रयोजनमुक्तं तस्यापि ततः सम्भवात् । न हि शास्त्राङ्गमेव तत्प्रयोजनं वक्तव्यमिति नियमः सम्भवतोऽन्य (-थति, अन्य-) स्यापि वचने दोषाभावादिति चेत् ; न , अप्रस्तुताभिधानस्यैव दोषत्वात् । १५

अपि च,

सदाचारामिरक्षादि यद्वन्मङ्गलतो मतम् ।
निर्विघ्नीकरणाद्यन्यत्तद्वदाम्नायते न किम् ? ॥१७॥
ततस्तदपि वक्तव्यं शास्त्रादौ तत्प्रयोजनम् ।
परैः प्रयोजनेच्छा कथमेव नियम्यते ? ॥१८॥ २०
स्तुतिप्रयोजनं तस्माद्वक्तव्यं प्रस्तुतोचितम् ।
अतिप्रसङ्गसम्बद्धप्रवादी भवतोऽन्यथा ॥१९॥
तदन्तरायविध्वंसमुक्तवोत्पादनात्मना ।
विदुः शास्त्रोपयोगित्वं मङ्गलस्य मनीषिणः ॥२०॥

स्यान्मतम्– निर्विघ्ननिर्वहणादिकं न मङ्गलात् सत्यपि तस्मिन् कश्चित्तदभावात् , २५
असत्यपि [1]कश्चित्तद्भावात् । न हि यस्य [2]भावेऽपि यन्न भवति अभावेऽपि भवति तत्तस्य कार्यम् , अन्वयव्यतिरेकानुविधानाधीनत्वाद्धेतुहेतुमद्भावस्य, अन्यथा कुम्भादेरपि कुविन्दादि-

---

१ मङ्गलमात्रे । २ सदाचार । ३ मङ्गलस्य । ४ तुलना–"परमात्मानुष्ठानाद् ग्रन्थकारस्य नास्तिकतापरिहारसिद्धिः तद्वचनान्नास्तिकैराददीयमानेन सर्वत्र क्वचिदनुपपत्तेस्तदाद्यर्थं तदभिधेयप्रयोजनमित्यपरे, तदप्यसारम् , श्रेयोमार्गसमर्थनादेव वक्तुर्नास्तिकतापरिहारसम्भवात् ।" –त० को० पृ० १ । ५ नास्तिकत्वपरिहारात् । ६ शास्त्रम् । ७ शास्त्राङ्गमङ्गलप्रयोजनस्य सदाचारपरिपालनादेः । ८ निर्विघ्नोक्त–ब० । ९ ग्रहणगानार्थमुक्तनिरणाक्यादौ । १० चार्वाकग्रन्थेषु । ११ मात्रे यत्न प० ।

कार्यत्वप्रसङ्गादिति ; तदसत्, समग्रस्यैव हेतुत्वात्। असमग्रस्य व्यभिचारेऽपि दोषाभावात्, अन्यथा न पावकस्यापि धूमहेतुत्वम्, आर्द्रेन्धनादिविकलस्य धूमव्यभिचारात। तस्मात्—

आर्द्रेन्धनादिसहकारिसमग्रतायां
यद्वत्करोति नियमादिह धूममग्निः।
तद्वद्विशुद्ध्यतिशयादिसमग्रतायां
निर्विघ्नतादि विदधाति जिनस्तवोऽपि ॥२१॥

नाप्यसति तस्मिन् तद्भावः ; तस्य निबद्धस्याऽभावेऽप्यनिबद्धस्य तस्य परमगुरुगुणानुस्मरणात्मनो मङ्गलस्यावश्यम्भावात्, तदस्तित्वस्य च तत्कार्यादेवानुमानात् धूमादेः प्रदेशादिव्यवहितपावकानुमानवत्। मङ्गलसामग्रीवैकल्यस्य च कस्यचित्तत्कार्यस्य वैकल्यादेवानुमानात् धूमाभावात्तदुत्पादनसमर्थदहनाभावानुमानवत्। यदि परमगुरुगुणानुस्मरणमपि मङ्गलं तर्हि तत एव समीहितसिद्धेः किमन्येन वाचिकेन कायिकेन वा ? सतोऽपि तस्यान्तरङ्गसहितस्यैव समग्रत्वात् अन्तरङ्गस्य तु केवलस्यापि माङ्गलिकप्रयोजनसमर्थत्वादिति चेत् ; इदमनुमतमेवास्माकम्, "आभ्यन्तरं केवलमप्यलं ते" [बृहत्स्व० श्लो० ५९] इत्याम्नायात्। न च तावता वाचिकादेर्वैयर्थ्यम् ; तस्य सामग्र्यन्तरत्वात्। एकस्मिन् कार्ये किं सामग्र्यन्तरेणेति चेत् ? न ; दहनकार्ये काष्ठादिवन्मण्यादेरपि सामग्र्यन्तरस्योपलम्भात्। अन्यदेव दहनकार्यं मण्यादेर्यत्काष्ठादेर्न भवतीति चेत् ; मङ्गलकार्यमप्यन्यदेव परमगुरुगुणानुस्मरणात् यद्वाचिकादेर्न भवतीति समानमुत्पश्यामः। यद्येवं भगवद्गुणस्तवनादिवत् मिथ्यातीर्थकरगुणस्तवनादिकमपि सामग्र्यन्तरं भवेत् ततोऽपि मङ्गलकार्योपलम्भादिति चेत् ; कस्तद्गुणो नाम ? यदि सर्वज्ञपरमवीतरागत्वादिः ; स तर्हि भगवद्गुण एव, "तदपरस्य तद्गुणत्वं नास्तीति यथास्थानं निवेदनात्। अतः सर्वत्र तद्गुणस्तवनमेव मङ्गलं तत एव तत्प्रयोजनभावान्नापरम्।

किं पुनस्तत् ? इत्यत्राह—

प्रसिद्धाशेषतत्त्वार्थप्रतिबुद्धैकमूर्तये।
नमः श्रीवर्धमानाय भव्याम्बुरुहभानवे ॥ १ ॥

अस्यायमर्थः—"श्रीवर्द्धमाना यस्माद्विनेयानां स श्रीवर्द्धमानो भगवतां समूहस्तस्मै 'नमस्करोमि' इत्युपस्कारः। ननु यदि 'श्रीवर्धमानाय' इत्युक्तेऽपि सर्वेषामेव भगवतां प्रतिपत्तिस्तर्हि 'श्रीजिननाथाय'इति वक्तव्यम्, एवं हि लघ्वी प्रतिपत्तिः अस्य सामान्यवाचित्वात्

---

१ निर्विघ्ननिर्वहणादिसद्भावः। २ निबद्धस्य भावेऽप्यनिबद्धस्य तस्याभावेऽपि परम—ब०, आ०, प०। ग्रन्थाङ्गभूतस्य। ३—स्य तस्याभावेऽपि परम —स०। ग्रन्थानन्तर्गतस्य मनोवाक्कायव्यापाररूपस्य। ४ मङ्गलकार्यात् निर्विघ्नपरिसमाप्त्यादेरेव। ५ असमाप्तग्रन्थादौ। ६ वाचिकस्य कायिकस्य वा। ७ परमगुरुगुणस्मरणात्मकस्य। ८ अन्तरङ्गस्य केवलस्य माङ्गलिकप्रयोजनसमर्थत्वे। ९ यदेवं ब०, प०, आ०। १० सर्वज्ञवीतरागत्वाद्यतिरिक्तस्य। ११ श्रीवर्धमाना यस्माद्विनेयानां सहश्री आ०, ब०, प०।

छन्दसोऽप्यनुपहतत्वात्, श्रीवर्द्धमानशब्दस्य तु भगवति पश्चिमतीर्थंकरे एव रूढत्वात् ततो झटिति तस्यैव प्रतीतिर्न सर्वेषाम्। भवतु तस्यैवायं स्तवः प्रधानत्वात्, तदुपदिष्टमिदानीन्तनमिदं खलु धर्मतीर्थम्, अतश्च शास्त्रकारस्य निःश्रेयसमार्गनिर्णय इत्युपकारं प्रति प्रत्यासन्नत्वेन प्रधानत्वात् स एव स्तोतव्यो न सर्वेऽपीति चेत्, न, सैवैषामपि स्तुतिविषयबुद्धिपरिगृहीतानामिदानीमेव पापमलापायोपक्रान्तित्वेन प्रत्यासन्नत्वाविशेषात् तदपाये निःश्रेयसमार्गनिर्णयस्याप्यवश्यम्भावात्, कथं वा "वन्दित्वा परमर्हतां समुदयम्" [अष्टश० पृ० २] इति शास्त्रान्तरे सर्वेषामपि स्तवनमुपपद्यते? कथंचित्सर्वेषामपि प्राधान्यं क्वचित्पश्चिमस्यैव विवक्षात इति चेत्, स्वेच्छापरवशस्तर्हि शास्त्रकारो न गुणपरवश इति यत्किञ्चिदेतत्। व्युत्पत्तिवशात् अंत एव सर्वप्रतिपत्तौ प्रतिपत्तिगौरवमिति चेत्, न, चोद्यसमाधानार्थत्वात् पर्यवचनस्य। भवति अत्र चोद्यम्—

कुतः स्तवस्य सामर्थ्यं तादृशं यत्करोत्ययम्।
निर्विघ्नतादिकं कार्यं नाशक्तमर्थं हि कारणम् ॥२२॥
स्वकारणबलात्तस्य यदि शक्तिर्भवेदियम्।
श्रीवर्द्धमानस्तैस्यासौ विषयः किमुदीर्यते? ॥२३॥
स्तुतिर्निर्विषया नास्तीत्ययं तद्विषयः कुतः।
इति चेन्नियमः कस्मात्? यः[10] कश्चन विधीयताम् ॥२४॥

अत्रेदमाह—'श्रीवर्द्धमानाय' इति। श्रीर्मङ्गलस्य मलापहरणाविशक्तिरेव मङ्गलार्थिभिरभिलषितत्वात् तल्लक्षणत्वाच्च श्रियः, सा वर्द्धमाना वृद्धिं [11]प्रजग्मी यस्मादसौ श्रीवर्द्धमानो भगवत्समूह इति। ततः

प्रतिपत्तेर्गुरुत्वेऽपि कृत्वा गात्रनिमीलनम्।
कृता श्रीवर्द्धमानोक्तिरस्यार्थस्य प्रसिद्धये ॥२५॥

स्यान्मतम्—न भगवतः सामिप्रायात् मङ्गलस्य तत्कृतिः सर्वत्रोपेक्षापरत्वात्, न चोपेक्षापरस्य 'इदमित्थं करोमि' इत्यभिप्राय सम्भवति, [12]"उपेक्षापरत्वहानेः"। नापि निरभिप्रायात्, निरभिप्रायप्रवृत्तेरदर्शनादिति, तन्न, पद्मविकासकरणे [13]"भानोर्निरभिप्रायस्यापि प्रवृत्तिदर्शनात्। शक्तितो हि कारणस्य कारणत्वं नाभिप्रायात्।

अभिप्रायेण हेतुत्वे, भानुः पद्मविकासने।
न हेतुः स्यात्, सदाऽऽलस्येन्, भगवत्स्तवदिप्यताम् ॥२६॥

एतदेवाह—'भव्याम्बुरुहभानवे' इति। भव्यं मङ्गलं भवतेर्मङ्गलार्थत्वात्। तथा च पठन्ति—

---

१ अनुद्भटः। २ महार्थैः। ३ —यामेव स्तु— आ०, ब०, प०, स०। ४ —स्वावश्य— प०। ५ 'परमार्हताम्' —अष्टश०। ६ श्रीवर्द्धमानायेति पदादेव। ७ स्तवस्य। ८ श्रीवर्द्धमान। ९ कुतः आ०, ब०, प०, स०। १० तीर्थंकर। ११ प्रजग्मिव —आ०, ब०, प०, स०। १२ उपेक्षापरत्वहामे आ०, ब०, प०, स०। १३ तुलना—"तस्मात्तामन्यादेव प्रद्योतते भास्करो यथा लोकम्। तीर्थप्रवर्तनाय प्रवर्तते तीर्थंकर एवम्॥" —त० भा० अ० १०।

"सत्तायां मङ्गले वृद्धौ निधाने व्याप्तिकर्मणि ।
गतौ चापि समाख्यानं पदार्थे भवति विदुः ॥" इति ।

भव्यमेवाम्बुरुहवदम्बुरुहं भगवद्भव्यत्वेनाङ्गत्वात्तस्य भानुरिव भानुर्भगवान् स्वशक्ति-स्तच्छक्तिविकासकारित्वात् ।

स्वभावत एव मङ्गलस्य तच्छक्तिः शब्दशक्तित्वात् अर्थप्रत्यायनशक्तिवदिति चेत् ; न ; स्वार्थप्रत्यायनशक्तेरपि पुरुषायत्तत्वात्, नियमेनस्य साध्यधर्मत्वात् । न हि पदादिवदेव स्वभावतः शब्दस्य स्वार्थावद्योतनसामर्थ्यम् अनभिमतस्यापि प्रसङ्गात्, तदभ्युपायवैयर्थ्योपनेः । समयेनेति चेत् ; समयात्तर्हि तस्य तच्छक्तिर्न स्वभावात् पुंस्त्वस्त्रीत्वनित्यताभावप्रसङ्गात् । अनुभावनित्व एव पुरुषेच्छामपि शब्दाः पुरुषेण यथाकामं प्रसिद्धादर्थादर्थान्तरेऽपि प्रयुज्यमानानां तेषां तत्प्रद्योतनं प्रत्याभिमुख्यस्यैव प्रतिपत्तेर्न वैमुख्यस्य । स्वशक्तित एव तत्रापि तदभिमुख्यं न तद्विच्छात इति चेत् ; न ; इच्छाविरहेऽपि तत्प्रसङ्गात् । समयादेव तेषां तच्छक्तिरिति चेत् ; तत्कृतैव तर्हि सा तेषामिति न शब्दस्य स्वार्थावबोधनशक्तिः स्वभावात् अपि तु समयात्, स च पुरुषादिति पुरुषायत्तैव तच्छक्तिः तदाह— **श्रीवर्द्धमानाय** । श्रीर्वचनस्यार्थः "प्रत्यायनशक्तिः वर्द्धमाना शिष्यप्रशिष्यपरम्परया वृद्धिं गच्छन्ती यस्मादिति व्युत्पत्तिः ।

कुतः पुनरत्यन्तकृतार्थत्वेन निरीहस्य भगवतः शब्दशक्तिकरणव्यापार इति चेत् ? न ; तथाविधस्य स्वभावनियमस्य[14] भावात् भानोः पद्मविकासनवत् । [15]तदाह— **भव्याम्बुरुहभानवे** । निःश्रेयसतत्कारणपर्यायेण भवन्तीति भव्याः तेषामम्बुरुहमिवाम्बुरुहं प्रवचनं सकलतत्त्वनिवेदनश्रीनिवासत्वात्, तस्य भानुरिव भानुर्भगवान्, [16]अनभिसन्धेरपि स्वभावत-[17]स्तच्छक्तिविकासकारित्वात् । नन्वेवं प्रवचनमेव भगवत्कृतमुक्तं भवति शक्तिशक्तिमतोरभेदात्, तथा चाप्रमाणमेव प्रवचनं प्राप्तम्, अनभिसन्धाय प्रवृत्तत्वात् बालोन्मत्तवाक्यवदिति चेत् ; अत्राह— **'प्रसिद्ध'** इत्यादि । निःश्रेयसाधिगिरभ्यर्थ्यमानत्वादर्था अनन्तज्ञानशक्त्यादयो गुणाः, तत्त्वेन न [18]संवृत्या अर्थान्तरत्वार्थाः, अशेषा अविकलास्तत्त्वार्थास्तेषां प्रतिबुद्धं प्रत्युद्बोधनं प्रतिबन्धविगमे समुन्मीलम् 'भावे क्तप्रत्ययविधानात्' अशेषतत्त्वार्थप्रतिबुद्धम्, प्रसिद्धं प्रमाणनिश्चितं तच्च तदशेषतत्त्वार्थप्रतिबुद्धं च तत्तथोक्तम्, सैव एका प्रधानभूता स्वसत्तां प्रति अनन्यापेक्षत्वेनासहाया वा मूर्तिः स्वभावो यस्य स तथोक्तस्तस्मै इति ।

अनन्तज्ञानशक्त्यादिप्रतिबोधप्रसिद्धता । प्रभोश्च तत्स्वभावत्वं पश्चाद्व्यक्तं वक्ष्यते ॥२७॥

अनन्तज्ञानसाम्राज्यप्रतिबोधे सति प्रभोः । शासनं तद्विधिक्तार्थमप्रमाणं कुतो भवेत् ? ॥२८॥

---

१ मलापहरणादिशक्तिः । २ अगृहीतसङ्केतस्यापि । ३ समवायात्त —आ०, ब०, प०, स० । सङ्केतात् । ४ शब्दस्य । ५ यदि स्वभावात् शब्दस्य अर्थप्रत्यायनशक्ति. स्यात्तर्हि पुरुषाधीनत्वं न स्यादिति भावः । ६ अप्रसिद्धेऽर्थेपि । ७ पुरुषेच्छायाम् । ८ अप्रसिद्धार्थावद्योतनशक्तिः । ९ पुरुषेच्छाकृतैव । १० —प्रत्ययनश्च—आ०, ब०, प०, स० । ११—स्याभावा—ब०, प० । १२ —तथाह आ०, ब०, प० । १३ अभिसन्देशोऽपि प०, आ० । अभिप्रायरपितस्यापि । १४ प्रवचनशक्ति । १५ कल्पनया ।

इदमन्यत् व्याख्यानम्– श्रीः देवागम-नभोयान-चामरादि-विभूति-सर्वज्ञविद्या-महाकल्याणाभिषेकलक्षणा निरतिशयपुण्यपरमवैराग्यादिहेतुतत्त्वादिकरणशक्तित्वादिलक्षणा[1] वा वर्द्धमाना प्रतिदिवसमभिवृद्धिं व्रजन्ती यस्य भगवतां समूहस्य[2] सन्मतेर्वा तस्मै **श्रीवर्द्धमानाय नमः**। प्रसिद्धानि प्रमाणनिश्चितानि अशेषाण्यविकलानि तत्त्वानि श्रीवादीनि[3] तान्येवार्थो विषयो यस्याः सा प्रसिद्धाशेषतत्त्वार्था, प्रतिबुद्धा स्वावरणसम्पत्तिनिर्व्यपगमे सति प्रतिव्यक्त्युद्बुद्धा, एका अविच्छिन्ना असहाया वा मूर्तिर्ज्ञानदर्शनादिरूपा यस्य तस्मै **'प्रसिद्धाशेषतत्त्वार्थप्रतिबुद्धैकमूर्त्तये'** इति।

[4]किमर्थमत्र प्रसिद्धग्रहणम्? भगवतः सुगतादिभ्यो व्यवच्छेदार्थम् तेषां प्रसिद्धतत्त्वार्थाया बोधमूर्तेरभावात् प्रतिभासाद्वैतादेस्तद्बोधविषयस्याप्रमाणत्वादिति चेत्, उच्यते– प्रतिभासाद्वैतादिकं तत्त्वम्, अतत्त्वं वा? तत्त्वमपि ज्ञातम्, अज्ञातं वा? यद्यज्ञातम्, कथं 'तत्त्वम्' इत्युक्तिः? ज्ञाते एव तदुपपत्तेः। ज्ञातं चेत्, कथमप्रमाणत्वम्? तस्य तत्त्वरूपतया ज्ञातत्वेन सप्रमाणत्वस्यैवोपपत्तेः। ज्ञातमप्यतत्त्वमेव तदिति चेत्, तथाऽपि तत्त्वपदेनैवातत्त्वविज्ञो[5] भगवतस्तत्त्वविदो व्यवच्छेदात् किं प्रसिद्धपदेन कर्त्तव्यम्? परोभ्युपगमेन तत्त्वमेव तदिति चेत्, तथाऽपि न प्रसिद्धपदमर्थवत्[6] प्रसिद्धतयाऽपि परेण तस्याभ्युपगमात्। अभ्युपगमनिबन्धना प्रसिद्धिरप्रसिद्धिरेवेति चेत्, [7]तन्निबन्धनं तत्त्वमप्यतत्त्वमेवेति, व्यर्थं प्रसिद्धपदमिति चेत्; न व्यर्थम्, परोपन्यस्तस्य [8]साधनस्यासिद्धत्वोद्भावनार्थत्वात्। अत्र हि परमतम्–"यस्त्वावदसर्वज्ञ एष सर्वज्ञो भवति तस्य परोक्षार्थपरिज्ञाने को हेतुः? न ह्यन्वीक्ष्य किमपि कारणमुपलक्षितं यदनुष्ठानात् सर्ववेदनं सम्भवति। मन्त्रतन्त्रादयस्तु प्रायशः सकलसमयसम्मविनः" [प्र० वार्तिकाल० १।२९] इति, तत्रेदमुच्यते– असिद्धः कारणाभावः। प्रसिद्धपदसूचितस्य प्रमाणस्यैवाशेषतत्त्वगोचरस्य सर्वज्ञत्वनिमित्तत्वात्। किं पुनस्तादृशं प्रमाणं छद्मस्थस्य सम्भवति? वादम्, कथमन्यथा पटप्रमाणकृतसर्वज्ञत्वाङ्गीकरणं मीमांसकस्य? तथाहि–

यदि प्रमाणमेकं न पटप्रमाणार्थगोचरम्।
[9]'यदि षड्भिः प्रमाणैः स्यात्' इत्यादि कथमुच्यते? ॥२९॥

न ह्येकेन प्रमाणेन प्रत्यक्षादिप्रमाणषट्कं तद्विषयं च सर्वमनुपसङ्ख्यम् 'इदमनेनाय जानाति' इत्यङ्गीकर्त्तुमर्हति[10] स्वयमप्रतिपन्नस्याङ्गीकारायोगात्। प्रतिपन्नत एव, परं नैकेन, किन्तु षड्भिरेव प्रमाणैर्यथास्य [11]तानि तद्विषयांश्च पृथगेवाधगच्छतीति चेत्, न, [12]एकप्रत्य-

---

१ अप्रतिहत। २ –न ब–प०, ब०।–प्य ब–आ०। ३ महावीरस्य पश्चिमतीर्थकरस्य। ४ "औपम्यसम्बन्धसंस्तवनिश्चयाभ्यां ज्ञानम्"–त० सू० १।३। ५ –बन्धुद्वीपा आ०, ब०, स० प०। ६ आदिशब्देन अवर्णवादे-अनन्तमुक्तादिग्रहः। ७ किमर्थं प्रति– ता०। ८ प्रतिभासाद्वैतादेः। ९ सुगतादिभ्यः। १० सार्थम्, ११ अभ्युपगमनिबन्धनम्। १२ साधनस्यासिद्धत्वो–प०, ब० आ०। १३ मी० श्लो० १।१।२।११२। १४ मीमांसकः। १५ प्रत्यक्षादिप्रमाणानि। १६ एकप्रत्ययेन प्रमाणषट्कतद्विषयाणां मनुसम्बन्धनाभावे।

योपसङ्कलनाभावे 'षड्भिरेव नैकेन' इत्यपि वक्तुमशक्यत्वात्। तथाहि—न हि यस्यैकं प्रमाणं प्रमाणषट्कतद्गोचरार्थविषयमस्ति, न च प्रत्यक्षादीनि स्वविषयपरिच्छेदमात्रोपक्षीणानि अपरप्रमाणतद्विषयगन्धमपि स्पृशन्ति, तत्कथमसौ प्रमाणषट्कं तद्विषयं वा जानीयात्, येनैवमुच्यते—"यदि षड्भिः प्रमाणैः स्यात्सर्वज्ञः केन वार्यते।" इति। भवत्येवंविधमुपसङ्कलनं प्रमाणं तु न भवति अपूर्वार्थत्वाभावात्, यथास्त्वं प्रमाणेनिर्णीतस्यैव प्रत्यक्षादिप्रमाणतद्विषयकलापस्य स्मरणेन सङ्कलनात् अपूर्वार्थं च प्रमाणं न गृहीतग्राहीति चेत्; न; [3]विषयविषय्यसन्दोहस्य [4]प्रागसिद्धेः प्रत्यक्षादेरेकैकस्य [5]तत्सन्दोहाविषयत्वात्, तत्सन्दोहाविषयं च सङ्कलनस्य गृहीतग्राहित्वं तत्सन्दोहासिद्धौ न सिध्येति। ततस्तत्सन्दोहे [6]तदपूर्वार्थत्वात् प्रमाणमिति कथमप्रमाणम्? अपि च,

> गृहीतग्रहणात् मानतद्ज्ञेयाकलनं यदि।
> न [7]मानं मानमेकत्वप्रत्यभिज्ञा कथं भवेत्? ॥३०॥
>
> पूर्वोत्तरावबोधाभ्यामेकत्वस्याग्रहो यदि।
> मानज्ञेयसमूहोऽपि किमन्यस्यैव गोचरः? ॥३१॥

यथैव हि पूर्वोत्तरज्ञानाभ्यां स्वकालनियतपर्यायमात्रपरिच्छेदाभ्यामेकत्वस्याग्रहणात् अपूर्वार्थमेकत्वप्रत्यभिज्ञानं तथैव प्रत्यक्षाद्यन्यतमापरिच्छिन्नविषयिविषयसन्दोहगोचरमपि सङ्कलनज्ञानमपूर्वार्थमनुमन्तव्यम्। तच्च प्रमाणम्, इत्यस्ति तद्वत् सकलजीवादिविषयमप्यागमिकं[8] तस्य प्रमाणं यदनुष्ठानात् सर्ववस्तुसाक्षात्करणं भगवत इति न युक्तमेतत्—'कारणाभावान्नास्ति कस्यचित् सर्वज्ञत्वम्' इति।

स्यादाकूतम्— अस्ति निरवशेषवस्तुविषयं सङ्कलनम्, तत्तु न सकलविषयैकप्रमाणसामर्थ्यात्[10] तदभावात्, अपि त्वात्मसामर्थ्यात्। आत्मा हि स्वपरप्रकाशादिरूपः [11]परिस्फुरन् सकलप्रमाणतद्ज्ञेयसन्दोहं सङ्कलयति, [12]तत्सामर्थ्यप्रयुक्तं चेदं 'यदि' इत्यादिवचनं नैकप्रमाणसामर्थ्यप्रयुक्तम्।

> न चात्मनः प्रमाणत्वं प्रमातृत्वेन निश्चयात्।
> प्रमाणत्वे[13] हि तस्यापि प्रमाताऽन्यः प्रकल्प्यताम् ॥ ३२ ॥
>
> तस्यापि स्वपरज्ञस्य प्रमाणत्वोपकल्पने।
> प्रमाताऽन्यः प्रकल्प्यः स्यादेवं स्यादनवस्थितिः ॥ ३३ ॥

१—माणेनि—ब०, प०; आ०। २ "सर्वस्यानुपलब्धेर्ऽर्थे प्रामाण्यं स्मृतिरन्यथा" [नी०श्लो० १।१।५।११] इत्युक्तत्वात्। ३ विषयविषयिस—आ०, ब०, प०, स०। ४ सङ्कलनात्पूर्वं केनापि ज्ञानेनाग्रहणात्। ५ विषयविषयिसमुदायाविषयत्वात्। तत्सन्दोहावि—ब०, प०, आ०। ६ सङ्कलनज्ञान। ७ प्रमाणम्। ८ स्मरणानुभवाभ्याम्। ९—विषयविषयिस—ब०, आ०, प०, स०। १० श्रुतज्ञानात्मकम्। ११ सकलविषयैकप्रमाणाभावात्। १२ परिस्फुरन्तु म—ता०। १३ आत्मसामर्थ्यं। १४ —णत्वेन त—ता०।

न विना च प्रमातारं प्रमाणस्योपपद्यते ।
न हि कर्तृनिरपेक्षं करणं व्यवलोक्यते ॥ ३४ ॥
तन्न प्रमाणं सर्वार्थमेकं यस्य यदादियम् ।
[1]प्रसिद्ध(द्धि)सर्वतत्त्वानां प्रसिद्धेत्यादिनोच्यते ॥ ३५ ॥ इति,

तदसङ्गतम्, यस्मादात्मन एव सर्वप्रमाणतद्वेयसन्दोहमाकलयतः स्वविषयाभ्यभिचारे प्रामाण्यात्, तद्व्यभिचारे [2]तद्बलात्तन्निश्चितस्य 'यदि' इत्यादिवचनस्यानुपपत्तेः । आत्मनः प्रामाण्ये प्रमातृत्वं न स्यादिति चेत्, न, विरोधाभावात । विषयपरिच्छित्तिं प्रति स्वतन्त्रशक्त्यपेक्षया प्रमातृत्वात् साधकतमशक्त्यपेक्षया च तस्यैव प्रमाणत्वात्, एकत्र च शक्तिनानात्वस्य 'आत्मनाऽनेकरूपेण' [3]इत्यादिना निषेधनात । तन्न प्रमाणात्तत प्रमातुरर्थान्तरत्वं प्रमितेरपि [4]तस्य [5]तत्प्रसङ्गात् । न चैतत्पक्ष्यं भवताम्, विषयप्रमितिवत् [6]स्वप्रमितेरपि [7]तस्मादर्थान्तरत्वे स्वसंविदितात्मवादाभावप्रसङ्गात् । क्रियाकर्तृत्वमात्रत्वमेकस्य शक्तिभेदप्रयुक्तम् वि (क्तमपि) रुद्धमिति चेत्, तर्हि [8]तत एव कर्तृकरणत्वमात्रव्यवस्थाप्यविरोधात् नात्मन प्रमाणत्वे प्रमात्रन्तरपरिकल्पनं यत्तोऽनवस्थानं भवेत् ।

तस्मादात्मैव सर्वार्थवेदी स्याद्वादशासनात् ।
प्रमाणं भावना तस्य सर्वदर्शित्वमावहेत् ॥ ३६ ॥

तत क्षितं प्रसिद्धग्रहणं परसाधनव्यासिद्धदोषोद्भावनार्थमिति ।

यत्पुनरिदं बौद्धस्य मतम्–भवतु किञ्चित्प्रमाणं यदभ्यासात्तत्त्वदर्शित्वं भगवतः तत्तु न सर्वविषयं [9]तदसम्भवात् । न हि संसारिणस्तदस्ति, सर्वस्य सर्वदर्शित्वप्रसङ्गात् । [10]सम्भवेऽपि तदभ्यासस्य वैफल्यात् । कस्यचित्तदभ्यासनिबन्धनसकलार्थदर्शनसाधने निःश्रेयसार्थिनां प्रयोजनाभावाच्च । [11]ते खलु सोपायहेयोपादेयगोचरमेव कस्यचिज्ज्ञानमभिवाञ्छन्ति [12]स्वयं तदाम्नायात्, सोपायहेयोपादेयतत्त्वपरिज्ञाने हेयस्य हानादुपादेयस्य चोपादानात् निःश्रेयसावाप्तेः पुरुषार्थपरिसमाप्तेः, सकलार्थज्ञानं तु [13]कस्यचिदवस्करकुटीरकोटरान्तर्गतकीटसंख्यागणनादिगोचरं विद्यमानमपि नास्मदादिभिरन्येषामीय पुरुषार्थोपयोगाभावात् । यदुक्तम्–

"सम्मादनुष्ठेयगतं [14]ज्ञानमस्य [15]विचार्यताम् ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ? ॥" [प्रमाणवा० १।३३] इति,

---

१ प्रसिद्धस्य-ता० । २ आत्मप्रामाण्यबलात् । ३ न्यायवि० का० ९ । ४ प्रमातुः । ५ अर्थान्तरत्वप्रसङ्गात् । ६ स्वप्रमितेरपि आ०, ब०, स०, प० । ७ प्रमातुरात्मनः । ८ शक्तिभेदप्रयुक्तत्वादेव कारणात् । ९ सकलपदार्थविषयैकप्रमाणसम्भवात् । १० सकलविषयैकप्रमाणसम्भवे तु । ११ निःश्रेयसार्थिनः । १२ "हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः । यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥–तस्माद्धेयतत्त्वस्य दुःखसम्यस्य साभ्युपायस्य समुदयसम्यक्त्वस्य उपादेयतत्त्वस्य निरोधसम्यक्त्वस्य साभ्युपायस्य मार्गसम्यक्त्वादिकस्य प्रमाणान्तरविलक्षणस्य यो वेदकः स प्रमाणमिष्टो न तु सर्वस्य यस्य कस्यचिद्वेदकः । न खलु सकलपदार्थसंख्यातृत्वोपदेशना अपि तु तत्त्वज्ञानवतामुपदेष्टृत्वेनैव च प्रामाण्यमिष्यते ॥"–प्र० वा० भ० १।३४। १३ कस्यचिदवस्करकु–ता०। विद्यमानमपि कीटसंख्यापरिज्ञानम्। १४ संसारदुःखप्रहाणोपायम्। १५ प्रमाणपुरुषस्य ।

अत्रेदमुच्यते– किं तत्प्रमाणं यदभ्यासादनुष्ठेयवस्तुसाक्षात्करणं तथागतस्य ? प्रत्यक्षमिति चेत्; न; अनुष्ठानवैयर्थ्यप्रसङ्गात्। अनुष्ठानं हि प्रमाणविषयसाक्षात्करणार्थम्, प्रत्यक्षस्यैव च [1]तत्साक्षात्करणरूपत्वे किं तदनुष्ठानेन ? न चाऽसाक्षात्करणरूपं प्रत्यक्षम्; अनुमानाद्यविशेषप्रसङ्गात। साक्षात्करणतारतम्यादोष इति चेत्; [2]स्यादाकूतम्–प्रत्यक्षमपि किञ्चित्साक्षात्कारि तदन्यत् साक्षात्कारितरं तदन्यत् साक्षात्कारितममिति सातिशायनमेव, तत्र प्रथमाभ्यासाद्वितीयस्य तदभ्यासात्तृतीयस्य तदभ्यासादपि तत उत्कृष्टस्याध्यक्षस्य सम्भवान्नानुष्ठानवैयर्थ्यदोष इति, तन्न; विषयविशेषाभावे प्रत्यक्षविशेषानुपपत्तेः। तथा हि–न साक्षात्करणतारतम्यमध्यक्षस्य [3]स्वलक्षणविषयम्; तस्यैकरूपत्वात। यदि [4]तस्य विशदविशदतरादिज्ञानवेद्यं नानारूपं भवेत, भवेदपि तद्विषयमध्यक्षस्य साक्षात्करणतारतम्यं फलवत। न चैवम, तस्य [5]निरंशत्वेन नानारूपत्वस्यासम्भवात्। सम्भवे वा प्रथमप्रत्यक्षत एव तथावभासनात् तदवस्थमनुष्ठानवैयर्थ्यम्, असमग्रप्रतिभासस्य स्वयमनभ्युपगमात। "तस्मात् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः" [प्र० वा० ३।४४] इति वचनात।

प्रत्यक्षस्य भिदा[6] किं स्यादेकरूपे स्वलक्षणे ?।
[7]नानारूपं न तत्कस्मादाद्येऽध्यक्षेऽवभासते ॥३७॥
यदनुष्ठानवैयर्थ्यं न स्यात् ? नाप्यवभासनम्।
असमग्रस्य भावस्य सौगतैरनुमन्यते ॥३८॥
तन्न स्वलक्षणेऽप्येष विशेषोऽध्यक्षगोचरः।
[8]अन्यत्र चेत्; तथाप्यस्यं कैमर्थक्येन कल्पनम् ? ॥३९॥
तत्त्वस्वलक्षणं यस्माद्विना तेनापि गृह्यते।
[9]विशेषेणोत्तरेणेति नानुष्ठानस्य तत्फलम् ॥४०॥

तन्न [11]प्रमाणं प्रत्यक्षं यदनुष्ठानात्तत्त्वदर्शित्वम्। अनुमानमिति चेत्; न; तस्य [12]प्रतिबन्धग्रहणमन्तरेणासम्भवात्। तद्ग्रहणञ्च न योगिप्रत्यक्षात्; अस्मदादौ तदभावात्। अस्मदादिप्रत्यक्षादेवेति चेत्; तदप्यन्वयविषयम्, व्यतिरेकविषयं वा स्यात् ? अन्वयविषयमपि

---

१ अनुष्ठेयवस्तु। २ इदं बौद्धस्य आकूतमभिप्रायः स्यात्। ३ "तत्र यदर्थक्रियासमर्थं तदेव वस्तु स्वलक्षणमिति।"–प्रमाणसमु० टी० पृ० ६। "यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः तत्स्वलक्षणम्। तदेव परमार्थसत्।"–न्यायवि० १।१३, १४। "स्वमसाधारणं लक्षणं तत्त्वं स्वलक्षणम्।"–न्यायवि० टी० पृ० २२। "अर्थक्रियासमर्थं यत्तदत्र परमार्थसत्। अन्यत् संवृतिसत्प्रोक्तं ते स्वसामान्यलक्षणे॥" –प्र० वा० ३।३। एतन्मते स्वलक्षणं क्षणिकं निरंशं परमाणुरूपं च। ४ स्वलक्षणस्य। ५ "एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्। कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते॥–सर्व एव दृष्टो निरंशत्वाद्धावस्य। एको हि अर्थात्मा निरंशः। स तावत् प्रत्यक्षोऽभ्युपगन्तव्यः।" –प्र० वा० स्व० टी० पृ० १२१। ६ भिदा ब०, प०, आ०। ७ स्वलक्षणं परमार्थत एकरूपम्, यदि नानारूपं स्यात् तथापि कथं तन्नानारूपं प्रथमप्रत्यक्ष एव नावभासते ? यतः साक्षात्करणविशेषार्थं क्रियमाणमनुष्ठानं व्यर्थं न स्यात् ? अपि तु स्यादेवेति भावः। ८ स्वलक्षणभिन्ने। ९ अध्यक्षगोचरविशेषस्य। १० स्वलक्षणभिन्ने कल्पितेन। ११ प्रमाणप्र–आ०,ब०,प०। १२ अविनाभावसम्बन्ध।

सकलव्यक्तिविषयम्, प्रतिनियतव्यक्तिविषय वा स्यात् ? [1]न सकलव्यक्तिगोचरम्, तद्वतः सर्वहात्वापत्तेः । प्रतिनियतव्यक्तिगोचरं चेत्, तर्हि तद्व्यवैव [2]प्रविवन्धस्य तेन ग्रहणं मयेन्न निरपेक्षव्यक्तिगतस्य । [3]न हि या व्यक्तयो न [4]तद्गोचरा तन्निष्ठस्य प्रतिवन्धस्यान्वयस्य वा धर्मस्य तेन प्रतिपत्तिः सम्भवति, [5]आधेयप्रतिपत्तेराधारप्रतिपत्तिनान्तरीयकत्वात् । एकत्र तद्ग्रहणमेवान्यत्रापि तद्ग्रहणमिति चेत्, [6]अन्यत्र 'तद्ग्रहणमेवैकत्रापि तद्ग्रहणं किम स्यात् ? एकत्र तद्ग्रहणं प्रत्यक्षत एवानुभूयत इति चेत्, अन्यत्र तदग्रहणमपि तत एवानुभूयते 'तदन्वयविषयपरोक्षानुसन्धानेन तस्य स्वयमनुभवात् । [7]अतः [8]अन्यत्र साध्यामावेऽपि साधन सम्भाव्येत, [9]तथा च कथमष्टपूर्वधूमादिदर्शनान् निश्चिता पावकादिप्रतिपत्तिर्भवेत् ? तस्मात् अन्वयविषयात्प्रत्यक्षात्प्रतिवन्धप्रतिपत्ति । व्यतिरेकविषयादेवान्योपलम्भकृपादिति [10]चेत्, [11]तस्य च 'साध्याभावप्रयुक्तसाधनाभावनियमाधिकरणभावाभिमतकतिपयविषयोपलगोचरत्वे स एव दोषः [12]सम्प्रिष्टस्यैव तथाविधतदभावे'-नियमस्य तेन ग्रहणात्न निरपेक्षविषयप्रवृत्तेरिति । न हि यो यस्याविषयः' [13]'तत्तस्य कस्यचित्सद्दसत्त्वप्रतिपत्तौ ममर्थं मेरुशिखरे मोदकमदृसत्त्वप्रतिपत्तिवत् । सकलविषयग्रहणे चोक्तम्- 'तद्वतः सर्वहात्वापत्तिः' इति । तथा च [14]दुरभसत्यस्य [15]यत्न अनित्यत्वे कदाचिदुपलभ्यत्वं दुरात्मत्वे हेतुपरवशत्व शून्यत्वे चोत्पत्तिसमावनानिर्मितत्वम् अनात्मत्वे चानात्मकार्यकारित्व साधनमुक्तं [16]तत्सामान्यव्यतिरेकनिश्चयविरहात् विषक्षेपि संभाव्यमानं कथमुक्तसाध्यप्रत्यायनसामर्थ्यमुद्वहेत् यतश्च [17]तुरात्मकस्य दुःखमत्यस्य निर्णयः स्यात् ? एवमन्यत्रापि । तस्न परस्पानुमानं तद्व्याप्तावनुष्ठेय वस्तुसाक्षात्करणम् ।

न्यान्यतम्-न सकलविषयग्रहणात् व्यतिरेकनिर्णयो येनार्थं दोषः स्यात् अपि तु [18]'तावत्व्यतदुत्पत्तिप्रतिवन्धसामर्थ्यात् । तथा हि [19]'दुःखसत्यस्य कदाचिदुपलभ्यत्वमनित्यत्वस्वभावं [20]'तदभावे न भवत्येव । नित्यत्वे हि [21]'नित्योपलभ्यवभावमेव प्रसङ्गात् । तदुक्तम्

---

१ न सकल-प० । २ प्रतिवद्धस्य व०,आ०,प०,स० । ३ स हि ता० । ४ अस्मादारभ्य प्रत्यक्षविषया: । ५ वस्तुतः सम्बन्धोऽयं वा धर्मं । ६ प्रत्यक्षगोचरत्वपौ । ७ प्रत्यक्षगोचरे व्याप्तौ । ८ तद्ग्रहणमेवैकत्रापि तद्ग्रहणं आ०, व०, प०, स० । सम्बन्धग्राहक । १० वस्तुतः प्रत्यक्षं प्रतिनियतविषयम् अत । ११ स्वगोचरव्याप्तौ । १२ स्वगोचरव्याप्तौ अन्वयव्यभिचारे सति । १३ विपरीतव्यभिचारस्य । १४ विपरीतव्यभिचारस्य व्यतिरेकविषयकप्रमाणस्य । १५ अनिरेकनियम । १६ अनिरेकविशिष्टनिश्चयेन साध्याभावप्रयुक्तव्यभिचाराभावनिश्चयेन । १७ -मात्रानि -ता० । १८-घटादेस्तत्र कस्य-ता० । १९ तत् इतम् तस्य स्वविषयीभूतपदार्थविशेषस्य कस्यचित् धर्मस्य । २० दुःखसत्यस्य आ०, व०, प०, स० । २१ "दुःखं संसरिणः स्कन्धा"-अ० को० ११७० । 'यत्' इत्यस्य साधनविशेषणत्वात् । २२ "दुःखत्वञ्च अनित्यतो दुःखतः शून्यत्वेऽनात्मतश्चेति चतुष्प्रकारमाम्नातम्-कायविशुद्धिमार्गः स्फुटं दीपशिखावत् । दुःखं हेतुसाकल्यात् न चात्मा सम्भविष्यति" । ६ तदविवुपलभ्यात् दुःखमुक्तम् अनित्यम्, दौरात्म्यात् शरणादिरहितत्वेनेत्यनेन हेतुसाकल्यं सत्र वर्तते दुःखमिति व्याप्तात् दुःखं तत् । ये च "कार्यमात्मा अकारणं कारणत्वं, आकाशेऽनात्मा अविद्यमानगुणत्वात्, अन्ये शून्यम इत्याख्यातम् ।"-अ० को० प० ११३८,३९ । २३ "तत्र दुःखमत्ये कथं कार्यता । तदया अनित्यतो दुःखमित्युच्यते ।"-धर्मसं०पृ०२३ । २४ 'न च प्रतिबन्धः सम्बन्धेर्न निश्चयः कर्तुमशक्यत्वात् सम्बन्धोदुष्करः ।"-न्यायवि० पृ० ४१ । हेतुबिं० टी० पृ० ५५ । स्वसंवेदनेनैव सम्बन्धसंबन्धः, कार्यकारी च तदुत्पत्तिः सम्बन्धः । २५ दुःखमात्मत्वम् आ०,व०,प०,स० । २६ अनित्यत्वम् ता० । २७ नित्योपलभ्य-आ०,व०,प०,स० ।

"न हि नित्यस्य नित्यमुपलभ्यस्वभावस्य [1]कदाचिदुपलम्भो युक्तः उपलभ्येतरस्वभावयोः परस्परपरिहा[2]रस्थितत्वेन विरोधात्, उपलभ्यत [3]एव सत्त्वेति (स इति) प्रतिपादनात्। न च [4]सर्वदा सर्वमुपलब्धुं शक्यं क्रमोपलभ्यस्यानित्यत्वात्। न च क्रम एकत्वे सम्भवति; क्रमवत एकत्वेनाप्रतिभासनात् प्रत्यक्षस्याप्रवृत्तेः अनुमानस्य [6]तदभावे अभावात् प्रत्यक्षपूर्वकत्वा[7]दनुमानस्य, अनुमानपूर्वकत्वे अन्धपरम्पराप्रसङ्गात्।" [प्र०वार्तिकाल० १।१७८] इति।

एवमन्यत्रापि स्वभावहेतौ वक्तव्यम्। तत्र तत्स्वभावस्यान्यस्वभावत्वं तत्स्वभावस्यैवाभावप्रसङ्गात्। नाप्यनित्यहेतुकस्य दुःखसत्यस्य अहेतुकत्वं नित्यहेतुकत्वं वा सम्भावयितुं शक्यम्; अहेतुकत्वे नित्यत्वस्य नित्यहेतुकत्वे चानिवर्त्तनस्य प्रसङ्गात् कारणवैकल्याभावे कार्यनिवृत्तेरयोगात्। ततो निवर्त्तमानं कार्यं कारणस्य निवृत्तिमेव गमयति नानिवृत्तिम्, [8]तत्र स्वयमप्यनिवृत्तत्वप्रसङ्गात्। न चानिवृत्तिरूपमेव दुःखसत्यम्, [10]तस्य [11]कदाचिदुपलभ्यत्वेनानित्यत्वस्य साधनात्। तदुक्तम्—

"अहेतोर्नित्यतैवाऽस्तु नित्यहेतोः क्षयः कुतः।
[12]हेतुवैकल्यमप्राप्य कथं भावो निवर्त्तते ?॥
यस्य हेतुकृतो भावस्त[13]दभावान्न तद्भवेत्।
[14]तदभावेऽपि भावश्चेदभावोऽस्य कुतो भवेत् ?॥
अनित्यहेतुको भावो हेत्वभावान्निवर्त्तते।
[15]नित्यहेतोरभावोऽस्ति न हेतोर्न निवर्त्तते॥"[प्र०वार्तिकाल० १।१३५] इति।

एवमन्यत्रापि कार्यहेतौ वक्तव्यम्। तत्र तत्कार्यमहेतुकमन्यहेतुकं वा युक्तमिति; अत्रेदमुच्यते— यत् यत्स्वभावं यत्कार्यं वा सर्वत्र सर्वदा तत् तत्स्वभावमेव नान्यस्वभावम्, तत्कार्यमेव नाकार्यं नान्यकार्यं वेति। 'नहि' इत्यादिना 'अहेतोः' इत्यादिना चोच्यमानः कस्य पुनः प्रमाणस्यैतावान् व्यापारः ? प्रत्यक्षस्यैवेति चेत्; न; तस्य सन्निहिते तात्कालिकवस्तुमात्रगोचरतया निरवशेषसपक्षविपक्षाभिमतव्यक्तिनिकरनिरीक्षणशक्ति[16]विकलत्वेन [17]इयतो व्यापारस्याऽसम्भवात्। प्रदेशतस्तादात्म्यतत्कार्यत्वग्रहणमेव देशकालव्यापित्वेनापि तद्ग्रहणमिति चेत्; व्याहतमेतत्—यदि प्रदेशतस्तद्ग्रहणं कथं तद्व्यापित्वेन तद्ग्रहणम् ? तच्चेत्; कथं प्रदेशतस्तद्ग्रहणम् ? 'प्रदेशतश्च, तद्व्यापित्वेन च' इति स्पष्टो व्याघातः। कथमन्यथा स्तम्भस्यापि प्रदेशनियतत्वेन ग्रहणमेव [18]तद्व्यापित्वेन ग्रहणं न स्यात् ? यत इद सूक्तं स्यात्—

---

१ कथञ्चिदु—आ०, व०, प०, स०। २—हारस्थितित्वेन आ०, व०, प०, स०। ३ इव सत्तेति "उपलभ्यतयैव स इति"—प्र० वार्तिकाल०। ४ सर्वथा आ०,व०,प०,स०। ५ नित्यत्वे। ६ प्रत्यक्षाभावे। ७—त्वादनुमानपूर्व—ता०। ८ तुलना—"न ह्यहेतुकत्वे नित्यहेतुकत्वे वा निवर्तनाय व्यापारः सफलः।" —प्र० वार्तिकाल० १।१३५। ९ यदि निवर्तमानं कार्यं कारणस्यानिवृत्तिं गमयेत् तदा कारणस्यानिवृत्तौ स्वयं कार्यस्यापि न निवृत्तिः स्यादिति भावः। १० दु.खसत्यस्य। ११ कदाचिदप्युप—आ०,व०,प०,स०। १२ हेतोर्वैकल्य—आ०,व०,प०। १३ हेत्वभावात्। १४ कारणाभावेऽपि यदि कार्यसत्त्वं स्यात् तदा अस्य—कार्यस्य अभावः कुतः कारणात् स्यात् ? १५ यतः नित्यकारणकस्यार्थस्य अभावो नास्ति अतः स हेतोर्न निवर्तते। १६ सर्वोपसंहारेण। १७ सकलदेशकालव्यापित्वेन।

"यो यत्रैव स तत्रैव यो यदैव तदैव सः ।
न देशकालयोर्व्याप्तिर्भावानामिह विद्यते ॥" [ ] इति ।

तत्र प्रत्यक्षस्यायं व्यापारः, तस्यान्यविषयस्य व्यतिरेकविषयस्य वेषतो व्यापारस्याऽनुपपत्ते । तैत्रात्म्यतो विकल्पस्येति चेत्, कः पुनरसौ विकल्पः ? अनुमानमेवेति चेत्, अनुमानाच्चर्हि व्याप्तिग्रहणम्, तदपि न सम्यक्, [1]तेनैव तद्ग्रहणे [2]परस्परात्रयप्रसङ्गात् । ५ अन्येन तद्ग्रहणे अनुमानपूर्वकत्वमनुमानस्योक्तं स्यात् । भवतु को दोष इति चेत्, किं [3]पुनरिदमिष्टानिष्टमेवोक्तं भवद्भवेत् यस्मिन् 'अनुमानस्यानुमानपूर्वकत्वे अन्धपरम्पराप्रसङ्गात्' इति ? अनुमानपूर्वकमेवानुमानं सर्वत्र व्यवहारात्, न च व्यवहारो विचारमर्हति तस्याविचारितरमणीयत्वात्, सद्विचारे सकलभेदव्यवहारविरहप्रसङ्गादित्यपि न वन्ध्यम्, अनित्यानुमानव्यभिचाराद्यनुमानस्याप्यनीकारप्रसङ्गात् । नित्यादित्वेनाद्रियमाणे दुराग्रहस्यादौ कर्म १० तैवानुमानमिति चेत् ? स्यादेतदेवं यदि दर्शनपूर्वकमनुमानं स्यात्, न चैवम्, तस्यानुमानपूर्वकत्वेनोपगमात्, अन्धपरम्परात्रयप्रसङ्गस्य चाविचारितरमणीयव्यवहारपदवीमुन्मूलयतो निवारयितुमशक्यत्वात् । व्यवहारादपि नित्यानुमानमप्रसिद्धमेव [4]तत्र तस्यानुपयोगादिति चेत्, न, व्यवहारे तस्यैवोपयोगात्, प्रवृत्तिनिवृत्तिव्यवहारस्य नित्यत्वादिनिमित्तत्वेन व्यवहारिणां [5]प्रसिद्धत्वात् । न हि निरंशक्षणिकादिरूपतया वस्तु किञ्चिन्मिथित विपश्चितां १५ व्यवहारकारणम् । कथमन्यथा अभ्यासावस्थाया [6]"प्रत्यक्षविषयतयाऽभ्यारोपित दृश्यमार्थैकत्वमेव व्यवहारकारणं" भवतेष

"ततो [7]"माध्यविषय [8]"विषयान्तरगोचरम् ।
प्रमाणमध्यारोपेण" [9]"व्यवहाराविरोधकृत् ॥" [प्र० वार्तिकाल० १।१]

इति मुधया निरूपितम् ? [10]"तदनुमानाङ्गीकरणे च न दुराग्रहस्यस्यानित्यत्वं तन्निमित्तत्वस्यानुमानेन २० साधनात् । नापि [11]"तस्यानात्माश्रितत्वम्, अनुमानसिद्धनित्यादिरूपपरामर्शतः तदाश्रयत्वोपपत्ते, ।

---

१ प्रत्यक्षादृश्यमानेन । २ प्रत्यक्षानुमानेनैव स्वीकरणाग्रहणे । ३ व्याप्तिग्रहणे सति अनुमानोत्थानम्, सति चानुमाने व्याप्तिग्रहणमिति । ४ द्वितीयानुमानेन प्रथमानुमानव्याप्तिग्रहणे । ५ पुनरिति वार्ता-प० । ६ निष्टारितेन । ७-रमन्यत्र-आ०, ब०, प०, स० । ८ तत्र व्यवहारे तस्य नित्यादिवस्तुनः । ९ तस्माद्वा-प० । १०-दारेऽप्य-प० । -दारेऽपि प्र- आ०, ब०, स० । ११ "अन्यो हि दर्शनं यत्र आत्मा व्यवस्थ प्रतीयते, किन्तु यत्रार्थे बुद्धिर्जन्मतेव तेन तत्रायमेयम् । अनेकाध्यवसायाच्च सन्तानस्यैकत्वं प्रतीयते ।" —न्यायवि० वि० पृ० ७ । १२ दर्शनविषयभूत इत्य. दृश्य, प्रत्ययस्यार्थे प्रतिविम्बभूतः इत्यः प्रत्ययः । बौद्धानां हि सर्वत्र क्षणिकत्वात् अन्यत् दृश्यम् अन्यत् स्मर्यं अतो विसंवादात् अध्यारोपं व्यवहारविरोधत्व इत्यः । तत्रापि[1]यार्थे ते 'यद् दृष्टं तदेव स्मर्यम्' इति विभिन्नप्रत्यवमर्शानामेकप्रमाणोपनीतकर्मकर्तृविषये । तत्रैव इत्यकर्मत्वं व्यवहारस्य निवहति । १३ प्रत्यक्षेण्या । १४ दर्शनेनैवेत्य अतीतस्मरणीयम् । १५ सन्तानस्यैकत्वादीनेन । १६ "तदनुमानाङ्गीकरणे"-प० वार्तिकाल० । १७ निष्पादनमुपपत्तेः । १८ तस्यात्मनि-आ०, ब०, प०, स० । ९ तु नास्त्यत्र ।

कारणमेव किञ्चित्कस्यचिदाश्रयत्वेनाधिष्ठायकम् [1]अनुपकारिणस्तदयोगात्। न च नित्यस्यात्मनोऽन्यस्य वा [2]कारणत्वम्? तत्कथं तेन दुःखसत्यस्याधिष्ठानम्? तदुक्तम्–"नाकारणमधिष्ठाता नित्यं वा कारणं कथम्?" [प्र० वा० १।१७९] इति चेत्; उच्यते–

नन्विदं कारणत्वं च [3]संवृत्यैव न तत्त्वतः
यदुक्तं कीर्त्तिनैवेदं "संवृत्यास्तु यथा तथा" [प्र० वा० २।४] ॥ ४१ ॥
लोकाभिप्राय एवायं संवृत्यर्थोऽपि[4] नापरः।
स[5] च नित्यस्य हेतुत्वमविवादं प्रकल्पयेत् ॥ ४२ ॥
तत्रैव[6] तँस्य सद्भावात् क्षणिकादौ विपर्ययात्।
इति प्रपन्नवतः पश्चाद्यथास्थानं वदिष्यते ॥ ४३ ॥
हेतुत्वादेव दुःखस्य [7]तेनात्मा स्यादुपाश्रयः।
तत्कथं दुःखसत्यस्य चतुराकारतोच्यते? ॥ ४४ ॥

ततो निराकृतमेतत्–"[8]चतुराकारं [9]दुःखसत्यमनित्यतो दुःखतः [10]शून्यतोऽनात्मतश्च" [प्र० वार्तिकाल० १।१७८] इति। तन्नायं [11]व्याप्तिविकल्पोऽनुमानात्। मा भूत्तथापि योग्यतयैव साध्यसाधनाविनाभावसर्वस्वगोचरः कश्चिदपर एवायं विकल्प इति चेत्; अस्ति तर्हि निरवशेषवस्तुविषयं [12]छद्मस्थस्यापि किञ्चित्प्रमाणमिति [13]तदभ्यास एव सकलार्थदर्शनार्थिना कर्तव्यो न नियतविषयानुमानाभ्यासः; [14]तदभ्यासे सकलार्थदर्शनासम्भवात्[15]। नहि नियतविषयप्रमाणाभ्यासाद् अशेषविष[16]दर्शनमुपपन्नम् अतिप्रसङ्गात्। तस्मादशेषदर्शनस्याशेषविषयमेव प्रमाणं कारणं नापरमिति प्रतिपादनार्थम् [17]अशेषग्रहणम्।

यत्पुनरेतत्–भवतु भगवद्दर्शनमशेषविषयम्, तथापि किं [18]तस्य परीक्षया पुरुषार्थानुपयोगात्? यत्पुनस्तद्दर्शनं [19]चतुरार्यसत्यगोचरं तदेव परीक्षितव्यं पुरुषार्थोपयोगित्वात् नापरविषयं विपर्ययादिति; तत्रेदमुच्यते– तत्सत्यव्यतिरिक्तं [20]यदि किञ्चिन्नास्ति तर्हि[21] तावदेव

---

१ अर्थक्रियारहितस्य। २ नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरहात्। ३ कल्पनयैव। ४ "इयमेव खलु संवृतिरुच्यते येयं विचार्यमाणा विशीर्यते।" "प्रमाणमन्तरेण प्रतीत्यभिमानमात्रं संवृतिः" अनिरूपिततत्त्वा हि प्रतीतिः संवृतिर्मता।" –प्र०वार्तिकाल० २ ८। "संव्रियत आव्रियते यथाभूतपरिज्ञानं स्वभावावरणादावृतप्रकाशनाच्चानयेति संवृतिः। अविद्या मोहो विपर्यास इति पर्यायाः। अविद्या ह्यसत्यदार्थस्वरूपारोपिका स्वभावदर्शनावरणात्मिका च सती संवृतिरुपपद्यते। अविद्योपदर्शितं च प्रतीत्यसमुत्पन्नं वस्तुरूपं संवृतिरुच्यते। तदेव लोकसंवृतिसत्यमित्यभिधीयते।" –बोधिच० प० पृ० ३५२। ५ लोकाभिप्रायात्मकः संवृत्यर्थः। ६ नित्य एव। ७ तस्यासद्भावा–आ०, ब०, प०, स०। हेतुत्वस्य। ८ येनात्मा प० । यतात्मा स० । नात्मा ब०, स०। तेन नित्यस्य हेतुत्वसमर्थनेन। ९ धर्मसंग्रहप्रमाणवार्तिकादौ निर्दिष्टम्। पश्यतु पृ०११टि०३३। १० दुःखस्य सत्य–आ०,ब०,प०,स०। ११ शून्यवतो–आ०, ब०,प०,स० । १२ व्याप्तिविकल्पोऽनात्मा मा–ता० । १३ अल्पज्ञस्य। १४ तदैव प० । सकलसाध्यसाधनगोचरव्याप्तिविकल्पाभ्यास। १५ नियतविषयानुमानाभ्यासे। १६–र्शनाभावात् आ०,ब०,प०,स०। १७ प्रसिद्धाशेषतत्त्वार्थत्यत्र। १८ तदशेषविषयत्वस्य। १९ "सत्यान्युक्तानि चत्वारि दुःखं समुदयस्तथा। निरोधो मार्ग एतेषां यथाभिसमयं क्रमः॥"–अभिधर्मको० ६।२। धर्मसं० पृ० ५। २० यत्कि–आ०, ब०, प०, स०। २१ सत्यचतुष्टयपरिमितम्।

जगदिति कथम् तद्दर्शनस्याशेषविषयत्वम् ? कथं वा न पुरुषार्थोपयोगित्वं यतस्तत्परीक्षणमुपेक्ष्यते ? न हि सर्वविषयस्यैवाऽसर्वविषयत्वं पुरुषार्थहेतोर्वा तद्वेतुत्वमुपपन्नम्, विरोधात्। ततः[1] सत्यचतुष्टयवेदित्वेन कस्यचित्प्रामाण्यमभ्युपगच्छद्भिः अशेषवेदित्वेनैव अभ्युपगन्तव्यमिति व्याहतमेतत्—

"हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः[2]। यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥" [प्र० वा० १।३४] इति।

भवतु तर्हि चतुःसत्यव्यतिरिक्तं किमपि वैदिपर्यं सुगतदर्शनमपुरुषार्थोपयोगीति चेत्, कस्य न तत् पुरुषार्थोपयोगि—सुगतस्य, विनेयाना वा ? [न] तावत्सुगतस्य, तस्य निरवशेषचतुःसत्यव्यतिरिक्तयाशिद्वयदर्शने तत्त्वसत्त्वक्षणिकत्वादिसकलसाध्यसाधनधर्मव्याप्तिप्रतिपत्तौ मुनिभिस्तस्य स्वार्थानुमानलक्षणस्य पुरुषार्थस्य सम्भवात् अन्यथा तदयोगात्। न हि व्याप्तिग्रहणनिरपेक्षस्य प्रैदेशिकस्य[3] दृष्टसापेक्षस्यै वाऽनुमानस्य सम्भवः, अतिप्रसङ्गात्। अत एवोक्तमुद्योतकरेण—

"सहभावस्तु यो व्याप्तौ न तस्मादनुमोदयः। कादाचित्कतया [4]तस्य [5]सर्वत्रास्त्वनुमाऽथवा ॥" [प्र० वा० १।४] इति

स्यान्मतम्, न सुगतस्यानुमानात्मा पुरुषार्थो यतस्तदुपयोगित्वेनाशेषदर्शनस्य विचारार्हत्वम्, अपि तु [12]प्रत्यक्षादेव (क्षात्सैव) [13]तस्य च न व्याप्तिग्रहणसापेक्षत्वं यतस्तत्राक्षेपदर्शनस्योपयोग इति, तदसारम्, अनुमानस्येव सर्वाकारगोचरस्य सौगतप्रत्यक्षस्यैव [14]परैरभ्युपगमात्। यस्मादुक्तम्—

"सर्वाकारानुमानं[15] यदध्यक्षात्तत्र सिध्यते। नेन्द्रियेणापि संयोगस्तेन[16] तोऽधिकविशेषकृत् ॥" [प्र० वा० १।१३८] इति

यतानुमानमेव प्रत्यक्षं तर्हि 'प्रत्यक्षात् व्याप्तिग्रहणम्' इति[17] 'अनुमानात्तद्ग्रहणम्' इत्युक्तं भवति, न चैतन्न्याय्यम्, तत एवानुमानात्तद्ग्रहणे[18] परस्पराश्रयप्रसङ्गात्, अन्यतस्तद्ग्रहणे तत्राप्यन्यतस्तद्ग्रहणमित्यनवस्थापत्तेः प्रस्तुतार्थप्रतिपत्त्यभावप्रसङ्गात्। उक्तञ्च प्रज्ञाकरेण—

१—विषयस्तावर्स—आ०, ब०, प०, म०। २ तत्सत्व—आ०, ब०, प०, स०। ३—रुक्तीति आ०, ब०, प०, स०। ४ सत्यचतुष्टयव्यतिरिक्त्य अगतोऽभावात् सत्यचतुष्टयवेदित्वेनैव अशेषार्थवेदित्वम्। ५ पठन्तु—पृ० ९ टि०१२। ६ सहियपक्षद—आ०,ब०,प०। ७ अनुमानायोगात्। ८ व्याप्तिविरोधे व्याप्तिग्रहकारोक्षस्य। ९—स्वैवानु—प०। १० प्रमाणवार्तिकालङ्कारकृता प्रज्ञाकरगुप्तेन "सहभावस्तदौन्मुख्या न "—प्र० वार्तिकाल० ३।१। ११ सहभावस्य। १२ यदि कादाचित्कसहभावेनानुमानं स्यात् तदा वह्निमपि धूमानुमानं स्यात् कादाचित्कसहभावस्याविशेषात्। १३ प्रत्यक्षा 'त—आ०,ब०,प०। १४ प्रत्यक्षात्मनः पुरुषार्थस्य। १५ "यस्तत् सर्वाकारपदार्थसाक्षात्करणं तदेवाध्यक्षम्। साक्षात्करणाभो हि प्रत्यक्षार्थ "—प्र० वार्तिकाल० ३।१३८। १६ सर्वाकारानुमानात्मकत्वव्यापेक्षया। १७ इति कथनेन। १८ स्वीयव्याप्तिग्रहणे।

"अनुमानान्तराक्षेपादनवस्थावतारतः।
अकृताऽप्रतिपत्तिः स्यात्तस्य तस्येत्यपेक्षणात्॥" [प्र० वार्तिकाल० १।४]

इति चेत्; अस्तु सौगतस्यैवायं दोषो यस्माद्व्यवहारमात्रादेव प्रसिद्धमनुमानम्, तद्भावे प्रवृत्त्यादिव्यवहारविरहप्रसङ्गात्। प्रत्यक्षस्याप्यनुमानपूर्वकस्यैव व्यवहारकारित्वात्, अनुमानमेव खल्वत्यन्ताभ्यासपाटवपरिकलितशरीरमननुस्मृतसाध्यसाधनसम्बन्धतयोपजायमानम् अकस्माद्धूमदर्शनाद्वह्निसंवेदनवत् अध्यक्षव्यपदेशमनुभवत् प्रवृत्त्यादिव्यवहारमारचयति नापरम्। तत्र यदि अन्धपरम्पराप्रसङ्गापादनादनुमानमवसाद्येत व्यवहार एवापसारितः स्यात्। तत्र यद्येतावता परितोषस्तदा न किञ्चित्कर्तव्यमिति मुक्तिरेव संसारात् तस्यात्यन्तमसम्भवात्। अथ व्यवहारप्रसिद्धः संसारः; तर्हि सिद्धमेवानुमानं व्यवहारस्य तन्नान्तरीयकत्वात्। अतस्तद्गृहीतव्याप्तिसामर्थ्यात् सर्वाकारगोचरमनुमानं सुगतस्योपजायमानमनवद्यमेवेति चेत्, आस्तां तावदेतत्, तत्त्वपदतात्पर्य्यचिन्तायां विचारणात्। तन्नानुमानात्तस्य सर्वाकारानुमानं दर्शनादेव तदुपपत्तेः। यदि तद्दर्शनमननुमानं कथमनुमानात्मकं तत्प्रत्यक्षमुक्तमिति चेत्? न; एवमपि परस्यैव दोषात्। तन्न सुगतस्य निरवशेषदर्शनमपुरुषार्थकरम्, तदभावे तत्पुरुषार्थस्य स्वार्थानुमानस्याभावप्रसङ्गात्।

एतेन 'विनेयानामपि तत् पुरुषार्थकरं न' इति चिन्तितम्। तदभावे स्वार्थानुमानवत् तन्निबन्धनस्य परार्थानुमानस्यापि विनेयपुरुषार्थतयाऽभिमतस्याभावप्रसङ्गात्। साध्यप्रतिबद्धलिङ्गोपदर्शनपरं हि वचनं परार्थानुमानम्, तेनैव सुगतोपदिष्टेन विनेयानां तत्त्वप्रतिपत्तेः, न वचनमात्रेण तस्य वस्तुनि प्रामाण्यानभ्युपगमात्, प्रमाणसङ्ख्याव्याघातप्रसङ्गात्। न चासति स्वार्थानुमाने तदुपदर्शनपरं वचनम्। न च निरवशेषदर्शनमन्तरेण स्वार्थानुमानमिति स्वपरार्थसिद्धिमूलनिबन्धनत्वादखिलवस्तुसाक्षात्करणस्य कथन्नाम विचारभूमिभागविधेयत्वन्न भवेत्?

अपि च, परमपीदं पर्यनुयुज्यते– यत्तच्चतुःसत्यव्यतिरिक्तं तत् चेतनम् अचेतनम्, वा गत्यन्तराभावात्? चेतनमेव कीटसङ्ख्यादिलक्षणमिति चेत्; अत्रापि सङ्ख्यावतः, सङ्ख्याया वा

---

१ प्रकृताप्रकृता वा स्या–प०। प्रकृता च प्रकृता स्या–स०। २ –परिकरितग –ता०। ३ 'अत्यन्ताभ्यासतस्तस्य झटित्येव तदर्थवित्। अकस्माद्भ्रमतो वह्निप्रतीतिरिव देहिनाम्॥"–प्र० वार्तिकाल० १।१३८। ४ व्यवहारापसारणेन। तुलना–"तत्र यद्येतावता परितोषस्तदा न किञ्चित्कर्तव्यमिति मुक्तिरेव ·····" –प्र० वार्तिकाल० १।५। ५ व्यवहाररूपस्य संसारस्य। ६ अनुमानाविनाभावित्वात्। ७ चतुःसत्य तद्व्यतिरिक्तराशिद्वयदर्शनगृहीत। ८ प्रसिद्धाशेषतत्त्वार्थेति श्लोकोक्तस्वपदविचारावसरे। ९–मानं तद्दर्श–आ०, ब०, प०, स०। १० राशिद्वयदर्शनादेव। ११ सुगतप्रत्यक्षम्। १२–नमनुमा–आ०, ब०, प०, स०। १३ सुगतस्वार्थानुमाननिबन्धनस्य। १४ "त्रिरूपलिङ्गाख्यानं परार्थानुमानम्"–न्यायवि०पृ० ६१। "तत्र परार्थानुमानं स्वदृष्टार्थप्रकाशनमित्याचार्यीयलक्षणम्"–प्र० वा०, म० ४।१। १५ साध्यप्रतिबद्धलिङ्गोपदर्शकवचनेनैव। १६ वचनस्य। १७ "वचसां प्रतिबन्धो वा को वाह्येष्वपि वस्तुषु। प्रतिपादयता तानि येनैषां स्यात्प्रमाणता॥"–तत्त्वस० श्लो० १५१३। १८ यतो हि बौद्धैः प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमेवानुमन्यते। १९ सौगतम्।

दर्शनमपुरुषार्थकरम् ? न तावत्सङ्ख्यावतः, तद्धि [1]निरवशेषदेशकालाधिष्ठान क्षीटनिकुरुम्बक्रमेण, न च तदर्शनाभावे [2]तदधिकरणचतुःसत्यसंवेदन सम्भवति । न हि चतुःसत्यं नाम किञ्चित्स्वतन्त्रमस्ति, दुःखसैमुद्यादेश्चेतनसन्तानाधिकरणस्यैव तस्यात् । चेतनसन्तानस्य च नारकतिर्यङ्नरसुरभेदभिन्नस्य प्रत्येकमनेकधा भेदमनुभवतः प्रतिव्यक्तिदर्शनविरहे तदधिकरणनिरवशेषचतुःसत्यसाक्षात्करणासम्भवात् कथम सर्वदर्शनस्य पुरुषार्थोपयोगित्वम् ? ५ सामान्यरूपतयैव सकलचतुःसत्यवेदनाक्षं प्रतिव्यक्तिनिरवशेषचेतनसन्तानदर्शनमर्थवदिति चेत्, न, सर्वाकारचतुःसत्यवेदनविरोधात् । न हि सामान्येन गृहीतं सर्वाकारेण गृहीतं नाम । सर्वाकारग्रहणं चामिमत भवताम् "सर्वाकारानुमानं यत्" [प्र० वार्तिकाल० १।१३८] इत्यादि वचनात् । भवतु सुगतस्य प्रतिव्यक्तिगतदर्शनेनैव सकलचेतनसन्तानसाक्षात्करणम्, अस्माकं तु तदर्थवत्त्वम भवति, अस्मदर्थे चतुःसत्योपदेशे तन्मात्रगोचरस्यैव सुगतज्ञानस्योपयोगात्, अत एवास्मदादेशेन नसा साक्षात्रिर्दिशति— १०

"क्षीटसंख्यापरिज्ञानं तस्य न' कोपयुज्यते" [प्र० वा० १।३३] इति । ततस्तन्मात्रगोचरमेव ज्ञानं सुगतस्य परीक्षितव्यम्-'किं तस्य [3]तदस्ति वा न' वा' इति, तदभावे "तथतुःसत्योपदेशासम्भवात्, न सर्वचेतनसन्तानविषयं तदभावेऽपि "तस्सम्भवादिति चेत्, न, दृतोस्तत्रत्वात्, सकलचेतनसन्तानादर्शने तन्निष्टत्वेन चतुःसत्योपदेशासम्भवात् । १५ न हि कूपमपश्यतः 'कूपे जलम्' इत्युपदेशः सम्भवति । "तन्निष्टत्वेन तदुपदेशो नार्थवानिति चेत्, कथ तर्हि तदुपदेशोऽर्थवान् ? अतन्निष्टत्वेनेति चेत्, न, "तन्निष्टतया ज्ञातस्यातन्निष्टत्वेनोपदेशे बन्धकत्वेनोपदेष्टुरप्रमाणत्वापत्तेः ।

एतेन कतिपयतदुभयव्यक्तिनिष्टत्वेनेति प्रत्युक्तम्, न्याय स्य समानत्वात् । २०

स्यान्मतम्—यिनेयानुरोधादेव भगवतो देशना, विनेयाश्च मु(स्व)गतमेव चतुःसत्यमुपदेशादृष्टमिच्छन्ति तस्यैवानुप्रेक्षत्वात् न सर्वगत विषर्यात्, ततः सर्वचेतनाधिकरणत्वेनाधिगतमपि विनेयाभिप्रायवशात् प्रतिनियतदृष्टव्यक्तिज्ञातत्वेनैव चतुःसत्यमुपदिशति नान्यथेति प्रतिनियतचेतनव्यक्तिज्ञानमेव तस्यै[4] परीक्षायोग्यं न सर्वचेतनव्यक्तिज्ञानमिति, तत्र, विनेयनियमाभावात् । तत्त्वमुमुत्सावन्तो हि विनेयाः, ते च न मनुष्या एव, सरीसृपादीनामपि तत्त्वमुमुत्सावत्त्वे "तदयिरोधात् । तेषां तत्त्वमुमुत्सावत्त्वमेव नास्तीति चेत्, मानवाना कुतस्तद्वत्त्वम् ? ससार- २५ दुःखपरिपीडनोद्वोधित्वात् कुतश्चिद्वासनाविशेषादिति चेत्, न, सरीसृपादीनामपि तदविरोधात् ।

---

१ चतुःसत्यप्रतिनिर्दिष्टं संज्ञाद्वयमेवेतत् एतत् । २ ज्ञानप्रत्यक्षिकर्मणि क्षीटसमूह एव । ३ क्षीटसमूहाधिकरणक । ४—समुदायादे—ज्ञा०, ब,प०,स० । समुदेति आसादिति समुदयः दुःखमेव समुदयो दुःखसमुदयः तृष्णेति भावः । ५—द्रव्यविरहिते त ता० । ६ संज्ञाद्वयक्षीटादिदर्शनस्य । ७—दादेरुपदेशेन न साक्षात्रि—ज्ञा०, ब०, प०, स० । अस्मत्तश्चतुरस्यादे आदेशीमूर्तेन 'नः' कोपयुज्यते' इत्युक्त 'नः' इति पदेन । ८ "तस्मात्तदुद्देशगतं ज्ञानमस्य विचार्यताम्" इति पूर्वार्धः । ९ अस्मदीयवतुःसत्यमात्रगोचरमेव । १० अस्मदीयवतुःसत्योपदेशस्य । ११ अस्मदीयवतुःसत्योपदेश । १२ अस्मदादेरवतुःसत्योपदेश । १३ सकलचेतनसन्तानविशेषत्वया चतुःसत्योपदेश । १४ सकलचेतनसन्तानविशेषतया । १५ मुक्तस्य । १६ विनेयतारविरोधात् ।

सुगतानुग्रहादिति चेत्; न; तस्यापि सर्वचेतनसाधारणत्वात्, अन्यथा सुगतस्य जगद्धितैषित्वानुपपत्तेः। न हि खण्डशो जगदनुगृह्णतः समग्रं तद्धितैषित्वमुपपन्नम्। सरीसृपादीनां तत्त्वबुभुत्सावत्त्वेपि न विनेयत्वं तत्त्वज्ञानामृतोपदेशभाजनत्वाभावात्, व्यक्तया वाचा तेषामबबोधयितुमशक्यत्वादिति चेत्; मा भूत् व्यक्तया तदवबोधनम्, अव्यक्तया तु तद्वेद्यया स्यात्। न तादृशी सुगतस्य वागस्तीति चेत्; अन्यादृशी कुतः? तदभ्यासादिति चेत्; सापि तत एवास्तु। तदभ्यासोऽपि तस्य नास्तीति चेत्; इतरवागभ्यासः कुतः? तद्वागुपदेशादिति चेत्; अव्यक्तवागुपदेशोऽपि नास्तीति कुतोऽवसितम्? अनुपलम्भादिति चेत्; न; सर्वविद्व्यापारस्यानुपलब्धस्यापि सम्भवात्, कथमन्यथा वैगवैगुण्यलक्षणस्य शैपस्य भावान्निःशेपं दुःखहेतुप्रहाणं सुगतस्य स्यात्, यतो निःशेपार्थमुपसर्गस्योक्तं सूक्तं स्यात्?

ततः कथञ्चित्सर्वेषां विनेयत्वोपपत्तितः।
प्राणिनां तत्परिज्ञानं तत्र किन्न परीक्ष्यताम्? ॥ ४८ ॥
अजानन्न हि ताँस्तेषामुपदेष्टा तथागतः।
तथा चेत्; बुद्धिवैगुण्यं कथमस्य निवर्त्तताम्? ॥ ४९ ॥
अस्तु कीटावबोधोऽपि तेन चेन्नास्ति वः फलम्।
युष्मद्बोधेन कीटानामपि नेति समं न किम्? ॥ ५० ॥
ततो यथेदं कीटान्प्रत्युच्यते धर्मकीर्त्तिना।
'कीटसङ्ख्यापरिज्ञानं तस्य नः कोपयुज्यते' ॥ ५१ ॥
तथैव कीटकैरेतद्वक्तव्यमितरान् प्रति।
भिक्षुसङ्ख्यापरिज्ञानं तस्य नः कोपयुज्यते ॥ ५२ ॥ इति।

तत्र सङ्ख्यादिवतः कीटादिचेतनवर्गस्य ज्ञानमपुरुषार्थकरम्, तदभावे सकलचेतनवर्गाश्रितनिरवशेषानुष्ठेयतत्त्वोपदेशानुपपत्तेः। नापि तत्सङ्ख्यायाः; तस्यास्तद्व्यतिरेकेणाभावे तज्ज्ञानस्यैवासम्भवात्। सम्भवतो हि ज्ञानस्यानुपयोगित्वेनोपेक्षणीयत्वं वक्तव्यं नाऽसम्भवतः तत्परीक्षायाः परैरप्यनभ्युपगमात्। न चाविप्रतिपत्तिविषय एव विवादः तदनुपरमप्रसङ्गात्।

अथ यस्य सङ्ख्या विद्यते स्याद्वादिनः तस्यापि तद्विषयं तदाप्तज्ञानमपुरुषार्थकरमित्येतदेवमप्यसुन्दरम्; इदमपि न सुन्दरम्; कीटसङ्ख्यागोचरस्याप्तज्ञानस्य प्रायश्चित्तविभागाद्युपदेशहेतुत्वेन

---

१ "प्रमाणभूताय जगद्धितैषिणे नमोस्तु तस्मै सुगताय तायिने॥"—प्र० समु० १।१। २ सरीसृपादिवेद्या अव्यक्ता वाक्। ३ अव्यक्तवागभ्यासोऽपि। ४ अनुपलब्धस्यापि अव्यक्तवागुपदेशस्यानङ्गीकारे। ५ अव्यक्तवागुपदेशासामर्थ्ये। ६ "हेतोः प्रहाणं त्रिगुणं सुगतत्वम्—हेतोः समुदयस्य प्रहाणं निरोधः सुगतत्वम्। तच्च त्रिगुणं गुणत्रययुक्तम्। सुशब्दस्य त्रिविधोऽर्थः—प्रशस्तता सुरूपवत्, अपुनरावृत्तिः सुनष्टज्वरवत्, निःशेषता च सुपूर्णघटवत्।" —प्र० वा० म० १।१।१९। ७ सुगतघटकसुशब्दस्य। ८ सकलचेतनसन्तानगतचतुःसत्यपरिज्ञानम्। ९ सुगते। १० अजानं न हि ता ते—आ०,ब०,प०। अज्ञानं न हितान् ते—स०। ११ सर्वप्राणिनः। १२ सर्वप्राणिनोऽज्ञानरूपि यदि उपदेष्टा स्यात्। १३ युष्माकं भिक्षूणाम्। १४ प्रमाणवार्तिके(१।३३)। १५ भिक्षून् प्रति। १६ संख्यावदर्थभिन्नतया। १७ असम्भवदर्थपरीक्षायाः। १८ विभिन्नकीटहिंसाजन्यतीव्रमन्दादिपापपरिहारकविविधप्रायश्चित्त।

पुरुषार्थोपनिबन्धनत्वात्, उपनतकीटवर्गपरिसङ्ख्यापरिज्ञानस्यैव हि द्विप्र्यादितद्व्यापादनोपनीतविनेयशोपपरिहारोपायभूतस्य प्रायश्चित्तविधानशास्योपदेष्टुत्व भगवतो न सर्वज्ञपरीतस्य । तत्र चक्षुःसत्यव्यतिरिक्तस्य चेतनत्वम् । अचेतनत्व तर्हि भवतु , तदपि मूर्तम्, अमूर्त वा ? मूर्त चेत्, पृथिव्यादिकमेव । तच्च संस्वेदजादिचेतनवर्गाधिकरणमेवेति मैवंतावाभूत्पम्—

"न स कश्चित्पृथिव्यादिरंशो यत्र न जन्तवः । ५
संस्वेदजाद्या जायन्ते सर्वं भौजात्यकं ततः ॥" [प्र०वा० १।३९] इति[1]

चार्वाकं प्रति धर्मकीर्तेर्वचनात् । तादृशस्यैं च तस्य परिज्ञानं कथम् पुरुषार्थकारणम् ? तदपरिज्ञाने तदधिकरणचेतनवर्गस्य [2]तेनानवबोधे च तद्घोषरुचुरुपनिरवशेषसत्स्थानवगमेनोपदेशानुपपत्तेः । तत्र मूर्तम् । तदमूर्तमेव गगनादिकमिति चेत् , न, तस्य स्वयमनभ्युपगमेनासत्त्वात् । परोभ्युपगमात्तत्त्वे पुरुषार्थहेतुत्वमपि तस्य तदभ्युपगमादेवास्तु । तत्र जगति १०
किञ्चित्पुरुषार्थसाधन यत्परिज्ञानं सर्वज्ञस्यापरीक्ष्यं भवेत् । ततो [3]निराकृतमेतत्–"पुरुषार्थज्ञतामात्रात् सम्पूर्णं शासनं मतम्" [प्र० वार्तिकाल० १।१३८] इति , मात्रशब्दस्य व्यवच्छेदाभावेन [4]वैयर्थ्यात्, [5]तेदभावश्च सर्वज्ञानस्यापि पुरुषार्थज्ञानत्वात्, [6]तेदपि साक्षात्परम्पर्येण वा सर्वस्यैं यत्परिज्ञानं पुरुषार्थहेतुत्वात् । अत एवोक्तमलङ्कारकृता–"न च कार्यकारणभावमतिवृत्त्य परस्परं सकलं जगज्जायते" [प्र० वार्तिकाल० १।१३८] इति । [7]तेदयम् एवं- १५
वचनात् सर्वज्ञस्य पुरुषार्थज्ञानत्वमुररीकुर्वतेव अपुरुषार्थज्ञानमपि किञ्चिदभ्येषसि कृत्वा तच्चायच्छेदार्थं मात्रशब्दमप्युपादत्त इति प्रज्ञाकरव्यपदेशमात्रमिति अन्ये सुखेचनव्यवहारसङ्दर्शनावेदयति ।

यत्पुनरेतत्–

"सर्वं जानातु सर्वस्य वेदको न निषिध्यते । २०
नास्माभिः शक्यते ज्ञातुमिति सन्तोष इष्यते ॥" [प्र० वार्तिकाल० १।१३३] इति ,

तत्र चक्षुःसत्यवेदनं सर्वविदः कुतोऽवसितम् ? प्रमाणसंबादिनस्तत्सत्योपदेशादिति [8]चेत् ; तर्हि [9]एव सर्ववेदनमप्यवमानत्वं तस्य [10]तैमान्तरीयकत्वादित्युच्यत्वात् । ततः सूक्तम्–'सर्ववेदनस्य सप्रयोजनत्वात्' सुशानत्वाच्च तदर्थमग्नेषपियपमेव प्रमाणमभ्यसितव्यं न नित्यविषयमनुमानमिति ।

१–परिज्ञानं यस्य तत्तेषं । २ –तत्रेषन– आ०, ब०, प०, स० । ३ भगवता– आ०, ब०, प०, स० । ४ –वैर्यात्ती आ०, ब०, प०, स० । ५ जीवात्म–आ०, ब०, म० । ६ "न स कश्चिन् पृथिव्यादैरंशः प्रदेशो यत्र जन्तवः संस्वेदजाद्या नाद्यसदृशजन्मपृतयो न जायन्ते ततः सर्वमूतपरिणतिजातं मातृपितृजनने बीजात्मकमिति ज्ञात्वा बौजविदस्त्वभावना कस्यचित् ।" –प्र० वा० म० ११३९ । ७ चेतनवर्गाधिकरणम् पृथिव्यादैः । ८ सुगतेन । ९ पृथिव्यादिकरूपकचेतनसमूहनिष्ठ । १० दृश्यम्–तात्पर्य० टको० १२७– । ११ निराकृतमे–आ०, ब०, प०, स० । १२ वैयर्थ्यं तर्क–आ०, ब०, म० । १३ व्यवच्छेदाभावम् । १४ सर्वज्ञानस्य पुरुषार्थज्ञानत्वमिति । १५ सर्वस्य प्रमिताः प्रतिपिपदि परिज्ञानं भवति तत्सर्वमिति साक्षात् परम्परया वा पुरुषार्थहेतुत्वमेवेत्यर्थः । १६ प्रज्ञाकरः । १७ चेत् न तत आ०, ब०, प०, स० । १८ अविगानादिपद्धत्याद्यौपपत्तिकैश्चादैव । १९ सर्ववेदनादीनामाविगानात् । २० –त्वाकत– आ०, ब०, प०, स० ।

सामान्यप्रतिभासित्वं यदि योग्यतया[1] भवेत् ।
अनुमानस्य [2]सम्बन्धनियमस्ते विहन्यते ॥ ६४ ॥
[3]तदभ्यासेन तत्रापि तत्सामान्यस्य दर्शने ।
निर्विकल्पकमध्यक्षं न सिद्धिपथमृच्छति ॥ ६५ ॥
अथ तत्प्रतिभासित्वं नानुमानस्य ते मतम् ।
विलक्षणस्य यत्तत्रं[4] स्वरूपस्यावभासनम् ॥ ६६ ॥
अध्यक्षमेव तत्प्राप्तम् नानुमानं तथा सति ।
कस्याभ्यासादिदानीं स्यात्तत्त्वदर्शी तथागतः ॥ ६७ ॥
अध्यक्षाभ्यासचिन्ता तु प्रागेव विनिवारिता ।
तन्न सामान्यभासित्वमन्तरेणानुमास्ति वः ॥ ६८ ॥

स्यान्मतम्[5]—न सामान्यं नाम अनुमानादिविकल्पादन्यदस्ति प्रमाणाभावात्, तत्प्रतिबिम्बमेव[6] केवलमव्यतिरिक्तमबाह्यमनन्वितमपि व्यतिरिक्तमिव बाह्यमिवान्वितमिव चानादिवासनासामर्थ्यादध्यवसीयते, ततोऽभ्यासपाटवे सति सकलविप्लवव्यपगमादव्यतिरिक्तादिरूपस्यैव तस्य[7] दर्शनात् कुतस्तद्दर्शनस्य सविकल्पकत्वमिति ? तन्न सारम् ; व्यतिरिक्तादिरूपतया गृहीतस्याभ्यासादपि तथैव दर्शनोपपत्तेः। न हि तद्रूपतयाऽभ्यस्तमन्यथा द्रष्टुं शक्यमतिप्रसङ्गात्। अभ्यासोऽपि तस्यान्यथैवेति[10] चेत् ; न; तथा गृहीतस्यैव तत्सम्भवात्, अन्यथा[11] विद्यमानतया गृहीतस्य कामिन्यादेरन्यथाभ्यासात्[12] तद्दर्शनमप्यन्यथैव[13] स्यादिति निरस्तमेतत्—"पश्यति (न्ति) पुरतोऽवस्थितानिव[14]" [प्र०वा०] इति ; पुरतोऽवस्थितत्वस्य[15] अविद्यमानतया दर्शनस्य च विरोधात्। अथ कदाचिद्विद्यमानतयापि कामिन्यादेरभ्याससम्भवात् तद्दर्शनं पुरोऽवस्थितत्वेन पठ्यते; तर्हि सामान्यस्यापि व्यतिरिक्तादिरूपतया कदाचिदभ्याससम्भवात् सविकल्पकमपि [16]तद्दर्शनं पठ्यतामविशेषात्। न पूर्वमपि सामान्यस्य [17]व्यतिरिक्तादिरूपमनुमानावगतमस्ति यतस्तदभ्यासाद्दर्शनमपि [18]तस्य [19]तथैव स्यादिति चेत् ; कुतस्तर्हि [20]तस्य तद्रूपमवगतम् ? वासनाबलावलम्बिनो विकल्पान्तरादिति चेत् ; न; तेनापि स्वतस्तस्य [21]तथाऽवगमे अनुमानेनापि स्यादविशेषात्। तत्रापि[22] विकल्पान्तरादेव[23] तदाकारस्य व्यतिरिक्तादिरूपावगमो न स्वत इति चेत् ; न; तत्रापि[24]

---

१ तदाकारेण विनापि । २ तदुत्पत्ति-तादात्म्यान्यतरलक्षणसम्बन्धनियमः । ३ अनुमानाभ्यासेन । ४ अनुमाने । ५ "तत्त्वभावविकल्पा धीस्तदर्थे वाप्यनर्थिका । विकल्पिकाऽतत्कार्यार्थभेदनिष्ठा प्रजायते ॥ तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः । व्यावृत्तमिव निस्तत्त्वं परीक्षानक्षभावतः ॥ अर्था ज्ञाननिविष्टास्त एवं व्यावृत्तरूपकाः । अभिन्ना इव चाभान्ति व्यावृत्ताः पुनरन्यतः ॥"—प्र० वा० ३।७५, ७६, ७७ । ६ विकल्पप्रतिबिम्बितमेव । ७ विकल्पाकारभूतस्य सामान्यस्य । ८ व्यतिरिक्तादिरूपेणैव । ९ व्यतिरिक्तादिरूपतया । १० अव्यावृत्तादिरूपेणैव । ११ अन्यथा गृहीतस्य अन्यथाऽभ्यासेन अन्यथा दर्शनसम्भवे । १२ अविद्यमानतयाऽभ्यासात् । १३ अविद्यमानत्वेनैव । १४ "कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः । अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ॥"—प्र० वा० २।२८२ । १५ —स्य विद्यमान— ता०। १६ सुगतदर्शनम् । १७ —व्यतिरिक्तादि— आ०, ब०, प०, स० । १८ सामान्यस्य । १९ व्यतिरिक्तादिरूपेण । २० सामान्यस्य । २१ व्यतिरिक्तादिरूपेण । २२ विकल्पान्तरेऽपि । २३ सामान्याकारस्य। २४ अनन्तरोक्तविकल्पान्तरेऽपि।

'शेषेणापि' इत्यादेरयुक्तेश्चकत्वानवस्थानाच्च । ततो [1]निराकृतमेतत्–"सर्वत्र सर्वथा बुद्धिरूपमभ्यारोप्यते ततः [2]सामान्यमन्यापोहोऽवस्त्वंशश्च" [प्र० वार्तिकाल० २।१७०] इति, तदभ्यारोपस्योक्तप्रकारेणावगन्तुमशक्यत्वात् ।

ततोऽनुमानमन्यं वा विकल्पं परिकल्पयन् ।
तत्र एष तदाकारमहणं वक्तुमर्हति ॥६९॥ ५
तत्र सिद्धं तदभ्यासात् स्पष्टं सामान्यदर्शनम् ।
सविकल्पं ततश्चेदं प्रतिषिद्धं [3]तयो (त्वयो) दितम् ॥७०॥
"तस्माद्भूतमभूतं वा यद्यदेवातिभाव्यते ।
भावनापरिनिष्पत्तौ तत्स्फुटाकल्पधीफलम्" ॥७१॥
[4]स्फुटकल्पधियोऽप्येवं सत्फल्स्योपवर्णनात् । १०
विकल्पानभ्युपाये च नानुमानस्य सम्भवः ॥७२॥
तस्मात्य तदनुष्ठानात्तत्त्वदर्शी तथागतः ।
यत्तत्स्य प्रमाणत्वं मवता परिकल्प्यताम् ॥७३॥
ततोऽनुमानादभ्यस्तात्सर्वचित्तस्वरूपगः यदि ।
सामान्यदर्शी सम्प्राप्तो विकल्पोपहतश्च सः ॥७४॥ १५

किञ्च, वस्तून्यनुमानैवद्रूपादौ रसादेरपि प्रतिबन्धात् तदभ्यासतो रूपादिदर्शनमपि भवेत् । रूपाद्यवमासित्वं न रसादेरिति चेत्, वस्त्ववमासिस्वमपि नानुमानस्येति समानम्, अन्यथा [5] प्रत्यक्षादिक्षेपप्रसङ्गात् । लेशतस्तदवमासित्वं" "तस्यास्येवेति चेत्, न, निरंशत्वेन वस्तुनो लेशामावात् । कल्पितो लेश इति चेत्, न तर्हि तस्य लेशतोऽपि वस्त्ववमासित्वम्, कल्पितस्यावस्तुरूपत्वात् । [6]एकत्वाध्यवसायाद्वस्तुरूपत्वमिति चेत्, न, एकत्वस्यापि कल्पितस्ये- २०
नावस्तुरूपत्वात् । [7]तस्याप्येकत्वाध्यवसायाद्वस्तुरूपत्वमिति चेत्, न, 'एकत्वस्यापि' इत्यादेरप्यनवस्थानुषङ्गेन चक्रकस्यानवस्थानस्य च प्रसङ्गात् । तन्न लेशतोऽपि [8]तस्य वस्त्ववमासित्वम् । [9]तथापि तदभ्यासाद्वस्तुदर्शने रसाद्यभ्यासाद्रूपादिदर्शनमपि स्यात् प्रतिबन्धविशेषात् रूपादीनामेकसामान्यधीनत्वात्, तथा च कथमन्धादिव्यवहारः ?

अन्धो न सोऽस्ति लोके यो रसाद्यभ्यासवर्जितः । २५
अभ्यासोऽपि स नो यस्मात् सम्बद्धार्थदर्शनम् ॥७५॥
ततोऽन्धस्यापि रूपे स्यादवश्यं [10]दर्शनं ततः ।
तथा चान्धव्यवस्थेयं विनष्टा सार्वलौकिकी ॥७६॥
अनन्धोऽप्यन्धकारस्थो रसमास्वाद्यन् जनः ।

---

१ निराकृतमे–ब्या०, ब०, प०, स०। २ "सामान्यमन्यापोहो वस्त्वंशश्चेति"–प्र०वार्तिकाल०। ३ तयोर्दि–प०। ४ प्रमाणवार्तिके (२।२८५)। ५ सविकल्पपुटो। ६ –स्मिंसम्प्राप्ती ब्या०, ब०, प०। ७ –मानादिक–ब्या०, ब०, प०, स०। ८ रसादेरप्यनु– ब्या०, ब०, प०, स०। ९ रसाद्यभ्यासतः। १० स्वसंवेदनस्वसंवित्तिरूपेऽनुमानस्य। ११ वस्त्ववमासित्वम्। १२ अनुमानस्य। १३ कल्पितायाश्च वस्तुना एकत्वाध्यवसायात्। १४ एकत्वस्यापि। १५ अनुमानस्य। १६ वस्त्ववमासित्वमिति। १७ दर्शनात्ततः ब्या०, ब०, प०, स०।

असाक्षात्कारिता चास्य तत्त्वज्ञानस्य कारणात् ।
भवतीति वदिष्यामः शिष्य विश्वस्यतामिदम् ॥९२॥

नोपवर्णितप्रमाणाभ्यासात् भगवतो निरवशेषतत्त्वज्ञानम्, अपि तु तदावरणविगमादिति चेत् ; न; तस्य तदव्यतिरेकात् । सकलावरणविगमो हि न सकलज्ञानादन्यः, तज्ज्ञान-
५ कैवल्यरूपत्वात् तदावरणवैकल्यस्य, नीरूपस्याभावस्यानभ्युपगमात् । न च तदेव तस्य कारणम्; सदसत्समयविकल्पानुपपत्तेः । तथा हि–

यदाऽस्ति सकलज्ञानं तदा किं तेन हेतुना ? ।
सिद्धं न हेतुसापेक्षं सिद्धमेवान्यथा न तत् ॥९३॥
यदापि नास्ति तज्ज्ञानं तदा कस्य क हेतुता ।
१० न ह्यसत् खरशृङ्गादि स्वरूपेऽन्यत्र वा क्षमम् ॥९४॥ इति ।

स्यान्मतम्–सकलज्ञानप्रथमपर्याय एव तदावरणविश्लेषात्मा तत्समय एव तत्पूर्वकालभाविनिरवशेषावरणप्रध्वंसनाद् अन्धकारविश्लेषात्मकप्रदीपप्रथमपर्यायवत्, उत्तरस्तु तत्पर्यायो न तद्विश्लेषात्मा ततः पूर्वमावरणस्यैवाभावात् । न ह्यविद्यमानं कचिद्विशिष्टमुपशिष्टं वेति व्यपदेशमर्हति वस्तुसन्नोचरत्वात् तद्व्यपदेशस्य, अवस्तुत्वे सति तदयोगात् । स तु तद्विश्ले-
१५ षात्मनः प्रथमतत्पर्यायादेव अन्धकारविरहात्मप्रदीपपर्यायात्तदुत्तरपर्यायवत् तस्यैव तद्रूपेण परिणामाद्भवति ततस्तदावरणविगमस्य तत्कारणत्वमुच्यते । न चेदमत्र मन्तव्यम्–तदुत्तरोत्तरस्य तर्हि तत्पर्यायस्य तद्विश्लेषहेतुकत्वं न स्यात् पूर्वपूर्वस्य तत्कारणपर्यायस्यावरणप्रध्वंसाधिकरणत्वाभावादिति; तस्यापि तद्विश्लेषप्रभवपर्यायवंश्यत्वेन तद्धेतुकत्वाविरोधादिति; तदपि न सम्यङ्मतम् ; तद्विश्लेषकारणावचनात् । प्रथमस्य हि निरवशेषावरणविश्लेषस्य हेतुर्वक्तव्यः,
२० तदहेतुकत्वासम्भवात् । तत्पूर्वभावी तद्विश्लेष एव तद्धेतुरिति चेत् ; न; तस्यापि तद्धेतुत्वे अनादितद्विश्लेषस्यानिष्ट[स्य] प्रसङ्गात् । आवरणोपश्लेषनिधा(दा)नभूतमिथ्याज्ञानविरोधी सम्यग्ज्ञानाभ्यासस्तद्धेतुरिति चेत्; अनुकूलमाचरसि, तदभ्यासस्यैव प्रमाणाभ्यासत्वात् । रत्नत्रयादावरणविश्लेषो न तदभ्यासादिति चेत् ; न; तस्यैव रत्नत्रयत्वात् । आदरोपगृहीतस्य तत्त्वज्ञानपरिमलनस्य तदभ्यासव्यपदेशात्, प्रशब्देन च प्रकर्षवाचिना तस्याप्यभिधानात् । कुतः
२५ पुनरावरणोपश्लेषविगमकारणत्वं प्रमाणाभ्यासस्यावगतमिति चेत् ? 'आवरणोपश्लेषनिदानविरो-

---

१ अनुमानस्य । २ ज्ञानावरण । ३ आवरणविगमस्य । ४ कैवल्यं प्रतियोग्यसंसृष्टत्वम्, प्रकृते च आवरणरहितत्वम् । ५ तुच्छस्य । ६ सदसत्त्वमयवि–आ०, ब०, प०,स०। तद्धि कारणं भवत् कार्यकाले वा स्यात्, कार्याभावकाले वा ? ७ खसद्व्योम्न–आ०,ब०,प०,स०। ८ प्रथमपर्यायकाल एव। ९ सकलज्ञानपर्यायः। १० उत्तरः सकलज्ञानपर्यायः। ११ प्रथमपर्यायस्यैव उत्तरपर्यायरूपेण। १२ परम्परया। १३ द्वितीयपर्याय। १४ आवरणविश्लेषहेतुकत्व। तद्धेतुत्वावि–आ०, ब०, प०, स०। १५–कारणवचनात् आ०, ब०, प०, ता०। १६ आवरणविश्लेषः। १७ तत्पूर्वभाविनो विश्लेषस्यापि स्वपूर्वभाविविश्लेषहेतुकत्वे अनादितद्विश्लेषकल्पनायामनवस्थेति भावः। १८–पदिधान–ता०। १९ आवरणविश्लेषहेतुः। २० सम्यग्दर्शनज्ञानचारित्राणि रत्नत्रयम्। २१ सम्यग्ज्ञानाभ्यासात्। २२–परिमेलनस्य आ०, ब०, प०, स०। दृढाभ्यासस्य। २३ सम्यग्ज्ञानाभ्यास। २४ प्रसिद्धशेषेति प्रशब्देन।

भित्वात्' इति भूमः । तथाहि–यत् यत्कारणविरुद्धं तत्तस्याभावकारणम् यथा शीतस्पर्शविरोधी दहनः तत्स्पर्शहेतुकस्य रोमहर्षादेः, आवरणोपश्लेषकारणमिथ्याज्ञानाभिनिवेशविरोधी च सम्यग्ज्ञानाभ्यास इति कारणविरुद्धोपलब्धेः अन्यथानुपपत्तिनियमनिश्चयबलात्। मुनिश्चित एव प्रमाणाभ्यासस्यावरणविश्लेषं प्रति कारणभाव इति ।

यथास्यावरणं तस्य मिथ्याज्ञानं च कारणम् । ५

तथा तृतीये वक्ष्यामः सा हि तद्विस्तरैकिति: ॥९५॥

तदनेन श्लोकस्य प्रथमपादेन भगवतः स्वार्थसम्पत्कारणयुक्तम् ।

स्यान्मतम्–निःश्रेयसवस्तुविषयज्ञानजनित भगवद्वचनं निःश्रेयसार्थमेव स्यान्न नियतार्थम्, नियतार्थज्ञानजनित हि वचनं नियतार्थं स्यात् । न च भगवतो नियतार्थं वेदनमस्ति । नियतार्थत्वञ्च वचनेषु दृश्यते । न श्लु सर्वं तद्वचनं सर्वार्थमेव प्रतीतिबाधनात्, वैचनान्तर- १०
वैयर्थ्येन 'प्रत्नवदिवोपमसङ्गाच्चेति , तस्मा ; सर्वविषयत्वेऽपि तज्ज्ञानस्य प्रदेशतो नियत-
विषयत्वस्यापि भावात्' । सप्रदेशं हि तज्ज्ञानम् "अत्यनाऽनेकरूपेण" [न्याय वि० श्लो०
९] इति वचनात् । तत्प्रदेशयोगपद्ये तस्मिन्सिसक्षुवचनयोगपद्यमिति चेत् , न , प्रतिपित्सु-
प्रश्नसहायस्यैव तत्प्रदेशस्य वचनकारणत्वात् । न च प्रतिपित्सु सर्वमेव पृच्छति। ततस्तत्प्रदेश- १५
निमित्तस्य वचनसन्दर्भस्य नियतार्थत्वमित्येतत् 'प्रतिबुद्धप्रश्नेन - प्रतिज्ञप्तिनियतभगवत्प्र-
बोधप्रदेशबाधिना कथ्यते । ततो नेदमत्र दूषणं प्रज्ञाकरस्य–

"सर्वार्थदर्शनायातः शब्दः सर्वार्थवाचकः ।" [प्र० वार्तिकाल० १।९] इति ।

एकग्रहणेन तु सकलप्रदेशाऽनुकृतनिश्चितवस्तुगोचरभगवत्प्रबोधप्रदेशबाधिना तस्मि-
न्निमित्तस्य तत्सन्दर्भस्य सर्वार्थत्वं दर्शयति । 'सर्वार्थं' इत्यादि' पुनरस्मिन् पक्षे अनुकूलत्वादेव २०
न दूषणम् । अत एवोक्तम्–

"स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने ।" [आप्तमी० श्लो० १०५] इति ।

मूर्त्तिग्रहणं तु ज्ञानतदवभासबोधार्थम् , अन्यथा "हत्वायोगस्य वक्ष्यमाणत्वात्। तद-
नेन द्वितीयपादेन स्वार्थसम्पत्तिरुक्ता ।

श्रीवर्द्धमानशब्देन तु "निरतिशयापदानकर्मपरमवैराग्यादिसम्पद्बाधिना भगवदाम्ना- २५
यस्य प्रामाण्यमावेदयता परार्थसम्पत्कारणमभिहितम् । परमवीतरागश्चोपदेशं एव कस्मात् ? २५
निमित्तबुद्धिवदनुग्रहबुद्धेरपि "तस्याऽसम्भवात्, अपीतरागत्वप्रसङ्गादित्यत्रेदमाह–भव्याभ्युज्जृम्भ-
मानत्वे । भव्यानामभ्युज्जृम्भहेतुत्वेन रूपणं विकासयोग्यतासाधनार्थत्वात्, भानुत्वेन भगवतो" रूपणं
तत्प्रबोधनप्रवृत्तिस्वाभाव्यसाधनार्थत्वात् । स्वभाव एव खल्वयं तस्य यत्सर्वदर्शी वीतरागोऽपि

---

१ अन्यथा साध्याभावे अनुपपत्तिरभावः साधनस्य, अविनाभावनियम इत्यर्थः । २–दृष्टिः आ०,ब०,प०, स० । विवरणस्थानम् । ३ वचनोत्तर–आ०, ब०, प०, स० । ४ उपरोधायरम्भ्यं । ५ –त्व प्रदेश–आ०,ब०,प०, स० । सांशम् । ६ युगपत् । ७–तार्थमि–आ०, ब०, प, स० । ८ प्रतिबुद्धैरभूतैव इति प्रतिबुद्धप्रदेन । ९ प्रज्ञा-करगुप्तस्य वचनम् । १०–भेदावैपार्थम् आ० ।–भेदपार्थम् ब०, प०, स० । ११ ज्ञानावै–आ०, ब०, प० । १२ अतिप्रसङ्गात्वर्थं । १३–ऽस्तत्सम्भवि–प०। १४ परमवैतरागस्य भगवतः । १५–ठो निरूप–आ०,ब०,प०,स०।

भव्योपदेशे व्याप्रियते । न हि स्वभावाः पर्यनुयोगमर्हन्ति भावानां निःस्वभावतापत्तेः । स च तत्त्वभावः तत्कार्यादाम्नायादेवावगम्यते, तस्यापौरुषेयस्य निषेधात् । अनेन च परार्थसम्पत्स्वरूपं निरूपितम् । ततः सूक्तमेतदर्थतो देवस्य—

"यो निःशेषपदार्थतत्त्वविषयज्ञानाभियोगादभूत्,
प्रत्यर्थस्फुरितप्रदेशविशदज्ञानैकमूर्त्तिर्जिनः ।
वैराग्यातिशयाद्यचिन्त्यविभवात्सत्योद्यवादी च यः,
तस्मै भव्यसरोजतिग्मरुचये भक्त्या नमस्कुर्महे ॥" [ ] इति ।

अथ यदि भगवतो भव्याभ्युन्नहभानुत्वं तत्तर्हि वाङ्मयमयूखसापेक्षमेव नान्यथा । न हि तत्सन्निधानादनुपदेशमेव भव्यानां तत्त्वज्ञानमिति सौगतवत् स्याद्वादिनामभिनिवेशोऽस्ति, ततस्तद्वाङ्मयादेव तत्त्वज्ञानसिद्धेर्वाङ्मयमिदमपार्थकम् । न ह्येकवाङ्मयसाध्ये तदन्तरमुपयोगवत् । तत्रापि तदपरापरवाङ्मयोपयोगपरिकल्पनायाम् अनवस्थाप्रसङ्गादिति । तत्रेदमाह—

बालानां हितकामिनामतिमहापापैः पुरोपार्जितैः,
माहात्म्यात्तमसः स्वयं कलिबलात्प्रायो गुणद्वेषिभिः ।
न्यायोऽयं मलिनीकृतः कथमपि प्रक्षाल्य नेनीयते,
सम्यग्ज्ञानजलैर्वचोभिरमलं तत्रानुकम्पापरैः ॥२॥ इति ।

इदमत्र तात्पर्यम्—भवति भगवद्वाङ्मयादेव भव्यानां तत्त्वज्ञानम् । यदि तद्व्याप्य-(तदुद्याप्य-) मलिनीकृतमेव स्थितम् । न चैवम् । न च मलिनीकृतस्य भव्यजनमनसि तत्त्वावद्योतनसामर्थ्यं सम्भवति, परिशोधितमलस्यैव तस्य निरवद्यविद्यानिबन्धनत्वात् । अतस्तन्मलपरिशोधनार्थमिदं वाङ्मयमारभ्यमाणं नापार्थकत्वदोषमुद्वहति प्रयोजनविशेषसम्भवात् । यस्य तु शब्द[:]स्वरूपं स्वार्थञ्च यथावस्थितमवद्योतयति तस्य भवत्येव तत्र शास्त्रस्यान्यस्य वानुपयोगित्वं प्रयोजनविशेषवैधुर्यात् । तथा हि—

शब्दश्चेदात्मनस्तत्त्वं स्वरवर्णक्रमादिभिः ।
द्योतयेत् स्वमहिम्नैव प्राप्तं व्याकरणं वृथा ॥९६॥
यतो वेदस्य नित्यस्य स्वत एवावबोधिते ।
स्वरूपे न भवन्त्येव मिथ्यात्वाज्ञानसंशयाः ॥९७॥
तदभावे न तस्यास्ति प्रत्यवायस्ततः कुतः ।
क्रियते वेदरक्षार्थं कैश्चिच्छब्दानुशासनम् ॥९८॥

---

१ उपदेशाम्नायात् । २ आम्नायस्य शास्त्रोपदेशस्य । ३ अकलङ्कदेवस्य । ४ वाङ्मयमूख—आ०, ब०, प०, स० । ५ "सम्भारावेवतत्तस्य पुंसश्चिन्तामणेरिव । निःसरन्ति यथाकामं कुतश्चादिभ्योपि देशनाः ॥"—तत्त्वस० श्लो० ३६०८ । ६ भगवदुपदेशादेव । ७ एतद्व्याख्यातकम् । ८ यदि भगवद्वाङ्मयमय यावत् निर्मलमेव स्यात् । ९ भगवद्वाङ्मयस्य । १० भव्यजनस्य म—आ०, ब०, प०, स० । ११ भगवद्वाङ्मयस्य । १२ एतद्व्याख्यातकम् । १३ मीमांसकस्य । १४ वेदः । १५—तमेव द्योतयति आ०, ब०, प०, स० । १६ "रक्षार्थं वेदानामध्येयं व्याकरणम्"—पा० म० पस्प० ।

स्वतो हि निर्मलज्ञाने जाते तत्र प्रदीपवत् ।
नाज्ञानादिमलं तस्मिन् हेत्वन्तरशतादपि ॥९९॥
एतेन व्यङ्ग्यकारतस्मिन् वेदे व्यर्था निरूपिताः ।
स्वतो हि तस्याभिव्यक्तौ व्यञ्जकैः किं प्रयोजनम् ? ॥१००॥
आवारकप्रतिक्षेपो व्यञ्जकैर्यदि वर्ण्यते ।
स्वतस्तेनैव शक्तिश्चेत् , कुर्वन्त्यावारकाः किम् ॥१०१॥
शक्तिर्ध्वंसे स्वनित्यत्वं वेदस्य स्यात्तदैत्मनः ।
शक्तिर्भिन्नैव तस्माद्वेत् स्वतोऽसौ पोषक कथम् ? ॥१०२॥
शक्तेरेव यदि ज्ञानं वेदस्य व्यर्थता भवेत् ।
ग्राह्यत्वाक्षेप वैयर्थ्यम् , अहेतोः ग्राह्यता कथम् ? ॥१०३॥
वेदोऽपि शक्तिसम्बन्धाद्धेतुश्चेद्बोधजन्मनि ।
तस्सम्बन्धोऽपि तेनैव जन्योपकाराश्रते कथम् ? ॥१०४॥
अशक्तस्योपकर्तृत्वे पूर्वशक्तिर्वृथा भवेत् ।
शक्तिरस्ति विभिन्ना चेत्सैव स्यादुपकारिणी ॥१०५॥
वेदोऽपि शक्तिसम्बन्धादुपकारी यदीष्यते ।
प्रसङ्गः पूर्व एव स्यादनवस्थाभयप्रदः ॥१०६॥
तस्मादभिन्ना तच्छक्तिर्नित्या सा च स्वनश्यि तम् ।
तत्तदाकृत्यभिव्यक्ती नान्यतो युक्तिमृच्छति ॥१०७॥
न वाच्याकृतिसम्बन्धस्तादृशस्योपपद्यते ।
अनाधेयादिरूपत्वात् कूटस्थस्य विशेषतः ॥१०८॥
अज्ञानश्चेदसामर्थ्यं भदृस्तद्विदमनर्थकम् ।
"अन्यथाकरणे चास्य बहुत्वं स्वाभिवारणम्" [मी०श्लो० १।१।२।१५०] इति।
अन्यथाकरणस्यैवासम्भवाद्युक्तनीतिवत् ।
नाभावस्य नियेधोऽयं नियेधः प्राप्तिपूर्वकः ॥११०॥
किञ्च,
अन्यथाकरण चैतत्स्वरूपमनुधावति ।
तत्पौरुषेयमेव स्यात्पुरुषेणान्यथाकृतेः ॥१११॥

---

१ तस्मिन् वेदे अभिव्यक्तिरिति । २ ज्ञानजन्यम् । ३ सतीत्यौ आ०, ब०, प०, म० । ४ ज्ञानानुत्पादश्च । ५ शक्तिमिश्रस्य । मतः भिन्नयोः उपकार्योपकारकभावं विना सम्बन्धासम्भवात् । ६ यदि वेदोऽप्यशक्तोऽपि शक्तिसम्बन्धात् पुर्वोत्पन्नं तद्वत् ज्ञानेऽपि विद्यमानादिति ज्ञानोत्पादेऽप्यसौ पूर्वशक्तेरवैयर्थ्यं स्यात् । ७ वेदे पूर्वशक्तेरुपकारिकाया अन्या शक्तिर्जन्ये पूर्व सा भिन्ना । ८ पूर्वशक्तेरुपकारकत्वमस्य कथम् । ९ वेदः किमशक्तः सन् शक्तेरुपकारं करिष्यति शक्त्या वा ? शक्त्या चेत्, सा तस्यै भिन्ना, तत्सम्बन्धस्य चार्थसम्बन्धः शक्ति- परिकल्पनीयेत्यनवस्था । १० अन्यथाकरणम् । ११ नित्यस्य । १२ यदि नित्ये वस्तुन्यनित्यस्य आधीयते नापि तस्मात् कथन महीयसे, अनाधेयस्वभावेतादृशस्वरूपत्वात्तस्य । १३ भाष्यः आ०, ब०, प०, म० ।

यद्यन्यथाकरणं वेदस्वरूपमनुधावति; तत्तर्हि पौरुषेयमेव स्यात्, पुरुषेणान्यथाक्रियमाणत्वात् कलशादिवत्। अथ नानुधावति पुरुषकृतस्यान्यथाभावस्य वेदादन्यत्वादिति चेत्; कथं तर्हि कथितम्[1] 'अन्यथाकरणे चास्य' इति ? न हि तस्मादर्थान्तरं तस्येति सम्बन्धाभावे व्यपदेशमर्हति। न सम्बन्धात् तत्तस्येति व्यपदेशः, अपि तु पुरुषाभिप्रायादेव, निवारणस्यापि बहुभिस्तत्रैवं करणादिति चेत्; कुतस्तेभ्यस्तन्निवारणम् ? तेषां[2] वेदेत्थम्भावपरिज्ञानादिति चेत्; तदपि न प्रत्यक्षात्; तत्र वेदेतरसाधारणस्यैव वर्णपदादेः प्रतिभासनात्। सम्प्रदायाच्चेत्; कुतस्तस्यैवं सत्यत्वं नानित्थम्भावसम्प्रदायस्यापि ? वेदस्य तथैवं सत्यत्वाच्चेत्; तदपि कुतः ? तत्सम्प्रदायस्य सत्यत्वाच्चेत्; न; परस्पराश्रयात्। अनादित्वादित्थंसम्प्रदाय एव सत्यो नान्य इति चेत्; तदपि कुतोऽवसितम् ? अनादिः काल इत्थंसम्प्रदायवान् कालत्वात् अद्यकालवदिति चेत्; न; अन्यत्रापि साम्यात्—अनादिः कालः अन्यथासम्प्रदायवान् कालत्वात् अद्यकालवदिति। साध्यविकलं निदर्शनम् अद्यकालस्यान्यथासम्प्रदायवत्त्वादर्शनादिति चेत्; कस्य तर्हि निवारणम् ? येनोच्यते—'अन्यथाकरणे चास्य बहुभ्यः स्यान्निवारणम्' इति। न ह्यन्यथासम्प्रदायादन्यद् अन्यथाकरणं नाम। तस्मादनादित्वाद् इत्थंसम्प्रदायवद् अन्यथासम्प्रदायस्यापि सत्यत्वादनिवारणमेव स्यात्। अबहुजनपरिगृहीतत्वात् असत्य[10] एवायम् अत एव 'बहुभ्यस्तन्निवारणम्' उच्यत इति चेत्; न; म्लेच्छादीनां धर्मसम्प्रदायस्य प्रामाण्यप्रसङ्गात्, उक्तनीत्या तस्याप्यनादित्वाद्भूयोजनपरिग्रहाच्च[11]। भूयांसो हि म्लेच्छादयः तेषां याज्ञिकापेक्षयातिशयेन बहुत्वात्, तत्कथं जीवति तत्सम्प्रदाये चोदनाया एव धर्मे प्रामाण्यम् ? पौरुषेयत्वादप्रमाणमेव स[12] इति चेत्; न; वेदेत्थम्भावसम्प्रदायस्यापि पौरुषेयत्वाविशेषात्। गुणवत्कृतोऽयमिति[13] चेत्; कः पुनरत्र[14] सम्प्रदातुर्गुणः ? वेदतत्त्वज्ञानमेव अन्यस्यानुपयोगदिति चेत्; कुतस्तस्य[15] तज्ज्ञानम् ? सम्प्रदायान्तराच्चेत्; न; धर्मतत्त्वज्ञानस्यापि म्लेच्छादिषु तथाभावात्[16] तेषामपि गुणवत्त्वापत्तेः। तन्न सम्प्रदायाद्वेदविवेचनम् अन्यथाऽपि तत्सम्प्रदायात्। तस्माद्वेदस्य स्वावद्योतनस्वभावत्वादेव विवेचनं नान्यथा। न च[17] तत्रान्यथाकरणं कुतश्चिदपीति व्यर्थं तन्निवारणार्थमन्यापेक्षणम्। तथा—

स्वभावादेव वेदस्य स्वार्थावद्योतकारिणः।
किं परापेक्षया कार्यं व्याख्यानादि यदिष्यते ॥११२॥

व्याख्यानादिसहायाच्चेद्वेदात् स्वार्थे मतिर्भवेत्।
नियतो यदि तस्यार्थो व्याख्याभेदः कथं तथा ? ॥११३॥

---

१ कुमारिलभट्टेन। २—दर्थान्तरस्येति आ०,ब०, प०, स०।,३ तस्येदमिति व्यपदेशम्। ४ पुरुषाभिप्राय एव। ५ वेदेऽर्थभावनापरि—आ०,ब०,प०,स०। ६ वेदेत्थम्भावपरिज्ञानमपि। ७ इत्थम्भावसम्प्रदायस्यैव। ८ इत्थम्भूतत्वेनैव। ९ सति हि सम्प्रदायसत्यत्वे वेदस्य इत्थम्भूतत्वेन सत्यत्वसिद्धिः, सति च तस्मिन् सम्प्रदायसत्यत्वसिद्धिरिति। १० अनित्यम्भावसम्प्रदायः। ११—परिगृहीतत्वाच्च आ०, ब०, प०, स०। १२ म्लेच्छसम्प्रदायः। १३वेदेत्थम्भावसम्प्रदायः। १४सम्प्रदायप्रवर्तकस्य। १५सम्प्रदायकर्तुः। १६म्लेच्छानामपि। १७नित्यवेदस्वरूपे।

अस्ति चायं यदप्येकोऽ[1] धर्मं द्रव्यगुणादिकम् ।
वेदयादी परोऽ[2] धर्ममपूर्वाख्यं वदत्यलम् ॥११४॥
इयेनस्यानर्थरूपत्वादधर्मत्वं प्रपद्यते ।
भौष्यकारस्तदुभ्येकोऽ[3] नैवमित्यवगच्छति ॥११५॥
वधस्य विहितत्वापि सौहृद्याद्या दुरुहेतुताम् । ५
श्रेयस्करत्वमन्येऽ[4] तु मन्यन्ते वेदवेदिनः ॥११६॥
एवमादिः परोऽप्यस्ति तदूव्याख्यामेवविस्तर ।
तत्र न ज्ञायते किं तदूव्याख्यानं वस्तुगोचरम् ? ॥११७॥
न चाविदिततत्त्वार्थव्याख्यानसहकारिणः ।
वेदास्तत्त्वं प्रपद्यन्ते प्रेक्षावन्तो विचक्षणा ॥११८॥ १०
वेदस्य नियतार्थत्वात्तदुच्चारार्थावबोधनः ।
न च सर्वोऽपि तैर्ज्ञेयस्तत्त्वार्थ इति युज्यते ॥११९॥
तत्त्वार्थं यदि मन्येथाः व्याख्यान युक्तिसङ्गतम् ।
वेदात्मा यदि सा युक्तिः सर्वं तयुक्तिसङ्गतम् ॥१२०॥
सर्वव्याख्यानुकूल्येन स तमर्थं वदत्यथम् । १५
वेदो न द्वेष तद्भेदे कापि दृष्टः पराङ्मुखः ॥१२१॥
युक्तिरन्यैव वेदार्थेस्साऽपिऽ[5] वेदार्थदृग्यदि ।
तदा धर्मे प्रमाणत्व वेदस्येवेति नश्यति[6] ॥१२२॥
अवेदार्थैव युक्तिश्चेत् व्याख्या तत्सङ्गमात्मकम् ।
तत्त्वार्थो काचिदन्यासां सर्वासां तत्प्रसङ्गतः ॥१२३॥ २०
अथ "वेदान्तर युक्तिस्तत्सङ्गायुक्तिसङ्गमः ।
"तदूव्याख्यायुक्तिसाङ्गत्ये तर्हि वेदान्तर भवेत् ॥१२४॥

---

१ कुमारिलभट्टः । "श्येनो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः । चोदनालक्षणैः साध्या तस्मात्तेभ्यो धर्मत्व ॥"–मी० श्लो० ३।१।१।१२ । २ प्रभाकरः । "चोदनैवपूर्व ब्रूतः"–शाबरभा० २।१।५ । "तस्य त्वपूर्वत्वं वेदवाक्यानुसरतः ।"–प्रक०प०पृ० १९५ । ३ शबरस्वामी "श्येनार्थः ? य प्रत्यवायाय श्येनो वज्र इषुरित्येवमादिः । तत्रानर्थो धर्मं उच्चै मा भूत् इत्यर्थग्रहणम् । कर्म पुनरसावनर्थ ? हिंस्र हि स्य, सा च प्रतिषिद्धेति । कर्म पुनरनर्थः कर्तव्यतयोपदिश्यते ? उच्यते ; नैष दोषोऽत्र कर्तव्यतया विधीयन्ते । यो हि हिंसिष्यमिन्द्रोऽग्नि, तदायमभ्युपायः इति हि तेषामुपदेशः–'श्येनेनाभिचरन् यजेत' इति हि समामनन्ति म अनिन्दितश्चमिति ।"–शाबरभा० १।१।२ । ४ "श्येनादीनां तु य साक्षाच्छास्त्रोपारेण नापि तत्कल्पस्त्रानर्थत्वमिति तत्सानर्थत्वप्रतिपादनपरम्–'श्येनो वज्र इषुः' इत्येवमादि भाष्यमुपलक्षणीयम् ।"–मी० श्लो० टी० पृ० १०८ । ५ "स चैतो हेतुः अविदुषः पशुहिंसाप्रकाशकात् ।"–सां० माठर० का० २ । "ज्योतिष्टोमा दिवाक्यस्य प्रधानापूर्वस्य पशुहिंसादिवाक्यमाङ्गभूतमर्थहेतुनापूर्वेण सहरूपं ।"–सां० तत्त्वकौ० का० २ । ६ मीमांसकाः । ७ व्यक्तस्वभेदः । ८ वेदार्थदृशो यदूव्याख्यानं कृतं तत्प्रमाणमिति । ९ तथा धर्मे प्र–आ०, ब०, प०, स० । १० वेदार्थदृशो नरस्यापि प्रामाण्यं स्वतेति भाव । ११ प्रकृतवेदव्याख्यानसमर्थनार्थं यदि वेदान्तरमपेक्ष्यते । १२ वेदान्तरव्याख्या ।

तत्राप्येवं प्रसङ्गे स्यादनवस्था महीयसी ।
तन्न व्याख्यानसम्यक्त्वं सुगमं युक्तिसङ्गमात् ॥१२५॥
सर्वव्याख्यासमत्वे च सन्दिग्धा नियतार्थता ।
वेदस्य कुरुते तूर्णमप्रामाण्यभयज्वरम् ॥१२६॥
अथानियत एवार्थो वेदस्य विदुषां मतः ।
तत्तद्व्याख्यानभेदेन तत्तदर्थगतिस्ततः ॥१२७॥
सर्वसम्प्रतिपत्तिः स्यात्सर्वार्थेषु तथा सति ।
कश्चिदर्थः कथं नाम केनचित्प्रतिषिध्यते ॥१२८॥
अनर्थेतररूपत्वं शवरोम्वेकसम्मतम् ।
श्येनस्य यत्स वेदार्थो विरुद्धोऽपि भवेन्न किम् ? ॥१२९॥
अर्थानर्थत्वरूपेण त्यागोपादानवर्जितः ।
श्येनोऽपि यदि वेदार्थः सुस्थितः प्रेरको विधिः ! ॥१३०॥
अग्निहोत्रादिवाक्याद्यत् सव्याख्यानात्प्रतीयते ।
[1]श्वमांसभक्षणं तस्य वेदार्थत्वं कथन्न वः ? ॥१३१॥
असद्व्याख्यानमेतच्चेत् सद्व्याख्यानं किमुच्यताम् ।
यत्र वेदानुकूल्यं चेदेतदत्रापि दृश्यते ॥१३२॥
ततो व्याख्यासहायाच्चेद्वेदादर्थोऽवसीयते ।
सर्वव्याख्यार्थतादार्ढ्यमसमञ्जसमापतेत् ॥१३३॥
नित्यं तद्बोधशक्तस्य[2] नापेक्षेति च वक्ष्यते ।
अशक्तस्यापि काऽपेक्षा नापेक्षा शक्तकारिणी ॥१३४॥
तस्माद्वेद [:] स्वतस्त्वं च स्वार्थं चान्यनिराश्रयः ।
व्यक्तं वक्तीति वक्तव्यं स्वतःप्रामाण्यवादिभिः[3] ॥१३५॥
न चेदृशः स्व[-शस्व-]भावस्य[4] स्वरूपस्वार्थयोर्द्वयोः ।
सम्भवेन्मलिनीभावो नरयत्नशतादपि ॥१३६॥
न ह्यीदमेव मे रूपमयमेवार्थ इत्यपि ।
जानुघातं वदन् वेदः शक्यप्रच्छादनः परैः ॥१३७॥
तत्स्वतो निश्चिते वेदे वेदार्थे च तदर्थकम् ।
यद्व्याकरणमीमांसाद्येतत्सर्वमनर्थकम् ॥१३८॥

ततः स्थितमेतत्– असम्भवन्मलिनीकारस्यैव यत्नान्तरवैफल्यं नापरस्य । सम्भवन्मलिनीकारश्च भगवदाम्नायः स्वरूपतोऽर्थतश्च छद्मस्थानां तत्राऽज्ञानादिमलसद्भावात् इति विवृतं तात्पर्यं वृत्तस्य ।

---

१ "तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ । खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा ॥"–प्र० वा० ३।३१८ । २ वेदस्य । ३ मीमांसकैः । ४ नित्यस्वभावस्य वेदस्य । ५ अल्पज्ञानाम् ।

अधुना पुनरवयवव्याख्यानं क्रियते—न्यायोऽत्र स्याद्वादामोघलाञ्छनो भगवदाम्नायोऽभिमतः। न चैवमप्रकरणार्थत्वम्, तस्यापि न्यायत्वात्। सामान्यपाचिना न्यायशब्देन कुतो विशेषप्रतिपत्तिरिति चेत्? 'मध्यामधुरुहमानवे' इत्युक्ता पुनरस्य वचनात्। भगवतो हि मध्यकमलाकरविकासकारिणा मरीचिनिकरेण मथितव्यं तद्भावे तरङ्गणायोगात्। स च न भगवद्ज्ञानरूपो मुक्तः, ततो मध्यानां तत्त्वप्रतिपत्तिविकासासम्भवात्, प्रतिपुरुषं ज्ञानकल्पनावैयर्थ्यात्, सर्वस्य सर्वदर्शित्वापत्तेः, प्रतिपाद्यप्रतिपादकभावाभावप्रसङ्गाच्च। नाऽपि विनेयज्ञानरूपस्तन्निकरः, सदसद्विकल्पायोगात्। न ह्यसतस्तत्त्व तन्निकरत्वम्, खरशृङ्गस्यापि प्रसङ्गात्। नापि सतः, प्रयोजनाभावात्। मध्यकमलविकासः प्रयोजनमिति चेत्, न, तदव्यतिरेकात्। तत्त्वप्रतिपत्तिरूपो हि तद्विकासः कथं तत्त्वज्ञानाद्भिद्येत यतस्ततः स स्यात्? भेदे स्वमतविरोधात्। कुतो वा तत्त्वं सेत्स्यत्? विनेयमाधिन एव कृतध्विदेतीति चेत्, निष्फलस्तर्हि भगवद्व्यापार इति नासौ तत्त्वजिज्ञासावद्भिरभ्यर्थनीयः स्यात्। भगवद्व्यापारोऽपि चेत्, सः कोऽपरोऽन्यत्राम्नायात्, इत्याम्नाय एव न्यायग्रहणेन गृह्यते। यद्येवमाम्नाय इति वक्तव्यं स्पष्टत्वात्, छन्दोमङ्गस्याप्यभावादिति चेत्, न, आम्नायस्यापि तत्त्वप्रतिपत्तिहेतुत्वेन न्यायरूपत्वोपपत्तेर्नार्थत्वादेवंवचनस्य। 'निश्चितं च निर्बाधं च वस्तुतत्त्वम्' इयतेऽनेनेति न्यायः' इति व्युत्पत्तेः। तदुपवर्णनञ्च प्रमाणमेकमेव द्वे एवेति नियमव्यावृत्तोपदर्शनार्थम्। कृतः पुनर्न्याय रूपत्वमाम्नायस्येति चेत्? आस्तां तावत्तृतीये तद्विस्तरात्।

कः पुनरसौ? इत्याह—अर्यं प्रतीयमानो वर्णपदवाक्यात्मको न प्रमाणागोचरः स्फोटादिरिति। स किम्? इत्याह—नेनीयते। कः पुनरत्र यत्नार्थः? सुखाशुभायसौष्ठवलक्षण इति ब्रूमः। सुखेन नीयते नेनीयते इति। सुखं पुनरिह नयनोपायानां सुगमत्वम्, सुगमैरुपायैर्नीयत इति। अत एवाशुभावस्यापि परिग्रहः सुगमोपायस्योपेक्ष्य आशुभावोपपत्तेः। सुष्ठु नयनाद्वा नेनीयते। सौष्ठवं तु नयनस्यायविछिन्नयुक्तिगोचरत्वम्। अविच्छिन्तामिर्युक्तिभिर्नीयते नेनीयत इति। पौनःपुन्य भृशार्थो वा "यङर्थः। पुनः पुनर्नीयते नीयमानः क्रियते नेनीयत इति। किं नेनीयते? इत्याह—अमलम्। मलाभावम्, अर्थाभावेऽव्ययीभावात्, अवद्या"दित्यमिति यावत्।

स्यान्मतम्—"एकदा यद्यवश्यातर्यं नीतो न्यायः किं पुनर्नीयते नयनप्रयोजनस्यावश्यं तत्त्वप्राप्तेः प्रागेव सिद्धत्वाद् अप्रकरणत्वाच्च। तथा हि—तदेव, अन्यद्वा पुनर्नीयते न्यायः? न तावत्तदेव, यतस्तस्य प्राप्तत्वात्। न हि प्राप्त प्रति नयनं सम्भवति, अप्राप्तस्य नयनविषयत्वात्। अन्यदेव तर्हि पुनर्नीयत इति चेत्, न, तस्याऽऽऽनिर्देशात्, एकस्यैवामलार्थस्योपात्तत्वात्। तत्र पौनःपुन्यमत्र यद्यर्थ उपपन्न इति; तत्र "सुगतम्, विषयभेदस्यात्र भावात्।

---

१ मरीचिनिकरः। २ भगवज्ज्ञानमात्र। ३ विनेयज्ञानस्य। ४ स्वत्व् ब०, प०। ५—स्यात्र आ०, ब०, प०, स०। ६ विनेयज्ञानतत्त्वम्। ७ एवं न्यः— ता०। ८ 'आम्नायो मन्त्रिकीकृतः' इति कृते सति। ९—स्फोट— आ०, ब०, प०, स०। १० —स्य अनि— आ०, ब०, प०, स०। ११ —तत्त्वं मी— आ०, ब०, प०। १२ "पौनःपुन्ये नृशार्थम क्रियासमभिहारे तस्मिन् द्योत्ये दृष् स्यात्"—सि० कौ० ३।१।२२। १३ निर्मलत्वम्। १४ एकदा ब०। १५ सुगमम् आ०, ब०, प०, स०।

न ह्यवदातत्वमेकमेवात्र विषयः, अवदाततरत्वादेरन्यस्यापि भावात्। अप्रतिपादितस्य कथं प्रतिपत्तिरिति चेत् ? न ; अमलशब्देनैवं एतत्प्रतिपादनात् तस्य सामान्यशब्दत्वात्। भवति हि सामान्यशब्दाद्विशेषगतिः नीलशब्दात् नीलनीलतरादिविशेषव्यवसायदर्शनात्, तद्वदत्रापि अमलशब्देनैव अमलतरत्वादेः प्रतिपत्तिः। ततोऽमलत्वं[2] नीतो न्यायः पुनरमलतरत्वं पुनरमलतमत्वं ततोऽपि सातिशयममलतमत्वं नीयत इति न शास्त्रस्यावृत्तिवैफल्यं बालक्रीडादोषो वा विशेषप्रतिलम्भात्। आम्नायस्य हि नैर्मल्यं नाम तज्ज्ञानस्य[3] नैर्मल्यमेव। तच्चास्मान्न्यायशास्त्रादाविर्भवत् पुनरावृत्तिसहायात् सविशेषम्, ततोऽपि तथाविधात् सविशेषतरं सविशेषतमञ्च भवति। दृश्यते च शास्त्रस्य[4] अभ्यासाधिष्ठितस्य स्वविषये ज्ञानविशेषकारित्वमिति नात्र विद्वज्जनस्य विवादः। कस्य[5] पुनरभ्यासेन शास्त्रस्याधिष्ठानम् ? आचार्यस्येति चेत् ; न ; प्रयोजनाभावात्। तद्विषयज्ञानविशेषः प्रयोजनमिति चेत् ; न ; तस्य प्रागेव सिद्धत्वात्, अन्यथा शास्त्रकरणस्यैवाऽसम्भवात् अस्मदादिवदिति चेत् ; सत्यम्, स्वयं प्रयोजनाभावः शास्त्रकारस्य, प्रतिपाद्यस्यैव तु तदभ्यासात्तद्विषयज्ञानविशेषोत्पत्तेः। शास्त्रकारो हि शास्त्रमावर्त्तयन् प्रतिपाद्यस्य शास्त्रार्थज्ञानं सातिशयमुपजनयति परार्थत्वात्तत्प्रवृत्तेः। तन्न प्रयोजनाभावस्तदभ्यासस्य। अत एव भृशार्थस्यापि यङर्थस्योपपत्तिः, भृशं नीयते नेनीयत इति, फलातिशयरूपस्य भृशार्थस्य सम्भवात्। तदनेन पुनरावृत्तिर्निग्रहस्थानं[6] प्रत्युक्तम् ; सातिशयज्ञानस्य तत्साध्यत्वात्। न हि सप्रयोजनादेव वचनात् निग्रहावाप्तिः ; अतिप्रसङ्गात्। तत्त्वजिज्ञासावन्तं प्रत्येव तद्वचनं सप्रयोजनं तेनैव ततः सातिशयज्ञानस्याभीष्टत्वात् न विजिगीषावन्तं प्रति, न ह्यसौ ततस्तत्त्वज्ञानमिच्छति, तत्तिरश्चिकीर्षयैव तस्य प्रवृत्तेः, अतस्तं प्रति पुनर्वचनस्य निरर्थकत्वान्निग्रहाधिकरणत्वमिति चेत् ; न ; प्रथमवचनस्यापि तत्त्वप्रसङ्गात्, ततोऽपि तस्य तत्त्वज्ञानं प्रत्यनादरस्य तत्तिरस्कारपरत्वस्य चाविशेषात्, ततस्तद्वचनमपि[11] निग्रहस्थानेषु गणयितव्यम्। तदभावे वाद एव न भवेदिति चेत् ; मा भूत्, को दोषः ? वादिनो जयलाभाद्यभाव इति चेत् ; न ; [12]तद्वचनेऽपि तदभावस्य समत्वात्। न हि निरर्थकात्प्रथमवचनादपि तल्लाभादि; द्वितीयादपि प्रसङ्गात्। [13]सार्थकत्वसमर्थनं पुनर्वचनेऽपि समानम्। निरूपयिष्यते चैतद्यथावसरमिति नेह प्रतन्यते। तस्मादुपपद्यत एव सुखादियङर्थः प(र्थप)रिग्रहः। पौनःपुन्यभृशार्थयोरेव [14]शब्दविद्यायां यङर्थत्वमनुश्रूयते न सुखादीनामिति चेत् ; न ; तेषामपि कैश्चित्तदर्थत्वानुस्मरणात्। तथा च पठ्यते—

"पौनःपुन्यं भृशार्थो वा दूराभ्याससुखानि च।
आशु सुष्ठु बहुत्वञ्च यङर्थाः परिकीर्तिताः॥" [ ] इति।

पौनःपुन्यभृशार्थमात्रयङर्थवादिभिस्तु भृशार्थ एव दूराभ्यासादीनामन्तर्भावान्न पृथगुपादानं कृतमिति न कश्चित् व्याघातः।

१—नैव प्रति—आ०, ब०, प०, स०। २ —त्वं ततो आ०, ब०, प०, स०। ३ ते ज्ञानस्य ता०। ४ —सिसाहाय्यात् आ०, ब०, प०, स०। ५ शास्त्राभ्यासा—ता०। ६ —पाकारत्व—ता०। ७ 'शास्त्राभ्यासकर्त्ता कः स्यात्' इति प्रश्नार्थः। ८ शास्त्रकारप्रवृत्तेः। ९ पुनरुक्तं नाम निग्रहस्थानम्। १० निग्रहाधिकरणत्व। ११ प्रथमवचनमपि। १२ प्रथमवचनेऽपि। १३ प्रथमवचने यदि सार्थकत्वं समर्थ्यते। १४ सि० कौ० ३।१।२२।

कीदृशो न्यायः ? इत्याह–मलिनीकृतः विप्रतिपत्तिमलीमसः कृतः इति, निर्मलस्य निर्मलज्ञानस्य नेत्रे प्रयोजनाभावात्। किं कृत्वा ? इत्याह–प्रक्षाल्य मलिनीकृतन्यायं परिशोध्य। कैः ? सम्यग्ज्ञानजलैः निर्मलस्वान्तःमलशोधनत्वाच्च जलसाधर्म्यात्, सम्यग्ज्ञानानि लक्षणेन निरूपितानि। ज्ञानग्रहणम् अक्षाक्षोपदेशनिषेधार्थम्। तथाहि–यद्युपदेष्टव्यं न स्वयं जानाति कथमुपदिशेत्, उपदिशन्वा कथं प्रमाणमुन्मत्तवत् ? नन्वेवं सुगतस्याप्रमाणं स्वमेव स्यात् अज्ञातस्यैव वैदिर्भाबहेतुफलमावादेस्तेनोपदेशात्। परिहार एव लोकबुद्ध्या बहिर्भावहेतुफलभावादिरिति चेत्, का पुनरियं लोकबुद्धिः ? ग्राह्यग्राहकभावोपप्लवाधिष्ठिता वितथाकारा विज्ञप्तिरिति चेत्, सा यदि विनेयसम्बन्धिनी, कथं तया बुद्धस्य बहिर्भावादिपरिज्ञानं तस्यास्तेनापरिज्ञानात्। तामपि लोकबुद्ध्या तदज्ञानीत इति चेत्, न, अनवस्थानात्। आत्मसम्बन्धिन्येव लोकबुद्धिरिति चेत्, न, अतत्त्वदर्शित्वप्रसङ्गात्। तथा हि–

वितथार्था हि विज्ञप्तिर्लोकबुद्धिर्निगद्यते।
तद्वतस्तत्त्वविरुद्धं चेत्, अतत्त्वज्ञः क एष्यताम् ? ॥१३९॥
अविद्याप्रत्यवस्थानिश्च कथं तैस्यैवमुच्यताम् ?
अविद्याप्रभवा ह्येषा विज्ञप्तिर्वितथाकृतिः ॥ १४०॥
'यैर्यार्थ्यं प्रत्ययापेक्षादविद्योपप्लुतात्मनाम्।
विज्ञप्तिर्वितथाकारा जायते तिमिरादिवत् ॥' [प्र० वा० २।२१७]
इति कीदृशेयमावाद्या, अविद्या चेत्सरीक्षिता।
नास्त्येव तर्हि बुद्धस्य लोकबुद्ध्यैवमेषिता ॥१४२॥

"असत्यपि सुगतस्याविद्योपप्लवविकल्पतया तद्वशाद्यो मिथ्याज्ञाने प्राक्त्यक्तज्ञानबलित्वात् संस्कारानुपपत्तेः एष एव बहिर्भावानुपदेशः। तदुक्तम्–"पूर्वाविद्येव देशनासम्भवावासक्रमप्रणवत्" [प्र० वार्तिकाल० २।२१९] इति चेत्, तन्न, "यस्मात्तवापि बुद्धस्याज्ञानत्वं चेत्, सिद्धमज्ञातोपदेशित्वम्। तस्य ज्ञानत्वेऽपि मिथ्याज्ञानत्वं चेत्, न, तद्वशाद्यं तदभावात्। पूर्वमासीदिति चेत्, न, तस्येदानीं क्षयविनष्टानुपयोगादात्मदर्शनवत्। यदि पुनरपक्रान्तस्यापि मिथ्याज्ञानस्येदानीमुपदेशहेतुत्वम्, आत्मदर्शनस्यापि "विपापक्रान्तस्य पुनरुत्पत्तिनिबन्धनत्वं भवेदिति सुगतस्य पुनर्जननमात्मदर्शनादयश्च दोषा भवेयुः पुनरुत्पत्तेस्तदूपत्वात्, "पुनरावृत्तिरित्युक्तो जन्मदोषसमुद्भवो" [प्र० वा० १।१४२] इति वचनात्। तथा च दुर्ग्राहमेतत्–"आत्मदर्शनमीक्षस्य

---

१ वस्तु। २ –ज्ञानत्व– आ०, ब०, प०, स०। ३ बाह्यग्राह्यभेदाभेदाकारणमावादेः। ४ "वैदर्भं लोकबुद्धौ बाह्यविज्ञप्ति प्रतन्वते" –प्र० वा० २।२१९। ५–कार वि आ०, ब०, प०। ६ विनेयसम्बन्धिन्या विज्ञप्तेः। ७ सुगतस्य। ८ "अनाद्यविद्योपप्लुतात्मनामप्रहीणक्लेशज्ञानानां पुंसां यथार्थं यस्य प्रमेयं च आत्मीयः यथार्थं प्रत्यक्षज्ञानापेक्षयमनीयः। तस्माद्धेतवो ग्राह्यग्राहकाद्या यस्याः सा तादृशी विज्ञप्तिर्जायते। तिमिरादिवत्" तिमिरादिवि, विषयाकारबन्धनत्वादिविशिष्टेः।" –प्र० वा० प्र० २।२१७। ९ धर्मकीर्तेः। १० असत्यस्यापि आ०,ब०,प०,स०। ११ पूर्वाविद्येव आ०,ब०,प०,स०। पूर्वमविद्येव। १२ यस्मात्तवापीत्यत्र आ०,ब०,प०,स०। १३ पूर्वमित्यस्य। १४ सुगतस्यापि। १५ विरोधः–आ०, ब०, प०, स०।

हानादपुनरागमः" [प्र० वा० १।१४३] इति । प्रागप्यात्मदर्शनं न सुगतस्येति चेत्; न तर्हि तस्य कदाचिदपि संसारः कारणाभावात् । आत्मदर्शनं हि संसारस्य मूलकारणं तृष्णाया अपि संसारहेतोस्तत्प्रभवत्वात् । तदभावे चानादिरेव संसारविरहः प्रसज्येत कारणाभावे कार्याभावस्य नियमात् । न चैवम्, उपायाभियोगनिबन्धनस्य तद्विरहस्याभ्युपगमात् । न चासतो विरहः संसारस्य खरशृङ्गवत् । सतोऽपि न विनात्मदर्शनेन सम्भवः, तदन्यहेतुकत्वस्य चाहेतुकत्वस्य च स्वयमनभ्युपगमादित्यस्त्येव तस्यापक्रान्तमात्मदर्शनम्, ततश्च मिथ्याज्ञानात्तत्कार्यमिव कथमिदानीं न पुनरावृत्तिर्भवत्विति चेत् ? न; "अपुनरावृत्त्या गतः सुगतः" [ ] इत्यस्य विरोधात् । किञ्च,

आत्मदर्शनमुच्छिन्नमपि कार्यं करोति चेत् ।
व्यर्थमेव मुमुक्षूणां तदुच्छेदाय चेष्टितम् ॥१४३॥
मिथ्याज्ञानादपक्रान्तान्मिथ्याज्ञानं न तस्य किम् ।
उपदेशस्ततो भावी न तदित्येष विस्मयः ॥१४४॥
मिथ्याज्ञानमलेनैवं परितः परिवेष्टिता ।
विधूतकल्पनाजाला मूर्त्तिस्ताथागती कथम् ? ॥१४५॥

यत्पुनरत्र परस्य समाधानम्—

"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधा यत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः" ॥

न हि स्वभावो यत्नरहितेन निवर्त्तयितुं शक्यः । यत्नश्च दोषदर्शिनो गुणेषु प्रवर्त्तते दोषेषु च गुणदर्शिनः । न च सात्मीभूतनैरात्म्यदर्शनस्य दोषेषु गुणदर्शनं न गुणेषु दोषदर्शनमदर्शनं वा गुणेषु, नैरात्म्यदर्शनस्य निरुपद्रवत्वात् ।

ततः स्वभावो भूतात्मा निरुपद्रव एव च ।
कथमस्य परित्यागः शक्यः कर्तुं सचेतसा ॥
पक्षपातश्च चित्तस्य न दोषेषु प्रवर्त्तते ।
ततस्तस्य न दोषाय यत्नः कश्चित्प्रवर्त्तते ॥" [प्र० वार्तिकाल० १।२१२] इति;

तन्न समीचीनम्, मिथ्याज्ञानवत् मिथ्योपदेशस्याप्यभावप्रसङ्गात्, तस्याप्यभूतार्थविषयस्य सोपद्र-

---

१ "यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः । स्नेहात् सुखेषु तृष्यति तृष्णा दोषास्तिरस्कुरुते । गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते । तेनात्माभिनिवेशो यावत् तावत् स संसारे॥"—प्र०वा० १।२१९–२२१। २ प्रागप्यात्मदर्शनाभावे । ३ नैरात्म्यदर्शनाभ्यासस्य साधनस्य । ४ द्रष्टव्यम्—प्र० वा० स्ववृ० ३।३६–३७ । ५ सुगतस्य । ६ "अपुनरावृत्त्या गमनं सुगतत्वम्···"—प्र०वा०म० १।१४२ । ७ सुगतस्य । ८ मिथ्याज्ञानयुक्तसुगतात् । ९ "विधूतकल्पनाजालगम्भीरोदारमूर्त्तये" (प्र० वा० १।१) इत्यादिना स्तूयमाना । १० "दोषराशेरुद्रेजकस्य प्रहाणेन निरुपद्रवस्य प्रमाणसंवादित्वेन भूतार्थस्य सत्यार्थस्यानारोपितत्वेन स्वभावस्य प्रकृतेर्नैरात्म्यस्याभिरुचितविषयस्य विपर्ययेष्वात्माद्याकारेष्वभ्यासे सोपद्रवत्वादिना प्रयत्न एव तावन्न सम्भवति प्रेक्षस्य । सम्भवेपि वा विपर्ययैः न बाधा नैरात्म्यस्य सात्मीभूतस्य स्वभावस्यास्ति बुद्धेस्तत्र दोषप्रतिपक्षे गुणवति मार्गे पक्षपातात् ।"—प्र० वा० म० १।२१२ ।

वत्वेन दोषत्वात्, दोषतया च निश्चिते तस्य प्रयत्नासम्भवात्। प्रयोजनवशादोषेऽपि प्रयत्न इति चेत्, न, पक्षपातामावे तदसम्भवात्। नैं च दोषे पक्षपातः "पक्षपातश्च चित्तस्य" इत्यादि विरोधात्। दोष एवार्थे नैं भवति प्रयोजनवत्त्वेन गुणत्वादिति चेत्, नं, गुण एवार्थे न भवति अमूतार्थत्वेन दोषत्वात्। प्रयोजनवत्त्वं गुणो दृश्यत इति चेत्, न, अमूतार्थत्वस्य दोषस्यापि दर्शनात्। तथा च,

गुणत्वान् पक्षपातोऽस्मिन् दोषत्वात्तद्विपर्ययः।
युगपत्प्राप्नुयातां ते धर्माधर्मान्योन्यबाधितौ ॥१४६॥
पक्षपातादिधेयत्वमविधेयत्वमन्यतः।
क्वपदेशस्य तच्चैतद्दोःस्थ्यं ते महदागतम् ॥१४७॥
तदस्मासङ्कटादेशान्निर्मुच्येत यथागतः।
कथन्नामेति चेतो मः कृपया परिपीड्यते ॥१४८॥

वस्तुभूतेऽप्यमूतार्थतया दोषत्वे गञ्जनिमीलनं कृत्वा गुणत्वस्यैव प्रयोजनवत्त्वलक्षणस्याभिसन्धानात् पक्षपात एवै न तत्र विपर्ययैं इति चेत्; किं तत्प्रयोजनं यत्पक्षपातनिबन्धनं भवेत्? मार्गावतैरो विनेयानामिति चेत्, कः पुनरसौ मार्गः? वहिरर्थाविज्ञानमेवेति चेत्; कस्यासौ मार्गः? पुरुषार्थस्य प्रवृत्तिनिवृत्त्यादिलक्षणस्येति चेत्, न, वस्तुतत्त्वमावात्, स्वयं तथैवाभ्युपगमात्। अवस्तुसतश्च दोषबेनापक्षपातविषयत्वात् कथं तदर्थोऽयं कारणान्वेषणप्रयत्नलक्षणागतस्य? दोषे दोषतया निर्णीते तदसम्भवाच्च, अन्यथा "यच्चान्य दोषेषु गुणदर्शिनः" इत्यस्य विरोधात्। प्रवृत्त्यादेरपि प्रयोजनवत्त्वेन गुणत्वात् पक्षपातविषयत्वमेव, अभूतार्थत्वेन तु दोषत्वे सत्यपि गञ्जनिमीलनविधानादिति चेत्, न, "तत्प्रयोजनस्याप्यपरप्रवृत्त्यादिरूपत्वेन 'वस्तुतत्त्वमावात्' इत्यादेरावृत्त्या चक्रकानवस्थयोः प्रसङ्गात्। तदन्यत्वपक्षे च समाधानस्यानिवार्यत्वात्। तत्र प्रवृत्त्यादिः पुरुषार्थः। निःश्रेयसमेव स्यान्मिथ्यं पुरुषार्थ इति चेत्, न, तत्र वहिरर्थाविज्ञानस्यामार्गत्वात् सकलधर्मनैरात्म्यदर्शनस्यैव तन्मार्गत्वेनोपगमात्। "मुक्तिस्तु शून्यतादृष्टेः" [प०वा० १।२५५] इति वचनात्। तत्र वहिरर्थाविज्ञानं मार्गः। सम्यग्ज्ञानमेव तर्हि नैरात्म्यदर्शनं मार्ग इति चेत्, न, तत्र तस्यापदेशस्यैव हेतुत्वात्। न हि तस्यापदेष्टाऽयमर्थस्तत्त्वोपदेशाद् अनन्तरभूमवत्। अतस्त्वापदेशाभावमुपदेक्षो वहिरर्थाद्वेतविषयस्य वस्तुवृत्तेनाभावात्। मिथ्योपदेशादपि तत्त्वज्ञानं चेत्, न, मिथ्याज्ञानादपि प्रसङ्गात्। तत्त्वसिद्धिनिबन्धनत्वे मिथ्याज्ञानत्वमेव तस्य न स्यादिति चेत्, न, क्वपदेशस्याप्यर्थतैं एवामिथ्यात्वप्रसङ्गात्। तत्र वहिरर्थाविज्ञानं नैरात्म्यज्ञानं वा तदुपदेशस्य प्रयोजनं यतस्तत्र पक्षपातात्प्रयत्नो-

---

१ न तर्हीये आ०, ब०, प०, स०। २ मिथ्योपदेशः। ३ न च म–आ०,ब०, प०, स०। ४ मिथ्योपदेशे। ५ एव तत्र ता०। ६ उपदेशे पक्षपातामाव। ७ –र्थवत्तायो आ०, ब०, प०। ८ प्रवृत्तिलक्ष–आ०, ब०, प०, स०। ९ चैवैः। १० तस्यापी–आ०, ब०, प०। ११–रात्म्यस्यैव आ० ब०, प०। १२ तत्त्वसिद्धिनिबन्धनत्वादेव।

भवेत् । अप्रयत्नेऽपि च [1]'पूर्ववेधात् भवति तदुपदेशः । न हि प्रयत्नादेव सर्वं कार्यम् अप्रयत्नानन्तरीयकस्य विद्युदादेरभावप्रसङ्गादिति चेत् ; उक्तमत्र–'सुगतस्य मिथ्याज्ञानमपि भवेत् तत्कारणस्यापि [2]तदावेधस्य भावात्'इति । [3]तेन चाप्रयत्नसिद्धेनैवं तत्त्वज्ञानबाधेन सम्भवादसम्बद्धमेतत्–'निरुपद्रव' इत्यादि । सतोऽपि मिथ्याज्ञानस्य तत्त्वज्ञानाबाधकत्वे [4]प्रागपि न स्यात् । सत्यमेतत्, मिथ्याज्ञानस्यैव वस्तुतः कस्यचिदभावात् , असतो हि विषयस्य ग्रहणे मिथ्यात्वम् , स च बहिर्भावादिरेव, न चास्य क्वचित्प्रागपि प्रत्यवभासनं स्वरूपमात्रवस्तुविषयत्वात् सर्वसंवेदनानाम् , केवलं भौतमुद्रामात्रकमेवैतत् यत्तर्द्दवभासकल्पनम् । ततो न प्रागपि [5]श्रुतचिन्ताकाले सम्यग्ज्ञानं वा(नवा)धनसामर्थ्यं मिथ्याज्ञानमलानां किं पुनर्विधूतसकलविप्लवे सुगतभावे प्रभास्वरचित्तमयत्वात् तदा भगवतः ? तदुक्तम्–

"प्रभास्वरमिदं चित्तं प्रकृत्याऽगन्तवो मलाः ।
तत्प्रागप्यसमर्थानां पश्चाच्छक्तिः क्व तन्मये [6] ॥" [प्र० वा० १।२१०]

इति चेत्; न; [7]उक्तोत्तरत्वात् । असति वस्तुवृत्त्या मिथ्याज्ञाने न तन्निबन्धनो रागादिरित्यनादिशुद्धिः सुगतस्य स्यात् । अविद्यापरिकल्पितमस्त्येव तदिति चेत् ; न ; सतोऽपि तस्य रागादावन्यत्र [8]चासामर्थ्यात् । अपि च,

मिथ्याज्ञानमशक्तं चेत्तत्त्वसंवित्तिबाधने ।
मिथ्योपदेशसामर्थ्यं कथं [9]तस्यावकल्प्यताम् ? ॥१४९॥

यदि सन्निहितमपि मिथ्याज्ञानं तत्त्वज्ञानबाधनाय न समर्थम् अविद्यानिर्मितस्य तस्यैव विचारासहत्वादिति; हन्तैवं कथं [10]तादृशस्यैव तस्य चिरापक्रान्तस्य मिथ्योपदेशसामर्थ्यं यतो बहिरर्थादिदेशना बुद्धस्य भवेत् ? ततो नासामर्थ्यात्तस्य [11] [12]तद्बाधनम् अपि त्वसत्त्वात्, तदपि चिरातीतस्याहेतुत्वादेव, तद्वन्मिथ्योपदेशोऽपि चिरापक्रान्तान्मिथ्याज्ञानान्न सम्भवति । नापि तात्कालिकात्; सुगतावस्थायां [13]तदभावात् । तन्न लोकबुद्ध्या मिथ्याविकल्परूपया [14] बहिरर्थादिचिन्ताप्रतननं बुद्धानाम् । यत इदं सूक्तम्–

"तदुपेक्षिततत्त्वार्थैः कृत्वा गजनिमीलनम् ।
केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते ॥" [प्र० वा० २।२१९] इति ।

---

१ पूर्ववेदात् आ०, ब०, प०, स० । पूर्वसंस्कारात् । २ तदावेदकस्य आ०, ब०, प०, स० । पूर्वमिथ्याज्ञानसंस्कारस्य । ३ मिथ्याज्ञानेन । ४ प्रयत्नं विना केवलं संस्कारसमुद्भूतेनैव । ५ संसारावस्थायामपि । ६ बहिरर्थावभास । ७ "तत्र श्रुतमयी श्रूयमाणेभ्यः परार्थानुमानवाक्येभ्यः समुत्पद्यमानेन श्रुतशब्दवाच्यतामास्कन्दता निर्वृत्ता परं प्रकर्षं प्रतिपद्यमाना स्वार्थानुमानलक्षणया चिन्तया निर्वृत्तां चिन्तामयीं भावनामारभते ।"–आत्मप० का० ८३ । ८ "प्रभास्वरमिदं चित्तं नित्यत्वविरहितस्यैव तेन ग्रहणादागन्तवो मलाः, असद्भूतसमारोपस्यामूलकत्वेन भौतमुद्रामात्रकत्वात् न परमार्थतो नित्यत्वं क्वचित्प्रतिभाति ।"–प्र० वार्तिकाल० १।२१० । ९ दत्तोत्त–आ०, ब०, प०, स० । १० मिथ्याज्ञानम् । ११ बासामर्थ्या–आ०, ब०, प०, स० । १२ चिरापक्रान्तमिथ्याज्ञानस्य । १३ अविद्याकल्पितस्यैव । १४ मिथ्याज्ञानस्य । १५ तत्त्वज्ञानबाधनाभावः । १६–बाह्य लो–आ०, ब०,प०, स० । १७–रूपतया आ०, ब०, प०, स० ।

नाऽपि तत्त्वज्ञानात्तत्प्रसञ्ननम्[1], बहिरर्थादेरवस्तुत्वेन तत्त्वज्ञानस्य तद्विषयत्वाद् अन्यथा मिथ्याज्ञानत्वप्रसङ्गात्। [2]विधिपरत्वेनैव तद्विषयत्वे मिथ्याज्ञानत्वं न [3]निषेधपरत्वेन, ततो निषेधविषयोपदर्शनार्थं तत्त्वज्ञानेनैव बहिरर्थानुवादेऽपि न दोष इति चेत्, न, तद्वाभित्येश्वरादेरप्यनुवादप्रसङ्गात्, तस्यापि निषेधविषयत्वाभ्युपगमात्। तथा च बहिरर्थादिवत्तस्यापि संवृतिसत्त्वोपपत्तेर्न किञ्चिदसौगतं मतं भवेत्। पूर्वपक्षस्येनानूद्यितस्य कथं सत्यत्वमिति चेत्? ५ कथं बहिरर्थादेरिति समानम्? मा भूत्तस्यापि तैवेति चेत्, तत्समत्वाहिं संवृतिसत्यव्यवहारो बहिरर्थादिव्यतिरेकेण तदसम्भवात्। तत्र तत्त्वज्ञानादपि तत्प्रसञ्ननमिति सिद्धमज्ञातोपदेशित्वं बुद्धस्य, तदज्ञानात्तत्त्वम् अनपदेशवचनत्वात्। नैं ज्ञातस्य वचनं प्रेक्षावतामनवद्येमिति चेत्, साधुचोदक, साधीयस्तव चोद्यम्, अमुमदमेवैतदस्माकम्[4]। न हि चोद्यमित्येव समाधातव्यम्, न्यायोपपन्नस्यानुमतिविषयत्वात्। १०

सम्यग्ज्ञपार्थं तु सशयितस्य विपर्यस्तस्य चोपदेशनिर्देश्यर्थम्, तदुपदेशेऽप्युपदेष्टुरनवद्येयवचनत्वेनाज्ञातत्वप्रसङ्गात्। तत्र—

सन्दिग्ध संविदद्वैतम्, तद्धि नः (न) प्रतिभासतः।
सिद्ध्यति, प्रतिभासस्य बहिर्भावे[5] विभावनात्॥१५०॥
न तस्यं[6] प्रतिभासोऽस्ति, अद्वैतस्य कथं भवेत्? १५
अपह्नवे हि दृष्टस्यादृष्टस्यं[7] सितरामयम्[8]॥१५१॥
बहिर्भोऽपि यद्यस्ति तद्वैतं कथं भवेत्?
न हि ज्ञानार्थयोर्भावे द्वयोरद्वैतसङ्गतिः॥१५२॥
बाध्यत्वात्प्रतिभासोऽपि [9]नास्यसाक्षित्वसङ्गतम्।
बाध्यबाधकभावस्य स्वयं [10]बौद्धैर्निराकृतेः॥१५३॥ २०
संवृत्या बाधनेऽर्थस्य वस्तुतस्तदनिह्नवात्।
अद्वैतं [11]सांवृतं प्राप्तं प्राप्तं बाह्यं तु वस्तुसत्॥१५४॥
तस्माद्भिर्मासतो वस्तुसदसत्त्वानुषाविनः।
सन्दिग्धं संविदद्वैतं तत्र वाच्यं मनीषिणाम्॥१५५॥
एवं बुद्धकल्पितं सर्वैः सर्वथैकान्तवादिभिः। २५
तत्प्रमाणविपर्यस्तमनाप्तोपज्ञमुच्यते॥१५६॥

'सम्यग्ज्ञानजलैः' इति बहुवचनं तद्बहुत्वस्य वक्ष्यमाणत्वात्। एवमपि बहुमिरेव प्रक्षालनं नैकेन नापि द्वाभ्यामिति प्राप्तमिति चेत्, आह—'कथमपि' इति। एकादीनां मध्ये

---

१ बाह्यचिन्तानिवारः। २ बाह्यार्थाः सन्तीति विधिरूपतया। ३ बाह्यार्थाभाव इति निषेधरूपतया। ४ निषेधपरादेरपि। ५—गतं भ—ज्ञा०, ब०, प०, स०। ६ बहिरर्थादेरपि। ७ सत्यत्वम्। ८ अस्य- बहिरुपह्नवति। ९ चैत्र स्व—ज्ञा०, ब०, प०, स०। १० चैतन्यम्। ११—वेऽपि मार्ग—ज्ञा०। अस्मिन् पाठे अपिशब्दः एवार्थको ज्ञेयः। १२ बहिर्भावत्वं। १३ संवेदनाद्वैतस्य। १४ अपह्नवः स्यात्। १५ नास्ति बहिर्थः। १६ द्वयम्—ब० वार्तिकाल० २।३३।१ पृ० ४१। १७ खप्नसम् ज्ञा०, ब०, प०, स०।

केनापि प्रकारेणेति। एकेन तत्प्रक्षालने किं तत्र द्वाभ्यां बहुभिर्वा वैयर्थ्यादिति चेत्? न; ततोऽपि तदतिशयस्य सम्भवात्, सम्यग्ज्ञानानां सापत्न्यस्याभावाच्चेति निवेदनात्। कथं तर्हि बहुवचने द्व्यादिप्रतिपत्तिरिति चेत्? न; बहुषु द्व्यादेरन्तर्भावेन तत्तत्प्रतिपत्तेरविरोधात्। कैर्नेनीयते? इत्याह **वचोभिः**। न्यायविनिश्चयवचनैरिति। **'प्रत्यक्षलक्षणम्'** इत्येवमादीनि हि तद्वचनानि, तैश्च प्रत्यक्षादिकमेव निर्मलत्वं नीयते नाम्नायस्तत्कथं[1] तैः स तन्नेनीयत इत्युच्यत इति चेत्; न; तृतीये[2] तैरेवाम्नायस्यापि तन्नयनात्। प्रत्यक्षादेस्तर्हि तन्नयनं किमर्थम् अप्रस्तुताभिधानदोषादिति चेत्? न; तस्याप्याम्नायपरिशोधनार्थत्वात्। प्रत्यक्षादौ हि निर्मलतां नीते निर्मलतत्प्रमाणपरिशुद्धद्रव्यपर्यायसामान्यविशेषात्मकजीवादिपदार्थगोचरतया सुपरिशुद्धमाम्नायज्ञानप्रामाण्यं भवति। अत एव प्रत्यक्षादिकं परिशोध्य पश्चादाम्नायः परिशोधितः, निश्चितप्रामाण्यप्रत्यक्षाद्यविरोधेन निष्प्रतिपक्षस्याम्नायप्रामाण्यस्य व्यवस्थापनार्थम्। यदक्ष्यति— "सकलागमार्थविषयज्ञानाविरोधं बुधाः प्रेक्षन्ते" [न्यायवि० श्लो० ३८५] इति। लोकप्रसिद्धमेव परिशुद्धं प्रत्यक्षादिकं[6] किं तत्परिशोधनेन? परिशुद्धशोधने अतिप्रसङ्गादिति चेत्; न; तस्याप्याम्नायवन्मलिनीकृतत्वात्। न तर्हि कस्यचिदपि परिशोधनम् उपायाभावात्, सर्वप्रमाणमलिनीभावे हि क इवोपायः परिशोधनस्य स्यात्, प्रमाणस्यैव परिशोधनोपायत्वात्, तस्य च मलिनीभावात्, अप्रमाणस्य तदुपायत्वे प्रमाणकल्पनावैयर्थ्यम्, प्रमाणवत्प्रमेयस्यापि अप्रमाणदेव परिशोधनोपपत्तेः।

यदि सर्वप्रमाणानामुच्यते मलिनीकृतिः।
उपायाभावतस्तेषां परिशुद्धिक्रिया कथम्? ॥१५७॥
प्रमाणस्यैव वक्तव्या परिशुद्धावुपायता।
न च तन्मलिनीभूतमुपायत्वाय कल्पते ॥१५८॥
मलीमसमुपायश्चेत्; मलप्रक्षालनं वृथा।
अप्रमाणमुपायश्चेत्; प्रमाणान्वेषणं वृथा ॥१५९॥
प्रमेयपरिशुद्धिश्च प्रमाणपरिशुद्धिवत्।
अप्रमाणादुपायात् यत्प्रसिद्धिपदमृच्छति ॥१६०॥
इति चेत्; असदेतत्; यन्न हि सर्वं मलीमसम्।
प्रमाणम्, परिशुद्धस्य सम्भवात्तस्य कस्यचित् ॥१६१॥
तेनैं चापरिशुद्धस्य परिशोधनसम्भवात्।
उपायाभावतो नास्ति शुद्धिरित्यसमञ्जसम् ॥१६२॥
सर्वशून्यप्रवादे हि शून्यज्ञानमकल्मषम्[7]।
सकल्मषान्न तज्ज्ञानाच्छून्यत्वं यत्प्रसिद्ध्यति ॥१६३॥

---

१ बहुवचनात्। २ वक्ष्यमाणकारिकारूपाणि। ३ तैः वचोभिः स आम्नायः तत् अमलत्वं नेनीयते। ४ प्रवचनप्रस्तावे। ५ अमलत्वप्रापणात्। ६-कं किं तत्परिशुद्धशोधनेन आ०, ब०, प०, स०। ७ परिशुद्धप्रमाणेन। ८ अविसंवादि प्रमाणं स्वीकर्तव्यम्।

अशून्यवेदनं तेन नीयते निर्मलां दशाम् ।
यैरशून्यं न किञ्चिदस्याच्छून्यज्ञानं कथं भवेत् ? ॥१६४॥
शून्यज्ञानं भवत्तच्च स्वसत्तां प्रत्यनाकुलम् ।
[1]भावसंविन्निनैर्मल्यं [2]स्यादेऽयद्येतयस्यलम् ॥१६५॥
[3]द्वैतवेदनेनैर्यं निर्मलेन मलीमसम् । ५
विधूतमलसम्बन्धं भवेद् [4]द्वैतप्रवेदनम् ॥१६६॥
अथाचितोपलम्भश्चेद्द्वैतमत्रकल्पयेत् ।
[5]द्वैतं किन्न मैं एवायमत्रकल्पयितुं क्षम ॥१६७॥
अस्ति चे [6]द्वैतसंवित्तिरस्ति चास्यामबाधनम् ।
इति निर्णीयते [7]पंश्चादलमत्राग्रहेण से ॥१६८॥ १०
स्वरूपवेदनं चास्य संविदा परिशुद्धिमत् ।
तस्य तेन बहिर्वस्तुशुद्धिः शुद्धिपथं व्रजेत् ॥१६९॥
बहिर्वस्तुपरिच्छेदि न किञ्चिदपि वेदनम् ।
[8]संवेदनबहुत्वं तु प्रसिद्धमिति कुत्सितम् ॥१७०॥
अनासादितबाधत्वान्निर्मलं चेत्स्वयंवेदनम् । १५
अर्थवेदनमप्यस्तु ततोऽर्थोऽस्तु निराकुलः ॥१७१॥
स्वसंवेदननैर्मल्यमर्थनिर्मलवेदनात् ।
सिद्धमेतेन बोद्धव्यमन्यथा" सदसम्भवात् ॥१७२॥
[9]एकान्तवेदनं यच्च परिशुद्धं परैर्मतम् ।
बुद्धिस्तेनाप्यनेकान्तगोचरा" परिशुद्ध्यति ॥१७३॥ २०
एवमादि यथान्याय सूरिर्विस्तारयिष्यति ।
तत्किमायासैः किमस्माकं [10]"अन्यविस्तरकारिभिः ॥१७४॥

तस्मादान्यपरिशोधनोपायत्वादुपप्लवमध्यआदिपरिशोधनम् । तत्परिशोधनोपायस्यापि परिशोधनादनवस्थानमिति चेत्, न, अपरिशुद्धस्यैव परिशोधनात्, प्रसिद्धपरिशुद्धिकस्य [11]"तद्भावात्, [12]तेनैवापरपरिशोधनात्, [13]"तत्सद्भावस्य चानन्तरमेव निवेदनादिति न किञ्चिदवद्यम् । ततः सूक्तम्— २५

---

१ 'सर्वं शून्यम्' इति वैदन्तं यदि सकल्पर्यं तदा सर्वस्य अशून्यत्वमेव स्यादिति भावः । २ यदि सर्वशून्यतां ग्राहकं प्रमाणमपि अशून्यं न स्यात् तदा कथं सर्वशून्यताप्रतिपत्तिः ? ३ अशून्यमय चाविसंवादि । ४ यत्रा शून्यज्ञानमशून्यं तथा बाह्यार्थज्ञानमप्यशून्यं स्यादिति भावः । ५ स्यतो बद्धो—ता०, ब० । स्तो विधौ—ब० । ६ शून्यद्वैतग्राहीत्र । ७ बाह्यार्थज्ञानम् । ८ द्वैतविषयकाऽबाधितोपलम्भः । ९ वेद्यद्वैतं—आ०,ब०, प०, स० । १० पश्चादप्यत्र प्रद्वेष—आ० ब०,प०,स० । ११ चतुष्टयादिविषयमेवात् संवेदनबहुत्वम् । १२ अर्थवेदननैर्मल्याभावे संवेदननैर्मल्यमपि न स्यादिति भावः । अन्यथा आ०, ब०, प० स० । १३ सर्वथा शून्यिकत्वादिमाहकम् । १४ तत्सैमेतेन रूपेण सदसत्त्वमकम् तत्स्वरूपेण असदरूपमभिति सदसदात्मकवस्तुग्राहिणी बुद्धिः स्यात् । १५ अन्यविस्तार—ब० । १६ परिशोधनाभावात् । १७ प्रगिद्धपरिशुद्धिकस्य ज्ञानस्य ।

'वचोभिः' इति। अनेन न्यायनैर्मल्यनयनस्यानन्योपायत्वं दर्शयति, अन्योपायत्वे तद्वचनासम्भवात्। वचसामप्रमाणत्वात् कथं [1]तैः स तन्नेनीयत इति चेत्? न; तत्प्रामाण्यस्य वक्ष्यमाणत्वात्।

यस्य[2] तु तेषामवस्तुविषयत्वात् प्रामाण्यमनभिमतम्, तस्य निष्प्रयोजनमेव शास्त्रं [3]तेन कस्यचिदप्यर्थस्यानिवेदनात्, तन्मतोपजीविनो वादिनश्च निग्रहावाप्तिः असाधनाङ्गवचनात्। तथा च [4]देवस्य वचनम् "समस्तो वा वाक्यराशिरनर्थकः" [ ] इति[5]। न वचनमात्रस्यानर्थकत्वं प्रमाणानुपपन्नवस्तुवादिनो वेदादिवचनस्यैवानर्थकत्वात्, निरवद्यप्रमाणपथःपरिपेक्परिशुद्धस्य तु त्रिरूपस्य लिङ्गस्य तत्साध्यसम्बन्धस्य च प्रतिपादकं वचनं प्रमाणमेव तस्य परार्थानुमानत्वेन सौगतैरङ्गीकरणात्। न च शास्त्रस्य निष्प्रयोजनत्वम्; लिङ्गतत्साध्यसम्बन्धाभिधायित्वेन तस्य प्रयोजनवत्त्वात्तस्यापि परार्थानुमानत्वात्। न च तन्मतोपजीविवादि-वचनस्याऽसाधनाङ्गवचनत्वम्, लिङ्गादेः साधनाङ्गस्यैव तेनाभिधानादिति चेत्; न; वचसामवस्तुविषयत्वाभावप्रसङ्गात्। तथा हि— तेषामवस्तुविषयत्वं प्रसज्यप्रतिषेधेन वा स्यात् [10]'वस्तुविषयत्वं वचसां नास्ति' इति," पर्युदासेन वा स्यात् 'वस्तुनोऽन्यदवस्तु तद्विषयत्वं वचसाम्'इति? न तावदाद्यो विकल्पः; लिङ्गस्य तत्साध्यसम्बन्धस्य च वस्तुनः [11]तद्विषयत्वात्। [12]तद्व्यतिरिक्तं वस्तु न तद्विषय इति चेत्; कुत एतत्? व्यभिचारात्, व्यभिचरन्ति हि शब्दा घटादिकं वस्तु तदभावेऽपि तत्प्रवृत्तेरिति चेत्; अत एव लिङ्गादिविषयत्वमपि न स्यात्, शब्दादौ चाक्षुषत्वाद्यभावेऽपि [13]तद्वचसां प्रवृत्तिदर्शनात्, अन्यथा तदसिद्धत्वाद्व्युद्भावनाभावप्रसङ्गात्। न ह्यनभिहितस्य दोषोद्भावनमुपपन्नम्; अतिप्रसङ्गात्। शब्दान्यत्वमन्यत्रापि समानम्।

स्यान्मतम्— अन्य एव स शब्दो यश्चाक्षुषत्वादौ सत्येव भवति, सोऽन्य एव यस्तदभावे। न चान्यस्य दोषेणान्यस्य दोषवत्त्वं चौरदोषेण साधोरपि तद्वत्त्वप्रसङ्गादिति; तन्न; अन्यत्रापि समानत्वात्। [14]अन्येषामपि हि शब्दानां स्वविषयभावभाविनां तद्विपरीतानाञ्च परस्परतो विशेषात्। विशेषानवभासनस्य[15] च [16]लिङ्गशब्देष्वपि समानत्वात्[17]।

एतेन पर्युदासोऽपि प्रत्युक्तः; लिङ्गशब्दवदितरेषामपि वस्तुगोचरत्वेन अवस्तु-[18]विषयत्वानुपपत्तेः। लिङ्गशब्दानामप्यवस्तुविषयत्वमेव लिङ्गस्यावस्तुरूपत्वात्, स्वलक्षणं हि वस्तूच्यते तस्यैवार्थक्रियासामर्थ्यात्, न च तस्य लिङ्गत्वमनन्वयात्, साध्येनान्वितं च लिङ्गम्, स्वलक्षणस्य च न धर्मिणि तदन्वयः[20] शक्यनिर्णयः, साध्यस्याद्याऽप्यनध्यवसायात्। न चानध्यवसिते साध्ये [21]तदन्वयः सुकराऽध्यवसायः; अतिप्रसङ्गात्। सपक्षे

---

१ वचनैः न्यायः अमलत्वं प्राप्यते। २ बौद्धस्य। "वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते। प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥"—प्र०वा० १।४। ३ शास्त्रेण। ४ पक्षसिद्ध्यङ्गभूत। ५ वेदस्य आ०, ब०, प०, स०। ६ इति वच—आ०, ब०, प०, स०। ७—ध्यसम्बद्धस्य स०। ८ "त्रिरूपलिङ्गाख्यानं परार्थानुमानम्। त्रीणि रूपाण्यन्वयव्यतिरेकपक्षधर्मत्वसंज्ञकानि यस्य तत् त्रिरूपम्। त्रिरूपं च तल्लिङ्गं च तस्याख्यानम्।"—न्यायवि० पृ० ६१। ९—नस्य सा—आ०, ब०, प०, स०। १०—दवस्तु—आ०, ब०, प०, स०। ११—ति विपर्यु—आ०,ब०,प०,स०। १२ त्रिरूपलिङ्गवचन। १३ लिङ्गतत्साध्यसम्बन्धव्यतिरिक्तम्। १४ अनित्यः शब्दः चाक्षुषत्वादित्यादीनाम्। १५ घटपटादिशब्दानाम्। १६ घटपटादिशब्देषु इमे शब्दाः स्वविषयसद्भावे प्रयुक्ता इमे च तदभावे इति भेदानवभासनम्। १७ लिङ्गवाचकशब्देष्वपि। १८—त्वादिति न आ०, ब०, प०। १९—विषयत्वेनानुप—आ०,ब०,प०, स०। २०—यशक्य—आ०, ब०, प०। २१ स्वलक्षणलिङ्गान्वयः।

तदन्तरायाभ्यवसाय इति चेत्, न, धर्मिगतस्य हेतुस्वलक्षणस्यान्यत्रासम्भवात्, तत्रैवोपलम्भात्। तैर्माविभास्याप्यन्यत्र भावे न किञ्चित्तत्रौपदेशिकं स्यात्। सामान्यरूपेण तदेवान्यत्रेति चेत्, न, तैद्रूप्यस्य व्यतिरिक्तस्याभ्यतिरिक्तस्य वा स्पष्टप्रतिभासेनापरिच्छेदात्। प्रत्यभिज्ञानेन तत्परिच्छेद इति चेत्, न, तदग्रहणाभावे तैंदनुत्पत्तेः। वासनाबलात्तदुत्पत्तौ कामिन्याद्विज्ञानवदवस्तुविषयं प्रत्यभिज्ञानं भवेत्। अवस्तुविषयमेव तेदस्तु सामान्यस्य तद्विषयस्यावस्तुत्वादिति चेत्, सिद्धं तर्हि लिङ्गस्यावस्तुत्वं तस्य सामान्यरूपत्वात्। तदनेनैं तस्साध्यसम्बन्धस्याप्यवस्तुत्वं निवेदितम्। न हि सम्बन्धिनः सामान्यस्यावस्तुत्वे तत्सम्बन्धस्य वस्तुत्वमुपपद्यम्, वन्ध्यास्तनन्धयावस्तुत्वे तत्सौन्दर्यवस्तुत्वप्रसङ्गात्। तन्न लिङ्गादिशब्दानामपि वस्तुगोचरत्वं यतस्तद्वदन्येपामपि तद्गोचरत्वं सैम्भाव्येत इति चेत्, उच्यते—

अवस्तु यदि लिङ्गं स्यात्सर्वसाक्षिविवर्जितम्।
कथं तद्विषयो विज्ञेर्विषयः कारणं हि यैः ॥१७५॥

यद्यवस्तुरूपमेव लिङ्गं तैं तर्हि सकलशक्तिभ्यैकस्यस्वभावं कथं तत् कस्यचिद्विज्ञानस्य विषयः स्यात्? विज्ञान प्रति कारणस्यैव तद्विषयत्वात्, "नाकारणं विषयः" [ ] इति वचनात्। न चावस्तुनः कारणत्वम्, वस्तुत्वप्रसङ्गात्, अर्थक्रियासामर्थ्यस्य दस्तुलक्षणस्यैनाभ्यनुज्ञानात्। अकारणस्यैऽप्यवस्तुनो ग्रहणे वस्तुग्रहणमपि स्यादित्यसदेतत्—"नाकारणं विषयः" इति।

वस्तुनो यदि येोगवमनिमित्तस्य "कस्यचित्।
"सर्वैरयैकेन संवित्तिः "सर्वैरेकस्य वा भवेत् ॥१७६॥

सर्वस्य सर्ववेदित्वमनुषार्यं ततो भवेत्।
प्रतिपाद्याद्यिभावस्य कथयाऽपि कथं गतिः ॥१७७॥

अवस्तुवेदि(दे)नेप्येतद्दूषणं दृश्यते समम्।
ततस्तस्यापि" येोगवमहेतोरेवमुरुयताम् ॥१७८॥

यत्रकारणत्वेव कस्यचिद्वस्तुनो ग्रहणम्, तदा सर्वस्यैकेन ग्रहणम् अकारणत्वाविशेषात्पितृसुताभ्यासरहितमेव सर्वस्य सर्वदर्शित्वं भवेत्। वाद्यिप्रतिपाद्यस्यैव च प्रतिवादिना प्राश्निकेनेव नियमेन प्रतिपत्तौ न वार्त्तयापि प्रतिपाद्यप्रतिपादकभावः प्रतिष्ठयितुं शक्यते। न हि "प्रतिपन्नस्त्वाय एव परः प्रतिपादयितव्यः, प्रतिपादकस्यापि प्रतिपाद्यत्वेनानवस्थानप्रसङ्गादि-" त्यर्थं पर्यनुयोग परस्य स्वमर्त प्रत्यनुपगमभयमान्यमार्षेदृशति। न ह्यपरीक्षितं परीक्षालोचनः "स्व-

---

१ धर्मिमात्रीयत्वस्वभावस्यापि सपक्षे सद्भावे। २ अन्यथाप्यपि। ३ बौद्धदृश्या सन्तानोद्गमस्य सामान्यस्य। ४ प्रत्यभिज्ञानादुत्पत्तेः। ५ प्रत्यभिज्ञानम्। ६—न सा—आ०, ब०, प०, स०। ७ संम्भवते आ०, ब०, प०, स०। ८ बौद्धानाम्। ९ बौद्धस्य। तर्हि—आ०, ब०, प०, स०। १० "अर्थक्रियासामर्थ्यलक्षणाद्वस्तुनः।" —न्यायवि० टू० १२। ११ वस्य पेन् आ०, ब०, प०, स०। १२ शून्यैः। १३ वस्तुनोऽपि। १४ कृतार्थः। १५—वस्त्वाप्रमाणे—आ०, ब०, प०, स०। १६—चनस्य—आ०, ब०, प०।

पक्षघातिनमेव दोषं परपक्षे निक्षिपति। समानः स्वत्वयं पर्यनुयोगः [1]परस्यापि। अवस्तुनोऽप्य-कारणस्यैव ग्रहणे सर्वसर्वज्ञत्वस्य प्रतिपाद्यप्रतिपादकभावाभावस्य च समानत्वात्। न हि नियामकाभावे तत्रापि विज्ञानानां विषयप्रतिनियमः सम्भवति। विज्ञानशक्तेर्नियामकत्वं वस्तुग्रहणेऽपि समानम्। ततो वस्तुवदवस्तुनोऽपि नाकारणस्य संवित्तिरिति सर्वहेतूनां सुबुद्धमज्ञातासिद्धत्व-
५ मवबुध्यते। किञ्च, 'लिङ्गम्, अवस्तु च' इति व्याहतम्। लीनमर्थं गमयतीति हि लिङ्गम्, लीनार्थगमनञ्च नापरं तज्ज्ञानैकरणात्, न चावस्तुनस्तत्करणम्; वस्तुत्वप्रसङ्गादित्युक्तत्वात्। तत्कथं तद्वचनस्यासाधनाङ्गवचनत्वान्निग्रहस्थानत्वं न भवेत्? वस्त्वेकत्वाध्यवसायात् वस्त्वेव लिङ्गम्, वस्तुना हि धूमादिस्वलक्षणेन धूमत्वादिसामान्यमेकत्वेनाध्यवसितं वस्त्वेव ततो न तस्याशक्तिर्येनाग्रहणमलिङ्गत्वञ्चेति चेत्; न सारमेतत्; यस्मात्—

१० अवस्तुनोऽपि शक्तिश्चेद्वस्त्वेकत्वेन निर्णयात्।
अवस्त्वभेदनिर्णीतिरशक्तिर्वस्तुनो न किम्? ॥१७९॥
विशेषस्याप्यशक्तत्वे सामान्यवदवस्थिते।
कुतोऽनुमेयसंवित्तिं लभन्ते हन्त! सौगताः ॥१८०॥
एकत्वाध्यवसायेऽपि बलवत्त्वेन वस्तुनः।
१५ अवस्तुनि भवेच्छक्तिर्नाशक्तिर्वस्तुनीति चेत; ॥१८१॥
अननन्वितत्वमप्येवं वस्तुधर्मः कथन्न ते।
शक्तिवत्प्रविशेल्लिङ्गे वस्त्वेकत्वेन निश्चिते ॥१८२॥
सामान्यस्यैव लिङ्गत्वमन्वयार्थं तवेच्छतः।
असाधारणतास्यैवं प्राप्तेयं व्यभिचारकृत् ॥१८३॥
२० सामान्यं पुनरन्यच्चेदन्वयायोपमृग्यते।
[10]वस्त्वभेदनयाभावे कथं तस्यापि लिङ्गता ॥१८४॥
तदभेदनये तस्य प्राच्यवत्स्यादनन्वयः।
पुनः सामान्यकल्पिस्तु जनयेदनवस्थितिम् ॥१८५॥
एतेनाभ्यासभूमौ[11] यत्प्रत्यक्षमुपवर्णितम्[12]।
२५ अविसंवादशून्यत्वं तस्याप्युक्तमनन्वयात् ॥१८६॥

अभ्यासावस्थायां हि दृश्यप्राप्ययोरेकत्वमध्यारोप्य तत्सामर्थ्यादध्यक्षस्याविसंवादकत्वं[13]

---

१ बौद्धस्यापि। २ घटज्ञानस्य घट एव विषयः न तु पटः इत्याकारकः। ३—नकार—आ०, ब०, प०। ४—नस्तत्कारणत्वं ब—आ०, ब०, प०, स०। ५ सौगतमतोपजीविवादिवचनस्य। ६ अवस्तुना सह एकत्वाध्यवसायात् वस्तुनः अशक्तिः किन्न स्यात्? ७ यथा धूमस्वलक्षणगता शक्तिः एकत्वाध्यवसायबलात् धूमसामान्ये उपसङ्क्रामति तथा धूमस्वलक्षणगतमनन्वितत्वमपि धूमसामान्ये उपसङ्क्रामेत् तथा च अनन्वयात् न हेतुत्वमिति भावः। ८ भवेच्छतः आ०, ब०, प०, स०। ९ सामान्यस्यैव। १० वस्तुना सह एकत्वाध्यवसायाभावे। ११ अभ्यासबहुत्वे।—सभूमौ य—आ०, ब०,प०,स०। १२ वार्तिकालङ्कारे (१।२)। १३—स्यापि संवादकत्व—आ०, ब०, प०

मनुमन्यते परैः 'यदेव दृष्टं तदेव ग्राह्यम्' इत्यविप्रायनिवेदनाम्, तदेकत्वस्याप्यवस्तुस्वलक्षणाभेदाध्यवसाये वस्तुत्वभाषमूतानन्त्यव्यवसायानुपातित्वेन स्वान्यव्यवसायपरित्यागात् कथमविसंवादकारित्वं स्वलक्षणवत्, पुनरप्यविसंवादनिमित्तमेकत्वान्तरपरिकल्पनायां तदवस्थमनवस्थानम्।

स्यान्मतम्—न सर्वस्य वस्तुधर्मस्य बलक्षत्वं व्यवहारोपयोगिन एव तस्य बलक्षत्वात्, तदुपयोगित्वञ्च शब्देरेव नान्यत्र (नानन्त्र) तस्य, ततः शब्देरेव अबाधसुव्यवहारोप्पत्ते र्नानन्त्यम्, तेन- ५ व्यारोपे हि न प्रत्यक्षं[6] संवादाभावात्। न हि सैन्यानन्यितवस्तुविषयत्वे संवादित्वं नाम अतिप्रसङ्गात्। नाप्यनुमानम्, लिङ्गाभावात्, अनन्वितस्य लिङ्गत्वायोगादिति प्रवृत्त्यादिव्यवहारः सर्व एवोच्छेदेत, तस्य प्रत्यक्षादिनिबन्धनस्य तदभावे गत्यन्तरामायात्। न च व्यवहारमुपजीवतां तदभावायोपक्रमः श्रेयान्। तदनुपजीवने तु प्रत्यक्षादिनिराकरणमभिमतमेव तायागतानाम्, सकलव्यवहारपरिस्पन्दाभावे निरवशेषविकल्पनिष्क्रान्तस्य 'सवेदनपरमार्थपर्यवसितस्य' १० सर्वथा मुक्तत्वेन प्रत्यक्षादिचिन्तया प्रयोजनाभावात्। तदुक्तम्—

"यद्यद्वैते न दोषोऽस्ति मुक्त एवासि सर्वथा।
वर्तसे व्यवहारेऽपि चेत्प्रत्यक्षाद्यपि चिन्त्यताम्॥" [प्र०वार्तिकाल० १।३६] इति।

ततः प्रयोजनवशाच्छब्देरेवाध्यारोप्यते "नानन्त्यम् इति, तदसमीचीनम्, अनन्त्यव्यानारोपे शब्देरप्यनारोपप्रसङ्गात्, "तस्याश्चास्तवभावात्। न हि सा तत्त्वभावा "ततो निष्कृष्याध्या- १५ रोपायुं शक्यते, स्वरूपत एव निष्कर्षणासम्भवात् स्वरूपाभावप्रसङ्गात्। कल्पनया निष्कर्षमिति चेत्, न, अनिष्कृष्टस्वभावायाः ततोऽपि[10] तदसम्भवात्। न हि कल्पनाव्यवसेदिनीं[11] मिनत्ति "तदानीमेव तद्भेदाभावप्रसङ्गात्। अन्यथा भिनत्तीति चेत्, न, सदा शब्देरेवाभावात्[12]। न ह्यविद्यमाना भेत्तुं शक्यते, "तदपि तद्भावे क्षणक्षयत्वाभावापत्तिः। सत्यम्, न कल्पनया भिद्यते शक्तिः, केवलमभिन्नापि भिन्नेव तस्यां "प्रत्यय- २० भासत इति चेत्, कल्पनागतैव तर्हि शक्तिरध्यवसितव्या, न वस्तुगता। न चैतदपर्यं भवताम्, तच्छब्देरप्यवस्तुरूपत्वात्। न चावस्तुनस्तथाविधत्वेन सामर्थ्यादर्थक्रियाकारित्वं कूर्मरोमसामर्थ्याभ्यासाद् वन्ध्यासुतस्यापि सुतप्रयोजनकारित्वप्रसङ्गात्। वस्तुभूतैव "कल्पनाशक्तिः वस्तुशब्देस्तदाश्रयासादिति चेत्, न, अनन्विताया एवाभ्यासप्रसङ्गात् तस्याभावत्वात् अनन्वयनिष्कृष्टाया असम्भवात्। कल्पनया सम्भव इति चेत्, न, 'कल्पनागतैव[13] तर्हि' इत्यादेरावृत्त्या २५

---

1 "ततो व्यवहारप्रसिद्धमवयविन एकत्वं समाश्रित्य यदेव दृष्टं तदेव ग्राह्यमिति व्यवहारात् प्रमाणताव्यवहारः स च एकत्वाध्यवसायी देशकालभेदान्।"—प्र०वार्तिकाल० १।५। २—वस्तुतत्त्व—भा० ब०, प०। ३ सान्त्य—भा०, ब०, प०, स०। ४ नान्त्यः भा०, ब०, प०, स०। ५ वस्तुतत्त्व अनन्वितत्व काप्यारोपे। ६—सं प्रत्यक्षम्—भा०, ब०, प०, स०। प्रमाणकं भवेदिति भावः। ७ प्रत्यक्षस्य। ८ व्यवहाराभावः। ९ संवेदनस्य पर—भा०, ब०, प०, स०। १० अनन्त्य। ११ "यद्यद्वैतेन दोषोऽस्ति व्यवहारेऽपरत्रापि दोषोऽपि चिन्त्यताम्।"—प्र० वार्तिकाल० १।३६। 'न दोषोऽस्ति' अस्मिन् पाठे 'यद्यद्वैतं निर्दोषम्' इत्यर्थो ध्रुवः। १२ सान्त्यः भा०, ब०, प०, स०। १३ धर्मधर्मिणोरेकान्त शब्देरपि वस्तुत्वं अनन्त्यमभावत्वात्। १४ अनन्त्यतः। १५ कल्पनातोऽपि। १६ शब्दम्—ब्यभेदेन भिन्नं—प०। १७ उपलक्षण एव। १८ अविद्यमानत्वात्। १९ कल्पकाशक्तिरपि। २० कल्पनायाम्। २१ कल्पनायां प्रतिभासिता शक्तिः। २२ यत इव त—भा०, ब०, प०, स०।

चक्रकप्रसङ्गादनवस्थानापत्तेश्च। तन्न अवस्तुनि वस्त्वध्यामः सम्भवति, यतोऽभ्यासावस्थायां दृश्य-प्राप्ययोरेकत्वस्य अविसंवादकारित्वं लिङ्गस्य वा स्वरूपसाध्यसंवित्तिहेतुत्वमिति दुष्परिहार-मज्ञातासिद्धत्वं सर्वलिङ्गानाम्, तेषामवस्तुसामान्यरूपतया स्वज्ञानाहेतुत्वात्। अत एव साध्य-संवित्तिकरणाभावात् [1]तद्वचनानामसाधनाङ्गवचनत्वञ्च।

वस्त्वेव यदि सामान्यं ज्ञानरूपतयोच्यते।
[2]लिङ्गताऽर्थस्य हन्तैवमसामान्यात्मनः कथम् ? ॥१८७॥
अर्थादेव च धूमादेर्व्यवहाराय सौगताः।
पावकाद्यनुमानेन प्रवृत्तिं कल्पयन्त्यमी ॥१८८॥
अध्यासाद्वा (साज्ञा) नधर्मस्य यद्यर्थस्यापि लिङ्गता।
अध्यस्तं ननु सामान्यमवस्त्वेवेति भाषितम् ॥१८९॥
[3]ज्ञानात्मनापि सामान्यं वस्तु यद्यन्वयात्मना।
अर्थात्मनाऽपि किन्न स्याद्वस्तु सामान्यमन्वितम् ? ॥१९०॥
अन्वयग्रहणं यद्वज्ज्ञानेऽर्थेऽपि तथा भवेत्।
ततोऽभिधेयं वस्त्वेव बहिः सामान्यमागतम् ॥१९१॥
नचैतदभ्यनुज्ञानं सौगतानां हितावहम्।
"तदवस्त्वभिधेयत्वात्" इति [4]कीर्तिवचःक्षतेः ॥१९२॥
[5]स्वलक्षण्येन सामान्यं वस्तु चेज्ज्ञानगोचरम्।
व्याजोक्त्या किम् ? न सामान्यं सर्वथास्तीति कथ्यताम् ॥१९३॥

स्वलक्षणरूपतयैव ज्ञानगतस्यापि सामान्यस्य वस्तुत्वे बहिरन्तश्च स्वलक्षणमेवास्ति वस्तुतो न सामान्यमिति स्पष्टमभिधातव्यं किमनया 'ज्ञानात्मना वस्त्वेव सामान्यम्' इति व्याजोक्त्या ? न च सामान्याभावे वचनव्यवहारोऽपि विषयाभावात् स्वलक्षणस्यातद्विषयत्वात्। ज्ञानस्वलक्षणमेवाबाह्यमपि बाह्यतया अनन्वितमप्यन्विततयाऽध्यवसीयमानं सामान्यमिति चेत्; कुतस्तस्यं तथाऽध्यवसायः ? स्वत एवेति चेत्; न; स्वलक्षणतयैव स्वतस्तस्य वेदनसम्भवात्तत्स्व-भावत्वात् न सामान्यरूपेण विपर्ययात्। [6]तदपि तस्य स्वभाव इति चेत्; न; वस्तुत एव सामान्यसिद्धेरुक्तत्वात्। अस्वरूपमपि वासनादोषात्तेन[7] तद्गृह्यत इति चेत्; न, प्रतिबन्धाभावात्। न हि [8]ततस्तस्योत्पत्तिः; तस्यावस्तुत्वेनाहेतुत्वात् प्रतिबन्धान्तरस्य[9] चानभ्युपगमात्। कारणत्वमेव च ग्राह्यत्वम्, "ग्राह्यतां विदुर्हेतुत्वमेव" [प्र०वा०२।२४७] इति वचनात्[10]। अकारणस्यापि [11]तस्य स्वयोग्यतयैव संवेदनं ग्राहकमिति चेत्; न; स्वमतव्याघातेन[12] ध्यान्ध्य-

---

१ हेतुप्रतिपादकवचसाम्। २ लिङ्गतोऽर्थ–आ०, ब०, प०, स०। ३ ज्ञानात्मना भासमानमपि सामान्यम्। ४ "न तद्वस्त्वभिधेयत्वात्–तत् सामान्यं न वस्तुरूपादिस्वभावम् अभिधेयत्वात्।"–प्र० वा०, स० २।११। धर्मकीर्ति। ५ ज्ञानस्वलक्षणरूपतया। ६ कथ्यते आ०, ब०, प०, स०। ७ शब्दागोचरत्वात्। ८ प्र० वा ३।७५–७७। द्रष्टव्यम्–पृ० २२ टि० ५। ९ ज्ञानस्वलक्षणस्य। १० सामान्यरूपमपि। ११ तेन ज्ञानस्वलक्षणत्वेन तत् सामान्यम्। १२ ततः सामान्यात् तस्य ज्ञानस्वलक्षणस्य। १३ कार्यकारणभावातिरिक्तस्य। १४ "भिन्नकालं कथं ग्राह्यमिति चेत् ; ग्राह्यतां विदुः। हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥"–प्र० वा०। १५ सामान्यस्य। १६ न बान्ध्य–आ०, ब०, प०, स०।

प्रसङ्गात् । अपि च, अक्षस्तुतोऽपि सामान्यस्यैव संविधिविषयत्व स्यादन्वितरूपत्वाविशेषात् । उक्तं चैतत्–

"प्रमाणमर्थसम्बन्धात्प्रमेयमसदित्यपि ।
केवलं ध्यान्ध्यमेवैतत्किञ्च सन्तं समीक्ष्यते ॥" [न्यायवि०का०२८९] इति ।

तस्मात्सरूपस्य ग्रहणम् । ततो न बहिरन्तर्वा सामान्य वस्तुभूतमिष्यतेऽस्तुभूतमपि सम्- ५
वति यद्धि भवत् शब्दवाच्यं भवेत् ।

तदनेन लिङ्गसाध्यसम्बन्धस्य तेनाप्यत्वं प्रत्युक्तम् , लिङ्गाभावे तत्साध्यसम्बन्ध-
स्यायोगात् । ततो यदुक्तम्–"लिङ्गस्य तत्साध्यसम्बन्धस्य वा प्रतिपादकं वचनं
परार्थमनुमानम्" [ ] इति , तत्प्रतिविहितम् । न लिङ्गेऽपि वचनमव्यभि-
चारिताया प्रत्यायकरं सत्यपि तस्मिन् प्राक्प्रवृत्तप्रतिसन्धियपर्यमाणपर्यालोचनादेव लिङ्गप्रतिपत्तेः १०
वचनमात्रादतदभावात् । वचनं तु केवलं तत्प्रमाणानुस्मरणमेवोपस्थापयतीति तेनैव तत्प्रमाणं न
बहिर्ये । तदुक्तम्–"अर्थे हि वचनमप्रमाणं प्रमाणे तु प्रमाणमिति न किञ्चित्त्यज्यते"
[ ] इति चेत् , न, प्रमाणेऽपि तस्य स्वयोग्यतयैव प्रमाणत्वे तृतीयं तत्प्रमाणं
भवेत् । शाब्दज्ञानस्य विकल्पत्वेन प्रत्यक्षानन्तर्भावात् लिङ्गनिरपेक्षत्वेन चाननुमानत्वात् । ततः
प्रमाणसंख्यानियमं एव क्षीयत इति कथमुक्तम्–'न किञ्चित्त्यज्यते' इति ? मैवम् । वचन १५
मनुमानमेव प्रमाणे तस्य तेन प्रतिबद्धत्वेन लिङ्गत्वोपपत्तेरिति चेत् , कस्य तत्प्रमाणं यत् तच्च-
नादनुमानव्यम् ? प्रतिपादकस्येति चेत् , उपपन्नमेतत् , वक्तमस्य "तत्रैव भावात् । लिङ्गं हि यत्र
स्वयमवस्थितं तदुक्तमेव साध्यं गमयति नान्यगतम् , पर्वतधूमात् "महोदधौ पायकानुमानप्रसङ्गात् ,
किन्तु येनानुमितेनापि प्रतिपाद्यस्य किं फलमिति वक्तव्यम् ? सम्बन्धग्रहणमिति चेत् , न,
अन्यप्रमाणेनान्यस्य तद्ग्रहणायोगात् प्रतिपुरुष प्रमाणभेदकल्पनावैयर्थ्यात्पक्षेऽ एकीयप्रमाणेनैव २०
सर्वस्य तद्विषयपरिच्छेदसम्भवात् । तन्न प्रतिपाद्यस्य तत्प्रमाणम् ।

प्रतिपाद्यस्येति चेत् , न , वचनस्य तत्राभावात् प्रतिपादकवचनाच्च न "तदनु-
मानम् , प्रतिबन्धाभावात् । न हि प्रतिपाद्यप्रमाणोद्भूतं प्रतिपादकवचनम् , सन्तानान्त-
रासिद्धिप्रसङ्गात्" , सन्तानान्तरभाविनो "व्याहारादेः स्वबोधादेवोत्पत्तिप्रसङ्गात् । तज्ज्ञा-
तीयादुत्पन्नं ततोऽप्युत्पन्नमेवेति चेत् , स्यान्मतम्–प्रतिपाद्यप्रमाणसजातीयं हि प्रतिपादक- २५
प्रमाणम् , तदुद्भूतं" वचनं प्रतिपाद्यप्रमाणादप्युत्पन्नमेव ततस्तदनुमानम् । न चात्रापक्ष-
धर्मत्वम् , तत्सजातीयपक्षधर्मत्वेनैव तत्पक्षधर्मत्वस्यापि लाभादिति, तदसारम् ; स्वस-
म्बन्धिनो व्याहारादेर्मूलाभिमतशरीरे चैतन्यानुमानप्रसङ्गात् , तस्यापि तत्सजातीयकार्यत्वा-

---

१ लिङ्गसम्बन्धाद्यत्वम् । २ वचने । ३ अविनाभावग्राहिप्रत्यक्षपृष्ठभाविविकल्पस्मरण । ४ प्रमाणानुसारेण । ५ वचनस्य । ६–मः ची–आ०, ब०, प०, स० । ७ व्याप्तिग्राहिप्रमाणे । ८ वचनस्य । ९ प्रमाणे । तत्रैति वक्ष्य–आ० ब०, प० । तत्र प्रतिबन्ध–स० । १० प्रतिपादक एव । ११ महानसादौ पाकानु–आ०, ब०, प०, स० । १२ प्रतिपाद्यप्रमाणानुमानम् । १३ प्रतिपाद्यप्रतिपादकवैरोचनानन्तर्यं स्यादिति भावः । १४ वक्तव्यादेः । १५–मं हि वच–आ०, ब०, प०, स० । प्रतिपादकप्रमाणोद्भूतम् ।

विशेषात्। [1]तत्र चैतन्यमेव नास्ति कथं तत्सजातीयत्वमात्मचैतन्यस्येति चेत्? प्रतिपाद्येऽपि तर्हि प्रमाणमस्तीति कुतः यतस्तत्सजातीयत्वं प्रतिपादकप्रमाणस्य स्यात्? अत एवानुमानादिति चेत्; न; उभयत्र [3]साम्यात्। अनुमानात्तत्सिद्धौ [4] तत्सजातीयत्वं स्वचैतन्यस्य, ततोऽपि वचनस्य तत्सजातीयकार्यत्वम्, अतश्च मृतशरीरे चैतन्यं सिद्ध्यति, इति चक्रकापादनस्य च प्रतिपाद्यप्रमाणानुमानेऽप्यनिवारणात् ततो मृतव्यवस्था क्षीयते इति; अत्रापीदं वक्तव्यम्–'कथमुक्तम्–न किञ्चित्क्षीयते' इति। तत्र प्रमाणेऽपि वचनस्य प्रामाण्यं बहिरर्थवत्। सत्यमेतत्, न हि वचनात्प्रमाणप्रतिपत्तिः स्वसंवेदनादेव तत्प्रतिपत्तेः, वचनं तु केवलमनुवादकमेवेति चेत्; किमिदमनुवादकत्वं नाम? प्रतीतप्रत्यायनमिति चेत्; न; वचनात् तत्प्रतीत्यभावात्। न हि यादृशस्य स्वसंवेदनात्प्रतिपत्तिः प्रमाणस्य तादृशस्य वचनादस्ति प्रतिपत्तिः; तस्य स्वलक्षणाकाराविषयत्वात्। आकारान्तरविषयत्वे तु न तेन प्रमाणमनूद्यते। न ह्यन्यविषयेणान्यदनूदितं भवति, अतिप्रसङ्गात्। [9]तद्विषयसामान्याकारस्य प्रमाणस्वलक्षणैकत्वाध्यवसायात् तेन [10] तदनूद्यत एवेति चेत्; न तदाकारस्य तदेकत्वाध्यवसायस्य च चिन्नितत्वात्। ततो वचनमकिञ्चित्करमेवेति न तेन शास्त्रमन्यद्वा कर्त्तव्यम्। [12]परस्य कुर्वतश्च [13]तत् वस्तुतो वस्तुगोचरं तृतीयमेव प्रमाणमङ्गीकर्त्तव्यम्, अन्यथा [14]तत्कृतस्य शास्त्रादेरकृतकल्पत्वप्रसङ्गादित्येतद् **'वचोभिः'** इत्यनेन निवेदयति।

वचसां विशेषणमाह–**'तत्रानुकम्पापरैः'** इति। तांस्त्रायते सांसारिकघोरदुःखगर्त्तावर्त्तपरिपातात् परिपालयतीति तत्रा, सा चासावनुकम्पा कृपा च सैव अपरा आदिभूता हेतुत्वेन येषां तैरिति। परशब्दस्योत्तरार्थत्वात् तत्प्रतिपक्षवाचिनश्च अपरशब्दस्य आद्यार्थत्वोपपत्तेः एवं व्याख्यानम्। तदनेन [15]परपरिरक्षणपरायणया कृपया वचसां प्रवृत्तिं दर्शयन् शास्त्रस्य पारार्थ्यं दर्शयति। के पुनस्तच्छब्देन परामृश्यन्ते? येषामयं न्यायो मलिनीकृत इति ब्रूमः। केषां मलिनीकृत इत्याह–**'बालानाम्'** इति। हिताहितविवेकविकला बालास्तेषामिति।

यद्येवं न ते प्रज्ञाबलविकलत्वादेव सुभाषितैरर्थिनो भवन्ति, बलवत्प्रज्ञानां हि महात्मनामेष धर्मो न पुनरप्रतिबलप्रज्ञानां बालानाम्। ते हि सहजात् [16]आहार्याच्च मात्सर्यबलान्न केवलमनादरमेव सूक्ताभासेषु कुर्वन्ति प्रत्युत [17]प्रद्वेषमप्याचरन्ति ततो न परोपकारचिन्तया शास्त्रकृपायामनुबद्धस्पृहं मनः कर्त्तव्यम्, अपि तु सूक्तगोचरसुचिराभियोगविवर्द्धितव्यसनया चित्तवृत्त्यैवेति। तदुक्तम्–

"प्रायः प्राकृतशक्तिरप्रतिबलप्रज्ञो जनः केवलं
[18]नानर्थ्येव सुभाषितैः परिगतो विद्वेष्यपीर्ष्यामलैः।

---

१ मृतशरीरे। २ प्रतिपाद्यगतप्रमाणे मृतशरीरगतचैतन्ये च। ३ सामान्यात् आ०,ब०,प०। ४ मृतशरीरे चैतन्यसिद्धौ। ५ अस्मादेवानुमानात् प्रतिपाद्यगतप्रमाणसिद्धौ तत्सजातीयत्वं प्रतिपादकप्रमाणस्य, ततोऽपि वचनस्य तत्सजातीयकार्यत्वमतश्च प्रतिपाद्यप्रमाणसिद्धिरिति चक्रकम्। ६ स्वसंवेदनानुभूतप्रमाणप्रतीत्यभावात्। ७–शस्य संवे–आ०,ब०,प०। ८ वचनस्य। ९ वचनेन। १० वचनविषय। ११ वचनेन। १२ बौद्धस्य शास्त्रादिकं कुर्वतः १३ वचनम्। १४ तत्कृतशा–आ०, ब०, प०। १५ परिर–आ०, ब०, प०। १६ आरोपितात्। १७ प्रद्वेषमेवाचरयन्ति आ०, ब०, प०। १८ नानर्थ्यैव–आ०, ब०, प०।

तेनार्यं न फरोकार इति नश्चिन्ताऽपि [1]चेतश्चिरं
सूक्ताभ्यासविवर्द्धितव्यसनमित्यत्रानुबद्धस्पृहम् ॥" [प्र० वा० १।२]

इति चेत्, अत्राह–हितकामिनाम्। हितानि न्यायविनिश्चयवचनानि हितस्य परमागमस्य वैः नैर्मल्यनयनात्। परमागमस्य च हितत्वं हितस्य निःश्रेयसस्य तत्कारणस्य च यथावदभिधानात्। तानि कामयन्ते प्रतिपन्नहृतुमिच्छन्तीति हितकामिनस्तेषामिति। ७

कुतः पुनः वाचना हितकामित्वम्? न हि ते हितमित्यमिति जानन्ति वाक्यविशेषात्, अजानन्तश्च कथ नाम तत्कामयेरन्, परिज्ञानविपर्यस्तत्कामनाया इति चेत्? न, अध्युत्पन्नसन्दिग्धयोः स्वयं तत्परिज्ञानाभावेऽप्याचार्यवचनाद्युपपत्तेः, आचार्ये तयोरप्युद्धिसम्भवात्, असम्भवद्बाधकोरभ्युपगमात्। क्रिया हि द्रव्यं विनयति नाद्रव्यम्" [ ] इति न्यायात्। विपर्यासोपहतस्य तु यद्यपि न तत्र हितबुद्धिस्तथाऽप्यसौ पूर्वपक्षमुद्भ्य तत्कामयत एव अपरिज्ञातपूर्वपक्षस्य स्वपक्षनिर्णयानुपपत्तेः "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" [न्यायसू० १।१।४१] इति वचनात्। न हि धर्मकीर्त्तेरपि 'सूक्ताभ्यास' इत्यादि वचनात् सूक्ताहित्यं प्रकारान्तरात् सम्भवति। न हि तेनापि स्वत एव सूक्तपरिज्ञानम्, अन्यथा तद्वदन्येषामपि तत्सम्भवात् 'अप्रतिबलप्रज्ञो जनः' इत्यसङ्गतं स्यात्। अथ येषां तदसम्भव, तान्प्रति सङ्गतमेवेदमिति चेत्, न तर्हि सर्वथा शास्त्रस्यापरार्थत्वम् असम्भवत्परिज्ञानान् प्रति अपरार्थत्वेऽपि तेऽपि परिज्ञातारं प्रति तत्त्वोपपत्तेः। तथा चेदमपर्यालोचितवचनम् 'तेनार्यं न परोपकारः' इत्यादि। स्वयं च शास्त्रान्तरस्य "कृपया तत्रीतिरुद्योत्पते" [ ] इति कृपापदोपादानात् पारार्थ्यमभ्युपजानानैव वैतण्डिकस्य तैत्वत्याद्यष्ट इति कथमनुकम्पनो नाम? न हि शास्त्रस्यैव कर्म्मविपाकात्पारार्थ्यम् अपारार्थ्यमपरस्यानुन्मत्तः प्रतिपत्तुमर्हति। ततोऽनुकम्पावतां पारार्थ्येनैव शास्त्रकरणं न व्यसनितया। २०

नन्वनुकम्प्यतामभ्युपगम्य सन्दिग्धम्, विपरीतस्तु कथं प्रतिकूलत्वात्? न हि स्वमतप्रतिकूलमेव कश्चिदनुकम्पितुमर्हतीति चेत्, न, महापुरुषस्याप्यपारमर्षवंविधत्वात्, महान्तो हि प्रतिकूलेऽप्यनुकम्पामेवोपनयन्ति। न च तत्रासौ निष्फलैव, तत्त्वप्रतिपादनस्य तत्फलस्य भावात्। प्रतिपाद्यमानोऽप्यसौ" मत्सरित्वान्न प्रतिपद्यते प्रत्युत तत्प्रत्याख्यानायैव प्रवर्त्तते ततो विफलैव तत्रानुकम्पेति चेत्, किमिदं प्रतिपाद्यमानत्वं नाम? प्रतिपत्तिकारणोपसमर्पणमिति" चेत्, न तर्हि "तदप्रतिपत्तिः अविफलकारणसमर्पणे ह्यनिष्टतोऽपि तत्प्रतिपत्तिरदयमम्भाविनी सभिहितप्रदीपस्यानभिमतरूपदर्शनवत्। प्रतिपाद्यमानोऽपि तत्कृकारं न समर्पयति मात्सर्यादिति चेत्, न, उपपत्तिमद्वस्तुप्रतिपत्तौ मात्सर्यपरित्यागस्यापि सम्भवात्। विजिगीषुतया प्रवृत्तस्य तेजस्विनो

---

१ "चेतश्चिरं"–प्र०वा०। २–ज्ञानवि–ब्रा,ब०,प०। ३ इदं सम्भवम्। ४ धर्मकीर्त्तेरपि। ५ सम्भवपरिज्ञानात् सिध्यात्। ६ प्रमाणवार्त्तिकस्य। ७ पारार्थ्यम्। ८–तथ क–ब्रा०, ब०, प०। ९ ९ विपरीते अनुकम्पा। १० विपरीतः। ११–पसर्त्तव्यमिति–ब्रा०, ब०, प०। १२ विपरीतस्य अप्रतिपत्तिः।

न तत्परित्यागसम्भव इति चेत्; न; स्वयं तदपरित्यागेऽपि प्राश्निकैः तत्प्रत्युक्तेन परिषद्बलेन वा तत्परित्यागस्य प्रयोजनात्। मत्सरिणोऽप्यनुकम्पनीयत्वे निग्राह्यत्वं न स्यात् 'अनुकम्प्यते निगृह्यते च' इति विरोधादिति चेत्; सत्यमेतत्; वस्तुतो निग्रहाभावात्। न हि तत्त्वज्ञानस्य निःश्रेयसावाप्तिनिबन्धनस्य पात्रतामुपनीयमान एव निगृह्यते, तदुपनयनस्यानुग्रहत्वात्। कथं तर्हि कथितम् "स्वपक्षसिद्धिरेकस्य निग्रहोऽन्यस्य वादिनः"[ ] इति चेत्? न; निग्रहशब्देन मिथ्याभिनिवेशनिवर्त्तनस्याभिधानात्। स्वपक्षसिद्धिस्तेनाभिधीयत इति चेत्; न; तत्सिद्धेरपि तन्निवृत्तिरूपत्वात्। न च तन्निवर्त्तनस्य वस्तुतो निग्रहस्थानत्वम्; अनन्तसंसारसरित्पातनिबन्धनतदभिनिवेशनिवर्त्तनस्य सुतरामनुग्रहस्थानत्वात्, निग्रहस्थानशब्देनाभिधानं तु प्राश्निकाभिप्रायवशात्। प्राश्निकाः खलु तस्य तन्निवर्त्तनादङ्गीकृतवस्तुनिर्वाहशक्तिवैकल्यमाकलय्य पराजयमुद्घोषयन्ति, स्वयं च वादी तेजस्वितया स्वशक्तिभङ्गेन खिद्यते इति तदभिसन्धिवशात्तन्निवर्त्तनं निग्रहस्थानमुक्तं न वस्तुतः। नन्वेवमपि तस्यास्त्येव परितापः, न चानुकम्पाविषयः परितापयोग्य इति चेत्; भवतु कियानपि परितापो न चैतावता तदनुकम्पा दुष्यति, दुरन्तदुःसहसंसारदुःखकारणस्य तत्तस्याऽपसारितत्वात्। न हि महतो व्याधेरपसारकारणमातुरस्य तदात्वकटुकमपि दिव्यमौषधं दोषमुद्वहति।

भवत्वियं तत्र वार्ता यस्यैवमभिप्रायः 'प्रतिवादिवचनेनोपपत्तिभूषितेनोद्घाटितो मम निरवद्यनिःश्रेयसप्रासादशिखराधिरोहणद्वारकवाटो विघटितश्चाधोगतिपातालप्रवेशमार्गः चिराय मे कृतार्थत्वं भवितव्यतावलेनोपस्थापितम्' इति भूयसः परितापस्याप्यभावात्, यस्य तु सभ्यसाक्षिकं स्वबुद्धिप्रत्ययञ्च पराजितस्यापि नैवमभिप्रायः कुतश्चिदान्तरादोषात् केवलं पराजयपीडैव महती, तत्र कथमनुकम्पा न दुष्यतीति चेत्? उच्यते—यदि तस्य परिपीडाभयात्पराजयो न कर्त्तव्यः तर्हि तस्य वचनप्रामाण्यात् बहवोऽप्युन्मार्गमनुपतन्तस्तस्य महान्तमनन्तदुःखनिबन्धनमशुभास्रवमापादयेयुः, पराजितस्य तु तस्य वचनविश्वासाभावात् न तेषां तदनुपातस्ततो नायं प्रसङ्ग इति तात्कालिकखेदहेतुत्वेऽपि अशुभास्रवनिरोधरूपमहोपकारकारणत्वात् तत्राप्यनुकम्पा न दुष्यत्येव। यस्य तु प्रतिपाद्यमानस्याप्यप्रतिपत्तिः अन्तरङ्गवैकल्यात्, नापि स्वमतानुरागप्रयुक्तात् काकवासितादुपरतिं (तिः) न तत्रानुकम्पनम्—"अविनेये माध्यस्थ्यम्" [ ] इत्यागमात्। नापि तस्य वस्तुवादेऽधिकारः प्राश्निकैस्तन्निवारणात्। न हि ते शक्तिविकलतयाऽध्यवसितमपि वादेऽधिकारयन्ति "समर्थवचनं वादः" [प्रमाणस० ६।५१] इति तल्लक्षणापरिज्ञानप्रसङ्गात्, काकवासितस्य च तेजस्विना नरपतिना निवारणात्। तदुपपन्नं विपरीतोऽप्यनुकम्प्यत इति।

---

१ मात्सर्यपरित्याग। २ परिषद्बलेन—आ०, ता०। सभ्येन। ३ मात्सर्यपरित्यागस्य। ४ मिथ्याभिनिवेशनिवृत्ति। ५ मिथ्याभिनिवेशनिवर्त्तनात्। ६ भिद्यते—आ०, ब०, प०। ७ प्राश्निकाभिप्राय। ८ चेत्; न; भ—आ० ब, प०। ९ ततः वादितः तथा अनुकम्पया। १० दिव्यमौ—आ०, ब०, प०। ११—नोद्भूषितो आ०, ब०, प०। १२ मानकषायादिरूपात्। १३ उत्पथभाषिणो विपरीतवादिनः। १४ श्रोतृणाम्। १५ विपरीतवादिन्यपि। १६ बोधशक्त्यभावात्। १७ काकशब्दवन्निरर्थकप्रलापात्। १८ "मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्व-गुणाधिक-क्लिश्यमानाविनेयेषु।"—त० सू० ७।११।

कैः पुनस्तेषां न्यायो मलिनीकृत इत्याह–'अतिमहापापैः' इति। मलोपलेपस्य पापकार्यस्वाभिनिवेदनेनाहेतुकत्वं प्रत्याचक्षाणः तस्याशक्यप्रक्षालनत्वार्थमेव निवेदयति, हेतुमत्त्वमात्रस्यापि सद्धेतुविषयोपरक्तेनेन शक्यनिवर्तनत्वात्, तस्मिंश्चाकृतमेतत्–

"घृण्यमाणोऽपि नाङ्गारः शुक्लतामेति जातुचित्।
निजस्वभावसम्पर्कः केनचिन्न निवार्यते॥" ५
[प्र० वार्तिकाल० १।२३४] इति।

पापानामतिसङ्क्लेशप्रतिपादनं तु मलस्य तैन्मात्रनिबन्धनत्वाभावात् अन्यथाऽतिप्रसङ्गः शुद्धन्यायविदामपि तैन्मात्रसद्भावाविशेषात्। कुतस्तेषां तानि पापानि? मलिनीकृतान्यायाद्धेतोः, 'सोऽपि कैः? तैरेवेति चेत्, न, 'परस्पराश्रयप्रसङ्गादित्याह–'पुरोपार्जितैः' इति। अत्रेदमेतद्भवति– न हि य एव न्यायस्तैरधुना मलिनीक्रियते तत एव तैर्नि येनार्थं दोषः किन्तु १० प्रागेवोपार्जितानि, तदुपार्जने चापरस्तत्पुरोपार्जितो मलिनीकृतो न्यायो हेतुः सोऽपि तदपरपाप निबन्धन इत्यनादिरयं तत्प्रबन्ध इति। अनेन सहजो मलसम्बन्धो दर्शितः।

तं पुनराहार्य दर्शयति–'स्वयं गुणद्वेषिभिः' इति। 'न्यायो मलिनीकृतः' इति वर्तते। गुणद्वेषिणश्चैकान्तवादिनः तैः परमागमन्यायगुल्मं स्वपक्षजीवादिपदार्थप्रकाशनरूपस्य द्वेषात्, सैं एव कृत इत्याह–'कलिप्रियात्' कलिकाञ्चस्तैः। तस्य साधारणत्वात् सर्वेषामपि १५ तद्द्वेषः स्यादित्यत्राह–प्रायः प्रायुर्येण। तदपि कुत इत्याह–माहात्म्यात्तमसः। अविद्यान्धकारसामर्थ्यात्। न केवलं काल एव गुणद्वेषकारणमपि स्वविद्यासामर्थ्यमपि। न च 'तत्सर्वैपामिति भावः। विपुलो वृत्तस्यावयवार्थः।

समुदायार्थस्तु सम्बन्धाभिधेयप्रयोजनलक्षणः। तत्र न्याय एवाभिधेयम्। तेन च शास्त्रस्य वाच्यवाचकभावः सम्बन्धः। स च सामर्थ्यात्। न हि तेन" न्यायमनुवादेन 'स २० नैर्मल्यं नेतुं शक्यते। प्रयोजनं तु शास्त्रस्य न्यायनैर्मल्यनयनम्, तेन सम्बन्धो हेतुहेतुमद्भावः, शास्त्रस्य तद्धेतुत्वात्, तस्य च तत्कार्यत्वात्। स च कण्ठोक्त एव 'वचोभिर्नीयते' इति वचनात्।

किं पुनः शास्त्रादौ सम्बन्धाद्यभिधानस्य प्रयोजनमिति चेत्? "केचिदाहुः–श्रोतृजनप्रवर्तनम्। सति हि सम्बन्धाद्यभिधाने तदभिहितप्रयोजनं प्रति आशापरवशीकृतचेतसः श्रोतृ- २५ जनस्य शास्त्रश्रवणतदभ्यासादौ भवति प्रवृत्तिर्नासति। तदुक्तम्–

"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते?॥

१–आत्मजि–आ०,ब०,प०,स०। २–स्वाभिरा–ता०। ३ पापमेव। ४ पापोद्य। ५ न्यायमलिनीकारः। ६ पापन्यायकलिनीकारः तस्माच्च पापैरुक्त इति। ७ पापानि। ८ दैवः। ९ कलिबलस्य। १० तत्सर्वैपामपि आ–ता०, ब०। ११ शास्त्रैव। १२ न्यायः। १३ मीमांसकाः।

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"
[मी० श्लो० १।१।१ श्लो० १२, १७] इति ;

तदिदमनुपपन्नम् ; प्रेक्षावतो वचनमात्रात् क्वचित्प्रवृत्तेरयोगात् । निरवद्यप्रमाणव्यापारप्रदीपालोकपर्यवलोकिते हि वस्तुनि प्रवर्त्तमानः प्रेक्षावानित्युच्यते । स कथमनाकलितवस्तुतत्त्वाद्वचनमात्रात् प्रवर्तेत [2]प्रेक्षावत्ताविलोपप्रसङ्गात् ? वचनमपि प्रमाणत्वादाकलितवस्तुतत्त्वमेवेति चेत् ; कुतस्तस्य[3] प्रामाण्यं वस्तुनि प्रतिबन्धाभावात् ? न प्रतिबन्धात्तस्य प्रामाण्यमपि तु योग्यतयैव कृत्तिकोदयवच्छकटोदयें[4] , न हि तत्रापि तादात्म्यं तदुत्पत्तिर्वा प्रतिबन्धः सम्भवति , तदभावस्य यथावसरं निवेदनादिति चेत् ; किमिदं कृत्तिकोदयस्य योग्यत्वम्[5] ? अन्यथाऽनुपपन्नत्वमिति चेत् ; न तर्हि तत्[6] वचनस्य स्वार्थापेक्षया सम्भवति, तस्यापि लिङ्गत्वप्रसङ्गात् । अन्यथानुपपन्नस्याप्यलिङ्गत्वे न लिङ्गं नाम किञ्चिन तल्लक्षणान्तराभावात् । तन्नान्यथानुपपन्नत्वम्[7] । अन्यदेव तदिति चेत् ; न ; कृत्तिकोदये [8]तस्यासम्भवात् निदर्शनस्य साधनवैकल्यापत्तेः । अथ मतम्–कस्यचित्किञ्चिद्योग्यत्वम् , अन्यथानुपपन्नत्वं कृत्तिकोदयस्य अन्यच्च वचनस्य, न चैवं [11]साधनस्याऽसिद्धत्वं तद्विकलता वा निदर्शनस्य ; योग्यतासामान्यस्य हेतुत्वात् , तस्य[12] चोभयोरपि साध्यदृष्टान्तधर्मिणोर्भावादिति ; तन्न ;[13]अन्यस्यापि स्वाभाविकस्याभावात् , वचनस्य [14]समयानुपालनप्रयासवैकल्यप्रसङ्गात् । स[15] एव [16]तस्य, [17]सहकारीति चेत् ; न; [18]तस्य मिथ्याप्रत्ययहेतोरपि दर्शनात् । आप्तोपनीतस्य न तद्धेतुत्वमिति चेत् ; सत्यमेतत्, आप्तस्य यथार्थवेदितया [19]दोषविकलतया च मिथ्यावादासम्भवात् । तदेव तु नाप्तत्वमद्यापि शास्त्रकारस्य निश्चितमित्यस्माकमस्ति खेदः । माकारि खेदः । तदाप्तभावस्य सुप्रसिद्धत्वादिति चेत् ; किं तर्हि प्रयोजनवचनेन ? विनापि तेन[20] निश्चिततदाप्तभावस्य[21] तद्वचनमात्रादेव प्रवृत्तिसम्भवात् । न हि 'इदं त्वया श्रोतव्यम्' इत्याप्तेनाज्ञातः 'तद्वचनं प्रयोजनवदन्यथा वा' इति सन्दिग्धुमर्हति, तथा सन्दिहानस्य तत्राप्तबुद्धेरेवाभावप्रसङ्गात् । न ह्याप्तस्य निष्प्रयोजनवचनसम्भवः तस्य परहितोपनिबद्धशुद्धचित्ततया सर्वव्यापाराणां साफल्यनियमात् । सत्यम्, अस्त्येवाप्तवचनस्य प्रयोजनम्, तत्तु प्रतिपाद्यस्याभिवाञ्छितमन्यद्वेत्यनुपदर्शने न ज्ञायत इति चेत् ; न; उपदर्शनेऽपि समानत्वात्। न ह्युपदर्शितमित्येव अभिवाञ्छितं भवति अनभिवाञ्छितस्याप्युपदर्शनसम्भवात् । [22]अनभिवाञ्छितेऽपि प्रवृत्तिरनुपदर्शिते प्रयोजने स्यात् आप्तवचनस्यानुल्लङ्घनीयत्वादिति चेत् ; अस्तु, न कश्चिद्दोषः, तत्प्रवृत्तेः पुरुषार्थहेतुत्वात् । तदेव तस्याः[23] कथ-

---

१ तदिदमुप– आ०,ब०,प०,स० । २ प्रेक्षावत्त्वावि–आ०, ब०, प०, स० । ३ वचनस्य । ४ 'उदेष्यति शकटं कृत्तिकोदयात्' इत्यनुमाने । ५ शकटोदयकृत्तिकोदययोः । ६ अन्यथानुपपन्नत्वम् । ७ वचनस्यापि । ८अर्थाऽभावे अनुपपन्नस्यादिवचनस्याऽलिङ्गत्वे । ९ योग्यत्वम् । १० अन्ययानुपपन्नत्वव्यतिरिक्तस्य । ११ साधनस्यापि सिआ०,ब०,स०। १२ योग्यतासामान्यस्य । १३ अन्ययानुपपन्नत्वातिरिक्तस्य । १४ सङ्केतग्रहण । १५ सङ्केत एव । १६ कस्य ता० । वचनस्य । १७ सकालीति आ०, ब,० प०, स० । १८ वचनस्य । १९ दोषविकल्पतया आ०,ब०,प०,स० । २० प्रयोजनवचनेन । २१ जनस्य । २२ अभिवा–ता० । २३ प्रवृत्तेः ।

मिति चेत् ? 'बालकपाठप्रवृत्तिवत्' इति ब्रूमः । -यदि चाय निर्बन्धः प्रथममिहितसम्बन्धादिकमेव शास्त्रमादेयमिति ;

पूर्वं सम्बन्धादिवाक्यस्यात्याद्यादेयत्वनिबन्धनम् ।
सम्बन्धादिवयः पूर्वं वाच्यमन्यत्रसम्मते ॥१९४॥
तत्राऽन्यत्ततः पूर्वं ततः पूर्वं ततः परम् ।
आदिवाक्यप्रबन्धे स्यादेवं सत्यनवस्थितिः ॥१९५॥
अल्पत्वादादिवाक्यस्य सम्बन्धाद्युक्तिको विना ।
प्रवृत्तिविषयत्वं चेत्तुल्यमद्यिवकल्प्यते ॥१९६॥
प्रत्येकं सर्ववाक्यानामल्पत्वं ननु दृश्यते ।
मन्यसेतन्महत्त्वं चेदादिवाक्येऽपि तत्समम् ॥१९७॥
प्रत्येकं वाक्यवृत्तेश्च शास्त्रवृत्तिर्न चापरा ।
[a] सा चान्यविषयत्वान्न सम्बन्धाद्युक्तिसंगृह्य ॥१९८॥
अलौकिकस्य मार्गोऽयं यत्पाद्युपयोजनम् ।
वाक्यमन्यं महद्वापि व्रजत्वादेयतामिति ॥१९९॥
तस्मात्सर्वं मानरूपत्वात् स्यार्थनिर्णयनिर्मितैः (तैः) ।
श्रोतृप्रवृत्तिहेतुत्वमादिवाक्यस्य सङ्गतम् ॥२००॥

[b]अन्यस्त्वाह—नेदं मुनिभिरप्रमाणतया सम्यग्ज्ञानविधिशेषनिर्णयनिबन्धनत्वात् प्रवृत्तिकारणम्, अपि तु [c]तद्विषयसंशयकरणात् । असति होतस्मिन् [d]'किमिदं शास्त्रं सम्बन्धादिरहितमेव बालोन्मत्तादिवाक्यवत्, तत्सहितमपि किमनभिमतप्रयोजनमेव मातृविमाहविधिक्रमव्याख्यानवत्, अभिमतप्रयोजनमपि किमशक्यप्रयोजनमेव स्वरोपशमनकारणकणिपचूडामणिगुणव्यावर्णनवत्' इत्येवंरूपा संशयविकल्पः प्रादुर्भवन् प्रेक्षावतां प्रवृत्तिमेव शास्त्रे प्रतिरुन्ध्यात्, उपदर्शिते पुनः सम्बन्धादिविशेषे प्रागुपदर्शितानर्थसंशयव्यवच्छेदेन तद्विषयस्यैवार्थसंशयस्य प्रादुर्भावात्, भयस्येव तेषां तत्र प्रवृत्तिः । न [e]''वार्थसंशयात् प्रवृत्तौ प्रेक्षावत्तापरिक्षतिः,

---

१ सम्बन्धकथनमन्तरेण । २ वाक्यप्रवृत्तेश्च आ०,ब० । वाक्यप्रवृत्तेः प० । ३ वाक्यप्रवृत्ति । ४ शास्त्रस्य । ५ इतोनिर्णयस्वरूपात्वात् । ६ प्रमेयेत्तरः । ७ तद्विषयस्य सं-आ०, ब०, प०, स० । "अनुपेक्ष्य तु प्रतिपत्तिभिन्नप्रवीजनमभिधेयं सम्बाध्येतस्य प्रकरणस्य वाक्यस्तत्परीक्षावा इव, अदत्वानुद्यमं वा व्यवहरतश्चक्षुष्टारनाद्यारोपवदेवाद्य, अनभिमतं वा प्रयोजनं मातृविवाहवाक्येष्वदेवाद्य, अतो वा प्रकरणप्रस्तुत्य उपायः प्रयोजनस्य, अनुपाय एव वा प्रकरणस्य सम्बाध्येत । एतावत् अनर्थशमनावाप्तिहेतुत्वमप्यनर्थसम्भावनायां न प्रेक्षावन्तः प्रवर्तन्ते । अभिधेयादित्वर्थसम्भवबाधनर्थसम्भवना विरुद्धीयते । तत्र तु प्रेक्षावन्तः प्रवर्तन्ते । इति प्रेक्षावतां प्रवृत्तकरणमर्थसम्भावनां कर्तुं सम्बन्धादीन्यभिधेयानि इति स्थितम् ।" —न्याय वि० टी० पृ० ७ । ८ सम्बन्धादिविशेषे ।
९ —स्यैव आ—आ०, ब०, प०, स० । १० "तंत्रयेनापि प्रवृत्तिदर्शनात् । यथा कृषीवलादीनाम् । स्यादेतत्यपि कृषीवलादेरभिधिने फले संशयस्तत्रापि तत्फलप्राप्तयर्थमेव प्रवर्तन्तां दिवस एव । तेन निश्चयपूर्विकैव तेषां प्रवृत्तिरिति; तदसमञ्जस; यतो हि सत्य प्रवृत्तिः सा तत्संशयेऽपि तस्य भवतीत्येतावद्दिह प्रकृतम् । न च कृषीवलादेरपि वाक्यार्थे तेषु प्रवृत्तमो येन व्यपनिश्चयनिबन्धनप्रवृत्तावपि विषयपूर्विका प्रवृत्तिरेवमुच्यते । किं तर्हि ? फलार्थं ते प्रवर्तन्ते । तत्र च फले प्रतिबन्धादिगमनाय निश्चयोऽपीष्यत एव संशयपूर्विकेव तेषां प्रवृत्तिः ।"—तात्प० सं०१०पृ०३।

कृष्यादौ कृषीवलादीनां [1]तत्कृतप्रवृत्तिकत्वेऽपि तत्परिक्षतेरभावात्। अथ तेषामङ्कुराद्युपेये संशयेऽपि तदुपाये कृष्यादौ निर्णय एव, ततो निर्णीतोपायतया प्रवृत्तत्वादुपपन्नं प्रेक्षावत्त्वम्, शास्त्रे तु यथोपेये संशयस्तथा तस्य [2]तदुपायभावेऽपि ततः केवलादेव संशयात्प्रवृत्तेः कथन्न [3]तत्परिक्षय इति चेत्? न सारमेतत्; अङ्कुराद्युपेयनिर्णयाभावे कृष्यादितदुपायभावस्यापि दुष्करानर्ण-
५ यत्वात्, उपेयसापेक्षं हि कस्यचिदुपायत्वं तत्कथं तेंदनिश्चये शक्यनिश्चयमिति सन्दिग्धोपायतयैवोभयत्रापि[4] प्रवृत्तिरिति न कृष्यादेः शास्त्रात्किमपि वैलक्षण्यमुल्लेक्ष्यत इति; सोऽपि न युक्तकारी विचारविकलत्वात्; तथा हि—यत्येतदाप्तवचनं कथमस्मात्संशयः? निर्दोषवचनस्य नियमेन निर्णयनिबन्धनत्वात्, निर्दोषताया एवाप्तित्वात्[5]।

नन्विदमेवाप्तस्याप्तत्वं यँत्स्वप्रतिभासानतिक्रमेण वचनम्, स्वप्रतिभासमतिक्रम्य वदत[6] एव
१० वञ्चकत्वेनानाप्तत्वादिति चेत्; किमिदानीं शास्त्रकारस्यापि सम्बन्धादिकं सन्दिग्धमेव? तथा चेत्; सुस्थितं तस्य शास्त्रकारत्वम्। न च स्वप्रतिभासानतिक्रमतो वचनमेवाप्तत्वम्; बालोन्मत्तादेरपि तत्प्रसङ्गादिति प्रमाणपरिशुद्धवचनमेवाप्तत्वम्[7]। न च तद्वचनादर्थसंशयः, अर्थनिर्णयस्यैवोपपत्तेः। न च धर्मोत्तरेण शास्त्रकारस्याप्तत्वमनभिप्रेतमेव; "व्याख्यातारो हि क्रीडाद्यर्थं विपरीताभिधायिनोऽपि सम्भाव्यन्ते न प्रणेतारः" [ ] इति [8]तद्वचनात्।
१५ न चाविपरीताभिधानादन्यदन्यस्याप्तत्वं नाम। शब्दस्यैवैष स्वभावः यदाप्तभाषितोऽपि संशयमेवोपजनयतीति चेत्; न; अनर्थसंशयस्यापि जननप्रसङ्गात्, तथा च "अर्थसंशयमेव प्रवृत्त्यङ्गं कर्तुमादावभिधेयादिकमाह[9]" [ ] इत्यपेशलं स्यात्। यदि च स्वाभाव्यादस्य[10] संशयहेतुत्वं कुतस्तर्हि तत्संशयस्य व्यवच्छेदः? [11]शास्त्रादेवाधिगतादिति चेत्; न; तस्याप्यादिवाक्यवत् शब्दात्मकत्वेन संशयहेतुत्वात्, तत्संशयस्यापि[12] शास्त्रान्तरात् व्यवच्छित्तिकल्पनायाम् अनव-
२० स्थानात्। प्रमाणात् संशयव्यवच्छेद इति चेत्; तद्यदि प्रमाणं शास्त्रादन्यत एवाधिगतम्; शास्त्रमनर्थकं प्रयोजनान्तराभावात्। शास्त्रादेवेति चेत्; न; तत्रापि [13]ततः संशयस्यैव भावात्, शब्दस्य तत्करणस्वभावत्वात्। तत्संशयस्यापि प्रमाणान्तराद् व्यवच्छेदश्चेत्; न; 'तद्यदि' इत्यादेः प्रसङ्गस्य पुनरावृत्तेरनवस्थाप्रसङ्गात्।

---

१ अर्थसंशयकृत। २ तदुपायो भावेऽपि आ०, ब०, प०, स०। ३ प्रेक्षावत्तापरिक्षयः। ४ उपेयानिर्णये। ५ कृष्यादौ शास्त्रे च। ६ "आप्तेनोच्छिन्नदोषेण"—रत्नक० १।५। "आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः। क्षीणदोषोऽनृतं वाक्यं न ब्रूयादेत्तसम्भवात्"—साङ्ख्यका० माठर० पृ० १३। ७ यत्प्रति—आ०, ब०, प०, स०। ८ एवञ्च तत्त्वे—आ०, ब०, प०, स०। ९ "आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा।"—न्यायभा० १।७। "यो यत्राविसंवादकः स तत्राप्तः परोऽनाप्तः। तत्त्वप्रतिपादनमविसंवादः तदर्थज्ञानात्।"—अष्टश०, अष्टसह० पृ० २३६। १० "व्याख्यातॄणां हि वचनं क्रीडाद्यर्थमन्यथापि सम्भाव्यते शास्त्रकृतां तु प्रकरणप्रारम्भे न विपरीताभिधेयाद्यभिधाने प्रयोजनमुत्पश्यामो नापि प्रवृत्तिम्।"—न्यायवि० टी० पृ० ४। ११ "अर्थसंशयोऽपि हि प्रवृत्यङ्गं प्रेक्षावताम्। अनर्थसंशयो निवृत्यङ्गम्। अत एव शास्त्रकारेणैव पूर्वं सम्बन्धादीनि युज्यन्ते वक्तुम्।"—न्यायवि० टी० पृ० ४। १२ शब्दस्य। १३ शास्त्रादेवाग—आ०, ब०, प०, स०। १४ शास्त्रहेतुकसंशयस्यापि। १५ शब्दात्मकात् शास्त्रात्।

ततो दूरं गतेनापि वाक्यमात्रमिजल्पितम् ।
अर्थनिर्णयकृद्वाक्यमादिवाक्य तथा न किम् ? ॥२०१॥
अङ्गीकारस्तवात्रापि न युक्तः परिदृश्यते ।
आप्तोल्लिपक्षे वैफल्यं वाक्यस्यास्य हि दर्शितम् ॥२०२॥
यंत्र श्रोतुः प्रवृत्त्यङ्गं श्रद्धापुत्पादनं सुधीः ।
व्यावर्णितमसन्दिग्धमादिवाक्यप्रयोजनम् ॥२०३॥
तदप्याप्तोल्लिखितदपेक्षेत्स्यात् , वाक्यमेतद् वृथा भवेत् ।
आप्ताङ्गत्वेव श्रद्धादेः सम्भवादादिवाक्यवत् ॥२०४॥
अन्यथा चादिवाक्येऽपि श्रद्धापुत्पत्तिकारणम् ।
वाक्यान्तरं प्रतीक्ष्यं स्यादनवस्थानदुःखदम् ॥२०५॥
अनाप्तवचनत्वेऽस्य वाक्येन्मत्तादिवाक्यवत् ।
श्रद्धाकृत्वृष्येत्पत्तिरतः सम्भाव्यते कथम् ? ॥२०६॥

यस्तुनरेसत्-[3]व्यापकानुपलब्ध्या प्रत्ययवतिप्रमानस्य तदसिद्धतोद्भावनमादिवाक्यस्य प्रयोजनम् । अत्र हि 'नारब्धैर्न्य न श्रोतव्यमिदं शास्त्र' सम्बन्धादिरहितत्वात् उन्मत्तवचनवत्' इति कस्यचित् औरम्भवणादिव्यापकसम्बन्धाग्रमावोपदर्शनेन आरम्भादिनियारणार्थं प्रत्यक्ष- १५
क्षाने तत्सम्बन्धाप्युपदर्शनेन तैवनुपलम्भस्याप्सिद्धत्वमनेनोद्भाव्यते, अन्यथा शास्त्रारम्भादौ प्रेक्षावतामप्रवृत्तिप्रसङ्गादिति , तदपि न चतुरस्रम् , यैंचनमात्राप्त मुनिभिस्तत्सम्बन्धाप्युपदर्शनासम्भवेन तदसिद्धतोद्भावनस्य दुर्निवानत्वात् । न हि [4]व्यापकोपलम्भमवितथमनुपस्थापयन् तदनुपलम्भप्रत्याख्यानाय वचनमेतत्समर्थम् । तदुपलम्भस्यैव तदनुपलम्भनिषेधित्वात् । केवलस्य तदुपदर्शनसामर्थ्यवैवकस्येऽपि सकस्यशास्त्रश्रवणसहितस्य तत्सामर्थ्यमस्त्येव, अधिगतशास्त्रस्य सम्बन्धादौ निर्णयोपपत्तेरिति चेत् , न, व्यापकानुपलम्भे त्रीयति [5]तच्छ्रवणस्यैवासम्भवात् अन्यथा तदसिद्धतोद्भावनवैयर्थ्यात् । उपमृद्यते तदनुपलम्भ इति चेत्, कुतस्तदुपमर्दनम्[7]? सम्बन्धादिनिर्णयात् । सोऽपि कस्मात् ? [11]तच्छ्रवणात् । तदपि कुतः ? तदुपमर्दनादिति चेत्, न, [12]चक्रक-

---

१ "श्रद्धाकृत्वृष्युत्पादनार्थं तदिदमेव ।"–त० श्लो० पृ० ४। "तच्छ्रवणादभिधेयादौ श्रद्धाकृत्वृष्युत्पादः ततः प्रवृत्तिरिति वैचित् स्वयूथ्याः।" –सिद्धिवि० टी० प० ५। २ आप्ताङ्गत्वा श्रद्धादेरुपपत्तभावे। ३ "तस्मात् 'यत् प्रयोजनरहितं वाक्यम्, तदर्थो वा न तद् प्रेक्षावताऽऽरम्भे कर्तुं प्रतिपादयितुं वा तथा दृष्टादिमादिवाक्यं श्रवणतत्परीक्षा च निष्प्रयोजनं वेदं प्रकरणं तदर्थो वा' इति व्यापकानुपलब्ध्या प्रत्यक्षवतिप्रमानस्य तदसिद्धतोद्भावनमार्थसादौ [प्रयोजनरत्नवोपन्यासः।" –हेतु बि० टी० पृ० २। स्या० प्र० कु० पृ० १। "तत्र निषेध्यस्य यद्व्यापकं तस्यानुपलब्धिः व्यापकानुपलब्धिरुच्यते। तथा हि अत्र आरम्भप्रेक्षत्वं निषेध्यम्, तत्र व्यापकं सम्बन्धाग्रतिपत्तम्, तस्यानुपलब्धिः"–स्याप्रम० कु० प० पृ० ३९। ४ –र्थं श्रोतव्यमिति(दम् आ०, ब०, प०, स०। ५ शास्त्रारम्भप्रवृत्त। ६ सम्बन्धाद्यनुपलम्भात्। ७ सम्बन्धादिनिर्णयात्। ८ –ने तद्– आ०, ब०, प०। ९ सम्बन्धादि। १० सकस्यशास्त्रार्थप्रवण। ११ –पदशनम् आ०, ब०, प०, स०। १२ शास्त्रश्रवणात्। १३ सति शास्त्रश्रवणे सम्बन्धादिनिर्णयः, सति च तस्मिन् व्यापकानुपलम्भोपमर्दनम्, तस्मिंश्च सति शास्त्रश्रवणमिति।

दोषस्य मुख्यक्तत्वात् । आप्तवचनत्वेन प्रमाणत्वाद् अन्यनिरपेक्षमेवेदं[1] सम्बन्धानुपदर्शन-समर्थम् ; इत्यप्यसारम् ; उदीरितोत्तरत्वात्– अन्तरेणापि वचनमाप्ताज्ञयैव सम्बन्धादिसिद्धौ व्यापकानुपलम्भस्यासिद्धत्वं (त्व) निर्णयात् आदिवाक्यवत्, अन्यथा[2] तत्रापि[3] तदनुपलम्भ-निषेधाय वचनान्तरकल्पनायामनवस्थानात्। तन्नेदमपि विवेकचतुरचेतसां चेतसि प्रीतिकरम् ।

प्रतिज्ञावचनमेतत् ; इत्यपि तादृगेव । वचनमात्रात् प्रतिज्ञार्थासिद्धेः सर्वत्र हेतुवैफल्यप्रस-ङ्गात् । वक्ष्यमाणः[4] शास्त्रार्थो हेतुरिति चेत्, न ; प्रत्यक्षपरोक्षरूपस्य प्रमाणस्यैव शास्त्रार्थत्वात्। तस्य च स्वरूपादिविषयचतुर्विधविप्रतिपत्तिनिराकरणमुखेन यथास्थानमुपवर्ण्यमानैरुपपत्तिविशेषै-र्निर्णय(ये)शास्त्रार्थपरिज्ञानस्य परिपूर्णत्वात् किमपरमवशिष्यते यदत्र प्रतिज्ञायमानं शास्त्रार्थ-ज्ञानसाध्यं भवेत् ? तन्नेदमपि तत्प्रयोजनम् पूर्वोपन्यस्तप्रयोजनवत् विचारासहत्वात् ।

अयमेव च शास्त्रकारस्याप्यभिप्रायः, सर्वस्याप्यस्यादिवाक्यप्रयोजनस्य चूर्णौ निराकरणात् । न च तदीयमेव शास्त्रं व्याचक्षाणैस्तदनभिमतमेवादिवाक्यप्रयोजनमभिधातुं युक्तम् । तर्हि किमप(किम्प)रमिदमादिवाक्यमिति चेत् ? 'सङ्क्षेपेण शास्त्राभिधेयशरीरप्रतिपादनपरम्' इति ब्रूमः । तथा हि–**'वचोभिर्नीयते'** इति सव्यापारं शब्दशरीरमुपदर्शितम्। **'न्यायः'** इत्यभिधेयशरीरम् । इतरत्सर्वं यथासम्भवमुभयत्र विशेषणम् । किम्प्रयोजनं सङ्क्षेपेण तदुप-दर्शनस्येति चेत् ? विनेयव्युत्पादनमेव, विस्तरेण तदुपदर्शनवत् । नन्विदमपि शास्त्रकारस्या-नभिप्रेतमेव सङ्क्षेपतः शास्त्रशरीरोपदर्शनस्यापि चूर्णौ प्रतिक्षेपात् ; "सत्यम् ; शब्दैकदुमात्रा-पेक्षया तत्प्रतिक्षेपः, वाङ्मात्रेण निश्चयायोगात्" [ ] इति तत्रैव[5] वचनात् । न चेदं वाङ्मात्रमादिवाक्यम् ; आप्तोपनीतत्वेन वाग्विशेषत्वात् । आप्तत्वमेव शास्त्रकारस्य न निश्चित-मिति चेत् ; न , कुतश्चित्[6] चिरसंवासादेस्तन्निश्चयसम्भवात् । अनिश्चिततदाप्तभावस्य नेदं तदुपदर्शनक्षममिति चेत् ; न ; प्रत्यक्षादावपि समानत्वात् । न हि तदप्यनिश्चिततदभ्यभिचारा-दिविशेषस्य स्वविषयोपदर्शनक्षमम् । न च सङ्क्षेपावगमे विस्तरवैयर्थ्यम् ; प्रतिपत्तिविशेषस्य तदधीनत्वात् । प्रवृत्त्यङ्गत्वमेवाप्तवचनत्वादस्य[7] कस्मान्न भवतीति चेत् ? न ; वचनमन्तरेणापि प्रवृत्तेराप्ताज्ञयैव[8] सम्भवादित्युक्तत्वात् । संशयादिकारणत्वं तु निवारितमेव । तन्न किञ्चिदत्र परिहास्यमस्तीति पर्याप्तं[9] प्रसङ्गेन ।

कस्यचिदत्र चोद्यम्–"प्रमाणादिष्टसंसिद्धिरन्यथाऽतिप्रसङ्गतः ।" [प्रमाणप० पृ० ६३] इति वचनात् न्यायमलप्रक्षालनस्यापीष्टत्वात् । तदपि[10] प्रमाणादिति वक्तव्यं न सम्य-ग्ज्ञानादिति । न च सम्यग्ज्ञानमेव प्रमाणम् ; अज्ञानस्यासम्यग्ज्ञानस्य च तस्य[11] भावात् । न च

---

१ शास्त्रम् । २ आप्ताज्ञया सम्बन्धादिसिद्ध्यभावे । ३ आदिवाक्येऽपि । ४ –णशा–आ०, ब०, प०, स० । ५ "चतुर्विधा चात्र विप्रतिपत्तिः–सङ्ख्यालक्षणगोचरफलविषया ।"–न्यायवि० टी० पृ० ९ । ६ अकलङ्कदेवस्य । ७ अकलङ्कीयं शास्त्रं न्यायविनिश्चयाख्यम् । ८ –क्षाणे सदमि –आ०, ब०, प० –क्षणैस्तदभि–स० । ९ युक्तिशून्यनिरर्थकशब्दापेक्षया । १० चूर्णौ । ११ चिरसहवासादेः । १२ आदिवाक्यस्य । १३–राज्ञयैव आ; ब, स० । –रायवैव प० । १४ आदिवाक्यस्य विशेषतः चर्चा निम्नग्रन्थेषु द्रष्टव्या–न्यायम० पृ० ६ । सन्मति०टी० पृ०१७० । तत्त्वसं पृ०२ । त०श्लो० पृ०४ । स्या० र०पृ०१४ । १५ न्यायमलप्रचालनमपि ।१६ प्रमाणस्य ।

शब्दलिङ्गादेरज्ञानस्य लोके प्रामाण्यं न प्रसिद्धं युक्तियुक्तं चेति शक्यं वक्तुम्; उभयस्याप्युपपत्तेः। लोकस्तावत् 'दीपेन मया दृष्टं वस्तुपाऽवगतं धूमेन प्रतिपन्नं शब्दान्निश्चितम्' इति व्यवहरति। न चौपचारिकं तेषां प्रामाण्यमिति युक्तं वक्तुम्, यतो यस्य प्रमितिक्रियाया साधकतमता तस्य प्रामाण्यमिति प्रसिद्धिः, प्रमाणपदाच्चोक्तन्यायेनार्थस्यायगमः। तथा शास्त्रान्तरेऽपि—अव्यभिचारादिविशेषणविशिष्टोपलब्धिजनकस्य बोधस्यावोधस्य वा सामान्येन प्रमाणत्वप्रसिद्धिः। यथा ५ चोक्तम्—"लिङ्गितं साक्षिणो भुक्तिः प्रमाणं त्रिविध स्मृतम्" [ ] लोकेऽपि तथाभूतस्यैव प्रमाणत्वव्यवहारो यथाऽऽहुः—अस्मिन्नियतयोऽस्माकमयं पुरुषः प्रमाणम्। युक्तियुक्तं चैतत्, यतः प्रमाणपदं करणव्युत्पत्त्याभिधायकं प्रसीयतेऽनेनेति प्रमाणम्। करणविशेषस्य विशिष्ट कार्यजनकत्वेन प्रमाणत्वात्, कार्यविशेषैश्च कार्यान्तरेभ्यः प्रमाणस्येवाव्यभिचारादिस्वरूपत्वेन वा। तत्र सम्यग्ज्ञानमेव प्रमाणम्, अन्यस्यापि भावात्। ततो न 'सम्यग्ज्ञानजलैः' इत्युपपन्नम्, १० निरवद्योपप्रमाणसंग्रहमाशास्ते। सम्यग्ज्ञानात्मनैव प्रमाणेन न्यायमलप्रक्षालनात्, किमितरप्रमाणपरिग्रहेणेति चेत्? न सदेवत्, एवं प्रमाणसम्प्लवस्यानभीष्टिप्रसङ्गात्। अभीष्टश्च कथञ्चित्प्रमाणसम्प्लवः स्याद्वादिनामिति। तदेवंलक्षणोनिराधिकरीयं सम्यग्ज्ञानात्मकत्वमेव प्रमाणस्य व्यवस्थापयन्नाह—

प्रत्यक्षलक्षणं प्राहुः स्पष्टं साकारमञ्जसा।
द्रव्यपर्यायसामान्यविशेषार्थात्मवेदनम् ॥३॥ इति। १५

'न्यायः' इत्यनुवर्त्तमानमर्थग्रहाभिमुक्तिपरिणामेन द्वितीयान्तमिह सम्बध्यते। ततोऽयमर्थः—न्यायं प्राहुः स्वामिसमन्तभद्रादयः। किं प्रशब्देन आहुरिति पर्यायस्त्वादिति चेत्? न, 'प्रकर्षेण आचार्योपदेशपारम्पर्येण आगतमाहुः प्राहुः' इति व्याख्यानार्थत्वात्। तदनेनानादिरयं शास्त्रप्रवन्धः, केवलं तत्सदृक्षेष्वादिविधायेव शास्त्रकारणतामाविष्कृतमिति दर्शयति। २० न्यायं किं प्राहुः? वेदनम् ज्ञानम्। कथं प्राहुः? स्पष्टम् शब्दादित्वेन (?) परिस्फुटं यथा भवति "तत्त्वज्ञानं प्रमाणम्" [आप्तमी० श्लो० १०१] इत्यादिना तथैव प्रवचनात्। अनेना वेदनात्मकत्व न्यायस्य व्यवच्छिनत्ति, तद्व्यवच्छेदे वेदनात्मकत्वविधानानुपपत्तेः। न हि शब्दस्य नित्यत्वमव्यवच्छिन्नमनित्यत्व विधातुमर्हति। कथ वचनमात्रासंवृण्वव्यवच्छेद इति चेत्? न, सोपपत्तिकत्वादस्य वचनस्य। तथा च प्रयोगः—न्यायो वेदनात्मा, न्यायस्वान्यथानुपपत्तेः। २५ कथं धर्मश्च हेतुरिति चेत्? न, तस्यापि हेतुत्वाविशेषस्य वक्ष्यमाणत्वात्।

---

१ सम्यग्विशेषणम्। २ "अव्यभिचारिणीमसंदिग्धामपूर्वार्थविज्ञानमनधिगतार्थाधिगमं वा प्रमाणम्।"—न्यायम० पृ० १२। ३ यतोक्तम् आ०, ब०, प०, स०। "प्रमाणं लिङ्गितं भुक्तिः साक्षिभ्यश्चेति कीर्तितम्।"—आह्निक० २।१२। ४—५ एतत् आ०, ब०, प०, स०। ५ एकस्मिन् प्रमेये बहूनां प्रमाणानां प्रवृत्तिः प्रमाणसम्प्लवः। ६ "उपरीणविशेषस्यापरि प्राप्तसम्प्रत्ययानुपपत्तेरनुपपत्तेः। सति हि प्रतिपत्तुरुपरीणविशेषे देशादिविशेषोपसर्पणकालादिसम्पाते प्रतिपन्नमपि दिरभ्यस्तं स पुनरनुमानान् प्रतिपित्सते तत्प्रतिबन्धग्रहणादिरागत्यकरणात् प्रतिपत्तिविशेषोपपत्तेश्च। पुनस्तमेव प्रस्पष्टतो वुभुत्सते तत्करणसम्बन्धात्तदिदमित्थमिति।"—सन्मति० पृ० ६। प्रमेयक० पृ० ५९। ७—८ नि—आ० ब०, प०, स०। ८ द्वितीयत्वात्।

असिद्धमन्यथाऽनुपपन्नत्वम् अचेतनास्यापीन्द्रियादेर्न्यायत्वाविरोधात्, नीयतेऽनेनेति हि नीतिक्रियाकरणं न्याय उच्यते, तच्चाचेतनमपि नानुपपन्नं प्रसिद्धियुक्तिभ्यां तस्य समर्थितत्वादिति चेत्; अत्र प्रतिविधानम्; अचेतनस्य सामग्र्येकदेशस्य, सामग्र्यारूपस्य वा प्रमाणत्वं भवेत् प्रकारान्तरासम्भवात्? न तावत्सामग्र्येकदेशस्य; साधकतमत्वासम्भवात्। प्रमितिक्रियां प्रति करणत्वे हि तस्य प्रामाण्यं भवेत् करणत्वञ्च साधकतमत्वमेव "साधकतमं करणम्" [पा०व्या० १।४।४२] इति वचनात्। सामग्र्येकदेशस्य च नयनप्रदीपादेर्यदि हेतुत्वमेव साधकतमत्वम्; तदा सर्वतद्धेतूनामपि साधकतमत्वेन प्रामाण्यान्न कश्चित्प्रमाता नापि किञ्चित्प्रमेयमित्यतिमहदसमञ्जसं प्राप्तं करणस्यैव कर्तृत्वादिविरोधात्। हेतुत्वाविशेषेऽपि सर्वेषां किञ्चिदेव करणं तत्रैव करणत्वस्य विवक्षितत्वात् "विवक्षातः कारकाणि भवन्ति" [जैने०महा० १।४।४१] इति न्यायात्; इत्यप्यसङ्गतम्; प्रमात्रादेरपि विवक्षया करणत्वप्रसङ्गात् विवक्षाया विषयनियमाभावात्। कथं वा पुरुषेच्छानिबन्धनं कस्यचित्प्रमाणत्वं वस्तुप्रतिपत्तावुपयुज्येत? सांवृतस्यैव प्रमाणप्रमेयतत्फलभावस्य प्रसङ्गात्। कारणस्यैवातिशयः साधकतमत्वमिति चेत्; न; तदपरिज्ञानात्। अन्त्यक्षणेप्राप्तिरतिशय इति चेत्; न; प्रमाणाभिमतप्रदीपादिवत् कदाचित् प्रमेयस्य घटादेरन्त्यक्षणप्राप्तिभावात्। एतेन सन्निपत्यकारित्वमतिशय इति प्रत्युक्तम्; प्रमेयस्यापि सन्निपत्यकारित्वसम्भवात्। स खलु सन्निपत्यकारीत्युच्यते यस्मिन्सति नियमेन कार्यस्य भावः, सम्भवति चायं प्रमेयापेक्षयाऽपि प्रकारः, कदाचित्प्रदीपादिकरणान्तरसाकल्येऽपि प्रमेयसन्निधिविरहविधुरीकृतप्रादुर्भावस्य घटादिसंवेदनस्य तत्सन्निपाते नियमेनोत्पत्तिदर्शनात्। न केवलं विषयस्यैव सन्निपत्यजनकत्वम्, प्रमातुरपि तत्त्वात्। न हि तदसन्निधानेऽपि अनवधानकृते मूर्च्छादिनिबन्धने वा विषयज्ञाननिष्पत्तिः तदनवधानाद्यपगम एव नियमेन तन्निष्पत्तेः। अतः प्रमातुरपि सन्निपत्यजनकत्वात् साधकतमत्वं भवेत् विश्वरूपस्यैवं वचनाच्च। तन्नायमप्यतिशयः साधकतमत्वव्यवस्थाहेतुः अतिव्याप्तिदुष्टत्वात्। निरपेक्षकारित्वमतिशय इति चेत्; न; असिद्धत्वात्, सामग्र्येकदेशानामन्योन्यसहकारित्वेन कार्यकारित्वात्। सामग्र्यन्तरतदेकदेशनिरपेक्षत्वं तु न प्रदीपादेरेव, प्रमात्रादेरपि भावात्। एवं चेतनस्यापि संशयादिज्ञानस्य सामग्र्येकदेशस्य प्रामाण्ये साधकतमत्वं निरूपयितव्यम्। तन्न सामग्र्येकदेशस्य प्रदीपादेः प्रमितिक्रियाकरणत्वम् असाधकतमत्वात् प्रमात्रादिवत्।

अत्राह विश्वरूपः—"सत्यमेतत्, सामग्र्येकदेशस्य न प्रामाण्यं मयापि विचार्य तत्परित्यागात्" [ ] इति; सोऽपि न सम्यग्वादी; बोधमात्रलक्षणप्रमाणवादिनं प्रति प्रदीपादिभिस्तदेकदेशैः अव्याप्तिदोषस्यानुद्भावनप्रसङ्गात्। यदि हि तेषां प्रामाण्यम्, न च

---

१ आत्मादीनामपि। २ हैम० बृ० बृ० ७।४।१२२। "न चानेककारकजन्यत्वेऽपि कार्यस्य विवक्षातः कारकाणि भवन्तीति न्यायात् साधकतमत्वं विवक्षात इति वक्तव्यम्, पुरुषेच्छानिबन्धनत्वेन वस्तु व्यवस्थितेरयोगात्।"—सन्मति० टी० पृ० ४७१। ३ कल्पितस्यैव। ४ अतिशयज्ञानाभावात्। ५ कार्याव्यवहित प्राक्क्षणवृत्तित्वम्। ६ तस्यापि प्रमाणत्वं स्यात्। ७ "सन्निपत्य जनकत्वमतिशयः इति चेन्न···"—न्यायम० पृ० १२। ८—न् खत्वस—आ०,ब०,प०,स०। ९ कार्यस्यामावः आ०, ब०,प०,स,। १० —न्ततत्सा—ता०। ११ प्रमेयसन्निधाने। १२ सन्निपत्यजनकत्वात्। १३ —न तदस—आ०,ब०,प०,स०। द्रष्टव्यम्—सन्मति० टी०पृ० ४७२। १४ सन्निधाने सत्यपि। १५ विषयज्ञानोत्पत्तेः। १६ जैनादिकं प्रति। १७ सामग्र्येकदेशैः। १८ प्रदीपादीनाम्।

तत्र लक्षणं तदा स्यादव्याप्तिः, अप्रमाणे तु प्रमाणलक्षणभावो न दोषाय अतिव्याप्त्यभावस्य गुणत्वात्। लोकप्रसिद्धया 'तत्प्रमाणत्वमङ्गीकृत्य सैरव्याप्तिरुद्भाव्यते न वस्तुवृत्त्या। अत एवोक्तम्-'लोकव्यवहारोपेन मया दृष्टमित्यादि व्यवहरति' इति पर्यन्तमिति चेत्, वस्तुवृत्त्या तर्हि बोधप्रमाणलक्षणमव्याप्तिदोषरहितमेवेति कथं तत्र तदुद्भावनं 'निरनुयोज्यानुयोगाभिग्रहस्थान न भवेत्? वस्तुतश्च तेषामप्रामाण्ये कथमिदमुक्तम्-'युक्तियुक्तं चैतत्' इत्यादि, अवस्तु- ५ भूतस्य युक्तियुक्तत्वानुपपत्तेः।

किञ्च, तेषां प्रामाण्ये युक्ति प्रमितिक्रियाकरणत्वमेव। यदुक्तम्-'प्रमाणपद करणत्वाभिधायकं प्रमीयतेऽनेनेति प्रमाणम्।' इति, तस्य च साधकतमस्वभावस्यार्थावस्वभावत्वं स्वयं प्रतिपद्यमान एव कथमिदं वक्तुमर्हति 'युक्तियुक्तं चैतत्' इति? यथाज्ञानमेव परार्थप्रवृत्तानां वचनस्योपपत्ते, अन्यथाज्ञातस्यान्यथावचने हि वञ्चकस्याप्त परार्थकारी स्यात्। अस्तु तर्हि १० वस्तुत एव तेषां प्रामाण्यमिति चेत्, न, तस्य निरस्तत्वात्। वस्तुमूलप्रमाणसामर्थ्येनैवेशत्वया तेषां तैदिति चेत्, नन्वेवमुपचार एव स्यात्, प्रमाणैकदेशतया तेषां प्रामाण्यात्। न चैतत्सत्य भवताम् 'न चौपचारिकं तेषां प्रामाण्यम्' इत्यस्य विरोधात्। 'सामग्रीतद्वतोरव्यतिरेकात् सामग्री प्रामाण्यवत् तत्प्रामाण्यमपि वास्तवमेव नौपचारिकमिति चेत्,

कथमेकक्रियायां स्यादनेकं कारण पृथक्। १५
[11]तास्यादिभेदे यद्भेदश्छेदेऽप्युपलभ्यते ॥२०७॥
प्रमितेरपि भेदश्चेत्, न, [12]सकृत्तत्सम्भवात्।
ज्ञानानां युगपज्जन्म न यद्वः शासने मतम् ॥२०८॥
क्रमेण तस्य[13] भावश्चेत्, [14]अक्रमात्तत्क्रमः कथम्?
कारणाक्रमान्तो यत् कार्यं क्रमवदीक्ष्यते ॥२०९॥ २०

तन्नेदं युक्तम्-[15]प्रत्यादिवत् प्रमाणादेरपि वस्तुसत्तत्प्रसङ्गात्। तस्यापि [16]तद्वतश्चैकदेशत्वात् तत्र[17] प्राप्तमपि प्रामाण्यं विशेषविधिना प्रमातृव्यापिना बाध्यत इति चेत्, कः पुनरयं तस्य [18]बाधो नाम? सामग्रीतादात्म्यनिषेध इति चेत्, न, [19]तदभावात्। अन्यथा प्रमातृव्यापेरप्यभावप्रसङ्गात्। न हि सामग्रीबहिर्गतस्य [1]तत्त्वम्, अतिप्रसङ्गात्। तदन्तर्गतत्वाच्चि[21] प्रामाण्यमेव निषिध्यत इति चेत्, न, तदन्तर्गमस्यविरेकेण नेत्रादीनामप्यपरस्य प्रामाण्यस्यामावात्। २५ ततो 'यद्यन्तर्गमो न प्रामाण्यनिषेध, [22]स चेत्, नान्तर्गम' इति महानर्थ व्याघातः परस्य। कीदृशेन वा [23]तेन [24]तस्य बाधनम्? गौणेनेति चेत्, न, [25]तदवस्थायां प्रामाण्यस्यापप्रसक्तेः

१ लक्षणस्य लक्षणमावस्य। २ प्रत्यादिवत् प्रामाण्यम्। ३ "अनिश्चिदृश्यते निग्रहस्थानमिमीयो निरनुयोज्यानुयोग।"-न्यायसू० प।१।३१। ४ पृ० ५७ प० ७। ५ प्रत्यादीनां सामग्रैकदेशत्वम्। ६ पृ०५७ प० ८। ७ सामग्रैकदेशत्व। ८ सामग्रैकदेशानां प्रत्यादीनाम्। ९ प्रामाण्यम्। १० सामग्रीतदेवयोः। ११ कारकभेदे क्रियाभेद एवोपलभ्यते न क्रमेदः। १२ युगपत्। १३ ज्ञानजन्मनः। १४ क्रमरहितात् सामग्रीक्रमकरणम्। १५ प्रत्यादेरिव प्र-आ०, ब०, प०, स०। १६ तद्वतैक-आ०, ब०, प०, स०। १७ प्रमात्रादौ। १८ बोधो नाम आ०, ब०, प०, स०। १९ सामग्रीतादात्म्यनिषेधाभावात्। २० प्रमात्रादेरिवम्। २१ प्रमात्रादेः। २२ प्रामाण्यनिषेधः। २३ प्रमातृव्यापिना। २४ प्रामाण्यस्य। २५ गौणेनेत्यायाम्।

साधकतमत्वम्। एवमन्वयदपि व्यतिरिक्तं कारणं सर्वत्र वस्तुपरिणतौ साधकमेव [1]तद्योग्यत्वसव्यपेक्षत्वात्, तद्योग्यत्वमेव [2]तदभिमुखं तत्र साधकमेव [3]निरपेक्षत्वात् प्रतिपत्तव्यम्। नन्वेवं तदाभिमुख्यपर्यायोऽपि सामर्थ्यस्य [4]प्राच्यादेव तच्छक्तिपर्यायात्, तस्यापि [5] तदाभिमुख्यपर्यायः प्राच्यादेव तच्छक्तिपर्यायादिति किं व्यतिरिक्तेन खड्गादिनेति चेत्? न; सर्वथा तदाभिमुख्यस्य [6]तन्निरपेक्षत्वे तदन्वयव्यतिरेकानुविधानस्याभावप्रसङ्गात्। अस्ति चैतत्, अतस्तस्यापि [7]तत्र [8]कारणत्वं वक्तव्यम्। अत एवोक्तम्—

"विशेषं कुरुते हेतुर्विस्रसा परिणामिनाम्।
मुद्गरादिर्घटादीनामन्वयव्यतिरेकवान् ॥" [ ] इति।

तस्मात् सर्वत्र वस्तुपरिणतौ भिन्नस्य तच्छक्त्याभिमुख्यमात्रे व्यापारः। भवतु तदभिमुखस्य तत्सामर्थ्यस्यैव साधकतमत्वम्, तत्क्रियानर्थान्तरत्वं तु कथं [9]तस्येति [10]चेत्? न; 'छिन्नं काष्ठम्' इति तत्क्रियासामानाधिकरण्येन [11]तत्प्रतिपत्तेः। [12]ततः काष्ठस्यैव [13]तदनर्थान्तरत्वं न तत्सामर्थ्यस्येति चेत्; न; तस्यापि [14] तदव्यतिरेकात्, व्यतिरेके सामर्थ्यतद्भावानुपपत्तेर्यथास्थानं विचारणात्। तन्न द्विधाभावः छिदिक्रिया। कुठारव्यापार एवोत्पातनिपातादिश्छिदिरिति चेत्; सत्यम्; तत्र [15] कुठारस्य साधकतमत्वं तस्य तत्क्रियापरिणामसामर्थ्यरूपत्वात्, न तु तस्य [16]तत्क्रियातोऽर्थान्तरत्वम् 'निपतत्युत्पतति वा कुठारः' इति [17]तत्सामानाधिकरण्येन तत्प्रतिपत्तेः। समवायादेवं प्रतिपत्तिर्नानर्थान्तरत्वादिति चेत्; न; समवायनिमित्तत्वे [18]तस्यैव तत्र [19] प्रतिभासप्रसङ्गात्। न चैवमभेदस्यैव प्रतिभासनात्। न [20]तस्यापि प्रतिभासनं सामानाधिकरण्यस्यैवावभासनादिति चेत्; न; अभेदस्यैव [21]तत्त्वात्। समवायस्यैव तत्त्वं कस्मान्नेति चेत्? न; 'सामान्यमेव विशेषः सामान्यविशेषः' [22]इत्यादावभेदस्यैव तत्त्वेन [23]परस्यापि सुप्रसिद्धत्वात्, समवायस्य च निषेत्स्यमानत्वात्। कुतः पुनः परिणामसामर्थ्यं भावस्येति चेत्? तदास्तां तावत् तदुपपत्तिसाम्राज्यस्यैव सविस्तरमुत्तरत्र निरूपणात्। तन्न किञ्चित्क्रियाव्यतिरिक्तं [24]करणम्। ततो नयनादेरपि नीतिक्रियाकरणत्वं तदव्यतिरेके स्यादिति तदचेतनत्वं विरुध्येत। [25]तस्य च चेतनत्वे निष्प्रयोजनमेव तदपरज्ञानकल्पनम्, अनेनैवाभिप्रायेण भाष्यकारैरप्यादिष्टम्—"न ह्यचेतनेन किञ्चित् [26]मीयते ज्ञानकल्पनावैफल्यप्रसङ्गात्" [ ] इति। तदनेन संशयादिज्ञानस्यापि प्रामाण्यं निरस्तम्; तस्यापि नीतिकरणत्वे तदनर्थान्तरत्वनियमान्न संशयादित्वं स्यात्। न हि

---

१ वस्तुगतसामर्थ्य। २ क्रियाभिमुखम्। ३ तन्निर—आ०, ब०, प०, स०। ४ तत्पूर्ववर्तिनः। ५ पूर्वसामर्थ्यस्यापि। ६ खड्गादिनिरपेक्षत्वे। ७ खड्गादेरपि। ८ छिदिक्रियायाम्। ९ कारकत्वं आ०, ब०, प०, स०। १० सामर्थ्यस्य। ११ चेत् छि—आ०, ब०, प०, स०। १२ अनर्थान्तरत्वप्रतीतेः। १३ छिन्नं काष्ठमिति प्रतीत्तिः। १४ तदर्था—आ०, ब०, प०, स०। १५ सामर्थ्यस्यापि। १६ कुठारगतव्यापारे। १७ तक्रियार्था—आ०, ब०, प०। कुठारगतक्रियातः। १८ क्रियासासामानाधिकरण्येन। १९ समवायस्यैव। २० प्रतीतौ। २१ अभेदस्यापि। २२ सामानाधिकरण्यात्। २३ इत्याद्यमे—आ०, ब०, प०, स०। २४ "तथा सामान्यमेव द्रव्यव्यावृत्तिहेतुत्वाद्विशेषो द्रव्यत्वादिः।"—प्रश० व्यो० पृ० १२७। २५ कारणम् आ०, ब०, प०, स०। २६ नयनादेः। २७ —त् क्रियते आ०, ब०, प०, स०।

नीतिर्वाद्वास्त्र्ये [1]तस्य तच्चम्, नीतेर्निर्णयरूपत्वात्। न हि निर्णय एव संक्षयादिः, विरोधात्। निर्णयात्मिका च नीतिर्निरूपयिष्यते। ततो न नयनादे संशयादेर्वा नीतिसाधकतमत्वं [2]तदनर्थान्तरस्य वेदनस्यैव तैस्त्वात् तस्य तत्र परनिरपेक्षत्वात्। न हि स्वर्यं तत्क्रियासामर्थ्यं (समर्थं) स्यान्यापेक्षणम्। असिद्धं परनिरपेक्षत्वम्, इन्द्रियमनसोरपेक्षणात् "इन्द्रियमनसी विज्ञानकारणम्" [ ] इति वचनादिति चेत्, न, ज्ञानस्योत्पत्तावेव [3]तैरपेक्षणात्, उत्पन्नस्य हु तस्यै ५ स्वत एव विषयनिर्णीतिर्नान्यतः। न चैवं नयनादेः संशयादेर्वा स्वतस्तन्निर्णीतिः, अचेतनत्वसंशयादित्वविरोधात्। निर्विकल्पकदर्शनमपि न स्वतस्तन्निर्णयसमर्थम्, तदृष्टमाविविकल्पकल्पनावैफल्यप्रसङ्गादिति न तस्यापि मुख्यं प्रामाण्यम्। निर्णयज्ञानहेतुत्वेन तु नेत्रादीनां प्रामाण्यमौपचारिकमेव न मुख्यम्। उक्तञ्च—

"सिद्धं यस्य परापेक्षं सिद्धौ स्वपररूपयोः। १०
तत्प्रमाणं ततो नान्यदविकल्पमचेतनम्॥" [सिद्धिवि० प्र०परि०] इति।

अत्र अविकल्पग्रहणेन तत्त्वनिर्णयस्वभावविकल्पत्वात् दर्शनस्य संशयादेश्च परिग्रहो नयनादेः अचेतनग्रहणेन।

वेदनं तत्फलाभिन्नः कथं तत्करणं यदि ?
कुठारस्तत्फलाभिन्नः कथं तत्करणं भवेत् ? ॥२१०॥ १५
प्रदनस्यापि "हुत्यदृष्टेक्ष नौ तस्य" प्रवर्तनम् ?।
व्यतिरिक्तं फलाद्यदे (च्चे) ज्ञानभिन्नस्यैव दर्शनात् ॥२११॥
विचाराद्व्यतिरिक्तं वेदनभिन्नस्यापि दर्शने।
दर्शनालिङ्गसौ[13] व्यायात् किंरूपो वा स कथ्यताम् ? ॥२१२॥
साध्यरूपं फलं तस्मादभिन्नं साधनं कथम् ?। २०
साध्यमेव हि "तथुक्तभेदः कथमन्यथा ? ॥२१३॥
सिद्धं च साधनं तस्मादभिन्नं" साध्यते कथम् ?।
"स्यात्सिद्धस्यापि साध्यत्वे साध्यत्यापरिनिष्ठितिः ॥२१४॥
साध्यसाधनभावश्च वेदनार्थावसाययोः।
अमेदश्चेति वागेषा पूर्वापरविरोधिनी ॥२१५॥ २५
मेरोपाधिर्हि "तद्भावो नाभेदं क्षमते भवन्।
अमेदश्च न "भेदम्, "तदुभयमेकत्र दुर्घटम् ॥२१६॥

---

१ संशयादेः। २ तदर्थान्त—आ०, ब०, प०, स०। ३ नीतिरित्यतोऽभिन्नस्य। ४ साधकतमत्वात्। ५ नीतिरित्यतः। ६ "ततः सुमानिनम्—इन्द्रियमनसी कारणं विज्ञानस्य अर्थो विषय इति"—कंभी० स्वइ० का० ५४। ६ इन्द्रियमनसोरपेक्षणात्। ७ ज्ञानस्य। ८ श्लोके। ९ कुठारगतोत्पतननिपतनक्रियारूपा क्रियाक्रिया। १० तुभ्यमेत् आ०, ब०, प०, स०। ११ तु आ०, ब०, प०। १२ प्रदनस्य। १३ विचारः। १४ साधनम्। १५ सिद्धस्यापरनिरपेक्षस्यापि सिद्धत्वात् कथं साध्यमेमिति भावः। १६ कथमेत्। १७ साध्यसाधनभावः। १८ मेदश्च इत्य—आ०, ब०, प०, स०। क्षमते इति पूर्वेणान्वयः। १९ मेरोनेदौ।

इति चेत्सत्यमेकान्ताभेदे दूषणमीदृशम् ।
नैवं स्याद्वादिनामिष्टिः[1] स्यादभेदस्य वाञ्छनात् ॥२१७॥

तथा हि–नेदमर्थनिर्णयरूपमेव वेदनम्; स्वनिर्णयरूपत्वाभावप्रसङ्गात् । न च नास्त्येव तस्य [2]तादूप्यम्; युक्तितस्तस्य व्यवस्थापनात् । नापि स्वनिर्णयरूपमेव अर्थनिर्णयरूपत्वाभावप्रसङ्गात् । न च नास्त्येव तस्य [3]तादूप्यम्; युक्तितस्तस्यापि व्यवस्थापनात् । न च तदुभयव्यतिरिक्तमेव, तस्यासंवेदनात् निर्णयवेदनयोः संसर्गवशादेविवेकावभासनं न वस्तुत [4]एवाविवेकभावादिति चेत्; न; विवेकनियमस्य निपेत्स्यमानत्वात् । ततो निर्णयवेदनयोः कथञ्चित् व्यतिरेकस्यापि भावान्नायुक्तः क्रियाकारकभावः । एतदर्थं च कारिकायाम् **अर्थात्म**ग्रहणम् । विषयभेदेन निर्णयभेदेऽपि तत्साधनज्ञानस्याभिन्नमानस्य अन्वयव्यतिरेकाभ्यां कथञ्चित् व्यतिरेकस्य [6]तेनोपदर्शनात् । सत्यपि व्यतिरेके निर्णयसमसमयस्य वेदनस्य कथं तत्करणत्वमिति चेत्? न; अत्र नैयायिकस्याविप्रतिपत्तेः, कार्यसमकालस्यैं नित्यस्य अन्यथा हेतुत्वाभावप्रसङ्गात् । निर्णयसहजन्मनस्तस्य[9] कथं[10] तत्कारित्वमिति चेत्? न; एकान्तेन तत्सहजन्माभावात्, क्षणभङ्गस्य निपेत्स्यमानत्वात् । इन्द्रियादिना तर्हि [11]किमुत्पाद्यते? न निर्णयः, तस्य वेदनकार्यत्वात् । नापि वेदनम्; तस्याक्षणिकत्वेन [12]तद्व्यापारात् प्रागपि भावादिति चेत्; न; निर्णयसमर्थस्य [13]तस्य तदुत्पाद्यत्वात् । पूर्वं तर्हि तदनिर्णयसमर्थमिति चेत्; न; तदापि विषयान्तरनिर्णयसमर्थत्वात् । [14]तस्य चान्यत इन्द्रियादेर्भावात् । स्वार्थनिर्णयविकलस्य तु न तस्य प्रामाण्यं सुषुप्तज्ञानवत् । निरूपयिष्यते चैतत् । सामर्थ्यस्य साधकतमत्वे स्वसंवेदनव्यावातः [15]तस्याप्रत्यक्षत्वात् क्रियानुमेयत्वेनोपगमात् "[16]शक्तिः क्रियानुमेया" [ ] इति वचनात्, स्वसंविदितश्च प्रमाणमिति सिद्धान्त इति चेत्; अस्तु [17]शक्तिरूपेण तद्व्यावातो न कश्चिद्दोषः, [18]शक्तेर्लब्धिसंज्ञितभावेन्द्रियस्वभावाया अप्रत्यक्षत्वोपगमात् । तत एव सुमतिदेवैरुक्तम्–"**शक्तिः परोक्षेति चेन्न काचित्क्षतिः** [ ] इति । स्वसंविदितत्वं तूक्तं[19] स्वरूपापरोक्षनिर्णये[20] क्रियातादात्म्यात् । [21]तत्क्रियाया अपि परोक्षशक्तितादात्म्यात् परोक्षत्वप्रसङ्ग इति चेत्; [22]अभिमतमेवैतत् परोक्षेतरस्वभावतया सर्वस्यापि वस्तुनोऽभ्यनुज्ञानात् । वक्ष्यति च–

"प्रत्यक्षं बहिरन्तश्च परोक्षं स्वप्रदेशतः" [न्यायवि० श्लो० १२८] इति ।

ततो वेदनस्यैवार्थात्मविषयस्य प्रामाण्यादुपपन्नमेतत्–'न्यायो वेदनादेव न्यायत्वान्यथानुपपत्तेः' इति ।

---

१ –ष्टः स्या–आ०, ब०, स० । २ स्वनिर्णयरूपत्वम् । ३ अर्थनिर्णयरूपत्वम् । ४ अभेदावभासनम् । ५ अभेदात् । ६ अर्थात्मग्रहणेन । ७ निर्णयसाधकतमत्वम् । ८ –स्यानि–आ०, ब०, प०, स० । ९ वेदनस्य । १० –यं सहजा–आ०, ब०, प०, स० । ११ किमुत्पद्य–आ०, ब०, प०, स० । १२ इन्द्रियादिव्यापारात् । १३ वेदनस्य । १४ विषयान्तरनिर्णयसमर्थस्य वेदनस्य । १५ सामर्थ्यस्य । १६ "कथमन्यथा न्यायविनिश्चये 'सहभुवो गुणाः' इत्यस्य 'सुखमाह्लादनाकारं विज्ञानं मेयबोधनम् । शक्तिः क्रियानुमेया स्यायूनः कान्तासमागमे ।' इति निदर्शनं स्यात् ।"–सिद्धिवि० टी० पृ० ६९ । १७ शक्तिनिरूपेण त–आ०, ब०, प०, स० । १८ "लब्ध्युपयोगौ भावेन्द्रियम् । अर्थग्रहणशक्तिर्लब्धिः । उपयोगः पुनरर्थग्रहणव्यापारः ।"–लघी० स्ववृ० श्लो० ५ । १९ सामर्थ्यस्य । २० निर्णयरूपक्रिया । २१ निर्णयक्रियायाः । २२ अभिमतमेतत्–आ०, ब०, प०, स० ।

नन्वर्थस्य घटादेः आत्मनश्च योग्यस्यावस्त्य वेदनमेव कथम् ; अशक्तस्य तदसम्भवात् । न अशक्तस्य सम्यग्मुष्टिविषयत्वम् , योग्यस्यैव तदुपपत्तेः । शक्तस्यैव तस्य वेदनमिति चेत् ; न , एकान्तेन द्रव्यरूपत्वे पर्यायरूपत्वे सामान्यात्मकत्वे विशेषाकारत्वे च तस्यार्थक्रिया-सामर्थ्यस्य शास्त्रकारेणैव निषेधात् । न च द्रव्यादे रूपान्तरमस्ति, यतस्तस्याऽनिषिद्धसामर्थ्यस्य किञ्चिद्वेदनं स्यात्तदसम्भवात् । सौम्यरूपेयं प्रतिभेति चेत्, क्षत्राह–'द्रव्यम्' इत्यादि । ५ तात्पर्यमत्र–यद्यप्येकान्तनित्यादिरूपत्वे अर्थात्मनोः शक्तिरेकस्यम् अर्थक्रियाविरहात् , कथञ्चि-न्नित्यादित्वभावत्वे तु नार्थ दोषः तत्रार्थक्रियासामर्थ्यस्य निरूपणाद्वेदनविषयतोपपत्तेः निरवद्यत्वं प्रतिज्ञाया इति ।

एकान्ततो नित्यमनित्यमेवं समानमन्यत्वं न वस्तु किञ्चित् ।
अर्थक्रियायां तदशक्तिभावात् तथाविधस्याप्रतिवेदनाच्च ॥२१८॥ १०

अविद्यमानं कथयन्ति सन्तस्तद्वेदनं नाम कथं प्रमाणम् ।
अवस्तुसंस्पर्शितया ततोऽपि को नाम मानव्यवहारयोगः ॥२१९॥

ततोऽस्तु चात्मन्तरमेव रूपमन्तर्बहिर्वस्तुषु वस्तुदृक्त्वा ।
तस्यार्थशक्तेः प्रतिवेदनाच्च क्योमारविन्दप्रतिमं तदन्यत् ॥२२०॥

तथोदितं स्वामिसमन्तभद्रैरेकान्तनीतिव्रततीकुठारैः । १५
अमेदभेदात्मकमर्थतत्त्वं तव स्वतश्चान्यतरत्प्रपुष्यम् ॥" [युक्त्यनु० श्लो०७]

तद्वेदनं तन्निरवद्यरूपं प्रमाणतत्त्वेन निरूप्यमाणम् ।
अयुक्तिमन्नेति वदन्त्युदारं द्रव्यादिशब्दग्रहणेन देवैः ॥२२२॥

स्यान्मतम्–आगमार्थ एव प्रमाणार्थो वक्तव्यः, आगमनैर्मल्यनयनयोपायतया तैंदपर-प्रमाणपरिचिन्तनात् , एकविषयत्वे च संवादसामर्थ्यात् तस्य तदुपायत्व न भिन्नविषयत्वे २० तस्यासमर्थ्यमावात् । हेयोपादेयतत्त्वमेव च "सोपायमागमार्थो न द्रव्यादिरूपावर्थानां तत्कर्थं तयोः प्रमाणार्थत्वमुक्तं न हेयादितत्त्वस्य सोपायत्वेति ? तन्न सारम् , अर्थानमनोरेव सोपाय-हेयादिरूपत्वात्, "द्रव्यादित्वभावकथनं तु तदभावे हेयादिरूपस्यैवासम्भवप्रतिपादनार्थम् "तथैव यथावसरं निरूपणात् । ततश्च "प्रत्यागमानां द्रव्यादिरूपवस्तुवादविमुखत्वेन वस्तुभूतहेयादितत्त्व-प्रतिपादकत्वाभावादप्रामाण्यम्, परमागमस्य चान्ययोगव्यवच्छेदेन तद्वैपरीत्यादू हेयादिविषयं २५ प्रामाण्यमयस्यापितं भवति । ततो निरवद्यं यथोक्तविषयस्य वेदनस्यैव न्यायत्व तदन्यथानुपपत्ति-नियमनिश्चयात् । अनिश्चितान्वयस्य कथं हेतुत्वमिति चेत् ? न ; अन्ययानुपपत्तेरेव निश्चितया अन्व-यस्यापि निश्चयात् तस्यास्तदुपपत्तात् । साधर्म्यदृष्टान्तानुपदर्शने कथं "तन्निश्चय इति चेत् ? न, पक्ष

---

१ द्रव्यपर्यायसामान्यविशेषातिरिक्तम् । २ असिद्धा । ३ विशेषरूपम् । ४ भेदतिरेकेऽप्यभेदः,अभेदव्तिरेकेऽपि भेदः, केवलं भेदः अभेदश्च न तत्त्वमिति भावः । ५ कारिकायां द्रव्यपर्यायेत्यादिपदसोपात्तत्वेन । ६ अकलङ्कदेवः । ७ आगमनिश्चितत्वप्रकारेप्रमाण । ८ आगमनिश्चप्रमाणत्व । ९ –सेन तत्प्र–ज्ञा०, घ०, प०, स० । १० हन्तोपायी-पायानीत्यनुपरिहतम् । ११ इत्यादे स्व–ज्ञा०, ब०, प०, स० । १२ तदेव ज्ञा०, ब०, प०, स० । १३ बौद्धाद्य-मानाम् । १४ अन्वयनिश्चय ।

एव तन्निश्चयोपपत्तेः विपक्षे बाधकसामर्थ्यात्, तस्य चोक्तत्वात्। निरूपयिष्यते चैतत्सविस्तरमिति नातीव निर्बाध्यते। यथोक्तस्य वेदनस्यैव प्रामाण्ये शब्दलिङ्गयोरतन्न स्यात् शब्दस्यावेदनत्वात् लिङ्गस्यावेदनस्यापि भावात्, तथा च तन्निरूपणमप्रस्तुताभिधानम्, प्रमाणमेव हि तच्छास्त्रे निरूपयितव्यं नापरमिति चेत्; अत्राह–'**अञ्जसा**' इति। तात्पर्यमत्र–
५ यथोक्तमेव संवेदनं मुख्यतः प्रमाणम्, तद्धेतुत्वेन तूपचरितं प्रामाण्यमचेतनस्यापि शब्दलिङ्गादेरनिवारितमिति। कथं शब्दादेस्तद्धेतुत्वमिन्द्रियादेरेव तद्धेतुत्वात् "इन्द्रियमनसी विज्ञानकारणम्" [ ] इति वचनादिति चेत्? न; इन्द्रियप्रत्यक्षापेक्षया तन्नियमाभिधानात्, अन्यथा स्वमतव्याघातापत्तेः।

दर्शनस्य प्रामाण्यप्रसङ्गः, तेनाप्यर्थात्मनोरेव सत्तारूपेण ग्रहणात् "सामान्यग्रहणं
१० दर्शनम्" [ ] इति वचनात्। इत्यत्राह–**साकारम्** इति। घटः पट इति वा जीवः पुद्गल इति वा यो योऽयमतद्रूपपरावृत्तो भावस्वभावः स आकारः, तेन विषयेण सह वर्त्तत इति साकारम्। '**अर्थात्मवेदनम्**' इत्यनेन ज्ञानस्यैव प्रामाण्यमुपदर्शयति तस्यैव साकारत्वात् "सायारं णाणं" [ ] इति वचनात्। अर्थात्मग्रहणेनैव वेदनस्य साकारत्वमुक्तं भेदनिर्देशात्, सन्मात्रापेक्षायां तदनुपपत्तेरिति चेत्; न; सन्मात्रस्यापि तद्रूपत्वा-
१५ त्तदुपपत्तेः। अर्थात्मरूपमेव हि वस्तु प्रथमलोचनादिप्रणिधानवेलायाम् अपरामृष्टभेदतयाऽनुभूयमानं सन्मात्रमुच्यते नापरम्। अतो दर्शनापेक्षया भेदनिर्देशो न तन्त्रम्, ज्ञानापेक्षयैव तस्य तत्त्वादित्यस्ति संशयावकाशस्ततो न पौनरुक्त्यं साकारग्रहणस्य। दर्शनस्यापि किन्न प्रामाण्यं यतः साकारग्रहणेन तन्निवर्त्यत इति चेत्? न; "ज्ञानं प्रमाणमित्याहुः" [सिद्धि-वि० परि० १०] इत्यागमविरोधापत्तेः। आगमोऽपि कस्मान्न तत्प्रामाण्यमिच्छतीति चेत्?
२० न; अनिश्चयरूपत्वात्। न चानिश्चयरूपः प्रमाणार्थः 'प्रकर्षेण संशयादिव्यवच्छेदलक्षणेन मीयते वस्तुतत्त्वं येन तत्प्रमाणम्' इति तदर्थोपादानात्, निर्णयात्मकत्वमन्तरेण तद्व्यवच्छेदायोगात्। दर्शनमपि निर्णयरूपमेवेति चेत्; न; विषयेन्द्रियसन्निपातानन्तरमवग्रहस्यैव निर्णयात्मनोऽनुभवात्। "विषयविषयिसन्निपातानन्तरमाद्यं ग्रहणमवग्रहः" [लघी० स्व० श्लो० ५] इति वचनाच्च। दर्शनेन त्ववग्रहव्यवधानमनुमानं एव न तन्निर्णयात्।

---

१ निर्बध्यते ता०, व०, आ०, स०। २ लिङ्गशब्दयोः आ०, ब०, प०, स०। ३ शब्दलिङ्गनिरूपणम्। ४ इन्द्रियमनसोर्विज्ञानकारणत्वनियम। ५ "जं सामण्णगहणं दंसणमेयं"–सन्मति० २।१। द्रव्यसं०गा० ४३। ६ "पमाणदो पुधभूदं कम्ममायारो"–जयध० पृ० ३३१। ७ "सागारे से णाणे भवति, अणागारे से दंसणे भवति।" –प्रज्ञाप० प० ३० सू० ३१४। "साकारं ज्ञानमनाकारं दर्शनमिति।" –सर्वार्थसि० २।९। ८ अर्थात्मेति विशेषनिर्देशानुपपत्तेः। ९ अर्थात्मरूपत्वाद् विशेषनिर्देशोपपत्तेः। १० अर्थात्मेति विशिष्य ग्रहणम्। ११ दर्शनस्य प्रामाण्यं नवेत्याकारक। १२ "णाणं होदि पमाणं"–ति०प०गा० ८३। लघी०श्लो० ५२। प्रमाणसं० श्लो०८६। १३ न्यायकुमु० पृ०४८ पं० १०। १४ निर्णयकत्वम–आ०,ब०,प०,स०। १५ संशयादिव्यवच्छेदायोगात्। १६ दर्शनरूपमपि आ०, ब०, प०, स०। १७ द्रष्टव्यम्–सर्वार्थसि० १।१५। अक० टि० पृ० १३४। १८ दर्शने तु–आ०,ब०,प०,स०। १९ यतः पूर्वकालभाविदर्शनमेव अनु पश्चात् मानम् अवग्रहात्मकं भवति, न तु तत् स्वयमर्थनिर्णयात्मकम्।

एतच्च "सत्तार्थयोगे सत्तालोक०" [७पी०श्लो० ५] इत्यादिव्याचक्षाणैर्माध्यकारैरेवं निरूपितम्। प्रमाणमेव तत् निर्विकल्पकप्रत्यक्षत्वादिति ब्रह्मविदः, तदास्ताम् यथावसरं निरूपणात्।

युक्तिकारजतज्ञानस्य साक्षात्करवात् प्रामाण्यप्रसङ्ग इति चेत्, न, अर्थग्रहणेन तन्निवर्त्तनात्। न हि [3]तद्रजतमर्थः, तदेशादौ तदप्राप्तेः। तदप्यर्थं एवान्यदेशादौ सत एव तस्य प्रतिवेदनात्, ततो नार्थपदेन तन्निवर्त्तनम्, अतो 'धौव्यविवर्जितम्' इति वक्तव्यम्, अर्थज्ञानस्यापि ५ बाध्यमानस्याप्रामाण्यप्रतिपादनार्थमिति चेत्, कथमज्ञानस्यैवं बाधनम् अतिप्रसङ्गात्? सन्निहितदेशतत्वादेरसत एव ग्रहणादिति चेत्, न, [4]तस्याप्यन्यदेशादौ सत एव ग्रहणात्। तस्यापि सन्निहितदेशादीत्यादिकमसदेव गृह्यत इति चेत्, न, तत्रापि तस्यैवोत्सरत्वात्। तत्र दूरमनुसरतोऽपि किञ्चिदवसदेदनमस्ति यत्प्रामाण्यव्यवच्छेदेन बाधविवर्जितपदमर्थयत्[5]वेत्। असत एव कस्यचिद्वेदने वा रजतस्यैवासतो वेदनमस्तु विशेषाभावात्। असतः कथं वेदनमिति चेत्? सन्निहितदेशत्वादेः १० कथम्? अहमेव तत्रापि चोदक इति चेत्, [6]स्वतस्तर्हि कथं वेदनम्? योग्यस्वाच्चेत्, क तस्य योग्यत्वम्? वेदनोत्पत्ताविति चेत्, कुतस्तदवगतिः? तत एव वेदनादिति चेत्, तन्न, यस्मात्—

यदि तद्वेदनेनैव [7]तस्यार्थत्वन्म वेद्यते।
तदर्थास्तित्वसन्देहः कस्यचित्कथमुद्भवेत्? ॥२२३॥ १५
ज्ञानदेव कथं ज्ञानमात्मनोऽर्थास्तमुद्भवम्।
स एवास्ति न वेत्स्येवं विरुध्याय प्रकल्पते ॥२२४॥
दृश्यते चात्मसंवित्ती सत्यामप्यर्थसंशयात्।
अर्थिनामपि तद्वेदोत्पत्तप्रवृत्तिस्तनूरुहाम् ॥२२५॥
अनिश्चयात्मकत्वाच्चेत् तच्छानात्सशयोद्भवः। २०
अविरोधात्तयाऽप्येष किन्न स्यादात्मसंशयः?॥२२६॥
तथा सत्यर्थविज्ञानमर्थकार्यत्वमात्मनः।
तदेव प्रतिवेत्तीति संशयानः कथं [8]वदेत् ॥२२७॥
तत्र सेनैव [9]तत्पुप्तिः, यदि तत्पुप्तिरन्यतः"।
अनर्थसम्भवं [10]तच्चेत्, कथं स्यादर्थवेदनम्॥२२८॥ २५
यद्विशादर्थकार्यत्वं [11]प्राक्प्यातानस्य तत्त्वतः।
तस्यापि विषयोत्पत्तिरन्यथा तु वृथा भवेत् ॥२२९॥
[12]तदप्यर्थोद्भवं चेन्न तद्गतिः पूर्ववत्स्वतः।
तदज्ञानकृतप्तिस्तु विदष्यादनवस्थितिम् ॥२३०॥

---

१ अकल्पदेवैः।"तदनन्तरभूतं यन्नामग्रहणं न व्यवहारव्यवस्थानविरुध्यमुत्तरपरिच्छेदं प्रतिपत्तेरुत्पादः।" —अष्ट० दश० टिप्प० ५। २ दर्शनम्। ३ शुक्तिकायां मरुमरीचं रजतम्। ४ बाधवर्जि—ता०, ब०, स०। ५ संशयादेरेव। ६ —स्वतस्तत्र ता०। ७ सन्निहितदेशतत्वादेरपि। ८ —देशकालादिक—ता०। ९ दर्शितदेशादेरेव। १० सतः का०,ब०,प०,स०। ११ लभ्य। १२ यदेः ता०। १३ तस्य अर्थाजन्मवगतिः। १४ रजतम्। १५ अन्यत्रात्मम्। १६ प्राक्प्यात—का०, ब०, प०। प्रागभ—स०। १७ अन्यत्रात्मम्।

तज्ज्ञानंकार्ये योग्यत्वं नाध्यक्षं विषयस्य तत् ।
नानुमेयमलिङ्गत्वात्, लिङ्गं यद्यस्ति कथ्यताम् ? ॥२३१॥
संवित्तिनियमो लिङ्गम् ; अशक्तस्य[3] हि वेदने ।
तद्वेद्यं सकलं प्राप्तं तथा तन्नियमः कथम् ? ॥२३२॥
इति चेन्न, स्वशक्त्यैव संवित्तेर्नियतार्थता ।
तच्छक्तिरपि तद्धेतोरर्थशक्त्या[4] तु किं फलम् ? ॥२३३॥
ज्ञानमर्थादनुद्भूतं न चेन्नियतगोचरम् ।
अर्थो ज्ञानादनुद्भूतो वेद्यः स्यान्नियतः कथम् ? ॥२३४॥
अन्योन्यहेतुकत्वञ्च न सदन्योन्यसंश्रयात् ।
तद्वेद्यवेदकाभावाद् [5]भावनैरात्म्यमागतम् ॥२३५॥
अज्ञानजस्याप्यर्थस्य स्वशक्तिवशतो यदि ।
नियतस्यैव वेद्यत्वं [6]यथादर्शनमुच्यते ॥२३६॥
ज्ञानमेवमनर्थोत्थं निर्यतार्थं[7] न किं मतम् ? ।
स्वयमेवेदमन्यत्रं[8] देवः स्पष्टं न्यवेदयत् ॥२३७॥
"स्वहेतुजनितोऽप्यर्थः परिच्छेद्यः स्वतो यथा ।
तथा ज्ञानं स्वहेतूत्थं परिच्छेदात्मकं स्वतः ॥" [लघी० श्लो०५९] इति ।

तत्र वेदनोत्पत्तावर्थस्य योग्यत्वम् । विषयभावपरिणाम इति चेत् ; न ; नित्यक्षणिकयोरविषयत्वप्रसङ्गात्, तत्परिणामाभावात् । परिणामिनो भावस्य विषयत्वमिति चेत् ; सत्यम् ; तथापि नार्थसामर्थ्यकृतं वेदनं तत्परिणामस्यैव तत्कृतत्वात् । न च सं[9] एव वेदनम् ; अर्थज्ञानयोरभेदप्रसङ्गात् । स्वहेतुजनितस्यापि वेदनस्यार्थाभिमुख्यमर्थसामर्थ्यादिति चेत् ; न ; "[10]तस्यापि स्वरूपाभिमुख्यवत् स्वशक्तित एव भावात् । किमिदानीं तत्परिणामेनेति चेत् ? यद्येवं जानाति निर्मुच्यतां तत्र निर्बन्धः । ततो यदुक्तं धर्मकीर्तिना—

"नित्यं प्रमाणं नैवास्ति प्रामाण्याद्वस्तुसद्गतेः ।
ज्ञेयानित्यतया[12] तस्य अध्रौव्यात्·····॥" [प्र० वा० १।१०] इति ।

तन्निरस्तम् ; ज्ञेयकार्यत्वे हि ज्ञानस्य[13] तदनित्यतया स्यादनित्यत्वम्, न चैवम्, तत्कार्यत्वस्यानन्तरमेव निषेधात् । मा भूत्तत्कार्यत्वं तथापि वस्तुसद्गतित्वात्तस्य[13] प्रामाण्यम् । वस्तुसद्गतित्वञ्च वस्तुनि सति व्यापारात् । न च वस्तु सर्वदास्ति यतस्तद्व्यापारस्य सर्वदास्तित्वम्, अतो वस्तुसदनित्यतया तत्र व्याप्तं ज्ञानमप्यनित्यमेव, तद्व्यापारतद्वतोरभेदात् । व्यापारोऽप्यव्यापाराद्न भिद्यत इति चेत् ; न ; ज्ञेयस्य ज्ञातेतरावस्थयोरविशेषप्रसङ्गात् सर्वमज्ञमेव सर्वज्ञमेव वा

---

१ –कार्ययो–आ०, ब०, प०, स० । २ –स्य निवे–आ०, ब०, प०, स० । ३ संवित्तिकारणात् । ४ शून्यत्वम् । ५ यथाप्रतीति । ६ नियतार्थान्न आ०, ब०, प०, स० । ७ लघीयस्त्रये । ८ तयोरसत्त्वात् विषयभावपरिणामाभावात् । ९ अर्थगतविषयभावपरिणामस्यैव अर्थसामर्थ्यकृतत्वात् । १० विषयभावपरिणामः । ११ अर्थाभिमुख्यस्यापि । १२ ज्ञेयानित्यतया । १३ ज्ञानस्य ।

जगत्सामान्यम् । न चैवम्, अतो वस्तुनि सत्येव तत्र ज्ञानस्य व्यापारो न पूर्वं नापि पश्चादित्युपपन्नं ज्ञेयानित्यत्वया वस्तुसत्तयेऽप्रौन्यमिति चेत्, कुतः पुनरिदं ज्ञेयानित्यत्वमवगतं येनैवमुच्यते? तद्विषयादेव ज्ञानादिति चेत्; न, तस्यं नित्यत्वाभावात् "नित्यं प्रमाणं नैवास्ति" इत्यस्य विरोधात्। अनित्यात्तर्हि तदवगम इति चेत्, अनित्यत्वेन तेंदज्ञाने कथम् 'अनित्यात्' इति वचनम्? न च "ज्ञानस्याप्यर्थं रूपम्; स्वसंवेदनरूपत्वात्तस्य। न च स्वप्नदृशस्तद्वेदनम् "'तस्मादु दृष्टस्य ५ भावस्य" [प्र० वा० ३।४४] इत्यादि "विज्ञेयप्रसङ्गात्। अस्त्येव "तस्य "तस्येव ज्ञानमिति चेत्, कुतस्तज्ज्ञानम्? अन्यत एव कुतश्चिदिति चेत्, न; 'ज्ञेयानित्यतया' इत्यस्य वैयर्थ्यप्रसङ्गात्। ज्ञेयानित्यत्वादेवेति चेत्, तदपि कुतः? तज्ज्ञानस्यानित्यत्वादिति चेत्, न, परस्पराश्रयात्-हेत्वस्यानित्यत्वेन तज्ज्ञानस्यानित्यत्वम्, ततश्च तदनित्यत्वमिति। तत्र ज्ञेयानित्यत्वं तज्ज्ञानादेव शाक्यावसायम्। नाप्यतज्ज्ञानात्, अप्रतिपन्ने धर्मिणि तद्धर्मप्रतिपत्तेरयोगात्। १० ततो न ज्ञेयानित्यत्वं ज्ञानानित्यत्वस्य कारकं ज्ञापकं वेति न किञ्चिदेतत्। ततो वेदनस्य सद्विषयत्वमपि स्वरूपेणैव तद्वदसद्विषयत्वमपि स्यात्।

अथासदेव रजतं कुतस्तस्य देशादिनियमेन वेदनम् असतो देशादिनियमस्यासम्भवात्, वस्तुधर्मत्वात्तस्येति चेत्? न, वेदनस्यैव तथा सामर्थ्यात्। तदपि यदि "स्तोपादानप्रकृतेरेव, सर्वस्यापि वेदनस्यासद्विषयत्वप्रसङ्गः[१], तस्सामर्थ्यहेतोः स्तोपादानप्रकृतेर- १५ विशेषादिति चेत्, न, आवरणोदयात् तस्सामर्थ्याभावात्। न च तदुदयस्य सर्वत्राविशेषः, स्वहेतुनियमेन "तस्मियमात्, आवरणसङ्गस्य च नियेदनात्। सर्वमसत् किम वेदत इत्यप्येनेनाऽपास्तम्, आवरणशक्तिनियमात् नियतस्यैव वेदनोत्पत्तेः। ततो रजतवेदनस्यानर्थवेदनस्येव अर्थपदेनैव तदूव्यवच्छेदात न तदर्थं बाधवर्जितपदमर्थवत्। रजतज्ञानमप्यर्थज्ञानमेव अर्थस्यैव शुक्तेः रजतरूपतया वेदनादिति चेत्, कुतस्तस्यं २० तद्रूपतया वेदनम्? "तेंद्वेदनहेतुत्वादिति चेत्, न, ज्ञानस्यार्थकार्यत्वनिषेधात्। अनिषेधेऽपि कथं शुक्तिकार्यं ज्ञानं रजतप्रतिभासं भवेत् अतिप्रसङ्गात्? कारणदोषाव्यभिचार्यत्वात्तस्य "तदवभासित्वम्, न "चातिप्रसङ्गः तद्दोषप्रक्षिप्तिनियमेन "नियतज्ञानमाधादिति चेत्, न, "तेंद्वेतुनादेव "अतज्जनितस्यापि तद्विषयत्वोपपत्तेः, सर्वत्र विषयकार्यज्ञानकल्पनावैफल्यप्रसङ्गात्। नैं- २५ वाकारणार्थवेदने सर्वतद्वेदनप्रसङ्गः, तद्दोषप्रक्षिप्तिनियमेन तन्नियमोपपत्तेः। तन्न तज्ज्ञानहेतुत्वात्तस्यं तद्रूपतया वेदनम्। स्वयं "तद्रूपत्वादिति चेत्, न, शुक्तिरूपत्वाभावप्रसङ्गात्। न हि रजतमेव "तद्रूपं भिन्नप्रयोजनत्वात्। अरजतरूपापि "शुक्तौ रजतरूपत्वेनावभासते कारणदोषादिति चेत्,

---

१ प्रमाणस्य। २ क्षणस्य। ३ ज्ञानात्। ४ ज्ञानाद्धेतोः। ५ ज्ञानस्याज्ञानतया स्व-ज्ञा०,ब०,प०,म०। ६ "एष एवास्तित्वे गुणः" इति वैशेषिकाः। ७ विशेषणभिन्न-ज्ञा०,ब०,प०,म०। ८ ज्ञानस्य। ९ अनित्यत्वेन। १० वैदकवतम् असतो देशादिनियमवेदनसामर्थ्यम्। ११ प्रकृतज्ञानस्य क्षणोत्पन्नभूतं तदूर्ध्वज्ञानम्। १२ -प्रकृतात्तस्या -ज्ञा०, ब०, प०। १३ आवरणोदयनियमात्। १४ शुक्तिरूपार्थस्य। १५ रजतरूपम्। १६ रजताकारावभासित्वम्। १७ यदि शुक्तिरूपमपि रजतज्ञानं रजतप्रतिभासं तदूतद् बाधवर्जितप्रतिभासं कुतो न भवति? १८ नियतज्ञानात्मा-ज्ञा०। १९ कारणदूषकादेव। २० ईश्वरज्ञानादित्यपि। २१ न च का-ज्ञा०। २२ शुक्तिरूपार्थस्य। २३ रजतरूपकात्। २४ शुक्तिरज-ज्ञा०, ब०, प०, म०।

वस्तुसता[1], तद्विपरीतेन वा ? वस्तुसता चेत्; न; रजतज्ञानस्य प्रामाण्यप्रसङ्गात्। न हि वस्तुसज्ज्ञानमेवाप्रमाणम्; प्रमाणविलोपप्रसङ्गात्। बाधनादप्रमाणमिति चेत्; न; तदेव[2] वस्तुसज्ज्ञानस्य कथम् ? स्वतस्तद्विषयस्य[3] वस्तुसत्त्वेऽपि शुक्तिरूपत्वेनाभावादिति चेत्; यदि तर्हि प्रतिभासते कथं बाधनं स्वरूपनियतस्यैव प्रतिभासनात् ? प्रतिभासते चेत्; [4]कथमसत्, असतः प्रतिभासानभ्युपगमात् ? अन्यथा रजतस्यापि [5]तद्वदसत एव [6]प्रतिभाससम्भवान्न तद्वस्तुसत्त्वं भवेत्। [7]तद्विपरीतेन चेत्; सिद्धं तर्हि तज्ज्ञानस्यावस्तुविषयत्वाद् अर्थपदेनैव निवर्त्तनम्। अथ तद्रूपं[8] स्वयमवस्तुसदपि वस्तुसच्छुक्तितादात्म्याद् वस्तुसदेव ततो नार्थपदनिवर्त्त्यत्वं [9]तज्ज्ञानस्य; न तर्हि तस्य बाधनमपि स्यात् [10]वस्तुसज्ज्ञानस्य [11]तदयोगात्। स्वतस्तद्विषयस्या[12]वस्तुसत्त्वात्तस्य[13] [14]तदुपपत्तौ अर्थपदनिवर्त्त्यत्वमपि स्यादविशेषात्। न च सर्व एव असदाकारो वस्तुतादात्म्येनैवावभासते यतस्तत्प्रयुक्तं तस्य वस्तुत्वं भवेत्, स्वतन्त्रस्यापि गन्धर्वनगरादेः प्रतिभासनात्। तस्यापि भानुमन्मरीचिप्रसरादिभावान्तरतादात्म्येनैव प्रतिभासनमिति चेत्; तत्तादात्म्यस्य[15] तर्हि कथमसतः स्वतन्त्रस्य प्रतिभासनम् ? तदपि [16]तत्तादात्म्यादेवेति चेत्; न; तत्र [17]तद्व्यापारस्याभावादनवस्थापत्तेः। न च तस्य[18] स्वतन्त्रावभासिनो वस्तुत्वम् अवस्तुधर्मत्वात्। तस्मात्स्वतन्त्रमेव तत् [19]अवस्तुभूतञ्चावभासत इति न्याय्यम्। तद्वद् गन्धर्वनगरादिरप्यसदाकारः प्रतिभातीति किं तत्र भावतादात्म्यपरिकल्पनेन अदृष्टकल्पनादोषप्रसङ्गात् ?

असतः स्वतन्त्रस्य प्रतिभा ससम्भवे कथमुक्तं [20]शास्त्रकारेण भ्रान्तिलक्षणम्—"अतस्मिन् तद्ग्रहो भ्रान्तिः" [सिद्धिवि० परि० २] इति ? अनेन हि शुक्त्यादितादात्म्येनैव रजतादिप्रतिभासनमभिधीयते न स्वातन्त्र्येण। अतस्मिन् शुक्त्यादौ तद्ग्रहो रजतादिमह इति व्याख्यानादिति चेत्; न; 'अतस्मिन्' इत्यसदाकारपरत्वान्निर्देशस्य, अतस्मिन् 'असति तस्मिन्' इति तदर्थत्वात्, न पुनः तस्मादन्यस्मिन्[21] तस्मिन् इति। एवं हि यत्रैवान्यरूपत्वेनासदवभासनं तत्रैवेदं लक्षणं भवेन्नान्यत्र, तदस्तित्वस्य च निवेदनात्। अभिप्रेतञ्च शास्त्रकारस्यानन्यरूपत्वेनावभासनम्। "यथैवात्मायमाकारमभूतमवलम्बते" [न्यायवि० श्लो० ३५] इति वचनात्। भूततादात्म्यनियमेनावभासने हि कथम्—'अभूतमवलम्बते इति वचनात्' इति ब्रूयात ? परमप्यत्र यथास्थानं चिन्तयिष्यते। तस्मादसत्प्रतिभासनमेव रजतज्ञानमिति अर्थपदेनैव तद्व्यवच्छेदान्न तदर्थं प्रयत्नान्तरमास्थेयम्।

[22]अन्यस्य मतम्—न किञ्चिदसद्विषयं ज्ञानमस्ति यदर्थपदस्य व्यच्छे[23]स्यात्। शुक्ति-

---

१ रजतरूपत्वेन। २ बाधनमपि। ३ रजतरूपत्वस्य। ४ शुक्तिरूपत्वम्। ५ रजतरूपत्वविशिष्टस्यैव। ६ कथमसतः प्रतिभासोऽनभ्युप—आ०, ब, प०, स०। ७ शुक्तिरूपत्ववत्। ८ प्रतिभासनं भवेन्न तद्वस्तु—ता०। ९ अवस्तुसता। १० रजतरूपम्। ११ तदज्ञानस्य तर्हि आ०, ब०, प०, स०। रजतज्ञानस्य। १२ वस्तुतज्ज्ञा—आ०, ब०, प०, स०। १३ बाधनायोगात्। १४ रजतरूपस्य। १५ रजतज्ञानस्य। १६ बाधनोपपत्तौ। १७ भावान्तरतादात्म्यस्य। १८ भावान्तरतादात्म्यादेव। १९ भावान्तरतादात्म्यव्यापारस्य। २० भावान्तरतादात्म्यस्य। २१ अवस्तुभूतमव—आ०, ब०, प०, स०। २२ अकलङ्कदेवेन। २३ —न् अत—आ०, ब०, प०, स०। 'अतस्मिन्' इत्यत्र पर्युदासरूपे नञर्थे तस्मादन्यस्मिन तस्मिन् इत्येवार्थः स्यात्, पर्युदासः सदृशग्राहीति नियमात्। २४ प्रभाकरस्य।

शक्लादौ 'इदं रजतम्' इति ज्ञानमसद्विषयमिति चेत्, न, तत्रापि 'इदम्' इत्यस्य प्रत्यक्षत्वात्, 'रजतम्' इत्यस्य स्मरणत्वात्। न च प्रत्यक्षस्मरणयोरसद्विषयत्वम्, अनभ्युपगमात्। न चापरं तत्रासद्विषयं संवेदनम् अननुभवादिति; तदसङ्गतम्, रजतज्ञानस्य स्मरणरूपतया अननुभवात्, पुरोवर्त्तिरजतावमासित्वेनानुभवस्यमाधस्यैव तस्य प्रतिवेदनात्। स्मरणरूपत्वे स्वतीवविषयतया तदनुभवप्रसङ्गात्। न चैवम्, तत्र तस्य स्मरणत्वम्। अतद्रूपाधमासिनोऽपि तद्रूपत्वे नीलस्य ५ निरवशेषजगद्रूपत्वं भवेत् प्रतीतिविरोधस्योभयत्र साम्यात्। स्मरणमेव तद्गतसुतः प्रमुषितत्वान्न स्वरूपेण वेद्यत इति चेत्, न, प्रमोपापरिज्ञानात्। अस्यसंवेदनं प्रमोप इति चेत्, न, प्रश्नस्यैवोत्तरत्वात् 'किन्न स्मरणं तस्येन संवेद्यते' इति प्रश्नः, तत्कथम् 'अस्यसंवेदनात्' इति सै व्योत्तरीभवति? प्रश्नसमाधानयोरविशेषप्रसङ्गात्। न चास्यसंवेदनं संवित्तेः, स्वमतव्याघातात्। 'संवित्तिरपरोक्षा' इति स्वैमतत्वात्। अनुभवस्वरूपत्वेन ग्रहण प्रमोप इति चेत्, न, १० तेंत्र 'तद्प्रस्थाभावात्। असतश्च ग्रहणानभ्युपगमात्। अभ्युपगमे वा सिद्धमसद्विषयं ज्ञानमिति कर्थं तदुव्यवच्छेदार्थमर्थपदं न मवेत्?

किञ्चैवम् इदम्प्रतिभासस्यापि स्मरणत्वप्रसङ्गो रजतप्रतिभासाद्भमेशात्। न हि स्मरणादन्यिमस्यास्मरणत्वम्। अभेदश्चामेदप्रतिभासात्। विवेक एव 'तयोर्न प्रतिभासते नाभेदः इति चेत्, तर्हि रजतमपि न प्रतिभासते तदन्याप्रतिभासनस्यैव भावात्। रजतप्रतिभा- १५ सनमेव तदन्याप्रतिभासनमिति चेत्, अभेदप्रतिभासनमेव विवेकप्रतिभासनमपि स्यात्। अभेदप्रतिभासनादन्यदेव 'तदिति चेत्, रजतप्रतिभासनाद् अन्यदेव अन्याप्रतिभासनमपि स्यात्। को दोष इति चेत्? न, सकलप्रतिभासविरहप्रसङ्गात्। सैं एव स्मृतिप्रमोष इति चेत्, न, गाढमूर्च्छादेरेवत्त्वप्रसङ्गात्। 'इदम्प्रतिभासामावान्नेति चेत्, न; 'तैस्यापि अनिदम्प्रतिभासनिवृत्तिमात्रत्वेन 'तैत्रापि भावात्। यदि च इदम्प्रतिभासोपाधिकप्रति- २० भासविरहैं एव 'तैत्प्रमोषः, सकलं जगत्तत्प्रमोष एव स्यात् इदम्प्रतिभासस्यैव सर्वत्र भावात्। कर्थं पटादिप्रतिभास इति चेत्? न, तस्यापटादिप्रतिभासनिवृत्तिमात्रत्वात्। 'तत्प्रतिभासस्येनानुभूयमानः कर्थं तदन्यप्रतिभासनिवृत्तिरेव स्यात्? रजतप्रतिभासनमपि 'तत्त्वेनानुभूयमानं कर्थं तन्निवृत्तिरेव स्यात्? बाधनादिति चेत्, न, तत्प्रतिभासाभावे बाधनस्यैवासम्भवात्। प्राप्ते हि तस्मिन् बाधनं नाप्राप्ते निर्विषयत्वप्रसङ्गात्। प्राप्तौ वा तस्य न तदन्यप्रतिभासनिवृत्तिस्वमेव, २५

---

१ "रजतमिदमिति मैवं ब्रूमः किन्तु इदं एते विज्ञाने। तत्र रजतमिति स्मरणम्, तत्सानुभवरूपत्वात् ज्ञानाख्यप्रत्ययः। इदमिति पिशाचमनुभवरूपं प्रमाणमिष्यत एव।"—अक० प० पृ० ४४। बृह० प० पृ० ६५। २ "स्मरणमिति यत्तावत्स्मार्ये स्मृतिज्ञानान्येतदाह"—बृह० पृ० ७२। "अनन्तरश्च रजते स्मृतिर्जाता तथापि च। मरीचीदानदित्यैक्यपरामर्शविवर्जितम्॥"—अक० प० पृ० ३२। ३ प्रश्न एव। ४ "किन्तु संवेद्यः प्रत्यक्षत्वात्"—बृह० पृ० ७६। "प्रत्यक्षा च नौ बुद्धिरियमेतद्भूर्त भवति प्रत्यक्षा च नः संवेद्य"—बृह० पृ० ७७। "सर्वं प्रकाशैव मितिः"—अक० प० पृ० ५७। ५ स्मरणे। ६ अनुभवस्वरूप। ७ प्रत्यक्षस्मरणयोः। "ग्रहणस्मरणे यैमे विवेचा नरूपाभिनै।"—अक० प० पृ० ३१। ८ प्रतिभासत इत्यन्वयः। ९ रजतनिश्चयप्रतिभासनात्। १० विवेक-प्रतिभासनम्। ११ सकलप्रतिभासाभाव। १२ गाढमूर्च्छादेरो इदमिति प्रतिभासाभावात्। १३ इदम्प्रतिभासस्यापि। १४ गाढमूर्च्छादयपि। १५ इदम्प्रतिभासमात्रम्। १६ स्मृतिप्रमोषः। १७ पटप्रतिभासत्वेन। १८ रजतत्वेन।

रजतप्रतिभासतयैवानुभवात्। तदपह्नवे घटादिप्रतिभासोऽपि न कश्चिदिति सर्वत्र इदम्प्रतिभासस्यैव सकलभेदप्रतिभासविकलस्य भावाद्[1] विजयी [2]परमात्मवादः स्यात्। अथवा, शून्यवाद एव इदम्प्रतिभासस्याप्यपह्नवाविशेषात्। अशक्यापह्नवत्वे वा [3]तस्य तद्वदेव रजतप्रतिभासस्य इदम्प्रतिभासात्[4] तदभेदप्रतिभासस्य चाशक्यापह्नवत्वात् सिद्धम् इदम्प्रतिभासस्यापि स्मरणरूपत्वं रजतप्रतिभासात्तद्रूपादभेदात्[5]। स्पष्टप्रतिभासत्वान्नैवमिति ; समानं रजतप्रतिभासेऽपि। तन्नैष स्मृतिप्रमोषवादो न्याय्यः। तस्मादसदाकारप्रतिभास एवायम्[6], तद्व्यवच्छेदार्थमर्थपदञ्च इति व्यवस्थितमर्थवेदनस्यैव प्रामाण्यम्।

कुतः पुनरर्थवेदनस्य तत्त्वावगमः ? प्रत्यक्षादिति चेत् ; तदपि तदेव, तदर्थान्तरं वा भवेत् ? तदर्थान्तरमिति चेत् ; नैकविषयं पूर्वस्मादविशेषात्। न हि तदविशिष्टमेव तत्प्रामाण्यमवगमयति [7]तत एव तदवगमप्रसङ्गात्। अत एव न [8]सजातीयविषयम्, मिथ्याज्ञानप्रामाण्यप्रसङ्गाच्च मरीचिकातोयज्ञानेऽप्युत्तरतज्जातीयज्ञानभावात्। संवादप्रत्यय एव केवलम् अर्थक्रियाधिगमात्मा प्रत्यक्षमवशिष्यते। न च [9]तेनान्यविषयेण साधनज्ञानस्यातीतस्य प्रामाण्यं शक्यमवगन्तुम् अध्यक्षस्यातीतविषयत्वाभावात्। तन्नार्थान्तरात् प्रत्यक्षात् तत्प्रामाण्यावगमः। तत एवेति चेत् ; न ; सन्देहात्। उत्पन्नेऽपि हि जलज्ञाने भवति सन्देहः 'किमिदं सत्यं तोयम् अन्यथा वा' इति। ततो न [10]ततः स्वविषयस्यार्थक्रियासाधनत्वावगमः सम्भवति। न हि सन्दिग्धादेव प्रत्ययात्तत्त्वप्रतिपत्तिः अतिप्रसङ्गात्। अर्थज्ञानस्य बोधात्मकत्वमेव प्रामाण्यम्, तच्च तत एव तस्य सिद्धयतीति चेत् ; न; बोधात्मकत्वस्य तैमिरज्ञानेऽपि भावात् तस्यापि प्रामाण्यप्रसङ्गात्। बाधाविधुरं बोधात्मकत्वमेव प्रामाण्यमिति चेत् ; न, बाधावैधुर्यस्याप्युत्पत्त्यवस्थायामप्रवेदनात्। प्रवेदने वा न ततः प्रवर्त्तमानोपि (नोवि) प्रलभ्येत। न ह्यवगतप्रामाण्यादेव बोधात्प्रवर्त्तमानस्य विप्रलम्भो न्याय्यः, तदवगमस्यैवाभावप्रसङ्गात्।

एतेन मिथ्याज्ञानस्य स्वतो बाधितत्वपरिज्ञानं प्रत्याख्यातम्। स्वतो हि [11]तत्परिज्ञाने न ततः [12]कस्यचित्तद्विषयार्थितया प्रवृत्तिः। न हि निर्विषयत्वं परिजानन्नेव तस्य तत्कृतां प्रवृत्तिमनुसरति तत्परिज्ञानस्यैवाभावापत्तेः। तन्न प्रथमं बाधविरहसिद्धिः। अर्थक्रियाधिगमसमये पश्चादेव तत्सिद्धिः, स्नानाद्यर्थक्रियाधिगमे हि जलस्य तत्साधनत्वं प्रतिपद्यमानः तद्बोधननिर्बाधत्वमध्यवस्यतीति चेत् ; नैव तत्सारम् ; एवमर्थक्रियाधिगमस्यैवासम्भवात्। तदधिगमो हि प्रवृत्तिपूर्वकः[13], प्रवृत्तिश्च तोयस्यार्थकारित्वनिर्णयात्। न चानवगतप्रामाण्यात् ज्ञानात्तद्विनिश्चयः[14] सम्भवति। यदि ह्यर्थक्रियाधिगमात् प्रागेव कुतश्चित्तोयवेदनस्य प्रामाण्यमवगतं भवति तदा तोयस्यार्थक्रियासम्बन्धावगमात् प्रवर्त्तमानस्यार्थक्रियाधिगमादुपपन्नं [15]तदर्थकारितोयसंवेदनप्रामाण्यनिश्चयनम्।

---

१ विजयिप-आ०,ब०,प०। २ ब्रह्मवाद। ३ इदम्प्रतिभासस्य। ४ रजतप्रतिभासाभेदस्य। ५ स्मरणरूपात्। ६ विपर्ययः। ७ प्रमाणत्वावगमः। ८ स्वस्मादेव स्वप्रामाण्यावगमप्रसङ्गात्। ९ प्रथमज्ञानसजातीय। १० संवादप्रत्ययेन। ११ स्वस्मादेव। १२ बाधितत्वपरिज्ञाने। १३ कस्यचिद्वि-आ०,ब०,प०,स०। १४ -क प्रवृ-आ०,ब०, प० स०,। १५ -त्तद्विषयनि-आ०,ब०,प०,स०। तोयस्य अर्थकारित्वनिश्चयः। १६ तदर्थक्रियाकारितोय-आ०, ब०, प०, स०।

न चैष (ते) वह्निव्यवेन किञ्चित्, प्रागेव तस्य निश्चितत्वात्। अर्थक्रियासम्बन्धाच्च प्रामाण्ये मिथ्याज्ञानस्यापि प्रामाण्यप्रसङ्गः, तदविगतादपि स्वप्नेक्षुरसादेः रेतोनिर्गमैश्वर्यक्रियादर्शनात्। तैत्कृत्वा सा तत्क्रिया न भवति ततः कदाचित्प्राप्तेरिति चेत्, अन्यतोऽपि न भवेत्, ततोऽपि कदाचिदप्राप्तेः। अथ तत्प्राप्तिरसन्दिग्धा वैलक्षण्यमिति चेत्, न, प्रतिभासाभेदे सन्देहस्यैवानिवृत्तेः। अभिन्नप्रतिभासं हि सत्यतोयज्ञानं वह्निपरिहारात्, तत्कर्म तत एव प्राप्तिसन्देहविनिवृत्तिः? विलक्षणप्रतिभासात्तन्निवृत्तिरिति चेत्; न, तस्य तदानीमनुपलक्षणात्। पश्चादेवाभ्यासात्तदुपलक्षणमिति चेत्, न, परस्परान्वयप्रसङ्गात्—आकारविशेषावधारणात्प्रामाण्यनिर्णये तज्ज्ञानाभ्यासः, ततश्च तया तन्निर्णय इति। तथा ततोऽन्यतो वा प्रत्यक्षात्तत्प्रामाण्यावगमः। प्रतिपादितं चैतद्वार्तिककारैः—

"सन्नादः प्रत्ययः सोऽन्यविषयं यदि वर्तते।
सेन पूर्वस्य मानत्वमेतीतस्येक्ष्यते कथम्? ॥
साधनप्रत्ययस्यापि सन्देहविषयत्वतः।
साधनत्वं कथं तस्य प्रमाणत्वाप्रतीतितः॥
बोधात्मकत्वान्मानं चेत्प्रमत्ता 'सर्वमानता।
अबाधितार्थबोधोऽपि प्रथमं न प्रसिद्ध्यति॥
अर्थार्थकारितां ज्ञात्वा तदर्थस्य प्रमात्ववित्।
प्रमाणं प्रागसिद्धं यत् तस्य विद्धिः कथं ततः? ॥
यदि प्रमाणं प्राक् सिद्धं क्रियया तस्य "योगवित्।
अर्थक्रियातस्तज्ज्ञानं प्रमाणमिति गृह्यते॥
यत्रैवार्थक्रिया 'तत्र प्रमाणमथ चेन्मतम्।
अर्थक्रियोदयो दृष्टः "सोऽप्रमाणाद्दृतादपि॥
'सैतो नार्थक्रिया सा चेत्, अन्यतोऽपि कथं मता।
'सैत' कदाचिदप्राप्तिः साऽन्यत्रापि" समीक्ष्यते॥
यतो न प्राप्तिसन्देहस्तत्प्रमाणं मतं यदि।
सन्देहस्य निवृत्तिर्हि समानाकारतः कुतः?॥
अभ्यासाच्छक्यते पश्चादाकारः स विलक्षणः।
ततः प्राप्त्यविनाभावः एष सोऽन्योऽन्यसंश्रयः॥"

[प्र० वार्तिकाल० १।४] इति।

---

१ तैमिरैरन्यथाभासः। २ सुप्तपु०—भा०, ब०, प०, स०। ३ —सादेर्—भा०, ब०, प०, स०। मिथ्याज्ञानस्यापि तत्प्रमुखादिरूपा। ५ सत्यज्ञानमिश्रितादपि। ६ तत्प्रामाण्यमि—भा०, ब०, प०, स०। —दानि—भा०, ब०, प०, स०। ८ विलक्षणप्रतिभासानुपलम्भनम्। ९—स्मिति तस्ये—स०। १० —सर्वमानता भा०, ब०, प०, स०। ११ अर्थक्रियासम्बन्धज्ञानम्। १२ "सोऽप्रमाणाप्यसदपि"—प० वार्तिकाल०। १३ असमानकालात्। १४ असमानकालात्। १५ प्रमाणतोऽपि।

मा भूत्प्रत्यक्षात्तत्प्रामाण्यावगतिः अनुमानाद्भवेत्, तथा हि—स्नानपानादिसमर्थतोय-दर्शनाहितसंस्कारस्य तोयान्तरदर्शने पूर्वतोयानुस्मरणात् 'इदमपि तोयं स्नानादिप्रयोजनकरम् ईदृशाकारत्वात् पूर्वतोयवत्' इति तोयार्थक्रियासम्बन्धविषयमनुमानमुपजायते। तदेव च तोयवेदनप्रामाण्यज्ञानम्, अर्थक्रियासम्बन्धादन्यस्य प्रामाण्यस्याभावाद् अबाधितत्वादेरपि तदायत्तत्वादिति चेत्; असारमेतत्; साध्यसाधनसम्बन्धाप्रतिपत्तौ अनुमानानुदयात्। तत्प्रति-पत्तिश्च न प्रत्यक्षात्; तत्प्रामाण्यानिश्चयात्।

अनुमानात्तन्निश्चयश्चेत्; न; परस्पराश्रयप्रसङ्गात्--अनुमानेन प्रत्यक्षप्रामाण्यनिश्चये ततः सम्बन्धज्ञानम्, ततश्चानुमानमिति। कथं वा प्रत्यक्षेण प्रागपि तोयतत्प्रयोजनयोः पूर्वापर-समयभाविनोः सम्बन्धवेदनम्? कथञ्च न स्यात्? इतरेतरविषयपरिहारेणावस्थानात्। तोयप्रत्यक्षं हि तोयमात्रगोचरं न तत्प्रयोजनविषयम्, अपरिच्छिन्नतत्प्रयोजनञ्च कथं तद्धेतुत्वं स्वविषयस्य जानीयात्? तत्प्रयोजनप्रत्यक्षञ्च स्नानादिमात्रपर्यवसितं न पूर्वतोयमधिगच्छति, अनधिगततद्रूपञ्च कथं तत्कार्यत्वं स्वविषयस्य गृह्णीयात्? न च तत्समुदायेन सम्बन्धवेदनम्, क्रमभाविनो-स्तदभावात्। नाप्येकमुभयसमयव्यापि प्रत्यक्षम्; क्षणिकत्वात् सर्वभावानाम्।

भवदपि सम्बन्धग्रहणं प्रत्यक्षाद्यदि व्याप्त्या भवति तदा भवत्यनुमानं व्यभिचार-परिशङ्कनाभावात्। न हि सकलदेशकालभाविनस्तोयकलापस्य स्नानपानादिप्रतिबन्धनिर्धारणे व्यभिचारसम्भावनं सम्भवति, निर्धारणसम्भावनयोर्विरोधात्। अपि तु नास्मदादिप्रत्यक्षस्य व्यापिसम्बन्धग्रहणे सामर्थ्यमस्ति; सर्वस्य सर्वदर्शित्वप्रसङ्गात्। साहचर्यमात्रस्य तु व्याप्तिविकलस्य न सम्बन्धत्वम्। न च तत्परिज्ञानादनुमानम्; व्यभिचारसम्भवात्। सम्भवद्व्यभिचारादप्यनुमाने तत्पुत्रत्वादेरपि स्यात्। तस्माद् व्याप्त्या सम्बन्धज्ञानमङ्गीकर्त-व्यम्। न च तत्र प्रत्यक्षस्य सामर्थ्यम्, तेन हि पुरोवर्त्तिन एव तोयस्य तदर्थक्रियासम्बन्धः परिगृह्यते न देशकालान्तरभाविनः तस्य तेनाग्रहणात्, ग्रहणे वा तदधिकरणस्य देशादेरपि सर्वस्य तेन ग्रहणं स्यात्, अन्यथा तद्गतसकलतोयव्यक्तिग्रहणाभावेन व्याप्त्या सम्बन्धज्ञानस्या-सम्भवादनुमानाभाव एव स्यात्। सम्बन्धज्ञाननिरपेक्षमेवानुमानमिति चेत्; न; प्रतिपादकवत् प्रतिपाद्यस्यापि स्वत एव तत्प्रसङ्गात्, तथा च गतमिदानीं शिष्योपाध्यायादिव्यवहारेण। तन्न युक्तिसहमेतत् साहसातिरेकत्वात्। तन्न दृष्टान्ततोयतत्प्रयोजनसम्बन्धस्यापि प्रत्यक्षात्प्रतिपत्तिः-अनुमानात्तत्प्रतिपत्तौ तत्राप्यपरो दृष्टान्तः, तस्यापि स्वप्रयोजनसम्बन्धोऽनुमानान्तरादवगन्तव्यः तत्राप्येवमित्यपरापरानुमानप्रतीक्षायामनवस्थानान्न प्रकृततोयज्ञानप्रामाण्यसिद्धिः स्यात्। ततो

१—त्वात्तत्पूर्व—आ०, ब०, प० स०,। २ अर्थक्रियासम्बन्धायत्तत्वात्। ३ अविनाभावनिश्चयः। ४ समुदायासम्भवात्। ५ सर्वोपसंहारेण। ६ किन्तु। ७ अविनाभावशून्यस्य। ८ 'गर्भस्थः मैत्रतनयः श्यामो भवितुमर्हति तत्पुत्रत्वादितरपुत्रवत्' इत्यादेः। ९ व्याप्तौ स—आ०, ब०, प०, स०। १० सकलदेशगत। ११ उदाहरणीकृततोय। १२ दृष्टान्तस्यापि आ०, ब०, प०, स०।

न प्रत्यक्षात् नानुमानात् प्रामाण्यागमः, न चापरं प्रमाणमस्ति यतस्तदवगमः स्यात्। तत्कथं प्रमाणसिद्धिः यतस्तल्लक्षणप्रणयनमिति ? एतदपि तेनैव प्रतिपादितम्—

"तदृष्टावेव दृष्टेषु सविस्सामर्थ्यभाविनः।
स्मरणादू व्यवहारश्चेदनुमानं तथा सति ॥
तच्चानुमानमप्यक्षादप्यक्षमनुमानतः।
अन्योन्यसंश्रयादेवं नास्त्यन्यत्तरसंस्थितिः ॥

स्वरूपस्यावलम्बनाकारपरिच्छेदि हि प्रत्यक्षं न हि तृणस्यापि कुड्यीकरणे समर्थम्।

न पूर्वापरयोस्तेन[3] सम्बन्धः परिगृह्यते।
देशकालान्तरव्याप्त्या सङ्गतियोंग उच्यते ॥
देशकालान्तरव्याप्तेरग्रहणे क्षमम्।
यदि; सर्वस्य सर्वार्थदर्शित्वैव प्रसज्यते ॥
सहभावस्तु 'यो[ऽ]व्याप्त्या[4] न तस्मादनुमोदयः।
क्वादाचित्कतया तस्यं सर्वत्रास्त्वनुमाऽथवा ॥
इदानीमेवमाकारमेतदस्तीति वेद्यताम्।
अध्यक्षतः, न देशाद्यन्तरस्यग्रहणं ततः ॥
अगृहीते च देशादौ तद्व्याप्तिर्गृह्यते कथम् ?।
तेंदग्रहेऽनुमानं चेदेतदप्यन्तसाहसम् ॥
अनुमानान्तराच्चेपादनवस्थावतारतः।
प्रकृताप्रतिपत्तिः स्यात्तस्य तस्येत्यपेक्षणात् ॥
न प्रत्यक्षानुमानाभ्यामपरं मानमिष्यते।"

[प्र० वार्तिकाल० १।५]

इति चेत्, अत्राह—'प्रत्यक्षलक्षणम्' इति। प्रतिपक्षमक्ष्णोतीति प्रत्यक्षम्, परस्यान्तर्सरं विचारयितानम्, तेन प्रमाणप्रतिपक्षस्य तैदभावस्य स्वविषयत्वेन व्यापनात्, तदेव लक्ष्यतेऽनेनेति लक्षणम्, प्रत्यक्षं लक्षणं यस्य तत्तथोक्तम् अर्थवेदनम्। कथं पुनः परविचारेणार्थज्ञानस्य तैस्त्वमवगम्यत इति चेत्? उच्यते—यद्यर्थं विचारः प्रमाणं न भवति, कथमतः प्रमाणाभावसिद्धिः तद्भावसिद्धिवत् ? । न चैवं कस्यचित् क्वचित्परावयः, प्रमाणनिरपेक्षाण्याः स्वार्थसिद्धेः सर्वत्र सुलभत्वात् ? नापि विजयः, तस्य परापेक्षत्वात्, 'तस्य चामाणादित्यभाव एव वाद्व्यवहारस्य "प्राप्तः। तस्मात्परप्रश्नमुद्रासेन स्वपक्षसिद्धिमन्विच्छता प्रमाणमूलैव तत्सिद्धिरन्वेषणीया नान्यथा अतिप्रसङ्गात्।

---

१ प्रमाणप्रतिपक्षव्यवहार एव। २—करणसम—आ०, ब०। ३ ये प्रत्यक्षेण। ४ ये व्या—आ०,ब०,प०,स०। ५ अन्यस्य अविनाभावसम्बन्धेन। ६ सहभावस्य। ७ व्याप्तिग्रहणसम्बन्धेन। ८ प्रामाण्यागमस्य। ९ अप्रमा ; जलम्। १० परापेक्षत्व। ११ प्रसिद्ध—आ०, ब०, प०, स०।

भवतु विचारः प्रमाणमिति चेत्; सांवृतम्, पारमार्थिकं वा ? सांवृतत्वे न ततः पारमार्थिकी प्रमाणाभावसिद्धिः, उपायस्य सांवृतत्वे तदयोगात्, अन्यथा तत एव तादृशी तद्भावसिद्धिरपि स्यादित्यपार्थकत्वमेव प्रमाणनिराकरणप्रयासस्य प्राप्तम्। तद्भावसिद्धौ सांवृतमपि प्रमाणं नास्तीति चेत्; किमिदानीं मनोराज्येऽपि दारिद्र्यमस्ति ? विचारवाह्यं प्रतिभासमात्रं हि संवृतिः, सा च यथायथं प्रमेयेषु विद्यत एव प्रवादिनाम्। विचारात्मिका न विद्यत इति चेत्; न; तस्या अपि "प्रमाणमात्मसात्कुर्वन्" [न्यायवि० श्लो० ४९] इत्यादिरूपायाः प्राचुर्येण भावात्। सांवृतात्प्रमाणात् प्रमाणाभावसिद्धिरपि सांवृतैवेति चेत्; न; तथापि तत्प्रयासवैयर्थ्यस्य तदवस्थत्वात्, सांवृतस्य तदभावस्यास्माभिरप्यङ्गीकाराद् वास्तवस्यैव तस्यानभ्युपगमात्। तन्न सांवृतत्वेन विचारः प्रमाणम्।

पारमार्थिकत्वेनेति चेत्; न; ततोऽप्यपरिज्ञातात् स्वार्थसिद्धेरयोगात्। स्वतः प्रामाण्यनिराकरणाभावप्रसङ्गात्। नापि परिज्ञातात्; स्वतः परतश्च तत्परिज्ञानाभावस्य स्वयमेव प्रतिपादनात्। अस्त्येव तत्परिज्ञानमभ्यासात्, अप्रामाणासम्भविनः प्रतिभासविशेषस्याभ्यासबलेनावधारणात्। 'तत्प्रमाण्यपरिज्ञाने भूयस्तदभ्यासः, तस्माच्च तत्परिज्ञानम्' इति परस्पराश्रय इति चेत्; स्यादेवं यदि तत्कृतादेवाभ्यासात् तत्परिज्ञानम्, न चैवम्, पूर्वाभ्यासस्य तत्परिज्ञानहेतुत्वात्, तस्यापि तथाविधतत्पूर्वज्ञानाभ्यासतो भावात्, इत्यनादिरयमभ्यासप्रबन्धः, तत्र पूर्वपूर्वस्मादवधृतविशेषस्यैव उत्तरोत्तरज्ञानस्योत्पत्तेः न विचारप्रामाण्यपरिज्ञानमिति चेत्; अनुकूलमाचरसि; प्रत्यक्षादेरप्येवं प्रामाण्यपरिज्ञानस्यानपवादस्य प्रसङ्गात्, तत्राप्यभ्यासबलेनैव प्रमाणप्रत्यनीकपदार्थासम्भविनः प्रतिभासविशेषस्य [10]अप्रवृत्तेर्नावधारणात् प्रामाण्यपरिज्ञानस्योपपत्तेः, अभ्यासानादित्वेनैव परस्पराश्रयस्यापि परिहारात्। न चाभ्यासादेव [11]तद्विशेषावधारणात्; तदभावेऽपि क्षयोपशमापरनामधेयाददृष्टसामर्थ्यादप्रवृत्तस्यैव तदवधारणसम्भवात्। ततो निराकृतमेतत्–"यतो न प्राप्तिसन्देहः" [प्र०वार्तिकाल० १।५] इत्यादि। 'समानाकारतः' [12]इत्यस्यासिद्धत्वात् विशेषावधारणस्यैव[13] भावात्। दृश्यते च बालावलादीनामपि [14]पुरोवर्तिभावप्रतिभासेष्व [दृष्टाद्] भ्यासतो वा प्रवृत्तेः प्रागेव 'सत्यार्थोऽयम् अन्यथैव चायम्' इति देशकालनरान्तरापेक्षयाऽप्यसम्भवत्परिस्खलनस्य विशेषस्यावधारणम्। अत [15]एव वक्ष्यते–

"इन्द्रजालादिषु भ्रान्तमीरयन्ति[16] न चापरम्।
अपि चाण्डालगोपालबाललोलविलोचनाः॥
तत्र शौद्धोदनेरेव कथं प्रज्ञाऽपराधिनी।
बभूवेति वयं तावद्बहुविस्मयमास्महे॥" [न्यायवि०श्लो० ५१,५२] इति।

---

१ पारमार्थिकी। २ प्रमाणसद्भावसिद्धौ। ३ द्रष्टव्यम्–पृ० १४ टि० ४। ४ यथा यथा प्र–आ०,ब०,प०,स०। ५–र्वन्तीत्या–आ०,ब०,प०,स०। ६–त्वे वि–स०। ७–रणभाव–ता०। ८ स्यादेतदेवं स०। ९ पदार्थसंभ–आ०,ब०,प०,स०। १० पुरुषेण, प्रवृत्तेः प्रागेव। ११ प्रतिभासविशेषावधारणम्। १२ इत्यस्यापि सिद्धि–आ०,ब०,स०। इत्यस्यापि सिद्ध–प०। १३–स्य भावा–ता०। १४ पुरोवर्तिप्रतिभास्यैष्टभ्यासतो वा आ०,ब०,प०। पुरोवर्तिप्रतिभासैष्टस्यासतो वा स०। १५ एवं व–आ०, ब०, प०,स०। १६–रयन्ते न आ०, ब०, प०, स०।

अपरिस्खलितप्रत्ययवेद्योऽपि स विशेषो न तात्त्विक इति चेत्, व्याहतमेतत्—'प्रत्ययश्च न परिस्खलति, स च तात्त्विको न भवति' इति, विषयतात्त्विकत्वनिबन्धनत्वात् तत्प्रत्ययापरिस्खलनस्य। वासनादार्ढ्यनिबन्धनमेव तदपरिस्खलनं न तद्विषयभावनिमित्तमिति चेत्, न, अत्रापि प्रत्ययापरिस्खलनस्यैवोपायत्वात्, तस्य चायथार्थत्वे तदोऽस्यायथार्थस्यैवासिद्धेः। अयमप्यभाविकें एवार्थ इति चेत्, कुत एतत्? तथैव प्रत्ययापरिस्खलनादिति चेत्, न; तस्यायथार्थत्वेन यथार्थतदभाविकत्वसिद्धावनुपयोगात्। तदभाविकत्वमप्यययार्थमेवेति चेत्, न; 'कुत एतत्' इत्यादेरनुपरतेरनवस्थाप्रसङ्गात्। यदि च वासनादार्ढ्यहेतुकत्वस्याभाविकत्वमप्ययथार्थमेव, मौक्तिकमेव वह्निं तत्त्वाग्रम्, अभाविकत्वायथार्थत्वे भाविकत्वस्यावश्यमनवभवस्थानात्। तस्यापि न परिज्ञानोपायः, प्रत्ययापरिस्खलनस्ययथार्थत्वप्रतिपादनात्। अथेदं वासनादार्ढ्यहेतुकत्वप्रत्ययस्यापरिस्खलनं न वासनादार्ढ्यादपि तु तद्धेतु-कत्वलक्षणत्वविषयस्य भावत एव भावात्, किमेवं प्रत्यक्षादिप्रामाण्यप्रत्ययस्याप्यपरिस्खलनं तत्प्रामाण्यलक्षणतद्विषयतद्भावादेव न भवति यतो वासनादार्ढ्यनिमित्तत्वेन तैतत्तत्प्रमाण्य-सिद्धिर्न भवेत्। अवश्यं चैतदेवमभ्युपगन्तव्यम्, अन्यथाऽनन्तरविचारेऽपि प्रामाण्या-सिद्धिप्रसङ्गात्। न हि तत्प्रामाण्यमपि तद्विषयप्रत्ययापरिस्खलनादन्यतः सिद्ध्यति, "तस्माद् तद्विषयसद्भावमुक्तेव "तसिद्धिर्न वासनादार्ढ्यमुक्तात्। न चासिद्धप्रमाण्याद्विचारात् प्रत्यक्षादीनामप्रामाण्यं सिद्धयतीत्युक्तम्।

अथ न विचारः 'प्रमाणम् अन्यथा' वा' इति विचारयितव्यः। सैं खलु परस्य परी-क्षाहेतुरेव न स्वयं परीक्षाभूमिः अनवस्थाप्रसङ्गात्। तत्परीक्षायां हि विचारान्तरमवश्यम्भावि, विना तेन परीक्षाऽयोगात्, तत्परीक्षायामिति पुनर्विचारान्तरमिति परापरविचारपरीक्षायामेव आसंसारं व्यापाराप्त प्रकृतप्रत्यक्षादिप्रामाण्यपरीक्षायां व्यापारः स्यात्। ततः सुदूरं गत्वापि अविचारितादेव कुतश्चिद्विचारात् तत्परापरीक्षायाम् आद्यादपि "तैयाविचादेव विचारात्तस्यक्षादि-प्रामाण्यं परीक्ष्य परिस्खलत इति चेत्, नन्वु तत्परिहारागतो नामाप्रामाण्यमेव प्रत्यक्षादीनाम्, तत्कथम् अकृतविचारादविचारप्रामाण्यात् सिद्धयति? प्रामाण्यमेव वा "तेषां "तैतः किम् सिद्धयति?

सिद्धयति न परं (ति परं) वस्तु न पारमार्थिकं व्यावहारिकत्वात्। इदमेव हि तस्य व्याव-हारिकत्वं यत्परीक्षापरिशुद्धप्रमाणसिद्धत्वम्। न हि तथाविधस्य पारमार्थिकत्वम्, परीक्षापरिशुद्ध-प्रमाणवेद्यस्य "तत्त्वात्। इदञ्चास्मिन्नर्थे बौद्धस्य, "प्रामाण्यं व्यवहारेण" [प्र०वा० १।७] इति वचनादिति चेत्, कथमिदानीं विचारप्रामाण्यस्य पारमार्थिकत्वम्? तस्याप्यपरीक्षाशुद्धत्वात्।

१-तेन तत्प्रत्यक्षसिद्धेः ब्रा०, ब०, प०। २ अस्खलत्प्रत्ययत्वात्। ३ प्रत्ययापरिस्खलनं वासनादार्ढ्यनिमित्तं न तद्विषयभावनिमित्तमित्यस्य। ४ अभ्रान्तत्वप्र० । ५ प्रत्यक्षमेव। ६-स्यापि-ब्रा०,ब०, प०, स०। ७ प्रत्य क्षपरिस्खलनात्। ८ प्रामाण्यसि-स०, प०,ब्रा०। ९-प्रत्यक्षपरि-ब्रा०। १० प्रत्ययापरिस्खलनात्। ११ विचार प्रमाण्यसिद्धेः। १२-ब्रा न चैतै ब्रा०, ब०,प०,स०। १३ विचारः। १४ अविचारितादेव। १५ प्रत्यक्षादीनाम्। १६ अविचारितबुद्धिचारात्। १७ पारमार्थिकत्वात्।

प्रसिद्धञ्चैतत् प्रमाणवादिनामिति न साध्यपक्षे निक्षेपमर्हति । व्यतिरिक्तश्चेत्; तत्रापि तद्वर्गे विचारस्य यदि व्यभिचारः कथं तततस्तत्सिद्धिः प्रामाण्यसिद्धिवत्। अव्यभिचारश्चेत्; अविचलितं तत्प्रामाण्यं भवेत् तस्य तल्लक्षणत्वात्। अत्र चोक्तम्–"प्रत्यक्षादेरपि स्वविषयाव्यभिचारलक्षणं तद्वदेव तदप्रतिपिद्धम्" [ ] इति। अत उक्तम्–प्रत्यक्षलक्षणमर्थवेदनमिति।

ननु भवन्नपि परस्यास्मिन् विषये विचारः किन्नाम प्रमाणम्–प्रत्यक्षम्, अनुमानम्, अन्यद्वा भवेत्? प्रत्यक्षमिति चेत्; न; 'प्रत्यक्षमविचारकम्' इति स्वमतव्याघातात्। भवदपि तत् सर्वस्माज्ज्ञानवर्गादव्यतिरिक्तं यदि; स एव तर्हि यथास्वमप्रामाण्यं प्रतिपद्यत इति प्राप्तम्, न चैतदुपपन्नम्; तद्वर्गस्य त्वया कुतश्चिदविपर्ययीकरणात्। न ह्यविपर्ययीकृतः सकलदेशकालगोचरपुरुषाधिष्ठानस्तद्वर्गः स्वगतमप्रामाण्यमेव प्रतिपद्यते नापरमिति सम्भवति निर्णयः। एतदपि तद्वर्गेणैव प्रतीयत इति चेत्; न; अत्रापि तस्यैवोत्तरत्वात्। अविपर्ययीकृते तस्मिन् 'तेनैवेदं प्रतीयते' इति दुरवबोधमेतदिति। पुनरपि तथा समाधाने तदेवोत्तरमित्यनवस्थानं भवेत्। यदि च ज्ञानवर्गस्य सर्वस्यापि स्वत एवाप्रामाण्यप्रतिपत्तिः, न तर्हि तत्र कस्यचिदपि विप्रतिपत्तिरिति सौगतमेव सकलं जगत्स्यात्। अप्रमाणेऽपि तस्मिन् प्रमाणत्वसमारोपाद्विप्रतिपत्तिरिति चेत्; कुतस्तत्समारोपः? तत एव ज्ञानवर्गादिति चेत्; न; तस्य स्वतोऽप्रमाण्यप्रतिपत्तेरभ्युपगमात्। न ह्यप्रामाण्यं प्रतिपद्यमानस्य स्वतः प्रामाण्यारोपणमुपपन्नम्; तत्त्वप्रतिपत्ति मिथ्यारोपयोरेकज्ञानेन विरोधात्। अविरोधे वा न कुतश्चित्तदारोपनिवृत्तिः, तत्त्वज्ञानस्य तदप्रत्यनीकत्वात्, अपरस्य तत्प्रत्यनीकस्याभावादित्यमुक्तिरेव संसारात्। आरोपात्मकत्वे च तद्वर्गस्य न प्रत्यक्षत्वम्, प्रत्यक्षस्य कल्पनापोढत्वात्, आरोपस्य च कल्पनात्मकत्वात्। अशब्दसंसर्गादविकल्पत्वमेव तैमिरिकस्य द्विचन्द्रग्रहणवदिति चेत्; तथापि न प्रत्यक्षत्वम् प्रत्यक्षस्याभ्रान्तत्वात् 'प्रत्यक्षमभ्रान्तम्" [ ] इति वचनात्। आरोपस्य च स्वप्रतिभासिनि प्रामाण्ये यद्यप्रामाण्यं न स्वतः प्रतीयते 'सर्वस्याप्रामाण्यं स्वतः प्रत्येयम्' इति प्रकृतपरित्यागः। प्रतीयते चेत्; तदवस्थो विप्रतिपत्त्यभावः। न हि स्वाप्रामाण्यवेदिन एव ज्ञानात् तद्विषयसद्भावावष्टम्भेन विप्रतिपद्यन्ते विद्वांसः। तत्रापि पुनः प्रामाण्यारोपाद्विप्रतिपद्यन्त एवेति चेत्; न; 'कुतस्तत्समारोपः' इत्यादेः पुनरावृत्त्या चक्रकानवस्थाप्रसङ्गात्।

एतेन 'परतस्तत्समारोपः' इत्यपि प्रत्युक्तम्; तत्समारोपस्यापि स्वाप्रामाण्यावेदित्वे प्रकृतप्रतिज्ञापरित्यागस्य, तद्वेदित्वे विप्रतिपत्त्यनङ्गत्वस्य, तत्राप्यपरतत्समारोपकल्पनायाम् 'कुतस्तत्स-

---

१ प्रमाणभावनिर्मुक्तज्ञानवर्गरूपे प्रमाऽभावे। २ विचारतः। ३ प्रमाऽभावसिद्धिः। ४ विचारप्रामाण्यम्। ५ प्रामाण्यस्य। ६ "कल्पनापोढमभ्रान्तं प्रत्यक्षम्"–न्यायवि० पृ० ११। ७ यथामप्रा–आ०, ब०। यथातमप्रा–प०। यथास्वप्रा–ता०। ८ स्वगतप्रा–आ०, ब०, प०, स०। ९ ज्ञानवर्गे। १० वा नु कु–स०। ११ तदविरुद्धत्वात्। १२ ज्ञानवर्गस्य। १३ "तत्र कल्पनापोढमभ्रान्तं प्रत्यक्षम्।"–न्यायवि० पृ० ११। "प्रत्यक्षं कल्पनापोढमभ्रान्तम्।"–प्र० वार्तिकाल० २। १२३। १४ स्वगते। १५ सर्वस्यापि प्रामाण्यं सतः आ०, ब०, प०, स०। १६–ण्यवादिन आ०, ब०, प०, स०। १७ स्वाप्रामाण्यवे–स०। १८–तस्तत्स–स०।

मारोपः' इत्याद्यानुरूप्येणाविशेषात् । तत्र तदूर्ध्वतद्व्यतिरिक्तम् । नाऽपि व्यतिरिक्तम्, अनुपयोगात् । तत्र प्रत्यक्षं विचार ।

नाप्यनुमानम्, प्रत्यक्षाभावे तदभावात्, तस्य तत्पूर्वकत्वात् । अप्रामाण्यप्रतिबन्धे हि लिङ्गस्य प्रत्यक्षसिद्धे स्यादनुमानम्। न चाप्रामाण्यं प्रत्यक्षसिद्धमिति कथं तत्सम्बन्धः प्रत्यक्षवेद्यः स्यात् ? सम्बन्धाधिकरणप्रतिपत्तिमन्तरेण सम्बन्धप्रतिपत्तेरनुपपत्तेः । सत्यपि प्रत्यक्षादप्रामाण्य- ५ परिज्ञाने न तत्सम्बन्धस्य प्रत्यक्षवेद्यत्वम्, 'स्वरूपस्यावलम्बनाकारपरिच्छेदि हि प्रत्यक्षम्' इत्यादेः 'यतस्तत्सम्बन्धसाहनम्' इत्यस्य दोषस्य परपक्षोक्तस्यैव अत्रापि प्रसङ्गात् । नापि अनुमानवेद्यत्वम्, 'अनुमानान्तरापेक्षात्' इत्यादिप्रसङ्गात् । तस्मादनुमानमपि विचारः ।

प्रमाणान्तरमित्यपि न युक्तम्, "न प्रत्यक्षानुमानाभ्यामपरं मानमिष्यते" [प्र० वार्तिकाल० १।५] इति स्वमतव्याघातप्रसङ्गादिति चेत्, भवतु सौगतस्यायं पर्यनुयोगः तेनै- १० वास्य विचारस्याप्रामाण्यप्रतिपत्त्यर्थमङ्गीकाराव्र जैनस्य विपर्ययात् । जैनेन तु केवलम् 'अप्रमाणाद्विचाराद्विचारज्ञानवर्गस्याप्रामाण्य , तत्प्रामाण्ययदृच्छक्यप्रतिपत्तिक्रमिति प्रमाणयितव्यो विचारः, तद्वदेव चार्थज्ञानस्यापि प्रामाण्यमशक्यप्रतिषेधम्' इत्येतावदुच्यते ।

स्यान्मतम्-न सौगतस्यायं प्रमाणम् । न ह्यनेन[1] किञ्चिद्विधीयते नापि प्रति- षिध्यते, केवलमर्थज्ञानप्रामाण्ये संशय एवापादते न च सशयापादकं प्रमाणं विरोधादिति, १५ तदसङ्गतम्, अर्थनिषेधनियमनिर्णयाभावे "स्वरूपस्य स्वतो गतिः" [प्र० वा० १।६] इति विरोधात्। न हि सन्दिग्धेऽर्थे स्वरूपस्यैव न परस्वरूपस्य गतिरिति नियमो न्याय्यः । किञ्च,

विचारितं चेत्सन्दिग्धम्, भ्रमन्निन्ध[2] 'किमुच्यताम् ?
सवेदनस्वरूपं चेत्, विचारस्तत्र नास्ति किम् ? ॥२५६॥

नास्ति चेत्, अविकल्पत्वभ्रणिकत्वादिकं तव । २०
तत्र मानात्कुतः सिद्धयेत् ? स्वसंवेदनतो यदि ॥२५७॥

कुतस्तदपि संसिद्धयेत् ? विचारेण विना कृतम् ?
प्रसिद्धत्वाद्विचारेण किं तत्रेत्यपि दुर्भणम् ॥२५८॥

मीमांसकादयस्तत्र यत्प्रसिद्धिं[3] न मन्वते ।
विना विचारतस्तस्यं प्रतिबोध्याः[4] कथं त्वया ॥२५९॥ २५

अपि च त्वं स्वमिवितौ विचारविरह[5] मुवम् ।
स्वलक्षणज्ञानशून्यत्वमात्मनः कथयस्यलम् ॥२६०॥

---

१ अप्रामाण्यनिरूपणेन सह लिङ्गस्य अविनाभावे । २ पू० ७५ । ३ विचारेण । ४ एवापद्यते आ०, ब०, प०, स० । ५ गतिरि—आ०, ब०,प०, स० । ६ स्विदिदुच्य—आ०, ब०, प०, स० । ७ स्वसंवेदनस्व- रूपे । ८ स्वसंवेदने । ९ नमन्नते आ०, ब०, प०, स० । १० सिध्या इति शेषः ।

"अप्रत्यक्षस्योपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति ।" [ ]
[1]इत्यादेर्बहुलं तत्र तद्विचारस्य दर्शनात् ॥२६१॥

अस्तु तत्र विचारश्चेत्तच्च सन्दिग्धमस्तु वः ।
तद्विचारस्य सम्यक्त्वान्निश्चितं चेत्तदुच्यते ॥२६२॥

मानमेव स सम्यक्त्वे तस्य तल्लक्षणत्वतः ।
न चैवम्, मानसंशीतेः स्वयमेव निरूपणात् ॥२६३॥

सन्दिग्धमानवेद्यत्वादर्थवत्तत्स्ववेदनम् ।
त्याज्यमस्तु, उभय[3]त्यागश्चोपायेन विना कथम् ?२६४॥

अस्ति कश्चिदुपायश्चेत्; द्वयत्यागः कथं भवेत् ?
तत्त्यागे कोऽवशिष्येत यस्योपायत्वकल्पनम् ॥२६५॥

तस्मात्स्ववेदनं वाह्यज्ञानाप्रामाण्यमेव वा ।
विचारादन्यतो वाऽपि प्रमाणादेव सिद्ध्यति ॥२६६॥

तद्वदेव प्रमाणत्वमर्थज्ञानस्य किन्न तत् ।
'प्रत्यक्षलक्षणं प्राहुः' इति सूक्तं ततो बुधैः ॥२६७॥

अथवा 'आत्मवेदनम्' इत्ययुक्तम्; अर्थज्ञानस्य स्वतो वेद[3]नायोगात्, स्वात्मनि क्रियाविरोधात् छिदिक्रियावत् । न ह्यतिनिशितोऽपि करवाल आत्मानमेव छिनत्तीत्यत्रेदमाह—'प्रत्यक्षलक्षणमात्मवेदनम्' इति । आत्मवेदनप्रतिपक्षस्य तद्भाव[4]स्य स्वविषयेत्वेनाक्षणात् प्रत्यक्षं तद्भावज्ञानं तदेव लक्षणं यस्यात्मवेदनस्य तत्तथोक्तम् । तथा हि—

स्वसंवेदनवैकल्यं सर्वप्रत्ययगोचरम् ।
स्वतश्चेदवगम्येत प्रतिज्ञा भज्यते तव ॥२६८॥

अन्यतश्चेत्; तदन्यस्य यदि [7]संवेद्यते स्वतः ।
प्रतिज्ञाभङ्गदोषस्ते पुनरप्यनुपज्यते ॥२६९॥

तत्रापि [8]तस्य संवित्तिरन्यतो यदि कल्प्यते ।
तत्राप्यन्यत इत्येवमनवस्था कथं न वः ॥२७०॥

---

१ "अप्रसिद्धोपलम्भस्य नार्थवित्तिः प्रसिद्ध्यति ।"—तत्त्वस० का० २०७४ । २ अर्थ-स्वसंवेदनो-भय ।—भयं त्या—आ०, व०, प० ।—भयस्या—स० । ३ वेदनात् स्वा—आ०, व०, प०, स० । ४ "स्वात्मनि वृत्तिविरोधात्, न हि तदेव अङ्गुल्यग्रं तेनैव अङ्गुल्यग्रेण स्पृश्यते, सैवासिधारा तयैवासिधारया छिद्यते ।"—स्फुटार्थ० अभिध० पृ० ७८ । "न छिनत्ति यथात्मानमसिधारा तथा मनः । यथा सुतीक्ष्णाप्यसिधारा खड्गधारा तदन्यवदात्मानं स्वकीयं न छिनत्ति न विघटयति स्वात्मनि क्रियाविरोधात् तथा मनः, असि-धारावच्चित्तमपि स्वात्मानं न पश्यतीति योज्यम् ।"—बोधिचर्या० पृ० ३९२ । ५—स्य वि—आ०, ब०, प०, स० । ६ आत्मवेदनाभावज्ञानम् । ७ स्वसंवेदनवैकल्यं संवेद्यते । ८ स्वसंवेदनवैकल्यस्य । ९ वा स० ।

काक्ष्णस्य निहृत्तेश्चेत्, काक्ष्णीयं किमुच्यताम् ?
सर्वज्ञानस्वसंविच्चिदैकरूप्यज्ञानमेव चेत् ॥२७१॥

तर्हि तस्मिन्ननिष्पन्ने कथं काक्ष्णानिवर्तनम् ?
काक्ष्णितार्थप्रकल्पृप्तिर्हि काक्ष्णार्थापृत्तिकारणम् ॥२७२॥

मनसोऽप्यत्र गमनादिरूप्यनुचितं यतः ।
काक्ष्णितार्थं परित्यज्य तत्र तद्रूपसम्भवात् ॥२७३॥

अदृष्टादन्यतो वापि तत्र तैन्नृतिसम्भवे ।
मा स्म भूदनवस्थानं प्रकृतं हु न सिद्ध्यति ॥२७४॥

साकल्येन स्वसंविच्चिदैकरूप्यस्यैव्यप्रवेदनात् ।
तस्मात्तद्विषये किञ्चिज्ज्ञानमस्तु स्वतो गैतम् ॥२७५॥

तदेव चार्थविज्ञानस्यात्मवेदनलक्षणम् ।
प्रत्यक्षलक्षणं देवः प्राह येनात्मवेदनम् ॥२७६॥

न स्वसंवेदने कश्चिद्विरोधोऽप्यस्ति वस्तुतः ।
निर्बाधं तस्य दृष्टत्वात् दृष्टे कानुपपन्नता ॥२७७॥

छिदिक्रिया विरुद्धास्तु तस्याः स्वात्मन्यदर्शनात् ।
न स्वसंवेदनं तस्य दर्शनादर्थवित्तिवत् ॥२७८॥

अन्यथार्थात्मसंविद्योर्विरोधेनोपपादनात् ।
निह्नायितं जगत्प्राज्ञमस्वसंवित्तिवादिनाम् ॥२७९॥

सकलज्ञानानां हि स्वसंवेदनैकरूप्यं यदि स्वत एव प्रत्येतव्यम्, तदा तदेव तेषां स्वसंवेदनमिति तद्वैकरूप्यप्रतिज्ञाव्याघातः कथम भवेत् ? अभ्यासोऽत्रगम्यत इति चेत्, न, तस्यापि स्वतस्तद्वैकरूप्यवेदने प्रतिज्ञाव्याघातस्य तदवस्थत्वात् । अन्यतस्तद्वेदने तस्यापि तदभ्यतस्तद्वेदनमित्यनवस्थाप्रसङ्गात् । निवृत्ताकाङ्क्षस्य न तत्प्रसङ्ग इति चेत्, नन्वियमाकाङ्क्षा साकल्येन तद्वैकरूप्यपरिज्ञानगोचरा कथं तत्परिज्ञानापरिसमाप्तौ निवृत्तिमती स्यात् ? आकाङ्क्षितैप्रयोजनपरिसमाप्तिरेव ह्याकाङ्क्षानिवृत्तिनिबन्धनं नापरं किञ्चित् । अन्यत्र गतमनस्कस्य न तद्यसङ्ग इत्यप्यनुचिंतमेव वचनम्, आकाङ्क्षाविषयव्यतिक्रमेण तदन्यत्र गमनासम्भवात् । अदृष्टसामर्थ्येन ईश्वरचोदनया वा तत्सम्भवेऽपि, भवतु निवृत्तमनवस्थानम्, प्रस्तुतसिद्धिस्तु नास्त्येव सकलज्ञानगतस्य स्वसंवेदनवैकरूप्यस्यैवमप्रवेदनात् । तदवस्तद्विषयं स्वसंविदितमेव किञ्चिज्ज्ञानमङ्गीकर्तव्यम्, अन्यथा तदसिद्धेः, तदेव च सकलस्वार्थवेदनस्यापि स्वसंविदितत्वमवस्थापयति । तत इदमुक्तम्-'प्रत्यक्षलक्षणमात्मवेदनम्' इति । न चार्थज्ञानानां स्वसंविदितत्वे कश्चिदपि

१–व्याकृतिका–आ०, ब०, प०, स० । २ अन्यत्र । ३ मनोगतिः । ४–स्याप्यवे–आ०, ब०, प०, स० । ५ यदि: स० । ६ अन्यत्रात्मार्थ–ता० । ७–तत्र–आ०, ब०, प० ।

विरोधः तस्य निर्बाधमनुभूयमानत्वात्। न चानुभवातिक्रान्तखड्गस्वरूपगोचरछिदिक्रियानिदर्शनेन अनुभवाधिरूढस्य स्वसंवेदनस्यापि विरोधपरिकल्पनमुपपन्नम्, अर्थवेदनस्यापि तत्प्रसङ्गात्। ततो न स्वरूपस्य नार्थस्य वेदनमिति सकलं जगन्निद्रामुद्रितमेव अस्वसंवेदनज्ञानवादिनां प्राप्तम्। तस्मादनुभवोपस्थापितशरीरत्वाद् अर्थवेदनवदप्रतिक्षेपार्हमेव आत्मवेदनमपि, साकल्यतः तद्विपक्षा-
५ वेदनान्यथानुपपत्तेर्वा प्रामाण्यवत्।

भवतु प्रामाण्यमप्रतिक्षेपार्हम्, अन्यथा तद्विचारस्यापि तत्प्रतिक्षेपे साकल्येन तत्तत्प्रतिक्षेपायोगात्। तस्य तु कुतः प्रतिपत्तिः ? [10]तद्विचारप्रामाण्यस्य कुत इति चेत्; नेदमुत्तरम्। अव्युत्पन्नप्रश्नस्य तत्रापि समानत्वादिति चेत्; न; क्वचित्स्वतः क्वचित्परतश्च [11]तन्निश्चयसम्भवात्। [12]परतस्तन्निश्चयेऽनवस्थानमिति चेत्; न; पर्यन्ते कस्यचित्स्वतःसिद्धप्रामाण्यस्यापि सम्भवात्।
१० यथा चैतत्सुबद्धं तथोत्तरत्र निरूपयिष्यामः। एतदेवाह—**'प्रत्यक्षलक्षणम्'** इति। स्वसंवेदनमत्र **प्रत्यक्षम्**, तदेव **लक्षणं** गमकं यस्य न्यायस्य तं **प्राहुः** इति। प्रत्यक्षग्रहणमुपलक्षणम्, तेन [13]परलक्षणमपि तं प्राहुरिति प्रतिपत्तव्यम्। तदेवमभिहितं प्रमाणस्य सामान्यलक्षणम्।

अधुना पुनरभिहितलक्षणस्य तत्सामान्यस्य विभागो लक्षयितव्य इत्यनयैव कारिकया आवृत्तिन्यायेन प्रत्यक्षस्य[14] लक्षणं दर्शयति [15]तस्य तद्विभागत्वात्। परोक्षमपि [16]तद्विभाग एव तस्य
१५ कस्मान्न लक्षणमुपदर्श्यते ? [17]शास्त्रान्तरे तस्य तदुपदर्शनमिति चेत्; न; प्रत्यक्षस्यापि तत्रैव तदुपदर्शनात्। इहापि तृतीये परोक्षस्य तदुपदर्श्यत एव **"प्रत्यक्षमञ्जसा स्पष्टमन्यच्छ्रुतम्"** [न्यायवि० श्लो० ४६९] इत्यनेनेति चेत्; न तर्हि प्रत्यक्षमायत्र लक्षयितव्यं तस्यापि तत्रैव तदुपदर्शनात्। तस्योक्तोपसंहारत्वादत्रैव तस्य तदुपदर्शनीयम्, अनुक्तस्योपसंहारायोगात्; इत्यप्यसमाधानम्; परोक्षेऽपि समानत्वात्। द्वितीयेनानुमानस्य तृतीयेन
२० शाब्दस्य च परोक्षविभागस्य लक्षणोपदर्शनात् परोक्षमपि लक्षितं भवत्येवेति चेत्; न; विभागलक्षणस्य सामान्यानुपातित्वाभावात्, इतरथा प्रमाणमपि न सामान्येन लक्षयितव्यं प्रत्यक्षादितद्विभागलक्षणादेव तल्लक्षणोपपत्तेरिति चेत्[18]; नेदमशक्यपरिहारम्; अत्रैव परोक्षस्यापि सामर्थ्येन लक्षणात्, तस्य प्रत्यक्षविसदृशत्वात्। प्रत्यक्षे च 'स्पष्टम्' इति [20]लक्षिते तद्विसदृशत्वाद् 'अस्पष्टम् परोक्षम्' इति भवत्यर्थात्प्रतिपत्तिः। तस्य तद्विसदृशत्वमेव कुत इति
२५ चेत् ? परोक्षत्वादेव, अन्यथा तदपि प्रत्यक्षमेव स्यात्। न हि प्रत्यक्षसजातीयमप्रत्यक्षमुपपन्नम्। न च प्रत्यक्षमेव प्रमाणम्; परोक्षस्याप्युपपत्तिबलेन व्यवस्थापनात्। उपसंहारे च परि-

---

१—वादितिरु—आ०, ब०, प०, स०। २—स्य तत्र—आ०, ब०, प०, स०। ३ आत्मवेदनाभाव। तद्विपक्षवेदना—ता०। ४ साकल्यतः प्रामाण्यप्रतिक्षेपे। ५ प्रामाण्यप्रतिक्षेपविचारस्यापि। ६ प्रामाण्याभावे। ७ विचारतः। ८ प्रामाण्यप्रतिक्षेप। ९ प्रामाण्यस्य। १० प्रामाण्यप्रतिक्षेपविचारप्रामाण्यस्य। ११ प्रामाण्यनिश्चय। १२ परतश्च तन्नि—आ०, ब०, प०। १३ प्रत्यक्षभिन्नः परोक्षः परः। १४—क्षलक्ष—आ०, ब०, प०,स०। १५ प्रत्यक्षस्य। १६ प्रमाणसामान्यविभागः। १७ लघीयस्त्रयादौ। १८ प्रत्यक्षस्य। १९—त्तदशक्यप—आ०, ब०, प०, स०। २० लक्ष्यते त—ब०। लक्षते आ०, ब०।

स्फुटमेव प्रत्यक्षवैसदृश्य परोक्षस्य प्रतिपादितम् 'अन्यच्छ्रुतम्'इति । तत्र 'अन्यत्' ईत्यनेन प्रत्यक्षविजातीयत्वस्य प्रतिपादनात् । प्रत्यक्षमेव पैरोक्षलक्षणवलेन किम लक्ष्यत इति चेत्, न, विशेषाभावात् । कः पुनरत्र विशेषो यत्प्रत्यक्षलक्षणवलेन परोक्ष तल्लक्षणवलेन वा प्रत्यक्षं लक्ष्यत इति ? प्रत्युत प्रत्यक्षमेव प्रथमं लक्षयितव्यं तैत्पूर्वकत्वेन परोक्षस्यैव पश्चाल्लक्षणोपपत्तेः । अत इदमुच्यते 'प्रत्यक्षलक्षणम्' इत्यादि । लक्ष्यतेऽनेनेति लक्षणम्, प्रत्यक्षस्य लक्षणं [प्रत्यक्षं] ५ लक्षणं तत् प्रत्यक्षस्यैव स्वरूपम्, असाधारणैर्न स्वरूपैरेव भावानां लक्षणसम्भवात् । अत एव तेषु स्वलक्षणमित्युक्तिः । तत् प्राहुः । कीदृशम् ? 'स्पष्टम्' इति ।

किं पुनरिदं स्पष्टत्वं नाम ? साक्षात्करणमिति चेत्, तदपि दुरवबोधम् । आलोकपरिकल्पितस्येन ग्रहणमिति चेत्, न, अतिव्यापकत्वात्, पावकानुमानेऽपि भावात्, आलोकालिङ्गितस्य पर्वते पावकस्यानुमानात्प्रतिपत्तेः । अव्यापकत्वाच्च रसादिप्रत्यक्षेषु, अन्धकारान्तरितसमप- १० गोचरलक्षणप्रविप्रत्यक्षेष्वपि अविद्यमानत्वात् ।

'अव्यवहितग्रहणम्' इत्यपि वाक्षमेव, काचादिव्यवहितरूपदर्शनदशायामभावात् । व्यवधापकमेव काचादिकं न भवति वस्तुग्रहणप्रतिबन्धाभावात्, तत्प्रतिबन्धेन हि व्यवधायकत्वं नान्यथेति चेत्, किमिदानीं व्यवधानोपाधिकं वस्तुग्रहणमेव नास्ति ? तथा चेत्, तद्ग्रहणमेवं साक्षात्करणमिति वक्तव्यं किमव्यवहितविशेषणेन व्यवच्छेद्याभावात् ? न चेदमुचितम्, १५ अनन्तरमेव निरूपणात् । व्यवधानोपाधिकवस्तुग्रहणसम्भवे तु सिद्ध काचादेरपि व्यवधायकत्वमिति कथं नान्यापकत्वं साक्षात्करणलक्षणम् ? काचाद्यन्तरितवस्तुग्रहणस्य 'प्रैत्यक्षत्वेऽप्यव्यवहितग्रहणस्यापाभावात् । प्रत्यक्षमपि तन्न भवति व्यवहितग्रहणत्वादिति चेत्, न, सर्वज्ञविज्ञानस्यापि काचाद्यन्तरितवस्तुग्राहिणः प्रत्यक्षत्वाभावप्रसङ्गात्, तदग्राहित्वेन सर्वज्ञत्वाभावापत्तेः । सत्यप्यन्तर्घाने वस्तुस्वरूपस्य ग्रहणात् प्रत्यक्षमेव 'तैदिति चेत्, सिद्धमस्मदादिज्ञानस्यापि- २० प्रत्यक्षत्वम्, तत्रापि काचमाण्डैर्पर्यंयगुण्ठितखण्डशर्करापिण्डस्वरूपग्रहणस्यानुभवादिति सिद्धमव्यापकत्वं तल्लक्षणस्य ।

भवतु तर्हि वस्तुन्यरूपग्रहणमेव साक्षात्करणमिति चेत्, न, अनुमानादावपि प्रसङ्गात् तस्यापि वस्तुन्यरूपग्राहित्वेन स्याद्वादिनः प्रसिद्धत्वात्, "बौद्धस्य प्रसाधयिष्यमाणत्वात् । सामान्यरूपेणैव 'तैस्य 'तद्ग्राहित्वं न विशेषरूपेणेति चेत्, न, शब्दाद्युपाधिसम्बन्धेनैवानित्यत्वादेः २५ तेन ग्रहणात् । न "सकलोपाधिकसम्बन्धेनेति चेत्, न, प्रसिद्धप्रत्यक्षेणापि तदभावात्,

---

१ वैसादृश्यं आ०, ब०, प०, स०। २ इति प्र-आ०, ब०, प०, स०। ३ परोक्षलक्षेन आ०, ब०, प०, स०। ४ प्रत्यक्षपूर्वकत्वेन। ५ लक्षणं प्रत्यक्षस्य आ०, ब०, प०, स०। ६ –न रूपेणैव आ०, ब०, प०। ७ पावकानुमा–आ०, ब०, प०, स०। ८ –व्यभि–आ०, ब०, ब०, स०। ९ –अन्यथा–आ०। १० –व्यवधान्तरेते स०।–व्यवधा–पपेति आ०, ब०, प०। ११ वस्तुग्रहणेन। १२ प्रत्यक्षत्वे व्यव–आ०, ब०,प०,स०। १३ अन्तरितवस्त्वादि सर्वज्ञविज्ञानम्। १४–पर्ययगुण्डित–आ०। १५ बौद्धस्य प्रसाध प्रसाध्य–आ०, ब०, प०। १६ अनुमानस्य। १७ वस्तुस्वरूपग्राहित्वम्। १८–पाधिस–आ०, ब०, प०, स०।

अप्रतिपन्नशुक्त्यधिष्ठानोऽपि तत्र रजतप्रतिसङ्क्रमं प्रतिपद्यत एवेति चेत्; न; रजतस्याप्रतिसङ्क्रमरूपत्वात्, अनधिष्ठानतयैव प्रतिपत्तेः। किं तर्हि शुक्तिशकलेन कर्त्तव्यमिति चेत्? न किञ्चित्। तदभावेऽपि कुतो न रजतप्रतिभासनमिति चेत्? भवत्येव यदि [1]तत्कारणसन्निधानम्। [2]विद्याशक्तिविरचितस्याशुक्तिशकलस्यैव तस्यावलोकनात्। न हि तत्र किञ्चिदधिष्ठानम्, अप्रतीतेः। कथं तर्हि 'शुक्तिशकलमेव रूप्यरूपतया[3] प्रतिभातम्' इति पश्चात्प्रत्यभिज्ञानमिति चेत्; कः पुनस्तच्छकलस्य रूप्यप्रतिभासेन सम्बन्धो येनैवमुच्यते? ग्राह्यत्वमिति चेत्; न; स्वरूपेण[4] तदभावात्। परंरूपेण[5] तु परस्यैव ग्राह्यत्वं न तस्य अतिप्रसङ्गात्। कारणत्वमिति चेत्; तँस्यैव[6] तर्हि तेन[7] ग्रहणं न [8]रूप्यस्य। अन्यकृतेनाप्यन्यग्रहणे चक्षुरादिकृतेनैव [9]तद्ग्रहणमस्तु, पर्याप्तं तच्छकलस्य [10]तत्कारणत्वकल्पनया। नापि चक्षुरादिना सर्वदा तत्प्रतिभासनोदनम्; तच्छकलेऽपि समानत्वात्। [11]तस्य विशिष्टस्यैव तद्धेतुत्वं न तन्मात्रस्येति चेत्; न; चक्षुरादेरपि कामलाद्युपहतिपरिग्रहपरीतस्यैव तद्धेतुत्वेन अतिप्रसङ्गपरिहारस्य सुकरत्वात्।

अवश्यं चैतदेवमङ्गीकर्त्तव्यम्, अन्यथा विद्याशक्तिविरचितस्य रजतादेरप्रतिभासप्रसङ्गात्, तत्र तद्धेतोः कस्यचिदधिष्ठानस्याभावात्। विद्याशक्तिरेवाधिष्ठानमिति चेत्; न; आकाशे तदभावात्, आकाशगतस्य च तदा रजतस्य प्रतिभासनं न तत्र विद्याशक्तिस्तस्या बोधरूपत्वेन पुरुषाधिष्ठानत्वात्। मन्त्र एव तच्छक्तिः, तस्य च तत्र[12] सम्भव एवेति चेत्; न; तस्यापि गुप्तभाषितस्य मुखविवरमात्रपर्यवसितत्वेन बाह्याकाशगतत्वासम्भवात्, अन्यैरपि सन्निहितैस्तच्छ्रवणप्रसङ्गात्, अश्रुतिगोचरस्य सम्भवे[13] च न तस्य शब्दत्वम्, शब्दस्य श्रोत्रग्रहणलक्षणत्वात्। आकाशमेवालोकपरिकलितमधिष्ठानमित्यपि नोपपत्तिपूरितम्; उपरतरूप्यप्रतिभासस्य तथा प्रत्यभिज्ञानप्रसङ्गात्। न चैवम्, ततो न पराधिष्ठानत्वं रजतस्य येन [14]तद्वदनधिगताधिष्ठानस्य विकल्पवैशद्य[15]स्याप्यध्यवसायः स्यात्। कथं तर्हि 'शुक्तिशकलमेव रजतरूपतया प्रत्यभासिष्ट' इति प्रत्यभिज्ञानमिति चेत्? न; [16]तेनापि स्वहेतुदोषोपजनितविभ्रमात्मना तादृप्यस्यासत एव प्रतिवेदनात्, तद्विभ्रमस्य च विचारादवगतेः। तत्र [17]निर्विकल्पवैशद्यस्य विकल्पे प्रतिसङ्क्रमः।

नाऽपि विकल्पधर्मस्य निश्चयस्याविकल्पे; तत्प्रतिक्षेपन्यायस्य समानत्वात्। न [18]तँयोरितरेतराधिष्ठानप्रतिसङ्क्रमः; स्वाधिष्ठानगतत्वेनैव तत्प्रतिभासस्य परेणाभ्युपगमात्, तत्कथमेवमाशङ्केति चेत्? किं पुनरेतदनात्मज्ञजल्पितम्—

"मनसोयुगपद्वृत्तेः सविक[19]ल्पाविकल्पयोः।
विभ्रमो [20]लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति॥" [प्र० वा० २।१३३] इति?

---

१ रजतप्रतिभासहेतुसान्निध्यम्। २ इन्द्रजालादिविद्या। ३ रजतत्वेन। ४ शुक्तिशकलस्य। ५ शुक्तिरूपेण। ६ रजतरूपेण। ७ शुक्तिशकलस्यैव। ८ रजतप्रतिभासेन। ९ ग्रहणात्र आ०, ब०, प०, स०। १० रूपस्य ता०। ११ रजतग्रहणम्। १२ रजतप्रतिभासकारणत्व। १३ शुक्तिशकलस्य। १४ आकाशे। शब्दस्य आकाशगुणत्वात्। १५-वे न च तस्य आ०, ब०, प०, स०। १६ तद्वदनादिगता-आ०, ब०, प०, स०। १७ -स्याप्यव्यव-आ०, ब०, प०, स०। १८ ततोऽपि आ०,ब०,प०,म०। १९ -निर्विकल्पकवै-आ०, ब०, प०, स०। २० निर्विकल्पविकल्पधर्मयोः। २१ -सविकल्पवि-ता०। २२ -शीघ्रवृत्तेः।

नन्वनेनापि न [1]तथा तत्प्रतिसङ्क्रमः प्रविपाद्यते, निर्विकल्पेतरैकत्वव्यवहारमात्रस्य प्रतिपाद्नादिति चेत्, कः पुनरयं तद्व्यवहारो नाम ? तद्व्यवसाय इति चेत्, कथम् तथा प्रतिसङ्क्रमो व्यवसीयमानस्य [2]सदेकत्वस्यैव प्रतिसङ्क्रमार्थत्वात् ? तद्वचनमिति चेत्, न, [3]'व्यवस्यति' इति विरोधात्. । न च व्यवस्यतीति वक्तीत्यर्थः, शाब्दिकसमयस्यैवमभावात्. ।

कुतो वा [4]तयोरेकत्वव्यवहारः ? यौगपद्यादिति [5]चेत्, नियमवतः, नियमरहितद्वा ? ५ नियमवत्त्वेत्, सहोपलम्भनियमात् वाह्यवभेव तदेकत्वं नीलतत्क्षणवत्, कथं तस्य [6]व्यवहारमात्रसिद्धत्वं सहोपलम्भनियमस्यानैकान्तिकत्वप्रसङ्गात् ? नियमरहितात्वेत्, न, नीलध्वंलयोरपि प्रसङ्गात्. । एकार्थकारित्वादिति चेत्, क [7]पुनरेकोऽर्थः ? प्रवर्त्तनमेव, तथा च प्रज्ञाकरः–"[8]प्रवर्त्तनैस्यैकस्य कार्यस्य भावात्" [प्र० वार्त्तिकाळ० २।१३३] इति, तदपि न निरूपितम्, [9]रूपादावपि प्रसङ्गात्, तदकारणादेरेकस्य कार्यस्य तत्रापि भावात्. । १० अस्त्येव साधारणशक्तिप्रयुक्तः [10]तत्राप्येकघटव्यवहार इति चेत्, विशेषशक्तिप्रयुक्त एव रूपे रस इति रसे वा रूपमिति किम् भवति तत्र व्यवहारः ? तच्छक्तेरन्योन्यमभावादिति चेत्, विकल्पाविकल्पयोरपि तर्हि कथं [11]विशब्दनिम्नयत्नव्यवहारः तस्यापि विशेषशक्तिप्रयुक्तत्वात्, [12]तस्याश्च परस्परमसम्भवात्. । सम्भवे वा न विशेषशक्तिः, तत्प्रयुक्तस्य [13]तत्रव्यवहारस्योभयत्राप्यनुपरिहारित्वं भवेत्. । १५

कुतः पुनर्विकल्पेतरयोर्यौगपद्यम्, अयौगपद्ये सहकारित्वामावेनैकप्रवृत्तिकारित्वानुपपत्तेरिति ? अत्र परस्य [14]वचनम् "युगपद्विषयसन्निधानादेव" [प्र० वार्त्तिकाळ० २।१३३] इति, तदेतन्नातीव चतुरस्रम्; विकल्पस्यापि वस्तुत एव सप्टत्वप्रसङ्गात् सन्निहितविषयत्वात्, दर्शनस्यापि [15]तत एव स्पाष्ट्यात्. । अत एव [16]देवस्य वचनम्–"स्पष्टं सन्निहितार्थत्वात्" । [प्रमाणसं० श्लो० ४] इति । नास्त्येव विकल्पस्य विषय इति चेत्, न, २० [17]'युगपत्' इत्यादिवचनस्य [18]व्याघातप्रसङ्गात् । न ह्यसतो [19]युगपदन्यथा वा सन्निधानं सम्भवति । कस्यितोऽस्त्येव [20]तद्विषयो न वस्तुयत्नागत इति चेत्, केन तत्कल्पनम् ? तेनैव विकल्पेनेति चेत्; तस्यैव कुतः सम्भवः सद्धेतोरभावात् ? तद्विषयसन्निधान तद्धेतुश्चेत्; तदपि कुतः ? तस्मादेव विकल्पादिति चेत्, न, परस्पराश्रयदोषस्य [21]मुख्यत्वात्. । अन्येन [22]'तत्कल्पनं चेत्, तेनापि दर्शनविषयेण समसमयस्यैव तस्य' कल्पने न युगपद्विषयसन्निधानम्. । २५ तत्समसमयस्य कल्पने न तस्यापि दर्शनयोगपद्यम्. । युगपद्विषयसन्निधानाऽभवतु को दोष इति

---

१ तथा तत्र–आ०, ब०, प०, स०. २ निर्विकल्पेतरैकत्वरूपं. ३ निर्विकल्पेतरयोः. ४ यौग नियम–आ०, ब०, प०, स०. ५ एकत्वम्. ६ –मात्रस्यैव आ०, ब०, प०, स०. ७ पुनरेकार्थ स०. ८ –नैकान्त स०. ९ रूपरसादावपि. १० व्याप्तावपि. ११ विकल्पे विशब्दन्यवहार निर्विकल्पे च विशब्दव्यवहार इति. १२ विशेषशक्तेः. १३ विकल्पे विशब्दव्यवहारस्य निर्विकल्पे च निशब्दव्यवहारस्य मुख्यत्वमेव स्वकारणादेवेत्यर्थः भावः. १४ प्रत्यक्षस्यास्य. १५ सन्निहितविषयत्वादेः. १६ अकलङ्कस्य. १७ –वमत्र–आ०,ब०,प०,स०. १८ उपपद्यता वा आ०,ब०,प०,स०. १९ विकल्पविषय. २० सति तद्विषयसन्निधाने विकल्पोत्पत्ति, सति च विकल्पे तद्विषयसन्निधानमिति. २१ विकल्पविषयकल्पनम्. २२ विकल्पविषयस्य.

चेत्; 'तस्यैव कुतः सम्भवः' इत्याद्यनुबन्धादन्योन्यसंश्रयस्य अत्रापि सुपरिस्फुटत्वात्। पुनरन्येन तत्कल्पनायामनवस्थापत्तिः।

नन्विदमेव तस्य[1] कल्पनं नाम यत्तन्निर्भासितया विकल्पोत्पाद इति चेत्; कुतस्तदुत्पादः? वासनाबलाच्चेत्; कुतस्तस्य[2] दर्शनयौगपद्यम्? [3]तत एवेति चेत्; न; पुनरपि 'युगपत्' इत्यादिस्ववचनविरोधात्[4]।

किञ्च, कः पुनर्विकल्पः, को वा तस्य विषयः? गौरिति परामर्शो विकल्पः, तस्य [5]गकारादिर्विषय इति चेत्; न; [6]तस्य समस्तस्यैकविकल्पवेद्यत्वायोगात्, क्रमभावित्वात्। विकल्पोऽपि क्रमभाव्येक एवेति चेत्; न; क्रमवत्त्वे विषयवदेकत्वायोगात्, अन्यथा ज्ञेयानित्यतया तद्बुद्धेरनित्यत्वव्यवस्थापनं[7] परस्याप्रेक्षावत्त्वमुपक्षिपति। व्यस्त एव स[8] तद्विषय इति चेत्; न; प्रतिवर्णं[9] विकल्पभेदप्रसङ्गात्। अस्त्येव तथा[10] तद्भेदः, तथा च परस्य वचनम्—"गकारादिवर्णविकल्पानामपि क्रमेणोदयमासादयतामेकत्वाभावः" [प्र० वार्तिकाल० २।१३३] इति; तदिदमसम्बद्धम्; एकत्वाध्यवसायस्यैवमभावप्रसङ्गात्[11], तदधिष्ठानस्य[12] गौरित्येकस्य[13] विकल्पस्याभावात्। अः (गः) इत्यस्तीति चेत्; न; [14]'अयं गः' इति तदध्यवसायस्याप्रसिद्धेः। व्यवहारप्रसिद्धस्य च तस्येदमुपायपरिचिन्तनम्। न [15]च 'गः' [16]इत्यप्येकविकल्पसम्भवः, गकारस्याप्यर्द्धमात्रिकस्यानेकक्षणक्रमभाविन एकत्वानुपपत्तौ तद्गोचरविकल्पानेकत्वस्यापि सुप्रसिद्धत्वात्। न च निरंशतद्भागविकल्पः शक्यनिरूपणः। एवमौकारादावपीत्यभाव एव विकल्पस्यापतितः। सोऽयं लाभमिच्छतो मूलच्छेदः—सतो विकल्पस्य दर्शनैकत्वाध्यवसायमुपपादयितुमुपक्रान्तेन तदभावस्यैवोपपादनात्। गकारभागेष्वेक एव विकल्प इति चेत्; गकारादिवर्णेष्वप्येक एव स्यादिति दुर्व्याहृतमेतत्—"गकारादिवर्णविकल्पानामपि" इत्यादि। वस्तुवृत्तिपर्यालोचनया [17]तदुक्तं संवृत्या तु स एवायमित्येकत्वकल्पनया तदेकत्वं न निवार्यते इति चेत्; ननु वस्तुवृत्तिपर्यालोचनायां त एव [18]विकल्पा न सम्भवन्तीति प्रतिपादितम्, तत्कथं तेषां [19]क्रमेणोदयवत्त्वमन्यद्वा सम्भवति? सम्भवतामपि [20]तेषां स्वसंविदितत्वात् परिस्फुटे भेदवेदने तदैव कथं तत्रैकत्वप्रत्यभिज्ञानविभ्रमः? तत्स्वसंवेदनस्यानिर्णयरूपत्वेन [21]तद्गृहीतस्यापि [22]तद्भेदस्याऽगृहीतकल्पत्वादिति चेत्; न; "न हि दृश्यस्य भेदेन तदैवैकत्वविभ्रमः" [प्र० वार्तिकाल० २।२५४] इति स्ववचनोपद्रवापत्तेः।

[23]अनेन दर्शनविषय एवा (व) निश्चिते भेदे तदैकत्वविभ्रमस्य प्रतिक्षेपात्

---

१ विकल्पविषयस्य। २ विकल्पस्य। ३ विकल्पादेव। ४ यतो हि निर्विकल्पेतरयोरैक्यं न युगपद्विषयसन्निधानमूलकं किन्तु विकल्पमूलकम्। ५ गकरादेर्वि—आ०, ब०, प०, स०। ६ गकरादेः।. ७ "ज्ञेयानित्यतया तस्याऽप्रौव्यात्···"—प्र०वा०१।१०। ८ सौगतस्य। ९ गकारादिः। १० प्रतिवर्णम्। ११ —ज्ञादधि—आ०,ब०, प०, स०। १२ एकत्वाध्यवसायाधारभूतस्य। १३—वादित्यस्ती—आ,ब०,प०,स०। १४ अयमिति आ०, ब०। १५ च इत्य—ता०। १६ इत्यप्यविकल्प—आ०, ब०, प०, स०। १७ —मात्रेक—आ०, ब०, प०, स०। १८ गकारादिवर्णविकल्पानामित्यादि वाक्यं कथितम्। १९ विकल्पना न आ, ब०,प०,स०। २० क्रमेणोदयत्व—आ०, ब०, प०, स०। २१ विकल्पानाम्। २२ स्वसंवेदनगृहीतस्यापि। २३ विकल्पभेदस्य। २४ वचनेन।

अतत्परमेव' एतद्वचनम्, न हि सर्वमेव वचनं स्वप्रतिपाद्यस्तुतत्परमेव, अतत्परस्यापि प्रतिवादि[1]चित्तव्याकुलीकरणबुद्ध्या प्रयोगसम्भवादिति चेत्, नैतन्न्याय्यम्, विकल्पस्य विकल्पान्तरादिवत् निर्विकल्पादपि भेदस्यागृहीतकल्पत्वप्रसङ्गात्, [2]तद्भेदस्याप्यभिलापानभिलापपरत्वस्य स्वसंवेदनादेवानिर्णयस्वभावात्प्रतिपत्तिप्रतिबन्धानात्। अभिमतमेवेदं परस्य वैनाश्येकत्वविध्वस्तस्याभ्यनुज्ञानादिति चेत्, कथमित्यानीम्— ५

"प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति ।
प्रत्यात्मवेद्याः सर्वेषां विकल्पो नामसंश्रयः ॥" [प्र० वा० २।१२३]

इत्येतदनवसरं न भवेत्[3]न हि यद्गृहीतमगृहीतकल्पनमेव तदेव परप्रतिपत्त्यङ्गत्वेन प्रेक्षावद्भिरुपक्षिप्यते। तन्नेदमभिहितार्थतत्परं न भवति वचनम्, अतिप्रसङ्गात्। स्वसंवेदनसिद्धस्यापि विकल्पेतरस्यैवस्य (त्या) सिद्धत्वे कथ तत्रैकत्वाध्यवसायः निर्विवादस्य सिद्धत्वात्, तत्र च तदनुपपत्तेरिति १०
चेत्, अयमपरः परस्यैव दोषोऽस्तु, पौर्वापर्यमनालोच्य वचनात्।

अपि च, गकाराविविकल्पानाम् एकत्वप्रत्यभिज्ञानमपि 'य एव गकारविकल्पस एवौकाराविकल्पः' इत्युदयमासादयदपरापरपरामर्शोत्पत्तात् न नानात्वेन निर्भुज्यते, तत्कथं तदन्यव्यवस्थितैकत्वस्यार्थ गकाराविविकल्पानामेकत्वमध्यारोपयितुमर्हति ? तत्रापि प्रत्यभिज्ञानादन्यस्मात् एकत्वाध्यारोपपरिकल्पनायाम् अनवस्थाप्रसङ्गात्। तन्न गौरित्ययमेको १५
विकल्पः, कथमस्य दर्शनैकतानव्यवसायः, स्वयमविद्यमानस्य तदयोगात् ?

सत्यम्, न वस्तुतस्या विकल्पसम्भवः, संवृत्तेव तत्सम्भवात्। न च तैस्य विचारस्यभीमुखनिपातेन निर्लोपनमुपपन्नम्, सकलव्यवहारोच्छेदप्रसङ्गात्, विकल्पाधीनस्वात्सर्वस्यापि लोकव्यवहारस्य। तस्मादविचारितरम्यस्यैव विकल्प इति चेत्, न, दर्शनात्तद्व्यतिरेकस्यापि वैयात्यप्रसङ्गात्। न हि धर्मिणो विकल्पस्याविचारप्रमत्वे तद्धर्मस्य दर्शनव्यतिरेकै[4]स्य विचारप्रमत्वम्। मा भूदिति चेत्, कथमिदानीं भावतो[5] दर्शनस्य निर्विकल्पकत्वम् ? २०
तदप्यविचारप्रमभेवेति चेत्, "सविकल्पस्य तर्हि तस्य भाविकं भवेत्। "सदृश्यमाविकमेव दर्शनाच्चतद्व्यतिरेकस्यापि तद्व्यतिरेकवदभाविकत्वादिति चेत्, "विकल्पेतरविभागविनिर्मुक्तं तर्हि भावतः प्रत्यक्षमिति तथैव तल्लक्षणमभिधातव्यम्, तत्कथमुक्तम् "प्रत्यक्षं कल्पनापोढम्" [प्र०वा० २।१२३] इति। स्वत एव प्रत्यक्षस्याविकल्पत्वं न विकल्पव्यतिरेकात्[6]। न हि स्वत एवा- २५
विद्यमानं "तद्व्यतिरेकाक्षिपति, विकल्पान्तरस्यापि प्रसङ्गादिति चेत्, न समीचीनमेतत्, यस्मात्—

सविकल्पस्यमर्थेयं स्वतः कस्माच्च कल्प्यते ।
तस्यापि "यत्स्वतोऽसत्त्वे परतोऽपि न सम्भवः ॥२८३॥

१—तत्र—आ०, ब०, प०, स० । २—विकल्पत्या—आ०,ब०,स० । ३ तथेदस्या—ता० । निर्विकल्पसविकल्पभेदस्य । इ"यत्रैवित्तवैतत्यप्रसक्तविकल्पस्य प्रत्यक्षता" —म०वार्तिकाल०२।२३९ । ५ निर्विकल्पकसविकल्पकयोः । ६ —तावे नि—आ०, ब०, प०, स० । ७ इत्यादयमा—आ०, ब०, प०, स० । ८ स्यैतद्विकल्पस्य । ९ विचारमात्रप्रसङ्गात् । १० —कविचार—स० । ११ —भीमाव—आ०,ब०,प०,स० । १२ वस्तुतः । १३ सविकल्पकत्वं आ०, ब०, प०, स० । १४ सविकल्पतामपि । १५ विकल्पे तत्प्रमा—स० । १६ —व्यवस्य—आ०,ब०,प०,स० । १७ विकल्पव्यतिरेकात् । १८ यस्मात्तोऽसत्त्वे आ०, ब०, प०, स० ।

न तथा तत्प्रतीतिश्चेदन्यथा सा कुतो भवेत् ? ।
स्वत एवेति चेत्; नैवम्; विवादस्यावलोकनात् ॥२८४॥
स्वत एवाविकल्पत्वं यदि तस्य प्रसिद्ध्यति ।
विवदन्ते कथं तस्मिन्यथास्वं तीर्थिकाः परे ॥२८५॥
प्रसिद्धेऽपि[1] विवादश्चेत्; स कुतस्तर्हि लुप्यताम् ।
प्रसिद्धत्वात्; न तस्यान्यदस्ति निर्लुप्तिकारणम् ॥२८६॥
अन्यतश्चेदकल्पं तद्यदि तत्र विवादतः ।
तदेवासिद्धमन्यस्य कथं सिद्धिनिबन्धनम् ॥२८७॥
तस्यापि सिद्धिरन्यस्माद्यदि कल्प्येत तादृशात् ।
भवन्तमनवस्थाख्या न मुञ्चेद्वज्रशृङ्खला ॥२८८॥
अन्यद्विकल्पकं चेत्; न; तत्त्वतस्तदसम्भवात् ।
कल्पितात्तु कथं तस्मात्कस्यचित्सिद्धिराञ्जसी ॥२८९॥
अन्यथा कल्पनासिद्धपावकान्माणवादपि ।
कस्मादोदनपाकादिस्तत्त्वतो न भवत्ययम् ॥२९०॥
कल्पितोऽपि विकल्पश्चेत्तत्त्वसंवित्तये तदा ।
प्रत्यक्षे सविकल्पत्वसिद्धिः किन्न ततो भवेत् ॥२९१॥
सोऽपि तत्र न चेदस्ति; कस्य न ? व्यवहारिणः ।
तन्न; 'मूढस्तयोरैक्यं व्यवस्यति' अस्यै बाधनात् ॥२९२॥
व्याख्यातुर्नास्ति चेत्; कस्मात् ? कल्पनादोषनिह्नवात् ।
अविकल्पत्वमप्येवं स[10] कुतः प्रतिबुध्यताम् ? ॥२९३॥

यदि प्रत्यक्षस्याविकल्पत्वं स्वत एव; सविकल्पत्वमपि स्यात् । न हि तदपि स्वत एवाविद्यमानम् अन्यतः कुतश्चित्सम्भवति "व्यवसायात्मकं ज्ञानं प्रत्यक्षं स्वत एव नः" [ ] इति वचनाच्च । सविकल्पकत्वं न कुतश्चिदपि प्रतीयत इति चेत्; निर्विकल्पत्वस्य कुतः प्रतीतिः ? स्वत एवेति चेत्; न; अन्यत्रापि समत्वात्, विवादावलोकनाच्च । यदि प्रत्यक्षस्य स्वत एवाविकल्पत्वं प्रतियन्ति प्रतिपत्तारः, कुतस्तर्हि तत्र विवादमारचयन्ति ? न हि प्रतिपत्तिविषय एव विप्रतिपत्तिभूमिः; विरोधात् । अस्ति [11]च विप्रतिपत्तिः—[12]केचित्प्रत्यक्षं निर्विकल्पकमिति । अपरे[13] सविकल्पकमिति । अन्ये[14] सर्वविकल्पव्यपेतमिति । न च प्रसिद्ध एव विवादे विवादनिवृत्तिः सम्भवति; प्रसिद्धिव्यतिरेकेण तन्निवृत्तिहेतोरभावात् । तत्र स्वतस्तत्प्रतिपत्तिः[15] ।

---

१. प्रत्यक्षस्य । २ विचारश्चेत् आ०, ब०, प०, स० । ३ तदेव सि–ता० । ४ –दिस्तद्वतो आ०, ब०, प०,प० । ५ –त्यश्चेत्तत्त्वसंवि–आ०, ब०, प०, स० । ६ –त्वं सि–आ०, ब०, प०, स० । ७ तत्र स० । ८ प्र० वा० २।१३३ । ९ व्याख्यातुं ना–आ०, ब०, प०, स० । १० व्याख्याता । ११ च प्रति–आ०, ब०, प०, स० । १२ बौद्धाः । १३ शब्दवादिनः । १४ ब्रह्मवादिनः । १५ प्रत्यक्षस्य अविकल्पत्वप्रतिपत्तिः ।

अन्यतश्चेत्; न, तस्यापि निर्विकल्पत्वे विवादास्पदत्वेन स्वयंमेवारिरद्धत्वात् । न चामिद्धमन्यसिद्धिनिबन्धनम्, अतिप्रसङ्गात् । तस्यापि सिद्धिरन्यस्मान्निर्विकल्पादिति चेत्, न, भवतो दुर्विमोचाऽनवस्थामयवज्रकण्टकनिपातप्रसङ्गात् । अन्यतो विकल्पादेव तत्सिद्धिरिति चेत्, न, वस्तुवृत्त्या तदभावात् । कल्पितात्तु न तत्तस्मात्त्विकस्यानिकल्पत्वस्य सिद्धिः । न ह्युपपद्धादुपपादः अनुपपद्धतकल्पावाप्तिः, अन्यथा कल्पितादपि माणवकपाचकात्तित्विक्मेवोदन- ५
पाकादिकं भवेत् । सविकल्पत्वमपि प्रत्यक्षस्य तात्त्विकं तत एव सिद्ध्येत् । नास्त्येव तौटोऽपि विकल्पस्तत्रेति चेत्, कस्यासौ नास्ति ? व्यवहारिण इति चेत्, न, "विभूदां लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति" [प्र० वा० २।१३३] इत्यस्य विरोधप्रसङ्गात् । अनेन प्रत्यक्षे सवि कल्पताव्यवसायस्य व्यवहारिपु प्रदर्शनात् । व्यावर्तयतीति चेत्, कुत एतत् ? तत्सामर्थ्यकल्पना- व्यापारोपरक्षप्रत्यक्षस्यमयादिति चेत्, तर्हि स कुतः प्रत्यक्षस्य निर्विकल्पत्वमपि प्रतिपद्येत इति १०
महानयं परस्य विषमविचारगर्तावपातः । तन्न स्वत एव प्रत्यक्षस्माद्विकल्पत्वम्, अपि तु विक- ल्पस्मादिरेकादेव । न चावस्तुसतो विकल्पाद् वस्तुसद्भावरिरेकः, ततो वस्तुस्पर्शेन विकल्पः । स चोक्त्या [4]नीत्या न सम्भवतीति कस्य दर्शनैकत्वपरिकल्पन परैः प्रतन्यताम् ? तत्परिकल्पन- हेतोरेकत्वर्तनकार्यकारित्वस्य [5]भागाश्रयासिद्धत्वात् । कथ भागाश्रयासिद्धत्वं ग्याद्यादिप्रसिद्धत्वेनेवा- भिधानात्, [6]तैरनिरपेक्षतया व्यवसायात्मनो विकल्पस्य एकप्रवृत्तिकार्यकारित्वादिति चेत् ? न, १५
तयापि [7]"तदसिद्धत्वस्यापि चलनात् तद्विकल्पादन्यस्य [8]"दर्शनस्याभावात्, पुरोवर्तिपदैकाकार- स्तस्मादिप्रतिभासो हि सद्विकल्पः, न च तस्मात्परं दर्शन प्रतीतिपथोपस्थितमस्ति, निरक्षपरमा- णुस्वलक्षणाकारस्य परामिमतस्य [9]"तस्य स्वप्नेऽपि परिस्फुटप्रत्ययविषयत्वानवलोकनात् ।

भागत स्वरूपासिद्धत्वार्थं हेतुः, तथा हि कदा पुनर्विकल्पस्य प्रवर्तकत्वम् ? अभ्यासे इति चेत्, न, तदा दर्शनस्यैव [10]"तद्ग्रहीकारात्, "[11]विकल्पमन्तरेणापि" स्वभ्यासात्प्रवर्तते" २०
[प्र० वार्तिकाल० १।४] इति वचनात् । अपिशब्दात् 'विकल्पादपि प्रवर्तते' इत्यप्य भ्युच्चय इति चेत्, न, तस्यैवमेवम्पर्यायमात्रात्, ततो "[12]हेयोपादेयविषये धीरेव पूर्विका प्रवर्तनात्प्रमाणम्" [प्र० वार्तिकाल० १।४] इत्युत्तरपक्षविरोधात्, "सया दर्शन एव प्रवर्तकत्वस्याधारणात्, अत एवैवकारस्य व्यावर्त्यमाह, "न विकल्पादयः" [प्र० वार्ति- काल० १।४] इति । अनभ्यास इति चेत्, न, तज्ञानीमनुमानस्यैव प्रवर्तकत्वात् । विकल्पा- न्तरस्य "[13]सतोऽपि तत्रैवान्तर्भावाव्यतुहालात्, "[14]यत्र तु नाभ्यासस्तत्रानुमानमेव प्रत्यभि- ज्ञादयः" [प्र० वार्तिकाल० १।४] इति वचनात् । अनुमानस्यैव [15]तदा दर्शनेन सहैकप्रव २५

---

१ विकल्पत्व । २ –स्यात्–आ०, ब०, प०, स० । ३ श्रीपतविकल्पादेव । ४ ऋलिनीऽपि । ५ व्यव हारेषु आ०, ब०, प०, स० । ६ स्त्रिया आ०, ब०, प०, स० । ७ भावाश्रय–आ०, ब०, स० । 'विकल्पे तत्त्वारेकत्वम् एकव्यर्तनकार्यकारित्वात्' इत्यप्र विकल्पस्याद्धत्वव्यपदात् भागाश्रयसिद्धत्वम् । ८ इतरनि- रपेक्षितयाव्यव–आ०, ब०, प०, स० । ९ –स्यैव प्रप्र– आ०, ब०, प०, स० । १० स्याद्वादिविद्वेविकल्पस्य एकव्यर्तनकार्यकारित्वाद्विकल्पेऽपि । ११ भागाश्रयसिद्धत्वस्य । १२ निर्विकल्पस्य । १३ दर्शनस्य । १४ प्रार्थकत्व स्वीकारात् । १५ 'अपि कुत्राभ्यासात्' इ०वार्तिकाल० । १६ तदनरपेक्षया । १७ तत्रोऽपि स० ।१८ अनभ्यासे ।

र्त्तनकार्यकारित्वमिति चेत्; न; दर्शनस्य तदा प्रवर्त्तकत्वानभीष्टेः[2] अभ्यासवत्, अनुमानवैफल्यप्रसङ्गात्। केवलमप्रवर्त्तकं दर्शनमनुमानसहितं तु प्रवर्त्तकमिति चेत्; न; प्रमाणसम्प्लवस्यासम्मतत्वात्[3]। तन्न एकप्रवर्त्तनकार्यकारित्वं हेतुः; असिद्धत्वात्[4]। तदयं प्रदेशान्तरे विकल्पस्य प्रवर्त्तकत्वं प्रतिषिध्य पुनरन्यत्राभ्युपगच्छन् स्ववाचैव स्वचरितं विडम्बयतीति कथमनुन्मत्तः
५ प्रज्ञाकरः? तन्नेदं विकल्पे वैशद्यमुपचरितं तन्निबन्धनाभावात्।

किं तर्हि? वस्तुभूतमेव। कुत एतत्? अनुपचरितत्वे सति वेद्यमानत्वात् तदन्यस्वरूपवत्। अञ्जसापदेनानुपचरितत्वमुक्तम्, वेद्यमानत्वं तु केनेति चेत्? न; आत्मवेदनपदेन तस्याप्युक्तत्वात्। तदयमत्र प्रयोगः—तात्त्विकं सविकल्पकप्रत्यक्षस्य वैशद्यम्, उपचारविरहे सति स्वानुभवगोचरत्वात्, तदपराकारवदिति। न चेदमाश्रयासिद्धं साधनम्; तत्प्रत्यक्षवैशद्यस्य स्वसंवे-
१० दनप्रत्यक्षसिद्धत्वात्। अत एव न स्वरूपासिद्धम्। नाऽपि विरुद्धम्; असति उपचरिते च वैशद्ये यथोक्तस्य साधनस्यासम्भवात्। अत एव न व्यभिचारवत्। तस्मादसिद्धत्वादिमलविकलत्वाद् भवत्येव अतस्तत्प्रत्यक्षस्य तात्त्विकी वैशद्यसिद्धिः।

अथ न तद्वैशद्यं स्वसंवेदनवेद्यं[5] विप्रतिपत्तेः। न चेयमनुमानादन्यतः शक्यनिवर्त्तनेति तदेव वक्तव्यम्। तच्चेदमेव—विशदमेव प्रत्यक्षं प्रमाणद्वितयान्यथाऽनुपपत्तेः। प्रत्यक्षं परोक्षमिति
१५ हि प्रमाणद्वितयं प्रमाणोपपन्नतया प्रत्याय्यमानमनुपपन्नमेव भवति यदि प्रत्यक्षमप्यविशदमेव, परोक्षस्यैव प्रमाणस्य व्यवस्थितेः अवैशद्यस्य तल्लक्षणत्वात्; न चैवम्, ततो विशदमेव प्रत्यक्षमिति। तत्रेदं विचार्यते—न प्रमाणस्व व्यतिरिक्तं तद्द्वित्वम् असम्प्रतिपत्तेः। प्रमाणस्य च स्वरूपं प्रत्यक्षत्वपरोक्षत्वे। तयोश्च यदि प्र [6] तत्साधनत्वम्, उभयोपादानमपार्थकमिति कथमकिञ्चित्करत्वं नाम न साधनदोषः? समुदितयोस्तत्साधनत्वे प्रत्यक्षमेवैकं प्रमाणं प्राप्तं तल्लक्षणस्यैव
२० वैशद्यस्य तत्समुदायेन साधनात्, न परोक्षं तल्लक्षणसाधनोपायाभावादिति विरुद्धो हेतुः, इष्टविरुद्धसाधनात्। इष्टं हि प्रमाणद्वित्वं तद्विरुद्धं चैकप्रमाणत्वम्, तत्साधने च स्पष्टमेवेष्टविरुद्धसाधनत्वं तस्य[7]। परोक्षप्रमाणावैशद्यसाधनेऽप्ययमेव हेतुरिति चेत्; कथमेवं प्रत्यक्षवैशद्यसाधने परोक्षावैशद्येन तत्साधने च [10]तदपरेण व्यभिचारवत्त्वं हेतोर्न भवेत्? अथ वैशद्यमवैशद्यं वा न प्रत्येकं तत्समुदायसाध्यम्, अपि तु समुदितमेव तदयमदोष इति चेत्; तदप्येकाधिकरणम्,
२५ भिन्नाधिकरणं वा स्यात्? एकाधिकरणं चेत्; तदात्मकमेकमेव प्रमाणमिति न प्रमाणद्वयसिद्धिः[11], अतो हेतुविरुद्धप्रतिज्ञार्थः स्यात्। भिन्नाधिकरणमिति चेत्; किं कस्याधिकरणम्? प्रत्यक्षमेव

---

१ अनभ्यासे। २ —नभीष्टेष्टिरभ्या—आ०, ब०, प०, स०। ३ एकस्मिन् प्रमेये बहूनां प्रमाणानां प्रवृत्तिः प्रमाणसम्प्लवः। बौद्धमते हि "न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भवः। तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते॥" [प्र० वा० २।६३] इत्युक्तत्वात् प्रमाणव्यवस्थैव न तु सम्प्लवः। क्षणिकत्वाच्च पदार्थानां नैकत्रार्थे बहुप्रमाणानां व्यापारः। द्रष्टव्यम्—प्र० वार्तिकाल० २।१३२। ४ हेतोरसि—ता०। ५ सविकल्पकप्रत्यक्ष। ६ असदुप—प०। असद्युप—आ, ब०, स०। ७ विप्रतिपत्तिः। ८ —णद्वितीया—आ०, ब०, प०, स०। ९ तस्यापरोक्षप्रमाणवैशद्य—आ०, ब०, प०, स०। १० प्रत्यक्षवैशद्येन। ११ —सिद्धेरतो हेतुविरुद्धार्थः आ०, ब०, प०, स०।

वैशद्यस्य परोक्षमेव चावैशद्यस्येति चेत्, तद्विपर्ययः कस्मान्न भवति ? तेनापि भिन्नाधिकरणत्वाविरोधात्। लोकव्यवहाराद्विपर्ययनिवृत्तिः, लोको हि प्रत्यक्षादिकमेव वैशद्यादेरधिकरणं प्रत्येति न परोक्षादिकम्, लोकप्रसिद्धस्यैव चेदं प्रत्यक्षादेर्विपरीतप्रतिपत्तिव्यवच्छेदाय लक्षणकथनमिति चेत्, लोकस्यापि कुतोऽधिकरणनियमप्रतिपत्तिः[1] ? प्रत्यक्षादिति चेत्, अलमनुमानेन वैशद्याधर्मस्यापि तर्ह्येव प्रतिपत्तेः। न ह्यप्रतिपन्नतद्धर्मकं प्रत्यक्षं तदपेक्षमधिकरणनियमं प्रत्येतुमर्हति। वैशिय- ५
मप्रतिपत्तिनुमानान्तरादित्यव्यनेन प्रत्युक्तम्। तस्मेदमनुमानं प्रत्यक्षवैशद्यप्रत्ययोपनसमर्थम्।

इदं हि तर्हि स्यात्–प्रत्यक्षं विशदज्ञानात्मकम्, प्रत्यक्षत्वात्, यद्विशदज्ञानात्मकं न भवति न तत्प्रत्यक्षम् यथा अनुमानादिज्ञानम्, प्रत्यक्षं च विवादास्पदीभूतम्, तस्माद्विशदज्ञानात्मकमिति चेत्, अत्रापि किमिदं प्रत्यक्षत्व नाम यत्साधनत्वेनोपन्यस्तम्? प्रत्यक्ष- १०
शब्दस्य व्युत्पत्तिनिमित्तमिति चेत्, तदपि किम्? इन्द्रियाश्रितत्वमेव, अक्षाणीन्द्रियाणि
तानि प्रतिगतं तत्कार्यत्वेन तदाश्रितं प्रत्यक्षमिति व्युत्पत्तिविधानादिति चेत्, न, हेतोर्भागासिद्धत्वप्रसङ्गात्, अनिन्द्रियप्रत्यक्षे असीन्द्रियप्रत्यक्षे चाऽभावात्, तदुभयप्रत्यक्षसद्भावस्य च प्रतिपादनात्।

आत्माश्रितत्वं प्रत्यक्षत्वम्, अक्षवृत्तेः स्वं परं च विषयत्वेन व्याप्नोतीत्यक्षं आत्मा १५
तं प्रतिगतं प्रत्यक्षमिति व्युत्पादनादिति चेत्; न, स्मरणादेरपि प्रत्यक्षत्वप्रसङ्गात् आत्माश्रितत्वाविशेषात्। तथा च तत्प्रति वैशद्यम्, अन्यथा हेतोरनैकान्तिकत्वप्रसङ्गादिति नेदानीं वैधर्म्यदृष्टान्तो यतः विपक्षव्यतिरेकि साधनस्य प्रत्यक्षवैशद्यव्यवस्थापनपरस्य सम्भवः। अक्षमेव प्रतिगतं प्रत्यक्षं न स्मरणादिकं तथाविधम्, अन्यस्यापि संस्कारप्रबोधकादेरपेक्षणात्, २०
ततः परापेक्षणात्परोक्षमेव तदिति चेत्, न तर्ह्यक्षज्ञानम् "अवग्रहादिधारणापर्यन्तं प्रत्यक्षम्, आत्ममात्रव्यतिरेकिणः मोग्रहादेरपि तेनापेक्षणात्। मोग्रहादेरपि आवरणक्षयोपशमविशेषापाकात्तद्वीर्यप्रदेशविशेषत्वात्तमपेक्षणपरापेक्षणमिति चेत्, न "तत्तदभावभावेन्द्रियवत्, द्रव्येन्द्रियस्यापि "निर्वृत्त्युपकरणरूपस्यापेक्षणात् तस्य[2] "आत्मपरत्वेन प्रसिद्धत्वात्। भावेन्द्रियस्यैव साक्षात्तदपेक्षणं २५
न द्रव्येन्द्रियस्य, सत्यपि तस्मिन् अन्तरङ्गशक्तिवैकल्ये "शब्दादिसंवेदनाभावात्, तद्वैकल्ये पुनरसत्यपि तद्व्यापारे स्वप्नादौ सत्यशब्दादिसंवेदनसम्भवात्। केवलम् उपकरणप्रदेशपर्यवसितत्वाद् भावेन्द्रियस्य साक्षात्तदपेक्षणं[3], तदपेक्षमपीन्द्रियज्ञानमुपकरणापेक्षमिव लक्ष्यमाणं प्रत्यक्षविनिश्चयोपचारं[4] परोक्षव्यपदेशमासादयति। अत एव गवाक्षसमानत्वप्रसिद्धिरिन्द्रियाणामिति चेत्, भवतु कथमपि परापेक्षणात् परोक्षत्वम्, तथापि सायधारणस्यक्षप्रतिगमनस्य विषयमा-

---

१ विपर्ययसिद्धेः। तथाहि मि–आ०, ब०, प०, स० । २ –र्थेन आ०, ब०, प० । ३ –त्ति अत्र–आ०, ब०, प०, स० । ४ प्रत्यक्षादेव । ५ अविकलनियम । ६ –नं वै–आ०, ब०, प०, स० । ७ "प्रतियत्समाश्रितम् कम्..."–न्यायबि०टी० पृ० १० । ८ "अश्नोति व्याप्नोति आत्मानमिति अक्षं आत्मा प्रमाणसंतानः प्रतिनियतो वा, तमेव प्रतिनियतं प्रत्यक्षमिति।"–राजवा० १।१२। ९ –श्री साप–आ०, ब०, प०, स० । १० अत्र ग्रन्थान्तरि– ता० । ११ अन्यत्समान । १२ निर्वृत्ति गोलकादेः, उपकरणत्वं अधिपत्यादेः । १३ इन्द्रियस्य पुद्गलत्वम् । १४ आत्मनिश्चयेन । १५ शब्दादे र्ग –आ०, ब०, प०, स० । १६ उपकरणापेक्षणात् । १७ –निक्षपेप–आ, ब०, प०, स० ।

दसिद्धमेवेन्द्रियज्ञानस्य प्रत्यक्षत्वम्, अन्यथा स्मरणादीनामपि न तद्विघटनं भवेत्। तैरप्यन्तरङ्ग-शक्तिसाकल्यस्यैव साक्षादपेक्षणात् बहिरङ्गापेक्षणस्योक्तन्यायेनोपचरितत्वोपपत्तेः। भवतु परोक्षमेवावग्रहादिकमिति चेत्, न ; तस्येन्द्रियप्रत्यक्षत्वकथनविरोधात्। औपचारिकं तस्य प्रत्यक्षत्वमिति चेत् ; किमुपचारनिबन्धनम् ? वैशद्यमिति चेत् ; तदपि कुतः ? प्रत्यक्षत्वाच्चेत् ; न; परस्पराश्रयात्—वैशद्यात्प्रत्यक्षत्वम्, ततोऽपि वैशद्यमिति। तद्वैशद्यं स्वसंवेदनासिद्धमिति चेत् ; पर्याप्तमनुमानेन, तस्यापि तत्साधनार्थत्वात्, सिद्धस्य च साधनासम्भवात्। अवध्यादिज्ञान-वैशद्यसाधनार्थमनुमानम् इन्द्रियज्ञानवैशद्यस्य स्वसंवेदनादेव सिद्धत्वादिति चेत् ; न ; अस्य-हेतोरन्वयित्वस्यापि प्रसङ्गात्, इन्द्रियज्ञाने वैशद्यान्वितस्य प्रत्यक्षत्वस्य प्रतीतेः, तथा च कथ-मयं केवलव्यतिरेकी हेतुरुक्तः ? न चावध्यादिज्ञानवैशद्येऽपि अनुमानमर्थवत् ; तस्यापि स्वसं-वेदनसिद्धत्वाविशेषात्। तन्न व्युत्पत्तिनिमित्तं प्रत्यक्षत्वम्।

अथ व्युत्पत्तिनिमित्तेनैकार्थसमवेतमन्यदेव प्रवृत्तिनिमित्तं प्रत्यक्षत्वम्, तच्च सर्व-प्रत्यक्षव्यक्तिसाधारणमिति न भागासिद्धत्वं साधनस्येति ; किं तस्य सतो रूपं न वक्तव्यम् ? आवरणविगमविशेष इति चेत् ; न ; तस्य नीरूपस्याभावात्। नीलादिप्रतिभासविशेष एव स इति चेत् ; न ; वैशद्यस्यैव तद्रूपत्वात्, तदन्यस्य विचारासहत्वात्। तदेव भवत्विति चेत्, न, साध्यस्यैव हेतुत्वप्रसङ्गात् प्रत्यक्षत्ववैशद्यशब्दयोरेकार्थत्वात्। 'प्रत्यक्षत्वात्—विशदत्वेन प्रतिभासनात्, विशदज्ञानात्मकम्—तदात्मकं व्यवहर्त्तव्यम्' इति हेतुप्रतिज्ञयोरर्थ इति चेत् ; सिद्धं नः समीहितम्, अस्मत्प्रयोगस्यैवानया भङ्ग्या प्रतिपत्तेः। न चात्रापि केवलव्यतिरेकित्वं हेतोः ; नीलादेस्तत्त्वेनावभासमानस्य तद्व्यवहारविषयत्वेन प्रसिद्धस्य साधर्म्यदृष्टान्तत्वात्। ननु यदि वैशद्यमेव प्रत्यक्षत्वम्, तस्येन्द्रियज्ञानेऽपि तत्त्वत एव भावात् मुख्य-मेव तस्यापि प्रत्यक्षत्वं तत्कथं तस्य सांव्यहारिकत्वम् ? यत इदं शास्त्रकारस्य वचनं शोभेत—

"प्रत्यक्षं विशदं ज्ञानं मुख्यसंव्यवहारतः" [लघी० श्लो० ३]

इति चेत् ; न; सूत्रकारमतस्य व्यवहारस्य चानुसरणेन तथा वचनात्। तथा हि—सूत्रकारस्य यत्परिस्फुटमात्ममात्रापेक्षं च तदेव प्रत्यक्षम्, इदं तु पुनरिन्द्रियज्ञानं परिस्फुटमपि नात्ममात्रापेक्षं तदन्यस्येन्द्रियस्याप्यपेक्षणात्। अत एकाङ्गविकलतया परोक्षमेवेति मतम्। ततस्तन्मतानुसरणेन अवध्यादिज्ञानस्य समग्रलक्षणतया प्रत्यक्षत्वप्रतिपादनार्थं मुख्यग्रहणम्। इन्द्रियज्ञानमपि व्यवहारे वैशद्यमात्रेण प्रत्यक्षं प्रसिद्धम्, अतस्तदनुसारेण तत्प्रत्यक्षत्वं न मुख्यत इति ज्ञापनार्थं संव्यवहारपदोपादानम्। मुख्यतया हि तत्प्रत्यक्षत्ववर्णने सूत्रविरोधः स्यात् तत्र तस्य परोक्षत्वकथनात्, ततो न किञ्चिदवद्यम्।

---

१ स्मरणादिभिरपि। २ -क्तन्यायोपचारितत्वो- ता०। ३ अवग्रहादे-। ४ अनुमानस्यापि। ५ वैशद्य-साधनार्थत्वात्। ६ अवेद्यादि-आ०, ब०, प०। ७ हेतोरनन्वयित्व-आ, ब०, प०, स०। ८ -ज्ञानवै-ता०। ९ चावेद्यादि-आ०, ब०, प०, स०। १० -प्रतिपत्तिनि-आ०, ब०, प०। ११ अस्मत्प्रतियोग-आ०, ब०, प०, स०। १२ प्रतिसाधनात् आ०, ब०, प०, स०। १३ चात्र के-आ०,ब०,प०,स०। १४ इन्द्रियज्ञानस्य। १५ "आद्ये परोक्षम्" [त० सू० १।११] इति सूत्रणात् इन्द्रियज्ञानस्य परोक्षत्वं सूत्रकारमते। १६-रवै-ता०। १७ इन्द्रियज्ञानस्य प्रत्यक्षत्वम्। १८ त० सू० १।११।

यस्पुनरेतत्–स्पष्टं प्रत्यक्षं सन्निहितार्थत्वात्, परामिमतदर्शनवदिति, तत्र किमिदमर्थस्य सन्निहितत्वम्? ज्ञानजननसामर्थ्यमिति चेत्, न, तस्य निषेधात्। योग्यदेशावयस्थानमिति चेत्, क्व देशादेर्योग्यत्वम्? अर्थज्ञानजनन इति चेत्, न, तेऽप्यपि तज्ज्ञानविषयत्वे तदयोगात्। अविषय एवासौ चक्षुरादिवदविषयमात्रेण प्रवृत्तेरिति चेत्, न, अत्रापि "इन्द्रियमनसी विज्ञानकारणम्" [लघी०श्लो० ५४] इत्यस्य विरोधात्। नैं हीन्द्रियमनोभ्यामन्यत्रापि देशादेस्तद्धेतुत्वे तदु- ५ भयमेव तद्विज्ञानकारणमित्युपपन्नम्। अर्थस्य ग्राह्यत्वसम्पादने देशादेर्योग्यत्वमिति चेत्, न, तस्य ज्ञानशक्तिम एव भावात्, अन्यथा तत्कल्पनावैयर्थ्यात्। वैच्छक्तितः सर्वत्र कस्माद्न ददिति चेत्, देशादिशक्तितोऽपि कस्माद्न भवति? प्रतिनियतत्वात्तस्या इति चेत्; ज्ञानशक्तेरपि समानः प्रतिनियमः। यस्यं तु न प्रतिनियतशक्तिकत्वं ज्ञानस्य तच्छक्तितो भवत्येव सर्वस्य ग्राह्यत्वम्। तत्र योग्यदेशावयस्थानमर्थस्य सन्निहितत्वम्। १०

नैवेत्यपि चेत्, तदपि न देशकृतम्, दूरतारकादिप्रत्यक्षेऽपि सत्त्वात्। नापि कालकृतम्, चिरभाविष्वतुविषर्यसत्यत्वप्रतिपत्तिप्रत्यक्षेऽप्येवंविधमानत्वात्। एतेन तदुभयकृतं प्रत्युक्तम्, तदुभयदूरस्थापि सत्यस्वप्नसंवेदनविषयत्वात्। तदर्थं भागासिद्धो हेतुः, पञ्चाक्तेष्वपि दूरतार-कादिप्रत्यक्षेष्वविद्यमानत्वात्। अथ न तेषां पक्षीकरणम्, कुतस्तर्हि तद्वैशद्यसिद्धिः? अन्यत इति चेत्, तदेवासन्नदूरस्थिदिप्रत्यक्षेऽपि वक्तव्यं व्यावर्त्यायात् किमनेन? दूरासन्नादिप्रत्यक्षसाधारणं १५ किञ्चित्साधनमिति चेत्, न, यथा निर्बाधमवभासते तत्तथैवास्ति यथा नीलं नीलतया, निर्बाधमवभासते च स्पष्टतया प्रत्यक्षमित्यादेर्भावात्।

ग्रहणग्रक्षत्वमपि न तत्र सन्निहितत्वम्, असिद्धेः, ग्राह्यस्य ज्ञानवज्ज्ञानेव द्विरूपत्वव्यवस्था-वात्। अनैकान्तिकत्वाच्च–स्मरणादावर्थस्य ग्रहणशक्त्यक्षेऽपि तद्वैशद्याभावात्, 'तदर्थविषयत्वस्य च निरूपयिष्यमाणत्वात्। तन्नेदमपि तस्य सन्निहितत्वम्। २०

यद्येवं कथमुक्तं शाबरकारेण–"स्पष्टं सन्निहितार्थत्वात्" [प्रमाणसं० श्लो० ४] इति चेत्, न, परमतानुज्ञामात्रेण तद्वचनात्। न हि शाबरकारस्येदं स्वतन्त्रवैशद्यसाधनम्, तत्प्रतीपा-नामप्रक्ष्यपरिज्ञानत्वात्, अपि तु योऽसौ मन्यते सौगतैः–"निर्विकल्पकं दर्शनं सन्निहितार्थ त्वाद्विशदम्" [ ] इति, तं प्रत्यनैकान्तिकोपचरस्यान्यग्रहणस्य वैशद्यं तेनैव तत्सद्भिन हेतुना प्रतिपाद्यते सौकर्यार्थम्। पथे हि तत्सिद्धेनैव हेतुना प्रतिपाद्यमानः प्रतिपत्तिसौकर्यं २५ प्राप्नोति। न चात्र तस्य दोषोद्भावनमपि सम्भवति निर्दोषतया प्रसिद्धत्वात्, अन्यथा ततो निर्विकल्पं वैशद्यसाधनायोगात्। किं तर्हि शाबरस्य स्वतन्त्रं वैशद्यसाधनमिति चेत्? तद्-

---

१ –र्थं च दि–आ०, ब०, प०, स०। २ नेंद्रियान्त्रि–आ०, ब०, प०, स०। ३ –त्वेन तदु–आ०,ब०,प०स०। ४ ज्ञानशक्तिः। ५ सर्वस्य। ६ वैशद्यमि–आ०, ब०, प०,स०। ८–स्य सत्त्व–आ०, ब०, प०, स०। ९ अर्थस्य। १० स्मरणादिषु वैशद्याभावात्। ११ स्मरणादीनाम् अर्थविषयत्वस्य १२ स्वतन्त्रं वै– आ०, ब०, प०, स०। स्वसिद्धान्तसम्मतवैशद्य। १३ "इन्द्रियगोचरो यत्रार्थे विशदप्रतिभासः, निष्प्रकम्पे कार्ये अपरप्रतिभासिता।"–म० वार्तिकाल० २।१३०। १४–स्यवैश–आ०, ब०, प०, स०। १५ स्वतन्त्रवै–आ०,ब०,प०म०।

न्यायेन प्रत्यक्षमेवेति भ्रमः। तत्र यः तत्प्रसिद्धमपि[1] तन्न तथा व्यवहरति स तेनैवाध्यक्षप्रतिसिद्ध-(प्रसिद्ध) तत्प्रतिभासेन हेतुना तद्व्यवहारः कार्यते तथाविधापरव्यवहारविषयनिदर्शनोपदर्शनात्। तदुक्तं सिद्धिविनिश्चये—

"पश्यन्स्वलक्षणान्येकं स्थूलमक्षणिकं स्फुटम्।
यद्व्यवस्यति वैशद्यं[3] तद्विद्धि सदृशस्मृतेः॥" [सिद्धि वि०प्र० परि०] इति।

ततः सूक्तम्-'प्रत्यक्षलक्षणं प्राहुः स्पष्टमञ्जसा' इति।

तदेवं तद्वचनसामर्थ्यात् परोक्षमस्पष्टमञ्जसेति निवेदितं भवति प्रत्यक्षप्रतियोगित्वात् परोक्षस्य। तत्प्रतियोगित्वं च तद्विरुद्धधर्माध्यासादेव। न हि तद्धर्माक्रान्तस्यैव तत्प्रतियोगित्वम्; अतत्प्रतियोगिन एव कस्यचिदभावापत्तेः। तत्प्रतियोगित्वमेव तस्य कस्मात्[4]? अवैशद्यात्। तदपि-कुतः? तत्प्रतियोगित्वात्। परस्पराश्रय इति चेत्; नेदमिदानीं प्रयत्नसाध्यं प्रसिद्धत्वात्। तत्प्रतियोगित्वं हि तद्विजातीयत्वम्, तच्च लोकत एव प्रसिद्धम्। केवलं प्रत्यक्षे वैशद्येन लक्षिते परोक्षमवैशद्येन लक्षितव्यम्, अन्यथा तद्विजातीयत्वायोगादित्येतदेवात्र प्रतिपत्तव्यम्। यद्येवं क-प्रत्यक्षप्रस्तावत्वमस्येति चेत्? न; प्रत्यक्षस्यैव प्राचुर्यात्। भवति हि प्राचुर्येण व्यपदेशो यथा माकन्दवनमिति। न हि तत्र माकन्दा एवं, स्तोकशो वृक्षान्तराणामपि सम्भवात्, एवं सामर्थ्यात्परो-क्षलक्षणनिवेदनेऽपि प्रत्यक्षस्यैव प्राचुर्यात्, तेनैवायमाद्यः प्रस्तावो व्यपदिश्यते नापरेण विपर्ययात्। प्रत्यक्षप्राचुर्यञ्च तद्भेदस्येन्द्रियादिप्रत्यक्षस्य सविस्तरं निरूपणात्।

किं पुनरिदमवैशद्यं नाम? व्यवहितवस्तुविषयत्वमिति चेत्; न; देशकालव्यवायेऽपि क्वचि-द्वैशद्योपलम्भात्। स्वभावव्यवहितस्य[5] तु ग्रहणमेव नास्ति। न चाग्रहणमेवावैशद्यम्; स्याद्वादिमतस्या-नेवंविधत्वात्, अतिप्रसङ्गाच्च नीलदर्शनस्यापि तदापत्तेः, तस्यापि नीलव्यतिरिक्तनिरवशेषपदार्था-न्तरपरिच्छेदपराङ्मुखत्वात्, अविषयबाहुल्यनिबन्धनाच्च अवैशद्यप्राचुर्यादविशदमेव वा सकलं छद्मस्थसंवेदनं प्राप्तम्, विषयस्तोकनिबन्धनस्य वैशद्यलेशस्य सतोऽप्यसत्कल्पत्वात्।

वेदनान्तरसापेक्षत्वमवैशद्यमिति चेत्; उत्पत्तौ, ज्ञप्तौ वा तदपेक्षणम्? उत्पत्ताविति चेत्; न; अतिप्रसङ्गात्, सर्वस्यापि वेदनस्य पूर्वपूर्ववेदनसापेक्षतयैवोत्पत्तेः। विषयज्ञप्तौ तु तदपेक्षणे प्रामाण्यमेव न स्यात्, स्वपरपरिच्छेदं प्रत्यनन्यसापेक्षस्यैव तत्त्वप्रतिज्ञानात्—"सिद्धं यन्न परापेक्षम्" [सिद्धिवि०प्र० परि०] इत्यादिवचनात्। प्रमाणस्य चेदमवैशद्यचिन्तनम्। ततो यदि 'ईदृशमवै-शद्यं न प्रामाण्यम्, तच्चेत् नेदृशमवैशद्यम्' इत्येकं सन्धित्सोरन्यत्प्रच्यवेत। तन्नेदमप्यवैद्यम्। ध्यामलितप्रतिभासित्वमिति चेत्; उच्यते—

न ध्यामलावभासित्वमप्यवैशद्यमञ्जसम्।
रूपदर्शन एवेदं यन्न शब्दादिवेदिने॥२९४॥

---

१ प्रत्यक्षसिद्धमपि। २ प्रतिसिद्ध-प०। ३ तत्सिद्धसदृश-प०। ४ तस्मात् आ, ब० प०, स०। ५ एवास्तोक-आ०, ब०, प०, स०। ६-स्य तद्ग्रह-आ०, ब०, प०, स०। ७ वेदनान्तरापेक्षणे। ८ -णस्येदमवै-आ०, ब०, प०, स०।

न च तद्वेदनं सर्वं स्पष्टमेवेति युक्तिमत् ।
शब्दादिगोचरस्यापि स्मरणादेः प्रसिद्धितः ॥२९५॥
किञ्च श्यामलितत्वं चेदृर्थधर्मोऽभिमन्यते ।
ज्ञानस्य तेनावैशद्यं कथं नामोपपत्तिमत् ? ॥२९६॥
अन्यथार्थस्य नीलत्वान्नीलं तद्वेदनं न किम् ? ।
ज्ञानधर्मो मतं तेन्चेत्, चाक्षुषं तत्कथं भवेत् ? ॥२९७॥
अन्धकारप्रतिच्छायं गृह्यते तद्धि चक्षुषा ।
न ज्ञानं चाक्षुषं चक्षुरमूर्त्तौ यस्य वर्त्तते ॥२९८॥
तस्यानुभयधर्मत्वे तत्किं यदि न किञ्चन ।
कथं भाति ? विभात्येव मृगतृष्णाम्बुवादि ॥२९९॥
कथं तेनाप्यवैशद्यं वेदने परिकल्प्यताम् ।
साकारज्ञानवादस्य कथं प्रत्युतिरन्यथा ? ॥३००॥

'श्यामलितप्रतिभासित्वमवैशद्यमित्यनुपपन्नम्, अन्यापकत्वात्, रूपज्ञान एव तस्य भावात् शब्दादिवेदनेषु विपर्ययात्।' न च शब्दादिज्ञानं सर्वमपि स्पष्टमेवेत्युपपन्नम्, तद्विषयस्यापि स्मरणादेः परोक्षज्ञानस्य प्रसिद्धत्वात्। १५

अपि च, इदं श्यामलितत्वमर्थधर्मश्चेत्, कथं तेन ज्ञानमविशदमवभासेत ? विषयधर्मस्य विषयिण्युपचाराच्चेत् ; परमार्थतस्तर्हि सकलमपि ज्ञानं विशदमेवेति प्राप्तम् । न चैतदुचितम्, अनभ्युपगमात्। अर्थस्यैव च श्यामलितत्वात्तज्ज्ञानस्यापि तत्त्वे नीलत्वमपि तस्य स्यात् तदर्थस्य नीलत्वात्। तस्मान्नयमर्थधर्मः। २०

नापि ज्ञानधर्मः, चक्षुर्विषयत्वात्। न हि चक्षुषो ज्ञानगोचरत्वम्, तस्य मूर्त्तिमत्पदार्थविषयत्वेन प्रसिद्धत्वात्, ज्ञानस्य चामूर्त्तिमत्त्वात्। न च श्यामलिताकारस्य चक्षुर्विषयत्वमसिद्धम्, अन्धकारप्रतिच्छन्दकस्य तस्य चक्षुर्वेद्यत्वेन प्रतीतेः। अनुभयधर्मत्वे एवायमिति चेत्, न, ज्ञानार्थैकधीविरेकिणस्तृतीयस्य राशेरभावात्। नीलत्वमेवेदमिति चेत्, वारद्वयस्य कुतः प्रतिभासनम् ? कारणदोषसामर्थ्यान्मृगतृष्णिकाम्बुवदिति चेत् ; भवत्येवम्, तथापि कथं तेन ज्ञानस्यावैशद्यम्? तदाकारत्वादिति चेत्, न, साकारसंवेदनवादप्रतिक्षेपाभावप्रसङ्गात्। तन्नेदमवैशद्यम्। २५

'अवस्तुसामान्याकारत्वं तत्' इत्यप्यसमञ्जसम्, साकारवादनिषेधेन तन्निषेधात्। तस्मादर्थज्ञानस्यैव प्रतिभन्धकाद्व्यवहारविशेषनिबन्धनपरिणतिविशेष एव 'कश्चित्तदित्यनवद्यम्।

सदेवं प्रत्यक्षं तल्लक्षणसामर्थ्यात्परोक्षं च वैशद्याऽवैशद्याभ्यां व्यवस्थितम्। तदेवमर्थं निर्विकल्पकमेवेति[11] कश्चित्, तन्नाह—'साकारम्' इति। करोतिः[12] अत्र निश्चयार्थः। "कृतेनाकृतवी-

---

१ शब्दरिरेकत्वम् । २ श्यामलितत्वम् । ३ –स्य श्या–मा०, ब०, प०, स० । ४ –स्यापि पीतत्वे मा०, ब०, प०, स० । ५ श्यामलितत्वे । ६ –मपि स्वा–मा०, ब०, प०, स० । ७ –स्यतिरेकेण तु–मा०, ब०, प० । ८ कस्मात् ग्र–मा०, ब०, प०, स० । ९ –मयमरिनतिविरोधा क–मा०, ब०, प०, स० । १० अवैशद्यम् । ११ –ति कृतवीक–मा०, ब०, प०, स० । १२ –ति तत्र नि–मा०, ब०, प०, स० ।

क्षणात्" [ ] इत्यत्र 'निश्चितेनानिश्चितदर्शनात्' इत्यर्थग्रहणात्। आङ् अभिव्याप्तौ, अभिव्याप्तिश्च शक्त्यपेक्षया ततो यस्य यावती शक्तिः तावत्येव विषये सा वेदितव्या। तदयमर्थः— आ समन्तात् करणमाकारः शक्यविषयाभिव्यापी निश्चयः, तेन सह वर्त्तत इति साकारं प्रत्यक्षलक्षणम्। सामर्थ्यलक्षितं च परोक्षमिति।

ननु च निश्चयो नामाभिजल्पवान् प्रतिभासः। स च संवेदनस्य स्वरूपे वा स्यात्, अर्थरूपे वा? न तावत्स्वरूपे; तस्य अशक्यसमयत्वात्। अभिजल्पसमयो हि क्रियमाणः 'इदमस्य वाचकं वाच्यं वा' इति क्रियते। न च क्षणमात्रपर्यवसितं तत्स्वरूपमन्यद्वा किञ्चिदस्येत्यनुवदितुं शक्यम्, क्षणादूर्ध्वं तदभावात्, असतश्चानुवादायोगात्। न च तत्सत्ताक्षण एवानुवादः; तस्यानुविवदिषितवस्तुस्वरूपसंवेदनपूर्वकत्वेन समसमयत्वानुपपत्तेः। अतीतस्यापि स्मरणोपनीतस्यानुवाद इति चेत्; किमिदं तेन तस्योपनयनं नाम? स्वस्वरूपवेदनमिति चेत्; न; असतस्तद्योगात्। न ह्यसत् स्वरूपेण वेदितुं शक्यम्; सत्त्वप्रसङ्गात्। न हि स्वरूपप्रतिभासनाद् अन्यदन्यस्यापि सत्त्वम्। असतोऽपि सत्त्वेनाध्यारोप इति चेत्; अध्यारोपितस्यैव तर्हि तदाकारस्य शक्याभिजल्पसमयत्वं न संवेदनस्वरूपस्य, तस्य पूर्वापरीभावविधुरशरीरत्वेनाशक्यानुवादत्वात्। न चाकृतसमयस्याभिजल्पस्य तत्र योजनम्; सर्वस्य सर्वत्र योजनप्रसङ्गात्, इत्यनभिजल्पानुपन्नमेव सर्वस्यापि ज्ञानस्य स्वरूपवेदनम्—उत्पद्यमानमेव हि तत् संवित्तिविषयभावं बिभर्त्ति तद्व्यतिरेकेण तत्संवित्तेरभावात्, तदा च न पूर्वापरभावो नाप्यभिजल्पयोजनं यतः सविकल्पकत्वं भवेत्। तस्मात्तत्क्षण एव जातस्य साक्षाद्वेदने निर्विकल्पकत्वमेव। सहजाभिजल्पसंसर्गात् सविकल्पकत्वमेवेति चेत्; न; सहजस्य अभिलापस्याभावात्। भावेऽपि स्वतस्तद्विविक्तत्वात् संवेदनस्य न तत्संसृष्टत्वेन वेदनम्। समसमयत्वेन वेदनमेव संसर्ग इति चेत्; न; तस्येतरेतराध्यासरूपत्वात्, तस्य च वाच्यवाचकभावनिबन्धनत्वात्। तद्भावश्च न स्वाभाव्यादेव, सर्वस्यापि तत्प्रतिपत्तिप्रसङ्गात् समयवैयर्थ्यापत्तेश्च। समयादिति चेत्; न; तदैवोत्पन्ने तदशक्यत्वस्य निरूपितत्वात्। भवति चात्र परस्य वचनम्—

"तदैव चोदितस्यास्य साक्षाद्वित्तौ न कल्पना।
अभिलापेन संसर्गादिति चेन्नाभिलाप(पि)ता॥
ज्ञानस्य तद्विविक्तत्वे कथं संसर्गसम्भवः।
समानकालविन्मात्रान्नैव संसर्ग उच्यते॥" [प्र०वार्तिकाल० २।२४९] इति।

तन्न संवेदनस्याभिजल्पवत्त्वं स्वरूपे सम्भवति।

---

१ आत्मावोऽभि—आ०,ब०,प०स०। २ अभिव्याप्तिः। ३ "विकल्पो नामसंश्रयः"—प्र०वा० २।१२३। ४ अनुवादस्य। ५ शक्त्याभि—आ०,ब०,प०,स०। शक्यसङ्केतत्वम्। ६ तत्प्रयो—आ०,ब०,प०,स०। ७ —त्र प्रयोज—आ०,ब०,प०,स०। ८ —नेन नि—आ०,ब०,प०,स०। ९ —स्याप्यभि—आ०,ब०,प०,स०। १० अभिजल्पसंसृष्टत्वेन। ११ —यत्ते वेद—आ०,ब०। १२ —दत्र न तत्त्वा—आ०,ब०,प०। १३ चेत्तदेवोत्प—आ०,ब०,स०। १४ सङ्केताशक्यत्वस्य। १५ तदेव चो—आ०,ब०,प०,स०। "तदैव चोदिते तस्य···अभिलापस्य संसर्गादिति चेन्नाभिलापिता। सुखस्य तद्विविक्तत्वे···समानकालविन्मात्रान्नैव···"—प्र०वार्तिका०। १६—जल्पत्वं आ०,ब०,प०,स०।

अर्थरूपे तत्सम्भव इति चेत्, न, तस्यापि यदि ग्रहणम्, तदा तभिर्विकल्पकमेव, तदविषयस्याप्यतिसूक्ष्मसमर्थमात्रमन्तशरीरस्य अशक्यसमयत्वेनाभिसत्यवस्त्वायोगात्, परिस्फुटप्रतिभासत्वाच्च । यदि तस्य न ग्रहणम्, तथापि न तत्र विकल्पसम्भवः । न ह्यग्रहणमेव विकल्पः, अतिप्रसङ्गात्—सर्वसंवेदनानामन्योन्यविषयापेक्षया तदग्रहणात्मकत्वादिशेषात् । अध्यारोपितार्थापेक्षया तर्हि विकल्पसम्भव इति चेत्, न, अध्यारोपार्थापरिज्ञानात् । अर्थग्रहणमध्यारोप इति चेत्, न, कथितोत्तरत्वात् । तदग्रहणं सैव इत्यपि तादृक्समेव । न चापरमध्यारोपस्य रूपं पर्यालोच्यमानं सम्भवति । यत्र तर्हि ग्रहणमध्यारोपश्च तत्र तत्सम्भव इति चेत्, ननु यदि ग्रहणारोपयोर्नैं भेदः किमुभयोपादानेन पौनरुक्त्यदोषात्? ग्रहणमित्येव वा आरोप इत्येव वा वक्तव्यम्, तत्र च प्रागेव दूषणं प्रतिपादितमिति न पुनः प्रतिपाद्यते । यदि पुनर्नैव एवं तैयोस्तयापि विज्ञानद्वयमेवैककालं प्रसक्तम्—यद्ग्रहणात्मकं तभिर्विकल्पकं यद्यारोपात्मकं तत् सविकल्पकमिति, तदिदमप्यसमञ्जसम्, आरोपस्य ग्रहणाग्रहणाभ्यां विचारितत्वात् । भवति चात्र परस्य वचनम्—

"यदि ग्रहणमर्थस्य विकल्पः कथमत्र सः ? ।
अथाग्रहणमर्थस्य विकल्पः कथमत्र सः ? ॥
अथार्थारोपतस्तत्र विकल्पत्वं निरुच्यते ।
ग्रहणाग्रहणे मुक्त्वा तत्राप्यर्थोऽस्ति नापरः ॥
ग्रहणारोपसद्भावे विकल्प इति चेन्मतिः ।
ग्रहणारोपयोरैक्ये द्वयोः सम्भव इत्यसत् ॥
तत्रैकपक्षनिक्षिप्तो दोषः प्रागेव वर्णितः ।
अथ भेदस्तयोरस्ति द्वयमेव प्रसज्यते ॥
निर्विकल्पकसंसिद्धिः सविकल्पा तदैव च ।" [प्र०वार्तिकाल० २।२४९] इति ।

तत्र स्वरूपेऽर्थरूपे वा निर्णयसम्भवः, तस्मादयुक्तं साक्षाग्रहणमिति चेत्, नेत्यसिद्धिर्निर्णयव्यवस्थितिविषयम् अतिमुग्धभाषितत्वात् । तथाहि—योऽर्थं 'तदेव चोदितस्य' इत्यादिवचनप्रक्रमः स यदि निष्प्रयोजन एव, कथं तत्र प्रस्तुतमात्रे प्रेक्षावतामादरो यतोऽर्थं शास्त्रोपनिबन्धः क्रियते ? कर्म वा तत्प्रक्रमोपन्यासकारिणो निमित्ताधिकरणत्वं न भवेत्, असाधनाङ्गवचनत्वात् ? सप्रयोजनस्त्वे यदि तत्प्रयोजनं सकलसंवेदननिर्विकल्पकत्वसाधनादन्यदेव, स एव दोषः तद्व्यतिनो निमित्ताधिकरणत्वमिति प्रस्तुतानुपयोगिनस्तत्प्रक्रमस्यासाधनाङ्गवचनत्वात् । तभिर्विकल्पत्वसाधनमेव तत्प्रयोजनमिति चेत्, तदपि तत्प्रक्रमस्य स्वयं तैत्परिच्छेदरूपत्वात्, तत्परिच्छेदहेतुत्वाद्वा भवेत् ? स्वयं तत्परिच्छेदरूपत्वे सिद्धमभिन्नरूपत्वं तत्प्रतिभासस्य स्वभावभूतस्यैवाभिन्नरूपस्य तैत्र

---

१ —मात्रमन्त—आ०, ब०, प०, स० । २ अध्यारोपः । ३ ग्रहणारोपयोः । ४ "सविकल्पकसंसिद्धिः अविरुद्धा तदेव च ।"—प्र० वार्तिकाल० । ५ वनदैव आ०, ब०, प०, स० । ६ अभिन्नरूपपरिच्छेद । ७ तत्प्रभावा—आ०, ब०, प० ।

परिकल्पनमभ्यनुज्ञायते । तत्र च न तावत्स[1] एव तस्य[2] विकल्पत्वं कल्पयति ; स्वयमकल्पनात्मकत्वात् । 'परमार्थतस्तु विज्ञानम्' इत्यादि वचनात् । न ह्यकल्पनात्मनस्तत्कल्पनम्; प्रत्यक्षेऽपि तत्प्रसङ्गात् । कल्पनात्मापि तस्यास्तीति चेत् ; किमपरतत्कल्पनेन वैयर्थ्यात् । तदात्मापि[3] यदि वस्तुत एव, सिद्धं नः समीहितम्, पारमार्थिकस्यैव विकल्पस्य व्यवस्थापनात् । सोऽपि[4] कल्पित एवेति चेत् ; न; तत्रापि 'न तावत्स एव' इत्यादेर्दोषात् चक्रकप्रसङ्गात्, अनवस्थापत्तेश्च । परतस्तत्र[5] तत्कल्पनमिति चेत्; न ; परेणापि स्वयमविकल्पात्मना तत्कल्पनाऽयोगात् । विकल्पात्मापि तस्येति चेत् ; न ; तस्य परमार्थत्वे परमतसिद्धिप्रसङ्गात् । कल्पितत्वेऽपि न स्वतस्तत्कल्पनम्; उक्तदोषत्वात् । परतस्तत्कल्पनं चेत्; न ; 'परेणापि' इत्यादिप्रसङ्गपौनःपुन्येन चक्रकानवस्थयोरप्रतिहतप्रसरत्वात् । ततो दुर्भाषितमेतत्–'यत्र स्यात्कल्पनान्तरैर्व्यवहारः' इति ; परमार्थतः[10] कल्पनाया च कल्पनान्तराणामेवासम्भवात् ।

भवतु तर्हि[11] परमार्थत एव कश्चिद्विकल्पः, तथापि किमायातं प्रत्यक्षस्य येन तदपि सविकल्पकमुच्यते इति चेत् ? अभिमतस्यापि कुतः सविकल्पकत्वम् ? तत्प्रतिभासस्याभिजल्पवत्त्वादिति चेत्; न ; अकृतसमयेनाभिजल्पेन तस्य[12] तद्वत्त्वायोगात् अतिप्रसङ्गात् । नापि कृतसमयेन ; विस्मृतेनापि तत्प्रसङ्गात् । अनुस्मृतेनेति चेत्; न; तदनुस्मरणस्य[13] निर्विकल्पत्वे तद्विषयस्यान्यत्र[14] योजनाऽसम्भवात् क्षणक्षयादिवत् । सविकल्पकत्वे तस्याप्यभिजल्पवत्त्वम् अनुस्मृतेनैवाभिजल्पेन, तदनुस्मरणस्यापि तद्वत्त्वं तदपरानुस्मृताभिजल्पेनेत्यनवस्थानान्न प्रकृतविकल्पनिष्पत्तिर्भवेत् । तन्नाभिजल्पवत्त्वात्तस्य सविकल्पकत्वम् ।

[15]अभिजल्पयोग्यविषयत्वादिति चेत्; कोऽसौ तद्विषयः ? अनुवृत्तव्यावृत्तादिस्वभावो भाव एव, तदपरस्य तद्योग्यस्यासम्भवादिति चेत्; तदियमकस्मादस्माकं महानिधिप्राप्तिः प्रत्यक्षस्यापि[16] तत एव सविकल्पकत्वोपपत्तेः, इदमेवाह 'द्रव्य' इत्यादि । द्रव्यं चान्वयरूपं सुवर्णवत्, पर्यायाश्च व्यावृत्तिधर्माणः कटककुण्डलादिवत्, सामान्यं च सदृशपरिणामस्वभावं कुण्डलयुगलवत्, विशेषश्च विसदृशपरिणामलक्षणः केयूरहारवत्, द्रव्यपर्यायसामान्यविशेषास्त एवार्थात्मानौ तयोस्तद्रूपत्वात् तयोर्वेदनं प्रत्यक्षलक्षणम्, अतश्च साकारमिति ।

तदेवंलक्षणं प्रत्यक्षं त्रिविधं भवति । कथं पुनः कारिकायामनुक्तं त्रैविध्यमवगम्यते ? "प्रत्यक्षं विशदं ज्ञानं त्रिधा" [प्रमाणसं० श्लो० २] इति शास्त्रान्तरे प्रतिपादनादिति चेत्; न; सामान्यलक्षणस्यापि तत्रैव प्रतिपादनादिहावचनप्रसङ्गात् । इहापि वृत्तिकारेण त्रैविध्यमुक्तमेवेति चेत् ; सोऽपि कथं कारिकायामकथितं कथयेत्, कारिकाविवरणस्यैव[17] वृत्तित्वात्, अनुक्तव्याख्यानस्य विपर्ययादिति चेत् ? न ; अत्रापि पृथक् पृथक् तत्समर्थनेन

---

१ तत्र न च तावत् आ०, ब०, प०, स० । २ अस्पष्टप्रतिभासः । ३ स्वस्य । ४ कल्पनास्वरूपमपि । ५ अस्पष्टप्रतिभास्य । ६–परं तत्क–आ०, ब०, प०, स० । ७ कल्पनास्वरूपमपि । ८ अस्पष्टप्रतिभासे । ९ विकल्पत्व । १० कल्पनायां च आ०, ब०, प० । ११ परमार्थ एव ता० । १२ तद्वत्तायो–आ०,ब०,प०,स० । १३ निर्विकल्पत्वेपित–आ०, ब०, प०, स० । १४– न्यत्प्रयोज–आ०, ब०, प०, स० । १५ आभिजल्प–आ०, ब०, स० । १६ अनुवृत्तव्यावृत्तादिस्वभावभावविषयत्वादेव । १७–विचारस्यैव आ०, ब०, प०, स० ।

त्रैविध्याद्गमात्। करिष्यते हि 'सदसज्ज्ञान' इत्यादिना इन्द्रियप्रत्यक्षस्य 'परोक्षज्ञान' इत्यादिनाऽनिन्द्रियप्रत्यक्षस्य, 'लक्षणं समम्' इत्यादिना चातीन्द्रियप्रत्यक्षस्य समर्थनम्। अत इन्द्रियप्रत्यक्षादिभेदेन त्रिविधमेव तदिति भवत्येव निर्णयः। तत्र—

"द्विताहितानिर्मुक्तिश्चमिन्द्रियनिर्मितम्।
यदेशतोऽर्थज्ञानं तदिन्द्रियाध्यक्षमुच्यते ॥३०८॥ ५

इन्द्रियाणि चक्षुरादीनि तैर्निर्मितं तद्धेतुकं यदर्थस्य बहिर्घटादेः ज्ञानं तदिन्द्रियप्रत्यक्षं परिस्फुटत्वेन तल्लक्षणयोगात्। कुतः पुनश्चक्षुरादीन्द्रियकार्यत्वं घटादिप्रत्यक्षस्यावगम्यत इति चेत्? कुतोऽयं प्रश्नः? सर्वत्र कार्यकारणभावस्यैवासम्भवादिति चेत्, न, स्ववचनव्याघातात्—प्रस्तुतं हि प्रमेयवचनं परस्य स्ववचनम्, तदेव व्यौहन्येत। यदि न सर्वत्र तद्भावसम्भवः, तँस्याहेतुकस्यासम्भवात् व्योमकुसुमवत्। सम्भवेऽपि देशकालादिनियमानुपपत्तेः। हेतुनिबन्धनो हि भावानां १० तैन्नियमः कथं तदभावे भवेत्? तथा चै वादिवत् प्रतिवादिप्राभाकरादेरपि तत्प्रमाणवचनप्रसङ्गात्। कस्यचिदुत्तरवादित्वं न परीक्षकत्वं नापि नियामकत्वमिति प्राग्वत्, प्रश्नकृत एव तैदनुपपत्तेः। वादिन एव तत्प्रश्नवचनं तस्यैव "हेतुहेतुमद्भावनिश्चयाभावाभ्यां प्रतिवाद्यैविपर्ययादिति चेत्, "तस्मिंश्चयपूर्वकं तर्हि "तद्वचनमप्रतिकर्तव्यं तस्यानवरीयत्वात्, तथा च कथं सर्वत्र कार्यकारणभावाभावः?"तद्व्यवसायेऽपि "व्याप्तिव्यतिरेकयोः "सद्भावोपपत्तेः। तदैर्थं "तस्मिंश्चयत्वर्थानुयोगवचनयोः १५ कार्यकारणभावं स्वयमेवोपदर्शयति सर्वत्र तद्भावबन्ध कथयति इति कथं स्ववचनव्याघातपाशबन्धान्निर्मुच्येत? तत्र तद्भाव('तद्भाव')स्यासम्भवात्तत्पर्यनुयोगवचनम्", सम्भवेऽपि तस्यै दुरवबोधत्वात्"। "दुरवबोधं खल्विदं यत्किञ्चित्कस्यचित्कार्यं कारणं चेति, तद्भावस्य पूर्वापरभावाधिकत्वात्, "तत्र च प्रत्यक्षस्य सन्निहितविषयमात्रपरिच्छेदस्वभावत्वेनाप्रवृत्तेः। तदप्रवृत्तौ तत्पूर्वकत्वेनानुमानस्यानुत्पत्तेरिति चेत्, तदप्यसमीचीनम्, "तदनवबोधतत्पर्यमुयोग- २० वचनयोरपि "तद्भावपरिज्ञानाभावापत्तेः। मयांत्यति चेत्, न "तर्ह्यविप्रपन्नम्-'तदनवबोधात् तत्पर्यनुयोगः' इति। "तदनयोर्हेतुफलभावपरिज्ञाने "तस्यैव पर्ववचनोपपत्तेर्नान्यथा रूप्यापुरुषवत्। कथं तर्हि "तद्भावपरिज्ञानम्? परस्यापि कथमिति चेत्? भवतु परस्यापीदं चोद्यं न "तावत्सैव स्वपक्षे समाहितं भवतीति चेत्, आस्तां तावदेतत्, हेतुफलभावपरिज्ञानस्य यथाबसरमुपरिष्टात् निरूपणात्। तस्मादुपपन्नम् इन्द्रियकार्यं यत्तदिन्द्रियप्रत्यक्षमिति। २५

---

१ न्यायवि०-का० ५। २ न्यायवि० का० ११। ३ न्यायवि० का० १६८। ४ —ह्यते आ०, ब०, प०, म०। ५ अपव्याघात। ६ प्रस्तुतवचनस्य। ७ देशाद्यनियमम्। ८ चानादिस्त् आ०, ब०, प०, स०। देशाद्यनियमाभावे। ९ ऽतरवादित्वाद्यनुपपत्तेः। १० —द्भावाभावाभ्यां—ता०। ११ हेतुहेतु सद्भावनिश्चयपूर्वकम्। १२ प्रस्तुतप्रश्नवचनम्। १३ प्रस्तुतप्रश्नवचनवत्। १४ अन्यवस्तुविरेकयोः। १५ तद्भावो—ता०। १६ —र्थं निश्च—आ०, ब०, प०। १७ हेतुहेतुमद्भावनिश्चय। १८ कार्यकारणभावस्य। १९ 'कुतः पुनश्चक्षुरादीन्द्रियकार्यत्वं घटादिप्रत्यक्षस्य अवगम्यते?' इति पर्यनुयोगवचनम्। २० कार्यकारणभावस्य। २१ —न् खल्विदं खल्विदं आ०, ब०, प०। २२ दुरवबोधं कल्पितं य—स०। २३ पूर्वापरभावे। २४ कार्यकारणभावाऽनवबोध। २५ कार्यकारणभाव। २६ हेतुहेतुमद्भावनिश्चयगर्भं वचनम्। २७ तदनवगीधतत्पर्यनुयोगयोः। २८ सम्भेवं ब—आ०, ब०, प०, स०। २९ सद्भाव—आ०, ब०, प०, स०। ३० तावत्येव आ०, ब०, प०, स०।

तत्प्रत्यक्षस्य निर्णयात्मकत्वात्, तेन च स्वविषयस्य सर्वाकारेण ग्रहणान्न तद्विषये ज्ञानान्तरस्य शब्दान्तरस्य वा व्यापारः, सिद्धोपस्थायित्वेन वैयर्थ्यात्, समारोपव्यवच्छेदस्य[2] चाऽभावात् निश्चिते समारोपानुत्पत्तेरिति चेत्; न; [3]तस्य प्रादेशिकत्वात्। तत्प्रत्यक्षं हि स्वविषयस्य प्रदेशत एव ग्रहणे स्वशक्तिप्रयुक्तनियोगाधिष्ठितं न सर्वाकारेण, तथैव तस्य निर्वा-
५ धमवबोधात् तस्मादयमप्रसङ्ग एव। निष्प्रदेशमेव सकलं वस्तु कथं तस्य प्रदेशतो ग्रहणं [4]तद्ग्रहणम्? तद्ग्रहणस्य विभ्रमरूपत्वप्रसङ्गादिति चेत्; आस्तामिदम्, अनन्तरमेव निरूपणात्।

भवत्वेवं तथापि कथमिन्द्रियप्रत्यक्षस्य प्रामाण्यम्? कथं च न स्यात्? अप्रवर्त्तकत्वादिति चेत्; किं प्रवर्त्तकत्वेन प्रामाण्यं व्याप्तम्? [5]न चेत्; [6]तदभावे तदभावानुपपत्तिः, अतिप्रसङ्गात्। व्याप्तमेवेति चेत्; न; स्वसंवेदनयोगिप्रत्यक्षयोरप्रामाण्यप्रसङ्गात्। न हि स्वसंवेदनं
१० स्वरूपेऽन्यत्र वा प्रवर्त्तकम्; स्वरूपस्यानुभूतत्वात्, अन्यस्य चाविषयत्वात्। नापि योगी तत्प्रत्यक्षात् क्वचित्प्रवर्त्तते कृतार्थत्वात्। वस्तुयाथात्म्यविषयत्वात्प्रामाण्यम्[7] इन्द्रियप्रत्यक्षेऽपि समानम्। प्रवृत्तेः प्राक् तद्विषयत्वमेव कथमवगन्तव्यम्, प्रतिभासस्य सत्येतरविषयसाधारणत्वादिति चेत्? न; स्वसंवेदनादावपि प्रसङ्गात्। स्वहेतूपनिबद्धात् कुतश्चित्सामर्थ्यात् प्रवृत्तिनिरपेक्षमेव स्वप्रामाण्यं तदवगच्छतीति चेत्; इन्द्रियप्रत्यक्षमपि किमेवं न भवेत्? संशयादि-
१५ दर्शनादिति चेत्; निःसंशयादेरेव तत्प्रामाण्यनिर्णयस्यावलोकनात्। न हि [8]सुचिराभ्यासपरिकलितपुरोवर्त्तिनीरनिकरनिर्भासवतः प्रत्यक्षस्याकृतप्रवृत्तिकस्यैव न प्रामाण्यपरिज्ञानम्, नापि सन्देहाद्यनास्वादितविषयत्वम्। यत्रापि न स्वतस्तत्परिज्ञानं तद्धेतुशक्तिवैकल्यात्, तत्रापि कुतश्चिद् दर्दुरारावादेर्लिङ्गात् विषयतथात्ववेदने तत्परिज्ञानोपपत्तेरनुपयोगिन्येव प्रवृत्तिः। अथ प्रवृत्तिकामस्य यदि तन्न प्रवर्त्तकं किं तेन प्रमाणेनार्पीति चेत्?; क एवमाह—'तस्य न प्रवर्त्तकम्' इति?
२० प्रवृत्तिविषयोपदर्शकस्य प्रवर्त्तकत्वोपपत्तेः। न[9] वर्त्तमानस्य प्रवृत्तिविषयत्वं तस्यानुभवात् प्रवृत्तेश्चानुभवार्थत्वात्। तत्फलसिद्धावपि प्रवृत्तौ तदनुपरमप्रसङ्गात्। अनुभवान्तरार्था पुनः प्रवृत्तिरिति चेत्; न; [10]तदन्तरकाले प्राचीनविषयानवस्थानात्, निर्विषयस्य चानुभवस्याभावात्। भावी तु भवतु प्रवृत्तिविषयः, प्रवृत्तिकामस्य तत्राभिलाषात्। किन्तु न तस्य प्रत्यक्षेण ग्रहणम्, इन्द्रियव्यापारस्य वर्त्तमानपुरोवर्त्तिपर्यायमात्रपर्यवसायित्वेन भाविभावागोचरत्वे तदुपनिबद्धजन्मनः
२५ प्रत्यक्षस्यापि [11]तत्राव्यापारात्।

प्रवृत्तिविषयत्वं न वर्त्तमानस्य दर्शनात्।
प्रवृत्तिर्दर्शनार्थैव दर्शने सति किं तया? ॥३०९॥
निष्फलाऽपि प्रवृत्तिश्चेत्तस्या[12] उपरमः कथम्।

१—रसि— आ०, ब०, प०, स०। २ —स्य भावा— आ०, ब०, प०, स०। ३ इन्द्रियप्रत्यक्षस्य। तस्य तत्रा—आ०, ब०, प०, स०। ४ तद्ग्रहणमिति पदं निरर्थकं प्रतिभाति। ५ यदि व्याप्तं न स्यात्। ६ प्रवर्त्तकत्वाभावे प्रामाण्याभावो न स्यात्। ७ स्वसंवेदनयोगिप्रत्यक्षयोः। ८ —तूपनिबन्धात् आ०, ब०, प०, स०। ९ स्वसंवेदनयोगिप्रत्यक्षम्। १० स्वचिरा—आ०, ब०, प०, स०। ११ न प्रवर्त—आ०, ब०, प०, स०। १२ अनुभवान्तरसमये। १३ भाविनि। तत्रापि व्या—आ०, ब०, प०, स०। १४ —स्येत्कस्या आ०, ब०, प०, स०।

नं दर्शनानन्तरार्थापि तत्काले विपयास्तितेः ॥३१०॥
भाविन्यात्माद्यित्वेन प्रवृत्तिविषयोऽपि सन् ।
नेन्द्रियोपनिपातेन प्रत्यक्षेणोपलभ्यते ॥३११॥
वर्त्तमानपुरोवर्त्तिन्यार्द्रवादिन्द्रियात्कथम् ।
भावे भाविन्यतादृक्षे प्रत्यक्षमुपजायताम् ? ॥३१२॥ ५
अदृष्टेऽपि प्रवृत्तिश्चेत् भाविन्यभ्युपगम्यते ।
अतिप्रसङ्गदोषेण कथमेवं न लिप्यसे ? ॥३१३॥

इति चेत्, अत्र प्रज्ञाकरस्य निर्वाहं –'अभ्यासदशायां वर्त्तमान एव जलादिरूपे भाविनिवह्नि-पस्योपादानत्वेन तत्सहभाविनश्च स्पर्शादेः तदेकसामग्र्यधीनतया तत्सहकारित्वेनाध्यारोपाद् दृश्य-दर्शनमेव भाविनि प्रवर्त्तकम्। न चैवमतिप्रसक्तिर्नो" प्रवृत्तिः, अध्यारोपविषय एव तदुपग- १० मात्। न चाध्यारोपस्याप्यतिप्रसक्तित्वम्, सत्येव सम्बन्धे तद्भावात्। अनभ्यासे तु तद-ध्यारोपाभावात्, भाव्यविनाभावितोयाद्याकारविज्ञेयपक्षिदर्शनोपनिबद्धानुमानात्प्रवृत्तिः' इति, तन्नेदमुच्यते–कोऽयं तदध्यारोपो नाम ? दृश्यग्राह्ययोरेकत्वमहणमिति चेत्, न तर्हीदं प्रत्य-क्षतः सम्भवति, तस्य क्षणपर्यवसितवस्तुविषयत्वेनाभ्यनुज्ञानात्। पारमार्थिकस्यैव तस्य सैद्ध स्तुविषयत्वम्, सांव्यवहारिकस्य तु तदेकत्वमहणमविरुद्धमेव। यदाहं–"सांव्यवहारिकप्रत्य- १५ क्षापेक्षया तु कर्तृत्वस्य प्रतीतिरिरुध्यते" [ ] इति। तात्पर्यमत्र–कर्तृत्वं हि क्रियायां स्वातन्त्र्यम्, क्रिया च पूर्वापरात्मिका। न तत्र वास्तवस्य प्रत्यक्षस्य प्रवृत्तिः, अतः सांव्य-वहारिकस्यैव तस्य तत्र व्यवहार इति, तदिदमसम्यङ्मनः, क्षणमात्रपर्यवसितवस्तुविषयस्यैव प्रत्यक्षस्य सांव्यवहारिकत्वात्। न हि पारमार्थिकस्य तस्य तैद्विध्यसम्भः, सकलविकल्पातीतसवे-दनपरमार्थविषयत्वेन "तदग्रीकारात्। तदयं स्वसंवपरपोलोचयक्षेप यथाविच्छिन्नं कथिदन्यथाऽपि २० कथयतीति कथमनुमन्तव्यः ? "विकल्पेन तर्हि तदेकत्वं वेद्यत इति चेत्, न, तस्य "तैद्व्यतिरि-क्तस्य "तेनाप्रतिवेदनात्, विकल्पस्य बहिर्विषयत्वानभ्युपगमात्। अन्यतिरिक्तस्य वेदनमिति चेत्, कथं "ततो भाविनि प्रवृत्तिः ? बहिर्विषयाद्यपि जलादिदर्शनात् "तत्र "तामनिच्छन् बहिःस्पर्शनक्षमत्वनादत्ते" (धा) नाद्विकल्पादिच्छतीति कथं स्वयः ? "तैदर्शनादेव तद्विकल्पसद्भा-

---

१ तदर्शनान्तरस्थापि स०। दर्शनान्तरात्स्यापि आ०, ब०, प०। २ "तत्र भाविस्वकी तत्प्रापकत्वेनैक-तारोपः। पत्र तु स्पर्शादौ तदेकसामग्र्यधीनत्वेनेति न विरोधः"–प्र० वार्तिकाल० १।१। ३ –नावे तत्सह-आ०, ब०, प०। ४ –ग्राहिनिवृत्ति–आ०, ब०, प०, स०। ५ तस्य लक्षण–आ०, ब०, प०, स०। ६ प्रत्यक्षस्य। ७ तमर्थसंवेदितवस्तु। ८ "न च प्रत्यक्षतः कर्तृत्वमपि पूर्वं प्रतिपन्नम्, पौर्वापर्ये प्रत्यक्षस्या-प्रसेः। सांव्यवहारिकत्वमाश्रित्य तु प्रतीतिरिरुध्यते।"–प्र० वार्तिकाल० १।२। ९ क्षणमात्रपर्यवसित वस्तुविषयत्वम्। १० "इदं च पुरुषार्थाध्यवसायिन्यः प्रमाणसामग्र्याः प्रामाण्यमुपगम्य उच्यते। परमार्थतस्तु सकलमेव स्वसंवेदनमात्रं नैद्रियादिप्रत्यक्षव्यवहारभागोऽस्ति।"–प्र० वार्तिकाल० १।२५०। ११ विकल्पतेन आ०, ब०, प०, स०। १२ एकत्वस्य। १३ विकल्पव्यतिरिक्तस्य। १४ विकल्पेन। १५ विकल्पमात्र। १६ बहिर्विषये। १७ प्रवृत्तिम्। १८ –व्यनादत्तादि–आ०। १९ व्यवहारतः बहिर्विषयप्रत्यक्षादेव।

यात्तत्र[1] प्रवृत्तिरिति चेत्; कथं [2]स्वयमतद्गोचरमतद्गोचरसहायमपि तत्र प्रवर्त्तकम् ? न ह्यन्धस्य तदन्तरसाचिव्येऽपि रूपदर्शनसामर्थ्यम्। अथ बहिर्गोचर एव विकल्पः, तदव्यतिरिक्तस्यापि तद्वेद्यस्य बहीरूपत्वेनाध्यवसायादिति चेत्; न; तद्बहीरूपत्वस्यापि व्यतिरिक्तत्वेनाप्रवेदनात्। अव्यतिरेकेण वेदनमिति चेत्; न; 'कथं ततो भाविनि प्रवृत्तिः' इत्याद्यनुवृत्तेश्चक्रकोपक्रमात् अनवस्थानदोःस्थ्याच्च। कथं वा प्रवृत्तिकार्ये दर्शनसहायत्वं विकल्पस्य भिन्नविषयत्वात्, नीलज्ञानवत् पीतदर्शनस्य। तदेकत्वाध्यवसायात्; न; दर्शनस्य निर्विकल्पकत्वेन [4]ततस्तदसम्भवात्। विकल्पात्तत्सम्भव इति चेत्; न; तेनापि तद्व्यतिरिक्तस्य तदेकत्वस्यानध्यवसायात्। अव्यतिरिक्तस्याध्यवसायेऽपि स्वरूपमेवाध्यवसितं न तदेकत्वम्। पुनरपि तस्य तदेकत्वाध्यवसाये स एव प्रसङ्गः 'न दर्शनस्य'इत्यादिरनवस्था च। ननु एवं व्यवहारी न विवेचयति प्रवृत्तिविरोधित्वात्। न हि प्रवृत्तिकामस्य तद्विरोधिनि विचारे सादरत्वं तत्कामत्वविरोधात्। किमिदानीमविचारितरमणीयमेव ज्ञानं प्रवृत्तिकामस्य पक्षतः ? तथा चेत्; अनर्थकं तर्हि [5]तं प्रति प्रमाणलक्षणप्रणयनम्। व्याख्यातारं प्रति नानर्थकम् "[6]व्याख्यातारः खल्वेवं विवेचयन्ति" [प्र० वा० स्ववृ० १।७२] इति वचनादिति चेत्; न; [7]तस्यापि प्रवृत्तिकामत्वाविशेषात् आहारादौ प्रवृत्तिदर्शनात्। न हि प्रवृत्त्युपायस्य विचारभीरुतां विवेचयन्नेव तत्कृतां प्रवृत्तिमुपजीवितुमर्हति। विवेचयन्नपि सहजेन व्यामोहेन तामुपजीवतीति चेत्; न, विवेकव्यामोहयोः तमःप्रकाशवद्विरोधात्। अन्य एव विवेक आहार्यस्य अन्य एव च सहजव्यामोहस्य विरोधी, तत्र शास्त्रोपनीतेन विवेकेनाहार्यस्य निवृत्तावपि को विरोधो यत्सहजस्य तस्यावस्थानं तत्कृतञ्च प्रवृत्त्युपजीवनं[10] न भवेदिति चेत् ? उच्यते—

आहार्येण विरोधोऽस्य विवेकस्य कुतो मतः।
विरुद्धविषयत्वाच्चेत्; सहजेनापि [11]तन्न किम् ? ॥३१४॥
अविरुद्धार्थतायां तु विवेको मोहतां व्रजेत्।
[12]आहार्योऽपि ततो मोहस्तन्मोहात्[13] नाशवान् कथम् ॥३१५॥
मोहो मोहाविरोधान्न मोहध्वंसाय कल्पते।
न तमःक्षालनं लोके तमसैवोपलभ्यते ॥३१६॥
ततः शास्त्रस्य वैयर्थ्यमागतं सौगते मते।
तन्नेदमिह साधूक्तम्—"शास्त्रं मोहनिवर्त्तनम्" ॥३१७॥ [प्र० वा० १।७]

---

१ बहिरर्थे। २ परमार्थतः दर्शनं बहिरर्थागोचरं सत् बहिरर्थागोचरविकल्पसहायादपि कथं बहिरर्थे प्रवर्तकं स्यादिति भावः। स्वयमतद्गोचरसहायमपि आ०, ब०, प०, स०। ३–त्वेनापि व्यवसा–आ०, ब०, प०, स०। ४ दर्शनात् एकत्वाध्यवसायासम्भवात्। ५ तत्प्रति–आ०, ब०, प०, स०। व्यवहारिणं प्रति। ६ "व्याख्यातारः एवं विवेचयन्ति न तु व्यवहर्त्तारः, ते तु स्वालम्बनमेव अर्थक्रियायोग्यं मन्यमानाः दृश्यविकल्प्यार्थावेकीकृत्य प्रवर्तन्ते।"–प्र० वा० स्ववृ० १।७२। ७ व्याख्यातुरपि। ८ आरोपितस्य व्यामोहस्य। ९ व्यामोहस्य। १० –नं भ–आ०, ब०, प०, स०। ११ विरुद्धविषयत्वम्। १२ आहार्येऽपि आ०, ब०, प०, स०। १३ यतः विवेकः सहजव्यामोहादविरुद्धः अतः स्वयं मोहरूपः सम्प्राप्तः तथा च कथं तेन आहार्यमोहस्य नाशः इति भावः।

तद्विवेकाविरुद्धार्थो मोहो वा सहजस्तव ।
विवेक एव संवृत्तो व्याख्यातुरिह धीमतः ॥३१८॥
आहार्येतररूपाभ्यां व्याख्याता रहिततस्ततः ।
क्वचित्कथ प्रवर्तेत कुतश्चिद्वा निवर्तताम् ॥३१९॥
पुनर्मोहान्तरं तस्य सहजं यदि कल्प्यते । ५
पूर्वैस्सर्वैप्रसङ्गे स्यात् सानवस्थानचक्रकम् ॥३२०॥

शास्त्रोपनिबद्धजन्मनो विवेकस्याहार्येणापि मोहेन तद्विरुद्धविषयत्वादेव विरोधो नान्यथा। मोहस्य हि इदंयप्रत्ययोरेकत्वं तद्विवेकस्य तु तन्नानात्वं विषय इति , यथैवं सहजेनापि तैस्य विरोधः स्यात् तैस्यापि सवेकत्वविषयत्वाविशेषात् । अविरोधे तु सहजमोहवत्तद्विवेकस्यापि तदेकत्वगोचरत्वेन तैस्यापि मोहरूपत्वम् , आगोपिवविषयत्वात् , तथा च कथमाहार्यस्यापि मोहस्य १०
तैस्यादृपवर्तनम् ? । न हि मोहादेव मोहान्तरमपसरति तस्य तद्विरोधिरूपत्वात् । न हि तमस एव तमःप्रक्षालनं क्वचिदप्युपलब्धम् । तथा च मोहप्रसरहेतुरेव शास्त्रं न मोहविध्वंसकमिति न साधु भाषितमेतत्–"शास्त्रं मोहनिवर्तनम् ।" [प्र० वा० १।७] इति । मोहस्य वा सहजस्य विवेकैकार्यत्वेन विवेकरूपतापत्तौ न व्याख्यातुरहार्यः सहजो वा मोह इति कर्म तस्य क्वचिदावर्तनं निवर्तनं वा कुतश्चित् ? पुनरपि सहजमोहान्तरपरिकल्पनादोष १५
इति चेत्, न, पूर्वनिरवशेषप्रसङ्गपौनःपुन्यादनवस्थादोषःप्रध्वस्तस्य चक्रकस्य प्रसङ्गात् । तन्न अविचारितरम्ये संवेदनप्रामाण्ये शास्त्रप्रणयनमर्थवत्, विचारपरिशुद्धं तत्प्रामाण्यमिति । व्याप्तोहनिषेधार्थत्वात् न हि तैस्यानर्थक्यमिति चेत्, न, तन्निषेधस्य प्रवृत्तिकामेस्तैद्विरोधित्वेनानन्युपगमात्। कस्यचित्कथंचित्प्रवृत्तिरपि नास्त्येव पूर्वापरीभावस्यादर्शनवेषयत्वादिति" चेत्, न, २०
भेदमात्रस्यैवसप्रवृत्तिप्रसङ्गात् । भवतु सर्वभेदविनिर्मुक्तं संविन्मात्रं तत्त्वम्–"स्वरूपस्य स्वतो गतिः" [प्र० वा० १।६] इति वचनादिति चेत्, आस्तां तावदेतत्–'स्वतस्तत्त्वम्' "इत्यादौ विचारात्। तथ अभ्यासदशायामेकत्वाभ्यारोपात्प्रत्यक्षस्य भाविविषयत्वोपपत्तौ भाविनि प्रवर्तकत्वम् ।

नाप्यनभ्यासदशायाम् अनुमानस्य , लिङ्गाभावेन तस्यैवाभावात्[१] । दृश्यमेव लक्षविलिङ्गमिति चेत्, न, तस्य प्राप्तैकत्वेनाभ्यवसितत्वात् । न हि साध्यमेव साधनम्, अतिप्रसङ्गात्, स्वभावहेतोरपि व्यवसितसाध्यमात्रिरेकस्यैव लिङ्गत्वात् । दृश्यमपि व्यवसितप्राप्यव्यतिरेकमनेवेति चेत्, न; तदूव्यवसायस्याभ्यासनिबन्धनत्वेन तदभावे अनुपपत्तेः क्षणविवेकव्यवसायवत्, अन्यथा तदूव्यवसायस्याप्यनभ्यास एव सम्भवात् यदुक्तम्–"अभ्यासपाटवाद्य-

---

१ वाग्वजलक्ष्म आ०, ब०, प०,स० । २–पत्तिरूप –आ०, ब०, प०, स० । ३ विवेकस्य । ४ सहजस्यामोहस्यापि । ५ विवेकस्यापि । ६ विवेकात् । ७ शास्त्रं तदेव मोह– आ०, ब०,प०,स० । ८ शास्त्रप्रणयनस्य । ९ प्रवृत्तिविरोधित्वेन । १० अभ्यासविरहात्। ११ न्यायवि०स्वो० ५१ । १२–त् अदृश्य–आ०,ब०,प०,स० । १३ क्षणविवेकव्यवसायवत्तदभावेपि ।

भावान्न क्षणविवेकव्यवसायः" [ ] इति तदपर्यालोचितवचनं भवेत्, क्षणविवेकानुमानस्य च वैफल्यात्। निश्चिते समारोपाभावात् तद्व्यवच्छेदफलत्वानुपपत्तेः। तदयमभ्यासदशायां दृश्यप्राप्यविवेकव्यवसायप्रसवोचितायामपि तदेकत्वाध्यवसायमेवाभिदधानः पुनरनभ्याससमये तदनुचितेऽपि तद्विवेकव्यवसायमावेदयतीति सत्यं तथागतप्रज्ञ तव तथागतः। किञ्च—

लिङ्गलिङ्गिविभागेन दृश्यप्राप्यार्थनिश्चयात्।
अभ्याससमये मानमनुमानं तवोचितम् ॥३२१॥
अन्यदा तु प्रमाणत्वमध्यक्षस्योपपत्तिमत्।
तदेकत्वावसायस्य निरभ्यासेन सम्भवात् ॥३२२॥
तत्क्रमन्यायमुल्लङ्घ्य कुर्वतस्तद्व्यतिक्रमम्।
तव प्रज्ञाकरस्यापि कुतः प्रज्ञाविपर्ययः ? ॥३२३॥
यदि चाभ्यासतोऽध्यक्षं दृश्यप्राप्याविवेकदृक्।
पश्येत्सौगतमध्यक्षं क्षणानामन्वयं तथा ॥३२४॥
अभ्यासातिशयोद्भूतं तत्त्वतो भवतो मतम्।
तत्सर्वं क्षणिकं ब्रूयात्कथं नाम महामुनिः ॥३२५॥
अन्यथा वस्तु पश्यंश्चेदन्यथोपदिशेदयम्।
कथन्नाम प्रमाणं स्यादविसंवादवर्जनात् ? ॥३२६॥

अभ्यासोऽपि सुगतस्य क्षणिकत्वैव भावेषु तथैवानुमानादिति चेत्; व्यवहर्तुरपि तथैव स्यात्तथैव दर्शनात्, अन्यथा—"पश्यन्नयं क्षणिकमेव पश्यति" [ ] इत्यस्य विरोधात्।

तन्न प्रज्ञाकरस्यैवमेकत्वाध्यवसायतः।
भाविप्रवृत्तिचिन्तायामुपपत्तिमती मतिः ॥३२७॥

कथं तर्हि भाविनि प्रवृत्तिरिति चेत् ? तस्य साक्षादेव दर्शनादिति ब्रूमः। यदि दर्शनं किं प्रवृत्त्या ? तस्या दर्शनार्थत्वात्, तस्य च सिद्धत्वात्, न हि सिद्धप्रयोजनहेतवः प्रयोजनार्थिभिरभ्यर्थ्यन्त इति चेत्; न; प्रवृत्तेर्दर्शनगोचरभाविरूपसहभाविस्पर्शादिप्राप्त्यर्थत्वात्। स्पर्शादेरपि यदि दर्शनं न प्रवृत्तिः, वैफल्यात्, नाप्यदर्शने अतिप्रसङ्गादिति चेत्; न; तस्य दृश्यमानरूपतादात्म्येन कथञ्चिद्दर्शनस्यापि भावात्। सर्वात्मना दर्शनादर्शनयोरेव प्रवृत्तिवैफल्यातिप्रसङ्गदोषोपनिपातात्।

एतेनेन्द्रियान्तरवैफल्यं प्रत्युक्तम्; स्पर्शादेर्विशेषत इन्द्रियान्तरादुपलब्धेः। रूपस्यापि कथं भाविनो दर्शनम्, अनक्षविषयत्वात्, कथं वा तस्य स्पर्शाद्येकत्वं विरुद्धधर्माध्यासादिति चेत् ? आस्तां तावदेतत् यथास्थानं निवेदनात्।

---

१ पुनरभ्या—आ०, ब०, प०, स०। २ तथागतः आ०, ब०, प०, स०। ३ अन्यथा तु आ०, ब०, प०। ४ तत्क्रमन्याय्यमु—ता०, स०। ५ साक्षाद्क्षादेव आ०, ब०, प०, स०। ६ सिद्धिप्रयोजनहे—आ, ब०, प०। ७ प्रवृत्तिवै—आ०, ब०, प०, स०। ८ रूपसहभाविस्पर्शादेः। ९—त् तेने—ता०, स०।

ननु यदि भाविन्यपि प्रत्यक्षं प्रवर्तेत कथं तर्हि भाव्यकारैर्वर्त्तमान एव तस्यैं तैस्वमुक्तमिति चेत्, न, वर्त्तमानप्रवृत्तित एव भाविप्रयोजनाभावेः न तदर्थमेकत्वाध्यवसायेन प्रत्यक्षस्य भाविविषयत्वं प्रति सौगतेन प्रयतितव्यमिति निवेदनार्थत्वात् तथा वचनस्य । यथा च तत्तत्प्राप्तिस्थाः सैरेव सविस्तरं निरूपितम् । यत्पुनः "अभ्यासेऽपि भाविज्ञानमनुमानम्" [ ] इति तेषां वचनम्; तदप्येकत्वाध्यवसायप्रयत्नसाध्यतामपि प्रत्यक्षं न प्रत्यक्षमिति ५ निवेदनार्थम् । कथन्न प्रत्यक्षमिति चेत् ? आरोपितविषयत्वात् । आरोपितं हि इदंये तत्कारणत्वेन भाविरूपं तत्प्राप्तस्य विषयः, तादात्म्यं च सविकल्पकत्वान्न प्रत्यक्षत्वम्, कल्पनापोढस्य तैस्वात् । व्यवहारी नैवं मन्यत इति चेत्, किं पुनर्व्यवहारादन्यत्र कल्पनापोढत्वं प्रत्यक्षलक्षणमुक्तम् ? तथा चेत्, न तत्प्रमाणम्, "प्रामाण्यं व्यवहारेण" [प्र० वा० १।७] इति वचनात् । न चाप्रमाणं प्रत्यक्षम्, प्रमाणविशेषस्य तस्यात् । ततो व्यवहारादेव कल्पनाविरहस्य प्रत्यक्षलक्षण- १० त्वात् आरोपितविषयस्य प्रत्यक्षस्यं विकल्पकत्वात् । पत्नेन कुक्षिकायिवरमणिप्रभामणिज्ञानस्यापि प्रत्यक्षैत्वं प्रसज्यम्, आरोपितविषयत्वेन विकल्पकत्वाविशेषात् । तर्हि विकल्पकं तदिति वक्तव्यं किमनुमानं तदिष्यतामिति चेत् ? न, परस्य निर्दर्शनाभावनिवेदनार्थत्वात् । परस्य हि वचनम्-"अभ्यासे भाविज्ञानवत् प्रमामणिज्ञानवच्च आरोपितविषयमपि प्रमाणमनुमानम् अर्थाविसंवादात्" [ ] इति । तत्रेदमुच्यते-निर्दर्शनज्ञानं किंनाम प्रमाणम् ? १५ न प्रत्यक्षम्, विकल्पकत्वात् । न च तस्मान्नत्रं प्रमाणम्, प्रमाणद्वयनियमव्यापत्तेः । तस्मादनुमानमेव तत् । न च तस्य निदर्शनत्वम्, अनुमानान्तरवत् विवादविषयत्वात् । विवादे किं निमित्तमिति चेत्, अनुमानान्तरे किम् ? आरोपितविषयत्वमिति चेत्, न, प्रकृतेऽपि तद्भावात्, अन्यथा तस्य स्वलक्षणविषयत्वेनाध्यक्षाविशेषप्रसङ्गात् । ततो न किञ्चिन्निदर्शनं यदनुमानप्रामाण्यसाधनं २० प्रत्युपयुज्यत इति निवेदनार्थं भाविज्ञानस्यानुमानत्ववचनम् । ततः समञ्जसं प्रत्यक्षस्य भावि- विषयत्वेन तत्र प्रवर्त्तकत्वम् इति सूक्तम्-हिताहितप्राप्तिपरिहारक्षमेन्द्रियप्रत्यक्षम् । हितस्यासुकूलवेदनीयतत्कारणरूपस्य अहितस्य च प्रतिकूलवेदनीयतत्कारणरूपस्य यथासंख्येन प्राप्तौ परिहारे च तस्य शक्तिसम्भवादिति सुविवेचितमिन्द्रियप्रत्यक्षम् ।

अनिन्द्रियप्रत्यक्षं तु सर्वसंवेदनं, स्वसंवेदनम्, तस्य अर्थोपप्लवविशेषापरनामधेयाद् अनिन्द्रियादुत्पत्तेः, तद्विशेषव्यतिरिक्तस्य स्वनिन्द्रियस्य "सतोऽपि स्वसंवेदनं प्रत्युपयोगात्, २५ तथा च भाष्ये सविस्तरं निर्णीतम् । कथं पुनः संवेदनामात्मसंवेदनमिति चेत् ? कथमर्थसंवेदनम् ? निर्बाधात्तदनुभवादिति चेत्, समानमात्मसंवेदनेऽपि । स्वरूपपरिच्छेदपरावृत्ततया बहिरुन्मेषप्रहमात्रव्याप्तानां तेषामनुभवात्, "अर्थग्रहणं बुद्धिः" [न्यायभा० ३।२।४६] इति-

१ अकलङ्कदेवैः । २ प्रत्यक्षस्य । ३ प्रवर्त्तकत्वात् । ४ प्रत्यक्षत्वात् । ५ "तस्मात् मणिप्रभावापि मणिरत्नं प्रत्यक्षमेव"-प्र० वार्तिकाल० २।५७ । ६ यौद्धेन हि अनुमानप्रामाण्यसाधनस्य मणिप्रभामणिज्ञानं दृष्टान्तत्वेनोपन्यस्तम् (प्र० वा० २।५७) । तत्र मणिप्रभामणिज्ञानस्य अनुमानत्वापादनेन विघटत इति भावः । ७ परस्यापि ब्य०-आ०, ब०, प०, स० । ८ मणिप्रभामणिज्ञानम् । ९ विरूपमात्रम् । १० स्वतोऽपि स० । ११ व्याप्तज्ञानां आ०, ब०, प०, स० ।

वचनान्न तेषामात्मवेदनमिति चेत्; न ; वचनमात्रात् अपरिस्खलितप्रतीतिव्यापारोपदर्शितस्य तस्य[1] प्रत्याख्यातुमशक्यत्वात्, अन्यथा अर्थवेदनस्यापि प्रत्याख्यानप्रसङ्गात्, "स्वरूपस्य स्वतो गतिः" [प्र०वा० १।६] इति तत्प्रत्याख्यानपरस्यापि वचनस्य भावात्। 'ज्ञानान्तरवेद्यमर्थज्ञानं वेद्यत्वात् कलशवत्' इत्यनुमानानुग्रहात्[2] पूर्वमेव वचनमुपपत्तिमत्, नापरमिति चेत्; न; 'स्वसंवेद्यमेव ज्ञानं वेद्यत्वात् सुखादिवत्'इत्यनुमानानुग्रहस्य[3] परवचनेऽपि भावात्। कुतः पुनः सुखादेरपि स्वसंवेद्यत्वमिति चेत् ? कलशादेः अन्यवेद्यत्ववत् प्रतीतेरेव। कथमेवमपि तत्स्वसंवेदनस्वभावनियमस्यानुमानविषयत्वे न प्रतिज्ञाव्याघातः ? न ह्यर्थान्तरभूतानुमानविषयतामावहत एव नियमेन स्वानुभवस्वभावत्वम्। अतद्विषयत्वे तु कथमतद्विषयमनुमानं तत्प्रतिपादनपरस्य 'स्वरूपस्य' इत्यादिवचनस्यानुग्राहकं यत्तदेवोपपत्तिमद्भवेदिति चेत्; उच्यते—

संविदामन्यवेद्यत्वस्यानुमानं स्वविद्यदि।
तदन्यवेद्यनियमप्रतिज्ञा तव भज्यते ॥३२८॥
स्वयमज्ञातसत्त्वं तत्[4] अस्वसंवेदने कथम्।
अर्थग्रहणमित्यादेर्वचसोऽनुग्रहक्षमम् ॥३२९॥
अननुग्राहकत्वेनाप्येवं तत्किन्न कल्प्यते।
इत्थमेवान्यथा नेति नादृष्टं शक्यकल्पनम् ॥३३०॥
अन्यतो वेदनं तस्याप्यनुमानस्य चेन्मतम्।
न तदानीं तत्, अन्यस्य वेदनस्याप्रवेदनात् ॥३३१॥
पश्चादेव तदस्तित्वे पश्चादपि न जायते।
यदा तदा कथं नाम तदित्थम्भाववेदनम् ॥३३२॥
विषये सति तज्ज्ञानं स्यादेव नियमाद्यदि।
तस्याप्यज्ञातसत्त्वस्य[10] तद्वित्त्वं कथमुच्यताम् ? ॥३३३॥
तस्यापि वेदनाद्वित्तिरन्यतश्चेत्प्रकल्प्यते।
न तदानीं तदन्यस्येत्यादि पूर्वप्रसञ्जनात् ॥३३४॥
चक्रकं भवतः प्राप्तमनवस्थाभयप्रदम्।
ततोऽनुमानं स्वाभासस्वभावमभिवर्ण्यताम् ॥३३५॥
ततः प्रतिज्ञाव्याघातः समाधातुं न शक्यते।
ततो नातिशयः क्वश्चिद्योगसौगतयोर्मिथः ॥३३६॥
तस्मात्प्रतीत्युपाध्यायैर्यथा वास्तु (वस्तु) प्रतीयते।
तथैवाभ्युपगन्तव्यं निर्मुच्याग्रहवैशसम् ॥३३७॥

---

१ आत्मवेदनस्य। २ "तस्मात् ज्ञानान्तरसंवेद्यं संवेदनं वेद्यत्वात् घटादिवत्"—प्रश० व्यो० पृ० २।२९। विधिवि०न्यायक०पृ० २६७। ३ अर्थग्रहणं बुद्धिरिति वचनम्। ४ स्वरूपस्य स्वतो गतिरिति वचनेऽपि। ५ अनुमानाविषयत्वे तु। ६ स्वसंवेदनात्मकं यदि। ७ अनुमानम्। ८ अन्यतो वेदनम्। ९ अन्यवेदनास्तित्वे। १० तद्वेदित्वम्।

अर्थवेदनवत्तस्मात्प्रतीतं स्वप्रवेदनम् ।
अशक्यमेवापह्नोतुमितरस्याप्यपह्नवात् ॥३३८॥

संवेदनानामन्यवेद्यत्वनियमानुमानं यदि स्वसंवेदनस्वभावम्, कथम् तन्नियमप्रविष्ठाव्याघातः ? न चेत् तत्स्वभावम्, तर्हि तदेवासिद्धसाध्यकं कथम् "अर्थग्रहणम्" [न्यायमा०] इत्यादेर्वचनस्यानुमाहकं परिकल्प्यताम् ? तदननुग्राहकत्वस्यापि परिकल्पनाप्रसङ्गात् । न ह्यनुपलम्भगोचरीकृतं किञ्चिद् 'इत्थमेव नान्यथा' इति शक्यमवस्थापयितुम्, भावेषु तदतद्भावव्यवस्थाया उपलम्भनिबन्धनत्वात् । अन्यथा उपलम्भस्यैव आनर्थक्यादितिप्रसङ्गाच्च । स्वत एव तद्वेदनमन्यतस्तु वेदन विद्यत एवेति चेत्, न, अनुमानेसमसमयस्य तस्याश्रवेदनात् । युगपद्वेदनोत्पत्तेरनभ्युपगमाच्च । पश्चादेव तद्वेदनमिति चेत्, न, पश्चादपि यदा तत्र जायते तदा कथन्वनुमानस्य इत्थम्भावीध्यवसायः स्यात् ? स्यादेवायम्, सति विषये तत्संवेदनस्यावश्यम्भावादिति चेत्, न, तस्याप्यविदितस्य अनुमानस्वरूपेत्थम्भावगोचरत्वानवगमात् । तस्याप्यन्यतो वेद्यत्वे चेत्, न, अनुमानसमेत्यादेरनुगमेन चक्रकोपनिपाताच्च । पुनरन्यतस्तस्यापि वेदनपरिकल्पनायाम् अनवस्थाप्रसङ्गः । ततोऽनुमानस्य विषयनियमं व्यवस्थापयितुकामेन स्वाभासस्वभावं तदभ्युपगन्तव्यमिति कथम् भवतोऽपि प्रतिहाव्याघातः ? यदिमौ अन्यथेष्टानन्यथेष्टनियमवादिनौ न परस्परमतिशयाते । तस्माद्विरक्तप्रत्ययोपाध्यायोपदर्शिते वर्त्मनि प्रयतमानैः प्रेक्षावद्भिः स्वरूपानुरागपरिमृदुपरिहारेण यथाप्रतीति भावतत्त्वमभ्युपगन्तव्यम् । प्रतीयते चार्थसंवेदनस्य संवेदनानामात्मसंवेदनमपि, तत्कथं शक्यापलापम् ? अर्थवेदनस्याप्यपह्नवेन ज्ञानव्यवोच्छेदप्रसङ्गात् । स्वपरपरिच्छेदविकलस्य ज्ञानत्वायोगात् मृदादिवत् । न च ज्ञानाभावे ज्ञेयमपि किञ्चित्, तदधीनत्वात्तदर्थव्यवस्थायाः इति विज्ञप्तेरेन सकलप्रलपनैरन्यवादिनः । उक्तम्—"ज्ञानाभावे कथं ज्ञेयं बहिरन्तश्च ते द्विधा ।" [आप्तमी० क्र० ३०] इति ।

एतेन परोक्षा बुद्धिरिति[1] प्रत्युक्तम्, अर्थस्यापि परोक्षस्यप्रसङ्गात् । अनुमत्रोपाह्नवात्तस्यैवेति चेत्, तदुक्तम्—"स हि बहिर्देशसम्बद्धः प्रत्यक्षतामनुभूयते"[शाबरभा० १।१।५] इति, तदसत्, अन्तर्देशसम्बद्धतया बुद्धेरपि प्रत्यक्षत पवानुभवात् । तदनुभवापलापे चार्थानुभवस्यापि[2]पलापात्र ज्ञानं नापि किञ्चिज्ज्ञेयमिति दुर्निवारः शून्यवादगर्तापातो मीमांसकस्य । न च ज्ञानानुभवाभावेऽर्थानुभवसिद्धिरिति करिष्यत एवात्र प्रबन्धः । तस्मादर्थवेदनान्यथानुपपत्त्या विज्ञानस्य स्वसंवेदनसिद्धिः ।

एतेन कापिलानामपि ज्ञानं व्याख्यातम्, तस्यापि स्वसंवेदनशून्यस्य अर्थवेदनत्वानुपपत्तेः । प्रतीतमर्थवेदनमिति चेत्, न, स्वसंवेदनस्यापि प्रतीतेः । सत्यम्, तस्यापि प्रतीतिर्न तु

---

१ अर्थवेदनवदपि । २ –नयमवत्व आ०, ब०, प०, स० । ३ अन्यथेदन्तस्य । ४ –ग्राह्यता–आ०, ब०, प०, स० । ५ –तैर्मत –आ०, ब०, प०, स० । ६ इत्थम्भवस्थाया । ७ "अर्थवेदना हि ग्रन्थप्रवृत्तिर्न बुद्धानरवेदया"…न ह्यक्षज्ञेयं बधिरबुद्धिगम्यते, ज्ञाते स्वयमुपलब्धेश्च । तस्माद्ग्रन्थता बुद्धिः ।" –शाबरभा० १।१।५ । ८ बुद्धिरिति शू–आ०, ब०, प०, स० । ९ ज्ञानवेद–आ०, ब०, प०, स० ।

वास्तवस्य, ज्ञानस्य प्राक्कृतत्वेनाचेतनस्य वस्तुतः स्ववेदनाभावात्, चेतनोपाधिसामर्थ्यात्तु चेतनायमानस्य तस्य स्ववेदनमौपाधिकमेव न वास्तवमिति चेत्; उच्यते—

उपाधिसिद्धं[1] चैतन्यं तत्कार्याय कथं क्षमम् ? ।
न मुखं मुखकार्याय दर्पणप्रतिबिम्बितम् ॥३३९॥
तत्कार्यकरणे वा-तदवस्तु कथमुच्यताम् ? ।
वस्तु कार्यक्षमं यस्मात्कथ्यते वस्तुवेदिभिः ॥३४०॥
कुर्वन्नपि भयं सत्यं[2] रज्जुसर्पो न वस्तु चेत् ।
नैतत्सारम्; भयाभ्यासादेव तस्य समुद्भवात् ॥३४१॥
सर्पज्ञानाद् भयाभ्यासेऽभिव्यक्ते हि भयं भवेत् ।
भयाभ्यासविहीनस्य तज्ज्ञानेऽपि[3] तदत्ययात् ॥३४२॥
सर्पस्यानुपयोगश्चेत्किं[4] तज्ज्ञानमपेक्ष्यते[5] ।
इति चेद् भयसंस्कारव्यक्तौ[6] तच्छक्तिदर्शनात् ॥३४३॥
तद्व्यक्तिरपि सर्पाच्चेत्; न; अवस्तुत्वादशक्तितः ।
गम्यते[7] तदवस्तुत्वमपि बाधकनिर्णयात् ॥३४४॥
तस्मादुद्बुद्धसंस्कारकार्यत्वेन विनिश्चितम् ।
न तत्सर्पाद्भयं नापि तज्ज्ञानादुपजायते ॥३४५॥
संस्कारस्य च वस्तुत्वमस्खलत्प्रत्ययार्पितम् ।
न शक्यमेवापह्नोतुं त्रिदिवाधिपतेरपि ॥३४६॥
तन्न कार्यक्षमं किंचिदवस्तु यदुपाश्रयात्[8] ।
अवस्तु ज्ञानचैतन्यमर्थवित्त्यै प्रकल्प्यते ॥३४७॥
किञ्च केनैष गन्तव्यो ज्ञाने[9] चैतन्यसन्निधिः[10] ।
न चैतन्येन तस्यात्मसंवित्त्यैव व्यवस्थितेः ॥३४८॥
न च ज्ञानेन चैतन्यस्यात्मनो वाऽपि वेदनम् ।
जडत्वात्, उभयाज्ञाने[11] ज्ञेयस्तत्सन्निधिः[12] कथम् ॥३४९॥
तस्मात्स्वसन्निधिज्ञाने चिच्छक्त्या यदि वेद्यते ।
ज्ञानस्यापि तया वित्तिः स्वरूपस्यैव कथ्यताम् ॥३५०॥
तद्वच्च बहिरर्थानां तयैव प्रतिवेदनात् ।
निष्प्रयोजनमेव स्यात्तदन्यज्ञानकल्पनम् ॥३५१॥

---

१ स्वसंवेद–आ०, ब०, प०, स० । २ – द्धचै–ता० । ३ सत्यं आ०,ब०,प०,स० । ४ सर्पज्ञानेऽपि । ५ –क्ति न ज्ञा–आ०, ब०, प०, स० । ६ सर्पज्ञानम् । ७ सर्पज्ञानशक्ति । ८ सर्पावस्तुत्वम् । ९ सदुपा–आ०, ब०, प०, स० । यदृष्टान्तात् । १० ज्ञानचैत–आ०,ब०,प०,स० । ११ उभयज्ञाने आ०, ब०, प०, स० । १२ ज्ञाने चैतन्यसन्निधिः ।

बहिर्धर्मग्रहे तस्या ज्ञानं चेत्साधनं भवम् ।
ज्ञानग्रहे परं ज्ञानं साधनं परिकल्प्यताम् ॥३५२॥
ज्ञानानामनवस्थैव कापिलाना प्रसज्यते ।
ज्ञानग्रहे विना ज्ञानादेवमर्थग्रहो न किम् ? ॥३५३॥
तन्न चैतन्यसंवेद्यो ज्ञाने चैतन्यसन्निधिः । ५
ज्ञानवेद्यः स चेज्ज्ञाने स्वसंवेदनमिष्यताम् ॥३५४॥
अन्यथा ज्ञानचैतन्यद्वयस्याप्रतिवेदनात् ।
तेन तद्द्वयसान्निध्यं दुर्वारं हि निवेदितम् ॥३५५॥
यदि तद्द्वयसान्निध्यमन्यज्ज्ञानेन वेद्यते ।
न तस्यापि जडत्वेन तद्विदो दौरूप्यसम्भवात् ॥३५६॥ १०
तस्यापि चितिसान्निध्याच्चित्प्रत्योपकल्पने ।
वेद्यं तदपि सान्निध्यं बोधस्यैवापरस्य यः ॥३५७॥
तत्राप्येवं विचारे स्यादनवस्थानवैशसम् ।
चिच्छक्तिसन्निधिज्ञान निर्मूलं यत्प्रकल्पते ॥३५८॥
ततश्चित्सन्निधिज्ञानमलुपाधि स्ववेदनम् । १५
ज्ञानत्वात्तद्वदन्यच्च सर्वं विज्ञानमुच्यताम् ॥३५९॥

तदिदं वचनं वस्तुस्वरूपमेवापि विषका कापिलैः (मविविच्य कापिलै) कथितम्–"तस्मात्तत्संसर्गादचेतनं चेतनावदिह लिङ्गम्" [सांख्यका० २०] इति। ततः सिद्धमनिन्द्रियप्रत्यक्षं तस्य स्ववेदनरूपत्वात्। तस्य चोक्तन्यायेन सर्वसंवेदनेषु साधितत्वात्।

अतीन्द्रियं तु प्रत्यक्षमविसंवादप्रमाण्याद्यर्थं लोकोत्तरं कालत्रयत्रिलोकाधिकरणनिरवशेषपदार्थतत्त्वसाक्षात्करणदक्षमतिशयमुत्कृष्टं ज्योतिः। तत्सद्भावे च प्रमाणं 'लक्षणम्' इत्यादौ, 'अन्यत्र च यथावसरं निरूपयिष्यते।

तदेवत् त्रिविधमपि प्रत्यक्षं द्रव्यादिभेदावस्तुगोचरमिति साधूक्तम्–'द्रव्यपर्यायसामान्यविशेषार्थात्मवेदनम्' इति ।

प्रत्यक्षं त्रिविधं देवैः दीप्यतामुपपादितम् ।
द्रव्यपर्यायसामान्यविशेषार्थात्मवेदनम् ॥३६०॥

कश्चिदाह–यदि साकारं निश्चयात्मकं प्रत्यक्षं सत एव निरपेक्षोपाधिगर्भस्य भावस्य निश्चयात् किं प्रमाणान्तरेण अपूर्वार्थाधिगमस्य तत्कर्तव्यताभावात्, समारोपव्यवच्छेदस्य च निश्चिते समारोपाभावेनासम्भवादिति, अत्रेदमाह–

---

१ चित्तत्वं । २ चैतन्यसंविदि । ३ दास्यं–आ०,ब०,प०, स० । ४–पि चेति आ०,ब०,प०,म० । ५ –मपि चित्सन्निधानं–आ०, ब०, प० ।–मपि चित्सन्निधानमपि–म० । ६ तद्धात्रे आ०, ब०, प०, स० । ७ स्याद्वादि० श्लो० १६८ । प्रमाणमी० श्लो० ९ । ८ चिच्चक्तम् आ०, ब०, प०, स० । देवैः दीपयद्भिर्नं त्रिविधं प्रत्यक्षं दीप्यताम् स्ववेद्यम् ।

सदसज्ज्ञानसंवादविसंवादविवेकतः ।
सविकल्पाविनाभावी समक्षेतरसम्भवः ॥४॥ इति ।

अस्यायमर्थः–सङ्गतम् इन्द्रियं कारणत्वेन यस्मिन् तत् संमक्षम् इन्द्रियप्रत्यक्षं तच्च इतरच्च प्रमाणान्तरमनुमानादि तयोः सम्भव एकविषयत्वेनोपसर्पणं **समक्षेतरसम्भवः**,'उपपद्यते'इति शेषः । कुत एतत् ? दृष्टत्वात् । न हि दृष्टमनुपपत्तिपर्यनुयोगस्य भूमिः; अतिप्रसङ्गात् । सत्यम्, प्रत्यक्षविषय एव प्रमाणान्तरसञ्चारो दृश्यते स त्वंपूर्वार्थाधिगमस्य समारोपव्यवच्छेदस्य च तत्प्रयोजनस्याभावात् निष्प्रयोजनः पर्यनुयुज्यत इति चेत् ; अत्राह–**'सविकल्पाविनाभावी'** इति । विकल्पो गृहीतेतरत्वेन निश्चितेतरत्वेन चार्थस्य कथञ्चिद्भेदः तदविनाभावी तज्ज्ञान्तरीयकस्तन्निबन्धनः स प्रस्तुतः तत्सम्भव इति ।

गृहीतश्चागृहीतश्च यदि प्रत्यक्षगोचरः ।
अपूर्वाधिगमस्तस्मिन् किन्न मानान्तरात्फलम् ॥३६१॥

निश्चितश्चेतरश्चैवमर्थश्चेदक्षगोचरः ।
तत्रारोपोपपत्तेस्तद्व्यवच्छेदः प्रमान्तरात् ॥३६२॥

न खल्वस्मदादिप्रत्यक्षं निरवशेषाभावोपाधिप्रतिपत्तौ समर्थम् ; विकलोपाधिविषयतयैव तस्यानुभवात् । ततस्तद्गृहीतावशिष्टस्य भावभागस्य भावात् तदुपग्रहप्रवृत्तस्य प्रमाणान्तरस्य अपूर्वार्थाधिगमान्न निष्प्रयोजनतया शक्यः पर्यनुयोगः । न च निश्चयात्मकत्वेऽपि प्रत्यक्षस्य ततः सर्वतद्विषयोपाधीनां निश्चयः; क्वचिन्निश्चयरूपस्यान्यत्रानिश्चयात्मनश्च परिच्छेदस्य ततः सम्भवात् । निश्चयात्मनः प्रत्यक्षात् कथमनिश्चयात्मा परिच्छेद इति चेत् ? न; एकान्तेन तस्य तदात्मकत्वाभावात् । कथं तर्हि व्यवसायात्मकं ज्ञानं प्रत्यक्षमित्युक्तमिति चेत् ? न; अभिप्रायापरिज्ञानात् । न ह्यनेन प्रत्यक्षाभिमतज्ञानस्य अनिश्चयरूपस्वभावान्तरप्रतिक्षेपः क्रियते, सत्यपि रूपान्तरे व्यवसायरूपापेक्षयैव तस्य प्रत्यक्षत्वं नेतरभागापेक्षयेति एवम्परत्वात्तद्वचनस्य । ततो निश्चयावशेषितस्यापि भावोपाधेर्भावान्न तद्विषयस्य प्रमाणान्तरस्य नैष्फल्यपर्यनुयोगः सुलभावकाश इति ।

स्यादाकूतम्–एतदेव विप्रतिपत्तिस्थानं यदेकस्य गृहीतेतरत्वेन निश्चितेतरत्वेन च विकल्प इति, तत्कथं तन्निबन्धनः समक्षेतरसम्भव इति ? तन्न; निश्चितस्य विप्रतिपत्तिस्थानत्वायोगात्, निश्चित एव तद्विकल्पो जैनवत् सौगतस्यापि । तदाह–**'सदसज्ज्ञान'**इत्यादि । सद् विद्यमानम् असद् अविद्यमानं च ज्ञानं ययोस्तयोर्विवेको निश्चयः सौगतस्यापि सदसज्ज्ञान-

---

१ –चमतीन्द्रिय–आ०, ब०, प०, स० । २ –जनं पर्य–आ०, ब०, प०, स० । ३ –दम्र –आ०, ब०, प०, स० । ४ –वशेषोपाधि–आ०, ब०, प०, स० । ५ प्रत्यक्षगृहीत । ६ प्रत्यक्षात् । ७ निश्चयात्मकत्वाभावात् । ८ लघी० का० ६० । "इदमनन्तरोक्तं स्पष्टं विशदं व्यवसायात्मकं ज्ञानम् । कथम्भूतम् ? स्वार्थसन्निधानान्वयव्यतिरेकानुविधायि प्रतिसंख्यानिरोध्यविसंवादकं प्रत्यक्षं प्रमाणं युक्तम् ।"–सिद्धिवि० टी० प० ९६ । ९ निश्चितावशिष्टस्य, अनिश्चितस्येत्यर्थः । निश्चयाविशेषि–आ०, ब०, प०, स० ।

विवेकः तस्मादस्ति वस्तुपु गृहीसेतरत्वेन विकल्प इति भावः । तत्र परमाणूनां नीलाद्याकारः सज्ज्ञानः तस्य प्रत्यक्षेण परिज्ञानात्, असज्ज्ञानस्तु तेषामेव परम्परया [1]विवेकः तस्य सतोऽपि प्रत्यक्षेणाग्रहणात्, अन्यथा स्थूलाकारप्रतिवेदनाभावप्रसङ्गात् ।

विवेकः परमाणूनां प्रत्यक्षे यदि भासते ।
स्थूलैकाकारनिर्भासाभाव एव प्रसज्यते ॥३६३॥ ५

न च नास्ति स निर्भासो निर्बाधत्वात् स्वप्रवेदनात् ।
तदभावे न किञ्चित्स्यादणुज्ञानाप्रवेदनात् ॥३६४॥

शून्यवादापवादश्च ननु पश्चाद्भविष्यति ।
तेनालमुत्सुकायित्वात् प्रस्तुते दीयतां मतिं ॥३६५॥

सतोऽपि स्थूलनिर्भासस्येन्द्रियत्वं न चेदसत् । १०
तस्यैवेन्द्रियजत्वं यद्वक्ति प्रज्ञाकरः स्फुटम् ॥३६६॥

"को वा विरोधः" [प्र० वा० २।२२३] इत्यादि कारिकाव्याख्याने खलु अर्थोद्धारकारेण—"यथैव केशा दूरीयसि देशेऽसंसक्ता अपि घनसन्निवेशावभासिनः परमाणवोऽपि तथेति न विरोधः" [प्र० वार्तिकाल० २।२२३] इति द्वयोनेन परिस्फुटमेव परमाणुषु घनसन्निवेशप्रतिभासस्य इन्द्रियजत्वमुक्तम् । विकल्परूपत्वे हि तस्यान्यदेव किञ्चिदिन्द्रियज्ञानम्, १५ तत्र च परमाणवः परिमण्डलाद्यवभासिन एवेति कथं घनसन्निवेशावभासिनो यतः 'परमाणवोऽपि' इत्यादि वचनमुपपन्नं भवेत् । विकल्पज्ञान एव ते घनसन्निवेशावभासिनो न इन्द्रियज्ञान इति चेत्, न, तस्य तद्रूपो परत्वात्, अन्यथा तेऽपि विवेकस्यावभासने [2]तद्वत्वप्रसङ्गः । अनवभासने [3]त्विन्द्रियज्ञानेऽपि अनवभासितविवेका एव ते घनसन्निवेशप्रतिभासिनो भवेयुरविशेषात् । तस्मादिन्द्रियम एव तन्निर्भासः [4]तत एव दूरविरलक्लेशघनसन्निवेशप्रतिभासस्य २० तथाविधस्यैव [5]निदर्शनत्वमुक्तम्, न केवलं विरलवस्तुनियन्धनत्वेन निदर्शनत्वादस्य तन्निर्भासस्य, अपि तु इन्द्रियजत्वेनापीत्यवधोतनार्थम् । ततो न परमाणूनां विवेकस्याप्यक्षेण ग्रहणं घनसन्निवेशस्यैव ग्रहणात् । [6]तदग्रहणे तदव्यतिरिक्तो नीलाद्याकारः कथं गृह्यत इति चेत् ? न, दर्शनादभ्युपगमाच्च । "हेतुभावादते नान्या ग्राह्यता नाम काचन" [प्र०वा० २।२२४] इत्यादि व्याख्यातं कुर्वता हि [7]"परेणोक्तम्–"परमाणूनामियं नीलाकारता" [प्र० वार्ति- २५ काल० २।२२४] इति । ततोऽवगम्यते [8]"तत्प्रत्यक्षत्वं तेनान्युपगतम्, अन्यथा 'इयम्' इति प्रत्यक्षनिर्देशानुपपत्तेः । गृहीतोऽपि [9]"तदाकारो भ्रान्त एव स्थूलाकारविवेदिति चेत्, न, 'परमाणूनाम्'

---

१ तत्र प्रमाणवस्तम् स० । २ मैत्रः । ३ –प्रतिभासे–आ०, ब०, प०, स० । ४ प्रमाणवार्तिकालङ्कारकृत्या । ५ –त्वेऽपि तस्य आ०, ब०, प०, स० । ६ विकल्पस्य । ७ परमाण्वविषयत्वात् । ८ विकल्पस्य परमाणु विषयत्वे । ९ विकल्पज्ञानेऽपि । १० घनसन्निवेशप्रतिभासानुपपत्तेः । ११ परमाणुविषयत्वे परमाणुमैत्रवभासने । १२ –गत एव आ०, ब०, प०, स० । १३ निदर्शनमुक्तम् आ०, ब०, प०, स० । १४ परमाण्वग्रहणे । १५ प्रज्ञाकरेण । १६ नीलाकारताप्रत्यक्षत्वम् । १७ नीलाद्याकारः ।

इति वचनात्। न हि स्वलक्षणस्वभावस्य भ्रान्तत्वम्; बहिरर्थवादाभावप्रसङ्गात्। न चार्यं व्यायान्, तद्वाद एव स्थित्वा "परमाणूनाम्" इत्यादिवचनात्। ततः सिद्धम्—परमाणुषु नीलाद्याकारस्य सत एव ग्रहणम्, अग्रहणं च विवेकस्येति सदसज्ज्ञानत्वं तयोः।

स्यान्मतम्—न विवेकाग्रहणं धर्मकीर्त्तेरभिप्रेतं सकलोपाधिवेदनस्यैव तदभिमतत्वात्। "तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः" [प्र० वा० ३।४४] इति वचनात्। नैं च तस्यानभिप्रेतं सौगतसिद्धान्ततया प्रत्येतव्यम्, तद्वचनमूलत्वात् तत्सिद्धान्तपरिज्ञानस्य। निबन्धनकारस्य तु सदपि विवेकापरिज्ञानवचनमनादेयमेव 'तस्मात् दृष्टस्य' इत्यादि प्रत्यनीकत्वात्। न हि तस्यैव शास्त्रं व्याचक्षाणस्य तन्मतविरुद्धं वचनमुपपन्नमिति; तदसत्; "न च ते बुद्धिगोचराः" [ ] इति धर्मकीर्तिनैव प्रतिपादनात्। अनेन हि विवेकरूपतयैव परमाणूनामबुद्धिगोचरत्वमुच्यते न नीलादिरूपतया; प्रतीतिबाधप्रसङ्गात्। कथं तर्हि तस्मादित्यादिकं तस्य वचनमिति चेत् भवत्वयं तस्य दोषः, परस्परविरुद्धाभिधानात्। न तावता विवेकाग्रहणं तस्यानभिप्रेतम्' इत्यवसीयते। ततः सिद्ध एव सौगतस्यापि गृहीतेतररूपतया भावभेदः निश्चितानिश्चितरूपतया च। तदाह—'संवादविसंवादविवेकतः' इति। संवादो निर्णय एव "नातः परो विसंवादः" [ ] इति वचनात्। तदभावो विसंवादः तयोरपि विवेक एकवस्तुविषयतया निश्चय एव जैनवत् सौगतस्यापि तद्भावात्। तथा हि—

नीलवत्क्षणभङ्गादेर्मनोऽध्यक्षादवेदने।
"एकस्यार्थस्वभावस्य" इत्यादि सूक्तं वचः कथम्? ॥३६७॥
वेदने तु ततस्तस्य निश्चयो यदि नीलवत्।
तत्रानुमानवैफल्यं तद्वदेव कथं न वः? ॥३६८॥
न गृहीतिर्गृहीतत्वान्निश्चितत्वान्न निश्चयः।
तस्यानुमानादन्यत्तु फलं तस्य किमुच्यताम्? ॥३६९॥
निश्चिते च समारोपो विरोधान्नोपजायते।
फलं यतोऽनुमानस्य तद्विच्छेदः प्रकल्प्यताम् ॥३७०॥
समारोपव्यवच्छेदमनुमानात्तदिच्छता।
वक्तव्यः क्षणभङ्गादेर्मनोऽध्यक्षान्न निश्चयः ॥३७१॥
तस्येव यदि नीलादेरपि तस्मान्न निश्चयः।
मानसं कथमध्यक्षं निश्चितं निश्चयात्मकम् ॥३७२॥

---

१ बहिरर्थवदभाव—आ०, ब०,प०,स०। २ बहिरर्थवादे। ३ नीलाद्याकार-विवेकयोः। ४ न तस्याभिप्रेतं आ०,ब०,प०,स०। ५ —त्वात्तस्ति—आ०, ब०, प०, स०। ६ प्रज्ञाकरस्य। ७ तस्मात् दृष्टस्य भावस्येत्यादि। ८ धर्मकीर्तेः। ९ —वोऽपि विसं—आ०, ब०, प०, स०। १० प्र०वा० ३।४२। ११ क्षणभङ्गादेः। १२ समारोपव्यवच्छेदः। १३ तस्यैव आ०, ब०, प०, स०। क्षणभङ्गादेरिव।

न हि किञ्चिदनिश्चिन्वत् युज्यते निश्चयात्मकम् ।
स्वापमूर्च्छादिवोचेऽपि संस्त्वस्यातिप्रसङ्गतः ॥३७३॥
नाप्येतन्निर्णयात्मत्वं मानसस्याप्रसिद्धिमत् ।
यतः प्रज्ञाकरस्येदमस्मिन्नर्थे वचः स्थितम् ॥३७४॥
"इदमित्यादि यज्ज्ञानमभ्यासात्पुरतः स्थिते । ५
साक्षात्करणतस्तत्र प्रत्यक्षं मानसं मतम् ॥ [प्र० वार्तिकाल० २।२४३] इति
इदमित्येवमुल्लेखाज्ञानान्योऽन्यत्रापि निर्णयः ।
स चेदस्ति मनोऽप्यक्षे सिद्धं तन्निर्णयात्मकम् ॥३७६॥

तस्यैव तैदात्म्यरूपं नीलादावेव न क्षणक्षयादौ इत्युक्तदोषत्वात् । ततो गृहीतावशेषितस्य निश्चितावशेषितस्य च भावभागार्थस्य भावाच्छब्दाय तन्निश्चयाय च प्रवर्तमानस्य प्रमाणान्तरस्य न १०
वैफल्यमिति साधूक्तम्–'सदसज्ज्ञान' इत्यादि ।

यदि वा यदुक्तमेन्यैः–'द्रव्यपर्यायं' इत्यादि युक्तम्, विरोधात् । अन्यथा हि द्रव्यस्य स्वभावः व्यतिरेकश्च पर्यायस्य, तयोश्च लक्षणतो विरोधात् कथमेकत्वम् ? सामान्यविशेषयोश्च, तयोरपि साहश्यवैसादृश्यरूपतया लक्षणतो विशेषस्य सुप्रसिद्धत्वात् । तत्कथं 'द्रव्यपर्यायसामान्यविशेषाणामेकत्वमर्थज्ञानयोर्यतस्तद्वेदनं प्रत्यक्षम्' इति । तत्रेदमाह–'सदसज्ज्ञान' इत्यादि- १५
सम्यक् सहचारिपरिहारेण लक्ष्यतेति व्याप्तोति स्वपर्यायानिति समस्तं द्रव्यम्, इतरे व्याप्तिविपर्ययात् पर्यायाः । अथवा, समरूपतया लक्ष्यते गम्यत इति समश्च 'तिर्यक् सामान्यम् । इतरे तद्रूपवैपरीत्याद् विशेषास्तेषां समश्चेतराणां सम्भवः । समित्यत्र्युपसर्गः एकत्वे, 'समर्थः' इत्यादौ दर्शनात्, 'एवः संवेदनम्, गत्यर्थस्य धातोर्ज्ञानार्थत्वात् । तदयमर्थः–समश्चेतराणां द्रव्यपर्यायाणां २०
सामान्यविशेषाणां चैकत्वेन वेदनम् । केनेति चेत् ? प्रत्यक्षलक्षणेन । पूर्वश्लोकादनुवर्तमानस्य तृतीयापरिणामेन सम्बन्धात् । इदमत्र पेदम्पर्यम्–न द्रव्यादीनामप्रतिपत्तौ तत्रैकत्वप्रतिषेधनमुपपन्नम्, अप्रतिपन्नप्रवेदे मशफप्रतिषेधस्याऽप्रवेदनात् । प्रतिपन्ना एव द्रव्यादय इति चेत्, कुतस्तत्प्रतिपत्तिः ? प्रत्यक्षादिति चेत्, ततस्तर्हि– २५

अन्विताननिवृत्तेन यथा भेदोऽवगम्यते ।
द्रव्यपर्याययोस्तद्वदभेदोऽप्यवसीयते ॥३७७॥
प्रत्यक्षेणोपलब्धोऽपि यथभेदो विरुध्यते ।
विरुध्येतैव भेदोऽपि तद्विश्लेषानपेक्षणात् ॥३७८॥
ततश्च भावनैरात्म्यप्रवादो दुरुत्सृजो भवेत् ।
तपपत्तिं तत्रापीत्येतदपि वक्ष्यते ॥३७९॥

---

१ निश्चयात्मकत्वलक्षणस्य प्रस्तावात् । सत्त्वस्यापि प्रस–आ०, ब०, प०, स० । २ मनोऽप्यत्र । ३ निर्णयात्मकत्वम् । तदप्यत्र आ०, स० । ४ –स्व च मा–आ०, ब०, प० । ५ कीदृशं । तत्वसं० पृ० ११८, ४९९ । हेतुबि० टी० पृ० ९८ । ६ –दि मु–आ०, ब०, प०, स० । ७ –वैसार–आ०, ब०, प०, स० । ८ "करणरीत्यभिधेयं सञ्चयुक्तादिषु गौत्ववत्"–परीक्षामु० ३।१ ।

कुतः पुनरेतदवगतम्—'द्रव्यपर्यायतादात्म्यं प्रत्यक्षतोऽवगम्यते' इति ? तत्राह—**सविकल्पाविनाभावी** । स तत्सम्भवो विशेषेण संशयादिव्युदासेन कल्पनं समर्थनं विकल्पो निर्णय इति यावत्, तदविनाभावी तन्नान्तरीयकः तदात्मकत्वात् । एतदुक्तं भवति—प्रत्यक्षप्रयुक्तो हि तत्सम्भवो निर्णयस्वभावः ततस्तस्य तत्तादात्म्यावगमरूपत्वं स्वत एव निश्चितमिति किं तन्निश्चयार्थेन प्रमाणान्तरेणेति ? कथमेवं तत्र विप्रतिपत्तिः? न हि प्रत्यक्षत एव तत्तादात्म्यावगमे तत एव च तस्य तद्विपर्यत्वनिर्णये तत्र कस्यचिद्विप्रतिपत्तिर्भवितुमर्हति निर्णयस्य विप्रतिपत्तिप्रत्यनीकत्वात् । दृश्यते च तत्रानेकधा विप्रतिपत्तिः प्रवादिनामिति चेत्; न; शास्त्रान्तरसंस्कारविकलानां तदभावात् । न हि कुण्डलिनस्य प्रसारितस्य च पन्नगपतेरेकत्वे तद्विपर्यत्वे च प्रत्यक्षस्य तेषां विप्रतिपत्तिः सर्वेषां तत्रैकवाक्यत्वोपलम्भात् । तर्हि तान्प्रति शास्त्रमनर्थकमेव, स्वत एव विप्रतिपत्त्यभावे तन्निवर्तनस्य शास्त्रफलस्याभावादिति चेत्; न; तान्प्रत्यन्यपरत्वाच्छास्त्रस्य । ते हि कुतश्चित्प्रत्युत्पन्नशरीरेन्द्रियविषयनिर्वेदा मुमुक्षुतया मोक्षमार्गप्रश्नेन विदिततन्मार्गतत्त्वं देवं सप्रश्रयमुपपन्नास्तेन च सम्यग्ज्ञानं तन्मार्गमुक्ताः पृच्छेयुः 'किं तत् सम्यग्ज्ञानम्' इति ? तत्र सम्यग्ज्ञानव्यवहारविषयोपदर्शनाय तत्प्रसिद्धमेव द्रव्यपर्यायस्वभावपदार्थगोचरं प्रत्यक्षादिज्ञानं शास्त्रेणानूद्यत इति कथमनर्थकत्वं तस्य ? तत एव कैश्चिदुक्तम्—"**प्रमाणानुवादः**" [ ] इति । प्रवादिनां तु विद्यन्त एव विप्रतिपत्तयः । न चैतावता स्वविषयनिर्णयस्वभावरहितमेव प्रत्यक्षम्, निर्णीतेऽपि विषये कुतर्काभियोगवशात् अन्तरङ्गादपि दोषोपप्लवात् मन्दप्रज्ञानां विप्रतिपत्तिविधानोपपत्तेः, अन्यथा सकलप्रतिपत्तृनिश्चयाधिष्ठाने बहिर्विषयौ[1] विप्रतिपत्तिविरहाद् विज्ञानवादादिविकलं सकलं जगत्प्राप्नोति । तासां च विप्रतिपत्तीनां क्वचित् स्वमतानुरागविषमग्रहव्यापत्तिविकलेषु तत एव वचनमात्रोपसूचितान्निर्णयात्मनः प्रत्यक्षान्निवृत्तिरिति मन्वानेनेदमभिहितम्—'**सविकल्पाविनाभावी**' इति । येषां तु बलवती स्वमतपक्षपातिनी मतिः तेषामपि तत एव प्रत्यक्षस्य विकल्पाविनाभावित्वात् यथाविहितवस्तुनिर्णयस्वभावापरव्यपदेशाद् अनुमानव्यवस्थापिताद् विप्रतिपत्तिव्यावृत्तिः, न च निर्णयरूपत्वाविशेषात् अध्यक्षनिर्णयवत् अनुमाननिर्णयस्यापि विप्रतिपत्तिविषयत्वेन तदपरानुमानव्यवस्थायामनवस्थानम्; स्वप्रसिद्धनिदर्शनबलोपनीतत्वेनानुमाननिर्णयस्य अशक्यविप्रतिपत्तिमलोपलेपत्वात् । तच्चेदमनुमानम्—विवादाध्यासितं प्रत्यक्षम् अन्वयव्यतिरेकबद्वस्तुनिश्चयरूपं प्रत्यक्षत्वात् । किमत्र परप्रसिद्धमुदाहरणम् ? सदसज्ज्ञानप्रत्यक्षम् । तदाह—'**सदसज्ज्ञानविवेकतः**' इति । सच्च[2] गृहम् असच्च तद्विशेषणं देवदत्तादिर्वैकल्यं तयोर्ज्ञानं तस्य विवेकः प्रत्यक्षेण निर्णयः । ततस्तमुदाहरणत्वेनाश्रित्य सविकल्पाविनाभावीति । एकं हि प्रत्यक्षज्ञानं देवदत्ताभाववद्विशिष्टगृहविषयमुपजायमानं विशेषणप्रतिभासाद्विशेष्यप्रतिभासस्य तत्प्रतिभासाच्च विशेषणप्रतिभासस्य नीलपीतप्रतिभासवद् अर्थान्तरत्वाद्तु-

---

१ प्रत्यक्षस्य । २ द्रव्यपर्यायतादात्म्य । ३ स्वस्य । ४ विवादाभावात् । ५ प्रवादिनाम् । ६ –ज्ञानस्य व्यव–आ०, ब०, प०, स० । ७ –यादौ प्रति–आ०, ब०, प०, स० । ८ –समतानु–आ०, ब०, प०, स० । ९ "प्रत्यक्षादिति पाठः"–ता० टि० । १० 'देवदत्ताभाववद् गृहम्' इत्यत्र ।

अथाकारं परस्यापि प्रसिद्ध्यम्। तथा च विशेषस्य वचनम्–"तसोऽपि विशेषणविशेष्यत्वेन प्रतिभासाद्भावगृहयोरेकज्ञानावलम्बनत्वम्" [ ] इति। तच्च[1] तदुभयप्रतिभासलक्षणाकारापेक्षया सत्यतिरेकम्, सदाकाराधिष्ठानसंवेदनापेक्षया तु सान्त्यम् इत्यन्वयव्यतिरेकवद्वस्तुस्वभावमिति सिद्धं तद्विषयस्य स्वसंवेदनस्यान्यस्य वा प्रत्यक्षस्यान्वयव्यतिरेकवद्वस्तुनिर्णयरूपत्वमिति[2] साध्यावैकल्यमुदाहरणस्य। ५

अथवा, सामान्यविशेषज्ञानसत्र उदाहरणम्। तथाहि–'सदसज्ज्ञानविवेकतः' इति। सीदति स्वविशेषव्यापकत्वेन गच्छतीति सत्, न सीदति विजातीयविशेषव्यापकत्वेन न गच्छतीत्यसत्। सच्चासावसच्च सदसत्[3] सामान्यविशेष इत्यर्थः। प्रसिद्ध्यायमर्थः परस्य। तथा च "सामान्यं विशेष इति बुद्ध्यपेक्षम्" [वैशे० सू० १।२।३] इति। अत्र भाष्यम्–"तत्रैकं गोत्वं बुद्धिवशात्सामान्यं विशेष इति[4] व्यवस्थ्यते, अनुवृत्तबुद्धिहेतुत्वात्सामान्यं व्यावृत्तबुद्धिहेतुत्वाद्विशेषः।" [ ] इति। तस्य ज्ञान तत्प्रत्यक्षं सदसज्ज्ञानं तस्य विवेको निश्चयः। तस्मादुदाहरणात् सविकल्पाविनाभावीति। तथा हि– १०

यत्सामान्यविशेषस्य व्यावृत्त्यनुगमात्मनः।
विनिश्चायकमभ्यक्षं काणादस्य प्रसिद्धिमत् ॥३८०॥
तदुदाहरणादन्यदपि प्रत्यक्षमञ्जसा। १५
व्यावृत्त्यनुगमात्मार्थनिश्चयाङ्गं निबुध्यताम् ॥३८१॥

स्यान्मतम्–गोत्वस्यान्यस्य वा सामान्यरूपमेव वस्तुमत् न विशेषरूपं तच्च परमुपचारात्, ततो न वस्तुसञ्चाव्यावृत्त्यनुगमात्मनिर्णयरूपत्वं तत्प्रत्यक्षस्य। ततः साध्यावैकल्यमुदाहरणस्य, तथा च "द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च" [वैशे० सू० १।२।५] इति। अत्र भाष्यम्–"तत्र द्रव्यत्वमनेकवृत्तित्वाद्बुद्ध्या सामान्यं सत् व्यावृत्तप्रत्ययहेतुत्वादौपचारिकीं विशेषाख्यामपि लभते" [ ] इति। २० तत्रेदमुच्यते–कः पुनरसौ विशेषो द्रव्यत्वे यस्योपचारः क्रियते? गुणकर्मभ्यो व्यावृत्तत्वमिति चेत्, न; तस्य मुख्यत्वेन भावात्, अन्यथा तदुव्यावृत्तप्रत्ययस्यैवानुवृत्तप्रसङ्गात्, तस्य तद्विशेषनिबन्धनत्वात्। उपचारसिद्धात्तद्विशेषाच्चप्रत्यय इति चेत्, न, तत्प्रत्ययाभावे तदुपचारस्यैवायोगात्। तदय परस्पराश्रयः–व्यावृत्तप्रत्ययाद्विशेषोपचारः, तदुपचाराच्च तत्प्रत्यय २५ इति। यदि च द्रव्यत्वस्य गुणकर्मभ्यो व्यावृत्तत्वमौपचारिकम्, तर्हानुवृत्तत्वं तर्हि पारमार्थिकं मिति गुणकर्मणामपि द्रव्यत्वोपचारः मुख्यव्यवस्थितो द्रव्यादिभेदः स्यात्। पृथिव्यादिष्वनुवृत्तिरेव

---

१ देवदत्तप्रभवत्व एहमिति ज्ञानम्। २–३ न सान्यादिनै–भा०, ब०, प०, स०। ३ पृथिवीत्वादिकमिति०। ४ "अपरं द्रव्यगुणकर्मभ्यो अनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं विशेषश्च भवति। एवं पृथिवीतरत्वादीनां वयस्त्वोत्पटत्वपटत्वादीनामपि प्राच्यप्रत्यिग्रत्वानानुवृत्तिप्रत्ययहेतुत्वात् सामान्यविशेषभावः सिद्धः।"–प्रश०भा० पृ० ३६५। ५ ओदने भा०, ब०, प०, स०। ६ "एतानि तु द्रव्यत्वादीनि पृथ्वादिषु वर्तमानत्वात् प्रथमान्येन सामान्यानि, स्वप्रत्ययविशेषकत्वाच्च विशेषाख्यानीति।"–प्रश०भा०पृ०१६६। ७ गुणकर्मभ्यो द्रव्यं व्यावृत्तमिति प्रत्ययस्य। ८ गुणकर्मसामान्यादिभिन्नत्वात्। ९ गुणकर्मसामान्यस्य।

तस्य गुणकर्मभ्यो व्यावृत्तिर्नापरेति चेत्; गुणकर्मभ्यो व्यावृत्तिरेव तस्य पृथिव्यादिष्वनुवृत्तिर्नापरेत्यपि कस्मान्न स्यात्? अनुवृत्तप्रत्ययेन पृथगेवानुवृत्तेर्व्यवस्थापनादिति चेत्; न; व्यावृत्तप्रत्ययेनापि पृथगेव व्यावृत्तेर्व्यवस्थापनप्रसङ्गात्। व्यावृत्तप्रत्ययोऽपि नापरोऽनुवृत्तप्रत्ययात्। तथा च भाष्यम्–"कः पुनर्द्रव्यत्वनिमित्तो द्रव्यस्यानुवृत्तप्रत्ययः? 'द्रव्यं द्रव्यम्' इति। व्यावृत्तप्रत्ययोऽपि स एव" [ ] इति। तत्कथमसिद्धादेव व्यावृत्तप्रत्ययात् पृथग्व्यावृत्तेर्व्यवस्थापनमिति चेत्; न; वचनमात्रात् तत्प्रत्ययापलापस्य दुरुपपादत्वात्, अनुवृत्तप्रत्ययस्याप्यपलापस्य प्रसङ्गात्। शक्यं हि वक्तुम्–कः पुनः द्रव्यत्वनिमित्तः पृथिव्यादिषु व्यावृत्तप्रत्ययः? रूपाद्युत्क्षेपणादिविलक्षणाः पृथिव्यादय इति, द्रव्यमित्यनुवृत्तप्रत्ययोऽपि स एव, इति। पृथगेवानुवृत्तप्रत्ययोऽनुमूयत इति चेत्; न; व्यावृत्तप्रत्ययस्यापि पृथगेवानुभवात्। व्याहतश्चैतत्–अनुवृत्तप्रत्ययस्यैव व्यावृत्तप्रत्ययत्वमिति, नीलप्रत्ययस्यैव तदपरसकलपदार्थप्रत्ययत्वप्रसङ्गात्, एवञ्च सर्वस्य सर्ववेदित्वमुपायाभियोगनिरपेक्षमेव भवेत्। नीलात् तदपरसकलपदार्थजातस्य अर्थान्तरत्वान्नायमतिप्रसङ्ग इति चेत्; अनुगमाद्व्यावृत्तेरनर्थान्तरत्वं कस्मात्? अनुगमप्रत्ययस्यैव व्यावृत्तप्रत्ययत्वादिति चेत्; तदपि कस्मात्? अनुगमाद्व्यावृत्तेरनर्थान्तरत्वादिति चेत्; न; सुव्यक्तत्वात्परस्पराश्रयस्य। न च विषयवशात् प्रतीतिव्यवस्था; प्रतीतेः प्राक् विषयस्यैवासिद्धेः। प्रतीतिश्चानुवृत्तप्रतिभासवती व्यावृत्तप्रतिभासवती च भिन्नाकारैवेति कथन्न ततस्तद्विषयभेदसिद्धिः। युगपद् बुद्धिद्वयं न प्रतिभासत इति चेत्; नीलपीतयोरपि युगपद्ग्रहणे बुद्धिद्वयं न प्रतिभासते एव। मा भूत् बुद्धिद्वयमिति चेत्; किं तर्हि स्यात्? एकैव बुद्धिरिति चेत्; सा यदि नीलविषयैव कुतः पीतप्रतिभासनम्? न कुतश्चिदिति चेत्; न; नीलेऽप्यपरापरावयवानामेकावयवग्रहणेनाऽग्रहणप्रसङ्गात् अखण्डैकावयवग्रहणमेवावशिष्येत। न च तस्योपलब्धिरिति प्रतिविषयज्ञानभेदवादिनां निःशेषप्रतीतिविलोप एव स्यात्। अवयविप्रतीतेः नैवमिति चेत्; न; अवयवाप्रतीतौ तदप्रतीतेः। अतिबहलान्धकारवेलायामप्रतीतावयवैवावयविप्रतीतिरिति चेत्; न; तदापि मध्यपार्श्वादिभागैप्रतिपत्तेरवश्यम्भावात्, अन्यथा पशुमनुष्यादिविभागैपरिज्ञानप्रसङ्गात्। अस्ति च तदवस्थायां तत्परिज्ञानम्। तन्न अवयवप्रतिपत्तिविकला क्वचिदप्यवयविप्रतिपत्तिरिति दुरपवाद एव सकलप्रतीतिविलोपः प्रत्यर्थनियतज्ञानवादिनाम्।

अस्तु तर्हि नीलबुद्धिरेव पीतविषयेति चेत्; न; नीलाभिमुखेनैव रूपेण तस्यास्तद्विषयत्वविरोधात्, तदपरनिरवशेषपदार्थविषयत्वातिप्रसङ्गस्याभिहितत्वात्।

एतेन तारानिकुरम्बस्यैकज्ञानवेद्यत्वं प्रत्युक्तम्; एकज्ञानस्यैकताराभिमुखेनैव रूपेण तारान्तरविषयत्वानुपपत्तेः। तथा च सदसद्वर्गः कस्यचिदेकज्ञानालम्बनम् अनेकत्वात् तारानिकुरम्बवदिति न निदर्शनम्, साध्यविकलत्वात्। अस्त्येव तर्हि पीताभिमुखमपि रूपं तद्बुद्धे-

---

१ अनायासम्। २ अनुगमप्रत्ययस्यैव व्यावृत्तप्रत्ययत्वे अनुगमाद् व्यावृत्तेरनर्थान्तरत्वम्, तस्मिंश्च अनुगमप्रत्ययस्य व्यावृत्तप्रत्ययत्वमिति। ३ अखण्डैकावयवस्य। ४–वयवावय–आ०, ब०, प०, स०। ५–गप्रतीतेर–आ०, ब०, प०, स०। ६–गादिपरि–आ०, ब०, प०, स०। ७ नीलादिमुखे–आ०, ब०, प०, स०।

रिति चेत्, सिद्धं तर्हि द्रव्यत्वादिसामान्यप्रत्ययस्यापि अनुवृत्तस्यापिमुखादन्यदेव व्यावृत्तरूपाभिमुखं रूपम्, अन्यथा तस्य तद्विषयस्यायोगादिति न सर्वथा अनुवृत्तप्रत्ययादनर्थान्तरमेव व्यावृत्तप्रत्ययः, तथात्वे वा "गोत्वमनुवृत्तबुद्धिहेतुत्वात् सामान्यम्" [ ] इत्येतदेव भाष्यमर्थवत् सामान्यस्य तदनुवृत्तेरेव तद्विषयस्य भावात्, "व्यावृत्तबुद्धिहेतुत्वाद्विशेषः" इति तु नार्थवत् विशेषस्य तद्व्यावृत्तेरेव तद्विषयस्याभावात्। अनुवृत्तादिभाष्यस्यैव व्यावृत्तादि- ५
भाष्येण व्याख्यानमिति चेत्, न, अवाचकत्वात्। न ह्यनुवृत्ततत्प्रत्ययपदार्थयोः व्यावृत्ततत्प्रत्ययपदे[3] वाचके। न चाचार्येण व्याख्यानम्, तस्य व्यामोहत्वात्, ततः प्रत्ययभेद एव भाष्यभेदोपपत्तिर्नान्यथा। तदयम् 'अनुवृत्तबुद्धि' इत्यादिना भाष्येण अनुवृत्तव्यावृत्तप्रत्यययोर्भेदमाचक्षाण एव 'कः पुनः' इत्यादिना तयोरभेदमेवाचष्ट इति कथमनुन्मत्तः आत्रेयः? तत्र व्यावृत्तरूपस्य विशेषस्योपचारः। एकवृत्तित्वं विशेषो द्रव्यत्वस्योपचर्यते "एकवृत्तिर्विशेषः" [ ] इति तद्भाष्यादिति चेत्, न, तस्यापि मुख्यस्यैव भावात्। १०
अनेकवृत्तिनि कथमेकवृत्तित्वमिति चेत्? न, तस्य श्लेषे कुडवत् अनेकवृत्तिनि सम्बन्धप्रमाणसिद्धत्वात्, अथवृत्तस्यासिद्धिरेव, न ह्यनेकवृत्तिन 'एकवृत्तित्वमेव' इत्यवृत्तमेकवृत्तित्वं सिद्धमिति चेत्, कः पुनरवधारणार्थः? व्यावृत्तिरन्यत इति चेत्, सैव तर्हि विशेषो नैकवृत्तित्वमात्रम्, सा चैकवृत्तिवदनेकवृत्तिन्यपि भवन्ती विशेषः कस्मान्न भवेदविशेषात्? १५
एकवृत्तित्वोपादिरेव 'सा विशेषव्यपदेशाय कल्प्यते नानेकवृत्तित्वोपाधिकेति चेत्, कुत एतत्? सत्यसामान्ये सत्यपि तस्यां विशेषव्यपदेशादर्शनादिति चेत्; न, द्रव्यत्वादिषु विशेषव्यपदेशस्य तत एव दर्शनात्। ततो न विशेषोपचारस्य किञ्चित्प्रयोजनं मुख्यत एव विशेषात्सकलव्यवहारानां निष्पत्तेः। तस्मान्मुख्यत एव द्रव्यत्वे अनुवृत्तव्यावृत्ताकारद्वितयोपपत्तौ तदात्मकस्य अन्वयव्यतिरेकवद्वस्तुनिश्चयरूपत्वेन साध्यधर्मस्यानुपपत्तेः उपपन्नमेतत् २०
'अन्वयव्यतिरेकवद्वस्तुनिश्चयस्वरूपं प्रत्यक्षं प्रत्यक्षात्मात्, द्रव्यत्वसामान्यविशेषप्रत्यक्षवत्' इति।
न चेदनुमन्तव्यम् अप्रसिद्धमुदाहरणम् द्रव्यत्वस्याप्रत्यक्षविषयत्वात्, अन्यथा अनुमानेन तदवस्थानायैफल्यादिति, "प्रत्यक्षत्वेऽपि तस्य स्वनिर्णयार्थमनुमानमिति परैरभ्युपगमात्। तथा च भाष्यम्-"भवतु वा द्रव्यत्वं प्रत्यक्षं तथाप्यनुमानोपन्यासः दार्ढ्यार्थं इत्यदोषः" [ ] इति। २५

अथवा, संशयप्रत्यक्षम् अप्रोदाहरणम्, तदाह-'सधादविसंवादविवेकतः' इति। संवादविषयत्वात् संवादो योऽसद्भावः विसंवादो विशेषः, सद्विषयत्वात्तद्धर्मी संवाद-विसंवादौ अवधारणानध्यवसायौ संवादाविसंवादौ बोधनिष्ठौ निर्णयानिर्णयौ धर्मौ तयोर्विवेकः तत्प्रत्यक्षेण निश्चयः तस्मात् सविकल्पाविनाभावीति। तथा च प्रयोग -प्रत्यक्षम्

---

१ व्यावृत्तप्रत्ययस्य अनुवृत्तप्रत्ययाभिन्नतौ अनुवृत्तप्रत्यये एव अवधिप्यमाणे। २-प्रत्यक्षमाद्रियन्ते आ०, ब०, प०, स०। ३ "प्रत्ययाद्रियन्ते"-ता० टि०। ४ एकवृत्तित्वकपरिणतत्वादि। ५ प्रत्ये चतुष्प्रदेशक -आ०, ब०, प०, स०। ६ अनन्ती व्याप्तिः। ७ अनन्ति वि-आ०, ब०, प०, स०। ८ व्याप्ती व्याप्तिः। ९ अनन्ती व्याप्ती। १० प्रत्यक्षेऽपि आ०, ब०, प०, स०। ११ -मंशो धर्मी आ०, ब०, प०, स०।

अन्वयव्यतिरेकवद्वस्तुनिर्णयरूपं प्रत्यक्षत्वात् संशयप्रत्यक्षवत्। अन्वयवत्त्वञ्च संशयवस्तुनो बोधरूपेण तस्य व्यतिरेकस्वभावव्यापित्वात्, व्यतिरेकवत्त्वञ्च निर्णयानिर्णयरूपाभ्यां तयोः परस्परतो व्यावृत्तेः। प्रसिद्धं चैतत्परस्यापि। तथा च संशयलक्षणसूत्रे[1] भाष्यम्–"तत्रायमूर्ध्वतासामान्यविशिष्टस्य धर्मिणोऽवधारणं निर्णयः स्थाणुर्वा पुरुषो वेति विशेषानवधारणं संशयः, एक एव प्रत्ययः।" [ ] एकस्यावधारणानवधारणात्मकत्वानुपपत्तिरिति चेत्; दृष्टत्वादप्रतिषेधः। दृष्टमिदम्–एकं ज्ञानं सामान्यविशिष्टस्य वस्तुनोऽवधारणं सद्विशेषानवधारणात्मकं यथा स्थाणुर्वा पुरुषो वेति। दृष्टस्य चापह्नवो न युक्त इति। तन्न संशयप्रत्यक्षस्य साध्यविकलत्वम्।

आदर्शमुखज्ञानप्रत्यक्षम् अत्रोदाहरणम् अनेनैव प्रतिपादितं प्रतिपत्तव्यम्। तत्रापि संवादनविषये मुखज्ञाने परस्परप्रत्यनीकतया विसंवादविषययोः सम्यङ्मिथ्याप्रतिभासयोः तत्प्रत्यक्षेण निश्चयतः साध्यवैकल्यदोषानवकाशात्। प्रयोगश्चात्र–'प्रत्यक्षम् अनुगमव्यतिरेकात्मकवस्तुनिर्णयस्वभावं प्रत्यक्षत्वात् आदर्शमुखज्ञानप्रत्यक्षवत्' इति। 'आदर्शमुखज्ञानमनुगमव्यावृत्तरूपम्' इत्यविप्रतिपत्तिस्थानमेव वैशेषिकस्य। सम्यङ्मिथ्याप्रतिभासयोः परस्परव्यावृत्तयोर्बोधात्मना तेन व्याप्तेः स्वशास्त्रप्रसिद्धत्वात्। तथा च "आत्मेन्द्रियार्थसन्निकर्षात्" इत्यादौ भाष्यम्–"तत्रादर्शादिषु मुखम्' 'अभिमुखं मुखम्' इति च भ्रान्तः प्रत्ययो मुखमित्येतावता सम्यक्" इति। ततः स्थितम् अनन्तरोक्तादनुमानात् परप्रसिद्धनिदर्शनबलोपबृंहितात् प्रत्यक्षस्य विकल्पाविनाभावित्वनिश्चये तदेवोपवर्णितस्वभावं समक्षेतरसम्भवमवस्थापयत् प्रवादिनां विप्रतिपत्तिमलं प्रक्षालयितुं क्षमत इति। तन्न प्रत्यक्षस्य निश्चयात्मकत्वेऽपि प्रमाणान्तरशब्दान्तरवैफल्यम्, भावस्य सांशत्वेन प्रत्यक्षापरिच्छिन्नस्यापि तद्भागस्य तद्विषयत्वोपपत्तेः, प्रत्युत निरंशवस्तुवादिनामेव तद्वैफल्यं विषयाभावात् प्रत्यक्षेणैव सर्वात्मना भावस्य परिच्छेदात्। न भावपरिच्छेदात् प्रमाणान्तरस्यानुमानस्य शब्दस्य वा साफल्यम् अपि तु समारोपव्यवच्छेदादिति चेत्; कोऽयं समारोपो नाम? अतस्मिन् तदध्यवसायी विकल्प इति चेत्; ननु न तस्य निर्विकल्पकमेव रूपम् "अभिलापसंसर्ग" [न्यायवि० पृ० १३] इत्यादिवचनस्य निर्विषयत्वप्रसङ्गात्। नापि विकल्पकमेव; "सर्वचित्तचैत्तानाम्" [न्यायवि० पृ० १९]" इत्यादिवचनव्यापत्तेः। उभयरूपत्वे च तद्भेदेन तदात्मनो ज्ञानस्य भेदो वा स्यात्; अभेदो वा? यद्यभेदः; तदानीम् अक्रमवत् क्रमेणापि सत्यपि विरुद्धधर्माध्यासे भावस्य कथञ्चिदेकत्वमविरुद्धं भवेत्। वक्ष्यते चैतत्–"विरुद्धधर्माध्यासेन स्याद्विरुद्धं न सर्वथा।" इति"।

---

१ "सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः।" –वैशे० सू० २।२।१७। २ आत्रेयकृतम्। ३ "आत्मेन्द्रियार्थसन्निकर्षात् यन्निष्पद्यते तदन्यत्।" –वैशे० सू० ३।१।१८। ४ तत्रादर्शनादि–आ०, ब०, प०, स०। ५ मुखमिदं च भ्रा–आ०, ब०, प०, स०। ६ –यन् प्र–आ०, ब०, प०, स०। ७ प्रमाणान्तरशब्दान्तरविषयतोपपत्तेः। तद्विषयोप–आ, ब०, प०। ८ "अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना"–न्यायवि० पृ० १३। ९–पि निर्विक–आ०,ब०,प०,स०। १० "सर्वचित्तचैत्तानामात्मसंवेदनम् (स्वसंवेदनम्)" –न्यायवि० पृ० १९। ११ न्यायवि० श्लो० १२६।

तथा च तदेकत्वज्ञानम् अविपरीतार्थविषयत्वात् कथमध्यारोपः ? यतोऽनुमानात्तद्व्यवच्छेदः, तदभावे च कथं तस्य प्रामाण्यम् ?

विरुद्धधर्माध्यासेऽपि निर्विकल्पेतरात्मना ।
तदात्मनश्चेद्दोषस्यामेद एव प्रतीतितः ॥३८२॥

तद्वदेव क्रमेणापि प्रतीतेरनुपप्लवात् । ५
विरुद्धधर्माध्यासेऽपि भावैकत्वं न मुच्यति ॥३८३॥

एकत्वज्ञानमेवं चाविपरीतार्थगोचरम् ।
अध्यारोपः कथं तस्य व्यवच्छेदोऽनुमाबलात् ॥३८४॥

नाध्यारोपव्यवच्छेदाज्ञापि वस्तुग्रहात्तत । १०
प्रामाण्यमनुमानस्य स्याद्वादन्यायविद्विषाम् ॥३८५॥

एतदेवाह 'एकत्र' इत्यादिना[1]—

[एकत्र निर्णयेऽनन्तकार्यकारणतेक्षणे ।
अतद्धेतुफलापोहे कृतस्तत्र विपर्ययः ॥ ५॥]

एकत्र एकत्वे '[2]बुद्धेः' इति शेषः । भावघनस्य निर्देशः । तस्मिन् किम् ? इत्याह–अनन्तकार्यकारणता । कारणं प्रमाणमित्यर्थः । "हेतुरपदेशो लिङ्गं निमित्तं १५
प्रमाणं कारणमित्यनर्थान्तरम्" [वैशे० सू० ९।२।४] इति वैशेषिकाणां सूत्रदर्शनात् । कारणस्य भावः कारणता, प्रामाण्यमिति यावत् । तत्प्रतिषेधोऽकारणता प्रामाण्याभाव इत्यर्थः । कस्य ? अनन्तकारिणः । अन्तो विनाशः, प्रक्रमवशात् समारोपस्येति गम्यते, तं करोतीति क्षिप् तत्कारि न तत्कारि अनन्तकारि तस्य अनुमानस्येत्यर्थः । अनुमानप्रामाण्याभावसाधने साधनमेतत् द्रष्टव्यम् । तदयमर्थो भवति–न समारोपव्यवच्छेदेन प्रामाण्यमनु २०
मानस्य तत्र तस्यासाधकतमत्वात्[3] । तदेव कस्मादिति चेत् ? व्यवच्छेद्यस्य समारोपस्यैवाभावात् । इदमेवाह–कृतस्तत्र विपर्ययः । तत्र बहिरन्तश्च भावेषु कुतः प्रत्ययात् विपर्ययः समारोपः, न कुतश्चित्, एकत्वप्रत्ययस्य विषर्यत्वेनाभिप्रेतस्य सम्यग्ज्ञानत्वादिति भावः । कदा न विपर्ययः ? इत्याह–निर्णये निश्चये । कस्येत्यपेक्षायां समस्तेत्यादिकमिह पद्यखण्डमभिसम्बन्धनीयम् । तदयमर्थः–समस्तेतरसम्द्रव्येषु समस्तस्य द्रव्यस्य इतरेषु पर्यायेषु समस्ते- २५
कत्वेन च द्रव्येण ज्ञानस्य निर्णय इति विकल्पाविकल्पाद्यक्रमपर्यायैकत्वज्ञानवत् क्रमाभाविसुखदुःखादिनानापर्यायैकत्वज्ञानस्यापि तत्त्वज्ञानतया निश्चये नासौ समारोपः तदभावात्तद्व्यवच्छेदेनैकत्वेनानुमानस्य प्रामाण्यमिति समुदायार्थः । तत्र द्वितीयो विकल्प उपपन्नः ।

---

१ अनुमानस्य । २ "एकत्र निर्णयेऽनन्तकार्यकारणतेक्षणे । अतद्धेतुफलापोहे कृतस्तत्र विपर्ययः ॥ इति वार्तिकेन" –ता० टि० । ३ बुद्धिरिति आ०, ब०, प०, स० । ४ –त्वादेव क–ता० । ५ –स्यैकत्वेन आ०, ब०, प० स० ।

भवतु तर्हि प्रथम एव विकल्पो बोधाकारभेदे बोधभेदस्यावश्यम्भावित्वादिति चेत्; तत्रापि न निर्विकल्पकभागस्य समारोपत्वं तस्य यथावस्थितस्वरूपसंवेदनस्वभावत्वेन तत्त्वज्ञानत्वात्। तदभावे च कथं तद्व्यवच्छेदकत्वेनानुमानस्य प्रामाण्यम्? एतदेवाह—**ईक्षणे** निर्विकल्पकज्ञानभागे। किम्? अनन्तकार्यकारणतासमारोपव्यवच्छेदविकलस्यानुमानस्य न प्रामाण्यम्। कुत इति चेत्? **कुतस्तत्र विपर्ययः** विपर्ययाभावो यत इत्यर्थः। भवतु विकल्प भाग एव समारोप इति चेत्; कुतस्तस्य प्रतिपत्तिः? अप्रतिपन्नस्य भावे अतिप्रसङ्गात्, ज्ञानत्वानभ्युपगमाच्च। स्वसंवेदनादिति चेत्; तदपि न निर्विकल्पकम्; तस्य तस्मात्पृथक्कृतत्वात्। न हि पृथक्कृतं वेदनं स्वसंवेदनं नाम, अन्यवेदनाभावप्रसङ्गात्। अन्यत एव तस्य वेदनमिति चेत्; न; अन्यवेद्यत्वनियमे जडत्वप्रसङ्गात्, समसमयस्य अकारणत्वेनाविषयत्वाच्च। वेदनात् प्राक्समय एव विकल्पभाग इति चेत्; तदा तर्हि परिज्ञानशून्यस्य कथं बोधत्वम्? स्वसंवेदनादिति चेत्; न; 'तदपि न निर्विकल्पकम्' इत्यादेः 'कथं बोधत्वम्' इति पर्यन्तस्य प्रसङ्गात्। पुनरपि स्वसंवेदनाद्बोधत्वमिति चेत्; न; अनवस्थावाहिनश्चक्रकस्य प्रसङ्गात्। कारणत्वेऽपि अतदाकारेण न तस्य वेदनम्; साकारज्ञानवादस्य अनवसरत्वप्रसङ्गात्। आकारवत्त्वे तद्वेदनस्य पुनरपि विकल्पेतररूपत्वमेकस्य विज्ञानस्य प्राप्तम्, न चैतदुपपन्नम् उक्तदोषत्वात्। पुनस्तदुभयाकारपृथकाराभ्यनुज्ञाने तत्रापि 'न निर्विकल्पकभागस्य' इत्यादिकम् 'उक्तदोषत्वात्' इतिपर्यन्तमावर्त्तमानम् अनवस्थातरङ्गिणीमाकर्षतश्चक्रकस्योपनिपातकं भवेत्। तन्न स्वतस्तद्वेदनं निर्विकल्पकं यतस्तत्प्रतिपत्तिः, अप्रतिपन्नस्य समारोपस्यासत्त्वात् कथं तद्व्यवच्छेदकत्वेनानुमानस्य प्रामाण्यम्? एतदेवाह—**अतद्धेतु**। तत् स्वसंवेदननिर्विकल्पकं धत्ते आत्मनि धारयतीति तद्धः तस्मादन्यः अतद्धः स्वसंवेदनप्रत्यक्षरहितो विकल्पभाग इत्यर्थः, तस्मिन्। तुशब्दः अपिशब्दार्थः, न केवलं दर्शनभागे किन्तु अतद्धेऽपि विकल्पभागे। किम्? अनन्तकार्यकारणतासमारोपव्यवच्छेदविकलस्यानुमानस्य न प्रामाण्यम्। कुत एतदिति चेत्? **कुतस्तत्र विपर्ययः**। विपरीतारोपो न कुतश्चिदप्यवगम्यत यत इत्यर्थः। विकल्पकमेव तर्हि तस्य स्वतो वेदनमिति चेत्; न तर्हि तत्प्रत्यक्षम्, कल्पनापोढस्य तत्त्वात्, अन्यथा लक्षणस्याव्याप्तिदोषापत्तेः। नाप्यनुमानम्; विषयभेद एव तद्भावात्। न चाप्रमाणात् प्रतिपन्नस्य प्रतिपन्नत्वं प्रमाणकल्पनावैयर्थ्यात्। अपि च, विकल्पभागो नामाभिजल्पयोग्य आकारः, तस्य च सामान्यरूपत्वेनावस्तुत्वात् कथं स्वविप्तिफलत्वम्? अवस्तुनो निष्फलत्वात्। फलवत्त्वे वस्तुत्वापत्तेः। ततो न विकल्पकमपि तस्य स्वतो वेदनम्। अविदितस्य च असमारोपत्वात् कथं तद्व्यवच्छेदेनानुमानस्य प्रामाण्यम्। एतदेवाह—**फलापोहे**। फलमपोह्यते असम्बन्धित्वेन स्थाप्यते तस्मादिति फलापोहः सामान्याकारो विकल्पभागः तस्मिन्। किम्? अनन्तकार्यकारणतासमारोपव्यवच्छेदरहितस्यं न प्रामाण्यम्? कुत इति चेत्? **कुतस्तत्र विपर्ययो**

---

१ ईक्षणे इति निर्विकल्पकभागे ज्ञान—आ०, ब०, प०,। २ ज्ञानाविषयत्वात्। ३ चेत्तथा तर्हि आ०, ब०, प०। ४ —कत्वस्य वि—आ०,ब०,प०, स०। ५ —पि तन्निर्वि—आ०, ब०, प०, स०। ६ प्रत्यक्षत्वात्। ७—दोषोपपत्तेः ब०, प०। ८—स्य तत्प्रा—आ०,ब०, प०।

विपरीतारोपो न कुतश्चिन्निवर्तेत यत इत्यर्थः । सत्यम्, विकल्पेतराकारव्यवस्थितुर्नेर्नानात्वं विकल्पान्तरोपनीतं तु तदभेदमाश्रित्य समारोपास्तित्वमास्थीयत इति चेत्, न, विकल्पान्तरस्यापि प्राच्यादोषादसम्भवात्। तस्यापि विकल्पान्तरोपनीतत्वकल्पनायामनवस्थाप्तेः। तस्मात्तु समारोपव्यवच्छेदकारित्वेनानुमानं प्रमाणयता गृहीतेतरादिरूपेण वस्तु सांशमभ्युपगन्तव्यम्, अन्यथा समारोपसम्बन्धेन तस्य तद्व्यवच्छेदकारित्वानुपपत्तेरिति 'एकत्र' इत्यादि- ५
वार्तिकवात्पर्यम् ।

अपि च, समारोपव्यवच्छेदो नाम तन्निवृत्तिमात्रम्, भावान्तरस्वभावो वा स्यात् ?

निवृत्तिमात्रं चिच्छेदो यदि तैस्योपकल्प्यते ।
तदा तेनैकरूपात्मानमनुमानं कथं भवेत् ? ॥३८६॥
अन्यथा स्वापमूर्च्छादेर्मानत्वं केन वार्यते । १०
ततोऽपि तस्यसमारोपनिवृत्तिर्न विशिष्यते ॥३८७॥
तेदाप्यारोपसद्भावाभ्यनुज्ञाने कथं भवेत् ।
चैतन्यशून्यस्वापादिप्रैर्वादस्तैर्न तात्त्विकः ॥३८८॥
तत्तृतीयं प्रमाणं ते भवेत्स्वापादिसन्निभम् ।
अचेतनत्वात्, यत्तत्य नान्तर्भावः प्रमाणयोः ॥३८९॥ १५
प्रमाणसङ्ख्याभ्याघातव्याघ्रेयमुद्गुसात्।
'कुर्वीथाः दुर्विदग्धत्व कथमात्मानिरक्षणम् ? ॥३९०॥
भावान्तरं समारोपव्यवच्छेदो यदीष्यते ।
तदप्यज्ञानरूपं चेत् किम स्वापप्रमाणता ॥३९१॥
स्वापादपि यदज्ञान किञ्चिदस्तूपजायते । २०
अज्ञानकरणाद्धेतोस्तत्र स्वापानुमानयोः ॥३९२॥
'तत्त्वज्ञानस्वभावश्चेत्तत्रापि द्वैतकल्पनम् ।
तज्ज्ञानमनुमानं तत्, यद्वा तस्मात्परं भवेत् ? ॥३९३॥

अनुमानमेव तत्त्वज्ञानमिति चेत्, अत्राह –

एकत्र निर्णयेऽनन्तकार्यकारणवेक्षणे । २५
आतद्धेतुफलापोहे कुतस्तत्र विपर्ययः ॥५॥ इति ।

कुतः ? कस्मात्। तत्र तेषु भावेषु। विपर्ययो विपरीतारोपः ? न कुतश्चित्। स हि न तावन्नियतभावविषयः सम्भवति। कदा न सम्भवति ? इत्याह–'अनन्त' इत्यादि।

---

१ –दर्शिनस्त इ–आ०, ब०, प०, स० । २ अनुमानस्य । ३ समारोपस्य । ४ तत्स्वरूपमा– आ० ब०, प०, स० । ५ तत्तत्समारोप–आ०, ब०, प० । स्वापादावस्थायाम् । ६ "गाढसुप्तस्य विस्मर्म प्रबोधे पूर्वदेवहि । यावतै व्यवधानेन बाधेनेति विशिष्यिकम् ॥"–प० वार्तिकाल० १।३९ । ७ बौद्धस्य । ८ दुरर्थो दुर्विदग्धस्तं आ०, ब०,प०,स० । ९ अज्ञानकरण–आ०, ब०,प०,स० । १० समारोपव्यवच्छेदात्मकं भावान्तरं तत्त्वज्ञानरूपमेव, तदा विकल्पद्वयं भवति ।

अन्तशब्दोऽवधिवाची, स च द्विधा–पूर्वान्तः परान्तश्चेति। न विद्येते अन्तौ ययोस्ते अनन्ते, कार्यं च कारणं च कार्यकारणे, पुनरस्य अनन्तशब्देन कर्मधारयः–परान्तरहितत्वात् अनन्तं कार्यम्, पूर्वान्तरहितत्वादनन्तं कारणम्, तयोर्भावोऽनन्तकार्यकारणता, अनादेः कारणप्रबन्धस्य अनन्तस्य च कार्यप्रवाहस्य भाव इति यावत्। तस्या ईक्षणमनुमानम्, [1]तस्या-
५ प्युक्तन्यायेन वस्तुविषयत्वात् ईक्षणव्यपदेशविषयत्वोपपत्तेः। यद्येवमीक्षणस्य विकल्पाविरोधात् भवत्येव सत्यपि तस्मिन् विपर्यय इति चेत्; अत्राह–**निर्णये** निश्चयात्मनि तदीक्षणे न निर्विकल्पे अनुमानस्य निर्विकल्पत्वाभावात्। प्रतिसमारोपं तद्व्यवच्छेदकानुमानभेदाभ्युपगमेन यदि **'कुतस्तत्र विपर्ययः'** इत्युच्यते, तदा सिद्धसाधनमिति चेत्; अत्राह–**एकत्र** एकस्मिंस्तदीक्षण इति। तदयमर्थः–यथा तदहर्जातप्रथमचित्तगोचरं कुतश्चिद् व्याहारादिविशेषाल्लिङ्गा-
१० दुपजायमानमनुमानं तच्चित्तस्वरूपस्य चेतनत्वस्य निश्चयात् तद्गतमचेतनत्वसमारोपं व्यवच्छिनत्ति तथा खण्डशस्तन्निश्चयानङ्गीकारादन्यस्यापि तत्स्वरूपस्य हेतुमत्त्वसजातीयहेतुकत्वशरीराद्यनुपादानत्वादेस्तेनैव[2] निश्चयात् अहेतुकत्वविजातीयहेतुकत्वशरीराद्युपादानत्वादिसमारोपाणामपि ततः एव व्यवच्छेदोपपत्तेः, यदुक्तम्–"आद्यं चित्तमहेतुकं न भवति कादाचित्कत्वात् घटवदिति[6]। तथा [7]तच्चित्तं प्राक्तनचित्तप्रभवं चित्तत्वात् अवलग्नचित्तवदिति, तथा
१५ यस्मिन्नविकृतेऽपि यद्विक्रियते न तत्तदुपादानं यथा गव्यविकृतेऽपि विक्रियमाणो गवयो न गवोपादानः, विक्रियते चाविकृतेऽपि शरीरादौ चित्तम्" [ ] इति, तद्वदन्यदपि तथाविधमनुमानं तत्सर्वं व्यवच्छेद्याभावेन व्यवच्छित्तिफलविकलत्वादनर्थकमेव। तथा तेन [10]तस्य हेतुमत्त्वं निश्चिन्वता यदपेक्षमस्य हेतुमत्त्वं तदपि प्राक्तनं चित्तं निश्चेतव्यम्। [11]तन्निश्चयाभावे तदपेक्षस्य तद्धेतुमत्त्वस्य निश्चयायोगात्। तथा च स्वयमुक्तम्–

२० "द्विष्टसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात्।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम्॥" [प्र० वार्तिकाल० १।१] इति।

तदपि निश्चीयमानं हेतुमदेव निश्चीयते इति तद्धेतुभूतमपि प्राक्तनं चित्तं तेनैव[12] निश्चेतव्यम्। एवं तावद्वक्तव्यं [13]यावदनादिस्तद्धेतुप्रबन्धस्तेनैव निश्चितो भवति, तथा चादिमत्संसारसमारोपव्यवच्छेदस्यापि तत एव भावात् न तदर्थमनुमानान्तरे प्रयतितव्यमिति। एतद्
२५ अपूर्वान्तकारणेक्षणग्रहणेन दर्शयति।

१–स्यानवद्यान –आ०, ब०, प०, स०। २ अनुमानस्यापि। ३ चित्तनिश्चय। ४ अनुमानेन। ५ अनुमानादेव। ६ द्रष्टव्यम्–प्र० वा० २।३४। ७ "तस्मात्तत्रादिविज्ञानं स्वोपादानत्रलोद्भवम्। विज्ञानत्वादिहेतुभ्य इदानीन्तनचित्तवत्॥" –तत्त्वस० श्लो० १८९७। ८ "अविकृत्य हि यद्वस्तु यः पदार्थो विकार्यते। उपादानं न तत्तस्य युक्तं गोगवयादिवत्॥" –प्र० वा० १।६१। "यत्पुनर्वस्त्वविकृत्यैव यद्विकार्यते न तत्तदुपादानं यथा गवयमविकृत्य गौर्विकार्यमाणः। अविकृत्य च शरीरं मनोमतेरनिष्टाचरणादिना दुर्मनस्कृतादिलक्षणस्य विकारस्योपादानं क्रियते।"–तत्त्वस० प० पृ० ५२८। ९–दनर्थमेव स०। १० आद्यचित्तस्य। ११ प्राक्तनचित्तनिश्चयाभावे। १२ तेनैवं नि–स०। १३ यावदनादिसद्धेतु–आ०, ब०, प०, स०।

तथा मरणचित्तस्य कुतश्चिदनुमानं यथा तच्चैतन्यं निश्चिन्वत्, तदचेतनत्वसमारोप व्यवच्छिनत्ति, तदुक्तेन न्यायेन तदपरस्यरूपस्यापि मायाविचित्रप्रतिसन्धायित्वादेवतेनैव निश्चयात् तदप्रतिसन्धानाद्विसमारोपस्यापि सैव एव व्यवच्छेदोपपत्तेर्न तदर्थमन्यचित्तक्षणसमप्रकारण लिङ्गोपनिबद्धप्रबन्ध मायाविचित्तानुमानं स्वभावानुमानतया परैरभ्युपगम्यमानमर्थवत्तां प्रतिलभते, चित्तान्तरप्रतिसन्धायित्वमपि तेन तस्य निश्चिन्वता तदपि चित्तान्तरं निश्चेतव्यम्, निश्चयमन्तरेण तत्प्रतिसन्धायित्वनिश्चयायोगात्, तदपि निश्चीयमानं तदपरचित्तप्रतिसन्धाय्येव निश्चीयेत इति तत्प्रतिसन्धेयमपि चित्तं तेनैव निश्चेतव्यम्, एवं तावदभिधातव्यं यावदनन्तस्य प्रतिसन्धेयचित्तप्रबन्धस्य तेनैव निश्चयः कृतो भवति। तथा च संसारपर्यवसायसमारोपस्य तत एव व्यवच्छेदात् तदर्थमनुमानान्तरमाश्रयितव्यम्, इत्येतत् परान्तरहृदितकार्येश्रणमहमेन दर्शयति।

मनु कारणात्तममावेव कार्यं न तद्विपरीतात्, ततः सम्भवत्यपि कार्यप्रबन्धस्यैं पर्यवसायः, तत्क्षयमपरान्तरहितत्वं तस्येति चेत्; न, तस्य पर्यवसायित्वे सन्तानाश्रयत्वस्य वक्ष्यमाणत्वात्। सम्भैकस्मिन् चित्तसन्धाने साकल्यमनुमानमेवास्य, तद्रहितसकलसमारोपव्यवच्छेदस्यैकस्मादेव सिद्धत्वात्। सन्तानान्तरेषु साकल्यं तदभेदस्येति चेत्, अत्राह—अतश्चेतुफलापोहे। हेतवश्च फलैनि च हेतुफलानि, तानि विवक्षितानि हेतुफलानि येषां ते तथेतुफलाः एकसन्तानश्रणाः। तदन्ये पुनः अतश्चेतुफलाः तेषामपोहः, अपोहान्ते ते येन सोऽपोहो निर्णयः तदपोहस्तस्मिन् सति। कुतो न कुतश्चित् तच्च तेषु सन्ताना तरेषु विपर्ययो विपरीतारोपो यतः तच्चव्यवच्छेदार्थमनुमानवत्तुच्यमिति। तात्पर्यमत्र—एको हि चित्तसन्तानः कुतश्चिदनुमानाभिप्रीयमान तदपरभावापोहस्तत एव निश्चेतव्यः तस्य "तदपरत्वात् अपोहनिश्चयस्यैं "तापोहनिश्चया विनाभावात् एकानुमाननिश्चेयत्वं" सर्वसन्तानानाँ"न्यायबलायातमित्येकानुमाननिश्चयादेव निरवशेषेऽपि "तत्रकावगतारोपनिरूपस्यस्य व्यवच्छेदात् चिरं पर्यालोचयन्तोऽप्यनुमानभेदस्य साकल्य मुत्पश्यामः। तत्र सदेवानुमानं तत्त्वज्ञानं यत्समारोपव्यवच्छेदसमर्थत्वाच्च भवेत्। मनु अनुमानस्य समारोपव्यवच्छेदं प्रति कारणत्वात् "तस्मादर्थान्तरत्वमेवं(व)तत्कर्यं 'तद्व्यनुमानं तदपव च्छेदः' इति विरूपोत्पापनम्, तदुमेद एवाश्योत्थापनोपपत्तेरिति चेत्? न, क्रियाकारकयोः प्रदीप-तमोऽपहारयोरिव अनर्थान्तरत्वस्य "परं प्रत्यपि प्रसिद्धत्वेनादोषात्।

यद्येवम् 'अन्यद्वा तत्त्वज्ञानं तदुपव च्छेदः' इति विरूपानुपपत्तिः, अन्यत्वे क्रियाकारकभावस्यानुपपत्तेरिति चेत्, मा भूत् क्रियाकारकभावापेक्षया तद्विरूपोत्पापनम्, कार्यकारणभावापेक्षया तस्योत्थापितत्वात्, तद्भावस्य च भेद एव परं प्रति प्रसिद्धत्वात्।

---

१ निश्चितत्वात् आ०,ब०,प०,स०। २ अनुमानात्। ३ बौद्धैः। "मरणप्रत्यक्षज्ञानं स्वोपादेयोदयक्षमम्। सन्निपत्तो हीनसद्भावात् पूर्वविज्ञानवत्तया॥"—तत्त्वसं० इको० १८९९। ४ मरणचित्तस्य। ५ कार्योत्पादसन्तत्वस्य। ६—स्तानसाक्ष—आ०,ब०,प०,स०। ७ अनुमानभेदस्य। ८—क्ति वि—स०। ९—त्रि वि—आ०,ब०,प०,स०। १० विवक्षितचित्तसन्तानस्य। ११ तदपरभावापोहरूपत्वात्। १२—स्यापि—आ० ब०,प०,स०। १३—निश्चयत्वम् स०। १४—र्वां ज्ञानस्का—आ०,ब०,प०,स०। १५—मगतस्यादो—आ०,ब०,प०,स०। १६ समारोपव्यवच्छेदात्। १७ बौद्धं प्रति। "क्रियाकारकयोरेकविरोध इति चेन्नस्त्र। धर्मभेदाभ्युपगमाद्धर्मिसिद्धेरभेदेऽपि"—प्र०वा०२।३१८।

भवतु तर्हि तत्त्वज्ञानमन्यदेव तद्व्यवच्छेद इति चेत्; तदप्यनुमानान्तरम्, प्रत्यक्षं वा स्यात्? अनुमानान्तरमिति चेत्; न; प्रथमानुमानापेक्षया तस्य विशेषाभावात्। इदमेवाह –**'कुतस्तत्र विपर्ययः'** इति। तत्र द्वितीयेऽनुमाने। कुतः? न कुतश्चित् प्रथमानुमानापेक्षया वैपरीत्यम्, तस्मादविशेष इति यावत्। निर्णयो विशेष इति चेत्; न; [1]तस्य प्रथमानुमानेऽपि भावात्। [2]तदाह–**'एकत्र निर्णये'** इति। **एकत्र** प्रथमानुमाने, गणनकाले प्रथमस्यैवैकशब्देन व्यपदेशदर्शनात्। **निर्णये** निश्चये सति **'कुतः'** इत्यादि सम्बन्धनीयम्। समारोपव्यवच्छेदो विशेष इति चेत्; न; तस्यापि प्रथमानुमानेऽपि भावात्। तदाह–**'अतद्धेतुफलापोहे'**। अतद्धेतुफलशब्देन अध्यारोपितमाकारमाह–तस्यैव स्वलक्षणं प्रत्यहेतुत्वादफलत्वाच्च तदपोहस्तद्व्यवच्छेदः तस्मिंश्च एकत्र सति 'कुतः' इत्याद्यभिसम्बन्धनीयम्।

प्रथमस्यानुमानस्य द्वितीये चेदपेक्षणम्।
अविशेषेऽपि तस्यापि तृतीये स्यादपेक्षणम् ॥३९४॥

चतुर्थे तस्य तस्यापि पञ्चमे पञ्चमस्य च।
षष्ठे स्यादनवस्थानं कथमेवं[3] निवृत्तिमत्? ॥३९५॥

इदमेवाह–**'अनन्तकार्यकारणतेक्षणे कुतस्तत्र विपर्ययः'** इति। अनन्तस्य अनवसानस्य अनुमानप्रबन्धस्य कार्यकारणता अपेक्ष्याऽपेक्षकता। सामान्यशब्दस्यापि प्रस्तावबशाद्विशेषेऽपि प्रवृत्तेः। तस्या ईक्षणमुक्तेन न्यायेन दर्शनम्, तस्मिन् सति, कुतस्तत्र परमतेऽनवस्थानस्य प्रस्तुतत्वात् तन्निवृत्तिः विपर्ययः? तँन्न अनुमानान्तरमपि तत्त्वज्ञानं यत्समारोपव्यवच्छेदशब्दवाच्यं भवेत्।

प्रत्यक्षमेव तर्हि तत्त्वज्ञानमिति चेत्; तदप्यभ्यस्तात्, अनभ्यस्ताद्वानुमानात् भवेत्? अनभ्यस्तादिति चेत्; न; एकानुमानप्रसवसमय एव व्याधूतसमारोपनिरंशक्षणिकवँस्तुदर्शने सति सकलप्रवृत्त्यादिव्यवहारविलयप्रसङ्गात् व्यवहारस्याध्यारोपनिबन्धनत्वात्। तदाह–**'एकत्र'** इत्यादि। **एकत्र** एकस्मिन्ननभ्यस्ते **निर्णयेऽनुमाने** सति तत्कार्यं यत् **अनन्तकार्यकारणतेक्षणम्**। अन्तोऽध्यारोपित आकारः। अस्यते व्याप्यत्वेन गम्यते क्षणप्रबन्धोऽनेनेति व्युत्पत्तेः, अनन्तं तद्रहितम्, तच्च तत्कार्यकारणतयोपादानोपादेयतयोपलक्षितमीक्षणं च दर्शनप्रवाहस्तस्मिन् **कुतस्तत्र** विवक्षिते विषये विविधं परि समन्तादयनं गमनं **विपर्ययः** सर्वः संसारव्यवहार इत्यर्थः। कदैषः? इत्यत्राह–**अतद्धेतुफलापोहे**। तस्माद्विवक्षितादेतोः फलं तस्याभिप्रायः तस्योहोऽभिनिवेशस्तद्भावोऽतद्धेतुफलापोहः तस्मिन् सति। तात्पर्यमत्र–

---

१ निर्णयस्य। २ तदा श्लोक–आ०,ब०,प०,स०। ३ कथमेव निवृ–आ,ब०,प०,स०। ४ तस्यानु–आ०, –ब०, प० स०। ५ –वस्तुवृद–आ०, ब०, प०, स०। ६ तस्यापोहोऽभि–आ०, ब०, प०, स०।

क्षणिकत्वानुमानाच्चेदभ्यासरहितादपि ।
एकत्वारोपनिर्मुक्तदर्शनप्रसवो भवेत् ॥३९६॥
आत्मदृष्टेर्स्वतो नाशात्तदभ्यासस्नेहात्त (स्नेहस्य) दार्ढ्यतः ।
तद्भावे सुखार्थित्वं न भवेत्तन्निबन्धनम् ॥३९७॥
अनीप्सितसुखः कस्मादिदमस्मात्फलं भवेत् । ५
इष्टमित्यभिसम्बन्धो यतस्तत्र प्रवर्त्यताम् ॥३९८॥
आप्त एव ततो मार्गे निर्वाणगमने भवेत् ।
सकलक्लेशनिर्मुक्तज्ञानरूपं हि तत्[1] मतम् ॥३९९॥

तत्र अभ्यासरहितादनुमानाद् व्यापृतविपरीतौरोपं प्रत्यक्षमुपपन्नम् । अभ्यासवत उपपन्नमेवेति चेत्, तदप्यस्मदादीनाम्, अस्मद्विशिष्टानां वा स्यात् ? अस्मदादीनामिति चेत्, न, १० अस्मत्वेपि क्षणिकस्वलक्षणदर्शनानुपलम्भात्। तदपि कस्मादिति चेत् ? अन्तर्धीहेय यावज्जीवमेकत्वस्यैव निर्णयात्। तदाह-'एकत्र निर्णये कुतस्तत्र विपर्ययः' इति। एकत्रेति पष्ठ्यर्थैसप्तम्यर्थं भावप्रधानं च। एकत्वस्य बहिरन्तश्च निर्णये सति कुतस्तत्र भावेषु विपर्यये विलक्षणपरिज्ञानम् ?

विलक्षणपरिज्ञानमेकत्वे निश्चिते कथम् ? १५
न हि नीलपरिज्ञानं निश्चिते पीतवस्तुनि ॥४००॥
अन्यथा सर्वविज्ञानं सर्वत्रैवं प्रसज्यते ।
सर्वसर्वज्ञतां तच्च निरायार्य प्रकल्पयेत् ॥४०१॥

मा भूत्तस्मादादीनां तदभ्यासजं स्वलक्षणप्रत्यक्षम्, अस्मद्विशिष्टानां तदस्त्येव तेषामनुमानाभ्यासप्रकर्षभाविनो निर्मूलितसमारोपसंस्कारस्य सर्वाकारवस्तुदर्शनस्यानुपप्लवादिति चेत्, २० अत्राह-अनन्तफार्यकारणनिक्षपणे अन्तको मृत्युः अर्थः स्वामी यस्य तत् अन्तकार्यम् उच्छेदवत् तद्न्यत् अनन्तकार्यम् अनुच्छेदसन्तानम् अस्मद्विशिष्टानां वस्तुदर्शनम्, तस्य कारणमनुमानं तदभ्यासेक्षणे पर्यालोचने। तत्रोत्तरम् 'अतत्' इति। तदनन्तरोक्तं तदीक्षणं नेत्यर्थः। प्रतम्यप्रतिषेधे समासः कथम् असामर्थ्यादिति चेत् ? न, 'अप्राङ्मोभिवत्' अविरोधात्। २५ कुत एतदिति चेत् ? आह-हेतुफलापः, हेतोः कारणात् फलस्य प्रयोजनस्य आपः निष्पत्तिः नाऽन्यस्मात्, तत्र तस्मिन् हेतुफलापे न्याय्ये सति विपर्ययः अहेतोरनुमानाभ्यासात् सर्वाकारवस्तुदर्शनफलापो भवन्मतः। कुतो न कुतश्चित्। हेयश्च सम्बोधने। यथा च अनुमानाभ्यासः सर्वाकारवस्तुदर्शनस्य न कारणं तथा निवेदितं प्रथमकारिकाव्याख्याने, निवेदयिष्यते च तृतीये[2]। तत्र निरंशवस्तुवादिनां समारोपव्यवच्छेदादपि प्रामाण्यमनुमानस्यो-

---

१ दर्शयन्ति। २ आत्मदर्शनविमित्तकः। ३ आत्मत्वेनमूलकम्। ४ निर्णात्। "तथा चोक्तम्-चित्तमेव हि संसारो रागादिक्लेशवासितम्। तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥"-तत्त्वसं०प०पृ० १८४। ५-रोपप्रत्य-भा०, ब०, प०, स०। ६ नान्यतत्र भा०, ब०, प०, स०। ७ प्रज्ञातै।

पपन्नमिति साधूक्तम्–'एकत्र' इत्यादि । तस्मादनुमानस्य प्रामाण्यं वस्तुगोचरत्वादेव, तस्य सांशत्व एव भावानामुपपन्नम्, अतो न निश्चयरूपत्वेऽपि प्रत्यक्षस्य प्रमाणान्तरस्य शब्दान्तरस्य वा वैफल्यमिति स्थितम् ।

स्यान्मतम्–निश्चयो नाम विकल्पविशेषत्वात् सत्येव विकल्पे भवति, न च विकल्पकं प्रत्यक्षं तत्र निर्विकल्पकत्वस्यैव प्रमाणोपपन्नत्वात्, तत्कथं तस्य[1] निश्चयात्मकत्वमिति ; तत्र किमिदं विकल्पकत्वं नाम ? वाचकशब्दविशिष्टतयार्थग्राहकत्वमिति चेत् ; कः पुनर्वाचकः शब्दः स्वलक्षणरूपः, सामान्यरूपो वा ? स्वलक्षणरूपश्चेत् ; तस्यापि वाचकत्वं स्वहेतुबलायातम्, साङ्केतिकं वा ? स्वहेतुबलायातमिति चेत् ; न ; प्रथमश्रवण एव तद्वाचकत्वप्रतिपत्तिप्रसङ्गात् । सङ्केतादेव तद्वाचकत्वप्रतिपत्तिरिति चेत् ; न; स्वलक्षणे सङ्केतासम्भवात् । अन्वयिनो हि शक्यसमयत्वं तत्र स्वयमुपलम्भस्य परं प्रत्युपदर्शनस्य च सम्भवात् । स्वयमुपलब्धे हि पुनः परं प्रत्युपदर्शिते भवति 'अयमस्य वाचकः' इति सङ्केतः ? सङ्केतितस्य च व्यवहारोपयोगित्वम् । स्वयमुपलम्भादिश्च सत्येवान्वये (वान्वये) । न च स्वलक्षणस्यान्वयः ; क्षणक्षीणत्वेनाभ्युपगमात् । तन्न शब्दस्वलक्षणस्य हेतुबलप्रवृत्तं वाचकत्वं सङ्केतादवगम्यत इति युक्तम् । एतेन साङ्केतिकमपि तस्य वाचकत्वं प्रत्युक्तम् ; सङ्केतासम्भवे तदसम्भवात् । स्वतः स्वलक्षणस्यैव अवाचकत्वेऽपि वाचकशब्दसामान्यैकत्वेनाध्यवसायाद्वाचकत्वम्, अत एव इन्द्रियज्ञाने "न ह्यर्थं शब्दाः सन्ति तदात्मानो वा। येन तस्मिन् प्रतिभासमाने तेऽपि प्रतिभासेरन्" [ ] इति तदाकारत्वमेव निषिध्यते तन्निर्विकल्पकतासाधनार्थम् । कथञ्चिदवाचकत्वे तु तस्य किं तत्र तदाकारत्वनिषेधेन ? सत्यपि तत्र तत्स्वलक्षणाकारत्वे विकल्पापत्तिभयाभावात् । अन्यथा रूपादिस्वलक्षणाकारत्वस्यापि निषेधप्रसङ्गात् ।

इन्द्रियज्ञानवार्त्तैवमुत्सन्ना सौगते मते ।
रूपाद्याकारनिर्मुक्तौ यत्र तस्यास्ति सम्भवः ॥४०२॥

तदयं लाभमिच्छतो मूलविनाशः, इन्द्रियज्ञानस्य निर्विकल्पकत्वं साधयितुमुपक्रान्तेन तस्यैवोन्मूलीकरणात् । तत्सामान्याकारत्वस्यैव तत्र निषेध इति चेत् ; कथं तर्हि धर्मोत्तरेण कथितम्–"इह च यतो व्यवहर्तारो दृश्यविकल्प्यावर्थावेकीकृत्य शब्दस्वलक्षणमेव वाचकमध्यवस्यन्ति तस्मात्स्वलक्षणमेव वाचकमङ्गीकृत्य तदाकारशून्यत्वान्निर्विकल्पकं प्रत्यक्षम्" [ ] इति ?

किञ्च शब्दसामान्याकारवद् अर्थसामान्याकारस्यापि तत्र निषेधः कर्त्तव्यः, सति

---

१ प्रत्यक्षस्य । २–हकमि–स० । ३–वाचये स० । ४ स्वलक्षणस्य । ५–स्य वाच–आ०, ब०, प०, स० । ६ अर्थात्मानो वा शब्दाः । ७ अर्थे । ८ प्रभास–आ०, ब०, प०, स० । ९ इति वाक्येन । उद्धृतमिदम्–न्यायप्र०वृ०पृ० ३५ । १० शब्दाकारत्वमेव । ११–कत्वासा–आ०, ब०, प०,स० । १२ सत्यप्येकत्वाध्यवसाये यदि स्वलक्षणस्य अवाचकत्वमेव न कथमपि वाचकत्वं तदा । १३ स्वलक्षणस्य । १४ इन्द्रियज्ञाने । १५ शब्दाकारत्व । १६ इन्द्रियज्ञाने । १७ अवाचकस्वलक्षणाकारत्वे । १८ वाचकशब्दगतसामान्याकारत्व । १९ किं च–आ०, ब०, प०, स० । २० इन्द्रियज्ञाने ।

तैरभिन्नमर्थस्य वाच्यत्वेन प्रतिभासनात् तत्प्रतिभासस्य सविकल्पकत्वापत्तेः । अर्थसामान्याकारेऽपि "तदनिर्देश्यस्य वेदकम्" [ ] इत्यनेनैव निषिद्धत इति चेत् , न, शब्दसामान्याकारस्यापि तेनैव निषेधात् 'न ह्यर्थे शब्दाः' इत्यादेर्मैयर्थ्यापत्तेः । अनेन हि शब्दसामान्याकारे निषिद्धेऽपि "शब्देनाव्यापृतोत्तस्य" [ ] इत्यादिकमर्थसामान्याकारनिषेधाधावश्यं वक्तव्यम् , तेनैव च शब्दसामान्याकारस्यापि निर्देश्यत्वेन निषेधे सिद्धे "न ह्यर्थे शब्दाः" इत्यादेर्न किञ्चित्फलमुत्पद्यामः, तत्र सामान्याकारस्यानेन निषेधः किन्तु स्वलक्षणाकारस्यैव वाचकसामान्यैकस्वेनाध्यवसितस्य, ततो वाचकस्वलक्षणसर्वङ्कषतया ग्रहणमेव विकल्पाना विकल्पत्वमिति कश्चित् , सोऽपि न विपश्चित् , ओत्रज्ञानस्यैव सविकल्पकत्वापत्तेः । तस्य वाचकस्वलक्षणविषयत्वात् ।

अथ न तन्मात्रविषयत्वमेव विकल्पकत्वम् अपि तु तद्विशिष्टवाच्यग्रहणम् , न च ओत्रज्ञानं तद्विशिष्टवाच्यविषयमिति चेत् , न, वाचकग्रहणस्यैव तद्विशिष्टवाच्यग्रहणत्वात् , वाच्यरूपानवसाये वाचकत्वस्यैवानवसायात् , वाच्यवाचकयोरेकज्ञानस्यान्यतरप्रतिपत्तिनान्तरीयकत्वात् । वाचकत्वमपि न ओत्रज्ञानवेद्यम् , "शब्दस्य पूर्वापरीभावे "तदप्रवृत्तेः, तात्कालिकवस्तुगोचरव्यापाराद्धि ओत्रेन्द्रियात् तद्विषयस्यैव ज्ञानस्योत्पत्तेः । पूर्वापरीभूतस्य च शब्दस्य वाचकत्व तत्रैव सङ्केतकरणादे सम्भवादिति चेत्; कथं तर्हि "तत्परेन्द्रियज्ञानानां वाचकविषयत्वम ? तेषामपि तत्रास्ति पूर्वापरीभावे तेषा मप्यप्रवृत्तेरिति चेत् , व्यर्थं तर्हि तत्र" शब्दस्वलक्षणकार्यनिराकरणम् , सत्यपि" तदाकारत्वे वाचकस्वमात्रावगाहणादेव विकल्पापत्तिमयप्रसक्तस्य प्रतिक्षेपात् । सति तदाकारत्वे वाचकरूपे" मेव तदाकारमध्यवस्यन्तो व्यवहर्तारः प्रत्यक्षस्य "तद्विषयत्वमेव प्रतिपद्येरन् , अतस्तदभिप्रायनिषेधेन निर्विकल्पकत्वसाधनार्थम् इतरेन्द्रियज्ञानेषु शब्दस्वलक्षणाकारप्रतिक्षेपः, इत्यपि न चतुरम् , ओत्रज्ञानेऽपि तदाकारप्रतिक्षेपप्रसङ्गात् , तत्रापि सति तदाकारे व्यवहर्तृजनस्य 'वाचक एष तदाकारस्तद्विषयमेव च प्रत्यक्षम्' इत्यभिसन्धानस्यावश्यम्भावात् । अप्रतिक्षिप्तेऽपि तदाकारे तत्र "तदभिसन्धानमेव प्रकारान्तरेण प्रतिपिप्यत इति चेत् , न, अन्यत्रापि" "तत एव तत्रिषेधप्रसङ्गात् । किं वा तत्प्रकारान्तरम् ? प्रत्यक्षमिति चेत्" , न, तत्र वाचकविषयत्वस्यैव व्यवहर्तारं

---

१ अर्थसामान्याकारे । २–भासनस्य आ०, ब०, प० । ३ वाक्येन । ४–ताऽधिकृत्य आ०, ब०, प०, स० । ५ तदुक्तोऽयम्–"शब्दान्यव्यापृतात्मत्वात् तुदाभासनात् । अर्थस्य दृश्यविवेति ।" –अपोहसि० पृ० ६ । " अर्थस्य दृश्यविद तदनिर्देश्यस्य वेदकम् ।"–तत्त्वसि० डी०पृ० २६० । " दृश्यविद तच्छब्दाः क्रियन्तीतोत्तरः ॥"–हेतुबि०डी०पृ० १०२ । ६ न ह्यर्थे शब्दाः सन्तीति कारिकेन । ७ सम्बन्धतया । आ०, ब०, प०, स० । ८–स्वलक्ष आ०, ब०, प०, स० । ९ वाचकविशिष्टवाच्य । १०–रीयत्वात् आ०, ब०, प०, स० । ११ शब्दपूर्वा–स० । १२ ओत्रज्ञानमप्रवृत्ते । १३ चक्षुरादीनाम् । १४ इन्द्रियस्यापि । १५–पि निराका–आ०, ब०, प०, स० । १६ वाचकस्वलक्षणमेव आ०,ब०,प०, स० । १७ वाचकविषयत्वमेव । १८ तदपि सन्धा–आ०, ब०, प०, स० । १९ चक्षुरादीन्द्रियस्याने । २० प्रकारान्तरादेव । २१ मेव तत्त्व । व्यवहर्तारि प्रत्यक्षयत्वात् , ध चासिद्धमसिद्धस्य व्यवहारम् आ०,ब०, प०, स० ।

प्रति प्रसिद्धत्वात्। न हि तद्विषयादेव तद्विषयत्वप्रतिक्षेपः। सत्यम्; अभिनिवेशमात्रात्तस्य तद्विषयत्वं वस्तुवृत्तमन्यथेति चेत्; अन्यथा वस्तुवृत्तमित्यपि कुतः? तत एव प्रत्यक्षादिति चेत्; न; प्रतिपादिताभिनिवेशाद्रातात् तदसिद्धेः। अन्यथाभूतादिति चेत्; न; तस्य व्यवहारिणं प्रत्यसिद्धत्वात्। न चासिद्धमसिद्धस्य साधनम्; स्वयं सिद्धस्य अपरमसिद्धं प्रति साधनत्वोपपत्तेः। सकलविकल्पोपसंहारवेलायां सिद्धमेव तस्य तदिति चेत्; न; तद्वेलाया विचारयिष्यमाणत्वात्। तन्न प्रत्यक्षं प्रकारान्तरम्। नाप्यनुमानम्; तस्यापि प्रत्यक्षव्यापारानुसारिणः तदविषये प्रवृत्त्यसम्भवात्। तद्व्यापारनिरपेक्षत्वे तु तस्य स्वयमेवासम्भवान् व्याप्तिपरिज्ञानस्य प्रत्यक्षाधीनत्वात्। अनुमानाधीनत्वे अनवस्थादोषस्य वक्ष्यमाणत्वात्। ततो यद्यपरेन्द्रियज्ञानेषु शब्दस्वलक्षणाकारे तत्रैव व्यवहर्तुर्वाचकरूपाभिनिवेशस्यावश्यम्भावान् 'तदाकारवतां तु ज्ञानानाम् अवश्यम्भाविनी विकल्पापत्तिः' इति भयात् 'तदाकारनिषेधे प्रयासः, तर्हि श्रोत्रज्ञानेऽपि तत्प्रयासो विधातव्यः, तथा च विषयाभावे तदेव ज्ञानं न भवेत्। ततो न वाचकरूपाध्यवसायाधिष्ठितशब्दस्वलक्षणविशिष्टविषयपरिच्छेदो विकल्पलक्षणम्; श्रोत्रज्ञानेन अतिव्यापित्वात्। तन्न शब्दस्वलक्षणस्य स्वभावतोऽन्यतो वा वाचकत्वं सम्भवति।

मा भूत्तत्स्वलक्षणस्य वाचकत्वं तत्सामान्यस्यैव तदभ्युपगमात्, "तस्य देशकालभिन्नव्यक्त्यनुगमरूपत्वेन तत्र सङ्केतकरणादेर्व्यवहारविनियोगस्य च सम्भवादिति चेत्; न; सामान्यस्य वस्तुभूतस्यानभ्युपगमात्। अपोहरूपमवस्तुभूतमभ्युपगम्यत एवेति चेत्; कथमवस्तुनो वाचकशक्तिः यतस्तदविच्छिन्नविषयग्रहणं विकल्पः[11] स्यात्, तच्छक्तिभावे[12] तदवस्तुत्वानुपपत्तेः। स्वलक्षणशक्तेरारोपात् शक्तिमानेवाऽपोह इति चेत्; न; स्वलक्षणस्यापि वाचकशक्तेरभावात्, तदुक्तदोषप्रसङ्गात्। शक्त्यन्तरस्यारोपेऽपि[13] तत्प्रयोजनमेवापोहस्य स्यान्न विषयप्रतिपादनम्।

अपि च, आरोपस्य विकल्पत्वेनावस्तुगोचरत्वात्, तदारोपितापि शक्तिरवस्तुरूपैवेति कथं तद्वशादपोहस्य वाचकत्वम्? आरोपितायामपि शक्तौ स्वलक्षणशक्तेरारोपादिति चेत्; न; 'स्वलक्षणस्यापि' इत्यादेरभ्यासाच्चक्रकापत्तेरनवस्थानोपस्थानाच्च। तन्नापोहस्यापि वाचकत्वम्। ततः कथं वाचकविशिष्टविषयग्रहणं विकल्पलक्षणं वाचकस्यैवासम्भवात्? एतदेवाह—

अभिलापतदंशानामभिलापविवेकतः।
अप्रमाणप्रमेयत्वमवश्यमनुपज्यते ॥ ६ ॥ इति।

अभिलप्यतेऽनेनेत्यभिलापः शब्दसामान्यं तस्यैव साक्षाद्वाचकत्वेन परैरभ्युपगमात्। अंशा इवांशा विशेषाः। किं पुनरंशसादृश्यं विशेषाणामिति चेत्? अधिकरणत्वमेव, अंशिनं प्रत्यंशानामिव सामान्यं प्रति विशेषाणामप्यधिकरणत्वप्रसिद्धेः। तस्यांशास्तदंशाः अभिलापश्च

---

१ प्रत्यक्षस्य। २ वाचकविषयत्वम्। ३ व्यवहारिणः। ४ अन्यथाभूतम् अभिनिवेशशून्यं प्रत्यक्षम्। ५ प्रत्यक्षाविषये। ६ अनुमानस्य। ७—रणतां आ०,ब०,प०। ८ शब्दस्वलक्षणाकार। ९ श्रोत्रज्ञानमेव। १० शब्दसामान्यस्य। ११—त्यस्य स्यात् आ०,ब०,प०,स०। १२ वाचकशक्तिसद्भावे। १३ अपोहशक्तिमानिति व्यपदेशमात्रमेव स्यात्। १४—क्त्रोप—आ०,ब०,प०,स०। १५ प्रत्यंगाना—आ०,ब०,प०, स०। १६ विशेषाणामधि—आ०,ब०, प०,स०।

तर्दशाम्र अभिलापतर्दशास्तेषां शब्दसामान्यतत्स्वलक्षणानाम् । अभिलापविवेकतः– अभिलप्यनमभिधेयप्रतिपादनम् अभिलापः, तस्योल्लेखायेन विविक्ते (विवेको) विरहः तस्मात् । ततो 'न विकल्पसम्भवः' इत्यध्याहारः ।

मा भूद्विकल्पः । तदुक्तम्–

"परमार्थतस्तु सकलं विज्ञानमविकल्पकम् । ५
तद्ग्राह्यविषये सर्वस्याविकल्पेन वर्त्तनात् ॥" [प्र० वार्तिकाल० २।२४९]

इति चेत्, तदसारम्, यस्मात्–

विकल्पविरहे न स्यादनुमानं तदात्मकम् ।
तदृत्पत्ये तु नाभ्यर्थं यथाकामं प्रसिद्ध्यति ॥४०३॥
प्रत्यक्षं कल्पनापोढमर्थसामर्थ्यसम्भवात् । १०
इत्यादिनानुमानेन साधनात्तद्व्यवस्थितेः ॥४०४॥
स्वत एवाविकल्पं चेत्प्रत्यक्षं सिद्धिमृच्छति ।
भूतोपादानमभ्यक्षं तद्वत्किन्न प्रसिद्ध्यति ॥४०५॥
तदुपादानभावेन तैस्य चेभावभासनम् ।
निरंशैकस्यभावस्य किं तस्यास्यवभासनम् ? ॥४०६॥ १५
चित्रैकज्ञानवादस्तु वादिनः श्रेयसे न यः ।
बाह्यबाधकसंसिद्धेस्तत्राप्ये प्रतिवेदनात् ॥४०७॥
कथं तद्ग्रहसिद्धिः स्याद्ग्राह्ये ज्ञानवस्थिते[1] ।
प्रमाणपरिमुद्ध्या हि प्रमेयस्य व्यवस्थितिः ॥४०८॥

इदमेवाह–'अप्रमाणप्रमेयत्वमनुपज्यते' इति । प्रमाणमत्र प्रत्यक्षमेव अनुमानाभावस्य २०
विकल्पाभाववादिना परेणैवाभ्युपगमात् । प्रमेयमपि तद्ग्रह स्वलक्षणमेव । प्रमाणञ्च प्रमेयञ्च
प्रमाणप्रमेये तयोर्भावः प्रमाणप्रमेयत्वम्, तदभावः अप्रमाणप्रमेयत्वम्, अनुपज्यते
विकल्पाभावमन्वागच्छति प्रतिपादितेन न्यायेनेति भावः ।

भवतु तर्हि सर्वस्यापि प्रमाणप्रमेयविभागस्याभावः सर्वभावनैरात्म्यस्यापि सौग-
तैरङ्गीकारादिति चेत्; २५

कथं स्यात्सर्वनैरात्म्यं प्रमाणं यदि तत्र वः ? ।
कथं स्यात्सर्वनैरात्म्यं प्रमाणं नेत्र तत्र वः ? ॥४०९॥

प्रमाणमन्तरेणापि तत्सिद्धं यदि पुष्यते ।
भावनैरात्म्यपक्षायैः किम् सिद्धिमाप् ? ॥४१०॥

---

१ विकल्पात्मकम् । २ अनुपलम्भात् । ३ "अविसंवादश्च यथोपपत्तयर्थक्रियोपलम्भनिबन्धनः"–प्र० वार्तिकाल० २।०। ४ प्रतिपत्तेः । ५–६ ब्रा०, ब०, प०, स० । ६ वैरूप्यम् । ७–तस्माच्च ब्रा०, ब०, प० ।

एतदेवाह–**अवश्यमनुषज्यते**[1] । अवश्यं भावनैरात्म्यं सौगतानामङ्गीकारवशवर्त्तित्वात्, अवश्यं प्रमाणादिभावेतत्त्वं विपर्ययात्, तदपि प्रमाणसिद्धिनिरपेक्षमेव सिद्धयतीति यावत् ।

इदमन्यद् व्याख्यानम्–यदि अभिलापसम्बन्धविशिष्टा एवार्था विज्ञानैर्व्यवसीयेरन् तदा न तावत्तद्विशिष्टत्वमर्थानामौत्पत्तिकम्[2]; प्रथमदर्शन एव तद्विशिष्टव्यवसायप्रसङ्गेन सङ्केतवैयर्थ्यापत्तेः । सङ्केतकालगृहीतस्याभिलापस्यानुस्मृत्यर्[3] योजनात्[4] विषयस्य तद्विशिष्टत्वमिति चेत् ; अत्राह–'**अभिलाप**' इत्यादि। अयमस्यार्थः–अभिलप्यते यः स्वार्थः परार्थश्च स **अभिलापस्तेन विवेकः** असम्बन्धः ' कस्य ? अभिलापस्य तद्वाचकस्य शब्दस्य । तथा हि स्वार्थविशेषे निर्णीते शब्दविशेषे स्मृतिः स्यात् नानिर्णीते, अन्यथा दानादिचेतसां स्वर्गप्रापणसामर्थ्येऽनिर्णीतेऽपि तद्विशेषस्मृत्या तद्योजनं स्यात् । न चैवम् अविवादप्राप्तेः । अस्याश्च तत्र तद्योजनायां स्वार्थविशेषनिर्णय इत्यन्योन्यसंश्रयः[10] । तत्र अभिलापस्य[11] अभिलापेन सम्बन्धः । तथा, अभिलप्यते अनेनेत्यभिलापः शब्दः तेन विवेकः । केषाम् ? तदंशानां घकारादीनाम् । तथा हि–'यथा विशेषणविशिष्टार्थग्रहणं तद्विशेषणस्मृतौ नान्यथा तथा तदंशविशिष्टाभिलापस्मरणं [12]केवलस्याऽवाचकत्वात्। तदंशस्मरणपूर्वकम्,[13] तत्स्मरणमप्यभिलापविशेषस्मरणपूर्वकम्' इत्यन्योन्यसंश्रयो द्वितीयः[14]। तदेवम् अभिलापतदंशानामभिलापविवेकतो विकल्पाभाव एव प्राप्तः, तदभ्युपगमे[15] च निर्विकल्पस्याकिञ्चित्करत्वान्न प्रमाणम् , अत एव न प्रमेयम् , इति **अप्रमाणप्रमेयत्वं**[16] तद्विवेकतः **अवश्यमनुषज्यते** ।

इदमपरं तद्व्याख्यानम्–यदि [17]अभिलापविशिष्टार्थव्यवसायस्तदभिलापस्मरणात् तद्वत्तदपि[18] स्मरणं केवलस्य तस्याऽवाचकत्वात् [19]तदंशविशिष्टस्यैव, तदंशानां च स्मृतानामेव तद्विशेषणतयावसाय इति । अभिलापस्मरणं तदंशस्मरणञ्च अपराभिलापतदंशस्मरणद्वये सति भवति । तदपि तदपराभिलापतदंशस्मरणे भवति, तत्राप्येवमिति अनेकोऽनवस्थानदोषः[20] प्रसज्यते । तस्मात् **अभिलापतदंशानामभिलापविवेकतो** वाचकशब्दविरहात्तदवस्थ एव '**अप्रमाण**' इत्यादिर्दोष इति ।

स्यान्मतम्–भवतु परस्परगाश्रयः अनवस्थानं तु न सम्भवति, स्मर्यमाणस्य शब्दस्य शब्दान्तरस्मरणनिरपेक्षत्वात् । स्वयमवाचकस्य हि वाचकविशिष्टतया निर्णये व्यतिरिक्तवाचकस्मरणमपेक्षणीयम्, शब्दस्य त्वर्थप्रतिपादनवत् स्वप्रतिपादनेऽपि व्यापारान्न तत्स्मरणे वाचका-

---

१–ते इति अवश्यं आ०,ब०,प०,स० । २–त्वत्वम् आ०,ब०,प०,स० । ३ कारणजन्यम् । ४–नुषज्य आ०, ब०, प०,स०। ५–जना वि–ता०। ६ –ष्टमि–आ०,ब०,प०,स० । ७ कस्यापि लाभस्य आ०,ब०,प०,स०। ८ शब्दविशेष । ९ शब्दयोजनं स्यात्तथा च'दानचित्तं स्वर्गप्रापणसमर्थम्' इति विकल्पः समुत्पद्येत ।१० स्वार्थविशेषे निर्णीते शब्दविशेषे स्मृतिः, अस्याश्च शब्दविशेषस्मृतेश्च तत्र स्वार्थविशेषे तद्योजनायाम्–शब्दयोजनायाम् स्वार्थविशेषनिर्णय इत्यन्योन्याश्रयः । ११ अभिलाप्यस्य, अभिलप्यते यः इति व्युत्परोः । १२ अंशविरहितस्य । केवलस्य वाच–आ०, ब०, प०, स० । १३ घकारादिअंशस्मरणमपि । १४–यतः आ०, ब०, प०, स० । १५ विकल्पाभावे स्वीक्रियमाणे । १६ अभिलापविवेकतः । १७ अभिलापविशेषार्थ–स० । १८ अपिशब्दोऽत्र भिन्नक्रमः 'स्मरणम्' इत्यस्यानन्तरमभिसम्बन्धनीयम् । तदभिलापस्मरणमपि । १९ अभिलापांश । २०–स्यादोषः आ०,ब०,प०,स० ।

स्मरस्मरणमर्थस्य तत्कथमनवस्थानमिति ? तदप्यसदेव मतम् , शब्दस्य स्वप्रतिपादनस्वाभाव्याभावात् । शब्दत्वे वा श्रोत्रज्ञानेऽपि स्ववाचकत्वेनैव तस्यावभासनात् स्मरणवत्कथं तस्यापि निर्विकल्पकत्वम् ? तत्र तस्य न तथावभासनमिति चेत् , किं तर्हि स्यात् ? अप्रतिभासनमिति चेत् , न, तज्ज्ञानस्य निर्विषयत्वप्रसङ्गात् , न च विषयशून्यं विज्ञानमिति श्रोत्रज्ञानव्यवहारविच्छेदमेव प्राप्तम् । अन्यथाऽवभासनमिति चेत् , न , तस्याभ्रान्तत्वेन प्रत्यक्षत्वाभावापत्तेः । तत्र शब्दस्य स्वप्रतिपादनस्वाभाव्यम् । तथा चेत् स्मरणेऽपि कथं तस्य तद्रूपतया प्रतिभासनम् ? अथ स्मरणं मतद्रूपमपि तद्रूपमिवैनं अध्यवोचयति । कुत एतत् ? तस्य विकल्पत्वेनैवंस्वाभाव्यादिति चेत् , तदपि कुतः ? वाचकरूपविद्योतनादिति चेत् , न , परस्परायत्वात्–विकल्पत्वाद्वाचकरूपाद्योतनम् , ततश्च विकल्पत्वमिति । अन्यथैव तस्य विकल्पत्वनिबन्धनं वाचकरूपाद्योतनमिति चेत् , न , तस्याऽभावात् । भावे तदपि यदि तत्परिकल्पितं स एव दोषः–तदद्योतनात्तस्य विकल्पत्वम् , ततश्च तदद्योतनमिति । पुनस्तद्विकल्पत्वनिबन्धनस्यापरतदद्योतनस्य परिकल्पनायां कथमनवस्था न भवेत् ?

अपि च, "स्वामिसम्बन्धसद्भा एवार्था विज्ञानैर्व्यवसीयन्ते"[ ]इति" ब्रुवाणेन स एव तद्विशेषो वक्तव्यः। पदं वाक्यं वेति चेत्, ननु वाक्यं नाम पदसमुदायेऽकल्पितं नाख्यातैरकल्पं तस्य निषेत्स्यमानत्वात्, ततः पदयोजनया "तदयकल्पितिः कर्त्तव्या, पदानां चानुस्मर- "जोपस्थापितानामेव योजनम् । न च पदमपि किञ्चिदक्षयकैरकल्पं तस्यापि निषेत्स्यमानत्वात्। वर्णयोजनया तु "तत्कल्पितिर्विधातव्या । वर्णानां च स्मरणोपस्थापितानामेव योजनम् । न च वर्णा निर्भागाः, दीर्घादिव्यवहाराभावप्रसङ्गात् । भ्रान्तत्वव्यवहारे" इति चेत्, आस्तां "तावदेवत्, तृतीये" विचारणात् । ततो वर्णप्रकल्पितिरपि स्मरणोपनीतसद्भागयोजनयैव सम्पादयितव्या । तावच्चैषं प्रक्रिया यावत्पर्यन्ते निर्भागाः शब्दपरमाणवः, तेषां चाशक्यसङ्केतत्वेन अनभिलाप्ये- सम्बन्धाद्स्मरणम् , तद्स्मरणे च तद्विशिष्टतया "तद्वयविनो न स्मरण तस्मिंश्च तद्विशिष्टतया "तद्वयविन इति तावद्वक्तव्यं यावद्वाक्यानुस्मरणं न भवति । "तत्र च कथं स्वामिलाप" सम्पद्यतया अर्थक्रियासाय ? न ह्यननुस्मृताभिलाषस्य तत्सम्पद्यतया" सम्भवति तद्व्यवसायः, प्रथमदर्शनेऽपि प्रसङ्गात् । तस्माभिलाषपर्यन्तं विकल्पलक्षणम् असम्भवादिति । एतदेवाह–'अभिला'-इत्यादि । अभिम्र बुद्धिः, अभिम्रियते अभिगृह्यते विषयोऽनयेत्यभिलेहि व्युत्पत्तेः । तस्माम् अपतन्तो विषयदेवनाऽप्रविशन्तोऽज्ञा भागा येषां ते अभिलाषपर्यन्ता" अनवगृहीतभागाः

---

१ शब्दत्व । २ श्रोत्रज्ञाने । ३ शब्दस्य । ४ , स्ववाचकत्वेन । तदाव–आ०, ब०, प०, स० । ५ सम्पत्त्व । ६ वाचकविशिष्टतया । ७–मिवातद्रूपी–आ०, ब०, प०, स० । ८ स्मरणत्व । ९ विकल्पकल्पितम् । १० –स्वानं म म–आ०, ब०, प०, स० । ११ "स्वामिसम्बन्धसद्भाव एवार्था निश्चर्व्यवसीयन्ते इत्येवम्- स्तस्य "–अष्टसह० पृ० १९० । १२ वाचकत्वेन । १३–योपनीतसद्भागम्प्यपि–आ०, ब०, प०, स० । १४ पदरचना । १५ वर्णेषु दीर्घादिव्यवहार । १६ तावदेवं तृ–आ०, ब०, प०, स० । १७ प्रस्तावे । १८ अभिलाषसम्बन्धाभावात् । १९ पर्यन्त । २० पदस्य । २१ वाक्ये । २२ –सम्बन्धतया आ०, ब०, प०, स० । २३ अभिम्र + अन्तत् + अंशाः ।

परमाणव इत्यर्थः। तेषाम् **अभिलापविवेकतः** वाचकशब्दविरहाद् **अवश्यं** नियमेन-**अनुपलभ्यते अप्रमाणप्रमेयत्वम्**। माणः शब्दः, मणेः शब्दार्थस्य घञि एवंरूपत्वात्, प्रकृष्टो माणः प्रमाणः, शब्दपरमाण्वपेक्षया तद्वयवी तत्कलापापेक्षया पुनस्तद्वयवी, तावदेवं यावदक्षराणि, तदपेक्षया पदम्, पदापेक्षया वाक्यम्, तस्य प्रमेयत्वं स्मरणकृतम्, तद्भावः **अप्रमाण-प्रमेयत्वम्**। तद्वयवश्यम्भावेनापद्यते तत्प्रतिपत्तिनिबन्धनस्य पूर्वपूर्वतद्भागानुस्मरणस्याभावात्, सोऽपि तत्पर्यन्तवर्त्तिशब्दपरमाणूनामननुस्मरणात्। तन्न परस्याभिलापसम्भवः तदभावात् कथमुक्तम्–'अभिलापप्रतिबद्धतयैवार्था व्यवसीयन्ते' इति।

भवतु वा कथञ्चिदभिलापः, तथापि तत्स्मरणस्यापराभिलापप्रतिबन्धे अनवस्थानमुक्तम्। तदप्रतिबन्धे यदि तन्निर्विकल्पकं न तद्विषयस्य शब्दस्यान्यत्र योजनं स्वलक्षणत्वादिति गतमर्थव्यवसायवार्त्तया। सविकल्पकं चेत्; कथमव्यापकं विकल्पलक्षणं न भवेत्? अनभिलापवतोऽपि तत्स्मरणस्य सविकल्पकत्वात्। साक्षादनभिलापवत्त्वेऽपि उपचारादभिलापवदेव तत्स्मरणम्। न हि साक्षादभिलापसम्बन्धादेवाभिलापवत्त्वं प्रतीतेः, अपि तु अभिलापसम्बन्धयोग्याकारगोचरत्वादपि। तद्योग्यश्चाकारः साधारणाकार एव तत्र शब्दसङ्केतादेः शक्यविधानत्वात्। अत एवोक्तम्–"अभिलापसम्बन्धयोग्यप्रतिभासा प्रतीतिः कल्पना" [न्यायवि० पृ० १३] इति। ततः शब्दस्मरणस्यापि शब्दसामान्यगोचरत्वेनोपचाराद् अभिलापवत्त्वोपपत्तेरुपपन्नं विकल्पत्वमिति चेत्; अत्रोच्यते–स सामान्याकारः कल्पितः, पारमार्थिको वा भवेत्? कल्पितश्चेत्; कथं तस्याभिलापसंसर्गं प्रति योग्यत्वम्? योग्यत्वं हि सामर्थ्यमेव। न हि तत् कल्पितस्योपपन्नम्।

कल्पितश्चेत्कथं योग्यः? योग्यश्चेत्कल्पितः कथम्?
योग्यश्च कल्पितश्चेति मिथो निष्पीडितं वचः ॥ ४११ ॥
कल्पितश्चेत्समर्थोऽपि कल्पितं स्यात्स्वलक्षणम्।
सौगतानां ततः प्राप्तं न किञ्चित्परमार्थसत् ॥ ४१२ ॥
कल्पनामात्रवादस्तु पश्चात्प्रतिविधास्यते।
कल्पितोऽपि समर्थश्चेत्; मरीच्यम्भोऽपि पीयताम् ॥ ४१३ ॥

योग्यत्वमपि तस्य कल्पितमिति चेत्; तर्हि तेनाप्यभिलापसंसर्गयोग्येन भवितव्यम्, अन्यथा तत्प्रतिभासवत्याः प्रतीतेर्विकल्पकत्वानुपपत्तेः। तदपि तस्य तद्योग्यत्वं यदि पारमार्थिकम्; स एव प्रसङ्गः–कल्पितश्चेत्यादि। कल्पितञ्चेत्; न; तर्हि 'तेनापि' इत्यादेः प्रसङ्गस्यानुबन्धादनवस्थापत्तेश्च।

यत्पुनरेतत्–स्वलक्षणमेव सामान्यं तस्यैव दृष्टसाधारणरूपेण प्रतीत्युपस्थापितस्य सामा-

---

१ –स्यागात् आ०, ब०,स०। २ –बन्धतयैवार्थोऽध्यवसीयते इति आ०,ब०,प०,स०। ३ अभिलापस्मरणम्। ४ अभिलापस्मरणस्य। ५ –वत्त्वापत्तेः आ०, ब०, प०, स०। ६ शब्दसामान्याकारस्य। ७ –तमपि चेत् आ०, ब०, प०, स०। ८ –त्वत्वात्–आ०, ब०, प०, स०। ९ तुलना–"यदा साक्षाज्ज्ञानजननं प्रति शक्तत्वेन प्रतीयते तदाऽसौ स्वेन रूपेण लक्ष्यमाणत्वात् स्वलक्षणम्। यदा तु पारम्पर्येण शक्तता तस्यैव प्रतीयते तदा सामान्यरूपेण लक्षणमिति सामान्यलक्षणम्"–प्र० वार्तिकाल० २।२।

न्यव्यपदेशात्, ततो वास्तवमेव तस्यामिलापसम्बन्धसामर्थ्यमिति, तद्योच्यते—यदि साधारणं रूप स्वलक्षणस्यास्ति न किञ्चित् संवृत्तिसत्[1] तदपरस्य तस्याभावात्। नास्ति चेत्, कथं तेनावभासनम्? मरीचिकातोयवदिति चेत्, उच्यते—

स्वलक्षणस्य शैलेन्द्रेस्तद्रूपस्य प्रवेदनम्।
सर्वदा तत्प्रवृत्तिः स्यात्तच्छलेरधिरोपणात्॥ ४१४॥ ५
अछद्मशक्तिकत्वेऽपि सदा तच्चेन्न वेद्येत्।
असाधारणरूपस्याप्यप्रवेदनमागतम्॥ ४१५॥
शक्तिमत्त्वं विहायान्यन्न तत्रापि निबन्धनम्।
ततः स्वलक्षणस्यैव वार्तोऽपि विलयं गता॥ ४१६॥
सैचिवाभावतो नो चेत्सर्वदा तत्प्रवेदनम्। १०
तद्रूपदर्शनी शक्तिस्तदा तर्हि कथं भवेत्?॥ ४१७॥
भावेषु हि विना कार्यं न शक्तिः शक्यकल्पना।
सर्वकार्येषु सामर्थ्यं सर्वेषामन्यथा भवेत्॥ ४१८॥
साऽपि नास्ति तदेदानीं चेत्, प्राप्तेऽपि सचिवे कथम्?।
तत्साधारणरूपस्य तद्ग्राहे स्यात्प्रवेदनम्॥ ४१९॥ १५
सचिवात्समधिप्राप्तात् न सा तस्योपकार्यते।
समकालतया हेतुर्हेतुमत्त्वाव्यवस्थितेः॥ ४२०॥
[2]प्रागग्रहस्य पश्चाच्चेत्तस्य शक्तिसतो[3] भवेत्।
क्षणद्वयस्थितौ तस्य क्षणभङ्गि जगत्कथम्?॥ ४२१॥

तन्न स्वलक्षणबलादाकारप्रवेदनम्। विज्ञानबलादेवेति चेत्, तदपि कथम् अविद्यमानेमुपदर्शयेत्, कारणस्य विपर्यस्योपगमात्? न चासतः कारणत्वम्। अर्थज्ञान एवार्थं नियम इति चेत्, [4]तथाप्यकारणस्य विषयत्वे को दोष? सर्ववेदनमेव प्रतिबन्धाभावाविशेषादिति चेत्, न, असद्वेदनेऽपि समानत्वात्।

मरीच्यां जलवत्सर्वस्यासतः किम् वेदनम्?।
प्रतिबन्धो न तत्रापि यदस्ति नियमक्षमः॥ ४२२॥ २५
सर्वस्याप्यमतो विज्ञायेकस्मादेव वेदनात्।
अपरं तत्र विज्ञानं सर्वमेव वृथा भवेत्॥ ४२३॥
सर्वसद्वेदनेऽप्येवं नैष दोषोऽन्यथा भवेत्।
इत्यनिष्टप्रसङ्गोऽयं कथमाम निवार्यताम्॥ ४२४॥

---

१ —रूपदर्श ता०। २ —[5]स्यैव आ०, ब०, प०, स०। ३ प्रवेदने। ४ सदृशाभासा—आ०, ब०, प०, स०। ५ सदृशविरहात्। ६ सदृशविरहात्तस्याप्यम्। ६ शक्ति। ७ प्रागग्रहश्च आ०, ब०, प०। ८ सदृशविरहाणां। ९ वस्तु। १० अर्थज्ञानेऽपि।

मिथ्याज्ञानं तथा शक्तेर्नियतग्राहकं यदि ।
अर्थज्ञानं तथा शक्तेर्नियतग्राहकं भवेत् ॥ ४२५ ॥
ततस्तस्यार्थकार्यत्वकल्पना युक्तिवर्जनात् ।
'अकारणं न विषयः' इत्येतद्बालभाषितम् ॥ ४२६ ॥

तस्मादसदाकारस्याकारणत्वेन ग्रहणाभावान्न साधारणाकारग्रहणमपि विकल्पलक्षणम् ।

भवतु वा तद्ग्रहणम्, तथापि तद्ग्रहणशक्त्या ज्ञानस्वरूपग्रहणे तदाकारवत् तत्स्वरूपस्यापि[1] मिथ्यात्वं भवेत् । न ह्यसदाकारग्रहणाभिमुखेन स्वभावेन गृहीतमन्यथा भवति, नीलाभिमुखस्वभावगृहीतस्यापि पीतत्वप्रसङ्गात् । न च ज्ञानस्वरूपस्य मिथ्यात्वम् ; अनभ्युपगमात्, तदप्रतिपत्तिप्रसङ्गाच्च । न हि मिथ्यारूपादेव मिथ्यात्वम् अमिथ्यात्ववच्चक्ष्यप्रतिपत्तिकम् । शक्त्यन्तरेण तद्ग्रहणे तदुभयशक्तिसाधारणत्वं विज्ञानस्य प्राप्तम् । भवतु को दोष इति चेत् ; न; साधारणविषयवत्तस्यापि मिथ्यात्वप्रसङ्गात् । पुनरपि तत्साधारणाकारकल्पने अनवस्थापत्तेः अग्रहणमेव सामान्याकारस्य । तन्नेदमपि विकल्पलक्षणम् असम्भवात् । एतदेवाह—

पदार्थज्ञानभागानां पदसामान्यनामतः ।
तथैव व्यवसायः स्याच्चक्षुरादिधियामपि ॥७॥ इति ।

अर्थोऽभिधेयः पदस्यार्थः **पदार्थः** सामान्यम्, तत्रैव शब्दसङ्केतस्य सम्भवात् । तस्य **ज्ञानं** तस्य **भागाः** परापरसामान्यरूपा अंशास्तेषां **व्यवसायः स्यात्**[2] । अवसायोऽधिगमस्तद्भावो व्यवसायो विशब्दस्याभावार्थत्वात्[3] विमलादिवत्, सः स्याद्भवेत् अनवस्थानादिति भावः । कुतः[4] सम्भवतां तेषां व्यवसाय इत्याह—**पदसामान्यनामतः** । पद्यन्ते ज्ञायन्तेऽनेनेति पदं ज्ञानमेव तत्र सामान्यानामपरापरात्मनाम्, तद्विषयत्वेन नमनम् उक्तप्रकारेणोपसर्पणं[5] तस्मादिति । तर्हि मा भूज्ज्ञानस्यात्मनि सामान्याकार इति चेत्; न; शक्तिभेदेन ज्ञानभेदप्रसङ्गात् । [6]तथा हि—न सामान्यग्रहणं तद्ग्रहणस्य स्वसंवेदनशक्तिव्यतिरेकात्, अस्मविदितस्य च बहिर्विषयत्वानभ्युपगमात् । पुनरप्यपरस्वसंवेदनशक्तिकल्पनायां स एव प्रसङ्ग[7]:शक्तिभेद इत्यादिरनवस्था च । ततः सुदूरमपि गत्वा शक्तिद्वयाधिष्ठानमेकं संवेदनमभ्युपगन्तव्यम् । ततो यदुक्तम्—"बहीरूपतयैव सामान्यं न ज्ञानरूपतया" [ ] तन्निषिद्धम्; ज्ञानरूपतयापि सामान्यस्योपदर्शितत्वात् । सदपि सामान्यं ज्ञानरूपतयाऽर्थ एव; इत्यपि न शोभनम्; साधारणाकारस्य अर्थत्वानभ्युपगमात् । तदनर्थत्वे च तत्प्रतिपत्तेरसम्भवात् न साधारणाकारग्रहणं विकल्पलक्षणमिति साधूक्तम्—'**पदार्थ**' इत्यादि ।

---

१ तथास्तिर्नेव—आ०, ब०, प०। २ अर्थज्ञानस्य। ३ साधारणाकारग्रहणम्। ४ तदग्रहण—आ०, ब०, प०, स०। ५ —स्वरूपस्य ग्र—आ०, ब०, प०, स०। ६ ज्ञानस्वरूपस्यापि। ७ मिथ्यात्वाप्रतिपत्ति। ८ ज्ञानस्वरूपग्रहणं। ९ साधारणाकारग्रहणशक्तिस्वरूपग्रहणशक्तिरिति शक्तिद्वयसाधारणत्वम्। १० —त् व्यव—आ०, ब०, प०, स०। ११ विशब्द—आ, ब०, प०। १२ सम्भवतां ते—आ० ब०, प०, स०। १३ —र्पणात्तस्मा—आ०, ब०, प०, स०। १४ तथाहि न ता०। १५ प्रसङ्ग—आ०, ब०, प०, स०।

भवन्तु तर्हि निर्विकल्पा एव बुद्धयो विकल्पबुद्धिव्यवस्थानोपायाभावादिति चेत्, अत्राह–'चक्षुरादिक्रियामपि' इति । चक्षुरादिर्येषां श्रोत्रादीनां तेषां कार्यभूता क्रियः तासामपि न केवलं मानसीनामित्यपि शब्दार्थः । किम् ? व्यवसायः अधिगमाभावः । कथम् ? तथैव तेनैव प्रकारेण । तथा हि–

विकल्पबुद्धयो यद्वद्दोषरूढा अपि स्फुटम् । ५
द्वीदृङ्मात्रत्वाभावेन खिद्यन्ति मनस्विते ॥ ४२७ ॥
निर्विकल्पक्रियोऽप्येवं[1] चक्षुरादीन्द्रियोद्भवाः ।
विचारव्यवहारेषु विमुह्यन्त्येव जीवितम् ॥ ४२८ ॥

यतः–

न तासामपि सामान्यं विषयत्वेन सम्मतम् । १०
तदुद्भव दोषो निःक्षेपस्तत्राप्येषः प्रसज्यते ॥ ४२९ ॥
[2]निर्देश्यं वस्तु तद्वेद्यं केवलं परवीक्षया ।
न जातु न कचित्तादृक् पश्यामः प्रतिभासनम् ॥ ४३० ॥
अभावे सर्वबुद्धीनां बोद्धव्यस्यानवस्थितेः ।
भावनैरात्म्यवादस्य साम्राज्यमधुनाऽऽप्तम् ॥ ४३१ ॥ १५
तस्यापि न व्यवस्थेति प्रागेवैतं निवेदितम् ।
कस्यिचत् तत्र सामान्यं बोद्धानामवतिष्ठते ॥ ४३२ ॥
वस्तुभूतं तु तत्तेषां नास्त्येवात्मन्युपायतः ।
ततो न तत्र निर्बन्धः शास्त्रकारः कदोत्स्यम् ॥ ४३३ ॥

भवतु वा किमपि सामान्यम्, तथापि शब्दस्मरणवच्चक्षुरादिबुद्धीनामपि व्यवसाय- २०
त्वेकत्वमनिवार्यमेव । तदाह–'पदार्थे' इत्यादि । पदमभिधानं तदेवार्थो विषयो येषां ज्ञानानां स्मरत्रस्वरूपाणां तेषां भावात् यद्विषयिणां ज्ञानाः, नात्मविषयाः तेषामव्यवसायत्वमावश्यकात्, तेषां व्यवसायो निश्चयत्वमात्रः । कुतस्तेषां सः ? इत्याह–'पदसामान्यनामतः' इति । पदस्य स्मर्यमाणशब्दस्य सामान्यं तत्र नमनात् तदाहकत्वेनोपनिपातात् । ततः किम् ? इत्याह–तत्रैव (तथैव) इत्यादि । तयैवेति[3] अवगात् यथैवेति सम्पते–त्योर्नित्यसम्बन्धात् । ततोऽय- २५
मर्थः–यथैव शब्दस्मरणभागानां स्वविषयसामान्यगोचरत्वेन व्यवसायत्वभावत्वं तथैव चक्षुरादि-बुद्धीनामपि । न हि तासामपि पर्युदस्तसामान्यवस्तुवेदित्वम् अनुभवपथोपेक्षापितमशक्तीति भावः ।

---

१ –विकीऽप्येवं ला०, ब०, प०, स० । २ निर्देश्य–ला० । ३ बौद्धेच्या । ४ ग्रहणोपयोगात्वात् । ५ –व्यवस्य–ला०, ब०, प० । ६ –ति सम्मते स० । ७ –स्यात् सम्ब–ला०, ब०, प०, स० । ८ –च च चक्षु –ला०, ब०, प०, स० । ९ अनुभवपथोपेक्षापितमशक्तीति० । ब चैकसमयपर्यवसितत्वापारक्रमत्वः तज्ज्ञानस्य पश्चात्परसमयगोचरत्वं सर्वस्य सकाशात्वदुपदिशतीत्यापत्तेः । तदाह–यौगदेशिकैरुच्यते वृत्तिर्यतीतविषयिणि । तदाहितं च विज्ञानं न कालान्तरमर्षिणि । च यावत्परसमयव्यवस्थापितमशक्तीति–ला०, ब०,प०,स० । अनुभव स्थापितमशक्तीति ला० ।

स्यान्मतम्–न सामान्यं चक्षुरादिज्ञानस्य विषयः सम्भवति । तद्धि कल्पितम्, वस्तुभूतं वा भवेत् ? न तावत्कल्पितम्; तस्यावस्तुत्वेन तद्विषयस्य तज्ज्ञानस्यावस्तुविषयत्वोपपत्तेः । न चैतन्न्याय्यम्, तस्याऽप्रत्यक्षत्वप्रसङ्गात् । न ह्यवस्तुविषयं प्रत्यक्षं नाम; अतिप्रसङ्गात्, 'अञ्जसा' पदवैयर्थ्यापत्तेश्च निवर्त्तयाभावात् । अस्तु वस्तुभूतमेव सामान्यमिति चेत्; तदपि तद्भवसामान्यम्, सादृश्यसामान्यं वा भवेत् ? न तावत् तद्भवसामान्यम्; तद्धि कालत्रयव्यापिरूपम्, तदपि कस्यचिद्विशेषात्मकस्य, तव्यतिरिक्तस्य वा भवेत् ? विशेषात्मकस्य चेत्; तस्यापि तद्रूपं प्रतिक्षणभेदिनश्चक्षुरादिप्रत्यक्षस्य वेद्यम्, कालान्तरव्यापिनो वा ? । न तावदाद्यस्य; तस्य वर्त्तमानसमयपर्यवसिते चक्षुरादिव्यापारे तदायत्तोत्पत्तिकत्वेन तत्समय एव पर्यवसानात् । न चैकसमयपर्यवसिततद्व्यापारजन्मनः तज्ज्ञानस्य अपरापरसमयगोचरत्वम्; सर्वस्य सर्वाकारवस्तुदर्शित्वापत्तेः । तदाह–

"योग्यदेशस्थितेऽज्ञाणां वृत्तिर्नातीतभाविनि ।
तदाश्रितश्च विज्ञानं न कालान्तरभाविनि ॥" [प्र०वार्तिकाल० २।१२६]

न चापरापरसमयप्रतिपत्तिमन्तरेण तद्व्यापित्वं कस्यचित्सुखावबोधम्; व्यापकप्रतिपत्तेर्व्याप्यप्रतिपत्तिनान्तरीयकत्वात्, एकेन च प्रत्यक्षेण तद्ग्रहणे व्यर्थ एवापरापरश्चक्षुरादिव्यापारः स्यात् । अपरापरतत्प्रत्यक्षार्थत्वान्न दोष इति चेत्; न; तस्य प्रयोजनाभावात् । कालान्तरव्याप्तिग्रहणं प्रयोजनमिति चेत्; न; तस्य प्रथमप्रत्यक्षादेव भावात् । नैकेन तद्ग्रहणम्; अपरापरेणैव तेन तद्ग्रहणाभ्युपगमादिति चेत्; न; तस्यापि परापरसमयानुसन्धायित्वेन स्वकालपर्यवसित एव विशेषे व्यापारात् । तन्न क्षणक्षीणं प्रत्यक्षमेकमनेकं वा कालान्तरव्यापिभावनिरीक्षणे दक्षतां कक्षीकरोति । मा भूत्तस्य तन्निरीक्षणदक्षत्वं कालान्तरव्यापिनस्तु भवत्येवेति चेत्; न; तस्यापि प्रथमचक्षुरादिव्यापारादुत्पन्नस्यैव तत्र प्रवृत्तौ अपरापरतव्यापारवैफल्यप्रसङ्गात् । तद्व्यापारादपि तस्योत्पत्तिरिति चेत्; न; उत्पन्नस्योत्पत्त्ययोगात्, उत्पन्नस्यापराधीनस्वभावत्वात्, उत्पन्नस्यापि कालान्तरव्याप्तिः अपरापरतव्यापारादिति चेत्; न; प्रागेव कालान्तरव्यापितयोत्पन्नत्वात्; प्रागतव्यापितयोत्पन्नस्य पश्चात्तव्यापित्वं तद्व्यापारादिति चेत्; न; प्राच्यातव्यापिरूपपरिक्षयाभावे हेतुशतेनापि पुनस्तव्यापिरूपकरणासम्भवात् विरोधात् । तत्परिक्षयभावे पुनस्तदन्यदेव तव्यापारसम्पादितं भवेत् । तन्न तस्य कालान्तरव्याप्तिः अपरापरतद्व्यापारात् । ततः कालान्तरव्याप्तिमन्ति दर्शनान्येव परापराण्युपजायन्त इति

---

१ –ज्ञानविष–आ०, ब०, प०, स० । २ तद्भावसा–आ०, ब०, प०, स० । ३ तस्य हि ता० । ४ –व्याप्तिरूपम् आ० ब०, प० । ५ चित्तस्यापि आ०, ब०, प०, स० । ६ पर्यवसात् न च तद्व्यापारस्य पूर्वापरसमयभावित्वप्रतीतेः न चैक–आ०, ब०, प०, स० । ७ अपरापरचक्षुरादिव्यापाराणाम् । ८ विशेषव्या–आ०, ब०, प०, स० । ९ –व्यापिनिरी–आ०, ब०, प०, स० । १० प्रत्यक्षस्य । ११ अपरापरचक्षुरादिव्यापारादपि । १२ प्रथमप्रत्यक्षस्य । १३ प्रागिव स० । १४ प्रागेव त–आ०,ब०,प०,स०। १५ अपरापरचक्षुरादिव्यापारात् । १६ विरोधात् तत्परिच्छेदात्किमेवं आ०, ब०, प०, स० । १७ प्रत्यक्षस्य ।

चेत्, न, तेषां प्रयोजनाभावात्। प्रथमतश्चापरोपनतितेनैव कालान्तरव्यापिना प्रत्यक्षेण भावसामान्यस्य परिच्छेदात् किमेव भावानां प्रेक्षावत्त्वमस्ति यत्तेषु प्रयोजने भवन्ति नासतीति ? स्वहेतुसामर्थ्यायत्तजन्मानो हि ते सैत्यसति च प्रयोजने भवत्येव निश्चमेनेति चेत्, सत्यमेवैतत्, यदि तथादर्शनं तेषाम्, दृष्टे चानुपपत्तिपर्यनुयोगस्यासम्भवात्। न चैवम्। न चादर्शनपथप्रस्थायिनि वस्तुनि एवमुच्यत्वसुचितम्, अतिप्रसङ्गात्। तन्न कालान्तरव्यापिनापि प्रत्यक्षेण कस्यचित्कालान्तरव्यापिरूपं सूपगमम्। तन्न विशेषात्मनः कालान्तरव्यापिरूपं सम्भवति, असम्भवितपतेः। तदुक्तम्– ५

"एकत्र दृष्टो भेदो हि क्वचिन्नान्यत्र दृश्यते।" [प्र० वा० २।१२६] इति।

नापि विशेषव्यतिरिक्तस्य सामान्यस्य तैव्यापित्वम्, तव्यतिरेकस्यैवाप्रतिपत्तेः विशेषपुञ्जैरेवोपलम्भात्। यदि हि विशेषवत्सामान्यमपि स्यात् तेवुद्धिरप्युपलब्धैव स्यात्, न चैवम्। न चानुपलब्धस्यास्तित्वं व्योमकुसुमवत्। तदप्युक्तम्– १०

"न तस्माद्भिन्नमस्त्यन्यत्सामान्यं बुद्ध्यमेदतः॥"[प्र०वा० २।१२६] इति।

एतेन साहश्यसामान्यमपि प्रत्युक्तम्, तस्यापि विशेषव्यतिरिक्तस्यानुपलम्भात्, विशेषाणां चानन्वयात्। तन्न सामान्यविषयत्वमक्षज्ञानस्य यतो व्यवसायस्तदभावस्वभावमिति।

तत्रेदमुच्यते–प्रथमस्तावद्विकल्पोऽनुपपन्न एव, क्षणक्षीणस्य प्रत्यक्षस्यान्वयविषय- १५
त्वाभावे निर्विषयत्वप्रसङ्गात्। स्वरूपविषयत्वाभ्येति चेत्, न तर्हीन्द्रियैर्प्रत्यक्षत्वम्, स्वरूपे तदव्यापारभावात्। क्षणिकग्रहिर्षस्तुविषयत्वात् तत्प्रत्यक्षस्वमिति चेत्, तस्यै सद्विषयत्वं कुतोऽवसीयते ? "योग्यदेशस्थितेस्तज्ज्ञानाग्रम्" इत्यादिकाद्विचारादिति चेत्, स विचारः किमाम प्रमाणं भवेत् ? प्रत्यक्षमिति चेत्, न, तस्य निर्विकल्पत्वेन पर्वविचारकस्यायोगात्। विचार- २०
कस्यापि प्रत्यक्षत्वे तस्य समयत्रयगोचरत्वमुररीकर्तव्यम्, अन्यथा मध्यसमयपर्यवसितेन्द्रिय-व्यापारोपलब्धसत्ताकस्य कथमतिक्रान्तेऽनागते च प्रत्ययस्य प्रवृत्तिरिति ? अस्त्यै तदूव्यापारस्यानुपपत्तेः। यदि हि तत्प्रत्यक्षं मध्यमसमयगतं पूर्वापरयोरपि समयौ पश्येत्तदा मध्ये इन्द्रियव्यापारस्य तत्प्रत्यक्षस्य च सद्भावं पूर्वापरयोश्च तदभावं पश्येत् नान्यथा। न हि मुलक्षमप्रतियत्नस्यक्षं तत्र कस्यचिद् भावमभावं वा प्रत्येतुमर्हति। भवतु तर्स्यै समयत्रयगोचरत्वमिति चेत्, २५
कथमुच्यम्–"न पूर्वं परत्र न परं पूर्वत्र प्रत्यक्षम्" [प्र०वार्तिकाल० २।१०६] इति ? प्रस्तुत-प्रत्यक्षस्वरूपस्य प्रत्यक्षस्य पूर्वापरसमयविषयतोपपत्तेस्तत्कृतस्य विशेषाभ्यवग्रहणस्याप्यनिवारणात्। ततो निरवद्यमेतत्–"व्यक्तीनां भावो न तासामन्वयः" [प्र० वार्तिकाल० २। १२६] इति। यदि पुमरिदमपि प्रत्यक्षं न पूर्वापरक्षणौ पश्यति कथं "तत्रेन्द्रियव्यापारतद्-

---

१ –ज्यत्वो आ०, ब०, प०, स०। २ उत्पत्तौ च। ३ कालान्तरव्यापित्वम्। ४ सामान्यबुद्धिरपि। ५ निर्विकल्पस्यक्ष प्र–आ०, ब०, प०। ६ प्रवर्त्त स्व–आ०, ब०, प०, स०। ७ प्रत्यक्षस्य। ८ भवेत्प्रत्यक्षं तत्र कस्यचि–आ०,ब०,प०। ९ मध्यसमयव्यापारोपलब्धप्रत्यक्षस्य। १० प्रत्यक्षस्य। ११ पूर्वापरक्षणौ।

ध्यक्षयोरभावं पश्येत् ? । पश्यतु को दोष इति चेत् ; न; 'अपरमपि प्रत्यक्षं पूर्वापरक्षणावग्रंत्यक्षवदेव तत्र कस्यचिदन्वयं पश्यतु न कश्चिद्दोषः' इत्यपि प्रसङ्गात् । ततो 'न पूर्वं परत्र' इत्यापि परस्य प्रयासमात्रमेव, तथापि कस्यचिद्[3]निष्टस्याऽभावात् । तन्नायं विचारः प्रत्यक्षम् ।

अनुमानमिति चेत् ; न ; लिङ्गाभावात् । इन्द्रियव्यापाराश्रितत्वमेव लिङ्गम्, तेन तदध्यक्षस्य क्षणपर्यवसानसाधनादिति चेत् ; क पुनस्तस्य स्वसाध्याविनाभावप्रतिपत्तिः ? संहृत[4]सकलविकल्पावस्थायामिति चेत् ; न ; तस्या एवापरिज्ञानात् अनुपजातविकल्पकलापा निरंश[5]क्षणक्षीणस्वपरविषयदर्शनप्रबन्धरूपा सेति चेत् ; नन्विदं श्रुत एव भवद्वचनात्। न कदाचिदप्यनुभवपथमुपसर्पति अन्तर्बहिश्चान्वयिनो नानावयवसाधारणस्यैव चेतनस्येतरस्य च प्रतिपत्तिदर्शनात्।

तस्माद् दुरन्तसंसारदुःखदावाद्भीरुभिः ।
अदृष्टा कल्पितैवेयं लोकविप्लवकारिणी ॥ ४३४ ॥

तर्हि विपक्षे समयान्तरप्रवृत्तिलक्षणे बाधकबलादविनाभावप्रतिपत्तिरिति चेत् ; न ; विरोधाभावे बाधकानुत्पत्तेः । अस्तु क्षणमात्रपर्यवसितेन्द्रियव्यापारकृतं प्रत्यक्षं न च तन्मात्रपर्यवसितम्, किमत्र विरुद्धम् ? नियतातीतादिविषयत्वमेव । न ह्यतीतादिविषयत्वसम्भवे प्रत्यक्षस्य नियततद्विषयत्वं शक्यमुपपादयितुम् ; तदन्यस्याप्यतीतादित्वाविशेषात् । एवञ्च सर्वः सर्वाकारदर्शी स्यात् । न चैवम्, अतीते स्मरणस्य अनागते च सम्भवानुमानस्य वैयर्थ्यापत्तेः । अतो विरोधबलोपनीतस्यातिप्रसङ्गस्यैव हेतुबाधकस्य विपक्षे सम्भवात् कथं तद्बलेनाविनाभावप्रतिपत्तिर्न भवतीति चेत् ? न; वर्त्तमानविषयत्वेऽपि दोषात् । तथा हि—

ग्रहणं वर्त्तमानस्य प्रत्यक्षेणावगच्छतः ।
सर्वस्य वर्त्तमानस्य तेनैव ग्रहणं भवेत् ॥ ४३५ ॥
प्रत्यक्षान्तरमन्यत्र तद्वृत्तेर्वोपकल्पितम् ।
गृहीतग्रहणादोषात्परस्य स्मरणादिवत् ॥४३६॥
प्रत्यक्षं वर्त्तमानस्य यस्यैवाकारमुद्वहेत् ।
तस्यैव ग्रहणं तेन न सर्वस्येति चेन्मतम् ॥४३७॥
सर्वस्य वर्तमानत्वाविशेषात्स्वेष्टवस्तुवत् ।
तदेव नियतं कस्मादाकारोद्वहनं भवेत् ॥४३८॥
'यत्रैव योग्यमध्यक्षं तस्यैवाकारमुद्वहेत् ।
गृह्णाति च तदेव' इति प्रत्यवस्थानं सम्भवे ॥४३९॥
अतीतादिग्रहेऽप्येवं नियमः किन्न मन्यते ।
यत्प्रत्यक्षस्य तत्रापि सामर्थ्यं नियमान्वितम् ॥४४०॥

---

१ —र्शं यदेव आ०, ब०, प०, स० । २ कथञ्चिद्दोषः आ०, ब०, प०, स० । ३ —निष्टमा—आ०, ब०, प०, स० । ४ संहृतसकलविकल्पावस्था । ५ क्षणान्तर । ६ क्षणमात्र । ७ तद्वृत्तेर्वावक—आ०, ब०, प०, स० । ८ —न सम्भवेत् आ०, ब०, प० ।

'सामर्थ्यं ननु भावानां येऽपेक्षते कार्यदर्शनात् ।
सामर्थ्यात्कार्यकल्पत्वमिस्तु न युक्तान्योन्यसंभवात् ॥४४१॥
इत्यपि प्रत्यवस्थानं तमोधाद्वल्यसम्भवम् ।
आकारनियमेऽप्येवं दोषवादानिपेचनात् ॥४४२॥
आकारनियमः सिद्ध प्रत्यक्षात्, 'स तु किंकृतः' । ५
इत्यप्राप्यप्रसामर्थ्यस्योत्तरत्वेन वर्णनात् ॥४४३॥
नान्योन्याश्रयदोषोऽत्रेत् , गृहीतनियमेऽप्ययम् ।
समाधिः किम येन स्यं तत्रैवासि पराङ्मुखः ॥४४४॥

अपि च–

इन्द्रियस्यात्यकालत्वं तैदध्यमे भवेदपि । १०
कारणस्यात्यदेशत्वं कार्यं किन्नोपगच्छति ॥४४५॥
तथा सदात्यकाद्वर्हेनं महाधूमसम्भवः ।
वीतावप्यणुनो न स्यात् स्थूलनाशाद्धुवेदयः ॥४४६॥
प्रतीतिबाधनान्नैवमिति चेदुमिधीयते ।
कालदैर्घ्येऽपि संवित्ते प्रतीतिः किम विद्यते ॥४४७॥ १५
देशव्याप्तिरणुत्वान्न भावस्येत्यपि दुर्यशः ।
अयस्यब्यादिसंसिद्धेर्यास्यानं निरूपणात् ॥४४८॥
न चापि देशव्याप्तित्वमन्नातीव प्रसक्तिमत् ।
योग्यतानियमं मुक्त्वा नान्यत्रस्ति च कारणम् ॥४४९॥
कौलव्याप्तौ च बोधस्य सैं समानस्ततः कथम् । २०
अतिप्रसङ्गो येनास्यौ बाधनं परिकल्प्यते ॥४५०॥

तत्र बाधकपदार्थस्याविनाभावनिश्चय । न चानिश्चितविनाभावस्य गमकत्वम् अतिप्रसङ्गात् । तदयमप्रयोजको हेतुः।असिद्धश्च, इन्द्रियव्यापारस्य क्षणमात्रनियमभावर्त्वप्रसिपत्तेरुपायाभावात्, अतीतस्य स्मरणेन भाविनश्च समयस्यानुमानेनावद्यम्भात्र तत्रेन्द्रियव्यापार । न हि स्मरणानुमान व्यापार एवेन्द्रियव्यापारः तस्मिन्नन्यनरस्यापि विषयपरिच्छेदस्याभ्यक्षत्वप्रसङ्गादिति चेत् , न, २५ अभ्यक्षयोग्ये अतीते भाविनि च स्मरणानुमानप्रवृत्तेरभावात् । स्मरण हि नानासमयव्यवहित पदोपलब्धपूर्वे प्रवृत्तिमत् , न च तस्यानुनिरुपत्यक्षविषयत्वम् । अनुमानस्य अनन्तरसमयगोचरत्वमपि न प्रत्यक्षविषयापेक्षम् अप्रत्यक्षविषय एव इन्द्रियविपुदायुत्तरपरिणामादौ तैदभ्युपगमात् । आनन्तर्यावि[क्षेपात्तत्परिणामस्यापि कस्मान्नेन्द्रियविषयत्वमिति चेत् ? न, योग्यतानियमेन विष-

---

१ तत्रैवापि प–आ०,ब०,प०। २ इन्द्रियप्रवृत्ते । ३ कालस्यापी ब्य०,ब०,प०,स०। ४ गोम्यत्वनियम । ५ कालस्यापि । ६ प्रतिपत्तावुपाया–ता०, स० । ७ अनुमानाभ्युपगमात् । ८ चक्षुर्विषुदायुत्तरपरिणामस्यापि ।

व्यवस्थाया निवेदितत्वात्। ततो नास्मादुपायादिन्द्रियव्यापारस्य क्षणनियमप्रतिपत्तिः। तद्व्यापारजनितस्य प्रत्यक्षस्य क्षणनियमात् तद्व्यापारस्यापि तन्नियमप्रतिपत्तिरिति चेत्; तत्प्रत्यक्षस्य कुतस्तन्नियमः? तद्व्यापारस्य तन्नियमादिति चेत्; न; परस्पराश्रयात्—इन्द्रियवृत्तेः क्षणनियतत्वे तत्प्रत्यक्षं क्षणनियतं स्यात्, तत्प्रत्यक्षक्षणनियतत्वादिन्द्रियवृत्तिः क्षणनियता स्यादिति। स्वत एवेन्द्रियवृत्तेस्तन्नियमः प्रतीयत इति चेत्; न; तद्वृत्तेरचेतनत्वात्। चेतनैव तद्वृत्तिः तद्वृत्तित्वात् स्वप्नोपलब्धतद्वृत्तिवदिति चेत्; न; तच्चेतनत्वस्य "विप्लुताक्ष" इत्यादौ निराकरणात्। तन्न कुतश्चिदपि तद्व्यापारस्य तन्नियमस्य सिद्धिः।

सिद्धस्यापि न गमकाङ्गत्वं व्यभिचारात्। दृश्यते हि समयपर्यवसितादपि तद्व्यापाराद् अलातक्षणेष्वन्वयदर्शनम् अन्यथा चक्रभ्रान्तेरभावप्रसङ्गात् तस्यास्तदन्वयज्ञानरूपत्वात्, तज्ज्ञानस्य चेन्द्रियजत्वात्। उपघातवशादल्पसमयादपि तद्व्यापाराच्चक्रज्ञानमविरुद्धमिति चेत्; न; स्तम्भक्षणेष्वपि तत एवान्वयज्ञानस्याविरोधप्रसङ्गात्। कुतस्तत्रोपघात इति चेत्? अलातक्षणेषु कुतः? तेषामेव शीघ्रवृत्तितिरोहितभेदान्वयादिति चेत्; न; स्तम्भक्षणानामपि शीघ्रवृत्तित्वाविशेषात्, अन्यथा विलम्ब्य प्रतिपत्तिप्रसङ्गात्। उपघातजत्वे अलातचक्रज्ञानवत् तदन्वयज्ञानस्यापि विभ्रमः स्यादिति चेत्; न; तथापि व्यभिचारस्यापरिहारात्। अपि च, यदि तद्विभ्रमेण प्रयोजनं मा भूदुपघातनिबन्धनं तदन्वयज्ञानम्, अनुग्रहनिबन्धनं तु स्यात्, विषयक्षणान्वयेन वस्तुभूतेनैव तदिन्द्रियस्यानुग्रहात्। विषयस्याकारणत्वात् कथं तदन्वयस्यानुग्राहकत्वमिति चेत्; उपघातकत्वं कथम्? सौगते मते विषयस्य" कारणत्वादिति चेत्; अनुग्राहकत्वमपि तत एवास्तु तं प्रत्येव तदन्वयस्य वस्तुभावोपपादनात्, तद्वस्तुभावस्यापरिस्खलितात्तज्ज्ञानादेव प्रतिपत्तेः। न चैवम् अलातचक्राकारस्यापि वस्तुभावः; करव्यापारकृतशीघ्रपरिवर्त्तनाभावेऽपि तत्प्रतिपत्तिप्रसङ्गात्, वस्तुप्रतिपत्तौ तत्परिवर्त्तनस्याकिञ्चित्करत्वात्। तदेव तत्र सामग्रीति चेत्; गतमिदानीं विभ्रमवार्त्तया, काचादेरपि रजनीकरव्याकारप्रतिपत्तौ सामग्रीरूपत्वोपपत्तेः, तद्व्याकारस्यापि वस्तुत्वप्रसङ्गात्। बाधकप्रत्ययोपनिपातस्य चक्राकारेऽपि भावात्। तन्नापरिस्खलितप्रत्ययवेद्यत्वं तदाकारस्य यतो वस्तुभावः स्यात्। स्तम्भाद्यन्वयज्ञानमपि परिस्खलितमेव मनोविकल्पत्वान् मरीचिकातोयविकल्पवत्। क्षणक्षीणानि हि स्तम्भस्वलक्षणानि प्रत्यक्षतो वेद्यन्ते, तदनन्तरकालभावी तु मनोविकल्पः तदन्वयमविद्यमानमेवोपदर्शयतीति चेत्; न; तस्येन्द्रियव्यापारान्वयव्यतिरेकानुविधायिनो मनोविकल्पत्वानुपपत्तेः अलातचक्रविभ्रमस्यापि तद्विकल्पत्वप्रसङ्गात्। तथा च व्याहतमेतत्—

---

१ इन्द्रियव्यापार। २ क्षणनियमप्रतिपत्तिः। ३ इन्द्रियव्यापारस्य। ४ तद्वृत्तत्वा—आ०,ब०,प०,स०। ५ न्यायवि०श्लो० ४८। ६ इन्द्रियव्यापारात्। ७ ज्ञानविरो—आ०,ब०,प०,स०। ८ —जन्त्वलात—आ०,ब०,प०,स०। ९ तदापि आ०,ब०,प०। १० अन्वयज्ञानस्य सत्यत्वेन। ११ —स्याकार—आ०,ब०,प०,स०। १२ सौगतम्। १३ —व्यपरिवर्तनभा—आ०,ब०,प०,स०। १४ —करव्यापार—आ,ब०,स०।—करयव्यापार—प०। १५ —रूपत्वापत्तेः प०। १६ चन्द्रद्व्याकार। १७ अलातचक्राकारस्य। १८ मनोविकल्पत्वात् आ०,ब०,प०,स०। "परस्परविविक्ताणुप्रथमप्रतिभासनम्। विकल्पकात्तु विज्ञानात् घनाकारावभासिता॥" —प्र०वार्तिकाल० २।२९६। १९ मनोविकल्पत्व।

"शीघ्रवृत्तेरलातादेरन्वयप्रतिघातिनी ।
चक्रभ्रान्तिं दृगाधत्ते न दृशां घंटनेन सा ॥"[प्र०वा० २।१४०] इति ।

स्पष्टप्रतिभासत्वान् न चक्रसंवेदनस्य मनोविकल्पत्वम् । न हि वह्निकल्पा स्पष्टावभासिनो भवन्ति । "नैं विकल्पानुविद्धस्य स्पष्टार्थप्रतिभासिता ।" [प्र० वा० २।२८३] इति वचनादिति चेत् , न, स्वभ्यागन्वयज्ञानेऽपि स्पष्टप्रतिभासाविशेषात् । दर्शनसाभिप्यतः तत्रै ५
तैंप्रतिभास इति चेत् , न, चक्रसंवेदनेऽपि तत एव तदापत्तेः । तस्य तदन्वयज्ञानस्य मनोविकल्पत्वम् ।

'ननु इन्द्रियव्यापारस्य अनुमहचरादन्वयज्ञानहेतुत्वे प्रथमतद्व्यापारादेव तदुत्पत्तेः अपरापरज्ञापारेण किं कर्तव्यम् ? परापरं तैंज्ञानमेवेति चेत् , न, तस्यैव प्रयोजनानवधारणात् । अन्वयग्रहणस्य प्रयमज्ञानादेव भावात् ।' इत्यपि अलातचक्रज्ञाने समानः पर्यनुयोगः—प्रथमे- १०
न्द्रियव्यापारादेर्योपपातव्यज्ञात् तज्ज्ञानोत्पत्तेरपरापरतज्ज्ञापारस्य तत्कृतस्य व्यापारफलानस्य वैगर्भ्यापिशेषात् । अपरापरज्ञानेनैव चक्राकारप्रतिपत्तौ अन्वयप्रतिपत्तिरपि तथैवास्तु । तथा च व्याहतमेतत्—
"तथा सति परापरदर्शनानां विच्छेदात् एकेनापि न तत्कालान्तरस्थानग्रह "[ ]इति ।
तन्न क्षणपर्यवसितस्येन्द्रियव्यापारस्य गमकाङ्गत्व व्यभिचारात् । ततो नानुमानत्वमपि विचारस्य ।

अथस्तुर्मस्पर्शी विकल्प एवायं कश्चिन्न प्रमाणमिति चेत् , कथमतः प्रत्यक्षस्य क्षणनियमप्रति- १५
पत्तिः ? तदियमेवाप्रतिपत्तिरपि तत एव प्रसज्यात् । तादात्म्याद् विकल्पात्परामिमतसिद्धिं निवारयन् तत एव स्वाभिमतमवस्थापयतीति किमतः परं परस्य साहसमुद्भावयामः । तथा च वक्ष्यति—

"सर्वथा वितथार्थत्वं सर्वेषामभिलाषिनाम् ।
ततो वेद्यव्यवस्थानं प्रत्यक्षमेवेति साहसम् ॥" [न्यायवि०श्लो०१५६] इति ।

तन्न विपरीतज्ञानात्तस्यास्य भागविपरीतव्यवहारः । स्वत एवेति चेत् , न , तथैवासम्र- २०
तिपत्तेः । तदुक्तंवाह—

आत्मनाऽनेकरूपेण बहिरर्थस्य तादृशः ।
विचित्रं ग्रहणं व्यक्तं विशेषणविशेष्यभाक् ॥८॥ इति ।

'चक्षुरादिधियाम्' इत्यनुवर्त्तते । तदयमर्थः —चक्षुरादिज्ञानानाम् आत्मना स्वभावेन बहिरर्थस्य स्वभावेर्यद् ग्रहणं संवेदनं तद् व्यक्तम् उपहसनपरमेतद् अवद्यते व्यक्तोपाधा- २५
नाम् अव्यक्तमित्यर्थः । कीदृशेन तेन कीदृशस्य तस्य ग्रहणं व्यक्तमिति चेत् ? अनेकरूपेण । न विद्यते एकमनित्यं रूपं यस्य तेन क्षणिकेनेति यावत् । तादृशः अनेकरूपस्य क्षणिकस्येति यावत् ।

---

१ पातेन आ०, ब०, प०, म० । २ "न विकल्पानुविद्धस्य "—प्र० वार्तिकाल० । "न विकल्पानुविद्धस्येति स्पष्टप्रतिपत्तिरपि ॥"—प्र० वा० म० । ३ तात्पर्यज्ञानात् । ४ स्पष्टप्रतिभासः । ५ दर्शनसाभिमुख्यतः ।
६ अन्वयज्ञानमेव । ७ व्यवसाय—आ०, ब०, प० । ८ —न् स्त्र । आ०, ब०, प०, म० ।

अध्यक्षाद्यल्क्षणक्षीणान् क्षणिकस्यैव वेदनम् ।
तदव्यक्तं समाचष्टे सूरिर्मानविवर्जनात् ॥४५१॥
विचारस्य प्रमाणत्वं तत्र पूर्वं निवारितम् ।
शास्त्रकारस्तदेवाह [1]विशेषणविशेष्यभाक् ॥४५२॥ इति ।

५ **विशेषणं** चक्षुरादिव्यापारस्य क्षणनियम एव विशिष्टज्ञानहेतुत्वात्, तच्च **विशेष्यं** चैं तत्कृतं प्रत्यक्षस्य क्षणविषयत्वम्, ते स्वविषयत्वेन भजत इति **विशेषणविशेष्यभाक्**। विचाररूपं तदपि **व्यक्तम्**, अत्राप्युपहसनं तस्याप्रमाणत्वेन निरूपणात्, अप्रमाणोपाश्रयणेन कस्यचिदप्यसिद्धेरिति भावः। स्वसंवेदनमेव तर्हि [3]तत्र प्रमाणमिति चेत्; अत्राह–**'विचित्रम्'** इति। चिदिति चिच्छक्तिरनुभव इत्यर्थः, सैव त्राणं त्रा परिरक्षणं यस्य तच्चित्रम्, तद्विपरीतं १० **विचित्रं**–क्षणक्षयविषयत्वं प्रत्यक्षस्य। अनुभवप्रसिद्धं खल्वनुभवपरिरक्षितं भवति। न चेदं तत्प्रसिद्धम्। न हि प्रत्यक्षं किञ्चिदपि क्षणविषयत्वेनात्मानमावेदयदुपलभ्यते। न चानुपलब्धस्य कल्पनम् अतिप्रसङ्गात्। तन्न क्षणविषयं प्रत्यक्षम्। न च तस्यैं निर्विषयस्य सम्भव [6]इत्यसम्भवे असम्भव्येव प्रथमो विकल्पः।

[7]द्वितीयस्तु निरुपद्रव इति तमुपाश्रित्य प्रत्यक्षस्य सामान्यविषयत्वनिवेदनेन व्यव- १५ सायात्मकत्वं व्यवस्थापयन्नाह–**'आत्मना'** इत्यादि। **आत्मना** चक्षुरादिबोधस्वभावेन **ग्रहणं** साक्षात्करणं **बहिरर्थस्य** घटादेः **व्यक्तं** सर्वजनप्रसिद्धमिति। अनेन–

अशक्यप्रतिषेधत्वं बहिरर्थस्य दर्शयन्।
विज्ञानमात्रवादादेर्वक्ति स्वेच्छानिबद्धताम् ॥४५३॥

कथं पुनर्बहिरर्थस्य ग्रहणम्? कथञ्च न स्यात्? एकरूपत्वे तदयोगात्। यद्येकमन्तर्भाव- २० ग्रहणप्रवृत्तमेव प्रत्यक्षस्य रूपम्; कथं तेन बहिर्भावस्य ग्रहणम्, बहिर्भावस्याप्यन्तर्भावत्वप्रसङ्गात्? न हि अन्तर्भावग्रहणैकरूपेण गृह्यमाणस्य बहिर्भावत्वम्; अन्तर्भावस्यापि तद्भावाभावप्रसङ्गात्। बहिर्भावग्रहणप्रवृत्तमेव तर्हि तस्यैं रूपमिति चेत्; न; अन्तर्भावस्यानुभवप्रसङ्गात्। न चानुभवानाव्रातस्य बहिर्भावगोचरत्वम्; **'परोक्ष'** इत्यादिना[11] तन्निराकरणात्। तत्कथं बहिर्भावग्रहणं सुप्रसिद्धम्, असम्भवदर्थस्य सुप्रसिद्धत्वायोगादिति चेत्? अत्राह– २५ **'अनेकरूपेण'** इति। अनेकम् आत्मनि[12] व्याप्तमन्यत् अन्यच्चार्थे रूपं यस्य तत् **अनेकरूपम्**, तेनेति।

अनेकरूपं प्रत्यक्षमात्मार्थग्रहणक्षमम्।
एकस्वभावपक्षोक्तदोषेणालिप्यते कथम्? ॥४५४॥

---

१ विशेषेण वि–आ०, ब०, प०, स०। २ चैतत्कृतम् आ०, ब०, प०, स०। ३ तत्प्रमा–आ०, ब०, प०, स०। ४ परीक्षितं आ०, ब०, प०। ५ प्रत्यक्षस्य। ६ प्रत्यक्षस्याऽसम्भवे। ७ 'विशेषात्मकतद्भवसामान्यस्वरूपं प्रतिक्षणभेदिनः चक्षुरादिप्रत्यक्षस्य वेद्यम्' इत्याकारकः। द्रष्टव्यम्–पृ० १४२ पं० ७। ८ 'कालान्तरव्यापिनो वा' इत्याकारकः। ९ अन्तर्भावाभाव। १० प्रत्यक्षस्य। ११ न्यायवि० श्लो० ११। १२ आत्मनि व्याप्तम् आ०, ब०, प०। आत्मव्याप्तम् स०।

वेदमेकत्वभावेन रूप तद्वेदनेकम् ।
तस्य नानात्वभावत्वमेवं सति सुदुर्घटम् ॥४५५॥
एकरूपप्रहाविष्टत्वभावस्येव तत्परम् ।
विषयीभावमापन्न कर्थ तस्मात्पृथक् भवेत् ? ॥४५६॥
वेर्ग नानात्वभावेन तैन्चेत्स्यादनवस्थितिः । ५
तस्यापि नानारूपेण परेणैव प्रवेदनात् ॥४५७॥

इति चेत् , अत्र प्रतिविधानम्–

अनेकरूपज्ञान हि नान्यत्रत्यक्षवेदनात् ।
किं तत्रानेकरूपस्य परस्य परिकल्पनम् ॥४५८॥
अनवस्थानदोषस्यात्यं यत्सामर्थ्यादुपस्थितम् । १०
बहिरर्थपरिज्ञानं निरुणद्धि प्रसिद्धिमत् ॥४५९॥

न हि प्रत्यक्षवेदनादन्यदेव अनेकरूपवेदनम् । तच्च तच्छक्तिरूपादुपपन्नमेव,ततः किं तत्रापरानेकरूपपरिकल्पनेन ? यतोऽयमनवस्थानदोषो बहिरर्थपरिच्छेदप्रसिद्धिविध्वंसकारी निराबाधवृत्ति प्रवर्तेत । बहिर्हि प्रत्यक्षादक्यतिरिक्तमेवानेकरूपं तत्परिज्ञानविषयत्वात् तद्वत्, तथा चान्येन रूपेणार्थवेदनम् अन्येन च स्ववेदनमिति स्वराड्डागतो 'विरुध्यत इति चेत् , न, सर्वथा १५ तद्व्यतिरेकस्याशक्यसाधनत्वात् । सर्वथा हि प्रत्यक्षादनेकरूपस्याव्यतिरेके तदेव प्रत्यक्षं निर्भागमवशिष्येत । न च निर्भागं प्रत्यक्षमन्यद्वा वस्तु किञ्चित्सम्भवति निरवयवप्रमाणसंवेद्यत्वाभावादिति करिष्यत एवात्र प्रबन्धः । कथञ्चिद्व्यतिरेकसाधनं तु सिद्धसाधनमेव, 'रूपतद्वतोरत्यन्तव्यतिरेकस्यानभ्युपगमात् । नन्वेवमपि येनात्मना प्रत्यक्षात्तैर्व्यतिरिक्तं येन तत्परिज्ञानमेव 'तस्यापि परिज्ञानमस्तु, येन तु "तद्व्यतिरिक्तं तेनान्यदेव "तद्वेदनाद् अनेकरूपवेदनमिति २० तस्मिन्धनमन्यदेव शक्तिरूपं" परिकल्पयितव्यम , तद्रूपवेदनमप्यन्यस्मादेव शक्तिरूपादिति तदवस्थमनवस्थानमिति चेत् , अन्यदेव तद्वेदनमिति कुतः ? तथैवानुभवादिति चेत् , न, "रूपतद्वद्विषयस्य वेदनद्वयस्यानुभवात् । अनुभवे वा कथमनवस्थान तस्यानुभूयमानविकल्पत्वात्, तदिदमन्योन्यव्याहतम्–'अनुभवस्यानवस्थानं च' इति । यदि भिन्न 'तैद्वेदन नास्ति, कर्थ तत प्रत्य- २५ क्षस्य वेदनम् ? अथेदनविषयस्य शक्तिरूपस्य तद्वेदनानङ्गत्वात्, अन्यथा प्रत्यक्षस्याप्यविदितस्यैव अर्थवेदननिबन्धनत्वापत्तेरिति चेत् , कस्तस्याग्रेवेदनमाह ? प्रत्यक्षतादात्म्येन तद्वेदनस्यामिहित-

---

१ प्रत्यक्षस्य । २ प्रत्यक्षस्य अनेकरूपम् । ३ –दूषनतमेव ता० । ४ –क्षादिनि–आ०, ब०, प०, स० । ५ –ग्रहिण–आ०, ब०, प०, स० । ६ विरुध्येत आ०, ब०, प०, स० । ७ रूपमात्रवृत्तौ । ८ तत् अनेकरूपम् । ९ ग्राह्यतरिज्ञानमेव । १० अनेकरूपात्मि । ११ अनेकरूपम् । १२ प्रत्यक्षवेदनात् । १३ कर्थ तत्र–आ०, ब०, प०, स० । १४ रूपग्रहि–आ०, ब०, प०, स० । रूपमात्रतद्वतोरपरस्य । १५ –तरिक्तं–ता० । १६ अनेकरूपवेदनम् ।

त्वात्। अपरिज्ञातेन रूपेण कथं तस्य प्रत्यक्षपरिज्ञानाङ्गत्वमिति चेत्? न; सर्वात्मना परिज्ञातस्यैव तस्य तदङ्गत्वमित्यनभ्युपगमात्। तद्भेदस्यापरिज्ञाने कथमस्तित्वमिति चेत्? न; कार्यभेदादेव तद्भेदस्य सुपरिज्ञानत्वात्। भिन्नं हि तत्कार्यमर्थवेदनं स्वसंवेदनं च। न हि तदेकरूपत्वे सत्युपपन्नम्, उक्तत्वात् न्यायस्य। न चैकान्तिकस्तद्भेदः; कार्यभेदस्याप्यैकान्तिकत्वाभावात्। न हि स्वसंवेदनादर्थवेदनं ततो वा स्वसंवेदनमेकान्ततो भिन्नम्; अभेदस्यापि कथञ्चिदुपलम्भात्। नन्वेवं बहिरपि नानानीलपीतादिविषयत्वे कथञ्चित्संवेदनभेदः तन्निबन्धनश्च रूपभेदः प्राप्नोतीति चेत्; सत्यमेतत्; न्यायोपपन्नत्वात्। अनेकरूपत्वमपि तस्य यद्येकरूपनिबद्धमेव, अनेकसंवेदनत्वमेव तस्य तन्निबद्धमस्तु किमनेकरूपत्वकल्पनया? तदपि तदपरानेकरूपनिबद्धमेवेति चेत्; न; तस्यापि तदपरानेकरूपनिबद्धत्वकल्पनायामनवस्थापत्तेरिति चेत्; न; पूर्वपूर्वानेकरूपनिबद्धस्य उत्तरोत्तरस्य तद्रूपस्योपपत्तेः अव्यवस्थितदोषाभावात् अनादित्वेनोपादानोपादेयभावस्य प्रकल्पना।

भवतु बहिरर्थस्य ग्रहणम्, अन्वितस्य तु कथं ग्रहणम्? प्रत्यक्षस्य क्षणपर्यवसायित्वेन तदन्वयाधिष्ठानपूर्वापरक्षणगोचरत्वाभावादिति चेत्; न; तस्य तत्पर्यवसायित्वाभावात्, कालान्तरावस्थायित्वेन प्रथमलोचनादिव्यापारादुत्पत्तेः। अपरापरस्तर्हि तद्व्यापारः कैमर्थक्यात्? प्रथमप्रत्यक्षादेव बहिर्भावान्वयस्य प्रतिपत्तेः प्रत्यक्षान्तरस्यानपेक्षणादिति चेत्; न; तेन तत्रैवापरापरस्यातिशयस्य साधनात्। तथा हि—

अक्षव्यापारतः प्राच्याद्युत्पन्नस्य दृगात्मनः।
अन्यतोऽवग्रहात्मत्वमीहनात्मत्वमन्यतः ॥४६०॥

अन्यतोऽवायरूपत्वं धारणात्मत्वमन्यतः।
तद्व्यापाराच्ततो नास्ति वैफल्यं तस्य तात्त्विकम् ॥४६१॥

तदेवाह—**अनेकरूपेण**। अनेकम् अपरापरलोचनादिव्यापारोपनीतप्राद्भावोपग्रहम् अवग्रहादिविशेषाभिख्यं रूपं यस्य तेनेति। ततो निराकृतमेतत्—"**ग्रहणस्य तु कालान्तरस्थानवत्त्वे सकृदेव तथा ग्रहणमिति। तदेव चक्षुरनुवर्त्तनं वृथेति प्राप्तम्**" [ ] इति।

स्यान्मतम्—प्रत्यक्षात् तद्विशेषस्यानर्थान्तरत्वे तद्वत् प्रथमचक्षुरादिव्यापारादेवोत्पन्नत्वात् किं पुनस्तद्व्यापारानुवर्त्तनेन; अर्थान्तरत्वे तु कथं तस्येति व्यपदेशः सम्बन्धाभावात्? तद्विशेषात्प्रत्यक्षस्योपकारः सम्बन्ध इति चेत्; न; तस्यापि तस्मादनर्थान्तरत्वे पूर्ववदोषात्, अर्थान्तरत्वेऽपि सम्बन्धाभावेन व्यपदेशानुपपत्तेः। उपकारादप्युपकारान्तरसम्बन्धपरिकल्प-

---

१ अनेकरूपस्य। २ –तस्य तस्यैतद्–आ०,ब०,प०,स०। ३ स्वपरि–आ०,ब०,प०,स०। ४ कार्यभेदस्यैका–आ०, ब०, प०, स०। ५ प्रत्यक्षस्य। ६ तन्निबन्धनम्–आ०, ब०, प०, स०। एकरूपनिबद्धमस्तु। ७ प्रत्यक्षस्य। ८ क्षणपर्यवसायित्वाभावात्। ९ अपरापरव्यापारेण। १० प्रत्यक्ष एव। तत्रैवापरापराति–आ०, ब०, प०,स०। ११ व्यापारात्। १२ अपरापरव्यापारस्य। १३ अवग्रहाद्यात्मकस्य अतिशयस्य। १४ प्रत्यक्षवत्। १५ उपकारस्यापि। १६ प्रत्यक्षात्।

नायामनयस्याप्रसङ्गादिति, तदपि न सम्यक्, एकान्तभेदाभेदयोः एव दोषेऽपि कथञ्चित्पक्षस्याप्रतिक्षेपात्। 'कथञ्चिद्' इति अन्यपदमाश्रमेतद्, तदर्थस्य आत्मन्तरस्याप्रसिद्धेरिति चेत्, न, तस्यानुभवोपरूढत्वात् निरपवादानुमानगोचरत्वेन च सुप्रसिद्धत्वात्। तच्चेदमनुमानम्- क्रमप्रवृत्तज्ञानेकरूपः चक्षुरादिबोधात्मा बोधत्वात् विचारवत्। कः पुनर्विचारः इति चेत्?

"एकत्र दृष्टो भेदो हि क्वचिदन्यत्र दृश्यते।
न सम्भाव्यिक्रमस्तस्यात्मामान्य बुद्ध्यभेदतः॥" [प्र०वा० २।१२६] ५

इत्ययमेव। कथमस्य निदर्शनत्व चक्षुरादिज्ञानात्मनः क्रमानेकरूपत्वे स्यादिति चेत्? उच्यते- अस्य खलु क्रमवृत्तस्य सहय उल्लेखा 'एकत्र' इति 'दृष्ट' इति 'भेद' इति 'कथित्' इति 'नान्यत्र' इति एवमुत्तरेऽपि। तेषाञ्च निरन्वयविच्छिन्नानां विचारत्वम्, अन्विवैकज्ञानाधिष्ठानानां वा? निरन्वयविच्छिन्नानामपि प्रत्येकं विचारत्वे- १०

प्रथमोल्लेखनादेव सामान्यामायनिर्णयात्।
तदुत्तरोत्तरोल्लेखो भवेयुर्निष्प्रयोजनाः॥४६२॥
[1]तत्सत्त्वनिश्चयेऽप्यौचित्यमुच्चार्याणारतोऽन्यथा।
तदुत्तरोत्तरव्यापारो व्यर्थकः कथम्? ॥४६३॥
सम्भूयैव विचारत्वं तेषामित्यप्यसङ्गतम्। १५
क्रमिणां सम्भवाभावात् क्षणक्षीणात्मनां मिथः॥४६४॥

ने हि सम्भूय तेषा विचारत्वम्, क्रममाविते सम्भवाभावात्। नापि प्रत्येकम्, एकत्र एव सामान्यामायनिर्शनात् उल्लेखान्तरयैयर्थ्यापत्ते, अपि तु सर्वेषामेव तेषा विचारत्वम्। काक्षानन्तरानुसन्धानशून्यानामपि तेषामेकत्र तन्निर्शने व्यापारादिति चेत्, न, कालप्रत्यासन्नयैव तत्र व्यापार(र) [2]सम्भवात्, व्यवहितानां तु पूर्वपूर्वोल्लेखानां तदयोगात्, अन्यथा सामान्यज्ञानेऽपि क्षणिकक्रममाविनयुरुषेन्द्रियापाराणां कारणत्वोपपत्तेः तत्सन्निधेय [3]प्राणकरण्य प्रेक्षावत्त्वमपाकुर्यात्। २०

अपि च, 'सर्वेषाम्' इत्युक्तम्, तत्र कः सर्वशब्दार्थः? निरपवादसमुदय इति चेत्, अयमपि कस्य व्यापारः? कस्यचिद्विकल्प्यमेवेति चेत्, तस्यापि सहि विचारोल्लेखान् 'एकत्रेति प्रथम उल्लेखो दृष्ट इति द्वितीयो भेद इत्यादिम्नतीयादि' इत्युल्लिखन्नयोद्दिश्य समुदिन्वतो २५ विचारवद्ग्रहव एवोद्देश्यः प्राप्तः, तेषामपि क्षणध्वंसिनां न प्रत्येक समुदयव्यवहरत्व पूर्ववदुल्लेखान्तरयैयर्थ्यापत्तेः। नापि सम्भयोपाधीनाम्, क्रममाविनेन तदभावात्। तेषामपि सर्वेषामेव

---

१ कथञ्चिदात्मत्व-आ०,ब०,प०,म०। २ "कथञ्चिदित्यनवद्येन"-देवुवि०टी०पृ० ९४। ३ -नाय दृष्ट-आ०,ब०,प०,म०। ४ एकत्रेति शब्दादेव। ५ एव भेद इत्यादिकाः। ६ तत्त्वा उत्तरोत्तरोल्लेखानां वार्थ वार्थिनयुक्तप्रकारः तत्सत्ता तदवेदनेति तदुत्तरोत्तरव्यापारस्य वैयर्थ्यम इति। ७ -त्वदेव-आ०,ब०,प०, म०। ८ क्रमाक्रम् स०। ९ व सम्भूय हा०। १० "तदुत्तरोत्तरम-आ०,ब०,प०,म०। तत्र शब्दार्थं वृत्तिम्। ११ "तत्सम्भवत् इन्द्रियव्यापार"-प्र०वार्तिकाल०३।१२६। १२ -सुरेन्द्रयम्-आ०, ब०, प०, म०।

समुच्चयप्रयोजननिबन्धनत्वमिति चेत्; न; तत्रापि 'अपि च' इत्यादेः प्रसङ्गस्यानिवर्तनात् चक्रकापत्तेः अनवस्थोपनिपाताच्च । तन्न विकल्पात् विचारोल्लेखानां सम्भवति समुच्चयः । सन्तानात् सम्भवतीति चेत्; न; तत्रापि विकल्पदोषात् । अपि च,

समुच्चयः कथं तस्मात्सन्तानश्चेदवस्तुसन् ।
तत एवान्यथा प्राप्तमन्यदप्यर्थवेदनम् ॥४६५॥
तत्पूर्वत्वात्पुमर्थस्य व्युत्पाद्यः स्यान्न स एव वः ।
निष्प्रयोजनमेवातः सम्यग्ज्ञानविचारणम् ॥४६६॥
तस्य वस्तुत्वमारोपादित्यप्येतेन चिन्तितम् ।
किञ्चारोपेण वस्तुत्वमवस्तुत्वान्न भिद्यते ॥४६७॥
अन्यथा माणवोऽप्यग्निरध्यारोपेण कल्पितः ।
सुप्रसिद्धाग्निवत्कुर्यात् किन्न पाकप्रयोजनम् ? ॥४६८॥
वस्तुसन्नपि सन्तानो भिद्यते चेत्प्रतिक्षणम् ।
विचारोल्लेखभागोक्तैरेष दोषैर्न मुच्यते ॥४६९॥
न चेद्भिद्येत; भिद्येत क्षणभङ्गिजगत्कथा ।
अचित्त्वादन्वितोऽप्येषः समुच्चयकरः कथम् ?॥४७०॥
[1]चित्त्वेऽप्येकस्वभावत्वे सन्तानान्न समुच्चयः ।
तस्मिन्नयं चायं चेति व्यापारस्याप्यसम्भवात् ॥४७१॥
[2]चित्पर्ययस्वभावत्वे मतान्तरगतिर्भवेत् ।
तन्न सन्ततो युक्तं सर्वगशब्दार्थकल्पनम् ॥४७२॥
अनेनैव पथाऽऽत्मापि योगोक्तः प्रतिवर्णितः ।
तस्याप्यचेतनत्वेनानधिकारात्समुच्चये ॥४७३॥
चेतनेन स्वनिष्ठेन समुच्चेता स चेन्मतः ।
प्रत्युल्लेखगतं तद्वा यद्वैकोल्लेखगोचरम् ? ॥४७४॥
एकोल्लेखगतेनासौ चेतनेन कथं पुमान् ।
अन्योल्लेखानविज्ञातान् समुच्चयपथं नयेत् ? ॥४७५॥
अतिप्रसङ्गदुष्टोऽयमविज्ञातसमुच्चयः ।
एवं हि चेतनं न स्यादेकोल्लेखेन सार्थकम् ॥४७६॥
प्रत्युल्लेखगतत्वे तु तस्यापि क्रमभाविनः ।
उल्लेखा बहवस्तेषामपि क्षणविनाशिनाम् ॥४७७॥

---

१ त्वादिप्र–आ०, ब०, प०, स० । २ तन्निर्विक–स० । ३ न-एवातः –आ०, ब०, प०, स० । ४ सन्तानस्य । ५ –ते चित्प्र–आ०, ब०, प०, स० । ६ –रूकथाम् आ०, ब०, स० । ७ चित्रोऽप्य–आ०, ब०, प०, स० । ८ चित्पर्याय–आ०, ब०, प०, स० ।

न तत्समुच्चयाक्षत्व प्रत्येकं प्राक्प्रदूषणात् ।
नापि सम्भूय, सम्भूतेः क्रमभाविष्वसम्भवात् ॥४७८॥
समुच्चितास्तदङ्गं चेत्,कः समुच्चयकृत् ? पुमान् ।
न, अनेनैव पर्येत्यादेर्दोषस्यात्राभियोगतः ॥४७९॥
सचक्रकानवस्थानदूषणस्यानिवारणात् । ५
तस्मान्न क्षणिकोद्देशैः सर्वैरपि समुच्चय ॥४८०॥
कथञ्चिन्नित्यरूपैस्तैः समुच्चेता पुमान्यदि ।
तैर्भिन्नत्वे पुमानन्यो निष्फलः परिकल्प्यते ॥४८१॥
स्मृतिप्रत्यभिज्ञादेरात्मकार्यस्य सर्वथा ।
तत्रैवान्वितविज्ञाने सर्वस्यापि समाश्रितः ॥४८२॥ १०
सूरिणा स्वयमेवेदं यथात्मानं वदिष्यते ।
तस्मात्सापि स्वनिष्ठेन चेतनेन समुच्चयी ॥४८३॥
आत्मा चेतनसम्बन्धाच्चेतनश्चेदुपाधिभिः ।
तच्चेतन्यम्, कथं तेन चेतनस्तत्स्वतः पुमान् ? ॥४८४॥
अतत्त्वे[ऽ]पि चेतनश्चासौ चेतनार्थक्षमः कथम् ? । १५
मणेरुपाधितो रक्तान्न हि रक्तप्रयोजनम् ॥४८५॥
अन्यथा तादृक्षेनैव सन्तानेन समुच्चयात् ।
आत्मकल्पनवैयर्थ्यमनिवार्यं प्रसज्यते ॥४८६॥
तस्मादचेतनोऽतत्त्वचेतनो वा नरोऽधमः ।
न क्षमश्चेतनार्थाय सन्तानवदयुक्तितः ॥४८७॥ २०
सम्बन्धिकस्य चिरस्य तास्विकत्वेऽपि तत्त्वतः ।
नरादर्थान्तरम्, तेन नरः स्यादचेतनः कथम् ? ॥४८८॥
आकाशस्यापि तेनैव चेतनत्वानुषङ्गतः ।
पुंस्येव तस्य सम्बन्धान्नेति चेत्, असदुत्तरम् ॥४८९॥
सम्बन्धिक पुनश्चित्तमेवं सत्यन्यदागतम् । २५
तेनाप्यर्थान्तरेणात्मा चिच्चेत्[२], व्योम न किं तथा ॥४९०॥
पुनः सम्बन्धिकं चित्तमात्मन्येवेति[३] कल्पने ।
प्राक्प्रदोषानुषृक्तिः "स्यादनवस्थानवैशसम् ॥४९१॥
नरादन्यतिरिक्तं चेच्चित्तमप्युपाधिकं तदा" ।

---

१ –मावीहर्ग–ज्ञा०, ब०, प०, स० । २ –रूपत्वे ज्ञा०, ब०, स० । ३ तस्मिन्क्षणानां नित्यत्वे ।
४ –आत्मवमेवैर् ज्ञा०, ब०, प०, स० । ५ आत्मयै–ज्ञा०, ब०, प० । ६ –तनं चे–ज्ञा०, ब०, प०, स० ।
७ अतत्त्वमप्येव । ८ चित्तम्य ज्ञा०, ब०, प०, स० । ९ कथा ज्ञा, ब०, प०, स० । १० –त्मनेवेति ज्ञा०, ब०,प०,स० । ११ –तिः स्या–ज्ञा०,ब०, प०, स० । १२ तथा ज्ञा०, ब०, प० ।

अनित्यत्वं नरस्यापि दुर्वारं चित्त्ववद्भवेत् ॥४९२॥
निरन्वयस्यानित्यस्य न चात्मत्वं सयुक्तिकम् ।
स्मृतिप्रत्यवमर्शादिकार्यं तस्याक्षमत्वतः ॥४९३॥
नित्यानित्यस्वभावत्वं यदि तस्योपवर्ण्यते ।
स्याद्वादानुप्रवेशोऽयं महान् दोषस्तवापतेत् ॥४९४॥
तन्न पुंसश्चिदात्मत्वं कथञ्चिदपि युज्यते ।
विचारोल्लेखभागानां समुच्चेता यतो भवेत् ॥४९५॥

तन्न विचारोल्लेखानां कुतश्चिदपि सम्भवति समुच्चयो यतः सर्वेषां विचारत्वमुपपद्यते। तन्न प्रथमो विकल्प उपपत्तिमान् ।

भवतु तर्हि द्वितीय एव विकल्पः अन्वितज्ञानाधिष्ठानानामुल्लेखानां विचारत्वोपगमादिति चेत् ; सिद्धं तर्हि विचारस्य क्रमानेकान्तरूपत्वमिति निरवद्यं तस्य निदर्शनत्वम् । ननु संशयादिदोषादनेकान्तः कथं तदात्मनि परमार्थ इति चेत् ? कथं विचारे ? तत्रापि मा भूदिति चेत् ; नास्त्येव तर्हि विचारः । तथा चेत् ; न संशयाद्युद्भावनं तस्य विचारनिबन्धनत्वात् । अथ तत्र संशयादिरेव नास्ति निरवद्यप्रतीतिविषयत्वादिति ; समानमेतत् तदात्मन्यपि, तदनेकान्तस्यापि स्वतोऽनन्तरानुमानाच्च निरवद्यादेव प्रतीतेः । ततो विचारवदक्षज्ञानात्मनि उपपन्नमनेकान्तात्मकत्वम् । एतदेवाह—**अनेकरूपेण** । अनेकश्चासौ क्रमभाविनानोल्लेखत्वात् रूपश्चासौ निरूपणत्वात् इत्यनेकरूपः, तेन दृष्टान्तेन यः सिद्धः क्रमानेकरूपश्चक्षुरादिज्ञानात्मा तेनेति ।

नन्वेक एव '**अनेकरूपेण**' इति शब्दः, तेन यदि साध्यमभिधीयते निदर्शनमनभिधानं प्राप्तम्, तदभिधाने साध्यमवचनमेवापन्नम्, एकेन युगपदनेकार्थनिवेदनायोगादिति चेत् ; न ; आवृत्त्या साध्यवचनादेव निदर्शनस्यापि प्रतिपत्तेः । भवत्वेवम् अर्थज्ञानस्य अक्रमवत् क्रमेणाप्यनेकरूपत्वं न्यायोपपन्नत्वात्, न पुनर्बहिरर्थस्य तस्य निरंशत्वात् क्षणक्षीणत्वाच्चेति चेत्; अत्राह—**तादृशः** । यादृग् अक्षज्ञानात्मा सम्भवक्रमाभ्यामनेकरूपः **तादृशः** तत्सदृशस्य बहिरर्थस्य ग्रहणं तस्यापि सम्भवक्रमाभ्यामनेकरूपत्वे न्यायसद्भावात्, युगपन्नानाशक्त्यात्मविज्ञानवत् नानानीलाद्याकारस्य बहिर्भावस्य प्रत्यक्षेणैव वेदनात् । प्रत्यक्षस्य च क्रमानेकरूपत्वेऽवस्थिते अवस्थितमेव बहिरर्थस्यापि तादृश्यम्, तस्यैव तद्ग्रहणोपायत्वात् । न हि निरवद्ये तद्ग्रहणोपाये तदनवस्थानमुपपन्नम् ।

यत्पुनरेतत्—अर्थज्ञानस्योपपन्नमेव विचित्रैकरूपत्वम् अशक्यविवेचनत्वात् न बहिरर्थस्य तदभावादिति; तदास्ताम्, उत्तरत्र विचारात् । तस्मादवस्थितम्-अन्तर्बहिश्च तद्भवसामान्यविषयत्वमक्षज्ञानस्य । विशेषव्यतिरिक्तस्य तु सामान्यस्य निराकरणमभिप्रेतमेवेति न प्रत्यवस्थीयते ।

---

१ —खनात्कृत—आ०, ब०, प०, स० । २ —भाविनोल्ले—आ०, ब०, प०, स० । ३ —नमभिधा—आ०, ब०, प०, स० । ४ संभवत्क्रमा—आ०, ब०, प०, स० । क्रमयागपद्याभ्याम् । ५ —वस्थापितेऽव—आ०, ब०, प०, स० । ६ "चित्रामासापि बुद्धिरेकैव साद्यचित्रविलक्षणत्वात् ।शक्यविवेचनं चित्रमनेकम्, अशक्यविवेचनाश्च बुद्धेर्नीलादयः ।"—प्र० वार्तिकाल० २।२२० ।

तदेवेन सादृश्यसामान्यविषयत्वमप्यग्रहणात्तस्य निवेदितमवगन्तव्यम्, अन्विताव्यावृत्त रूपवत् समानासमानरूपयोरपि भावेषु भावत एव भावात्। तदाह–आत्मनाऽनेकरूपेण समानासमानरूपेण तादृशः समानासमानरूपतया तत्सदृक्षस्य बहिर्वस्तुनो ग्रहणमिति।

यदि पुनरयं निर्वस्तुको वस्तुपु वस्तुभूत सादृश्य नास्तीति, तदा कथमस भावग्रहणे-ष्वेकत्वाध्यवसायी विकल्पो यद्यवच्छेदाद् अनुमानप्रामाण्यमवकल्प्येत ? विलक्षणस्वलक्षण दर्शनादेव सदृक्ल्प इति चेत्, न, घटकपालक्षणदर्शनादपि तत्प्रसङ्गात्। तथा च "अन्ते क्षयदर्शनादादावपि क्षमः" [ ] इत्यनवसरं मयेत्, आदिवदन्तेऽपि समारोप-पतिरोहितस्य क्षयदर्शनस्य क्षयव्यवस्थापकत्वायोगात्, अन्यथा समारोपव्यवच्छित्तिकल्पना-वैफल्यापत्तेः। तस्म विलक्षणस्वलक्षणदर्शनादेकत्वविकल्पः।

भवतु सदृशाकारदर्शनादेवासौ, वस्तु सादृश्यं न वस्तुभूतम्, असदर्थव्यापृत्या कल्पित-त्वादिति चेत्, कथं तर्हि कथितम्–"साधर्म्यदर्शनाद्धीरो भ्रान्तिर्नामोपजायते।" [प्र० वा० २।३६१] इति ? दर्शनस्य कल्पितावाकारगोचरत्वे सविकल्पकत्वप्रसङ्गात्। दर्शनशब्दे-नापि विकल्पकमेव किञ्चिद्विज्ञानमुच्यते न प्रत्यक्षमिति चेत्, न, पश्चादेकत्वविकल्पाभावप्रस-ङ्गात्। न हि सदृक्षविकल्पविषये एवैकत्वविकल्पस्य सम्भवः, क्षणभ्रयविकल्पविषयेऽपि नित्यविकल्पप्रसङ्गात्, कथं क्षणभङ्गानुमानस्य समारोपनिवारकत्वं यतः प्रामाण्यं स्यादिति सर्वं पव मण्डूकेन भक्षितः।

किञ्च, तस्यापि सदृक्षविकल्पस्य कुत उत्पत्तिः ? सदृशापरापरदर्शनादिति चेत्, न, सादृश्यस्यावस्तुत्वेन दर्शनविषयत्वायोगात्। दर्शनशब्देन विकल्प एव कश्चिदुच्यत इति चेत्, तस्यापि कुत उत्पत्तिः ? सदृक्षादेव पूर्वस्मात्, न चैवमनवस्थानम् अनादित्वात्तत्रवाहन्येति चेत्, न, अनादित्वासम्भवात्। न हि घटपर्यायविषया एव सर्वदा सदृक्षविकल्पाः, पटादि-पदार्थान्तरविषयाणामपि तेषां पूर्वं भावात्। तथा चानुत्पत्तिरेवार्थस्य घटपर्यायसदृक्षविकल्पस्य प्राप्ता पूर्वं तादृक्षविकल्पाभावात्, अन्यथाऽसौ तादृक्षस्यानुत्पत्तेः। अथ पूर्वमपि घटपर्यायगोचर-सदृक्षविकल्पवासना विद्यत एव तर्हि वैफल्यात् कस्मात्सदृक्षोत्पत्तिः ? वासनाप्रबोधकस्या-भावादिति चेत्, पश्चात् कस्य तत्प्रबोधकत्वम् ? घटपर्यायगोचरस्य दर्शनस्यैवेति चेत्, प्राप्ति घटपर्यायगोचरस्य तस्य तत्प्रबोधकत्वं कस्मान्न स्यात् ? तस्य घटपर्यायविलक्षणविषयत्वान्नेति चेत्, घटपर्यायदर्शनस्यापि तद्विशेषात्, सत्पर्यायाणामपि मिथो विलक्षणत्वात्। विलक्षणत्वेऽपि वेषामस्ति काचित्सदृश्यासत्तिः, अतस्तद्दर्शनस्यैव तत्प्रबोधकारित्वमिति चेत्, का परा तत्सदृश्या-सत्तिरन्यत्र समानपरिणामात्।

---

१ –दृशश्चि–आ०, ब०, प०, । २ चैवमभ्यवस्थापकत्वे एकत्वाप्यवस्थात्मकः समारोप एव न स्यात् तथा च कस्य स्वरूपैर्दः इति भावः। ३ –नादिश्चेती आ०, ब०, प०, स०। ४ –दे वैद–आ०, ब०, प०, स०। ५ पूर्वमया–आ०, ब०, प०। ६ –दपट–आ०, ब०, प०, स०। ७ तमाति आ०, ब०, प०, स०। ८ दर्शनस्य।

अपि च, दर्शनशब्दस्य विकल्पवाचित्वात्, यदि सदृशविकल्पादेव तद्विकल्पः। तर्हि सर्वस्यापि मनोविभ्रमस्यान्तरुपप्लवजत्वमेवापतितम्, तथा चेदमेव वक्तव्यम्–

"अस्तीयमपि या त्वन्तरुपप्लवसमुद्भवा" [प्र० वा० २।३६२] 'भ्रान्तिः' इति, न "साधर्म्यदर्शनाल्लोके भ्रान्तिः" इति, तस्यार्थान्तराभावात्। न चैकवचनप्रतिपन्नेऽर्थे वचनान्तरमर्थवत्; अतिप्रसङ्गात्। ततो न दर्शनशब्दस्य विकल्पार्थत्वम्, प्रत्यक्षार्थत्वस्यैवोपपत्तेः। प्रत्यक्षे च तद्दर्शने न सादृश्यस्यावस्तुत्वम्; दर्शनविषयस्य तदयोगात्। दर्शनस्यापि भ्रान्तत्वान्न तद्विषयत्वेन वस्तुत्वं सादृश्यस्येति चेत्; न; सर्वदा सदृशस्यैव विषयस्य दर्शने प्रतिभासनात्। तथा हि–

धूमान्तरसमस्यैव धूमस्येह प्रवेदनम्।
निराकारेऽपि विज्ञाने नात्यन्ताय विधर्मणः ॥४९६॥

धूमश्चायमिति ह्येवं प्रत्यभिज्ञानमन्यथा।
कथं येनास्य लिङ्गत्वं पर्वताग्निप्रसाधने? ॥४९७॥

पश्यतोऽप्यतिवैधर्म्यं प्रत्यभिज्ञा यदीदृशी।
पाषाणाद्युपलम्भेऽपि किमेवं नोपजायते? ॥४९८॥

तथा च सति सर्वत्र सर्वस्मादविशेषतः।
हुताशनानुमानं स्याद् वस्तुसादृश्यविद्विषाम् ॥४९९॥

धूमवासनाप्रबोधवैत्येव धूमप्रत्यभिज्ञानम्, न च पाषाणादावस्ति तत्प्रबोधवत्त्वं तस्य धूमस्वलक्षणातिविलक्षणत्वेन तत्प्रबोधं प्रत्यनुपयोगात् तत्कथं तत्र तत्प्रत्यभिज्ञानं यतः पावकानुमाने लिङ्गमिति चेत्? न; धूमान्तरस्यापि धूमस्वलक्षणादतिविलक्षणत्वात्। तत्कार्यकारित्वान्नातिविलक्षणत्वमिति चेत्; न; असिद्धत्वात्, एकधूमकार्य एव धूमान्तरव्यापारस्याप्रतीतेः, तत्सदृश एव तदन्तरस्य व्यापारोपलम्भात्। अस्तु सदृशकार्यकारित्वादेवावैलक्षण्यमिति चेत्; कुतः कार्ययोरपि सादृश्यम्? सादृशापरकार्यद्वयजननादिति चेत्; न; तद्द्वयस्यापि सादृश्यं तदपरसदृशतद्द्वयजननादित्यनवस्थानापत्तेः। स्वत एव कार्यसादृश्ये धूमसादृश्यमपि स्वत एवास्तु किं तत्र कार्यसादृश्यपरिकल्पनया? कारणसादृश्यात् तत्सादृश्यमित्यप्येतेन प्रत्युक्तम्; न्यायस्य समानत्वात्। ततो वस्तुत एव सादृश्यस्य भावात् कथमन्तर्बहिश्च तद्विषयं तद्दर्शनं न भवेत्?

अन्योन्यसदृशोरेव वेदनं स्वार्थयोरिति।
अनुक्तसिद्धमेवेदं साकारज्ञानवादिनः ॥५००॥

---

१ –शार्थस्यैवो–आ०, ब०, प०, स०। २ सादृश्यदर्शने। ३ सादृशस्यैव ता०, ब०। ४ धूमस्य प्रतिवे–आ०, ब०, प०, स०। ५ –वतैव धूम–आ०, ब०, प०, स०। ६ पाषाणस्य। ७ धूमकार्य। ८ एकरूपधूम–आ०, ब०, प०, स०। ९ –प्रतिपत्तेस्तत्स–आ०, ब०, प०। १० एव वात–आ, ब०, प०, स०। ११ –तद्द्वयदर्शनादि–आ०,ब०,प०,स०। १२ तत्कार्यसा–आ०, ब०, प०, स०। १३ सादृश्याभावात्तत्कथमन्तर्बहिश्च तद्विषयदर्शनम् आ०, ब०, प०, स०।

दर्शनस्यार्थसारूप्यं यदि तत्कस्यितं भवेत् ।
कल्पनाविरहाभावात् प्रत्यक्षं तत्कथं भवेत् ? ॥५०१॥
सविकल्पकमेवेदं प्रत्यक्षं यदि कल्प्यते ।
प्रत्यक्षं कल्पनापोढं भवेदव्यापि लक्षणम् ॥५०२॥
परमार्थेन सारूप्यस्याभावादर्थवेदने ।
कल्पनाविरहस्तस्मिन्नस्त्येवेति यदोच्यते ॥५०३॥
अतदूपस्य तस्यार्थविषयत्वं तदा कथम् ।
सर्वसाधारणस्यास्य नियमोऽपि कथित्कृतः ? ॥५०४॥
स्वहेतुबलतस्तत्कल्पेदर्थविभियतार्थकम् ।
तत्कारूपनिबन्धन्येव सारूप्यं तर्हि निष्फलम् ॥५०५॥
न चार्थदर्शन नास्ति तस्य पूर्वं समर्थनात् ।
अर्थदर्शनमध्यक्षं तदनुबाणैः परिस्फुटम् ॥५०६॥
अकल्पनाकृतं चाच्यं सारूप्यमपि तँद्गतम् ।
सौरूप्यदर्शनं तच्चेद्भ्रान्तिरेवार्थबोधयोः ॥५०७॥
अन्यथादर्शनाभावाद्भ्रान्तपत्समर्थनम् ।

तस्माद्यस्तुत्वेव द्रव्यपर्यायात्मकत्ववत् सामान्यविशेषात्मकत्वमपि भावस्य, तद्विषय त्वम् प्रत्यक्षस्येति सूक्तम्-'आत्मनाऽनेकरूपेण बहिरर्थस्य तादृशः । व्यक्तं ग्रहणम्' इति ।

तद्विनिष्टि **विचित्र** शबलं सामान्यस्य विशेषात्मकं विशेषस्य सामान्यात्मकमिति । तत्र यदि विशेषात्मकमित्यत्रावधारणम्, क्षत्रबलमिति व्याख्यानमनुपपन्नम्, विशेषैकात्मनः शबलत्वायोगात् । अथेन सामान्यात्मकमित्यपि विचारितम् । नोभयत्राप्यवधारणम्, विशेषात्मनि सामान्यात्मनः, तदात्मनि च विशेषात्मनो विद्यमानत्वादिति चेत्, उपपन्नमेवं शबलमिति व्याख्यानम् **विचित्रपदं** तु पुनरुक्तं भवेत् ग्रहणशब्दस्यास्य 'अनेकरूपेण' इत्यनेन गतत्वात् । प्रत्यक्ष-शब्दस्यैव तेनैं गतं नार्थग्रहणशब्दस्यास्यमिति चेत्, न, प्रत्यक्षशब्दर्थग्रहणस्याव्यतिरेकात् । तन्नेदं व्याख्यानमित्यन्यथा व्याख्यायते-

विचित्रं स्पष्ट-सप्तरादिप्रतिभासभेदेन नानाप्रकारमिति । तन्विदमपि वैचित्र्यम् । अनेकेत्यादिनैव गतं तत्कथं पौनरुक्त्यैपरिहार इति चेत्, न, एकपुरुषप्रस्थश्चयैव तेन तन्निधानम्, अनेन तु नानासन्तानग्रहणगतस्य प्रतिभासभेदस्यामिधानमिति पौनरुक्त्यनवतारात् । कस्यचिद्धि प्रत्यासन्नस्य स्पष्टमर्थग्रहणम् अन्यस्य प्रत्यासन्नतरस्य

---

१ दर्शनस्य । २ विषयप्रतिनियम । ३ -कल्पितेवं प० । ४ प्रत्यक्षगतम् । ५ तत् साकल्यदर्शनं भ्रान्ति-रेव वैत्, अर्थबोधनैः अन्यथार्थबाधात् इत्याराव्यः । ६ अनेकरूपेणेति पदेन । ७ -तत्प्रहार आ०, प०, प०, स० । ८ अनेकरूपेणेति पदेन । ९ विचित्रपदेन ।

स्पष्टतरम् अपरस्य प्रत्यासन्नतमस्य स्पष्टतममिति [1]दृष्ट एवायं विभागः। तथा च "**यद्यस्माद्भिन्नप्रतिभासं न तत्तेनैकविषयं यथा रसज्ञानं रूपज्ञानेन, प्रत्यक्षाद् भिन्नप्रतिभासं चानुमानम्**" [ ] इत्यत्र भिन्नप्रतिभासत्वं व्यभिचारीति निवेदितं भवति, स्पष्टज्ञानात् स्पष्टतरादिज्ञानस्य भिन्नप्रतिभासत्वेऽप्येकविषयत्वोपलम्भात्। करिष्यते चात्र द्वितीये विस्तर इति नेहातीव निर्बध्यते।

पुनरपि ग्रहणविशेषणं '**विशेषण**' इत्यादि। विशेषणं च जात्यादि व्यवच्छेदकत्वात्, विशेष्यञ्च तद्वत् व्यवच्छेद्यत्वात्, विशेषणविशेष्ये विषयत्वेन भजतीति '**विशेषणविशेष्यभाक्**' इति। अनेनार्थग्रहणस्य विकल्पकत्वमुक्तम्। तथा हि—यत् सविशेषणग्रहणं तत् सविकल्पकं यथा दण्डीति ग्रहणम्। सविशेषणग्रहणञ्च जात्यादिमदर्थग्रहणमिति।

स्यान्मतम्—विशेषणं विशेष्यमिति च सत्येव योजने भवति तदभावे तदप्रतीतेः। [2]योजनञ्च सत्येव भेदे। न च जात्यादि-तद्वतामस्ति परस्परतो भेदः, तदनवभासनात्। संसर्गात्तदनवभासनमिति चेत्; सति भेदे संसर्ग एव कस्मात्? समानदेशकालत्वादिति चेत्; न; समानदेशकालानामपि स्वरूपस्य भेदात्। भिन्नदेशकालानामपि स्वरूपभेदादेव [3]तथाप्रतिभासो न देशकालभेदात्। यदि हि तत्र न स्वरूपभेदो देशादिभेदेऽपि न भेदप्रतिभासनम्। देशाद्यभेदेऽपि परेषां वर्णसंस्थानयोरवभासत एव भेदो वातातपयोश्च इति न देशाद्यभेदादवभासभेदो हीयते। अथ समवायसम्बन्धबलादेकलोलीभावेन प्रतिभासनम्; तथा सति सर्वत्र [4]तथात्वकल्पनाप्रसङ्गतः सर्व एवाभेदप्रतिभासो नाभेदसाधनं भवेत्। ततोऽनवभासनान्नास्त्येव जात्यादि-तद्वतां भेद इति न तदायत्तं तत्र योजनम्, अयोजने च न विशेषणादिकमिति कथं तद्भाक्त्वं प्रत्यक्षस्य यतो विकल्पकत्वं तस्येति? तदपि न साधु मतम्; ऐकान्तिकस्य भेद-प्रतिभासस्याभावेऽपि जात्यादि-तद्वतां कथञ्चित्तत्प्रतिभासस्य प्रागेव प्रतिपादितत्वात्। सति च तस्मिन् कथञ्चिद्भेदात्मनो योजनस्यापि भावात्। अवश्यं चैतदेवमङ्गीकर्त्तव्यम् ऐकान्तिके भेदप्रतिभासे तदभेदप्रतिभासवद् योजनस्यैवाभावापत्तेः।

नन्वयमिष्टे स्थाने वृष्टिलाभस्तथागतानां योजनाभावस्य तैरभ्युपगमात्। तथा च वचनं प्रज्ञाकरस्य—

"अभिन्नप्रतिभासस्य योजनं कस्य केन वा?
विभिन्नप्रतिभासस्य योजनं न प्रतिभाति (प्रतीतिभाक्)॥

इत्यभिन्नप्रतिभासं हि तत् एकमेव कस्तत्र योजनार्थः उभयापेक्षत्वाद्योजनायाः। अथ भिन्नप्रतिभासद्वयं तदा परस्परविवेकेन प्रतिभासनान्नितराम् अयोजनेत्यसम्भव एव

---

१ स्पष्ट आ०, ब०, प०, स०। २ —प्रत्यवभासनं न आ०, ब०, प०, स०। ३ तद्यव—आ०, ब०, प०, स०। ४ योजनं स—आ०, ब०, प०, स०। ५ भिन्नप्रतिभासः। ६ तथाकल्पना—आ०, ब०, प०, स०। ७ कथंभेदभेदात्मनो स०। कथंभेदाभेदात्मनो प०। ८ —नं न प्रतिभासति स०। "योजनं न प्रतीतिभाक्"—प्र० वार्तिककाल०।

योजनायाः । तथ पारमार्थिकी योजना ।" [प्र० वार्तिकाल० २।१४६] इति चेत्, कथं तर्हि येनैवोच्यम्–"संयोज्यग्रहणं हि कल्पना" [प्र० वार्तिकाल० २।१४६ इति ? योजनाभावे तत्पूर्वकस्य ग्रहणस्यासम्भवात् । तदयं योजनमनिच्छन्नेव तत्पूर्वकं ग्रहणमिच्छतीति कथं स्वस्थः ? संवृत्या तद्विष्टेरोष इति चेत्, न, 'संवृत्यर्थापरिज्ञानात्। असत्यपि योजने तदाभासं ज्ञानं तैवर्यं इति चेत्, नन्विन्द्रियमपि ज्ञानं नेन्द्रियभ्रम, तत्र योजनप्रतिभासस्यानभ्युपगमात् । कल्पनैवेति चेत्, न, योजनाभावे तदसम्भवात् । तत्सम्भवेन योजनमिति चेत्, न, अन्योन्याश्रयस्य मुख्यत्वात् । न योजनं पुरोधाय कल्पना येनैवं प्रसङ्गः किन्तु तैदात्मिकैव सोपजायत इति चेत्, न, 'संयोज्य ग्रहणं हि कल्पना' इत्यत्र योजनस्य ग्रहणपूर्वकालव्याभिचारविशेषात् । न विशेष एककालस्पेऽपि 'व्यादाय स्थिपिते' इत्यादिवत् औपसंख्यानिकस्य कत्र्याप्रयस्य भावादिति चेत्, न, भेदप्रतिभासयोजनयोरप्येवमेककालत्वप्रसङ्गात्। तथा च यदुक्तं परेण– "योजनात्पूर्वं प्रत्येकदर्शनपूर्विका कल्पना" [प्र० वार्तिकाल० २।१४६] इति, तत्प्रतिविहितम् ।

अपि च, किंविषयं तयोऽनं यदाश्रिका कल्पनोत्पद्यते ? न तावद्बहिर्विषयम्, कल्पनाया निर्विषयत्वात्। अन्तर्विषयमिति चेत्, न, तत्रापि भेदप्रतिभासाभावे तदसम्भवात् "अभिन्नप्रतिभासस्य" इत्यादि वचनात्। तत्प्रतिभासेऽपि नितरां तदनुपपत्तेः "विभिन्नप्रतिभासस्य" इत्याद्यभिधानात्। न चानुपपत्तिविषयं योजनं नाम, अयोजनमेव तत्स्यात्। सत्यमयोजनमेव तत्, संवृत्त्या तु तस्य योजनत्वमिष्यते इति चेत्, न, 'सवृत्त्यर्थापरिज्ञानात्' इत्यादिकस्य 'अयोजनमेव तत्स्यादिति' पर्यन्तस्यावर्तनात्, पुनरपि 'सत्यम्' इत्यादिवचने तस्यैवावर्तनात् चक्रकस्यानवस्थावाहिनः प्रसङ्गात्। तत्र परमार्थत्व इव संवृत्यापि परस्य योजनमिति न कैम्पना नाम। मा भूदिति चेत्, कुतस्तद्भावे योजनाभावस्यागतिः ? 'अभिन्नप्रतिभासस्य' इत्यादिकाद्वचनादिति चेत्, न, शब्दगतुमात्रात्, कस्यचिदवगमविरोधात्, ज्ञानकल्पनापरिभ्रमवैकल्यापत्तेः। तदुपजनितज्ञानादेवेति चेत्, न ततोऽपि तुच्छाभावस्यावगतिः असम्बन्धात्। नापि भावान्तरस्वभावस्य, विशेषाभ्यन्तः शाब्दज्ञानाविषयत्वात्। सामान्यात्मनोऽपि क्वचिद्योजितस्याप्रतिभासनात्। योजितप्रतिभासने तु कथं सर्वात्मना कल्पनाभावः ? तत्प्रतिभासस्यैव कल्पनात्वाद्। "संयोज्य" इत्यादिवचनात्पारमार्थिकी चेयम्, संवृतिवादे त्वनवस्थादोषस्यौजस्त्वात्। ततो दुरुक्तमेतत् "न पारमार्थिकी योजना" [प्र० वार्तिकाल० २।१४६] इति ।

किञ्च, मा भूदभेदैकान्ते योजनं तस्योभयाघेक्षत्वात्, तत्र चोभयरूपाभावात्, भेदैकान्ते तु कथम योजनं तत्र तैद्धात् ? अभिन्नत्वेन प्रतिभासनादिति चेत्, किं पुनर्भिन्नमेव

---

१ संवृत्यार्थापरि–आ०, ब०, प०, स०। २ संवृत्यर्थः। ३ योजनप्रतिभेदेन कल्पना। ४ योजनापूर्वं प्र–आ० ब०, प०, स०। "योजनापूर्वं प्रत्येक" "–प्र० वार्तिकालङ्कार०। ५ कल्पनानो या आ०, ब०,प०, स०। ६ शब्दगमनमात्रात् आ०, ब०,प०, स०। ७ उभयरूपस्याभावात्।

योजनम् ? तथा चेत् ; न ; दण्डदेवदत्तयोरप्यभिन्नप्रतिभासत्वेन तदभावे दण्डीति विकल्पानुत्पत्तिप्रसङ्गात् । मा भूत्तदुत्पत्तिरिति चेत् ; न ; संयोज्यग्रहणं प्रति तन्निर्दर्शनप्रदर्शनविरोधात् । परप्रसिद्ध्या तत्प्रदर्शनमिति चेत् ; कथं परोऽप्यभिन्नं प्रतिपद्यमान एव भिन्नं प्रतिपद्येत ? प्रतिपद्यमानो दृश्यत इति चेत् ; तत्प्रतिपत्तिरेव तर्हि विरोधोद्भावनेन निवारयितव्या ।

अपि [च,] त्वल्लोकव्यवहारस्यैवंविधत्वात्कुतः स्वयं तदभ्युपगमः क्रियते ? प्रयोजनवशादिति चेत् ; किं प्रयोजनम् ? विकल्पस्य संयोज्यग्रहणत्वसाधनम् ; तथा हि–यद्विकल्पकं तत्संयोज्यग्रहणं यथा दण्डीति विकल्पकम् , विकल्पकञ्च विवादास्पदमिति चेत् ; न ; निदर्शनस्य वस्तुतः साध्यविकलत्वात् । परोपगमात्तद्विकलत्वमिति चेत् ; न ; उपगममात्रसिद्धस्याऽवस्तुरूपत्वात् । न चावस्तुरूपनिदर्शनबलोपनीतस्य साध्यस्यापि वस्तुरूपत्वम् । अवस्तुरूपमेव तदपि सर्वस्यापि संयोज्यग्रहणस्य सांवृतत्वादिति चेत् ; तर्हि किं तत्साधनप्रयासेन प्रयोजनाभावात् ? प्रयोजनवत्त्वे वस्तुरूपत्वापत्तेः । मा भूत्साध्यस्य प्रयोजनवत्त्वं तत्साधनं तु सप्रयोजनमेव, प्रत्यक्षे तद्रूपकल्पनानिषेधनस्य तत्प्रयोजनत्वात् , अनिरूपिताकारस्य निषेध्यस्य क्वचिन्निषेधायोगात् । स चायं तन्निषेधप्रयोगः–यन्न भेदप्रतिभासं तन्न संयोज्यग्रहणं यथा क्षीरवारिज्ञानमतद्वेदिनः, न भेदावभासञ्च जातिजातिमदादिरूपेण प्रत्यक्षम् , यच्च न संयोज्यग्रहणं न तद्विकल्पकं यथा तदेव क्षीरवारिवेदनमतद्वेदिनः, न संयोज्यग्रहणञ्च प्रत्यक्षम्, ततो निर्विकल्पकमिति चेत् ; न; तत्रावस्तुरूपकल्पनाविरहस्य परं प्रत्यपि प्रसिद्धत्वेन तत्साधने सिद्धसाधनदोषापत्तेः । अवस्तुभूतायामपि कल्पनायां परस्य वस्तुभावाभिनिवेशात् प्रत्यक्षे [10]तत्सद्भाव एव प्रसिद्धो न तद्विरहस्तत्कथं सिद्धसाधनत्वमिति चेत् ? स्वोपगमतस्तर्हि तत्रावस्तुभूताया एव कल्पनाया निषेधात् , [11]वस्तुभूतया कल्पनया सविकल्पकमेव प्रत्यक्षं प्राप्तम् । वस्तुभूता कल्पनैव नास्तीति चेत् ; न; तद्भावे कल्पितकल्पनाया अप्यभावापत्तेः । उभयकल्पनाविलोपस्य च कल्पनामन्तरेण दुरवबोधत्वादित्यावेदितत्वात् । कल्पनयैव कल्पनाविलोपप्रतिपत्तौ च विशेषणविशेष्यतद्योजनप्रतिभासवती वस्तुत एवासौ [12] वक्तव्या, तद्वत्प्रत्यक्षस्यापि [13]तत्प्रतिभासवत्त्वोपपत्तौ कथन्न वास्तवी तत्र कल्पना ? ततो यद्यवस्तुकल्पनाविरहस्तत्र साध्यते वस्तुकल्पनया विकल्पमेव तदापन्नम् । ततः प्रयासमात्रमेवैतत् धर्मकीर्त्तेः–

"विशेषणं विशेष्यञ्च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सङ्कलय्यैतत्तथा प्रत्येति नान्यथा ॥
यथा दण्डिनि जात्यादेर्विवेकेनानिरूपणात् ।
तद्वता योजना नास्ति कल्पनाऽप्यत्र नास्त्यतः ॥" [प्र०वा०२।१४५] इति ।

---

१ योजनाऽभावे । २ –दर्शनवि–आ०,ब०,प०,स०। "प्रत्येकञ्च विशेषणादीनां ग्रहणमन्तरेण न संयोजनं यथा दण्डीति प्रतीतौ ।"–प्र० वार्तिकाल०२।१४६ । ३ चेन्न तत्प्र–आ०,ब०,प०,स०। ४ अपि तु लोक–स० । अपि स्वलोक–आ०,ब०,प० । ५ –स्यैवं सिद्धत्वात् आ०,ब०,प०,स० । ६ –जनविक–आ०,ब०,प०,स० । ७ –कल्पन–आ०,ब०,प०,स०। ८–पि सि–आ०,ब०,प०,स०। ९–पि विक–आ०,ब०,प०,स०। १०कल्पनासद्भाव.। ११ वस्तुभूतायाः कल्पनायाः स–आ०, ब०, प०, स० । १२ कल्पना । १३ विशेषणविशेष्यतद्योजनप्रतिभास ।

वस्तुकल्पनाविरहस्यं विप्रतिपत्तिस्थानस्यानेनासाधनात्। तैरकल्पनाविरहः प्रयानेन साम्यत इति चेत्, न, तद्भ्रमणापरिज्ञानात्। इदमेव विशेषणविशेष्यप्रत्येकदर्शनपूर्वकं संयोग्यग्रहणं तद्भ्रमणमिति चेत्, क्व पुनरियं तद्भ्रमणत्वेन प्रतिपन्नम्? दण्डीति विकल्प इति चेत्, न, तत्र योजनस्य-मिथ्यार्थस्य वस्तुतोऽसत्त्वात् अवस्तुविषरूपलक्षणत्वायोगात्। भवतु वा किमपि योजनम्, तथापि दण्डदेवदत्तयोः प्रत्येकदर्शनं विकल्पकम्, अविकल्पकं वा? विकल्पकञ्चेत्, तर्हि तत्रापि दण्डस्य विशेष्यस्य तत्त्ववयवानाञ्च विशेषणानां प्रत्येकं दर्शनं योजनञ्चापेक्षणीयम्। तैरवयवानाञ्च दर्शनस्य विकल्पकत्वे तत्रापि सेषां तद्भागानाञ्च प्रत्येकं दर्शनं योजनं चापेक्षितव्यं तावदेवं यावदन्ते परमाणवः, सेषाञ्च न दर्शनम्, तैरिन्द्रियं न तद्विशिष्टस्य तदवयविनो दर्शनम्, तत्र च न तद्विशेषणस्योत्तरावयविनो दर्शनम्, तावदेवं यावन्न दण्डदर्शनम्। एवं दण्डदर्शननिवेशेऽप्ययमेव न्याय इति प्रत्येकदर्शनाभावाच्च संयोग्यग्रहणं दण्डस्य देवदत्तेनेति कर्त्रा दण्डीति ग्रहणम्, यत्रेदं विकल्पलक्षणमवगम्येत? तत्र तैर्योर्दर्शनं विकल्पकम्। अविकल्पकमेव तर्हि चेत्, तत्र कस्य प्रतिभासः? अवयविन इति चेत्, न, तस्यैं निरवयवस्य तदनुपलम्भात्, परस्यानभ्युपगमाच्च। सावयवस्येति चेत्, न, तदर्शनस्य विशिष्टविषयस्वेनाविकल्पकत्वाभावप्रसङ्गात्। निर्रंशश्चाविकल्प स्वलक्षणस्य तत्र प्रतिभासनमिति चेत्, भवत्येव निर्विकल्पकत्वं तदर्शनस्य यदि तत्स्वपिण्डपलब्धी[13] क्षत्येत। नापि तद्विषयस्य क्वचिद्योजनमिति मुख्यवस्त्विति दण्डीति विकल्पः।

स्यान्मतम्-संवेदनाकारयोरेव दण्डदेवदत्तयोः प्रत्येकदर्शन योजनञ्च न वहिराकारयोः, विकल्पस्यैं वस्तुसूत्र्या निर्विषयत्वात्, तथाच प्रसक्त इति, तदपि न समीचीनम्, तत्संवेदनस्यानवगमात्। दण्डिज्ञानात् पूर्वं दण्डप्रतिभासं देवदत्तप्रतिभासञ्च विकल्पद्वयं तर्हि चेत्, सम्भवत्यत्र प्रत्येकं दर्शनं न पुनर्योजनं क्षणिकत्वेन पश्चात्तदभावात्[14] तत्स्वीकारणायोगाच्च। नन्विदमेव पुनर्योजनं यत्तद्द्वयेन[15] उभयप्रतिभासमेकं दण्डिज्ञानमुपजन्यत इति चेत्, न, तद्द्वयस्य युगपदसम्भवात्, अनभ्युपगमात्। क्रमभावे च सन्निहितस्यैव कारणत्वं नेतरस्येति कथ तद्द्वयजन्यत्वं दण्डिविकल्पस्य? सन्निहितस्यापि व्यवहितयिकल्पसंतकारप्रबोधगर्भस्यैव कारणत्वादेवमिति चेत्, अस्ति तर्हि कथञ्चिदाख्यविकल्पस्याप्युभयप्रतिभासवरूपम्। भवतु को दोष इति चेत्? कुतस्तस्याप्युत्पत्तिः? तारूपादेव प्राग्विकल्पादिति चेत्, कथ तर्हि प्रत्येकदर्शनमुपयोगवत्[16]? यतस्तद्वचनमपर्यालोचितं न भवेत्। तत्र प्रत्येकदर्शनपुरस्सरं योजनं वस्तुतो विकल्पलक्षणम्, उभयावभासित्वे सत्येकज्ञानस्वरूपत्वेनावस्थानात्[17]। तथा

---

१ -स्व प्रति-आ०,ब०,प०,स०। २ वस्तुकल्पनाविरह। ३ 'निश्चयस्य इति पदं योजनस्य' इति पदस्य टिप्पनमूलं सूत्रे प्रक्षिप्तमिति भाति। ४ -सरागद्वस्तुनि-ता०। ५ प्रत्येकदर्श-आ०,ब०,प०,स०। ६ दण्डावयवा नाम्। ७ परमाणुदर्शनामावे। ८ -वं तावदेव-आ०,ब०,प०,स०। ९ एवमेवेदमपि। १० अवयविनः। ११ निरंशस्य। १२ बौद्धस्य। १३ -रूपं शून्ये-आ०,ब०,प०,स०। १४ विकल्पकस्य स०। १५ दण्डप्रति-आ०, ब०,प०,स०। १६ -मावस्यैवंरूप-आ०, ब०, प०, स०। १७ दण्डप्रतिभासेन देवदत्तप्रतिभासेन च। १८ नीलस्य आ०,ब०,प०,स०। १९ -वदता आ०,ब०,प०,स०। -ज्ञानावस्थानात्-स०। -नावस्थानात्-आ०,ब०,प०।

चात्र देवस्य वचनम्–"[1]विविधानुविधानस्य विकल्पनान्तरीयकत्वात्।" [प्रमाणसं० स्व० श्लो० ४] इति। तर्हि तल्लक्षणे एव विकल्पः प्रत्यक्षे [3]प्रतिषिध्यते इति चेत्; केन तत्प्रतिषेधः? "जात्यादेर्विवेकेन" इत्यादिना न्यायेनेति चेत्; न; तेन प्रत्येकदर्शनपुरस्सरयोजनात्मकस्यैव तस्य निषेधात्, "विशेषणम्" इत्याद्युक्त्वा तदभिधानात्, तल्लक्षणस्य च विकल्पस्योक्तप्रकारेणासम्भवात्। न चाऽसम्भवतो निषेधैः स्वतः सिद्धेः[5] रागवत्किंशुकानाम्। अन्यतस्तन्निषेध इति चेत्; किं तदन्यत्? प्रत्यक्षमेव; तस्यैकानेकप्रतिभासविकल्पविकलस्यानुभवात् "प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति" [प्र० वा० २।१२३] इत्यभिधानादिति चेत्; न; तस्य[6] तद्विकल्पात्मन एव 'आत्मनाऽनेकरूपेण' इति निवेदितत्वात्। संशयादिदोषापादनेन जात्यन्तरनिराकरणात्तत्र तन्निषेध इति चेत्, न; तथा दण्ड्यादिविकल्पेऽपि तन्निषेधापत्तेः। कल्पित एव सोऽपि न वास्तव इति चेत्; न; वस्तुभूतविकल्पाभावे तत्कल्पनानुपपत्तेर्निवेदितत्वात्। ततो यदि [10]तद्विकल्पे जात्यन्तरस्य न संशयादिना पीडनं प्रत्यक्षेऽपि न स्यादविशेषात्।

किञ्च किमिदं संशयाद्यापादनं प्रमाणम्? अप्रमाणापादितस्य दोषस्यादोषत्वात्। प्रत्यक्षमिति चेत्; न, तस्याविचारकत्वात्। अनुमानमिति चेत्; न; तस्य निर्विकल्पकस्याभावात्, अनभ्युपगमात्। विकल्पकत्वेऽपि स्वयमनवगतस्य अदोषापादनत्वात्। अवगतमेव स्वसंवेदनाध्यक्षेण [11]तदिति चेत् कथमेवं विकल्पाविकल्पात्मना [12]उभयात्मानमनुपद्रवं प्रतिपद्यमानमेव [13]तत् प्रत्यक्षस्य जात्यन्तरे संशयादिकमापादयेत् [14]स्वरूपानभिन्नत्वप्रसङ्गात्? तन्न तात्त्विकस्य विकल्पस्य प्रत्यक्षे कुतश्चिदपि निषेध इति सिद्धं सविकल्पकं प्रत्यक्षम्।

ननु च विशेषणविशेष्यभाक्त्वेन तस्य सविकल्पकत्वमुक्तं न जात्यन्तरप्रतिभासत्वेन तत्कथमिदं तत्प्रयोजकमुच्यते? जात्यन्तरप्रतिभासादन्यस्य तद्भाक्त्वस्याभावादिति चेत्; न तर्हि **'विशेषणविशेष्यभाक्'** इति पृथगभिधातव्यम्, जात्यन्तरप्रतिभासस्य[15] **'आत्मना'** इत्यादिना प्रतिपादनादिति चेत्; न; उभयथा विकल्पावेदनार्थत्वादेवंवचनस्य। तथा हि–यदि निरंशविषयत्वं निर्विकल्पकत्वम्; न तर्हि प्रत्यक्षं निर्विकल्पम्[16], तस्यानेकरूपस्वपरावभासित्वेन विकल्पकत्वोपपत्तेः इत्यावेदनार्थमिदमभिहितम्–**'अनेकरूपेण तादृशो ग्रहणम्'** इति। तथा यदि अकृतयोजनं ग्रहणमविकल्पकत्वम्, तर्हि प्रत्यक्षमपि यदेव [17]तथाविधं तदेवाविकल्पकम्, कृतयोजनं तु विकल्पकमेवेति प्रतिपादयितुं **'विशेषणविशेष्यभाक्'** इत्युक्तम्।

---

१ विवादानुविवादनस्य विकल्पान्त–आ०, ब०, प०, स०। २ उभयावभासित्वे सत्येकज्ञानत्वलक्षणः। ३ प्रतिपद्यते इति आ०, ब०, प०, स०। ४ –धः सि–स०। –धः स्वतः सिद्धः आ०, ब०, प०। ५ स्वतः सिद्धत्वादित्यर्थः। ६ प्रत्यक्षस्य। ७–ल्पात्मनानेक–आ०, ब०, प०, स०। ८ प्रत्यक्षे। ९ विकल्पत्वनिषेधः। १० दण्ड्यादिविकल्पे। तद्विकल्पजा– आ०, ब०, प०, स०। ११ अनुमानम्। १२ स्वरूपांशे निर्विकल्पकम्, अर्थांशे च विकल्पकमिति। १३ अनुमानम्। १४ अनुमानस्य जात्यन्तरत्वापत्तिभयात् विकल्पत्वमात्रस्वीकारे स्वरूपानभिज्ञत्वं स्यादिति भावः। १५ –सनस्य आ०, ब०, प०, स०। १६ –ल्पकं त– आ०, ब०, प०, स०। १७ अकृतयोजनम्।

ननु च जात्यादिसङ्कल्पेन भेदे सति तादात्म्यमेव योजनम्, तच्च सर्वत्र प्रत्यक्षे विद्यत इति कथम् सर्वस्य तस्य विशेषणादिविषयत्वमिति चेत्? न, गुणप्रधानभावोपाधिकस्यैव तस्य योजनत्वात्, तद्भावस्य च सर्वत्राभावात्। भवतु विवक्षानियमेन सैद्धान्तिनियमः तस्य विवक्षानियन्त्रणत्वात्, "विवक्षया मुख्यगुणव्यवस्था" [बृहत्स्व० श्लो० २५] इति वचनात्। प्रत्यक्षस्य तु कथं तद्विषयत्वं तस्य विषयारूपत्वाभावादिति चेत्, तथापि विवक्षया जनितसंस्कारप्रबोधगर्भस्य तस्य न विरुध्यत एव विशेषणादिविषयत्वम्, कथमन्यथा 'बहवः' इति 'एक' इति 'बहुविधम्' इति 'एकविधम्' इति च विशेषणादिरूपेण ग्रहणं यतो बह्वादिवेशभेदेन अवग्रहादिभेदकथनमान्वीयप्रसिद्धमुपपनीयेत? ततः स्थितम्–संयोजनमेव प्रत्यक्षं सविकल्पकं नापरमिति। 'सैवं संयोजनमेव सविकल्पकमेव'इत्यनुक्षाने तु यद्वक्ष्यति–"सकलाकारं वस्तु निर्विकल्पकम्"[ ] इति तद्विरुध्येत। निरंशप्रतिभासरूपनिर्विकल्पकस्वप्रत्यनीकभावापेक्षया तु सकलमपि प्रत्यक्षं सविकल्पकमेव, तस्य जीत्य तरंगोचरस्येन सांशवस्तुविषयत्वोपपत्तेरिति सर्वं निरवद्यम्।

ननु सदिदं भवता बाह्यन्तरं पत्युरोक्षतिरया प्रतिभाति नीलादिस्थूलरूपम्, तस्य च दूरविरलकेशादाविव अविद्यमानस्यैव प्रतिभासनात्कथ तद्रूपो बहिरर्थः पारमार्थिको यतस्तद्विषयत्वं प्रत्यक्षस्येति चेत्? अत्राह–

अर्थज्ञानेऽसतोऽप्युक्तः प्रतिभासोऽभिलाषवत्। इति।

'अर्थस्य' इत्यनुवर्तते। तदयमर्थः–अर्थस्य विषयस्य ग्राहकत्वेन सम्बन्धिनि सति। कस्मिन्? **अर्थज्ञाने**, अर्थ्यते इत्यर्थो विषयस्तस्याज्ञानम्, पञ्चमीति योगविभागात्समासः, तस्मिन्? किम्? **असतोऽविद्यमानस्यैं** स्थूलाकारस्य **प्रतिभासो** वेदनविषयत्वम् **अयुक्तः** सङ्गतो न भवति। तथा हि–

> अर्थकार्यं यदि ज्ञानमर्थस्य ग्राहकं मतम्।
> असतः स्थूलरूपस्य प्रतिभासस्तदा कथम्? ॥५०८॥
>
> असतो न हि विज्ञानमन्यद्धेतोपजायते।
> जायते चेदसत्तस्य सतः कार्यं हि लक्ष्यताम् ॥५०९॥
>
> चन्द्रद्वित्वादिकस्यैवमहेतुत्वादवेदने।
> व्यामोहस्यापि भावत्वो न स्याद्भ्रान्तपदमर्थवत्" ॥५१०॥

---

१ तादात्म्यस्य। २ गुणप्रधानभावस्य। ३ गुणप्रधानभावोपाधिकस्य। ४ विशेषणादिविषयत्वम्। ५ "बहुबहुविधक्षिप्रानिश्रितानुक्तध्रुवाणां सेतराणाम्। अर्थस्य"–तत्त्वार्थसू० १।१६,१७। ६ –क्षयोपशमेन प०। ७ सर्वस्यैवी –आ०, ब०, प०, स०। ८ अक्षयन्तरत्वेन आ०,ब०,प०,स०। ९ "अर्थेन केशा दीर्घयसि हेसे अर्थस्यस्य अपि धनसञ्चिदेशतमासिनः परमाणवोऽपि तथेति न विरोधः।"–प्र० वार्तिकाल० १।१२३। १० –भावस्थूल–आ०, ब०, प०, स०। ११ कथमपोऽयमभ्रान्तमिति प्रत्यक्षमभ्रान्तमभ्रान्तपदम्।

अहेतोरपि वित्तिश्चेत्तद्द्वित्त्वादेः, तदा कथम् ।
'कारणस्यैव वेद्यत्वम्' इत्ययं नियमो भवेत् ? ॥५११॥

अहेतोर्वेद्यतां वक्ति नियमं वक्ति चेदृशम् ।
केन धान्धा (ध्यन्धा)यितो हन्त जगद्विजयधीरयम्[3] ॥५१२॥

अपि च, यद्यसतोऽपि स्वलक्षणेषु स्थूलाकारस्य दर्शनम्; शब्दस्य किन्न स्यात्? स्थूलप्रतिभासो दृश्यते न शब्दप्रतिभास इति चेत्; न; 'घटोऽयं पटोऽयम्' इत्यत्र शब्दप्रतिभासस्यापि दर्शनात्। विकल्पप्रतिभास एवायं न प्रत्यक्षप्रतिभास इति चेत्; न; अस्यैव मानसप्रत्यक्षत्वेन प्रज्ञाकरेण[4] कथनात्। शब्दप्रतिभासवत्त्वे कथमस्य प्रत्यक्षत्वं निर्विकल्पकत्वाभावादिति चेत्? नन्वयं[5] तत्रैव दोषस्तत्किमत्र प्रश्नेन ? स्वकौपीनविवरणस्याप्रतिबुद्धव्यवहारत्वात्।

नायं दोषः, शब्दप्रतिभासवत्त्वेऽपि पूर्वापरपरामर्शित्वाभावेनाविकल्पकत्वादिति चेत्; उच्यते—यदि तत्परामर्शित्वादेव विकल्पकत्वं तर्हि प्रत्यक्षे सर्वत्र तदेव[6] निराकर्त्तव्यम्, विकल्पप्रसङ्गभयस्य तत्प्रयुक्तत्वात् न शब्दप्रतिभासवत्त्वम्, सत्यपि तस्मिंस्तत्प्रसङ्गभयाभावात्। तदिदं व्याघभयपरिहाराय साधुव्यापादनं[7] तथागतस्य। तत्परामर्शस्यापि शब्दप्रतिभासमूलत्वात्[8] स एव तत्र प्रतिषिध्यत इति चेत्[9]; न; मानसप्रत्यक्षेऽपि तत्प्रतिषेधप्रसङ्गात्। अस्त्येव वस्तुतस्तत्रापि तन्निषेधः केवलं तत्प्रतिभासिना[10] विकल्पेन एकत्वाध्यासात् आभिमानिकं तदपि तत्प्रतिभासमुच्यत इति चेत्; कस्तर्हि वस्तुत इन्द्रियज्ञानात्तस्य[11] भेदः ? न कश्चिदिति चेत्; नास्त्येव तर्हि [12]तदिति न [13]प्रत्यक्षचतुष्टयवादः साधीयान्।

यत्पुनरेतत्—आगमप्रसिद्धं[14] तदभिप्रेत्य 'नीलमिदम्' इत्यादिविकल्पप्रादुर्भावान्यथानुपपत्त्या चानुमितं तदङ्गीकृत्य तच्चतुष्टयवाद इति; तदास्तां तावत् प्रस्तावान्ते निरूपणात्। ततस्तस्येन्द्रियज्ञानाद् भेदं ब्रुवता तात्त्विक एव [15]तत्र शब्दप्रतिभासो वक्तव्यः ततः [16]कथन्न तत्परामर्शित्वं यतो विकल्पकत्वं न भवेत्? सत्यपि [17]तत्प्रतिभासे [18]तत्र [19]तत्परामर्शाभावे चक्षुरादिज्ञानेऽपि न भवेदिति [20]तत्र [21]तत्प्रतिभासनिषेधनं प्रयासमात्रमेव कीर्त्तेः। अतस्तन्निराकरणादवगम्यते सति [22]तस्मिन्नवश्यंभावी [23]तत्परामर्श इति कथन्न विकल्पकं मानसप्रत्यक्षम्? तथा सति प्रत्यक्षान्तरस्यापि तत्त्वमनिवार्यम्। तथा हि—इन्द्रियादिप्रत्यक्षं विकल्पकं प्रत्यक्षत्वात् मानसप्रत्यक्षवत्। शब्दप्रतिभासाभावान्नेति चेत्; न; तस्याप्यनु-

---

१ सौगतः। २ "इदमित्यादि यज्ज्ञानमभ्यासात्पुरतः स्थितेः। साक्षात्करणतस्तत्तु प्रत्यक्षं मानसं मतम्।"—प्र० वार्तिकाल० २।२४३। ३ नन्वयं न चैव दो—आ०,ब०,प०,स०। ४ पूर्वापरपरामर्शित्वमेव। ५ तथागतस्य आ०,ब०,प०,स०। ६ शब्दप्रतिभास एव। ७ चेन्न स प्रत्यक्षे—आ०,ब०,प०,स०। ८ शब्दप्रतिभासनिषेधः। ९ शब्दप्रतिभासिना। १० मानसप्रत्यक्षस्य। ११ मानसप्रत्यक्षम्। १२ इन्द्रियमनोयोगिस्वसंवेदनप्रत्यक्षचतुष्टय। १३ "एतच्च सिद्धान्तप्रसिद्धं मानसं प्रत्यक्षम्।"—न्यायवि०—पृ० १४। तर्कभा० पृ० ९। १४ मानसप्रत्यक्षे। १५ कथं तत्र—आ०, ब०, प०, स०। १६ शब्दप्रतिभासे। १७ मानसप्रत्यक्षे। १८ पूर्वापरपरामर्शाभावे। १९ चक्षुरादिज्ञाने। २० शब्दप्रतिभास। २१ शब्दप्रतिभासे। २२ पूर्वापरपरामर्शः।

मानात्–इन्द्रियादिप्रत्यर्थं शब्दप्रतिभासवत्, तस्मात् मानसाध्यक्षवदिति । स्वलक्षणेष्वसतः कथं शब्दस्य तत्र प्रतिभासनमिति चेत् ? स्थूलाकारवदिति ब्रूमः । तदाह–**अभिलापवत्** । अभिलापः शब्दो विशतेऽस्मिन्नित्यभिलापवत् 'अर्थज्ञानम्' इति विग्रहपरिणामेन सम्बन्धः । तदपि इन्द्रियजं [1]विकल्पकम् इति भावः । ततो यथा मानसः स्वलक्षणे शब्दस्यावभासनं तथा स्थूलाकारस्यापि न स्यात्, तद्वत्ति च । तस्मात्तस्मेवायमिति कथन्न तदात्मनो बहिरर्थस्य परमार्थत्वम् ? ५

अपि च, विरलकेशादिज्ञानस्यापि घनाकारस्यासत्त्वं [2]कुतोऽवसितम् ? तत्प्रतिभासात् इन्द्रियज्ञानादेवेति चेत्, न, तत्प्रतिभासस्य तद्भावप्रतिभासतत्वविरोधात् । अन्यथा–

नीलादेर्वस्तुजातस्य यदेव प्रतिभासनम् ।
तदेव तदसत्त्वस्याप्यवभासनमापतेत् ॥५१३॥ १०
तद्घनाकारवत्प्राप्तं नीलादिविलमप्यसत् ।
बहिरर्थप्रवादाय दीयतां सलिलाञ्जलिः ॥५१४॥
असत्त्वोपाधिकत्वेन घन एवावभासते ।
न नीलादि ततो नास्ति दोषोऽप्यमिति चेन्न तत् ॥५१५॥
घनज्ञानस्य मिथ्यात्व कथमेवं प्रकल्प्यताम् ? १५
न ह्यसन्तमसत्त्वेन मुष्यमाणं मृषोचितम् ॥५१६॥
तस्यापि घनबोधस्य सन्यग्ज्ञानत्वमेव चेत् ।
निवर्त्तनीयभ्रान्त्यपदर्श्यैव हि किं मयेत् ? ॥५१७॥
चन्द्रद्वित्वावभासं चेज्ज्ञानं तदपि दुर्घटम् ।
असत्त्वोपाधिकस्यैव तद्द्वित्वस्यापि भासनात् ॥५१८॥ २०
न तथा प्रतिपत्तिश्चेद्घनाकारेऽपि तत्समम् ।
तन्न तत्प्रतिभासेन तद्वस्तवबोधनम् ॥५१९॥

तदाह–'**अर्थे**' इत्यादि । अर्थस्य घनाकारस्य अर्थेव इति व्युत्पत्तेः, ज्ञान तस्मिन् **असतः** असत्त्वस्य तदाकारसम्बन्धिन एव प्रत्यासत्तेः **प्रतिभासोऽस्यास्ति**, '**व्यक्तम्**' इत्यनुवर्त्तमानेन क्रियापरिणामेन कर्मपहसनपरेण च सम्बन्धात् 'अव्यक्तः' इति लभ्यते । निवर्त्तनमाह–'**अभिलापवत्**' इति । अभिलापपक्षवेन तज्ज्ञानं ज्ञानं गृह्यते, अभिलाप इवाभिलापवत्ति–अयमर्थो यथाभिलापजं विज्ञानं न स्वयमेव स्वविषयस्याभाव गमयति तथा घनाकारज्ञानमपीति । ननु तर्हि बाधकप्रत्ययात्तदभावावसाय इति चेत्, कस्तत्प्रत्ययः ? विरलकेशविषय इति चेत्, कीदृक्षाले केशा यद्विज्ञानं विरलकम् । स्थूलरूपा इति चेत्, न,

---

१ प्रत्यक्षवत् । २ निश्चयमिति स० । ३ कुतोऽवसितमतत्प्रतिभासो द्वीश्चित्र–आ०, ब०, प०, स० । ४ –अर्थस्यैव–आ०, ब०, प०, स० । ५ –ग्राह अभिलापपक्षवेन आ०, ब०, प०, स० । ६ –ज्ञानत्वं चिर–आ०, ब०, प०, स० ।

स्थूलाकारस्यासद्रूपत्वे तदधिष्ठानविरलभावस्याप्यसद्रूपत्वेन तज्ज्ञानस्य मिथ्याज्ञानत्वात् । न हि मिथ्याज्ञानमेव घनाकारप्रत्ययस्य बाधकम् , अन्यत्रैवमदर्शनात् । व्यवहारतः सन्नेव विरलकेशस्थूलाकार इति चेत् ; न ; स्तम्भादिस्थूलाकारस्यापि व्यवहारतः सत्त्वाविशेषात् । व्यावहारिकमप्रतिषिद्धमेव तत्सत्त्वं पारमार्थतत्सत्त्वस्यैव निषेधादिति चेत् ; कुतस्तन्निषेधः ? विरलकेशघनाकारनिदर्शनादिति चेत् ; तदाकारस्यापि परमार्थसत्त्वाभावात् निदर्शनत्वम्, व्यवहारसत्त्वाभावाद्वा ? परमार्थसत्त्वाभावादिति चेत् ; कुतस्तस्य तदभावः ? तत्प्रत्ययस्य स्खलनादिति चेत् ; तदपि कुतः ? बाधनाद्विरलकेशप्रत्ययेनेति चेत् ; स्यादेतदेवं यदि तस्य परमार्थविषयत्वम् , तादृशेनैव तत्प्रत्यनीकविषयस्य बाधोपपत्तेः । न चैवम् , तस्य संवृतिसिद्धस्थूलविरलकेशविषयत्वेन अनन्तरं प्रतिपादनात् । न च तादृशेन क्वचित् परमार्थसत्त्वस्य बाधनमुपपन्नम् , संवृतिसिद्धसिंहज्ञानेन माणवके मनुष्यज्ञानस्य बाधप्रसङ्गात् । तन्न परमार्थसत्त्वाभावात्तदाकारस्य निदर्शनत्वम् । व्यवहारसत्त्वाभावात्तु निदर्शनत्वे ततो व्यवहारसत्त्वाभाव एव स्तम्भादिस्थूलाकारस्य शक्यापादनो न परमार्थसत्त्वाभावः ।

भवतु तर्हि परमार्थविषय एव स्थूलविरलकेशप्रत्ययोऽपीति चेत्; कुत एतत् ? बाधकप्रत्ययोपनिपातपरिपीडारहितत्वादिति चेत् ; खान्नो रत्नवृष्टिः पतिता, स्तम्भादिस्थूलाकारप्रत्ययस्यापि तत्पीडारहितत्वेन परमार्थसद्विषयत्वोपपत्तेः । तन्न स्थूलात्मानस्तत्केशाः । परमाण्वात्मान इति चेत्, न, परमाणूनामप्रतिभासनात्, सर्वदा स्थूलाकारस्यैव बहिरवलोकनात् ।

स्यान्मतम्–विततत्वमेव स्थूलत्वम् , तच्च परमाणुपरस्परप्रत्यासत्तिरूपमेव नाखण्डावयविरूपं तस्य क्वचिदप्यनवलोकनात् । अतः स्थूलप्रतिभास एव परमाणुप्रतिभासः, तत्कथं तदप्रतिभास इति ? तन्न ; एवं बाध्याभावप्रसङ्गात् । केशघनाकारप्रत्ययो बाध्य इति चेत् ; न ; एवं तस्यापि केशपरस्परप्रत्यासत्तिरूपघनाकारगोचरत्वेन यथार्थत्वात्, तादृशस्य च बाध्यत्वानुपपत्तेः । अवयविविषय एव घनाकारप्रत्ययः तेन बाध्यत्वमिति चेत् ; न; केशप्रत्ययस्यापि तद्विषयत्वतः तत्प्रतिभासत्वापत्त्या परमाणुप्रतिभासनाभावस्यापरिहारात् । अपि च, परमाणूनां प्रत्यासत्त्या यदि तद्भेदस्याप्रतिरोधः कथं तदात्मकं वैतत्यम्, विभिन्नेषु स्तम्भादिषु तददर्शनात्? भेदप्रतिभासस्य तया प्रतिरोध इति चेत्; न; भेदाव्यतिरेकात् परमाणूनां तत्प्रतिभासस्यापि तया तत्प्रसङ्गात् । तथा च 'तत्प्रत्यासत्तिर्वैतत्यम् इति रिक्ता वाचोयुक्तिः अनधिगतविषयत्वात् । नीलादितयावभासन्त एव परमाणव इति चेत्, तथापि कथं विततताः ? प्रत्यासत्तिकृताद् भेदा-

---

१ -त्रैव दर्श-आ०, ब०, प०, स० । २ स्तम्भादिस्थूलाकारसत्त्वम् । ३ -स्यात्तदेवं आ०, ब०, प०, स० । ४ परमार्थविषयेणैव । ५ -स्याबाधो-आ०, ब०, प०, स० । ६ -स्याबाध- आ, ब०, प०, स० । ७ -त्वे तद्यव-आ०, ब०, प०, स० । ८ निर्बाधत्वेन । ९ बाध्यभाव-आ०, ब०, प०, स० । १० बाध्यत इति आ०, ब०, प०, स० । ११ -यत इति चेन्न तत्प्रति-आ०, ब०, प०, स० । १२ तददर्शना-आ०, ब०, प०, स० । १३ प्रत्यासत्त्या । १४ परमाणुप्रतिभासस्यापि । १५ प्रत्यासत्त्या १६ प्रतिरोधप्रसङ्गात्

नवभासनादिति चेत्, कोऽसौ [1]तदनवभासः ? तुच्छोऽयमाभासप्रतिषेध इति चेत्, न, तुच्छश्च स्थूलश्चेति व्याघातात्। अभेदप्रतिभासस्तदनवभास इति चेत्, न, अभेदस्याभावात्। असत्ये वासौ[2] प्रतिभासत इति चेत्, न, तत्प्रतिभासस्य विभ्रमप्रसङ्गात्। को दोष इति चेत्, कथं ततो नीलादिसिद्धिः? तत्राविभ्रमादिति चेत्, कथं विभ्रमाविभ्रमरूपत्वमेकस्य हानस्य ? विरोधात्। अविरोधे वा स्थूलसूक्ष्मरूपत्वमप्येकस्य वस्तुनस्तात्त्विकमेवेति नैकान्तेन स्थूलाकारस्यापरमार्थसत्त्वम्। ५

यत्पुनरस्मिन्नवसरे–'कथं भयङ्करी रथ्यासु विभक्तीर्णः केशकलापः पलालपिण्डोऽन्यो वा स्थूलः शक्यते व्यवस्थापयितुम् ? न हि इमेऽवयविनो भवद्भिरभ्युपगम्यन्ते, अन्यायत्वित्वेन पलालादिव्यक्तीनां [3]व्यक्त्यन्तरानारम्भात्' इति सौगतस्य घोषे त्रिश्लोकनस्य वचनम्–"नैष दोषः, पृथक्त्वाग्रहणनिबन्धनस्य बनप्रत्ययवदस्यापि स्थूलप्रत्ययस्य भ्रान्तत्वात्" [ ] इति, तदप्येनेन चिन्तितम्, तथा हि– १०

पिण्डे पलालबोधस्य विभ्रमो बाधनाद्यदि।
पत्रादौ तर्हि तस्यापि निर्बाधत्वादविभ्रमः ॥५२०॥

तयोरन्योन्यतो भेदे विभ्रमेतरूपयो।
भिन्नतद्भेदतात्म्याद् बोधस्यापि भिदा भवेत् ॥५२१॥ १५

बोधद्वित्वयभावश्च तज्जन्म युगपत्कथम् ?
ज्ञानानां युगपज्जन्म यत्र योगैरभीप्सितम् ॥५२२॥

क्रमतश्चेत्तदुत्पत्तिः[4] दृश्यते युगपत्कथम् ?।
आशुभावनिमित्तोऽयंद्विभ्रमस्तार्क्षसो मतः ॥५२३॥

विभ्रमत्व कुतो योगपद्य ? बाधनतो यदि। २०
बोधयोस्तर्हि तस्यापि निर्बाधत्वादविभ्रमः ॥५२४॥

अत्रापि पूर्वन्यायेन बोधद्वन्द्वस्य कल्पने।
तस्यापि युगपज्जन्म कथं न्याबधिरो भवेत् ? ॥५२५॥

तज्जन्मक्रमभावे च प्रसङ्गः पूर्ववद्भवन्।
सचक्रक्रानवस्थानदुरुसहक्लेशमावहेत् ॥५२६॥ २५

एकत्वं चेत्कथञ्चित्स्याद्विभ्रमेतरयोर्मिथः।
भागानां भागिनश्चैवं तात्त्विक्यं किन्न मन्यते ? ॥५२७॥

---

१ भेदानवभासः। २ अभेदः। ३ पलालबोधस्य। ४ 'पलालपिण्डो-यम्' इति बौद्धगणेन विभ्रमे तदुक्तौ। ५ बोधद्वित्वय–ब्रा०, ब०, प०, स०। ६ युगपदुत्पत्तिरूपः। ७ पूर्वजन्मता–ब्रा०, ब०, प०, स०। ८ –प्रकैर् ब्रा०, ब०, प०, स०।

प्रतीतिरपि तादात्म्यविषयैवात्र लौकिकी ।
तन्तवो यत्पटीभूता इति लोकोऽवगच्छति ॥५२८॥
जात्यन्तरमपाकृत्य प्रतीतं भागभागिनोः ।
अन्यथा कल्पयंल्लोकमतिक्रामति केवलम् ॥५२९॥
भेदाभेदात्मकत्वं तद्वक्तव्यं भागतद्वताम् ।
एतदेव स्वयं देवैरुक्तं सिद्धिविनिश्चये ॥५३०॥

प्रत्यासत्त्या ययैक्यं स्याद्भ्रान्तिप्रत्ययतोस्तथा ।
भागतद्वदभेदोऽपि ततस्तत्त्वं द्वयात्मकम् ॥"

[सिद्धिवि० परि० ६] इति ।

तन्न परमाणूनां विवेकानवभासने नीलादितयाप्यवभासनमुपपन्नम् उक्तदोषात् । अविद्यमानश्च परमाणुरूपकेशविरलाकारप्रतिभासः कथं घनाकारप्रतिभासस्य बाधक इत्यनिश्चितमेव तस्यातदर्थविषयत्वम् , एतदेवाह–**युक्तः**' इति । युक्तिः बाधोपपत्तिः, युक्तस्यायुक्तेः प्रतिभासः, 'अव्यक्तः' इति पूर्ववदुपहासः । कस्य ? **असतः** असत्त्वस्य घनाकारसम्बन्धिन इति । निदर्शनमाह–**अभिलापवत्** । अभिलापादिव अभिलापवदिति । यथा 'नास्ति घनाकारः' इति वचनमात्रान्न तस्यावभासः तथा बाधोपपत्तेरपि तस्या एवाभावादिति भावः । तन्न केशघनाकारप्रतिभासनिदर्शनेन स्तम्भादिस्थूलाकारप्रतिभासस्यासदर्थत्वनिश्चयः साधीयान् ।

यत्पुनरेतत्–असदर्थविषयः स्थूलप्रतिभासो मानसत्वात् मरीचिकातोयप्रतिभासवदिति; तन्न, तस्येन्द्रियभावाभावानुविधायिनो मानसत्वायोगात् । अन्यस्यैव स्वलक्षणदर्शनस्य तदनुविधायित्वं स्थूलप्रतिभासे तु तत्सान्निध्यात् तदाभिमानिकमेव न वास्तवमिति चेत् ; न; तदन्यस्याप्रतिवेदनात् नयनोन्मीलनानन्तरं झटिति स्थूलप्रतिभासस्यैव प्रत्यवलोकनात् । अप्रतिविदितस्यापि भावे ततोऽप्यन्यस्यैव तदनुविधायित्वं पुनरपि ततोऽप्यन्यस्यैवेति न क्वचिदवस्थितिर्भवेत् । एकत्वाध्यवसायात्तदप्रतिवेदनं नाभावादिति चेत् ; किं पुनस्तदध्यवसायस्तस्य स्थूलप्रतिभासात्पृथग्भावं प्रतिरुणद्धि, स्वसंवेदनं वा? तथा चेत् ; सिद्धो नः सिद्धान्तः 'स्थूलप्रतिभासान्नापरमस्ति' इति । अथ न प्रतिरुणद्धि; कुतो न भेदप्रतिवेदनम्? विद्यत एव तत् , केवलं व्यवहार एव तदनुरूपो न भवतीति चेत् ; तत्प्रतिवेदनं चेत्तत्र समर्थं सोऽपि कस्मान्न भवति ? एकत्वाध्यवसायेन प्रतिरोधादिति चेत् ; न ; सति समर्थे कारणे तदयोगात् । तत्सामर्थ्यमेव तेन प्रतिरुध्यत इति चेत् ; न ; प्रत्यक्षस्यैव तत्प्रसङ्गात् । ततस्तस्याव्यतिरेकात् । अत्र

---

१ –रूपकं तद्वक्त–आ०, ब०, प०, स० । २ –प्रत्ययतोस्तया ता० । ३ "त्रयात्मकम्"–सिद्धिवि० । ४ –क्तप्र–आ०, ब०, प०, स० । ५ –पा इव आ०, ब०, प०, स० । ६ असमर्थविषयस्थू–आ०, ब०, प०, स० । ७ तदनुविधायित्वम् । तथाभि–आ०, ब० । ८ स्वलक्षणदर्शनस्य । ९ –नं नानाभा–आ०,ब०,प०,स० । १० स्वलक्षणदर्शनस्य । ११ 'वा'शब्दः समुच्चयार्थकः । १२ व्यवहारे । १३ भेदप्रतिवेदनगतं व्यवहारसामर्थ्यम् । १४ एकत्वाध्यवसायेन । १५ प्रतिरोधप्रसङ्गात् । १६ सामर्थ्यात् ।

चोक्तम्–[1]सिद्ध इत्यादि। असमर्थं चेत्, न, भेदवत्[2] सत्येतनादावपि [3]तद्भावप्रसङ्गात्। न चैवमेकस्याध्यवसायेन किञ्चित्। अथ सन्निहितत्वात्तस्यैव व्यवसाय एव [4]लोकं व्यभिचरति न [5]भेदप्रविवेदनं [6]तस्यासन्निहितत्वात्, अयमेव च तदभ्यवसायेन भेदव्यवहारस्य प्रतिरोध इति चेत्, न, [7]तत्प्रतिवेदनमपि यदा सन्निहितम्, तदा तत्र व्यवहारस्यापि प्रसङ्गात्। तस्मैकस्याध्यवसायेन भेदव्यवहारप्रतिरोधात् सतोऽपि भेदप्रतिवेदनस्यानुपलम्भं किन्त्वभावादेव इति न स्थूलप्रतिभासस्याभिमानिकमिन्द्रियमात्रावानावृत्तिविधायित्वम्, वस्तुत एव तदुपपत्तेः। ५

अपि च, यदि तैत्प्रतिभासो मानस एव प्रतिसङ्ख्यान्तो निवर्तेत "शक्यन्ते हि कल्पना प्रतिसङ्ख्यानबलेन निवर्तयितुम्" [ ] इति स्वयमभिधानात्। न चैवम्, निर्रंशं चिकल्पयतोऽपि स्थूलप्रतिभासनिवृत्तेः, तस्मान्न [8]सूक्ष्मादिस्थूलप्रतिभासो मानसः प्रतिसङ्ख्यानेनानिवर्त्तनात्। गोरूपस्थूलप्रतिभासवत्। ननु च न गोरूपोऽपि स्थूलाकारः परमार्थ- १० सन्नस्ति परमार्थतो रूपादिपरमाणूनामेव भावात्, घटावयवविभ्यवहारस्यापि तदधिष्ठानत्वात्। [9]यदि तर्हि नावयवी अपि तु रूपादय एव तदा न 'घटस्य रूपादयः' इति भवेत्। न हि भवति 'रूपादीनां रूपं "रूपादयः घटस्य घटः' इति पर्यालोचनं परस्साक्षङ्क्ष्य धर्मकीर्तिराह–

"रूपादिशक्तिभेदानामनाक्षेपेण वर्त्तते।
तत्समानफलाक्षेपहेतुव्यवच्छेदे घटश्रुतिः॥ १५
अतो न रूपं घट इत्येकाधिकरणा श्रुतिः।
भेदव्यायमतो जातिसमुदायाभिधानयो॥
रूपादयो घटस्येति तत्सामान्योपसर्जना।
तच्छक्तिभेदाः स्याप्यन्ते वाच्योऽन्योऽप्यनया दिशा॥"

[प्र० वा० १।१०२–१०४] इति। २०

अत्र प्रज्ञाकरस्य व्याख्यानम्–"रूपादीनां "प्रतिनियतशक्तिभेदमनाक्षिप्य तेषु समानोदकधारणशक्त्याक्षेपेण घटश्रुतिः प्रवर्त्तते ततो 'न रूपादयो घटः' इति समानाधिकरणता। अत एव समुदायशक्तिविक्षायाम् अथ समुदायशब्दः, जातिशब्दस्तु प्रत्येकमेकफलस्ये यथा वर्न यथा वृक्ष इति। कथं तर्हि 'रूपादयो घटस्य' इति व्यपदेशः? "उदकाहरणसाधारणरूपादिप्रत्ययजननसमर्थाः प्रत्येकमित्यर्थः। अथ यथा २५

---

१ सिद्ध इत्यन्तग्रन्थ–ज्ञा०, ब०, प०, स०। 'सिद्धो यः सिद्धान्तः' इत्यादि। २ यथा भेद प्रतिवेदनं भेदव्यवहारे असमर्थं तथा। ३ व्यवहाराभावप्रसङ्गात्। ४ भेदप्रति–ज्ञा०, ब०, प०, स०। ५ तस्यानीतत्वा–ज्ञा०, ब०, प०। तस्यानीतत्वा–स०। ६ भेदप्रतिवेदनम्। ७ स्थूलप्रतिभास। ८ "अनुभवाद्यात्मकता रागादिप्रतिपत्तिभूता प्रज्ञा प्रतिसङ्ख्यानम्"–तत्त्वस० पं० पृ० ५३७। ९ तुलना–"न चैतद् व्यवसायात्मं प्रत्यक्षं मानसं मतम्। प्रतिसङ्ख्यानिरोध्यत्वादर्थसंक्षिप्तेक्षणात्।"–सिद्धिवि० प्रत्यक्षपरि०। १० "यदि तर्हि नावयवी रक्षदत्र एव तदा न घटस्य रूपादयः इति भवेत्। न हि भवति रूपादीनां रूपम्, नापि घटस्य वा घट इति पर्यालोचनं परस्याक्षङ्क्षाह"–प्र० वार्तिकाल० २।१००। ११ 'रूपादयः' इति पदमधिकं ज्ञापि। १२ प्रतिनियतशक्तिरे वस्तुमना–ज्ञा०, ब०, प०, स०। १३ उदकाहरण–स०।

'वृक्षाणां वनं वृक्षा वनम्' इति तथा 'घटो रूपादीनां रूपादयो घटः' इति कस्मान्न भवति ? भवत्येव यदि शास्त्रान्तरसंस्कारो न भवति । लोकस्तु प्रायशस्तत्संस्कारानुसारी, ततो न भवति । यस्तु सम्यगवबोधयुक्तः तस्य भवत्येव सं प्रत्ययः 'रूपादय एव केचित् घटः कार्यविशेषसमर्थाः, उदकाद्याहरणं च कार्यविशेषः, सन्निवेशविशेषेण वा व्यवस्थिताः, यतः सन्निवेशविशेषादुदकधारणविशेषः । 'रूपं घटः' इति तु न भवति सामानाधिकरण्यम् अवयवावयविभेदेन परस्परव्याप्त्यभावात् ।" [प्र०वार्तिकाल०] इति । ततः कल्पितत्वात् गोरूपस्य मानस एव तत्प्रतिभास इति कथन्न साध्यवैकल्यमुदाहरणस्येति चेत् ? कथमेवमिन्द्रियज्ञानस्य प्रतिसङ्ख्यानबलादनिवर्त्यत्वम् (र्त्यत्वे) भवँता तत्र गोदर्शनं निदर्शनमुक्तम् ? सामग्रीसाकल्ये अनिवँर्त्या गोबुद्धिः अश्वं विकल्पयतोऽपि गोदर्शनादिति तस्यापि मानसत्वे प्रतिसङ्ख्याननिवर्त्यत्वात् तदनिवर्त्यत्वं प्रति साध्यविकलत्वेनोदाहरणत्वायोगात् । तदयमिन्द्रियज्ञानविपयत्वं गोरूपस्य प्रतिपद्यमान एवँ तस्य विकल्पितत्वमप्याचष्ट इति कथमनुन्मत्तो धर्मकीर्त्तिः ? भारवहनाद्येकप्रयोजनसाधनसाधारणरूपादिशक्तिरूपत्वात् अकल्पित एव गवार्थः । यदाहँ–"तेषु समानोदकधारणशक्त्याक्षेपेण घटश्रुतिः" [प्र० वार्तिकाल०] इति चेत् ; न ; शक्तेरप्रत्यक्षत्वेन दर्शनविपयत्वानुपपत्तेः । प्रत्यक्षत्वेऽपि यद्येका चाव्यतिरिक्ता च रूपादिभ्यस्तच्छक्तिरभ्यनुज्ञायते; सिद्धस्तर्हिं परमार्थत एव तद्रूपो गौरवयवीति कथमुक्तम्–"अवयवा एव नावयवी विद्यते" [प्र० वार्तिकाल० १।९९] इति ? व्यतिरिक्ताऽवयव्यभिप्रायेण तद्वचनमिति चेत्; न; अव्यतिरेकेऽपि अवयवित्वायोगात्। कथञ्चिद्व्यतिरेके तद्योग इति चेत्; न; स्याद्वादिमतानुप्रवेशप्रसङ्गात् । तन्नैका शक्तिः ।

प्रतिरूपादिव्यक्ति भिन्नैवेति चेत्; कथमेवम् एकगवप्रत्ययविपयत्वमेकस्यैव ? अतत्फलहेतुव्यवच्छेदस्य तासु भावादिति चेत्; तव्यवच्छेदस्तर्हिं गोऽवयवी ? सत्यम् ; यदाह–

"तत्समानफलाहेतुव्यवच्छेदे घटश्रुतिः" इति । इति चेत् ; न तर्हिं तस्य दर्शनविपयत्वं नीरूपत्वेनाप्रतिवन्धात्, तत्कथमश्वं विकल्पयतो गोदर्शनादिति निदर्शनोपन्यासः ? तव्यवच्छेदस्य च गोऽवयवित्वे 'तव्यवच्छेदो गौः' इति प्रत्ययेन भवितव्यं न 'रूपादयो गौः' इति । ततो यदुक्तम्–'यस्तु सम्यगवबोधयुक्तस्तस्य' इत्यादि 'घटः' इति पर्यन्तम् ; तदसम्यगवबोधविजृम्भितमेव प्रज्ञाकरस्योत्पश्यामः । तव्यवच्छेदस्य शक्तिरूपेभ्यो रूपादिभ्योऽव्य-

---

१ वृक्षवन–आ०,ब०,प०,स० । २ सम्प्रत्ययः–आ०,ब०,प०,स० । प्र०वार्तिकाल० । ३ यतस्तन्निवेश–आ०, ब०, स० । यतस्तत्सन्निवे–प० । ४ भवतान्न आ०, ब०, प०, स० । ५–वर्त्यगोबुद्धिमश्वं विकल्पयतो गोदर्शनादिति तस्यापि समानत्वे प्रतिसख्याननिवर्त्यत्वं तदनि–आ०, ब०, स० । ६ गोदर्शनस्यापि । ७ प्रतिसंख्याननिवर्त्यत्वं प्रति प० । ८ एतस्य आ०, ब०, प०, स० । ९ यथाह आ०, ब०, प०, स० । १० परमार्थ एव आ०, ब०, प०, स० । ११ कथं युक्तं आ०, ब०, प०, स० । १२ तद्योग इ–आ०, ब०, प०, स० । अवयवित्वयोगः । १३ अतत्कार्यकारणव्यावृत्तेः । १४ भिन्नशक्तिषु । १५ –दे घट इति चेन्न आ०, ब०, प०, स० । १६ तुच्छस्वभावत्वेन सम्बन्धाभावात् । १७–च्छेदो गौ–आ०, ब०, प० । १८ प्रज्ञाकारस्यो–ता० । १९ अतद्धेतुफलव्यवच्छेदस्य ।

विरेकात् त एव गौरित्यपि प्रत्ययो न तुल्यतीति चेत्, न, तस्यं प्रतिशक्त्यभिन्नस्य तदभ्यतिरेके तात्त्विकस्यैवावयविनः सिद्धिप्रसङ्गात्। तुल्यस्य तद्भावच्छेदस्य तत्साधारणस्य कल्पने 'तद्भावच्छेदस्तर्हि' इत्यादेः 'तत्कथम्' इत्यादिपर्यन्तस्य प्रसङ्गस्य पुनः पुनरनुबन्धादानिचक्रमापद्येत।

स्यान्मतम्—न तद्भवच्छेदस्यैकत्वादेकगवप्रत्ययविषयत्वम्, अपि तु सन्निवेशविशेषात्। यदाह—"सन्निवेशविशेषेण वा व्यवस्थिता।" [प्र० वार्तिकालं० १।१००-१०२] इति, तत्र, अत्रापि समानत्वात्तत्प्रसङ्गस्य। तथा हि—

रूपादिभ्यो विभिन्नस्योत्सन्निवेशः स एव गौः।
न तु रूपादयस्तस्मात्ते[1] गौरिति मतिः कथम्? ॥५३१॥

अथिथिक्तः स [2]चेत्तेभ्यो[3] यश्चतुष्टय कल्प्यते। १०
वालवोऽवयवी सिद्धेत् स्याद्वादिभिरमिष्टुतः ॥५३२॥

तेभ्योऽविविक्तः सः[4] प्रतिरूपादि भेदवान्।
तद्वत्तस्यापि नानात्वान्मतिरेकगवे कथम् ॥५३३॥

सन्निवेशविशेषस्य पुनरन्यस्य कल्पने।
पूर्वं एव प्रसङ्गः स्यादभ्यवस्यामवप्रदः ॥५३४॥ १५

तत्र शक्तिव्यवच्छेदः सन्निवेशेषु कथ्यन।
गवार्थस्तास्त्विको यस्य दर्शनं निर्विकल्पकम् ॥५३५॥

स्यान्मतम्—अतत्फलहेतुभ्यवच्छेदः सन्निवेशविशेषो वा न कश्चिदेकरूपो गौरस्ति, शक्तीनामेव बह्वीनां [5]तत्त्वात्, एकत्वव्यवहारस्तु तत्रैकार्थक्रियानिबन्धन इति, तत्र, 'तत्समान' इत्यादिकल्पं 'सन्निवेशविशेषेण' इत्यादिकल्पं चावचनप्रसङ्गात्। एकार्थक्रियानिबन्धनश्च एकत्व २०
व्यवहारो न तावदर्शनसमकालः, ततः पूर्वं तत्क्रियाया अभावात् तद्व्यवहारस्यासम्भवात्। दर्शनमेव तत्क्रियेति चेत्, न, तत्कार्यतद्व्यवहारस्य [6]तत्समकालत्वायोगात्। दर्शनोत्तरकालस्तद्व्यवहार इति चेत्, दर्शने तर्हि गोव्यपदेशमात्रः परमाणवो विरलमाना एव प्रत्यक्षमासेरन्। एवमिति चेत्, कुत एतत्प्रतिपत्तव्यं न चेत्कोशपानं न चेद्या बलवर्णरपालक्षासनम्। अनुभवबलं हु न तादृशमुत्पश्यामो यतस्तान्प्रतिपद्येमहि। ततः कस्यचिदप्यवयवित्वेनानवलम्बनात् कथं तदुपसर्जनरूपादिशक्तिभेदाः प्रतिपाद्येरन्[7] 'गवादे रूपादयः' इति। तत्र केवलम् 'अश्व विक्लप्यतः' इत्यादिकमेव, अपि हु 'रूपादयो घटस्य' इत्यादिकमपि दुर्भाषितमेव। ततो गोदर्शनं निर्विकल्पकमवयव्युपसर्जनभेदं रूपादिशक्तिविशेषमप्यपदेशं विधातुमिच्छता

---

१ व्यवच्छेदस्य। २ कश्चदः। ३ चित्तेभ्यः आ०, ब०, प०, स०। ४ रूपादिभ्यः। ५ सन्निवेशः। ६—क्षणम् आ०,ब०,प०,स०। ७ गौत्वात्। ८ धर्मकीर्त्युक्तस्य। ९ प्रस्तुतस्यैव। १०-दर्शनसमकालत्वायोगात्। ११—क्रियाः—आ०, ब०, प०, स०। १२—न् गोत्वर उपजनः आ०, ब०, प०, स०।

तात्त्विक एव गवादिरवयवी वक्तव्यः । तात्त्विकत्वे तस्य कुतो नावयवविवेकेनोपलम्भ इति चेत् ? न; कथञ्चिदविवेकस्यापि भावात् । कथं पुनः सूक्ष्माविवेकित्वं स्थूलस्य विरोधादिति चेत् ? कथं शक्तिसामान्याविवेकित्वं शक्तिविशेषस्य विरोधाविशेषात् ? शक्तिविशेष एव रूपादीनां न तत्सामान्यमिति चेत् ; न; 'तेषु समान' इत्यादिवचनविरोधात् । कल्पितं तेषु तत्सामान्यमिति चेत् ; न; अतो गौरिति वा घट इति वा प्रत्ययस्यायोगात् , कल्पितस्यानर्थकरत्वात् , अन्यथा नित्यादिप्रद्वेषस्य निर्निबन्धनत्वापत्तेः । कल्पितादपि तस्मात्कथं तद्विशेषस्याविवेको विरोधपरिहाराभावात् ? विवेक एवास्त्विति चेत् ; न; 'गवादे रूपादयः' इति व्यपदेशाभावप्रसङ्गात् सम्बन्धाभावात् । सम्बन्धादपि कल्पितादेव तथा व्यपदेश इति चेत् ; 'रूपादयो घटस्य' इत्यादेर्विरोधात् । कल्पितस्तेद्विशेष इति चेत् ; न ; ततोऽपि 'रूपमिति रस इति' च प्रत्ययायोगात् कल्पितस्यानर्थकरत्वात् ।

अन्यथा नित्यविद्वेषो निर्निबन्धनतां व्रजेत ।
तस्यापि शक्तिसङ्कल्पादर्थकारित्वसम्भवात् ॥५३६॥

कल्पितोऽप्यविविक्तोऽसौ शक्तिसामान्यतो यदि ।
कल्पिताकल्पितात्मत्वं विरोधाद्युज्यते कथम् ? ॥५३७॥

विविक्त एव तस्माच्चेत्तस्येति कथमुच्यताम् ? ।
सम्बन्धेन विना सोऽपि कल्पितो यदि कथ्यते ॥५३८॥

तस्मादभिन्नं तच्छक्तिभेदतद्वद्द्वयं यदि ।
कल्पिताकल्पितात्मत्वं विरुद्धं पुनरापतेत् ॥५३९॥

ततोऽपि तद्विवेकश्चेत्सम्बन्धाभावतः कथम् ।
स तस्येति वचोवृत्तिः सौगतस्योपपद्यते ? ॥५४०॥

पुनः सम्बन्धकल्पौ तु प्राक्प्रसङ्गानुवर्त्तनात् ।
अनवस्थालता व्योमविस्तारव्यापिनी भवेत् ॥५४१॥

ततस्तच्छक्तिसामान्यं तद्विशेष इति द्वयम् ।
न्यायवर्त्मनि निष्णातैरवगन्तव्यमाञ्जसम् ॥५४२॥

भवतु तात्त्विकमेव शक्तिद्वयम् , तत्तु परस्परं भिन्नमेवेति चेत् ; न; दत्तोत्तरत्वात् । सम्बन्धाभावेन 'गवादे रूपादयः' इति व्यपदेशायोगात् , कल्पिते च सम्बन्धेऽनवस्थानदोषात् । हेतुफलभावे च तस्मिन् तयोरेकसमयत्वाभावप्रसङ्गादिति । परस्परभेदेऽप्येकेन रूपादिना तादात्म्यात्तद्व्यपदेश इति चेत् ; एवमपि न काचित् क्षतिः, स्थूलेतराकारयोरप्येवमन्योन्यभेदे सत्यपि द्रव्येणैकेन तादात्म्योपपत्तेरवयविनो जैनाभिमतस्य सुव्यवस्थानात् । ततस्तात्त्विकत्वाद्

१–वेकोपल–आ०, ब०, प०, स० । २–मान्यविवे–आ०, ब०, प०, स० । ३ प्रज्ञाकरगुप्तवचन । ४ शक्तिसामान्यात् । ५ शक्तिविशेषः । ६ परमार्थसत् । ७ परस्परमभि–आ०, ब०, प०, स० ।

गोऽप्यविनो न तत्प्रतिभासस्य मानसत्वम्, अतो न साध्यधर्मैक्यमुदाहरणस्य । नापि साधनवैकल्यम्, तत्प्रतिभासे प्रतिसङ्ख्यानेनानिषर्त्यत्वं प्रति परस्याविवादात् । तत्र दृष्टान्तस्य कश्चिद्दोषः ।

नापि हेतोः । असिद्धत्वादोष एवेति चेत्, न, प्रतिसङ्ख्यानेनानिर्वर्त्यत्वस्य घटादिस्थूलप्रतिभासे धर्मिण्यपि समर्थितत्वात् । अनैकान्तिकत्वादिति चेत्; न; विपक्षे सर्पादिविषयमानसप्रतिभासे[1] तदभावात्, तत्र प्रतिसङ्ख्यानाभिप्रवृत्तेरेव दर्शनात् । विरुद्धत्वादिति चेत्, न, निश्चितविपक्षव्याप्तिकस्य विरुद्धत्वायोगात् । तस्मादसिद्धादिसकलावद्यविकलत्वादनवद्यमिदं साधनम्–घटादिस्थूलप्रतिभासो न मानसः प्रतिसङ्ख्यानेनानिवर्त्यत्वात् गोरूपस्थूलप्रतिभासवदिति । प्रतिवादाह–'अर्थ' इत्यादि । सेन्यू घटादिरवयवी तस्य स्वावयवेषु विद्यमानत्वात् तस्य प्रतिभासो धर्मिनिर्देशोऽयम् । अर्थम् अर्थक्रियासमर्थं स्वविषयं जानातीति अर्थज्ञः[2] विध्येव रूपत्वात् साध्यनिर्देशोऽयम्। 'नी' इति 'इ' इति च प्रतिपेधाभ्यामस्यैवार्थस्याभिधानात् । अनेन कल्पितविषयत्वप्रतिषेधाद् अमानसत्वं तत्प्रतिभासस्याभिहितम् । हेतुमाह–योजनं प्रतिसङ्ख्यानकर्तृ समाधानं युक्तं तदभावाद् 'अयुक्त'इति प्रस (प्रतिस)ङ्ख्यानेनासमाप्तेयत्वादिति । दृष्टान्तमाह–अभिलापवत् । अभिलप्यते परेणाभ्युपगम्य कथ्यत इति अभिलापो गोप्रतिभासः स इव तद्वदिति ।

अपि च, यो मानसप्रतिभासो नासौ सन्निहितार्थो यथा अतीतादिप्रतिभासः, सन्निहितार्थश्चायं घटादिस्थूलप्रतिभासः, तस्मान्मानसः । न हि 'अयं घटः' इत्यसन्निहितेऽर्थे भवति । इदं च नः प्रत्यक्षम्, सन्निहितार्थनिश्चयलक्षणत्वात् । ननु कः पुनरसौ स्थूलो नाम यस्य विषयत्वेन सन्निधानम्? वर्ण एवेति चेत्, न तर्हि 'स्थूलस्तत्प्रतीतिः' स्यात्, भवति च परिपिण्डितवलेचनस्य स्थूलोऽपि तदवलोकनात् । स्पर्श एवेति चेत्, न, अस्पृशतोऽप्युन्मीलितलोचनस्य 'तंपुपलब्धेः । "रूपादिकरणमन्यद्द्रव्यमेव सें इति चेत्, न, 'अयं घटः' इत्यत्र वर्णादेरन्यस्यापतिवेदनात् । अत एवोक्तम्–

"नायं घट इति ज्ञाने वर्णप्रत्यवमासनात्" [ ] इति ।

ततो न घटादिप्रतिभासप्राप्तयो नापि स्पार्शनः, अपि तु तदुभयजन्मा मानस एव, तस्मात्सन्निहितार्थ एवायमिति चेत्, न, रूपादेरन्योन्यविवेकलक्षणस्यार्थस्य सन्निधान एव तत्प्रतिभासभावात् । कथमन्योन्यविवेको विरोधादिति चेत्? न, परस्परपरिहारस्यैव विरोधत्वात् । तस्य चैकान्तिकस्याभावात्, अविवेकस्यापि प्रतिभासात् । न च प्रतिभासादन्यद्विरोधेऽपि निवन्धनमस्ति । कुतस्तत्प्रतिभास इति चेत्? दर्शनादेवेति ब्रूमः । तैंयदि चाक्षुषम्, स्पार्शादेस्तेनाग्रहणात् कथं स्वविषयस्य तद्विवेकं प्रत्येति तद्विवेकग्रहणार्थं तद्ग्रहणान्तरीयकत्वात् ?

---

१ गोऽप्यस्थूलप्रतिभासे । २–नाभिवर्तकत्वं आ०, ब० प०, स० । ३–वर्तस्य आ०, ब०, प०, स० । ४–से सति तद्–आ०, ब०, प०, स० । ५ सद् घटः–आ०, ब०, प०, स० । ६ विरुद्धव्याप्ते सति 'अर्थज्ञः' इति सिध्यति । विध्ये चैवं रू–आ०,ब०,प०,स० । ७ मेति च प्रति–आ, ब०, प०, स० । ८ स्पर्शं कुर्वतः । ९ स्थूलप्रतीतिः । १० स्थूलोपलब्धे । ११रूपादिरू–आ०,ब०,प०,स० । १२ स्थूलः । १३–तिभासाभावा–स० । १४ दर्शनम् । १५–स्य तद्ग्रह–आ०, ब०, प० ।

एतेन स्पार्शनं तदित्यपि प्रत्युक्तम्; तेनापि रूपादिकमजानता स्वग्राह्ये तदविवेकस्य दुर्ज्ञानत्वात्, न च रूपादिसर्वस्वविषयं दर्शनान्तरमस्ति यत्तदविवेकमुपदर्शयेदिति चेत्; न; अविवेकवत् विवेकस्याप्यग्रहणप्रसङ्गात्। तथा हि—न चाक्षुषमेव ज्ञानं स्पर्शादिकमप्रतियत् स्वविषयस्य तद्विवेकं प्रत्येतुमर्हति, तद्विवेकप्रतिपत्तेरपि तत्प्रतीतिपुरस्सरत्वात्। एतेन स्पार्शनं तदित्यपि प्रत्युक्तम्; तेनापि रूपादिकमप्रतियता स्वविषये तद्विवेकस्य दुरवबोधत्वात्, सकलरूपादिविषयस्य च दर्शनान्तरस्याभावात् न ततोऽपि तदवगम इति कथं दर्शनबलात् परस्परं विविक्तं रूपादिस्वलक्षणं शक्यमवस्थापयितुम्?

स्यान्मतम्—रूपादिदर्शनस्य स्पर्शाद्यविषयत्वेऽपि तद्विवेकस्य सर्वविषयादनर्थान्तरत्वात् स्वविषयं प्रतियत्तमपि नियमेन प्रत्येति अन्यथा अनर्थान्तरत्वायोगादिति; तदयमस्माकमानन्दहेतुरमृतस्यन्दः; तद्विवेकवत् तदविवेकस्याप्येवमवगमोपपत्तेः, कथञ्चित्स्पर्शाद्यविवेकस्य रूपादेर्दर्शनविषयादनर्थान्तरत्वाविशेषात् अप्रतिपन्नादपि तद्विषयस्याविवेकेऽदधिरूपस्योष्ट्रस्पर्शादेरप्यविवेकः स्यात् अप्रतिपन्नत्वाविशेषात्, ततश्च दधिकरभयोरेकावयवित्वात् दधनि प्रवृत्तिचोदनायामुष्ट्रेऽपि प्रवृत्तिः स्यादिति चेत्; न; तद्विवेकस्याप्येवमव्यवस्थितिप्रसङ्गात्, रूपस्वलक्षणस्यैं हि सर्वस्माद्विवेके स्वतोऽपि विवेक इति नीरूपमेव तदिति तच्चोदनायामुष्ट्रवद् दधन्यपि न प्रवृत्तिः स्यात् नीरूपस्य व्योमवदशक्यंखादनत्वात्। तथा च कस्यचिद्वचनम्;—"आकाशमास्वादयतः कुतस्तु कवलग्रहः?" [ ] इति।

सर्वस्माद्व्यतिरेकित्वे तद्विशेषनिराकृतेः।
स्वतोऽपि व्यतिरेकित्वान्निःस्वभावं भवेद्दधि ॥५४३॥
तथा च दधि खादेति चोदितोऽपीह मानवः।
दधन्यपि च नीरूपे वर्त्ततां कथमुष्ट्रवत्? ॥५४४॥

स्वरूपस्य प्रतिपन्नत्वात् कथं तत एव तस्य व्यतिरेक इति चेत्? न; प्रतिपन्नत्वादव्यतिरेके परतोऽपि न स्यात् तस्यापि कुतश्चित्प्रतिपत्तिसम्भवात्, अन्यथा सत्त्वानुपपत्तेः "उपलम्भः सत्येव" [प्र० वार्तिकाल० २।५४] इति वचनात्। अव्यतिरेके प्रतिपत्तिरव्यतिरेकसाधनी, सा च स्वरूप एव न परत्र, तत्र व्यतिरेकप्रतिपत्तेरेव भावादिति चेत्; न तर्हि दधिरूपस्यापि करभाद्व्यतिरेको व्यतिरेकप्रतिपत्तेरेव तत्र भावात्। सत्यपि सा न व्यतिरेकसाधनीति चेत्; न; अव्यतिरेकस्यापि तत्प्रतिपत्तेरसिद्धिप्रसङ्गात्। निर्बाधत्वात् ततस्तत्सिद्धिरिति चेत्; न; व्यतिरेकेऽपि तुल्यत्वात्, तत्प्रतिपत्तेरपि निर्बाधत्वाविशेषात्। न हि लौकिकः परीक्षको वा करभविविक्तदधिरूपनिरूपणोपनिबद्धां बुद्धिबाधोपरुद्धामवबुध्यते।

---

१ दर्शनम्। २ स्पर्शादिविवेकम्। ३ तद्विवेकविषयस्य आ०, ब०, प०, स०। स्पर्शादिविवेकस्य। ४ रूपादेः। ५ स्पर्शादिविवेकमपि। ६–वेका दधि–आ०, ब०,प०।–वेकोदधि–स०। ७–स्य सर्व–आ०, ब०, प०, स०। ८–क्यबाधन–आ०, ब०, स०। ९–रेकत्वे आ०, ब०, प०, स०। १० व्यतिरेकत्वा–आ०, ब०, प०, स०। ११ सत्येति ब–आ०, ब०, प०, स०। १२ "सत्तोपलम्भ एवेति भावानां पारमार्थिकी" –प्र० वार्तिकाल० २।५४। १३ व्यतिरेकप्रतिपत्तिः। १४ अव्यतिरेकप्रतिपत्तेः।

स्यान्मतम्–येनातिशयेन दधिव्यपदेक्षनिबन्धनेन करमादधिरूपं व्यतिरिच्यते तस्य व्यतिरेकविधित्वभावत्वे करमादिव स्पर्शादेरपि दधिगतात्तद्रूपस्यैव व्यतिरेक एव स्यात्। अतत्त्व भावत्वे करमाद्व्यव्यतिरेकापत्तिः, अतो न वर्णस्पर्शात्मकत्वेनोभयात्मकस्य दधिद्रव्यस्येति, तदपि स्ववधार्यैव परप्रतिपत्तिनिबन्धनं परस्य, तथा हि–स्पर्शादेरपि येनातिशयेन व्यतिरिच्यते तद्रूपं तद्व्यपदेशनिबन्धनेन तत्स्वापि व्यतिरेकविधित्वभावत्वाविशेषात् दधिरूपस्य स्पर्शादेरिव स्वरूपादपि व्यतिरेक एव प्रोक्तः, तस्मात्तत्त्वभावत्वे स्पर्शादेरप्यव्यतिरेकापत्तेः, अतो न वर्णात्मकत्वमपि दधित्वलक्षणस्य, अपि तु नीरूपत्वमेव। तदुक्तमुम्बेकेन (?)–

"न मेदो वस्तुनो रूपं तद्भावप्रसङ्गतः॥" [ ] इति।

तस्य तद्विवेकविधित्वभावत्वं स्पर्शादिविषयमेवैं न स्वरूपविषयमिति चेत्, कुत एतत्? एवमनुभवादिति चेत्? किं भवान् अनुभवव्यापारमपि जानाति? तथा चेत्, सुस्थितं तर्हि दधिरूपस्य तद्रूपत्वस्पर्शादेरव्यतिरेकित्वम्, व्यतिरेकित्वञ्च करमात्, अनुभवव्यापारस्यैवमेव प्रतीतेः। एकसामग्र्यधीनतया कल्पित एव तैस्य स्पर्शाद्यव्यतिरेकः, तस्यैं तस्यानुभवविषयत्वं कल्पितस्य तदयोगादिति चेत्? न; नीलादिरूपस्यापि अधिष्ठानविज्ञानिनीविज्ञासोपनीतकारित्वेन दर्शनविषय स्वामापत्तेः। तथा च वेदेमत्तकवचनम्–"नेह नानास्ति किञ्चन" [बृहदा० ४।४।१९] इति "इन्द्रो मायाभिः पुरुरूप ईयते" [ऋक्० ४।७।३३, बृहदा० २।५।१५] इति च। नीलादेरपरं दर्शनवैर्थं न प्रतीयत इति चेत्, न, "तव्यव्यतिरेकव्यतिरेकस्यापि तद्वेत्वप्रतीतेः। नीलादिमात्रं प्रतीयत एवेति चेत्, न, अन्वयेनापि 'सन्मात्रं प्रतीयते एव' इति कर्तुं (वक्तुं) क्षम्यत्वात्।

ननु सन्मात्रे वस्तुसति तव्यतिरिक्तं दर्शनमेव नास्ति द्वैतवादापत्तेः, तत्कर्थं "तस्य तद्वेद्यत्वमिति चेत्, न, नीलादिमात्रेऽपि 'परमार्थसति "तद्भावात्। नीलादिमुखादिक्षरीरव्यतिरे "किणः तद्वाहकस्य "अलङ्कारकारेणानङ्गीकारात्। नीलादिमुखादिक्षरीरयोश्च ग्राह्यत्वेन ग्राहकत्वान भ्युपगमात्। नीलादिरूपमेव तद्दर्शनमिति चेत्, सन्मात्ररूपमेव तद्दर्शनमपि किम् स्यात्? सन्मात्रस्यैं सविषादत्वात्तन्नर्थान्तरत्वे दर्शनस्यापि सविषादत्वमिति न तस्य तत्र प्रामाण्यम्, निर्विषादत्वैव प्रामाण्यादिति चेत्, न, नीलादिदर्शनस्यापि तद्भावप्रसङ्गात्। अत्यन्तासाधारणस्य नीलादेरपि विषादाधिष्ठानत्वेन 'तैदनर्थान्तरत्वे तद्दर्शनस्यापि तदधिष्ठानत्वाविशेषात्। तद्दर्शन विषादस्य कुतश्चिदुपपत्तिबलाभिराकरणमिति चेत्, न, सन्मात्रदर्शनविषादस्यापि तस्य एव निराकरणप्रसङ्गात्। तदुपपत्तिबलस्य सन्मात्रादनर्थान्तरत्वे "तैद्विद्यादविषयत्वात् कुतश्चतत्तद्दर्शन विषादनिवृत्तिः विषादात्तदाद्येव तदयोगात्? अन्यथा दर्शनादेव "तैद्दोषात् तद्विषादनिवृत्तेः "तद्व

---

१ अतिरिक्तस्य। २ विरिक्तस्य। ३ व्यतिरेकविधानस्वभावाभावे। ४ अतिरिक्तस्यापि। ५ प्राप्तं स्यात् स्वभा–भा०, ब०, प०, स०। ६ इदं मन्त्रलक्षणमिदमृतवाक्षसिद्धौ (२।५) उपलभ्यते। ७–त तत्स्वरू–भा०, ब०,प०,स०। ८ दधिरूपस्य। ९ उपनिषद्वचनम्। १० स्पर्शादमेवाव्यवत्व। ११ सन्मात्रस्य। १२ परमार्थेसति भा०,ब०,प०,स०। १३ दर्शनमात्रात्। १४–त्वतिरेकेण त–भा०, ब०, प०, स०। १५ प्रज्ञाकरगुप्तैव। १६–त्व निरा–भा०, ब०, प०, स०। १७ तदर्थान्त–भा०, ब०, प०, स०। १८ सन्मात्रवत्। १९ विषाद स्यात्। २० उपनिषत्प्रक्रियैव।

लोपकल्पनवैफल्यप्रसङ्गात्। तद्बलविवादस्यापि अन्यस्माद्युपपत्तिबलान्निवर्त्तनमिति चेत्, न; तत्रापि [1]प्राच्यप्रसङ्गानतिवृत्तेरनवस्थानोपस्थानात्। अर्थान्तरत्वे तु [2]द्वैतदोषोपनिपातात् न सन्मात्रग्राह्यस्य दर्शनविषयत्वमिति चेत्; न; नीलादिस्वलक्षणविषयदर्शनाधिष्ठानविवादव्यावर्त्तनपरस्यापि उपपत्तिबलस्य तत्स्वलक्षणादनर्थान्तरत्वे [3] तद्बद्धिवादविषयत्वेन तद्दर्शनविवादव्यावर्त्तकत्वाभावस्य तद्विवादस्यार्प्यन्योपपत्तिबलाद्व्यावर्त्तने अनवस्थादोषस्य चाविशेषात्। अर्थान्तरत्वेऽपि यदि तस्यासाधारणरूपत्वं तदवस्थ एव [4]तस्य तद्दर्शनविवादनिवर्त्तकत्वाभावः तस्यापि तत्स्वलक्षणवद्विवादभूमित्वात्। तद्विवादस्याप्यन्यस्मादसाधारणादेवोपपत्तिबलान्निवृत्तिरिति चेत्; न, द्वितीयस्य अनवस्थानदोषस्यास्य प्रसङ्गात्। भवतु साधारणमेव [5]तस्य रूपमिति चेत्; न; वस्तुसतो भवन्मतेनाऽभावात्। अवस्तुसदेव तत् कल्पितत्वादिति चेत्; न; तादृशादेव तद्बलात् सन्मात्रदर्शनविवादस्यापि निवृत्तिप्रसङ्गात्। न तत्र तादृशमपि [6]तत्सम्भवति अद्वैतवादपरिपीडनादिति चेत्; न, तस्य कल्पितत्वेन नीरूपस्य अद्वैतवादप्रत्यनीकत्वायोगात्। [7]नीरूपात् कथं तद्विवादनिवर्त्तनमिति चेत्? कथं तत एव स्वलक्षणदर्शनविवादनिवर्त्तनमिति समानः पर्यनुयोगः? सन्मात्रे वस्तुसति कल्पनमपि कुतस्तद्बलस्य [8]? तत एव सन्मात्रादिति चेत्; न; तस्य स्वयंज्योतीरूपस्य नित्यशुद्धत्वेनाभ्यनुज्ञानात्। न च कल्पनायां न [9]तच्छुद्धिः, [10]तस्या मिथ्याप्रतिभासत्वेनाशुद्धित्वादिति चेत्; ननु [11]असाधारणलक्षणवस्तुवादिनोऽपि कुतस्तद्बलस्य [12]कल्पनम्? ज्ञानस्वलक्षणादेव कुतश्चिदिति चेत्; न; तस्य स्वसंवेदनात्मनः शुद्धस्यैवाभ्युपगमात्, तत्र च कल्पनारूपस्याशुद्धिदोषस्यानुपपत्तेः। नैकान्ततः शुद्धमेव [13] संवेदनम् स्वरूपापेक्षया शुद्धस्यापि ग्राह्याकारापेक्षया [14] तद्विपर्ययभावात्, अन्यथा "अभिलापसंसर्ग" [न्यायवि० पृ० १३] इत्यादेर्निर्विषयत्वप्रसङ्गादिति चेत्; न; सत्तातत्त्वेऽपि तुल्यत्वात्, तस्यापि पादत्रयेणैव परिशुद्धिभावात् "त्रिपादस्यामृतं दिवि" [यजु०पुरुष० ३१।३। छान्दो० ३।१२।६] इत्याम्नायात्। पादतः पुनरपरिशुद्धिरेव, तस्य विश्वभूतत्वाभिधानात्। तद्भूतानाञ्च भेदप्रतिभासरूपत्वेनाऽशुद्धिरूपत्वे तदात्मनि तत्पादेऽप्यशुद्धिं प्रति विवादाभावात्। अन्यथा "पादोऽस्य विश्वा भूतानि" [यजु० पुरुष० ३१।३। छान्दो० ३।१२।६] इति श्रुतेर्निर्विषयत्वापत्तेः। अस्त्येव वस्तुतो निर्विषयत्वं श्रुतेः पादतोऽपि तस्य परिशुद्धत्वात्, अन्यथा मोक्षाभावानुषङ्गात्। अशुद्धिपरिक्षये मोक्ष इति चेत्; न; अशुद्धेस्तत्पादस्वभावत्वेन तत्परिक्षये तत्पादस्यापि परिक्षयोपनिपातात्। न चैतत्पथ्यं परेषाम्, आत्मपरिक्षयस्य तैरनभ्युपगमात्। केवलमविचारवन्धुरप्रतिभासमात्रसावलम्बनैवेयं "पादोऽस्य" इत्यादिका श्रुतिरिति चेत्; न; अभिलापसंसर्ग"[न्यायवि०] इत्यादेरपि निर्विषयत्वात् परिशुद्धरूपस्यैव संवेदनस्य भावात्।

---

१ प्राप्यप्रस–आ०, ब०, प०, स०। २ तु नैतद्दोषो–आ०,ब०,स०। सु नैतद्दोषो–प०। ३–त्वे तदविवा–आ०, ब०, प०, स०। ४–स्याप्यनुपप–आ०, ब०, प०, स०। ५ तस्यादर्श–आ०, ब०, प०, स०। ६ उपपत्तिबलस्य। ७ साधारणादेव। ८ उपपत्तिबलम्। ९ तुच्छस्वभावादुपपत्तिबलात्। १० उपपत्तिबलस्य। ११ तच्छुद्धः आ०, ब०, प०, स०। १२ कल्पनायाः। १३ असाधारणचणवस्तु–आ०, ब०, प०, स०। १४ उपपत्तिबलस्य। १५ –व स्वसं–ब०। १६–या विप–आ०, ब०, प०, स०।

"प्रमास्वरमिदं चित्तं प्रकृत्या" [प्र० वा० १।२१०] इति वचनात्। अलंपरिक्षय एव प्रमास्वरत्व न सर्वदेति येन्, न, मलानां कदाचिदपि वस्तुगृहीतामावात्। "परमार्थतस्तु विज्ञानं सर्वथैवाविकल्पकम्" [प्र० वार्तिकाल० २।२४९] इत्यलङ्कारात्। "अभिलापसंसर्ग" [न्यायवि०] इत्यादिस्तु श्रुतिविभिन्नुःविचारपरीपहाक्षम-प्रतिभासमात्रविषय एव। ततः सत्तातत्त्ववादवत्र स्वलक्षणादेऽपि तादृश किञ्चिदलि ५ यत्तदर्शनविषादनिवर्तनपरमुपपत्तिवलमुपकल्पयेत्। प्रतिभामात्रादेव तर्हि विचारपरिपंथेपयिशारुशरीरात् तदुपकल्पनम्, इत्यपि दुर्घटम्, मतान्तरेऽपि समत्वात्। ततो यदि रूपादेः स्पर्शादिभ्यो विवेक एव, अविवेकस्तु कल्पित, तर्हि स्वरूपतोऽपि विवेक एव, तदविवेकस्तु कल्पित एवास्तु। ततस्तस्य स्पर्शादिविवेकवत् स्वरूपतोऽपि न दर्शनविषयत्वं सत्तातत्त्वस्यैव सर्वत्र सर्वदा सर्वथा च विवेकविकल्पस्य तदुपपत्तेः। तथा च श्रुतिः—"पश्यन्त्रा एतत् द्रष्टव्यं १० न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते।" [बृहदा० ४।३।२३]।

स्यान्मतम्—बाह्यप्रामेयेदं 'पश्यन्त्रा' इत्यादि, न हि निरस्तसकलभेदकल्पोल्लसत्प्रतिभासप्रपञ्चं सत्तातत्त्वमनुभवपथोपस्थापितमुत्सहयामः। ततो यदि रूपादिरपि न स्यात् निर्विवादं शून्यवादावतारः स्यात्, न चार्यं न्याय्यः प्रमाणाभावात्। ततो न रूपादेः स्वरूपतो विवेकः परस्परतः एव सद्भावात्, तथैवानुभवव्यापारस्य निरवद्यत्वोपलम्भादिति, तदपि न १५ समीचीनम्, निरस्तस्पर्शादिविवेकतत्प्रतिभासस्य रूपादेरपि तत्त्वोपस्थापितस्यासम्प्रतिपत्तेः शून्यवादावतारस्य तदवस्थत्वात्। ततो न रूपादेर्विगतस्य तत्स्पर्शादेर्विवेकः करमादेव सेद्धा वात् अनुभवव्यापारस्य तथैव संवेदनात्। धर्मकीर्तिनाऽपि तैव्यापारानभिज्ञानादेवेदमभिहितम्—

"सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः।
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ? ॥ २०
अथास्त्यतिशयः कश्चिद्येन भेदेन वर्त्तते।
स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम्॥" [प्र०वा०३।१८१-८२] इति।

ततः 'सिद्धं तदविवेकलक्षणावयविसन्निधानसापेक्षत्वेन द्रव्यादित्यूल्लप्रतिभासस्य सन्निहितार्थत्वं ततश्चामानसत्वम्। "तदाह—'अर्थं' इत्यादि। प्रतिभासः प्रस्तावात् स्थूलाकारगोचरः स धर्मी, साध्यमाह—अयुक्तः असङ्गतः। कुतः सकाशात् ? असतः, अस्यति २५ प्रेरयति स्वविषयेभ्यिन्द्रियाणीत्यसं मनः तस्मात्तत इति इन्द्रियादेव युक्त इत्यर्थः। निमित्त माह—अर्थज्ञाने अर्थस्यानन्तरोत्पन्नस्य ज्ञानस्य उत्तरव्यापेन तत्प्रतिभासं प्रति सन्निहितत्वेनावगमः।"

---

१ परीक्ष्य एव आ०,ब०,प०,स०। २ पदार्थतत्त्व आ०,ब०,प०,स०। ३—वेदवि—आ०,ब०,प०,स०। ४ सम्यक्तत्व आ०,ब०,प०, स०। ५ दर्शनविषयत्वोपपत्तेः। ६ इदम्प्रमिति पदम् 'एतत्' इत्यस्य निष्पन्नमूर्त सम्यात्ताद्यावानमिति भाति। "पश्यत्येतद्य पश्यति" —बृहदा०। ७ विवेकवत्वात्। ८ ततश्चापारा—आ०,ब०, प०, स०। ९ सिद्धान्तादपि—आ०, ब०,प०,स०। १० तथाह आ०,ब०,प०,स०। ११ —गतेऽस्मिन् तस्मा—आ०,ब०,प०,स०।

तस्मिन् इति, तस्मान्निमित्तादिति यावत्। परप्रसिद्धं निदर्शनमाह–**अभिलापवत्** अभि समन्ताल्लानं खण्डनमभिला तामाप्नोतीत्यभिलापं स्वलक्षणं तस्येव तद्वदिति। तदयमत्र सङ्ग्रहः–

स्थूलाकारावभासोऽयमर्थसन्निधिसम्भवात्।
अमानसोऽवगन्तव्यः स्वालक्ष्ण्यावभासवत् ॥५४५॥ इति।

तदेवं स्पर्शादिनानावयवाधिष्ठानस्य तद्विवेकलक्षणस्यावयविनः पारमार्थिकस्यैव भावादुपपन्नं तस्य प्रत्यक्षविषयत्वम्। ततः सूक्तम्–**'बहिरर्थस्य ग्रहणम्'** इति।

न केवलमवयविन एव तस्य तद्विषयत्वमपि तु द्रव्यस्यापि अक्रमवत् क्रमेणापि परापरपर्यायाविष्वग्भावस्वभावस्य द्रव्यसंज्ञितस्य स्तम्भादेरविरोधात्। एतदेवाह–

परमार्थैकनानात्वपरिणामाविघातिनः ॥९॥ इति।

एकं च नाना च एकनाना तयोर्भाव **एकनानात्वम्** 'एकत्वं च नानात्वं च' इत्यर्थः, भावप्रत्ययस्य प्रत्येकमभिसम्बन्धात्, स एव **परिणामो** विवर्त्तः। **परमार्थ**श्चासौ अकल्पितत्वात् एकनानात्वपरिणामश्च स तथोक्तः, तस्य **अविघातः** प्रमाणैरप्रतिक्षेपः स विद्यतेऽस्मिन्निति **परमार्थैकनानात्वपरिणामाविघाती** बहिरर्थस्तस्य 'प्रतिभासः' इति सम्बन्धः। कुतस्तत्प्रतिभास इति चेत्? न; प्रत्यक्षादेव चक्षुरादिजनितात् क्रमानेकस्वभावादिति निवेदितत्वात्।

स्यान्मतम्–अवयवेभ्यो भिन्न एवावयवी, पर्यायेभ्यश्च द्रव्यमर्थान्तरमेव बहिरर्थः, अवयवा एव वा, निरवयविनो निर्द्रव्या एव वा पर्यायाः बहिरर्थः, ततस्तस्यैव प्रत्यक्षात्प्रतिभासो न क्रमाक्रमानेकस्वभावस्येति। तत्राह–

प्रतिज्ञातोऽन्यथाभावः प्रमाणैः प्रतिषिध्यते। इति।

अन्यथा पूर्वोक्तादन्येन प्रकारेण **भावः** सत्त्वं बहिरर्थस्य **प्रतिज्ञातः** परैरङ्गीकृतः **प्रमाणैः** प्रत्यक्षादिभिः **प्रतिषिध्यते** प्रतिक्षिप्यते इति। ततो न तथा बहिरर्थ इति भावः। यदि तस्यान्यथाभावो न प्रतिपन्नः कथं प्रतिषेधः तस्य[4] निर्विषयत्वायोगात्? प्रतिपन्नश्चेत्, तत्रापि यदा तत्प्रतिपत्तिर्न तदा तत्प्रतिषेधः प्रतिपत्त्यधिष्ठितस्य तदयोगात्, प्रतिपत्तित एव सत्त्वव्यवस्थितेः, अन्यस्य तद्व्यवस्थित्युपायस्याभावात्। अन्यदा तु तत्प्रतिषेधे न सर्वथा तदन्यथाभावप्रतिषेधः, प्रतिपत्त्यवस्थायां तदभावादिति चेत्; न; प्रतिपन्नस्यैव तस्य प्रतिषेधेन तन्निर्विषयत्वाभावात्। नापि प्रतिपन्नस्यान्यदैव निषेधः; प्रतिपत्तिसमयेऽपि निषेधात्। तत्समयेऽप्यसतः कथं प्रतिपत्तिरिति चेत्? स्यादेतदेवम्, यदि विषयाधीनसत्ताकत्वं प्रतिपत्तेः, न चैवम्, तत्र विषयाहेतुत्वस्य निवेदनात्। कुतस्तर्हि तत्प्रतिपत्तिरिति चेत्?, तच्छास्त्रादेव। तत्कृतां तु कुतश्चिदात्मसम्बद्धात् पुद्गलविशेषादिति ब्रूमः। तथा च प्रयोगः–सर्वथैकान्तज्ञानं

---

१ परापरपर्यायतादात्म्यरूपस्य। २ प्रतिषेधस्य। ३ यथा त–आ०, ब०, प०, स०। ४ प्रति षेधाभावा ५ प्रतिपत्तौ। ६ परशास्त्रादेव। ७ शास्त्राकाराणां तु। तत्कृतां तत्कृत–आ०, ब०, प०, स०।

तद्यादिनां शरीरेन्द्रियादिव्यतिरिक्तजीवसम्बन्धपुरःसरपरिपाकपूर्वकं मिथ्याज्ञानत्वात् मदिरादयुपयोगजनितमिथ्याज्ञानवत्[1]। सर्वज्ञानत्व च तस्य प्रत्यक्षादिना बाध्यमानत्वात्। तदुक्तम्—

"जीवस्य संविदो भ्रान्तेर्निमित्तं मदिरादिवत्।
तत्कर्मागन्तुकं तस्य प्रवन्धोऽनादिरिष्यते॥" [सिद्धिवि० पृ० ३७३] इति।

भविष्यति चास्य तृतीये विस्तर इति नेहानीं क्रियते। "भवत्वेवम्, तथापि कथम् सतो विषयस्य तत्र प्रतिभासनमिति चेत्? तज्ज्ञानशक्तित एव, सतोऽपि तस्य तैत एव तदुपपत्तेः। निरूपितं चैतत्पूर्वमिति न निरूप्यते।

यदि प्रतिपत्तिविषयस्याप्यभावो इन्तैव कथमनेकान्तेऽपि विश्वास इति चेत्? भवत्येवम्, यदि प्रतिपत्तिमात्रात्तस्सिद्धिरुच्येत, न चैवम्, तद्विशेषादेव[2] निर्व्यावाधात् सदम्युपगमात्, तस्य च प्रमाणैः सद्भावेस्यापनात्। यद्येवमनेकान्तविधिपरैः[3] कथं तैरेकान्तप्रतिषेध इति चेत्? न, प्रतिषेधपरत्वस्यापि तेषु भावात्, अन्यथा तैर्विधेयेषु स्वरूपादिवत् पररूपादिनापि विश्व्युपकल्पनायां नाऽवयवावयव्यादिविभागः, सर्वात्मैदापत्तेः। नार्य दोषो ब्रह्मवादिनामिति चेत्, आस्तामेतत्, तन्मतस्य यथावसरं निरूपणात्। एतेन प्रतिषेधपरेष्वपि तेषु विधिपरत्वमप्यवबोद्धव्यम्, अन्यथा तैर्विधेयेषु पररूपादिवत् स्वरूपादिनापि प्रतिषेधोपकल्पनायामपि न तद्विभागसिद्धिः सकलविषयनिःस्वभावतापत्तेः। नार्य दोषः शून्यवादिनामिति चेत्, इदमप्यसत् निरूपितस्याभिरूपविप्लवमाणत्वात्। ततो विषयाणां परस्परतो विवेकमविवेकञ्च स्वतो वस्तुसमवयस्भावी प्रमाणेषु विधिप्रतिषेधपरतया द्वैरूप्यात्प्युपगमः। तथा च तात्त्वेन अात्मन्यनेकान्तम् एकान्तविरोधिनं प्रतिपत्तामानि तत्र परप्रतिज्ञार्थं तदन्यथाभावं प्रतिषेधन्तीति किमः प्रयासेन? बहिर्विषय एवायमेवं "तद्यापारोपदर्शनेन अस्मात्मिस्तत्प्रतिषेध" विधानात्। तद्यापारोऽपि परामिमतबहिर्विषयानुरूप एवेति चेत्, किं तद्व्यापारो यत्सोऽपि व्यापारः? प्रलम्बमेवेति चेत्; न, अस्य अवयवावयव्यादिकान्तभेदे "तदवर्शनात्। अन्यथा तत्र न विवादः स्यात्, अस्ति चैं केचित्" तत्रात्मन्यात्मभेदस्य, "अपरे। कथञ्चिद्भेदस्य, योगैरेकान्तभेदस्य च प्रतिपादनात्। स्याद्वादिनामपि यदि कथञ्चिद्भेदे तद्व्यापारः कथं विवाद इति चेत्? न, सत्यपि "तद्व्यापारे वस्तुतद्व्यामोहस्यानि (ह्यनि)वार्यसम्भवात् विवादोपपत्तेः, निश्चयस्यैव विवादविरोधित्वात्। न" चैवं नैयायिकानाम्, तत्प्रत्यक्षस्य निश्चयैकरूपत्वात्[4] "व्यवसायात्मकं प्रत्यक्षम्" [न्यायसू० १।१।४] इति तल्लक्षणप्रणयनात्। स्याद्वादिनामपि निर्णयात्मकमेव प्रत्य-

---

१—सन्तत्वपु—आ०,ब०,प०,स०। २ —तज्ज्ञानत्वं तस्य आ० ब०,प०, स०। ३ मिथ्याज्ञानत्वम्। ४—तैर्निर्णितं स०। ५ अत्र ताडपत्रं त्रुटितम्। भवत्येवं प०,स०। ६ ज्ञानशक्तित एव। ७ प्रतिपत्तिविषयाद्वैत। ८ प्रमाणैः। ९ प्रमत्तेषु। १० —सत्वं तद्—आ०, ब०, प०, स०। ११ प्रमाणव्यापारोपदर्शनेन। १२ अन्यथामानमेषेष। १३ तदर्शनात् आ०,ब०,प०,स०। १४ चैकश्चन आ०, ब०,प०,स०। १५ चौद्धैः। १६ जैनैः, कुमारिलभट्टानुयायिभिश्च। १७ तथापारवस्तु—आ०, ब०, प०, स०। प्रमाणव्यापारे। १८ न चैवं वस्तु सूर्यं चैकविधमात्मा।

क्षम् "व्यवसायात्मकं ज्ञानं प्रत्यक्षम्" [ ] इति तल्लक्षणस्यापि श्रवणादिति चेत्; न; एकान्ततस्तदात्मकत्वाभावात्, व्यवसायात्मनोऽपि तस्य कथञ्चित्तदव्यवसायस्यापि सम्भवात्। एकान्तव्यवसायत्वभावाभ्युपगमे हि तत्र तेषां स्याद्वादित्वस्याभावापत्तेः कथन्न स्वमतव्याघातः? न चैवं नैयायिकानां तदेकान्तभेदे प्रत्यक्षमनिर्णयस्वभावमित्युपपन्नम्, अवयवावयव्यादावपि तस्य तत्स्वभावत्वापत्तेः क्वचिदपि व्यवसायाभावप्रसङ्गात्। न चैतन्न्याय्यम्, "व्यवसायात्मकम्" इति तल्लक्षणस्यासम्भवदोषानुषङ्गात्। 'तदेकान्तभेद एव तदव्यवसायं नावयव्यादौ' इत्यप्युपपन्नम्; व्यवसायेतरस्वभावतया उभयात्मकस्य तत्प्रत्यक्षस्याभ्यनुज्ञाने तेषामनेकान्तविद्वेषाभावप्रसङ्गात्। तस्मात् व्यवसायैकस्वभावमप्यक्षमावक्षाणानाम् अवयव्यादिवत् तद्विषयेण तदेकान्तभेदेनापि व्यवसितेनैव भवितव्यमिति कुतस्तत्र विवादप्रवृत्तिः?

स्यान्मतम्-यथा प्रत्यक्षेनिर्णीतेऽप्यवयवादौ सौगतस्य विवादस्तथा यदि तदेकान्तभेदेऽपि को दोष इति? तत्र; विवादस्यानन्त्यापत्तेः। तथा हि-

विवादस्य निवृत्तिर्हि निर्णयादेव नान्यतः।
निर्णीतेऽपि विवादश्चेत्कुतः स्यात्तन्निवर्त्तनम्? ॥५४६॥
अध्यक्षादनिवृत्तश्च सोऽनुमानादितः कथम्?
निवर्त्तेत न तस्यापि निर्णयादपरं बलम् ॥५४७॥
तदशक्यव्यवच्छेदो विवादोऽनन्ततां व्रजन्।
कथारम्भस्य नैष्फल्यं व्यक्तं वक्ति प्रवादिनाम् ॥५४८॥
विवादस्तत्र निर्णीते युक्तो न्यायविदामयम्।
निश्चयश्च विवादश्चेत्यन्योन्यपरिपीडनात् ॥५४९॥

यत्तूक्तम्-"यथेत्यादि निदर्शनम्; तदयुक्तम्; अवयव्यादौ निर्णीते स्थूलादितया सौगतस्य विवादाभावात्। तत्परमार्थसत्त्वे विवाद इति चेत्; न तर्हि निर्णीते विवादः, तस्य तत्सत्त्वे निर्णयाभावात् स्थूलादावेव तद्भावात्। "यद्येवं न बहिरर्थपरमार्थसत्त्वं प्रत्यक्षविषय इति[12] कथमिदमुक्तम्-'अर्थेवेदनं प्रत्यक्षलक्षणम्' इति। इति चेत्; न; व्यामोहविफलप्रतिपत्तेरेवेदया तद्वचनात्, तेषां प्रत्यक्षलक्षणत एव तत्सत्त्वनिश्चयात्। तर्हि तान् प्रति निरर्थकमेव तद्वचनं विवादाभावेन तन्निवर्त्तनस्य तत्फलस्याभावात्, प्रत्यक्षस्वरूपनिर्णयस्य[13] च स्वत एव भावादिति चेत्; सत्यम्; न तान्प्रति तद्वचनस्य तत्स्वरूपनिर्णयनार्थत्वं[14] नापि तद्विषयविवादनिवर्तनफलत्वम्, तथापि न वैफल्यं संशयविशेषव्यवच्छेदार्थत्वात्। तथा हि-'सम्यग्ज्ञानं निःश्रेयसकारणम्'[15]

---

१ प्रत्यक्षस्य। २ अनिर्णयस्वभावत्वापत्तेः। ३ यदेका-आ०,ब०,प०,स०। अवयवावयव्याद्येकान्तभेदे। ४ नैयायिकानाम्। ५-क्षं नि-आ,ब०,प०,स०। ६-वृत्तिश्च आ०,ब०,प०,स०। ७ अनुमानादेरपि। ८ व्रजेत् आ०, ब०, प०, स०। ९ व्यक्ति आ०, ब०, प०,स०। १० यदेत्या-आ०,ब०,प०। ११ यदेवं आ०,ब०, प०,स०। १२ न्यायविनिश्चये तृतीयश्लोके। १३-स्य वस्तुत एव आ०,ब०,प०,स०। १४ निर्णयार्थत्वं स०। १५ -सकरणम् स०।

इति श्रवणात् तेषामपि संशयः–'कः पुनरसौ ? सम्यग्ज्ञानश्रवनस्य विषयः ?' इति । तत्र नापरतत्त्वद्वियः किन्तु यदेवेदं भवता मुप्रसिद्धमात्मार्थवेदनं तदेवेति तद्वचनविषयसंशयव्युदासार्थमित्यमभिहितम्–'आत्मार्थवेदनं प्रत्यक्षलक्षणम्' इति। एवं परोक्षलक्षणेऽपि वक्तव्यम् । 'येषां तु सतोऽपि क्वचिन्निर्णयस्यानुत्कृष्टत्वादपरिच्छेदो व्यामोहस्तेषां तव्यापारोपदर्शनादेव व्यामोहप्रध्वंसे निर्विवादत्वसम्भवात् । तत्रयोजनपरमिदमपि वचनमनवद्यमेव देवस्य– ५

"न पश्यामः क्वचित्किञ्चित्सामान्यं वा खलक्षणम् ।
आस्यन्तरं तु पश्यामस्ततोऽनेकान्तसाधनम् ॥" [सिद्धिवि०पृ०१२१] इति।

न चैवं नैयायिकाना तद्भेदैकान्ते प्रत्यभिज्ञायिर्णयत्वमनुत्कृष्टनिर्णयत्व वा युक्तम्, अवयव्यादिमात्रेऽपि तत्प्रसङ्गात् अनेकान्तविद्वेषित्वेन तत्र निर्णयानिर्णयौ । निर्णयोत्कर्षापकर्षयोरप्यसम्भवात् । ततः स्थितम्–नैं तद्भेदैकान्ते प्रत्यक्षव्यापारो विवादादिति । ततो यदुक्तं व्योम शिवेन—"प्रत्यक्षेण रूपादिव्यतिरिक्तस्य द्रव्यस्यावधारणात्तद्विपर्ययव्युदासः" [प्र०व्यो० पृ० ४४] इति; तत्प्रविप्यूहम्, एकान्ततस्तैर्व्यतिरिक्तस्य तेनोनवधारणात्, अन्यथा विवादानवतारप्रसङ्गात् । अवधारिते तदयोगादित्युक्तत्वात् ।

यदप्यपरमुक्तं तेनैव–"इन्द्रियग्राह्य तु द्रव्यम्, कथमेतत् ? प्रतिसन्धानात् । तथा हि–'यमहमद्राक्षं चक्षुषा तमेतर्हि स्पृशामि यं चास्प्राक्षं तं पश्यामि' इति । न च द्वाभ्यामिन्द्रियाभ्यामेकार्थग्रहणं विना प्रतिसन्धानं न्याय्यम्" [प्र०व्यो०पृ० ४४] इति ; तत्रापि प्रतिसन्धानस्य किंविषयमविनाभावित्वम्–किं द्रव्यविषयम्, किं वा तद्ग्रहणविषयम् ? द्रव्यविषयमिति चेत्, अत्रापि किं तस्यं तैर्वदविनाभावकथने प्रयोजनम् ? निश्चितविनाभावात्तर्तः तत्परिज्ञानमेवेति चेत्, तैर्वदि द्रव्यस्येति कुतः ? 'तैर्वविनाभावादिति चेत्, तर्हि "ततोऽप्यन्यदेव "तत्परिज्ञानम् । "तस्यापि तद्विनाभावात्तत्सम्बन्धित्वे"' "ततोऽपि "तत्परिज्ञानम- १० परमेवेति न वयमवधारयामः' क पुनरिदमनवस्थादोषदूरं द्रव्यपरिज्ञानं लभ्यत इति । तन्नाविनाभावात् "तत्तस्येति युक्तम् । स्वयं "तत्परिच्छित्तिरूपत्वादिति चेत्, न, प्रतिसन्धानस्यापि "तत एव तत्सम्बन्धित्वापत्तेः । इष्टमेवैवत् बौद्धस्येति चेत्, तर्हि किमर्थं "तस्य "तदविनाभावकथनम् ? तत्परिच्छित्तिरूपत्वनियेदनार्थमिति चेत्, न; अप्रतिपन्नस्य तन्निवेदना १५ योगात्, अविनाभावस्यैव तत्राप्सिद्धेर्धूमादिवत् । यस्यते चैतत्–"अन्यथानुपपन्नत्वमसिद्धस्य

---

१ तैर्वं तु आ०, ब०, प० । एतैर्वं तु स० । २ –त्पत्तेर्व्या–आ०, ब०, प०, स० । ३ न चैवैक –आ०, ब०, प०, स० । ४ इत्यादिव्यतिरिक्तस्य द्रव्यस्य । ५ प्रत्यक्षेण । ६ प्रतिसन्धानस्य । ७ द्रव्यविषया विनाभावकथने । ८ प्रतिसन्धानात: । ९ द्रव्यपरिज्ञानम् । १० द्रव्यविनाभावात् । ११ द्रव्यपरिज्ञानादपि । १२ द्रव्यपरिज्ञानं द्रव्यविनाभावीति परिज्ञानम् । १३ अन्यथानुपपन्नत्वस्यापि । १४ –त्वेन ततोऽपि आ०, ब०, प०, स० । १५ अन्यपरिज्ञानादपि । १६ अन्यपरिज्ञानं तद्विनाभावीति तृतीयपरिज्ञानम् । १७ द्रव्यपरिज्ञानं द्रव्यस्येति । –वात्तस्येति आ०, ब०, प०, स० । १८ द्रव्यपरिच्छित्तिः । १९ तत्परिच्छित्तिरूपत्वादेव । २० प्रतिसन्धानस्य । २१ द्रव्यविनाभावित्वकथनम् ।

न सिद्ध्यति।"[न्यायवि० श्लो० १२] इति। प्रतिपन्नस्यैव[1] [2]ततस्तन्निवेदनमित्यप्ययुक्तम्; यतस्तत्प्रतिपत्तिः[3] तत एव तद्रूपत्वस्यापि प्रतिपत्तेः, तस्य[4] तदनर्थान्तरत्वात्, अन्यथा तदयोगात् अविनाभावनिवेदनानर्थकत्वस्य तदवस्थत्वात्, स्वयमशः प्रतिपत्तेश्च निवारितत्वात्[5]। तत्र तस्य द्रव्यविषयमविनाभावित्वं[6] सप्रयोजनं यतस्तत्कथनमिति स्थितम्।

भवतु [7]तद्ग्रहणविषयमेव [8]तस्याविनाभावित्वमिति चेत्; तत्रापि स एव दोषः—'किं तस्य' इत्यादिः। अपि च, यदि तस्य[9] [10]तदविनाभावित्वेन [11]तदवभासित्वम्; कथं द्रव्ये प्रामाण्यम्? [12]अन्यविषयस्यान्यत्र[13] तदयोगात् अतिप्रसङ्गात्। प्रामाण्यमपि तस्य तद्ग्रहण एवेति चेत्; न; "प्रतिसन्धानमर्थसिद्धौ प्रमाणम्" [प्रश०व्यो०पृ० ४५] [14]इत्यस्य विरोधात्। न च 'द्वाभ्याम्' इत्यादिना तस्य तद्ग्रहणाविनाभावमुपक्रम्य 'प्रतिसन्धानम्' इत्यादिना द्रव्ये तत्प्रामाण्योपसंहारं कथं पूर्वापरवेदी विदध्यात्, [15]उपक्रमोपसंहारयोर्विसंवादादिति चेत्? सत्यम्; अयमपरः परस्य दोषः। नास्ति दोषः, द्रव्ये तत्प्रामाण्यस्य [16]तद्ग्रहणप्रामाण्यद्वारोपनीतस्यामुख्यस्य [17]प्रतिपादनादिति चेत्; न; द्रव्येन्द्रियसन्निकर्षोपनीतजन्मनस्तस्य[18] [19]तत्र मुख्यस्यैव प्रामाण्यस्योपपत्तेः। न च तत्सन्निकर्षजत्वं तस्यासिद्धम्; "इन्द्रियमर्थेषु सविकल्पकज्ञानोत्पत्तौ सङ्केतस्मरणापेक्षम्" [प्रश० व्यो० पृ० ४४] इत्यादिना स्वयमेव तत्समर्थनात्। भवतु तर्हि मुख्यत एव प्रतिसन्धानस्य द्रव्यविषयत्वम्, तस्यार्थकार्यस्य सतो निर्विषयत्वस्याप्ययोगादिति चेत्; न; द्विचन्द्रादिवेदनस्यार्थकार्यस्यापि निर्विषयत्वदर्शनात्। [20]प्रतिभासवदर्थत्वेन न निर्विषयत्वमिति चेत्; नन्वत्र प्रतिभासवानर्थो नामावयवी, तस्य च नानुपलब्धपूर्वस्य प्रतिभासनम्, अन्यथा दर्शनस्पर्शनविषयतया तद्ग्रहणायोगात्। न चैवम्, 'यमहम्' इत्यादिना तद्विषयतयैव तस्य कथनात्[21]। उपलब्धपूर्वस्यैव भवतु प्रतिभासनमिति चेत्; न; उपलब्धेर्दर्शनादिरूपाया अप्रतिभासे तद्विषयतया तस्य प्रतिभासासम्भवात्। भवतु दर्शनादेरपि प्रतिभास इति चेत्; कस्तत्रेन्द्रियसन्निकर्षः? संयोग इति चेत्; न; तस्य गुणत्वेन [22]गुणे वृत्त्यभावात्, गुणश्च दर्शनादिरात्मनः। तत एव न तस्य श्रोत्रे शब्दवच्चक्षुरादौ समवायः; अन्यगुणस्यान्यत्र [23]तदयोगात्। नापि संयुक्तसमवायादिः; चक्षुरादिसंयुक्तेऽवयविनि [24]तस्य समवायाभावादिति कथमतत्सन्निकृष्टस्य तस्य[25] प्रतिसन्धाने [26]तत्प्रत्यक्षत्वसमर्थनविरोधात्? अस्त्येव सम्बद्धविशेषणभावः तत्रापि सन्निकर्षः चक्षुरादिसम्बद्धद्रव्यापेक्षया दर्शनादेर्विशेषणत्वात्[27] तद्द्वा-

---

१ प्रतिसन्धानस्य। २ अविनाभावकथनेन। ३ तत्परिच्छित्तिरूपत्वनिवेदनम्। ४ प्रतिसन्धानप्रतिपत्तिः। ५ तत्परिच्छित्तिरूपत्वस्य। ६ –न् न तस्य आ०, ब०, प०, स०। ७–त्वं न प्र–आ०, ब०, प०, स०। ८ द्रव्यग्रहणविषयम्। ९ प्रतिसन्धानस्य। १० प्रतिसन्धानस्य। ११ द्रव्यग्रहणाविनाभावित्वेन। १२ द्रव्यग्रहणावभासित्वम्। १३ द्रव्यग्रहणविषयस्य। १४ द्रव्ये। १५ "प्रतिसन्धानं द्रव्यसिद्धौ प्रमाणम्"–प्रश० व्यो०। १६ –द्वारविस–स०। १७ द्रव्यग्रहण। १८ प्रतिसाधनात् आ०, ब०, प०, स०। १९ प्रतिसन्धानस्य। २० द्रव्ये। २१ प्रतिभासमर्थकार्यत्वेन निर्वि–आ०, ब०, प०, स०। २२–नानुपल–आ०, ब०, प०, स०। २३ दर्शनादौ। २४ समवायायोगात्। २५ दर्शनादेः। २६ प्रतिसन्धाने प्रत्यक्षत्वसमर्थनस्य विरोधात्। २७ विशेषणभावस्य।

वस्य च संश्लिष्टेन्द्रियग्रहणान्यथानुपपत्तेरयमेवाभिगमात् । 'द्रव्येणासम्बद्धं दर्शनादि कथं तद्विशेषणमिति'इत्यपि वार्त्तम्, 'संयुक्त' समवेतं वा विशेषणम्'इति नियमानभ्युपगमादिति चेत्, न, गुणादीनां सम्बन्धाभावे विशेषणभावस्य स्वयमेव निराकरणात् । "नैतदेवम्, गुणकर्मसामान्यानां सत्यवेतानामेव विशेषणतोपलब्धेः" [प्रश०व्यो०पृ० ५०] इति वचनात् ।

स्यान्मतम्–प्रतिसन्धानसमये दर्शनादेरपक्रमाद्यपक्रान्त एव तद्विषयभावः, केवलं तदु- ५
पजनितसंस्काराभिव्यक्तिवशादविद्यमानस्यैव तस्य प्रतिभासनम्, तत्र च भ्रान्तमेव प्रतिसन्धानम्, शुद्धे एव द्रव्ये तदविभ्रमोपगमादिति । तत्रेदमुच्यते-तद्भावाद् द्रव्यमविशिष्टं चेत्, तदपि तद्भविष्यदविद्यमानमेवेति न प्रतिसन्धानात्तसिद्धिः, तद्भावस्य च द्रव्यादविवेके तस्यापि तद्भविष्यदविद्यमानत्वेति कथं तत्र प्रतिसन्धानस्य भ्रान्तत्वम् ? अपरिस्पन्दसदस्सत्त्वभावयोः परस्परमविवेकादयमप्रसङ्ग इति चेत्, न, रूपस्पर्शयोरप्यनुन्मुक्तवृत्तत्वमनोरेवान्योन्यमविविक्तत्वा- १०
पत्तेः । नियतेन्द्रियग्राह्यत्वाच्चेति चेत्, न, प्रोच्चयोरपि भेदप्रतिभासविषयत्वेन तदभावानुपपत्तेः । यदैव हि नयनस्पर्शनाभ्यां रूपस्पर्शयोर्ग्रहणमेवं तद्भावद्रव्ययोरपि भ्रान्तेस्तत्प्रतिभासाभ्यामिति न विशेषं पश्यामः । तदुभयप्रतिभासात्मकमेकमेव तद्विज्ञानं तद्विषयस्तादात्म्यविरुद्ध एव तयोरविवेक इति चेत्, न, नयनस्पर्शनोपलब्धितप्रतिभासभेदेऽपि तदात्मकस्य ज्ञानस्यैकत्वात्, तद्विषयत्वेन रूपस्पर्शाविवेकस्यात्यविरोधोपपत्तेः । अस्तु को दोष इति चेत् ? न, तस्यैव द्रव्यतस्यापनात् । १५
विविक्तमेव तद्विषयमावाद् द्रव्यमिति चेत्, तस्यैं यदि 'तथा प्रतिभासनम्'' न तर्हि तद्भावप्रतिभासनम्, न हि पीतविविक्तशङ्खभावभासने पीतावभासनमुपलब्धम् । तथा चोत्सन्न एव 'यमहम्' इत्याद्विरूपः प्रतिभासव्यवहारः स्यात् । नास्ति 'तथा तस्यैं' प्रतिभासनमिति चेत्, न, अभेदात् द्रव्यरूपेणाप्यप्रतिभासनप्रसङ्गात् । सम्मूर्च्छितसप्रतिभासेतरत्वभावाद्वयं तदेकमेव द्रव्यमिति चेत्, न, सम्मूर्च्छितरूपस्पर्शस्वभावद्वयस्यापि १७ द्रव्यस्यैकस्याभ्युपगमप्रसङ्गात् । तथा च तदेवावयवि- २०
द्रव्यं तस्यैव प्रतिसन्धाने प्रतिभासनात्, "१८अस्माश्रम्' इति तद्भिन्नस्य स्पर्शस्य 'पश्यामि' इति रूपस्य 'यं तम्' इति च तद्विविक्तस्वभावस्यावयविनस्तत्राध्यवसायात् नापरं विषयैयात् । वस्तुयं चैतत्–

"स्पर्शोऽयं चाक्षुषत्वान्न रूपं स्पर्शनग्रहात् ।
रूपादीनि निरस्तान्यन्न चाप्युपलमेमहि ॥" [स्यायवि०श्लो०२८५] इति । २५

ततो सिद्धमेतत्–"रूपस्पर्शयोश्च प्रतिनियतेन्द्रियग्राह्यतादेतत्प्रतिसन्धानं न सम्भवति" [प्रश० व्यो०पृ० ४४] इति, तत्रैव तत्सम्भवस्य प्रतिपादनात् । ७

---

१ दर्शनादिः चतुर्विशेषणम् 'चतुर्दर्शनम्' इत्यादिविशिष्टज्ञानान्यथानुपपत्तेः । २ "संयुक्तं समवेतं वा विशेषणमिति नियमानभ्युपगमात्"–प्रश०व्यो०पृ० ५० । ३–क्रमेणेति ज्ञा०,ब०,प०,स० । ४ दर्शनविषयस्य । ५ विद्यमान एव । ६ दर्शनविषयभावात् । ७ तद्भावस्यापि । ८ द्रव्यवत् । ९अन्वयोरपि चैतत्र–ज्ञा०,ब०,प०,स० । द्रव्यदर्शनविषयभावश्चैवं । १० द्रव्यस्य । ११ तद्विषयभावविविक्तत्वेन । १२ –मं तदभाव–ज्ञा०,ब०, प०,स० । १३ विविक्तत्वेन । १४ द्रव्यस्य । १५–र्शनरूपद्वयस्यापि ज्ञा०,ब०,प० । १६ असंस्पार्शम् ज्ञा०,ब० । असंस्पार्शम् स० । असंस्पार्शम् प० ।

यदि च रूपस्पर्शात्मकमेकं द्रव्यं न भवेत्; कथं भ्रान्तेतरस्वभावमेकं प्रतिसन्धानम्? तदपि मा भूदिति चेत्; न; तस्यैकान्ततो विभ्रमे दर्शनादिविषयत्ववत् द्रव्यस्याप्यसिद्धेः। अविभ्रमे द्रव्यवत्तद्विषयत्वस्यापि परमार्थत एव सिद्धेर्निवेदितत्वात्।

अपि च, यदि न सम्भवत्येव भ्रान्तेतरस्वभावमेकं संवेदनम्; न तर्हि 'इह ग्रामे वृक्षाः' इत्यपि ज्ञानं सम्भवेत्। तद्धि ग्रामादावव्यभिचारित्वेनाभ्रान्तं न इहभावे व्यभिचारात्। इहभावाभावे कथं तज्ज्ञानमिति चेत्? न; अन्तरालादर्शनमात्रेण तद्भावात्। तथा च परस्य वचनम्—"दूराद् ग्रामारामयोरन्तरालमपश्यताम् 'इह ग्रामे वृक्षाः' इति ज्ञानं दृष्टम्" [प्रश० व्यो० पृ० १०७] इति। मा भूत्तदपि ज्ञानमिति चेत्; कथं तर्हि 'दृष्टम्' इत्युक्तम्? कथं वा समवायलक्षणे तद्व्यवच्छेदार्थं सम्बन्धपदम्? तदपि तदर्थं नेति चेत्; न; "दृष्टश्च भ्रान्तेहज्ञानस्य व्यवच्छेदार्थं सम्बन्धपदम्" [प्रश०व्यो०पृ० १०७] इत्यस्य विरोधात्।

'इहाकाशे शकुनिः' इत्यपि ज्ञानमेतेन व्याख्यातम्; तस्यापि शकुनावव्यभिचारित्वेनाभ्रान्तत्वेऽपि इहभावे भ्रान्तत्वात्। आकाशस्यातीन्द्रियत्वेन तत्र इहेति प्रत्यक्षप्रत्ययायोगात्। तथा च परस्य वचनम्—"अतीन्द्रियेऽप्याकाशे यत् 'इह' इत्यपरोक्षज्ञानं तत्केवलं भ्रान्तम्" [प्रश०व्यो०पृ० १०७] इति। मा भूत्तदपि ज्ञानमिति चेत्; तर्हि कथम् "इहाकाशे शकुनिरिति ज्ञानं दृष्टम्" [प्रश०व्यो०पृ० १०७] इत्युक्तम्? कथं वा "तद्व्यवच्छेदार्थम् आधाराधारग्रहणम्" [प्रश०व्यो०पृ० १०७] इत्यभिहितम्? तन्न भ्रान्तेतराकारज्ञानपरित्यागः परस्य श्रेयान्। तदपरित्यागे च यथा तदाकारयोः परस्परप्रत्यनीकत्वेऽपि कथञ्चिद्विवेकस्तथा वर्णस्पर्शयोरपि इति तद्विवेकैक एवावयवी नापर इति नासौ बहिरर्थो नापि शुद्धावयवमात्रम्, न च द्रव्यमेकान्तभिन्नं पर्यायेभ्यः; तस्य सर्वस्यापि प्रत्यक्षत एव निषेधात् तस्य तद्विरुद्धावभासितत्वात्।

भवतु तर्हि निर्द्रव्यः पर्याय एव बहिरर्थः; तस्य दीपादिनिदर्शनेन अन्यत्राप्यवगमात्। दीपादौ च निर्विवादं प्रत्यक्षेणैवाधिगमात्। निर्विवादो हि दीपादौ क्षणभङ्गी पर्यायः, प्रत्यक्षादेव बालावलानामपि तत्र सम्प्रतिपत्तेः। धर्मकीर्त्तिनापि तदुपदर्शनार्थमेव—

"तथा ह्यलिङ्गमाबालमसंसृष्टोत्तरोदयम्।
पश्यन्परिच्छिनत्त्येव दीपादिं नाशिनं जनः॥" [प्र०वा०२।१०५]

इत्यस्याभिधानादिति चेत्; न; तत्रापि विवादाविशेषात्। कथमन्यथा "न चैकदैकतैलजनित एक एवासौ दीपज्वालाप्रतानः" [प्र०वार्तिकाल०] इति प्रज्ञाकरेण तस्योपदर्शनम्? अविद्यमानस्य तदयोगात्। स्वयमुद्भावितस्योपदर्शनमिति चेत्; न; उद्भावनस्य प्रयोजनाभावात्।

---

१ प्रतिसन्धानस्य। २ संभवतीत्येव आ०,ब०,प०,स०। ३ अन्तरालदर्श—आ०,ब०,प०,स०। ४ "दृष्टश्च भ्रान्तेह·····"—प्रश०व्यो०। ५ "अतीन्द्रियेऽप्याकाशे इहेति ज्ञानं केवलं भ्रान्तम्"—प्रश०व्यो। ६ तदा आ०, ब०,प०,स०। ७ वर्णस्पर्शाद्यभेदः। ८ नैयायिकाभिमतः अवयवात् पृथग्भूतः। ९ बौद्धाभिमतः। १० प्रत्यक्ष एव आ०, ब०, प०, स०। ११ नत्वेलदीपा—आ०, ब०, प०, स०।

परिहारः प्रयोजनमिति चेत्, नन्वेवमनुद्धावनमेव न्याय्यम्, उद्भाव्यसमाधानस्य स्तोत्या समीकरणवत् अनुद्दिश्यमानोक्त्यवहारत्वात्। तत्रार्थं स्वयमुद्भावयितः, परेणामेव भावात्। यदि तत्रापि विवादः कथम् 'अलिङ्गम्' इत्युक्तम्? विवादव्यवच्छेदस्य लिङ्गादेव भावात्, अन्यतस्तदभावस्यानन्तरमेव निवेदयिष्यमाणत्वात्, तस्मादलिङ्गवचनादविवाद एव दीपादौ तत्पर्यायः। तद्विवारोपदर्शनं तु शास्त्रविरुद्धमेव 'निरन्वनकारस्येति चेत्, सत्यम्, अस्त्यर्थं तस्य दोषः। ५ नास्ति दोषः, सत्वव्यलिङ्गत्वे विवादव्यवच्छेदस्य अन्यत एव भावादिति चेत्, किं पुनस्तदन्यदन्यत्र प्रत्यक्षात्? तदेवास्तु इति चेत्, न, तदतद्विषयविकल्पानतिक्रमात्। तद्विषयादेवेति चेत्, न, दीपादिवदन्यत्रापि प्रत्यक्षत एव तत्तद्विवादनिवृत्तेः अनुमानवैफल्यात्। अन्यत्र तैस्तैर्व विवादनिमित्तत्वान्न ततस्तव्यवच्छेद इति चेत्, कुतस्तस्य तन्निमित्तत्वम्? समानाकारगोचरत्वादिति चेत्; न, दीपादावपि तदविशेषात्। समानाकारभावान्तेति चेत्; न, "केवलं तु १० सादृश्यात् समानसामग्रीतो वा स एवायमिति व्यवहारः" [प्र० वार्तिकाल०] इति तत्सादृश्यानुवादिन्या अलङ्कारपूर्णेरिरोधात्। तत्र तद्विषयादेव प्रत्यक्षात्तद्व्यवच्छेदः। तदन्यविषयात्; इत्यप्यसङ्गतम्, अतिप्रसङ्गात्—नीलप्रत्यक्षादेव लोहिते पीतव्यवच्छेदापत्तेः। तत्र प्रत्यक्षत्वे (इं) तदन्यत्। तर्हि तदुत्तरकालभावी विकल्प एव तदन्यः, तत एव तैस्तैर्व्यवच्छेद इति चेत्, न, ततोऽपि अप्रमाणात्तदयोगात्, अतिप्रसङ्गात्, प्रमाणसिद्धिप्रयासवैफल्याच्च। प्रमाण १५ मेवामी[1] प्रत्यक्षत्वेनेति चेत्, न, अस्वीकरणात्। तृतीयप्रमाणत्वे च प्रमाणसङ्ख्यानियमव्याघातः। ततः 'एकदा' इत्यादिविवादस्य यत्तव्यवच्छेदकमुक्तम्—

"यदि प्रथमसम्पातमात्रादुत्पन्न एव सः।
कालान्तरव्यापितया वृथा तैलायतः परम्॥" [प्र०वार्तिकाल० २।१०५] इति,

तदपाकृतम्, तस्य प्रत्यक्षत्वे तद्भङ्गमविकल्पत्वे च दोषस्योक्तत्वात्। अनुमानविकल्प एवायं २० विकल्पः कथमिति चेत्, ननु तद्विकल्पस्य लिङ्गायत्तत्वात् लिङ्गादेव तत्तद्व्यवच्छेद इत्यायातम्, तथा च स एव [2]शास्त्रविरोधः, तत्रालिङ्गवचनेन विवादाभावस्य प्रतिपादनात्, निरन्वनकृता[3] तु विवादस्य लिङ्गतत्तद्व्यवच्छेदस्य चाभिधानात्।

स्यान्मतम्—अलिङ्गवचनाभिर्विवादार्थं परमसमयं एव शास्त्राभिप्रेतं तत्र यावद्देरव्यविवादस्यैव नाशदर्शनस्य भावात्। न च सर्वत्र विवादः, लिङ्गतत्तद्व्यवच्छेदो वा निरन्वन २५ कृता निरूप्यते, पूर्वपूर्वतत्पर्यायेरेव सन्निरूपणात्, तत्रैव दर्शनस्य सादृश्यविषयत्वेन विवादनिमित्तत्वात्, न परमपर्याये तत्र तदुत्तरपर्यायस्यानुत्पत्तेः, दर्शनस्य तत्सादृश्यविषयत्वाभावात् तत्कर्य शास्त्रविरोध इति? तन्न, 'नाशिनम्' इत्यस्य मध्यमपर्यायापेक्षयैव व्याख्यानात्, "प्रतादृक्सदृश्यं विनाशेऽनित्यमेति च व्यपदिश्यते" [प्र० वार्तिकाल०] इति। तदपि

---

१ अमीषां। २ तदवयवस्य ता०,ब०,प०,म०। ३ प्रकटनात्। ४ तदेवानीमि ता०,ब०,प०,म०। ५ अवयवैव। ६ लिङ्गविशेषत्वम्। ७ लिङ्गव्यवच्छेदः। ८ विकल्पः। ९ "कालान्तरव्यापितया"—प्र०वार्तिकाल०। १० प्रमाणसंख्या। ११ प्रकरणेन अवयोक्तम्।

चरमपर्यायापेक्षमेवेति चेत् ; न; "न च प्रदीपादीनां तादवस्थ्यम् अपि तु परापरतैलोपादानजन्यमाना परापरैव प्रदीपज्वाला" [प्र० वार्तिकाल०] इति तत्रैव तद्व्याख्यानस्य समर्थनात् । चरमपर्यायापेक्षायां परापरेत्यनुपपत्तेश्चरमविरोधात् । ततो दुरुत्तर एवायं शास्त्रविरोधः परस्येत्यलं तन्निर्बन्धेन । विवादस्तु विद्यत एव, तत्कथं सति तस्मिन् दर्शनादेव दीपादौ क्षणभङ्गसिद्धिः अतिप्रसङ्गात् ? व्यवच्छिन्ने विवादे भवत्येवेति चेत् ; कुतस्तद्व्यवच्छेदः ? यदीत्यादेर्विचारादिति चेत् ; न; कथञ्चिदक्षणिकत्वेऽपि प्रदीपादेरपरापरतैलादिना तत्रैवापरापरस्यातिशयस्योपकल्पनात् । न च तस्य तस्मादेकान्तेन भेदो यतः सम्बन्धाभावान्न तस्येति व्यपदिश्येत, तेन वा तदन्तरस्य करणेऽनवस्थानं भवेत्, अपि तु अभेद एव । सोऽपि नैकान्तिकः, येन प्रदीपादिवत्तदतिशयस्यापि तदात्मनः प्रथमतैलादिसम्पातादेवोत्पत्तेरपरापरतत्सम्पातस्य वैयर्थ्यम्, तदतिशयवद्वा प्रदीपादेरपि तदात्मत्वेनापरापरस्वभावत्वादैकान्तिकमनित्यत्वमापद्येत भेदाभेदयोरनेकान्तेनाभ्यनुज्ञानात् । न चैतद्वचनमात्रम्; प्रत्यक्षेणैव भेदेतरात्मना प्रसिद्धत्वात् । न च तस्य तदात्मत्वमसिद्धम्; अनुभवसिद्धत्वात् । यदीत्यादिविचारस्याप्यन्यथानुपपत्तेः । निरूपितं चैतत् 'आत्मनाऽनेकरूपेण' इत्यादौ । तन्न विचाराद्विवादव्यवच्छेदः तस्य तदनुकूलत्वात् । ततो न क्वचिदपि प्रत्यक्षान्निर्विवादात् क्षणभङ्गसिद्धिः, यतो निर्द्रव्यः पर्याय एव बहिरर्थोऽवतिष्ठेत, सद्द्रव्यस्यैव तस्यावस्थानात्, तत्रैव प्रत्यक्षस्य निर्विवादत्वोपवर्णनात् । चरमक्षणेऽपि किमेवं नावतिष्ठत इति चेत् ? क एवमाह 'नावतिष्ठते' इति ? तर्हि कुतस्तदुत्तरक्षणे नोपलभ्यत इति चेत् ? अनुपलभ्यत्वेन परिणामादेवं । अविद्यमानत्वादेवानुपलभ्यत्वं किन्नेति चेत् ? न; चरमक्षणस्यावस्तुत्वप्रसङ्गात् अकार्यकारित्वात् । स्वविषयज्ञानकरणान्नैवमिति चेत् ; न; सजातीयकरण एव विजातीयकरणं नान्यथेति निवेदयिष्यमाणत्वात् । तन्न प्रत्यक्षं पराभिमतबहिर्विषयानुरूपं तस्यानेकान्तानुरूपस्यैवोपलम्भात् । नापि प्रमाणान्तरम्; तस्याप्यनेकान्तनियतत्वेन निवेदयिष्यमाणत्वात् । तथा चानेकान्तस्यैकान्तनिषेधात्मकत्वेन प्रमाणैः तद्विधेरेव तन्निषेधत्वोपपत्तेरुपपन्नमेतत्—

प्रतिज्ञातोऽन्यथाभावः प्रमाणैः प्रतिषिध्यते ॥१०॥ इति ।

तदेवं व्याख्यातमिन्द्रियप्रत्यक्षं व्यवसायात्मकम् । तत एव च निदर्शनात् अनिन्द्रियप्रत्यक्षमपि स्वसंवेदनापरसञ्ज्ञकं व्यवसायात्मकमवगन्तव्यम् । तथा हि—व्यवसायात्मकं स्वसंवेदनं प्रत्यक्षत्वात् इन्द्रियप्रत्यक्षवत् । न चेदमाश्रयासिद्धं साधनम्; सर्वज्ञानानां स्वरूपवेदनस्यान्यनिरपेक्षप्रतिभासत्वेनालङ्घनार्हत्वात् । तत्प्रतिभासत्व एव विवाद इति चेत् ; न;

---

१ तन्निबन्धेन आ०,ब०,प०,स० । २ यदित्या—आ०, ब०, प०, स० । 'यदि प्रथमसम्पातमात्रादुत्पन्न' इत्यादिविचारात् । ३ —रतैलादीनामत्रैवा—प०।—रतैलादिनामत्रैवा—आ०,ब०,स० । ४ अतिशयस्य । ५ दीपादेः । ६ अतिशयेन । ७ अतिशयान्तरस्य । ८ प्रदीपात्मनः । ९ अतिशयात्मकत्वेन । १० प्रत्यक्षस्य । ११ न्यायवि० श्लो० ८ । १२ "उक्तञ्च—सतो न नाशो दीपस्तमःपुद्गलभावतोऽस्ति"—ता० टि० । १३ —यकरणान्नान्य—आ०, ब०, प०, स० । १४ तन्निषेधोप—आ०, ब०, प०, स० । १५ व्याख्यानमि—आ०, ब०, प०, स० ।

नीलज्ञानाद्व्यस्य तद्वेदनस्याननुभवात्, तस्य च प्रतिभासनाद्विवादानुपपत्तेः, अन्यथाऽर्थप्रतिभासेऽपि विवादात् न बहिर्नान्तः प्रतिभास इत्यन्धकल्पं जगद्भवेत् । तदाह–

परोक्षज्ञानविषयपरिच्छेदः परोक्षवत् । इति ।

परोक्षं स्वप्रकाशविकलम् । ननु परोक्षमस्पष्टमिति प्रसिद्धं तत्कथं 'स्वप्रकाशविकलं तदुच्यते' इति चेत् ? न, व्युत्पत्तिभेदेनार्थद्वयप्रतिपादनात् । अक्षमिति इन्द्रियम्, तच्च वैशद्यहेतु, आवरणविगमविशेषाधिष्ठानं जीवप्रदेश एवोच्यते तस्यैव मुख्यत इन्द्रियत्वात्, तत्प्रतिगतं प्रत्यक्षमिति स्पष्टप्रतिपत्तिः, तस्मात्परावृत्तमवैशद्यकारणावरणाधिष्ठानजीवप्रदेशोपनिबंधं परोक्षमित्यस्पष्टप्रतिपत्तिः । यदा अक्षणम् अर्थवस्तूपसर्पणं ग्राहकत्वेन व्यापनम् अक्षः, तस्मात्परावृत्तं परोक्षमिति, तदा स्वप्रकाशवैकल्यप्रतिपत्तिः । अत्र च स्वसंवेदनाभावस्य प्रक्रमादयमेवार्थो गृह्यते मास्पष्टत्वं विपर्ययात् । ततः परोक्षं स्वप्रकाशविकलं ज्ञानं येषां ते **परोक्षज्ञानाः** यौगिकाः, येषां **विषयपरिच्छेदो** परितः छेदो व्यावृत्तिर्यस्य सः परिच्छेदः, विषयस्यासौ परिच्छेदश्च **विषयपरिच्छेदो** ग्राह्यविशेष इत्यर्थः । परोक्षं विषयि तेन समानं वर्त्तते इति **परोक्षवत्**, सोऽपि परोक्ष एव भवति विवादाविशेषादिति भावः ।

लोकप्रसिद्धमप्येतज्ज्ञानानामात्मवेदनम् ।
यौगिकस्य विवादाच्चेन्न भवत्येव तत्त्वतः ॥५५०॥
अर्थवेदनमप्येवं न भवत्येव तादृशम् ।
तत्रापि विवदन्ते यत्प्रयुद्धा बुद्धशासने ॥५५१॥
अविज्ञाने च बाह्यस्य तद्विशेषैः कथं पुनः ।
यद्वं कुर्वीत येनार्थं यौगिकः स्वर्गमाप्नुयात् ? ॥५५२॥
अज्ञातस्यैव यद्यस्य करणं यदि कल्प्यते ।
व्यर्थिका धर्मजिज्ञासा किन्न स्याद्वेदवादिनाम् ? ॥५५३॥
अपरिज्ञातमेवास्ति नापि तत्करणं क्वचित् ।
सर्वेषां यत्नकारित्वमन्यथा स्यादनाकुलम् ॥५५४॥
अर्थग्रहः प्रसिद्धोऽयमक्षजाद्बुद्धयेष्वपि ।
विवाद विधीतास्मिन्नुन्मत्तो वेत्तः कथम् ? ॥५५५॥
इत्यपि स्वगृहे मुक्त्यमुत्तरं निश्चयागतम् ।
तस्मात्स्ववेदनं सर्वज्ञानानामनुपप्लवम् ॥५५६॥

तथा च यदुक्तम्–

"यदा तु ग्राह्यमाकारं नीलादिं प्रतिपद्यते ।
न तदा ग्राहकाकारसंविच्चिर्दृश्यते क्वचित् ॥" [मी०श्लो०शून्य०७४] इति ।

१ –र्थं पराभा–आ०, ब०, स० । –र्थं पर्याभा–प० । २ अपि ह्यते आ०, ब०, प०, स० ।

तत्र कीदृशस्य तदाकारस्य संवित्तिर्न दृश्यते ? नीलादेरव्यतिरिक्तस्येति चेत् ; न काचित् क्षतिः अस्माकमपि तदनिष्टेः । व्यतिरिक्तस्येति चेत् ; न; नीलवदहमिति तदाकारस्यापि दर्शनात् । अहम्बुद्धावात्मन एव दर्शनं न नीलवेदनस्येति चेत् ; न; नीलग्रहणस्वभावस्यैव तत्र[1] दर्शनात्, अन्यथा नीलस्य कर्मत्वेन प्रतिभासविरोधात् । तद्ग्रहणस्वभावत्वमप्यात्मन[2] एवेति चेत् ; अनर्थकमेव तर्हि ज्ञानं तत्प्रयोजनस्य विषयपरिच्छेदस्यात्मन एव भावात् । ज्ञानस्य तत्र करणत्वान्नानर्थकत्वमिति चेत् ; न ; कार्यस्यैव करणापेक्षणात् । न चात्मा कार्यम् ; तस्य नित्यत्वात् । अनित्य एव विषयपरिच्छेदपर्यायस्तस्[3]येति चेत् ; न ; तत्रापि चक्षुरादेरेव प्रतीतस्य करणत्वोपपत्तेः । ततो दुर्भाषितमेतत्[4]–"परोक्षात्मनो बुद्धिः"[ ] इति; बुद्धेरेवाभावात् । तत्पर्याय एव बुद्धिरिति चेत् ; न तर्हि तस्य परोक्षत्वम् अहम्बुद्धौ प्रत्यवभासनात् । तत्रापि न शक्तिरूपेण प्रतिभासनमिति चेत् ; अस्तु तस्यैव[5] परोक्षत्वं तत्पर्यायस्य तु कथम् ? तस्यापि तदव्यतिरेकादिति चेत् ; न तर्हि नीलादेरपि प्रत्यक्षत्वं तच्छक्तिरूपात्तस्याप्यव्यतिरेकात् । प्रत्यक्षमेव तस्य[6] तद्रूपमिति चेत् ; न ; तस्यातीन्द्रियत्वोपगमात् । अन्यथा "तत्र प्रत्यक्षतो ज्ञाताद्दाहादहनशक्तता" [मी० श्लो० अर्था० ३] इत्यादेरर्थापत्तेर्वैफल्यात् । तथा चेदमपि दुर्भाषितमेव–"प्रत्यक्षोऽर्थः" [ ] इति । ततो यथा परोक्षत्वेऽपि [7]तद्रूपस्य प्रत्यक्षमेव नीलादिकं तथैवानुभवात्, तथा तत्पर्यायोऽपि[8], तत्रापि तथाऽनुभवस्याविशेषात् । [9]कुतश्चेदं निश्चितम् 'सकलं ज्ञानं स्वप्रकाशविकलम्' इति ?

"व्यापृतं चार्थसंवित्तौ [10]नात्मानं ज्ञातुमर्हति ।
तेन प्रकाशकत्वेऽपि बोधायान्यत्प्रतीक्ष्यते ॥
[11]ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकम् ।
सति प्रकाशकत्वे च व्यवस्था दृश्यते यथा ॥
रूपादौ चक्षुरादीनां तथात्रापि भविष्यति ।
प्रकाशकत्वं बाह्येऽर्थे शक्त्यभावात्तु नात्मनि॥" [मी०श्लो०शून्य० १८४–८७]

इत्यादेर्विचारादिति चेत् ; उच्यते–यद्ययं विचारः सकलज्ञानान्तःपातिनमात्मानमपि[12] स्वप्रकाशविकलमवैति; कथं सकलमपि ज्ञानं स्वप्रकाशविकलं विचारज्ञानस्य स्वप्रकाशप्रसिद्धेः[13] ? अथ नावैति; कथं सकलज्ञानानां स्वप्रकाशवैकल्यमवगतम्, विचारज्ञानस्य तदनवगमात् ? तस्यापि विचारज्ञानान्तरात्तदवगम इति चेत् ; न; [14]तदन्तरस्याप्यपरतदन्तरात् तदवगमेऽन-

---

१ अहम्बुद्धौ । २ नीलग्रहणस्वभावत्वमपि । ३ आत्मनः । ४ "तस्मादप्रत्यक्षा बुद्धिः"–शाबरभा० १। १।५ । ५ आत्मपर्याय एव । ६ शक्तिरूपस्यैव । ७ नीलादेः । ८ शक्तिरूपम् । ९ "आकारवान् बाह्योऽर्थः, स हि बहिर्देशसम्बद्ध प्रत्यक्षमुपलभ्यते ।"–शाबरभा० १।१।५ । १० शक्तिरूपस्य । ११ आत्मपर्यायोऽपि । १२ कुतश्चिदनि–आ०,ब०,प०,स० । १३ "ज्ञानं नात्मानमृच्छति"–मी० श्लो० । १४ "ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकम् । न चात्मानुभवोऽस्त्यस्येत्यात्मनो न प्रकाशकम्॥"–मी०श्लो० । १५ विचारस्यात्मानमपि । १६ स्वात्मानं स्वप्रकाशविकलमनुभवतो विचारस्य स्वप्रकाशत्वमेवायातमिति भावः । १७ तदनन्तरस्या–आ०, ब०, प०, स० ।

वस्याद्योपात्। न तद्दोषः, यावच्छक्यमेव विचारज्ञानपथमुद्वीक्षेतेः, प्रत्युत्पन्ने तु भ्रमे तत एव तद्विनिवृत्तेः, अभिरुचेस्तन्निवृत्तिशङ्क्यया[1] वा तद्विच्छित्तेः। न ह्यनभिरुचितं विचारज्ञानं प्रबन्धु (प्रबद्धु) महंति। विषयान्तरसम्पर्काद्वा[2] तदुन्मज्जेः। दृश्यते हि कविकोलाहलस्य प्रवर्तमानस्यापि पीतादिसन्निधानवस्थानं पीतादिज्ञानस्यैव तथा प्रादुर्भावात्। तदुक्तम्—

"यावच्छक्यं च तद्बुद्धिस्तत्प्रबन्धे च सत्यपि। ५
सँयोज्य(श्रमाद्व्युच्या)न्यसम्पर्काद्विच्छेदो विषयेष्विव ॥" [मी०श्लो०शून्य०११३]

इति चेत्, भवत्ययमनवस्थादोषः परिहारे न पुनः सकलसंवेदनस्वप्रकाशवैकल्यापरिज्ञानदोषस्य, तस्य तत्त्वत्वात्। ततस्तमपि दोषं परिजिहीर्षता सुदूरमनुसृत्यापि विचारज्ञानं स्वप्रकाशरूपमुररीकर्त्तव्यम्, अन्यथा स्वगतपरोक्षतायास्तेनाप्रतिपत्तेः तत्कृतोपपरिहाराप्। एतदेव दर्शयितुमाह—'परोक्ष' इत्यादि। परोक्षं स्वप्रकाशविकलं ज्ञानं जानातीति **परोक्षज्ञाः** १० मीमांसकस्य सम्बोधनमेतत्। विधिप्रत्यये सति पर्वरूपसिद्धिः। **विषयपरिच्छेदो** विषयस्य सकलज्ञानपरोक्षतावच्छ्यस्य परिच्छेदो विचारः परिच्छिद्यतेऽनेनेति व्युत्पत्तेः, स न **परोक्षवत्** परोक्षमनुभवादिः स्वप्रकाशवैकल्यात् तद्वत् तत्समानो न भवति, स्वप्रकाशस्यापि तत्र भावादिति भावः। ततो यथा विचारज्ञानस्य स्वप्रकाशत्वमपि तथैव निर्बाधानुभावात् तथार्थज्ञानस्यापि स्वस्तु तदविशेषात्। तच्छब्देरपि तत्र तर्हि एव विचारज्ञानैवदधिगमात्। ततो नेदं पर्याः १५ लोचितवचनम्—'प्रकाशकत्वम्' इत्यादि।

यद्यर्थज्ञानस्य 'विषयवदात्मन्यपि व्यापारः तर्हि अक्षुण्णे स्मादिवत्रसादावपि व्यापारः कुत्रो नेति चेत्? 'तथैवेऽनर्थनात्' इति ब्रूमः। तथा स्वरूपव्यापारस्यावर्णनम्, तद्ग्रहनस्य निवेदितत्वात्। तत इत्थमपि "तादृशमेव—'सति प्रकाशकत्वे च' इत्यादि। तेन 'प्रकाशकत्वेऽपि' इत्यादि पुनः अनुभवप्रत्वनीकस्यावेद्य प्रतिविहितम्। २०

किं वा "तद्ग्रहनवशेये परिहीयते यत्तत्ववबोधायान्यप्रतीक्षणम्? अर्थप्रकाशनमेव, अपरिज्ञा("अपरज्ञा)नाद्व्यपरिज्ञातावर्थज्ञानप्रकाशनायोगात्, "तदपि स्वप्रकाशनाय ज्ञानान्तरं प्रतीक्षेत। "तदपि तदपरं ज्ञानान्तरमित्यव्यवपरज्ञानप्रतीक्षायामेवावर्तसारं व्यापाराप्त प्रथमज्ञानस्य प्रकाशनम्, "तदभावादर्थेस्यापि न प्रकाशनमित्युपरज्ञामिदानीं शेषवेदकभावेन,ततो दूरमनुसृत्यापि कस्यचिदपरिज्ञातत्वैव" स्वविषयप्रकाशकत्वे प्रथमज्ञानस्यापि तद्वत्तदुपपत्तेः व्यर्थमेतत्परिज्ञानार्थमन्यप्रतीक्षणम्। "तस्य अर्थज्ञानापरिज्ञाने ऽर्थप्रकाशनस्य "परिज्ञानिः। अर्थज्ञानस्मरणस्य तर्हि परिज्ञानिः, अपरिज्ञाते तस्मिन्" तदयोगात् तस्य परिज्ञातविषयत्वात्। अस्ति च तज्ज्ञानस्य

---

१ तद्ग्रहि—आ०, ब०, प०, स०। अनवस्थानिवृत्तेः। २ शाम्यता ता०। ३ अवबद्धविच्छित्तेः। ४ अनवस्थाव्याप्तेः। ५ समाहता—प०। ६ —समर्पि आ०, ब०, प०, स०। ७ निर्बाधानुभवादेव। ८ —ज्ञान दर्शि—आ०, ब०, स०। —ज्ञानादर्शि—प०। ९ यदर्थवदात्म—स०। विषयवत्तात्प्रम—प०। विषयवत्तात्प्रम—आ०, ब०। १० —न दर्शे—आ०, ब०, प०, स०। ११ अपर्यालोचितमेव। १२ स्वरूपानवबोधे। १३ द्वितीयज्ञानात्। १४ द्वितीयज्ञानमपि। १५ तृतीयं ज्ञानम्। १६ प्रथमज्ञानप्रकाशनाभावे। १७ —रिज्ञानस्यैव स०। १८ तज्ज्ञानार्थज्ञानापरिज्ञाने आ०, ब०, प०, स०। १९ परिज्ञानिः आ०, ब०, प०, स०। २० प्रथमज्ञाने।

स्मरणम् 'परिज्ञातो मया घटः' इत्यत्र विषय[वत्]विषयिणोऽपि प्रतिभासनात्, ततस्तदन्यथानुपपत्त्या अर्थज्ञानस्य परिज्ञानमवगम्यत इति चेत्; न; भ्रान्तस्य [1]तस्यासत्यपि तत्परिज्ञाने सम्भवात्, क्वचिदज्ञातपूर्वेऽपि 'स' इति स्मरणविभ्रमस्योपलम्भात्। अभ्रान्तमेव स्मरणमिति चेत्; कुत एतत्? सत्येव तत्परिज्ञाने भावादिति चेत्; सत्येवेति कुतः? स्मरणस्याभ्रान्तत्वादिति चेत्; न; परस्पराश्रयात्–'सिद्धेन तत्[2]सत्त्वेन तदभ्रान्तत्वसिद्धिः, ततश्च तत्सत्त्वसिद्धिः' इति। अन्यत एव [3]तत्सत्त्वसिद्धिरिति चेत्; न; स्मरणवैयर्थ्यापत्तेः।

अपि च, अन्यदपि[4] तद्विषयं यदि न भवेत् किं तस्य परिहीयेत? स्वविषयप्रकाशनमिति चेत्; न; दत्तोत्तरत्वात्। स्मरणमेव तद्विषयं परिहीयते सत्येव तस्मिन् तदुपपत्तेरिति चेत्; न; 'भ्रान्तस्य तस्य' इत्यादेः पुनरनुबन्धात् अनवस्थावाहिनश्चक्रकस्यापत्तेः। अभ्रान्तत्वं स्मरणस्य निर्बाधत्वादवगम्यते न द्वितीयज्ञानभावात् ततोऽयमदोष इति चेत्; न; तन्निर्बाधत्वस्य स्वतो दुरवबोधत्वात् स्वसंवेदनवादप्रत्युज्जीवनापत्तेः। अन्यतस्तदवबोधे इति चेत्; न; ततोऽपि भ्रान्तात्तदयोगात्। [6]अभ्रान्तमेव तदिति चेत्; कुत एतत्? सत्येव [7]तन्निर्बाधत्वे भावादिति चेत्; सत्येवेति कुतः? तस्याभ्रान्तत्वादिति चेत्; न; पूर्ववत्परस्पराश्रयदोषात्। न तद्दोषः, तन्निर्बाधत्वस्यान्यत एवावगमादिति चेत्; न; प्राच्यस्यान्यस्य वैयर्थ्यापत्तेः।

अपि च, अन्यदपि द्वितीयं यदि भ्रान्तम्; कुतस्ततोऽपि [9]तदवगमः अतिप्रसङ्गात्। अभ्रान्तमेव तदपीति चेत्; न; 'कुत एतत्' इत्यादेरावृत्त्या परिनिष्ठाशून्यस्य [10]परिभ्रमणस्योपनिपातात्। तदनेनार्थज्ञानस्यापि निर्बाधत्वं दुरवबोधमिति प्रतिपादितं प्रतिपत्तव्यं समानत्वान्न्यायस्य। तत इदमसम्भव्येव [12]लक्षणं 'बाधवर्जितं प्रमाणम्' इति। स्वसंवेदनवादिनां तु नायं दोषः, कस्यचित्क्वचिदभ्यासपाटवातिशयाधिष्ठानस्य देशकालनरान्तरापेक्षयापि निर्बाधत्वस्य स्वत [13]एवाध्यवसायात्, अन्यथा सकलप्रवृत्त्यादिव्यवहारविलोपापत्तेरिति निरूपितम्, निरूपयिष्यते च यथास्थानम्। ततो न स्मरणस्यापि परिहाणिः यतस्तद्बलेनार्थज्ञानस्य स्वज्ञानायान्यप्रतीक्षणमुपपाद्येत। अपि च–

प्रतीक्ष्यमाणमप्यन्यत्तावता लभ्यते कथम्।
न[14] हि विप्रेच्छया लब्धिर्घृतपूरस्य दृश्यते ॥५५७॥
अर्थप्रकाशतस्तच्चेदन्यथानुपपत्तिका।
तस्यापि निर्मुखस्यार्थे तज्ज्ञानोन्मुखता कथम्? ॥५५८॥
तत्स्वरूपे हि निर्ज्ञाते तस्येदं बुद्धिरुद्भवेत्।
ज्ञात एव पितर्येष पुत्रस्तस्येति निर्णयात् ॥५५९॥

---

१ स्मरणस्य। २ तत्परिज्ञानसत्त्वेन। ३ प्रथमज्ञानस्य परिज्ञानसत्त्वसिद्धिः। ४ द्वितीयज्ञानम्। ५ प्रथमज्ञानविषयम्। ६ प्रथमज्ञानस्य। ७ –बोधनमिति आ०,ब०,प०,स०। ८ अभ्रान्तेरेव त–आ०,ब०, प०, स०। ९ पूर्वज्ञानस्य निर्बाधत्वे। १० पूर्वज्ञानस्य निर्बाधत्वावगमः। ११ चक्रक। १२ "एतच्च विशेषणत्रयमुपाददानेन सूत्रकारेण कारणदोषबाधकरहितमगृहीतग्राहि ज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचितम्।"–शास्त्रदी० १।१।५। १३ एव व्यवसा–आ०,ब०, प०, स०। १४ तर्हि वि–आ०, ब०, प०, स०।

ज्ञानमात्रोन्मुखे तस्मिन् सम्बन्धग्रहनिर्मुखे ।
अर्थस्य ज्ञानमित्येष व्यवहारः क्षयं व्रजेत् ॥५६०॥
अर्थोभिमुक्ये तस्यापि तत्कृतातत्प्रकाशनात् ।
तज्ज्ञानमपि लब्धेत तत्राप्येवं निरूपणे ॥५६१॥
अनवस्थानदोषोऽयमनिवार्यः प्रसज्यते । ५
विपर्यान्तरसञ्चारनिषेधभ्रमधिक्रमः ॥५६२॥
तत्तज्ज्ञानावगाहिन्याः स्मृतयोऽप्यनवस्थिताः ।
प्राप्नुवन्ति तदन्यार्थस्मृतिसञ्चारयारिकाः ॥५६३॥
ज्ञानम् प्रेक्षकं वाक्यं स्मरेत्तज्ज्ञानमप्ययम् ।
कथं तैर्व्यवधिर्व्यक्तं विप्रस्तज्ज्ञानस्मृतिमान् कथम् ?॥५६४॥ १०
येन तद्विषयं कुर्यान्नानुज्ञानमनाकुलम् ।
प्रत्यक्षायैर्विमुच्येत प्रेक्ष्य चेह च याज्ञिकः ॥५६५॥

स्याग्मतम्–सत्यम् अर्थाभिमुखस्यैव तेस्यार्थज्ञानाभिमुक्यम् अनवगतेऽर्थे 'तस्येदं ज्ञानम्' इत्यवगमायोगात्, प्रतियोगिनि पितरि ज्ञात एव 'तस्यार्थं पुत्रः' इति प्रतिपत्तिदर्शनात्। सम्बन्धग्रहणनिर्मुखतया ज्ञानमात्रस्य तेनैं ग्रहणे तु 'अर्थस्य ज्ञानम्' इति व्यवहारलोपप्रसङ्गात्। १५
तत्र यद्यपि तैत्कृतात्तत्प्रकाशनात्तद्विषयमपि[१] ज्ञानम्, तैत्कृतादपि ततस्तद्विषयं[२] ज्ञानमित्यपरापरज्ञानोपकल्पनम्, तथापि नानवस्थानं यावच्छक्तमेव तदुपजननात्, उपजाते तु अमे तदभावात्। तत एव न स्मृतीनामप्यनवस्थानम्, तासामप्युपजातज्ञानपरम्परामात्रपर्यवसायित्वेनैं परतः प्रवृत्तेरभावात्। तदुक्तम्–

"घटादौ च गृहीतेऽर्थे यदि तावदनन्तरम् । २०
अर्थापत्त्यावपुष्यन्ते विज्ञानानि पुनः पुनः ॥
यावच्च्रमं ततः पश्चात्तावत्त्वेव स्मरिष्यति॥"[मी०श्लो०शून्य०१९०] इति।

ततः प्रवर्तकवाक्यरूपाद्विषयान्तरे तदर्थक्षणे सञ्चारसम्भवे कथम् "तज्ज्ञानं कथं वा न "तज्ज्ञानस्मरणं यत्तदनुज्ञानसम्भवात् प्रेक्ष्य चेह च याज्ञिकस्य प्रत्यवायनिर्मुक्तिर्न भवेदिति, तदपि न समीचीनम्, भ्रमापरिज्ञानात्–'कस्य भ्रमः, को वा भ्रमः ?' इति। अर्थभ्रमाक्षस्यैव २५
भ्रमः, अन्यथानुपपत्तिरेकस्यमेवैं च भ्रम इति चेत्; न, प्रथमस्यार्थ्यज्ञानस्याग्रहणप्रसङ्गात्। न हि तस्यार्थ्यप्रकाशनादन्यतो ग्रहणम्। न चान्यथानुपपत्तिविकल्पदपरापरज्ञानवत्तस्यापि[१५]

---

१ देवदत्तादेः। २ वाक्यज्ञानम्। ३ वाक्यार्थबोधस्य। तदर्थविप्रस्तज्ज्ञानस्य स्मृतिमान् आ०, ब०, प०, स०। ४ यदि तदर्थत्वं नास्ति कथमनुज्ञानमुक्तमे अर्थत्वनस्मरणं स्यादिति भावः। ५ द्वितीयज्ञानस्य। ६ द्वितीय ज्ञानेन। ७ द्वितीयज्ञानकृतम्। ८ प्रथमज्ञानस्य यो विषयः तद्विषयमपि ज्ञानम्। ९ तृतीयज्ञानकृतादपि। तत्कृत स्यादपि आ०, ब०, प०, स०। १० द्वितीयज्ञानस्य यो विषयः तद्विषयमपि ज्ञानम्। ११ –र्थबोधितत्वेन आ०, ब०, प०, स०। १२ वाक्यार्थज्ञानम्। १३ वाक्यार्थज्ञानस्मरणम्। १४ –वैकल्पभ्रमभेद च भ्रमा–आ०, ब०, स०।–वैकल्पभ्रमः ब०। १५ प्रथमज्ञानस्यापि।

ततो[1] ग्रहणमुपपन्नम्; अतिप्रसङ्गात्। तन्न तत्प्रकाशस्य श्रमः। आत्मनः श्रम इति चेत्; कस्त्यापि श्रमः? अर्थज्ञानतज्ज्ञानादिप्रबन्धप्रतिपत्तावभिरुचिवैकल्यमिति चेत्; न; तद्वैकल्येऽपि सामग्रीसद्भावे तत्प्रतिपत्तेरवश्यम्भावात् अशुचिप्रतिपत्तिवत्। तर्हि सामग्रीवैकल्यमेव तस्य श्रम[3] इति चेत्; ननु अर्थप्रकाश एव सामग्री, स च विद्यत एव, कथं तद्वैकल्यम्? न तन्मात्रमेव सामग्री येनैवम्, अपि त्वन्यथानुपपन्नतया तत्परिज्ञानमपि, न च [4]तत्सर्वस्मिन्नपरापरे तत्प्रकाशे विद्यते, त्रिचतुरादितत्प्रकाश एव तद्भावात् तत्कथमनवस्थानमिति चेत्? न तर्हि प्रथमस्याप्यर्थज्ञानस्य ग्रहणम्, तत्राप्यन्यथानुपपत्तिपरिज्ञानाभावस्य वक्ष्यमाणत्वात्। ततो न प्रतीक्ष्यमाणस्यापि ज्ञातज्ञानस्य कुतश्चित्सम्भवः। तदेवाह–'**परोक्ष**' इत्यादि। **परोक्षज्ञानम्** आद्यमर्थज्ञानं तस्य **विषयो** विषयप्रकाशः तात्स्थ्यात्ताच्छब्द्योपपत्तेः; तेन **परिच्छेदो** ग्रहणम्, **परोक्षवत्** परः पश्चाद्भाव्यक्षो योऽवस्तस्येव तद्वदिति।

आद्यस्याप्यर्थबोधस्य ग्रहणं नार्थदर्शनात्।
अन्यथासम्भवाज्ज्ञानादुत्तरज्ञानतानवत् ॥५६॥

तन्न अर्थप्रकाशादेवार्थज्ञानं ग्रहणम्। अन्यथानुपपन्नतया [6]परिज्ञातात् [7]तत्तद्ग्रहणमिति चेत्; सिद्धस्य, असिद्धस्य वा [8]तस्य तत्परिज्ञानम्? सिद्धस्येति चेत्; कुतः सिद्धिः? स्वत इति चेत्; ज्ञानधर्मस्य, अर्थधर्मस्य वा? ज्ञानधर्मस्य चेत्; न; ज्ञानस्यैव स्वतस्सिद्धिप्रसङ्गात् तस्य तत्प्रकाशादव्यतिरेकात्, तथा च व्यर्थं तस्यान्यथानुपपत्तिपरिज्ञानम्, तस्य ज्ञानप्रतिपत्त्यर्थत्वात्, तस्याश्च स्वत एव सिद्धत्वात्। अन्यत एव तत्सिद्धिरिति चेत्; तदपि कुतः सिद्धम्? तत्कृतात्प्रकाशादिति चेत्; न; तस्यापि तज्ज्ञानधर्मत्वे स्वतः सिद्धत्वे च [11]पूर्ववदोषात्, पुनरन्यतस्तत्सिद्धिकल्पनायाम[12]प्यनवस्थापत्तेः। तन्न ज्ञानधर्मस्य कुतश्चित्सिद्धिः।

अर्थधर्मस्यैवेति चेत्; न; तस्यापि स्वतःसिद्धावर्थस्यापि तत एव सिद्धेर्ज्ञानकल्पनावैफल्यम्। विज्ञानवादप्रत्युज्जीवनञ्च, स्वसंविदिततत्प्रकाशानर्थान्तरत्वे विषयस्य तज्ज्ञानत्वापत्तेर्निर्विवादत्वात्। न च याज्ञिकस्य तदभ्युपगमः श्रेयान्, बहिरर्थाभावे तन्निबन्धनस्य यागादेरभावप्रसङ्गात्। तन्न स्वतस्तत्सिद्धिः[13]। नाप्यन्यतः; तदभावात्। अर्थज्ञानं तदस्तीति चेत्; न; ततोऽर्थस्यैव सिद्धेः। [14]तत्सिद्धेरपि [15]तत एव सिद्धिरिति चेत्; न; तस्यार्थसिद्धिं प्रत्युपक्षीणस्य तत्सिद्धिं[16] प्रत्यव्यापारात्। व्यापारे चानवस्थानात्, अपरापरतत्सिद्धौ तस्यैवासंसारं व्यापारात्। मा भूदर्थज्ञानात्तत्सिद्धिः, तदन्यत एव तद्भावादिति चेत्; न; ततोऽप्यनर्थविषयात् तत्प्रकाशग्रहणायोगात्। अर्थविषयमेव तदिति चेत्; कुतस्तदपि [17]ज्ञातम्? तत्कृतादेवार्थप्रकाशादिति चेत्; न; प्राक्तनार्थज्ञानवदोषात्,

---

१ अर्थप्रकाशात्। २ –पत्तिर्हि वर्तिनी सा–आ०, ब०, स०।–पत्तिर्हि वर्त्मनि सा–प०। ३ श्रम इति चेन्नार्थ–आ०, ब०, प०, स०। ४ अन्यथानुपपन्नतया परिज्ञानमपि। ५ –गत एव आ०, ब०, प०, स०। ६ ग्रहणान्नार्थ–आ०, ब०,प०,स०। ७ प्रबन्धवत्। ८ परिज्ञानात्–आ०, ब०, प०, स०। ९ अर्थप्रकाशात्। १० अर्थप्रकाशस्य। ११ पूर्वदोषात् आ०, ब०, प०, स०। १२ –यामव्यवस्था–आ०। १३ अर्थप्रकाशसिद्धिः। १४ अर्थप्रकाशसिद्धेरपि। १५ अर्थज्ञानादेव। १६ अर्थप्रकाशसिद्धिं प्रति। १७ ज्ञानम् आ०, ब०, स०।

तत्प्रकाशस्यापि ज्ञानान्तरासिद्धावनवस्थानात्। तन्न सिद्धस्य तस्याभ्यथानुपपत्तिपरिज्ञानम्। नाप्यसिद्धस्यैव, न ह्यप्रतिपन्ने धूमे तस्य पावकापेक्षं 'नुपरिज्ञानम् अन्यथाऽनुपपन्नत्वम्। तदेवाह—

अन्यथानुपपन्नत्वमसिद्धस्य न सिद्ध्यति ॥११॥ इति।

अन्यथा अर्थज्ञानाभावप्रकारेण **अनुपपन्नत्वम्** अघटनम् उक्तप्रकारेण **असिद्धस्य** विषयप्रकाशस्य **न सिध्यति।** ५

अपि च, अयमर्थधर्मः सन् कथ बुद्धिमनुमापयति ? तस्तत्स्वादिति चेत्, सौ यथानुमानः, कथं तेन तद्वेदने तत्कृतत्वयेदनम् ? तस्या एव ततोऽनुमानादिति चेत्, एतदपि कुतः ? तथा संवेदनादिति चेत्, 'किं तत्संवेदनम् ? तदेवानुमानमिति चेत्; किं पुनस्तस्य स्वसंवेदनमस्ति ? न चेत्, कथं ततस्तयी संवेदनम् ? अप्रतिविदितादेव तत्स्वात्तस्य प्रतिनियतपुरुषबुद्धिगोचरत्वस्य दुरवबोधत्वात्। मामूत्तस्य स्वसंवेदनम्, अन्येन तु वेशमानं तथाविधमेव तद्वेदन १०
इति चेत्, तस्यापि तथाविधतद्वेदनविषयत्वं कुत ? तथा संवेदनादिति चेत्, किं तत्संवेदनं तवेव ? अन्यदिति चेत्, न, अत्रापि 'किं पुनस्तस्य' इत्यादेरनुभन्धात् अनवस्थानोत्तरस्य चाक्रर्कस्यापत्तेः। एतेन 'परस्य सा बुद्धिर्बुद्धिमात्रम्' इत्यपि प्रत्युक्तम्, न्यायस्य समानत्वात्। तन्न बुद्धिकृतत्ववर्यप्रकाशस्य।

अहेतुकत्वे कथं सत्त्वमेव "तस्येति चेत्, न, अर्थहेतोरेव तदुपपत्तेः, यावदर्थभावि १५
त्वं तस्य नीलत्वादिवत्। ततः कादाचित्कत्वं न स्यादिति चेत्, किं पुनस्तद्गृहीतोऽपि" कदाचिदर्थोऽस्ति ? तथा चेत्, कुत एतत् ? तथादर्शनादिति चेत्, ननु तत्प्रकाश एव तद्दर्शनम्, तत्कथं 'स एवास्ति, स एव नास्ति'इत्युपपन्नं व्याघातात् ? चिरप्रध्वस्यान्तराळास्तित्व प्रकाशरहितमेव पश्चात्प्रत्यभिज्ञायत इति चेत्, प्रत्यभिज्ञायां यदि तस्य प्रकाशते कथं "तस्यास्तद्विषयत्वम् अतिप्रसङ्गात्। प्रकाशने चेत्, कथ तस्य प्रकाशरहितत्वं व्याघातस्योक्तत्वात् ? प्रत्यभि- २०
ज्ञायाः पूर्वमप्रकाशमेव तदस्तित्वमिति चेत्, न, तदपरिज्ञाने 'तद्प्रकाशमन्यथा वा' इति दुरवबोधत्वात्। अर्थकारणात् भवतस्तथ्यकाशस्यै कथन सर्वप्रतिपत्तुसाधारणत्वं नीलवदिति चेत्, न, ज्ञानात्परोक्षात्मभावेऽपि समानत्वात्, अन्यथा "अज्ञानाधीनस्य मीलस्यापि 'तदभावप्रसङ्गात्। न चापरिज्ञातस्य तस्य कादाचित्कत्ववेदनम्। नापि परिज्ञातस्य, अर्थज्ञानादन्यतश्च तत्परि- २५
ज्ञानाभावस्य निवेदितत्वात्।

तस्मात्परोक्षत्वे ज्ञानस्य तत्कृतो विषयपरिच्छेदोऽपि परोक्ष एव पुरुषान्तरज्ञानकृतत्वपरिच्छेदवदिति। एतदेव निवेदयति-'परोक्ष'इत्यादिना। 'परोक्षत्वम्'इति।"परं पुरुषान्तरज्ञानं तदुद्भवस्तत्कृतो विषयपरिच्छेदस्तद्वदिति असिद्ध इति यावत्। न च 'तथाविधात्परि-

---

१ स्वपरिज्ञा–आ०, ब०, प०, स०। २ प्रकाशनस्य आ०, ब०, प०, स०। ३ अर्थप्रकाशः। ४ बुद्धिः। ५ आत्मन इवं बुद्धिरित्यवेदने। ६ किञ्च संवे–आ०, ब०, प०, स०। ७ तदा आ०,ब०,प०,स०। ८ अन्यस्यापि। ९ किं पुनः संवे–आ०,ब०,प०,स०। १०–दस्योपपत्तेः आ०,ब०,प०,स०। ११ अर्थप्रकाशस्य। १२ अर्थप्रकाशाहीनत्वात्। १३ प्रत्यभिज्ञाया अन्तराळविषयत्वम्। १४ अर्थप्रकाशस्य। १५ जडार्थानस्य। १६ सर्वप्रतिपत्तृकारकत्वाभाव। १७ परपुरुष–आ०,ब०,प०,स०। १८ तथाविधात्तत्परि–आ०,ब०,प०,स०।

च्छेदात्स्वबुद्ध्यनुमानं पुरुषान्तरज्ञानकृतादपि [1]ततस्तदनुमानप्रसङ्गात् । तस्य तदन्यथानुपपत्तिनियमनिश्चयान्नेति[2] चेत् ; न; स्वबुद्धिकृतस्याप्यसिद्धस्य[3] तदनिश्चयाविशेषादिति एतदेव वक्ति । **'अन्यथा'**इत्यादिना निवेदनात् तत्कस्तवातिशयो दूषणाभिधाने परसामर्थ्यमुपजीवत इति ? तत्राह–

[5] **मिथ्याविकल्पकस्यैतद्व्यक्तमात्मविडम्बनम्** । इति ।

अत्रेदमैदम्पर्यम्–भवेदेवेदं भवत्सामर्थ्यं यदि दूषणे भवतोऽधिकारः स्यात् । न चैवम्, अनुपायत्वात् । **"दृष्ट**[6]**(अदृष्ट)दृष्टयः"**[प्र०वा० २।४६८] इत्यादिर्विकल्प एव तत्रोपायः, तेनास्वसंविदितज्ञानेऽर्थगोचरत्वनिषेधस्य दूषणस्यापादनादिति चेत् ; न ; तस्य[7] निर्विषयत्वात्, **"विकल्पोऽवस्तुनिर्भासात्"** [ ] इत्यभिधानात् । न च तादृशात्कस्यचित्क्वचिदा-[10] पादनम् ; अतिप्रसङ्गात् ।

अस्वसंविदितज्ञानादर्थदृष्टेर्निषेधनम् ।
अवस्तुज्ञाद्विकल्पाच्चेत् ; ततः कस्मान्न तद्विधिः ॥ ५६७ ॥
निषेध एव [9]तस्यास्ति प्रतिबन्धो विधौ न चेत् ।
सोऽपि तद्दृ[10]ष्टिनिर्ज्ञानाभावे केनावगम्यताम् ?॥ ५६८ ॥
[15] तस्मादेव न तज्ज्ञानं तस्य [11]स्वांशव्यवस्थितेः ।
न विकल्पान्तरात्तस्याप्येतद्दोषानतिक्रमात् ॥ ५६९ ॥
न चोभयापरिज्ञाने तत्सम्बन्धप्रवेदनम् ।
"द्विष्ठसम्बन्धसंवित्तिः"[12]इत्यादिवचनक्षतेः ॥ ५७० ॥
सम्बन्धोऽपि यदि द्विष्ठो विकल्पस्येह गोचरः ।
[20] तदवस्तुविनिर्भासप्रवाद[:]स्थितिमान् कथम् ? ॥ ५७१ ॥
सोऽपि तत्प्रतिबन्धाच्चेत्तद्व्यवस्थानिबन्धनम् ।
तस्यापि प्रतिबन्धस्य विकल्पादन्यतः स्थितौ ॥ ५७२ ॥
परापरविकल्पानामासंसारमुपस्थितेः ।
अनवस्थानदोषः स्यादलङ्घ्यस्त्रिदशैरपि ॥ ५७३ ॥
[25] ततो निराकृतमेतत्–

"लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात्तदाभासशून्ययोरप्यवञ्चनम् ॥" [प्र०वा० २।८२] इति ;

---

१ अर्थपरिच्छेदात् । २–न्नेदिति आ०,ब०,प०,स०। ३ अस्वसंविदितस्य । ४ अन्यथानुपपत्तिनियमनिश्चयाभावाविशेषात् । ५ अत्रेदमेव तात्पर्यम् आ०,ब०,प०,स०। ६ दृढदृष्टय. आ०,ब०,प०,स०। "अदृष्टदृष्टयोऽन्येन द्रष्टा दृष्टा न हि क्वचित् । = हि यस्माददृष्टा दृष्टिर्ज्ञानं येषां तेऽर्थाः क्वचिदन्येन द्रष्ट्रा दृष्टा इति न, दृष्टा निश्चयविषयाः स्यु ।"–प्र० वा० म० २।४६८ । ७ विकल्पस्य । ८ निर्विषयविकल्पात् । ९ अर्थदृष्टिविधानम् । १० विकल्पस्य । ११–यविज्ञाना– आ०, ब०, प० । १२ स्वांशे व्यवस्थिते आ०, ब०, प०, स० । १३ "द्विष्टसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात् । द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् ॥"–प्र० वार्तिकाल० १।१ ।

प्रतिबन्धस्यैव दुरवबोधत्वात्। तस्मात् मिथ्या वस्तुतो निर्विषयत्वादसत्यो विकल्पः "अदृष्टदृष्टयः" इत्यादिर्विषये यस्य तस्य मिथ्याविकल्पकस्य सौगतस्य एतत् परोक्षज्ञानदोषोद्भावन व्यक्तं परिस्फुटं यथा भवति तथा आत्मविरुद्धवचनम्, आत्मतिरस्करणम् असाधनाङ्गवचनाभिधानवत्।

अपि च, अप्रत्यक्षज्ञानादर्थदृष्टेः प्रतिषेधो यदि [1]तुच्छः कथं तत्र अनन्तरविकल्पस्य [5] प्रतिबन्धः तथाहि[2]सत्याभावात्, अन्यथा विकल्पस्यापि तुच्छतापत्तेः, तत्कार्यत्वाभावाच्च तत्प्रतिषेधस्य तुच्छत्वेनाहेतुत्वात्। प्रत्यक्षज्ञानादर्थदृष्टिरेव पर्युदासवृत्त्या तद्विपरीताच्चदृष्टिप्रतिषेध इति चेत्, तदपि यथाप्रतिभासम्, यथाऽभ्युपगमं वा स्यात्? आद्येऽपि विकल्पे यदि तद्विपर्याकारम्, तर्हि परस्परविविक्तानेकनीलपीताद्याकारं तदेकसम्भ्युपगन्तव्यम्-"चित्रप्रतिभासेऽप्येकैव बुद्धिः" [प्र० वार्तिक० २।२२०] इति वचनात्। वेदाकमतवत् क्रमेणापि तथाविधत्वं न [10] परित्यजति अशक्यविवेचनत्वस्यैव तत्रापि निरूपणादिति सौगमवक्रमाभ्यां सविकल्पक तत्त्वान्न विविधानुविधानस्यैव "विकल्पलक्षणत्वात्, शब्दसंसर्गस्य तु तल्लक्षणस्य 'अभिलापप्रतिभासानाम्' इत्यादौ निषेधात्। अविषयाकारं चेत्, न, तथाप्यनेकशक्तिकस्वसंवेदनाकारविनिषेधत्वात्, अन्यथा युगपदनेकार्थमाहकत्वानुपपत्तेः सङ्घिताऽभ्यन्तत्वविरोधात्। "सम्भवानेकान्तात्मा "पर्यायानेकान्तस्य व्यवस्थानात् सिद्धं तथापि" सम्भवक्रमाभ्यां सविकल्पकत्वम्। न च [15] "सविकल्पस्यार्थज्ञानत्वम्, तस्यावस्तुविषयत्वेनाभ्युपगमात्, तत्कथं प्रत्यक्षात्तत्सादर्थदर्शनमेव तद्विपरीतात्तन्निषेधो यक्तस्व विचारविकल्पस्य प्रतिबन्धः प्रत्यक्षस्य वा "ततः स्वसंवेदनसाधन भवेत्? तदाह-'मिथ्या'इत्यादि। मिथ्या निर्विषयो विकल्प एकमनेकाकारमेकमनेकशक्तिकं वा ज्ञानं यस्य तस्य सौगतस्य एतत् अर्थदर्शनान्यथानुपपत्त्या सविकल्पस्वसंवेदनसाधनं व्यक्तमात्मविरुद्धवचन विकल्पस्यानर्थविषयत्वेनार्थदर्शनलक्षणस्य हेतोरेवासिद्धत्वा- [20] दिति भावः। तत्र यद्यावप्रतिभासं तत्प्रत्यक्षसंवेदनम्।

तर्हि यथाभ्युपगमं "तत्स्थितिरिति चेत्, न, निरंशस्य 'तस्य साकारस्य निराकारस्य चानुभवात्, विकल्पोपसंहारवेलायामपि चित्रावभासस्यैव तस्य प्रतिसंवेदनात्, तदुपसंहारव्युत्थाने तथैवानुसरणाच्च। ततस्तत्र ज्योमकुसुमवत् स्वसंवेदनसाधन प्रयासमात्रकमेव। [25] तदाह-'मिथ्या'इत्यादि। अविकल्पकस्य निरंशदर्शनस्य एतत् स्वसंवेदनसाधनं मिथ्या न समीचीनं अनुपायत्वेनाशक्यत्वात् निरंशार्थदर्शनस्य तद्विरुद्धसिद्धेः, अतश्च व्यक्तमात्म-

---

१ विकल्पनाविनिर्भासः। २-सर्वप्रकारेण आ०, ब०, प०, स०। ३ अप्रत्यक्षज्ञानात् अर्थदृष्टिप्रतिषेधः। ४ प्रत्यक्षज्ञानम्। ५ प्रत्यक्षज्ञानम्। ६ एकत्वम्। ७ "चित्राभासापि बुद्धिरेकैव ग्राह्याकारविविक्तलक्षणत्वात्, ग्राहकविवेकनं चित्रमनेकम्, ग्राहकविवेचनमात्रव बुद्धेर्नीलादिवत्।"-प्र० वार्तिकाल० ३।२२०। ८ युगपत्क्रमाभ्याम्। ९ प्रत्यक्षज्ञानम्। १० "तिविधानुविधानत्व विकल्पमात्रोपयोगित्वात्"-प्रमाणस०पृ०१८। ११ व्यापविः श्लो०६। १२ युगपदनेकधर्मग्रहणत्वात्। १३ क्रमेण अनेकधर्मग्रहणत्वम्। पर्यायोऽनेका-आ०, ब०, प०, स०। १४ तथा हि आ०, ब०, प०, स०। १५ सविकल्पकस्या-आ०, ब०, प०, स०। १६ विकाल्पः। १७ तदस्तीति आ०, ब०, प०, स०। १८ प्रत्यक्षस्य। १९ तथाहि आ०, ब०, प०, स०।

विडम्बनं परोक्षज्ञानवादितिरस्कारेणात्मनः सौगतस्यापि तिरस्कारात्, तदभ्युपगतस्यापि संवेदनस्य [1]वस्तुतः परोक्षत्वादिति मन्यते ।

यदि चायं निर्बन्धः नापरिज्ञातात्[2] संवेदनादर्थदृष्टिर्भवतीति ; तर्हि कथमव्यवसितादपि व्यवसायादर्थव्यवसायः स्यात् ? व्यवसित एव व्यवसायो व्यवसायान्तरेणेति चेत् ; कुत एतत् ? तस्य स्मरणादेव, न ह्यव्यवसितस्य स्मरणमतिप्रसङ्गादिति चेत् ; तर्हि व्यवसायस्यापि व्यवसायेन भवितव्यम्, तत्रापि स्मरणाविशेषादिति व्यवसायमालोपनीता स्यात्। अस्तु को दोष इति चेत् ? कुतस्तर्हि [3]तन्मालाप्रसूतिः ? पूर्वपूर्वस्मात् व्यवसायादिति चेत् ; न; विषयान्तरसञ्चाराभावप्रसङ्गात्—पूर्वपूर्वव्यवसायस्य स्वविषयापरापरव्यवसायजनन एवोपक्षीणस्य विषयान्तरव्यवसायं प्रत्यव्यापारात् । न हि जनकत्वेन ग्राह्यलक्षणप्राप्तं स्वसन्तानसम्बन्धित्वेनान्तरङ्गञ्च पूर्वपूर्वव्यवसायं परित्यज्योत्तरोत्तरव्यवसायस्य विषयान्तरव्यापारः सम्भवति । सम्भवत्येवार्थसन्निधौ, अर्थो हि सन्निधौ (धौ) व्यवसायस्य पूर्वव्यवसायग्रहणाभिमुख्यं प्रतिबद्ध्य स्वग्रहणाभिमुख्यमेवोपकल्पयतीति चेत्; न तर्हि व्यवसायस्य व्यवसायः स्यात्, अर्थव्यवसायस्यैव प्राप्तेः, तथा च व्यवसायस्य स्मृतिरेव न स्यात्, अव्यवसिते तदनुपपत्तेः । प्रतिबन्धकस्यार्थस्यासन्निधाने भवत्येवेति [4]चेत्; न; असन्निहितार्थाया व्यवसायदशाया एवासम्भवात्। तथा च निरवद्यप्रतिपत्तिरक्षाविधानविकलतयोत्सन्नमूला एव व्यवसायबुद्धयस्तद्विषयाश्च स्मृतय इत्युज्ज्वलं ताथागतदर्शनम् ! ततो यदुक्तम्—

ज्ञानस्य—"ज्ञानान्तरेणानुभवो भवेत्तत्रापि च स्मृतिः ।
दृष्टा तद्वेदनं केन तस्याप्यन्येन चेदिमाम् ॥
मालां ज्ञानविदां कोऽयं जनयत्यनुबन्धिनीम् ।
पूर्वा धीः सैव चेन्न स्यात्सञ्चारो विषयान्तरे ॥
तां ग्राह्यलक्षणप्राप्तामासन्नां जनिकां धियम् ।
अगृहीत्वोत्तरज्ञानं गृह्णीयादपरं कथम् ? ॥
बाह्यः सन्निहितोऽप्यर्थस्तां पिबन्धुं (पिबद्धुं) नहि प्रभुः ।
धियं नानुभवेत्कश्चिदन्यथाऽस्थस्य सन्निधौ ॥
न चासन्निहितार्थास्ति दशा काचिदतो धियः ।
उत्सन्नमूलास्मृतिरप्युत्सन्नेत्युज्ज्वलं मतम् ॥" [प्र०वा० २।५१३-१८] इति;

तत्प्रतिक्षिप्तम् ; स्वपक्षेऽप्यनिवारणात् ।

नन्वयं पक्ष [5]एवाऽसौगतानां यद्व्यवसायस्य व्यवसायान्तरेण व्यवसाय इति, तत्कथमेवमुपक्षेपः कृत इति चेत्?न;स्वतस्तद्व्यवसायाभावे व्यवसायान्तरतस्तद्व्यवसायस्यावश्याभ्युपगमनीयत्वात्,

---

१ वस्तुनस्तत्परो–प० । वस्तुतत्परो–आ०, ब०, स० । २ परिज्ञानात्सं–आ०, ब०, प०, स० । ३ तन्मालोपस्मृतिः स० । तन्मालोलाप्रसूपस्मृतिः आ०, ब०, प० । ४ स्मरणानुपपत्तेः । ५ चोन्नसन्नासन्निहि–आ०, ब०, प०, स० । ६–त्पन्नमू–आ०, ब०, प०, स० । ७ मालाज्ञानविधां आ०,ब०,प०,स० । ८ पूर्वादिः सै–आ०, ब०, प०,स० । ९–दन्यतोऽर्थ–आ०, ब०, प०, स० । १० एव सौग–आ०,ब०,प०, स० ।

अन्यथा तदोऽर्थव्यवसायस्य तत्स्मरणस्य चाभम्भवात्। स्वसंवेदनवेद्यत्वात्तस्य तदोऽर्थव्यवसाय[1] स्मरणञ्च तस्य, न व्यवसायान्तरवेद्यत्वादिति चे , कीदृग् तत्स्वसंवेदनम्? अव्यवसायस्वभावमिति चेत् , न तर्हि व्यवसायस्य तत् स्वसंवेदनं तैस्याव्यवसायस्वैभावापायात्। व्यवसायस्वभावमेव हि संवेदनं तैत्स्वसंवेदनं न तद्विपरीतम्, अन्यथा सुप्तस्वभावमपि स्वसंवेदनं दुःखसंवेदनं भवेत्। सुप्तदुःखयोर्भेदाभेदे चेत्, न, व्यवसायेतरयोरपि तदविशेषात्। मामूचेतस्य स्व- ५ संवेदनम् अन्यदेवास्त्विति चेत्, तदपि यदव्यवसायस्वभावम्, स एव प्रसङ्गः—'न तर्हि' इत्यादिः। पुनरपि तथाविधस्वसंवेदनकल्पनायामनवस्था। व्यवसायस्यैव कथञ्चिदव्यवसाय स्वभाव इति चेत्; भवत्वेवम्, तथापि तस्याव्यवसायस्वभावयोनैव बहिर्विषयत्वं 'तेनैव प्रति- पन्नत्वान्नारेण विषयत्वात्। को दोष इति चेत्? अर्थव्यवसायाभाव एव। न ह्यव्यवसाय- स्वभावसंवेदनविषयतामुपगतस्य व्यवसितस्य नाम, अव्यवसितस्यैव कस्यचिदभावापत्तेः। १० तैत्स्वभावमपि सवेदनमर्थव्यवसायमुपनयति व्यवसायस्वभावात्। कथञ्चिदनर्थान्तरत्वादिति चेत्, स्वैव्यवसायं किमेवं नोपनयति सदविशेषात्? आत्मव्यवसाय प्रति तदनर्थान्तरत्वमनङ्गमिति चेत्, अर्थव्यवसायं प्रति कथमङ्गमिति न किञ्चिदेतत्? तस्माव्यवसायस्वभावं तत्स्वसंवेदनम्।

भवतु व्यवसायस्वभावमेव तदिति चेत्; न, अभिजल्पसंसर्गाभावात्। अभिजल्प- संसर्गे हि व्यवसायोऽवकल्प्यते। न च स्वरूपे तत्संसर्गोऽस्ति बहिर्व्यवसायाभावप्रसङ्गात्– १५ बहिर्व्यवसायोऽपि सत्येव [2]तत्संसर्गे भवति, साम्प्रतं यदि स्वरूपे संसर्गः न बहिः स्यात्, युगपदभिजल्पद्वयसम्बन्धस्याप्रतिवेदनाद्दनम्युपगमाच। क्रमेणैकत्र ज्ञाने तदुभयसंसर्ग इति चेत्, न, एकस्य क्रमाभावात्[3] क्षणभङ्गवाद्व्यापत्तेः। नामिजल्पसम्बन्धाद् व्यवसायानां [4]तादात्म्यं येनायं प्रसङ्गः, किन्तु सजात्यादिव्यवच्छेदस्वभावत्वात्। तदपि नामिजल्पसम्बन्धात्, अपि [5]तु स्वहेतुविशेषात् तच्छक्तिरूपेण तेषामुत्पत्तेः। तस्मात् स्वशक्तित एव स्वरूपाधिष्ठान २० संजात्यादिव्यवच्छेदस्वभावत्वात् व्यवसायस्वभावमेव व्यवसायानां स्वसंवेदनमिति चेत्, उपपन्न- मेवैतत् एवमेव व्यवसायानां तत्त्वव्यवस्थितेः, अन्यथा तदसम्भवात्। तथा हि–नामिजल्पस्या- नुस्मृतस्य योजनम्, न चाटटे तद्विषये [6]'तदनुस्मरणम् अतिप्रसङ्गात्। दृष्टेऽपि न चानिश्चिते[7], क्षणभङ्गाधिगमेऽप्यस्यानुस्मरणापत्तेः, तथा च [8]'तेहर्षानानन्तरमेव तदभिजल्पा- नुविद्धस्य [9]'तदूव्यवसायस्योत्पत्तेर्नीलादिवत्, न [10]तावानुमानस्य सामर्थ्यमुत्पश्यामः, [11]व्यभिसिते २५ विपरीतारोपस्यानुत्पत्तेः तदूव्यवच्छेदस्याप्यसम्भवात्। निश्चित एव तर्हि तद्विषये तदभिजल्पा-

---

१ व्यवसायात्। २ स्वरूपस्य। ३–स्वभावात् ब्र–आ०, ब०, प०, स०। ४ तत्स्वसंवेदनमाव आ०, ब०, प०, स०। ५–मूर्तस्य प०, स०। ६ अव्यवसायस्वभावमेव ज्ञातात्। ७ नाम ब्र–आ०, ब०, प०, स०। ८ अव्यवसायस्वभावमपि। ९ स्वस्य ब्र–आ०, ब०,प०,स०। १० शब्दार्थयोर्ने। ११–तु सहजमङ्गीकृ- आ०, ब०, प० स०। १२ अव्यवसायप्रसङ्गात्। १३ तु विशेषात् आ०, ब०, प०, स०। १४ शब्दविषये। १५ शब्दस्मरणम्। १६ शब्दस्मरणं भवतीति शेषः। १७ क्षणभङ्गधीगमेनैव १८ क्षणिकमिदमिति इव महविकल्पाविर्भावपत्तेः। १९ क्षणभङ्गे सर्वं क्षणिकं तत्साधिन्यनुमानस्य। २० विपरीतारोपविषयेऽर्थेऽनुमानसामर्थ्यं स्वविषयेऽपाकरणमाह।

नुस्मरणमिति चेत्; न; 'निश्चिते[1] तस्मिन् तेदनुस्मरणम्[2], तदनुस्मरणे च तेंद्योजनया[3] तेंन्निश्चयः' इति परस्पराश्रयस्य सुव्यक्तत्वात्। ततः स्वहेतुसामर्थ्यादेव क्षयोपशमविशेषलक्षणात् संशयादिव्यवच्छेदस्वभावतेयोत्पत्तेः व्यवसायानां तत्त्वमवतिष्ठते नान्यथा। तथा च देवस्यान्यत्र वचनम्—

"व्यवसायात्मकं ज्ञानं प्रत्यक्षं स्वत एव नः।
अभिधानाद्यपेक्षायां भवेदन्योऽन्यसंश्रयः॥" [ ] इति।

ततो यदुक्तम्—

"रूपं रूपमितीक्षेत तद्धियं किमितीक्षते।
अस्ति चानुभवस्तस्याः सेंविकल्पः कथं भवेत्॥" [प्र०वा० २।१७७] इति;

तत्प्रतिविहितम्; अभिजल्पसम्बन्धेन हि व्यवसाये रूपव्यवसायसमये तद्बुद्धिव्यवसायो न भवेत्, युगपदभिजल्पद्वयसम्बन्धाप्रतिवेदनात्। अस्ति च तेंदापि तदनुभवः, स च कैंथं व्यवसायात्मकप्रत्यक्षवादिन इति भवत्ययं पर्यनुयोगः। न चैवम्, अन्यथैव व्यवसायैंस्य व्यवस्थापनात्। ततो व्यवसायात्मकमेव व्यवसायानां स्वसंवेदनम्। तच्च न [10]परस्य प्रत्यक्षम्; [11]तस्याव्यवसायस्वभावतयाऽभ्युपगमात्। नाप्यनुमानम्; साध्यादर्थान्तरस्यानुमानत्वात्, स्वसंवेदनस्य च व्यवसायेभ्यो भेदाभावात्। नाप्यन्यत्प्रमाणम्; प्रमाणद्वयनियमव्याघातात्। न चाप्रमाणम्; अप्रमाणाद्व्यवसायसिद्धेरयोगात्, प्रमाणचिन्तावैफल्यापत्तेः। [12]अतोऽवरमस्वसंवेदनमेव व्यवसायानाम्। न चेदमपि शोभनम्; अव्यवसितैर्व्यवसायैरर्थव्यवसायायोगात्, अन्यथा अपरिच्छिन्नैरपि ज्ञानैरर्थपरिच्छित्तिप्रसङ्गात्। नन्वेवं सन्तानान्तरज्ञानैरर्थपरिच्छित्तिः किन्न भवति अपरिच्छिन्नत्वाविशेषात्, तथा च प्रतिसन्तानं निष्फलमेव ज्ञानभेदकल्पनम्, एकसन्तानज्ञानैरेव सर्वेषां बहिरर्थपरिच्छेदोपपत्तेरिति चेत्; व्यवसितिरप्यर्थानामन्यसन्तानव्यवसायैः कस्मान्न भवति अव्यवसितत्वाविशेषात्? तथा च प्रतिसन्तानं [13]तेंद्भेदकल्पनमपि निष्फलमेव, एकसन्तानव्यवसायैरेव सर्वेषां बाह्यव्यवसायोपपत्तेः। अव्यवसितैरपि स्वव्यवसायैरेव स्वयमर्थावसायो न परव्यवसायैरिति चेत्; न; 'अननुभूतैरपि स्वानुभवैरेव स्वयमर्थानुभवो न परानुभवैः' इत्यपि प्रसङ्गात्। अननुभूतानां तेषां स्वानुभवत्वमेव कुतोऽवगतं येनैवमुच्यते? [14]तादृशानामिन्द्रियाणां कथमात्मीयत्वमगम्यत इति चेत्? मा भूत्तदवगमः, न काचित्क्षतिः? कथं [15]तैरर्थावगम इति चेत्? न; तदभावात्। कथं [16]तेंथा व्यवहार इति चेत्? न; तस्य भाक्तत्वात्, रूपादिविषयानुभवहेतुत्वेन तदुपपत्तेः। अनुभवस्य तु न भाक्तमर्थप्रतिपत्तिनिबन्धनत्वम्, तस्यानुभवान्तरनिमित्तत्वाभावादनवस्थापत्तेः। तस्मादनुभवहेतूं[17]नामप्रसिद्धिर्न दोषाय नानुभवानाम्, तदप्रसिद्धौ विषयाप्रसिद्धेः, अन्यथा सर्वदा सर्वविषयप्रसिद्धिप्रसङ्गात्। तदुक्तम्—

१—तेऽस्मिन् आ०,ब०,प०,स०। २ शब्दानुस्मरणम्। ३ शब्दयोजनया। ४ अर्थनिश्चयः। ५—तयोपजायते व्य—आ०,ब०,प०,स०। ६ सोऽविकल्पः आ०,ब०,प०,स०,प्र०वा०। ७ रूपव्यवसायकाले रूपबुद्ध्यनुभवः। ८ कथमव्यवसा—आ०,ब०,प०,स०। ९—यस्यैव व्यव—आ०,ब०,प०,स०। १० बौद्धस्य। ११ प्रत्यक्षस्य। १२ अतोऽपरमस्व—आ०,ब०,प०,स०। १३ व्यवसायभेद। १४ अननुभूतानाम्। १५ इन्द्रियैः। १६ चक्षुषा पश्यामीत्यादिव्यवहारः। १७ इन्द्रियाणाम्।

"आत्मानुभूतं प्रत्यक्षं नानुभूतं परैर्यदि ।
आत्मानुभूतिः सा सिद्धा कुतो येनैवमुच्यते ॥
व्यक्तिहेत्वभिसिद्धिः स्यान्न व्यक्तेर्व्यक्तमिच्छतः ।
व्यक्तस्यसिद्धावपि व्यक्तं यदि व्यक्तमिदं जगत् ॥"[प्र०वा० २।५४० ४१]

इति चेत्, न, व्यवसायेऽपि समानत्वात्। तेऽपि हि कथमव्यवसिता आत्मीयत्वेनाव्य- ५
गम्यन्ते ? तद्धेत्वेोऽनुभवादृष्यत्वादर्था एव कथं तैर्व्यावगम्यन्त इति चेत् ? माभूत्था तद्वगमो न कश्चित् क्षतिः। कथं तैरर्थावसाय इति चेत् ? न, तदभावात्। कथं तथा व्यवहार इति चेत् ? न, तस्य भाक्तत्वात्, बहिर्व्यवसायहेतुत्वेन तदुपपत्तेः। व्यवसायानां तु न भाक्तमर्थ-व्यवसायनिबन्धनत्वं तेषां तव्यवसायान्तरनिबन्धनत्वाभावादनवस्थाप्रसक्तेः। तस्मात् व्यवसाय- १०
हेतूनामव्यवसायो न दोषाय न व्यवसायानाम्, तदव्यवसाये विषयाव्यवस्थितेः, अन्यथा
सर्वदा सर्वविषयव्यवसायापत्तेः। तदज्ञानमप्येवं (तदज्ञाप्येव) वक्तव्यम्–

आत्मनिश्चितमेव स्याच्चिन्निश्चित नान्यनिश्चितम् ।
यद्यात्मनिश्चयः सिद्धः कुतो येनैवमुच्यते ॥५७४॥
मा भूच्चिन्निश्चयहेतूनां निश्चयस्तेन का क्षतिः ।
न बाह्यनिश्चयः सिद्ध्येच्चिन्निश्चयैरप्यनिश्चितैः ॥५७५॥ १५
अनिश्चयेऽपि तेषां चेद्वयों निश्चीयते परैः ।
तदा सर्वं जगत्प्राप्तं मुनिनिश्चयपर्यं गतम् ॥५७६॥ इति ।

प्रत्युक्तश्च व्यवसायानां स्वतः परतश्च व्यवसायः। ततो मिथ्यैवेदं यत्–"अध्यवसि
तैरपि व्यवसायैर्यदीह व्यवसीयते"[ ] इति। तदाह–'मिथ्याविकल्पकरणमेतत्' २०
इति। न विद्यते विकल्पनं विकल्पो व्यवसायो यस्य तत् अविकल्पं तच्च तत् कं च ज्ञानं
तस्य कार्यतेन सम्बन्धि। किं तत् ? एतत्। बाह्यं व्यवसितमिति। अस्यैव परस्येवसि
थितत्वेनैतच्छब्देन परामर्शात्। तत्किम् ? मिथ्या, न सम्यक्। अन्यथा 'अध्यक्षेणाप्यनु-
मयेन बाह्यं व्यक्तम्' इत्यपि न मिथ्या स्यात्। ततः किम् ? इत्याह–'व्यक्तम्' इत्यादि।
'एतत्' इत्यत्रापि सम्बन्धनीयम्। एतत् परेणोच्यमानं "व्यक्तस्यसिद्धावपि व्यक्तं यदि २५
व्यक्तमिदं जगत्" इति तत् व्यक्तं स्पष्टम् आत्मविद्वन्मनम् आत्मतिरस्करणम्, अदोषे
दोषोद्भावनात्। ततो न सौगतस्य दूषणवचनसामर्थ्यम् असदूषणवादित्वात्। तत्कर्तं
तदुपजीवनं स्याद्वादिन इति कारिकाक्षरार्थस्य तात्पर्यम्।

---

१ "यत् चक्षुरादयवयुमूर्तं चक्षुरादिना व्याप्यव्यापकभावमिति यथा तथा ज्ञानमनुभवेऽप्यर्थो ज्ञात इति भविष्य-तीत्याह–अर्थव्यक्तिहेतोरप्यक्षुरादेरर्थदर्शनेऽप्यभिसिद्धिरभिव्यक्तिः स्यात्, कस्मै न कारणदर्शनपूर्वकं कार्यदर्शनम्। न तु व्यक्तेरप्यक्ष्यो व्यक्तं वर्तमिदं जगत्यो व्यवसिद्धिर्युक्ता। यदि पुनर्व्यक्तेरसिद्धावपि व्यक्तं वस्तूच्यते तदा सर्वमिदं जगत् व्यक्तं स्यात्, अव्यक्तव्यक्तिव्यतेव विशेषाभावात्।"–प्र०वा०म० पृ० २८१। २ अननुभूता। ३ आत्मीय-तेव। ४ अनुभवादिभिः। ५ व्यवहारहेतु–आ०, ब०, ए०, घ०। अनुभवकारीणाम्। ६ तत्किं आ०, ब०, प०, स०।

तदेवं प्रासङ्गिकं प्रतिपाद्य 'परोक्ष' इत्यादिकस्यैवार्थम् 'अध्यक्षम्' इत्यादिभिः श्लोकैः सङ्गृहीतुकामः प्रथमं परप्रसिद्धेनैव अर्थज्ञानानुमानेन अर्थज्ञानस्य स्वसंवेदनविषयतां व्यवस्थापयन्नाह—

अध्यक्षमात्मनि ज्ञानमपरत्रानुमानिकम् ॥१२॥
नान्यथा विषयालोकव्यवहारविलोपतः । इति ।

अध्यक्षं स्वानुभवप्रत्यक्षवेद्यत्वात् न प्रत्यक्षान्तरवेद्यत्वात् तस्य निराकरणात् । किं तत् ? **ज्ञानं** नीलादिवेदनम् । कस्मिन् ? **आत्मनि** । कीदृशे तस्मिन् ? **अपरत्र** अनर्थान्तरे स्वात्मनीति यावत् । कुत एतत् ? **आनुमानिकम्** इति । अनुमानमत्रार्थापत्तिरेव, "ज्ञाते त्वनुपपादवगच्छति" [शाबरभा० १।१।५] इत्यत्र अर्थापत्तेरेवानुमानशब्देनाभिधानात् । अनुमानेन गृह्यत इत्यानुमानिकम् । हेतुपदं चैतत् । तदयमर्थः—स्वात्मनि स्वसंवेदनप्रत्यक्षम् अर्थज्ञानम्, आनुमानिकत्वादिति । किं पुनरानुमानिकत्वं स्वसंवेदनाभावे न भवति ? न भवत्येव । तदाह—'**नान्यथा**' इति । अन्यथा स्वसंवेदनाभावप्रकारेण आनुमानिकं स्वात्मनि ज्ञानं न भवतीति । एतदेव कुतः ? इत्यत्राह—'**विषय**' इत्यादि । अत्रापि '**अन्यथा**' इत्यनुवर्त्तयितव्यम्, **अन्यथा** अर्थज्ञानस्याध्यक्षत्वाभावप्रकारेण **विषयः** अन्यत्रभावः[1] स चान्यथानुपपत्तिरेव तस्य **आलोको** दर्शनं स एव **व्यवहारो** व्यवसायरूपत्वात्, तस्य विलुप्तिर्[2]**विलोपस्**तस्मात्तत इति । तथा हि—अर्थापत्तिस्तावदन्यथानुपपत्तिबलादेव । तच्च नापरिज्ञातमेव तत्प्रसूतिनिबन्धनम् अपरिज्ञातसमयस्यापि[3] ततस्तत्प्रसूतिप्रसङ्गात्, तथा च निर्विवादं भवेत् । न हि अर्थापत्तित एवार्थज्ञानं प्रतिपद्यमानस्तत्र विप्रतिपत्तुमर्हति । भवति[4] चात्र विप्रतिपत्तिः—स्वानुभवप्रत्यक्षवेद्यमर्थज्ञानमिति जैनादेः, प्रत्यक्षान्तरवेद्यमिति वैशेषिकादेः, अर्थापत्तिवेद्यमिति च मीमांसकस्य तदर्शनात् ।

भवतु परिज्ञातादेव तद्बलात्तत्प्रसूतिरिति चेत्; कुतस्तत्परिज्ञानम् ?—अर्थज्ञानादन्यत एव कुतश्चिदिति चेत्; तेनापि यद्यर्थज्ञानस्याऽपरिज्ञानं कथं तद्विषयस्य तद्बलस्य ततः परिज्ञानम् ? सर्वापरिज्ञानवतोऽपि कुतश्चित् सर्वविषयपुरुषविशेषज्ञानस्य परिज्ञानप्रसङ्गात्, तथा च दुर्भाषितमेतत्—

"सर्वज्ञोऽयमिति ह्येवं तत्कालेऽपि बुभुत्सुभिः ।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम्॥" [मी०श्लो० १।१।२, श्लो० १३४] इति।

भवतु ततोऽर्थज्ञानस्यापि परिज्ञानमिति चेत्; अर्थापत्तिरूपं तत्र तदभ्युपगन्तव्यम्, अन्यतस्तत्परिज्ञानायोगात्, "अनुपपादवगच्छति" इति वचनात् । अभ्युपगम्यत एवेति चेत्; तद्बले[6] तर्हि तत् किन्नाम प्रमाणम् ? अन्यदेव किमपीति चेत्; तर्हि प्राप्तमर्थ-

---

१ न्यायवि० श्लो० १० । २ अनन्यत्राभाव. आ०, ब०, प० । नान्यत्राभावः स० । ३ —तस्य यस्यापि आ०, ब०, प०, स० । ४ भवतु चात्र आ०,ब०,प०,स० । ५ अन्ययानुपपत्तिबलात् । ६ तद्बलेन तर्हि स० । अन्ययानुपपत्तिबले ।

ज्ञानेऽर्थापत्तिः अन्यथानुपपत्तिबले चान्यदिति । तथा च न तयोरन्यतरेणार्थ्यज्ञानविषयं तद्बलमवगतं भवति, एकत्र प्रवृत्तेनान्यस्याऽपरिज्ञानात् । न चैकेनोभयपरिज्ञाने तद्गतो विषयविषयिभावः शक्योऽन्यगन्तुम् ।

स्यादाकूतम्–अर्थापत्तिरन्यरूपतयोभयत्रभावमेकमेवेद तदुभयविषयं नैकान्तभेदवत्तया प्रमाणद्वय तद्गमप्रसङ्ग इति , तन्न , तस्य सप्तमप्रमाणत्वप्रसङ्गात् प्रत्यक्षादिष्वनन्तर्भावात् । भवतु तद्बलेऽपि तदर्थापत्तिरूपमेवेति चेत् , न , तैत्प्रमुक्तिनिबन्धनस्य सैद्धलान्तरस्याभावात् । भावे वत एवार्थज्ञानार्थापत्तेः प्राक्तस्य तद्बलस्य वैफल्यं स्यात् । भवत्विति चेत् , विप्लुप्तस्तर्हि तदा लोकव्यवहारो विकल्पतत्रव्यवहारे प्रयोजनाभावात् । तद्बलान्तरेऽपि व्यपदेशविकोपनीदिरेव वक्तव्यः–तत्रापि 'तच्च नापरिज्ञातमेव' इत्यादेः 'विप्लुप्तस्तर्हि तत्रव्यवहारः' इत्यादिपर्यन्तस्य सुगनिरूपणत्वात् । पुनरपि तद्बलान्तरे सर्वोऽपि तत्पक्षो वक्तव्य इति नानवस्थातो मुक्तिः । तन्न परतस्तत्परिज्ञानम् ।

एतेन आत्मनस्तत्परिज्ञानमिति प्रत्युक्तम् । ततोऽपि सद्विषयप्रमाणपर्यायनिरपेक्षात् तदसम्भवात् , प्रमाणकल्पनस्यैव वैफल्यप्रसङ्गात् सकलप्रमाणविषयपरिज्ञानस्यात्मन एवोपपत्तेः। तत्पर्यायसापेक्षादेव तैतत्तत्परिज्ञानमिति चेत् , न , तत्पर्यायज्ञानादन्यत्वे तदर्थापत्तिरूपत्वस्य तद्दोषस्य च निवेदितत्वात् । अस्तु तर्हि तैतोऽर्थज्ञानरूपादेव तत्परिज्ञानमिति चेत् , न , तस्य स्वसंवेदनत्वाभावे ततोऽपि तत्परिज्ञानासम्भवात् । यदि हि तत् परिज्ञातस्वरूपं भवति, भवत्येव ततः स्वविषयतद्बलपरिज्ञानं नान्यथा । न हि 'सद्विषयमित्यन्यथानुपपत्तिबलम्' इति परिज्ञानम् अनात्मज्ञत्वे ततः सम्भवति । न चापरिज्ञातात् ततोऽर्थापत्तिरर्थज्ञानस्येति स्वानुभवप्रत्यक्षसिद्धं तद्ज्ञानकर्तृत्वम् , अन्यथा तस्यानुमानिकत्वायोगादिति सूत्रम्–'अदृश्यत्वात्'इत्यादि ।

तदयम् 'अन्यथानुपपन्नत्वम्'इत्यादर्थस्य संग्रहः । स्वसंवेदनाभावे तत्त्वन्यथानुपपन्नत्वस्य दुरवबोधत्वमनेन प्रतिपादिते । तच 'अन्यथानुपपन्नत्वम्' इत्यादिनापि प्रतिपादितमेव–अन्यथानुपपन्नत्वम् असिद्धस्य स्वभावत्वप्रभावेरस्य सम्बन्धि तद्गमकत्वेन न सिद्धयति' इति तदुच्यानाभावात् । पुनरप्युक्तस्यैवार्थस्य सोपपत्तिकं संग्रहमाह–

आन्तरा भोगजन्मानो नार्था[1] प्रत्यक्षलक्षणाः ॥ १३ ॥
न धियो नान्यधेत्येते विकल्पा विनिपातिताः । इति ।

अन्तर्भवेसि भवा आन्तरा[2]. सुखादयस्ते प्रत्यक्षलक्षणाः प्रत्यक्षं लक्षणं प्रमाणं येषां ते तथोक्ताः । न[3] इति तेषां तथात्वप्रतिषेधे । कथम् ? अन्यथा तत्संवेदनस्य स्वात्मन्यभ्युपगमाभावप्रकारेण ।

---

१ स्याद्वादिरिकम् । २ अथापरमुपपत्ति । ३ अन्यथानुपपत्तिबलान्तरस्याभावात् । ४–वादिरिकस्थे च ब्रह्म–आ०,ब०,प०,स०। ५ आत्मनः । अन्यथानुपपत्तिबलपरिज्ञानमिति । ६–स्व निर्वे–आ०,ब०,प०,स०। ७ आत्मनः । ८ परिज्ञानम् आ०, ब०, प०, स०। ९ स्यात्यविं० इको० ११ । १० देति आ०,ब०,प०,स०।

तदयमत्र प्रयोगः—स्वात्मनि सुखादिसंवेदनं प्रत्यक्षम्, अन्यथा सुखादीनामपि प्रत्यक्षत्वानुपपत्तेः। तथा हि—सुखादयः प्रत्यक्षविषयतामनुभवन्तः स्वतः, अन्यतो वाऽनुभवेयुः? अन्यत एवेति चेत्; तदपि तद्वेदनं नियतम्, अनियतं वा भवेत्? नियतमेवेति चेत्; कुत एतत्? सुखादीनामवश्यसंवेद्यत्वात्, तदपि सत्त्वादिति चेत्; न; सर्वस्य सर्ववेदित्वापत्तेः, विषयान्तरसञ्चाराभावप्रसङ्गाच्च—सुखादिवत्तद्विषयस्य संवेदनस्यापि सत्त्वेन अवश्यसंवेद्यत्वात्, तथा तत्संवेदनस्यापीत्यासंसारं तत्संवेदनप्रबन्धस्यैव प्रादुर्भावान्न विषयान्तरसञ्चारः संवेदनस्य स्यात्। सति विषयान्तरसन्निधाने भवत्येव तत्र तस्य सञ्चार इति चेत्; न तर्हि सतोऽवश्यसंवेद्यत्वम्, तच्चरमसंवेदनस्य सत्त्वेऽपि तदभावात्।

अपि च, तत्संवेदनं यदि सुखादिमात्रात्; न प्रत्यक्षं स्यात् इन्द्रियसम्प्रयोगजस्य तत्त्वात्। नाप्यनुमानादि; लिङ्गादिनिरपेक्षत्वात्। अपि तु प्रमाणान्तरमेव सप्तमं भवेत्। भवत्विति चेत्; ननु तेनापि पञ्चाद्भाविना तात्कालिकस्यैव सुखादेर्वेदनं न पौर्वकालिकस्य। तत्र च दोषं वक्ष्यामः। तात्कालिक एव सुखादिर्न पौर्वकालिक इति चेत्; न; सर्वथा समानकालत्वे सुखादितत्संवेदनयोर्युवतिनयनयोरिव हेतुफलभावाभावापत्तेः। तन्न सुखादिमात्रात्तत्प्रत्यक्षम्। यदि पुनस्तन्मनःसम्प्रयोगजमेव तदिति मतम्; तदपि न समीचीनम्; तत्सम्प्रयोगस्यानियमेन तत्संवेदनस्याप्यनियमापत्तेः। नियत एव तत्सम्प्रयोगो इति चेत्; न; बहिर्विषयेष्वेवमदर्शनात्। अन्तर्विषयेष्वेवमेवेति चेत्; न; सुखादिवत् तत्संवेदन-तत्संवेदनसंवेदनादिष्वपि तन्नियमेन तद्वेदनस्यापि नियमप्रसङ्गात् विषयान्तरसञ्चाराभावस्य तदवस्थत्वात्। तन्न तत्र नियतं किञ्चित् वेदनम्।

अनियतमेव भवत्विति चेत्; किं पुनरेवं कदाचित्सुखादेरसंवेदनमप्यस्ति? तथा चेत्; न; तस्य भोगरूपत्वाभावापत्तेः, असंवेदने तदयोगात्, भोगरूपश्च सुखादिः। अत एवाह—**'भोगजन्मानः'** इति। भोगो भुक्तिर्वेदनारूपः स एव जन्म प्रादुर्भावो येषां ते तथोक्ता इति। न ह्य स्वतोऽन्यतश्चाऽवेदने तस्य भोगरूपत्वमुपपन्नमतिप्रसङ्गात्। तथा हि—

अविज्ञातोऽपि भोगश्चेत्सुखादिः परिकल्प्यते।
सर्वदा सुखदुःखादिभोगाक्रान्तं जगद्भवेत् ॥५७७॥

संवित्तिसमये भोगसत्त्वस्य नियमो यदि।
स्तम्भादेः संविदः पूर्वमपि सत्त्वं कथं भवेत्? ॥५७८॥

इत्यचोद्यं पुराभावः तत्र यच्छक्यकल्पनः।
आकारभेदनिर्णीतेर्वचनादपि तद्विदाम् ॥५७९॥

प्रत्यग्रोऽयं पुराणो वा गृहस्तम्भादिरित्यलम्।
जानन्त्येव तदाकारदर्शनादेव देहिनः ॥५८०॥

---

१ अवश्यसंवेद्यत्वाभावात्। २ प्रत्यक्षत्वात्। ३ सुखादिसंवेदनम्। ४ मनःसम्प्रयोगः। ५–त्तेः सर्वे–आ०, ब०, प०, स०। ६ स्तम्भादौ। ७–त्यत्र आ०, ब०, प०, स०। ८ तद्विधाम् आ०, ब०, प०, स०।

पञ्चाप्याकारवैशिष्ट्यं न स्वतः शक्यनिर्णयम् ।
तत्रापि तद्विवेकः स्यात्तद्विदां वचनक्रमात् ॥५८१॥
नैवं भोगपुरायत्नमाकाराच्छक्यवेदनम् ।
सभाप्रतीतिवैधुर्यादविगानपदं गतात् ॥५८२॥
न चैकारमसुखार्थीनां द्रष्टा कश्चिदिहापरः । ५
यतस्तद्वचनात्तेषां पूर्वभायः प्रतीयताम् ॥५८३॥
तस्माद्विदितो भोगः क्षणेऽपि यदि सेभ्यते ।
सर्वदातैनतत्सर्वं दुर्निवारं प्रसज्यते ॥५८४॥
अग्निहोत्रादनुष्ठानं स्वर्गभोगाय तद्वृथा ।
नित्यसिद्धे हि तद्भोगे किं निमित्तम्यपेक्षया ॥५८५॥ १०
तदभिव्यक्तये तच्चेदनुष्ठानममीप्सितम् ।
इन्द्रियज्ञानमप्येवं तद्वेद्योऽर्थोऽक्ष्यमिष्यताम् ॥५८६॥
यत् 'बुद्धिजन्म प्रत्यक्षम्' इति सूत्रैस्थितिः कथम् ? ।
जैमन्यभ्युपगतो लोके नास्त्यमिष्यविचिनी ॥५८७॥
तदपि व्यक्त्यमिष्टञ्चेत् सर्वकार्यं तथा भवेत् । १५
ततः साङ्ख्यमतं तच्च यथास्थानं निषेत्स्यते ॥५८८॥
तस्माद्भवतिपन्नस्य न यथा सर्वकालता ।
भोगस्य क्षणकालत्वमपि नैव प्रकल्प्यताम् ॥५८९॥

भवतु तर्हि संवित्तिसमय एव सुखादिरिति चेत्, तथापि कथं तस्याचिद्रूपत्वे भोगरूपत्वं सुद्धिकारवत् ? अचेतनत्वेऽपि यथा किञ्चिन्नीलं पवलञ्च किञ्चित्, तथा किञ्चिदनुग्रहरूपं पीडारूपं किञ्चित् किमिति विरुद्धम्, यतोऽचेतनमपि भोगरूपं न भवतीति चेत् ? न सारमेसत्, नीलादिवद्भोगस्यापि साधारणत्वप्रसङ्गात् । अचेतन हि नीलादि देवदत्तमिव अन्यान् प्रत्यपि नीलादीव न पीतादीनामन्यतमम्, एवमचेतनो भोगोऽपि किञ्चिदिव सर्वान्प्रत्यपि भोग एव स्यान्नाऽभोग । तथा च–

भोगेनैकेन सर्वेषां भोगवत्त्वं तनुभृताम् । २५
दुर्निवारप्रसङ्गं स्यादचभोगविदां मते ॥५९०॥
यो येन वेद्यते भोगो भोगी सेन स एव चेत् ।
अन्येन वेदने तस्य सोऽपि स्यात्तेन भोगवान् ॥५९१॥
अन्येन तस्य विदिश्येत देहान्तर्गतत्वतः ।
देहान्तर्गत एवास्य किन्न स्याच्छत्रवेदकः ? ॥५९२॥ ३०

---

१ सङ्गवेद् ता० । २ तत्र तत्र–ता०, ब०, प०, स० । ३ "तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ।"–मी० सू० १।१।४ । ४ जन्मसङ्ख्याः ।

आत्मधर्मत्वतस्तस्य यद्यन्येनाप्रवेदनम् ।
अचेतनः कथन्नाम तद्धर्मो मृद्विकारवत् ॥५९३॥
तद्धर्मत्वेन[2] वा मा भूत्तस्याध्यक्षेण वेदनम् ।
अनुमानेन तद्वित्तिः, परस्यापि कथन्न वः ॥५९४॥
ततोऽनुमानवेद्येन[3] भोगेनैकस्य कस्यचित्[4] ।
तदन्यस्यापि भोगित्वं निर्विवादमुपस्थितम् ॥५९५॥
[5]सामान्यमनुमावेद्यं तच्चाह्लादाद्यनात्मकम् ।
नास्ति तत्तेन[6] भोगित्वं परस्येत्युपकल्पने ॥५९६॥
सामान्यं यदि तद्वस्तु ह्लादाद्यात्मैव तन्न किम् ? ।
अवस्तु यदि ; तज्ज्ञानं प्रमाणमनुमा कथम् ? ॥५९७॥
विशेषाग्रहणे तच्च सामान्यं गृह्यते कथम् ? ।
न ह्यविज्ञातखण्डादेर्गोत्वं शक्यप्रवेदनम् ॥५९८॥
विशेषग्रहणे सिद्धं भोगित्वमनुमावतः ।
विशेषस्यापि सामान्यरूपेण ग्रहणान्न चेत्[7] ॥५९९॥
कथं [8]तस्यान्यरूपेण ग्रहणम् ? यदि विभ्रमात् ।
विभ्रान्तस्य प्रमाणत्वमनुमानस्य तत्कथम् ? ॥६००॥
[10]तस्य सामान्यतादात्म्यात्तद्रूपेण[11] प्रवेदने ।
प्रत्यक्षेणापि [12]तस्यास्तु तथैव[13] प्रतिवेदनम् ॥६०१॥
[14]अन्यथा [15]तेन [16]तद्वित्तौ भ्रान्तिः प्रत्यक्षमाश्रयेत् ।
तज्जगन्मान्यमानत्वगौरवक्षयकारिणी ॥६०२॥
प्रत्यक्षानुमयोरेवमभिन्ने विषयग्रहे ।
भोगाध्यक्षीव भोगी स्यात्किन्न भोगानुमानकृत् ? ॥६०३॥

स्यान्मतम्–स्पष्टोपलम्भविषय एव भोगः परितोषादिनिबन्धनं तदुपलम्भश्च प्रत्यक्षत एव नानुमानात्, तस्य अस्पष्टप्रतिभासत्वात्। न चापरितोषादिकारिणा भोगेन भोगवत्त्वं तदनुमानवतस्तदयमप्रसङ्ग इति; तन्न; अस्पष्टोपलम्भविषयस्यापि मनोज्ञादिरूपस्य परितोषादिकारित्वोपलम्भात्।'अन्यभोगस्यात्मीयत्वेनाप्रतिपत्तेर्न तेन परितोपादिः'इत्यप्यनेन प्रतिविहितम्; नवयुवतिवदनकमलकमनीयरूपादेरनात्मीयत्वेन दर्शनेऽपि परितोषाद्युपलम्भात्। प्रतिपत्तिविपयोऽपि [17]कुतश्चिददृष्टशक्तिवशात् कश्चिद्भोगः कस्यचिदेव परितोषादिहेतुर्न तदपरस्येति चेत्; उच्यते–

---

१ भोगस्य । २– न मा वा भू –ता० । आत्मधर्मत्वेन । ३ भोगेनैकेन क–आ०, ब०, प०, स०। ४ भोगित्वे स्वीक्रियमाणे । ५ भोगत्वादिरूपम् । ६ अनुमानवेद्येन भोगसामान्येन । ७ ग्रहणं न चेत् आ०, ब०, प०,स०। ८ भोगित्वं परस्य । ९ विशेषस्य सामान्यरूपेण । १० विशेषस्य । ११ सामान्यरूपेण । १२ विशेषस्य । १३ सामान्यरूपेण । १४ सामान्यरूपेण । १५ प्रत्यक्षेण । १६ विशेषज्ञाने । १७ कुतश्चिद्दृष्ट–आ०,ब०,प०,स०।

भोगः स्वयं यदि परितोषाद्यात्मा तदा तेनैव तदपरपरितोषाद्यरणेऽपि प्रत्यक्षभोगप्रतिपत्तिमत इत्यानुमानभोगप्रतिपत्तिमतोऽपि परितोषादिमत्त्वोपपत्तेः कथम् कस्यचिद्भोगेन तदपरस्यापि [1]भोगवत्त्वं भवेत् ? परितोषाद्यात्मत्वमपि [2]तस्याहृष्टशक्तित्व कल्पितेनैव नापरं प्रतीति चेत्, कुत एतत् ? केनचिदेव [3]तस्य [4]तत्प्रेम प्रतिपत्तेरिति चेत्, न, परेणापि तस्य तत्प्रेमैव प्रतिपत्तेः। रूपान्तरेण प्रतिपत्तिस्तु न तत्प्रतिपत्ति अतिप्रसङ्गात्। रूपान्तरमपि तस्मादभिन्नमेव इति चेत्, व्याहतमेतत्—'तदन्तरञ्च तदभिन्न च' इति। [5]भेदैकान्तानुपपादनादुपपद्येत्, एवमपि तत्प्रतिपत्तौ यदि न परितोषादिप्रतिपत्तिः, अप्रतिपन्न एव परसुखादिर्भवेत् परितोषादिनैव तस्य सुखादित्वोपपत्तेः, अन्यथा सत्त्वादिभावेनापि [6]तत्त्वप्रसङ्गात्। तदात्मना तत्प्रतिपत्तौ तु कथम् परोऽपि परितोषादिमान् यतः कस्यचिद्भोगेन परोऽपि तद्वान् भवेत्? तन्न स्वयं परितोषाद्यात्मत्वे भोगस्य प्रत्यात्मं तत्प्रतिनियमः।

स्वयं तैरनात्मकत्वे तु कथं तस्य भोगत्वम्? परितोषादिकरणादिति चेत्, न, स्रक्चन्दनादेरपि तत्त्वप्रसङ्गात् तेनापि तत्करणात्। अस्त्येवोपचारात्तस्यापि तैरात्मकमिति चेत्, उपचार इति कुतः? स्वयमपरितोषादिरूपत्वादिति चेत्, न, तत एव मुख्यादेरप्युपचार एव तत्त्वापत्तेः। न चैवम्, तस्य स्वत एव भोगत्वेन सर्वप्राणभृतां प्रसिद्धत्वात्। एतदुर्वच्च 'भोगजन्यमानः' इति वचनम्। [7]तस्मोपचारभोगत्वे वा मुख्यो भोगो वक्तव्यः, तेन विना उपचारस्यासम्भवात्। तत्कृतपरितोषादिर्मुख्य इति चेत्, सोऽपि यथार्थान्तरज्ञानविषयत्वया कस्यचिद्भोगः, तदपरस्यापि स्यात्, तेनापि तत्परिज्ञानादिशेषात् [8]तदविशेषेऽपि [9]तस्य परितोषाद्यात्मत्वम् अदृष्टवशात् कस्यचिदेव नापरं प्रतीति चेत्, न, तत्रापि 'कुत एतत्' इत्यादानुपन्यासानिवृत्तेरुपपत्त्यनवस्थितस्य प्रमत्वात्। तन्न परतः सुखादीनां प्रत्यक्षत्वानुभवनमुपपन्नम्, [10]प्रत्यात्मं तन्नियमाभावप्रसङ्गात्।

अस्तु तर्हि स्वत एव तेषां[11] तदनुभवनमिति चेत्, अपरोक्षं तर्हि तद्वेदनं वक्तव्यम्, अन्यथा [12]तदनर्थान्तरत्वेन तेषामपि परोक्षत्वेन ततो हर्षादयुदयप्रसङ्गात्। उक्तञ्च चैतत् 'सुख-दुःखादिसंवित्तेः' इत्यादिना[13]'। ततः सूत्रमिदम्—'सुखादिवेदनम् आत्मनि प्रत्यक्षम् अन्यथा सुखादीनामपि प्रत्यक्षत्वानुपपत्तेः' इति।

पुनरप्यात्मनि ज्ञानस्य प्रत्यक्षत्वमुपपादयतीति—प्रत्यक्षमात्मनि ज्ञानम्। कुत एतत्? अर्थाऽ प्रत्यक्षलक्षणाः नान्यथा इति। अन्यथा ज्ञानरूपात्मनि स्वत प्रत्यक्षत्वाभावप्रकारेण अर्था नीलपटलादयः प्रत्यक्षलक्षणा' प्रत्यक्षप्रमाणा न भवेयुः। यदि

---

१ —र्थम् आ०, ब०, प०, म०। २ तस्याहृष्टशक्तित्व कल्पितेनैव आ०, ब०, प०, म०। ३ भोगस्य। ४ परितोषादिरूपेण। ५ भेदैकान्तानुपपत्ति—आ०, ब०, प०, म०। ६ सुखादित्व। ७ तदप्रत्यक्षत्वे आ०, ब०, म०। परितोषप्रवाक्यात्वे। ८ भोगत्वम्। ९ सुखादेः। १० सुखादेः। ११ सुक्ष्मेण। १२ तदपि विशेषेऽपि तत्त्वापि—आ०, ब०, प०, म०। १३ सुखादेः। १४ प्रत्यर्थं नि—आ०, ब०, प०, म०। १५ सुखादीनाम्। १६ परोऽनुमानादिभिरूपेण। १७ स्वादिवि० श्लो० १४।

भवेयुः को दोष इति चेत् ? तल्लक्षणत्वापरिज्ञानमेवेति ब्रूमः । [1]तल्लक्षणत्वं हि तेषां[2] स्वतः, परतो वा परिज्ञायते ? न तावत् स्वतः ; तस्यार्थधर्मत्वाभावप्रसङ्गात् । अर्थधर्मत्वे हि [3]तस्यार्थस्यापि स्वतः परिज्ञेयत्वं भवेत् धर्मधर्मिणोरभेदनयाभ्यनुज्ञानात् । न चैवम्, अतो न तस्यार्थधर्मत्वम् । नापि ज्ञानधर्मत्वम् ; ज्ञानस्यापरोक्षत्वापत्तेः, स्वतः परिज्ञानविषयत्वेनापरोक्षात् [4]तल्लक्षणत्वादव्यतिरेकात् । तद्धर्मत्वे[5] वा तेन कथमर्थस्तल्लक्षणो भवेत् अतिप्रसङ्गात् । तेनापि[6] तस्य तल्लक्षणत्वकरणादिति चेत् ; न ; तस्यापि प्राच्यवत् ज्ञानधर्मत्वात्, तेनाप्यर्थस्य तल्लक्षणत्वानुपपत्तेः । पुनस्तेनापि[7] तस्यापरतल्लक्षणत्वकरणे परिनिष्ठाभावप्रसङ्गात् । एतेन तस्यात्मधर्मत्वं प्रतिविहितम् ; समानत्वान्न्यायस्य । तन्न स्वतस्तस्य परिज्ञानम् । परत इति चेत् ; किं तत्परम् ? अर्थज्ञानादन्यदेव ज्ञानमिति चेत् ; कुत एतत् ? तत्कृतस्य परिज्ञेयत्वस्य तत्र दर्शनादिति चेत् ; न ; तस्य स्वतो दर्शने पूर्ववदोषात् । परतो दर्शने 'किं तत्परम् ?' इत्यादिप्रसङ्गस्यानिवृत्तेरव्यवस्थापत्तेः । एतेन 'आत्मा परः' इति प्रत्युक्तम् ; अनवस्थादोषस्याविशेषात् ।

अर्थज्ञानादेव तत्परिज्ञानमिति चेत् ; [8]तेनापि [9]यद्यतत्कृतत्वेन तत्परिज्ञानम् ; भ्रान्तमेव तद्भवेत् ;अर्थानां तल्लक्षणत्वस्य [10]तत्कृतत्वात्,तस्य चान्यथा[11] तेन[12] परिज्ञानात् । तत्कृतत्वेन तु तेन तत्परिज्ञाने सिद्धं तस्य[13] स्वतः प्रत्यक्षत्वम्,अन्यथा तत्कृतस्य तल्लक्षणत्वस्य तेन परिज्ञानायोगात् । न हि तदेवाजानतः शक्यं [14]तत्कृतत्वपरिज्ञानम् । अपरिज्ञातं[15](परिज्ञातं) तल्लक्षणत्वमेव [16]तेषां मा भूदिति चेत् ;कथमिदानी [17]योगाद्यङ्गत्वेन तेषां स्वर्गादिसुखादिभोगहेतुत्वम्, अतल्लक्षणानां[18] तदङ्गभावस्य कर्तुमशक्यत्वात् ? भोगहेतवश्चार्थाः परस्याप्यभिमताः । तत एवाह–**'भोगजन्मानः'** इति । भोगस्य स्वर्गसुखादेर्जन्म येभ्यस्ते **भोगजन्मानोऽर्था** इति । ततोऽश्वयम्भाविनि तेषां तल्लक्षणत्वे तत्परिज्ञाने च तदन्यथानुपपत्तिबलादेव स्वतः प्रत्यक्षमर्थज्ञानमभ्युपगन्तव्यम् । अतश्च तत्तथाऽभ्युपगन्तव्यम्–**न**, यतः **अन्यथा** तथा तदभ्युपगमाभावप्रकारेण **धियो**[19] बुद्धयः । बुद्धय एव कीदृश्यः ? **प्रत्यक्षलक्षणाः** । प्रत्यक्षस्य लक्षणं सत्सम्प्रयोगजत्वं तद्विद्यते आसामिति तल्लक्षणाः, मत्वर्थीयाकारप्रत्यये सति एवंरूपत्वात्, प्रत्यक्षबुद्धय इति यावत् । कुतस्ता न भवन्तीति चेत् ? प्रमाणाभावात् । यद्यपि न प्रत्यक्षं तत्र प्रमाण[मनुमान]मस्त्येवेति चेत् ; न ; तस्य **'विषयेन्द्रिय'**इत्यादिना[20] निषेधात् । मा भूवन् तर्हि तद्धिय इति चेत् ; न ; तासामर्थपरिच्छेदरूपं भोगं प्रति हेतुत्वविरोधात्, असतीनां गगनकुसुमस्रजामिव तदयोगात्, तद्धेतवश्च ताः । तदाह–**'भोगजन्मानः'** इति । व्याख्यातमेतत् ।

---

१ प्रत्यक्षलक्षणत्वम् । २ नीलधवलादीनाम् । ३ प्रत्यक्षलक्षणत्वस्य । ४ प्रत्यक्षलक्षणत्वात् । ५ ज्ञानधर्मत्वे । ६ ज्ञानधर्मेण प्रत्यक्षलक्षणत्वेनापि अर्थस्य अपरप्रत्यक्षलक्षणत्वकरणादिति चेत् ; । ७ अपरप्रत्यक्षलक्षणत्वेनापि । ८ तत्परमार्थज्ञा–आ०,ब०,प०,स० । ९ प्रत्यक्षलक्षणत्वपरिज्ञानम् । १० अर्थज्ञानेनापि । ११ अर्थाकृतत्वेन । १२ अर्थकृतत्वात् । १३ अतत्कृतत्वेन रूपेण । १४ अर्थज्ञानेन । १५ अर्थस्य । १६ तत्कृतपरि–आ०,ब०, प०, स० । १७ अपरिज्ञानं त–आ०, ब०, प०, स० । १८ अर्थानाम् । १९ योगाद्य–आ०, ब०, प०,स० । २० प्रत्यक्षलक्षणत्वशून्यानाम् । २१ –यो बुद्धय एव ता० । २२ न्यायवि० श्लो० १६ ।

तस्मादवश्यम्भाविन्यर्थपरिच्छेदे सत्य एव तद्युद्धयो वक्तव्याः। तत्र च स्वानुभवप्रत्यक्षमेव प्रमाणम् अनुमानस्यापि तन्मात्रतीयकत्वात्। वक्ष्यति चैवम् 'तावत्' इत्यादिना[1]। ततः स्वात्मनि तत्प्रत्यक्षबुद्धेरा एव प्रत्यक्षधियो वक्तव्याः। **इति** एवम् एते अनन्तरोक्ता **विकल्पाः** भेदाः सुखाद्यो नीलादयश्च बुद्धयश्च ज्ञानस्याप्रत्यक्षत्वे प्रत्यक्षलक्षणा न भवन्तीति विपर्याय **विनिपातिताः** निराकृताः 'परोक्ष' इत्यादिकारिकार्धेन[2], तेनाप्यस्यैवार्थस्याभिधानात्। ५ सङ्क्षेपेन तदर्थस्यैवार्थं सङ्ग्रह इति दर्शयति।

यत्पुनरेतत्—मा भूत् सुखादीनां प्रत्यक्षत्वमिति। तत्राह—

सुखदुःखादिसंवित्तेरवित्तेर्न हर्षादयः ॥ १४ ॥ इति।

सुखदुःखादीनां संवित्ते[3] परोक्षत्वेन यदि **अवित्तिः** तदा तेषामपि[4] तदनर्थान्तरत्वात्, तदनर्थान्तरत्वेऽप्यर्थभेदनोक्तन्यायेनाप्रतिपत्तिरेवेति कथं तेभ्यो **हर्षादयः** कस्यचित्, १० अतिप्रसङ्गात्? हर्षादय इति संयोगपरस्येऽपि न पञ्चम्यर्थं लघुत्वहानिः, क्वचिच्छन्दोविचित्रिवेदिनां तद्व्यवहारात्। "कोपनिपण्यस्य प्रकृतिपलिनस्य"[ ]इतिवत्। प्रत्यक्षेण तेषामभेदेनेऽप्यनुमानेन भेदनात्तेभ्यो हर्षादय इति चेत्, न, तस्यैवासम्भवात् लिङ्गाभावात्। सुखादीनां परिच्छेद एव लिङ्गमिति चेत्, न, तद्बुद्ध्यसिद्धौ तदसिद्धत्वस्योक्तत्वात्।

अभ्युपगम्याप्याह—

१५

आनुमानिकभोगस्याप्यन्यभोगाविशेषतः[5] । इति।

अनुमानेन यो गृह्यते भोगः सुखादानुभवस्तस्य **अविशेषेण** तदभ्युपगमं दर्शयति, पुरुषान्तरभोगाविशेषात्, न ततो हर्षादय इति। तथा हि—न विवक्षितो भोगो हर्षादिहेतुः आनुमानिकत्वात् आत्मान्तरभोगवत्। पुत्रादिभोगेन व्यभिचारः साधनस्य तस्यानुमानिकत्वेऽपि पित्रादेर्हर्षादिकारणत्वादिति चेत्, न, असिद्धत्वात्। न हि तैस्य तद्भोगानुमानादेव हर्षादयः, ६० अपि तु तदनुमाने सति स्नेहपरवशस्य स्वयमेव स्वानुभवसंवेद्यभोगरूपेण परिणामात्, अन्यथा वैरीमूर्धपुत्रादिभोगानुमानादपि तैस्य[6] तदभावात्। ततो न सुखादिबुद्धेरप्रत्यक्षत्वं स्याय्यम्।

इतश्च न तस्याय्यमित्याह—

तावत्परत्र "शक्योऽयमनुमातुं कथ थियम् ॥ १५ ॥
यावदात्मनि तथेष्टासम्बन्धं न प्रपद्यते[7]। इति।

परोक्षज्ञानवादिनोऽपि[8] मीमांसकस्य परबोधप्रतिपत्तिरप्रत्यक्षत्वस्य[9] प्रत्यक्षबाधितोपदेशादेरन्यथानुपपत्तेः। न च परबोधस्य प्रत्यक्षतो वित्तिः, [10]अनिन्द्रियसम्प्रयोगात्। अनुमानतस्तद्वित्तिस्तु लिङ्गतत्सम्बन्धपरिज्ञानसम्बन्धेक्षा। न चात्मस्थे बोधे तत्सम्बन्धो लिङ्गस्य

---

१ स्वात्मनि—ख्या० १५। २ —शेष एव आ०, ब०, प०, स०। ३— धार्य लिख—आ०, ब०, प०, स०। ४ स्यात्मनि—ख्या० १५। ५ सुखदुःखादीनामपि। ६ तस्यात्मनश्च इत्यस्य। ७ विवादैः। ८ —सुखादि—आ०, ब०, प०, स०। ९ विवादैः। १० इत्यादि। ११ प्रत्यक्षेऽपम् आ०, प०, ब०, स०। १२ —मी मी—आ०, ब०, प०, स०। १३ —क्य तत्र च परि—आ०, ब०, प०, स०। १४ इन्द्रियसम्प्रयोगाभावात्।

शक्यपरिज्ञानः, ततो यावत् असौ आत्मनि प्रत्यक्षत एव बोधपूर्वत्वं व्याहारादेर्न प्रतिपद्येत न तावत्पुरुषान्तरबोधमनुमातुमर्हतीति कथमस्य परार्थं किमपि चेष्टितमिष्टं भवेत्? आत्मन्यपि बोधमनुमिमान एव तत्पूर्वकत्वं व्याहारादेरवगच्छतीति चेत्; तदनुमानं यदि तस्मादेव लिङ्गात्; तदा 'ततः सम्बन्धपरिज्ञानम्, परिज्ञातसम्बन्धाच्च लिङ्गात्तत्' इति सुव्यक्तमुभयथा प्रकल्पितनिबन्धनमन्योन्याश्रयणम्। अन्यत एव लिङ्गात्तदिति चेत्; न; तत्सम्बन्धस्यान्यतोऽनुमानादवगमः, तदपि लिङ्गात्, तत्सम्बन्धस्यापि तदनुमानादवगम इत्यनवस्थादोषात्। तन्नात्मनि बोधज्ञानमनुमानात्, लिङ्गाभावाच्च। तदाह—

विषयेन्द्रियविज्ञानमनस्कारादिलक्षणः ॥ १६ ॥
अहेतुरात्मसंवित्तेरसिद्धेर्व्यभिचारतः। इति।

आत्मनि बोधानुमाने हि विषयेन्द्रियादीनामन्यतमस्यैव लिङ्गत्वं सम्बन्धसम्भवात्, नापरस्य विपर्ययात्। तत्र न तावद्विषयेन्द्रियान्तःकरणानां लिङ्गत्वम्; तेषां बोधं प्रति हेतुत्वेन व्यभिचारसम्भवात्। अप्रतिबद्धशक्तित्वेनाव्यभिचार एवेति चेत्; न; कार्यादर्शने तस्यैवापरिज्ञानात्। विद्युदादिचरमक्षणस्य तददर्शनेऽपि तत्परिज्ञानमिति चेत्; सत्यम्; सजातीयकार्यापेक्षया तत्सत्त्वादेव तत्परिज्ञानं तस्य [10]ना(तन्ना)न्तरीयकत्वात्, [11]अन्यथा तत्सन्तानस्यैव अवस्तुत्वापत्तेरित्युत्तरत्र विस्तरविधानात्। न चैवं विजातीयकार्यापेक्षयापि ततस्तत्परिज्ञानं बहुलं [12]तदभावेऽपि भावसत्त्वस्योपलम्भात्। विजातीयश्च कार्यं विषयादीनां बोधस्तत्कथं तत्र [13] [14]तेषामप्रतिहतशक्तिकत्वमिति सम्भवव्यभिचारत्वान्न लिङ्गत्वम्। असिद्धत्वाच्च। असिद्धा हि विषयादयः परोक्षज्ञानवादिनाम्, तदपरिज्ञानस्य निवेदितत्वात्।

एतेन विज्ञानस्यापि तत्रालिङ्गत्वमुक्तम्; स्वत एव परोक्षज्ञानवादिनां [15]तदसिद्धत्वस्य सुप्रसिद्धत्वात्। किं पुनरिदं विज्ञानं नाम? स एव साध्यो बोध इति चेत्; न; तत्र लिङ्गत्वसम्भावनस्याप्यसम्भवात्। न हि साध्यमेव कश्चिदनुन्मत्तो लिङ्गं सम्भावयति अनित्यत्ववत्। सति तत्सम्भावने तत्र दूषणवचनम्, अन्यथाऽतिप्रसङ्गात्। अर्थापत्तिरनुमानं वा विज्ञानमिति चेत्; न; तद्द्वयस्यापि [16]तद्विषयत्वे [17]तत्रापि [18]तत्सम्भावनाऽभावात्, [19]प्रत्यक्षेऽपि प्रसङ्गात् न कश्चित्प्रत्यक्षवेद्यो भावः [20]स्यात्। अतद्विषयत्वे [21] तदुद्भवानुमाने तत्सम्भावनप्रसङ्गः [22] तथा तत्प्रभवानुमानेऽपीति न कचिद्व्यवस्थितिर्यतोऽनुमानवेद्यो बोधो भवेत्। ततो दूरमनुसृत्यापि यदि तस्य स्वतस्तद्विषयत्वान्न [23]तत्सम्भावना, आद्यस्यापि न स्यादविशेषात्, इति नार्थापत्त्या-

---

१ लिङ्गादिति आ०, ब०, प०, म०। २ –म्यान्य–आ०, ब०, प०, स०। ३ –गमनं त–आ०, ब०, प०, स०। ४ –क्तिकेनाव्य–आ०, ब०, प०, स०। ५ अप्रतिबद्धशक्तिकत्वस्यैव। ६ कार्यादर्शनेऽपि। ७ कार्यसत्त्वादेव। ८ अप्रतिबद्धशक्तिकत्वपरिज्ञानम्। ९ कार्यस्य। १० अप्रतिबद्धशक्तिकत्वाविनाभावित्वात्। ११ चरमक्षणस्य कार्यकर्तृत्वाभावे। १२ विजातीयकार्याभावेऽपि। १३ बोधे। १४ विषयादीनाम्। १५ विज्ञानासिद्धत्वस्य। १६ स्वसंवेदनविषयत्वे। १७ साध्यात्मकबोधेऽपि। १८ लिङ्गत्वसम्भावनाऽभावात्। अर्थापत्त्यनुमानयोरपि बोधस्यापि ज्ञानत्वेन स्वरूपविषयत्वादिति भावः। १९ स्वरूपविषयत्वेन प्रत्यक्षत्वेऽपि लिङ्गसम्भावनायाम्, सर्वत्र प्रत्यक्षविषयीभूतेऽर्थे। २० सर्व एव अनुमेयः स्यादिति भावः। २१ स्वसंवेदनविषयत्वे। २२ यतः तस्य स्वरूपाविषयत्वात्। २३ लिङ्गसम्भावना।

दिकमपि विज्ञानम् । साध्यज्ञानानुत्तरज्ञानस्येव तस्योपपत्तेः तत्र सम्बन्धसम्भवेन तत्सम्भावनस्य सम्भवात् । आदिशब्देन अनुत्पन्नपरिग्रहः । अनुत्पन्नं परिच्छिन्नो विषयः, तत्परिच्छेदो[1] वा स्यात् ? । सोऽपि आत्मसंवित्तेः मीमांसकज्ञानस्य अहेतुः भगमकः इत्याह–

असिद्धसिद्धि(द्धे)रप्यर्थं. सिद्धश्चेदखिलं जगत् ॥ १७ ॥

सिद्धम् [तत्किमतो ज्ञेयं सैव किन्नानुपाधिका ।] इति । ५

परिच्छिन्नस्य विषयस्य तत्परिच्छेदस्य वा नापरिज्ञातत्वेन तद्धेतुत्वम्, अतिप्रसङ्गात् । न चापरिज्ञातहानस्तद्विषयः तत्परिच्छेदो वा 'परिज्ञातं' इत्युपपन्नम् , 'अखिलं जगत्परिज्ञातम्' इत्यप्युपपत्तेः । परिज्ञायत एव स्वतो मुख्यतोऽर्थविशेषणत्वेन वा तत्परिच्छेद इति चेत्, सोऽपि यदि ज्ञानधर्मः, तत्राह–'तत्किमतो ज्ञेयम्' इति । तस्य अर्थज्ञानम् अतः परिच्छेदात् किम् नैव ज्ञेयम् अनुमातव्यम् , परिच्छेदपरिज्ञानादेव तदनर्थान्तरत्वेन ज्ञानस्यापि १०
स्वत एव परिज्ञातत्वादिति भावः । भवतु वार्थस्यैव धर्म इति चेत्, आह–सैव किन्नानुपाधिका ? सैव परिच्छित्तिरेव सिद्धिशब्दवाच्या किं न भवत्येव अनुपाधिका विषयज्ञानविशेषणशून्या ? परिच्छित्तेः स्वत प्रत्यक्षायाः अन्यतिरेकेणार्थस्यापि तत एव प्रत्यक्षत्वात् विरुद्धमेव ज्ञानम् , अतो विरुद्धो हेतुः, ज्ञानसाधनाय प्रयुक्तेन तदभावस्यैव साधनादिति १५
तात्पर्यम् । तदयं 'परोक्षज्ञान' इत्यादेः संग्रहः ।

तदेव दूषणमन्यत्राप्यतिदिशन्नाह–

एतेन येऽपि मन्येरन्प्रत्यक्षं धियोऽपरम् ॥ १८ ॥
संवेदनं न तेभ्योऽपि प्रायशो दत्तमुत्तरम् । इति ।

एतेन परोक्षेत्यादिना मीमांसकदूषणेन तेभ्योऽपि नाऽदत्तं किन्तु दत्तमेवोत्तरम् । कथम् ? प्रायशो बाहुल्येन, परम्पाप्युत्तरस्य वक्ष्यमाणत्वात् । सर्वात्मना तदाने तैवनुपपत्तेः । २०
तेभ्यो येऽपि साङ्ख्या मन्येरन् । किम् ? संवेदनम् चैतन्यम् । कीदृशम् ? अप्रत्यक्षम् प्रत्यक्षस्य प्रमाणविशेषस्यात्मा, प्रामाण्यस्य च चित्तधर्मत्वात्, चित्ताच्च संवेदनस्य भिन्नत्वेन प्रत्यक्षत्वानुपपत्तेः । अत एवाह–धियो व्यवसायात्मिकाया बुद्धेः अपरं भिन्नमिति । तात्पर्यमत्र परोक्षसंवेदनेन यदि बुद्धिप्रतिविम्बितवार्थानुभवन विषयानुभवनमेव किन्न स्यात् यतो न मीमांसकमतम् ? आक्षेपसमाधानयोरुभयत्रापि समानत्वादिति । एते सङ्ग्रहश्लोकाः । २५

नैयायिकस्ताह–अर्थप्रकाशनमेव ज्ञान नात्मप्रकाशनं तत्सिद्धानुपायाभावात् । अर्थप्रकाशनमेव तेनोपायः तस्यं तैवन्तरेणानुपपत्तेः । अत एव कस्यचिद्वचनम्–"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति ।" [ ] इति । इति चेत्, केयमर्थदृष्टेः प्रसिद्धिः– किमुत्पत्तिः, आहोस्विदुपलब्धिः ? कथोपलम्भोऽपि यस्याप्रत्यक्षत्वे सत्यर्थदृष्टिर्न प्रसिद्ध्यति–किं

---

१ विज्ञातोपपत्तेः । २ विषयपरिच्छेदः । ३ 'अवश्य' इति क्वचनानुपपत्तेः । ४ 'अन्यथानुपपन्नत्वम्' इत्यारभ्य 'एतेन येऽपि' इत्यन्तग्रन्थो संग्रहश्लोका, 'परोक्षज्ञानविषय' इत्यादिरूपः अर्थस्य एमिः संग्रहात् । ५ आत्मप्रकाशने । ६ अप्रकाशनत्व । ७ आत्मप्रकाशं विना । ८–ब्धीति सैव आ०, ब०, प०, स० ।

सैवार्थदृष्टिः, उत तज्जनकं ज्ञानमिति ? तत्र यद्यभिमतिः सैवार्थदृष्टिरुपलम्भः, तस्याप्रत्यक्षत्वे सत्युत्पत्तिर्न सम्भवतीति; तदयुक्तम्; उत्पादे सति पश्चादर्थदृष्टेः प्रत्यक्षत्वं युक्तं न पूर्वमेव, अन्यथा अतिप्रङ्गात्। अथ अर्थदृष्टिजनकं ज्ञानमुपलम्भः, तस्याप्रत्यक्षत्वेऽर्थदृष्टिर्नोत्पद्यते इति; तदयुक्तम्; चक्षुरादिवदप्रत्यक्षस्याप्युत्पादकत्वसम्भवात्, तीव्रस्पर्शादिना सुषुप्तप्रबोधे पूर्वज्ञानासंवेदनात्। अथार्थदृष्टेः प्रसिद्धिरुपलब्धिः; तदाप्ययं स्याद्वाक्यार्थो भवति—अप्रत्यक्षोपलम्भस्य नार्थोपलम्भः प्रत्यक्ष इति। न चानेन किञ्चित्साधितं—भवति। अथ दृश्यत इति दृष्टिः अर्थ एव, ततश्चाप्रत्यक्षोपलम्भास्यार्थोऽपि प्रत्यक्षो न भवतीत्यं वाक्यार्थः; न; उपलम्भादर्थान्तरत्वात्। न चैकस्याप्रत्यक्षत्वेन अन्यस्याप्यप्रत्यक्षत्वम्; अतिप्रसङ्गात्। अथोपलम्भस्याप्रत्यक्षत्वे सति अर्थो दृष्ट इत्येवम्प्रतीतिर्न भवतीत्यभिमतमेतदस्माकम्, नागृहीतं विशेषणं विशिष्टप्रतीतौ निमित्तम्। न च सर्वत्र दर्शनविशिष्ट एवार्थो गृह्यते। न हि 'शुक्लो गच्छति गौः' इत्यत्र गोदर्शनमनुभूयते, अपि तु गुणक्रियाविशिष्टो गौरेवानुभूयते। ततो नार्थदर्शनस्य स्वसंवेदनसिद्धावुपायत्वम्, अन्यथानुपपत्तिवैधुर्यादिति। तदेतत् व्यामोहविजृम्भितं भासर्वज्ञस्य; स्वप्रकाशनाभावे ज्ञानस्य विषयनियमानुपपत्तेः 'नार्थदृष्टिः' इति निवेदनात्। न ह्यस्वप्रकाशस्य तस्य 'अयमेव विषयो नान्यः' इति शक्योपपादनम्। तत्कारणस्य विषयप्रतिनियमात् तस्यापि तन्नियमः, प्रतिनियतविषयं हि तत्कारणम् इन्द्रियसन्निकर्षादिकम्, अतस्तदुपजनितं ज्ञानमपि प्रतिनियतविषयमेवेति चेत्; कुतः कारणस्य तन्नियमः ? ज्ञानस्य तन्नियमादिति चेत्; न; परस्पराश्रयस्य सुव्यक्तत्वात्। कारणस्य तज्ज्ञानादेव नियम इति चेत्; न; तस्याप्यस्वप्रकाशस्य तन्नियम एव विषयो नातन्नियम इत्यशक्योपपादत्वात्। तत्कारणस्य तद्विषयनियमात्तस्यापि तन्नियम इति चेत्; न; 'कुतः कारणस्य तन्नियमः' इत्याद्यनुबन्धादनवस्थाप्रसङ्गाच्च। ततो नाऽनात्मवेदनस्य ज्ञानस्य विषयप्रतिनियमो विवक्षितवदन्यत्रापि तस्य प्रवृत्तिसम्भवात्। तदेवाह—

विमुखज्ञानसंवेदो विरुद्धो व्यक्तिरन्यतः ॥१९॥ इति

मुखं स्वसंवेदनम् अर्थप्रकाशस्य विषयनियमे तस्यैवोपायत्वेनाधुनैव निवेदनात्, तस्याभावो **विमुखम्**—अर्थाभावेऽव्ययीभावविधानात्, तज्जानन्तीति **विमुखज्ञाः**, नैयायिकानां सम्बोधनमेतत्। **न संवेदः** समीचीनं वेदनं संवेदो न सम्भवति युष्माकम्। 'वः' इत्यस्य वक्ष्यमाणस्य सिंहावलोकिते सम्बन्धात्। कीदृशः संवेदो न सम्भवति ? **विरुद्धः** विषयप्रतिनियमेन स्वीकृतः। कुत इति चेत् ? **व्यक्तिरन्यतः** विवक्षितार्थवदन्यत्रापि तत्संवेदनरूपा व्यक्तिः सम्भवति यत इत्यर्थः। तात्पर्यमत्र—

---

१ तज्जन्मकमिति सैव आ०,ब०,प०,स०। २—प्रबोधपूर्व—आ०, ब०, प०, स०। ३—नादयथार्थ—आ०, ब०,प०,स०। ४ —म्प्रत्य— आ०,ब०,प०,स०। ५ —दृश्य— ता०। ६ —स्य प्रका— आ०, ब०, प०, स०। ७ विषयप्रतिनियमः। ८ सति कारणस्य विषयप्रतिनियमे ज्ञानस्य तन्नियमः, तस्मिंश्च कारणस्य विषयप्रतिनियम इति। ९ कारणज्ञानादेव। १० विषयप्रतिनियमः।

ज्ञानस्यानात्मयेदित्वे तस्यार्थं विषयो घटः ।
इति स्वेच्छानियतोऽयमर्थोऽस्मा नोपपत्तिमान् ॥६०४॥
स्वेच्छानियताः सर्वेऽपि तस्यैव विषया न किम् ? ।
यतो विषयिताद्यर्थादन्यत्रापि न तद्गतिः ॥६०५॥
स्यान्मतं घटविज्ञानं यदि सर्वत्र वर्त्तते । ५
सर्वत्र व्यवहारोऽयं भवेदानयनादिकम् ॥६०६॥
न चैवं नियतार्थस्य व्यवहारस्य दर्शनात् ।
ततोऽपि[1] नियतार्थस्यं ज्ञानस्यानात्मयेदिनः ॥६०७॥
इति तस्येदमूमित्याद्यवहारस्य देहिनाम् ।
बहूनां दर्शनेऽप्यर्थे क्वचिदिष्टे तदीक्षणात् ॥६०८॥ १०
नियतार्थनिबद्धस्य व्यवहारः कुतो गतः ? ।
तदृष्टेऽपि चेन्न तत्रापि पोद्यमस्य प्रवर्त्तनात् ॥६०९॥
अस्वप्रकाशासदृष्टेरपि तस्याः कथ भवान् ।
[2]विषये व्यवहारोऽयं नान्य इत्यपि कल्पयेत् ॥६१०॥
अन्यतस्तन्नियमाच्चेन्नान्येषमनवस्थितिः । १५
सर्वस्यापि प्रसङ्गस्य प्राच्यस्याप्रोपबृंहणात् ॥६११॥
तदस्वसंविदो मुद्गैर्न्यानां नियमास्थितेः ।
व्यवहारः कथंचिस्सिद्धस्तदन्यत्रापि सिद्ध्यति ॥६१२॥

तदेवाह—

असञ्चारो न यः [स्थानमविशेष्यविशेषणम् ।] इति । २०

'अन्यतः' इत्यनुवर्त्तते । विवक्षितादन्यत्रापि विषये समीचीनं चरणं सञ्चारः संव्यवहारः तदभावः असञ्चारः स न यः इति पूर्ववत् । तत्र व्यवहारनियमादपि ज्ञानस्य विषयनियमः तस्यैवासिद्धेः ।

तदेवं सर्वविज्ञानसर्वार्थत्वे प्रसज्यते ।
स्याद्वः सर्वंकिञ्चिन्यश्चाविभागविकल्प स्थिति ॥६१३॥ २५

तदाह—'स्थानमविशेष्यविशेषणम्' इति । विशेष्याश्च सर्वेज्ञाः सकलवेदनजनणविशेषेणाधारत्वात् विशेषणाश्च किञ्चिन्मात्राः तदभावात्, विशेष्यविशेषणा न विद्यन्ते यस्मिंस्तद् अविशेष्यविशेषण स्थानम् ।

स्यान्मतम्—न कारणनियमाच्चापि कार्यनियमात् दर्शनस्य नियतविषयाभिमुख्यं येनैवं स्यात्, अपि तु अनुभवादेव । सर्वविषयत्वे हि 'सर्वं दृष्टम्' इत्यनुभवः स्यात् । न चैवम्, ३०

---

१ –पि न तथार्थत्वं आ०, ब०, प०, स० । २ विषयस्य– आ०, ब०, प०, स० । ३ –दभावात् आ०, ब०, प० । –दभावत्वात् स० ।

'घटो दृष्टः पटो दृष्टः' इति विषयनियमेनैव तस्यानुभवात्। योगिदर्शनस्य तु सर्वार्थत्वमुपपन्नमेव, सर्वत्रापि दृष्टत्वेनैव तदनुभवोद्भवात्, तत्कथमविशेष्यविशेषणं नैयायिकानामवस्थानम् अनुभववलादेव सकलेतरविषयसंवेदनभेदव्यवस्थितौ सर्वज्ञकिञ्चिज्ज्ञविभागोपपत्तेः सविशेष्यविशेषणस्यैव तदवस्थानस्य सम्भवादिति ? तत्रोच्यते—कोऽयमनुभवो येन दर्शनस्य तदाभिमुख्यम् ? तदेव दर्शनमिति चेत्; स्वतस्तर्हि तस्य तदाभिमुख्यमवगन्तव्यम्। तथा चेत्; न; स्वसंवेदनप्रत्युज्जीवनेन तदभावप्रतिज्ञाविरोधात्। तदेवाह—**'विमुखज्ञानसंवेदो विरुद्धः'** इति। विमुखं च तत् विषयान्तरनिर्मुखत्वात्, ज्ञानञ्च घटादिदर्शनं **विमुखज्ञानं** तस्य यः स्वत एव **संवेदः** अन्यतः संवेदनस्य वक्ष्यमाणोत्तरत्वात्। स **विरुद्धो** विरोधवान् स्वप्रकाशविकलसकलज्ञानप्रतिज्ञयेति यावत्।

भवतु तर्हि तदन्यदेव ज्ञानं तदनुभव इति। तदेवाह—**'व्यक्तिरन्यतः'** इति। दर्शनस्य यत्तदाभिमुख्यं तस्य **अन्यतः** दर्शनविषयादेव ज्ञानात् **व्यक्तिः** प्राकट्यमिति। अत्रेदमाह—**'असञ्चारः'** इति। समीचीनश्चारो ज्ञानं तदाभिमुख्यस्य तद्भावः **असञ्चारः** तदन्यतोऽपि तस्य न सम्यक् परिज्ञानमित्यर्थः। तथा हि—तस्याप्याभिमुख्यं 'नियताभिमुख एव दर्शने न सर्वाभिमुखे' इति कुतः परिज्ञानं येनैवमुच्यते नियताभिमुखमेव दर्शनं दृष्टमित्यनुभवात्, अन्यथा च तदभावादिति चेत् ? न; तत्रापि 'कोऽयमनुभवः' इत्यादि प्रबन्धस्यानुबन्धादनवस्थानदोषानुपलम्भनात्। तदेवाह—**'अनवस्थानम्'** इति।

अवस्थानमदृष्टशक्तेः, ईश्वरानुग्रहात्, अन्यतो वा भवतीति चेत्; यस्य तर्हि ज्ञानस्य स्वतः परतश्च न परिज्ञानं तद्व्यापारस्येत्थम्भावेनानिरूपणात् न तद्विषयस्य ज्ञानस्येत्थम्भावनिर्णयः तदभावे च तद्विषयस्य, इति तावद्वक्तव्यं यावदर्थदर्शनस्य नियताभिमुख्यं निर्णयदूरं भवति। ततो न तदाभिमुख्यं विशेषणं तद्दर्शनञ्च विशेष्यमित्युपपन्नम्। एतदाह—**अविशेष्यविशेषणम्।** विशेष्यविशेषणयोरुक्तरूपयोरभाव एव स्यादित्यर्थः। ततोऽनुभववलमपि दर्शनस्य नियतविषयत्वे निबन्धनमिति कल्पनैव केवलमवशिष्यते तस्याश्च सर्वत्राविशेषात्सर्वाभिमुखमपि तत्प्राप्तम्। ततो यदुक्तं व्योमवता (?)—**"यस्मिन्नेव विषये ज्ञानमुत्पन्नं स एवोपलभ्यो नेतर इति विषयविषयिभावस्य नियामकत्वम्"** [प्रश० व्यो० पृ० ५२८] इति; तदत्यन्तबालभाषितम्; विषयविषयिभावस्यैवातिप्रसङ्गेन पर्यनुयुक्तत्वात्। न हि दोषेण पर्यनुयुक्तस्यैव तत्परिहारायोपदर्शनमुपपन्नम्, अन्यथा विप्रतिपत्त्या पर्यनुयुक्तस्य अनित्यत्वादेरेव तत्परिहारायोपदर्शनसम्भवात्तदर्थं कृतकत्वाद्युपदर्शनमुपपन्नं न भवेत्। न चैवं कस्यचिदिष्टाप्रसिद्धिः, विवादविषयमेवोपदर्श्य तत्परिहारस्य सम्भवे प्रयासरहितस्यैव स्वपक्षव्यवस्थापनस्य सम्भवात्। तदस्मादशक्यप्रतिषेधमेव दर्शनस्य सर्वविषयत्वम्।

अपि च, कस्यचित् तेन द्रष्टृत्वे परस्यापि स्यात् तदनात्मप्रकाशस्याविशेषात्। नायं

१—मनवस्था— आ०,ब०,प०,स०। २ तथाभि— आ०,ब०,प०,स०। ३ —लप्रतिज्ञानप्रति—आ०,ब०, प०,स०। ४ अनव—आ०,ब०,प०,स०। ५ कल्पः नैव आ०,ब०,प०,स०। ६ व्योममतौ आ०,ब०,प०,स०।

दोषः, सम्बन्धस्य नियामकत्वात्। अनात्मप्रकाशस्यापि यत्रैव तस्य सम्बन्धस्तस्यैव तद्विषय-दर्शनं भवति न परस्य। तथा च परस्य वचनम्-"यस्मिन्नात्मनि समवेतं ज्ञानमुपजातं स एव द्रष्टा नान्यः। तत्र विषक्तिज्ञानासमवायात्।" [प्रश० व्यो० पृ० ५२९] इति चेत्, न, समवायनियमस्य दुरवबोधत्वात्। तथाहि-कुत इदमवगन्तव्यम्-'क्वचिदेवात्मनि दर्शनस्य समवायो नान्यत्र' इति? तत एव दर्शनादिति चेत्, न, स्वसंवेदनप्रत्युज्जीवनात्। ५ तस्य च तदभावप्रतिक्षया विरोधात्। तदाह-'विप्रतिषेधज्ञानसंवेदो विरुद्धः' इति। व्याख्यानं पूर्ववत्। इत्यनिश्चयः-'विप्रतिपत्तेः पूर्वं विपर्यासान्तरं प्रति, अधुना तु आत्मान्तर-सम्बन्धं प्रति' इति।

भवतु तर्हि ज्ञानादन्यत एव तस्य तत्रियमोपगमः। तदाह-व्यक्तिरन्यतः तत्रिय-मस्येति। तत्राह-असंसारः असम्प्रतिपत्तिः तत्रियमस्य। कुतः? इत्याह-अनवस्थानं १० यत इति। तथाहि-यैवंपि ज्ञानं तदात्मन्येव समवेतं तद्विषयम् ['एकात्मसमवेतानन्तरज्ञान-वेद्यमर्थज्ञानम्" [ ] इत्यभ्युपगमात्। तस्यापि कुतस्त्रियमार्थोपगमः? तत एवेति चेत्, न, 'स्वसंवेदनप्रत्युज्जीवनात्' इत्याद्यनुपन्यासादनवस्थोपस्थानस्य अव्यक्तत्वात्। यैवंपस्थान-माकाङ्क्षाज्ञानिवृत्त्या नियम्यत इति चेत्, न तर्हि चरमस्य तत्रियमपरिज्ञानं तदभावाभ्रं 'तत्पू-र्वत्वेति [न] दर्शनस्य क्वचित्समवायनियमः स्वतोऽन्यतश्च तदपरिज्ञानादिति न तज्ज्ञानं १५ विशेष्यं नापि तस्य नियतात्मस्थसमवेतत्वं विशेषणमित्यायातम्। तदेवाह-अविशेष्यविशे-षणम्। विशेष्यविशेषणे व्याख्याते, तयोरभावः अविशेष्यविशेषणम् अर्थाभावेऽव्य-यीभावात्।

अपि च, अनात्मप्रकाशने ज्ञानस्य ज्ञानत्वमेव कथम्? कथं च न स्यात्? तत्प्रति-पत्त्युपायाभावात्। "तदेव तत्रोपाय इति चेत्, न, स्वसंवेदनप्रत्युज्जीवनेनं" तदभावप्रतिक्षावि- २० रोधात्। तदाह-'विप्रतिषेधज्ञानसंवेदो विरुद्धः' इति। व्याख्यातं विप्रतिपत्तं तस्य ज्ञानेन ज्ञानात्मना स्वतः संवेदो विरुद्धः पूर्ववत्।

व्यक्तिस्तर्हि तज्ज्ञानतस्य अन्यतस्तद्विषयाज्ञानानिति परः, तदाह-'असंस्कारः' इति। तात्पर्यमत्र यत्तदन्यज्ज्ञानं तत्प्रत्यक्षम्, अन्यद्वा भवेत्? प्रत्यक्षमपि यद्यर्थप्रकाशनं न भवति कथं तदभिमुखस्य ज्ञानस्य प्रकाशनं विषयाप्रकाशने तदाभिमुख्यासाध्यप्रकाशनत्वात्? २५ तत्प्रकाशने तद्विशिष्टतयैव ज्ञानस्याप्रकाशनम्, अतो मा भूत्तद्विषयं सविकल्पकं प्रत्यक्षं तस्य सविशेषणवस्तुप्रतिपत्तिरूपत्वेन विशेषणाप्रतिपत्ताबनुत्पत्तेः, निर्विकल्पकं तु तत्स्वरूपमात्रालो चनरूपं प्रत्यक्षं "तदप्रतिपत्तावपि भवत्येवेति चेत्, न, तदभिमुखतयैव तस्य ज्ञानत्वप्रतिल-

---

१ -विद्यता आ०, ब०, प०, स०। २ पूर्वापर- आ०, ब०, प०, स०। ३ -रज्ञानं प्रति आ०, ब०, प०, स०। ४ -मायगमः आ०, ब०, प०, स०। ५ तदपरिज्ञानं आ०, ब०, प०, स०। ६ एकार्थसंब-न्ध- ब०, प०, स०। ७ -मायगमः आ०, ब०, प०, स०। ८ अनवस्थोपस्थानम्। ९ समवायनियम। १० व्यवसायत्व। ११ ज्ञानमेव स्वसंवेदी इत्यर्थः। १२ -मर्थं तद्- ब०। १३ विशेषणप्रतिपत्तावपि।

म्भात्, "अर्थग्रहणं बुद्धिः" [न्यायभा० ३।३।४६] इत्यभ्युपगमात्। तदाभिमुख्यस्य चेदप्रतिपत्तिः किमविशिष्टं[1] तस्य रूपं यन्निर्विकल्पकेप्रत्यक्षवेद्यं भवेत् ? प्रकाशमात्रमिति चेत् : न; विषयविमुखस्य तस्यैवाभावात्। सत्यम्, तदभिमुखमेव तत्, केवलं तदाभिमुख्यं न गृह्यते, प्रकाशमात्रस्यैव ग्रहणादिति चेत् ; न ; प्रकाशात्तदाभिमुख्यस्याभेदे कथमग्रहणं प्रकाशस्यापि तत्प्रसङ्गात् ? गृहीतेतरस्वरूपतायाश्च विरोधात्। भेदे तु न प्रकाशस्य प्रकाशत्वम् अर्थाभिमुखत्वाभावात्, अतिप्रसङ्गात्। भिन्नेनापि तदाभिमुख्येन सम्बन्धात्तदभिमुखतयैव प्रकाश इति चेत् ; नैवम् ; स्वाभिमुखत्वस्यापि सम्भवात्, तत्सम्बन्धस्यापि तत्रोपपत्तेः। तत्प्रकाशमनात्मप्रकाशं ज्ञानम्। न च सविकल्पकस्य प्रत्यक्षस्य तत्राभावे निर्विकल्पकमपि सम्भवति तँस्यैव तँत्र प्रमाणत्वात्। तथा च [3]व्योमवता उक्तम्–"**अथास्त्वेवं निर्विकल्पकज्ञानस्योत्पत्तिः, सद्भावे तु किं प्रमाणम् ? सविकल्पकज्ञानोत्पत्तिरेव**" [प्रश० व्यो० पृ० ५५७] इति[6]। ततः सत्यपि निर्विकल्पके सविकल्पकमङ्गीकर्त्तव्यम्, अन्यथा तदसिद्धेः। तस्य च[7] न विषये सञ्चारो न प्रवृत्तिस्तत्कथं तेन तदर्थज्ञानस्य प्रकाशनम् ? तत्रासञ्चार एव तस्य कस्मादिति चेत् ? अतत्सन्निकर्षजत्वात्, अर्थसन्निकर्षजं हि ज्ञानमर्थे सञ्चारवन्नापरम्। न च द्वितीयज्ञानं तत्सन्निकर्षजम्, अर्थज्ञानसन्निकर्षादेव संयुक्तसमवायलक्षणात्तदुत्पत्तेः। अतत्सन्निकर्षजस्यापि तत्र सञ्चारे कथमयमेवास्य विषयो नापर इति व्यवस्था ? तदाह–**अनवस्थानम्** विषयस्येति यावत्। तन्न प्रत्यक्षादर्थज्ञानस्य ज्ञानत्वप्रतिपत्तिः।

भवतु तदन्यत एव तत्प्रतिपत्तिर्द्वितीयस्यैव विकल्पस्योपादानादिति चेत् ; न; किं तदन्यत् ? उपमानमिति चेत् ; न; तस्योपलभ्य एव विषये वाच्यत्वोपाधिकत्वेन प्रवृत्तेः, अर्थज्ञानस्य चानुपलभ्यत्वप्रतिपादनात्। आगम इति चेत् ; न; तस्मादप्यपरिज्ञातात्तदप्रतिपत्तेः। परिज्ञातादेव भवत्विति चेत् ;

[10]तज्ज्ञानस्यापि [11]तज्ज्ञत्वं वेद्यं चेदागमान्तरात्।
तत्राप्येवं प्रसङ्गः स्यात्तथा सत्यनवस्थितिः ॥६१४॥
अनुमानं तु नास्त्येव तज्ज्ञानत्वावबोधनम्।
प्रत्यक्षपूर्वकत्वेन [12]तदभावे तदत्ययात् ॥६१५॥
न चास्ति पञ्चमं मानं न्यायतत्त्वविदां मते।
अर्थबोधस्य बोधत्वं यतः स्यादुपपत्तिमत् ॥६१६॥

ततः किम् ? इत्याह–**अविशेष्यविशेषणम्** ज्ञानं विशेष्यं तस्य विशेषणमर्थस-

---

१ "अर्थाभिमुख्यविशेषणरहितम्" –ता० टि०। २ –कं प्र–आ०, ब०,प०,स०। ३ सविकल्पस्यैव। ४ निर्विकल्पके। ५ व्योमवतावुक्तं स०। व्योममतैरुक्तं प०। व्योममतारुक्तं आ०, ब०। ६ "अन्यथा हि विशिष्टार्थानुपलब्धौ विशिष्टस्य सङ्केतस्मरणस्यानुपपत्तेः सविकल्पकं ज्ञानं न स्यात्, तस्य तत्कार्यत्वात्" –प्रश० व्यो० पृ० ५५७। ७ च वि– आ०, ब०, प०, स०। ८ –यं ज्ञा– आ०, ब०, प०, स०। ९ मनःसंयुक्ते आत्मनि अर्थज्ञानस्य समवेतत्वात्। १० आगमज्ञानस्यापि। ११ अर्थज्ञानज्ञत्वम्। तज्ज्ञत्वं आ०, ब०, स०। तज्ज्ञन्यत्वं प०। १२ प्रत्यक्षाभावे।

स्यन्धित्वं तदुभय न भवेत् अनुपायस्त्वेनाप्रतिपत्तिविषयत्वादिति । ततो यदुक्तं मासर्वज्ञेन– "स्वात्मावबोधकत्वाभावे कथमसौ बोधस्वभाव इति चेत्, इति पूर्वपक्षयित्वा समाधानम्– स्वात्मदाहकत्वाभावेऽपि यथाग्निर्दहनस्वभाव' स्वात्मदायकत्वाभावेऽपि यथा दात्रादिकं दात्रादिस्वभावम्।" [ ] इति, तत्प्रतिविहितम्, दृष्टान्तमात्रास्याध्यसिद्धौ सर्वत्र हेतुवैकल्यात् अतिप्रसङ्गाच्च । न तन्मात्रादेव तस्याधनमपि तूपपत्तिमत्तया च, उपपत्तिश्च यथाप्रतिपन्नत्वम् । तदयमर्थः–अनात्मवेदनेऽपि ज्ञानं ज्ञानमेव यथाप्रतिपन्नत्वात् अनात्मदहनेऽपि वह्निवत्, इत्यपि न साध्यम्, असिद्धत्वाद्धेतोः, तथाप्रतिपन्नत्वस्य प्रतिषिद्धत्वात् ।

यँदप्यन्यदुक्तं ठेनैव–"तदप्रसिद्धौ विषयस्याप्यप्रसिद्धिरिति चेत्, इति पूर्वपक्षयित्वा समाधानम्–किं कारणम्? न हि तदुपलम्भः स्वविषयं लिङ्गयत्साधयति येन तदप्रसिद्धौ विषयस्याप्यप्रसिद्धिः स्यात्। किं तर्हि? तद्गृहीतिरूपतयोत्पादमात्रेण तं विषयं व्यवहारयोग्यं करोति तदप्रसिद्धावपि विषयः प्रसिद्ध एवेत्युच्यते" [ ] इति, तदप्यसम्बद्धम्, तद्गृहीतिरूपतयोत्पादस्यैव दुष्परिज्ञानत्वेन प्रतिक्षिप्तत्वात् । ततो ज्ञानस्य विषयनियमं नियतप्रमातृसमवायमर्थप्रकाशरूपत्वञ्च प्रतिपद्युमिच्छता स्वप्रकाशरूपं तदभ्युपगन्तव्यम्, अन्यथा तदसम्भवादुक्तवत् । स्वप्रकाशे तु ज्ञाने सम्भवति तत्प्रतिपत्तिः–'यद्विषयतया यदात्मस्वभावतया च स्वतस्तस्य वेदनं स एव तदर्थो नापरः स एव च तेन प्रमाता नापरः' इति, अस्यार्थपरिच्छित्तिरूपतया च स्वतः प्रवेदनात् 'ज्ञानमेव तत् नाज्ञानम्' इत्यस्य च स्वत एव व्यवस्थापनात् । ततः स्वप्रकाशमेव ज्ञानं स्याद्दुरवबोधत्वेनोत्पत्तेः ।

यत्पुनरत्र तस्यैव वचनम्–"उत्पादे हि सति पश्चादृष्टदृष्टे' प्रत्यक्षत्वं युक्तं न पूर्वमेवं" [ ] इति, तत्तदभिप्रायापरिज्ञानादेवोक्तम् । न हि सौगतस्यापि 'अप्रत्यक्षोपलम्भस्य' इत्यादि अनुमानस्यायमभिप्रायः 'मागेवार्थदृष्टेः प्रत्यक्षत्वं पश्चादुत्पत्तिः' इति, अपि तूत्पत्तिमात्रेण सो स्वप्रकाशरूपतया प्रत्यक्षमेवोत्पद्यते, तदुपपत्तिमात्रेण "तन्मात्रतदुपपत्तोपपत्तेः", अतदुपपत्तोपपत्तिः" अनुत्पत्तिरेवेति अनुत्पन्नेवार्थदृष्टिर्भवेदित्यर्थमेवं'। तस्मात् परामिप्रायतः पौर्वापर्यमर्थदृष्टौ तत्प्रत्यक्षत्वव्युदासार्थमेवास्य तत्त्वं 'नहि' इत्यादि दूषणमुद्दयुप्यते? "तदयमविज्ञातपूर्वपक्षतया दूषणमुद्दोषयन्नात्मनो विदूषकत्वमावेदयति । एवमन्यदपि तस्य दुर्विलसितमुपदर्श्य प्रतिविधातव्यम् ।

कथं पुनरात्मवेदनं ज्ञानस्य? कथञ्च न स्यात्? स्यात्मनि क्रियाविरोधादिति चेत्, न, असिद्धत्वात् । विरोधोऽपि प्रमाणबाधानमेव नापरः, तत कस्यचिन्निषेधायोगात् । स च

---

१ चैत्रेति पूर्व– स० । चैत्र तर्हीति पूर्व –प० । २ स्वप्रकाशरूप– आ०, ब०, प०, स० । कथमर्थं करणशक्तौ दायक इति रूपम्, ऐदृक इति पाठम् । ३ आद्यादि– आ०, ब०, प० । ४ दृष्टान्तमात्रादेव । ५–तया वोप– आ०, ब०, प०, स० । ६ यदयं– आ०, ब०, प०, स० । ७ मात्रवेदनेन । ८ तदप्यसम्बद्धरूपम् आ० । ९ अर्थदृष्टि । १० अर्थदृष्टेः । ११ अर्थदृष्टिरेवेति । १२ –तिरस्येत्यर्थ– आ०, ब०, प०, स० । १३ तदस्याभिप्रायः । १४ तदस्यापि दूषन– आ०,ब०,प०, स० ।

प्रमाणप्रसिद्धेन सिद्ध्यति, 'तत्प्रसिद्धञ्च तद्बाधितं च' इति तत्रैव विरोधात्। प्रमाणप्रसिद्धञ्च ज्ञानस्य स्वप्रवेदनं विषयनियमादिनाऽनुमानेन तद्व्यवस्थापनात्। [2]सपक्षानुगमाभावादनुमानमेव तन्न भवतीति चेत्; स्यादेतदेवम्, यदि [3]तदनुगमस्यासाधारणतया [4]तल्लक्षणत्वम्। न चैवम्, तदाभासेऽपि तैत्पुत्रत्वादौ भावात्। तस्मादन्यथानुपपन्नत्वस्यैव [5]तथा [6]तल्लक्षणत्वम्। तच्चाविकलमेव विषयनियमादौ। [7]तेनैव कथं [8]तदनुगमाभावे गम्यत इति चेत्? न; विपक्षे बाधकबलादेव तदवगमात्, तस्य चोपदर्शितत्वात्। करिष्यते च [9]तस्यैव तल्लक्षणत्वे प्रबन्ध इति नेह प्रतन्यते। ततः सम्यगेव प्रकृतमनुमानमिति न तद्विषये ज्ञानस्यात्मवेदने कश्चिद्विरोधो यतस्तन्निषेधः स्यात्।

प्रमाणसिद्धमप्येतद्विरुद्धं चेत्स्ववेदनम्।
अर्थवेदनमप्येवं विरुद्धमवबुध्यताम् ॥६१७॥
प्रमाणमेव तस्यापि परित्राणाय नापरम्।
ततः स्ववित्तेरत्राणे त्राणमर्थविदः कथम्? ॥६१८॥
स्वार्थवित्तिविलोपे च ज्ञानमेव क्षयं व्रजेत्।
ज्ञानाभावे कथं ज्ञेयं स्वसंवेदनविद्विषाम्? ॥६१९॥
ज्ञानज्ञेयविलोपे च शून्यवादानुषञ्जनम्।
तस्मान्न्यायबलनिर्बन्धो मुच्यतामस्ववेदनात् ॥६२०॥

इदमेवाभिसन्धाय सौगतेनाप्युक्तम्—

"यदा स्वरूपं तत्तस्य तदा कैव विरोधिता।
स्वरूपेण विरोधे हि सर्वमेव [10]प्रलीयते ॥" [प्र० वार्तिकाल० २।३२९] इति।

कश्चायं [11]स्वात्मा नाम यत्र क्रियाविरोधः? क्रियावानेवार्थ इति चेत्; तत्र[12] तद्विरोधे कथं क्रियावत्त्वम्? क्रियावत्त्वे वा कथं तद्विरोधो व्यावर्तात्? न व्यावर्तः तत्कर्मकत्वेन तत्र तद्विरोधस्याभिधानात्, तत्कर्तृका तु न विरुध्यत एव 'छिनत्ति खड्गः' इति प्रतीतेः, कर्म तु तत्र व्यतिरिक्तमेव खड्गः काष्ठं छिनत्तीति प्रत्ययादिति चेत्; नन्वेवं बुद्धेरप्यात्मसमवायिन्याः तत्कर्म-[13]कत्वमेव [14]प्रतिषिद्धं भवति, न चैतत्पथ्यं भवताम्, आत्मनोऽप्रमेयत्वप्रसङ्गात् तस्यैव बुद्धौ कर्तृत्वात्। तदिदमन्यत्र सन्धानमन्यत्र पानः शरस्य, बुद्धेः स्वसंवेदनप्रतिषेधायोपक्रान्तेन आत्मनि प्रतिपत्तिकर्मत्वप्रतिषेधात्। तत्र क्रियावानर्थः स्वात्मा। क्रियैवेति चेत्; कः पुनः क्रियाविरोधः? तद्रूप्यानुपपत्तिरिति चेत्; कथं पुनस्तस्या एव तद्रूपत्वानुपपत्तिः द्रव्यादी-

---

१ प्रमाणसिद्धेनसिद्धयतेतत्प्र- आ०, ब०, प०। प्रमाणसिद्धेनसिद्ध्यत्येतत्प्र- स०। २ स च पक्षा- आ०,ब०, प०,स०। ३ तदनवगम- आ०, ब०, प०, स०। सपक्षानुगमस्य। ४ अनुमानलक्षणत्वम्। ५ गर्भस्थः श्यामः तत्पुत्रत्वात् इतरपुत्रवदित्यादौ। ६ असाधारणतया। ७ अन्यथानुपपन्नत्वमेव। ८ सपक्षानुगमाभावे। ९ अन्यथानुपपन्नत्वस्यैव। १० प्रतीयते प०, स०। ११ स्वात्मनाम् यत्र आ०, ब०, प०, स०। "स्वात्मा हि क्रियायाः स्वरूपम्, क्रियावादात्मा वा?"—प्रमेयक० पृ० १३६। न्यायकुमु० पृ० १८८। स्या० रत्ना० पृ० २२९। १२ क्रियावत्यर्थे। १३ बुद्धिकर्मकत्वमेव बुद्धिविषयत्वमेव। १४ प्रसिद्धं आ०,ब०,प०,स०।

नामपि ज्ञप्त्यादिरूपत्वानुपपत्त्या शून्यवादानुपपत्तेः। तद्विषयत्वेनैव तस्य तैदनुपपत्तिर्न तद्रूपत्वेनेति। न हि छिदिरात्मन्यपि छिदिर्मयवतीति चेत्, किंविषया तर्हि छिदिः? निर्विषयत्वे स्वात्मनीति विज्ञेयानुपपत्तेः। काष्ठविषयेति चेत्, कुत्र पुनः? स्वैसत्तायां पक्षेति चेत्, न, स्वात्मविषयत्वस्यापि प्रसक्तेः। विशेषाभावादिति चेत्, न, स्वात्मन्यपि तत्सम्भवात्। काष्ठ एव छिदिरूपतस्य विशेषस्य विनाशात्मनः प्रतिपत्तिर्न छिद्यात्मनीति चेत्, न, काष्ठेऽपि साक्षात्- ५ तस्य तैरूपत्वाभावात्, तदारम्भकावयवसंयोगविनाशरूपत्वात्। पारम्पर्येण छिदिरूपत्वमपीति चेत्, सिद्धं तर्हि तस्याः स्वात्मविषयत्वमपि पैछिन्नाशस्यापि पारम्पर्येण तत्कार्यत्वात्। छिदिर्हि स्वक्रमसमवायिनी स्वक्रकाष्ठसंयोगात् स्वकार्यानिवर्त्तमाना भवत्येव परम्परया स्वविनाशस्य कारणम्। अथैवमपि तस्या न स्वविषयत्वम्, काष्ठविषयत्वमपि मा भूत्। ततो न १० स्वात्मन्येव क्रियाविरोधः परात्मन्यपि तद्भावात्। तथा च—

यथा विरोधमुद्दिश्य "छिदेरात्मनि कल्प्यते।
विरोधो भेदनस्यापि स्वात्मनि न्याय्यमेविभिः ॥६२१॥
तथाऽन्यत्रापि "तं दृष्ट्वा तस्याः किमोपकल्प्यते।
भेदनस्य स्वाश्रयेऽपि विरोधो बाधवर्जितः ॥६२२॥
"उभयत्र विरुद्धत्व ज्ञानं तदिति केवलम्।
प्रत्येतव्यं भवेदेवं क्रौंचमुद्राप्रमाणकैः ॥६२३॥

ततो न स्वात्मनि क्रियाविरोधेन अर्थज्ञानस्य स्वसंवेदननिषेधनमुपपन्नम्।

तन्निषेधे वा कुतस्तर्यं प्रतिपत्तिः? अप्रतिपत्तिरूपमेव तत्सर्वमेति चेत्, न, व्योमकुसुमवत्तदभावापत्तेः। "एकात्मसमवेतानन्तरज्ञानादिति चेत्, कुत इदमवसितम्? 'अर्थज्ञानं ज्ञानान्तरवद्यं वेद्यत्वात्' "कल्पवत्' "इत्यनुमानादिति चेत्, कल्प्यास्यापि कुतस्तद्वेद्यत्वमवसितं २० यता निदर्शनस्य साध्यधर्मत्वं न भवेत्? तद्वेदनादेवेति चेत्, न, तस्याप्यसंवेदनत्वात्। यदि हि न "तत्यसंवेदनं भवत्येव ततः कल्प्यान्यत्वस्य "तद्ग्रहस्य ग्रहणम्। न चैवम्, अतो विरुद्धमेतत्-'अनात्मवेदिन एव ज्ञानात्मस्य कुतश्चिदभ्युपगम्यते गृह्यते' इति। तदेवाह-'विभुत्व' इत्यादि। विषयात् विभिन्नं मुक्तं रूपं यस्य तत् ज्ञानं विभुत्वज्ञानम्, तस्य यः स्वतः संवेदः स विरुद्धः स्वसंवेदनप्रसक्तेः। व्यधिकरण्यतः कल्प्यज्ञानादन्यत्व एव ज्ञानात्तत्- २५ कल्पज्ञान्यत्वस्य व्यवस्थितेः प्रकाशनमिति परः। तत्राह-'असञ्चार' इति। असञ्चारः असम्प्रतिपत्तिः कल्प्यज्ञानस्यान्यत्वस्येति यावत्।

---

१ छिदिरिवतत्रैव। २ क्रियाया०। ३ क्रियाकरणयुक्तत्वेन। ४ स्वसत्तेति आ०, ब०, प०, म०। ५ छिदिरूप। ६—पक्षादि तत्रा—आ०, ब०, प०, म०। ७ भेदनेऽपि आ०, ब०, प०, म०। ८ छिदिविनाशस्यापि। ९ —पक्षादि तत्रा—आ०, ब०, प०, म०। १० छिदिरात्मनि क—आ०, ब०, प०, म०। ११ तद्दृष्ट्वा—आ०, ब०, प०, म०। विरोधम्। १२ कल्पे स्वात्मनि च। १३ अवश्यतया। १४ एकात्मसम—आ०, ब०, प०, म०। १५ कल्पज्ञानस्य आ०, ब०, प०, म०। १६ प्रकाश्य०—पृ० ११३ टि० १। १७ कल्प्यवेदनम्। १८ स्वात्मत्व।

अन्यत्वं कलशज्ञानस्यान्यतो यदि वेद्यते ।
तस्यापि कलशज्ञानादन्यत्वं गम्यते कुतः ? ॥६२४॥

तदन्यत्वापरिज्ञाने वचस्तत्तादृशं कथम् ? ।
कलशाद्वेदनान्यत्वमन्यतो वेदनादिति ॥६२५॥

वेदनं न स्वतस्तस्य स्वसंवित्त्यपलापिनाम् ।
अन्यतो वेदने तु स्यादनवस्थानदूषणम् ॥६२६॥

तदाह–'**अनवस्थानम्**' इति । ततश्च न तज्ज्ञानं विशेष्यं नापि तस्य कलशार्थान्तरत्वं विशेषणमित्यायातम् । तदाह–'**अविशेष्यविशेषणम्**' इति । ततो निदर्शनस्य साध्यवैकल्यमिति भावः ।

यत्पुनरत्र परस्यानुमानम्–"**कलशादर्थान्तरं तज्ज्ञानं चेतनत्वात्, यत्पुनस्तस्मादनर्थान्तरं तन्न चेतनं यथा तस्यैव स्वरूपम्, चेतनञ्च तज्ज्ञानम्, तस्मात् ततोऽर्थान्तरम्**" [ ] इति ; तदपि न समीचीनम् ; अनुमानज्ञानस्यापि [2]तज्ज्ञानादन्यत्वस्य स्वतः पूर्ववदप्रतिवेदनात्, अनुमानान्तरपरिकल्पनायामनवस्थापत्तेः ।

अपि च, कुतः कलशाच्चेतनत्वस्य व्यावृत्तिः ? तस्य तद्विरुद्धेनाचेतनत्वेन व्याप्तत्वादिति चेत् ; तदेव कुतोऽवगतम्, यतस्तव्याप्तादनर्थान्तरत्वात् व्यावर्त्तमानं चेतनत्वमर्थान्तरत्व एव नियतं तदवगमयेत् ? तत एव कलशज्ञानादिति चेत् ; तेनापि चैतन्यं क प्रतिपन्नं यतस्तत्पर्युदासरूपमचेतनत्वं कलशस्य [3]ततोऽवगम्यताम् ? अप्रतिपन्ने तस्मिन्[4] तत्पर्युदासस्य दुरवगमत्वात् अप्रतिपन्नमंशकपर्युदासवत् । आत्मन्येव[5] तत्प्रतिपन्नमिति चेत् ; न, अनात्मवेदिनि तस्मिन् तदयोगात् । ज्ञानान्तर इति चेत् ; न; तस्य[6] तदविषयत्वात्[7] । तन्न कलशस्य तज्ज्ञानादेवाचेतनत्वपरिज्ञानम् । अन्यतो ज्ञानादिति चेत् ; न; ततोऽपि कलशमात्रविषयात्तदनुपपत्तेः । प्रतिषेध्यचेतनत्वविषयमपि [8]तदिति चेत् ; किं तच्चेतनम् ? तदेव ज्ञानमिति चेत् ; न; अस्मात्मवेदिनस्तस्य तद्विषयत्वायोगात् । कलशज्ञानमिति चेत् ; कुत एतत् ?, [9]तस्य [10]तेनार्थवेदनत्वेन ग्रहणात्तद्विषयत्वाच्च चेतनस्येति चेत् ; ईदृशस्तव्यापारः कुतोऽवगतो येनैवमुच्यते ? न तावत्तत एव ; तस्यानात्मविषयत्वात् । तादृशतव्यापारगोचरत्वस्य[12] स्वतः [13]प्रतिवेदनाभावात् । अन्यतश्च तत्कल्पनायाम् अनवस्थादोषात् । आकाङ्क्षानिवृत्त्या तद्दोषनिवृत्तिरिति चेत् ; कथं पुनर्जिज्ञासिततादृशतव्यापारनिश्चयाभावे तदाकाङ्क्षानिवृत्तिः [14]तस्यास्तन्निश्चयनिबन्धनत्वात् ? अदृष्टादेस्तर्हि [15]तद्दोषनिवृत्तिरिति चेत् ; सोऽपि यदि

---

१ –त्वविलापि–आ०, ब०, प०, स० । २ कलशज्ञानात् भिन्नत्वस्य । ३ कलशज्ञानात् । ४ चैतन्ये । ५ –मर्थक्यपर्यु– आ०, ब०, प०, स० । ६ –ष न तत्र–आ०, ब०, प०, स० । ७ ज्ञानान्तरस्य । ८ कलशज्ञानाविषयत्वात् । ९ ज्ञानान्तरम् । १० कलशज्ञानस्य । ११ ज्ञानान्तरेण । १२ –त्वोरगोचरत्वस्य–आ०, ब०, प०, स० । १३ परिवेदना– आ०, ब०, प० । १४ आकाङ्क्षानिवृत्तेः । १५ अनवस्थादोष ।

सन्निधयमविधाय तद्दोषं निवर्तयति तदवस्थं तज्ज्ञापाप्रपरिज्ञानम् । तद्विघानमपि यद्यन्यतः, कथं तद्दोषनिवर्त्तनम् ? तज्ज्ञाप्यन्यतस्तद्विधानस्यापेक्षणीयत्वात् । यद्यापाये मुमुक्षितत्तत एव तद्विधानमिति चेत्, न, स्वसंवेदनयादप्रत्युन्मज्जनप्रसङ्गात् । तस्मान्यतो विज्ञानात् कल्पशत्याश्रयेतरत्वं शक्यपरिज्ञानम्, पर्युदासितस्य चेतनत्वस्य कचिदप्यपरिज्ञानात् । तत्कथं नैनाऽनर्थान्तरत्वं व्याप्तं यतस्तस्माज्ज्ञापकं चेतनत्वमर्थज्ञानस्य कल्पशदर्थान्तरत्वमवबोधयेत् ? ५ तदयं सन्दिग्धविपक्षव्यावृत्तिकत्वेनानैकान्तिकत्वात् सम्यगेतुः, अतो नानुमानादपि कल्पशत् ज्ञानस्यार्थान्तरत्वमिति साध्यधर्मस्याश्रयादुदाहरणस्य न कल्पशज्ञानस्यार्थान्तरज्ञानविपयत्वसाधनं सम्यक् साधनम् ।

व्यभिचाराच्च । व्यभिचारि खल्विदं चेतनत्वं व्याप्तिज्ञानेन । न हि यावितावत्प्राप्तिकस्यानुमानम् अतिप्रसङ्गात् । नापि प्रोदेशिकस्तद्विज्ञानस्य, यदेवाविज्ञातावत्प्राप्तिकं तेनैव व्यभिचारशङ्कनात् । ततः साकल्येन तैद्विज्ञाने तु तदेवागमगतस्यापि चेतनत्वस्य ज्ञानान्तरवेद्यत्वेन व्याप्तिं प्रविशत् आत्मवेदनमेव न तदन्तरवेद्यमिति मुख्यतो व्यभिचारः । साध्यसाधनसामान्यस्यैव संज्ञानविषयत्वं व्याप्तेस्तन्निग्रहेण[1] तद्परिज्ञाने परिज्ञानासम्भवात्, न व्यक्तीनां विपर्ययात्, व्यक्तिरूपं च "तज्ज्ञानं तत्कर्म तस्य तद्विषयत्वमिति चेत्? न, "तद्परिज्ञाने सामान्यस्याप्य परिज्ञानात् तस्य[2] तन्निष्ठत्वात् । कतिपयव्यक्तिपरिज्ञानात्रेत्र भवति "तत्परिज्ञानमिति चेत्, न, "तावता व्याप्तिपरिज्ञानासम्भवात्[3], अन्यथा वह्न्यादावपि "तत्सम्भवात् व्यभिचारः स्यात्[4]। बाधनात्तत्र[5] व्यभिचार इति चेत्, न, "लक्षणयुक्तत्वे बाधासम्भवे तल्लक्षणमेव दूषितं स्यात्" [प्र० वार्तिकाल० २।१५] इति चेतनत्वाद्यापि बाधाविरहं प्रति न निःशङ्कं चेतः स्यात्। बाधस्यानुपलम्भात्मकाङ्गमेवेति चेत्, न, अनुपलम्भस्य सर्वसम्बन्धिनः "सतोऽपि दुरवबोधत्वेनासिद्धत्वात्[6]। आत्मसम्बन्धिनश्च "परचित्तो (चेतो) वृत्तिविशेषैर्व्यभिचारित्वात्। अतो नाबाधितविषयत्वमनुमानलक्षणम्, अपि तु विज्ञातव्याप्तिकत्वमेव, तच्च सकलव्यक्तिविज्ञानमुखेनैव नान्यथेति कथम् तज्ज्ञाप्तिज्ञानस्य[7] तद्विषयत्वमिति सुव्यक्तमेव तेनानैकान्तिकत्वम् ।

"सुखादिना च, तस्यापि स्वत एव प्रकाशनात् । न हि तस्य वेद्यत्वापि परं प्रकाशन मनुभूयत इति । तदाह–'विमुक्त'इत्यादि । विमुक्तं स्वप्रकाशपराङ्मुखत्वात् अर्थज्ञानं[11] तस्य ज्ञानमर्थान्तरं विमुक्तज्ञानं तस्य सम्बन्धी गमकत्वेन यः संवेदः संवेदकं हेतुः सः २५

---

१ विधयविधाबम् । २ चेतनतत्वेन । ३ तनो नानु–आ०, ब०, प०, । ४ –स्यार्थान्तर–आ०, ब०, प०, स० । ५ कतिपयव्याप्यज्ञानव्यक्तिषु गृहीतव्याप्तिकस्य । ६ यदेव वस्तु । यदेवाविज्ञानव्या– आ०, ब०,प० । ७ व्याप्तिज्ञाने । तद्विज्ञातुं तदे– आ०, ब०, प०, । ८ व्याप्तिज्ञानम् । ९ व्याप्तिज्ञान । १० साध्यसाधनसामान्या परिज्ञाने । ११ व्याप्तिज्ञानम् । १२ व्यक्तपरिज्ञाने । १३ सामान्यस्य । १४ सामान्यपरिज्ञानम् । १५ कतिपय व्यक्तिपरिज्ञानमात्रेण । १६ व्याप्तिज्ञानसम्भवात् । १७ तदुप्रभावी । १८ स्वतोऽपि आ०, ब०, प०, स० । १९ परचैतोनिवृत्ति– ता० । परचित्तोवृत्ति– प० । २० स्वविषयमिति । २१ तुलना–"सुखादिरनेन हेतोर्व्यभिचारात् मोहरहितेन च" –प्रमेयक० पृ० ११२ । २२ –र्थं च तच्च आ०, ब०, प०, स० ।

अविरुद्धो[1] विपक्षेऽपीति शेषः, तस्माद्व्यभिचारीति भावः। [2]व्याप्तिज्ञाने सुखादिज्ञानेऽपि तद्व्याप्तेः सुखादेश्चान्यत एव ज्ञानात् व्यक्तिः; इत्याह–**'व्यक्तिरन्यतः'** इति। तत्रोत्तरम्–**'असञ्चारः'** इति। [3]तत्र तद्व्याप्तेः सुखादेश्चान्यतो न सञ्चारः न परिज्ञानम्। कुतः? इत्यत्राह–**अनवस्थानम्**। 'यतः' इति शेषः। तथाहि–

५ तदन्यत्रापि तद्व्याप्तिरन्यतो यदि वेद्यते।
तत्राप्येवं प्रसङ्गे स्यादनवस्था कथन्न वः? ॥६२७॥

आकाङ्क्षाविनिवृत्त्यादि पूर्वमेव विचिन्तितम्।
तस्मात्तद्व्याप्तिसंवित्तिस्तत एवोपगम्यताम् ॥६२८॥

सुखाद्यपेक्षया तु व्याख्यानम्–यद्यन्यदेव सुखादेस्तद्वेदनं तर्हि पश्चादेव न सुखाद्युत्प-
१० त्तिसमये, [4]ततः पूर्वं तन्निमित्तस्य सन्निकर्षस्याभावादित्यविदितस्यैव [5]तस्योत्पत्तिः। तथा च–'उत्पन्नमात्रेणैव सुखादिना तद्वान् पुरुषः' इति यदवस्थानं व्यवस्था लोकस्य तन्न स्यात्, अविदितस्यानुत्पन्नकल्पत्वादित्यनवस्थानम्। पश्चाद्वेदनान्न तत्कल्पत्वमिति चेत्; न; व्यवधाने तदयोगात् तावत्कालं [6]तदनवस्थानात्। अनन्तरमिति चेत्; न; नियमाभावात्। न ह्युत्पन्नस्यानन्तरमेव वेदनमिति नियमः, अन्यत्रैवमदर्शनात्।

१५ यत्पुनरत्र विश्वरूपस्य समाधानम्–"[7]सुखादेर्धर्माधर्माभ्यामुत्पादः तौ च यथा सुखाद्युत्पत्तिमाक्षिपतस्तद्वदनन्तरक्षणे तत्संवेदनमपि" [ ] इति; तदप्यनुपपन्नम; उत्पत्तिसमय एव [8]तस्य संवेदनं न हि समसमयस्य [9]तस्यानन्तरसमयत्वम्; [10]तत्समयस्यापि तदपरसमयत्वेन व्यवधानप्रसङ्गात्। अत्रापि यत्तस्य[11] प्रतिवचनम्–"या तूत्पत्तिकाल एव सुखादेः संवित्तिः सा भ्रमनिमित्तस्याशुभावस्य तत्र सम्भवात् तत्कृता, यथा घटादेरुत्प[12]द्यमानस्य प्रत्यक्षता, तत्रावश्यं घटस्योत्पत्ति[13]द्वितीयक्षणे रूपादिसमवायः तृतीये संवेदनम् अथ च [14]युगपत्संवित्तिः। सुखादौ तु द्वितीयक्षणे संवेदनोत्पादात् स्वप्रकाशभ्रमः" [ ] इति। तत्रोच्यते–कस्यासौ तद्भ्रमः? तस्यैव सुखादेरिति चेत्; न; अचेतनत्वात्। चेतनधर्मो हि विभ्रमः, स कथमचेतनस्य स्यात् घटादावपि प्रसङ्गात्? आत्मन इति चेत्; न; तस्याप्यचेतनत्वात्। चेतन एवात्मा चेतनसमवायादिति चेत्; तद्यदि चेतनमन्यवि-
२५ षयमेव कथं सुखादौ तद्विभ्रमः स्यादतिप्रसङ्गात्? तद्विषयमेवेति चेत्; न; घटादावपि [15]तद्वेदनस्य तद्विभ्रमत्वप्रसङ्गात्। ततश्चानिश्चितं [16]तस्यान्यवेद्यत्वमिति कथमर्थज्ञानस्य [17]तदन्तरवेद्यत्वे [18]तस्य निदर्शनत्वम्। आशुभावात्संवेदनस्य तत्र यौगपद्यविभ्रम एव न स्वप्रकाशविभ्रम इति

---

१ –द्वोपि प–आ०,ब०,प०,स०। २ व्याप्तिज्ञानेऽपि आ०,ब०,प०,स०। ३ व्याप्तिज्ञाने सुखादिज्ञाने च। ४ सुखाद्युत्पत्तेः प्राक्। ५ सुखादेः। ६ कल्पनत्वा–आ०,ब०,प०,स०। ७ तदवस्था–आ०,ब०,प०,स०। ८ –त्पादनात्तौ आ०,ब०,प०,स०। ९ सुखादेः। १०सुखादिसंवेदनस्य। ११ अनन्तरसमयस्यापि। १२विश्वरूपस्य। १३ –रूपाद्यमा–आ०,ब०,प०,स०। १४ –त्पति. द्वि–ता०। १५ रूपवान् घट इति विशिष्टज्ञानम्। १६ घटवेदनस्य। १७घटस्य। १८तदनन्तरवेद्य–आ०,ब०,प०,स०। १९घटस्य। तस्य निदर्शनस्य निद–आ०,ब०,प०,स०।

चेत्, न, सुखादावपि तस्यैव प्रसङ्गात्। भवत्विति चेत्, न, 'स्वप्रकाशभ्रमः' इत्यस्य विरोधात्। सत्यपि यौगपद्यभ्रमे कथं तस्य प्रत्यक्षत्वम् अभ्रान्तस्यैव तस्यात्? अप्रत्यक्षमेवैं तद्वेदनमिति चेत्, कथं ततः सुखादिसिद्धिः? विभ्रमाद्ययोगात्तत्प्रसङ्गात्। यौगपद्य एव तस्य भ्रमत्वं न सुखादाविति चेत्, कथमेकस्य[1] विभ्रमाविभ्रमत्वमाश्रयत्वम् विरोधात्? अविरोधे[2] वा यस्यैव सुखादिस्तं तस्यैव स्वप्रकाशनत्वमपि भवेदिति न सुखादेरन्यतः सञ्चारः तस्यैवान्य स्याश्रयस्यानात्। तदाह—अनवस्थानम्। ततः स्थितं सुखादिनापि वेद्यस्यास्य व्यभिचारित्वम्।

[3]ईश्वरज्ञानेन च। न हि तस्यान्यवेद्यत्वम्, एकत्वात् तस्य। नाप्यवेद्यत्वम्, ईश्वरस्यासर्वज्ञत्वप्रसङ्गात्। अस्त्येव तस्यापि ज्ञानान्तरम्, न चानवस्थानम्, तयोरन्यस्यैकेनैकस्य चान्येन वेदनात्, नापि परस्पराश्रयणम्, स्वप्रकाशनिरपेक्षयोरेव विषयप्रकाशत्वादिति चेत्, न, तथापि स्वप्रकाशस्याश्रयस्याभावात्। तथा हि तद्वेदकमन्यस्य आत्मविषयस्यैव प्रकाशनम्, न आत्मापरिज्ञाने तद्विषयतया तस्य प्रकाशनमुपपन्नम्। आत्मपरिज्ञाने च किमन्यज्ञानपरिकल्पनया? भवत्वेकमेव तज्ज्ञानं तथापि न व्यभिचारः तस्यापरिज्ञानात्, तद्व्यतिरेकेणैव तस्य सर्वज्ञत्वोपगमादिति चेत्, तदपरिज्ञाने तत्समवायित्वेन कथं तेनात्मनोऽपि परिज्ञानम्? मा भूदिति चेत्, कथं तर्हि "स वेत्ति विश्वम्" [श्वेता० ३।१९] इत्यादिना तस्य [4]स्वरूपोपदर्शनम् अपरिज्ञातस्य तदयोगात्? न चेदमपौरुषेयमेव, अनभ्युपगमात्। अपरिज्ञातस्य[5] चोपदेशे[6] करणमपि "तस्यैवेति कथं अगदो युक्तिमद्धेतुकत्वम्? अतो न तदपरिज्ञानमुपपन्नं बहुदोषत्वात्। "नाप्यन्यतस्तत्परिज्ञानमिति कथम्न तेन व्यभिचारः साधनस्य? न व्यभिचारः अनित्यत्वेन विशेषणात्, "अनित्यत्वविशिष्टं हि वेद्यत्वं साधनं न सन्मात्रमेव, 'अर्थज्ञानं तदन्यवेद्यम् अनित्यत्वे सति वेद्यत्वात् "कम्बलवत्' इति प्रयोगकरणात्। माहेश्वरे च ज्ञाने तद्विशिष्टस्य हेतोरभावात्, तस्य नित्यत्वादिति चेत्, न; हेत्वन्तरत्वेन निग्रहस्थानप्रसङ्गात्, "अविशेषोक्ते हेतौ निषिद्धे पुनर्विशेषोपादानं हेत्वन्तरम्" [न्यायसू० ५।२।६] इति वचनात्। प्रथममेव तथा वचने न दोष इति चेत्, न, तथापि व्यभिचारस्यानिवारणात् विशेषणस्य विपक्षाविरुद्धत्वात्। न हि विपक्षेणाविरुद्धं विशेषणं ततो हेतुं व्यावर्त्तयितुमलम्। अनित्यत्वं हि नित्यत्वस्यैव परिहारेण तस्यैव[7] तत्प्रत्यनीकत्वात्, न स्वप्रकाशस्य विपर्ययात्, अत एव स्वप्रकाशोऽपि अस्वप्रकाशस्यैव परिहारेण नानित्यस्वेति न परस्परपरिहारेण स्वप्रकाशविरुद्धत्वमनित्यत्वस्य। नापि सहानवस्थानेन, असति

---

१ यौगपद्यविभ्रमस्यैव। २ प्रत्यक्षत्वात्। ३ –ज्ञानमेव आ०, ब०, प०, स०। ४ –द्विभ्र–आ०, ब०, प०, स०। ५ –स्य विभ्रमत्व–आ०, ब०, प०, स०। ६ –भेन म–आ०, ब०, प०। –भेदाप–म०। ७ "माहेश्वरापक्षयेण हेतोर्व्यभिचारात्"– प्रमाणप० पृ० ६०। युक्त्यनुशा० टी० पृ० १०। न्याय कुसु० पृ० १८६। स्या० रत्ना० पृ० २१२। ८ ज्ञानापरिज्ञाने। ९ स्वात्मनीऽपि। १० स्वरूपदर्शं–आ०, ब०, प०, स०। ११ माहेश्वरस्वरूपस्य। १२ चोपदेशकरण–आ०, ब०, प०, स०। १३ अपरिज्ञातस्यैव। १४ नाप्यतस्त–आ०, ब०, प०, स०। १५ अनित्यत्वविशेषणं सह– आ०, ब०, प०, स०। १६ कम्बलवदिति आ०, ब०, प०, स०। १७ नित्यत्वस्यैव।

परस्परपरिहारे सहावस्थानस्यापि सम्भवात्। कलशादावदर्शनान्[1] तत्सम्भव इति चेत्; नित्यत्वस्यापि न स्यात् आत्मादावदर्शनात्, तत्कथमीश्वरज्ञानस्य नित्यस्यापि स्वप्रकाशत्वम्? क्वचिद(दृद)र्शनेऽपि न नित्यत्वस्य तद्विरोध इति चेत्; अनित्यत्वेन किमपराद्धं भवतो यतस्तत्रैव तद्विरोधमावेदयति? ततो विपक्षाद्विशेषणस्य व्यावृत्तिनियमाभावान्नद्विशिष्टस्य हेतोरपि न तन्नियम इति संशयितविपक्षव्यावृत्तिकत्वात्तदवस्थं सविशेषणस्यापि व्यभिचारित्वम्। ततश्च यदत्र भासर्वज्ञेन पक्षत्रयमुपन्यस्तम्–"अनैकान्तिकत्वपरिहारार्थं परमेश्वरस्य ज्ञानद्वयमभ्युपगन्तव्यम्, तद्व्यतिरेकेण वा सर्वज्ञत्वम्, अनित्यत्वे सति इति वा हेतुविशेषणं कर्त्तव्यम्" [ ] इति; तत्प्रतिविहितम्; पक्षत्रयेऽपि अनैकान्तिकत्वस्याशक्यपरिहारत्वेन प्रतिपादित्वात् इत्यलमतिप्रसङ्गेन। ततः साध्यविकलनिदर्शनत्वादनैकान्तिकत्वाच्च न वेद्यत्वं विशिष्टमविशिष्टं वा सम्यक् साधनमिति न ततो ज्ञानस्य ज्ञानान्तरवेद्यत्वं सिद्ध्यति। तदेवाह–'**अविशेष्यविशेषणम्**' इति। विशेष्यं ज्ञानं तस्य विशेषणं ज्ञानान्तरवेद्यत्वं तदुभयस्याभावः **अविशेष्यविशेषणम्**। ततो न ज्ञानं ज्ञानान्तरवेद्यं प्रमाणाभावात्। स्वसंवेद्यत्वे च प्रमाणमुक्तमेव, ततस्तदेव प्रेक्षावद्भिरभ्युपगन्तव्यम्, अन्यथा तद्व्यवविघटनादिति स्थितम्।

अपि च, यद्यस्वप्रकाशत्वमेव सकलसंवेदनानां तदा कथं क्वचिन्नैरन्तर्यं संवेदनानां तत्परिज्ञानं वा? न हि–'देवदत्त गामभ्याज' इत्यादौ दकारादिविषयमेकमेव संवेदनम्, तस्य[2] कालदीर्घस्यासम्भवात्, [3]उत्पन्नापवर्गित्वेनाभ्युपगमात्। क्षणक्षीणत्वे च न[4] दकारसंवेदनस्यैव एकारादौ प्रवृत्तिः, [5]तस्यासन्निकृष्टत्वात्, असन्निकृष्टेऽपि प्रवृत्तावतिप्रसङ्गात् "प्रत्यर्थनियता हि बुद्धयः" [न्यायभा० ३।२।४६] इति भाष्यविरोधाच्च। तस्मात् प्रतिवर्णं विद्यन्त एव तद्वेदनानि निरन्तराणि च, 'निरन्तरमुपलब्धा दकारादयः' इति स्मरणात्। न च स्मरणम्[6] अप्रतिपन्ने [7]तन्नैरन्तर्ये सम्भवति; अतिप्रसङ्गात्। न च [8]तत्परिज्ञानं [9]तेषां स्वत एव; तदस्वसंवेदनप्रतिज्ञाविरोधात्। एतदेवाह–'**विमुग्ध**' इत्यादि।

विमुग्धानां स्वप्रकाशविकलानां **ज्ञानानाम्** उक्तवाक्यदकारादिविषयाणां **संवेदः** [10]सङ्कुलितत्वेन नैरन्तर्येण वेदनं स्वतो **विरुद्धः**[11] तदस्वसंवेदनप्रतिज्ञेति। **व्यक्तिरन्यतः** संवेदनान्नैरन्तर्यस्येति परः, तत्राह–'**असञ्चारः**' इति। [12]अन्यतस्तस्य **न सञ्चारो** न संवेदनम्। कुतः? इत्याह–**अनवस्थानं** यतः। तथा हि–तदन्यदेकं चेत्; सर्वचरमेण तेन भवित-

---

१ स्वप्रकाश-अनित्यत्वयोः। २ कलशादादनित्यत्वं वर्तते न स्वप्रकाशत्वमिति। ३ स्वप्रकाशविरोधः। ४ विपक्षव्यावृत्तिनियमः। ५ भासर्वज्ञत्वेन आ०, ब०, प०, स०। ६ –लदर्श–आ०, ब०, प०, स०। ७ –लवेदना– आ०, ब०, प०। ८ तथा आ०, ब०, प०, स०। ९ तत्त्वज्ञानं आ०, ब०, प०, स०। १० देवदत्तेत्यादिविषयस्यैकस्य संवेदनस्य। ११ उत्पन्नापवर्गित्वे–आ०, ब०, प०, स०। १२ न तदाकार–आ०, ब०, प०, स०। १३ एकारस्य। १४ स्मरणाघप्रति– आ०, ब०, प०, स०। १५ दकारादिनैरन्तर्ये। १६ नैरन्तर्यपरिज्ञानम्। १७ दकारादीनाम्। १८ संकलितत्वेन आ०, ब०, प०, स०। १९ –दस्ततस्वसं– आ०, ब०, स०। –दस्तत्वसं– प०। २० अतस्तस्य आ०, ब०, प०, स०।

कथं [1]तदेव तद्वेदनसम्भवात्। भवत्विति चेत्, न, [2]तेन [3]तेषामवेदने तद्धर्मस्य नैरन्तर्यस्यापि वेदनायोगात्। न च तेषामपि वेदनम्, [4]तदा तेषामुत्पन्नापवर्गित्वेनानवस्थानात्। अवस्थाने वा कथं निरन्तरत्वं तदेकसमयमात्रतया क्रमाभावात्? सत्येव [5]क्रमे [6]तदुपपत्तेः। 'अपरित्यक्तक्रमाणामेव [7]तेषामवस्थानम्' इत्यपि न युक्तम्, अवस्थितस्वभावापेक्षया नैरन्तर्यासम्भवस्य क्रमवत्स्वभावापेक्षया च तदपरिज्ञानस्य पूर्ववत्प्रसङ्गात्। पुनरपि क्रमापरिहारेणावस्थानकल्पने तदेवोत्तरमिश्रनवस्थादोषपारम्पर्योपनिपातात्। तस्मात्सर्वात्मनैवावस्थानम्। तत्र च कथं नैरन्तर्यं कथं वा युगपज्ज्ञानानामुत्पत्तिः? "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायसू० १।१।१६] इति व्यवतिष्ठेत? कथं वा सविषयत्वम्? तत्काले[8] दकारादीनामपक्रमात्। अनपक्रमे वा कथम् युगपद्ग्रहणम्? तस्मात्य पक्षः श्रेयान्। तस्मात्प्रतिवेदनं भिन्नान्येव तद्वेदनानि। तत्र च पूर्वं दकारवेदनं पुनस्तद्वेदन[9] ततोऽप्येकार १०
वेदनं पुनरपि "[10]तद्वेदनमेवमुत्तरापीति न वर्णज्ञानानां नैरन्तर्यं पश्यामः "[11]तज्ज्ञानैर्व्यवधानात्, तत्कथं निरन्तरतया तत्परिज्ञानम्? घटनादिति चेत्, न, नैरन्तर्यस्येव घटनत्वात्, तस्य चाभावात्। आशुभावप्रयुक्तविभ्रमाद् घटनमिति चेत्, "[12]तत्किमिदानीमवस्तुमदेव? सत्या चेत्, न, तदेकज्ञानसंसर्गितया[13] सर्ववेदनानामप्यवस्तुत्वप्रसङ्गात् कथं तैर्वर्णप्रकाशन व्योमकुसुमैरिवावस्तुसङ्क्रिस्तदयोगात्? घटन एव तज्ज्ञानस्य विभ्रमो व्यवधानज्ञानस्य बाधकस्य भावान्न वेदनस्वरूपे १५
विपर्ययादिति चेत्, न, [14]तत्रापि घटनस्येव रूपत्वात्। न हि [15]दकारज्ञानमप्यघटनरूपं सम्भवति। तथाहि-"[16]अर्थमात्रिकत्वमपि दकारस्यानेकर्जुक्रमोपनिबद्धमित्यवश्यम्भाविनि क्षणभेदे तत्क्षणभाविनां दकारभागानामपि भेदादवश्यम्भावी "[17]तज्ज्ञानानामपि भेदः, तत्र चघटनं यदि विभ्रमनिबद्धमेव कथं तत्र कस्यचिद्बोधस्याभ्रान्तत्वं विभ्रमनिबन्धनपरिज्ञानेन बाधनादिति न दकारज्ञानस्यापि वस्तुत्वम्। वर्णान्तरज्ञानेऽप्ययमेव न्याय इति न किञ्चिद्वर्णज्ञानं वस्तुसद २०
स्तीति विप्लुतो वर्णव्यवहारः।

वर्णज्ञानविलोपे च पदज्ञानं कथं भवेत्?।
सत्येव वर्णविज्ञाने पदज्ञानस्य सम्भवात् ॥६२९॥

पदज्ञानमनादृत्य वाक्यज्ञानञ्च दुर्लभम्।
पदज्ञानानुजं यस्माद्वाक्यज्ञानं परैर्मतम् ॥६३०॥

पदवाक्यव्यवस्था च तज्ज्ञानासम्भवे कथम्?।
व्यवहारो यतः शास्त्रः सिद्धोन्यायविदां मते? ॥६३१॥

---

१ तदेव आ०,ब०,प०,स०। २ सर्ववरमभूतेव अन्यज्ञानेन। ३ दकारादिसंवेदनानाम्। ४ चरमक्षणे। ५ -पवर्गत्वे-आ०,ब०,प०,स०। ६ क्रमतः। ७ नैरन्तर्योपपत्तेः। ८ दकारादिसंवेदनानाम्। ९ -से तदा कथ-आ०,ब०,प०,स०। १० दकारवेदनवेदनम्। ११ एकारवेदनवेदनम्। १२ दकारादिज्ञानानामनैः। १३ घटनम्। १४ -संसर्गतया आ०,ब०,प०,स०। १५ वैतेऽपि। १६ गकार-आ०,ब०,प०,स०। १७ अर्थमात्रिक-आ०, ब०, प०। अर्थमात्रिक-स०। १८ क्षणभेद-आ०, ब० प०, स०। १९ दकारभागज्ञानानाम्।

एतदेवाह–**अविशेष्यविशेषणम्** । विशेष्यो वर्णादिस्तस्य विशेषणं ज्ञेयत्वं तस्याभावः '**अविशेष्यविशेषणम्**' इति । ततो वर्णज्ञानस्य परमार्थसत्त्वमिच्छता तद्भागज्ञानघटनस्य तदभ्युपगन्तव्यं तस्यैव वर्णज्ञानत्वात् । न च तत् अन्यवेद्यत्वनियमे सम्भवतीति स्वसंवेद्यमेव तदङ्गीकर्त्तव्यम् । कथं पुनः सत्यप्यात्मवेदने घटितत्वेन वेदनं वेदनानां तैरितरेतरेतरापरिज्ञानादिति चेत् ? न; तेषां कथञ्चिदन्वयस्यापि भावात्, अन्वितेनात्मना घटाधिष्ठानज्ञानानां परिज्ञाने घटनस्यापि सुपरिज्ञानत्वात्। उक्तञ्चैतत्–'**आत्मनाऽनेकरूपेण**' इति। प्रतिक्षणभेदनियमे तु तेषां न भवत्येव क्वचिदपि घटनज्ञानं तदधिकरणभेदपरिज्ञानस्य क्वचिदसम्भवात्। न ह्येकमपरापरतदधिष्ठानभेदविषयं ज्ञानं तन्नियमवादिनां सम्भवति, सन्निहितविषयत्वेन तस्याभ्युपगमात् तत्कथं तद्घटनपरिज्ञानम् ?

ततो यदुक्तं प्रज्ञाकरेण–"**तदाकारैकबुद्धिवेदने दीर्घवेदनव्यवस्था**" [प्र० वार्तिकाल० २।४८५] इति; तत्प्रतिविहितम्; दीर्घत्वं हि वर्णानां समयक्रमानुपातित्वम्, तदाकारत्वे बुद्धेरपि तदनुपातित्वेनाक्षणिकत्वानुषङ्गात्। कल्पनयैव तस्याः तदाकारत्वं न वस्तुत इति चेत्; न; कल्पनातस्तदाकारत्वस्य "**बालानाम्**" इत्यादिवृत्तव्याख्याने प्रतिविहितत्वात्। ततः समान एव नैयायिकवत्सौगतस्यापि शाब्दव्यवहाराभाव इत्यलं प्रसङ्गेन ।

साम्प्रतं **विमुखेत्यादिकमेव** व्याख्यातुकामो योगज्ञानदूषणं सौगतज्ञानेऽपि योजयन्निदमाह–

निराकारेतरस्यैतत्प्रतिभासभिदा यदि ॥२०॥
तत्राप्यनर्थसंवित्तावर्थज्ञानाविशेषतः । इति ।

निराकारं नैयायिकादेर्ज्ञानं तस्मात् **इतरत्** साकारं तस्य **एतत्** '**विमुख**'इत्यादि दूषणम् । कुतः ? इत्याह–**अर्थज्ञानाविशेषतः** । अर्थस्यैव न स्वरूपस्य ज्ञानं तस्माद्विशेषादवैलक्षण्यात् । न हि यद्यस्माद्विशिष्टं तत्तद्दूषणापरामृष्टं भवितुमर्हति तद्विशिष्टत्वस्यैवाभावप्रसङ्गात्। असिद्धं तस्य तद्विशिष्टत्वम्, तदाह–**प्रतिभासभिदा यदि** । प्रत्यात्मं भासनं **प्रतिभासः** स्वप्रकाशनं तेन **भिदा** साकारज्ञानस्यार्थज्ञानाद्विशेषो **यदि** चेत्; तत्राह–**तत्रापि** तद्भिदायामपि तद्दूषणं भवतीति यावत्। अत्रेदमैदम्पर्य्यम्–नाविशिष्टत्वमर्थज्ञानात् साकारज्ञानस्यानात्मवेदित्वमुच्यते यतः प्रतिभासभिदोच्येत, किन्तु विषयविषयिणोरन्यतरापरिज्ञानमेव । तच्चास्ति स्वप्रकाशेऽपि ज्ञाने । कदा ? इत्याह–**अनर्थसंवित्तौ** अर्थपरिच्छित्त्यभावे । तथा च,

अर्थज्ञत्वं यद्वद् दुर्वोधं स्वप्रकाशशून्यस्य ।
स्वपराभ्यां तद्बोधप्रतिषेधात् पूर्वमस्माभिः ॥६३२॥

---

१ परमार्थसत्त्वम् । २ तद्भागज्ञानघटनस्यैव । ३ –यमे भव–आ०, ब०, प०, स० । ४ सत्यस्यात्म–आ०,ब०,प०,स० । ५ न्यायवि० श्लो० ८ । ६ ज्ञानानाम् । ७ घटनाधिकरणज्ञानानां भेदपरिज्ञानस्य । ८ प्रतिक्षणभेदनियम । ९ ज्ञानस्य । १० समयक्रमानुपातित्वेन । ११ कल्पनयैतस्याः आ०,ब०,प०,स० । १२ बुद्धेः । १३ न्यायवि०श्लो० २ । १४ असिद्धत्वस्य त–आ०,ब०,प०,स० । १५ –ज्ञानस्यात्मवेदि–आ०,ब०,प०,स० ।

तद्गृहीतार्थमहणे तत्सारूप्य स्ववेदिनोऽपि कथम् ।
गम्येत, तन्मुखेन यदर्थमहण मणन्ति परे ॥६३३॥

अर्थसरूपज्ञानमहणमेव हि परेषामर्थमहणम् उपचारात्, तत्त्वतस्तदेव च सारूप्यज्ञानं कथमर्थापरिज्ञाने भवेत् ? ज्ञानमात्रपरिज्ञानाभूवत्येवेति चेत्, न, सारूप्यस्य सम्बन्धवद् द्विष्ठत्वेन तत्परिज्ञानस्यैकरूपपरिज्ञानमात्रादसम्भवात् । ५

द्विष्ठसारूप्यसंवित्तिर्नैकरूपप्रवेदनात् ।
द्वयस्वरूपमहणे सति सारूप्यवेदनम् ॥६३४॥

अन्यथा सम्बन्धज्ञानस्यापि तन्मात्रादेव सम्भवादश्लीलमेवेदं भवेत्-"द्विष्ठसम्बन्धसंवित्तिः" [प्र० वार्तिकालं० १।१] इत्यादि ।

भवतु परिज्ञाते एवार्थे सारूप्यपरिज्ञानमिति चेत्, कुतस्तत्परिज्ञानम् ? तत एव ज्ञानादिति चेत्, यदि सारूप्यमनादृत्य, निष्फलं तर्हि [2]तत्कल्पनम् । [3]तत्परिज्ञानमुखेनैवेति चेत्, न, [4]'अर्थपरिज्ञाने [5]तत्परिज्ञानम्, [6]तन्मुखेन चार्थपरिज्ञानम्' इति परस्पराश्रयात् । सारूप्यान्तरपरिज्ञानमुखेनैवेति" चेत्, न, एकार्थापेक्षया [8]तदन्तरस्यामावात् । भावेऽपि [9]कथमर्थापरिज्ञाने [10]तस्यापि परिज्ञानम् ? परिज्ञाते पदार्थे इति चेत्, न, 'कुतः' इत्यादेरनुबन्धादन [11]वस्थानानुपपत्तेः । तन्न तत एवार्थस्य तत्सारूप्यस्य च परिज्ञानम् । अत्रार्थे 'विमुग्ध' इत्यादेर्व्याख्यानम्-मुग्धमिव मुग्धं चैतन्यं वस्तुरसपरिज्ञानस्य तदधीनत्वात्, विगतं मुग्धं यस्मात्स विमुग्धः अचेतनार्थः, स च ज्ञानस्य विमुग्धज्ञाने तयोः संवेदः समस्तेन स्वरूपत्वेन वेदनम् । स्ततो विरुद्धोऽनुपपन्न इति । अन्यत एव तर्हि ज्ञानात्तत्सारूप्यस्य व्यक्तिस्तेनार्थस्य तज्ज्ञानस्य च ग्रहणसम्भवादिति चेत्, न, [12]तेनाप्यनादृतसारूप्येण तद्ग्रहणात्, प्रथमज्ञानेऽपि तत्कल्पनावैफल्यानुषङ्गात् । सारूप्यपरिज्ञानमुखेन तु तेन[13] तद्ग्रहणे पूर्ववत् परस्पराश्रयस्य सारूप्यान्तरकल्पने चानवस्थानस्य प्रसङ्गात् । तन्न ततोऽपि प्रथमज्ञान सारूप्यस्य सञ्चारः सम्प्रतिपत्तिः, तत्सारूप्यस्यैवासम्प्रतिपत्तेः । तस्याप्यन्यतः परिज्ञानपरिकल्पनायामनवस्थानम् । अत्र चार्थे 'व्यक्तिः' इत्यादि 'अनवस्थानम्' इत्यन्तं सुगम स्वाभ्यूह्येयम् । ततो न प्रत्यक्षात्ततोऽन्यतो वा सारूप्यपरिज्ञानम् ।

नापि तदुद्भवभाविन्ये विकल्पात्, तस्यावस्तुविषयत्वात् । ततोऽपि वस्तुसिद्धावति प्रसङ्गात् । वक्ष्यति चैतत् "अयमेवं[14] न वेत्येवम्" इत्यादिना[15] । सारूप्यमप्यवस्त्वेवेति चेत्; न,

---

१ अर्थसरूप-आ०, ब०, प०, स० । २ कथमर्थपरि-आ०, प०, प०, स० । ३ ज्ञानज्ञानमात्र-आ०, ब०, स० । ज्ञानमनात्र-प० । ४ एकरूपज्ञानमात्रादेव । ५ -ज्ञान एवा-आ०, ब०, प० । ६ सरूप एव परि-आ०,ब०,प०,स० । ७ सारूप्यकल्पनम् । ८ तदन्तरपरिज्ञान । ९ सारूप्यपरिज्ञानम् । १० सरूपमुखेन । ११ -मुखेनेति आ०,ब० । १२ सारूप्यान्तरस्य । १३ कथमर्थपरि-आ०, ब०, प०, स० । १४ सरूपान्तरस्यापि । १५ -वस्थानु-आ०,ब०,प०,स० । १६ तेनाप्यनादृत-आ०,ब०,प० । १७ अप्रज्ञानेन । १८ -वमर्थेना आ०, ब०, प०, स० । १९ श्लोवा० श्लो० ११ ।

तदात्मनः प्रत्यक्षस्याप्यवस्तुत्वप्रसङ्गात्। तदयम् अञ्जनविन्यासादेव लोचनभङ्गः। प्रत्यक्षस्य तत्प्रति [1]संस्कारार्थमेव सारूप्येण [2]नीरूपत्वस्योपस्थापनात्। अवस्तुविषयस्यापि तस्य तत्र प्रामाण्यं [3]प्रतिबन्धादिति चेत्; न; अनुमानादन्यस्य [4]तदभावात्। तस्य च "[5]प्रकाशनियमः" [6]इत्यादौ निपेत्स्यमानत्वात्। ततो न कुतश्चिदपि सारूप्यं सुपरिज्ञानम्। ततो न तज्ज्ञानं विशेष्यं नापि तस्य विशेषणं सारूप्यम्, अत इदमुक्तम्–**अविशेष्यविशेषणम्**। इति सूक्तं **'निराकारेतरस्य'** इत्यादि। ततो न यौगसौगतावन्योन्यमतिशयाते अस्ववेदनादिव[7] स्ववेदनादपि संवेदनादर्थसिद्धेरभावात्। मा भूत्तत्सिद्धिः, संवेदनमात्रस्यैवाभ्युपगमादिति चेत्; न; "[8]स्वतस्तत्त्वम्" इत्यादिना[9] तन्निराकरणात्।

इदानीमनवस्थानमेव संविद्विषयं पूर्वोक्तं व्यक्तीकुर्वन्नाह–

ज्ञानज्ञानमपि ज्ञानमपेक्षितपरं तथा ॥२१॥
ज्ञानज्ञानलताशेषनभस्तलविसर्पिणी।

पर्यन्ते–**'प्रसज्येत'** इति। निराकारमेव ज्ञानं ततो नानवस्थानं परतस्तत्र सारूप्यपरिज्ञानाभावादिति चेत्; न; तद्वदेव प्रथमज्ञानस्यापि निराकारत्वापत्तेरविशेषात्। निराकारस्य कथं विषयनियमः? इत्यपि न युक्तम्; पर्यन्तज्ञानेऽपि समानत्वात्। शक्तिनियमात्तत्र[10] तन्नियमः प्रथमज्ञानेऽपि न वैमुख्यमावहति। तदेवाह–

[प्रसज्येत] अन्यथा तद्वत्प्रथमं किन्न मृग्यते ? ॥२२॥ इति।

ततः प्रथमवत् पर्यन्तेऽपि [11]सरूपमेव ज्ञानम्। तस्य च परतः प्रतिपत्तौ तदवस्थ एव [12]तत्प्रसङ्गः। तत्र च सुदूरमनुसृत्यापि पर्यन्तज्ञानस्य [13]कुतश्चिदप्रतिपत्तौ न [14]तत्तस्तत्पूर्वस्य[15] नापि [16]तत्तस्तत्पूर्वस्य परिज्ञानं यावत्प्रथमज्ञानमप्रतिपन्नम्। [17]अर्थप्रतिपत्तिरर्थाकारज्ञानप्रतिपत्तेरेव तत्प्रतिपत्तित्वात्, तस्याश्चाभावादिति प्रवृत्त्यादिव्यवहारविकलमखिलं जगद्भवेत्, [18]तस्यार्थतत्त्वप्रतिपत्तिमूलत्वेन तदभावेऽभावात्। एतदेवाह–

गत्वा सुदूरमप्येवमसिद्धावन्त्यचेतसः।
असिद्धेरितरेषां च तदर्थस्याप्यसिद्धितः ॥२३॥
असिद्धो व्यवहारः इति।

मा भूत्तद्व्यवहार इति चेदाह–

अयमतः किं कथयाऽनया ? इति।

---

१ संसारा–आ०, ब०, प०, स०। २ निरूप–आ०, ब०, प०, स०। ३ विकल्पस्य। ४ वस्तुप्रतिबन्धात्। ५ प्रामाण्याभावात्। ६ न्यायवि० श्लो० ३२। ७ –दिव स्ववेदनादर्थ–आ०, ब०, प०, स०। ८ न्यायवि० श्लो० ५६। ९ –परस्तथा आ०, ब०, प०, स०। १० पर्यन्तज्ञाने विषयनियमः। ११ स्वरूप–आ० प०, ब०, स०। १२ अनवस्थाप्रसङ्गः। १३ कुतश्चित्प्र–आ०, ब०, प०, स०। १४ पर्यन्तज्ञानात्। १५ उपान्त्यज्ञानस्य। १६ उपान्त्यज्ञानात्। १७ अर्थाप्रति–ता०। १८ प्रवृत्त्यादिव्यवहारस्य। तस्यार्थप्र–आ०, ब०, प०, स०।

अयं सौगतः किं न किञ्चित् 'कुर्यात्' इति शेषः। कथा ? कथया पार्थिवादि-रूपया, अनया प्रसिद्धया। कुतः ? इत्याह–'अतः' इति। अतो व्यवहारादेव [3]कथा यत इति। यदुक्तं भवति–सति हि प्रतिपाद्यप्रतिपादकादिलक्षणे व्यवहारे सम्भवति कथा तस्यास्तद्विक्षेपत्वात्[4], असति तु तस्मिन्[5] तस्या एवाभावात्। कथं तया[6] किमप्यसौ[7] क्षिप्यन्मुत्पादनमन्यद्वा कुर्विति ?

यदि वा, 'निराकारेतरस्य' इत्यादिनैव प्रसङ्गागतं सौगतमतक्षिप्य नैयायिकमेव पुनरप्यपक्षिपन्नाह–'ज्ञानज्ञानम्' इत्यादि। ननु [8] प्रति न युक्तमनवस्थाप्रसञ्जनम्, न हि तत्र[9] ज्ञानज्ञानस्य परिज्ञाननियमः, [10]तदपरिज्ञानेऽपि दोषाभावात्। तत्कथमस्य "तदपरापेक्षणं यतस्तत्प्रसङ्ग" ? प्रथमज्ञानस्यापि "[11]तन्नियमः कस्मादिति चेत् ? न, तत्रापि तदभावात्। न हि तस्यापि नियमेन परिज्ञानम्, अपरिज्ञातस्यैव "[12]तस्यापि विषयप्रकाश"[13]-कत्वात्, तावतैव व्यवहारस्यापि सम्भवादिति चेत्, क इदानीं परोक्षज्ञानवादिनो मीमांस-कस्यैव[14] विक्षेपः स्यात् ? अयमेव यतस्तस्य[15] परोक्षमेव ज्ञानम्, नैयायिकस्य तु कदाचित्प्रत्यक्षमपीति चेत्, उच्यते–यदा "[16]तत्परोक्षम्, तदा तदस्तीति कुतः ? भवतोऽपि "[17]तथाविधं पावकादिकं "[18]क्वचिदस्तीति कुत इति चेत् ? मा भूत्, "[19]न कापित् क्षतिः। न चैव "[20]भवतः 'अपरिज्ञातस्यैव विषयप्रकाशत्वम्' इत्यभ्युपगम्यते। अभ्यदा प्रत्यक्षत्वादिति चेत्, न, ततस्तदैव[21] तत्सत्त्वोपपत्तेः। एकदा प्रत्यक्षस्यान्यदापि सत्त्वे नित्यमर्थज्ञानं भवेत्, "[22]पूर्वापरकोट्योरपि अप्रतीतस्यैव सत्त्वोपपत्तेः। परोक्षस्यापि[23] तत्कार्यान्यथानुपपत्त्या तत्त्वे पावकस्येव[24] धूमादिति चेत्, न, व्यवहारस्यापि धूमवदपरिज्ञातस्यागमकत्वात्। परिज्ञातस्यैव गमकत्वमिति चेत्; न, [25]तत्परिज्ञानस्यापि अर्थपरिज्ञानवदपरिज्ञाने कुतोऽस्तित्वम् ? व्यवहारादेव [26]तरुत्वादिति चेत्, न, तत्रापि 'व्यवहारस्यापि' इत्यनुसन्धानात्[27] अव्यवस्थापत्तेः। ततो यदुक्तं भासर्वज्ञेन–"तदप्रतीतौ ततोऽप्यौ व्यवहाराः प्रवृत्ता इति कुतोऽयगम इति चेत् ? इति पूर्वपक्षयित्वा तत्प्रतिषेधनम्–तदव्यवहारदर्शनादेव अङ्कुरादिसादिदर्शनाद् बीजाद्यधर्मादिनिश्चयवत्" [ ] इति, तत्प्रतिविहितम्, व्यवहारतस्तदवगमस्य अनवस्थादोषोपहतत्वेन दुष्करत्वात्। ततो "[28]यद्यभ्युपगम्यापि परोक्षत्वमनवस्थानदोषान्न निर्मुक्तिः, अर्थज्ञानस्य प्रत्यक्षत्वनियमे[29] एवाग्नौ कर्तव्यः। तद्वत्तज्ज्ञानस्यापि[30] तन्नियमे कथ[31] तदन्तरमनपेक्षणं यतो 'ज्ञानज्ञानलक्षा' इत्या-

---

१ कुर्यादिति आ०, ब०, प०, स०। २ व्यवहारे देवकथा यतः ता०। ३ कथयत आ०, ब०, प०। ४ व्यवहारविक्षेपकत्वात्। ५ व्यवहारे। ६ कथया। ७ सौगतः। ८ नैयायिकम्। ९ ज्ञानज्ञानापरिज्ञानेऽपि। १० तदन्यज्ञानापेक्षणम्। ११ अनवस्थाप्रसङ्गः। १२ परिज्ञाननियम। १३ प्रथमज्ञानस्य। १४ –प्रकाशत्वात् ता०। १५ मैमांसकस्य। १६ मीमांसकस्य। १७ ज्ञानम्। १८ परोक्षम्। १९ क्वचिदस्ति कुत आ०, प०, ब०, स०। २० मा भू–आ०, ब०, प०, स०। २१ भवतोऽपि धूमे–ता०। नैयायिकस्य। २२ प्रत्यक्षत्वात् एव। २३ ज्ञानस्य प्राक्कोटौ विनाशात् पश्चात्कोटौ। २४ ज्ञानस्य। २५ –स्यैव पू–आ०ब०, प०। २६ व्यवहारपरिज्ञानस्यापि। तत्परिज्ञातस्या–आ०, ब०। २७ व्यवहारपरिज्ञानकृतात्। २८ –सम्बन्धस्य–ता०। २९ यदप्यु–आ०, ब०, ब०, स०। ३० –मे सति–आ०, ब०, प०, स०। ३१ अर्थज्ञानावस्थापि। ३२ तदन्तरं–आ०, ब०, प०, स०।

चानवसरं भवेत् ? पर्यन्ते कस्यचिज्ज्ञानस्यात्मवेदनत्वादनवसरमेवेदमिति चेत् ; न; तद्वत्प्रथमज्ञानस्यापि [1]तत्त्वानुषङ्गात्। तदेवाह–**'अन्यथा तद्वत्प्रथमं किन्न मृग्यते'** इति। ततस्तस्याप्यन्यत एव वेदनादनवस्थानमेव।

नानवस्थानं विषयान्तरसन्निधानात्। सन्निहिते हि विषयान्तरे [3]तत्रैव ज्ञानम्, न ज्ञानज्ञानादाविति चेत् ; न ; सन्निहितेऽपि तस्मिन् तस्यैवान्तरङ्गत्वेन बलीयस्त्वात्। अन्तरङ्गोऽपि[4] (हि) ज्ञानज्ञानादिः आत्मसमवायात्, न विषयान्तरं विपर्ययात्, प्रत्यासन्नसम्बन्धश्च। प्रत्यासन्नो[5] हि तत्र[6] मनसः सम्बन्धः संयुक्तसमवायलक्षणः [7]त्रयसन्निकर्षत्वात्, विषयान्तरज्ञानहेतुस्तु सम्बन्धो विप्रकृष्टः [8]चतुष्टयादिसन्निकर्षत्वात्। ततो बलवति प्रत्यासन्नसम्बन्धे च ज्ञानज्ञानादौ स्वविषयज्ञानजननसमर्थे सति कथं सन्निहितेऽपि विषयान्तरे ज्ञानं यदनवस्थानं न भवेत् ? अव्यापकश्च [10]तत्सन्निधानम्, व्याप्तिविषये मानसप्रत्यक्षे सकलार्थवेदिनि माहेश्वरे च ज्ञाने तदभावात्। [11]ततो न विषयान्तरसन्निधानमङ्गमवस्थितेः। सत्यपि विषयान्तरसन्निधानादे[12]रवस्थाने कथं पर्यन्तज्ञानस्याप्रतिपन्नस्यास्तित्वम्[13] ? किं पुनः प्रतिपत्त्या व्याप्तमस्तित्वं येन तदभावे न भवेत् ? बाढम् ; कथमन्यथा[14] व्योमकुसुमादेस्तन्न[15] भवेत् ? सर्वस्य तर्हि सर्वज्ञत्वं [16]सतः सर्वस्य वेदनात्। [17]प्रत्येकं न वेदनं [18]बहुभिरेव वेदनादिति चेत् ; न; असर्वज्ञेनैवमपि[19] प्रतिपत्तुमशक्यत्वादिति चेत् ; सत्यम् ; अस्ति प्रतिपुरुषं सर्वज्ञत्वम्, अन्यथा व्याप्तिपरिज्ञानाभावस्य निवेदनात्। पर्यन्तज्ञानस्यापि तर्हि पावकादिवत् व्याप्तिज्ञानविषयत्वादेवास्तित्वमिति चेत् ; कथं तर्हीदमुक्तं भासर्वज्ञेन[20]–"न पुनरविदितो नास्त्येवोपलम्भः" [ ] इति।

[21]कथं वा व्याप्तिज्ञानस्यास्तित्वम् ? भवतां कथम् ? स्वयमुपलम्भात् ; ममाप्येवमिति चेत् ; न; **'अन्यथा'** इत्यादिदोषात्। उपलम्भान्तरादिति चेत् ; अनुपघातमनवस्थानम्, [22]तस्यापि [23]तदन्तरादस्तित्वोपपत्तेः। तत्रापि विषयान्तरसन्निधानादवस्थानमिति[24] चेत् ; न ; 'सत्यपि' इत्यादेरनुवन्धेन चक्रकप्रसङ्गादनवस्थापत्तेश्च। ततः पर्यन्तज्ञानस्याप्रतिपत्तिकत्वादभाव एव वक्तव्यः।

तदनेन शक्तिपरिक्षयात् ईश्वरनियोगाच्चावस्थानमिति प्रतिविहितम् ; पर्यन्तज्ञानस्याप्रतिपत्तिकत्वेनाभावप्रसङ्गात्। तदभावे च [25]तद्विषयस्याप्यभावस्तावदेवं यावत् प्रथमज्ञानस्य तदर्थस्य चाभाव इत्यसिद्ध एव तन्निबन्धनो व्यवहार इति। तदाह–

---

१ आत्मवेदनत्वानुषङ्गात्। २ पर्यन्तस्यापि ज्ञानस्य। ३ विषयान्तर एव। ४ अत्र ताडपत्रं त्रुटितम्। ५ –सन्ने हि तत्र मनः स–आ०,ब०,प०,स०। ६ ज्ञानज्ञानादौ। ७ ज्ञानज्ञानादिः आत्मा मनश्चेति त्रयम्। ८ हेतुस्तत्सम्बन्धो आ०,ब०,प०,स०। ९ विषयान्तरम् इन्द्रियम् आत्मा मनश्चेति चतुष्टयम्। १० विषयान्तरसन्निधानम्। ११ ततो विष–आ०,ब०,प०। १२ –दनवस्थाने आ०,ब०,प०,स०। १३ –पन्नव्याप्तित्वम् आ०,ब०,प०,स०। १४ प्रतिपत्त्या अस्तित्वव्याप्त्यभावे। १५ अस्तित्वम्। १६ स्वतः आ०,ब०,प०,स०। सत्त्वेन रूपेण। १७ सतः तत्तद्व्यक्तिरूपेण। १८ सामान्यरूपतया। १९ बहुव्यक्तिद्वारेण। २० –ज्ञेन पुनर–आ०,ब०,प०,स०। २१ कथं व्या–आ०,ब०,प०,स०। २२ उपलम्भान्तरस्यापि। २३ अन्यस्माद् उपलम्भान्तरात्। २४ –नादनवस्थानमिति आ०, ब०, प०, स०,। २५ तद्विषयत्वस्या–आ०, ब०, प०, स०। उपान्त्यज्ञानस्य।

गत्वा सुदूरमप्येषमसिद्धाधन्त्यचेतसः ।
असिद्धेरितरेषां च तदर्थस्याप्यसिद्धितः ॥२३॥

असिद्धो व्यवहारोऽयम् इति ।

ततः किम् ? इत्याह–

अतः किं कथयाऽनया ? । ५

अतः अनन्तरन्यायात् । किम् ? न किञ्चित् 'व्युत्पाद्यम्' इति क्षेपः ? कया ? कथया सूत्रवार्तिकादिव्याख्यानया । अनया प्रसिद्ध्येति । तत्त्वज्ञानव्युत्पादनमेव हि [1]तस्याः प्रयोजनम्–अनन्तरन्यायेन[2] च तदभावान्निष्प्रयोजनैव कथेति भावः इति ।

'निराकारेतर' इत्याद्यः अन्तरश्लोकः[3] वृत्तिमध्यवर्तित्वात्, 'विमुञ्च' इत्यादिवार्तिकव्याख्यानवृत्तिग्रन्थमध्यवर्तिन[4] इत्यमी श्लोकाः । [5]वृत्तिचूर्णिनां तु विस्तारभयान्नास्माभिर्व्याख्यानमुपदर्श्यते । सङ्ग्रहश्लोकास्तु वृत्त्युपदर्शितस्य वार्तिकार्थस्य संग्रहपरा इति विशेषः । १०

एवमवस्थापितेऽर्थज्ञानस्यात्मवेदने साङ्ख्यः प्राह–सत्यम्, अर्थज्ञानं प्रत्यक्षमिति नात्र विवादः किन्तु तत्परार्थमचेतनम् । [6]परार्थं तत् संहतत्वात्, शयनासनाद्यङ्गवत् । शयनासनाद्यङ्गं हि परस्परप्रत्यासत्तिविशिष्टतया संहतं परार्थमेवोपलब्धं तस्यै तदुपभोक्तृशरीरार्थत्वेनोपलब्धेः, [7]अतो न साध्यवैकल्यमुदाहरणस्य । नापि हेतोरसिद्धत्वम्, अर्थज्ञानस्यापि गुणत्रयरूपतया संहत १५ त्वोपपत्तेः । सन्निवेशविशेषो हि संहतत्वम्, तच्च [8]भेदसाध्यपेक्षम्, भेदश्चायविरुद्धो गुणानामिति सङ्घातमेव तदात्मकमर्थज्ञानम् । तदात्मकत्वञ्च तस्य यथासम्भवं सुखदुःखमोहनिमित्तत्वेनाभ्यवसायात्[9] । न ह्यतदात्मक[10] तन्निमित्तं भवितुमर्हति अतिप्रसङ्गात् । भवति च [11]'ततः कस्यचित्कदाचित् सुखम्' [12]'अन्यदा दुःखं मोहो वा । ततो गुणत्रयात्मकम्, ततश्च परार्थम्, [13]'अत एवाचेतनम् । परार्थत्वं हि परानुभवापेक्षत्वं विषयत्वमेवोच्यते । विषयश्च घटादिरचेतन २० एव प्रतिपन्नः । तत इदमुच्यते–'अर्थज्ञानमचेतनं विषयत्वात् घटादिवत्' इति । तत्रेदमाह–

प्रत्यक्षोऽर्थपरिच्छेदो यद्यकिञ्चित्करेण किम् ॥२४॥
अथ नार्थं परिच्छेदो यद्यकिञ्चित्करेण किम् ?

अर्थस्य नीलादेः परिच्छेदो निर्णयः अर्थपरिच्छेदः । प्रत्यक्ष[14] स्वानुभवाभ्युपगमेऽपि तयैव व्यवस्थापितत्वात् । अनेन [15]'अर्थज्ञानमचेतनम्' इति प्रत्युक्तम्, अचेतनत्वे २५

---

१ कथायाः । २ –न तद्–आ०, ब०, प०, स० । ३ –मध्यवर्तिनः आ० । ४ वृत्तिचूर्णिनां तु आ०, ब०, प०, स० । ५ वृत्तिप्रदर्शितस्य आ०, ब०, प०, स० । ६ "सङ्घातपरार्थत्वात्–इह येऽपि ते सङ्घाताः ते परार्था एव: पर्यङ्कादयाध्यादयः"–सांख्यका० माठर०, गौडपाद०, युक्तिदी०, तत्त्वकौ० आ० १६ । ७ शास्त्रमाम्नायस्य । ८ ततो आ०, ब०, प०, स० । ९ भेदसाध्यपेक्षं आ०, ब०, स० । १० –वस्तुनो न आ०, ब०, प०, स० । ११ सुखदुःखमोहात्मकम् । १२ अर्थज्ञानात् । १३ अन्यथा तु–आ०, ब०, प०, स० । १४ तत्र आ०, ब०, प०, स० । १५ अर्थज्ञानमचेत–आ०, ब०, प०, स० ।

स्वसंवेद्यत्वायोगात्। तत इदमुच्यते–चेतनस्तत्परिच्छेदः[1], स्वसंवेद्यत्वात्, यस्तु न चेतनो नासौ तथा यथा नीलादिः[2], स्वसंवेद्यश्च तत्परिच्छेदः, तस्माच्चेतन इति।

नायं प्रयोजको हेतुः, स्वयमचेतनत्वेऽपि [3]तस्य चेतनसंसर्गेण स्ववेदनोपपत्तेः। एवं तद्वेदनस्य विभ्रमः स्यादिति चेत्; न; अव्यतिरेकापेक्षया तदभ्युपगमात्। अभ्युपगम्यत एव चेतनतत्परिच्छेदयोरव्यतिरेकवेदनस्य विभ्रमत्वम्, व्यतिरेकस्यैव परमार्थत्वात्। प्रत्यक्षत्वं विभ्रमस्य कथमिति चेत्? न; वस्तुतस्तस्याप्यभावात् केवलमनुत्पन्नविवेकदर्शनप्रतिपन्नाभिप्रायानुमन्तानमात्रेण [4]तदभिधानात्। तन्न स्वसंवेद्यत्वं चेतनत्वसाधनायालं तत्परिच्छेदस्य अन्ययानुपपत्तिविकलत्वादिति चेत्; तदिदमपर्यालोचितमेव परस्य [5]वचनम्; विभ्रमविषयत्वेन [6]चेतनतत्परिच्छेदयोरपि तदविवेकवदवस्तुतैव प्राप्नुयात्। इदमप्यभिमतमेवेति चेत्; कथमिदानीं तदवस्तुत्वस्य [7]प्रतिपत्तिः? वस्तुभूतस्य तद्वेदनस्याभावात्, अवस्तुभूताच्च[8] अवस्तुप्रतिपत्तेरपि दुरुपपादत्वात्। वक्ष्यति चैतत्–

"विभ्रमे विभ्रमे तेषां विभ्रमोऽपि न सिद्ध्यति।" [न्यायवि०श्लो० ५४] इति।

ततो वस्तुभूतमेव तद्वेदनमङ्गीकर्तव्यमिति कथन्न तत्रायं दोषः–'चेतनज्ञानभागयोरप्यवस्तुत्वं विभ्रमविषयत्वात् तदविवेकवत्' इति? तयोरविभ्रान्तमेव तद्वेदनं निर्बाधत्वात्, तदविवेके तु भ्रान्तमेव [9]बाधवत्त्वात्, तस्मादसिद्धमेव [10]तयोर्विभ्रमविषयत्वमिति चेत्; [11]भवत्येवेदं यदि [12]तद्वेदनमेव लभ्येत। कुतो न लभ्यते? विवेकावेदनादेव। विवेको हि ज्ञानभागाच्चेतनस्य तदविविक्तः[13]। कथं [14]तदवेदने [15]तस्यापि वेदनम्? वेदने वा–

विदिताविदितत्वेन चिदाकारविवेकयोः।
विरुद्धधर्माध्यासेन भेदस्तत्र कथन्नु वः? ॥६३५॥
विवेकाद्विद्यमानश्च [16]तदाकारो व्रजत्यलम्।
ज्ञानभागेन तादात्म्यमभावादन्यथा गतेः ॥६३६॥
तथा च वस्तुतस्तत्र [17]चिद्रूपत्वव्यवस्थितेः।
चिति संसर्गतश्चित्त्वं तस्येत्यनुचितं वचः ॥६३७॥
तस्मादेकान्ततो भेदाच्चित्त्वभावविवेकयोः।
विरुद्धधर्माध्यासेऽपि नैवायं शक्यकल्पनः ॥६३८॥
एकान्ताभेदपक्षे च चिद्रूपस्याप्यवेदनम्।
तद्विवेकवदेव स्यादिति [18]तत्सम्भवः कथम् ॥६३९॥

---

१ –दः संवे–आ०, ब०, प०। २ –दि स्व–आ०, ब०, प०, स०। ३ अर्थज्ञानस्य। ४ –दनयोर–आ०, ब०, प०, स०। ५ प्रत्यक्षत्वस्य। ६ प्रत्यक्षत्वाभिधानात्। ७ वचनं हि वि–आ०, ब०, प०, स०। ८ –त्वे चेतनतत्प–आ०, ब०, स०।–त्वे चेतनत्वात्तत्प–प०। ९ प्रतिपत्तुर्वस्तु–आ०, ब०, प०, स०। १० –ताच्च वस्तु–आ०, ब०, प०, स०। ११ बाधवत्त्वं त–आ०, ब०, प०। बाधकत्वात् स०। १२ चेतनज्ञानभागयोः। १३ भवतीवेदं आ०, ब०, प०। १४ चेतनज्ञानभागयोर्वेदनमेव। १५ चेतनादभिन्नः। १६ विवेकावेदने। १७ चेतनस्यापि। १८ चिदाकारः। १९ ज्ञानभागे। २० चिद्रूपसद्भावः।

अविवेकपरिज्ञानं येन ज्ञानस्य यद्भवेत् ।
[1]संसारकारणत्वेन कापिलैरभिलप्यताम् ॥६४०॥
चिद्रूपवद्विवेकस्याप्ययया नियमाद्ध्रुवे ।
कथञ्चिद्भेदकल्पित्तु ज्ञानदृग्भागयोरपि ॥६४१॥
तद्वदेव भवेदेतदेवैरन्यत्र भाषितम् । ५
"चित्तेर्विषयनिर्भासविवेकानुपलम्भतः ।
विज्ञातायाः क्वचित्सिद्धो विरुद्धाकारसम्भवः ॥" [सिद्धिवि०प्र०परि०] इति।

ततो यत् [2]पतञ्जलेः सूत्रम्—"दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" । [योगसू० २।६] इति । यच्च तत्रैव विन्ध्यवासिनो भाष्यम्—"भोक्तृभोग्यशक्त्योरत्यन्तासङ्कीर्णयोर्-विभागप्राप्ताविव सत्या भोगः प्रकल्प्यते" [योगभा० २।६] इति , तत्प्रतिविहितम् , १०
[3]ईषार्थत्वानुपपत्तेः, वस्तुत एवोक्तेन न्यायेन तयोरविभागस्य भावात् । न हि साक्षादेव सतस्त-दविभागस्य [4]इषार्थत्वमुपपन्नम् , [5]तच्छक्त्योरपि [6]तदर्थत्वप्रसङ्गात् । तया च [7]तद्वदेषार्थस्तुसत्त्वं तयोरपीति स एव पुनरपि मायावादः प्राप्त । निरुपद्रवप्रतिपत्तिविषयत्वेन तच्छक्त्योरे-निर्वार्यत्वपरिकल्पनं [8]तदविभागेऽपि समानम्—कथञ्चित्तस्यापि [9]" निरुपद्रवतयैव प्रतिवेद-नात् । कुतश्चायमिवार्थ [10] प्रतिपत्तव्यः ? तत एव दर्शनशब्दाभ्याख्यात् ज्ञानभागादिति [11]चेत् , १५
[12]"तेनाप्यात्मानमप्रतियता कथं तत्र [13]दृगेकत्वस्य इषार्थस्य प्रतिपत्तिः [14]'एक इषाहं दृशा' इति ? न हि स्फटिकमप्रतियतः [15]' प्रवाल इव स्फटिकः' इति [16]प्रतिपत्तिः । आत्मनश्च [17]यदि दृक्शक्त्या सङ्कीर्णतयैव परिज्ञानम् , न भवत्येष तत इषार्थवेदनम् ।

दृक्शक्त्या स्वमसङ्कीर्णं तद्भागः प्रविदन्नयम् ।
तत्सङ्कीर्ण इवास्मीति कथं नामावबुध्यताम् ? ॥६४३॥ २०
भ्रुवमेव मणिं कश्चित् कस्यचित्परिपश्यतः ।
न [18]इारक्त इत्येत्येव तत्र बुद्धिः प्रवर्त्तते ॥६४४॥
कथं वा तत्सङ्कीर्णस्यात्मनः स्यात्तथा [19]गतिः ।
अचेतनत्वाच्चास्यैष न धर्मोऽयं पटादिवत् ॥६४५॥
दृक्शक्तिमद्वपुस् सोऽपि [20]चेतनो यदि कल्प्यते । २५
तन्नासङ्कीर्णतद्विज्ञो तस्माद्वार्यान्यवस्थितेः [21] ॥६४६॥

---

१ —प्रसार—आ०, ब०, प०, स० । २ पतञ्ज—आ० । ३ —स्मतैवास्मि—आ०, ब०, प०, स० । ४ एवार्थ—आ०, ब०, प०, स० । ५ दृग्दर्शनशक्तीरपि । ६ इषार्थत्व । ७ अविभागवदेव । ८ —वस्तुत्वं स० । ९ —त्तिविज्ञान—प०, स० । १० अविवार्यत्वं वस्तुत्वमिति । ११ अविभागस्यापि । १२ —मयेवार्थः आ०, ब०, प०, स० । १३ —ति चित्तेरपि स० । १४ ज्ञानभागेनापि । १५ दृगेकत्वस्यार्थ—आ०, ब०, प०, स० । १६ एवेषाहं आ०, ब०, प०, स० । १७ —तः पाटल इव आ०, ब०, प०, स० । १८ —प्रतिपत्तम—आ०,ब०,प०,स० । १९ यदि तच्छक्त्य—आ०,प०,प० । यदेतच्छक्त्य—स० । २० इारक्त आ०, ब०, प०, स० । २१ ज्ञानभागात् । २२ ज्ञानभागेऽपि । २३—मत्वम—आ०, ब०, प०, स० ।

अन्यया यदि [1]सङ्कीर्ण(र्णं) दृक्छक्त्यात्मानमन्यया ।
असङ्कीर्णतया वेत्ति विरोधानवकाशनात् ॥६४७॥

तन्न तत्सङ्करेऽप्येवं[2]मिवार्थत्वोपकल्पने ।
प्राच्यप्रसङ्गतो यस्मादव्यवस्थामतिभ्रमः ॥६४८॥

[3]कथं वा ज्ञानभागस्य स्वत एव चिद्रूपासङ्कीर्णतया परिज्ञानं अचेतनत्वात् कलशादिवत् ? चेतनसङ्कीर्णतया चेतन एवायमित्यपि न शोभनम् ; तदसङ्करपरिज्ञानसमय एव तत्सङ्करस्याव्यवस्थितेर्विरोधात् । नास्ति विरोधः, यस्माद् अन्यैव सा दृक्शक्तिर्यदपेक्षमसाङ्कर्यपरिज्ञानं तद्भागस्य, साप्यन्यैव तच्छक्तिर्यत्सङ्करापेक्षं तस्य चेतनायमानत्वमिति चेत् ; न, [4]प्राच्यस्येव तत्सङ्करस्यापि अविद्याविषयतया[5] इवार्थत्वे तत्रापि 'कुतश्चायमित्यर्थः प्रतिपत्तव्यः' इत्यादिप्रसङ्गस्यानुवन्धाद्व्यवस्थया बुद्धिविभ्रमापत्तेः । प्रतिपित्सानिवृत्त्या तद्विभ्रमनिवृत्तिरवस्थितिभावात् , यावन्तः खल्विवार्थतया तच्छक्तिसङ्कराः प्रतिपित्सिता निष्पन्ने तावतां तत्परिज्ञाने भवत्येव व्यवस्था, तदपरेषाम् इवार्थतया प्रतिपित्सावैकल्यादिति चेत् ; कथमिदानीमप्रतिपन्नास्ते सूत्रभाष्याभ्यां तदर्थत्वेनाभिधियेरन्, प्रतिपन्नवस्तुविषयत्वात् प्रेक्षावतां वचनप्रवृत्तेः ? तस्मादवश्यम्भाविनी साकल्येन तत्प्रतिपत्तिरिति कथमनवस्थाव्यावृत्तिर्यतो मतिविभ्रमो न भवेत् । नापि तच्छक्तेरपरापरत्वम् यतः कयाचित्तस्य सङ्करः कयाचिच्च विपर्ययः परिकल्प्यते, परस्यैवमनभ्युपगमात् । तन्न [6]तत एव तस्य तच्छक्तिसङ्करविकलस्य प्रतिपत्तिः, यत इवार्थस्य तत एवाधिगमः स्यात् ।

नापि परतः; तस्याप्यचेतनत्वे घटादिवदेव प्रतिपत्तिधर्मत्वानुपपत्तेः । 'दृक्शक्तिसाङ्कर्याच्चेतन एव परः' इत्यपि न युक्तम्; तत्रापि तत्साङ्कर्यस्य इवार्थत्वेन स्वतः प्रतिपत्तेरुक्तन्यायेनासम्भवात् , परतः प्रतिपत्तौ अनवस्थापत्तेः । दूरमनुसृत्यापि कस्यचिदनन्याँधीनमेव चिद्रूपत्वमभ्युपगन्तव्यम् । अन्यथा ततः कस्यचिदिवार्थत्वापरिज्ञानात् । इत्युपपन्नमर्थज्ञानस्य वस्तुभूतंचेतनत्वनिवेदनार्थं प्रत्यक्षग्रहणम् , अचेतनत्वे कल्पितंचेतनत्वे च प्रत्यक्षत्वानुपपत्तेः ।

भवतु प्रत्यक्षस्तत्परिच्छेद इत्यत्राह–'**यदि**' इत्यादि । यद्ययमभ्युपगम्यते तदा **अकिञ्चित्करेण** न किञ्चित्करोतीत्यकिञ्चित्करः पुरुषः, तस्यैवाकर्तृत्वाभ्युपगमात् , तेन **किम्** ? न किञ्चित्फलम् । निष्फल एवासौ [10]कल्पित इत्यर्थः । सफल एवासौ तत्परिच्छेदस्याधिष्ठानात् , स[11] हि चेतनाधिष्ठित एव प्रवृत्तिमान् , चेतनश्च नापरः पुरुषादिति चेत् ; न; अचेतनत्वस्यासिद्धत्वात्, तत्र[12] स्वत एव चेतनत्वस्योपपादितत्वात् । एतेन भोगस्तत्फलमिति

---

१ संकीर्ण यच्छक्तयात्मानमन्यया आ०, ब०, प०, स० । २–रेष्वेवमिवा–आ०, ब०, प०, स० । ३ कथञ्चाज्ञान–आ०, ब०, प०, स० । ४ प्राच्यस्यैव आ०, ब०, प०, स० । ५ –तयैवार्थ–आ०, ब०, प०,स० । ६ स्वत एव आ०, ब०, प०, स० । ७–न्यादीनमेव आ०, ब०, प०, स० । ८ –तमचे–आ०,ब०, प०, स० । ९–तमचे–आ०, ब०, प०, स० । १० कल्पते इ–आ०, ब० । कल्प्यते इ–प० । ११ परिच्छेदः । १२ परिच्छेदे ।

प्रत्युक्तम्, तस्यापि विषयदर्शनस्य सत्त्वे एव भावात्। [1]चेतनस्यापि [2]तदधिष्ठानादेव भोक्तृत्वकल्पनायामन्यत्रस्थितेः पुरुषेऽपि प्रसङ्गात्।

अपि च, यद्यप भोग[3] पुरुषाद्यनन्य एव तद्वदेव नित्य इति व्यर्थ एव भोग्यसन्निधिः अकिञ्चित्करत्वात्। भोगार्थो हि तत्सन्निधिः, भोगनित्यत्वे च किं तेन[4]? तत्सन्निधिनित्यत्वादेव [5]तन्नित्यत्वमिति चेत्, न, अनिर्मोक्षप्रसङ्गात्। आत्यन्तिको हि[6] परभोगोपरमो भोक्तुः निर्भोगः[7], तस्य च [8]भोग्यसन्निधिनित्यत्वे दुरुपपादस्वात्मपरिच्युतिरेव संसारस्येति कथमुपजाय तन्निर्वेदस्यापि [9]तापत्रयनिवृत्तये तन्निवर्तनहेतौ जिज्ञासा तदुपक्रमे वा सम्भाव्येत? तदुक्तमन्यत्र—

"दृश्यदर्शनयोर्भुक्तिर्नित्यव्यापकयोः कथम्।
यतस्तापाद्विमुच्येत तदर्थञ्च तपश्चरेत्? ॥" [सिद्धिवि० परि० ८] इति।

तन्न तत्सन्निधेर्नित्यत्वम्। [10]"तदनित्यत्वमेव तर्हि भोगोपरमादपवर्ग इति चेत्, न, तदुपरमे तदात्मनः पुरुषस्याप्युपरमात् [11]"पुरुषोच्छेदैकशेषत्वादोषनिपातात्। तन्न भोगस्य पुरुषाद्यनन्यत्वम्।

अन्यत्वमेवास्तु तस्य तत्प्रतिबिम्बरूपत्वात्, पुरुषप्रतिबिम्बं हि बुद्धिविवर्तगतं तद्वृत्तिसरूपं भोगः। न च प्रतिबिम्बतद्बोरभेदः[12], चन्द्रतोयगतप्रतिबिम्बयोर्भेदस्यैव प्रतिपत्तेरिति चेत्, उच्यते—तत्प्रतिबिम्बं यदि न [13]"तत्, तदवस्थं तद्वैरूप्यम्। तत एवेति चेत्, तस्य यदि नित्यं तत्करणसामर्थ्यं नित्य एव भोग इति कथमपवर्गः? भोग्यसन्निधावेव तत्सामर्थ्यमिति चेत्, न, प्रागसमर्थस्य [14]"तदापि तद्योगात्, नित्यतया स्वरूपप्रच्युतेरसम्भवात्। प्राक्तनासमर्थरूपपरित्यागेन तदा तत्समर्थरूपोपादाने तु परिणाम्येव परमार्थतः पुरुष इत्ययुक्तमुक्तम्—"चितिशक्तिरपरिणामिनी" [योगभा० १।२] इति।

सत्यपि पूर्वं सामर्थ्ये[15]"तत्सन्निधावेव [16]"तस्य [17]"तत्कर्तृत्वं सामयीत कार्यभावात् नान्यदेति चेत्, तदापि[18]" तस्य यद्गुणपरिणतमेव तत्कारित्वं कथमुक्तम्—

"गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः।" [सांख्यका० २०] इति?

तत्परिणतमेवेति चेत्, वस्तुतस्तर्हि निष्फल एव पुरुष इति कथ भोगात्तदनुमानम् सम्याऽसत्फलत्वात्? ततो निष्पिण्डमेवतत् (मेवत्)"पुरुषोऽस्ति भोक्तृभावात्" [सांख्यका० १७]

---

१ चित्सदर्शनात्मकस्य भोक्तुः। २ परिच्छेदादेव। ३ चेतनस्यापि परिच्छिन्नस्य। ४ तदा-पापि-आ०, ब०, प०। ५ भोग्यसन्निधिना। ६ भोगनित्यत्वम्। ७ हि भोगी-आ०, ब०, प०, स०। ८ 'बुद्धेरेव पुरुषभावापरिणामनिर्बन्धः, तदर्थत्वाच्च भोगः"—योगभा० २।१८। "तदर्थत्वाच्च निर्बन्धस्तस्य पुरुषार्थवत्तेति."—योगवा० २।१८। ९ भोग्यनित्य-आ०, ब०, प०, स०। १० "दुःखत्रयाभिघाता-त्तज्जिहासा तदपघातके हेतौ"—सांख्यका० १। ११ भोक्तृसन्निधिनित्यत्वेऽपि। १२ पुरुषच्छेद-आ०, ब०, प०, स०। १३ —तत्त-आ०, ब०, प०, स०। १४ पुरुषात्। १५ भोग्यसन्निधिकालेऽपि। १६ भोक्तृसन्निधावेव। १७ पुरुषस्य। १८ प्रतीतिश्च। १९ भोग्यसन्निधिकालेऽपि।

इति सप्रतिकारस्य, "अयमेव च तस्य भोगो यत्तत्र छायासङ्क्रमणसामर्थ्यम्" [ ] इति च तन्निबन्धनकारस्य ।

अपि च, तेन भोगेन भोग्यं भुञ्जानः पुमान्न [1]तावदभुक्तेनैव भोक्तुमर्हति, मुक्तात्मनोऽपि तँत्त्वप्रसङ्गात् । तँस्य स भोग एव न भवति तेन तस्याननुभवादिति चेत् ; इतरस्यापि न स्यात् तेनापि तँदननुभवस्याविशेषात् । भुक्तेनैव भुङ्क्ते इति चेत् ; कुतस्तद्भुक्तिः ? स्वत इति चेत् ; व्यर्थं तद्भोगकल्पनम्, भोगस्यापि स्वत एव तत्प्रसङ्गात् । भोगान्तरेण तत्प्रतिच्छायालक्षणेनेति चेत् ; न;तत्रापि तदन्तरकल्पनायामनवस्थानात् । तत्र भोगेन पुरुषस्य साफल्यम् ।

नापि कैवल्यार्थनोपक्रमेण; भोगाभावे तस्यैव वैफल्यात् । भोगोपरम एव हि "कैवल्यम्, भोगस्य च स्वत एवाभावात् किं तदुपरमार्थनोपक्रमेण ?

भोगाभावे स्वतः सिद्धे किंशुके पाटलत्ववत् ।
कस्तदर्थं प्रवर्त्तेत यदि नोन्मादवान् जनः ॥६४९॥
सत्यं नँ नस्य भोगस्तन्निवृत्त्यै नापि वर्तनम् ।
सदा शान्तस्वभावत्वात् दृशिमात्रस्य तत्त्वतः ॥६५०॥
केवलं बुद्धिसत्त्वस्थो भोगादिरुपचर्यते ।
तत्र स्वामिनि राज्ञेव सेनाव्यूहगतो जयः ॥६५१॥
इति चेदुपचारस्य निष्फलस्यैव कल्पने ।
ततोऽन्यत्रापि तत्कृप्तिरनवस्थानमानयेत् ॥६५२॥
प्रमाणाविषये तस्मिन्नुपचारः कँथञ्च वा ।
प्रतीत एव यल्लोके दृश्यते तँत्प्रवर्तनम् ॥६५३॥
न पुमान् तादृशः कापि प्रत्यक्षेणावलोक्यते ।
यादृशं कापिलाः प्राहुः प्रशान्तब्रह्मवादिनः ॥६५४॥
भोगादेर्लिङ्गतः पूर्वं तस्य ज्ञानं निवारितम्[7] ।
प्रत्यक्षाद्यपरिज्ञातं कथमाप्तोऽपि तं वदेत् ? ॥६५५॥
आप्तत्वस्यैव तज्ज्ञानरहिते सम्भवात्ययात् ।
आप्तान्तरोपदेशेन तज्ज्ञाने चानवस्थितेः[10] ॥६५६॥
नापि दृष्टानुमानाप्तवचनेभ्यः प्रमान्तरम् ।
यतस्तत्प्रतिपत्तिः स्यादित्यसन्नेव ते पुमान् ॥६५७॥

---

१ तावद्भुक्ते–आ०, ब०, प०, स० । २ तत्प्रस–आ०, ब०, प०, स० । भोक्तृत्वप्रसङ्गात् । ३ मुक्तस्य । ४ तदनुभ–आ०, ब०, प०, स० । ५ "पुरुषस्य उपचरितभोगाभावः शुद्धिः, एतस्यामवस्थायां कैवल्यं भवति ।"–योगभा० ३।५५ । ६ न सत्यमो–आ०, ब०, प० स० । ७ कथन्न वा आ०, ब०, प०, स० । ८ उपचारप्रवृत्तिः । ९ अतो नानुमानात्तद्गतिः । १० –ते आ०, ब०, प०, स० ।

तत्र भाक्तेऽपि भोगादित्तत्रेति सुविवेचयन् ।
इदमाह यतो देवो 'यदकिञ्चित्करेण किम्' ॥६५८॥

सेनाव्यूहजयस्योपपन्न एव राजन्युपचारस्तस्य प्रमाणवः प्रतीतेः । प्रतीतिविषयतया चोपचारस्य[1] लोके प्रवृत्तिदर्शनात् । न चैवं पुरुषे भोगस्यैव कूटस्थितस्यैवानधिगमात् । न हि प्रत्यक्षेण बुद्धिसत्त्वव्यतिरिक्तस्य चिद्रूपस्याधिगतिः, तस्य[2] स्वयमचेतनत्वात् । सांसर्गिकाच्च चैतन्याद्व्यतिरिक्तस्य ग्रहणानुपपत्तेः । नाप्यनुमानात्, भोगादेर्लिङ्गस्य निषिद्धत्वात्, लिङ्गान्तरस्य च यथास्थानं निराकरणात् । नाप्यागमात्, तस्यानृतवचनत्वात्, आप्तेश्चापरिज्ञाते तस्मिन् [3]कस्याचिदसम्भवात् । आप्तान्तरोपदेशात्तत्परिज्ञाने चानवस्थानदोषात् । न चापरं प्रमाणम्, यतस्तत्प्रविप्तिः "त्रिविधं प्रमाणमिष्टम्" [सांख्यका० ४] इति वचनात् । ततो निःशेषप्रमाणव्यापारदूरपपरिवर्त्तिस्वेन व्योमारविन्दमकरन्दसौरभसन्निभ एव पुरुष इति कथं तस्योपचारादपि भोगवत्त्वं यतो निष्पन्नं तत्परिकल्पनं न भवेत् ? इति सर्वमेतच्चेतसि कुर्वतो देवस्येदं वचनमाविर्भूतम्–'यदकिञ्चित्करेण किम्' इति ।

विकल्पान्तरमुपक्षिपति–'अथ' इत्यादि । 'अथ' इति वितर्के । परिच्छेदोऽर्थनिर्णयो नार्थं न प्रत्यक्ष, किन्त्वचेतन एवासाविति यदि अयं परस्याभिप्रायः । तत्रोत्तरम्, अकिञ्चित्करेण तत्परिच्छेदेन किम् ? न किञ्चित् । असिद्ध तस्य अकिञ्चित्करत्व भोगापवर्गार्थत्वात्, "भोगापवर्गार्थं दृश्यम्" [योगसू० २।१८] इति वचनात् । भोगार्थत्व तु भोग्यप्रतिबिम्बायत्तत्वात् । विषयो हि तत्र प्रतिबिम्बित एव पुरुषस्य भोग्यो भवति, "बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते" [ ] इति वचनात्। अपवर्गार्थत्वञ्च रजस्तमोभ्यामनभिभूतस्य सत्त्वमूयिष्ठतया नितान्तनिर्मलस्य स्वरूपतच्छायागतपुरुषविवेकप्रतिपत्तिकरत्वात् । सति तद्विवेकपरिज्ञाने तत्रापि निर्विण्णस्य चेतनस्य वैराग्यबलेन [4]तत्प्रविलयेन स्वरूपप्रतिष्ठानस्यापवर्गस्योपपत्तेरिति चेत्, उच्यते–तत्परिच्छेदः पुरुषस्यात्मनमनुपदर्शयन् कथं भोग्यमुपदर्शयेत् [5]दर्पणादाविवमदर्शनात् ? उपदर्शितात्मन एव दर्पणादेस्तं प्रति [6]मुख्यापदर्शकत्वप्रसिद्धेः । आत्मानमुपदर्शयन्नपि यदि तदन्तरप्रतिबिम्बितमुपदर्शयति तदा तदन्तरमप्यपरतदन्तरप्रतिबिम्बितमेवोपदर्शयति, तत्राप्येवमित्यपरापरतत्परिच्छेदकल्पनायामनवस्थानात् [7]प्रेक्षकभोग्योपदर्शनं सम्भवतीति कथ तस्य भोगार्थत्वं [8]यदकिञ्चित्करत्व न भवेत् ? अतदन्तरप्रतिबिम्बितस्य तस्योपदर्शने सुतरामकिञ्चित्करत्वं विषयस्यैव तथा तदुपदर्शनोपपत्तेः ।

---

१ –चेषयेत् आ०, ब०, प०, स० । २ –स्य इत्यैके आ०, ब०, प० स० । ३ उपचारः इति दोष । ४ प्रत्यक्षस्य । ५ नाप्यनुमाना–आ०, ब०, प०, स० । ६ अविदुष–आ०, ब०, प०, स० । ७ –प्रहणनेये–आ०, ब०, प०, स० । ८ सार्थं प्र–आ०, ब०, प०, स० । ९ बुद्धौ । तत्प्रति–आ०, ब०, प०, स० । १० तत्प्रतिविधि–आ०, ब०, प०, स० । ११ –दर्पणादाविव दर्श–आ०, ब०, प०, स० । १२ मुख्यापु–आ०, ब०, प०, स० । १३ प्रेक्षणभो–आ०, ब०, प०, स० । १४ यदि हि–आ०, ब०, प०, स० ।

अकरणा न विषयप्रतिपत्तिः क्रियात्वात् छिदिक्रियादिवत्। करणञ्च मुख्यं तत्परिच्छेद एव व्यवसायस्वभावत्वात्, व्यवसायोपलब्धमेव विषयस्य उपलब्धत्वोपपत्तेः, नेन्द्रियादिकं विपर्ययात्। नापि तत्प्रतिपत्तौ करणान्तरकल्पनायामनवस्थानं स्वत एव करणत्वात्, अकरणस्य हि तदन्यतः प्रतिपत्तिः। करणस्य तु तद्रूपतया परत्र ज्ञानमुपनयतो नितरामात्मनि तदुपनयनं प्रदीपवत्। प्रदीपस्य हि प्रकाशरूपतया प्रसिद्धमेव परत्रेवात्मन्यपि परिज्ञानोपनयनम्। नन्न तन्निरपेक्षस्य विषयस्यैव स्वरूपोपदर्शनमिति कथं तस्याकिञ्चित्करत्वमिति चेत्? इदमप्यकिञ्चित्करमेव वचनम्। तथाहि—यदि विषयोपलम्भस्वभावः पुरुषः किं तत्परिच्छेदेन? पुरुषवत्तदुपलम्भस्यापि नित्यतया तन्निरपेक्षत्वात्, निष्फलकल्पनायामनवस्थानात्। तस्यातत्स्वभावत्वेऽपि नितरां तस्य निष्फलत्वम् अन्धं प्रति प्रदीपवत्। तत्सन्निधौ तस्य तदुपलम्भनमिति चेत्; न; स्वयमशक्तस्य तदयोगात् व्योमकुसुमवत्। स्वयमपि शक्तौ सैव तत्र साक्षात् करणम्, तत्र सत्यामसत्यपि प्रदीपादौ नक्तञ्चरेषु सान्धकाररूपदर्शनस्य प्राणिमात्रे अन्धकारदर्शनस्य च भावादिति किं तत्कल्पनेन? तदुपधानेन व्यवसायस्वभावत्वं तदुपलम्भस्येति चेत्; न; स्वत एव तस्यापि भावात्। तत्परिच्छेदस्यापि तदुपस्त(ष्ट)म्भादेव तत्स्वभावत्वं न स्वतोऽचेतनत्वात्। तत्र तस्य भोगार्थत्वम्।

अत एवं नापवर्गार्थत्वम्, अपवर्गस्य भोगनिवृत्तिरूपतया भोगाभावेऽनुपपत्तेः। विवेकप्रतिपत्त्यङ्गतया च तस्यापवर्गार्थत्वम्। न च तस्य तदङ्गत्वमिति निवेदितमिवार्थविचारे। ततः सूक्तम् 'अकिञ्चित्करेण किम्' इति।

अपि च, नीलादिसुखादिविषयोपस्थापनेन हि तस्य भोगार्थत्वम्, तदुपस्थानञ्च तत्प्रतिबिम्बात्। तदपि कुतस्तस्यावगन्तव्यम्? तत एव "तत्परिच्छेदात्, स एव हि 'मय्येदं प्रतिबिम्बमस्मादर्थादुपजातम्' इति प्रत्येतीति चेत्; न; तस्य अचेतनत्वेन तदयोगात्। चिच्छायासङ्क्रमाच्चेतन एव स इति चेत्; न; तत्सङ्क्रमस्य पुरुषादनन्यत्वे वक्ष्यमाणोत्तरत्वात्। अन्यत्वे तु न तस्य स्वतश्चेतनत्वं "तस्य पुरुषधर्मत्वेन अन्यत्रायोगात् "चैतन्यं पुरुषस्य स्वरूपम्" [योगभा० १।९] इति वचनात्। चिच्छायान्तरसङ्क्रमकल्पनायामनवस्थानात्। भवत्रपि कथञ्चिच्चेतनो यदि पृथगेवार्थं पश्यति किं प्रतिबिम्बकल्पनेन? पुरुषस्यापि तथा तदर्शनोपपत्तेः। यदि न पश्यति; कथं तत्कार्यतया प्रतिबिम्बं प्रतीयात्? अप्रतिपन्ने कारणे तत्कार्यत्वस्याशक्यप्रतिपत्तिकत्वात्। इन्द्रियस्याप्रतिपत्तावपि तत्कार्यतया रूपादिज्ञानं कथं प्रतीयत इति चेत्? न; स्वतस्तदनभ्युपगमात्"। न हि तदेवेन्द्रियज्ञानमात्मन इन्द्रियकार्यत्वं प्रत्येति; तद्व्यतिरेकादेव लिङ्गात्तत्प्रतिपत्तेः। वक्ष्यति चैतत्—

"अक्षादेरप्यदृश्यस्य तत्कार्यत्वव्यतिरेकतः" [न्यायवि० श्लो० १७९] इति।

---

१ अर्थपरिच्छेदेन। २ विषयोपलम्भस्वभावाभावे। ३ विषयपरिच्छेदस्य। ४ शक्तौ सत्याम्। ५ तदुपाधानेन ता०। ६ पुरुषस्य। ७ एवावर्गा—आ०, ब०, प०। ८ —ति वेदि—आ०, ब०, प०। ९ अतः आ०, ब०, प०। १० विषयपरिच्छेदात्। ११ चेतनत्वस्य। १२ —तदभ्युपगमात्—आ०, ब०, प०।

अत्राप्येवमिति चेत्, आस्तां तावत्। तन्न तत एव तत्कार्यत्वावगमः। प्रत्यक्षादन्यत इति चेत्, न, तस्याप्यर्थाविषयत्वे ततोऽपि तदसम्भवात्। अर्थविषयत्वञ्च यदि प्रतिबिम्बमन्तरेण, प्रथमप्रत्यक्षेऽपि व्यर्थं तत्कल्पनम्। प्रतिबिम्बेनेति चेत्, तदर्थकार्यत्वस्यापि न स्वतोऽवगमः पूर्ववत्। अन्यत अन्यक्षादिति चेत्, न, 'तस्याप्यर्थाविषयत्वे' इत्यापतनुबन्धादव्यवस्थितेः।

एतदेवाह—

प्रत्यक्षं करणस्यार्थप्रतिबिम्बमसंविदः ॥२५॥ इति।

करणस्य बुद्धिविवर्तस्य स्वस्य परस्य वा प्रत्यक्षं स्पष्टसंवेद्यम् अर्थप्रतिबिम्बम् अर्थकार्यं प्रतिबिम्बम् 'अयुक्तम्' इत्युपरिभागस्थेन सम्बन्धः। कुतः? इत्याह—असंविदः अचेतनत्वात्। न चाचेतनेन कस्यचित्प्रत्यक्षत्वमुपपन्नम्, चेतनकल्पनावैफल्यापत्तेः। चेतनत्वेनाप्युक्तन्यायेनासंविदोऽसम्प्रतिपत्तेः। तन्न प्रत्यक्षात्तत्परिज्ञानम्।

नाप्यनुमानात्, प्रत्यक्षाभावे तदप्रवृत्तेर्लिङ्गाभावाच्च। विषयनियमो लिङ्गमिति चेत्; न, तस्य 'एतेन' इत्यादिना निराकरणात्। कार्यव्यतिरेकस्तर्हि लिङ्गम्, कार्यस्य प्रतिबिम्बलक्षणस्य सत्यपि कारणान्तरसाकल्ये कदाचिदनुत्पद्यमानत्वादिदमवगम्यते—अस्ति कारणान्तरमप्यस्य यदभावादिदानीमनुत्पत्तिरिति, स चार्थो व्यपदिश्यत इति चेत्, न, व्यतिरेकस्यासिद्धेः, सति पूर्वज्ञानादौ तस्याप्यदर्शनाभावात्। भवतु प्रतिबिम्बसादृश्ये तस्मादेव तस्योत्पत्तिः, तद्वैसादृश्ये तु कथम्? अतोऽर्थादेव तादृशात्तदुपपत्तनमिति चेत्, सादृश्येऽप्यर्थस्य कथं तदुपपत्तनकत्वम्? शक्तेरिति चेत्, सा किमन्यत्र सत्कारणे नास्ति? तथा चेत्, कथमेकप्रधानात्मकत्वं जगतः? शक्तयभेद एव तदुपपत्तेः, शक्तेरेव प्रधानार्थत्वात्।

शक्तीनां यदि भिन्नत्वं हेतुत्वात् प्रतिकारणम् (?)।
भेदान्तरवदेवासामपि कार्यत्वमापतेत् ॥६५९॥
सत्यपि शक्तीनामेवं भेदप्रकल्पने।
शक्तिभेदप्रवर्त्यस्यानादिवार्या कथं भवेत् ॥६६०॥
एकशक्तिनिबद्धत्वं जगद्धेतोस्य कल्पितम्?।
यतः प्रधानतत्त्वं ते लब्धसञ्जीवनं भवेत् ॥६६१॥
तदेकशक्तिमद्भावे प्रतिबिम्बविधायिनाम्।
असत्यपि क्वचित्कार्ये व्यतिरिच्येत तत्कथम् ॥६६२॥

तन्न कार्यव्यतिरेकस्यापि लिङ्गत्वमिति नानुमानादपि तत्परिज्ञानम्।

भवतु पुरुषादेव तत्परिज्ञानं तस्य साक्षादेवोपलब्धिस्वरूपत्वादिति चेत्, न, येनापि पुरुषार्थतत्प्रतिबिम्बयोरपरिज्ञाने तयोर्हेतुफलभावस्य दुरवबोधत्वात्। तत्परिज्ञानञ्च यदि तत्प्रति

---

१ प्रतिबिम्बकमनम्। २ - ३ १८। ३ पूर्वज्ञानादेव। ४ मिश्रत्वं हि
५ कारणभे-ब्य०, व०, प०। ६ , प०।

विम्बवतो विज्ञानात् ; तस्यापि कुतस्तत्कार्यत्वमवगन्तव्यं तत्कार्यात्तेनस्तदवगतेरयोगात् । पुरुषादेवेति चेत् ; न ; तत्रापि 'तेनापि' इत्यादेः प्रसङ्गादनवस्थोपनिपाताच्च । स्वत एव तयोस्तेन परिज्ञाने व्यर्थं सार्थप्रतिविम्बस्यापि ज्ञानस्य कल्पनम् विनापि स्वत एव पुरुषस्यार्थावगमनसद्भावात् । भवत्ये(त्वे)वमिति चेत् ; तर्हि न कैवल्यम् , सर्वदाऽर्थस्य भावेन तद्दर्शनस्यानिवृत्तेः । अर्थाभावे वा पुरुषविकलमेव कैवल्यं भवेत् , तदा दृश्याभावेन तद्दर्शनस्य कैवल्ये तदेकरूपस्य पुरुषस्यासम्भवात् । आत्मदर्शनरूपस्तदा पुरुष इति चेत् ; न ; तद्दर्शनस्यापि दृश्यदर्शनादभेदात् , अन्यथा निरंशत्वव्यापत्तेः ।

भवतु तर्हि तदा तस्य स्वपरविषयत्वविशेषणरहिता दृशिरेव रूपम्, "द्रष्टा दृशिमात्रः" [योगसू० २।२०] इति वचनादिति चेत् ; कथमिदानीं प्रागतद्रूपत्वे तदापि तद्रूपत्वं कौटस्थ्यव्यापत्तेः ? प्रागपि तद्रूप एव स इति चेत् ; कथं दृश्यदर्शित्वम् ? इत्ययत्नसिद्धमेव कैवल्यं भवेत् । सत्यम्, न तदापि तस्य तद्दर्शित्वम्, दृश्यसन्निधानादेव केवलं तव्यपदेशात् , संसारस्य च पत्यर्थतोऽसम्भवादिति चेत् ; कुतः सन्निधिज्ञानम् ? न तावद् दृश्यात् ; अचेतनत्वात् , चिच्छायासङ्क्रमाच्च चेतनत्वस्य प्रतिषिद्धत्वात् । नापि पुरुषात् ; तस्य वस्तुतो निर्विषयत्वात् । सन्निधेरपि तदन्तरवशाद्दर्शनकल्पनायाम् अनवस्थानात् । ततो दुर्भाषितमेवेदं विन्ध्यवासिनः—"तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः सम्बन्धो हेतुः" [योगभा० १।४] इति; तस्यैव सम्बन्धस्यापरिज्ञानात् । न चापरिज्ञातविषया प्रेक्षावतां वचनप्रवृत्तिः । सत्यपि सन्निधाने न तावता तस्य तद्दर्शित्वम् ; तद्ग्रहणपरिणामे सत्येव तदुपपत्तेः । अन्यथाप्रवृत्तस्यापि तद्दर्शित्वप्रसङ्गात् , सर्वगतत्वेन सर्वदा तत्सन्निधानभावात् । तपरिणामश्च न तस्याविकारिणः सम्भवतीति न पुरुषस्यापि वस्तु तदुपरक्तं वा चित्तं संवेद्यं सम्भवतीति । तदेवाह—

अप्रत्यक्षं स्वसंवेद्यमयुक्तमविकारिणः । इति ।

पुरुषस्य हि दृश्यमप्रत्यक्षमेव प्रत्यक्षेण तत्प्रतिविम्बवत् , अतः (अन्तः) करणलक्षणेनापरिज्ञातेन तत्प्रतिपत्तेरयोगात्, तदपरिज्ञानस्य च निवेदितत्वात् । भवतु स्वतस्तस्य तत्संवेद्यं न प्रत्यक्ष इति चेत् ; **'स्वसंवेद्यम्'** इत्ययुक्तम् त(क)स्य ? **अविकारिणः** स्वतस्तद्भेदनाभावस्याभिहितत्वात् । ततो यदि चित्तस्य दृश्यत्वम् स्वसंविदितमेव तदभ्युपगन्तव्यं

---

१ अर्थकार्यत्वम् । २ विज्ञानात् । ३ एवानयो-आ०, ब०, प० । ४ अर्थतत्प्रतिविम्बयोः । ५ पुरुषेण । ६ ज्ञानकल्पनां विनापि । ७ अर्थदर्शन । ८ अर्थस्याभावे । ९ -भावे सदर्थदर्श-आ०, ब०, प० । १० दृश्यदर्शनस्य । ११ दृश्यदर्शनात्मकस्य । १२ -स्यासद्भावात् आ०, ब०, प० । १३ दृश्यदर्शनाभे-आ०, ब०, प० । १४ कैवल्यकाले । १५ स्वपरविषयत्वमिति विशे-प० ।-यत्वमितिशे-आ०, ब० । १६ दृशिमात्रस्वरूपम् । १७ दृश्यदर्शित्वव्यपदेशात् । १८ दृश्यसन्निधानान्तर । १९ -चित्रवृत्तिबोधे-आ०,ब०, प० । २० -नादिसम्बद्धो हे-आ०, ब०, प० । "-नादिसम्बन्धो"-योगभा० । २१ पुरुषस्य । तस्य दर्शि-आ०, ब०, प० । २२ दृश्यदर्शित्वम् । २३ -स्यापि दर्शि-आ०, ब०, प० । २४ दृश्यसन्निधान । २५ -परिज्ञानेन आ०, ब०, प० । २६ दृश्यप्रतिपत्तेरयोगात् । २७ तदज्ञानस्य आ०,ब०,प० । २८ चेत् संवे-आ०, ब०, प० । २९ चेत्तस्य प० । चैतस्य आ०, ब० । ३० -त्वमस्व-आ०, ब०, प० ।

पुरुषवशेन तदनुपपत्तेः । कथं पुनश्चित्तस्य दृश्यत्वे स्वसंविदितत्वम् ? कथं च न स्यात् ? अन्यत्र चक्षुरादौ शब्दादौ वा 'दृश्ये तददर्शनादिति चेत् , मा भूदन्यत्र तदर्शन चित्ते तु विषय एव । विद्यमानमपि तद्भान्तमेव, पुरुषसन्निधिविशेषेण भावादिति चेत् , न, तत्परिज्ञाने तदघनानुपपत्तेः । तत्परिज्ञानमपि यदि पुरुषात् 'ममेद सन्निहितम्' इति, यदि वा चित्तात् 'ममायं सन्निहितः' इति, तदा तस्यापश्यम्मानि स्वपरविषयत्वमित्यफलमुभयपरिकल्पनं चित्तत एव सकलसमीहितपरिनिष्पत्तेः । स्वसंवेदने कथं तस्यार्थवेदनम् ? निर्णयरूप हि वेदनम्, न क्षेकनिर्णयसमय एव निर्णयान्तरम , युगपत्तदप्रतिवेदनात् । तथा च सूत्रम्–"एकसमये चोभयानवधारणम् ।" [योगसू० ४।२०] इति । प्रसिद्धञ्चार्थवेदनमेव चित्तस्येति न तस्य स्वतो दृश्यत्वम् । नापि चित्तान्तरात् , अनवस्थानात् तस्यापि तदन्तरदृश्यत्वात् । अदृश्यस्वभावेत्यपि न युक्तम् , तैत्प्रचारसंवेदनेन तत्त्वानां प्रवृत्तिदर्शनात्–'क्षुब्धोऽहम्, भीतोऽहम् , अमुत्र मे रागः, अमुत्र मे क्रोधः' इति । ततोऽन्यदेव तत्र दर्शनमभ्युपगन्तव्यम् । न चैवं चित्तस्य तत्र दोषः, तस्य स्वतः परतश्चादृश्यत्वात् । विषयोपलम्भमात्रस्यैव तेनूपगमादिति चेत् , न , दृष्टोत्तरत्वात् ।

अपि च, दर्शनायत्त तस्यं दृश्यत्वमिति कुत्र इदमवगन्तव्यम् ? "अनन्तरान्न्यायादिति चेत् , न , तेनापि" दर्शनदृश्ययोर्व्यवसाये ततोऽपि तदयोगात् । तद्व्यवसाययोर्भेदे कथं योगपद्येन भावो "दृश्यान्न्यदेव दर्शनमिति "एक समये च" इत्यादिसूत्रविरोधात् । एक एव तदुभयव्यवसायी न्याय इति चेत् , चित्तमप्येकमेव स्वपरव्यवसायि किन्न स्यात् ? यतस्तस्मादन्यदेव दर्शनं न भवेत्। अवश्यं "चैवमभ्युपगन्तव्यम्, अन्यथा घनादिव्यवहारोऽपि न भवेत् व्यवसायबहुत्वे तदनुपपत्तेः । न तत्र व्यवसायबहुत्वम् , एकस्यैव घनत्वादिविषयस्यं भेदकस्य व्यवसायस्याभ्युपगमादिति चेत् , न , स्वपरयोरपि तस्यैकस्य प्रसङ्गात् । एकव्यवसायविषयत्वे कथं "तयोर्भेद इति चेत् ? न , घनत्वादिरूपादावपि समानत्वात् । 'तत्रापि प्रतिविषय भिन्ना एव व्यवसाया इति चेत् , कुतस्तेषामवगमः ? अनवगतानामभ्युपगमविरोधात् । कुतश्चिव्यवसायादिति चेत् , न, "तत्रापि प्रतिव्यवसायं "तद्भेदे 'कुतः' इत्यादिप्रमाणनिष्ठापत्तेः"। न प्रतिविषय तद्भेद "तस्मादेकमनेकार्थमवस्थितं च चित्तम्" [योगभा० १।३२] इति भाष्यविरोधाच्च । ततो यथा बहिः कथञ्चिद् विषयमेवाध्यवसायभेदेऽपि विज्ञानमेकमेव

---

१ दृश्येन तद्–आ०, ब०, प० । २ चित्तपरिज्ञाने । ३ चित्तस्य । ४ –मुभयकल्प–आ०, ब०, प० । चित्तपुरुषमुभयम् । ५ प्रतिविद्ध–आ०,ब० । प्रतिविद्ध–प० । ६ अदृश्यमेवे–आ०,ब०,प० । ७ तत्प्रचारसत्त्वानां आ०, ब०, प० । चित्तप्रचार । "स्वबुद्धिप्रचारप्रतिसंवेदनात् सत्त्वानां प्रवृत्तिर्दृश्यते क्षुब्धोऽहं भीतोऽहम् अमुत्र मे रागः अमुत्र मे क्रोध इति"–योगभा० १।३६ । ८ दर्शनस्य । ९ दर्शनरूपतया । १० चित्तस्य । ११ अनन्तरान्न्याय–आ०, ब०, प० । अनन्तरानुभवेनापि । १२ अनन्तरानुभवेनापि । १३ दर्शनदृश्यव्यवसाययोः । १४ ततः दृश्यादभिन्नमेव दर्शनमिति । १५ उभयव्यवसायि ज्ञानम् । १६–स्य व्यव–आ०, ब०, प० । १७ स्व परयो । १८ घनत्वादिरूपादावपि । १९ कुतस्तेषाम्–आ०, ब०, प० । २० व्यवसायविषयकव्यवसायभेदे । २१–निष्ठापत्तेः आ० ।

तथा स्वपरयोरपि इति नार्थस्तद्दर्शनार्थेन दर्शनकल्पनेनेति । व्याख्यातमनिन्द्रियप्रत्यक्षम् ।

सौगतः प्राह–भवतु स्वसंविदितमेव ज्ञानं तस्य तु कथं बहिर्विषयत्वम् ? न सत्त्वमात्रेण; अतिप्रसङ्गात् । सकलविषयसाधारणं हि तत्सत्त्वम् , तेन च तस्य बहिर्विषयत्वे सर्वं सर्वविषयमेव संवेदनमिति कथं प्रतिकर्मव्यवस्था–'नीलस्यैवेदं संवेदनं न पीतस्य' इति ?

स्यान्मतम्–आलोचनाज्ञानेन्द्रियतद्विषयसन्निकर्षादेरेव तद्व्यवस्थेति; तन्न; तस्यापि[1] साधारणत्वात् । असाधारणस्य हि व्यवस्थापकत्वम् । न चासौ तथा नीलाधिगमवत् पीताद्यधिगमेऽपि भावात् , तदधिगमोत्पादकत्वाच्च । न हि तदुत्पादकमेव तद्व्यवस्थापकत्वम् ; एककियानिमित्तस्य क्रियान्तरं प्रत्यनङ्गत्वात् । अन्यथा यतः कुतश्चिदखिलक्रियानिष्पत्तेर्न कस्यचिदप्यभिमतक्रियावैकल्यं भवेत् । अर्थेनैव तर्हि संसर्गिणा[2] तद्व्यवस्था, संसृष्टस्यैव नीलादेर्वेदनं नापरस्येति चेत् ; न ; तस्याप्यज्ञातस्य व्यवस्थापकत्वेऽतिप्रसङ्गात् । न चाव्यवस्थायां तज्ज्ञानम् । तज्ज्ञान-[त्]व्यवस्थायां परस्पराश्रयात् । तस्मात्तदात्मभूतस्यैव कस्यचिद्भेदस्य व्यवस्थापकत्वम् । स चार्थाकार एव , तत एवाधिगमस्यार्थघटनोपपत्तेः[3] । अन्यस्य तु मान्द्यपाटवादेः सतोऽपि तद्भेदस्य साधारणतया तदनङ्गत्वात् । तथा च वार्त्तिकं तन्निबन्धनञ्च—

"तस्माद्यतोऽस्यात्मभेदादस्याधिगतिरित्ययम् ।
क्रियायाः कर्मनियमः सिद्धा सा तत्प्रसाधना ॥ [प्र० वा० २।३०४]

यतः स्वरूपभेदादस्य संवेदनस्य अयमस्य नीलस्य पीतस्य वाधिगतिः[4] इति नियमः साधिगतिस्तत्साधना[5] सिद्धा, तन्मात्रभावादेव नियमस्यास्य भावात् । तथा चोक्तम्–"भावादेवास्य तद्भावे" [प्र०वा० १।६] न चेयमर्थघटना सारूप्यादन्यतः संवेदनस्य । यतः–

अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम् ।
[6]अन्य[:]स्वभावो ज्ञानस्य भेदकोऽपि कथञ्चन ॥
तस्मात्प्रमेयाधिगतेः साधनं मेयरूपता ।
साधनेऽन्यत्र तत्कर्मसम्बन्धो न प्रसिद्ध्यति ॥ [प्र० वा० २।३०५,६]

तदाकारं हि संवेदनमर्थं व्यवस्थापयति नीलमिदं पीतं वेति । यथा आकारयोगित्वं ज्ञानस्य तथोत्तरत्र प्रतिपादयिष्यामः । अन्यत्र तु साधने तेन कर्मणा सम्बन्धो न

---

१ आलोचनज्ञानादेरपि । २ संसर्गिणोऽर्थस्य । ३ अर्थाकारादेव । ४ अर्थघटनानङ्गत्वात् । ५–गतिनियमः आ०, ब०, प० । ६–नास्सिद्धा आ०, ब०, प० । ७ "एनामधिगतिम् अर्थरूपताम् अर्थसरूपतां मुक्त्वा न ह्यन्यः कश्चिदिन्द्रियादि-स्वभेदात् कथञ्चन केनापि प्रकारेण ज्ञानस्य भेदकोऽप्यर्थेन ज्ञेयेन घटयति योजयति नीलस्येयमधिगतिः पीतस्य चेयमित्यादि ।..... तस्मात्प्रमेयाधिगतेः फलभूतायाः व्यवस्थाप्यायाः साधनं प्रमाणं मेयरूपता । अर्थेन सारूप्यं तस्य प्रतिविषयं भिन्नस्य सूपलक्षणत्वात् । सारूप्यात् पुनरन्यत्र साधने तस्याः क्रियायाः कर्मसम्बन्धो नीलस्येयमधिगतिः पीतस्य चेत्यादि न सिध्यति । इन्द्रियाधिगतिर्विषयस्य सम्बन्धेऽप्यनुभवमात्रात्मकज्ञानस्य विषयकत्वायोगात् । ज्ञानगतस्यापरविषयस्य लक्षणभेदेनानुपलक्षणात् ।"–प्र० वा० म० वृ० ३।२०५-२०६ । ८ अन्यस्य भावो आ०, ब०,प० । "अन्यः स्वभेदात्"–प्र० वा०म०वृ० । ९ सम्बन्धो आ०,ब०,प० ।

प्रसिध्यति । सविच्चेत्तदाकारता चेत् परित्यज्यते, कथं तस्य सवदेनमिति नियमः ? साक्षात्करणादेव नियमो भविष्यतीति चेत्; किमिदं साक्षात्करणमर्थस्य रूपम्, अथ सवेदनस्य, [1]अथान्यदेव किञ्चित् ?

अर्थस्य साक्षात्करणं यदि रूप [2]यदिष्यते ।
साक्षात्कारि हि विज्ञान कथमर्थस्य तद्भवेत् ? ॥ ५

अथ संवेदनस्यैव रूप साक्षात्क्रिया मता ।
साक्षात्कृतः कथं सोऽर्थो न स्यान्यस्यान्यरूपता ॥

अन्यत्वेऽप्येष दोषस्तु भवेदेवानिवारितः ।

तथा हि–यदि साक्षात्करणमर्थस्य स्वभाव [3]नीलादिवत्साधारण इति सर्वस्य संविदित' सोऽर्थो भवेत् । साक्षात्क्रिया चार्थस्य न युक्ता ज्ञानधर्मत्वात् । अथ ज्ञान १०
धर्मोऽस्यावर्थविषय' तेनार्थं सविदित उच्यते; अर्थविषय इति [4]को हि विषयार्थः ? अर्थसंवेदनरूपत्वादिति चेत्; अर्थस्य संवेदनमिति किम्?अर्थरूपत्वात्संवेदनस्येति चेत्, सैवार्थाकारता संवेदनस्य । अथार्थाज्जातत्वादर्थसंवेदनम्; तथा सति चक्षुषोऽपि जातत्वात् चक्षुःसंवेदनमिति प्राप्तम् । अर्थं पश्यति न [5]चक्षुरिति चेत्, अर्थं पश्यतीति कोऽर्थः ? अर्थे पश्यत् दृश्यते तेन पश्यतीत्युच्यते; केन पश्यति ? स्वरूपेण । यथैव तर्हि स्वरूपं १५
संवेदनरूपेण पश्यति तथा अर्थमर्थरूपेणेत्यर्थरूपता अर्थस्य साधिका, संवेदनरूपता संवेदनस्येति तदाकारतैव सर्वस्य साधिका । नान्यः स्वभावो भेदकोऽपि ज्ञानस्यार्थेन घटयति ।" [प्र० वार्तिकाल० २।३०४] इति । अत्राह–

एतेन वित्तिसत्तायाः साम्यात्सर्वैकवेदनम् ॥२६॥
प्रलपन्तः प्रतिक्षिप्ताः प्रतिविम्बोदये समम् । इति । २०

प्रलपन्तो निरुपपत्तिकममिजल्पन्तस्साधागताः प्रतिक्षिप्ताः । किं प्रलपन्त ? सर्वैकवेदन सर्वस्य नीलघवलादेरेकेनैव ज्ञानेनाभिर्गमम् । कुत.? वित्तिसत्तायाः साम्यात् निराकारज्ञानसद्भावस्य सकलविषयसाधारणत्वादिति । केन तेषा प्रतिक्षेपः ? एतेन कपिलद्रूपणेनेति । तथा हि किं तदेकज्ञानम् यस्य निराकारत्वे सर्वविषयत्वमापाद्येत ? नीलादिविषयो निर्णय एवेति चेत्, न, तस्य निराकारत्वमेव नियतविषयस्य स्वानुभवप्रत्यक्षेणानुभवात् । निराकारत्वे २५
कुतो विषयनियम इति चेत्? स्वहेतुप्रभवादेव शक्तिनियमादिति ब्रूमः । कुतस्तेस्यावगम इति चेत्? विषयनियमादेव । ननु [6]शक्तियमोऽपि शक्तिनियमादेवावगम्य" इति कथम परस्पराश्रय

---

१ साक्षात्कार–आ०, ब०, प० । २ अन्यवान्य–आ०, ब०, प० । ३ संविदव–आ०, ब०, प० । यदिष्य–प० वार्तिकाल० । ४ नीलादि–आ०, ब०, प० । ५ चोऽपि वि–आ०, ब०, प० । ६ द्वितीयैक-वचनम् । ७ –गमात् आ०, ब०, प० । ८ –त्व सति कपिल–आ०, ब०, प० । ९ शक्तिनियमस्य । १० विषयनिय-मोऽपि । ११ –गम्यत इति आ०, ब०, प० ।

इति चेत् ? न ; तन्नियमस्य[1] प्रत्यक्षत एव सिद्धत्वात्। केवलं 'स कुतः' इति प्रश्ने तन्नियमेन[2] प्रत्यवस्थानं तस्यावश्यम्भावेनाभ्युपगम्यत्वात्, अन्यथा सारूप्यासम्भवस्यापि[3] निवेदनात्। ततो यद्यर्थस्य परिच्छेदो व्यवसायोऽभ्युपगम्यते तस्य प्रत्यक्षसिद्धत्वान्, तर्हि तत्रान्यत एव विषयनियमादकिञ्चित्करमेव सारूप्यकल्पनमिति किं तेन ? तदाह—

५ **प्रत्यक्षोऽर्थपरिच्छेदो यद्यकिञ्चित्करेण किम् ॥२७॥** इति।

पक्षान्तरमाह—

अथ नायं परिच्छेदो यदि [अकिञ्चित्करेण किम् ।] इति।

अथ इति वितर्के। **यदि अयम्** अनन्तरपरिच्छेदो नीलादिव्यवसायरूपो **न** न विद्यत इति तत्राह—**अकिञ्चित्करेण किम्** सारूप्यकल्पनेन विषयाभावात् ? न हि निर्विषयं
१० तत्कल्पनमुपपन्नम् ; व्योमकुसुमेऽपि तत्प्रसङ्गात्। साङ्ख्यकल्पितं चैतन्यं तद्विषय इति चेत् ; न ; तस्यासत्त्वात्। कथमन्यथा "संसर्गादविवेकश्च[श्रुत्]" [प्र०वा०२।२७७] इत्यादिना तन्निराकरणम् ? सतस्तदयोगात्। [6]स्वलक्षणवदभ्युपगमसिद्धस्य तस्य तद्विषयत्वमिति चेत् ; न ; तत्सिद्धस्यापरमार्थत्वात्। अपरमार्थत एव संवेदनं तत्सारूप्यं चेति चेत् ; कुतः किं सिध्येदित्यन्धमूकं जगद्ब्रूयेत् ? स्वप्रसिद्धमेव तर्हि निर्विकल्पकं दर्शनं तद्विषय इति चेत् ; न ;
१५ तस्यापि प्रतिक्षेप्स्यमानत्वात्। ततो निर्विषयत्वादुपपन्नमेव तत्परिकल्पनस्याकिञ्चित्करत्वम्।

भवतु तर्हि व्यवसायस्यैव तद्विषयत्वमिति चेत् ; न; तस्य स्वतः प्रत्यक्षत्वे सारूप्यस्यापि तदात्मनः प्रत्यक्षत्वप्रसङ्गात्। अस्तु को दोष इति चेत् ; न; निर्विवादत्वेन तत्साधनप्रयासवैफल्यापत्तेः। तत्प्रत्यक्षस्याप्यव्यवसायत्वेन विवाद इति चेत् ; कथं पुनर्व्यवसायस्याव्यवसायस्वभावः स्यात् विरुद्धधर्माध्यासेन भेदात् ? इत्यस्वसंवेदनमेव व्यवसायस्याभ्युपगमविरुद्धमाप-
२० तितमिति कुतस्तत्सिद्धिः अन्यतस्तत्सिद्धेरनभ्युपगमात् ? स्वसंवेदनादेवान्यत इति चेत् ; 'न तस्य स्वतः' इत्यादिप्रसङ्गाच्चक्रकापत्तेरनवस्थानाच्च। ततः सव्यवसायमेव तत्स्वसंवेदनं तेन च तत्स्वरूपवत् सारूप्यस्यापि व्यवसायान्न तत्र विवाद इत्यकिञ्चित्कर एव तत्साधनप्रयासः। तदाह—**प्रत्यक्षोऽर्थपरिच्छेदो यद्यकिञ्चित्करेण** तत्प्रयासेन **किम्** ? न किञ्चिदिति।

यदि चायं निर्बन्धो व्यवसायस्य स्वसंवेदनमव्यवसायमेवेति ; तदेवाह—'**अथ नायं**
५ **परिच्छेदो यदि**' इति। 'अथ' इति पूर्ववत् **यदि अयम्** अनन्तरः **परिच्छेदो** व्यवसायस्य स्वसंवेदनं व्यवसाय एवेति निश्चयो **न** न विद्यते इति। तत्राह—**अकिञ्चित्करेण किम्** — सारूप्येण न किञ्चित्फलमिति यावत्। विषयनियमस्तस्य फलमिति चेत् ; न; अव्यवसितात्ततस्तदयोगात् क्षणिकत्वादिवत्। न हि क्षणिकत्वादौ नास्त्येव सारूप्यं नीलादावपि तदव्यतिरिक्ते

---

१ विषयनियमस्य। २ शक्तिनियमेन। ३ -पि वे-आ०, ब०, प०। ४ प्रत्यक्षान्तरमाह आ०, ब०, प०। ५ तदप्रयो-आ०, ब०, प०। ६ सलक्षणवदनभ्युप-आ०, ब०, प०। ७ व्यवसायप्रत्यक्षस्य। ८ -स्याप्यव-आ०, ब०, प०। ९ तत्सवे-आ०, ब०, प०।

तदभावप्रसङ्गात्। भवतु तत्रापि संवेदनस्य सैव एव सैन्नियम इति चेत्, किमिदानीमनुमानेन ? व्यवसार्य इति चेत्, न, बहिःसाकारस्यैव ज्ञानस्य व्यवसायत्वात्। अव्यवसायत्वेऽपि किं तव्यवसायेन ? प्रवृत्तिरिति चेत्, न, तस्या दर्शनादेवोपपत्तेः "तत्प्रधानत्वात्" [प्र० वा० १।५] इति वचनात्, क्षणिकत्वादेरप्रवृत्तिविषयत्वाच्च।

समारोपव्यवच्छेद इति चेत्, तेनापि किम्? विषयनियम इति चेत्, न, "संवेदनादर्थान्तरवत्तस्तदयोगात्, "तस्माद्यतोऽस्यात्ममेदात्" इति वचनव्यापत्तेः। अनर्थान्तरवद्व्यसारूप्यरूपान्न "तस्तन्नियमः "तस्मात्प्रमेयाधिगतेः साधनं मेयरूपता" [प्र०वा० २।३०६] इत्यस्योपपन्नत्वात्। सारूप्यरूपत्वे तु तस्य संवेदनकारणादेव भावात् विफलमनुमानम्। तच्च विषयनियमः तद्व्यवच्छेदात्।

संवाद इति चेत्, ननु सोऽपि संवेदनविषयस्येत्यस्मादव्यवसाय एव, स च घटनादेव भवति घटनस्य व्यवसायरूपत्वात्। 'क्षणभङ्गादेरिदं संवेदन नान्यस्य'इति नियमनं हि घटनम्, तच्च व्यवसायात्मकमेव तल्लेखरूपत्वात् अवद्रूपस्य व्यवसायान्तरस्याप्यभावात्। घटनमपि 'तद्व्यवच्छेदादेवेति चेत्, न, तस्य विषयसारूप्यादेव भावात्। तदव्यवच्छेदसहायमेव "तदपि तन्नियन्धनं" न केवलं समारोपे तदप्रतिवेदनादिति चेत्, न तर्हि सति "तस्मिन्नसदध्यवसायी तन्नियम इति दुर्भाषितमेवेदम्–"भावादेवाऽस्य तद्भावे" [प्र०वा० १।६] इति। तद्व्यवच्छेदाच्च तस्य" विशेषे सत एव तन्नियमो न सारूप्यात्। अविशेषे तु न "तदपेक्षणम् अविशेषकारिण्यपेक्षाया अनभ्युपगमात्। तत्सहायत्वमेव विशेष इति चेत्, न,

पृथक् तस्य समर्थत्वे सहायेनेह किं फलम् ?।
पृथक् तस्यासमर्थत्वे सहायेनेह किं फलम् ॥ ६६३ ॥
"सामर्थ्यं साध्यं तस्य सारूप्यस्य चेत् यदि।
सहायं यदपेक्ष्यैव कुर्यात् घटनक्रियाम् ॥ ६६४ ॥
सहायनियमेनैव स्वहेतुवशभाविना।
चैतन्यं नित्यमन्येषं किन्न स्यान्नियतार्थदृक् ॥ ६६५ ॥
सारूप्यमन्तरेणापि "तत्रार्थनियमस्थितेः।
तत्साधनप्रयासोऽयं धर्मकीर्तेरतो वृथा ॥ ६६६ ॥
"तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः।
साध्यं तेनात्मना येन प्रतिकर्म विभज्यते ॥" [प्र० वा० २।३०२] इति।

---

१ क्षणिकत्वादापि। २ सारूप्यादेव। ३ एव नियम आ०, ब०, प०। विषयप्रतिनियमः। ४ व्यवसायः सारूप्यम् फलमिति चेत्। ५ "प्रवृत्तेस्तत्प्रधानत्वात्"–प्र० वा०। ६ संवेदनाद् भिन्नम् समारोपव्यवच्छेदात्। ७ समारोपव्यवच्छेदाद् विषयनियमः। ८ अनुल्लेखात्मकत्व। ९ समारोपव्यवच्छेदादेव। १० विषय सारूप्यम्। ११–र्थं वेदनं आ०, ब०, प०। १२ सारूप्ये। १३ सारूप्यस्य। १४ समारोपव्यवच्छेदापेक्षम्। १५ सामर्थ्यात्तत्र–आ०, ब०, प०। १६ चैतन्ये।

सहायसन्निधानेऽपि तदसन्निधिवत्स चेत् ॥ ६६८ ॥
कथमर्थविदित्येष सारूप्येऽपि समो नयः ।

तत इदमप्यलङ्कारवचनं प्रत्युक्तम्—

"यथा तद्बोधकं वस्तु तथैव तदबोधकम् ।
यदा तद्बोधकं वस्तु केन नेष्टमबोधकम् ॥" [प्र० वार्तिकाल० २।३०२] इति ।

सारूप्येऽपि समानत्वात् । तत्र तत्सहायत्वमपि तस्य विशेष इति निष्फलं तदपेक्षणम् । अतः क्षणक्षयादौ सारूप्यस्यैव विषयनियमनिबन्धनत्वात् कथन्न वैयर्थ्यमनुमानस्य ? तदनिच्छता च न तत्र तस्य तन्निबन्धनत्वमभ्यनुज्ञातव्यम् । तथा च कथं नीलादावपि तस्य तत्त्वमविशेषादिति सूक्तम्–'**अथ नागम्**' इत्यादि । तत्र व्यवसाये सारूप्यस्य कल्पनं प्रत्यक्षविरोधात् । स्वतस्तन्निश्चये च तत्प्रयासवैफल्यात् । अनिश्चये च तस्याकिञ्चित्करत्वात् ।

भवतु साङ्ख्यस्यैव चैतन्ये तत्कल्पनम्, इदमेवाह–'**अथ**' इत्यादिना । कापिलीयः पुरुषः **अयं** सारूप्यविषय इति **परिच्छेदो** निश्चयः सौगतस्य **यदि** इति ; तत्राह–**अकिञ्चित्करेण** पुरुषेण **किम्** ? न किञ्चित् । विषयाधिगमस्य तत्फलत्वात् कथं तस्याकिञ्चित्करत्वमिति चेत् ? न ; आकारवादे पृथक्तदधिगमाभावात् । आकारद्वारा तदधिगम इति चेत् ; आकारस्यैव कुतोऽधिगमः ? स्वत इति चेत् ; न; कापिलैस्तदनभ्युपगमात् । विषयाधिगमादेव स्वाधिगमो व्यवस्थाप्यते तदभावे तदनुपपत्तेरिति चेत् ; न ; पृथक् तदधिगमाभावस्य उक्तत्वात् । पृथगेव तदधिगमः कापिलैरभ्युपगम्यत इति चेत् ; न ; तदभ्युपगमस्य प्रमाणत्वे कथमाकारकल्पनम् ? तदभाव एव तदुपपत्तेः । अप्रमाणत्वे तु न पृथक् तदधिगमः, यतः स्वाधिगमसम्पादनम् ? आकारद्वारादेव तेनाधिगमात्तत्सम्पादनमिति चेत् ; न; तदसम्पादने तस्यैवासिद्धेः "तत्सम्पादनात्तत्सिद्धौ च परस्पराश्रयात् । तत्र विषयाधिगमादपि तत्सम्पादनमुपपन्नम् । तत इदं साङ्ख्यसिद्धान्तानभिज्ञतयैव परेणोक्तम्–"यथैव तर्हि **स्वरूपं संवेदनरूपेण पश्यति तथार्थमर्थरूपेण**" [प्र० वार्तिकाल० २।३०६] इति । ततो विषयाधिगमस्याकारवतस्तच्चैतन्यादभावादुपपन्नम्–'**अकिञ्चित्करेण किम्**' इति ।

नापि निरंशे दर्शने तत्कल्पनमुपपन्नमित्यावेदयति–'**प्रत्यक्षम्**' इत्यादिना । **करणस्य** इन्द्रियस्य कार्यं प्रत्यक्षं साक्षात्कारिज्ञानम् । उपलक्षणमेतत् प्रत्यक्षान्तरस्यापि । तत् **अर्थप्रतिबिम्बम्** अर्थाकारमिति **अयुक्तं** युक्तिवर्जितम् । विषयनियम एव संवेदनस्य तत्र युक्तिः तदभावे तदनुपपत्तेरिति चेत् ; न; निरंशस्यैतस्यैवाननुभवात् । न हि निरंशं

१–धानेऽपि–आ०, ब०, प० । २ समारोपव्यवच्छेदासन्निधानतुल्यं स विशेषः । ३ सदा आ०, ब०, प० । ४ क्षणिकत्वादौ । ५ सारूप्यस्य । ६ विषयनियमनिबन्धनत्वम् । ७ चेत् आकार–आ०, ब०, प० । ८ –त्तेः प्रमा–आ०, ब० । ९ तदधिगमात्तत्सम्पादने आ०, ब०, प० । विषयाधिगमात् स्वाधिगमसम्पादनम् । १० स्वाधिगमासम्पादने । ११ स्वाधिगमसम्पादनात् । १२ यदैव आ०,ब०,प० । १३–स्य त–आ०,ब०,प० ।

किञ्चित्संवेदन कथिन्नियमवदुपलब्धं यतस्तस्य सदन्यथानुपपन्नत्वमवसीयेत । "अन्यथानुपपन्नत्वमसिद्धस्य न सिध्यति" [न्यायवि० श्लो० ११] इति वचनात् । एतदेवाह–असंविदः असम्प्रतिपत्तेः निरंशस्य प्रत्यक्षस्येति । तस्य व्यवसायादन्यत्र सारूप्यकल्पनमुपपन्नम् । नापि व्यवसाये तस्य निराकारस्यैवानुभवात् । न चावता सर्वस्य विषयत्वम्, तस्य तथानुभवाभावात् । तर्हि न किञ्चिदपि तस्य प्रत्यक्षमाकारस्येति चेत्, अत्राह–'अप्रत्यक्षम्' इत्यादि । अविकारिणः आकारविकारविकलस्य व्यवसायस्य यत् स्वम् आत्मीयं संवेद्यं नीलादि तत् अप्रत्यक्षमित्ययुक्तम् अत्र 'अनुभवमात्रात्' इति भावगतो हेतुः प्रतिपत्तव्यः ।

यदि च, निराकारत्वे ज्ञानस्य प्रत्यासत्तिनियमाभावात्सर्ववेदनत्वम्, तत एव सर्वाकारत्वमपि भवेत् । सर्वस्य तत्कारणत्वाभावादिति चेत्, न, तत्रापि समानत्वात् प्रश्नस्य– 'सर्वमपि किन्न तस्य कारणम्' इति ? अतोऽत्रापि तदेव सर्वविषयत्वम् । एतदेव कारिकाशेषेण दर्शयति–प्रतिनियमोदये आकारवत्त्वे ज्ञानस्य तत् सदृशं सर्वैकवेदनम् ।

स्यान्मतम्–न वस्त्विस्येव सर्वं सर्वस्य कारणं शक्तिप्रतिनियमात् । प्रतिनियतशक्तयो हि भावाः प्रतिनियतमेव कार्यं कुर्वीरन् न सर्वम् । न च कारणमित्येव चक्षुरादिकमपि तत्र स्वाकारसमर्पणक्षमम्, तच्छक्तिविशेषस्य नीलादावेव स्वहेतुषडभाविनो भावात् । ततो न सर्वाकारत्वेन सर्वविषयत्वम् । नापि चक्षुरादिविषयत्वमिति, तत्, शक्तित एव नियतविषयत्वोपपत्तेः आकारवादवैयर्थ्यापत्तेः । कल्पयताऽपि ह्याकारं शक्तिरभ्युपगन्तव्या, तदभावे तस्यैव नियतत्वासम्भवात् । तथा च तदवश्यं एव अर्थः स्वशक्तितो वेदनस्य विषयनियममवकल्पयतीति व्यर्थमर्थाकारकल्पनं सवेदनस्य । पुरुषश्चैवम् अर्थस्यैवमेव सिद्धेः । आकारवादे हि न तस्य सिद्धिः प्रत्यगदर्शनात् । आकारदर्शनमेव तस्यापि दर्शनं सादृश्यादिति चेत्, न, प्रत्यगदृष्टे तस्मिन् तत्सादृश्यस्यैव दुरवगमत्वात् । न चानवगतं सादृश्यमुपकारकल्पनायाऽलमिति निवेदितं पूर्वम् । तस्मान्नेदमत्र निदर्शनमुपपन्नम्–"यथा पितुः सदृशः पुत्र उत्पत्तिमान् 'पितृरूपं गृह्णातीति व्यपदिश्यते लोके विनापि ग्रहणव्यापारेण तथा विज्ञानेऽपि व्यपदिश्यते" [प्र० वार्तिकाल० २।३०५] इति, वैषम्यात् । उपपन्नं ह्यन्विदम्–पुत्र पितृरूपं गृह्णातीति पृथगेव पितापुत्रयोस्तत्सादृश्यस्य चोपलम्भात् । न चैवमत्र, पृथग् अर्थतदाकारयोस्तत्साधर्म्यस्य चाप्रतिवेदनात् । तस्मादर्थशक्तित एव विषयनियमो युक्तः । "वस्तुवस्तु ज्ञानस्यैव "तत्र शक्तिः, अर्थस्य ज्ञानं प्रत्यकारणत्वात् । न च ज्ञानमशक्तमेव, तत्र तदाकारस्याप्यभावप्रसङ्गात् व्योमकुसुमवत् । शक्तस्याप्याकारद्वारेणैव बहिर्विषयत्वमिति चेत्, न, पारम्पर्यदोषात् । भवति ह्येवं पारम्पर्यम्–'शक्तित आकारः, ततोऽर्थवेदनम्' इति ।

---

१ निराकारत्वेन । २ दृश्यगत । भगवती आ०, ब०, प० । ३ पत्तेः क–ता० । ४ आकारस्यैव । ५ पृथग्–आ०, ब०, प० । ६ अर्थस्यापि । ७ पृथग्–आ०, ब०, प० । ८ अर्थे । ९ पितृरूपम् आ०, ब०, प० । १० वस्तुवस्तुज्ञा–आ०, ब०, प० । ११ विषयनियमे ।

निराकारज्ञानमेव नास्ति अप्रतिवेदनात् तत्कथं तच्छक्तितस्तन्नियम इति चेत् ? न; तस्यैव 'नीलमहं वेद्मि' इत्यनुभवात्। एवमपि कथं तस्य बहिर्विषयत्वसिति चेत् ? कस्यायं प्रश्नः—प्रयोजकस्य, प्रकारस्य, ज्ञापकस्य वा ? प्रयोजकस्तु [1]प्रतिपादित एव। प्रकारः शक्तिलक्षणः। ज्ञापकश्च स्वसंवेदनरूपः, स्वत एव तत्र बहिर्विषयत्वस्यानुभवात्। [2]तदेव कीदृशमिति [3]चेत् ? नीलमपि कीदृशम् ? यादृशमनुभवेन दृश्यते तादृशमेवेति चेत्; न; प्रस्तुतेऽपि समानत्वात्—बहिर्विषयत्वमपि ज्ञानस्य यादृशमनुभवोपारूढं [4]तादृशमेव तदिति। ततो निराकृत्वमेतत्[5]—"नीलादिसुखादिकमन्तरेणापरस्य ज्ञानाकारस्यानुपलक्षणात्" [ ] इति; अपरस्यैव स्वपरपरिच्छेदरूपस्य [6]तदाकारस्य दर्शितत्वात्। साक्षात्करणञ्च तस्यैव धर्मो नार्थस्य। कथमेवमर्थः साक्षात्कृत इति व्यपदेश इति चेत् ? न; साक्षात्करणविषयत्वादेव तदुपपत्तेः। स्वयं तस्य [8]तद्धर्मत्वे तु 'साक्षात्कर्त्ता सः' इति स्यान्न 'साक्षात्कृतः' इति। न हि भवति छेदनधर्मैव खड्गः छिन्न इति, 'छेत्ता' इति तत्र व्यपदेशदर्शनात्। तत इदमपि शब्दन्यायापरिज्ञानादेव परस्य वचनम्—"अथ संवेदनस्यैव" इत्यादिकिं[9] (दिकम्।) ततो यदि निराकारत्वे सर्वविषयत्वं संवेदनस्य आकारवत्त्वेऽपि भवेत्, शक्तेरनियामकत्वे तदाकारनियमस्याप्यसम्भवात्। इति सूक्तम्—'**प्रतिबिम्बोदये समम्।**' इति।

पुनरपि साकारवादं दूषयन्नाह—

सारूप्येऽपि समन्वेति प्रायः सामान्यदूषणम् ॥२८॥ इति।

सारूप्येऽपि न केवलं सामान्ये **समन्वेति** सङ्गतं भवति। किम् ? **सामान्यस्य दूषणं प्रायो** बाहुल्येन नित्यत्वादिदूषणस्य तत्राऽभावात्। तथा हि—यथा सामान्यस्य क्वचित् दृश्यत्वे सर्वत्र दृश्यत्वमेवं, दृश्यत्वाददृ(त्वाद्दृ)श्यत्वे[10] निरवयवत्वविरोधात्, तथा संवेदनस्य यदि नीलविषयत्वं तदाकारतया जडविषयत्वमपि तदाकारतयैव, अन्यथा विषयस्यानुकृतेतरत्वेन[11] विषयिणश्च सरूपेतरत्वेन विरुद्धधर्माध्यासे निरंशत्वविरोधात्, अविरोधे वा सामान्येऽपि [12]तदविरोधादसम्बद्धमेतत्—"जातिः सर्वत्र दृश्येत" [प्र० वा० स्व० ३।१५८] इति। तथा च जडमेव संवेदनमिति कथं ततः कस्यचिदधिगमो ज्ञानकल्पनावैफल्यापत्तेः ? तदनेन अधिगमनियमस्य सारूप्यसाधने विरुद्धत्वमुक्तम्।

अथ नीलं जाड्यादन्यदेव तत्कथं तत्र[13] सारूप्ये जाड्येऽपि तन्नियम इति चेत् ? उच्यते—

---

१ प्रतिवादिन एव। २ बहिर्विषयत्वमेव। ३ चेन्न नी—आ०, ब०, प०। ४ "तस्मात्सुखादिनीलादिव्यतिरिक्तमपरमिह जगति संवेदनं नास्तीति"—प्र० वार्तिकाल० ३।५०६। ५ ज्ञानाकारस्य। ६ तद्धर्मं प्रत्येतुं सा—आ०, ब०। ७ पृ० २४१ पं० ६। ८ किं भवति सा—आ०, ब०, प०। ९—व सादृश्यत्वाद् दृश्य—आ०, ब०, प०। १० क्वचित् अदृश्यत्वे क्वचिच्च दृश्यत्वे। ११—त्वे वि—आ०, ब०, प०। १२ क्वचिद् दृश्यत्वस्य क्वचिच्चादृश्यत्वस्याविरोधात्। १३ नीले।

जडस्वाभीलमन्यच्चेज्जडं नीलं कथं भवेत् ? ।
सम्बन्धाच्चेज्जडत्वेन सोऽपि कः परिकल्प्यताम् ? ॥६६९॥
न तादात्म्यं विभिन्नत्वात्तदुत्पत्तेस्तु सम्भवे ।
जडत्वाभीलमुत्पन्नं जडमेव पुनर्भवेत् ॥६७०॥
प्रागुक्तस्त्र दोषश्च तस्माने जडतेत्ययम् । ५
पुनस्तद्भेदकल्पनौ स्यादनवस्थानरूपणम् ॥६७१॥
जडत्वेतरनिर्मुक्तं नील येनुपकल्प्यते ।
स्कन्धान्तरं तदापन्नं तच्च नानभ्युपागमात् ॥६७२॥
तन्निर्मुक्तेरपि ज्ञानं तदाकारतयोद्भवत् ।
तैन्निर्मुक्तं भवेन्नीलप्रभवोत्तरनीलवत् ॥६७३॥ १०
[1]नीलादिवा(दिव) कर्यं [2]तस्मान्नीलस्याभिगमस्तदा ।
चेतनस्यैव धर्मोऽयं यतो लोके प्रसिद्धिमान् ॥६७४॥
तस्मादधिगमोऽन्यस्माद्दृशादेव वेदनात् ।
इत्यवस्थानवैधुर्यावर्यवृत्तिः क्षयं गता ॥६७५॥
तत्र ज्ञाद्यात्मुपजन्नीलकल्पनेयं फलावहा । १५
तथापि नीलसंविस्तेरुर्क[3]नीत्याऽनवापनात् ॥६७६॥
अतदाकारया विद्यया ज्ञाद्यस्य यदि वेदनम् ।
नीलस्यापि तयैवेति व्यर्थमाकारकल्पनम् ॥६७७॥
अविज्ञाते तु ज्ञाद्यस्य कर्यं तत्र प्रवर्तनम् ? ।
नीलमात्रावधोद्याच्चेत्कर्यं नातिप्रसज्यते ॥६७८॥ २०
सम्बन्धो ज्ञाद्य एवेति यदि तत्रैव वर्तनम् ।
कर्यं तस्मिन्नविज्ञाते सम्बन्धोऽप्यवगम्यताम् ॥६७९॥
साधनज्ञानतोऽन्येषं साध्ये वर्तनसम्भवात् ।
अनुमानप्रमाणस्य कैमर्थ्यक्येन पोषणम् ॥६८०॥
[4]अप्रवृत्ति[:]कुतो ज्ञाद्ये? [5]स्नानादेः प्रापणं कथम्? । २५
नीलमात्रप्रवृत्त्या चेज्ज्ञाद्यमभ्युदया भवेत् ॥६८१॥
तया च नीलमेव स्यादिना ज्ञाद्येन चेतनम् ।
चेतन्येतरनिर्मुक्तेस्तत्र पूर्वं [6]निषेधनात् ॥६८२॥

---

१ –तैरसंभवात् प० ।–तैस्तुरसंभवेत् आ०, ब० । २ तयोद्भवेत् आ०, ब०, प० । ३ जडत्वेतर निर्मुक्तम् । ४ नीलादेवाकर्यं आ०, ब०, प० । ५ जडत्वेतरनिर्मुक्तस्यापि । ६ –धनीत्यानवा–आ०, ब०, प० । ७ ज्ञाद्ये एव । ८ ज्ञाद्ये । ९ प्रवृत्तो दोषपादनात् ज्ञाद्ये अप्रवृत्तिरेवास्तु इत्युक्ते प्राह । अप्रवृत्तिरुतो ज्ञाद्ये आ०, ब०, ब० । १० यतः । ११ निषेधनात् आ०, ब०, प० ।

दूषणं चेतनत्वेपि पुरस्तादभिधास्यते ।
तदलं त्वरितत्वेन प्रस्तुते दीयतां मतिः ॥६८३॥

ततो न सारूप्यवादे बहिरर्थवेदनम्, [2]इत्यसरूपमेव ज्ञानमभ्यनुज्ञातव्यम् ।

कथं पुनरतद्रूपेण तद्वेदनमिति चेत्? कथमसामान्यस्वभावैः खण्डादिभिः समानप्रत्यय-
५ जननम्? स्वहेतुनियतात् कुतश्चित्प्रत्यासत्तिविशेषादिति चेत्; अनुकूलमाचरसि, निराकारादपि वेदनात्तत एव विषयाधिगमोपपत्तेः । सकलविषयाधिगमः कस्मान्न भवतीत्यपि न युक्तम्; खण्डादीनामेवं सकलसमानप्रत्ययहेतुत्वापत्तेर्व्यवहारसाङ्कर्योपिनिपातात् । प्रतिनियतसमानप्रत्यय-हेतुरेव तत्र[3] तद्विशेषो[4] न सर्वतत्प्रत्ययनिबन्धनमित्यपि समानमन्यत्र, निराकारेऽपि वेदने प्रतिनि-यतार्थाधिगमनिबन्धनस्यैव तद्विशेषस्य[5] भावात् । सारूप्यमेव तत्र तद्विशेष इति चेत्; खण्डा-
१० दिष्वपि सामान्यमेव तद्विशेषः कस्मान्न भवति तदभावेऽप्येकप्रयोजनजननस्योपलम्भात्? [6]उप-लभ्यन्ते हि चक्षुरालोकादयस्तदेकसामान्यानधिष्ठिता अपि रूपज्ञानमेकमुपजनयन्तो ज्वरो-पशमनादिकं वा गुडूच्यादयः, तथा खण्डादयोऽपि [7]तादृशा एव समानप्रत्ययमेकमुपजनय-न्तीति किं तत्र सामान्यकल्पनयेति चेत्? न; जाड्यवन्नीलादेरपि निराकारादेव वेदनादधिगम-प्रसङ्गात् पूर्वोपादेयत्ववद्वा । न हि नीलस्य पूर्वक्षणोपादेयत्वमसंवेद्यमेव नीलस्यापि [8]तत्त्वापत्तेः,
१५ निरंशवादे [9]भागशस्तद्वेदनविरोधात् । न च [10]तदाकारत्वं [11]तद्वेदनस्य; [12]तस्यापि [13]तदुपादेय-त्वप्रसङ्गात् । न चेदमुचितम्; चेतनस्याचेतनोपादेयत्वानभ्युपगमात्, अचेतनमेव तदपि प्राप्तम्, तथा च कथं [14]ततस्तद्वेदनम्[15]? अन्यतस्तद्वेदनमिति चेत्; न; तस्यापि तदाकारत्वे पूर्ववत्प्रस-ङ्गात्, पुनरन्यतस्तद्वेदनपरिकल्पनायामनवस्थापत्तेः न किञ्चिदर्थवेदनमिति सुव्यवस्थितः सारू-प्यवादः तद्विपर्ययाभावात् । ततो दूरमनुसृत्यापि निराकारमेव तद्वेदनमभ्युपगन्तव्यं नियतविष-
२० यञ्च, तद्धि नीलवेदनमपीति नार्थः सारूप्येण यतः स एव तत्र [16]तद्विशेषः स्यात् ।

कस्तर्हि तद्विशेष इति चेत्? अतदर्थपरावृत्तत्वमेव । तदेवाह—

अतदर्थपरावृत्तमतद्रूपं तदर्थदृक् । इति ।

अतद्रूपम् अनीलादिरूपम् अपिशब्दो द्रष्टव्यः, तादृशमपि वेदनं तन्नीलादिक-

---

१ –नत्वे तु पु–प० । २ नत्वे पु–आ०, ब० । ३ इत्यसद्रूप–आ०, ब०, प० । ३ खण्डादौ । ४ प्रत्या-सत्तिविशेषः । ५ भावनात् आ०, ब०, प० । ६ "यथेन्द्रियालोकमनस्कारा आत्मेन्द्रियमनस्कारा रूपविज्ञानमेकं जनयन्ति आत्मेन्द्रियमनोर्थतत्सन्निकर्षाद्वा असत्यपि तद्भावनियते सामान्ये । शिंशपादयो भिन्नाश्च परस्परानन्व-येऽपि प्रकृत्या एकाकारं प्रत्यभिज्ञानं जनयन्ति अन्यां वा दहनगृहादिकां काष्ठसाध्यामर्थक्रियां यथाप्रत्ययम् । न तु भेदाविशेषेऽपि जलादयः । श्रोत्रादिवद् रूपादिविज्ञाने ।.....यथा वा गुडूची व्यक्त्यादीनां सह प्रत्येकं वा ज्वरादिशमनादिलक्षणानाम् एककार्यक्रियावत् । न तत्र सामान्यमपेक्ष्यते । भेदेऽपि तत्प्रकृतित्वात् । न तदविशेषेऽपि दधित्रपुसादयः ।" –प्र० वा० स्ववृ० ३।७५, ७६ । ७ एकसामान्यानधिष्ठिता एव । ८ असंवेद्यत्वापत्तेः । ९ भागतस्तद्वे–आ०, ब०, प० । १० पूर्वक्षणोपादेयत्वाकारत्वम् । ११ नीलवेदनस्य । १२ नीलवेदनस्य । १३ पूर्वनीलक्षणोपादेयत्व । १४ नीलवेदनात् । १५ नीलस्य ज्ञानम् । १६ प्रत्यासत्तिविशेषः ।

मेवार्थं पश्यतीति तदर्थदृग् अवधारणगर्भत्वात्समासस्य। कुत एतत्? अतदर्थपरावृत्तं यत इति। नीलादेरर्थादन्यः पीतादिरतदर्थः तस्मात्परावृत्तं तद्ग्रहणपराङ्मुखत्वात्, तत्कथं तेन तद्दर्शनम्? न हि तत्परावृत्तमेव तद्दर्शनं भवति। ननु अतद्रूपत्वे तत्परावृत्तत्वमेव कथमिति प्रश्नविषय, तत्कथं तस्यैवोत्तरत्वम्? प्रश्नविषयस्यैवोत्तरत्वे न कश्चित्साधनसाफल्यम्, विवादविषयादेव तत्सिद्धेरिति चेत्, न, शक्तिगतस्य तत्परावृत्तत्वस्य हेतुत्वात्, अधिगमगतस्य च साध्यत्वात्। ५ तदयमर्थः –शक्तिनियमात् संवेदनस्याधिगमनियम इति। एतदेवोत्तरार्थं विवृण्वन्नाह–

अथेदमसदूपं किमतदर्थनिवृत्तितः ॥२९॥
तदर्थवेदनं न स्यादसमानामपोहवत्। इति।

अथेति प्रश्ने। इदं स्वसंवेदनवेद्यं ज्ञानम्। कीदृशम्? असद्रूपम् अविषयाकारम्। अनेन तत्सारूप्यसाधने प्रत्यक्षसाधनमुक्तम्। तदर्थवेदनं तस्य नीलादेरर्थस्य वेदनं तत्परिच्छेदि १० किन्न स्यात्? स्यादेव। कुत एतत्? अतदर्थनिवृत्तितः। व्याख्यातमेतत्। सैव कथमसद्रूपस्येति चेत्? खण्डादीनामिवेति ब्रूमः। तदाह–'असमानामपोहवत्' इति। यथा कर्कादयपोहः खण्डादीनामसद्रूपाणामेव सता तद्वेदनस्यापीत्यर्थः। तन्निवृत्तेर्नीरूपत्वात्कथं सतो व्योमकुसुमादिव नियतमर्थवेदनमिति चेत्? न, सर्वथा तन्नीरूपत्वस्यासिद्धत्वात्, कथञ्चिद्भावताश्रित्येनैव तत्प्रसिद्धेः। १५

"नात्यन्तमन्यत्वमनन्यता च विधेर्निषेधस्य च शून्यदोषात्" [बृहत्स्व० श्लो० ४२] इति वचनाच्च। परस्य तु भवत्येवायं पर्यनुयोगः किं तेषु तेषु तदपोहस्य फलमिति? समानप्रत्यय इति चेत्, न, नीरूपात्तदयोगात्। प्रसिद्धस्य तस्य तन्नीरूपत्वं "रूपं तस्य न किञ्चन" [प्र०वा० २।३०] इति वचनात्। 'वासनाप्रबोधादेव तत्प्रत्यय, तत्र केवलं तदपोहस्य सहकारिमात्रं ण्य'न्यपि वासनामात्रविजृम्भितमेव, कारणस्यैव सहकारित्वोपपत्तेः। न च नीरूपस्य कारणत्वम्, वस्तुत्वानुपङ्गात्, तस्य क्षणभङ्गित्वात्, अन्यथा स्वलक्षणस्यापि तद्भावोपनिपातान्न किञ्चिदुद्भवेत्।

यत्पुनरेतत्–"समानप्रत्ययः समानसामान्येन सर्वस्य विलक्षणत्वात्कथमुदयी?" [प्र०वार्तिकालं० ४।१२] इति पूर्वपक्षयित्वा प्रतिपादितम्–"तदन्यव्यावृत्तिमात्रादेव नियामकात्कचिदेव तदुदयः" [ ] इति, तत्प्रतिविहितम्, तन्मात्रस्य नीरूपत्वेन २५ व्योमकुसुमवत्तत्प्रत्ययनियामकत्वायोगात्।

यदप्यन्यदुक्तम्—

"आरोपितो य आकारो वासनाबीजयोधतः।
तावन्मात्रेण पर्याप्तं जातिरन्या वृथा न किम्॥"[प्र०वार्तिकालं० ४।१२] इति,

---

१ तदर्थमर्थदृक् । २ प्रत्यक्षसाध–आ०, ब०, प० । ३ श्लोकवार्तिके । ४ कर्कादयपोहस्य । ५ वासनः । ६ कारणस्यगतत्वात्। ७ "यत्पुनः तत्परावृत्तिमात्रमेवास्तु सामान्यमिति न इतिः ।"–प्र० वार्तिकालं० ४।१२ ।

तदपि न किञ्चित्; [1]तदाकारस्य नीरूपत्वे ततोऽपि तदन्यापोहवत्समानप्रत्ययायोगात्। वस्तुरूपत्वे तु स एव वस्तुभूतः समानाकार इत्यसङ्गतमेतत्–"जातिरन्या वृथा न किम्" इति। ततो न कुतश्चिदपि नीरूपत्वात् समानप्रत्ययः।

भवत्वेवम्; तँस्यैवाभावात्। विशेषान्तरव्यापिरूपत्वे हि समानत्वम्। न च प्रत्ययस्य रूपं तँदन्तरव्यापि, तँन्मात्रपर्यवसायिन एव तस्य प्रतिभासनात्। ततः स्वलक्षणमेव तत्, न सामान्यम्। तथा च परस्य वचनम्–"स च बुद्ध्याकारः[4] स्वलक्षणमेव न तत्सामान्यं बुद्ध्यन्तरस्य तदानीमभावात् अर्थगतत्वाभावाच्च" [प्र०वार्तिकाल०४।१२] इति। ततो न समानप्रत्ययाभावो दोषायेति चेत्; न ;

"प्रत्ययो यदि नामायं क्वचिदेव प्रवर्त्तते।
नियमो हेतुमात्रे स्यात् सामान्ये तु गतिः कथम् ?॥" [प्र०वार्तिकाल०४।१२]

इत्यस्य विरोधात्। अनेनँ सामान्यप्रत्ययमभ्युपगम्य तन्नियामकत्वेन सामान्यादन्यँस्य अन्यापोहस्य प्रतिपादनात्। असत एव तस्याभ्युपगम इति चेत्; न, प्रयोजनाभावात्। व्यवहारः प्रयोजनमिति चेत्; न; तस्याप्यसतस्ततोऽसम्भवात् अप्रतिवेदनाच्च। कुतो हि व्यवहारस्य प्रतिवेदनम् ? दर्शनादिति चेत्; न; ततः स्वलक्षणस्यैव प्रतिवेदनात्। न च तस्यैव व्यवहारत्वम्; निरंशक्षणक्षीणत्वात्, व्यवहारस्य च पूर्वापरभावाधिष्ठानप्रवृत्त्यादिरूपतया तद्विपरीतत्वात्, तत्र च दर्शनस्याप्रवृत्तेः। विकल्पादिति चेत्; न; समानप्रत्ययापलापे तस्यैवासम्भवात् तस्य तँद्रूपत्वात्। अङ्गीकारादस्त्येव तत्प्रत्यय इति चेत; न; तदर्थापरिज्ञानात्। दर्शनमङ्गीकार इति चेत्; न, तत्र समानाकारस्याप्रतिभासनात्। प्रतिभासनेऽपि स्वलक्षणवदसत्त्वानुपपत्तेः। विकल्प इति चेत्; न; समानप्रत्ययाभावे तदभावस्योक्तत्वात्। अङ्गीकारादस्त्येव तत्प्रत्यय इति चेत्; न; 'तदर्थापरिज्ञानात्' इत्याद्यनुबन्धादनवस्थापत्तेः। न दर्शनमङ्गीकारो नापि विकल्पः किन्तु तदभिनिवेशमात्रमिति चेत्; न; तस्यापि चिद्रूपत्वे दर्शनविकल्पान्यतरकोटिव्यतिक्रमानुपपत्तेः। अचिद्रूपत्वे तु न ततस्तत्प्रत्ययप्रतिपत्तिः, ज्ञानकल्पनावैफल्यदोषात्। इति न विकल्पाद्व्यवहारप्रतिवेदनम्। नापि व्यवहारान्तरात्; अनवस्थानात्। ततो न कुतश्चिदपि तत्परिज्ञानम्। अतः प्रतिषिद्धमेतत्–

"व्यवहारमात्रमविचारिततत्त्वयापि जात्या सम्पाद्यते?" [प्र०वार्तिकाल० ४।१२] इति;

अपरिज्ञातस्य[10] [11]तया सम्पादनमिति दुरवबोधत्वात्।

अपि च, किमिदमविचारिततत्त्वया[12] इति ? विचारभीरुस्वभावया[13] इति चेत्; ननु–

---

१ आरोपिताकारस्य। २ समानप्रत्ययस्यैवाभावात्। ३ विशेषान्तरव्यापि। ४ स्वमात्र। ५ –कारस्व– आ०, ब०, प०। ६ श्लोकेन। ७ –न्यस्यापोहस्य आ०, ब०, प०। ८ –वृत्तिर्वि–आ०, ब०, प०; ९ तद्रूपत्वाद्वी–आ०, ब०, प०। १० व्यवहारस्य। ११ जात्या। १२ –तत्व इति आ०, ब०, प०। १३ –भीरु स्वभाव इति आ०, ब०, प०।

विचारो हि विकल्पात्मा तदभावे कथं भवेत् ? ।
यतस्तद्भीरुता नाम्नि तस्यैवेयं प्रकल्पते ॥६८४॥
अङ्गीकारात्तदस्तित्व पूर्वमेव निवारितम् ।
सैव नास्ति तस्माच्च तद्भीरिरिति दुर्घटम् ॥६८५॥
नित्यादिरूपं तत्प्राप्तं सामान्य निरुपद्रवम् । ५
क्षणभङ्गिजगद्वादवैतथ्यावेदनभ्रमम् ॥६८६॥
तस्माद्विपारसद्भावे विकल्पो निरुपद्रव ।
न च सामान्यनिर्भासस्तन्निषेधस्तवः कथम् ? ॥६८७॥

तस्माद्वस्तुसम्मेव समानप्रत्ययः । न च तस्य नीरूपादन्यापोहादुत्पत्तिरिति दुरतिक्रमोऽयं दोषोपातः सौगतस्य । शास्त्रकारेण तु तदभ्युपेक्षामात्रेण इदमभिहितम्-'असमानामपोहयत्' १०
इति । ततः स्थितम्—यथा समानपरिणामविकल्पानामेवान्यापोहस्तत्त्वतश्च नियत एव समानप्रत्ययः तथा सारूप्यविकल्पस्यैव संवेदनस्यातदर्थनिवृत्तिः, अतश्च नियतमेवार्थवेदनमिति ।

ननु यावदतदर्थव्यावृत्त्या नियतार्थत्वं ज्ञानस्य तावदतदाकारव्यावृत्तेरेव कस्मान्न भवति ? अतदाकारव्यावृत्तिर्नाम तदाकारत्वमेव, तच्च न क्वचिदप्युपलभ्यते, तत्कथं तेन नियतार्थत्वं व्यपदिश्येत(ते)वेति चेत्, न, अन्यत्रापि तुल्यत्वात्। अतदर्थव्यावर्त्तनमपि तदाभिमुख्यमेव तेनापि कथं नियतार्थत्वं तस्यैवादर्शनात् । अप्राप्तदर्शनमपि अर्थप्रतिपत्त्यन्यथानुपपत्त्या परिकल्प्यत इति चेत्, न, प्रतिकर्मनियमान्यथानुपपत्त्या तदाकारत्वस्यापि परिकल्पनात् । 'तुल्यस्यापि नियमः नियमविकलात् प्रतिकर्मनियमायोगात् ?' इत्यपि न युक्तः प्रश्नः, तदाभिमुख्येऽप्येवं प्रश्नापत्तेः । शक्तिरस्तु (शक्तिस्तु) न तत्रैव पक्षपातमुद्वहति । ततो यथाकारवतो नार्थवेदनं तदन्यतोऽपि न भवेत् । तुल्यदोषपरिहारत्वात् इति उत्साद एव बाह्यर्थस्य । स २०
चामिप्रेत एषाद्वैतवादिनः । न हि संवेदनस्यान्यत् वेद्यम् अस्ति दोषात् । तत एव न वेद्यं अन्यस्य वेद्यमिति स्वप्रकाशमेव तदवशिष्येत । तदुक्तम्—

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
तत्रापि तुल्यदोषत्वात्स्वयं सैव प्रकाशते ॥" [प्र०वा० २।३२७]

इति चेत्, अत्राह— २५

अत्राक्षेपसमाधीनामभेदे मूलमाकुलम् ॥३०॥
स्वचित्तमात्रगर्भोपतारसोपानपोषणम् । इति ।

अत्र अनयोः निराकारेतरज्ञानयोः आक्षेपसमाधीनां दोषपरिहाराणाम् उक्तप्रकारेण अभेदे विशेषाभावे सति । नु इति वितर्के । यत्स्वचित्तमात्रं संविद्द्वैतं स एव गर्भवत् दुःखापा-

---

१ प्रकल्पते प० । २ विचार एव । ३ दोषोपनिपात आ०,ब०,प० । ४ –नुज्ञामात्रेण आ०, ब०, व० । ५ दोषस्य ।

दहेतुत्वात् **गत्तः** तस्या**वतारसोपान**मवतरणमार्गः "नान्योऽनुभाव्यः" इत्यादिस्तस्य **पोषणं** समर्थनं **तदाकुलं** न भवति । कुतः ? **ऊनं** यतः । अवनमवगमनम् ऊः अवतेरवगमनार्थत्वात् किपि त्वरञ्चल (ञ्चेरत्वर) [पा०व्या० ६।४।२०] इत्यादिना सौत्रो वकारस्य ऊजा (ऊडा) देशे सत्येवंरूपात् उवा अवगत्या ऊनं हीनम् अवगमरहितं यस्मादित्यर्थः ।

तथा हि–ग्राह्यादिनिषेधः कुतोऽवगन्तव्यः "यतो नान्यः" इत्यादि शोभेत ? ग्राह्याद्यपरिज्ञानादिति चेत् ; न; अपरिज्ञानात् कस्यचिदप्रतिपत्तेः, अतिप्रसङ्गात् । तदपरिज्ञानमेव तन्निषेधापेक्षया परिज्ञानम् । न चेदं व्याहतम् ; विषयभेदात् , परिज्ञानस्यैवापरिज्ञानत्ववत् अपरिज्ञानस्यापि परिज्ञानत्वोपपत्तेः । प्रसिद्धं हि रूपपरिज्ञानस्यापि रसादावपरिज्ञानत्वमिति चेत् ; उच्यते–यदि तत्परिज्ञानान्निषेधस्यान्यत्वम्–"नान्योऽनुभाव्यो बुद्ध्या" इति व्याहन्येत, तन्निषेधस्य तत्परिज्ञानादन्यस्यैव तेनानुभवात् । अनन्य एव ततस्तन्निषेधो ग्राह्यादिपर्युदासस्य तत्परिज्ञानरूपत्वादिति चेत् ; अप्रतिपन्ने ग्राह्यादौ कथं तस्य तत्पर्युदासरूपत्वमपि शक्यमवगन्तुम् ? अप्रतिपन्ने कलशादौ भूतलादेस्तत्पर्युदासरूपतया प्रतिपत्तेरप्रतिवेदनात् । एकान्तापरिज्ञाने जात्यन्तरस्य कथं तत्पर्युदासरूपत्वमवगम्यत इति चेत् ? क एवमाह–"नैकान्तपरिज्ञानमिति ? सम्यगेकान्तस्य नैगमादिना नयविभागेन मिथ्यैकान्तस्य च परपरिकल्पनया प्रतिवेदनात् । ग्राह्यादेरपि कल्पनयैव वेदनमिति चेत् ; न; तत्पर्युदासरूपादेव ज्ञानात्तत्कल्पनानुपपत्तेः, ततस्तत्पर्युदासस्यैव प्रतिवेदनात् । अन्यतस्तत्कल्पनायामद्वैतव्यापत्तिः ।

अपि च, अन्यस्यापि तत्कल्पकत्वं तन्निर्भासित्वमेव । तच्चानुपपन्नम् "अविभागोऽपि बुद्ध्यात्मा" [प्र० वा० २।३५४] इत्यस्य व्याघातात् । सत्यम् ; न तस्यापि वस्तुतस्तन्निर्भासित्वम् , अन्यत एव तत्र तत्कल्पनादिति चेत् ; न; तस्यातन्निर्भासत्वे ततस्तत्र तत्कल्पनानुपपत्तेः । न ह्यरूपनिर्भासमेव ज्ञानमन्यत्र तन्निर्भासित्वं कल्पयितुमलम् । भवतु तस्य तन्निर्भासित्वमिति चेत् ; न; अविभागबुद्धिप्रतिघातस्योक्तत्वात् । तत्रापि तदन्यतस्तत्कल्पनायाम् अनवस्थापत्तेः । तन्न कुतश्चिदपि ग्राह्यादिप्रतिवेदनम् । तत्कथमेतत्–

"ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ।" [प्र० वा० २।३५४] इति ।

तल्लक्षणस्य स्वतः परतश्चासम्भवात् । "विचारावरुढं विशीर्यत एव तल्लक्षणम् , अकृत्वा तु तदवरोधं तदभ्युपगम्यत इति चेत् ; न; विचारस्यैव परामर्शभेदाधिष्ठानस्य वस्तुवृत्तेनाभावात् । अवस्तुभूतात्तु तत्त्वतो न ततः क्वचित्तदभावप्रतिवेदनम् ।

स्वसंवेदनादेव तत्प्रतिवेदनं सर्वज्ञानानां ग्राह्यादिभेदनिर्भासविकलतया स्वतः प्रतिवे-

---

१ "ज्वरत्वरस्रिव्यविमवामुपधायाश्च"–पा०सू० । २ अच्सहितस्य वकारस्य 'अव' इत्यस्य । ३ ग्राह्यादिनिषेधपरिज्ञानात् । ४ ग्राह्यादिनिषेधस्य । ५ ग्राह्यादिनिषेधपरिज्ञान । ६ ग्राह्यादिनिषेधस्य । ७ ग्राह्यादिपर्युदास । ८ अनेकान्तस्य । ९ एकान्तपर्युदास । १० –हानेकान्त–आ०,ब०,प० । ११ –स्य कल्प–आ०,ब०। १२ ग्राह्यादिकल्पकत्वम् । १३ अन्यज्ञानस्य । १४ ग्राह्यादिभेदवानिव प्रतिभासस्य । १५ विचारागूढं वि–आ०, ब०, प० । १६ विचारविषयत्वम् । १७ संवे–आ०, ब०, प० ।

दनादिति चेत् , न, तन्निर्भासावेदने तद्वैकल्यस्य तेनोऽपि [1]दुरवगमत्वात् । सत्यपि क्वचित्तद्वेदने[2] कुतः, क्वचित्तद्वैकल्यवेदनम् ? न तावत्तन्निर्भासादेव, तेन [3]तद्वैकल्याधिकरणस्य ज्ञानस्याप्रतिवेदनात् । तदप्रतिवेदने तदाधेयस्य तद्वैकल्यस्य दुरवबोधत्वात् । न च तदधिकरणस्यैव तेन प्रतिपत्ति , "तस्या नानुभवोऽपरः" [प्र० वा० २।३२७] इत्यस्य व्याघातात् । नापि तदधिकरणेनैव ज्ञानेन तद्वैकल्यवेदनम् , तेनापि तन्निर्भासस्यानवबोधात् । न च निषेध्यान वगमे तन्निषेधपरिज्ञानम् । न चोभयविषयमेकं संवेदनमस्ति यतस्तद्वैकल्यस्य क्वचिदवगमः, तत्रापि "तस्या" इत्यादेरुपन्यासात् ।

कथमेवमेकान्तप्रतिषेधस्य आत्यन्तरे परिज्ञानम् ? आत्यन्तरविषयं हि प्रमाणम् । न च तेन प्रतिषेध्यस्यैकान्तस्य प्रतिपत्तिः, येन च तस्य प्रतिपत्तिर्नयेन न तेन तन्निषेधाधिकरणस्य आत्यन्तरस्य प्रतिषेधनम् । न चोभयविषयमन्यत् , तस्यापि प्रमाणत्वे एकान्तविषयत्वस्य नयत्वे आत्यन्तरविषयत्वस्य चायोगात् । प्रमाणनयभाषाविकल्पेन तु [न] तत्परिज्ञानम् , प्रमाणादिपरिकल्पनावैफल्यापत्तेः । न च कुतश्चिन्निषेध्यतन्निषेधाधिकरणपरिज्ञानमन्तरेण तन्निषेधप्रतिपत्तिरुपपत्तिमतीति चेत् , न, आत्मनस्तदुभयविषयस्य भावात् । आत्मा हि[4] नयपर्यायात्प्रमाण[5]पर्यायमुपगतः सर्वथा तच्छक्तिं परित्यजति यतस्तद्विषयपरिज्ञानाभावात्तद्विषयतया आत्यन्तरस्य परिज्ञानं न भवेत् । तत्परित्यागे हि "निरन्वयविनाशात्मैव न स्यात् । न चैवम् , तस्य व्यवस्थापनात् । प्रमाणपर्याय एव नयशक्तिभावे कथं प्रमाणत्वमेव तस्य न नयत्वमपीति चेत् , न; एकान्ततः "प्रमाणत्वानभ्युपगमात् । अत एव 'स्यात्प्रमाणम् , स्यादप्रमाणम्' इत्यादि सप्तभङ्गीप्रवर्तनम् । न चैव परस्यापि प्राह्यादितन्निषेधाधिष्ठानविषय किञ्चित्सम्भवति यतस्तद्विवेकपरिज्ञानं" क्वचिद्भवेत् । तदिदमप्रतिपन्नविषयमेव परस्य वचनम्–"अविभागोऽपि बुद्ध्यात्मा" [प्र०वा०२।३२७] इति । ततः सूक्तम्–ग्राह्यादिनिराकरणस्याद्वैतगर्तावसारसोपानस्य परिपोषणमाकुलम् अवगमरहितत्वात् इति । एतौ अन्तरश्लोकौ ।

स्यान्मतम्–'सारूप्येऽपि' इत्यादिना सारूप्य-सामान्ययोः साधारणो "दोषसमन्वयः प्रतिपादितः, ततश्च कथं सारूप्यवत्सामान्यस्यापि वस्तुत्वम् ? मा भूदिति चेत् , न, तस्य 'सामान्यविशेषोपार्थात्मवेदनम्' "इत्यनेन प्रत्यक्षविषयत्वनिषेदनात , अवस्तुनः प्रत्यक्षविषयत्वानुपपत्तेरिति , तत्राह–

सामान्यमन्यथा सिद्धम् [न हि ज्ञानार्थयोस्तथा ॥३१॥
अदृष्टेरर्थरूपस्य प्रमाणान्तरतो गतेः ।] इति ।

---

१ प्राह्यादिप्रतिभासावेदने । २ स्वसंविदस्यादपि । ३ ग्राह्यादिवेदने । ४ तद्वैकल्यादिकार-आ०, ब०, प० । ५ ग्रहणम् । ६ –रूप ग्रा–ब० । ७ एकान्तस्य । ८ –न तन्नि–आ०, ब०, प० । ९ हि नैव प–आ०, ब० । हि नैवं प–प० । १० –ग्रनयप–आ०, ब०, प० । ११ क्षणिकत्वप्रसङ्गात् । १२ प्रमाणा–आ०, ब० । १३ ग्राह्यादिविवेकपरिज्ञानम् । १४ दोषसमन्वयः आ०, ब०, प० । १५ न्यायवि० श्लो० ३ ।

येन हि प्रकारेण सामान्यं दुष्यति 'व्यक्तिभ्यो व्यतिरेकेण-व्यतिरेके हि 'तासां तत्' इति व्यपदेशो न स्यात्त , असम्बन्धात्। न चानुपकारे सम्बन्धोऽपि अतिप्रसङ्गात्। व्यक्तिभिस्तदभिव्यक्तिरुपकार इति चेत् ; अभिव्यक्तिरपि नियतामिरेव कुतः ? कुतश्चित्प्रत्यासत्तेरिति [1]चेत् ; तया ता:[2] समानप्रत्ययमेव कुर्वन्तु किं सामान्येन ? सत्यपि तस्मिन् तत्कल्पनस्यावश्यम्भावात्। एवं हि पारम्पर्यपरिश्रमः परिहृतो भवति, अन्यथा नियमेन तस्योपनिपातात्-प्रत्यासत्तेरभिव्यक्तिः सामान्यस्य ततश्च समानप्रत्यय इति। नित्यत्वेन च-नित्यत्वे हि तस्य नित्योपलम्भनं तँच्छक्तेर्नित्यत्वात्। न तस्याः कुतश्चित्प्रतिबन्धो नित्यत्वहानेः। अतच्छक्तिकत्वे तु न कदाचिदपि दर्शनं व्योमारविन्दवत्। न च तस्य कुतश्चिच्छक्तेराधानम् अनित्यत्वोपनिपातात्। एतेन व्यापित्वमपि चिन्तितम्। व्यापित्वे हि तस्य सर्वत्र प्रतिपत्तिः तच्छक्तौ। अतच्छक्तौ तु न क्वचिदपि स्यात्। शक्तिप्रतिबन्धतदाधानयोः पूर्ववदयोगात्' इति। न तथा स्याद्वादिनां **सामान्यं सिद्धं** किन्तु **अन्यथा** अन्येन कथञ्चिदव्यतिरेकादिप्रकारेण। सदृशपर्यायरूपं हि सामान्यं न व्यक्तिभ्यो व्यतिरिक्तमेव तदव्यतिरेकस्यापि दर्शनात्। न च तस्य नित्यत्वमेव, द्रव्यतो नित्यत्वेऽपि पर्यायतो विपर्ययात्। नापि व्यापित्वमेव, एकत्वोपचारतो व्यापित्वेऽपि वस्तुतः प्रतिव्यक्ति पर्यवसानात्। प्रसिद्धञ्च सामान्यमीदृशं सौगतस्यापि प्रत्यक्षविषयतया तस्याभ्यनुज्ञानात्-"दृष्टेश्च यमलादिषु" [प्र० वा० २।३८४] इति वचनात्।

ननु एवमर्थज्ञानयोरपि न दुष्यत्येव सारूप्यं दूषणनिबन्धनस्य नित्यत्वादेस्तत्राप्यभावादिति चेत् ; अत्राह-'न[10] हि **ज्ञानार्थयोस्तथा**' इति। तात्पर्यमत्र-मा भूत्सारूप्ये नित्यत्वादेः सामान्यधर्मस्याभावात् तत्प्रयुक्त उपप्लवो निरंशत्वस्य तु स्वलक्षणेष्ववश्यम्भावात्, [11]तत्प्रयुक्तस्य तु तस्य नास्त्येव परिहारः, तत एव प्रायशः सामान्यदूषणमित्युक्तम्। तत्र सर्वात्मना सारूप्ये अर्थवत् ज्ञानस्यापि जडत्वादर्थस्यैव जीवनं [12]न ज्ञानस्येति कस्य सारूप्यम् ? ज्ञानवदर्थस्यापि वा चेतनत्वाज्ज्ञानस्यैवावस्थानं नार्थस्येति केन सारूप्यमिति ? ततो न **तथा** जैनकल्पितेन प्रकारेण **ज्ञानार्थयोः सामान्यं** सारूप्यं सिद्धम्।

अपि च, सारूप्यं नाम द्विष्ठो[13] धर्मः, तदधिकरणप्रतिपत्तावेव शक्यते प्रतिपत्तुं नान्यतरप्रतिपत्तिमात्रादिति ज्ञानवदर्थोऽपि प्रतिपत्तव्यः। भवत्वेवमिति चेत्; कुतस्तत्प्रतिपत्तिः ? तत एव प्रत्यक्षात् यस्य सारूप्यं परिजिज्ञास्यत इति चेत् ; ततोऽपि यद्यसारूप्योपायमेव तद्ग्रहणं व्यर्थमेव सारूप्यकल्पनम्। सारूप्योपायमेवेति चेत् ; न; परस्पराश्रयप्रसङ्गात्-'प्रतिपत्तावर्थस्य तत्सारूप्यपरिज्ञानम्, परिज्ञाते च तस्मिंस्तदुपायमर्थप्रतिवेदनम्' इति। तन्न ततोऽर्थदर्शनम्। तदेवाह-'**अदृष्टेरर्थरूपस्य**' इति। साधनमिदम्, '**न हि**' इत्यादि साध्यम्।

---

१ चेन्न तयोः स-आ०, ब०, प०। २ व्यक्तयः। ३ तच्छक्तिनि-आ०, ब०, प०। ४ -त्ययादान-आ०, ब०, प०। ५ ननु तथा आ० ब०, प०। ६ सादृश्यपर्याय-आ०, ब०, प०। ७ न तद्व्यक्ति-आ०, ब०, प०। ८ तस्य द्रव्यत्व-आ०, ब०, प०। ९ तत्राभावा-आ०, ब०, प०। १० न विज्ञा-आ०, ब०, प०। ११ निरंशत्वप्रयुक्तस्य। १२ नार्थज्ञानस्येति तस्य आ०, ब०, प०। १३ तद्द्विष्ठो आ०, ब०, प०।

भवत्सन्यत एव तत्प्रतिपत्तिरिति चेत्, तदपि यदि प्रत्यक्षम्, स एव दोषः—सारूप्यानपेक्षे ततस्तत्परिज्ञाने सारूप्यकल्पनावैफल्यस्य, तदपेक्षे ततस्तत्प्रतिवेदने परस्पराश्रयस्य चाविशेषात्। पुनरपि प्रत्यक्षान्तरात्तत्प्रतिपत्तिकल्पनायामनवस्थानात्। ततो नान्यतोऽपि प्रत्यक्षादर्थवेदनं सम्भवति। तदेवाह—'**प्रमाणान्तरतोऽगतेः**' इति। प्रत्यक्षादन्यत्प्रत्यक्षं प्रमाणं तदन्तरं तस्माद् अगतेरप्रतिपत्तेः '**अर्थरूपस्य**' इति। ५

अनुमानात्तत्प्रतिपत्तिरिति चेत्, न, लिङ्गाभावात्। नीलाद्याकार एव लिङ्गं तस्यार्थकृतत्वादिति चेत्, अत्र विचार्यते—"क एतस्मिन्बन्धनं ज्ञानस्याकारवत्त्वं दृष्टं येनैवमुच्यते? आकारद्वयदर्शनाभावात्। न हि ज्ञानाकारादन्योऽर्थाकार उपलभ्यते यतस्तत्कृतत्वं ज्ञानाकारस्योपलभ्यते। उपलम्भे वा तस्यापि प्रतिभासमानत्वात् ज्ञानाकारतैवेति तस्मिन्बन्धनमन्य एवार्थाकार उपलब्धव्यः। तत्राप्येवंकल्पनायामनवस्थैव। ततोऽर्थस्य बाह्यात्रेण सत्ताभ्युपगमो न प्रमाणनिबन्धनः" [ ] इति, तदयुक्तम्, अन्वयबलात् तदनुमानानभ्युपगमात्। न हि बौद्धस्य संवेदनाकारातिरेकाकारानुमानम् अन्वयबलात् येनैवंप्रसङ्गः स्यात्, अपि तु व्यतिरेकसामर्थ्यादेव। तथा च तस्य वचनम्—"चक्षुरालोकमनस्कारेषु सत्स्वपि न भवति स्तम्भशून्याभिमते स्तम्भाकारमक्षविज्ञानम्, अन्यत्रघटिति एव भवति ततो ज्ञायते—अन्येन केनचिदत्र वस्तुना भवितव्यम्, यदभावादन्यत्रा भावः स तथाभूतोऽर्थः प्रागेषो बाह्यः" [प्र०वार्तिकाल० ३।३९०] इति। व्यतिरेकबलादपि गमनमनुमानमिति प्रसिद्धमेव। नैयायिकस्यापि अस्मदादेस्तत एव प्रतिपत्तेः। १० १५

भवतु तर्हि व्यतिरेकबलादेव ज्ञानाकारस्य लिङ्गत्वमिति चेत्, न, असिद्धत्वात्। असिद्धो हि तदाकारो निराकारस्यैव ज्ञानस्यानुभवात्, तत्कथं तस्य व्यतिरेकः? सिद्धस्यैव क्वचित्तदुपपत्तेः। सिद्धेऽपि तदाकारे ततोऽर्थस्य नान्यादृशस्यानुमानम्, सारूप्याभावप्रसङ्गात्। 'अन्यादृशार्थः, तत्सरूपत्वं च संवेदनम्' इति व्याघातात्। अथ यादृशं संवेदनं नीलरूपं तादृशस्यैव ततोऽनुमानम्, कुत एतत्? तादृशादेव तादृशस्य सम्भवादिति चेत्, न, अन्यादृशादपि तादृशस्य सम्भवदर्शनात् यथा निर्विकल्पाद्विकल्पस्य। तत्रापि विकल्पवासनासहायादेव विकल्पत्वमिति चेत्, आकारवत्त्वमप्याकारवासनासाहाय्यादेव किन्न स्यात् यतस्ततोऽर्थस्य तादृशस्यानुमानम्? वासनाप्रभवत्वे विकल्प एव दर्शनं भवेदिति चेत्; किमिदं विकल्पत्वं नाम?, साधारणाकारत्वमिति चेत्, अवासनाप्रभवत्वे तत् किं नास्ति? तथा चेत्, मनोऽपि कथम् तदाकारं तदाकारज्ञानं जनयेत्? तदाकारमेव मन इति चेत्, तद्वेदनं तर्हि सविकल्पकं प्राप्तम्, नानाविषयप्रसाधारणस्य स्थूलरूपस्य तेन प्रतिवेदनात्। भवत्विति चेत्, न, तद्वदेव बहिरर्थवेदनस्यापि सविकल्पकत्वोपपत्तेः। अन्तरिव बहिरपि स्थूलरूपस्य परमार्थसत्त्वाऽविरोधात्। तदुक्तम्— २० २५ ३०

---

१ –त्वस्य स्यात् आ०, ब०, प०। २ व्यतिरेकबलादेव। ३ सम्भवति दर्शनात् आ०, ब०, प०। ४ विकल्पेऽपि। ५ विकल्पमेव ब–आ०। ६ विकल्पकत्वं आ०। ७ –वत्येतस्मिन् आ०, ब०, प०। ८ तद्वदेव बहिरर्थवेदन बहि–आ०, ब०।

"चित्रार्थज्ञानवच्चित्रं वस्तुरूपं न किं बहिः ।" [ ] इति ।

विचारासहत्वान्न बहिः स्थूलरूपं परमार्थः इति चेत्; न; अन्तरपि तदसहत्वस्य वक्ष्यमाणत्वात्। मा भूदुभयत्रापि तदिति चेत्; असतः कथं तस्यावभासनम्? मरीचिकातोयवदिति चेत्; न, स्वतोऽवभासने तदसत्त्वविरोधात्, स्वसंवेदनस्य मिथ्यात्वानभ्युपगमात्। अन्यतोऽपि न निराकारात् तदवभासनम्; साकारवादवैफल्यापत्तेः। आकारवत्त्वे तु तदप्यसदेव भवेत् असदाकारत्वात्। तस्याप्यन्यतस्तथाविधादवभासनमिति चेत्; न; अनवस्थानात्। मा भूदवभासनमपि तस्येति चेत्; न, दृष्टत्वात्। दृष्टं हि तस्यावभासनम्, तदपह्नवे नीलादौ निरंशे कः समाश्वासो यत्र दर्शनगन्धोऽपि नास्ति? भवतु सर्वाभावः तस्यापि कैश्चित्प्रतीक्षणादिति चेत्; ननु इदमत्यद्भुतमवभाति यत् 'सर्वं नास्ति, तत्प्रतीक्षणं च विद्यते' इति। तदप्युक्तम्—

"चित्रमेकमनिच्छद्भिश्चित्रं शून्यं प्रतीच्यते" [ ] इति ।

तत्र स्थूलाकारस्य प्रतिक्षेपो न्याय्यः।

नाप्यसत एव तस्य प्रतिभासनम्। न च मरीचिकातोयमत्र निदर्शनम्; तस्याप्यसतः साकारवादे प्रतिभासायोगात्, पूर्वोक्तन्यायात्। ततः स्थूलाकारमेवैं दर्शनम्, तस्य च साधारणाकारतया विकल्पत्वमवासनाप्रभवत्वेऽपि समानम्। न समानम् अननुसन्धायित्वात्, अनुसन्धायित्वं हि विकल्पकत्वम्, तदभावात्साधारणाकारमपि दर्शनं निर्विकल्पकमेवेति चेत्; न; वासनाप्रभवत्वेऽपि समानत्वात्। "तत्प्रभवस्यापि स्थूलप्रतिभासस्याननुसन्धायित्वाविशेषात्। तथापि तस्य न वासना कारणमिति चेत्; विकल्पस्यापि न स्यात्। ततो निर्विकल्पाद्विकल्पस्येव निराकारादेवार्थाद्[६] आकारवतोऽपि ज्ञानस्योत्पत्तिसम्भवात् न तदाकारादर्थस्य तादृशस्यानुमानमुपपन्नम्। एतदेवाह—**प्रमाणान्तरतोऽगतेः**। प्रत्यक्षादन्यत्प्रमाणं तदन्तरम् अनुमानं तस्माद् **अगतेः**प्रतिपत्तेः **'अर्थरूपस्य'** इति। तथा च निषिद्धमेतत्—"**नह्याभ्यामर्थं परिच्छिद्य प्रवर्त्तमानः**" [ ] इति, प्रत्यक्षानुमानयोरन्यतरस्याप्यर्थस्याप्रतिवेदनात्। ततः स्थितम्—

सामान्यमन्यथासिद्धं न हि ज्ञानार्थयोस्तथा ॥
अदृष्टेरर्थरूपस्य प्रमाणान्तरतोऽगतेः । इति ।

स्यान्मतम्—निराकारत्वे ज्ञानस्य कस्तस्य विषयः स्यात्? समकालो नीलादिरिति चेत्; न; तत्र प्रतिबन्धाभावात्। अप्रतिबन्धस्यापि तद्विषयत्वे सर्वस्य सर्वदर्शित्वप्राप्तेः। हेतुत्वेन प्रतिबद्ध एव सोऽपीति चेत्; न तर्हि तत्समकालत्वम्। न हि हेतोः फलेन समकालत्वम्। तत्त्वे हि प्रागसत्त्वम्, असतश्चासामर्थ्यं प्राक्। पश्चात्कार्यकाले सामर्थ्यमिति

---

१ परमार्थमिति आ०, ब०, प०। २ –मासमाने आ०, ब०, प०। ३ तत्प्रत्यक्षं वि–आ०, ब०, प०। ४ –व निदर्श–आ०, ब०, प०। ५ तत्प्रतिभासस्यापि। वासनाप्रभवस्यापि। ६ –रादेवासाधारणाकारवतोऽपि आ०, ब०, प०। ७ प्रतिबन्धरहितस्यापि। ८ तुलना–प्र० वार्तिकाल० २।२४७।

चेत्, कार्यकाले कार्यस्य विद्यमानत्वाद् व्यर्थं सामर्थ्यम्। एवं हि कार्यस्य कालो यदि तदा कार्यस्य सत्त्वम्। तस्मात् प्रागेव सत्त्वं सर्वहेतूनाम्। अतोऽर्थोऽपि हेतुर्न फलभूतसंप्राहक-विज्ञानसमानकालभावी। यदुक्तम्—

"असतः प्रागसामर्थ्यात्पश्चाच्चानुपयोगतः।
प्राग्भावः सर्वहेतूनां नातोऽयः स्वधिया सह॥" [प्र०वा०२।२४६] इति। ५

भवतु तर्हि प्राग्भाविन एव विषयत्वं तस्य हेतुत्वेन ज्ञाने प्रतिबन्धादिति चेत्, न, ज्ञानकाले तस्यामावात्। न ह्यसतस्तत्काले सद्विषयत्वम्, एवं हि निर्विषयत्वमेव ज्ञानस्य स्यात्। साकारवादिनां तु नायं दोषः, साकारज्ञानहेतुत्वयैव तस्य सद्विषयत्वोपपत्तेः। तदप्युक्तम्—

"भिन्नकाल कथं ग्राह्यमिति चेद्ग्राह्यतां विदुः।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्॥" [प्र०वा०२।२४७] इति, १०

तत्राह—

अतीतस्यानभिव्यक्तौ कथमात्मसमर्पणम् ॥३३॥
असतोऽज्ञानहेतुत्वे व्यक्तिरव्यभिचारिणी। इति

यदि ज्ञानकाले अतीतस्य सद्धेतोरभावात् अनभिव्यक्तिः अप्रतिपत्तिः तर्हि तस्यामप्युपगम्यमानायां कथमात्मसमर्पणं संवेदने स्वाकारोपनिधानम्? 'अतीतस्य' इति सम्बन्धः। कदैतदिति चेत्? असतो ज्ञानकाले अविद्यमानस्यातीतस्य अज्ञानहेतुत्वे ज्ञानहेतुत्वाभावे तद्धेतोरेव हि तत्रात्मसमर्पणं परस्यामिप्रेतम् "हेतुत्वमेव युक्तिज्ञाः" इत्यादिवचनात्। असतश्च ज्ञानकाले यदि तद्धेतुत्वं तद्धेयत्वमपि स्यात्, निर्विषयत्वमेवं संवेदनस्य स्यात्। 'असतस्य वेद्यम्' इति 'सन्न वेद्यम्' इत्यर्थादिति चेत्, निर्हेतुकत्वमप्येवं स्यात् 'असतस्य हेतुः' इत्यत्रापि 'सन्न हेतुः' इत्यर्थात्। स्वकाले सत एव हेतुत्वान्न निर्हेतुकत्व- २०
मिति चेत्, निर्विषयत्वमपि न भवेत्, स्वकाले सत एव तस्य तद्वेद्यत्वात्। अन्यकालस्यापि वेद्यत्वे तद्विशेषात् चिरातीतमपि वेद्यं भवेदिति न तत्र प्रमाणान्तरकल्पन फलवत्, प्रत्यक्षत एव सिद्धेरिति चेत्, न, हेतुत्वेऽप्येवं प्रसङ्गात्। अन्यकालस्याविशेषेण चिरातीतस्यापि हेतुत्वे स्वात्मसमर्पणे च प्रत्यक्षसिद्धेः प्रमाणान्तरवैफल्यस्य चाविशेषात्। शक्यस्यैव हेतुत्वम्, न च चिरातीतस्य शक्यत्वम् अनन्तरस्यैव संवेदनोपजनने सामर्थ्यात्, ततो नायं प्रसङ्ग इति चेत्, न, २५
प्रसङ्गान्तरस्याप्येवमनुपपत्तेः। शक्यस्यैव हि वेद्यत्वम्, न चिरातीतस्य शक्यत्वम्, अस्य कालातीतस्यैव तद्वित्तं (तद्वित्ति) प्रति शक्यत्वात्। तदेषाह—व्यक्तिरव्यभिचारिणी। व्यक्तिः अतीतस्य प्रतिपत्तिर्न व्यभिचारिणी अनन्तरविषयप्रवृत्तेष्वप्रवृत्तेः।

यत्पुनरेतत्—अतीतादेरपि प्रत्यक्षविषयत्वे वर्तमानत्वमेव अभिमतवर्तमानवदिति,

---

१ कालात् प्राक्काले। तदाकारस्य—आ०, ब०, प०। २ प्रकल्पा—आ०, ब०, प०। ३ कथमिव तत्समर्पणं संवेदनस्य—आ०, ब०, प०। ४ तदयत्तस्य आ०, ब०, प०। ५ —क्षणेऽप्यसौ आ०, ब०, प०। ६ —त्वादिति—आ०, ब०, प०। ७ प्रसङ्गादन्यत्रान्तरस्याप्येव—आ०, ब०, प०, म०।

तत्रापि किमिदं वर्त्तमानत्वमेव नाम ? प्रत्यक्षविषयत्वमेवेति चेत्; न; साध्यस्यैव हेतुत्वायोगात्, तद्विषयत्वमेव हेतुस्तदेव साध्यमिति कथमिव न्यायवेदिनः प्रतिपद्येरन् ? 'अनित्यम् अनित्यत्वात्' इत्यादिवत् साध्यत्वानुपपत्तेश्च सिद्धत्वात्। सिद्धं हि तद्विषयत्वमतीतादेः। न च सिद्धमेव साध्यम्; असिद्धस्य तत्त्वेन प्रसिद्धत्वात्। वर्त्तमानत्वं वर्त्तमानव्यवहारविषयत्वम्, तदेवातीतादौ प्रत्यक्षविषयत्वेनोपपद्यते, न हि विषयत्वादन्यत् तद्व्यवहारनिबन्धनं तस्यैव तन्निबन्धनत्वेन प्रसिद्धेऽपि वर्त्तमाने प्रतिपत्तेरिति चेत्; किमेवं नीले पीतव्यवहारविषयत्वन्न प्रकल्प्यते ? प्रसिद्धे पीते तद्विषयस्यैव तद्व्यवहारनिबन्धनत्वेन प्रसिद्धेः, तस्य च नीलेऽपि भावात्। एवं लोको न क्षमते तस्य तथा प्रकल्पनाभावादिति चेत्; न; अन्यत्रापि तुल्यत्वात्—लोकस्यातीतादावपि वर्त्तमानव्यवहारकल्पनस्याभावात्। वर्त्तमानकालसम्बन्धित्वं वर्त्तमानत्वमिति चेत्; न; कालस्य तत्र प्रमाण(णा)भावोपन्यासेन स्वयं प्रतिक्षेपात्। अप्रतिक्षेपेऽपि यथा कस्यचित्प्रत्यक्षविषयस्य वर्त्तमानकालसम्बन्धाद् वर्तमानत्वम्, एवम् अतीतादिकालसम्बन्धादतीतादित्वमपि भवेदिति कथं सर्वस्य प्रत्यक्षविषयस्य वर्त्तमानत्वोपपादनमुपपद्येत ?

यदि चायं निर्बन्धः प्रत्यक्षवेद्यं वर्त्तमानमेव नातीतादिकमिति; तर्हि प्रत्यासन्नमेव तन्न दूरादिकमित्यपि भवेत्। शक्यं हि वक्तुम् 'पर्वतादयोऽपि दूरादितयाभिमताः प्रत्यासन्नाः प्रत्यक्षवेद्यत्वात् वापीकूपादिवत्' इति। प्रत्यक्षबाधनान्नैवमिति, प्रत्यक्षेणैव पर्वतादौ दूरादित्वस्य प्रतिपत्तेरिति चेत्; न; अन्यत्रापि समानत्वात्, अतीतादावपि वर्त्तमानकल्पने प्रत्यक्षबाधनस्याविशेषात्, अतीतादेरतीतादितयैव प्रत्यक्षेण प्रतिपत्तेः। अतीतादौ प्रत्यक्षमेव न वर्तते तत्काले तस्याभावात्, परप्रसिद्धेन तु तस्य विषयत्वेन वर्त्तमानत्वापादनमिति चेत्; दूरे पर्वतादावपि न तत्प्रवर्त्तते तद्देशेऽपि तस्याभावात्, अतद्देशेऽपि तत्प्रवृत्तौ अतत्कालेऽपि स्यात्। अवश्यं चैतदेवमभ्युपगन्तव्यम्, कथमन्यथा योगिप्रत्यक्षस्यातीतादौ प्रवृत्तिः ? वर्तमानमात्रविषयत्वे तस्याशेषज्ञत्वविरोधात्। तदपेक्षया सर्वं वर्त्तमानमेवेति चेत्, कथमेवमतीतादित्वेन भावानामुपदेशो वर्त्तमानतयैव तदुपपत्तेः, वर्त्तमानतया प्रतिपन्नस्यातीतादित्वेनोपदेशे तस्य वञ्चकत्वेन प्रामाण्याभावानुपङ्गात्। अस्मदाद्यपेक्षयाऽतीतादित्वमप्यस्त्येव तेषामिति चेत्; अस्मदादेरेव तर्हि तथा तदुपदेशो युक्तो न योगिनः, तदपेक्षया तेषु तदभावात्।

[12]किं वेदम्—अस्मदाद्यपेक्षयापि तेषामतीतादित्वम् ? अदर्शनविषयत्वमेव। "तस्मादतीतादि पश्यतीति कोऽर्थः ? अन्येनादृश्यमानं पश्यति" [प्र० वार्तिकाल० १।१३८] इत्यलङ्कारवचनादिति चेत्; न; तात्कालिकस्यापि व्यवहितविप्रकृष्टादेरन्येनादर्शनसम्भवात्। अदृश्यमानं कथमस्ति उपलम्भलक्षणत्वात्सत्तायाः इति चेत् ? किमिदानीं यावदेव दृश्यमस्मदादेस्तावदेवास्ति ? तथा चेत्; योगिनापि तावदेव दृश्यमिति न योगीतरयोः कश्चिद्विशेषः स्यात्।

---

१ —मात्रत्वं नाम आ०, ब०, प०। २ विषयत्वस्यैव। ३ व्यवहारनिबन्धनत्वेन। ४ "न प्रमाणेनापि गतिः कालस्य विद्यते।"—प्र० वार्तिकाल० १।१३८। ५ प्रत्यक्षवेद्यम्। ६ अतीतकाले। ७ योग्यपेक्षया। ८ —दिमत्त्वेन आ०,ब०,प०। ९ योगिनः। १०अर्थेषु। ११ अतीतादित्वाभावात्। १२ किञ्चेदनम् प०।

अस्मदादीनां दृष्टमतीतम्, दृश्यमाणमनागतमिति चेत्, तर्हि कथं योगिदर्शनापेक्षयापि वर्त्तमानं भवेत् उपरतत्वादनुत्पन्नत्वाच्च । अस्मदादिदर्शनस्यैव तद्विषयस्योपरमानुत्पत्ती न वस्तुन इति चेत्, तस्य तर्हि स्यादक्षणिकत्वं पूर्वापरकालव्यापित्वात् । तन्न अस्मदाद्यपेक्षया भावानामतीतादित्वात्तथात्वेनोपदेशः । तेषामुपदेशोऽपि वर्त्तमानतयैव तयैव स्वयं परिज्ञानादिति — चेत्, न तर्हि तदुपदेशादुपायोपेयभावपरिज्ञानम्, वर्त्तमानतयोपदिष्टानां तद्भावाभावात् । ५
नहि वर्त्तमाना एव भावा केचित्केषाञ्चिदुपायत्वमुपेयत्वं वा प्रतिपद्यन्ते "प्रागभावः सर्वहेतूनाम्" [प्र० वा० २।२४६] इत्यस्य व्याघातात् । अतो व्यर्थमेव तदन्वेषणम्, सोपायहेयोपादेयतत्त्वपरिज्ञानस्य तदन्वेषणादिष्टत्वात्, तस्य च ततोऽसम्भवात् । ततो न सुभाषितमेतत्—

"ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये ।" [प्र० वा० १।३२] इति ।

तस्मादतीतादितया प्रतिपन्नत्वादेव भावानां योगिना तथोपदेश इत्यङ्गीकर्त्तव्यम्, अन्यथा १०
योगिन एवाभावापत्तेः—यतसौ वर्त्तमानतयैव सर्वं पश्यति, स्वसन्तानभाविनः पूर्वोत्तरसमयभाविनिरवशेषक्षणानपि तथैव पश्यतीति नासौ कस्यचित्कार्यं पूर्वाभावात्, नापि कस्यचित्कारणमुत्तराभावादित्यसन्नेव खरविषाणवत् । ततस्तदभावमनभ्युपगच्छता यथास्वकालभाविन एव तान् स पश्यतीति वक्तव्यम् । तथा च "तेनैव व्यभिचारादयुक्तमेतत्—'अतीतादिकमपि वर्त्तमानं प्रत्यक्षविषयत्वात् प्रसिद्धवर्त्तमानवत्' इति । तस्माद्यत्तत्कालभाविनयैव अतीतादेरस्मदादिप्रत्यक्षस्यापि प्रतिपत्तिः, न तस्याः कालव्यवधिक्षणो व्यभिचारोऽस्ति । तदेवाह— १५
व्यक्तिरव्यभिचारिणी ।

साकारमेव तु विज्ञानं व्यभिचारि द्विचन्द्रादेर्बहिरभावेऽपि तदाकारस्य ज्ञानस्योपलम्भात् । न "तन्मात्राच्चस्तुप्रतिपत्तिर्विशिष्टादेव" बहिर्भावोपनीताच्चतत्परिज्ञानोपगमात्, तस्य चाव्यभिचारादिति चेत्, स्यादेतदेवं यदि बहिर्भावस्य पृथग्दर्शनं भवेत्—'इदं बहिर्भावोपनीतमाकारवद्विज्ञानम् इदमन्यथा' इति । न चैवम्, सर्वदा ज्ञानाकारादेव तत्प्रतिपत्तेः, तस्य च सत्यसति चार्थे विशेषाभावात् । २०

मन्येवं निराकारापि व्यक्तिर्व्यभिचारिण्येव "द्विचन्द्रादौ बहिरसत्यपि तद्दर्शनात् । निर्बाधात् तद्व्यक्तिरव्यभिचारिण्येव, द्विचन्द्रादिव्यक्तिस्तु बाधावतीति चेत्, न, बाधकस्यासम्भवात् । तथा हि—

"बाधकः किं तदुच्छेदी किं वा ग्राह्यस्य हानिकृत् ।
ग्राह्याभावज्ञापको वा त्रयः पक्षाः परः कुतः ? ॥

यदि बाधको बाध्यप्रत्ययस्याभावं करोति तदालम्बनस्य वा; तदा "तत् ज्ञातम्, अज्ञातं वा ?

---

१ वस्तुनः । २ अतीतादीनाम् । ३ कार्यकारणभाव । ४ योग्यन्वेषणम् । ५ —यतस्तेन—आ०, प०, ब० । ६ तत्त्वपरिज्ञानस्य । ७ योगिनः । ततो न सम्—आ०, ब०, प० । ८ दृश्यते आ०, ब०, प० । ९ योग्यभावम् । १० अतीतादिभिरेव । ११ तथाकारज्ञानमात्रोपलम्भात् । १२ —तिर्विशेषादेव आ०, ब०, प० । १३ —न तद्हि चन्द्रा—आ०, ब० ।—न तदि चन्द्रा—प० । १४ बाध्यम् ।

अजातस्य कथं तेन[1] तस्याभावो विधीयताम् ।
न[2] जातु खरशृङ्गस्य ध्वंसः केनचिदर्पितः ॥
जातस्यापि न भावस्य ततोऽभावो विधीयते ।
[3]तदस्ति [4]हेतोस्तन्नास्ति बाधकादिति साहसम् ॥

यद्यजातोऽसौ भावः केन तस्याभावः क्रियते ? दैवरक्ताः किंशुकाः कस्तान् पुना रञ्जयति ? अथ जातः कारणात् ; तथा सति यथा जातस्तथास्ति, कथं तत्र विनाशावेशः ? तथा सति तदेव नष्टं तदेव सदिति महदसमञ्जसम् । अथ यथा न जातस्तथा विनाश्यते; तथा सति–

अन्यरूपेण जातस्य[5] यद्यन्येन विनाश्यता ।
नीलादेरन्यपीतादिरूपेणास्तु विनाश्यता ॥

न च तस्य [6]तद्रूपमिति सैव दैवरक्तता । तेन च रूपेणासौ पश्चाद्विनाश्यते । अथ [7]सर्वदा;

यदि पश्चाद्विनाश्येत पूर्वं तद्रूपता भवेत् ।
तेन रूपेण जातस्य कथं पश्चाद्विनाशनम् ? ॥
तदैव तेन रूपेण जातः पश्चाद्विनाश्यते ।
[8]पश्चात्तद्रूपता नास्ति दैवरक्तः स किंशुकः ॥
पूर्वमेवास्य नाशश्चेत्कारणादेव तत्तथा ।
नाशकेन परं कार्यं किमस्येति निरूप्यताम् ? ॥

एतदालम्बनविनाशेऽपि समानम् । तथा हि–

यथा स जातस्तेनास्य[10] रूपेण न विनाशनम् ।
यथा न जातस्तेनापि न रूपेण विनाशनम् ॥
व्यर्थकत्वादशक्यत्वात् प्रमाणेनाप्रतीतः ।
अर्थस्यास्य [11]कथं नु स्यात्कल्पनापि सचेतसाम् ॥

[12]अथ आलम्बनाभावं ज्ञापयति बाधकः; तदप्यसत्–

यदा स दृश्यते भावस्तदाऽभावो न बोध्यते ।
[13]यदा न दृश्यते भावो [ऽ] दर्शनं तस्य बोधकम् ॥
[14]तदा भावप्रसिद्धौ च नाभावः [15]सविशेषणः ।

---

१ बाधकेन । २ बाध्यप्रत्ययस्य तदालम्बनस्य वा । ३ न जातखर–आ०, ब०, प० । ४ बाध्यम् । ५ स्वकारणात् । ६ अन्यरूपम् । ७ सर्वथा आ,० ब० । सर्वथा प० । ८ पश्चात्तद्रूपनास्तित्वे दै–आ०, ब०, प०, प्र०वार्तिकाल० । ९ उत्पादकहेतोरेव । १० तेनाश्यरूपेण आ०, ब०, । ११ कथं तु स्यात् ब० । कथन्न स्यात्–प्र० वार्तिकाल० । १२ अथनालम्ब-आ०, ब०, प० । १३ यथा न आ०, ब०, प० । १४ तदभावप्र–प० । भावादर्शनकाले । १५ यस्य अर्थस्य अभावः क्रियते तेन विशेषणीभूतेन अर्थेन भवितव्यम्, तदभावे च कथमभावः सविशेषणः ।

विशेषणाप्रसिद्धौ च बोधशक्तिः कथं [1]तस्य ? ॥
विशेषणमथान्यत्र सिद्धमत्रानुवादवत् ।
भावरूपं हि तत्तत्र नाभावस्य विशेषणम् ॥
[2]तदेवान्यत्र नास्तीति[3] यथैव [4]प्रतिपद्यते ।
तथैव प्रतिपन्नस्य निषेधोऽयं किमर्थकः ? ॥ ५
अन्यथा प्रतिपन्नस्य तथापि न निषेधनम् ।
प्रागुक्तमेतदेवेति न पुनः पुनरुच्यते ।
न दृश्यते [5]यदा भावस्तदा न स्यान्निषेधनम् ॥
स्मृत्याध्याहृत्य तत्राम्य क्रियते चेन्निषेधनम् ।
स्मृत्या स्वरूपग्रहणे न कथञ्चिन्निषेधनम् । १०
स्मृत्या स्वरूपग्रहणे नाभावस्य विशेषणम् ॥" [प्र०वार्तिकाल०३।१३०]

इति चेत्, किमर्थं विचारस्य प्रयोजनम् ? न किञ्चिदिति चेत्, न, निष्प्रयोजनवचनस्य असाधनाङ्गवचनत्वेन निग्रहापत्तेः । बाधकसद्भावपरिज्ञानस्य नाशः प्रयोजनमिति चेत्, न, तस्याजातस्य वदयोगात्, तत्र 'यद्यजातोऽसौ भावः' इत्यादेर्वैयर्थात् । नापि जातस्य, तत्रापि 'अथ जातः कारणात्तथा सति' इत्यादेः प्रसङ्गस्यापि विशेषात् । अथ येन १५ रूपेण न जातस्तेनास्य नाशः क्रियते, तम; तत्रापि 'अन्यरूपेण जातस्य' इत्यादेरविकलस्याविशेषात् । तन्न सैत्परिज्ञानस्य विचारप्रयोजनं तद्विषयस्य बाधकस्येति चेत्, न, तत्राप्यस्य प्रसङ्गस्य तुल्यत्वात् । तस्यापि 'यथा स जातः तेनास्य रूपेण न विनाशनम्' इत्यादिनैव प्रतिपादनात् । तन्न तद्विषयस्यापि ततो नाशः । तर्हि तत्परिज्ञानस्य निर्विषयत्वं तेन ज्ञाप्यते इति चेत्, किमिदं निर्विषयत्वनाम ? तद्विषयस्य बाधकस्यासत्त्वमेवेति चेत्, न, तत्रापि 'यदा स २० दृश्यते भाव' इत्यादेरुपसर्पणात् ।

अपि च, नाप्रसिद्धे बाधके तद्विशिष्टत्वममावस्य, न च तथा प्रतिपत्तिः 'तदा भावाप्रसिद्धौ च' इत्यादेर्न्यायात् । प्रसिद्धे च तस्मिन् भाव एव नाभावः, भावाभावयोर्निष्पर्यायैकत्र विरोधात् । अन्यत्र प्रसिद्धमन्यत्रानुवादोपनीतं निषिध्यत इति चेत्, न, तत्रापि 'भावरूपं हि तत्तत्र' इत्यादेर्दूषणस्यानुपपत्तेः । न चापरिज्ञानस्यानुवादोऽपि । परिज्ञानञ्च न २५ दर्शनमेव, निषेधसमये तद्भावात् । स्मरणमिति चेत्, तेनापि यदि तत्स्वरूपग्रहणं सम्भवत्यनुवादो न निषेधः, स्वरूपतः प्रतीयमानस्य तदयोगात् । अथ न स्वरूपग्रहणम्, न तर्हि वस्त्वभावविशेषणत्वम्, 'स्मृत्या स्वरूपग्रहणे' इत्यादिना स्वयमप्येवममिधानात् ।

ततो न विषयाभावस्यापि परिज्ञानं तत्क्षयमुखे बाधकाभावनिर्णयः ? यतो निर्बाधैव

---

१ तस्याः आ०, ब०, प० । २ तदेवान्य—आ०, ब०, प० । विशेषणीभूतं वस्तु । ३ नास्तीति स्वेन । ४ प्रतिपाद्यते आ०, ब०, प०, प्र० वार्तिकाल० । ५ यथाभावः आ०, ब०, प० । ६ —मस्य प्रयो—आ०, ब०, प०, । ७ बाधकसद्भावपरिज्ञानस्य । ८ —भावः प्रयोजनमिति चेत्र तत्राप्यस्य आ०, ब०, प० । ९ —कस्यस्याद—आ०, ब०, प० । १० पुनस्तत् ।

द्विचन्द्रादिर्व्यं (दिव्य) क्तिर्भवेत्। ततो विचाराद्बाधकं निषेधता तस्य तद्भावज्ञापकत्वमनुमन्तव्यम्। तथा च द्विचन्द्रादेरपि किञ्चिद्भावमवबोधयत् किन्न बाधकं भवेत्? तस्य प्रतिभासे कथमभाववबोधनमिति चेत्; कथं बाधकस्य? तदपि मदीयमेव चोद्यमिति चेत्; उच्यते—भवेदिदं चोद्यम्, यदि प्रतिभासनादेव सत्त्वम्, सति तस्मिन् कथमभाववोधनं विरोधादिति? न चैवम्, अर्थक्रियासामर्थ्यादेव सत्त्वोपपत्तेः। प्रतिभासनमात्रादेव तु सत्त्वे नित्यादेरप्रतिषेधप्रसङ्गात्, तस्यापि स्वग्राहिणि विज्ञाने प्रत्यक्षभासनात्। नास्त्येव तादृशं ज्ञानं लोक इति चेत्; कीदृशमस्ति? सौगतकल्पितमनित्यादिविषयमेवेति चेत्; न; विप्रतिपत्त्यभावप्रसङ्गात्। तथा च व्यर्थमेव प्रमाणशास्त्रप्रणयनं तस्य प्रमाणविषयविप्रतिपत्तिनिराकरणार्थत्वात्। स्वत एव च तदभावे किं तदर्थेन तत्प्रणयनप्रयासेन किंशुके पाटलिमापादनप्रयासवत्। सोऽपि नास्त्येवेति चेत्; न; दृष्टत्वात्। भ्रम एवायं तवेति चेत्; किमिदं भ्रम इति? असत्यपि तत्प्रयासे तत्परिज्ञानमिति चेत्; अस्ति तर्हि प्रतिभासनमसतोऽपि इति कथमुपलभ्यमानस्याभावज्ञापनमनुपपन्नम्? यतः किञ्चित्कस्यचित् बाधकं न भवेत्। ततो बाधकत्वादुपपन्नं द्विचन्द्रादिव्यक्तेर्व्यभिचारित्वं नार्थव्यक्तेर्विपर्ययात्। विपर्ययप्रतिपत्तिश्चाभ्यासे स्वतः, अनभ्यासे च परतः। न चैवमनवस्थानम्; पर्यन्ते कस्यचिदभ्यासवतो ज्ञानस्यावश्यम्भावात्। तदाह—**व्यक्तिः** निराकारबुद्धिः **अव्यभिचारिणी** व्यभिचारशीला न भवति, ततो बहिरर्थप्रतिपत्तिस्तत एवेति भावः।

निराकारव्यक्तिरेव नास्ति नीलादिमुखादिव्यतिरेकेण तदसम्प्रतिपत्तेस्तत्कथं क्वचिद्व्यभिचारित्वं तस्या इति चेत्? न; स्वसंवेदनतस्तत्प्रतिपत्तेर्निवेदितत्वात्।

अपि च, निराकारैव बहिरर्थव्यक्तिः, "**भिन्नकालम्**" [प्र० वा० २।२४७] इत्यादिप्रश्नस्यान्यथानुपपत्तेः। न ह्यपरिज्ञातविषयः प्रेक्षावतां प्रश्नः। परिज्ञानञ्च भिन्नकालस्यार्थस्य न प्रत्यक्षात्; तेन पृथक् तस्याप्रतिवेदनात्। पृथक् प्रतिवेदने हि तस्य भिन्नकालत्वमन्यद्वा तत्त्वं शक्यमवगन्तुम्। न चैवम्, तदाकारस्यैव तेन प्रतिपत्तेः, तस्य च तदनुप्रविष्टस्य तात्कालिकत्वात्। नापि तत्कादाचित्कत्वलिङ्गोपजनितादनुमानात्तत्परिज्ञानम्; तस्यापि प्रत्यक्षवन्निराकारस्याभावात्। आकारवत्त्वे तु तेनापि स्वरूपस्यैव परिज्ञानं न पृथगर्थस्येति न ततोऽपि तत्परिज्ञानम्। पुनरपि तदाकारकादाचित्कत्वलिङ्गोपजनितादनुमानात्तत्परिज्ञानपरिकल्पनायाम् अनवस्थानमसमञ्जसमासज्येत। न चापरं तत्परिज्ञानकारणमिति कथमयं प्रश्नः "**भिन्नकालं कथं ग्राह्यम्**" इति? प्रश्नोपनिबन्धनस्य भिन्नकालवस्तुपरिज्ञानस्याभावे तदनुपपत्तेः। कथं वा तत्रेदमुत्तरम्—"**हेतुत्वमेव**" इत्यादि। तस्यापि भिन्नकालवस्तुविषयत्वेन तज्ज्ञानाभावेऽनुपपत्तेः। तदेवाह—

अतीतस्यानभिव्यक्तौ कथमात्मसमर्पणम्। इति।

---

१ विचारस्य। २ –भावमेववो–आ०, ब०, प०। ३ भवदिदं आ०, ब०, प०। ४ नित्यादेरपि। ५ विवादाभावे। ६ शास्त्रप्रणयनप्रयासः। ७ शास्त्रप्रणयनप्रयासे। ८ –त् सा बाध–आ०, ब०, प०। ९ –रा व्य–आ०,ब०,प०। १० प्रसक्तस्या–आ०,ब०,प०। ११ –तत्कथमश–आ०,ब०,प०। १२ भिन्नकालस्य अर्थस्य।

अभि[1]मुखी विषयं प्रति न पुनस्तदाकारा व्यक्तिः बुद्धिः **अभिव्यक्तिः** तदन्या **अनभिव्यक्तिः** आकारवती व्यक्तिः तस्याम्, **आत्मसमर्पणं** स्वाकारनिवेशनम् **अतीतस्य** तज्ज्ञानाख्यविषयस्य । **कथम्** न कथञ्चित् अवगम्यत इति शेषः । ततो भिन्नकालविषयं प्रमुत्तरञ्च प्रतिपादयता सत्परिज्ञानमभ्युपगतव्यम् । तच्च निराकारत्वेन व्यक्त्या उपपद्यत इति उपपन्न तदन्यथानुपपत्त्या तद्व्यक्तिव्यवस्थापनम् । तदेवाह— ५

असतो ज्ञानहेतुत्वे व्यक्तिरव्यभिचारिणी । इति

असतः अतीतस्य[2] तस्य ज्ञानकाले व्यतिक्रमात् **ज्ञानहेतुत्वे** स्वाकारज्ञाननजनकत्वे **व्यक्तिः** निराकारा विधिः, अन्यतस्तत्परिज्ञानयोगात् **अव्यभिचारिणी** प्रमाणमिति यावत् ।

यदि निराकारैव व्यक्तिः कथं ततः प्रकाशननियम —'नीलस्यैवायं प्रकाशो न पीता-दे[3]' इत्येवं रूप इति चेत् ? अत्राह— १०

प्रकाशनियमो हेतोर्बुद्धेर्न[4] प्रतिपिम्यते[5] ॥३४॥
अन्तरेणापि तादूप्यं ग्राह्यग्राहकयोः सतोः । इति

प्रकाशोऽधिगमः तस्य नियमोऽवधारणमुक्तरूपम्, स कस्याः सम्बन्धी ? बुद्धेः प्रत्यक्षलक्षणायाः ततस्तस्य भावात् । सं कुतः ? इत्याह—**हेतोः** बुद्धेर्यो हेतुरिन्द्रियादिलक्षणः प्रकाशावरणक्षयोपशमादिसव्यपेक्षस्तत इति । एतदुक्तं भवति—स्वहेतोरेव बुद्धिः नियतप्रकाश १५
शक्तिकत्वेनोत्पन्ना अतो नियत एव ततो विषयप्रकाश इति । अवश्याभ्युपगमनीयश्चायं स्वहेतु-निपन्धनः शक्तिनियमो भावानाम्, अन्यथा 'नीलज्ञानस्य नीलत्वपीतादयोऽपि किम सर्वे हेतवः तज्ज्ञान वा नीलवत्किन्न सर्वेषां कार्यम् ? कारणत्वेन च नीलस्य आकारयितृत्वे तैदविशेषात् पशुपादयोऽपि ज्ञानस्य कुतो नाकारयितारः ? कुतो वा स्वलक्षणदर्शनं नीलत्वलक्षणभङ्गा दापि न निश्चयमुपजनयति यतस्तत्र समारोपः तद्व्यवच्छेदार्थमनुमानञ्च परिकल्प्येत' इत्या- २०
दयतिप्रसङ्गपर्यनुयोगे कः परः परिहारः ? ततो यथा शक्तिनियमादेव अत्र कारणत्वादिनियमः तथा प्रकाशनियमोऽपि बुद्धेरिति व्यर्थं तदर्थमाकारपरिकल्पनम् । न चातीतपरिज्ञानार्थम्, तस्यापि शक्तित एवोपपत्तेः । ततो यदत्र वार्तिकम्—

"ज्ञानशब्दप्रदीपानां प्रत्यक्षस्येतरस्य च ।
जनकत्वेन पूर्वेषां क्षणिकानां विनाशतः ॥ २५
शक्तिः कुतोऽस्तता ज्ञानात्" [प्र०वा०२।४१७] इति,

तत्प्रतिविहितम्, सन्निधानं यदि ग्रहणनिबन्धनं भवेदतीतस्य शब्दादेरग्रहणम् असन्नि-धानात् । न चैवम् । शक्तेस्तन्निबन्धनत्वात्, तस्याश्च भिन्नकालभावापेक्षयापि भावात्, अन्यथा तदपरिज्ञानमेवेति निवेदितत्वात् । यदपि समानकाले परिज्ञानेऽविप्रमङ्गपरं वार्तिकम्—

---

१ अभिमुखीवि-आ०, ब०। २-दपेति ब- आ०, ब०, प०। ३-स्य ज्ञान-आ०, ब०, प०। ४ नीलस्यैव वा। ५ प्रतिपिपादयिषितम्। ६ 'व्यक्ति- कुतोऽस्तताम्-प्र० आ०। ७ ग्रहनिबन्धनत्वात्।

"अन्यस्यानुपकारिणः ॥
व्यक्तौ व्यज्येत सर्वोऽथः" [प्र०वा०२।४१८] इति ।

यच्चात्र निबन्धनम्–"न समानकालस्य हेतुता; तथाऽप्रतीतेः । [1]असम्बन्ध(द्ध)ग्रहणे च सर्वमेव गृह्येत" [प्र०वार्तिकाल०] इति ; तदपि प्रत्याख्यातम् ; न हि कालसाम्याद्विषयपरिज्ञानं यदयमतिप्रसङ्गः, किन्तु शक्तेः, तस्याश्च स्वहेतुबलभाविनो नियमात् नियतस्यैव समसमयस्यान्यस्य वा परिज्ञानमिति किमेतावता न पर्याप्तम् ? यत इदं बालविप्रलम्भनमाकारपरिकल्पनया कल्प्यते । कथञ्चायम् "स्पर्शस्य रूपहेतुत्वात्" [प्र०वा०१।१८४] इत्यादिव्याख्याने "परस्परवियोगेन समानकालयोरपि हेतुत्वात्" [प्र०वार्तिकाल०] इत्यनेन समसमयस्यापि [2]स्पर्शस्य रूपहेतुत्वं प्रतिपादयन्नेव निबन्धनकारः तादृशस्यैवार्थस्य ज्ञानहेतुतां प्रत्याचक्षीत ? यत इदम् "न समानकालस्य" इत्यादि सूक्तं भवेत् ? तदयं प्रज्ञाकरोऽपि विस्मरणशील इति सविस्मयमस्मच्चित्तमावर्तते ।

यदपि हेतोः प्रकाश्यप्रकाशनियम एव "तद्धेतोर्नियमो यदि" [प्र०वा०२।४१८]इत्यमेन पूर्वपक्षयित्वा समाधानमुक्तम्–"नैषापि कल्पना ज्ञाने" [प्र०वा०२।४१९] इति । निबन्धनमत्र–"[न] प्रतिनियतग्रहणमनया कल्पनया । हेतुनियमो हि पदार्थानां स्वरूपे, कार्यकरणे वा ? न तावत्स्वरूपे ; स्वरूपप्रतिनियमे हि कारणतः स्वरूपमेव तयोस्तथाभूतं यदवभासते ततः स्वरूपावभासनमेव प्रसक्तं तत्पूर्वकारणाधीनं न परस्पराधीनमिति न परस्परं ग्राह्यग्राहकभावः समानकालतयोदयात् । यदधीना हि तयोर्ग्राह्यग्राहकता तस्य हि तौ ग्राह्यग्राहकाविति युक्तम् । न च [6]संविदितात् स्वरूपादपरा ग्राह्यग्राहकता । कथं तर्हि 'ग्राहकोऽहं ग्राह्यं मेदम्' इति प्रतीतिः ? नः तदपरस्य सम्बन्धस्याप्रतिभासनात् । कल्पनामात्रमेव अनादिवासनाधीनमेतत् । तथा चोक्तम्–"सव्यापारमिवाभाति" [प्र०वा०२।३०८] इति । तस्मात्स्वरूपे स्वहेतुनियमान्न ग्राह्यग्राहकभावः । अथ कार्यकरणे हेतुनियमः; तदापि यदि ताभ्यां प्रतिनियतस्य कार्यात्मनो जननम्; कथमिव ग्राह्यग्राहकभावः सहकारिभाव एव भवेत् ? न च तावता ग्राह्यग्राहकभावः, तस्मान्न हेतुतो ग्राह्यग्राहकभावः" [प्र०वार्तिकाल०] इति । तत्र स्वरूप एव हेतुनियमः, न तावता स्वरूपप्रतिभासनमेव नीलतद्वेदनयोः । नीलस्य हि स्वहेतुनियतं ग्राह्यत्वं नियतवेदनापेक्षमेव न तु निरपेक्षं तत्कथं तस्य स्वतोऽवभासनम् ? तद्वेदनस्यापि तन्नियतग्राहकत्वं नियतनीलापेक्षं स्वापेक्षञ्च, तत्कथं तस्य स्वावभासनमेव । न चैवं सति 'कारणमेव नीलस्य ग्राहकं ग्राह्यञ्च तद्वेदनस्य' इति चोद्यम् ; नीलतद्वेदनयोः परस्परापेक्षस्यैव ग्राह्यग्राहकभावस्य कारणेन

---

१ 'असम्बद्धग्रहणे'–प्र० वार्तिकाल० । २ प्रज्ञाकरगुप्त० । ३ स्पर्शस्यापि रूप–आ०, ब०, प० । ४ कार्ये कारणे वा आ०, ब० । कार्यकारणे वा प० । ५ तस्य हेतौ आ०, ब०, प० । ६ संविदितस्वरू– आ०, ब०, प० । 'संविदितस्वस्वरूप'–प्र० वार्तिकाल० । ७ –रूपस्यस्वहे– आ०, ब०, प० । ८ स्वहेतुनियतग्राहकत्वम् ।

नियमात् न स्वापेक्षस्य । अवश्यञ्चैतदेवमङ्गीकर्त्तव्यम्, अन्यथा नीलस्वद्वेदनयोर्हेतुफलभावेऽपि तत्प्रसङ्गात् । तद्वेदन हि कारणमेव कस्यचित्, अन्यथा तदवस्तुत्वापत्तेः । कारणत्वञ्च तस्य कार्योपजननशक्तिलक्षणं स्वकारणादेवेति तदेव तस्य नीलं कार्यं मे पुनस्तत्तस्येति ग्राह्यम् । तथा च न तत्तस्य ग्राहकमेव अहेतोस्तदनभ्युपगमात् । ततो निरालम्बनमेवत्–

"ज्ञानं तथावभासतः ।
तं व्यनक्तीति कल्पेत तदभावेऽपि तत्कृतम् ॥" [प्र०वा०२।४२०] इति ।

नीलज्ञाने नीलस्वतत्वस्य तदवभासस्य च तदाकारताख्यलक्षणस्यानन्तरनीत्या निषेधात् । तस्मादत्र कारणेन कार्यान्तरापेक्षमेव तस्य कारणत्वमापाद्येत मात्मापेक्षमित्येतदेवोत्तरम् । प्रतच्च ग्राह्यग्राहकभावेऽपि समानम्–नीलस्वद्वेदनयोः परस्परसव्यपेक्षस्यैव तैद्भावस्य तत्कारणेनोपसर्पणात् । ततो दुर्व्याहृतमेवत्–"यद्धीना हि तयोः" इत्यादि । नीलस्वज्ञानस्वरूपव्यतिरिक्तः तद्भावै एव नास्ति तत्कर्य सविन्तेति चेत् ? न, कार्यकारणभावस्यापि तद्व्यतिरिक्तस्याभावात् सविन्तनस्याभावापत्तेः । कार्यं ज्ञान तस्य कारणञ्च नीलमिति प्रतीतेः अस्त्येव तद्भाव इति चेत्, न, ग्राह्यं नीलं तस्य ग्राहकं च ज्ञानमित्यपि प्रतीतेः ।

'कल्पनामात्रमेवैतदनादिवासनाधीनम्' इत्यपि न युक्तम्, कार्यकारणभावप्रतीताव्येवंप्रसङ्गात् । कल्पितं एव तद्भावोऽपि परमार्थतो बहिरर्थस्यामवितिवेदनात् । न हि प्रत्यक्षेण तत्प्रतिवेदनम्, आकारवतो ज्ञानस्यैव ततः प्रतिवेदनात् । नाप्यनुमानेन; तस्य प्रत्यक्षपूर्वकत्वेन तदभावेऽनवतरणात् ।

"प्रत्यक्षपूर्वकं सर्वमनुमानं प्रवर्तते ।
प्रत्यक्षस्यानुमानेन्ना यद्यन्योन्यसमाश्रयः ॥

न यावदनुमानं प्रमाणं तावन्न प्रत्यक्षं प्रमाणीभवति माद्येऽर्थे । न च प्रत्यक्षस्य प्रामाण्यासम्भवेऽनुमानम्, तत्पूर्वकत्वात्, अन्यथा अन्धपरम्परा भवेत् । तस्मात्परमार्थतः स्वरूपमेव संविदनस्य संविदित नार्थः ।" [प्र०वार्तिकाल० २।४२०] इति मास्त्येव वस्तुतस्तस्य कारणत्वं तत्कार्यत्वञ्च ज्ञानस्य, कल्पनैव केवलं तद्भावमुपदर्शयतीति चेत्, न, बहिरर्थवेदनस्य सविकल्पकत्वेन प्रत्यक्षत्वाभावप्रसङ्गात् । न हि कल्पनारोपितगोचरस्य निर्विकल्पकत्वमुपपन्नम् । सत्यम्, मिथ्याभिनिवेशरूपेण विकल्पेन सविकल्पकत्वम् अपरामर्शरूपकत्वात्तन्निर्विकल्पकत्वमुच्यत इति चेत्, कथं तयापि प्रत्यक्षत्वं भ्रान्तत्वात् ? न हि मिथ्याविषयमभ्रान्तमुपपन्नम्, अतिप्रसङ्गात् । इदमपि सत्यमेव वस्तुदृश्या सर्वस्याऽलम्बने भ्रान्तत्वात्, अभिनिवेशकभावाभावाभ्यां तु सम्यग्विज्ञानाविभागः, यत्र हि व्यवहर्तुरर्थाभिनिवेशः

---

१ नीलवेदनस्य । २ न पुनः नीलवेदनं नीलस्य कार्यं नीलभावादिति भावः । ३ अकारणस्य । ४ ग्राह्यग्राहकभावस्य । ५ ग्राह्यग्राहकभावः । ६–मेव तदना–आ०, ब०, प० । ७–वेदनम् आ०, ब०,प० ।

[तत्] सम्यग्ज्ञानं "प्रामाण्यं व्यवहारेण" [प्र०वा०१।७] इति वचनात्। यत्र तु तद्भावः तैमिरिककेशादौ मिथ्यैव ज्ञानम् "केशादिनार्थोऽनर्थार्थिमोक्षतः" [प्र०वा०२।१] इति वचनादिति चेत्; अनाकारमेव तर्हि विज्ञानमभ्यनुज्ञातव्यम्, व्यवहारस्य तथैव भावात्। न हि व्यवहारी नीलमेव विज्ञानमनुमन्यते 'नीलमहं वेद्मि' इति नीलादन्यत्रैव तज्ज्ञाने तदभिनिवेशदर्शनात्। न चासौ क्वचिदनुगम्यते क्वचिन्नेति निर्निमित्तमुपपन्नम्। सत्यपि तथा व्यवहारे प्रकाशनियमाय साकारवाद इति चेत्; न; हेतुबलादेव तन्नियमान्न विषयाकारात्। एतदेवाह—**न प्रतिबिम्बतः**। **प्रतिबिम्बं** विषयसारूप्यं **न** ततः **प्रकाशनियम** इति। कदैतत्? इत्याह—**अन्तरेणापि** विनापि। किम्? **तादूप्यं** विषयाकारत्वं **ग्राह्यग्राहकयो**र्नीलतद्वेदनयोः **सतो**र्व्यवहारतो विद्यमानयोरिति। विद्यत एव व्यवहारतो नीलतद्वेदनयोरन्यत्वम्। न चैवमनुभव इति चेत्; न; अन्वयव्यतिरेकानुभवस्यैव भेदानुभवत्वात्, अन्वयवद्विज्ञानमनुभूयते व्यतिरेकवच्च नीलादिकम्। तथा हि—

पीते प्रवृत्तं प्रत्यक्षं यदान्यत्र प्रवर्त्तते।
तदा तदन्वितं पीतं व्यतिरेकि च दृश्यते ॥६८८॥
पीतादव्यतिरेके तु तद्वृत्तस्यान्वयः कथम्?।
अन्वितस्य च तस्यास्ति दर्शनं सार्वलौकिकम् ॥६८९॥
पीतं मया पुरा दृष्टमधुना दृश्यते परम्।
इत्यन्वितस्य बोधस्य स्वतोऽनुभवनिर्णयात् ॥६९०॥
अभेदे त्वन्वितज्ञानात्पीतमप्यन्वितं भवेत्।
न ह्यन्विताद्भिन्नं तदुपपन्नमनन्वितम् ॥६९१॥
विषयान्तरसञ्चारः प्रत्यक्षस्य तदा कथम्।
पीतस्यैव सदा वित्तेस्तज्ज्ञानाव्यतिरेकिणः? ॥६९२॥
अन्वयव्यतिरेकेऽपि यद्यभेदप्रकल्पनम्।
पीततज्ज्ञानयोर्लोके न किञ्चिद्भिन्नतो व्रजेत् ॥६९३॥
विरुद्धधर्माध्यासाद्धि भेदोऽन्यत्रापि नापरः।
अभेदश्चेदसावत्र कथमन्यत्र भिद्यते ॥६९४॥

नन्विदं बालोपलालनमेव यदन्वयव्यतिरेकाभ्यां भेदप्रकल्पनम्, प्रमाणाभावात्। न हि किञ्चित्क्वचिदन्वितं कुतश्चिद्व्यावृत्तमित्यपि प्रमाणमस्ति, प्रत्यक्षस्य तत्राप्रवृत्तेः। प्रत्यक्षेण हि तात्कालिकत्वमेव भावानां प्रतिपत्तव्यं तथा तद्धेतोर्नियमान्न पौर्वापर्यम्, अतिप्रसङ्गात्। न च तदप्रतिपत्तौ ततस्तदन्वयव्यतिरेकपरिज्ञानम्; तस्य तदविनाभावात्। असति च

---

१ अत्र आ०, ब०, प०। २ अर्थबुद्ध्यभावात्। ३ ज्ञानाभिप्राय। ४ प्रत्यक्षम् अन्वितम्। ५ पीतवत् ज्ञानस्य। ६ ज्ञानस्य। ७ पौर्वापर्याप्रतिपत्तौ।

प्रत्यक्षे नानुमानम् ; तत्पूर्वकत्वात् । प्रमाणान्तरं तु नास्त्येव यतस्तत्प्रतिपत्तिः । अतोऽनादि-तद्वासनाविकासोल्लासिता विकल्पिकैव बुद्धिरन्वयव्यतिरेकावुपदर्शयति । तदभिप्रायेण च पीतसंवेदनयोर्भेदकल्पनमनुमन्यत एव, परमार्थत एव तदनभ्युपगमात्, "परमार्थतस्तु तदतदाकारं परापरं विज्ञानमेव" [प्र० वार्तिकाल० २।३०७] इति वचनादिति चेत् ; कुतः पुनरिदमपरापरत्वं विज्ञानानामवगन्तव्यम् ? तेषामेव कुतश्चिदन्यतमादिति चेत्, न; तस्य स्वाकारमात्रपर्यवसायित्वेनान्यत्राप्रवृत्तेः । न हि तदन्यत्राप्रवर्तमानं तद्गतमपरापरत्वं प्रत्येतुमर्हति, धर्मपरिज्ञानस्य तद्विकरणपरिज्ञानाविनाभावनियमात् । तन्नैकस्मात्तत्परिज्ञानम् । भवतु बहुभिरेव तत्परिज्ञानम्, तानि हि परस्परमनुप्रवेशरहितमात्मानमात्मानुभवस्वभावतया प्रतिपद्यन्ते, तदेव च तेषामपरापरत्वपरिज्ञानमिति चेत्, नन्विदमेव दुरवबोधं यत्रैकं सन्नोचरं [1]विज्ञानं न भवेत् । भवतु तदिति चेत्, न; वक्ष्यमाणोत्तरत्वात् । तन्न प्रत्यक्षात्तदपरापरत्व-परिज्ञानम् । नाप्यनुमानात्, प्रत्यक्षाभावे तदनुत्पत्तेस्तत्पूर्वकत्वात् । प्रमाणान्तरस्य चानभ्युपगमात् ।

तदपरापरत्वमपि तद्वासनोपनीतेन विकल्पेनैव कल्प्यत इति चेत्, न, "परमार्थतः" इत्यस्य विरोधात्, कल्पितस्यापरमार्थत्वात् । अस्ति वस्तुतस्तदपरमार्थत्वम्, तत्परमार्थत्वकथनं तत्र श्लोकाभिप्रायानुरोधादिति चेत्, न, अन्वित एव ज्ञाने तत्कथनप्रसङ्गात् । [2]तत्रैव (तत्रैव) श्लोकस्य परमार्थत्वाभिप्रायात् ।

कस्य वा वस्तुतः परमार्थत्वम् ? पीतवेदनाकारमात्रस्याद्वैतवेदनस्येति चेत्, पीतमपि कीदृशम् ? स्थूलमिति चेत्, न; तस्यानभ्युपगमात् । "तस्मान्नार्थेषु न ज्ञाने स्थूलावभा(लाभा)सः" [प्र० वा० २।२११] इति वचनात् । परापरपरमाणुरूपमिति चेत्, तत्परमाणुषु तर्हि वेदनमेकं प्रवर्त्तमानमात्मानमपरापरतदाकारानुगतं [3]तदाकारांश्च (काराश्च) परस्परव्यतिरेकिणः प्रतिपद्यत इति कथं प्रत्यक्षसिद्धावेषान्वयव्यतिरेको न भवेत्तां यतः पीतसंवेदनयोः पारमार्थिक एव भेदो न भवेत् ? प्रतिपरमाणु भिन्नत एव तद्वेदनं तदयमदोष इति चेत्, कथमद्वैतं कथं वा तद्वेदनानां बहुत्वस्य परिज्ञानं स्वरूपवेदननियमेन परस्परमविषयीकरणात् ? अन्यस्य चैकस्य तत्परिज्ञातुरभावात् । भवत्येकपरमाणुरूपमेव पीतमिति चेत्, न, तस्यानवभासनात् । न हि निर्भेदस्य संवेदनस्यावभासन ग्राह्यग्राहकादिभेदप्रतिभासवत एव तस्य प्रतिवेदनात् । स्वतो निर्भेदमेव तत्, तद्भेदप्रतिभासस्तु तस्योपप्लव एव "ज्ञानस्यामेदिनो भेदप्रतिभासो ह्युपप्लवः" [प्र० वा० २।२१२] इति वचनादिति चेत्, तदुपप्लवो यदि तस्य स्वत एव, कथ निर्भेदत्वम् ? न हि स्वत एव भेदेन प्रत्यवभासमानं निर्भेदमित्युपपन्नम्, पीतताप्यवभासमानस्याप्यपीतत्वप्रसङ्गात् । अन्यत एव तस्य तदुपप्लवः स्वतस्तु तन्निर्भेदमेवावभासत इति चेत्, कथं तर्हि तस्यासत्त्वोपपादनम्, यथावत्त्वं प्रतिभासमानस्य तद्-

---

१-इदं तद्ग्र-आ०,ब०,प० । २ त एव प० । अत्र तात्पर्यं त्रुटितम् । ३-स्याकारमा-आ०,ब०,प० । ४ अत्र तात्पर्यं त्रुटितम् ।

योगात्? तदपि नेति चेत्; किं पुनरिदमुन्मत्तभाषितम्–"ज्ञानमपि स्वरूपेणाप्रतिपन्नमसदेवेति शून्यतैवावशिष्यते" [प्र० वार्तिकाल० २।२१२] इति ? शून्यवादिन एवेदं वचनं न ज्ञानवादिनः, तेन निर्भेदतयैव तन्निर्भासस्य तत्सत्त्वस्य चाभ्युपगमात्। तथा च तस्य वचनम्–"अविभागोऽपि बुद्ध्यात्मा" [प्र०वा०२।३४५] इति, "स्वसंवेदनप्रसिद्धमेतत्" [प्र०वार्तिकाल० २।३५४] इति च । इति चेत्; उच्यते–

निर्भेद एव बुद्ध्यात्मा स्वतश्चेदवभासते ।
ग्राह्यादिभेदनिर्भासस्तत्र कस्मादुपप्लवः? ॥६९५॥

अन्यतस्तस्य भावस्तु नैवाद्वैतनिपीडनात् ।
न स्वतो नान्यतश्चैष यदि निर्भासते कथम्? ॥६९६॥

मायामरीचिप्रभृतिरिव चेन्नेदमुत्तरम् ।
न हि तस्यापि निर्भासः स्वपरापेक्षया विना ॥६९७॥

तथापि तस्य निर्भासे तद्बुद्ध्यात्मनो न किम् ।
स्वसंवेदनप्रसिद्धत्वं यतस्तत्रोपवर्ण्यते ? ॥६९८॥

नास्त्येव तस्य निर्भास इत्यप्यश्लीलभाषितम् ।
ग्राह्यग्राहकसंवित्तीत्यादेः स्वोक्तस्य बाधनात् ॥६९९॥

दृष्टश्चायं न दृष्टस्य लोपो बुद्धौ प्रसज्यतः ।
शून्यतैव भवेत्तत्त्वं बुद्धेरुक्तञ्च कैश्चन ॥७००॥

"तत्रैकस्याप्यभावेन द्वयमप्यवहीयते ।
तस्मात्तदेव तस्यापि तत्त्वं यो द्वयशून्यता ॥" [प्र०वा०२।२१३] इति ।

शून्यता परमार्थश्चेत्केदमाकारकल्पनम् ।
यतः प्रयासः सर्वोऽयं तव साफल्यमुद्वहेत् ? ॥७०२॥

प्रमाणविरहाच्चायं परमार्थः कथं भवेत् ? ।
अशून्यमेव तत्त्वं स्यादन्यथा सकलं जगत् ॥७०३॥

प्रमाणं चेन्न शून्यत प्रमाणस्यैव भावतः ।
शून्यत्वं चेत्प्रमाणं नेत्येतत्पूर्वं निवेदितम् ॥७०४॥

१–णप्रति–आ०, ब०, प० । २ ज्ञानवादिना । ३–मेतदिति चेत् आ०, ब०, प० । ४–तं नि–आ०, ब०,प० । ५ "मायामरीचिप्रभृतिप्रतिभासवदसत्त्वेऽपि न दोषः।"–प्र०वार्तिकाल०२।२१०। ६ "ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते"–प्र० वा० २।३५४। ७ दृष्टेथायं न दृष्टस्य लोपे बु–आ०, ब०, प० । ८ "तत्र एकज्ञानात्मनि विरुद्धं द्वयं न युक्तमित्येकस्य ग्राह्यत्वस्य ग्राहकत्वस्य वावश्याभ्युपगन्तव्यत्वेनाभावेन द्वयमप्यवहीयते । अन्योन्यसापेक्षयोरेकाभावेऽपराभावस्य न्यायप्राप्तत्वात्। तस्मात्तस्य ज्ञानस्यापि तत्त्वं तदेव या द्वयेन ग्राह्यग्राहकाकारेण शून्यता नाम ।"–प्र० वा० म०वृ० २।२१३। ९ यद्द्वयशू–ता० ।

ततो नाद्वैतज्ञानं तच्छून्यत्वं वा[1] परमार्थतः, तद्व्यवस्थापनोपायाभावात् ।

भवतु युक्त्यात्मैवाऽविभागः परमार्थः, तस्य स्वसंवेदनप्रसिद्धत्वात् । न चैवं ग्राह्यग्राहकादिभेदनिर्भासस्योपप्लवस्याभावात्–"ग्राह्यग्राहकसंविच्चिभेदवानिव लक्ष्यते" [प्र०वा० २।३५४] इति वचनव्यापत्तिः, तदुपप्लवस्य बुद्ध्यन्तरेणोपकल्पनात्, बुद्धिभेदस्यानिराकरणात्, बहिरर्थस्येव प्रमाणाभावेन प्रतिक्षेपादिति चेत्, न, बुद्ध्यन्तरस्याप्यविभागितयैव स्वतः प्रसिद्धेः ततोऽपि तदुपकल्पनानुपपत्तेः । तत्रापि तदन्तराच्चदुपकल्पनपरिकल्पनायामव्यवस्थापत्तेः । अपरापरस्य बुद्धिभावो न तद्विषयमेकज्ञानमन्तरेण शक्यः प्रतिपत्तुम्, तदभ्युपगमे च पीतादेरेवापरापरस्य तदभ्युपगन्तव्यम् अविशेषात् । तथा च सत्येव पीतादौ क्रमेणानुबुद्धिमात्मनः पीतादेश्च परस्परतो व्यावृत्तिं प्रतिपद्यत इति प्रत्यक्षसिद्धावेव संवेदनतद्वेद्यगतावन्वयव्यतिरेकौ न कल्पनामात्रविरचितौ । ततः प्रतिपिपादयिषितम्–

"अन्वयव्यतिरेकाभ्यां भेदव्यापारकल्पना ।
अनादिवासनासङ्गान्न तावद्व्यक्तपूर्वकौ ॥
सजातिपूर्वविज्ञानाज्जन्मवादितवासना ।
व्यतिरेककल्पनाबीजं केवलान्धपरम्परा ॥"[प्र०वार्तिकाल० २।३०८]इति ।

अस्यश्चतज्ज्ञान्वयव्यतिरेकयोः प्रतिपत्तौ प्रतिपन्न एव पीततद्वेदनयोर्भेदः, तस्य सँद्रूपत्वात्। सँद्रूपत्वेऽप्यभेदे नीलधवलादावपि न भवेत् । न हि विरुद्धधर्माध्यासादपरस्तत्रापि भेदः । सँश्चेत् पीततद्वेदनयोर्भेदवदपि न भेदः परत्रापि न भवेत् । तस्मादनुभवोपारूढमेव ज्ञानतद्विषययोर्नानात्वं न व्यवहारमात्रप्रसिद्धम् । तदेवाह–'अन्तरेणापि' इत्यादि । सतोरुपलम्भविषययोस्तद्विषयेयत्तयैव परेण सत्त्वोपगमात् "उपलम्भः सत्ता" [प्र० वार्तिकाल० ४।२६३] इति वचनात् । शेषं पूर्ववत् । ततो यदेतद्वार्त्तिकं तन्निदन्यनन्तरम्–

"नार्थोऽसंवेदनः क्वचिदनर्थं वापि वेदनम् ।
दृष्टं संवेद्यमानं तयोर्नास्ति विवेकिता ॥" [प्र० वा० २।३८८]

"अनन्वयव्यतिरेकित्वात् एकमेव नीलसंवेदनमन्योन्यव्यतिरेकेणादर्शनात् । तथाहि–

नार्थोऽसंवेदनो दृष्टोऽनर्थकश्च न वेदनम् ।
सदापि योगादेकं तदर्थसंविदनं ततः ॥
भेदेन विनियोगार्थं भेदविद्भेदमिच्छति ।
स चेन्नास्ति ततो भेदाभेदयोः कैव मिश्रता ॥

तस्मादत्र भेद इति नाममात्रमेव परेण विधातव्यम् न परस्य काचित् क्षतिः । हेयो-

---

१ वा पाठः–आ०,ब०,प० । २– मार्थतत्तस्य आ०, ब०, प० । ३ भेदस्य । ४ अन्वयव्यतिरेकाभ्यां विरुद्धधर्माध्यासात्सत्त्वात् । ५ विरुद्धधर्माध्यासाभावेऽपि । ६ विरुद्धधर्माध्यासः । ७ उपलम्भविषयतयैव ।

पादेयविभागश्चेत्तत्र नास्ति किंमीदृशा भेदेन" [प्र०वार्तिकाल० २।३८८] इति; तत्प्रतिविहितम्; 'अनन्वयव्यतिरेकित्वात्' इत्यस्यासिद्धेः; वस्तुतस्तद्भावस्य प्रतिपादनात्। अन्योन्यव्यतिरेणार्थतद्वेदनयोर्दर्शनस्योपपत्तेः, अन्वितानन्वितरूपत्वेन ज्ञानार्थयोर्दर्शनस्यैव तद्व्यतिरेकदर्शनत्वात्। न च तद्व्यतिरेकस्य निष्फलत्वम्; व्यतिरेकेणैव विनियोगात्। नीलमेव हि वस्त्रादिकमाच्छादनादौ विनियुज्यते न तज्ज्ञानम्, तेन कस्यचिदाच्छादनाभावात्, तदेव च तज्ज्ञानं विषयान्तरपरिच्छित्तावुपयुज्यते न नीलं तेन कस्यचित्परिच्छेदायोगात्। यथा च तज्ज्ञानस्य विषयान्तरपरिच्छित्तौ विनियोगस्तथा प्रतिपादितमेव। ततो 'भेदेन' इत्यादि प्रज्ञाबलविकल्पयैव प्रज्ञाकरेण प्रतिपादितम्। यत्पुनरुक्तम्—

"दधानं तच्च तामात्मन्यर्थाधिगमनात्मना।
सव्यापारमिवाभाति व्यापारेण स्वकर्मणि॥
तद्वशात्तद्व्यवस्थानादकारकमपि स्वयम्॥" [प्र०वा० २।३०७-८] इति;

तदपि महत्तमसो विलसितमेव; "संवेदनमात्मनि विषयाकारतां धत्ते" [ ] इत्यस्य प्रतिक्षेपात्, तद्वशादधिगमव्यवस्थानस्यासम्भवात्। तदसम्भवे तन्निबन्धनस्य 'सव्यापारमिवाभाति' इत्यस्यानुपपत्तेः, वस्तुत एव तस्य सव्यापारत्वाच्च। न हि तस्मिन्नेव तदिवेति व्यपदेशो नील एव नीलमिवेति तत्प्रसङ्गात्। वस्तुतः सव्यापारत्वञ्च तस्य परापरविषयाभिमुख्यलक्षणस्याधिगमव्यापारस्य तत्र प्रतीतेः। नापि तस्याकारकत्वम्; वस्तुसति व्यापारे तदपेक्षया कारकत्वस्यैवोपपत्तेः। ततो हेतोरेव प्रकाशनियमो बुद्धेर्नाकारनियमादिति सूक्तम्—'प्रकाशनियमः' इत्यादि।

भवतु नाम सत्यर्थे हेतोरेव तत्प्रकाशनियमो न तादृप्यात्, यत्र तु तैमिरिकज्ञानादावर्थ एव नास्ति तत्र कथम्? न हि तत्र प्रकाश एव सम्भवति तस्य प्रकाश्यनिष्ठत्वेन तदभावेऽनुपपत्तेः। सम्भवतश्च कुतश्चिन्नियमो नान्यस्य। तत्रापि विद्यत एव केशादिः प्रकाश्य इति चेत्; न; तस्यानर्थत्वात्। न ह्यसावर्थः; अर्थक्रियाविरहात्। अर्थ एवायं अलौकिकः, लौकिककस्यैवायं नियमो यदर्थक्रियया भवितव्यमिति चेत्; न; तस्य "अभिन्नदेशकालानाम्" इत्यादौ स्वयमेव निराकरणात्। तस्मादसौ तज्ज्ञानस्यैवाकारो न बाह्यस्य प्रकाशविषयस्य सतो गत्यन्तराभावात्। प्रकाशविषयेण ह्यर्थेन वा भवितव्यं ज्ञानेन वा। तत्रार्थत्वाभावे अवश्यम्भावि ज्ञानत्वम्, अर्थज्ञानाभ्यां राश्यन्तरस्याभावादिति सिद्धं तत्केशादेस्तादृप्यादेव प्रतिवेदनम्, ततस्तत्र विपर्ययस्त्यत्येव भवदुक्तो न्यायः। तदेवाह—

अनर्थाकारशङ्केषु व्युदस्त्येष नयो यदि ॥२५॥ इति।

अर्थस्य बाह्यस्याकारः स्वरूपं तस्य शङ्का 'किमयमर्थाकारो भवति न वा' इति

---

१ किमीदृग्येनेति आ०, ब०, प०। २ ज्ञानार्थव्यतिरेक। ३ विषयाकारतावशात्। ४ संवेदनस्य। ५ कथं तर्हि प्र-आ०, ब०, प०। ६ प्रकाशस्य। ७ न्यायवि० श्लो० ४६। ८—सौ ज्ञान-आ०, ब०, प०।

प्रत्यक्षमर्शनम् अर्थाकारशङ्का, न विद्यते सा येषु तैमिरादिज्ञानविषयेषु ते अनर्थाकारशङ्काः शङ्काभावनिवेदनेन तत्र निर्णयस्यात्यन्ताभावमावेदयति । तेषु शुक्त्यादि शिथिलीभवति एषः अनन्तरोक्तः 'प्रकाशनियमो हेतोः' इत्ययं नयो न्याय एवाक्षज्ञानादेव तत्प्रकाशनियमात् । सिद्धे क्वचित्तत्तन्नियमे अन्यत्रापि तदेव नियामकम् । तथा हि–'विवादापन्नस्तत्प्रकाशनियमो विषयाकारादेव, तत्प्रकाशनियमत्वात् , तैमिरकेशादिप्रकाशनियमवत्' इति परस्याकूतम् । यदि इति तदाकूतद्योतने । तत्रोत्तरमाह–

सर्वं समानमर्थात्मासम्भाव्याकारशून्यम् । इति ।

अर्थश्च आत्मा च ज्ञानस्वभावस्तच्छून्यस्य तस्याभावात्, तयोः असम्भाव्यस्वरूपत्वेनाभावात् तस्याकारस्य केशादिलक्षणस्य शून्यं तच्छाने प्रतिभासनम् । तदयमर्थः–नायमर्थरूपः केशादिर्नापि ज्ञानरूपः किन्त्वविद्यमान एव तच्छाने प्रतिभासते तत्कथं तैमिरानन्तरनयस्य प्रोटनम् ? कथं वा तमिरदर्शनवदक्षद्विवादापन्नेऽपि विषयाकारसाधनम् ? सत्येव तस्य ज्ञानरूपत्वे तदुपपत्तेः । असतः प्रतिभासमानमेव न सम्भवति प्रतिभास्यामावादिति चेत्, न, तैमिरस्यैव प्रतिभास्यत्वात् । कथं तस्य प्रतिभास्यत्वमिति चेत् ? कस्मिन्न प्रकारे प्रश्नः ? विषयगत इति चेत्, 'केशादिरूपेण' इति ब्रूम । कथमसतस्तद्रूपत्वमिति चेत् ? सतोऽपि कथम् ? तथा दर्शनात् समानमन्यत्र–असतोऽपि केशादिरूपस्योपलम्भात् । असतोऽसत्त्वेनैवोपलम्भनमुपपन्नं न तद्रूपतयेति चेत्, न, सतोऽपि सत्त्वेनैव तदुपपन्नं न तद्रूपतयेत्यपि प्रसङ्गात् । तद्रूपतैव तस्य सत्त्वमिति चेत्, असत्त्वमपि तद्रूपतयैवेति किमनुमन्यसे ? सदसतोरविशेषापत्तेरिति चेत्, न, शक्तिभावाभावाभ्यां तत्परिहारात्–यस्य हि तदर्थक्रियायां शक्तिः स साक्षात्केशादिः अन्यस्तु तदाभास इति । तन्नायं विषयगते प्रकारे प्रश्नः । तच्छानगत इति चेत्, न, तत्रापि शक्तिरूपेणोत्तरवचनात् । असदपि केशादिकं ज्ञानेन प्रतिभास्यते तच्छक्तिमत्त्वादिति । तदेव कथमसद्विषयमिति चेत्? आह–

'सर्वं समानम्' इति । योऽयं तत्समाधानं च सर्वं समानं सदृशम् तद्ग्रहणे तदनुकरणे च । तथा हि यद्यसतो न ग्रहणम् अनुकरणमपि कथं यतो ज्ञानं तदाकारम् ? न तदनुकरणात् तस्य तदाकारत्वमपि तु पूर्वज्ञानादिति चेत्, न, तस्यापि तदाकारत्वं यदि पूर्वज्ञानात्तस्यापि तत्पूर्वज्ञानादित्यनादेः केशनिर्भासस्य प्रसङ्गात् । न चैवम्, विषयान्तरनिर्भासैर्व्यवधानस्य दर्शनात् । व्यवहितस्यैवाकारार्पकत्वमिति चेत्, सादृश्यस्यैवार्थस्य प्रतिभासनं किन्न भवेत्ततः केशादिज्ञानेनार्थवत्त्वं न भवेत् ? भवत्येवमतिप्रसङ्गो ज्ञानान्तरावगतस्यापि प्रतिभासोपपत्तेरिति चेत्, न, आकारार्पणेऽपि तत्प्रसङ्गात् । शक्तिनियमतस्तत्परिहारस्यान्यत्रापि प्रत्यवायाभावात् । वर्तमानतया प्रतिभासमानस्य कथं व्यवहितस्य केशादेरिति चेत् ? यद्यर्थेन

---

१ ग्याक्षतास्ता– आ०,ब०,प०। २ द्विध वि–आ० ब०,प०। ३ तत्रानन्तरस्य श्रो–प०। तत्रानन्तरयस्य आ०, ब०। ४ असत एव। ५ तथा तदर्श–आ०, ब०, प०। ६ केशादिरूपतया। ७ अपि कैश–आ०, ब०, प०। ८ तर्हि यद्यसतोऽप्र–आ०, ब०, प०। ९–ज्ञानमर्थज्ञानं आ०, ब०, प०।

प्रतिभासमानस्य कथं तस्य ज्ञानान्तर्गतत्वम् ? तद्भावस्य मिथ्यात्वादिति चेत्; न; वर्त्तमानत्वस्यापि तत्त्वाविशेषात्। मिथ्याकारस्य कथमर्थत्वमिति चेत् ? ज्ञानत्वमपि कथम् ? न वहिर्भावेन ज्ञानत्वं केशादितयैव तत्त्वादिति चेत्; अर्थत्वमपि तयैव किन्न स्यादविशेषात् ? ततो न पूर्वज्ञानेनापि तदाकारेण तदर्पणम्। अतदाकारेण तु तद्ग्रहणवन्न तदर्पणमप्युपपन्नम् अतिप्रसङ्गाद् दोषादिति सूक्तम्-**सर्वं समानम्** इति।

शक्तिनियमान्नियतस्यैव तदाकारस्यार्पणे तत एव ग्रहणमपि नियतस्यैव भवेत्। तन्नियमश्च वस्तुसत्केशादिविपर्यदर्शनाहिततद्वासनापरिपाकवशात्, भवन्मतेन वस्तुसत्तदाकारदर्शनार्पिततद्वासनापरिपाकवशात्तन्नियमवत्। एतदेवाह-

तद्भ्रान्तेराधिपत्येन [सान्तरप्रतिभासवत् ॥३६॥]

तत् अनन्तरोक्तम् अर्थात्मासम्भाव्याकारडम्बरं **भ्रान्तेः** मिथ्याज्ञानस्य **आधिपत्येन** सामर्थ्येन। दृष्टान्तमाह-**सान्तरप्रतिभासवत्** इति। अन्तरं व्यवधानं तेन सह वर्त्तमानं **सान्तरं** केशादि तस्य ज्ञानात् वहिर्व्यवधानेवत्त्वेनैव प्रतिभासनात् **तत्प्रतिभासः** स इव तद्वदिति। तात्पर्यमत्र-केशादिप्रतिभासोऽयम् अवस्तुविषयः वाध्यमानत्वात् सान्तरप्रतिभासवदिति। साध्यविकलं निदर्शनम्, तत्प्रतिभासस्यापि वस्तुविषयत्वात्। अन्तरस्यापि ज्ञानाकारत्वेन वस्तुत्वादिति चेत्; न तर्हि केशादेस्तदाकारत्वम् अन्तरितस्य तदयोगात्, सर्वस्यापि तदाकारत्वापत्तेः। अतोऽवस्त्वेव केशादिकम् अज्ञानत्वे गत्यन्तराभावात्, अर्थत्वस्य स्वयमनभ्युपगमात्। तदयं शमनप्रयोगादेव प्रकोपो दोषस्य केशादिप्रतिभासस्यावस्तुविषयत्वमुपशमयितुमुद्भावितादेव निदर्शनस्य साध्यवैकल्यात् [10]तत्प्रतिभासस्य तद्विषयत्वोपनिपातात्। तदिदं दोषमपसिसारयिषता नान्तरस्य ज्ञानाकारत्वमुररीकर्तव्यमिति [11]सिद्धं तस्यावस्तुत्वेन तत्प्रतिभासस्यावस्तुप्रतिभासित्वमिति न साध्यवैकल्यं निदर्शनस्य।

संवृतिरेवायमन्तरप्रतिभासो नाम। दर्शनं हि केशादेस्तद्रूपमेव नापरमसम्प्रतिपत्तेः। न च तदेव स्वतः स्वस्य व्यवधानमुपदर्शयति विरोधात्। संवृतिस्तु व्यवधानवासनापरिपाकादुत्पद्यमाना व्यवधानस्य तद्वत्तत्वेनोपदर्शनात् अन्तरप्रतिभास इत्युच्यते। न च तस्यावस्तुविषयत्वेनान्यथा वा विचारसहत्वम्, [12]तदसहत्वस्यैव [13]तद्रूपत्वात्, ततः सन्दिग्धसाध्यमेव निदर्शनम्; अवस्तुविषयत्वस्य साध्यस्य तत्रानिश्चयनादिति चेत्; न; केशादिप्रतिभासस्यापि संवृतित्वप्रसङ्गात् तस्यापि तद्वासनापरिपाकाभावेऽनुत्पत्तेः। अतस्तस्यापि तद्विषयादन्यत्वानन्यत्वाभ्यां विचार(रा)क्षमत्वात् कथं निश्चितं तस्य तदाकारत्वं यतस्तदवष्टम्भेनान्यस्यापि वेदनस्य

---

१ तदभावस्य मि-आ०, ब०, प०। वहिर्भावस्य। २-ज्ञमतिप्रसङ्गादिदोषा इति आ०, ब०, प०। ३-यमनिश्चयव-आ०, ब०, प०। ४-यहेतुत्वाद्वास-आ०, ब०, प०। ५-धानत्वेनैव आ०, ब०, प०। ६ केशादिप्रतिभासस्यापि। ७ ज्ञानाकारत्वाभावे। ८-त्वमुपदर्शयितु-आ०, ब०, प०। ९ सान्तरप्रतिभासस्य। १० केशादिप्रतिभासस्य। ११ सिद्धान्तस्य आ०, ब०, प०। १२ विचारासहत्वस्यैव। १३ संवृतिस्वरूपत्वात्।

विषयाकारानुमानमुपपन्नं भवेत् ? स्पष्टप्रतिभासत्वान्न केशादिप्रतिभासस्य संवृतित्वम् । न हि संवृतेः स्पष्टत्वम् । "न विकल्पानुविद्धस्य स्पष्टार्थप्रतिभासिता ।" [प्र० वा० २।२८३] इति वचनादिति चेत् , न, अन्तरप्रतिभासस्यापि स्पष्टस्यैवोपलम्भात् तस्य भावस्तुविषयतया निश्चयान्न सन्दिग्धसाध्यत्वं निदर्शनस्य ।

नापि बाध्यमानत्वस्य हेतोरसिद्धत्वम् , 'नायमित्थमेव केशादिः' इति बाधकप्रत्ययस्य तत्रोपनिपातात् । बाध्यबाधकभावस्य च वास्तविकस्यैव व्यवस्थापनात् । यदि तज्ज्ञानादन्य एव केशादिरन्येनापि कस्मान्नोपलभ्यते नानाप्रतिपत्तृसाधारणत्वाद्बहिर्विषयस्य सत्यकेशादिवत् ? तिमिरादेस्तदुपलब्धिनिबन्धनस्याभावादित्यपि न युक्तम् , परेषामपि तिमिरादिसम्भवात् । तत्सम्भवे भवत्येव तस्यापि तदुपलम्भ इति चेत् , न, अन्यस्यैव केशादेस्तेनोपलम्भात् । कथं तर्हि तैमिरिकस्योरेकवाक्यत्वम् 'आकाशे केशसदृशकोऽयमास्ते' इति ? न, सादृश्यनिबन्धनत्वात्तदेकवाक्यत्वस्य, एकस्यैवोपलम्भे तयोरन्यतरस्याभ्यैत्रोपलम्भो न भवेत्तस्यैवान्यत्र सम्भवात् । भवति च भिन्नदिग्देशतया तदुपलम्भन तैमिरिकस्य, तस्मात्सादृश्योऽन्य एवासौ केशादिरिति तज्ज्ञानानुप्रविष्ट एवायम् अनन्योपलभ्यत्वात् तज्ज्ञानस्वरूपवदिति चेत् , न, पक्षस्य प्रत्यक्षबाधितत्वात् , वेदनानुप्रविष्टस्येव [a]स्य प्रत्यक्षेण प्रतिपत्तेः, बहिस्तस्यैवान्तस्तज्ज्ञानस्यैव च प्रतिभासनात् ।

न च 'तज्ज्ञानस्वरूपे तदनुप्रविष्टत्वे सति अनन्योपलभ्यत्वमुपलभ्यम्' इत्येव [b] तस्य गमकत्वं यावद्विपक्षे विरोधो न गम्यते । गम्यत एव सहानवस्थानं [c]तद्विरोध इति चेत् , न, [d]सहावस्थानस्यैव प्रतिपत्तेः [e]तदनुप्रवेशसहितस्यैवानन्योपलभ्यत्वस्य प्रतिवेदनात् । परस्परपरिहारस्तद्विरोध इति चेत् , न, अन्योपलभ्यत्वापेक्षयैव [f]तस्य भावात्, हेतुविरुद्धेन अन्योपलभ्यत्वेन साध्यविपक्षस्य व्याप्तत्वात् । अस्त्येव [g]तेनापि तस्य विरोध इति चेत् , क्व पुनस्तद्व्याप्तिप्रतिपत्तिः ? सत्यकेशादाविति चेत् , न, तत्राप्यनुपलभ्यत्वस्य यद्भूतः स्वयमनभ्युपगमात् । पठति च प्रज्ञाकरः—"परेण तदभावेऽपि दृश्यते इति विपर्यासमारोप्य तथा व्यवहारः" [ ] इति । न च वैपर्यासिको धर्मस्तात्त्विकस्य बाधको माणवके सिंहत्ववन्मनुष्यत्वस्य । ततो व्यभिचारी हेतुः, सत्यकेशादावतज्ज्ञानानुप्रविष्टेऽपि भावात् । नायं दोषः, तत्रापि[h] तदनुप्रवेशस्यैव भावादिति चेत् , क्व पुनरिदानीं हेतुविरोधिना साध्यविपक्षस्य व्याप्तिपरिज्ञानं यतो विपक्षव्यावृत्त्या हेतोर्गमकत्वम् ? क्वचित्साहचर्यदर्शनमात्रेण गमकत्वे तत्पुत्रत्वेऽपि प्रसङ्गः श्यामेऽपि क्वचित्तस्य दर्शनात् । नैवमिति चेत् , न; प्रकृतेऽपि समानत्वात् अनन्योपलभ्यत्वस्यापि साध्यविपर्यये दर्शनात् । तथा—सान्तरत्वेन हि

---

१ पुरुषेण । २ पुरुषस्य । [a]–न्यत्र तदुप–आ०, ब०, प० । ४ केशादेः । ५ अन्यमित्थमेव । ६ केशादेः । ७ केशादेः । ८ केशादिज्ञानस्य । ९ इत्यन्वयमात्रेण । १० तस्यासमत्वं ब० । तस्य समत्वं आ० । ११ विपक्षविरोधः । १२ सहानवस्था–आ०, ब०, प० । १३ तदनुप्रवेश–आ०, ब०, प० । १४ विरोधस्य । १५ तदनुप्रवेशेनापि । १६ सत्यकेशादावपि ।

[1]तदपि स्वयंमुपलभ्यमानमन्येन शक्यमुपलब्धुं केशादिवत्। न च तस्य तज्ज्ञानानुप्रवेश इति प्रतिपादितमनन्तरमेव। ततो नात्रस्तैमिरकेशादेस्तज्ज्ञानानुप्रवेशः सिद्ध्यति यतस्तत्र प्रकाशनियमस्य तादृप्यनिबन्धनत्वनिर्णयात् अन्यत्रापि[2] तस्यैव तन्निबन्धनत्वसाधनमुपपद्येत। ततो बोधशक्तित एव तत्केशादावपि तन्नियमस्य भावादन्यत्रापि तत एव तन्नियमः प्रतिपत्तव्य इत्यलमभिनिवेशेन।

स्यान्मतम्–यदि संविदनुप्रवेशो नार्थस्य कथमवभासनम्? स्वरूपेणैव पुरोवर्तिनेति [3]चेत्; कथं दूरेऽपि न तथैव दर्शनम्? कथं ध्यामलितत्वेन ग्रहणम्? न ह्यन्यरूपेण तद्ग्रहणम्। अथ तद्रूपमेव मन्दालोकसम्पर्कान्मन्दतया प्रकाशते; तदनुपपन्नम्; यतः–

[4]अर्थस्य प्रतिभासः स्याद्यदि भासा समन्वितः।
[5]अन्येन सहिताभासे [6]न स्यान्मन्दावभासिता ॥७०५॥

परस्परव्यावृत्तालोकरूपप्रतिभासे हि तयोरेव तथावभासनमिति[7] नाऽस्पष्टरूपप्रतिभासः। न खल्वन्यस्मिन् स्वरूपावभासवति तदपरस्तथा भवति। भवत्येव कुसुम्भरागवस्त्रान्तरितवस्तुप्रतिभासवदिति चेत्; न; तत्रापि समानत्वात्। स्वरूपेण प्रतिभासने [8]नेरतावभासः। तदेव तस्य रूपमिति तथावभासनाभ्युपगमे प्रकृतस्याप्यालोकमन्दतया तदेव रूपमिति सकलस्य तथावभासनात् कुतो बुद्धिभेदः? तस्माद्बालोकभेदेऽपि न भेदावभासः। [9]तस्माद्बुद्धेरेवायमाकारो मन्दरूपः तथा व्यक्तरूपश्चेति; तन्न समीचीनम्; मन्दरूपस्यापि बाह्यत्वात्। ननु अर्थस्यातद्रूपत्वात्कथं तथा प्रतिभासनम्, मन्दालोकवलात्तत्प्रतिभासनस्य प्रतिविहितत्वादिति चेत्? न; यस्मात्–

मन्दालोकान्वयादर्थो मन्दश्चेन्नावभासते।
[10]बुद्ध्यात्मारोपसम्पर्कात्तद्रूपो भासते कथम्? ॥७०६॥

मिथोव्यावृत्तयोर्बोधभेदोपप्लवयोस्ततः।
प्रतिभासे कथं बोधरूपे स्यात्तदुपप्लवः ॥७०७॥

निरुपप्लवताभावे तत्रेदं कथमुच्यते?।
"ज्ञानस्याभेदिनो भेदप्रतिभासो ह्युपप्लवः॥" [प्र० वा० २।२१२]
मोहाभावे कथं च स्यात् "शास्त्रं मोहनिवर्त्तनम्।" [प्र० वा० १।७]
असतः खरशृङ्गस्य किं किञ्चित्स्यान्निवर्त्तनम् ॥७०९॥

---

१ केशादि। २ सत्यकेशादावपि। ३ चेत्थं दू–आ०, ब०, प०। ४ अतद्रूप–आ०, ब०, प०। ५ तुलना–प्र० वार्तिकाल० २।४१६। ६ अनेन स–आ०, ब०, प०। ७ न सन्मन्दा–आ०, ब०, प०। ८ –ति रूप–आ०,ब०,प०। ९ रूपेण आ०,ब०,प०। १० –नेन न रताव–आ०,ब०। –ने न रक्तावभासः– प्र० वार्तिकाल०। ११ कस्मा–आ०, ब०, प०। १२ बुद्धयात्मालोकस–आ०, ब०, प०।

विवेकविकलस्यायमस्त्येवोपप्लवो यदि ।
तस्यैवार्थोऽपि मन्दावभासः किन्नोपपत्तिमान् ? ॥७१०॥

सत्यपि बुद्ध्यात्मनो ग्राह्यादिविकल्पस्य चान्योन्यव्यावृत्ततया प्रतिभासने तद्विवेकश्च विविकल्पस्य भवत्येव बुद्ध्यात्मनि ग्राह्यादिभेदप्रतिभासोपप्लव इति चेत्, नैवम्, मन्दावभासस्याप्युपप्लवस्य सम्भवात्। 'मन्दालोकरूपयोरपि विविक्ततया प्रत्यवभासनस्य तद्विवेकवैकल्यस्य च क्वचित्प्रतिपत्तिरिति सम्भवानिवारणात्। तस्मात्-"मन्दालोकमाहित्येन रूपेऽपि मन्दप्रतिभासोपपत्तेरर्थस्य प्रतिभासः स्यात्।" [ ] इत्यादिकमपर्यालोचितवचनमेव निपुणबुद्धेः। धर्मकीर्तिस्तु "मनसो युगपद्वृत्तेः" [प्र० वा० २।११३] इत्यादिना दर्शनविकल्पयोरन्यतरधर्मस्यान्यत्र प्रत्यासत्तिवशाद्व्यारोपं ब्रुवाण एव आलोकमान्द्यस्य तत्पाटवस्य वा रूपेऽपि कथमध्यारोपमपाकुर्वीत ? यतस्तद्व्यारोपवशादेकाकारस्यापि रूपस्य स्पष्टेतरात्मना भेदेन प्रतिभासो न भवेत्। ततस्तस्यापीदमपर्यालोचितमेवाभिधानम्-

"मान्द्यपाटवभेदेन भासो बुद्धिभिदा यदि ।
भिन्नभिन्नस्मिन्नभिन्नस्य कथं भेदेन भासनम् ? ॥" [प्र०वा०२।४११] इति ।

न च यथमालोकमान्द्यनिबन्धनत्वं मन्दावभासस्य ब्रूमः सत्यपि तस्मिन् आलोके परिस्फुटस्यैव रूपदर्शनस्य भावात्, असत्यपि तस्मिन् परिणतवयसि मन्दस्यैव रूपप्रतिभासस्योपलम्भात्, अपि तु तज्ज्ञानाक्षविनिबन्धनत्वमेव। यदुक्तम्-'तद्ज्ञानेराधिपत्येन' इति।

ननु यावत्तदाधिपत्येन बहिरसत एव मन्दाकारस्य प्रतिभासन तावत् ज्ञानाकारस्यैव कस्मान्न भवति ? प्रतीतिरेवमनुगृहीता भवति। तथा हि 'प्रतीतिरेव मम श्यामलितरूपोदिता' इति जनः प्रतिपत्तिमानिति चेत्, न, तद्बहिर्भावेन प्रतिभासमानस्य तदाकारत्वानुपपत्तेः। 'प्रतीतिरेव मम श्यामलितरूपोदिता' इति तु प्रतिपत्तिर्ग्रहि'ष्यस्यान्तरूपचारात्। ननु कार्यधर्मस्य कारणे भवत्युपचारे यथा चक्षुषि दर्शनमान्द्यस्याध्यासात् 'मन्दं चक्षुः' इति। दर्शनस्य तु न विषयः कार्यं माद्यन्यम् यतस्तन्मान्द्यस्य तत्राध्यासात् 'मन्दं दर्शनम्' इत्युच्यते। विषयत्वादेव तद्धर्मस्य विषयिण्युपचार इति चेत्, न, मान्द्यवत् धर्मान्तरस्यापि तद्गतस्य तत्रोध्यासप्रसङ्गात्। तथा च कुड्यादित्वेनापि दर्शनस्य व्यपदेशः स्यात्। न चैवमनुमतिं भवतः। तस्मादस्पष्टत्वं नाम दृष्टेरेव रूपं सर्वजनप्रसिद्धत्वात्। न च सार्वजनिकस्य निश्चयस्य निर्निबन्धनमेव विभ्रमत्वव्यवस्थापनत्वमुपपन्नम्। तदुक्तम्-

"मम श्यामलितं चक्षुस्तादृग्दर्शनसङ्गमात् ।
तत्कार्यदर्शनादेव व्यपदेशस्तथास्तु सः ॥

---

१ मन्दावभास-आ०, ब०, प० । २ -दिकल्पम-आ०, ब० प० । ३ आलोकमान्द्यो । ४ दृष्टे । ५ -रेव मन्दा-आ०, ब०, प० । ६ -रूप तु विषयिः च-आ०, ब०, प० । ७ दर्शने । ८ -मनुमतिर्भ-आ०, ब०, प० ।

दृष्टेस्तु कार्यं नास्त्यन्यन्नार्थः[1] कार्यतया स्थितः ।
तथा समागमादेव यदि नीलापि [2]सोच्यताम् ॥
कुड्यं ममेयं दृष्टिर्हि न कदाचित्त्वयेष्यते ।
तस्मादस्पष्टता दृष्टेः सर्वलोकप्रतीतितः ॥
निश्चयो न हि सर्वेषामकस्माद्भ्रान्त उच्यते ॥" [प्र०वार्तिकाल० २।४१०]

इति चेत्; न; तन्निश्चयस्योपचारेण भावात्, उपचारस्य विषयभावेनोपपत्तेः । न चैवं धर्मान्तरस्याप्युपचारः; वा (वा) ह्रीके गोत्ववत्तिष्ठन्मूत्रत्वस्यापि तत्प्रसङ्गात् । कदाचिदस्त्येवायमपीति चेत्[3]; न; दर्शनेऽपि कदाचिद्विषयव्यपदेशस्य भावात्, 'पावकोऽत्र धूमात्' इत्यत्र धूमदर्शनस्यैव धूमत्वेन व्यपदेशात् । ततः 'कुड्यं ममेयम्' इत्यादि पराभिप्रायानभिज्ञतयैव प्रतिपादितम्, कादाचित्कस्य विषयव्यपदेशस्य विषयिणि परेणाभिप्रेतत्वात् । न च तन्निश्चयस्याकस्मादेव भ्रान्तत्वमुच्यते, बाधकादेव तदभिधानात् । तच्च बहिर्भावेन प्रतिभासनमेव ।

ननु न संवेदनात्तस्य[4] बहिर्भावः, तस्यैव[5] तद्व्यतिरिक्तस्याभावादनुपलम्भात्, असंवेदनपादानत्वात् । न च तदात्मन[6] एव तस्य बहिर्भावो विरोधात् । 'ममायं बहिरेव ध्यामलाकारः' इति व्यवहारस्तु शरीरापेक्षयैव, ममत्वेन शरीरस्य व्यपदेशात् । स्वरूपप्रतिभासे[7] हि न तटस्थातटस्थते "व्यवहारमात्रमिदम्[8], आश्रयापेक्षया परम्" [ ] इति वचनादिति चेत्; न; शरीरस्यापरिज्ञाने ममत्वेन निर्देशानुपपत्तेः सुप्तशरीरवत् । न च तस्य परतः परिज्ञानम् अनभ्युपगमात् । स्वतस्तु परिज्ञाने भवतु 'मम' इति न पुनर्ध्यामलाकार इति तस्य तेनापरिज्ञानात् । "न हि स्वसंवेदने परसंवेदनम्" [ ] इति वचनात् । मा भूच्छरीरापेक्षयापि [9]तस्य [10]तटस्थत्वमिति चेत्; कथं तद्व्यवहारः ? संवृतिमात्रादिति चेत्; [11]कुतस्तयोर्हेतुफलभावप्रतिपत्तिः ? न कुतश्चिदिति चेत्; कथमभ्युपगमस्तद्विपर्ययवत् ? न च संवृतिमात्रात्तद्भावप्रतिपत्तिः तेन व्यवहारस्यापरिज्ञानात् । नापि व्यवहारात्; तेनापि तन्मात्रस्याप्रतिवेदनात् । न च [12]तयोरेकेन परिज्ञानाभावे तद्धेतुफलभावस्य परिज्ञानम् । भवतु तदुभयविषयमेकमेव किञ्चिद्विज्ञानमिति चेत्; न; यतस्तत्रापि[13] तयोरनुप्रवेशे न हेतुफलभावः तस्य भेदनिष्ठत्वेनैकत्रासम्भवात् । अननुप्रवेशे सिद्धं [14]तयोस्तदपेक्षया[15] तटस्थत्वम् । संवृत्या तद्व्यव-

---

१ -र्थका-आ०, ब०, प० । २ दृष्टिः । ३ चेत् दर्श-आ०, ब०, प० । ४ -नभिज्ञातर्यप्र-आ०, ब०, प० । ५ भ्रान्तत्वकथनात् । ६ बाधकत्व । ७ ध्यामलाकारस्य । ८ यतः ध्यामलाकारसंवेदनयोरभेदः अतः तस्यैव संवेदनस्वरूपस्यैव ध्यामलाकारस्य कथं तस्माद् व्यतिरिक्तत्वमिति भावः । ९ पृथगनुपलब्धस्य सवेदनस्य 'संवेदनात्तस्य बहिर्भावः' इत्यत्र न अपादानत्वं युज्यते । तदचानुगदान-प० । -तदचानुपाधान-आ०, ब० । १० तत्स्वरूपादेव संवेदनात् तस्य ध्यामलाकारस्य । ११ -सेन तटस्था तटस्थत्वत्वे प०।-सेन तटस्थातटस्थते आ०, ब० । १२ -मायापेक्ष-आ०, ब० ।-मात्रापेक्ष-प० । १३ ध्यामलाकारस्य । १४ तदवस्थत्वमिति आ०, ब०, प० । १५ संवृति-व्यवहारयोः । १६-रेकापरि-आ०,ब०,प० । १७ उभयविषयकज्ञानेऽपि । १८ संवृतिव्यवहारयोः । १९ उभयविषयकज्ञानापेक्षया ।

द्वार इत्यपि संवृत्यैव न वस्तुतः । ततो यदि तस्य विचार्यमाणस्यायोगो न कश्चिद्दोषो विचारासहत्वस्यैव [1]तद्रूपत्वादिति चेत्, न, वास्तवस्यैव तद्व्यवहारस्य प्रसङ्गात् । सन्निष्पन्नात्मस्य[2] मिथ्यात्वे गत्यन्तरासंभवात् ।

अपि च, द्वितीयस्यामपि संवृतौ पूर्ववत्प्रसङ्गः तस्यास्तत्स्वरूपस्य चापरिज्ञाने न [3]तद्भाव स्याभ्युपगमः । परिज्ञानस्य यदि क्वचिदनुपविष्टत्वयैव किम [4]वस्तुतः तटस्थतयैव प्रतिभासनम् ? तयोरपि संवृत्यैव तद्भावः परिकल्प्यते तस्य च विचारपरिशिथिलत्वं न दोषायेति [5]चेत्, तन्न, अव्यवस्थापत्तेः । ततो दूरमनुसृत्यापि कथंचिन्मिथ्यासंवृतिवत्सकलयोः पारमार्थिक एव तद्भावोऽभ्युपगन्तव्यः । स च तयोः क्वचिद्बहिर्मूतयोरेव प्रतिभासते(ने) सम्भवति नान्यथा । तथा च श्यामत्वाकारस्यापि तज्ज्ञानबहिर्भूतस्यैव प्रतिभासनमिति सिद्धं सदेकत्वनिश्चयस्य तेन बाधनाद्भ्रान्तत्वम् ।

यदि पुनः (पुन) रसत एव तदाकारस्य भ्रान्तिसामर्थ्येन बहिरवभासनं कथं तज्ज्ञानस्यास्पष्टत्वं यतः परोक्षतया प्रमाणत्वम् ? कथं वा बहिरभिव्यक्तेन रूपेण तज्ज्ञानस्य स्पष्टत्वं यतः प्रत्यक्षतया प्रमाणत्वमिति चेत् ? न, अभिप्रायापरिज्ञानात्[6] । न ह्यालोकालिङ्गितवस्तुविषयतया स्पष्टत्व प्रत्यक्षस्य श्रोत्रादिप्रत्यक्षस्य वैद्धाया (तदभावा)पत्तेः, अपि तु अक्षोपेक्षमादिनिमित्तो ज्ञानस्य विशुद्धिविशेष एव । अस्पष्टत्वमप्यपकृष्टस्वविशेष एव न श्यामत्वाकारकवलितवस्तुप्रतिभासित्वमेव, स्मरणादौ तदभावापत्तेः । प्रतिपादितं चैतत्पूर्वम् । ततो नानर्थकाशङ्केऽपि तैमिरिकविषयादौ प्रकाशनियमस्य हेतुनिबन्धनत्वं मुच्यति यतोऽन्यत्रापि तन्निदर्शनेन तद्मुच्यता व्यवस्थाप्येतेति स्थितम् ।

इदानीं 'प्रकाशनियमो हेतोः' इत्यादिकमेव व्याचिख्यासुरवसरप्राप्तं बोधमुत्थापयति—

यथैवात्मायमाकारमभूतमवलम्बते ।
तथैवात्मानमात्मा चेदभूतमवलम्बते ॥३७॥ इति ।

यथैव येनैव भ्रान्तेराधिपत्येन प्रकारेण नापरेण आत्मा स्वभावो ज्ञानस्य तस्यैवाऽस्वकस्योपपत्तेः अयं प्रत्यात्मवेद्यनीय आकारं तैमिरिकेशादिकम् अभूतम् अविद्यमानम् अवलम्बते जानाति तथैव तेनैव प्रकारेण आत्मान स्वरूपम् आत्मा अभूतम् असन्तम् अवलम्बते चेत् यदि । तथा हि, यद् बोधाधिपत्येनावलम्बते तदभूतम् यथा तैमिरिकेशादि, बोधाधिपत्येनावलम्बते च बोधात्मेति । तत्रोत्तरमाह—

न स्वसंवेदनात् [तुल्यं भ्रान्तेरन्यत्र चेन्मतम् ।] इति ।

---

१ संवृत्तेस्वरूपतत्व । इदम्-पृ० १४ टि० ७ । २ 'संवृत्या व्यवहार' इत्यस्य विभाषायते । ३ हेतुरूपमात्मस्य । तद्भावस्याभ्युपग-आ०, ब०, प० । ४ वस्तुतत्व-आ०, ब०, प० । ५ चैद्याव्यव-आ०, ब०, प० । ६ यथतत्व प० । तावत्यं त्रुटितम् । ७ -ज्ञानं न-आ०, ब०, प० । ८ तद्भावोपपत्ते प० । तद्भावोपपत्तेः आ०, ब० । ९-ग्रहणादि-आ०, ब०, प० ।

आत्मानमात्मा अभूतमवलम्बते इत्येतत् न । कुतः ? **स्वेन** आत्मना **संवेदनात्** प्रतिपत्तेस्तदात्मनः । तात्पर्यमत्र—यद्याधिपत्यं तस्याभूतमेव कुतस्तेनात्मनस्तत्केशादेर्वावलम्बनम् ? इत्यसिद्धं साधनं तद्विकलता च दृष्टान्तस्य । भूतमेवेति चेत् ; कुत एतत् ? तथैव स्वसंवेदनात्प्रत्यक्षात्प्रतिपत्तेरिति चेत् ; प्रत्यक्षबाधितस्तर्हि भवदीयः पक्षस्तस्य कथं हेतुबलेन व्यवस्थापनम् ? "**न** तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः" [ ] इति न्यायात् । नः भूतं नाप्यभूतं तत्, तस्य तदुभयविकल्पातीतत्वादिति चेत् ; तन्न; यस्मात्—

तद्विकल्पव्यतीतत्वं यद्यभूतमुदीर्यते ।
तयोरन्यतरः कल्पो भवेदुक्तप्रतिक्रियः ॥७११॥
भूतं चेदाधिपत्यञ्च तद्वद्भूतं न किं मतम् ? ।
भूताभूतविकल्पाभ्यां निर्मुक्तं तदपीति चेत् ॥७१२॥
अनवस्थानदोषेण तदेतत्पीडितं वचः ।
वक्तुश्चित्तपरिक्लेशमावहत्यतिदुःसहम् ॥७१३॥
तस्माद्दूरमुपेत्यापि तद्भूतमभिवाञ्छता ।
बोधात्मा भूत एवायमभ्युपेतो भवत्यलम् ॥७१४॥
तस्मादालम्बनं तस्य नाभूतस्योपपद्यते ।
[3]इति सूक्तमिदं देवैः **'न स्वसंवेदनात्'** इति ॥७१५॥

पर आह—**तुल्यं** सदृशम् आत्मनीवाकारेऽपि तत्केशादौ स्वसंवेदनं तस्यापि 'तदनर्थान्तरत्वेनैव प्रतिवेदनात्। न हि तत्रापरं तद्वेदनमुपलभ्यते । इदमेव च स्वसंवेदनं यदन्यनिरपेक्षमुपलम्भनमिति भावः परस्य[4] ।

ननु इदं प्रागेव प्रतिविहितम् अन्योपलम्भस्य व्यवस्थापनात्, तत्किं पुनरुपक्षेपेणेति चेत् ? न; अन्यथा दूषणप्रतिपादनार्थत्वात् । तदेवाह—**भ्रान्ते**रिति । 'न' इत्यनुवृत्तम् । यदुक्तं **'तुल्यम्'** इति । तन्न; कुतः ? **भ्रान्ते**र्विभ्रमात् मिथ्यात्वात्तदाकारस्य । न हि ज्ञानाकारस्य मिथ्यात्वमुपपन्नं ज्ञानस्यैव तत्प्रसङ्गात् । प्रसिद्धश्च भ्रान्तितया तदाकारः । ततो न स्वतस्तस्य संवेदनम्। अभ्रान्तिरेवासौ ज्ञानरूपतया भ्रान्तिस्तु बहीरूपत्वेनैवासतेति चेत्; न; तस्य तथाऽनवभासनात्, अन्तारूपतयैव प्रतिपत्तेः, अप्रतिभासने च न भ्रान्तिः, अतिप्रसङ्गात्। प्रतिभासत एव ज्ञानान्तरे तद्रूपतया । तदाह **'अन्यत्र चेत्'** इति । **अन्यत्र** ज्ञानान्तरे तत्प्रतिभासं इति भ्रान्तिः तदाकारः **चेत्** यदि इति । तत्रोत्तरमाह—**'मतम्'** इति । 'न' इत्यधिकृतम् । इदमभिमतं न सम्भवतीत्यर्थः । न हि ज्ञानाकारस्य ज्ञानान्तरे प्रतिभासनम् अनन्यवेद्यतया

---

१ —क्तप्रतीतितः आ०,ब०,प० । २ —तमपि वा—आ०,ब०,प० । ३ ततः सूक्त—आ०, ब०, प० । ४ तदर्था—आ०, ब०, प० । ५ "एतदेव स्वसम्वेदनं यदन्यागोचरत्वे सति प्रकाशनं नाम ।"—प्र० वार्तिकाल० ३।४६६ । ६ युक्तं आ०, ब०, प० । ७ —सवति आ०, ब०, प० ।

तदभ्युपगमात् । अन्यस्यैव तत्र प्रतिभासनमिति चेत् ; कथं तत्क्षेत्रादेर्भोक्तृत्वम् ? अन्यस्यैव तदुपपत्तेः । तस्माद्दृश्यादिति चेत् , तस्यापि कथं तत्त्वं येनेष्यमुख्येव । तत्र बहिरसतः क्षेत्रादेः प्रतिभासनादिति चेत् , न, ग्राह्येऽपि तज्ज्ञाने तथैव तत्प्रसङ्गात् । इति सिद्धं मुख्यतयैव तस्य भ्रान्तित्वं तेनाऽऽत्मसंवेदनमिति [1]द्वितीयेऽपि ज्ञाने तदनुप्रविष्टस्यैव तस्य प्रतिभासनम् । बहीरूपत्वं तु ज्ञानान्तरोपदर्शितमेवेति चेत्, न, तत्रापि 'न हि' इत्यादेर्दोषस्य परिभ्रमादव्यवस्थापत्तेः । ५

[2]एतेन एवमपि प्रत्युक्तं यदुक्तमलङ्कारे–"विकल्पो ग्राह्यग्राहकोल्लेखेनोत्पद्यमानः सोऽपि स्वरूपे ग्राह्यग्राहकरूपरहित एव परेण तथा व्यवस्थाप्यते न तस्यापि स्वतो व्यवस्था" [प्र० वार्तिकाल० ३।३३०] इति । कथम् ?

[3]'विकल्प एव नैव स्यादनवस्थानदोषतः । १०
तदभावे कथं नाम वचोऽप्येतत्प्रवर्तताम् ॥७१६॥
"वाच्यवाचकसम्बन्धज्ञाने हि वचनं भवेत् ।
नापरं तत्र विज्ञानमन्यत्र सविकल्पकात् ॥" [ ]
तत्संस्कारादृचोवृत्तिरित्यप्येतेन दूषितम् ।
विकल्पमादिसंस्कारस्तदभावे न यद्भवेत् ॥७१८॥ १५
तद्वचोऽपि न चेन्नास्य [4]निबद्धस्यावलोकनात् ।
भ्रान्तिरेव तवेयं चेत्केयं भ्रान्तिर्निगद्यताम् ॥७१९॥
[5]बंधस्यविद्यमानेऽपि तत्सत्त्वारोपणं यदि ।
विकल्पादेर्[6] नन्वेतत्तदभावस्ततः कथम् ? ॥७२०॥
मिथ्याज्ञानं ततः किञ्चिद्वस्तुपूर्त्यैव कल्प्यताम् । २०
ग्राह्यमेव च तद्ग्राह्य तस्मिन्मिथ्यारूपमित्यपि ॥७२१॥
तज्ज्ञानस्य स्वरूपस्य तद्वन्मिथ्या भवेद्यदि ।
तद्वदेव न तस्य स्यात्स्वसंवेदनमात्रकम् ॥७२२॥
अस्ति चैतत्ततस्तस्यासत्यं सूक्तमिदं ततः ।
'न स्वसंवेदनातुल्यं भ्रान्तेरन्यत्र चेन्मतम्' ॥७२३॥ इति । २५

कथं पुनर्बाह्यस्य ग्रहणम् ? कथञ्च न स्यात् ? स्वाभिमुखेन रूपेण तद्योगात् । स्वरूपस्यैव हि तेन ग्रहणमुपपन्नं न बाह्यस्य, तदभिमुखेनैव रूपेण ग्रहणं न स्वाभिमुखेनेति चेत् ; किमेवं द्वे रूपे तस्याः ? तथा चेत् , कुतस्तयोः प्रतिपत्तिः ? परस्पराभ्यामिति चेत् , तथा

---

१ तत्रापि स्व-आ०, ब०, प० । २ द्वितीये वि-आ०, ब०, प० । ३ एवमेवमपि आ०, ब०, प० । ४ विकल्पे एव आ०, ब०, प० । ५ निबन्धस्या-आ०, ब० प० । ६ बाह्यस्य वि-आ०, ब०, प० । ७-७ तत्तेत-आ०, ब०, प० ।

सति देवदत्तयज्ञदत्तपरिच्छिन्नमिव न द्वयमिति वेद्येत, 'मया विदितमेतत्' इति च न स्यात् कर्तुरसंवेदनत्वेनानवभासनात्। ततश्च ते एव स्वसंवेदने स्याताम्। तथा च सन्तानान्तरप्रतिपन्नवदप्रतिपत्तिर्द्वयोः। अत एवात्मा द्वयोः प्रतिपत्तेष्यते, अन्यथायं प्रसङ्ग इति परः; अत्रोच्यते—

स्ववेदनेतरत्वेन पूर्वन्यायानतिक्रमात्।
सोऽपि पर्यनुयोगेन नैवानेन विमुच्यते ॥७२४॥

यदि स्वसंवेदनरूप आत्मा तस्य स्वात्मनि निमग्नत्वात् न परवेदनम्। परस्यापि वेदने को विरोध इति चेत्? 'तेन रूपेण परं वेत्ति परेण वा' इति विकल्पयोरेकत्र स्यात्। 'स्वरूपेण वेत्ति' इति न युक्तम्, [1]स्वरूपस्य स्वात्मनि व्यवस्थानात्। स्वरूपे [2]निविष्टं यद्रूपं स्वाभिमुखमेव, तत्कथं परं वेत्ति? अन्यमुखञ्चेत्; तेन तर्हि स्वात्मा न प्रतीयते। ततः सन्तानान्तरवेदनवन्न द्वयप्रतीतिः। यस्य तदाभिमुख्यद्वयं स एक एवेति चेत्; 'द्वयमेतत्' इति कः प्रतिपत्तिमान्? स एव इति चेत्; पुनराभिमुख्यद्वयेन प्रयोजनमित्यनवस्थानं स्यात्। ततः स्वसंवेदनरूपत्रयम्, ततस्तद्वेदने पर आत्मोपगन्तव्यः पुनरपर इति महत्यनर्थपरम्परा। ततः स्वविषयमेव ज्ञानं न बहिर्विषयमिति चेत्; कथमेवं क्वचित्कस्यचिद्विभ्रमः स्यात्? असदवभासित्वं हि विभ्रमः, तच्च बहिर्विषयस्यैव सम्भवति न स्वरूपविषयस्य, स्वरूपस्य विद्यमानत्वात्। विभ्रम एव मा भूदिति चेत्; न; तस्य[3] प्रसिद्धत्वात्। विचारासहैव तत्प्रसिद्धिरिति[4] चेत्; कोऽसौ विचारो यदसहत्वं तत्प्रसिद्धेः? 'कथं पुनः बाह्यस्य ग्रहणम्' इत्यादिरेवेति चेत्; न; तस्य जडत्वे स्वयमेवासम्भवादप्रतिपत्तेः। न हि तस्य स्वतः प्रतिपत्तिर्जाड्यात्। परतः इति चेत्; न; ततोऽपि स्वरूपमात्राभिमुखात्तदयोगात् 'स्वरूपस्य स्वात्मनि' इत्यादिवचनात्। विचारेऽप्यभिमुखमेव तदिति चेत्; न; तत्रापि 'किमेवं द्वे रूपे स्तः' इत्यादेर्निरवशेषस्य प्रसङ्गस्योपनिपातात्। तन्न जैडो विचारः। चेतन एवेति चेत्, तस्याप्येकाकारत्वे कथं तत्र परापरस्य पूर्वपक्षोल्लेखस्य तदुत्तरोल्लेखस्य चोपदर्शनं विरोधात्? अनेकाकारत्वेऽपि यदि प्रत्युल्लेखं तद्भेदस्तदा कुत 'इदमत्रोत्तरम्' इति पूर्वपक्षतदुत्तरयोर्विषयविषयिभावज्ञानम्? पूर्वपक्षोल्लेखस्य तदुत्तरे तदुल्लेखस्य च पूर्वपक्षे प्रतीत्यभावात्। न च [5]तद्व्यावापरिज्ञाने विचारः, तस्य तादृप्यात्। सन्तानरूपेण भेदो विद्यत इति चेत्; न; तस्यावस्तुसत्त्वे विचारस्यापि तत्त्वापत्तेः तादृप्यात्। तत्र च दोषस्य वक्ष्यमाणत्वात्। वस्तुसदेव तद्रूपमिति चेत्; न; [6]आत्मसिद्धिप्रसङ्गात्, परापरज्ञानपर्यायाविष्वग्भावस्यैवात्मत्वात्, सति तस्मिन् निर्बाधमेव बाह्यग्रहणं स्वपररूपगोचरस्याभिमुख्यद्वयस्य तत्र भावात्। तद्द्वयप्रतिपत्तावप्यपरे-

---

१ स्वरूपं स्वा—आ०, ब०। स्वरूपस्या—प०। २ विशिष्टं प०। ३ तस्याविद्धत्वात् आ०, ब०। ४ विभ्रमप्रसिद्धिः। ५ जातो वि—आ०, ब०, प०। ६ विषयविषयिभावापरिज्ञाने। ७ नासिद्धि—आ०, ब०, प०। ८ स्वरूपगो—आ०, ब०, प०।

प्यभिमुखयद्वयेन प्रयोजनं तत्प्रतिपत्तावपि तदन्येनेत्यनवस्थानमिति चेत्, न, विचारोल्लेखभेद-प्रतिपत्तावपि एवप्रसङ्गात् तत्रापि तदभिमुख्यभेदेन प्रयोजनं तत्प्रतिपत्तावपि तदन्येन तत्प्रति-भेदेनेत्यनवस्थानस्याविशेषात्। नास्त्यनवस्थानम्, परतस्तदुल्लेखानामपरिज्ञानात्। 'परतो हि तत्परिज्ञाने तत्राभिमुख्यभेदापेक्षणात्तद्भवत्यनवस्थानं तत्परिज्ञानेऽपि तदपराभिमुख्यभेदस्यावश्यापे-क्षणीयत्वात्, न चैवम्, स्वत एव तेषां परिज्ञानात्। स्वतः परिज्ञाने परस्परस्वरूपापरिज्ञानात् कथं तन्नानात्वपरिज्ञानम्? इत्यपि न मन्तव्यम्, तत्परिज्ञानस्य तदविष्वग्भावात्मना विचारे-णैव भावात्, तस्य निरवशेषतदुल्लेखविषयत्वादिति चेत्, सिद्धं नः समीहितम्, आत्मरूपयोरपि स्वपराभिमुखयोरेवमात्मनैव तद्भेदिना प्रतिपत्तेरनवस्थानदोषानवतारात्। पराभिमुख्यस्यापि स्वतः परिज्ञाने तदपि स्वाभिमुखमेव भवेत्, अन्यथा ततस्तत्परिज्ञानायोगादित्यन्यदेव पराभि मुखं तदभ्युपगन्तव्यम्, तस्यापि स्वतः परिज्ञानेऽपि ततोऽपि परं पराभिमुखमभ्युपगन्तव्य मिति कथं तदोपानवतार इति चेत्? न, परापरस्य स्वाभिमुख्यस्याभावात्। कुतस्तर्हि परा-भिमुख्यस्य परिज्ञानमिति चेत्? प्रथमादेव स्वाभिमुखतः, तस्मात्तस्य कथञ्चिदव्यतिरेकात्, आत्मन स्तद्विषयज्ञानस्वपराभिमुख्ययोरप्येकमेव स्वसंवेदनमिति न स्वसंवेदनरूपत्रयं सम्भवति। व्यतिरेकनयार्पणया सम्भवत्येवेति चेत्, न, तयापि तत्परिज्ञानार्थमात्मान्तरपरिकल्पनं नैय-तोऽप्येकान्ततस्तेषां तिरेकस्याभावात्, अन्यथा विचारात्तदुल्लेखानामपि ततस्तया व्यतिरेके तत्प्रतिपत्त्यर्थं विचारान्तरपरिकल्पनस्यापि प्रसङ्गात्। तत इदमेवविचारात्तयैव प्रतिपादितम्-'ततः स्वसंवेदनरूपत्रयम्' इत्यादि।

कथं पुनः स्वपराभिमुख्ययो रूपयोरात्मनश्चान्वयिव्यतिरेकितया विरुद्धधर्माभ्यासे सति परस्परमनिष्वग्भाव इति चेत्? न, विचारात्तदुल्लेखानामपि तत एव तद्भावापत्तेः। विचा रोऽपि मा भूदिति चेत्, क पुनरिदानीं भवतः "क्षितः (ता) प्रणता? संवेदनाद्वैत इति चेत्, भेदे जीवति कथं तदद्वैतम्? निराकृते तस्मिन् तदिति चेत्, न, विचारादेव तन्निराकरणात्, तस्य चामावात्। अविद्योपप्लुतानामस्त्येव विचारः, तत्परिप्लुतावेव तदभावादिति चेत्, कुतः पुनस्तदुपप्लवापेक्षणं विचारस्य? स्वयमप्युपप्लवत्वादिति चेत्, कथं ततस्तात्त्विकं भेदनिराकरणं तद्विषयम्? कथं वा सति तस्मिन्निरुपप्लवं तदद्वैतम्? तस्याप्यन्यतो विचा-रान्निराकरणादिति चेत्; न, अनवस्थाप्रसङ्गात्। नायं दोषः प्रदीपकल्पत्वाद्विचारस्य। प्रदीपो हि तैलवर्त्यादिकं निरवशेषं स्वत एवोपशाम्यति न तत्र निमित्तान्तरमपेक्षते तद्वद्विचा-रोऽपि भेदजालं निराकृत्य स्वत एव निवर्तिष्यते न तत्र विचारान्तरमपेक्षते इति चेत्, ततस्त-न्निराकरणं नाम तदभावसंवेदनमेव। तच्च न स्वयम्, तद्रूपत्वेन विरोधात्-'अभावश्चेन्न संवेदनम्, तर्हि नाभावः' इति। अविरोधे वा सद्वैतस्याप्यभावस्यैव संवेदनत्वमिति नोपप्लवात्तस्य विशेषः।

---

१ परतोऽपि तत्र-आ०, ब०, प०। २ -ज्ञानस्वरूपाभि-आ०, ब०, प०। ३ भेदविचारयो। ४ भेद-प्रतिपत्तेनापि सर्वथा भेदस्य सिद्धत्वात्। ५ -मतिचारितत्वं आ०, ब०, प०। ६ विचारात्तदुल्लेखत्वमपि प०। विचारात्तदुल्लेखमपि। आ०, ब०। ७ क्षितः प्रज्ञा सं-आ०, ब०, प०। ८ तदद्वैतस्याप्य-आ०, ब०, प०। ९ -रिवर्तेत-आ०, ब०, प०। १० नाम निरे- प०। नाम तदभावे निरे-आ०, ब०।

नापि तद्धेतुत्वेन ; अभावस्य [1]तदयोगात्। ततो नोपप्लवरूपाद्विचारात् भेदनिराकरणम्। अनुपप्लवरूपत्वे तु तस्य तदेकयोगक्षेमत्वेन आत्माप्यनुपप्लव एव स्वपरपरिच्छेदस्वभावावपि तस्येति कथन्न बाह्यग्रहणम् ? तदेवाह–

सत्यं तमाहुराचार्या विद्यया विभ्रमैश्च यः ॥३८॥
यथार्थमयथार्थं वा प्रभुरेषोऽवलोकते । इति ।

सत्यम् अवितथम्। **तम्** आत्मानम्। आत्मन एव विचारविषयतया प्रस्तुतत्वात्। **आहुः** आवेदयन्ति। के ? **आचार्या** विचारज्ञानप्रवर्त्तका इति। अनेन सत्यात्मवादित्वाभावे तेषां तत्प्रवर्त्तकत्वाभावं पूर्वोक्तन्यायमावेदयन् अनुमानसिद्धं तत्सत्यत्वमावेदयति–कीदृशं तम् ? इत्याह–**योऽवलोकते** पश्यति। कया ? **विद्यया** यथावस्थितवस्तुरूपावलोकनशक्त्या। तदनेन 'सारूप्यमवलोकननिमित्तम्' इति[2] प्रत्युक्तम् ; शक्तेरेव तन्निमित्तत्वोपपत्तेर्निवेदितत्वात्। कमवलोकते ? **यथार्थं** यो येन स्वभावेन स्थितोऽर्थः स[3] यथार्थस्तमिति, सुँप्सुपेति[4] समासः। तदनेन 'सर्वमुपप्लव एव' इत्येकान्तः प्रतिविहितः। तथा हि – तदेकान्तस्य नाप्रतिपन्नस्यैवाभ्युपगमः अनुपप्लववत्। नापि कुतश्चिदुपप्लवादेव तत्प्रतिपत्तिः तद्वदेव, अनुपप्लवात्तु तँत्प्रतिपत्तौ कथं तदेकान्त इति[5] ? न विधिमुखेन कुतश्चित्तत्प्रतिपत्तिर्यदयं प्रसङ्गः स्यात्, अपि त्वनुपप्लव एव प्रतिक्षिप्यते तँत्प्रमाणस्य प्रत्यक्षादेरसम्भवादिति, तल्लक्षणदोषोद्भावनेन प्रतिक्षेँपात्। प्रतिक्षिप्ते चानुपप्लवे पारिशेष्याद्उपप्लवस्यैवावस्थानं गत्यन्तराभावादिति चेत् ; न; तत्रापि प्राच्यादेव दोषात् पारिशेष्यस्याप्युपप्लवत्वे ततोऽप्युपप्लवस्य तँद्विपर्ययवदव्यवस्थितेः। अनुपप्लवत्वे तदेकान्तपरिहाणेः। उपप्लवस्यापि[10] यदि स्वरूपं व्यभिचरति कथमुपप्लवत्वम् ? न व्यभिचरति[11] चेत् ; तथापि कथं तत्त्वम् ? अव्यभिचारिस्वरूपस्यैवानुपप्लवत्वात्, [12]तदवलोकनस्य यथार्थावलोकनत्वादिति सूक्तं **यथार्थमवलोकते** इति।

पुनरपि तत्स्वरूपमाह–**विभ्रमैश्च** मिथ्याकारग्रहणशक्तिविशेषैश्च। चशब्दः पूर्वसमुच्चयार्थः **'अयथार्थं मिथ्याकारं योऽवलोकते'** इत्यनेनापि मिथ्याज्ञानसद्भावमावेदयता ज्ञानानां स्वत एव प्रामाण्यमिति प्रतिविहितम्, तत्र मिथ्याज्ञानाभावप्रसङ्गात्। तथा हि–स्वशब्देन[13] ज्ञानस्वरूपमेवोच्यते। तद्यदि प्रामाण्यस्य प्रयोजकं मिथ्याज्ञानेष्वपि भवेदविशेषात् इत्यभाव एव तेषां भवेत्, सति प्रामाण्ये मिथ्यात्वविरोधात्। अभावे च मिथ्याज्ञानानां चोदनावत् प्रत्यागमस्यापि धर्मे तज्ज्ञानजननद्वारेण प्रामाण्यात् [14]"धर्मे चोदनैव प्रमाणम्" [ ] इत्यपर्यालोचितमेव वचनं भवेत्, [15]अन्ययोगव्यवच्छेदाभावेनावधारणानुपपत्तेः।

---

१ हेतुत्वायोगात्। २ बौद्धमतम्। "साधनं मेयरूपता"–प्र०वार्तिकाल० २।३०६। ३ सुबन्तं सुबन्तेन सह समस्यते। ४ उपप्लवैकान्तप्रतिपत्तौ। ५ इति कथन्न वि–आ०,ब०,प०। ६ अनुपप्लवत्वग्राहकप्रमाणस्य। ७ –पात्तत्प्रति–आ०,ब०,प०। ८ अनुपप्लववत्। ९ पारिशेष्यस्य अनुपप्लवरूपत्वे। १० –पि तयादि–आ०,ब०,प०। ११ –चरतीति आ०,ब०,प०। १२ तदवलोकस्य आ०,ब०,प०। १३ –न स्व–आ०,ब०,प०। १४ "चोदनैव प्रमाणमेतद्धर्मेऽवधारितम्"–मी० श्लो० चो० सू० श्लो० ४। १५ –द्रष्टव्यम्–पृ० २५ टि० १४।

मिथ्याज्ञानेषु प्राप्तमपि प्रामाण्यं [1]बाधकप्रत्ययेनापोद्यत इति चेत्, [2]तद्यदि तेषामेव स्वरूपमविशिष्ट कथमपवादः ? तेषामेव तत्प्रसङ्गात्। न चैवम्, सत्यपि बाधकप्रत्ययोपनिपाते तैमिरिकस्य द्विचन्द्रप्रतिभासानिवृत्तेः। तत्स्वरूपादन्यदेव [3]अप्रामाण्यमिति चेत्, तत्रापि यदि ज्ञानस्वरूपस्य निरपेक्षं प्रयोजकत्वं स एव दोषो मिथ्याज्ञानेष्वपि तैमिरप्रसङ्ग इति। बाधकप्रत्ययविरहव्यपेक्षस्यैव तैमिरस्य तत्र प्रयोजकत्वमिति चेत्, न तर्हि स्वतः प्रामाण्यम्, परसव्यपेक्षत्वे परत एव तदुपपत्तेः। [4]ज्ञानरूपमेव [5]तद्विरहः भावान्तरस्वरूपत्वाद्भावस्य, तस्मादयमप्रसङ्ग इति चेत्, न, मिथ्याज्ञानेष्वपि तद्रूपसद्भावेन [6]तद्विरहप्रसङ्गात्। भवतोऽपि भूतलमेव घटाभावं ब्रुवतः सघटमपि भूतलं तदभावः कस्मान्न भवतीति चेत् ? न भूतलस्य तदभावत्वम् अपि तु तत्कैवल्यस्यैव "एकस्य कैवल्यमेव परस्य वैकल्यम्" [हेतुबि० पृ० १८८] इति वचनात्। न च कैवल्यं भूतलमेव, [7]तद्भेदस्यापि तत्र प्रतिभासनात्। बाधाविरहस्यापि [8]ज्ञानात् कथञ्चिदर्थान्तरत्वे नैकान्ततः स्वतः प्रामाण्यम्, निरपेक्षतया ज्ञानमात्रादेव भावे तदेकान्तोपपत्तेः। न हि तद्विरहापेक्षया भवतो निरपेक्षत्वम्। [9]तद्विरहोऽपि ज्ञानमेव, कथञ्चित् [10]तदव्यतिरेकात्, अज्ञानस्यैवदनुपपत्तेः। न ह्यज्ञानस्य ज्ञानात् [11]कथञ्चिदप्यव्यतिरेकः। ततस्तदपेक्षत्वेऽपि तस्याप्रामाण्यस्य न स्वतस्त्वद्भावविरोधः, स्वतःशब्देन [12]अज्ञानस्यैवापेक्षयतया प्रत्याख्यानादिति चेत्; न, सत्यपि ज्ञानत्वे तेन [13]तदव्यतिरेकानपह्नवात्। तदनपह्नवे च कथं तदपेक्षस्य स्वतो भावः ? परत एव भावोपपत्तेः, परनिरपेक्षस्यैव भावस्य स्वतो भावत्वात्।

परिच्छेदकत्वमेव प्रामाण्यम्, तच्च स्वत एव ज्ञानानाम्, तत्किं तत्र बाधाविरहस्य व्यपेक्षयेति चेत् ? न, [14]तन्मात्रस्य मिथ्याज्ञानेष्वपि भावात्। न तन्मात्रं प्रामाण्यम्, अपि तु यथार्थप्रतिभासरूपस्तद्विशेष इति [15]चेत्, [16]तस्य तर्हि किमन्यत्प्रयोजकम् अन्यत्र बाधाविरहात् ? तद्विशेषोऽपि स्वतः एव[17], बाधाविरहात् तस्य शक्तिरेवेति चेत्, न, स्वतस्त्वद्भावे अतिप्रसङ्गस्याभिहितत्वात्। स्वतोऽपि शक्तिविशेषाधिष्ठानादेव [18]तद्विशेषो न [19]तन्मात्रादिति चेत्, न, शक्तिविशेषस्यैव प्रयोजकत्वे परतः प्रामाण्यापत्तेः। एतदर्थमेव शक्तिविशेषवाचिनो विशेषपदस्यात्रोपादानम्[20]। ततो यदि निर्बन्धः स्वतः प्रामाण्ये निर्विशेषमेव ज्ञानं [21]तत्र प्रयोजकमभ्युपगन्तव्यम्। तत्र च न मिथ्याज्ञानसम्भवः, ज्ञानमात्रस्य तत्प्रयोजकस्य [22]तत्रापि भावेन प्रामाण्यस्यैव प्राप्तेः। न च मिथ्याज्ञानाभावः, दृष्टोत्तरत्वात्। तस्मादुपपन्नं मिथ्याज्ञानसद्भावेन [23]स्वतः प्रामाण्यप्रत्याख्यानम्।

---

१ बाधकप्र—आ०, ब०, प०। २ अप्रमाणमि—आ०, प० प०। ३ प्रामाण्यप्रसङ्ग। ४ ज्ञानरूपस्य। ५ अप्रमाण्यं। ६ ज्ञानस्वरूप—ब०। ७ बाधविरहः। ८ बाधविरह। ९ एकाभावः। १० कैवल्यभूतलयोर्भेदस्य। ११ —मार्थमिद्—आ०, ब०, प०। १२ बाधाविरहोऽपि। १३ —तद्व्यति—आ०, ब०, प०। १४ कथंचिदव्य—आ०, ब०, प०। १५ —न ज्ञा—आ०, ब०, प०। १६ बाधाविरहेण। १७ ज्ञानभेदविवक्षायात्। १८ परिच्छेदमात्रस्य। १९ चेत् न स तस्य आ०, ब०, प०। २० परिच्छेदविशेषस्य। २१ तत्रापीति योगः। २२ परिच्छेदविशेष। २३ प ज्ञानसामान्यप्रसाधनात्। २४ दृष्टेः —त्पत्तिज्ञानात् आ०, ब०, प०। २५ प्रामाण्ये। २६ मिथ्याज्ञानेऽपि। २७ —ये स्वतः प्रामाण्येन प्र—आ०, ब०, प०।

कः पुनरसौ यो विद्यया यथार्थं विभ्रमैश्चायथार्थमवलोकते ? इत्याह–**एषः** प्रत्यात्मवेदनीयः इति। अनेन प्रत्यक्षवेद्यत्वमात्मनः प्रतिपादयता तन्निषेधवादिनः प्रत्यक्षबाधनं प्रतिपादितम्। कीदृशः पुनरेषोऽपि ? इत्याह–'**प्रभुः**' इति। प्रभुत्वं पुनस्तस्य यथार्थाद्यवलोकने विषयाकारस्य व्यतिरिक्तविज्ञानस्य चानपेक्षणात्। एतदपि कुत इति चेत् ? तथैव तस्य स्वतोऽनुभवात्। निरूपितञ्चैतत्। कुतः [1]पुनर्यथार्थत्वमवलोकनस्य परिज्ञायत इति चेत् ? कुतश्च न परिज्ञायते ? तदुपायस्याभावादिति चेत्; कथं तदपरिज्ञाने तद्वचनम् ? परिज्ञानपूर्वकत्वात्प्रेक्षावतां वचनप्रवृत्तेः। अस्त्येव तस्य परिज्ञानमिति चेत्; तस्य तर्हि यथार्थत्वं कुतश्चित्परिज्ञातव्यम् अन्यथा तदुपायाभावस्य ततः परिज्ञानायोगात्। न तस्य यथार्थत्वं नापि तद्विपर्ययः [2]तदुभयविकल्पनिर्मुक्तत्वादिति चेत्; न; तस्याप्यपरिज्ञाने वचनायोगात्। परिज्ञाने च यथार्थत्वं तस्य कुतश्चिदवगन्तव्यम्, अन्यथा ततस्तन्निर्मुक्तत्वाप्रसिद्धेः। तत्परिज्ञानस्यापि तदुभयविकल्पनिर्मुक्तिरेवेति चेत्; न; प्राक्त्यादेव प्रसङ्गात्, अव्यवस्थापत्तेश्च। ततो दूरमनुसृत्यापि यथार्थादेव कुतश्चिद्वेदनात्कचित्तन्निर्मुक्तत्वपरिज्ञानम्। [3]तस्य च यथा यथार्थत्वपरिज्ञाने कश्चिदुपायस्तथा विषयावलोकनस्यापीति नोपायाभावात्तत्परिज्ञानप्रतिक्षेपः। तदनेन अयथार्थत्वपरिज्ञानस्याप्यप्रतिक्षेपो निरूपितः। [4]तत्रापि बाधकस्योपायस्याभावात् तस्यापि प्रतिक्षेप इति चेत्; [5]अस्ति तर्हि बाधकः बाधकादेवास्यापि [6][7]तदुपपत्तेः। न मया कुतश्चित्तत्परिज्ञानं प्रतिक्षिप्यते यतोऽयं प्रसङ्गः[8], अपि तु परप्रतिपादितस्य तत्परिज्ञानोपायस्य बाधावैधुर्यादेरनुपायत्वमेवापाद्यत इति चेत्; न; अनुपायस्य तदापादनस्याप्ययोगात्। व्यभिचारादिदोषोद्भावनं तत्रोपाय इति चेत्; न; ततोऽप्ययथार्थात् तदयोगात्। यथार्थमेव तदिति चेत्; सिद्धं तर्हि यथार्थत्वमवलोकनस्यापि तद्दोषोद्भावनवत्तस्यापि कुतश्चित् तत्त्वपरिज्ञानोपपत्तेः। ततः सूक्तम्–'**सत्यम्**' इत्यादि।

यदि पुनर्नीलज्ञानं [9]न नीलाकारम् अपि तु बोधरूपमेव कथं नीलस्यैवेदमिति विशेषो बोधरूपतया विषयान्तरं प्रत्यपि तस्याविशेषात् ? नील एव व्यापारात्तस्यैव तन्न पीतादेरिति [10]चेत्; न; निराकारत्वे व्यापारस्यैव तादृशस्याप्रतिवेदनात्। अस्ति चायं विशेषो विषयान्तरव्यावृत्तिलक्षणः, ततो नीलबोधरूपतया द्विरूपमेव नीलज्ञानम्, तथैवानुस्मरणाच्च। अनुस्मरणं हि तस्य द्विरूपतयैव 'नीलज्ञानमासीत्' इति नीलबोधरूपद्वयोल्लेखेन तदुत्पत्तेः प्रतिवेदनात्। न हि स्वयमनुभयरूपस्य उभयरूपतया स्मरणे अधिरोहणमा[11]त्मसमर्पणमुपपन्नम्। अवश्यं चेदमुपगन्तव्यम्, अन्यथा [12]ततस्तत्स्मरणस्य[13], [14]ततोऽपि [15]तत्स्मरणादेरेकाकारादिकत्वा-

---

१ पुनरप्ययथात्वं आ०, ब०, प०। २ तदुपायवि–प०। ३ तस्य यथार्थत्वं प–आ०, ब०, प०। ४ अयथार्थत्वपरिज्ञाने। ५ यतः अप्रसिद्धप्रतियोगिकोऽभावो नास्ति अतः बाधकाभावस्य प्रतियोगिभूतो बाधकोऽप्यस्त्येव। ६ अयथार्थत्वपरिज्ञानस्यापि। ७ अप्रतिक्षेपोपपत्तेः। ८ प्रसङ्गादपि तु आ०, ब०, प०। ९ न तन्नीला–आ०, ब०, प०। १० चेन्निरा–आ०, ब०, प०। ११ –त्मसर्पणमु–आ०, ब०। १२ प्रथमज्ञानात्। १३ विषयस्मरणस्य। १४ द्वितीयज्ञानात्। १५ प्रथमज्ञानस्मरणादेः।

नुपपत्तेः । एकाकारादिकल्पे तदवस्तत्स्मरणम्, ततोऽपि तत्स्मरणादिकमुपलभ्यते । तथा च वा तिर्कं वस्तिवन्धनल्पे–

"अन्यथा ह्यतदाकारं कथं ज्ञानेऽधिरोहति ।" [प्र०वा० २।३८०] इति । "यदि तत्तदाकारमात्मान स्वसंवेदनेन नानुभवेत् कथं तदाकारतया ज्ञाने स्मरणे अधिरोहेत् । अधिरोहण तदाकारजननम्, तदधिरोहतीति कुतः ? तथैव प्रतिपत्तेः ।

एकाकारोत्तर ज्ञानं तथा ह्युत्तरमुत्तरम् ।

अवश्यमेतदुपगन्तव्यम् । तथा हि–उत्तरमेकैकेनाकारेणाधिकमधिकं भवति नान्यथा । तथा हि–पूर्वेण नीलं गृहीतं तदुत्तरेण नीलज्ञानम्, तदुत्तरेण नीलज्ञानज्ञानम्, तदुत्तरेणापि तदधिकमिति निश्चिनोति । तदेतदन्यथा न स्यात्, एतदेवोदाहरणेन प्रतिपादयति–

तस्यार्थरूपेणाकारावात्माकारस्य कश्चन ।
द्वितीयस्य तृतीयेन ज्ञानेन हि विभाव्यते ।

द्वितीयज्ञानं पूर्वज्ञानद्वयाकार स्वाकारञ्च विभाव्यते तृतीयेन, चतुर्थेन तदेव त्रयमेकाकाराधिकमिति यावद् गणयितुं स्मर्तुं वा शक्नोति ।" [प्र० वार्तिकाल०] इति । ततो विषयज्ञानस्य विषयान्तरव्यावृत्तिलक्षणात् । तज्ज्ञानस्य चाकाराधिक्यलक्षणाद्विशेषादाकारवत्त्वमेव अर्थज्ञानस्योपपन्नम् । यत्कथं विषयाकारनिरपेक्षत्वं तदवबोधने प्रभुत्वमुच्यत इति चेत् ? अत्र पूर्वोक्तमेवोत्तरं विस्मरणशीलानुग्रहाय प्रतिनिर्दिशन्नाह–

विषयज्ञानतज्ज्ञानविशेषोऽनेन वेदितः ॥३९॥ इति ।

विषयज्ञान नीलादिज्ञानं तज्ज्ञान तद्विषयमनुस्मरणम्, तयोर्विशेषो व्याख्यातः । अनेन 'प्रकाशनियमः' इत्यादिना । वेदितो निरूपितः । तथा हि–'यद्यन्यथानुपपन्नत्वं तद्विशेषस्य भवत्येव ततो विषयाकारव्यवस्थापनम् । न चैवम्, तस्यासम्भवात् । तथा हि–स्वहेतूपनिबन्धादेव शक्तिविशेषाद्विषयान्तरव्यावृत्तिनियमे किं तदर्थेन तदाकारनियमकल्पनेन ? कल्पयतोऽपि तन्नियमं तच्छक्तिविशेषस्यावश्याभ्युपगमनीयत्वात्, अन्यथा तन्नियमस्यैवासम्भवादिति प्रतिपादितत्वात् । सति च 'तद्विशेषे किमनेन परिश्रमहेतुना पारम्पर्येण–'तद्विशेषात् ज्ञानाकारस्याकारविशेषः, ततोऽपि विषयनियमः' इति ? 'तद्विशेषादेव तन्नियमोपपत्तेः । ततो न तन्नियमलक्षणात् विषयज्ञानविशेषात् आकारवत्त्वव्यवस्थापनमुपपन्नम्, अन्यथैव तत्सोपपत्तेः । नापि तदनुस्मरणगताद्याकाराग्रयलक्षणाद्विशेषात्, तस्यैवासिद्धेः । सिद्ध एवासौ विषयज्ञानोपसर्पिताभ्यां नीलतदाकाराभ्यां 'स्वाकारेण च, तत्र तल्लक्षणस्य विशेषस्य विभावनादिति

१–क्रमप्रमु–आ०, ब०, प० । २ तदन्यथा–आ०, ब०, प० । ३–पनिबन्धादेव आ०, ब०, प० । ४ तद्विशेषे । ५ ततो वि–आ०, ब०, प० । ६ शक्तिविशेषादेव । ७ –द्धिः आ०, ब०, प० । ८ स्वाकारौ च आ०, ब०, प० ।

चेत्; न; विषयज्ञाने विषयाकारस्यानन्तरन्यायेनाभावात्, तेन तत्समर्पणानुपपत्तेः। कथमेवं तस्य तदाकारत्वेन स्मरणम्–'नीलज्ञानमासीत्' इत्युल्लेखरूपमिति चेत्? भवेदेवेदं यदि 'नीलमेव ज्ञानं नीलज्ञानम्' इति तदुल्लेखार्थः स्यात्। न चैवम्, 'नीलस्य [1]ज्ञानं नीलज्ञानम्' इति तदर्थत्वात् देवदत्तकम्बलवत्। एवमपि कथं नीलस्य स्मरणमिति चेत्? [2]तज्ज्ञानस्य कथम्? तदाकारस्यानुकरणादिति चेत्; न; [3]तस्यैव स्मरणापत्तेः। तत्र च 'आसीत्' इत्युल्लेखानुपपत्तिः, तदाकारस्य स्मरणगतस्यातीतत्वाभावात्। तात्कालिकस्यापि अतीततज्ज्ञानरूपतयाऽध्यारोपात्तदुपपत्तिरिति चेत्; कोऽसौ तदध्यारोपः? तदेव स्मरणमिति चेत्; कुतस्तर्हि तत्र तदाकारस्य परिज्ञानम्? न स्वतः; तेन तस्य बहिर्भूतस्यैव परिज्ञानात्[4]। अन्यतस्तत्स्मरणादिति चेत्; न; अनुभवाभावे तदनुपपत्तेः। न च स्वसंवेदनादपरस्तत्रानुभव इत्यपरिज्ञानमेव तस्य प्राप्तम्। तत्र तदेवाध्यारोपः। नापि परः; 'तत्रैवासीत्' इत्युल्लेखप्रसङ्गात्। न चैवम्; 'नीलज्ञानमासीत्' इति विषयज्ञानस्मरण एव तदुपलम्भात्। तदपरव्यापारस्य तत्रारोपात्तथा तदुपलम्भ इति चेत्; कस्तर्हि तस्य तात्त्विको व्यापारः? निर्व्यापारस्य व्योमकुसुमाविशेषेणाभावापत्तेः। आत्मन्येव विषयज्ञानाकारस्य स्मरणमिति चेत्; न तर्हि तत्रातीतत्वारोपः, तत्कालतया स्मरणेन निश्चयात्, निश्चिते च विपर्ययानुत्पत्तेः। अनिश्चयात्मना तत्रैव तज्ज्ञानं तद्व्यापार इति चेत्; न, विरोधात् 'स्मरणं च, अनिश्चयात्मकं च' इति 'माता च वन्ध्या च' इतिवत्। ततो नापरस्तद्व्यापार इत्यतीतपरामर्श एव तद्व्यापारोऽनुमन्तव्यः। स च तदनुप्रविष्टत्वे तद्विषयाकारस्य न सम्भवतीत्यनुप्रवेश एव तत्र तस्य वक्तव्य इत्यसिद्ध एवाकारत्रयात्मा विशेषः, स्मरणस्य स्वाकारस्यैकस्यैव[5] भावात्। न च तस्यान्यथानुपपन्नत्वम्।

"अन्यथानुपपन्नत्वमसिद्धस्य न सिद्ध्यति।" [न्यायवि० श्लो० ११]

इति न्यायात्। तत्कथं ततो विषयज्ञानस्याकारवत्त्वमनुमानपदवीमुपनीयते? कथं पुनस्तदाकारेण स्मरणेन नीलस्य तज्ज्ञानस्य वा परिज्ञानमिति चेत्? न; 'स्वहेतूपनिबद्धादेव शक्तिविशेषात्' इति दत्तोत्तरत्वात्। अयमेव विषयज्ञानतज्ज्ञानयोर्विशेषो यद्विषयज्ञानस्य नीले स्वात्मनि शक्तिः स्मरणस्य तु [6]नीले तज्ज्ञाने स्वात्मनि चेति। तस्मादप्रातीतिकमेवेदम्–'तस्यार्थरूपेणाकारौ' इत्यादि।

कस्मात्पुनः शक्तिविशेषाद्विषयज्ञानतज्ज्ञानयोर्विशेष उच्यते, न ग्राह्यभेदादेव तद्भेदो वक्तव्यः? ग्राह्यभेदस्य नीलपीतादिलक्षणस्य परिस्फुटप्रतिभासविषयतया फलभेदात्, अनुमेयशक्तिविशेषापेक्षया चातिप्रसिद्धत्वात्। अत एव च भट्टेन प्रतिपादितम्–

---

१ ज्ञानमिति त–आ०, ब०, प०। २ तस्य ज्ञानस्य आ०, ब०, प०। ३ आकारस्यैव। ४ –नायतः आ०, ब०, प०। ५ –त्यनु–आ०, ब०, प०। ६ –व वा भा–आ०, ब०, प०। ७ नीलतज्ज्ञानस्वात्मनि च आ०, ब०, प०।

"विषयव्यपदेशाच्च नर्ते ज्ञाननिरूपणम् ।
तज्ज्ञानात्मन्यनेकत्वे ग्राह्यभेदनिबन्धनः ॥
संविच्छिभेदः सिद्धोऽत्र किमाकारान्तरेण नः ।" [ ]

इति चेत्, उच्यते—ग्राह्यभेदः संविदं भिन्दन् यदि तद्वनुप्रवेशेन भिनत्ति, कथमाकारवत्त्वं यत ईदं शोभेत—'किमाकारान्तरेण नः' इति । नात्स्येव तस्य तद्वनुप्रवेश इति चेत्, कथं ततः संविच्छि- ५
भेदो गगनस्यापि तैव एव तैत्प्रसङ्गात् । तस्य तेनानवष्टम्भान्नेति चेत् ; संवित्तेः कस्तेनावष्टम्भः ? विषयत्वमेवेति चेत्, तैदपि नीलसंविदो नीलवत् पीतादेरपि कस्मान्न भवति ? अशक्तेरिति चेत्, कस्याशक्तिः ? विषयस्यैव पीतादेरिति चेत्, न, तदंश त्वापि संविच्छिसामर्थ्ये तद्वि षयभावस्यावश्यम्भावात्, अन्यथा शुक्तिरूप्यादेरविषयत्वापत्तेरिति निवेदनात् । संविच्छेरेवाशक्तिः, नीलादौ नियत एव विषये तस्याः शक्तिभावात् विषयान्तरे विपर्ययादिति चेत्, सिद्धस्तर्हि १०
शक्तिभेदादेव संविच्छिभेदो न ग्राह्यभेदात्, "तद्भेदस्यापि संविच्छिभेदादेवोपपत्तेः । स्वहेतोरेव "तद्भेदो न संविच्छिभेदादिति चेत्, न, ततो नीलधवलादिरूपस्यैव भेदात् । "ग्राह्यरूपमपि तदेवेति चेत्, भवत्येवम्, तथापि कुतस्तद्वगमो यतस्तन्निबन्धनं संविच्छिभेदं ब्रूयात् ? संविच्छि भेदादेव, न चैवं परस्पराश्रयः, संविच्छिभेदस्य तद्भेदादवगमात् । "तद्भेदोऽपि हि संविच्छिं भिनत्त्येव, न पुनस्तद्भेदमवगमयति तस्यान्यत एवावगमादिति चेत्, कुतस्तर्हि विभ्रमसंविदीनां १५
भेदः ? तद्विषयात् केशोण्डुकादेरेव भेदादिति चेत्, न, तस्यासत्त्वात् । न चासतो भेदकत्वम् तस्य" वस्तुधर्मत्वेन तत्रासम्भवात् । विषयत्वमसतः कथमिति चेत् ? न, तस्यापि तद्बलेना भावात्, संविच्छिदभेदेव तदुपपत्तेः । ततो न ग्राह्यभेदस्य भेदकत्वम् अव्यापकत्वात् । शक्ति-भेदस्य तु भेदकत्वे नायं दोषः, सर्वसंविच्छिषु तद्भावात् । "तद्भेदस्यापि कुतोऽवगमो यत स्तन्निबन्धनः संविच्छिभेदस्त्वयापि निरूप्यत इति चेत्, 'संविच्छिभेदादेव तन्निबन्धनात्' इति २०
ब्रूमः । ततो न ग्राह्यभेदाभाप्याकारभेदात् संविच्छिभेदः शक्तिभेदादेव तदुपपत्तेरित्युपपन्नमुक्तम्—
'विषय' इत्यादि ।

यदि ज्ञानमर्थाकारं न भवति कथं तत्स्मरणे अर्थस्यापि नियमेन स्मरणम् 'नीलज्ञानमा-सीत्' इति ? सति भेदे पटस्मरणे "पटस्येव तद्योगात्, तदाकारत्वे तु तस्य भवत्येव तथा स्मरणं तद्व्यतिरेकेण ज्ञानस्यैव स्मर्तुमशक्यत्वात् । तस्यप्यर्थात्तज्ज्ञानस्य व्यतिरेके तत्सङ्कलित २५
स्यैव स्मरणं विभ्रमात् । विभ्रमस्य च निमित्तं तस्य 'तैत्र तद्व्यापारः, तत्कार्यत्वं वा । ततो विषयसङ्कलितत्वज्ञानस्मरणस्य अन्यथैव भावात् न ततो विषयाकारव्यवस्थापनं विज्ञानस्योपपन्न-मिति चेत्, उच्यते—

---

१ विषयस्वरूपदेशाधानर्थे प० । विषयत्वपदेशाधनर्थे आ०,ब०। २ —मनेकत्वे आ०,ब०,प०। ३ इदं आ०,ब०,प०। ४ ग्राह्यभेदत्व । ५ संविदमनुप्रवेशः । ६ ग्राह्यभेदादेव । ७ भेदप्रसङ्गात् । ८ विषयत्वमिति । ९ शुक्तिरूपदेः आ०,ब०,प०। एवत्वम् । १० ग्राह्यभेदस्यापि । ११ ग्राह्यभेदः। १२ ग्राह्यरूपमेव तदेवेति आ०,ब०, प०। १३ ग्राह्यभेदोऽपि । १४ भेदकत्वस्य। १५ शक्तिभेदस्यापि। १६ पटस्यैव प०। १७ तत्राव्यापा—आ०,ब०,प०।

"अर्थकार्यतया ज्ञानस्मृतावर्थस्मृतेर्यदि ।
भ्रान्त्या सङ्कलनं ज्योतिर्मनस्कारेऽपि सा भवेत् ॥

भ्रान्तिरिति सम्बन्धः । यद्यर्थस्य कार्यं विज्ञानम् अथाप्यर्थे कार्यं व्यापारो यस्येति ज्ञानस्मृतौ नियमेनार्थस्मरणम् अतस्तदवमूढमतिसन्तानस्य तथा भवति प्रतिपत्तिः, एवं तर्हि ज्योतिर्मनस्कारेऽपि तथा प्रतीतिः स्यात् । यथा विषयकार्यता विज्ञानस्य तथा आलोककार्यता मनस्कारकार्यतापि तेन द्वयसङ्कलनेनापि प्रतीयेत । न हि कार्यत्वे कश्चिद्विशेषः । अथ विषये व्याप्तत्वात्तत्सङ्कलनम्, मनस्कारे तत्राव्याप्तत्वात् तदा तस्यालोकेऽपि समान एव व्यापारः । न ह्यालोकमपहाय रूपे व्याप्रियते । तदसदेतत्-तस्माद्यथा आलोकप्रतिभासमिति न भवति तथा रूपप्रतिभासमिति न स्यात् । अथालोकोऽपि विषय एवान्तर्गतत्वात् 'रूपप्रतिभासम्' इति निश्चयेनैव गतः; न; आलोकस्य प्रकाशकत्वेन विषयत्वाभावात् कथं तत्र व्यापारः ? अथ प्रकाशकोऽप्यालोको रूपनिपतितत्वाद्रूपमेव सम्पद्यत इति विषयः; तथा सति ज्ञानमपि प्रकाशकं रूपनिपतितत्वाद्रूपमेवेति साकारालोकवत् विज्ञानमपि साकारम् । यथा न रूपेण विनाऽऽलोको न ग्रहीतुं (-को ग्रहीतुं) शक्यस्तथा विज्ञानमपि, न हि रूपादिकं प्रकाश्यं विना विज्ञानं ममास्तीति कश्चिद्विजानाति । तस्माद्रूपाद्याकारमेव विज्ञानम् एवमन्यथा तदनुस्मृतौ रूपादिस्मरणायोगादतिप्रसङ्गात्" [प्र० वार्तिकाल० २।३८०] इति चेत्; नायमपि दुष्परिहरो दोषो यस्मान्न विषय इत्येव सर्वत्र स्मरणम्, यत्र शक्तिस्तत्रैव तद्भावात् । न च शक्तिरपि विषयनिबन्धना यतो नीलवदालोकेऽपि भवेत्, अपि तु तत्कारणादेव संस्कारात् । तस्याप्यनुभवाद् भावे नीलवदालोके किन्न भावस्तस्यापि तद्वत्तद्विषयत्वात्, न ह्यसौ विषयेऽपि क्वचिदेव संस्कारकारी नान्यत्रेत्युपपन्नम्, एकरूपत्वादिति चेत् ; न; एकरूपत्वस्यासिद्धत्वात्, स्वहेतूपनिबन्धस्य प्रतिविषयं शक्तिविशेषस्य भावात् । अवश्यं चैतदेवमङ्गीकर्त्तव्यम्, अन्यथा विषयाकारेऽपि ज्ञाने दोषोपपत्तेः । तथा हि—

यदि नीलस्य तज्ज्ञानाकारत्वात्तत्स्मृतौ स्मृतिः ।
आलोकोऽपि तदाकारस्तस्याप्येषा न किं भवेत् ॥७२५॥
नीलज्ञानमनालोकाकारं चेत्तद्दृशिः कथम् ?
तथापि तद्दृशौ व्यर्थं नीलेऽप्यौकारकल्पनम् ॥७२६॥
आलोकादर्शने नीलमात्रस्यैव दृशिः कथम् ?
अन्यथा हि वचो न ह्यालोकमित्यादि दुष्यति ॥७२७॥
रूपे निपतनात्तस्य तद्दृष्ट्यैव दृशिर्यदि ।
नीलस्यापि भवेदेषा तन्निपाताविशेषतः ॥७२८॥

---

१ "विनालोको ग्रहीतुम्"—प्र० वार्तिकाल० । २ —ना ज्ञानं ता० । ३ दुष्परिहारो आ०, ब०, प० । ४ संस्कारस्यापि । ५ —ले व्यापा—आ०, ब०, प० । ६ आलोकस्य ।

रूपमात्रावभासं तदर्थज्ञान ततो भवेत् ।
न त्वालोकावभासं तन्न च नीलावभासनम् ॥७२९॥
विज्ञानं नीलनिर्भासमासीदिति ततः स्मृतिः ।
कथं यतोऽर्थज्ञानस्य नीलाकारस्य कल्पनम् ॥७३०॥
विशेषापेक्षया नीले रूपदृष्ट्या न चेद्दृशिः ।
आलोकेऽपि विशेषः किन्नैव यन्नैवमुच्यते ॥७३१॥
यदर्थज्ञानमालोकाकार प्राप्त विशेषतः ।
ततः सङ्कल्पितालोक तज्ज्ञानस्मरणं भवेत् ॥७३२॥
विषयाकारवादेऽपि तद्विपर्ययबाधवत् ।
स्मरणातिप्रसङ्गस्य हन्त हन्त कथं भवान् ? ॥७३३॥
एतेन क्षणभङ्गाद्याकारत्वादर्थदर्शिदः ।
तत्सङ्कलनतस्तत्र स्मृतिः स्यादिति दर्शितम् ॥७३४॥
स्मृत्या च क्षणभङ्गादौ नीलवदाविव निश्चिते ।
प्रयासमात्रं तत्रैव स्यादनुमानोपकल्पनम् ॥७३५॥

तस्मादिषयाकारेऽपि विज्ञाने 'नीलसङ्कल्पितस्यैव तस्य स्मरणं नालोकादिसङ्कल्पितस्य' इत्यत्र नापरमस्ति निबन्धनमन्यत्र तादृशाच्छक्तिविशेषादित्ययुक्तं तदर्शनादिषयाकारैर्विज्ञानकल्पन शक्तिविशेषादेव तस्य भावात् । न चान्यथैव भवतस्तत्तत्कल्पनं धूमादेर्वह्नादिकल्पनस्यापि प्रसङ्गात् ।

अथ पुनर्विषयकार्यतया विज्ञानस्य विषयसङ्कल्पितत्वेन स्मरणेऽतिप्रसङ्गाय प्रतिपादितं 'यथा' इत्यादि, यच्चेदमपरम्—

"सर्वेषामपि कार्याणां कारणैः[1] इत्याकृतिर्यथा ग्रहः ।
कुलालादिविवेकेन न स्मर्येत घटस्ततः ॥" [प्र० वा० २।३८१] इति ,

तदपि न शोभनम् , शक्तिकल्पनयैव तस्यापि परिहारात् , अन्यथा इदमपि शोभनं भवेत्—'यदि विषयकार्यत्वात्तदाकारं तज्ज्ञान मनस्कारकार्यत्वात्तदाकारमपि भवेत् , न हि कार्यत्वे कश्चिद्विशेषः' इति । तथेदमपि—

सर्वेषामपि कार्याणां कारणैः स्यात्समाकृतिः ।
कुम्भालाकारजुत्पत्स्य न घटस्योद्भवात्ततः ॥७३६॥ इति

तदिदमतिप्रसङ्गापादनं पपलकपिशाचकस्य मुखमुज्जृम्भोत्थापनमिव परस्यैव विपत्तिमापादयति न नियताकारज्ञानवादिनः, शक्तिप्रतिनियमादेव तेन तत्परिहारस्याभिधानात् । तदेवाह—

---

१ सर्वार्थेषु—आ०, ब०, प० । २ क्षणभङ्गविदो । ३ -कारकल्पनं आ०, ब०, प० । ४ शोभनं नवेति ऐक० ।

अर्थज्ञानस्मृतावर्थस्मृतौ नातिप्रसज्यते । इति ।

अर्थो नीलादिस्तस्य **ज्ञानं** तस्य **स्मृतौ** येयमर्थस्यापि तज्ज्ञानसंसर्गित्वेन स्मृतिस्तस्यां निराकारज्ञानवादिसम्मतायां **नातिप्रसज्यते** सैवार्थस्मृतिः 'ज्योतिर्मनस्कारादिभिः' इति[1] शेषः।

कथं पुनर्नातिप्रसज्यते यावता निराकारज्ञानस्य साधारणतया सर्वविषयत्वं तत्स्मरणस्यैव च सर्वत्रैवानुभवविषये प्रवर्त्तनमापद्यत एवेति चेत् ; अत्र पूर्वोक्तमेव शक्तिनियममुत्तरीकुर्वन्नाह–

सरूपमसरूपं वा यत्परिच्छेदशक्तिमत् ॥४०॥
तद्व्यनक्ति ततो नान्यत् व्यक्तिश्चेदसतः कथम् ? इति ।

यस्य नीलादेः परिच्छेदो व्यवसायो यत्परिच्छेदस्तस्य शक्तिः सा विद्यतेऽस्येति **यत्परिच्छेदशक्तिमत्**[3] अर्थज्ञानं तज्ज्ञानं च तद्यदित्युक्तं **व्यनक्ति** प्रकाशयति **ततोऽन्यत्** क्षणपरिणामादिकमालोकादिकं च न **व्यनक्ति** तत्परिच्छेदशक्तिमत्त्वाभावात् । कीदृशं **तत्** यत्तच्छब्देन निर्दिश्यत इत्याह[4]–**सरूपं** सस्वभावं रूपशब्दस्य स्वभाववाचित्वात् नीरूपः प्रध्वंस इतिवत्। कुतः पुनरिदमवगतं यद्विज्ञानशक्तित एव विषयव्यक्तिनियमो न पुनस्तदुत्पत्तिसारूप्याभ्यामन्यतो वेति चेत् ? तदिदं निदर्शनेन प्रत्यादिशन्नाह–**असरूपम्** अविद्यमानं तदिव **वा**शब्दस्येवार्थत्वात् । तात्पर्यमत्र–यदि तदुत्पत्त्यादेरेव[5] तन्नियमः तैमिरिककेशादौ न भवेत् तस्य नीरूपत्वेनाकारार्पणक्षमस्य हेतुत्वस्य योग्यत्वादेश्चाभावात् । ज्ञानस्वरूपतया सरूप[6] एव तत्केशादिरपीति चेत् ; न; तस्य ज्ञानाद्[7] बहिष्ट्वेनैव प्रतिभासनात् । भ्रान्तमेव बहिष्ट्वमिति चेत् ; किमिदं भ्रान्तमिति ? अविद्यमानमिति चेत् ; तस्य तर्हि कथं व्यक्तिः तदाकारार्पणक्षमस्य हेतुत्वस्य तत्राप्यभावात् ? तदपि ज्ञानरूपतया सरूपमेवेति चेत् ; न; तस्यापि तत्केशाद्यधिष्ठानतयैव[8] प्रतिभासनात् । भ्रान्तमेव तदधिष्ठानत्वमिति[9] चेत् ; न; तत्रापि 'किमिदं भ्रान्तम्' इत्याद्यनुबन्धादव्यवस्थापत्तेश्च । कुतो वा ज्ञानस्य तदाकारत्वम् ? अहेतुकत्वे नित्यत्वादिदोषात् । अनन्तरज्ञानादिति चेत् ; न; तस्मिन्नतादृशेऽपि तद्दर्शनात् । अतादृशादपि तद्भावे सन्मात्रमेव तत्त्वं भवेत् । तत एव सकलस्यापि विज्ञानवैश्वरूप्यस्य सम्भवात् । तादृशादेव व्यवहितादिति चेत् ; न; पूर्वं तिमिरादिरहितस्य तदभावात् । प्राग्जन्मभाविन इति चेत् ; प्रागपि तदभावे कथमिदानीं तिमिरादिभावेऽपि तस्य तदाकारत्वम् ? अत एव तद्भावस्यानुमानमिति चेत् ; कथमेवं विधवागर्भादपि चिरव्यवहितस्य पतिसम्पर्कस्यैव नानुमानं यतो जारसम्पर्कदोषेण विधवा दूष्येत । सन्निहितादेव तत्सम्पर्कादन्यत्र गर्भाधानदर्शनादिति चेत् ; न; कथं तर्हि चिरव्यवहितस्य केशादिज्ञानस्यापि तदाकारार्पकत्वम् ? सन्निहित एव नीलादौ

---

१ इति विशेषः आ०, ब०, प० । २ –वानुभव–प० । ३ अर्थज्ञानञ्च तद्यदित्यु–आ०, ब०, प० । ४ –ह स्वभा–आ०, ब०, प० । ५ विषयनियमः । ६ स्वरूप आ०, ब०, प० । ७ बहिः सत्वेनैव प० । ८ प्रतिभासात् आ०, ब० । ९ –नमिति आ०, ब०, प० ।

तस्मिन्[1] दर्शनात्। विषयवशादपि शक्तासंस्कारात् कार्योत्पत्तेर्दो योगदर्शनादिति चेत्, न, तद्विषयागमेष्वपि साक्षात्सन्निधानेनैव प्रमङ्गात्। न च कार्यान्तरगस्यापि व्यपदिशादेव तत्संस्कारसद्भावः, तदुपहिताद्वितीयक्षणेऽपि सन्निधिसम्भवात्तद्भावात्। भवतु केशोण्डुकादिरूपमपि ज्ञानं सन्निहितादेव तज्ज्ञानक्षिप्रभवादिति चेत्, तत्स्वरूपं यदि तदाकारः कथमस्य प्रेक्षावतस्तत्रेक्षणम्? अतदाकारत्वे तु कथं तत्तन्मिमित्तज्ञानस्य तदाकारत्वम्? तज्जन्मनस्य तत्करणस्वभावत्वादिति चेत्, तत्तिरस्कारस्वभावत्वमेव कस्मान्न भवति? अन्यतो व्यक्तिविषयत्वायोगादिति चेत्, करणविरुद्धत्वं कथम्? इदमत इति चेत्, व्यक्तिरपि इदमत एव। ज्ञानाकारत्वेनामत एव साक्षादर्थेनामत इति चेत्, न, तज्ज्ञानरूपस्वपरिज्ञानाभावस्य पूर्वं निवेदितत्वात्। तस्मादमत एव तदाकारस्यापि ज्ञानशक्तेरो व्यक्तिः। अत इदमुक्तम् सरूपकेशादिरूपव्यक्तिरपि विज्ञानलक्षित एव व्यक्तित्वात् असरूपतत्प्रतिपत्तिवदिति।

भवतु नाम वर्तमानस्य सरूपव्यक्तिरो व्यक्तिः सति तत्र शक्तिसद्भावात्, अतीतादेस्तु कथम्? असति तत्र तत्सम्भवादिति मन्यमानश्चोदयति—

'व्यक्तिभेदसतः कथम्'? इति।

सत् वर्तमानम् असतः अतीतादि तस्य, कथम्? न कथञ्चिदुपपत्तिः। चोदकः पुनरिमामेव चोदयति।

तदिदमपि निरूपणमनेन तत्रापि शक्तिमत्त्वमापादयन् परिहरति—

आगादपि यथा चक्षुरचिन्त्या भावशक्तयः ॥४१॥ इति।

आगादपि दूरादपि न केवलमासन्नम् एवेत्यपिशब्दः। यथा येन शक्तिभावप्रकारेण चक्षुः तज्जनितं ज्ञानं कार्ये कारणोपचारात्, तथैव अतीतादेरसतोऽपि व्यक्तिरिति। अयमत्र भावः—यदि ज्ञानमात्रे अतीतादेरभावात् तत्र तत्सन्निधानेनापि दूरवस्तुनापि न भवेत् सम्प्रति ज्ञानदेशे[ऽ]भावात्, अन्यथा नयनगोलक एव तत्प्रतिभासप्रसङ्गात्, तत्रैव तदेशसम्बन्धात्। न चैवम्, दर्शनमपि ज्ञानवत् एव तदुपलम्भात्। तदाकारसंक्रमस्य तदेशत्वात्तत्रापि तदेशत्वोपचारम् इति चेत्, न; विशदे विषये पुरस्थापि तैमिरिकस्य विप्रकृष्टदेशोपलम्भप्रसङ्गात्। अस्त्वापि न एव देशो यत्र चक्षुरिति चेत्, तथापि कथं तत्र दूरप्रतिभासनं न(ज्ञा)नस्य तदेव ज्ञानमप्रतिभासनप्रसङ्गात्। न चैवम्, सर्वत्र चक्षुषो दूरप्रतिभासनदेव प्रसङ्गात्। प्रतिनियतापि ज्ञानात्मनि विषये न तदेशादपि दूरप्रतिभासनम्, इन्द्रियान्तरज्ञानेऽपि तथात्वप्रसङ्गात्। सन्निधाने सत्यपि प्रमाणान्तरवदनिर्देशमेवेति चेत् तदन्यत्रापि

1-मी ए(-ब्र०, ब०, प०। 2 द्वितीयक्षण-ब्र०, ब०, प०। 3-मी ज्ञ-ब्र०, ब०, प०। 4 सन्निधानेन ब्र० ब० प०। 5 चेत् ब्र०, ब०, प०। 6-मी ए-ब्र०, ब०, प०। 7 तत्तन्मिमित्त-ब्र० ब०, प०। 8 चेत् ब्र०, ब०, प०। 9 ज्ञानस्य ब्र० ब० प०। 10-मी ति-ब्र०, ब०, प०।

दूरप्रतिभासनम् ? पुनरपि शरीरस्थापरज्ञानापेक्षया तत्परिकल्पनायाम् अन्यवस्थापत्तिः । विषयदेशज्ञानकल्पनायाञ्च योगिज्ञानस्य प्रतिविषयदेशं भेदापत्तेर्न योगी नाम कश्चिदेको भवेत् । सत्यपि भेदे तदेकमेव मेचकज्ञानस्याभ्युपगमादिति चेत् ; न; व्यापकात्मवादस्य व्यवस्थाप्रसङ्गात् । नापि तात्त्विके तद्भेदे तदेकमुपपन्नम् ; भेदेतरात्मवादस्यानभ्युपगमात्, नीलबोधरूपतया तात्त्विक एव भेदे तदुपपत्तिप्रसङ्गाच्च । तथा च यत्तस्य कल्पितत्वप्रतिपादकमलङ्कारवचनम्–

"नीलान्न व्यतिरेकेण विषयिज्ञानमीक्ष्यते ।
ज्ञानपृष्ठेन भेदस्तु कल्पनाशिल्पिनिर्मितः ॥" [प्र०वार्तिकाल० ३।३७७] इति ।

तदश्लीलभाषितं भवेत् । अतात्त्विके तु तद्भेदे कथं तस्य विषयग्रहणम् ? आकारबलाभावात् । स्वशक्तित एवेति चेत् ; उपपत्तिमदेतत्, अन्यथा कालदेशविप्रकृष्टतया भावोपदेशस्याभावप्रसङ्गात्, किन्तु नयनज्ञानादपि स्वविषये भिन्नदेशेऽपि व्यक्तिः स्वशक्तित एव भवेत् तथैव निरवद्यानुभवात् । तथा च कथं भिन्नदेशवत् भिन्नकालस्यापि स्मरणादेर्न व्यक्तिः ? तत्रैव तत्रापि ज्ञानशक्तेरनिवारणात् । भिन्नकालवस्तुज्ञानं निर्विषयमेव तत्काले तद्विषयस्याभावादिति चेत् ; भिन्नदेशवस्तुज्ञानमपि कथं सविषयं तदेशे तद्विषयस्याप्यभावात् ? तस्य देशान्तरे विद्यमानत्वादिति चेत् ; इतरस्यापि कालान्तरे विद्यमानत्वादिति समः समाधिः । सर्वस्यापि कालान्तरवर्त्तिनः किन्न व्यक्तिरिति चेत् ? देशान्तरवर्त्तिनोऽपि किन्न स्यात् ? स्वहेतुनिबद्धाच्छक्तिनियमादिति चेत्; न; अन्यत्राप्यस्यैव परिहारत्वात् । कथं पुनः शक्तयोऽपि देशकालविप्रकृष्टभावापेक्षप्रादुर्भावा इति चेत् ; न; तथा तासामचिन्त्यत्वात् । न हि शक्तयः 'कथमित्थमेवोत्पन्ना नान्यथापि' इति विचारयितुं प्रार्यन्ते । प्रमाणबलोपनीतास्तु परमभ्युपायन्त एव, अन्यथा न किञ्चिद्भवेत् अपहस्तिततद्बलावलम्बनस्यान्यत्रापि वस्तुव्यवस्थापनस्यासम्भवात् । तदेवाह–'**अचिन्त्या भावशक्तयः**' इति । स्वपदव्याख्यातमेतत् । चोद्यमाविष्कुर्वन्नाह–

विषमोऽयमुपन्यासस्तयोश्चेत्सदसत्त्वतः । इति ।

अयमनन्तरः आदित्यादिः **उपन्यासो** दृष्टान्तो **विषमो** दार्ष्टान्तिकसदृशो न भवति । सदृशेन च दृष्टान्तेन भवितव्यम् । तद्वैषम्यञ्च तयोर्देशकालविप्रकृष्टयोः **सदसत्त्वतः** देशव्यवहितस्य हि तज्ज्ञानदेशे असत्त्वेऽपि व्यक्तिरुपपन्नैव तज्ज्ञानकाले भावात्, न कालव्यव-

---

१ –परविज्ञा–आ०, ब०, प० । २ प्रतिविषयं देशभेदा–आ०, ब०, प० । ३ –वादप्रसङ्गान्न तुप–आ०, ब०, प० । ४–प्रतिपादितम–आ०, ब०, प० । ५ विज्ञानत्वेन भेद–प० । ६ तदकश्मलभा–आ०, ब०, प० । ७ कालदेशे पि प्रकृ–आ०, ब० । कालदेशेऽपि विप्रकृ– प० । ८ तत्रैव आ०, ब०, प० । भिन्नदेश इव । ९ भिन्नकालेऽपि । १० ज्ञानदेशे । ११ चेदन्य–आ०, ब०, प० । १२–वादिति आ०, ब०, प० । १३ –ख्यानमेतत् आ०, ब०, प० । १४ –हि तस्य हितस्य ज्ञानप्रदेशे प० ।–हितस्य ज्ञानदेशे आ०, ब० ।

हितस्य, तद्देशवत्तत्काले ऽप्यभावात् । चेत् शब्दः परामृतमवद्योतयति । तदिदं परिहरन्नाह–

यदा यत्र यथा वस्तु तदा तत्र तथा नयेत् ॥४२॥
अतत्कालादिरप्यात्मा न चेन्न व्यवतिष्ठते । इति ।

यदा यस्मिन् काले यत्र यस्मिन् देशे यथा येन प्रकारेण वस्तु नीलपचलादि 'स्थितम्' इति शेषः । तद्वस्तु तदा तस्मिन् काले तत्र तस्मिन देशे तथा तेन प्रकारेण नयेत् प्रापयेत् व्यक्तिम् 'व्यक्तिः' इत्यनुवर्त्तमानस्य यिमक्तिपरिणामेन सम्बन्धात् । क इत्याह–आत्मा जीवः । अतत्कालादि' न विद्यन्ते तस्य वस्तुनः कालादयः काल-देशप्रकारा यस्यासावतत्कालादि' । अपिशब्दात् तत्कालादिरपि । यद्येवं तत्प्रकारत्वाद्विषया कारत्वं तस्यापद्यत इति चेत् , सत्यम् , सत्त्वप्रमेयत्वादिना तदभ्युपगमात् , अन्यथा नीरू-पत्वापत्तेः । अतत्प्रकारत्वं तु नीलाद्याकारभावादिति निरवद्यम् ।

विपक्षे दोषमाह–न चेत् एवमात्मा व्यक्तिं न नयति चेत् , न व्यवतिष्ठते न वस्तुव्यवस्थां प्रतिलभते । तत्पक्षे तु व्यवस्थां प्रतिलभमान काद्यदेशाकारभेदेनैव प्रतिलभते । तथा तत्प्रतिलम्भश्च कथं भवेत् आत्मा चेदतत्कालादिरपि तत्कालादिकं वस्तु न व्यनक्त्यात् ? तदाकारज्ञानादेवेति चेत् , न, ततः स्वरूपमात्रपर्यवसायिनो भिन्नदेशादितया तस्य तत्प्रति-लम्भानुपपत्तेः । न हि तात्कालिकनिरंशज्ञानानुप्रविष्टस्यैव विषयाकारस्य भिन्नदेशादित्वम् । तदाकारजनकस्य भिन्नदेशादित्वात्तस्यापि भिन्नदेशादित्वमिति चेत् , कुतस्तदाकारजनकस्य भिन्नदेशादित्वमवगतम् ? अन्यतस्तदाकारज्ञानादिति चेत् , न, तत्रापि 'ततः' इत्यादेरनवस्थान दुस्तरदौरात्म्यप्रतिबन्धनिबन्धनस्य प्रसङ्गस्योपनिपातात् । तदर्पितस्याकारस्य भिन्नदेशादित्वा दिति चेत् , तदपि कुतोऽवगतम् ? तज्जनकस्य भिन्नदेशादित्वादिति चेत् , न, परस्पराश्रय दोषस्य परिस्फुटत्वात् । स्वत एव संविदनन्यत्वादिति चेत् , न, तस्यापेक्षिकत्वात् । आपेक्षिकं हि भिन्नदेशत्वादिकम् , किञ्चिदपेक्ष्यैव तस्य भावात् । तच्चापेक्ष्यं नास्त्येव, तत्र तदभ्यपा-तात् । नाप्यस्मत् , तस्य स्वाकारमात्रपर्यवसितेर्नाऽपरिज्ञानात् । न चापरिज्ञाते तस्मिंस्तदपेक्षं भिन्नदेशत्वादिकं सुपरिज्ञानम् , परिज्ञात एव प्रामादौ तदपेक्षया पर्ववादौ भिन्नदेशत्वादिपरि-ज्ञानस्योपलम्भात् । तन्न किञ्चिदेतत् ।

भवतु तर्हि तत्त्वं संविदद्वैतमेव, देशादिभेदस्तु कल्पनारोपित एवेति चेत् , तदपि कल्पनं कस्मात् ? अहेतुकत्वायोगात् । प्राक्तनादेव तत्कल्पनादिति चेत् , तत्र भिन्नदेशत्वादिक तत्परिज्ञानञ्च यदि परमार्थत एव किमन्यत्रापि न भवेत् ? कल्पनारोपितमेवेति चेत् , न, 'तदपि' इत्यादयनुगमनादव(नाद)नवस्योपनिपातात् । तदाह–यदा यत्र यथा वस्तु देशादि-

---

१ भिन्नदेशवत् शब्दवत्तेऽपि । २ परिहरं क–ज्ञा०, ख०, घ० । ३ व्यतिष्ठ–ज्ञा० । ४ तदेवं ज्ञा०, ख०, घ० । ५ तस्य वि–ज्ञा०, ख०, घ० । ६ –देश परि–ज्ञा०, ख०, घ० ।

भेदकल्पनं कार्यकारणरूपेण स्थितं तद्वस्तु **तदा तत्र तथा नयेत्** व्यक्तिम् । **अतत्कालादिरप्यात्मा** सम्यग्बोधस्वभावो **न चेन्न व्यवतिष्ठते** तद्वस्तु व्यवस्थाविकलं भवतीत्यर्थः ।

विकल्पनमपि मा भूत् निर्विकल्पस्याद्वैतस्यैव भावादिति चेत् ; तदपि कुतः अनवगतस्याव्यवस्थितेः ? "स्वरूपस्य स्वतो गतिः" [प्र० वा० १।६] इति चेत्[1] ; तत्कथमद्वैतम्, वेद्यवेदकावगमभेदस्यैवमभिधानात् ? तद्भेदेऽपि[2] तदेकमेवेति चेत् ; न; क्रमेणावग्रहादिभेदेऽपि तदेकत्वप्रसङ्गात्। तथा च निर्व्याकुलं देशादिभेदैर्न[3] वस्तुव्यक्तिनयनम् , तन्नयनविघातुरात्मनो निर्व्याकुलत्वात् । व्याकुल एवासौ भेदे सत्येकत्वस्य व्याघातादिति चेत् ; अत्राह–**न चेदात्मा न व्यवतिष्ठते** वेद्यादिभेदाक्रान्ताद्वैतंवास्तवव्याघातस्याविशेषादिति भावः । कल्पित एव तत्र वेद्यादिभेदो वस्तुतो निर्भेदत्वाद्वैतस्येति चेत् ; न; कल्पमे **यदा यत्र** इत्यादेर्निव्याकुलत्वस्याभिहितत्वात् । पुनरपि विपक्षे दोषमाह–

व्यवहारविलोपो वा [मोहाच्चेदयथार्थता] ॥४३॥ इति ।

'न चेत्' इति, एवं न चेत् **'यदा'** इत्यादिप्रकारेण वस्तु व्यक्तिं नयत्यात्मा ; तदा **व्यवहारः** प्रवृत्त्यादिलक्षणस्तस्य **विलोपो** विलयः स्यात् । तथा हि–व्यवहारः क्वचिद्विषये तदनुभवार्थिनो भवन् भिन्न एव भवति नात्मनि, तस्यानुभूयमानत्वेन तद्विषयत्वानुपपत्तेः । भिन्नेऽपि[4] नाऽप्रतिपन्ने सर्वत्र तत्प्रसङ्गात् । न चाकारवादिनो भिन्नप्रतिपत्तिरस्तीति निवेदितम् । अतो विलुप्यत एव व्यवहारः । **वा**शब्दः पूर्वदोषसमुच्चये ।

नास्त्येव देशादिभेदः प्रवृत्त्यादिरूपो व्यवहारो वा क्वचित्तदाश्रयस्य बहिर्भावस्यैवाभावात् । तत्प्रतिभासस्तु विपर्यासोपनीत एव "प्रतिभासः समस्तोऽपि वासनाबलनिर्मितः।" [प्र० वार्तिकाल० ३।३६५] इति वचनात् । तस्मादयमयथार्थ एव । तदेवाह–**'मोहाच्चेदयथार्थता'** इति । देशादिभेदव्यवहारयोरयथार्थत्वमविद्यमानत्वम् । कुतः ? **मोहात्** तत्प्रत्ययस्य विपर्यासरूपत्वात् **चेत्** शब्दः पराकूतद्योतने । तत्रोत्तरमाह–

अत्यन्तमसदात्मानं सन्तं पश्यन् स किं पुनः ।
प्रस्फुटं विपरीतं वा न्यूनाधिकतयापि वा ॥४४॥
प्रदेशादिव्यपायेऽपि प्रतियन् प्रतिरुध्यते । इति ।

न तावदयमारोपितोऽपि देशादिभेदो व्यवहारो वा तद्विकल्पमनुप्रविशति तावन्मात्रस्यैव प्रसङ्गात् । न च तावन्मात्रं तद्भेदो व्यवहारो वा लोकस्यैवमनभिनिवेशादप्रतिपत्तेश्च । बहिर्ग-

---

१ चेत्कथ–आ०, ब०, प० । २ तदभेदे–आ०, ब०, प० । ३ –न च वस्तु–आ०, ब०, प० । ४ –तवस्तुव्या–आ०, ब०, प० । ५ एव न चेत् आ०, ब०, प० । ६ भिन्नेन विना प्र–आ०, ब०, प० । ७ "भावनाभावनिर्मितः"–प्र०वार्तिकाल० । ८ –व्यवाये–आ०,ब०,प० । ९ बहिर्यतस्य तस्यैव ते–आ०,ब०,प० ।

तस्यैव तस्य तेनोपदर्शने पुनः अत्यन्त परस्वरूपवत् 'स्वरूपेणापि असदात्मानम् अविद्यमानस्वभावं विषयविषयिणोर्देशादिभेदं प्रवृत्तिप्राप्त्यादिरूपं व्यवहारञ्च पश्यन् अवलोकयन् । कथम् ? सन्तं विद्यमानमिव, असति सच्छब्दप्रयोगात् इवार्थप्रतिपत्तिः 'अग्निर्माणवकः' इतिवत् । सः अनन्तरोक्त आत्मा तस्यैव तथादर्शित्वोपपत्तेः । किम् ? कस्मात् । पुनरिति शिरःकम्पे प्रतिरुध्यते निषिध्यते, नैव निषिध्यते इति यावत् । किं कुर्वन् ? प्रतियन् प्रतिपद्यमानः । किम् ? सन्त विद्यमानमपि सन्तमित्यस्यापूर्वस्य सम्बन्धाद्वक्ष्यमाणस्य अपिशब्दस्य परिप्रक्रमेण योजनात् । कस्मिन् सति प्रतियन्? प्रदेशादिव्यपायेऽपि । प्रदेशव्यपाये चन्द्रादिकम् कालव्यपाये अतीतादिकम्, द्रव्यव्यपाये काचादिव्यवहितमिति । एतदुक्तं भवति—यथाऽयम् असत्कालादिरेव आरोपिताकार पश्यन्न प्रतिरुध्यते तथा अनारोपितमपि । इत्यारोपितवदनारोपितस्यापि आत्मशक्तितत्व एव परिज्ञानोपपत्तेः । कथ सः प्रतियन् ? प्रस्फुटं प्रकर्षेण स्पष्टम् अनेन प्रत्यक्षपर्यायरूपतया सन्तं प्रत्येतीति प्रतिपादयति । यथा चेदमुपपन्नं तथा प्रतिपादितं प्रागिति न पुनरुच्यते । पुनरपि कथ प्रतियन् विपरीतं वा स्पाष्ट्यविकल वा तदनेनापि स्मरणादिपरोक्षपर्यायरूपेण सन्त प्रत्येतीति निवेदयति ।

ननु यदि प्रत्यक्षवत्स्मरणादावपि वस्तुनः स्वरूपेण प्रतिभासनम्, कथमस्पष्टत्वम् ? तत्स्वरूपप्रतिभासे स्पष्टत्वस्यैवोपपत्तेः । न हि तत्स्वरूपप्रतिभासादपरमभ्यक्षेऽपि स्पष्टत्वम् । ततो यदि स्वरूपतस्तेन वस्तु प्रतिपन्न स्पष्टरूपमेव तत् । यदि स्वरूपतो न प्रतिपन्नम्; अप्रतिपन्नमेव सर्वथा तद्भवेत् । स्वरूपप्रतिपत्तावपि तत्स्पष्टमेवेति चेत्, तर्हि नीलादेस्तद्वेदनात् कथं भेदः ? कथञ्च न स्यात् ? अविवेचनात् । यदि हि नीलादिस्ततो वेदनान्तरेऽपि प्रतिभासेत भवेदविवेचन ततश्च भेदः । न चैवम्, प्रत्यक्षप्रतिभासिनः स्पष्टात्मनस्तस्य स्मरणादावन्य "त्राप्रतिभासनात्, तत्रास्पष्टात्मनस्तदपरस्यैव प्रतिभासोपलम्भेः । नीलादिरुभयत्रैकरूप एव न तस्य स्पष्टत्वमस्पष्टत्वं वा, वयोर्विज्ञानधर्मत्वादिति चेत्, कथ तर्हि 'स्पष्टो नीलादिरस्पष्टो वा' इति तत्र व्यपदेशः अन्यधर्मेणान्यत्र "तदनुपपत्तेः ? स्पष्टादिज्ञानसंसर्गादिति चेत् ; ननु संसर्गोऽतद्भेद एव 'स्पष्टो नीलादिः' इत्यभेदेनैव प्रत्यवभासनात्, तथा च ज्ञानान्तर्गत एवासौ इति कथं तदपरतया व्यवस्थाप्येत ? तदेकत्वं प्राप्तस्यैव तस्मादभेदानुपपत्तेः । तथा च परस्य वचनम्—

"स्वरूपेण प्रतीतं चेत्साक्षात्करणमेव तत् ।
स्वरूपेणाप्रतीतं चेत्सर्वथास्याप्रतीयता ॥

---

१ पर—आ०,ब०,प० । २—गादेर्वार्थ—आ०,ब०,प० । ३ विषेष्यते आ०, ब०, प० । ४—दिव्यवधे—आ०, ब०,प० । ५—तदवाप्तेरपि तस्यात्मगति—आ०, ब०, प० । ६—ग स्फुटम् आ०, ब०, प० । ७ तथा प्र—आ०, ब०, प० । ८ स्पाष्ट्यविकलं तदनेनापि स्मरणेनादि परोक्षसम्बधाद—आ०, ब०, प० । ९—सनम स्पष्ट—आ०, ब०, प० । १० प्रतिभिन्न रूप—आ०,ब०,प० । ११ नीलादेः । १२—त्र प्र—आ०,ब०, प० । १३ व्यपदेशानुपपत्ते ।

स्वरूपेण प्रतीतेऽपि तदसाक्षात्कृतं यदि ।
नीलरूपस्य संवित्तेर्भेदस्तर्हि कथं भवेत् ?॥
प्रतीतिभेदाद्भेदो हि नीलादेरेकरूपता ।
भिन्नेऽन्यस्मिन्कथं भेदस्तदन्यस्य प्रमान्वितः ॥
तत्संसर्गात्तथात्वं चेदपरोऽर्थः कुतो भवेत् ?
तदेकतां प्रपन्नस्य ततो भेदः कुतो मतः ? ।" [प्र०वार्त्तिकाल० २।३२९]

ततो न ज्ञानसंसर्गान्नीलादेः स्पष्टात्मत्वम्, तस्यैव[1] बहिर्भूतस्याभावप्रसङ्गात्, अपि तु स्वत एव तस्य च प्रत्यक्षवत्स्मरणादावपि प्रतिभासने तदपि स्पष्टमेवेति न युक्तमुक्तम्–"**विपरीतं वा प्रतियन्**' इति चेत्; [2]तदिदमपि प्रज्ञापरिपाकवैकल्यमेव प्रज्ञाकरस्य ज्ञापयति–स्वरूपप्रतीत्या वैशद्यानुपपत्तेः, उपप्लुतज्ञाने तदभावप्रसङ्गात्। अस्ति च कामिन्यादिविषयस्योपप्लुतज्ञानस्यापि वैशद्यम्। न च तत्र स्वरूपपरिज्ञानं कामिन्यादीनामभावात्। ज्ञानाकारतया विद्यन्त एव त इति चेत्, न; "अभूतानपि पश्यन्ति" [3]इत्यस्य विरोधात् विद्यमानानामेवाऽभूतत्वायोगात्। "पुरतोऽवस्थितानिव" इत्यपि न युक्तम्; ज्ञानापेक्षया तदाकाराणामेव पुरतो भावानुपपत्तेः, एकत्र निष्पर्यायं भिन्नदेशत्वासम्भवात्। कल्पितस्तद्भावः[4] इति चेत्; न, "पश्यन्ति" इत्यस्यायोगात् कल्पनस्य दर्शनरूपत्वासम्भवात्। दर्शनसाहचर्यात्तदपि दर्शनमेवेति चेत्; न; तत्रापि दर्शनवद् अन्तःप्रविष्टतयैव तत्प्रतिभासप्रसङ्गात्। पुनरपि कल्पितस्य पुरतोभावस्यावस्थापने व्यवस्थावैकल्यापत्तेः। अतो दूरं गत्वापि वस्तुत एव तेषां क्वचित्पुरतो भावो वक्तव्य इति कथं ज्ञानाकारत्वम्? तद्भिन्नदेशानां तदाकारत्वानुपपत्तेः अतिप्रसङ्गादित्यसतामेव तेषां दर्शनमिति कथं तत्र वैशद्यम् ? असतां स्वरूपेण ग्रहणायोगात्। नीलादिना स्वरूपेणैव तेषामपि ग्रहणमिति चेत्; कथमिदानीं [5]नीरूपत्वमिति सति स्वरूपे तदनुपपत्तेः ? वाध्यमानत्वादिति चेत्; न; तन्नीरूपत्वे तत्प्रयुक्तस्य वैशद्यस्यापि तत्त्वप्रसङ्गात्। [6]नीरूपमेव तदपीति चेत्; न; दर्शनस्यापि तदनर्थान्तरत्वेन नीरूपत्वापत्तेः। तस्मादर्थान्तरमेव दर्शनमिति चेत्; कुतस्तर्हि तस्य वेदनम् ? स्वत एवेति चेत्; न; व्याघातात्। व्याहतं खल्विदं यत्–'नीरूपम्, स्वतश्च वेद्यते' इति व्योमकुसुमादिवत्। तत एव दर्शनादिति चेत्; न; तस्याविशदत्वे दर्शनत्वायोगात्। विशदमेव तदिति चेत्; न; विषयविषयितया वैशद्यस्य तत्रानवभासनात्। सदपि तद्वैशद्यं नीरूपमेव, तत्प्रयोजकस्य विषयवैशद्यस्य नीरूपत्वात्। भवतु नीरूपमेव तदपीति चेत्; न; तत्रापि 'दर्शनस्यापि' इत्यादेरनुगमादनवस्थानदोषोपनिपातात्। ततो न विषयस्वरूपप्रहणप्रयुक्तं वैशद्यम्, निर्विषयकामिन्यादिदर्शने तदभावानुषङ्गात्। भावनापरिपाकप्रयुक्तं तत्र[7] वैशद्यमिति चेत्;

---

१ –वावहिर्भू–आ० ब० प०। २ तदेवमपि आ०, ब०, प०। ३ –यस्योपरतज्ञा–आ०, ब०, प०। ४ "कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः। अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव।"–प्र० वार्तिकाल० २।३८२। ५ युगपत्। ६ पुरतो भावः। ७ –लादीनां स्व–आ०, ब०, प०। ८ नीलरूप–आ०, ब०, प०। ९ नीलरूप–आ०, ब०, प०। १० कामिन्यादौ।

म, सत्यपि विषये [1]तत्प्रयुक्तस्यैव [2]तस्य प्रसङ्गात्। भवत्विति चेत्[3], यत्र तर्हि सत्परिपाके नास्ति तत्र सत्यपि विषयग्रहणे न वैशद्यम्। नायं दोषः, सत्येव[4] सत्परिपाके विषयग्रहणस्यापि भावादिति चेत्, न, भाविनस्यापि विषयस्य ग्रहणप्रतीतेः। अन्यथा अनभ्यासदशाया जलादेरदर्शने जिज्ञासायात् कथमर्थक्रियानुमान यतः स्नानपानाद्यर्थिनः प्रवृत्तिर्भवेदिति न विषय स्वरूपवेदनादेव वैशद्यम्, सत्यपि तस्मिन्नन्तरङ्गमलविशेषमलीमसत्वेनावैशद्यस्यापि सम्भवात्। ५ ततो न सूक्तमिदम्-'स्वरूपेण प्रतीत चेत्' इत्यादि।

नन्वेवम् अन्तरङ्गमलविगमाविगमप्रयुक्तस्ये वैशद्येतरयोर्ज्ञानधर्मत्वमेवेति कथमस्यास्माभ्यां व्यपदिश्यते 'स्पष्टो नीलादिः अस्पष्टो वा' इति? [5]इति चेत्, न, तथाविधज्ञानविषय तयैव तथा व्यपदेशोपपत्तेर्न तादात्म्यरूपात्तत्संसर्गात्। तत इदमपि न सुभाषितम्-'तत्संसर्गात्तथात्वं चेत्' इत्यादि, तद्व्यपदेशस्य[6] तत्संसर्गाभावेऽप्युपपत्तेः। १०

पुनरपि कथं प्रतियमित्यत्राह-न्यूनाधिकतयापि वा। न्यूनतया पूर्वं गृही तस्याल्पस्यैव स्मरणात् अधिकतया तस्यैव कालाधिक्यानुस्मरणात्। अथवा पर्वतादौ गण्डशै लस्य न्यूनतया ततः पर्वतस्याधिकतया प्रतिवेदनात्।

स्यान्मतम्-विषयाकारवैकल्यमेवात्र व्यवस्थापयितुमभिप्रेतम्, तच्च 'प्रदेशादि' इत्यादिनैव प्रतिपादितम्, किमनेन 'प्रस्फुटम्' इत्यादिना 'न्यून' इत्यादिना च प्रयो- १५ जनाभावादिति? तन्न, आत्मव्यवस्थापनस्य तत्प्रयोजनत्वात्। किं पुनरात्मा [7]प्रतिरुध्यत इति? अत्र परो ब्रूयात्-'प्रमाणाभावात्' इति, तत्रेदमुत्तरम्-'प्रस्फुटम्' इत्यादि। व्यवस्थापित एव पूर्वमात्मेति चेत्, न, प्रकारान्तरेणेदानीं तद्व्यवस्थापनात्। तथा हि यद्यात्मा नाम न भवेत् कुतस्तदा प्रस्फुटेतररूपतया विज्ञानेषु न्यूनाधिकस्वभावतया च विषयेषु राशिद्वयप्रतिपत्तिः? [8]एकराशिविषयस्य ज्ञानस्य राश्यन्तरं प्रत्यनुपक्रमे तत्प्रतिपत्तेरनुपपत्तेः, प्रतियोगिपरिज्ञान- २० मन्तरेणैकराशिपरिज्ञानमात्रादेव [9]तत्प्रतिपत्तेरनुपक्रमात्। तत्र तदुपक्रमे च न सम्भवत्येवात्मप्रतिषेधः परापरविषयग्रहणोपक्रमाधिष्ठानस्य ज्ञानस्यैव आत्मत्वेन आत्मतत्त्ववेदिभिरभ्यनुज्ञानात्। न च राशिद्वयपरिज्ञानमसिद्धम्, प्रसिद्धत्वात्। प्रसिद्धिरप्येकराशिपरिज्ञानस्यैवेति चेत्, हुत एतत्? तथानुभवादिति चेत्, न, राश्यन्तरज्ञानेऽपि तदविशेषात्। तथापि तस्य प्रसिद्धत्वपक्षेऽपि तदपरस्यापि भवेदित्यभाव एव बहिरन्तश्च भावानामापद्येत। न चासौ शक्यव्य २५ वस्थापनः प्रमाणयेकस्यात्। ततोऽनुभवमात्रादेकराशिपरिज्ञानमभ्यनुजानतो[10] राश्यन्तरपरिज्ञानमभ्युपगमविषय एव। एतदर्थमेवेदमुक्तम्-'प्रतियन्' इति। तस्मादुपपन्नं राशिद्वयपरिज्ञानादात्मव्यवस्थापनं तत्प्रतिपादनार्थं 'प्रस्फुटम्' इत्यादिकं 'न्यून' इत्यादिकञ्च वचनम्।

---

१ आत्मव्यवस्थापकप्रयुक्तस्यैव। २ वैशद्यस्य। ३ चेदत्राह आ०, ब०, प०। ४ -च परि-आ०, ब०, प०। ५ -सम्भवादा-आ०, ब०, प०। ६ इति तच्च आ०, ब०, प०। ७ -स्य तेन-आ०, प०, ब०। ८ -या गृ-आ०, ब०, प०। ९ -तादव भाव न्यून-आ०, ब०, प०। १० प्रतिपिप्रते आ०, ब०, ब०। ११ एवंवि-आ०, ब०, प०। १२ तत्प्रतिपत्तेरप-आ०, ब०, प०। १३ -नुज्ञानतो आ०, ब०, प०।

साम्प्रतं **'विपरीतं वा प्रतियन्'** इत्येतत् स्मरणपर्यायेणैवं प्रत्यभिज्ञानादिना पर्यायेणापि [2]दमयन्नाह–

एतेन प्रत्यभिज्ञानाद्यतीतानुमितिर्गता ॥४५॥ इति ।

प्रत्यभिज्ञानं तदेवेदं तादृशमिदमिति वा ज्ञानम्, तदादिर्येषां तर्कानुमानश्रुतानां तानि **प्रत्यभिज्ञानादीनि** तैः **अतीतस्य** उपलक्षणमिदं वर्तमानस्यानागतस्य च **अनु** पश्चात् पूर्वपूर्वस्मादूर्ध्वमुत्तरोत्तरैः **मितिः** परिज्ञानं **गता** निश्चिता । केनेति चेत् ? **एतेन 'यदा यत्र'** इत्यादिना ।

[3]तथा हि स्मरणं यद्वदतत्कालाद्यपि स्वयम् ।
नियतग्राहि तद्वत्स्यात् प्रत्यभिज्ञाद्यपि स्फुटम् ॥७३७॥
सामर्थ्यात्तादृशात्तस्य तत्क्रियातो[4]विनिश्चयात् ।
जडचेष्टितमेवातस्तत्कालादित्वकल्पनम् ॥७३८॥

प्रतिपन्नविषयमेव प्रत्यभिज्ञानम् 'अनु' इति वचनात् । न च पूर्वापरयोरेकत्वं सादृश्यं वा कुतश्चित्प्रतिपन्नं तत्कथं तस्य प्रत्यभिज्ञानेन प्रमितिरिति चेत् ? न; प्रत्यक्षतोऽपि तत्प्रतिपत्तेः । सन्निहितस्यैव पर्यायस्य तेन[5] प्रतिपत्तिर्न पूर्वस्य तत्कथं तदेकत्वस्य तत्सादृश्यस्य वा तेन परिज्ञानमिति चेत् ? किमपेक्ष्य तस्य सन्निधानम् ? प्रत्यक्षमेवेति चेत् ; न; विषयस्य तज्ज्ञानापेक्षया समकालत्वानभ्युपगमात् **"नातोऽर्थः स्वधिया सह"** [प्र० वा० २।२४६] इति वचनात् । तदर्थजातस्याकारस्य [6]तत्समकालत्वमेव [7]तस्यापि तत्समकालत्वम्, [8]तत्परिज्ञानस्यैव विषयपरिज्ञानतयाऽभ्यनुज्ञानादिति चेत् ; अनुपकारे तदाकारस्यापि परिज्ञानं कथम् ? **"नाकारणं विषयः"** [ ] [10]इत्यस्य विरोधात् । व्यतिरिक्त एवायं विषये न्यायः, न चाकारस्य ज्ञानाव्यतिरेक इति चेत् ; कस्तर्हि तत्र न्यायो यतस्तत्परिज्ञानम् ? स्वहेतोस्तत्स्वभावतयोत्पत्तिरेवेति चेत् ; व्यतिरिक्तेऽप्ययमेव कस्मान्न भवति यतस्तत्र निष्प्रयोजनमेव हेतुभावपरिकल्पनं न भवेत् ? अहेतोरपि परिज्ञाने किन्न सर्वस्य परिज्ञानम् अहेतुत्वाविशेषादिति चेत् ? न; आकारस्याप्यहेतोरेव वेदनात्, तत्राप्येवमतिप्रसङ्गस्योपनिपातात् । स्वहेतुनिबद्धेन[11] शक्तिनियमेनाहेतुत्वेऽपि तस्यैव ततः परिज्ञानं न सर्वस्येति चेत् ; न; व्यतिरिक्तपरिज्ञानेऽप्येवमेव समाधानोपपत्तेः, व्यतिरिक्तस्यापि तादृशादेव तन्नियमात् नियतस्यैव परिज्ञानं न सर्वस्येति । शक्तितश्च विषयपरिज्ञाने कथं सन्निहितस्यैव प्रत्यक्षेण दर्शनं नातीतादेरपि तत्रापि तस्य शक्तिसम्भवात् ।

भवतु पूर्वापरयोस्तस्य[12] प्रवृत्तिस्तथापि न ततस्तत्रैकत्वं प्रतीयते, भेदस्यैवैकान्ततः

---

१ –णैव आ०, ब०, प० । २ "निवेदयन्नाह इति पाठेन भाव्यम्"–ता० टि० । प्रत्याचक्षाण आह इत्यर्थः । ३ "श्लोकार्धेनोक्तार्थं श्लोकद्वयेन विवृणोति"–ता० टि० । ४ –तोपि नि–आ०,ब०,प० । ५ पूर्वपरयो–आ०, ब०, प० । ६ प्रत्यक्षेण । ७ ज्ञानसमकालत्वमेव । ८ अर्थस्यापि । ९ आकारपरिज्ञानस्यैव । १० "नाऽहेतु–विषयः"–प्र०वार्तिकाल०३।४०४ । ११ –तुनियमेन श–आ०,ब०।–तु नियमेनाहेतु–प०।, १२ प्रत्यभिज्ञानस्य ।

प्रतिपत्तेरिति चेत्, एकसमवायात्, अनेकसमवायाद्वा ? न तावदेकसमवायात्, तत एकस्वभावादेकस्यैव पर्यायस्य परिज्ञानप्रसङ्गात्। पर्यायान्तरस्यापि तत एव परिज्ञानमिति चेत्, न, परस्वभावापत्तेः। न हि तत्पर्यायापेक्षमुख्यैकस्वभावसंवेदनवेद्यस्य तदपर्यान्तरत्वं तत्स्वरूपवदुपपन्नम्, एकस्वभावनिरन्वयनिबन्धनत्वेऽपि कार्याणामपरापरत्वस्यानिवारणप्रसङ्गात्। भवतु ततस्तस्यैकस्यैव परिज्ञानं न परस्येति चेत्, कथं तस्य [2]ततो भेदपरिज्ञानम् ? अपरिज्ञाने [5] तस्मिन् तदनुपपत्तेः। तस्य [4]तत्स्वभावत्वादपरिज्ञातेऽपि तस्मिन् भवत्येव परिज्ञानम् अन्यथा [5]तत्स्वभावत्वस्यैवाभावप्रसङ्गादिति चेत्, न, तत्स्वभावत्वस्यासिद्धत्वात्। भेदो हि पूर्वस्योत्तरस्मात्, तत्राभाव एव, सैव च [6]तदधिकरणतया पश्चादेव भवन् कथं पूर्वस्य स्वभावः स्यात् ? पूर्वस्यैव [7]तद्रूपतयाऽवस्थितिमत्त्वेनाक्षणिकत्वापत्तेः। [8]"पूर्वमेवायमभावो" न पश्चादिति चेत्, भावस्तर्हि [9]"पश्चादिति कार्यासमकालस्य कारणस्य पूर्वमेव [10]"गतं सन्तानव्यवस्थां कथम् विधुरीकुर्यात् ? कथञ्चेदमपि सुभाषितम्— [10]

"न तस्य किञ्चिदुत्पन्नं न भवत्येव केवलम्" [प्र० वा० ३।२७७] इति ?

सति [11]"पश्चाद्भावे "न भवत्येव" इति वचनानुपपत्तेः। भावोऽपि तस्य [12]पश्चादापतितः प्रागेव [13]"तत इति चेत्, पश्चात्तर्हि किं[14] स्यात् ? न किञ्चिदिति चेत्, नन्वेवममाव एवोक्तः स्यात्, तदपरस्य न [15]किञ्चिदन्यदर्थस्यामावात्। [16]"भवत्येवमिति चेत्, न, 'स च तदधिकरणतया' इत्यादेर्दोषस्यामिहितत्वात्। पुनरपि[17] धर्म्मावपरिकल्पने प्रसङ्गः 'भावस्तर्हि' इत्यादिः[18] अनवस्थादोषमन्वाकर्षन्नापद्येत। 'न [19]तस्य पश्चाद्भावो नाप्यभावः इत्यपि न युक्तम्, उभयाभावस्य न किञ्चिदन्यत्वापत्तेः [20]तस्य च पश्चाद्भावपूर्वभावयोः प्राक्प्रदोषानतिक्रमात्। तत्रापि 'न तस्य' इत्यादिवचने परस्यानवस्थादोषस्योपनिपातात् ततः [21]पश्चाद्भाव्येवाभाव[22] इति नासौ पूर्वस्य स्वभावः। यद्येवम्, अस्वभावात्ततोऽपि[23] तस्य[24] भेदो वक्तव्यः सदस्वभावत्वस्यान्यथानुपपत्तेः। [25]तस्य च यदि [26]तत्स्वभावत्वं [27]पूर्वस्यापि स्यादविशेषात्। [28]तस्यापि पश्चाद्भाव्यभावत्वेन नास्त्येव [29]तत्स्वभावत्वमिति चेत्, न, तत्रापि 'यद्येवम्' इत्यादेरनुबन्धादनवस्थानमुद्रहतश्चक्रकस्यानुषङ्गादिति चेत्; न, [30]तस्माच्छेदस्याभावान्तरनिबन्धनत्वानभ्युपगमात्, तत एवाभावाच्चदुपपत्तेः[31]। स एव ह्यभावः प्राक्तस्य [32]इतो [33]भेदनिबन्धनम्, न तदन्तरं सदप्रतिपत्तेः तत्कथमर्थं प्रसङ्गः ?

---

१ –पत्तिरि–आ०, ब०, प०। २ –तादैक–आ०, ब०, प०। ३ तत्त्वभेद–आ०, ब०, प०। ४ परभेदस्वभावत्वात्। ५ तत्स्वभावाभाव–आ०, ब०, प०। ६ उत्तरे। ७ अभावः। ८ उत्तराधिकरणतया। ९ उत्तरस्वरूपतया। १० पूर्व एव आ०, ब०, प०। ११ उत्तराधिकरणस्य पूर्वाभावः। १२ यदि उत्तर काले पूर्वाभावः नास्ति किन्तु पूर्वमेव तर्हि पूर्वस्य सद्भाव एव प्राप्त। १३ नन्वम्। तथा च कार्यकारणयोरेकस्मिन्काले कथं सन्तानव्यवस्था स्यादिति भावः। १४ पूर्वक्षणस्य। १५ पूर्वक्षणस्य। १६ उत्तरक्षणतः। १७ किञ्च स्याद आ०, ब०, प०। १८ अधिकधर्म–आ०, ब०, प०। १९ भवत्येव–आ०, ब०, प०। २० पूर्वभावस्य पूर्वधर्मान्तरकल्पने। २१ इत्यादेरन–आ०, ब०, प०। २२ पूर्वस्य। २३ तस्य प–आ०, ब०, प०। २४ पश्चाद्भाव एव–आ०, ब०, प०। २५ पूर्वाभावः। २६ पूर्वाभावोऽपि। २७ पूर्वस्य। २८ पूर्वभावस्य पूर्वभेदस्य। २९ पूर्वक्षणस्वभावत्वम्। ३० पूर्वमुत्तरस्य पूर्वाभावस्यापि। ३१ पूर्वभेदस्यापि। ३२ पूर्वक्षणस्वभावत्वम्। ३३ पूर्वाभावात् पूर्वभेदस्य। ३४ भेदोपपत्तेः। ३५ स्वस्मात्। ३६ भेदे निब–आ०।

पश्चाद्भावी [1]भाव एव [2]किन्न तन्निबन्धनं ततोऽपि[3] [4]परस्यामावस्यापरिज्ञानादिति चेत् ? उच्यते—

सर्वथाऽर्थान्तरं भावादभावश्चेन्निषिध्यते[5] ।
[6]निषिध्यतां न किञ्चिन्न क्षणं स्याद्वादवेदिनाम् ॥७३९॥
कथञ्चिद्यस्तु तद्भेदो नासौ शक्यनिषेधनः ।
प्रतीतिदयिताश्लेषलब्धस्वारस्यसुखो ह्ययम् ॥७४०॥
पश्यन्तः कलशं यस्माज्जायमानं स्वहेतुतः ।
नष्टो मृत्पिण्ड इत्येवं निश्चिन्वन्ति विपश्चितः ॥७४१॥
एकान्तभावरूपे तु कलशे नाशनिर्णयः ।
कथं तत्रोपजायेत तन्मिथ्यात्वप्रसङ्गतः ॥७४२॥
निश्चयो न च मिथ्यासौ निर्भासस्य समुद्भवात् ।
तस्माद्भावात्[7]रिक्तोऽयमभावोऽस्ति कथञ्चन[8] ॥७४३॥
स एव नाशः प्राच्यस्य [9]प्रतीत्या सुहृदोच्यते ।
कथञ्चित्तद्भेदेन नाशोक्तिस्तू[10](स्तू)त्तरोदये[11] ॥७४४॥
[12]तत्रोत्तरस्यासंवित्तौ तद्भावाभाववेदनम् ।
[13]एकस्वभावमध्यक्षं न च तद्वेदनक्षमम् ॥७४५॥
यद्यनेकस्वभावं [14]तदक्रमेणोपगम्यते ।
एकानेकस्वभावं तत्क्रमेणापि न किं मतम् ? ॥७४६॥
अनेकसमयं तच्चेन्न्यायादागतमुच्यते ।
तेन पूर्वापराभेदः सुबोधो भेदवन्न किम् ? ॥७४७॥
तदन्तर्बहिरप्येवमेकत्वेऽध्यक्षतो गते ।
निरवग्रहमेवात्र प्रत्यभिज्ञाप्रवर्त्तनम् ॥७४८॥
सादृश्ये प्रत्याभिज्ञानमेतेन प्रतिवर्णितम् ।
प्रत्यक्षादेव तस्यापि[15] ग्रहणस्योपदर्शनात् ॥७४९॥

एतदेवाह—

प्रायशोऽन्यव्यवच्छेदे प्रत्यग्रानवबोधतः । इति ।

प्रत्यग्रं च तद्वर्तमानत्वात् प्रतिनवम् **अनवं** च तदतीतत्वाच्चिरतनं तस्य **बोधः** [16]परिज्ञानं प्रत्यभिज्ञानादेः स **प्रत्यग्रानवबोधः** तस्मात्तत इति । उपलक्षणमेतत्—'सदृशबोधतः'

---

१ उत्तरक्षण एव । २ किं तन्निय—आ०, ब०, प० । ३ उत्तरक्षणात् । ४ भिन्नस्य । ५ निषेध्यते आ०, ब०, प० । ६ निषेध्यताम् आ०, ब०, प० । ७ —तिरेकोऽयम—आ०, ब०, प० । ८ नः आ०, ब०, प० । ९ प्रतीच्या आ०,ब०,प० । १० —सूत्तरोध—आ०, ब०, प० । ११ —क्तिस्तू···त्तु०···ता० । १२ तत्रोत्तर—प० । १३ अध्यक्षम् । १४ —पि प्रत्यग्रस्योप—आ० , ब०, प० । १५ परिज्ञानं प्रत्यभिज्ञानं प्रत्यभि—आ०, ब० ।

इत्यपि द्रष्टव्यम्। इदमभिहितं भवति–अतत्कालादित एव प्रत्यभिज्ञादेर्यत्र एकत्वसादृश्यपरिज्ञानं भावेषु प्रतीयते तत्र 'एतेन' इत्याद्युपपन्नमिति।

कथमेवं प्रत्यभिज्ञादेः प्रामाण्यं[1] प्रत्यक्षप्रतिपन्नविषयत्वेनापूर्वार्थत्वाभावात्, अपूर्वार्थत्वञ्च भवतां प्रमाणम् "प्रमाणमनधिगतार्थाधिगमज्ञानम्" [ ] इति [2]वचनादिति चेत्? अत्राह–अन्यव्यवच्छेदे इति। अन्यस्मात् एकत्वादैकान्तिक नानात्वं सादृश्याच्च वैलक्षण्यमभ्यारोपितं तस्य व्यवच्छेदो निरासस्तस्मिन्, तन्निमित्त यः प्रत्यभिज्ञानादेः प्रत्यक्षानवबोधस्तत इति। एतदुक्तं भवति–प्रत्यक्षप्रतिपन्नस्यापि समारोपव्यवच्छेदविशिष्टतया प्रत्यभिज्ञानादिना प्रतिपत्तेः कथञ्चिदपूर्वार्थमेव तत् ततश्च प्रमाणमनुमानवदिति। तथा च सूक्तं चूर्णौ देवस्य वचनम्–

"समारोपव्यवच्छेदात् प्रमाणमनुमानवत्।
स्मृत्यादितर्कपर्यन्त लिङ्गिज्ञाननिबन्धनम्॥" [ ] इति।

कथमेवं प्रत्यक्षविषये सर्वत्रापि न प्रत्यभिज्ञादिकं यतः [3]प्रथमदृष्टादेरप्रत्यभिज्ञानात्कस्यचिदनुवादभङ्गो भवेदिति चेत्? न, स्मर्यमाण एव तत्र [4]तदुपपत्तेः। न च स्मरणस्यापि तत्र सर्वत्रापि भावः, संस्कारगोचर एव तस्य भावात् तथैव प्रतिपत्तेः। एतदेवाह–'प्रायशः' इति। प्रायशो बाहुल्येन यः प्रत्यभिज्ञादेः प्रत्यक्षानवबोधस्तत इति। यावत् नित्येतरात्मकं वस्तु सादृश्येतरात्मकं चाभ्युपेयते तावत्तद्विपरीतमेव कुतो नाभ्युपेयत इति चेत्? अत्राह–

अविज्ञाततथाभावस्याभ्युपायविरोधतः ॥४७॥ इति।

अविज्ञातः अपरिज्ञातः तथा तेन परोक्षेनैकान्तक्षणक्षयादिप्रकारेण भावः सत्ता यस्य चेतनस्येतरस्य वा तस्य योऽभ्युपाय अङ्गीकारः तस्य विरोधतो बाधनादतिप्रसङ्गेनेति भावः। तथा हि–

एकान्तक्षणभङ्गादि यद्यतत्त्वमुपेयते।
तदद्वैकान्तनित्यत्वाप्युपेयं किन्न ते मतम् ॥७५०॥
सर्वप्रवादिनामेवमभिप्रेतव्यवस्थितेः।
परोक्षयः क सम्भाव्यस्तदभावे जयोऽपि वा ॥७५१॥
तस्माभ्युपगमस्तस्माज्ज्ञातस्यैवोपपत्तिमान्।
न च तस्य परिज्ञानमिति पूर्वं निवेदितम् ॥७५२॥

[5]. तदेमे 'यथैवात्मायम्' इत्यादयोऽन्तरश्लोकाः 'प्रकाशनियमः' इत्यादेर्तैर्व्याख्यानात्।

स्यान्मतम्–[6]यदुक्तम् असत्येव केशादिः तैमिरिकस्य प्रतिभासते भ्रान्तेरपि पत्येन इति,

---

१ –र्थं प्रमाण्यम्–आ०, ब०, प०। २ "प्रमाणमविसंवादिज्ञानमनधिगतार्थाधिगमलक्षणत्वात्"–अष्टस०, अष्टसह० पृ०१०५। ३ प्रथमदृष्टादे–आ०,ब०,प०। ४ अनुवादभङ्गोपपत्तेः। ५ तदु–आ०,ब०,प०।

तदयुक्तम् ; असतः प्रतिभासेऽतिप्रसङ्गात् , व्योमकुसुमादेरपि तदापत्तेः । [1]अतो वस्तुसन्नेव [2]तत्केशादि [:] स्वप्नविषयश्चेति ; तन्न ; शक्तिवैकल्यात् । यदि वस्तुसन्नेव स्वप्नादिविषयः, कथं तस्य शक्तिवैकल्यम् ? वस्तुसति तदयोगात् । न चायं शक्तिमानेव तत्कार्यादर्शनात् । 'न हि स्वप्नोपलब्धादहनादेर्दाहादिकार्यम् । तदपि कदाचिदुपलभ्यत एवेति चेत् ; न ; तस्याप्यसत एव भ्रान्तिसामर्थ्येनोपलम्भात् , कथमन्यथा तदादरधनया दृष्टस्यैव पश्चादन्यथोपलम्भनम् ? न चेदमन्यदेव, दृढप्रत्यभिज्ञानविषयत्वात्। असत्यपि कार्ये शक्तिमानेवायम्, अलौकिकत्वात् । लौकिकस्यैवायं धर्मो यच्छक्तिमत्त्वेऽवश्यम्भाविकार्यदर्शनमिति चेत् ; तन्न ; असति कार्ये शक्तिमत्त्वस्यैव दुरुपपादत्वात्, तदुपपादनस्य [7]कार्योपाध्यायत्वात्। तज्ज्ञानमेव तस्य[8] कार्यम्, अकारणस्याविषयत्वात् ततस्तत्र एव तदुपपादनमिति चेत् ; न; स्वर्गचैत्यवन्दनाधिष्ठानस्य[9] साध्यसाधनभावस्यापि तत्र एव तदुपपादनापत्तेः । भवतु को दोष इति चेत्? चैत्यवन्दनादेरपि धर्मत्वमेवेति ब्रूमः । तथा च न युक्तमेतत्–"धर्मे चोदनैव प्रमाणम्" [ ] इति[10] प्रत्यागमस्यापि तत्र प्रामाण्यात् । अथ तज्ज्ञानं[11] "तदागमादेव केवलान्न [12]तद्विषयात् कथमिदानीं तस्य[13] शक्तिमत्त्वम् ? [14]कार्यलेशमप्यनुपजनयतस्तदनुपपत्तेः । तदपि मा भूदिति चेत् ; सिद्धं तर्हि [15]तस्यावस्तुसत एव प्रतिभासनम् , सकलशक्तिविरहस्यैव तद्रूपत्वात् , तथा स्वप्नादिविषयस्यापि स्यादविशेषात् ।

यदि चायं विप्लवविषयो भावो [16]भाविक एव कथं तस्येच्छानुवर्तनम् अन्यत्र [17]तादृशे तददर्शनात् । अस्ति चेच्छानुवर्तनं विप्लवविषयस्य कामिन्यादेरिच्छया पुरतः पार्श्वतश्चोपलम्भात् । अनियतदेशगतत्वात तथा [18]तस्योपलम्भो नेच्छात इति चेत् ; न; [19]अन्यस्यापि तदुपलम्भप्रसङ्गात् । सामग्रीवैकल्यान्नैवमिति[20] चेत् ; सति चक्षुरादौ कथं [21]तद्वैकल्यम् ? विप्लवापेक्षमेव [22]तदपि सामग्री न केवलमिति चेत् ; न ; वस्तुसति [23]विषये विप्लवस्यानुपयोगात्[24], अन्यथा अन्यत्रापि तदपेक्षणप्रसङ्गात् । वस्तुसत्यपि अलौकिक एव [25]तदपेक्षणं नान्यत्रेति चेत्; कथमेवं तस्य विप्लवत्वं वस्तुसद्विषयोपलब्धिनिबन्धनस्य [26]तत्त्वायोगात् अतिप्रसङ्गात् । अनिष्टत्वात [27]तद्विषयस्येति चेत् ; न; विषादिविषयस्य चक्षुरादेरपि [28]तत्त्वापत्तेः । न चानिष्ट एव [29]तस्य विषयः कामिन्यादेरिष्टस्यापि तद्विषयत्वात् । अर्थक्रियाविरहादनिष्ट एवायमपीति[30] चेत्; न; तदर्शनस्यैवार्थिनस्तदर्थक्रियात्वात्, [31]गेयस्य श्रवणवत् । न हि गेयस्य श्रवणादन्यदेव फलम् ,

---

१ ततो आ० ,ब०, प० । २ तैमिरिककेशादिः । ३ –दा तद्वतयाह–आ०, ब०, प० । स्वप्ने । ४ कार्यम उपाध्यायः ज्ञापको यस्य । ५ शक्तिमत्त्वस्य । ६ शक्तिमत्त्वज्ञानादेव । ७–नस्य साधन–आ०, ब०, प० । ८ चैत्यवन्दनज्ञानादेव चैत्यवन्दननिष्टस्वर्गप्रापणशक्तिमत्त्वस्य उपपादनापत्तेः । ९ "तस्मात् चोदनैव प्रमाणं धर्मस्य इति स्थितः प्रतिज्ञार्थः ।"–बृह० १।१।७ । १० चैत्यवन्दननिष्ठस्वर्गप्रापणशक्तिज्ञानम् । ११ बौद्धागमादेव । १२ चैत्यवन्दनाख्यविषयात् । १३ चैत्यवन्दनस्य । १४ कार्ये लेश–आ०,ब०,प० । १५ चैत्यवन्दनस्य । १६ भावि क– आ०, ब०, प० । परमार्थसन्नेव । १७ परमार्थसद्वस्तुनि । १८ विप्लवविषयस्य । १९ "प्रतिपत्तुः" ता० टि० २० –कल्यात्मैवमिति आ०, ब०, प० । २१ सामग्रीवैकल्यम् । २२ चक्षुरादयपि । २३ विषयविद्ध–आ०, ब० प० । २४ –गादन्यत्रापि–आ०, ब०, प० । २५ विप्लवापेक्षणम् । २६ विप्लवत्वायोगात् । २७ विप्लवविषयस्य २८ विप्लवत्वापत्तेः । २९ विप्लवस्य । ३० कामिन्यादिरपि । ३१ गेयश्रवण–आ०, ब०, । गेयश्च श्रवण प० ।

तस्यैव प्रीतिरूपस्य तत्फलत्वेन प्रसिद्धत्वात्, तद्वत्कामिन्यादेरपि तद्दर्शनस्यैव [1]प्रीतिरूपस्य फलत्वोपपत्तेः नार्थक्रियाविरहादनिष्टत्वमुपपन्नम्। तथा च कस्यचिद्वचनम्-

"ज्ञेयस्वरूपसंविन्निरेव तत्र क्रिया मता।
चित्रेऽपि [2]दृष्टिमात्रेण फलं परिसमाप्तिवत्॥ [प्र० वार्तिकाल० १।१] इति।

तदपि [3]दर्शनं न कामिन्यादेः अपि त्विन्द्रियादेरेवेति चेत्, कथमतत्कार्यस्य [4]तद्विषयत्वम्? स्वशक्तित इति चेत्, न, असद्विषयत्वस्यापि प्रसङ्गात्, तत्कर्यं कामिन्यादेरलौकिकत्वेन सत्त्वम्? तन्निर्वन्धे वा तत्कार्यमेव तद्दर्शनमिति कथमर्थक्रियाविरहात्तस्यानिष्टत्वम्, यतस्तदुपलब्धिहेतोः [5]काचोन्मादादेर्विप्लवत्वम्? अविप्लवत्वे च कर्थं [6]तदपनयने लोकस्य प्रयासश्चक्षुरुपपादनवत्? ततो न वस्तुसद्दर्शने विप्लवापेक्षणं विप्लवस्यैव तत्रानुपपत्तेः। अतश्चक्षुरादिरेव तत्र सामग्रीति तत्सामग्रीतः परस्यापि समानदेशकालस्य तद्विपरीतस्य च तद्दर्शनं भवेत्, अनियतदेशादेरर्थस्य नियतप्रतिपत्तृवेद्यत्वाप्रतिवेदनात्। ततो न स्वत एव तस्यानियतदेशादित्वम्, अपि त्विच्छानुवर्तनादेव, इच्छयैव तद्भावनालक्षणया परिस्फुरः कामिन्यादेरुपलम्भात्। अतो न तस्य[7] पारमार्थिकं बहिरर्थत्वम्।

एतदेवाह-

अभिन्नदेशकालानामन्येषामप्यगोचराः।
विप्लुताक्षमनस्कारविषयाः किं बहिः स्थिताः॥४७॥ इति।

किं नैव बहिः स्थिताः? के? विप्लुताक्षमनस्कारविषयाः। विप्लुताक्षविषयाः केशादयः विप्लुतमनस्कारविषयाः कामिन्यादयः। कीदृशास्ते न बहिः स्थिताः? *अभिन्नदेशकालानाम्* विप्लुतेन सहाभिन्नौ समानौ देशकालौ येषां तेषाम्, इदं कामिन्यादीनां नियतदेशादित्वापेक्षयोक्तम्, *अन्येषामपि* भिन्नदेशकालानामपि, एतदनियतदेशत्वापेक्षया प्रति पादितम्। *तेषामगोचरा* अविषयाः इति। तात्पर्यमत्र-यदि परमार्थसन्तोऽपि नियतदेशादयस्तदा तेन विप्लुतेन अभिन्नदेशकालानां विषया एव भवेयुः। अनियतदेशादयः पुनरन्येषामपि, तयैव परत्र परमार्थसति दर्शनात्। न चैवम्, अतो न ते बहिर्विघ्नन्त इति।

तदनेन [8]"स्वप्नान्तिकशरीरं वस्तुसत्" इति प्रत्युक्तम्, वस्तुत्वे तस्य यथा तेनान्येषां दर्शनं तथाऽन्यैरप्यभिन्नदेशकालैस्तस्य[9] दर्शनं भवेत्, अस्वप्नान्तिकशरीरवत्, अन्यथा [10]"तस्यापि परैरग्रहणापत्तेः कर्थं सन्तानान्तरव्यवस्थापन यत्न इव सूक्तं भवेत्-

"बुद्धिपूर्वां क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्ग्रहात्।" [सन्ताना० श्लो० १]

---

१ प्रतीतिरूपतस्य आ०,ब०। २ दृष्ट्या-आ०,ब०,प०। ३ दर्शनं तु का-आ०,ब०,प०। ४ कामिन्याद्यर्थस्य। ५ कामिन्यादिविषयत्वम्। ६ -विरहार्थस्य आ०,ब०,प०। ७ काचोन्मादादे-आ०,ब०,प०। ८ काचापनयने। ९ कामिन्यादेः। १० स्वप्नान्तिक-आ०,ब०,प०। "यथा स्वप्नान्तिकः कायः प्रासत्प्रत्यक्षधामनीः। आप्तेहविकाधस्य तथा जन्मान्तरेष्वपि"-प्र०वार्तिकाल० १।१६। ११ स्वप्नान्तिकशरीरस्य। १२ आप्तस्यशरीरस्यापि।

इत्यादि[1] ।

न तत्रापि परमार्थतः परस्परतो दर्शनम्, व्यवहारमात्रेण तु तदभ्यनुज्ञानमिति चेत्; तस्य स्वप्नान्तिकेऽपि भावात्। अस्ति हि तत्राप्येवं व्यवहारः 'परमहं पश्यामि परोऽपि माम्' इति। तथा च सुप्तोत्थितो यथा परं कथयति 'मया त्वं स्वप्ने दृष्टः' इति तथा परोऽपि ब्रूयात् 'मयापि त्वं दृष्टः' इति। व्यवहारप्रसिद्धमपि तत्र[3] परस्परदर्शनं मिथ्येवेति चेत्; तच्छरीरदर्शनमपि तथा स्यादविशेषात्।

किञ्च तच्छरीरस्योपादानम्? अनुपादानस्य वस्तुसत्तानुपपत्तेः, अन्यथा[4] आदिजन्मनोऽपि[5] तथैव तदापत्तेर्न परलोकसिद्धिर्भवेत्। भवतु स्वप्नान्तिकमेव परं तस्योपादानमिति चेत्; तर्हि सन्तानान्तरमेव तदिति कथं तस्य ताडनादौ सुप्तशरीरस्योत्त्रासनादिकम्? न ह्यन्यस्य[7] वटकभक्षणे परस्य पिपासया मरणमुपलब्धम्। सुप्तशरीरमेव तस्योपादानमिति चेत्[8]; [9]तत्तर्हि निःसन्तानं भवेत्, एकस्य सन्तानद्वयोपादानत्वानुपपत्तेः। तदुपपत्तौ वा यथा ततः[10] स्वप्नान्तिके बुद्धीन्द्रियादेः सन्तननं तथोत्तरसुप्तशरीरेऽपीति कथं तस्य सुप्तत्वम् [11]बुद्धयमानत्वात् स्वप्नान्तिकवत्। कथञ्चैवं मात्रादिशरीरमेवापत्यसन्तानस्य स्वसन्तानस्य[12] चोपादानं न भवेद्यतः परलोकसिद्धिरिति दुस्तरोऽयं दोषापातः। तन्न तस्य[13] परमार्थसत्त्वम्, अर्थरूपतया च तत्सत्त्वे कथं निश्छिद्रपिहितेऽपि गर्भगृहादौ तस्य प्रवेशः तदन्यत्र [14]तददर्शनात्। [15]अप्रतिघत्वेनान्यविलक्षणत्वात्तस्येति चेत्; न; अलौकिकार्थवादप्रत्युज्जीवनापत्तेः, अलौकिकस्यैव अप्रतिघ इति नामान्तरप्रतिपादनात्, ततो विजयी मीमांसकः स्यान्न ताथागतः। बोधरूपतया तु तस्य परमार्थत्वमाकारवादप्रतिक्षेपादेव प्रतिक्षिप्तमिति न पुनः प्रतिक्षिप्यते। ततो न बहिरर्थतया स्वप्नान्तिकस्य कामिन्यादेर्वा सत्त्वं बहिरवस्थितस्य नानाप्रतिपत्तृसाधारणत्वप्रसङ्गात्।

नायं दोषः, [16]तस्यान्तर्देहवृत्तित्वादिति चेत्; इदमेवोल्लिख्य [17]परिहरन्नाह—

अन्तःशरीरवृत्तेश्चेददोषोऽयं न तादृशः।
तत्रैव ग्रहणात्किं वा रचितोऽयं शिलाप्लवः ॥४८॥ इति।

शरीरस्यान्तः **अन्तःशरीरम्**, अन्तःशब्दस्य "पारे मध्येऽन्तः" [शाकटा० २।१।९] इति सूत्रत्वात् पूर्वनिपातः। तत्र वृत्तिर्वर्त्तनं कामिन्यादेस्तस्याः **चेत्** यदि **अदोषो** दोषो न भवति **अयम्** 'अभिन्नदेशकालानाम्' इत्यादिः। तत्रोत्तरमाह—**न** इति। नास्त्यन्तःशरीरवृत्तिः। अत्रोपपत्तिमाह—**तादृशः** कामिन्यादिप्रकारस्य **तत्रैव** बहिरेव, बहिरित्यस्य प्रस्तुतत्वात्, **ग्रहणात्** परिज्ञानात्। न ह्यन्तःशरीरवृत्तौ बहिर्ग्रहणमुपपन्नमिति

---

१ "मन्यते बुद्धिसद्भावं सा न येषु न तेषु धाः।" इत्युत्तरार्धम्। —सिद्धिवि० द्वि० परि०। उद्धृतमिदम्—राजवा० पृ० १९। २ जाग्रच्छरीरे। ३ स्वप्नान्तिके। ४ —थाद्विजन्म—आ०, ब०, प०। ५ अनुपादानत्वेन। ६ वस्तुसत्तापत्तेः। ७ 'दहीबड़ा' इति भाषायाम्। ८ —त्कस्तर्हि आ०, ब०, प०। ९ सुप्तशरीरम्। १० सुप्तस्य कामिन्यादेर्वा शरीरात्। ११ बुध्यायमानत्वात् आ०, ब०, प०। १२ सस्तानस्य आ०, ब०, प०। १३ स्वप्नान्तिकशरीरस्य। १४ तद्दर्श—आ० ब० प०। १५ प्रतिघातरहितत्वेन। १६ स्वप्नान्तिकस्य कामिन्यादेर्वा। १७ परिहरन्नाह आ० ब० प०।

भावः । विभ्रमत्वादन्तःशरीरवर्त्तिनोऽपि बहिर्भावेन ग्रहणमविरुद्धमिति चेदाह–किं वा किमिव, रचितो निर्मितः अयं परेणोच्यमानः शिलापुत्रकः अभद्रेयतया शिलापुत्रसमानत्वाच्छिलापुत्र इति । शरीरान्तर्वर्त्तिनो बहिः प्रतिभास उच्यते । एतदुक्तं भवति–यथा शिलायां निमज्जनमेव अद्रेर्यं गुरुत्वान्न प्लवनं लघुत्वाभावात् तथा कामिन्यादेरन्तरेव प्रतिभासनं अद्रेयम् अन्तर्भवनस्य तत्र भावात्, न बहिः बहिर्भवनस्याभावात् । असत्यपि बहिर्भवन भ्रान्तिबलात्प्रतिभासत इति चेत्, कथमेवं कामिन्यादिरेव असन्न प्रतिभासेत भ्रान्तिबलस्य सम्भवात् ? बाध्यमानतया बहिर्भावासत्त्ववत् तदसत्त्वस्यापि परिज्ञानात् । तस्मादसन्नेव कामिन्यादिर्नीलौकिकोऽर्थो नापि ज्ञानाकार इति ।

स्यान्मतम्–भ्रान्तमपि ज्ञान न कामिन्यादेर्व्यतिरिक्तमस्ति तद्प्रतिवेदनात्, तत्कथं तदुल्लसदसत एव तस्य परिज्ञानमिति ? बहिर्भावस्य कथम् ? मा भूदिति चेत्, न; दृष्टत्वात् । दृष्टं हि बहिर्भावस्य परिज्ञानम्, 'बहिरयं कामिन्यादिः' इति । न च दृष्टस्यापह्नवः कामिन्यादिज्ञानेऽपि प्रसङ्गात् ।

ननु न ज्ञानादेव तस्य बहिर्भावो न च तस्य तस्माद्व्यतिरेकः तदप्रतिवेदनात् । न बाह्यव्यतिरिक्तदेव बहिर्भावो विरोधादिति चेत्, न, कामिन्यादेर्ज्ञानमिति व्यतिरेकस्यापि परिज्ञानात् । मिथ्यैव तत्परिज्ञानं 'शिलापुत्रकस्य शरीरम्' इत्यादिवदिति चेत्, कुतस्तस्य मिथ्यात्वम् ? तद्विषयस्य व्यतिरेकस्यासत्त्वादिति चेत्, किं पुनरसतोऽपि प्रतिभासनम् ? तथा चेत् किम कामिन्यादेरेवासतः प्रतिभासनं यैतस्य ज्ञानाकारत्वकल्पनम् । ततो वस्तुसन्नेव कामिन्यादेस्तज्ज्ञानाद्व्यतिरेक इति बहिरेवासौ न तदाकारः । बहिरपि न सन्नेव बाधावत्त्वात् । ततो यदुक्तम्–

> "आत्मा स तस्यानुभवः स च नान्यस्य कस्यचित् ।
> प्रत्यक्षप्रतिवेद्यत्वमपि तस्य तदात्मना ।" [प्र०वा० २।३२६] इति,

तत्प्रतिविहितम्, तदनुभवस्य तदर्थान्तरत्वेन 'आत्मा' इत्यादेरयोगात्, अर्थान्तरस्यैवानुभवस्यासौ वेद्यतया "सम्बन्धी इति 'स च' इत्यादेरसम्भवात् । प्रत्यक्षप्रतिवेद्यत्वमपि तस्यार्थान्तरवेद्यानुभवान्न पुनः स्वयमनुभवात्मत्वादिति 'प्रत्यक्ष' इत्यादेरप्यनुपपत्तेः । यदप्युक्तम्–

> "नीलादिरूपस्तस्यासौ स्वभावोऽनुभवश्च सः ।
> नीलाद्यनुभवः स्यातः स्वभावानुभवोऽपि सन् ॥"[प्र०वा० २।३२८] इति,

तदपि न सुभाषितम्, नीलादेरपि कामिन्यादिवदवभासाकारेणैव ज्ञानेन परिज्ञानात्, तस्य

---

१ कामिन्यादेरेव आ०, ब०, प० । २ कामिन्यादयस्यापि । ३ भ्रान्तिबलात् । ४ कामिन्यादे । ५ एवं बहि–आ०, ब०, प० । ६ कामिन्यादेः । ७ मेवदस्यापि । ८ यतस्य आ०, ब०, प० । ९ ज्ञानाकार । १० –न्तरस्यैवानुभव–आ०, ब०, प० । ११ सम्बन्धीति सम्बेदित्या–आ०, ब०, प० ।

तत्स्वभावत्वानुपपत्तेः । कथमतदाकारेण तद्ग्रहणम् ? प्रतिबन्धाभावेन सर्वग्रहणप्रसङ्गादिति चेत् ; न; प्रतिबन्धस्य शक्तिनियमलक्षणस्य प्रतिपादितत्वात् , कथमन्यथा विप्लुताकारग्रहणम् ? न हि तत्र तादात्म्यम् , विप्लुतेनाऽविप्लुतस्य तदयोगात् । नापि तस्मादुत्पत्तिः, तस्याशक्तत्वात् समकालत्वाच्च । ततः शक्तिनियमादेव तत्परिज्ञानम्, तद्वन्नीलादेरपि इति । न च विप्लुताकारज्ञानं नास्त्येव; स्वयमेव तदभ्युपगमात् । अत एवोक्तम्—

"अवेद्यवेदकाकारा यथा भ्रान्तिर्निरीक्ष्यते ।
विभक्तकलक्षणग्राह्यग्राहकाकारविप्लवा ॥" [प्र०वा० २।३३०] इति ।

यतोऽपि ग्राह्यादिभेदविफलवन्नि (विप्लववन्नि) रीक्षणं ततोऽपि न वस्तुतस्तन्निरीक्षणम् ; स्वरूपमात्रविषयत्वात् । अन्येन तु तद्विषयत्वं तत्रोपकल्प्यत इति चेत् ; सिद्धं तर्हि तदन्यस्य तद्विषयत्वम् अतद्विषयेण तदुपकल्पनायोगात् । तत्राप्यन्यतस्तदुपकल्पनायामनवस्थानदोषात् । ततो दूरं प्रपलायितेनापि स्वत एव कुतश्चित् तद्विप्लवस्य परिज्ञानमभ्युपगन्तव्यम् , तद्बहिर्भूतस्यैव तच्छक्तिनियमादिति च ।

ततो यदुक्तम्—

"संवेदनेन वाह्यत्वमतोऽर्थस्य न सिद्ध्यति ।
संवेदनाद्बहिर्भावे स एव तु न सिद्ध्यति ॥
यदि संवेद्यते नीलं कथं वाह्यं तदुच्यते ? ।
न चेत्संवेद्यते नीलं कथं वाह्यं तदुच्यते ? ॥"[प्र० वार्तिकाल० ३।३३१] इति;

तत्प्रतिक्षिप्तम् ; विप्लवेऽपि समानत्वात् । तथा हि—

संवेदनेन वाह्यत्वं विप्लवस्य न सिद्ध्यति ।
संवेदनाद्बहिर्भावे स एव तु न सिद्ध्यति ॥ ७५३ ॥
विप्लवो यदि वेद्येत कथं वाह्यः स उच्यते ।
विप्लवश्चेन्न वेद्येत कथं वाह्यः स उच्यते ॥ ७५४ ॥ इति ।

ततो यदि सत्यपि वेदने विप्लवस्य वाह्यत्वमविरुद्धं नीलादेरपि स्यादविशेषात् । यद्येवं नीलादिज्ञानमपि वितथाव्भासं ज्ञानत्वात् कामिन्यादिज्ञानवदिति चेत्; कथं पुनः साधर्म्यमात्रस्य गमकत्वम् , तत्पुत्रत्वादावपि प्रसङ्गात् । विपक्षेऽपि भावान्नैवं चेत् ; ज्ञानत्वस्य विपक्षव्यावृत्तिः कुतोऽवगता ? अनुपलम्भादिति चेत् ; न ; तस्तदवगमायोगात् , वक्तृत्वादावपि तत एव तदवगमप्रसङ्गात् । न हि तस्यापि विपक्षे सर्वज्ञादावुपलम्भोऽस्ति । तथा च 'सुगतो न सर्वज्ञो वीतरागो वा वक्तृत्वादे रथ्यापुरुषवत्; इत्यस्यापि गमकत्वं भवेत् । अनुपलम्भेऽपि विरोधाभावात्सन्दिग्धैव तस्य विपक्षेव्यावृत्तिरिति चेत्; किं पुनर्ज्ञानत्वस्य विपक्षेण विरोधः ? तथा चेत् ; कोऽसौ

---

१ विप्लुतपरिज्ञानम् । २ –भेदफल–आ०,ब०,प० । ३ अनुपलम्भात् । ४–तदपगमा–ता० । विपक्षव्यावृत्तिज्ञानाभावात् । ५ तदपगमप्र–ता० । ६ वक्तृत्वस्य । ७ विपक्षविरोधाभावात् । ८ वक्तृत्वस्य । ९ –आव्यावृ–ता० ।

विपक्षः ? वितथावभासनिमृत्तिमात्रमिति चेत्, न, तस्य तुच्छेत्याप्रतिपत्तेः। अवितथावभासित्वमिति चेत्, तदपि यदि वस्तुसदेव कथं तेन तस्य विरोधः ? न ह्यज्ञानस्य तदवभासित्वमुपपन्नम्, [ज्ञान] कल्पनावैफल्यापत्तेः। असदेव कल्पनारोपितत्वादिति चेत्, तेनापि कस्तस्य विरोधः ? सहानवस्थानमिति चेत्, न, सहैव तदवस्थानात्। सत्येव तज्ज्ञाने तत्कल्पनस्योपपत्तेः, निरधिष्ठानस्य तस्यायोगात्। परस्परपरिहार इति चेत्, न, ज्ञानत्वस्याज्ञानत्वेनैव तैर्व्याप्तात् न सम्यगवभासित्वेन। तद्विरुद्धव्याप्तत्वात्तेनापि तस्य तद्व्याप्तिः, सम्यगवभासित्वविरुद्धं हि मिथ्यावभासित्वं तस्य परिहारेणावस्थानात्, तेन च व्याप्तं ज्ञानत्वम्, अतस्तस्यापि नैतद्व्याप्त इति चेत्, कुतस्तस्य तद्व्याप्तत्वम् ? तद्विपर्ययविरोधादिति चेत्, न, परस्पराश्रयात्—तद्विपर्ययविरोधात्तस्य तद्व्याप्तत्वम्, ततश्च तद्विपर्ययविरोध इति। कामिन्यादिज्ञानेषु सत्येव तस्मिन् तस्य दर्शनात्तद्व्याप्तत्वनिश्चय इति चेत्, न रथ्यापुरुषादौ सत्येव किञ्चिज्ज्ञत्वादौ वक्तृत्वादेरपि दर्शनात् तस्यापि तद्व्याप्तत्वनिश्चयापत्तेः। अतस्तस्यापि विरोधबलादेव विपक्षव्यावृत्तिसम्भवात्कथं सन्दिग्धविपक्षव्यावृत्तिकत्वं यन्न गमकस्य भवेत्। तथा चासङ्गतमेतद्—

"उक्त्यादेर्दोषसङ्क्षयः।
नेत्युक्ते व्यतिरेकोऽस्य सन्दिग्धो व्यभिचार्यतः॥" [प्र० वा १।१४४] इति।

विरोधबलादेव विपक्षव्यावृत्तिनिर्णये तत्र सन्देहानुपपत्तेरव्यभिचारित्वस्यैव सम्भवात्। ज्ञानप्रकर्षतारतम्येऽपि वक्तृत्वादेरपकर्षतारतम्यानवलोकनात्। अत्यन्तप्रकर्षप्राप्तेऽपि ज्ञाने तत्सम्भावनाद्विरोध एव तेन तस्य तदयमदोष इति चेत्; न तर्हि सत्येव तस्मिन् तद्दर्शनाद्व्याप्तत्वनिर्णयः, सत्येव किञ्चिज्ज्ञत्वादौ दृष्टस्यापि वक्तृत्वादेस्तद्विपक्षेऽपि सम्भावनात्। तथा च कथं ज्ञानत्वस्यापि वितथावभासित्वेन व्याप्तिर्यतस्तद्बलात्तद्विपर्ययेण तस्य विरोधः स्यादिति तदवस्थं तस्यापि सन्दिग्धविपक्षव्यावृत्तिकत्वेनागमकत्वम्।

नन्वत्र सम्यगवभासित्वमेव विपक्षः, तच्च न ज्ञायते किमिदमवभासस्य सम्यक्त्वमिति ? वस्तुसद्विषयत्वमिति चेत्, विषयस्यापि कुतो वस्तुसत्त्वम् ? न प्रतिभासनात्, तस्यावस्तुसत्यपि कामिन्यादौ भावात्। बाधविरहविशिष्टादिति चेत्, तद्विशिष्टस्यैव कुतोऽवगमः ? बाधानुपजननादिति चेत्, न, तदनुपजननस्योत्पत्तिसमये कामिन्यादिज्ञानेऽपि भावात्। पश्चादपि भाविनः ततस्तदवगम इति चेत्, न, कामिन्यादिज्ञानेऽपि पश्चादपि तत्सम्भवात्। न सर्वदा पश्चात्तत्र तत्सम्भव इति चेत्, न, नीलादिज्ञानेऽपि समानत्वात्। न हि तत्रापि सर्वदा पश्चात्तत्सम्भवः, चिरकालानुपजातबाधस्यापि पुनः कुतश्चिद्बाधोपदर्शनात् शास्त्रार्थविपर्ययज्ञानवत्।

१—स्यातिपत्तितो वि—आ०, ब०, प०। २ अवितथावभासित्वेन। ३ ज्ञानत्वस्य। ४ यदि अवितथावभासित्वमप्यदोष। ५—न ह्यसौ आ०, ब०, प०। ६—नीरूप—आ०, ब०, प०। ७ परस्परपरिहारसम्भावात्। ८ सम्यगवभासित्वेनापि। ९ ज्ञानत्वस्य। १० परस्परपरिहारलक्षणो विरोधः। ११ ज्ञानत्वस्य। १२ मिथ्यावभासव्याप्तत्वम्। १३ मिथ्यावभासित्वे। १४ ज्ञानत्वस्य। १५ असर्वज्ञत्वव्याप्तत्व। १६ वक्तृत्वादेरपि। १७ —मि दिग्ध—आ०, ब०, प०। १८ सर्वज्ञरूपविपक्षेण। १९ वक्तृत्वादेः। २० अवितथावभासित्वेन। २१ ज्ञानत्वस्य। २२ बाधानुपजननात्पश्चिमज्ञानवत्। २३ बाधानुपजननसम्भवः।

स्य सामान्यान्वयप्रतिरूपकस्य प्रथमान्तस्य भावात्। किञ्च विषयप्रतिभासिनी भवत्येव इति एवं जडाः व्यभिचारदोषपरिज्ञानविकलास्तावागताः सम्प्रतिपेदिरे सम्भूय प्रतिपन्ना इति।

यत्पुनरेतन्मण्डनस्य—

"प्रत्येकमनुविद्धत्वादभेदेन मृषा मतः।
भेदो जलतरङ्गाणां भेदाभेदः कलावतः॥" [ब्रह्मसि० का० ३१]

"अभेदानुविद्धत्वात्प्रत्येकं विश्वस्य भेदो मृषा यथा जलतरङ्गेषु चन्द्रमसः, तत्र हि प्रत्येक चन्द्रमा इत्यन्वयः। तथा विश्वस्य भेदेऽपि प्रत्येकमिदं 'तत् अर्थो वस्तु' इत्यभेदान्वयः, तरुभेदस्तु यद्यपि न मृषा वनमित्यभेदाऽनुगत[म]श्च न तु प्रत्येकम्। न हि प्रत्येकं तरुषु वनमिति बुद्धिरतो न तेन व्यभिचारः। एतदर्थमस्य प्रत्येकमित्युक्तम्" [ब्रह्मसि० व्या०] इति, तदपि तस्य बालवल्गनमसो विजृम्भितमेव, तथा हि— किमिदं भेदस्याभेदानुविद्धत्वम्? एकस्यभावान्वय इति चेत्, न, जलतरङ्गचन्द्रेष्वपि तदभावात्, तत्प्रतिपत्तिवैकल्यात्। न हि तत्राप्येकस्तरङ्गचन्द्र एव परापरप्रतिपत्तिरस्ति युगपन्नानारूपतयैव तेषां प्रत्यवभासनात्। 'चन्द्रश्चन्द्र' इत्यनुगमव्यवहारस्तु तत्र सादृश्यनिबन्धन एव नैकत्वायत्तः, तेषां परस्परं सदृशतयैव प्रतिपत्तेः। भवतु सादृश्यमेव तत्रानेदानुगम इति चेत्, न तस्यापि गमकत्वम्, धर्मिहेत्वादिज्ञानैर्व्यभिचारात्। न हि तेषु 'इदं ज्ञानमिदं ज्ञानम्' इति प्रत्येकमनुगमो नास्ति, सुप्रसिद्धत्वात्। न च तेषां मृषात्वम्, तत्कथन्न व्यभिचारी हेतुः? तेऽन्यपि मृषेति चेत्, कथं तेष्वस्तात्त्विकं भेदमृषात्वानुमानम्? अमृषात्वेन कल्पनादिति चेत्, न, माणवकादप्यमृषापावकतया कल्पितात्तात्त्विकस्यैव दाहादेः प्रसङ्गात्।

मनु कल्पितोऽपि च अग्निर्दंशो मरणकार्याय कल्पते प्रतिर्सूर्यकश्च प्रकाशकार्याय, तद्वत्कल्पितरूपेभ्य एव तेभ्यस्तात्त्विकं तदनुमानमिति चेत्? तेष्वहिं मरणादिभिर्व्यभिचारः साधनस्य। तेषाम् 'इदं मरणकार्यम्, इदं प्रकाशकार्यम्' इति प्रत्येकमभेदानुगमे सत्यपि मृषात्वाभावात्। मृषैव तान्यपीति चेत्, न, यस्मात्—

अमृषाकार्यनिष्पत्तौ मृषारूपान्निमित्ततः।
दृष्टान्तत्वं कथं तेषां मृषैव यदि तान्यपि॥ ७५५॥
श्लोकप्रसिद्धितस्तेषाममृषात्वेन संग्रहि।
तेनैव व्यभिचारित्वमपि कस्मान्न मृष्यते॥ ७५६॥
वस्तुतो व्यभिचारित्वं ततश्चेन्न प्रसिद्ध्यति।
दृष्टान्तत्वं कथं तस्माद्वस्तुभूतं प्रसिद्ध्यति॥ ७५७॥

---

१ तत्र तर्हि आ०, ब०, प०। २ तदर्थोऽनस्तित्वमे—आ०, ब०, प०। ३ —स्वभेदोऽनुग—आ०, ब०, प०। "वनमित्यभेदानुगमश्च"—ब्रह्मसि० व्या०। ४ तेषां तत्प्रत्य—आ०, ब०, प०। ५ धर्मिहेत्वादिज्ञानैः। ६—सूर्यकश्च आ०, ब०, प०। ७ धर्मिहेत्वादिज्ञानेभ्यः। ८ मरणादीन्यपि। ९ दृष्टान्तत्वम्।

वस्तुवृत्त्या तदप्येतदवस्तु यदि वर्ण्यते ।
अनुमानं कथं वस्तु तद्बलेनोपकल्पितम् ॥ ७५८ ॥
विश्वभेदमृषात्वस्य यतस्तस्माद्व्यवस्थितिः ।
न ह्यवस्तुवशात्किञ्चिन्मेयं शक्त्यनिरूपणम् ॥ ७५९ ॥
तत एवान्यथा विश्वभेदयाथात्म्यनिर्णयात् ।
कुतश्चित्तन्मृषावादः क्वास्यदं प्रतिपद्यताम् ? ॥७६०॥
अवस्तु न हि नामेह त्वयैव सुलभं भुवि ।
तत्कृता तत्त्वनिर्णीतिर्यत्तवैवेति कल्प्यताम् ॥ ७६१ ॥

तस्माद्वस्त्वेवानुमानम् अन्यथा ततोऽन्ययोगव्यवच्छेदेन साध्यव्यवस्थापनानुपपत्तेः । अतस्तत्सत्यत्वनिदर्शनं मरणादिकमपि वस्त्वेवेत्युपपन्नस्तेन व्यभिचारः साधनस्य ।

विद्याऽविद्याभेदेन च । न हि विद्याविद्ययोरभेदः । न च विद्याविद्ययोरियमियञ्चेत्यादिः प्रत्येकमनुगमो नास्ति मृषात्वाभावेऽपि इति । तदेवमस्यापि मृषात्वमेवेति चेत् ; कुत इदानीं संसारः ? तन्निबन्धनस्य पृथगविद्यारूपस्याभावात् ? कल्पितादिति चेत् ; कुतस्तत्कल्पनम् ? प्राच्यादेव तद्रूपादिति चेत् ; न; तस्यापि वस्तुनो विद्यापृथग्भूतस्याभावात् । तदपि कल्पितमेवेति चेत् ; न; 'कुतः' इत्यादेः प्रसङ्गादनवस्थानात् । नायं दोषः, अनादित्वात्तत्प्रबन्धस्येति चेत् ; तस्य तर्हि वस्तुन एव विद्यापृथग्भावे तद्वत्स्वं व्यभिचारित्वम् । अपृथग्भावे तु स एव प्रसङ्गः 'कुत इदानीं संसारः' इत्यादि । पुनरपि 'कल्पितात्' इत्यादिवचने 'कुतस्तत्कल्पनम्' इत्यादिप्रसङ्ग आवर्त्तमानो महान्तमनवस्थादोषमुपनिपातयेत् । तस्मादतिदूरमभिलष्यापि तस्य तत्पृथग्भावस्तात्त्विक एव वक्तव्यः । कथमन्यथा अयमाम्नायः—

"विद्यां चाविद्यां च यस्तद्वेदोभयं सह" ॥ [ईशा०श्लो० ११] इति ।

"विद्याविद्ये न्ये (द्वे) अप्युपायोपेयभावात् सहिते" [ब्रह्मसि० व्या० पृ० १३] इति च तद्विवरणं [10]मण्डनं (नस्य); निरवकाशत्वात् । तथा हि—

यदि विद्यापृथग्भावो वस्तुनः कल्पितस्य वा ।
[11]तत्प्रबन्धस्य नास्त्येव क्व प्रतिष्ठा [12]सह श्रुतेः ॥ ७६२ ॥
सत्येव यत्पृथग्भावे [13]तत्प्रयोगस्य दर्शनम् ।
[14]सह चैत्रेण मैत्रोऽयं स्थूल इत्यादिषु स्फुटम् ॥ ७६३ ॥

---

१ अतस्तत्त्वनि—आ०, ब०, प० । २ विद्याऽविद्याभेदस्यापि । ३ अविद्यारूपकल्पनम् । ४ अविद्यारूपात् । ५ अविद्यासन्तानस्य । ६ अविद्यारूपस्य । ७ विद्यापृथग्भावः । ८ मैत्रा० ७।९ । मवसन्त० ३।१ । ९ विद्याविद्येत्वे प० । विद्याविद्येत्वे आ०, ब० । १० मण्डनस्तुति—आ०, ब०, प० । 'मण्डनम्' इति पाठे 'मण्डनकृतम्' इत्यर्थो ग्राह्यः । ११ अविद्याप्रबन्धस्य । १२ 'यस्तद्वेदोभयं सह' इत्यत्रोक्तस्य सहशब्दस्य । १३ सहशब्दप्रयोगस्य । १४ समार्च—सु० ।

उपायोपेयभावश्च (श्चाऽऽ) पृथग्भावे कथं भवेत् ? ।
सद्विद्याविद्ययोर्येन [1]मुमण्डं मण्डनोदितम् ॥ ७६४ ॥

स्यान्मतम्–न तस्यै विद्यायेदं पृथक्त्वं नाप्यपृथक्त्वम्, अवस्तुत्वात् । वस्तुन एव हि कस्यचित्कुतश्चित्पृथक्त्वापृथक्त्वाभ्यां व्यपदेशो नावस्तुनः । तदयं साभ्यामनिर्वचनीयैवेति, तदपि न सङ्गतम्, यस्मात्–

अयमेव च विद्यायाः स्वभावो यदि कल्प्यते ।
साप्यविद्येव विद्याया वार्तापि क्वोपलभ्यताम् ? ॥ ७६५ ॥
विद्याया[2]श्चेत्स्वभावोऽन्यो वास्तवः [3]परिपट्यते ।
अविद्यातः पृथग्भावः कथमेवं निपिद्ध्यताम् ?॥७६६॥
स्वभावभेद एवाय पृथग्भावः प्रसिद्धिमान् ।
भावेषु यस्मात्तन्नेयं चर्चितार्था यथोगतिः ॥७६७॥
कथं चैवं पृथग्भावस्तस्याविद्यान्तरादपि ।
[4]तदपेक्ष्यापि यत्तस्या वस्तुत्वं तदवस्थितम् ॥७६८॥

मा भूदिति चेत्, कथमिदानीं तस्या न्यायोपजनितात्मैकत्वाविज्ञानलक्षणस्य प्रपञ्चरूपमृत्युं प्रति प्रत्यनीकतया तन्निस्तरणत्वम् ? यतै इदं स्वाम्नातं भवेत्–

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" [ईशा० श्लो० ११] इति ।

सत्येव हि यः पृथग्भावे विषादेर्विपान्तरोपशमनादेरुपलम्भात्[5]। अवस्तुनोऽपि अविद्यान्तरात्पृथग्भावे तद्वदेव विद्यातोऽपि भवेत् अविशेषादित्युपपन्नो व्यभिचारः साधनस्य, विद्याविद्याभेदस्यामूपात्वेऽपि तद्भावात्। ततो मण्डनादिभिरपि व्यभिचारदोषमजानानैरेव प्रकृतमनुमानमुपदर्शितमित्यावेदयति 'विप्लुताक्षा' इत्यादिना ।

विविधं प्लुतं प्लवनं वस्त्वादिषु यस्य स विप्लुतो जडचन्द्रादिः, तमश्नोति विषयत्वेन व्याप्नोतीति विप्लुताक्षा बुद्धिः यथा येन तद्विषयस्यामेदानुविद्धत्वादिना प्रकारेण वितथप्रतिभासिनी मृषाचन्द्रादिभेदोपदर्शिनी, तथा तेनैव प्रकारेण सर्वत्र बुद्धिः किन्नेति जडाः अप्रविदः सम्प्रतिपेदिरे। आप्ता हु तेषां व्यभिचारदोषापरिज्ञानात् अविद्यापरिकल्पितात्मत्वाद्वा प्रतिपत्तव्यम् ।

यत्पुनरेवम् कामिन्यादिबुद्धिवत् वस्त्वचन्द्रादिवच्चेति निदर्शनम्–तत्रापि वितथप्रति-

---

१ –मदेत् पृ–स० । २ मृषु मण्डनं समर्थनं यस्य तत् मुमण्डम् । ३ अविद्याप्रकल्पस्य । ४ "आविद्य अज्ञानः स्वभावः, अर्थान्तरम्, ज्ञानस्वरूपत्वी, अपि सती, एवमेवैवमविद्या माया विद्या प्रतिभास इत्युच्यते । स्वभावान्तरेण कस्यचित्, अन्योऽन्यस्मै वा परमार्थ एतेन अविद्या; अवस्तुत्वात्ते कथुपसरणी, न स्वरूपाद्वा तत्त्वादिर्वचनीया"–अमलि० पृ० ९ । ५ परिपश्यते ता० । ६ तदपेक्षयापि तत्त्व आ०, ब० । तदपेक्षापि यत्तत्व आ०, ब० । ७ इदं शास्त्रं आ०, ब०, प० ।

भासित्वस्य मृषात्वस्य च यतः प्रतिपत्तिः, तस्य चेत् अवितथप्रतिभासित्वं कथन्न व्यभिचारः ? सत्यपि ज्ञानत्वे वितथप्रतिभासित्वस्य, तद्विपर्यये च मृषात्वे सत्यपि इदमिदमित्यभेदानुगमे मृषात्वस्याभावात्। वितथप्रतिभासित्वे तु ततः कथं तल्लिङ्गिः तद्विपर्ययवत्। अतो निदर्शनस्य साध्यवैकल्यमित्यावेदयन्नाह—

५ **प्रमाणमात्मसात्कुर्वन् प्रतीतिमतिलङ्घयेत्।**
वितथज्ञानसन्तानविशेषेषु न केवलम् ॥५०॥ इति।

प्रमाणम् अवितथनिर्भासं ज्ञानम् **आत्मसात्कुर्वन् प्रतीतिं** यथार्थपरिच्छित्तिम् **अतिलङ्घयेत्** प्रत्याचक्षीत। सौगतो ब्रह्मवादी वा। क तामतिलङ्घयेत्? **वितथा** मिथ्याभिमता ये **ज्ञानानां सन्तानविशेषाः** कामिन्यादिविषयाः तरङ्गचन्द्रादिविषयाश्च प्रवाहभेदाः
१० तेषु, **न केवलं** न प्रमाणमन्तरेण, तदनतिलङ्घनस्यापि तथा प्राप्तेः। न च तदात्मसात्करणं परस्योपपन्नम्, व्यभिचारदोषस्य तत्रोपदर्शितत्वात्। ततो निदर्शनस्य साध्यवैकल्यादपि न प्रकृतानुमानयोर्गमकत्वमित्यभिप्रायो देवस्य।

अपि च, यदि मिथ्यावभासनमेव ज्ञानम्, कुतः सन्तानान्तराणां प्रतिपत्तिर्यतस्तेषामनित्यत्वादिर्धर्मोऽवबुध्येत ? कुतो वा जीवान्तराणां यतस्तेषामप्यात्मा विभिन्नत्वादिस्वभावो
१५ विभाव्येत, धर्मपरिज्ञानस्य धर्मिपरिज्ञाननान्तरीयकत्वात्। मिथ्याज्ञानाच्च न यथावत्तत्प्रतिपत्तिः, बहिरर्थतत्प्रपञ्चयोरपि ततः एव तथा तत्प्राप्तेः अयथावदेवं[5] तत्प्रतिपत्तिः, तेषामपि वास्तवभेदवदपरमार्थत्वात्, ग्राह्यादिसन्तानान्तरजीवान्तरभेदप्रतिभासस्तु विपरीतवासनाबलादविद्याबलाद्वा परिकल्पित[6] एव। तदुक्तम्,—

"अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
२० ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥
मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥" [प्र० वा० २।३५४, ५५] इति।
"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः।
सङ्कीर्णमिव मात्राभिर्भिन्नाभिरपि पश्यति ॥
२५ तथेदममलं ब्रह्म निर्विकल्पमविद्यया।
कलुषत्वमिवापन्नं भेदरूपं प्रतीयते॥" [बृहदा०भा०वा० ३।५।४३,४४] इति च।

तदेवाह—

अद्वयं द्वयनिर्भासं सदा चेदवभासते। इति।

---

१ ज्ञानात्। २ ज्ञानत्वेन वि–आ०, ब०, प०। ३ वितथप्रतिभासित्वसिद्धिः। ४ मिथ्याज्ञानादेव। ५ अयथावद्भूततत्प्र–आ०, ब०, प०। अयथावदेतत्प्र–स०। ६ –त एतद्–आ०, ब०, प०।

अद्वयं संवेदनतत्त्वम् आत्मतत्त्वञ्च द्वयनिर्भासं ग्राह्यादिभेदनिर्भासम् । इत्र शब्दोऽत्र द्रष्टव्यः । तदनिर्भासे तन्निर्भासवचनाद्विनिर्माणवच्च इत्यादिवत् । कदा तदद्वयम् ? सदा सर्वकालं भेदप्रतिभासदशायां तदुपसंहारदशायाञ्चेति चेत् शब्दः परप्रकृतद्योतने । तत्रोत्तरमाह—

न स्वतो नापि परतो भेदपर्यनुयोगतः ॥५१॥ इति ।

तस्य खलु संविदद्वैतस्य स्वतो वाऽवभासनं परतो वा गत्यन्तराभावात् ? स्वत एव "स्वयं सैव प्रकाशते" [प्र०वा०२।३२७] इति वचनादिति चेत्, कथमेवमात्मतत्त्वस्यापि स्वतोऽनवभासनम् ? "अयमात्मा पुरुषः स्वयं ज्योतिर्भवति" [बृहदा० ४।३।९,१४] इत्यादेर्वचनात् ।

ननु आत्मा नाम नित्यः । नित्यत्वञ्च कालत्रयानुपपातात् । तत्र मध्यकालानुपातिनो रूपात् कालान्तरानुपातिनो रूपस्य यद्भेदः, तावन्मात्रमेव तदिति कथं नित्यत्वम् ? भेदे स्वयं रूपं संवेदनमेव तदिति नासावात्मा नाम । न चात्मन्यद्वैते कालसम्भवो यतस्तत्त्रयानुपपातान्नित्यत्वम् । तत्र तस्य स्वतोऽवभासनम् । अवभासनाच्च [1]तदस्तित्वे भेदस्यापि स्यात् [2]तदविशेषादिति चेत् ; न, सविदद्वैतेऽपि समानत्वात् । न हि [3]तस्यापि क्षणमात्रमग्नस्य निरंशस्यावभासनम् । न च तेदद्वैते कालसम्भवो यतस्तत्क्रमानुपपातामावादनित्यत्वं भवेत् ? अवभासनाच्च तदस्तित्वे ग्राह्यादेरपि स्यात्तदविशेषात् । बाधकाभावाभावाभ्यां विशेष इति चेत्, न, आत्मप्रपञ्च-प्रतिभासयोरपि तत एव तदुपपत्तेः । कथं पुनः प्रपञ्चप्रतिभासस्य बाधनम् ? कथं च न स्यात् ? तत्प्रतिभासस्यात्मप्रतिभासाद्भिन्नत्वात् "आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति" [ ] इत्याम्नायादिति चेत्, ग्राह्यादिभेदप्रतिभासस्यापि कथम् ? तत्प्रतिभासस्यापि सवित्प्रतिभासादन्यत्वस्यानभ्युपगमात् । वस्तुतो नास्त्येव तत्प्रतिभासो विचारासहत्वात् केवलं कल्पनामात्रतस्तदभ्युपगमः तत एव तस्य बाधोपपत्तिरपीति चेत्; न, प्रपञ्चप्रतिभासेऽपि समानत्वात् । न हि प्रपञ्चस्यापि वस्तुतः प्रतिभासनम्, प्रमाणविरहात् । केवलं मायानिबन्धन एव तेदभ्युपगमः, "इन्द्रो मायाभिः पुरुरूप ईयते" [बृहदा० २।५।१९] इत्यादि वचनात् । तत एव तस्यापि बाधोपपत्तिरिति [4]। तत्र संविदद्वैतस्य स्वतोऽवभासनं पुरुषाद्वैतेऽपि [5]तत्तस्यानुपपन्नात् । न चेदमुचितम्, उभयप्रतिभासबाधे वस्तुनि" अद्वैतस्यापत्तेरिदमेवाह—

न स्वतः इति । न स्वतोऽद्वयस्यावभासनम् । कुतः ? भेदेन "तदुभयाद्वयरूपेण पर्यनुयोगात् अद्वयस्य प्रतिविधानात इति ।

परतस्तदवभासनेऽप्याह—'नापि परतः' इति । कुतः ? भेदपर्यनुयोगतः मति परस्मिन् भेदस्यापद्वयस्याभावात्" तेन चाद्वैतप्रतिविधानादिति ।

---

१ सौगतः । २ तदविशेषात् । ३ अवभासनाविशेषात् । ४ तस्यापि क्षण—आ०, ब०, प० ५ संवेदनाद्वैते । ६ अत्रान्तरे पञ्चदशप्रन्थपर्यन्तं प्रतिविधानपर्यन्तं [ ] एतत्पुस्तकान्तर्गतम्—बृहदा० ४।५।६। ७ तदभ्युपगमः । १० —नि चैव आ०, ब०, प०, ब०, प०, म० । ११ तदुभयाद्वयरूप—आ०, ब०, प० । १२ "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्"—बृहदा० ४।५।६। १३ ग्राह्यादिभेदप्रतिभासः । १४ प्रतिभासमनुपपन्नात् । १५ इति [illegible] न ।०—आ०, ब०, प०,

स्यान्मतम्—न [1]तेन तस्य प्रतिविधानं [2]तस्यायमनुत्थानात्। न एवन्तु वस्तुरूपप्रतिविधानाय समर्थं तरक्षुचन्द्रादिवद्भेदेति ; तदसङ्गतम ; आत्माद्वै[3]तस्याप्येवं परतः प्रतिभासप्रसङ्गात्, परस्याप्युक्तन्यायेन [4]तदापत्तिनियन्धनत्वाभावात। कथं पुनः परतस्तस्य[5] प्रतिभासः ? कथं च न स्यात् ? परस्याविद्यामयत्वात्, अविद्यायाश्च मिथ्याज्ञानत्वात्—
५ "अविद्या माया मिथ्यावभासः" [ब्रह्मसि० पृ० ९] इति मण्डनेन तदर्थाभिधानात। न च मिथ्याज्ञाने तत्त्वप्रतिभासनं [6]तज्ज्ञानत्वविरोधात। तत्त्वं च तद्[7]द्वैतं तस्यैव परमनिःश्रेयसत्वेन परैरभ्युपगमात। "तदेतत्प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात्सर्वस्मात्" [बृहदा० १।४।८] इत्याम्नायादिति चेत ; न ; संविद्[8]द्वैतस्यापि तद्वदपरतोऽनवभासनापत्तेः परस्य विकल्पत्वेनावस्तुप्रतिभासित्वात् "विकल्पोऽवस्तुनिर्भासः" [ ] इति
१० वचनात्। न चावस्तुवेदने वस्तुप्रतिभासनं [9]तद्वेदनत्वविरोधात। वस्तु [10]च तद्[11]द्वैतं तस्यैव काष्ठागतनिःश्रेयसत्वेन भवद्भिः प्रतिष्ठापनात, "यद्यद्वैतं न तोषोऽस्मि मुक्त एवास्मि सर्वथा" [प्र० वार्तिकाल० १।३६] इति वचनात। सत्यम ; न परतस्तत्प्रतिभासनं ग्राह्यादिभेदसमारोपव्यवच्छेदस्यैव ततो भावात। सति हि तद्व्यवच्छेदे निर्व्याकुलं स्वत एव तदवभासनं तद्व्याकुलत्वहेतोरन्यारोपस्याभावादिति चेत; न; आत्मन्यपि समानत्वात। न हि तस्यापि परतः प्रतिभासनम्। तत्रापि परस्याम्नायादेः प्रपञ्चारोपनिवारण एव व्यापारात, तन्निवारणे च स्वत एव तस्य
१५ निर्व्याकुलमवभासनं तद्व्याकुलत्वनिबन्धनस्य तदारोपस्याभावात। तदुक्तम—

"आम्नायतः प्रसिद्धिश्च श्रुतयोऽस्य प्रचक्षते।
भेदप्रपञ्चविलयद्वारेण च निरूपणम्॥" [ब्रह्मसि० १।२] इति।

[12]कः पुनस्तत्प्रपञ्चस्य विलयो नाम ? नीरूपं निवृत्तिमात्रमिति चेत; न, [13]तस्यानिरूपितरूपस्य कार्यत्वानुपपत्तेः कारणत्ववत्, अन्यथा तस्यैव सकलप्रपञ्चकारणत्वेन ब्रह्मभावोपपत्तेः
२० तदपरस्य निरतिशयानन्दादिरूपस्य ब्रह्मणः परिकल्पनमप्रयोजनमेव, तत्प्रयोजनस्यान्यत्रैव परिसमाप्तत्वात। तत्र तन्निवृत्तिमात्रं तद्विलयः।

नापि भेदप्रतिभासकालुष्यपरिशुद्धो[14] जीवस्वभावः, तस्य ब्रह्मणो भेदे [15]तस्यैव तद्द्वारेण निरूपणापत्तेर्न ब्रह्मणः। ब्रह्मणश्च तथा निरूपणमभिप्रेतम् "नमस्यामः प्रजापतिरित्य-
२५ [16]नन्तमाम्नायते" [ ] इत्यादेर्वचनात्। नास्त्येव [17]तस्य [18]तस्माद्भेदः "अनेन जीवेनात्मना" [छान्दो० ६।३।२] इति जीवब्रह्मणोरभेदस्याम्नायादिति चेत; न; ब्रह्मवत्तस्यापि[19] नित्यपरिशुद्धिप्रसङ्गात, अभेदस्यैवंलक्षणत्वात। अभेदेऽपि मुख्यतस्ति-

---

१ भेदेन। २ भेदस्य। ३ परो यतोऽवस्तु अतः न तेन अद्वैतबाधेत्यादिन्यायेन। ४ अद्वैतव्याघात। ५ अद्वैतस्य। ६ मिथ्याज्ञानत्व। ७ अवस्तुवेदनत्व। ८ च द्वैतं आ०,ब०,प०,स०। ९ —वैदा इति चेन्न परतः स० —वैधा इति चेन्न परतः आ०,ब०,प०। १० सौगतः प्राह। ११ निवृत्तिमात्रस्य। १२ —परिविशुद्धो आ०,ब०,प०,स०। १३ जीवस्वभावस्यैव। १४ —व्यवहितमाम्ना—आ०,ब०,प०,स०। १५ जीवस्य। १६ ब्रह्मणः। १७ जीवस्यापि।

बिम्बयोर्मुख्यस्यैव परिशुद्धिर्न तत्प्रतिबिम्बस्य तस्य मणिकृपाणादेः रागादिना कालुष्यस्योपलम्भात्। तदद्वयभेदेऽपि ब्रह्मण एव नित्या परिशुद्धिर्न जीवस्य तत्राविद्याकालुष्यस्योपलम्भादिति चेत्, न, प्रतिबिम्बस्य भ्रान्त्युपदर्शितत्वेनावस्तुसतोऽपि मुखादभेदानुपपत्तेः, तद्वन्मुखस्याप्यवस्तुसत्त्वप्रसङ्गात्। 'ममेदं मुखम्' इत्यभेदपरामर्शोऽपि तत्र सादृश्यविशयादेव [1]चित्रार्पितात्माकारवत्, नाभेदात्। अभेदे तु वस्तुनस्तत्रापि[2] मुख्यप्रयोजनेन भवितव्यम्, न चैवम्, आत्मपक्षवदप्रसनादेस्तत्रानुपलम्भात्। [3]अवस्तुसतः कथं प्रतिभासनमिति चेत्? 'मुख-तदभिरेकवत्' इति ब्रूमः। जीवोऽपि भ्रान्त्युपदर्शितत्वाद्वस्तुसदेवेति चेत्, व्याहतमेतत्—'अवस्तुसंश्च ब्रह्मणश्च न भिद्यते' इति, ब्रह्मणोऽप्यवस्तुसत्त्वापत्तेः। ब्रह्म [4]तस्माद्भिन्नत एव स एव तु ब्रह्मणो न भिद्यते तस्मादयमदोष इति चेत्, न, जीवस्य तद्भेदमन्तरेण ब्रह्मणोऽपि [5]तद्भेदानुपपत्तेः भेदस्योभयनिष्ठत्वात्। तस्मादभेद्येमेवेद [6]मौलोपाख्यानवत्। तद्यथा—कूपो ग्रामस्य समीपो ग्रामस्तत्कूपस्य [7]नितरां दूर इति। तस्माज्जीवस्य ब्रह्मामेदे ब्रह्मणोऽपि [8]तदभेदस्यावश्यम्भावात्। यदविद्याकालुष्यं जीवस्य या च तत्परिशुद्धिरागन्तुकी [9]तदुभय प्रमापि (ब्रह्मापि) [10]परिशुद्धस्त्ये (शत्ये)वेति न सुभाषितमेतत्—[11]"तद्धि सदा विशुद्ध नित्यप्रकाशमनागन्तुकार्यम्"[12]"[ब्रह्मसि० पृ० ३२] इति। [13]तथेदमपि—"तस्मादविद्यया जीवाः संसारिणो विद्यया विमुच्यन्ते" [ब्रह्मसि० पृ० १२] इति। ब्रह्मनिष्ठानस्य सदाविशुद्धत्वादेरभेदे सति जीवेऽप्यनुषाताच्। भिद्यत एव जीवो ब्रह्मणः कल्पनारोपितत्वात्, ब्रह्मणश्च तद्विपर्ययादिति चेत्, का तर्हि तस्य [14]परिशुद्धिः [15]"स्यात् यदन्वितो जीवस्वभाव प्रपञ्चविलयत्वेन व्यपदिश्येत? अविद्याकालुष्यनिर्मुक्तिरेवेति चेत्, न, स्वतोऽपि निर्मुक्तिप्रसङ्गात्, स्वरूपस्याध्यारोपितस्याविद्यामयत्वात्। भवस्विति चेत्, न, नीरूपस्य तन्निर्मुक्तिमात्रस्यासम्भवादिति प्रतिपादनात्। तत्र परिशुद्धो जीवस्वभाव एव तत्प्रपञ्चविलयः तत्परिशुद्धेरेवापरिज्ञानात्।

भवतु नित्यपरिशुद्धं [16]ब्रह्मैव [17]तद्विलय इति चेत्, न, नित्यस्य विलयस्य प्रसङ्गात्। तथा च किं तत्र परापेक्षया नित्यस्य निरपेक्षत्वात्, नित्ये तद्विलये [18]परस्यामावाच्च। ततो यदुक्तम्—"अविद्यया मरणादिलक्षणया अविद्यैव निवर्त्यते मृत्युरित्यविद्यैवोच्यते" [ब्रह्मसि०पृ० १३] इति; तत्प्रतिविहितम्, नित्ये भेदप्रपञ्चविलये निवर्त्यनिवर्तकयोरविषयोरेवासम्भवे तद्वचनस्यासम्भवद्विषयत्वात्। तत्र तत्प्रपञ्चविलयः कश्चिदपि शक्यनिरूपणो यद्द्वारेण परतः प्रजापतेर्निरूपणमिति चेत्,

---

१ प्रतिबिम्बस्य। २ चित्रार्पितात्माकारवत् आ०, ब०, प०, स०। चित्रार्पितमात्माकारवत् बा०(१) ३ प्रतिबिम्बेऽपि। ४ प्रतिबिम्बस्य। ५ अवस्तुसतो जीवात्। ६ तदभेद-आ०, ब०, प०, स०। ब्रह्मभेद। ७ जीवभेदानुपपत्तेः। ८ मौलोपा-आ०, ब०, प०, स०। ९ तस्य कूपस्य बा०, ब०, प०, स०। १० तद्भेदस्य आ०, ब०, प०, स०। ११ तदुतर्थं बा०। १२ परशुधामवेदे-बा०। १३-वार्थकम् आ०, ब०, प०,स०। १४ तथापि आ०, ब०, प०, स०। १५ जीवस्य। १६ स्याद् भेदप्रतीतेरेवमुच्यिमप्य-आ०, ब०, प०, स०। १७ ब्रह्म इव आ०, ब०, प०, स०। १८ प्रपञ्चविलयः। १९ आम्नायादेः।

[1]भवन्मतेऽपि कोऽयमारोपस्य[2] व्यवच्छेदो नाम ? नाश एवेति चेत् ; न ; [3]तस्य निर्हेतुकत्वेन परतोऽनुपपत्तेः । तस्यैवाशक्तिकरणमिति चेत ; न ; तस्य निषेत्स्यमानत्वात् । तदेव संविदद्वैतमिति चेत् ; न ; तस्यापि कार्यत्वापत्तेः । न चेदमुचितम्–"न कारणं न कार्यं च तत्" [ ] इति स्वयमभ्युपगमात् । कीदृशं च तत् ? निरंशं परमाणु-
५ मात्रमिति चेत् ; न; तस्याप्रतिवेदनात् नीरूपाभाववत् । [4]चित्रमेव तत् "चित्रप्रतिभाप्येकैव बुद्धिः" [प्र०वार्तिकाल० २।२१९] इति वचनादिति चेत् ; किमिदं चित्रमिति ? नानानीलाद्याकारमिति चेत् ; न ; तथा नानाशक्तिकत्वस्यापि प्रसङ्गात् । को दोष इति चेत् ? न; एकया शक्त्या आत्मनः तदन्यया च तदपरस्य परिज्ञानापत्तेः, तथा च परमार्थत एव ग्राह्य-ग्राहकभावस्य[5] भावात्कथं तस्यारोपितत्वं यतस्तव्यवच्छेदद्वारेण [6]तदद्वैतनिरूपणम् ? यदि
१० परमार्थत एव तद्भावः; कथं तद्विकलतया संवेदनस्य विकल्पप्रतिसंहारवेलायामनुभवो नारोपितस्य[7] ? वैकल्यानुपपत्तेरिति चेत् ; न ; निष्प्रपञ्चस्यात्मन एव तदानीमनुभवात् । प्रपञ्च-ज्ञानस्यैवारोपितविषयत्वोपपत्तेः । तदुक्तं कैश्चित्–

"सत्यमाकृतिसंहारे स्वयं तद्व्यवतिष्ठते ॥" [वाक्यप० ३।२।११] इति ।

तथा परैः–

१५ "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥" [सर्ववेदान्त० २५] इति । वचनमात्रमेवैतत् , निष्प्रपञ्चस्यात्मनः क्वचिदप्यननुभवादिति चेत् ; न ; ग्राह्यादिभेदविकलस्य संवेदनस्याप्यननुभवात् । अननुभवमपि तद्विचारादवगम्यते विचारणैव तदभेदारोपं व्यवच्छिन्दता तदस्तित्वस्यापि प्रत्यायनादिति चेत् ; न ; एवम् [10]आम्नायादेवात्मनोऽप्यवगमप्रसङ्गात् । तेनैव[11] [12]प्रपञ्चारोपं प्रत्याचक्षाणेनात्मनोऽपि [13]बुद्धावुपस्थापनात् । तत्प्रपञ्चप्रत्याख्याने किमवशिष्यते
२० यस्यात्मत्वेन बुद्धावुपस्थापनम्[14] ? ग्राह्यादिभेदप्रत्याख्याने कस्यावशेषो यस्य संवेदनत्वेन बुद्धौ समर्पणम् ? [15]तद्भेदसाधारणस्य प्रतिभासमात्रस्येति चेत्; अन्यत्रापि तस्यैव किन्न स्यात् ? कथमेवमात्मसंवेदनयोर्भेद इति चेत् ? आत्मनो नित्यत्वाद् अन्यस्य तद्विपर्ययात् ।

कथं पुनरात्मनः शब्दज्ञाने प्रकाशनं [16]तस्याविद्याभेदत्वेन मिथ्याज्ञानत्वात् ? न हि मिथ्याज्ञाने तत्त्वप्रकाशनम् ; तन्मिथ्यात्वस्यैवाभावापत्तेः । एवं हि प्रत्युत्पन्नशब्दज्ञानमात्रस्यैव
२५ सकलभेदप्रपञ्चप्रलयोपनिपातेन प्रवृत्त्यादिः सर्वोऽपि संसारव्यापारो न भवेत्, आत्ममननध्याना-द्युपदेशश्चापार्थकतां प्राप्नुयात् तस्यापि तत्प्रपञ्चप्रलयार्थत्वात् , तत्प्रलयस्य च शब्दज्ञानमात्रादेव

---

१ सौगतमते । २ ग्राह्यादिभेदसमारोपस्य । ३ नाशस्य । ४ चित्रमात्रमेव आ०, ब०, प०, स० । ५ –स्याभा–आ०, ब०, प०, स० । ६ संवेदनाद्वैत । ७ ग्राह्यग्राहकाकाराक्रान्तस्य । ८ –वानिरूपितवि–आ०, ब०, प०, स० । ९ अनुभवागम्यमपि संवेदनम् । १० आम्नायादेवाप्यात्म–आ०, ब०, प० । ११आम्नायेनैव । १२ प्रचारोयं प्र–आ०, ब०, प०, स० । १३ बुद्धा उप–आ०, ब०, प०, स० । १४–नस्य ग्राह्यादि–आ०, ब०, प०, स० । १५ ग्राह्यग्राहकादिभेद । १६ शब्दज्ञानस्य ।

भावात्। न [1]तस्मात्प्रादेव तद्भावः किन्तु सन्मननाद्युपसंस्कृतादेव, तदुपसंस्कृतं हि [2]तज्ज्ञानम्, इतरनिरवशेषाविद्याविलासानुपरमयत् आत्मानमप्युपरमयति [3]यथा पयः पयो जरयति स्वयमपि जीर्यति, विषञ्च विषान्तरमुपशमयति स्वयमपि उपशाम्यति, उपरतसकलद्वितीयमभेदाख्यञ्च स्वत एव निष्पपञ्चमात्मतत्त्वस्य प्रकाशत इत्येवम्प्रकारं शास्त्रज्ञानस्य तत्प्रकाशनिबन्धनत्वमिति चेत्, ननु अयमप्यर्थः कुतश्चिदाम्नायज्ञानादेव ज्ञातव्यः। [4]तत्रैव मिथ्यात्वे तज्ज्ञानात्कथं तत्प्रतिपत्तिः? न चापरमुपायान्तरं यतस्तत्परिज्ञानमित्यप्रतीतिकमेवेदम्—

"संहृताखिलभेदोक्तः सामान्यात्मा स वर्णितः।
हेमेव [5]परिहार्यादिभेदसंहारसूचितम्॥" [महासि० १।३] इति।

तत्र भेदप्रपञ्चसंहारवती वेला नाम काचिच्छक्तिनिरूपणा यस्यामात्मतत्त्वस्य निष्पपञ्चस्य प्रकाशनमिति चेत्, संविदद्वैतस्यापि कथं विचारज्ञाने प्रकाशनम्? तस्यापि [6]विकल्पत्वेनावस्तुगोचरत्वाद् अन्यथा तस्य तद्गोचरत्वविरोधात्। एवञ्च प्रत्युत्पन्नविचारज्ञानस्यैव सकलग्राह्यभेदारोपप्रलयोपनिपातेन तद्[7]द्वैतप्रकाशनात् निष्फलमेव तदभ्यासोपकल्पनं भवेत्, [8]तस्यापि तत्प्रकाशनादन्यस्य फलस्यासम्भवात्, तस्य च प्रायमिकादेव विचारज्ञानादुपपत्तेः। अभ्यासपरिपाकाधिष्ठितमेव [9]तत् प्रकाशनिबन्धनं न केवलम्, [10]तत्सकलं निखिलमप्यपरमभ्यारोपमपाकुर्वन् आत्मानमप्यपाकरोति यावदारोपमात्मित्वात्तस्य[11], यथा प्रदीपस्तैलवर्त्यादिकं प्रतिसंहरन्नात्मानमपि प्रतिसंहरति। सङ्गतसकलभेदारोपवेलायां तु[12] तद्[13]द्वैतस्य स्वत प्रकाशनमिति चेत्, न, अस्याप्यर्थस्य कुतश्चिदित्कल्पादेवावगमात्। [14]तस्य च मिथ्याज्ञानत्वेन तदवगमानुपायत्वात्, उपायान्तरस्य चाभावात्। तस्मादिदमप्यप्रातीतिकमेव—

"[15]ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते।" [प्र०वा० २।३७] इति।

तस्मान्नापि विकल्पप्रतिसंहारवती वेलेव नाम काचिच्छक्तिनिरूपणा[16] यस्यां तद्[17]द्वैतस्य स्वतः प्रकाशनमुपकल्पेत। तदेवाह—

प्रतिसंहारवेलायां न सवेदनमन्यथा। इति।

व्यक्तमेतत्।

इदमपरं व्याख्यानम्—यदुक्तम्—'अद्वय ज्ञाननिर्भासम्' इति। कुतस्तस्य[18] तन्निर्भासत्वम्? स्वत वेति चेत्; आह—'न स्वतः' इति। उपपत्तिमाह—'भेदपर्यनुयोगतः' इति। भेदः संवेदनस्याविभागलक्षणो विशेषस्तस्य पर्यनुयोगः 'स कथं

---

1 शब्दमात्रादेव। 2 –पुपसंस्कृतादेव। 3 शब्दज्ञानम्। 4 "यथा पयः पयो जरयति स्वयं च जीर्यति यथा च विषं विषान्तरं शमयति स्वयं च शाम्यति"–बृहत्सि० पृ० १२। 5 आम्नायस्यैव। 6–स्वप्रतीतिक–आ०, ब०, प०, स०। 7 परिहार्यं कटकम्। 8 सन्मात्रे प्रपञ्चसंहारवति वेलम आ०, ब०, प०, स०। 9–रिक्तीकरणेन आ०, ब०, प०, स०। 10 सन्मात्रवस्तुनि। 11 विचारज्ञानम्। 12 विचारज्ञानस्य। 13–र्थं तद्–आ०, ब०, प०, स०। 14 निष्कल्पस्य। 15 "तस्यापि तुच्छरूपत्वात् स्वयं नैव प्रकाशनं"–प्र०वा० 16–च्च यत्तद्वै–आ० ब०, प०, स०। 17–स्य नि–आ०, ब०, प०, स०।

सम्भवति' इति प्रश्नः, तस्मात्तत इति । कथं खलु स्वत एव विभागरूपतया प्रतिभासमानमविभागमुपपन्नम् ? विभागस्यासत एव प्रतिभासनादिति चेत् ; कथमिदानीमसदवभासिनस्तस्य सम्यग्ज्ञानत्वम् ? यतस्तस्मात् दुःखहेतुग्रहाणं प्रकल्प्येत, मिथ्याज्ञानात्तदयोगात् नित्यादिज्ञानवत् । अभिमतञ्च ततस्तद्ग्रहाणं परस्य, "नैरात्म्यदृष्टेस्तद्युक्तितोऽपि वा" [प्र०वा० १।१३९] इत्यत्र युक्तिशब्देनाद्वैतवेदनस्यापि तद्ग्रहाणकारणतया प्रज्ञाकरेण[३] व्याख्यानात् । तदेवाह–**भेदपर्यनुयोगतः** । भेदस्तद्ग्रहाणकारणत्वविशेषः तत्पर्यनुयोगः 'स कथम्' इति प्रश्नः तत इति । तन्न स्वतस्तस्य[४] द्वयनिर्भासत्वम् ।

परतोऽपि नेत्याह–'**नापि**' इत्यादि । उपपत्तिमाह–'**भेद**' इत्यादि । परमेव **भेदस्तस्य पर्यनुयोगः** 'तत्कथम्' इति प्रश्नः, तत इति । अद्वैते परस्यैवासत्त्वादिति मन्यते । कल्पितं तत्सत्त्वमिति चेत् ; न; तत एव तत्कल्पनायोगादसत्त्वात् । कल्पनया सत्त्वञ्चेत् ; न; परस्पराश्रयात्–'कल्पनया सत्त्वम्, ततश्च कल्पना' इति । अन्यत इति चेत् ; न; तत्राप्येवं प्रसङ्गात् । [५]तस्याप्यन्यतः कल्पनायामनवस्थानात् । नानवस्थानम्, अनादित्वात्तत्प्रबन्धस्येति चेत्; कुतस्तत्सिद्धिः ? स्वत इति चेत् ; न; स्ववेदनस्य [६]वस्तुसत्संवेदनधर्मत्वेन तत्रायोगात् । [७]तदपि विकल्पितमेवेति चेत् ; कथं ततः क्वचिदित्थम्भावस्य सिद्धिः अनित्थम्भाववत् ? कुतो वा परमार्थसन्नेव तत्प्रबन्धो न भवेत् ? प्रतिसंहृततत्प्रबन्धस्यैव संवेदनस्य सत्यभ्रान्तपाटवे प्रतिवेदनादिति चेत्; न; कदाचिदपि तदनुभवाभावात् । तदाह–'**प्रतिसंहार**' इत्यादि । सुबोधम् ।

एतेन पुरुषाद्वैतस्यापि द्वयनिर्भासत्वं प्रत्युक्तम् । न हि तस्यापि स्वतस्तन्निर्भासत्वं **भेदपर्यनुयोगतः** । भेदस्य 'एकमेवेदमद्वितीयम्' इति विशेषस्य पर्यनुयोगात् 'स कथम्' इति प्रश्नात् । न हि स्वत एव भेदेनावभासमानस्य तद्विशेषसम्भवः । भेदस्यासत एव प्रतिभासनात्तत्सम्भव इति चेत् ; कथमसदवभासिनस्तस्य[८] सत्यज्ञानत्वम् । यतः "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्ति० २।१।१] इत्याम्नायेत । मिथ्याज्ञानत्वे तु कथं तद्दर्शनात्सकलदुःखनिवर्हणम् ? यत इदं स्वाम्नातं भवति–

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[९]॥"[मुण्डको० २।२।८] इति ।

तन्न तस्य **स्वतो** द्वयनिर्भासत्वम् । **नापि परतो भेदपर्यनुयोगतः** तदद्वैते परमेव **भेदस्तस्य पर्यनुयोगतः** 'तत्संभवप्रश्नः कथमसावद्वैतव्यापत्तेः' इति ततस्तस्मादिति । परस्य

१–प्रमाणं आ०, ब०, प०, स० । २–तशब्दवेद–आ०, ब०, प०, स० । ३ "अथवा युक्तियोगः परस्परसङ्गताद्वैतम्, अद्वैते तद्दृष्टिरपि ।" –प्र० वार्तिकाल० २।१३९ । ४ –स्य स्वयंनि आ०, ब०, प०, स० । ५ तत्राप्यन्यतः आ०, ब०, प०, स० । ६–स्थानम् ना–आ०, ब०, प०, स० । ७ वस्तुसत्त्वं संवे आ०, ब०, प०, स० । ८ वेदनमपि । ९ संवेदनानुभवाभावात् । १० एकमेवाद्वितीयमिति विशेषस्य । ११ परापरे आ०, ब०, प०, स०, ।

कल्पनया सत्त्वान्न दोष इति चेत्, न, 'तत्र पक्ष' इत्यादेः 'अनित्यम्भाषवत्' इति पर्यन्तस्यापि समानत्वात् ।

यदि वा, भेदः "तमेव भा(आ)न्तमनुभाति सर्वम्, तस्यैव भासा भाति" [कठोप० ५।१५] इत्याम्नातः पुरुषार्थीनो भेदप्रतिभासस्तत्पर्यनुयोगः 'कथमयम्' इति प्रश्नः, तस्मादिति । परतो भेदप्रतिभासे पुरुषायत्तत्वेन यदाम्नानो विरुद्धयेतेति मन्यते । ५

परतो द्वयनिर्मोसं मुक्तानः प्रतिपीडयेत् ।
पुरुषायत्तमद्वयमामनन्तं निगागमम् ॥७६९॥
[1]विवेकाशक्तमुद्दिश्य प्रतिपत्तारमागमः ।
पुरुषाद्वैतनिर्मासमम्बाहेति मतं यदि ॥७७०॥
परतो भेदनिर्मासः कस्येदानीं विवेकिन[2] । १०
न विवेकेऽनुपायत्वात्परस्यैवानवस्थितेः ॥७७१॥
कल्पनातः पर स्याच्चेत्सैव कस्माद्विवेकिनः ।
विभ्रमाद् यदिनस्तर्हि विवेकी सुमहानयम् ॥७७२॥
विभ्रमप्रतिरोधी हि विवेकः सार्वलौकिकः ।
स चास्ति विभ्रमश्चेति न श्रद्धेयमिदं वचः ॥७७३॥ १५
सत्येव पाटवे तस्य तैमिरोपोपकल्पने ।
पाटवं किमिदं पुंसः स्वरूपग्रहणं[3] यदि ॥७७४॥
तदिदमुत्पन्नमात्रस्य विवेकस्य न विद्यते ।
तथा चेदस्य वेद्यं स्यादविद्याकल्पितं परम् ॥७७५॥
न विवेकस्तया यासौ मिथ्यार्थस्वासदन्यवत् ।
न विवेकाभयं तस्मात्परतो भेदभासनम् ॥७७६॥ २०

ततः सूत्रम्–'भेदपर्यनुयोगतः' इति ।

कुतश्च भेदप्रपञ्चः परमार्थसन्नेव न भवेत्तत्तस्य कुतश्चिदारोपितत्वं परिकल्प्येत ? प्रतिसंहृतसत्प्रपञ्चस्यैव परमात्मनः कदाचित्प्रतिवेदनादिति चेत्, न, तादृशस्य कदाचिदप्यनुभवाभावात् । तदाह–'प्रतिसंहार' इत्यादि । तन्नाद्वैतवादः श्रेयान् । २५

विभ्रमवाद एवास्त्विति चेत्, न, तस्य 'विप्लुत' इत्यादिना प्रतिक्षेपात् । तदेव व्याचक्षाणस्तत्प्रतिक्षेपमेव दर्शयति–

इन्द्रजालादिषु भ्रान्तमीरयन्ति न चापरम् ॥५२॥
अपि चाण्डालगोपालबालालोलविलोचनाः । इति ।

---

१ दवेता० ६।१४। मुण्डको०३।२।१०। २ –तत्वबाधतत्व–आ०, ब०, प०, स०,। ३ विवेकशक्तिमु–आ०, ब०, प०, स०। ४ विवेकस्य। ५ विभ्रमविरोधकल्पनायाम्। ६ –र्मं विवः आ०, ब०, प०। ७ –परिमं आ०, ब०, प०, स०।

व्यक्तः शब्दार्थः। तात्पर्यार्थस्तूच्यते–यदिन्द्रजालस्वप्नादिविषयेषु विप्लवव्याप्तं प्रत्ययत्वमन्यद्वा न तज्जाग्रदर्थविषयेष्वस्ति, स्वयमेव प्राणिनां तत्र विप्लवप्रतिपत्तिप्रसङ्गेन अनुमानस्य वैफल्यापत्तेः। अनुमानान्तरेऽप्येवं प्रसङ्गः, कृतकत्वादेरपि घटादावनित्यत्वव्याप्ततया प्रतिपन्नस्य शब्दे धर्मिण्यभावात्। भावे स्वत एव पुंसां तत्राप्यनित्यत्वप्रतिपत्तेः, अनुमानवैफल्याविशेषादिति चेत्; सत्यम्; तत्र बालाबलागोपालादीनां स्वत एवानित्यत्वप्रतिपत्तिः। न चैतावता तदनुमानवैफल्यम्; आगमाहितसंस्कारस्य तत्र नित्यत्वाध्यारोपे तस्य तद्व्यवच्छेदार्थत्वात्। जाग्रत्प्रत्ययेषु त्वागमवतामेव विप्लवप्रतिपत्तिर्न बालादीनां "प्रामाण्यं व्यवहारेण" [प्र०वा० १।७] इत्यस्य विरोधात्, बालादिपरिज्ञानादन्यस्य व्यवहारस्याभावात्। तस्य च विप्लवगोचरत्वे कथं ततः प्रामाण्यव्यवस्थापनं विप्लवव्यवस्थापनस्यैवोपपत्तेः? तस्माद्विप्लवज्ञानमेव तत्र तेषाम्। न च विप्लवात्मन एव प्रत्ययत्वस्य तत्र भावे तदुपपन्नम्। सत्यपि तस्मिन्नविप्लवसंस्कारादुपपन्नमेवेति चेत्; न; तेषामिदानीं तत्संस्कारहेतोरनुपलम्भात्। न चाहेतुकस्तत्संस्कारो नित्यत्वापत्तेः। प्राक्तनात्तत्संस्कारादिति चेत्; न; स्वरूपसत्यत्वेऽपि प्रसङ्गात्, तस्यापि संस्कारबलादेव सत्यतया परिज्ञानसम्भवात् वस्तुतो विप्लवस्यैवोपपत्तेः। कथं पुनः स्वरूपविप्लवे बहिर्विप्लवपरिज्ञानं सत्येव तदविप्लवे तदुपपत्तेस्तस्य तदपेक्षत्वादिति चेत्? कथमिदानीमेकचन्द्रादिविप्लवे द्विचन्द्रादिविप्लवपरिज्ञानम्? सत्येवैकचन्द्रादेरविप्लवत्वे द्विचन्द्रादिविप्लवस्यापि परिज्ञानसम्भवात्। परिकल्पितेन तदविप्लवेन तदपरविप्लवपरिज्ञानमिति चेत्; स्वरूपाविप्लवेनापि तादृशेनैव बहिर्विप्लवपरिज्ञानं भवतु विशेषाभावात्। ततः स्वरूपवदसंस्कारबलोपनीतमेव बहिरर्थसत्यत्वमिति न विप्लवात्मकं तत्प्रत्ययेषु प्रत्ययत्वम्, बालादीनामपि तत्र विप्लवप्रतिपत्तिप्रसङ्गात्। न चैवम्, अविप्लवपरिज्ञानस्य तत्र तेषां भावादित्यसिद्धो हेतुः, अतश्च तद्वादिनां जडत्वमिति। तथा च यज्ञातश्चदमं (यज्ञातमाश्चर्यं) तदाह–

तत्र शौद्धोदनेरेव कथं प्रज्ञापराधिनी ॥५३॥
बभूवेति वयं तावत् बहुविस्मयमास्महे। इति

तत्र जाग्रत्प्रत्ययाविप्लवे **शौद्धोदनेरेव** सकलज्ञानधन्यम्मन्यस्य बुद्धस्यैव न चाण्डालादीनामल्पप्रज्ञानां **कथं प्रज्ञा** बुद्धिः **अपराधिनी** स्खलनवती "सर्वमालम्बने भ्रान्तम्" [प्र०वार्तिकाल० २।१९६] इत्युपदेशात् **बभूव** इति एवं **वयं** परीक्षाचक्षुषः **तावत्** क्रमेण

---

१ –र्थः सूच्य–आ०,ब०,प०,स०। २ शब्दे। ३ मीमांसकागम। ४ –रोपितस्य –आ०,ब०,प०, स०। अनुमानस्य। ५ बौद्धानाम्। ६ बालादिव्यवहारस्य। ७ कथन्न ततः आ०, ब०, प०, स०। ८ जाग्रत्प्रत्ययं। ९ बालाबलादीनाम्। १० प्रत्ययस्य आ०, ब०, प०, स०। ११ विप्लवात्मनि। १२ संवेदनस्वरूपसत्यत्वेऽपि। १३ स्वरूपाविप्लवे। १४ बहिर्विप्लवोपपत्तेः। १५ एकचन्द्राविप्लवेन। १६ द्विचन्द्र। १७ परिकल्पितेनैव। १८जाग्रत्प्रत्ययेषु। १९ यज्ञाश्चतदमं तदाह आ०। यज्ञश्चदमं तदाह स०। तथाश्च तदमं तदाह ब०। यज्ञाश्च तदयं तदाह प०। २०–ज्ञानदन्यम्मन्य आ०, ब०, स०।

बहुविस्मयम् अनल्पाश्चर्यम् आस्महे । भवति हि प्रेक्षावतामाश्चर्यबहुलमासनं मनोऽवस्थानं यदि मन्दबुद्धिगोचरे महामतेरेव परिस्खलनम् । अस्ति चेदं शौद्धोदनेः । अधिक्षेपेऽपि स्वरूपार्थज्ञानानाम् अर्थज्ञानेष्वेव विप्लवोपगमात् । परमपि वदाह–

तत्राप्यापि जनाः सक्ताः [तमसो नापरं परम् ।] इति ।

तत्र तस्मिन् प्राक्तवचनप्रज्ञाविषयेऽपि परिस्खलनयति शौद्धोदनौ अप्यापि स्खलन्त्व तया परिज्ञानसमयेऽपि जना दिग्नागादयः सक्ताः तत्प्रामाण्ये कृताग्रहाः "प्रमाणभूताय" [प्रमा०स० श्लो० १] इति वचनादिति च वयं बहुविस्मयमास्महे । भवति हि विषारशूरवेधसां साश्चर्यमवस्थानं यदि प्रज्ञायक्षेपपन्नोऽपि लोकः परिज्ञान(व)क्षेपेऽपि आत्मबुद्धिमङ्ग(बुद्धि क्ष)र्वति । बद्धलक्षेपपन्नाश्च दिग्नागादयः "स श्रीमानकलङ्कधी." [ ] इत्यादे "न्यायमार्गतुलारूढम्" [हेतुवि० टी० प० १] इत्यादेश्च श्रवणात् । भवदपि कदाचिदज्ञानबलम् अध्यारोपेण तमसा प्रतिरुध्यते तदयमदोष इति चेत्, न, तमस एव तेन प्रतिरोधसम्भवात् तस्य वस्तुपक्षप्रसूतत्वात्, तममत्र विपर्ययात् । कदाचिद्देषमपि स्यादिति चेत्,

अत्राह– तमसो नापरं परम् ॥५४॥ इति

तमसः अध्यारोपाद् अपरं प्रज्ञामलं परन्न किन्तु तम एव परम्, तस्यैव बहुलप्रतिरोधित्वेन प्रकृष्टत्वादिति च वयं बहुविस्मयमास्महे । भवति ह्येवम् बहुविस्मयापादानं यदन्ध कारेणापि प्रदीप प्रतिरुध्यते इति । भवतु बहिरिवान्तरपि विप्लवो बुद्धवेदनेऽपि तदभ्युपगमात् । "भिन्नबोऽहमपि मायोपमः स्वप्नोपमः" [ ] इत्यादिवचनादिति चेत्, न, अत्रापि 'तत्र' इत्यादेर्दोषस्याविशेषात् ।

अपि च, यत्परिज्ञानं तद्विप्लवस्य कथमवैरूप्यापनम् अविप्लववत् ? परिज्ञानञ्च यत्किंविप्लवम, कथं वैरेकान्तः ? सविप्लवं चेत्, कथं ततस्तिसृभिस्तद्विपर्ययवत् ? तदेवाह–

विभ्रमे विभ्रमे तेषां विभ्रमोऽपि न सिद्ध्यति । इति ।

विभ्रमे बहिरन्तः सकलज्ञानविष्लवविषये यत्तद्विपर्यये ज्ञानस्य विभ्रमो विप्लव स्तस्मिन् तेषां ज्ञानानां विभ्रमोऽपि न केवलमविभ्रम इत्यपि शब्दार्थः, न सिद्ध्यति ।

अविभ्रमे यथा सर्ववेदनेषु न सिद्ध्यति ।
विभ्रमाविभ्रमोऽप्येव विभ्रमान्न प्रसिद्ध्यति ॥७७७॥

ततः सूत्रमिदम्–

तत्राप्यापि जना सक्तास्तमसा नापरं परम् ।
विभ्रमे-विभ्रमे तेषां विभ्रमोऽपि न सिद्ध्यति ॥ इति ।

---

१ –पे प्यत्र आ०, ब०, प०, म० । २ प्रज्ञावतेन । ३ –भवभ्य–आ०, ब०, प०, म० । ४ विपरै काभ्य । ५ 'सर्व विप्लवम्' इति विद्वांसः । ६ विभ्रमविप्लवस्य ।

तदसिद्धौ दूषणान्तरमभ्याह-

कथमेवार्थ आकाङ्क्षानिवृत्तेरपि कस्यचित् ॥५७॥
व्यवहारो भवेज्जातिमूकलोहितपीतवत् । इति ।

अर्थे जलादौ **व्यवहारस्तदभिधानादिः** स च **आकाङ्क्षायाः** विभ्रमाभिप्रायस्य **निवृत्तिः** अर्थ इत्यधिमुक्तिरेव तस्यास्तद्रूपत्वात् । तस्या एव एवकारस्यात्र दर्शनात् न वस्तुतोऽर्थस्य भावात् । विभ्रमैकान्ते[4] तदसम्भवात् । तन्निवृत्तिश्च कस्यचिदेव दृढवासनावतो नापरस्य तस्य तत्र तदाकाङ्क्षया अनर्थक्रियाव्यवहारस्यैव भावात् । **अपि**शब्दः 'च' इति शब्दार्थः, **'व्यवहारः'** इत्यस्यानन्तरं द्रष्टव्यः इति । परमतं **कथं** नैव **भवेत्** ? दृष्टान्तमाह-**'जाति'** इत्यादि । **जातिमूकेन** जातिबधिरमुपलक्षयति नान्तरीयकत्वात्, लोहितादिशब्देनापि तद्विषयं व्यवहारम् । तदयमर्थः-यथा जातिबधिरः शब्दार्थसम्बन्धमजानानः तन्निबन्धनं **'लोहितं पीतम्'** इति च शब्दविकल्पात्मकं व्यवहारं न प्रतिपद्यते तथा विभ्रमैकान्तमप्रतिपद्यमानोऽपि तत्रैवार्थाधिमुक्तिभावाभावाभ्याम् अर्थानर्थक्रियाव्यवहार इत्यपि न प्रतिपत्तुमर्हतीति ।

परस्य मतम्-न ग्राह्याकारेऽपि संवेदनानां [6]विभ्रमः, तत्र तेषामप्रवृत्तेः **"नान्योऽनुभाव्यो बुद्ध्यास्ति"** [प्र० वा० २।३२७] इति वचनात् । न चाविषये विभ्रमः ; नीलज्ञानस्य पीते तत्प्रसङ्गात् । तत्र तद्वत् स्वरूपे तत्कल्पनम्, स्वरूपस्यानुभवाधिष्ठितत्वेन परमार्थसत एवोपपत्तेः, अन्यथा सकलव्यवस्थावैफल्योपपत्तेरिति । तत्राह-

अनर्थानेकसन्तानानस्थिरानविसंविदः ॥५८॥
अन्यानपि स्वयं प्राहुः प्रतीतेरपलापकाः । इति ।

अनर्थान् अविद्यमानविषयान् प्रत्ययान् **प्राहुः** प्रतिपादयन्ति 'प्रत्ययान्' इत्यध्याहारात् । कीदृशान् ? **एकसन्तानान्** अभिन्नसन्तानान् । पुनस्तद्विशेषणम् **अस्थिरान्** क्षणिकान् **अन्यानपि** भिन्नसन्तानानपि तादृशान् **प्राहुः स्वयं** बौद्धाः । तद्विशेषणम् **अविसंविद** इति । न विद्यते स्वपरविषयतया विविधा संवित् सम्यग्ज्ञानं येषां ते तथोक्ताः । कुतस्ते तथेति चेत् ? आह-**प्रतीतेरपलापका** यत इति । प्रतीतेः स्वपरविषयतया लोकप्रसिद्धाया अपलपनादेव तेषाम् अविसंवित्त्वं न पुनर्वस्तुतस्तदभावादेव, अन्यथा सन्तानसन्तानान्तरतदेतानेकत्वक्षणभङ्गादीनामप्रतिपत्तिप्रसङ्गात् । तदनेन प्रतीत्यपलापादनवधेयवचनत्वं तेषामुपदर्शयति ।

भवतु तत्त्वं संविदद्वैतमेवेति चेत् ; दत्तमत्रोत्तरम्-**'अद्वयं द्वयनिर्भासम्'** इत्यादिना । तदेव [8]विस्तारयन्नाह-

---

१ विभ्रमाभिद्धौ । २ -या वादि-आ०, ब०, प०, स० । ३ इत्यादिषु-आ०, ब०, प०, स० । ४ -कान्ते-न तस्मि-आ०, ब०, प०, स० । ५ शब्दस्वेदिति, आ०, ब०, प०, स० । ६ विभ्रमप्रवृ-आ०, ब०, प०, स० । ७-पयत्वाम्र-आ०, ब०, प०, स० । ८ विस्तरयन्ना-आ०, ब०, प०, स० ।

स्वतस्तत्त्वं कुतस्तत्र वितथप्रतिभासतः ॥५७॥
मिथस्तत्त्वं कुतस्तद्व वितथप्रतिभासतः । इति ।

स्वतः स्वस्मात् तत्त्वम् अद्वयरूपं 'कुतो' नैव 'सिद्ध्येत्' इत्यध्याहारः । हेतुमाह-'वितथ' इत्यादि । वितथो ग्राह्यादिनीलादिरूपो भेदस्तस्य प्रतिभासनं वितथप्रतिभासः तस्मात् इति । एवदुक्तं भवति-सकलभेदप्रतिभासविकल हि संविन्मात्रं परस्याद्वैतं न विज्ञानरूपम्, सति तस्मिन् बहिरर्थसन्तानान्तरप्रसुज्जीवनापत्तेः । तस्यैव न स्वतः सिद्धिः, स्वतोऽपि भेदाभिज्ञानस्यैव संवेदनस्य प्रतिभासनात्, तस्य च मिथ्यात्वादिति । परतस्तत्सिद्धिं प्रत्याचक्षाण आह-'मिथ' इत्यादि मिथ इति 'अन्यतः' इत्यर्थो निपातत्वात्, निपातानामानेकार्थत्वात् । 'मिथः' परतश्च तत्त्वम् अद्वयं कुतो नैव सिद्ध्यति । कुत एवत् ?, वितथप्रतिभासतः न हि परतोऽपि निरंशस्य प्रतिभासनं भेदवत एव तत्रापि सहिष्णुतया प्रतिभासनात् । तत्रास्य च मिथ्यात्वादिति भावः ।

ननु च स्वतः प्रतिभासने निरस्ते निरस्तमेवाद्वयम्, परतस्तु तत्प्रतिभासनं परस्याप्यनभिप्रेतमेव "तस्या नानुभवोऽपरः" [प्र०वा० २।३२७] इति वचनात् तत्कथं तस्योपक्षेपः परप्रसिद्धस्यैवोपक्षेपोपपत्तेरिति चेत् ? किमिदानीम्-"आत्मा स तस्यानुभवः" [प्र०वा० २।३२६] इत्यादेर्विचारस्य फलम् ? न किञ्चिदिति चेत्, न, असाधनाङ्गवचनतया तद्वादिनो निग्रहावाप्तेः । तस्माद्बहिरभिज्ञानमेव सत्यं भेदसमारोपव्यवच्छेद्यस्यापि तत्परिज्ञानरूपत्वात्, अन्यथा वैफल्यापत्तेः । अतो विद्यत एव परस्यापि परतस्तत्प्रतिभासनमित्युपपन्न एव तदुपक्षेपः । तदेवाह-

यतस्तत्त्वं पृथक् तत्र मतः कश्चिद्बुधः परः ॥५८॥ इति ।

बुधः प्रतिपन्न कश्चित् विपरीतात्मा परः प्रकृष्टः पृथग् भिन्नः तत्र अद्वैते मतः अभिप्रेतः परस्य । कीदृशोऽसौ ? यतो यस्माद् बुधात् तत्त्वम् अद्वयं प्रतिभातीति दोषः । तत एव तर्हि विपरीतात्मनो बुधात्तत्त्वं प्रतीयतामिति चेत्, आह-

ततस्तत्त्व गतं केन [कुतस्तत्त्वमतत्त्वतः] इति ।

ततो बुधात् तत्त्वमद्वयं गतं प्रतिपन्नम् । केन ? न केनचित् । तथाहि-विचारो नाम विकल्पज्ञानविशेष एव ।

विकल्पकञ्च विज्ञानमभिलाप्येतरात्मकम् ।
तत्त्वेन सम्मतत्वेव निरंशज्ञानवादिनः ॥७७८॥
कल्पितं सम्मतत्वेव तच्चेत्तत्कल्पनं कुतः ?
परतश्चेद्विकल्पात्र तस्याप्यन्येन कल्पनात् ॥७७९॥

---

१ विज्ञानरूप-आ०, ब०, प०, स० । २ विज्ञाभावे । ३ अद्वैतस्य । ४ -ने निरस्तमे-आ०, ब०, प०, स० । ५ अद्वैतपरीक्षान । ६ अन्यथा आ०, ब०, प०, स० । ७ विकल्पक-आ०, ब०, प०, स० ।

अनवस्थानदोषोऽयमनिवार्यः प्रसज्यते ।
तस्मान्न सम्भवत्येव विज्ञानं ते विकल्पकम् ॥७८०॥
न चासम्भवतस्तस्मात्तत्त्वस्य प्रतिवेदनम् ।
व्योमाम्भोरुहसौरभ्यादपि तस्य प्रमज्जनात् ॥७८१॥

तदेवाह–'कुतस्तत्त्वमतत्त्वतः' इति । कुतो नैव तत्त्वम् अद्वयम् अतत्त्वतः अविद्यमानसद्भावाद्विचारात् गतमिति ।

एतेनानुमानं विचार इति प्रत्युक्तम् । अपि च,

अनुमानं भवेद्व्याप्तौ साध्यविद्या च तद्गतिः ।
तद्विद्या यदि चाध्यक्षात् प्राप्तं निःश्रेयसं भवेत् ॥७८२॥
न च निःश्रेयसप्राप्तस्यानुमानं प्रकल्प्यते ।
विधूतकल्पनाजालं यत्ते निःश्रेयसं मतम् ॥७८३॥
विकल्पः साध्यधीश्चेन्न तस्य स्वांशे व्यवस्थितेः ।
साध्यैकत्वावसायाच्चेत्तदंशस्यैवमुच्यते ॥७८४॥
वस्तुतो न तथाप्यस्ति साध्यविद्या ततः कथम् ।
व्याप्तिधीनुमानं यद्द्वैतविषयं भवेत् ॥७८५॥
यादृशं व्याप्तिविज्ञानमयथार्थं भवेत्ततः ।
तादृगेवानुमानं चेत्ततस्तत्त्वगतिः कथम् ? ॥७८६॥

तदाह–'कुतस्तत्त्वमतत्त्वतः' इति । न विद्यते तत्त्वम् अद्वयं विषयत्वेन यस्मिन् तद् अतत्त्वम् अनुमानं तस्मात् कुतस्तत्त्वं गतमिति यदि निरंशस्य स्वतः परतश्च न प्रतिभासनम् ।

तदपि मा भूत्; सर्वाभावस्यापि बौद्धैः सिद्धान्तीकरणादिति कश्चित् । निरंशेतरनित्येतरादिविकल्पैर्निर्विकल्पस्यैव तत्त्वस्य परिकल्पनादिति परः । तत्राह–

यथा सत्त्वं सतत्त्वं वा प्रमासत्त्वसतत्त्वतः ॥६॥
तथाऽसत्त्वमतत्त्वं वा प्रमासत्त्वसतत्त्वतः । इति ।

यथा येन गत्यन्तराभावप्रकारेण **सत्त्वं** ज्ञानज्ञेयरूपस्यार्थस्य विद्यमानत्वं **प्रमासत्त्वतः** प्रमाणभावात् । **तथा** तेन प्रकारेण तस्य **असत्त्वमपि** प्रमासत्त्वतः प्रमाणभावादेव । तात्पर्यम्–

प्रमाणनिरपेक्षस्य सर्वाभावस्य कल्पनम् ।
न युक्तम्, तद्विपक्षस्य तथाक्लृप्तिप्रसञ्जनात् ॥७८७॥

---

१ तत्त्वप्रतिवेदनस्य । २ –वा विचा–ता० । ३ व्याप्तिज्ञानम् । ४ साध्यज्ञानम् । ५ बौद्धस्य । ६ तत्त्वमन्वर्थ–आ०, ब०, प०, स० । ७ अर्थस्य । ८ प्रमाणनिरपेक्षतया ।

प्रमाणोत्पन्नकल्पनास्तु न भवत्येव सर्वथा ।
प्रमाणस्यैव सद्भावात्तत्पूर्वकल्पनाविधायिन ॥७८८॥ इति ।

तत्र शून्यवादः श्रेयान् ।

निर्विकल्पकवस्तुवादिनोऽपि सतत्त्व विकल्पत्वम्, 'सह तैर्निरंशादिभिर्विकल्पैर्वर्तत इति सतत् तस्य भावः सतत्त्वम्' इति व्युत्पादनात् । तत्[1] यथा प्रमाससतत्त्वतो भावस्य तथा असतत्त्वम् अविकल्पत्वम् न विद्यन्ते ते विकल्पा यस्य तदतत्तस्य भावोऽतत्त्वमिति व्युत्पादनात । यदपि प्रमाससतत्त्वतः प्रमाणस्य सविकल्पत्वात् । वाशब्द उभयत्रापि पक्षान्तरद्योतने । तात्पर्यमत्रापि—

सर्वविकल्पातीतं तत्त्वं न विना प्रमाणतः सिद्धयेत् ।
तद्विपरीतस्यापि च तत्त्वस्यैवं प्रसिद्धिमयात् ॥७८९॥
तत्र सदपि प्रमाणं सर्वविकल्पव्यतीतमेव मतम् ।
यदि तस्य न प्रसिद्धिः स्वतोऽस्ति तन्निश्चयाभावात् ॥७९०॥
अविनिश्चितमपि चेच्चेत्, स्यातः प्रसिद्धं प्रमाणमविकल्पम् ।
सविकल्पमेव न तथा किमिति व्यवस्था कुतस्तत्त्वे ॥७९१॥
परतस्तत्प्रसिद्धौ तदपि परं निर्विकल्पमेव यदि ।
तत्राप्ययं प्रसङ्गो भवमशक्यो निवारयितुम् ॥७९२॥
पुनरपरनिर्विकल्पप्रकल्पनायामवस्थितिर्न स्यात् ।
तस्मात्प्रमाणमन्ते सविकल्पकमेव वक्तव्यम् ॥७९३॥
तस्य स्वतोऽनुभवनात् युगपत्त्वपरार्थनिर्णयप्रत्वेः ।
एकान्तनिर्विकल्पं प्रमवति तस्मिन् कथं तत्त्वम् ॥७९४॥ इति ।

भवतु प्रमाणादेव सविकल्पकादेव च भावेष्वसत्त्वमतत्त्वञ्च, तत्तु न परमार्थतः, विचारासहत्वात्, अपि तु व्यवहारेणैव संवृतिरूपेणेति चेत्, न, ततोऽसत्त्वावतत्त्वयोरिव सत्त्वसतत्त्वयोरपि भावेषु कल्पनापत्तेः व्यवहारस्य तत्राप्यविशेषात् । न चेदनुचितम्, विरोधात् । यदि तेषु सत्त्वसतत्त्वे तदा कथमसत्त्वासतत्त्वे । ते चेत्, कथं सत्त्वसतत्त्वे इति ? तदेवाह—

तदसत्त्वमतत्त्वं वा परसत्त्वसतत्त्वयोः ॥९०॥
न हि सत्त्वं सतत्त्वं वा तदसत्त्वासतत्त्वयोः । इति ।

तत् अनन्तरोक्तम् असत्त्वमतत्त्वं च वाशब्देन समुच्चयात् । न हि नैव सम्भवति । कदा ? परयोस्तद्विरोधिनोः सत्त्वसतत्त्वयोः सतो यथाऽसत्त्वं सतत्त्वं च । वाशब्देना-

---

१—अतत्र पङ्क्तिः—आ०, ब०, प०, स० । २ यथाभावकल्पनाप्रतिषेधमूतस्य । ३ सविकल्पत्वम् ।

प्रापि समुच्चयात्। तत् अनन्तरोक्तम् 'न हि' इति सम्बन्धः। कदा ? [1]असत्त्वासतत्त्वयोः सत्त्वसतत्त्वप्रत्यनीकयोरसत्त्वासतत्त्वयोः सतोरिति।

स्यान्मतम्-सांवृतमपि विज्ञानमसत्त्वादिविषयमेव तत्त्वसिद्धिनिबन्धनं न [2]सत्त्वादिविषयमिति; [3]तन्न; मिथ्यात्वाविशेषात्। मिथ्याज्ञानमपि मणिप्रभामणिज्ञानमेव [4]तन्निबन्धनं तत्र मणिप्राप्त्या परितोषदर्शनात् न प्रदीपप्रभामणिज्ञानं विपर्ययात्, तद्वदत्रापीति चेत्; न; तत्रापि विभ्रमे तदनुपपत्तेः। तथा हि—न मणिप्रभामणिज्ञानं तन्निबन्धनं भ्रान्तत्वात् प्रदीपप्रभामणिज्ञानवत्। कथमेवं ततः प्रवृत्तस्य मणिप्राप्तिरिति चेत् ? न; सन्निहितस्यान्यत एव सत्यज्ञानात्तत्प्राप्तेः। तदेवाह—

परितुष्यति नामैकः प्रभयोः परिधावतोः ॥६१॥
मणिभ्रान्तेरपि भ्रान्तौ मणिरत्र दुरन्वयः ॥ इति।

परिधावतोः प्रवर्त्तमानयोर्मध्ये **एकः परितुष्यति** मणिप्राप्त्या नापरो विपर्ययात्। कुतः परिधावतोः ? **मणिभ्रान्तेरपि** न केवलं तद्भ्रान्तेः। क्व तद्भ्रान्तेः ? **प्रभयोः** द्विवचनान्मणिप्रदीपप्रभयोरिति। **नाम**शब्देनात्रारुचिमावेदयन् तत्रोपपत्तिमाह-**भ्रान्तौ** अत्र मणिज्ञाने **मणिर्दुरन्वयो** दुरनुगमो दुरवायो वेति। तदनेन साध्यसमत्वं दृष्टान्तस्य दर्शितम्। परो दृष्टान्तसमर्थनमाह—

सति भ्रान्तेरदोषश्चेत् [तत्कुतो यदि वस्तु न] ॥६२॥ इति।

सति हि मणौ तत्प्रभामणिज्ञानात्मा **भ्रान्तिर्नासति**, तस्मा**ददोषः** मणिरत्र दुरन्वयः इति दोषो नास्ति, [5]सत्येव मणौ भ्रवन्त्यास्ततस्तदन्वयस्यावश्यम्भावादिति भावः। तदुक्तम्—

"मणिप्रदीपप्रभयोर्मणिबुद्ध्याऽभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥" [प्र० वा० २।५७] इति।

चेच्छब्दः पराभिप्राये। तत्रोत्तरमाह-'**तत्कुतो यदि वस्तु न**' इति। **वस्तु** मणिरूपं **यदि न** विद्यते **तत्** 'सति' इत्यादि **कुतो** न कुतश्चिदपि। तथा हि—कीदृशं तद्वस्तु ? शून्यमिति चेत्; सुस्थितं [6]तस्यास्तत्प्रापकत्वम्। सकलविकल्पविकलमिति चेत्; न; तस्याप्यननुभवात्। निरंशपरमाणुरूपमित्यपि श्रद्धानमात्रम्; अनुभवप्रत्यनीकत्वात्। नानावयवसाधारणं स्थूलमिति चेत्; अत्राह—

कामं सति तथाकारे तद्भ्रान्तं साधु गम्यते।

---

१ असतत्त्वयोः—आ०, ब०, प०, स०। २ सतत्त्वादिवि—आ०, ब०, प०, स०। ३ तन्नि—आ०, ब०, प०, स०। ४ तत्त्वसिद्धिनिबन्धनम्। ५ सत्ये मणौ आ०, ब०, प०, स०। ६ भ्रान्तेः। भवन्त्यास्तदन्व—आ०, ब०, प०, स०। ७ मणिप्राप्तेः। ८ मणिभ्रन्तेः। ९ मणिप्रापकत्वम्।

प्रसिद्धः साक्षस्थूल आकारो यस्य तस्मिन् वस्तुनि सति भ्रान्तं मणिभ्रमणं यदि-स्यधिकृत्य सम्बन्धः, तदा कामम् अतीव तद्भ्रान्तं साधु शोभनं मणिप्राप्त्याऽवगम्यते । नैवम्, अनेकान्तविद्वेषिणस्तदाकारस्य वस्तुनोऽसम्भवादिति भावः । [3]संवृत्या तदाकारमेव वस्तु परस्यापि प्रसिद्धमिति चेत्, न, दृष्टान्तवदार्ष्टान्तिकेऽपि सांवृतस्यैव वस्तुनो मिथ्याज्ञानतः प्रसिद्धिप्रसङ्गात् । [4]भवत्येवमिति चेत्, न, परमतानभिज्ञापनात् । ५

[5]सत्त्वादिवदसत्त्वादि संवृत्यैव यदीष्यते ।
परपक्षाविशेषस्ते कस्तदा वस्तुतो भवेत् ? ॥७९५॥
संवृत्या च वरं तत्त्वं सत्त्वाद्येवोपकल्पितम् ।
तत्र स्वर्गापवर्गादिसुखसम्प्राप्तिसम्भवात् ॥७९६॥
न सर्ववस्तुनैरात्म्यनिर्विकल्पादि तत्त्ववत् । १०
न ह्यलौकिकमन्यच्च किञ्चिदिष्टमवाप्यते ॥७९७॥
प्रयोजनमवुन्मुख्य निष्प्रयोजनमाभयम् ।
प्रेक्षावतां कथं नाम कक्षीकर्तुं क्षमो भवान् ॥७९८॥

तत्र संवृत तत्त्वमित्युपपन्नम् ।

भवतु वास्तवमेवेति चेत्, न, तस्य मिथ्याज्ञानाद्सिद्धेः । सर्वेषामपि तत्त्वं एवाभि- १५
मतसिद्धिप्रसङ्गात् । तदाह—

अयमेव न पेत्येवमविचारितगोचराः ॥६३॥
जायेरन् सविदात्मानः सर्वेषामविशेषतः ॥
तावता यदि किञ्चित्स्यात् सर्वेऽमी तत्त्वदर्शिनः ॥६४॥ इति ।

अयं बहिरन्तश्च प्रतीयमानो भावः एवं शून्यतादिरूपेण न वा नैव एवं सत्त्वादि- २०
रूपेण एवमित्यस्य इति शब्दस्याहितस्यात्र सम्बन्धात् । इत्येवमविचारितगोचरा अनाद्यविद्याविषया जायेरन् उत्पद्येरन् सविदात्मानो विज्ञानस्वभावाः सर्वेषां प्रवादिनाम् अविशेषतो विशेषमन्तरेण । ततः किम् ? इत्याह—तावता तज्ज्ञाननमात्रेण यदि चेत् किञ्चित् शून्यादिकं स्यात् भवेत् सर्वे निरवशेषा अमी वैशेषिकादयस्तत्त्वदर्शिनः स्वाभिमतद्रव्यादिपदार्थतत्त्वदर्शनशीलाः स्युरिति वचनपरिणामेन सम्बन्धः । २५

द्रव्यादीनां विचारासहत्वादयथार्थत्वमेवेति चेत्; न, शून्याद्यपि तदसहत्वाविशे षात् । कथं वा द्रव्यादेर्विचारासहत्वम् ? कथञ्च न स्यात् ? शून्यनिर्विकल्पवादिनोर्विचार-स्यैवासम्भवात्, सतोऽपि तस्य स्वांशमात्रपर्यवसानात् । तदाह—

---

१ तथाऽऽकारमतीव तद्भ्रान्तं—आ०, ब०, प०, स० । तत्त्वमेव । २ नचैकान्त—आ०, ब०, प०, स० । ३ संवित्त्या ४ भवतैवमि—आ०, ब०, प०, स० । ५ सत्त्वादि—आ०, ब०, प०, स० । ६ मिथ्याज्ञानादेव । ७—तथा आ—आ०, ब०, प०, स० ।

पर्वतादिविभागेषु स्वांशमात्रावलम्बिभिः ॥६५॥
विकल्पैरुत्तरैर्वेत्ति तत्त्वमित्यतियुक्तिमत् । इति ।

पर्वत[1]ग्रहणं सर्वद्रव्योपलक्षणं पर्वतस्य द्रव्यत्वेन ततः तज्जातीयोपलक्षणोपपत्तेः[2]। आदिशब्देन गुणादिपरिग्रहः । पर्वत आदिर्येषां ते पर्वतादयः, त एव परस्परतो विभज्यमानतया विभागाः विशेषास्तेषु । तत्त्वम् अयथार्थत्वम्, 'तेषामयथार्थानां भावस्तत्त्वम्' इति व्युत्पादनात्[3]। तत् वेत्ति तज्जानाति सौगत इत्यतियुक्तिमद् अतिशयेन सयुक्तिकम्, उपहसनमेतत् अयुक्तिमत्येवमभिधानात । कैः ? विकल्पैः विचारज्ञानैः । कीदृशैः ? उत्तरैः उत्तरन्ति व्यवस्थां वैकल्यादुत्प्लवन्त इत्युत्तरास्तैः, इत्यनेनोपहासे कारणमुक्तम् । तदाह–

शून्यविकल्पवादेषु विकल्पानामसम्भवात्[4] ।
तैः क्वचित्तत्त्वविज्ञानमुपहासास्पदं न किम् ? ॥ ७९९॥
अनुपायं हि किञ्चिन्न कस्यचित्सिद्धिमृच्छति ।
अनुपायेष्टसिद्धौ हि कस्य केन दरिद्रता ॥८००॥

भवन्तु वा विकल्पाः, तथापि तैः स्वांशमात्रे वापनारोपिताभिलाप्याकारलक्षणे[5] पर्यवसितैः क्वचिदन्यत्र तत्त्वपरिज्ञानमतियुक्तिमदेवेत्यावेदयन्नाह–**स्वांशमात्रावलम्बिभिः** इति । तथा हि–

स्वरूपमात्रनिर्मग्नैर्विकल्पैस्तत्त्ववेदनम् ।
कथमन्यत्र यद्द्रव्याद्ययथार्थं प्रकल्प्यते ॥८०१॥
अनुमानादिवान्यत्र तदाभासादपि स्वयम् ।
तत्त्वज्ञानं कुतो न स्यादविशेषाद्विशेषतः ॥८०२॥
अनुमानस्य साध्येन सम्बन्धाच्चे[6]द्विशिष्टता ।
सम्बन्धोऽपि विकल्पात्र परतः शक्यवेदनः ॥८०३॥
ततोऽपि स्वात्मनिर्मग्नात्सम्बन्धप्रतिपत्तयम् ।
सम्बन्धे तस्य सम्बन्धादेवं सत्यनवस्थितिः ॥८०४॥
विकल्पजननान्मानं येन प्रत्यक्षमुच्यते ।
अनयैव च पद्धत्या निषिद्धः सोऽपि बुध्यते ॥८०५॥
शुक्लस्य दर्शनं यद्वन्मानं शुक्लविकल्पतः ।
स्यात्पीतादिविकल्पादप्यविशेषात् पुरोदितात् ॥८०६॥

१–मात्रविलम्बि–ता० । २ सर्वत्रग्र–आ०, ब०, प०, स० । ३ ततः स्वजातीं–आ०, ब०, प०, स० । ४–नां च संभ–आ०, ब०, प०, स० । ५–णार्थ–स० । ६–मात्रविलम्बि–ता० । ७–त्वेद्विशिष्यता आ०, ब०, प०, स० । ८ विकल्पादपि ।

शुक्ले शुक्लविकल्पस्य सम्बन्धाच्चेष्टिशिष्टता ।
न तस्यापि प्रमाणत्वप्रसङ्गादनुमानवत् ॥८०७॥
गृहीतविषयत्वं तु स्वांशमात्रावलम्बिनः ।
न तस्य शक्यते वक्तुं यतः स्यादप्रमाणता ॥८०८॥
[1]एकस्याप्यवसायेन स्वयं दृश्यविकल्प्ययोः ।
गृहीतग्रहणं तत्र कल्प्यते यदि सौगतैः ॥८०९॥
एकस्य व्यवसायस्यैवांशौ दृश्यविकल्प्ययोः ।
कथं ततो विकल्पस्य गृहीतग्रहणं भवेत् ॥८१०॥
एकत्राप्यवसायेनेत्यादेः पुनरुदीरणे ।
तदेवोत्तरमेवं स्यादनवस्था महीयसी ॥८११॥
गृहीतार्थत्वमीहक्षमनुमानेऽपि विद्यते ।
तत्कथं स्यात्प्रमाणं यत्प्रमाणद्वयमाक्षसम् ॥८१२॥
प्रयोजनविशेषाच्चेत्तन्मानं कः स[3] कल्प्यताम् ? ।
निश्चयश्चेन्न शुक्लादिविकल्पेष्वपि [4]तद्गतेः ॥८१३॥
प्रवृत्तिरिति चेन्नास्या अपि तत्रोपलम्भनात् ।
निश्चयादेव नीलादौ यतो लोकः प्रवर्त्तते ॥८१४॥
समारोपनिषेधाभ्यां[5]स्तोऽपि [6]स्त्यस्ति येन तैः ।
अप्रामाण्यसमारोपो दर्शनेषु निषिध्यते ॥८१५॥
न चैत्र तस्यैमारोपो यस्य तैः स्यान्निषेधनम् ।
इति चेत्किमिदानीं तद्विकल्पानामपेक्षया ॥८१६॥
अपेक्षेत परः कार्यं यदि विद्येत किञ्चन ।
यदकिञ्चित्करं वस्तु किं केनचिदपेक्ष्यते ? ॥८१७॥
ततस्तेषु तदारोपो गन्तव्यस्तदपेक्षया ।
तन्निषेधात्प्रमाणत्वं तद्विकल्पेष्वपि स्फुटम् ॥८१८॥
तस्मान्नासौ[9] विशेषः स्याद्, वस्तुलेशग्रहो यदि ।
विकल्पेषु स किं नास्ति [10]शुद्धत्वादेरुपग्रहात् ॥८१९॥
स्वांशमात्रावलम्बित्वात्तल्लेशग्रहणं कथम् ।
तेषु[11] चेदनुमानं किं स्वांशादन्यत्र वृत्तिमत् ॥८२०॥

---

१ यावन्तदंशेष्टिशिष्टता आ०, ब०, प०, स० । २ एकस्यापवसा—आ०, ब०, प०, स० । ३ प्रमेयान्तरविशेषः । ४ तद्गतेः—आ०, —ब०, प०, स० । ५ चैतस्या अपि आ०, ब०, प०, स० । ६ विकल्पेषु । ७ दर्शने । ८ अप्रामाण्यमसारोपः । ९ प्र० वा० ३।२५९ । १० समारोपनिषेधः । ११ शुद्धत्वादे—आ०, ब०, प०, स० । १२ विकल्पेषु ।

अभिन्नयोगक्षेमत्वे सत्येवमनुमानवत् ।
मानत्वं चेद्विकल्पानां मानद्वित्वं विलुप्यते ॥८२१॥
अमानत्वेऽप्यमानत्वादनुमानस्य किं च तैः ।
कथं प्रत्यक्षमानत्वं स्वांशमात्रैः प्रदीयताम् ॥८२२॥ इति ।

तदाह-'पर्वतादि' इत्यादि । पर्वत आदिर्येषां समुद्रादीनां ते पर्वतादयः । विभज्यन्ते विशेषेण परिच्छिद्यन्ते यैस्ते विभागाः पर्वतादीनां विभागा पर्वतादिविभागास्तेषु संविदात्मसु । 'संविदात्मानः' इत्यत्रेह विभक्तिपरिणामेन सम्बन्धात् । तत्त्वंप्रमाणत्वम्, तच्छब्देन 'प्रमाणमात्मसात्कुर्वन्' इत्यत्र इहोपस्थितस्य प्रमाणस्य परामर्शः । वेत्ति जानाति । कः ? सौगतः । कैः ? विकल्पैः व्यवसायैः । कीदृशैः ? उत्तरैः प्रत्यक्षोत्तरकालभाविभिः इत्यतियुक्तिमत् । अत्रोपपत्तिमाह-'स्वांश' इत्यादि । सुगमम् ।

यदपुनरेतत्-"आवरणं तर्हि परमाणूनामसंसर्गात्कथम् ? इति न युक्तम् ; न ह्यवयविप्रतिबद्धमावरणं क्वाप्युपलब्धं येन तत्त्वाभावे परमाणुषु न स्यात्, तथा प्रतिघातादयः । अथैवमुच्यते-

छिद्रत्वात्परमाणूनां संहतेः स्यात्पटादिकम् ।
कथमावरणं वातस्यातपस्य जलस्य च ॥

अवयविसंयोगमन्तरेण परमाणव एव केवलाः अन्योन्यतपरस्परान्तरानुप्रवेशाः कथमावरणभाजः ? अत्रोच्यते-असंसृष्टाः कथमवयविनं जनयन्ति ? संसर्गश्च नैकदेशेन ; तदभावात् । न सर्वात्मना ; अणुमात्रपिण्डप्रसङ्गात् । संयोगस्य पदार्थान्तरस्य जननेनेति चेत् ; तमेव संयोगं सान्तराः कथं जनयन्तीति समानः प्रसङ्गः । संसर्गे परमाणुमात्रपिण्डप्रसङ्गः । संसर्गश्चेत् ; किं संयोगेनापरेण तथा अवयविना ? अथ सान्तरा एव संयोगमवयविनञ्च जनयन्ति तथा सत्यावरणादिकार्यमपि किन्न जनयन्ति ?" [प्र० वार्तिकाल० १।९१] इति ।

तत्राह-'पर्वत' इत्यादि । विभज्यन्त इति विभागा विशेषाः स्वलक्षणपरमाणवः तेषु तत्त्वम् । किं तत् ? इत्याह-पर्वतादि । पर्वणो भावः पर्वता सा च आवेष्टकत्वमेव वंशादिपर्ववत् । अनेनावरणमुक्तम् । पर्वता आदिर्यस्य प्रतिघातादेः क्रियान्तरस्य तत् पर्वतादि । तत्किम् ? वेत्ति जानाति प्रज्ञाकरः । कैः ? विकल्पैः अनन्तरविचारैः । कीदृशैः ? उत्तरैः । नैयायिकादिं प्रति उत्तरीकृतैः इति अतियुक्तिमत् । अत्रोपपत्तिमाह-'स्वांशमात्र' इत्यादि ।

---

१ श्लो० ६१ । २ श्लो० ५० । ३ संसर्गाभावप्रयुक्त-अवयवित्वाभावे । ४ तथा हि प्रति-आ०, ब०, प०, स० । ५ स्याद्वा-आ०, ब०, प०, स० । ६ -स्परानुप्र-आ०, ब०, प०, स० ।

स्वविज्ञानिनियतैर्वेत्ति विचारैः परमाणुषु ।
कार्यमावरणाद्वीति नोपहास्यमिदं कथम् ? ॥८२३॥
अन्यथा नीलविज्ञानात्तत्त्वं नैलेक्यगोचरम् ।
जनः सर्वोऽपि जानीयात् सर्वज्ञोऽपि स्फुटं भवेत् ॥८२४॥
तेषामणुषु सम्बन्धात्तदंशमात्रविदामपि ।
तेभ्यस्तत्त्वसंविच्चिरित्यप्यज्ञानकल्पितम् ॥८२५॥
तत्तत्त्वं न हि तेषां यत्तत्सम्बन्धेऽपि[1] विद्यते ।
अन्यथा साध्यसम्बन्धाल्लिङ्गं साध्यात्मतां व्रजेत् ॥८२६॥
लिङ्गाल्लिङ्गिनि विज्ञानमनुमानं यदुच्यते ।
तत्तुच्छतां क्वचिन्नीत्या ततो निष्फलकल्पनम् ॥८२७॥
तेभ्योऽप्यन्ये विकल्पाश्चेदणुतत्त्वप्रक्षमाः ।
तत्राप्ययं प्रसङ्गः स्यात्तदंशमात्रावलम्बनात् ॥८२८॥
तेभ्योऽप्यन्यविकल्पानां प्रकल्पमाधनवस्थितेः ।
अणुतत्त्वपरिज्ञानं न युगेनापि सिद्ध्यति ॥८२९॥
अैवम्यकत्वाभानत्वं विचाराणां यदीष्यते ।
अवयवैकत्वमेवेदमतस्तत्त्वे कथं भवेत् ॥८३०॥
सम्बन्धाश्चेन्न लिङ्गेष्वप्येवमेव प्रसञ्जनात् ।
लिङ्गानामेव मानत्वे व्यर्थिकैवानुमा भवेत् ॥८३१॥
तन्नार्थानवभासित्वे युक्तमर्थेष्ववञ्चनम् ।
विकल्पानामतश्चेदं कोशेयज्ञानकीर्तितम् ॥८३२॥
"लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात्तदाभासशून्ययोरप्यवञ्चनम् ॥" [प्र०वा० २।८२] इति ।

कथं वा सम्बन्धादपरिज्ञानादेव क्वचिदवञ्चनम्, सर्वस्य प्रसङ्गात् । परिज्ञाता-देवेति चेत्, न, परमाणूनामदर्शने तत्परिज्ञानानुपपत्तेः । अथतु तद्दर्शनमपीति चेत्; न, अस्मदादौ तेषामभावात् । भावे वतेव 'तेभ्यस्तत्त्वव्यवस्थादिकल्पनस्य बाधकं स्यात् । तथा च यदुक्तम्— "अत्राप्यतीन्द्रियदर्शिनोगिप्रत्ययो भवति बाधकः, यदि योगी भवेत्" [प्र०वार्तिकाल० १।९१] इति, तदप्यसंकल्पितम्, सन्निहितादस्मदादिदर्शनादेव तद्बाधने विप्रकृष्टपुरुष-प्रत्ययात् तत्कल्पनानुपपत्तेः । योगिशब्देनास्मदादिरेवोच्यते तस्यापि देशतोऽतीन्द्रियार्थदर्शि-त्वादिति चेत्, न, 'यदि' इत्यादिविरोधात् । प्रत्यासन्नवेदनीयस्यास्मदादिभावस्य अनाश-

---

१ विज्ञानस्यम् । २ परमाणुसम्बन्धेऽपि । ३ अविशेषादितिवात् । ४ कीर्तनम् आ०, ब०, प०, स० । ५ परमाणुदर्शनस्य । ६ परमाणुषु । ७ -स्तापत्तेस्ति-आ०, ब०, प०, स० । ८ -रिविज्ञानात् आ०, ब०, प०, स० ।

ङ्गास्पदत्वात् । आशङ्क्यते चानेन[1] योगिभावो यदिशब्दोपादानात् । भवतु योगिनैव तेषां[2] दर्शनमिति चेत् ; इदमपि कस्मात् ? [3]तेषामेव विचारक्षमत्वान्नावश्यव्यादीनां विपर्ययादिति चेत् ; किमिदं तेषां [4]तत्क्षमत्वम् ? न तावत्तद्विषयत्वम् ; अनभ्युपगमात् । [5]तत्प्रतिबद्ध-विषयत्वमिति चेत् ; तदपि कुतः ? तेषामेव तेन[6] दर्शनादिति चेत् ; न ; परस्पराश्रयात्-
५ 'तेषाम्' इत्यादिना 'तत्प्रतिबद्ध'[7] इत्यादेस्तेन च 'तेषाम्' इत्यादेर्व्यवस्थापनात् । भवतु वा सति योगिनि तेन तेषामेव दर्शनम् , असति तु कथम् ? न चैकान्तेन सन्नेवासौ[8] यदीत्या-शङ्कावचनानुपपत्तेः तस्य पाक्षिकाभावसव्यपेक्षत्वात् । तन्न किञ्चिदेतत् । ततो विचारसा-फल्यमभ्युपगच्छता[9] वक्तव्यं बहिरर्थविषयत्वं विकल्पानाम् , अन्यथोपहासास्पदत्वेन तत्सा-फल्यानुपपत्तेः ।

१० प्रकारान्तरेणापि [10]तेषां तद्विषयत्वं दर्शयन्नाह—

सन्तानान्तरसद्भूतेश्चान्यथानुपपत्तितः ॥६७॥
विकल्पोऽर्थक्रियाकारविषयत्वेन तत्परैः ।
ज्ञायते न पुनश्चित्तमात्रेऽप्येष नयः समः ॥६८॥ इति ।

धर्मकीर्त्तेः[11] सन्तानादन्यस्तच्छिष्यादिसन्तानः **सन्तानान्तरं** तस्य **सद्भूतिः**
१५ सद्भावः । सैव कस्मादिति चेत् ? शास्त्रकरणात् । न हि [12]तत् स्वार्थम् ; निश्चिततदर्थत्वात् , अन्यथा करणायोगात् । कालान्तरतन्निश्चयार्थत्वात्स्वार्थमेवेति चेत् ; न ; तन्निश्चयस्यापि पूर्वतन्नि-श्चयादेव भावात् । कदाचिद्विच्छिद्येतापि [13]तत्प्रबन्ध इति चेत् ; तर्हि पर एव विच्छिन्नतत्प्रबन्ध-प्रतिपत्ता तद्विपरीतत्वादिति परार्थमेव [14]तत्करणम् , तच्च पराभावे न सम्भवति । मा भूदिति चेत् ; न ; उपलम्भात् । सोऽपि स्वप्नादिवत् भ्रम एवेति चेत् ; किमस्य[15] वचनस्य फलम् ?
२० तद्भ्रमज्ञानमिति चेत् ; अस्ति परः, तदभावे तज्ज्ञापनानुपपत्तेः । इदमपि नास्त्येव वचनमिति चेत् ; न ; 'उपलम्भात्' इत्यादेरनुबन्धादव्यवस्थापत्तेश्च । ततः पर्यन्ते किञ्चिद्वचनं पार-मार्थिकं परार्थञ्च वक्तव्यम् , तद्वच्छास्त्रं चेति सिद्धा सन्तानान्तरसद्भूतिः, तस्या **अन्यथा-नुपपत्तितः, ज्ञायते** प्रतीयते । कः ? **विकल्पो** व्यवसायः । केनात्मना ? **अर्थक्रि-याकारविषयत्वेन** अर्थक्रिया स्नानपानादिः तां करोतीत्यर्थक्रियाकारो जलादिः स विषयो
२५ गोचरो यस्य तस्य भावस्तत्त्वं तेन । कैर्ज्ञायते ? **तत्परैः** सः अर्थक्रियाकारः परः प्रधानो येषां तैर्जनैः ।

कथं पुनर्विकल्पैर्जलादेर्ग्रहणम् ? कथं च न स्यात् ? स्वग्रहणस्वभावेन [16]तदयोगात् । परग्रहणस्वभावेनेति चेत् ; न ; स्वभावभेदे विकल्पस्यापि भेदात्मनो भेदापत्तेः । भवत्वन्य

---

१ प्रज्ञाकरेण । २ परमाणूनाम् । ३ परमाणूनामेव । ४ विचारक्षमत्वम् । ५ तत्प्रतिबन्धवि-आ०, ब०, प०, स० । ६ योगिना । ७ -बन्ध-आ०, ब०, प०, स० । ८ योगी । ९ -ता वद वक्त-आ०, ब०, प० । १० विकल्पानां बहिरर्थविषयत्वम् । ११ धर्मकीर्तिम्-आ०, ब०, प०, स० । १२ शास्त्रकरणम् । १३ शास्त्रार्थनिश्चयप्रबन्धः । १४ शास्त्रकरणम् । १५ भ्रमस्य । १६ जलादिग्रहणायोगात् ।

एवार्थविकल्प इति चेत्, न, तस्याप्यस्वसंवेदिनोऽर्थविषयत्वासम्भवात् पटादिवत्। स्वसंवेदने तु ततोऽप्यन्य एवार्थविकल्पः स्यात्। न चेदमुचितम्। तत्राप्येवं विचारे अनवस्थापत्तेरिति चेत्, नैं; स्वपरविषयत्वभावभेदाधिष्ठानस्यैकस्यैव विकल्पस्य भावात्। कथमेकस्यानेक स्वभावत्वं विरोधादिति चेत्? कथमन्तरविचारस्यै अनेकपरामर्शाधिष्ठानत्वम्? अथ परामर्शो भिन्न एव विचारोऽपीति चेत्; किं तद्भेदकल्पनया बहिरर्थवेदनस्यैकेनैव प्रतिक्षेपसम्भवात्। बहुभिरेव तत्प्रतिक्षेप इति चेत्, न, बहुना युगपदसम्भवात् विकल्पाना तदनभ्युपगमात्। क्रमेण सम्भव इति चेत्, न, क्रमवतामेकत्र कार्ये व्यापारानुपपत्तेः, अन्यथा कन्यामाविवराभ्यामपि गर्भनिष्पत्तेर्नै कन्या गर्भवती दूष्या भवेत्। तस्मादेक एव परामर्शभेदेऽपि विचारो वक्तव्यः, तथा स्वपरग्रहणस्वभावभेदेऽपि विकल्प इत्युपपन्नं तस्यार्थक्रियाकारविषयत्वम्। अवश्यं चैतदेवमङ्गीकर्तव्यम्, कथमन्यथा सन्तानान्तरस्य परिज्ञानम्? तत्राप्यस्य विचारस्याप्रतिरोधात्। न चापरिज्ञातस्यैव तस्य सत्त्व नित्यादिवत्। न च तन्नास्त्येव, विचारकरणात्। परार्थं हि तत्करणं कथं परामर्शे भवेत्। संशयितेऽपि परे भवत्येव तत्करणम्—'यदि स्यात्परस्तदर्थमिदम्, न चेत् न' इति बुद्धेरिति चेत्, न, अनेकान्तविद्वेषे संशयस्यैवासम्भवात्, तस्य "'इदमित्थमन्यथा वा' इति परामर्शद्वयात्मकत्वे सत्येवोपपत्तेः। तद्द्वयात्मनस्तस्य सम्भवे वा विकल्पेन कोऽपराधः कृतो येन स एव स्वपरवेदनस्वभावद्वयात्मा न भवेदित्युपपन्नं तेनै बहिरर्थस्य वेदनम्, अन्यथा "तद्बलेन सन्तानान्तरस्याप्यन्यथस्थितेः।

ननु यावदर्थान्तरस्यैव अक्षादेर्विकल्पवेद्यत्वमनुमानादुच्यते तावदनर्थान्तरस्य कस्मान्न कथ्यते तदनुमानस्यापि भावात्? तथा हि—अक्षादिस्तद्विकल्पादनर्थान्तरम्, तद्वेद्यत्वात्, तत्स्वरूपवदिति चेत्, न, सन्तानान्तरेण व्यभिचारात्, तस्य तद्वेद्यत्वेऽपि तदर्थान्तरत्वात्। न च व्यभिचारिणो गमकत्वम् अन्यथानुपपत्तिवैकल्यात्। इदमेवाह—न पुनः नैव तद्विकल्पानर्थान्तरतया चित्तमेव न अक्षमिति चित्तमात्रं अक्षादि तस्मिन् साध्ये, न केवलं सदरूप इत्यविशन्दः, एषोऽनन्तरोक्तो नयः न्यायोऽन्यथानुपपत्तिरूपः समः सदृशः तत्र तदभावात्।

ननु सन्तानान्तरस्य विकल्पो न तावत्प्रत्यक्षम्, परचेतसा साक्षादप्रतिभासनात्। अनुमानमिति चेत्, न, लिङ्गाभावात्। व्याहारादेस्तु[12] न लिङ्गत्वम्, गाढमूर्च्छादौ तदभावेऽपि भावात्। तद्विशेषस्य[13] "तत्त्वमित्यपि न युक्तम्, असिद्धे साध्ये तस्यैव दुरवबोधत्वात्। सिद्धे तस्मिन्[14] "तद्बुद्धिरिति चेत्, न, परस्पराश्रयात्—साध्यसिद्धया तद्विशेषस्य तत्सिद्ध्या च साध्यस्य व्यवस्थापनात्। तदेवाह—

---

१ –प्यस्वसंवे–आ०, ब०, प०, स०। २ –भेदने–आ०, ब०, प०, स०। ३ –पत्तिरिति आ०, ब०, प०, स०। ४ न पर–आ०, ब०, प०, स०। ५ "कथं पुनर्विकल्पैर्बहवोऽप्यमिस्यादिरस्य"–आ० टि०। ६ सन्तानान्तरस्य। ७ विचारकरणम्। ८ इदमित्थमन्य–आ०, ब०, प०, स०। ९ संशयस्य। १० विकल्पेन। ११ विकल्पवेद्यत्वे। १२ व्यवहारो ब०। १३ सन्तानान्तरविज्ञानाविनो व्याहारादिविशेषस्य। १४ लिङ्गत्वम्। १५ सन्तानान्तरे साध्ये।

अन्योन्यसंश्रयान्नो चेत् [तत्किमज्ञानमेव तत् ।] इति ।

उक्तरूपात् परस्पराश्रयात् **नो चेत्** न यदि **सन्तानान्तरसद्भूतिरिति** सम्बन्धः । ननु अयमन्यत्रापि प्रसङ्गः—पावकादौ धूमादेरपि न लिङ्गत्वम् गोपालकलगादौ तदभावेऽपि[1] भावात् । तद्विशेषस्य[2] तत्त्वमित्यपि न सुन्दरम् ; पावकाद्यसिद्धौ तस्यैवापरिज्ञानात् । तत्सिद्धौ[3] तत्परिज्ञाने पूर्ववत्परस्पराश्रयात् । तद्विशेषस्य स्वसाध्यनियमलक्षणस्य धूमादिस्वरूपत्वात्, अपरिज्ञातेऽपि पावकादौ भवत्येव परिज्ञानमित्यपि न शोभनम् ; व्याहारादिविशेषस्याप्येवं परिज्ञानप्रसङ्गादिति चेत् ; सत्यम् ; अस्तीदं समाधानं सुबोधत्वात्, तत्र गजनिमीलनं कृत्वा समाधानान्तराभिधित्सया परं पृच्छन्नाह—'**तत्किम्**' इति । **तत्** तस्मात् सन्तानान्तरं नो चेदित्यस्मात्, **किं** तव सिद्धम् ? पर आह **'अज्ञानमेव तत्'** इति । तद्विकल्पस्यार्थक्रियाकारविषयत्वम् **अज्ञानम्** अप्रतिपत्तिकं सन्तानान्तरसद्भावलिङ्गस्य तज्ज्ञानस्य तल्लिङ्गाभावेऽसम्भवादिति भावः परस्य । तत्रोत्तरमाह—

अद्वयं परचित्ताधिपतिप्रत्ययमेव वा ॥६९॥
वीक्षते किं तमेवायं विषमज्ञ इवान्यथा । इति ।

न तावद्व्याहारादिरप्रतिपन्न एव व्यभिचारोद्भावनस्य तत्रासम्भवात्। प्रतिपत्तिरपि न निर्विकल्पात्; ततस्तस्यानिश्चयात्, अनिश्चिते च व्यभिचारोद्भावनस्यासम्भवात् । नापि विकल्पात्; तस्याप्यनुभयस्वभावत्वे तदसम्भवात् । तथा हि—**तमेव** प्रसिद्धमेव । कमेव ? **परचित्ताधिपतिप्रत्ययं** परचित्तं सन्तानान्तरज्ञानम् अधिपतिप्रत्ययो निमित्तकारणं यस्य सः परचित्ताधिपतिप्रत्ययो व्याहारादिः तमेव, 'असहायं न तद्व्यभिचारादिकम्' इत्येवकारार्थः, किम् ? इत्याह—**वीक्षते** प्रतिपद्यते **किं नैव** । कः ? **अयम्** अनन्तरोक्तो विकल्पः । कुत इत्याह—**'अद्वयम्'** इति । एवकारः प्रथमोऽत्र सम्बध्यते । द्वौ अवयवौ यस्य तद्द्वयं द्विरूपं वस्तु तस्मादन्यद् अद्वयं तदेव यत इति, विकल्पविशेषणमपि **अद्वयमिति** नपुंसकमेव, परलिङ्गत्वात्तत्पुरुषस्य । तदिदमभिहितं भवति—

स्वग्रहैकस्वभावोऽयं विकल्पस्त्वन्मते स्थितः ।
व्याहारादेः कथं तेन[4] बहिरर्थस्य वीक्षणम् ?॥ ८३३॥
अवीक्षणे कथं तस्य[5] व्यभिचारः प्रकल्प्यताम् ।
सन्तानान्तरसद्भावज्ञानं तस्मान्न यद्भवेत् ॥८३४॥
तस्माद्धेतोरनेकान्ते विकल्पो दर्शयन्नयम् ।
युक्तस्तद्विषयो न स्यादन्यथा तद्गतिस्ततः[6] ॥८३५॥

---

१ पावकाभावेऽपि । २ पावकाविनाभाविनो धूमस्य । ३ पावकसिद्धौ । ४ विकल्पेन । ५ व्याहारादेः । ६ व्याहारादिव्यभिचारपरिज्ञानम् ।

सन्तानान्तरविलक्षणस्यासम्भवेऽपि ततः स्थितम् ।
विकल्पो बहिरर्थस्य वेदितेत्युदितान्नयात् ॥८३६॥

स्वपक्षसमर्थनेन दृष्टान्तमाह—विषमं स्वपुटितप्रदेशं जानातीति विषमज्ञः स[1] इव यद्वत् अयम् अन्यथा अन्येन समप्रकारेण । किम् ? वीक्षते । तद्वत्स्वरूपमात्रविषयोऽपि विकल्पो व्याहारादिकमपरम् । किम् ? वीक्षत इति । वाशब्दो वितर्के । 'किम्' इत्यस्यानन्तरं द्रष्टव्यः । प्रयोगश्चात्र—यतस्मादन्यविषयं न ततस्तस्य वीक्षणं यथा विषमज्ञानात् समभावस्य [2]व्याहारादेरन्यविषयश्च विकल्पः स्वरूपमात्रगोचरत्वात् तन्मात्रस्य व्याहारादेर्विभिन्नत्वात् । ततो न [3]तैस्तस्य[4] व्यभिचारोद्भावनमुपपन्नम् तदुद्भावने वा तस्य[5] बहिर्विषयत्वमङ्गीकर्तव्य मिति भावः ।

व्याहारादेर्व्यभिचारश्च तत सन्तानान्तरप्रतिपत्ति, तद्भावाच्च न तदुल्लेनार्थक्रियाकार- विषयत्वपरिज्ञानम् । विकल्पस्य किमिदानीं[6] तस्य मयेत् यत्र भवतः स्थिरप्रज्ञत्वम् । सर्वथ- स्तुनैतस्य सर्वविकल्पातीव संवन्मात्रं येति चेत्, कुत एवत्[7] ? तस्यैव विचारसहत्वादिति चेत्; अत्राह—'अशून्यम्' इत्यादि । 'नो' इत्यनुवर्त्तमानं[8] वाशब्दवत् किमः[9] परं द्रष्टव्यम् । किं वा नो वीक्षते ? किन्तु वीक्षत एव । कः ? अयम् अद्वैतादिविचारः । कम् ? तमेव प्रसिद्धमेव । कीदृशम् ? अन्यथैव इति । प्रथमस्यैवकारस्यात्र सम्बन्धः । 'भूतम्' इत्यध्याहारश्च कर्तव्यः । तदयमर्थः—अन्यथैव परपरिकल्पितादद्वैतादिप्रकारादन्येनैव प्रकारेण भूतमिति । स किरूप वीक्षते ? अशून्यम् उपलक्षणमिदम्, तेन शून्यमपीति । दृष्टान्तमाह— 'विषमज्ञ इव' इति । यद्वदन्यथाभूतमेयाज्ञो जनो विषं वीक्षत इति । कुतः पुनरेवम्— द्वैतमेवाद्वैतम् अशून्यमेव शून्यं तद्विचारे वीक्षते[10] द्वैतादेरेवाविद्यमानत्वात् अविद्यमानस्य चान्यथा वीक्षणायोगादिति चेत्, न, तस्य प्रमाणविषयतया विद्यमानत्वात् । तदाह—'परचित्ताधिप्रतिप्रत्ययम्' इति । परं प्रकृष्टमविचलितत्वेन चित्तं ज्ञानं यस्य सः परचित्तः निर्बाधप्रतिपत्तिरित्यर्थः । अधिपस्यतेऽधिगम्यतेऽनयेत्यधिपतिः अधिगतिस्तस्याः प्रत्ययो विश्वा- सः संवादो यस्मिन्नसौ अधिपतिप्रत्ययः संवादिज्ञानविषय इत्यर्थः । परचित्तप्रत्ययश्चासावधि पतिप्रत्ययश्चेति परचित्ताधिपतिप्रत्ययः, तमिति । परचित्तपदेन [11]स्वप्रसिद्धया अधिपति- प्रत्ययपदेन [12]परप्रसिद्धया द्वैतादेर्विद्यमानत्वमावेदयति । तथा हि—

अस्पष्टप्रतिभासं यत् ज्ञान संवादवत्तया ।
द्वैतादि तस्य संवेद्य विद्यमानं कथं न तत् ? ॥८३७॥

ततो नाद्वैतादेर्विषयादवत्वापनम्, [13]"आत्मादिविचारपक्षद्विचारस्यापि" विपर्यासरूप

---

१ स इव इदम्—आ०, ब०, प०, । २ व्यवहारादे—आ०, ब०, प०, स० । ३ व्याहारादेः । ४ विक ल्पस्य । ५ विकल्पस्य । ६ —मी तत्तस्तं भवतः स्थिरप्र—आ०, ब०, प० । ७ इद एवोदतः । ८ किंशब्दात् । ९ ते तदद्वैत—आ०, ब०, प० । १० जैन । ११ सौगत । १२ आत्मतत्त्वादैतात्र वेदान्तिभिरभ्युपगतं ग्राह्य ग्रहणम् ता० टि० । १३ अद्वैतविचारस्यापि ।

त्वेन विशेषाभावादिति निरूपितत्वात्। विशेषे वा तद्वत् बाह्यविकल्पस्यापि स्वप्नविकल्पात्तदुपपत्तौ नार्थक्रियाकारिविषयत्वं[1] तस्य न[2] स्यात्। न विचारविकल्पैरप्यद्वैतादेर्ग्रहणं येनायं दोषः। न चैतावता वैफल्यमेव[3] तेषाम्; समारोपव्यवच्छेदेन फलेन फलवत्त्वात्। तदेवाह—

समारोपव्यवच्छेदः साध्यश्चेत्सविकल्पकैः ॥७०॥ इति।

सुबोधमेतत्। अत्रोत्तरमाह—

नैषापि[4] कल्पना साम्यादोषाणामनिवृत्तितः। इति।

एषापि अनन्तरापि **कल्पना न**। कुत एतत्? **साम्यात्** पूर्वन्यायस्यात्रापि सदृशत्वात्। तथा हि—यथा तैः[5] स्वांशमात्रार्वलम्बिभिर्न द्वैतादेः परिच्छेदस्तथा तद्व्यवच्छेदोऽपि। न ह्यपरिज्ञाते तस्मिन् तद्गतविपरीतारोपनिवर्तनम्। परिज्ञात एव मरीचिकादौ तद्गतजलाद्यारोपनिवर्त्तनस्योपलम्भात्। हेत्वन्तरमाह—**दोषाणाम्** अनुक्तानामपि उक्तानां **साम्यात्** इत्यनेन गतत्वात्[6] **अनिवृत्तितो** निवर्त्तनाभावात्। तथा हि—

कोऽयं समारोपस्य व्यवच्छेदो नाम? [7]तत्त्वज्ञापनमिति चेत्; किं [8]तस्य तत्त्वम्? अतस्मिन् [9]तद्ग्रहत्वमिति चेत्[10]; न; तस्य तत्स्वसंवेदनादेव परिज्ञानात्। तस्य[11] निर्विकल्पत्वात्तदपरिज्ञातमेवेति चेत्; न; अज्ञातार्थविषयतया विकल्पानां प्रमाण्यप्रसङ्गात्। तेऽपि तत्र समारोपमेव व्यवच्छिन्दन्ति न [12]तत्त्वं प्रतिपद्यन्त इति चेत्; न; तत्रापि 'कोऽयम्' इत्याद्यनुबन्धादव्यवस्थापत्तेश्च। तन्न तत्त्वज्ञापनं तद्व्यवच्छेदः।

तन्नाशः[13] इति चेत्; कस्तदनाशे दोषः? तत्त्वज्ञानप्रतिबन्ध इति चेत्; कुत [14]एतत्? तस्य विभ्रमत्वादिति चेत्; न; स्वतस्तत्परिज्ञाने तदनुपपत्तेः। न हि गुडे विपक्षज्ञानं विभ्रमरूपतया प्रतिपन्नमेव गुडतत्त्वपरिज्ञानं [15]प्रतिबन्धुम (बद्धु) र्हति। स्वतस्तत्परिज्ञानमपरिज्ञानमेव निर्विकल्पत्वादिति चेत्; कथमिदानीं तस्य तत्त्वज्ञानप्रतिबन्धित्वम् अनुपदर्शित [16]स्वरूपस्य तदसम्भवादतिप्रसङ्गात्। कथं वा तन्नाशाय विकल्पान्वेषणम्? अज्ञाते तस्मिन्[17] तदनुपपत्तेः। न च [18]विकल्पात्तन्नाशः [19]तस्याऽहेतुकत्वेनाभ्युपगमात्। [20]तन्नाशोऽपि [21]न तद्व्यवच्छेदः।

तदुत्पत्तिप्रतिबन्ध इति चेत्; कस्तदप्रतिबन्धे दोषः? तत्त्वज्ञानप्रतिबन्ध इति चेत्; न; उक्तोत्तरत्वात्। कथं वा सति समर्थकारणे [22]तत्प्रतिबन्धः कुतश्चित्? असमर्थे तु न

---

१ तद्ग्राह्यवि—आ०, ब०, प०,। २ —त्वं तस्यान्यान्यविचा—आ०, ब०, प०। ३ 'न' इति निरर्थकं भाति। ४ विकल्पानाम्। ५ नैया विद्—आ०, ब०, प०। ६ —राविकल्प आ०, ब०, प०। ७ सांशमात्रावलम्बिभिर्नद्वै—आ०, ब०, प०। ८ —मात्रविल—ता०। ९ —त्वादित्यनुवृत्ति—आ० ब०, प०। १० "समारोपत्व"—ता० टि०। ११ समारोपस्य। १२ तद्ग्रहणमि—आ०, ब०, प०। १३ चेत्तस्य आ०, ब०, प०। १४ स्वसंवेदनस्य। १५ समारोपत्वम्। १६ समारोपनाशः। १७ एव तत्तस्य-आ०,ब०,प०। १८ प्रतिबन्धमर्ह—आ०,ब०, प०। १९ स्वभावस्य आ०, ब०, प०। २० समारोपे। २१ विकल्पस्यास्तन्ना—आ०,ब०,प०। २२ नाशस्य। २३ तत् तस्मात् कारणात् नाशोऽपि। २४ —पि तद्व—आ०, ब०, प०। २५ तत्त्वज्ञानप्रतिबन्धः।

किञ्चिदहिकल्पैर्वैवसिद्धत्वात् [1]तत्प्रतिबन्धस्य। कारणस्यैव सामर्थ्यं तैः[2] प्रतिरुध्यत इति चेत्, न, असतः प्रतिरोधासम्भवात्। स्वहेतूपजन्येनीतत्वेन सत एवेति चेत्, न, तस्याप्युत्पत्स्यवस्थायां [3]तद्योगात्, अन्यथा तदुत्पत्तेरेव प्रतिरोधप्रसङ्गात्। न चेदमुचितम्, सति [4]समर्थे कारणे तत्प्रतिरोधस्यान्यानुपपत्तेः। तत्रापि कारणस्यैव सामर्थ्यं तैः प्रतिरुध्यत इति चेत्, न, 'असतः' इत्याद्यनुवन्धाद्व्यवस्थानुपपत्तेश्च। पश्चात्तत्प्रतिरोध इति चेत्, न, तदा तस्य स्वयमेव नाशात्, विकल्पानां मृतमारणस्यापत्तेः। समर्थमपि कारणं विकल्पाभावे सत्येव समारोपमुपजनयति न पुनस्तदभावे तादृशत्वात्तत्सामर्थ्यस्येति चेत्, नैवम्, नित्यस्यान्यनिरपेक्षप्रसङ्गात्। यदपि हि सत्येव सहकारिणि कार्यकारि न तदभावे तच्छक्तेरपि तादृशत्वात्, सहकारिणा तदनुपकारस्यान्यत्रापि समानत्वात्। ततो नैवं [5]तैस्तदुत्पत्तिप्रतिबन्धः।

स्यान्मतिरेषा भवतः—विकल्पसहायः [6]समारोपक्षणस्तदुत्तरक्षणमसमर्थं जनयति सोऽप्यसमर्थतरमसमर्थतमं च सोऽपि, ततश्च कार्योत्पत्तिरित्येवं प्रकारः, [7]तैस्तदुत्पत्तिप्रतिबन्ध इति, साऽपि न न्याय्या, यस्मात्तत्क्षणस्य [8]समर्थस्यैवोत्तरक्षणस्य जनने यदि शक्तिः कथं [9]विकल्पसाहाय्येऽपि [10]अन्यथा तज्जननम्? [11]अथासमर्थस्यैव, तथापि किं विकल्पैरेतत्[12] एव तदुत्पत्तेः? कथं वा तदन्यक्षणस्य वस्तुत्वम्, सजातीयमतन्व[13]तस्तदयोगात्? विजातीयजननादिति[14] चेत्, न, अशक्तौ तस्याप्ययोगात्। शक्ताविति चेत्, न, सजातीयस्यापि तत्प्रसङ्गात्। अशक्तिरेव [15]तत्रेति चेत्, न, शक्यासत्त्वया [16]तद्धेतापत्तेः। विजातीयजनने [17]शक्तिरेवेतरत्राशक्तिरिति चेत्, न, [18]इतरस्यापि विषय[19] तत्र प्रसङ्गात् (इतरस्यापि जननप्रसङ्गात्) अशक्तिरिति [20]शक्तेरेवाभिधानात्। भवत्वपि शक्तिस्तत्र तनोतीति चेत्, विजातीयमपि न जनयात् अविशेषात् इत्यवस्तुत्वमेव [21]तस्य। भवत्विति चेत्, कथं तस्य कृतश्चिदुत्पत्तिः अवस्तुनस्तदयोगात् व्योमारविन्दवदिति? तद्धेतोरप्यवस्तुत्वमजनकत्वात्, एवं तद्धेतोरपीति सर्वस्यापि तत्प्रबन्धस्यावस्तुत्वमापतितम्। ततः समारोपस्यैवाभावान्न तद्व्यवच्छेदेनापि विकल्पानां साफल्यमतो वस्तुविषयत्वेनैव तदुपपत्तिः।

एवं विकल्पानामर्थक्रियाकारविषयत्वव्यवस्थापनेन बहिरर्थमवस्थाप्य प्रकारान्तरेणापि तमवस्थापयन्नाह—

न हि जातु विपश्चान मरण प्रति धावति ॥७१॥
असंवेद्यहिरर्थात्मा प्रसिद्धोऽप्रतिषेधकः। इति।

---

१ तत्प्रबन्धप्रतिबन्धस्य। २ विकल्पैः। ३ प्रतिरोधयोगात्। ४ समर्थका-आ०,ब०,प०। ५ नैव ते-आ०। ६ विकल्पैः। ७ समारोपक्षण-आ०,ब०,प०। ८ विकल्पैः। ९ समारोपक्षणस्य। १० विकल्पसाहाय्यस्याप्य-आ०, ब०,प०। ११ अन्यथासमर्थस्य-आ०,ब०,प०। १२ तत एतद्-आ०,ब०,प०। असमर्थसमारोपक्षणादेव। १३ -तस्तनना-आ०, ब०, प०। १४ तज्जातीयोत्पत्तौ। १५ समारोपक्षणे भेदः स्यात्। १६ सजातीयेऽप्रसक्तिः। १७ सजातीयस्यापि। १८ शक्तिरेव-आ०,ब०,प०। १९ समारोपक्षणस्य।

न हि नैव **जातु** कदाचिदपि[1] **विषज्ञानं** विषाकारं वेदनं **मरणं प्रति धावति** कारणत्वेनोपसर्पति सर्वस्यापि तज्ज्ञानवतो मरणप्रसङ्गात्। न चैवम्, नियतस्यैव तद्दर्शनात्। न रूपमात्रविषज्ञानं येनायं प्रसङ्गः किन्तु रसविशेषज्ञानमेव। न चेदं[2] सर्वस्यास्ति; [3]यस्य त्वस्ति तस्य भवत्येव मरणमिति चेत्; कुतोऽस्यास्तित्वम्? तद्वासनात इति चेत्; न; तस्या अपि सर्वत्र भावात्। तत्प्रबोधादिति चेत्; न; [4]तस्यापि स्वरसतो भावे नियमायोगात्। अन्यतः प्रबोधकादिति चेत्; तदपि यदि वासनान्तरम्, स एव प्रसङ्गः, तस्यापि सर्वत्र भावात्। तत्प्रबोधस्यापि [5]तदन्तरापेक्षायाम् अनवस्थादोषात्। ततो न [6]विषज्ञानान्मरणमिति सूक्तम्–**'न हि'** इत्यादि। [7]

कदैतत्? इत्याह–**असन्** अविद्यमानः **चेत्** यदि **बहिरर्थात्मा** बहिरर्थस्वभावो विषाख्य [8]इति शेषः। सति तु बहिरर्थात्मनि विषतदास्वादनादेर्भवति मरणमिति यावत्। तदयं प्रयोगः–बहिरर्थरूपमेव विषं ततो मरणस्यान्यथानुपपत्तेः।

[9]कुतः पुनर्विषान्मरणमिति परिज्ञानम्[10]? न तावद्विषज्ञानात्; तस्य [11]मरणे भाविन्यप्रवृत्तेः। न हि तदानीमविद्यमानं तत्र प्रवृत्तिमदुपपन्नम्। नापि मरणज्ञानात्; तस्यापि प्रागसतो विषविषयत्वानुपपत्तेः। न चोभयसमयव्यापकमेकज्ञानं[12] सम्भवति; तस्यापि स्वतः पूर्वसमयव्यापिना रूपेणोत्तरसमयव्यापिनः तेन[13] च पूर्वसमयव्यापिनः परिज्ञानाभावे रूपद्वयाधिष्ठानतया दुरवगमत्वात्। [14]अन्यतस्तदवगम इति चेत्; न; तत्राप्येकसमये समयद्वयवति च पूर्ववद्दोषात्। पुनस्तदन्यपरिकल्पनायाम् अनवस्थानात्। न च विषमरणयोरपरिज्ञाने [15]सुपरिबोधस्तद्गतो हेतुफलभावः, इत्यसिद्धमेतत्–'विषान्मरणम्' इति यदन्यथानुपपत्त्या बहिरर्थविषसाधनमिति चेत्; अत्राह–**प्रसिद्धः** प्रमाणनिश्चितो **बहिरर्थात्मा**। 'कीदृशः' इत्यपेक्षायां **'मरणं प्रति धावन्'** इति प्रत्ययपरिणामेन सम्बन्धः। तत्र हेतुः–**अप्रतिषेधकः** न विद्यते प्रतिषेधको यस्येत्यप्रतिषेधको यतस्ततः प्रसिद्ध इति। यदप्रतिषेधकं तत्प्रसिद्धं यथा परस्य संविदद्वैतम्, अप्रतिषेधकश्च बहिरर्थात्मा उक्तविशेषण इति।

ननु यथा तस्य न प्रतिषेधकं तथा न साधकमपि ततः साधक-बाधकप्रमाणाभावात्सन्देह एव। न च सन्दिग्धस्य प्रसिद्धत्वमिति चेत्; अत्राह–

सन्देहलक्षणाभावान्मोहश्चेद्व्यवसायकृत् ॥७२॥
[16]बाधकासिद्धेः [17]स्पष्टाभात्कथमेष विनिश्चयः। इति।

---

१ –चिद्वि–आ०, ब०, प०। २ विषरसज्ञानम्। ३ यस्यास्ति आ०, ब०, प०। ४ वासनाप्रबोधस्य। ५ वासनान्तरापेक्षायाम्। ६ विज्ञाना–आ०, ब०, प०। ७ इति तु शेषः आ०, ब०, प०। ८ –नि विशेष–आ०, ब०, प०। ९ सौगतः प्राह। १० –ज्ञानान्न आ०, ब०, प०। ११ मरणभा–आ०, ब०, प०। १२ –मेवं ज्ञानम् आ०, ब०, प०। १३ उत्तरसमयव्यापिना रूपेण। १४ अन्यज्ञानात् 'विषान्मरणम्' इति ज्ञानम्। १५ "उपहासवचनमेतत्"–ता० टि०। १६ "पञ्चमं लघु सर्वत्र' इति नियमस्यामायादेवम्प्रयोगः। स्वामिभिरपि देवागमस्तोत्रे तथा प्रयुक्तम्। अवाच्यतैकान्तेऽप्युक्तिरिति।"–ता० टि०। १७ स्पष्टाभावात् आ०, ब०, प०।

सन्देहेन लक्षणं सन्देहलक्षणं यथोक्तस्य बहिरर्थात्मनः तस्याभावात्, निश्चये नैव तल्लक्षणस्य भावात् प्रसिद्ध इति ।

विपरूपे हि 'बाह्यार्थे मरणं प्रति भावदि ।
सन्देहो नास्ति लोकस्य निश्चयस्यैव दर्शनात् ॥८३८॥
अस्त्ययं निश्चयः किन्तु प्रमाणान्नैष साधकात् ।
उक्तनीत्या प्रमाणस्य तत्राभावनिरूपणात् ॥८३९॥
अनादिवासनोद्भासरूपाभ्यामोहतः परम् ।
ईदृशो निश्चयः पुंसां न्यायाघातक्रियाक्षमः ॥८४०॥

तदाह[1]–'मोहव्यवसायकृत्' इति । तत्रोत्तरम् 'बाधकासिद्धेः' इति । वक्ष्यमाणमत्र 'कथम्' इति सम्बन्धनीयम् । बाधकम् उक्तविषयस्य प्रमाणस्य निषेधकम्, तस्यासिद्धेः कारणात् । कथम् ? न कथञ्चित्, मोहो व्यवसायकृत् इति ।

प्रमाणस्य निषेधश्चेद्विपक्षत्कार्यवेदिनः ।
कुतश्चिन्निश्चयस्तादृक् न्यामोहादिति युक्तिमत् ॥८४१॥
न चैष बाधकस्यैवाप्रसिद्धेर्नन्वु चोदितः ।
विचारो बाधकश्चेत् प्राक् कुतस्तस्यापि सम्भवः ॥८४२॥
व्यामोहाच्चेत् कथं तेन तन्निषेधस्य साधनम् ।
निश्चयादपि तादृक्षादुक्तसिद्धिप्रसञ्जनात् ॥८४३॥
प्रत्यक्षाच्चेन्न तत्रैवं परामृष्टेरसम्भवात् ।
विकल्पात्मा परामृष्टिर्नाविकल्पे[2] हि युज्यते ॥८४४॥

तदाह–स्पष्टाभात् प्रत्यक्षात्। कथम् ? न कथञ्चित्। एष पूर्वोक्तो विचारात्मा निश्चय इति ।

यदि च विपप्रत्यक्षमेवात्मनो मरणे सैन्यप्रत्यक्षमेव वा विपे प्रवृत्त्यभाव परामृशति सैन्याभावमेव किन्न परामृशति विशेषाभावात् । एतदेवाह–

'विपर्यासोऽपि किन्नेष्टः' [आत्मनि भ्रान्त्यसिद्धितः] ॥७३॥ इति ।

कथं पुनरतद्विषयस्य तत्परामर्शित्वमिति चेत् ? कथमतद्विषयत्वम् ? अतत्काल्यत्वादिति चेत्, न, तत्काले[3]ऽपि तस्य कथञ्चित्तन्मयात् अन्यस्यापि प्रतिपत्तेः । वक्ष्यति चैतत्–'भेदज्ञानात्' इत्यादिना ।

भ्रान्तिरेव तत्प्रतिपत्तिरिति चेत्, न, बाधकाभावात् । न भेदज्ञानं बाधकम्, तस्यैवात्यन्तभेदविषयस्याप्रतिभासनात् । कथञ्चिद्भेदविषयस्य तु न बाधकत्वम्, अविरोधात् ।

---

१ बाह्योऽर्थे आ०, ब०, प०[1] । २ तदाह आ०, ब०, प० । ३ –ल्यो हि आ०, ब०, प० । ४ मरण-प्रत्यक्षमेव । ५ "तर्हि"–ता० टि० ।

तदेवाह–'**आत्मनि भ्रान्त्यसिद्धितः**' इति । ज्ञानानामन्वय **आत्मा** तत्र **भ्रान्तेरसिद्धितो** निर्बाधप्रतिपत्तेरेव सिद्धितो **विपर्यासोऽपि किन्नेष्ट** इति । अवश्यञ्चैतदेवमभ्युपगन्तव्यम्, अन्यथा तत्र प्रवृत्तेरिव तदभावस्याप्यपरामर्शप्रसङ्गात् । न ह्यतद्विषयं तत्रात्मनः प्रवृत्त्यभावं पराम्रष्टुमर्हति । मा भूदुभयथापि परामर्शः तदुपायस्यान्वयस्यैव दुर्ववो- ५ धत्वादिति चेत् ; कस्येदानीं सुखावबोधत्वम् ?, अद्वयवेदनस्यैव, "**स्वरूपस्य स्वतो गतेः**" [प्र०वा० १।६] इति चेत् ; न ; तस्यापि यथाकल्पनमप्रतिभासनात् । न हि यथा तैत् परैः परिकल्प्यते व्यपगलितसर्कलकल्पनाजालकल्मापं तथा तस्य प्रतिभासनमस्ति, ग्राह्यादिभेदकल्पनाकलुषीकृतवपुष एव प्रत्यवलोकनात् । अन्यैव तत्कल्पनेति चेत् ; न ; अद्वैतक्षतेः, अन्यत्वस्यानवलोकनाच्च । विभ्रमात्तदनवलोकनमिति चेत् ; कस्य विभ्रमः ? तत्कल्पनाया १० एवेति चेत् ; यदि नाम तैस्या विभ्रमः किमद्वैतस्यागतं यतस्तत् यथापरिकल्पनमेव आत्मानं नोपदर्शयति ?

उन्मत्तो यदि नामैको लोष्टं पश्यति हेमवत् ।
अनुन्मत्तोऽपि लोकः किं तथा तत्प्रतिवीक्षते ? ॥८४५॥
यथाकल्पनमस्त्येव स्वतस्तस्योपदर्शनम् ।
१५ बलिना तद्विकल्पेन छादान्निश्चीयते न चेत् ; ॥८४६॥
दर्शनान्निर्विवादं चेत् का दोषो निश्चयादृते ।
निर्विवादं तँतदचेन्न तद्दृष्टं वः स्वतः कथम् ? ॥८४७॥
तदेव तेन दृष्टं यत् विवादाद्येनमुच्यते ।
सविवादं च दृष्टं चेत्येतन्नातिप्रसञ्जनात् ॥८४८॥
२० तत्कल्पनायां न भ्रान्तिरद्वैतस्यैव तद्यतः ।
निर्भेदं भेदवत्त्वेन स्वरूपं पश्यतीति चेत् ॥८४९॥
तन्नैवं तत्स्वरूपस्य स्वतो दृष्टेर्विलोपनात् ।
विभ्रमस्तत्त्ववित्तिश्च तत इत्यतिसाहसम् ॥८५०॥
भेद एव भ्रमस्तस्य चिदादौ नात्मनीति चेत् ।
२५ विभ्रमेतररूपं तदेकं संवेदनं कथम् ॥८५१॥

तथैव प्रतिभासाच्चेदेतदेवाह सौगतः–

अद्वयं द्वयनिर्भासमात्मन्यप्यवभासते । इति ।

संवेदनं खलु **अद्वयम्** अभिन्नम् । कीदृशमपि ? **द्वयनिर्भासमपि** विभ्रमेतरोभयाकारमपि । **अपि**शब्दस्य भिन्नप्रक्रमत्वात् । तस्य तादृशत्वं कस्मिन् ? **आत्मनि**

१–यं हि प–आ०, ब०, प० । २ दुर्बोध–आ० ब० प० । ३ अद्वयवेदनम् । ४–कलकल्मा–आ०, ब०, प० । ५ कल्पनायाः । ६ न चित् आ०, ब०, प० । ७ दर्शनात् । ८ विवादोऽनेन मु–प० । विनाश्चैवमु–आ०, ब० । ९ स्वत्वन्वयं आ०, ब०, प० ।

स्वरूपे । तादृशमपि तदद्वयं कुत इति चेत् ? अवभासने पत्र इति । न हि प्रतिभासमानमन्यथाकल्पनमर्हति, अतिप्रसङ्गादित्येवमेकमनेकात्मके परेण निरूपिते सत्याह—

इतरत्र विरोधः क एक एव स्वहेतुतः ॥७४॥
तथा चेत्स्वपरात्मानौ सदसन्तौ समश्नुते । इति ।

इतरत्र क्रमानेकान्ते, कः न कश्चिद् विरोधः । कदाचिदपि समश्नुते सम्यक् बुद्ध्यन्तरपरिहारेणाश्नुते व्याप्नोति । कः ? एक एव बोधात्मा न द्वौ । कौ ? सदसन्तौ सन् वर्तमानो विषयग्राही पर्यायः, असन् अनागतो मरणग्राही वा । कीदृशौ ? स्वपरात्मानौ स्वात्मानौ स्वस्वभावौ कथञ्चित्तयोस्तस्मादव्यतिरेकात्, परात्मानौ च कथञ्चिद्विपर्ययात् । कुतः पुनरित्थम्भाव इत्याह-स्वहेतुतः स्वकारणादिति ।

अपरापरपर्यायव्यापी बोधः स्वहेतुतः ।
तादृशादुपपन्नो यन्न विरोधेन दुष्यति ॥८५२॥

तत्रोपपत्तिमाह—'तथा' इति । तेन[1] प्रतिभासनप्रकारेणेति । तथा हि—

यैकैक एव बोधात्मा विभ्रमाविभ्रमात्मकः ।
निर्बाधप्रतिभासत्वाद्युगपत्परिकल्प्यते ॥८५३॥
क्रमेणापि तथा किन्न परापरविवर्तभूः ।
बोधात्मैकः प्रकल्प्येत निर्बाधत्वानुपप्लवात् ॥८५४॥

न विभ्रमः संवेदनस्य स्वभावः[2] द्वैविध्येकस्यैव सत्स्वभावत्वात् । न चैतावता तत्र निर्विवादं सद्विवेकस्य [3]सतोऽप्यबोधिमार्गमनवभासनात्, सचेतनादिस्वभावतयैव तस्य प्रत्यवलोकनात् । तन्न विभ्रमेतराकारतयोभयाकारं संवेदनं यत्तदवष्टम्भेन क्रमानेकान्तव्यवस्थापनमिति चेत् ? अत्राह—

तत्प्रत्यक्षपरोक्षाक्षक्षममात्मसमात्मनोः ॥७५॥
तथा हेतुसमुद्भूतमेकं किन्नोपगम्यते[4] । इति ।

तत् संवेदनम् उपगम्यते सौगतैः । कीदृशम् ? प्रत्यक्षः सदादि परोक्षो विभ्रमविवेकस्तयोः[5] अक्षणं व्यापनम् अक्षः तं क्षमत इति क्षमं तदात्मकम् । पुनरपि तद्विशेषणम् आत्मानम् सजातीयाद्विजातीयाच्च स्वति व्यावर्तयति इति आत्मसम्, निरंशस्वलक्षणरूपमिति । तस्योपगमने किम् ? इत्याह—'एकम्' इत्यादि । 'तत्' इत्यनुवर्तनीयम् । तत् संवेदनं किन्नोपगम्यते उपगम्यत एव । कीदृशम् ? एकमभिन्नम् । कयोः ? आत्मनोः अन्तस्वभावयोः[6] । अनेकस्वभावयोः एकस्य परेणैवोपगमात् । कुतस्तत्तादृशम् ?

---

१ –न प्रका–आ०, ब०, प० । २ तेन प्र–आ०, ब०, प० । ३ यत्रैक आ०, ब०, प० । ४ विभ्रमविवेकस्यैव । ५ सतोऽप्यबधि–आ०, ब०, प० । ६ –ते सौ–आ०, ब०, प० । ७ –यौकस्य परे–आ०, ब०, प० ।

इत्याह–**तथा** तेन तादृशात्मना **हेतोः** स्वकारणात् **समुद्भूतं** समुत्पन्नं यत इति । इदमत्र तात्पर्यम्–

अनेकान्तभयाज्ज्ञानं विभ्रमाविभ्रमात्मकम् ।
मुञ्चतोऽप्यपरित्याज्यं तत्प्रत्यक्षेतरात्मकम् ॥८५५॥
विरुद्धधर्माध्यासेऽपि कथञ्चित्तत्त्रयथा मतम् ।
एकं तद्वत्क्रमेणापि किमेकं नोपगम्यते ? ॥८५६॥
दृष्टान्तः प्राच्य एवान्यो[1] नेति नास्माकमाग्रहः ।
फलं हि केनाप्यस्माकमुपायेनाभिवाञ्छितम् ॥८५७॥
यदि प्राच्यः प्रसिद्धस्ते तेन[2] नः साध्यनिश्चयः ।
परश्चेद्भवतः सिद्धस्तेन नः साध्यनिश्चयः ॥८५८॥
न च तद्द्वितयत्यागे निर्विवादं मतान्तरम् ।
यत्र ते भवति प्रज्ञाऽनेकान्तभयवर्जिता[3] ॥८५९॥ इति ।

वर्त्तमानपर्यायादभेदे पूर्वापरयोः ; तयोरपि वर्त्तमानत्वमेव तद्भेदात्[4] तत्स्वरूपवदिति तन्मात्रमेवावशिष्यते, तस्य चानभ्युपगमात् कथन्न नैरात्म्यवादः ? कथं वा तत्प्रत्यक्षत्वे तयोरपि[5] न प्रत्यक्षत्वं यतस्तत्र प्रमाणान्तरप्रवृत्तिः फलवती भवेत् ? तथापि तत्परोक्षत्वे न सन्तानभेदः सन्तानान्तराणामपि तदनर्थान्तराणामेव[6] तद्वत्[7] परोक्षत्वोपपत्तेरिति कथन्नैकात्मवाद इति चेत् ? अत्राह–

सर्वैकत्वप्रसङ्गादिदोषोऽप्येष समो न किम् ॥७६॥ इति ।

सर्वेषां पूर्वापरपर्यायाणाम् **एकत्वं** वर्त्तमानादभेदस्तस्य **प्रसङ्गः** स **आदिर्यस्य** नैरात्म्यवादसन्तानभेदाभावादेः स चासौ **दोषश्च** न केवलमन्य **एष** त्वयोच्यमानः **समः** सदृशो **न किं** सम एव भवेत् । 'संवेदनेऽपि' इति शेषः ।

तथा हि–

अभ्रमाच्चेदभिन्नः स्यात् भ्रमः सोऽप्यभ्रमो भवेत् ।
भ्रमाभावे कथं सूक्तं 'शास्त्रं मोहनिवर्त्तनम्'[10] ॥८६०॥
भ्रमादप्यभ्रमाभेदे भ्रम एवावशिष्यते ।
अविभ्रमव्यपोहे च कुतः किमवगम्यताम् ? ॥८६१॥
अध्यक्षादपि सत्त्वादेर्ग्राह्याकारच्यवो यदि ।
अभिन्नोऽध्यक्ष एवायमपि तत्त्वात्तदात्मवत् ॥८६२॥

---

१ एकं प्रत्यक्षेतरात्मकमिति । २ –कान्ते भय–आ०, ब०, प० । ३ वर्तमानाऽभेदात् वर्तमानस्वरूपवत् । ४ वर्तमानमात्रमेव । ५ वर्तमानप्रत्यक्षत्वे । ६ पूर्वापरयोः । ७ प्रत्यक्षत्वेऽपि । ८ तदर्था–आ०, ब०, प० । ९ पूर्वापरवत् । १० प्र० वा० १।७ ।

अभ्यक्षे तद्विषेके च ग्राह्याकारगतिः कथम् ? ।
अविभागोऽपि बुद्ध्यात्मेत्यादि[1] सूक्तं यतो भवेत् ॥८६३॥
परोक्षाद्यद्विषेकाय सत्त्वादेरन्यभेदिनः[2] ।
परोक्षभाव एव स्यात्तत्स्वरूपवदक्षसा ॥८६४॥
तैतत्तैतन्यगन्धस्याप्यभावस्तस्य चाश्रये । ५
स्वसंपूर्णोऽसि चार्वाकश्चिन्मात्रस्यापि लोपनात् ॥८६५॥
नायं प्रसङ्ग एकान्ताभेदस्याभावतो यदि ।
अयमेव परत्रापि समाधिः किन्न मृग्यते ? ॥८६६॥
कथञ्चिद्देवाभेदोऽयं पूर्वापरविवर्तयोः ।
वर्त्तमानावतो लोकस्तथैव परिपश्यति ॥८६७॥ १०
लोकदृष्टिमनादृत्य यद्गत्यन्तरकल्पनम् ।
तदभ्यासप्रवणौम्यैकल्पनेक्षोदरोद्गवम् ॥८६८॥
अप्राप्तामुभवात्सार्वं स्वबुद्धिपरिकल्पितम् ।
मान चेत्स्वविदिष्टेऽर्थे किन्न कस्येह सिद्ध्यति ? ॥८६९॥
तस्माल्लोकदृशा मान तथा च स्वपरं जगत् । १५
सर्वं भेदेतरात्मैवासाङ्कर्येण प्रतीयते ॥८७०॥

तदेवाह—

भेदाभेदव्यवस्थैवं प्रतीता लोकचक्षुषः । इति ।

सुबोधम् । ततो यदुक्तम्—'कुतो विपान्मरणमिति परिज्ञानम् ? न तावद्विपज्ञानात्' इत्यादि, तत्प्रविविक्तम्, विषज्ञानस्यैव कथञ्चिन्मरणग्राहितया परिवर्त्तनात्, तेनैव विष- २० मरणयोर्हेतुफलभावस्यापि सुबोधत्वात् । ततः सूक्तम्—'बाह्यमेव विषं ततो मरणान्यथानुपपत्तेः' इति ।

नैं किञ्चिच्चेतनात्मकं वस्तु यतः 'सम्भवदक्षाभ्यामनेकान्तात्मनो बहिर्भावहेतुफल-भावादेः परिज्ञानम्, तत्परिज्ञानोपायाभावात् । 'विज्ञप्तिः स्वसंवेदनात्मिका तदुपाय इति चेत्, न ; तस्या बहिरिवान्तरपि विभ्रमत्वात् । न हि विभ्रमाद्वस्तुपरिज्ञानम् अतिप्रसङ्गादिति चेत्, २५ एतदेवाशङ्क्य परिहरन्नाह—

विज्ञप्तिर्वितथाकारा यदि वस्तु न किञ्चन ॥७७॥
भासते केवलं नो चेत्सिद्धान्तविषमग्रहः । इति ।

---

१ प्र० वा० २।२५७ । २ भेदतः आ०, ब०, प० । ३ तदभेदमगन्ध—आ०, ब०, प० । ४ —स्य भाव—आ०, ब०, प० । ५ "सर्वविभ्रमवादी प्राह"—आ० टि० । ६ नीलपद । ७ विप्तिः स्व—आ०, ब०, प० ।

विज्ञप्तिर्बुद्धिः वितथोऽसत्य आकारः प्रतिभासो यस्यां सा **वितथाकारा**। ततः किम्? **वस्तु** कार्यक्षमं **किञ्चन** चेतनमचेतनं वा **न भासते** न प्रतिभासते न सम्यगवगतिमुपसर्पति, तस्या एवाभावात् **यदि** चेत्; अत्रोत्तरम्-**केवलं** प्रमाणसहायरहितं विज्ञप्तिर्वितथाकारेति, ततश्चासिद्धम्।

न हि प्रमाणसम्बन्धशून्यस्यास्तित्वनिर्णयः।
बुद्धेरविभ्रमस्यैव विभ्रमस्योपपद्यते ॥८७१॥

कुतः[1] एतत्? **केवलं नो चेत्** न यदि सिद्धान्त एव विषमो दुष्परिहरो ग्रहः **सिद्धान्तविषमग्रहः**, तदा तत्केवलम्, यदा तु स विद्यते न तदा तद्ग्रहस्यैव[2] "भिक्षवोऽहमपि मायोपमः" [ ] इत्यादेस्तत्र प्रमाणत्वात्। भवतु तत एव निर्णय इति चेत्; न; ततोऽपि विभ्रमरूपात्तद्योगात्[3] अन्यथा तादृशादेव प्रतिसिद्धान्तादपि तद्विषयस्य तत्प्रसङ्गात्[4]। तदेवाह-

अनादिनिधनं तत्त्वमलमेकमलं परैः ॥७८॥
सम्प्रीतिपरितापादिभेदात्तत्किं द्वयात्मकम्। इति।

तत्त्वं ब्रह्मरूपम्, **अलं** समर्थं पुरुषार्थाय "तरति शोकमात्मवित्" [छान्दो० ७।१।३] इत्यादिना तद्वेदनस्य शोकनिस्तर(निस्तर)णकारणतया श्रवणात्। कीदृशम्? **अनादिनिधनम्** अविद्यमानपूर्वापरपर्यवसानम्। "तदेतत् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्" [बृहदा० २।५।१९] इति वचनात्। **एकम्** असहायम् "एक एवाद्वयो द्वितीयः" [मै०उ० २।४] इति श्रुतेः **अलं** पर्याप्तं **परैः** बहिरन्तश्च भेदैः। श्रूयत एव केवलं तादृशं तत्त्वं न कदाचिदपि प्रत्यवभासत इति चेत्; न; विभ्रममात्रेऽपि समानत्वात्, तत्प्रतिभासनस्यापि निरूपितत्वात्। प्रत्युत प्रतिभासत एव ब्रह्मतत्त्वं सकलभेदानुयायिनः प्रतिभासमात्रस्योपलम्भात्, तस्यैव च ब्रह्मत्वेन तद्वादिभिर्व्यावर्णनात्। कथं तद्द्वितीयं भेदस्यापि प्रतिभासनात्। सति तस्मिन् द्वयरूपताया एवोपपत्तेः? तदाह-**तत्** अद्वयं **किम्**? नैवं[5], किं तर्हि स्यात्? **द्वयात्मकम्** उभयरूपं तत्त्वं भवेत्। कुतः? इत्याह सम्प्रीतिः सुखं परितापो दुःखं तावादी येषां भयशोकनीलधवलादीनां तेषां **सम्प्रीतिपरितापादीनां भेदात्** नानात्वात्, तस्य अद्वयतत्त्वे अत्यन्तमसम्भवादिति भावः[6]।

एवं पातनिकायां प्रतिविधानमाह-

ग्राह्यग्राहकवद्भ्रान्तिस्तत्र किन्नानुषज्यते ॥७९॥ इति।

तत्र तेषु सम्प्रीत्यादिषु **भ्रान्तिर्मिथ्यावभासनं किं** कस्मात् **नानुषज्यते** न प्रसज्यते

---

१ तदेतत् आ०, ब०, प०। २ दुष्परिहारो आ०, ब०, प०। ३ तद्ग्रहणस्यैव आ०, ब०, प०। ४ निर्णयप्रसङ्गात्। ५ नैवं आ०, ब०, प०, स०। ६ अद्वयत्वे आ०, ब०, प०।

प्रसम्यव एवेति । निदर्शनमाह–ग्राह्यग्राहकयोः नीलत्वदहनयोः इव तद्भूदिति । हेतुरत्र 'भेदत्वात्' इत्यवगम्यते दृष्टान्ते तस्यैव भ्रान्त्यनुपलम्भनेन व्याप्तिपरिज्ञानात् । तदयं प्रयोगः– सम्प्रीत्यादिः भ्रान्त्यनुपलभ्यो भेदत्वात् ग्राह्यादिवदिति । भ्रान्त्यनुपलम्भकथनेन सम्प्रीत्यादेर्भेदस्य वक्तुरोऽसत्त्वं कथयन् तस्याद्वैतप्रत्यनीकत्वं प्रतिषेधति । न हि भ्रान्त्यनुपलम्भं द्वित्व चन्द्रस्यैकत्वप्रत्यनीकमुपलब्धमिति । ५

एवमङ्गीकृत्य सम्प्रीत्यादिभेदं तस्य [1]तत्प्रत्यनीकत्वमपाकृतम् । इदानीं स [2]एवोपायान्नास्तीति निवेदयन्नाह–

भेदो वा सम्मतः केन [हेतुसाम्येऽपि भेदतः] । इति ।

भेदः सम्प्रीत्यादेर्नानात्वम् । 'वा' इति पक्षान्तरद्योतने, सम्मतः सम्यक् प्रतिपन्नः । केन ? न केनचिज्ज्ञानेन ततो न तस्य [3]तत्प्रत्यनीकत्वम् अज्ञातस्य व्योमकुसुमवत् तद्योगा १०
दिति भावः ।

कथं पुनः केनेति ? यावता प्रत्यक्षत एव सं परिज्ञायते सम्प्रीत्यादेर्भेदाधिष्ठानस्यैव तत्र परिस्फुटमवभासनात् । ततो नागमादप्यभेदप्रतिपत्तिः, भेदप्रत्यक्षेण विरोधात् । भ्रान्ति-प्रतिपत्तिस्तु ततो भवत्येव, तद्विरोधिन्या एव तस्यास्ततः परिज्ञानादिति चेत् , न , प्रत्यक्षस्य विधिमात्रविषयत्वेन भेदगोचरत्वानुपपत्तेः । "व्यवच्छेदनिष्ठो हि भेदः, व्यवच्छेदश्च न विधि १५
परस्य प्रत्यक्षस्य विषयः , तत्कथं तेन" भेदग्रहणम् ? व्यवच्छेदपरत्वमप्यस्यैव प्रत्यक्षस्य तदयमदोष इति चेत् , न, युगपत्तदसम्भवात् । न हि किञ्चित्कचिद् विदधदेव प्रत्यर्थं तदेव तत्र तद्व्यवच्छेत्तुमर्हति, "निष्पर्यायकमेकत्र विधिव्यवच्छेदयोरप्रतिपत्तेः । पर्यायेण तस्य [4]तत्त्वमिति चेत् , विधिपूर्वस्तर्हि व्यवच्छेदो वक्तव्यो विहितस्यैव 'अयमत्र नास्ति नासावयम्' इति व्यवच्छेदप्रतिपत्तेः" । उक्तञ्च– २०

"लब्धरूपे क्वचित्किञ्चिद्बाहुल्येव निषिध्यते ।
विधानमन्तरेणातो न निषेधस्य सम्भवः ॥" [प्रज्ञप्ति० २२] इति ।

भवत्येवमिति चेत् , "न , एकव्यापारत्वेन क्रमवत्त्वानुपपत्तेः । प्रत्यक्षं हि ज्ञानं क्षणिकम् , तद्व्यापारौ विधिव्यवच्छेदौ क्रमवन्तौ भवेताम् , क्रमवतोर्हि व्यापारयोः पश्चाद्भावी न तद्व्यापारः स्यात् । अपि च, अन्यैव युक्तेर्व्यापारेऽर्थावबद्धरूपायाः, सा चेदर्थविधानरूपोदया विधिरेवास्या २
व्यापारः, न व्यवच्छेदो योगपद्यनिषेधात् , उत्पन्नायामानुत्पत्तेः ।

---

१ एवेति दर्श०–आ०, ब०, प० । २ भेदस्य । ३ अद्वैतप्रत्यनीकत्वम् । ४ भेद एव । ५ भेदस्य । ६ अद्वैतप्रत्यनीकत्वम् । ७ भेदः । ८ प्रत्यक्षे । ९ आगमात् । १० व्यवच्छेद एवो हि । ११ प्रत्यक्षस्य । १२ युगपत् । १३ प्रत्यक्षस्य । १४–पत्तिः आ०, ब०, प० । १५ "न खलेकप्रमाणज्ञानव्यापारौ द्वन्द्वौ विधि व्यवच्छेदौ क्रमवन्तौ युज्येते, क्षणिकत्वात् ; क्रमवतोर्हि व्यापारयोः पश्चात्तनो न तद्व्यापारः स्यात्, व्यवधानात् । अपि च अन्यैव युक्तेर्व्यापारेऽर्थावबद्धरूपायाः ; सा चेदर्थविधानरूपोदया, विधिरेवास्या व्यापारः यौगपद्यस्य निषेधात्, उत्पन्नायाम् पुनरुत्पत्तेः ।"–प्रज्ञप्ति० पृ० ४५ ।

[1]अपि च, सन्निहितावलम्बनं प्रत्यक्षं नासन्निहितमर्थमवभासयितुमर्हति । न चानवभासमानं व्यवच्छेत्तुं पर्याप्नोति । अनवभासे हि तत्र व्यवच्छेद्ये व्यवच्छेदमात्रं स्यात्, न व्यवच्छेदः कस्यचित् । [2]तस्मान्नावभा(ज्ञानवभा)समाने विषये अन्यव्यवच्छेदः, अन्यस्य घटादेरसन्निहितत्वेन तज्ज्ञानेऽनवभासनात् । ज्ञानान्तरेऽवभासनाद्व्यवच्छेद इति चेत् ; न; स्वयं व्यवच्छेदकृता तद्रूपासंस्पर्शे 'अस्यायं व्यवच्छेदः' इति प्रतिपत्त्यसम्भवात् । इदमप्युक्तम्—

"क्रमः सङ्गच्छते युक्त्या नैकविज्ञानकर्मणोः[3] ।
[न][4] सन्निहितजं तच्च तदन्यासङ्गि जायते ॥" [ब्रह्मसि० २।३] इति ।

ननु इदमेव दर्शनस्यान्यव्यवच्छेदकारित्वं यन्नियतविषयत्वम् । तद्धि यथा नीलं तदाकारनियमाद् विधत्ते तथा तदन्यन्न भवतीति व्यवच्छिनत्त्यपि, अन्यथा नियतनीलविधानानुपपत्तेः । तद्विधानादन्यस्य च अन्यव्यवच्छेदस्याभावात् । 'इदमस्ति, इदमत्र नास्ति' इति तु विधिव्यवच्छेदव्यवहारः दर्शनबलभाविकल्पविकल्पित एवेति चेत् ; न ; नीलदर्शनात् पीतादिवत् रसादेरपि व्यवच्छेदप्रसङ्गात् तत्प्रतिनियमस्याविशेषात् । भवत्येव तद्रूपतया[6] तस्यापि[7] व्यवच्छेदः, तदेशादितयैव अनभ्युपगमादिति चेत् ; न; पीतादावप्येवं प्रसङ्गात्, पीतादेस्तदेशादित्वे भवत्युपलम्भो नीलवत्तुल्योपलम्भयोग्यत्वात् । न चोपलब्धिः, ततस्तदेशादितया पीतस्य व्यवच्छेदः, रसादेस्तु न तद्योग्यत्वम् अतो न [10]तथा [11]तद्व्यवच्छेद इति चेत् ; तादृप्येणापि न भवेत्, तदेशादित्ववदनुपलभ्यस्यैव तस्य तद्रूपतोपपत्तेः । उपलभ्यस्यानुपलभ्यत्वं कथं विरोधादिति चेत् ? अन्यतस्तर्हि विरोधाद् व्यवच्छेदो न दर्शननियमात् ? असति च व्यवच्छेदे कुतो विरोधः ? इतरेतराश्रयो वा—विरोधात् व्यवच्छेदस्य, ततोऽपि विरोधस्य व्यवस्थितेः । तस्मान्नैकविधिरन्यव्यवच्छेदः ।

[12]अपि च, एकनियमादन्यव्यवच्छेदे चित्रादिषु नीलादीनामेकदर्शनभाजां भेदो न सिद्ध्येत्, एकज्ञानसंसर्गात् एकत्र च ज्ञानस्यानियमात् । इदमप्युक्तम्—

"विधानमेव नैकस्य व्यवच्छेदोऽन्यगोचरः ।
मा स्म भूदविशेषेण [13]मा न भूदेकधीजुषाम् ॥" [ब्रह्मसि० २।४] इति ।

तन्न व्यवच्छेदव्यापारं प्रत्यक्षमिति न भेदविषयम्, ततो न तेनैकत्वाम्नायस्य विरोधः । तदप्यभिहितम्—

---

१ "अपि च सन्निहितार्थालम्बनं प्रत्यक्षं नासन्निहितमर्थमवभासयितुमर्हति ; न चानवभासमानरूपं व्यवच्छेत्तुं पर्याप्नोति;अनवभासमाने हि तत्र व्यवच्छेद्ये व्यवच्छेदमात्रं स्यात्, न व्यवच्छेदः कस्यचित् ; सर्वस्यवा स्यात् । तस्माज्ज्ञानवभासमाने व्यवच्छेद्ये व्यवच्छेदः । न च सन्निहितार्थावलम्बने प्रत्यक्षेऽसन्निहितावभासो युक्तः ।" —ब्रह्मसि० पृ० ४५ । २ तस्मान्नावभासने आ०, ब०, प० । ३ —णोःसन्नि—आ०, ब०, प० । ४ "न सन्निहितजं तच्च तदन्यामर्शि जायते ।"—ब्रह्मसि० । ५ नीलं पीतादिकं न भवति । ६ —तयास्या—आ०, ब०, प० । नीलरूपतया । ७ रसादेरपि । ८ नीलदेशतयैव रसादिव्यवच्छेदानभ्युपगमात् । ९ तुल्योपलम्भयोग्यत्वम् । १० नीलेदेशादितया । ११ रसादिव्यवच्छेदः । १२ तुलना—ब्रह्मसि० पृ० ४७ । १३ मा भूदेकधियामिति आ०,ब०,प० ।

"आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः ।
नैकत्व आगमस्तेन प्रत्यक्षेण विरुध्यते ॥" [प्रज्ञप्ति० २।१] इति ।

ततः स्थितम् 'भेदो वा' इत्यादि ।

कथमेतत् ? इत्याह–'हेतुसाम्येऽपि' इति । हेतूनां प्रत्यक्षादिन्यायानां साम्यं विधिमात्रविषयत्वेनागमसादृश्यं तस्मिन् । 'अपि' इति सोऽपि, कृतमत्रार्थे नियमः सुखादिः सुखादिरेव न दुःखादिः, सोऽपि स एव न सुखादिरिति यतस्तस्माद्धेतुप्रत्यनीकत्वं भवेत् ? एतेनैव स्वहेतुसामर्थ्यादुत्पत्तेरिति चेत् , अत्राह–

भेदतः ।
तेषामेव सुखादीनां नियमश्च निरन्वयः ॥८०॥ इति ।

भेदतः भेदमाश्रित्य योऽपि नियमः परस्परमिश्रणात्मा । केषाम् ? तेषाम् अनन्तरोक्तानां सुखादीनाम् । स किम् ? निरन्वय एव अशक्यसाधन एव, भिन्नप्रक्रमतया एवकारस्यात्र सम्बन्धात् । तथा हि–भेदो[1] नाम व्यापृतिः, सा चानेकाधिष्ठाना प्रतिज्ञायते[2] प्रज्ञाप्यते च । तथा च तस्या[3] एकस्याः अनेकवृत्तेर्वस्तुस्वभावत्वेन वस्तूनामपि सुखादीनां भेदो न स्यात् । नैकस्मादभिन्नमभिन्नस्वभावं भिन्नं पुनन्यते तद्वदेव । [4]अपि च, भेदो नाम परस्परानात्मा स्वभावविशेषः । स चेद्वस्तुनः स्वभावः ; वस्तूनामभावप्रसङ्गः अभावात्मप्रतिज्ञानात् । [5]प्रकारान्तरम् भेदश्चेद्वस्तुनः स्वभावो नैकं किञ्चन वस्तु स्यात् , भेदेन एकत्वस्य विरोधात् परमाणुरपि भेदादनेकात्मक इति नैकः । तथा च तत्समुदयरूपो नैकोऽन्यस्यात्मा [6]नायकस्येव तत्रैकत्वानेकत्वयोरनुपपत्तेः, तृतीयप्रकारासम्भवाच्च वस्तुनो निःस्वभावताप्रसङ्गः । [7]अथ मा भूदेष दोष इत्यर्थान्तरमेव व्यापृतिराश्रीयते तथापि व्यापृतेरस्वरूपत्वात् स्वरूपेण भावा न व्यापृताः स्युः ।

[8]स्यान्मतम्– वस्तुन्यर्थे विकल्पः तत्त्वमन्यत्वं चेति नावस्तुनि । अवस्तु चार्थे भेदो विकल्पोपनीतत्वात् मायाशोयवत् तत्कथमत्रार्थे विचार इति ? तन्न ; एवमपि निःस्वभावेन वस्तूनां वस्तुतो भेदाभावापत्तेः । कल्पितवस्तु तद्भेदो न वार्यत एव ब्रह्मवादिनाप्यनाद्यविद्याविलसितस्य तद्भेदस्याभ्युपगमात् । तन्न सुखादीनां भेदतो नियमः, तस्यैव विचाराक्षमत्वेनासम्भवात् । तदुक्तम्–

"न भेदो वस्तुनो रूपं तदभावप्रसङ्गतः ।
अरूपेण च भिन्नत्वं वस्तुनो नावकल्प्यते ॥" [प्रज्ञप्ति० २।५] इति ।

---

१ तुलना–प्रज्ञप्ति० पृ० ३० । २ –ते ब्र–आ०, ब०, प० । ३ व्यापृतेः । ४ तुलना–"भेदः परस्परानात्मस्वभाव ..."–प्रज्ञप्ति० पृ० ३० । ५ "आकारः प्रकारः भेदश्चेद्वस्तुनः स्वभाव"–प्रज्ञप्ति० पृ० ४८ । ६ नावकल्प्यते आ०, ब० । नावकल्पते प० । ७ प्रज्ञप्ति० पृ० ३० । ८ प्रज्ञप्ति० पृ० ४८ । ९ वस्तुभेदा–आ०, ब०, प० ।

तन्न विभ्रमैकान्तवादः, तद्वदाम्नायात् ब्रह्मवादस्याप्यवस्थितेः ।

भवतु तर्हि विज्ञानवाद एव, तस्य प्रत्यक्षबलादेवोपपत्तेः, न ब्रह्मवादो विपर्ययादिति चेत् ; अत्राह—

प्रत्यक्षलक्षणं ज्ञानं मूर्च्छितादौ कथं ततः ॥ इति ।

प्रत्यक्षं निर्विकल्पमनुभवनं तल्लक्षणं प्रमाणं यस्मिन् तत् **प्रत्यक्षलक्षणं ज्ञानम्** । **कथम्** ? न कथञ्चित् । कुत एतत् ? **मूर्च्छितो** मोहाक्रान्त **आदिर्यस्य** [1]सुषुप्तादेः तत्र ततस्तल्लक्षणज्ञानप्रसङ्गात् । ननु तत्र तल्लक्षणं प्रत्यक्षमेव नास्ति कथं तत्प्रसङ्ग इति चेत् ? कुतस्तन्नास्ति ? अनुपलम्भादिति चेत् ; न ; अन्यत्रापि समानत्वात् , अखण्डवेदनस्य जाग्रदादावप्यप्रतिपत्तेः ।

अपि च, मूर्च्छितादौ ज्ञानाभावे प्रबोधस्य कदाचित्कत्वेनाहेतुत्वायोगात् शरीरोपादानत्वप्रसङ्गः । तदाह—

अज्ञानरूपहेतुस्तदहेतुत्वप्रसङ्गतः ॥८२॥
प्रवाह [एकः किन्नेष्टस्तदभावाविभावनात्] । इति ।

प्रवाहः प्रबन्धो ज्ञानस्य, **'ज्ञानम्'** इत्यस्य विभक्तिपरिणामेन सम्बन्धात् । कदा भवतः ? मूर्च्छितादेरूर्ध्वम् । **'मूर्च्छितादौ'** इत्यस्यापि पञ्चमीपरिणामेन योजनात् । किम् , अज्ञानम् अचेतनं रूपं स्वभावो यस्य शरीरस्य स एव हेतुः कारणं यस्य सः **अज्ञानरूपहेतुस्तत्प्रवाहः** 'भवति' इति शेषः । कुत एतत् ? **तस्य** तत्प्रवाहस्य **अहेतुत्वम्** अकारणकत्वं तस्य **प्रसङ्गतः** प्रसञ्जनात् । तात्पर्यम्—

गाढामूर्च्छाद्यवस्थायां ज्ञानस्याभावकल्पने ।
तस्य प्रबोधहेतुत्वमसतो न भवेत्ततः ॥८७२॥

शरीरमेव तस्येदं कारणं परिकल्प्यताम् ।
अन्यथाऽहेतुतैव स्याद् गत्यन्तरपरिक्षयात् ॥८७३॥

अनित्यत्वमहेतोश्च कथं नामोपपत्तिमत् ?
"नित्यं सत्त्वमसत्त्वं वा" इत्यादेः स्वोक्तस्य पीडनात् ॥८७४॥

[2]जाग्रज्ज्ञानस्य हेतुत्वाद् दोषो नैष भवेद्यदि ।
चिरनष्टस्य हेतुत्वं कथं तस्योपकल्प्यताम् ॥८७५॥

स्वकाले तस्य भावाच्चेदात्मनः किन्न कल्प्यते ?
नित्यैकव्यापिनस्तस्याप्यभावाप्रतिवेदनात् ॥८७६॥

---

१ सुप्तादे—आ०, ब०, प० । २ प्र० वा० ३।३४ । ३ "गाढसुप्तस्य विज्ञानं प्रबोधे पूर्ववेदनात् । जायते व्यवधानेन कालेनेति निनिश्चितम् ।।"—प्र० वार्तिकाल० १।४९ ।

तदेवाह—

एकः किन्नेष्टस्तदभावाविभावनात् । इति ।

एकः द्वितीयरहित आत्मा इति यावत् । किम् ? कस्मात् । नेष्टः ? इष्ट एव प्रबोधहेतुः । कुत एतत् ? तदभावस्य एकाभावस्य अविभावनाद् अनिश्चयात् ।

ननु यद्यसौ प्रामाण्यादेरन्य एव, कथमस्ति ? अप्रतिभासनात् । अस्तित्वेऽपि प्रामाण्यादिः किं भवति ? असन्नेवेति चेत्, न, प्रतिभासनात् । प्रतिभासवतोऽप्यसत्त्वे तदा सर्वस्यापि प्रसङ्गात् । सन्नेवेति चेत्, न, अद्वैतवादव्यापादनात् । भवतु प्रामाण्यादिरेवायमिति चेत्, न, चित्राकारैकज्ञानाभ्युपगमेन बौद्धदर्शनस्यैवैवं प्रतिष्ठानात् न ब्रह्मवादस्य, तत्र निराकारस्यैवात्मनः प्रसिद्धेः । "अस्थूलमनवं(मनणु)ऽह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमो(मो)वायुमनाकाशम्" [बृहदा० ३।८।८] इत्यादि वचनात् । तत्कथं तदभावाविभावनं तदभावस्यैव विभावनादिति चेत्, न, जात्यन्धानेऽप्येवं प्रसङ्गात् । तदपि च यदेतत् 'नीलमहं वेद्मि' इति स्वपरसंवेदनव्यवसायात्मकं ज्ञानं न ततो भिन्नमस्ति अप्रतिवेदनात् । अस्तित्वेऽपि प्रकृतं किं भविष्यति ? असदेवेति चेत्, न, प्रसिद्धस्यासत्त्वे अन्यत्रापि व्यभिचारासङ्गात् । सदेवेति चेत्, न, उभयाप्रतिवेदनात् । "मनसोर्युगपद्वृत्तेः" [प्र० वा० २।१३३] इत्यादेर्निषिद्धत्वात् । भवतु तदेवं तदिति चेत्, न, अप्रतिवेदने तदेवेत्ययोगात् । अस्त्येव स्वतस्तस्य प्रतिवेदनमिति चेत्, तर्किमाह प्रमाणम् ? अप्रमाणात्तत्प्रतिवेदनायोगात् । प्रत्यक्षमिति चेत्, न, तस्य निर्विकल्पकत्वात् । निर्विकल्पं हि प्रत्यक्षं तत्कथं तत्स्वभावशून्यस्य व्यवसायस्य स्यात् ? अस्त्येव तस्यापि तत्स्वभाव इति चेत्, न, 'व्यवसायश्च निर्विकल्पश्च' इति व्याघातात् । नायं दोषः ऐकान्तिकस्य व्यवसायस्यानभ्युपगमादिति चेत्, एवमपि स्वतो निर्विकल्पकस्वभावस्यैव प्रतिवेदनं प्रत्यक्षं न व्यवसायात्मनः । पुनरस्यापि निर्विकल्पस्वभावकल्पनायामनवस्थानम्, 'व्यवसायश्च निर्विकल्पश्च' इत्यादेरनुबन्धात् । तन्न तत्प्रत्यक्षम् । नाप्यनुमानम् अलिङ्गजत्वात् । नापि प्रमाणान्तरम् अनभ्युपगमात् । ततो न स्वतस्तत्प्रतिवेदनम् । नापि परतः "तस्या नानुभवोऽपरः" [प्र० वा० २ । ३१७] इति व्याघातात्, तद्वदन्यस्यापि प्रतिवेदनप्रसङ्गाच्च । ततो न जात्यन्धज्ञानं नाम किञ्चित्प्रतिविदितमस्ति यस्य प्रबोधहेतुत्वकल्पनम् । अप्रतिविदितस्यापि तत्कल्पने परमाणव एव तदस्तु । ततः सूक्तम् 'एकः' इत्यादि ।

यद्येक आत्मा कथं प्रतिशरीरं जीवभेदः 'देवदत्तजीवो यज्ञदत्तजीवः' इति ? अभिन्ना एव सन्तः आत्मनो जीवाः । तदेकत्वे च तेषामप्येकत्वमेव स्यान्न नानात्वम्, न चैवम्, नानात्वस्यैव तेषु दर्शनादिति चेत्, न, सम्यगेतत्, उपाधिकल्पितेभ्यस्तेभ्यः परमात्मनोऽन्यत्वात् । तथाहि—घटाकाशादुपाधिपरिच्छिन्नात् अन्योऽनुपाधिरपरिच्छिन्न आकाश इति । तद-

---

१ —अस्थूल—आ०, ब०, प० । २ 'नीलमहं वेद्मि' इति क्वचित् । ३ अप्रज्ञानेऽपि । ४ अप्रज्ञानमेव । ५ निर्विकल्पकस्वभाव । ६ हेतुरहिते । ७ प्रत्यक्षः । ८ —च तथाहि—आ०, ब०, प० । ९ अपेक्ष्यः ।

भेदवचनं तु तेषामुपाध्युपरमे पृथगवस्थानाप्रतिवेदनात्, तद्विकारत्वाच्च । तस्यैव परमात्मनः खल्वेते विकारा य इमे जीवा अन्ये च भेदाः । तदुक्तम्–"यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन् एवमेव एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यः लोकः (काः) ।" [कौषीत० ३।३] इति । [1]तदेवाह–

अविप्रकृष्टदेशादिरनपेक्षितसाधनः ॥८३॥

दीपयेत् किन्न सन्तानः सन्तानान्तरमञ्जसा । इति ।

दीपयेत् दीप्यमानं प्रकाशमानं कुर्यात्, **किन्न** कुर्यादेव । किम् ? **सन्तानान्तरं** जीवादिलक्षणं सन्तानभेदम् । को दीपयेत् ? **सन्तानः समः**[2] मोहन्यूनाधिकभावरहितस्तानो विस्तारो यस्य सः परमात्मा, तस्यैव वृद्धिपरिक्षयरहितविस्तारमूर्त्तिकतया ब्रह्मविद्भिरभ्यनुज्ञानात्[3] । कथं दीपयेत् ? **अञ्जसा** परमार्थेन । परमार्थत्वं बलवदविद्याभिप्रायवशात् वस्तुतः सन्तानान्तरस्यापरमार्थत्वात् । सः कीदृशः ? **अविप्रकृष्टः** सन्तानान्तरेण सह प्रत्यासन्नो देशादिर्यस्य स तथोक्तः[4] । तदनेन देशकालाभ्यां प्रत्यासन्नत्वात्प्रबोधादौ तस्यैव हेतुत्वं न जाग्रज्ज्ञानादेः विपर्ययादित्यावेदयति । पुनस्तद्विशेषणम्–**अनपेक्षितं** स्वोत्पत्तिं प्रति **साधनं** निमित्तं येन स तथोक्तः । तदनेनापि तस्य नित्यत्वमावेदयति । अनित्यत्वे अनपेक्षितसाधनत्वानुपपत्तेः । प्रसिद्धं चैतत् ब्रह्मविदाम्–"न तस्य कश्चिज्जनको न चाधिपः" [श्वेता० ६।९] इत्यागमात् । तदेतदसहमानः सौगत आह–

अन्यवेद्यविरोधात् [किमचिन्त्या योगिनां गतिः]॥८४॥ इति ।

अन्ये भिन्नाः परस्परतः परमात्मनश्च जीवादयस्ते च ते **वेद्याश्च** वेदनविषयाः तेषां **विरोधात् । 'न दीपयेत्'** इति योजनम् । इदमनेनावेदयति–प्रतिविदितानामेव तेषां[5] स दीपकः परिकल्पयितव्यो नान्येषां व्योमकुसुमादिवत्, वेद्यता च तेषामनुपायत्वाद्विरुद्धेति । न विरुद्धा, तेषां[6] स्वत एव वेद्यत्वादिति चेत् ; न; वेदनस्य [7]परमात्मधर्मत्वेन तेष्वसम्भवात् । "नान्यदस्ति द्रष्टृ नान्यदस्ति श्रोतृ नान्यदस्ति मन्तृ नान्यदस्ति विज्ञातृ" [बृहदा० ३।८।१] इति वचनात् । नायं दोषः, तेषामपि[8] [9]तदव्यतिरेकात्तद्धर्मत्वोपपत्तेरिति चेत् ;न ; [10]तेभ्यस्तस्य [11]व्यतिरेके तेषामपि[12] ततो[13] व्यतिरेकस्यैव न्याय(य)त्वात्, [14]तस्योभयनिष्ठतयैव प्रत्यवलोकनात् । प्रसिद्धश्च [15]तेभ्यस्तस्य[16] व्यतिरेको ब्रह्मविदाम्, "परमेश्वरस्तु अविद्याकल्पिताच्छारीरात्कर्तृ भोक्तृ विज्ञानात्माख्यादन्यः, यथा मायाविनश्चर्मखड्गधरात् सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः" [ब्र० भा० १।१।१७] इत्यादिभाष्यश्रवणात् ।

---

१ तदेवाह आ०, ब०, प० । २ समो न्यूना–आ०, ब०, प० । ३ "अस्थूलमनण्वह्रस्व···"–बृहदा० ३।८।८ । ४–क्षः स्यादनेन आ०, ब, प० । ५ जीवानाम् । ६ परमार्थघ–आ०, ब०, प० । ७ जीवानामपि । ८ परमात्माऽव्यतिरेकात् । ९ जीवेभ्यः । १० परमात्मनः । ११ जीवानामपि । १२ ब्रह्मणः । १३ व्यतिरेकस्य । १४ जीवेभ्यः । १५ परमात्मनः । तेभ्यस्तद्व्यति–आ०, ब०, प० ।

सुवर्णस्य रुचकादिव्यतिरेकेऽपि रुचकादयस्तद्द्रव्यतिरिक्ता एव तद्वत्परमात्मनो जीवादिव्यतिरेकेऽपि जीवादयस्तद्द्रव्यतिरिक्ताः किन्न भवन्तीति चेत् ? कुतः पुनः सुवर्णस्य रुचकादिव्यतिरेकः ? [1]तदभावेऽप्यवस्थान्तरे भावादिति चेत्, रुचकादीनामपि तर्हि [2]तद्व्यतिरेकः, तदभावेऽपि [3]द्रव्यान्तरे भावात्। अन्य एव ते रुचकादय इति चेत्, सुवर्णमप्यवस्थान्तरगतमन्यदेव किन्न स्यात् ? प्रत्यभिज्ञानादिति चेत्, न, 'अमी च रुचकादय अमी च रुचकादयः' इति तत्रापि [4]तथानुसेरवलोकनात्। तादृश्यात्तत्प्रवर्तन नैकत्वादित्यपि समानं स्वर्णेऽपि। ननु अस्ति तावद् द्रव्यादव्यतिरेकः रुचकादीनाम्, तच्च द्रव्यं स्वर्णमन्यद्वेति किमनेन ? तद्व्यतिरेकमात्रादेव निदर्शनात् परमात्मात्यतिरेकस्य जीवादिपूपकल्पनादिति चेत्, न, अस्ति तावत्पर्यायतादात्म्यं सुवर्णस्य, ते च पर्याया रुचकादयोऽन्ये येति किमनेन, तत्तादात्म्यादेव निदर्शनाज्जीवादव्यतिरेकस्य च परमात्मन्युपपादनात्। एकैकपर्यायपरिहारेणेव सकलपर्यायोपसंहारेणापि सम्भवति सुवर्णं तत्कर्म तस्य तैन्मात्रेणापि तादात्म्यं यदेवमुच्यत इति चेत्, न, एकैकद्रव्यपरित्यागेनेयं सकलद्रव्यपरित्यागेनापि रुचकादीनां सम्भवाद्, अन्यथा अपिधचनानुपपत्तेः, कल्पनामात्रस्योभयत्रापि समानत्वात्। तन्न व्यतिरिक्तादेव सुवर्णात् स्वस्तिकादीनामव्यतिरेको यतस्तव्यतिरेकिण एवात्मनो जीवादीनामव्यतिरेकात् तद्वच्चेतनधर्मत्वं तेषूपपाद्येत। तन्न [5]तेषां तात्त्विकं ज्ञानधर्मत्वम्।

कल्पितमेव भवत्विति चेत्, केन तत्कल्पनम् ? अविद्याविलासेनेति चेत्, न, जीवादिभेदव्यतिरेकिणस्तस्यैव[6] भावात्। प्राग्भवीयस्तद्भेद एव तद्विलास इति चेत्, न, तस्यापि वस्तुतो ज्ञानरूपस्याभावात्। कल्पितमेव तत्रापि [7]तद्रूपत्वं प्राग्भवीयेन तद्भेदेन। न चैवमनवस्थान दोषः, अनादित्वात् प्रबन्धस्येति चेत्, तदसद्ज्ञानरूपत्वस्याप्यनादित्वात्। न चातद्रूपादेव क्वचित्तद्रूपकल्पनम्, अचेतने घटादिप्रबन्धेऽपि प्रसङ्गात्। तस्माविद्याविलासेन तत्कल्पनम्।

अस्तु, परमात्मनैव तत्कल्पनम्, तस्य [8]तत्त्वत एव ज्ञानरूपत्वात् "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्ति० २।१।१] इति वचनादिति चेत्, भवत्येवम्, तथापि कथं कल्पितस्य तद्रूपस्य क्वचित्प्रतिपत्त्यङ्गत्वम् ? कल्पितस्य [9] पावकस्य पावकाङ्गत्वादर्शनात्। कल्पितोऽप्यहिर्दंशो भवत्येव मरणाङ्गमिति चेत्, न, वस्तुसदस्तदंशकल्पिनो[10] ज्ञानस्यैव [11]तदङ्गत्वात्। तदंशस्य तदङ्गत्वे अतिप्रसङ्गात्। भवत्वत्रापि वस्तुसतः परमात्मन एव [12]तत्कल्पनाङ्गत्वं तत्प्रतिपत्त्यङ्गत्वम्, "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" [कठो० ५।१५] इति वचनादिति चेत्, किमित्दानीं जीवेषु चेतनत्वकल्पनेन कल्पितेऽपि तस्मिन् [13]पुरुषादेव

---

१ रुचकाद्यभावेऽपि। २ सुवर्णव्यतिरेकः। ३ द्रव्यादौ। ४ प्रत्यभिज्ञानप्रवृत्तेः। ५ तादृश्यात्। ६ –द्रव्यादिभेदे–आ०, ब०, प०। ७ –न दोषः–आ०, ब०, प०। ८ पर्यायमात्रेणापि। ९ –मेव स–आ०, ब०। –मेनापि स–प०। १० जीवानाम्। ११ अविद्याविलासमर्म्मेव। १२ प्राग्भवीय–आ०, ब०, प०। जीवादिभेद। १३ तद्रूपं प्राग्भवी–आ०, प०, प०। १४ तद्रूप एव आ०, ब०, प०। १५ –स्यैव पावकस्य पावकाङ्ग–आ०, ब०, प०। १६ –तदंश–आ०, ब० प०। १७ मरणाङ्गत्वात्। १८ –नानुतत्त–आ०, ब०, प०। १९ पुरुषा–आ०, ब०, प०।

तत्प्रतिपत्तेः [1]ततस्तत्प्रतिपत्तिरेव तेषु तत्कल्पनमिति चेत् ; न ; घटादावपि प्रसङ्गात् । एवञ्च चेतन एव सर्वभेदो नाचेतन इति [2]प्रतीतिविरुद्धमापद्येत । पुरुषोऽपि तान् प्रतिपद्यमानः प्रतिपन्नः, तद्विपरीतो वा प्रतिपद्येत ? तद्विपरीत एव, "तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ" [बृहदा० ३।८।११] इति वचनादिति चेत् ; कथमिदानीं तस्य सर्वज्ञत्वम्, आत्मापरिज्ञाने तदनुपपत्तेः । न चासर्वज्ञ एवासौ "सर्वज्ञं ब्रह्म जगत्कारणम्" [ब्र० भा० १।१।१०] इति भाष्यात् । "स वेत्ति विश्वम्" [श्वेता० ३।१९] [3]इत्याम्नायाच्च ।

भवतु प्रतिपन्न एवेति चेत् ; स भूमा, अल्पो वा भवेत् ? भूमा चेत् ; तथापि कथं तस्य सर्वज्ञत्वं स्वरूपादन्यस्याप्रतिवेदनात् ? "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" [छान्दो० ७।२४।१] इति वचनात् । तदवस्थायामन्यदेव नास्ति सर्वस्य भूमन्यनुप्रवेशात् । न चासतोऽपरिज्ञानादसर्वज्ञत्वम्, अपि तु सत एव सविशेषात्परिज्ञानात् । न चेदं भूमन्यस्ति, सतो भूम्नः सर्वात्मना परिज्ञानात् । ततः स्वपरिज्ञानमेव तस्य सर्वज्ञत्वमिति चेत् ; कथं तर्हि तस्य जगत्कारणत्वं तदन्यस्य जगत एवाभावात् । स एव जगदिति चेत् ; न; तस्य तत एवानुत्पत्तेः । यद्यसौ सन् किमुत्पत्त्या ? यद्यसन् ; कुत उत्पत्तिरिति ? कथं वा ततो जीवादेर्भेदस्य प्रतिपत्तिः तदानीमसतस्ततोऽपि तदनुपपत्तेः । तन्न भूमा जगत उत्पत्तेः प्रतिपत्तेर्वा निमित्तमुपपन्नम् ।

भवत्वल्प एव स इति चेत् ; तेनापि यदि भूम्नोऽपरिज्ञानं कथं सर्वज्ञत्वम् ? परिज्ञाने स एव भूमा "ब्रह्मवद ब्रह्मैव भवति" [मुण्ड० ३।२।९] इति कथमल्पत्वम् ? उपाधिपरिच्छिन्नतया परिज्ञानादिति चेत् ; न; तत्परिच्छेदस्यार्तद्रूपत्वात् । न च अतद्रूपपरिज्ञानं तत्परिज्ञानम् अन्यत्र विभ्रमात् । विभ्रमे च कथं तस्य ब्रह्मत्वं यतो द्विविधं ब्रह्मकल्पनं शोभेत ? [10]अपहतपाप्मत्वादिभिर्ब्रह्मधर्मैरिति चेत् ; न; विभ्रमस्यैव पाप्मत्वात् । नायं[11] पाप्मा अदुःखहेतुत्वादिति चेत् ; न; अस्मदादिविभ्रमस्याप्यतद्धेतुत्वापत्तेः । तथा चासङ्गतमेतत्-"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" [कठो० ४।१०] इति । [12]ब्रह्मज्ञानिभ्रमस्यैवापाप्मत्वं ब्रह्मज्ञानज्वलनोपहतशक्तिकत्वान्नेतरविभ्रमस्य विपर्ययादिति चेत् ; न; ब्रह्मज्ञानी च विभ्रमी चेति व्याघातात् । [13]अथ तस्यापि इच्छया भवत्येव विभ्रम इति [14]चेत्, न; इच्छाविषयस्य विभ्रमात्प्रागदर्शनात् अदृष्टतद्विषयस्य चेच्छानुपपत्तेः । प्राक्तद्दर्शनभावे च नेच्छातो विभ्रमः विभ्रमादेव तद्भावात् । तथा च अनादिविभ्रममलोपहतस्य कथं तस्यापहतपाप्मत्वादिकं[15] यतो

---

१ पुरुषात् । २ प्रतीतिरुद्ध-आ०, ब०, प० । ३ "अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः ॥ अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥"-ता० टि० । "सर्वेत्ति वेद्यम्"-श्वेता० । ४ यत्तु ता० । ५ भूमावस्थायाम् । ६ ब्रह्मणः । ७ ब्रह्मश्च आ०, ब०, प० । ८ ब्रह्मस्वरूपत्वाभावात् । ९ "द्वे ब्रह्मणो वेदितव्ये शब्दब्रह्म परञ्च यत् ।"-मैत्रा० ६।२२ । १० "अहतपाप्मा ह्येष ब्रह्मलोकः ।"-छान्दो० ८।४।१ । ११ विभ्रम. । १२ विभ्रमस्यैवा-आ०,ब०,प० । १३ अर्थस्यापि छाया-आ०,ब०,प० । १४ चेच्छा-आ०, ब०, प० । १५ -कं न यतो-आ०, ब०, प० ।

ब्रह्मत्वमस्यस्य । तस्येऽपि न तस्य स्वयेदने परवेदनम्, विभ्रमाभावात् "अविज्ञातं विजानात्" [बृहदा०३।८।११] इति वचनाच्च । परतस्तस्याविज्ञानादविज्ञातत्वं [1]तेनोच्यते स्वतस्तु विज्ञात एवास्योऽपीति चेत्, न तर्हि परविज्ञानम् " [2]विज्ञातारं केन विजानीयात् विजानातीति" [ ] इत्यादिना आत्मज्ञस्य [3]परविज्ञानप्रतिषेधात् । भूमन्येव तेनापि तत्प्रतिषेधो नाल्पे तत्रात्मज्ञानवत् परज्ञानस्यापि भावादिति चेत्; न, [4]तस्यापि भूमामेदात्, तत्रापि [5]तन्निषेधात् । उपाधिभेदया भेद एव [6]ततस्तस्येति चेत्, कथं तर्हि [7]तस्य तात्त्विकस्य ज्ञात्रन्तरस्यानभ्युपगमात्, कल्पितेन च [8]तेन ब्रह्मत्वानुपपत्तेः ? ततस्तस्याप्यात्मज्ञत्वे न परवेदनमिति न सम्त्येवं जीवाः स्वतः, परतश्चाप्रतिपत्तेः । तन्न तेषामेकेन दीपनमिति सूक्ष्म्—'अन्यथेष्ट-विरोधान्न दीपयेत्' इति ।

तत्रोत्तरमाह—'किमचिन्त्या योगिना गतिः' इति । किमचिन्त्या ? चिन्त्यैव गतिः प्रवृत्तिः योगिनां सम्बन्धवताम् । तथा हि—पूर्वोत्तरज्ञानानां कार्यकारणभावः सम्बन्धस्तेषां सत्येव भेदे भवति, भेदश्च न तेषां कुतश्चिच्छक्यपरिज्ञानः, सर्वज्ञानानां स्वरूप-मात्रनिष्ठत्वेन प्रतियोगिन्यप्रवृत्तेः । अप्रतिपन्ने च प्रतियोगिनि 'अहं कारणमस्य अहं कार्यमस्य' इति व्यवस्थापयितुमशक्यम् । तत्कथं ब्रह्मवज्ज्ञात्रज्ञानस्यापि क्वचित्कारणत्वम् ? मा भूदिति चेत्, तत्राह—

'आयासम्' [अन्यथाऽद्वैतमपि चेत्स्यमयुक्तिमत्]। इति ।

ज्ञात्रज्ञानं प्रबोधस्यानुपलब्धमपि कारणं प्रमाणस्यैकं दूषणमुक्तम् 'एकः किन्नेष्टः' इत्यादिना । दूषणान्तरमिदानीं वक्तव्यम् । तथा [हि] ज्ञात्रज्ञानं प्रबोधादुत्पन्नं यदि तस्य जनकम्[9], परस्पराश्रयः—'उत्पन्नेन तस्य[10] जननम्, जनिताच्चोत्पत्तिः' इति । अनुत्पन्नं चेत्; न, सर्वजननप्रसङ्गात् । तथा हि—

अनर्थज्ञ चेद्विज्ञानमर्थवित् [11]सर्वविद्भवेत् ।
ज्ञानान्तरं वृथा प्राप्तमिति यद्भिगद्यते ॥८७७॥
तयेदमपि वक्तव्यं ज्ञात्रज्ञानं प्रबोधतः ।
अजातं[12] तस्य हेतुश्चेत्सर्वहेतुः प्रसज्यते ॥८७८॥
हेत्वन्तरं ततः प्राप्तं स्वन्मतेऽपि पृथेहितम् ।
एकहेतुप्रवादश्च ब्रह्मवादं प्रकल्पयेत् ॥८७९॥
प्रत्यासत्त्या स तस्यैव हेतुर्नान्यस्य चेन्मतः ।
तस्या[13] एवार्थनियमो ज्ञानस्याप्यनुमन्यताम् ॥८८०॥

१—ज्ञानार्थ—ज्ञा०, ब०, प०। २ अविज्ञातमिति वचनेन। ३ विज्ञातारं—ज्ञा०, ब०, प०। ४ परे हि—ज्ञा०, ब०, प०। ५ अन्यत्रापि। ६ भूम्नः सकाशात्। ७ प्रबोधस्य। ८ "अजातं तर्हि"—ज्ञा० टि०। १० ज्ञात्रज्ञानेन। ११ प्रबोधस्य। १२ "अपरित् तर्हि"—ज्ञा० टि०। १३ "भवेत् तथा च"—ज्ञा० टि०। १४ सर्वार्थ ज्ञा०, ब०, प०। १५ प्रत्यासत्तेः।

तदेवाह–'**अविप्रकृष्ट**' इत्यादिना । **सन्तानः** ज्ञानात्मा **सन्तानान्तरम्** अर्थाख्यं **किं न दीपयेत्** किं न प्रकाशयेत्? कथम्? **अञ्जसा**। कीदृशः? **अनपेक्षित-साधनः**। अनपेक्षितम् अनाकाङ्क्षितं साधनं विषयकृतमुपकारलक्षणं येन स तथोक्तः। तदनपेक्षस्य[1] तत्प्रदीपनेऽतिप्रसङ्गं परिहरति— अविप्रकृष्टः प्रत्यासन्नो देश आदिर्यस्य कालादेः स यस्य सः **अविप्रकृष्टदेशादिः** अविप्रकृष्टत्वं च देशादेर्योग्यतयैव न संसर्गितया व्यवहितदेशादेरपि प्रदीपकत्वात्[2]। उक्तं चैतत्पूर्वं '**यदा यत्र**' इत्यादिना। ततो निराकुलतया बहिरर्थसिद्धेः कथं विज्ञानवाद इति भावः।

ननु च योग्यतावगमः कार्यदर्शनादेव, तच्च कार्यं व्यतिरिक्तविषयदर्शनमेव, तच्च न, स्वरूपादन्यत्र ज्ञानप्रवृत्तेरनवलोकनात्, नीलादेरपि ज्ञानानुप्रविष्टस्यैव प्रत्यवभासनात्, न बहिर्भूतस्येति चेत्; तदेवाह–'**अन्यवेद्यविरोधात्**' इति। अन्यच्च तज्ज्ञानात् व्यतिरेकात् वेद्यञ्च तद्विषयत्वात् तस्य विरोधात्। तथा हि–यदि नीलादिः संवेदनमननुप्रविष्टः कथं तत्समानाधिकरणतया परिज्ञानम् 'नीलादिः संवेद्यते' इति, तदनुप्रविष्टस्यैव तथा तदर्शनात् नीलमुत्पलमितिवत्। अनुप्रविष्टश्चेत् कथं तद्ग्राह्यत्वम् अनुप्रवेशविरोधात्? तदुक्तम्–

"यदि संवेद्यते नीलं कथं बाह्यं तदुच्यते?
न चेत्संवेद्यते नीलं कथं बाह्यं तदुच्यते?" [प्र०वार्त्तिकाल० ३।३३१]इति।

ततो '**अन्यवेद्यविरोधान्न सन्तानः सन्तानान्तरं दीपयेत्**' इति। तत्रोत्तरमाह–'**किमचिन्त्या योगिनां गतिः**' इति। **किं** कुतो **योगिनां** परिशुद्धज्ञानसम्पन्नानां बुद्धानां **गतिः** बुद्धिः **अचिन्त्या** अविचारयितव्या? साप्येवं विचारयितव्यैव। तथा हि–यदि सा स्वरूपादन्यत्र न प्रवर्त्तते कथं तया तेषां योगित्वम् अतिप्रसङ्गात्। प्रवर्त्तते चेत्; कथमन्यत्रापि अन्यवेद्यविरोधो यतः सन्तानः सन्तानान्तरं न दीपयेत्? दीपयेत्, तत्कृतमुपकारमपेक्षमाण एव उपकारित्वस्यैव ग्राह्यलक्षणत्वादिति चेत्; न; योगिज्ञानापेक्षयापि तस्यैव तल्लक्षणत्वापत्तेः। तथा च यदुक्तम्–

"रूपादेश्चतसश्चैवमविशुद्धधियां प्रति।
ग्राह्यलक्षणचिन्तेयमचिन्त्या योगिनां गतिः॥' [प्र०वा० २।५३२] इति।

तदपर्यालोचितवचनं भवेत्। तदपेक्षयाऽन्यदेव ग्राह्यलक्षणं तत्तु नास्मदादिभिरित्यन्तया शक्यनिरूपणमतो नोच्यते। अस्मदादिज्ञानापेक्षमेव तु तल्लक्षणं शक्यनिरूपणत्वादुच्यते इति चेत्; न; अनिरूपितेन तल्लक्षणेन[3] तेषां तज्ज्ञत्वे कणादादीनामपि तत एव तत्प्रसङ्गात्। तथा च कथं तत्परिहारेण[4] तथागतानामेव प्रामाण्यपरिकल्पनमुपपद्येत। तदुपपादयता[5]

---

१ तदपेक्षस्य आ०, ब०, प०। २ –त्वादित्युक्त–आ०, ब०।–त्वादित्ययुक्त–प०। ३ ग्राह्यलक्षणेन। ४ कणादादिपरिहारेण। ५ "प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने। (प्रमाणसमु० श्लोक १)"–ता० टि०।

शक्त्यनिरूपणमेव तदपेक्षमपि तल्लक्षणमभ्युपगन्तव्यम्। तदाह—'अन्य' इत्यादि। अन्ये च ते कणादादयो वेदिनश्च विश्वस्य तेषाम् 'अविरोधात् अविरोधप्रसङ्गात्। किमचिन्त्या ? शक्यचिन्तैव योगिनां पुंसां गतिर्बुद्धिरित्यंविषयवतीति। तच्च तदपेक्षया तल्लक्षणं निरूप्यमाणं न योग्यतायां अपरम् अतस्तदपेक्षास्मदादिज्ञानापेक्षयापि भवतीति व्यर्थं तदुत्पत्त्यादिफल्गुनम्। अतदुत्पन्नादिना तत्प्रकाशनेऽतिप्रसङ्ग इति चेत्, न, ५ योग्यतानियमेन प्रकाशनियमस्यामिहितत्वात्। ततः सूक्तम्-'अविप्रकृष्ट' इत्यादि।

योगिन एव मा भूवन न क्वचित्प्रसिद्धिः सद्भूतिमात्रेण तदभ्युपगमादिति चेत्, अत्राह—

आयातमन्यथाऽद्वैतम् [अपि चेत्थमयुक्तिमत्।] इति।

अन्यथा अन्येन 'ज्ञानमपि ज्ञानान्तरस्य न हेतु, नापि योगिनो विपन्ने' इति प्रकारेण आयातम् उपनतम् अद्वैतं निरंशसंवेदनैकव्यक्तितत्त्वम्। तदपि सौगतस्यामिमतमेवेति चेत्, १० आह-'अपि चेत्थमयुक्तिमत्' इति। 'इत्थम्' इत्यनन्तरम् 'अपि च' इति द्रष्टव्यम्। इत्थमनेनाद्वैतप्रकारेण। अपि च न केवलम् अन्यथैव अयुक्तिमत् तत्त्वं संविदद्वैतस्य महाद्वैतवदनुपपत्तिमत्तया प्रतिपादितत्वात्। ततः क्वचित् प्रज्ञास्थैर्यमन्विच्छता न बहिरर्थः प्रतिक्षेप्तव्यः तत्प्रतिक्षेपे 'तदनुपपत्तेः।

कथं पुनर्बहिरर्थस्य वस्तुसतः परिज्ञानम् ? न प्रतिभासात्, तस्यासत्यपि 'तस्मिन् १५ विप्लवावस्थायां भावात्। 'तद्विक्षेपादित्यपि न युक्तम्, अबाधितत्वादेः तद्विक्षेपस्य निराकरणादिति चेत्, न, तदुत्तरसन्तानान्तरस्यापरिज्ञानापत्तेः। प्रत्यक्षतस्तत्प्रतिवेदनात्, तद्विलक्षस्य च व्याहारादेरसत्यपि 'तस्मिन् विप्लवदशायां भावात। तदाह—

व्याहारादिविनिर्भासो विप्लुताक्षेऽपि भावतः ॥८५॥ इति।

व्याहारो वाग्व्यापार आदिर्यस्य गमनादेः कायपरिस्पन्दस्य तस्य विनिर्भासनं २० व्याहारादिविनिर्भासः सन्तानान्तरं किन्न दीपयेत् इति 'तत्कारणमविच्छेद्य सम्यग्व्यवस्थापनीयम्। अत्र हेतुमाह—विप्लुताक्षेऽपि स्वापाद्युपहतेन्द्रियेऽपि प्रतिपत्तरि तद्विनिर्भासस्य 'भावतो विद्यमानत्वात्, न व्यभिचारिणो गमकत्वमिति भावः। परः परिहारमाह—

अनाधिपत्यशून्यं तत्पारम्पर्येण चेत् [असत्] । इति।

अधिपतिः निमित्तं सन्तानान्तर व्याहारादेः स एवाधिपत्यं तेन शून्यं आधिपत्य- २५ शून्यम्, न आधिपत्यशून्यम् अनाधिपत्यशून्यम् आधिपत्यसहितमिति यावत्। किं तदिति चेत् ? आह—तत् व्याहारादिकम्। कथं तत्तादृशम् ? इत्याह—पारम्पर्येण परम्परतया विप्लुताक्षमपि व्याहारादिकं यद्यपि साक्षादधिपत्यसहितं न भवति, परम्परया तु भवत्येव।

---

१ अविरोधात् प्रस—आ०। २ प्रत्यक्षस्यैवानुपपत्तेः। ३ अर्थे। ४ प्रतिभासविशेषात्। ५ —सन्तरेद—आ०, ब०, प०। ६ सन्तानान्तरे। ७ भावात्—आ०, ब०, प०। ८ —स्य सन्निहित—आ०, ब०, प०।

आधिपत्यसहिताद्व्याहारादित एव तद्व्याहारादेरुत्पन्नत्वात् ततस्तस्यापि परम्परया गमकत्वान्न व्यभिचार इति परस्य भावः । चेत्शब्दस्तमेव द्योतयति ।

तत्रोत्तरम्–'असत्' इति । असत् अप्रशस्तम् अनाधिपत्येत्यादि । हेतुमाह–

'अर्थेष्वपि प्रसङ्गश्च' [इत्यहेतुमपरे विदुः] ॥८६॥ इति ।

च शब्दो यस्मादर्थे । यस्मात् **अर्थेष्वपि** अर्थप्रतिभासेष्वपि विषयशब्देन विषयिप्रतिवेदनात्, न केवलं व्याहारादिषु इत्यपिशब्दः । **प्रसङ्गः** पारम्पर्येणार्थसाहित्यस्य । तथा चार्थप्रतिभासानामपि विप्लुताक्षभाविनाम् अर्थप्रत्यायनोपपत्तेर्न व्यभिचार इति शास्त्रकारस्याभिप्रायः । ततश्च यदुक्तम्–"ग्राह्यप्रतिभासः परमार्थसद्विषयो न भवति तत्प्रतिभासत्वात् विप्लुताक्षतत्प्रतिभासवत्" [ ] इति ; तत्प्रतिविहितम् ; निदर्शनस्य साध्यवैकल्यात् । तदेवाह–'इत्यहेतुमपरे विदुः' इति । **इति** एवम् अनन्तरहेतुम् **अहेतुम्** अगमकम् **अपरे** अर्थवादिनो **विदुर्विजानन्ति** ।

त इमे 'इन्द्रजाल' इत्यादयो 'विप्लुताक्ष' इत्यादेरेव व्याख्यानश्लोकाः ।

कुतः पुनः सतोऽपि ग्राह्याकारस्य बहिरर्थत्वम् ? कुतश्च न स्यात् ? अर्थज्ञानादव्यतिरेकात्, तस्याप्यनुमानादवगमात् । तच्चेदम्–'यत्र [1]सहोपलम्भनियमः तत्र भेदः यथा चन्द्रद्वये' सहोपलम्भनियमश्च नीलतज्ज्ञानयोः, इति । [2]नीलस्यैव केवलस्यानुभवो न [3]तज्ज्ञानस्य तस्य [4]परोक्षत्वात्, तत्कथं तत्र तन्नियम इति चेत् ; न ; अननुभवविषयात्ततः[5] सन्तानान्तरज्ञानादिवाऽर्थपरिच्छेदानुपपत्तेः । [6]ज्ञानान्तरानुभूतात्तु ततः तत्परिच्छित्तौ अनवस्थानस्याभिधानात् । तन्नासिद्धो हेतुः । नापि रूपालोकाभ्यां व्यभिचारी ; तत्र [7]तदभावात्–निरालोकस्यापि रूपस्याञ्जनादिसंस्कृतलोचनेनोपलम्भात्, नीरूपस्याप्यालोकस्य गगनतले विलोकनात् । तस्मान्नन्नियमो भेदे सति गवाश्ववदुपपत्तिमान् । ततो भवत्येव नीलतज्ज्ञानयोस्तस्मार्दभेदप्रतिपत्तिरिति चेत् ; अत्राह–

सहोपलम्भनियमान्नाभेदो नीलतद्धियोः । इति ।

तस्य धीस्तद्धीः, नीलं च तद्धीश्च **नीलतद्धियौ** । तस्येत्यत्र [8]नीलस्येत्यपेक्षायामप्रवृत्तिः

---

१ "सकृत्संवेद्यमानस्य नियमेन धिया सह । विषयस्य ततोऽन्यत्वं केनाकारेण सिद्ध्यति ॥ विषयस्य हि नीलादेर्धिया सह सकृदेव संवेदनम् । धिया सह न पृथक् । ततः संवेदनादपरो विषय इति कथम् ?"–प्र०वार्तिकाल० पृ० ९१ । "यद् यस्मादपृथक् संवेदनमेव तत्तस्मादभिन्नं यथा नीलधीः स्वस्वभावात् । यथा वा तैमिरिकज्ञानप्रतिभासी द्वितीय इन्दुपः–चन्द्रमाः । नीलधीवेदनञ्चेदम् इति पक्षधर्मोपसंहारः । धर्म्यत्र नीलाकारतद्धियौ, तयोरभिन्नत्वं साध्यधर्मः, यथोक्तः सहोपलम्भनियमो हेतुः । ईदृश एवाचार्यये प्रयोगे हेत्वर्थोऽभिप्रेतः ।"–तत्त्वसं० पं० पृ० ५६७ । २ मीमांसकः"–ता०टि० । ३ नीलज्ञानस्य । ४ "उक्तञ्च परोक्षं जैमिनेर्ज्ञानमिति, ज्ञाते त्वर्थेऽनुमानादवगच्छति बुद्धिमिति च ।"–ता० टि० । ५ परोक्षज्ञानात् । ६ "यौगाभ्युपगतात्"–ता० टि० । ७ सहोपलम्भनियमाभावात् । ८ सहोपलम्भनियमात् । ९ "सापेक्षमसमर्थं भवतीति" (पा० महा० २।१।१) न्यायात् समासाभावः ।"–ता० टि० ।

अगमकत्वात्, अनपेक्षाया तु न नीलधिय एव प्रतिपत्तिः, अन्यधियोऽपि ततः सम्भवात्। तथा च न सहोपलम्भनियमः अन्यधीन्यपेक्षया नीलस्य [1]तद्प्रतिवेदनादिति चेत्, न, प्रकरणादिवशात् तच्छब्दस्य नीलार्थनिर्णये बहिरपेक्षाविरहान्नमकस्योपपत्तेः वृत्तिविघानस्याविरोधात्। तयोरभेदः तादात्म्यं [2]भेदाभावो वा। कुत एतत्? **सहोपलम्भनियमात्**। अस्यार्थः पश्चाद्विधरिष्यते। द्विचन्द्रादिवदिति निदर्शनमत्र द्रष्टव्यम्, शास्त्रे [3]परेणाभिधानात्। ५

तदिदं [4]निषेधमाह—'न' इति। कुत एतदिति चेत्? पक्षस्य प्रत्यक्षबाधनात्। प्रत्यक्षं हि नीलं तज्ज्ञानात् नीलाच्च तज्ज्ञानम् अर्थान्तरतया जडेतररूपतया भिन्नजातीयत्वेन सकृत्प्रेक्षावत्सान्निध्यतया प्रतिपद्यमानं तदभेदपक्षं प्रतिक्षिपत्येव, पावकानुष्णपक्षमिव दहनोष्ण प्रत्यक्षम्। तत्र [5]तस्य हेतुबलात्परिपाठनम्।

"न तस्य हेतुभिर्ज्ञाणमुत्पतन्नेव यो हृतः।" [ ] इति न्यायात्। १०

तद्भेदप्रत्यक्षस्य भ्रान्तत्वान्न तेन तस्य प्रतिक्षेपः चन्द्रार्कादिस्थिरप्रत्यक्षेणेव तद्गतिपक्षस्येति चेत्, न, बाधकाभावात्। अन्यतस्तद्बाधने तत एव तदभेदपरिज्ञानाऽवश्यंतन्नियमः स्यात्। तन्नियमादेव तद्बाधनं देशान्तरप्राप्तेरिव स्थिरप्रत्यक्षस्येति चेत्, भवेदेवं यदि [6]तत्प्राप्तेरिव [7]तन्नियमस्याप्यविनाभावनिश्चयः सुलभः स्यात्। न चैवम्, तदलभस्य वक्ष्यमाणत्वात्। ततो न नीलतद्धियोरभेदः, तत्पक्षस्य प्रत्यक्षेण बाधनात्। १५

कथमिदं कारिकायामनुक्तमिधीयत इति चेत्? न, सामर्थ्यप्रापितस्यार्थस्याभिधाने दोषाभावात्। परेणैव हि नीलतद्धियोरिति [8] भेदं निर्दिशता, तत्प्रत्यक्षमुपस्थापितं [9]तन्निर्देशस्य [10]तन्मूलत्वात्। [11]तच्चोपस्थाप्यमानमभेदप्रतिक्षेपकमेव [12]तत्प्रत्यनीकविषयत्वादिति न किञ्चिदसामञ्जस्यम्, अतश्च न तयोरभेदः। इत्याह—

विरुद्धासिद्धसन्दिग्धव्यतिरेकान्वयत्वतः ॥८७॥ इति। २०

व्यतिरेकश्चान्वयश्च **व्यतिरेकान्वयौ**। अन्वयशब्दस्य अजादन्ततया[13] पूर्वनिपातेन भवितव्ये तत्कथमयं निर्देश इति चेत्? न, धर्मार्थादिषु दर्शनात् व्यतिरेकशब्दस्यापि पूर्वनिपातोपपत्तेः। सन्दिग्धौ संशयितौ व्यतिरेकान्वयौ[14] यस्य **सन्दिग्धव्यतिरेकान्वयः**। पुनर्विरुद्धादीनां द्वन्द्वं कृत्वा भावप्रत्ययः, तस्य प्रत्येकमभिसम्बन्धश्च कर्तव्य इति। इदमुच्यते—न नीलतद्धियोरभेदस्तादात्म्यं सहोपलम्भनियमात्। कुतः? तस्य विपक्ष एव[15] भावेन विरुद्धत्वात्। २५

---

१ सहोपलम्भनियमात्प्रतिवेदनात्। २ "तदभावश्चाक्षरोधौ भवोऽपि चेतनत्वेनाविशिष्टत्वम्"—ता० टि०। ३ चौदेन। "भेदश्च भ्रान्तविज्ञानैरन्यैरेतैस्तथाविधैः।"—प्र० वा० २।३८९। ४ निषेधमाह—आ०, ब०, प०। ५ तस्य। ६ देशान्तरप्राप्तेरिव। ७ सहोपलम्भनियमस्यापि। ८ सहोपलम्भनियमवचनप्रयोगेण। ९ तन्निदर्शनस्य आ०, ब०, प०। १० भेदप्रत्यक्षमुक्तत्वात्। ११ भेदप्रत्यक्षम्। १२ अभेद। १३ "अल्पाच्तरं पूर्वनिपातमर्हम् (पा० २।२।३४) इतिसूत्रोक्तप्रकारेण"—ता० टि०। १४—यौ च पक्ष आ०, ब०, प०। १५ "भेद एव"—ता० टि०।

[1]तथा हि–

[2]तादात्म्ये यौगपद्यं न सहार्थौ नीलतद्धियोः ।
यौगपद्यं यतो लोके भेदाधारं प्रतीतिमत् ॥८८१॥
यौगपद्ये च सत्यस्मिन् वालिकाकुचयोरिव ।
तयोः परस्परैकत्वं कविभिः कल्प्यतां कथम् ? ॥८८२॥
[3]तद्भेदनियतो हेतुर्निषेधस्येव ते मतम् ।
तत्कथं विषमश्नासि सञ्जीवनधिया स्थितः ॥८८३॥
भेदे गवाश्ववन्नो चेत् सहदृङ्नियमस्तयोः ।
अभेदेऽपि कथं चन्द्रतद्द्वैरूप्यविवेकवत् ॥८८४॥
[4]चन्द्रदृष्ट्यैव दृश्यश्चेत्तद्विवेकोऽपि ते मतः ।
तद्विवेकानुमानस्य कैमर्थ्यक्येन कल्पनम् ॥८८५॥
तस्यैव निश्चयार्थं चेत्तत्कल्पनमुदीर्यते ।
चन्द्रेऽपि निश्चयार्थैवं मानमन्यत्प्रकल्प्यताम् ॥८८६॥
प्रत्यक्षादेव निश्चेयश्चन्द्रश्चेत्तद्भेदतः ।
तद्विवेकोऽपि[6] तत्प्राप्तमनुमानं पुनर्वृथा ॥८८७॥
अभेदेऽपि न चेच्चन्द्रनिश्चये तद्विनिश्चयः ।
तद्दृष्टावपि तद्दृष्टिर्नेति [7]सिद्धं निदर्शनम् ॥८८८॥
स्वसामग्र्यास्तथोत्पत्तेः सहदृङ्नियमो यदि ।
नीलतज्ज्ञानयोरेव नाभेदेऽपि त्वदुक्तयोः ॥८८९॥
भेदेऽप्येष नयः कस्माद् भवता भद्र नेष्यते ।
सहदृङ्नियमस्तत्र यत्तयोर्न गवाश्ववत् ॥८९०॥
व्यवसायोऽपि लोकस्य नीलतज्ज्ञानयोरयम् ।
भेद एवास्ति भेदेत्यनज (एवास्ति नाभेदे त्यज) निर्बन्धवैशसम् ॥८९१॥

ततः स्थितं सहोपलम्भनियमस्य विरुद्धत्वान्न ततो नीलतज्ज्ञानयोरभेद इति ।

अपि च, एवं विकल्पाविकल्पयोरपि मनसोरेकत्वप्रसङ्गः सहोपलम्भनियमात् । अस्ति हि तत्रापि तन्नियमः "मनसो युगपद्वृत्तेः" [प्र० वा० २।१३३] इति वचनात् । अनियतैव तत्र

---

१ तुलना–"तत्र मदन्तशुमगुप्तस्त्वाह–विरुद्धोऽयं हेतुः, यस्मात्–सहशब्दश्च लोके स्यान्नैवान्येन विना क्वचित् । विरुद्धोऽयं ततो हेतुर्यस्ति सहवेदनम् ॥"–तत्त्वसं०पं० पृ० ५६७ । अक० टि० पृ० १४३ पं०२७ । २ 'नीलतद्धियोः तादात्म्ये सहार्थः यौगपद्यं न' इत्यन्वयः । ३ तत् तस्मात् । ४ नीलतद्धियोः । ५ चन्द्रं दृष्ट्वैव आ०, ब०, प०, । ६ "प्रत्यक्षादेव निश्चेय इति सम्बन्धनीयम्"—ता० टि० । ७ सिद्धिर्निद–आ०, ब०, प० । ८ निर्विकल्पकसविकल्पकयोः ।

तद्वृत्तिः केवलस्यैव निर्विकल्पस्य प्रतिसंहारे[1] विकल्पस्यैवेन्द्रियव्यापारोपरमे[2] दर्शनादिति चेत्, न, तर्हि नीलज्ञानयोरपि सन्नियमः[3] स्वर्णस्यैव तज्ज्ञानस्य विषयान्तरे नीलस्यापि ज्ञानान्तरे दर्शनात्। तदन्यदेव ज्ञानं नील च, पूर्वापरैक्ये प्रमाणाभावस्य निवेदनात्। ततो यन्नील-सहितं ज्ञानं ज्ञानसहितश्च नील तदन्यदेवेदमस्यैव तत्र सन्नियमे इति चेत्, कथमेष विकल्पे-तरयोरप्यसहभाविनोरन्यत्वात् सहप्रतिपन्नयोस्तन्नियमो[4] न भवेत्? ५

तथा च वस्तुपृत्त्येव सर्वभेदव्यवस्थितेः।
कथमुक्तमिदम् "मृदः तयोरैक्य व्यवस्थिति" ॥ [प्र० वा०२।१३३]
दर्शनाभेदतः स्याच्च विकल्पे तत्त्वतो भवेत्।
"न "विकल्पानुविद्धस्य" इत्यादि "तज्जडकल्पितम् ॥८९३॥
"तद्देशमपि सामान्यं वस्तु सत्स्यात्स्वलक्षणवत्। १०
"[11]"तद्वस्त्वभिधेयत्वात्" इति तन्मुग्धभाषितम् ॥८९४॥
विरुध्यधर्मयोरेवमभिलाप्येतरात्मनोः।
सहोपलम्भादैक्ये विरुद्धो नावकल्पते ॥८९५॥

तथा हि—न "[12]तस्याभिलाप्यैकस्वभावस्य स्वतो वेदनम्, "[13]तस्यानभिलाप्यस्य तत्रा सम्भवात्, अभिलाप्यस्यानभिलाप्यरूपानुपपत्ते[14]"। अभिलाप्यमेव "[15]तदपीति चेत्; न तर्हि १५ प्रत्यक्षम्, "[16]तस्यानभिलाप्यस्यैवाभ्यनुज्ञानात्। तृतीयं तु प्रमाणं भवेत् अविनाभावेनानुमा-नेऽप्यनन्तर्भावात्। ततश्च 'प्रमेयद्वैविध्यात्[17]" इति व्यभिचारी हेतुर्भवेत्, प्रमाणद्वैविध्यादि क्रमेणापि भावात्। "[18]नाप्ययमनभिलाप्यस्वभाव एव, "[19]"अभिलापसंसर्गे" [न्यायवि० पृ० १३] इत्यादेर्निर्विषयत्वापरोः। अभिलाप्याकारविषयं स्वरूपवेदनं कथं तदभावे निर्विषयं न भवेत्? "[20]आरोपिततदाकारविषयत्वान्न दोष इति चेत्, न, आरोपकस्याभावात्। २० विकल्प "[21]एव हि आरोपकारी, तस्य चोक्तन्यायादसम्भवे कुतः क्वचित्कस्यचिदारोपणमिति विकल्पविकल्पं सकलं जगद्भेदेति कथमनुमानं यत सहोपलम्भनियमादित्यसाधनाङ्गतया निग्रहाधिकरणं न भवेत्? यदि पुनर्विकल्पाविकल्पयोर्विकल्पधर्मयोः अभिलाप्येतराकारयोर्वा सत्यपि सहोपलम्भनियमे नाभेदः, कथं तदा तस्य गमकत्वं व्यभिचारात्? तदेवाह—'विरुद्ध-त्वात्' इति। विरुद्धत्वं विषयीकृतत्व तस्मादिति। २५

---

१ मुखरहिते। २ "सकलविकल्पसंहारे सुप्तावस्थापमिवर्षः"—ता० टि०। ३ "देवदत्तेति अत्रापि सम्बन्धनीयम्"—ता०टि०। ४ "विहिते व्यापारे"—ता०टि०। ५ सहोपलम्भनियमः। ६ देवदत्त वि—आ०, ब०, प०। ७ सहोपलम्भनियमः। ८ तदभेदे व्यवस्थिते आ०, ब०, प०। निर्विकल्पसविकल्पयोरभेदव्यवस्थितेः। ९ प्र०वा० २।१८१। १० "तदिदं तत्त्वस्य विरुद्धधर्माध्यासेतरार्थः"—ता०टि०। ११ तज्जडकल्पितम्—आ०, ब०, प०। १२ विरुद्धधर्मयोरेवम्। १३ तद् सामान्यमपि वस्तु। प्र०वा०२।१३३। १४ विरुद्धस्य। १५ तदेवेदमस्य। १६ —स्व-लक्षणवत्—आ०, ब०, प०। १७ स्यात्। १८ देवदत्तेति। १९ 'प्रमेयद्वैविध्यात् प्रमाणद्वैविध्यम्"—ता० टि०। २० विरुद्ध। २१ "अभिलाप्यसंसर्गयोग्यप्रतिभासस्वभावेति। कल्पना"—न्यायवि०। २२ अभिलाप्याकार। २३ एव स्वरूपोप—आ०, ब०, प०।

एतेन यत्परस्य मतम्–"न नीलतज्ज्ञानयोरेकत्वं तन्नियमेन साध्यते अपि तु उभयोरपि चेतनत्वेनाविशिष्टत्वम्" [ ] इति ; तदपि प्रत्याख्यातम् । तथा हि–

यथैव तन्नियामेऽपि[2] मनसोरविकल्पता ।
एकस्यैव विकल्पत्वं [3]परस्यैव न तूभयोः ॥८९६॥
नीलतज्ज्ञानयोरेवं तज्ज्ञानं चेन्न नीलकम् ।
तदभिन्नं तु तज्ज्ञानमिति भेदो दुरुत्तरः ॥८९७॥
अचेतनत्वात्संवित्तेर्नीलं चेतनमेव चेत् ।
अन्यतस्तर्हि [6]तच्चित्त्वं साध्यं [5]तन्नियमो वृथा ॥८९८॥
यथा चाचेतनस्यापि वित्तिः सम्भवति स्फुटम् ।
तथा निवेदितं पूर्वं तत्किमत्र [8]प्रयस्यते ॥८९९॥

किञ्चेदं [7]नीलं तज्ज्ञानञ्च, ययोस्तन्नियमादभेदसाधनम् ? निरंशपरमाणुरूपमिति चेत् ; न ; वक्ष्यमाणोत्तरत्वात् । यदेव [9]प्रसिद्धमिति चेत् ; न ; तस्य नानावयवसाधारणस्यावयविसिद्धिभयेनानभ्युपगमात् । अभ्युपगमेऽपि न सिद्धो हेतु ; नर्त्तकीं पश्यतस्तद्विषयस्य[10] परेण परिज्ञानेऽपि तज्ज्ञानस्यापरिज्ञानात् । तद्विषयस्यापि परेण कथं परिज्ञानमवगतम् ? रोमहर्षादेस्तत्कार्यस्य दर्शनादिति चेत् ; न ; तस्य[11] तदेकविषयकार्यत्वस्यानुपायत्वेनासिद्धेः, अनुमानाच्च तत्समानस्यैव परेण परिज्ञानं शक्यपरिकल्पनं न तस्यैव, तस्य[12] सामान्यविषयत्वात् ।

अपि च, रोमहर्षादिकार्यदर्शनात् स्वपरयोरेकविषयत्ववदेकसुखादित्वमपि भवेत्, भिन्नसुखादित्वे भिन्नविषयत्वस्याप्यनिवारणात् । देशभेदात् कथं सुखादेरेकत्वमिति चेत् ? न; [14]एकत्वे तद्देशभेदस्यैवासम्भवात् । [16]ततः कथं भिन्नदेशो रोमहर्षादिरिति चेत् ? न ; अविरोधात् । अन्यथा एकस्माद्विषयादपि [17]तदभावप्रसङ्गात् । रोमहर्षादिभेदाच्च सुखादेर्भेदे ग्राह्यस्यापि स[18] किन्न स्यादविशेषात् ? ततो यथा भिन्नादेव सुखादेः स्वपरयोः रोमहर्षादिः तथा ग्राह्यादपीति न तद्दर्शनात् स्वविषयस्य परवेद्यत्वं शक्यविधानं यतो हेतोरसिद्धत्वमिति[19] । तदुक्तम्–

"अन्येन वेदनं चैतत्कुतोऽवसितमात्मना ।
तत्कार्यदर्शनान्नैतत्कार्यत्वस्याप्रसिद्धितः ॥
अनुमानस्य सामान्यविषयत्वस्य वर्णनात् ।
स एव दृश्यतेऽन्येनेत्येतदेव न सिद्ध्यति ॥

---

१ सहोपलम्भनियमेन । २ सहोपलम्भनियमेऽपि । ३ परस्य न तूभ–आ०, ब०, प० । ४ नीले चेतनत्वम् । ५ सहोपलम्भनियमः । ६ प्रसज्यते आ०, ब०, प० । ७ नीलञ्च ज्ञानञ्च आ०, ब०, प० । ८ सहोपलम्भनियमात् । ९ व्यवहारप्रसिद्धम् । १० नर्तकीक्षणस्य । ११ रोमहर्षादेः । १२ अनुमानस्य । १३ प्रतिपत्रोः । १४ स्व-परप्रतिपत्रोर्भिन्नदेशवर्तित्वात् । १५ एकत्रैतद्देश–आ०, ब०, प० । १६ अभिन्नदेशात् सुखादेः । १७ भिन्नदेशीयरोमहर्षाद्यभाव । १८ भेदः । १९ –त्वमुक्तमिति आ०, ब०, प० ।

यथा च रोमहर्षादिकार्यदृष्टेस्तदेकता[1] ।
तथा सुखादेरेकत्वं सत एव प्रसिद्ध्यति ॥
अन्यदेव सुखं तस्य ग्राह्यमप्यन्यदस्तु तत् ।
देशभेदात्सुखादीनामन्यत्वमिति चेन्मति[2] ॥
एकत्वे देशभेदोऽपि कथ सिद्ध्यति तत्त्वतः ? । ५
सत एव सुखादन्ये रोमहर्षादयो न किम् ? ॥
अन्यत्वाद्रोमहर्षादे[3] सुखस्य यदि भिन्नता ।
अन्यत्वे ग्राह्यमप्यन्यदिति कस्मान्न गृह्यते ? ॥" [प्र०वार्तिकाल० ३।३२१]

इति चेत्, असारमेतत्, एवं परार्थानुमानस्य व्यापत्तेः । तत्प्रदु [3]स्वदृष्टार्थप्रकाशनम् । स्वदृष्टस्य वादिप्रतिपन्नस्य त्रिरूपलिङ्गस्य परेणापरिज्ञाने कथं स प्रति तेनप्रकाशनमर्थवत्, साध्यधर्मं प्रति रूपप्रकाशनवत् ? तदयमन्यतरासिद्धः सहोपलम्भनियमः प्रकाशितस्यापि परेणापरिज्ञानात् । तत्समानस्य परिज्ञानाददोष इति चेत्, न, स्वतस्तत्परिज्ञाने तत्प्रकाशनवैफल्यात् । ततस्तत्परिज्ञानमिति चेत्, न, अपरिज्ञातस्य प्रकाशनासम्भवात् । परिज्ञानेऽपि तदवस्य तद्वैफल्यम् । वादिपरिज्ञातस्येति चेत्, न, वृत्तोत्तरत्वात्, तत्रापि परेणापरिज्ञानात् । पुनरपि तत्समानस्य तेन परिज्ञानमिति चेत्, न; 'स्वतः' इत्यादेरनुपपत्तेरव्यवस्थापत्तेश्च । न च तत्रैव धर्मिण्यपरत्राभियमोऽस्ति [4]तदप्रतिवेदनात्, अप्रतिवेदितस्य च ज्ञानस्वभावत्वानुपपत्तेः । धर्म्यन्तरे विद्यत एवेति चेत्, तस्याप्यप्रतिपन्नस्य कथं प्रकाशनम् ? स्वयं दृष्टार्थग्रहणविरोधात् । प्रतिपन्नस्येति चेत्, न, वृत्तोत्तरत्वात् । तत्रापि तदपरस्य तत्समानस्य तेन परिज्ञानमिति चेत्, न, 'स्वतः' इत्यादेर्दोषात् । एकत्र च धर्मिणि तदभियमभेदाभावात् । पुनरपि धर्म्यन्तरे तद्भेदकल्पनायां स एव प्रसङ्गः तस्यापीत्यादिरव्यवस्था च । तद्धर्मिगतस्तदभियम इति व्यवहारादेक एव ततस्तस्यैकत्र प्रकाशनमेव अन्यत्रापि प्रकाशनमिति चेत्, न, एकत्र परिज्ञानस्यैवान्यत्रापि परिज्ञानत्वप्रसङ्गात् । ततः किम् ? अन्यतोऽपि किम् ? साध्यप्रतिपत्तिरिति चेत् ? ततोऽप्येकार्थपरिज्ञानमेव । ततस्तत्परिज्ञानमपरिज्ञानमेवेति चेत्, न, ततः साध्यप्रतिपत्तरपि तदप्रतिपत्तित्वापत्तेः । भवत्येवं परस्यैव [5]तत्प्रतिपत्तिमतोऽभावादिति चेत्, न, तदभावेऽस्यापि वचनस्य वैयर्थ्यात् । इदमपि मा भूदिति चेत, न अत्राप्येव प्रसङ्गात् । पुनरेवमभिधाने अनवस्थादोषात् । ततो दूरप्रसारितस्यापि शब्दस्य परार्थत्वनियमात् कथं तदभावः ? सतोऽपि परस्य प्रत्यक्षादेव [6]तत्प्रतिपत्तिः न प्रकाशितालिङ्गादिति चेत्, कुत [7]एतत् ? परस्य प्रत्यक्ष नीलतज्ज्ञानाभेदविषयं प्रत्यक्षत्वात् अस्मत्प्रत्यक्ष

---

१ विषयस्य एकता । २ अभिप्रदेशात् । ३ "तत्र परार्थानुमानं स्वदृष्टार्थप्रकाशनमित्याचार्यधर्मकीर्तिलक्षणम्"—प्र० वा० म० २।१ । ४ त्रिरूपलिङ्गप्रकाशनम् । ५ परस्य सहोपलम्भनियमस्यानुपलम्भात् । ६ —रिज्ञानस्य च आ०, ब०, प० । ७ —प्रतिपत्तौ न मा—आ०, ब०, प० । ८ —स्यानदो—आ०, ब० प० । ९ 'भो०तज्ज्ञानाभेदग्रहणेति' । १० एव

वदिति चेत् ; कथमिदं द्विष्टकामित्वं स्वपरयोरेकविषयत्वमवान्न परार्थानुमानमिष्यते, तदेव च पोष्यते इति । ततो दुरतिक्रममेव परविषयस्य परेण परिज्ञानं [1]तद्दर्शनस्य च । दृश्यते हि सामग्रीवशात् परदर्शनस्य प्रतिपत्तिर्न तद्विषयस्य 'पश्यन्नयमास्ते स तु न ज्ञायते यं पश्यति' इति व्यवहारदर्शनात् । कथं पुनर्दर्शनस्यैव परिज्ञानं न तद्विषयस्येति चेत् ? न ; तत्रैव[2] तत्सामग्र्याः प्रतिबन्धात् । सामग्रीतस्तदपरिज्ञानेऽपि [3]तदनुमिताद्दर्शनात्तत्परिज्ञानं [4] [5]तस्य दृश्य-शून्यस्यासम्भवात् , भ्रान्तस्यापि[6] केशोण्डुकादौ सत्येव दृश्ये भावात् केवलं [7]स तत्र मिथ्या, सत्यज्ञाने तु तथ्य इति विभाग इति चेत् ; भवतु नार्मबम् , तथापि क्स्तव परितोषः ? तथापि सहोपलम्भनियमस्याप्रसिद्धेः । न हि सामग्रीतो दर्शनस्यैव ततोऽपि विषयस्यैव प्रतिपत्तौ तन्नि-यमः[8] । ततो दुरालाप एवायम् अन्येन वेदनं चैतत् इत्यादिः । असाधारणत्वे विषयस्य वचनप्रबन्धस्याप्यस्य वैयर्थ्यापत्तेः, प्रकाशितस्यापि परेणापरिज्ञानात् , अपरिज्ञातस्य च पारा-र्थ्यानुपपत्तेः । [9]लिङ्गवत्तत्समानपरिज्ञानाददोष इति चेत् ; न ; तस्यातद्वचनत्वेन[10] सत्यपि तद्दोषे तन्निग्रहाभावप्रसङ्गात् । तद्वचनमेवेति चेत् ; न ; [11]तदपरिज्ञाने तत्प्रभवत्वापरिज्ञानात् । तत्परिज्ञाने तु कथमसाधारणत्वं विषयस्य स्वपरप्रतिपत्तिविषयस्य [12]तत्त्वानुपपत्तेः । तदयं साधारणतां वचनस्य प्रतिपद्यमानो नीलादेरेव किन्न प्रतिपद्येत ?

यत्पुनरत्र चोद्यम्–"यदि च साधारणत्वं प्रतिभाति त्वया दृष्टं न वेति किमिति प्रश्नः ? प्रमाणान्तरसंवादार्थः । यदि प्रत्यक्षान्न प्रत्येति वचनादपि नैव प्रत्येष्यति । [13]तदपि स्वप्रतिभासमेव सूचयति त्वं प्रति (त्वत्प्रति) भासितं मम प्रतिभाति इति । [14]तेनापि पृष्ट्वैव ज्ञातव्यं तत इतरेतराश्रयदोषः । यच्च प्रत्यक्षेण न प्रतिपन्नं तत्कथं वचनात्प्रत्येतव्यम् ? न हि प्रत्यक्षेऽर्थे परोपदेशो गरीयान्" [प्र० वार्तिकाल० ३।३३१] इति ; तदपि व्याकुलचित्ततामलङ्कारकर्तुरावेदयति ; वचनसाधारणत्वेऽपि प्रसङ्गात् । तस्यापि प्रत्यक्षतः प्रतिभासे किमित्ययं प्रश्नः त्वयापि [15]श्रुतं न वेति ? कदाचिद्दर्शनस्यापि भावात् । तददर्शने कथं तत्साधारणत्वं दर्शनापेक्षत्वात्तस्येति[16] चेत् ; कथं वचनस्याप्यश्रवणे [17]तत्त्वं तस्यापि श्रवणापेक्षत्वात् । श्रवणयोग्यतयेति चेत् ; न; परत्रापि दर्शनयोग्यतया भवेत् । दर्शनाभावे सैव कथं कार्यानुमेयत्वात्तस्या[18] इति चेत्; न; कदाचिद्दर्शनस्यापि भावात्, इत्थमेव वचनेऽपि तव्यव-स्थापनोपपत्तेः । ततो न प्रत्यक्षप्रतिपन्न एव साधारणाकारे प्रमाणान्तरसंवादार्थः[19] प्रश्नः, किन्तु तस्यैव परदर्शनविशिष्टस्य प्रतिपत्तये । ततो न युक्तमुक्तम्–'यदि प्रत्यक्षात्' इत्यादि तथा 'तेनापि' इत्याद्यपि । परस्परप्रश्नमात्रात्तत्प्रतिपत्तेरनभ्युपगमात् । न च प्रत्यक्षादप्रतिपन्नस्यैव

---

१ परदर्शनस्य । २ परदर्शन एव । ३ सामर्थ्यनुमितात् । ४ दर्शनविषयपरिज्ञानम् । ५ दर्शनस्य । ६ दर्शनस्य । ७ विषयः । ८ सहोपलम्भनियमः । ९ लिङ्गवदक्षमानेन परि–आ०, ब०, प० । १० वचनस्य विषयप्रतिपादकत्वाभावेन । ११ विषयापरिज्ञाने । १२ असाधारणत्वानुपपत्तेः । १३ वचनमपि । १४ तथैव पृ–आ०, ब०, प० । १५ श्रुतं तदेवेति आ०, ब०, प० । १६ साधारणत्वस्य । १७ तत्त्वस्यापि आ०, ब०, प० । साधारणत्वम् । १८ योग्यतायाः । १९ –रसंभवादर्थार्थः आ०, ब०, प० ।

वचनात्प्रतिपत्तिः, न च तत्र वचनस्यागरीयस्त्वं विशिष्टरूपप्रतिपत्त्यर्थतया तत्त्वोपपत्तेः । अत इदमन्यसङ्गतम् , 'यच्च' इत्यादि । यत्त्वेदमन्यत्-

"प्रत्यक्षस्य प्रमाणत्वे वचनस्य प्रमाणत्वं (ता) ।
वचनस्य प्रमाणत्वे प्रत्यक्षस्येत्यसाध्वदः ॥" [प्र०वार्तिकाल०३।३३१]इति,

तत्र युक्तं 'प्रत्यक्षस्य' इत्यादि , सति प्रत्यक्षसंवादे वचनप्रामाण्यस्य लोकागम्यत्वात्; 'वचनस्य' इत्यादिकं तु अयुक्तम् , तत्संवादनिरपेक्षस्यैव प्रत्यक्षस्य सा(असा)धारणाकारे प्रामाण्यात् , तस्य च भयतोऽपि प्रसिद्धत्वात् , अन्यथा यावन्व्यापारवैयर्थ्यापत्तेरिति निवेदनात्। ततः स्थित विषयविषयिणोरेकस्य अन्यतरस्यापरिज्ञानेऽपि परिज्ञानादसिद्धः सहोपलम्भनियमः, ततश्च न नीलतद्धियोरभेद इति ।

स्यादाकूतम्-सहस्यय प्रसङ्गो यदि यौगपद्यं सहशब्दस्यार्थः, न चैवम् , तस्यैकार्थत्वात् । दृश्यते च तस्य 'तदर्थत्वम् , यथा सहोदर इति । तदयमर्थः-सह एकस्य उपलम्भः , तस्य नियमः 'ज्ञानस्यैव नार्थस्य' इत्यवधारणं तस्मादिति , तन्न , ज्ञानवन्नीलादेरप्युपलम्भात् । तदेव ज्ञानमिति चेत् , न , तदन्यस्यैव तस्य 'अहम्' इति प्रतिवेदनात् । अहमित्यपि नीलाद्येव प्रतिवेद्यत इति चेत् , न , तस्य पीतादावभावप्रसङ्गात । नीलवदन्येदव तत्र तदिति चेत् , कुत एतत् ? 'पौर्वापर्ये प्रमाणाभावादिति चेत् , न , अन्यत्वस्याप्यपरिज्ञानप्रसङ्गात् । न हि पूर्वापरयोरेकेनाऽग्रहणे 'पूर्वस्मादिदमन्यत्' इति मुपरिज्ञानम् । कुतश्चित्परिज्ञाने वा तदेकस्वपरिज्ञानमपि स्यादविशेषात् । ततो न नीलाद्येव ज्ञानमित्यसिद्धः एकोपलम्भनियमः ।

सिद्धस्यापि किं तस्य साध्यम् ? नीलतद्धियोरेकत्वमिति चेत् , न , तद्दर्शनस्यैव हेतुत्वात् । तदेकत्वन्यवहार इति चेत् , कस्तर्हि "तव्यवहारो नाम ? तन्निश्चयस्तदभिधानञ्चेति चेत् , न , निश्चयाभिधानविषयस्यैव हेतुत्वात्" नैकोपलम्भनियमो हेतुः ।

दृश्यगुपलम्भाभाव इति चेत् , कुतस्तत्प्रतिपत्तिः ? प्रत्यक्षादिति चेत् , न , प्रतिपन्थाभावात् । तदास्य प्रतिपन्थ इति चेत् , न , प्रत्यक्षस्य "तदद्वभावत्वापत्तेः, हेतोर्वा प्रत्यक्षवत् भावरूपत्वोपनिपातात् । तदुत्पत्तिरिति चेत् , न , अभावस्य सकलशक्तिविकलतया कारणत्वानुपपत्तेः । न चाकारणस्य प्रतिपत्तिः, "नाकारणं विषयः" [ ] "इत्यस्य विरोधात् ।

नाप्यनुमानात्तत्परिज्ञानम् , प्रत्यक्षाभावे तदनवतारात् , लिङ्गाभावाच्च । तद्धि लिङ्गं न भावरूपम् , तस्य प्रत्यक्षवत् तत्राप्रतिबन्धात् । न चाप्रतिबन्धस्य लिङ्गत्वम् , तादात्म्यादिलिङ्गप्रतिपन्थकल्पनावैफल्यापत्तेः । नाप्यभावरूपम् , तत्रापि 'कुतस्तत्प्रतिपत्तिः'

---

१ 'प्रत्यक्षसंवेदनं"-प्र० वार्तिकाल० । २ सहशब्दस्य । ३ एकार्थत्वम् । ४ नीलवदपि । ५) ज्ञानस्य । ६ अहमिति प्रतिवेदनस्य । ७ अहमिति प्रतिवेदनम् । ८ एकस्यैव प्रतिवेदनस्य क्रमशः नीलवत् पीतादौ सम्भवे । ९ "पुनः स (भवन्तगुणगुप्तः) एवाह-यदि सहशब्द एकार्थतया हेतुरसिद्धः --"-तत्त्वस०पं०पृ०५१८ । अक०टि०पृ०१५९ । १० एकस्योपलम्भस्यैव हेतुत्वे असिद्धत्वमिति भावः । ११ व्यवहा-ब्य०,ब०,प० । १२-त्वात् तस्मिन्-ब्य०,ब०,प० । १३ दृश्यगुपलम्भाभाववत् । १४ द्रष्टव्यम्-पृ०२९८टि०१० ।

इत्यादेः तादात्म्यादिपर्यन्तस्योपनिपातात्। पुनरभावरूपतल्लिङ्गपरिकल्पनायां चक्रकदोषादनवस्थापत्तेश्च। तन्नानुमानादपि [1]तत्परिज्ञानमित्यज्ञातासिद्धत्वाद्हेतुरेवायम्।

कथं वास्यानर्थक्य हेतुत्वम्, "अर्थो ह्यर्थं गमयति" [ ] इत्यस्य विरोधात्। संवृत्यार्थ एवायं[2] परमार्थतः कृतकत्वादेरप्यर्थाभावात्। न हि निरंशे परमार्थतः कृतकत्वमनित्यत्वमित्यादिसाध्यसाधनभूतमर्थद्वयं सम्भवतीति चेत्; आस्तां तावदेतत्। तन्नायमपि हेतुरसिद्ध[3]त्वात्।

युगपदुपलम्भ एवास्तु हेतुरिति चेत्; न; तस्यापि विपक्षेणाविरोधात्। अविरोधे गवाश्वादौ किन्न तदुपलम्भ इति चेत्? अभेदेऽप्येकाणुमात्रे किन्न स्यात्? स्वहेतुतस्तथानुत्पत्तेरिति चेत्; न; इतरत्रापि समानत्वात्, गवाश्वादेरपि ततस्तथानुत्पत्तेः। ततो यत्र स्वहेतुसामर्थ्यं तत्र भवत्येव भेदेऽपि तदुपलम्भ इति सिद्धं सन्दिग्धव्यतिरेकत्वम्। ततः सूक्तम्—**सन्दिग्धव्यतिरेकत्वत** इति, तथा **सन्दिग्धान्वयत्वत** इति च, व्यतिरेकसन्देहे अन्वयसन्देहस्याप्यावश्यकात् (कत्वात्)।

यत्पुनर्द्विचन्द्रादिवदिति निदर्शनम्; तदपि न शोभनम्; साध्यविकलत्वात्। न हि द्विचन्द्रादेस्तज्ज्ञानादभेदः, साकारत्वादप्रतिविधानात्। परस्परं तदाकारद्वयस्याभेद इति चेत्, न; तत्रापि यथाप्रतिभासं भेदस्यैव भावात्। यथातत्त्वमभेद एव एकस्यैव चन्द्रमसो द्विरूपतयोपलम्भादिति चेत्; न; अन्यथारव्यातेरपि प्रतिविधानात्। तत इदं कारणदोषवशादाकारद्वयमेकमेवावभासमानं यथाप्रतिभासं भिन्नमेवेति सिद्धं साध्यवैकल्यम्, अतदचानुदाहरणमिति।

[यत्] पुनरेतत् परमाणुमात्रमेव [5]नीलतज्ज्ञानादिकं तत्र च कल्पित एव साध्यसाधनभेदः परमार्थतो नित्यत्वाद्यनुमानेऽपि तर्दभावात् इति; तदपि न साधीयः; परिकल्पिताद्धेतोस्तत्त्वतः साध्यसिद्धेरसम्भवात्, अन्यथा तत एव भेदस्यापि तादृशस्य सिद्धिप्रसङ्गात्। तथा हि—ययोः सहोपलम्भनियमस्तयोर्भेदो यथा सुगतेतरयोः तन्नियमश्च नीलतज्ज्ञानयोरिति। सुगतोपलम्भसमये हि तदन्यस्यानुपलब्धावभाव एव स्यात् सुगतस्यात्यन्तिकत्वात्। "तिष्ठन्त्येव पराधीनाः" [प्र०वा० १।२०१] [10]इत्यादिवचनात्। न च तदन्याभावे [11]तस्यापि सम्भवः, तस्य जगद्धितैषिणो जगदभावेऽनुपपत्तेः, अन्योपलम्भे च सुगतस्यानुपलब्धौ [12]तद्धिकलं जगद्भवेत्, संसारिप्रवाहस्याप्यपर्यन्तत्वात्। न चेदं पथ्यं भवताम् अनुमानमुद्राभेदापत्तेः, व्याप्तिपरिज्ञानस्य तदायत्तत्वात्, "न च सम्बन्धो व्याप्यसर्वविदा ग्रहीतुं शक्यः" [प्र० वार्तिकाल० १।२] इत्यलङ्कारवचनात्। सर्वविदस्तज्ज्ञाने कथमितरस्यानुमानमिति चेत्? इदमपि भवानेव प्रष्टव्यो य एवं ब्रूते। तदस्ति [13]तयोस्तन्नियम इति न साधनवैकल्य-

---

१ तत्प्रतिज्ञा—आ०, ब०, प०। २ पृथगुपलम्भाभावः। ३ —त्वाद् युगपदुपलम्भवदुपलम्भ—प०। —त्वाद् युगपदुपलम्भवत् युगपदु—आ०, ब०। ४ भेदेन। ५ युगपदुपलम्भः। ६ —मसदिवावभा—आ०,ब०,प०। ७ नीलपीतज्ञाना—आ०,ब०,प०। ८ साध्यसाधनभेदाभावात्। ९ तात्त्विकस्य। १० "अकल्पकल्पासङ्ख्येयभावनापरिवर्द्धिताः। तिष्ठन्त्येव पराधीना येषां तु महती कृपा॥"—अभिस० पृ० १३१। ११ सुगतस्यापि। १२ सुगतान्यम्। १३ सुगतेतरयोः सहोलम्भनियमः।

मुदाहरणस्य । नापि साध्यवैकल्यम् अभेदे संसारिणि सुगतत्वस्य सुगते च संसारित्वस्यानभिमतस्य प्रसङ्गात् । संसारीतरविभाग एव नास्ति संविदद्वैतस्यैव तत्त्वतो भावात् तत्कथं तस्योदाहरणस्यमिति चेत् ? कथमिदानीं तेदमेवानुमानं तदद्वैते धर्मिहेतूदाहरणविभागाभावात्, अनुमानस्य च तन्मूलत्वात् । तदपि मा भूदिति चेत्, न तर्हि भवानस्माकं प्रतिवादी तदनुमानवादिन एव तैरत्वात्, तेन चास्यातिप्रसङ्गस्य दुष्परिहरत्वादिति कथमतो न भेदसिद्धिः ? ५

तदत्र प्रतिपक्षमनपाकुर्वत एव कल्पितादेतोः साध्यसिद्धिं तात्त्विकीमन्विच्छन् कथमिव प्रज्ञावन्तमात्मानं प्रेक्षावन्तः प्रकटीकुर्यात्, यदि केनापि निष्करुणहृदयेन विप्रलब्धो न भवेत् । तदेवाह—

साध्यसाधनसङ्कल्पस्तत्त्वतो न निरूपितः ।
परमार्थावताराय कृतश्चित्परिकल्पितः ॥८८॥ १०
अनपायीति विद्वत्तामात्मन्याशंसमानकः ।
केनापि विप्रलब्धोऽयं हा ! कष्टमकृपालुना ॥८९॥ इति ।

साध्यं नीलतज्ज्ञानयोरभेद साधन सहोपलम्भनियमः, तयोः सङ्कल्पः समर्थनं स तत्त्वतः निरंशवस्तु ममामित्य न निरूपितः न स्थापितः, निरंशत्वे साध्यादिधर्मभेदस्य, तस्मिंश्च निरंशत्वस्यासम्भवादिति भावः । कीदृशस्तर्हि स इत्याह—परिकल्पितः अध्यारोपितः । कुतः परिकल्पितः ? कुतश्चिद्विकल्पबुद्धिबलात् । किमर्थम् ? परमार्थावतारायं परमार्थस्य नीलतज्ज्ञानाभेदस्यावतारः प्रतिपाद्यधेवसि प्रवेशनं तस्मै इति । कुतः पुनः परिकल्पितस्य तदवतारार्थत्व(त्वम् ?) इति चेत् ? अनपायी अव्यभिचारी यत इति । न ह्यपरिकल्पितस्यापि तदर्थत्वम् अव्यभिचारादन्यतः तस्यैं । परिकल्पितेऽपि भावे कथं तस्यापि न तदर्थत्वमिति मन्यते । अत्र दूषणम्—इति एवं विद्वत्तां प्रज्ञावत्तामिताम् आत्मनि स्वरूपे आशंसमानकः "न्यायमार्गतुलारूढं जगदेकत्र मन्मतिः" [ ] इत्यादिना कुत्सितमाशंसमानः अयं प्रसिद्धो धर्मकीर्तिः केनापि दिङ्नागादिना विप्रलब्धो वञ्चितः । कीदृशेन ? अकृपालुना निष्कृपेण । सकृपस्य परवञ्चकत्वासम्भवात् । वञ्चकत्वञ्च तस्यासत एव तत्सदृशस्योपदेशात् । कल्पनया सन्नेवासौविति चेत्, न, तस्या एव साध्यसाधनोभयधर्मपरामर्शद्वयात्मनो निरंशवस्तुबाधेऽनुपपत्तेः । तस्या अपि कल्पनयोपपत्तावभ्युपगमे वस्तुन्यवस्थापत्तेः । ततो न तात्त्विकस्तस्य दृष्टो नापि सांवृत इति कथं तदुपदेशी न वञ्चको

---

१ नीलतद्धियोरभेदानुमानम् । २ प्रतिवादिनस्तत् । ३ दुष्परिहार—आ०, ब०, प० । ४ —र्थांऽपि च तरि—आ०, ब०, प० । ५ निरंशं वस्तु आ०, ब०, प० । ६ परमार्थावतारार्थत्वम् । ७ अभ्यभिचारस्य । ८ "न्यायमार्गतुलारूढं जगदेकत्र मन्मतिः । (हेतु० वि० पृ० १) इत्यनेन वर्णकेन धर्मकीर्तिस्मरणं कृतम् । अनेन ग्रन्थेन तत् धर्मकीर्तिमपि कीदृशविद्वत्वे 'न्यायमार्गतुलारूढम्' इत्यादिभिरेव स्वस्तवनं कृतम् । ९ कष्टस्यः । १० वञ्चनया एव ।

दिङ्नागादिः[1] ? कथं वा तत्प्रामाण्यादसन्तमेव तमनपायिनं प्रतिपद्यमानो न विप्रलब्धो धर्मकीर्त्तिः ? काल्पनिकस्य च तत्सत्त्वस्य[2] प्रतिक्षेपात्। अप्रतिक्षेपेऽपि कुतस्तस्य तेनानपायित्वं प्रतिबन्धस्य तात्त्विकस्याभावात्, कल्पितस्य विपक्षेऽप्यविशेषात्। तस्मादसन्तमसाध्यप्रतिबन्धञ्च तमनपायिनं प्रतिपद्यमानो वञ्चित एवायम्, अतश्च यदस्य विद्वन्नाशंसनं तदपि कुत्सितमिति।

५ साध्यसाधनसङ्कल्पवस्तुतत्त्वं न वेत्त्ययम्।
वर्णयत्यपि तद्विज्ञत्वं मूढत्वं किमतः परम् ॥९००॥

शास्त्रकारः पुनरत्र विषादमावेदयन्नात्मनि कारुणिकत्वं प्रदर्शयति–'**हा कष्टम्**' इति–

अविद्योल्लासमुत्पश्यन् दिङ्नागादौ सुदुःखदम्।
१० **हा कष्टम्**इति देवोऽयं कृपालुत्वाद्विषीदति ॥९०१॥

तस्मान्न कल्पितस्य तेनियमस्य सम्यग्हेतुत्वं यतो नीलतज्ज्ञानयोरभेदः सिद्ध्येत्। कः पुनरयं नीलादिर्नाम यस्य तज्ज्ञानभेदिनो बहिरर्थत्वं परिकल्प्येत ? परमाणुसन्दोह इति चेत्; न; तत्र छायावरणादेरर्थप्रयोजनस्यासम्भवात्। न हि परमाणवः छायाविधायिनो विरलपरिमण्डलात्मनां छत्रादिरूपतानुपपत्तेः। अत एव न पततो जलादेराधार-
१५ कारिणः। कथं वा तत्रैकाकर्षणे नियममेनान्याकर्षणं भेदे तदनुपलम्भात्। नायं दोषो योग्यताविशेषात्। दृश्यते हि भेदेऽपि तद्विशेषादयस्कान्ताकर्षणे लोहाकर्षणं तद्वत्परमाणुष्वपि भवेत्। नापि तत्र छायावरणादेरप्यसम्भवः; योग्यतावलादेव तस्याप्युपपत्तेः, दृश्यते हि तद्बलाद् बहुछिद्राणामपि चपकादीनां पतदम्भःप्रतिबन्धित्वमिति चेत्; स्यादेतदेवम्; यदि परमाणवः प्रतीयेरन्, न चैवम्, एकैकशः समुदायेन वा तत्प्रतिपत्तेरप्रतिवेदनात्। न चाप्रतिपन्नेषु
२० दृष्टान्तमात्राद् इदन्त्वम् अनिदन्त्वं वा शक्यव्यवस्थापनम् अतिप्रसङ्गात्। तत्र तत्सन्दोहो नीलादिः। तदारब्धोऽवयवीति चेत्; न; परमाणूनां निरपेक्षतया तदारम्भकत्वे पृथग्दशायामपि प्रसङ्गात्। संयोगसव्यपेक्षाणां तत्त्वे[7] संयोगो यद्येकदेशेन, अव्यवस्थापत्तिः। तदाह–

तत्र दिग्भागभेदेन षडंशाः परमाणवः। इति।

तत्र तस्मिन् संयोगे दिश एव भागा **दिग्भागाः** तैर्भेदस्तेन **षडंशाः**[8] षडवयवाः **परमाणवो** भवेयुरिति शेषः। तथा हि–पार्श्वदिग्भागेषु चतुर्षु उपर्यधस्ताच्च व्यवस्थितैः
२५ परमाणुभिरभिसम्बद्ध्यमानस्य मध्यपरमाणोरवश्यम्भाविनः षडेकदेशाः तदभावे प्रत्येकं तत्सम्बन्धानुपपत्तेः। तथा च सुव्यवस्थितं नित्यत्वम्, सावयवत्वे विनाशस्यावश्यम्भावात्। कथं वा परमाणुत्वम्, सावयवस्य कार्यद्रव्यवत् स्थूलत्वात् ? तदवयवानां तद्व्यतिरेकादिति चेत्;

१–दिकः क–आ०, ब०, प०। २ –स्य च प्र–आ०,ब०,प०। ३ तदनुपायत्वं आ०, ब०, प०। ४ सद्दोपलम्भनियमस्य। ५ योग्यताविशेषात्। ६ परमाणुसमुदायः। ७ "षट्केन युगपद्योगात् परमाणोः षडंशता। षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः॥"–विंशति० वि० पृ० ७। चतुःश० पृ० ४८। तत्त्वसं० पृ० २०३।

कथमेवं [तैस्तस्य सावयवत्वम् ?] सम्बन्धादिति चेत्, न, [तैरपि दिग्भागभेदिभिरप्रसम्बद्ध्य-
मानस्य तस्य पुनः षडंशतापत्तेः। पुनः षडंशानां तद्व्यतिरेकपरिकल्पनायामनवस्थानं प्राप्य-
दोषानतिवृत्तेः। न चापर्यवसायिनस्तवशाः प्रतीतिविषयाः। सन्नैकदेशेन तेषां संयोगः। सर्वा-
त्मनेति चेत्, आह—

नो चेत्पिण्डोऽणुमात्रः स्यात् [न च ते बुद्धिगोचराः] ॥९०॥ इति। ५

नो चेत् न यदि षडंशाः परमाणव एकदेशेन संयोगस्यासम्भवात् सर्वात्मनैव तद-
भ्युपगमात्, तथा च पिण्डः परमाणुप्रचयः अणुरेव अणुमात्रः स्यात् भवेत्। दिग्भागभेदिनां
हि परमाणूनां सर्वात्मना मध्यपरमाणुना सम्बन्धे तदनुप्रवेशस्यावश्यम्भावात्। स [एवैकोऽव-
शिष्यत] इति मन्यते। तथा च न कार्यं तस्यैकद्रव्यस्यासम्भवात्, "[अ] द्रव्यमनेकद्रव्यं च
द्रव्यम्" [ ] इत्यभ्युपगमात्। १०

भवतु वा कथमपि संयोगः, स तु कथमप्रतिपन्नानाम्, अतिप्रसङ्गात्, अप्रतिपन्नाश्च परमाणवः प्रत्यक्षतस्तदप्रतिभासनात्। तदाह—न च ते बुद्धिगोचराः इति। न च नैव ते परमाणवो बुद्धेः अध्यक्षसंविदो गोचरा विषयाः स्थूलस्यैव तस्मा
देतस्य प्रतिभासमात्। तथापि तत्कल्पनायाम् अव्यवस्थापत्तेः। अनुमानात्तर्हि तत्प्रतिपत्तिः, तच्चेदम्—विवादापन्नं [तद्] अणुकं स्वतोऽल्पपरिमाणावयवारब्धं कार्यत्वात् पटादिवत्। ये च १५
ततोऽल्पपरिमाणाः ते परमाणव इति चेत्, न पटादेरेव [परकल्पितस्यासम्भवात्, निदर्शनत्वानु-
पपत्तेः। असम्भवश्च तस्य परिस्फुटमनवभासनात्। तदाह—

न चैकम् [एकरागादौ समरागादिदोषतः।] इति।

न च नैव एकम् अखण्डम् अवयवनिष्क्रान्तं [पटादि इति। 'कुतः' इति प्रश्ने
'न च ते' इत्यादि। न च तद्बुद्धिगोचर इति वचनपरिणामेन हेतुपदमभिधातव्यम्। २०

हेत्वन्तरमाह—एकरागादौ समरागादिदोषतः इति। राग आदिर्येषां चक्षुरावरणादेः स तथोक्तः एकस्य प्रदेशस्य रागादिरेकरागादिस्तस्मिन् समः साधा
रणः प्रदेशान्तरस्य रागादिः स एव दोषस्तस्मात्तत इति। एकत्वे हि शरीरादेः
क्वचिद्रागादौ सर्वत्र तेन भवितव्यं रागादिमतः प्रदेशात्तत्परस्यानर्थान्तरत्वात्। न हि

---

१ पूर्वभूतावयवैः परमाणोः। २ स्वावयवैः। ३ असम्भवः। ४ सम्बन्धेऽतदात्मनो—आ०, ब०, प०। ५ —विशेषतः इति आ०, ब०, प०। ६ कार्यस्य। ७ "तथा अद्रव्यं द्रव्यमनेकद्रव्यं च द्रव्यमिति वचनव्याघातः। तथा हि न विद्यते अन्यं अवयवं च द्रव्यमित्यद्रव्यम्। परमाणूनां अवयवं आकाशादीनां अन्यं नापि अवयवमित्य-द्रव्यम्, नित्यद्रव्यमिति यावत्। अनेकद्रव्यं स्वनेकद्रव्यं अनवयवत्वेनेत्यनेन स्वरूपेण द्वित्रिचतुर्यं द्रव्यमद्रव्यं नित्यमनेक-द्रव्यद्रव्यं कार्यमिति। एकद्रव्यत्व च कार्यद्रव्यस्याभ्युपगमे व्याहतमेतद् भवतीति।"—प्रश० व्यो० पृ० २३१। ८ —न्यं च—आ०, ब०, प०। "तथा कार्यद्रव्यपरिमाणं समवायिकारणम्। तस्याप्यल्पपरिमाणमित्यतः कार्यं निरतिशयाणुपरिमाणेनारब्धमिति क्रमते।"—प्रश० व्यो० पृ० २२४। "अल्पपरिमाणापेक्षया तदवयवपरिमाणस्य भीरोरल्पीयस्त्वप्रतीतेः. यथ तस्यावयवः स परमाणुर्भविष्यति।"—प्रश० कन्द० पृ० ३१। ९ —अवयवारब्धं आ०, ब०, प०। १० अल्पपरि—आ०, ब०, प०। ११ पटादिति आ०, ब०, प०।

[1]निष्पर्यायं तत्रैव रागादिस्तद्भावश्चोपपन्नो विरोधात्। ततः पाण्यादौ रागे चलने चावरणे च प्रदेशान्तरेऽपि तत्प्रतिपत्तिः स्यात्, न चैवम्, तत्र तद्भावस्यैव परिज्ञानात्। प्रदेशान्तरवद्वा पाण्यादावपि न [2]तत्प्रतीतिः स्यात् ततः तस्यैकान्तेनाभेदात्। न चैवम्, पाण्यादौ तद्भावस्य प्रदेशान्तरे च तद्भावस्य निर्विवादं प्रतिपत्तेः। भिन्न एव परस्परं प्रदेशाः प्रदेश्येव तु तद्गतो न भिद्यते तदयमप्रसङ्ग इति चेत् ; एवमपि प्रदेशगतश्चलनादिः प्रदेशिनं यदि नोपसर्पति तत्रैव चलतः प्रदेशादचलतस्तस्य [3]पृथक्सिद्धिः स्यात्। एवं रागादावपि। उपसर्पतीति चेत् ; न ; तत्रैव इतरेष्वपि चलत एव तस्य परिज्ञानापत्तेः। एवं रागादावपि। न चैवम्। तत्र [4]चलाचलादिः कश्चिदेकोऽवयवीति। [5]तदुक्तम्-

"पाण्यादिकम्पे सर्वस्य कम्पप्राप्तेर्विरोधिनः।
एकत्र कर्मणो[ऽ]योगात्स्यात्पृथक्सिद्धिरन्यथा॥
एकस्य चावृतौ सर्वस्यावृतिः स्यादनावृतौ।
दृश्येत रक्ते चैकस्मिन् रागो[ऽ]रक्तस्य वा[ऽ]गतिः॥
नास्त्येकः समुदायोऽस्मात्" [प्र०वा० १।८६-८८] इति।

अत्र यद्धासर्वज्ञस्य प्रत्यवस्थानम्-"यत्तावन्नास्त्येकोऽवयवी तस्य पाण्यादिकम्पे सर्वकम्पप्राप्तेरिति ; तदयुक्तम् ; व्याप्तेरप्रसिद्धत्वात्। न हि यस्य पाण्यादिकम्पे सर्वकम्पप्राप्तिः तस्याभावः इत्येवं व्याप्तिः क्वचिद्गृहीता। नापि यस्य सत्त्वं तस्य न पाण्यादिकम्पे सर्वकम्पप्राप्तिः इत्येवं व्याप्तिः परेण दृष्टा। न च दृष्टान्ताभावे स्वपक्षसिद्धौ परपक्षनिराकरणे[6] वा क्वचिद्धेतोः सामर्थ्यं दृष्टम्" [ ] इति ; तन्न युक्तम् ; बौद्धमतानभिज्ञानात्। न ह्यत्र [7]बौद्धेन विशेष्यस्यैवायवयिनो निषेधः साध्यत्वेनाभिप्रेतः, स्वयमपि व्यवहारप्रसिद्ध्या तस्याभ्युपगमात्, अपि तु तद्विशेषणस्यैकत्वस्यैव तत्रैव विप्रतिपत्तेः। अत एव 'नास्त्येकः समुदायः' इत्युक्तम्, अन्यथा 'नास्ति समुदायः' इत्येवोच्येत[8]। हेतुरत्र चलाचलादिरूपो विरुद्धधर्माध्यास एव, तस्यैव साध्यविपक्षे [9]तद्विरुद्धधर्मप्रसङ्गापादन-

---

१ युगपत्। २ चलनादिप्रतीतिः। ३ प्रदेशिन-। ४ "न चैदमिष्टापादनं यौगानाम् तैरयुतसिद्धयोः पृथक्सिद्धघनङ्गीकारात्"-ता०टि०। ५ चलादिः आ०,ब०,प०। ६ "पाण्यादिकम्पे सर्वस्य कम्पप्राप्तेः। यदि पाण्यादयोऽवयवा एवावयव्येकरूपत्वदा पाण्यादेः कम्पे सति सर्वस्य पादादेरपि कम्पः प्राप्नोति। एकस्मिंस्तस्मिन् कर्मणः कम्पस्य विरोधिनोऽकम्पस्यायोगात्।..... अथावयवेभ्यो भिन्नोऽवयवी। अत एवैकस्मिन्नवयवे कम्पमाने नावयवान्तरस्य कम्पः तदापि स्यात्पृथक्सिद्धिरन्यथा अवयवावयविनोर्भेदे पृथक्कम्पमानादवयवादकम्पमानस्यावयविनः समवेतस्य भेदेन तत्रावयवे सिद्धिः स्यात् वस्त्रोदकवत्।..... अथाभेदपक्षे एकस्यावयवस्यावृतौ सर्वस्यावृतिश्च स्यादिति प्रसङ्गः। भेदपक्षमाश्रित्यानावृतौ चावयविन. स्वीक्रियमाणायामावृत एवावयवेऽनावृतोऽसौ दृश्येतेति प्रसङ्गः। अथाभेदपक्षे रक्ते चैकस्मिन्नवयवे सर्वत्रावयवे रागो दृश्येतेति प्रसङ्गः। भेदपक्षे तु रक्त एवावयवेऽरक्तस्य चावयविनो वाऽगतिः स्यादिति प्रसङ्ग.।"-प्र० वा०म० वृत्ति १।८६-८७। अवयविनि ०पृ० ८५। ७-क्षनिवारणे-आ०,ब०,प०। ८ बौद्धस्य वि-आ०,ब,प०। ९-च्यते आ०,ब०,प०। १० तद्विरुद्धधर्मोप्रस-आ०, ब०, प०।

व्याप्येन कथनात् । तत्र चास्त्येव व्याप्तिप्रसिद्धिः—यस्मिन् चलत्यपि यन्न चलति न तत्तेनैकं यथा पर्णेन पाषाणः, चलत्यपि पाणिशरीरे न चलति प्रदेशान्तरशरीरमिति । तत्कथन्न दृष्टान्तो 'न च' इत्यादि सूक्तं भवेत् ? सूक्तमेवेदम् , अवयविनमनभ्युपगच्छतः पर्णपाषाणयोरप्य भावादिति चेन , न , व्यवहारप्रसिद्ध्या तदभ्युपगमस्योक्तत्वात् ।

यदप्येतदपरं [1]तस्यैव—"न ह्येवं कश्चिदनुन्मत्तः प्रत्यवतिष्ठते नास्त्येको वन्ध्यापुत्रः तस्य पाण्यादिकम्पे सर्वकम्पप्राप्तेः, अकम्पने वा चलाचलयोः पृथक्सिद्धिप्रसङ्गः खपुष्पखरशृङ्गवत्" [ ] इति , तदपि न सुभाषितम् , वन्ध्यासुतविलक्षणस्यावयविनः खपुष्पादिविलक्षणयोश्च पर्णपाषाणयोर्बौद्धमतेऽपि प्रसिद्धत्वात् । तदबुध्यमानेन प्रत्यवतिष्ठमानस्योन्मत्तत्वानुपपत्तेः । तन्नागृहीतव्यापको हेतुः ।

नाप्रसिद्धः , तत्प्रतीतिमात्रात् । [2]ननु चलप्रतीतिरचलत्यपि रूपादिवच्चलावयवसमवायात् , तथा चलत्यपि अचलप्रतीतिः अचलावयवसमवायाभिमित्तात् सम्भवति तत्कथं तस्मात् क्वचिच्चलाचलत्वं तत्त्वत सिध्यति ? विभ्रमस्य सत्यपि तस्मिन् सम्भवात् , ततः सन्दिग्धासिद्धो हेतुरिति चेत् , कथं तत[3] शरीरस्यापि सिद्धिः, विभ्रमस्तद्योगात् ? चलादि रूप एव तद्विभ्रमो न शरीर इति चेत् , न , विभ्रमेतररूपतया प्रत्ययभेदप्रसङ्गात् । न च मिन्न एव तत्प्रत्ययः, 'चलति शरीरम्' इति, विशेषणविशेष्यविषयस्यैकस्यैव तस्यानुभवात् । भ्रान्तस्तदनुभव इति चेत् , कथं ततः[4] प्रत्ययस्यापि सिद्धिः विभ्रमात्तद्योगात् ? तदेकस्य एव स विभ्रमो न प्रत्यये इति चेत् , न, विभ्रमेतररूपतया तद्भेदप्रसङ्गात् । न च भिन्न एवानुभव 'एक एवायम्' इति विशेष्यविशेषणविषयस्यैकस्यैव तस्यानुभवात् । भ्रान्तस्तदनुभव इति चेत , न , प्राक्प्रसङ्गानुबन्धादनवस्थानोपनिपातात् । ततः शरीरवच्चलाचलत्वादावप्यभ्रान्त एव प्रत्यय इति वस्तुत एव तस्सिद्धेः कथं सन्दिग्धासिद्धत्वं साधनस्य ?

मा भूत्सन्दिग्धासिद्धस्य सन्दिग्धव्यतिरेकत्वं तु स्यात् , संयोगवच्चलनस्यापि प्रदेशवृत्तित्वेनैकस्यापि चलाचलप्रत्ययविषयत्वाविरोधादिति चेत् , न , प्रदेशाभावे प्रदेशवृत्तित्वानुपपत्तेः । अव्यापकत्वमेव तस्य तद्वृत्तित्वमिति चेत , न , प्रदेशाभावे तस्यैवानुपपत्तेः । तदधिष्ठितेतरप्रदेशसम्बन्ध हि [5]तत्र तस्याव्यापकत्वं नान्यथा । संयोगस्य कथमित्यपि न युक्तम् , तत्रापि समानत्वात् तत्पर्यनुयोगस्य, तस्याप्येकावयविनि अव्यापकत्वानुपपत्तेरिति । व्याप्यत्वं [6]प्रदेशवत्त्वान्न संयोगस्याव्यापकत्वम् , अपि तु [7]तद्धर्मत्वात् । तथा च परस्य वचनम्—"संयोगस्यैव ह्येष धर्मो येन यत्र यत्रावयवे सम्बद्धोऽवयवी दृश्यते तत्र तत्र रूपादिव

---

१ अत्र 'यतः' इत्याध्याहार्यम् । २ मानर्थक्यमेव । ३ न चल-आ० ब०, प० । ४ प्रतीतिमात्रात् । ५ अनुभवात् । ६ एवायम्-आ०, ब०, प० । ७ अव्याप्यवृत्तित्वेन । ८ अव्यापकत्वानुपपत्तेः । ९ तदधिष्ठित-प्रदेशात् भिन्नप्रदेशसम्भवे । १० इतरप्रदेशे । ११ अवयवि. । १२ प्रदेशवत्त्वा-आ०, ब०, प० । १३ अव्या वर्त्तनं हि संयोगस्यैव धर्म इति अव ।

त्तदुपलम्भकारणावैगुण्येऽपि संयोगो नोपलभ्यते" [ ] इति। तस्मादेवं-धर्मत्वादेव संयोगादेः प्रदेशवृत्तित्वं न [2]व्याप्यस्य प्रदेशवत्त्वात्। तद्वच्चलनस्यापीति चेत्; न; तद्धर्मणः संयोगस्यैव बौद्धं प्रत्यसिद्धत्वेन दृष्टान्तत्वानुपपत्तेः। अप्रसिद्धोऽपि परप्रसिद्धेन दृष्टान्तेन समर्थ्यते। तथा च वचनं परस्य–"यथा त्वन्मते [2]निर्विकल्पकेन ज्ञानेन तदेव सविकल्पकं ज्ञानमात्मसदृशं कथञ्चिदुत्पादितं कथञ्चिन्नेत्यभिन्नस्यैवांशः परिकल्प्यते तथा संयोगाद्याधारस्यापीत्यदुष्टं संयोगादेः प्रदेशवृत्तित्वम्" [ ] इति चेत्; न; वैषम्यादुपन्यासस्य। न हि विकल्पज्ञानम् एकान्तेनाभिन्नमेव, सदृशेतरस्वभावयोः तदर्थान्तरत्वाभावा[3]नभ्युपगमात्। तदनर्थान्तरत्वे तु कथं ताभ्यामन्योन्यभेदिभ्यामभिन्नस्य [4]एकान्ताभेदित्वम्? येनोच्यते–'अभिन्नस्यैव' इति। न चावयविन्यपि कथञ्चिद् भेदवत्येव संयोगादेः प्रदेशवृत्तित्वम्, 'संयोगस्यैव' इत्यादिविरोधाद्, अनेकान्तवादोपाश्रयप्रसङ्गाच्च। बौद्धस्यापि कस्मान्न तत्प्रसङ्ग इति चेत्? क एवमाह–'न' इति? "चित्रप्रतिभासाप्येकैव बुद्धिः" [प्र० वार्तिकाल० २।२१९] इति वचनात्। क इदानीं जैनात्तस्य विशेष इति चेत्? न; पर्यन्ते तस्यापि [6] तेन निराकरणात् "अविभागोऽपि बुद्ध्यात्मा" [प्र० वा० २।३५४] इत्यादिवचनात्। तत्र संयोगदृष्टान्तेन स्वभावादेव [7]प्रदेशवृत्तित्वं चलनस्य, अपि तु [8]व्याप्यभेदादेव इति न सन्दिग्धो व्यतिरेकः, तन्निश्चयस्यैव भावात्। तस्मादुपपन्नमेतत्–[9]नैकोऽवयवी चलाचलत्वात्, अन्यथा तद्योगादिति।

[10]तथा, 'आवृताऽनावृतत्वात्' इति च। नन्विदम् अवयवेष्वेव भिन्नेषु नावयवीति तस्मादसिद्धमिति चेत्; अवयविनि तर्हि किम्? आवरणमेवेति चेत्; न; मनागप्यदर्शनप्रसङ्गात्। 'अनावरणमेव' इत्यपि न युक्तम्; अविकलस्य दर्शनापत्तेः। अविकल एव स दृश्यत इति चेत्; न; तथानुभवाभावात्, सन्देहानुपपत्तेश्च। न हि अविकलदृष्ट एव सन्देहः। भवति चायम् अर्धावृतं पश्यतः 'किमयं देवदत्तः किं वा तदपरः' इति च। अवयवाग्रहणात् सन्देह इति चेत्; तद्ग्रहणेन तद्दर्शनस्य प्रतिबन्धे कथमविकलदर्शनकल्पनम्? अप्रतिबन्धे तु कथं तत्र सन्देहो निश्चिते [12]तदनुपपत्तेः, निश्चयस्य तद्विरोधित्वात्। निश्चयरूपं च दर्शनम्, "व्यवसायात्मकं ज्ञानं प्रत्यक्षम्" [ ] इति वचनात्। कथं [13]चायमवयवग्रहणमन्तरेण दृश्येत? [14]तद्ग्रहणस्य तद्दर्शनं प्रत्यनङ्गत्वादिति चेत्; न; कतिपयावयवग्रहणाभावेऽपि [15]तत्प्रसङ्गात्। सकलावयवग्रहणमेव [16]तदनङ्गमिति चेत्; कथमिदानीं सकलावयवनिष्ठतया तस्य

---

१ अवयविनः। २ [निर्विकल्पकज्ञानेन। ३ –भावादनभ्यु–ता०। विकल्पज्ञानात् तत्स्वभावयोर्भिन्नत्वाभ्युपगमात्। ४ विकल्पज्ञानस्य। ५ बौद्धस्य। ६ चित्रप्रतिभासाप्येकैव बुद्धिरिति वचनस्यापि। ७ प्रतिदेश–आ०, ब०। ८ तु द्रव्यव्याप्य–आ०, ब०, प०। ९ नैकावयवी आ०, ब०, प०। १० तथा वृथा नावृ–आ०, ब०, प०। "अथवा अन्यथाऽयं विरुद्धधर्मसंसर्गः। तथा हि–आवृते एकस्मिन् पार्ष्ण्यादौ स्थूलस्यार्थस्य आवृतानावृतरूपे युगपद्भवन्तौ विरुद्धधर्मद्वयसंयोगमस्य आवेदयतः।"–अवयविनिरा० पृ० ८५। ११ सन्देहानुपपत्तेः। १२ अवयवी। १३ अवयवग्रहणस्य। १४ अवयविदर्शनप्रसङ्गात्। १५ अवयविदर्शनानङ्गम्।

दर्शनम्, सत्येव तद्ग्रहणे तदुपपत्तेः। मा भूदिति चेत्, कथमविकल्पदर्शनं [1]तन्निष्ठत्वमावविकल्पस्यैव दर्शनात्। तन्निष्ठत्वं नाम तत्समवायः, तस्य [2]च [3]ततो भेदान् न तस्यात्र व्यवयविदर्शनस्य वैकल्यमिति चेत्, कथमर्थान्तरत्वे सत्य तेन [4]तन्निष्ठोऽवयवीति व्यपदेशः? सम्बन्धादिति चेत्, तर्हि [5]तत्त्वभाव कथ [6]तद्दर्शने दृश्येत? तत्त्वभावतया [7]मादर्शीति चेत्, न, दर्शनवैकल्यप्रसङ्गात्। तस्यापि ततो भेदादयमदोष इति चेत्, कथं तेन [8]सम्बन्धोऽवयवीति व्यपदेशः? सम्बन्धादिति चेत्, न, 'तर्हि' इत्यादेरनवस्थानाच्च। ततो दूरमनुसृत्यापि कस्यचित्सम्बन्धस्य तत्त्वभावत्वं चेदभ्युपायेत प्राक्तनस्य तन्निष्ठत्वस्यैव तदभ्युपगन्तव्यम्। न च तस्य सकलावयवग्रहणमन्तरेण दर्शनम्, आश्रयदर्शनस्याधारग्रहणसव्यपेक्षत्वात्। दृश्यावयवनिष्ठतयैव तु दर्शनेऽपि सिद्धे विकल्पदर्शनम्। न च [9]"तत् अनायुतस्योपपन्नमित्यवयविन्येव अर्थाचरणमाधाप्तासिद्धत्वं साधनस्य। सन्दिग्धव्यतिरेकत्वं तु पूर्ववदुद्भाव्य समाधातव्यम्। ततो भवत्येवात्मादपि हेतोर्नैकोऽवयवीति।

तथा [10]"रक्तारक्तत्वादित्यतोऽपि। रक्तारक्तैर्हि तन्तुभिरारब्धे पटे अवश्यम्भवत्येव रक्तारक्तता तया रूपभेदो न भवत्येव तत्रैकस्यैव रूपस्य चित्रस्य भावात्। तया च प्रतिपत्तिः चित्रमिदं रूपमिति चेत्, न, 'चित्रं चैकं च' इति व्याघातात्—भेदस्य चित्रार्थत्वात् अभेदस्य चैकार्थत्वात्, भेदाभेदयोश्च परस्परपरिहारस्वरूपाविकरणतया विरोधस्य सुप्रसिद्धत्वात्। उक्तञ्च—

"चित्रं तदेकमिति चेदिद चित्रतर ततः।" [प्र० वा० २।२००]

भवतु तदेकमेव न चित्रं नीलपीतादिविशेषैरनिर्देश्यत्वादिति चेत्, न, सादृश्यात्प्रतिभासनात्। अप्रतिभासितस्यापि द्रव्यग्रहणादनुगमः, नीरूपस्य द्रव्यस्य दर्शनायोगादिति चेत्, कथमनुपलभ्यस्य द्रव्यप्रतिपत्त्यङ्गत्वम् अन्यत्रैवमदर्शनात्। तथापि तत्कल्पने किमरूपस्यैव द्रव्यस्य न दर्शनकल्पनम्, अविशेषात्? भवत्वेकं तद्रूपं प्रतिभासवत्, तथापि कथं तत्र चित्र प्रतिभासः? चित्ररूपावयवसम्बन्धादिति चेत्, न; उपाधिकृतत्वेन विभ्रमत्वापत्तेः। न चासौ विभ्रम एव, चित्राकारवत्तद्रूपस्यापि ततोऽसिद्धिप्रसङ्गात्। चित्रत्व एवासौ विभ्रमो न [11]'तद्रूप इति चेत्, न, विभ्रमेतरात्मना [12]'तस्यैव चित्रत्वापत्ते', तस्य [13]च वस्तुतस्तत्त्वे [14]'तद्रूपस्यैव किम स्यात्? तदप्युपाधिनिबन्धनमेव न वास्तवमिति चेत्, न, तत्प्रतिभासस्यापि विभ्रमत्वापत्तेः। न चासौ विभ्रम एव। ततश्चित्रस्यवरूपान्यप्रतिभासस्यापि असिद्धिप्रसङ्गात्। चित्राकार एवासौ विभ्रमो

---

१ –विकल्पद–आ०, ब०, प०। २ अवयविनि। ३ समवायस्य। ४ अवयवात्। ५ समवायेन। ६ सम्बन्धस्यवयवाः। ७ तद्दर्शने आ०, ब०, प०। सम्बन्धस्यैव। ८ मा च दर्शी–आ०, ब०, प०। ९ अवयवोऽव–आ०, ब०, प०। १० विकल्पदर्शनम्। ११ "स्थूलावैरवयवात्मे मन्निवेशपरं मानम्। विपक्षे निश्चितं सर्वमसत्येतन्निवेशतः॥ रक्ते च राग एकस्मिन् सर्वं रक्तमेव रक्तवत्। विरुद्धधर्मभावे वा वास्तवमनुपलभ्यते।"–तत्त्वसं० इयो० ५८३, ५८४। 'तथा रागाद्यन्तरं विशेषः एकसंतानीयः।"–अष्टसहस्रि० पृ० ८५। १२ तद्भावतश्चित्रमाप इति आ०, ब०, प०। १३ अवयवस्यैव चित्रमतिभ्रमविषयत्वात् चित्रार्थं व्यादिति भावः। १४ अवयवस्य वस्तुनश्चित्रत्वे। १५ अवयवस्यैव।

तत्तस्तदुत्पत्तेरयोगात् नीलादेः पीतादिवत् । रूपत्वमात्रेणैकजातित्वमेव न जात्यन्तरस्यमित्यपि न युक्तम्, नीलादेरपि पीतादिप्रसङ्गापत्तेः । ततोऽवयवरूपात्तदुत्पत्तौ तैरपि तज्जातित्वमेव, तत्त्व न रूपत्वेनैव, तत्र चित्ररूपत्वाभावापत्तेः । नाप्येकेन चित्रत्वेन, तत्र तदभावस्याभिधानात् । नाप्यनेकनीलत्वादिना, तस्य स्वाश्रयव्याप्त्यभावात् । न च तैरव्यापि सामान्यम्, सर्वगतस्यैव तस्योपगमात्, तदव्यापिनश्च सर्वगतत्वानुपपत्तेः । ततो न नानाजातिसम्बन्धा रूपस्य चित्रप्रतीतिनिमित्तोपरत्वम्, अपि तु स्वरूपभेदादेव । न च सत्यैकत्रावयविनि सम्भवत्युपपन्न तैरन्यथानुपपत्त्या तद्भावसाधनम् ।

भवन्तो पुनरिदमवयवी कुत एवमाहुः ? समवायात्तेः कारणादिति चेत्, किं पुनर्द्व्यणुकस्य समवायिकारणम् ? अणुद्वयमिति चेत्, न, परमाणूनामनुपलम्भेनासत्त्वात्, तत्र समवायिकारणत्वस्य तत्संयोगे धासमवायिकारणत्वस्यासम्भवात् । निमित्तमात्राश्रय न तदुत्पत्तिः अनभ्युपगमात्, इत्यसत्त्वमेव द्व्यणुकस्य प्राप्तम् । तदभावे च न तदुत्थं द्रव्यम्, ततोऽपि न तदुत्तरमित्यरण्यावयविपर्यन्तस्याभाव एव तद्द्रव्यस्य स्यात् । नायं दोष, तस्यादेतुकस्यैव भावादिति चेत्, अत्राह—

स्वतः सिद्धेरयोगाच्च [तदुत्पत्तेः सर्वथेति चेत्,] ॥९१॥ इति

स्वतो हेत्वन्तरेण सिद्धेर्निष्पत्तेः अयोगाद् अघटनात् । 'न चैकम्' इति सम्बन्धः । च शब्दः पूर्वहेतुसमुच्चये । परमत्र हेतुमाह—'तदुत्पत्तेः सर्वथा' इति । तस्य अवयविनः स्वावयवेषु वृत्तिर्यत्नं तस्याऽयोगाच्च । 'न चैकम्' इति । कथं तद्योगः ? सर्वथा सर्वेण एकदेशेन सर्वात्मना वा इति प्रकारेण । तथा हि—सर्वात्मना तस्य संघे वृत्तौ, महत्त्वम् प्रत्यवयवं भेदात्, एकावयवत्वं वा । देशतो वृत्तौ; 'सेषा तदन्यत्वं प्राप्त्यावयववत्त्वम्, तत्कथं ते तस्य ? सेष्वपि वृत्तेरिति चेत्, न, सर्वात्मना तत्रिषेधात् । देशतश्चेत्; न, पूर्वदोषानुषङ्गात्तस्यापि ।

ननु "महत्त्वान्यत्वतो देशः, तस्मात्तस्य च सर्वम्, न चावयविनो निरवयवस्य महत्त्वम्, अतो न सर्वात्मना देशतो वा तस्य वृत्तिः प्रकारान्तरेणैव तद्भावात् तस्य च विशेषप्रतिषेधादेशाभ्यनुज्ञानात्, यथैव हि पाणिना चक्षुषा दर्शननिषेधो ऽभिन्नेन दर्शनमभ्यनुज्ञापयति,

---

१ निमित्तोपरत्तेः । २ अवयवान्तरे । ३ —त्वाभा—आ०, ब०, प० । ४ स्वावयवेषु । ५ तत्त्वरूपत्वेनैव तदभावस्याभिधानात् । ६ च तदुत्थं आ०, ब०, प० । ७ अवयविनः । ८ अवयवेषु । ९ "देशतश्चेत्" । १० "एकस्मिन् भेदाभावाद्दशाद्यवयवप्राप्तिरभावश्च—कि प्राप्तिवत्त्वं द्रव्यैकदेशवृत्तौ वा ? अवयवेऽपीति चेन्न, तत्रापि प्रसङ्गः । कस्मात् ? एकस्मिन् भेदाभावात्तद्वत्त्वप्राप्तिरिति । 'द्रव्यम्' इत्यनेनाद्यैकत्वविशिष्टम्, 'एकदेशः' इति भागादौ वस्त्वन्तरमित्यम्, तस्मिन्नेकदेशवृत्तौ भेदाभिधानं तत्रैवाभावप्रसङ्गात्तद्वत्त्वप्राप्तिरिति भेदाभावः ।"—व्योम वृ०, आ० ब० १ । १ । ११ । "तथा हि महत्त्वं सम्बन्धिभेदभेदेन । निरवयवत्वं च देशतस्तस्य । तथा विशेषप्रतिषेधस्य [सम्भवात्] प्रकाशान्तरेण [तद्भावात्] । अन्यथा हि न [इति] वक्तव्यम् ।"—प्रश० व्यो० पृ० ७६ ।

अन्यथा तदनुपपत्तेः, तथा सर्वात्मैकदेशाभ्यां वृत्तिनिषेधोऽपि प्रकारान्तरेण वृत्तिमभ्यनुज्ञापयत्येव, अन्यथा 'न वर्त्तते' इति अविशेषेणैव वचनप्रसङ्गादिति चेन ; तत्प्रकारान्तरं तस्य स्वरूपम् , अन्यद्वा गत्यन्तराभावात् ?

स्वरूपं तस्य वृत्तिश्चेत्पटो वर्त्तत इत्ययम् ।
विशिष्टप्रत्ययस्तत्र कथं नामोपपत्तिमान् ? ॥९०८॥
भेदे सत्येव यल्लोके विशेषणविशेष्ययोः ।
दण्डी मनुष्य इत्येवं स प्रतीतिपथं गतः ॥९०९॥
भेदकल्पनयाऽसौ चेत्तत्कृता[2] तात्त्विकी कथम् ? ।
तद्वृत्तिर्भागवान् येन तात्त्विकः परिकल्प्यताम् ॥९१०॥
अतात्त्विकं तु तत्सत्त्वं न बौद्धोद्वेगकारणम् ।
व्यवहारदृशां तस्य तेनापि स्थितिसाधनात् ॥९११॥
अन्यैव तस्य वृत्तिश्चेत् समवायात्मिका मता ।
तयापि तस्यासम्बन्धे विशिष्टः प्रत्ययः कथम् ? ॥९१२॥
सम्बन्धादेव दण्डादेर्यतोऽयं[3] दृश्यते नरे ।
कथं वा तस्य सा वृत्तिः पटस्तन्तुषु यद्भवेत् ॥९१३॥
गर्दभोऽपि तया तेषु न भवत्यन्यथा कथम् ? ।
लोकः कथं ततो वस्त्रं पटमेव न गर्दभम् ॥९१४॥
सम्बन्धोऽपि तया तस्य स्वतश्चेत् किन्न तन्तुभिः ।
इति व्यर्थैव सैवं चेन्नास्य पूर्वं निषेधनात् ॥९१५॥
अन्यतश्चेन्न तेनापि तस्याः सम्बन्धकल्पने ।
कथं तेन विशिष्टत्वं तस्य यत्तन्मतिर्भवेत् ॥९१६॥
कथं वा स्यात्प्रतिक्षिप्तं गर्दभातिप्रसञ्जनम् ।
तेनापि तस्य सम्बन्धे स्वतोऽन्यत इति द्वयोः ॥९१७॥
पक्षयोरनवस्थानं प्राच्यदोषानिवर्त्तनात् ।
तन्नान्याप्यस्ति तद्वृत्तिरित्यवृत्तिक एव सः ॥९१८॥

ततो यदुक्तं व्योमवता—"वृत्त्यनुपपत्तिरिति हेतुः स्वरूपासिद्धश्च वृत्तेः समवायस्य सिद्धत्वात्" [प्रश० व्यो० पृ० ४६] इति ; तत्प्रतिविहितम् ; उक्तेन न्यायेन समवायस्यापि वृत्तित्वासिद्धेः ।

मा भूद्वृत्तिः, तथापि कथमसत्त्वम् ? कथञ्च न स्यात् ? वृत्त्या सत्त्वस्याव्याप्तेः ।

---

१ प्रतीतिकथं गतः आ०, ब०, प० । २ कल्पनाकृता । ३ विशिष्टप्रत्ययः । ४ –ते तराम् आ०, ब०, प० । ५ धारयेत् । ६वर्तनम् आ०, ब०, प० ।

न हि बुद्ध्यवेद्य सत्त्वमाकाशादौ परोपगते रूपादौ च तदभावेऽपि भावादिति चेत्, सत्यम्, सत्त्वमात्रस्य न व्याप्तिः, अर्थक्रियादिसत्त्वस्य तु विपक्ष एव। कुत एतत्? स्वबुद्धित इति चेत्, न, तदनिषेधप्रसङ्गात्। न हि स्वयं बुद्धिव्याप्ततया बुद्ध्यमानस्यैव तत्सत्त्वस्य निषेधनम्। परबुद्धितः इति चेत्, परस्यापि यदि तत्र प्रमाणमस्ति न तन्निषेधनम्, तेनानुमानस्य तेन प्रतिक्षेपात्। तस्यैव तदनुमानेन प्रतिक्षेप इति चेत्, न, तत्प्रतिक्षेपे तस्यैवानुत्पत्ति प्रसङ्गात्, तन्मूलत्वात्, तेन सद्व्याप्तिपरिज्ञाने सत्येव तदुत्पत्तेः। अथ नास्ति प्रमाणम्, न तर्हि व्याप्तिनिश्चयः, तदभावे च न तन्निषेधः। सत्येव तन्निश्चये व्यापकाभावात् व्याप्य निषेधोपपत्तेरिति चेत्, न, 'प्रमाणादन्यतो वा' इत्यकृतविचारस्यैव परबुद्धिमात्रस्योपाश्रयात् कथं तदाश्रयेण कस्यचिन्निषेधनम्, अतिप्रसङ्गात्। कथमदृष्टविपरीतान्तस्य? न हि तस्या व्यपरिज्ञातस्यैव निषेधः तन्निषेधानुमानस्याश्रयासिद्धिदोषात्। स्वयं परिज्ञाने च पूर्ववत्तदनुपपत्तेः। परबुद्ध्या तत्परिज्ञानस्य प्रमाणभावाभावाभ्यां विचारे प्रागिव दोषात्, अकृतविचारस्यैव परबुद्धिमात्रस्योपाश्रयणं वीथ्यागतस्यापि तदभीष्टमुद्ग्रहेणविशेषात्। ततः स्थितम्-'न चैक सर्वथा तद्बुद्धेरयोगात्' इति। साम्प्रतं पूर्वपक्षसमाप्तिम् इतिशब्देन चेच्छब्देन च परामिप्रायं द्योतयन्नाह 'इति चेत्' इति।

अत्रोत्तरमाह-

एतत्समानमन्यत्र भेदाः संविदसंविदोः।
न विकल्पानपाकुर्युर्नैरन्तर्यानुषन्धिनः ॥९२॥ इति।

एतदनन्तरोक्तं 'तत्र' इत्यादि, समान सदृशम्। क? अन्यत्र। अपि शब्दोऽत्र द्रष्टव्यः। तदयमर्थो न केवलं बहिरर्थे अपि तु अन्यत्रापि विज्ञानेऽपि तस्यैव तदपेक्षया अन्यत्वात्। तथा हि-विज्ञानमपि सौक्षम्यादिना दोषेण दोषवत् निरन्तरत्वात् बहिरर्थवदिति। न चेदं स्वतन्त्रं साधनम्, बहिरर्थे तत्त्वतस्तत्त्वस्योपगमनानिष्टापत्तेः, अन्यथा तन्निदर्शनोपन्यासायोगात्, अपि तु प्रसङ्गापादनम्। तदपि न तत्त्वतस्तत्र तत्त्वव्यवस्थापनार्थम् अतत्र स्वयमपि तदनभ्युपगमात्, अपि तु व्याप्तिविघटनार्थमेव। यदि निरन्तरत्वं दोषवत्त्वेन व्याप्तं विज्ञानेऽपि तद्भवेत् तत्रापि तस्य विद्यमानत्वादिति। तस्यापि बाह्यवत् परित्यागे किमवलम्बनो बहिर्भावं दूषयेत्? निरवलम्बनस्य तदपोषणस्याप्यनिवारणात्। ततो नास्ति तस्य "तेन व्याप्तिः, बहिष्कृतेऽपि विज्ञाने तस्य भावात्। ततोऽनैकान्तिकत्वाभावो" बहिरर्थे तत्त्वसाधनमुपपन्नम्। ततो यदुक्तं न्यायवार्तिके-"यः परेण "चोदितं दोषमनु-

---

१ तदभावादि-आ०, ब०, प०। २ निषेधानुमानस्य। ३ प्रतिषेध आ०, ब०, प०। ४ -षेधोऽति- आ०, ब०, प०। ५ विषेधानुपपत्तेः। ६ तथाभ-आ०, ब०, प०। ७ दोषवं आ०, ब०, प०। ८ स्वतन्त्रस्य-आ०, ब०, प०। ९ निरन्तरत्वस्य। १० दोषवत्त्वेन। ११ निरन्तरत्वात्। १२ दोषितम् आ०, ब०, प०।

कृत्य 'भवतोऽप्ययं दोषः' इति ब्रवीति स निगृहीतो वेदितव्यः" [न्यायवा० ५।२।२१] इति ; तत्प्रतिविहितम् ; 'दोषमनुद्धृत्य' इत्यस्यासिद्धेः, व्यभिचारोद्भावनादेव तदुद्धरणात् । 'भवतोऽपि' इत्यस्य च व्याप्तिविघटनबलेन तदुद्भावनोपायत्वात् । एतदप्यन्यत्तथैव— "यत एवासावुत्तरे वक्तव्यप्रसङ्गं करोति अत उत्तरापरिज्ञानान्निगृह्यते" [न्यायवा० ५।२।२१] इति ; तदपि दुर्भाषितम् ; प्रसङ्गकरणस्यैवोक्तनीत्या सदुत्तरत्वेन तदपरिज्ञानस्याभावात् । अन्यदप्युत्तरमेवंविधे विषये सम्भवति, तस्यापरिज्ञानान्निगृह्यत इति चेत् ; न ; प्रकृतस्य परिज्ञानाज्जयस्यापि प्राप्तेः । न चैतदुभयं यौगपद्येन ; विरोधात् ।

निग्रहश्चेज्जयो नास्ति जयश्चेन्नास्ति निग्रहः ।
निग्रहश्च जयश्चेति व्याहतं युगपद् द्वयम् ॥९१९॥
अपरिज्ञानमप्यस्य कस्मादप्रतिपादनात् ।
न निग्रहमयात्तस्य परिज्ञानेऽपि सम्भवात् ॥९२०॥
एकदोषाभिधानेन परपक्षे हि दूषिते ।
दोषान्तरप्रवादो हि निग्रहायैव कल्पते ॥९२१॥
[3]सतो दोषान्तरस्यापि निग्रहो यदकीर्त्तनम् ।
सतो हेत्वन्तरस्यापि निग्रहः स्यादकीर्त्तनम् ॥९२२॥
ततस्तत्कीर्त्तनं योगैर्निग्रहः कल्प्यते कथम् ।
इदमेव स्वयं देवैरन्यत्र प्रतिपादितम् ॥९२३॥
"वादिनोऽनेकहेतूक्तौ निगृहीतिः किलेष्यते ।
नानेकदूषणस्योक्तौ वैतण्डिकविनिग्रहः ॥" [सिद्धिवि० परि० ५] इति ;

ततो न युक्तम्—'उत्तरापरिज्ञानान्निगृह्यते' इति ; तदपरिज्ञानस्यैवासिद्धेः । एवमन्यदपि समानदोषापादनं निर्दोषं प्रतिपत्तव्यम् । तन्न मतानुज्ञा नाम निग्रहस्थानं सम्भवति ।

मा भूत् 'चौरस्त्वं पुरुषत्वात्' इत्युक्ते 'भवानपि चौरः तत्त्व एव' इति प्रसङ्गकरणबुद्ध्या प्रतिब्रुवाणस्य तन्निग्रहस्थानम्, चौर्यापादनबुद्ध्या तु प्रतिवदतो भवत्येव, परापादितस्य चौर्यस्यात्मन्यभ्युपगमात्, अनभ्युपगमे हि न पुरुषत्वं तत्र हेतुर्वक्तव्यः किन्तु पदद्रव्येणा- नतिसृष्टेन सम्बन्धः, न चोक्तः [4]सः, इत्युत्तरस्यापरिज्ञानेन परमतमनुजानतो भवत्येव तन्निग्रहस्थानमिति चेत् ; कस्तेन तं निगृह्णीयात् ? वाग्येव ; परिषद्बलादिपरिग्रहैर्वैफल्यापत्तेः । परिषद्बलादय एवेति चेत् ; तेनापि वादिनो गुणाभावात् जयमपश्यन्तः कथमितरं निगृह्णीयुः ? जयाभावे निग्रहानुपपत्तेः । न च तस्य स्वपक्षसाधनं गुणः, चौर्यं प्रति पुरुषत्वस्यानैकान्तिकत्वेनासाधनत्वात् । परत्र तदभ्युपगमकरणं स[5] इति चेत् ; न ; तस्याप्यन्यायनिबन्धनत्वेन

---

१ न्यायवार्तिके उक्तम् । २ जयपराजयौ । ३ सतो आ०, ब०, प० । ४ निग्रहस्थानम् । ५ अनतिसृष्ट-पदद्रव्यसम्बन्धश्चेदिति हेतुः । ६ गुणः ।

दोषत्वात्। विधिगीषोः कथमपि तत्करणं गुण एवेति चेत्, न, चपेटादिनापि तत्करणस्य गुणत्वप्रसङ्गात्। 'तेन तत्करणं परिषत्पतिर्न सहते धर्मच्युतेरिति चेत्, व्यभिचारिहेतुना तत्करणं कथं सहेत अविप्लोषात्? स्वयमपरिज्ञानादिति चेत्, न, स्वतस्तस्यापरिज्ञानेऽपि प्राश्निकवचनात् परिज्ञानोपपत्तेः, प्राश्निकैश्च तद्वचनस्यावश्यम्भावात्, अन्यथा तदैफल्यात्। परिज्ञातमपि सहते न्यायशास्त्रे तस्य गुणत्वेनाभिधानादिति चेत्, शास्त्रान्तरे तस्य दोषत्वेनाभिधानात् न सहेतापि। तत्कथं तस्मादेकान्तेन वादिनो जयो यतः 'इतरस्य निग्रहः स्यात्? तन्न कथञ्चिदपि मतानुज्ञानं निग्रहायेत्यलं प्रसङ्गेन।

कथं पुनरचेतनार्थदोषेण चेतनस्य[2] दूषणं तत्करदोषेण साधोरपि तत्प्रसङ्गादिति चेत्; स्यादेवम्, यद्यर्थेऽप्यचेतनत्वं तस्यावलम्बनम्, [3]तदभावाच्चेतने न भवेदिति। न चैवम्, अर्थेऽपि नैरन्तर्यस्य तदवलम्बनत्वात्, तस्य च चेतनेऽप्यविशेषात्। न च तदवलम्बनस्य चेतनभेदैः प्रतिक्षेपः, तस्यापि प्रतिक्षेपापत्तेः। तच्च दोषस्याभिधायिष्यमाणत्वात्। तदाह—भेदाः चेतनेतरत्वलक्षणाः, व्यक्तिभेदाद्बहुवचनम्। कथंभूते? सविदसविदोः ज्ञानार्थयोः, विकल्पान् सांशत्वादिदोषपरामर्शान् न अपाकुर्युः, न प्रतिक्षिपेयुः। असविद्ग्रहणं किमर्थम्? तद्भेदैस्तदनपाकरणस्य परं प्रत्यपि प्रसिद्धत्वादिति चेत्, न, तस्य निदर्शनार्थत्वाद् असंविद्भेदवत् संविद्भेदा अपि स्वान्यापाकुर्युरिति। तत्र हेतुमाह—नैरन्तर्यानुपनिबन्धन इति। नैरन्तर्यं प्रत्यासत्तिः, तदनु पनिबन्धनस्तदवलम्बन इति।

नैरन्तर्यं [9]मनस्यं ते दोषोत्पत्तिनिबन्धनम्।
विद्भेदाक्षत्वयुक्तस्य[10] दोषस्य क्षेपकः कथम्? ॥९२४॥
'तस्यापि तैः प्रतिक्षेपे सान्तरत्वमबाधितम्।
चेतनेषु भवेत्तस्य तदभावत्वनिश्चयात् ॥९२५॥
निरन्तरेतरत्वाभ्यां निर्मुक्ता यदि संविदः।
स्थूलस्तम्भावभासोऽयं कथं तासूपपद्यताम् ॥९२६॥
अन्यथा तादृशैरेव बाह्यैरप्यणुभिः स्वयम्।
द्रव्यनिष्पादनात्किन्नु[11] नैरन्तर्येण नः कृतम् ॥९२७॥
यस्यांशत्वादिदोषस्य तत्राप्युद्भावनं भवेत्।
निरन्तरत्वस्याभावः सान्तरत्वं तदुच्यताम् ॥९२८॥

भवतु सान्तरत्वमेव संवेदनानामिति चेत्, न, व्यवधानाभावे तदनुपपत्तेः। व्यवधानञ्च न समानीयैरन्यवहितैरेव, नैरन्तर्यदोषात्। व्यवहितैरेवेति चेत्, न, तद्भव

---

१ चपेटादिना। २ इतरस्य आ०, ब०, प०। ३ —स्य भाव—आ०, ब०, प०। ४ अचेतनत्वाभावात्। ५ दीर्घावलम्बनत्वात्। ६ नैरन्तर्यस्य। ७ पेतोपनम् (?)। ८ नैरन्तर्यप्रयुक्तस्य। ९ नैरन्तर्यस्यापि। १० किन्तु नै—आ०, ब०, प०।

धानस्यापि सजातीयैरव्यवहितैरनुपपत्तेः । व्यवहितैरेवेति चेत् , न ; अनवस्थापत्तेः । तथा च नीलमणिसम्मतानां संवेदनपरमाणूनां परापरैरपरिमाणैः तत्परमाणुभिर्व्यवधानात् नीलव्याप्तं सकलं जगद्भवेत् ।

नीलव्याप्तं जगत्प्राप्तं पीतादिपरिवर्जितम् ।
तच्च प्रतीतिसौभाग्यप्रत्यनीकं प्रकल्पनम् ॥९२९॥
व्यवधानं विजातीयैर्यदापि स्यात्परापरैः ।
तदा नीलमणिर्नाम न कश्चिदवतिष्ठते ॥९३०॥
न मेचकमणिज्ञानमपि तत्रोपपत्तिमत् ।
तेषु पर्यन्तवत्स्वेव तथा ज्ञानप्रवर्त्तनात् ॥९३१॥
उपदानान्ययोरेवं व्यवधानप्रकल्पने ।
अतीव कालदूरत्वं संवित्त्योः सम्प्रसज्यते ॥९३२॥
ततश्चाव्यवधानेन नीलज्ञाने क्रमः क्वचित् ।
प्रतीतिपथमापन्नो भ्रश्यत्येव भवन्मते ॥९३३॥
सजातिव्यवधानेऽपि नीलसंवित्तिसन्ततेः ।
अनादिनिधनत्वाप्तिः प्रतीतिं प्रतिपीडयेत् ॥९३४॥
तस्मान्निरन्तरत्वं तद्वक्तव्यं वेदनेष्वपि ।
सांशत्वप्रचयाभावदोषं तच्च प्रकल्पयेत् ॥९३५॥

तथा हि— नीलमणिसंवेदनपरमाणूनां देशतो नैरन्तर्ये[1] मध्यवर्त्तिनः[2] षडंशाः प्राप्नुवन्ति षड्भिर्दिग्भागभिन्नैर्नैरन्तर्यादिति । [3]तैरपि व्यतिरिक्तैस्तस्य नैरन्तर्ये पुनरन्ये षडंशा इति, तैरेव सकलस्यापि गगनतलस्य व्याप्तेरनवकाशास्तदन्ये भवेयुः । तथा क्रमवतामपि तत्परमाणूनां देशतो नैरन्तर्ये मध्यवर्त्तिनो द्वौ देशौ पूर्वापराभ्यां द्वाभ्यां नैरन्तर्यात् , ताभ्यामपि तथा नैरन्तर्ये परौ उभौ देशाविति तैरेवानाद्यनन्तकालव्याप्तेः कालः कीदृगुपादानादिप्रबन्धस्य भवेत् ? सर्वात्मना तु नैरन्तर्ये परमाणुमात्रत्वं [4]प्रचयस्य, मणिपरमाणूनामेकत्रैवानुप्रवेशात् । सन्तानस्याप्येकक्षणत्वम् , एकत्रैव परापरतत्क्षणानां प्रत्यस्तमयात् । न च प्रकारान्तरं नैरन्तर्यस्यास्ति यत्रायं दोषो न भवेत् । कथं नास्ति ? तेषामक्रमाणामन्योन्यात्मकतया स्थूलीभावेन क्रमवताञ्च दीर्घीभावेन नैरन्तर्यस्योपपत्तेरिति चेत् ; न ; कालदैर्घ्ये क्षणभङ्गवादव्यापत्तेः, देशदैर्घ्येऽप्येवयविवत् । एकत्र [5]चलनादौ सर्वत्र तत्प्रसङ्गात् प्रचयवतामेव चलनादिः, न प्रचयस्येति चेत् ; न ; तेषां प्रचयैकरूपत्वेन रूपान्तराभावात् । भावे वा यत्रैव तेषां चलनादिस्तत्रैव प्रचयस्य तद्विकलस्य प्रतीतिप्रसङ्गात् ।

---

१ सम्बन्धे । २ परमाणोः । ३ अंशैः । ४ प्रवयस्य ता०,आ०,ब० । ५ -पपत्तिरिति आ०,ब०,प० । ६ चानादौ आ०, ब०, प० ।

तर्हि मा भूवन् तत्परमाणव तत्सन्तानाश्च, तेषामपि बाह्यवद्प्रतिभासनात्, अद्वैतं तु संवेदनमस्त्विति चेत्, न, तस्य निरंशाणुरूपस्य निषेत्स्यमानत्वात्। नीलादिभेदा धिष्ठानमेव तदिति चेत्, किमिदं तेषां तेनाधिष्ठानम्? तत्र वर्त्तनमिति चेत्, न, अवयवि-वदनुविधिकल्पादिदोषानुषङ्गात्। तदात्मत्वमिति चेत्, न, अवयविनोऽपि स्वावयवापेक्षया तदात्मसङ्गात्। स एव नास्ति, कपालव्यतिरेकेणाऽप्रतिभासनादिति चेत्, ज्ञानमपि नास्ति नीलादिव्यतिरेकेणाप्रतिभासनात्। नीलादीनामेकत्वमेव तदिति चेत्, अवयव्यपि कपालानामेकत्वमेव किन्न स्यात्? विरुद्धधर्माध्यासादिति चेत्, नीलादीनां कथम्? अशक्यविवेचनत्वादिति चेत्, न, तेनापि तदध्यासस्याप्रतिषेधात् चित्रप्रतिभासाभावापत्तेः।

किन्त्वेदमशक्यविवेचनत्वम्? युगपत्प्रतिभासनमिति चेत्; न, तथापि भेदस्यैवोपपत्तेः यौगपद्यस्य तन्निष्ठत्वात्। अपृथग्ग्राह्यत्वमिति चेत्, तदपि कुतः प्रतिपत्तव्यम्? सवेद्यत्वादिति चेत्, न, परस्पराश्रयात्—अपृथग्ग्राह्यत्वेन तस्य, ततश्चापृथग्ग्राह्यत्वस्य सिद्धेः। नीलादिभ्य एवेति चेत्, न, तैरपि परस्परस्यापरिज्ञाने तदपेक्षस्य तद्ग्राह्यत्वस्यापरिज्ञानात्। परिज्ञाने तु नार्थनिषेधनम् अर्थस्याप्यन्यतस्तदुपपत्तेः। अत एव नानुमानादपि तत्परिज्ञानम्। न चानुमानमद्वैते सम्भवति विरोधात्, अद्वैतेन तस्य नैरन्तर्येतरचिन्तायां पूर्ववदोषाच्च। तस्मात् पृथग्ग्राह्यत्वमशक्यविवेचनत्वम्। एकत्वेन प्रतिभासनमिति चेत्, न, कपालेष्वपि तद्भावेनावयविसिद्धेरप्रतिषेधात्। तदेवाह—'एतत्समानमन्यत्र' इति। एतत् परनिश्चितत्वम् अभेदप्रतिभासरूपमशक्यविवेचनत्वं समानमन्यत्रापि बहिरर्थावयवेष्वपि।

भवतु समानम्, तथापि नावस्तत्र तत्सिद्धिः, दूरविरलदेशेषु तदभावेऽपि भावादिति चेत्, तेष्वपि कुतस्तदभावे तद्भावः? सन्निवेशविशेषादेकार्थकरणात् तद्ग्रासनाप्रबोधाच्चेति चेत्, न, संवेदनभेदेष्वपि सत एव तत्सङ्गात्। न च तत्रैकार्थकरणं नास्त्येव, खरविषाणवद्वस्तुत्वापत्तेः। कार्यकारणभेदे कथमद्वैतमित्यपि न सारम्, परस्यैव दोषात्। न च तद्भेदा एव 'सन्निवेशनिबन्धनं तदवभासनम्' इत्यादिविकल्पानपाकुर्वन्ति, भेदत्वेन बाह्यभेदाविशेषात्। तदाह—संविदद्वयविदोः। असंविदुपादानमत्रापि निदर्शनार्थम्, असंविद इव संविदोऽपि भेदा नीलादये विकल्पान् परमर्शान् नाऽपाकुर्युः। कीदृशान्? नैरन्तर्यानुपबन्धिनः नैरन्तर्यं सन्निवेशविशेषम्, उपलक्षणमिदम्—तेनैकार्थकरणादिकमपि अनुपबध्नन्ति अनुपस्यापयन्ति एकप्रतिभासनमिति शीलाम् इति।

तत्त्वतश्चित्रमेकं ते विज्ञानं तत्कथं भवेत्।
निर्बाधात्प्रतिभासाच्चेद् बाह्योऽप्यर्थस्तथेष्यताम् ॥९२६॥

---

१ नीलादिभेदानाम्। २ अद्वैतसंविदभेव। ३ तदात्मतत्प्रसङ्गात्। ४ अवयवी। ५ ज्ञानम्। ६ विरुद्धधर्माध्यासस्य। ७ अन्यथा—विरुद्धधर्माध्यासाभावे। ८ भेदनिश्चयात्। ९ एकस्य। १० अभेदप्रतिभासस्वरूप—आ०, ब० प०। ११ अशक्यविवेचनत्वतः अवयवेषु अवयवसिद्धिः। १२ एकावयवस्यानेकेऽपि। १३ —र्थकारणत्वात्तदाभासप्रतिषेधस्य—आ०, ब०, प०। १४ संवेदनभेदेषु। १५ संवेदनभेदा एव। १६ —र्थं भेदि—आ०, ब०, प०।

नन्देवमपि अवयवाविष्वग्भागलक्षण एवावयवी सिद्ध्यति । न चायं यौगस्याभिप्रेतः अवयवभिन्न एव तत्र तस्याभिप्रायात् । तस्य च न सिद्धिः, तद्दूषणस्य तदवस्थत्वादिति चेत् ; भवतोऽपि चित्रैकरूपमेव संवेदनं सिद्ध्यति । न च तत्त्वाभिप्रेतम् "अविभागोऽपि बुद्ध्यात्मा"[प्र० वा० २।३।५४] इति विरोधात् । यत्त्वभिप्रेतं निरंशवेदनं तन्नाद्यापि सिद्धम्, तदप्रतिपत्तिदूषणस्याप्रतिक्षेपात् । अथ कदाचिदिदमपि तैर्वाभिप्रेतम्, यौगस्याप्यवयवाविष्वग्भावः किन्नाभिप्रेतः स्यात् ? प्रयोजनाभावादिति चेत् ; न ; बहिरर्थस्थापनस्यैव प्रयोजनत्वात् । स्याद्वादानुप्रवेशस्तु भवतोऽपि, चित्रैकचित्तवादस्यापि स्याद्वादत्वात् । अनुप्रविष्टस्यापि परित्यागाददोषो यौगस्यापि, तदविष्वग्भावस्य परित्यागात् । तत्परित्यागे न कश्चिदवयवी, प्रकारान्तरस्य प्रतिक्षेपादिति चेत् ; चित्रैकचित्तपरित्यागेऽपि न किञ्चिद्विज्ञानं निर्भागतद्रूपस्य प्रतिक्षिप्तत्वात् । ततो न बहिर्नान्तः किञ्चिदिति सर्वनैरात्म्यम् ।

न तस्यापि निष्प्रमाणा सिद्धिरतिप्रसङ्गात् । प्रमाणञ्च न तत्र वास्तवमस्ति तद्विरोधात् । अवास्तवमिति चेत् ; न तत्तस्य तत्त्वतोऽप्रतिपत्तेस्तद्विपर्ययवत् । नापि तदप्रतिपन्नमेव प्रमाणम् ; अनभ्युपगमात् । तत्प्रतिपत्तिश्च न वस्तुभूतात्प्रमाणात् ; तस्यैवाभावात् । अवस्तुभूतादिति चेत् ; न, तस्यापि तादृशात्प्रतिपत्तावनवस्थानात् ।

अपि च, किमिदमवस्तुभूतमिति ? अविद्यमानमिति चेत् ; न; तस्याऽकिञ्चित्करत्वेन प्रमाणत्वायोगात् । विद्यमानत्वेन कल्पनात्तत्त्वमिति चेत् ; कुतस्तत्कल्पनम् ? संवृतेरिति चेत् ; न; तस्या अपि मिथ्याज्ञानव्यतिरेकेणाभावात्, तस्य चोक्तनीत्या निषेधात् । संवृतेरपि संवृत्या परिकल्पनायाम् अनवस्थादोषात् । तन्न सर्वनैरात्म्यमपि तत्त्वम् ; तत्र प्रमाणस्याभावात् । भावेऽपि न तेन तस्य परिच्छेदः, प्रतिबन्धाभावात् । न हि तन्नैरात्म्येन तस्य तादात्म्यम् ; स्वयं नैरात्म्यप्रसङ्गात् । नापि तदुत्पत्तिः; तस्य सर्वशक्तिवैकल्यात् । न च योग्यत्वम् ; तस्य कार्यावसेयत्वात् । न च कार्यं तत्परिच्छेदरूपमुपलब्धम् ; तत्रैव विप्रतिपत्तेः । ततो न तस्य प्रमाणोपपन्नत्वं विचारचतुराः प्रवक्तुमर्हन्ति । ये तु ब्रुवन्ति ते विचारविकला इत्यावेदयति–

आहुरर्थबलायातमनर्थमविकल्पकाः । इति ।

आहुः प्रतिपादयन्ति । किम् ? **अनर्थम्** अर्थस्य ज्ञानज्ञेयलक्षणस्याभावम्, अर्थाभावेऽव्ययीभावविधानात् । कीदृशम् ? **अर्थबलायातम्**-अर्थ्यते तत्त्वनिरूपणार्थिभिरित्यर्थः प्रमाणम्, तस्य बलं विषयप्रतिबन्धस्तेनागतम् **अर्थबलायातम्** । कयाहुः ? **अविकल्पकाः** न विद्यते विकल्पो निवेदितन्यायेन तस्य प्रमाणविषयत्वाभावनिर्णयो येषां ते तथोक्तास्ताथागता इति ।

---

१ अवयविभि–आ०,ब०,प०। २ –सौगतस्य। ३ चित्रैकचित्रवा–आ०,ब०,प०। ४ निष्प्रमाणसि–आ०, ब०, प० । ५ सर्वनैरात्म्यविरोधात् । ६ अवास्तवप्रमाणात् । ७ तत्प्रमा–आ०, ब०, प० । ८ प्रमाणेन । ९ नैरात्म्यस्य । १० प्रमाणस्य । ११ सर्वनैरात्म्यस्य । १२ निराचारवि–आ०, ब०, प० । १३ के आहुः ।

एतेन [1]सकलविकल्पविकलसंवित्तिमात्रं तत्त्वमित्यपि प्रत्युक्तम्, तद्वैकल्पमेव नीरूपनिषेधात्मत्वे प्रमाणविषयत्वासम्भवात्, तस्य तद्रूपायातत्वं ब्रुवतामप्यविकल्पकत्वाविशेषात्। पर्युदासमेव, तत्त पर्युदस्तसकलविकल्पस्य संवेदनस्यैव तद्वैकल्यार्थत्वादिति चेत्, इदमप्यसङ्गतम्, यस्मात्–

विकल्पा यदि वेद्येरन् निषेध्येरन्न सर्वथा । ५
विकल्पाद्येन वेद्येरन्निषेध्येरन्न ते कथित् ॥९३७॥
न ह्यविद्याय तद्रूपं तदुल्लेखेन सान् क्वचित् ।
तत्रामी नेति निश्चेतुं निर्वकुम्र प्रभुर्जनः ॥९३८॥
वस्तुतस्तदविद्यत्वप्यारोपेण प्रवेदनात् ।
पेंद्वानकवत्तेषा निषेधः सम्मतो यदि ॥ ९३९॥ १०
तन्न सारं विकल्पादेवारोपस्यावकल्पनात् ।
आरोपात्तस्य कृत्तौ तु भवत्यन्योन्यसंश्रयः ॥९४०॥
अन्यारोपाद्विकल्पश्चेत्सोऽप्यन्यस्माद्विकल्पकात्।
सोऽप्यारोपात्तदन्यस्मादित्थं स्यादनवस्थितिः ॥९४१॥
परकल्पनया चेत्स्युर्विकल्पास्तन्न सङ्गतम् । १५
आत्मेतरविकल्पे यत् विकल्पविरहात्मयः ॥९४२॥
आरोपात्तद्विकल्पश्चेन्नेदानीं तन्निषेधनात् ।
तस्माद्विकल्पासंवित्तेः तन्निषेधः क्वचित्कथम् ॥९४३॥
किञ्च तद्वेदनं यत्र विकल्पः पर्युदस्यते ।
नीलादिरूपं तच्चेत्स्यात् सावकल्पकमेव तत् ॥९४४॥ २०
नानाभागात्मभावस्य तस्य स्थूलस्य दर्शनात् ।
एकानेकविकल्पस्य तत्राबद्धमवस्थितेः ॥९४५॥
तद्विकल्पव्यपेतस्य न तस्यास्ति स्वतो गतिः ।
अविवादः स्वसंवित्तेर्विवादविषयेऽप्ययात् ॥९४६॥
अन्यतोऽपि न तादृग्यात्तस्याप्यन्येन [2]तादृशात् । २५
प्रतिपत्तौ यतो दूरं प्रसरत्यनवस्थितिः ॥९४७॥
अतादृशान्न तद्विद्यात्तात्त्विकी कल्पितात्कथम् ? ।
अकल्पिताच्चेन्नन्वेवं तदेव स्याद्विकल्पकम् ॥९४८॥

---

१ सकलं वेदि-आ०, ब०, प०। २ अविशेष-आ०, ब०, प०। ३ प्रधानवत्। ४ तादृग्या आ०, ब०, प०।

तच्च सर्वविकल्पानामभावे दत्तबुद्धयः ।
बौद्धाः कथमिव ब्रूयुः विरोधापत्तिभीरवः ॥९४९॥

तदेवाह– '**आहुः**' इत्यादि । '**न**' इत्यनुवर्तनीयम् । **नाहुः** बौद्धाः । किम् ? **अनर्थम्** अर्थ्यत इत्यर्थः सकलविकल्पाभावः तस्मादन्यं विकल्पभावम् । कीदृशम् ? **अर्थबलायातम्**, अर्थ्यमानं निर्विकल्पवेदनमर्थः तं बलयति स्थापयतीति तद्बलतदधिगमः, तस्मै तदर्थम् आयातम् । कस्मान्नाहुः ? **अविकल्पकाः** विकल्पानामभावं कायन्ति कथयन्ति यत इति । ततो न सकलविकल्पातीतमपि तत्त्वम्, प्रमाणप्रणयनवैकल्यात् ।

अस्तु तर्हि विभ्रममात्रं तत्त्वम्, अन्तर्बहिश्च यथाकल्पनप्रतिपत्तेः, यथाप्रतिभासनञ्च नानैकत्वादिधर्मैर्विचारायोगात् । तस्मादविद्यमानमेव सुखनीलादि सर्वमवभासते "मायामरीचिप्रतिभासवदसत्त्वेऽप्यदोषः"[1] [प्र० वार्तिकाल० २।२१०] इति वचनादिति कश्चित्; सोऽपि न विपश्चिदेव । यस्मात्–

सत्यश्चेद्विभ्रमात्मासौ सर्वथा विभ्रमः कथम् ? ।
मिथ्या चेत्; सुखनीलादि सत्यमेव प्रसज्यते ॥९५०॥
यतोऽपि विभ्रमज्ञानं विचारात्परिकल्प्यते ।
तद्विभ्रमे कथं तस्मादन्यविभ्रमवेदनम् ? ॥९५१॥
अन्यथा तत एवान्यसर्वाविभ्रमकल्पनात् ।
विभ्रमैकान्तवादोऽयं नश्येत्पर्यन्त एव ते ॥९५२॥
तदविभ्रमपक्षे तु तद्बलात्सर्वविभ्रमम् ।
न प्राज्ञा ब्रुवते ब्रूयुर्मेपकल्पाः परं परे ॥९५३॥

तदाह–'**आहुः**' इत्यादि । कम् आहुः ? **अनर्थम्**–न विद्यतेऽर्थोऽस्मिन् इत्यनर्थो विभ्रमः तम् । कीदृशम् ? **अर्थबलायातम्**, अर्थो विचारः तस्य तत्त्वतो भावात् अन्यथा ततो विभ्रमव्यवस्थानुपपत्तेः, तस्य बलं सामर्थ्यं तेनायातम् । क आहुः ? **अविकल्पकाः** इति । अवयो मेपाः [2]ईषदसमाप्ता (कल्पप्[3]) अवयः **अविकल्पा** अनुकम्पिताः त एवाविकल्पका विभ्रमवादिन इति । न मया तत्त्वतो भावनैरात्म्यादिकं कुतश्चित्तद्बलादागतं परिकल्प्यते यदयं प्रसङ्गः, किन्तु परपर्यनुयोगेन [3]तद्विपर्यय एव निषिध्यते । निषिद्धे च तस्मिन् तदेव तत्त्वमवशिष्यते गत्यन्तराभावादिति चेत्; न; तत्पर्यनुयोगो[4]दनर्थात्तन्निषेधे अतिप्रसङ्गात् । अर्थादिति चेत्; न; तस्यैव तद्बादिनामभावात् । भावे सिद्धं स्वत एव तस्यार्थबलायातस्य परिकल्पनं तत्र चायं दोषश्चेति सूक्तम्–'**आहुः**' इत्यादि ।

---

१ –विप्रसृतिभासवदसत्त्वमप्य–ता० । "प्रतिभासवदसत्त्वेऽप्यदोष."–प्र० वार्तिकाल० । २ प्रतिषु उपलभ्यमानः कोष्ठकान्तर्गतः 'कल्पप्' इति शब्दः ईषदसमाप्तौ कल्पप्प्रत्ययस्य सूचकः । ३ बहिरर्थादिसद्भावः । ४–गात्तदनर्था–आ०, ब०, प० ।

इदमेवानेकान्तवादिनमुपहसतः सौगतस्य प्रत्युपहास दर्शयन् व्याचष्टे–

चित्रं तदेकमिति चेदिद चित्रतर ततः ॥९३॥ इति

चित्र नानारूपं तद्वाद्यं चित्रपतङ्गादि, एकम् अभिन्नम् इति एव चेत् यदि मन्यते जैनः इदम् अनन्तरोक्तं ततश्चित्रात् अतिशयेन चित्रं चित्रतरं विस्मयनीयतरम्। तथा हि–यदि नानारूपं नैकं विरोधात्, इत्यसदेव एकत्वम्, तद्भावे च न नानारूपम्, तस्यापि परमाणुरूपस्यानुद्विगोचरत्वादित्यसदेव तादृशो बहिर्यं इति भवत्येव तद्वादिनामुपहास इति भाव। परस्य तत्र प्रत्यपहासमाह–

चित्रं शून्यमिद सर्वं वेत्सि चित्रतम ततः। इति

'चित्रं नानारूपं बाह्यं मयूरादि। कीदृशम्? इदं प्रत्यक्षवेद्यं सर्वं निरवशेषं वेत्सि जानासि। कीदृशम्? शून्यं नीरूपम्। 'इदम्' इत्यत्रापि सम्बन्धनीयम्। इद परस्य वचनं ततश्चित्रतरात् अतिशयेन चित्रं चित्रतमम्, अनुपायस्यैव तदभाववेदनस्य प्रतिपादनात्। तत्प्रत्यक्षमेव तत्रोपाय इति चेत्, न, तेन तदस्तित्वस्यैव प्रतिवेदनात्। अत एवोक्तम् 'इदम्' इति।

सत्यम्, तेन तद्भावस्य वेदनम्, तच्च तदन्तर्गतस्यैवेति चेत्, न, बहिर्भूतस्यैवानुभवात्। भ्रान्तस्तदनुभव इति चेत्, न; सर्वदा तथैव भावात्। न च तादृशस्य विभ्रमः, स्वरूपेऽपि प्रसङ्गात्। तत्र प्रत्यक्षं तत्रोपायः। विरोध इति चेत्, न, तस्याप्यप्रतिपन्नस्यानुपायत्वात्। न प्रत्यक्षात्तत्प्रतिपत्तिः, तेनैकत्वाधिष्ठानस्यैव नानारूपस्योपलम्भात्। न हि सत्रैकत्वविकलस्य नानारूपस्य तद्विकलस्य चैकत्वस्य प्रत्यवभासनम्, तथा कदाचिदप्यसंवित्तेः। तदुक्तम्–

"न पश्यामः क्वचित्किञ्चित्सामान्यं वा स्वलक्षणम्॥" [सिद्धिवि०५०२] इति।

मा भूत्तेनस्तत्प्रतिपत्तिर्विचारादेव तदभ्युपगमात्। तथा हि–यदि चित्रपतङ्गादौ नीलपीतादिकमेकं न तर्हि 'नाना' इति कथं चित्रत्वम्? कथञ्चिदेवैक न सर्वथेति चेत्, तत्रापि येन स्वभावेनैकं येन च नाना तयोर्भेदे, यदेकं तदेकमेव यन्नाना तदपि नानैवेति न चित्रमेकम्, नैकं चित्रमिति कथमनेकान्तवादः? तत्रापि कथञ्चिदेव भेदाद्वयमदोष इति चेत्, न, तत्रापि 'तत्रापि' इत्यादिप्रसङ्गानिवृत्तेरनवस्थोपनिपाताच्च। न चापर्यवसितानामेव भेदाभेदस्वभावानाम् एकत्र परिकल्पनमुपपन्नं प्रतीतिप्रत्यनीकत्वात्। ततो यदि किञ्चित्पर्यवसाने नानारूपमेकं न भवति प्रथममपि न भवेदविशेषात्, इति सिद्धस्तस्य तत्परिहारलक्षणो

---

१ तत्रापर–ता०। २ चित्रमिति ना–ब्या०, ब०, प०। ३ प्रत्यक्षेण। ४ सर्वदा भवतः। ५ विरोध प्रतिपत्तिः। ६ –व्यधिष्ठा–ब्या०, ब०, प०। ७ प्रत्यक्षे। ८ "नान्तरं तु पश्यामः ततोऽनेकान्तसाधनम्" इत्युत्तरार्धम्। ९ प्रत्यक्षात्।

विरोधः, तस्य बहिरर्थाभावप्रतिपत्तावुपायत्वञ्च । तेनैकस्यानेकत्वे अनेकस्य चैकत्वे निषिद्धे परिशिष्टस्याप्रतिवेदनादभावोपपत्तेरिति चेत् ; न; विचारस्याप्रमाणत्वे ततो विरोधस्याप्रतिपत्तेः ।

प्रामाण्यञ्च न प्रत्यक्षत्वेन ; ततो विरोधपरिज्ञानाभावस्य निवेदितत्वात् । अनुमानत्वेनेति चेत् ; तत्र तर्हि विरोधप्रतिबद्धं किञ्चिल्लिङ्गमङ्गीकर्त्तव्यम् अन्यथा अनुमानस्यानुत्पत्तेः । तत्प्रतिबन्धस्य च न प्रत्यक्षात्परिज्ञानम् ; तस्य विरोधाविषयत्वात् । न च विरोधमजानता कस्यचित्प्रतिबन्धः शक्यपरिज्ञानः, तन्निष्टस्य तस्य सत्येव तत्परिज्ञाने परिज्ञानोपपत्तेः । विचारादेव तस्यापि परिज्ञानं तेन विरोधस्यापि प्रतिपत्तेरिति चेत् ; न ; परस्पराश्रयात्–प्रतिबन्धपरिज्ञानाद्विचारः, ततश्च तत्परिज्ञानमिति । विचारान्तरात्तत्परिज्ञानमिति चेत् ; न ; तेनापि विरोधस्याग्रहणे तदयोगात् । ग्रहणे तु प्रकृतविचारवैयर्थ्यम् । अनुमानत्वे च विचारान्तरस्य तद्धेतोरपि प्रतिबन्धपरिज्ञानमन्यतो विचारादित्यव्यवस्थितो विचारः, स कथं नाम विरोधमुपवृंहयेत् ? "स्वयं पतन्नोद्धरते पतन्तम्" [ ] इति न्यायात् । ततो नानुमानत्वेनापि विचारस्य प्रामाण्यम् । अतो विकल्पमात्रमेवेदमवस्तुसंस्पर्शिदुरागमानुरक्तानां रक्तपटानाम् । न चातः क्वचिद्विरोधस्यान्यस्य वा प्रतिपत्तिः । न चैकानेकस्वभावयोरपरावपि तत्स्वभावौ, अपि तु चित्रपतङ्गे य एव नीलादीनां परस्परमेकस्वभावः स एव तयोरपि तत्स्वभावः, य एव च तेषामन्योन्यं नानास्वभावः स एव तयोरपि तत्स्वभावः, तथैव परिस्फुटज्ञानवपुषि निरुपप्लवतया प्रत्यवभासनात्, तत्कथं तदवलम्बनेनानवस्थापरिकल्पनमुपपन्नम् । तन्न विरोधादप्येकानेकात्मनो बहिर्भावस्याभावपरिज्ञानं तस्यैवाप्रतिपत्तेः ।

नापि वैयधिकरण्यात् ; तस्यापि विरोधासिद्धावसिद्धेः तन्मूलत्वात् । नाप्युभयदोषादपरिज्ञानलक्षणात् ; तत्परिज्ञानस्य प्रत्यक्षत एव प्रतिपादनात् । नापि साङ्कर्यसंशयाभ्याम् ; कथञ्चिदसाङ्कर्येणैव निःसंशयं तत्प्रतिपत्तेः । अतो निर्बाधप्रतिपत्तिविषयस्याभावमनुपायमाचक्षाणो भवत्येवातीवोपहासविषय इति युक्तमुक्तम्–'**चित्रं शून्यम्**' इत्यादि ।

ततो न यथोक्तं बाह्यमसत्, नापि विभ्रममात्रम्, सकलविकल्पविकलं वा, तत्प्रतिषेधस्याभिहितत्वात् । नापि संवृतिमात्रम्, स्पष्टप्रतीतिविषयस्य तत्त्वानुपपत्तेः । तदेवाह–

तस्मान्नैकान्ततो भ्रान्तिर्नासत्संवृतिरेव वा ॥९४॥ इति ।

सुबोधमेतत् । **वा**शब्दादनुक्तसमुच्चयः, तेन 'न सकलविकल्पविकलम्' इत्यपि प्रतिपत्तव्यम् ।

भवतु तर्हि तदेकव्यक्तिसंविन्मात्रमद्वैतमिति चेत् ; तद्यदि चित्रैकरूपम्, "**चित्रप्रतिभासाप्येकैव बुद्धिः**" [प्र० वार्तिकाल० २।२१९] इति वचनात् ; तदाऽनुकूलमागतम्, बाह्यस्यापि तद्रूपस्यानिवारणात् । न च बाह्यमपरिज्ञानान्नास्त्येव स्वतस्तस्यापरिज्ञानेऽपि परतः

---

१ सम्बन्धस्य । २ –व्यवस्थाविचारस्य आ०, ब०, प० । ३ बौद्धानाम् । ४ –ज्ञाने तस्य आ०, ब०, प० । ५ तदाह आ०, ब०, प० । ६ –क्तः समुच्चीयते तेन सकल–आ०, ब०, प० ।

परिज्ञानात् । तस्य[1] च स्वपरविषयस्वभावद्वयाधारस्याभ्युपगमात् । 'तत्स्वभावद्वयस्याप्यपरेण तद्द्वयेन तस्याप्यपरेण तेन परिज्ञानमित्यनवस्थानम्' इत्यपि चोद्यं न चित्रैकवादिनः सम्भवति [2]तत्रापि प्रसङ्गात् ।

भवतु बाह्यस्य परिज्ञानम्, तथापि कथं चित्रस्यैकत्वम् ? कथं ज्ञानस्य ? अशक्यविवेचनत्वादिति चेत्, न, बहिरपि तद्भावस्य निवेदितत्वात् । [3]अभिन्नयोगक्षेमत्वादिति चेत्, किमिदं तत्त्वादिति ? सहोत्पत्तिविनाशत्वात्, सहोत्पत्तिसंवेदनत्वाद्वेति चेत्, न, तस्य सन्तानान्तरज्ञानैर्व्यभिचारित्वेनागमकत्वात् । अस्ति हि [4]तेषां तत्त्वं न चैकत्वमिति । [5]तान्येव न सन्ति अपरिज्ञानात् तत्कथं तेषु तत्त्वम् ? न हि तेषां प्रत्यक्षतः परिज्ञानम्, शरीरवत्तत्रापि संक्षयायभावापत्तेः । नाप्यनुमानात्, लिङ्गाभावात् । व्याहारादि लिङ्गमिति चेत्, कुत एतत् ? तस्य संवेदनकार्यत्वेनात्मनि प्रतिपत्तेरिति चेत्, तर्हि [6]तस्य संवेदनस्य चैकमेव ज्ञानमभ्युपगन्तव्यम्– अन्यथा 'संवेदनस्य व्याहारादिः कार्यम्, तस्य संवेदन कारणम्' इति परिज्ञानासम्भवात् । भवत्विति चेत्, न, तस्यापि[7] संवेदनसमयस्य व्याहारादौ तत्समयस्य च संवेदने प्रवृत्त्यभावात्, 'तत्काले भाविनि भूते' वा स्वयमभावात् । अतत्कालेन च तत्प्रतिपत्तौ अतिप्रसङ्गात् । न चोभयकालत्वमेकस्य, क्षणिकत्वात् । भवतु वा [8]तस्य [9]तत्कार्यत्वम्, तथापि न गमकत्वम्, गाढत्वापादौ साध्याभावेऽपि भावात् । अन्य एव स व्याहारादिः, न च तत्समभिव्याहृतलिङ्गस्यापि तत्रागमकत्वम्, गोपालघटिकाधूमव्यभिचारात् पर्वतधूमस्यापि पावकं प्रत्यगमकत्वापत्तेरिति चेत्, भवत्वेव तथापि कथं तस्य सर्वत्र तत्कार्यत्वम् ? कचित्तथा दर्शनादिति चेत्, न ; तेन तत्रैव[10] तत्प्रतिपत्तिसम्भवान्न सर्वत्र तस्य तत्राऽनुवृत्तेः । व्याप्तिज्ञानादिति चेत्, कुतस्तस्योत्पत्तिः ? कचित्तथा दर्शनादिति चेत्, न, [11]शालूकस्यापि सर्वत्र [12]गोमयकार्यत्वपरिज्ञानापत्तेः कचित्तथादर्शनस्याऽविशेषात् । न चैवम्, [13]अन्यत्रान्यतोऽपि[14] तस्योत्पत्तेः । तज्ज्ञानतः सर्वज्ञत्वापत्तेश्च । तस्मादप्रतिपन्नव्याप्तिकत्वान्न व्याहारादेस्तेषामनुमानम्, इत्यनुपलम्भात् न सन्त्येव सन्तानान्तरज्ञानानीति न तैरभिन्नयोगक्षेमत्वस्य व्यभिचार इति चेत्, कोऽयमनुपलम्भो नाम ? उपलम्भनिवृत्तिमात्रमिति चेत्, न, ततो गगनकुसुमादिव कस्यचिदप्यप्रतिपत्तेः । अन्योपलम्भ इति चेत्, तेनापि कथं भवेत्प्रतिपत्तिः ? तद्विविक्ततया तद्विषयस्योपलम्भादिति चेत्, अस्तु तर्हि तत्रैव तदभावो न सर्वत्र, अन्यथा प्रत्यक्षादेव स्वर्गादिविविक्तभूतलादिविषयात् सर्वत्र

---

१ क्षणस्य । २ चित्रज्ञानेऽपि । ३ "योगः अप्राप्तस्य विषयस्य परिच्छेदलक्षणा प्राप्तिः, क्षेमः तदर्थक्रिया सुखसंवेदनलक्षणं परिपालनम् ।"–हेतुबि० टी० पृ० ३६ । "अत्यन्तभेदानुपपत्तिः योगः, कथञ्चिदभेदानुपपत्तिः क्षेमः ।"–प्र० वा० स्व० । ४ सन्तानान्तरज्ञानानाम् । ५ सन्तानान्तरज्ञानानि । ६ व्याहारादेः । ७ ज्ञानस्यापि । ८ व्याहारादिकाले भाविनि । ९ संवेदनकाले भूते । १० व्याहारादेः । ११ संवेदनकार्यत्वम् । १२ क्वचित् दृष्टत्वात् तत्रैव । १३ इन्दीवरस्तम्भस्यापि । १४ "पद्मात्तामरसं शशाङ्क वदनैरिन्दीवरं सौमवात् आताम्रैरिरहेःफलादपि मणिर्भोभिर्जितो रोचनाः । इति पुराणवचनम्"–स्या० दि० । १५ सहकारितो । १६ पद्मादपि ।

स्वर्गाद्यभावप्रतिपत्तेः चार्वाकस्यापि किं तत्र प्रमाणान्तरपरिकल्पनया ? यत इदं शोभेत—

"प्रमाणान्तरसद्भावः[1] प्रतिषेधाच्च कस्यचित् ॥" [ ] इति ।

कथं वा क्वचिदपि तेषामदृश्यानां तस्मादभावप्रतिपत्तिः ? 'दृश्यानुपलम्भस्यैव[2] गमकत्वम्' इति स्वमतव्याघातात् । इदमपि भेदवादिन एव मतं नाद्वैतवादिनः तेनानुपलम्भमात्रादभावप्रतिपत्तेरभ्युपगमादिति चेत् ; न ; एवं नीलेनान्याकारस्य तेन नीलस्यानुपलम्भात्, अभावप्रतिपत्तावभिन्नयोगक्षेमत्वस्याश्रयासिद्धिप्रसङ्गात् । नीलेतरयोरन्योन्यमनुपलम्भेऽपि स्वयमुपलम्भान्नाभाव इति चेत् ; न ; सन्तानान्तरेष्वपि स्वयमुपलम्भस्य भावात् । सोऽपि परेणानुपलभ्यमानो नास्त्येवेति चेत् ; न ; नीलेतरयोरपि स्वयमुपलम्भस्य परस्परानुपलम्भेनाभावापत्तेः । तन्नानुपलम्भमात्रादपि तदभावज्ञानम् ।

कथं वा तन्मात्रात्तदभावज्ञानज्ञानम्[3] ? कथं च न स्यात् ? तन्मात्रज्ञानेन तदभावज्ञानस्य तज्ज्ञानेन च तन्मात्रस्याप्रतिपत्तेः, तत्काले तस्याभावात्, उभयसमयव्यापिनश्च ज्ञानस्यानभ्युपगमात् । उभयोश्च कुतश्चिदपरिज्ञाने तद्धेतुफलभावस्याशक्यपरिज्ञानत्वात् । सत्यम् ; न वस्तुतोऽनुपलम्भस्य तज्ज्ञानहेतुत्वम् "अशक्तं सर्वम्" [प्र० वा० २।४] इति वचनात्, संवृत्या तु तदभ्युपगम्यते "संवृत्यास्तु यथा तथा" [प्र० वा० २।४] इति वचनादिति चेत् ; न ; व्याहारादेरपि तयैव[4] सन्तानान्तरपरिज्ञानहेतुत्वापत्तेः । संवृतिबलेन[5] तत्परिज्ञानमपरिज्ञानमेवेति चेत् ; न ; तेन[6] तन्निषेधस्याप्यनिषेधत्वप्रसङ्गात् ।

अपि च, केयं संवृतिर्नाम ? तत्र हेतुफलभावमध्यारोपयन् कश्चिन्मिथ्याविकल्प इति चेत् ; न ; तस्यापि हेतुसमसमयस्य तत्फले तत्फलसमसमयस्य च हेतौ अप्रवृत्तेः, उभयसमसमयस्य च तस्यानभ्युपगमात्, कथं ततोऽप्यनुपलम्भस्य तद्धेतुत्वम् ? सत्यम् ; न तस्याप्युभयविषयत्वं वस्तुतः संवृत्यन्तरेणैव परिकल्पनादिति चेत् ; न ; तेनापि हेतुतत्फलयोरपरिज्ञाने विकल्पतद्विषयत्वस्याशक्यारोपणत्वात् । तस्यापि तदन्तरेण तद्विषयत्वपरिकल्पनान्न दोष इति चेत् ; न ; तत्रापि 'तेनापि' इत्याद्यनुवन्धादावृत्तिमतोऽनवस्थादोषस्यापत्तेः । विचाराधिष्ठिता न सम्भवत्येव संवृतिः[6], लोकबुद्ध्यैव केवलमभ्युपगम्यत इति चेत् ; न सम्यगेतत् ; लोकस्यैव सन्तानान्तरस्वभावस्याभावात् । तदयं लोकमेवानभ्युपगच्छन् तद्बुद्ध्या संवृतिमङ्गीकरोतीति कथमनुन्मत्तप्रज्ञः ?

भवतु वा संवृतिः, तथापि तया तदभावज्ञानस्य किमारोपयितव्यम् ? अनुपलम्भ-

---

१ "तदुक्तं धर्मकीर्तिना—प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः । प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥" प्र० परी० पृ० ६४ । प्रश० कन्द० पृ० २५५ । प्रमाणमी० पृ० ८ । २ "प्रतिषेधसिद्धिरपि यथोक्ताया एवानुपलब्धेः—यथोक्ताया दृश्यानुपलब्धिस्तत एव ।"—न्यायवि०, टी० पृ० ४३ । प्रमाणवा० स्ववृ० १।५ । प्रमाणवार्तिकाल० ४।२६२ । ३ —दभावज्ञानं क—आ०, ब०, प० । "अनुपलम्भमात्रात् सन्तानान्तराभावज्ञानमभूदिति ज्ञानम्"—ता० टि० । ४ संवृत्यैव ।। ५ संवृतिबलेन । ६ "सत्याभासः परन्तत्र न तत्त्वं परमार्थतः । विचार्यमाणशून्यत्वे संवृतिः सेति गीयते ॥"—प्र०वार्तिकाल० पृ०४८ ।

कार्यत्वमिति चेत्, न, असति तस्मिन् तदारोपणे तस्य निर्विषयत्वप्रसङ्गात्। सत्येवेति चेत्, तदापि किं तस्य प्रयोजनम्? [1]तदभावप्रतिपत्तिरिति चेत्, न, तस्यास्तत्सत्तामात्रेणैव[2] भावात् तदभेदात्। तत्र नित्यत्वस्य निषेधः, तस्य निर्हेतुकत्वे अवश्यं तत्प्रसङ्गादिति चेत्, न सम्यगेतदपि, यस्मात्—

नित्यत्व तस्वभावश्चेन्न कृतश्चिन्निषिध्यते । ५
तेनैव तन्निषेधे हि निषिद्धं स्यादभेदत ॥९५४॥
तदर्थं क्षाममन्विच्छोर्मूलच्छेदस्तथागत ।
नित्यत्वहानिकामस्य क्षाने तद्धान्युपस्थितेः ॥९५५॥
तद्रूप भेदनित्यत्वं नित्यस्य दैवतो गौतम् ।
तन्निषेधाय तस्यार्थं तैस्कार्यत्वाधिरोपणम् ॥९५६॥ १०
आरोपितश्च नित्यत्वं तत्र नास्त्येव निश्चयात् ।
निश्चयात्मानुमानश्च प्रसिद्धं बौद्धशासने ॥९५७॥
स्वरूपे निश्चयस्तस्य नास्तीत्यपि न युक्तिमत् ।
विना तेनार्थनिर्णीतिर्नेति पूर्वं निरूपणात् ॥९५८॥
तदयुक्तस्तदारोपो वैफल्यात्संवृतेरयम् । १५
दोषो न सौगतस्यास्ति वस्तूच्छान्तानुवादिनः ॥९५९॥
न चासौ संवृतिः शक्या निषेद्धुं हेतुसम्भवात् ।
तत्सम्भवोऽपि तद्धेतोस्तदनादिक्रमागतात् ॥९६०॥
इति चेत् युक्तमेवेदं कार्यकारणतास्थितौ ।
सा तु नास्ति त्वयाप्युक्त सर्वमित्यभिधायिनः" ॥९६१॥ २०
संवृतीना प्रवाहेऽपि संवृत्या" यदि तस्थितिः ।
कथमेवमवस्थानं यतस्तन्निर्णयो भवेत् ॥९६२॥
तस्मादयुक्तमेवेदं कीर्तितं धर्मकीर्तिना ।
"निष्पत्तेरपराधीनमपि कार्यं स्वहेतुना ॥९६३॥
सम्पद्यते कल्पनया किमकार्यं कथञ्चन ॥ [प्र० वा० २।२६] २५
इति कल्पनया तत्सम्बन्धस्यैवमसम्भवात् ॥९६४॥

अपतु स्वरूपमेव तस्य "तथाऽऽरोप्यमिति चेत्, न, अनुपलम्भस्य वैरूप्यापत्तेः। संवृतित एव तत्स्वरूपस्य[8] भावात्। भवतीति चेत्, न, अनुपलम्भवादिनोऽसाधनाङ्गवादित्येन निग्रहोपनिपा-

---

१ सन्तानान्तराभावे। २ सन्तानान्तराभावप्रतिपत्तिः। ३ सन्तानान्तराभावसत्तामात्रेणैव। ४ तस्माद् इत्ये। ५ तदभावप्रसङ्गस्य। ६ तदभावप्रसङ्गमेव। ७ एवे. आ०, ब०, प०। ८ अनुपलम्भकार्यत्वमिथ्यारोपणम्। ९ स्वरूपनिषेधेन। १० प्र० वा० २।२। ११ संवृतावपि तत्र स्थितेः आ०, ब०, प०। १२ संवृत्या। १३ —स्वा त्मन्या—आ०, ब०, प०।

तात्। कथं वा ततस्तत्त्वतः सन्तानान्तराभावस्य परिज्ञानम्? आरोपितस्वरूपस्य तात्त्विकप्रयोजननिबन्धनत्वानुपपत्तेः तोयादिवत्। तदप्यतात्त्विकमेवेति चेत्; न तर्हि तत्त्वतस्तदभाव इति कथन्न [1]तैरभिन्नयोगक्षेमत्वस्य व्यभिचारः? नायं दोषः; [2]तेषामप्येकत्वेन पक्षीकरणादिति चेत्; न; व्यभिचारविषयस्य तदयोगात्, अन्यथा न किञ्चित्तत्पुत्रत्वादिकमपि व्यभिचारि भवेत्, तत्रापि व्यभिचारविषयस्य पक्षीकरणात्। को वा विरोधो यन्नानात्व एव [3]तेषामभिन्नयोगक्षेमत्वं न भवेत्, अदृश्यात्मना तेन साक्षाद्विरोधद्वयस्यापि[4] सर्वज्ञत्वेन वचनादेरिवासिद्धेः? नानात्वविरुद्धेनैकत्वेन तस्य[5] व्याप्तत्वात् पारम्पर्येण [6]तेनापि विरोध इति चेत्; क्व पुनरेकत्वेन तद्व्याप्तिः प्रतिपन्ना? प्रकृत एव चित्रज्ञान इति चेत्; तत्र यद्येकत्वप्रतिपत्तिरन्यतः, व्यर्थमभिन्नयोगक्षेमत्वम्, तस्यापि तदर्थत्वात्[7] तस्याश्चान्यत एव भावात्। अत एव तत्प्रतिपत्तौ परस्पराश्रयः—निश्चिते नानात्वविरोधे ततस्तत्प्रतिपत्तौ[8] तेन तद्व्याप्तिनिश्चयः, ततश्च[9] तद्विरोधनिश्चय इति। तन्नाभिन्नयोगक्षेमत्वं हेतुः, संशयितविपक्षव्यतिरेकत्वात्, तदपि नानात्वेन साक्षात्परम्परया च [10]विरोधासिद्धेः व्यभिचारनिश्चयाद्वा, निश्चितो ह्यत्र व्यभिचारः सन्तानान्तरज्ञानेषु व्याहारादिभेदाद् भिन्नतयैव प्रतिपन्नेषु हेतुभावात्।

यत्पुनरत्रोक्तम्—'तद्भेदस्य साकल्येन व्याप्तिपरिज्ञाने तत्परिज्ञानवतः सर्वज्ञत्वम्, देशतस्तत्परिज्ञाने न गमकत्वं व्यभिचारसम्भवात्' इति; तदपि न युक्तम्; अभिन्नयोगक्षेमत्वेऽपि तथा प्रसङ्गात्। नायं दोषः, तत्र पक्ष एव व्याप्तिग्रहणादिति चेत्; न; व्याहारादिभेदस्यापि [11]तत्रैव तद्ग्रहणात् गमकत्वोपपत्तेः व्यभिचारदोषस्य परिहरणात्। तन्नाभिन्नयोगक्षेमत्वादेकत्वं संवेदनाकाराणाम्।

यत्पुनः—अभेदप्रतिभासादेव निर्बाधात् तथा[12] चेत्; अर्थावयवानामप्येकत्वं तदविशेषात्। प्रतिपादितञ्चैतत्—**'एतत्समानमन्यत्र'** इति। तदेव विस्मरणशीलानामनुग्रहार्थमावेदयन्नाह—

अतश्चार्थबलायातमनेकात्मप्रशंसनम्। इति।

अत्र **च** शब्दो भावनायाम्। **अतः** अस्मात् एकान्तविभ्रमादेर्यदन्यत् **'अन्यत्र'** इत्यनुवर्त्तमानस्य विभक्तिपरिणामेन सम्बन्धात्। किं तद्? **अनेकात्मप्रशंसनम्**, अनेकात्मनः अनेकस्वभावस्य ज्ञानस्यैव नार्थस्यानभ्युपगमात्, प्रशंसनं प्रतीतिबलेन स्तवनम्। तत्किम्? अर्थस्य बाह्यस्य घटादेर्बलं स्वरूपादप्रच्यवनं तस्मै तदर्थम् आयातम् आगतम् **अर्थबलायातम्**। तथा हि—

चित्रमेकं यथा ज्ञानं प्रतीतिबलतो मतम्।
मन्यतां तद्वदर्थोऽपि तत एवानुपप्लवात् ॥९६५॥

---

१ सन्तानान्तरज्ञानैः। २ सन्तानाज्ञानानामपि। ३ सन्तानान्तरज्ञानानाम्। ४ सहानवस्थापरस्परपरिहारस्थितिलक्षणविरोधद्वयस्यापि। ५ अभिन्नयोगक्षेमत्वस्य। ६ नानात्वेनापि। ७ एकत्वप्रतिपत्त्यर्थत्वात्। ८ एकत्वप्रतिपत्तौ। ९ एकत्वव्याप्तत्वात्। १० विरोधसिद्धेः आ०, ब०, प०। ११ पक्ष एव व्याप्तिग्रहणात्। १२ एकत्वं संवेदनाकाराणाम्।

न चैकमेकरागादावित्यादिरपि[1] दोषवत् ।
एकानेकस्वभावेऽर्थे चित्रवाय न कल्पते ॥९६६॥
कल्पते यत्र यौगोक्ते सोऽस्माभिरपि नेष्यते ।
त दूषयन्नतोऽस्माकं प्रतिहस्तायते भवान् ॥९६७॥
चित्रैकज्ञानवत्तत्र सशयादपि दूषणम् । ५
प्रवर्त्तते न निर्बाधनिर्णयाश्लेषमूषिते ॥९६८॥
अद्वैतवेदनं तस्मादेकानेकात्मकं ब्रुवन् ।
न प्रत्यर्थहिरर्थस्य तादृश प्रतिपीडने ॥९६९॥

भवतु तर्हि तदेकमेव न चित्रम् ,

"[2]किं स्यान्ना चित्रतैकस्यां न स्यात्तस्या मतावपि । १०
यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥" [प्र०वा०२।२१०]

इति वचनादिति चेत् , न , तादृशस्य कदाचिदपि तस्याननुभवात् । अननुभाव्यमपि लिङ्गाद्यवगम्यत इति चेत् , न ; तदप्रतिषेधने तत्कार्यस्वभावतया कस्यचिदपि परिज्ञानायोगात् , अतत्कार्यस्वभावस्य लिङ्गत्वानभ्युपगमात् । सुगतसन्निधानात्तद्यवगम्यत इति चेत् , न , अद्वैतवादे सुगतस्यैवाभावात् । भावेऽप्युत्तरमाह— १५

न जायते न जानाति न च किञ्चन भाषते ॥९५॥
बुद्धः शुद्धः प्रवक्तेति तत्किलैषां सुभाषितम् । इति ।

बुद्धः सुगतो न ज्ञायते न विनेयैः प्रतीयते तस्य बुद्धिरूपतयाऽनन्यवेद्यत्वात् "तस्या नानुभवोऽपरः" [प्र० वा० २।३२७] इति वचनात् । अपरानुभवभावे वा तद्वतोऽपि सर्वदर्शित्वं सकलविषयाकारगर्भस्य तेन परिज्ञानात् । तस्याप्यपरानुभवभावे तद्वतोऽपि २० सर्वदर्शित्वम् । तत्राप्येवमिति सर्वस्यापि बुद्धमनुभवतो विनेयवर्गस्य तदनुभवाधिष्ठानस्यापि सर्वदर्शित्वान्न किञ्चिद् बुद्धेन ? बुद्धवदेव तस्यापि स्वत एव [3]तत्त्वपरिज्ञानात् । तन्न तस्यापरस्मादनुभवात्परिज्ञानम् । अनुमानादिति चेत् , न , ततोऽपि तस्य स्वरूपप्रतिवेदने पूर्ववदोषात् , अन्यथा [4]तद्वैयर्थ्यात् । समारोपव्यवच्छेदान्न तद्वैयर्थ्यमिति चेत् , किं तद्व्यवच्छेदेन ?

---

१ स्याद्वा० इत्ये० ९१ । २ —वादेऽपूर्वे आ०, ब०, प० । ३ "अनु यदि सा चित्रता बुद्धावेकत्वं स्यात् तदा च चित्रमेकं ज्ञानं व्यवस्थाप्येत तदा किं दूषणं स्यात् ? आह—न स्यात्तस्यां मतावपि । न कश्चिद् दोषः तस्यां मतावभ्युपगम्यमानायां चित्रता स्यात् । अनेकपुरुषसन्तानितेव । कथं तर्हि प्रतीतिरित्याह—यदीदं स्वयमर्थानां रोचते तत्र के वयम् । यदीदम् अद्वैतेऽपि तद्भ्युपगमनयनानां मायामात्रायां नीलादीनां स्वयमपरप्रेरणया रोचते तत्र तथाप्रतिभासे के वयमस्माकं वा किं वक्तुम् ? तस्मात्तु न प्रतिभासतो वैचित्र्यमात्मीयेष्टम् ।"—प्र० वा० म० वृत्ति० २।२१० । ४ तत्त्वारि—आ०, ब०, प० । ५ अनुमानवैयर्थ्यात् ।

सत्यपि तस्मिन् तत्स्वरूपस्याप्रतिवेदनात्। प्रतिवेदने तु सिद्धं तद्वतोऽपि सर्वदर्शित्वं सकलार्थाकारप्रतिबद्धस्य बुद्धस्वरूपस्य तेन प्रत्यवलोकनात्। तदुक्तम्-

"समारोपव्यवच्छेदात्तत्त्वसिद्धिमनिच्छताम्।
अनुमानमनर्थं स्यादन्यथा सकलग्रहः॥" [ ] इति।

ततश्च तदवगत्यर्थं पूर्ववद्बुद्धवैयर्थ्यम्, ततो न कुतश्चिदपि तस्य परिज्ञानमित्युपपन्नमिदं **'बुद्धो न ज्ञायते'** इति।

तदनेन सुगतसन्निधानात्तत्त्वज्ञानमिति प्रत्युक्तम्; सुगतस्यापरिज्ञाने तत्सन्निधानस्यापि दुष्परिज्ञानत्वात्। अपरिज्ञातमेव तत्[2] तत्परिज्ञानस्य निबन्धनम् चक्षुरादिवद्रूपादिपरिज्ञानस्येति चेत्; भवेदेवं यदि रूपादिज्ञानवत् निरंशवेदनविषयं [3]किञ्चिद्विज्ञानं विप्रतिपत्तिमलोपलेपविकलेन प्रज्ञाप्रकाशेनोपदर्शितं भवेत्। न चैवम्, सर्वदा प्राणादिभेदमलाधिष्ठानस्यैव तस्य परिज्ञानावलोकनात्। प्रतिपादितं चैतत् [4]प्राक्-**'प्रतिसंहारवेलायां न संवेदनमन्यथा'** इति। तदनेन तत्त्वज्ञानात्तत्सन्निधानपरिज्ञानं प्रत्युक्तम्; उक्तनीत्या तत्त्वज्ञानस्यैवाप्रतिपत्तेः। तन्न तत्सन्निधानात्तदवगतिः।

तद्वचनाद् "अद्वयं यानमुत्तमम्" [ ] इत्यादेस्तदवगतिरित्यप्ययुक्तम्; [5]तदपरिज्ञाने तद्वचनस्याप्यशक्यपरिज्ञानत्वात्। कथं वा तस्यैव वचनं प्रमाणं न रथ्यापुरुषादेरपि? तस्यैव परिशुद्धज्ञानत्वादिति चेत्; न; स्वरूपापेक्षया रथ्यापुरुषादेरपि तत्त्वात्। न सकलविषयापेक्षयेति चेत्; न; बुद्धेऽपि तदभावात्। न हि तस्यापि सर्वत्र परिशुद्धज्ञानं समकालभाविन्यभावात्, [6]तस्याकारणत्वेन तद्विषयत्वात्। तदपि कारणमेव अविनाभावादिति चेत्; न; तस्यापि विषयत्वे "नानोऽर्थः स्वधिया सह" [प्र०वा०२।२४६] इत्यस्य विरोधात्। भवदपि तस्य सर्वार्थज्ञानं निराकारं चेत्; न [7]तस्यैकस्वभावस्य देशकालस्वभावभिन्नानेकवस्तुविषयत्वम् एकस्वभावज्ञानविषयत्वेन सर्वस्याप्येकत्वापत्तेः, अन्यथैकस्वभावहेतुकत्वेऽपि कार्याभेदप्रसङ्गाभावात् न नित्ये नानाकार्यविरोधः स्यात्। अनेकस्वभावमेव भवतु तदिति चेत्; कथं तदेकम्, प्रतिस्वभावं विरुद्धधर्माध्यासेन भेदोपनिपातात्? अन्यथा क्रमेणापि तदेकमेवानेकस्वभावं प्राप्नुयात्। शक्यविवेचनत्वान्नेति चेत्; किमिदं विवेचनं यच्छक्यमुच्यते? कालकृतस्तत्स्वभावानां क्रम इति चेत्; न; [8]युगपदपि देशकृतस्य [10]तस्य भावात्। ततो[11] नात्यन्ताय भेदः, तेषामभेदस्यापि प्रतिभासनादिति चेत्; न; कालभिन्नानामप्यभेदानुगमस्यावलोकनात्। मिथ्यैव तेषां [13]तदनुगमो विकल्पोपनीतत्वादित्यपि नोत्तरम्; देशभिन्नानां [13]तदनुगमस्यापि [विकल्पोपनीतत्वात्, स्पष्टप्रत्ययविषयत्वान्नेति

---

१ -ज्ञातत्वा-आ०,ब०। २ सुगतसन्निधानम्। ३ -ज्ञाननिब-आ०, य०, प०। ४ किञ्चिज्ज्ञानं आ०, ब०,प०। ५ पृ०३१७ पं०२२। ६ सुगतापरिज्ञाने। ७ समकालभाविनोऽर्थस्य। ८ सुगतज्ञानस्य। ९ क्रमयुगप- आ०, ब०, प०। १० क्रमस्य। ११ देशकृतक्रमात्। १२ अभेदानुगमः। १३ अभेदानुगमस्यापि।

चेत्, अस्ति कालभिन्नानामपि] स्पष्टप्रत्ययविषयत्वम्। निरूपयिष्यते च तत्। अनेन एकान्तभेदप्रतिषेधेन विवेचनमिति प्रत्युक्तम्, प्रत्यक्षतस्तदभावात्। अनुमानस्य च तत्पूर्वकतया तत्राप्रवृत्तेः। नापि सन्तानान्तरं प्रति नयनं विवेचनम्, तस्याप्रतीतेः अनभ्युपगमाच्च। नाप्यन्यवेद्यत्वम्, युगपद्भाविनामिव क्रमेणभुवामपि तेषां परेण प्रत्यक्षेणाग्रहणात्। अनुमानेन ग्रहणस्य चोभयत्राविशेषात्। ततो भवत्येव क्रमवतामपि तेषाममेदः, तद्भेदस्यामेदप्रत्यनीकत्वाभावत्वात्। तदुक्तम्—

"अन्तर्बहिर्मुखाकारादि संविद न भिनत्ति चेत्।
[2]अक्रमं न क्रमाधीनं भिन्द्यादेव सुखादिकम्॥" [सिद्धिवि०प्र०परि०] इति।

न चेदमुचितं भवताम्, बुद्धस्यैकान्ततः प्रतिसमयमक्षुण्णत्वेन सदात्मत्वानुपपत्तेः। तन्न तत्क्षानस्य क्रमवदक्रमेणाप्यनेकस्वभावत्वमिति न तेन तस्याशेषपर्ययेत्व निराकारेण।

नापि साकारेण, तस्याप्याकारापैक्रमात्रविषयत्वेनान्यत्राप्रवृत्तेः। सर्वमपि तत्राकारापैक्रमेयेति चेत्, उच्यते—पूर्वापरसमयभाविनो भावा नीलादिरूपमिव कालक्रममप्यात्मनो यदि न तत्र समर्पयन्ति कथं तस्यै वस्तुपयत्वं यतस्तेनाशेषज्ञत्वं बुद्धस्य? कथं वा क्वचिदुपायोपेयभावस्य परिज्ञानम्? तस्य कालक्रमालिङ्गितत्वेन तदनवबोधे दुरवबोधत्वात्। योगपद्यालिङ्गितत्वे तु सैद्धाव एव न भवेत् कस्यचिदनिष्पन्नस्यानुपायत्वात्, निष्पन्नस्यापि पुनरनुपयोगात्, स्वनिष्पत्तिसमय एवोपेयस्यापि निष्पत्तेः। अन्यनिवारणादुपायत्वं न निष्पादकत्वादिति चेत्, कुतस्तर्हि तन्निष्पत्तिः? न कुतश्चिदिति चेत्, न, [3]निरयसत्त्वादिप्रसङ्गात्। अन्यत इति चेत्, न, तस्यैवोपायत्वापत्तेः, न प्रकृतस्य। भवत्विति चेत्, न, तस्याप्युपेयसमसमयत्वे पूर्ववदोषात्। पुनरन्यतस्तन्निष्पत्तिकल्पनायाम् अनवस्थानात्[4]। तद्भिन्नसमयत्वे तु सिद्धः कालक्रमालिङ्गितत्वसद्भाव। स च न बुद्धज्ञानस्य विषयः, अनर्पिताकारत्वादिति कथं तस्य प्रामाण्यम्? यत्र इदं सूक्तं भवेत्—

"हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः॥" [प्र० वा० १।३४] इति।

"तमपि ते तत्र समर्पयन्ति पूर्वापरभावेनैव तदर्पिताकाराणां बुद्धवेदने "व्यवस्थानादिति चेत्, उच्यते—

प्रत्याकारं यदि ज्ञानं तत्रैकात्मतया भिद्यते।
प्रत्यर्थनियतत्वेन कथं सर्वार्थवित्त्वं स्यात् ॥९७०॥

---

१ प्रत्यक्षपूर्वकतया। २ क्रममाक्षेऽपि प०। क्रममाक्ष्यपि आ०, ब०। ३ अक्रमं हि क्रमाधीनं आ०, ब०, प०। ४ बुद्धमपि। ५ भावाभावस्मरि—आ०, ब०, प०। ६ कालक्रमस्य आ०, ब०, प०। ७ उपायोपेयभाव। ८ एवोपेय—आ०, ब०, प०। ९ निरयं सत्त्वा—आ०, ब०, प०। "निरयं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात्।"—प्र० वा० ३।१४। १० —स्वर्ग तद्धि—आ०, ब०, प०। ११ अक्रमस्मरि भावाः। १२ व्यवस्थापना—आ०, ब०, प०।

तदाकारक्रमस्यापि परेण प्रतिवेदनम् ।
तदाकारेण तत्रापि तत्क्रमस्यान्यतो गतौ ॥९७१॥
अनवस्थानदोषः स्यात्तन्नैकान्तेन तद्विदा ।
प्रत्याकारं कथञ्चिद्वेदनेकान्तः प्रशस्यताम् ॥९७२॥
आत्मानमेव जानानः क्रमाऽनेकान्तगोचरम् ।
बुद्धः कथं ततो ब्रूयादेकान्तक्षणिकं जगत् ॥९७३॥
तदन्वयस्य मिथ्यात्वे मिथ्यैव स्यात्तथागतः ।
मिथ्या च सर्ववेदी च प्रमाणञ्चेति साहसम् ॥९७४॥
तन्न कालक्रमज्ञानं तस्य स्याद्वादविद्विषः ।
सोपायोपेयविज्ञानं नास्ति तस्य तदत्यये ॥९७५॥

तदाह–**न जानाति** न वेत्ति **बुद्धः**। किम् ? **किञ्चन** उपेयादि इति तत्त्वम् । भवतु तस्याज्ञेयत्वं तत्त्वापरिज्ञानञ्च तथापि शुद्ध इति चेत् ; आह–**शुद्धः** निर्मलः। कः ? **बुद्धः** । **इति** एवम् , **तत्** क्रमायातवचनम् , केषाम् ? **एषां** बौद्धानाम् । '**किल**' इत्यरुचिद्योतने । **सुभाषितम्** अरुचिद्योतनाद् दुर्भाषितमिति यावत् । तथा हि–अपरिज्ञाते तस्मिन् कथं तच्छुद्धेः परिज्ञानम् ? कथं वा तत्त्वापरिज्ञानमलक्षयलितस्य शुद्धेः सम्भवोऽपि यतस्तद्वचनमेतेषां सुभाषितं भवेत् ?

भवतु वा परिशुद्धो बुद्धस्तथापि कथं तस्य वचनम् ? कथञ्च न स्यात् ? कारणाभावात् । तस्य हि कारणं विकल्पः, "विकल्पयोनयः शब्दाः" [ ] इत्यभिधानात् । न चासौ बुद्धस्य; विधूतकल्पनाजालत्वात् । तदभावेऽपि तत्प्रभावात्संस्काराद्वचनमिति चेत्; न; तस्यापि विकल्पत्वे तत्रासम्भवात् । अविकल्पत्वे तदुभयस्वभावविकलत्वे च "ततो वचनस्यानुत्पत्तेः, अन्यथा विकल्पयोनित्वनियमव्याघातात् । विकल्पादेव चिरापक्रान्तात्तस्य वचनमिति चेत्, न; तस्य हेतुत्वे सन्तानान्तरासिद्धेः । "व्याहारादेस्तत्सिद्धिरिति चेत् ; न; तस्यापि चिरापक्रान्तबुद्धिप्रभवत्वशङ्कायां ततस्तत्परिज्ञानायोगात् । तथा च न चार्वाकस्येव बौद्धस्यापि "परार्थं शास्त्रप्रणयनम् । बुद्धिरनुसन्धानवत्येव व्याहारादिकं जनयति आत्मनि तथैव दर्शनान्न चिरापक्रान्तेति चेत् ; विकल्पोऽपि तथाविध एव वचनमुत्पादयति, अस्मदादौ तथा दर्शनान्न चिरापक्रान्त इति किन्नेष्यते ? स्वापादौ विकल्पविकलस्यापि वचनस्योपलम्भादिति चेत् ; न; तदा[16]

---

१ क्रमेणैका– आ०, ब०, प० । २ उपायादिकत्वं आ०, ब०, प० । ३ तच्छुद्धिप–आ०, ब०, प० । ४ –नमेषां–आ०, ब०, प० । ५ वचनस्य । ६ "विकल्पाः शब्दयोनयः । तेषामन्योन्यसम्बन्धो नार्थान् शब्दाः स्पृशन्त्यमी ॥" इति शेषाशः । द्रष्टव्यम्–न्यायकुमु० पृ० ५३७ टि० ७ । ७ विकल्पः । ८ शुद्धस्य–आ०, ब०, प० । ९ विकल्पाभावेऽपि । १० चेत् त–आ०, ब०, प० । ११ संस्कारात् । १२ बुद्धस्य । १३ चिरापक्रान्तस्य । १४ व्याहारादेस्तदिति आ०, ब०, प० । १५ परार्थशा–आ०, ब०, प० । १६ स्वापादौ ।

बुद्धिविकल्पस्यापि व्यापारादेः प्रतिपत्तेः। ततश्चिरपञ्चमन्त्राद्विज्ञानाव्यापारादिवत्[1] न विकल्पादपि वचनमिति न कुतश्चिदपि बुद्धस्य वचनम्। तदाह–न च नैव किञ्चन किमपि उपायोपेयतत्त्व भाषते कथयति बुद्ध इति। यद्यपि नाम स्वमुखेन न च किञ्चन भाषते बुद्धस्तथापि प्रवक्तैव [2]कुड्यादिभ्योऽपि तत्प्रभावोपजनितस्य तत्त्वोपदेशस्य तद्वचनत्वादिति चेत्, कथ तेषामप्यविकल्पत्वे वचनम्? विकल्पयोनित्वनियमव्याघातात्। अस्मदादिवचनस्यैव तन्नियमो न बुद्धवचनस्येति चेत्, किमिदानीं कुड्यादिभ्यस्तत्कल्पनया बुद्धादेव तदुपपत्तेः? तथा च दुर्व्याहृतमेतत्–

"ये कल्पयन्ति कवयः सुगतस्य वाच–
स्ते कल्पनामपि मुनेः परिकल्पयन्ति।" [ ] इति,

वाचां कल्पनाव्याप्तिर्विकल्पात्।

भवतु विकल्पत्वमेव कुड्यादीनामिति चेत्, किमिदानीं [3]तत्र बुद्धप्रभावेन? स्वयं [4]विकल्पत्वादेव तेषां वचनोपपत्तेः। [5]तद्विकल्पत्वं तत्प्रभावादिति चेत्, न, [6]तस्य तदुपादानत्वे [7]तेषां बुद्धैकसन्तानत्वेन बुद्धस्यैव विकल्पकत्वप्रसङ्गात्। तत्सहकारित्वे तु तत्र किमुपादानम्? कुड्यादिकमेवेति चेत्, न, तस्याचेतनत्वे [8]तत्त्वायोगात् शरीरवत्। प्रागपि विकल्पत्वेन चेतनमेव [9]तदिति चेत्, न, तथाप्रतीत्यभावात्। विकल्पाच्च विकल्पे किं वा तत्सहकारित्वेनास्मदादिविकल्पवत्। [10]"तत्त्वविषयत्वं तस्य[11] तत" इति चेत्, न तर्हि तत्प्रमाणम्। प्रमाणञ्च न प्रत्यक्षम्, विकल्पत्वात्। नानुमानम्, अलिङ्गजत्वादित्यन्यत्रैव प्रमाणमनिष्टं भवेत्। कथं वा कुड्यादिविकल्पबुद्धिनेयविकल्पस्यैव "[12]तत्तत्त्वविषयस्य न भवेत्? एव हि पारम्पर्यं परिस्फुटं भवति–'कुड्यादिविकल्पस्य तत्तत्त्वविषयत्वम्, ततो वचनम्, ततश्च विनेयानां तत्त्वावगमनम्' इति। एवम्भूतस्यस्य[13] प्रमाण एव नास्तीति चेत्, कथ चिन्तामणिकल्पत्वम्? यत इद सुभाषितम्–

"चिन्तारत्नोपमानो जगति विजयते विश्वरूपोऽप्यरूपः॥"[ ] इति,

चिन्तितप्रकाशप्रदानसमर्थप्रभावे सत्येव चिन्तारत्नोपमत्वोपपत्तेः। ततो न कुड्यादिभ्योऽपि तत्प्रभावात्तत्त्ववचनमिति न ततोऽपि तस्य वक्तृत्वम्। ततस्तदारोपणं परस्य दुर्भाषणमेव। तदाह 'प्रवक्ता' इत्यादि। व्याख्यातमेतत्।

---

१ –वत्तिविक–आ०, ब०, प०। २ "सम्भारापेक्षतत्तस्य पुंस्त्रिभिस्त्रमर्थैरिव। निस्सरति यथाकामं कुम्यादिभ्योऽपि देशनाः॥"–तत्त्वसं० पञ्जि० ३६०८। ३ बुद्धप्रभावेन विकल्परहितत्वे। ४ कुड्यादौ। ५ विकल्पादेव आ०, ब०, प०। ६ कुड्यादीनां विकल्पत्वम्। ७ बुद्धस्य कुड्यादिविकल्पोपादानत्वे। ८ कुड्यादीनाम्। ९ विकल्पोपादानत्वायोगात्। १० कुड्यादेः। ११ तत्तत्त्वावि–आ०, ब०, प०। १२ विकल्पस्य। १३ बुद्धसहकारित्वेन। १४ बुद्धसहकारतः। १५ बुद्धस्य।

तन्न बुद्धवचनादपि निरंशस्य संविदद्वयस्य प्रतिपत्तिर्यतः सत्त्वम्। सतोऽपि भूतभवद्भव्यानां यद्यन्यतमेन कालेनावच्छेदः ; कालान्तरं तत्त्वशून्यं भवेत्। तथा कार्यस्यापि कस्यचिदभावे व्योमकुसुमादिवदवस्तुत्वम्। [1]भावे त्वद्वैतव्यापत्तिः।

नैष दोषः ; कालस्यैवापरस्याभावात्, असता च तस्यावच्छेदानुपपत्तेः। न च कार्याभावादसत्त्वम् ; कार्येण सत्त्वव्याप्तेरभावात्। भावे कार्यसमसमयमेव कारणं स्यान्न पूर्वं कार्यस्याभावात्। तादृशस्य[2] च न तत्कारणत्वम् अपि तु तदेककारणप्रभवत्वमेव। तत्कारणस्यापि कार्यव्याप्तसत्ताकत्वे कार्यसमसमयत्वेन तदेककारणप्रभवत्वम्, तत्कारणेऽपि तथा चिन्तायामसम्भाव्येव तत्क्रमो[3] भवेत्। तथा कार्यक्रमोऽपि, कार्यस्यापि कार्यान्तरेण सत्त्वव्याप्तौ तत्समसमयत्वस्यावश्यम्भावात्। तत्सम्भवमिच्छता च न कार्यव्याप्तं कस्यचित्सत्त्वमभ्युपगन्तव्यमिति न कार्याभावात्तद्द्वयस्याभावः। एतदेवाह—

न जातं न भवत्येव न च किञ्चित्करोति सत् ॥ ९६ ॥ इति।

अत्रैवकारो भिन्नक्रमो नकाराभ्यां परो द्रष्टव्यः। **नैव जातं नैव भवति** इति **'चित्रं तदेकम्'** इति **'ततः' 'तदेकम्'** इति च अनुवर्त्तयितव्यम्। तदयमर्थः—**तत्** संवेदनम् एकम् अयं **नैव जातं** नैवोत्पन्नम्, अनेन [4]तस्यातीतत्वं प्रतिक्षिप्तम्। **नैव भवति** नैव निष्पद्यते अनेनापि वर्त्तमानत्वम्। 'नैव भविष्यति' इत्यपि भावित्वप्रतिक्षेपाय द्रष्टव्यम्—उक्तस्योपलक्षणत्वात्। उपपद्येत च तत्रातीतत्वादिप्रतिक्षेपः कालस्यैव निबन्धनस्याभावात्। **न च** नैव **किञ्चित्सजातीयमन्यद्वा** कार्यं **करोति** जनयति तथापि **सत्** कार्येण सत्त्वव्याप्तेरभावात्। [5]हेतुद्वयं चैतत् [6]परस्याभिप्रायगतम्। अत्र पूर्वपक्षद्योतनं **'चेत्'** इति द्रष्टव्यम्। उत्तरमाह—

तीक्ष्णं शौद्धोदनेः शृङ्गमिति किन्न प्रकल्प्यते ? इति।

सुबोधमेव। तात्पर्यमत्र—

निरंशं चेत्तदद्वैतं[7] मुक्तोपाधि कुतश्चन।
प्रमाणादुपलभ्येत शोभेतैवं भवद्वचः ॥९७६॥
प्रमाणं तु[8] न तत्रास्ति प्रत्यक्षादीति भाषितम्।
केवलं कल्पनैव स्यात्तदस्तित्वे निबन्धनम् ॥९७७॥
न च [9][10]तद्वास्तवं युक्तमन्यथा तन्निबन्धनम्।
विषाणमपि किन्न स्यान्निशितं बुद्धमस्तके ॥९७८॥

---

१ भवत्वद्वै—आ०, ब०, प०। २ कार्यसमकालवर्तिनः। ३ कारणक्रमः। ४ —त्तद्द्वय—आ०, ब०, प० । ५ श्लोकात्। ६ तस्यापि तत्त्वं आ०, ब०, प०। ७ "श्लोके अविद्यमानं हेतुद्वयं कथमुच्यत इत्याशङ्क्यायामाह"—ता० टि०। ८ "सौगतस्य"—ता० टि०। ९ —तमुक्तो—आ०,ब०,प०। १० तन्न आ०,ब०, प०। ११ "कल्पनानिबन्धनं निरंशमद्वैतम्"—ता० टि०।

अद्वये नास्ति युद्धोऽपि यत्र शृङ्गस्य कल्पनम् ।
इति चेत्कल्पना तस्य किम सत्त्वाय कल्पते ॥९७९॥
तदद्वयञ्च युद्धश्च तच्छृङ्गं चेति तत्त्वतः ।
त्रितयस्याप्यवस्थाने न भेदस्तात्त्विकः कथम् ॥९८०॥
तस्मात्कल्पितमद्वैतमवस्त्येव यथोदितम् । ५
तदवष्टम्भतस्तस्य बहिरर्थनिषेधनम् ॥९८१॥ इति ।

तस्मादेकव्यक्तिकमनेकव्यक्तिकं वा चित्रमेव सवेदनमनुमन्तव्यम् । तत्र बहिरर्थमपि वादी प्रत्यवस्थापयति एकरागादौ सर्वरागादेः सांशत्वादेश्च दोषस्य तद्वत्ताकारत्वस्य बहिरर्थे तदवयवेषु चाप्रवृत्तेः। यत्र तु प्रवृत्तियोगकल्पिते अवयविनि तदवयवेषु च तत्रास्माकमभिरतिरेव, ततोऽत्र तैस्मयकृत्या[न]कापि दृष्यस्माकं परिग्लानिः । यथैवं कुतस्तत्र तदोषस्य 'एतत्समान- १०
मन्यत्र' इत्यादिना समाधानम् ? आहितविषयस्याभ्युपगमनीयत्वादिति चेत् , न हीदृशम् अकस्मद्भूतस्य चेष्टितं यदयमन्यायेनापि दोषेण परपक्षं प्रतिक्षिपतीति । ततो युक्त विज्ञानवदर्थस्यापि प्रतीतिबलादवस्थापनम् ।

इदानीं बाह्यव्यशेष दर्शयित्वा परिहर्तुमाह-

एकेन चरितार्थत्वात्तत्राऽविप्रतिपत्तितः ॥ ९७ ॥ १५
अलमर्थेन चेन्नैवमतिरूक्षानुवादतः । इति ।

अलं पर्याप्तम् अर्थेन घटादिना प्रयोजनाभावात् । तदुदाहरणादिकमस्ति तस्य प्रयोजनमिति चेत् , कुतस्तदस्तित्वम् ? प्रतिभासाच्चेत् , प्रतिभासरूपमेव तर्हि तेत् तद्व्यतिरिक्तस्य तदयोगात्। तच्च तैदुपादेव घटादेरिति किं तत्रार्थस्य कारणत्वेन ? तदाह-एकेन नानाकारसाधारणेन ज्ञानेन नार्थेन तैस्य 'अलम्' इति पर्युदासात्। चरितो निष्पादितोऽर्थः प्रयोजनं यस्य २०
तस्य भावात् चरितार्थत्वात् अर्थस्य। 'एकेन' इत्यपेक्षायामपि चरितशब्दस्य 'प्रवृत्तिर्गमकत्वात्। तर्हि ज्ञानेनाप्यलम् अन्येन चरितार्थत्वादिति चेत्, किं तदन्यत्? अर्थश्चेत्, न, [1] ततो अद्वयत्वेन [11]ज्ञानार्थस्याधिगमस्यासम्भवात्। ज्ञानमेवेति चेत् , न तर्हि तेनाटमिति शक्यम् , अभ्युपगमात्। तदाह-तत्र ज्ञाने अविप्रतिपत्तितो योऽयमर्थवादिनोऽपि विप्रतिपत्तेरभावात्, अन्यथा नार्थसिद्धिः स्वतस्तदयोगादिति मन्यते। 'चेत्' इति परमतं द्योतयमुत्तरमाह-नैवम्। एवम् २५
'अलमर्थेन' इति प्रकारेण । कुत एवम् ? अतिरूक्षस्य प्रमाणपदवीप्रतिप्रसिद्धस्य अनुवादतोऽनुकथनात्[12] 'अर्थस्येति' । तात्पर्यमत्र-

---

१ चित्रमवत्। २ -कथनमिर-ता० । ३ तत्रास्तौ आ०, ब०, प० । ४ यदन्यायेन आ०, ब०, प० । ५ तदुदाहरणादि । ६ प्रतिभासरूपादेव । ७ अर्थस्य । ८ अन्यान्येन । ९ समाप्तः । १० अर्थात् । ११ ज्ञानस्यापि आ०, ब०, प० । ज्ञानतत्रयोजनप्राप्तेः । १२ -नार्थस्येति आ०, ब०, प० ।

प्रयोजनवशादर्थः कल्पितो यदि कथ्यते ।
युज्येत तत्प्रतिक्षेपस्तदर्थस्यान्यतो[1] भवान् ॥९८२॥
न चैवं मानसाभ्यान् ज्ञानवत्तस्य वर्णनात् ।
निषेधे मानसिद्धस्य ज्ञानं जीवति तत्कथम् ? ॥९८३॥

किं पुनस्तत्प्रमाणं यतोऽतिरुढत्वमर्थस्येति चेत् ? तावत् 'प्रत्यक्षम्' इति ब्रूमः । "तत्रापि[2] प्रतिभासान्तर्गतमेव नीलमवभासते नापरम्, ततः प्रतिभासव्यतिरेके न प्रमाणं ततो नाभ्युपगमः । अथ प्रतिभासान्तर्गतं तन्न प्रतिभासते प्रतिभासस्यान्तरत्वात्, नीलादेश्च बहिरवभासनात्; न व्यतिरिक्तस्य सद्भावे तस्य प्रतिभासनं स्वरूपेणापरोक्षेण तस्य प्रतिभासनात् । यथा हि–

"व्यतिरिक्तस्य सद्भावे न नीलस्यापरोक्षता ।
स्वरूपेणापरोक्षत्वान्न तस्यान्यापरोक्षता ॥"

[प्र० वार्तिकाल० ३।३३३] इति प्रज्ञाकरः ।

तत्र किं तत्प्रत्यक्षम्, यत्र प्रतिभासान्तर्गतमेव नीलमवभासेत ? नीलादन्यदेवेति चेत्; न; 'न व्यतिरिक्तस्य' इत्यादिविरोधात् । स एव प्रतिभासो यत्रान्तर्गतो नीलस्येति चेत्; तेन तर्हि पूर्वापरीभूतेन भवितव्यम्, अन्यथा पूर्वं विशेषणतया आत्मनः, पश्चात्तद्विशिष्टतया नीलस्य ततः परिज्ञानायोगात् । सत्येव हि प्रागुपाधिपरिज्ञाने भवत्युपाधिमत्प्रतिपत्तिः, "विशेषणं विशेष्यं च" [प्र० वा० २।१२५] इत्यादिवचनात्[3] । प्रागधिगम्यं च तद्रूपं यैवान्तर्गतनीलं तन्नीलस्यापि तदन्तर्गमस्तत्रैवावभासत इति तेनापि पूर्वापरीभूतेन भवितव्यम् अन्यथा तत्रापि 'अन्यथा' इत्यादिदोषात्[4] । तद्रूपस्यापि प्रागधिगम्यस्यान्तर्गतनीलत्वे पुनरयमेव प्रसङ्ग इति अवस्थाद्वितारवतो नीलज्ञानस्य कथं क्षणभङ्गित्वम् ? कथं वा निर्विकल्पत्वं[5] प्रतिभासोपाधिकतया नीलं परिच्छिन्दतो विकल्पकत्वस्यैवोपपत्तेः ।

एतेन 'अन्तर्गतपीतं तत्' इति प्रत्युक्तम्; तुल्यदोषत्वात् । कथं वा तत् पश्चान्नीलस्य विशेषणम्; विरोधात् । पीतस्य परित्यागादिति चेत्; न तर्हि पीतमेव तत्, तत्परित्यागेन नीले तत्त्यागेनापि पुनः रूपान्तरे प्रवृत्तेः, व्यावृत्ताद्यनुवृत्तस्य विरुद्धधर्माध्यासेन भेदस्यैवोपपत्तेः । यदि पुनस्तत्र न किञ्चिदप्यन्तर्गतम्; कथं तज्ज्ञानम् ? अनाकारस्यानभ्युपगमात् । अन्यथा पश्चादप्यतदाकारमेव तत् नीलविषयं भवेत् । कथं तस्य तद्विषयत्वम् ? कथं तदाकारस्य ? स्वहेतुबलात्तथैवोत्पत्तेः; समानमन्यत्र । ततो न युक्तम्–'प्रतिभासव्यतिरेके न प्रमाणम्' इति; नीलस्य तज्ज्ञानाद्व्यतिरेके तस्यैव प्रामाण्यात् ।

---

१ ज्ञानात् । २ तत्रापि । ३ प्रत्यक्षेऽपि । ४ "...सम्बन्धं लौकिकीं स्थितिम् । गृहीत्वा सदृलक्ष्यैवंतथा प्रत्येति नान्यथा ।" इति श्लोकांशः । ५ यद्यनन्तर्गतं नी–आ०, ब०, प० । ६ –रूपद्व–आ०, ब०, प० । ७ –त्यकल्पं आ०, ब० । ८ कथं वा तद्–आ०, ब०, प० ।

एतेनैतदपि प्रत्युक्तम्-"यथैव ग्राहकाकार[1] स्वरूपेणापरोक्षो न ग्राहकान्तरभावात्, तथा तेन समानकालोऽपि नीलादि:" [प्र० वार्तिकाल० ३।३३०] इति, कथम्? ग्राहके स्वत एव ग्राह्ये च परत एवापरोक्षत्वस्य दर्शनात्। दर्शनानुसारित्वाद्धाभ्युपगमस्य। अन्यथा "यदेव दृश्यते तदेवाभ्युपगम्यते" [प्र० वार्तिकाल० ३।३३०] इत्यसङ्गतं स्यात्। ग्राहकसमकालतया च ग्राह्यस्य स्वयं प्रकाशत्वेऽपि इदमपि नीलं तत्समकालत्वाद्भवेत्। प्रत्यक्ष-५ वाधनस्य इतरत्रापि तुल्यत्वात्। न [2]तत्समसमयत्वमात्रेण [3]तस्य [4]तत्त्वम्, अपि तु [5]तद्ग्रहणतया चक्षुरादेरुत्पत्तेरिति चेत्, न, तत्रापायपूर्वं पश्चादपि [6]तद्भावात्। पौर्वापर्ये तस्य प्रमाणं नास्तीति चेत्, चक्षुरादिकार्यत्वमपि कथम्? पौर्वापर्यप्रमाणबलादेव तस्यापि परिज्ञानोपपत्तेः। तथा च दुर्भाषितमेतत्-"यथा चक्षुरादिकाद्ग्राहकाकारस्तथा तत्समानकालो ग्राह्याकारोऽपि" [प्र० वार्तिकाल० ३।३३०] इति, कल्पिते तु तस्य तत्कार्यत्वे तन्निबन्धनं स्वयं प्रकाशत्व-१० मपि कल्पितमेव न तात्त्विकम्। तत्र च न विप्रतिपत्ति। [7]तत्र नीलादेस्तत्प्रतिभासादेव तदन्तर्गतत्वपरिज्ञानम्।

भवत्वन्यत एवेति चेत्, न, तत्रापि विषयान्तर्गमस्वान्येन परिज्ञाने अनवस्था दोषात्। अनन्तर्गामिन एव विषयस्य तेन प्रतिपत्तौ प्रान्त्येनापि स्यादित्यपुक्तमुक्तम्-'प्रतिभासान्तर्गतमेव नीलमवभासते नापरम्' इति। अनन्तर्गतप्रतिभासे कथम् 'नीलं १५ प्रतिभासते' इत्यभेदावगम इति चेत्? न, एवमपि भेदस्यैवावगमात्। अभेदे हि 'नीलम्' इत्येव 'प्रतिभासते' इत्येव वा स्यात् न चोभयम्? अभेदेऽप्यपोद्धारपरिकल्पनया द्वैरूप्यादेवमवगम इति चेत्, स्यादेवदेयं यद्यभेदस्य [8]श्रुतभिन्नावगमः, स तु ततोऽन्यत्रश्च न प्रस्पष्टात्, तन्नीत्या ततो भेदस्यैवावगमात्। तद्वेलमाविनो [9]विकल्पादित्यप्युक्तम्, ततोऽपि यथानुभवं प्रवृत्ताद्भेदावगमस्यैवोपपत्तेः। अनुभवातिक्रमप्रवृत्तात्तु न [10]ततः कस्यचिदपि प्रधानादि- २० विकल्पाद्विभावगमः सम्भवति। विकल्पाद्भेदावगमे कथं ततो द्वैरूप्यम्? कथं वा कल्पनि कस्यानुभवविषयत्वमुच्यते? यत इदं सूक्तम्-

"तस्माद्द्विरूपमस्त्येकं यदेवमनुभूयते।
स्मर्यते च" [प्र० वा० २।३३७] इति।

अत्रापि 'एकम्' इत्यत्र 'अनुभूयते' इति 'न द्विरूपम्' इत्यत्र 'स्मर्यते' इत्यस्यैव सम्बन्धाद्- २५ दोष इति चेत्, न, अनुभवाभावे स्मरणानुपपत्तेः। उपपत्तावपि कुतो द्विरूपस्यैकस्य वेदनम्? यत इदं श्लोकेत-

"उभयाकारस्यास्य संवेदनं फलम्।" [प्र० वा० २।३३७] इति।

---

१ ग्राहकसमकालत्वमात्रेण। तत्समयत्वाद्ये-आ०, ब०, प०। २ ग्राह्यस्य। ३ स्वरूपेणापरोक्षत्वम्। ४ ग्राहकसमकालतया। ५ ग्राह्यस्य भावात्। ६ तदीय-आ० ब०, प०। ७ -गतस्यान्येन आ०, ब०, प०। ८ भेदस्यानया। ९ प्रत्यक्षवलभाविनः। १० -स्यपु-आ०, ब०, प०। ११ विकल्पात्। १२ इयपु-आ०, ब०, प०।

अनुभवादेव स्मरणैकत्वेनाध्यवसितादिति चेत् ; न; ततोऽपि द्विरूपस्यैवावगमोपपत्तेर्नैकस्य । तद्विषयत्वमपरित्यजत एव तस्य तदेकत्वाध्यवसाय इति चेत् ; 'अपरित्यजतः' इति कुतः ? तथा निश्चयात् ; न तर्हि तद्विषये द्विरूपकल्पनं निश्चयेन तद्विरोधात् । ततो न तदेकत्वाध्यवसायादनुभवस्य द्विरूपविषयत्वमपि तु तत्त्वत एवेति वार्तिकतात्पर्यम् । अतस्तदपरिज्ञानादेवं इदं निबन्धनकारस्य[1] वचनम्–"अपोद्धारपरिकल्पनया द्विरूपम्" [प्र० वार्तिकाल०] इति ।

भवतु द्विरूपमनुभवात् , तथापि न नीलं बहिरर्थः, प्रतिभासैकत्वस्यापि तत्रानुभवादिति चेत् ; न ; तदभावस्य निवेदितत्वात् । भेदमात्रे नीलतत्प्रतिभासयोरसङ्गतिरिति चेत् ; न ; विषयविषयिभावस्यैव तत्र सङ्गतित्वात् । 'नीलं प्रतिभासते' इत्यत्र 'नीलं प्रतिभासस्य विषयो भवति' इत्यवगमात् । कः पुनर्विषयार्थ इति चेत् ? नीलार्थोऽपि कः ? स्वरूपमेवेति चेत्; अपरोऽपि तदेव सर्वस्य विषयत्वमविशेषात्[2]। स्वरूपस्येति चेत्; नीलत्वमपि स्यात् । तत्त्वे[3] यस्यैव कारणं तदेव नीलमिति चेत् ; विषयोऽपि यस्यैव ज्ञानं स एव स्यात् । किं तस्य[4] ज्ञानेन[5] ? कारणेनापि किम् ? कारणमेव इतरेणापि[6] ग्रहणमेव । ततो युक्तं प्रत्यक्षाद् अतिरूढत्वमर्थस्य ।

तथाऽनुमानादपि । [7]ततः पर्वतशिरसि पावकस्य परोक्षस्यैव प्रतिपत्तेः । परोक्षश्चार्थ एव अपरोक्षस्यैव ज्ञानस्याभ्युपगमात् । [8]सोऽप्यपरोक्ष एव महानसपावकस्यैव ततः प्रतिपत्तेः, महानसपावकश्च अपरोक्ष एव प्रतिपन्न इति चेत्; न ; तथा सति सन्निहितेवदनुमानवैफल्यप्रसङ्गात् । अध्यारोपादेव [9]तस्यापरोक्षत्वं अध्यारोपश्चानुमानादेवेति चेत् ; अध्यारोपितं तर्हि [10]तस्य ज्ञानत्वमर्थत्वं तु प्राकृतमिति प्राप्तम् । अध्यारोपितमेव तत्र रूपं नापरं यस्य परोक्षत्वेनार्थत्वमिति चेत्; कुतस्तदध्यारोपणम् ? अनुमानाद्धूमादिति चेत् ; न; [11]तदभावे [12]तस्यैवाभावात् । तद्भावे भाव इति चेत्; न; परस्पराश्रयात्–तदध्यारोपणात्[13] धूमः, धूमाच्च तदध्यारोपणमिति । अन्यतस्तदध्यारोपणं चेत्; न; तस्यापि लिङ्गत्वे पूर्ववद्दोषात् । तत्रापि लिङ्गान्तरात्तदध्यारोपेण अनवस्थादोषात् । अनुभवात्तदध्यारोपणं तु न पर्वते स्यात् तत्र पावकानुभवस्य प्रागप्रवृत्तेरिति न तत्र पावकार्थिनः प्रवर्तेरन् । अपरोक्षत्वे च तत्पावकस्य कथं तदनुमानस्य परोक्षविषयत्वम् ? अतीतस्यैव तत्र [14]तस्याध्यारोपादिति चेत्; भवत्वेवम् , [15]तथापि तत्र तस्य प्रतिभासे न परोक्षत्वम् । न हि प्रतिभासवत्त्वे च परोक्षत्वमुपपन्नम्; अतिप्रसङ्गात् । अप्रतिभासे तु नाध्यारोपः; प्रतिभासव्यतिरेकेण तदप्रतिपत्तेः । प्रतिभासोऽपि–तस्यान्यत्रैव नानुमान इति चेत्; न; तस्य निषिद्धत्वात् । कथञ्चैवं प्रमाणमनुमानम् ? अदर्शनसमारोपव्यवच्छेदादिति चेत; न; [16]तस्य तुच्छस्याप्रतिपत्तेः अनभ्युपगमाच्च । दर्शनोपनयनमेव पावके [17]तद्व्यवच्छेद इति चेत् ; ननु दर्शनमपरोक्षत्वमेव, तच्च विनाप्यनुमानेन

---

१ –देव तन्नि–आ०, ब०, प० । २ प्रज्ञाकरस्य । ३ असम्बन्धः । ४ नीलत्वे । ५ विषयस्य । ६ कृतमिति शेषः । ७ ज्ञानेनापि । ८ अनुमानात् । ९ पर्वतीयपावकः । १० पर्वतपावकस्य । ११ धूमाभावे । १२-अध्यारोपस्यैवाभावात् । १३ तदध्यारोपेण धू–आ०, ब०, प० । १४ पावकस्य । १५ तथा हि तत्र प्रति–आ०, ब०, प० । १६ व्यवच्छेदस्य । १७ अदर्शनसमारोपव्यवच्छेदः ।

तस्यास्त्येवेति न तद्व्यवच्छेदात्तस्य[1] प्रामाण्यम्, अपि तु पावकविषयत्वादेव। तद्व्यपरोक्षताव्यतिरेकेणैव, अन्यथा तत्परोक्षविषयत्वप्रतिज्ञाव्याघातात्। ततो यदुक्तम्–"अनुमानमपि नापरोक्षताव्यतिरेकं साधयति" [प्र० वार्तिकाल० ३।३३३] इति, तत्प्रतिब्रूमः, तेन तद्व्यतिरिक्तस्यैव पावकस्य व्यवस्थापनात्।

यच्चापरमुक्तम्–"यदि च दृश्यमानताव्यतिरेकेण [2]विकल्पे तदर्शनार्थं न प्रवर्तेत दर्शनार्थिनो वा नोपदिशेत्, न हि दृश्यमानतामप्रतियन् दर्शनार्थी भवति" [प्र० वार्तिकाल० ३।३३३] इति, तत्र किमियं दृश्यमानता पावकस्य यत्प्रतिपत्तौ तद्दर्शनार्थी न भवेत्? स्वयं दर्शनात्मकत्वमिति चेत्, सत्यम्, न तस्य प्रतिपत्तिः, नापि तेनार्थित्वं लोकस्य, अर्थान्तरेणैव दर्शनेन [3]तस्य [4]सद्भावात्। दर्शनसम्बन्ध इति चेत्, न, सति दर्शनेऽनुमानवैफल्याद् अर्थित्वायोगाच्च। न ह्युपनतेनैव कस्यचिदर्थित्वम् अनुपनत एव तद्दर्शनात्। दर्शनयोग्यत्वमिति चेत्, अस्त्येव तस्य प्रतिपत्तिः, परोक्षस्यापि पावकस्य तद्योग्यत्वेनानुमितेः, व्याप्तेस्तथैव निश्चयात्। योग्यताप्रतिपत्तौ दर्शनेन कथमर्थित्वमिति चेत्? न, अन्यत्रापि शक्तिपरिज्ञानादेव फलार्थित्वोपलम्भात्। तत्र स्वयं दर्शनार्थनात्, दर्शनार्थिनः कथनाच्च पावकानुमानस्यापरोक्षविषयत्वं शक्त्योपपादनं परोक्षविषयत्वेऽपि तद्योग्यतापरिज्ञानाच्चदुपपत्तेः। स्वरूपप्रतिपत्तौ पावकस्य कथं परोक्षत्वमिति चेत्? तत्प्रतिपत्तेरस्पष्टत्वादेव। तदपि तस्यां[5] कथमिति [6]चेत्? न, कारणबलादिति निवेदितत्वात्। ततो युक्तम् अनुमानाद्व्यतिरेक्यत्वमर्थस्य। तत इदमकीर्तिकरमेव धर्मकीर्तेः–

"दर्शनोपाधिरहितस्याग्रहाच्चद्वद्दे ग्रहात्।
दर्शन नीलनिर्भासो नार्थो बाह्योऽस्ति केवल॥" [प्र०वा० २।३३५] इति।

प्रत्यक्षानुमानाभ्यां दर्शनोपाधिरहितस्यैव पावकादेः प्रतिपत्तेः तत्र बाह्यतयार्थत्वस्योपपत्तेः। ततः प्रतीतिबलप्रविज्ञानस्य यशस्वित्वं तदर्थस्यापि, यच्च अर्थस्यापरमार्थत्वम् अविद्यद्दर्शनपथप्रस्थायित्वात् वैमिरिककेशादिवत्, तत् विज्ञानस्यापि स्यादविशेषात्। तदाह–

कल्पना सदसत्त्वेन समा। इति।

ज्ञानस्य सत्त्वेनार्थस्यासत्त्वेन कल्पना अर्थे ज्ञाने च सदसीति यावत्।

ननु एवमपि ज्ञानकल्पनैवास्तु, तत्र सकलसमीहितसिद्धेः, अन्यकल्पना तु सिद्ध्युपप्लाविनी कुतः पोष्यत इति? तत्राह–

किन्तु गरीयसी॥ ९८॥
प्रतीतिप्रतिपक्षेण तत्रैका यदि नापरा। इति।

किन्तु इति[7] अवितर्कपदं तत्र तस्मिन् कल्पनासाम्ये सति एका ज्ञानकल्पना

---

१ अनुमानस्य। २ विकल्पेत प०। विकल्पेतदर्शनार्थं आ०, ब०। ३ मेरुस्य। ४ दर्शनार्थित्वात्। ५ स्वरूपप्रतिपत्तौ। ६ पेत् आ०–आ०, ब०, प०। ७ –ति वि–आ०, ब०, प०।

यदि स्याद् अपरा अर्थकल्पना **यदि न** स्यात्, 'स्यात्' इत्युपस्कारस्य **यदि** शब्दस्य चोभयत्र सम्बन्धात्। तत्र दूषणम्–**गरीयसी** गुर्वी नितरां ज्ञानकल्पना। तत्र निमित्तमाह–**प्रतीतिप्रतिपक्षेण** प्रतीतिर्ज्ञानस्य प्रतिपत्तिः तस्याः प्रतिपक्षः तदभावस्तेन। तथा हि–ज्ञानं नाम विषयग्रहणस्वभावमेव, प्रतीतेः "विषयग्रहणधर्मो विज्ञानस्य" [ ] इति वार्तिकाच्च। विषयभावे च तादूप्याभावात्किं तस्यावशिष्येत? यस्य [1]प्रतीतिः स्वरूपमेव तस्य विषयो न बाह्यमिति चेत्; किं पुनस्तस्य विषयत्वम्? ग्राह्यत्वमिति चेत्; कथं ग्रहणत्वम्? ग्राह्यस्यैव तदनुपपत्तेः। स्वभावभेदादेकस्यैव तदुभयधर्मकल्पनायामपि अनेकान्तदोषात्। संवृत्या [2]निर्दोषत्वमनेकान्तस्येति चेत्; न; बाह्यवज्ज्ञानस्याप्यपरमार्थत्वापत्तेः, निरंशस्यापि तस्य विषयविषयिभावायोगेनासम्प्रतिपत्तेः। तत इदमप्रतीतिकमेव "**स्वरूपस्य स्वतो गतिः**" [प्र०वा० १।६] इति।

इयमेव तस्य स्वतो गतिः यन्निरपेक्षं प्रकाशनम्, भेदव्यवहारस्तु तत्र काल्पनिक इति चेत्; किमिदं प्रकाशनं नाम? जडप्रतिद्वन्द्वी धर्म इति चेत्; न; अपरिज्ञाने जडस्य क्वचित्तत्प्रतिद्वन्द्वित्वस्यापरिज्ञानात्। परिज्ञाने तु नार्थनिषेधो [3]जडस्यैवार्थत्वात्। कल्पितमेव तन्न तात्त्विकमिति चेत्; ननु कल्पितत्वं कल्पनाबुद्धिविषयत्वमेव। तच्च नान्तर्गमेण; तद्बुद्धेर्जडत्वापत्त्या स्वप्रकाशप्रच्युतेः। बुद्ध्यन्तरेण प्रकाशे चानवस्थानप्रसङ्गात्। अनन्तर्गमेण चेत्; कथं स्वसंवेदनमेव बुद्धिफलम्? बाह्यसंवेदनस्यापि भावात्। तस्मादिदमप्यनुभवप्रत्यनीकमेव–

"तस्मात्प्रमेये बाह्येऽपि युक्तं स्वानुभवः फलम्॥" [प्र०वा० २।३४६] इति

"यतः स्वभावोऽस्य यथा तथैवार्थविनिश्चयः॥" [प्र०वा० २।३४६] इति च।

अजडस्वभावयाऽपि बुद्ध्या जडस्य निर्णयात्। तन्न जडप्रत्यनीकत्वेन प्रकाशनम्।

चिद्रूपत्वेनेति चेत्; न; चितेरपि प्रकाशपर्यायत्वात्। अपि च, अस्यां [4]यदि न काचिदपि शक्तिः कथं "**स्वयं सैव प्रकाशते**" [प्र०वा० २।३२७] सत्यामेव कर्तृशक्तौ 'प्रकाशते' इत्युपपत्तेः। अध्यारोपितया [5]तया प्रकाशत इति चेत्; न; तयैव तदनुपपत्तेः। न हि तच्छक्तिविकलतयैव संविदाना तामात्मन्यारोपयितुमर्हति। तद्विकलतया न संवित्ते सदादिनैव संवेदनादिति चेत्; कथमुभयात्मा सती केनचित्संवित्ते केनचिन्नेति? कुतश्चिददृष्टात्कारणादिति चेत्; न; बहिर्भावस्यापि इष्टानिष्टस्वरूपस्यैव केनचिदिष्टात्मना परेणानिष्टात्मना च प्रतिपत्तिप्रसङ्गात्। एकरूपवेदिनां रूपान्तरस्याप्रतिपत्तौ कुतस्तस्योभयात्मकत्वप्रतिपत्तिरिति? अनेकात्मकं चार्थमेकरूपतया दर्शयतश्चादृष्टात्कथमर्थवेदनम्? 'ततस्तिमिरादेरिवानर्थवेदनस्यैवोपपत्तेः' इति च न पर्यनुयोगः; परत्रापि तुल्यत्वात्। तथा च यथेदमुच्यते–

---

१ –ति स्वरू–आ०, ब०, प०। २ निर्दोषत्वेऽने–आ०, ब०, प०। ३ जडस्यै–आ०, ब०, प०। ४ –कमेवेति आ०, ब०, प०। ५ –शप्रतीतेः आ०, ब०, प०। ६ चितौ। ७ –तया प्र–आ०, ब०, प०।

"तमनेकात्मकं भावमकात्मत्वेन दर्शयत् ।
तददृष्टं कथन्नाम मयेदमिति वेदनम् ॥" [प्र०वा० २।३४४] इति ,

तयेदमपि वक्तव्यम्–

तामनेकात्मिकां बुद्धिमेकात्मत्वेन दर्शयत् ।
तददृष्टं कथन्नाम मयेयमिति वेदनम् ॥९८४॥ इति ।

ततः सर्वात्मनैव सा [1]संवित्ते इति न तयैव तदारोपः । नापि बुद्ध्यन्तरेण , तत्रापि तच्छक्ति-विकल्पतया संविदाने तत्प्रतिभासायोगात् । तत्रापि बुद्ध्यन्तरेण तदारोपकल्पनायाम् अनवस्था-दोषात् । तच्छक्तिमत्त्वे तु बुद्धेः कथं तदपेक्षं तत्प्रकाशनं निरपेक्षं नाम शक्तेस्तद्भ्यतिरेकादिति चेत् ? किं पुनस्तया[2] न व्यतिरिक्तप्रकाशनम् ? तया चेत् , कथं तया परबुद्धिपरिज्ञानम् ? यत इदं सूक्तं स्यात्–"स्वरूपेण हि संविदां भिन्नत्वात्प्रतिपुरुषं नानाकारवेदनं युक्तम्" [प्र० वार्तिकाल० ३।३३९] इति । तासामपि कुतश्चिदाकारमुखेनैव वेदनं नान्यथेति चेत् , न , सुप्त-प्रबुद्ध जीवन-सुखेष्टानिष्टादिरूपाणां तदाकाराणां युगपदेकत्र समर्पण-स्याप्रतिपत्तेः ।

न ह्येकैकं विज्ञानं साकारं परबुद्धिभिः ।
सुप्त बुद्ध मृत जीवदिष्टमन्यच्च दृश्यते ॥९८५॥
ततः शक्तिवशात्तासां विज्ञानाकारकल्पना ।
तयार्थस्यापि तेनेदमयुक्तं कीर्तिवार्तिकम् ॥९८६॥

"तदर्थाभासतैवास्य प्रमाणं न तु सन्नपि ।
ग्राहकात्मा परार्थत्वात् बाह्येष्वर्थेष्वपेक्ष्यते ॥" [प्र० वा० २।३४७] इति ।

ग्राहकात्मन एव शक्तित्वस्य परबुद्धिप्रतिपत्तिविषयार्थप्रतिपत्तावप्यपेक्षणात् ।

संविद्भेदानभीष्टौ च नापरं तत्त्वमस्ति वः ।
संविद्वयवशादस्य प्रतिभेदात्सविस्तरम् ॥९८७॥

तस्मादर्थोऽप्यङ्गीकर्तव्य एव, अन्यथा ज्ञानभेदस्यानिर्वाहत्वोपपत्तेः ।

भवतु बाह्यस्यापि ज्ञानम्, तस्य तु कुतः सत्यत्वम् ? कुतश्चाधिपयः कश्चिदेव सत्यो न सर्वः ? प्राप्त्यादिविशेषादिति चेत् , न, तत्रानवस्थादिदोषात् । तदुक्तम्–

"यथैष प्रथमं ज्ञानं तस्य प्राप्तिमपेक्षते ।
तत्प्राप्त्यापि पुनः प्राप्तेरपेक्षेत्यनवस्थितिः ॥

---

१ संविदेति आ०, ब०, प० । आत्मतीत्यर्थः । २ –पीव त–आ०, ब०, प० । ३ –या तय–आ०, ब०, प० । ४ –दृश्यता–आ०, ब०, प० ।

कस्यचित्तु यदीष्येत स्वत एवाप्तिरूपता ।
प्रथमस्यापि तद्भाव इति सर्वसमानता ॥
प्राप्तेरथापि पूर्वेण प्राप्तिरूपेण सत्यता ।
अन्योन्याश्रय इत्येकासत्यत्वेनोभयस्य तत् ॥
अथ कारणशुद्धत्वात्तज्ज्ञानस्यास्ति सत्यता ।
तज्ज्ञानस्यापि सत्यत्वं तत्कारणविशुद्धितः ॥
एवं परापरापेक्षादनवस्था प्रसज्यते ।" [प्र० वार्तिकाल० ३।३५१]

इति चेत्; न, अभ्यासे स्वतः अन्यदा परतस्तत्सत्यत्वस्य निश्चयात्। न चानवस्थानम्; पर्यन्ते कस्यचिदभ्यासवतो भावात् । अवश्यं चेदमङ्गीकर्त्तव्यम्, अन्यथा[1] अर्थज्ञानवत् सन्तानभेदज्ञानस्यापि सत्यत्वानिश्चयात्, तद्विषयस्याप्यसिद्धिप्रसङ्गात् । न चैवं केशादेरपि तज्ज्ञानात्सिद्धिः ; तत्र स्वतः परतश्चासत्यत्वस्यैव निश्चयात् । तदाह–

न हि केशादिनिर्भासो व्यवहारप्रसाधकः ॥९९॥ इति ।

केश आदिर्यस्य मशकादेस्तस्य **निर्भासः** प्रत्ययो **न हि स्फुटं व्यवहारप्रसाधको** व्यवहारः स्वतोऽन्यतो वा सत्योऽयमिति निश्चयः, प्रसाधकः सद्विषयत्वेन अलङ्कारको यस्य स तथोक्तः तस्माद् असन्नेव तद्विषय इति भावः । कथमसतः प्रतिभासनम्? आस्तामेतदनन्तरं निरूपणात् । पर आह–

वासनाभेदाद्भेदोऽयम् [सिद्धस्तत्र न सिद्ध्यति] । इति ।

पूर्वपूर्वविकल्पोपनीतः[2] संस्कारो **वासना, तद्भेदो** दार्ढ्यशैथिल्यलक्षणस्तस्मात् तमाश्रित्य **अयं** प्रतीयमानो घटादिज्ञानं तथ्यं मिथ्या च केशादिज्ञानमिति **भेदो** निर्णयः 'भिद्येते भिन्नतया व्यवस्थाप्येते पररपरतः तथ्यमिथ्याज्ञाने येन स भेदः' इति व्युत्पत्तेः । संस्कारदार्ढ्यशैथिल्याभ्यामेव हि क्वचिज्ज्ञाने तथ्यमिथ्यात्वविभागविनिश्चयो न विषयभावाभावाभ्यामिति कथं तन्निश्चयात्तत्सिद्धिरिति मन्यते ?

तत्रोत्तरम्–'**सिद्धस्तत्र**' इति । अपिशब्दः द्रष्टव्यः । **तत्रापि** सन्तानभेदज्ञानेऽपि **सिद्धो** निश्चितो **वासनाभेदाद् भेदोऽयम्**।[3] [4]तथा च ततोऽपि कथं तद्भेदसिद्धिः ? मा भूत्, तद्भेदस्य तज्ज्ञानसत्यत्वनिश्चयस्य च वासनाभेदादेव भावात् ।

"कार्यत्वात्सकलं कार्यं वासनाभेदसम्भवम् ।
कुम्भकारादिकार्यं वा स्वप्नदर्शनकार्यवत् ॥" [प्र०वार्तिकाल० ३।३५१]

---

१ अन्यथा आ०, ब०, प० । अनभ्यासदशायाम् । २ –था तज्ज्ञा–आ०,ब०,प० । ३ –नीतसं–आ०, ब०, प० । ४ "वासना पूर्वविज्ञानकृतिका शक्तिरुच्यते ।"–प्र०वार्तिकाल० पृ० १८ । ५ –भेदादज्ञा–आ०, ब०, प० । ६ तथा च कथं ततोऽपि आ०, ब०, प० ।

इति वचनादिति चेत्, कुतः स्वप्नदर्शनस्य तद्भूतभावः ? कुतश्चिन्निश्चयादिति चेत्, न, [1]तस्य वासनाफलभावित्वे ततोऽर्थस्येव [2]तस्याप्यसिद्धेः। वस्तुतथाभावभावित्वे तु हेतोरनैकान्तिकत्वम्, तस्य कार्यत्वेऽपि [3]तद्भूतभावित्वाभावात्। लोकाभिप्रायादेव तस्य तद्भूतभावित्वं न स्वतः मया कुतश्चिन्निश्चीयत इति चेत्, न, लोकस्यापि [4]तत्र तन्मात्रभावाभिप्रायाभावात्। तदाह— ५

न सिद्ध्यति।
तन्मात्रभावो दृष्टान्ते सर्वत्रार्थोपकारतः ॥१००॥
पारम्पर्येण साक्षाद्वा [परापेक्षाः सहेतवः]। इति।

न सिद्ध्यति। स पर्वं वासनाभेद एव तन्मात्र तस्मात् भावो जन्म। क्व ? दृष्टान्ते निदर्शने। क्रियति ? सर्वत्र सर्वस्मिन् स्वप्नविज्ञानभाविनि विज्ञानान्तरभाविनि च। कस्मात् ? १०
अर्थस्य नीलादेर्जनकत्वेन व्यापार उपकारो न विषयत्वेन, असत एव तदा तस्य प्रतिभासनात्, तस्मात्। कथम् ? पारम्पर्येण अविप्लवे दर्शनमर्यात् ततः संस्कारस्ततश्च [5]विप्लवे नारीचौरादिदर्शनमिति परिपाटिः पारम्पर्यं तेन। दृष्टान्तमाह—'साक्षाद्वा' इति। 'वा' इति इवार्थः, साक्षात् अव्यवधानेन वा[अ]विप्लवे यथा तदुपकारस्तथा पारम्पर्येणान्यदेति। सौत्रान्तिकादनुगमेन चेदमुक्तम्, [6]स्वतः साक्षादपि तत्र तदुपकाराभावात्। १५

कीदृशास्ते दृष्टान्ता यत्र साक्षादेव पारम्पर्येण तदुपकार इति प्रश्नयन्त्र प्रत्याह—

परापेक्षाः[7] सहेतवः।
विच्छिन्नप्रतिभासिन्यो व्याहारादिधियो यथा ॥ १०१ ॥ इति।

व्याहारो वचनमादिर्यस्य व्यापारस्य तस्य धियो बुद्धय। कथम्भूताः ? परं प्राक् 'व्याहारादिकम् उपकारकमविप्लवे साक्षादिवान्यद्वा' पारम्पर्येणापेक्षन्त इति परापेक्षाः, २०
तत्र हेतुः सहेतवः सकारणिका यत इति। न हि परानपेक्षस्ये सहेतुस्य परस्येव हेतुत्वात्।

एवमपि वासनैव परमस्तु किं व्याहारादिनेति चेत्, आह—'विच्छिन्नप्रतिभासिन्य' इति। विच्छिन्नं विच्छेदः देशादिनियमस्तेन प्रतिभासन्ते इति शीलमस्तयोक्ताः। न हि व्याहारादिधियां वासनामात्रकारणत्वे देशादिनियमः सम्भवति। तथा हि—पूर्वं ज्ञान वासना, तच्च न सहेतुकमेव, विसदृशादपि तद्धियां भावात्। सा(वा)दृशादेव व्यवहिताच्चाभावः, २५
तस्यापि साक्षाद्व्यवहितादेव भाव इति चेत्, कथं सेयं विसदृशैरनुपादानोपादेयैरेकसन्तानस्य एव इदं सदृशमम्—[8]'नीलमवलोक्य चोरव्यापारं पश्यामि' इति। भवतु विसदृशादपि तद्भाव

---

१ विषयस्य। २ स्वप्नदर्शनस्य वासनाफलभावित्वस्य। ३ वासनायाम्। ४ स्वप्नदर्शने। ५ —य तत्र भावे—आ०, ब०, प०। ६ विप्लवेऽपि चौर—आ०, ब०, प०। ७ सविज्ञानाद्वैतवादिमतेन। ८ व्यवहार—आ०, ब०, प०। ९ —न्यथा पा—आ०, ब०, प०। १० नीलमव—आ०, ब०, प०।

इति चेत् ; कथं तर्हि नासां विच्छेदो विसदृशस्यादिच्छेदात् । तच्छक्तिप्रबोधस्य विच्छेदादिति चेत् ; न ; तस्यापि विसदृशकार्यत्वे तदयोगात् । तद्धेतुशक्तिप्रबोधविच्छेदात्तद्विच्छेदकल्पनायाम् अनवस्थादोषात् । तत्र [1]तन्मात्रभावित्वे [2]तासां देशादिनियमात्मा विच्छेदः । नाप्याकारनियमात्मा; व्याहारादिनेवाकारान्तरेणापि विसदृशादवश्यन्तया तदुत्पत्तेः । बाह्यापेक्षायां [3]तूपपद्यते । बाह्याद् व्याहारादेरेव देशादिनियतहेतुबलान्नियमोत्पत्तेः साक्षात् , पारम्पर्येणापि तदाहितादेव संस्कारादन्तरङ्गनियमोपनीतप्रबोधात्तदुत्पत्तेः । ततो दुर्भाषितमेतत्—

"कस्यचित्किञ्चिदेवान्तर्वासनायाः प्रबोधकम् ।
ततो धियां विनियमो न बाह्यार्थव्यपेक्षया ॥" [प्र०वा० २।३३६] इति ।

यदि बाह्यान्नियमः कथं स्वप्ने स्वशिरोदारणादेर्ज्ञानम् , तस्य साक्षादभावात् , प्राग्व्यदृष्टेरिति चेत् ; न ततोऽपि । जन्मान्तरदृष्टादेव संस्कारवाहिसन्तज्ज्ञानात् कुतो न सर्वदा? कुतो वा रागादीनां नियमः ? न हि तत्रालम्बनमुपयोगि, [4]ततो रागहेतोरेव विरागस्यापि दर्शनादिति चेत् ; न; अन्तरङ्गसहायस्यैव तस्य तन्नियामकत्वात् । ततो यदा अन्तरङ्गं यन्निमित्तं च तदेव तदेव नान्यदा नान्यच्च ज्ञानरागादिकार्यमुपजायते । वासनैवान्तरङ्गं तस्या एव तदृता स्वतः सकलप्रतिभासनियामकत्वेन संवेदनादिति चेत् ; कुतो विप्रतिपत्तिर्यत्तस्यं [5]त्रानुमानम ? अनिश्चयादिति चेत्; निश्चयादप्यनिश्चितात्कुतस्तद्भावः [6]? न हि स्वतस्तस्यं [7]निश्चयो वासनावत् । नाप्यन्यतः ; अनवस्थादोषात् । अनिश्चितादपि [8]स्वसंवेदनात्तत्र [9]तन्निवृत्तौ वासनायामपि स्यादिति व्यर्थमेव तत्रानुमानम् । तस्मादचेतनमेवान्तरङ्गं तस्यैव दृष्टकारणव्यभिचारवतः कार्यात्प्रतिपत्तेः । तदेव च क्षयोपशमविशेषवशाद्बाह्यतत्संस्कारसाहाय्येन क्वचिद्यथार्थमयथार्थञ्च प्रत्ययमुपजनयतीति सूक्तमेतत्—'परापेक्षा व्याहारादिधियो विच्छिन्नप्रतिभासिन्यो यतः' इति ।

'यथा' इति सादृश्ये यथैताः परापेक्षास्तथाऽन्येऽपि दृष्टान्ता इत्येवं साध्यवैकल्यं दृष्टान्तस्य [10]प्रतिपाद्येदानीं तत्र सत्यपि [11]तन्मात्रभावे साध्यासिद्धिमावेदयन्नाह—

सन्निवेशादिभिर्दृष्टैर्गोपुराट्टालकादिषु ।
बुद्धिपूर्वैर्यथा तत्त्वं नेष्यते भूधरादिषु ॥१०२॥
तथा गोचरनिर्भासैर्दृष्टैरेव भयादिषु ।
अबाह्यभावनाजन्यैरन्यत्रेत्यवगम्यताम् ॥ १०३ ॥ इति ।

सन्निवेशाः संस्थानविशेष आदिर्येषामचेतनोपादानत्वादीनां तैः दृष्टैरुपलब्धैः ।

---

१ वासनामात्रभावित्वे । २ धियाम् । ३ आकारनियमात्मा विच्छेदः । ४ ज्ञानादपि । ५ बाह्यालम्बनात् । ६ ज्ञानस्य । ७ यथा आ०, ब०, प० । ८ तथैव आ०, ब०, प० । ९ वासनावता पुरुषेण । १० वासनायाम् । ११ विप्रतिपत्त्यभावः । १२ निश्चयस्य । १३ निश्चयसंवेदनात् । १४ निश्चये । १५ विप्रतिपत्तिनिवृत्तौ । १६ प्रतिपद्ये—आ०, ब०, प० । १७ वासनामात्रजन्यत्वे ।

क्व ? गोपुराट्टालकादिषु । कीदृशैः ? बुद्धिपूर्वैः, युक्तं बुद्धिर्विद्यते अस्येति[1] बुद्धी, बुद्धिमान् पूर्वो हेतुर्येषां तैः । यथा येनाभिप्रायेण तत्त्वं बुद्धिपूर्वत्व नेष्यते । क्व ? भूधरादिषु यादृशैः तथा तेन प्रकारेण गोचरनिर्भासैः विषयप्रतिभासैः दृष्टैरेव मयादिषु, आदिशब्दादुन्मादादिषु । कीदृशैः ? अभ्यासभावनाजन्यैः, अविद्यमानाभ्यासया वासनयैव जन्यैः, अन्यत्र वाग्रहिषये तत्त्वम् अभ्यासभावनाजन्यत्वं 'नेष्यते' इति गतेन सम्बन्धः इत्यवगन्तव्यम् । तथा हि–युक्तं तादृशादेव विषयप्रतिभासित्वप्रत्यक्षत्वादेः अन्यत्रापि भावनाजन्यत्वसाधनं यादृशस्य मयादौ तज्जन्यत्वनिश्चयानं नान्यादृशात् । अन्यादृशाच्च तत् वाग्रहप्रत्ययेषु पर्वतादिषु सन्निवेशादिवत् । कुत एतत् ? अन्यत्र कुतः ? स्वय तत्र श्लोकस्य बुद्धिपूर्वत्वबुद्धेरभावात्, प्रकृतेऽपि भावनाजन्यत्वबुद्धेरभावात् । अपरामृष्टविशेषं [2]सामान्यमेवात्र हेतुरिति चेत् ; न , बुद्धिपूर्वत्वेऽपि [3]तस्यैव तत्त्वापत्तेः । कथं पुनः सन्निवेशादिवस्तुविशेषे सति [4]दृष्टस्य [5]तन्मात्रादनुमानम् , पाण्डुद्रव्यविशेष एव धूमे दृष्टस्यानलस्य पाण्डुद्रव्यमात्रादपि [6]तत्प्रसङ्गात् । यदुक्तम्–

"वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिन ।
न युक्तानुमिति पाण्डुद्रव्यादिव हुताशने ॥" [प्र०वा० १।१४]

इत्यपि न समाधानम् , भावनाजन्यत्वस्यापि [7]तन्मात्रात्तदभावापत्तेः । ततो विषयनिर्भासादिविशेषस्यैव साध्यव्याप्तिः, तस्य च सन्निवेशादिवत्पक्षे[8] धर्मिण्यभावात् न ततः साध्यसिद्धिः ।

नन्वेव कृतकत्वादनित्यमपि न सिद्ध्येत् तस्यापि घटादौ साध्यव्याप्ततया प्रतिपन्नस्य शब्दे धर्मिण्यभावादिति चेत् , अत्राह–

अत्र मिथ्याविकल्पौघैरप्रतिष्ठानकैरलम् । इति ।

अत्रास्मिन् न्याये सति मिथ्याविकल्पौघैः असत्यविकल्पप्रबन्धैः अलं पर्याप्तम् । कीदृशैः ? अप्रतिष्ठानकैः न विद्यते परपक्ष एव दोषतया प्रतिष्ठानं प्रतिष्ठा येषां तैरिति । सन्निवेशादिसिद्धतोद्भावनपक्षेऽपि तेषां मात्रादिति भावः ।

यदि वा, भवतु सन्निवेशादेर्बुद्धिमत्तोऽपि सिद्धिः, स तु विपक्ष एव अन्यस्य बुद्धिमत्त्वासम्भवात् , अनित्यश्च [9]अन्यत्रार्थक्रियाविरहात् , अविभुश्च निरंशस्य व्यापित्वायोगात् । तादृशश्च वासनारूप एव । ततो न तस्सिद्धौ कश्चिदस्माकं परिपीडा, परिशेषस्यैव भावात् । अत एवोक्तम्–

"प्रधानानां प्रधानं सदीश्वराणां तथेश्वरः ।
सर्वस्य जगतः कर्त्री वासना देवता परा ॥" [प्र०वार्तिकाल० ३।३५१]इति ।

---

१ –ति बुद्धिमान् ब्या०, ब०, प० । "अतीऽनेकाचः (शाकट्य० ३।३।१५१) इति सूत्रेण बुद्धशब्दान्मत्वर्थे इन्"–ता०टि० । २ विषयप्रतिभासित्वादि । ३ विषयप्रतिभासित्वसामान्यम् । ४ सामान्यमात्रस्य हेतुत्वापत्तेः । ५ बुद्धिपूर्वत्वस्य । ६ सन्निवेशमात्रात् । ७ अनुमानप्रसङ्गात् । ८ विषयप्रतिभासमात्रात् । ९ वाग्रहत्वस्य । १० नित्ये ।

तन्न सन्निवेशादेरगमकत्वं यतस्तद्विषयनिर्भासादेरपि तत्त्वमापद्यत इति । अत्रेदमाह—'अत्र' इत्यादि । अत्र सन्निवेशादिसाध्ये बुद्धिमति हेतौ ये **विकल्पौघाः** चेतनत्वं न विभुत्वं नार्थक्रियेति परामर्शरूपास्ते **मिथ्यैव** अवस्तुविषयत्वात् । अत एव न तेभ्यः कस्यचित्प्रतिष्ठानमित्यलं नैः कल्पितैरिति ।

न हि मिथ्याविकल्पेभ्यो हेतौ बुद्धिमति स्वयम् ।
चेतनत्वादिभावस्य प्रतिष्ठानं समञ्जसम् ॥९८८॥
वासनारूपता तस्य यतस्तैरुपकल्प्यताम् ।
अन्यथा वासनाबन्धसर्वस्वप्रतिषेधनात् ॥९८९॥
तैरेवेशादिरूपत्वं तस्याः[1] किन्न प्रकल्प्यते ।
न हि तादृग्विकल्पौघैर्दारिद्र्यं कस्यचित्क्वचित् ॥९९०॥
तथा च वासनाहेतुवादिना[2] यद्वदुच्यते ।
"प्रधानमीश्वरः कर्म यदन्यदपि कल्प्यते ॥९९१॥
वासनासङ्गसम्मूढचेतःस्पन्द एव सः ।"
इति तद्वत्परेणापि वाच्यमीशादिवादिना ॥९९२॥
वासनैव जगद्धेतुर्नान्य इत्यपि कल्पनम् ।
प्रधानेशादिसम्बन्धमूढस्पन्द एव नः ॥९९३॥

तत इदमनिच्छता सन्निवेशादेरगमक[त्व]मेव वक्तव्यम् । तद्बुद्धिविषयप्रतिभासत्वादेरपीति न वासनाभेदात्प्रत्ययनियमः, अपि तु बाह्यभेदादेव तथैव प्रमाणतः प्रसिद्धेरिति स्थितम् ।

भवतु बहिरर्थः, न तु परमाणुरूप एव तस्यैव प्रत्यक्षत्वान्नापरो विपर्ययादित्युपक्षिप्य प्रत्याचक्षाण आह—

अत्यासन्नानसंसृष्टानाणूनेवाक्षगोचरान् ॥१०४॥
अपरः प्राह तत्रापि तुल्यमित्यनवस्थितिः । इति ।

अत्यासन्नान् अतिशयेन निकटवर्त्तिनः, इत्यनेनाणूनां प्रत्यक्षत्वे निमित्तमुक्तम् । यद्येवं रूपस्य रूपनैकत्वाद् यथैकप्रत्यक्षविषयत्वमेवं रसादेरपि स्यादिति चेन ; न ; तस्य[9] देशतस्तन्नैकत्वेऽपि एकप्रत्यक्षकार्यशक्तितत्स्वभावान् रूपस्यैव हि रूपान्तरेण तन्न[10] न रसादेः । कार्यान्तरापेक्षायां तु तत्रापि "तदस्त्येव, रूपादिसाधारणस्यैवोदकाहरणादेर्दर्शनात् । **असंसृष्टान्** संसर्गरहितान् **अणूनेव** नावयविनम् **अक्षगोचरान्** इन्द्रियज्ञानविषयान्, **अपरो** योगाचारान् अन्यः सौत्रान्तिकः **प्राह**—तत्रोत्तरम् । **तत्रापि** प्रत्यासत्तावपि न पूर्वमेव **तुल्यं**

---

१ वासनायाः । २ हेतुवासना यद्व —आ०,ब०,प० । प्रज्ञाकरेण । प्र०वार्तिकाल० ३।३५१ । ३ प्रसृष्ट एव आ०, ब०, प० । ४—नासनादे—आ०,ब०,प० । ५ —न परो आ०, ब०, प० । ६ रसादेः । ७ नैकत्वा-भावाद् । ८ एक प्रत्यक्षत्वेशक्त्यपेक्षया नैकत्वम् । ९ रसादेरपि । १० नैकत्वम् ।

सदृशं दूषणमिति शेषः । किं तत् ? इत्यनवस्थितिः इति । इति अतः प्रत्यक्षप्रतीतेः अणुविषयत्वेनानवस्थानम् ।

भवतु पूर्वं प्रत्यासत्तेरभावात्तदनवस्थानं न पश्चादिपर्ययादिति चेत् , न , पश्चादप्य संसर्गात् । असंसर्गेऽप्येकदेशतया [1]तदुपपत्तिरिति चेत् , कः पुनरेकदेशः ?—

अणुभ्योत्तमिलीनानां स्वरूपामिश्रणं कथम् ? ५
तस्य प्रत्यणु भेदाच्चभेदेको देश कथं मतः ? ॥९९४॥
एकदेशतया तस्याप्येकत्वमिति चेदसत् ।
तत्राप्येष प्रचिन्तायामनवस्थानुषङ्गनात् ॥९९५॥
स्थूलश्चेत्कल्पितस्तेन प्रत्यासत्तिर्न तात्त्विकी ।
इन्द्रियज्ञानवेद्यत्वं [2]षेषां तद्दृश्य कथम् ? ॥९९६॥ १०
अकल्पितश्चेन्निर्भागो भवेदवयवी ततः
दृश्यन्तेऽणव एवेति न [3]भवद्वचनस्थितिः ॥९९७॥
शक्तिसादृश्यतस्तेषां प्रत्यासत्तेर्दिशेर्यदि ।
संसर्गेण विना तेषु व्यूहबुद्धिः कुतो भवेत् ? ॥९९८॥
घटोऽयमिति व सामान्यादेष चेद्व्यूहभित्कथम् ? । १५
सर्वत्र शक्तिसा दृश्याद्भगदेकघटं भवेत् ॥९९९॥
कार्यभेदेन भेदश्चेद्व्यूहस्य परिकल्प्यते ।
स एव शक्तिसादृश्ये कार्यभेदः कथं मतः ? ॥१०००॥
अन्यथेष्टेऽपि चैकस्मिन् तद्भेदाद् व्यूहभेदतः ।
न घटो नाम कश्चित्स्याच्चेटी[4] केनोदकं हरेत् ? ॥१००१॥ २०
एककार्यतया तेषु व्यूहधीर्यदि तन्न नो ।
निरंशवेदनं तस्य स्वपरव्याप्तिवेदनात् ॥१००२॥
अनेकनीलाद्याकारमेकं चेत्किम [5]दाहृत ।
बहिरर्थो यतस्तस्मिन् अणुव्यूहप्रकल्पनम् ॥१००३॥
वेदनं व्यूहरूपं चेत्कार्यं तत्कल्पनं कुतः ? २५
तत्कार्योदन्यतस्तस्मादिति चेन्नानवस्थितेः[6] ॥१००४॥
अलाताद्दहणं तच्चेन्न अलातेरवेदनात् ।
अणुस्तोमो अलातिश्चेन्न तस्याद्याप्यसिद्धितः ॥१००५॥

---

१ तदुपपत्तेरि—आ०, ब०, प० । २ अणूनाम् । ३ भवेद्व—आ०, ब०, प० । ४ एवेटिश्च नो—आ०, ब०, प० । ५ दाहरणम् आ०, ब०, प०, । ६ —वस्थितिः आ०, ब०, प० ।

व्यूहादुत्पत्तितस्तत्र व्यूहज्ञानं मतं यदि ।
तन्न व्यूहानवस्थाने तदुत्पत्तेरसम्भवात् ॥१००६॥
ततस्तु तव्यवस्थायामन्योन्याश्रयदूषणात् ।
तन्न संसर्गवैधुर्ये व्यूहो नामोपपद्यते ॥१००७॥

भवतु संसर्गादेव [1]तेषां दर्शनमिति चेत् ; न ; [2]सर्वदा स्थूलस्य दर्शनात् । दर्शनजन्मा विकल्प एव स्थूलज्ञानं न दर्शनम् । न हि दर्शनमसद्विषयं युक्तम् । [3]असंश्च स्थूलाकारो बहिरवयवभेदे[4]नादर्शनादिति चेत् ; भवतु कथञ्चित्तद्भेदेनैव दर्शनम् । कथं भिन्नानामभिन्नं रूपं विरोधादिति चेत् ? [5]नेदानीं विकल्पविषयत्वमपि स्थूलस्य, अनेकान्तविद्वेषे विकल्पस्याप्यभिलाप्यानभिलाप्यभेदाधिष्ठानस्यासम्भवादिति सर्वं निर्विकल्पमेव जगत्प्राप्तम् । ततः कुतो नीलादेरपि प्रतिपत्तिः निर्विकल्पस्य क्षणभङ्गादिवत् [6]तत्रापि [7]असत्कल्पत्वात् । विकल्पमेकानेकात्मकमनभिद्रुह्यतो बाह्येन किमपराद्धं यतस्तमेव तादृशमभिद्रुह्येत । [8]कुतस्तस्य [9]तादृशत्वमिति चेत् ? विकल्पस्यैव पूर्वपूर्वस्मात्तादृशादेवोपादानाद् अवयवसंसर्गाद्वा । संसृज्यमानाः खल्ववयवा एव कथञ्चित्स्थूलीभवन्ति । कात्स्न्र्यैकदेशाभ्यां पर्यनुयुज्यमानो न सम्भवत्येव संसर्गः तत्कथं तद्वशात् [10]तेषां स्थूलीभाव इति चेत् ? कथं दर्शनमपि [11]तत एव [12]तस्याप्युपपत्तेः । कुतो वा [13]ताभ्यां तत्पर्यनुयोगो [14]व्याप्त्यभावे येन केनचित्तत्प्रसङ्गात्[15] । सत्यपि ताभ्यां तस्य[16] तद्भावे[17] नैकदेशेन संसर्गेऽनवस्थानम्, नापि सर्वात्मना तस्मिन्प्रचयहानिः, परस्परानुप्रवेशस्य संसर्गस्यानभ्युपगमात् । वियोगपर्युदास एव हि संसृज्यमानपदार्थात्मा संसर्गः प्रतीयते नापरः । स च तन्तोः [18]तदन्तरेण पार्श्वदेशात्मा परमाणोस्तदन्तरेण[19] [20]सर्वात्मेति न किञ्चिदसमञ्जसमुत्पश्यामः [21]यतो न तद्वशादणव एव स्थूलीभवेयुः । तद्वशा[22]भ्य एव स्थूलकार्यस्य तत्प्रत्ययादेर्भावात् किं स्थूलेन ? पारम्पर्यपरिश्रमो ह्येवं स्यात्–तेभ्यः स्थूलस्ततश्च तत्कार्यमिति चेत् ; न तर्हि नीलादिनापि किञ्चित् , तत्कार्यस्यापि तत्प्रत्ययादेस्तेभ्य[22] एव सम्भवात् । तदुक्तम्–

"स्वीकुर्वन्ति गुणानर्थां यया शक्त्याऽगुणा न किम् ।
तया तत्संविदं कुर्युर्भिन्नाश्चेदेकसंविदम् ॥" [सिद्धिवि० परि०] इति ।

नीलादिव्यतिरेकेण नापरस्तत्स्वभावो यतस्तत्कार्यं स्यादिति चेत् ; न ; [23]निराकारावस्थस्य प्रधानस्यैव तत्स्वभावत्वात् । न तथा कदाचिदपि तेषां प्रतिपत्तिरिति चेत् ; न ;

---

१ परमाणूनाम् । २ सर्वथा आ०, ब०, प० । ३ असंश्चेत्स्थू-आ०,ब०,प० । ४ –भेदे वा दर्श–आ०, ब०,प० । ५ न तदानीं आ०,ब०,प० । ६ नीलादावपि । ७ अनिश्चायकत्वेन अविद्यमानवद्भावात् । ८ कुतस्तत्र ता-आ०,ब०,प० । ९ एकानेकात्मकत्वम् । १० परमाणूनाम् । ११ संसर्गवशादेव । १२ दर्शनस्यापि । १३ कात्स्न्र्यैकदेशाभ्याम् संसर्गपर्यनुयोगः । १४ व्याप्त्यभावात् ये–आ०, ब०, प० । १५ पर्यनुयोगप्रसङ्गात् । १६ संसर्गस्य । १७ व्याप्तिसद्भावे । १८ तन्त्वन्तरेण । १९ परमाण्वन्तरेण । २० सर्वात्मनेति आ०, ब०, प० । २१ यं सन्तानतद्भावादण– आ०, ब०, प० । २२ परमाणुभ्य एव । २३ निराकारावस्थानस्य आ०, ब०, प०, ।

निरवयवापि तद्भावात्। यद्यामलकं वस्तुभूतेनैव स्थूल किमिति यदपेक्षयेव कपित्थापेक्षयापि न [1]तथेति चेत् ? स्वहेतोस्तथैवोत्पन्नत्वात्। न हि भावः स्वहेतुप्रकृतेस्तथाऽन्यथा वा भवन्तः पर्यनुयोगमर्हन्ति, अन्यथा पावकोऽपि धूमस्यैव(स्येव) किम न सर्वस्य जनक ? धूमोऽपि पावकस्यैव(स्येव) किम न सर्वस्य गमक इति पर्यनुयोगात् न कश्चिदित्यम्भावे नावतिष्ठेत। आपेक्षिकत्वाच्च स्थूलस्यावस्तुरूपत्वे कारकज्ञापकयोरपि तत्त्वापत्तेः। ततो निरवयवप्रतिपत्तिविषयत्वात् स्थूल [2]एव च बहिर्भावो न परमाणवो विपर्ययादित्युपपन्नमुक्तम्-'इत्यनवस्थितिः' इति।

तदेवं परमाणूनां प्रत्यक्षत्वं प्रत्याख्याय अवयविनस्तत्प्रत्याख्यानाय योगमतमुपक्षिपति--

तत्रापि तुल्यजातीयसंयोगसमवायिषु ॥१०५॥
अत्यक्षेषु ध्रुवेष्वन्यदध्यक्षमपरे विदुः। इति।

तत्र तेषु अनन्तरोक्तेष्वणुषु अन्यद् अर्थान्तरमवयविद्रव्यम्-अध्यक्षम्। अपिशब्देनात्रापशब्दो द्योतयति-परमाणव एव तावन्न सम्भाव्याः कथं तत्रान्यदध्यक्षमिति। दृश्यते च अपिशब्दादपशब्दोद्योतन यथा-"ब्रह्माण्डं यदि तत्तत् तत्रापि क्षितिमण्डलम्" [ ] इति।

किं पुनरवयविना परिकल्पितेन, तत्प्रयोजनस्य परमाणुष्वेव परिसमाप्तेरिति चेत् ? न, [3]तेषामदर्शनात्। न चादृष्टेषु तत्समाप्तिकल्पनम्, अव्यवस्थापत्तेः। तदाह-'अत्यक्षेषु' इति अप्रज्ञानमतिक्रान्तेष्वित्यर्थः। प्रत्येकमक्षायामत्यक्षत्वेऽपि सङ्घातावस्थाया स्फुटो न तेषा प्रत्यक्षत्वमिति चेत् ? न, तदापि नित्यत्वेन प्राक्तनस्वभावापरित्यागात्। तदाह-'ध्रुवेषु' इति। अपरित्यक्तपूर्वस्वभावानामेव यथा द्रव्यारम्भकत्वमेवमप्यप्रत्यक्षत्वमपि तदा किन्न भवेदिति चेत् ? भवेदेवम्, यदि तदापि तत्प्रतिभासनम्। न चेदमस्ति, स्थूलस्यैव प्रतिभासनात्। [4]तदपि परमाणुष्वेव नावयविनीति चेत्, कथमस्थूलेषु [5]स्थूलदर्शनम् ? कुवस्त्रिद्विभ्रमनिमित्तात् दूरविरलकेशवदिति चेत्, किंरूपास्ते केशा यत्र [6]तद्दर्शनं निदर्शनमुच्येत ? परमाणुरूपा इति चेत्, न, तत्र दर्शनस्य विषयाधिष्ठितत्वेन दृष्टान्तत्वानुपपत्तेः। स्थूलरूपा एव "या च यावती च मात्रा"[प्र०वार्तिकाल०द्वि०प० पृ० ३१०] इति न्यायादिति चेत्, न, अवयविनमनभ्युपगच्छतस्तद्रूपास्ते इत्यनुपपत्तेः। परबुद्ध्या ते तद्रूपा न स्वबुद्ध्येति चेत्, स्वबुद्ध्या तर्हि किं निदर्शन यतस्तद्दर्शनस्याणुविषयतामाचक्षीत इति न किञ्चिदेतत्। [7]ततः स्वबुद्ध्या अपि तद्रूपा" एव ते वक्तव्या इति "सिद्धं तेषु प्रत्येकं तद्दर्शनस्यावयविविषयत्वं तद्वद् घटादावपि। न च दूरविरलकेशेषु तद्दर्शनस्य विभ्रमाद्घटादावपि विभ्रमः, नीलादावपि क्वचित्तद्दर्शनस्य विभ्रमात् सत्यनीलादावपि तस्याप्तेः। ततो युक्तम् 'अन्यदध्यक्षम्' इति।

भवत्वन्यदध्यक्षम्, तच्च स्थूलावयवारब्धमेव, तस्यैव महत्त्वेनाध्यक्षत्वोपपत्तेर्न परमा

---

१ स्थूलम्। २ एवं च आ०, ब०, प०। ३ -ज्ञानं यो-आ०, ब०, प०। ४ -न्यादेवाव-आ०, ब० प०। ५ -मात्तिरि-आ०, ब०, प०। ६ परमाणूनाम्। ७ स्थूलप्रतिभासनम्। ८ स्थूलदर्शनम्। ९ तत्र स्वबु-आ०, ब०, प०। १० स्थूलरूपाः। ११ सिद्धान्तेषु आ०, ब०, प०।

ण्वारब्धं विपर्ययात्, ततो न युक्तं तत्र ग्रहणमिति चेत्; न; महतोऽपि परमाण्वारब्धद्व्यणुकादिक्रमेण प्रादुर्भावात् पारम्पर्येण परमाणुनिष्ठत्वेन तत्र ग्रहणोपपत्तेः। तच्च तेषु **अन्यदध्यक्षम् अपरे** योगा **विदुः** जानन्ति। कीदृशेष्वित्याह-'**तुल्य**' इत्यादि। समवायो वृत्तिः कार्यस्य स येषामस्तीति समवायिनः कार्योपादानहेतवः संयोगेन सहिताः समवायिनः **संयोगसमवायिनः** 'शाकपार्थिवादिवदुत्तरपदलोपी समासः। संयोगग्रहणमुपलक्षणम्-निमित्तान्तरस्यापि। साहित्यञ्च संयोगस्य तेषु समवायात्, कालदेशादेश्च संयोगादिति प्रतिपत्तव्यम्। तुल्यजातीयाश्च ते संयोगसमवायिनश्च **तुल्यजातीयसंयोगसमवायिनः** तुल्यजातीयत्वं कार्यद्रव्यापेक्षम्। कार्यस्य द्रव्यस्य हि पार्थिवस्य पार्थिवा एव, आप्यस्य चाप्या एव समवायिनो नान्य इति। एवमन्यत्रापि। तेषु **तुल्यजातीयसंयोगसमवायिषु** इति। अत्र प्रतिविधानमाह-

कारणस्याक्षये तेषां कार्यस्योपरमः कथम् ॥१०६॥ इति।

तेषां वैशेषिकादीनां **कथम्**? न कथञ्चित्। **कार्यस्य** अवयविनोऽन्यस्य **उपरमः** कादाचित्कत्वम्। कदा? **कारणस्य** परमाणुलक्षणस्य **अक्षये** नित्यत्वेन स्वरूपावैकल्ये इति।

तात्पर्यमत्र-कार्यस्य हि कार्यत्वं सत्तासम्बन्धात्। न चासौ सतः, एतद् वैयर्थ्यात्। नाप्यसतः; खरशृङ्गादेरपि प्राप्तेः। अपि तु प्रागसतः कारणसामग्र्याः "प्रागसतः सत्तासम्बन्धः कार्यत्वम्" [ ] इति वचनात्। न च कारणस्याक्षये प्रागपि कार्यस्यासत्त्वं सत्त्वस्यैवोपपत्तेः, तत्परतन्त्रस्य तस्य सति तस्मिन्नवश्यम्भावात्। असति तस्मिन्नभावादेव तस्य तत्परतन्त्रत्वं न तु सति भावनियमादिति चेत्; सत्यप्यभावे किं निबन्धनम्? स्वभावनिबन्धनत्वे भवनस्यापि तन्निबन्धनत्वापत्तेः, नित्यत्वप्रसङ्गस्य चोभयत्राप्यविशेषात्। शक्तिवैकल्यमिति चेत्; न; पश्चादप्यभवनप्रसङ्गात्। न हि नित्यस्य पश्चादपि तद्वैकल्यप्रच्युतिः, अनित्यत्वापत्तेः। एतदर्थमेव च 'अक्षये' इत्युक्तम्।

कथं वा शक्तिविकलस्य वस्तुत्वं व्योमकुसुमवत्? अर्थान्तरशक्तिसम्बन्धादिति चेत्; न; अनुपकारिणस्तत्सम्बन्धायोगात् अतिप्रसङ्गात्। न च शक्तिविकलस्योपकारित्वम्; अवस्तुत्वात्। पुनरप्यर्थान्तरशक्तिसम्बन्धाद्वस्तुत्वकल्पनायाम् अनवस्थापत्तेः। न च शक्तेः कुतश्चिदुपकारो नित्यत्वात्। नित्यत्वे कथं तत्कार्यस्य प्रागभाव इति चेत; न; एवमपि परस्यैव पर्यनुयोगात्। अनित्यैव शक्तिः, प्रागभाविन्यास्तस्याः कारणादुत्पत्तेरिति चेत्; न; सत्यविकले कारणे तत्प्रागभावस्याप्यनुपपत्तेः। सतोऽपि कारणस्य स्वशक्तिवैकल्यात्तस्याः प्रागभवनमिति चेत्; न; 'पश्चादप्यभवनप्रसङ्गात्' इत्यादेराम्नायात् अनवस्थोपनिपाताच्च।

---

१ समवायवृ-आ०, ब०, प०। २ सत एव वै-आ०, ब०, प०। ३ "स्वकारणसत्तासम्बन्धः कार्यत्वम्"-प्रश० व्यो० पृ० १२९। "प्रागसतः सत्तासमवायो वा कार्यत्वमित्येके"-प्रश० क० पृ० १८। ४ कारणावीनस्य। ५ कार्यस्य। ६ शक्तिवैकल्यप्रच्युतिः। ७ परस्य पर्य-आ०, ब०, प०। ८ शक्तेः। ९ चेत् तन्न आ०, ब०, प०।

किं वा शक्तिकरणे कारणस्य प्रयोजनम् ? कार्यकरणमिति चेत्, न, शक्तिकरणेऽपि [1]तदन्तरकरणापेक्षायाम् अनवस्थादोषेण कार्यानिष्पत्तेः। स्वतस्तत्करणे तु कार्यकरणमेवास्तु विशेषाभावात्।

भवतु स्वतस्तत्करणम्, तथापि न कार्यस्यानुपरमः संयोगस्यापेक्षणीयस्याभावे तदुपरमात्। संयोगापेक्षा एव हि परमाणवः कार्यारम्भिण इति चेत्, स एव तेषां कथं संयोगः ? तदुत्पत्तेरिति चेत्, अनिवृत्तः पर्यनुयोगः 'तेषामक्षये कथं तदुपरमः' इति। संयोगोऽपि तेषां [2]कर्मणः, तदपि सस्कारात्, सोऽपि कर्मणः पूर्वस्मात्, तदपि पूर्वस्मादेव संस्कारात्, तावदेवं यावदाद्यं कर्म, तत्तु तेषामात्मसंयोगात्, [3]तदनित्यत्वेन कर्माद्यनित्यत्वादुपपन्नः संयोगस्योपरम इति चेत्, न, आत्मन[4] परमाणूनाञ्च नित्यत्वे तत्संयोगस्याप्यनित्यत्वानुपपत्तेः। अपेक्ष्यस्याप्यदृष्टस्यात्मकार्यत्वेन सर्वदा सन्निधानात्। अपेक्ष्यासन्निधानात्तदसन्निधानेमिति चेत्, ननु तत्रापेक्ष्यं द्रव्यादिकमेव "द्रव्यगुणकर्माणि धर्मसाधनम्"[ ] इति [5]भावत्कसूत्रात्। [6]तदपि न तदेव येनाऽदृष्टापेक्षात्मपरमाणुसंयोगादिक्रमादुत्पत्तिः, परस्पराश्रयात्—सत्यदृष्टे तदपेक्षा तत्क्रमाच्चोत्पत्तिः", उत्पन्नञ्च तदपेक्ष्य अदृष्टस्योत्पत्तिरिति। भवतु "[7]अन्यदेवेति चेत्, न, तस्यापि परमाणूनामक्षये सत्कार्यत्वेनोपरमायोगात् सन्निधन्यनस्यादृष्टस्यासन्निधानानुपपत्तेः। अक्षयेऽपि तेषाम् आत्मसंयोगादिक्रमस्य तद्धेतोरदृष्टानित्यत्वेनानित्यत्वादुपपत्तेरुपरतिः। अदृष्टानित्यत्वं चापेक्ष्यस्य द्रव्यादेरनित्यत्वादिति चेत्, न, तत्रापि 'तदपि न तदेव' इत्यादेरनुगमात् आयुक्तिदोषादनवस्थानुपपत्तेश्च। तस्य तत्संयोगकारणत्वेन कार्योपरमः।

कुतो वा तेषां संयोगादि सहकारि ? प्रतिक्षणं तत्कृतादुपकारादिति चेत्, न, [8]तस्य तेभ्यो भेदे तेषामिति व्यपदेशानुपपत्तेः। ततोऽपि भिन्नस्योपकारस्य मायात्तदुपपत्तौ अनवस्थानदोषस्तव्योपनिपातात्। [9]"अभेदे तेषामनित्यत्वापत्तेः"[10]। एककार्यकरणमेवोपकार इति चेत्, कुतस्तेन[11] तत्करणम् ? शक्तत्वात्, तदपि कुतः ? सति तस्मिन्नवश्यम्भावात् कार्यस्येति चेत्, न तर्हि परमाणूनां शक्तत्वं सत्स्वपि तेषु कार्यानुत्पत्तेः। सहकारिसन्निधावेव तेषां शक्तत्वमिति चेत्, न, अनित्यदोषस्योक्तत्वात्। तत्सन्निधिरेव तेषां शक्तिरिति चेत्, कथमन्य अन्यस्य शक्तिः ? तेन तत्कार्यस्य करणादिति चेत्, तदपि [12]कथम् ? कथं राज

---

१ कार्यकार-आ०, ब०, प०। २ तदनन्तरेणापि-आ०, ब०, प०। ३ किमात्मा। ४ आत्मसंयोगस्याभिन्नत्वेन। ५ अप्यदृष्टसन्निधानम्। ६ —सापेक्षानीति भावः सूत्रात् आ०, ब०, प०। ७ "तस्य तु साधनानि गुणिस्मृतिविशिष्टानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थितानि द्रव्यगुणकर्माणि"—प्रश० भा० पृ० ११८। ८ द्रव्यादिकमपि। ९ द्रव्यादेः। १० आत्मापुसंयोगात् परमाणुषु क्रिया, क्रियातो विभागः, विभागात्, पूर्वदेशसंयोगनाशः ततः परमाणुद्वयसंयोगः तेन च द्व्यणुकोत्पत्तिः, त्रिभिर्व्यणुकैः त्र्यणुकमित्यादिक्रमात्। ११ द्रव्यादुत्पत्तिः। १२ द्रव्यादिकम्। १३ उपकारस्य। १४ उपकारात्तत्संयोगादेर्भेदे। १५ —सत्त्वापत्तेः आ०, ब०, प०। १६ 'संयोगादिसहकारिणः'—आ०, टि०। १७ कथं राज—आ०, ब०, प०।

कार्यस्य प्रतिव्यूहेन करणमिति चेत् ; न; तत्र वस्तुतस्तव्यूहस्यैव हेतुत्वात् , तत्पोपकत्वेन राशि[1]भक्त्या तद्धेतुत्वोपकल्पनात् । परमाणूनामपि भाक्तमेव हेतुत्वं सहकारिपोषणादिति चेत् ; न ; तत्पोषणेऽपि तदपरसहकारिपोषणेन हेतुत्वे अनवस्थापत्तेः । स्वतस्तत्पोषणे तु व्यर्थमेव तत्[2] कार्यस्यैव स्वतस्तदुपपत्तेः । एवं हि तात्त्विकं तद्धेतुत्वं भवेत् । भवतु स्वत एव तत्पोषणं तत्तु[3] सहकारिसन्निधिविशिष्टानामेव तेषां न केवलानामिति चेत् ; न ; तद्विशिष्टरूपस्य प्रागपि भावे ततोऽपि तत्पोषणप्रसङ्गात्, अभावे चानित्यत्वस्याभिधानात् । तदा तत्सन्निध्यभाव एव "तेषां तद्रूपाभावो न स्वरूपाभावो यदयं प्रसङ्ग इति चेत् ; न; पश्चादपि तत्सन्निधिभाव एव तद्रूपभावो न स्वरूपभाव इत्यपि प्रसङ्गात् । एवञ्च तद्रूपं कारणं ब्रुवता तत्सन्निधेरेव कारणत्वमभिहितं न तेषाम्[4] । तेषामेव विशिष्टप्रत्ययवेद्यस्वभावो विशिष्टरूपं न सन्निधिरेव; तर्हि तद्भावोऽपि पूर्वं तद्वेद्यस्वभावाभाव एव न तत्सन्निधिमात्राभाव इति कथन्न अनित्यतादोषोपनिपातः । ·

एतेन यदपि प्रत्युक्तं यदुच्यते परैः—"न तेषामेव कारणत्वं नापि तत्सन्निधेरेव, अपि तु तदुभयसामग्र्याः ।" [ ] इति; कथम् ? यथा सामग्रीभावे तदन्तर्गतसत्तात्मकत्वेन कार्योत्पत्तौ तेषामुपयोगः, तथा तदभावेऽपि तदन्तर्गताभावत्वेनैव तदनुत्पत्तौ तेषामुपयोग इत्यनित्यतादोषन्याप्रतिक्षेपात् । सामग्र्यभावस्य तदभावमन्तरेणापि तदनुत्पत्तिं प्रत्युपयोगे सामग्रीभावस्यापि तद्भावमन्तरेणैव किन्न तदुत्पत्तिं प्रत्युपयोगः स्यात् ? सामग्रीभावे तद्भावस्यावश्यम्भावादिति चेत्; भवत्यवश्यम्भावः, अन्यथा नित्यत्वहानेः, तस्य तु कुतस्तदङ्गत्वम् ? न ह्यवश्यम्भावादेव तत्त्वम्, आकाशादिभावस्यापि तत्त्वप्रसङ्गान्न नियमवती सामग्री स्यात्। अननुकृतव्यतिरेकत्वान्न तस्य तदङ्गत्वमिति चेत्; तत एव परमाणुभावस्यापि न स्यादिति कथन्न तन्निरपेक्षस्यैव[5] सामग्रीभावस्य तदुत्पत्तावुपयोगः ?

सामग्रीकारणत्वे च प्रत्येकं तत्कारणत्वाभावात् कथं परमाणवः समवायिकारणम् संयोगोऽसमवायिकारणं निमित्तकारणमन्यदिति व्यपदेक्ष्यः ? सामग्रीकारणत्वस्य तत्रोपचारादिति चेत्; न; मुख्यकारणत्वाभावेनावस्तुत्वापत्तेः । कथं सामग्र्या अपि कारणत्वम् अवस्तूनां सामग्र्या अप्यवस्तुत्वात् ? सामग्र्यास्तदभेदान्मुख्यमेव प्रत्येकमपि कारणत्वमिति चेत् ; न; प्रत्येकपरिसमाप्त्या तस्यास्तदभेदे सामग्रीबहुत्वेन कार्यबहुत्वापत्तेः, कार्यानुपरमदोषाच्च परमाणूनां समग्ररूपाणामक्षयात्[6] । बहुपरिसमाप्तौ तु कथं प्रत्येकं कारणत्वं तत्परिसमाप्त्या बहुष्वेवं तत्त्वोपपत्तेः[7] । तथा च नैकशो वस्तुत्वमकारणत्वात् । बहुशो वस्तुत्वमेव एकशोऽपि वस्तुत्वमिति चेत; न; एकशस्तदभावस्यैव बहुशोऽपि तदभावत्वापत्तेः । बहुशस्तद्भाव एव इष्यते कारणत्वादिति चेत ; न; एकशोऽपि विपर्ययात् तदभावस्यैव दर्शनात् ।

---

१ "उपचरेण"—ता० टि० । २ सहकारिपोषणम् । ३ सहकारिपोषणम् । ४ सहकारिसन्निध्यभाव । ५ परमाणूनाम् । ६ तत्पोषणाभावः । ७ परमाणुनिरपेक्षस्यैव । ८ कारणत्वोपपत्तेः ।

एकशश्चावस्तुत्वे न परमाण्वादेर्नित्यत्वम्, अकारणवत्त्वेऽपि सत्त्वाभावात्। न ह्यवस्तुनः स्वत सत्तासम्बन्धाद्वा वस्तव व्योमकुसुमादावपि प्रसङ्गात्। सतश्चाकारणवतो नित्यत्वम् "सदकारणवन्नित्यम्।" [वै०सू० ४।१।१] इति वचनात्। एकशश्च कारणत्वेन वस्तुत्वे सामग्र्याः प्रागपि सत्त कार्यस्यावश्यम्भावात् कथम मुख्यः कारणभावो यत इदं विश्वरूपस्य सूक्ष्मम्- "तथा च मुख्यः कारकव्यपदेशो यदा सहकारिसहितं स्वरूपं कार्यं जनयति नान्यदा गौणः" [ ] इति। तच्च "द्रव्याणि द्रव्यान्तरमारभन्ते" [वै०सू० १।१।१०] इत्युपपन्नम्, आरम्भकाणामिवारभ्यस्यापि प्रागसत्त्वाभावेनारभ्यत्वानुपपत्तेः।

अथ वा, कारणस्याक्षये सेपा कार्यस्य परापरतया तस्यैवानुत्पत्तिः उपरमः कथम् ? न कथञ्चित्। तत एव कारणादेकस्य परस्य पुनरप्यपरस्योत्पत्तेः। सहकारिभेदेकस्यावनुत्पत्तिरित्यप्ययुक्तम्, सहकारिप्रतीक्षणस्य प्रतिक्षिप्तत्वात्। न च सदैकरूपम्, प्रागिव पश्चादप्यवयवसंयोगस्य भावात्, तस्य च द्रव्यारम्भे निरपेक्षत्वात्। "संयोगस्य द्रव्यारम्भे निरपेक्षकारणत्वात्" [ ] इत्याद्येयवचनात्। तत्सदैकस्येऽपि कारणप्रतिबन्धादनुत्पत्तिरिति चेत्, न, सति शक्ते हेतौ तदयोगात्।

कार्यमपि प्रतिबध्ने शक्तमेवेति चेत्, न, काचपच्योपनिपातात् हेतोरुत्पत्तिशक्तस्य बन्धस्य कार्यादिति। हेतोः हेतुत्वमेव तेन प्रतिबध्यत इति चेत्, किं तस्य हेतुत्वम् ? स्वरूपमेवेति चेत्, न, तस्योत्पन्नेऽपि कार्ये भावात्। शक्तिरिति चेत्, न, तस्या अर्थान्तरस्यानभ्युपगमात्। तत्साहित्यमेव तेन तत्प्रतिबन्ध, सति तस्मिन कार्योपजननस्याप्रतिपत्तेरिति चेत्, न, तदनुत्पत्तेस्तन्मात्रायत्तत्वप्रसङ्गात्। न चैतदप्यं भवताम्, सदुत्पत्तेरपि तन्मात्रमात्रायत्तत्वेन हेतोरकिञ्चित्करत्वापत्तेः। तन्मात्रसहितादेतुभावादेव सदुत्पत्तिरिति चेत्, न, तदनुत्पत्तेरपि तन्मात्रसहितादेतुभावादेव प्राप्तेः। तन्मात्रे हेतुभावोऽपि प्रतीयत इति चेत्, न, तस्य शक्तिरूपस्य कार्यानुमेयतया कार्यानुत्पत्तावप्रतिपत्तेः। स्वरूपमेव तस्य शक्तिः, नैतस्याप्रतिपत्तिरिति चेत्, न तर्हि तस्य प्रतिबन्ध इति कथमनुत्पत्तिः अपरस्य परस्य कार्यस्य अक्षीणशक्तिके हेतौ तदयोगात् इत्युपपन्नमेतत्-'कारणस्य' इत्यादि।

न चायं पक्षान्तरे दोषः, प्रारब्धैकस्थूलपरिणामानां सत्परिणामापरिक्षये तदपरपरिणामारम्भे शक्तिपरिक्षयात्। शक्तेश्च कथञ्चिच्छक्तिमदर्थान्तरत्वेन व्यवस्थापनात्।

अपि च, कुत इदं परमाण्वनामाधारत्वं यतः कार्ये तेषु व्यपदिश्येत ? तत्पादनादिति चेत्, न, सहकारिणामपि तत्प्रसङ्गात्। स्थापनादिति चेत्, न, स्वयमस्थास्नुतयोत्प-

---

१ अन्यथा आ०, ब०, प०। २ -रव पुन -आ०, ब०, प०। ३ संयोगस्य। ४ "च च द्रव्यगुणकर्महेतुः द्रव्यारम्भे निरपेक्षः।"-प्रश० भा० पृ० ६१। ५ कार्येण। ६ तत्सदीपत्तेर्यापि कार्ये आ०, ब०, प०। ७ तस्य च। ८ कारणसहितस्य। ९ कारणसहितस्यप्रतिबन्धे। १० कारणसहितस्य प्रतिबन्धमात्र। ११ कारणसहितस्यप्रतिबन्धसद्भाव। तदभावादेस्तादे-आ०, ब०, प०। १२ कारणसहितस्यप्रतिबन्धसद्भावे। १३ हेतुभावस्य। १४ कथमुत्प-आ०, ब०, प०। १५ अनुत्पत्तेरयोगात्। १६ अपारतन्त्र्यप्रसङ्गात्।

न्नस्य तदयोगात्। न हि तस्य तेभ्यः स्थितिरव्यतिरेकेण विरोधात, स्वयमस्थास्नु च स्थितिश्च तस्येति। व्यतिरेकेऽपि कथं तया तत्तिष्ठेन्नाम? सम्बन्धादिति चेत्; न; अनुपकारे तदयोगादतिप्रसङ्गात्। स्थित्यापि तदन्तरस्योपकार इति चेत्; न, तस्यापि व्यतिरेके पूर्ववत्प्रसङ्गात्। तेनापि तदन्तरकल्पनायाम् अनवस्थापत्तेः। स्थितिरेव कार्येणोपकार इति चेत्; न; तत्स्वरूपस्य परमाणुभ्य एव भावात्। अस्वरूपमुपकार इति चेत्; तेनाप्यनुपकारे सम्बन्धायोगात्। ततोऽप्यस्वरूपोपकारान्तरपरिकल्पनायाम् अनवस्थोपनिपातात्। तन्नास्थास्नुतयोत्पन्नस्य कुतश्चिदवस्थापनम्। नापि विपरीतस्य वैयर्थ्यात्। सत्यपि स्थापकत्वे परमाणूनां कथं स्थाप्यस्य कुतश्चिदुपरमः? स्थापकेष्वक्षीणेषु तदयोगात्। उपरमहेतुसन्निधानात्प्रागेव तेषां स्थापकत्वं न पश्चादिति चेत्; न, अनित्यत्वापत्तेरावेदनात्। कार्यस्यैवायं धर्मो यत्स्थापकेषु सत्स्वपि उपरमहेतुसन्निधानादुपरमतीति चेत; तदुपरमे कथं स्थापकत्वं तस्य स्थाप्यापेक्षत्वात्? चित्रोपरमे कथं कुड्यस्य स्थापकत्वमिति चेत्? न; असिद्धत्वात्। न हि सत्येव स्थापकत्वे कुड्यस्य चित्रोपरमः, तदस्थापकत्वपरिणामभाव एव तदुपपत्तेः। किमिदानीं वृष्ट्यादिना तदुपरमहेतुनेति चेत्? न; तत्सन्निधान एव तस्य स्वहेतुतस्तत्परिणामात्। उक्तञ्चैतत्—

"स्वतोऽन्यतो विवर्त्तेत क्रमाद्धेतुफलात्मना" [सिद्धिवि० परि० ३] इति।

तन्न कुड्यमत्र दृष्टान्तो वैषम्यात्। तस्मादनुपरतिरेव सत्सु स्थापकेषु कार्यस्येति व्यर्था एवोपरतिहेतवो नित्यकारणवादिनाम्। तदाह—**कारणस्य** इत्यादि। **कारणस्य** परमाणुरूपस्य जातावेकवचनम्। **अक्षये** स्थापकस्वभावापरिक्षये **कार्यस्य** स्थाप्यस्योपरमः प्रध्वंसः। **कथम्**? न कथञ्चित्।

किञ्च तस्य तैः स्थाप्यत्वम्? सम्बन्ध इति चेत्? सोऽपि यदि सर्वात्मना तदनुप्रवेशः; तदा परमाणव एव नापरं द्रव्यमिति कथन्न "सर्वाग्रहणम् अवयव्यसिद्धेः" [न्यायसू० २।१।३४] इति भवतोऽपि दोषः। एकदेशेनेति चेत्; न; कारणव्यतिरेकेण तदभावात्। भावे तत्रापि सर्वात्मना तदनुप्रवेशे स एव अवयव्यभावान्न तस्य नापि परमाणूनामतीन्द्रियत्वाद्ग्रहणमिति सर्वाग्रहणदोषः। तत्राप्येकदेशेन तदनुप्रवेशकल्पनायाम् अनवस्थानम्। न सर्वात्मनैकदेशेन वा सम्बन्धः; तस्य भेदाभावात्, सत्येव च भेदे तन्निःशेषतायां सर्वात्मनेति, तत्सशेषतायामेकदेशेनेति चोपपत्तेः, अपि तु स्वरूपेणैव; इत्यपि न युक्तम्; तेनापि तदनुप्रवेशे तन्मात्रावशेषात् पूर्वदोषानतिवृत्तेः। न तदनुप्रवेशः सम्बन्धः, अपि तु अजहद्रूपतया प्राप्तिरेवेति चेत्; तत्रापि न क्रमेण प्रत्यवयवं तस्य सम्बन्धः; एकद्रव्यस्य प्रसङ्गात्, तस्य चानभ्युपगमात्, अवय-

---

१ कार्यस्य। २ कार्यस्य। ३ कार्यम्। ४ चित्रोपरमोपपत्तेः। ५ चित्रोपरम। ६ कुड्यस्य। ७ कार्यस्य। ८ यौगस्यापि। "अवयविद्रव्यमनभ्युपगच्छन्तं सौगतं प्रति भवता आपाद्यमानो दोषो भवतोऽपि यौगस्यापि स्यादित्यर्थः।"—ता० टि०। ९ एकदेशाभावात्। १० अवयविनः। ११ सर्वाग्रहणप्रसङ्ग। १२ प्राप्तेरेवे—आ०, ब०, प०।

वान्तराणाञ्च अवयविशून्यत्वापत्तेः । नापि युगपत्, अप्रतिपत्तेः । न हि यदा तदेकावयव-संबद्धतया विशिष्टप्रत्ययोपारूढं तदैव तदन्यावयवसम्बद्धतया शक्य प्रतिपत्तुं विरोधात् । न हि नीलं नीलत्वया प्रतीयमानमेव पीततया बुद्धिशिखरमभ्यारोहति, [1]ततो यथा नीलबुद्धिवेद्य नीलमेव न पीतं तथैकावयवसम्बद्धमेव तत्[2] बुद्धिवेद्य नावयवान्तरसम्बद्धम् । यदु तत्सम्बद्धं तद्द्रव्यान्तरमेव भवितुमर्हतीति कथमवयविनोऽपि एकत्वम् ? तद्बहुत्वस्यैवोपपत्ते । न चैका- ५
वयवसम्बद्ध तत्प्रत्ययवेद्यं च तन्न भवति, अवयवान्तरापेक्षयापि तथा प्रसङ्गात् । तदन्तरस्यापि सत एकैकत्वात् । न चैकैकसम्बन्धान्न्यः तत्कलापसम्बन्धः। तस्यैव वीप्सयमानस्य कलापगोचर-तया व्यवहारोपरूढत्वात् सेकवत् । सेकस्य हि प्रतिवर सम्भवत एव प्रसिद्धं वीप्सया तत्कलापगोचरत्वम्[3] । ततः प्रत्येकमेसम्बन्धे सम्बन्धैकस्यमेवावयवानः प्राप्तम् । तन्मा भूदिति प्रत्येकमेव सम्बन्धः, तत्र च प्रत्यवयव बहुत्वमेव अवयविनो नैकत्वम् । न येनात्मना १०
तदेकावयवसम्बद्धं तेनैवावयवान्तरसम्बद्धतया वेद्यं यदयं प्रसङ्ग[4] स्यात्, अपि तु आत्मान्त-रेणेवेति चेत्, न, स्वभावभेदाभावात् । [5]तद्भावे निरंशत्वादव्यापत्तेः, भिन्नावयवकल्पना वैफल्याच्च । तदुक्तम्—

"एकस्यानेकवृत्तिर्न भागाभावाद्बहूनि वा ।
भागित्वाद्वास्य नैकत्वं दोषो वृत्तेरनार्हते ॥" [आप्तमी०श्लो० ६२] इति । १५

ननु यद्यवयविनो न प्रतिपत्तिः क्व तदा क्रमयोगपद्याभ्यां वृत्तिपर्यनुयोगः ? धर्मपर्यनु-योगस्य सत्येव धर्मिण्युपपत्तेः, प्रतिपत्तावपि किं तत्पर्यनुयोगेन ? युगपदनेकावयवयवृत्तिमत्व एव तस्य[6] प्रतिपत्तेः, तथा प्रतिपन्नस्य चाशक्यप्रतिक्षेपत्वादिति चेत्, सत्यम्, अस्ति प्रतिपत्तिः, न तु सा प्रमाणम्, तत्प्रामाण्यस्यैव वृत्तिपर्यनुयोगेन प्रतिक्षेपात् । सैव एव तत्प्रतिपत्त्या किन्न प्रतिक्षिप्यत इति चेत्[7], 'नीलं तदेव कथमनीलम्' इत्यपि पर्यनुयोगः 'सर्वं २०
सर्वात्मकम्' इति प्रतिपत्त्या किन्न प्रतिक्षिप्यते ? तस्याः प्रत्यक्षप्रत्यनीकत्वात्, न हि नीलमेव भवदनीलं प्रतिभासत इति चेत्, समानमन्यत्र, अवयविप्रतिपत्तेरपि तत्प्रत्यनीकत्वात् । न हि निरंशस्यावयविनोऽपि प्रत्यक्षे प्रतिभासनमस्ति ।

स्यादेवं निर्विषयमेव तत्स्यात्, परमाणूनामतीन्द्रियत्वेन तद्विषयत्वायोगादिति चेत्, न, कथञ्चिद्भवयवाभेदिनस्तस्य[8] तद्विषयत्वात्, अवयववित् तदवयवाभेदस्यापि तत्र प्रतिभासनात् । २५
अत एव तन्तवः पटीकृता इति व्यवहारः । न ह्ययम् अपटात्मना पटभावापत्तिमन्तरेण घटा मटति । अभूततद्भावे सत्येव क्रियेत्यत्वयोपपत्तेः। अवयवतद्वतोः पृथक्त्वाभिमहणादयमभेदप्रतिभासो न वस्तुवृत्तेन अभेदभावात्, [9]सेनावनप्रतिभासवत्। न हि [10]सेनावनप्रतिरूपकस्य अभेदस्य भावात

१—सम्बन्धतया आ०, ब०, प०। २ तथा यथा आ०, ब०, प०। ३ अवयविद्रव्यम्। ४—प्रसङ्गं कथं तत्र आ०, ब०, प०। ५ —कं तत्त्व—आ०, ब०, प०। ६ स्वभावभेदे। ७ अवयविनः। ८ वृत्तिपर्यनुयोग एव। ९ प्रत्यक्षम्। १० अवयविनः। ११ "कर्मकर्तृभ्यां प्राग्वतीं च्विः (पाणि० ३।४।५५)" इत्यादि०। १२ —त्वविप्रति —आ०, ब०, प०। १३ —भावं प्रति—आ०, ब०, प०। सेनावनात्मकस्य अभेदस्य।

त्प्रतिभासः, [1]प्रत्यासत्तावपि प्रसङ्गात्, अपि तु दूरात्पृथक्त्वापरिज्ञानादेव, तद्वत् अवयवतद्वतो
र्पीति चेत्; न, स्थूलप्रतिभासस्याप्येवं परमाणुष्वेव प्रसङ्गात्। भवत्ययं प्रसङ्गो यदि परमाणवः
पृथक्त्वेनापि कदाचिदुपलभ्येरन् तदा कुतश्चिद्गृहीतपृथक्त्वानां तेषामेव स्थूलबुद्धिविषयत्व-
मिति। न चैवम्, सर्वदा तेषामतीन्द्रियत्वेनासाक्षात्करणात्। न चातीन्द्रियाणामेव करितुर-
५ गादीनां धवखदिरादीनाञ्च पृथक्त्वापरिज्ञानात् सेनावनबुद्धिविषयत्वमुपलब्धम्, प्रत्यासत्तौ
पृथक्तया दृष्टानामेव तेषां दूरतः पृथक्त्वापरिज्ञाने तद्बुद्धिगोचरत्वप्रतिपत्तेः। अतो न सेनावनादि-
प्रतिभासदृष्टान्तात् परमाणुषु स्थूलप्रतिभासोपकल्पनमुपपन्नं वैषम्यादिति चेत्; नेदानीमवयवतद्व-
तोरपि पृथक्त्वापरिज्ञानाद्भेदबुद्धिः तयोरपि पृथक् कदाचिदप्यप्रतिपत्तेः। न हि निरंशमेवावय-
विनं तदवयवकलापं च क्वचिदपि सम्पश्यामो यतस्तयोरेव कुतश्चित्पृथक्त्वापरिज्ञानाद्भेद-
१० बुद्धिगोचरत्वं परिकल्पयेम।

यत्पुनरेतत्-अणुषु स्थूलप्रत्ययस्य अतस्मिंस्तत्प्रत्ययत्वम्; न; प्रधानापेक्षित्वात्। भवि-
तव्यं स्थूल एव तत्प्रत्ययेन प्रधानभूतेन। न ह्यसति पुरुष एव पुरुषप्रत्यये स्थाणौ तत्प्रत्ययो
दृष्टः। न चावयविनः सम्भवति प्रधानस्तत्प्रत्ययः, तदभावात्। तत्कथं परमाणुष्वप्रधानस्त-
त्प्रत्ययः इति? तदपि न युक्तम्; अवयवतद्वतोरभेदप्रत्ययस्याप्येवमनवप्रसङ्गात्। न हि
१५ तस्याप्यतस्मिंस्तत्प्रत्ययत्वेन प्रधाननिरपेक्षस्योत्पत्तिः। न च कथञ्चिद्वादमनिच्छतः कश्चिदपि
मुख्यः कथञ्चिदभेदप्रत्ययः सम्भवति, तदभावे च कथं तदपेक्षौ परस्परैकान्तभिन्नयोरवयवतद्व-
तोस्तत्प्रत्ययः सम्भवेत्। ततो यदि पृथगपरिज्ञानयोरप्यवयवतद्वतोः पृथक्त्वापरिज्ञानादभेदप्रत्ययः
परमाणुष्वेव [6]तादृशेषु ततः स्थूलप्रतिभासो भवेत्। तदाह-'**कारणस्य**' इत्यादि।
कारणस्य पृथक्त्वापरिज्ञानलक्षणस्य **अक्षये** अवयवतद्वतोरिव परमाणुष्वपि भावे **कार्यस्य**
२० अभेदप्रत्ययवत् स्थूलप्रतिभासनस्य **उपरमो** निवृत्तिः **कथम्?** न कथञ्चिदिति।

अस्तु समवायात्तयोरभेदप्रत्यय इति चेत्; न; [7]तस्मात् 'इहेदम्' इति भेदप्रत्ययस्यो-
पगमात्, तद्धेतोश्चाभेदप्रत्ययहेतुत्वानुपपत्तेः। कथं वा [8]ततस्तयोस्तत्प्रत्ययः? सम्बन्धादिति
चेत्; केन सम्बन्धः? तादात्म्येनेति चेत्; न; परमतानुप्रवेशापत्तेः। सम्बन्धान्तरेणेति
चेत; न; [9]तेनाप्यसम्बद्धेन तदयोगात्। तस्यापि सम्बन्धान्तरेण सम्बन्धे अनवस्थोपनिपा-
२५ तात्। स्वत एव समवायस्य सम्बन्ध इति चेत्; न; अवयवतद्वतोरेव स्वतस्तत्सङ्गात्।
असम्बन्धत्वान्नेति चेत्; समवायस्य कुतः सम्बन्धत्वम्? स्वतः सम्बन्धाच्चेत्; सोऽपि
कस्मात्? सम्बन्धत्वाच्चेत्; न; परस्पराश्रयात्-स्वतः सम्बन्धात् सम्बन्धत्वम्, ततश्च
स इति।

---

१ सामीप्येऽपि। २ अणुस्थू-आ०, ब०, प०। ३ स्थूलप्रत्ययेन। ४ स्थूलप्रत्ययः। ५ -वाक्यं
आ०, ब०, प०। ६ पृथक्त्वेनापरिज्ञानेषु। ७ समवायात्। ८ सम्बन्धान्तरेणापि। ९ -प्यसम्बन्धेन आ०,
ब०, प०।

अथाय तस्य स्वभावो यद्ययमसम्बन्धोऽपि तयोरभेदप्रत्ययमुपजनयतीति , तन्न, तन्तु-पटयोरिव कपालपटयोरपि तदस्वप्रसङ्गात् । तन्तुपटयोरेव तस्य तज्जनकस्वभावो न कपालपट योरिति चेत्, कपालपटयोस्तर्हि कुतस्तत्प्रत्ययः ? समवायान्तरादिति चेत्, न, "तस्य भावेन व्याख्यातम्"[3] [वै० सू० ७।२।२८] इति तदेकत्वकथनविरोधात् । एकस्यापि तत्र तत्र स्वभावभेदान्नायं दोष इति चेत्, न, स्वभावभेदस्य कथञ्चित्तदर्थान्तरत्वे अनेकान्तवादप्रसङ्गा- ५ दनापत्तेः । सर्वथाऽर्थान्तरत्वे तु कथं स[4] तस्येति व्यपदेशः ? सम्बन्धादिति चेत्, न , तत्रापि प्रतिस्वभाव तत्स्वभावभेदकल्पनायाम् अन्यत्रस्थितिप्रसङ्गात् । ततो निर्विभाग एव समवायः, ततः कथं तन्तुपटयोरेवाभेदप्रत्ययो न कपालेपटयोरप्यविशेषात् । तदाह–'कारणस्य' इत्यादि । कारणस्य समवायस्य अक्षये तन्तुपटवत्कपालपटादावपि भावे कार्यस्य पूर्वेत्रेवोत्तरत्राप्य- भेदप्रत्ययस्य उपरमो निवृत्तिः कथम् ? न कथञ्चिदिति । १०

समवायस्याविशेषेऽपि समवायिनामस्ति विशेषो यतस्तन्तुष्वेव पटस्याभेदप्रत्ययो न कपालादिष्विति ततोऽयमदोष इति चेत्, किमिदानीं समवायेन ? अविष्वग्भावश्चानस्य तत्कल्प- येष्टस्य समवायिविशेषादेव भावात् । कथं चाविष्वग्भावप्रत्ययस्य मिथ्यात्वे ततः पटादेरपि प्रतिपत्तिः ? मिथ्याप्रत्ययाच्चदयोगात् । अन्यत एव तत्प्रतिपत्तिरिति चेत् , न , युगपत्प्रत्यय द्वयस्याप्रतिवेदनात् । क्रमेण प्रतिवेदनमिति चेत् , न , तथाननुभवात् । न हि पटादितदभेद- १५ प्रत्यययोः पौर्वापर्यस्यानुभवः , तथानिश्चयाभावात् । निश्चयात्मा च भवतामनुभवः, स कथं तदभावे भवेत् ? कथं वा पटादेरभेदप्रत्ययेनाप्रतिपत्तौ तदधिष्ठानत्वेनाभेदप्रतिपत्तिः 'तन्तवः पटोभवन्ति' इति ? विद्यते चेयम् , तस्मादेक एवायं प्रत्ययो मिथ्यात्मेति कथमतः पटादित्वस्य प्रसिद्ध्येत् ? यतोऽवयविव्यवस्थापनेन यौगाः सौगतमतिशयीरन् ।

अभेदयौग एवायं प्रत्ययो मिथ्या बाध्यमानत्वात् न पटादौ विपर्ययादिति चेत् , २० कथमेक एवायं मिथ्या च अमिथ्या च विरोधात् ? अन्यथा प्रतिपत्त्यभावान्न विरोध इति चेत् , अनुकूलमावश्यिम् , अत एव बहिरर्थस्याप्यवयविरूपतया नानैकस्वभावस्य सिद्धेः । ततो न निरंशावयव्यभावेऽपि प्रत्यक्षस्य निर्विषयत्वम् , जात्यन्तरविषयत्वेन सविषयत्वात् । तदुक्तम्–"जात्यन्तरं तु पश्यामः" [सिद्धिवि०परि० २] इति ।

तत्र निर्विषयत्वप्रसङ्गभयात् प्रत्यक्षस्य निरंशावयविनः कल्पनमुपपन्नम् , असत्यपि २५ तस्मिन् तद्बुद्ध्यभावात् । न चैवम् , अप्रतीत एव तस्मिन् वृत्तिपर्यनुयोगः, परोपगमतस्तस्य प्रतीतेः । प्रतीयमानस्य वृत्तिमत एव प्रतीतेर्निरवसरे एव क्व[10]त्पर्यनुयोग इति चेत् , कथमिदानीं सर्वैकभावभावनैरात्म्यादावपि पर्यनुयोगः ? तस्यापि यथाकल्पनं तद्रूपस्यैव प्रतीतेः । कल्प्यत

---

१ अवयवावयविनो । २ –पटयोरेव कपालपट–आ०, ब०, प० । ३ तस्यैकत्वं भावेन सत्तया इव, यथा स्वलक्षणादिविषयाः विशेषलिङ्गाभावात्सर्वैकत्वं सत्तायाः तथा समवायस्यापि इति भावः । ४ स्वभावभेदः । ५ –चयट– आ०, ब०, प० । ६ पट्र–आ०, ब०, प० । ७ –भाव ए–आ०, ब०, प० । ८ अवयविनि । ९ –परस्यत्र आ०,ब०, प० । १० इतिपर्यनुयोगः ।

एव परमपरैस्तद्रूपं न परिस्फुटज्ञानप्रकाशमुपश्लिष्यतीति चेत् ; समानं वृत्तावपि, सापि परिकल्प्यत एव भवद्भिर्न तस्या अपि तत्प्रकाशोपश्लेपः क्वचिदपि दृश्यते । न हि निरंशं किं न क्वचित्क्रमेण यौगपद्येन वा वर्त्तमानमुपलभेमहि ।

यद्येवमनुपलम्भादेव वृत्तिवत् वृत्तिमतोऽप्यभावः साधयितव्यः किं वृत्तिपर्यनुयोगेनेति चेत् ? सत्यम् ; अस्ति ततोऽपि तदभावसाधनम् । "न पश्यामः क्वचित्किञ्चित्सामान्यं वा स्वलक्षणम्" [सिद्धिवि०परि० २] इति वचनात् । वृत्तिपर्यनुयोगस्तु व्यापकाभावादपि तदभावनिरूपणार्थः, अनेकप्रकारत्वात्तत्त्वनिरूपणस्य । व्यापिका हि वृत्तिर्वृत्तिमतः परैस्तथैव प्रतिपत्तेः । वृत्तेर्वृत्तिमद्रूपत्वे 'कथं तस्यानेकत्र वर्त्तनं युगपन्निरंशस्य' इति भवति पर्यनुयोगः ? न चैवम्, पदार्थान्तरस्य समवायस्यैव वृत्तित्वात्, तस्य चानेकत्र भावो विभुत्वात् । तदनेकत्र भाव एव वृत्तिमतोऽप्यनेकत्र भाव इति चेत् ; कथं तस्य तद्धर्मो वृत्तिमतः ? तस्य तत्सम्बन्धत्वादिति चेत् ; न; पटस्य तन्तुवत् कपालादिष्वपि सर्वत्र वृत्तिप्रसङ्गात् समवायस्य सार्वत्रिकत्वात् । तस्याविशेषेऽपि समवायिनः पटादेर्विशेषान्नियम इति चेत् ; कस्य नियमः ? समवायस्येति चेत् ; न; 'सार्वत्रिकश्च नियतश्च' इति व्याघातात् । पटादेरेवेति चेत् ; किमिदानीं समवायेन ? इति न तद्रूपा वृत्तिः, समवायिविशेषस्यैव वृत्तित्वात् । तत्र चोक्तमेव दूषणम् ।

न च समवायो नाम कश्चित् ; प्रमाणाभावात् । न हि तस्य प्रत्यक्षात्प्रतिपत्तिः ; पटतन्तुव्यतिरेकेण तदनिर्णयात्, सन्निकर्षाभावाच्च । न तावदसौ संयोगः ; द्रव्य एव तदुपगमात् । नापि समवायः ; तस्यान्यस्यानभ्युपगमात् । नापि संयुक्तसमवायादिः ; तस्यापि क्वचित्समवायाभावे समवायस्य, असम्भवात् । भवतु सम्बद्धविशेषणभाव इति चेत् ; कथं समवायस्यानाश्रितत्वम् ? सति तस्मिन्नाश्रितत्वस्यैवोपपत्तेः । समवायापेक्षयैव तत्राश्रितत्वस्य निषेध इति चेत् ; कुतो दोषात् ? अनवस्थानादिति चेत् ; कुतः सम्बद्धविशेषणभावे स न भवति ? तस्य समवायादनर्थान्तरत्वात् । अर्थान्तर एव तत्प्रसङ्गादिति चेत् ; न; एवं समवायस्यापि पटादेरनर्थान्तरत्वप्रसङ्गात्—"अविशेषणात् विशेषणत्वस्येव असम्बन्धादपि सम्बन्धस्यानर्थान्तरत्वाविरोधात् । तथा च स्वरूपवृत्तिरेवोक्तदोषा स्यात् । तन्न अनाश्रितत्वे समवायस्य समवायान्तरवत्तद्विशेषणभावोऽपि सम्भवतीति कथं ततोऽपि दर्शनं तस्य ? न चासन्निकर्षे दर्शनम् ; सन्निकर्षवादवैफल्यापत्तेः । तस्मान्न युक्तमुक्तम्—"समवायस्य प्रत्यक्षेणैव प्रतिभासनात्" [ ] इति । "अत एव चातीन्द्रियः" [प्रश० भा० पृ० १७४] इति प्रशस्तकरवचनविरोधाच्च ।

---

१ समवायस्यानेकत्र । २ समवायस्य । ३ अनेकवृत्तित्वरूपो धर्मः । ४ समवायस्य । ५ संयोगाभ्युपगमात् । ६ —यादि त—ता० । ७ सम्बद्धविशेषणीभावस्य । ८ अनवस्थादोष । ९ घटा—आ०, ब०, प० । १० विशेषणानात्मकात् समवायात् था विशेषणवत्त्वस्य—सम्बद्धविशेषणभावस्य अनर्थान्तरत्वं तथा सम्बन्धानात्मकात् पटादेरपि समवायस्य अनर्थान्तरत्वं स्यात् विशेषाभावादिति भावः । ११ —त्वस्यैव आ०, ब०, प० । १२ —वृत्तेरेवोक्त— आ०, ब०, प० । १३ सम्बद्धविशेषणीभावादपि । १४ "समवाये अभावे च विशेषणविशेष्यभावात्"—न्यायवा० १।१।४ । "तदेतत् पञ्चविधसम्बन्धसम्बन्धिविशेषणविशेष्यभावात् दृश्याभाव-समवाययोर्ग्रहणम् ।.....समवायस्य तु क्वचिदेव ग्रहणम्—यथा रूपसमवायवान् घटः घटे रूपसमवाय इति ।"—न्यायमा० पृ० ३ ।

इह प्रत्ययापेक्षमेव तेन[1] तस्यातीन्द्रियत्वमुच्यते तस्य [2]तत्राप्रतिभासनात्, आधारस्यैव हि तत्र प्रतिभासन न समवायस्य निर्विकल्पे प्रत्यक्षान्तर एव तस्य प्रतिभासनादिति चेत्, न, तस्याविभावनात्। अवयवावयविनोः संश्लेषज्ञानमेव तदिति चेत्, न, तत्र कथञ्चित्तादात्म्यस्यैव प्रतिभासनादिति निरूपणात्। ततो न युक्तमेतदपि व्योमशिवस्य—"निर्विकल्पके त्ववयवावयविनोः संश्लेषज्ञाने समवायः प्रत्यक्ष एव" [प्रश० व्यो० पृ० ६९९] इति। तन्न तत्र प्रत्यक्षं प्रमाणम्। ५

नाप्यनुमानम्, तदभावात्। ननु इदमस्ति—इह [3]शाखासु वृक्ष इति प्रत्ययः सम्बन्धपूर्वक[4], निर्बाधत्वे सति इह प्रत्ययत्वात्, कुण्डे दधीति प्रत्ययवदिति चेत्, न, असोऽपि तादात्म्यस्यैव सम्बन्धस्योपपत्तेः। ननु तादात्म्यं नाम वृक्षस्य शाखाभिस्तासां वा वृक्षेणैकत्वमेव, तत्कथं सम्बन्धः? सम्बन्धस्य द्वित्वतयैवोपपत्तेरिति चेत्, न, एकान्तेनैकत्वाभावात् द्वित्वताया अप्युपपत्तेः। कथं पुनर्भेदाभेदयोरेकविषयेरन्यतरप्रतिषेधरूपत्वात् एकत्र धर्मिणि सम्भव इति चेत्? कथं विभ्रमेतरयोरेकत्र ज्ञाने सम्भवः तद्विशेषात्? मा भूदिति चेत्; किं पुनरिदानीम् 'इह ग्रामे वृक्षाः' इति ज्ञानमभ्रान्तमेव? तथा चेत्, किं तत्प्रच्छेदार्थेन निर्बाधताविशेषणेन? भ्रान्तमेव, सम्बन्धाभावेऽपि ग्रामारामव्यवधानादर्शनादुत्पत्तेरिति चेत्, कथं ततो ग्रामादेरपि प्रतिपत्तिः मिथ्याज्ञानस्य वस्तुविषयत्वायोगात्? न च ग्रामादिरवस्त्वेव बाधाविरहात्। न च तद्विरहविषयस्याबाधस्तुत्वम्, अतिप्रसङ्गात्। अभ्रान्तमेव ग्रामादौ तदिति चेत्, कथमेकमेव भ्रान्तमभ्रान्तञ्च, विभ्रमेतरयोरप्येकविधानस्य इतरप्रतिषेधरूपत्वेन एकत्रायोगात्? प्रतिभासभेदेन च भेदस्यैवोपपत्तेः। विलक्षणो हि विभ्रमप्रतिभासादितरप्रतिभासः, तत्कथं तस्य तदेकविषयत्वम्? प्रतिभासस्यापि न सर्वथा भेदः, कथञ्चिदभेदस्यापि प्रतिभासनादिति चेत्, अनुकूलमाचरसि, अवयवसङ्घातयोरप्येवं कथञ्चिद्भेदोपपत्तेः अभेदप्रतिभासाविशेषात्। अस्ति हि तत्रापि भेदवदभेदस्यापि प्रतिभासः, शाखाचलने वृक्षश्चलतीति प्रत्ययात्। न अत्यन्तव्यतिरेके शाखाचलनं वृक्षे शक्यं प्रतिपत्तुम्। समवायाच्छक्यमेवेति चेत्, कथं ततोऽपि शाखाया वृक्षत्वेन प्रतिपत्तिः, इहेतिप्रत्ययाभावप्रसङ्गात्? न हि सद्रूपप्रतिपत्तिहेतोरेव तदधिकरणत्वप्रतिपत्तिः, विरोधात्। न हि नीलं नीलतया प्रत्याययदेव तदधिकरणतया प्रत्याययदुपलब्धम्। न च शाखावत् वृक्षस्यापि चलनादेव तत्र [5]चलनप्रत्ययः, चलनाद्व्यस्यानुपलम्भात् [6]व्याप्त्या तत्प्रसङ्गाच्च। न हि निरंशस्याव्याप्त्या तत्सम्भव, निरंशत्वेऽव्याप्तेः। ततः शाखाचलनमेव वृक्षस्यापि चलनमिति कथं शाखातादात्म्यं वृक्षस्य प्रतीतिसिद्धं न भवेत्, यतस्तत्रार्थान्तरसम्बन्धप्रतिज्ञा प्रतीतिप्रतिक्षिप्ता हेत्वयश्च विरुद्धा न भवेयुः? तदेवाह—

---

१ प्रत्यक्षत्वेन। २ तदप्रत्यये। ३ समवायस्य। ४ "इह तन्तुषु पट इत्यादीहप्रत्ययः सम्बन्धपूर्वकः अबाध्यमानेहप्रत्ययत्वात्। यो योऽबाध्यमानेहप्रत्ययः स सम्बन्धपूर्वकः यथा कुण्डे दध्नीति' तथा चायमबाध्यमानेहप्रत्ययः तस्मात्तथा सम्बन्धपूर्वकः इति।"—प्रश०व्यो० पृ० १०९। प्रशा०भाष्य० पृ० ३२५। ५ —पपत्तिरि—आ०, ब०, प०। ६ चलनं तत्र प्रत्यय—आ०, ब०, प०। ७ सर्वदेशावरुद्धेन। ८ —वस्य व्या—आ०, ब०, प०।

समवायस्य वृक्षोऽत्र शाखास्तित्यादिसाधनैः ।
अनन्यसाधनैः सिद्धिरहो लोकोत्तरास्थितिः ॥१०७॥ इति ।

समवायस्य वृक्षशाखादीनामयुतसिद्धानाम् अत्यन्तव्यतिरेकिणः सम्बन्धस्य **आस्थितिः** आस्था प्रतिज्ञा **लोकोत्तरा** लोकं दर्शनप्रत्ययम् उत्तरति उल्लङ्घयतीति **लोकोत्तरा** प्रत्यक्षनिराकृतेति यावत् ।

प्रत्यक्षेण हि तादात्म्यं गृह्यता वृक्षशाखयोः ।
भिन्नसम्बन्धसम्बन्धेयं कथन्न प्रतिषिध्यते ? ॥१००८॥
ततः प्रत्यक्षनिर्ज्ञप्तपक्षानन्तरभावतः ।
कालात्ययापदिष्टत्वं हेतूनामिति मन्यते ॥१००९॥

सिद्धिर्ज्ञप्तिस्तस्या रहस्त्यागः सिद्धिरहः सिद्ध्यभाव इति यावत् । कस्य ? **समवायस्य** । कैः ? **'वृक्षोऽत्र शाखासु'** इति एवं रूपं ज्ञानमभिधानञ्च **आदि**र्येषाम् 'इह तन्तुषु पटः' इत्यादिज्ञानाभिधानानां तान्येव **साधनानि** तैरिति । न तानि साधनानि, तद्धर्माणाम् इहप्रत्ययत्वादीनां साधनत्वादिति चेत् ; न ; धर्मतद्वतामविष्वग्भावापेक्षयैवमभिधानात् । 'यो य इहप्रत्ययः स सम्बन्धपूर्वको यथा कुण्डे बदराणीति प्रत्ययः' इति व्याप्तिदर्शनस्याप्येवमेवोपपत्तेः, अन्यथा हेतोर्व्याप्तिदर्शने कर्त्तव्ये धर्मिणस्तदुपदर्शनमसम्बद्धं भवेत् । कथं पुनरितिशब्दस्य आदिशब्देन समासः 'वृक्षः' इत्यादेस्तेनापेक्षणात् ? अनपेक्षणे तु न तद्रूपस्य बुद्ध्यादेस्तेनोपदर्शनमिति चेत् ; न ; तदनपेक्षतयैव प्रकृतस्य तेनोपदर्शनात् । वृक्ष इत्यादिकं तद्बुद्धौ तत्प्रकरणार्थमुक्तम् । कुतस्तैस्तस्य सिद्धिरहः ? इत्यत्राह— **अनन्यसाधनैः** यत इति । अन्यः समवायस्तस्य समवायिभ्योऽर्थान्तरत्वात् , तस्मादन्यः तादात्म्यपरिणामः तस्य साधनैः विरुद्धैरिति यावत् ।

समवायविरुद्धस्य तादात्म्यस्येह साधनैः ।
समवायस्य संसिद्धिः कथन्नामोपपद्यते ? ॥१०१०॥
तादात्म्यसाधनत्वञ्च तेषां तद्व्याप्तिनिर्णयात् ।
विभ्रमाविभ्रमाकारप्रत्यये सुपरिस्फुटम् ॥१०११॥

न हि इह विभ्रमेतराकारयोः ज्ञानमिति[1] प्रत्ययस्य तादात्म्यसम्बन्धपूर्वकत्वनिर्णयेऽपि शाखादौ इहेदम्प्रत्ययस्य तदन्यसम्बन्धपूर्वकत्वसाधनमुपपन्नम् , यथाव्याप्तिनिर्णयमेव अनुमानोपपत्तेः, अन्यथा अतिप्रसङ्गात्। 'कुण्डे दधि' इति प्रत्ययस्य तदन्यसम्बन्धपूर्वकत्वमेव प्रतिपन्नम्, तत्संयोगस्य ताभ्यामन्यत्वादिति चेत् ; न; प्रत्यासत्तिपरिणामस्यैव संयोगस्यापि प्रत्यक्षेण प्रतिपत्तेः, अन्यत्र विवादात् । न विवादः, अन्वयव्यतिरेकितया प्रतिभासभेदात् भिन्नस्यैव

१—सन्देह. क—आ०, ब०, प० । १ ज्ञानप्र—आ०, ब०, प० ।

संयोगस्य परिज्ञानात् । अन्तर्भावे हि संयोगी सत्यसति च संयोगे तस्योपलम्भात्, व्यतिरेकी च संयोगः सत्यपि संयोगिनि तस्याप्रतिपत्तेः, इत्यपि न युक्तम्, तद्भेदादपि विभक्तेतरायकाराभ्यां ज्ञानस्येव कथञ्चिदेव तद्भेदपरिज्ञानात् । आत्यन्तिकभेदस्य अभेदप्रतिभासेन प्रतिक्षेपात् ।

संयोगस्यैकत्वे तद्व्यतिरेकात् संयोगिनोरप्येकत्वमिति चेत्, न, प्रतिसंयोगि भिन्नस्यैव तस्य प्रतिपत्तेः । कथमनुगतरूपाभावे 'कुण्डं संयोगि दधि संयोगि' इत्यनुगतप्रत्यय इति चेत्, कथम् 'संयोगः सम्बन्धः समवायः सम्बन्धः' इत्यनुगतप्रत्ययः, सम्बन्धरूपस्याप्यनुगतस्याऽभावात् ? भावे वास्य सप्तमपदार्थत्वापत्तेः । न हि तस्य द्रव्यादीनां पञ्चानामन्यतमत्वम्, समवायाधारतया तेषामभ्युपगमात् । अत एव न समवायित्वम्, समवायनानात्वे अनवस्थानात् । तस्मात्संयोगसमवाययोः स्वरूपमेव परस्परसादृश्यात् अनुगतप्रत्ययकारणमङ्गीकर्तव्यम्, तद्वत् दधिकुण्डयोरपि । ततो निषिद्धमेतत् व्योमशिवस्य–"भिन्नेभ्योऽनुगतप्रत्ययस्याऽदर्शनात्" [प्रश० व्यो० पृ०] इति भिन्नाभ्यामेव संयोगसमवायाभ्यां सम्बन्धप्रत्ययस्यानुगतस्योपलम्भात् । एवं संयोगोऽपि तद्व्यतिरेकी यत्पूर्वकत्वं 'कुण्डे दधि' इति प्रत्ययस्योपकल्प्येत ?

कुतः पुनः समवायाभावे 'शाखासु वृक्षः' इति प्रत्ययः ? इति चेदाह–

अध ऊर्ध्वविभागादिपरिणामविशेषतः । इति ।

अध ऊर्ध्वं च ये विभागा मूलशाखारूपा अवयवास्ते आदयो येषां पार्श्वमध्यविभागानां तैः सह परिणामविशेषः कथञ्चिदभेदपरिणामस्तत इति ।

अभेदपरिणामादि शाखामिरिह शाखिनः ।
शाखासु वृक्ष इत्येष प्रत्ययः परिदृश्यते ॥१०१२॥
तत्कार्यं तद्दृशेरन्यसम्बन्धपरिकल्पनम् ।
दृष्टान्यहेतुकल्पौ हि न क्वचित्स्यादवस्थितिः ॥१०१३॥

यदि च 'शाखासु वृक्षः' इति प्रत्ययात्तत्र वृक्षस्य कार्यत्वेन वृत्तिः, 'वृक्षे शाखाः' इत्यपि प्रत्ययात्तासामपि तत्र तथावृत्तिः प्राप्नुयात् । एवञ्च 'न यावच्छाखा न तावद्वृक्षः, न यावच्च वृक्षो न तावच्छाखा' इति परस्परापेक्षयात् उभयाभावः परस्यापतेदित्यावेदयन्नाह–

तानेव पश्यन् प्रत्येति शाखा वृक्षेऽपि सौकिकः ॥१०८॥ इति ।

तानेव प्रकृतानवयवानवयविनश्च पश्यन् प्रत्येति प्रतिपद्यते शाखा आदे-

---

१ –त्वी च सं–आ०, ब०, प० । २ –रेकत्वात् ता० । ३ तदभ्यु–आ०, ब०, प० । इत्यादिपञ्चानामन्यतमत्वानभ्युपगमात् । ४ समवायाधारत्वादेव । ५ इदं चार्थतस्तेन वृत्तिः । ६ –पत्तेरित्या–आ०, ब०, प० । ७ "परस्परानुविद्धेत्यादिग्रन्थेभ्यः स्वयं कृताः । शाखां पश्यतीति यथैके स्युः शाखे गौरित्यपरे ।"–प०, ता० ३।२५० । "वृक्षे शाखा विभक्तायामेष सौकिक्य मतिः । विभक्तावयविश्रेयान्नैरन्तर्योपसम्भनात् ॥ सा पुनस्तास्विति अयं लोकातिक्रान्तमुपपन्नो ।"–तत्र सं० पृ० २६७ ।

यमूना वृक्षे आधारभूते, न केवलं तासु वृक्षम्, अपि तु तत्रापि ताः प्रत्येतीत्यपि-शब्दार्थः। कः प्रत्येति ? लौकिकः। लोकेन तत्त्वव्यवहारेण चरतीति लौकिको व्यवहारीति यावत्। अनेन व्यवहारप्रसिद्धत्वात् 'वृक्षे शाखाः' इति प्रत्ययस्याशङ्क्यापह्नवत्वमावेदयति। तदेवं समवायस्याभावात् नावयविनः तद्वत् परमाणुषु वृत्तिरित्यसङ्गेयासौ[1] कथं तस्य दर्शनं कथं वा ततश्छायातपनिवारणादिकम् ?

मतोऽपि केन तस्य[2] दर्शनम् ? नित्येनात्मनेति चेत् ; न ; तत्रापि 'कारणस्य'[3] इत्यादिदोषात्। तथा हि—

दर्शनं यदि नित्येन पुंसमार्थस्य प्रकल्प्यते।
नित्यं तद्दर्शनं किन्न नित्यकारणसम्भवे ? ॥१०१४॥
अन्तःकरणसंयोगावेक्ष्यविरहायपि।
संयोगो वः कथं क्वापि समवाये निराकृते ॥१०१५॥
[4]तद्द्वयाभावतो न स्यान्निमित्तमपि किञ्चन।
[5]समवायादिनासन्ननिमित्तं यन्यरैरिदम् ॥१०१६॥
ततोऽपेक्ष्यात्मनात्मा न स्यात्कदाचिदपि तद्दृशिः।
सर्वाग्रहप्रतिक्षेपः सति स्थूलेऽपि तत्कथम् ? १०१७॥
ततोऽनपेक्ष एवात्मा दर्शनादि करोत्वयम्।
तत्र तत्कार्यनित्यत्वदोषोऽयं दुरुपक्रमः ॥१०१८॥
सकृदेव च तत्कार्यं सर्वं स्यादनपेक्षणात्।
क्षणान्तरे त्ववस्तुत्वमहेतुत्वात्प्रसज्यते ॥१०१९॥
हेतुत्वेऽपि तदा सर्वं तत्कार्यं स्यात्तथा पुनः।
न चैवं दृश्यते तस्मान्न नित्येष्वस्ति हेतुता ॥१०२०॥

ततो विषयज्ञानहर्षविषादादिकार्यस्य कादाचित्कत्वं क्रमभावञ्चाभ्युपगच्छता कादाचित्की शक्तिरात्मनः क्रमभाविनी चाभ्युपगन्तव्येति कथं तस्य नित्यत्वम् ? शक्तीनां सहकारिरूपतया ततोऽत्यन्तव्यतिरेकादिति चेत् ; न; व्यतिरेके शक्तित्वाभावस्य निवेदितत्वात्। यथा पूर्वपूर्वशक्तिपरिहारेण कथञ्चिदुत्तरोत्तरशक्त्युपादानमात्मनः तथा कथञ्चित् नानात्वपरिमाण्डल्यादिपरिहारेणैकस्थूलाद्याकारोपादानं परमाणूनामप्यविरुद्धमिति [10]नावयवेभ्यः स्थूलमर्थान्तरम्।

---

१ —र्ं वा ता—आ०,ब०,प० । २ —श्च. कः आ०,ब०,प० । ३ अवयवी । ४ अवयविन. । ५ "कारणस्याग्रहे नैवं कार्यस्योत्पत्तिः कथम्"—ना० टि० । ६ संयोगसमवायाभावतः समवाय्यसमवायिकारणाभावात् । ७ समवायादिना तत्र नि—आ०, ब०, प० । ८ —त्वं दो—आ०, ब०, प० । ९ सहकारिसन्निधौ शक्तिरित्युपेत्य-कः।"—ना० टि० । १० नावयवेभ्यः आ०, ब०, प० ।

अर्थान्तरत्वे पुनरपि तदाशङ्कापूर्वं दूषणमाह–

तुलितद्रव्यसयोगे स्थूलमर्थान्तरं यदि ।
तत्र रूपादिरन्यश्च साक्षैरीक्ष्येत सादरैः ॥१०९॥ इति ।

तुलितानाम् उन्मानपरिच्छिन्नानां द्रव्याणा तन्तुवीरणादीनां सयोगे स्थूलम् अवयविद्रव्यम् अर्थान्तरं तुलितद्रव्येभ्यो भिन्न यदि चेत्, तत्र स्थूले रूपादिः, आदिशब्दात् रसादिश्च अन्यः अवयवरूपादिभ्योऽर्थान्तरभूतो न केवलम् अवयवरूपादिरेवेति च शब्दः। 'भवेत्' इत्यध्याहारः। भवत्येव अवयवरूपादेस्तद्रूपादिप्रादुर्भावस्य "गुणाश्च गुणान्तरमारभन्ते" [वैशे०सू० १।१।१०] इति वचनेनाभ्युपगमादिति चेत्, आह–ईक्ष्येत दृश्येत तत्र रूपादिरन्यः। न च दीर्घते। न हि तन्तुरूपादिरन्यः, अन्यश्च पटरूपादिरुपलभ्यते, तथैवासम्प्रतिपत्तेः। तथापि तदुपलब्धिकल्पनायां न किञ्चित्क्वचिदेकमुपलब्धं भवेत्। उपलब्धमित्यभिधानस्य आतिविशेषस्य तत्रामावाद्नुपलब्धिरिति चेत्, क्वेदानीं तद्विशेषस्य भावः? तन्तुरूपादाविति चेत्, पश्यत आश्चर्यं यन्महति पटरूपादौ सं नास्ति अमहति तन्तुरूपादौ विद्यत इति। कुतो वा तत्र तस्यास्तित्वम्? तद्रूपादेरुपलब्धेरिति चेत्, न; तस्यापि तदवयवरूपादेर्भिन्नस्यानुपलम्भात्। पुनस्तदवयवरूपादौ तदस्तित्वपरिकल्पनायामनवस्थाप्तेः। ततः क्वचिदपि कार्यद्रव्ये रूपादेः कारणरूपादिव्यतिरेकेणानुपलब्धेः निर्विषयमेवेदं सूत्रद्वयम्–"अनेकद्रव्येण समवायाद्रूपविशेषाच्च रूपोपलब्धिः। एतेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम्" [वै० सू० ४।१।८,९] इति। तत्र आतिविशेषाभावात्तस्यानीक्ष्यत्वम्। इन्द्रियाभावादिति चेत्, न, इन्द्रियवद्भिरुपलब्धिप्रसङ्गात्। तदाह–'साक्षैः' इति। सहाक्षैरिन्द्रियैर्यैर्वर्तन्त इति साक्षास्तैः सं ईक्ष्येत। आदरभावान्नेति चेत्, न, आदरवद्भिस्तदीक्षणापत्तेस्तदाह–सादरैः आदरवद्भिः स ईक्ष्येतेति।

तत्रैव दूषणान्तरमाह–

गौरवाधिक्यतत्कार्यभेदाश्च [आसूक्ष्मतः किल] । इति

गुरोर्भावो गौरवं तस्याधिक्यमतिरेकः, तच्च तस्य गौरवस्य कार्यभेदाः फलविशेषाः तुल्यतन्तुविशेषलब्धाः ते च गौरवाधिक्यतत्कार्यभेदाः। चशब्दान्न केवलं रूपादिरेव तत्र स्थूले 'ईक्ष्येरन्' इति वचनपरिणामेन सम्बन्धः।

द्वितन्तुके गुरुत्वं हि तन्तुगौरवतोऽधिकम् ।
ततोऽपि च तदारब्धे द्रव्ये तदभिवृद्धिमत् ॥१०२॥

---

१ "वीरणशब्दः कलमशब्दवित्यत्रापि इह तन्तुषु पदं इह वीरणेषु कट इति वक्ष्यमाणत्वात्।"–न्या० वि०। २ –वस्तुन्य आ०, ब०, प०। ३ पश्यतामाश्चर्य प–आ०, ब०, प०। ४ आतिविशेष। ५ –सि स्थूले त–आ०, ब०, प०। ६ तन्तुरूपादा। ७ आतिविशेषस्य। ८ "तेषां तन्तूनामवयवेषां रूपादिस्तदवयवरूपादिः"–न्या० वि०। ९ –नीक्ष्यत्वम् आ०, ब०, प०। १० सदृ ई–आ०, ब०, प०।

तावदेवं पटद्रव्यं यावत्तत्परिणामवत् ।
तत्तथा किन्न वीक्ष्येत सादरैः प्रतिपत्तृभिः ॥१०२२॥
इन्द्रियागोचरत्वाच्चेद्भ्रुवत्वेवं तथापि तत् ।
तुलानतिविशेषैस्तत्कार्यैः कस्मान्न दृश्यते ॥१०२३॥
तेषामपि न चादृष्टिर्भवतां हेतुसम्भवात् ।
अंत एवाह तत्कार्यभेदाश्चेति विदांवरः ॥१०२४॥

अत्र परस्य परिहारं दर्शयन्नाह—

आसूक्ष्मतः किल ।
अतौल्यादर्थराशेस्तद्विशेषानवधारणम् ॥११०॥ इति ।

तद्विशेषस्य कार्यद्रव्यगतस्य गौरवाधिक्यविशेषस्य तत्कार्यविशेषस्य च **अनवधारणम्** अनिश्चयः। कस्मात् ? **अतौल्यात्** तोल्यत इति तोलः, कर्मणि घञ्, तस्य भावस्तौल्यम्, न तौल्यम् **अतौल्यं** तुलया परिच्छेत्तुमशक्यत्वं तस्मात्। कस्य ? **अर्थराशेः** अर्थानां परमाणुद्व्यणुकत्र्यणुकषडणुकाष्टाणुकाल्पांशुतन्तुपटानां राशेः । आ कुतः ? **आसूक्ष्मतः** आ परमाणुभ्यः परमाणूनभिविधीकृत्येति यावत् । न हि महत्यनेकद्रव्यराशौ तोल्यमाने तन्मध्यपातिनो गौरवादेः तत्कार्यस्य च प्रतिद्रव्यमियत्तयोपलक्षणम् कार्पासभारतोलने तत्पातिनोऽशुकस्येव सम्भवतीति परस्य भावः । शास्त्रकारस्तत्रारुचिं **किल**शब्देन द्योतयति । कस्मात् ? अनुपलक्षितस्य भावासम्प्रसिद्धेः । तथा हि—

गौरवादि पृथक् तत्र यदि नैवोपलभ्यते ।
कथं तस्यास्तितां ब्रूमो व्योमाम्भोजवदञ्जसा ॥१०२५॥
गौरवादेः क्रियायाश्च तत्कृतायाः असम्भवे ।
तदपेक्षं कथं तत्स्यात् समवाय्यपि कारणम् ॥१०२६॥
द्वितन्तुकादि तादृक् च कथं तद्द्रव्यमुच्यताम् ? ।
क्रियावत्त्वादिकं यस्मात्त्रितयं द्रव्यलक्षणम् ॥१०२७॥
तन्नातौल्याद्गुरुत्वादेस्तत्रास्त्यनवधारणम् ।
आहासिद्धत्वमप्यस्य हेतोः सम्प्रति शास्त्रकृत् ॥१०२८॥

ताम्रादिरक्तिकादीनां समितक्रमयोगिणाम् ।
कथमातिलकात् [स्थूलप्रमाणानवधारणे] ॥१११॥ इति ।

न हि सम्भवत इयत्त्वेनातौलनम्, अन्यथा अर्धगुञ्जापरिमाणं रक्तिका आदिर्येषां मापकादीनां ते रक्तिकादयः, ताम्रं शुल्वमादिर्यस्य सुवर्णादेः तस्य रक्तिकादयः **ताम्रादिरक्ति-**

---

१ तत एवाह न त—आ०, ब०, प० । २ "क्रियागुणवत्समवायिकारणमिति द्रव्यलक्षणम् ।"—वै० सू० १।१।१५ । ३ —व्याप्यनव—आ०, ब०, प० । ४ —योगिनाम् आ०, ब०, प० ।

कादयः तेषाम्, कथं 'मानम्' इति वक्ष्यमाणेन सम्बन्धः मान तोलनम्। कीदृशानाम् ? समितक्रमयोगिणां पृथगवधारिताः समिता, ते च ते पुनः क्रमेण तुलायोगिनश्च समितक्रमयोगिणः तेषाम्, आ कुतः तेषां तोलनम् ? आ कुतश्च समितक्रमयोगिनस्ते ? इत्याह—आतिलकात्। तिलपरिमाणं तिलकं तदवधीकृत्य ततः प्रभृति वा। दृश्यते हि तिलकस्यैकस्येयत्तया तोलनं पुनस्तदपरन्यासे तदधिकस्य तावदेवं यावद् रक्तिकायाः, तत्रापि तावदेवं यावन्मापकादेस्तोलनम्। एवम् अल्पस्याशुकस्य प्रथममियत्तया पुनस्तदवयविनः क्षेपे तदधिकस्य तत्रापि तावदेवं यावत्तन्तो', तत्रापि तावदेवं यावदन्त्यावयविनः पटादेर्भवति तोलनम्। तत्र वस्तुराशिगतस्यापि सम्भवतः सम्भवत्यतोलनम्। यत्तु कार्पासमारमभ्यपातिनोऽशुकस्येवेति, तदपि न सारम्, निपुणवणिजां तत्रापि तोलनस्यैव प्रतीतेः। अतो यत्तोलनम् असम्भव एव तद्विषयस्येति भावः। १०

महति चार्थराशौ तोल्यमाने वा कस्य प्रमाणानवधारणम् ? अवयविनामिति चेत्, आह—

स्थूलप्रमाणानवधारणे ॥१११॥
अल्पभेदाग्रहान्मानमणूनामनुपज्यते। इति।

स्थूलस्य अवयविनः प्रमाणमियत्ता तस्यानवधारणमनिश्चयः तस्मिन्नभ्युपगम्यमाने १५
मानं परिच्छेदः 'पटोऽयं घटोऽयम्' इत्यादिना रूपेण परमाणूनामनुपज्यते प्राप्नोति। तथा च यतो मयं तदेवापतितं परमाणुदर्शनाद्विभ्यतस्तस्यैव प्राप्तेः। तत्र हेतुमाह—'अल्पभेदाग्रहात्' इति। पटापेक्षया तन्तवस्तदपेक्षया तदवयवास्तदपेक्षयापि तदवयवा यावत्परमाणवः अल्पभेदा अवयविन एव तेषामर्थराशौ तोल्यमाने प्रत्येकमियत्तया तदग्रहादप्रतिपत्तेः। २०

अंशित्वेन पटस्येव तन्त्वादीनामियत्तया।
अग्रहात्परमाणूनां परिज्ञानं प्रसज्यते ॥१०२९॥
तेषामप्यपरिज्ञाने बहिर्ज्ञानविवर्जितम्।
जगत्प्राप्नोति योगानां तोपोऽयं दुरुपक्रमः ॥१०३०॥

तन्नावयविनां तदा तदनवधारणम्। अवयवानामिति चेत्, आह— २५

अंशुपातानुमादृष्टेरन्यथा तु प्रसज्यते ॥११२॥ इति।

अन्यथा परपरिकल्पितादवयविनां तदवधारणं नावयवानामिति प्रकारान्तरेण अवयवानामपि तदवधारणमिति प्रकारेण प्रसज्यते प्रसक्तिर्भवति। अवयविनामेव केषाञ्चि-

---

१ —यौगपद्यत ता०। २ —योगिन ता०, ब०, प०। ३ अल्पभेदादिति ता०, ब०, प०। ४ —वादीना— ता०, ब०, प०।

दल्पपरिमाणानामितरापेक्षया, अवयवत्वादिति भावहेतुः। हेत्वन्तरमाह–'**अंशुपातानुमादृष्टेः**' इति। महति कार्पासभारे तोल्यमाने यस्तत्रांशोः पातस्तस्य याऽनुमा तुलानतिविशेषाल्लिङ्गात्, तस्याः दृष्टेर्दर्शनाच्च **अन्यथा तु प्रसज्यत** इति। अपि च, परमाणुपर्यन्तमध्यपातिनामवयवविशेषाणामशक्येयत्तातोलनानां यद्यभावः पर्यन्तोऽप्यवयवी न भवेत् तस्याप्यवयवाधीनस्यैवाभ्युपगमात्[1]। भावश्चेत्; तत्राह–

क्षीराद्यैरविजातीयैः प्रक्षिप्तैः क्रमशो घटः।
तावद्भिरेव पूर्येत यावद्भिर्न विपर्ययैः ॥११३॥ इति।

आदौ भवमाद्यं **क्षीरमाद्यं** येषां नीरादीनां तैः, **अविजातीयैः** एकजात्यधिष्ठानैः **प्रक्षिप्तैः** घटे निवेशितैः। कथम् **क्रमशः** परिपाट्या स **घटस्तावद्भिरेव** तत्परिमाणैरेव **पूर्येत** पूर्णः क्रियेत **यावद्भिः** यत्परिमाणैर्न पूर्येत **विपर्ययैः** युगपन्निवेशितैः विजातीयैर्वा युगपन्निवेशितैः, द्रव्यस्यैकस्यैवारम्भाद्विजातीयैस्तु तस्याप्यनारम्भात्। ततो युगपत्क्रमाभ्यां तावद्भिरेव प्रक्षेपविपर्ययैरेकानेकद्रव्योत्पादनैर्घटस्यापरिपूर्णेतरतया भेदोपलब्धिर्भवेदिति भावः। एतच्छायमेव धर्मकीर्त्तिनापि प्रतिपादितम्–

"तस्य क्रमेण संयुक्ते पांशुराशौ सकृद्युते।
भेदः स्याद्गौरवादीनां पृथक् सह च तोलिते॥" [प्र० वा० ४।१५७] इति।

ननु युगपन्निवेशितैरपि द्विचुलुकाद्यपरापरद्रव्यारम्भक्रमेणैव अन्त्यावयविन आरम्भस्ततः कथं तैरप्यपरिपूर्तिः? द्रव्यबहुत्वे परिपूर्तेरेवोपपत्तेरिति चेत्; न; सर्वैरपि क्षीरादिचुलुकैः युगपत्प्रवृत्तसंयोगैरेकस्यैव द्रव्यस्य कैश्चिदारम्भोपगमात्। येषां तु नैवमभ्युपगमः, तेषां कथं तन्तुषु पटः? न हि तैस्तस्यानारम्भे तत्र भावः। तदारम्भकाणां खण्डावयविनां तत्र भावात् तस्यापि तत्र भाव इति चेत्; न; उपचारापत्तेः। तथा च कथं तद्विषयात् 'तन्तुषु पटः' इति प्रत्ययात् सम्बन्धसिद्धिः? मुख्यस्यैव 'कुण्डे दधि' इत्यादेः प्रत्ययस्य सम्बन्धपूर्वकस्योपलम्भात्। न हि मुख्ये दृष्टो धर्मोऽन्यत्र योजनमर्हति, पावकधर्मस्य काष्ठजन्मादेः माणवकेऽपि योजनप्रसङ्गात्। सम्बन्धोऽपि तत्र उपचरित एवेति चेत्; कुतस्तर्हि मुख्यतस्तत्सिद्धिः? कर्पटखण्डेषु पट इति प्रत्ययादिति चेत्; न; रूढितस्तदभावात्। भावेऽपि तमेव तत्साधनमनुक्त्वा कुतः[2] 'पदार्थप्रवेशादौ 'इह तन्तुषु पटः, इह वीरणेषु कटः' [प्रश० भा० पृ० १७१] इत्युपचरितस्य तस्योपन्यासः? सति मुख्ये[3] गौणोपन्यासायोगात्, तस्मादिष्टसिद्धेरसम्भवात्। ततः साक्षादपि तन्तुभिः पटस्यारम्भो वक्तव्यः। तद्वत् क्षीरादिचुलुकैरप्यन्त्यस्य तद्द्रव्यस्येति न तैर्युगपन्निवेशितैर्नानाद्रव्यारम्भ इत्यपरिपूर्तिरेव तैर्घटस्य। ततः सूक्तम्–'**यावद्भिर्न विपर्ययैः**' इति।

---

१ "पर्यन्तशब्देन अन्त्यावयवी ग्राह्यः"–ता०टि०। २ –वाधारस्यै–आ०, ब०, प०। ३ सम्बन्धस्य सि–आ०, ब०, प०। ४ प्रशस्तपादभाष्यादौ। ५ गुणोप–आ०, ब०, प०। ६ –प्यन्त्यस्य आ०, ब०, प०।

ननु यद्यवयवी नाम न कश्चित् तर्हि परमाणव एवावशिष्येरन्, तेषां चानुपलम्भात् बहिर्वस्तुदर्शनशून्यं जगत्प्राप्नमिति चेत्, न, तेषामेव कुतश्चित्कथञ्चिदेकीभूतानामुपलम्भविषयत्वात्। पटावयवानां परस्परमिव किम्न घटावयवैरप्येकीभावः भेदाविशेषादिति चेत्? भवतोऽपि[1] किम्न [2]तदवयवाः पटमिव घटमप्यात्मन्यवस्थापयन्ति तद्विशेषात्? तस्यैव तत्र समवायादिति चेत्, न, तत्रैव प्रश्नात् 'कुतः स तस्यैव न घटस्यापि' इति? समवायस्यैवेयं शक्तिर्यत्पटमेव तत्र योजयति नापरमिति चेत्, न, स्वरूपव्यतिरेकेण शक्तेरभावात्, स्वरूपस्य च सर्वत्राविशेषात्। अवयविनि तद्विशेषकल्पनायां तु समवायस्यापि तदनर्थान्तरत्वेन प्रत्यवयवि भेद स्यात्। तदर्थान्तरत्वे तु कथं 'तैं तस्य' इति व्यपदिश्येरन्? न समवायान्तरात्, तदभावात्। स्वत एवेति चेत्, पटोऽपि स्वत एव तन्तूनामिति किं समवायेन? कथञ्चित्तस्य तदर्थान्तरत्वकल्पनं तु तेषामेवैकीभाव पुष्णातीति कथम्न परोपालम्भस्तत्रापि भवेत्—समवायविशेषाणामपि परस्परमिव पदार्थान्तरभावैरपि न कस्मादेकीभावो भेदाविशेषात्? स्वहेतुनियताच्छक्तिविशेषादिति चेत्, समानं पटावयवेष्वपीति न किञ्चिदेतत्। तन्नावयवी परपरिकल्पित इति कुतस्तत्र गुणकर्म सामान्यादीनां सम्भवः? तेषां तदाश्रितत्वेन तदभावे सम्भवानुपपत्तेः।

साम्प्रतं परमताक्षेपपुरस्सरं स्वमतमाह—

नांशेष्वंशी न तेऽन्यान्ये वीक्ष्या न परमाणवः।
आलोक्यार्थान्तरं कुर्यादत्रापोद्धारकल्पनाम् ॥११४॥ इति।

अंशेषु भागेषु अंशी भागी न वीक्ष्यो न दृश्यो 'वीक्ष्याः' इत्यनेन वचनपरिणामेन सम्बन्धात्। न ते अंशा अत्र अंशिनि वीक्ष्याः। कीदृशाः सन्त ते न इति चेत्? अन्ये परस्परमेकान्तेन निर्भिन्ना। परमाणवः तर्हि वीक्ष्या इति चेत्, आह—न परमाणवो वीक्ष्या इति च सम्बन्धः। न हि तेऽप्यन्योन्यमेकान्तेन भिन्ना, प्रत्यवभासन्ते। ततो न सन्त्येव परपरिकल्पिता बहिर्भावा दृश्यतयाऽभ्युपगतानां तेषामदर्शनादिति मन्यते।

कीदृशस्तर्हि बहिर्भाव इति चेत्? एकानेकरूप आत्मन्तरमेवेति ब्रूमः, तस्यैव प्रत्यक्षतः प्रतिपत्तेः। कथं तर्हि लोकस्य 'सन्त्यवयवाः पटस्यावयवी' इति व्यवहार इति चेत्? आह—आलोक्य प्रत्यक्षतः प्रतिपद्य। किम्? अर्थान्तर आत्मन्तरम्। कुर्याल्लोकः। क्व काम्? अत्र अर्थान्तरे अपोद्धारस्य अवयवादिपृथक्करणस्य कल्पनाम् अभिसन्धिम्। ततोऽभिसन्धिनिबन्धन एवायं व्यवहारो न प्रत्यक्षनिबन्धन इति भावः।

---

१ यौगस्यापि। २ पटावयवाः। ३ तदनर्था—मा०, ब०, प०। ४ "शक्तिविशेषा स्वरूपविशेषा इत्यर्थः"—ता० टि०। "समवायस्तु सम्बन्धी नित्य स्वाश्रय एव स इति तार्किकरक्षायामनुपदम्"—ता० टि०। "अशब्देन समवायस्वरूपविशेषा गृह्यन्ते" ता० टि०। ५—पार्श्वे प—मा०, ब०, प०।

जात्यन्तरस्यालोक्यत्वं ब्रुवता[1] चेदमुच्यते ।
निमित्ताभावतो नात्र संशयादिरिति स्फुटम् ॥१०३१॥

संशयादिः खलु दोषो भेदमभेदञ्च निमित्तमुपाश्रित्य प्रवर्तते । न च भेदाभेदाभ्यामत्यन्तविलक्षणे जात्यन्तरे तदुभयमस्ति यतस्तत्प्रवर्त्तनम् , अन्यथा नरसिंहेऽपि मानवगजरिपुधर्मावलम्बिनो दोषस्य प्रवृत्तिः स्यात् । मा भूत् प्रत्यक्षादिप्रमाणविषये तत्प्रवृत्तिः अभिसन्धिविषये तु स्यात् , अभिसन्धी भेदाभेदयोस्तन्निमित्तयोः पृथगेव प्रतिभासनादिति चेत् ; न; तत्रापि धर्मिणः प्रतिभासाभावात् । न चाप्रतिपन्ने धर्मिणि भेदेतराभ्यां संशयादिप्रकल्पनमुपपन्नम् । तन्न संशयादिः तत्र ।

नाप्युभयदोषः ; भेदेतरयोरेकस्येतरेणनयेनाप्रतिपत्तेः[2], युगपच्च नयद्वयस्याप्रवृत्तेः । तत्कथं प्रतिपक्षोपेक्षया[3] भेदस्यैवाभेदस्यैव वा अभिसन्धानविषयस्य उभयदोषोपनिपातेनोपहतिः सम्भवति यतस्तदभावकल्पनम् ? ततो व्याधूतसंशयादिरेव जैनस्य प्रमाणविषयो नयविषयश्च बहिरर्थ इति स्थितम् ।

तदेवं **'परोक्षज्ञानविषय'**[4] इत्यादिना आत्मवेदनम् **'एतेन वित्तिसत्तायाः'**[5] इत्यादिना चार्थवेदनं व्यवस्थापयता[6] कारिकोपात्तम् आत्मपदमर्थपदञ्च व्याख्यातम् ।

इदानीं तदुपात्तं द्रव्यपदं व्याचिख्यासुराह–

[7]गुणपर्ययवद्द्रव्यं ते सहक्रमवृत्तयः ।
विज्ञानव्यक्तिशक्त्याद्या भेदाभेदौ रसादिवत् ॥११५॥ इति ।

द्रव्यमिति लक्ष्यस्य **गुणपर्ययवदिति**[8] च लक्षणस्य निर्देशः । गुणाश्च सहभुवो धर्माश्चेतनस्य सुखज्ञानवीर्यादयः । यथोक्तं स्याद्वादमहार्णवे–

"सुखमाह्लादनाकारं विज्ञानं मेयबोधनम् ।
शक्तिः क्रियानुमेया स्याद्धूनः कान्तासमागमे ॥" [ ] इति ।

अचेतनस्य रूपरसादयः । पर्या(र्यै)याश्च क्रमभाविनः चेतनस्य सुखदुःखादयः, अचेतनस्य कोशकुशूलादयः गुणपर्यायाः, ते सन्त्यस्येति **गुणपर्ययवत्** । गुणादिग्रहणेन द्रव्यमात्रस्य,

---

१ –ता भेद–आ०, ब०, प० । २ भेदग्राहिणा नयेन अभेदस्य अभेदग्राहिणा च नयेन भेदस्याप्रतिपत्तः । ३ प्रतिपक्षापेक्षया आ०, ब०, प० । ४ श्लो० १० । "परोक्षज्ञानविषयपरिच्छेदः परोक्षवत् दशमकारिकाया अपरार्धमिदम्"–ता० टि० । ५ श्लो० २६ । "एतेनेत्यादि द्वाविंशतितमकारिकेयम्"–ता० टि० । ६ तृतीयकारिकोपात्तम् । ७ "गुणाणमासवो दव्वं एकदव्वस्सिया गुणा । लक्खणं पज्जयाणं तु उभओ अस्सिया भवे ॥"–उत्तरा० २८।६ । "दव्वं सल्लक्खणियं उप्पादव्वयधुवत्तसंजुत्तं । गुणपज्जयासयं वा जं तं भण्णंति सव्वण्हू ॥"–पञ्चास्ति० गा० १० । "गुणपर्ययवद्द्रव्यम्"–तत्त्वार्थसू० ५।३८ । "तं परियाणहु दव्वु तुहुं जं गुणपज्जयजुत्तु । सहभुव जाणहि ताण गुण कम-भुवपज्जउ वुत्तु ॥"–परमात्मप्र० गा० ५७ । लघी० टि० पृ० १४२ पं० २७ । ८ –ति लक्ष–आ०, ब०, प० । ९ –पर्यायाः आ०, ब०, प० ।

द्रव्यग्रहणेन च गुणादिमात्रस्य प्रतिक्षेपः तत्र प्रमाणाभावात्, निवेदयिष्यते चैतत्। मतुप्प्रत्ययेन तु तदुभयभेदैकान्तस्य। दृश्यत एव भेदैकान्तेऽपि तत्प्रत्ययः 'गोमान् देवदत्तः' इति सम्बन्धमात्रात्तत्कर्थं तेनैव तत्प्रतिक्षेप इति चेत्? न, द्रव्यतद्गुणयोः कथञ्चिदभेदादन्यस्य सम्बन्धस्यासाधात्, समवायस्य प्रतिक्षेपात्। एकान्तभेदे कार्यकारणभावस्याप्यनुपपत्तेः।

गुणपर्ययाणां व्याख्यानं 'ते' इत्यादि। 'ते' इति गुणपर्यायाः। कथं पुनर्द्रव्ये गुणीभूतानां तेषां सच्छब्देन परामर्शः द्रव्यस्यैव मुख्यतया तदुपपत्तेः? बहुवचनात् द्रव्यस्य बहुत्वेनाप्रक्रमादिति चेत्, न, गुणादीनामपि तथा तद्भावात्, समासात्तद्बहुत्वस्याप्रतिपत्तेः। अप्रतिपन्नमपि सम्भवति तत्र तदिति चेत्, न, द्रव्येऽपि जीवादिभेदेन तैर्विशेषात्, पुल्लिङ्गत्वस्यापि न विरोधः जीवादीनां पुल्लिङ्गत्वादिति चेत्, न, शब्दोपक्रमेण गुणादीनामप्रधानत्वेऽपि बुद्ध्युपक्रमेण प्राधान्यात्। बुद्ध्युपक्रमस्य च शब्दोपक्रमादेव प्रतिपत्तेस्तस्य तदविनाभावात्, बुद्धावप्रधानतयैव तेषामुपक्रम इति चेत्, न, प्रथमं स्वरूप एवोपक्रमात् विशेष्यापेक्षया पश्चादेव प्राधान्यप्रकल्पनेः। द्रव्यपरामर्शोऽपि कस्मान्न भवति प्राधान्याविशेषादिति चेत्? न, प्रयोजनाभावात्। द्रव्यलक्षणस्य 'गुणपर्ययवत्' इत्यनेनैव प्रतिपादनात्। ततो गुणपर्यया एव ते।

सह च क्रमश्च सहक्रमौ, तावर्थौ यत्र द्रव्ये वृत्तिरात्मलाभपरिणतिर्येषां ते **सहक्रमवृत्तयः** सहवृत्तयो गुणाः क्रमवृत्तयः पर्यायाः। के पुनस्ते गुणादय इत्याह-**विज्ञानव्यक्तिशक्त्याद्याः** इति। विज्ञानं ज्ञानादिचित्तम्, उपलक्षणमिदं मन्त्रादेरपि, तस्य व्यक्तिर्व्यज्यमानं रूपं 'व्यज्यत इति व्यक्तिः' इति व्युत्पत्तेः। शक्तिश्च कार्योपजननसामर्थ्यम्, विज्ञानव्यक्तिशक्ती ते आद्ये येषां ते **विज्ञानव्यक्तिशक्त्याद्या** इति। आद्यशब्दाद् अन्येऽपि सहवृत्तयः सुखज्ञानवीर्यपरिस्पन्दादयः क्रमवृत्तयश्च सुखदुःखहर्षविषादादयः परिगृह्यन्ते।

कथं पुनर्व्यक्तिशक्त्योः सहभावः? तस्य भेदनिष्ठत्वात्, तयोश्च भेदाभावादिति चेत्, न, अभेदे व्यक्तिवच्छक्तेरपि प्रत्यक्षत्वप्रसङ्गात्, तथा च किं तदनुमानेन? विप्रतिपत्तिनिवारणमिति चेत्; सैव कुतः प्रत्यक्षविषये विप्रतिपत्तिः? अनश्वरं तत्फलस्य स्वर्गादेरदर्शनादिति चेत्, न, व्यक्तावपि तद्भेदेन तत्प्रसङ्गात्। तथा च कथं तदनुमानं धर्मिण्यसिद्धे तदनुपपत्तेः? निश्चयात्तत्र विप्रतिपत्तिनिवृत्तौ शक्तावपि स्यात्। तत्र शक्तेर्व्यक्त्यभेदः, व्यक्तिदर्शननिश्चयाभ्यां तद्दर्शननिश्चयाभावात्।

पतेन "सामग्री शक्तिरिति प्रत्युक्तम्। तथा हि-

---

१ मतुप्रत्यय-आ०, ब०, प०। २ तत्प्रयोगो यो-प०। तत्प्रयोगात् मतिमान् देव-आ०, ब०। ३-त्तत्कर्थं आ०, ब०, प०। ४ मतुप्प्रत्ययेन। ५ बहुत्वेन। ६ तद्विशे-आ०, ब०, प०। ७ गुणादीनाम्। ८ -पर्याया आ०, ब०, प०। ९ शक्त्यनुमानेन। १० ज्ञानादिचित्तस्य। ११ शक्त्यभेदेन। १२ विप्रतिपत्तिप्रसङ्गात्। १३ व्यक्तौ। १४ "न तावन्मीमांसकवदौन्द्रिया शक्तिरस्माभिरभ्युपेयते किन्तु कार्यानुमेया स्वरूपं वा सहकारिसाकल्यं वा।"-न्यायवा० ता० टी० पृ० १०३। "सम्पादयत्स्वभावं सह कार्योपलक्षितात्। न हि कल्पयितुं शक्यं शक्तिमन्यामतीन्द्रियाम्॥"-न्यायम० पृ० २१। "किन्तु योग्य

सामग्री यदि शक्तिः स्यात्फलात्प्रागेव [1]पश्यतः ।
इयं शक्तिरिहेत्येवं निश्चयः स्यात्तदर्थिनः ॥१०३२॥
न चैवं कार्यदृष्ट्यैव तत्र निश्चयदर्शनात् ।
न चानिश्चितमध्यक्षं सामग्रीशक्तिवादिनाम् ॥१०३३॥
सत्यामेव च सामग्र्यां मन्त्रतन्त्रादिना कथम् ।
दाहस्यानलकार्यस्य प्रतिबन्धो भवेदयम् ? ॥१०३४॥
विना मन्त्राद्यभावेन सामग्री विकलैव चेत् ।
ततस्तदा कथं दाहः काष्ठादेरपि मर्त्यवत् ॥१०३५॥
सामग्र्येव न शक्तिस्तन्नापि [3]जात्यादिरेव सा ।
दृश्यमानेऽपि जात्यादौ शक्तिदृष्टेरसम्भवात् ॥१०३६॥
तत्सम्भवेऽपि मन्त्रादौ स्वतः शक्तिविनिश्चयात् ।
गुरूपदेशवैयर्थ्यं प्राप्तमेकान्तवादिनाम् ॥१०३७॥

तन्न व्यक्तिरेव शक्तिः, तद्वत्प्रत्यक्षत्वप्रसङ्गात् ।

नापि शक्तिरेव व्यक्तिः, तद्वदप्रत्यक्षत्वापत्तेः । नाप्येकान्तेन भेदः ; शक्तिशक्तिमद्भावाभावोपनिपातात् । शक्तेर्व्यक्तौ समवायात्तद्भाव इति चेत् ; न ; [4]अशक्तिमत्त्वे तदनुपपत्तेः खरशृङ्गवत् । शक्तिमत्त्वञ्च न तयैव शक्त्या ; परस्पराश्रयात्–'तया शक्तिमत्त्वे तत्र तत्समवायः, ततश्च तया शक्तिमत्त्वम्' इति । नाप्यन्यया ; अनवस्थापत्तेः । तन्नैकान्तेन अभेदो भेदो वा तत्रोपपन्नः, कथञ्चिदेव तयोरुपपत्तेः । तदाह–**'भेदाभेदौ'** इति । केषामित्यपेक्षायां विज्ञानव्यक्तिशक्त्याद्यानामिति विभक्तिपरिणामेन सम्बन्धः कर्त्तव्यः । निदर्शनमत्राह–**'रसादिवत्'** इति । रस आदिर्येषां गन्धादीनां तेषामिव तदिति । निरूपितञ्च रसादीनां भेदाभेदात्मकत्वमिति निदर्शनत्वेनोपन्यासः । यदि वा, रसाद्यो ज्ञाननिर्भासाः तेषामिव तद्वदिति । प्रसिद्धञ्च कर्कटीभक्षणकालभाविबोधनिर्भासानां रसरूपादीनां भेदाभेदात्मकत्वं [5]बौद्धस्य "नीलादिधियनिर्भासः" [प्र० वा० २।२२०] इत्यादावलङ्कारकृता तथैव निरूपणात् ।

"गुणपर्ययवद्द्रव्यम्" [त०सू० ५।३८] इति सूत्रमिदं तत्त्वार्थस्य, इदमेव च त्वया व्याचिख्यासया कारिकायामुपक्षिप्तम्, तत्र किं गुणग्रहणेन 'पर्ययवद्द्रव्यम्' इत्येवास्तु गुणानामपि परिच्छिन्नायनरूपतया पर्ययेष्वेवान्तर्भावादिति चेत् ? अत्राह–

तावच्छिन्नस्वरूपसहकारिसन्निधानमेव शक्तिः । सैवेयं द्विविधा शक्तिरुच्यते–अवस्थिता आगन्तुका च । तत्रावयवच्छिन्नं स्वरूपमवस्थिता शक्तिः, आगन्तुका तु दण्डचक्रादिसंयोगरूपा ।"–न्यायमं० पृ० ४९५ । "न हि नो दर्शने शक्तिपदार्थ एव नास्ति, कोऽसौ तर्हि ? कारणत्वम् । किं तत् ? पूर्वकालनियतजातीयत्वम्, सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वेति ···· अनुग्राहकत्वसाम्यात् सहकारिष्वपि शक्तिपदप्रयोगात् ।"–न्यायकुसु० ३।१३ ।

१ मन्यतः आ०, ब०, प० । २ मन्त्रादिना कश्चित् व्यक्तिविशेषं प्रति दाहशक्तिप्रतिरोधकाले । ३ अग्नित्वादिजातिरूपा । ४ व्यक्तेः शक्तिरहितत्वे । ५ बौधस्य आ०, ब०, प० ।

सदापि सविकल्पारूप्यासाधनाय क्रमस्थितेः ।
गुणपर्ययययोर्नैक्यमिति सूत्रे द्वयग्रहः ॥११६॥ इति ।

सूत्रे 'गुणपर्ययवद्द्रव्यम्' इत्यत्र द्वयस्य गुणपर्ययद्वितयस्य ग्रहणादानम् । कस्मात् ? गुणपर्ययययोर्नैक्यमिति । गुणश्च पर्ययश्च गुणपर्ययौ, सावावेकवचनम्, तयोरैक्यमभेदो न, क्रमाक्रमभावरूपाद्विरुद्धधर्माध्यासादिति मन्यते इति हेतोः ।

यद्येवं गुणार्थिकोऽपि नयो वक्तव्यः, सति विषये 'तद्वचनानुपपत्तेः, तत्कथं द्रव्यार्थपर्यायार्थत्वा द्विविधत्वमेव मूलनयस्य ? 'पर्यायार्थ एव गुणार्थोऽपि, पर्ययशब्दस्य सहक्रममाविधर्मसामान्यवाचित्वादिति चेत्, न तर्हि सूत्रेऽपि गुणग्रहणमर्थवत्, पर्ययशब्देनैव सामान्यवाचिना गुणानामपि प्रतिपत्तेरिति चेत्, न, ततः पर्ययप्रतिपत्तिसमय एव गुणाना तदनुपपत्तेः । न हि सामान्यशब्दाद्गुणपदेव सकलतदर्थप्रतिपत्ति, गोशब्दस्य 'नवार्थत्वेऽपि कदाचित्कस्यचिदेव तत्र प्रतिपत्ते । तन्त्रेणानेकप्रतिपत्तिरपीति चेत्, न, तन्त्रस्य व्याख्यानगम्यत्वात्, व्याख्यानाच्च प्रतिपत्तेर्गरीयस्त्वात् । भवतु 'समयान्तरे 'ततस्तत्प्रतिपत्तिः तर्हि गुणग्रहणेन ? सत्यम्, प्रयोजनवशेन तद्ग्रहणात् । तर्हि तदेव तन्निमित्तं वक्तव्यं न भेद इति चेत्, न, प्रयोजनस्यापि भेदायत्तत्वेन भेदस्यैव मूलनिमित्तत्वोपपत्तेः ।

किमर्थस्तर्हि भेदग्रह इत्यत्राह–सविकल्पारूप्यासाधनाय । सह विकल्पैर्भेदैर्वर्तत इति सविकल्पं युगपद्भाविनानाभेदमिति यावत्, तस्याश्च या प्रतिपत्तिस्तया साधनं प्रतिपत्तिरेव तस्मै सविकल्पारूप्यासाधनाय । कस्याः तदित्यत्राह–क्रमस्थितेः क्रमेण परिपाट्या स्थितिः परापरपर्ययेष्ववस्थानं तस्याः । किंकालायाः ? सदा सर्वकालभाविन्याः । अपिशब्दः क्रमस्थितेः इत्यत्र द्रष्टव्यः । तात्पर्यमत्र–

युगपद्वस्तु वक्तव्यं नानाधर्मसमाश्रयम् ।
बहिरन्तरनंशस्य तस्याप्रत्यवभासनात् ॥१०३८॥
क्रमानेकत्वमार्यं तत्तदेवानुमन्यताम् ।
विशेषादिमयोन्मुक्तेरुभयत्रापि सम्भवात् ॥१०३९॥
प्रतीतिश्च यथा तस्य प्रत्यक्षादन्यतोऽपि वा ।
प्रतीयतां तथा किन्न क्रमानेकत्वमाश्रयम् ॥१०४०॥

---

१ गुणार्थिकवचनम् । २ पर्याय–आ०, ब०, प० । तत्त्वार्थवार्तिके (५।३८) तु गुणपर्ययवस्य द्रव्यार्थिकेऽन्तर्भाव इत्। तथाहि– 'अनु गौणम्–नद्विषयान्नैगमो मूलनयः प्रसज्यते नैष दोष ; द्रव्यस्य द्वाभ्यामात्मा सामान्यं विशेषश्चेति । तत्र सामान्यमुत्सर्गोऽन्वय गुण इत्यनान्तरम् । विशेषो भेदः पर्याय इति पर्यायशब्दः । तत्र सामान्यविषयो नयो द्रव्यार्थिकः । विशेषविषयः पर्यायार्थिकः तदुभयं यद्गुणप्रमुखतोद्दिश्यते द्रव्यमित्युच्यते । न तद्विषयस्तृतीयो नयो मन्तुमर्हति विकल्पदेशत्वात्तस्य ज्ञानम् ।' –राजवा०५।३८ । ३ "सर्वेणुपसङ्ग्रहाभावाद्विनेयप्रतिपत्तिभावतः" इत्यमरः । ४ मनवश्चान्ये आ०, ब०, प० । वाक्यान्तरे । ५ क्रमस्थाप्या । ६ –ने परीक्ष्यम इत्र-आ०, ब०, प० ।

प्रत्यक्षादपि तद्वित्तेः शक्तिसाचिव्यकाङ्क्षणात् ।
नानाद्यनन्तसंसारवित्तिदोषः प्रसज्यते ॥१०४१॥
अन्यथा कल्पनातोऽपि सर्वकालस्थितेर्ग्रहात् ।
कल्पनान्तरवैयर्थ्यं प्रमाणान्तरवद् भवेत् ॥१०४२॥
कल्पनातोऽपि तद्वित्तिर्यदि नेष्येत सौगतैः ।
समारोपव्यवच्छित्तिरनुमानफलं कथम् ? ॥१०४३॥
नासतोऽस्ति व्यवच्छित्तिः समारोपस्य तत्कृता ।
कल्पनाकृततद्वित्तेरारोपोऽप्यस्ति नापरः ॥१०४४॥
अनुमानमनिच्छन्तस्तद्व्यापारप्ररूपणे ।
शास्त्रज्ञाः स्युरतस्तेषां नाधिकारो विचारणे ॥१०४५॥
ततोऽनुमानमन्विच्छन्नेकत्वप्रतिवेदनम् ।
विकल्पाच्छक्तितो ब्रूयात्तद्वदध्यक्षतो वयम् ॥१०४६॥
विकल्पकात् क्षणक्षीणादेकत्वप्रतिवेदनम् ।
इच्छन् कथं नु तादृक्षादध्यक्षात्तन्न वाञ्छति ॥१०४७॥
विकल्पादपि तद्वित्तिर्विकल्पान्तरतो यदि ।
अनवस्थानतो न स्यादारोपस्य व्यवस्थितिः ॥१०४८॥
कथं वा वेदने जीवत्यभिलाप्येतरात्मके ।
क्रमानेकान्तरूपत्वं प्रत्यक्षस्य निपिध्यते ॥१०४९॥
स्थायिना तेन यन्न स्यात्स्वपरस्थायिताग्रहः ।
देवैर्निवेदितं चैतत्स्वयमन्यत्र तद्यथा ॥१०५०॥
"द्रव्यात्स्वस्मादभिन्नाश्च व्यावृत्ताश्च परस्परम् ।
लक्ष्यन्ते गुणपर्याया धीविकल्पाविकल्पवत् ॥" [सिद्धि० परि० ३] इति ।
अक्षव्यापारतः प्राच्यात् स्थायिप्रत्यक्षसम्भवे ।
परापराक्षव्यापारवैयर्थ्यं चेत्तदप्यसत् ॥१०५२॥
परापरोपकारस्य तेनादानात्तदात्मना ।
विकल्प इव केनापि निश्चयानिश्चयात्मनः ॥१०५३॥

ततो युक्तं यथा गुणवद्द्रव्यं तथा पर्ययवदपीति ।

अथवा, यत एव गुणवद्द्रव्यमात्मादि तत एव पर्ययवदिति सूत्रार्थः । गुणवत्त्वं हि प्रसिद्धमेव, बुद्ध्यादिभिरात्मादेः, तच्च पर्ययवत्त्वाभावेऽनुपपन्नम् । तथा हि—बुद्ध्यादेरनुत्पत्तौ यदात्मादेरूपं तदेव तदुत्पत्तावपि कथं प्रागिव पश्चादपि बुद्ध्यादिमत्त्वम् ? बुद्ध्यादेर्भावादेवेति

---

१ अनुमानकृता । २ -पणम् ता० । ३ शास्त्रज्ञेसुरतः आ०, ब०, प० । केवलं शास्त्रव्याख्यातरः स्युर्न तु विचारकाः । ४ बौद्धः । ५ प्रत्यक्षेण । ६ यदात्मादिरूपं आ०, ब०, प० ।

चेत्, किम्न सर्वस्यापि तद्वत्त्वं व्यतिरेकाविशेषात्। आत्मादावेव भावादिति चेत्, कः सम्प्रत्ययः ? स्वरूपमेवेति चेत्, न, प्रागिव तस्य तदर्थत्वानुपपत्तेः। समवाय इत्यप्यनेनापास्तम्। प्राग्भावी स्वभावस्तस्य पश्चादिति चेत्, कुतस्तस्येति ? समवायान्तरादिति चेत्, न, तस्यामावात्। भावेऽपि प्रागिव पश्चादपि ततस्तदनुपपत्तेः। तत्रापि प्रागभाविनः स्वभावस्य पश्चाद्भावे अनवस्थादोषात्। तादात्म्यादिति चेत्, आत्मादेरेव स तादृशः कस्मा न भवति ? अनित्यत्वापत्तेः समवायेऽप्यविशेषात्। एवं हि समवायपरिकल्पनमदृष्टकल्पनत्वेन पापीयः परिहृतं भवति। तत्र सिद्धं गुणवत्त्वात् पर्ययवत्त्वमात्मादेः, पूर्वापरस्वभावविलक्षण्यस्यैव पर्यायार्थत्वात्।

ननु एवं बुद्ध्यादिनाप्यात्मादेः तादात्म्यादेव तद्भावोपपत्तेः किं तदर्थेन पर्ययवत्त्व कल्पनेन ? अन्यथा तदर्थेनाप्यपरपर्ययवत्त्वकल्पनेन भवितव्यं तदर्थेनाप्यपरेण तत्कल्पनेनेत्यनवस्थापत्तेरिति चेत्, सत्यमेवेदं यदि परोऽप्येवं प्रतिबुद्ध्येत। न च प्रतिबुध्यते अनेकान्तवादापत्तिभयात्, अतस्तं प्रति सैव तदापत्तिर्गुणवत्त्वेन व्यवस्थाप्यते। सच्च गुणवत्त्व न गुणसमवायो नापि गुणतादात्म्यं यदन्यतरसिद्धं भवेत्, अपि तु गुणसम्बन्धमात्रम्। तस्य चोभयसिद्धस्य भवत्येव गमकत्वम्, अन्यथानुपपत्त्युपपत्तेः।

ननु इह गुणा बुद्ध्यादयः, ते च पर्याया एव क्रममावात्, तद्वत्त्वं च पर्ययवत्त्वमेव। तच्चेत्सिद्धम्, न साध्यम्। असिद्धश्चेत्, न साधनम्। अन्यदेव पर्ययवत्त्वं ततः साध्यमिति चेत्; न, ततोऽन्यस्य तद्वत्त्वस्य साधने अनवस्थापत्तेः, असाधने साधनस्य व्यभिचारादिति चेत्, न, शक्तिव्यक्तिरूपतया साध्यसाधनयोर्भेदात्। व्यक्तयो हि बुद्ध्यादयः पर्यायाः, तद्वत्त्वेन प्रतिबुद्ध्यादिव्यक्ति भिद्यमानैः शक्तिपर्यायैस्तद्वत्त्वं द्रव्यस्योपकल्प्यते। शक्तिपर्यायाणामपरशक्तिपर्ययोपनिबन्धनत्वं यदि नास्ति व्यक्तिपर्यायाणामपि न भवेत्। अस्ति चेत्, अनवस्थानमिति चेत्, सत्यम्, अनवस्थिता एव तत्पर्याया अनन्तशक्तित्वात् भावस्य। [1]तदेव कुतोऽवगन्तव्यम् ? व्यक्तिपर्यायात्। शक्तिपर्ययस्य तैतोऽपि परस्य [2]तत्पर्यायस्यानुमानेऽनवस्थापत्तेः, [3]इत्यपि न युक्तम्, कतिपयतदनुमानपर्यवसाने तद्बलभाविन [4]ऊहादेव निरवधिशक्ति पर्ययपरिच्छेदोपपत्ते[5] अनवस्थोपनिपातामावात्। ऊहस्य चावश्याभ्युपगमनीयत्वात्, अन्यथा अनाद्यनन्तकालकलापस्याप्रतिपत्तेः, आत्मादौ तत्सम्बन्धात्मनो नित्यत्वस्य अव्यवस्थापनप्रसङ्गात्। ततो युक्तं गुणवत्त्वेन पर्ययवत्त्वोपकल्पनम्। सम्प्रतिपत्तिविषये गुणवत्त्वे विप्रतिपत्तिविषय पर्ययवत्त्वाविनाभावनिश्चयसद्भावात्।

अत एव च साध्यसाधनभावेन भेदात् सूत्रे गुणपर्ययवो[6] पृथगुपादानमित्यावेदयति 'सदापि' इत्यादिना—गुणपर्ययययोर्नैक्यम्। इति एवं सूत्रे द्वयग्रहः भेदः। कुतः ?

---

१ प्रतीतस्त्वेव आ०, ब०, प०। २ तदेव म कु—आ०, ब०, प०। ३ व्यक्तिपर्यायात् शक्तिपर्यायस्य। ४ शक्तिपर्यायस्य। ५ इत्यप्युक्तम् आ०, ब०, प०। ६ तदेव। ७—शक्तिपरि—आ०, ब०, प०। ८ —नित्य मन्यतमा—आ०, ब०, प०।

इत्याह–[1]**सत्** द्रव्यम् आपिसन्त्याश्रयत्वेनागच्छती(न्ती)ति [2]**सदापिसाः, विकल्पा** गुणात्मानो भेदा यस्य तस्याख्या निर्णयः **साधनाय** निश्चयाय। कस्य ? **क्रमस्थिनेः**, क्रमभावित्वात् क्रमाः पर्यायास्तेषां स्थितिर्यस्मिन् तस्य क्रमस्थितेः पर्ययवतो यत इति। ततः स्थिनं गुण-पर्यययोर्लिङ्गलिङ्गिभावप्रतिपादनार्थमुभयोपादानं सूत्रे इति।

अनिष्टप्रसङ्गपरिहाराय कस्मान्न भवति ? भवति हि गुण एव द्रव्यमित्युक्ते तत्प्रसङ्गः सत्त्वचेतनत्वादिगुणाधारतया बौद्धविज्ञानस्य बुद्धिसुखादिगुणाधिष्ठानतया महेश्वरादेश्च अकमस्य द्रव्यत्वप्राप्तेरिति चेत् ; न; गुणवद्द्रव्यमित्युक्तेऽपि [3]तदप्राप्तेरित्यावेदयन्नाह–

गुणवद्द्रव्यमुत्पादव्ययध्रौव्यादयो गुणाः।
द्रुद्रावं द्रवति द्रोष्यत्येकानेकं स्वपर्ययम् ॥११७॥ इति।

गुणवद्द्रव्यमिति हि सूत्रं संक्षेप्तव्यम्। न चैवम् अकमस्यापि विज्ञानेश्वरादेर्द्रव्यत्वा-पत्तिः ; तत्र [4]गुणवत्त्वस्यैव गुणव्यापकानामुत्पादादीनामभावेन अभावात्। उत्पादादिव्याप्ता हि गुणाः कथं तदभावे भवेयुः वृक्षाभावे शिंशपावत् ? तदिदमाह–'**उत्पादव्ययध्रौव्यादयो गुणाः**' इति। प्रागसत आत्मलाभ उत्पादः, सतो विनाशो व्ययः, कथञ्चिदवस्थानं ध्रौव्यम्, तान्यादयो व्यापकत्वेन प्रधानभूता येषां ते तथोक्ताः। अर्थक्रियाकर्तृत्वेनैव व्याप्तिर्गुणानां नोत्पादादिभिरिति चेत् ; न ; [5]तस्यापि उत्पादादिस्वभावत्वात्। न हि कस्यचित्प्रागिव कार्यकालेऽप्यसमर्थस्य तत्कर्तृत्वम् ; प्रागपि तत्प्रसङ्गेन कार्यानुपरमापत्तेः। समर्थस्येति चेत् ; तदा तर्हि समर्थीभवतः प्राच्यासमर्थस्वभावपरिहारेणावस्थायित्वमवश्यमिति कथं नोत्पादाद्यात्म-कमेव तत्कर्तृत्वं भवेत् ? तच्चाक्रमाद्विज्ञानादेर्व्यावर्त्तमानं गुणवत्त्वमपि व्यावर्त्तयतीति कथं तस्य द्रव्यत्वापत्तिर्यदनिष्टमापद्येत। नन्वेवं संक्षिप्तादपि सूत्रात् क्रमवत्त्वस्यापि प्रतिपत्तेः "गुणपर्यय-वद्द्रव्यम्" इति किं विस्तीर्णेनेति चेत् ? सत्यमेव यदा उत्पादादिप्राधान्यं गुणानां व्याख्यायते। यदा तु न ; तदा गुणवत्त्वेन [6]पर्ययवत्त्वव्यवस्थापनार्थं विस्तीर्णं सूत्रम्। किं पुनः सूत्रकारस्य संक्षिप्तमपि सूत्रमस्ति ? बाढम्, कुत एतत् ? निर्बन्धनकारेणोपक्षेपात्। स्वबुद्धिक्लृप्तस्योपक्षेप इति चेत्; महदिदमद्भुतम्–यत्सूत्रकारस्यासती बुद्धिः निबन्धनकारस्येति।

कस्यचिद्वोद्यम्–भवतु नाम तत्रोत्पादादित्रयं यत्र पूर्वापरौ पर्यायौ, विनाशोत्पादयोः कथञ्चिदवस्थानस्य च तत्र सम्भवात्। [7]यत्र वर्त्तमान[8] एवास्ति न पूर्वापरौ अनुपलम्भात्, तत्र कथम् ? यतो द्रव्यलक्षणमव्यापकं न भवेदिति ? तत्राह–'**द्रुद्राव**' इति। द्रुद्राव द्रुतवद्विद्युदादि द्रव्यम्। कम् ? **स्वपर्ययं** न द्रव्यान्तरपर्यायम् असङ्कीर्णतयैव प्रतिपत्तेः। अनेन

---

१ सद्द्रव्यमपि स–आ०, ब०, प०। २ सदापि सवि–आ०, ब०, प०। ३ अनिष्टप्रसङ्गप्राप्ते·। ४ गुणत्वस्यैव आ०, ब०, प०। ५ अर्थक्रियाकर्तृत्वस्यापि। ६ –ष्टत्वमा–आ०, ब०, प०। ७ पर्यायत्व–आ०, ब०, प०। ८ अकलङ्कदेवेन। ९ सूत्रकारस्य अविद्यमाना बुद्धिः निबन्धकारस्य आगता। १० "विद्युदादिद्रव्ये"–ता० टि०। ११ "पर्यय."–ता० टि०।

पूर्वपर्ययवस्त्वं तस्योक्तम् । ध्रौव्यमिति स्वपर्ययम्, अनेनापि परपर्ययवस्त्वम् । अत्र हेतुः द्रवति स्वपर्ययं यत इति ।

शब्दादि वस्तु दुद्राव ध्रौव्यत्वप्यारमपर्ययम् ।
[1]यतस्तद् द्रवति व्यक्तं घटादिरिव तत्त्वतः ॥१०५४॥
पूर्वाभावे कथं तस्यानुपादाना भवेज्जनिः[2] । ५
वस्तुत्वमुत्तराभावे कथं वानर्थकारिणः[3] ॥१०५५॥
सजातिकरणाभावे विजातीयच्छतेरपि ।
असम्भवादिति व्यक्तं पूर्वमेतन्निवेदितम् ॥१०५६॥
अवस्तुत्वे च तद्धेतुप्रबन्धे स्यादवस्तुता ।
असम्पादयतो वस्तु यदवस्तुत्वमिष्यते ॥१०५७॥ १०
उत्पादादित्रयं तस्माच्छब्दादावपि तत्त्वतः ।
तद्वस्तुवादिभिर्वाच्यमन्यथा तदसङ्गतेः ॥१०५८॥
शब्दादिद्रव्यमेवेदमुत्पादादित्रयस्थितेः ।
एकानेकात्मकं यत्तन्निमिन्वन्ति विपश्चितः ॥१०५९॥
नातो लक्षणमव्याप्ति सूत्रसंक्षेपदर्शितम् । १५
द्रव्ये सर्वत्र भावाम्नाप्यतिव्याप्त्यन्यतोऽगतेः ॥१०६०॥

भवतु नाम विद्युदादेरुत्पादव्ययवत्त्वम्, ध्रौव्यवत्त्वं तु कथमिति चेत् ? न, ध्रौव्यवद् विद्युदादिकम् उत्पादव्ययवत्त्वात् घटादिवदिति तन्निश्चयात् । घटादावपि ध्रौव्ययवत्त्वसाधिद्धेः साध्यवैकल्यमुदाहरणस्येति चेत्, अत्राह—

भेदज्ञानात् प्रतीयेते प्रादुर्भावात्ययौ यदि । २०
अभेदज्ञानतः सिद्धा स्थितिरंशेन केनचित् ॥११८॥ इति ।

घटादौ हि ध्रौव्यवत्त्वमनन्विच्छन्तः किमन्यत्तत्रान्विच्छेयुः ? न किञ्चिदिति चेत्, न, प्रतीतिविरोधात् । उत्पादव्ययाधिष्ठानं प्रतिक्षणं भेदमिति चेत्, तमपि कस्मादन्विच्छन्ति ? तज्ज्ञानादिति चेत्, न, तस्य वैभिरिककेशादिभेदज्ञानवदप्रामाण्ये ततस्तदन्विच्छायोगात् । न भेदज्ञानमित्येव सर्वमप्रमाणम्, बाधाविकलतया प्रामाण्यस्यापि प्रतिपत्तेरिति २५
चेत्[4], तर्हि भेदस्य घटादिप्रतिक्षणनानात्वस्य ज्ञानात् प्रत्ययात् प्रतीयेते प्रादुर्भावप्रोत्तरस्य तत्क्षणस्य, अत्ययश्च पूर्वस्य प्रादुर्भावात्ययौ यदि चेत्, अभेदस्य तयोरेकत्वस्य ज्ञानम् ततः सिद्धा निश्चिता स्थितिः अवस्थानम् । तैन्द्रियकस्यापि सकृत्पुनर्जातनष्टादावप्रमाण्येऽपि घटादिपरापरपर्ययेषु बाधावैकल्येन प्रामाण्यादिति

---

१ यतस्तद्—आ०, ब०, प० । २ आपत्तिः । ३ अर्थक्रियानुपादकस्य । ४ चेत् न तर्हि आ०, ब०, प० । ५ अभेदज्ञानस्यापि ।

भावः। भेदाभेदात्मकं हि भवन्मते वस्तु, तस्य च तदात्मना स्थितावभेद एव, न भेदः स्यात्। अस्थितावपि भेद एव नाभेदः स्यात् तत्कथमुभयात्मकत्वं तस्येति चेति ? अत्राह—'अंशेन केनचित्' इति। न ह्युत्पादव्ययौ स्थितिर्वा वस्तुनः सर्वात्मना यदयं प्रसङ्गः किन्तु केनचिद्भागेनैव। भागभावे न प्रमाणमालम्बनम्, तत्र भेदाभेदात्मनो जात्यन्तरस्यैव नरसिंहवत् प्रतिपत्तेर्न नरसिंहयोरिव भेदेतरभागयोः। नय एव तत्रालम्बनं "कुर्यात् अत्रापोद्धारकल्पनाम्" [न्यायवि० श्लो० १११] इति वचनादिति। चेन्न कल्पनाविषयस्यावस्तुसत्त्वेन तन्निबन्धनस्योत्पादादेरप्यवस्तुत्वापत्तेरिति चेन्; न; बाधाभावात्। न हि कल्पनाविषय इत्येव सर्वमवस्तुसत्; बाधावैकल्ये वस्तुसतोऽप्युपपत्तेः। न तद्वैकल्यं प्रमाणेनैव जात्यन्तरविषयेण बाधनादिति चेत्; न; अनुप्रविष्टकल्पनाविषयस्यैव जात्यन्तरस्य तेनापि प्रतिपत्तेः। न हि सकलकल्पनाविषयप्रतिक्षेपे जात्यन्तरं नाम सम्भवति; तद्विषयसमाहारस्यैव परस्परसम्मूर्च्छनात्मनस्तत्त्वेन प्रतिपत्तेः। प्रमाणं तर्हि कल्पनया बाध्येत अननुप्रविष्टस्यैव जात्यन्तरे स्वविषयस्य तया ग्रहणादिति चेत; न; अनुप्रवेशवदननुप्रवेशेऽपि तस्या औदासीन्यात्। अतो न कल्पनया प्रमाणस्य नापि तेन तस्या बाधनमिति यथास्वं वस्तुसन्तावेव तद्विषयौ। अतो युक्तम्—अंशेनैवोत्पादव्ययौ स्थितिश्चेति। ततो यदुक्तं मण्डनेन—

"उत्पादस्थितिभङ्गानामेकत्र समवायतः।
प्रीतिमध्यस्थताशोकाः स्युर्न स्युरिति दुर्घटम्॥

यस्य खलु द्रव्यात्पर्याया भिद्यन्ते तस्य द्रव्यमात्रार्थिनो द्रव्यस्थितेर्विनाशाभावात् अपूर्वस्य चानुत्पादात् मध्यस्थता, रुचकार्थिनस्तस्यापूर्वस्योत्पत्तेः प्रीतिः, वर्द्धमानकार्थिनस्तस्य विनाशाच्छोक इति व्यवस्था प्रकल्प्यते। यस्य तु न पर्येभ्योऽन्यद्द्रव्यं न द्रव्यादन्ये पर्यायास्तस्योत्पत्तिस्थितिभङ्गानामेकत्र समवाये द्रव्यार्थिनो मध्यस्थता भवेन्न भवेच्च प्रीतिशोक स्याताम्, न हि तद्द्रव्यमवतिष्ठत एव विनश्यति अपूर्वञ्चोत्पद्यते तत्र विनाशादपूर्वोत्पत्तेश्च प्रीतिशोकौ स्यातां न मध्यस्थता, मध्यस्थता च स्थितेः स्यादिति दुघटमापद्यते। तथा वर्द्धमानकार्थिनस्तन्नाशाच्छोक इति स्यात् न च स्यात् स्थितेः। प्रीतिश्च तस्यापूर्वस्योदयात् स्यात्। तथा रुचकार्थिनस्तस्यापूर्वस्योदयात् प्रीतिः स्यात्, न च भवेत् पूर्वस्यैव स्थितेः, विनाशाच्च शोकः स्यात्।" [तत्त्वसि २।२४] इति।

तदिदं प्रमाणाभिप्रायेण, नयाभिप्रायेण वा दूषणम्? आद्ये विकल्पे युक्तम् उत्पत्तिस्थितिभङ्गानामेकत्र समवाय इति, परस्पराविष्वग्भूतानामुत्पादादीनां प्रमाणतः प्रतिपत्तेः। न

---

१ —मवलम्ब—आ०, ब०, प०। २ तत्रावलम्ब—आ०, ब०, प०। ३ 'चेन्न' इतिपदद्वयमत्र सम्पातादायातमिति भाति। ४ तद्विषये समा—आ०, ब०, प०। कल्पनाविषय। ५ जात्यन्तरत्वेन। ६ कल्पनया। ७ कल्पनाया। ८ "शरावो वर्धमानक इत्यमरः"—ता० टि०। अत्र सुवर्णशरावो ग्राह्यः। ९ प्रकल्पते ता०। १० पर्यायेभ्य—आ०, ब०, प०।

पुनर्द्रव्यार्थिन इति वर्त्तमानकार्थार्थिन इति च पर्यायात् द्रव्यस्य ततोऽपि पर्यायस्यापोद्धारेण ततोऽ
प्रतिपत्तेः । न च तथा तदप्रतिपत्तौ तदर्थिनाम्, अनपोद्धारेण[1] तु प्रतिपत्तौ आत्यन्तरमेव प्रती-
यत इति कथं द्रव्यार्थार्थित्वं आत्यन्तरार्थित्वस्यैव सम्भवात् । तदर्थिनश्च मध्यस्थतैव सर्वदा
तद्रूपाप्रच्युतेः न तदभावः । नापि प्रीतिशोकौ तन्निमित्तामावात् । तन्नेदं प्रमाणाभिप्रायेण ।

नयाभिप्रायेणैवेति चेत्, तत्रापि युक्त द्रव्यार्थिनो मध्यस्थता, भवेदिति न तु न भवेच्चेति ५
सैत्यभिसन्धितो द्रव्ये मध्यस्थतायाः एवोपपत्तेर्न तदभावस्य ततो दुर्घटत्वम्। प्रीतिशोकौ स्याता-
मित्यप्यपेशलम्, द्रव्ये तन्निमित्तयोरुत्पादविनाशयोरभावात् "न सामान्यात्मनोदेति न व्येति
व्यक्तमन्वयात्" [आप्तमी० श्लो० ५७] इति वचनात् । ततः परमतानभिज्ञानादेवोक्तम्–न
हि तदित्यादि आपद्यत इति पर्यन्तम् । तथा वर्त्तमानकार्थिनस्तदाशाच्छोक एव न तदभावः,
तन्निमित्तस्य[2] स्थितेस्तत्राऽभावात् । तदयव्ययाधिष्ठानत्वमेव हि पर्यायाणां न स्थितिमत्त्वम् १०
"व्येत्युदेति विशेषात्त" [आप्तमी० श्लो० ५७] इति वचनात् । नापि प्रीतिः ; तस्यैव
पुनस्तदयाभावात्। एवं तुष्यकार्थिनस्तदुत्पादात् प्रीतिरेव न तदभावः, तस्यैव पूर्वमभावात् । नापि
शोकः, तत्पदमानस्यैव नाशाभावात् । ततो वर्त्तमानकार्थिन इत्यादि शोकः स्यादिति पर्यन्तमपि
परमतापरिज्ञानमेव परस्यावेदयति । यदप्यपर तस्यैव–

"नैकान्तः सर्वभावानां यदि सर्वविधागतः । १५
अप्रवृत्तिनिवृत्तीदं प्राप्तं सर्वत्र ही[3] जगत् ॥ इति ।

यदा हि सर्वप्रकारप्यनैकान्तिकत्वं भावानां तथा सति नायं लौकिकः क्वचि-
दभिमतसाधनप्रकारमवधार्य प्रवर्त्तेत यतो नासौ तथैव, नापि निवर्त्तेत यतो नासाव-
तथैव, तथा दुःखहेतोर्न निवर्त्तेत यतो नासौ तथैव नापि न निवर्त्तेत यतो नासावतथै-
वेति कष्टां यत्त दशामापद्येत ।" [अष्टसि० २।२५] इति , २०

तत्रापि न परिहरत[4] किमपि कष्टं नयाभिप्रायेण सर्वत्रैकान्तस्यैवोपपादनात् "तदे-
कान्तोऽर्पितान्नयात्" [बृहत्स्व०श्लो० १०३] इति वचनात्। तथा च यत्सुखसाधनं तत्तथैव
नाऽतथापि यतो न प्रवर्त्तेत । दुःखहेतुरपि तथैव नाऽतथापि यतो न निवर्त्तेत । प्रमाणापैणेन
तथाऽतथात्वयोर्भावात् भवत्येवायं प्रसङ्ग इति चेत्, न, प्रमाणतस्तु पप्रतिपत्तावव्यभिसन्धि
विषय एव व्यवहारोपपत्तेः, अभिसन्धेश्चैकभावात्, प्रत्युत ऐकान्तिकत्व एव सुखसाधनत्वादेर- २५
प्रवृत्तिनिवृत्तिकत्वं जगतः । तथा हि स्रक्चन्दनादिकमहिविषादिकं च सन्निहितस्येवान्यस्यापि
तत्कालस्येवान्यकालस्यापि यदि सुखसाधनमेव[5] दुःखसाधनमेव वा किं प्रवृत्त्या निवृत्त्या वा ?
ततो नैकान्त इत्यादि नकारवर्जं परपक्षेऽपि वक्तव्यम् ।

अथानेकान्तवदेकान्तोऽपि क्वचिन्नेष्यते प्रज्ञाविदा, भेदस्याविद्याविजृम्भितस्येदन्तया निर्वक्तु

---

१ भेदरूपेण । २ अभेदेन । ३ –न्यभिप्रायम् नया–आ०, ब०, प० । ४ विषमानाभिप्रायतया । ५ क्षीरमवनिमित्तस्य । ६ "ही शब्द: पदपूर्त्यर्थ"–अष्टसि०आ० । ७ –मेव वाऽसुखसाधन–आ०, ब० ।

मशक्यत्वादिति चेत्; मा नाम भूत् भेदे तदिष्टिः परमात्मनि तु भवेत्, ततो हि लोकानां सृष्टिः "स इमांल्लोकानसृजत" [ऐत० १।२] इत्यादि श्रवणात्। तस्य चैकान्ततत्त्वसृष्टिहेतुत्वे कार्यं किञ्चिद्विवक्षितदेशादितयैव निःशेषापरदेशादितयाप्युपजायेत इति तत्साङ्कर्यं तदसाङ्कर्यप्रतिपत्तिविरुद्धमापद्येत अप्रवृत्तिनिवृत्तिकं च जगद्भवेत्। अथ न तथा[1] तस्य तद्धेतुत्वं कथं कार्यं जगत्? कथञ्चित्तदभावादिति चेत्; कथं तर्हि 'जगदुत्पत्तौ स न प्रवर्त्तेत यतो न हेतुरेव, नापि न प्रवर्त्तेत यतो नाहेतुरेव' इति कष्टदशापत्तिर्भवतोऽपि न भवेत्? न भवत्येव विषयभेदात्, न हि यस्य तद्देशादित्वं स हेतुरहेतुरपि तत्रैव, अपि त्वन्यदेशादित्वे, तत्र चाप्रवृत्तिः[2]. इतरत्र वृत्तावप्युपपद्यत एवेति कथं कष्टता? तदापत्तेरनुपपत्तेरेव कष्टार्थत्वादिति चेत्; तर्हि चन्दनादिरपि येनात्मना हेतुः सुखस्य न तेनैवाहेतुः अपि त्वन्येनैव, तेन च तत्राप्रवृत्तिः, इतरेण प्रवर्त्तमानस्यापि नानुपपत्त्या पीड्यत इति कथं [3]परोऽपि कष्टां दशामापद्येत? ।

जगद्धेतुत्वमपि परमात्मनो नेष्यते जगत एव विचारपरिशोधितस्याव्यवस्थितेरिति चेत्; कुत इदानीं [4]तत्प्रतिपत्तिः? न स्वतः; असम्प्रत्ययात् संविदद्वैतवत्।

स्वतश्चेत्परमात्मायं प्रतिपन्नः समिष्यते।
संविदद्वयमप्येवं स्वतः सिद्धं समिष्यताम् ॥१०६१॥
आत्मसंविदद्वयस्यैव तत्त्वतः सम्भवे; कथम्।
वस्तुभेदप्रतिक्षेपः? "नेह नानास्ति किञ्चन" ॥१०६२॥
श्रुतिभ्यस्तत्प्रतीतिश्चेत्; जगतोऽसम्भवे कथम्।
श्रुतयोऽप्युपपद्यन्तां जगदन्तर्गता हि ताः ॥१०६३॥
अवाध्यमेव हेतुत्वं तास्वन्तर्भ[5]तावपि।
श्रावयन्ति यतस्तास्तं कारणात्मतयोदितम् ॥१०६४॥

"यतो वा इमानि भूतानि जायन्ते" [तैत्ति० ३।१] इत्यादिका हि श्रुतयो जगद्धेतुत्वप्रतिपादनमुखेनैव परमात्मभावं श्रावयन्ति तत्कथं तस्य न हेतुत्वं कल्पितं वा श्रुतिप्रसिद्धस्य कल्पितत्वानुपपत्तेः? परमात्मन्यपि [7]तदुपनिपातात्। ततः कारणमेव जगतः परमात्माऽनेकान्तश्चेति कथन्न तत्रापि" प्रवृत्तिनिवृत्तिर्विकल्प्यम्? विषयभेदात्तु "तदभावे चन्दनकण्टकादावपि न भवेदित्ययुक्तम्—'अप्रवृत्तिनिवृत्तीदम्' इति पर्याप्तं प्रसङ्गेन।

तत उत्पादादीनां नयविषयाधिष्ठानतया साङ्कर्याभावाच्चित्रिवन्वनाः प्रीत्यादयो भवन्त्येव न न भवन्ति इत्युपपन्नमुक्तं स्वामिसमन्तभद्रैः तन्मतोपजीविना भट्टेनापि—

---

१ निःशेषदेशादितया। २ अन्यदेशादौ। ३ –त्तिरत्र वृत्ता–प०। ४ कष्टदशापत्तेरनुपप–आ०, ब०, प०। ५ जैनोऽपि। ६ ब्रह्माद्वैततत्प्रतिपत्तिः। ७ कठोप० ४।११। बृहदा० ४।४।१९। ८ ब्रह्मन्। ९ प्रतिपत्तावपि। १० कल्पितत्वोपनिपातात्। ११ परमात्मन्यपि। १२ प्रवृत्तिनिवृत्तिर्वैकल्यमेव।

"घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥" [आप्त०मी०श्लो० ५९] इति ।
"पयसानकभक्षेण रुचकः क्रियते यदा ।
तदा पूर्वार्थिनः शोकः प्रीतिश्चाप्युत्तरार्थिनः ॥
हेमार्थिनस्तु माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम् ।" [मी०श्लो०पू० ६१३] इति । ५

ततो घटादेरभेदज्ञानेन ध्रौव्योपपत्तेर्न साध्यवैकल्यम् । नापि साधनवैकल्यम्, तत्पादादेरपि तत्र तज्ज्ञानादेव प्रतिपत्तेः ।

[1]उत्पादो नाम [2]अभूत्वा भवनम्, अभूतस्य च न भवनम्, व्योमकुसुमादिवत्, अतः कथमुत्पाद इति चेत् ? न, चक्रचीवरादिव्यापारवैफल्यापत्तेः । अभिव्यक्तिकरणात्तस्या फल्यमिति चेत्, न, अभिव्यक्तेरप्यभूतायाः करणायोगात् । अभिव्यक्त्यभिव्यक्तिकरणा- १०
दिति चेत् ; न, अनवस्थापत्तेः । अभिव्यक्तेरभूतायाः अपि करणं न घटादेरिति किंकृतो विभागः ? कुतो वा प्रागपि भवतोऽनुपलब्धिः ? तिरोभावादिति चेत्, [3]स यदि तस्मादन्यः कथम् घटादिकस्येव तेनः सर्वस्यानुपलब्धिः ? तत्रैवे तस्य भावादिति चेत्, न, 'सर्वं सर्वत्र विद्यते' इति [6]दर्शनात् । तदभिव्यक्तेस्तत्रैव भावादित्यपि न युक्तम् । [7]अत एव तदभिव्यक्त्यभिव्यक्तेस्तत्रैव भावादित्यपि, अनवस्थापत्तेश्च । तत्र तस्मादन्यतिरोभाव । अनन्य एवेति चेत्, कथं १५
पश्चादुपलब्धिः ? कुतश्चित्तिरोभावापगमादिति[8] चेत्, सिद्धमुत्पत्तिमत्त्ववत् व्ययवत्त्वमपीति न साधनवैकल्यं निदर्शनस्य । साध्यधर्मस्य हेतोः, शब्दविद्युदादावप्युत्पादव्ययवत्त्वस्याऽविप्रतिपत्तेः । अतो भवत्येव शब्दविद्युदादेरवस्थानवत्त्वप्रतिपत्तिरन्यथानुपपत्तिनियमनिश्चयात् ।

[11]यत्पुनरेतत्—यद् यद्भावं प्रत्यनपेक्षं तत्तद्भावनियतं यथा अन्त्या कारणसामग्री कार्योत्पादं प्रत्यनपेक्षा तद्भावनियता, विनाशं प्रत्यनपेक्षश्च भावः, तस्मान्नश्यत्येव न तिष्ठतीति, तत्र २०
कदाऽसौ नाशः ? भावस्योत्पत्तिसमय एवेति चेत् ; न, हेतोर्धर्मिविपर्ययसाधनेन [12]विरुद्धत्वोपपत्तेः । उत्पत्तिसमयभावी हि भावो धर्मी, तस्य च तदैव नाशे कथं न विपर्ययो यतस्तं साधयन् हेतुर्विरुद्धो न भवेत् ? उत्पत्तेरूर्ध्वमिति चेत्, सोऽपि यदि भावाद्भिन्नः ; कथं भावस्वरूपतया व्यपदिश्येत भावो नश्यतीति ? न ह्यन्यः अन्यरूपतया व्यपदेशमर्हति[13]-

---

१ सांख्य आदयश्च । २ "अपूर्वतनभूतावस्तुत्वम्"—किरणा० पृ० २९ । ३ तिरोभाव । ४ तिरोभावतः । ५ घटादेरेव । ६ "सर्वं सर्वत्र विद्यत इति दर्शनाच्चोभयत्र तिरोभावोऽपि सर्वत्र विद्यते तत सर्वस्यानुपलब्धिप्रसंगनिरासार्थं ।"—ता० टि० । ७ सर्वं सर्वत्र विद्यते इति दर्शनादेव । ८ 'न युक्तम्' इति सम्बन्धः । ९ घटादे । १० —त्पेक्षमभिव्यक्ति— आ०, ब०, प० । ११ बौद्धस्य मतम् । "तदयं भावोऽनपेक्षतद्भावं प्रति तद्भावनियत तद्यथा चरमसहकारिसामग्रीकार्योत्पादनेऽसम्भवत्प्रतिबन्धा ।"—प्र० वा० स्व० पृ० ३।१९७ । "ये यद्भावं प्रत्यनपेक्षास्ते तद्भावनियता यथासमनन्तरक्षण सकलसामग्री स्वकार्योत्पादने नियता । विनाशं प्रत्यनपेक्षाश्च सर्वे जन्मिनः क्षणिका भावा इति स्वभावहेतुः ।"—तत्त्वसं० प० श्लो० ३५३ । १२ विरुद्धोप—आ०, ब०, प० । १३ "सर्वस्य सर्वरूपतया व्यपदेशप्रसंगात्"—ता० टि० ।

प्रसङ्गात् । नायं दोषः ; भावस्यैव [1]तद्धेतुतया तद्रूपत्वेन व्यपदेशोपपत्तेर्न सर्वस्य सर्वरूपतया विपर्ययादिति चेत् ; न ; अनश्वरस्यैव भावस्य तद्धेतुत्वापत्तेः, नाशात् पूर्वं नश्वरत्वानुपपत्तेः। ततो नश्वरत्वेनार्थक्रियाकारित्वस्य व्याप्तिव्यवस्थापनं परस्यापरिज्ञानविजृम्भितमेव । अन्यतो नाशान्नश्वरस्यैव तस्य तद्धेतुत्वमिति चेत् ; न; तन्नाशस्यापि पश्चाद्भावित्वे तत्रापि 'सोऽपि यदि भावाद्भिन्नः' इत्यादेरनुवन्धात् । तन्नाशेऽपि नाशान्तरान्नश्वरस्यैव भावस्य हेतुत्वपरिकल्पनाया-मपरिनिष्ठापत्तेः । [2]तन्नायं भिन्न एव भावात् । अभिन्न एवास्त्विति चेत् ; न ; [3]तस्यापि तद्भावरूपत्वप्रसङ्गात । कथञ्चिद्भेदस्यापि भावान्न तद्रूपत्वापत्तिरिति चेत्; कथमेवमवस्थितस्य कथञ्चिदन्यथा भाव एव नाशो न भवेत्तत्रैव लोकस्यापि नाशव्यवहारप्रतिपत्तेः । तत्र च विरुद्धो हेतुः निरन्वयविनाशसाधनाय प्रयुक्तेन तद्विरुद्धस्य सान्वयस्यैव विनाशस्य तेन साधनात् । ततः सर्वं सदुत्पादादित्रयात्मकमेव नोत्पादाद्यन्यतमैकान्तात्मकं तदप्रतिपत्तेः । एतदेवाह—

सदोत्पादव्ययध्रौव्ययुक्तं [4]सदसतोऽगतेः । इति

'सत्' इति धर्मिणो निर्देशः प्रसिद्धत्वात, **उत्पादव्ययध्रौव्ययुक्तम्** इति साध्य-स्य अप्रसिद्धत्वात् "अप्रसिद्धं [5]साध्यम्" [न्यायवि० श्लो० १७२] इत्यभिधानात् । हेतुत्वमत्र सत एव द्रष्टव्यम् । धर्मित्वं प्रत्यपक्षीणस्य कथं तस्य हेतुत्वमिति चेत् ; न; [6]साध्यं प्रत्यधिकरणभावेन तस्य तत्प्रत्युपक्षयेऽपि अन्यथानुपपन्नत्वेनानुपक्षयात्, [7]तस्य धर्मिभावं प्रत्यनुपयोगात् ।

प्रतिज्ञार्थैकदेशत्वेनासिद्धस्य कथमन्यथानुपपन्नत्वमपि साध्यवदिति चेत्? न साध्य-स्यापि [8]तदेकदेशत्वेनासिद्धत्वम्, अपि तु स्वरूपेणाप्रतिपत्तेः । न चैवं सतोऽप्रतिपत्तिः धर्मित्व-स्याप्यभावप्रसङ्गात् । तदयमत्र प्रयोगः—यत्किञ्चित् सत् तत्सर्वमुत्पादव्ययध्रौव्ययुक्तम् अन्यथा सत्त्वानुपपत्तेः ।

असिद्धिरन्यथानुपपत्तेः साध्यस्यासम्भवात् । न हि असम्भवत्साध्यापेक्षं क्वचिदन्यथानुपपन्नत्वमुपपत्तिमत्तामुद्वहति । तस्यासम्भवश्च विचारसूक्ष्मसूचीमुखनिर्भेदभी-रुत्वात् । तथा हि यदि [9]भावस्य स्वतो न सत्त्वम; उत्पादादियोगेऽपि न स्यात् व्योमकुसुमवत् । उत्पादादिना चासता न योगः, योगेऽपि न सत्त्वम्; कूर्मरोमयोगेणापि तत्प्रसङ्गात् । सत्त्वेवोत्पादा-दिरिति चेत्; यदि स्वतः भावोऽपि तथैव सन्निति किं तद्योगेन ? अपरोत्पादादियोगादिति चेत् ; न ; तदुत्पादादेरप्यपरोत्पादादियोगेन सत्त्वपरिकल्पनायाम् अपरिनिष्ठापत्तेः । तन्न तद्योगो नाम साध्यं सम्भवति तत्कथं तदपेक्षमन्यथानुपपन्नत्वं सत्त्वस्येति चेत्; न; उत्पादादेस्तद्वतो भेदैकान्त एवैवं दोषोपनिपातात्, नाभेदभावे; [10]तत्रोत्पादाद्यात्मकस्यैव [11]सत्स्वरूपतया निर्णयात् ।

---

१ नाशहेतुतया । २ नाशः । ३ नाशस्यापि । ४ द्रष्टव्यम्—अक० टि० पृ० १४२ पं० २१ । ५ द्रष्टव्यम्—अक० टि० पृ० १६२ पं० ३२ । ६ साध्यत्वं प्रत्य—आ०, ब०, प० । ७ अन्यथानुपपन्नत्वस्य । ८ प्रतिज्ञार्थैक-देशत्वेन । ९ यदि स्वभाव—आ०, ब०, प० । १० तत्रोत्पादात्मक—ता० । ११ सत्स्वरूप—आ०, ब०, प० ।

सतः किमिदं सत्त्वम् ? उत्पादाद्यात्मकत्वमेव नापरम्, इति । "उत्पादव्ययध्रौव्ययुक्तं सत्" [त० सू० ५।३०] इति युक्तशब्दस्य चाभेदवाचिन एवोपादानात् ।

अपि च, कथमिदानीमर्थक्रियासामर्थ्यस्यापि सद्लक्षणत्वं यत इदं सूक्तं स्यात्–

"अर्थक्रियासमर्थं यत्तदत्र परमार्थसत् ।" [प्र० वा० २।३] इति ।

स्वयमसतस्तस्सामर्थ्येन सम्बन्धेऽपि व्योमकुसुमवत्सस्त्वानुपपत्तेः । असता च तेन तद्वदेव सम्बन्धासम्भवात् । स्वतस्तस्य सत्त्वे भावस्यापि तेन एव तदुपपत्तेः तत्सम्बन्धवैफल्यात् । अपरतस्सामर्थ्यसम्बन्धात्सत्त्वे चानवस्थादोषस्यापिक्षेपात् । एवम् "उपलम्भः सत्ता" [प्र०वार्तिकाल० २।५४] इत्यादावपि वक्तव्यम् । 'भावादभिन्नमेव तस्सामर्थ्यादिकं तदेव च भावस्य सत्त्वं नापरम् । न च तस्यापरं तस्सामर्थ्यादिरूपं सत्त्वमपेक्षणीयं स्वत एव तद्रूपत्वात्' इति समाधानं तु उत्पादाद्यात्मन्यपि सत्त्वे न वैमुख्यमुद्वहति ।

ननु उत्पादादेरपि उत्पादादिस्वभावत्वात् अस्तु उत्पादस्योत्पादात्मकत्वं स्वतो व्ययध्रौव्यात्मकत्वं तु कथमिति चेत् ? न, व्ययध्रौव्याभ्यामपि तस्य कथञ्चिद्भेदात् स्वत एव तदात्मकत्वस्याप्युपपत्तेः । भावादेव उत्पादादेरभेदो न परस्परत इति चेत्, न, भावाभेदस्यैव परस्परतोऽप्यभेदस्यात् । "व्यावृत्ताश्च परस्परम्" [सिद्धिवि० परि० ३] इत्यप्येकान्तिकव्यावृत्तेरनभिधानात् । एवं व्ययस्योत्पादध्रौव्यात्मकत्वं ध्रौव्यस्य च उत्पादव्ययात्मकत्वं स्वतः प्रतिपत्तव्यम् । तन्न तस्यासम्भवः साध्यस्य विचारवैमुख्याभावादित्युपपन्नमेव तदपेक्षमन्यथानुपपन्नत्वं साधनस्य ।

व्यभिचाराद्ननुपपन्नमेव तस्यान्यथानुपपन्नत्वम्, व्यभिचारश्चोत्पादादीनामन्यतमैकात्मनि अन्यतमद्वयात्मनि वा भावेऽपि भावादिति चेत्, न, असतोऽगतेः । सदुत्पादादित्रयं व्याप्यपक्षेण व्यापकस्यानिधानात् । न विद्यते सदस्मिन्नसत्, तदन्यतमैकात्मकम्, अन्यतमद्वयात्मकं वा तस्य प्रत्यक्षादिप्रमाणेन अगतेः अप्रतिपत्तेः ।

विनेतराभ्यां नोत्पादो न व्ययो ध्रौव्यवेदनात् ।
प्रमाणेन विरोधाच्च न चोत्पादव्ययौ क्वचित् ॥१०६५॥
विरुद्धं हि निरंशार्थस्योत्पादविगमद्वयम् ।
तस्याशत्वे समाधानं पुरस्तादभिधास्यते ॥१०६६॥
उत्पादध्रौव्यरूपश्च भावो हि व्ययवर्जितः ।
न प्रतीतिविदग्धस्त्रीपरिष्वङ्गसुखावहः ॥१०६७॥
व्ययवानेव भिन्नेन व्ययेन स मतो यदि ।
तदा तेनैव सर्वोऽपि भावो व्येतीह किम नः ? ॥१०६८॥

---

१ अर्थक्रियासामर्थ्येन । २ स्वत एव । ३ –सं तस्य च आ०, ब०, प० । ४ पदार्थेऽपि । ५ –क्रम् तदन्य –आ०, ब०, प० । ६ नाप्यते–आ०, ब०, प० ।

तद्विशिष्टतयार्थस्य नियतस्यैव वेदनात् ।
इति चेद्व्ययकालेऽपि भावस्य स्यादवस्थितिः ॥१०६९॥
अनवस्थायिनो यस्मान्न वैशिष्ट्येन वेदनम् ।
तथा च न विषादः स्यादिष्टनाशेऽपि देहिनाम् ॥१०७०॥
अस्थितस्यापि वैशिष्ट्यं बुद्ध्युपस्थापितस्य चेत् ।
बुद्ध्युपस्थापनं तस्य सतश्चेत्कथमस्थितिः ? ॥१०७१॥
असतश्चेत्कथं तस्य व्ययवैशिष्ट्यवेदनम् ? ।
दृष्टं हि नीलवैशिष्ट्यं सत एवोत्पलात्मनः ॥१०७२॥
आरोपितेन रूपेण वैशिष्ट्यं तस्य चेत्सतः ।
व्ययस्तस्यापि रूपस्य भावस्यैव भवेत्तदा ॥१०७३॥
ततस्तस्यापि वैशिष्ट्यमसतः कथमुच्यताम् ? ।
आरोपितेन रूपेण तस्याप्यस्तित्वकल्पने ॥१०७४॥
पूर्वदोषानिवृत्तिः स्यादनवस्थानवाहिनी ।
विशेषणत्वमप्यस्य नाशक्तस्योपपद्यते ॥१०७५॥

विशिष्टप्रत्ययहेतोरेव हि नीलादेर्विशेषणत्वं दृष्टम् । न च व्ययस्य तद्धेतुत्वं शक्तिवैकल्यात्, शक्तिमत्त्वे तु भाव एव स्यात् तस्य तल्लक्षणत्वात् द्रव्यादिवत् । द्रव्यादेरपि न शक्तिमत्त्वात् भावत्वम् अपि तु भावेन सत्तापरव्यपदेशेन सम्बन्धात् । न च व्ययस्य तत्सम्बन्धो यतो भावत्वमिति चेत् ; कथं तर्हि भावस्य भावत्वम् ? तत्सम्बन्धाभावादनवस्थापत्तेः । स्वत एव भावप्रत्ययकरणादिति चेत् ; द्रव्यत्वादेस्तर्हि कथम् ? न हि ततस्तत्प्रत्ययः ; द्रव्यादिप्रत्ययस्यैव भावात्, इत्यभावत्वमेव तस्य स्यात् । तदपि नास्ति; अभावप्रत्ययकरणाभावादिति चेत्; तत्तर्हि भावाभावस्वभावविनिर्मुक्तं तत्त्वान्तरं प्राप्नुयात् । तच्चानुपपन्नम् ; "सतश्च सद्भावोऽसतश्चासद्भावस्तत्त्वम्" [न्यायभा० १।१।१] इति तत्त्वनियमप्रतिपादनभाष्यव्याघातापत्तेः । नायं प्रसङ्गः स्वप्रत्ययोपजननसमर्थतया द्रव्यत्वादावपि भावत्वस्यैवोपपत्तेरिति चेत् ; अनुकूलमाचरसि, शक्तिमत्त्वस्यैव भावलक्षणत्वेनैवं प्रतिष्ठानात् । तथा च व्ययोऽपि कथन्न भावः स्वप्रत्ययशक्तेरविशेषात् ? इत्यशक्त एवासौ सर्वथा वक्तव्य इति नासौ कस्यचिद्विशेषणम्, स्वानुरक्तप्रत्ययमकुर्वतस्तत्त्वानुपपत्तेः । ततो न विशिष्टप्रत्ययनियमात्तन्नियमः ।

तत्कार्यव्ययनियमादिति चेत्; किं पुनर्व्ययादपि व्ययः ? तथा चेत्; न; तस्यापि भावादर्थान्तरत्वे प्राच्यप्रसङ्गस्यानिवृत्तेः, अनवस्थापत्तेश्च । अनर्थान्तरत्वे तु तद्वत्प्रथमस्यापि

---

१ अपि तस्यापि आ०,ब०,प० । २ भावस्येव आ०,ब० । भावस्येह प० । ३ नाशस्तस्यो–आ०,ब०,प० । ४ –यकार–आ०, ब०, प० । ५ द्रव्यत्वादेः भावप्रत्ययः । ६ अभावत्वमपि । ७ चेत्तर्हि –आ०, ब०, प० । ८ वक्तव्यमिति आ०, ब०, प० । ९ विशेषणत्वानुपपत्तेः ।

तस्वोपपत्तेः; सिद्धमुत्पादध्रौव्यात्मनो भावस्य व्ययात्मकत्वमपि, अन्यथा तदप्रतीतेः। एवम् उत्पादवानेव ध्रौव्यव्ययात्मा भावो नान्यथा प्रतीत्यभावात्।

भवतु व्यतिरिक्तेनोत्पादेन तद्वत्त्व नात्मभूतेनेति चेत्, कः पुनस्तादृश उत्पादः? प्रागसतः सत्तासम्बन्धः, कारणसम्बन्धो वेति चेत्, न, तत्र कारणवैफल्यापत्तेः, सत्सम्बन्धस्य नित्यत्वेन कारणनिरपेक्षत्वात्। तदुक्तम्- ५

"सत्ता स्वकारणाश्लेषकारणात्कारणं किल।
सा सत्ता स च सम्बन्धो नित्ये कार्यमथेह किम्? ॥" [ ] इति

तन्न सत्सम्बन्धः उत्पादः।

प्रागसत आत्मलाभ इति चेत्, न तर्हि तस्य व्यतिरेक इति आत्मभूतेनैवोत्पादेनोत्पादवान् ध्रौव्यव्ययात्मा भावः, अन्यथा तदवगमाभावात्। उत्पादव्ययस्वभावमेव च १०
ध्रौव्यम्, अन्यथा कस्याप्यपरिज्ञानात्। ध्रुवमेवात्मादि परिज्ञायत इति चेत्; कुतस्तत्परिज्ञानम्? स्वशक्तित इति चेत्, न, सर्वदा सर्वेणापि तत्प्रसङ्गादविवादापत्तेः। आगमतस्तत्परिज्ञानम्, न च सा सर्वदा सर्वस्यापीति चेत्; तदभावे यदि तस्य प्राक्यं तद्विषयत्वं न परिक्षीयेत कथं तद्विषयत्वं विरोधात्? परिक्षीयते चेत्, कथन्न व्ययः तस्य तस्मादर्थान्तरत्वात्, न हि अर्थान्तरस्य परिक्षये तत्परिक्षयः, अतिप्रसङ्गात्। कथं तादृशेन तेन तद्विषय इति व्यप- १५
देशः अतिप्रसङ्गस्याविशेषात्? सम्बन्धात्कृतस्त्रिधिति चेत्, न, ततोऽप्यर्थान्तरात्तदनुपपत्तेः। तत्राप्यपरसम्बन्धकल्पनायाम् अनवस्थापत्तेः"। तस्य तस्मादनर्थान्तरत्वे तु सिद्धं तदपरिक्षये पश्चादप्यपरिज्ञानम्। न ह्यपरित्यक्तदविषयत्वसम्बन्धस्वभावं तद्विषयभावमनुभवति। अनुभवद्वा परित्यक्ततत्स्वभावमेवेति कथन्न व्ययः?

कथं वा नोत्पादः? पूर्वस्वभावपरित्यागस्योत्तरस्वभावोपादानात्मन एवोपपत्तेः। २०
अनुत्तरोपादानस्य भावस्यानायोगेन निःशेषपरिक्षये तत्परिज्ञानस्योत्पन्नस्यापि निर्विषयत्वापत्तेः। तन्नैकशो द्विशो वा सम्बन्धव्युत्पादादयः, यतस्तत्रापि भावाद्व्यभिचारी हेतुर्भवेत्।

ननु ध्रौव्यं नाम पूर्वस्य दधिपर्यायस्योत्तरतत्पर्यायेणैकत्वम्, तच्च तेनैव कुतो न क्रमपर्यायेणापि देशादिभेदस्य प्रकृतेऽप्यविशेषादिति चेत्? अत्राह-

तादात्म्यनियमो हेतुफलसन्तानवन्नचेत् ॥११९॥ इति। २५

तादात्म्यम् एकत्वं तस्य नियमो दधिपर्यायस्य तत्पर्यायेणैव न क्रमपर्यायेणेत्यव-

---

१ तदाद्यम् -आ०, ब०, प०। २ कथं पुन-आ०, ब०, प०। ३ "अथ त्रिभिर्दं कार्यत्वं सामेति-स्वकारणसत्सम्बन्धः"-अष्ट० व्यो० पृ० ११९। ४ -त्मलाभे इति आ०, ब०, प०। ५ -त्पादात् ध्रौ -आ०, ब०, प०। ६ प्राक्यं यत्तद्वि -आ०, ब०, प०। ७ परिज्ञानविषयत्वम्। ८ तद्विषयत्वस्य अत्यन्ते। अत्र 'न व्ययः' इत्यनुवर्तनीयम्। ९ अर्थान्तरभूतेन। १० तद्विषयत्वपरिक्षयेण। ११ -पत्तेश्च तस्य -आ०, ब०, प०। १२ तद्विषयत्वस्य। १३ तद्विषयत्वापरिक्षये। १४ -कथं तद्वि-आ०, ब०, प०। १५ सम्बन्धादिति।

धारणं **भवेदिति** तद्भावं विदधानस्तदभावं व्यवच्छिनत्ति, तदव्यवच्छेदे तद्विधानानुपपत्तेः। अत्र हेतुः **'असतो गतेः'** इति **असतः** करभपर्यायेष्वविद्यमानस्य तादात्म्यस्य दध्नो दधिपर्यायेष्वेव[1] **गतेः** प्रतिपत्तेः। तत्र दृष्टान्तः **हेतुफलसन्तानवत्**। हेतवश्च[2] फलानि च पूर्वापरक्षणरूपाणि, तेषां सन्तानः, तद्वत्। यथा तेषां भेदेऽपि परस्परमेवैकः सन्तानो न करभक्षणैः तद्व्यावृत्तस्य तस्य तत्रैव गतेः, अन्यथा "चोदितो दधि खाद" [प्र० वा० ३।१८२] इत्यादेस्तत्रापि प्रसङ्गात्। तथा तत एव तेषां परस्परमेव तादात्म्यं न तत्क्षणैः।

अथवा हेतुफले हेतुत्वफलत्वे भावप्रधानत्वान् निर्देशस्य। यदि वा, न विद्यते हेतुर्यस्य सः अहेतुः प्रध्वंसः फलं विधिः अन्यस्य फलत्वानुपपत्तेः तयोः सन्तन्यते तादात्म्येन विस्तीर्यते इति **हेतुफलसन्तानो अहेतुफलसन्तानो वा** मध्यक्षणः तस्यैव। न हि तस्य हेतुत्वमेव, स्वयमफलस्य सामान्यादिवदवस्तुत्वापत्तेः। पूर्वपूर्वापेक्षयाऽपि तस्य वस्त्वेन तत्तत्पूर्वकालभावित्वेन चिरापक्रमदोषाच्च। नापि फलत्वमेव; स्वयमहेतोर्व्योमकुसुमसमत्वोपनिपातात्। उत्तरोत्तरापेक्षयापि तस्य तत्त्वेन[4] तत्तदुत्तरकालभावित्वेनातिचिरभावित्वप्रसङ्गाच्च। तथा न तस्य विधिरेव स्वभावः, तत्क्षणवत् क्षणान्तरेऽपि तत्स्वभावत्वेनाक्षणिकत्वप्रसङ्गात्। नापि नाश एव; क्षणान्तरवत् तत्क्षणेऽपि तदात्मत्वेन[5] शून्यवादोपनिपातात्। ततः पूर्वं प्रति फलत्वमुत्तरं प्रति हेतुत्वं तत्क्षणं प्रति विधित्वं क्षणान्तरं प्रति नाशत्वमिति परस्परं भिन्नावेव हेतुफलभावौ विधिविनाशौ च। न च तौ च तौ च तादात्म्येन व्याप्नुवति[6] तस्मिन्नतिप्रसङ्गः; वस्तुसाङ्कर्यापत्तेः। ततो यथा नियतप्रतीतिसामर्थ्यात् नियतमेव हेतुफलतादात्म्यं विधिविनाशतादात्म्यञ्च तत्क्षणस्य तथा द्रव्यादेः पर्यायतादात्म्यमपीति न कश्चिद्दुपालम्भः।

मा भूत्तत्क्षणस्यापि तत्तादात्म्यं हेतुफलभावस्य विधिविनाशभावस्य च क्वचिदनिष्टेः। अद्वैतं हि तत्त्वं तस्य निरवद्यप्रमाणविषयत्वात्, न हेतुफलभावादि विपर्ययात्। कल्पितस्य तु न दृष्टान्तत्वम्, साध्यस्यापि कल्पितस्यैव प्रसिद्धिप्रसङ्गादिति चेत्; न; अद्वैतस्यापि निर्भागपरमाणुरूपस्याप्रमाणत्वात्! नानैकस्वभावत्वे तु नाद्वैतं तद्वदर्थस्यापि तादृशस्याऽनिषेधोपपादनात्।

भवतु [7]तदुभयमपि क्षणिकमेवेति चेत्; अत्राह—

भिन्नमन्तर्बहिः सर्वं युगपत्क्रमभावि नः।
प्रत्यक्षं न तु साकारं क्रमयुक्तक्रमयुक्तिमत् ॥१२०॥ इति।

सर्वं निरवशेषम् **अन्तश्चेतनं भिन्नं बहिश्चाचेतनं भिन्नम्** अनेकत्वभावं **युगपत्** अक्रमेण 'यत्' इति शेषः। तत्रोत्तरम्—**क्रमभावि** क्रमेण भवनशीलम् अन्तर्बहिः

---

१ —ष्वेव आ०, ब०, प०। २ "हेतुत्वेन"—ता० टि०। ३ चिरविनष्टदोषात्। ४ फलत्वेन। ५ तथात्म—आ०, ब०, प०। ६ व्याप्नोति त—आ०, ब०, प०। ७ "संवेदनद्वयम्—ता० टि०। ८ —क्रमयुक्तवत् आ०, ब०, प०।

सर्वं भिन्नमिति सम्बन्धः । कुत एतत् ? प्रत्यक्षं प्रत्यक्षवेद्यं यत इति । निरूपितं चैतत् ।

ननु यदि प्रत्यक्षमक्रमं न तेनापरक्रमप्रतिपत्तिः । सक्रमं चेत्, न, तत्क्रमेणाप्यपरिज्ञातेन तदनुपपत्तेः, तत्परिज्ञानस्याप्यपरतत्क्रमेण परिकल्पनायामनवस्थापत्तेरिति चेत्, अत्रोत्तरम् 'न तु' इत्यादि । प्रत्यक्षमित्यत्रापि सम्बन्धनीयम् । प्रत्यक्षं प्रत्यक्षप्रमाणं साकारं स्वपरनिर्णयात्मकं न तु नैव अयुक्तिमत् अपि तु युक्तिमदेव । कीदृशं तत् अयुक्तिमन्न भवति ? क्रमयुक्तं क्रमेण अपरापरार्थक्रियापर्यायरूपेण युक्तमुपपन्नम् । प्रत्यक्षक्रमस्यापरतत्क्रमेण परिज्ञानानभ्युपगमात् । न च तावता तत्क्रमापरिज्ञानमेव प्रत्यक्षपरिज्ञानस्यैव तत्क्रमपरिज्ञानत्वात्, प्रत्यक्षतत्क्रमयोः कथञ्चिदैक्यात् । अवश्यं चैवमभ्युपगन्तव्यम्, अन्यथा युगपद्भाविदूरापरापरस्वभावपरिज्ञानस्याप्येवमयुक्तिमत्त्वापत्तेः । ततो युक्तं युगपदिव क्रमेणाप्यनेकस्वभावं सर्वम्, प्रत्यक्षतस्तथैव प्रतिपत्तेः ।

एतदेव श्लोकप्रसिद्धेनोदाहरणेन दर्शयन्नाह—

प्रत्यक्षप्रतिसंवेद्यः कुण्डलादिषु सर्पवत्। इति ।

प्रत्यक्षं विशदं व्यवसायात्मकं ज्ञानं येन प्रतिपुरुषं सम्यगबाधितत्वेन वेद्यो ज्ञातव्यो 'विशेष' इति वक्ष्यमाणमिहाकृष्य सम्बन्धनीयम् । विशेषश्च द्रव्यपर्यायात्मा भावः, तस्यैकान्तभिन्नद्रव्यपर्यायाभ्यां भिद्यमानतया विशेषाभिधानोपपत्तेः । अत्रोदाहरणम्— कुण्डलमादिर्येषां प्रसारणोत्क्षणविक्षणाद्यवस्थाभेदानां तेषु सर्प इव तद्वत् ।

सर्पस्तावदनुस्यूतः कुण्डलायमनादिषु ।
प्रत्यक्षेणैव संवेद्यो विवादस्तत्र ते कथम् ? ॥१०७६॥
प्रत्यक्षेऽपि विवादश्चेद्विवादः क्व कल्प्यताम् ? ।
कल्पनैवान्वयज्ञानं प्रत्यक्षमेति चेन्मृषा ॥१०७७॥
अन्वयज्ञानतोऽन्यस्य प्रत्यक्षस्याप्रवेदनात् ।
अवेदनाभिमानस्ते निश्चयाभावतो यदि ॥१०७८॥
सनिश्चयं[1] चेदध्यक्षं कथं नाम न निश्चयः ।
अनिश्चयं चेत्सर्वत्र सर्वं प्रत्यक्षमुच्यताम् ॥१०७९॥
ततोऽनुभूतसर्पादिज्ञानं प्रत्यक्षमेव तत् ।
विशदत्वेन निर्भासात् सुप्तमीक्षादिबोधवत् ॥१०८०॥
वैशद्यं च यथा तस्य मुख्यमेव न कल्पितम् ।
निरूपितं तथा पूर्वमिति नेह निरूप्यते ॥१०८१॥

---

१ परवर्ण—आ०, ब०, प०। २ तुलना—"तस्मादुभयहानेन व्याहत्यनुपपत्तितः। पुरुषेऽभ्युपगन्तव्यः कुण्डलादिषु सर्पवत् ॥"—मी० श्लो० पृ० ६९५। प्रमाणवा० १११। ३ —र्यं चिद् —आ०, ब०, प०। ४ —त्त —आ०, ब०, प०।

ततो द्रव्यादिरूपत्वं वस्तुनोऽध्यक्षतोऽधुना ।
पश्यन्ननाद्यनन्तेऽपि काले तत्त्वं प्रपद्यते ॥१०८२॥
पश्यतोऽपि तथा व्याप्तिं यदि नानुमितिस्तदा ।
क्षणभङ्गानुमानादेरपि देयो जलाञ्जलिः ॥१०७३॥
तस्मान्मध्यवदेवान्यकालेऽप्यर्थस्तदात्मकः ।
प्रपत्तव्योऽत एवोक्ता पूर्वश्लोके [1]सदाश्रुतिः ॥१०८४॥

ततो द्रव्यपर्यायात्मैव भावः प्रत्यक्षेण तथा प्रतिपत्तेः । यत्पुनरत्रोक्तमर्चटेन—

"अविनाशोऽनुवृत्तिश्च व्यावृत्तिर्नाश उच्यते ।
द्रव्याविनाशे पर्याया नाशिनः किं तदात्मकाः ? ॥
नष्टाः पर्यायरूपेण नो चेद्द्रव्यस्वभावतः ।
किमन्यरूपता तेषां न चेन्नाशस्तथा कथम् ॥" [हेतु०टी० पृ० १०५] इति ।

तदयुक्तम् ; द्रव्याविनाशे पर्यायनाशस्यानभ्युपगमात्, सर्पादेरेव नश्यतः पर्यायत्वात् अनश्यतश्च द्रव्यत्वात् । कथमेकस्यैव नाशश्च अनाशश्चेति चेत् ? प्रतीतिरेव प्रष्टव्या यैवमुपदर्शयति न वयं तदुपाध्यायतया तदुपदर्शितमनुमन्यमानाः । प्रतीतिरेव पृच्छ्यत इति चेत् ; कुतो वस्तुव्यवस्था ?

प्रतीतिरेव वस्तूनां व्यवस्थाया निबन्धनम् ।
तत्र चेन्नास्ति विश्वासो विनष्टा तद्व्यवस्थितिः ॥१०८५॥
निर्विकल्पप्रतीतेस्तु तद्व्यवस्थोपकल्पनम् ।
कुर्वन्तः कामयन्तेऽमी वन्ध्ययाऽपि सुतोद्भवम् ॥१०८६॥

ततः प्रतीतिबलावस्थापितत्वादुपपन्नमेकस्यैव नाशश्चानाशश्चेति । तथा जातिश्चाजातिश्चेति । तथा च—

"एकं जातमजातं च नष्टानष्टं प्रसज्यते ।
द्रव्यपर्याययोरेकस्वभावोपगमे सति ॥" [हेतु० टी० पृ० १०५]

इत्ययमनुपालम्भ एव, स्याद्वादिनामभिमतत्वात् । यद्येवं द्रव्यपर्याययोः कथं स्वालक्षण्यभेदो यतस्तन्नानात्वप्रकल्पनमिति चेत् ? विनाशाविनाशरूपतया भेदस्यापोद्धरणात् । तदपि कल्पनयैव नयनामधेयया न प्रत्यक्षादिप्रतीत्या, तत्र जात्यन्तरस्यैव भेदाभेदैकान्तविलक्षणस्य प्रतिभासनादिति निवेदितमसकृत् ।

ततो यदुक्तम्—"ततो लक्षणभेदेन तयोर्नैव विभिन्नता ।" [हेतु०टी० पृ० १०५] इति; तत्तथैव प्रत्यक्षादिप्रतीत्यपेक्षया । कल्पनापेक्षया तु न तथा, तत्र तल्लक्षणभेदस्य प्रतीतेः ।

---

१ सदाशब्दः । २ "उत्पत्तिश्चानुवृत्तिश्च"—ता० टि० ।

कथं पुनर्द्रव्यपर्याययोः तदात्मकमेकं वस्तु द्वयस्योपपत्तेः, अभेदेऽप्यन्यतरस्यैव सम्भवात् । कथञ्चिद्भेदे तु ताभ्यामभेदरूपस्याभेदे तद्भेद एव स्यात् । भेदे तु परस्परविविक्तयोः त्रयः स्वभावा नैकस्तदात्मार्थः, तेषामप्यभेदरूपस्यापरस्य कल्पनायामनन्तस्वभावत्वमेकस्यापतितः (तम्)परापरतत्स्वभावपरिकल्पनस्यापरिनिष्ठानात् । न च तदभ्युपगमो वस्तुषट्कमाविज्ञाने तदनवभासनादिति चेत् , न, एकान्ततद्भेदाभेदयोः प्रत्यक्षादावप्रतिभासनात् । न च कथञ्चिद्भेदेऽपि ताभ्यामन्यत्तदभेदरूपम् , यदर्थं प्रसङ्गः किन्तु स्वरूपमेव, द्रव्यस्य पर्यायेण पर्यायस्य द्रव्येणाभेदः, तथैव प्रत्यक्षादितः प्रतिपत्तेः । अवश्यं चैतदेवमभ्युपगन्तव्यम् , अन्यथा विकल्पस्यापि स्वविषयापेक्षया निर्विकल्पेतरात्मनो ज्ञानस्याभावप्रसङ्गात् । शक्यं हि तत्रापि वक्तुम्-तदात्मनोर्भेदे ज्ञानद्वयम्, अभेदेऽन्यतरत्वम् , कथञ्चिद्भेदे प्राप्यप्रसङ्ग इति । ततस्तत्राप्ययमेव परिहारः, स्वरूपमेव तस्य ताभ्यां तयोश्च तेनाभेदः तथैव निरवद्यस्वसंवेदनाध्यक्षतोऽधिगमादिति । ततः प्रमाणदूषणमज्ञानत्वेवेदमपि तेनाभिहितम्-

"एकान्तेन विभिन्ने च ते स्यातां वस्तुनी सदा ।
तयोः केन विभिन्नाभ्यामभिन्नस्य विभेदतः ॥
तेषामभेदसिद्ध्यर्थमभिन्नो यदि कल्प्यते ।
अन्यस्वभावस्तस्यापि तदभेदप्रसिद्धये ॥
कल्पनीयः स्वभावोऽन्यः तथा स्यादनवस्थितिः ।
न चानन्तस्वभावत्वमर्थसामर्थ्यभाविनि ॥
ज्ञानेऽवभासते तेन तथैवोपगमो भवेत् ।" [हेतु० टी० पृ० १०५] इति ।

तत्त्वेदमपि-

"ऐकान्तिकस्त्वभेदः स्यादभिन्नाद् भिन्नयोर्यदि ।
भेद एव विशीर्येत तदेकाऽप्यतिरेकतः ॥" [हेतु०टी० पृ० १०५] इति ।

द्रव्यपर्यायाभ्याम् अन्यस्याभेदरूपस्याभावे तस्मात्तयोर्विकल्पतदाकारयोरिवाभेदपरिग्रहस्यैवानुपपत्तेः । यदप्युक्तम्-

"अभेदस्यापरित्यागे भेदः स्यात्कल्पनाकृतः ।
तस्याविषयभावे वा स्यादभेदे मृषार्थता ॥
अन्योन्याभावरूपाणामपरामर्शहेतुकः ।
एकभावो यतस्तस्मान्नैकस्य स्याद् द्विरूपता ॥"[हेतु०टी०पृ० १०६] इति,

तदपि सर्पादेरिव विकल्पज्ञानस्यापि द्वैरूप्यं प्रतिविदध्यात् अविशेषात् । एकरूपमेव

---

१ -च्याः ब-आ०,ब०,प० । २ भेदं ब-आ०,ब०,प० । ३ ब्रह्म विषयेति इन्द्रः । ४ विकल्पेऽपि । ५ विकल्पाभ्य । ६ निर्विकल्पेनाभ्याम् । ७ अर्थेन । ८ "यः पुनः स्वभाव यस्य कार्यभेदानुमितः स तं तं वस्तुनो स्वातन्त्रमिति चार्थः"-हेतु० टी० टि० पृ० १०५ । ९ "तयोरेकेन न भिन्नाभ्याम् इति वा पाठ."-ता० टि० । १० इतेन मत्त-आ०, ब०, प० । ११ तस्यापि तदभावे आ०, ब०, प० । भेदस्य ।

वस्तुतस्तज्ज्ञानम् अभिलाप्याकारस्य तत्र कल्पितत्वादिति चेत् ; न ; स्वतस्तत्कल्पनस्य प्रत्यक्षवदसम्भवात् , अन्यतश्चानवस्थापत्तेः ।

कुतो वा परस्पराभावरूपत्वं भेदाभेदयोः ? प्रत्यक्षादिप्रमाणादिति चेत् ; न ; तत्र सम्मूर्च्छिततदुभयस्वभावस्यैव सर्पादेर्भावस्य प्रतिभासनात । नयादिति चेत् ; न ; तत्रापि सम्यगभिसन्धिरूपे प्रतिभासमानस्याप्येकस्य अपराभावत्वेनाप्रतिभासनात् , अपरत्र विधिवत् प्रतिषेधस्याप्यनभिसन्धेः । एकावधारणाभिसन्धिस्तु मिथ्यैव प्रमाणव्यापारप्रतिद्वन्द्वित्वादिति न तद्बलेनान्योन्याऽभावरूपत्वं द्रव्यपर्याययोः, यतो द्रव्यस्यैव पर्यायरूपतया पर्यायस्यैव च द्रव्यरूपतया एकस्यैव द्वैरूप्यं न भवेत् । यदप्युक्तम्—

"अन्योन्याभावरूपाश्च पर्यायाः स्युर्न भेदिनः ।
तद्विनाशे[ऽ]विनाशि स्याद् द्रव्यं वा कथमन्यथा ॥"[हेतु०टी०पृ० १०६]इति;

तत्रापि पर्यायाणामभेदित्वं नाशित्वञ्च द्रव्यस्य यदि कथञ्चित् ; अनुमतमेव, द्रव्यमेव नश्यति पर्यायनाशात् , पर्याया एव तिष्ठन्ति द्रव्याविनाशादिति प्रतीतिबलेनाभ्यनुज्ञानात् । एकान्तेन तु तत्कल्पनमनुपपन्नं तद्बलेन प्रतिक्षेपात्; अन्यथा विकल्पज्ञानमपि तदाकारवदेकान्तेन व्यावृत्तमेव नानुवृत्तमिति प्रत्याकारं तद्भेदान्नोभयात्मकमेकं तद्भवेत् । तथा तदाकारयोरप्येकान्तेनाभेद एवेति निर्विकल्पकमेव तत् न कश्चिदपि विकल्प इति तन्निबन्धनस्य वाच्यवाचकव्यवहारस्याभावात् कथमनेकान्तदोषोद्भावनम् । विकल्पकमेव वा तदिति कथं तत्स्ववेदनस्य प्रत्यक्षत्वं कल्पनापोढस्यैव तेंदुपपत्तेः । नाप्यव्यतिरिक्तस्यानुमानत्वमिति अन्यदेव तत्प्रमाणं प्रमाणद्वयनियमव्याघाताय कल्प्येत । न चाऽस्वसंविदितमेव तत् "सर्वचित्तचैत्तानाम्" [न्यायवि० पृ० १९] इत्यादेर्विरोधात् । ततः कथञ्चिदेव तज्ज्ञानस्य व्यावृत्तत्वमभिन्नत्वञ्च तदाकारयोरिति प्रतीतिवशात् प्रतिपत्तव्यम् । तथा द्रव्यस्य नाशित्वमभिन्नत्वञ्च पर्यायाणामिति न कश्चिद्व्याघातः ।

ततो यथा नेदं विकल्पे दूषणम्—'तद्धर्मयोराकारयोः तस्य तत्र वा तयोरनुप्रवेशे ऐकान्तिकौ भेदाभेदौ, अननुप्रवेशे धर्मधर्मिणोः भेद एव नापरः' । तथाहि—येनात्मना ज्ञानं तदाकाराविति च यदि तेन भेदः, तदा भेद एव नैकस्य द्वैरूप्यम् । न च ज्ञानतदाकाराभ्यामपरस्वभावो यन्निमित्तस्तयोरभेदः । सतोऽपि [10]तस्माद्यदि ज्ञानतदाकारयोरभेदः तदा [11]स एव न ताविति तयोः स्वभावहानिः [12]तस्मात्तयोर्भेदोऽप्यस्तीति चेत् ; तत्रापि येनात्मना ज्ञानं तदाकारौ तदन्यश्चेति यदि तेन भेदः; तदा भेद एव तेषामप्यभेदसिद्धये [13]परस्वभावकल्पनायां पूर्वप्रसङ्गाऽनिवृत्तिः, धर्मित्वञ्च तस्यैव स्यात्तदायत्तत्वात् ज्ञानतदाकारयोः । न चापरिनिष्ठितापरापरस्वभावं तज्ज्ञानं प्रतीयते इति । कस्मात् ? एकान्ततोऽननुप्रवेशस्य, ज्ञानतदाकारव्यतिरिक्तस्य तदभेदरूपस्य चानभ्युपगमात् । न चैवं भेद एव तयोः ; स्वत एव कथञ्चित्परस्परमभिन्नतया निर्बाधप्रतीत्युपारूढत्वात् । तथा

---

१ विकल्पज्ञानम् । २ –माणभेदादिति आ०,ब०,प० । ३ –कमेतन्न कश्चिद्विक–आ०,ब०,प० । ४ प्रत्यक्षत्वोपपत्ते. । ५ तं आ०,ब०,प० । ६ यदा आ०,ब०,प० । ७ सप्तमीद्विवचनम् । ८ विकल्पस्य । ९ विकल्पे । १० अपरस्वभावत्वे । ११ अभेदं एव । १२ अपरस्वभावात् । १३ –द्वपर–आ०,ब०,प० ।

द्रव्यपर्यायात्मकेऽपि वस्तुनि । अत्र इदमपि प्रतीतिविघटनमिश्रवचनमेव तेनोक्तम्–

"ऐकान्तिकावनन्यत्वाद्भेदाभेदौ तयोर्ध्रुवम् ।
अन्योन्य वा तयोर्भेदो नियतो धर्मधर्मिणोः ॥
तयोरपि भवेद् भेदो यदि येनात्मना तयोः ।
पर्यायो द्रव्यमित्येतद्यदि भेदस्तदात्मना ॥ ५
भेद एव तथा च स्यान्न चैकस्य द्विरूपता ।
द्रव्यपर्यायरूपाभ्यां न चान्योऽस्तीह कश्चन ॥
स्वभावो यन्निमित्ता स्याद्यतोरेकत्वकल्पना ।
ततस्तयोरभेदे हि स्वात्महानिः प्रसज्यते ॥
तस्य भेदोऽपि ताभ्याञ्चेद् यदि येनात्मना च ते । १०
धर्मी धर्मस्तदन्यश्च यदि भेदस्तदात्मना ॥
भेद एवाथ तत्रापि तेभ्योऽन्यः परिकल्प्यते ।
तेषामभेदसिद्ध्यर्थं प्रसङ्गः पूर्ववद्भवेत् ॥
न चैवं गम्यते तस्माद्वादोऽयं जोल्मकल्पितः ।" [हेतु० टी० पृ० १०७] इति ।

नन्विदं प्रागेव प्रतिपादितम् 'एकान्तेन विभिन्ने च' इत्यादिना । न चातिव्यवधान १५
यदनुस्मरणाय पुनरपि प्रतिपाद्येत यस्मादतिस्मरणशील इवायं प्रतिभातीति चेत्, किम् इवशब्दोपादानेन ? साक्षादेव क्षणिकप्रकृतस्य तच्छीलत्वोपपत्तेः । ततो निर्दोषत्वादनेकान्तस्य न तद्वादी आत्मा, तत्र अमूर्तं दोष घोषयतोऽर्थस्यैव (घंटस्यैव) आत्मत्वात् ।

विकल्पस्योभयरूपत्वं निर्विकल्प सविकल्पव्यावृत्तिभ्यामेव न वस्तुतः सत्कथ तद्वदन्यत्रापि वास्तवत्वमनेकान्तस्येति चेत्, तस्य स्वरूपमपि अस्वरूपव्यावृत्तिरेवेति अभाव एव विक- २०
ल्पस्य । तथा च अनुमानस्यापि तद्रूपस्याभावात् निष्प्रयोजनत्व सर्वहेतूनामिति किं तत्पूर्वपादनाय (तत्प्रतिपादनाय) हेतुबिन्दुः तद्विवरणं चार्च (चार्चट) स्य ? ततो वस्तुत एवोभयरूपत्वमनुमानविकल्पस्येति कथं तद्वदन्यत्रापि निर्दोषत्वमनेकान्तस्य न भवेत् ? एतदेव पूर्वसूक्तम्–

"तादात्म्यनियमो हेतुफलसन्तानवद्भवेत्" [न्यायवि० श्लो० ११९] इति ।

सः अनेकान्तः आत्मा यस्येति तस्य भावः तादात्म्यम्, तस्य नियमः निर्दोषत्वेन २५
अवश्यम्भावः । सैव च, हेतुफलम् अनुमानविकल्पः, स एव स्वीकारयोः सन्तन्यमानत्वात् सन्तानः, तस्येव तद्वदिति । तस्मादयाल्य एव अनेकान्तवादः इत्यर्थं (त्यर्थटं) प्रत्येवमुच्यताम्–

अर्थंतचटक, तदस्माद्गुपरम धुस्वर्फपश्चबलचलनात् ।
स्याद्वादाचलविदलनपुष्टुर्नं तवास्ति नयपक्षः ॥१०८७॥ इति ।

---

१ "आत्मोऽसमीक्ष्यकारी स्यात्"–आ० टि० । २ विकल्पस्वरूपत्व । ३ नियमः । ४ साक्षात्–आ०, ब०, प० । ५ –दयास्य आ०, ब०, प० ।

तदेवं मूलकारिकानिर्दिष्टयोः द्रव्य-पर्यायपदयोः व्याख्यानं कृत्वा सामान्यविशेषपदयोस्तद्दर्शयति—

समानभावः सामान्यं विशेषोऽन्यो[1] व्यपेक्षया ॥१२१॥ इति ।

समानः सदृशः स चासौ **भावश्च** आत्मलाभः स एव **सामान्यम्**, 'नैकं सकलव्यक्तिगतम्' इति **समान**शब्देन, 'नापि तद्व्यतोऽर्थान्तरम्' इति च **भाव**पदेन प्रदर्शयति ।

न हि सामान्यं तदाधारसमस्तव्यक्तिगतमेकं सम्भवति; व्यक्त्यन्तरालेऽपि तदुपलम्भप्रसङ्गात् । व्यक्तावेव तदुपलम्भो व्यक्तेस्तन्निमित्तत्वात् नान्यत्रेति चेत् ; न; उपलभ्येतरस्वभावतया तस्य भेदापत्तेः । ततो व्यापि सामान्यं तथैवोपलभ्यत इति कथन्नान्तरालेऽपि तदुपलब्धिः ? व्यक्तिष्वेव भावादिति चेत् ; तदन्तरालेष्वसतः कथमेकत्वम् ? अनुगतप्रत्ययात्; कः प्रत्ययस्यानुगमः ? एकत्वमिति चेत् ; न; प्रतिव्यक्ति 'खण्डो गौः मुण्डो गौः' इति तद्भेदस्यैवोपलम्भात् । प्रत्ययत्वं सामान्यमिति चेत् ; तस्याप्येकत्वं तद्व्यक्तिषु कुतः ? तदन्यस्मादनुगतप्रत्ययादिति चेत् ; न; तत्रापि 'कः प्रत्ययस्यानुगमः' इत्यादेरावृत्तेरनवस्थापत्तेश्च । तन्नैकं सत्त्वमन्यद्वा सामान्यम् ।

नापि भावादर्थान्तरम् ; भावस्यासत्त्वापत्तेः । सत्त्वेन सम्बन्धान्नेति चेत् ; न; सम्बन्धस्य द्विष्टत्वात्, असतश्च तदधिकरणत्वानुपपत्तेः काकदन्तवत् । प्रागेवाऽसत्त्वं तत्सम्बन्धात् न तत्समये इति चेत् ; न ; किं पुनस्तत्सम्बन्धः कादाचित्को यत एवम् ? तथा चेत् ; कुतस्तस्यापि[2] सत्त्वम् ? अन्यस्मात् तत्सम्बन्धादिति चेत् ; सोऽपि कथमसतः व्योमकुसुमवत् ? तस्यापि प्रागेव तत्सम्बन्धादसत्त्वं न तत्समय इति चेत् ; न; तत्रापि 'किं पुनः' इत्यादेर्दोषादपरिनिष्ठानाच्च । अकादाचित्कस्तु नित्य एवेति न तदपेक्षं भावस्य प्रागसत्त्वम् । भवतु स्वरूपसत्त्वापेक्षमेवेति चेत्; सति तस्मिन् किमन्यसत्त्वसम्बन्धेन ? कारणेन तत्[3]सम्बद्ध एवोत्पाद्यत इति चेत्; भवेदेवं यदि सत्त्वद्वयमुपलभ्येत । न चैवम् ; 'घटोऽस्ति, पटोऽस्ति' इत्यादावेकस्यैव आत्मभूतस्य तस्योपलम्भात् ।

घटोऽस्तीति प्रत्ययः विशेषणापेक्षः, विशिष्टप्रत्ययत्वात्, दण्डीति प्रत्ययवत्, यच्चापेक्ष्यं विशेषणं तद् अर्थान्तरं सत्त्वम्, तत्कथं तस्याऽप्रतिपत्तिरिति चेत् ? न; स्वरूपसत्त्वस्यैव कल्पनापृथक्कृतस्य विशेषणत्वोपपत्तेः । दण्डीत्यत्र वस्तु भिन्नमेव विशेषणं दृष्टमिति चेत् ; किं तत्तादृशम् ? दण्ड इति चेत् ; तर्हि 'देवदत्ते दण्डः' इत्येव प्रत्ययः स्यात् 'उत्पले नीलम्' इतिवत्, न 'दण्डी' इति । दण्डसम्बन्ध एव; तस्यैव मत्वर्थीयेनाभिधानादिति चेत् ; न; तस्यापि स्वरूपप्रत्यासत्तेरन्यस्याऽप्रतिपत्तेः, अकारणाच्च ततो दण्डीत्यत्र तत्प्रत्यासत्तेरिव सद्द्रव्यमित्यादौ

---

१ –पोऽन्यव्यपे–आ०, ब०, प० । २ सम्बन्धस्यापि । ३ तत्सम्बन्ध–आ०, ब०, प० । ४ –त्यापत्ते–आ०, ब०, प० ।

स्वरूपसत्त्वस्यैव अभिसन्धिपूर्वकस्य विशेषणत्वोपपत्तेः नातोऽर्थान्तरस्य सत्त्वस्य प्रतिपत्तिः ।

अर्थान्तरमेव द्रव्यादेः सत्त्वम्, तस्मिन् भिद्यमानेऽप्यभिद्यमानत्वात्, प्रदीपादेः पर्वतवत्। न चाभिद्यमानत्वमसिद्धम्, 'सद् द्रव्यम्, सन् गुणः, सत् कर्म' इति सर्वत्र द्रव्यादौ सद्भिन्नस्य सदित्ययस्याविशेषादिति चेत्, कस्तस्याऽविशेषः ? न तावदेकत्वम्, प्रतिद्रव्यादि तद्भेदस्यैव प्रतिपत्तेः । नापि सादृश्यम्, सदृशात्ततो विषयस्यापि सदृशस्यैव प्रसिद्धेः, तस्य च प्रतिद्रव्यादि भिद्यमानत्वात् ।

यत्पुनः सदभेदे साधनान्तरम्–"विशेषलिङ्गाभावाच्च" [वैशे०सू० १।२।१७] इति, तदपि न, द्रव्यार्थमेवज्ञानस्यैव तद्विज्ञत्वात् । अभिन्नं हि द्रव्यादिभ्यः सत्त्वं प्रतीयते 'सद् द्रव्यादिकम्' इति द्रव्यादिसामानाधिकरण्येन प्रतीतेः । समवायात्तथा प्रतीतिः नाऽभेदादिति चेत्, न, अभेदादेव 'एको भावः' इत्यादौ तैस्तथोपदेर्शनात् । न हि भावाद् अर्थान्तरात्मकमेकत्वं तत्समवायि सम्भवति, संख्याया गुणत्वेन द्रव्यसमवायित्वात् भावस्य च परसामान्यस्य अद्रव्यत्वात् । तस्मादभेद एव तेस्य तैर्भावादिति तन्निबन्धनैव तत्सामानाधिकरण्यप्रतीतिः, तद्वत् सद् द्रव्यादिकमित्यपि, अन्यथा हेतुफलभावस्याप्यैक्यस्थितिप्रसङ्गात् । ततो द्रव्यादिवत् तद्भेदेन प्रतीयमानं भिन्नमेव सत्त्वम् । यद्येवं कथं तदात्मना सर्वैकत्वप्रसिद्धान तैनस्येति चेत् ? सद्ग्रहणेन तन्मात्रस्यैवापोद्धारादिति ब्रूमः । तस्य एकमर्थान्तरभूतं द्रव्यादेः सत्त्वं सम्भवति । तद्वत् द्रव्यत्वादिकमपि, तस्यापि 'पृथिव्यादि द्रव्यम्, रूपादिर्गुणः, उत्क्षेपणादि कर्म' इति पृथिव्यादिसमानाधिकरणतया प्रतीतेः, तदनर्थान्तरभावस्य तद्भेदस्य च उपपत्तिबलायातत्वात् । ततः सूक्तम्– 'समानभावः सामान्यम्' इति ।

अन्यो विसमानभावः विशेषः, विसदृशपरिणामादेव भावेषु व्यावृत्तप्रत्ययस्योपपत्तेः । नित्यद्रव्येषु अन्त्यविशेषेभ्यो भिन्नेभ्य एव तदुपपत्तिरिति चेत्, कथमव्यावृत्तेषु तेभ्यस्तदुपपत्तिः ? तेषां तत्र समवायादिति चेत्" , स किम् अव्यावृत्तानि" व्यावर्तयति ? तथा चेत्, न ; व्यावृत्तेस्तदुपपत्तौ" विसदृशपरिणामसिद्धेः । अतदूपत्वे कथं तया तानि व्यावृत्तानि ? व्यावृत्त्यन्तरकरणादिति चेत्, न, अनवस्थापत्तेः । न व्यावर्तयति व्यावृत्तिप्रत्ययं तूपजनयतीति चेत्, न, अव्यावृत्तेषु "तत्प्रत्ययस्य भ्रान्तत्वप्रसङ्गात् अल्पेहिते ह्रोहितप्रत्ययवत् । न चायं भ्रान्त , योगिना भावात् । न हि तेषां भ्रान्तिः, निरुपप्लवज्ञानवतामेव "तत्रोपपत्तेः । ततः द्रव्यत्वगुणकर्मस्वेष्वपि परमाणुषु परस्परासम्भवी कश्चिदात्मादिभ्यतिरेकी परिणतिविशेषो वक्तव्य यतो योगजनामयं प्रत्यय इति सिद्धो विसदृश-

---

१ सादृश्यस्य । २ द्रव्याभेद–आ०, ब०, प० । ३ सामानाधिकरण्यप्रतीतौ । ४ भावसमवायि । ५ एकत्वस्य । ६ भावात् सामान्यात् । ७ –त्वाप्यव–ता० । ८ द्रव्यादेव तद्–आ०, ब०, प० । ९ "अन्तेषु मता अन्त्याः सदृशपरिणामादिशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैको वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतव ॥"–प्रश० भा० पृ० ११८ । १० विशेषेभ्य । ११ यैस् कि–आ०, ब०, प० । १२ –तौ व्या–आ०, ब०, प० । १३ नित्यद्रव्यरूपत्वे । १४ व्यावृत्तिप्रत्ययस्य । १५ योगिज्ञोपपत्तौ ।

परिणामः। ततो यदुक्तम्–"योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनःसु चान्यनिमित्तासम्भव एभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिः तेऽन्त्या विशेषाः।" [प्रश० भा० पृ० १६८] इति ; तदयुक्तम् ; अन्यनिमित्तसम्भवस्य निर्बाधात्, व्यावृत्तिप्रत्ययादेव अवगमात्। अन्त्यविशेषनिबन्धनत्वे तन्निर्बाधत्वानुपपत्तेः। ततो निष्प्रयोजनमेव तत्कल्पनं वैशेषिकस्य। ततः स्थितम्–**'समानभावः सामान्यं विशेषोऽन्यः'** इति।

सामान्यविशेषयोः अपेक्षाकृतत्वान्न वस्तुस्वभावत्वम्। न हि वस्तुस्वभावाः [1]पुरुषेच्छया भवन्ति, तदनियमेन तेषामप्यनियमप्रसङ्गादिति चेत् ; अत्राह–**'व्यपेक्षया'** इति। अपेक्षा पुरुषेच्छा, तद्भावो **व्यपेक्षा**, तया सामान्यं विशेषश्च, ततो वस्तुस्वभावौ च। न हि सामान्यविशेषस्वभावत्वे भावः पुरुषेच्छामपेक्षते, स्वहेतोरेव तथोत्पत्तेः। तर्हि कथं खण्डापेक्षया 'समानः' इति, कर्कापेक्षया च 'विलक्षणः' इति मुण्डे प्रत्यय इति चेत् ? एवमपि प्रत्ययस्यैव [2]तत्कृतत्वं न सामान्यविशेषयोः। प्रत्ययोऽपि नीलादिप्रत्ययवत् तन्मात्रादेव कस्मादभवन् अपेक्षामनुसरतीति चेत् ? सत्यम् ; नानुसरत्येव प्रत्यक्षप्रत्ययः प्रत्यभिज्ञानस्य तु सैव सामग्रीति तदेव[3] तामनुसरति। न हि प्रतियोगिप्रतीक्षामन्तरेण एकत्ववत् सादृश्यवैसदृश्ययोरपि प्रत्यभिज्ञानं सम्भवति। तदेवं द्रव्यपर्याययोरिव सामान्यविशेषयोरपि लक्षणोपपत्तेः उपपन्नं तदात्मकत्वमर्थानाम्।

अनुपपन्नमेव 'एकं च द्व्यात्मकञ्च' इति विरोधादिति चेत् ; कुतो विरोधः ? एवमेवेति चेत् ; न किञ्चित्तत्त्वं भवेत स्वेच्छाविरोधस्य सर्वत्र सम्भवात्। प्रमाणत इति चेत् ; क्व तेनासौ प्रतिपन्नः ? घटे घटयोश्च, तत्र एकत्वद्वित्वयोः द्वित्वैकत्वविरुद्धयोरेव प्रतिपत्तेरिति चेत् ; कीदृशो घटो यत्र तत्प्रतिपत्तिः ? सामान्यमात्रं विशेषमात्रं वेति चेत् ; न किञ्चित्तत्त्वं तथाप्रतीत्यभावात्। सामान्यविशेषात्मा चेत् ; न तर्हि विरुद्धमेकस्य द्वैरूप्यम् विरोधव्यापारितेनापि प्रमाणेन तदविरोधस्योपदर्शनात्। सामान्यविशेषाभ्यामिव पटकुटीभ्यामपि घटस्य द्व्यात्मकत्वं[4] किन्न भवतीति चेत् ? भवत्येव यदि प्रमाणमुपदर्शयति। न चैवम्, अतो न भवति। ततो यदुक्तं मण्डनेन–"नेदृशानां विप्रतिपिद्धार्थानां ज्ञानानां प्रामाण्यमेव युज्यते संशयज्ञानवत्" [ब्रह्मसि० पृ० ६३] इति ; तदसम्बद्धम् ; तदर्थविप्रतिषेधस्यैव कुतश्चिदप्रसिद्धेः। तदप्रामाण्यात्तत्सिद्धौ परस्पराश्रयः–'तत्प्रसिद्ध्या तदप्रामाण्यम्, ततश्च तत्प्रसिद्धिः' इति।

यच्चापरम्–"संशयविषयोऽपि द्व्यात्मा स्यात् [5]द्व्याभासत्वात्तस्य" [ब्रह्मसि०

---

१ "पौरुषेयीमपेक्षाञ्च न हि वस्त्वनुवर्तते"–ब्रह्मसि० २।६। २ अपेक्षाकृतत्वम्। ३ प्रत्यभिज्ञानम्। "एकस्य द्व्यात्मकता विरोधवती, एकञ्च द्व्यात्मकञ्चेति विप्रतिपिद्धम्।"–ब्रह्मसि० पृ० ६३। "परस्परस्वभावत्वे स्यात्सामान्यविशेषयो। साङ्कर्यं तत्त्वतो नेदं द्वैरूप्यमुपपद्यते॥"–तत्त्वसं० श्लो० १७३२। हेतु० टी०पृ० १०५। प्र० वार्तिकाल० १।२५। ब्र० सू० शा० भा० २।२।३३। ४ –त्वं न आ०, ब०, प०। ५ "द्व्योराभासः प्रकाशो यस्यासौ द्व्याभासः तस्य भावस्तत्त्वं तस्मात्"–ता० टि०।

पृ० ६३] इति , तदपि भवत्येव , यदि संशयः प्रमाणम् , प्रमाणोपदर्शितस्यैव वस्तुरूपत्वोपपत्ते । अन्यथा सर्वस्य सर्वार्थसिद्धेः नामेदवादी[1] 'समतिशयीत । यदि च विरोधात् न ह्यात्मकं वस्तु कथं ब्रह्मणः प्रतिपन्नेतरस्वभावत्वम् ? प्रतिपन्नमेव ब्रह्म सत्प्रमाणात् नाप्रतिपन्नमिति चेत् , न , भेदविवेकेनाऽप्रतिपत्तेः । तेनापि प्रतिपत्तौ न तत्र भेदविभ्रमः स्यात् , न हि शुद्धे पीतविवेकेन प्रतिपन्ने पीतविभ्रमः । विवेकस्याऽनिश्चयाद्विभ्रम इति चेत् , न , प्रतिपत्तेरेव निश्चयत्वात् , अन्यथा आनन्दादेरप्यनिश्चयेन विभ्रमविषयत्वे प्रमाणवेद्यमेव ब्रह्म न भवेत्–'विभ्रमाऽन्तश्च तद्वेद्यम्' इति विरोधात् । प्रतिपत्तेरपि आनन्दादावेव निश्चयो न तद्विवेक इति चेत् , न , प्रतिपत्तेरपि निश्चयेतरात्मत्वानुपपत्तेः विरोधात् । अन्यथा ब्रह्मण एव प्रतिपन्नेतरस्वभावत्वमविरुद्धं साधयति ततो नेदमत्र दूषणम्–

"एकत्वमविरोधेन भेदसामान्ययोर्यदि ।
न द्वयात्मता [2]भवेत्तस्मादेकनिर्मुक्तमागवत् ॥" [आप्तमी० २।१८] इति ।

अन्यथा ब्रह्मण्यप्येव भवेत्–

एकत्वमविरोधेन प्रतीतेतरयोर्यदि ।
न द्वयात्मता भवेत्तस्मादेकनिर्मुक्तभागवत् ॥१०८८॥ इति ।

तदेवं द्रव्यपर्यायसामान्यविशेषात्मकत्वं भावस्य प्रपञ्चोक्तमुपसंहृत्य दर्शयन्नाह–

स्वलक्षणमसङ्कीर्णं समानं सविकल्पकम् ।
समर्थं स्वगुणैरेकं सहक्रमविवर्तिभिः ॥१२२॥ इति ।

लक्ष्यते इत्यन्भावेन गृह्यते येन तल्लक्षणम्, स्वं स्वरूपं लक्षणं यस्य तत् स्वलक्षणम्, चेतनमन्यद्वा वस्तु , न हि तस्यान्येन लक्षणम् । अन्येनैव क्रियावत्त्वादिना[3] द्रव्यस्य लक्षणमिति चेत् , गुणादेरपि तेन कस्मान्न लक्षणम् ? द्रव्य एव तस्य भावादिति चेत् , अलक्षिते तस्मिन् 'तत्रैव' इति कुतः ? लक्षितमेव तत् [4]'अन्येनेति चेत् , न , क्रियावत्त्वादेः लक्षित लक्षणत्वेन वैयर्थ्योपपत्तेः । अन्यस्यापि तस्माद्व्यान्तरत्वं चेत् ; तेनापि [5]पुनस्तस्यैव लक्षणं न गुणादेरपि । द्रव्य एव तस्यापि भावादिति चेत् , न , 'अलक्षिते तस्मिन्' इत्यादेरयुक्त्या चक्रकाद्व्यवस्थितेश्च । अनर्थान्तरत्वच्चेत् ; न , क्रियावत्त्वादेरेव तत्त्वापत्तेः । तत्र अन्येन तल्लक्षितम् । क्रियावत्त्वादिनैवेति चेत् , न , परस्पराश्रयात्– 'लक्षिते तस्मिंस्तत्रैव क्रियावत्त्वादि', तेन तल्लक्षणम्' इति ।

---

१ –व्यतिमति–ता० ।–व्यतीनमति–आ०, ब०, प० ।–व्यती ऽमति–ता० टि० । २ भेदवादिनम् । ३ प्रतिपत्तिरपि आ०, ब०, प० । ४ "भवेदेकत्वनिर्मुक्तभागवत्"–आप्तमी० । ५ "क्रियावद्गुणवत्समवायिकारणं द्रव्यम् (वैशे० सू० १।१।१५) इति वचनात्"–ता० टि० । ६ "लक्षणान्तरेण"–ता० टि० । ७ –न तत्र –आ०, ब०, प० ।

अपि च, तेन[1] तल्लक्ष्यमाणं रूपं यदि द्रव्याद्भिन्नमेव कुतस्तल्लक्षितं स्यात्? तेनापि तस्य लक्षणादिति चेत्; न; तत्राप्येवं प्रसङ्गाद् अपरिनिष्ठापत्तेः। अभिन्नञ्चेत्; तदपि स्वतो गुणादेर्व्यावृत्तम्, अव्यावृत्तं वा?

व्यावृत्तं तन्न चेद् द्रव्यं स्वत एव गुणादिकात्।
क्रियावत्त्वादिनान्येन ततो व्यावर्त्तते कथम्? ॥१०८९॥
न हि स्वरूपमन्येन शक्यते कर्त्तुमन्यथा।
अन्यथाऽऽत्माद्यनित्यं स्यात् परिणामप्रकल्पनात् ॥१०९०॥
व्यावृत्तबुद्धिहेतुत्वात् सै[2] तद्व्यावर्त्तको यदि।
अव्यावृत्ते कथं तस्मिन् तद्बुद्धिर्न मृषा भवेत् ॥१०९१॥
मृषाबुद्धिकराद् द्रव्यं व्यावृत्तञ्चेद् गुणादिकात्।
चन्द्रश्चन्द्रान्तरादेव व्यावृत्तस्तद्वतो भवेत् ॥१०९२॥
व्यावृत्तमेव तत्तस्मात् स्वभावेनोपगम्यताम्।

तथा सति तदेव स्यात्, न च तयोरेकान्तस्य लक्षणम्। यमात्मानमाश्रित्य 'वाटमिदमस्माद् व्यावृत्तम्' इति प्रतिपत्तिः स एव असाधारणत्वात् तस्य लक्षणमुपपन्नं नापरं विपर्ययात्। ततः सूक्तम्–'स्वलक्षणम्' इति।

कथं पुनरभेदे लक्ष्यलक्षणभावः? तत्र हि लक्ष्यमेव लक्षणमेव वा स्यात्। न च तयोरेकाभावे अन्यतरस्य सम्भवः परस्परापेक्षित्वादिति चेत्; न; प्रवृत्ति व्यावृत्तिरूपतया तदुपपत्तेः। न हि वस्तुनः प्रवृत्तिरेव रूपम्; पररूपादिनापि तत्प्रसङ्गात्। नापि व्यावृत्तिरेव; स्वरूपादिनापि तदापत्तेः। अपि तु प्रवृत्ति–व्यावृत्ती द्वे अपि, तत्र प्रवृत्तिरूपेण लक्ष्यम्, लक्षणञ्च तदेव व्यावृत्तिरूपेण। वस्तु हि प्रवर्त्तमानम् अन्यासाधारणेन आत्मनैव शक्यं लक्षयितुं नान्यथा। तथा च सत्प्रत्ययहेतुत्वेन सत्त्वस्य द्रव्यादिप्रत्ययहेतुत्वेन च [6]द्रव्यत्वादेरसाधारणात्मनैव[7] परैरपि[8] लक्षणमभ्युपेतम् ततो नाभेदे लक्ष्यलक्षणभावानुपपत्तिः।

भवतु स्वलक्षणम्, तत्तु विजातीयादिव सजातीयादपि विलक्षणमेवेत्यत्राह–**समानं** सदृशं केनचित् **स्वलक्षणं** नैकान्तेन विलक्षणमेव तथा प्रतीतेः। कल्पनयैव तथेति चेत्; न; प्रत्यक्षतः प्रतीतेः। न हि तत्प्रतीतं कल्पनया; वैसदृश्येऽपि[9] प्रसङ्गात्। खण्डप्रत्यक्षं मुण्डे नास्ति तत्कथं तत्सादृश्यं प्रत्यक्षप्रतीतमिति[10] चेत्? वैसदृश्यमपि कथं [11]तत्प्रत्यक्षस्य कर्कादावप्यभावात्। कर्कादिविशिष्टतयैव तस्याऽप्रतिपत्तिः स्वरूपतस्तु प्रतिपत्तिरेयेति चेत्; न; सादृश्यस्या-

---

१ तेन लक्ष्य –आ०, ब०, प०। २ –वृत्तिबुद्धि –आ०, ब०, प०। ३ क्रियावत्त्वादिः। ४ लक्ष्यलक्षणभावोपपत्तेः। ५ "परसामान्यस्य"–ता० टि०। ६ "अपरसामान्यस्य"–ता० टि०। ७ –णात्मन्येव आ०, ब०, प०। ८ नैयायिकादिभिरपि। "लक्षणमसाधारणो धर्मः"–प्रश० व्यो० पृ० १८९। ९ वैसादृश्येऽपि आ०, ब०, प०। १० प्रतीयते इति ता०। ११ खण्डप्रत्यक्षस्य।

प्येवं प्रतिपत्तेः । भवतु वैसदृश्यमपि कल्पनयैवेति चेत्, नेदानीं स्वलक्षणं नाम किञ्चित्, सदृशेतराकारव्यतिरेकेण तस्याऽप्रतिभासनात् । तस्माद्वस्तुसदेव सादृश्यम् । अपि च,

पूर्वानुभूतसादृश्यं जलादेर्दृश्यते न चेत् ।
स्नानपानादिसामर्थ्यं कुतस्तस्यावगम्यताम् ? ॥१०९३॥
कल्पनासिद्धसादृश्याद् वस्तुसामर्थ्यवित् कथम् ? ५
अनुमानादनभ्यासे स्नानार्थी यत्नवर्तताम् ॥१०९४॥
तत्समर्थतया येन [1]वस्तु तोयादि वाञ्छता ।
समं तोयादिनान्येन तदुक्तव्यं मनीषिणा ॥१०९५॥

तदाह– 'समर्थम्' इति । अर्थक्रियायां शक्तं यतः ततः 'समानम्' इति ।

[2]यदि गोत्वं नाम सामान्यमन्यत् सादृश्यान्नास्ति कुतो बाहुलेयादौ गोबुद्धिः ? १०
शाबलेयसादृश्यादेवेति चेत्, ननु ततः 'शाबलेय इव' इति, मेदविभ्रमे 'शाबलेयोऽयम्' इति वा प्रत्ययः स्यात् न 'गौः' इति, शाबलेयस्य अगोत्वात् । गोत्वे [3]तस्यैव कथमन्येषु अत्यन्तसदृशेष्वपि तद्बुद्धिः गोरूपस्याभावात् । शाबलेयस्वभाव हि गोरूपम्, तत्कथं तदन्येषु ? व्यक्तिसङ्करापत्तेः । तन्न तत्सादृश्यादन्यत्र तद्बुद्धि । अन्यसादृश्यादिति चेत्, न, अन्यस्यापि प्रसिद्धस्य गोरभावात् । तस्मात् तद्बुद्धिरन्यत एव अन्वितैकरूपात् [4]सामान्यादिति १५
चेत्, न, शाबलेयसादृश्यादेव तदुपपत्तेः । भवतु ततः शाबलेयबुद्धिः, गोबुद्धिस्तु कथमिति चेत्, न, गवानमिश्रस्य शाबलेय एव गौरिति सङ्केतात् । [5]कर्कादावपि [6]तत्सङ्केताद्बुद्धिरिति चेत्, भवतोऽपि किम ? सामान्यस्य तद्विषयस्याभावादिति चेत्, परस्यापि सादृश्यस्याभावात् । सादृश्यात्तद्बुद्धिः गवयेऽपि कस्मान्नेति चेत्, सामान्यादपि कस्मान्न ? सत्त्वादेस्तत्रापि भावात् । तद्विशेषादेव समानं न सन्मात्रादिति चेत्, समानमन्यत्र, सादृश्यमात्रादपि २०
[7]तदनभ्युपगमात् । [8]'सादृश्याद(द्)गोत्वे शाबलेयस्वं कथमिति चेत् ? सामान्यादपि सत्त्वे कथम् ? अन्यतः सामान्यादिति चेत्, सादृश्यादप्यन्यत एवास्तु, सामान्यवत् सादृश्यस्यापि अनेकत्रा वस्तुषु भावात् । ततो न सूक्तमेतत् कुमारिलस्य–

"सारूप्यमथ सादृश्य कस्य केनेति कथ्यताम् ।
न तावच्छाबलेयेन बाहुलेयादय' समाः ॥ २५
विशेषरूपतो येऽपि तत्सस्थानादिभिः समाः ।
शाबलेय इवेति स्यात् तत्र बुद्धिर्न [9]गौरिति ॥

---

१ वस्तुतो यदि आ०, ब०, प० । २ "आह आह"–ता० टि० । ३ शाबलेयस्यैव । ४ "अन्वितमिलाक्षण्यविभिन्नं सामान्यं मीमांसकैरिष्यते तत्र दूषणं व्यक्त्यन्तरे उच्यम्–तादात्म्यं चेन्नार्थे व्यावर्तमानत्वात्तस्य । व्यावृत्त्यपि कोऽर्थस्तद्व्यक्तानन्वयो न किम्"–ता० टि० । ५ मेदाभावौ । ६ "शाबलेय एव गौरिति सङ्केतात्" –ता० टि० । ७ अन्वितवस्तुरूपमभ्युपगमात् । ८ अनेकत्राश्वैमन्वितगतसादृश्यात् । ९ "गौरिव"–मी० श्लो० ।

शाबलेयोऽयमिति वा भ्रान्त्या गौरिति नास्ति तु ।
शाबलेयस्वरूपञ्च न गौरित्यवतिष्ठते ॥
तदन्येषु हि गोबुद्धिर्न स्यात् सुसदृशेष्वपि ।
दृश्यते सा न[1] चान्यत्वे गोरूपं तत्र विद्यते ॥
न चान्यो गौः प्रसिद्धोऽस्ति यत्सादृश्येन गौर्भवेत् ।"
[मी० श्लो० आकृति० श्लो० ६७–७१] इति ।

प्रतिपादितन्यायेन शाबलेयस्यैव गोरूपतया व्यवस्थितौ तत्र गृहीतसङ्केतस्य बाहुलेयादावपि तत्सदृशे गोबुद्धेः तद्व्यवहारस्य च सम्भवात् । सादृश्यमेव तत्र नास्तीति चेत् ; कथम् 'अयमनेन सदृशः' इति प्रत्ययः ? तदवयवसादृश्यादिति चेत् ; न ; अवयवानां तद्वतो भेदे यौगमतानुप्रवेशात् । अभेदे कथं [2]तत्सादृश्यम् अवयविसादृश्यमेव न भवेत् ? यतो 'न तावत्' इत्यादि सुभाषितम् । यदि सादृश्यात् बाहुलेयादौ गोबुद्धिः कदाचित् कस्यचित् क्वचिच्च स्यात् मैत्रे चैत्रबुद्धिवत्, भ्रान्तिश्च[3] तद्वदेव । न चैवम्, सर्वदा सर्वेषाञ्च भावात्, निर्बाधत्वेनाभ्रान्तत्वाच्च । निर्बाधभ्रान्तिकल्पने सर्वज्ञानमिथ्यात्वापत्तेः । न चैकोऽपि कश्चिद्गौः तद्विशेषस्य क्वचिदपरिज्ञानात् । यमूव पूर्वमिति चेत् ; न; तस्य अस्मदादिभिरप्रतिपत्तेः । तन्न तत्सादृश्यात् क्वचिद् गोबुद्धिः । भवन्ती वा बाहुलेयवत् महिष्यादावपि भवेत् तत्सादृश्यस्य तत्रापि भावात् । न हि तस्य[4] क्वचित्परिसमाप्तिः अनवधित्वात्, ततो न तद्वशाद्भ्यते गोबुद्धिरिति चेत् ; तन्न; यस्माद् भवत्येव बाहुलेयादौ गोबुद्धिः विभ्रमो यदि तद्विषयस्तत्र न स्यात् मैत्रे चैत्रबुद्धिवत् । अस्ति च तत्र तद्विषयः सादृश्यविशेषः तत्रैव तद्बुद्धेः सङ्केतात् । अत एव सर्वदा सर्वेषामपि तदुपपत्तिः । एकगोत्वनिबन्धनत्वे तु भवत्येव विभ्रमः प्रत्यक्षेणैव तद्गोत्वविविक्तवस्तुविषयेण[5] बाधनात् । न च तद्विभ्रमे सर्वज्ञानमिथ्यात्वम् ; बाधावत एव तदुपपत्तेः । न[11] चैको गौः कश्चिन्नास्ति प्रथमसचेतविषयस्यैव तत्त्वात् । न च तत्र विशेषाग्रहणम् ; सादृश्यविशेषस्योपलम्भात् । न च तन्निबन्धना बुद्धिः महिष्यादावपि; तत्र [12]तदभावात् । [13]अन्यतस्तु सादृश्यान्न भवत्येव, सामान्यान्तरादपि प्रसङ्गात्, तस्यापि निरवधित्वात् ; ततः सुलभैव सादृश्यविशेषाद् गोबुद्धिः । इति दुर्भाषितमेवेदमपि [14]तस्य–

"न चापि स इति ज्ञानं सदृशेष्वस्ति सर्वदा ।
सर्वपुंसामतो भ्रान्तिर्नैषा बाधकवर्जनात् ॥
सर्वज्ञानानि मिथ्या च प्रसज्यन्तेऽत्र कल्पने ।
विशेषग्रहणाभावादेको गौः कश्च कल्प्यताम् ॥

---

१ "न चान्यत्र"–मी० श्लो० । २ अयवसादृश्यम् । ३ भ्रान्तिश्चेत्तद्वदेव ता० । ४ कश्चिदेव गौः आ०, ब०, प० । ५ सादृश्यस्य । ६ –मात्रेरनवधि–आ०, ब० प० । ७ सादृश्यवशात् । ८ बाहुलेयादौ । ९ –पपत्तेः आ०, ब०, प० । १० –पत्ये बाध–आ०,ब०,प०। ११ न चैको गौ. आ०, ब०, प० । १२ तद्भावा –आ०, ब०, प० । १३ अन्यवस्तु आ०, ब०, प० । १४ कुमारिलस्य ।

अभूच्च यद्यसौ पूर्वं नास्मदादेस्तदग्रहात् ।
सादृश्यस्यावधिर्नास्ति ततो गोघीन लभ्यते ॥"
[मी० श्लो० आकृति० श्लो० ७१-७४] इति ।

तत्र सामान्यात्मना स्वलक्षणस्य सङ्कीर्णोऽपि ।

नापि शक्त्यात्मना, तस्यापि प्रतिव्यक्ति भिन्नस्यैव भावात् । अभिन्न एवासौ मृत्पिण्डादीनाम् । न हि मृत्पिण्डशक्तरेव दण्डादिष्वभावे तेषां[1] तत्कार्ये व्यापारः तदन्यकारणवदिति चेत्, न, सर्वशक्तिसाङ्कर्येऽपि तदुपपत्तेः[2] । यथा[3] मृत्पिण्डस्तत्र शक्तः तथा दण्डादिरपीति शक्तिसाङ्कर्ये तूपादान एव सहकारिण्येव वैकस्मिन् सर्वशक्तीनां भावात् तदन्यतमस्यैव तत्कार्यं स्यान्न सर्वेषाम्, वैयर्थ्यात् । एवमपि सामग्र्या एव जनकत्वं नैकस्येति चेत्, न, सर्वशक्ति साङ्कर्ये तद्विरोधात् । न तद्विरोधः प्रत्येकदशायां तत्साङ्कर्यस्य तिरोधानादिति चेत्, इतरदशायां कुतस्तदभिव्यक्ति ? सामग्रीशक्तेरिति चेत्, न, शक्तिसाङ्कर्यवादिनः सच्छक्तेरपि प्रत्येकं भावात्, तदापि[4] तदभिव्यक्तेः । तथापि[5] तस्याजनकत्वे समुदायस्यापि न स्यात् तत्रापि अभिव्यक्तशक्तिसाङ्कर्यादन्यस्य तज्जननिमित्तस्यामावात् । सामग्रीशक्त्या चाऽनभिव्यक्त्या न तदभिव्यक्तिः[6] कार्यवत् । न च स्वतस्तदभिव्यक्तिः प्रत्येकशक्तिवत् । सामग्यन्तरशक्त्या तदभिव्यञ्जनवस्थानम् । सामग्री च यावदेकशक्तिमभिव्यनक्ति तावत् कार्यमेव कुर्यात् किं पारम्पर्येण[7]? तत्र शक्तिसाङ्कर्यादेककार्यत्वम् उपादानादीनाम्, अपि तु तत्सामान्यादेव । अत एव बहुष्वेव कार्यं नैकस्मिन् । तत्साङ्कर्ये त्वितरनिरपेक्षमेकस्मिन्नेव स्यात् उपादानेतरशक्तीनां तत्रैव भावात् । तत्र शक्तिरूपेणापि सङ्कीर्णं वस्तु । तदाह– 'असङ्कीर्णम्' इति ।

नन्वसङ्कीर्णे नाम स्वलक्षणानामितरेतराभावात्मा भेद एव । तस्माच्च तेषामनर्थान्तरत्वे तद्भेदाभावरूपत्वात् किन्नाम स्वलक्षणम् ? एकरूपत्वाच्च केन वा किमसङ्कीर्णं भवेत् ?

अपि च, भेदस्य वस्तुरूपत्वे न क्वचिदेकत्व भेदेन[8] तस्य विरोधात् । 'ततः परमाणुरपि भिन्ना (न्न) एव । न चैकाभावे तत्समुच्चयरूपमनेकमपि । न च तृतीयः[9] कश्चित्प्रकार इति निःस्वभावत्वमेव स्वलक्षणस्य स्यात् । तदुक्तम्–

"न भेदो वस्तुनो रूप तदभावप्रसङ्गतः ।" [प्रज्ञप्ति० २।५] इति ।

अथ मा भूदयं दोष इति तस्य तेभ्योऽर्थान्तरत्वमिष्यते[10] स तर्हि नीरूप एव स्यात् वस्तुव्यतिरेकिणः प्रकारान्तरासम्भवादिति न तल्लेन तेषामसाङ्कर्यम्, नीरूपस्य क्वचिदनुपयोगादिति साङ्कर्यमेव प्राप्तम् । इदमप्युक्तम्–

---

१ दण्डादीनाम् । २ तत्कार्ये व्यापारोपपत्तेः । ३ तेन रूपेण । ४ प्रत्येकदशायामपि । तथापि आ०, ब०, प० । ५ प्रत्येकस्य । ६ स्वलक्षणस्य । ७ तत्कार्यम् । ८ "परमाणुरपि भेदादनेकात्मक मिति सिद्ध. तथा च तत्समुच्चयरूपोऽनेकोऽवयवात्मा नावकल्प्यते"–प्रज्ञप्ति० पृ० ४८ । ९ –च प्र–आ०, ब०, प०। १० इतरेतराभावात्मा ।

"अरूपेण च भिन्नत्वं वस्तुनो नावकल्पते।" [ब्रह्मसि० १।५] इति चेत्; उच्यते—

यत्तावदुक्तम्—'भेदात् स्वलक्षणानामनर्थान्तरत्वे तद्वदेकत्वम्' इति; तन्न; भेदस्यैकस्याभावात्, प्रतिस्वलक्षणं परिसमाप्तिमत एव तस्योपगमात्। नापि तद्वदभावरूपत्वम्; एकान्ततस्तेषां [1]तदनर्थान्तरत्वस्याभावात्। कथञ्चिद्भावरूपत्वं[2] तु न दोषाय, इष्टत्वात्।

यदन्यदप्युक्तम्— 'मा भूदयम्' इत्यादि; तदपि न सुन्दरम्; अर्थान्तरत्वस्यापि एकान्तेने[3]ऽविभावनात्। अनेकान्तव्यतिरेकात्तु न नीरूपत्वमेव विपर्ययस्यापि भावादिति [4]कथं सति तस्मिन्[5] साङ्कर्यं तेषाम्, [6]तस्य तद्रूपत्वात्[7]। उक्तञ्च— "नात्यन्तमन्यत्वमनन्यता च विधेर्निषेधस्य च" [बृहत्स्व० श्लो० ४२] इति।

यदप्यभिहितम्— 'भेदस्य वस्तुरूपत्वे' इत्यादि; तदपि न मनोज्ञं प्राज्ञानाम्; तथा हि— [8]यद्येकत्ववत् स्वरूपत एव भेदः स्यात् तदा तेनैकत्वं परिपीड्यत विरोधात्। न चैवम्, तस्य परोपाधित्वात्। परतो हि स्वलक्षणानि भिद्यन्ते न स्वतः। न चोपाधिभेदे विरोधः यतस्ततस्तस्य[9] परिपीडनात् एकसमुच्चयात्मनोऽनेकस्याप्यनुपपत्तेः, प्रकारान्तरापरिज्ञानाच्च निःस्वभावत्वं तेषामनुपपद्येत।

कथञ्चैवं वादिनां ब्रह्मणोऽपि निःस्वभावत्वं न भवेत्? शक्यं हि वक्तुम्— प्रपञ्च-विवेकस्य [10]तत्स्वभावत्वे न तस्यैकत्वं विवेकेन तद्विरोधिना परिपीडनात्, तदभावे च नानेकत्वं तस्य तत्समुच्चयरूपत्वात्, न च प्रकारान्तरम्, ततो निःस्वभावमेव तदिति। नास्त्येव तस्य तस्माद्विवेकः, "सर्वगन्धः सर्वरसः" [छान्दो० ३ १४।४] इत्यादिना तस्य सर्वात्मत्वश्रवणादिति चेत्; न; निर्मुक्तत्वभावप्रसङ्गात्। प्रपञ्च एव हि अज्ञानायापिपासादिरूपः संसारः, तस्माच्च "तस्याविवेके कथमुपायेनापि निर्मुक्तिः? न हि तेन तस्य[11]" स्वभावाद्वियोगः पावकस्येव औष्ण्यात्। स्वभावतश्चाविवेके[12] तस्य संसारः। भवन्नपि वियोगः कुतश्चिदेव स्यात् न सर्वस्मात्, तत्प्रबन्धस्य अनन्तत्वेन अनुच्छेद्यत्वात्। ततो नित्यनिर्मुक्तं [13]तदिच्छता तद्विविक्तमेव एष्टव्यम्। अथ नास्त्येव प्रपञ्चः "नेह नानास्ति किञ्चन" [बृहदा० कठो० ४।११] इत्यादि श्रुतेः तत्कथं तस्य तस्माद्विवेकः? अमतः प्रतियोगित्वानुपपत्तेरिति चेत्; किमपेक्षं तर्ह्यदम्—"अस्थूलमनवह्रस्वम् (मनण्वह्रस्वम्)" [बृहदा० ३।८।८] इति, "स एष नेति नेत्यात्मा" [बृहदा० ३।९।२६] इति च? अविद्याकल्पितप्रपञ्चापेक्षमिति चेत्; तत्प्रपञ्चात्तर्हि तद्विवेको वक्तव्यः, अन्यथोक्तदोषात्। न तस्य तस्माद्विवेको नाप्यविवेकः तदुभयं प्रति [14]तस्यावस्तुत्वेन अपादानत्वायोगादिति चेत्; न, नेति नेति निषेधानुपपत्तेः, विवेकस्यैव निषेधार्थत्वात्। अपि च,

---

१ अभावाभिन्नत्वस्याभावात्। २ –त्वं न आ०, ब०, प०। ३ –न्तेनाभावात् आ०, ब०, प०। ४ कथं तत्र सति त –आ०, ब०, प०। ५ स्वरूपावस्थाने। ६ साङ्कर्यस्य। ७ नीरूपत्वरूपत्वात्। ८ यदेकत्व– आ०, ब०, प०। ९ एकत्वस्य। १० ब्रह्मस्वभावत्वे। ११ ब्रह्मणः। १२ प्रपञ्चादभेदे। १३ ब्रह्म। तत्त्वेच्छ आ०, ब०, प०। १४ प्रपञ्चस्य।

स्वभावस्तादृशस्तस्य यदि संसार उच्यते ।
न भवस्येव निर्मुक्तिस्तस्वभावापरिक्षयात् ॥१०९६॥
निर्मुक्तिर्यदि तस्यैव संसारः कथ्यतां परः ।
संसारेण विना यस्मान्निर्मुक्तिर्नोपकल्प्यते ॥१०९७॥
जीवानामेव संसारनिर्मुक्तिर्नैव तस्य चेत् । ५
जीवेभ्यस्तदभिन्नश्चेत् न तस्येत्युच्यतां कथम्? ॥१०९८॥
मुक्तात्मप्रतिबिम्बानामनन्यत्वेऽपि संहृतेः ।
नाऽशुद्ध्यादिर्यथा तस्य तथेहापीति चेन्मृषा ॥१०९९॥
तेषां तस्मादभेदेऽपि तेभ्यस्तद्भेदवर्णनात् ।
स्वयमेव तथा ब्रह्म जीवेभ्यो यदि भिद्यताम् ॥११००॥ १०
अविचित्रं कथन्नाम कथ्यतां तत्प्रपञ्चतः ।
यन्न तत्र प्रवर्तेत निःस्वभावत्वकल्पनम् ॥११०१॥

तस्मात्तत्राप्ययमेव परिहारः—स्वोपाधेरेकत्वस्य न परोपाधिना भेदेन बाधनमिति, तथा स्वलक्षणेऽपि । कुतः पुनः परोपाधित्व भेदस्य ? तदपेक्षणात् । सदपि किमर्थम् ? स्वरूपलाभार्थमिति चेत्, न, तस्य वस्तुस्वभावत्वेन तद्धेतोरेव भावात् । न हि वस्तुन स्वहेतोरुत्पत्तिः १५ भेदविकल्पस्यैव । परतोऽपि, परस्परापेक्षयता तदभावप्रसङ्गात्— 'सति वस्तुभेदे परम्, परतश्च तद्भेदः' इति । पश्चाच्च हेत्वन्तरादुत्पद्यमानः कथं वा वस्तुनः स्वभावः स्यात् कार्यान्तरवत् ? वस्तुहेतोरुत्पत्तौ च किं तस्य परापेक्षया प्रयोजनं स्वरूपस्य वस्तुकारणादेव भावात् ? नार्थक्रिया परासन्निधानेऽपि तदर्थक्रियादर्शनात् । प्रतीतिरुचेत्, न तर्हि भेदः परापेक्ष, तद्विषयायाः प्रतीतेरेव तदपेक्षत्वात् । न हि तस्याः तदपेक्षत्वं तद्विषय २० स्यापि; रूपादिप्रतीतेः चक्षुरादापेक्षत्वेन रूपादावपि तत्प्रसङ्गात् । न च प्रतीतेरपि तदपेक्षत्वम्, परस्परापेक्षयात्—'प्रसिद्ध हि परमपेक्ष्य वस्तुभेदप्रतिपत्तिः, तत्प्रतिपत्त्या च परप्रसिद्धिः' इति । न च वस्तुमात्रादनवगृहीतभेदाद् भेदसिद्धि , एकस्मिन्नपि तत्प्रसङ्गात् । तत्र अपेक्षा नाम कश्चिद् वस्तुधर्मः ।

पुरुषधर्म एवासौ, पुरुषेणैव कस्यचित् कुतश्चित् भेदस्यापेक्षणादिति चेत्, न, वस्तुनि २५ तदपेक्षानुवर्तनस्यासम्भवात् । न हि पुरुषस्य भेदापेक्षया वस्तु भिन्नं भवति, अन्यथा सहकारः कोविदारोऽपि स्यात् तथापि तदपेक्षासम्भवात् । तदुक्तम्—

"पौरुषेयीमपेक्षाञ्च नैः हि वस्त्वनुवर्तते" [श्लोकवा० २।६] इति ।

---

१ ब्रह्मण । २ प्रतिबिम्बवतः । ३ प्रतिबिम्बानाम् । ४ मुख्यभेद । ५ परापेक्षणात् । ६ —त्वे त—आ०, ब०, प० । ७ 'न हि' इत्यन्वयः । ८ भेदः । ९ भेदस्य । १० प्रयोजनम् । ११ प्रतीतेः परापेक्षत्वम् । १२ तेन सहकारस्य कोविदारस्यापीत्यपि । १३ न हि स्वभ—आ०, ब०, प० ।

सर्वनिषेधे क आगमः, किं वा प्रत्यक्षं यो येन विरुद्ध्यत इति चेत् ; न ; सर्वाभेदेऽपि तुल्यत्वात् । सत्यम् ; न वस्तुतः तत्रापि तदुभयम् , अविद्यानिबन्धनं तु विद्यत इति चेत् ; न ; अन्यत्रापि संवृतिनिबन्धनस्य भावात् । सैव कथं तत्रेति चेत् ? अविद्या कथमितरत्र ? अथाविद्या विद्याऽद्वैतप्रतिबन्धिनी न भवति तदा सर्वाकारैर्वक्तुमशक्यत्वादिति चेत् ; न ; संवृतेरपि [1]तथात्वेन नैरात्म्यवादप्रतिबन्धित्वानुपपत्तेः ।

अथ विधिसमय एव तस्य स[2] व्यापारः कथं विध्यनुवादेन भवेत् ? [3]अपूर्वप्रसिद्धतया विधेरनुवादायोगात् । नापि तत्पश्चाद्भावी सं तस्य व्यापारः तदा प्रत्यक्षस्यैवाऽभावात् इति न प्रत्यक्षात् [5]विधेयासत्त्वव्यवच्छेदः । मा भूदिति चेत् ; विधिरपि न भवेत् , तस्य तद्रूपत्वात् "विधेर्विधेयासत्त्वव्यवच्छेदरूपत्वात्" [ब्रह्मसि० पृ० ४७] इति मण्डनवचनात् । मा भूद् विध्यनुवादेन तदसत्त्वव्यवच्छेदः प्रत्यक्षात्[6] तद्रूपतयैव तदुपगमात् , तदनुवादेन तु तद्व्यवच्छेदः प्रत्यभिज्ञानादेव प्रत्यक्षविहिते घटे तदनुवादेन तत्र स्मरणोपनीतस्य तदभावस्य 'नायमिह' इति प्रत्यभिज्ञया प्रतिपत्तेरिति चेत् ; 'भूतले न घटः' इत्यपि प्रतिपत्तिस्तत्रैवेत्यलमभिनिवेशेन । यदि विधिप्रत्यक्षत एव अन्यव्यवच्छेदः ; स तर्हि भूतले घटादेरिव प्रतिक्षणपरिणामादेरपि स्यात् [8]तद्विविक्ततयापि तस्य प्रतिपत्तेरिति चेत् ; अस्ति प्रतिपत्तिः न तु प्रमाणम् , अर्थक्रियाकारित्वादिलिङ्गोपनीतेन तत्परिणामानुमानेन बाध्यमानत्वात् , न तर्हि घटादिव्यवच्छेदेऽपि प्रमाणम् , आम्नायेनैव अभेदविषयेण बाधनादिति चेत् ; न; तस्य प्रतिविधास्यमानत्वात् । ततो भेदस्य प्रत्यक्षत एव प्रतिपत्तेरुपपन्नमुक्तम्–**'स्वलक्षणमसङ्कीर्णम्'** इति । **असङ्कीर्ण**पदेन स्वलक्षणस्य विशेषात्मकत्वं **सामान्य**पदेन च सामान्यात्मकत्वमुक्तम् । अतः सामान्यविशेषात्मकत्वात् सर्वं वस्तु सविकल्पकमेव नाऽसहायस्वभावम् । अत एवाह–**'सविकल्पकम्'** इति ।

सत्यम्; अस्ति भेदस्य प्रत्यक्षादिना प्रतिपत्तिः, न तु वस्तुसत्त्वम् , आम्नायेनैव अभेदविषयेण बाधनात् । न चैवम् आम्नायस्यापि भेदविशेषस्य [10]तस्मादसिद्धिः–बाध्यमानत्वेन अप्रमाणत्वादिति मन्तव्यम्; तत्त्वावेदनलक्षणस्यैव प्रामाण्यस्य [11]तत्र तेन[12] बाधनान्न व्यवहाराविसंवादलक्षणस्य[13], अवस्तुविषयत्वेऽपि अविद्यासंस्कारस्थैर्येण सम्भवात्[14]; तस्य च न तेन बाधनम् अविरोधात् । कथमेवं प्रत्यक्षादेः [15]तदपेक्षेणैव तेन बाधनमिति चेत् ? न; स्वरूपप्रतीतिं प्रत्येव [16]तस्य तदपेक्षत्वात् न स्वार्थप्रतीतिं प्रति लब्धस्वरूपस्य स्वत एव तदुपपत्तेः, अन्यथा प्रामाण्यमेव न स्यात् स्वकार्यं प्रति निरपेक्षतयैव [17]तदुपपत्तेः । स्वरूपप्रतीतिहेतुत्वस्य तु न तेन बाधनं तत्त्वा-

---

१ वक्तुमशक्यत्वेन । २ असत्त्वनिषेधः । ३ पूर्वमप्रसिद्धतया । ४ असत्त्वनिषेधः । ५ विधेयासत्त्वस्य व्य–आ०, ब०, प० । ६ प्रत्यक्षत्वात् आ०, ब०, प० । ७ प्रत्यभिज्ञातः । ८ प्रतिक्षणपरिणामविविक्ततया । ९ प्रत्यक्ष एव ता० । १० प्रत्यक्षात् । ११ प्रत्यक्षे । १२ आम्नायेन । १३ स्य वस्तु–आ०, ब०, प० । १४ "प्रत्यक्षादीनां तु व्यावहारिकं प्रामाण्यम् , अविद्यासंस्कारस्य स्थैम्ना व्यवहारविपर्ययाभावात् ।"–ब्रह्मसि० पृ० ४० । १५ प्रत्यक्षापेक्षेणैव । १६ आम्नायस्य प्रत्यक्षापेक्षत्वात् । १७ प्रामाण्योपपत्तेः ।

वेदनभागस्यैव बाधनात् तत्रैव विरोधात् । [1]तदविशेषादाम्नायस्यैव किन्न प्रत्यक्षादिना बाधनमिति चेत् ? न, प्रत्यक्षादेः [2]तदपेक्षतया परत्वेन आम्नायस्यैव बलीयस्त्वात् । बलीयसा हि दुर्बलस्य बाधनं लोकवत् न तेन तस्य । [3]दृश्यते च पूर्वापवादेन परस्य बलीयस्त्वम्, यथैकत्व ज्ञानात् द्वित्वज्ञानस्य सतोऽपि त्रित्वज्ञानस्य क्वस्य तदुपमर्देनोपपत्तेः । ततो न भेदस्य वस्तुसत्त्वम् [4]तत्प्रत्यक्षादौ तत्त्वावेदनस्य "इदं सर्वं यदयमात्मा" [बृहदा० २।४।६] इति, "आत्मैवेदं सर्वम्" [छान्दो० ७।२५।२] इति, "सर्वं वै खल्विदं ब्रह्म" [छान्दो० ३।१४।१] इति आम्नायेन सर्वाभेदमवधोवयता बाधनात् । तन्न वस्तुतः स्वलक्षणस्यासङ्कीर्णस्वं प्रतिभासमात्रादेव व्यवहारप्रसिद्धप्रामाण्यात् तदुपपत्तेरिति चेत् , किमिदम् आम्नायस्य अभेदविषयत्वम् ? तत्परिज्ञानत्वमिति[5] चेत् , न , अचेतनत्वात् । तत्परिज्ञानं प्रति हेतुत्वमिति चेत्, तत्परिज्ञानमपि यदि विषयाव्यतिरिक्त तर्हि तस्य स्वतस्तथा[6] प्रतिपत्तौ भेद एव तदर्थः स्यान्नाभेद इति कथं तेन प्रत्यक्षादेः भेदविषयस्य बाधनम् ? एकवाक्यतया तदुपोद्बलनस्यैवोपपत्तेः । अप्रतिपत्तौ च व्यतिरेकस्य तदव्यतिरेकात् तत्परिज्ञानस्यापि न प्रतिपत्तिरिति कथं ततः सर्वाभेदस्याधिगतिः ? प्रतिपत्र तरगतादपि ततस्तत्प्रसङ्गात् । व्यतिरेकेणैव तस्याप्रतिपत्तिर्न रूपान्तरेणेति चेत्, न, प्रतिपन्नेतरयोरेकत्र विरोधात् । अविरोधे वा भेदाभेदयोरपि तत्र तदुपपत्तेः कुतो न तत्त्वावेदनमेव प्रामाण्यम् आम्नायवत् प्रत्यक्षादेरपि भवेत् ? अव्यतिरिक्तमेव [7]ततस्तदिति चेत्, न, नित्यत्वेन अकार्यत्वापरोः । नित्यो हि तद्विषयः सर्वाभेदलक्षणः परमात्मा "[8]स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म" [बृहदा० ४।४।२५] इति श्रवणात् । कथं तदव्यतिरेके तत्परिज्ञानस्यानित्यत्वं यत आम्नायादुत्पत्तिः । तन्न तस्माद्व्यतिरिक्तम् । नाप्यव्यतिरिक्तम् , मायामयत्वेनावस्तुत्वात् , वस्तुनैव (न्येव) व्यतिरेकेतरविकल्पोपपत्तिरिति चेत् , न तर्हि तस्य कार्यतापि, अवस्तुनि तस्या अप्यप्रसिद्धेः । तन्न आम्नायस्य स्वतः तत्परिज्ञानहेतुत्वेन वा तद्विषयत्वम् , यतस्तेन प्रत्यक्षादेर्भेदविषयस्य प्रतिपीडनमुपपद्येत । [9]सत्यप्याम्नायाद् ब्रह्मणः परिज्ञाने—

ब्रह्म तच्चेत् समर्थं न स्वपुष्पाद् मिथ्यते कथम् ? ।
प्रतिभासबलाच्चेन्न तस्यासत्यपि दर्शनात् ॥११०३॥
विना कार्येण सामर्थ्यमपि तस्य न युज्यते ।
कार्यार्थमेव यत्प्रोक्तं तत्प्रसिद्धिपदं गतम् ॥११०४॥
कार्यमस्ति प्रपञ्चश्च नियतस्तस्माच्च [10]दृश्यते ।
भिन्नमेव कथन्न स्यादसङ्कीर्णं स्वलक्षणम् ? ॥११०५॥

---

१ विरोधविरोधात् । २ प्रत्यक्षादेरतया । ३ "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्"—मी०सू० ६।५।५७ । ४ भेदप्रत्यक्षादौ । ५ —मिति—ब० । ६ विषयव्यतिरिक्तत्वेन । ७ विषयात् परिज्ञानम् । ८ स एष—आ०,ब०,प० । ९ ततस्तात्मा—आ०, ब०, प० । १० प्रपञ्चात्मकं कार्यम् ।

प्रपञ्चोऽन्योन्यभिन्नोऽपि न भिन्नः परमात्मनः ।
तस्य तत्परिणामत्वात् सुवर्णात्तद्विकारवत् ॥११०६॥
इति चेत्किन्न [1]तद्व्यापी तथैवासौ[2] प्रकाशते ।
सत्यज्ञानस्वभावोऽयं यदाम्नायेषु पठ्यते ॥११०७॥
तथा तस्य प्रकाशे च कथमुक्तमिदं [3]श्रुतौ ।
"एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते ॥"११०८॥ इति ।

कुतो वा देवदत्तादेर्न [4]तथा सम्प्रतिपत्तिः जीवस्य तस्य तद्विकारत्वात् । न हि प्रकृतिधर्मः स्वप्रकाशः विकारे [5]तस्यातद्रूपतया ततो भेदादिति चेत् ; न ; "तत्त्वमसि" [छान्दो० ६।८।७] इत्यादि श्रुतिभ्यः परमात्मरूपताया एव जीवे प्रतिपत्तेः । अन्यथा कथं तस्य[6] ज्ञानादमृतत्वस्याप्यवक्लृप्तिः विकारस्य प्रकृतावेव प्रलयात् । न च प्रलयरूपमेव अमृतत्वम् ; अशुद्धिपरिक्षयविशिष्टस्य स्वरूपस्यैव [7]तत्त्वेन ब्रह्मविदां प्रसिद्धत्वात् । तन्न विकारात्मत्वे जीवस्य तदवक्लृप्तिः । तथा च भागवतं भाष्यम्–"विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विकारस्य प्रकृतिसम्बन्धे प्रलयप्रसङ्गान्न ज्ञानादमृतत्वमवकल्पेत" [ब्र० शा० भा० १।४।२२] इति ।

भवतु तर्हि देहेन्द्रियमनोबुद्धिसङ्घातोपाधिसम्पर्ककलुषीकृतत्वात्तस्य[8] ततो भेद इति चेत् ; कस्य तत् कालुष्यम् ? जीवस्येति चेत् ; ननु जीवः परमात्मैव, "अनेन जीवेनात्मना" [छान्दो० ६।३।२] इति श्रवणात्, ततः 'तस्यैव तत्कालुष्यं ततश्च भेदः' इति रिक्ता वाचो युक्तिः । ततः सत्यपि देहेन्द्रियाद्युपाधिभेदे परमात्माऽभिन्न एव जीव इति कथमसावात्मानं प्रतिपद्यमानः सर्वव्यापिनमेव न प्रतिपद्यते ? [9]घटाकाशस्यापि कथन्न तथा प्रतिपत्तिः तस्यापि पराकाशादभिन्नत्वादिति चेत् ? भवत्येव यदि तस्यापि स्वतः प्रतिपत्तिः, न चैवम्, अचेतनत्वेन परत एव तस्य प्रतिपत्तेः । तच्च संसारिज्ञानम् । न च तस्य सकलात्मनि वस्तुनि प्रवृत्तिः शक्तिवैकल्यादिति उपपन्ना गुहोदरगतेन तदवच्छिन्नतयैवाकाशस्य प्रतिपत्तिः । योगिज्ञानापेक्षया तु नायं प्रश्नः, तेन पराकाशाऽभिन्नस्यैव तस्य परिच्छेदात् । ततो यदि सकलभेदव्याप्येको ज्ञानात्मा तदा तथैव तस्य प्रकाशात् तस्येव तदभेदेन जीवानामपि तत्राविप्रतिपत्त्या भवितव्यम् । न चैवम्, तन्न तदभेदेन तत्परिणामत्वं प्रपञ्चस्य ।

न च प्रपञ्चो नाम कश्चिदस्ति वस्तुभूतः "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" [छान्दो० ६।८।७] इत्यादिभिः श्रुतिभिः परमात्मन एव तात्त्विकस्योपदर्शनात् न प्रपञ्चस्य । तत्र "इन्द्रो मायाभिः पुरुरूपः" [ऋक्सं० ४।७।३३] इत्यादिभिः मायारूपत्वस्यैव निवेदनात् । तद्रूप एव स तत्परिणाम इति चेत् ; कथं नित्यशुद्धत्वं तस्य ? प्रपञ्चरूपावाप्तेरेवाऽशुद्धित्वात् । तदवाप्तेश्च तत्परिणामित्वेऽवश्यम्भावात् सुवर्णादे रुचकादिरूपावाप्तिवत् ।

---

१ प्रपञ्चव्यापी । २ परमात्मा । ३ कठोप० ३।१२ । ४ स्वप्रकाशरूपत्वेन । ५ तस्य तद्रूप–आ०, ब०, प० । ६ जीवस्य । ७ अमृतत्वेन । ८ जीवस्य । ९ घटाकारस्यापि–आ०, ब०, प० ।

कथं वाऽनुच्छित्तिधर्मत्वम् ? "अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा" [बृहदा० ४।५।१४] इत्याम्नायते ? कृतश्चिदसिद्धेः, तदनर्थान्तरस्योच्छित्तौ तस्याप्युच्छित्तेः । अर्थान्तरं तु कथं सौ तस्य परिणामो घटवत् पटस्य ? विभ्रमादिति चेत्, न तर्हि तत्र परमात्मनो वस्तुभूतेनोपादानत्वमिति कथं तया तस्य सामर्थ्यं तत्र ?

भवतु निमित्तत्वेनैव कुलालादिवत् घटादाविति चेत्, कथमिदानीम् "आत्मनि विज्ञाते सर्वं विज्ञातम्" [ ] इति आत्मविज्ञानेनैव सर्वविज्ञानं प्रतिज्ञायेत ? उपपन्नं स्वस्यात्मनः तदुपादानत्वे तज्ज्ञानादेव प्रपञ्चस्यापि ज्ञानं तस्य तदव्यतिरेकात् न निमित्तत्वे, कुलालज्ञानादेव घटादेरपि ज्ञानप्रसङ्गात् । श्रुतिविरोधश्चैवम्, श्रुतिभिः "सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्य आकाशं प्रत्यस्तम(स्तं)यन्ति" [छान्दो० १।९।१] इत्यादिभिः आत्मन्युपादानत्वस्यैव निवेदनात् । अनुपादाने "तेषां तत्र प्रलयानुपपत्तेः । कथं वा निरुपादानस्यैव निमित्तादेवोत्पत्तिः ? अस्त्येवोपादानं प्राच्यः प्रपञ्च इति चेत्, न तर्हि सर्गादौ तस्य सं प्रत्युपादानत्वम् अभावात् ? "सदेव सौम्य इदमग्र आसीदेकमेवाद्वितीयम्" [छान्दो० ६।२।१] इत्यात्मन एव सदुपस्य तदा सत्त्वश्रवणात् । अथास्त्येव तदापि तत्प्रपञ्चः 'आत्मैव एकमेव' इत्यवधारणं तु नामरूपाभ्यां व्याकृतस्य तस्याभावादिति चेत्, किमेवं सदा तथाविधस्य 'प्रधानस्यैव तदुपादानत्वम् भवति ? तस्याऽचेतनत्वेन ईक्षितृत्वायोगात्, ईक्षितृत्वं तदुपादानं श्रूयते "स ईक्षाञ्चक्रे स प्राणमसृजत" [प्रश्नो० ६।३।४] इत्यादेराम्नायात्, न चाम्नायानारूढस्य तत्त्वम् प्रमाणाभावात्, अनुमानादेस्तद्विषयस्य "परैस्तदाभासीकरणादिति चेत्, न, अविद्यात्मनः "प्रपञ्चस्याप्यचेतनत्वाविशेषात् । विद्यासाहचर्यात्तस्य चेतनत्वे पितृशक्तिसाहचर्यात् प्रधानस्यापि तत्त्वमिति कथमनेकात्मत्वम्, यत ईक्षापूर्वं जगद्धेतुत्वं तस्यापि न भवेत् आम्नायार्थत्वञ्च ? यत्तत्र" तत्र तन्निषेधे निर्बन्धो भाष्यकारस्य" । तत्र प्रपञ्चस्योपादानत्वेन आत्मनो निमित्तत्वम् ?

कुतो वा तत्र तस्योपादानत्वमभ्युपगन्तुं शक्तेरिति चेत्, न, कार्यस्य प्रपञ्चस्यावस्तुत्वे" वस्तुतत्त्वाश्रयायाः शक्तेरसम्भवात् । निष्पत्तये हि शक्तिः । न चाऽवस्तुनो निष्पत्तिः । तत्कथं तदर्था शक्तिः ? साध्यवस्तुभूतेव कार्यवदिति चेत्, कथं परमात्मनो वस्तुभूतस्यैव ? सम्बन्धादिति चेत्, न "सोऽप्यन्यविरेकः, विशेषात् । तदुत्पत्तिरिति चेत्, न, तत्रापि शक्त्याश्रयात्मस्वरूपपरिकल्पनायामपरिनिष्ठानात् । प्रपञ्चस्य प्रकाशनमेव निष्पादनम्, न च

१-त्वमुच्यते इ- आ०,ब०,प० । २ प्रपञ्चस्यादिः । ३ वस्तुभूतेनोप-आ०, ब०,प० । ४ "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्"-बृहदा० ४।५।६ । ५ शाकटायनशब्देनात्मा प्रतिपादो"-ता० टि० । ६ "वस्तुपदस्ये तत्त्वार्थो प्रपञ्चे वस्तु"-छान्दो० । ७ भूतानाम् । ८ "उपपन्नमदितप्रपञ्चस्य"-आ०टि० । ९ सर्गादौ । १० सर्वेष्वनिमाभाव । ११ "नेहनानास्ति"-ता०टि० । १२ "प्रपञ्चप्रलयाभाव"-आ०टि० । १३ "यदीन सर्वेऽपि अनुपप"-आ० टि० । १४ ब्रह्मसू० भा० १।१।५ । १५ शाङ्करभाष्यस्य । १६ वस्तुनो आ०,ब०,प० । १७ ब्रह्मसूत्रभाष्यस्य ।

तच्छक्तिरवस्तुभूतैव, असदपि चन्द्रद्वित्वादिकं प्रकाशयतश्चक्षुरादेः वस्तुत एव शक्तेरिति चेत् ; न ; चक्षुरादौ दोषतः तच्छक्तिभावात् । न चात्मनि कश्चिद्दोषः, "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" [श्वेता० ६।१९] इति तत्र निर्दोषताया एव श्रवणात् । ततः शक्तिवैकल्यात् अवस्तुभूतेवासाविति कथं तदाम्नायस्य प्रामाण्यं यतस्तेन प्रत्यक्षादेर्भेदविषयस्य बाधनम् ? शक्तिमत्त्वे तु वास्तवमेतत्कार्यं तत्प्रतिभिन्नशक्त्यभ्युपगन्तव्यम्, अन्यथा तत्त्वानुपपत्तेः ।

ततो यथा समर्थत्वादात्मा कार्याद्विभिद्यते ।
असमर्थात्प्रधानादेरपि तत्कार्यजन्मनि ॥११०९॥
न च तद्भेदविज्ञानमाम्नायेनोपपीड्यते ।
तथैव स्तम्भकुम्भादिर्यथास्वं कार्यजन्मनि ॥१११०॥
समर्थो भिद्यते तत्रासमर्थादन्यतः स्वयम् ।
नैकत्वाम्नायतो बाधा तज्ज्ञानस्यापि युज्यते ॥१११॥
न ह्यसौ[1] ब्रह्म-तत्कार्यभेदज्ञानमपीडयन्[2] ।
स्तम्भादिभेदनिर्भासबाधाय भवति प्रभुः ॥१११२॥
तस्मात् सामर्थ्यलिङ्गोत्थमनुमानमबाधितम् ।
परस्परमसङ्कीर्णं वस्तु वक्त्येव निश्चयात् ॥१११३॥

इदमेवाह **'समर्थम्'** इति । यस्मात् स्वकार्ये **समर्थं** शक्तं **स्वलक्षणम्** तस्मात् **असङ्कीर्णम्** इति । स्वलक्षणस्य स्वरूपमाह– **'स्वगुणैरेकम्'** इति । स्वग्रहणेन परगुणैरेकत्वाभावमावेदयन् "चोदितो दधि खाद" [प्र० वा० ३।१८२] इत्यादेरनवकाशत्वं दर्शयति । गुणशब्देन च, तस्य सामान्यवाचित्वात् गुणपर्याययोरुभयोरपि ग्रहणम् , अत एवाह– **'सहक्रमविवर्तिभिः'** इति । सूत्रे तु पृथक्पर्याययोपादानस्य प्रतिपादितमेव प्रयोजनम् । कुतः पुनरेवं स्वलक्षणमिति चेत् ? आह– **'समर्थम्'** इति ।

अर्थक्रियासमर्थं यत् स्वलक्षणमुदीरितम् ।
तद्द्रव्यपर्यायात्मैव बुद्धिमद्भिर्निबुध्यते ॥१११४॥
न द्रव्यं न च पर्यायो नोभयं व्यतिभेदवत्[3] ।
शक्तमर्थक्रियायां यत् तत्प्रतीतिर्न विद्यते ॥१११५॥
निवेदयिष्यते चैतत् यथास्थानं सविस्तरम् ।
विस्रब्धं स्थीयतां तस्मादिदानीमुच्यते परम् ॥१११६॥

'सहविवर्तिभिरेकम्' इत्येतदसहमानस्य मतमाशङ्कते–

यदि शेषपरावृत्तेरेकज्ञानमनेकतः । इति ।

---

१ –दि ब–आ०, ब०, प० । २ एकत्वाम्नाय. । ३ –यत् आ ,ब०,प० । ४ प्र० वा० २।३ । ५ परस्परानपेक्षम् ।

एकज्ञानादि तदेकसिद्धिः, तच्चैकस्य नानावयवसाधारण्य(ण)स्थूलस्य ज्ञानमतीन्द्रियम् **एकज्ञानम्** न तस्मादेवैकस्मात्, अपि तु **अनेकतः** अनेकस्मात् परमाणोः। कीदृशात्? **शेषपरावृत्तेः** शेषाः तज्ज्ञानं प्रत्यहेतवः प्रत्येकावस्थाः परमाणवः तेभ्यः परावृत्तिः सञ्चयलक्षणा अस्मिन् तस्मादिति। यथा हि—घटादावेकज्ञानं सन्निवेशानेकनिबन्धनम् एकज्ञानत्वात् दूरविरलदेशेषु तज्ज्ञानवत्। ततो न तद्बलात् अक्रमादनेकस्वभावस्यैकस्य सिद्धिरिति परस्फूत्वम्। 'यदि' इति तदवद्योतनार्थम्। अत्रोत्तरमाह—

अनर्थमन्यथाभासम् [अनंशाना न राशयः] ॥१२३॥ इति।

'एकज्ञानम्' इत्यनुवर्तते। तत् न विद्यते अर्थः अर्थक्रियासमर्थः यस्मिंस्तत् **अनर्थम्**, 'नञोऽर्थात्' [शाकटा० ३।१।२२८] इति[1] कप्रत्ययभावः, समासान्तस्यानित्यत्वात्। अथवा अर्थो न भवतीत्यनर्थः स्थूलाकारः, सोऽस्यास्तीत्यनर्थम्, अर्शआदिषु दर्शनादकारप्रत्ययात्। अनर्थत्वे निमित्तम् **'अन्यथाभासम्'** इति। अर्थो येन व्यवस्थितोऽनेकाऽस्थूलप्रकारेण तस्मादन्येन एकस्थूलप्रकारेण भासः परिच्छेदो यस्मिन् तद् **अन्यथाभासम्**। यदन्यथाभासं तदनर्थम् यथा दूरविरलदेशेषु स्थूलैकज्ञानम्, तथा च घटादावपि तज्ज्ञानम्, तथा च कथं तस्य प्रत्यक्षत्वं भ्रान्तत्वात्? स्थूलाकार एव तस्य[2] तत्त्वं न नीलादाविति चेत्, कथमेकस्यैव तत्त्वमतत्त्वञ्चापि रूपम्? अन्यथा घटादेरपि नानैकरूपत्वस्याविरोधात् न स्थूलाकारेऽपि तस्य विभ्रम इति कथं तत्रापि तत्प्रत्यक्षं न भवेत्? दूरे तदाकारस्य असत एव दर्शनान्नैवमिति चेत्, नीलादावपि नैवम्, तस्यापि क्वचिदसत एवोपलम्भात्। यत्र बाधोपनिपातः तत्रैव तस्यासत्त्वं न सर्वत्रेति चेत, न, स्थूलाकारेऽपि तुल्यत्वात्।

कथं वा दूरोपलभ्यस्य तदाकारस्यासत्त्वम्? प्रत्यासत्तौ तद्विविक्तनामेव केशानामुपलम्भादिति चेत्, कीदृशास्ते केशाः? स्वावयवापेक्षया स्थूला एवेति चेत्, असन्त एव वस्तुतः तर्हि सेऽपीति कथं तेषां सञ्चयः? कथं वा स्थूलघनज्ञानहेतुत्वम् असतां तद्योगात्। निरंशपरमाणुस्वभावा एवेति चेत्, न तेषां प्रत्यासत्तावप्युपलम्भ इति[3] कथं ततस्तदाकारस्यासत्त्वं यतस्तन्निदर्शनात् घटादावपि तदसत्त्वम्?

भवतु स्थूलवत् नीलादावपि तस्य नानावयवसाधारणतया सविकल्पत्वेन विभ्रम एव "सर्वमालम्बने भ्रान्तम्" [ ][4] इति वचनात्। प्रत्यक्षत्वं तु तस्य व्यवहर्तृप्रसिद्धादविभ्रमादिति चेत्, न तर्हि ततो बहिर्निरंशार्थसिद्धिः अतदाकारत्वात्, अन्यथा आकारवादव्याघातात्। ततः स्थूलार्थस्यैव सिद्धिरिति चेत, न तर्हि तस्य निर्विकल्पकत्वम्, तद्विषयस्य साधारणतया सविकल्पकत्वेन तत्सामर्थ्यजन्मनि[5] तस्मिन्नपि तत्त्वस्यैवोपपत्तेः।

---

१ इत्यस्त्रेण विहितस्य कप्रत्ययस्याभावः। २ "तत्राद्रिस्व"—शाकटा० ३।३।१३२। ३ अन्वयम्। ४ "परमार्थतस्तु सकलमालम्बनं भ्रान्तमेव।"—प्र० वार्तिकाल० २।१०६। ५ तदाकारज्ञानस्य। ६ ज्ञानेऽपि।

ततो यदुक्तम्–"प्रत्यक्षं कल्पनापोढमर्थसामर्थ्यादुत्पत्तेः" [ ] इति; तत्र अर्थो यदि परमाणुः ; असिद्धो हेतुः । स्थूलश्चेत् ; उक्तनीत्या विरुद्धः । ततो यदि भ्रान्तम् ; न निर्विकल्पम् , तच्चेत् ; न भ्रान्तम् , इति महानयं सङ्कटप्रवेशः परस्य । ततः सिद्धं प्रत्यक्षत एव सहविवर्तिभिरेकं स्वलक्षणम् । व्यावहारिकमेव तत्तथा न तात्त्विकमिति चेत् ; न; व्यवहारादन्यस्य तत्त्वस्याभावात् , अप्रतिपत्तेः । तत्र सञ्चितपरमाणुनिबन्धनत्वं प्रत्यक्षस्य । निरस्तश्च तत्सञ्चयः सान्तरनिरन्तरचिन्तया । तदेवाह– **अनंशानां न राशयः** । राशिबहुत्वापेक्षया बहुवचनम् । ततो निषिद्धमेतत् अर्थस्य–

"भागा एवावभासन्ते सन्निविष्टास्तथा तथा ।" [हेतु० टी० पृ० १०६] इति; सन्निवेशस्यैव अनंशेष्वभावात् , स्थूलप्रतिभासस्यैव च भागप्रतिभासविरोधिनोऽनुभवात् ।

कुतः पुनरिदमवगन्तव्यम्–'क्रमविवर्तिभिरेकम्' इति ? प्रत्यक्षत इति चेत् ; न ; तेन क्षणभङ्गिना सन्निहितस्यैव गुणस्य[2] ग्रहणात् न परापरसमयभाविनां तदा तस्याभावात् । तथापि ग्रहणे देशकालव्यवहितस्य सर्वस्यापि ग्रहणात् सर्वस्य सर्वदर्शित्वं प्रमाणान्तरवैयर्थ्यञ्च प्राप्नुयात् । न च तेषामग्रहणे तदेकत्वं स्वलक्षणस्य शक्यमवगन्तुम् , व्यापकप्रतिपत्तेर्व्याप्यप्रतिपत्तिनान्तरीयकत्वादिति चेत् ; भवेदेवम् , यदि तस्य क्षणभङ्गः सिद्धो भवेत्[3] , न चैवम् । तथा हि– [4]न तस्य स्वत एव तत्सिद्धिः ; तेन पूर्वापरयोरग्रहणे तद्व्यावृत्तिरूपस्य तस्य दुरवबोधत्वात् व्यावृत्तिप्रतिपत्तेः व्यावर्त्यप्रतिपत्तिनान्तरीयकत्वात् ।

ग्रहणञ्च [5]यद्यतत्कालेन; बहिर्विवर्तानामपि भवेत् । तत्कालेन चेत् ; व्याहतमेतत्– "तत्कालेनैव तत्कालव्यावृत्तिरात्मनो गृह्यते" [ ] इति । नाप्यन्यतः प्रत्यक्षात् ; [7]अत एव, अनभ्युपगमाच्च [8]तद्भङ्गस्य तत्स्वभावत्वात् । पूर्वापरापरिज्ञानेऽपि भवत्येव स्वतः प्रतिपत्तिरिति चेत् ; तद्विपर्ययस्यापि किन्न तथा बहिरन्तश्च प्रतिपत्तिः तस्यापि कथञ्चित्तत्स्वभावैत्वस्याविशेषात् ? क्षणिकतयैव उभयत्रापि वस्तूनां प्रतिभासनादिति चेत् ; न ; [9]एकतयापि प्रतिपत्तेर्दर्शनात् । अध्यारोपितमेवैकत्वं तत्र विकल्पेन प्रतीयते न वास्तवमिति चेत् ; विकल्पेनापि कथमतदाकारेण तस्य ग्रहणम् आकारवादवैफल्यप्रसङ्गात् ? तदाकारत्वञ्च न सर्वथा तद्वदवस्तुत्वापत्तेः । न चावस्तुना तत्प्रतिपत्तिः ; अन्यत्रापि ज्ञानवैयर्थ्यापत्तेः ।

---

१ "अर्थस्य सामर्थ्येन समुद्भवादित्याह । तद्धि अर्थस्य सामर्थ्येनोत्पद्यमानं तद्रूपमेवानुकुर्यात् ।"–प्र० वार्तिकाल० २।१९२ । २ गुणग्रह–आ०, ब०, प० । ३ "न तस्य स्वत एव तत्सिद्धिरित्यत्र न तस्य प्रत्यक्षान्नरात्तत्सिद्धिरिति वक्तव्यम् । तत्कालेनैव तत्कालव्यावृत्तिरात्मनो गृह्यत इत्यत्र आत्मशब्देन प्रथमप्रत्यक्षं ग्राह्यम्" ..... ननु तत्कालेन त्रिकालानुयायिना प्रत्यक्षान्तरेण प्रथमप्रत्यक्षस्य तत्कालव्यावृत्तिर्गृह्यत इत्यत्र व्याप्यभावात् व्याहतमेतदित्युक्तं कथं युक्तं स्यादिति न शङ्कनीयम् ; प्रत्यक्षस्य यथा कालत्रयवृत्तित्वेनाक्षणिकत्वं तथा प्रकृतप्रत्यक्षस्यापि अक्षणिकत्वं सम्भवत्यविसंवादात् , तथा परस्य क्षणभङ्गो न सिध्यतीत्यभिप्रायेणोक्तत्वात् ।"–ता० टि० । ४ यत्तत्कालेन आ०, ब०, प० । ५ "तथा हीत्यादि प्रतिपादितप्रक्रियात एव ।"–ता० टि० । ६ तद्भङ्गस्य आ०, ब०, प० । ७ –वस्त्वादि–आ०, ब०, प० । ८ अक्षणिकतया ।

[1]वस्तुनैव विकल्पान्तरेण ग्रहणमिति चेत्, न, तत्रापि 'कथमतदाकारेण' इत्यादेर्भ्रमणाद-परिनिष्ठानात्त्व । कथञ्चित्तदाकारत्व तु नानेकान्तविद्विषामुपपन्नम् । तदुक्तम्-

"विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम्"[आप्तमी०श्लो० ३] इति ।

वस्तुतो विविक्त एव विकल्पस्तदाकारात्, अविवेकस्तु विभ्रमादिति चेत्, विवेकस्य प्रतिपत्तौ कथं विभ्रमः ? निश्चयाभावादिति चेत्, न, प्रत्यक्षेऽपि तदापत्तेः । तथा च कथमेवत्- "प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति ।" [प्र० वा० २।१२३] इति, तद्विभ्रमाक्रान्तादेव तदभावप्रसिद्धेरयोगात् । तत्र तदाकारस्यासन्निधानान्न विभ्रम इति चेत्, इतरत्र कुतस्तस्सन्निधानम् ? वासनात इति चेत्, न, तस्याः प्रत्यक्षसमयेऽपि भावात् । सत्या[2] अपि नै प्रबोधः तद्धेतोरभावात् पश्चात्तु प्रत्यक्षादेव सदृशापरापरविषयात् सत्प्रबोधे युक्तं ततस्तत्सन्निधान तदविवेकविभ्रमश्च [3]विकल्प इति चेत्, कुतस्तर्हि प्रधानादिवासनाप्रबोधः पतञ्जलिकल्पः । न चार्य नास्त्येव, बहुलमुपलम्भात् । अदृष्टबलात्तु प्रत्यक्षेऽपि स्यात् । तत्र तद्विवेकप्रतिपत्तौ तद्विभ्रमः ।

सत्यमिदम्, न हि विकल्पस्यापि स्वतस्तद्विभ्रमः, विकल्पान्तरादेव सद्भावादिति चेत्, न [4]ततोऽपि, तदविषयात्, तदयोगात् । तद्विषयत्वे च पूर्ववद्भ्रमङ्गात् । तत्रापि [5]तदन्तरात्तत्कल्पनायाम् अनवस्थापत्तेः ।

मा भूद्विकल्प एवेति चेत्, किमिदानीं कल्पनापोढग्रहणेन व्यावर्त्यभावात् ? किं वाऽभ्रान्तग्रहणेन मानसस्यैवेन्द्रियस्यापि विभ्रमस्य सुस्वप्नन्यायतयाऽनुपपत्तेः । ततः सति विभ्रमे तद्विवेकः तज्ज्ञानस्याऽप्रतिपन्न एव वक्तव्यः । न च तावता बोधरूपतयाऽपि तस्याऽप्रतिपत्तिरेव विभ्रमसिद्धिप्रसङ्गात् "अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति" [ ] इति वचनात् । भवत्येवमिति चेत्, सिद्धा तर्हि क्षणभङ्गस्यापि प्रत्यक्षे तद्वदप्रतिपत्तिः । एतदेवाह-

तथाऽयं क्षणभङ्गो न ज्ञानांशः सम्प्रतीयते ।
अर्थाकारविवेको न विज्ञानांशो यथा क्वचित् ॥१२४॥ इति ।

तथा तेन प्रकारेण अयं परप्रसिद्धः क्षणभङ्गः न सम्प्रतीयते । कीदृशः ? ज्ञानांशः ज्ञानस्य प्रत्यक्षादेः अंशो भाग । क्व क इव ? इत्याह क्वचित् विकल्पादौ विभ्रमज्ञाने यथा येन तदनुभवाभावप्रकारेण अर्थाकारात् स्थूलादिक्षणात् विवेको नानात्वं न सम्प्रतीयते । कीदृशः विज्ञानांश इति । तदंशत्वञ्च तस्मात् प्रतिपन्नात् अप्रतिपन्नस्येव कथञ्चिदभेदात् ।

प्रत्यक्षे यदि क्षणभङ्गस्य न स्वतः प्रतिपत्तिः, मा भूत् अनुमानात्तु भवत्येव । तथा हि

---

१ वस्तुन्येव-आ०, ब०, प० । २ वासनाया । ३ न चैवः आ०, ब०, प० । ४ "ईप"-आ० टि० । तदाकारत्वं । ५ ततोऽपितद्विष-आ०, ब०, प० । ६ तदनन्तरा-आ०, ब०, प० । ७ तात्पर्य० प० टी० ४०१ । तुलना-तत्त्वसं० श्लो० २०७१ ।

यदैव हेतुः तदैव फलं यथा प्रदीपकाल एव प्रकाशः, वर्तमानसमय एव च प्रत्यक्षहेतुश्चक्षुरादिव्यापारः ततः प्रत्यक्षमपि तदैव न पूर्वं नापि पश्चात् तदा तन्नियम एव च तस्य क्षणभङ्ग इति चेत् ; कुतस्तत्समयनियमः[1] तद्व्यापारस्य ? प्रत्यक्षस्य तत्समयनियमादिति चेत् ; न ; परस्परा-श्रयात्-पूर्वेणोत्तरस्य तेन च पूर्वस्य सिद्धेः । तद्विषयात्प्रत्यक्षादिति चेत् ; ततोऽपि कस्मात्तस्य तन्नियम एवावगम्यते न पूर्वापरसमयव्यापित्वमपि ? तस्यापि क्षणभङ्गादिति चेत् ; न तस्यापि स्वतः प्रतिपत्तिः पूर्ववद्दोषात् । अनुमानादनन्तरोक्तादिति चेत् ; न ; तत्रापि 'कुतस्तत्समय-नियमः' इत्यादेरुपस्थानादनवस्थितेश्च । तन्नातोऽनुमानात् तत्प्रतिपत्तिः । नापि वस्तुत्वादि-लिङ्गोत्थात् ; ततः परिणामस्यैव सिद्धेरिति निवेदनात् ।

तत्र 'क्षणभङ्गात् प्रत्यक्षस्य ततः एकत्वस्यापरिज्ञानम्[2]'; तद्भङ्गस्यैवासिद्धेः । कथञ्चि-त्तद्विपर्ययस्य[3] तु प्रतीतेः[4] भवत्येव ततस्तत्परिज्ञानमित्यनयैव कारिकया निवेदयति—**तथा अयं** लोकप्रसिद्धः **क्षणभङ्गोनः** कथञ्चिदक्षणिकात्मा **ज्ञानांशः** प्रत्यक्षादिज्ञानभागो द्रव्यापर-नामा **सम्यग्** अकल्पितत्वेन **प्रतीयते** । कथं पुनरवग्रहादिपरापरपर्यायाणां भेदे सति तदात्मनः प्रत्यक्षस्य क्षणभङ्गोनत्वमिति चेत् ? न ; भेदवदभेदेनापि प्रतीतेः । प्रतीते च पर्यनु-योगानुपपत्तेः । प्रतीतिरेव कुतस्तयेति चेत् ? स्वत एव चित्रज्ञानवत् । अस्ति हि नील-पीतादिनानाकारव्यापिनो ज्ञानस्य स्वतः प्रतिपत्तिः । एतदेवाह— **'अर्थ'** इत्यादिना । अर्थान् नीलपीतादिस्वलक्षणपरमाणून् आकारयन्ति अनुकुर्वन्तीत्यर्थाकाराणि, तानि च तानि **विवेकोनानि** च अनेन तदेकत्वसाधनं परकीयमशक्यविवेचनत्वं सूचितम् । **अर्थाकार-विवेकोनानि** च तानि **विज्ञानानि** च नीलाद्यवभासरूपाणि तेषाम् **अंशो** व्यापकभागः स **यथा** अनुभवगतत्वेन **क्वचित्** चित्रैकज्ञानवादिमते **सम्प्रतीयते** तथा प्रागुक्तोऽपि इत्येवं व्याख्यानार्थमेव चोभयत्रापि अंशग्रहणम् , [5]अन्यथैवमेव ब्रूयात्—

तथायं क्षणभङ्गोनविज्ञानस्य प्रतीयते ।
अर्थाकारविवेकोनविज्ञानस्य यथा क्वचित् ॥१११७॥ इति ।

चित्रञ्च विज्ञानमवश्याभ्युपगमनीयमेव क्षणभङ्गैकान्तवादिनोऽपि इति, अन्यथा सर्वभावनिःस्वभावतापत्तेः । निरूपितञ्चैतत्— **"चित्रमेकमनिच्छद्भिः"** [पृ० २५६ ।] इत्यादौ । ततः प्रत्यक्षत एव निर्व्याकुलतया बहिरन्तश्च स्वगुणपर्यायतादात्म्यस्य प्रतिपत्तेः सूक्तमुक्तम्— **'स्वगुणैरेकं सहक्रमविवर्त्तभिः'** इति ।

एवं स्थिते परिणामस्य निर्व्याकुलत्वात् तमेव वस्तुलक्षणमागमाविरोधेन कथयन् तल्लक्षणं तत्त्वार्थसूत्रेण[6] दर्शयति—

तद्भावः परिणामः [स्यात्सविकल्पस्य लक्षणम्] । इति ।

---

१ –मयस्तद्ध्या–आ०, ब०, प० । २ इत्युक्तं घटते इत्यन्वय. । ३ –पर्यस्तु प्रतीतेः आ०, ब० । ४ प्रतीतौ च आ०, ब०, प० । ५ अन्यर्थवमेवं ब्रू–आ०, ब०, प० । ६ त० सू० ५।४१ ।

अतश्च समानभूमिकत्वेन एकोच्चारणगम्यमनेकं वाक्यमुन्मज्जति–'तैः स्वरूपादिभिः भवनम् आत्मलाभः तद्भावः स परिणामः' इत्येकम्। अनेन च परस्वरूपादिना भवनं प्रत्याचक्षाणः साङ्ख्यमतं प्रत्याचष्टे। सर्वमेदरूपेण आत्मानं प्रतिलभमानस्य प्रधानस्य प्रतीतौ कर्यं तत्प्रत्याख्यानम्? अस्ति हि प्रधानस्य प्रतीतिरनुमानिकी। तथा हि– 'ये यदन्विताः ते तद्धेतुका यथा मृदन्विताः शिवकादयो मृद्धेतुकाः, सुखाद्यन्विताश्च भेदा महदादयः, तस्मात्तद्धेतुकाः। यत्र सुखदुःखमोहात्मकस्तदन्वयी तद्धेतुः तत्प्रधानमिति चेत्, न, सुखाद्यन्वयस्य भेदेष्वप्रतिभासनात्। न हि यथा शिवकादिषु मृदन्वयः तथा भेदेषु सुखाद्यन्वयः प्रतिभासते, अन्यथा प्रधानमेव प्रतिभासित भवेत् तदन्वयस्यैव [2]दरत्वात्। तथा च किं तत्रानुमानेन प्रत्यक्षप्रतिपन्ने तद्वैयर्थ्यात् मृदादिवत्, अन्यथा मृदादावपि तत्कल्पनायां निदर्शनान्तर तत्रापि [3]तत्कल्पनायां तदन्तरमित्यनवस्थापत्तेः, सत्यम्, न तस्य भेदेषु अन्वितस्यैवानुमानं प्रति पन्नत्वात्, अपि तु सर्गप्राग्भाविनो निर्भेदस्य। तस्य चातिसूक्ष्मत्वेनानुपलम्भेन वैयर्थ्यमनुमानस्येति चेत्, मा भूद्वैयर्थ्यम्, असन्भवस्तु स्यात् निदर्शनाभावात्। शिवकादिरेव निदर्शनमिति चेत्, भवत्येव निदर्शनं यदि तत्रापि मृद्रूपं नि [4]दमेव कारणमिति प्रसिद्धम्। न चैवम्, तदप्रतिपत्तेः। न हि निर्भेदस्य सामान्यस्य प्रतिपत्तिः। भेदान्वितस्य तु प्रतिपत्तौ कर्यं निर्भेदत्वं प्रधानस्य? [5]अग्नेः प्रतिपत्तौ तद्विपरीतस्यापि कल्पनमिति चेत्, किमिदं विपरीतत्वम्? अनाधारत्वमिति चेत्; न; तत्कल्पनात्। अनियताधारत्वमिति चेत्, न तर्हि प्रधानस्यापि निर्भेदत्वम्, अनियतभेदत्वस्यैवोपप [6]। तस्य निर्भेदस्य प्रधानस्य हेतुरयं यस्य सर्गप्राग्भाविनः सूक्ष्मत्वेनानुपलभ्यस्य महदादेस्तत्कार्यात् प्रतिपत्तिः। ततो न युक्तमुक्तम्–

"सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः।
महदादि तच्च कार्यं प्रकृतिविरूप [7]सरूपम्च॥" [सां० का० ८] इति।

भवतु सभेदमेव सर्वदा तदिति चेत्, न तर्हीदमुपपन्नम्– "प्रकृतेर्महान्" [सां०का० २२] इति, सङ्घेदात् 'महान्' इत्युपपत्तेः। सङ्घेदस्य सतोऽपि महदुत्पत्तावनन्वयात् प्रकृतेस्तु विपर्ययादेवं वचनमिति चेत्, न तर्हि महदादेरहङ्कारादिरपि तस्यापि भेदत्वेन तदुत्पत्तावनन्वयात्, इत्यसङ्गतमेतत् "महदाद्या' प्रकृतिविकृतयः सप्त" [सां० का० ३] इति। विकृतित्वस्यैव तत्र सम्मतात्र प्रकृतित्वस्य। "मूलप्रकृतिः" [सां० का० ३] इत्यपि न मन्थुरम्, भेदानुगतायाः प्रकृतेरपि भेदान्तरकार्यत्वस्यावश्यम्भावात् मूलत्वस्य

---

1 "सुखदुःखमोहान्विता हि बुध्यादयोऽध्यवसायादिलक्षणा प्रतीयन्ते। यानि च यदूपसमन्वयवन्ति तानि तन्मात्रोपादानकारणानि, यथा मृदेमपिण्डसमन्विता घटमुकुटादयो मृदेमपिण्डमात्रोपादानकारणका इति कारणमस्वरूपाः भेदानामिति सिद्धम्।"–सां० त० कौ० पृ० १०८। सां० का० अयम० १५। २ प्रधानत्वात्। ३ स्वर्गप्रा–आ०, ब०, प०। ४ –स्यान्निप्रति–आ०, ब०, प०। ५ यथा महानसे धवखदिरादि अग्न्यन्विताप्रतिपत्तावपि धूमानानाद्विपरीतस्य तार्ण्यवार्ण्यादेः कल्पनं भवति तथेति भावः। ६ –भेदस्यवोपपत्तेश्च नि–आ०, ब०, प०। ७ "प्रकृतिसरूपं विरूपम्च"–सां० का०।

अविकृतित्वस्यासम्भवात् । तन्न एकप्रधानहेतुकत्वं जगतः प्रातीतिकम्, तद्भेदस्य भिन्नोपादानतायामेव प्रतीतिभावादित्युपपन्नं स्वरूपादिभिरेव तस्य भवनम् ।

तथा, 'तस्यैकस्य भावः तद्भावः स परिणामः' इत्यन्यत्[1]; अनेनापि 'अवयवा एव नावयवी' इति प्रतिक्षिप्तम्; तेषामेव कथञ्चिदेकभावस्य अवयविनोऽपि प्रतीतेः । अन्यथा शून्यवादापत्तेर्निरूपितत्वात्[2] । कथं पुनरनेकभावस्यापरित्यागे 'तेषामेकभावः ? प्राक्याकारपरित्यागाजहद्वृत्तिकस्यैव उत्तराकारोपादानस्य परिणामस्योपगमात्[3] । तत्परित्यागे च कथं तस्य स्वकीयस्त्वम्[4] अनेकावयवसाधारणत्वाभावादिति ? कल्पयतोऽप्यवयविनं न परमाणुवादान्निर्मुक्तिरिति चेत् ; न ; कथञ्चिदेव तस्य परित्यागात् । अनेकभावस्य हि अनेकभावापत्तियोग्यतयैव प्रत्येकदशाभाविन्या परित्यागः न पुनरेकभावापत्तियोग्यतया परस्परसमवायसमयभाविन्या । तयापि तत्परित्यागे तदेकभावस्यैवानुत्पत्तिप्रसङ्गात् । ततः सत्यप्येकभावे कथञ्चिदनेकभावस्यापरित्यागान्न परमाणुवादापत्तिः । एवमपि अवयवस्य अवयवान्तरेणैकभावे[5] पररूपेणापि भावः प्रतिपन्नो भवति, तथा च 'तैः स्वरूपादिभिरेव भावः तद्भावः' इति व्याख्यानं व्याकुलीभूतं भवति । न चैवं दधिभक्षणे चोदितस्य करभेऽपि निवृत्तिः दध्नस्तेनाप्येकभावसम्भवादिति चेत् ; न ; तदेकभावस्य तत्तद्रूपतया[6] चित्रैकसंवेदनवन्नियमेन ततस्तस्य परस्वरूपत्वाभावात् तथा प्रतीतेः । न चैवं दध्नोऽपि करभेणैकभावः प्रतीत्यभावात् । सम्भावनया तु तद्भावे अतिप्रसङ्गात् । दधिक्षणस्य उत्तरतत्क्षणेनेव करभक्षणेनापि एकसन्तानत्वापत्तौ भवन्मतेऽपि दधिखादने चोदितस्य करभेऽपि प्रवृत्तिप्राप्तेः । ततः प्रातीतिकमिदम्— 'तस्यैकस्य भावः तद्भावः' इति ।

तथा, 'तेन परस्परैकत्वेन द्रव्यपर्यायाणां भावः तद्भावः परिणामः' इत्यपरम्[7] ; अनेनापि द्रव्यात् पर्यायाणां तेभ्यश्च तस्य आत्यन्तिकं भेदं प्रत्याचष्टे, कथञ्चिद्भेदस्यापि प्रतिपत्तेः। मिथ्यैवेयम्[8]; भेदप्रतिपत्त्या बाध्यमानत्वादिति चेत् ; कुतस्तत्प्रतिपत्तिः ? प्रत्यक्षादिति चेत् ; न ; अभेदप्रतिपत्तेरपि तत एव बाधेन बाध्यत्वायोगात् । कथमुभयोरेकतो भावो विरोधादिति चेत् ? किमिदानीं भेदप्रतिपत्तिरेव ? तथा चेत् ; [9]कस्याः [10]तया बाधनम् ? अभेदसंस्कारपरिपाकोपनीताया अभेदप्रतिपत्तेरेवेति चेत् ; न तस्याः सहभावो ज्ञानोत्पत्तियोगपद्यस्यानिष्टस्य प्रसङ्गात् । नाऽपि पश्चात् ; प्रतिपत्तिभेदस्याप्रतिवेदनात् । अप्रतिवेदनं लघुवृत्तेरिति चेत् ; न ; प्रतिपत्त्योरपि [11]तदव्यतिरेकेण तत्प्रसङ्गात् । प्रतिविदितेतरात्मकत्वे तु तयोः ; भेदाभेदात्मकत्वेन किमपराद्धं भवतो यत्तदेव द्रव्यपर्याययोर्न क्षम्यते ? तन्न इयमन्यैव अभेदप्रतिपत्तिः प्रत्यक्षात्, प्रत्यक्षादेवैकस्मात् भेदवदभेदस्याऽपि प्रतिपत्तेः । एवमपि भेद एव तस्य[12]

---

१ वाक्यमित्यन्वयः । २ अवयवानाम् । ३ "पूर्वाकारपरित्यागाजहद्वृत्तोत्तराकारान्वयप्रत्ययविषयस्योपादानत्वप्रतीतेः ।"—अष्टसह० पृ० ६५ । ४ नित्यत्वम् । ५ —भागस्यै—आ०, ब०, प० । ६ —रेणैव भावे आ०, ब०, प० । ७ तदतद्रूपतया ता० । ८ वाक्यमित्यन्वयः । ९ अभेदप्रतिपत्ति· । १० तस्यास्तथा वा—आ०, ब०, प० । ११ भेदप्रतिपत्त्या । १२ लघुवृत्त्यभेदेन । १३ प्रत्यक्षस्य ।

प्रामाण्यम् नामेदे, तस्यासत एव समवायोपनीतस्य तत्र प्रतिभासादिति चेत्, कथं तदेवं प्रमाणतदाभासत्वाभ्यां भिन्नम् ? अभिन्न एवैष दर्शनादिति चेत्, न, [1]तद्दर्शनस्य तद्भेदवत् द्रव्यपर्यायाभेदेऽपि तद्दर्शनस्यैव प्रामाण्योपनिपातात्। अथ तेषामपि तत्र तन्मेष्यते समवायोपनीतस्य असत एव तस्य तत्र प्रतिभासनादिति, तन्न, तत्रापि 'कथं तदेव' इत्यादेरनुपक्षात् अनवस्थितेश्च। ५

तस्मात् दूरं गतेनापि प्रमाणेतरभागयोः।
एकत्वं तात्त्विकं वाच्यमनवस्थानभीरुणा ॥११९८॥
द्रव्यपर्यायतादात्म्यं निर्बाधज्ञानबोधितम्।
तद्वदेवानुमन्तव्यं न्यायमार्गानुवर्तिना ॥११९९॥
न च नास्त्येव तज्ज्ञानमास्ते शेते च माणवः। १०
इत्यासमाधभेदेन माणवस्यावबोधनात् ॥१२००॥
अपह्नवे तु तस्य स्याद् भेदज्ञानमपह्नुवम्।
निद्रायितं जगत्प्राप्तं तत्तच्चैतन्यवर्जनात् ॥१२०१॥
समवायादभेदज्ञेः असन्नेवावभासते।
भेदः सर्वोऽप्यसन्नेव किन्नैकस्माच्छकाशताम् ? ॥१२०२॥ १५
पक्षद्वैव परं तत्त्वं न भवेत् सर्वशक्तिमत्।
पर्यायोक्त्येदमेवोक्तं मण्डनेन मनीषिणा ॥१२०३॥

"समवायसामर्थ्याच्चेत् भेदवतोरभेदावभासः, इन्तैकस्यैव वस्तुनः सामर्थ्ये विशेषात् नानावभासोऽभ्युपेयताम् व्यर्था वस्तुभेदकल्पना" [प्रमाणवा० १।६१] इति। तत्र तत्राभेदप्रतीतिः असती मिथ्या वा, इत्युपपन्नमेतत्-'तेन अन्योन्यात्मकत्वेन भावस्तद्भावः २० परिणामः' इति।

स किमित्याह-स्यात् स विकल्पस्य लक्षणम् इति। स परिणामो विकल्पस्य विविधं स्वमतानुरूपेण 'कल्प्यते इति विकल्पः, चेतनेतरलक्षणो भावः तस्य लक्षणं स्वरूपं स्यात् भवेत्, प्रत्यक्षेण विषयस्य तथैव प्रतिपत्तेरिति भावः।

तत्रैवानुमानमाह- २५

तदेव वस्तु साकारमनाकारमपोद्धृतम् ॥१२५॥ इति।

वस्तु चेतनमन्यच्च धर्मि तदेव परिणामलक्षणमेव नैकान्ततः क्षणिकं कूटस्थं वा इत्येवकारः। कुत इत्याह साकारम् इति। आ समन्तात् क्रियन्ते कार्याणि यैस्ते आकाराः शक्तिपर्यायाः तैः सह वर्तत इति साकारं सशक्तिकं यत इति।

---

१ प्रत्यक्षमेव। २ प्रत्यक्षभेददर्शनस्य। ३ द्रव्यपर्यायाभेददर्शनस्य। ४ प्रत्यक्षाभेददर्शनस्यापि ५ प्रत्यक्षभेदे। ६ अभेदस्य। ७ चेद्भेद एव तद्वतोरभे—ता०। ८ तीर्थे आ०, ब०, प०। ९ —ण तद्विप— आ०, ब०, प०।

सशक्तिकमपि क्षणिकमेव किन्न भवतीति चेत् ? उच्यते—ततो यदि स्वकाल एव कार्यं तत्कार्यमपि तदैव तदैव तत्कार्यमपि इति निरवकाशः सन्तानः तन्निबन्धनो व्यवहारश्च । पश्चादिति चेत् ; कः पश्चादर्थः ? तद्विनाशश्चेत् ; सोऽपि यदि कार्यमेव; तदा 'कार्यं कार्यम्' इत्युक्तं भवेत् ; तच्चानुपपन्नम्; भेदाभावात् । भेदे तु नाद्यं कार्यं तदन्यस्याभावात्, भावे स एव दोषः तद्योगपद्यात् सन्तानवादो निरवकाश इति । कार्यादन्य एव नाशश्चेत् ; न सोऽपि कारणसमसमयः पूर्ववदोषात् । पश्चादेवेति चेत्; न; 'तत्राऽपि कः पश्चादर्थः' इत्याद्यनुगमादव्यवस्थितिदोषानुषङ्गात् । तन्न नाशः पश्चादर्थः । दर्शननिवृत्तिस्तर्हि तदर्थः, कारणदर्शननिवृत्तौ कार्योदयादिति चेत् ; न ; अवृत्तदर्शनस्य अकारणत्वप्रसङ्गात् । न च सर्वं वृत्तदर्शनमेव संसारिणः; सर्वदर्शित्वापत्तेः । सर्वदर्शिनोऽपि न तत्र तन्निवृत्तिः तदशायामसर्वदर्शित्वापत्तेः । एतेन दर्शनविषयत्वमेव वर्तमानत्वमिति प्रत्युक्तम् ; देशादिव्यवहितत्वेन अवृत्तदर्शनस्य अवर्तमानत्वप्रसङ्गात् । योग्यपेक्षया च सर्वस्य वर्तमानत्वे कथमुपायोपेयभावेन तत्त्वदेशना ? सहभाविनां तद्भावस्यानभ्युपगमात् । तन्न निवृत्तिरपि तदर्थः ।

नाऽपि कालविशेषः ; तस्यानिष्टेः ।

भवतु कार्यमेव तदर्थः ; न चोक्तो दोषः ; तदर्थस्य आधारत्वानवकल्प्तेः, 'नीलादिनेव पश्चात्त्वेनाऽपि स्वरूपेण भवति कार्यम्' इत्येवावकल्पनात्, कालविशेषस्याप्येवमेव पश्चात्त्वोपपत्तेः, तदन्तरापेक्षया तत्त्वावकल्प्तौ अनवस्थानस्याप्यवकल्पनादिति चेत् ; कुतस्तस्य तत्त्वप्रतिपत्तिः ? प्रत्यक्षादिति चेत् ; न ; ततः कारणस्याप्रतिपत्तौ 'अत इदं पश्चात्' इत्यप्रतिपत्तेः । न च ततः कार्यसहचरात् कारणस्य तत्सहचराद्वा कार्यस्य प्रतिपत्तिः असन्निधानात् । असन्निहितविषयत्वे च अतिप्रसङ्गात् । उभयसहचरत्वे च क्षणभङ्गभङ्गप्रसङ्गात् । तन्न प्रत्यक्षात् तत्प्रतिपत्तिः । तज्जन्मनो विकल्पादिति चेत् ; न ; तस्यावस्तुविषयत्वेनाऽप्रमाणत्वात् । न चाप्रमाणिकैव तत्त्वप्रतिपत्तिः ; प्रमाणव्युत्पादनप्रयासवैफल्योपनिपातात् । तन्न कश्चिदपि पश्चादर्थो निश्चयविषयः ।

भवतु वा, तथाऽपि कुतस्तदा कार्यम् ? कारणसामर्थ्याच्चेत् ; न ; तदभावात् । प्राच्यादेवेति चेत् ; अक्षणिकादपि ततस्तथा किन्न कार्यं यतः सत्त्वं ततो व्यावर्तेत ? कार्यकालेऽपि तस्य भावादिति चेत् ; भवतु, न विरोधः । न हि कारणभावेन कार्यविरोधः, तदभावेनैव विरोधस्य सम्भवात्, अन्यथा मृतादपि शिखिनः केकायितं स्यात् । कथं

---

१ कार्यकार्यमपि । २ कारणकारणकाले । ३ कार्यकार्यस्य कार्यमपि । ४ सकलोत्तरोत्तरक्षणानामेकस्मिन्नेव क्षणे निपतनात् द्वितीये च निरन्वयविनाशात् समाप्तः सन्तानव्यवहार इति भाव. । ५ तु साध्यं का—आ०, ब०, प० । ६ तन्नाशः आ०, ब०, प० । ७ दर्शननिवृत्तिः । ८ "दृष्टताऽनीतकालत्वं दृश्यता वर्तमानाता । भाविता द्रष्टव्यमाणत्वमिति कालव्यवस्थितिः॥"—प्र०वार्तिकाल० १।१३७ । ९ दृशादि—आ०, ब०, प० । १० उपायोपेयभावस्य । ११ —वकल्प्तेः आ०,ब०,प० । १२ पश्चात्तेनापि आ०,ब०,प० । १३ कार्यमेवेत्येवा— आ०,ब०,प० । १४ तदनन्तर—आ०, ब०, प० । १५ प्रत्यक्षात् । १६ —क्षात्प्रति— आ०, ब०, प० । १७ तत्प्रति— आ०, ब०, प० । १८ चेदक्षणिकादपि आ०, ब०, प० ।

पुनः नित्यादेकस्वभावात् कालभिन्नमनेकं कार्यम् ? तत्स्वभावभेदादेव तदुपपत्तेः, तदभ्युपगमे च कथं तदेकम् ? तदनर्थान्तरत्वेन तत्राऽपि भेदस्यैवोपपत्तेरिति चेत्, कथमिदानीं प्रदीपादेरपि क्षणिकादेकस्वभावादेव देशभिन्नस्य कार्यस्य कज्जलादेरुत्पत्तिः ? स्वभावभेदावकल्पनौ निरंशवादव्यापत्तेः। 'एकोऽपि स्वभावस्तस्य तादृश एव यतो नानादेशमनेकं कार्यम्' इति प्रतिवचनं न नित्यपक्षेऽपि वैमुख्यमुद्वहति, नित्यादप्येकस्वभावादेव कालभिन्नस्य कार्यस्योत्पत्तेः, न तैर्देन भेदः क्षणिकवत्। तदुक्तम्— ५

"प्राक् शक्तात्तत्वरात्[1] कार्यं पश्चात् किंभाविनश्वरात्।
कार्योत्पत्तिर्विरुध्येत न वै कारणसत्तया॥
यद्यदा कार्यमुत्पित्सु तैत्तदोत्पादनात्मकम्।
कारणं कार्यभेदेऽपि न भिन्नं क्षणिकं यथा॥" [सिद्धिवि०परि० ३] इति। १०

तन्न क्षणिकात् कार्यम्।

नाप्यक्षणिकात्, ततो यद्येकस्वभावादेव देशादिभिन्नं कार्यम्, क्षणिकादपि किन्न स्यात्? तस्यैव कार्यकालप्राप्त्यभावात् तत्प्राप्तस्यैव कारणत्वादिति चेत्, अनुत्पन्नस्य कार्यस्य कः कालो यस्य प्राप्तिः ? उत्पन्नस्येति चेत्, न परस्पराश्रयात्—तत्प्राप्तात् उत्पत्तिः, उत्पन्नस्य च कालभावात् तत्प्राप्तिरिति। तैत्प्राप्त्या च कारणत्वे अतिप्रसङ्गः—सर्वस्य नित्यस्य एकत्र कार्ये तैत्त्वापत्तेः। प्राप्तमपि तत्र यदैव समर्थं तदैव कारणं न सर्वमिति चेत्, पर्याप्त प्राप्त्या, तद्विकलस्यापि सति सामर्थ्ये तद्बाधिरोधात्। प्राप्त्यभावे तैदैव कथमवगम्यत इति चेत्? न, अन्वयव्यतिरेकाभ्यां तदवगमात्। तोयेऽपि प्राप्तिमात्राभावादेति चेत्, कुत एतत्? तथा प्रतीतेरिति चेत्, क प्रतीतिः? नित्य एवेति चेत्, न, क्षणिकवन्निरंशस्य तस्याप्रतिपत्तेः। तत्र एकस्वभावं सत्कारणम्। स्वभावभेदस्य तु तदनर्थान्तरस्यावकल्पने तन्निरंशवादस्य व्याघातः, अर्थान्तरस्य तु सहकारिसन्निधिरूपस्यावकल्पन प्रागेव निवारितम्। तन्न नित्यादपि कार्यं क्षणिकवत्। 'प्राक् शक्तात्' इत्यादिकन्तु देवै[10] साम्यापादनबुद्ध्यैवामिहितं न वस्तुतः तत्कारणत्वनिवेदनबुद्धया। कथमन्यथा "मिथ्यैकान्ते विशेषो या कः स्वपक्षविपक्षयोः" [आप्त०श्लो० ४१] इति तद्वचनं न विरुध्येत ? ततः क्षणिकादिलक्षणात् विपक्षात् बाधकप्रमाणबलेन व्यावर्तितस्य साकारत्वस्य निश्चितान्यथानुपपत्तिकत्वेन गमकत्वोपपत्तेः अविरुद्धम् ततो वस्तुनः परिणामलक्षणत्वसाधनमिति" सूक्तमेतत्—'तदेव वस्तु साकारम्' इति।

नन्वेवं वस्तुवत् तद्धर्माणामपि शक्तिमत्त्वेन वस्तुलक्षणत्वे क्रमाक्रमाभ्यामनेकान्तात्मकत्वम्, पुनस्तद्धर्माणामपि तथा 'तैत्त्वमिति एकवस्तुधर्मैरेव सकलस्यापि जगतोऽभिव्याप्तत्वात्

---

१ क्षणिकादिव- आ०, ब०, प०। २ कार्यभेदेन नित्यस्य स्वभावभेदः। ३ तदवं का- आ०, ब०, प०। ४ तदवोत्या- आ०, ब०, प०। ५ क्षणिकस्य। ६ कार्यकालप्राप्त्या। ७ कारणत्वापत्तेः। ८ सामर्थ्यमेव। ९ अन्वयव्यतिरेकाभ्यां। १० अकलङ्कदेवैः। ११-धनत्वमिति आ०,ब०,प०। १२ क्रमाक्रमाभ्यामनेकान्तात्मकत्वम्।

वस्त्वन्तरतद्धर्माणामवकाशः स्यादिति चेत् ; आह– **अनाकारमपोद्धृतम्** इति । न विद्यते आकारोऽनेकान्तरूपस्वभावो यस्य तत्–**अनाकारं** वस्त्विति सम्बन्धः । कीदृशं तथा ? **अपोद्धृतं** द्रव्यरूपतया पर्यायेभ्यः तद्रूपतया द्रव्यात् परस्परतश्च नयबुद्ध्या पृथक्कृतम् , अपृथक्कृतस्यैव अनेकान्तात्मत्वोपगमादिति भावः । यद्येवं व्यभिचारी हेतुः साकारत्वादिति, तेषां शक्तिमत्त्वे[1]ऽपि परिणामलक्षणत्वाभावादिति चेन् ; न ; तेषां पृथक्शक्तिमत्त्वाभावात् । न चैवमवस्तुत्वमेव नयबुद्ध्याऽपि वस्तुतादात्म्यस्याप्रतिक्षेपात् दुर्नयत्वानुपपत्तेः । ततो नयार्पणया एकान्तात्मकत्वं प्रमाणार्पणया त्वनेकान्तात्मकत्वं वस्तुन इति व्यवस्थितम् ।

यत्पुनरिदम् अनेकान्तनिराकरणाय व्यासस्य सूत्रम्–"**नैकस्मिन्नसम्भवात्**" [ब्रह्मसू० २।२।३३] इति । अस्यार्थः–नानेकान्तवादो युक्तः । कुत एतत् ? एकस्मिन् धर्मिणि सदसत्त्वनित्यानित्यत्वनानैकत्वादीनां विरुद्धधर्माणामसम्भवादिति, तत्राह–

भेदानां बहुभेदानां तत्रैकत्रापि सम्भवात् । इति ।

परिणामलक्षणमेव वस्तु । कुतः ? **भेदानां** सदसत्त्वादीनाम् । कीदृशानाम् ? **बहुभेदानाम्** अनेकप्रकाराणां **तत्र** तस्मिन् परप्रसिद्धे **एकत्रापि** "**एकमेवाद्वितीयम्**" [छान्दो० ६।२।१] इत्यान्नातेऽपि न केवलं स्याद्वादिप्रसिद्धे[2] जीवादावेव इत्यपिशब्दः **सम्भवात्** । तथा हि–

व्यावृत्तं चेन्न तद्ब्रह्म प्रपञ्चादवकल्प्यते ।
तस्याप्यवस्तुरूपत्वं तद्वदेव[3] प्रसज्यते ॥ ११२४ ॥
तस्मादिव स्वरूपाच्च तच्चेद् व्यावृत्तमुच्यते ।
नैरात्म्यवादनिर्मुक्तिः कथं ते ब्रह्मवादिनः ? ॥ ११२५ ॥
स्वरूपादनिवृत्तं तत् व्यावृत्तं चेन् प्रपञ्चतः ।
सदसद्धर्मभेदोऽयं कथं तत्र[4] न सम्भवी ? ॥ ११२६ ॥
प्रपञ्चात्तद्विवेकश्चेन् कुतश्चिदवगम्यते ।
प्रपञ्चाधिगमस्तत्र न भवत्येव सर्वथा ॥ ११२७ ॥
तद्विवेकवदन्यच्च तद्रूपञ्चेन्न वेद्यते ।
सर्वथा तदनिर्भासं न प्रधानाद्विभिद्यते ॥ ११२८ ॥
सत्यब्रह्मात्मना वित्तिः तस्य नो चेद्विवेकतः ।
विदिताविदितात्माऽयं तत्र भेदोऽस्तु सम्भवी ॥ ११२९ ॥
अमृतत्वञ्च नित्यञ्चेन तस्य ब्रह्माविवेकतः ।
मुमुक्षूणां प्रयासस्य किमन्यत्फलमुच्यताम् ॥ ११३० ॥

१– मत्वे परि– आ०, ब०, प० । २– द्वाद् एवे– आ०, ब०, प० । ३ प्रपञ्चवदेवा ४ ब्रह्मणि ।

संसारस्य निवृत्तिश्चेत् मुक्तौ संसारिता कथम् ? ।
विभ्रमाच्चेत् स एवायं सत्यां मुक्तौ कथं भवेत् ? ॥११३१॥
कथञ्चिदेव सन्नित्यममृतत्वं यदीष्यते ।
नित्यानित्यस्वभावोऽयं भेदो ब्रह्मणि सम्भवेत् ॥११३२॥
एवं बहुप्रभेदस्य सन्निभेदस्य सम्भवे ।
परिणामस्वरूपत्वं तस्य केन निवार्यते ॥११३३॥
सदनेकान्तविद्वेषे न ब्रह्म व्यवतिष्ठते ।
तस्माद्ब्रह्मविलोपीदं सूत्रं व्यासोपवर्णितम् ॥११३४॥

५

अस्तु नः सर्वमनेकान्तात्मकमेव इति निर्धारणे भाष्यकारस्य दूषणम्–"नेति ब्रूमः, निरङ्कुशा ह्यनेकान्ता सर्ववस्तुषु प्रतिजानानस्य निर्धारणस्यापि वस्तुत्वाविशेषात् स्यादस्ति स्यान्नास्ति इत्यादि विकल्पोपनिपातादनिर्धारणात्मकतैव स्यात् ।" [ब्रह्म०शां० २।२।३३] इति, तदपि भवत्येव यदि धर्मिण्येव तस्य निर्धारणवदनिर्धारणमपि । न चैवम्, तत्र निर्धारणस्यैव भावात्, अनिर्धारणं तु धर्मापेक्षया तदभावात्[2], धर्माणाञ्च तैर्[3]विकल्पानां ब्रह्मण्यपि निषेदनात् ।

१०

यच्च तस्येदमपरम् – "एवं सति कथं प्रमाणभूतः सन् तीर्थकरः प्रमाणप्रमेय-प्रमातृप्रमितिषु अनिर्धारितासु उपदेष्टुं शक्नुयात् ?" [ब्रह्म० शां० २।२।३३] इति, तदपि न सुन्दरम्, स्वरूपादिना प्रमाणादीनां सत्त्वेनैव निर्धारणात्, तेषां तदनिर्धारणं तु पररूपादिना तेषामभावात् । एवमन्यदपि तस्य दुर्विदग्धविजृम्भितमपासितव्यम् । ततो यदुक्तम्–"अनिर्धारितार्थं शास्त्रं प्रणयन् मत्तोन्मत्तवदनुपादेयवचनः स्यात्" [ब्रह्म० शां० २।२।३३] इति, तत्र कथमनिर्धारितार्थं शास्त्रम् ? प्रकारान्तरेण चेत्, न, तस्याभावात् । तत्प्रकारेण चेत्, कथं तत्प्रणयतो मत्तादिसादृश्यम् ? प्रमाणोपपन्नवस्तुवादिनः तदनुपपत्तेः, अन्यथा वेदोऽपि मत्तादिवदनुपादेयवचनः स्यात्, तेनापि सदसदादिस्वभावं ब्रह्मोपदिशता 'सदेव तत् असदेव वा' इत्यनिर्धारितस्यैव तस्य प्रणयनात् । अथ ब्रह्मणि परमार्थसति न प्रपञ्चो नाम कश्चिदस्ति यद्विवेकस्य तत्र रूपान्तरत्वात् सदेव इत्यनिर्धारितं तद्वेदयतीति चेत्, न तर्ह्यदानीमनेकान्तदोषोऽपि, तस्यापि प्रपञ्चान्तर्गतत्वेन तदभावे सम्भवाभावात्[4], स्थूलमतिनिर्बन्धेन ।

१५

२०

२५

---

१ ब्रह्म भा०, ब०, प० । २ धर्मिणि । ३ निर्धारणाभावात् । ४ निर्धारणशून्यानाम् । ५ सत्तया । ६ सत्ता-प्रमाणात् । ७ "सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सर्वमभवत् । "–तै० उ० २ । ६ । "सच्च मूर्तं त्यच्चामूर्तमभवत् निरुक्तं नाम निरुक्तस्य समानासमान-व्यक्तिभेदेषु देशकालव्यक्तिविशिष्टतयैवं तदिदमुपलभ्यमानं तद्विपरीतं निलयनं गोहमाश्वादौ अनिलयनं तद्विपरीतं विज्ञानं चेतनमविज्ञानं तद्विपरीतमचेतनं पार्थिवादि सत्यं अनृतं च तद्विपरीतम् । "–तै० उ० शां० भा० २ । ६ । "सदसच्चाहमर्जुन"–भ० गी० ९ । १९ । ८ स्यान्तर्गतत्वात् भा०, ब० । ९ –तं च तद्भ– भा०, ब०, प० ।

स्यान्मतम्[1]—सति सामान्ये सम्भवत्येकत्र भेदः तस्यैव एकार्थत्वात्। न च तदस्ति; व्यक्तिभ्योऽर्थान्तरत्वेन अप्रतिपत्तेः। न च ता एव सामान्यम्; अनन्वितत्वात्। कथञ्चिदन्वयकल्पनायाम्; अनवस्थोपनिपातात्। तदभावे[2] कथं धर्मिधर्मादिव्यवस्था? सामान्यरूप एव हि शब्दो धर्मी तस्य साध्यसाधनधर्मसाधारणत्वात्। धर्मोऽपि साध्यमनित्यत्वं तद्रूपमेव, तस्य पक्षसपक्षसाधारणत्वात्। अन्यथा तदंशव्याप्तेरभावप्रसङ्गात्। हेतुधर्मोऽपि कृतकत्वादिः तत्साधारण एव, अन्यथा[3] अनैकान्तिकत्वप्रसङ्गात्; इत्यपि न मन्तव्यम्; व्यावृत्तिभेदतस्तदुपपत्तेः। अशब्दव्यावृत्तिः शब्दो धर्मी, धर्मश्च अकृतकत्वादिव्यावृत्तिः कृतकत्वादिरिति पर्याप्तमेतावता किं तदर्थेन वस्तुभूतसामान्यपरिकल्पनेन? परिकल्पितेऽपि तस्मिन् तद्भेदस्य अवश्याभ्युपगमनीयत्वात्, अन्यथा भेदव्यवहारप्रच्युतेः। सामानाधिकरण्यादिव्यवहारस्यापि तत एवोपपत्तेः। तद्भेदस्य[4] वस्तुसत्त्वेऽन्वितत्वे च सामान्यस्यैव शब्दान्तरमिदमित्यपि न मन्तव्यम्; कल्पनयैव तस्य तद्रूपत्वात् न वस्तुतः। कल्पनैवं[5] हीयम् अवस्तुसन्तमपि वस्तुसन्तमिव अनन्वितमप्यन्वितमिव अभिन्नमपि भिन्नमिव स्ववासनाप्रकृतेरुपदर्शयन्ती धर्मिधर्मभावादिसामान्यप्रयोजनमुपकल्पयति। तदुक्तम्—

"संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः।
रूपमेकमनेकञ्च तेषु बुद्धेरुपप्लवः॥" [प्र०वा० ३।८६] इति।

[6]तन्नैकत्र भेदसम्भवः तस्यैवैकस्याभावादिति, तत्राह—

अन्वयोऽन्यव्यवच्छेदो व्यतिरेकः स्वलक्षणम् ॥१२६॥
ततः सर्वा व्यवस्थेति नृत्येत्काको मयूरवत्। इति।

अन्वयः अनुगमः खण्डादिषु गौरिति तन्तुषु अयं पट इति रुचकादौ तदेवेदं सुवर्णमिति रूपः, सोऽन्यस्य कर्कादेः वीरणादेः मृदादेश्च **व्यवच्छेद** एव नापरः। तथा सर्वस्मात् सजातीयात् विजातीयाच्च व्यतिरिच्यते भिद्यते इति **व्यतिरेकः** स एव **स्वलक्षणम्** न पूर्वोक्तम्। **ततः** तस्मादन्वयात् स्वलक्षणाच्च **सर्वा** निरवशेषा **व्यवस्था** स्वाभिमतवस्तुव्यवस्थितिः **इति** एवं **नृत्येत्**[11] नृत्यं कुर्यात् काक इव **काकः** सौगतः तद्व्यवस्थात्मनि नृत्यक्रियायामुपायात्मनः पिच्छभारस्याभावात् मयूर इव **मयूरो** जैनः तत्र तस्य [12]तद्भारस्य निवेदनात् स इव तद्वदिति। सौगतस्यापि उक्त एव तत्रोपायः अन्वयः स्वलक्षणञ्च तत्कथमेतदिति चेत्? न तावत् स्वलक्षणं तत्रोपायः; तस्य—

---

१ बौद्धस्य। २ "सौगत एव परेणोपाद्यमानं दूषणमनुवदति"—ता० टी०। ३ सामान्याभावे। ४ सपक्षसाधारण एव। ५ "पक्षमात्रे कृतकत्वास्वीकारप्रकारेण असाधारणानैकान्तिकत्वम्"—ता० टि०। ६— त्वाव्यावृत्तेः कृ— आ०, ब०, प०। ७ "अनित्य· शब्द इति"—ता० टि०। ८ अतद्भेदस्य। ९— नैव ह्यवस्तु आ०,ब०,प०। द्रष्टव्यम्— प्र०वा०स्ववृ० ३।७८९३। १० "भेदानां बहुभेदानां तत्रैकस्मिन्नयोगत।" —प्र० वा० ३।८९। ११ नृत्यं कु— आ०, ब०, प०। १२ तद्भावस्य आ०, ब०, प०।

व्यतिरेकैकरूपं तेनाप्यन्यस्माद् विविच्यते ।
तथा स्वतोऽपि नीरूपं तदुपाय कचित्कथम् ? ॥११३५॥
अन्यस्मादेव तस्यास्ति विवेको न स्वतो यदि ।
कथ तयैकरूपत्वमविवेकविवेकयोः ॥११३६॥
अविवेकविवेकाभ्यां तदभेदस्य सम्भवे ।
तदेव वस्तु सामान्यं तत्कर्य तन्निपिध्यताम् ॥११३७॥
न च तत्कल्पितं रूपं स्वालक्षण्यविरोधत[1] ।
असदूप्यं कल्पनामिर्यद्धस्यतेऽन्यैः स्वलक्षणम् ॥११३८॥
वस्तुसामान्यसंसिद्धे[2] तद्बोधेनेह बिभ्यता ।
स्वरूपतोऽपि व्यावृत्तमेकान्तेन तदिष्यताम् ॥११३९॥
स्वलक्षणे सासत्येवमन्यव्यावृत्तय क ताः ।
न हि व्यावृत्तकामाधे सन्ति सास्तदुपाश्रयाः ॥११४०॥
तदभावे कथन्नाम कल्प्यन्तां तन्निबन्धना[3] ।
जातयो बहुधा भिन्ना यतः सूक्तमिदं यचः ॥११४१॥
"ततो यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥" [प्र०वा० ३।४०] इति ।
जात्यभावे कथञ्च स्यात् धर्मिधर्मादिसम्भवः ।
अनुमानव्यवस्था ते यतस्तेनावकल्प्यताम् ॥११४३॥

सत्यपि स्वलक्षणस्य व्यावृत्तिभेदे कथं तन्निबन्धनस्य सामान्याकारस्य विकल्पस्यापि प्रतिपत्तिः[4] ? कथञ्च न स्यात् ? तस्यावस्तुत्वेन सर्वकारणत्वात् । अकारणस्यापि स्वहेतुजनितात् शक्ति विशेषात् प्रतिपत्तौ कैमर्थक्यात्[5] वस्तुन्यपि स्वज्ञानं प्रति कारणत्वपरिकल्पनम्, तस्यापि ततः शक्तिविशेषादेव तादात्म्यात् प्रतिपत्तिसम्भवात् ? सर्वस्यापि वस्तुनः तत एव प्रतिपत्तिः स्यात्-कारणत्वाविशेषादिति चेत् , अवस्तुनोऽपि स्यात् , तथा च शब्दविकल्पेनैव [6]शब्दत्ववत् कृतकत्वादिकमपि प्रतीयता निरवशेषजातिविशेषाधिष्ठानतया शब्दधर्मिणः 'प्रतिपत्तेः हेतुसाध्य-विकल्पानां कथन्न कैमर्थक्यम्[7] ? यत इदं सुभाषितम्—

"ततो यो येन धर्मेण विशेषः सम्प्रतीयते ।
न स शक्यस्ततोऽन्येन तेन भिन्ना व्यवस्थिति ॥" [प्र०वा० ३।४१] इति ।

शक्तिनियमादकारणस्यापि तस्य नियतस्यैव प्रतिपत्तिः न सर्वस्येत्यपि समाधान न वस्तुप्रति

---

१ स्वरूपम् । २ स्वलक्षणस्य । ३ तद्बोधेनेह आ०, ब०, प० । ४ व्यावृत्त एव व्यावृत्तक । ५ कथं साधु कल्पनां तन्नि- आ०, ब०, प० । ६ विकल्पज्ञानाऽक्षरत्वात् । ७ शब्दवत् आ०, ब०, प० । ८- पत्तिहेतुसा- आ०, ब०, प० । ९ कैमर्थक्यमिति प्रश्नः ।

लक्षणे च प्रमाणमिति चेत् ; न; तत्रापि सम्भवक्रमाभ्यां वस्तुभूतानेकधर्माधिष्ठानस्यैव भावस्य प्रत्यवभासनात् न निरंशक्षणिकपरमाणुरूपस्य नाप्यवस्तुसामान्यात्मनः ।

भवत्वेवम्, तथापि तदेव तत्र प्रमाणमिति चेत्; आह—**'प्रामाण्यं नागृहीतेऽर्थे'** इति । प्रमाणभावः **प्रामाण्यम्** अविसंवादित्वम्, अन्यद्वा प्रत्यक्षादेः **न** सम्भवति । कस्मिन् ? **अर्थे** स्वलक्षणादौ । कथम्भूते ? **अगृहीते** अप्रतिपन्ने । असम्बन्धेन प्रामाण्यस्य अत्रैव निराकरणादिति भावः । ततः किम् ? इत्याह—**'प्रत्यक्ष'** इत्यादि । व्याख्यानमत्र पूर्ववत् ।

भवेदपि प्रत्यक्षस्य प्रामाण्यं तत्रार्थप्रतिभासात्, नानुमानस्य तत्रावस्तुविषयत्वेन तदभावात् । तत्रापि खण्डादयोऽर्था एव अतत्कार्यकारिकर्कादिव्यावृत्तिविशिष्टाः प्रतिभासन्ते, त एव च तेषां सामान्यं नापरमेकं गोत्वादि तव्यवहारस्य तादृगर्थगोचरैरेव ज्ञानाभिधानैः प्रवर्तमानत्वेन मिथ्यार्थत्वात् । तदुक्तम्—

"[3]अर्थज्ञाने निविष्टास्ते (अर्था ज्ञाननिविष्टास्ते) यतो व्यावृत्तिरूपिणः ।
तेनाभिन्ना इवाभान्ति व्यावृत्ताः पुनरन्यतः ॥
त एव तेषां सामान्यं समानाकारगोचरैः ।
ज्ञानाभिधानैर्मिथ्यार्थो व्यवहारः प्रतायते ॥" [प्र० वा० ३। ७७-७८]

इति चेत् ; कथं पुनर्भेदस्य तत्स्वभावस्यापरामर्शे तेषां प्रतिभासनम् ? 'त एव प्रतिभासन्ते न प्रतिभासन्ते च' इति व्याघातात् । भेदरूपेणैवाप्रतिभासनं न रूपान्तरेणेति चेत् ; न ; निरंशवस्तुवादिनामेकत्र रूपभेदाभावात् । कल्पनया तद्भेदे कल्पितमेव रूपान्तरं तत्प्रतिभासिसामान्यं नार्थस्वरूपम्, इत्ययुक्तमुक्तम्—**'त एव तेषां सामान्यम्'** इति । कथञ्चैवं **"पररूपं स्वरूपेण"** [प्र०वा० ३।७०] इत्यादिना संवृतिस्वरूपमेव सामान्यम् भावनानात्वप्रच्छादनमिति पूर्वं प्रतिपाद्य इदानीमन्यथावचनमुपपन्नं विस्मरणशीलतापत्तेः ? तन्न ततोऽर्थप्रतिभासनम्, अप्रतिभासिते च न तस्य प्रामाण्यम् । तदाह—**'प्रामाण्यम् नागृहीतेऽर्थे'** इति । यदि स्यात् ; नित्यत्वाद्यनुमानस्यापि किन्न स्यात् ? तस्यें तत्र प्रतिबन्धस्याप्यभावादिति चेत् ; क्षणक्षयाद्यनुमानस्य कुतस्तत्र प्रतिबन्धः ? प्रत्यक्षादिति चेत् ; न ; परकल्पितस्य तस्यैवाप्रतिपत्तेः । प्रतिपत्तावपि ततो नार्थवत् तत्कार्यस्यानुमानस्य परिज्ञानम् ; स्वयं तदाकारत्वेन सविकल्पकापत्तेः । न च उभयोरपरिज्ञाने तत्सम्बन्धस्य परिज्ञानम्, **"द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात्"** [प्र० वार्तिकाल० १।१] इति स्वयमेवाभिधानात् । विकल्पादपि न तत एव तस्य प्रतिपत्तिः ; तेन स्वग्रहणेऽपि अर्थस्याग्रहणात् । विकल्पान्तरेणापि स्वांशमात्रपर्यवसायित्वेन तव्यतिरिक्तस्य तस्याग्रहणात् । न च तद्[10] अनुमानादन्यदेव; तृतीयस्यापि

---

१ "विषयविषयिभावसम्बन्धाभावेन" —ता०टि० । २ "न हीतरप्रतिपन्नयोस्तयोस्तद्विषयत्वमित्यादिना"—ता० टि० । ३ "अर्था ज्ञाननिविष्टास्ते यतो व्यावृत्तरूपकाः"—प्र० वा० । ४ "अनुमानात्"—ता०टि० । ५ नित्यत्वाद्यनुमानस्य । ६ नित्यत्वादौ । ७ क्षणक्षयादौ । ८ क्षणक्षयाद्यनुमानत एव । ९ प्रतिबन्धस्य । १० विकल्पान्तरम् ।

प्रमाणस्य प्रसङ्गात्। अनुमानमेव अर्थक्रियाप्राप्तिलिङ्गमिति चेत्, न, तस्यापि तत्रागृहीते प्रतिबन्धात् प्रामाण्ये 'कुतस्तत्र प्रतिबन्धः' इत्यनुपरमात् अनवस्थापत्तेश्च।

तदनेन 'मणिप्रभामणिज्ञानस्यापि मणौ प्रतिबन्धविचन्तयितव्यः। तत इदमपि निर्विषयमेव परस्य भाषितम्—

"लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि। ५
प्रतिबन्धात्तदाभासशून्ययोरप्यवञ्चनम्॥" [प्र० वा० २।८२] इति।

कीदृशो वा सोऽर्थो यत्र तस्य प्रतिबन्धः, यतोऽप्यर्थक्रियावाप्तिः? एकान्तनिरंशक्षणिकपरमाणुलक्षण इति चेत्, न, तादृशस्य मणेरप्यप्रतिपत्तेः। तत इदमशक्योपपादनमेव—

"मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति॥ १०
यथा तथा[ऽ]यथार्थत्वेऽप्यनुमानतदाभयोः।
अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितम्॥" [प्र०वा० २।५७ ५८] इति।

दृष्टान्ते दार्ष्टान्तिके च परकल्पितस्यार्थस्याभावे तदर्थक्रियाया एवासम्भवात् 'विशेषोऽर्थक्रियां प्रति' इति, 'अर्थक्रियानुरोधेन' इति च वक्तुमशक्यत्वात्।

नन्वेवंविचारे नानुमानं न च तदभ्यासज प्रत्यक्षमिति सकलव्यवहारविलोपः, ततो १५ व्यवहारं परिपालयता तत्प्रामाण्यमकृतविचारमेवाभ्युपगन्तव्यमिति चेत्, न, नित्यत्वाद्यनुमानस्यापि तथा तदभ्युपगमप्रसङ्गात् व्यवहारस्य प्रायशः सविषयत्वेनोपपत्तेः। तदाह—'प्रत्यक्षेतरगोचरौ' प्रत्यक्षादितरदनुमानं तस्य गोचरौ विषयौ कथं न प्रकल्प्येते? प्रकल्प्येते एव, कथमित्यस्य प्रक्रान्तेन नघा सम्बन्धात्। कौ? तद्गोचरौ कथं न प्रकल्प्येते भेदाभेदौ। भेदश्च, उपलक्षणमिदं निरंशत्वादेः, अभेदश्च, इदमप्युपलक्षणं व्यापित्वादेः, २० तौ इति। अभेदस्यैव तद्गोचरत्वप्रकल्पना वक्तव्या न भेदस्य तत्र सौगतस्यापि (स्यादि-) प्रतिपत्तेरिति चेत्, न, दृष्टान्तार्थत्वात् तद्वचनस्य। यथा भेदस्याकृतविचारमेव तद्गोचरत्वं तद्वदभेदस्यापि वक्तव्यमिति। कैः पुनस्तौ तथा कथम् प्रकल्प्येते? इत्याह— आत्मविकल्पकैः। आत्मानं कूटस्थनित्यमीश्वरादिकं ये विशेषेण कल्पयन्ति नैयायिकादयः तैरिति। ततो नित्यत्वाद्यनुमानाभ्युपगमेन क्षणिकत्वाद्यनुमानस्यैव प्रामाण्यं व्यवस्थापयता २५ वस्तुग्राहिस्व तस्याभ्युपगन्तव्यम्। तथा च सिद्धं तद्वदेव सम्भवक्रमानेकधर्माधिष्ठानभावविकल्पस्यापि वस्तुविषयत्वं निर्बाधत्वात्, अन्यथाऽर्थवेदिम संवेदनस्यैवाप्रतिपत्तेरिति स्थितं सामान्यविशेषात्मकत्वं प्रत्यक्षविषयस्य।

साम्प्रतमुक्तमेवार्थमनुग्रहपरत्वात् क्षिप्राणामनुस्मरणाय श्लोकानां विंशत्या

---

१ –लिङ्गमिति आ०, ब०, प०। २ –भासयोर्न –सा०।

सङ्गृह्य कथयन्नाह–

उत्पादविगमध्रौव्यद्रव्यपर्यायसङ्ग्रहम् ॥१२८॥
सङ्क्षिप्तप्रतिभासेन स्याद्धिन्नं सविकल्पकम्। इति।

सद् अर्थक्रियासमर्थमिदं धर्मि, तत्रेदं साध्यम्–**उत्पादविगमध्रौव्याण्येव द्रव्यम्** "उप्पायट्ठिदिभंगा हवंति दव्वियलक्खणं एयं।" [सन्मति० १।१२] इति वचनात्, तच्च **पर्यायाश्च** तेषां **सङ्ग्रहः** परस्परतादात्म्येन स्वीकारो यस्मिन् तत्तथोक्तम्। कुत एतत्? इत्यत्राह–**सविकल्पकम्** सांशं यतः। निरंशत्वे हि तत्सङ्ग्रहत्वं सतो न स्यात्। सविकल्पकत्वे हेतुमाह–**स्यात्** कथञ्चिद् **भिन्नं** भिन्नतया प्रतिपन्नम्। केन? **भिन्नप्रतिभासेन**।

यद्येवं भिन्नमेव तदस्तु नाभिन्नमित्यत्राह–

अभिन्नप्रतिभासेन स्यादभिन्नम् [स्वलक्षणम्] ॥१२९॥ इति।

सुबोधमिदम्। सामान्यमेव तादृशमिति चेत्; आह–**'स्वलक्षणम्'** इति।

कथं पुनः परस्परविरुद्धभेदाभेदधर्माधिष्ठानमेकं वस्त्विति चेत्? आह–

विरुद्धधर्माध्यासेन स्याद्विरुद्धं न सर्वथा। इति।

एतदेव कुत इत्याह–

असम्भवदतादात्म्यपरिणामप्रतिष्ठितम् ॥१३०॥

असम्भवंश्चासावतादात्म्यपरिणामश्च **असम्भवदतादात्म्यपरिणामः** सम्भवत्तादात्म्यपरिणाम इत्यर्थः। तत्र **प्रतिष्ठितं** प्रमाणेन पूर्वं स्थापितं यत इति। अनेन भेदाभेदयोरेकत्र समवाय एव न तादात्म्यमिति प्रतिक्षिप्तम्।

पुनरपि तद्विशेषणमाह–

समानार्थपरावृत्तमसमानसमन्वितम्। इति।

समानार्थाः शक्तिसादृश्येन तुल्याः मृत्पिण्डस्य दण्डादयः तेभ्यः **परावृत्तम्** पसृतम्। अनेन साङ्ख्यकल्पितं वस्तुसाङ्कर्यं प्रतिक्षिप्तम्। **असमानो** विसदृशपरिणामः तेन **समन्वितं** सङ्गतम्। अनेनापि 'सर्वमेकान्तेनाभिन्नम्' इति ब्रह्मवादिमतं प्रतिध्वस्तम्। कुतः पुनः तदित्थमित्याह–

[प्रत्यक्षं बहिरन्तश्च परोक्षं स्वप्रदेशतः।] ॥१३०॥

प्रत्यक्षं प्रत्यक्षवेद्यं यतः। क? **'बहिरन्तश्च'** इति। यद्येवं प्रत्यक्षत एव तथा तस्य प्रतिपत्तेः, प्रमाणान्तरस्य वैफल्यमिति चेत्; आह–**'परोक्षं स्वप्रदेशतः'** इति। ततो न तद्वैफल्यमिति भावः। कथं पुनरेकमेव स्वलक्षणं तथा प्रत्यक्षं परोक्षञ्चेति चेत्? अत्राह–

सुनिश्चितमनेकान्तमनिश्चितपरापरैः। इति।

---

१ –संगा भवन्तिद –ता०। २ अनेकभेदा–आ०, ब०, प०।

अनेकान्तम् अनेकस्वभावं वस्तु **सुनिश्चितं** सुविवेचितं पूर्वमेव न पुनर्विचार्यते। कैस्तदनेकान्तम् ? **असंनिश्चितैः** अप्रत्यक्षविषयैः परैरुत्तरकालभाविभि **अपरैश्च** पूर्वकालभाविभिः प्रवेदैः। ततः प्रत्यक्षं परेभ्यश्च तत्त्वैरिति।

स्यान्मतम्–उपादानोपादेयक्षणसन्तानादन्यत् क्रमानेकान्तं परमाणुसमुदायादन्यत् स्थादेरवयवान्तरक्रमानेकान्तमपि दुर्विवेचममेवेति तत्राह– ५

सन्तानसमुदायादिशब्दमात्रविशेषतः ॥१३१॥ इति।

सन्तानसमुदाययोः[1] **आदिशब्दादवयव्यादेश्च** योगकल्पितस्य **शब्द** एव **तन्मात्रम्** तेनैव **विशेषोऽनेकान्तात्** नार्थतः, अनेकान्तस्यैव सन्तानादित्वात् ततः।

[तथा सुनिश्चितासंभवद्बाधकत्वात् [तु] तत्त्वतो विप्रशंसतः।]

सः तथा **सुनिश्चितः तत्त्वतो** वस्तुतः **विप्रशंसतः** प्रशंसनमुपपादनं प्रशंसा १०
तद्भावो विप्रशंसम्, अर्थाभावेऽव्ययीभावात् ततः इति।

एतदुक्तं भवति–एकत्वाभावे यथा दधिक्षणस्य तदुत्तरक्षणेनैकः सन्तानः तथा किन्न करभक्षणेनापि, यतो दधिभक्षणे चोदितः करभेऽपि न प्रवर्तेत ? सँस्यात्तत्कार्यत्वान्नेति चेत्, इतरस्य कुतस्तत्त्वम् ? तदनन्तरं नियमेन भावादिति चेत्, न, तस्यापि तथैव भावात्। अनुपादेयत्वान्नेति चेत्, इतरस्य कुतस्तदुपादेयत्वम् ? सादृश्यादिति चेत्, न, योगीतरज्ञानयोरप्येकसन्तानत्वापत्तेः, वस्तुतस्तस्याभावार्थं। कल्पनारोपितस्य करभक्षणेऽप्यनिवारणात्। तन्नैकत्वाभावे सन्तानः।

नाप्यवयवी, तस्याप्यवयवानामन्योन्याभेदरूपत्वेन तद्भावऽनुपपत्तेः। नेष्यते समुदाय एवावयवी नाभेद इति चेत्, सोऽपि यद्येकव्यूहगतानामन्योन्यं तथा किन्न व्यूहान्तरगतैरपि, यतो घटमानयेत्युक्ते पटेऽपि न प्रवर्तेत ? शक्तिसाधर्म्याभावादिति चेत्, विवक्षितानामपि तदेकरूपत्वे कथं भेदः तदन्यतमवत् ? वैधर्म्यसमापि भावादिति चेत्, साधर्म्यवैधर्म्ययोरिव किमवयवानामेव कथञ्चिद्भेदो यतः स एवावयवी न भवेत् ? तन्नाभेदमनिच्छतो भिन्नेषु साधर्म्यस्यापि सम्भवो यतो व्यूहनियमः। तदुक्तम्–

"सन्तानः समुदायश्च साधर्म्यञ्च निरङ्कुशं।
प्रेत्यभावश्च तत्सर्वं न स्यादेकत्वनिह्नवे ॥" [आप्तमी० श्लो० २९] इति। २१

यच्च मतम्–उपादेयेनैवोपादानरूपेकसन्तानत्वं नान्येनेति, तत्रोपादानमपि न प्रत्यभिज्ञानादन्यत् शक्यसमर्पणम्। ततोऽपि न भिन्नार्थात् नापि सादृश्यार्थात्, अति प्रसङ्गात्, अपि तु कथञ्चिदवस्तुभूताभेदविषयादेव। ततः तत्समर्पणादप्यनेकान्तमेव सुनिश्चितमित्यभेदमाह–

१–ता०प्रि०-प्रा०, ब०, प०। २ करभस्यत्व। ३ 'परमाणो सादृश्यस्य योगैरकल्पितस्य शब्द एवतन्मात्रम्' –आ०प्रि०। ४ –स्यमत्वप्रसङ्गे आ०, ब०, प०।

प्रत्यभिज्ञाविशेषात्तदुपादानं प्रकल्पयेत् ॥१३२॥
अन्योन्यात्मपरावृत्तभेदाभेदावधारणात् ।
मिथ्याप्रत्यवमर्शेभ्यो विशिष्टात् परमार्थतः ॥१३३॥ इति ।

तत् विवक्षितं वस्तु **उपादानम्** उत्तरस्य कार्यस्य सजातीयं कारणं **प्रकल्पयेत्** समर्थयेत् सौगतो यतः, तस्माच्च सुनिश्चितमनेकान्तमिति । कुतस्तत्प्रकल्पयेत ? प्रत्यभिज्ञैवान्यस्मात् विशिष्यमाणत्वात् विशेषस्तस्मात् **प्रत्यभिज्ञाविशेषात्** । इदमेवाह- **मिथ्याप्रत्यवमर्शेभ्यो** लूनपुनर्जातनखकेशाद्येकत्वप्रत्यभिज्ञानेभ्यः, उपलक्षणमिदम्, तेन सादृश्यप्रत्यभिज्ञानेभ्यश्च **विशिष्टात्** तत्त्वतः **परमार्थतः** । कुतस्तदित्थम् ? **अन्योन्यमात्मानौ परावृत्तौ** च यौ **भेदाभेदौ** तयोरवधारणात् निश्चयनात् ।

तदिति स्मरणम् इदमिति च प्रत्यक्षम्, न ताभ्यामन्यत् प्रत्यभिज्ञानं यतस्तयोरवधारणमिति चेत् ? अत्राह-

तथा प्रतीतिमुल्लङ्घ्य यथास्वं स्वयमस्थितेः ।
नानैकान्तग्रहग्रस्ता नान्योन्यमतिशेरते ॥१३४॥ इति ।

नानाऽनेकरूपाः क्षणिकाद्येकान्ता **नानैकान्ताः** त एव **ग्रहाः** व्यामोहनिबन्धनत्वात् **तैर्ग्रस्ता** वशीकृताः सौगतादयो **नान्योन्यं** न परस्परम् **अतिशेरते** अतिशयं लभन्ते । कस्मात् ? **यथास्वं** स्वमतानतिक्रमेण **स्वयम्** आत्मना **अस्थितेः** अवस्थानाभावात् । किं कृत्वा अस्थितेः ? **तथा** तेन तदिदमित्युभयोल्लेखाभेदप्रकारेण वा या **प्रतीतिस्तामुल्लङ्घ्य** प्रतिक्षिप्य । तथा हि-

यथा न प्रत्यभिज्ञानं प्रत्याकारं विभेदनात् ।
तद्वत् प्रत्यणु निर्भेदात् प्रत्यक्षमपि नो भवेत् ॥ ११४३॥
अनुमानञ्च तत्पूर्वं प्रत्यक्षासम्भवे कथम् ? ।
तदृत्यये कुतस्तत्त्वं सौगताः साधयन्त्यमी ॥ ११४४॥
अद्वैतशून्यवादौ तु प्रागेव प्रतिभापितौ ।
अनेकाकारमेकं तत् प्रत्यक्षं युक्तकल्पनम् ॥११४५॥
तदिदं द्वितयोल्लेखं तद्वत् प्रत्यवमर्शनम् ।
भेदेतरात्मनोऽर्थस्य ततः किन्नावधारणम् ॥ ११४६ ॥
तत्प्रतीत्यपलापे तु तदन्यार्थाप्रवेदनात् ।
एकान्तवादिनः सर्वे नान्योन्यमतिशेरते ॥ ११४७ ॥

भवतु तत्र सुनिश्चितमनेकान्तं यत्र पूर्ववदुत्तरस्यापि दर्शनम्, प्रत्यभिज्ञानस्य

---

१ -भयोर्लेखामे-आ०, ब०, प० । २ विभेदत' आ०, ब०, प० ।

तस्मिन्नयहेतोस्तत्र सम्भवात्, यत्र तु पूर्वस्यैव दर्शनं न परस्य तत्र कथं २ येत् ? न ह्यप्रतिपन्नस्य पूर्वाभेदेनान्यथा वा प्रत्यभिज्ञानं सम्भवतीति चेत्, अत्राह–

शब्दादेरुपलब्धस्य विरुद्धपरिणामिनः ।
पश्चादनुपलम्भेऽपि युक्तोपादानवद्गतिः ॥१३५॥ इति ।

शब्दस्य आदिशब्दाद् विद्युदादेश्च उपलब्धस्य मध्यावस्थायां प्रत्यक्षस्य विरुद्ध- ५
परिणामिनो विरुद्धो दृश्याददृश्यः स एव परिणामः स विद्यतेऽस्येति विरुद्धपरिणामी तस्य । पश्चाद् उत्तरकालम् अनुपलम्भेऽपि अदर्शनेऽपि युक्ता उपपन्ना गतिरनुमानिकीति। निदर्शनमुपादानस्येव उपादानवदिति ।

एतदुक्तं भवति शब्दादेरुत्तरपरिणामस्यायोग्यत्वेनादर्शनेऽपि अनुमानतोऽवगमात् कथम् प्रत्यभिज्ञान यतस्तत्रापि मुनिश्चितमनेकान्तं न भवेदिति युक्तम्–उपादानस्योपलम्भाच्छब्दादेरनु- १०
मानम् तस्य निरुपादानस्यायोगात्, नोपादेयस्यैव, कारणस्य कार्यवस्त्वनियमाभावादिति चेत्, अत्राह–

तस्याहष्टमुपादानमदृष्टस्य न तत्पुनः ।
अवश्यं सहकारीति विपर्यस्तमकारणम् ॥१३६॥ इति ।

तस्य उपलब्धस्य शब्दादेः अदृष्टम् अनुपलब्धम् उपादान पूर्वशब्दाद्युपादानम् अदृष्टस्य उत्तरतत्परिणामस्य तत् शब्दादि पुनरिति वितर्के न उपादानम् इति एवं सौगतेन १५
विपर्यस्त वैपरीत्य नीतम् शब्दादिकमवस्तुरूपमिति यावत्। अत्र निमित्तम्–अकारणमजनकं यत इति । न हि अकारणस्य वस्तुत्वं व्योमकमलवत् । सजातीयमकुर्वतोऽपि विजातीयस्य योगिज्ञानादेः करणात् कथमकारणत्वं तस्येति चेत् ? आह–अवश्य नियमेन सहकारि योगिज्ञानादिकार्यसचिवं नेति सम्बन्धः, सजातीयमतन्वतो रूपादेरिव तदयोगात्, अन्यथा तस्यापि कदाचित् तदेव स्यात् न सजातीयोपादानत्वमित्यसङ्गतमिदं भवेत्–"रूपादे रसतो २०
गति"[प्र०वा० ३।८] इति, तस्यासन्तानितस्य रसकाले सम्भवाभावात् । ततः सजातीयवद् विजातीयेऽपि तस्याकारणत्वादवस्तुत्वमापतत् तत्कारणपरम्परामप्यवस्तुभूतामुपकल्पयेत् । न चैवम्, अतस्तस्योभयत्रापि कारणत्वादुपपन्ना तस्मादुपादानवदुपादेयस्यापि प्रतिपत्तिः । कथमेवं कार्यस्वभावानुपलब्धिभेदेन त्रिविधमेव लिङ्गं कारणस्यापि भिन्नत्वात् ? तस्य स्वभावहेतावन्तर्भावादिति चेत्, न, साध्यादर्थान्तरत्वेन स्वभावहेतुत्वानुपपत्तेः । तथाविधस्यापि तत्साधर्म्यात् २५
तत्त्वमेवविरुद्धमेव । नैरपेक्ष्यञ्च तस्य तत्साधर्म्यम् । प्रसिद्धं हि कृतकत्वादेस्तद्धेतोरनित्यत्वादौ नैरपेक्ष्यम्, तस्य तन्मात्रानुबन्धित्वात्, तथा कारणस्याप्यन्त्यक्षणप्राप्तस्य कार्ये तस्यापि तन्मात्रा-

---

१ कथं सम्भवाभ्य–आ०, ब० प०। २ "मुनिश्चितमनेकान्तमित्यत्रापि सम्बन्धः।"–ता० टि०। ३ मनुष्य मानि आ०, ब०, प०। ४ अनुमाननिति सम्बन्धः। ५ –स्तर्वं पूर्व–आ०, ब०, प०। ६ अवश्यम् तत्–आ०, ब०, प०। ७ तदयोगितायोगात्। ८ –वन्तभाव इति आ०, ब०, प०। ९ तत्त्वमपि विरु–आ०, ब०, प०। १० 'नैरपेक्ष्यम्' इत्यन्तः।

नुबन्धित्वाविशेषादिति चेन्; किमिदं तस्य तन्मात्रानुबन्धित्वम् ? न सहभावनियमः; पश्चादेव भावात् । स्वकालेऽवश्यम्भाव इति चेन्; न, कार्यहेतोरपि तद्धेतुत्वप्रसङ्गात् । न हि तस्मिन्नपि सति स्वकालेनावश्यम्भावः कारणस्य, कार्यहेतोरेवाभावप्रसङ्गात् । तदायत्तेः स तस्य नेति चेत्; भाभूत् तथापि तन्मात्रानुबन्धिनस्तस्य प्रत्यायने नैरपेक्ष्यस्य कृतकत्वादिसाधर्म्यस्याविशे-
५ षात्, तथा चैकः स्वभावहेतुः स्यान्नापरः, अनुपलब्धेरपि तद्विशेषत्वेनाभ्यनुज्ञानात् । ततो यथा तत्साधर्म्येऽपि कार्यस्य ततो भेद एव साध्यार्थान्तरत्वात् तथा कारणस्यापि । ततो निराकृतमेतत्--

"हेतुना यः समर्थेन कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः ॥" [प्र०वा० ३।६] इति ।

१० एवं सति सङ्कराव्याघात इति चेन्; भवतु परस्यैवायं दोषः । न दोषः,तस्य स्वभावान्तर्भावाभावेऽपि कार्यहेतावन्तर्भावात्, कारणमप्यवश्यम्भावि कार्यं कार्यान्न विशिष्यते इत्यभ्युपगमादिति चेन, एवमपि कार्यमेवैको हेतुर्भवेन् स्वभावस्यावश्यम्भाविसाध्यस्यैव तत्कार्यतापत्तेः[1] । तद्भेदे कथं तत्कार्यतेति चेन्?साधनता कथम् ?भेदकल्पनाच्चेन् ;न; तत एव तत्कार्यत्वस्याप्युपपत्तेः । तादात्म्यादेव गमकत्वे किं तत्कार्यत्वेनेति चेन् ? न; तत एव गमकत्वे किं
१५ तादात्म्येनेत्यप्युपनिपातात्, प्रत्युत तत्कार्यत्वमेवात्रोपपन्नकल्पनम्, साध्यसाधनभावभेदानुकूलत्वात्, न तादात्म्यं विपर्ययात् । तन्नायमत्र परिहार इति लिङ्गसङ्ख्याविरोधि चतुर्थमेव तल्लिङ्गमिति कथं न परस्यायं दोषः ? निगमयन्नाह--

तदेवं सकलाकारं तत्स्वभावैरपोद्धृतैः ।
निर्विकल्पं विकल्पेन नीतं तत्त्वानुसारिणा ॥१३७॥
२० **समानाधारसामान्यविशेषणविशेष्यताम् ।** इति ।

तत् उक्तलक्षणं स्वलक्षणम्[2] **एवम्** अनेन प्रकारेण **सकलाः** सम्पूर्णाः आकाराः गुणपर्यायलक्षणा यस्य तत् **सकलाकारम् ।** कैस्तर्हि तथेत्याह--तस्यैव **स्वभावाः** स्वधर्माः तैरेव नान्यदीयैः । अस्तु तैस्तत्र समवेतैस्तत्तथेति चेन् ; आह-- **निर्विकल्पम्** तेभ्यस्तस्य पृथक्त्वं विकल्पः तस्मान्निष्क्रान्तम् । कथञ्चित्तदव्यतिरिक्तं तथैव प्रतीतिभावादिति भावः । यदि वा, यैर्मात्मानमाश्रित्य भेदो यच्छाश्रित्याभेद इति यो विकल्पः सौगतादेः तस्मान्निष्क्रान्तम्[3] । प्रत्यक्षतः तत्रात्मभेदस्याप्रतिपत्तौ तथा विकल्पस्यानुपपत्तेः । [4]यदैवं कथं तत्र सामानाधिकरण्यादिकं तस्य भेदोपाश्रयत्वादिति चेन् ? न ; तैरेव तत्स्वभावैः नयबुद्ध्या पृथक्कृतैः तदुपपत्तेः । तदाह--**तत्स्वभावैरपोद्धृतैः** परस्परतो निष्कृष्टैः । केन ? **विकल्पेन**

---

१ तदायत्ते स्वत-आ०, ब०, प० । २ -र्थत्वापत्तेः आ०, ब०, प० । ३ -अगमनेन आ०, ब०, प० २ कैस्तर्हि -आ०, ब०, प० । ५ "यदि न भेदः सामान्यविशेषयोः यैरात्मानमाश्रित्य सामान्यं विशेष इति तेनात्मना भेदस्तदा व्यतिरेक एव ..."-प्र० वा० स्ववृ० ३। १८० । ६ यदैवं आ०, ब०, प० ।

नयापरनामधेयेन नीतं प्रापितम्। कम्? समानाधारम् गौः शुक्लः इत्यादिशब्दप्रवृत्तिनिमित्त-भेदस्यैकमधिकरणम्[1], सामान्यस्य गवां गोत्वमिति, विशेषणं च भेदकं नीलमिति, विशेष्यस्य भेदमुत्पलमिति, तेषां भाव समानाधारसामान्यविशेषणविशेष्यताम्। विकल्पस्यावस्तुविषयत्वेन मिथ्यैव तन्निबन्धनं तन्नयनमिति चेत्? न; तद्वस्तुविषयत्वस्य व्यवस्थापितत्वात्। अत एवोक्तम्-तत्त्वानुसारिणा इति। कथं पुनस्तत्रासतां तेषां तेनाप्योढार इति चेत्? न, प्रमाणतोऽनेकधर्माधिष्ठानतया वस्तुनः प्रतिपत्तौ तदसत्त्वायोगात्। अत एवाह[2]-

'भेदानां बहुभेदानां तत्रैकत्रापि सम्भवात्।'

यद्येवं प्रमाणत एव भेदविषयात् सामानाधिकरण्यादिव्यवहारोपपत्तेः किं तदर्थेन नयकल्पनेनेति चेत्? न, भेदाभेदोपश्लिष्टस्यैव तेन प्रतिपत्तेः अगुणप्रधानभावेन योपेक्षितभेदो गुणप्राधानभावी च भेदः प्रस्तुतव्यवहारोपयोगी, न च तस्य नयादन्यतः प्रतिपत्तिः। न चैवं व्यवहारनयमेव प्रमाणम्, आपोद्धारिकव्यवहारस्यातन्निबन्धनत्वेऽपि सकलधर्मैकरूपाऽखण्डवस्तुवाक्यादिपदार्थव्यवहारस्य तेन एवोपपत्तेः।

तदेवं वस्तुभूतादेव धर्मभेदात् व्यवहारोपपत्तौ यत्तदर्थं व्याकृतिभेदेन जातिभेदोपकल्पन तस्यायुक्तस्य तत्कल्पनकृताऽध्यारोपनमीदृशं दर्शयन्नाह-

अत्र दृष्टविपर्यस्तमयुक्तं परिकल्पितम् ॥१३८॥
मिथ्याभयानकग्रस्तैर्मृगैरिव तपोवने। इति।

अत्र यस्मिन् वस्तुनि कथितव्यवहारनिमित्त यज्जातिजातं परिकल्पितं स्वेच्छाविरचितम्। कीदृशम्? दृष्टात् प्रस्तुतप्रतिपन्नात् वस्तुभूताद् धर्मभेदात् विपर्यस्तं विपरीतम् अवस्तुरूपमिति भावः, तत् अयुक्तम् अवस्तुत्वेन व्यवहारफलेनासम्बन्धात्, अन्यत एव च तस्य भावाच्च प्रतिपत्तिफलेन वा। नियेदितं चैतत्। कैस्तत्परिकल्पितम्? भयानकाः भयहेतवोऽनेकान्तविषयाः संशयादयः, मिथ्या च ते भयानकाश्च मिथ्याभयानकास्तेषां दोषोभासत्वेन साक्षाद् भयानकत्वाभावात् तैर्ग्रस्ता वशीकृता मिथ्याभयानकग्रस्ताः तैः सौगतैः। अत्र निदर्शनं मृगैरिव तपोवने। तथा मृगै. मिथ्याभयानकग्रस्तैः क्षेमस्थानेऽपि वैपरीत्यं कल्प्यते तथा विवेकविकलैः सौगतैरपि वस्तुनि वस्तुभूतानेकधर्माधारे निश्रेयसाभ्युदयनिबन्धने संशयादिमिथ्यादोषविभीषिकावलोकनविह्वलैः व्यवहारार्थमवस्तुभूतभेदापारम्पर्यं परिकल्पितमिति।

मिथ्याभयानकत्वमेव तेषां दर्शयन्नाह-

१-करणं च पा आ०, ब०, प०। २ न्यायवि० श्लो० १२२। ३ प्रमाणतः। ४ -भावतश्च आ०, ब०, प०। ५ कल्पिते आ०, ब०, प०।

यस्यापि क्षणिकं ज्ञानं तस्यासन्नादिभेदतः ॥१३९॥
प्रतिभासभिदां धत्तेऽसकृत्सिद्धं स्वलक्षणम् । इति ।

तात्पर्यमत्र–संशयादिभयादनेकान्तं परित्यजतो ज्ञानम् आसन्नादिविषयमेकमनेकार्थम्, प्रत्यर्थनियतं वा भवेत् ? तत्रादाविदम्– अत्र च अपिशब्दो भिन्नप्रक्रमत्वान तस्येत्यस्यानन्तरं द्रष्टव्यः । तदयमर्थः– **यस्य** सौगतस्य **क्षणिकं ज्ञानं तस्यापि** न केवलं जैनस्य **प्रतिभासभिदां** वस्तुभूतमाकारभेदं तज्ज्ञानं **धत्ते** । कुतः ? **आसन्न आदिर्येषामासन्नतरादेः** तद्विषयस्य तस्य **भेदस्तमाश्रित्य** तत् इति । आसन्ने हि तद्विशदं विशदतरमासन्नतरे [1]विशदतमं चासन्नतमे इति । भवत्वेवमिति चेदाह– **असकृदनेकवारं सिद्धं** यन्निश्चितं प्राक् **स्वलक्षणम्** अन्यत्रापि योज्यम् , तदपि प्रतिभासभिदां धत्ते, निर्दोषप्रतिपत्तिविषये तत्रापि संशयादेः तज्ज्ञानवदनवतारात् । द्वितीयेऽप्याह–

विलक्षणार्थविज्ञाने स्थूलमेकं स्वलक्षणम् ॥१४०॥
तथा ज्ञानं तथाकारमनाकारनिरीक्षणे । इति ।

अर्थस्यासन्नादेः विज्ञानम् **अर्थविज्ञानं विलक्षणं** च तत्परीक्षावलेन प्रतिपरमाणु भिन्नमर्थविज्ञानं च तस्मिन्नपि, अपिशब्दस्यात्रापि योजनात् । **स्थूलं** नानावयवसाधारणम् **एकम्** अवयवैः [2]कथञ्चिदव्यतिरिक्तं **स्वलक्षणं** चेतनाचेतनलक्षणं प्रतिभातीति शेषः । कुत एतत् ? **तथा** तेन स्थूलमेकमिति प्रकारेण **ज्ञानमनुभवो** यत इति । ततोऽनुभवविरुद्धं प्रत्यर्थनियतज्ञानकल्पनं परस्येति भावः । तथा ज्ञानेऽपि कस्मान्न तद्ग्राह्यं विलक्षणमेव भवतीति चेत् ? आह– **तथाऽऽकारं** विलक्षणाकारं स्वलक्षणं भवति । कदा ? **अनाकारनिरीक्षणे** सति निर्विकल्पदर्शनेन स्थूलैकविज्ञाने । न हि अतज्ज्ञानात् तत्सिद्धिः । ततोऽपि तत्सिद्धौ दूषणमाह–

अन्यथार्थात्मनोस्तत्त्वं मिथ्याकारैकलक्षणम् ॥१४१॥ इति ।

अन्यथा अन्येन स्थूलज्ञानात् सूक्ष्मसिद्धिप्रकारेण **अर्थात्मनोः** विषयविषयिणो[3]**स्तत्त्वं** क्षणक्षयैकरंश्यनानात्वादिकं **मिथ्या** वितथं किं तर्हि स्यात् ? आकारेषु ग्राह्याग्राहकादिप्रपञ्चरूपेष्वेकमनुगतं लक्षणं स्वरूपं यस्य तत् **आकारैकलक्षणं** [4]परब्रह्म तत्तत्त्वमिति सम्बन्धः । एवं मन्यते–

वनादौ स्थूलसंवित्तेर्भेदा यत्तत्त्वतो यथा ।
घटादावपि तद्बुद्धिस्तदायत्तैव कल्प्यते ॥११४८॥
तथा तरङ्गचन्द्रेषु भेदबुद्धेरिव त्वया ।
परस्या अपि तद्बुद्धेरेकाधीनत्वमुच्यताम् ॥११४९॥ इति ।

---

१ तद्विशद –आ०, ब०, प० । २ एकमवयवम् आ०, ब०, प० । ३–स्वनस्तत्त्वं आ०, ब०, प० । ४ परं ब्रह्म आ०, ब०, प० ।

भवतु निर्विकल्पादेव दर्शनाद्विलक्षणं तत्त्वमिति चेत्, कथं तत्र स्थूलप्रतिभासः ? विभ्रमादिति चेत्, न, तद्विवेकस्य दर्शनेन तदयोगात्। सदादिरूपस्यैव तत्र दर्शनं न तद्विवेकस्येति चेत्, अत्राह–

विज्ञानप्रतिभासेऽर्थविवेकाप्रतिभासनात्।
विरुद्धधर्माध्यासः स्याद् व्यतिरेकेण चक्रकम् ॥१४२॥ इति।

विज्ञानस्य उपलक्षणमिदं तद्विषयस्य च प्रतिभासे सदादिरूपेण ग्रहणे यत्तस्यार्थात् स्थूलाद्याकारात् विवेकस्यात्मनः प्रतिभासनाद् विरुद्धयोर्दृश्यादृश्ययोः धर्मयोरध्यासः स्याद् भवेत्, तथा सति सुनिश्चितमनेकान्तमनवद्यमिति मन्यते। भवतु तर्हि तस्य तस्माद् व्यतिरेक एवेति चेत्, न, तथा सत्यविवेकप्रसङ्गात्, व्यतिरेके तस्या बहयभावात्। एवञ्च सिद्धमिदम्– स्थूलमेकं स्वलक्षणं तथा ज्ञानं यत इति। पुनरपि तस्य तस्माद् विवेकपरिकल्पनायां वक्तव्यमिदम्– विज्ञानप्रतिभास इत्यादि। तत्रापि भवत्वित्यादि वचनं चक्रकम् तथेत्यादेरनुपपन्नात्। एतदेवाह– व्यतिरेकेण अर्थविवेकस्य विज्ञानाद् भेदेन कृत्वा चक्रवदावर्तमानमाशेषसमाधानं चक्रकम् स्यादिति सम्बन्धः। तत्र जीवति स्थूलज्ञाने निर्भागज्ञानसम्भवो यतः परमाणुसिद्धिः। तदसिद्धौ यदन्यत् प्राप्तं तदप्याह–

प्रतिक्षणं विशेषा न प्रत्यक्षाः परमाणुवत्। इति।

क्षणं क्षणं प्रति प्रतिक्षणं परमाणूनां ये विशेषाः निरन्वयविनाशलक्षणाः ते न प्रत्यक्षाः प्रत्यक्षविषया न भवन्ति। निदर्शनं परमाणव इव तद्वत्। ते च तद्विशेषाश्च कथोपपत्त्या न प्रत्यक्षाः ? इत्याह–

असदात्मतया बुद्धेः [अर्थाकारविवेकवत्] ॥१४३॥ इति।

बुद्धेः प्रत्यक्षरूपायाः स्थूलावभासित्वेनान्विताकारावभासित्वेन च असदात्मतया परमाणुतद्विशेषावभासित्वाभावेन।

स्यान्मतम्– प्रत्यक्षं परमाणुतत्प्रतिक्षणभङ्गविषयमेव स्थूलादिबुद्धिस्तु कल्पनैव केवलं निर्विषया न प्रत्यक्षमिति, तन्न, तद्विवेकेन प्रत्यक्षस्याप्रतिवेदनात्। अस्त्येव तथा तस्य स्वतः प्रतिवेदनमविवेकविभ्रमस्तु विकल्पादेव कुश्चिदिति चेत्, न तावदसौ दर्शनविकल्पाभ्यां प्रागेव, निमित्ताभावात्, तयोरेवैकप्रवृत्तिकारणयोस्तन्निमित्तत्वेन परैरभ्युपगमात्। नापि युगपत्, युगपद्विकल्पद्वयानभ्युपगमात्। न पश्चादपि, दर्शनविकल्पयोस्तदानीमतिक्रमेण तद्विभ्रमस्य निर्विषयत्वापत्तेः। पूर्वञ्च तत्र सर्वेषां विवेकाग्रहीतृत्वस्यैव प्रसङ्गात्। सम्भवतोऽपि तस्य कुतः प्रतिपत्तिः ? स्वसंवेदनादेव प्रत्यक्षादिति चेत्, न, तस्य विभ्रमाद्व्यतिरेके

---

१ -मात्मतया आ०, ब०, प०। २-बुद्धस्तु आ०, ब०, प०। ३- दनमिति वि-आ०, ब०, प०। ४ -मविवे-आ०, ब०, प०।

प्रत्यक्षत्वानुपपत्तेः। व्यतिरेके च तस्य तद्वद् वेदने विभ्रमासम्भवात्। विकल्पान्तरात् तत्सम्भवे चानवस्थानस्य निवेदितत्वात्। अवेदने तु यथा न तस्य प्रत्यक्षत्वं बुद्धेरतदाभत्वादेव नान्यतो विभ्रमात्, तथा प्रतिक्षणविशेषाणां तद्धर्मिणां परमाणूनामपि। एतदेवाह-**अर्थाकारविवेकवत्** इति। **अर्थो** दर्शनविकल्पैकत्वरूपो विभ्रमाकारः तस्माद् **विवेको** विकल्पस्वसंवेदनस्य स इव तद्वत् **प्रतिक्षणं विशेषा न प्रत्यक्षाः परमाणवश्चेति**।

एवञ्च यज्ज्ञातं परस्य तद्दर्शयन्नाह-

अत्यन्ताभेदभेदौ न तद्वतो न परस्परम्।
दृश्यादृश्यात्मनोर्बुद्धिनिर्भासक्षणभङ्गयोः ॥१४४॥ इति।

बुद्धिनिर्भासश्च स्वसंवेदनात्मा क्षणभङ्गश्च तयोः उपलक्षणमिदम्। तेन नीलादिक्षणभङ्गयोरित्यपि द्रष्टव्यम्। तयोः **तद्वतः** तदधिकरणात् ज्ञानादर्थाच्च **अत्यन्तौ** ऐकान्तिकौ **अभेदभेदौ** तादात्म्यव्यतिरेकौ **न** नापि **परस्परम्**। कीदृशयोः? **दृश्यादृश्यात्मनोः** दृश्यात्मा नीलादिर्बुद्धिनिर्भासश्च अदृश्यात्मा क्षणभङ्गस्तयोरिति।

कुत एवत्? [1]इत्यत्राह-

सर्वथार्थक्रियायोगात् [तथा सुप्तप्रबुद्धयोः।] इति।

तथा हि[3]- यदि नीलादिक्षणभङ्गयोः बुद्धिनिर्भासक्षणभङ्गयोश्च तद्वत एकान्ताद्व्यतिरेकः तदा पिण्डस्योपसंहारात् परमाणुरेवावशिष्येत् तस्य चाप्रतिपत्तेरभावो व्योमवदिति। ततः **सर्वथा** सर्वेण योगपद्येन क्रमेण वेति एकस्वभावेनानेकस्वभावेन वेति प्रकारेण **अर्थस्य** कार्यस्य **क्रिया** निष्पत्तिः तस्या **अयोगात्**, नीरूपात्तदनुपपत्तेः।

एवं यदि नीलादेः क्षणभङ्गोऽव्यतिरिक्तः तद्वदेव दृश्यः स्यात्, तथा च किं तदनुमानस्य फलम्? निश्चय इति चेत्; किं तदभावे न भवेत्? व्यवहार इति चेत्; न; नीलादिदर्शनादेव तदुपपत्तेः। तत्रापि निश्चयादेव स इति चेत्; स एव तर्हि क्षणभङ्गस्यापि निश्चयः स्याद्व्यतिरेकादिति न तत्फलं तदनुमानस्य। नापि समारोपव्यवच्छेदः; निश्चिते समारोपाभावात्। एतदेवाह-**सर्वथा** सर्वेण दर्शनहेतुत्वेन निश्चयनिमित्तत्वेन समारोपव्यवच्छेदकत्वेन च प्रकारेण **अर्थक्रियायाः** क्षणभङ्गानुमितेः **अयोगादिति**। नीलादेः क्षणभङ्गाद्व्यतिरेके तु साध्यान्तःपातित्वेन धर्मिहेतुदृष्टान्तानामसम्भवादनुमानानुपपत्तेः सुव्यक्तमेतत्-**'सर्वथाऽर्थक्रियायोगात्'** इति। तन्नैकान्तेन तयोः परस्परं तद्वतश्चाभेदो नापि भेदस्तद्वतः, नीलादेर्बुद्धिनिर्भासस्य च नित्यत्वापत्तेः, नित्यात्च, क्रमयोगपद्यादिना सर्वप्रकारेण **सर्वथाऽर्थक्रियायोगात्**।

भवतु कथञ्चिदेव तयोस्तद्वतः परस्परं चाभेदो भेदो वेति चेत्; अत्राह-

---

१ तेन क्षण-आ०, ब०, प० । २ इत्याह आ०, ब०, प० । ३ -हि नी-आ०,ब०,प० । ४ तदापि पि-आ०, ब०, प० । ५ क्षणभङ्गानुमानस्य । ६ निश्चयाभावे ।

तथा सुप्तप्रबुद्धयोः ।
अक्षयोर्यदि तादात्म्यमभिज्ञानमनन्यवत् ॥१४५॥ इति ।

सुप्तश्च गाढनिद्राविष्टः । उपलक्षणमिदम्– तेन मूर्च्छितश्च । प्रबुद्धश्च प्रत्युत्पन्नप्रबोधः । इदमप्युपलक्षणम्–तेन जागरिष्यंश्च । तयोः सुप्तप्रबुद्धयोः मूर्छितजागरितयोश्च । तादात्म्यम् एकत्वं तथा तेनानन्तरोक्तेन कथञ्चिदिति प्रकारेण । कीदृक्षयोः ? अक्षयोः जीवभागयोः ।

अस्तु नाम तद्भागत्वं प्रबुद्धजागरितयोः विज्ञानस्वभाववत्त्वात् न सुप्तमूर्छितयोः विपर्ययादिति चेत्, न, विज्ञानस्यैव क्षणभङ्गादिविज्ञानवत् निश्चयविकल्पस्य सुप्तादित्वात् । स्यादेतत् तस्यैवाभाव एव किम न स्यादिति चेत् ? क्षणभङ्गादावपि किम न स्यात् ? नीलादावपि सत्प्रसङ्गादिति चेत्, अन्यत्रापि प्राणाद्यभावप्रसङ्गादिति ब्रूमः । प्राणादेव तदा प्राणादिर्न विज्ञानादिति चेत्, न, तर्ह्यधुनापि सन्तानान्तरप्रतिपत्तिः देहान्तरभाविनो व्याहारादेरपि व्याहारादिप्रमवत्वेन बुद्धिपूर्वत्वाभावात् । अस्तु नामज्ञानादेव स इति चेत्, कथं क्रमवत्त्वम् ? न ह्यक्रमात् क्रमवतोऽस्योत्पत्तिः, "नाक्रमात् क्रमिणो भावाः" [प्र०वा० १।४५] इत्यस्य विरोधात् । क्रमवांश्चापरापरः प्राणादिस्तदवस्थायामुपलभ्यते ततस्तत्कारणेन ज्ञानेनापि क्रमवता तदा भवितव्यम् । ततस्तस्य निश्चयवैकल्यमेव स्वापादिर्नाभावः । तदपि निश्चय स्वरूपमेव ज्ञानत्वात् प्रबोधज्ञानवत् किम न भवतीति चेत् ? भवतोऽपि क्षणभङ्गादावपि तेन समारोपविकल्पमेव सत्त्वान्नीलादिवत् किम न स्यात् ? सत्त्वाविशेषेऽपि क्वचित्तद्वैकल्ये निश्चयवैकल्यमपि स्यात् । ततो युक्तं सुप्तादेरप्यात्ममागत्वम् ।

कुतस्तयोस्तादात्म्यम् ? इत्याह–अभिज्ञानम् इति । अत्र च 'यदि' इत्येतत्सम्बन्धनीयम् । सच निपातत्वात् यत इत्यत्रार्थे द्रष्टव्यम् । तदयमर्थः– अभिज्ञान 'य एवाहं सुप्तः स एव प्रबुद्धः' इति प्रत्यभिज्ञानं सुप्तप्रबुद्धसङ्घटनासक्तम्, यदि यत इति । न हि सुप्तात् प्रबुद्धस्यात्यन्तव्यतिरेके तस्य तदेकत्वसङ्घटनं युक्तम्, अन्यसुप्तापेक्षयापि प्रसङ्गात् । सन्तानभेदाश्रयेति चेत्, न, सन्तानस्यवस्थाया अप्येकत्वाभावेऽनुपपत्तेः । चिन्तितञ्चैतत् ।

स्यान्मतम्– व्यवसायात्मन एव ज्ञानात् संस्कारः "व्यवसायात्मनो दृष्टेः संस्कारः" [सिद्धिवि०परि० १] वचनात्, सुप्तज्ञानस्य चाव्यवसायत्वात् कथं ततः संस्कारो यतः स्मृतिरुद्भवन्ती प्रत्यभिज्ञानमवकल्पयेदिति ? मा भूत् ततकृतः संस्कारः, आत्मज्ञानकृतस्तु संस्कारोऽप्युत्थानावस्थायां विकल्पमुपनीयमानः स्मृत्युपस्थापनद्वारेण जागरितेनैव सुप्तेनापि प्रबुद्धस्यैकत्वं सङ्घटयति । कथमन्यकृतात् संस्कारादन्यत्र सङ्घटनमिति चेत् ? न, अत्यन्ताय तयोरन्यत्वाभावात् । न चेदं सङ्घटनं भ्रान्तं यतस्तदेकत्वन्न साधयेत् । तदाह-अनन्यवत् ।

---

१ निश्चयस्य । २ स्वापादौ । ३ विज्ञानम् । ४– विकल्पमेव आ०, ब०, प० । ५ तत्कृतम्–आ०, ब०, प० । सुप्तज्ञानकृतः । ६ अनिराकृतः एवार्थः ।

अन्यः कल्पितरूपो विभ्रमनामा विषयो यस्य तदन्यत् तस्मादन्यद्– **अनन्यवत्** वास्तवतत्तादाम्यविषयं बाधकाभावादिति यावत् ।

इदानीं तेन द्रव्यपर्यायादीनामन्योन्यात्मकत्वेन भाव इति परिणामलक्षणं सङ्गृह्य दर्शयन्नाह–

संयोगसमवायादिसम्बन्धाद्यदि वर्तते ।
अनेकत्रैकमेकत्रानेकं वा परिणामिनः ॥१४६॥ इति ।

संयोगश्च समवायश्च संयोगसमवायावादी यस्य संयुक्तैकार्थसमवायादेः स एव **सम्बन्धः** तस्मात् **यदि** चेत् **वर्तते**, कं किम् ? **अनेकत्र** शरीरदेशेषु **एकम्** आत्मद्रव्यं संयोगेन शरीरं समवायेन, **एकत्र** शरीरे **अनेकं** कटककुण्डलादि संयोगेन, कटकत्वादि संयुक्तसमवायेन, रूपसंस्थानादि समवायेन वा, रूपत्वादि समवेतसमवायेन, शरीरसमवेते रूपादौ तस्य समवायात् । एवमन्यत्रापि योज्यम् । **वेति** समुच्चयार्थम् । तत्र समाधानम्– **परिणामिन** इति । परिणाम उक्तलक्षणो विद्यतेऽस्येति परिणामी भावः तस्य **परिणामिनः** संयोगसमवायादिसम्बन्ध इति विभक्तिपरिणामेन सम्बन्धः । तथा हि– अप्राप्तयोः प्राप्तिः संयोगः । प्राप्तिश्च यदि शरीरादर्थान्तरम् ; कथं प्राप्तं शरीरमिति तद्रूपतया तत्र प्रत्ययः ? सम्बन्धादिति चेत् ; ततोऽपि तादृप्यस्य सम्भवे सिद्धः परिणामः । शरीरस्यैव ततोऽतद्रूपस्य तद्रूपतयोत्पत्तेरसम्भवे कथं ततोऽपि तथा प्रत्ययः ? कथं वा तस्याभ्रान्तत्वम् अतस्मिंस्तद्ग्रहात् ? भ्रान्ताच्च कथं ततः तादृप्यवत् शरीरस्यापि प्रतिपत्तिः ? तादृप्य एवासौ भ्रान्तो न शरीर इति चेत् ; कथमेकस्यैव भ्रान्तिरभ्रान्तिश्च स्वरूपं विरोधात् ? अविरोधे वा कथमेकस्यैव क्रमेणाप्राप्तिः प्राप्तिश्च स्वरूपं न भवेत् ? इति सिद्धः परिणामिन एव संयोगसम्बन्धः ।

तथा समवायोऽपि शरीरस्य तदाधारे तदवयवकलापे इहेति प्रत्ययहेतुः । तदाधारत्वञ्च तत्कलापस्य यदि यावद्द्रव्यभावि ; सशरीरस्यैव तस्य प्रतिपत्तिः स्यात् आधेयविरहितस्याधारस्यासम्भवात् । अयावद्द्रव्यभाविनोऽपि तस्माद् व्यतिरेके 'तदाधारस्तत्कलापः' इति न तद्रूपतया तत्प्रतिपत्तिः । सम्बन्धात्तथा तत्प्रतिपत्तौ : तद्विभ्रमेतरकल्पनायां च पूर्ववत्प्रसङ्गात् । अव्यतिरेके सिद्धस्तत्कलापः परिणामी प्रागतदाधारस्य तदाधारतया तदुत्पत्त्यवस्थायां परिवर्तनादिति समवायोऽपि परिणामिनं एव ! एवं संयुक्तसमवायादिरपि ।

नन्वेवमशक्यपरिहारत्वे परिणामस्य किमवयवैर्गुणविशेषेभ्यो गुण्यवयविसामान्यानामर्थान्तरत्वेन ? अवयवादीनां तद्रूपेणापि परिणामोपपत्तेरिति चेत् ; अभिमतमेवैतत् । अत एवेदमपि व्याख्यानम्– अवयवादय एवावयव्यादिरूपेण **परिणामिनः** परिणामशीला इति ।

---

१ क्वचिदने–आ०, ब०, प० । २ –द्रव्यसंयो–आ०, ब०, प० । ३ –वायादिः स–आ०, ब०, प० । ४ –मिन यथैवं आ०, ब०, प० । ५ किमवयवैव गु–आ०, ब०, प० । ६ तद्रूपत्वेनापि आ०, ब०, प० । अवयव्यादिरूपेणापि ।

तदेवमवस्थितं योगपद्यक्रमाभ्यां सामान्यविशेषात्मकं स्वलक्षणम् ।

भवेदेतत् सामान्यम्, तच्च विजातीयव्यावृत्तिरूपमेव तस्य निर्बाधत्वेन वस्तुषु भावात्, अर्थक्रियायाश्च तदुपाश्रयत्वेनैव तत्रोपपत्तेः । पावकादिव्यावृत्तिमत एव तोयादेः स्नानादिवत्-क्रियादर्शनात् । सामान्यत्वादिभिरपि तस्याबाध्याभ्युपगमनीयत्वात्, अन्यथा कर्कादिपरिहारेण खण्डादावेव गोत्वमिति नियमायोगादिति चेत्, अत्राह—

अतद्धेतुफलापोहमविकल्पोऽभिजल्पति । इति ।

सामान्यमिति वक्ष्यमाणमिहाकृष्य सम्बन्धनीयम् । तदयमर्थः—न विद्येते तस्य खण्डादेः हेतुफले तत्कारणकार्ये येषां ते **अतद्धेतुफलाः** कर्कादयः तेभ्योऽपोहो व्यावृत्तिः तं **सामान्यमभिजल्पति** कथयति । **अविकल्पो** विकल्पज्ञानरहितः सौगतः । न हि सामान्यमनिच्छतः तज्ज्ञानसम्भवः । तस्य हि न स्वलक्षण्यमेव रूपम्, अभिजल्पसम्बन्धाभावापत्तेः । तदभिसम्बन्धिनोऽपि रूपस्य तत्र भावे कथं सामान्यप्रतिक्षेप तस्यैव साधारणात्मनस्तत्त्वात् ? असाधारणत्वे अश्वसङ्केतादेस्तत्राप्यसम्भवात् । भवदपि सामान्यं तदपोहत्वादिति चेत्, कथमभिजल्पसम्बन्धं प्रति योग्यत्वम् ? तस्यैव वस्तुधर्मत्वात् । तदपि कल्पितमेवेति चेत्, न, तेनैव तदयोगात् । सति तद्योग्यत्वे तस्य विकल्पकत्वं विकल्पत्वे च तेन तत्कल्पनमिति परस्पराश्रयात् । विकल्पान्तरात् तत्र तत्कल्पनमिति चेत्, न, तत्रापि तदन्तरात् तत्कल्पनेऽनवस्थापत्तेः । तत्रापोहादिनो विकल्पसम्भवः । तदसम्भवे च कुतो व्यावृत्तिसामान्यप्रतिपत्तिः प्रत्यक्षस्यातद्विषयत्वात् ? कुतो वाभिजल्पः तस्य वैधोनित्येन तदभावे नोपपत्तेरिति मन्यते ।

साम्प्रतं तस्य वस्तुषु भावादीनां वस्तुसामान्यसाधनत्वेन विरुद्धत्वमाचेदयन्नाह—

समानाकारशून्येषु सर्वथानुपलम्भतः ॥१४७॥
तत्पदवस्तुपुभावादि साकारस्यैव साधनम् । इति ।

तत्पदवस्तुपुभाव आदिर्येषामर्थक्रियाभयत्वादेः तत **तत्पदवस्तुपुभावादि** । कथं पुनः सुबन्तसमुदायस्य समासस्तस्यासुबन्तत्वात् ? सुबन्तस्य हि सुबन्तेन समास इति वैयाकरणन्यायेः । समासेऽपि कथं सुपोऽलुगभाव इति चेत् ? न, तत्समुदायत्वाभावात् । न हि 'तत्पदवस्तुपुभाव' इति सुबन्तसमुदायोऽयम्, अपि तु तदर्थविषयं तत्प्रतिरूपकमव्ययखण्डमेव प्रातिपदिकम्, तस्य च सुबन्तत्वादुपपन्नः समासः, तद्विधायिनः सुपो लुक् च । न च सुबन्तरमिति पञ्चाल्लुगभावः पर्यनुयुज्येत । तत किमित्याह—**साकारस्यैव** । आकारवत एव न नीरूपस्य सामान्यस्य **साधनं** वस्तुषु परि

---

१ बौद्धः प्राह । २ तत्रापीति आ०,ब०,प०। ३ योग्यत्वस्य । ४ तदयोगित्वेन आ०,ब०,प०। 'विकल्पबोधवाच्यः विकल्प्यः शब्दगोचरः।''इत्यभिधानात्। ५ "सुपुपा"—जैनेन्द्र० १।३।३। ६ यत्र तुम्मा—आ०,ब०,प०।

णामिभावलक्षणेषु भवनादेस्तत्रैव प्रतिपत्तेः । क्षणक्षीणपरमाणुरूपाणि स्वलक्षणान्येव वस्तूनि तत्र च तेष्वेव भावादिः प्रतीयते न साकारेष्वेति चेन ; न; तेषामेव प्रमाणाभावेनाप्रतिपत्तेः । न हि तदप्रतिपत्तौ तत्र भावादेरन्यतरस्य वा प्रतिपत्तिः सम्भवति । तदेवाह–समानश्चासौ मानसहित आकारश्च **समानाकारः** तेन **शून्येषु** व्यावर्णितस्वलक्षणेषु । कथं तच्छून्येषु ? **सर्वथा** सर्वेण प्रत्यक्षविषयत्वेनानुमानविषयत्वेन च प्रकारेण **अनुपलम्भतः** तस्य वस्तुषु भावादेरिति विभक्तिपरिणामेन सम्बन्धः ।

कथं पुनस्तेषां समानाकारशून्यत्वम् , यावता प्रत्यक्षमेव तेषु प्रमाणमिति चेत् ? तदपि यथाकल्पनम् , यथाप्रतिभासं वा भवेत् ? न तावदाद्यम् ; तस्याप्रतिपत्तेः । न हि निर्विकल्पं प्रत्यक्षं क्वचिदपि दृश्यते यतः तत्स्वलक्षणप्रतिपत्तिः । "प्रथममिन्द्रियज्ञानं तदेवं दृश्यते केवलं तत्पृष्ठभाविनैकस्थूलविकल्पेन प्रत्यूहान्न निश्चीयत इति चेत् ; कथमनिश्चितं तदास्ति ? कथं वा प्रामाणम् ? अन्यथैवमपि स्यात्– सकलमपि प्रत्यक्षं व्यावृत्तवस्तुविषयमेव केवलं भेदविकल्पेन प्रत्यूहान्न निश्चीयत इति । भेदाभावे प्रत्यक्षादन्यो विकल्प एव न सम्भवतीति चेत् ; न ; अनेकान्ताभावेऽपि तदसम्भवस्य निवेदितत्वात् । अविचारितरम्यया तु कल्पनया तत्सम्भवस्योभयत्राविशेषात् , तथा च सर्वाभेदरूपस्य पुरुषस्य प्रसिद्धेः "यः सर्वेषु लोकेषु तिष्ठन् सर्वभ्यो लोकेभ्योऽन्तरो यं सर्वे लोका न विदुर्यस्य सर्वे लोकाः शरीरं यः सर्वान् लोकानन्तरो यमयति स आत्मान्तर्याम्यमृतः" [बृहदा० ३।७।१५] इत्याद्याः श्रुतयोऽर्थवत्यो भवेयुः ।

न चैवं निर्विकल्पा भ्रान्तिरपि । शक्यं हि वक्तुम्–'पश्यन्नयमेकमेव चन्द्रमसं पश्यति द्वित्वारोपविकल्पात्र पुनर्निश्चिनोति' इति । तथा च व्यर्थमभ्रान्तग्रहणं कल्पनापोढपदेनैव द्वित्वभ्रान्तेर्विनिवर्तनात् । निर्विकल्पैव तद्भ्रान्तिः इन्द्रियभावाभावानुरोधित्वेनेन्द्रियत्वादर्थसन्निधिसापेक्षत्वात् प्रतिसङ्ख्यया चानिरोध्यत्वादिति चेत् ; न; तत एव जातिप्रतिपत्तेरप्यमानसत्वापत्तेः । तदुक्तम्–

"न चेदं व्यवसायात्मप्रत्यक्षं मानसं मतम् ।
प्रतिसङ्ख्यानिरोध्यत्वादर्थसन्निध्यपेक्षणात् ॥" [सिद्धिवि०परि० १] इति ।

तत्र तद्भावाभावानुरोधित्वादिकमध्यारोपितमेव न तात्त्विकमित्यपि नोत्तरम् ; द्वित्वभ्रान्तावपि तथैव तत्प्रसङ्गात् ।

अपि च "विषयसरूपं तत्प्रत्यक्षम् अन्यथा वा ? तत्राद्ये विकल्पे वस्त्वेव सामान्यं सारू-

---

१ –रूपादित्व–आ०, ब०, प० । २ "नीरूपस्य सामान्यस्य"–ता० टि० । ३ भवनादिः आ०, ब०, प० । ४ वा न म–आ०, ब०, प० । ५ प्रथमेन्द्रिय–आ०, ब०, प० । ६ निर्विकल्पमेव । ७ "यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो···"–बृहदा० । ८ प्रत्यक्षलक्षणे । ९ चानुरोध्य–आ०,ब०,प० । १० विषयस्वरू–आ०, ब०, प० ।

व्यस्यैव स्वरूपम्। तदपि तत्रानारिवकमेवेति चेत्, न, भ्रान्तार्थेनाप्रत्यक्षत्वप्रसङ्गात्। एतेन कल्पितमिति प्रत्युक्तम्। कल्पिताकारस्यापि प्रत्यक्षत्वानुपपत्तेः। सर्वथा च विषयसारूप्ये विषयत्वं तस्यापि जडत्वापत्तेः, न स्यतः प्रतिपत्तिः। अन्यथेदस्य सरूपम् प्रतिपत्त्यघनवस्थापत्तिः। असरूपात् प्रतिपत्तौ विषयस्यापि सत एव प्रतिपत्तेः व्यर्थं तत्रापि सारूप्यकल्पनम्। असरूपमपि नाप्रतिपन्नमेव सत्प्रमाणम् अनभ्युपगमात्। प्रतिपत्तौ च प्रतिपत्तिरूपस्य व्यापारस्य स्वरूप एवोपक्षयाग् कुतस्तस्या विषयप्रतिपत्तिः? व्यापारान्तरादिति चेत्, न, उभय-व्यापारसम्बन्धे तस्य वस्तुन सामान्यविशेषात्मकस्यैवाध्यवसायापत्तेः। तत्र यथाकल्पन तत्। नापि यथाप्रतिभासम्, तत्र स्वपरव्यवसायात्मनि बहिरन्तश्च नानाव्यवसायाभावस्य स्फुट स्यैव प्रतिपत्तेः। तत्र प्रत्यक्षम् स्वलक्षणप्रतिपत्तिः।

नान्यदनुमानात्, तस्य विकल्पेनिषेधेन निषेधात्[1], प्रत्यक्षाभावेऽनवतारात्। ततो तस्यैव सामान्य तदभ्यापोहारूपस्यहेतूनां विरुद्धत्वात्।

स्यान्मतम्—खण्डादीनां पर्कादिभ्य इव परस्परतोऽपि[2] भेदाविशेषेऽपि 'स एव सामान्य गोत्व विभ्रति न पर्कादय.' इत्यत्र तस्मियता शक्तिरेवावलम्बनम्, तथा च तदकरणमकृत्वा किम तदाकारमेवानुगतप्रत्ययादिरूप ते कुर्वीरन्? एवं हि कल्पनागौरव परिहृत भवति शक्तिः सामान्य तदाकारमेवेति। तत्र सामान्यमर्थक्रियेति, तदयुक्तम्, एव हि विशेषाणामन्यपरिकल्प नमसङ्गात्। शक्त्य हि वस्तुभू—पर्या प्रत्यासत्या गोत्वमेव खण्डादीन् विशेषान् विभर्ति नाद्यत्व तथा तद्विशेषव्यवहारमेव कुर्यीताम् तद्विशेषेरिति। एवञ्च न कश्चिदपि विशेषो जीवितुमर्हति सर्वविशेषव्यवहाराणां सन्मात्रादेव महासामान्यादुपपत्तेः। विशेषाभावे कथ तद्व्यवहारः तस्यापि विशेषरूपत्वादिति चेत्? सामान्याभावेऽपि तद्व्यवहार कथ तस्याप्यनुगतप्रत्ययार्थत्वं सामान्यरूपत्वात्। कल्पित एव व्यवहारो विचारपीडां न सहत इति चेत्, न, विशेषव्यवहार स्यापि तथात्वात्। कथ पुनरेकस्वभावात् सामान्याद् देशकालादिभेदी तद्व्यवहार, कारणभेदादेव कार्यभेदोपपत्तेरिति चेत्? न, दाह्यपाकादिकार्यभेदेऽपि तद्धेतोः पावकस्य भेदाभावात्। तत्रापि शक्तिभेदादेव तद्भेद इति चेत्, कुतस्तद्व्यतिरेकात् शक्तिमतोऽपि न भेदः? तथा मात्रेण तद्भेदस्याप्यविरोधादिति चेत्, महदिदमद्भुत चित्र-अनर्थान्तरशक्तिमद्वादिना तत्र विरुद्धयते अर्थान्तरवादिना तु विरुद्धयत इति! व्यतिरिक्तैव शक्तिर्वाहत इति चेत्, न, तत्र एव कार्यनिरूपणे शक्तिमतो वैयर्थ्यापत्तेः। साध्य दाह, तेन तद्भेदस्य करणादिति चेत्, न, दाह्यभेदेन तद्भेदेनैवाध्यासात्। व्यवस्थाकारणे पावकभेदेन विरुद्धधर्माध्यासमेव न कुर्यात्? तथा च पावकभेदेन तद्भेदम् सामान्यमेव सकलदाह्यदेशनिर्भासासमर्थ्योपपत्तेः व्यर्थमेव तत्र शक्तिभेदपरिकल्पनम्। तदुक्त श्लोकेन—

---

१ सन्मात्र-अ०, ब०, प०। १—पि नि-अ०, ब०, प०। ३—दृश्य सदृश-अ०, ब०, प०। ४—सं ते-अ०, ब०, प०। ५ सन्मिश्र-अ०, ब० प०। ६ तद्व तद्व-अ०, ब०, प०। ७ दृ[illegible] वदृश-अ०, ब० प०। ८ नि[illegible]-अ०, ब०, प०।

"अर्थक्रियाकृते भेदे रूपभेदो न लक्ष्यते ।
दाहपाकादिभेदेन कृशानुर्न हि भेदवान् ॥
यथैव भिन्नशक्तीनामभिन्नं रूपमाश्रयः ।
तथा नानाक्रियाहेतुं रूपं किन्नाभ्युपेयते ॥
एकस्यैवैष महिमा भेदसम्पादनासहः ।
वह्नेरिव यदा भावभेदकल्पस्तदा मृषा ॥" [तत्त्वसि० २।७-१०] इति ।

तदेव सामान्यं नोपलभ्यते भेदस्यैव बहिरन्तश्चोपलम्भात्, तदुपलम्भे वा न भेदव्यवहारः तस्य संहृताखिलभेदरूपत्वात् तत्कथं तत्र तस्य सामर्थ्यम्, असति तदनुपपत्तेरिति चेत् ? न; विशेषाणामपि परपरिकल्पितानामप्रतिपत्तेः । प्रतिपत्तौ वा न सामान्यव्यवहारः संहृताखिलसामान्यरूपत्वात्तेषाम्, तत्कथं तत्र तेषामपि सामर्थ्यम् असति तदनुपपत्तेः । कल्पनया सत्त्वमिति चेत्; न; तस्या एव भेदाप्रतिपत्तावसम्भवात् । निवेदितञ्चैतत् । एतदेवाह—

न विशेषा न सामान्यं तान् वा शक्त्या कयाचन ॥१४८॥
तद्विभर्त्ति स्वभावोऽयं समानपरिणामिनाम् । इति ।

अत्र द्वितीयो नञ् तदित्यनेन सम्बन्धनीयः । वाशब्दश्चैवार्थः । तदयमर्थः—तदनन्तरोक्तं सामान्यं ब्रह्मवादिपरिकल्पितं **कयाचन** भिन्नयेतरया वा **शक्त्या** प्रत्यासत्त्यपरसञ्ज्ञया **तान्** विशेषान् ग्रामारामादिरूपान् **न विभर्ति** वा न स्वीकरोति यथा । उपलक्षणमिदम्—नापि तद्व्यवहारं करोति । तथा **विशेषाः** सौगताभिमताः **सामान्यं** गोत्वादि **न** विभ्रति **विभर्तीत्यस्य** वचनपरिणामेन सम्बन्धात् । इदमप्युपलक्षणम्—तेन तद्व्यवहारमपि न कुर्वन्ति, तेषामपि तत्सामान्यवदप्रतिपत्तिविषयत्वेन खपुष्पतुल्यत्वात् । मा भूत् तत्कल्पितानां तेषां तद्धरणं त्वत्परिकल्पितानां भवेत् त्वया तत्प्रतिपत्तेरभ्युपगमादिति चेत् ; न, तत्रापि तदसम्भवात् । न हि तेऽपि विशेषाः कयाचिदपि शक्त्या सामान्यं बिभ्रति, स्वयं तद्रूपत्वेन तदाधारत्वानुपपत्तेः । तन्न तत्रार्थक्रिया उपकल्पते । तदाह- **स्वभावोऽयं** सामान्यरूपः । केषाम् ? **समानपरिणामिनां** स्वहेतुसामर्थ्यतः सादृश्यपरिणामापत्तिमताम् । भिन्नमेव सामान्यं विशेषेभ्यस्तदाधेयञ्च 'खण्डादिषु गोत्वम्' इति प्रतिपत्तेः, तत्कथं ते तन्न बिभ्रतीति चेत् ? अत्राह—

अप्रसिद्धं पृथक्सिद्धम् [उभयात्मकमञ्जसा] ॥१४९॥ इति ।

प्रकर्षेण प्रत्यक्षलक्षणत्वेन सिद्धं निश्चितं प्रसिद्धं तदन्यद् **अप्रसिद्धम्** । किं तत् ? **पृथक्सिद्धं** विशेषेभ्योऽर्थान्तरत्वेन सिद्धं निष्पन्नं सामान्यम् । न हि प्रत्यक्षे सामान्यस्य

---

१ –हेतुरूपं आ०, ब०, प० । २ –तथा तुदा आ०, ब०, प० । ३ संहृतापि–आ०, ब०, प० ।
४ –पो न तदि–आ०, ब०, प० । ५ बौद्धकल्पितानां विशेषणाम् ।

विशेषभ्यो भेदस्तदाधेयत्वं वा प्रत्यवभासते, कथञ्चित् तदव्यतिरेकस्यैव तस्य तत्रावभासनात्। यद्यपि तत्र तदवभासकल्पनायां भवन्तु कुशलिनस्तायागता 'परस्परविश्लेषिणामणूनामेव तत्रावभासनम्' इति तेषामपि शक्यत्वात् परिकल्पनस्य। खण्डादिषु गोत्वमिति तु प्रतिपत्ति रापोद्धारिकी व्यवहारार्था न तावता तस्य तदाधेयत्वम्, अन्यथा तेषामपि तदाधेयत्वं भवेत्- "सामान्यनिष्ठा विविधा विशेषाः" [युक्त्यनु० श्लो० ४१] इत्यपि प्रतीतेः। कीदृक् तर्हि तत्त्वम् ? इत्याह- उभयात्मकमञ्जसा इति। सामान्यविशेषोभयस्वभावं तत्त्वम् अञ्जसा परमार्थेनेति।

तत्रात्मत्वेऽपि वस्तुनः सामान्यमेकमेव 'सर्वसर्वगतं न प्रतिव्यक्ति भिन्नं सदृशपरिणाम-लक्षणम्। तदुक्तम्-

"यया च व्यक्तिरेकैव दृश्यमानः पुनः पुनः।
कालभेदेऽप्यभिन्नैवं जातिर्भिन्नाश्रया सती॥
कात्स्न्यांवयवशो वृत्तिपृच्छा जातौ न युज्यते।
न हि भेदविनिर्मुक्ते कात्स्न्यभेदविकल्पनम्॥"[मी०श्लो०वन० ३२ ३३]

इति चेत्, न, व्यक्तिर्यत्तदन्तराळेऽपि तस्योपलम्भप्रसङ्गात्। अनभिव्यक्तेर्नेति चेत्, व्यक्त्यापि न भवेत्, तदन्तराळगतात्, तद्गतस्य तद्रूपस्यामेदात्। भेदे व्यक्तिगतमेव तस्या मान्यमस्तु तत एव तत्प्रयोजनपरिसमाप्तेः व्यर्थं तदन्तराळे तत्कल्पनम्। प्रतिव्यक्ति तस्य भेदे कथममेदप्रत्ययः 'शबलो गौर्मुण्डो 'गौरिति' इति चेत् ? अभेदेऽपि कथं क्वचिदभिव्यक्तिर नभिव्यक्तिश्चान्यत्र व्यक्तेरतद्रूपत्वात् ? न हि व्यक्तिर्विषयस्वभावो येन तद्रूपेतराभ्यां तस्य भेदः अपि त्वन्येव ततः, तत्प्रतिपत्तिरूपत्वादिति चेत्, कथमेवं तदन्तराळे तदप्रतिपत्ता-वनभिव्यक्तिरुत्तरम् ? तेषात्मप्रतिपत्तेरेव प्रतिपादनात्। तत्पर्यनुयोगे तस्या एवोत्तरत्वानुपपत्तेः। कुतश्च तस्याभिव्यक्तिः ? यत्र तत् तत्र इति चेत्, न, सर्वतः स्यात्, सर्वसर्वगतत्वेन तस्य सर्वत्र भावात्। यस्य सामर्थ्यं तत्र इति चेत्, तदपि यदि सामान्यरूपं सर्वसर्वगतञ्च म एव दोषः- तदन्तराळेऽपि ततस्तदभिव्यक्तिरिति। नायं दोषः, तस्य तत्रानभिव्यक्तस्वे-नानभिव्यञ्जकत्वात्। इतरत्र कुतस्तदभिव्यक्तिः ? अन्यस्मात् सामर्थ्यादिति चेत्, न, तदपीत्यादेः तत्राप्यनुषङ्गादनवस्थापत्तेश्च। असर्वगतमेव तदिति चेत्, न, सर्वगतसामान्यप्रतिज्ञाव्यापत्तेः। सामान्यादन्यैव सामर्थ्यम् असर्वगतमनभिव्यञ्जकञ्च, अन्यथा पूर्ववद् दोषादिति चेत्, ततोऽपि[13] यद्यभिव्यक्तिस्तद्व्यापिनी, सर्वस्य सर्वदर्शित्व-प्रसङ्गः, सर्वगतसामान्यव्यापिन्या तदभिव्यक्त्या "तदव्यतिरिक्तसकलान्तरव्याप्तेरवश्य-

---

१ सर्वं सर्व-आ०, ब०, प०। २ -व्यक्तस्तस्य-आ०, ब०, प०। ३ -व्यक्तिगतस्य-आ० ब०, प०। ४ गौरिति चेत् आ०, ब०, प०। ५ "अभिव्यक्तेः"-ता० टि०। ६ व्यक्त्यन्तराले। ७ सामान्यप्रतिपत्तौ। ८ "अनभिव्यक्तेर्न सामान्यप्रतिपत्तिः" इत्युत्तरम्। ९ अनभिव्यक्तस्यापि। १० सामान्यम्। ११ सामर्थ्यमपि। १२ सकलान्तरव्या। १३ असर्वगतसामर्थ्यादपि। १४ तदभिव्यक्ति-आ०, ब०, प०।

स्भावान् । वक्ष्यति चैतत्– नित्यमित्यादिना[1] । यदि न तद्व्यापिनी कथं तदभिव्यक्तम्, अभिव्यक्तिव्याप्तस्वभावस्यैवाभिव्यक्तत्वोपपत्तेः । खण्डशोऽभिव्यक्तमप्यभिव्यक्तमेवेति चेत् ; न . तस्य खण्डाभावात् । तद्भावे वा कथं तत्र कात्स्न्र्यावयवशो वृत्तिपर्यनुयोगो नोपपद्यते यत इदं सूक्तम्–'कात्स्न्र्यावयवशो वृत्तिः' इत्यादि । अपि च–

ब्राह्मण्यमपि सामान्यं यदि सर्वगतं तदा ।
शूद्रादिष्वपि तद्भावाज्जातिसाङ्कर्यमागतम् ॥११५०॥
व्यक्ताव्यक्तविभागन्तु निर्विभागे न युक्तिमान् ।
कुतो वा तदभिव्यक्तिर्व्यक्तिभ्यस्तदसम्भवात् ॥११५१॥
कौण्डिन्यादेर्न हि व्यक्तेस्तत्रशक्तिरुपलभ्यते ।
अन्यथानुपदेशः स्याद्विश्वयत्र गोत्ववत् ॥११५२॥
उपदेशमहायैव व्यक्तिस्तद्व्यञ्जिका यदि ।
केवलैव समर्था चेत् सहायापेक्षणेन किम् ॥११५३॥
केवला[2] न समर्था चेत् सहायापेक्षणेन किम् ।
सहाय एव सामर्थ्यं तस्यामिन्यपि नोचितम् ॥११५४॥
स्वतः सामर्थ्यशून्यत्वे तदपेक्षान खपुष्पवत् ।
स्वतोऽपि यदि सामर्थ्यं सहायो नैव कार्यकृत् ॥११५५॥
सत्येव सचिवे तच्चेन तत्कृतं स्यान्तथा सति ।
वृथा तत्करणं [3]जातेर्व्यक्तिरेवास्तु तत्कृता ॥११५६॥
एवं हि न प्रसज्येत पारम्पर्यपरिश्रमः ।
सचिवेन विनाप्यस्ति तच्चेन कुर्वीत किन्न तत् ॥११५७॥
कार्यं कार्यकृतेऽप्यस्ति सामर्थ्यमिति साहसम् ।
अन्योन्यजन्यसामर्थ्यं व्यक्तितत्सचिवद्वयम् ॥११५८॥
कार्यकृच्चेन्न शूद्रादावप्येवं तत्प्रसञ्जनात् ।

कौण्डिन्यादिवन्[4] सूतमागधादिरपि ब्राह्मण्यस्य व्यक्तिरेव, तत्रापि तस्य तदुपदेशस्य च सर्वगतसामान्यवादिमतेन भावात् । ततस्तत्रापि तदभिव्यक्तौ कथं याजनाध्यापनाद्यः कर्मविधयो न भवेयुः, आचारसाङ्कर्यं न भवेत् ? तदेवं क्षत्रियत्वादयोऽपि [5]चिन्त्याः । तत्र तस्य सर्वसर्वगतत्वं तद्वद् गोत्वादेरपि । व्यक्तिसर्वगतस्य तु प्रत्यन्तरालं विच्छेदे नानात्वम्, अन्यथा सर्वसर्वगतादविशेषः । तत्र [6]तादृशेन सामान्येन तदात्मकत्वं भावस्य सादृश्यात्मनैव

---

१ न्यायवि० श्लो० १५५ । २ –व्यक्तत्वात्ते. आ०, ब०, प० । ३ केवलं न–आ०, ब०, प० । ४ जातव्यक्ति–ता० । ५ ब्राह्मण्यां क्षत्रियाजातः सूतः । क्षत्रियायां वैश्याजातो मागधः । ६ द्रष्टव्यम्–प्र० वार्तिकाल० १।२ । ७ –या सर्वग–आ०, ब०, प० । ८ सर्वगतेन ।

[1]नेन तदुपपत्तेः । कथं तस्यापि विशेषेणैकत्वं विलक्षणत्वादिति चेत् ? कथं रूपेण संस्थानस्य तदविशेषात् ? मा भूत् , संस्थानस्यैवाभावादिति चेत् , न , दर्शनात् । न हि पश्यन्नय वैषम्यस्थौल्यादिकं न पश्यति, तदपह्नवे रूपस्थानेऽपि तदापरोग्रथकल्पं जगद्भवेत् ।। रूपमेव संस्थानम् सत्यैव तदुपलम्भे तस्य दर्शनात् नापरमिति चेत् , न , तत्र एव रूपस्यापि संस्थानादभ्यर्थाभावप्रसङ्गात् । दूरविरलदेशादौ केवलस्यापि रूपस्य दर्शनमिति चेत् , न , समन्धकारादौ केवलस्यापि मयूरादिसंस्थानस्योपलम्भात् । संस्थानमेव तत्र भवति यथा-स्पष्टस्याप्राप्तेः, तस्यैव संस्थानत्वे प्राप्तिरपि स्यात् , न चैवम् , स्पष्टस्यैव प्राप्तेः । न च तयोरेकत्व प्रतिभासभेदेन भेदस्यैवोपपत्तेः, तस्माद् भ्रान्तमेव तद्दर्शनम् विसंवादादिति चेत् , न , अस्पष्टतायामेव विसंवादात् , न संस्थाने । तदव्यतिरेकात् तत्रापि विसंवाद एवेति चेत् , न, एकान्ततस्तदभावात् , अन्यथा ह्यस्पष्टमित्येव स्यात् प्रतिभासो न स्थूलमिति । कथ वा तस्संस्थानस्यावस्तुत्वे लिङ्गत्वम् ? अविनाभावनियमादिति चेत् , न तन्नियमस्यापि तदुत्पत्तितादात्म्ययोरेवाभ्यनुज्ञानात् । अत एवोक्तम्–

"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमो दर्शनान्न न दर्शनात् ॥" [प्र० वा० ३।३०] इति ।

न चायमस्तु कस्यचित्कार्यम् ; व्योमकुसुमादिवत् । नापि स्वभाव । स्वभावत्वेऽपि साध्यस्य तस्मादेकान्तेनाभेदे तदप्यवस्तुत्वेव स्यात् । न च तत्साधने प्रेक्षावतां प्रवृत्ति पुरुषार्थाभावात् । साधितात् ततो वस्तुसाधनमिति चेत् , न, तस्यापि तस्मादेकान्तेनाभेदे पूर्ववदोषानवस्थानुषङ्गात् । कथञ्चित् तदव्यतिरेकपरिकल्पनया तस्साध्यवस्तुत्वपरिपालनं श्यामखिलोपलब्धसंस्थानस्यापि वस्तुत्वमवस्थापयति, तस्यापि श्यामखिलत्वात् कथञ्चित्तेनाव्यतिरेकात् । मा भूत्तिङ्गत्वमपि तस्येति चेत् , कथं तर्हि तत्र प्रतिपत्तृप्राप्तिव्यभिचारस्यानुमानादविसंवाद ? यत इद सूक्तम्–

"मर्मैवं प्रतिभासोऽयं न संस्थानविवर्जित ।
एवमन्यत्र दृष्टत्वादनुमानं तथा च तत् ॥" [प्र०वार्तिकाल० १।१] इति ।

कथं पुनः अनुमानादर्थविसंवाद सद्विषयस्याप्यस्पष्टावभासित्वेनावस्तुत्वाविशेषात् , तत्रापि तत्प्रतिभासलिङ्गोपजनितादनुमानाद् अविसंवादपरिकल्पनायामनवस्थाप्रसक्तिरिति चेत् , अयमपि परस्यैव दोष. । न दोषः, व्यवहारमङ्गभयादकृतविचारस्यैवानुमानप्रामाण्यस्याभ्यनुज्ञानादिति चेत् , म , तथा दर्शनस्यैव तदङ्गीकारोपपत्तेः । एवमप्यवास्तवमेव संस्थानं व्यावहारिकस्याभ्यक्षस्यावस्तुविषयत्वात् , तत् सांवृतमेव तत् अस्थूलादिरूपादवृत्त्या स्थूलादेः संवृत्या परिकल्पनादिति चेत् , अत्राह–

---

1 सामान्येन । २ –यक्षम्प्राप्तिव्यभि–आ०, ब०, प० ।

सन्निवेशादिवद् वस्तु सांवृतं किन्न कल्प्यते । इति ।

सन्निवेशो रचनाविशेषः संस्थानमिति यावत् । स **आदिर्यस्य** सदृशपरिणामादेः स इव तद्वत् "सुप इव" [शाकटा० ३।३।२] इति प्रथमान्तात् वत् प्रत्ययः । **वस्तु** रूपादिः **सांवृतं** संवृतेः कल्पनाया आगतम् **किं** कस्मात् **न कल्प्यते** ? कल्प्यत एव शक्यं हि वक्तुम्–अरूपादिव्यावृत्त्या रूपादिरपि कल्पनोपदर्शित एव न तात्त्विक इति । रूपाद्यभावे कस्यारूपादेः व्यावृत्तिरिति चेत ? स्थूलादेरभावेऽपि कस्यास्थूलादेः व्यावृत्तिः ? रूपादेरेव, तस्यैव स्थूलादितया परिकल्पनादिति चेत् , अन्यत्रापि स्थूलादेरेव, तस्यैव रूपादितया परिकल्पनादिति समानश्चर्चः ।

भवतु वस्त्वपि सांवृतमेवेति चेत् ; कुतस्तस्य परिज्ञानम् ? अवस्तुत्वेन स्वतस्तदयोगात् । अन्यत इति चेत् ; न ; ततोऽप्यतदाकारात्तदसम्भवात् । तदाह–

अप्रसिद्धं पृथक्सिद्धम् [उभयात्मकमञ्जसा]

अप्रसिद्धं प्रमाणनिश्चि[1]न भवति । किम् ? **पृथक्** ज्ञानादर्थान्तरतयाऽनाकारार्पकत्वेन **सिद्धं** निष्पन्नं सन्निवेशादि रूपादिकम्; सर्वथा तदाकाराश्च न ततस्तस्य परिज्ञानं तस्यापि तद्वदवस्तुत्वात् । पुनस्तदन्यस्य सर्वथा तदाकारस्य कल्पनायामनवस्थापत्तेः । कथञ्चित्तदाकारत्वे च सिद्धं तद्वास्तवेतरस्वभावं तदाह–'**उभयात्मकम्**' इति । भवतु ततः किम् ? इत्यत्राह–**अञ्जसा** इत्यादि । सन्निवेशादि वदन्तीति सन्निवेशादिवदो जैनाः ? [2]विच्येवं रूपात तेषां **वस्तु** रूपस्थूलादिरूपतयाऽनेकान्तात्मकं **सांवृतं** भवदभिप्रायेण **किन्नेष्यते** ? इष्यत एव । कथम् ? **अञ्जसा** परमार्थेन । तात्पर्यमत्र–

सत्येतरस्वभावं चेदेकं वस्तूपगम्यते ।
वस्तुतस्तर्हि रूपादिसंस्थानाद्यात्मकं [3]तथा ॥ ११५९ ॥
तथा च तद्वत्सामान्यविशेषात्मापि तत्त्वतः ।
वक्तव्यं वस्तु तद्बुद्धिदेवताकोपभीरुभिः ॥ ११६० ॥
अनेकान्तात्मके भावे सत्येवमुपपादिते ।
खण्डशोऽपि परिज्ञानं न वस्तुषु विरुद्ध्यते ॥ ११६१ ॥
निरंशार्थप्रवादे हि वस्तुनः सर्वथाग्रहात् ।
न क्वचिद्विभ्रमो नाम भवेदित्याह शास्त्रकृत ॥ ११६२ ॥

समग्रकरणादीनामन्यथा दर्शने सति ॥१५०॥
सर्वात्मनां निरंशत्वात् सर्वथा ग्रहणं भवेत् । इति ।

अन्यथा अनेकान्तादन्येन प्रकारेणैकरूपेण **दर्शने** अभ्युपगमे **सति** विद्यमाने सौगतादीनां **सर्वथा** सर्वेण चन्द्रादेर्वर्तुलत्वादिनैवैकादित्वादिनापि प्रकारेण **ग्रहणं भवेत्** ।

---

१ –पादिक. सा–आ०, ब०, प० । २ विच् प्रत्यये सति । ३ तदा आ०, ब०, प० ।

कुतः ? **निरंशत्वात्** निर्भागत्वात् । न हि निर्भागं वस्तु गृहीतमगृहीतञ्चोपपन्न विरोधात् । भवत्येव तथा ग्रहणं [1]केषाञ्चिदिति चेत् ; आह–**सर्वात्मनाम्** सर्वेषां भ्रान्तानामभ्रान्तानां चात्मनां पुरुषाणाम् । कीदृशानाम् ? **समग्रकरणादीना** करणमिन्द्रियमादिर्येषामालोकादीनां ते करणादयः, समग्राः सम्यगभिमुखाः कार्योत्पादने करणादयो येषां तेषामिति । यथा सामग्रीसद्भावात् चन्द्रादौ वर्तुलत्वादेर्ग्रहणं तैमिरिकादिभिस्तथैकत्वादेरपि भवेदविशेषात् । तथा च न विभ्रमो नाम कश्चिदपीति व्यर्थस्तन्निमूलत्वर्थः प्रयास इति मन्यते ।

५

भवतु तस्यैकत्वादिनैव वर्तुलत्वादिनाप्यग्रहणमेवेति चेत् , आह–

नौयानादिषु विभ्रान्तो न न पश्यति बाह्यतः ॥१५२॥ इति ।

नौयानमादिः येषामाशुभ्रमणादीनां तेषु निमित्तेषु सत्सु **विभ्रान्तः** प्रति पन्ना **न न पश्यति** पश्यत्येव । **क** ? **बाह्यतो** बहिस्तयाप्रतीतेरिति भावः ।

१०

पश्यन्नप्यसदेव पश्यतीति चेत्, आह–

न च नास्ति स आकारः ज्ञानाकारेऽनुपप्लवः । इति ।

सः वर्तुलत्वादिः **आकारो न च** नैव **नास्ति** विद्यत एव बाह्यतस्तत्प्रतीतेरविसंवादादिति भावः । बाह्यत्वादर्शनमसत्त्वञ्च ब्रुवतो दोषमाह–**ज्ञानाकारेऽनुपप्लवः ज्ञानस्याकारः** स्वरूपं **तत्रानुपप्लवः** प्राप्तिः न पश्यतीत्यस्य नास्तीत्यस्य च तस्मात् । बाह्यतो न न पश्यति न च नास्तीति सम्बन्धः–

१५

यदा बाह्यवदेवायं न पश्यत्यन्तरप्यणुम् ।
भ्रान्तत्वैतन्मृषात्वं तदा प्राप्नोति मानवः ॥११६३॥
चैतन्यरहितत्वासौ मृत एव कथं भ्रमी ।
मिथ्याज्ञानेन चेल्लोके भ्रमीति प्रथितो बुधैः ॥११६४॥
भ्रान्तिमात्रं बहिर्भ्रान्तत्वाभ्युपेतवतोऽपि न[2] ।
स्वतोऽन्यतो वा तद्विद्भिरिति पूर्वं निरूपितम् ॥११६५॥
भ्रान्तं बाह्यतो ज्ञानमभ्रान्तं चान्तरिष्यतः ।
द्वित्वादिनैव चन्द्रादिरविभ्रान्तोऽस्तु नान्यथा ॥११६६॥
विवेको विप्लवाकाराद् यदि विज्ञानचन्द्रयोः ।
तद्ग्रहे विप्लवाकारः क्व वराक[3] प्रवर्तताम् ॥११६७॥
तदग्रहे कथं विद्भिर्विभेदात्तयोरपि ।
तस्मात् दृश्येतरात्मत्वमनेकान्तावलम्बनम् ॥११६८॥

---

१ "आत्मनाम्"–ता० टि० । २ स च–आ०, ब०, प०। ३ ना आ०, ब०, प० । ४ –त्तिरपि भे–आ०, ब०, प० ।

इदमेवाह—

तस्माद् दृष्टस्य भावस्य न दृष्टस्सकलो गुणः ॥१५३॥ इति ।

तस्मात् प्रागुक्तादनेकान्तात् तमाश्रित्य **दृष्टस्य** उपलब्धस्य **भावस्य** चन्द्रादेः **न दृष्टो** नोपलब्धः **सकलः** समग्रो **गुणः** स्वभावः विप्रवाकारविवेकादिलक्षणो नैकान्तात् तत्र दृष्टस्यादृष्टस्वभावविरोधात् । भवतु दृष्ट एव तत्र सकलोऽपि गुण इति चेत् ; उक्तमत्र- कुतो विभ्रम इति । अन्यत इति चेत् ; न ; ततोऽप्यचन्द्रप्रतिभासात् तत्र विभ्रमे अतिप्रसङ्गात् । नापि चन्द्रप्रतिभासात् , तत्रापि सर्वगुणतयैव तस्य प्रतिभासात् । तत्राप्यन्यतो विभ्रमकल्पनायामनवस्थापत्तेः । ततो यदुक्तम्—

"तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ।" [प्र०वा० ३।४४] इति;

तदुपपद्यत एवैकान्तो यदि लभ्येत । इदं तु न युक्तम्—

"भ्रान्तेर्निश्चीयते नेति साधनं सम्प्रवर्तते ।" [प्र०वा० ३।४४] इति ;
सर्वात्मना वस्तुदर्शने भ्रान्त्यभावस्य निवेदितत्वात् ।

तदेवं रूपसंस्थानात्मकत्ववत् दृश्येतरात्मकत्ववच्च सामान्यविशेषात्मके वस्तुनि व्यवस्थिते सति यत्परस्यापद्यते तदाह—

प्रत्यक्षं कल्पनापोढं प्रत्यक्षादिनिराकृतम् । इति ।

प्रत्यक्षं प्रत्यक्षवेद्यं [1]ज्ञानज्ञेयलक्षणं वस्तु **कल्पनापोढं** जात्यादिकल्पनारहितं यत्परस्येष्टं तत् **प्रत्यक्षेण आदिशब्दादनुमानादिना च निराकृतम्** । अनेन "प्रत्यक्षं कल्पनापोढम्" [प्र० वा० २।१२३] इत्यस्य पक्षाभासत्वं ब्रुवता न हेतुभिः [2]परित्राणमित्यावेदितं भवति ।

निगमयन्नाह—

अध्यक्षलिङ्गतस्सिद्धमनेकात्मकमस्तु सत् ॥१५४॥ इति ।

सत् विद्यमानम् **अनेकात्मकम्** अनेकस्वभावम् **अस्तु** भवतु । कुतः ? **सिद्धं** निश्चितं यतः । कुतस्सिद्धम् ? **अध्यक्षलिङ्गतः** अध्यक्षञ्च लिङ्गञ्च ताभ्यां ततः । न हि प्रमाणसिद्धे [3]वस्तुन्यनस्तुङ्कारः [4] प्रेक्षावतो युक्त इति भावः । भवतु नाम प्रत्यक्षात् तत् [5]सिद्धं तस्य निश्चितलक्षणत्वात् लिङ्गात्तु कथं तस्य निश्चेष्यमाणलक्षणत्वादिति चेत् ; न ; तस्यापि विषयतः प्रत्यक्षनिश्चयादेव निश्चयात् । न हि प्रत्यक्षविषयादन्यथा [6]तस्य विषयः प्रत्यक्षवाधित्वेनाप्रामाण्यप्रसङ्गात् । न चैवं पुनस्तन्निश्चयकरणस्यापार्थकत्वम् ; तस्य लक्षणविप्रतिपत्ति-

---

१ ज्ञानं ज्ञे–आ०, ब०, प० । २ "न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हत ।"–ता० टि० । ३ वस्तुन्यवस्तुका–आ०, ब०, प० । ४ अस्वीकारः । ५ सिद्धं निश्चि–आ०, ब०, प० । ६ लिङ्गस्य ।

निराकरणार्थत्वेन सार्थकत्वात् । स्वमतानुरागपरवशचेतसो मत्सरित्वादनेकात्मके वस्तुनि नास्तुद्धारमनुमन्यत इति चेत् , न , प्रमाणालोकप्रकाशिते वस्तुनि सत्पुरुषाणां पुरुषार्थमङ्गभीरुतया मत्सरानुपपत्तेः । एतदेवाह–

सत्यालोकप्रतीतेर्ऽर्थे सन्तः सन्तु विमत्सराः । इति ।

सुबोधमेतत् ।

साम्प्रत सदृशपरिणामं सामान्यमनभ्युपगच्छतो वैशेषिकादेः तव्यवहार एव न सम्भवति, तत्परिकल्पितस्य सामान्यस्यानुपपत्तेरिति दर्शयितुं प्रथमं तावत् परसामान्यं सत्त्वमेव प्रत्याचष्टे । समानन्यायतया तत्प्रत्याख्यानादेव द्रव्यत्वादेरपरसामान्यस्यापि प्रत्याख्यानोपनीतात् (पनिपाठात्)–

नित्यं सर्वगत सत्त्व निरंश व्यक्तिभिर्यदि ॥१५४॥
व्यक्त व्यक्तं सदा व्यक्त त्रैलोक्य सचराचरम् । इति ।

अत्र द्वितीयव्यक्तशब्दो व्यञ्जकपर्यायः व्यक्त करोति व्यक्तयतीति [1]वपनादिषु (पचाद्यचि) व्यक्तमिति व्युत्पत्तेः । तदयमर्थः– सत्त्वं सामान्य व्यक्तिभिः द्रव्यादीनामन्यतमैर्विशेषैः व्यक्तं प्रकटीभूतं यदि चेत , व्यक्त व्यञ्जक द्रव्यादिषु सद्द्रव्य [2]सद्गुणः सत्कर्मेति च प्रत्ययस्योपजनकम् । अत्र दूषणम्–व्यक्तं प्रकटीभूतं भवेदित्युपस्कारः । किम् ? त्रैलोक्य त्रयो लोकास्त्रैलोक्यम् [3]चातुर्वर्ण्यादिवत् व्युत्पत्तिः । कदा तद् व्यक्तम् ? सदा सर्वकालम् ।

न चैवं सत्यसर्वज्ञः कश्चिदप्युपपद्यते ।
सत्किञ्चित्पदवृत्तया सर्वेणाशेषार्थावलोकनात् ॥११६९॥

यदा च यत्र च [4]तदस्ति तदैव तत्रैव तज्ज्ञानिनं सर्वदा सर्वत्रेति चेत , भवेदेवं यदि तद्नित्यमसर्वगतञ्च । न चैवम् , नित्यसर्वगतस्यैव तस्याभ्युपगमात् । तदाह– 'नित्यं सर्वगतम्' इति । तादृशस्याप्यभिव्यक्तिसहायस्यैव तस्य तत्प्रत्ययहेतुत्वम् , न च सर्वत्र सर्वदा तदभिव्यक्तिः, तदयमदोष इति चेत् , न , द्रव्यादीनां तदभिव्यञ्जकानां सर्वदा सर्वत्र च भावात् । तैरप्यभिव्यक्तैरेव [5]तदभिव्यक्तिर्नापरैरिति चेत् , न , सत्त्वेन [6]तदभिव्यक्तौ परस्परात्रयात्–[7]तेन तदभिव्यक्तिः, अभिव्यक्तेश्च [8]तैरतस्तयाभिव्यक्तिरिति । द्रव्यत्वादिभिरभिव्यक्तिरिति[9] चेत् , न , तैरप्यनभिव्यक्तैरतदभिव्यक्तौ सत्त्वेनापि[10] स्यात् अविशेषात् । पृथिव्यादिरूपाद्युल्लेखेनादिभिरभिव्यक्तैरेवेति चेत् , न तैरप्यनभिव्यक्तैः, अनवस्थाप्रसङ्गश्च । तत्र सामान्यधर्मैस्तदभिव्यक्तिः । स्वरूपेणैव निर्विकल्पकप्रत्यक्षविषयेणेति

---

१ वपत्यचि प०, प० । "अत् पचादिभ्यश्च"–अत०३।२।४८ । २ सद्गुणः आ०,प , प० । ३ चतुर्णा एव चातुवर्ण्यम् । ४ "सत्त्वम्"–ता० टि० । ५ सत्त्वमभिव्यक्तिः । ६ द्रव्यादिभिव्यक्ता । ७ सत्त्वेन । ८ द्रव्यादिभिः । ९ "द्रव्यादीनाम्"–ता० टि० । १० अनभिव्यक्तेन अभिव्यक्तिः स्यात् ।

चेत् ; तदपि यदि [1]नाभावविलक्षणम् , कथं तत एवाभिव्यक्तिः सत्त्वस्य नाभावादपि ? तत्रैव तस्य विद्यमानत्वादितरत्र विपर्ययादिति चेत् ; न ; तत्रेति सप्तम्यर्थस्य कारकविशेषत्वात् , न चाभावाभेदिनः कारकत्वम् ; अशक्तेः । शक्तेरेव कारकत्वेन न्यायविदां [2]प्रसिद्धत्वात् । शक्तिभावे तु भवत्येवाभावविलक्षणं तत् , तथा च तत एव भावप्रत्ययोपपत्तेरलमर्थान्तरेण भावेन[3] प्रयोजनाभावात् । शक्तेः शक्तिमदनर्थान्तरत्वात् , तेषां च परस्परतो व्यावृत्तेः कथं सत्सदित्यनुवृत्तप्रत्ययहेतुत्वम् , अनुवृत्तरूपस्यैवानुवृत्तबुद्धिनिबन्धनत्वोपपत्तेरिति चेत् ? कथमिदानीं तेषामेवेदमभिव्यञ्जकमिदमभिव्यंञ्जकं तत्त्वस्येत्यनुगतप्रतिपत्तिनिमित्तत्वम् ? न हि तेषामनुगमः परस्परतः ; भावसाङ्कर्यापत्तेः । अननुगमेऽपि शक्तिसादृश्यात् तेभ्य एव तत्प्रत्यय इति चेत् ; कथमेवं भावप्रत्यय एव तेभ्यो न भवेत् । तथा च प्रतिद्रव्यं भिद्यते भावः एकद्रव्येन्द्रियसन्निकर्षादुपलभ्यमानत्वात् , रूपादिवदिति ।

अत्र यदुक्तमात्रेयेण–"प्रतिद्रव्यं भिद्यते भावः' इति ब्रुवाणो भवान् भावं धर्मिणं प्रतिपद्यते वा, न वा ? यदि न प्रतिपद्यते ; हेतुराश्रयासिद्धो भवति। अथ प्रतिपद्यते; येनैव प्रमाणेनैं सत्सदित्यनुवृत्तप्रत्ययेन भावं धर्मिणं प्रतिपद्यते तदेव प्रमाणं तस्याश्रयभेदऽप्यभेदकत्वमनुशास्ति" [ ] इति ; तत्प्रतिविहितम् ; अनुवृत्ताभिव्यञ्जकप्रत्ययेनैव अनुवृत्तभावप्रत्ययेनाप्येकस्य भावस्याप्रतिवेदनात् । तन्नैवं तस्य कुतश्चिदभिव्यक्तिः सम्भवति स्वयमेवाभावात् । भवतोऽपि यद्यभिव्यक्तिरनर्थान्तरम् ; तर्हि तद्वदेव तस्यासिद्धत्वात् , सतोऽपि विशेषलिङ्गात् न तस्य भेदः तद्भेदप्रतिवेदिना [5]सङ्लिङ्गाविशेषेण सत्सदित्यनुवृत्तप्रत्ययरूपेण वाध्यमानत्वादिति चेत् ; ततोऽपि न तस्यैकत्वं तद्भेदनिवेदन(ना)विधुरेण विशेषलिङ्गेन वाध्यमानत्वात् । नैष दोषः ततोऽपि सर्वथा तद्भेदस्याप्रतिवेदनादिति चेत् ; किमिदानीमेकानेकरूपो भावः ? तथा चेत् ; न ; सांशत्वापत्तेः । न[7] चायमभ्युपगमो भवतां तदाह– **निरंशमिति** । ततो नानर्थान्तरं ततोऽभिव्यक्तिः ।

भवत्वर्थान्तरमेव, तस्यास्तत्प्रतिपत्तिरूपत्वादिति चेत् ; तत्सहायमपि सत्त्वं किन्न सर्वं सर्वदाऽभिव्यनक्ति ? सर्वस्य सर्वदाप्यग्रहणात् , गृहीतमेव हि द्रव्यादिकं तेन स्वविशिष्टतयाऽभिव्यज्यते दण्डेनेव देवदत्तः, न चार्वाग्दर्शिनां सर्वदा सर्वग्रहणे कश्चिदुपाय इति चेत् ; न ; सत्त्वस्याप्यग्रहणप्रसङ्गात् । न हि निरवशेषदेशकालकलाकलापावलोकनविकलस्य नित्यसर्वगतं सत्त्वं शक्यपरिज्ञानम् । न चापरिज्ञातेन तेन तद्विशिष्टतया द्रव्यादिप्रतिपत्तिः "नागृहीतविशेषणा विशेष्यबुद्धिः" [ ] इति[9] न्यायादतिप्रसङ्गात् । तदनवलोकने तदपेक्षं

---

१ नाभावलक्षण–आ०, ब०, प० । २ "न हि द्रव्यं कारकम् , किं तर्हि शक्ति"–काशि०२।३।७ । ३ "सत्त्वेन"–ता० टि० । ४ –व्यञ्जकं सर्वस्यै–आ०, ब०, प० । ५ –णैनैव :म–आ०, ब०, प० । ६ –श्रयभेदस्य भेद–आ०, ब०, प० । ७ सङ्लिङ्गाविश्लेषेण आ०, ब०, प० । ८ न वायमभ्यु–आ०, ब०, प० । ९ "विशिष्टबुद्धिरिष्टेह न चाज्ञातविशेषणा ॥८८॥"–मी० श्लो० अपोह० । लौकिक० नृ० । १० न्यायादिति प्र–आ०, ब०, प० ।

नित्यसर्वगतत्वमेव न गृह्यते । न सत्त्वमपि तस्य तस्मादर्थान्तरत्वादिति चेत्, कथमेवं तत्र तद्व्यपदेशः– 'नित्यं सर्वगतञ्च सत्त्वम्' इति ? सम्बन्धादिति चेत्, न, तेनापि तादृप्यस्यानवकल्पनात् । अवकल्पने तु स एव प्रसङ्ग'–तदनवलोकने तद्रूपं न शक्यपरिज्ञानमिति । न तादृप्यस्य 'तेनावकल्पनम्, तद्रूपज्ञानस्यैवावकल्पनादिति चेत्, न ; अतद्रूपे तद्रूपज्ञानस्य मिथ्यात्वात्, वस्तुतस्तदनित्यमसर्वगतञ्च प्राप्तम् । तया च कथमेवत्–'एको भाव' इति, प्रतिदेशकालभेदं भिद्यमाने तस्मिन्नेकत्वानुपपत्तेः ? ततो वास्तवमेव तस्य नित्यसर्वगतत्वमिति कथं सर्वदेशकालविशेषापरिज्ञाने तस्य परिज्ञानं यतः कश्चित् कदाचिदपि सत्सत्त्वं कुर्वीत ?

एतेनावयविज्ञानमपि प्रत्युक्तम्, अवयविनोऽपि स्वारम्भकसकलावयवपरिज्ञानाभावे तदाश्रितरूपस्य दुष्परिज्ञानत्वात् । तद्परिज्ञाने तदाश्रितत्वमेव तस्य न ज्ञायते न स्वरूपमिति चेत्, न, तस्य तस्मादर्थान्तरत्वात् । अर्थान्तरत्वे कथं तत्र तद्व्यपदेशः– स्वारम्भकावयवव्याप्यवयवीति ? सम्बन्धादिति चेत्, न, तेनापि तादृप्यस्यानवकल्पनात्, अवकल्पने तु पूर्ववदोषात् । अतद्रूपे तद्रूपज्ञानस्य तेनावकल्पने वस्तुतस्तद्व्याप्येवावयवीति कथमूर्ध्वाधःपार्श्वभागादिष्वेक एव स्वम्भो भवेत् ? यतः सौगत 'तदभावव्यादिनमतिशयीत वैशेषिकः । तत्र स्वारम्भकनिरवशेषावयवव्यापरिज्ञाने तत्परिज्ञानमुपपन्नम् । तथा च यदुक्तमाचार्येण– "यद्यपलब्धिकारणोपपन्नं वस्तु तद्विशेषणत्वेनोपलभ्यते भावो न सर्वाधारविशेषणत्वेन । एतेनावयविद्रव्यमपि व्याख्यातम्, येषामवयवानामुपलब्धिकारणमस्ति तैः सहोपलभ्यतेऽवयवी येषां नास्ति न तैः सह" [ ] इति, तदेवं परीक्षाप्रधानपरिभ्रष्टतामेव तस्यावष्टे ; निरवशेषावाधारावयवव्यापित्वभावयोर्भावावयविनोः कतिपयावाधारावयवगोचरतया परिज्ञानस्यासम्भवात् । सम्भवतोऽपि अवर्जितस्वरूपतया भिन्नत्वापत्तेः । ततः कतिपयाभिरपि व्यक्तिभिरभिव्यज्यमान तस्य सर्वत्राधारगतेनैव रूपेणाभिव्यज्यत इति सूक्तम्– 'सदा व्यक्तं त्रैलोक्यम्' इति ।

नन्वेवमपि द्रव्यगुणकर्मणामेव ततोऽभिव्यक्तिः सत्तैव तस्य भावात्–"सदिति यतो द्रव्यगुणकर्मसु सा भावः" [वैशे० १।२।७] इत्यभिधानात्, न सामान्यसमवायविशेषाणां विपर्ययात् । न च द्रव्यादित्रयमेव त्रैलोक्यम्, तस्य पदार्थसन्निवेशरूपत्वादिति चेत्, आह–'सचराचरम्' इति । चरत्वमिश्यात्वेन परस्य बुद्धि गच्छतीति चर द्रव्यादित्रयम्, अचर तद्विपरीतं सामान्यादित्रयम्, ताभ्यां सह वर्तत इति सचराचर त्रैलोक्यमिति ।

नेतृप्यम्–'सामान्यादौ सत्तासमवायात् तत्रस्तदभिव्यक्तिः' इति, चेत्, द्रव्यादौ कुत एतत् ? समवायादिति चेत्, न, तस्य सामान्यादावपि भावात्, अन्यथा 'द्रव्यादिसमवेतं सामान्यम्, निरवद्रव्यसमवेता विशेषाः' इति च प्रत्ययानामाश्रयभेदः । समवाये तु नित्यतामुपपन्नं,

१ गम्यत्वेन । २ अवयव्यवकल्पनम् । ३ तदभा–आ०, ब०, प० । ४ " ण तथा"–वैशे० । ५ न मूलं आ०, ब०, प० । ६ –व्यभिरिति चेत् आ०, ब०, प० । ७ समवाय ।

तत्कृतो यद्यन्यत्र तद्भावो नितरामात्मनि इति न्यायात् । यदि पुनः सत्यपि समवाये न सामान्यादौ तद्भावो द्रव्यादावपि न भवेदविशेषात् । विशेषकल्पनाया तु नैकः समवायः स्यात् । तदविशेषेऽपि द्रव्यादीनां विशेषो यतस्तत्रैव सत्त्वं न सामान्यादाविति चेत्, तर्हि द्रव्यत्वादिसामान्यविशेषाणामन्त्यविशेषाणाञ्च तत एव तत्रैव भावोपपत्तेः कैमर्थक्यात् समवायकल्पनम् ? यदि पुनः समवायात् द्रव्यादिवत् द्रव्यत्वादावपि सत्त्वं पृथ्वीत्वाद्यवान्तरसामान्यमपि किन्न भवतीति चेत् ? अयमपि भवत एव पर्य्यनुयोगो यः समवायकृतं द्रव्यादौ सत्त्वमन्वाह, नास्माकं विपर्ययात् । ततो युक्तं द्रव्यादिवद् द्रव्यत्वादौ सामान्ये विशेषसमवाययोश्च सत्त्वोपपत्तेः सचराचरं त्रैलोक्यं ततो व्यक्तं भवेदिति ।

यत्पुनरिदं सूत्रम्–"सदिति यतो द्रव्यगुणकर्मसु स भावः" [वैशे० १।२।७३] इति, तत्रैव भाष्यञ्च "परस्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टं सदिति यतोऽभिधानं प्रत्ययश्च भवति स भाव इति । उपलक्षणार्थश्चैतत् सूत्रम्, तथा द्रव्यमिति यतः पृथिव्यादिषु तद् द्रव्यत्वं गुण इति यतो रूपादिषु तद्गुणत्वं कर्मेति यत उत्क्षेपणादिषु तत्कर्मत्वम्" [ ] इति । तत्र यदि सत्त्वादयो न सन्ति कथं तेभ्यः क्वचिद् व्योमकुसुमेभ्य इव सदाद्यभिधानस्य प्रत्ययस्य च प्रवृत्तिः ? सन्त्येवोपचारतस्त इति चेत्, न; तत्कुसुमेष्वपि तदनिवारणात् । किं वा सद्भिस्तेषां साधर्म्यं यतस्तत्र सत्त्वमुपचर्येत ? सद्विशेषणत्वमेव, तथा च भाष्यम्–"यथा च सन्ति द्रव्यगुणकर्माणि सतामपि द्रव्यगुणकर्मणां विशेषणं तथा सामान्यविशेषसमवाया इति सन्त इव सन्त इत्युच्यन्ते ।" [ ] इति चेत्; न ; परम्पराश्रयापत्तेः–सति द्रव्यादीनां सत्त्वे तद्विशेषणत्वेन सत्त्वादेः सत्त्वम्, सता च तेन सम्बन्धाद् द्रव्यादीनां सत्त्वम् पृथिव्यादीनाञ्च द्रव्यादित्वमिति । तन्नोपचारतस्तेषां सत्त्वम् ।

नापि सत्तासम्बन्धात्; सत्तासम्बन्धे हि सामान्यादीनामपरजातित्वप्रसङ्ग इति स्वयमेव तन्निराकरणात् । भवन्तु तर्हि स्वत एव ते सन्त इति चेत् ; कथं तर्हीदं भाष्यम्–"सामान्यविशेषसमवायानां तु सदित्यभिधानप्रत्ययावौपचारिकौ" [ ] इति ? वस्तुभूतस्वरूपसत्तानिबन्धनयोस्तयोरौपचारिकत्वानुपपत्तेः । स्वतश्च तेषां सत्त्वे तद्वद् द्रव्यादीनामपि स्यादविशेषात् । एतदेवाह–

सत्तायोगाद्विना सन्ति यथा सत्तादयस्तथा ॥१५५॥
सर्वेऽर्था देशकालाश्च सामान्यं सकलं मतम् । इति ।

सत्तया महासामान्येन **योगः** सम्बन्धः तस्माद् **विना** तमन्तरेण **यथा** येन

---

१ समवेतत्वम् । २ सत्त्वभाव । ३ समवायाविशेषेऽपि । ४ समान्येनवि–आ०, ब०, प० । ५ –कर्मसु इति आ०, ब०, प०। ६ "परस्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टा सत्सदिति प्रत्ययानुवृत्तिः सा चार्थान्तराद्भवितुमर्हतीति यत्तदर्थान्तरं सा सत्तेति सिद्धा ।"–प्रश० भा० पृ० १६५ । ७ "अभिधानं प्रत्ययश्च भवतीति सम्बन्धनीयम्, एवं गुणत्वकर्मत्वयोरपि ।"–ता० टि० । ८–न प्रत्ययप्रवृ–आ०, ब०, प० । ९ सामान्यादीनाम् ।

सत्त्वद्रव्यत्वपरमसत्तासम्बन्धकल्पनायामनवस्थितिरिति प्रकारेण वेषु तत्प्रवीत्यभावप्रकारेण वा, सन्ति विद्यन्ते सत्तादयः आदिशब्दाद् द्रव्यत्वादयश्च । तथा येन प्रकारेण अर्थाः द्रव्यादयः, "द्रव्यगुणकर्मसर्वार्थ-" [वैशे० ८।२।३] इति वचनात्, सर्वे निरवशेषाः सन्तीति सम्बन्धः । न हि तत्राप्यर्थान्तरस्य सत्त्वस्य प्रतिपत्तिः, रूपमेदानवलोकनात् । सम्बन्धात् तदनवलोकनमिति चेत्, न, सर्वत्राप्यनवलोकनप्रसङ्गात् । 'तद्भेदाद्रूपान्तरस्याप्यं नर्थान्तरत्वात् । तथापि' 'तस्यावलोकने नानेकान्तप्रतिक्षेपः' अवलोकितानवलोकितरूपत्वेन तस्यावश्यम्भावात्, तथा च सामान्यविशेषात्मकत्वेनैव किम् स्यात्, यतः प्रतीतिमतिलङ्घ्य सत्त्वमर्थान्तरं परिकल्प्येत ? कथं वानवस्थानिर्मुक्तिः ? सत्त्वादिषु सत्त्वान्तरस्याभावादिति चेत्, न, जीवति सत्प्रत्यये तदभावस्यासम्भवात् । औपचारिक एव स 'तत्र माणवके सिंहप्रत्ययवदिति चेत्, न, बाधकाभावे 'तत्त्वानुपपत्तेः । 'तत्र 'तदन्तरानवलोकनमेव बाधकमिति चेत्, यद्येवं प्रतिपद्यसे द्रव्यादिष्वपि तन्मास्तु, अनवलोकनस्याविशेषात् । अनवलोकितमपि" सत्प्रत्ययादवगम्यत इति चेत्, न तर्हि तत्प्रत्ययस्यानवलोकनं बाधकमिति कथं सत्त्वादिष्वपि तत्तदन्तरं नावगम्येत यतोऽनवस्थान न प्राप्नुयात् ? तस्मात् स्वत एव द्रव्यादयः सन्ति, पृथिव्यादीनि द्रव्याणि रूपादयो गुणाः उत्क्षेपणादीनि कर्माणीति वक्तव्यम्, प्रतीतिव्यापारस्यैवमेवानुभवात् ।

नन्वेवं सत्त्वादीनां "पृथगभावे कथं "दृष्टान्तत्वम् ? परप्रसिद्ध्येति चेत्, न, तस्याः प्रमाणत्वे तथा तदभावानुपपत्तेः । अभ्युपगममात्रत्वे तु तद्विषयनिदर्शनबलादवस्थाप्यमान तद्द्रव्याद्यर्थसत्त्वमपि तादृशमेव भवेदिति चेत्, सत्यम्, न हि वयं दृष्टान्तबलात् तत्र तत्सत्त्वमवकल्पयामो निरपवादात्" तत्प्रतीतिबलादेव तदवकल्पनात् । सत्त्वादिनिदर्शनोपदर्शनं तु परस्य तद्बलमिलङ्घनमवस्थापयितुम्-'यदि द्रव्यादिषु तद्बलमतिलङ्घ्ययसि किम् सत्त्वादिष्वपि लङ्घ्यमनवस्थादोषमस्माकर्षसि ?' इति । भवति चैवमवस्थापनम्"-"स्वस्थाः"(सार्थ)श्रिता वादिनो न विचलिष्यन्ति" [ ] इति न्यायात् । कुतो वा सत्त्वादीनां सामान्यरूपत्वं यतस्तत्र सामान्यान्तरभावः ? समानप्रत्ययहेतुत्वादिति चेत्, न, देशकालावस्थासंस्कारादेरपि तद्रूपत्वापत्तेः । अस्ति हि तत्रापि" तत्प्रत्ययहेतुत्वम्-'दक्षिणात्योऽयम् अयमपि दाक्षिणात्यः' इति देशात्, 'प्रावृषिजोऽयम् अयमपि प्रावृषिज' इति कालात्, 'बालोऽयम् अयमपि बालः' इत्यवस्थातः, 'पण्डितोऽयम् अयमपि पण्डितः' इति संस्काराच्च तत्प्रत्यय

---

१ अनवलोकितसम्बन्धविशेषात् । २ सत्त्वं द्रव्यत्वस्य सम्बन्धान्तरस्य । ३ अनवलोकितसम्बन्धादभेदेऽपि । ४ रूपान्तरस्य । ५ -वत्तेनैव आ०, ब०, प० । ६ सत्त्वादिषु । ७ औपचारिकत्वानुपपत्तेः । ८ सामान्यादिषु । ९ सत्तान्तर । १० गगनान्यम् । ११ पृथगभावे आ०,ब०,प० । १२ "सत्प्रत्ययोपपत्तिर्हि यस्मिन् सति यथा गगनारयः"इति-ता०टि० । १३-वाक्षात्रति-आ०, ब०, प० । १४ -पत्तं स्वस्थप्रतिपत्तिश्रिता ता० । 'अस्मिन् पाठे स्वमतबाधामयाधिपत्तिश्रिता वादिनः' इत्यर्थो बोध्यः । १५ "स्वस्थाश्रयश्रिता वादिनो न विचलिष्यन्तीति"-प्रमेयक०पृ०११२ । १६-तिप्रस्य- आ०, ब०, प० ।

प्रादुर्भावस्यावलोकनात् । अथ तत्रापि देशादेर्धर्मविशेषाणामुत्पत्तौ तदधिष्ठानाः सामान्यविशेषा एव तत्प्रत्ययहेतवो न देशादय इति चेत् ; न ; नेभ्य एव तदर्शनात् । अन्यतस्तत्परिकल्पनायां सर्वत्र हेतुफलभावनियमनिर्लोपापत्तेः । अतो देशादय एव तद्धेतव इति भवत्येव तेषां सामान्यरूपत्वम् । तदेवाह–**देशकालाश्च** । च शब्दादवस्थादयश्च **सामान्यं** भवेयुरिति वाक्यशेषः । तथा च यदुक्तम्–"सामान्यादयो न सत्तासम्बन्धवन्तः, अवान्तरसामान्यविकलत्वात्, ये तु तत्सम्बन्धवन्तो न ते तद्विकलाः यथा द्रव्यादयः तद्विकलाश्च सामान्यादयः, तस्मान्न तत्सम्बन्धवन्तः"[ ] इति ; तत्प्रतिव्यूढम् ; देशादिवदन्येषामपि द्रव्यगुणकर्मणां कचित् कथञ्चित् कदाचित् सामानप्रत्ययहेतुत्वेन सामान्यरूपतोपपत्तौ न सत्तासम्बन्धो नावान्तरसामान्यमित्युभयाव्यावृत्त्या वैधर्म्योदाहरणत्वानुपपत्तेः । समानप्रत्ययहेतुरेव सामान्यं देशादयस्तु नैवम् , विशेषप्रत्ययस्यापि तत एव भावादिति चेत् ; न तर्हि सत्त्वद्रव्यत्वादयोऽपि सामान्यं समानप्रत्ययवत् [1]प्रागभावादिरूपादिव्यावृत्तिप्रत्ययस्यापि तत एव भावादिति न किञ्चिदेतत् । स्याद्वादिनां तु नायं दोषः सर्वस्यापि विशेषात्मकत्ववत् सामान्यात्मकत्वस्यापि प्रतीतिवलेन तैरभ्युपगमात् । तदाह– **सकलं** चेतनेतररूपं वस्तु **मतम्** अङ्गीकृतं सामान्यमिति सम्बन्धः ।

सकलमपि यदि सामान्यं तर्हि सन्मात्रमेव जगत् प्राप्तम् , तस्माद्व्यतिरेके सामान्यरूपत्वानुपपत्तेः, अभिमतञ्चैतद् ब्रह्मविदाम्–सकलभेदकलोपमलविकलस्य तन्मात्रस्यैव ब्रह्मरूपतया तैरभ्युपगमादिति चेत् ; कुतस्तदभ्युपगमः ? स्वेच्छानिबन्धादभ्युपगमात् तत्सिद्धावतिप्रसङ्गात् । प्रतिभासवलोपनिबन्धादिति चेत् ; न ; निर्भेदस्याप्रतिभासनात् । न हि निर्भेदस्य सतः प्रतिभासनम् जीवपुद्गलादिभेदतत्प्रभेदपरिकलितशरीरतया भेदरूपस्यैव तस्य प्रत्यवभासनात् । कथमन्यथा संसारतत्कारणादिः , तस्य भेदरूपत्वेन तदभावेऽनुपपत्तेः ? मा भूदिति चेत् ; न ; "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" [कठ० ४।१०] इत्यादेर्वचनस्य निर्विषयत्वापत्तेः । भवतु भेदप्रतिभासः स तु अविद्यारूपवारवनितास्वैरविलासपरिकल्पितत्वेनातत्त्वविषय एवेति चेत् ; कथं तस्यार्थान्तरत्वे ब्रह्मणः तात्त्विक एव भेदो न भवेत् ? तस्यासत्त्वादिति चेत् : न ; 'असंश्च प्रतिभासश्च' इति व्याघातात् । भावाभावाभ्यामनिर्वचनीयत्वादिति चेत् ; न ; तद्रूपस्याप्यसत्त्वे भेदप्रतिभासत्वानुपपत्तेः । सत्त्वे भेदतात्त्विकत्वस्य तदवस्थत्वात् । तस्यापि ताभ्यामनिर्वचनीयत्वकल्पनायां प्राच्यप्रसङ्गानिवृत्तेरनवस्थापत्तेश्च । ततस्तस्यानर्थान्तरत्वे तु ब्रह्मापि तद्वत् तद्विलासपरिकल्पितं भवेत् । न चैवम् , तस्य निरवद्यविद्यारूपतया परैः प्रतिज्ञानात् । नायं दोषः तस्य ततो भेदाभेदाभ्यामनिर्वाच्यत्वादिति चेत् ; न ; तद्रूपस्यासत्त्वे प्रतिभासत्वासम्भवात् । सत्त्वेऽप्य-

---

१ साध्यहेत्वभय । २ प्रागभावा–आ०, ब०, प० । प्रागभावादिव्यावृत्तिप्रत्ययः सत्त्वात्, रूपादिव्यावृत्तिप्रत्ययः द्रव्यत्वात् । ३–पत्रिक– आ०, ब०, प० । ४ सन्मात्रस्यैव । ५ –तात्त्विकस्त्व आ०, ब०, प० । ६–प्रसङ्गानतिवृ– आ०, ब०, प० । ७ परिज्ञा– आ०, ब०, प० । "विज्ञानमानन्दं ब्रह्म"–बृहदा० ३ । ९ । २४ ।

र्थान्तरत्वेऽनर्थान्तरत्वे च पूर्ववत्प्रसङ्गात्। तस्यापि ताभ्यामनिर्वचनीयत्वकल्पनायाम् अनवस्थानोपनिपातात्।

स्यान्मतम्-अयमेव अविद्यामुपप्लवप्रविलासप्रपञ्चस्य स्वभावो यदुक्तविचारपरशुपरिपातासहिष्णुत्वम्। तत्सहिष्णुत्वे तत्प्रपञ्चस्वपरित्यागापत्तेः।

'अद्वादविद्याऽविद्यास्तं विचारं सहते यदि।
न्यायघातासहिष्णुत्वमविद्यालक्षणं यतः॥" [ ]

इति वैचनादिति चेत्, न, तस्त्वभावस्यापि सैरेवासत्त्वयोस्ताभ्यामनिर्वचनीयत्वे च भेदाभेदयोस्ताभ्यामनिर्वचनीयत्वे च पूर्ववत्प्रसङ्गात् तस्यापि तत्प्रविघातासहिष्णुत्वव्यावर्णनायामनवस्थितेरप्रतिक्षेपात्। ततो दूरं गत्वापि सात्त्विकं तदर्थान्तरञ्च तद्रूपमभ्युपगन्तव्यमिति कथं न भेदो वास्तवो यतस्तदात्मकमेव सत्त्व न भवेत्? तदाह-

सर्वभेदप्रभेद सत् सकलाङ्गशरीरवत् ॥१५६॥ इति।

भेदाश्च जीवपुद्गलादय. प्रभेदाश्च तेषामवान्तरविशेषा, जीवस्य संसारिणो मुक्ताः त्रसस्थावराः सकलेन्द्रिया विकलेन्द्रियाः संज्ञिनोऽसंज्ञिन इति, पुद्गलस्य पृथिव्य आपस्तेजोवायव इति भेदप्रभेदा', सर्वे निरवशेषा भेदप्रभेदा यस्मिंस्तत् **सर्वभेदप्रभेद सत्** सत्त्वं भावप्रधानस्यानिर्देशस्य। **सकलेत्यादि** तदेव निदर्शनम्। **सकलान्यङ्गानि** करचरणादीनि यस्य तच्च तच्छरीरं च तदिव तद्वदिति। तात्पर्यमत्र-यथा न पाणिपादादेरर्थान्तरं शरीरं तद्भाव एवोपलभ्यमानत्वात्। न हि तदर्थान्तरत्वे तस्य तद्भाव एवोपलब्धि', गोरभावेऽप्यश्वस्योपलम्भात्। न चैवम् अतोऽनर्थान्तरमेव ततस्तत्। तथाहि तत्-"भावे चोपलब्धेः" [ब्रह्मसू० २।१।१५] इति। अतश्च तस्य ततोऽनर्थान्तरत्व यस्यत्यक्षतस्तथैवोपलभ्यते। न हि गवाश्ववत् पाण्यादिशरीरयोर्भेदेनोपलब्धिः, परस्परविच्छेदभावेनैवोपलब्धेः। न चोपलब्धेर्लक्षणान्तरम्, अतिप्रसङ्गात्। इदमप्युक्तम्-"भावाच्चोपलब्धेः" [ब्रह्मसू० २।१।१५] लक्षणान्तरं इति'। तथा तत एव सद्रूपमपि भेदादनर्थान्तरमभ्युपगन्तव्यम्। न हि तस्यापि भेदाभावेऽपि भेदादन्यत्वेनाप्युपलब्धि', सत्येव द्रव्यादौ भेदे सत्प्रभेदे च तदनर्थान्तरत्वेन च सर्वत्र सर्वदापि प्रतिपत्तेः। तदनर्थान्तरत्वे तस्य भेदस्येव भेदान्तरं प्रति तस्याप्यनुगमनं न भवेत्, तथा च "तदन्तरस्य सर्वस्याप्यसत्त्वादेकभेदमात्रमेव सद्रूप प्राप्तम्। तच्च प्रतीतिविरुद्धमिति चेत्, न, शरीरेऽप्येव प्रसङ्गात्। न हि तस्यापि पाण्यादेरव्यतिरेके "तेनैव "तदन्तरं प्रत्यनुगमन-

---

१ यदुक्तम्-आ०, ब०, प०। २ स्यादविद्या-आ०, ब०, प०। ३ न्यायाघातस-ता०। ४ "अविद्याया अविद्याश्च इदमेवतु लक्षणम्। मानाद्यघातासहिष्णुत्वमसाधारणमिष्यते ॥"-तू० सं० वा० श्लो० १८१। ५ सदसत्त्वया-आ०, ब०, प०। ६ प्रभा स्था-आ०, ब०, प०। ७ पृथिव्यास्ते-आ० ब०, प०। ८ तत्स्वरूपान्तरम्। ९ 'लक्षणान्तर' इति पदं सम्यगवधारणमिति भाति। १० "भावाच्चोपलब्धेरिति वा सूत्रम्"-ब्रह्म० शा० भा०। ११ भेदान्तरस्य। १२ पाण्यादिनैव। १३ अवयवान्तरम्।

मिति तस्याशरीरत्वादेकावयवमात्रभव तदपि प्रतीतिविरुद्धं प्राप्नुयात । स्वत एव पाण्यादेः शरीरत्वं नैकशरीरानुगमनादिति चे ; द्रव्यादेः सत्त्वमपि तथैव किन्न स्यात् ? सत्त्वबहुत्वापत्तेरिति चेत् ; शरीरबहुत्वापत्तिरितरदपि न भवेत् ।

ननु शरीरं नाम कणादस्य परम्परया परमाणुकार्यम् , परमाणुभ्यां हि संयोगसहाभ्यां द्व्यणुकम् , द्व्यणुकाभ्याञ्च चतुरणुकमुत्पद्यते, यावदन्त्यावयवि शरीरमिति तन्मतप्रसिद्धेः । परमाणवश्च नित्याः ते च यदि प्रवृत्तिस्वभावाः; सर्वदा तत्कार्याणामुत्पत्तिरेव नोपरमः । निवृत्तिस्वभावत्वे नोत्पत्तिः । उभयस्वभावत्वं तु विरोधादसम्भाव्यम् । अनुभयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानात् नित्यप्रवृत्तिप्रसङ्गः । अतन्त्रत्वेऽप्यदृष्टादेः ; नित्याप्रवृत्तिप्रसङ्गात् । तस्मादनुपपन्नः परमाणूनां कारणभाव इति कथं तद्द्व्यणुकादिरन्त्यावयविपर्यन्तः कार्यप्रबन्धो यस्य स्वावयवभेदाभेदपरिचिन्तया [1]परिक्लिश्नीम इति चेत् ; न ; सद्रूपस्यार्थोपनिपतस्यैवमसम्भवात् । तदपि यदि प्रवृत्तिस्वभावम् ; सृष्टिरेव सर्वदा जगत इति कथं प्रलयो महाप्रलयो वा ? निवृत्तिस्वभावं चेत् ; सर्गाभावात् कथं जगत्प्रपञ्चप्रतिभासः ? तदुभयस्वभावत्वं पुनस्तत्रापि [2]निष्कलैकस्वभावे विरोधादेवासम्भाव्यम । अनुभयस्वभावञ्चेत् ततोऽपि कथं जगदुत्पत्तिस्थितिविपत्तयो[3] यत इति ? निमित्तवशादेव तस्य [4]प्रवृत्तिर्निवृत्तिर्वा न स्वत इति चेत् ; तदपि निमित्तं यदि नित्यमव्यतिरिक्तञ्च ततः ; किमभ्यधिकमभिहितम् ? व्यतिरिक्तञ्चेत् ; कथमदृष्टम् तत्त्वम्? अपि च प्रवृत्तिनिवृत्त्योरन्यतरैव तस्यापि स्वभावो नोभयम , विरोधाविशेषादिति सम एव दोषः—प्रवृत्तिस्वभावत्वे सर्ग एव जगतः, निवृत्तिस्वभावत्वे च न प्रपञ्चप्रतिभास इति । तस्याप्यनुभयस्वभावस्य निमित्तवशात् प्रवृत्तिनिवृत्तिपरिकल्पनायाम् ; अयमेव प्रसङ्गोऽनवस्थापत्तिश्च । तन्न तन्नित्यमनित्यमपि ।

ब्रह्मणश्चेन्न तत्कार्यं जगद्ब्रह्मकृतं कथम् ?
कार्यं चेत् नित्यकार्यस्य कदाचिद्भवनं कथम् ? ॥ ११७० ॥
सर्गप्रलययोर्येन कादाचित्कत्वमुच्यताम् ।
कादाचित्कनिमित्ताच्चेत् तत्कादाचित्ककल्पनम् ॥ ११७१ ॥
तत्राप्येवं प्रसङ्गे किन्नानवस्थितिरापतेत् ।
अनादेस्तत्प्रबन्धस्य न चेद्दोषोऽनवस्थितिः ॥ ११७२ ॥
क्रमे सति प्रबन्धः स्यादक्रमाच्च क्रमः कथम् ? ।
अक्रमं च मतं ब्रह्म कूटस्थं यत्तदिष्यते ॥ ११७३ ॥

---

१ शरीरमपि । २ परिक्लेम आ०, ब०, प० । ३ —यो नियतः आ०, ब०, प० । ४ प्रवृत्तेर्निवृ— आ०, ब०, प० ।

प्रबन्धवर्त्तिभिर्ताद्वेर्निमित्तं तत्प्रवक्ष्यते ।
प्रबन्धवर्त्त्वं तस्यापि परस्मादेव तादृशात् ॥ ११७४॥
तथा सत्यम (न) वस्यानादेरणभिर्मुच्यसे कथम् ।
तस्मोपनिषदं सत्त्वमप्युत्पत्त्यादिकारणम् ॥ ११७५॥

सत्यम्, अकारणमेव ब्रह्म तस्य नित्यनिरञ्जनरूपतया शान्तात्मनः क्वचित्प्रवृत्तिनिवृत्त्योरसम्भवात्, अविद्योल्लासस्य तु जगत्कारणस्य तदात्मतीयकत्वात् तदपि तत्कारणमावेदयन्ति श्रुतयः । नहि विद्यासम्पर्कविकलस्तदुल्लासः प्रतिभासरहितस्य तस्यासम्भवात्, प्रतिभासस्य च विद्यारूपत्वादिति चेत्, कुतस्तयामूतस्य परिज्ञानम् ? "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" [छान्दो० ६ । २ । १] इत्यादेरम्नायादिति चेत्, न, तस्यापि निरंशपरमाणुरूपस्याऽप्रतिवेदनात् । स्थूलरूपे तु नानावयवसाधारणत्वमवश्यम्भावि, तस्य तदन्तरेणानुपपत्तेः । तथा च तदेव स्वावयवेभ्योऽनर्थान्तरं भवदभ्युपेते वस्तुनि निदर्शनम्, शरीरग्रहणस्योपलक्षणत्वादिति सिद्धो नः सिद्धान्तः । तस्याप्यविद्योल्लासनिबन्धनत्वेन न स्वावयवेभ्यो भेदो नाप्यभेदो वस्तुसद्विषयत्वात् तद्विकल्पस्येति चेत्, कथमिदानीं तद्बलात् तत्त्वतो ब्रह्मसिद्धिः अवस्तुसतस्तद्वनुपपत्तेरतिप्रसङ्गात् । मा भूत्तर्हि तत्प्रतिपत्तिः तदुपकल्पितादन्यत एव ज्ञानात् तत्परिज्ञानोपगमादिति चेत्, न, तत्रापि तत्त्वेत्यादेरनुगमादनवस्थापत्तेश्च । ततो दूरमनुसृत्यापि किञ्चित्तात्त्विकमेव तज्ज्ञानमनर्थान्तरञ्च स्वावयवेभ्यो वक्तव्यं तथा च सिद्ध तदेव सद्रूपस्यापि भेदाभेदरूपतत्त्वं(रूपत्वम्)तेनैव निर्बाधादवशेषादिस्युपपन्नमुक्त 'सकलाङ्गशरीरवत्' इति ।

यस्य तु मतम्—साध्यधर्मैकत्वं निदर्शनस्य शरीरस्यापि तदवयवेभ्यो नियमेनानर्थान्तरत्वाभावादिति, तदपि दुर्भणम् ; जीवस्यनर्थान्तरत्वपरिज्ञाने तदनुपपत्तेः । समवायादेव तत्परिज्ञानं नानर्थान्तरत्वादिति चेत्, कः पुनः संयोगात् समवायस्य विशेषो यतस्तत एव तत्परिज्ञानं न संयोगादपि । अयुतसिद्धसम्बन्धत्वमेवेति चेत्, न तावदियमयुतसिद्धिरवयवदेशत्वम्, शरीरतदङ्गयोस्तदभावेन समवायाभावापत्तेः । नहि तयोरवयवदेशत्वम्, शरीरस्य तदङ्गदेशत्वात् तदङ्गानाञ्च तदारम्भकदेशत्वात् । अश्वमहिषवत् लौकिकस्य पृथग्देशत्वस्याभावादपृथग्देशत्वं तयोरिति चेत्; न, करतलगतयोः कुवलयामलकयोरपि तथात्वेन समवायापत्तेः । नाप्यभिन्नकालत्वम्, अत एव । न च शरीरमभिन्नकालत्वं तदङ्गानाम्, प्रागपि भावात्, अन्यथा तदारम्भकत्वानुपपत्तेः । शरीरस्यैव सम्बन्धापेक्षमभिन्नकालत्वम्, नहि शरीरमन्यदाऽन्यदा च सम्बध्यते । सम्बध्यमानस्यैव तस्योत्पत्तेरिति चेत् ; कुत एतत् ? तत्सम्बन्धस्य तदेकसामग्र्यधीनत्वादिति चेत्, न, तस्य नित्यस्योपगमात् । तदुत्पत्तिसमये तस्य भावादिति चेत्, तत एव कुवलयामलकेन तादृशमेवोत्पत्स्यते । आमलकस्याकारणत्वान्नेति चेत्, न तेनापि तत्सम्बन्धविमुक्त्या

---

१ आम्नायस्यापि । २ भेदाभेदविकल्पस्य । ३ आम्नायस्यैव । ४ आम्नायतो ब्रह्मप्रतिपत्तिः । ५ तैरवयवि-आ०, ब०, प० । ६ करतलस्थयो-आ०, ब०, प० ।

देरनिवारणात्, तथा च तत्सम्बन्धोऽपि समवाय एवेति न संयोगस्यावकाशः कश्चित्।

का चेयमुत्पत्तिर्यस्याः सम्बन्धाभिन्नकालत्वम्? प्रागसतः शरीरस्यात्मलाभ एवाभावविलक्षण इति चेत्; न; तस्य द्रव्यादिष्वनन्तर्भावे सप्तमस्य पदार्थस्य प्रसङ्गात्। अन्तर्भावोऽपि न सामान्यादित्रयतया; तस्य नित्यत्वेनानुत्पत्तिरूपत्वात्। नापि गुणकर्मत्वेन; शरीरस्य द्रव्यत्वोपगमात्। द्रव्यत्वेनैवेति चेत्; कुतस्तस्य तत्त्वम्? स्वत एवेति चेत्; न; द्रव्यत्वकल्पनावैफल्योपनिपातात् द्रव्यत्वसम्बन्धादिति चेत्; न; सम्बन्धार्धीनस्य स्वभावस्यातात्त्विकत्वात् स्फटिकोपरागवत्। संयोगायत्तमेव स्वरूपमतात्त्विकं न समवायार्धीनमिति चेत्; न; तादात्म्याभावस्योभयत्राविशेषात्। ततो वस्तुतः सप्तम एव पदार्थ इति दुस्त्यजो व्याघातः परस्य। तन्न प्रागसत आत्मलाभ उत्पादः। तर्हि भवतु सत्तासम्बन्धः कारणसम्बन्धो वा स इति चेत्; कथमेवमुत्पादसम्बन्धयोरभिन्नकालत्वं तस्य भेदनिष्ठत्वात्? सम्बन्धस्यैवोत्पादत्वे च भेदासम्भवात्। तन्नाभिन्नकालत्वमयुतसिद्धिः। अभिन्नस्वभावत्वमिति चेत्; सिद्धस्तर्हि तादात्म्यपरिणाम एव समवायः, तत्रैव सति तत्स्वभावत्वोपपत्तेरिति न साध्यवैकल्यं निदर्शनस्य।

नापि साधनवैकल्यम्; निर्बाधतादाम्यप्रत्ययविषयत्वस्य शास्त्रकारहृदयगतस्य साधनस्य दार्ष्टान्तिकवत् तत्रापि भावात्। ततो युक्तमेव तत्–'सर्वभेदप्रभेदात्मकं सत्, निरवद्यतादात्म्यप्रत्ययविषयत्वात्, स्वाङ्गप्रत्यङ्गात्मकशरीरवत्' इति। सद्रूपाव्यतिरेके कथं भेदप्रभेदौ भावानामिति चेत्? न; तथात्वेनापि प्रतिभासात्। नहि सद्रूपतयैव भावाः प्रत्यवभासन्ते सद्रूपेणेव समविषमपरिणामाधिष्ठानभेदप्रभेदरूपेणापि परिस्फुटज्ञानवपुषि तेषां निरपवादतया प्रत्यवभासनात्, निरवद्यप्रतिभासोपाध्यायत्वाच्च भावतत्त्वप्रतिष्ठायाः। तदाह—

तत्र भावाः समाः केचिन्नापरे चरणादिवत्। इति।

तत्र तस्मिन्नुक्तरूपसद्रूपे सति **भावा** जीवादयः **समाः** परस्परं समानपरिणामरूपा नाभेदिनः। तथा च दुरुन्नातमेतत्–

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" [श्वेता० ६।११] इति।

जीवानां प्रतिशरीरं सदृशपरिणामाधिष्ठानतया भेदिनामेव प्रतिभासनान्नाभेदिनाम्। उपाधिभेदादेव तत्र भेदप्रतिभासो न स्वरूपभेदादिति चेत्; न; सर्वाभेदवादिनामुपाधिभेदस्यापि वस्तुवृत्तेनाभावात्। सोऽपि परोपाधिभेदोपनीतान् तत्प्रतिभासादेव न तत्त्वत इति चेत्; न; अनवस्थादोषात्। नचापरापरपरिमितोपाधिभेदप्रतिभासा युगपदनुभवपारिजातशीतलच्छायामण्डलपिण्डीभूताः प्रत्यवलोक्यन्ते येनैवं तत्त्वस्थितिं प्रति विलम्बविधुराः सुखमध्यासीमहि। वस्तुतश्चोपाधिभेदव्यवस्थापने न प्रतिभासभेदादन्यन्निबन्धनम्। अतस्तत एव युग-

---

१ "सामान्य" –ता० टि०। २ भेदप्रभेदरूपेणापि। ३ उपाधिभेदोऽपि। ४ –त्रपरिजात–आ०, ब०, प०। ५ "विश्वस्तविधः, सनौ विलम्भविश्वासौ इत्यमरः। विलम्बविलम्भशब्दावेकवातुसमुत्पन्नौ"–ता० टि०। ६ –दन्यनि– आ०, ब०, प०।

पदनेकक्षणगोचराणां जीवानामपि भेदोपपत्तेः समाना एव ते परस्परं नामेदिन इत्युपपन्नमुक्तम्– 'समा भावाः' इति ।

यद्येवमेकशरीराधिष्ठानानामपि पूर्वापरविवर्तक्षणानां सादृश्यमेव परस्परं नैक्यमिति चेत्, अत्रोत्तरम्– 'केचिन्नापरे' इति । केचित् नानादेहग्रहपरिवर्तिन एव ते समा नापरे नैकवपुःसम्पर्किणस्तत्र भेदवदभेदस्यापि तत्पतीतिबलेनाभ्युपगमात् । अभिहितञ्चैतत्– 'भेदज्ञानात्' इत्यादिना । यदि वा केचित् जीवा एव परस्परं समा नापरे जीवपुद्गलद्रव्यस्तेषां परस्परतो विसदृशपरिणामाधिष्ठानतया प्रतीतेः । अत्रोदाहरणम्–'चरणादिवत्' इति । चरण आदिर्येषां करशिरःपृष्ठोदरादीनां ते इव तद्वदिति । यथा चरणादीनामेकशरीरात्मकत्वेऽपि भेदप्रभेदरूपत्वं परस्परतः समविषमात्मकतया भिन्नरूपतयैव प्रतीतेः । चरणादयो हि चरणादिभिः समा न करादिभिः, तेऽपि तदन्तरैः समा न चरणादिभिरिति, तथा सदृशहमयादितैकसद्रूपत्वेऽपि जीवपुद्गलादीनामिति ।

साम्प्रतं प्रस्तुतप्रस्तावार्थविस्तारमुपसंहृत्यार्थं दर्शयन्नाह–

एकानेकमनेकान्तं विषमञ्च समं यथा ॥ १८७ ॥
तथा प्रमाणतः सिद्धमन्यथाऽपरिणामतः । इति ।

सदित्यनुवर्तते सद्विषयविषयिरूपं वस्तु एकम् अनुगतरूपापेक्षया, अनेकं व्यावृत्ताकारापेक्षया । अनेन द्रव्यपर्यायरूपत्वमुक्तम् । तथा विषमं विसदृशरूपं 'च' शब्दः समस्मिन्नत्र द्रष्टव्यः । समं च न केवलं विषममेव, अपि तु समं च सदृशपरिणामि च । इत्यनेन सामान्यविशेषात्मकत्वं निवेदितम् । अत एव अनेकान्तम् अनेकस्वभावम् । न चैतद् वाङ्मात्रमपि, यथा येन प्रस्तुतप्रस्तावप्रपञ्चितप्रकारेणानेकान्तं वस्तु भवति तथा तेन प्रकारेण सिद्धं निश्चितम् । कुतः प्रमाणतः प्रत्यक्षादन्यतश्च, तस्यापि तद्विषयत्वेन निरूपयिष्यमाणत्वात् । यद्येकं कथमनेकं विरोधादिति चेत्? अत्रोत्तरम्–'अन्यथा' इत्यादि । अन्यथा अन्येनैकान्तप्रकारेण विषयग्रहणव्यापारः परिणामस्तदभावाद् अपरिणामतः प्रमाणस्येति विभक्तिपरिणामेन सम्बन्धः । तथा हि यद्येकमनेकात्, तदपि एकरूपादेकान्ततो व्यावृत्तं प्रमाणतोऽवगम्येत भवत्येव तद्भेदस्य विरोधः प्रमाणप्रत्यनीकत्वात् । न च तस्य तादृशस्य प्रतिपत्तिः, अन्योन्याश्रयत एवावगमात् । न च प्रमाणावगते विरोधः, वस्तुमात्रेऽपि तत्प्रसङ्गेन नैरात्म्यवादोपनिपातात् ।

क्षणिकमेव वस्तु प्रत्यक्षतोऽवगम्यत इति चेत्, तत्पुनः प्रत्यक्षं व्यावहारिकं वा स्यात्पारमार्थिकं वा । यस्यापीदं लक्षणम्–"प्रमाणमविसंवादिज्ञानम्" [प्र०वा० १।३], पारमार्थिकं वा यस्यापीदं

---

१ यद्येकमेव शरीराधिष्ठानामपि आ०, ब०, प० । २ "भेदज्ञानात् प्रतीयते प्रत्युर्भावाभ्ययौ यदि । अभेदान्वयः सिद्धा स्थितिरेषेन केनचित् ॥"–ता०टि० । न्यायवि० श्लो० ११८ । ३ न परे ता० । ४ –ते तत्रो–ता० । ५ –पुद्गलस्यापि–आ०, ब०, प० । ६ –स्य हर्ष–आ०, ब०, प० ।

लक्षणम् –"अज्ञातार्थप्रकाशो वा" [प्र०वा० १।३] ? व्यावहारिकमिति चेत् ; ननु तन्निश्चयात्मकमेव, तथैव व्यवहर्तृषु प्रसिद्धेः, अन्यथा "मनसो" [प्र०वा० २।१३३] इत्यादिना तत्प्रसिद्धिप्रतिपादनस्यानुपपत्तेः । न च ततः क्षणिकस्य प्रतिपत्तिः, निर्विवादत्वेनानुमानवैफल्यापत्तेः । द्वितीयविकल्पेऽपि कुतस्तदनुमानस्य प्रामाण्यम् ? समारोपव्यवच्छेदादिति चेत् ; कोयं समारोपो नाम ? क्षणिकेऽक्षणिकज्ञानमिति चेत् ; उच्यते–

कालत्रयानुयायिनमिह न क्षणिकं वदन्ति विद्वांसः ।
प्रत्यक्षादिव तन्न क्षणिकज्ञानात्सुबोधं वः ॥११७६॥
न ह्यक्षणिकं ज्ञानं वस्तुबलादस्ति बौद्धसिद्धान्ते ।
कल्पितरूपं कथमिव तत्कस्यापि प्रतीतिकरम् ॥११७७॥
तस्याप्यक्षणिकत्वं क्षणिकज्ञानान्न शक्यकल्पनकम् ।
अक्षणिकञ्च न किञ्चिद्विज्ञानं तात्त्विकं भवताम् ॥११७८॥
कल्पितमक्षणिकं तद्यदि पुनरुच्येत पूर्ववद्दोषः ।
पुनरपि तद्वचने कथमनवस्थानतो मुक्तिः ? ॥११७९॥
तन्न समारोपोऽयं शक्यपरीक्षस्ततः कथं ब्रूयुः ।
तद्विच्छित्तिविधानात् प्रमाणमनुमानमिति बौद्धाः ? ॥११८०॥

अपि चैवं कथं नीलादिविकल्पस्यापि न प्रामाण्यम् ? नीलादौ विपरीतसमारोपाभावादिति चेत् ; क्षणिके कुतस्तद्भावः ? साधर्म्यदर्शनादिति चेत् ; न; नीलादेरपि पीतादिना कथञ्चित्तद्दर्शनात् । सर्वथा क्षणिकेऽपि तदभावात् । न तत्र समारोपः प्रतीयत इति चेत् ; इतरत्र कुतस्तत्प्रतीतिः ? स्वत इति चेत् ; न; अस्वलक्षणत्वे तदयोगात् । प्रत्यक्षं हि स्वसंवेदनम्, तत कथमस्वलक्षणविषयं भवेत् ? स्वलक्षणात्मैव स इति चेत् ; न तर्हि समारोपाकारत्वं स्वलक्षणस्यातद्रूपत्वात् । अन्यत एव तस्य तदाकारत्वं न स्वत इति चेत्; कथमन्यकृतस्य स्वतो वेदनम् ? तदप्यन्यत एवेति चेत् ; न, तस्याप्यतदाकारत्वे तदयोगात् । तदाकारत्वे तदपि न स्वलक्षणमिति तस्यापि न स्वसंवेदनादवगतिः । स्वलक्षणमेव तत्, तदाकारत्वन्तु तस्याप्यन्यत एवेति चेत्, न, तत्रापि कथमित्यादेरनुपक्षादनवस्थानदोषपाषाणदूरपरिपातनस्य दुरपाकरत्वात् । तत्र समारोपस्यैवाप्रतिपत्तेः तद्व्यवच्छेदः फलमनुमानस्य । अनिश्चितार्थनिश्चय इति चेत्; किं पुनः प्रत्यक्षतः स नास्ति ? नास्त्येव तस्यानिश्चयरूपत्वादिति चेत्; कथं प्रामाण्यम् ? प्रामाण्ये वा किमनुमानेन ? तत्कृतनिश्चयाभावेऽपि तत्प्रामाण्यस्याविघातात्, अस्ति च तत् । ततो न प्रत्यक्षात्प्रतिपत्तिः क्षणिकस्य ।

---

१ "मनसोर्युगपद्वृत्तेः सविकल्पाविकल्पयोः । विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति ॥"–ता० टी० । २ यायिनमिति न प० ।–यायिनमपि न आ०, ब० । ३ ब्रूयात् आ०, ब०, प० । ४ साधर्म्याभावात् । ५ अनुमानकृत

नाप्यनुमानात्, प्रत्यक्षतः तद्प्रतिपत्तौ ततस्तद्धेतुसम्बन्धस्योपरिज्ञानात्। अनुमानात्तत्परिज्ञाने, तत एव परस्पराश्रयत्वम्, अन्यतश्चामवस्थानस्य प्रसङ्गात्। न च प्रमाणान्तरम्, अस्माभ्युपगमात्। तन्न क्षणिक प्रमाणवेद्यं यदनेकमेवं भवदात्मनि क्रमत एकरूपतो विरुध्यात्।

नापि नित्यम्। नहि तत्रापि प्रत्यक्षं प्रमाणम्, तद्धि तद्धेतुकम्, अतद्धेतुकं वा? तद्धेतुकत्वे विषयस्य सत्करणैकस्वभावस्य नित्यत्वात् कथं तज्ज्ञानोपरमः? सामग्रीवैकल्यादिति चेत्, न, विषयस्यैव तैरूप्ये तदयोगात्। अन्यस्य तत्त्वे कथं विषयहेतुकं तज्ज्ञानम्? विषयश्चान्यश्च सामग्रीति चेत्, न, प्रत्येकं तयोस्तत्त्वे ज्ञानानुपरमस्य तदवस्थत्वात्। सम्भूय तत्त्वे कथं प्रत्येकं कारणत्वं यतः समवायि किञ्चिद् अन्यत्समवायि निमित्तञ्चापरं कारणमुच्यते? नहि सामग्र्या एव कारणत्वे तद्भेदः, तस्या एकत्वेन समवाय्यादीनामन्यतमत्वस्यैवोपपत्तेः। न च तदन्यतममात्रात्कार्यम्, त्रिभ्यः कारणेभ्यः कार्यमिति भवतामभ्युपगमात्। कुतो वा प्रत्येकमकारणत्वे वस्तुत्वं व्योमकुसुमादिवत्? सत्तासम्बन्धादिति चेत्, ननु सोऽप्याधार्याधारभाव एव। न चाकिञ्चित्करत्वे तद्भावः, तत्कुसुमादिवदेव। सामग्रीकारणत्वस्य तत्रोपचारान्नाकिञ्चित्करत्वमिति चेत् न, तदापन्नस्य सत्तासम्बन्धस्याप्युपचरितस्यैव प्रसङ्गात्, संवृतिसत्तायां एव प्राप्तेः। नच संवृतिसत्तासंभवदशायामपि वस्तुतः कारणत्वमिति यतायं हेतुफलभावः तात्त्विकीमवस्थामास्तिष्नुवीत? ततः प्रत्येकमेव कारणत्वात् कथमुपरमस्तज्ज्ञानस्य? सममभावदशायामेव तद्भावादिति चेत्, न तर्हि क्षणिकम्, प्रागकारणस्य तदवस्थायां कारणतया परिणामात्। तन्न तद्धेतुकं प्रत्यक्षम्।

नाप्यतद्धेतुकम्, नित्येश्वरहेतुकत्वे तत्राप्यनुपरमस्योपस्य तदवस्थत्वात्, अन्यथा कार्यत्वादेः तेन व्यभिचारापत्तेः। नचानुपरतस्यैव तस्य भावः, उद्गतो विषयान्तरपरिज्ञानाभावानुपपन्नात्, युगपत्तदुत्पादनस्यानभ्युपगमात्। तन्न प्रत्यक्षात्तत्परिज्ञानम्।

नाप्यनुमानात्, तस्य प्रत्यक्षपूर्वकत्वेन तदभावेऽनवतारात्। किं वा तत्र लिङ्गम्? कार्यमेव, कारणभावादेव तस्योपपत्तेरिति चेत्, न, अनुपरतस्यासिद्धेः। उपरतिमतस्तु उपरतिमत एव तस्य सिद्धिर्न नित्यस्य। ततो न युक्तमुक्तम्— तस्य कार्यं लिङ्गमिति। अकारणवत्त्वमिति चेत्, न, प्रागभावेन व्यभिचारात्, तस्य तत्त्वेऽप्यनित्यत्वात्। सोऽपि नित्य एवेति चेत्, कुतो न कार्यकालेऽपि तस्य प्रतिपत्तिः। कार्येण प्रच्छादनादिति चेत्, प्रच्छादनप्रागभावेन तर्हि व्यभिचारः, तस्याऽकारणवत्त्वेऽप्यनित्यत्वात्। सोऽपि नित्य एवेति चेत्, न, तत्रापि 'कुतो न' इत्यादेरावर्तनाद् अवश्यवस्थापत्तेः। न चापरापरस्यापरिमितस्य प्रच्छादनस्य प्रतिपत्तिः। तस्मादनित्य एव स इति कथन्न व्यभिचारः। समवायित्वे सत्यकारणवत्त्वादिति हेतोर्विशेषणात्, प्रागभावस्य च समवायित्वादिति चेत्, कुतो

---

१ –न्यानुमानात् आ०, ब०, प०। २ –च च तद्ग–प०। ३पपत्ति–आ०, ब०। ३ –पम्म आ०, ब०, प०। ४ "सामग्रीत्वे"–ता० टि०। ५ –तुकं ज्ञानमा०, ब०, प०। ६ –मामिव त–आ०, ब०, प०। ७ प्रत्यक्षपरास्य। ८ –त्वे तस्य कारणत्व–आ०, ब०, ।–त्वे तस्य कारणता प०।

इत्येवास्तु निर्दोषत्वादिति चेत्, उच्यते कीदृक्षं तच्छानं यदेवं प्रत्यक्षतया स्यादेव ? निरक्षणं क्षीणपरमाणुरूपमिति चेत्, न, विकल्पदशायां तदप्रतिपत्तेः । विकल्पस्यैव 'नीलमहं वेदि' इत्याकारस्यानुभवात्, न तद्व्यतिरिक्तस्य दर्शनस्य । अस्त्येव तस्याप्यनुभवः, केवलं विकल्पैकत्वेनाव्यवसायान्न पृथङ्निश्चयः इति चेत्, कथमनिश्चितमनुभूतं नाम बुद्धिव्यतिरिक्तचैतन्यवत् ? कथ वा तद्रूपं प्रतिभासन भावानां क्षणिकतया व्यवहारहेतुः; निश्चितस्य तत्त्वानुपपत्तेः, असिद्धत्वात् । अनिश्चितस्यापि सिद्धत्वे हेतोरपि स्यादित्यसङ्गतमिदम्–"हेतोस्त्रिष्वपि" [प्र० वा० ३।१४] इत्यादि । विचारतो विद्यत एव निश्चयस्तस्य, अनिश्चयस्तु नीलादिवत् प्रत्यक्षजन्मनो निश्चयस्याभावादिति चेत्, किमेष्येवमप्यनुमानेन ? व्यवहारस्य नीलादिवत् क्षणक्षयेऽपि तन्निश्चयादेवोपपत्तेः अन्यथा नीलादावपि ततस्तदनुपपत्तेस्तस्य निदर्शनत्वाभावप्रसङ्गात् । तत्राप्यनुमानत एव तदुपपत्तिकल्पनायामनवस्थोपनिपात –परापरतन्निदर्शनस्य तद्व्यवहारकारणानुमानप्रबन्धस्य चावश्यकल्पनीयत्वात् । तन्न विकल्पदशायां तत्प्रतिपत्तिः । विकल्पसंहारवेलायामिति चेत्, न, तद्वेलाया एवानवलोकनात् । सदा तत्प्रतिपत्तौ वा कुतस्तत एव क्षणक्षयेऽपि व्यवहारो न भवेत् ? विपरीतारोपादिति चेत्, न, विकल्पसंहारस्य विपरीतारोपस्येति व्याघातात्, तदारोपस्यैव विकल्पत्वात् । कथन्नीलादावपि कुतस्ततो व्यवहारः ? तदारोपाभावादिति चेत्, न, निरंशे वस्तुनि भागवत्तदनुपपत्तेः । कल्पनिकस्य च सांशत्वस्य तदक्षायामसम्भवात्। तत्र समारोपात् ततस्तद्व्यवहाराभावः। नापि पाटवाद्यभावात्, नीलादावपि तदापत्तेः । तत्र पाटवादिभावे वा न प्रतिभासनमेव तद्व्यवहारहेतुः, अपि तु पाटवादिविशिष्टम्, तस्य च क्षणक्षयेऽभावादसिद्धो हेतुः । यच्च तत्रावभासमात्रम्, तस्य नीलादावभावात् साधनवैकल्यञ्च दृष्टान्तस्य । ततो दुर्भाषितमिदम्–"यद्यथाऽवभासते तत्तथैव व्यवहारमवतरति यथा नीलं नीलतयाऽवभासमानं तथैव तद्व्यवहारमवतरति, अवभासन्ते च सर्वे भावाः क्षणिकतया" [ ] इति । ततो निर्विशेषमेव समारोपवैकल्पादिकं चित्रादिनीलादिक्षणक्षयादिविषयमन्वेषणीयम् ।

तथा च सति निःक्षेपधर्मेऽप्यवहृतेस्तत[1] ।
प्रत्यक्षादेव सिद्धत्वात् व्यर्थस्तत्साधनश्रमः ॥११८१॥
अस्ति चार्थः प्रयासस्ते तत्र तत्र तदुच्यते ।
क्षणक्षयनिरंशत्वाविकल्पत्वादिसाधनम् ॥११८२॥
तत्र ज्ञानं किमप्यस्ति क्षणक्षीणमनंशकम् ।
नापि चित्रं क्रमेणापि तच्चित्रत्वप्रसङ्गतः ॥११८३॥
क्षणभङ्गाविकल्पत्ववार्तांप्यत्र न यद्भवेत् ।
तस्मादसम्भवाद्दोषाद्युक्तं नाप्यक्षक्षणम् ॥११८४॥

---

१ –पेक्षसमारो–आ०, ब०, प० । २ –त्पत्तीच्च–आ०, ब०, प० ।

इदमेवाह—

अविकल्पकमभ्रान्तं प्रत्यक्षाभम् [पटीयसाम्] ॥२५८॥ इति ।

न विद्यते विकल्पो [1]जात्यादियोजनारूपः प्रतिभासो यस्मिंस्तद् **अविकल्पकम्** **अभ्रान्तं** तिमिराशुभ्रमणाद्यनाहितविभ्रमं परोक्षमर्थज्ञानम् । तत्किम् ? प्रत्यक्षमिवाभाति न प्रत्यक्षमेवेति **प्रत्यक्षाभं** तत्त्वेवासम्भवात्, असम्भवश्च तत्र प्रमाणाभावात् । अत एवोक्तम्— **अन्यथाऽपरिणामतः** इति । सम्भवेऽपि क्व तस्य प्रत्यक्षत्वम् ? दृश्ये जलादाविति चेत् ; न ; तस्याप्यनुभवाविष्टितत्त्वेनाप्रवृत्तिविषयत्वात् । प्रवर्त्तकस्य च प्रत्यक्षत्वमनुमतं भवतां प्राप्ये भाविनीति चेत् ; न; तस्य तेनाप्रतिपत्तेः । अप्रतिपन्नेऽपि प्रत्यक्षत्वे अतिप्रसङ्गात् । दृश्यप्रतिपत्तिरेव तस्यापि[2] प्रतिपत्तिस्तयोरेकत्वादिति चेत् ; उच्यते—

वस्तुतो यदि तद्भावः क्षणभङ्गे जगत्कथम् ? ।
सवृत्त्या यदि तत्र स्यात् प्रत्यक्षमविकल्पकम् ॥११८५॥
न ह्येकत्वोपसम्पृक्तदृश्यप्राप्त्योपलम्भनम् ।
अविकल्पकमध्यक्षमाचक्षाणाः[3] परीक्षकाः ॥११८६॥
क्षणक्षयित्वं प्रत्यक्षवेद्यमित्यपि [4]वः कथम् ।
परमार्थपथे तच्चेन्न तत्र तदसम्भवात् ॥११८७॥
नित्यानित्यादिनिःशेषविकल्परहितं यतः ।
अद्वैतमेव तत्त्वार्थः स्वसंवेदनगोचरः ॥११८८॥

भवतु वर्त्तमानविषयमेव प्रत्यक्षम्, न च तन्त्राप्रवर्त्तकत्वम्, उपलम्भपरिच्छेदमात्रादेव तदुपपत्तेः, भाविनि तु तस्य तत्त्वं व्यवहर्तृजनाभिप्रायादेव न तत्त्वत इति चेत् ; नन्वेवं क्षणभङ्गादावपि तस्यैव प्रामाण्यात् किमर्थो तत्र प्रमाणान्तरप्रवृत्तिः ? समारोपव्यवच्छेदस्य विहितोत्तरत्वात् । निश्चयार्थेति चेत् ; नीलादावपि किन्न तत्प्रवृत्तिः ? प्रत्यक्षादेव तस्य निश्चयादिति चेत् ; कथमेतत् तस्यानिश्चयरूपत्वात् ? निश्चयहेतुत्वादिति चेत् ; न ; निर्विकल्पत्वात् । निर्विकल्पं हि प्रत्यक्षं कथं निश्चयहेतुः अर्थवत् ? निश्चयसंस्कारादेव विनिश्चयः प्रत्यक्षस्य तद्धेतुत्वं तत्संस्कारप्रबोधादिति चेत् ; न; तत्प्रबोधस्याप्यर्थादेवोपपत्तेः । उक्तञ्चैतत्—

"अभेदात्मदृशस्मृत्यापर्याकल्पधियां न किम् ।
संस्कारा विनियम्येरन् यथास्वं सन्निकर्षिभिः ॥" [सिद्धिवि० परि० १] इति ।

तत्र प्रत्यक्षान्निश्चयः । भवत्रपि कथं नीलादावेव न क्षणक्षयादावपि यतस्तत्रैव

---

१ "जातिः क्रिया गुणो द्रव्यं संज्ञा पर्यव कल्पना । अस्तीति सिद्धो वस्त्वीकृतस्तत्रस्थो यथाक्रमम् ॥"—सा० द० । २ —विपत्तिः—आ०, ब०, प० । ३ णाद्यर्थं—आ०, ब०, प० । ४ नः आ०, ब०, प० ।

प्रमाणान्तरप्रवृत्तिः ? दर्शनपाटवादेरुभयत्राविशेषादिति निरूपितत्वात् । अपेक्षणे च निश्चयस्य तस्यैव मुख्यं प्रामाण्यं भवेत् स्वार्थव्यवसायं प्रत्यनपेक्षत्वेन साधकतमत्वात्, न प्रत्यक्षस्य विपर्ययात् । अविसंवादस्यापि तदायत्तत्वात्, सत्येव हि तस्मिन्नीत्यादौ तदवलोकनात् असति च क्षणक्षयादौ सत्यपि प्रत्यक्षे विपर्ययात् । इदमेवाह—

पटीयसाम् । ५

अविसंवादनियमादक्षगोचरचेतसाम् । इति ।

अक्षेभ्यश्चक्षुरादिभ्यो यानि गोचरचेतांसि विषयज्ञानानि तेषां **पटीयसां** व्यवसायात्मनाम् **अविसंवादस्य नियमः** तेषामेवायं तेषामस्त्येवेति यावधारणम्, तस्मात् । **अविकल्पकं प्रत्यक्षाभम्** इति । न हि तेषामेवावधारितोऽविसंवादो निर्विकल्पस्य, विरोधात् । न च तमन्तरेण प्रामाण्यम्, तस्य तेन व्याप्तत्वात् अन्यथाऽतिप्रसङ्गात् । न चाप्रमाणस्य प्रत्यक्षत्वम्, इत्युपपन्नम् अविकल्पकमित्यादि । न च तेषामप्रामाण्यम्, अविसंवादस्य तत्रावश्यम्भावात् । द्विचन्द्रादिचेतसां तु व्यवसायत्वमेव नास्ति, विप्लुतबाधस्यैवावसायस्य व्यवसायोपपत्तेः । कथ पुन व्यवसायरूपत्वे तच्चेतसामविकल्पकत्वम्, विकल्पविशेषस्यैव व्यवसायत्वात् ? असति चाविकल्पे क्वेदं प्रत्यक्षाभत्वचिन्तनम् ? स्वसंवेदनादाविति चेत्, न, तस्यापि भवन्मतेन शाब्दव्यावृत्तेन साद्रव्यादिशेषात्, अन्यथा प्रामाण्यानुपपत्तेरिति चेत्, सत्यम्, नास्त्येव तेषामविकल्पकत्वं तदप्रतीतेः, विकल्पानुत्पादाच्च । न चाविकल्पाद्विकल्पोत्पत्तिः । भवत्येव तत्संस्कारसहायादिति चेत्, न, तदाकारस्यापि तत्संस्कारसहायादनाकारादेव ततो भावप्रसङ्गात्, तथा च कथ विकल्पबुद्धावाकारश्चेक्षवदर्शनात् दर्शनेऽपि तत्कल्पनम् ? तत्कल्पने वा विकल्पकल्पनमपि स्यादविशेषादिति न तेषामविकल्पकत्वम् । अविकल्पकस्य प्रत्यक्षाभत्वचिन्तनं तु परोऽभ्युपगमप्रसिद्धस्यैव न वस्तुतत्त्वप्रपञ्चस्य,तत्र तदनुपपत्तेः। अथ किमर्थमत्र बहुवचनम्,एकवचनमेवास्तु शास्त्रव्यवहारस्य तथैव बाहुल्यात्, यथा "व्यवसायात्मनो बुद्धेः" [सिद्धिवि० परि० १] इति, 'प्रमाणस्य फलम्" [सिद्धिवि० परि० १] इति च, छन्दोभङ्गस्याप्यभावादिति चेत् ? न, तस्य युगपद्भावादर्शनबहुत्वनिवेदनेन तद्विकल्पबहुत्वनिवेदनार्थत्वात् । विकल्पजननाद्धि प्रत्यक्षप्रामाण्ये शष्कुलीभक्षणादौ युगपद्भाविरूपादिदर्शनजन्मनां विकल्पानामपि यौगपद्यप्रसङ्गः, कारणयौगपद्ये कार्यक्रमायोगात् "नाक्रमात् क्रमिणो भावाः" [प्र०वा० १।४५] इत्यस्य विरोधात् । न चैक एव तत्रत्यो विकल्पः, तद्वशाद्रूपादिदर्शनानामन्यतमस्यैव प्रामाण्यप्रसङ्गात्। एकस्याप्यनेकाकारत्वान्नेति चेत्, न, युगपदेकस्यानेकाभिलाप्याकारत्वे अनेकविकल्पेन किमपराद्धं यतः स एव युगपन्न भवेत् ? तथा च कथम् अथविकल्पयौगपद्यात् गोदर्शनस्य निर्विकल्पत्वं विकल्पत्वेऽपि तदविरोधात् रूपादिविकल्पवत् । तत्र विकल्पजननात् प्रत्यक्षप्रामाण्यम्, विकल्पस्यैव मुख्यतस्तदुपनिपातात् । विकल्पानामयथार्थत्वान्नेति चेत्, अत्राह—

---

१ –मेव मन्यसे इति–आ०, ब०, प० । २ –तनविक–आ०, ब०, प० ।

सर्वथा वितथार्थत्वं सर्वेषामभिलापिनाम् ॥१५९॥
ततस्तत्त्वव्यवस्थानं प्रत्यक्षस्येति साहसम् । इति ।

सर्वथा सर्वेण स्वलक्षणप्रकारेण सामान्यप्रकारेण च **वितथार्थत्वं** मिथ्यार्थत्वं **सर्वेषां** लिङ्गजानामन्येषाञ्च निरवशेषाणाम् **अभिलापिनां**[1] विकल्पानाम् **इति** एवं साहसम् अनालोचितं चेष्टितं प्रमाणाभावादिति भावः । तथा[2] हि—स्वतो वा तेषां मिथ्यार्थत्वमवगम्येत, अन्यतो वा ? स्वतश्चेत् ; तेन यदि मिथ्यार्थत्वं सत्यार्थत्वमेव नीलादिना भवेत् गत्यन्तरासम्भवात् । सत्यार्थत्वं चेत् ; न ; सर्वथा वितथार्थत्वप्रतिज्ञाविरोधात् । अस्तु नीलादिनैव वितथार्थत्वम्, न वितथार्थत्वेनापि, कथञ्चिदेव तदङ्गीकारादिति चेत् ; कथमेवं प्रधानादिना वितथार्थत्वेऽपि नीलादिना सत्यार्थत्वन्न भवेत् ? यत इदं सूक्तं स्यात्—"**वितथार्था नीलादिविकल्पा विकल्पत्वात् प्रधानादिविकल्पवत् ।**" [ ] इति । स्वतोऽपि वितथार्थत्वावगमे च किमर्थमिदमनुमानम् ? समारोपव्यवच्छेदार्थम्, सत्यार्थसमारोपस्यानेन व्यवच्छेदादिति चेत् ; न ; तस्यैव तत्त्वानुपपत्तेः । न हि स्वयं वितथार्थत्वमवगच्छत एव विपरीतारोपत्वं विरोधात् । अन्यस्य तत्र तत्त्वमिति चेत् ; न; तस्यापि स्वत एवारोप्याकारेण मिथ्यार्थत्वस्यावगमात् । अवगत तद्रूपस्याव्यवच्छेदेऽपि न दोषः, पुरुषार्थप्रतिबन्धाभावात् । तत्राप्यन्यस्य तदारोपत्वकल्पनायामनवस्थापत्तिः । तन्न स्वतस्तेषां वितथार्थत्वावगमः । नापि परतः, प्रत्यक्षस्य तत्राव्यापारात् । न हि तेन विकल्पानां प्रतिपत्तिः सामान्यविषयत्वापत्तेः, तेषां सामान्याकारत्वात् । तथा चेत ; व्याहतमेतत्[3]—"**प्रमाणं द्विविधं प्रमेयद्वैविध्यात्** [प्र० वार्तिकाल० २।११२] इति । न च तदप्रतिपत्तौ तद्धर्मस्य परिज्ञानम् ; तस्य तत्प्रतिपत्तिनान्तरीयकत्वात् । नापि परतो विकल्पात्[4] ; तस्याप्रामाण्यात् । प्रमाणमेव लिङ्गजो विकल्प इति चेत् ; कुत एतत् ? साध्यप्रतिबन्धादिति चेत् ; न; साध्यस्यैव व्यवस्थितस्याभावात् । भावेऽपि कुतः प्रतिबन्धस्य परिज्ञानम् ? तत एव विकल्पादिति चेत् ; तथा[5] साध्यस्यैव ततः किन्न परिज्ञानम् ? तस्यावस्तुविषयत्वादिति चेत्; प्रतिबन्धस्यापि न स्यादविशेषात् । अवस्त्वेव प्रतिबन्ध इति चेत् ; न; अवस्तुतया वस्तुत्वात्, अन्यथा तथा निर्धारणायोगात् । प्रतिबन्धेऽपि प्रतिबन्धादेव तस्य[6] प्रामाण्यं न परिज्ञानादिति चेत्; न; तत्रापि कुत इत्यादेरावृत्तेरव्यवस्थितेश्च । तन्न तत एव तत्परिज्ञानम्। नाप्यन्यतः तद्विकल्पात्; तस्यापि प्रतिबन्धादेव प्रामाण्यात्, तत एव च तत्परिज्ञानस्यासम्भवात् । अन्यतस्तद्विकल्पात् तत्परिकल्पनायां चापरिनिष्ठानात ।

किं वा तद्वितथार्थत्वप्रतिबद्धं लिङ्गं यतस्तदनुमानविकल्पः ? विकल्पत्वमेवेति चेत् ; कुतस्तस्य सत्यार्थत्वाद् व्यावृत्तिः यतोऽनैकान्तिकत्वन्न भवेत् ? प्रधानादिविकल्पे तद्विपर्ययेण साहचर्यदर्शनादिति चेत् ; न ; तन्मात्रात्तदनुपपत्तेः, कथमन्यथेन्द्रियज्ञानत्वस्यापि न ततो

---

१ अभिलापाना—आ०, ब०, प० । २ तथापि आ०, ब०, प० । ३ "मानं द्विविधं मेयद्वैविध्यात्..."—प्र० वा०२।१ । ४ विकल्पान्तरस्या—आ०, ब०, प० । ५ तदा आ०, ब०, प० । ६ विकल्पस्य । ७ साहचर्यमात्रात् ।

व्यावृत्तिः द्विचन्द्रादिज्ञाने तस्यापि तत्साहचर्यावलोकनात् ? तथा च विकल्पानामेव वस्तुविवेक शक्तिवैकल्यं नेन्द्रियबुद्धेरिति कुतः प्रतिपत्तेमहि ? यतस्तत्प्रमाणात् क्षणभङ्गादिवस्तुयाथात्म्य मवबुध्यमानाः पुरुषार्थसिद्धौ बुद्धिमवस्थापयेम[1]। निर्बाधत्वेनेन्द्रियज्ञानस्य सत्प्रामाण्यम्, न च तस्य विपक्षेण साहचर्यं तदयमदोष इति चेत्, न, विकल्पेऽपि समानत्वात्। न हि तस्यापि तन्मात्रस्य तदर्थत्वं बाधावैफल्यविनिश्चयाधिष्ठानस्यैव तदुपगमात्, तस्य च ५ बुरवधोवविपक्षसाहचर्यरूपत्वात्। अत. सूक्तम्-'सर्वथा' इत्यादि।

द्वितीयमपि विकल्पार्थवेतव्यपादिन साहसमाह- तत इत्यादि। ततस्तेभ्यो वितथार्थेभ्यो विकल्पेभ्यः तत्त्वव्यवस्थान तत्त्वेन प्रमाणत्वेन व्यवस्थानं निर्णयः। कस्य ? प्रत्यक्षस्य नीलादिदर्शनस्य "यत्रैव जनयेदेनाम्" [ ] इत्यादिवचनात्, इति साहसम्। तथा हि- १०

निश्चयाद्वितथार्थावेद्यप्रमाणं नीलदर्शनम्।
मरीचिदर्शनं किन्न तोयनिर्णयतो भवेत् ? ॥११८९॥
एकस्याध्यवसायस्यामावाद् दृश्यविकल्प्ययोः।
इति चेत्सोऽपि मिथ्यार्थस्तद्विक्षेपकृत् कथम् ? ॥११९०॥
तदर्थस्यापि दृश्यैकत्वेन निश्चयतो यदि। १५
नास्यापि वितथार्थस्य प्राप्त्यदोषानतिक्रमात् ॥११९१॥
एकस्याध्यवसायस्य तत्राप्यन्यस्य कल्पनम्।
अनवस्थाज्ञानागपाशबन्धान्न मुच्यते ॥११९२॥
स्यान्मतं व्यवहारेण प्रमाणं नीलदर्शनम्।
व्यवहारे विचारस्य न कार्यस्तत्प्रयोगमात् ॥११९३॥ २०
केवल स यथा लोके तथैव ह्यनुमन्यताम्।
व्यवहारार्थिभिस्तत्त्वैरपीति तदप्यसत् ॥११९४॥
नीलदर्शननिर्णीततदर्थैकत्वनिश्चयः।
इत्यस्य व्यवहारस्य लौकिकेष्वप्रवेदनात् ॥११९५॥
अस्त्येवायं विमोहात्तु भवन्तो न वदन्ति चेत्। २५
विमोहो निश्चयाधीने व्यवहारे कथं भवेत् ? ॥११९६॥
विमोहस्य पलीयस्त्वादाहार्यस्येति चेदयम्।
शास्त्रेणापि निवर्तेत कथमेवं यदुच्यते ॥११९७॥
"प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम्।" [2]इति।

---

१ -यामहि वि-ब्रा०, ब०, प० । २ -प्रत्यात्-ब्रा०, ब०, प० । ३ प्र० वा० १।७।

तन्नायं लोकरूढोऽस्ति व्यवहारो भवन्मतः ।
तल्लोपायैव चेष्टन्ते यतो व्यवजिहीर्षवः ॥११९८॥

ततो युक्तमुक्तम्–'ततः' इत्यादि । अथवा, **प्रत्यक्षस्य तत्त्वं** निर्विकल्पत्वं तस्य **व्यवस्थानं तत इति साहसम्** । न ह्ययथार्थादनुमानविकल्पात्तद्व्यवस्थापनमुपपन्नम् ; **अस्ति** चैतत्परस्य– "प्रत्यक्षं निर्विकल्पम् अर्थसामर्थ्यादुत्पन्नोरुत्तरार्थक्षणवत्" [ ] इत्यादेः "न सन्ति प्रत्यक्षे कल्पनाः, उपलब्धिक्षणप्राप्तानामनुपलम्भात्, भूतले घटवत्" [ ] इत्यादेश्च तद्व्यवस्थापनयोगस्य दर्शनात् । भवत्येव तादृशादपि 'ततः सम्बन्धबलात् तस्य व्यवस्थापनमिति चेत् ; न तद्बलस्य प्रत्यक्षादवगतिः ; अद्यापि तस्याव्यवस्थितत्वात् । व्यवस्थितमेव तत्[2] स्वतोऽपि[3] तस्य तत्त्वव्यवस्थितेः "प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति ।" [प्र०वा० २।१२३] इति वचनादिति चेत् ; किमिदानीमनुमानेन ? व्यामोहविच्छेद इति चेत् , सति व्यामोहे कथं व्यवस्थितत्वम् अतिप्रसङ्गात् ? तन्न ततस्तदवगमः । नापि तद्विकल्पात् ; तस्य तदवगमात्पूर्वं विकल्पान्तरवदप्रमाणत्वात् । तदवगमे प्रमाणत्वमिति चेत् ; न ; परस्पराश्रयात्–तदवगमात्प्रामाण्यम् सति च तस्मिंस्तदवगम इति । नापि तद्विकल्पान्तरात् ; तत्राप्येवं प्रसङ्गादव्यवस्थितिदोषाच्च । ततो विकल्पबलादेव विकल्पानां वितथार्थत्वं प्रत्यक्षतत्त्वञ्च व्यवस्थापयतां (ना)[4] न सर्वथा वितथार्थत्वमभ्युपगन्तव्यम् । तथा च सिद्धं नीलादिविकल्पस्यापि सत्यार्थत्वं निरुपद्रवत्वादिति तस्यैव तत्र प्रामाण्यं निरपेक्षतया तद्व्यवसायं प्रति साधकतमत्वात् , अविसंवादनियमाच्च, न निर्विकल्पस्य विपर्ययादिति प्रत्यक्षाभासमेव तत्, न प्रत्यक्षम् , इत्ययुक्तं परकीयं तल्लक्षणमिति भावो देवस्य । प्रतिषिद्धमेवमविकल्पकमिन्द्रियप्रत्यक्षम् ।

इदानीं मानसमपि तत्प्रत्यक्षं प्रतिषेद्धुं कारिकापादत्रयेण परप्रसिद्धं 'तत्स्वरूपमुपदर्शयति–

अक्षज्ञानानुजं स्पष्टं तदनन्तरगोचरम् ॥१६०॥
प्रत्यक्षं मानसं चाह [भेदस्तत्र न लक्ष्यते ।] इति ।

आह धर्मकीर्तिः । किम् ? **प्रत्यक्षम्** । कीदृशम् ? **मानसं** मनसः पूर्वज्ञानादागतं न केवलमैन्द्रियमेवेति । **च**शब्दः मानसत्वमेव दर्शयति । अक्षज्ञानं चक्षुरादिकार्यं रूपादिप्रत्यक्षं तस्य कार्यं यदनुजं तत्सदृशतयोत्पन्नम् अनोः सादृश्यार्थत्वात् तत् **अक्षज्ञानानुजम्** । अनुजपदेनाक्षज्ञानमानसयोरुपादानोपादेयभावमावेदयति, हेतुफलयोस्सादृश्यनिबन्धनस्य तद्भावस्य परैरभ्युपगमात् । **स्पष्टं** विशदम् अन्यथा प्रत्यक्षत्वानुपपत्तेः । प्रत्यक्षत्वे निमित्तमाह–**तस्याक्षज्ञानार्थस्यानन्तरो** द्वितीयो नीलादिक्षणोऽक्षज्ञानसमसमयो **गोचरो** विषयो यस्य तत्तथोक्तम् । कथं पुनस्तच्छब्देनाक्षज्ञानार्थस्य परामर्शः ? कथञ्च न स्यात् ? अप्रक्रमात्,

---

१ अनुमानविकल्पात् । २ प्रत्यक्षम् । ३ स्वत एव । ४ स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तत् मनोविज्ञानम् ।"–न्यायवि० पृ० १७ । प्र० वा० २ । २४३ ।

तच्छब्दस्य च प्रकान्तपरामर्शित्वादिति चेत्, न, विषयिप्रक्रमादेव नान्तरीयकतया विषयस्यापि प्रक्रमात्। एवमपि मुतस्येव विषयिणः किमपरामर्श इति चेत्? न, तद्विषयतया मानसस्य परैरनभ्युपगमात्। सदभ्युपगमस्य चानेन प्रतिपादनात्। तथा च परस्याभ्युपगमः–"इन्द्रियज्ञानेन समनन्तरप्रत्ययेन स्वविषयानन्तरविषयसहकारिणा जनितं मानसम्" [प्र० वार्तिकाल० २।२४५] इति। ५

तदिदानीं निराकुर्वन्नाह– भेदस्तत्र न लक्ष्यते। इति। भेदो व्यतिरेक इन्द्रियज्ञानात् तत्र मानसे न लक्ष्यते न दृश्यते। तथा हि तज्ज्ञानात्पूर्वम्, सह, पश्चाद्वा स तत्र दृश्येत? न तावत्पूर्वम्, तद्[1]कार्यस्य ततः पूर्वमसम्भवात्। नापि सह, कार्यकारणयोः सहभावानुपपत्तेः, युगपत्प्रत्यक्षद्वयस्याप्रतिवेदनाच्च। न हि तदैव मानसमिन्द्रियं च प्रत्यक्षद्वयमनुभवादर्शविषादपि प्रतिफलितमवलोकयामो यतस्तथाविकल्पयेम अनियमप्रसङ्गात्। न चानेन लोकिताविकल्पनस्य नियमः–'द्वयमेव तत् न तत्त्रयादिकम्' इति, स्वेच्छानिबन्धनस्य तत्राप्यनिवारणात्। नापि पश्चात्, तदेन्द्रियव्यापारे तैमिरिकस्येव तत्रोपपत्तेः। अतद्व्यापारे न विशदप्रतिभासप्रवृत्तिः। न कल्पनया तदस्तित्वम्, अन्धादावप्यविशेषात्। नन्वयमेव तस्य तस्माद्भेदो यन्निश्चयरूपत्वम्। निश्चयरूपं हि मानसमवलोक्यते 'इदं नीलम्, इदं पीतम्' इत्युल्लेखवत्त्वस्योपलम्भात् न तथेन्द्रियज्ञानस्येति चेत्, एवमिन्द्रियज्ञानस्यैव निश्चयरूपत्वे को दोषः? तद्विषये कथं संशयादिः निश्चयविरोधादिति चेत्? मानसविषयेऽपि कथं तद्विरोधात्। न भवत्येवेति चेत्, किमिदानीमनुमानेन, संशयादेरनुत्पन्नस्य व्यवच्छेदासम्भवात्? यत्र मानसं तत्रोत्पन्न एव संशयादिरिति चेत्, न, सवीन्द्रियज्ञानादौ तत्कारणे मानसस्यासम्भवानुपपत्तेः। सम्भवोऽपि तस्य नीलाद्यंशेन न क्षणभङ्गादावतः सैव संशयादिव्यवच्छेदात्सफलमेवानुमानमिति चेत्, न, निरंशवस्त्वादिनो भागशो वस्तुपरिच्छेदस्यासम्भवात्। न च निश्चयानिश्चयरूपतया व्याप्तेन्द्रियस्य प्रत्यक्षद्वयम्, अनुपलक्षणात्।

यत्पुनरेतत्–समानकालमाकारद्वयमिन्द्रियं मानसञ्च, तस्य चैकत्वाध्यवसायाद् विषयेकेनानुपलक्षणमिति, तत्र कुतस्तदध्यवसायः? न तावदैन्द्रियात्, तस्यामध्यवसायत्वात्। न चानध्यवसायोऽध्यवस्यतीत्युपपन्नम्, अचेतनो वेत्स्यतीतिवत्। एकत्ववेदनमेव तदध्यवसायो नैकत्वविकल्पनं तथाविरुद्धमेवेन्द्रियस्याध्यक्षस्यापीति चेत्, उच्यते– २१

तद्वेदनं चेदभ्रान्तं तच्चैक्यमापतेत्।
आकारद्वयमित्यादि तन्मिथ्यैव भवद्वचः ॥११९९॥
भ्रान्तमेव तदिष्टं चेत्तस्यार्थं सत्यं भवेत्?।
अभ्रान्तत्वं यतो यौष्टैर्बुद्धमध्यक्षलक्षणम् ॥१२००॥

---

१ इन्द्रियमनसः। २ इन्द्रियप्रत्यक्षद्वयस्य। ३ मानसप्रत्यक्षस्य। ४ क्षणभङ्गादौ।

एकत्वभागे प्रत्यक्षं तन्मा भूदिति कल्पने ।
"प्रत्यक्षवेद्यमेकत्वम्" इत्युच्चैर्धुष्यते कथम् ? ॥१२०१॥
अभिप्रेत्य चिदाद्यंशं प्रत्यक्षं यदि तन्मतम् ।
वाच्यः स एव तद्वेद्यः कथमेकत्वमुच्यते ? ॥१२०२॥
प्रत्यक्षांशात्कथञ्चिच्चेद् विभ्रमस्याविभेदनात् ।
प्रत्यक्षवेद्यमेकत्वमित्युक्तं व्यक्तया गिरा ॥१२०३॥
निर्णयादविभेदोऽपि भवेदेवं तथा सति ।
"इदमित्यक्षविज्ञानं[1]" न ततो मानसं परम् ॥१२०४॥

कुतश्चायं प्रत्यक्षस्य स्वरूपे विभ्रमः ? कारणदोषादिति चेत् ; न—

"हेतुदोषात् प्रमेये धीरतथापीति युक्तिमत् ।
स्वरूपेऽपि कथं युक्ता हेतुदोषशतादपि ॥" [ ]

इत्यस्य विरोधात् । अनेन कारणदोषादपि स्वरूपविभ्रमाभावस्य प्रतिपादनात् । ततो नैन्द्रियादेकत्वाध्यवसायः । मा भून्मानसादेव तदभ्युपगमादिति चेत् ; न ; तस्यापि स्वरूपेऽध्यवसायशून्यत्वात् , स्वरूपस्य च प्रत्यक्षैकत्वेनाध्यवसेयतया प्रस्तुतत्वात् ।

अपि च, तदध्यवसायो यद्यर्थाध्यवसायसमसमयः ; तदा "न च युगपदनेकविकल्पसम्भवः" [ ] इत्यस्य विरोधः । तद्भिन्नसमयश्चेत् ; न ; तदुभयात्मकस्य मानसस्याक्षणिकत्वप्रसङ्गात् । तन्न मानसादपि तदध्यवसायः । नापि ज्ञानान्तरात् ; तस्यापि तत्समयस्यानुपलक्षणात् । एकत्वाध्यवसायादनुपलक्षणमिति चेत् , न ; तदन्यतोऽध्यवसायेऽनवस्थोपपत्तेः । भिन्नसमयत्वे तु तस्य न ततस्तयोरेकत्वाध्यवसायः ; तत्समये तयोरेवाभावात्, असतोश्चाविवेकनिश्चयानुपपत्तेः । तन्न तयोरेकत्वाध्यवसायाद् भेदस्यानुपलक्षणम् अपि त्वभावादेवेत्युपपन्नम्—'भेदः' इत्यादि ।

शान्तभद्रस्त्वाह—यद्यपि प्रत्यक्षतस्तस्य तस्माद्भेदो न लक्ष्यते कार्यतो लक्ष्यत एव । कार्यं हि नीलादिविकल्परूपं स्मरणापरव्यपदेशं न कारणमन्तरेण, कादाचित्कत्वात् । न चाक्षज्ञानमेव तस्य कारणम् ; सन्तानभेदात् प्रसिद्धसन्तानान्तरतज्ज्ञानव । ततोऽन्यदेवाक्षज्ञानात्[3]त्कारणम् , तदेव च मानसं प्रत्यक्षमित्येतदेव दर्शयित्वा प्रत्याचिख्यासुराह—

अन्तरेणेदमक्षानुभूतं चेन्न विकल्पयेत् ॥१६१॥
सन्तानान्तरवच्चेतः समनन्तरमेव किम् । इति ।

अन्तरेण विना **इदम्** अनन्तरोक्तं मानसं प्रत्यक्षम् **अक्षानुभूतम्** ऐन्द्रियज्ञानविषयीकृतं नीलादि **न विकल्पयेत्** नीलादिकमिदमिति नानुस्मरेल्लोकः सौगतो वा । सत्यपि

---

१ –शा क–आ०,ब०,प० । २ "इदमित्यादि यज्ज्ञानमभ्यासात्पुरतः स्थिते । साक्षात्करणतस्तत्तु प्रत्यक्षं मानसं मतम् ॥"–प्र० वार्तिकाल० २।२४३ । ३ –त्तत्कर–आ०, ब०, प० ।

मानसप्रत्यक्षे तदनुभूतमेव विकल्पयति नाज्ञानुभूतं तत्किमज्ञप्रहणेन ? यदि तदानीमर्थवत् यदि सति तस्मिंस्तदनुभूतं विकल्पयेत्, न चैवम्, अतोऽनुभूतग्रहणमेव कर्तव्यमिति चेत्, अन्यथा तर्हि व्याख्यास्यामः-अनुभवनमनुभूतम्, अज्ञानां कार्यमनुभूतम् **अज्ञानुभूतम्** अज्ञज्ञानमिति यावत्, तत्कर्तृ **इदमन्तरेण न विकल्पयेत्** न विकल्पं नीलादिस्मरणं कुर्यात्। अत्र योपपत्तिः-**सन्तानान्तरवत्** इति। सन्तानस्यान्तरं भेदः स विद्यतेऽस्येति **सन्तानान्तरवत् अज्ञानुभूतम्**। एतच्च हेतुपदं द्रष्टव्यम्-सन्तानान्तरवत्त्वादिति, विषाणी गौरित्युक्ते विषाणित्वादिवत्। तद्वत्त्वञ्च तस्य तेन योगपद्यात् "मनसोर्युगपद्वृत्ते" [प्र० वा० २। १३३] इति वचनात्। न च युगपद्वृत्ता उपादानोपादेयत्वं तन्नियन्यनं चैकसन्तानत्वम्। उदाहरणस्य तु प्रसिद्धसन्तानान्तरवत्त्वानुभूतत्वयोः सुगमत्वात् अनुपन्यासः। चेच्छब्दः परापूर्वस्तर्कोद्योतनः। तत्रोत्तरम्-'चेतः' इत्यादि। **एवकारः** किमोऽनन्तरं द्रष्टव्यः। चेतो मानसं प्रत्यक्षं **समनन्तरम्** उपादानं **किमेव** नैव, विकल्पयेति शेषः। न हि मानसं विकल्पस्योपादानमुपपन्नम्, इन्द्रियज्ञानैसमभाविनस्तस्य ततः प्रागेव भावात्, तस्य चेन्द्रियज्ञानकार्यतया पश्चादेवोत्पत्तेः। न च भाव्यपि सर्वमनन्तरमिति प्रज्ञाकरादन्यस्य मतम्। तत्रापि **चेत इन्द्रियज्ञानं समनन्तरम्** उपादानं मानसस्य **किमेव** नैव, अपि तु विकल्पवदुपादेयमेव स्यात्। तथा चेत्, न, मानसस्य निरुपादानसत्तापत्तेः। तदेवाह-चेत इति। एवकारश्चेतःशब्दात्परो द्रष्टव्यः। मानसस्य समनन्तरं चेत एवास्ताम्। अन्यदित्यवधारणम्, किं न किञ्चित्। उत्तरं मानसमेव तस्य समनन्तरमिति चेत्, न तर्हीदमुपपन्नम् "इन्द्रियज्ञानेन" [प्र० वार्तिकाल० २। २४३] इत्यादि। इन्द्रियज्ञानं तस्योपादेयमुपादानं चेति चेत्, किमेवं विकल्प एव न भवेदविशेषात्? तदेवाह-चेत एव इन्द्रियज्ञानमेव **समनन्तरं** मानसस्य किं कस्मात्, विकल्पोऽपि स्यात्। एवञ्च 'विकल्पान्मानस तत्तश्च विकल्पः' इत्यन्योन्यसंश्रय इति मन्यते। भवत्यय प्रसङ्गो यदि तयोः परस्परत आत्मलाभादेतुफलभावो भवेत्, एकानिष्पत्तावन्यानिष्पत्तेः। न चैवम्, कुतश्चित् कस्यचिदात्मलाभस्यैव विषयाधिष्ठितस्याप्रतिष्ठानात्, अत एवोक्तं "निष्पत्तेरपराधीनम्" [प्र० वा० २। २६] इत्यादि, अपि तु नान्तरीयकत्वात्। न हि स्वकालभाविनं विकल्पमन्तरेण मानसम्, नापि तादृशं तदन्तरेण विकल्पः, ततो न परस्परायत्त इति चेत्, न, तत एव सन्तानभिन्नयो. युगपद्वृत्तिविरुद्धयोरपि सद्भावापत्तेः। न हि विना देवदत्तविज्ञानेन यज्ञदत्तादेर्ज्ञानम्, तदेकचित्तस्यैव जगतः प्राप्तेः तस्मिन्नन्यस्याविच्छेदात्, न चैवम्, अतोऽस्ति तयोरन्यविनाभावान्नियमो हेतुफलभाव इति कथ सन्तानान्तरचित्तपरिहारेण मरणचित्तादुत्तरमपरविकल्पस्यैवानुमानं यतो निश्चिता परलोकसिद्धिर्बौद्धस्य ? तत्र भाविनो मानसाद्विकल्पः। मयतु पूर्वमप्यदेव, पूर्वाभ्यज्ञानजन्मन इति चेत्, तस्यार्थज्ञानेन यद्येकसन्तानत्वम्, तदुपादेयस्य विकल्पस्यापि स्यात्, देवदत्तेनैव तस्यौत्तरस्य। तथा चाक्षज्ञानादेव

१-तत्कर्तृ आ०,ब०,प०। २ किममन्तरं आ०,ब०,प०। ३ -सदृशा-आ०,ब०,प०। ४ उपादानम्। ५-तस्मादाद्य-आ०, ब०, प०। ६-ज्ञाने च-आ०,ब०, प०।

विकल्प इति किं मानसेन ? तदाह–**चेत** इति । **चेत एव** अक्षज्ञानमेव न मानसम् । **किं** कस्मात् **न विकल्पयेत्** इति सम्बन्धः । कीदृशम् ? **समनन्तरं** परेण मानसस्योपादानमुक्तं यदि भिन्नसन्तानत्वम्; तर्हि यथा ततो न विकल्पस्तथा मानसमपि न भवेत्। न हि मण्डूकस्य पिता [1]गण्डूपाद् भवति । तदाह–**चेत** इति । **चेतः** अक्षज्ञानं **समनन्तरं** मानसस्योपादानं **किमेवं नैव** विकल्पवत् । तत्रैव दोषचयमाह–

शष्कुलीभक्षणादौ चेत्तावन्त्येव मनांस्यपि ॥१६२॥
यावन्तीन्द्रियचेतांसि प्रतिसन्धिर्न युज्यते ।

शष्कुल्या भक्ष्यविशेषस्य **भक्षणमादिर्यस्य** तदा घ्राणादेस्तस्मिन् , **चेत्** यदि **तावन्त्येव** तत्परिमाणान्येव न न्यूनान्यधिकानि वा **मनांस्यपि** मानसप्रत्यक्षाण्यपि, न केवलमक्षज्ञानानीत्यपिशब्दः । **यावन्ति** यत्परिमाणानि **इन्द्रियचेतांसि** इन्द्रियप्रत्यक्षाणि **प्रतिसन्धिः** प्रत्यवमर्शो **न युज्यते** । तात्पर्यमत्र–यथेन्द्रियज्ञानपरिमितानि मनांसि तथा तज्जन्मानो विकल्पा अपि तत्परिमाणा एवेति कथमयमेकः परामर्शः–'रूपादिकमहमेवानुभवामि' इति ? तदभावे च रूपादीनां कथमेकघटादिव्यवहारविषयत्वम् ? एकप्रत्यवमर्शबलादेव तदुपगमात् ।

"एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥" [प्र०वा० ३।१०८]

इति वचनात् । तन्न तावत्त्वं मनसामुपपन्नम् ।

अथैकमेव सकलरूपादिविषयं तेभ्यो मनस्तदाह–

अथैकं सर्वविषयमस्तु इति ।

सुबोधमेतत् । अत्रोत्तरम्–

किं वाक्षबुद्धिभिः ॥१६३॥ इति ।

अक्षबुद्धिभिः अक्षज्ञानैः **किं वा** किमिव तदेकम् , न किञ्चिदिह निदर्शनमस्ति । जलाहरणादिकमस्त्येव, तस्य घटादिव्यपदेशभाजोऽनेकस्मादेव रूपादेरेकस्य भावादिति चेत् ; न; तस्य तत्रानुपादानत्वात् , एकान्ततस्तदनेकत्वस्य चाप्रसिद्धेः । एकोपादानमनेकमिव तदुपादानमेकमपि कस्मान्न भवति ? दृश्यते हि नीलैकज्ञानोपादानं कर्कटीभक्षणादौ रूपादिज्ञानपञ्चकमिति चेत् ; न ; तस्याप्यसिद्धेः, रूपादिविषयस्यैकस्यैव मेचकस्य प्रतीतेः । '**यावन्तीन्द्रियचेतांसि**' इति तु परप्रसिद्ध्यैवाभिहितः । तन्न युक्तम्–**एकम्** इत्यादि ।

साम्प्रतं मनसामक्रमोत्पत्तावुक्तं प्रतिसन्ध्यभावं क्रमोत्पत्तावपि दर्शयन्नाह–

---

१ गण्डूपाद् भव–आ०, ब०, प० । किञ्चुलुकः । 'केंचुआ' इति भाषायाम् । २ "विकल्प."–ता०टि० ।
३ अनेकोपादानम् ।

क्रमोत्पत्तौ सहोत्पत्तिविकल्पोऽय विरुध्यते । इति ।

क्रमेण मनसाम् उत्पत्तौ अभ्युपगम्यमानायां सहैवोत्पत्तिर्यस्य रूपादिपरामर्शस्य सोऽयं प्रतीयमानो विरुध्यते । सत्युपादानक्रमे [1]तदनुपपत्तेः । ततो रूपे मनः, पुनस्तद्विकल्पः, ततो रसे मनः, पुनस्तद्विकल्पः, तथान्यत्रापीति विकल्पैर्मनोव्यवहितैः मनोभिश्च विकल्पव्यवहितैर्भवितव्यम् । न चैवम् , प्रतीत्यभावादिति भावः । ५

स्यान्मतम्–पञ्चादेक एव तेभ्यस्तद्विकल्प इति , तन्न, इन्द्रियज्ञानक्रमोत्पत्तावप्येवं तद्भावप्रसङ्गात् । भवत्विति चेत् , अत्राह– 'क्रम' इत्यादि । क्रमोत्पत्तौ इन्द्रियचेतसां सहोत्पत्तेरिन्द्रियज्ञानयुगपदुत्पादस्य विकल्पो निश्चयः "तस्मात् सन्तु सकृदिय" ।" [प्र० वा० २।१५७] इत्ययं परस्य प्रसिद्धो विरुद्ध्यते । कथं वा मनसां प्रत्यक्षत्वम् यदि न स्वसंवेदनम् ? तदुपस्यैव स्वयं तदभ्युपगमात् । स्वसंवेदने तु तत एव तत्प्रसिद्धेः किं ० [2]विकल्पतः ? तदनुमानेन निश्चयार्थम्' , तन्निश्चितस्यैव सिद्धत्वात् , स्वसंवेदनस्य चाविकल्पत्वेनानिश्चयत्वादिति चेत् , न , विकल्पस्याप्येवं स्वतोऽसिद्धिप्रसङ्गात् , तदनुभवस्याप्यनिश्चयत्वात् । निश्चयान्तरात्तत्सिद्धिकल्पनायाम् अनवस्थोपनिपातात् , असिद्धस्य चाङ्गित्वात् । अनिश्चयेऽपि तत्प्रसिद्धौ मनसामपि स्यादविशेषादिति व्यर्थमेव ततस्तदनुमानम् । इत्येवाह–

अध्यक्षादिविरोधः स्यात्तेषामनुभवात्मनः ॥१५४॥ इति । १५

आत्मनोऽनुभवः अनुभवात्मा, [3]राजदन्तादिषु दर्शनात् आत्मशब्दस्य परनिपातः, ततोऽनुभवात्मनः स्वानुभवस्य तेषां मनसां सम्बन्धिन 'उत्पत्तावपि' इति सम्बन्धः । तत्र रूपणम्–अध्यक्षमादिर्यस्य तद् अध्यक्षादि अनुमानमिति यावत् , तस्य विरोधो वैफल्येन परिपीडन स्याद् भवेदिति । अथवा, तेषामिति सहोत्पत्तिविकल्पेपरामर्शः प्रक्रमात् । बहुवचनं पुनर्व्यक्तिबहुत्वापेक्षम् , तेषाम् । [4]कस्यां किम् ? अनुभवात्मनः २० अनुभव आत्मा स्वभावो यस्य तद् अनुभवात्म, प्रक्रमात् मानसं प्रत्यक्षम् , तस्मात् । उत्पत्तावधिकृत्याभ्युपगम्यमानायाम् अध्यक्षेण आदिग्रहणादनुमानेन च विरोधो बाधः स्यात् । प्रत्यक्षेण तावद्भवति ततस्तदुत्पत्तेर्बाध', तेनेन्द्रियज्ञानादेव तदुत्पत्तिप्रतीतेः, तथा ह्यनुभवः– 'मया युगपदक्षादिना रूपादिकमन्यमापि' इति । तदनुमानेनापि , तेनापि तस्मादेव तदुत्पत्तेरध्यवसायात् । तथा हि– यद्यदन्वयव्यतिरेकावनुविधत्ते तत्तस्यैव कार्यं २५ कुलालादेरेव(रिव)कुम्भादिः, अनुविदधते चेन्द्रियाण्यन्वयव्यतिरेकौ तद्विकल्पा इति । अनुकृतान्वयव्यतिरेकादन्यस्य च तद्धेतुत्वकल्पनायां न कचित् कश्चिन्नियतो हेतु' फलं वा भवेत् । तन्न क्षान्तमप्रभो[5] व्यायाम् ।

---

१ सहोत्पत्तमुपपत्तेः । २ विकल्पस्तद्–आ०, ब०, प० । ३–र्थं न तन्नि–आ०, ब०, प० । ४ "राजदन्तादिषु परम्"–पा० सू० २। २। ३१ । ५ –कस्यां प–आ०, ब०, प० । ६ तस्यां आ०, ब०, प० । ७–क्षो न्यायात् आ० ।

धर्मोत्तरस्त्वाह[1]–न प्रत्यक्षादिप्रसिद्धत्वात् मानसं प्रत्यक्षमिष्यते यतोऽयं दोषः किन्त्वागमाधीनत्वात्। तत्र च परे दोषमुद्भावयन्ति—यदि मानसमपि किञ्चित्प्रत्यक्षं तर्हि नान्धो नाम कश्चित् लोचनविकलस्यापि तत्सम्भवादिति तत्परिहाराय[2] तल्लक्षणप्रणयनम् 'इन्द्रियज्ञानेन' इत्यादि। न हीन्द्रियज्ञानमन्धस्य यतस्तदुपादानस्य मानसप्रत्यक्षस्य तत्र भावात्तद्व्यवहारो न भवेदिति। तत्रोत्तरमाह[3]–

वेदनादिवदिष्टं चेत्कथं नातिप्रसज्यते। इति।

वेदना सुखाद्यनुभूतिरादिर्यस्य संज्ञादेस्तत् **इष्टम्** अभिमतम् प्रत्यक्षं **चेत्** यदि। दूषणमत्र–'**कथम्**' इत्यादि सुबोधम्। तथा हि–

अस्वसंवेदनं तच्चेत् प्रत्यक्षत्वेन[4] गम्यते।
ऐन्द्रियादिकमप्येवं तथा चातिप्रसञ्जनम् ॥१२०५॥
"अप्रत्यक्षोपलम्भस्य" इत्यादि[5] निर्विषयं भवेत्।
आगमादेव तत्सिद्धं कथमस्तु स्ववेदने ॥१२०६॥
बुद्धेश्चैतन्यमप्यन्यत्[6] प्रत्यागमनिरूपितम्।
भवेदित्यपि[7] बुद्धोक्तं कथन्नातिप्रसज्यते? ॥१२०७॥
प्रमाणबाधस्तुल्योऽयमुभयत्रात एव हि।
'अध्यक्षादिविरोधः स्यात्' इत्यभाणि मनीषिणा ॥१२०८॥

यत्पुनरुक्तम्–विप्रतिपत्तिनिराकरणाय तल्लक्षणमुच्यत इति; तत्राह–

प्रोक्षितं भक्षयेन्नेति दृष्टा विप्रतिपत्तयः। ॥१६५॥ इति।

प्रोक्षितं मन्त्रिताभिरद्भिरभ्युक्षितं **भक्षयेत्** मांसमिति वैदिकाः[8]। तदुक्तम्–

"प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां तु काम्यया।
यथा विधिनियुक्तस्तु प्राणानामेव चात्यये॥" [मनु० ५।२७][9] इति।

न भक्षयेत्प्रोक्षितमपि तु 'पात्रपतितं त्रिकोटिशुद्धम्' इति बौद्धाः[10], **इति** एवं **दृष्टाः** उपलब्धा **विप्रतिपत्तयो** बहुवचनमन्यासामपि तासाम् 'यो[11] मांसात्स्वर्गः, चैत्यवन्दनात्[12] स्वर्गः' इत्यादीनां परिग्रहार्थम्। तथा च तन्निवर्तनार्थमपि प्रमाणशास्त्रे तल्लक्षणमभिधातव्यमिति भावः, तत्त्वपरिच्छेदं प्रत्युपयोगित्वेन[13] तं प्रत्यनुपयोगात्। तदेवाह–

---

१ "एतच्च सिद्धान्तप्रसिद्धं मानसं प्रत्यक्षम्, न त्वस्य साधकमस्ति प्रमाणम्, एवं जातीयकं तद्यदि स्यान् न कश्चिद्दोषः स्यादिति वक्तुं लक्षणमाख्यातमस्येति।"–न्यायवि०टी०पृ० १९। २ यदा चेन्द्रियज्ञानविषयोपादेयभूतः क्षणो गृहीतस्तदा इन्द्रियज्ञानेनागृहीतस्य विषयान्तरस्याग्रहणादन्धबधिराद्यभावदोषप्रसङ्गो निरस्तः।"–न्यायवि० टी० पृ० १९। ३ अन्धादिव्यवहार। ४–न ह्यास्यते आ०,ब०,प०। ५ द्रष्टव्यम्–पृ०४६९ टि० ७। ६ सांख्यागम। ७ बुद्धयोक्तं आ०,ब०,प०। ८ इतीति आ०,ब०,प०। ९ "तर्हि खो अहं जीवक ठानेहि मंसं अपरिभोगं ति वदामि दिट्ठं सुतं परिसंकितं ··· खो अहं जीवक ठानेहि मंसं परिभोगं ति वदामि अदिट्ठं असुतं अपरिसंकितं"–मज्झिम० जीवकसुत्त। १० वैदिकानाम्। ११ बौद्धानाम्। १२ विप्रतिपत्तिनिराकरणं प्रति।

लक्षणं तु न कर्तव्यं प्रस्तावानुपयोगिषु । इति ।

सुखम्दः कर्तव्यमित्यतः परो ग्रन्थोऽवधारणार्थम् । तदयमर्थः–लक्षणं न कर्तव्यमेव, प्रस्तूयते प्रमाणकक्षत्वेनाधिक्रियते इति प्रस्तावो हेयोपादेयतत्त्वनिर्णयस्तत्र अनुपयोगीनि मानसमांसभक्षणादीनि तेषु । बहुवचनं मांसभक्षणादिनिदर्शनपरिग्रहार्थम् । तत्र धर्मोत्तरमतमपि न्यायधर्मोदनपेक्षम् । ५

साम्प्रतम् 'अविकल्पकम्' इत्यादिना सामान्यतः प्रतिक्षिप्तमपि स्वसंवेदनप्रत्यक्षं ग्रन्थान्तरेण प्रतिक्षिपन्नाह–

अध्यक्षमात्मवित्सर्वज्ञानानामभिधीयते ॥१६६॥
स्वापमूर्च्छाद्यवस्थोऽपि प्रत्यक्षी नाम किं भवेत् ।

अध्यक्षं कल्पनाविभ्रमविकलत्वेन आत्मवित् आत्मवेदनम् अभिधीयते १०
सौगतैः । तत् सर्वज्ञानानां विकल्पेतरभेदार्थिष्ठाननिरवशेषोपयोगानाम्, तदुक्तम्–"सर्वचित्त-चैत्तानामात्मसंवेदनं प्रत्यक्षम्" [न्यायवि० पृ० १९] इति । अयमनुपपन्नम्–स्वापश्च स्वप्नदर्शनविकलोऽवस्थाविशेषो न तद्दर्शनवान्, तदवस्थस्य स्वयमपि प्रत्यक्षत्वोपगमात् । मूर्च्छा च मर्मप्रहारादिनिमित्तश्चित्तश्यामोहः, स्वापमूर्च्छे ते आदी यस्योन्मादादेः स स्वापमूर्च्छादिः स्वनिश्चयैकस्वाविशेषेण स्वाप एव मूर्च्छादेरन्तर्भावेऽपि पृथगुपादानम्, १५
[1]निमित्तभेदतो भेदस्यापि भावात् । अन्यदेव हि प्रासादक्षयनादिकं निमित्तं स्वापस्यान्यदेव च विशेषोपयोगादिकं मूर्च्छादेः । तथा कार्यभेदादपि, सुप्तस्य [2]निर्मथित्वे (?) च शरीरं तद्विपरीतं मूर्च्छितादेरपि । स एवावस्थो यस्य सोऽपि न केवलं तद्विपरीत इत्यपि शब्दः प्रत्यक्षी प्रत्यक्षवान् नाम स्फुटं किम्न भवेत् ? नकारस्य पूर्वश्लोकादनुवृत्तेः, भवेदेव । तत्राप्यात्मसंविदो भावात्, तथा च कथमवस्थावतुष्टयव्यवस्थेति भावः । २०

तदवस्थस्य ज्ञानमेव नास्ति, तन्नाशे जाग्रत इव तत्त्वविरोधात्तत्र कथमात्मसंवेदनम् ? यतोऽयं प्रसङ्ग इति [3]प्रज्ञाकरो [4]ब्रह्मवादी च, तेनापि तदवस्थायां जीवस्य परमात्मतत्त्वसम्पन्नतया विशेषविज्ञानोपरमस्योपगमात् । "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" [बृहदा० ४।३।२१] इति श्रुतेः ।

तत्रोत्तरं दर्शयति–

विच्छेदे हि सतुःसत्यभावानादिर्विरुध्यते ॥१६७॥ इति ।

---

१ तुलना–"सुप्तस्य यदाविधिरपि नोत्थानमिति, सर्वोपपुरुषो हेतो भवति, भवानहं च परत्वम्, विस्फारितो नेत्रे । सुप्तमन्तु प्रमथनादलुप्तमनं पुनःपुनरुत्थानमिति निमीलितो अस्य नेत्रे भवतः । निमित्त भेदश्च भवति मोहस्वापयोः, सुप्तमदग्लानादिनिमित्तत्वान्मोहस्य, श्रमादिनिमित्तत्वात्स्वापस्य ।"–न्या० मा० १।१।१० । २ –निर्मथनत्वेषु वा० ता० । ३ जाग्रत्स्वप्नसुषुप्तितुरीयावस्था । ४ "संवेदनाभाव एव सुप्त मायोर्नान्तरो विभेदः"–ब्र० वार्तिकाभ० १।५०। ५ "सुषुप्तिर्नाम शानाभ्यो जीवस्यावस्थाविशेषः । अत्र च श्रुतिः–'यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत् सुषुप्तम्'– बृ० उ० ४।३।१९ ।

स्वापादौ **विच्छेदे** उपरमे विज्ञानानामिति सम्बन्धः **हि** यस्मात् **चतुःसत्यं** दुःख-समुदयनिरोधमार्गलक्षणं तस्य **भावना** प्रबुद्धेन मुहुर्मुहुश्चेतसि परिमलनं[1] सा **आदिर्यस्य** गुणादिप्रकाशस्य ब्रह्मलोकात् प्रत्यागमस्य च स **विरुध्यते**। तस्मात् सन्ति तदा विज्ञानानीति कथन्न कथितो दोषः ? तथा हि—यदि स्वापादौ ज्ञानविच्छेदः कुतः प्रबुद्धस्य तत्सत्यभावनं सन्निहितस्य तद्बीजस्याभावात् ? जाग्रदवस्थाभाविन इति चेत्; न; तस्य चिरनष्टत्वेन कारणत्वानुपपत्तेः, अन्यथा आत्मदर्शनबीजादपि चिरप्रहीणादेव सुगतस्य जन्मदोषसमुद्भवलक्षणायाः पुनरावृत्तेः सम्भवात्, असम्भवदर्थमेतद्भवेत्—"**अपुनरावृत्त्या गतस्सुगतः**" [ ] इति[2]। यदि पुनस्तस्य सम्यग्ज्ञाननिर्लुप्तशक्तिकत्वान्न कालान्तरेऽपि तत्फलम्; चतुःसत्यभावनाफलमपि तद्बीजान्न भवेत्, तस्यापि स्वापादिनिर्लुप्तशक्तिकत्वात्। दृश्यत इति चेत्; सत्यम्; दृश्यते, चिरनष्टादिति तु न दृश्यते, सन्निहितादपि तदुपपत्तेः। यदि सन्निहितज्ञान एव स्वापादिः कथमवस्थान्तराद्विशिष्यत इति चेत्? आस्तामेतत्। अपि च, कथमेवं प्रत्यक्षानुमानाभ्यां प्रवर्त्तमानस्य नियमेनाविसंवादः ? जाग्रज्ज्ञानात् प्रबोधचित्तवत् [7]चिरकालापक्रान्तादपि जलपात्रकादेस्तदुत्पत्तिपरिकल्पनायां नियमतस्तदर्थक्रियाव्याप्तेरसम्भवात्। तद्दृष्टत्वाच्चाविसंवादस्य। ततो न सुभाषितमेतत् "[8]न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यते।"[ ] इति। ततः सन्निहितादेव ततस्तदुत्पत्तिमभ्युपगच्छता चतुःसत्यभावनापि सन्निहितहेतुकैवाभ्युपगन्तव्या। न च तद्भावना नेष्यत एव; तन्मूलत्वात् सकलगुणदोषप्रकाशरूपस्य योगिज्ञानस्य। तदुक्तम्—

"बहुशो बहुधोपायं कालेन बहुनाऽपि च।
गच्छन्त्यभ्यस्यतस्तस्य गुणदोषाः प्रकाशताम्॥" [प्र० वा० १।१३७] इति।

तथा यदि स्वापादौ परमात्मसम्पन्नतया विशेषविज्ञानविकलो जीवः कथं तस्य पुनरुत्थानम्? तस्य तद्विज्ञानमूलत्वात्, तस्य च तदानीमभावात्। लेशतस्तद्भावेऽपि तदात्मापत्तेरनुपपत्तेः निवृत्तनिश्शेषाविद्यासस्पर्शं हि परमात्मरूपम्, तत्कथं तदापन्नस्य जीवस्यापि [9]तल्लेशसंस्पर्शः तद्रूपस्यैव तत्प्रसङ्गात्। भवतु जाग्रत्समयभाविन एव विशेषज्ञानात्तस्य पुनरुत्थानमिति चेत्; न, संसारसमयभाविनस्ततो मुक्तस्यापि तत्प्रसङ्गात्। "तस्य विद्यावलोपरमितस्य न तद्धेतुत्वमिति चेत्; स्वापादिवलोपरतस्य[12] कथम्? शास्त्रप्रामाण्यात्, श्रावयति हि शास्त्रम्—"**पुनः प्रतिन्यायं प्रतियोन्याद्रवति**" [बृहदा० ४।३।१७] इत्यादिकं सुषुप्तादेः पुनरुत्थानम्, ततो युक्तं तद्बलनिर्लुप्तस्यापि तद्धेतुत्वम्, अन्यथा तदनुपपत्तेः। न चैवं मुक्तस्य

---

१ परिमेलनं आ०, ब०, प०। २ द्रष्टव्यम् पृ० ३६ टि० ६। ३ सन्निहितादेव। ४ चिरकालप्रोक्तादपि —आ०, ब०, प०। ५ ज्ञानोत्पत्ति। ६ "उक्तञ्च सुगतेन—प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिरविसंवादनम्" [प्र०वा०१।३]—ता० टि०। ७ नाभ्यामर्थं आ०, ब०, प०। ८ पुनरुत्थानस्य। ९ परमात्मापत्तेः। १० अविद्यालेश। ११ संसारसमयभाविनः। १२ —परहितस्य आ०, ब०, प०।

पुनरुत्पानम्, निरवधिनिर्मोक्षस्यैव अवणात्। तन्न विशाखनरपतेरतस्य सत्कारणत्वनिर्मूलोऽयमुपपत्तिपथः इति चेत्, नन्वेवं शास्त्रमेवाप्रमाणं स्यात्, निरवयवपरमात्मसमापन्नत्वेन अविषयोः सुषुप्तनिर्मुक्तयोः पृथक्करणेन मिथ्याव्यापारत्वात् द्विचन्द्रादिबोधवत्। नास्त्येव तेन तयोः पृथक्करणं तदाभासयोरेवोपाधिगतयोः पृथक्करणात्, तयोश्च जलसूर्यादिवद्भेदस्यैव प्रसिद्धेरिति चेत्, भवत्वेवं तेन तयोः पृथक्करणम्, परमात्मापत्तिस्तु कथं भाष्येव अवस्तुनो वस्तुरूपापत्तेर्विरोधात् वस्तुनस्तदन्यरूपापत्तिवत्? कथं तर्हि जलसूर्यादेर्जलाद्युपरमे सूर्याद्यापत्तिरिति चेत्, न, तत्राप्याधारोपरतौ उपरमस्यैवोपलम्भात् न तदापत्तेः। एवमत्राप्युपाध्युपरमे तदाभासयोरुपरतिरेव स्यान्न तदापत्तिः अवस्तुत्वात्। मनूपाध्यनुप्रविष्टः परमात्मैव जीवो न तदाभास एव, "हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य" [छान्दो० ६।३।२] इत्यादौ जीवस्यात्मत्वेन निर्देशात्, कथं तस्यावस्तुत्वम्? यत्तो न तदापत्तिरिति चेत्, न तदपि साधु, लौकिकादविवेकाभिप्रायात् तथा निर्देशात् आभासस्यैवात्मत्वेन। अत एवात्रार्थे सूत्रं भाष्यं च—"आभास एव च" [ब्रह्मसू० २।३।५०] इति। "आभास एवैष जीवः परस्यात्मनो जलसूर्यादिवत् प्रतिपत्तव्यो न स एव साक्षात्नापि यस्तन्तरम्" [ब्र०शा० २।३।५०] इति। ततो न स्वापावस्थायां विशेषविज्ञानस्याविद्यात्मव्यपदेशस्यान्यरूपापत्तिः, उपरतौ च न तस्योन्मज्जनम्, तादृशस्योन्मज्जने च न प्रबुद्धस्यानुभूतस्मरणादिकं जीवान्तरवत्। अस्ति चेदम्। तस्मादन्यपरिच्छिन्नज्ञान एव स्वापादिः निश्चयवैकल्यात् जाग्रत्स्वप्नदशाभ्याम्, अपरित्यक्तशरीरत्वाच्च चतुर्थावस्थातो विशिष्यते।

स्वसंवेदनमात्रस्य तु प्रत्यक्षत्वमाचक्षाणानां न तस्य जाग्रदादेर्विशेषः, तदात्मभेदस्यापि प्रत्यक्षत्वात्। तन्न निश्चयविकल्पसंविन्मात्रमेव प्रत्यक्षम्।

अथैवोपपत्त्यन्तरमाह—

प्रायशो योगिविज्ञानमेतेन प्रतिवर्णितम्। इति।

योगिविज्ञानं चतुरार्यसत्यगोचरं मुख्यज्ञानम् एतेन निर्विकल्पप्रत्यक्षद्वारेण प्रतिवर्णितं प्रतिपादितं भवतीति शेषः। कीदृशम्? **प्रायशः** प्रकृष्टमयशोऽप्रामाण्यलक्षणं यस्य तादृशमिति। तदपि हि कल्पनापोढत्वादेव प्रत्यक्षम्, अन्यथा तदप्रत्यक्षत्वाव्याप्तिदोषात्। न च "तत्र स्वसत्तामात्रेण विज्ञेयानां प्रमाणम्, अपि तु सोपायहेयोपादेयतत्त्वोपदेशात्। "ज्ञानवान् मृग्यते कश्चित्तदुक्तमतिपत्तये।" [प्र० वा० १।३२] इति वचनात्। सोऽपि न निर्विकल्पात्, भाव्यभेदनात् कुड्यादेः, "विकल्पयोनयः शब्दाः" [ ] इति वचनात्। न विकल्पसंस्कारात्, योगिनस्तदभावे विधूतकल्पनाजालत्वविरोधात्। ततः सविकल्पकमेव तदभ्युपगन्तव्यम्। तथा च सिद्धमिन्द्रियादि-

---

१ पृथक्कार—आ०, ब०, प०। २ "आत्मनेति वचनात् स्वात्मनोऽन्यनिरपेक्षेण चैतन्यस्वरूपतया प्रसिद्धेन।" —छान्दो० शा० भा० ६।३ —मनसैव च आ०, प०, प०। ४ तत्सत्ता—आ०, ब० प०।

प्रत्यक्षमपि सविकल्पं प्रत्यक्षत्वात् योगिप्रत्यक्षवदिति । कीदृशश्च तन्निर्विकल्पकम् ? निराकार मेकशक्तिकञ्चेति चेत् ; न; तस्यानेकविषयत्वाभावानुषङ्गात् , अन्यथा नित्यस्यापि तादृशो ऽनेककार्यविरोधात् न तत्प्रतिषेधः तथा च–

अशेषज्ञततयेष्टस्य किञ्चिज्ज्ञत्वायशस्थितेः ।
प्रायशो योगिविज्ञानमेतेन प्रतिवर्णितम् ॥१२०९॥
साकारमेकाकारं तदेतेनैव निरूपितम् ।
अनेकशक्तिकं तच्चेदनेकाकारमप्यलम् ॥१२१०॥
नानाशक्तितदाकारसाधारणतया स्थितम् ।
निर्विकल्पं कथन्नाम तद्विभ्रज्जातिकल्पनाम् ॥१२११॥

तथा च–

अविकल्पतयेष्टस्य विकल्पत्वायशःस्थितेः ।
प्रायशो योगिविज्ञानमेतेन प्रतिवर्णितम् ॥१२१२॥

साम्प्रतं साङ्ख्यस्य प्रत्यक्षलक्षणं प्रत्याचक्षाण आह–

श्रोत्रादिवृत्तिः प्रत्यक्षं यदि तैमिरिकादिषु ॥१६८॥
प्रसङ्गः किमनद्वृत्तिस्तद्विकारानुकारिणी । इति ।

श्रोत्रादिर्यस्य चक्षुरादेस्तस्य **वृत्तिर्विषयाकारपरिणतिः यदि चेत् प्रत्यक्षम्** ननु बुद्धिवृत्तिरेवाध्यवसायरूपा साङ्ख्यस्य प्रत्यक्षं "प्रतिविषयाध्यवसायो दृष्टम्" [सां०का० ५ इति वचनात् , तत्कथं श्रोत्रादिवृत्तिः प्रत्यक्षमाशङ्क्यत इति चेत् ; न; [1]तद्वृत्तेरपि बहिरिन्द्रि प्रणालिकयैव भावात् तद्वृत्तेरेव तत्त्वोपपत्तेः । सति हीन्द्रियाणामालोचने मनसि सङ्कल्प ततोऽहङ्कारेऽभिमानः, ततश्च बुद्धावध्यवसाय इति तत्सिद्धान्तप्रसिद्धेः । अत्र दूषणम्- **तैमिरि आदिर्येषां** कामलिकादीनां तेषु **प्रसङ्गः** श्रोत्रादिवृत्तिप्रत्यक्षत्वस्य । तथा च द्विचन्द्रादिर तात्त्विक एव भवेदिति भावः । तद्वृत्तिरेव सा न भवति यतोऽयमतिप्रसङ्ग इति चेत अत्रोत्तरम्–**किं** कस्मात् **अतद्वृत्तिः** चन्द्रद्वित्वालोचनादिः, तस्य श्रोत्रादेर्विकारमनुकरोतीत्ये शीला न भवेदेव । भवति च, तिमिरादिना विकृत एव "[2]श्रोत्रादौ तद्वृत्तेर्भावात् । आसादित ध्यवसायनिबन्धनमेव वृत्तिस्तद्वृत्तिर्न वृत्तिमात्रम् ; इत्यपि न युक्तम् ; [3]"शब्दा[दिषु पञ्चा नामालोचनमात्रमिष्यते वृत्तिः ।" [सां०का० २८] इति तन्मात्रस्यैव तद्वृत्तित्ववचनात

---

१ एकशक्तिकात् । २ "श्रोत्रादिवृत्तिः भ्रान्तेपि न हि नाम न विद्यते । न च ज्ञानं विना वृत्ति. श्रोत्रादे पद्यते ॥"–प्र० वार्तिकाल० २।२०० ।–अकलङ्क० टि० पृ० १६२ । वार्षगण्यस्य । ३ बुद्धिवृत्तेरपि । ४ "रूपं पश्यति, मन. सङ्कल्पयति, अहङ्कारोऽभिमानयति बुद्धिरध्यवस्यति ।'–सां० का० माठर० ३० । ५ श्रोत दतद्वृ आ०, ब०, प० । ६ "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः"–सां० का० ।

साम्प्रतं नैयायिकस्य प्रत्यक्षलक्षणमुपदर्श्य निराकुर्वन्नाह—

तथाक्षार्थमनस्कारसत्त्वसम्बन्धदर्शनम् ॥१६९॥
व्यवसायात्मसंवाद्यव्यपदेश्य विरुध्यते । इति ।

अक्षम् इन्द्रियम् **अर्थः** तद्विषयो **मनस्कारोऽन्तःकरणं सत्त्व** आत्मा तेषां **सम्बन्धः** आत्मा मनसा युज्यते मन इन्द्रियेण तदप्यर्थेनेति क्रमेण सन्निकर्षः। तस्य कार्यं **दर्शन** विषयज्ञानम् **अक्षार्थमनस्कारसत्त्वसम्बन्धदर्शन** प्रत्यक्षमिति प्रकृतेन सम्बन्धः। इह सत्त्वमात्मादिग्रहणमेव कर्तव्यम्, न सम्बन्धग्रहणं तदर्थस्यार्थादेव प्रतिपत्तेः। न हि विषय ज्ञानं कुर्वदात्मादिकं परस्परमसन्निकृष्टमेव कर्तुमर्हति, परस्परं सन्निकर्षवत एव दण्डादेर्घटादि-कर्मणि व्यापारात्, तद्वदक्षादेरपि तादृशस्यैव विषयज्ञाने व्यापारोपपत्तेर्भवति तत्कार्यदर्शन-प्रतिपादनवदादेव तत्सम्बन्धप्रतिपत्तिः,अतो न कर्तव्य सम्बन्धग्रहणमिति चेत्, सत्यम्, तथापि तत्क्रियते सयुक्तसंयोगादेः सम्बन्धान्तरस्य प्रतिक्षेपेणाभिमतस्यैव संयोगादिसम्बन्ध षट्कस्य परिग्रहार्थम्। एवमपि सम्बन्धग्रहणमेवास्तु तेनैव प्रत्यासत्तिग्राहिना तत्षट्कस्यावरोधात्[1] सशब्दस्तु [2]किमर्थं इति चेत्? न, तस्य 'मम् निश्चितो बन्धः सम्बन्धः' इति व्याख्यानार्थ-त्वात्। निश्चयश्च सम्बन्धस्य कश्चित् कस्यचित् नापरस्य। तथा हि—चक्षुषो घटादिना संयोगः सम्बन्धो निश्चितो द्वयोरपि द्रव्यत्वात्। तद्गतेन रूपादिना संयुक्तसमवायोऽन्यस्या-सम्भवात्। रूपत्वादिना तु तत्समवेतेन संयुक्तसमवेतसमवायः तस्यैव परिक्षेपात्। श्रोत्रस्य तु शब्देन समवायः। शब्दत्वेन समवेतसमवायः। समवायाभावाभ्यां पुनरिन्द्रियस्य सम्बन्धि-विशेषणभावः, समवायिनो घटतदवयवा इति घटादिविशेषणत्वेन समवायस्य प्रतिपत्तेः, अघटं भूतलमिति भूतलविशेषणत्वेन च घटाभावस्याधिगमात्। तदेवमयमत्र सम्बन्ध इति निश्चय द्योतनार्थमुपसर्गोपादानम्। एवं विशेषरूपेणापि सन्निकर्षपदस्य व्याख्यानात्।

तदेव प्रत्यक्षमनभिमतव्यवच्छेदार्थं विशिनष्टि **व्यवसायात्म**। व्यवसायो निर्णय आत्मा स्वभावो यस्य तत् तथोक्तम्। अनेन सशयज्ञानस्य व्यवच्छेदः, तस्याक्षादिसम्बन्धदर्शनरूपत्वेऽपि व्यवसायभावाभावात्। सवादोऽव्यभिचारः सोऽस्यास्तीति **संवादि** अनेनापि विपर्ययज्ञानस्यं। तस्योक्तरूपस्य व्यवसायात्मनोऽपि व्यभिचारभूमित्वात्। व्यपदेशार्हं व्यपदेश्यम् तद-र्हत्वञ्च तत्कार्यत्वात्, न व्यपदेश्यम् **अव्यपदेश्यम्** अशब्दजन्यमिति यावत्। अनेनापि शब्दसन्निकर्षाभ्यामुपमानस्य 'इदं रूपम् इत्यादिज्ञानस्यं' तस्योभयजन्यमनोऽपि शाब्दतया लोकेऽधि(यि)गतत्वात्। तदनेन "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि-व्यवसायात्मकं प्रत्यक्षम्" [न्यायसू० १।१।४] इति सूत्रमुपदर्शितम्। यद्येवमक्षार्थग्रह-

---

१ "सत्त्वेनेदं प्रत्यक्षं चक्षुरादिद्रव्यसन्निकर्षात् प्रवर्तते, तत्र चक्षुर्द्रव्यं स्वयमेव विषयं चक्षुर्द्रव्यसन्निकृष्टं ज्ञान-मुत्पादयते आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति, युक्तावपि तु प्रकृतसन्निकर्षजज्ञानमुत्पादयतः तत्र चक्षुरादिव्यापाराभावात्, आत्मनि तु योगिनो द्वयोरात्ममनसोरेव संयोगप्रत्यक्षमुपजायते तृतीयस्य ज्ञानस्य व्यापारस्य तत्रासम्भवात्।"—न्यायवा० पृ० ७०। २ –वरोधनात् आ०ब०,प०। ३ किमर्थमिति आ०,ब०,प०। ४ सम्बन्धपदं आ०,ब०,प०। ५ "व्यवच्छेद इति सम्बन्धः" –आ०टि०। ६ "व्यवच्छेद"–आ०टि०।

णमेव कर्तव्यम् तस्यैव प्रत्यक्षकारणतया सूत्रे निर्देशात्, न मनस्कारसत्त्वग्रहणं विपर्ययादिति चेत्, न; तस्यापि तत्कारणत्वात्, सूत्रे तु तदवचनं साधारणकारणत्वात्। साधारणं हि कारणं मनस्कारादि; प्रत्यक्षवदनुमानादावपि भावात्। अक्षादेस्तु तत्रोपादानं प्रत्यक्षं प्रति तस्यासाधारणहेतुत्वप्रतिपादनार्थं न तु कारणान्तरव्यवच्छेदार्थम्। तथा च न्यायभाष्यम्–"नेदं कारणावधारणमेतावत्प्रत्यक्षकारणमिति। किं तर्हि? विशिष्टकारणवचनम्। यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते। यत्तु समानमनुमानादिज्ञानस्य न तन्निवर्त्यते।" [न्यायभा० १।१।४] इति। यद्येवं सूत्रवदत्राप्यसाधारणमेव कारणं वक्तव्यं नेतरदिति चेत्; न; तत्रापि दूषणदर्शनार्थत्वात्तद्वचनस्य, ततः कुतोऽयमेतत्। तर्हि सूत्रद्वयमिदं प्रत्यक्षलक्षणमिति चेत्, आह–**विरुध्यते** विचारेण पीड्यत इत्यर्थः। कथमित्याह–**'तथा'** इति। वीप्सागर्भमिदम्।

तदयमर्थः–तेन तेन विशेषणरूपेण विशेष्यरूपेण तत्समुदायरूपेण च प्रकारेणेति। तथा हि– विशेषणं तावद्व्यवसायात्मकमिति विरुध्यते, निवर्त्याभावात्। संशयज्ञानं निवर्त्यमिति चेत्; न; तस्य सन्निकर्षपदेनैव निवर्तनात्। सन्निकर्षजमेव तदपीति चेत्; कस्य सन्निकर्षः? स्थाणुपुरुषयोरन्यतरस्य, उभयस्य वा? न तावत्तदुभयस्य; एकत्रैकहेलया तस्यासम्भवात्। सम्भवे तज्ज्ञानस्य संशयत्वानुपपत्तेः। न हि वस्तुसति संशयो नाम अतिप्रसङ्गात्। अन्यतरस्य तु सन्निकर्षे तस्यैव तत्र प्रतिभासनं भवेत् कथमितरस्य? असन्निकृष्टस्यापि प्रतिभासने अन्यत्रापि सन्निकर्षकल्पनावैफल्यात्। सन्निकृष्ट एवान्यतर इतरेणापि रूपेण प्रतिभासते नापरः कश्चिदसन्निकृष्ट इति चेत्; न; इतराकारस्य तत्राभावे तेन सन्निकर्षानुपपत्तेः। रूपान्तरसन्निकर्षस्तु नेतरप्रतिभासकारणम् अतिप्रसङ्गात्। तन्न संशयज्ञानस्य सन्निकर्षजत्वम्। नापि विपर्ययज्ञानस्य; विपरीताकारस्य तत्राविद्यमानत्वेन सन्निकर्षानुपपत्तेः। रूपान्तरसन्निकर्षाच्च न तत्प्रतिभासनमिति निवेदनात्। तद्वद्व्यभिचारीत्यपि विरुध्यते; विपर्ययज्ञानस्यापि सन्निकर्षवचनेनैव निवर्तनात्। तद्वदव्यपदेश्यमित्यपि। ननु च व्यपदेश्यं ज्ञानं शब्दसहायादिन्द्रियसन्निकर्षादेव भवति, तत्कथं तस्य तत्पदेन निवर्तनमिति चेत्? कोऽसौ शब्दस्तस्य सहायः? सङ्केत्यमान इति चेत्; प्रत्युत्पन्नविषयदर्शनस्य, तद्विपरीतस्य वा? न तावत्तद्विपरीतस्य; अदृष्टे विषये 'अयमस्य वाचकः शब्दः' इति सङ्केतस्यासम्भवात्। स्मर्यमाणे सम्भव इति चेत्; सत्यम्; न चासौ सन्निकृष्टः। सन्निकृष्टे चेयं चिन्ता। भवतु प्रत्युत्पन्नतद्दर्शनस्यैवासौ सहाय इति चेत्, यद्येवं तद्दर्शनस्यैवासौ सहायो न सन्निकर्षस्य, तत एव तत्सहायाव्यपदेश्यज्ञानस्योत्पत्तेः। तदभावे सत्यपि सन्निकर्षे पूर्वमनुत्पत्तेः। अथ तदप्यपरिभ्रष्टसन्निकर्षमेव तज्जनयति; जनयतु तथापि न सन्निकर्षस्य तत्कारणत्वम्। 'इदमेवम्' इति चेत्, इदमेवंशब्दाभ्यां तद्दर्शनस्यैव तत्पुरस्सरतया प्रतिवेदनात्। न हि

---

१ –मिति किं तर्हि विशिष्टकारणमिति किं तर्हि –ता०। २ तन्निवर्तते –आ०,ब०,प०। ३ –स्य वाचकः शब्द इति वा आ०, ब०, प०। ४ तद्दर्शनादेव। ५ तद्दर्शनाभावे।

सन्निहित इत्येव सन्निकर्षोऽपि कारणम्, सन्निधानस्याकारणेऽपि सम्भवात्। अत एव वक्ष्यति—

"सन्निधानं हि सर्वस्मिन्नव्यापारेऽपि तत्समम्" [न्यायवि०श्लो० ३०१] इति।

यदि च, 'इदं रूपम्' इत्यादिज्ञान सन्निकर्षजम्, 'अयं स गवयः' इत्यपि स्यात्, सन्निकृष्ट एव गवये तस्योत्पत्तेः। तथा च तद्रूपवच्छेदार्थं यत्नान्तरमास्थातव्यम्, अन्यथा तस्य प्रत्यक्षत्वेन प्रमाणान्तरत्वाभावानुपपत्तेः। तदन्तरञ्च तदिदं भवतामुपमानाख्यम्। तस्योपमानवचननिमित्तत्वेन व्यपदेश्यत्वाद्व्यपदेश्यपदेनैव व्यवच्छेद इति चेत्, न, व्यपदेशसाधकतमस्यैव व्यपदेश्यत्वोपगमात्। न चोपमानस्य व्यपदेशसाधकतमत्वम्, साधर्म्यसाधकतमत्वेनोपगमात्। अन्यथा तस्यापि 'इदं रूपम्' इत्यादिज्ञानवत् शाब्दत्वोपपत्तेर्न प्रमाणान्तरत्वं भवेत्। प्रमाणान्तरस्यापि तस्य व्यपदेशादुत्पत्तेर्व्यपदेश्यत्वमिति चेत्, न, रूपमित्यादिज्ञानस्यापि प्रमाणान्तरस्यैव तथा व्यपदेश्यत्वप्रसङ्गात्। तथा चानुपपन्नमिदं भाष्यम्— "नामधेयशब्देन च व्यपदिश्यमान शाब्दम्" [न्यायभा० १।१।४] इति। व्यपदेशस्यैव तत्र साधकतमत्वं श्लोको व्यपदिशति—रूपमित्यमित्येतद्वचनात् मया प्रतिपन्नं न तु प्रत्यक्षादिति तव्यवहारप्रतिपत्तेः, ततः शाब्दमेव तत्र प्रमाणान्तरमिति चेत्, न, इतरत्रापि तुल्यत्वात्— गवयोऽयमित्याप्तवचनान्मया प्रतिपन्नं न प्रत्यक्षादिति इत्यपि श्लोकव्यवहारोपलम्भात्। तथापि तस्याशाब्दत्वेनाव्यपदेश्यपदेन व्यवच्छेद इत्यास्थातव्यमेव यत्नान्तरम्। नास्थातव्यम्, सन्निकर्षवचनेनैव तस्य व्यवच्छेदात्। न हि तस्य सन्निकर्षोदुत्पत्तिः, गवयदर्शनादेवाप्तवचनसहायात्तस्योत्पत्तेरिति चेत्, सिद्धस्तर्हि 'इदं रूपम्' इत्यादिज्ञानस्यापि तत एव व्यवच्छेदः तस्यापि नीलादिदर्शनादेव शब्दसहायादुत्पत्तेर्न सन्निकर्षात्। अत एव विश्वरूपेणापि दर्शनमेव पुरस्कृत्य संकेतकरणमुपदर्शितम्— "यदेतत्पश्यसि तस्य गोशब्दो वाचकः।" [ ] इति।

तद्दर्शन पुरोधाय शब्दः सङ्केतितः कथम्।
तदन्यस्य सहायत्वं सन्निकर्षस्य गच्छतु ॥१२१३॥
सन्निकर्षपदेनैव तस्याप्येव व्यवच्छिदि।
इयमव्यपदेश्योक्तिरुच्यावर्त्या विरुध्यते ॥१२१४॥

नेदमव्यपदेश्यपद विशेषणार्थं प्रत्यक्षस्य अपि सूत्रपदद्वयनिषेधार्थम् अव्यपदेश्यम् अवश्यम्। किं तत्? विरन्तनैर्नैयायिकैस्तद्विशेषणत्वेनाभिहितमव्यभिचारीति व्यवसायात्मकमिति च पदद्वयम्। तत्प्रयोजनस्यान्यत एव भावादिति व्याख्यानदर्शनात्। तत्र इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमित्येव लक्षणमस्तु निर्दोषत्वादिति, सोऽपि न निर्दोषवादी, सन्निकर्षस्यैवासमग्रसोरसम्भवात्, तस्य च यथास्थानं निषेधयिष्यमाणत्वात्। भावेऽपि कथं सन्निकर्षस्य कादाचित्कत्वम्? न हि नित्यहेतुकस्यानित्यत्वम्, हेत्वनित्यत्वादेव तत्कार्यो-

१ उपमानप्रमाण्याभावानुपपत्तेः। २ "उक्तदोषपरिहारार्थमेव अभिधेयादिक आह"—ता० टि०। ३ न व्यपदेश्यमव्यपदेश्यम् न व्यपदेश्यमित्यर्थः।

नित्यत्वोपपत्तेः । निरूपितञ्चैतत् 'कारणस्य' इत्यादिना । नापीन्द्रियार्थयोः सन्निकर्षः ; प्रमाणाभावात् । व्यवधाने सत्यग्रहणं दृश्यते, तत्र यदि सन्निकर्षनिरपेक्षमेवेन्द्रियज्ञानं व्यवधानेऽपि स्यात् , न चैवम् , अतोऽस्ति सन्निकर्षस्तयोः यदभावाद्व्यवधाने सति नार्थज्ञानमैन्द्रियमित्यनुमानतस्तत्प्रतिपत्तेः कथं प्रमाणाभाव इति चेत् ? कोऽसौ सन्निकर्षो नाम यस्य ततः प्रतिपत्तिः ? प्राप्तिविशेष इति चेत् ; तस्यापि प्राप्तिमतो व्यतिरेके तेन तयोस्तदपरस्तद्विशेषो वक्तव्यः ? तदभावे तत्सहायतया प्रत्यक्षज्ञानहेतुत्वानुपपत्तेः । अपरस्तद्विशेषस्यापि ततो व्यतिरेके तत एव पुनरपरस्तद्विशेषो वक्तव्य इत्यपर्यन्तास्तद्विशेषाः प्रसज्येरन् । न च तेषां प्रमाणतः प्रतिपत्तिः । अथ पर्यन्ते कश्चिदव्यतिरिक्त एव तद्विशेषो भवति योग्यतारूपस्तदयमदोष इति ; तन्न ; प्रथमत एव तदभ्युपगमप्रसङ्गात् । प्रथमतस्तादृशस्य तद्विशेषस्य न प्रतिपत्तिरिति चेत् ; पश्चात् कुतः प्रतिपत्तिः ? प्रागुक्तान्लिङ्गादेवेति चेत् ; न ; तस्य प्रागप्यविशेषात् । भवतु तद्रूप एव प्रागपि तद्विशेष इति चेन्न ; न तर्हि नयनघटयोः संयोगः श्रवणशब्दयोर्वा समवायो व्यतिरिक्तः, तदभावे च न तत्समुदायरूपसंयुक्तसमवायादिरपीति न युक्तं षोढात्वव्यावर्णनं सन्निकर्षस्य ।

योग्यतैव यदि प्राप्तिर्गोलकादेव तादृशात् ।
रूपज्ञप्तेर्वृथा चक्षुरादीनां परिकल्पनम् ॥ १२१५ ॥

तत इन्द्रियेत्याद्यपि विरुध्यते ।

न वा विरुध्यताम् , तथापि ज्ञानमिति विशेष्यं पदं विरुध्यते; विनापि तेन ज्ञानस्यैव प्रतिपत्तेः, तदन्यस्येन्द्रियार्थसन्निकर्षादनुत्पत्तेः । सुखादिरपि तत एवोत्पद्यत इति चेत्; न; तस्यापि ज्ञानत्वात् । विषयपरिच्छित्तिरूपमेव ज्ञानम् "अर्थग्रहणं बुद्धिः" [न्यायभा० ३। २।४६] इति वचनात् । न च सुखादिस्तत्परिच्छित्तिरूपः, आह्लादादिरूपतयैव प्रतिभासनादिति चेत् ; न , अज्ञानत्वे स्वतःप्रतिभासाभावप्रसङ्गात् । प्रतिभासोऽपि तस्य परत एव घटादिवत् , 'सुखादिः प्रतिभासते' इति प्रतिभाससामानाधिकरण्यं तु प्रतिभासाभेदोपचारादेव 'घटः प्रतिभासते' इतिवत् न वस्तुतः प्रतिभासरूपत्वादिति चेत् ; किमिदानीं तस्य वस्तुसद्रूपम् ? आह्लादादित्वमिति चेत् ; न ; तस्य सामान्यरूपत्वात् । तद्रूप एव सुखादिरपीति चेत् ; यदि मुख्यतः ; न तर्हि तस्य तत्सन्निकर्षादुत्पत्तिः नित्यत्वात् । उपचारतश्चेत् ; कथं वस्तुतस्तस्य तद्रूपत्वम् ? उपचरितस्य वस्तुसत्त्वानुपपत्तेः । कुतश्चोपचारः ? सम्बन्धात् ; सम्बद्धो हि सुखादिराह्लादादित्वेन ताद्रूप्यतयोपकल्प्यत इति चेत्; न; स्वयमनिर्धारितासाधारणरूपत्वे सम्बन्धस्यैव दुरवगमत्वात् । न हि

---

१ श्लो० १०६ । "कारणस्याग्रहे तेषां कार्यस्योपरमः कथम्" –ता० टि० । २ "न च व्यवहितार्थोपलब्धिरस्ति तस्मान्न प्राप्यकारीति ।"–न्यायवा० पृ० ३५ । न्यायकुमु० पृ० २८ टि० १२ । पृ० ७७ टि० २ । ३ "इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादि प्रागुक्तं सूत्रम्"–ता० टि० । ४ सुखादेः । ५ ज्ञानात्मकत्वात् । ६ सम्बन्धो हि सुखादेरा –ता० । ७ तद्रूपतया आ०, ब०, प० ।

किञ्चिदिन्द्रियसम्भावानवधारितं केनचित्सम्पद्यमिति शक्यमध्यवसातुम् । तन्नोपचारतोऽपि तस्य तद्रूपत्वमिति कथमिन्द्रियसन्निहितादर्थाद्योगसुखसत्येवोत्पत्तिः ? भवन्ती[1] चेयं कुतोऽवगन्तव्या ? न तावत् स्वत एव, अबोधरूपत्वात् । नान्यतोऽपि सुखादिसन्निकर्षात् संयुक्तसमवायादुत्पन्नात्; तत्र सुखादेरेव ग्रहणात् । नाप्यर्थसन्निकर्षात्, संयोगादेरुपजातेन तेनाप्यर्थस्यैव चन्दनवह्नेवेः परिज्ञानात् । न चोभययोरेकज्ञानाविषयत्वे तत्कार्यकारणभावो निर्णयविषयतां नेतुं पार्यते । पार्यत एव तदुभयज्ञानजन्मना सङ्कल्पनेनेति चेत्, तस्य प्रत्यक्षत्वे तदिन्द्रियं वक्तव्यं यतस्तस्योत्पत्तिः ? मन एवेति चेत्, कस्तस्यार्थेन सन्निकर्षः ? संयुक्तसंयोगादिरिति चेत्, न, तस्य सन्निकर्षेनियमं व्यवस्थापयता विश्वरूपेण प्रतिक्षेपात् । नयनादिरूपमेवेति चेत्, न, तस्य सुखविषयत्वासम्भवात्, सुखादेर्घटादिवत् प्रतिपत्रान्तरप्रत्यक्षविषयत्वापत्तेश्च । तन्न तत्प्रत्यक्षम् । नाप्यनुमानम्, लिङ्गाभावात् । तद्भावभावित्वं लिङ्गमिति चेत्, न, तस्यापि सुखादिबहिरर्थयोरेकज्ञानाविषयत्वे दुरवगमत्वादित्युक्तत्वात् । न चैतदुपमानं शाब्दं वा सादृश्यशब्दानपेक्षणात् । न चाप्रमाणतस्तद्गतिः । तन्न तस्य तस्मादुत्पत्तिः, इत्ययुक्तं तज्जन्यच्छेदाय ज्ञानग्रहणम् । तन्नायमवयवो विचार्यमाणमिदमविरुद्धम । नापि समुदितम्, असम्भवदोषात् । न हि परपरिकल्पितमस्वसंवेदनं ज्ञानं सम्भवति, "विसुम्ब" इत्यादिनैव तस्य [निराकरणात्] ।

अव्यापकत्वाच्च, अव्यापकं हीदं लक्षणं सुखादिप्रत्यक्षेण । तदपीन्द्रियार्थसन्निकर्षोत्पन्नं प्रत्यक्षत्वात् नीलादिप्रत्यक्षवत्, ततः कथमव्याप्तिरिति चेत् ? उच्यते—तत्तो यदि सुखादिरव्यतिरिक्तः, न तस्येन्द्रियसन्निकर्षः, तद्भावे तस्याप्यभावात् । 'तद्भावेऽपि न किञ्चित्क्षतिः, तस्य प्रत्यक्षार्थत्वात्, तस्य च निष्पन्नत्वात् । व्यतिरिक्तश्चेत्, न, प्रमाणाभावात् । 'सुखादिस्तत्प्रत्यक्षात् व्यतिरिक्तः तद्विषयत्वात् कलशादिवत्' इत्यनुमानं प्रमाणमिति चेत्, न, 'अनुष्णो दहनो द्रव्यत्वात्तद्वत्' इत्यत्रापि प्रमाणत्वापत्तेः । पक्षस्योष्णत्वप्रत्यक्षेण बाधनाद्धेतोश्च कालात्ययापदिष्टत्वात् नेति चेत्, प्रकृतस्यापि न भवेत् सुखादेस्तद्व्यतिरेकस्यापि तेन प्रबाधमानत्वात् । तद्व्यतिरिक्तश्च ततः पूर्वं यद्यनुभव एवास्ते ततोऽपि पूर्वं तथैवास्त इति नित्य एवायमतः कथं चन्दनवह्नादेरुत्पत्तेः ? यदि पुनरुत्तरापि तस्यानुभवो न तर्हि तस्य तस्मादिन्द्रियसन्निहितादुत्पत्तिः सहैव तेनोत्पत्तेरिति कथं न लक्षणस्याव्याप्तिः ?

तथा चक्षुर्ज्ञानेनापि, न हि चक्षुषोऽपि घटादिसन्निकर्षः प्रमाणाभावात् । चक्षुर्घटादिकं ज्ञानं प्रकाशयति बाह्येन्द्रियत्वात् स्वगादिवत्, 'इत्यनुमानमत्र प्रमाणमिति चेत्, न;

---

१ भवति चेयं आ०, ब०, प० । २ प्रतिपत्रान्तर-आ०, ब०, प० । ३ श्लो० १९ । ४ सुखादिप्रत्यक्षात् । ५ सन्निकर्षाभावे । ६ इन्द्रियसन्निकर्षाभावे सुखादिप्रत्यक्षसद्भावेऽपि । ७ सन्निकर्षेण । ८ प्रत्यक्षत्वप्य । ९ "चक्षुर्ग्रहणं प्राप्यार्थं परिच्छिन्दत्ते बाह्येन्द्रियत्वात्स्वगिन्द्रियवत्।"—न्यायवा० ता० पृ० ७२ । न्याय कुमु० पृ० ७५ टि० २ ।

तैमिरविषयस्य केशमशकादेरप्रकाशनप्रसङ्गात् । न हि तस्य चक्षुषा प्राप्तिः, अविद्यमानत्वाद्व्योम-कुसुमादिवत् । प्राप्त एवाक्षिपक्ष्मादिस्तेन तथा प्रकाश्यत इति चेत्; न; तत्रैव तस्य तत्प्रकाश-नापत्तेः न दूरपुरोवर्तिन्याकाशे । न हि चन्द्रमसः प्राप्तादन्यत्र तद्द्वित्वप्रकाशनम् । यदि च पक्ष्मादेः प्राप्तिर्भवतु तस्य प्रकाशनं कथं केशादेः ? सोऽपि तस्यैव स्वभाव इति चेत्; कथं तत्प्रकाशस्य मिथ्यात्वम् ? अविद्यमानत्वादिति चेत्; कथमविद्यमानस्तत्स्वभावो व्याघा-तात् ? अविद्यमानस्याप्राप्तस्यापि प्रकाशनमिति चेत्; विद्यमानस्यापि स्यादविशेषात् । विद्य-मानं सर्वमपि किन्न प्रकाश्यत इति चेत् ? इतरदपि किन्न ? योग्यतानियमादिन्द्रियस्येति समानमन्यत्रापि । तन्न तस्य घटादिना सन्निकर्षः संयोगः तत एव न तद्गतेन रूपादिना संयु-क्तसमवायो न रूपत्वादिना संयुक्तसमवेतसमवायो न समवायाभावाभ्यां सम्बद्धविशेषणभाव इति सुश्लिष्टं चक्षुर्ज्ञानेनाव्यापकत्वं लक्षणस्य ।

यदपि मतं नेदं प्रत्यक्षस्य लक्षणम्, अपि तु तत्फलस्य प्रत्यक्षं प्रत्यक्षफलमिति व्याख्यानादिति; तदपि न सम्यङ्मतम् ; तत्राप्युक्तदोषाणामनपवर्तनात् । कुतश्चेदमेव न प्रत्य-क्षम् ? विषयाधिगमस्यानुपजननादिति चेत्; न; अव्यतिरिक्तस्योपजननात् । अव्यतिरिक्तं हेतुरेव फलमेव वा स्यान्नोभयमिति चेत्, न; पूर्वापरतया व्यतिरेकस्यापि भावात् । पौर्वा-पर्येणापि कथमेकस्य द्वैरूप्यमिति चेत् ? अपौर्वापर्येण कथम् ? तथापि मा भूदिति चेत्; नेदानीं सामान्यविशेषाकाराभ्यां निर्णयेतरस्वभावं संशयज्ञानम्, अव्यभिचारीतरात्मकं विपर्ययज्ञानं वेति किं तद्व्यवच्छेदाय व्यवसायात्मकमव्यभिचारीतिवचनेन ? [7]यौग-पद्येन द्वैरूप्यस्याविरोधे क्रमेण किमपराद्धं यतस्तेनापि तदविरुद्धन्न भवेत् ? क्षणिकत्वात् ज्ञानस्येति चेत् ; न; अहमेव नीलं दृष्ट्वा पीतं पश्यामीत्यनुगतरूपस्यापि तस्य सङ्कलनात् । आत्मन एवेदं सङ्कलनं न ज्ञानस्येति चेत् ; न; ज्ञानादन्यस्य तस्यै तेनानवभासनात् व्यपदेश-वत्, अन्यथा व्यपदेशस्यापि तत्र सर्वत्राभावसनमिति निष्फलमव्यपदेश्यमिति विशेषण-मसम्भवात् । अपरिज्ञातशब्दार्थसम्बन्धस्याव्यपदेश्यमेव प्रत्यक्षमिति चेत्; अगृहीतभवत्स-ङ्केतस्याव्यतिरिक्तात्मविषयमेव प्रकृतमुपसङ्कलनमिति समानमुत्पश्यामः । यदि तदेवानुगम-रूपं किन्तत्रेन्द्रियव्यापारेणेति चेत् ? न ; तेन तदात्मन एव विषयविशेषाधिगमस्य तत्रोपस्था-पनात् । तन्नेदमेकान्ततः [9]फलमेव प्रत्यक्षस्य, प्रत्यक्षत्वस्यापि भावात् । किञ्चेदानीं प्रत्यक्षम् ? यत [10]इदमुत्पद्यते तदिति चेत् ; तदपि यदीदृशम्[11]; नेदं तत्फलं परिकल्पयितव्यम्, उक्तन्यायेन प्रत्यक्षत्ववत्तस्यैव फलत्वस्याप्युपपत्तेः । भवतु अन्यादृशमप्यचेतनमिन्द्रियालोकादि, चेतनमपि

---

१ चक्षुषा । २ केशादिरूपेण । ३ पक्ष्मादेः । ४ एव तद्व-ता० । ५ सम्बन्धविशेषणभावेनेति आ०, ब०, प० । ६ "फलविशेषणपक्षमेव सम्मन्यामहे । तत्र च यद्वैयधिकरण्यं चोदितं तदत शब्दाध्याहारेण परिहरिष्यामः यत एवं यद्विशेषणविशिष्टं ज्ञानान्तरं फलं भवति तत्प्रत्यक्षमिति सूत्रार्थः ।"-न्यायमं० पृ० ६१ । न्यायवा० ता० पृ० १०८ । ७ यौगपद्ये द्वै-आ०, ब०, प० । ८ आत्मन. । ९ सङ्कलने । १० फलत्व-मेव आ०, ब०, प० । ११ ज्ञानम् । १२ ज्ञानात्मकम् ।

संशयस्मरणादिकमिति चेत्, न, तत्रोपचारतो मुख्यतश्च प्रामाण्यस्यैव प्रतिक्षिप्तत्वात्। न चाप्रमाणं प्रत्यक्षं तस्य तद्विक्षेपत्वात्। तन्न नैयायिकस्य प्रत्यक्षलक्षणमुपपन्नम्।

यत्पुनरिदं मीमांसकस्य–"सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म प्रत्यक्षम्।" [जै० सू० १।१।४] इति, तदप्येतेन प्रत्युक्तम्, सम्प्रयोगस्य सन्निकर्षार्थत्वे नैयायिकत्व दोषात्। यच्चेदं तस्यानुमानम्–प्राप्यकारि चक्षुरिन्द्रियत्वात् त्वगादिवदिति, तत्र किमिदं चक्षुर्नाम? गोलक एवेति चेत्, न, तत्राप्राप्यकारित्वस्यैव प्रतीतेः। तन्निर्गतो रश्मिप्रसर इति चेत्, तस्यापि किमिदं प्राप्यकारित्वम्? प्राप्य सन्निहितस्य विषयं तज्ज्ञानजननमिति चेत्, क्व तज्जननम्? आत्मनीति चेत्, न, तत्रापि सन्निकर्षगते तदप्रतीतेः। न हि विषय-सन्निकर्षसंनिहित आत्मनि ज्ञानमिति कस्यचिदपि प्रतिपत्तिः। तयापि तत्कल्पनायां तद्या पित्वकल्पनमपि स्यात्, अविशेषात्। नचास्मिन्पक्षे दूरग्रहणम्, ज्ञातुः सन्निहितत्वेन तद-पेक्षया तदसम्भवात्। असन्निहिताधिष्ठानाऽपेक्षया तत्सम्भव इति चेत्, किमेतदधिष्ठानम्? गोलकरूपं शरीरमिति चेत्, न, तस्यापरिज्ञानात्। यदि हि तदपि परिज्ञायेत भवेदितो दूर मगरमिति प्रतिपत्तिर्नान्यथा। न च तस्य नगरज्ञानेन परिज्ञानम्, असन्निकर्षात्। असन्नि कृष्टस्यापि ग्रहणे नगरेऽपि सन्निकर्षवैयर्थ्योपनिपातात्। न च यावन्न तेन तज्ज्ञान तावत्तद पेक्षया नगरदूरत्वस्य ततः प्रतिपत्तिः। तन्न अधिष्ठानापेक्षयापि तत्सम्भव इत्ययुक्तमुक्तम्—

"विनिश्चित इति बुद्धिः स्यादधिष्ठानमपेक्ष्य च।"

[मी० श्लो० १।१।४ श्लो० ५७।] इति।

भवतु शरीरगत एवात्मनि तज्जननम्, दूरादिप्रतिपत्तेरपि तदपेक्षयैव भावादिति चेत्, कथमिन्द्रियाममार्गेणसन्निकर्षाद् दूरवर्तिनस्तन्मूलगते तत्र तज्जननम् इन्द्रियान्तरेष्वेव-मदर्शनात्? तत्राष्टस्यापि चक्षुषि कल्पनायां परमप्राप्यकारित्वमेव कल्पयितव्यम्। तत्र रश्मिप्रसरेण बहिर्वस्तुपरिच्छेदो प्रयोजनम्, सत्येव प्राप्यकारित्वे तत्सापेक्षत्वात्।

कथञ्च सर्वस्य चक्षुषम्? कथञ्च न स्यात्? गोलकस्यैव तस्यात्। तदपि चक्षु-रुपकारायैव तत्रैव चिकित्साविधानात्। न हि तदुपकारायान्यत्र तद्विधानमुपपन्नम्, अति-प्रसङ्गात्। अनैकान्तिको हेतुः–तदर्थस्य पादयोरपि तद्विधानस्योपलम्भादिति चेत्, न, पादमार्गेण तत्रतस्यैव सान्निध्यात्। अत्रापि गोलकमार्गेण रश्मिप्रसरगतस्यैव तस्य तदर्थमिति चेत्, न, अञ्जनादिरूपस्य तद्विधानस्य बहिःप्रसरतोऽनुपलम्भात्। अन्तः-प्रसरणो घृतादिरूपस्यापि तद्विधानस्यानुपलम्भ एवेति चेत्, सत्यम्, स तु शरीरबहिर्मार्गेण व्यवधानात्। न चैवमत्र केनचिद् व्यवधानम्, अत उपलब्धिलक्षणप्राप्तस्याभावादेवानुपलम्भो

---

१ "सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणे। प्रयोग इन्द्रियाणान्तु व्यापारोऽर्थेषु कथ्यते॥"–मी०श्लो० १।१।४ श्लो० २८। २ "तथैव प्राप्यकारित्वमिन्द्रियत्वात् त्वगादिवत्।"–मी०श्लो० १।१।४ श्लो०। ४२। ३ गतिविज्ञानमि आ०, ब०, प०। ४ आत्मनी व्यवस्थे। ५ गोलकस्य। ६ नगरज्ञानेन। ७ –भावस आ०, ब०, प०। ८ रश्मिरूपस्य। ९ चक्षुस्त्वम् आ०, ब०, प०। १० गोलकमपि।

घटादिवत्। ततो गोलकमेव चक्षुः, तच्च शरीर एव वृत्तिमत् न बहिरिति प्रतिषिद्धमेतत्—

"केचित्तस्य शरीराच्च बहिर्वृत्तिं प्रचक्षते।
चिकित्सादिप्रयोगश्च योऽधिष्ठाने प्रयुज्यते॥
सोऽपि तस्यैव संस्कार आधेयस्योपकारकः।
तद्देशश्चापि संस्कारः सर्वव्याप्त्यर्थ इष्यते॥
चक्षुराद्युपकारश्च पादादावपि दृश्यते।
तस्मान्नैकान्ततः शक्यं संस्काराच्चत्र वर्त्तनम्॥"।

[मी० श्लो० १।१।४। श्लो०४४-४६] इति।

यत्पुनः पक्षान्तरम्—इन्द्रियाणामर्थे व्यापारः तत्प्रगुणतयाऽवस्थानं वा कार्यावसेया शक्तिर्वा सम्प्रयोग इति, तदपि न सारम्; सत्यार्थस्य स्वप्नज्ञानस्य तदभावेऽपि भावेन लक्षणस्याव्याप्तिदोषात्। न हि तत्र सम्प्रयोगः, पिण्डीपिहितलोचनस्यापि तदभावात्। अस्त्येव शक्तिलक्षण इति चेत्; न; तस्यापि विरकारित एव अक्षणिक स (अँक्षणि स) म्भवात्[3] न पिहिते अतिप्रसङ्गात्। प्रत्यक्षमेव तत्र भवतीति चेत्; किमिदानीं भवेन्नाम प्रमाणं सत्यार्थत्वात्? नानुमानाद्यन्यतमम्, तल्लक्षणाऽनन्वयात्। सप्तमन्तु प्रमाणमनिष्टमापद्यते। ततः प्रत्यक्षमेव तदभ्युपगन्तव्यं निर्बाधस्पष्टनिर्भासत्वात् जाग्रत्प्रत्यक्षवत्, लोकप्रसिद्धत्वाच्च। तत्र तद्विद्यमानोपलम्भनमेव अविद्यमानोपलम्भनस्यापि तस्य बहुलमुपलम्भात्। तत्कथं तस्य धर्मं प्रत्यनिमित्तत्वम्, यतस्तत्र चोदनैव प्रमाणमवसीयते? नन्वेवं लोक एवाविद्यमानोपलम्भनस्यासत्सम्प्रयोगजस्य च तत्प्रत्यक्षस्य सम्भवे योगिप्रत्यक्षमपि तादृशमर्थांसि (मर्थात् सि) ध्यतीत्यवद्धमेतत—

"न लोकव्यतिरिक्तं हि प्रत्यक्षं योगिनामपि।
प्रत्यक्षत्वेन तस्यापि विद्यमानोपलम्भनम्॥
सत्सम्प्रयोगजत्वञ्चाऽप्यर्वाक्प्रत्यक्षवद् भवेत्॥"

[मी० श्लो० १।१। ४, श्लो० २८-२९]

इति चेत्; सत्यम्; अस्त्ययमपि परस्य दोषः। तन्नैवमपि प्रत्यक्षं शक्यलक्षणम्।

पुनरपि नैयायिकस्य विरुद्धं दर्शयति—

नित्यः सर्वगतो ज्ञः सन् कस्यचित्समवायतः॥१७०॥
ज्ञाता द्रव्यादिकार्थस्य [नेश्वरज्ञानसंग्रहः।] इति।

---

१ "यदि वार्जवस्थानं सम्प्रयोगोऽत्र वर्ण्यते। योग्यतालक्षणो वान्यः संयोगः कार्यलक्षितः॥" —मी० श्लो० १।१।४, श्लो० ४२। २ नेत्रे। ३ —म्भावात् न बहिरिति प्र०—आ० ब०, प०। ४ प्रत्यक्षम्। ५ धर्मे। ६ —लम्भस्यास —आ०, ब०, प०। ७ —मर्थो सि आ०, ब०, प०।—मर्थो सि —ता०। वारुमठीयताडपत्रे —मर्था सि। ८ —त्यपवद्—बा०, ता०। ९ —कस्यार्थेति आ०, ब०, प०।

नित्योऽनावेयादिस्वभाव आत्मा सन् वियमानो विरुध्यत इति सम्बन्धः। तस्याकिञ्चित्करत्वेन व्योमकुसुमादिवि[1]त्रेयादिति प्रतिपादनात्। अत एव सर्वगतः सर्वमूर्तैः सम्बद्ध इति। ज्ञो ज्ञातेति च विरुध्यते असतस्तदुभयाऽसम्भवात्। कुतश्च तस्य ज्ञत्वम्? स्वत एवेति चेत् न ज्ञानकल्पनावैफल्यात्। ज्ञानसम्बन्धादिति चेत्, न, तत्सम्बन्धादपि ज्ञानवानित्येव स्यात् न ज्ञ इति। ज्ञशब्दादपि तद्वत्त्वं प्रतीयत इति चेत्, न, तादूप्यस्य प्रतीतेः। अन्यथा न किञ्चिदसतः प्रतीयेत। तादूप्यमपि तत्सम्बन्धादेव प्रतीयत इति चेत्, कुतो न देवदत्ते दाण्डरूप्यप्रतिपत्तिः? समवायस्यैव तत्प्रतिपत्तिहेतुत्वात् न संयोगस्येति चेत्, मिथ्यैव तर्हि तत्प्रतिपत्तिः, असतरूपे तादूप्यग्रहणात्। तथा च कथं ततः आत्मतत्त्वप्रतिपत्तिः? आत्मन्यमिथ्यात्वादिति चेत् किं पुनरेकमेव ज्ञानं मिथ्या चामिथ्या च? तथा चेत्, न, क्रमेणाप्यपरापररूपभावस्य तथाऽऽप्तेः। एवञ्च तत्रैवान्वितरूपे ज्ञातृप्रयोजनपरिनिष्ठानात् व्यर्थमात्मा[2]न्तरपरिकल्पनम् विभिन्नज्ञानकल्पनं च स्वत एव ज्ञत्वात्। विभिन्नज्ञानसमवायाच्च ज्ञत्वे गगनादावपि प्रसङ्गः, तत्रापि तद्विशेषात्। तन्न समवायेन किञ्चित्। नापि ततो ज्ञत्वमात्मनस्तदाह-कस्यचित् अर्थान्तरज्ञानस्य समवायतः इति विरुध्यते, स्वत एवात्मनो ज्ञत्वेन तदैयर्थ्यात्। ततश्च 'द्रव्यादिकस्यार्थस्य ज्ञाता' इत्यपि विरुध्यमानेऽतिप्रसङ्गात्। ततो न बाह्यं विज्ञानं प्रत्यक्षं तत्फलं चोपपन्नमिति भावः।

अव्यापकञ्च प्रत्यक्षलक्षणं परस्य, तेनेश्वरज्ञानस्याप्रत्यक्षत्वादित्याह-'नेश्वरज्ञानसंग्रहः।' इति। न हि तस्य[3] नित्यस्य इन्द्रियार्थसन्निकर्षजत्वं विरोधात्। अथ तत्र प्रत्यक्षमपि, किमिदानीं प्रमाणान्तरमिति चेत्, न, तस्यापि नित्यस्यासाधकतमत्वात्। नापि तत्[4] फलम्, अनुत्पत्तिमत्त्वात्। स्वविषयाव्यभिचारस्तु केवल प्रमाणमेवेति चेत्, न, तस्य प्रत्यक्षादि-प्रमाणसामान्ये प्रमाणचतुष्टयनियमव्यापत्तेः। अस्मदादौ च प्रत्यक्ष एव नानुमानादौ, अस्मदादिविशेषापत्तेः।

भवतु तदप्यनित्यमेवेति[5] केचित्, तन्न, तस्यापि स्वविषयस्य तत्सन्निकर्षजत्वाभावात्। अस्वविषयत्वे सर्वविषयत्वायोगात्। अन्यस्य[6] तद्विषयत्वेऽनवस्थापत्तिः, अन्यस्यापि तदन्यविषयत्वात्। अथ एकेन तद्व्यतिरिक्तस्य सर्वस्य अन्येन च तस्य ग्रहणादयमदोषो ज्ञानद्वयभावादीश्वरस्येति चेत्, न, एवमपि स्वसंवेदनस्यावश्यम्भावात्। न हि तदेकं ज्ञानं स्वरूपमप्रतियत् तद्व्यतिरिक्तसर्वान्तरगतस्वविषयज्ञान प्रतिपत्तुमर्हति, विषयज्ञानस्य स्वविषयतया प्रतिपत्तेः स्वप्रतिपत्तिनान्तरीयकत्वात्। तन्न ज्ञानद्वयकल्पनमर्थवत्। प्रतिक्षिप्तश्चायं पक्षः प्रागिति नेह प्रतन्यते। ततो नानित्यस्यापि तज्ज्ञानस्य तेन संग्रह इति लक्षणान्तरमेव तत्र

---

१ तादूप्यव्यतिर्भात। २ "ज्ञानान्तरेऽपि न नात्मनिष्ठो मिथ्यामिथ्य कथञ्चन। ज्ञानं पूर्वापरीभूतं चीऽयमात्मेति वर्णितः॥"-ता० टि०। ३ ईश्वरज्ञानस्य। ४ ईश्वरज्ञानम्। ५-मानान्तरमिदे-जा०, ब०, प०, या०, ता०। ६-मेति चेत् जा०, ब०, प०। ७ स्वसंवेदनेश्वरस्य। ८ ज्ञानत्वस्वविषयस्य।

वक्तव्यमिति मन्यते। भवतापि कस्मादतीन्द्रियप्रत्यक्षस्य लक्षणान्तरं नोच्यत इति चेत्? अत्राह—

लक्षणं सममेतावान् विशेषोऽशेषगोचरम्।
अक्रमं करणातीतमकलङ्कं महीयसाम् ॥१७१॥ इति।

लक्षणं 'स्पष्टं प्रत्यक्षम्' इत्येतत् **समं** सदृशं त्रिष्वपि प्रत्यक्षेषु। कस्तर्हीन्द्रियादिप्रत्यक्षादतीन्द्रियप्रत्यक्षस्य विशेष इति चेत्? **एतावान् विशेषोऽशेषगोचरम्।** निःशेषद्रव्यपर्यायपरिच्छेदरूपम् अतीन्द्रियप्रत्यक्षम्। क्रमेण तद्गोचरमितरदपि प्रत्यक्षमिति चेत्; आह— **'अक्रमम्'** इति। इन्द्रियायत्तत्वे कथमितरत्तदप्यक्रमं तद्गोचरमिति चेत्? आह— **करणातीतम्।** करणानीन्द्रियाण्यतीतमतिक्रान्तं निरपेक्षत्वात्। तस्यैव समर्थनम् **'अकलङ्कम्'** इति। अविद्यमानज्ञानावरणादिकलमषमित्यर्थः। तथा हि—यज्ज्ञानं स्वविषये निरावरणं तदक्रममकरणञ्च तं प्रत्येति यथा सत्यस्वप्नज्ञानम्, तथा चातीन्द्रियप्रत्यक्षम्। निरावरणत्वं तस्योत्तरत्र समर्थनात्। अनावरणमपि नियतगोचरमेव तत् तस्स्वभाव्यादस्मदादिज्ञानवदिति चेत्; न; अस्मदादिज्ञानस्याप्यावरणवशादेव असर्वार्थत्वं न स्वाभाव्यादिति निरूपणात्। तत्केषां प्रत्यक्षम्? इत्याह—**महीयसाम्।** अर्हतामिति। भवतु तर्हि तत्सुगतस्यैव तत्रैव तल्लिङ्गस्य तत्त्वोपदेशस्य भावादिति चेत्; सत्यमिदं यदि तत्त्वोपदेश एव तत्र भवेत्। न चैवम्। अत एवाह—

ज्ञात्वा विज्ञप्तिमात्रं परमपि च बहिर्भासि भावप्रवादं
चक्रे लोकानुरोधात्पुनरपि सकलं नेति तत्त्वं प्रपेदे।
न ज्ञाता तस्य तस्मिन्न च फलमपरं ज्ञायते नापि किञ्चि-
दित्यश्लीलं प्रमत्तः प्रलपति जडधीराकुलं व्याकुलात्मः॥१७२॥ इति।

ज्ञात्वेत्यनन्तरम् अपि चेत्येतद् द्रष्टव्यम्। तदयमर्थो **ज्ञात्वापि च** प्रतिपद्यापि च। किम्? **विज्ञप्तिरेव** न बहिरर्थ इति। यदि वा, सैव सकलविकल्पमलविकला न भेदो नाम कश्चिदिति **तन्मात्रम्।** कीदृशम्? **परं** प्रकृष्टं तस्यैव निःश्रेयसत्वेनोपगमात्। किं चकार? **बहिर्भासिभावो** बहिरर्थः तस्य **प्रवादं** तदस्तित्वोपदेशं **चक्रे** चकार। कुतः? **लोकानुरोधात्** विनेयाभिरुचेः। ननु यदि बहिर्भावं न प्रतिपद्यते कथं तत्प्रवादकरणं सुषुप्तवत्? कथं वा विनेयानुरोधः? तस्यापि विज्ञप्तिबहिर्भूतत्वेन तेनाप्रतिपत्तेरिति चेत्; न; एवमपि परस्यैव दोषात्। यदि विज्ञप्तिमात्रमेव ज्ञातं तदेवोपदेष्टव्यं सत्यत्वात् नापरं विपर्ययात्। संवृत्या तदपि तत्त्वमेवेति चेत्; न; विकल्पस्यैव संवृतित्वात्। तस्य चैकान्तवादे निषिद्धत्वात्। तन्न संवृतिसत्योपाश्रयः तत्त्वोपदेशः सुगतस्योपपन्न इति चेत्;

---

१ —सां महतामि—आ०,ब०,प०। २ विज्ञप्तिबहिर्भूतमपि। ३ —वादिनि आ०, ब०,प०।

सत्यम् । अत एवास्य ग्राम्यभाषित्वमाह-इति उक्तन्यायात् प्रलपति बहुजल्पति । कः ? व्याकुलात्मः इति कर्तव्यमूढविकलः आत्मा सभागत., वहिनेंगैरात्मत्वेनोपगमात् । क्वं प्रलपति इति ? अश्लीलं ग्राम्यम् । कुतस्तस्य व्याकुलत्वम् ? जडधीर्यतः । तत्त्वमपि कुतः ? प्रमत्तो दुर्वासनामदिरापरवशो यत इति ।

८ तर्हि विप्रतिपत्तिमात्रमेव तेन तत्त्वमुपदिष्टमस्तु "अद्वय यानमुत्तमम्" इति वचनादिति चेत् , न , तस्यापि चित्रैकरूपत्वे अनेकान्तवादप्रसङ्गात् । परस्परव्यावृत्तानेकनीलादिरूपत्वे च सन्तानभेदानिराकरणात् । न तेनाप्यसौ विप्रतिपत्तिमपि तु पुनरपि उक्तदोषादूर्ध्वमपि सकलं चेतनमन्यच्च सत्त्वं नेति प्रपेदे प्रपन्नवान् । तदेव तर्हि तत्त्वं तेनोपदिश्यतामिति चेत् , न , तत्राप्यश्लीलमित्यादेर्दोषात् । कुत एतत् ? न ज्ञाता तस्य

१० सर्वाभावस्य यत इति । न हि सर्वाभावे तज्ज्ञानमपि विरोधात् । तत एव न तत्कस्यापि परिज्ञानम् , इत्याह-तस्मिन् सर्वाभावे न च नैव फलं तत्साध्यम् अपरम् अर्थान्तरम् अन्यस्य तत्फलत्वानुपपत्तेः, ज्ञायते ज्ञानस्यैव तद्भावे अनुपपत्तेः । तन्न तद्भावतत्त्वमपि शक्योपदेशं न च फलमपि तस्य सम्भवतीत्याह-नापि किञ्चित् । फलमिति सम्बन्धः । दुःखोपशमनादेस्तद्धेतुत्वे सत्य एवाभावादिति देवस्याभिप्रायः ।

१५ प्रज्ञाद्याम्मतिसागराम्मुनिपतेः श्रीहेमसेनादपि
व्यक्तं सम्मनसो वरीयहृदय विद्वद्वयापालवः ।
तस्य न्यायविनिश्चयस्य विवृतः प्रस्ताव आद्यो मया
प्रत्यक्षप्रतिपत्तये वितरतु श्रेयांसि भूयांसि नः ॥

इत्याचार्यस्याद्यविद्यापतिविरचिते न्यायविनिश्चयकारिकाविवरणे प्रत्यक्षप्रस्तावः प्रथमः ।

---

१ -मुत्तरम् आ०, ब०, प० । "उक्तं चोक्तम्-अद्वयं ज्ञानमुत्तमम्"-प० वार्तिकालं० १,७ । २ विप्रतिपत्तिमात्रेऽपि । ३ सर्वाभावकारे ।

भट्टाकलङ्कदेवविरचितः

न्यायविनिश्चयः

प्रसिद्धाशेषतत्त्वार्थप्रतिबुद्धैकमूर्तये ।
नमः श्रीवर्धमानाय भव्याम्बुरुहभानवे ॥ १ ॥
बालानां हितकामिनामतिमहापापैः पुरोपार्जितैः
माहात्म्यात्तमसः स्वयं कलिबलात्प्रायो गुणद्वेषिभिः ।
न्यायोऽयं मलिनीकृतः कथमपि प्रक्षाल्य नेनीयते
सम्यग्ज्ञानजलैर्वचोभिरमलं तत्रानुकम्पापरैः ॥ २ ॥
प्रत्यक्षलक्षणं प्राहुः स्पष्टं साकारमञ्जसा ।
द्रव्यपर्यायसामान्यविशेषार्थात्मवेदनम् ॥ ३ ॥
सदसज्ज्ञानसंवादविसंवादविवेकतः ।
सविकल्पाविनाभावी समक्षेतरसम्प्लवः ॥ ४ ॥
एकत्र निर्णयेऽनन्तकार्यकारणतेक्षणे ।
अतद्धेतुफलापोहे कुतस्तत्र विपर्ययः ॥ ५ ॥
अभिलापतदंशानामभिलापविवेकतः ।
अप्रमाणप्रमेयत्वमवश्यमनुषज्यते ॥ ६ ॥
पदार्थज्ञानभागानां पदसामान्यनामतः ।
तथैव व्यवसायः स्याच्चक्षुरादिधियामपि ॥ ७ ॥
आत्मनाऽनेकरूपेण बहिरर्थस्य तादृशः ।
विचित्रं ग्रहणं व्यक्तं विशेषणविशेष्यभाक् ॥ ८ ॥
अर्थज्ञानेऽसतोऽयुक्तः प्रतिभासोऽभिलापवत् ।
परमार्थैकनानात्वपरिणामाविघातिनः ॥ ९ ॥
प्रतिज्ञातोऽन्यथाभावः प्रमाणैः प्रतिषिध्यते ।
परोक्षज्ञानविषयपरिच्छेदः परोक्षवत् ॥ १० ॥
अन्यथानुपपन्नत्वमसिद्धस्य न सिद्ध्यति ।
मिथ्याविकल्पकस्यैतद् व्यक्तमात्मविडम्बनम् ॥ ११ ॥
अध्यक्षमात्मनि ज्ञानमपरत्रानुमानिकम् ।
नान्यथा विषयालोकव्यवहारविलोपतः ॥ १२ ॥
आन्तरा भोगजन्मानो नार्थः प्रत्यक्षलक्षणः ।
न धियो नान्यथेत्येते विकल्पा विनिपातिताः ॥ १३ ॥
सुखदुःखादिसंवित्तेरवित्तेर्न हर्षादयः ।
आनुमानिकभोगस्याप्यन्यभोगाविशेषतः ॥ १४ ॥
तावत्परत्र शक्तोऽयमनुमातुं कथं धियम् ।
यावदात्मनि तच्चेष्टासम्बन्धं न प्रपद्यते ॥ १५ ॥
विषयेन्द्रियविज्ञानमनस्कारादिलक्षणः ।
अहेतुरात्मसंवित्तेरसिद्धेर्व्यभिचारतः ॥ १६ ॥
असिद्धसिद्धेरप्यर्थः सिद्धश्चेदखिलं जगत् ।
सिद्धं तत्किमतो ज्ञेयं सैव किन्नानुपाधिका ॥ १७ ॥

एतेन येऽपि मन्येरन्नप्रत्यक्षं धियोऽपरम् ।
संवेदनं न तेभ्योऽपि प्रायशो दत्तमुत्तरम् ॥ १८ ॥
विमुखज्ञानसंवेदो विरुद्धो व्यक्तिरन्यतः ।
असञ्चारोऽनवस्थानमविशेष्यविशेषणम् ॥ १९ ॥
निराकारेतरस्यैतत्प्रतिभासभिदा यदि ।
तत्राप्यनर्थसंवित्तावर्थज्ञानाविशेषतः ॥ २० ॥
ज्ञानज्ञानमपि ज्ञानमपेक्षितपरं तथा ।
ज्ञानज्ञानलताशेषनभस्तलविसर्पिणी ॥ २१ ॥
प्रसज्येतान्यथा तद्धत्प्रथमं किन्न मृग्यते ।
गत्वा सुदूरमप्येवमसिद्धावन्त्यचेतसः ॥ २२ ॥
असिद्धेरितरेषां च तदर्थस्याप्यसिद्धितः ।
असिद्धो व्यवहारोऽयमतः किं कथयाऽनया ॥ २३ ॥
[एते (२०–२३) अन्तरश्लोकाः]
प्रत्यक्षोऽर्थपरिच्छेदो यद्यकिञ्चित्करेण किम् ।
अथ नायं परिच्छेदो यद्यकिञ्चित्करेण किम् ॥ २४ ॥
प्रत्यक्षं करणस्यार्थप्रतिबिम्बमसंविदः ।
अप्रत्यक्षं स्वसंवेद्यमयुक्तमविकारिणः ॥ २५ ॥
एतेन वित्तिसत्तायाः साम्यात्सर्वैकवेदनम् ।
प्रलपन्तः प्रतिक्षिप्ताः प्रतिबिम्बोदये समम् ॥ २६ ॥
सारूप्येऽपि समन्वेति प्रायः सामान्यदूषणम् ।
अतदर्थपरावृत्तमतद्रूपं तदर्थदृक् ॥ २७ ॥
अथेदमसरूपं किमतदर्थनिवृत्तितः ।
तदर्थवेदनं न स्यादसमानामपोहवत् ॥ २८ ॥
अत्राक्षेपसमाधीनामभेदे नूनमाकुलम् ।
स्वचित्तमात्रगर्त्तावतारसोपानपोषणम् ॥ २९ ॥
सामान्यमन्यथासिद्धं न हि ज्ञानार्थयोस्तथा ।
अदृष्टेरर्थरूपस्य प्रमाणान्तरतो गतेः ॥ ३० ॥
अतीतस्यानभिव्यक्तौ कथमात्मसमर्पणम् ।
असतोऽज्ञानहेतुत्वे व्यक्तिरव्यभिचारिणी ॥ ३१ ॥
प्रकाशनियमो हेतोर्बुद्धेर्न प्रतिबिम्बतः ।
अन्तरेणापि तद्रूप्यं ग्राह्यग्राहकयोः सतोः ॥ ३२ ॥
अनर्थाकारशङ्केषु त्रुट्यत्येष नयो यदि ।
सर्वं समानमर्थात्मासम्भाव्याकारडम्बरम् ॥ ३३ ॥
तद्भ्रान्तेराधिपत्येन सान्तरप्रतिभासवत् ॥३३½॥
यथैवात्मायमाकारमभूतमवलम्बते ।
तथैवात्मानमात्मा चेदभूतमवलम्बते ॥ ३४½ ॥
न स्वसंवेदनात् तुल्यं भ्रान्तेरन्यत्र चेन्मतम् ॥ ३५ ॥
सत्यं तमाहुराचार्या विद्यया विभ्रमैश्च यः ।
यथार्थमयथार्थं वा प्रभुरेषोऽवलोकते ॥ ३६ ॥
विषयज्ञानतज्ज्ञानविशेषोऽनेन वेदितः ।
अर्थज्ञानस्मृतावर्थस्मृतौ नातिप्रसज्यते ॥ ३७ ॥

सरूपमसरूपं वा यत्परिच्छेदशक्तिमत् ।
तद्व्यनक्ति ततो नान्यत् व्यक्तिश्चेदसतः कथम् ॥ ३८ ॥
आरादपि यथा चक्षुरचिन्त्या भावशक्तयः ।
विषमोऽयमुपन्यासस्तयोश्चेत्सदसत्त्वतः ॥ ३९ ॥
यदा यत्र यथा वस्तु तदा तत्र तथा नयेत् ।
अतत्कालादिरप्यात्मा न चेन्न व्यवतिष्ठते ॥ ४० ॥
व्यवहारविलोपो वा मोहाच्चेदयथार्थता ।
अत्यन्तमसदात्मानं सन्तं पश्यन् स किं पुनः॥४१॥
प्रस्फुटं विपरीतं वा न्यूनाधिकतयापि वा ।
प्रदेशादिव्यपायेऽपि प्रतियन् प्रतिरुध्यते ॥ ४२ ॥
एतेन प्रत्यभिज्ञानाद्यतीतानुमितिर्गता ।
प्रायशोऽन्यव्यवच्छेदं प्रत्यग्रानवबोधतः ॥ ४३ ॥
अविज्ञाततथाभावस्याभ्युपायविरोधतः ॥ ४३½ ॥
[एते 'यथैवात्मा' (३४) इत्यादि 'अविज्ञात' (४३½) इति पर्यन्तम् अन्तरश्लोकाः]
अभिन्नदेशकालानामन्येषामप्यगोचराः ।
विप्लुताक्षमनस्कारविषयाः किं बहिः स्थिताः ॥ ४४½ ॥
अन्तःशरीरवृत्तेश्चेद्दोषोऽयं न तादृशः ।
तत्रैव ग्रहणार्तिं वा रचितोऽयं शिलाप्लवः ॥ ४५½ ॥
विप्लुताक्षा यथा बुद्धिर्वितथप्रतिभासिनी ।
तथा सर्वत्र किन्नेति जडाः सम्प्रतिपेदिरे ॥ ४६½ ॥
प्रमाणमात्मसात्कुर्वन् प्रतीतिमतिलङ्घयेत् ।
वितथज्ञानसन्तानविशेषेषु न केवलम् ॥ ४७½ ॥
अद्वयं द्वयनिर्भासं सदा चेद्वभासते ।
न स्वतो नापि परतो भेदपर्यनुयोगतः ॥ ४८½ ॥
प्रतिसंहारवेलायां न संवेदनमन्यथा ॥ ४९ ॥
इन्द्रजालादिषु भ्रान्तमीरयन्ति न चापरम् ।
अपि चाण्डालगोपालबाललोलविलोचनाः ॥ ५० ॥
तत्र शौद्धोदनेरेव कथं प्रज्ञापराधिनी ।
बभूवेति वयं तावत् बहुविस्मयमास्महे ॥ ५१ ॥
तत्राद्यापि जनाः सक्ताः तमसो नापरं परम् ।
विभ्रमे विभ्रमे तेषां विभ्रमोऽपि न सिद्ध्यति ॥ ५२ ॥
कथमेवार्थ आकाङ्क्षानिवृत्तेरपि कस्यचित् ।
व्यवहारो भवेज्जातिमूकलोहितपीतवत् ॥ ५३ ॥
अनर्थानेकसन्तानानस्थिरानविसंविदः ।
अन्यानपि स्वयं प्राहुः प्रतीतेरपलापकाः ॥ ५४ ॥
स्वतस्तत्त्वं कुतस्तत्र वितथप्रतिभासतः ।
मिथस्तत्त्वं कुतस्तत्र वितथप्रतिभासतः ॥ ५५ ॥
यतस्तत्त्वं पृथक् तत्र मतः कश्चिद् बुधः परः ।
ततस्तत्त्वं गतं केन कुतस्तत्त्वमतत्त्वतः ॥ ५६ ॥
यथा सत्त्वं सतत्त्वं वा प्रमासत्त्वसतत्त्वतः ।
तथाऽसत्त्वमतत्त्वं वा प्रमासत्त्वसतत्त्वतः ॥ ५७ ॥

तदसत्त्वमतत्त्वं वा परसत्त्वसतत्त्वयोः ।
न हि सत्त्वं सतत्त्वं वा तदसत्त्वासतत्त्वयोः ॥ ५८ ॥
परितुष्यति नामैकः प्रभयोः परिधावतोः ।
मणिभ्रान्तेरपि भ्रान्तौ मणिरत्र दुरन्वयः ॥ ५९ ॥
सति भ्रान्तेरदोषश्चेत् तत्कुतो यदि वस्तु न ।
कामं सति तदाकारे तद् भ्रान्तं साधु गम्यते ॥ ६० ॥
अयमेवं न वेत्येवमविचारितगोचराः ।
जायेरन् संविदात्मानः सर्वेषामविशेषतः ॥ ६१ ॥
तावता यदि किञ्चित्स्यात् सर्वेऽमी तत्त्वदर्शिनः ॥ ६१½ ॥
पर्वतादिविभागेषु स्वांशमात्राविलम्बिभिः ।
विकल्पैरुत्तरैर्वेत्ति तत्त्वमित्यतियुक्तिमत् ॥ ६२½ ॥
सन्तानान्तरसद्भूतेश्चान्यथानुपपत्तितः ।
विकल्पोऽर्थक्रियाकारविषयत्वेन तत्परैः ॥ ६३½ ॥
ज्ञायते न पुनश्चित्तमात्रेऽप्येष नयः समः ।
अन्योन्यसंश्रयान्नो चेत् तत्किमज्ञानमेव तत् ॥ ६४½ ॥
अद्वयं परचित्ताधिपतिप्रत्ययमेव वा ।
वीक्षते किं तमेवायं विषमज्ञ इवान्यथा ॥ ६५½ ॥
समारोपव्यवच्छेदः साध्यश्चेत्सविकल्पकैः ।
नैवापि कल्पना साम्याद्दोषाणामनिवृत्तितः ॥ ६६½ ॥
न हि जातु विषज्ञानं मरणं प्रति धावति ।
असंश्चेद्बहिरर्थात्मा प्रसिद्धोऽप्रतिषेधकः ॥६७½॥
सन्देहलक्षणाभावान्मोहश्चेद्व्यवसायकृत् ।
बाधकासिद्धेः स्पष्टाभात्कथमेष विनिश्चयः ॥ ६८½ ॥
विपर्यासोऽपि किन्नेष्टः आत्मनि भ्रान्त्यसिद्धितः ॥ ६९ ॥
अद्वयं द्वयनिर्भासमात्मन्यप्यवभासते ।
इतरत्र विरोधः क एक एव स्वहेतुतः ॥ ७० ॥
तथा चेत्स्वपरात्मानौ सदसन्तौ समश्नुते ॥७०½॥
तत्प्रत्यक्षपरोक्षाक्षक्षममात्मसमात्मनोः ।
तथा हेतुसमुद्भूतमेकं किन्नोपगम्यते ॥७१½॥
सर्वैकत्वप्रसङ्गादिदोषोऽप्येष समो न किम् ।
भेदाभेदव्यवस्थैवं प्रतीता लोकचक्षुषः ॥ ७२½ ॥
विज्ञप्तिर्वितथाकारा यदि वस्तु न किञ्चन ।
भासते केवलं नो चेत्सिद्धान्तविषमग्रहः ॥ ७३½ ॥
अनादिनिधनं तत्त्वमलमेकमलं परैः ।
सम्प्रीतिपरितापादिभेदात्तत्किं द्वयात्मकम् ॥ ७४½ ॥
ग्राह्यग्राहकवद्भ्रान्तिस्तत्र किन्नानुपज्यते ॥ ७५ ॥
भेदो वा सम्मतः केन हेतुसाम्येऽपि भेदतः ।
तेषामेव सुखादीनां नियमश्च निरन्वयः ॥ ७६ ॥
प्रत्यक्षलक्षणं ज्ञानं मूर्च्छितादौ कथं ततः ।
अज्ञानरूपहेतुस्तदहेतुत्वप्रसङ्गतः ॥ ७७ ॥
प्रवाह एकः किन्नेष्टस्तद्भावाविभावनात् ॥ ७७½ ॥

अविप्रकृष्टदेशादिरनपेक्षितसाधनः ।
दीपयेत् किन्न सन्तानः सन्तानान्तरमञ्जसा ॥ ७८½ ॥
अन्यवेद्यविरोधात् किमचिन्त्या योगिनां गतिः ।
आयातमन्यथाऽद्वैतमपि चेत्थमयुक्तिमत् ॥ ७९½ ॥
व्याहारादिविनिर्भासो विप्लुताक्षेऽपि भावतः ।
अनाधिपत्यशून्यं तत्पारम्पर्येण चेदसत् ॥ ८०½ ॥
अर्थेष्वपि प्रसङ्गश्चेत्यहेतुमपरे विदुः ॥ ८१ ॥
सहोपलम्भनियमान्नाभेदो नीलतद्धियोः ।
विरुद्धासिद्धसन्दिग्धव्यतिरेकान्वयत्वतः ॥ ८२ ॥
साध्यसाधनसङ्कल्पस्तत्त्वतो न निरूपितः ।
परमार्थावताराय कुतश्चित्परिकल्पितः ॥ ८३ ॥
अनपायीति विद्वत्तामात्मन्याशंसमानकः ।
केनापि विप्रलब्धोऽयं हा ! कष्टमकृपालुना ॥ ८४ ॥
तत्र दिग्भागभेदेन षडंशाः परमाणवः ।
नो चेत्पिण्डोऽणुमात्रः स्यान्न च ते बुद्धिगोचराः ॥ ८५ ॥
न चैकमेकरागादौ सप्तरागादिदोषतः ।
स्वतः सिद्धेरयोगाच्च तद्वृत्तेः सर्वथेति चेत् ॥ ८६ ॥
एतत्समानमन्यत्र भेदाः संविदसंविदोः ।
न विकल्पानपा कुर्युर्नैरन्तर्यानुबन्धिनः ॥ ८७ ॥
आहुरर्थबलायातमनर्थमविकल्पकाः ॥ ८७½ ॥
चित्रं तदेकमिति चेदिदं चित्रतरं ततः ।
चित्रं शून्यमिदं सर्वं वेत्सि चित्रतमं ततः ॥ ८८½ ॥
तस्मान्नैकान्ततो भ्रान्तिर्नासत्संवृतिरेव वा ।
अतश्चार्थबलायातमनेकात्मप्रशंसनम् ॥ ८९½ ॥
न ज्ञायते न जानाति न च किञ्चन भाषते ।
बुद्धः शुद्धः प्रवक्तेति तत्किलैशं सुभाषितम् ॥ ९०½ ॥
न जातं न भवत्येव न च किञ्चित्करोति सत् ।
तीक्ष्णं शौद्धोदनेः शृङ्गमिति किन्न प्रकल्प्यते ॥ ९१½ ॥
एकेन चरितार्थत्वात्तत्राऽविप्रतिपत्तितः ।
अलमर्थेन चेन्नैवमतिरूढानुवादतः ॥ ९२½ ॥
कल्पना सदसत्त्वेन समा किन्तु गरीयसी ।
प्रतीतिप्रतिपक्षेण तत्रैका यदि नापरा ॥ ९३½ ॥
न हि केशादिनिर्भासो व्यवहारप्रसाधकः ॥ ९४ ॥
वासनाभेदाद्भेदोऽयं सिद्धस्तत्र न सिद्ध्यति ।
तन्मात्रभावो दृष्टान्ते सर्वत्रार्थोपकारतः ॥ ९५ ॥
पारम्पर्येण साक्षाद्वा परापेक्षाः सहेतवः ।
विच्छिन्नप्रतिभासिन्यो व्याहारादिधियो यथा ॥ ९६ ॥
सन्निवेशादिभिर्दृष्टैर्गोपुराट्टालकादिषु ।
बुद्धिपूर्वैर्यथा तत्त्वं नेष्यते भूधरादिषु ॥ ९७ ॥
तथा गोचरनिर्भासैर्दृष्टैरेव भयादिषु ।
अबाह्यभावनाजन्यैरन्यत्रेत्यवगम्यताम् ॥ ९८ ॥

अत्र मिथ्याविकल्पैरप्रतिष्ठानकैरलम् ॥ ९८½ ॥
अत्यासन्नानसंसृष्टानणूनेवाक्षगोचरान् ।
अपरः प्राह तत्रापि तुल्यमित्यनवस्थितिः ॥ ९९½ ॥
तत्रापि तुल्यजातीयसंयोगसमवायिषु ।
अत्यक्षेषु ध्रुवेष्वन्यदध्यक्षमपरे विदुः ॥ १००½ ॥
कारणस्याक्षये तेषां कार्यस्योपरमः कथम् ॥ १०१ ॥
समवायस्य वृक्षोऽत्र शाखास्वित्यादिसाधनैः ।
अनन्यसाधनैः सिद्धिरहो लोकोत्तरा स्थितिः ॥ १०२ ॥
अध ऊर्ध्वविभागादिपरिणामविशेषतः ।
तानेव पश्यन् प्रत्येति शाखा वृक्षेऽपि लौकिकः ॥ १०३ ॥
तुलितद्रव्यसंयोगे स्थूलमर्थान्तरं यदि ।
तत्र रूपादिरन्यश्च साक्षैरीक्ष्येत सादरैः ॥ १०४ ॥
गौरवाधिक्यतत्कार्यभेदाश्चा सूक्ष्मतः किल ।
अतौल्यादर्थराशेस्तद्विशेषानवधारणम् ॥ १०५ ॥
ताम्रादिरक्तिकादीनां समितक्रमयोगिनाम् ।
कथमातिलकात् स्थूलप्रमाणानवधारणे ॥ १०६ ॥
अल्पभेदाग्रहान्मानमणूनामनुपज्यते ।
अंशुपातानुमाद्दृष्टेरन्यथा तु प्रसज्यते ॥ १०७ ॥
क्षीराद्यैरविजातीयैः प्रक्षिप्तैः क्रमशो घटः ।
तावद्भिरेव पूर्येत यावद्भिर्न विपर्ययैः ॥ १०८ ॥
नाशेष्वंशी न तेऽन्यान्ये वीक्ष्या न परमाणवः ।
आलोक्यार्थान्तरं कुर्यादत्रापोद्धारकल्पनाम् ॥ १०९ ॥
गुणपर्ययवद्द्रव्यं ते सहक्रमवृत्तयः ।
विज्ञानव्यक्तिशक्त्याद्या भेदाभेदौ रसादिवत् ॥ ११० ॥
सदापि सविकल्पाख्यासाधनाय क्रमस्थितेः ।
गुणपर्यययोर्नैक्यमिति सूत्रे द्वयग्रहः ॥ १११ ॥
गुणवद्द्रव्यमुत्पादव्ययध्रौव्यादयो गुणाः ।
दुद्राव द्रवति द्रोष्यत्येकानेकं स्वपर्ययम् ॥ ११२ ॥
भेदज्ञानात् प्रतीयेते प्रादुर्भावात्ययौ यदि ।
अभेदज्ञानतः सिद्धा स्थितिरंशेन केनचित् ॥ ११३ ॥
सदोत्पादव्ययध्रौव्ययुक्तं सदसतोऽगतेः ।
तादात्म्यनियमो हेतुफलसन्तानवद्भवेत् ॥ ११४ ॥
भिन्नमन्तर्बहिः सर्वं युगपत्क्रमभावि नः ।
प्रत्यक्षं न तु साकारं क्रमयुक्तमयुक्तिमत् ॥ ११५ ॥
प्रत्यक्षप्रतिसंवेद्यः कुण्डलादिषु सर्पवत् ॥ ११५½ ॥
समानभावः सामान्यं विशेषोऽन्यो व्यपेक्षया ॥ ११६ ॥
स्वलक्षणमसङ्कीर्णं समानं सविकल्पकम् ।
समर्थं स्वगुणैरेकं सहक्रमविवर्तिभिः ॥ ११७ ॥
यदि शेषपरावृत्तेरेकज्ञानमनेकतः ।
अनर्थमन्यथाभासम् अनंशानां न राशयः ॥ ११८ ॥

तथाऽयं क्षणभङ्गी न ज्ञानांशः सम्प्रतीयते ।
अर्थाकारविवेको न विज्ञानांशो यथा क्वचित् ॥ ११९ ॥
तद्भावः परिणामः स्यात्सविकल्पस्य लक्षणम् ।
तदेव वस्तु साकारमनाकारमपोद्धृतम् ॥ १२० ॥
भेदानां बहुभेदानां तत्रैकत्रापि सम्भवात् ॥ १२०½ ॥
अन्वयोऽन्यव्यवच्छेदो व्यतिरेकः स्वलक्षणम् ।
ततः सर्वा व्यवस्थेति नृत्येत्काको मयूरवत् ॥ १२१½ ॥
प्रामाण्यं नागृहीतेऽर्थे प्रत्यक्षेतरगोचरौ ।
भेदाभेदौ प्रकल्प्येते कथमात्मविकल्पकैः ॥ १२२½ ॥
उत्पादविगमध्रौव्यद्रव्यपर्यायसङ्ग्रहम् ।
सद्भिन्नप्रतिभासेन स्याद्भिन्नं सविकल्पकम् ।
अभिन्नप्रतिभासेन स्यादभिन्नं स्वलक्षणम् ॥ १२४ ॥
विरुद्धधर्माध्यासेन स्याद्विरुद्धं न सर्वथा ॥ १२४½ ॥
असम्भवदतादात्म्यपरिणामप्रतिष्ठितम् ।
समानार्थपरावृत्तमसमानसमन्वितम्॥ १२५½ ॥
प्रत्यक्षं बहिरन्तश्च परोक्षं स्वप्रदेशतः ।
सुनिश्चितमनेकान्तमनिश्चितपरापरैः ॥ १२६½ ॥
सन्तानसमुदायादिशब्दमात्रविशेषतः ॥ १२७ ॥
तथा सुनिश्चितस्तैस्तु तत्त्वतो विप्रशंसतः ।
प्रत्यभिज्ञाविशेषात्तदुपादानं प्रकल्पयेत् ॥ १२८ ॥
अन्योन्यात्मपरावृत्तभेदाभेदावधारणात् ।
मिथ्याप्रत्यवमर्शेभ्यो विशिष्टात् परमार्थतः ॥ १२९ ॥
तथा प्रतीतिमुल्लङ्घ्य यथास्वं स्वयमस्थितेः ।
नानैकान्तग्रहग्रस्ता नान्योन्यमतिशेरते ॥ १३० ॥
शब्दादेरुपलब्धस्य विरुद्धपरिणामिनः ।
पश्चादनुपलम्भेऽपि युक्तोपादानवद्गतिः ॥ १३१ ॥
तस्यादृष्टमुपादानमदृष्टस्य न तत्पुनः ।
अवश्यं सहकारीति विपर्यस्तमकारणम् ॥ १३२ ॥
तदेवं सकलाकारं तत्स्वभावैरपोद्धृतैः ।
निर्विकल्पं विकल्पेन नीतं तत्त्वानुसारिणा ॥ १३३ ॥
समानाधारसामान्यविशेषणविशेष्यताम् ॥ १३३½ ॥
अत्र दृष्टविपर्यस्तमयुक्तं परिकल्पितम् ।
मिथ्याभयानकग्रस्तैर्मृगैरिव तपोवने ॥ १३४½ ॥
यस्यापि क्षणिकं ज्ञानं तस्यासन्नादिभेदतः ।
प्रतिभासभिदां धत्तेऽसकृत्सिद्धं स्वलक्षणम् ॥ १३५½ ॥
विलक्षणार्थविज्ञाने स्थूलमेकं स्वलक्षणम् ।
तथा ज्ञानं तथाकारमनाकारनिरीक्षणे ॥ १३६½ ॥
अन्यथार्थात्मनोस्तत्त्वं मिथ्याकारैकलक्षणम् ॥ १३७ ॥
विज्ञानप्रतिभासेऽर्थविवेकाप्रतिभासनात् ।
विरुद्धधर्माध्यासः स्याद् व्यतिरेकेण चक्रकम् ॥ १३८ ॥

प्रतिक्षणं विशेषा न प्रत्यक्षाः परमाणुवत् ।
अतदाभतया बुद्धेरर्थाकारविवेकवत् ॥ १३९ ॥
अत्यन्ताभेदभेदौ न तद्वतो न परस्परम् ।
दृश्यादृश्यात्मनोर्बुद्धिनिर्भासक्षणभङ्गयोः ॥ १४० ॥
सर्वथार्थक्रियायोगात् तथा सुप्तप्रबुद्धयोः ।
अंशयोर्यदि तादात्म्यमभिज्ञानमनन्यवत् ॥ १४१ ॥
संयोगसमवायादिसम्बन्धाद्यदि वर्तते ।
अनेकत्रैकमेकत्रानेकं वा परिणामिनः ॥ १४२ ॥
अतद्धेतुफलापोहमविकल्पोऽभिजल्पति ॥ १४२½ ॥
समानाकारशून्येषु सर्वथानुपलम्भतः ।
तस्य वस्तुपुभावादि साकारस्यैव साधनम् ॥ १४३½ ॥
न विशेषा न सामान्यं तान् वा शक्त्या कयाचन ।
तद्विभर्ति स्वभावोऽयं समानपरिणामिनाम् ॥ १४४½ ॥
अप्रसिद्धं पृथक्सिद्धमुभयात्मकमञ्जसा ॥ १४५ ॥
सन्निवेशादिवद् वस्तु सांवृतं किन्न कल्प्यते ।
समग्रकरणादीनामन्यथा दर्शने सति ॥ १४६ ॥
सर्वात्मनां निरंशत्वात् सर्वथा ग्रहणं भवेत् ।
नौयानादिषु विभ्रान्तो न न पश्यति वाह्यतः॥ १४७ ॥
न च नास्ति स आकारः ज्ञानाकारेऽनुपङ्गतः ।
तस्माद् दृष्टस्य भावस्य न दृष्टस्सकलो गुणः ॥ १४८ ॥
प्रत्यक्षं कल्पनापोढं प्रत्यक्षादिनिराकृतम् ।
अध्यक्षलिङ्गतस्सिद्धमनेकात्मकमस्तु सत् ॥ १४९ ॥
सत्यालोकप्रतीतेऽर्थे सन्तः सन्तु विमत्सराः ॥ १४९½ ॥
नित्यं सर्वगतं सत्त्वं निरंशं व्यक्तिभिर्यदि ।
व्यक्तं व्यक्तं सदा व्यक्तं त्रैलोक्यं सचराचरम् ॥ १५०½ ॥
सत्तायोगाद्विना सन्ति यथा सत्तादयस्तथा ।
सर्वेऽर्था देशकालाश्च सामान्यं सकलं मतम् ॥ १५१½ ॥
सर्वभेदप्रभेदं सत् सकलाङ्गशरीरवत् ॥ १५२ ॥
तत्र भावाः समाः केचिन्नापरे चरणादिवत् ।
एकानेकमनेकान्तं विषमञ्च समं यथा ॥ १५३ ॥
तथा प्रमाणतः सिद्धमन्यथाऽपरिणामतः ।
अविकल्पकमभ्रान्तं प्रत्यक्षाभं पटीयसाम् ॥ १५४ ॥
अविसंवादनियमादक्षगोचरचेतसाम् ।
सर्वथा वितथार्थत्वं सर्वेषामभिलापिनाम् ॥ १५५ ॥
ततस्तत्त्वव्यवस्थानं प्रत्यक्षस्येति साहसम् ॥ १५५½ ॥
अक्षज्ञानानुजं स्पष्टं तदनन्तरगोचरम् ।
प्रत्यक्षं मानसं चाह भेदस्तत्र न लक्ष्यते ॥ १५६½ ॥
अन्तरेणेदमक्षानुभूतं चेन्न विकल्पयेत् ।
सन्तानान्तरवच्चेतः समनन्तरमेव किम् ॥ १५७½ ॥
शष्कुलीभक्षणादौ चेत्तावन्त्येव मनांस्यपि ।
यावन्तीन्द्रियचेतांसि प्रतिसन्धिर्न युज्यते ॥ १५८½ ॥

अथैकं सर्वविषयमस्तु किं वाक्षबुद्धिभिः ।
क्रमोत्पत्तौ सहोत्पत्तिविकल्पोऽयं विरुध्यते ॥ १५९½ ॥
अध्यक्षादिविरोधः स्यात्तेषामनुभवात्मनः ।
वेदनादिवदिष्टं चेत्कथं नातिप्रसज्यते ॥ १६०½ ॥
प्रोक्षितं भक्षयेन्नेति दृष्टा विप्रतिपत्तयः ।
लक्षणं तु न कर्तव्यं प्रस्तावानुपयोगिषु ॥ १६१½ ॥
अध्यक्षमात्मवित्सर्वज्ञानानामभिधीयते ।
स्वापमूर्च्छाद्यवस्थोऽपि प्रत्यक्षी नाम किं भवेत् ॥ १६२½ ॥
विच्छेदे हि चतुःसत्यभावानादिर्विरुध्यते ॥ १६३ ॥
प्रायशो योगिविज्ञानमेतेन प्रतिवर्णितम् ॥ १६३½ ॥
श्रोत्रादिवृत्तिः प्रत्यक्षं यदि तैमिरिकादिषु ।
प्रसङ्गः किमतद्वृत्तिस्तद्विकारानुकारिणी ॥ १६४½ ॥
तथाक्षार्थमनस्कारसत्त्वसम्बन्धदर्शनम् ।
व्यवसायात्मसंवाद्यव्यपदेश्यं विरुध्यते ॥ १६५½ ॥
नित्यः सर्वगतो ज्ञः सन् कस्यचित्समवायतः ।
ज्ञाता द्रव्यादिकार्थस्य नेश्वरज्ञानसंग्रहः ॥ १६६½ ॥
लक्षणं सममेतावान् विशेषोऽशेषगोचरम् ।
अक्रमं करणातीतमकलङ्कं महीयसाम् ॥ १६७½ ॥

ज्ञात्वा विज्ञप्तिमात्रं परमपि च बहिर्भासि भावप्रवादं
चक्रे लोकानुरोधात्पुनरपि सकलं नेति तत्त्वं प्रपेदे ।
न ज्ञाता तस्य तस्मिन्न च फलमपरं ज्ञायते नापि किञ्चि-
दित्यश्लीलं प्रमत्तः प्रलपति जडधीराकुलं व्याकुलात्मः ॥१६८½॥

इति प्रथमः प्रत्यक्षप्रस्तावः

द्वितीयः प्रस्तावः

साधनात्साध्यविज्ञानमनुमानं तदन्यये ।
विरोधात्क्वचिदेकस्य विधानप्रतिषेधयोः ॥ १ ॥
प्रत्यक्षं परमात्मानमपि च प्रतिभासयेत् ।
सत्यं परिस्फुटं येन तथा प्रामाण्यमश्नुते ॥ २ ॥
साध्यं शक्यमभिप्रेतमप्रसिद्धं ततोऽपरम् ।
साध्याभासं विरुद्धादि साधनाविषयत्वतः ॥ ३ ॥
जातेर्विप्रतिपत्तीनां सत्ता साध्याऽनुषज्यते ।
तथेष्टत्वाददोषोऽयं हेतोर्दोषत्रयं यदि ॥ ४ ॥
भ्रान्तेः पुरुषधर्मत्वाद् यथा वस्तुबलागमम् ।
प्रपेदे सर्वथा सर्ववस्तुसत्तां प्रतिक्षिपन् ॥ ५ ॥
भावनाद्भ्युपैति स्म भावधर्ममवस्तुनि ॥ ५½ ॥
असिद्धधर्मिधर्मत्वेऽप्यन्यथानुपपत्तिमान् ।
हेतुरेव यथा सन्ति प्रमाणानीष्टसाधनात् ॥ ६½ ॥
इष्टसिद्धिः परेषां वा तत्र वक्तुरकौशलम् ॥ ७ ॥
अतीतानागतादीनामपि सत्ताऽनुषङ्गवत् ।
अतश्च बहिरर्थानामपि सत्ता प्रसाध्यते ॥ ८ ॥
तद्भावेऽपि तद्वादस्यान्यथानुपपत्तितः ।
अक्षादेरप्यदृश्यस्य तत्कार्यव्यतिरेकतः ॥ ९ ॥
एतेनातीन्द्रिये भावकार्यकारणतागतेः ।
तत्सत्ताव्यवहाराणां प्रत्याख्यानं निवारितम् ॥ १० ॥
व्याधिभूतग्रहादीनां विप्रकर्षेऽपि गम्यते ।
कुतश्चित्सदसद्भावविरोधप्रभवं तथा ॥ ११ ॥
प्रमाणमर्थे संवादाद् भ्रान्तिरध्यवसायतः ।
प्रत्यक्षाभेऽप्रसङ्गश्चेत् तथाऽनभिनिवेशतः ॥ १२ ॥
दूरदूरतरादिस्थैरेकं वस्तु समीक्ष्यते ।
नानाभं स्यात्तथा सत्यं न चेद्वस्त्वनुरोधि किम् ॥ १३ ॥
तस्मादनुमितेरर्थविपयत्वनिराकृतिः ।
प्रतिभासभिदायाः किमेकस्यानेकतो ग्रहात् ॥ १४ ॥
समानपरिणामात्मसम्बन्धप्रतिपत्तितः ।
तत्राशक्तिफलाभावौ न स्यातां लिङ्गलिङ्गिनोः ॥ १५ ॥
न भेदोऽभेदरूपत्वान्नाभेदो भेदरूपतः ।
सामान्यं च विशेषाश्च तदपोद्धारकल्पनात् ॥ १६ ॥
संसर्गो नास्ति विश्लेषाद्विश्लेषोऽपि न केवलः ।
संसर्गात्सर्वभावानां तथा संवित्तिसम्भवात् ॥ १७ ॥

[एतौ (१६–१७) अन्तरश्लोकौ]

तद्व्याप्तिव्यतिरेकाभ्यां मतं सामान्यदूषणम् ।
समानपरिणामे न तदेकस्यानुपायतः ॥ १८ ॥

सदृशात्मनि सम्बन्धग्रहे भूयस्तथाविधे ।
प्रत्यभिज्ञादिना सिद्धयेत् प्रायो लोकव्यवस्थितिः ॥ १९ ॥
तद्धतोऽनुपकारेऽपि भेदे कथमुपाधयः ॥ २० ॥
नोपधयो न तद्वन्तो भिन्नाभिन्ना अपि स्वयम् ।
जात्यन्तरे तथाभूते सर्वथा दर्शनादपि ॥ २१ ॥
तद्धत्यचोदिते शक्तेऽशक्ताः किं तदुपाधयः ।
चोद्यन्ते शब्दलिङ्गाभ्यां समं तैस्तस्य लक्षणे ॥ २२ ॥
सम्बन्धो यत्र तत्सिद्धेरन्यतोऽप्रतिपत्तितः ।
अनुमानमलं किं तदेव देशादिभेदवत् ॥ २३ ॥
एतेन भेदिनां भेदसंवृत्तेः प्रतिपत्तितः ।
तत्रैकं कल्पयन् वार्यः समाना इति तद्ग्रहात् ॥ २४ ॥
अतद्धेतुफलापोहः सामान्यं चेदपोहिनाम् ।
सन्दर्श्यते तथा बुद्ध्या न तथाऽप्रतिपत्तितः ॥ २५ ॥
यन्न निश्चीयते रूपं जातुचित्तस्य दर्शनम् ।
यथानिश्चयनं तस्य दर्शनं तद्वशात्किल ॥ २६ ॥
समानपरिणामश्चेदनेकत्र कथं दृशिः ।
न चेद् विशेषाकारो वा कथं तद्व्यपदेशभाक् ॥ २७ ॥
सदृशासदृशात्मानः सन्तो नियतवृत्तयः ।
तत्रैकमन्तरेणापि सङ्केताच्छब्दवृत्तयः ॥ २८ ॥
तत्रैकमभिसन्धाय समानपरिणामेषु ।
समयस्तत्प्रकारेषु प्रवर्त्तेतेति साध्यते ॥ २९ ॥
तज्जातीयमतः प्राहुर्यतः शब्दा निवेशिताः ॥ २९½ ॥
नानेकत्र न चैकत्र वृत्तिः सामान्यलक्षणम् ।
अतिप्रसङ्गतः तत्त्वादन्यत्रापि समानतः ॥ ३०½ ॥
व्यावृत्तिं पश्यतः कस्मात् सर्वतोऽनवधारणम् ।
सादृश्याद्यदि साधूक्तं तत्किं व्यावृत्तिमात्रकम् ॥ ३१½ ॥
एकान्ते चेत्तथाऽदृष्टेरिष्टं वक्तुरकौशलम् ।
सर्वैकत्वप्रसङ्गो हि तद्दृष्टं भ्रान्तिकारणम् ॥ ३२½ ॥
नो चेद्विभ्रमहेतुभ्यः प्रतिभासोऽन्यथा भवेत् ।
तदकिञ्चित्करत्वं न निश्चिनोति स किं पुनः ॥ ३३½ ॥
तथापि दर्शनं न स्याद्भिन्नाकारप्रसङ्गतः ।
न च दृष्टेर्विशेषो यः प्रतिभासात् परो भवेत् ॥ ३४½ ॥
प्रतिभासभिदैकत्र तदनेकात्मसाधनम् ।
अदृष्टिकल्पनायां स्यादचैतन्यमयोगिनाम् ॥ ३५½ ॥
तस्मादभेद इत्यत्र समभावं प्रचक्षते ।
नेक्षते नाविरोधोऽपि न समानाः स्युरन्यथा ॥ ३६½ ॥
अक्षज्ञानेऽपि तत्तुल्यं अनुमानवदिष्यते ॥ ३७ ॥
ततः सम्भाव्यते शब्दः सत्यार्थप्रत्ययान्वितः ।
सत्यानृतार्थताऽभेदो विवक्षाव्यभिचारतः ॥ ३८ ॥
सहशब्दार्थदृष्टावप्यविकल्पयतः कथम् ।
समयः तत्प्रमाणत्वे क्व प्रमाणे विभाव्यताम् ॥ ३९ ॥

तदर्थदर्शनाभावात् मिथ्यार्थप्रतिभासिषु ।
ज्ञानाकारेषु सङ्केत इति केचित्प्रचक्षते ॥ ४० ॥
वागर्थदृष्टिभागेषु गृहीतग्रहणेष्वपि ।
सत्याकारावबोधेषु सङ्केतमपरे विदुः ॥ ४१ ॥
न भेदेषु न सामान्ये केवले न च तद्वति ।
फलाभावादशक्तेश्च समयः सम्प्रवर्तते ॥ ४२ ॥
स एवायं समश्चेति प्रत्ययस्तन्निबन्धनः ।
वितथोऽवितथश्चापि तत्रैकत्वनिबन्धनः ॥ ४३ ॥
तथा तत्प्रतिषेधेऽपि वैलक्षण्यादिशब्दवत् ॥ ४३½ ॥
तत्समानासमानेषु तत्प्रवृत्तिनिवृत्तये ।
संक्षेपेण क्वचित्कश्चिच्छब्दः सङ्केतमश्नुते ॥ ४४½ ॥
तथाऽनेकोऽपि तद्धर्मैनानात्वप्रतिपादने ।
एकत्र बहुभेदानां सम्भवान्मेचकादिवत् ॥ ४५½ ॥
समानं केनचित्किञ्चिदपरञ्च तथाविधम् ।
भेदविद् धर्मिणः कृत्वा समानाकारकल्पना ॥ ४६½ ॥
तदन्यत्र समानात्मा स एवेति तथाविधे ।
व्यवच्छेदस्वभावेषु विशेषणविशेष्यधीः ॥ ४७½ ॥
तत्तन्निमित्तकः शब्दस्तथान्यत्रापि योज्यताम् ।
ततः सत्तेति साध्यन्ते सन्तो भावाः स्वलक्षणाः ॥ ४८½ ॥
['सहशब्दार्थ' (३९) इत्यादि 'ततः सत्तेति' (४८½) इत्यन्तं व्याख्यानश्लोकाः]
नानैकवचनाः शब्दाः तथा सङ्केतिता यतः ॥ ४९ ॥
प्रत्यभिज्ञा द्विधा काचित्सादृश्यविनिबन्धना ।
प्रमाणपूर्विका नान्या दृष्टिमान्द्यादिदोषतः ॥ ५० ॥
अस्ति प्रधानमित्यत्र लक्षणासम्भवत्वतः ॥ ५०½ ॥
तत्रान्यत्रापि वासिद्धं यद्धिना यद्धिहन्यते ।
तत्र तद्गमकं तेन साध्यधर्मी च साधनम् ॥ ५१½ ॥
अप्रत्यक्षः सुषुप्तादौ बुद्धः प्रत्यक्षलक्षणः ।
जीवतीति यतः सोऽयं जीव आत्मोपयोगवान् ॥ ५२½ ॥
कर्मणामपि कर्ताऽयं तत्फलस्यापि वेदकः ।
संसरेत् परिणामात्तो मुच्यते वा ततः पुनः ॥ ५३½ ॥
आत्मादिव्यतिरेकेण कोऽपरोऽध्यक्षतां व्रजेत् ।
नानायं क्रमशो वृत्तेर्न चेदत्राभिधास्यते ॥ ५४½ ॥
भूतानामेव केषाञ्चित् परिणामविशेषतः ।
कायश्चित्कारणं सोऽपि कथं संसारमुक्तिभाक् ॥ ५५½ ॥
शक्तिभेदे तथा सिद्धिः संज्ञा केन निवार्यते ॥ ५६ ॥
यथा भूताविशेषेऽपि प्रज्ञादिगुणसंस्थितिः ।
तथा भूताविशेषेऽपि भवेद्भूतादिसंस्थितिः ॥ ५७ ॥
तस्मादनेकरूपस्य कथञ्चिद् ग्रहणे पुनः ।
तद्रूपं भेदमारोप्य गुण इत्यपि युज्यते ॥ ५८ ॥
यदि स्वभावाद्भावोऽयं भिन्नो भावः कथं भवेत् ।
अनवस्थानतोऽभेदे सकलग्रहणं भवेत् ॥ ५९ ॥

तदनेकात्मकं तत्त्वं न हि ज्ञानात्मना क्वचित् ।
शरीरग्रहणं येन तद्गुणः परिकल्प्यते ॥ ६० ॥
गुणानां गुणसम्बन्धो गन्धादेः सङ्ख्यया ग्रहात् ।
तादात्म्यं केन वार्येत नोपचारप्रकल्पनम् ॥ ६१ ॥
अत्रान्यत्रापि तुल्यत्वात् आधारस्यैकरूपतः ।
तत्रैकत्वं प्रसज्येत संख्यामात्रं यदीष्यते ॥ ६२ ॥
नानात्मविभ्रमादेवं न पृथग्गुणिनो गुणाः ।
प्रसक्ता रूपभेदाच्चेत् भेदो नानात्वमुच्यते ॥ ६३ ॥
एकता भावसाम्याच्चेत् उपचारस्तथा भवेत् ।
भेदेऽपि वस्तुरूपत्वात् न चेदन्यत्र तत्समम् ॥ ६४ ॥
एतेन भिन्नविज्ञानग्रहणादिकथा गता ॥ ६४½ ॥
जीवच्छरीरधर्मोऽस्तु चैतन्यं व्यपदेशतः ।
यथाऽचैतन्यमन्यत्रेत्यपरः प्रतिपन्नवान् ॥ ६५½ ॥
अप्रत्यक्षेऽपि देहेऽस्मिन् स्वतन्त्रमवभासनात् ।
प्रत्यक्षं तद्गुणो ज्ञानं नेति सन्तः प्रचक्षते ॥ ६६½ ॥
तद्दृष्टिहानिरन्येषामदृष्टपरिकल्पना ॥ ६७ ॥
स्वातन्त्र्यदृष्टेर्भूतानामदृष्टेर्गुणभावतः ।
तत्सारतरभूतानि कायापायेऽपि कानिचित् ॥ ६८ ॥

['तस्मादनेकरूपस्य' (५८) इत्यादि 'स्वातन्त्र्यदृष्टेः' (६८) इत्यन्तं व्याख्यानश्लोकाः]

कार्यकारणयोर्बुद्धिकाययोस्तन्निवृत्तितः ।
कार्याभावगतेर्नास्ति संसार इति कश्चन ॥ ६९ ॥

तस्यापि देहानुत्पत्तिप्रसङ्गोऽन्योन्यसंश्रयात् ।
उत्तरोत्तरदेहस्य पूर्वपूर्वधियो भवः ॥ ७० ॥
अत एव विरुद्धत्वादलं प्रायस्तथा भवन् ।
तन्न कारणमित्येव कार्यसत्तानिवर्तकम् ॥ ७१ ॥

स्वनिवृत्तौ तथा तक्षो गोपुराट्टालकादिषु ॥ ७२ ॥
युगपद्भिन्नरूपेण बहिरन्तश्च भासनात् ।
न तयोः परिणामोऽस्ति यथा गेहप्रदीपयोः ॥ ७२½ ॥
प्रमितेऽप्यप्रमेयत्वाद्विकृतेरविकारिणि ।
निर्हासातिशयाभावान्निर्हासातिशये धियः ॥ ७३½ ॥
बलीयस्यबलीयस्त्वाद्विपरीते विपर्ययात् ।
काये तस्मान्न ते तस्य परिणामा सुखादयः ॥ ७४½ ॥
एतदत्र घटादीनां न तु जातुचिदीक्ष्यते ।
तुल्यश्च गुणपक्षेण तत्तथा परिणामतः ॥ ७५½ ॥
अक्षादीनां विकारोऽयमात्मकर्मफलं भवेत् ।
अन्यथानियमायोगात् प्रतीतेरपलापतः ॥ ७६½ ॥
कल्पनायामसामर्थ्यात् ततस्तद्विकृते ऋते ।
पारम्पर्येण साक्षाच्च नास्ति विज्ञानविक्रिया ॥ ७७½ ॥
कारणं नाक्षसङ्घातस्तत्प्रत्येकं विना भवात् ।
विकल्पानां विशेषाच्च तत्तद्धति विरोधतः ॥ ७८½ ॥

जातिस्मराणां संवादादपि संस्कारसंस्थितेः ।
अन्यथा कल्पयन् लोकमतिक्रामति केवलम् ॥ ७९½ ॥
नाऽस्मृतेरभिलाषोऽस्ति न विना सापि दर्शनात् ।
तद्धि जन्मान्तरान्नायं जातमात्रेऽपि लक्ष्यते ॥ ८०½ ॥
गर्भे रसविशेषाणां ग्रहणादिति कश्चन ।
तदादावभिलाषेण विना जातु यदृच्छया ॥ ८१½ ॥
तत्संस्कारान्वयेक्षत्वाद् भूयो भूयः प्रवर्तितः ।
कोशपानं विधेयं न समं भूयस्तथा दृशः ॥ ८२½ ॥
रूपादिदर्शनाभावात् तत्सम्बन्धस्मृतिः कथम् ।
नावश्यं चक्षुरादीनां सर्वत्रोन्मीलनादयः ॥ ८३½ ॥
तथा रागादयो दृष्टाः सङ्कल्पाद्यविनाभुवः ॥ ८४ ॥
तदाहारादिसामान्यस्मृतितद्विप्रमोषयोः ।
भावोऽभावश्च वृत्तीनां भेदिष्विह च दृश्यते ॥ ८५ ॥
तस्मात् संसारवैचित्र्यं नियमान्न विहन्यते ।
न च कश्चिद्विरोधोऽस्ति देहान्तरपरिग्रहे ॥ ८६ ॥
तदभावे हि तद्भावप्रतिबंधो न युक्तिमान् ॥ ८६½ ॥
['जातिस्मराणां' (७९) इत्यादि 'तदभावे हि' (८६½) इत्यन्तं व्याख्यानश्लोकाः]
बुद्धेः पुरुषतन्त्रत्वे नित्यत्वात्तदनुक्रिया ।
न भवेत्परिणामित्वाद्विनाशानुपलक्षणात् ॥ ८७½ ॥
परस्याप्यविरोधश्चेत् फलहेतुव्यपोहतः ।
प्रवृत्तेर्व्यवहाराणामविनाशेऽपि सम्भवात् ॥ ८८½ ॥
यथाऽजनकजन्येषु न सन्ति कलशादयः ।
तथा जनकजन्येषु ततस्तत्त्वं निरन्वयम् ॥ ८९½ ॥
तत्र नाशादिशब्दाश्च समिताः समनन्तरे ॥ ९० ॥
अन्यस्यान्यो विनाशः किं किञ्च स्यादचलात्मकः ।
तद्विवेकेन भावाच्चेत् कथन्नातिप्रसज्यते ॥ ९१ ॥
सदापि सर्वभावानां परस्परविवेकतः ।
न चानन्तरमित्येव भावस्तद्व्यपदेशभाक् ॥ ९२ ॥
तत्प्रतीत्यसमुत्पादात् भावश्चेत् स कुतो मतः ।
सादृश्यात् प्रत्यभिज्ञानं न सभागनिबन्धनम् ॥ ९३ ॥
विशेषकल्पनायां स्यात् परस्याव्यभिचारिता ।
तस्मात् सभागसन्तानकल्पनापि न युज्यते ॥ ९४ ॥
न चेत् स परिवर्तेत हेतुरेव फलात्मना ॥ ९४½ ॥
तस्माद्भावविनाशोऽयं फलीभावः तदग्रहः ।
तद्ग्रहः प्रतिषेधोऽस्य केवलं तन्निबन्धनः ॥ ९५½ ॥
अन्यथात्वं यदीष्येत हेतोरपि फलात्मनः ।
अन्य एवेति किन्नेष्टमिति केचित्प्रचक्षते ॥ ९६½ ॥
अन्यथात्वं न चेत्तस्य भवेद् ध्रौव्यमलक्षणात् ।
अभावस्याप्यभावोऽपि किन्नेत्यन्ये प्रचक्षते ॥ ९७½ ॥
स्वस्वभावस्थितो भावो भावान्तरसमुद्भवे ।
नष्टो वा नान्यथाभूतः ततो नातिप्रसज्यते ॥ ९८½ ॥

साधनं प्रकृताभावेऽनुपपन्नं ततोऽपरे ।
विरुद्धासिद्धसन्दिग्धा अकिञ्चित्करविस्तराः ॥ ९९½ ॥
तथार्थेऽसत्यसम्भूष्णुर्धर्मो न बहिरङ्गतः ।
सर्वथैकान्तविश्लेषे साध्यसाधनसंस्थितेः ॥ १००½ ॥
एकं चलं चलैर्नान्यैर्नष्टैर्नष्टं न चापरैः ।
आवृतैरावृतं भागै रक्तै रक्तं विलोक्यते ॥ १०१½ ॥
अन्यथा तदनिर्देश्यं नियमस्याप्यसम्भवात् ।
वृत्तावपि न तस्येदं विश्वरूपं विभाव्यते ॥ १०२½ ॥
सम्यग्ज्ञानं व्यवस्थाया हेतुः सर्वत्र तत्पुनः ।
प्रत्यक्षं यदि बाध्येत लक्षणं प्रतिरुद्ध्यते ॥ १०३½ ॥
साङ्कर्यं व्यवहाराणां सन्निवेशविशेषतः ।
नानैकपरिणामोऽयं यदि न व्यवतिष्ठते ॥ १०४½ ॥
सत्यप्येकार्थकारित्वेऽसंश्लेषपरिणामतः ।
इन्द्रियादिषु नैकत्वं यदि किं वा विरुद्ध्यते ॥ १०५½ ॥
तदनेकार्थसंश्लेषविश्लेषपरिणामतः ।
स्कन्धस्तु सप्रदेशोऽशी बहिः साक्षात्कृतो जनैः ॥ १०६½ ॥
नानाकारैकविज्ञानं स्वाधारे बदरादिवत् ।
तादात्म्येन पृथग्भावे सति वृत्तिर्विकल्प्यते ॥ १०७½ ॥
दर्शनादर्शने स्यातां सप्रदेशाप्रदेशयोः ।
विरोधानुपलम्भेन किल स्कन्धो विरुद्ध्यते ॥ १०८½ ॥
सम्भवत्यपि मात्राणां दर्शनादर्शनस्थितिः ।
इदं विज्ञानमन्यद्वा चित्रमेकं यदीक्ष्यते ॥ १०९½ ॥
अवान्तरात्मभेदानामानन्त्यात् सकलाग्रहे ।
नानाकारणसामर्थ्याज्ज्ञानं भेदेन भासते ॥ ११०½ ॥
भेदसामर्थ्यमारोप्य प्रत्यासत्तिनिबन्धनम् ।
चोद्यं महति नीलादौ तुल्यं तद्विषयाकृति ॥ १११½ ॥
सर्वथा श्लेषविश्लेषे नाणूनां स्कन्धसम्भवः ।
अन्यथा नाप्रदेशादीत्यपरैर्दत्तमुत्तरम् ॥ ११२½ ॥
नैरन्तर्यं निरंशानां स्वभावानान्तरेचनम् ॥ ११३ ॥
चित्रचैत्तविचित्राभदृष्टभङ्गप्रसङ्गतः ।
स नैकः सर्वथा श्लेषात् नानेको भेदरूपतः ॥ ११४ ॥
स्कन्धो मात्रानुरोधेन व्यवहारेऽवधार्यते ।
सङ्ख्यादिसमभावेऽपि तत्स्वभावविवेकतः ॥ ११५ ॥
अतादात्म्यस्वभावे वा ह्यानर्थक्यादलं परैः ॥ ११५½ ॥
स्पर्शोऽयं चाक्षुषत्वान्न न रूपं स्पर्शनग्रहात् ।
रूपादीनि निरस्यान्यं न चाभ्युपलभेमहि ॥ ११६½ ॥
सामग्रीविहितज्ञानदर्शिताकारभेदिनः ।
प्रायेणैकस्य तद्रूप्यं पृथक्सिद्धौ प्रसङ्गतः ॥ ११७½ ॥
अल्पभूयःप्रदेशैकस्कन्धभेदोपलम्भवत् ।
अन्यथा स्वात्मनि ज्ञानमन्यथा चानुमीयते ॥ ११८½ ॥

सत्प्रमेयत्वयोर्नास्ति सर्वथा नियमो यदि ।
अप्रवृत्तेः फलाभावात्तत्र वृत्तेर्निषेधतः ॥ ११९½ ॥
प्रमाणमर्थसम्बन्धात् प्रमेयमसदित्यपि ।
केवलं ध्यान्ध्यमेवैतत् किन्न सन्तं समीक्ष्यते ॥१२०½॥
सत्प्रत्यक्षं परोक्षेऽर्थे साधनं त्रिविधं द्वयम् ।
हेत्वात्मनोः परं हेतुः तज्ज्ञानव्यवहारयोः ॥ १२१½ ॥
परसत्त्वमसत्ताऽस्यादर्शनं परदर्शनम् ।
सदसज्ज्ञानशब्दाश्च केवलं तन्निबन्धनाः ॥ १२२½ ॥
अग्निः स्वपररूपाभ्यां भावाभावात्मको यथा ।
अन्वयव्यतिरेकाभ्यां शब्दबुद्ध्याऽवधार्यते ॥ १२३½ ॥
अप्रमेयं प्रमेयं चेदसत्किन्न सदात्मकम् ।
अथ न व्यवहारोऽयं अन्यत्रापि निरंकुशः ॥ १२४½ ॥
सत्प्रत्यक्षं परोक्षार्थगतिस्तत्रैकलक्षणम् ।
साध्येऽसति विरोधोऽयमतस्तत्केन साध्यते ॥ १२५½ ॥
सर्वत्र परिणामादौ हेतुः सत्त्वादिरन्यथा ।
शब्देऽपि साधयेत् केन तस्मान्नान्वयतो गतिः ॥ १२६½ ॥
सिद्धमर्थक्रियाऽसत्त्वं सर्वथाऽविचलात्मनः ।
निरन्वयविनाशेऽपि साधनं नोपचारतः ॥ १२७½ ॥
अवश्यं बहिरन्तर्वा प्रमाणमवगच्छताम् ।
सिद्धमेकमनेकात्मपरिणामव्यवस्थितम् ॥ १२८½ ॥
परापरविवेकैकस्वभावपरिनिष्ठितः ।
परमाणुरतोऽन्यो वा बहिरन्तर्न बुद्ध्यते ॥ १२९½ ॥
अर्थस्यानेकरूपस्य कदाचित् कस्यचित् कचित् ।
शक्तावतिशयाधानमपेक्षातः प्रकल्प्यते ॥ १३०½ ॥
स्वभावातिशयाधानं विरोधान्न परीक्ष्यते ।
तत्र सिद्धमसिद्धं वा तस्माज्जातिर्न हेतुतः ॥ १३१½ ॥
सन्निधानं हि सर्वस्मिन्नव्यापारेऽपि तत्समम् ।
न चेत् स परिवर्तेत भाव एव फलात्मना ॥ १३२½ ॥
परिणामस्वभावः स्याद्भावस्तत्रानपेक्षणात् ।
अयमर्थक्रियाहेतुरन्तरेण निरन्वयम् ॥ १३३½ ॥
भेदाभेदात्मनोऽर्थस्य भेदाभेदव्यवस्थितिः ।
लोकतो वानुगन्तव्या सभागविसभागवत् ॥ १३४½ ॥
['सिद्धमर्थक्रिया' (१२७) इत्यादि 'लोकतो वानु' (१३४) इत्यन्तं विवरणश्लोकाः]।
सामान्यभेदरूपार्थसाधनस्तद्गुणोऽखिलः ।
अन्यथाऽनुपपन्नत्वनियमस्यात्र सम्भवात् ॥ १३५½ ॥
प्रत्यक्षेऽपि समानान्यनिर्णयः प्रतिरुद्ध्यते ।
यथा क्षणक्षयेऽणूनां इत्यात्मातौ विडम्ब्येत् ॥ १३६½ ॥
अपृथग्वेद्यनियमादभिन्नाः परमाणवः ॥ १३७ ॥
देशकालान्तरव्याप्तिः स्वभावः क्षणभङ्गिनाम् ।
सम्प्रत्यस्तमिताशेषनियमा हि प्रतीतयः ॥ १३८ ॥
अग्रहः क्षणभङ्गेऽपि ग्रहणे किमनिश्चयः ।

आकृतिभ्रमवद्यद्वद्विषमश्चैर्विलोकितम् ॥ १३९ ॥
न चर्तेऽर्थविदोऽर्थोऽर्थात् केवलो व्यवसीयते ॥ १३९½ ॥
भावान्तरसमारोपेऽभाविताकारगोचरः ।
समक्षसंविदोऽर्थानां सन्निधिं नातिशेरते ॥ १४०½ ॥
अणवः क्षणिकात्मानः किल स्पष्टावभासिनः ।
अतत्फलपरावृत्तार्थाकारस्मृतिहेतवः ॥ १४१½ ॥
स्थूलस्पष्टविकल्पार्थाः स्वयमिद्रियगोचराः ।
समानपरिणामात्मशब्दसङ्केतहेतवः ॥ १४२½ ॥
स्वभावव्यवसायेषु निश्चयानां स्वतो गतेः ।
नाशस्यैकार्थरूपस्य प्रतीतिर्न विरुद्ध्यते ॥ १४३½ ॥
व्यामोहशबलाकारवेदनानां विचित्रता ।
साकल्येन प्रकाशस्य विरोधः सम्प्रतीयते ॥ १४४½ ॥
सम्भावितान्यरूपाणां समानपरिणामिनाम् ।
प्रत्यक्षाणां परोक्षात्मा प्रमाणान्तरगोचरः ॥ १४५½ ॥
प्रत्ययः परमात्मानमपि च प्रतिभासयेत् ।
सत्यं परिस्फुटं येन तत्र प्रामाण्यमश्नुते ॥ १४६½ ॥
आसादितविशेषाणामणूनामतिवृत्तितः ।
एकाकारविवेकेन नैकैकप्रतिपत्तयः ॥ १४७½ ॥
कालापकषपर्यन्तविवर्तातिशया गतिः ।
अशक्तेरणुवत् सेयमनेकान्तानुरोधिनी ॥ १४८½ ॥
अंशग्रहविवेकत्वान्मन्दाः किमतिशेरते ।
निर्णयेऽनिर्णयान्मोहो बहिरन्तश्च तादृशः ॥१४९½॥
जीवः प्रतिक्षणं भिन्नश्चेतनो यदि नावृतः ।
सकलग्रहसामर्थ्यात्तथात्मानं प्रकाशयेत् ॥ १५० ॥
तादात्म्यात् प्रत्यभिज्ञा न सदृशापरहेतुतः ।
अवस्थान्तर्विशेषोऽपि बहिरन्तश्च लक्ष्यते ॥१५१॥
सूक्ष्मस्थूलतरा भावाः स्पष्टास्पष्टावभासिनः ।
वितथेतरविज्ञाने प्रमाणेतरतां गते ॥ १५२ ॥
यस्मिन्नसति यज्जातं कार्यकारणता तयोः ।
भेदिनां प्रत्यभिज्ञेति रचितोऽयं शिलाप्लवः ॥ १५३ ॥
अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ।
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥१५४॥
प्रत्येति न प्रमाहेतुं प्रत्येति पुनरप्रमाम् ।
प्रमाहेतुतदाभासभेदोऽयं सुव्यवस्थितः ॥१५५॥
नियतेन न गृह्णाति निःशङ्कं चतुरस्रधीः ।
अन्यथाऽसम्भवेऽज्ञाने ह्यर्थश्चात्मव्यवस्थितः ॥१५६॥
प्रतिव्यूढस्तु तेनैव प्रभवोऽनलभ्यूभयोः ।
प्रत्यक्षेऽर्थे प्रमाणेन विकल्पेन प्रकल्पितः ॥१५७॥
प्रत्यक्षानुपलम्भाभ्यां यदि तत्त्वं प्रतीयते ।
अन्यथाऽनुपपन्नत्वमतः किन्न प्रतीयते ॥१५८॥

प्रमाणसाधनोपायः प्रमाणान्तरगोचरः ।
व्याप्यव्यापक भावोऽयमेकत्रापि विभाव्यते ॥१५९॥
सत्यप्यन्वयविज्ञाने स तर्कपरिनिष्ठितः ।
अविनाभावसम्बन्धः साकल्येनावधार्यते ॥१६०॥
सहदृष्टैश्च धर्मैस्तं न विना तस्य सम्भवः ।
इति तर्कमपेक्षेत नियमेनैव लैङ्गिकम् ॥१६१॥
तस्माद्वस्तुबलादेव प्रमाणं मतिपूर्वकम् ।
बहुभेदं श्रुतं साक्षात् पारम्पर्येण चेष्यते ॥१६२॥
अर्थमात्रावबोधेऽपि यतो नर्ते प्रवर्तनम् ।
स युक्तो निश्चयो मुख्यं प्रमाणं तदनक्षवत् ॥१६३॥
लिङ्गसंवृतयोस्तुल्या गृहीतग्रहणादपि ।
व्यवच्छेदाविसंवादव्यवहर्तृप्रवृत्तयः ॥१६४॥
शब्दाद्ययोगविच्छेदे तत्प्रामाण्यं न किं पुनः ।
अनुमानं तु हेतोः स्यात् अविनाभावनिश्चयात् ॥१६५॥
यथा कार्यं स्वभावो वाप्यन्यथाशङ्क्यसम्भवः ।
हेतुश्चानुपलम्भोऽयं तथैवेत्यनुगम्यताम् ॥१६६॥
प्रत्यक्षानुपलम्भश्च विधानप्रतिषेधयोः ।
अन्तरेणेह सम्बन्धमहेतुरिव लक्ष्यते ॥१६७॥
प्रपञ्चोऽनुपलब्धेर्नापक्षे प्रत्यक्षवृत्तितः ।
प्रमाणं सम्भवाभावाद्विचारस्याप्यपेक्षणात् ॥ १६८ ॥
तुलोन्नामरसादीनां तुल्यकालतया न हि ।
नामरूपादिहेतुत्वं न च तद्व्यभिचारिता ॥ १६९ ॥
तादात्म्यं तु कथञ्चित् स्यात् ततो हि न तुलान्तयोः ।
सास्नाविषाणयोरेवं चन्द्रार्वाक्परभागयोः ॥ १७० ॥
उपलब्धेश्च हेतुत्वादन्तर्भावात् स्वभावतः ।
तयोरनुपलम्भेषु नियमो न व्यवस्थितः ॥ १७१ ॥
अभविष्यत्यसम्भाव्यो धर्मो धर्मान्तरे क्वचित् ।
शेषवद्धेतुरन्योऽपि गमकः सुपरीक्षितः ॥ १७२ ॥
एतेन पूर्ववद्गीतसंयोग्यादौ कथा गता ।
तल्लक्षणप्रपञ्चश्च निषेद्धव्यो दिशाऽनया ॥ १७३ ॥
अन्यथानुपपन्नत्वरहिता ये विडम्बिताः ।
हेतुत्वेन परैस्तेषां हेत्वाभासत्वमीक्ष्यते ॥ १७४ ॥
विरोधादन्वयाभावाद् व्यतिरेकाप्रसिद्धितः ।
कृतकः क्षणिको न स्यात् नैकलक्षणहानितः ॥ १७५ ॥
सत्ता सम्प्रतिबद्धैव परिणामे क्रियास्थितेः ।
निर्व्यापारो हि भावः स्यान्नित्यत्वे वा निरन्वये ॥ १७६ ॥
अवस्थादेशकालानां भेदेऽभेदव्यवस्थितिः ।
या दृष्टा सोऽन्वयो लोके व्यवहाराय कल्पते ॥ १७७ ॥
सर्वसन्तानविच्छेदः सति हेतौ फलोदयः ।
अन्यथा नियमाभावादानन्तर्यं विरुद्धयते ॥ १७८ ॥

सत्त्वमर्थ क्रियाऽन्ये वा वस्तुधर्माः क्षणक्षये ।
हेत्वाभासा विरुद्धाख्याः परिणामप्रसाधनाः ॥ १७९ ॥
सर्वज्ञप्रतिषेधे तु सन्दिग्धा वचनादयः ।
रागादिसाधनाः स्पष्टा एकलक्षणविद्विषाम् ॥ १८० ॥
धर्मिधर्मस्य सन्देहे व्यतिरेके ततो भवेत् ।
असिद्धिः प्रतिबन्धस्येत्यपरे प्रतिपेदिरे ॥ १८१ ॥
वाचो विरुद्धकार्यस्य सिद्धिः सर्वज्ञबाधिनी ।
शिरःपाण्यादिमत्त्वाद्या विरुद्धव्याप्तसिद्धयः ॥१८२॥
सत्सम्प्रयोगजत्वेन विरुद्धः सकलग्रहः ।
स्वभावकारणासिद्धेरेकलक्षणविद्विषाम् ॥१८३॥
कथञ्च सम्भवी वक्ता सर्वज्ञस्तस्य तेन नो ।
यावत् प्रकृष्यते रूपं तावत् कार्यं विरुद्ध्यते ॥१८४॥
विवक्षामन्तरेणापि वाग्वृत्तिर्जातु वीक्ष्यते ।
वाञ्छन्तो वा न वक्तारः शास्त्राणां मन्दबुद्धयः ॥१८५॥
प्रज्ञा येषु पटीयस्यः प्रायो वचनहेतवः ।
विवक्षानिरपेक्षास्ते पुरुषार्थं प्रचक्षते ॥१८६॥
अप्रमत्ता विवक्षेयमन्यथा नियमात्यात् ।
इष्टं सत्यं हितं वक्तुमिच्छा दोषवती कथम् ॥१८७॥
प्रज्ञाप्रकर्षपर्यन्तभावः सर्वार्थगोचरः ।
तत्कार्योत्कर्षपर्यन्तभावः सर्वहितामिधा ॥१८८॥
यथा वचनसर्वज्ञकार्यकारण भूतयोः ।
अविरोधेन वाग्वृत्तेनराद्रेकस्तन्निषेधने ॥१८९॥
तथैव पुरुषत्वादेरक्षयाद् बुद्धि विस्तरे ।
सर्वप्रकाशसामर्थ्यं ज्ञानावरणसंक्षयात् ॥१९०॥
अक्षयात् पुरुषत्वादेः प्रतिपक्षस्य संक्षयात् ।
सर्वतोऽक्षमयं ज्योतिः सर्वार्थैः सम्प्रयुज्यते ॥१९१॥
कथञ्चित् स्वप्रदेशेषु स्यात् कर्मपटलाच्छता ।
संसारिणां तु जीवानां यत्र ते चक्षुरादयः ॥१९२॥
साक्षात्कर्तुं विरोधः कः सर्वथावरणात्यये ।
सत्यमर्थं तथा सर्वं यथाऽभूद्वा भविष्यति ॥१९३॥
परदुःखपरिज्ञानाद् दुःखितः स कथं भवेत् ।
स्वतो हि परिणामोऽयं दुःखितस्य न योगिनः ॥१९४॥
भावनापाटवाद् बुद्धेः प्रकर्षोऽयं सलक्षयः ।
कारणासम्भवाक्षेपविपक्षः सम्प्रतीयते ॥१९५॥
असिद्धश्चाक्षुषत्वादिः शब्दानित्यत्वसाधने ।
अन्यथासम्भवाभावभेदात् स बहुधा स्मृतः ॥१९६॥
सर्वथा नास्ति सामान्यं परिणामविनाशयोः ।
यो हेतोराश्रयः अनिष्टेरिष्टः स्वात्साविशेषतः ॥१९८॥
साध्यसाधनभावो न शब्दे नाशित्वसत्त्वयोः ।
अनलः पावकोऽग्नित्वात् इत्यनेकान्तविद्विषाम् ॥१९९॥
सर्वान्यार्थासमः शब्दः शब्दादिपरिणामतः ॥२००॥

अणूनां श्रुतयोग्यत्वातिशयादानहानयः ।
शब्दोत्पत्तिविनाशाः सत्साध्यसाधनसंस्थितिः ॥२०१॥
अन्यथाऽनुपपन्नत्वरहिता ये त्रिलक्षणाः ।
अकिञ्चित्कारकान् सर्वान् तान् वयं संगिरामहे ॥२०२॥
तत्र मिथ्योत्तरं जातिः यथाऽनेकान्तविद्विषाम् ।
दध्युष्ट्रादेरभेदत्वप्रसङ्गादेकचोदनम् ॥२०३॥
सुगतोऽपि मृगो जातो मृगोऽपि सुगतः स्मृतः ।
तथापि सुगतो वन्द्यो मृगः खाद्यो यथेष्यते ॥२०४॥
तथा वस्तुबलादेव भेदाभेदव्यवस्थितेः ।
चोदितो दधि खादेति किमुष्ट्रमभिधावति ॥२०५॥
अत्रैवोभयपक्षोक्तदोषारेकाऽनवस्थितेः ।
अनन्वयादिदोषोक्तेः प्रपञ्चो वा ऽनया दिशा ॥२०६॥
मिथ्योत्तराणामनन्त्याच्छास्त्रे वा विस्तरोक्तितः ।
साधर्म्यादिसमत्वेन जातिर्नेह प्रतन्यते ॥२०७॥
प्रकृताशेषतत्त्वार्थप्रकाशपटुवादिनः ।
विब्रुवाणोऽब्रुवाणो वा विपरीतो निगृह्यते ॥२०८॥
असाधनाङ्गवचनमदोषोद्भवनं द्वयोः ।
न युक्तं निग्रहस्थानमर्थापरिसमाप्तितः ॥२०९॥
पादी पराजितो युक्तो वस्तुतत्त्वे व्यवस्थितः ।
तत्र दोषं ब्रुवाणो वा विपर्यस्तः कथं जयेत् ॥२१०॥
सम्बन्धो यत्र निर्ज्ञातः साध्यसाधनधर्मयोः ।
स दृष्टान्तस्तदाभासाः साध्यादिविकलादयः ॥ २११ ॥
सर्वत्रैव न दृष्टान्तोऽनन्वयेनापि साधनात् ।
अन्यथा सर्वभावानामसिद्धोऽयं क्षणक्षयः ॥ २१२ ॥
प्रत्यनीकव्यवच्छेदप्रकारेणैवसिद्धये ।
वचनं साधनादीनां वादः सोऽयं जिगीषतोः ॥ २१३ ॥
आस्तां तावदलाभादिरयमेव हि निग्रहः ।
न्यायेन विजिगीषूणां स्वाभिप्रायनिवर्तनम् ॥ २१४ ॥
तदाभासो वितण्डादिः अभ्युपेताव्यवस्थितेः ।
तदात्मोत्कर्षणायैव वाचो वृत्तिः अनेकधा ॥ २१५ ॥
प्रामाण्यं यदि शास्त्रगम्यमथ न प्रागर्थसंवादनात् ।
सङ्ख्यालक्षणगोचरार्थकथने किं कारणं चेतसाम् ।
आ ज्ञातं सकलागमार्थविषयज्ञानाविरोधं बुधाः ।
प्रेक्षन्ते तदुदीरितार्थगहने सन्देहविच्छित्तये ॥ २१६ ॥
शास्त्रं शक्यपरीक्षणेऽपि विषये सर्वं विसंवादकम्
मिथ्यैकान्तकलङ्कितं बहुमुखैरुद्वीक्ष्य तर्कागमैः ।
दाहार्तैः परिणामकल्पविटपिच्छायागतैः साम्प्रतं ।
विस्रब्धैरकलङ्करत्ननिचयन्यायो विनिश्चीयते ॥ २१७½ ॥

इति द्वितीयः अनुमानप्रस्तावः

प्रवचनप्रस्तावः

सकलं सर्वथैकान्तप्रवादातीतगोचरम् ।
सिद्धं प्रवचनं सिद्धपरमात्मानुशासनम् ॥१॥
तथाऽन्यगुणदोषेषु संशयैकान्तवादिभिः ।
पुरुषातिशयो ज्ञातुं यद्यशक्यः किमिष्यते ॥२॥
परोक्षोऽप्यविनाभावसम्बद्धैर्गुणदोषयोः ।
शास्त्रैर्निर्वर्तितैः शास्त्रकारवत् सम्प्रतीयते ॥३॥
सिद्धहिंसानृतस्तेयाब्रह्मचर्यप्रवृत्तितः ।
स प्रत्यस्तमिताशेषदोषो नेति प्रतीयते ॥४॥
हेयोपादेयतत्त्वस्य सोपायस्य किलेदृशः ।
प्रवक्ता धिगनात्मज्ञं तदसाध्यमसाधनम् ॥५॥
सर्वथाऽसदुपादेयं हेयं सत् तदकारणम् ।
तदर्थोऽयं प्रयासश्चेत्यहो सत्यव्यवस्थितिः ॥६॥
करुणा स्वपरज्ञानसन्तानोच्छेदकारणम् ।
इति न करुणा अत्यन्तं परदुःखं न गोचरः ॥७॥
तत्त्वज्ञानाद्यनुत्पादहेतुरुन्मार्ग एव सः ।
मिथ्याविकल्पविज्ञानभावनापरिपाकतः ॥८॥
तत्त्वज्ञानमुदेतीति कुतस्तत्त्वविनिश्चयः ।
अनादिवासना न स्यात् त्रैलोक्यमविकल्पकम् ॥९॥
निरुपद्रवभूतस्य बाधाऽयुक्ता विपर्ययैः ।
विच्छेदो वरमुच्छेदाद्विदस्तत्पक्षपाततः ॥१०॥
यस्तावत्करुणावत्त्वात् तिष्ठत्येव हि चेतसाम् ।
सन्तानः स परोच्छेदान्न समत्वं प्रपद्यते ॥११॥
तथा निरास्रवीभावः संसारान्मोक्ष उच्यते ।
सन्तानस्यात्मनो वा इति शब्दमात्रं तु भिद्यते ॥१२॥
नित्यस्यापि सतः साक्षाददृश्यानुभवात्मनः ।
सुखादिर्विषयः शब्दाद्यविशेषो धियाऽन्यथा ॥१३॥
प्रदर्श्यः पुनरस्यैव गुणयोगनिवृत्तितः ।
निर्वाणमाह वेदोऽयं प्रमाणमिति साहसम् ॥१४॥
विश्वलोकाधिकज्ञाने विप्रलम्भनशङ्किनः ।
प्रामाण्यं कथमक्षादौ चञ्चले प्रमिमीमहे ॥ १५ ॥
परीक्षाक्षमवाक्यार्थपरिनिष्ठितचेतसाम् ।
अदृष्टदोषाशङ्कायाममानं सकलं भवेत् ॥ १६ ॥
प्रत्यक्षागमयोरिष्टं प्रामाण्यं गुणदोषयोः ।
दर्शनादर्शनाध्यासात् क्वचिद् वृत्तसमत्वतः ॥ १७ ॥
तज्ज्ञानपूर्वकं तर्क्यमनुमानसमीक्षितम् ।
मानं वस्तुबलादेव सर्ववस्तुनिबन्धनम् ॥ १८ ॥

[एते १६–१८ अन्तरश्लोकाः]

आगमः पौरुषेयः स्यात् प्रमाणमतिलौकिके ।
संवादासम्भवाभावात् समयाविप्रलम्भने ॥ १९ ॥
सकलज्ञस्य नास्तित्वे स्वसर्वानुपलम्भयोः ।
आरेकासिद्धते तस्याप्यर्वाग्दर्शनतोऽगतेः ॥ २० ॥
विज्ञानमञ्जसा स्पष्टं विप्रकृष्टे विरुद्ध्यते ।
न स्वप्नेक्षणिकादेर्वा ज्ञानावृत्तिविवेकतः ॥ २१ ॥
ततः संसारिणः सर्वे कथञ्चिच्चेतनात्मकाः ।
तत्तत्स्वभावतो ज्ञानं सर्वत्र शबलायते ॥ २२ ॥
अभिन्नो भिन्नजातीयैर्जीवः स्याच्चेतनः स्वयम् ।
मलैरिव मणिर्विद्धः कर्मभिर्न प्रकाशते ॥ २३ ॥
सर्वार्थग्रहसामर्थ्यचैतन्यप्रतिबन्धिनाम् ।
कर्मणां विगमे कस्मात् सर्वानर्थांन्न पश्यति ॥ २४ ॥
प्रभुः साक्षात्कृताशेषप्रपञ्चभुवनत्रयः ।
अनर्थैः परमात्मानमत एव न योजयेत् ॥ २५ ॥
एवं यत्केवलज्ञानमनुमानविजृम्भितम् ।
नर्ते तदागमात् सिद्ध्येत न च तेन विनाऽऽगमः ॥ २६ ॥
सत्यमर्थबलादेव पुरुषातिशयो मतः ।
प्रभवः पौरुषेयोऽस्य प्रबन्धोऽनादिरिष्यते ॥ २७ ॥
ग्रहादिगतयः सर्वाः सुखदुःखादिहेतवः ।
येन साक्षात्कृतास्तेन किञ्च साक्षात्कृतं जगत् ॥ २८ ॥
सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा ।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः ॥२९॥
वेदस्यापौरुषेयस्य स्वतस्तत्त्वं विवृण्वतः ।
आयुर्वेदादि यद्यङ्गं यत्नस्तत्र निरर्थकः ॥३०॥
शास्त्रज्ञानं तथैव स्यात् सामग्रीगुणदोषतः ।
अविरोधेऽपि नित्यस्य भवेदन्धपरम्परा ॥३१॥
तदर्थदर्शिनोऽभावान्लेच्छादिव्यवहारवत् ॥३१½॥
अनादिसम्प्रदायश्चेत् आयुर्वेदादिरागमः ।
कालेनैतावताऽनाप्तः कथन्न प्रलयं गतः ॥ ३२½ ॥
सिद्धं श्रुतेन्द्रियातीतं त्रिकालविषयं स्फुटम् ॥३३॥
तथा न क्षणिकादीनां सर्वथाऽगुणात्ययात् ।
तद्विरम्य विरम्यैतद् युक्तं शास्त्रप्रवर्तनम् ॥३४॥
तादृशोऽभावविज्ञाने शास्त्रे वृत्तिरनर्थिका ।
सन्देहेऽपि च सन्देहस्ततस्तत्त्वं निरूप्यते ॥३५॥
स्वतन्त्रत्वे तु शब्दानां प्रयासोऽनर्थको भवेत् ।
व्यक्त्यावरणविच्छेदसंस्कारादिविरोधतः ॥३६॥
वंशादिस्वरधारायां सङ्कुलाप्रतिपत्तितः ।
क्रमेणाग्रहेऽयुक्तः सकृद्ग्रहणविभ्रमः ॥३७॥
तालवादिसन्निधानेन शब्दोऽयं यदि जायते ।
को दोषो येन नित्यत्वं कुतश्चिदवकल्प्यते ॥३८॥

उपादानस्य सूक्ष्मत्वाद् युक्तं चानुपलम्भनम् ।
सादृश्यान्नैकरूपत्वात् स एवायमिति स्थितिः ॥३९॥
यदि चैवंविधो नित्यो नित्यास्ते विद्युदादयः ।
प्रत्यभिज्ञाऽप्रमाणं स्यात् युगपद्भिन्नदेशयोः ॥४०॥
सर्वार्थानामनादित्वे स विशेषो निराश्रयः ।
योऽन्यथासम्भवी शब्दघटाद्याख्योऽवभासते ॥४१॥
स वर्णपदवाक्यानां कालदेशादिभेदिनाम् ।
सदृशानां प्रबन्धोऽयं सर्वेषां न विरुद्ध्यते ॥४२॥
वाचः प्रमाणपूर्वायाः प्रामाण्यं वस्तुसिद्धये ।
स्वतः सामर्थ्यविश्लेषात् सङ्केतं हि प्रतीक्षते ॥४३॥
स पुनर्बहुधा लोकव्यवहारस्य दर्शनात् ।
शब्दार्थयोर्विकल्पेन सन्निवेशोऽनुवर्तते ॥४४॥
न सर्वयोग्यता साध्वी सङ्के तान्नियमो यदि ।
सम्बन्धनियमेऽन्यत्र समयेऽपि न वर्तताम् ॥४५॥
ततः शब्दार्थयोर्नास्ति सम्बन्धोऽपौरुषेयकः ॥४५½॥
स हि शब्दार्थसम्बन्धो यतोऽर्थः सम्प्रतीयते ।
तादृशो वाचकः शब्दः सङ्केतो यत्र वर्तते ॥४६½॥
क्रमेणोच्चार्यमाणेषु ध्वनिभागेषु केषुचित् ।
न वर्णपदवाक्याख्या अविकारेष्वसम्भवात् ॥४७½॥
शब्दभागाः स्वहेतुभ्यः समानोन्नयहेतवः ।
सकलाग्रहणात् तेषां युक्ता हि श्रोत्रगोचराः ॥४८½॥
परिणामविशेषा हि भावानां भावशक्त्यः ॥४९॥
ध्वनयस्तत्समर्थानां अभावादतिरेकिणाम् ।
वाचामपौरुषेयीणामाविर्भावो न युज्यते ॥५०॥
सम्यग्ज्ञानाङ्कुशः सत्यः पुरुषार्थाभिधायकः ।
इति अत्रापौरुषेयत्वं जातु सिद्धमनर्थकम् ॥५१॥
रागादयः सजातीयपरिणामाभिवृद्धयः ।
सर्वार्थानामनेकात्मपरिणामौ व्यवस्थितौ ।
मार्गस्तद्विषयश्चेति मतं सत्यं चतुर्विधम् ॥५२॥
अहं ममास्रवो बन्धः संवरो निर्जरा क्षयः ।
कर्मणामिति सत्कृत्य प्रेक्षाकारी समीहते ॥५३॥
तत्त्वज्ञानप्रभावेण तपः संवरणं नृणाम् ।
तपसश्च प्रभावेण निर्जीर्णं कर्म जायते ॥५४॥
रागद्वेषौ विहायैव गुणदोषवतोस्तयोः ।
मोक्षज्ञानात् प्रवर्त्तन्ते मुनयः समबुद्धयः ॥५५॥
सज्ज्ञानपरिणामात्मतत्त्वसम्प्रतिपत्तितः ।
पीतदोषास्रवाकारो विपरीतग्रहक्षयः ॥५६॥
सूचयन्ति हि कर्माणि स्वहेतुप्रकृतीनि च ॥ ५७ ॥
सात्मीभावाद्विपक्षस्य सतो दोषस्य संक्षये ।
कर्माश्लेषः प्रवृत्तानां निवृत्तिः फलदायिनाम् ॥ ५८ ॥

प्रतिपक्षस्थिरीभावः प्रायः संस्कारपाटवत् ।
निर्ह्रासातिशयौ येषां तत्प्रकर्षापकर्षयोः ॥ ५९ ॥
यद्यप्यनात्मविज्ञानभावनासम्भवस्ततः ।
न निरोधो निरोधे वा न प्रयोजनमीक्ष्यते ॥ ६० ॥
हेयोपादेयतत्त्वार्थविपरीतव्यवस्थितेः ।
मिथ्याज्ञानमनात्मज्ञं मैत्र्यादिप्रतिरोधतः ॥ ६१ ॥
तत्त्वार्थदर्शनज्ञानचारित्रेषु महीयसाम् ।
आत्मीयेषु प्रमोदादिरत एव विधीयते ॥ ६२ ॥
यस्तावत् करुणावत्त्वात्तिष्टत्येव हि चेतसाम् ।
सन्तानः स परोच्छेदान्न समत्वं प्रपद्यते ॥ ६३ ॥
तस्मात् निरास्रवीभावः संसारान्मोक्ष उच्यते ।
सन्तानस्यात्मनो वेति शब्दमात्रं तु भिद्यते ॥ ६४ ॥

नित्यस्येच्छा-प्रधानादियोगोऽनित्यः किमात्मनः ।
मिथ्याज्ञानादनिर्मोक्षस्तथाऽनेकान्तविद्विषाम् ॥ ६५ ॥
द्रव्यपर्यायसामान्यविशेषप्रविभागतः ।
स्याद्विधिप्रतिषेधाभ्यां सप्तभङ्गी प्रवर्तते ॥ ६६ ॥
तदतद्वस्तुभेदेन वाचो वृत्तेस्तथोभयम् ।
तदतद्वागवृत्तेश्च सह तदवागवृत्तिना ॥ ६७ ॥
प्रयोगविरहे जातु पदस्यार्थः प्रतीयते ।
स हि शब्दार्थतत्त्वज्ञैस्तस्येति व्यपदिश्यते ॥ ६८ ॥
अहमस्मीति वाक्यादौ सिद्धावन्यतरस्थितेः ।
उभयोक्तिवदत्रोक्तावुपालम्भो विरुद्ध्यते ॥ ६९ ॥

यदि केचित् प्रवक्तारो वृत्तिवाक्यार्थयोरपि ।
सूत्रेष्वेव तयोरुक्तौ त्रैलोक्यं किन्न वर्तते ॥ ७० ॥
केवलं प्रतिपत्तारः स्याद्वादे जडवृत्तयः ।
जातितद्वदपोहादिवादं च न हि जानते ॥७१॥
सर्वथैकान्तविश्लेषतत्त्वमार्गव्यवस्थिताः ।
व्याख्यातारो विवक्षातः स्याद्वादमनुरुन्धते ॥७२॥
अनेकलक्षणार्थस्य प्रसिद्धस्याभिधानतः ।
संशयादिप्रसङ्गः किं स्याद्वादेऽमूढचेतसः ॥७३॥
साकल्येनेह सामान्यविशेषपरिणामधीः ।
मिथ्यैकान्तप्रवादेभ्यो विदुषो विनिवर्तयेत् ॥७४॥

आप्तवादः स स एवायं यत्रार्थः समवायिनः ।
प्रमाणमविसंवादात् प्रणेता यदि शङ्क्यते ॥७५॥
आत्मा योऽस्य प्रवक्तायमपरालीढसत्पथः ।
नात्यक्षं यदि जानाति नोपदेष्टुं प्रवर्त्तते ॥७६॥
परीक्षाक्षमवाक्यार्थपरिनिष्ठितचेतसाम् ।
अदृष्टदोषाशङ्कायामन्यत्रापि प्रसज्यते ॥७७॥
प्रत्यक्षागमयोरिष्टं प्रामाण्यं गुणदोषयोः ।
उपलब्ध्यनुपलब्धिभ्यां क्वचिद्वृत्तसमत्वतः ॥७८॥

तथा साक्षात्कृताशेषशास्त्रार्थोऽक्षानपेक्षणात् ।
सद्वृत्तकेवलज्ञानः सर्वज्ञः सम्प्रतीयते ॥७९॥
ज्ञस्यावरणविच्छेदे ज्ञेयं किमवशिष्यते ।
अप्राप्यकारिणः तस्मात् सर्वार्थानवलोकते ॥८०॥
शास्त्रे दुरवगाहार्थतत्त्वं दृष्टं हि केवलम् ।
ज्योतिर्ज्ञानादिवत्सर्वं स्वत एव प्रणेतृभिः ॥८१॥
संघातो हेतुरेतेषां पृथगन्यत्र सम्भवात् ।
एवं हि सुगतादिभ्यो वरमीक्षणिकादयः ॥८२॥
शास्त्रं तल्लक्षणव्याप्तं सर्वज्ञादेरबाधनात् ।
अपौरुषेयवृत्तान्तोऽप्यत एव विरुद्ध्यते ॥८३॥
प्रत्यक्षमञ्जसा स्पष्टमन्यच्छ्रुतमविप्लवम् ।
प्रकीर्णं प्रत्यभिज्ञादौ प्रमाणे इति संग्रहः ॥८४॥
इदमेवमिति ज्ञानं गृहीतग्रहणेऽपि नः ।
प्रत्यक्षेऽर्थेऽन्यथारोपव्यवच्छेदप्रसिद्धये ॥८५॥
अनुमानमतो हेतुव्यवच्छेदेऽनवस्थितिः ।
उपमानं प्रसिद्धार्थसाधर्म्यात्साध्यसाधनम् ॥८६॥
यदि किञ्चिद्विशेषेण प्रमाणान्तरमिष्यते ।
प्रमितोऽर्थः प्रमाणानां बहुभेदः प्रसज्यते ॥८७॥
सर्वमेतच्छ्रुतज्ञानमनुमानं तथागमः ।
सम्प्रदायाविघातेन यदि तत्त्वं प्रतीयते ॥८८॥
आद्ये परोक्षमपरं प्रत्यक्षं प्राहुराङ्गसम् ।
केवलं लोकबुद्ध्यैव मतेर्लक्षणसंग्रहः ॥८९॥
स्याद्वादः श्रवणज्ञानहेतुत्वाच्चक्षुरादिवत् ।
प्रमा प्रमितिहेतुत्वात्प्रामाण्यमुपगम्यते ॥९०॥
प्रमाणस्य फलं तत्त्वनिर्णयादानहानधीः ।
निःश्रेयसं परं प्रायः केवलस्याप्युपेक्षणम् ॥९१॥
प्रत्यक्षं श्रुतविज्ञानहेतुरेव प्रसज्यते ।
इष्टं तत्त्वमपेक्षातो नयानां नयचक्रतः ॥९२॥
मिथ्यात्वं सौगतानां कणचरसमयं कापिलीयं प्रमेयं ,
प्रागल्भ्यं शाबराणां जिनपतिविहिताशेषतत्त्वप्रकाशे ।
पर्याप्तत्वं व्यपोहन्नुपहसनमयं प्रस्तुवन्न्यायमार्गे ,
स्याद्वादः सर्ववादप्रवणगुणगणः श्रेयसे नोऽस्तु नित्यम् ॥९३॥
नैकान्तक्षायिकाणां अतिशयमवदन्नैव नानार्थसाध्यम् ,
नैष्किञ्चन्यं तपो वाऽविगलितसकलक्लेशराशेर्विनाशे ।
निष्पर्यायं प्रवृत्तं सकलविषयगं केवलं वेद नित्यम् ,
योऽयं तस्मै नमस्त्रिभुवनगुरवे सम्भवे शान्तये ते ॥९४॥
युक्तायुक्तपरीक्षणक्षमधियामत्यादराराधिनाम् ,
संसेव्यं परमार्थवेदसकलध्यानास्पदं शाश्वतम् ।
लोकालोककलावलोकनबलप्रज्ञागुणोद्भूतये ,
आभव्यादकलङ्कमङ्गलफलं जैनेश्वरं शासनम् ॥९५॥

शुद्धिपत्रम्

प्रस्तावना

[पृ० ५१ श्लो० २० इत्यादि पृ० ५७ श्लो० १४९½ इत्यन्तं श्लोकानामङ्काः अर्धाङ्काधिका मुद्रिताः ते अर्धाङ्कन्यूनाः पठनीयाः]

पृ०	पं०	अशुद्धम्	शुद्धम्
५४	१६	-प्रतिवन्धो	-प्रतिषेधो
५५	३	-धर्मो	-र्धर्मो
५७	३५	नियमेन	नियमेन
,,	३७	भ्यूमयोः	धूमयोः
५८	४०	विरुद्धयते	विरुद्धयते
५९	२३	-क्षयाद	-क्षयाद्
,,	२६	सर्वार्थः	सर्वार्थैः
,,	३७	॥१९८॥	॥१९७॥
,,	३९	॥१९९॥	॥१९८॥
,,	४०	॥२००॥	॥१९८½॥

[पृ० ६० श्लो० २०१ इत्यादि पृ० ६० श्लो० २१६ इत्यन्तं एकार्धाधिकाः श्लोकाङ्काः मुद्रिताः ते एकार्धन्यूनाः पठनीयाः]

६०	२	सत्साध्य	तत्साध्य
,,	१३	-णामनन्त्य	णामानन्त्य
,,	१९	पादी	वादी
,,	२९	-पेताव्थ-	-पेताव्य-
,,	३०	॥२१५॥	॥२१३½॥
,,	३४	॥२१६॥	॥२१४½॥
,,	३८	॥२१७½॥	॥२१५½॥
,,	,,	-निचप-	-निचय-
६२	७	संसारिण	संसारिणः
,,	९	जीवः	जीवः
,,	,,	प्राभाण्यं	प्रामाण्यं
६३	२२	-शक्त्यः	-शक्तयः
,,	२६	इति अत्रा-	इत्यत्रा-

[पृ० ६३ श्लो० ५२ इत्यादि पृ० ६५ श्लो० ९४ इत्यन्तं श्लोकाङ्काः अर्धाङ्कन्यूना मुद्रितास्तेऽर्धाङ्काधिकाः पठनीयाः]

६४	३३	यत्रार्थः	यत्रार्थाः
२५०	१६	भावानामेव	भावनामेव
२५८	१९	यथागतस्य	तथागतस्य
२६२	६	श्रुत्यादिवैरस्थितिरुच्यते (?)	श्रुत्या देवैरस्थितिरुच्यते ।
३७२	१९	अयमेव	अयमेवं
३७६	८	शब्दोयं	शक्तोऽयं
४३७		त्रिलोचन	२।२८०।२५

श्रीमद्भट्टाकलङ्कदेवविरचितः

न्यायविनिश्चयः

स्याद्वादविद्यापतिश्रीमद्वादिराजसूरिरचित-

न्यायविनिश्चयविवरणसहितः

[द्वितीयोऽनुमानप्रस्तावः]

एतावदपाकृतविप्रतिपत्तिकतया प्रत्यक्षं प्रभेदतो निरूपितम्, इदानीं परोक्षस्य तथा निरूपणमवसरप्राप्तमिति तत्प्रभेदमनुमानं निरूपयन्नाह—

साधनात्साध्यविज्ञानमनुमानं तदत्यये ।
विरोधात्कचिदेकस्य विधानप्रतिषेधयोः ॥ १ ॥ इति ।

स्मरणादिरपि तत्प्रभेद एव तस्य कस्मादनिरूपणमिति चेत्? न; तस्यापि पश्चान्निरूपणात्। पूर्वमेव तस्य निरूपणमुपपन्नम्, स्मरणादिक्रमेण तत्प्रभेदस्य सूत्रे[1] निर्देशात्—"**स्मृतिः सञ्ज्ञा चिन्ताभिनिबोधः**" [त० सू० १।१३] इति, निर्देशानुरूपत्वाच्च निरूपणस्येति चेत्; सत्यमिदम्; तथापि प्राधान्यादनुमानस्य तदेवात्र प्रथमं निरूप्यते। कथं प्राधान्यमिति चेत्? उच्यते, शास्त्रमिदं प्रवचनप्रामाण्यनिरूपणपरम् '**बालानाम्**' इत्यादिना शास्त्रारम्भे तथैव प्रतिपादनात्। तत्प्रामाण्यञ्च[2] प्रत्यक्षानुमेयात्यन्तपरोक्षविषयम्। [3]तत्र प्रत्यक्षविषये तदविसंवादात् तत्प्रामाण्यनिवेदनार्थं प्रत्यक्षं निरूपितम्। तथा प्रवचनमत्यन्तपरोक्षे [4]तंत एव तदर्थं निरूपयिष्यते। परिशिष्टमनुमेयं तत्र च प्रधानमनुमानमेव तदविसंवादादेव तत्र तत्प्रामाण्यनिर्णयात्, ततस्तदेवात्र प्रथमं निरूप्यते। [5]तन्निर्णयानुपयोगिनः स्मरणादेः पश्चादपि किमर्थं निरूपणमिति चेत्? अनुमान(नार्थ)मेवेति ब्रूमः। न ह्यनुमानं [6]तन्निरपेक्षमुत्पत्तुमर्हति। निवेदयिष्यते चैतत् पश्चादेव। शास्त्रान्तरे तर्हि कथं स्मरणादेः पूर्वं निरूपणं कृतमिति चेत्? न; तत्रापरतद्भेदापेक्षस्य तत्प्राधान्यस्य विवक्षितत्वात्। तदपि तस्य तत्प्रामाण्यनिर्णयं प्रति न प्रत्यक्षादिवत् साक्षादुपयोगात् अपि तु पारम्पर्येण। अत एव कथञ्चित्तदुपयोगिन एव परोक्षभेदस्य शास्त्रे निरूपणं नापरस्य। न ह्यपरस्तद्भेदो नास्त्येव सम्भवैतिह्यप्रतिभादेरनेकप्रकारस्य तस्योपलम्भादित्यलं प्रसङ्गेन।

प्रकृतं व्याचक्ष्महे—**साधनं** साध्याविनाभावनियमनिर्णयैकलक्षणं वक्ष्यमाणं लिङ्गम्, तस्मात्। **साध्यस्य** वक्ष्यमाणलक्षणस्यैव यद् **विज्ञानम्**। तद् अनु व्याप्तिनिर्णयस्य पश्चाद्भावि मानम् **अनुमानम्**।

---

१ 'मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम्।" इति सूत्रे। २ श्लो० २। ३ प्रवचनप्रामाण्यञ्च। ४ तत्र—आ०, ब०, प०। ५ "प्रवचनाविसंवादात्। पूर्वापराविरोध एव प्रवचनस्य प्रवचनाविसंवादः। उक्तञ्चाप्तैः—दृष्टेऽर्थेऽध्यक्षतो वाक्यमनुमेयेऽनुमानतः। पूर्वापराविरोधेन परोक्षे च प्रमाणतामिति।"—ता० टि०। ६ प्रवचनप्रामाण्यनिर्णयानुपयोगिनः। ७ स्मरणादिनिरपेक्षम्।

'साधनाद्विज्ञानम्' इत्येवास्तु न साध्यग्रहणम्, साध्यविज्ञानस्यैव साधनादुत्पत्तेः। न साधनत्वं[1] तस्य स्वरूप[2]विषयं सम्भवति साध्यविषयतयैव तस्य निर्णयात्। रूपान्तरप्रयुक्तन्तु[3] ततस्तद्विज्ञानं रूपान्तराद्विज्ञानमेव न साधनाद्विज्ञानम्। तन्न साधनज्ञाननिवृत्त्यर्थं साध्यग्रहणम्। असाध्यज्ञाननिवृत्त्यर्थमित्यपि न चतुरस्रम्; असाध्यापेक्षया कस्यचित् साधनत्वानुपपत्तेः।

अन्यथाऽनुपपत्त्या[4] हि साधनं व्यवतिष्ठते।
अन्यथानुपपत्तिश्च साध्यापेक्षैव नान्यथा ॥ १२१० ॥
साधनं प्रकृताभावेऽनुपपन्नमिति श्रुतेः।
शक्यत्वादिविशिष्टञ्च साध्यं प्रकृतमुच्यते ॥ १२११ ॥
तदसाध्ये न विज्ञानं साधनादस्ति सम्भवि।
यद्व्यवच्छित्तये[5] साध्यपदमत्रोपवर्ण्यते ॥ १२१२ ॥

तन्न साध्यपदमर्थवत् विनाऽपि तेन तदर्थस्य प्रतिपत्तेः। साध्यविज्ञानमित्येवं वाऽस्तु न साधनादिति, साधनादेव तद्विज्ञानस्य भावात्। प्रत्यक्षादपि भावः पर्वतादावनुमितस्य पावकादेः प्रत्यक्षादपि प्रतिपत्तेरिति चेत्; न; साध्यस्य शक्याभिप्रेतादिरूपत्वात्, तद्रूपतया च तत[6]स्तस्याप्रतिपत्तेः। अव्यतिरिक्तमेव पावकादेस्तद्रूपम्, द्रव्यनयार्पणादिति चेत्; सत्यम्; न तथाऽपि तस्य मुख्यं साध्यत्वम्, विशेषरूपस्यैव पर्यायनयार्पितस्य मुख्यतया तत्त्वेन[7] लक्षणात्। तस्य च साधनादेव प्रतिपत्तिः, न प्रत्यक्षादिति विफलं साधनादिति पदमिति चेत्; इत्थमेतत् तान् प्रति येषामेवं परिज्ञानसामर्थ्यम्, ये तु बालाः शब्दताडित एवार्थे प्रतिपत्तिसौकर्यं मन्यन्ते न तान्प्रति। ततस्तेषां तत्सौकर्यावकल्पनाय पदद्वयोपादानम्। शास्त्रस्यापि मुख्यतस्तदुपकारपरतयैव प्रवृत्तत्वात्। अत एवोक्तम्—**'बालानां हितकामिनाम्'** इति।

विज्ञानग्रहणं तर्हि व्यर्थं प्रमाणत्वादेवानुमानस्य विज्ञानत्वप्रतिपत्तेः, विवेचितञ्च विज्ञानमेव प्रमाणमिति। यदि पुनर्विज्ञानं विज्ञेयमुच्यते कर्मणि कृद्विधानात्, तदयमत्र समासः—साध्यं विज्ञानं विज्ञेयं यस्य तत् साध्यविज्ञानमिति; तन्न; एवं सति साध्यविज्ञेयमिति स्पष्टस्यैवोपन्यासस्य प्रसङ्गात्। तन्न तद्ग्रहणमर्थवदिति चेत्; न; अनुमानस्य परिच्छित्तिरूपत्वप्रतिपादनार्थत्वात्। तस्य तद्रूपत्वमपि विज्ञानत्वादेव प्रतीयत इति चेत्; न; तथाऽपि बौद्धैस्तदनभ्युपगमात्। न चैतद्वाङ्मात्रम्; प्रमाणभावात्—विषयपरिच्छित्तिरूपमनुमानं प्रमाणत्वात् प्रत्यक्षवदिति। प्रत्यक्षमपि प्रतिबन्धादेव तद्विषये प्रमाणं न तत्परिच्छित्तिरूपत्वादिति चेत्; न; द्विचन्द्रादिज्ञानस्याप्येवं प्रामाण्यापत्तेः। एकचन्द्रादौ तस्यापि तद्भावभावित्वेन प्रतिबन्धात्। तथा च न तत्प्रत्यक्षम्, भ्रान्तत्वात्[8]। नानुमानम्; अलिङ्गजत्वादिति प्रमाणद्वित्वनियमव्याघातकमन्यदेव प्रमाणं भवेत्। अथ तल्लिङ्गमेव एकचन्द्रादौ न प्रमाणम्; तल्लिङ्गजस्यानुमानस्यैव तत्र प्रामाण्यात्।

१—त्वं न तस्य आ०, ब०, प०। २ साधनस्वरूप। ३—क्तं तत—आ०, ब०, प०। ४—त्येवास्तु आ०, ब०, प०। ५ प्रत्यक्षतः। ६ साध्यत्वेन। ७ "प्रत्यक्षं ह्यभ्रान्तं प्रत्यक्षं कल्पनापोढमभ्रान्तमिति वचनात्"—ता० टि०।

"प्रतिभासो य ईदृक्षो न संस्थानविवर्जितः ।
एवमन्यत्र दृष्टत्वादनुमानं तथा च तत् ॥" [प्र० वार्तिकाल० १।१] इति वचनादिति चेत्; तल्लिङ्गमेवेति कुतः ? प्रतिबन्धादिति चेत्; अनुमानमपि तदेव स्यात् तदविशेषात् । तत्राप्यन्यदेव तदुद्भवमनुमानं प्रमाणमिति चेत्; न; तत्रापि पूर्ववल्लिङ्गत्वोपनिपातात् पुनरनुमानान्तरपरिकल्पनायामव्यवस्थापत्तेः । न चैवं प्रत्यक्षस्यापि प्रामाण्यम्, प्रतिबन्धबलेन तत्रापि लिङ्गत्वस्यैवोपपत्तेः; सत्यम्; वस्तुतः तत्प्रतिभासस्यापि लिङ्गत्वम् । अनभ्यासे तत एव प्राप्यस्यानुमानात् । अभ्यासे तु लिङ्गमपि प्रत्यक्षमेव, तस्यैव प्राप्यप्रतिभासित्वेन व्यवहारिभिरभ्यनुज्ञानात् । तदनुरोधादेव च तत्प्रामाण्यस्य बौद्धैः परिचिन्तनादिति चेत्; सिद्धमिदानीं तद्भदेवानुमानस्यापि तद्विषये तत्प्रतिभासित्वादेव प्रामाण्यं व्यवहर्तृभिस्तथैवाभ्युपगमात्, तत्प्रामाण्यस्यापि तदनुरोधादेव तैः परिचिन्तनात् । कः पुनस्तस्य विषय इति चेत् ? प्रत्यक्षस्य कः ? स्वलक्षणमेव परमाणुलक्षणमिति चेत्; न; तस्य कदाचिदप्यप्रतिवेदनात् । स्थूलपावकादिरिति चेत्; अनुमानस्यापि स एवास्तु तस्यैव तत्रापि प्रतिभासनात् । अर्थ एव तत्प्रतिभासो न भवति अस्पष्टत्वात्, न ह्यस्पष्टोऽर्थः प्रत्यक्षेण पुनरन्यथैवोपलम्भात् । न हि तस्यैव पुनरन्यथोपलम्भो विरोधात् । अस्ति च ततो नार्थ एवायम् । अत एवोक्तम्—
"न च स एव प्रतिभासोऽर्थो युक्तस्तस्य पुनः प्रत्यक्षेणान्यथा दर्शनात्" [ ] इति । इति चेत्; किम्पुनरिदं तस्यानर्थत्वम् ? बोधरूपत्वमेव, स्वतस्तथैव प्रतिपत्तेरिति चेत्; न तर्हि तत्रार्थविभ्रमः, अनर्थत्वप्रतिपत्त्या तस्य विरोधात् । अथ स एवानुमानविकल्पः तद्विभ्रमो न भवति, विकल्पान्तरस्यैव तज्जन्मनस्तत्त्वादिति चेत्; कथं तर्हि तस्यैव विभ्रमत्वमुक्तम्—"तदेतदतस्मिंस्तद्ग्रहो भ्रान्तिः" [ ] इति ? विभ्रमविकल्पजननादिति चेत्; न; तेनापि व्यतिरिक्तस्याप्रतिवेदनात् । अव्यतिरिक्तस्य च बोधरूपतयैव प्रतिपत्तेः कथं सोऽप्यर्थविभ्रमः ? मा भूत्तज्जन्मनो विकल्पस्यैव तत्त्वादिति चेत्; न; तेनापीत्यादेः प्रसङ्गादनवस्थापत्तेश्च । तन्नेदमनर्थत्वम् । अवस्तुरूपत्वमिति चेत्; तद्रूपस्य कथमनुमानेऽपि प्रतिभासनम् ? तत्कारणत्वादिति चेत्; न; तत्र तदसम्भवात् । तदव्यतिरेकादिति चेत्; वस्तुरूपत्वमेव स्यात् अनुमानस्य तत्त्वात् । तस्याप्यवस्तुरूपत्वमिति चेत्; सुस्थितमनुमानत्वम् बोधस्यैव तत्त्वोपगमात् अवस्तुरूपस्य च बोधत्वासम्भवात् । अवस्तु-वस्तुरूपमेवानुमानम्, तदग्राह्याकारस्यैवावस्तुरूपत्वात्, तदतद्रूपतया द्विरूपस्यानुमानस्य प्रतीतिबलेनाभ्युपगमादिति चेत्; अभिमतमापतितम्, अर्थस्यापि स्पष्टेतररूपतया द्विरूपस्यैवापत्तेः । द्विरूपतयैव प्रत्यक्षेऽन्यत्र च किन्न तस्य प्रतिभासनमिति चेत् ? न; प्रमाणस्य समानाकारगोचरत्वाभावत् । अन्यथाऽनुमाने ग्राह्याकारस्यावस्तुरूपत्वमपि प्रतिभासत इति कथं तत्रार्थभ्रान्तिः ? अनिश्चयादिति चेत्; तदव्यतिरिक्ते भासुरादिरूपेऽपि कथं निश्चयो यतः पावकादौ तदर्थिनः प्रवर्तेरन् ? निश्चये वा खण्डशो ग्रहणमप्यर्थस्य तथैव स्यात् प्रत्यक्षेण स्पष्टतया अन्यथा चानुमानेन । तन्न प्रतिभासभेदादर्थभेदप्रकल्पनं तयोरुपपन्नमिति नै

---

१ नः सं–आ०, ब०, प०। २–नव–आ०, ब०, प०। ३–दविशे–आ०, ब०, प०। ४–मनव–आ०, ब०, प०। ५ व्यवहार्यनुरोधादेव। ६–नादिति चे–आ०, ब०, प०। ७ सोऽप्यर्थ–आ०, ब०, प०। ८–वादवस्तुरूप–आ०, ब०, प०। ९ न सम्भावित–आ०, ब०, प०।

सुभाषितमेतत्—

"प्रामाण्यं वस्तुविषयस्तयोरर्थाभिदां जगौ ।
प्रतिभासस्य भिन्नत्वादेकस्मिंस्तदयोगतः ।।" [ ] इति ।

मा भूदनुमानमपि द्विरूपमिति चेत् ; किमिदानीं तदेव नास्ति, सदेकरूपं वेति ? न तावदेकरूपम् ; ग्राह्याकारमात्रेणावस्तुत्वात्, स्वालक्षण्यमात्रेण प्रत्यक्षत्वात् । तदेव नास्तीति चेत् ; किमिदानीं तत्प्रमाणम् यतः किमपि स्वाभिमतं सिध्येत् ? प्रत्यक्षमेव, तत एवाभिमतस्याद्वैतात्मनः स्वरूपस्य सिद्धेरिति चेत् ; कुतस्तस्य वस्तुसत्त्वम् ? प्रतिभासादिति चेत् ; न ; तस्य बहिर्भावसन्तानभेदादावस्तुसत्यपि भावात् । विचारसहात् प्रतिभासादिति चेत् ; यदि नामायं तथाऽपि तस्मात् कुतो वस्तुसत्त्वस्यावगतिः ? अविनाभावादिति चेत् ; आगतमनुमानम्—अविनाभाविनो धर्मात् धर्मान्तरावगमस्यैवानुमानत्वेन तद्वादिनामिष्टत्वात् । वस्तुसतोऽपि ततः कस्मात् स्वरूपस्यैवाद्वैतात्मनः परिज्ञानं न पुनर्बहिर्भावादेः भेदस्यापि ? तस्य तत्रानुपलम्भादिति चेत्; अस्तु नामानुपलम्भः तथापि कस्मादसौ तत्परिज्ञाननिषेधमवबोधयति ? अविनाभावादिति चेत् ; उक्तमुत्तरम्—'आगतम्' इत्यादि । तन्नानुमानमन्तरेण क्वचित्कस्यचिद्विधानं प्रतिषेधो वा सम्भवति, तत एवाह—**तदत्यये** । तस्यानुमानस्य अत्यये अभावे **क्वचित्** प्रत्यक्षे **एकस्य** वस्तुसत्त्वस्य **यद्विधानं** यश्च **प्रतिषेधो** बहिर्भावादिपरिज्ञानस्य तयोः **विरोधात्** अनुपपत्तेः । साधनात्साध्यविज्ञानमनुमानमिति सम्बन्धः । तन्न तदेव नास्ति । सतोऽपि नैकरूपत्वम् ; द्वैरूप्येऽपि न प्रत्यक्षाद्भिन्नविषयत्वमित्युपपन्नमेतत् विषयपरिच्छेदरूपमनुमानं प्रमाणत्वादिति ।

बार्हस्पत्यास्तु प्राहुः—सतोऽप्यनुमानस्य कथं प्रामाण्यम् ? अव्यभिचारिलिङ्गप्रभवत्वादिति चेत् ; तदेव कुतः ? प्रामाण्यादिति चेत् ; न ; परस्पराश्रयात्—तत्प्रभवत्वात्प्रामाण्यं ततश्च तत्प्रभवत्वमिति । अन्यत एव तस्य तत्प्रभवत्वमवगम्यते ततश्च प्रामाण्यमिति चेत् ; अन्यस्य प्रत्यक्षत्वे व्यर्थं तत्प्रामाण्यपरिकल्पनम्, तत एव साध्यस्यापि परिज्ञानात् अन्यथा तदव्यभिचारिलिङ्गप्रभवत्वस्य ततोऽनवगमात् । अनुमानत्वे तु कथं तस्यापि प्रामाण्यम् ? अव्यभिचारिलिङ्गप्रभवत्वादिति चेत् ; न ; तत्रापि 'तदेव कुतः' इत्यादेः प्रसङ्गादनवस्थानदौस्थ्योपनिपातात् । क्व चेदमव्यभिचारित्वं लिङ्गस्य प्रतिपत्तव्यम् ? दृष्टान्त इति चेत् ; न ; तत्र तद्गतस्यैव तस्य प्रतिपत्तेर्नान्यस्य । तस्य तत्प्रतिपत्तिरेवान्यस्यापि तत्प्रतिपत्तिः समानत्वादिति चेत् ; तर्हि धूमादेरिव तत्पुत्रत्वादेरपि तथा तत्प्रतिपत्तेः श्यामत्वादौ सोऽपि गमक एव भवेत् । भवत्येव यत्तत्समानः तस्याव्यभिचारात्, यस्तु गौरत्वादावपि दृश्यते स विलक्षण एवेति चेत् ; न कश्चिदिदानीं व्यभिचारी हेतुः सर्वस्यैव गमकत्वात् । सत्यमिदम्, तदपेक्षया यस्य वैलक्षण्यपरिज्ञानं तद्विकलप्रतिपत्रपेक्षयैव व्यभिचारस्य परिकल्पनादिति चेत् ; नेदानीमेकान्ततः क्वचिद्व्यभिचार इति कथं तेन परस्यैकान्तिकः पराजयः स्यात् । तत्र दृष्टान्ते तत्प्रतिपत्तिः । नापि सर्वत्र ; तद्गतः सर्वज्ञत्वप्रसङ्गात् । न पक्षेऽपि ; तत्र साध्यस्य प्रतिपत्तौ तत्प्रतिपत्तिवैफल्यात्, तस्यास्तदर्थत्वात् । अप्रतिपत्तौ तदव्यभि-

---

१ नास्ति तदे—आ०, ब०, प० । २ क्वचिदव्य—आ०, ब०, प० । ३ अव्यभिचारित्वस्य । ४—देरिति त—आ०, ब०, प० । ५ अव्यभिचारित्वप्रतिपत्तेः । ६ गोचरत्वादावपि आ०, ब०, प० । ७—तत् सर्वज्ञत्वेऽपि तत्र—आ०, ब०, प० ।

चारस्य दुरवबोधत्वात् । तन्नाव्यभिचारि किञ्चिल्लिङ्गमिति कथं तत्प्रभवत्वेन प्रामाण्यमनुमानस्येति ?

तेषामपि तदप्रामाण्ये कुतश्चैतन्यभूतोपादनत्वपरलोकनिषेधादेः प्रतिपत्तिः ? प्रत्यक्षादिति चेत् ; किमर्थमिदानीं शास्त्रम् ? विप्रतिपत्तौ तन्निवर्तनार्थमिति चेत् ; न ; प्रत्यक्षविषये तस्या एवाभावात् पृथिव्यादिवत् । भावेऽपि न तत् स्वत एव तस्या निवर्तकम् अप्रमाणकत्वात्। निवर्तकस्य प्रमाणस्योपदर्शनादिति चेत् ; न ; प्रत्यक्षस्यातन्निवर्तकत्वात् । अनुमानस्येति चेत् ; किं तदनुमानम् ? भूतोपादानं चैतन्यं तद्विकारे विकारित्वात् , यत् यद्विकारे विकारि तत्तदुपादानं दृष्टम् यथा मृद्विकारविकारिशिवकादि मृदुपादानम् , भूतविकारविकारि च चैतन्यम् , तस्मात्तदुपादानमिति । तथा, न तत् परलोकि भूतोपादानत्वात् शरीरवदिति । इति चेत् ; कथं पुनः सामान्येनानुमानस्य निषेधे तद्विशेषयोरनयोरपि सम्भवो विशेषस्य सामान्याभावेन विरुद्धत्वात् । एतदेवाह—**तदत्यये । क्वचित्** चैतन्ये । यत् **एकस्य** भूतोपादानत्वस्य **विधानम्** तत्परमनुमानं यश्चैकस्य परलोकित्वस्य **प्रतिषेधः** तत्परमनुमानं तयो- **विरोधादिति ।** अथेष्यत एव हीदृशमनुमानं परलोकाद्यनुमानस्यैव परपरिकल्पितस्य निषेधादिति चेत् , कुतस्तस्यैव निषेधः ? तत्साधनस्यैवाव्यभिचारनिर्णयाभावेनाभावादिति चेत् ; न ; तदभावस्यान्यत्राप्यविशेषात् । नचाविशेषे कस्यचिदिच्छया विधानं प्रतिषेधश्च परस्योपपन्नः । तदाह—**तदत्यये ।** तस्य साधनस्यात्यये **क्वचित्** । इष्टसाध्ये यत् **एकस्य** अनुमानस्य **विधानम्** इच्छया यश्चापरस्य **प्रतिषेधः** तयोः **विरोधात्** । भवतु तर्हि परप्रसिद्धादेवानुमानादभिमतसिद्धिरिति चेत् ; कः पुनः परो नाम ? काय एव देवदत्तादेरिति चेत् ; न ; तस्याचेतनत्वेनानुमानस्य तत्प्रसिद्धत्वायोगात् । तद्गतो बुद्धिविवर्त इति चेत् ; तस्यापि न प्रत्यक्षात्प्रतिपत्तिः, संशयाभावप्रसङ्गात् । न हि तत्प्रतिपन्ने संशयो रूपादिवत्[७] । अस्ति च 'साधुरयं धूर्तो वा, पण्डितोऽयं मूर्खो वा' इति । नापि व्यापारादिलिङ्गजादनुमानात् , तस्यापि [८]स्वयमसिद्धेः । ततोऽपि परप्रसिद्धादेव तत्प्रतिपत्तिरिति चेत् ; कः पुनरत्र परो यस्यातः प्रतिपत्तिः ? स एवेति चेत् ; न ; तस्याप्रतिपत्तावस्यैवाभावात् । प्रतिपत्तौ भावश्चेत् ; न ; परस्पराश्रयात्—भावात्प्रतिपत्तिः, ततश्च भाव इति । तदन्य एव परः, तत्प्रसिद्धादनुमानात् प्रकृतस्य प्रतिपत्तिरिति चेत् ; तस्यापि न प्रत्यक्षात्प्रतिपत्तिरुक्तदोषात् । नापि व्यापारादिलिङ्गजादनुमानात् ; तस्यापि स्वयमप्रसिद्धेः । परप्रसिद्धादेव ततोऽपि तस्य प्रतिपत्तिरिति चेत् ; न ; अत्रापि 'कः पुनः' इत्यादेः प्रसङ्गाद्व्यवस्थावैधुर्याच्च । तन्न परप्रसिद्धादपि ततः परेषामभिमतनिष्पत्तिः । कथञ्चैवं प्रत्यक्षस्यापि प्रामाण्यम् ? विषयपरिच्छेदादिति चेत् ; न ; तस्याऽसत्यपि विषये भावात् । अव्यभिचारादिति चेत् ; स एव तत्र कुतः ? प्रामाण्यात् । तदपि ? अव्यभिचारादिति चेत् ; न ; परस्पराश्रयस्य स्पष्टत्वात् । अन्यतस्तस्याव्यभिचारः प्रतीयते ततश्च प्रामाण्यमिति चेत् ; किं तदन्यत् ? प्रत्यक्षमिति चेत् ; न ; तदव्यभिचारस्यापि तदन्यतः प्रतिपत्तावव्यवस्थापत्तेः । अर्थक्रियाज्ञानमिति चेत् ; न ; अविशेषात् ।

---

१ अनुमानाप्रामाण्ये । २ शास्त्रम् । ३ "चार्वाकमतापेक्षया"—ता० टि० । ४ चैतन्यम् । ५—वदिति चेत् आ०, ब०, प० । ६ तद्विषययोः आ०, ब०, प० । ७ "रूपादौ संशयो नास्ति यथा, सुप एवेति सूत्रेण सप्तम्यन्तात् वत्प्रत्ययः ।"—ता० टि० । ८ "स्वस्य चार्वाकस्य"—ता० टि० । ९—वस्थातैर्म्याच्च आ०, ब०, प० ।

स्वत एव तत्राव्यभिचारप्रतिपत्तौ प्रथमज्ञानेऽपि स्यात् । तस्य क्वचिद्व्यभिचारोऽपि दृश्यत इति चेत्; न; अर्थक्रियाज्ञानस्यापि स्वप्ने तद्दर्शनात् । स्वप्नतज्ज्ञानविलक्षणमेव जाग्रत्तज्ज्ञानमिति चेत्; प्रथमज्ञानमपि व्यभिचारिज्ञानविलक्षणमेव किन्न स्यात् ? लोकस्य तथा विवेकाभावादिति चेत्; न; इतरत्रापि तुल्यत्वात् ।

अपि च, तत्त एवानुमानस्यापि किन्न प्रामाण्यम् ? सर्वत्र तद्विषये तदभावादिति चेत्; प्रत्यक्षस्यापि न स्यात्, तद्विषयेऽपि सर्वत्र तदभावात् । विद्यमानतज्ज्ञानप्रत्यक्षसाधर्म्यादितरतत्प्रामाण्यपरिकल्पनम् अनुमानप्रामाण्यमपि परिपुष्णाति विशेषाभावात् । अथ प्रत्यक्षमविचारितप्रामाण्यमेव परिगृह्यते, अन्यथा व्यवहारविलोपात्; किमिदानीमनुमानेन भवतोऽपराद्धम् यतस्तदपि तथाविधमेव न परिगृह्येत ? किं तेन परिगृहीतेनापि परमार्थपरिज्ञानस्य तादृशादनुपपत्तेरिति चेत्; प्रत्यक्षेणापि किं ततोऽपि तदनुपपत्तेरविशेषात् ? तस्मादनुपपन्नमेव प्रत्यक्षस्य विधानं प्रतिषेधश्चानुमानस्य । तदाह—

तदत्यये तनोति विस्तारयति प्रामाण्यमिति **तत्** प्रामाण्यहेतुर्विशेषः तस्य **अत्ययः** तस्मिन् **क्वचित्** पृथिव्यादौ यत् **एकस्य** प्रत्यक्षप्रामाण्यस्य **विधानम्** यश्च **क्वचित्** परलोकादावेकस्यानुमानप्रामाण्यस्य **प्रतिषेधः** तयोः **विरोधात्** इति ।

मा भूत्प्रत्यक्षमपि प्रमाणम्, उपप्लवस्यैव सर्वत्रोपगमादिति चेत्; न; तद्बादस्य प्रतिक्षिप्तत्वात् । ततः प्रत्यक्षं प्रमाणयता प्रमाणयितव्यमनुमानमपि, तदव्यभिचारिलिङ्गप्रभवत्वस्योत्तरत्र समर्थनादित्युपपन्नमिदम्—स्वार्थपरिच्छेदरूपमनुमानम् प्रमाणत्वात् प्रत्यक्षवदिति ।

प्रत्यक्षस्यापि न वस्तुतः स्वार्थपरिच्छेदः तत्काले तदर्थस्य कारणत्वेन व्यतिक्रमात्, अपि तु तदाकारस्वरूपपरिच्छेदस्य तत्रारोपादौपचारिक एव, तथानुमानस्यापि तत्परिच्छेदसाधने सिद्धसाधनमिति चेत्; अत्राह—

प्रत्यक्षं परमात्मानमपि च प्रतिभासयेत् ।
सत्यं परिस्फुटं येन तथा प्रामाण्यमश्नुते ॥ २ ॥ इति ।

तात्पर्यमत्र कीदृशं तत्प्रत्यक्षं यदाकारपरिच्छेदस्तद्विषये समारोप्येत[3] ? निर्विकल्पं निरंशपरमाणुविषयमिति चेत्; न; तस्य क्वचिदप्यपरिज्ञानात्, [4]संवृतविकल्पकालेऽपि नानाभागसाधारणस्य नीलादिवेदनस्यैवानुभवात्, अन्यथा तत्कल्पनायां न क्वचिद्वस्तुनि व्यवस्था स्यात् । परिज्ञानेऽपि [5]तस्य यदि विषयादुत्पत्तेः प्रामाण्यं चक्षुरादावपि स्यात् । उत्पत्तिविशेषात् सारूप्यलक्षणादिति चेत्; न; तथाऽप्यकिञ्चित्करादौ प्रसङ्गात् । अकिञ्चित्करं हि विषदर्शनमज्ञस्य संशयादीनामन्यतमस्यापि तेनाकरणात्, तस्यापि विषयसारूप्यात् प्रामाण्ये ततोऽपि नः प्रवृत्तिः स्यात् । तथा च—

वस्तुशक्त्यवबोधस्य दर्शनादेव सम्भवात् ।
वैद्यकाद्युपदेशोऽयं तदर्थो व्यर्थतां व्रजेत् ॥ १२१३ ॥

१—तज्ज्ञानात्र—आ०, ब०, प०। २ तत्रोपप्लववादी प्राह। ३—त तन्नि—आ०, ब०, प०। ४ संवृतवि—आ०, ब०, प०। ५ निर्विकल्पस्य।

क्षणक्षयादावध्यक्षं विपर्यासादिकार्यवत् ।
तस्याप्येवं प्रमाणत्वं तत्प्रवृत्तिक्षमं भवेत् ॥ १२१४ ॥
आरोपेण सताऽप्येवं तत्प्रामाण्यानुपद्रवात् ।
तद्व्यवच्छेदयत्तत्ते प्रयासायैव केवलम् ॥ १२१५ ॥
अनुमानं प्रमाणत्वं तद्व्यवच्छेदिनोऽपि तत् । ५
कथं नामावतिष्ठेत यत्प्रमाणद्वयं भवेत् ॥ १२१६ ॥
नीलादावेव तन्मानं यदि तत्रैव निर्णयात् ।
प्रागेवाधिगमे तस्मान्निर्णयः किमपेक्ष्यते ॥ १२१७ ॥
फलं तदेव तस्यापि निष्पन्नं तच्च दर्शनात् ।
निष्पन्नेऽपि व्यपेक्षायां व्यपेक्षा नावतिष्ठते ॥ १२१८ ॥ १०
परतोऽधिगमे तस्मात् दर्शनात्स पृथग् भवेत् ।
ततश्चेदं विरुध्येत तेनानर्थान्तरं फलम् ॥ १२१९ ॥ इति ।
तत्साधकतमत्वञ्च निर्णयस्यैव युज्यते ।
सत्येव तस्मिंस्तद्भावान्न सारूप्याद्विषादिवत् ॥ १२२० ॥
"तस्मात्प्रमेयाधिगतेः साधनं मेयरूपता ।" १५
विदुषा न तु वक्तव्या वक्तव्या निर्णयात्मता ॥ १२२१ ॥
निर्णयात्मनि चाध्यक्षे पृथगेवार्थभासनात् ।
उपचारात् परिच्छित्तिः कथं तत्रोपकल्प्यताम् ॥ १२२२ ॥ इति ।

शब्दार्थः कथ्यते—**परम्** इत्यस्यानन्तरम् **'अपि च'** इत्येतद् द्रष्टव्यम् । तदयमर्थः—**प्रत्यक्षम्** उक्तरीत्या निर्णयरूपं स्पष्टं ज्ञानम्, तत् **आत्मानं** स्वरूपं **प्रतिभासयेत्** प्रतिभा- २० समानं कुर्वीत । न केवलं तमेवापि तु **परमपि च** बहिरर्थमपि च **प्रतिभासयेत्** । कथम् ? **सत्यम्** अवितथम्, तत्त्वञ्च मुख्यतयैव तत्र तत्करणात् । उपचारेण तत्करणे हि वितथमेव तद् भवेत् । एवमपि सत्यं तत्करणं परस्मिन्नेव वक्तव्यम् नात्मनि विवादाभावादिति चेत्; न; दृष्टान्तार्थत्वात् तद्वचनस्य । यथा आत्मनि तत्करणं सत्यमेवं परस्मिन्नपीति । कथमेवम् ? इत्याह—**परिस्फुटम्** अनुभवारूढं येन । २५

प्रसिद्धानुभवं हीदं यन्नीलादि बहिर्गतम् ।
प्रत्यक्षे प्रतिभातीति सर्वप्राणभृतामपि ॥ १२२३ ॥
अर्थसारूप्यवादोऽयं यदि तत्रोपकल्प्यते ।
प्रत्यक्षेण स बाध्येत पावकानुष्णवादवत् ॥ १२२४ ॥

---

१ आरोप्येण आ०, ब०, प० । २—यत्कस्ते आ०, ब०, प० । ३ प्र० वा० २।३०६ । ४—यत्वञ्च मु—आ०, ब०, प० । ५ "प्रतिभासमानत्वकरणात्"—ता० टि० । ६ चेन्नैवमि—आ०, ब०, प० ।

तत्रानाकार एवेयं प्रतिकर्मस्थितिर्यथा ।
प्रकाशनियमो हेतोरित्यत्रैव निरूपितम् ॥ १२२५ ॥
तत्र सारूप्यतो मानं प्रत्यक्षमिति युक्तिमत् ।
निर्णयात्मतयैवास्य प्रमाणत्वव्यवस्थितेः ॥ १२२६ ॥

तदाह—**तथा** तेन परिस्फुटेन निर्णयप्रकारेण **प्रामाण्यमश्नुते** व्याप्नोति प्रत्यक्षमिति ततो युक्तं प्रत्यक्षवत् स्वविषयनिर्णयरूपमनुमानं प्रमाणत्वादिति साधनात् साध्यविज्ञानमित्युक्तम् ।

तत्र साधनं बहुवक्तव्यतया पश्चान्निरूपयिष्यन्निदानीं साध्यं निरूपयन्नाह—

साध्यं शक्यमभिप्रेतमप्रसिद्धं [ततोऽपरम्] । इति ।

ननु साधनार्हं[1] साध्यं तच्च शक्यादिरूपमेव । न ह्यशक्यस्य तदर्हत्वम् अशक्यत्वविरोधात् । नाप्यनभिप्रेतस्य प्रसिद्धस्य वा, अतिप्रसङ्गात् । ततः साध्यलक्षणस्य व्युत्पत्तिवशादेव प्रतिपत्तेः किं तत्प्रणयनेनेति चेत् ? तन्न ; तथा तत्प्रतिपत्तेर्गरीयस्त्वात् , व्युत्पत्तेर्बहुधाभावेन सम्मोहसम्भवाच्च । प्रसिद्धादन्यद् **अप्रसिद्धम्** तदेव साध्यम् , न प्रसिद्धम् तत्र साधनवैफल्यात् , प्रसिद्धिरेव हि फलं साधनस्य सा च प्रागेव सिद्धेति । का पुनरियं प्रसिद्धिः ? निश्चयशून्यमधिगतिमात्रमिति चेत् ; तन्न ; क्षणिकत्वादेरसाध्यत्वप्रसङ्गात् । अधिगतत्वेन प्रसिद्धित्वादिष्टिरेवेयमिति चेत् ; किमिदानीं साध्यम् ? न यत्राधिगतिरिति चेत् ; न ; स्वभावलिङ्गविषये सर्वत्र तद्भावात् । कार्यलिङ्गविषये नेति चेत् ; न ; तत्रापि व्याप्तिज्ञानेन तद्भावात् , अन्यथा अनुमानस्यैवानुत्पत्तेः । ततो न किञ्चिदनधिगतमस्ति यत्साध्यं सम्भवेदिति तल्लक्षणवर्णनं सौगतस्य प्रयासमात्रमाकाशचर्वणवत् । यदि चाधिगतमसाध्यम् , किमिदानीं तत्रानुमानेन ? समारोपव्यवच्छेद इति चेत् ; सोऽपि प्रध्वंसनम् , [2]मिथ्यात्वज्ञापनं वा भवेत् ? न तावत्प्रध्वंसनम् ; तस्य स्वरसभावित्वेनानुमानकार्यत्वानुपपत्तेः । अथ न साक्षात्तस्य तत्कार्यत्वम् , अपि त्वनुमानसहितात् समारोपादुत्तरस्य तस्यासमर्थस्य ततोऽप्यसमर्थतरस्य तस्मादप्यत्यन्तासमर्थस्योत्पत्तौ ततः परस्यानुत्पत्तेः, तस्य च स्वरसभङ्गुरत्वेन विनाशात् पारम्पर्येणैवेति ; तन्न ; यस्मात्—

समर्थकरणे शक्तिः समारोपस्य चेत्ततः ।
उत्तरोऽपि समारोपः समर्थः किन्न जायते ? ॥ १२२७ ॥
अनुमानेन तच्छक्तेर्विनाशादिति चेदसत् ।
निर्हेतुकत्वात्तस्यापि[4] तत्कार्यत्वाव्यवस्थितेः ॥ १२२८ ॥
स्वभावस्तादृशस्तस्य सानुमानात्ततो यतः ।
असमर्थादिरूपः स्यादारोप इति चेदयम् ॥ १२२९ ॥
स्वहेतोस्तस्य [5]चेद् व्यर्थमनुमानं प्रसज्यते ।
अनुमानाच्च नेवासौ समकालतया स्थितेः ॥ १२३० ॥

---

१ न्यायवि० श्लो० ३३ । २ "अल्पवक्तव्यमादौ वक्तव्यमिति न्यायात् ।"—ता० टि० । ३ मिथ्याज्ञानं आ०, ब०, प० । ४ शक्तिविनाशस्यापि । ५ प्र० वा० ३।२७९ ।

किञ्च, सानुमानात् समारोपादशक्तादिसमुद्भवे ।
सहकारिसहायात्किं नित्यात्कार्यभिदा न यत् ॥ १२३१ ॥
"अपेक्ष्येत परः कार्यम्" इत्यादि वदता त्वया ।
सहकारिप्रतीक्षत्वं नित्यस्य प्रतिषिध्यते ॥ १२३२ ॥
तस्मान्नास्ति समारोपप्रध्वंसस्तद्व्यवच्छिदिः । ५
मिथ्यात्वज्ञापनं सा चेन्नातत्त्वज्ञे तदत्ययात् ॥ १२३३ ॥

न हि तत्त्वज्ञापनमतत्त्वज्ञानात्सम्भवति, तत्त्वज्ञानादेव मरीचिकाविषयाज्जलारोपे तज्ज्ञापनस्योपलम्भात्, तद्वदनुमानादपि तत्त्वज्ञानादेव तज्ज्ञापनमिति साध्यमेव क्षणक्षयादिकम् । न चेदमधिगतिमात्रेण प्रसिद्धौ उपपन्नम्; क्षणभङ्गादेरपि प्रसिद्धिप्रसङ्गात् । प्रसिद्धस्य च **"स्वरूपेणैव निर्देश्यः"** [प्र० वा० ४।७८] इत्यत्र स्वरूपग्रहणेन साध्यत्वप्रत्याख्यानात् । तस्मान्निर्णीतिरेव प्रसिद्धिः । १० तदभावेऽधिगतमात्रस्यापि साध्यत्वोपपत्तेः । कथमेवमनेकान्तस्य साध्यत्वं बहिरन्तश्च प्रत्यक्षतः प्रसिद्धत्वादिति चेत् ? सत्यमिदं यदि तत्र विपरीतारोपेणानुपहतिः । निर्णयात्मनि प्रत्यक्षे सैव कथं तस्य तद्विरोधित्वादिति चेत् ? न; दृष्टत्वात् । दृश्यते हि दुरागमाभ्यासविपर्यासितचेतसां तद्विषयेऽपि बहिर्भावादौ तदारोपः—कस्यचिदसन्निति अन्यस्य बोध इति अपरस्योपप्लव इति । न च दृष्टस्यापह्नवो दर्शनादेव तत्प्रतिषेधात् । ततस्तदारोपविकला निर्णीतिरेव प्रसिद्धिः । अत एव प्रशब्दोपादानम्, १५ प्रकर्षेण तद्वैकल्यलक्षणेन सिद्धं निश्चितं प्रसिद्धमिति, प्रसिद्धयतिशयप्रतिपत्त्यर्थम् । यद्येवं प्रत्यक्षमपि कथमनेकान्तप्रतिपत्तये परं प्रत्युपदर्श्यते—

"जात्यन्तरं तु पश्यामस्ततोऽनेकान्तसाधनम्" [सिद्धिवि० परि० २] इति ।

न हि तस्मादारोपवतः तत्प्रतिपत्तिः, आरोपस्य तेन तदविरोधित्वेनानिवर्त्तनात्, तन्निवर्तनरूपत्वाच्च तत्प्रतिपत्तेः । अनारोपवतस्तु तदुपदर्शनमकिञ्चित्करमविवादादिति चेत्; नायं नियमो- २० ऽपरस्तत्त्वमवबोधयितव्य इति । अयन्तु नियमः—प्राश्निकाः प्रतिपादयितव्या इति । ते च वादिवचनात् प्रत्यक्षव्यापारं परामृशन्तोऽनेकान्तविषयमेव प्रतियन्ति, प्रतिपुरुषमेव तद्व्यापारस्यानुभवोपारूढत्वात् । न हि तेषां विपरीताभिनिवेशो यतः प्रसिद्धमप्यनुभवमपलपेयुः तत्कारणाभावात् । तदागमाभ्यास एव तेषामपि तत्कारणमिति चेत्; न; तस्यापि मन्दप्रज्ञ एव तत्त्वान्न महाप्राज्ञे । न ह्यपव्याहार इत्येव दुर्बलवद् बलवतोऽपि ततः प्रत्ययवायः । प्रज्ञातिशयवन्तश्च प्राश्निकास्ततो न तेषामनुभवव्यापारपरिपन्थी २५ कुतश्चिदप्यभिनिवेश इति यथानुभवमेव तत्त्वमवबुद्धयन्ते । तदनुमत्या प्रतिवाद्यपि यदि तथैवावबुद्धयेत सुतरां फलवत् तदुपदर्शनम् । यदि नावबुद्धयेत तथाऽपि न दोषः; प्राश्निकप्रत्यायनमात्रेणैव वादिपक्षव्यवस्थितेः । अप्रसिद्धस्य साध्यत्वे तादृशस्य साधनस्यापि तत्प्रसङ्ग इति चेत्; किमेवं सति विहन्येत ? साधनत्वमेव, साध्यस्य सतस्तत्त्वानुपपत्तेरित्ति चेत्; न; साध्यान्तरापेक्षया तत्त्याप्यव्याघातात् । कथमेकस्य रूपद्वयमिति चेत् ? कथं रूपत्रयम् ? तदपि नेति चेत्; नेदानीं साध्यं ३०

१—मतत्त्वज्ञापना—आ०, ब०, प० । २ विपरीतारोपः । ३ शून्यवादिनः । ४ विज्ञानवादिनः । ५ तत्त्वोपप्लववादिनः । ६—रोपतस्त—आ०, ब०, प० । ७ प्रत्ययायः आ०, ब०, प० ।

नाम किमपि तस्य साधनापेक्षत्वात्, साधनस्य च त्रैरूप्याभावेऽनुपपत्तेः। कल्पितं त्रैरूप्यमिति चेत्; द्वैरूप्यमपि तादृशं किन्न स्यात्? यतः साधनस्यापि साध्यत्वन्न भवेत्। तन्न तव्यवच्छेदाय रूपेणैवेत्यवधारणमुपपन्नम्।

अप्रसिद्धमप्युक्तमेव साध्यम्, नार्थावगतमिति कश्चित्; तन्न; अभीष्टस्य साध्यत्वात्, उक्तमेव यद्यभीष्टं तदेव साध्यम्। अथार्थावगतम्[1] तदेव नापरम्। तदाह—**अभिप्रेतम्** इति।

सत्यमिदम्, मयाऽप्यभीष्टस्यैव साध्यत्वोपगमादिति सौगतः; तन्न; क्षणिकत्वस्येष्टस्यापि तेनासाधनात्। तदेव[2] शब्दादौ कृतकत्वादिना साध्यमनित्यशब्देनापि तस्यैवाभिधानादिति चेत्; चक्षुरादावात्मार्थत्वमेव[3] संहतत्वादिना किमेवं न साध्यम् पारार्थ्यशब्देनापि तस्यैवाभिधानात्। दृष्टान्ते तस्याभावेन हेतोस्तदन्वयस्याग्रहणादिति चेत्; क पुनः क्षणिकत्वेनापि तस्य[4] तद्ग्रहणम्? प्रदीपादाविति चेत्; कुत एतत्? प्रत्यक्षत एव तत्र क्षणिकत्वस्य प्रतिपत्तेरिति चेत्; न; शब्दवत्तत्रापि तस्तत्प्रतिपत्तेर्विवादात्। अनुमानत एव तत्प्रतिपत्तौ तदन्यत्र तदन्वयग्रहणं लिङ्गस्याङ्गीकर्तव्यम्। तत्रापि तत एव तत्प्रतिपत्तौ तदन्यत्र तद्ग्रहणं तस्याङ्गीकर्तव्यमित्यनवस्थापत्तिः। यत्पुनरेतत्—प्रदीपादेरक्षणिकत्वे परापरस्तैलादिव्यापारो व्यर्थः। न हि तस्य तदुत्पत्तिरर्थः, प्रथमतद्व्यापारादेव तद्भावात्। नाप्युपकारः, तस्याप्यभिन्नस्य करणायोगात्। भेदे सम्बन्धाभावात् तस्येति व्यपदेशानुपपत्तेः। तेनापि तदन्तरकरणेऽनवस्थानुपङ्गात्। ततोपरापर एव तत्प्रभवः प्रदीपादिरिति; तदपि न शोभनम्; तस्ततोऽप्यप्रमाणात् तत्प्रतिपत्तेरयोगात्। प्रमाणत्वञ्च न प्रत्यक्षत्वेन; तत्रैव क्षणिकविषये विवादात्, अन्यथा शब्देऽपि तत एव तत्प्रतिपत्तेः किमनुमानेन? अस्ति हि तत्राप्येवं परामर्शः—यदि शब्दोऽप्यक्षणिको व्यर्थस्तत्रापरापरस्तालादिव्यापारः, तदुत्पत्तौ तदुपकारे च पूर्ववत्तस्यानुपयोगात्। ततोऽपरापर एव शब्दोऽपि तत्प्रभवः ततः क्षणिक एवेति। तत्र सतोऽपि ततस्तदभिव्यक्तिवादिनां न तत्प्रतिपत्तिः, एकत्वारोपानिवृत्तेरिति चेत्; प्रदीपादावपि भवेत्, तदभिव्यक्तिवादिनामपि साङ्ख्यानां भावात्, तेषु तदारोपस्याप्यनिवृत्तेः। तन्न प्रत्यक्षत्वेन तत्प्रामाण्यम्। नाप्यनुमानत्वेन; तल्लिङ्गस्यापि क्षणिकत्वेनान्यत्रान्वयग्रहणे तत्क्षणिकत्वस्याप्यपरापरतत्कारणव्यापारादनुमानतया प्रमाणात्प्रतिपत्तौ अनवस्थापत्तेः। तन्न बहिस्तेनाप्यन्वयग्रहणं यतस्तत्साध्यम्।

भवतु तर्ह्यनित्यत्वमेव साध्यम्, तस्य प्रदीपादावपि प्राक्-प्रध्वंसाभावमध्यवर्त्तिभावात्मनः प्रत्यक्षत एव प्रतिपत्तेः, न क्षणिकत्वं तस्यातिसूक्ष्मसमयपर्यवसायिभावस्वभावस्य तत्र ततोऽप्रतिपत्तेरिति चेत्; किमेवं साङ्ख्यस्यापि पारार्थ्यमेव साध्यं न भवेत्? तस्यापि शयनादौ प्रसिद्धत्वात्। आत्मार्थत्वस्याभीष्टस्यासाधने स्वपक्षसिद्धेरभावात्, तदुपक्रम्य तद्विपरीतसाधने साधनस्य विरुद्धत्वदोषात्। तद्विपरीतस्यैवोपक्रम्य साधने निर्विवादत्वेन साधनवैफल्यात्। तदुक्तम्—

---

१ "अभीष्टमिति पदमत्रापि सम्बन्धनीयम्।"—ता० टि०। २ क्षणिकत्वमेव। ३ "चक्षुरादिः परार्थः संहतत्वात् शयनासनादिवत्—इदमनुमानं सांख्यमतप्रसिद्धं बौद्धं प्रति आत्मास्तित्वसाधकम्।"—ता० टि०। ४ "शयनासनादौ"—ता० टि०। ५ "कृतकत्वादिहेतोः"—ता० टि०। ६ प्रत्यक्षतः क्षणिकत्वप्रतिपत्तेर्विवादसद्भावात्। ७ "उक्तप्रकारात् परामर्शात्"—ता० टि०। ८ क्षणिकत्वस्य त—आ०, ब०, प०।

"साधनं यद्विवादेन न्यस्तं तच्चेन्न साधयेत् ।
किं साध्यमन्यथाऽनिष्टं भवेद्वैफल्यमेव वा ॥" [प्र० वा० ४।३३]

इति चेत् ; तन्न ; क्षणिकत्वमुपक्रम्यानित्यत्वसाधनेऽप्येवं दोषात् । न दोषः, तत्साधनादेव तस्यापि तत्प्राप्तेरिति चेत् ; कथमन्यसाधनादन्यस्य तत्प्राप्तिः अन्यथेष्टवदनिष्टस्यापि तत्प्राप्तिः, तथा च सर्वो हेतुर्विरुद्धो दृष्टान्तश्च साध्यविकलः स्यात् । परस्परविरुद्धस्य साध्यसन्दोहस्य क्वचिदसम्भवादयमपि न दोषः, कुतश्चित् प्रत्यासत्तेरिष्टस्यैव सिद्धेरिति चेत् ; न तर्हि पारार्थ्यसाधनादेवाऽऽत्मार्थत्वसिद्धिमन्विच्छतः साङ्ख्यस्याप्ययं दोषः, प्रत्यासत्तिविरहादेवानिष्टसिद्धेर्निवारणात् । ततो नेदं तत्र दूषणं प्रज्ञाकरस्य—

"यद्यन्यस्मिन् साध्यमानेऽप्यसाध्यं सिद्ध्येदिष्टं सर्वसिद्धिस्ततः स्यात् ।
प्रत्यासत्तेस्तारतम्यं विनाऽपि सिद्ध्येत् किञ्चिन्नान्यदेतत् कुतः स्यात् ॥"
[प्र० वार्तिकाल० ४।३३] इति ।

कथं पुनः प्रत्यासत्तावप्यन्यसाधनादन्यस्य सिद्धिः, प्रत्यक्षतो हेतुसाधनादेव साध्यसिद्धेरनुमानवैफल्यप्राप्तेः । ततोऽन्यैव तत्कृता तत्सिद्धिरिति चेत् ; ततोऽपि कथमात्मार्थत्वस्य साधनम् अनन्वयात् ? प्रत्यासन्नस्य कस्यचिदन्वयिन एव ततोऽपि साधनमिति चेत् ; न ; अनवस्थादोषात् । इत्यपि दूषणमनित्यत्वसाधनात् क्षणिकत्वसिद्धावप्यनुवध्यमानमात्मनो न वैमुख्येन सख्यं प्रख्यापयति । तन्न बहिः क्षणिकत्वस्याप्यन्वय आत्मार्थत्ववत् । भवतु पक्ष एव सँ तस्येति चेत् ; न ; आत्मार्थत्वेऽपि प्रसङ्गात् ।

कः पुनरात्मनः चक्षुरादिभिरर्थः ? न तावदुत्पत्तिः ; नित्यत्वात् । नापि विषयानुभवः ; तस्यापि तदव्यतिरेकात्, अन्यथा न तस्येति व्यपदेशः, सम्बन्धाभावात् । तेनापि तदनन्तरकल्पनेऽनवस्थानप्राप्तेः । एतेन तदभिव्यक्तिः प्रत्युक्ता । तन्न कूटस्थस्य तैः कश्चिदप्यर्थः सम्भवति यस्तेषां तादर्थ्यम्, पक्ष एव च तस्यान्वयः स्यात् । अपरापरानुभवस्वभावस्य सम्भवत्येव तैरर्थ इति चेत् ; स तर्हि बौद्धप्रसिद्धः सन्तान एवेति तत्साधने विरुद्ध एव हेतुः स्यादिति चेत् ; उच्यते—किमिदं क्षणिकत्वमपि ? पूर्वापरपर्यायविच्छेद इति चेत् ; न ; तस्य नीरूपस्याप्रतिपत्तिविषयत्वात् । कालापकर्षपर्यन्तपर्यवसितं वस्त्वेवेति चेत् ; कथं तस्य वस्तुत्वम् ? न प्रतिभासात् ; व्यभिचारात् । नाप्यर्थक्रियासामर्थ्यात् ; तत्र तस्य निषेधात् । तन्न तस्यापि सम्भवो यस्य पक्ष एवान्वयः स्यात् । सान्वयविच्छेदरूपं तत्सम्भवत्येव तत्र तत्सामर्थ्यस्यानिषेधादिति चेत् ; तत्तर्हि जैनसिद्धमनेकान्तमेवेति तत्साधनेऽपि कथं न विरुद्धो हेतुः । तदुक्तम्—

"पारार्थ्यं चक्षुरादीनां यथाऽनिष्टं प्रसाधयेत् ।
सङ्घातत्वं तथा सत्त्वं शब्दानित्यत्वसाधने ॥" [ ] इति ।

तन्न सामर्थ्योपनिपातिनः साध्यत्वप्रतिपादनार्थं बौद्धस्येष्टग्रहणमुपपन्नम्, अनिष्टापत्तेः । न चैवमभिप्रेतं साध्यमिच्छतो जैनस्य काचित्तदापत्तिः ; तदभिप्रेतस्य बहिरन्वये सत्यसत्यपि अन्तर्व्याप्ति-

१ "साधनप्राप्तेः"—ता० टि० । २ साध्यसिद्धिरनु—आ०, ब०, प० । ३ अन्वयः ।

वलात् साध्यस्यैव भावात्। कथमेवमप्रवृत्ताभिप्रायस्य पावकादेर्झटिति धूमादिप्रतिपत्त्या साध्यत्वमिति चेत् ? न; योग्यतया तस्यापि तत्त्वाविरोधात्। अभिप्रेतमपि न सर्वं साध्यम्, अपि तु सम्भवत्साधनमेवेत्याह—**शक्य**मिति।

तदेवं विधिमुखेन साध्यं निश्चित्य तदन्यव्यवच्छेदमुखेनापि तदेव निश्चेतुं साध्याभासं निरूपयति—

ततोऽपरम्।

साध्याभासम् [विरुद्धादि साधनाविषयत्वतः।] ॥ ३ ॥ इति।

सुबोधमेतत्। किं तदपरमित्याह—**विरुद्धादि**। विविधं रुद्धं निराकृतं प्रत्यक्षादिना विरुद्धम् अनेनाशक्यमुक्तम्। न हि प्रत्यक्षादिनिराकृतं शक्यं साधयितुम्। **"न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः।"** [ ] इति न्यायात्। आदिशब्देनानभिप्रेतं प्रसिद्धञ्च। कुतस्तस्य न साध्यत्वमेव ? इत्याह—**साधनाविषयत्वतः** इति। साधनं वक्ष्यमाणं तस्याविषयत्वमगोचरत्वम्, तस्मात्तत इति। तदविषयत्वञ्च निराकृतस्याशक्यत्वात् अनभिप्रेतस्यातिप्रसङ्गात् प्रसिद्धस्य च वैफल्यात्।

तत्र प्रत्यक्षनिराकृतमेकान्तक्षणक्षयादि तद्विपर्ययस्यैव प्रत्यक्षतः प्रतिपत्तेः। तस्यैव ततः प्रतिपत्तिः, तद्विपर्यये तज्जन्मनो व्यवसायस्यैव व्यापारादिति चेत्; न; व्यवसायादन्यस्य प्रत्यक्षस्याप्रतिवेदनात्। अस्त्येवेदं केवलं तदेकत्वाभिमानान्न पृथगवसीयत इति चेत्; नन्वेवं पावकानुष्णत्वमपि न प्रत्यक्षनिराकृतं भवेत् प्रत्यक्षतस्तस्यैव परिज्ञानात्, तद्विपर्ययेऽपि व्यवसायस्यैव व्यापारात्। सतोऽपि तद्व्यतिरिक्तप्रत्यक्षप्रतिवेदनस्य तदेकत्वाभिमानादेव पृथगनवसायात्। अभिमतञ्चैतद् ब्रह्मविदाम्—तत्प्रत्यक्षस्य विधिमात्रविषयत्वेन शीतोष्णादिभेदाविषयत्वात्। तद्विपर्यये हि निषेधविषयत्वमपि भवेत् तद्भेदस्येतरेतराभावात्मकत्वेन निषेधात्मकत्वात्। अनवसितं तत्प्रत्यक्षं कथमस्तीति चेत् ? भवत्प्रत्यक्षमपि कथम् ? एकत्वादिविकल्पसंहारे तस्यैव निर्व्याकुलमनुभवादिति चेत्; न; भेदविकल्पसंहारे तस्यापि निर्व्याकुलमनुभवात्; तथा च श्राव्यते—**"यद्द्वैतं न पश्यति पश्यन्वैतद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्।"** [बृहदा० ४।३।२३] इति; श्राव्यत एव केवलं तत्संहारो न कदाचिदपि दृश्यत इति चेत्; न; इतरसंहारस्याप्यदर्शनात्। ततो यथा न निर्भेदसामान्यविषयं प्रत्यक्षम् अपि तु भेदविषयमेव तथैव प्रतीतेः, तद्विरुद्धत्वात् पावकानुष्णत्वं साध्याभासम्, तथा नासाधारणस्वलक्षणविषयं तत्, अपि त्वनुवृत्तव्यावृत्तादिरूपजात्यन्तरगोचरमेव तथैव प्रसिद्धत्वात्, प्रसाधितत्वाच्चेति तद्विरुद्धत्वादेकान्तक्षणिकादिकमपि साध्याभासमेव। अत एवैकान्तनित्यत्वादेरपि तदाभासत्वं प्रतिपत्तव्यम्।

तद्वदेव चानुमाननिराकृतम्, अनुमानेनापि जात्यन्तरस्यैव बहिरन्तश्च वस्तुतानिरूपणात्। एवमागमनिराकृतमपि, आगमस्यापि तद्विषयस्यैव प्रामाण्यात् तदन्यविषयस्य तत्प्रतिक्षेपात्। अनभिप्रेतं तु साध्याभासं पारार्थ्यमात्रम्, साङ्ख्यस्य तत्सिद्धावप्यात्मसिद्धेरभावात्। सौगतादेरप्यनित्यत्वादिकं तत्प्रतिपत्तावप्यभीष्टस्य क्षणभङ्गादेरनिश्चयात्। प्रसिद्धं तु जैनं प्रति सौगतादेर्जात्यन्तरम्। ततः

---

१ उष्णत्वे। २ प्रत्यक्षम्।

स्थितम्–'**ततोऽपरम् । साध्याभासं विरुद्धादि साधनाविषयत्वतः ।**' इति ।

यद्यप्रसिद्धं साध्यं धर्मिणो विद्यमानत्वमपि साध्यं भवेत् तत्रापि विप्रतिपत्तेः सम्भवात्, तदाह–

जातेर्विप्रतिपत्तीनां सत्ता साध्याऽनुषज्यते । इति ।

सुगममेतत् । विप्रतिपत्तीनामिति बहुवचनं संशयादिभेदेन तासां बहुत्वात् । न च साधयितुं शक्यत इति चोद्यस्याभिप्रायः । तत्रोत्तरमाह–

तथेष्टत्वाददोषोऽयम् [हेतोर्दोषत्रयं यदि] ॥४॥ इति ।

तथा तेन सत्ता साध्येति प्रकारेण **इष्टत्वात्** जैनस्याभिमतत्वाद् **अदोषो** दोषो न भवति **अयम्** अनन्तर इति ।

पर इदानीमशक्यसाध्यतां तस्यां दर्शयन्नाह–**हेतोर्दोषत्रयं यदि** इति । दोषाणामसिद्धत्वादीनां त्रयं **दोषत्रयं हेतोः** सत्तासाधनस्य **यदि** चेत् । तथा हि–यदि भावधर्मो हेतुः, कथमसिद्धे भावे सिद्धः ? सिद्धश्चेद्; भावोऽपि सिद्ध एवाव्यतिरेकात् । न हि तदव्यतिरिक्तं धर्मं प्रतिपद्यमानस्तमेव न प्रतिपद्येत व्याघातात् । ततो न तस्य साध्यत्वं प्रसिद्धस्यैव तत्त्वोपपत्तेः । अथोभयधर्मः; तदा व्यभिचारः, तस्य भाववदभावेऽपि भावात्, न तादृशो हेतुरतिप्रसङ्गात् । कथं पुनर्भावधर्मस्याभावे सम्भवो यतो व्यभिचारः ? परस्य वचनादिति चेत्; न; वचनात् तत्सम्भवे अतिप्रसङ्गात् । असम्भवन्तमपि ब्रुवाणो दृश्यत इति चेत्; स तर्हि मिथ्यावादित्वेनैव निगृहीतव्यो न व्यभिचारेण असम्भवतस्तदभावात्, अभूतमुद्भावयतश्च स्वयं निग्रहावाप्तेः । सम्भवत्येव कल्पितः स तत्रापि अमूर्तित्ववत् । अमूर्तित्वं हि मूर्तित्वप्रतिषेधमात्रमाकाशादाविव अभावेऽपि खरविषाणादावस्ति–अमूर्तमाकाशादि अमूर्तं खरविषाणमिति च व्यपदेशात्, तद्वदन्योऽपि कल्पितभाववदन्यत्रापि सम्भवन्न विरुध्यत इति चेत्; न; तस्य भावधर्मत्वाभावात्, अतत्स्वभावत्वात् अतत्कार्यत्वाच्च, अन्यथा कल्पितत्वानुपपत्तेः । व्यवहारमात्रात्तस्यापि तद्धर्मत्वे वस्तुतः पक्षधर्मत्वाभावात् स एव दोषो वक्तव्यो न व्यभिचारः, तस्यावस्तुसत्यसम्भवात् । **"वस्तुन्येष विकल्पः स्याद् विधेर्वस्त्वनुरोधतः ।"** [ ] इति स्वयमेवाभिधानात् । तन्न व्यभिचारोद्भावनमुपपन्नमिति चेत्; आस्तामेतत्, वक्ष्यमाणोत्तरत्वात् । यदि पुनरभावधर्मः; तदा विरुद्धः, भावसाधनार्थमुपनीतेनाभावस्यैव साधनात् । तन्न सत्तायां साध्यत्वं तत्साधनस्य दोषत्रयानतिवृत्तेः । तदुक्तम्–

"नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः ।
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ॥" [प्र० वा० ३।१९०] इति ।

विरुद्धत्वं विरुद्धसाधनत्वात् । तच्च नासिद्धस्यैवाभावधर्मस्य चाक्षुषत्वादिवत् । नापि सिद्धस्य; तत्सिद्धावेवाभावस्यापि सिद्धेरव्यतिरेकात् । व्यतिरेके हि न तस्य तद्धर्मत्वमसम्बन्धात् । तत्कार्यत्वं

---

१ मानमपि–आ०, ब०, प० । २ बहुत्वं न च–आ०, ब०, प० । ३ कल्पितो भावभाववद–आ०, ब०, प० । ४–त्तायामसा–आ०, ब०, प० ।

सम्बन्ध इति चेत् ; न ; अभावात्मनस्तदभावात्, भावात्मनश्च तद्धर्म्मस्यासम्भवात्। सम्भवन्तोऽपि न तत्कार्यत्वम्, अभावस्याहेतुत्वात्। तत्र व्यभिचारस्य विरोधस्य चोद्भावनमुपपत्तिमदिति चेत्; सत्यम्, अस्त्ययमुद्भावयितुर्दोषः, शास्त्रकारस्तूभयाभावधर्मयोरनभ्युपगमं परिहारं मन्यमानः परिहारान्तरमनुक्त्वा भावधर्मस्यासिद्धत्वमेव परिहरन्नाह—

५ **भ्रान्तेः पुरुषधर्मत्वात् [यथा वस्तुबलागमम्]**। इति।

अत्र 'अदोषोऽयम्' इत्यनुवर्तनीयम्। तदयमर्थः—यदुक्तम्—**"यो हि भावधर्मं तत्र हेतुमिच्छति स कथं भावं नेच्छेत्"** [प्र० वा० स्ववृ० १।१९३] इत्ययमदोषो दोषो न भवति, **भ्रान्तेः** भावधर्ममिच्छतोऽपि भावानिच्छासम्भवात्, तस्याश्च **पुरुषे** तद्धर्मत्वेन **सम्भवात्**। एतदेवोदाहरणेन दर्शयन्नाह—

१० **यथा वस्तुबलागमम्।**

प्रपेदे सर्वथा सर्ववस्तुसत्तां प्रतिक्षिपन् ॥ ५ ॥ इति।

यथा इत्युदाहरणोपदर्शनार्थम्। **प्रपेदे** प्रपन्नवान्। किम्? **वस्तुबलागमम्** वस्तु तात्त्विकं बलमभिमतसाधनसामर्थ्यं यस्य स वस्तुबलः स चासावागमश्च, आगमो ज्ञानं वचनं वा आगच्छत्यनेन आगमयत्यनेन वेति व्युत्पत्तेः, गमेश्च बोधार्थत्वात् वस्तुबलागमः तमिति। अनेन भावधर्म-
१५ मिच्छन्नपीति दर्शितम्। प्रसिद्धश्चैतद् बौद्धस्य—**"इदं वस्तुबलायातं यद्वदन्ति विपश्चितः।"** [प्र० वा० २।२०९] इति वचनात्। क एवं प्रपेदे? इत्याह—**सर्वथा** सर्वेण पररूपादिप्रकारेण स्वरूपादिप्रकारेण च **सर्वस्य** चेतनस्येतरस्य च **वस्तुनः सत्तां प्रतिक्षिपन्** निराकुर्वन् इति। अनेनापि भावं नेच्छतीति प्रतिपादितम्। इदमपि प्रसिद्धमेव—

"यथा यथार्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा॥" [प्र० वा० २।२०९]
२० इत्यभिधानात्। विविच्यन्ते इति च न नानात्वस्य वचनम् अपि तु विशरणस्यैव। तथा च व्याख्यानम्—**"तस्माद्यथा यथा वस्तु चिन्त्यते तथा तथा विशीर्यत एवेति किमत्र कुर्मः।"** [प्र० वार्तिकाल० २।२०९] इति। कुतः पुनस्तदागमस्य भावधर्मत्वमिति चेत्? अभावधर्मस्य वस्तुबलत्वाभावेन ततो भावप्रतिक्षेपायोगात्। तद्बलत्वमपि व्यवहारत एव तस्येति चेत्; न; तथाविधात्ततो भावप्रतिष्ठानस्यापि भावात् कथमेकान्तिकस्तत्प्रतिक्षेपो यत इदं सूक्तम्—**"विज्ञानं विज्ञानरूपतयापि शून्यमिति सकलधर्मशून्यतैव न्याय्या।"** [प्र० वार्तिकाल० २।२०९]
२५ इति। ततः प्रतिष्ठापरिहारेण प्रतिक्षेपमेव ब्रुवता तात्त्विकमेव भावधर्मत्वं तस्याभ्युपगन्तव्यम्। तदाह—

भावनादभ्युपैति स्म भावधर्ममवस्तुनि। इति।

भावनात् भावप्रतिक्षेपस्य स्वपरबुद्धौ भवतः करणात् **अभ्युपैति स्म** सौगतो वस्तुबलागममिति सम्बन्धः। कीदृशम्? **भावधर्मं** तदन्येन तद्भावनानुपपत्तेः। कस्मिन्? **अवस्तुनि**
३० भावप्रतिक्षेपे। ततो युक्तं भावमनिच्छतोऽपि भावधर्मस्येष्टत्वात्तस्य हेतुत्वमसिद्धत्वाभावात्। तदयमत्र

१—यगमपरि—ता०। २—च्छतो भा—आ०, ब०, प०। ३ विज्ञानतयापि आ०, ब०, प०। ४ तथाह आ०, ब०, प०।

प्रयोगः—अस्ति चेतनाचेतनात्मकं वस्तु वस्तुबलागमसद्भावात्। धर्मो हि सिध्यन् धर्मिणमवबोधयति अन्यथा तदनुपपत्तेः। ततो यदुक्तम्—

"भावोपधानमात्रे तु साध्ये सामान्यधर्मिणि।
न कश्चिदर्थः सिद्धः स्यादनिषिद्धश्च तादृशम्॥" [प्र० वा० ३।१८७] इति।

तत्प्रतिक्षिप्तम्; भावोपधानमात्रस्य सत्ताविशेषणमात्रस्य सामान्यधर्मिणो वस्तुमात्रस्यापि विप्रतिपत्तिविषयत्वे तत्सिद्धित एव स्वार्थसिद्धेः **'न कश्चिदर्थः सिद्धः स्यात्'** इत्यस्यायोगात्। कथञ्चायम् **"इदं वस्तुबलायातम्"** [प्र० वा० २।२०९] इत्यादिना भावोपधानमात्रमपि साध्यं प्रतिषेधन्नेव **"अनिषिद्धं च तादृशम्"** इति ब्रूयात् न चेत् प्रतिक्षणोपक्षीणबुद्धिः। अथ व्यवहारे तस्यानिषिद्धत्वं निषिद्धत्वं तु परमार्थे, ततो मार्गभेदात् न तद्वचनयोः परस्परतो विरोध इति चेत्; व्यवहारतोऽपि तन्निषेधे किं नश्यति? साध्यत्ववत् साधनत्वमपि नश्येत्, अस्ति च तत् शब्दे नित्यत्वस्य सत्येव (सतैव) शुद्धाशुद्धरूपेण साधनादिति चेत्; न तर्हि परमार्थतोऽपि तन्निषेधो भावप्रतिक्षेपस्यापि सतैव केनापि साधनोपपत्तेः। असतापि तत्साधने तदनित्यत्वसाधनमपि स्यात्। तन्न व्यवहारेऽप्यनिषिद्धमित्याद्युपपन्नमिति कथं न तद्वचनयोर्विरोधः? कथं वा निषिद्धस्य साधने सिद्धसाधनत्वम्।

तदेवं निरुपाधिकं सत्त्वं प्रसाध्य सोपाधिकं साधयन्नाह—

असिद्धधर्मिधर्मत्वेऽप्यन्यथानुपपत्तिमान्॥६॥
हेतुरेव यथा सन्ति प्रमाणानीष्टसाधनात्। इति।

असिद्धस्य अनिश्चितस्य **धर्मिणो धर्मत्वेऽपि** शब्दान्न केवलं सिद्धधर्मिधर्मत्वे, **हेतुरेव** गमक एव तद्धर्मत्वेऽप्यसिद्धिदोषाभावस्य निरूपितत्वात्। कीदृशः? **अन्यथा** साध्याभावप्रकारेण **अनुपपत्तिमान्** असम्भववान्। अत्रोदाहरणम्—**'यथा'** इत्यादि। यथेत्युदाहरणप्रदर्शने। **सन्ति** विद्यन्ते **प्रमाणानि**। बहुवचनं प्रतिपत्तृभेदेन तद्बहुत्वात्। कुतः सन्ति? **इष्टसाधनात्** इष्टस्य भावनैरात्म्यस्य साधनात्। क पुनः प्रमाणोपाधिकं सत्त्वं प्रतिपन्नं येन तदन्वयदृष्टिरिष्टसाधनस्येति चेत्? न; तदृष्टावपि अन्यथानुपपत्तिमत्त्वेन गमकत्वात्। मा भूत्रान्यथानुपपत्तिमतोऽन्यथा गमकत्वं, तथाँ गमकत्वम्, तथोपपत्त्यभावे कथमिति चेत्? न; अन्यथानुपपत्तेरेव पर्युदासवृत्त्या तथोपपत्तित्वात्, तस्याः प्रसज्यप्रतिषेधरूपायाः अप्रतीतिकत्वात्। हेतुस्वरूपे तत्प्रतिपत्तिरेव च तथोपपत्तेरपि प्रतिपत्तिः, बहिस्तदभावेऽपि दोषाभावात्। ततो नेदमत्र दूषणम्—

"उपात्तभेदे साध्येऽस्मिन् भवेद्धेतुरनन्वयः।" [प्र० वा० ३।१८८] इति।

बहिरनन्वयेऽपि क्षतेरभावात् अन्तरनन्वयस्यासिद्धत्वात्। कुतः पुनरिष्टसाधनं प्रमाणादेव न तद्विपर्ययादपीति चेत्? न; ततोऽनिष्टस्यापि साधनात्, प्रतिपक्षस्य व्यवच्छेदानुपपत्तेः। साधयता

---

१ "भावोपादानमात्रे"—प्र० वा०। २ भावोपादानमा—प० । ३ सत्येव के—आ०, ब०, प०। ४ असतोऽपि आ०, ब०, प०। ५—हारे तस्यानि—आ०, ब०, प०। ६—धनस्य चेत् आ०, ब०, प०। ७ तथानुग—ता०। ८ अन्यथानुपपत्तिप्रतिपत्तिरेव। ९—स्तदा भा—आ०, ब०, प०।

हि स्वपक्षं प्रतिपक्षो व्यवच्छेत्तव्यः, स्वपक्षसाधनस्यैवान्यथानुपपत्तेः । ततो वस्तुषु भावव्यवच्छेदेनाभावं साधयता प्रमाणादेव तत्साधनमनुमन्तव्यम् । भावनैरात्म्यवादिनः तत्साधनमपि नास्त्येव तत्कथमन्यथानुपपत्तिमत्त्वम् असिद्धस्य तदनुपपत्तेरिति चेत् ? न ; **"इदं वस्तुबलायातम्"** [प्र० वा० २।२०९] इत्यादेस्तद्वचनादेव तत्साधनस्य श्रवणात् । तदपि स्वप्नवदेव न तत्त्वत इति चेत् ; किमनेन कर्त्तव्यम् । इष्टसाधनस्याभावसाधनमिति चेत् ; सिद्धमिष्टसाधनं तदभावसाधनस्यैव तत्त्वात् । इदमपि स्वप्नवदेव न तत्त्वत इति चेत्; न ; अत्रापि[1] 'किमनेन' इत्यादेः प्रसङ्गादनवस्थादोषाच्च । ततो दूरमनुसृत्यापि किञ्चिद् ब्रुवता तात्त्विकमेव तच्च तत्प्रयोजनञ्च वक्तव्यमिति कथमिष्टसाधनस्यासिद्धिः यतोऽन्यथानुपपत्तिर्न भवेत् ? प्रमाणादिष्टसाधने प्रमाणस्यापि तदन्यतः साधनं तस्यापि तदन्यतः साधनमित्यनवस्थानम् । स्वतस्तत्साधने भावनैरात्म्यस्यापि तत एव तदिति किं प्रमाणेन यतस्तत्साधनात् तदवस्थाप्यत इति चेत् ? अत्राह—

इष्टसिद्धिः परेषां वा [तत्र वक्तुरकौशलम्] ॥७॥ इति ।

परं ब्रह्म तस्यैव परत्वेन ब्रह्मविदां प्रसिद्धत्वात् तदिच्छन्तीति **परेषो 'वा'** इति समुच्चये तेषामपि न केवलं बौद्धानाम् । किम् ? **इष्टस्य** ब्रह्मणः **सिद्धि**र्भवेदिति शेषः । तात्पर्यम्—

स्वत एव यथा भावनैरात्म्यं वः प्रसिद्ध्यति ।
न प्रमाणात्प्रमाणे तन्नैरात्म्यस्यानवस्थितेः ॥ १३४ ॥
सर्वभेदात्मकं तद्वत् ब्रह्म सिद्धं स्वतो भवेत् ।
प्रमाणान्नान्यतस्तस्मिन् तदभेदानवस्थितेः ॥ १३५ ॥

ततः किम् ? इत्याह—**'तत्र वक्तुरकौशलम्'** इति । **तत्र** तस्यां परेषामपीष्टसिद्धौ **वक्तुः** सर्वाभाववादिनः **अकौशलं** स्वपक्षस्य तत्प्रत्यनीकव्यवच्छेदेनाव्यवस्थापनादनिपुणत्वम् । ननु तदिष्टसिद्धिरप्यभावरूपैव **"नेह नानास्ति किञ्चन"** [बृहदा० ४।४।१९] इति **"स एष न"** [बृहदा० ३।९।२६] इति च भेदप्रतिषेधस्यैव तदाम्नायेन श्रवणादिति चेत् ; न; तेनापि तस्य पर्युदासस्यैव श्रवणात् न तुच्छस्य । अन्यथा **"ऐतदात्म्यमिदं सर्वम्"** [छान्दो० ६।८।७] इत्यादिना तदसाङ्गत्यप्रसङ्गात् । ततः सत्त्वैव सर्वभेदात्मिका तदिष्टसिद्धिः । इदमेवाह—

अतीतानागतादीनामपि सत्ता [अनुषङ्गवत्] । इति ।

आदिशब्दाद्वर्तमानानाम् । **अपि**शब्दात् स्वभावदेशभिन्नानाञ्च भावानां **सत्ता** विद्यमानता । 'इष्टसिद्धिः परेषाम्' इति सम्बन्धः । कीदृशी सा ? इत्याह—**अनुषङ्गवत्** इति । अनुषङ्गो देशकालादिभिरव्यवच्छेदः, तेन वदते दीप्यत इत्यनुषङ्गवत् , वदेः दीप्त्यर्थस्य विचि सत्येवंरूपात् । कथमिष्टसिद्धिरीदृश्यपि स्वतः परेषाम् ? **"गृह्यते अग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ।"** [कठोप० ३।१२] इति बुद्धिकृताया एव तस्याः श्रवणादिति चेत् ; भवदिष्टसिद्धिरपि न स्वतो भवेत् **"यथा यथार्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा ।"** [प्र० वा० २।२०९] इति

१—पि किमनेनकर्त्तव्यमिष्टसाधनं तदभावसाधनस्यैव तत्त्वात्, इदमपि स्वप्नवदेव न तत्त्वत इति चेन्नात्रपि किम—ता० । २ "दृश्यते त्वग्र्यया"—कठोप० ।

चिन्ताकृताया एव तस्या अप्याकर्णनात् । अभावरूपैव चिन्तेति चेत् ; बुद्धिरपि भावरूपैवेति समः समाधिः । अतो न प्रमाणाभावे परस्येवात्मनोऽपीष्टसिद्धिः । अस्तु तर्हि संवृत्यैव प्रमाणमिति चेत् ; किमिदं संवृत्येति ? स्वरूपेणेति चेत् ; वस्तुसदेव तर्हि प्रमाणं स्वरूपभावात् । तथा च परेषां जैनानामेवेष्टसिद्धिः सिषाधयिषितप्रमाणप्रतिष्ठानां न सौगतानाम्, सति तस्मिन् सर्वाभावस्याप्रतिष्ठितेः । तदाह—**इष्टसिद्धिः** इष्टस्य साधयितुमभिप्रेतस्य प्रमाणस्य सिद्धिः निर्णीतिः **परेषां वा** जैनानामेव वेत्यस्यावधारणार्थत्वात् । दूषणान्तरमाह—**तत्र** तस्मिन्स्वरूपे संवृत्यर्थे **वक्तुः** संवृत्यास्ति प्रमाणमिति ब्रुवाणस्य **अकौशलं** वचनवैदग्ध्याभावः । प्रसिद्धार्थं स्वरूपपदं परित्यज्य तद्विपरीतस्य संवृतिशब्दस्योपादानात् यथा 'तरुपङ्क्तिरसङ्कटैव मुनेः' इत्यनुक्त्वा 'तर्वाल्युर्वेवर्षेः' इति ब्रुवाणस्य । तत्र संवृत्येति स्वरूपेणेत्यर्थः । न पररूपेणेत्यपि; तत्रापि वस्तुतः प्रमाणसिद्ध्या परेषामेवेष्टसिद्धेर्वचनकौशलाभावस्य च तदवस्थत्वात् । अपि च, यदि पररूपम् ; कथं तेन भावः ? स चेत् ; कथं पररूपं व्याघातात् । अव्याघातेऽप्याह—**अतीतानागतादीनामपि सत्ता** इति । तेषामपि सत्त्वं पररूपेण प्राप्नुयादित्यर्थः, न केवलं प्रमाणस्यैवेत्यपिशब्दः । तथा च—

भावावबोधरूपेणैवातीतेन भवेदयम् ।
भावनैरात्म्यबोधस्ते भविकालसमन्वयी ॥ १२३६ ॥
तेनैव भावबोधः स्यादतीतो भावनाऽथवा ।
तद्गोचरो विचारश्च सर्वोऽप्येवं वृथा भवेत् ॥ १२३७ ॥
सतापि तेन पूर्वस्मिन् भावग्राहनिवर्तनात् ।
परत्रापि विना तेन भावनैरात्म्यनिर्णयात् ॥ १२३८ ॥
प्रतिपाद्यो न कश्चित्स्यादेवमन्यत्र कथ्यताम् ।

तन्न पररूपेणेत्यपि तदर्थः । अयं तर्हि स्यात् संवृत्या स्वपरविकल्पनिर्मुक्तयेति चेत् ; न ? तन्निर्मुक्तेरप्यस्य स्वरूपत्वेन तत्रापीष्टसिद्धिरित्यादेर्दोषस्याविशेषात् । तदाह—**अनुषङ्गवत्** अनुषङ्गनं पूर्वदोषस्यानुगमोऽनुषङ्गः स विद्यतेऽस्येति **अनुषङ्गवत्** । तन्निर्मुक्तिः संवृतिरिति परमतं तस्यानुक्तस्य प्रक्रमवशात् आगमात् । यदि पुनस्तुच्छैव तन्निर्मुक्तिः ; तर्हि स्पष्टमभिधातव्यम्—'न कथञ्चिदप्यस्ति प्रमाणम्' इति, किं संवृत्याऽस्तीति ? प्रथमत एव तदभावाभिधाने तत्त्वगवेषिणामुद्वेगात् न तत्त्वप्रतिपत्तावाभिमुख्यं भवेत्, ततो मा भूत्तथोद्वेग इति प्रच्छादिताभावस्य प्रमाणस्येदमभिधानं संवृत्याऽस्तीति । तदुक्तम्—

"सर्वमस्तीति वक्तव्यमादौ तत्त्वगवेषिणा" [ ] इति ।

न चैवं वदतः किमप्यकौशलमनुद्वेगवचनादेव कौशलोपपत्तेरिति चेत् ; न ; एवं नित्येश्वरप्रधानादेरपि वचनप्रसङ्गात्, तदभावस्याप्रच्छादितस्य वचने लोकस्योद्वेगाविशेषात् । उद्विजतां वा लोको मा वा यथावस्थितमेव तु तत्त्वं तत्त्वविदा वक्तव्यम्, अन्यथा वञ्चकत्वप्रसङ्गादिति चेत् ; न ;

---

१ तर्वाद्युर्वेवर्षे इ-आ०, व०, प० । तर्वालिः तरुपंक्तिः ऊर्वेव विशालैव ऋषेः मुनेः । २-द्विर्व-आ०, व०, प० । ३ तेनाभा-आ०, व०, प० । ४-सिद्धेरि-आ०, व०, प० । ५-नुयुक्त-आ०, व०, प० ।

प्रमाणतत्त्वस्यापि तथैव वक्तव्यत्वापत्तेः । अथ तत्त्वं पश्चात् संवृत्यर्थपर्यालोचनपाटवाल्लोकः स्वयमेव प्रत्येति । यदुक्तम्—

"पश्चादवगतार्थस्य भावग्राहो निवर्तते ।" [ ] इति ;

ततो न पूर्वमेव तद्वचनेनोद्वेगः क्रियत इति चेत् ; ईश्वरादितद्वचनेनापि न कर्तव्यः तस्यापि तथैव प्रतीतेः । ततः संवृत्या प्रमाणादिवत् ईश्वरादिकमपि सौगतेन सिद्धान्तीकर्तव्यम् । तदाह—**इष्टसिद्धिः परेषां वा** इति । **इष्टस्य** लोकपूजितस्येश्वरस्य **सिद्धिः** संवृत्या स्यात् **परेषां** प्रमाणादीनामिव **'वा'** इत्यस्येवार्थत्वात् । ततः किम् ? इत्याह—**'तत्र'** इत्यादि । तत्रेति तस्येत्यस्यार्थे द्रष्टव्यः । तदयमर्थः—**तत्र** तस्येष्टस्य **वक्तुर्वदतः** बौद्धस्य । कथं वक्तुः ? **अनुषङ्गवत्** । अनुषङ्गो दोषोऽनुपज्यमानत्वात् तद्वत् यथा भवति, एवं न कौशलम् अकौशलमभिमतस्यैव दोषवत्त्वेन वचनात् । अपरमप्यतिप्रसङ्गमाह—**'अतीत'** इत्यादि । अतीतानां घटादीनां कपालादिषु तेषाञ्चानागतानां घटादिषु आदिशब्दाद्वर्तमानानां दण्ड-चक्रादीनां परस्परात्मनि **सत्ता** शक्तिरूपेण साङ्ख्यसिद्धा **सापि** न केवलमिष्टसिद्धिरेव संवृत्या सौगतस्य भवेत् । 'ततः किम्' इति प्रश्ने पूर्ववदत्रापि **'तत्र'** इत्यादि वक्तव्यम् । तत्र संवृत्याऽस्तित्वं प्रमाणानां यतस्तत्साधनं सिद्धसाधनं भवेत् ।

अभावैकान्ते विरोध एवोद्भावयितव्यः—'यदि तदेकान्तो न किञ्चित्तत्साधनम्, तच्चेत न तदेकान्तः' इति किं सत्तासाधनेन ? तावता तद्वादिनः पराजयादिति चेत् ; उच्यते—विरोधो नाम हेतोरेव विपक्षगोचरो व्यापारः स कथमसतस्तस्य स्यात् ? सतश्चेत् ; सिद्धं तदुद्भावनं भावसाधनं तस्य तन्नान्तरीयकत्वात् । अस्तीदं किन्तु तेन तदेकान्तनिषेध एव कर्तव्यो भावं साधयतापि तस्यावश्यकर्तव्यत्वात्, अन्यथा परस्यापरिक्षीणपक्षताप्राप्तेरिति चेत् ; न; तन्निषेधस्य नीरूपस्य करणेऽपि तत्प्राप्तेरविशेषात् । भावरूपस्य तु करणं भावसाधनमेव । न चायमप्येकान्तः, यस्मान्न हि तस्य स्वतः प्रतिपत्तिः ; विप्रतिपत्तेः । नापि परतः तदेकान्ते परस्यैवा-भावात् । भावे तद्विरोधः, परस्परव्यवच्छेदस्यापि भावात् । अवस्त्वेव परम् अविद्याक्लृप्तत्वात्, न हि तेन तदेकान्तो विरुध्यते चन्द्रमस्येकत्वैकान्तवत् द्वित्वेनेति चेत् ? न ; अभावैकान्तस्याप्येवं परतः प्रतिपत्तिप्रसङ्गात् । सति तस्मिन् कथं तदेकान्त इति चेत् ? न ; तत्सत्त्वस्य सांवृतत्वात् । वस्तुसता हि तेन तद्विरोधो न सांवृतेन तदनुकूलत्वात् । सांवृतात् कथं प्रतिपत्तिरिति चेत ? अविद्योपक्लृप्तात् कथम् ? न ततोऽपि तत्प्रतिपत्तिः भेदारोपस्यैव निवृत्तेः । परं हि परैराम्नाय-ज्ञानमुच्यते, तच्च **"अस्थूलमनल्पमह्रस्वमदीर्घमलोहितमस्नेहमच्छायम्"** [बृहदा० ३।८।८] इति स्थूलादिभेदपर्युदासप्रतिभासितयोपजायमानमखिलमपि भेदारोपमभ्यासपाटवाद्विनि-वर्त्य स्वयमपि निवर्तते विषवत् । इष्टं हि विषं विषान्तरमुपशमय्य पुनरात्मानमप्युपशमयतीति,

---

१—दिः त—आ०, ब०, प० । २—ति सर्वत्रेत्य—ता० । ३ तत्रेष्टस्य प० । ४ दोषत्वेन आ०, ब०, प० । ५—मस्य स्या—आ०, ब०, प० । ६—णप्रेक्षता—आ०, ब०, प० । अखण्डितपक्षता । ७ चन्द्रस्यैक—आ०, ब०, प० । ८ विद्यं हि आ०, ब०, प० ।

तन्निवृत्तौ च निराकुलो भावैकान्तः परनिःश्रेयसरूप इति चेत् ; न ; तद्भदभावैकान्तस्याप्यव्याकुलत्वापत्तेः, तत्रापि हि परं [1]परैर्विचारज्ञानैर्मूरीक्रियते । तदपि न चित्रमेकं वस्तु ; विरोधात् । नापि निष्कलस्वलक्षणरूपम् ; अपरिबोधगोचरत्वादिति भावप्रतिषेधपरतयोपजायमानमशेषमपि भावारोपमपसार्य गरलनिदर्शनबलेनात्मानमप्यपसारयदभावैकान्तमेव तन्निःश्रेयसमव्याकुलमवकल्पयेत् । कथं तादृशेनाप्यतद्विषयेण तदवकल्पनमिति चेत् ? आम्नायज्ञानेनापि कथम् ? न हि तस्यापि तद्विषयत्वम् । ५

"यः[2] सर्वेषु वेदेषु तिष्ठन् सर्वेभ्यो वेदेभ्योऽन्तरो यं सर्वे वेदाः न विदुर्यस्य सर्वे वेदाः शरीरं यः सर्वान् वेदानन्तरो यमयति स त्वन्तर्याम्यमृतः ।" [बृहदा० ३।७।१५] इति श्रुत्यैव तस्य तदविषयत्वनिवेदनात् । स्वसंवेदनादेव तस्य तत्त्वावकल्पनमिति चेत् ; न ; विवादात् । तदवस्थागतस्य न विवाद इति चेत् ; तदपि कथं तस्यापरिज्ञाने ? सति हि तत्परिज्ञाने तद्गतं निर्विवादत्वमन्यद्वा सुपरिज्ञातं भवति नान्यथा । न चान्यतस्तत्परिज्ञानं भवतः सम्भवति, **"विज्ञानान्तरमरे (विज्ञातारमरे) केन विजानीयात्"** [बृहदा० ४।५।५] इति तदनन्यवेद्यताया एव श्रवणात् । तन्न भावाभावैकान्तयोः परस्परतोऽतिशयो यत एकत्र विरुद्धमिष्टसाधनं परस्यं[3] सत्त्वं साधयेत् तत्रापि तदभावात्, स्वपरभावाभ्यां[4] भावाभावात्मकस्य साधयत्येव तत्र तस्य प्रतीतेः । ततो युक्तं विरोधादपि सत्त्वसाधनम् । १० १५

विज्ञानवादी प्राह—मा भूदभावैकान्तः, तथापि विज्ञानमेवास्तु न बहिरर्थः तस्य तद्व्यतिरेकेणाप्रतीतेरिति ; सोऽपि न प्रातीतिकवादी ; यतः—

अविवेके हि नीलादिज्ञानयोरवकल्पिते ।
बहिरेव भवेद्देहाद् बोधो नीलादिरूपवत् ॥ १२३९ ॥
तज्ज्ञानरहिताद्देहात्कथमेवं ततो वचः ।
"दर्शनं नीलनिर्भासं नार्थो बाह्यः" इति स्फुटम् ॥ १२४० ॥
तद्ज्ञानरहितोऽप्यन्यो[5] यद्यन्यावगतं वदेत् ।
सुगतावगतं तत्त्वं किन्न वक्ति कृपीवलः ॥ १२४१ ॥
अन्तःशरीरमेवायं नीलादिर्यदि बोधवत् ।
अन्तर्गतगिरिः कायो गिरेरपि पृथूभवेत् ॥ १२४२ ॥
अन्तर्गतः कुतश्चायं बहिष्ठेनावभासताम् ।
वासना प्रकृतेः [6]तद्यद्यसंस्तद्वद्विभासताम् ॥ १२४३ ॥
तथा च शून्यवादाप्तेः ज्ञानवादो विभज्यते ।
न च ज्ञानं निराकारं सौगतैरुपगम्यते ॥ १२४४ ॥ २० २५

---

१ बौद्धैः । २—मुररीक्रि—आ०, ब०, प० । ३ "यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरः ....."—बृहदा० । ४—स्य तत्त्वं सत्त्वं सा—आ०, ब०, प० । ५—परभावाभावाभ्या—आ०, ब०, प० । ६ प्र० वा० २।३३५ । ७ "देहः"—ता० टि० । ८ "देहबहिर्गतबोधज्ञातम्"—ता० टि० । ९ बहिश्चेन्नाव—आ०, ब०, प० । १०—स्तद्वदसंसद्वद्वि—आ०, ब०, प० ।

यतः, शून्यप्रवादस्य प्रत्याख्यानं प्रकल्प्यताम् ।
सतोऽपि ब्रह्मणस्तस्य विशेषः कल्प्यतां कुतः ॥ १२४५ ॥
अनित्यत्वाविभुत्वादेरिति चेन्नेदमुत्तरम् ।
नीलादेरिव तस्यापि वासितस्यैव भासनात् ॥ १२४६ ॥
सन्नेव यदि नीलादिः निर्बाधत्वेन बुध्यते ।
बहिर्भावोऽपि सन्नेव तथा किन्नावबुध्यते ॥ १२४७ ॥
न हि तत्रान्यथा ज्ञानं कदाचिदपि दृश्यते ।
बाधितो येन सैषः स्याद् बहिर्भावः प्रतीतिमान् ॥ १२४८ ॥

स्यान्मतम्—शरीरनीलादितदन्तरालप्रतिभासमेकमेव ज्ञानम्, न तत्कस्यचिदन्तर्नापि कुतश्चिद् बहिः स्वरूप एवावस्थानात् तदयमदोष इति; [2]तन्न; 'दूरादेवाहमत्रस्थो नीलादिकमवलोकयामि' इति नीलादितद्भेदनयोः भेदस्यैवानुभवतः प्रतीतेः । तस्याश्च भेदानवगमे बुद्धिचैतन्ययोरभेदप्रतीतेरप्यभेदावगमो मा भूत्, तथा च यथा साङ्ख्यं प्रत्येतत्त्वयोच्यते—

"अभिन्नवेदनस्यैक्ये यन्नैवं तद्विभेदवत् ।
[3]सिद्ध्येदसाधनत्वेऽस्य न सिद्धं भेदसाधनम् ॥" [प्र० वा० २।२७८] इति ।

तथा च भवन्तं प्रत्यस्माभिरिदमुच्यते—

विभिन्नवेदनाद् भेदे यन्नैवं तदभेदवत् ।
सिद्ध्येदसाधनत्वेऽस्य सिद्धं नाभेदसाधनम् ॥ १२४९ ॥ इति ।

कथं पुनर्नीलादेः तद्भेदनाद् भेदे 'नीलादिः प्रतिभासते' इति प्रतिभाससामानाधिकरण्येन प्रतिपत्तिः, अप्रतिभासात्मनि तदनुपपत्तेरिति चेत् ? अभेदेऽपि 'नीलादिः' इत्येव[4] 'प्रतिभासः' इत्येव वा भावात् कथं तथा प्रतिपत्तिः ? अन्वयव्यतिरेकाभ्यां भेदपरिकल्पनात्, अन्वितो हि प्रतिभासः तस्य पीतादावपि भावाद्, व्यतिरिक्तश्च नीलादिर्विपर्ययात् ।

तदनेन विरुद्धधर्माध्यासेन भेदपरिकल्पनमुपस्थाप्यमानं सामानाधिकरण्यव्यवहाराय कल्पते इति चेत्; उच्यते—

विरुद्धधर्माध्यासोऽयं तत्त्वतो यदि विद्यते ।
नीलतज्ज्ञानभेदः स्यात् तात्त्विकः कल्पितः कथम् ॥ १२५० ॥
कल्पितश्चेत्तदध्यासः कुतस्तत्कल्पनं मतम् ।
अन्यतश्चेत्तदध्यासादनवस्था प्रसज्यते ॥ १२५१ ॥
तद्भेदकल्पनादेव प्राच्यात्तद्भेदकल्पनम् ।
प्राच्यश्चापि ततः प्राच्यान्न चेहास्त्यनवस्थितिः ॥ १२५२ ॥

१—त्यत्वावि—प० । २ तत्र प० । ३ विद्धे साधनत्वेऽस्य न सिद्धि भेदसाधनम् । ता० । ४—च भासतेरित्येवाभा—आ०, ब०, प० ।

अनादेस्तत्प्रबन्धस्य प्रवृत्तेरिति चेत्तथा ।
भेदस्तात्त्विक एवासौ किन्न तत्कल्पितो मतः ॥ १२५३ ॥
अभेदस्यैव संवित्तेः स्वतश्चेन्नीलवेदनम् ।
तद्भेदकल्पनं चैतद्द्वयं केनावगम्यताम् ॥ १२५४ ॥
तद्व्यापारं कथं विद्यादजानानश्च तद्द्वयम् ।
एकत्वं दर्शनाभेदः कल्पनादिति यद्वदेत् ॥ १२५५ ॥
केनापि तद्द्वयज्ञाने जानीयादर्थमप्यसौ ।
ज्ञानस्यैवान्यवेद्यत्वं नार्थस्येत्यव्यवस्थितेः ॥ १२५६ ॥

तदाह—

अतश्च बहिरर्थानामपि सत्ता प्रसाध्यते ॥ ८ ॥ इति ।

अतः अस्मादनन्तरसाधितात् प्रमाणात्, सामान्योक्तावपि प्रत्यक्षादिति प्रतिपत्तव्यम् । अनुमानस्य वक्ष्यमाणत्वात् । **च**शब्दः सौष्ठवे । **बहिरर्थानां** जडनीलादीनाम् **अपि**शब्दान्न केवलं विज्ञानानां **सत्ता** विद्यमानता **प्रसाध्यते** प्रकर्षेण सिद्धिं नीयते । कथं पुनः प्रत्यक्षतस्तत्साधनम्, तस्य तदभावेऽपि तन्निर्भासिनो दर्शनात् ? तैमिरज्ञानवदिति चेत् ; स्वरूपसाधनमपि न भवेत्, तदभावे तन्निर्भासिनोऽपि [1]दर्शनात् भ्रान्तस्य विभागवेदनवत्[2] । न तद्विभागस्य प्रत्यक्षतः साधनं तद्विवेकस्यैव साधनादिति चेत् ; न तर्हीदमुपपन्नम्—

"ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ।" [प्र० वा० २।३५४] इति ।

तद्भेदविवेकवेदिन एव तल्लक्षणानुपपत्तेः । प्रत्यक्षजन्मनो विकल्पादेव तल्लक्षणमिति चेत् ; न ; ततोऽपि व्यतिरिक्तस्यार्थवेदलक्षणात्[3] । अव्यतिरेके तदात्मा तत्त्वतः सविभागः स्यात् तत्प्रत्यक्षात्मापीति न सूक्तमेतत्—**"अविभागोऽपि बुद्ध्यात्मा"** [प्र० वा० २।३५४] इति । तदात्मन्यपि तल्लक्षणमन्यत एव विकल्पादिति चेत् ; न ; पूर्ववत्प्रसङ्गादनवस्थितेश्च । ततो गत्वापि दूरं स्वत एव कुतश्चित्तल्लक्षणमनुमन्तव्यम् । एवञ्च यथेदमर्थग्रहापेक्षयोच्यते—

"यथाकथञ्चित्तस्यार्थरूपं मुक्त्वावभासिनः ।
अर्थग्रहः कथं सत्यं न जानेऽहमपीदृशम् ॥" [प्र० वा० २।३५३] इति ।

तथेदं स्वग्रहापेक्षया वक्तव्यम्—

यथा कथञ्चित्तस्यात्मरूपं मुक्त्वावभासिनः ।
आत्मग्रहः कथं सत्यं न जानेऽहमपीदृशम् ॥ १२५७ ॥ इति ।

विभागग्रहस्य सबाधत्वादसत्यत्वेऽपि सत्यत्वमेव विपर्ययात्[4] संवित्तिमात्रग्रहस्येति चेत् ; न ; अर्थग्रहस्यापि सत्यत्वापत्तेः । न हि तद्ग्रहोऽपि सर्वः सबाध एव ; बाधस्यैवाभावप्रसङ्गात्, सत्येव निर्बाधमरीचिग्रहे जलग्रहस्य बाधोपलम्भात् । वास्तवञ्च मरीचौ [5]तज्ज्ञानस्य निर्बाधत्वं न वासनास्थैर्यात्,

---

१ दर्शनादिविभा—आ०, ब०,प०। २ "ग्राह्यग्राहकसंवित्तिविभागवेदनवत्।"—ता० टि०। ३—र्थस्य संवित्तिवदिति चालक्षणात् आ०, ब०, प०। ४ "निर्बाधत्वात्"—ता० टि०। ५ मरीचिज्ञानस्य।

एवं स्वरूपेऽपि प्रसङ्गात् । ततो मरीचिरर्थ एव । जलं तर्हि किं स्यादिति चेत् ? ग्राह्यादिविभागवन्न किञ्चिदिति ब्रूमः । ततः प्रत्यक्षादर्थसाधनोपपत्तेः स्थितमेतत्– **'अतश्च'** इत्यादि ।

यदि चायं निर्बन्धो न ततस्तत्साधनमिति तथापि तदाह–

तदभावेऽपि तद्वादस्यान्यथानुपपत्तितः । इति ।

तस्य प्रत्यक्षस्यार्थविषयस्य **भावस्तस्मिन्नपि** न केवलं तद्भावे **बहिरर्थानामपि सत्ता प्रसाध्यत** इति सम्बन्धः । कुत एतत् ? **तद्वादस्य** तस्मिन् विज्ञाने वादः तत्साधनस्य यथा **"दर्शनोपाधिरहितस्य"** [प्र० वा० २।३३५] इत्यादि[1], तस्मिन् वा बहिरर्थे वादः तद्दूषणस्य यथा **"यथा कथञ्चित्"** [प्र० वा० २।३५३] इत्यादि, तस्य **अन्यथा** बहिरर्थसत्ताभावप्रकारेण **अनुपपत्तितो** घटनाभावात् । अयमत्र प्रयोगः–'सन्ति बहिरर्थाः साधनदूषणप्रयोगान्यथानुपपत्तेः' इति ।

अभावे सर्वथार्थस्य तद्विशेषः कथं भवेत् ।
तत्प्रयोगो यतो ज्ञानसाधनं वाऽर्थदूषणम् ॥ १२५८ ॥
व्यवहारप्रसिद्ध्या चेत्तत्प्रयोगोऽनुमन्यते ।
कः पुनर्व्यवहारार्थः ? कल्पना यदि ; कल्पितात् ॥ १२५९ ॥
कुतश्चित्सिद्धिरर्थस्य बुद्धेर्वा किन्न दूषणम् ? ।
न हि कल्पनया कस्याप्यस्ति वक्तुर्दरिद्रता ॥ १२६० ॥
विपक्षमव्यवच्छिन्दंस्तत्प्रयोगस्तथा सति ।
एकान्तेन स्वपक्षस्य कथं नामास्तु साधकः ? ॥ १२६१ ॥
तन्न कल्पितरूपोऽयं परमार्थो भवन्नपि ।
बोध एवेति चेत्तस्य परार्थत्वं कथं भवेत् ? ॥ १२६२ ॥

यदि [2]तत्प्रयोगः प्रतिपादकस्यैव बोधः ; कथमसौ परार्थः ? परस्य ततस्तद्विषयप्रतिपत्तेरसम्भवादतिप्रसङ्गात् । प्रतिपाद्यस्यैवेति चेत् ; कुतोऽसौ तस्य ? स्वत एवेति चेत् ; न ; प्रतिपादकस्य वैफल्यात् । तत एवेति चेत् ; न ; तस्याप्यप्रयोगकृतस्तदनुपपत्तेः । प्रयोगकृत इति चेत् ; न ; तत्प्रयोगस्यापि [3]तद्बोधत्वे परार्थत्वासम्भवात् । प्रतिपाद्यबोधत्वे तु पूर्ववत्प्रसङ्गः 'कुतोऽसौ तस्य' इत्यादिः, अनवस्था च । भवतु स्वार्थ एवायं न परार्थः परस्यैवाभावादिति चेत् ; कुतस्तदभावः ? त्वयाऽनुपलम्भाच्चेत् ; परेणानुपलम्भात्तवाप्यभावः । स्वयमुपलम्भान्नेति चेत् ; तत एव परस्यापि न भवेत् । सतोऽपि परस्याविनेयत्वान्न तदर्थोऽयमिति चेत् ; न ; विनेयस्यापि लोके सम्भवात् ।

"विनेयराजहंसास्ते सन्त्येव हि जगन्मताः ।
निरस्य जडसम्पर्कं ये गृह्णन्ति [4]वचोऽमृतम् ॥" [ ]

इत्युक्तत्वात् । तन्न स्वार्थ एवायम् । स्वार्थोऽपि कुतोऽयमुत्पन्नः ? स्वशक्तित इति चेत् ; न

---

१ "दर्शनोपाधिरहितस्याग्रहेऽग्रहात् तद्ग्रहे ग्रहात् । दर्शनं नीलनिर्भासं नार्थो बाह्योऽस्ति केवलम् ॥"–प्र० वा० । २ साधनदूषणप्रयोगः । ३ प्रतिपादकबोधत्वे । ४ वचो धृतम् आ०, ब०, प० ।

तर्हीदं सुभाषितम्–"ज्ञानवान् मृग्यते" [प्र० वा० १।३२] इति, स्वत एव बोधात् तदन्वेषणस्य वैयर्थ्यात् । ज्ञानवत एव बुद्धस्योपदेशादिति चेत्; स[1] तर्हि बहिरर्थरूप एव, बोधरूपत्वे पूर्ववद्दोषात् । साधनदूषणात्मा च स इति कथन्न तत्प्रयोगान्यथानुपपत्त्या बहिरर्थसत्तासाधनम् ? अथ तत्प्रयोग एव कस्यचिन्नास्ति तत्प्रतिभासस्तु विप्रलम्भ एव स्वप्नवत् तदयमसिद्धो हेतुरिति चेत् ; न ; अस्यैव असिद्धतोद्भावनस्य तत्प्रयोगत्वप्राप्तेः । अयमपि नास्त्येव, एतत्प्रतिभासस्यापि विप्रलम्भत्वादिति चेत्; न ; अत्रापि तथैव प्रसङ्गादनवस्थादोषाच्च । तन्न तत्प्रतिभासो विप्रलम्भः स्वरूपप्रतिभासेऽपि प्रसङ्गाच्च ।

भवतु तत्त्वं विभ्रम एव बहिरन्तश्चासत एव प्रतिभासात् स्वप्नवदिति चेत् ; नेदानीमसिद्धो हेतुः तत्प्रयोगत्वात् । नापि विरुद्धो बहिरर्थत्वादन्यत्र तदभावात् । न हि विभ्रमत्वे तद्भावः ; विभ्रमाद्विभ्रमसिद्धेर्निषेधात् । तत एव न व्यभिचारी चेति युक्तमतो बहिरर्थसत्तासाधनम् । ततः स्थितं **'तदभावेऽपि'** इत्यादि । साम्प्रतं सौत्रान्तिकं प्रति सत्तासाधनमाह–

अक्षादेरप्यदृश्यस्य तत्कार्यव्यतिरेकतः ॥ ९ ॥ इति ।

अक्षमिन्द्रियं चक्षुरादि, **तदादि**र्यस्य [2]भूतादेस्तस्यापि न केवलं प्रमाणादेः । **'सत्ता प्रसाध्यते'** इत्यधिकृत्याभिसम्बन्धः । कुत एतत् ? तस्याक्षादेः **कार्यं** रूपादिज्ञान-कार्यविकारादिकं तस्य **व्यतिरेकः** कारणान्तरसाकल्येऽप्यभावः ततः । कार्यव्यतिरेको हि कारणव्यतिरेकं गमयत्यन्यथा तदनुपपत्तेः । यच्च गम्यमानव्यतिरेकं कारणं तदक्षादि, इत्युपपन्नं ततस्तत्साधनम् । किं तत्साधनेन प्रत्यक्षादेव तत्सिद्धेः, गोलकादिकमेवाक्षादि तत एव तत्कार्यदर्शनात्, तच्च प्रत्यक्षत एव प्रतिपन्नमिति चेत्; न; तस्य[3] तद्धेतुत्वेऽविशेषेण प्रसङ्गात् । न चैवम्, सत्यपि तस्मिन्[4] कस्यचित्तदभावात् । तदपि सशक्तिकमेव कारणं नापरमिति चेत्; तत्तर्हि कथं दृश्यं शक्तेरतीन्द्रियत्वात् ? नन्वेवं न किञ्चिदपि कारणं दृश्यं स्यात् सर्वशक्तेरतीन्द्रियत्वात्, तत्कथं जलादौ तत्कार्यार्थिनः प्रवृत्तिः तच्छक्तेरपरिज्ञाने तदनुपपत्तेः ? कार्याच्च तत्प्रतिपत्तौ परस्पराश्रयात्–तत्परिज्ञाने कार्यम्, ततश्च तत्परिज्ञानमिति । क्वचिदभ्यासादिसहायात् प्रत्यक्षादेव तत्प्रतिपत्तौ गोलकादावपि स्यादविशेषादिति चेत्; न; जलादिवत्तत्राकारविशेषस्यानवधारणात् । यादृशो हि शक्तिमदभिमतस्याकारस्तादृशस्यैव तद्विपरीतेऽपि तस्मिन्नवलोकनात् । तन्न तत्प्रतिपत्तौ प्रत्यक्षमवलम्बनं हेतोरेवावलम्बनत्वात् । न चायमसिद्धो हेतुः ; [5]रूपादिकारणान्तरे तस्य प्रसिद्धत्वात् पिहितलोचनादिवत् । तत्रापि रूपादेः परिणतिविशेषव्यतिरेकादेव तद्व्यतिरेको न लोचनादिव्यतिरेकादिति चेत्; न; अपिहितलोचनादेः तत एव तत्कार्यदर्शनात् । न हि परिणतिविशेषविकलादेव कस्यचित्कार्यमपरस्य तद्व्यतिरेक इत्युपपन्नम् । अतो लोचनादिव्यतिरेकादेव तद्व्यतिरेक इति कथं न स तत्प्रतिपत्तावालम्बनम् ? भवत्येवालम्बनं तँतस्तु नाक्षादेः सत्त्वं साधयितव्यं परकीयस्यापि तत्प्रसङ्गात्, अपि तु [7]कार्यस्यैव तदपेक्षत्वमिति चेत् ; तदपि परकीयेन[8] किन्न साध्येत ? आत्मीयेनैवाविनाभावादिति चेत् ; न ; सत्तासाधनेऽप्यस्यैव परिहारत्वात् । अपि च ;

---

१ उपदेशः । २ "भूतशब्दोऽत्र व्यन्तरविशेषवाची"–ता० टि० । ३ गोलकस्य रूपादिज्ञानहेतुत्वे । ४ गोलके । ५ शक्तिशून्येऽपि गोलके । ६ रूपादिः कारणान्तराद्व्यतिरेकस्य प्र–आ०, ब०, प० । ७ तदस्तु आ०, ब०, प० । ८ "रूपादिज्ञानस्यैव"–ता० टि० । ९ "प्रत्यक्षेण"–ता० टि० ।

अक्षादेस्तदपेक्षत्वमन्यच्चेत्तस्य सिद्धितः ।
नाक्षादिसिद्धिस्तस्यां वा कथं नातिप्रसज्यते ॥ १२६३ ॥
तत्सिद्धिरेव तत्सिद्धिरविनाभावतो यदि ।
हेतुसिद्धिर्भवेत्साध्यसिद्धिरित्यनुमा वृथा[1] ॥ १२६४ ॥
ततोऽपि तदपेक्षत्वात्[2] कार्यधर्मान्तरस्य चेत् ।
सिद्धया तत्सिद्धिरुच्येत प्रादुष्यादनवस्थितिः ॥ १२६५ ॥
साक्षात्तत्साधने व्यर्थं तदपेक्षत्वसाधनम् ।
हेतोरेवोदितात्तस्य तथा साधननिर्णयात् ॥ १२६६ ॥
अक्षादेस्तदपेक्षत्वस्याभेदे भिद्यते वचः ।
तत्सत्त्वं तदपेक्षत्वमिति साध्यं न वस्तुतः ॥ १२६७ ॥

यदि तदपेक्षत्वमक्षाद्येव न तर्हि तदपेक्षं तत्कार्यमिति सामानाधिकरण्यं व्यतिरेकात्, अन्यथा हेतुफलभावायोगादिति चेत्; सत्यमिदं वस्तुवृत्तेन, वचनं तु केवलमपेक्षकप्राधान्येनापेक्ष्यमेव दर्शयत् सामानाधिकरण्यमुपदर्शयति । तस्मादुपपन्नम्—अक्षादेस्तत्कार्यव्यतिरेकात् सत्त्वसाधनम् अविनाभावनिश्चयात् । एवमदृश्यस्यापि सत्तां प्रसाध्य तत्र परोक्तं दूषणं प्रत्याचक्षाण आह—

एतेनातीन्द्रिये भावकार्यकारणतागतेः ।
तत्सत्ताव्यवहाराणां प्रत्याख्यानं निवारितम् ॥१०॥ इति ।

निवारितं निराकृतम् । किम् ? **प्रत्याख्यानं** प्रतिषेधवचनम् । केषाम् ? **तत्सत्ताव्यवहाराणां** तेषामतीन्द्रियाभावादीनां सत्ता विद्यमानता तद्व्यवहाराः तन्निर्णयादिरूपास्तेषामिति । अस्ति तत्प्रत्याख्यानं बौद्धस्य **"अन्येषामदृश्यानां हेतुफलभावाभावविरोधाँसिद्धेः"** [ ] इति वचनात् । कुतस्तन्निवारितम् ? इत्याह—**अतीन्द्रिये** अदृश्ये[4] **अभावश्च कार्यकारणता** च तयोः, उपलक्षणमिदं तेन विरोधस्यापि **गतेः** प्रतिपत्तेः । केन तद्गतिः ? **एतेन** अनन्तरन्यायेन ।

तथा हि—
इन्द्रियादि हि तत्कार्यात् साधितं साधयत्यलम् ।
हेतुमन्यं स्वनिष्पत्तेस्तदभावे तदत्ययात् ॥ १२६८ ॥
तयोरदृश्ययोरेव कार्यकारणतागतेः ।
न हेतुफलनिर्णीतिस्तत्रास्ति प्रतिषेधनम् ॥ १२६९ ॥
रूपज्ञानाद्यभावाच्च यदाक्षादेरभाववित् ।
अभावोऽयमदृश्यस्य कथञ्चैवं प्रसिद्धिमान् ॥ १२७० ॥

---

१ "मा भूत्तदपेक्षत्वसिद्धिरेवाक्षादिसिद्धिरुक्तदोषात्, अपि तु प्राक्तनसाधनात्तदपेक्षत्वं सिद्धयदक्षादिकं साधयतीति साधनभेदात् सिद्धिभेदसिद्धेर्नोक्तदोष इति चेत् ।" –ता० टि० । २ "भवतु तदपेक्षत्वसाधनादक्षादिसिद्धिस्तदपि तत्साधयद्भूपादिकार्यगतधर्मान्तरं साधयति, तद्धर्मान्तरमक्षादिकं साधयतीति परम्परया तत्सिद्धेर्वा साक्षाद्वा ? न तावत्परम्परयेत्याह ।"–ता० टि० । ३–धासिद्धि–आ०, ब० । ४–श्ये भाव–आ० ब० प० ।

कार्याभावात्प्रसिद्धश्च[1] हेतुशक्तिनिषेधनम् ।
परस्याप्यनलाभावं धूमाभावेन जल्पतः ॥ १२७१ ॥
नयनादिगुणस्यास्ति दोषेणानुमितेन यत् ।
विरोधावगतिस्तस्माददृश्येऽप्यस्तु तद्गतिः ॥ १२७२ ॥
गुणवान्नात्र नेत्रादिर्मिथ्याज्ञानोपलम्भनात् ।
इत्थं विरुद्धकार्योपलम्भस्याप्युपपत्तितः ॥ १२७३ ॥
अदृश्यानुपलम्भस्य संशयायैव कल्पनम् ।
[2]वर्णयन्ति कथं नाम निपुणा वस्तुनिर्णये ॥ १२७४ ॥

इदानीमतीन्द्रिये भावेत्यादिकमेव व्याचिख्यासुराह—

व्याधिभूतग्रहादीनां विप्रकर्षेऽपि गम्यते ।
कुतश्चित्सदसद्भावविरोधप्रभवं तथा ॥ ११ ॥ इति ।

गम्यते बुध्यते । किम् ? सदसतोर्भावश्च विरोधश्च प्रभवश्च हेतुफलभावः **सदसद्भावविरोधप्रभवम्** । कुतः ? **कुतश्चित्** आकारविशेषादेः । कथम् ? **तथा** तेनाऽन्यथानुपपत्तिप्रकारेण । केषाम् ? **व्याधिभूतग्रहादीनाम्**, आदिशब्दात् परचैतन्यानामपि । **विप्रकर्षेऽपि** अदृश्यत्वेऽपि । तथा हि—

अदृश्यस्यापि रोगादेर्हेतुत्वं कार्यजन्मनि ।
ततोऽपि तस्य सद्भावमसद्भावं विपर्ययात् ॥ १२७५ ॥
आरोग्यादिविरोधश्च विप्रकर्षेऽपि तत्त्वतः ।
प्रतियन्तः प्रतीयन्ते निर्विवादं परीक्षकाः ॥ १२७६ ॥

यत्पुनरुक्तं धर्मोत्तरेण[3]—**"न घटे पिशाचस्य भिन्नस्याभावः साध्यते यतो दृश्यानुपलब्धिः स्यादपि त्वभिन्नस्य । एतदुपलभ्यमानं रूपं न भवति पिशाच[4] इति तत्रोपलभ्यमानत्वमभ्युपगम्य प्रतिषेधः क्रियते पिशाचस्येति दृश्यानुपलब्धिरेव यथा घटस्य दृश्यत्वमभ्युपगम्य यद्यत्र घटः स्यात् दृश्य एव भवेत्, तथा यद्ययं पिशाचः स्यात् दृश्यः स्यादित्येवं दृश्यमानरूपत्वमभ्युपगम्य नित्यत्वं निषिध्यत इति, दृश्यानुपलब्धिरेव ।"** [ ] इति । तत्र; घटवच्छरीरेऽपि तस्याभिन्नस्यैव प्रतिषेधप्रसङ्गात् । न चैवम्, भिन्नस्यैव तत्र तत्कार्यानुपलब्ध्या परीक्षकैः प्रतिक्षेपात् ।

---

१ शक्तिहेतु—आ०, ब०, प० । २ द्रष्टव्यम्—प्र० वा० ४।३७७ । ३ "एवं प्रतिषेध्यस्य नित्यत्वञ्च दृश्यमानात्मत्वमभ्युपगम्य प्रतिषेधः कृतो भवति । वस्तुनोऽप्यदृश्यस्य पिशाचादेर्यदि दृश्यघटात्मत्वनिषेधः क्रियते दृश्यात्मत्वमभ्युपगम्य कर्तव्यः । यद्ययं दृश्यमानः पिशाचात्मा भवेत् पिशाचो दृष्टो भवेत् । न च दृष्टस्तस्मान्न पिशाच इति दृश्यात्मत्वाभ्युपगमपूर्वको दृश्यमाने घटादौ वस्तुनि वस्तुनोऽवस्तुनो वा दृश्यस्यादृश्यस्य च तादात्म्यनिषेधः । तथा च सति यथा घटस्य दृश्यत्वमभ्युपगम्य प्रतिषेधो दृश्यानुपलम्भादेव तद्वत् सर्वस्य परस्परपरिहारवतोऽन्यत्र दृश्यमाने निषेधो दृश्यानुपलम्भादेव ।" —न्या० वि० टी० पृ० ५१ । ४—चः त —आ०, ब०, प० ।

सिद्धान्तः—प्रथमस्यापि तत एव तत्त्वोपपत्तेः । तथा च प्रत्यक्षमेव तद् गत्यन्तराभावादिति सिद्धं तस्य स्पष्टज्ञानेनैकविषयत्वम् । ततो यदुक्तम्—**"यद्यस्माद् भिन्नप्रतिभासं न तत्तेनैकविषयं यथा रूपज्ञानाद्रसादिज्ञानम्, भिन्नप्रतिभासं चानुमानं प्रत्यक्षात् ।"** [ ] इति; तन्निषिद्धम्; दूरवृक्षवेदनेन व्यभिचारात्, तस्यास्पष्टावभासित्वेन आसन्नतद्वेदनात् भिन्नप्रतिभासित्वेऽपि तदेकार्थत्वात् ।

एतदेव दर्शयन्नाह—

तस्मादनुमितेरर्थविषयत्वनिराकृतिः ।
प्रतिभासभिदायाः किमेकस्यानेकतो ग्रहात् ॥१४॥ इति ।

अनुमितेः अनुमानस्य **अर्थविषयत्वनिराकृतिः** वस्तुप्रतिभासवत्त्वप्रत्याख्यानम् । कुतः ? **प्रतिभासभिदायाः** प्रतिभासस्य तदाकारस्य भिदा भेदो स्पष्टतालक्षणः तस्याः । **किम्** नैव । कस्मात् ? **तस्मात्** अनन्तरोक्तात् । कस्मात् ? **एकस्यानेकतो ग्रहात् ।** एकस्य पादपादेरनेकतोऽनेकेनास्पष्टास्पष्टतरादिरूपेण अनेकेन वा ज्ञानेनास्पष्टादिप्रतिभासिना ग्रहणं ग्रहस्तस्मात् । एतदुक्तं भवति—दूरभूरुहादिज्ञानेन प्रतिभासभेदस्य व्यभिचारात् न ततः तन्निराकृतिरिति । यदि प्रत्यक्षैकार्थमनुमानं गृहीतग्राहित्वात् कथं प्रमाणम् ? क्षणक्षयादेरतद्विषयस्यापि ग्रहणादिति चेत्; न; [1]तस्यातद्विषयत्वे तद्विषर्ययस्य [2] तद्विषयत्वं स्यात् गत्यन्तराभावात्, तथा च सुतरामप्रामाण्यमनुमानस्य [3]तेन बाधनात्, प्रत्यक्षस्य वा [4]तत्प्राप्तं [5]तेन बाधनात् । न चैतन्न्याय्यं तदप्रामाण्ये तस्यैवाभाव-प्रसङ्गात् [6]तत्पूर्वकत्वात् । तन्न क्षणक्षयादेरतद्विषयत्वं यतोऽपूर्वार्थत्वमनुमानस्येति चेत्; मा भूत्, तथापि नाप्रामाण्यं यथार्थत्वात् । अपूर्वार्थमेव [7]ततोऽपि प्रमाणं नापरमिति चेत्; कुत एतत् ? तत एव प्रयोजनादिति चेत्; किं तत्प्रयोजनम् ? अधिगमश्चेत्; न; तस्यानुमानेऽपि भावात् । परितोषोऽनेन व्याख्यातः । प्रवृत्तिरिति चेत्; न तर्हि स्वसंवेदनं प्रमाणम्, ततोऽपि तदभावात् । क्व चेयं प्रत्यक्षात् प्रवृत्तिः ? न क्षणे; तस्य प्रवृत्तिकालेऽनन्वयात् । नापि सन्ताने; तस्य तेनाग्रहणात् । ग्रहणेऽपि नापूर्वार्थत्वम्; पूर्वमपि तस्यान्यतोऽधिगमात् इत्यपूर्वार्थं प्रमाणयतः प्रत्यक्षमप्यप्रमाणं प्राप्तम् । अर्थाधिगमात्तु प्रामाण्यं नानुमानेऽपि प्रातिकूल्यमुद्घोषयति ।

किञ्च, कथञ्चिदपूर्वार्थमेवानुमानं तद्विषयस्य क्षणक्षयादेः प्रत्यक्षेणाग्रहणात्, न तावता तद्विपर्ययस्य तेन ग्रहणं तदुभयधर्मसाधारणस्य नीलादेरेव ग्रहणात् सदसत्त्वसाधारणस्येव भ्रान्त्या । न हि तया तद्विपयसत्त्वग्रहणम्; भ्रान्तित्वापत्तेः । नाप्यसत्त्वस्य वेदनम्; अप्रवृत्तिप्रसङ्गात् । न हि तत एव तद्विपयस्यासत्त्वं प्रतिपद्यमानः तदर्थितया प्रवर्तितुमर्हति । प्रतिपद्यमानोऽपि सत्त्वसमारोपात् प्रवर्तत इति चेत्; न; [10]तस्याप्रवेदनात् । प्रवेदनेऽपि तद्विपयस्याप्यसत्त्वं यदि तत एवावगम्येत स एव प्रवृत्त्यभावः । तत्रापि तत्समारोपकल्पनायामनवस्थापत्तिः । ततः सदसत्त्वसाधारणं नीलधवलादिकमेव भ्रान्तेर्विषयः तद्वत् प्रत्यक्षस्यापि क्षणभङ्गतद्विपर्ययसाधारणमिति

---

१ क्षणक्षयादेः प्रत्यक्षाविषयत्वे । २ नित्यत्वादेः । ३ नित्यत्वादिग्राहिणा प्रत्यक्षेण । ४ अप्रामाण्यम् । ५ क्षणिकत्वादिग्राहिणाऽनुमानेन । ६ प्रत्यक्षपूर्वकत्वात् । ७ यथार्थत्वादपि । ८ प्रवृत्त्यभावात् । ९ नित्यत्वादेः । १० सत्त्वसमारोपस्य ।

कथं तदधिगतार्थमनुमानं यतः प्रामाण्यं न भवेत् ? असाध्यविषयत्वे प्रत्यक्षस्य कथं ततो व्याप्ति-ग्रहणमिति चेत् ? न; विपक्षे बाधकसामर्थ्यादेव तद्ग्रहणात् । साध्यविषयत्वे तु तस्य किमर्थमनु-मानम् ? समारोपव्यवच्छेदार्थमिति चेत्; तदभावे किं न भवेत्ततो विषयपरिज्ञानमिति चेत्; व्याप्ति-वेदनं कथम् ? तदपि तद्व्यवच्छेदादेवेति चेत्; न; चक्रकात्—सति तद्व्यवच्छेदे तद्वेदनम्, ततोऽनुमानम्, ततस्तद्व्यवच्छेद इति । ततो नीलादेः प्रत्यक्षावगतस्यैव क्षणभङ्गादिविशिष्टतया अनु- ५
मानतो निर्णयादुपपन्नं तस्य तदेकार्थत्वमपूर्वार्थत्वञ्चेति वस्तुविषयमेवानुमानम् । कथमेतत् ? कथं च न स्यात् ? सम्बन्धापरिज्ञानात् । तथा हि—न साध्यसाधनयोरपरिज्ञाने सम्बन्धपरिज्ञानम्; तस्य तत्पूर्व-कत्वात् । परिज्ञानेऽपि न निर्विकल्पेन तत्परिज्ञानम्; 'इदमत्र प्रतिबद्धम्' इत्यपरामर्शात् । नापि तज्जन्मना विकल्पेन; तत्काले साध्यसाधनयोस्तद्दर्शनस्य च व्यपगमात् । विकल्पोपनीतयोस्तत्परिज्ञाने कथं वस्तुगतः सम्बन्धः, तदुपनीतयोरवस्तुत्वात् ? भवदपि तत्परिज्ञानं न सामस्त्येन; साध्यसाधनवस्तूनामानन्त्यात् १०
अनन्तेनापि कालेन तदसम्भवात् । नाप्येकदेशेन; फलाभावात् । अनुमानं हि तत्फलम्, न च यत्रैव तत्परिज्ञानं तत्रैवानुमानं सम्बन्धज्ञानादेव साध्यसिद्धेः । नाप्यन्यत्र; तत्र तत्साधनादेरभावात्, अन्यतश्च तदनुपपत्तेः । सम्बन्धप्रतिपत्तिनिबन्धनस्य च प्रकारान्तरस्याभावादिति चेत्; किमिदानीमनुमानमेव नेच्छेत् ? तथा चेत्; न कुतश्चिदभिमतसिद्धिः । निवेदितञ्चैतत् । इच्छतोऽपि तदवस्तुविषयमेवेति चेत्; न; अवस्तुन्यपि सम्बन्धापरिज्ञाने तदनुपपत्तेः । तत्परिज्ञानस्य चोक्तनीत्या तत्राप्यसम्भवात् । १५
किमर्थं वा तदनुमानम् ? व्यवहारार्थमिति चेत्; न; व्यवहारस्यावस्तुन्यसम्भवात् मरीचिकातोयादिवत् । वस्तुन्येवासौ तत्रानुमानस्य प्रतिबन्धादिति चेत्; न; तत्परिज्ञानेऽपि पूर्ववद्दोषात् । न दोषः, देशकालादिविशेषपरामर्शमन्तरेणापि 'ईदृशमीदृशप्रतिबद्धम्' इति कुतश्चित्प्रतिपत्तेः । नापि वैकल्यमनुमानस्य पुनस्तादृशादेव विशेषालिङ्गितालिङ्गालिङ्गिविशेषस्य प्रतिपत्तेरिति चेत्; सिद्धं तर्हि वस्तुष्वेव प्रतिबन्धपरिज्ञानमनुमानस्य च साफल्यम् । एतदेवाह— २०

समानपरिणामात्मसम्बन्धप्रतिपत्तितः ।
तत्राशक्तिफलाभावौ न स्यातां लिङ्गलिङ्गिनोः ॥ १५॥ इति ।

समानः सदृशः स चासौ **परिणाम**श्च विवर्तः स एवात्मा स्वभावस्तेन **सम्बन्ध**-स्याविनाभावस्य **प्रतिपत्तितः** परिज्ञानात् । [3]कयोस्तत्प्रतिपत्तितः ? इत्याह—**लिङ्गलिङ्गिनोः** लिङ्गस्य धूमादेः लिङ्गिनश्च पावकादेः । ततः किम् ? इत्याह—**तत्र** तस्यां प्रतिपत्तौ **तत्रानुमाने** २५
चाशक्तिश्च फलाभावश्च न स्यातां न भवेताम् । **समान**ग्रहणेनात्यन्तवैलक्षण्यं स्वलक्षणानां प्रत्युक्तम्, तथाविधानां तेषामप्रतिपत्तेः । निरूपितं चैतत् । **परिणाम**ग्रहणेन समाना-कारस्य कौटस्थ्यम्[4]; तस्याप्यपरिज्ञानाद्वैफल्याच्च । तत्र सम्बन्धप्रतिपत्तिः फलमिति चेत्; न; तस्यैवानु-मानविषयत्वप्रसङ्गात्, तथा च कथं विशेषे ततः प्रवृत्तिः ? तस्यं तत्र सम्बन्धादिति चेत्; लिङ्गस्यैव तँत्र किन्न स्यात् तत्परिज्ञानाशक्तेरन्यत्रापि तुल्यत्वात् । प्रवृत्तिरपि सामान्य[6]एवेति चेत्; न; ३०

१—नुमानस्य ता० । २—पात्तिलिंगत्वाल्लिंगा— आ०, ब०, प० । ३ तयो—आ०, ब०, प० ।
४ "प्रत्युक्तमिति प्रागुक्तमत्रापि सम्बन्धनीयम् ।"—ता० टि० । ५ सामान्ये । ६ सामान्यस्य । ७ विशेषे ।

बहिरर्थत्वाभावप्रसङ्गात् । अन्तरङ्गात्तु तदाभत्वे नायं दोषः ; एकविषयस्यापि [1]तद्विशेषात् प्रतिभासविशेषोपपत्तेः । एतदेवाह—

दूरदूरतरादिस्थैरेकं वस्तु समीक्ष्यते । इति ।

सुगममेतत् । कथं समीक्ष्यते ? इत्याह—

[**नानाभं स्यात्तथासत्यं न चेद्वस्त्वनुरोधि किम् ? ॥१३॥**]

नानाभं वैशद्यतारतम्ये नानैकप्रतिभासं वस्तुविषयत्वात् । तदाभत्वे दूषणान्तरमाह—**'स्यात्तथाऽसत्यं न'** इति । **तथा** तेन प्रत्यक्षाभप्रकारेण **असत्यम्** अविद्यमानं कामिन्यादि **न स्यात्** । अस्ति चाविद्यमानस्यापि तस्य तदाभत्वम् । परस्यापि **"अभूतानपि पश्यन्ति"** [प्र०वा० २।२८२] इति ब्रुवाणस्य प्रसिद्धत्वात् । तन्न वस्तुविषयत्वात्तदाभत्वं यतोऽनुमानेऽपि ततस्तदापत्त्या प्रत्यक्षत्वप्रसङ्ग इति भावः ।

कथं पुनः कामिन्यादेरसत्यत्वं ज्ञानरूपतया तस्यापि सत्यत्वात् ? **'अभूतानपि'** इति वचनं बाह्यत्वापेक्षयैव । न चैवं पुरतोभावस्य विरोधः तस्य ग्राहकान्तरापेक्षत्वात्, स्वात्मनि च ग्राहके तदनुपपत्तेरिति मन्तव्यम् ; तस्यापि ग्रेह्यवेदकभेदकल्पनादुपपत्तेः । ज्ञानात्मकत्वञ्च तस्य 'प्रतिभासमानत्वात् सुखादिवत्' इत्यनुमानात् । न च सत्यकामिन्यादिना व्यभिचारः; तस्यापि पक्षीकरणात् । ततो ज्ञानमेवास्ति न बाह्यमिति चेत् ; एतदेवाह—**'न चेद्वस्तु'** इति । नञो मध्यदीपकत्वेनात्रापि सम्बन्धात् । **न यदि वस्तु** बाह्यं प्रक्रमात् । अत्र दूषणमाह—**'अनुरोधि किम्'** इति । अनुरोधः स्वीकारः सोऽस्मिन्नस्तीति **अनुरोधि** पराभिमतं ज्ञानम् । तत्किम् ? **नैव** । तथा हि—न तन्नीलमेव तस्य बाह्यस्याप्यविरोधात् । अपरोक्षत्वेन विशिष्टमिति चेत्; तदपि यदि नीलमेव कथं तदेव तेन विशिष्टं नाम ? कथं वा तद् बाह्यं न भवेत् ? अन्यदेव चेत्; तदेव ज्ञानं स्यात् न नीलम् । भवत्वसदेव तदिति चेत् ; न ; प्रतिभासात् । सोऽप्यसत एवेति चेत्; न; स्वतस्तदयोगात् । ज्ञानादिति चेत्; न; **"नान्योऽनुभाव्यो बुद्ध्यास्ति"** [प्र०वा० २।३२७] इत्यस्य विरोधात् । विभ्रमादिति चेत्; न; तस्यापि विज्ञानत्वे तदयोगात् । तत्रापि विभ्रमान्तरकल्पनायामनवस्थापत्तेः । अज्ञानत्वे तु न ततः तत्प्रतिभासो विरोधात्, बहिर्भावप्रत्युज्जीवनाच्च । तन्नासत्त्वे तस्य प्रतिभासः । तदभावे ज्ञानमपि न भवेत् तस्यापि निर्भेदस्याप्रतिवेदनात् इत्युपपन्नमेतत्—**'अनुरोधि किम्'** इति । यदि तु न ज्ञानं नीलमात्रम् अपरोक्षत्वमात्रं वा तदुभयरूपत्वात्तस्येति; तदा स्वपरविषयतयापि द्विरूप्यापत्तेः कथं बाह्यस्य सतोऽसतो वा न ततः प्रतिपत्तिः यतो **'दूर'** इत्यादि न स्यात्, **'तथा सत्यं न'** इति च सूक्तं न भवेत् । तन्न वस्तुविषयत्वादेवानुमानस्य स्पष्टत्वं दूरस्थादिज्ञानानां तद्विशेषाभावप्रसङ्गात्, अवस्तुविषये च तदभावापत्तेः ।

अथवा यद्यस्पष्टावभासित्वादनुमानमवस्तुविषयं प्रत्यक्षमपि कथञ्चित्तथा भवेदित्याह—**'दूर'** इत्यादि । **दूरदूरतरयोः आदि**शब्दादासन्नासन्नतरयोस्तिष्ठन्तीति **तत्स्थास्तैः एकं** पादपादिलक्षणं **वस्तु समि**त्यविप्रतिसारेण **ईक्ष्यते** दृश्यते । कथम् ? **नानाभं** दूरादावस्पष्टादित्वेन आसन्नादौ स्पष्टादित्वेनानेकप्रतिभासमेकमिति । आसन्नादिप्रतिभासमेव सत्यं नेतरदिति चेत् ; उत्तरम्—**तथा** तेन नानाभमिति प्रकारेण **सत्य**मवितथं वस्तु । यद्येवं दूरादिवदासन्नादावपि किमस्पष्टादितया तन्न दृश्यत

---

१ क्षयोपशमविशेषात् । २ अविसंवादितया ।

इति चेत् ? न; संसारिज्ञानस्यासकलग्राहित्वात्, अन्यथा परमाणूनां नीलादिनेव परस्परविवेकेनापि दर्शनात् न क्वचित् स्थूलप्रतिभासः स्यात्। न च तदपह्नवः, सर्वत्र तत्प्राप्तेः। अपह्नुतोऽपि विकल्पादेवासौ न दर्शनादिति चेत्; न; ततोऽप्यतदाकारात्तदयोगात्। तदाकारत्वे वस्तुतः परमाणुस्वलक्षणवादव्यापत्तिः। भ्रान्त्या तस्यापि तदाकारत्वमिति चेत्; न; ततस्तद्विवेकस्य दर्शने भ्रान्तेरयोगात्। अदर्शने सर्वात्मनाप्यदर्शनप्रसङ्गात्। असकलदर्शने तु सिद्धं परमाणुविवेकस्याप्यदर्शनम्। तद्वदासन्नादावस्पष्टादेरपि। विकल्पेऽपि विकल्पान्तरादेव तत्प्रतिभासो न स्वत इति चेत्; न; तत्रापि पूर्वदोषादनवस्थापत्तेश्च। ततो दूरमुपसरतो दृश्येतरात्मकत्वस्याशक्यपरित्यागत्वादुपपन्नं तद्वदेव क्वचिदस्पष्टेतरस्वभावमपि। कथं पुनरस्पष्टस्येतरेण क्वचित्समुच्चयो बाधनस्यैवोपपत्तेर्विरोधात् ? अन्यथा चन्द्रमसि द्वित्वस्याप्येकत्वेन समुच्चयात्तदपि तात्त्विकमेवेति मिथ्याज्ञानविलोपः स्यात्, न चैवम्, अतो द्वित्ववदसत्य एवास्पष्टस्वभाव इतरेण बाधनात्; इत्यपि न सङ्गतम्; दृश्येतरेण समुच्चयेऽपि समानत्वात्। न हि स्वलक्षणेषु विवेकः कुतश्चिदवस्थाप्यमानः स्थूलस्वभावमबाधित्वा अवस्थातुमर्हति। सत्यम्, असत्य एव स[1] इति चेत्; क इदानीं सत्यस्वभावः स्यात् ? नीलादिरिति चेत्; न; तस्यापि स्थूलादभेदेन प्रतिपत्तेः, तदसत्यत्वे सत्यत्वानुपपत्तेः। अन्यथा—

स एव सत्योऽसत्यश्च नीलादिरिति ते कथम् ?।
समुच्चयप्रवादोऽयमनिष्टोऽपि प्रवर्तताम् ॥ १२८० ॥
सत्य एव स चेत्स्थूले तदभेदेन सत्यता।
परमाणुप्रवादं ते भद्र भद्राकरोत्यलम् ॥ १२८१ ॥
असत्य एव नीलादिर्यदि प्रत्यक्षवेद्यता।
कस्येदानीं प्रवृत्तस्य यतः स्यादीहितस्थितिः ? ॥ १२८२ ॥

[2]एतदेव 'दर्शयति—**न चेत्** न यदि। सत्यम्, अस्पष्टादिप्रतिभासं वस्तुतत्त्वम् **अनुरोधि** स्वीकारविषयः। किम् ? **न** किञ्चित्, उक्तनीत्या नीलादेरप्यसत्यत्वात् ततो नीलादावसत्यस्येतरेण समावेशो वक्तव्यः, तद्वदस्पष्टस्येतरेण अविशेषात्। नीलस्येतरेण किन्न स इति चेत् ? न; तत्र लोकाभिप्रायेण बाधनस्यैव भावात्। न चैवमस्पष्टादौ तदभिप्रायः—'स एव दविष्ठतया दृष्टोऽधुना अधिष्ठितो वृक्षः' इति तद्भावात्। ननु पूर्वमन्तरङ्गनिबन्धनत्वेनावस्तुरूपत्वमस्पष्टत्वादेरुक्तम्, इदानीं तु स्वभावत्वम्, तत्कथन्न विरोध इति चेत् ? न; इदानीमपि परानुरोधादेव तद्वचनात्। परो हि बाह्यस्यासतोऽपि लोकवुद्ध्या वस्तुत्वमन्विच्छन्नस्पष्टस्याप्यन्वेष्टुमर्हति तदविशेषात्। एवमपि कथं तज्ज्ञानस्य प्रत्यक्षत्वं विस्पष्टज्ञानस्यैव तदुपगमादिति चेत् ? न; तस्यापि परापेक्षयैवाभिधानात्। न तावत्तज्ज्ञानमप्रमाणम्; अविप्रतिसारात्, तल्लक्षणत्वादन्यत्रापि प्रामाण्यस्य। नाप्यनुमानम्; लिङ्गाभावात्। तदेव लिङ्गमिति चेत्; न; तज्जनितस्य ज्ञानान्तरस्याप्रवेदनात्। प्रवेदनेऽपि न तत्स्पष्टम्; अनुमानत्वात्। अस्पष्टमपि कथं प्रमाणम् ? 'साध्यं प्रत्यविनाभावादिति चेत्; न; लिङ्गस्यैव तत्त्वप्रसङ्गात्। तज्ज्ञानजनकत्वाच्चेत्; न; अनुमानानवस्थोपनिपातात्। तद्विषयत्वाच्चेत्; सिद्धो नः

---

१ स्थूलस्वभावः। २ यत एव आ०, ब०, प०।

अपि च, एवं परचैतन्यस्यापि शरीरादभिन्नस्यैव प्रतिषेधो न भिन्नस्येति [1]कथं मृतप्रतिपत्तिः यतो नास्त्येव अदृश्यत्वेन संशयविषयत्वात् । नित्यत्वस्यापि यदि भावादभिन्नस्यैव प्रतिषेधो भिन्नमप्रतिषिद्धं भवेत् । अस्तु कल्पितमेव तन्न वस्तुत इति चेत् ; कुत एतत् ? अप्रतिपत्तेश्चेत् ; अस्ति तर्ह्यदृश्यानुपलब्धेरप्यभावगतिरिति न युक्तम् 'एवम्' इत्यादि ।

५ किञ्च, परमाणूनामपि घटेऽभिन्नानामेव प्रतिषेधः पिशाचवत् , शक्यो हि तत्रापि दृश्यत्वमभ्युपगम्य निषेधो यद्ययं परमाणुरूपः स्याद् दृश्यः स्यादिति ।

एवञ्च परमाणुभ्यो घटस्यान्यस्य सिद्धितः ।
नैयायिकमतं सुस्थमवयव्यनिराकृतेः ॥ १२७७ ॥
घटोऽणुसञ्चयात्मैव नैकः स्थूलोऽस्ति चेदसत् ।
१० एकश्चायं[2] ज्ञानसन्निवेशीत्येवं विनिश्चयात् ॥ १२७८ ॥
संवृत्या स न तत्त्वाच्चेत् स कथं दृश्यतां यतः ।
तदभेदात्पिशाचादेर्दृश्यत्वमुपगम्यताम् ॥ १२७९ ॥

न हि सांवृतस्य दृश्यत्वम् ; दर्शनस्य वस्तुविषयत्वात् , सांवृतस्य चावस्तुत्वात् । न चाणुसञ्चयो दर्शनविषयः स्थूलस्यैकस्यैव तद्विषयत्वेनानुभवात् , 'एकश्चायं ज्ञानसन्निवेशीत्येवं विनिश्चयात्' इत्युक्तेः । १५ ततो यदि तदभेदेन दृश्यत्वोपगमात् पिशाचे दृश्यानुपलब्धिः परमाणुष्वपीति तेषामपि तदभिन्नानां प्रतिषेधात् कथं नावयविसिद्धिः ? तदभेदेनापि तत्रादृश्यत्वस्यैवोपगमे स एव पिशाचेऽपीति न तस्याभिन्नस्यापि घटादौ प्रतिषेधो दृश्यानुपलब्धेरभावात् , अन्यतश्च तदनुपगमात् । इदमेवाकलय्य देवैरन्यत्रोक्तम्—

"अदृश्यानुपलम्भारेकैकान्तेऽयं न लक्षयेत् ।
२० पिशाचो नाहमीति दृश्यादृश्याविवेकधीः ॥" [सिद्धिवि० प० ३४८] इति ।

अदृश्यानुपलम्भादेवाभिन्नस्य प्रतिषेधे भिन्नस्यापि स्यात् व्याध्यादौ तथा तत्प्रतिपत्तेः । इत्युपपन्नम्—अदृश्यानुपलम्भस्याप्यभावसाधनत्वम् । व्याधीत्यादि अन्तरश्लोकः ।

कथं पुनरनुमानात् सत्तासाधनं तस्यावस्तुविषयत्वात् ? अवस्तु हि सामान्यं तस्य विषयो निदर्शनसमानस्यैव पावकादेस्तत्र प्रतिभासनात् । सामान्यस्य च विचार्यमाणस्य वस्तुत्वेनानवस्थानात् । २५ सत्तायाश्च वस्तुरूपत्वादिति चेत् ; कथमिदानीं [3]तस्य प्रामाण्यम् ? वस्तुनि प्रवर्तनात् , तदपि तद्विषयस्य वस्त्वेकत्वेनाध्यवसायादिति चेत् ; उच्यते—तदेकत्वं यदि वस्तुरूपमेव; सिद्धमनुमानस्य [4]तद्विषयत्वम् ? अवस्तुरूपं चेत् ; कथं ततोऽपि तत्र प्रवर्तनमतिप्रसङ्गात् ? तस्यापि तदेकत्वेनाध्यवसायादिति चेत् ; न ; तत्रापि पूर्ववत्प्रसङ्गादनवस्थापत्तेश्च । किञ्चेदं सामान्यस्यावस्तुत्वम् ? सर्वशक्तिवैकल्यम्, तच्च विचारादिति चेत् ; सोऽपि[5] न तदेवानुमानम् ; तेन तत्र वस्तुत्वस्यैवाध्यवसायात् , तस्यापि

---

१ कथममृतप्रति–आ०, ब०, प० । २ "घटः"–ता० टि० । ३–भादेकैका–आ०, ब०, प० । ४ अनुमानस्य । ५ वस्तुविषयत्वम् । ६ विचारोऽपि ।

तल्लिङ्गस्येवातल्लिङ्गस्यापि तदेकसाध्यत्वे वस्तुत्वाध्यवसायस्यैव भावात्, भिन्नसाध्येन च तस्याविषयीकरणात्। न चाविषयीकृतमवस्तु वस्तु वेति शक्यमवगन्तुम्। नापि प्रत्यक्षं विचारः; तस्यापि स्वलक्षणनियतत्वेन तत्राप्रवृत्तेः, प्रवृत्तौ वा प्रमेयाभावान्नानुमानं भवेत्। नाप्यन्यत्प्रमाणम्; तद्द्वयनियमव्याघातात्। नाप्यप्रमाणम्; ततः कस्यचित्तत्त्वनिर्णयायोगात्, प्रमाणचिन्तावैफल्यात्। तन्न तस्यावस्तुत्वं कुतश्चिदपि सुनिश्चयम्। निश्चयेऽपि न तस्य वस्त्वेकत्वाध्यवसायो येन प्रवर्तकत्वात् प्रामाण्यमनुमानस्य निगदितोत्तरत्वात्। ५

भवतु तर्हि संवादादेव वस्तुनि तस्य प्रामाण्यम्, सोऽपि तस्मादात्मलाभादिति चेत्; स कुतोऽवगन्तव्यः? नानुमानात्; वस्तुनस्तेनावेदनात्। नापि वस्तुप्रत्यक्षेण; अनुमाने तस्याप्रवृत्तेः। न च तद्द्वयोरेकाविषयत्वे तत इदमिति प्रतिपन्नः संवादः। संवादाच्च प्रामाण्ये अतिप्रसङ्गमाह—

प्रमाणमर्थे संवादाद् भ्रान्तिरध्यवसायतः। इति। १०

भ्रान्तिः अतस्मिंस्तद्ग्रहो मणिप्रभामणिज्ञानादिः, **प्रमाणम्।** कुतः? **अर्थे** मण्यादौ **संवादाद्** अविप्रतिसारात्। स एव कस्मात्? **अध्यवसायतः।** अध्यवसायो य एव दृष्टः स एव प्राप्तः इत्यभिप्रायः तस्मात्तत इति। प्रसिद्धश्चैतत् परस्मात्-(परस्यापि) **"अविसंवादनमभिप्रायनिवेदनात्"** [प्र० वा० १।३] इति वचनात्। इष्टमेव तत्र प्रामाण्यं प्रत्यक्षत्वेन तत्कथमतिप्रसङ्ग इति चेत्? न; भ्रान्तेस्तत्त्वानुपपत्तेः। अप्रतिपन्नव्यभिचारस्य न तत्र भ्रान्तिबुद्धिरपीति चेत्; न १५ तर्हीमं प्रत्यनुमानप्रामाण्ये तन्निदर्शनम्। भ्रान्तमपि यथेदं प्रमाणं तथानुमानमपीति भ्रान्तिविदं प्रत्येव तत्तत्र निदर्शनमिति चेत्; इतरं प्रति तन्निरपेक्षमेव यदि तत्सिद्ध्यतीति तथैव तद्विदं प्रत्यपि सिद्ध्यतीति व्यर्थमेतत् **"माणिप्रदीपप्रभयोः"** [प्र० वा० २।५७] इत्यादि। तद्विदं प्रत्यपि नानुमानत्वेन निदर्शनं विप्रतिपत्तिविषयत्वेन साध्यान्तःपातित्वात्, अतः प्रमाणान्तरमेव सेति कथन्नातिप्रसङ्गः? तन्न संवादादपि प्रामाण्यमनुमानस्य अपि तु वस्तुविषयत्वादेव। २०

यद्येवं तदेवँ स्पष्टावभासित्वमपीति कथमनुमानत्वम्? लिङ्गजत्वादिति चेत्; न; तथापि परोक्षलक्षणस्यावैशद्यस्याभावेन तत्त्वानुपपत्तेः। परोक्षं च जैनस्यानुमानम्। एतदेवाह—

प्रत्यक्षाभेऽप्रसङ्गश्चेत् [तथाऽनभिनिवेशतः] ॥१२॥ इति।

प्रत्यक्षमिव स्पष्टत्वेनाभातीति **प्रत्यक्षाभम्** अनुमानं तस्मिन् **अप्रसङ्गः** प्रसङ्गाभावः प्रक्रमादनुमानत्वस्य। ततो वस्तुविषयत्वं तस्य ब्रुवतां तदेव निर्लुठितमिति परस्याकूतम्। **चेदिति** तद्द्योतने। २५ तत्रोत्तरमाह—**'तथानभिनिवेशतः'** इति। **तथा** तेन स्पष्टाभप्रकारेण **अनभिनिवेशतः** अनध्यवसायात् **प्रसङ्ग** इति। प्रसङ्गाप्रसङ्गयोः संहितायां समानत्वात् पूर्वत्राप्रसङ्गस्य अत्र च प्रसङ्गस्य सम्बन्धः। न हि वस्तुविषयत्वात् तदाभत्वमपि तु अन्तरङ्गादेव कारणविशेषात्, अन्यथा दूरे कचिन्नरस्य दूरतरे गृद्ध्रादेः दूरतमे च योगिनोऽवस्थितस्य एकवस्तुविषयमेकप्रतिभासमेव विज्ञानं भवेत्, न चैवम्, स्पष्ट-स्पष्टतर-स्पष्टतमभेदेन तद्भावात्। न च तत्र प्रतिप्रतिभासं विषयस्य भेदः; तस्यासाधारणतया ३०

---

१ बौद्धस्यापि। २ भ्रान्तिविदम्। ३ वस्तुविषयत्वमेव। ४ तत्तत्प्रतिपत्तृज्ञानविषयतया अनन्यवेद्यत्वं स्यात्, तथा च बहिरर्थत्वाभावः।

विशेषकल्पनावैफल्यानुपङ्गात् । **आत्मपदेन** च तत्परिणामस्य कल्पितत्वम्[२] ; कल्पितस्य वस्तुस्वभावत्वानुपपत्तेः, कल्पनानुपपत्तेश्च । तथा हि—

कल्पना सदृशाकारा न चेत्तत्कल्पनं कथम् ? ।
वस्तुतः सदृशाकारा सा चेद्वस्तु न किं तथा ? ॥१२८३॥
यदि कल्पनयैवासौ तदाकारा तदा कथम् ।
अनवस्थानदोषोऽयमनुपङ्गी निषिध्यताम् ? ॥१२८४॥
ततो दूरं गतेनापि सादृश्यं कल्पनागतम् ।
वस्त्वेव प्रतिपत्तव्यं तथा वस्तुषु धीमता ॥१२८५॥

तेन **सम्बन्ध** इत्यनेनाप्यात्मान्तरेण[३] सम्बन्धव्याख्यानम्[४] ; न हि सम्बन्धस्यात्मान्तरमन्यत्र सन्धिरूपात् । संयोगादिरात्मान्तरमेवेति चेत् ; सोऽपि कथं तदन्तरम् ? पावकादौ सम्बन्धप्रत्ययजननादिति चेत् ; तदपि सर्वत्र कस्मान्न भवति ? तस्य तत्रासम्बन्धादिति चेत् ; पावकादावपि न भवेत् तदविशेषात् । तत्र सम्बध्यत इति चेत् ; यदि स्वतः ; पावकादिरपि धूमादिना तथैव सम्बध्येतेति पर्याप्तं संयोगादिपरिकल्पनया । तस्य सम्बन्धत्वाद्युपपन्नः स्वतः सम्बन्धो न पावकादेर्विपर्ययादिति चेत् ; तदेव कुतः ? स्वतः सम्बन्धादिति चेत् ; सोऽपि कस्मात् ? सम्बन्धत्वाच्चेत् ; न ; परस्पराश्रयात् । सम्बन्धत्वं तथा प्रतीतेरिति चेत् ;- नन्वियमेव तत्र दुर्लभा पावकादिव्यतिरेकेण तस्यैवाप्रतिपत्तेः । यदि न तत्प्रतिपत्तिर्न कश्चित्सम्बन्ध इति कथं 'सम्बन्धी पावकादिः' इति प्रत्ययः ? विशिष्टप्रत्ययस्यासति विशेषणेऽनुपपत्तेरिति चेत् ; न ; स्वयं तथा तस्य परिणामादेव तदुपपत्तेः 'सम्बन्धः संयोगादिः' इति प्रत्ययवत् । न हि तत्र व्यतिरिक्तं सम्बन्धत्वमस्ति, तस्य द्रव्यादावनन्तर्भावेन सप्तमपदार्थत्वप्रसङ्गात् । न हि तद्विलक्षणं तत्रान्तर्भवति तदा पदार्थभेदाभावापत्तेः । तत्र स्वतस्तस्य तत्र सम्बन्धः । नापि तदन्तरेण ; तत्कल्पनायामनवस्थादोषात् । नायं दोषः ; समवायस्य तदन्तरत्वात्, तस्य चानाश्रितत्वेन तदन्तरनिरपेक्षत्वात् । न चैवं तस्यासम्बन्धत्वम् ; सम्बन्धबुद्धिकरणात् सम्बन्धत्वोपपत्तेः । न च पारतन्त्र्यात्सम्बन्धत्वं तद्बुद्धिकरणं वा ; द्रव्यगुणादावपि तत्प्रसङ्गात् । ततः स्वाभाव्यादेव तस्य तत्त्वं तत्करणञ्चेति किं पारतन्त्र्येण यतोऽनवस्थानमिति चेत् ? उच्यते—

समवायस्य नित्यत्वव्यापकत्वोपकल्पनात् ।
एकत्र वृत्तः संयोगः सर्वत्रापि ततो भवेत् ॥ १२८६ ॥
न हि तत्रापि तद्भावे तस्मादन्यनिबन्धनम् ।
स[५] चेत्सर्वत्र सर्वत्र संयोगोऽपि नियोगतः ॥ १२८७ ॥
ततोऽग्नाविव संयोगं धूमोऽन्यत्राप्युपव्रजन् ।
व्यभिचारात्कथं नाम पावकस्यानुमापकः ॥ १२८८ ॥

१—पविक—आ०, ब०, प० । २ "प्रत्युक्तमिति सम्बन्धः"—ता० टि० । ३ स्वरूपान्तरेण । ४ प्रत्युक्तमिति सम्बन्धः । ५ संयोगादिति प्र—ता० । ६ न चेत्स—आ०, ब०, प० ।

न च स्वभावनानात्वं समवायस्य यद्[1]तत्[2]मतम्।
विषयेषु नियामोऽयं संयोगस्य प्रकल्प्यताम् ॥१२८॥
तन्नानात्वादभेदश्चेत् समवायोऽपि भिद्यते।
तथा च **"तत्त्वं भावेन व्याख्यातम्"** इति दुष्यति ॥१२९०॥
भेदश्चेत् तत्कथं तस्य तत्र चेत्समवायतः।
तस्याप्येकस्वभावत्वे ततस्तन्नियमः कथम् ? ॥१२९१॥
तत्र स्वभावनानात्वे दोषः पूर्वोऽभिलक्ष्यताम्।
समवायान्तराक्षेपस्त्वाक्षिपत्यनवस्थितिम् ॥१२९२॥
कथञ्चिदेवाभेदश्चेत्स्वभावसमवाययोः।
सम्बन्धतद्वद्रूपः स्यादेको भावस्तथा न किम् ? ॥१२९३॥
यतः सम्बन्धिनोऽन्यस्य सम्बन्धस्य प्रकल्पना।
प्रेक्षावत्ताविलोपाय भवतो नावकल्पते ॥१२९४॥

तन्नापरः संयोगादिः सम्बन्धः। नाप्युपकार्योपकारकभावादिः;[3] तस्यापि भावादर्थान्तरत्वे कुतः स तस्येति व्यपदेशः ? सम्बन्धादुपकार्योपकारकभावादेरिति चेत्; न; तत्रापि तथैव प्रसङ्गादनवस्थोपनिपाताच्च। ततः स्थितम्–**'समान'** इत्यादि।

'प्रतिपत्तिः' इत्यनेन तदात्मनः सम्बन्धस्य निरवद्यसंवेदनविषयतामद्योतन् स्वमनीषिकया तत्कल्पनं परिहरति। प्रतिपादिता च तत्प्रतिपत्तिर्बहुशः पूर्वमिति नेदानीं प्रतन्यते। ननु यथा धूमस्य तदन्तरसदृशस्य पावकसम्बन्धः तथा मशकवर्तेरपि, पावकस्यापि यथा तादृशस्य धूमप्रतिबन्धस्तथा मणिविशेषादेरपीति मशकवर्तेः पावकस्य धूमाच्च मण्यादेरनुमानमापद्यत इति चेत्; एवमेतद्, यदि समानपरिणाममात्रेण तद्भावः। न चैवम्; तद्विशेषेण तदुपकल्पनात्, तस्य च धूमपावकभेदेष्वेव भावात् न मशकादिभेदेषु। कथं पुनस्तत्परिणामो विशिष्टश्चाविशिष्टश्चेति चेत् ? कथं सामान्यं तादृशं यतो यथोक्तदोषस्तत्रापि न भवेत् ? तथा प्रतीतेरिति समानमन्यत्र। नन्वेवं सामान्यस्यैव समानपरिणाम इति शब्दान्तरमिति चेत्; न; प्रतिव्यक्तिपर्यवसितस्यैव परिणतिविशेषस्य तेनाभिधानात्[3], सामान्यस्य तद्विपरीतत्वात्।

भवतु तत्परिणाम एव सामान्यम्, तस्य तु व्यक्तिभ्यो भेद एवेति योगाः। अभेद एवेति साङ्ख्याः। तत्राह–

न भेदोऽभेदरूपत्वान्नाभेदो भेदरूपतः। इति।

न भेदो न व्यतिरेकः तत्परिणामस्य विशेषेभ्यः। कुत एव तद् (एतद्)? **अभेदरूपत्वात्** अभेदस्तस्य तैस्तादात्म्यं रूपं यस्य तस्य भावात् **अभेदरूपत्वात्**। एतदपि कुत इति चेत् ? तथा प्रतीतेरेव। तथा च वक्ष्यति–**'तथासंवित्तिसम्भवात्'** इति। संवेद्यते हि तत्परिणामस्य तदभेदरूपत्वं 'सदृशो देवदत्तः' इति देवदत्तविशेषसामानाधिकरण्येन तस्य संवित्तेः।

१ वैशे० सू० ७।२।२८ २ –दि त–ता०। ३ समानपरिणामशब्देन।

न हि सामानाधिकरण्यमन्यदभेदरूपत्वात् । समवायरूपमेव तन्नाभेदरूपत्वमिति चेत् ; न ; 'समवायः सम्बन्धः' इत्यादावभेदरूपतयैव भवतोऽपि तत्प्रसिद्धेः । **नाभेदो** नाप्येकान्तेन तस्य तैस्तादात्म्यम् । कुत एतत् ? **भेदरूपः [पतः]** तस्य तद्व्यतिरेकस्वभावत्वात् । एतदपि तथाप्रतीतेरेव । किं पुनर्भेदस्याभेदस्य च पृथक्प्रतिपत्तिरस्ति ? तथा चेत् ; न; **"न पश्यामः क्वचित् किञ्चित्"** [सिद्धिवि० पृ० १२१] इत्यादेर्विरोधात्, तद्विपययोरन्योन्यासंसृष्टयोरेव सिद्धिप्रसङ्गाच्च । न हि तत्प्रतीत्योरन्योन्यविषयासंस्पर्शे तत्संसर्गकल्पनमुपपन्नं प्रतीतिनिबन्धनत्वात् प्रमेयव्यवस्थायाः । तयोस्तत्संस्पर्शे वा जात्यन्तरप्रतिपत्तिरेवास्ति नाभेदप्रतिपत्तिः भेदप्रतिपत्तिर्वा पृथगिति चेत् ; सत्यमिदम् ; प्रमाणतो भेदाभेदप्रतिपत्तेरेव भावात्, भावस्य च ततो भेदाभेदात्मन एव प्रसिद्धेः न पृथग्भेदात्मनो नाप्यभेदात्मनश्च, किन्तु तत एव जात्यन्तरप्रतिपत्तेरपोद्धारपरिकल्पनया भेदस्येतरस्य च पृथक् प्रतिपत्तिमवस्थाप्य तद्विपयसद्भावः तदपरैकान्तप्रतिषेधे हेतुरुक्तः । तत एवाह—

सामान्यं च विशेषाश्च तदपोद्धारकल्पनात् ॥१६॥ इति ।

सामान्यं च चशब्दात् तत्प्रतिपत्तिश्च । **विशेषाश्च** चशब्दात्तत्प्रतिपत्तिश्च । तस्माज्जात्यन्तरात् तस्यास्तत्प्रतिपत्तेश्च **अपोद्धारो** निष्कर्षणं भेदस्य तत्प्रतिपत्तेश्चाभेदस्य तत्प्रतिपत्तेश्च तस्य **कल्पन**मभिप्रायाधिरोहणम्, तस्मात् 'व्यवस्थाप्यन्ते' इति शेषः । यदि पुनः सदृशपरिणामः सामान्यं तर्हि भेदेन भवितव्यं तस्य तन्निष्ठत्वेन इतरत्रासम्भवात् । न चायं सम्भवति; अभेदस्यैव सर्वभावेषु **"सदेव सौम्येदम्"** [छान्दो० ६।२।१] इति, **"सर्वं खल्विदं ब्रह्म"** [छान्दो० ३।१४।१] इति, **"ऐतदात्म्यमिदं सर्वम्"** [छान्दो० ६।८।७] इति चाम्नायात् प्रतिपत्तेः । भेदप्रतिपत्तेश्चाविद्योपरचितत्वेन गन्धर्वनगरादिप्रतिपत्तिवत् भ्रान्तत्वादिति [1]कश्चित् । भेद एव भावानां तात्त्विको न कथञ्चिदप्यनुगमः तत्प्रतिपत्तेरारोपितविषयत्वेन वितथात्वादित्यपरः[2] । तत्रोत्तरमाह—

संसर्गो नास्ति विश्लेषाद्विश्लेषोऽपि न केवलः ।
संसर्गात्सर्वभावानां तथा संवित्तिसम्भवात् ॥१७॥ इति ।

संसर्ग ऐक्यापत्तिरात्मापरनामा । केषाम् ? **सर्वभावानाम्** सर्वेषां चेतनेतरात्मनां भावानां पदार्थानाम् । स किम् ? **नास्ति** न विद्यते । कुतः ? **विश्लेषात्** व्यावृत्तेः विभ्रमापरनाम्नः संसारादिति गम्यते, विश्लेषस्य विश्लेष्याविनाभावात्, अन्यस्य विश्लेष्यस्य तत्रासम्भवात् । संसर्गे हि [3]भावानामात्मनो विभ्रमेणापि तद्भावाद्विभ्रम एव स्यान्नात्मवाद आत्मना वा तस्य तद्भावादात्मैव न विभ्रमवादः । तदनभ्युपगमे च निर्विषयमेतत् **" इन्द्रो मायाभिः पुरुरूप ईयते"** [ऋग० ४।७।२३] इति । **"एकधानेकधा चैव दृश्यते जलचन्द्रवत्"** [ब्रह्मवि० १२] इति च । विभ्रमादन्यस्य तद्विपयस्याभावात् । तस्मादस्ति विभ्रमो विश्लिष्टश्चात्मन इति वक्तव्यम् । अविश्लेषे तस्य संसारित्वापत्तेः नित्यमुक्तत्वप्रतिज्ञाव्याघातो विभ्रमरूपत्वात् संसारस्य । भवतु संसारस्य तस्माद्विश्लेषः तथापि न तत्प्रतिज्ञाव्याघातः, आत्मनस्तस्माद्विश्लेषस्यैव भावादिति चेत् ; न ; अविश्लिष्टा-

१ ब्रह्मवादी । २ बौद्धः । ३ भावानात्म–आ०, ब०, प० । ४ –धानेक–आ०, ब०, प० ।

दविश्लेपस्यैवोपपत्तेस्तस्य द्विष्ठत्वात् । कथमिदानीं [1]रुचकादेः सुवर्णादविश्लेषेऽपि सुवर्णस्य ततो विश्लेषः ? अन्यथा रुचकाद्यपक्रमे तस्याप्यपक्रमप्राप्तिः, न चैवम् ; [2] असत्यपि तस्मिन् तदवस्थितेरुपलम्भादिति चेत् ; रुचकादेरपि कथमवस्थायिनः सुवर्णादविश्लेषेऽनवस्थायित्वं विरोधादिति न किञ्चिदेतत् ।

स्यादाकूतम्—वस्तुन्ययं भवति विकल्पः संश्लेषो विश्लेष इति [3] च । न च विभ्रमस्य वस्तुत्वम् , तत्त्वविरोधात् , अतस्तत्र सत्त्वासत्त्वाभ्यामिव संश्लेषविश्लेषाभ्यामनिर्वचनीयत्वमेव तत्त्वमिति; ५ तदपि दुराकूतमेव; नित्यमुक्तिप्रतिज्ञाव्याघातस्य तदवस्थत्वात् । तथा हि—

निश्चिते सति विश्लेषे नित्यमुक्तत्वसम्भवः ।
तादूप्यात्तस्य विश्लेषावाच्यत्वे स कथं भवेत् ॥१२९५॥
आत्मविभ्रमयोस्तस्माद्विश्लेषं वक्तुमर्हसि ।
तथा चेदन्यभावानामप्यसौ किन्न कथ्यते ? ॥१२९६॥ १०
कुतोऽसाविति चेदात्मभ्रमयोरप्यसौ कुतः ।
तथासंवित्तिभावाच्चेदन्यत्रापि स दृश्यते ॥१२९७॥

तदाह—**'तथासंवित्तिसम्भवात्'** इति । **तथा** तेन विश्लेषप्रकारेण सर्वभावानां **संवित्तेः** सम्यग्बुद्धेः **सम्भवात्** विश्लेषो विश्लेषाच्च संसर्गो नास्तीति संग्रहणेन तत्संवित्तेरविद्योपरचितत्वं प्रत्याख्यातम् ; तद्रचितत्वे सम्यक्त्वानुपपत्तेः । समीचीना च तत्संवित्तिः बाधकाभावात् । १५ 'भ्रान्ता तत्संवित्तिः भेदविषयत्वात् मायातोयादिसंवित्तिवत्' इत्यनुमानं बाधकमिति चेत् ; न ; तस्य विभ्रमात्मभेदसंवित्त्या व्यभिचारात् । ततः स्थितम्—**'संसर्गो नास्ति'** इति ।

तथा **विश्लेषोऽपि न केवलः** संसर्गरहितः । कुतः ? **संसर्गात्** समाश्लेषात् **सर्वभावानाम्** । तदपि कुतः ? **तथा संवित्तिसम्भवात् । तथा** तेन संसर्गप्रकारेण **संवित्तेः** गौरयम् गौरयमित्यनुगमयत्या बुद्धेः **सम्भवात्** । संसर्गश्चात्र न मिश्रीभावो मतान्तर- २० सिद्धिप्रसङ्गात् , अपि तु सदृशपरिणामः तस्यैवोक्तसंवित्तौ प्रत्यवभासनात् , संसर्गशब्देन च तदभिधानोपपत्तेः समः सर्गः संसर्ग इति । न च तत्संवित्तेर्विभ्रमत्वं विश्लेषसंवित्तावपि तत्प्रसङ्गात् , बाधकाभावस्योभयत्रापि समानत्वादिति । एतावन्तरश्लोकौ, 'समानपरिणाम' इत्यादेराभ्यां व्याख्यानात् ।

कुतः पुनः समानपरिणाम एव सामान्यमभिमतं न नैयायिकादिकल्पितमेवेति ? अत्राह—

तद्व्याप्तिव्यतिरेकाभ्यां मतं सामान्यदूषणम् । इति । २५

तत् अनन्तरोक्तं सामान्यं **मतम्** इष्टं जैनस्य । कुतः ? सामान्यस्यान्यकल्पितस्य दूषणं **सामान्यदूषणं** यत इति । तदपि कुतः ? व्याप्तिश्च सामान्यस्य स्वव्यक्तिवत् व्यक्त्यन्तरेष्वपि भावः, व्यतिरेकश्च स्वव्यक्तिष्वेव भावस्ताभ्यां **व्याप्तिव्यतिरेकाभ्याम्** । तथा हि—यदि सामान्यं व्यापि; खण्डादिवत् कर्कादावपि गोत्वस्य भावाद् वाह्याद्यर्थी तत्रापि किन्न प्रवर्तेत ? तत्र तस्यानुपलम्भादिति चेत् ; खण्डादावुपलम्भः कुतः ? तत्र तस्य तत्करणशक्तेरिति चेत् ; कर्कादावपि स्यात् । ३०

---

१ "रुचकं मङ्गलद्रव्ये ग्रीवाभरणदन्तयोरिति विश्वप्रकाशिका ।" —ता० टि० । २–२ स–आ०, ब०, प० । ३ इति वचनवि–आ०, ब०, प० ।

न हि तस्यैव क्वचिच्छक्तिरशक्तिरन्यत्रेत्युपपन्नम् भेदापत्तेः । शक्तिः क्वचिदन्यत्राशक्तिर्नापरेति चेत् ; न; विधिनिषेधयोरभेदस्यानभिमतस्य प्रसङ्गात् । ततः क्वचिच्छक्तावन्यत्रापि शक्तिरेव, अशक्तौ न क्वचिदपि शक्तिरित्येकान्तः । तत एवोक्तम्—

"आत्मनि ज्ञानजनने यच्छक्तं शक्तमेव तत् ।
अथाशक्तं कदाचिच्चेदशक्तं सर्वदैव तत् ॥" [प्र० वा० २।२१] इति ।

शक्तमपि सहकार्यभावान्न कर्कादौ तदुपलम्भं जनयतीति चेत् ; खण्डादौ कः सहकारी ? स एव खण्डादिरिति चेत् ; कुत एतत् ? तत्र तस्य समवायात् ; कर्कादिरपि स्यात्तदविशेषात्[1] । शक्तस्य न च तदपेक्षणं सहकारिणोऽपि तत्प्रसङ्गात् अनवस्थापत्तेः । गोत्व (त्वं) तत्सहकारिसमुदायस्यैव शक्तिर्न पृथगिति चेत् ; पृथक्तर्हि गोत्वमवस्त्वेव स्यादशक्तत्वात् । तन्न व्याप्तौ तस्य क्वचिदुपलम्भोऽन्यत्रानुपलम्भश्चोपपन्नः । तथा तस्य कालव्याप्तौ आश्रये असतीव प्रध्वस्तेऽपि तस्मिन्नुपलम्भः स्यात् तज्जननस्वभावत्वात् । आश्रयं तस्य सहकारी, तदभावान्नेति चेत ; न; तदभावेऽपि तस्य तत्स्वभावत्वाप्रच्युतेः अनित्यत्वप्रसङ्गात् । अत एवोक्तम्—

"तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षमः ॥" [प्र० वा० २।२२] इति ।

शक्तिरपि तस्य सहकार्येव नापर इति चेत ; न; तस्य सामान्यादिव[2] व्योमकुसुमादपि[3] कार्यप्रसङ्गात्, स्वतः शक्त्यभावेनासत्त्वस्य तद्वत्सामान्येऽपि[4] सहकारिशक्तिकृतस्य च सत्त्वस्य सामान्यवत्तत्रापि निवारणात् । तन्न व्यापि सामान्यम् ।

एतेन मीमांसकोऽपि सर्वगतसामान्यवादी प्रत्युक्तः । स्यान्मतम्—न तत्सामान्यस्य सर्वगतत्वेऽपि सर्वत्रोपलम्भः सर्वत्र तदभिव्यक्तावशक्तेः । खण्डादौ भवत्युपलम्भस्तस्य तच्छक्तिभावात्, तस्य च कार्यादेव तदुपलम्भादवगतेः । कर्कादावपि किन्न तच्छक्तिरित्यपि न पर्यनुयोगः, 'दाहशक्तिर्दहनवदाकाशेऽपि किन्न स्यात्' इत्यपि तत्प्रसङ्गात् । न चैकस्योपलभ्येतरात्मकत्वं विरुद्धम् ; उभयात्मकत्वाद्वस्तुन इति । तत्रोच्यते—

सामान्यरूपा शक्तिश्चेत्तदभिव्यक्तिकारणम् ।
तस्याः सर्वत्र सद्भावात्तद्व्यक्तिः सर्वतो भवेत् ॥१२९८॥
शक्तेरपि च तद्व्यक्तिर्व्यक्तायाः एव नान्यतः ।
तद्व्यक्तिरपि खण्डादावेव नान्यत्र चेत्तदा ॥१२९९॥
शक्तौ तद्व्यक्तिकारिण्यां प्रसङ्गः पूर्ववद्भवेत् ।
पुनस्तद्व्यक्तिचिन्तायामापतत्यनवस्थितिः ॥१३००॥
विशेषात्मापि शक्तिश्चेन्न समा खण्डमुण्डयोः ।
मुण्डात्कर्कादिव व्यक्तिर्गोत्वस्येह कथं भवेत् ? ॥१३०१॥

---

१ समवायाविशेषात् । २ गोत्वस्य । ३ व्योमकुसुमवत् । ४ व्योमकुसुमेऽपि ।

शक्तिसाम्यं च सामान्यात्कुतश्चित्कल्प्यते यदि । यव-
तस्य सर्वत्र सद्भावात्समाः स्युः सर्वशक्तयः ॥१३०२॥ त्या-
व्यक्तं तत्साम्यहेतुस्तद्व्यक्तिश्च समशक्तितः । सापि
यदि तत्साम्यचिन्तायामन्या स्यादनवस्थितिः ॥१३०३॥ क्षयैव
स्वत एव समत्वञ्चेच्छक्तीनामवकल्प्यते । मनेक- ५
भावानामपि तद्वत्स्याद् वृथा सामान्यकल्पनम् ॥१३०४॥ व्याप्रति-
गौरयं गौरयं चेति कथमन्वयिनी मतिः । कथमसौ
सामान्यं यदि नास्त्येव गोत्वलक्षणमन्वितम् ? ॥१३०५॥ दित्यप्य-
इत्यप्यचोद्यमेवेदं समानपरिणामिषु । तथाविधं
तथासङ्केतसामर्थ्यात्तन्मतेरनुपद्रवात् ॥१३०६॥ उक्तम्— १०
इयं शक्तिरियं शक्तिरित्यप्यन्वयिनी मतिः ।
शक्तिष्वपि कथन्नाम सामान्यविरहोऽन्यथा ॥१३०७॥

तत्र मीमांसकस्यापि सर्वगतं सामान्यमुपपन्नम् । ततो निराकुर्वन्— ३५] इति ।

"यद्वा सर्वगतत्वेऽपि व्यक्तिः शक्त्यनुरोधतः ।
शक्तिः कार्यानुमेया हि व्यक्तिदर्शनहेतुका ॥ १५
तेन यत्रैव दृश्येत व्यक्तिः शक्तं तदेव तु । स्य तत्परिणाम-
तेनैव च न सर्वासु व्यक्तिष्वेतत्प्रतीयते ॥ व्यक्तिनियते न
भिन्नत्वेऽपि हि कासाञ्चिच्छक्तिः कार्यविशेषक यपि तस्मिन्नेकस्यैव
न च पर्यनुयोगोऽस्ति वस्तुशक्तेः कथञ्चन दरूपत्वात्तस्य चेतर-
अग्निर्दहति नाकाशं कोऽत्र पर्यनुयुज्यताम् । यादेकत्वस्यैवोपपत्तेः । २०
[मी० श्लो० नैकत्वमिति चेत्; न;

सत्येव सामान्ये वक्तुमेवमुचितत्वात् । अपि च, पत्तेः, एवमाश्रयभेदेऽपि

सर्वत्र विद्यमानत्वाद् ब्राह्मणत्वस्य गोत्वम् ।
शूद्रस्याप्यधिकारित्वं किन्न यज्ञादिकर्मसु ॥१३०८॥
तद्व्यक्तावेव तत्त्वं स्यान्न च शूद्रेऽस्ति न २५
कौण्डिन्यादावपि व्यक्तिर्नाकृत्या तत्र किंचन ॥१३०९॥
आकृत्या तदभिव्यक्तौ गोत्वकल्पनया वृथा ॥
यतस्तत्प्रतिपत्त्यर्थमुपायान्तरमिष्यते ॥१३१०॥ ः ।
तदन्तराच्च सामान्यकल्पनातिप्रसङ्गतः ।
शूद्रेऽपि तत्परिज्ञानं किन्न स्यात्तत्र ॥१३११॥
तस्याप्यविशेषाकृत्या यदि
उपायान्तरतो विशिष्टस्य

तरसापेक्षः तस्मिन्नेव स्वतन्त्रत्वात्
ते भावः । ३ स्वभाव इ-आ०,

तदन्तरं क्रियारूपं यद्यन्योन्यसमाश्रयः ।
तदन्तरेण तद्वित्तेस्तद्वित्तेश्च तदन्तरात् ॥१३१३॥
ब्राह्मणत्वपरिज्ञानं सम्प्रदायात्कचिद्यदि ।
शूद्रेऽपि किन्न भट्टस्य सम्प्रदायात्तदिष्यते ॥१३१४॥
शूद्रत्वस्यापि कौण्डिन्ये गतेस्तत्सम्प्रदायतः ।
तस्यापि नाधिकारः स्यात्तत्कर्मस्वन्यशूद्रवत् ॥१३१५॥

तत्र व्याप्तिः सामान्यस्य ।

भवतु व्यतिरेक एव स्वव्यक्तिष्वेव वर्तनात् न तदभावे नापि तदन्तरेष्विति चेत् ; तर्हि व्यक्तीनां विनाशे चोत्पादे च कस्तस्य विधिः ? न विनाशोत्पादौ; नित्यत्वात् , व्यक्तिरहिते च तदभावे[1] कथं तद्देशजन्मनि[2] तद्भावः ? तस्य तत्र पूर्वमभावात् , व्यक्त्यन्तराच्चातदात्मनोऽनागमनात् । तदुक्तम्—

"सामान्यं समवायश्चाप्येकैकत्र समाप्तितः ।
अन्तरेणाश्रयं न स्यान्नाशोत्पादिषु को विधिः ?"

[आप्तमी० श्लो० ६५] इति ।

तत्र व्यतिरेकेऽपि सामान्यमुपपन्नम् । ततो निषिद्धमेतदपि—

"व्यक्तिष्वेव हि सामान्यं नान्तरा गृह्यते यतः ।
न ह्याकाशवदिच्छन्ति सामान्यं नाम किञ्चन ॥"

[मी० श्लो० आकृ० श्लो० २५] इति ।

यस्य तु मतं स्वाश्रयादपि तद्व्यतिरिक्तमिति[3] ; तत्र कथं तस्य ? तेनोपकाराद्राजपुरुषवदिति चेत् ; न ; उपकारस्याव्यतिरिक्तस्यासम्भवात् , तस्य कौटस्थ्येनानाधेयातिशयत्वात् । व्यतिरिक्तश्च कथं तस्य ? ततोऽप्युपकारादिति चेत् ; न ; तस्याप्यव्यतिरिक्तस्यासम्भवात् । व्यतिरेके पूर्ववद्दोषानवस्थानुषङ्गाच्च । नोपकारात्तत्तस्य अपि तु तदाधेयत्वादिति चेत् ; तदपि कुतः ? स्वशक्तितश्चेत् ; तया तर्हि तदात्मकमेवास्तु तथैव प्रतीतेः, आश्रयाव्यतिरेकेण हि सामान्यस्य प्रतीतिः खण्डो गौः कर्को ऽश्व इति । चेन्न ततो[4] विश्वासः स्वरूपेऽपि न स्यादविशेषादिति सामान्यमेव न किञ्चित् सामान्यकल्पनावैफल्योपनिपातात् । तथा हि—

समानशक्त्या सामान्यं बिभ्रते यावदाश्रयाः ।
समानप्रत्ययं तावत्किन्न कुर्वन्ति ते तथा ॥१३१६॥
एवं हि न भवत्यत्र पारम्पर्यप्रकल्पनम् ।
सामान्यभरणं शक्तेस्तस्मादपि च तन्मतिः ॥१३१७॥ इति ।

तन्नाश्रयशक्तितोऽपि तस्य तदाधेयत्वम् । आश्रयव्यङ्ग्यत्वादिति चेत् ; न ; तदभिव्यक्तिकृतस्तच्छक्तेः वैलक्षण्येतरपक्षयोः पूर्ववद्दोषात् । आश्रयादपि नाव्यक्तादेव तदभिव्यक्तिः ; अन्धकारेऽपि तत्प्रसङ्गात् । व्यक्तिरपि न सामान्यरूपेण ; एकत्र व्यङ्ग्यव्यञ्जकभावानुपपत्तेः । अन्यदेव तत्सामान्यं

१ तदभावेन क–ता० । २ विशेषे । ३–क्तमपि तत्र –प० । ४ प्रतीतितः ।

यद्रूपेण तस्याभिव्यक्तिः तदप्यन्यदेव यस्य ततोऽभिव्यक्तिरिति चेत् ; न ; तत्राप्येवं प्रसङ्गादव्यवस्थितेश्च । नापि[1] विशेषरूपेण ; तस्यैव स्वतो भावविलक्षणस्याभावात् । स्वतोऽसतः सत्तासम्बन्धस्याप्यनुपपत्तेः व्योमकुसुमवत् । तन्न तदभिव्यङ्ग्यत्वादपि तस्य तदाधेयत्वम् । तत्र वृत्तेरिति चेत् ; सापि यदि स्वतन्त्रा ; कथमसौ सामान्यतदाश्रययोः ? स्वतन्त्रा च तयोश्चेति व्याघातात् । [2]वृत्त्यन्तरापेक्षयैव (क्ष एव) सम्बन्धः स्वतन्त्रत्वान्न भवति न [3]स्वभावत इति चेत् ; सोऽपि यद्येकः ; कथमनेकसम्बन्धित्वं ततस्तस्याः[4] ? कारणस्वभावादप्येकस्मादेव निरवशेषकार्यविशेषोत्पत्तेः [5]प्रधानवादस्याप्रतिक्षेपप्राप्तेः । अनेकश्चेत् ; न ; तद्भेदे वृत्तेरपि भेदप्रसङ्गात् । भिन्नैव ततो वृत्तिरपीति चेत् ; कथमसौ वृत्तेः ? तस्यास्तत्र सम्बन्धादिति चेत् ; न ; तत्राप्यनेकस्वभावकल्पनायामव्यवस्थितेः । तत्कार्यत्वादित्यप्यनेनापास्तम् । तस्मादसम्बन्ध एव सामान्यसमवाययोरर्थस्य च ताभ्यामभ्युपगन्तव्यः । न च तथाविधं तत्त्रितयं कुतश्चिदपि प्रमाणान्निश्चितवपुरिति खपुष्पकल्पितमेव तदनल्पमतयः प्रतिपद्यन्ते । तदुक्तम्—

"सर्वथा न हि सम्बन्धः सामान्यसमवाययोः ।
ताभ्यामर्थो न सम्बद्धः तानि त्रीणि खपुष्पवत् ॥"

[आप्तमी० श्लो० ६५] इति ।

कुतः पुनः समानपरिणामेऽपि न सामान्यदूषणमिति चेत् ? अत्राह—

समानपरिणामे न तदेकस्यानुपायतः ॥१८॥ इति ।

समानपरिणामो व्याख्यातः तत्र, **न** सामान्यदूषणम् । कुतः ? **तस्य** तत्परिणामस्यैकस्य व्यक्तिष्वनुस्यूतस्य **अनुपायतः** अनभ्युपगमात् । नन्वेवं सामान्येऽपि व्यक्तिनियते न दूषणं स्यात्, तस्यापि व्यक्त्यन्तराले विच्छेदेनैकत्वाभावादिति चेत् ; न ; सत्यपि तस्मिन्नेकस्यैव परैस्तस्याभ्युपगमात् । व्याहतमेतत्—'विच्छिन्नं चैकं च' इति, एकत्वस्याविच्छेदरूपत्वात्तस्य चेतरविरोधादिति चेत् ; भवतु परेषामेवायं दोषः । न दोषः ; तन्नियतस्यापि तस्यैकप्रत्ययादेकत्वस्यैवोपपत्तेः । एकत्वे कथमाश्रयभेद इति चेत् ? आश्रयस्य कथं कालभेदः ? सति [6]तस्मिंस्तस्यापि नैकत्वमिति चेत् ; न ; क्षणक्षयवादापत्तेस्तस्यानिषेधात् । ततो यथा कालभेदेऽपि व्यक्तिरेकैव तथा प्रतिपत्तेः, एवमाश्रयभेदेऽपि जातिरिति प्रतिपत्तव्यम् । तदुक्तम्—

"प्रत्येकसमवेतत्वं दृष्टत्वान्न विरोत्स्यते ।
तथा सत्यपि नानात्वं नैकबुद्धेर्भविष्यति ॥
न हि सम्बन्धिभेदेन स्वरूपैकत्वबाधनम् ।
विभुत्वावयवाभावौ प्रतिपाद्यौ च शब्दवत् ॥
यथा च व्यक्तिरेकैव दृश्यमाना पुनः पुनः ।

१—पि शेष—ता० । २ यः सम्बन्धः संयोगादिरूपः सम्बन्धान्तरसापेक्षः तस्मिन्नेव स्वतन्त्रत्वात् सम्बन्धाभाव आपादयितुं शक्यः न तु स्वभावतः सम्बन्धरूपे समवाये इति भावः । ३ स्वभाव इ—ता०, व०, प० । ४ वृत्तेः । ५ सांख्याभिमतस्य । ६ कालभेदे ।

कालभेदेऽप्यभिन्नैवं जातिर्भिन्नाश्रया सती ॥"

[मी० श्लो० वन० श्लो० ३०–३२] इति चेत्;

उच्यते—

व्यक्तीनामेवमेकत्वं कस्मान्न परिकल्प्यते ।
तथा सति न सामान्यमेकव्यक्तौ तदस्थितेः ॥१३१८॥
मिथो न तासामेकत्वं व्यतिरेकेण वेदनात् ।
इति चेन्ननु जातावप्यस्त्येव व्यतिरेकधीः ॥१३१९॥
अन्तरालेषु विच्छेदस्तस्याः कथमिवान्यथा ।
नाप्युपायान्तरं यस्मात्तद्विच्छेदव्यवस्थितौ ॥१३२०॥
[1]विच्छेदवदविच्छेदोऽप्येकप्रत्ययतो यदि ।
विच्छिन्नेतररूपत्वे जातेर्निर्भागता कथम् ॥१३२१॥

कथं चासौ स्वाश्रयेषु वर्तेत ? एकदेशेनेति चेत्; न तर्हि तत्र समानप्रत्ययः तस्यं जातेरेव भावात्, एकदेशस्य चाजातित्वात् जातिबहुत्वापत्तेः । सर्वात्मना चेत्; न; तदैवान्यत्र तत्प्रत्ययाभावापत्तेः । न ह्येकत्रैव सर्वात्मना वृत्ता सती तदैवान्यत्र सम्भवति यतस्तत्रापि तत्प्रत्ययः स्यात् । नन्ववयवशो वृत्तिः सावयवस्य यथा भूतकण्ठे सक्सूत्रादेः, परिसमाप्त्या च वृत्तिरविभोः यथा प्रतिपिण्डं गुणादेः । न च जातेः [3]सावयवत्वमविभुत्वं वा यतस्तत्रैवंविधा वृत्तिरवकल्प्येत । तस्मादन्याद्गेव तद्वृत्तिस्तस्या अपि तत्रैव दृष्टत्वात् । तदुक्तम्—

"कात्स्न्यांवयवशो वृत्तिः प्रष्टुं जातौ न युज्यते ।
न हि भेदविनिर्मुक्ते कात्स्न्यभागविकल्पनम् ॥
या चावयवशो वृत्तिः सक्सूत्रादिषु दृश्यते ।
भूतकण्ठे गुणादेश्च प्रतिपिण्डं समाप्तितः ॥
तत्रावयवयोगित्वमविभुत्वश्च कारणम् ।
आकृतेस्तदभावेन न प्रसक्तमदो द्वयम् ॥
न च द्वैविध्यमेवेति वृत्तेरस्ति नियामकम् ।
त्रिविधापि हि दृष्टत्वात् सम्भवेद् द्विविधा यथा ॥"

[मी० श्लो० वन० श्लो० ३३–३७] इति चेत्;

अत्रोच्यते–तृतीयोऽपि वृत्तिप्रकारो नापरः स्वरूप[त]स्तन्निष्ठत्वात्, तत्प्रतीतेः । स्वरूपं च यदि तावदेव यावदेकत्र दृश्यते; कथं व्यापकत्वम् ? न तावदेव, व्यापकत्वादिति चेत्; तस्य तर्हि निश्शेषव्यक्तिप्रतिपत्तावेव सम्भवति प्रतीतिः व्यापकप्रतिपत्तेः व्याप्यप्रतिपत्तिनान्तरीयकत्वात् ।

तथा च सति सत्त्वादिसामान्यप्रतिवेदिनः ।
सर्वे भवेयुः सर्वज्ञास्तत्कथं तन्निषेधनम् ॥१३२२॥

---

१ विच्छेदः स्यादवि –ता० । २ प्रत्ययस्य । तस्याजा–ता० । ३ समवायत्वमपि–ता० ।

व्याप्त्याग्रहेऽपि गृह्येत यदि तु व्यापकं तदा ।
विज्ञेयाग्रहणेऽपि स्यात्तज्ज्ञानग्रहणं न किम् ? ॥१३२३॥

ततो दुर्व्याहृतमेतत्

'सर्वज्ञोऽयमिति ह्येवं तत्कालेऽपि बुभुत्सुभिः ।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥" [मी० श्लो० सू० २ श्लो० १३४] इति ।

अथ व्यापकतया तन्न गृह्यते ; तर्हि न गृह्यत एव, तत्स्वभावस्यान्यथा ग्रहणासम्भवात् तद्विभ्रमापत्तेः । तन्न सामान्यं नाम किञ्चित् । तदभावे कुतस्तत्प्रयोजनं समानप्रत्ययादिकमिति चेत् ? न ; समानपरिणामादेव तद्भावात् । तदाह—

सदृशात्मनि सम्बन्धग्रहे भूयस्तथाविधे ।
प्रत्यभिज्ञादिना सिद्ध्येत् प्रायो लोकव्यवस्थितिः ॥ १९ ॥ इति ।

सदृशः समान **आत्मा** स्वभावो यस्य तस्मिन् धूमादौ **सम्बन्धस्य** पावकाद्यविनाभावलक्षणस्य **ग्रहः** परिज्ञानं भूयोऽनेकवारम् । सकृत् तद्ग्रहे तस्मिन् विस्मरणस्य व्यभिचारस्य च सम्भवात् , सति तस्मिन् **सिद्ध्येत्** निष्पद्येत । किम् ? **लोकव्यवस्थितिः** लोकस्य व्यवहर्तुर्जनस्य विशिष्टा प्रवृत्तादिलक्षणा अवस्थितिः परिणतिः । क? **तथाविधे** सदृशात्मनि पावकादौ । केन सा सिद्ध्येत् ? **प्रत्यभिज्ञादिना** तादृशमिदमिति ज्ञानं प्रत्यभिज्ञा, सादिर्यस्य तर्कादेस्तेन । प्रत्यभिज्ञासामर्थ्यादत्र दर्शनस्मरणयोरपि प्रतिपत्तिः तदभावे तदनुत्पत्तेः । तदयमर्थः—भूयोवृत्त्या क्वचित् प्रतिपन्नसम्बन्धस्य पुनस्तादृशवस्तुदर्शने संस्कारप्रबोधादनुस्मृतौ तादृशमिदमिति प्रत्यभिज्ञानम् , ततोऽपि 'इदमत्रैव नान्यत्र' इति व्याप्तिवितर्के साध्यपरिज्ञानाल्लोकव्यवस्थितिरिति । तदुक्तम्—

"अक्षज्ञानैरनुस्मृत्य प्रत्यभिज्ञाय चिन्तयन् ।
आभिमुख्येन तद्भेदान् विनिश्चित्य प्रवर्तते ॥" [सिद्धिवि० पृ० ९७] इति ।

यद्येवम् 'पुनर्दृगादिना सिद्ध्येत्' इति स्पष्टमेव निर्देष्टव्यं किं प्रत्यभिज्ञाग्रहणेन ? ततो[1] दर्शनाद्याक्षेपे प्रतिपत्तिगौरवादिति चेत् ; सत्यम् ; तथापि लोकव्यवस्थित्या तदस्तित्वनिवेदनार्थं तद्ग्रहणं तस्यास्तन्नान्तरीयकत्वात् । प्रत्यभिज्ञानाभावे हि व्याप्तिवितर्कानुत्पत्तेरनुमानासम्भवात् कुतस्तद्व्यवस्थितिः ? अस्ति चेयं प्रज्ञाकरस्यापि तस्मात्तेनापि साऽभ्युपगन्तव्या । ततो न युक्तमिदम्—"स इति स्मरणमयमिति प्रत्यक्षं न च तयोरेकत्वं प्रतिभासभेदात् । न च ततोऽपरं प्रतिभाति यत्प्रत्यभिज्ञानमुच्यते ।" [ ] इति तद्व्यवस्थितिरपि मा भूदिति चेत् ; किमिदानीं तत्त्वम् ? सर्ववस्तुनैरात्म्यमद्वैतं वेति चेत् ; नः तस्यापि प्रतिपादनलक्षणया तद्व्यवस्थित्यैव सिद्धेर्निरूपितमिदं प्रागिति न प्रतन्यते । तद्व्यवस्थित्या प्रत्यभिज्ञोपकल्पने किं "प्रत्यभिज्ञा द्विधा काचिद्" इत्यादिना[2] वक्ष्यमाणेनेति चेत् ? न : तस्य तद्भेदप्रति-

१ प्रत्यभिज्ञाशब्दतः । २ लोकव्यवस्थितिरपि । ३ न्यायवि० श्लो० २१९ ।

पादनार्थत्वात् । सदृशात्मत्वे वस्तुनस्तस्य कुतश्चित्प्रत्ययादभिधानतो वा प्रतिपत्तौ तदन्तस्य वैफल्यं स्यात्, अनधिगतस्य तद्विषयस्याभावात् । अधिगतविषयत्वे च प्रयोजनाभावादिति चेत्; सत्यमिदम्; यद्येकस्वभावो भावः स्यात् । न चैवम्, सदृशरूपस्येव विसदृशस्यापि रूपस्य विचित्रस्य तत्र भावात् । न चैवं कुतश्चित् कस्यचिदधिगमेऽपि तदन्तरवैफल्यम्; अनधिगतस्य तद्विषयस्य भावात् कथं पुनः सदृशस्येतरदितरस्य वा सदृशं रूपं विरोधात् तापहिमस्पर्शवदिति चेत् ? उपपन्नं तापेतरस्पर्शयोः विरोधवत्त्वं तदेकस्येतरपरिहारेणैव प्रतिपत्तेः, न चैवं सदृशेतरयोः, परस्परात्मतयैव सर्वदा संवेदनात् । संविदिते च न विरोधो वस्तुमात्रेऽपि प्रसङ्गेन शून्यतापत्तेः । निरूपितं चैतत् पूर्वम् ।

अपि च, सदृशेतरवदेकानेकरूपयोरपि विरोधाविशेषात् कथमेकत्रानेकोपाधिसम्भवो यतस्तैस्तद्वान् व्यपदिश्येत ? अर्थान्तर्भूतैरेव स तैर्व्यपदिश्यत इति चेद्; अत्राह—

तद्भूतोऽनुपकारेऽपि भेदे कथमुपाधयः । इति ।

उपाधयो विशेषणानि गोत्वशुक्लत्वादीनि **तद्भूत** उपाधिमतः **कथम्** न कथञ्चित् भवेयुरित्युपस्कारः । कदा ? **भेदे** तद्वतस्तेषामर्थान्तरत्वे घटस्येव पटादय इति भावः । भेदेऽपि सम्बन्धात्ते[1] तस्येति चेत्; न; तस्य निषेधात्, अनिषेधे खण्डादेरिवात्मादेरपि ते भवेयुः तस्य सर्वत्र भावात् । उपकारादिति चेत्; न; नित्यानामनुपकारात् । उपकारेऽप्यतिप्रसङ्गात् । न ह्युपकारादेव ते तस्य; महेश्वरस्यापि तत्प्रसङ्गात्, तस्य सर्वोपकारकारित्वेन प्रसिद्धेः । एतदेवाह— **अनुपकारेऽपि** । अपिशब्दादुपकारेऽपीति । यदि चोपकर्ता तद्वाँस्तदा स केनचिदुपाधिना प्रतीयमानः स्वोपकार्यानुपाधीनपि सर्वान् प्रत्याययति उपकार्यप्रतीतावुपकर्तुरप्रतिपत्तेः । तथा च न तत्र प्रमाणान्तरप्रवृत्तिः अनधिगतस्य तद्विषयस्याभावात् । प्रमाणसम्प्लवस्याभिमतत्वान्न दोष इति चेत्; एवमपि कथं परप्रतिपादनं तस्यापि तत्राविप्रतिपत्तेः । न हि प्रतीयमान एवानित्यत्वादौ विप्रतिपत्तिः धर्मिणि शब्देऽपि तत्प्रसङ्गेन हेतोराश्रयासिद्धत्वापत्तेः । एकोपाधिद्वारेण प्रतीयमानस्तदुपकारशक्त्यैव प्रतीयते न तदन्तरोपकारशक्तिभिरिति चेत्; न; शक्तीनां तद्वतोऽनर्थान्तरत्वात् । अर्थान्तरत्वेऽपि कथं तस्येति व्यपदिश्यन्ताम् ? उपकारादिति चेत्; अनिवृत्तो व्यावृतः । तदुपकारशक्तिरूपतया तत्प्रतीतौ तच्छक्तीनां तदुपाधीनाञ्चावश्यन्तया प्रतिपत्तेः, पुनस्तच्छक्तीनां तदर्थान्तरत्वकल्पनायामनवस्थापत्तिः । तन्नोपाधितद्वतां भेदे तद्व्यवहारः ।

भवत्वभेद एवेति चेत्; अत्राह—

तत्रैकत्वप्रसङ्गाच्चाभेदे कथमुपाधयः ॥ २० ॥ इति ।

तत्र तस्मिन् विवादगते । **कस्मिन्** ? अभेदे शब्दादेरुपाधिमतः कृतकत्वादीनामनर्थान्तरत्वे **कथं** नैव **उपाधयः** तदा शब्दादेर्धर्मिण एवावशेषात् । तथा च न स्वभावलिङ्गजमनुमानं साध्यसाधनभेदस्याभावात् । कल्पितस्तद्भेद इति चेत्; न; कल्पनस्यैवास्मिन् पक्षे निर्विकल्पेतरोपाधिद्वयाधिष्ठानस्यासम्भवात् । कल्पनातस्तत्सम्भवे अनवस्थादोषात् । । एवं ब्रह्मणो[4] जीवानामभेदे तदेवं न ते[5] इति कथं तद्विशिष्टतया तत्प्रतिपत्तिर्यत एवमाम्नायते—"अनेन जीवेनात्मना"

१ उपाधयः । २ उपाधिमान् । ३ तदनन्तरो—आ०, ब०, प० । ४ ब्रह्मैव । ५ जीवादयः ।

[छान्दो० ६।३।२] इति ? सत्यं वस्तुवृत्त्या तद्भेदिन एव ते भेदस्तु कल्पनात इति चेत् ; न; भेदेऽप्युपाधित्वस्य निषेधात् । कुतो वा तत्कल्पना ? न तावद् ब्रह्मण एव; तस्य सत्य-ज्ञानत्वात् । "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्ति० २।१।१] इत्याम्नायात् , तस्य च मिथ्या-प्रतीतेरसम्भवात् , कल्पनायाश्च तत्प्रतीतिरूपत्वात् । नाप्यन्यतः तदभावात् । कल्पनातस्तद्भावे स एव प्रसङ्गः 'न तावत्' इति । अस्याप्यन्यतः कल्पनायाम् अनवस्थापत्तिः । नायं दोषः, कल्पनायास्तादृक्-प्रबन्धस्यानादित्वादिति चेत् ; न; तस्यापि ब्रह्माभेदेनाभावात् । पुनरन्यतस्तत्प्र-बन्धात् तत्परिकल्पनायाम् अनवस्थापत्तेरप्रतिपत्तेश्च । न हि परापरस्य तत्प्रबन्धस्य प्रतिपत्तिः । कुतो वा तस्य व्यवस्थितिः ? न तावद् ब्रह्मणः; तन्निषेधात् । नापि स्वतः; स्वयं प्रकाशरूपत्वे ब्रह्मवत् परमार्थत्वापत्तेः । ब्रह्मसम्पर्कात्तस्य तादूप्यं घटस्येव प्रतिसम्पर्कात्, न स्वत इति चेत् ; न; सत्यपि तस्मिन् स्वयमतद्रूपस्य तद्रूपत्वानुपपत्तेः । घटस्य तु न तन्मात्रात्तादूप्यमपि तु स्वयं तथा परिणामादेव, अन्यथा परमाण्वादेरपि तत्प्रसङ्गात् तत्सम्पर्कस्य तत्राप्यविशेषात् । तन्न तद्वत उपाधीनामभेदे तद्भावः । नाप्युपाधिमत उपाध्यभेदे; तत्र हि तस्याभाव एव स्यात् तत्र च नोपाधयस्तेषां तदपेक्षत्वात् । एतदेवाह–**'एकत्वप्रसङ्गाच्च'** इति । उपाधीनामुपाधिमद्भेदे तद्वदेकत्वस्य उपाधिमतश्चोपाध्यभेदे चशब्दात्तद्वन्नानात्वस्य **च प्रसङ्गान्नोपाधय** इति । कथं पुनर्भेदाभेदाभ्यामुपाधितद्वद्भावनिराकरणं जैनस्य स्वयमपि तदभ्युपगमादिति चेत् ? अत्राह–

नोपधयो न तद्वन्तो भिन्नाभिन्ना अपि स्वयम् । इति ।

अपि स्वयम् आत्मनो जैनस्य **नोपधयो** न विशेषणानि कृतकत्वादीनि सन्ति **न तद्वन्त** उपाधिमन्तः शब्दादयः । कीदृशाः ? **अभिन्नाः** परस्परमेकान्तेनाव्यतिरिक्ता साङ्ख्यवत् । तथा **भिन्ना अपि** व्यतिरिक्ता अपि यौगवत् , उक्तन्यायादिति भावः । तत्रैवोपपत्त्यन्तरमाह–

जात्यन्तरे तथाभूते सर्वथा दर्शनादपि ॥ २१ ॥ इति ।

ऐकान्तिकाद्भेदादभेदाच्चान्या जातिः **जात्यन्तरं** भेदाभेदात्मकं वस्तु तत्र **दर्शनात्** उपाध्युपाधिमद्भावस्योपलम्भात् , न केवलं पूर्वोक्तन्यायादित्यपिशब्दः । भवति चात्र प्रयोगः– यैर्यस्य विरुद्ध एव दृश्यते न तत्तत्र विद्यते तथा कृतकत्वादिकं नित्यत्वादौ, दृश्यते चैकान्तविरुद्धे जात्यन्तर एवोपाध्युपाधिमद्भाव इति । न चेदं तत्रैव तद्दर्शनमसिद्धम् ; कृतकश्शब्द इत्युपाधि-तद्वतोः कथञ्चिदव्यतिरेकस्य प्रतिपत्तेः । न चात्र कुतश्चिद्विरोधः; प्रतिपन्ने तदयोगात् । प्रति-पत्त्यपह्नवे च न किञ्चित् स्यात् , तदन्यस्य वस्तुव्यवस्थानिबन्धनस्याभावात् । भवतु सर्वनैरात्म्य-मेवेति चेत् ; न; तद्वादे तदसम्भवाद् विरोधात् । नापि तादृशात् ; तस्यापि तादृशात् सिद्धावन-वस्थानात् । नाप्यन्यादृशात् ; तद्वादे तदसम्भवाद् विरोधात । कथं पुनरव्यतिरेकाविशेषे शब्द-स्योपाधिमत्त्वमेव नोपाधित्वमिति चेत् ; न; 'पौद्गलिकः शब्दः' इत्युपाधिमत्त्ववत् 'शब्दः पुद्गलः' इत्युपाधित्वस्यापि तत्र प्रतीतेः । एकोपाधिप्रतिपत्तौ किन्न सर्वोपाधिप्रतिपत्तिरिति चेत् ? न ; एकान्ताभेद एव दोषात्–

---

१ कल्पनाप्रबन्धस्य । २ कल्पनाप्रबन्धस्य । ३ प्रदीपादिसंपर्कात् । ४ प्रदीपादिसम्पर्कसाम्यात् । ५ उपाधिमतः । ६ उपाधिमदपेक्षत्वात् । ७ यद्यद्विरु-आ०, ब०, प० । ८ प्रतीतिव्यतिरिक्तस्य ।

तथा हि—

शब्दाच्चेत्तदनित्यत्वमेकान्ताव्यतिरेकवत् ।
तद्ग्रहे ग्रहणात्तस्याप्यनुमानेन किं फलम् ॥ १३२४ ॥
निश्चयश्चेन्न तस्यापि तन्निश्चित्यैव निश्चयात् ।
निश्चितानिश्चितत्वेन तद्भेदोऽप्यन्यथा भवेत् ॥ १३२५ ॥
निश्चिते च समारोपो विरोधान्नावकल्पते ।
यतस्तस्य व्यवच्छेदः फलं स्यादानुमानिकम् ॥ १३२६ ॥

तथा यौगस्य—

अर्थान्तरत्वमेवात्मा भागेभ्यो यदि भागिनः ।
तथैवासौ प्रतीयेत नानुस्यूततया जनैः ॥ १३२७ ॥
अस्ति चायमनुस्यूतप्रत्ययस्तन्तवो हि ते ।
पटोऽयमिति लोकस्य प्रवादादप्रमादिनः ॥ १३२८ ॥
न चायं विभ्रमादेव निश्चिते तदसम्भवात् ।
सुप्रसिद्धं च योगस्य प्रत्यक्षं निश्चयात्मकम् ॥ १३२९ ॥
न तन्निश्चितभेदस्याप्यभेदविषया मतिः ।
निवेदितमिदं देवैः स्वयमन्यत्र[1] तद्यथा ॥ १३३० ॥
"प्रत्यक्षं सविकल्पं चेत्सामान्यसमवायिनाम् ।
अनुस्यूतधियो न स्युरेकस्यात्र विनिश्चयात् ॥" इति ।
सामान्यगुणकर्मस्वप्येवं तद्वद्विभेदिषु ।
तथैवावगमात्तेषु विवादो विदुषां कथम् ॥ १३३२ ॥
तद्व्यवच्छित्तये तस्माद्व्यर्थं शास्त्रोपकल्पनम् ।
एकान्तव्यतिरेकस्तन्नोपाधीनां परस्परम् । १३३३ ॥

तस्मादुपपन्ना जात्यन्तरे कस्यचित्प्रतिपत्तावपि उपाधेस्तदन्तरस्याप्रतिपत्तिः कथञ्चिदेव तयोरव्यतिरेकात् । जात्यन्तरं विशिनष्टि—**तथा** तेनोपाध्युपाधिमद्भावप्रकारेण **भूते** स्वहेतोरेवोत्पन्ने इति । न हि स्वहेतोरनुपजातमन्यतो भवति । समवायाद्भवत्येवेति चेत् ; न ; तस्य निषिद्धत्वात् । कथं तत्र तदर्शनमिति चेत् ? **सर्वथा** सर्वेण परमार्थप्रकारेण चेति । न हि कल्पना नाम जात्यन्तरमन्तरेण, तस्या अभिलाप्येतरस्वरूपतया तदात्मत्वात् । अन्यथा तदसम्भवस्य निवेदितत्वादित्यलं प्रसङ्गेन ।

परस्य[2] तु मतम्--न शब्दालिङ्गाद्वोपाधिमतः प्रतिपत्तिर्यतस्तस्य निरवशेषोपाधिशबलितस्यैकस्मादेव शब्दादेरवगमात् तदन्तरस्य तत्र वैफल्यं स्यात्, अपि तूपाधीनामेव । तत्र चैकतम-

---

१ सिद्धिविनिश्चये (परि० २) । २ "मीमांसकस्य"—ता० टि० । "अनन्तधर्मके धर्मिण्येकधर्मावधारणे । शब्दोऽभ्युपायमात्रं स्यान्नात्माध्यारोपकारणम् ॥"—मी० श्लो० १।१।४ श्लो० १७८ ।

विषयेणान्येषामनवगमात् न तदन्तरवैयर्थ्यमिति । तत्राह—

तद्वत्यचोदिते शक्तेऽशक्ताः किं तदुपाधयः ।
चोद्यन्ते शब्दलिङ्गाभ्याम् [समं तैस्तस्य लक्षणे] ॥ २२ ॥ इति ।

ते उपाधयो विद्यन्तेऽस्येति **तद्वान्** खण्डादिस्तस्मिन् । कीदृशे ? **शक्ते** वाहदोहादिप्रयोजननिर्वर्तनसमर्थे । **किं** न किञ्चित् तदर्थिनां तत्र प्रवृत्त्यादिकम् । यदि स तत्र समर्थः कथं न प्रवृत्त्यादिकमिति चेत् ? आह—**अचोदिते** बुद्धिविषयत्वेनाप्रेरिते । **शब्दलिङ्गाभ्यां** शब्देन गवादिना लिङ्गेन ककुद्मत्त्वादिना । न हि शक्त इत्येव कचित् कस्यचित् प्रवृत्तिरतिप्रसङ्गात्, अपि तु प्रतिपन्ने । न च शब्दादेस्तद्वतः प्रतिपत्तिः। अस्तूपाधिष्वेव प्रवृत्तिः तेषां ततः प्रतिपत्तेः, तदाह—**'तदुपाधयश्चोद्यन्ते शब्दलिङ्गाभ्याम्'** इति । तत्रोत्तरम्—**किं** न किञ्चिद् वाहादिप्रयोजनं तदुपाधिभिरिति विभक्तिपरिणामेन सम्बन्धः। कुतः? **अशक्ताः** ते तत्रासमर्था यत इति ।

उपाधयश्चेत्ते तत्र समर्थाः परिकल्पिताः ।
उपाधिमान् परः कस्मात् कल्प्यते निष्प्रयोजनः ? ॥ १३३४ ॥
तस्मादशक्तितस्तेषां चोदितैरपि तैः फलम् ।
न किञ्चिद्व्यवहर्तॄणां व्यर्था तच्चोदना ततः ॥ १३३५ ॥

यदि चोपाधिमतो न चोदना कुत इदानीं 'खण्डादेर्गोत्वादिः' इति प्रतिपत्तिः ? प्रमाणान्तरादिति चेत् ; यत्र तर्हि नोभयविषयं तदस्ति तत्र कथं यथा 'श्रेयःसाधनत्वं द्रव्यादेः' इति । न ह्यत्र द्रव्यादेरिव तदुपाधेः श्रेयःसाधनत्वस्यापि प्रमाणान्तरात् प्रतिपत्तिः, आगमादेव तद्भावात् । अत एवोक्तम्—**"धर्मे चोदनैव प्रमाणम्"** [ ] इति । न च तत्साधनत्वस्येव द्रव्यादेरपि तद्वतः शब्दादेव प्रतिपत्तिः 'उपाधय एव चोद्यन्ते' इत्यस्य विरोधात् । न चोभयविषयमन्यदस्ति यतोऽयमस्येति सङ्गलनम् । आत्मास्तीति चेत् ; न ; ततोऽप्रमाणात्तदयोगात् प्रमाणकल्पनावैफल्यात् । प्रमाणत्वेऽपि नोभयविषयत्वम् ; प्रत्यक्षादित्वे द्रव्यादावेव, शाब्दत्वे च तत्साधनत्व एव पर्यवसानात् । न चैकैकमात्रपर्यवसित इदमस्येति सङ्गलयितुमर्हति, सत्येवोभयविषयत्वे तदर्शनात् यथा देवदत्तस्य कम्बल इति । ततो न युक्तमिदम्—

"द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।
[मी० श्लो० १।१।२ श्लो० १३] इति ।

तत्र उपाधिमतोऽचोदनायामसङ्गलनं प्रवृत्तिर्वा । तत्रोपाधिभिस्तत्परिज्ञानात् प्रवृत्तिरिति चेत् ; शब्दादिनैव किन्न तत्परिज्ञानं यतः पारम्पर्यं परिकल्प्येत ? तद्वतामानन्त्यात् तत्र शब्दसम्बन्धस्य दुरवबोधत्वादिति चेत् ; न; उपाधिसम्बन्धस्यापि तदविशेषात् । न ह्युपाधयोऽप्यपरिज्ञातसम्बन्धा एव तमवगमयन्ति अतिप्रसङ्गात् । कथं वा तत्र शब्दान्तरादिप्रवृत्तिः ? एकोपाधिद्वारेणैकवत् तद्वतः सकलोपाधिशबलितस्य प्रतिपत्तेः । तदाह—**'समं तैस्तस्य लक्षणे ।'** इति । **समं** सदृशं दूषणम् । तैरुपाधिभिः **तस्य** तद्वतः लक्षणे परिज्ञाने इति ।

---

१ "वाहदोहादिप्रयोजने"—ता० टि० । २ शब्दलक्ष आ०, ब०, प० । ३ उपाधिपरिज्ञानात् ।
४ उपाधिगतः परिज्ञानम् । ५ तद्वता सूत्रे स्यात्—आ०, ब०, प० । ६ तदुपलम—आ०, ब०, प० ।

तदुपाधिभिरप्युपाधिरूपतयैव तस्य लक्षणाददोष इति चेत्; न; अन्यरूपतयाऽन्यस्य लक्षणायोगादनवस्थाप्रसङ्गाच्च । कथञ्चोपाधेरपि चोदनम्, कथञ्च न स्यात्? सम्बन्धापरिज्ञानात्। न ह्यपरिज्ञातसम्बन्धादेव लिङ्गादेस्तत्परिचोदनम्; अतिप्रसङ्गात्। तत्परिज्ञानञ्च सिद्ध एव गोत्वादा उपाधौ भवति नासिद्धे खरविषाणवत्। सिद्ध एवायं 'खण्डो गौर्मुण्डो गौः' इत्यनुगमप्रत्ययादिति चेत्; ततः पूर्वं कीदृशस्तत्स्वभावः? सिद्ध एव तदापि तत्प्रत्ययादिति चेत्? न; ततोऽपि पूर्वं तत्प्रत्ययात्तत्सिद्धौ तत्प्रसङ्गात, तस्य चाप्रतिपत्तेः, विषयान्तरसञ्चारव्यतिक्रमाच्च असिद्ध एवेति चेत्; उच्यते—

तत्प्रत्ययेऽपि तस्यासौ स्वभावश्चेन्न नश्यति ।
सँ कथन्नाम सिद्धः स्यात्तादृगन्यपदार्थवत् ॥ १३३६ ॥
स एव प्रत्ययस्तस्य सिद्धिँश्चेत् सर्ववस्तुनः ।
स एव सिद्धिरेवं च विफलं प्रत्ययान्तरम् ॥ १३३७ ॥
प्रतीतिस्तस्य सर्वस्य न परिस्फुरतीति चेत् ।
अँत्यक्तासिद्धरूपस्य प्रकृतस्यापि तत्समम् ॥ १३३८ ॥
यदि तस्य परित्यागे सति तत्प्रत्ययो भवेत् ।
कथं नित्यस्वभावत्वं गोत्वादेरुपवर्णितम् ॥ १३३९ ॥
न चानेकान्तवादेऽस्ति परस्याभिरुचिर्यतः ।
उत्पत्तिस्थितिसंहारस्वभावोऽयं प्रकल्प्यताम् ॥ १३४० ॥

किञ्च, अँयमनुगमरूपतया कुतश्चित्सिध्यन् विशेषादव्यतिरिक्तश्चेत्; विशेषस्यैवानुगमः स्यात् अव्यतिरेकस्यैवंरूपत्वात्[10]। न चैवम्, खण्डादिरेव मुण्डादिरित्यप्रतिपत्तेः, वस्तुसाङ्कर्यदोषाच्च। नैकान्तेनाव्यतिरेकः व्यतिरेकस्यापि भावादिति चेत्; न; उभयस्वभावतया सावयवत्वापत्तेः। न चेदमुचितम्—"विभुत्वावयवाभावौ प्रतिपाद्यौ च शब्दवत्।" [मी० श्लो० वन० श्लो० ३१] इत्यस्य विरोधात्। व्यतिरिक्तश्चेत्; न;

"सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका ।
जायते द्व्यात्मकत्वेन विना सापि न युक्तिमत् ॥" [मी० श्लो० आकृति० श्लो०५]

इत्यस्य व्यापत्तेः, अनेनाव्यतिरेकस्य प्रतिपादनात्। तत्र गोत्वादेः सिद्धिर्यत्र सम्बन्धपरिज्ञानं लिङ्गस्य। भवतु विशेषेष्वेव तस्य तदिति चेत्; न; तेषामानन्त्येनार्वाग्दृशां तत्र[11] तदसम्भवादित्यभाव एवानुमानस्य। इदमेवाह—

सम्बन्धो यत्र तत्सिद्धेरन्यतोऽप्रतिपत्तितः ।
अनुमानमलं [किं तदेव देशादिभेदवत्] ॥२३॥ इति ।

---

१ उपाधिमतः। २ गोत्वादिः। ३ तथापि आ०, ब०, प०। ४ अनुगतप्रत्ययात्। ५ असिद्धः स्वभावः। ६ कथन्नाम भवेत्सिद्धस्ता—आ०, ब०, प०। ७ सिद्धश्चे—आ०, ब०, प०। ८ अत्यक्ता—आ०, ब०, प०। ९ गोत्वादिः। १०—स्यैव रूपात्वत् आ०, ब०। ११ तत्र सम्भ—अ०, ब०, प०।

सम्बन्धो लिङ्गस्याविनाभावः सिद्ध्येदिति शेषः । कुतः ? **यत्र** यस्मिन् साध्ये गोत्वादौ स मतः **तत्सिद्धेः** । न च तत्सिद्धिरुक्तान्यायादिति भावः । ततश्च **अनुमानमलम् अनुमानस्य मलं** दूषणमभावलक्षणमित्यर्थः । सम्बन्धप्रतिपत्तिपूर्वकत्वेन तस्य तदभावेऽनुपपत्तेः । अतश्च तन्मलम् , **अन्यतः** अन्येषु विशेषेषु **अप्रतिपत्तितः** । सम्बन्धस्येति विभक्तिपरिणामेन सम्बन्धः । ५

भवतु विशेषेषु देशत एव तत्परिज्ञानं न साकल्येनेति चेत् ; अत्राह—**सम्बन्ध** इत्यादि । **यत्र** यस्मिन् विशेषरूपे लिङ्गे साध्ये च **सम्बन्धो** ज्ञातस्तयोस्तज्ज्ञानादेव सिद्धिः **तत्सिद्धिः** तस्याः सम्बन्धसिद्धेः सम्बन्धसिद्धित एवोपपत्तेः **अनुमानमलं** पर्याप्तं निष्प्रयोजनत्वात् । अन्यत्र सप्रयोजनमिति चेत् ; न ; **अन्यतः** अन्यस्मादप्रतिपन्नसम्बन्धाल्लिङ्गाद् **अप्रतिपत्तितः** साध्यस्यापरिज्ञानादतिप्रसङ्गादनुमानमलं कल्पयित्वेति शेषः । नायं दोषः; १० सामान्ये सम्बन्धज्ञानात् , तस्य च निदर्शनवदन्यत्रापि भावेन अनुमानोपपत्तेरिति चेत् ; न ; दत्तोत्तरत्वात् । अपि च, सामान्यं यदि प्रतिव्यक्ति भिन्नम् ; कस्तस्य विशेषेभ्यो विशेषो यतस्तत्र सम्बन्धग्रहणम् ? अथाभिन्नमेव निदर्शनगतस्यैवान्यत्रापि भावात् ; तर्हि निदर्शनस्थान एवान्यत्र गतस्यापि किन्न प्रतिपत्तिः ? न हि प्रतिपन्नादभिन्नमप्रतिपन्नमुपपन्नं नाम विरोधात् । अस्त्येव तस्यापि प्रतिपत्तिरिति चेत् ; न ; तदधिकरणानामपि तत्प्रसङ्गात् । न हि तदप्रतिपत्तौ १५ तन्निष्ठस्य प्रतिपत्तिः । मा भूत्तन्निष्ठतया तस्य सेति चेत् ; न ; तस्य तत्स्वभावत्वात् , प्रतीतस्य चेतरस्वभावानुपपत्तेः । नासौ तस्य स्वभावः समवायत्वेनार्थान्तरत्वादिति चेत् ; तेन कथं तन्निष्ठं नाम ? अनभिमतव्यक्तिनिष्ठताया अप्यनुपङ्गात्तदविशेषात् । तथापि स्वगतात्कुतश्चिद्विशेषात् नियतविशेषनिष्ठमेव तदिति चेत् ; स तर्हि विशेषः प्रतीयमानः तद्विशेषानपि प्रत्याययति, अन्यथा स्वयमप्रतिपत्तेः । न हि तदभिमुखस्य तदप्रतिपत्तौ सम्भवति २० प्रतिपत्तिः । न च तस्यापि तदर्थान्तरत्वं पूर्वप्रसङ्गादनवस्थापत्तेश्च । दृश्यमानव्यक्त्यभिमुखस्यैव तस्य ज्ञानं न तदन्याभिमुखस्येति चेत् ; किमिदानीं प्रतिव्यक्ति तस्य भेदः ? तथा चेत् ; न ; तँदनन्यत्वेन सामान्यस्यापि तत्प्रसङ्गात् , 'भिन्नादभिन्नं भिन्नमेव, इति न्यायात् । तदाह—**'किं तदेव देशादिभेदवत्'** इति । **तदेव** एकमेव । किम् ? नैव । सामान्यम् । कीदृशम् ? देशस्तदंशो व्यक्त्यभिमुखस्वभाव आदिर्यस्याश्रयादेः सोऽस्यास्तीति **देशादिभेदवत्** २५ इति । तन्न सामान्यं नाम किञ्चित् , यत्र प्रतिबन्धग्रहणं लिङ्गस्य ।

भवतु वा तत् , तथापि किं तत्प्रतिपत्त्या ? तदनुमानमिति चेत् ; तेनापि किम् ? अर्थक्रियार्थिनस्तत्र प्रवृत्तिरिति चेत् ; न ; तत्र तस्यासामर्थ्यात् विशेषकल्पनावैयर्थ्यापत्तेः । विशेषेष्वेव तदनुमानात्प्रवृत्तिरिति चेत् ; कथमन्यानुमानादन्यत्र प्रवृत्तिः", अतिप्रसङ्गात् । अनुमितादनुमानादिति चेत् ; नः प्रतिबन्धापरिज्ञाने तदनुपपत्तेः । तत्परिज्ञानञ्च न साकल्येनः ३० अस्मदादेरशेषविशेषप्रतिपत्तेरभावात, देशत इति चेत् ; न ; तत्रापि प्रतिबन्धज्ञानविषयस्य तत

१—रुक्तन्या—आ०, ब०, प० । २ सम्बन्धिसि—आ०, ब०, प० । ३ भावे अ—आ०, ब०, प० । ४ प्रतिपत्तिप्रसङ्गात् । ५ समवायेन । ६ तदभिमुखस्वस्यापि । ७ तदन्यत्वेन आ०, ब०, प० । ८—तु तथापीति तत्र तत्प्र—आ०, ब०, प० । ९ "प्रतिबन्धप्रतिपत्त्या"—ता० टि० । १० लिखते । ११ प्रतिपत्तिः आ०, ब०, प० ।

एव सिद्धेः, अतद्विषयस्य चानुमानाद्प्रतिपत्तेः तस्यैवानवतारात्। एतदेवाह–**'सम्बन्ध'** इत्यादि। व्याख्यानं पूर्ववत्। एकत्र विशेषे सम्बन्धग्रहणमेव सामान्यस्यान्यत्रापि तद्ग्रहणं तदयमदोष इति; स्यादेवं यदि विशेषाणामेकत्वं भवेत्, न चैवम्, देशादिभेदाभावापत्तेः। तदाह–**'किम्'** इत्यादि। **तदेव** सम्बन्धज्ञानवेद्यमेव विशेषरूपम्, किम्? नैव भवति। कीदृशं न भवति? **देश आदिर्यस्य** कालादेस्तेन **भेदवदिति**।

सामान्यादपि सामान्यमनुमेयं यदीष्यते।
कस्तेनानुमितेनार्थो यदेकमुपकल्प्यते॥ १३४१॥
बाह्यदोहादिरर्थश्चेत् सामान्यात्प्रथमादयम्।
असम्भवी कथन्नाम सामान्यान्तरतो भवेत्॥ १३४२॥
तदन्तराच्च सामान्यमन्यच्चेदनुमीयते।
अनुमानानवस्थेयं चेतःखेदाय ते भवेत्॥ १३४३॥

किं वा प्रयोजनं सामान्यात्? तत्र लिङ्गस्य प्रतिबन्धनिर्णय इति चेत्; विशेषेष्वेव किन्न भवति? तेषामानन्त्येन दुरवबोधत्वादिति चेत्; सामान्यस्यापि न भवेत्, दृष्टिविशेषे तस्य निर्णय एवान्यत्रापि तन्निर्णयो दृष्टसमानत्वात्तस्येति चेत्; न; लिङ्गस्याप्येवं तन्निर्णयप्रसङ्गात्। कुतो वा तस्य दृष्टसमत्वम्? तत्र सामान्यभावात्। सोऽपि कुतः? तत्र तत्प्रतिबन्धस्य निर्णयात्। अयमपि कस्मात्? तस्य दृष्टसमानत्वादिति चेत्; न; चक्रकदोषात्। यदि पुनः स्वत एव तस्य तत्समत्वं तर्हि सामान्यप्रयोजनस्य तत एव भावाद् व्यर्थमर्थान्तरतत्कल्पनम्। यदि सामान्यमप्रतिपन्नम्, कथं तस्य प्रतिषेधः पिशाचादिवत्? प्रतिपन्नं चेत्; तथापि कथम्? तत्प्रतीत्यैव बाधनादिति चेत्; कथमिदानीं प्रत्यनीकव्यवच्छेदेन स्वपक्षस्थापनम्? शक्यं हि वक्तुम्—

प्रतीतिः प्रत्यनीकस्य न चेन्नास्ति निषेधनम्।
प्रतीतिः प्रत्यनीकस्य यदि नास्ति निषेधनम्॥ १३४४॥
अनिषेधे च तस्य स्यात् कथमन्यः पराजयी?
तदभावे कथन्नाम योगो विजयमुद्वहेत्॥ १३४५॥
परोक्त्या विदितस्यापि युक्तिसाङ्गत्यवर्जनात्।
निषेधस्तस्य चेदेवं सामान्यस्याप्यसौ भवेत्॥ १३४६॥

साम्प्रतमुक्तन्यायेन सौगतमपि प्रतिक्षिपन्नाह–

एतेन भेदिनां भेदसंवृतेः प्रतिपत्तितः।
तत्रैकं कल्पयन् वार्यः [सजाना इति तद्ग्रहात्]॥२४॥ इति।

तत्र तेषु भेदिषु[3] **एकम्** अनुगतमाकारम् **कल्पयन्** सौगतो **वार्यो** निवारयितव्यः। कुतस्तत्कल्पयन्? **प्रतिपत्तितः** प्रतीतेरेकस्याकारस्य। कुतः प्रतिपत्तितः? **भेदसंवृतेः** संव्रियते प्रच्छाद्यतेऽनयेति संवृतिर्विकल्पिका बुद्धिः। भेदस्य परस्परव्यावृत्तेः संवृतिः **भेदसंवृतिस्तत** इति। कथं स भेदो यस्य संवृतिरिति चेत्? **भेदिनां** विजा-

---

१ अदृष्टविशेषस्य। २–समत्वादि–आ०, ब०, प०। ३ भेदेषु आ०, ब०, प०।

तीयव्यावृत्तिमतां खण्डादीनाम्। **'भेदिनाम्'** इत्यस्यापेक्षणेऽपि गमकत्वात् **'भेदसंवृत्तेः'** इति वृत्तिः[1]। केन स वार्यत इति चेत्? **एतेन** मीमांसकादिदूषणेन। तथा हि—संवृतिविकल्पित-स्याकारस्य भेदिभ्यो भेदे तस्यैव लिङ्गादेः प्रतिपत्तेः प्रवृत्तिरपि तत्रैव स्यात् न भेदेषु। न चेद-मुचितम्; अशक्तत्वात्। न हि तस्य वाहादौ शक्तिः, भेदिकल्पनावैफल्योपनिपातात्। भवतु भेदिष्वेव प्रवृत्तिस्तेषां तदाकारेण लक्षणादिति चेत्; न; लिङ्गादिनैव तत्प्रसङ्गात्, तदाकारस्येव तस्यापि तत्र प्रतिबन्धपरिज्ञानोपपत्तेः। तेनापि सामान्यरूपेणैव तल्लक्षणे अनवस्थापत्तेश्च। ततः **'तद्वत्यचोदिते'** इत्याद्यत्रापि समानम्। तेभ्यस्तस्याभेदे तु तद्वदेव वस्तुसत्त्वान्न संवृत्या प्रतिपत्तिः। कथं वा तया तत्प्रतिपत्तिः, कथञ्च न भवेत्? अतदाकारत्वे साकारवादविनिपातेन तदयोगात्। तदाकारत्वे कथं तस्याः क्षणिकनिरंशत्वं तद्वदेव देशकालाभ्यां दैर्घ्यात्। तथा तदाकार-स्यैव दैर्घ्यं न तस्या इति चेत्; न; अविष्वग्भावे तदनुपपत्तेः। विष्वग्भूतैव सा ततः केवलमन्यैव संवृतिस्तदविष्वग्भावमाविर्भावयतीति चेत्; न; तयापि तस्याः परिज्ञाने तदयोगात्। तदाकारतया परिज्ञानेऽपि स एव प्रसङ्गः तस्याः कथं क्षणिकनिरंशत्वमित्यादिः। तस्या अपि ततो विष्वग्भाव-कल्पनायामनवस्थापत्तिः। तन्न कुतश्चिदप्येकाकारप्रतिपत्तिः। ततो निर्विषयमिदम्—

"पररूपं स्वरूपेण यया संव्रियते धिया।
एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिनः॥"[प्र० वा० ३।६७] इति।

'एकार्थप्रतिभासिन्या' इत्यस्यासम्भवात्। यदपीदमन्यत्—

"तया संवृतनानात्वाः संवृत्या भेदिनः स्वयम्।
अभेदिन इवाभान्ति भावरूपेण केनचित्॥" [प्र० वा० ३।६८] इति।

तत्र 'भेदिनः' इति न तावत्तद्बुद्ध्यपेक्षम्; तया तन्नानात्वस्यावरणात्। न हि तदावृण्व-त्येव तद्भेदमुपदर्शयति विरोधात्। बुद्ध्यन्तरापेक्षमिति चेत्; कुतः सङ्कलनम्—भेदिनः स्वयमभेदिन इव इति? न नानात्वसंवृतेः; तया भेदिनामप्रवेदनात्। नापि भेदिबुद्धेः, तयापि संवृतिविषयस्यापरिज्ञानात् उभयविषयाद् बुद्ध्यन्तरादिति चेत्; न; तदसम्भवात्। न हि किञ्चिद्भेदनं क्वचिद्भेदमुपदर्शयदेव तद्विप-र्ययमुपदर्शयितुं समर्थं नीलत्वमुपदर्शयतैव क्वचित्पीतत्वस्याप्युपदर्शनप्रसङ्गात्। तत्र सामान्याकारः शक्यप्रतिपत्तिक इति न तत्र नापि विशेषे सम्बन्धपरिज्ञानं लिङ्गस्येति प्रलीन एवानुमानव्यवहारः। तत इदमप्यत्र समानम्—**'सम्बन्धो यत्र'**[2] इत्यादि। ततः सूक्तम् **'एतेन'** इति।

इतश्च वार्यं इत्याह—**'समाना इति तद्ग्रहात्'** इति। खण्डादिभिर्मुण्डादयः समानाः **सदृशा इति**। **'तेषां** भेदिनाम् **ग्रहात्** प्रतिपत्तेः। **'तत्रैकं कल्पयन् वार्यः'** इति। खण्डादय एव मुण्डादय इति प्रतिपत्तौ हि तत्राभेदकल्पनमुपपन्नं न समाना इति प्रतिपत्तौ, तत्तेषु समानतायाः एव प्रसिद्धेर्नाभेदस्य। न च त एव ते इति प्रतिपत्तिर्लोकस्य, एवं व्यवहारादर्शनेः। ननु च धर्मकीर्तिनाप्येतदभिहितम्—

---

१ समासः। २ न्यायवि० श्लो० २।२२। ३ न्यायवि० श्लो० २।२५

"प्रतिभासो धियां भिन्नः समाना इति तद्ग्रहात्।" [प्र० वा० ३।१०६] इति।

तत्कथं स एव तदेवैकं संवृतिनिबन्धनमभिदध्यादिति चेत्? स एवेदं प्रष्टव्यो य एवं स्ववाग्विरुद्धमवरुणद्धि।

स्यान्मतम्—नासौ संवृतिवेदनेऽप्येकमनेकसाधारणमाह यतः स्ववचनविरोधः। किं तर्हि? खण्डादीनामतद्धेतुफलापोहमेव, तस्यैव तेषु समानत्वेन सामान्यव्यवहारगोचरत्वात्। तस्यापि तेभ्यो भेदे तदपोहशब्देन सामान्यमेव यौगप्रसिद्धमभिहितं भवेत्। अभेदेऽपि मीमांस[क]परिकल्पितम्। तदुक्तम्—

"अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम्।
गोत्वमेव च तैरुक्तमगोऽपोहगिरा स्फुटम्॥" [मी० श्लो० अपोह० श्लो० १]

इत्यपि न चोद्यम्; तेभ्यस्तस्य तत्त्वान्यत्वाभ्यामवाच्यत्वात्। अवस्तुरूपा हि खण्डादयस्तत्सामान्यञ्च, उभयेषामप्यपोहकल्पितत्वात्। न च तेषामन्योन्यं तत्त्वमन्यत्वं वा; वस्तुष्वेव तद्विकल्पोपपत्तेः। "वस्तुन्येष विकल्पः स्यात्" [ ] इत्यादिवचनात्। ततस्तत्र भेदाभेदाभ्यां दोषोपकल्पनं परमतानभिज्ञानं पिशुनयतीति। तदेवाह—

अतद्धेतुफलापोहः सामान्यं चेदपोहिनाम्।
सन्दर्श्यते तथा बुद्ध्या [न तथाऽप्रतिपत्तितः]॥ २५॥ इति।

हेतुश्च फलञ्च हेतुफले तद्विवक्षिते खण्डादिवाहादिलक्षणे हेतुफले येषामन्येषां खण्डादीनां ते तद्धेतुफला न तद्धेतुफला **अतद्धेतुफलाः** कर्कादयस्तेषामपोहः **सामान्यं** गोत्वादि नापरम्। केषाम्? **अपोहिनाम्** विजातीयविशेषवतां खण्डादीनाम्। कुत एतत्? **सन्दर्श्यते** सम्यग्बाधितत्वेन प्रकाश्यते सामान्यम्। **तथा** तेन तदपोहप्रकारेण, **बुद्ध्या** विकल्पविद्यया यतः। **चेत्** शब्दः पराकूतद्योतने। तत्रोत्तरमाह—**न तथाऽप्रतिपत्तितः** इति। न नास्ति परोक्तम्। कस्मात्? **तथा** तेन तदपोहरूपप्रकारेण। **अप्रतिपत्तितोऽपरिज्ञानात्** सामान्यस्य। तथा तत्प्रतिपत्तिर्हि न तत एव सामान्यज्ञानात्; तथैवानिश्चयात्। न हि तदेव तद्विषयस्यापोहरूपतां निश्चिनोति; निर्विवादापत्तेः। विचारात्तस्य तादूर्ध्यमिति चेत्; कुतएतत्? तस्य निश्चयरूपत्वात्; न तज्ज्ञानस्यापि सविकल्पत्वेन तदविशेषात्। निश्चितस्यापि निश्चयान्तरापेक्षणे अनवस्थानं तत्रापि तदन्तरापेक्षणात्। विचारश्च सामान्यज्ञानस्यान्यतोऽसम्भवादेव अवतरति। न चासावस्ति सादृश्यविशेषादपि तदुपपत्तेः। सोऽपि नैयायिकादिसामान्यवत् भेदाभेदाभ्यां परिचिन्त्यमानो न सम्भवत्येवेति चेत्; उच्यते—

अपोहो यदि कर्कादिर्न समः खण्डमुण्डयोः।
असमानात् कथं तस्मात् समानप्रत्ययो भवेत्॥१३४७॥

१—त्यसंवि—आ०, ब०, प०। २ च शब्दः आ०, ब०, प०। ३—च तन्निश्च—आ०, ब०, प०। ४—त्वान्निश्चि—आ०, ब०, प०। ५ सामान्यस्य। ६ अपोहरूपत्वम्। ७ एतस्य आ०, ब०, प०। ८—त्तद्विचा—आ०, ब०, प०। ९ सामान्यज्ञानस्य अन्यतोऽसम्भवः। १० सादृश्यविशेषोऽपि। ११ कर्कादिः आ०, ब०, प०।

समानश्चेत्कथं भद्र, सादृश्यं दूषितं त्वया ।
अपोह एव सादृश्यं भावानामिति चाकुलम् ॥ १३४८ ॥
तस्य वस्तुष्वसद्भावात् कल्पनारोपितात्मनः ।
एकत्वाध्यवसायाच्चेत् तस्य वस्तुषु सम्भवः ॥१३४९॥
नैकत्वस्याप्यसद्भावात्तेष्वारोपितरूपिणः ।
तस्याप्येकत्वनिर्णीतिरन्यतस्तत्र सम्भवे ॥ १३५० ॥
अनवस्थालतापाशबन्धनान्मुच्यते कथम् ।
तन्न व्यावृत्तिसामान्यं विचारक्षममीक्षते ॥ १३५१ ॥
अविचार्यैव चेदिष्टं व्यवहाराय तत्परैः ।
मीमांसकादिसामान्यं तथैव न किमिष्यते ॥ १३५२ ॥
अविचारितरम्यत्वाविशेषेऽपि क्वचित् कथम् ।
पक्षपातः सतां युक्तो न्यायनिर्मलचेतसाम् ॥ १३५३ ॥

मा भूत् कल्पनागतस्तदपोहः सामान्यं विचारासहत्वात्, खण्डादिगतस्तु भवत्येव विपर्ययात् । न हि ते खण्डादयः कर्कादिभिरात्मानं मिश्रयन्ति स्वरूपप्रच्युतिप्रसङ्गात् । ततः स एव तेषां सामान्यमिति चेत्; न; एवमप्यतिप्रसङ्गात् । तथा हि— यथा खण्डादयः कर्कादिव्यावृत्त्या गोव्यपदेशविषयास्तथा तृणवनगुल्मतूलोपलादयोऽपि स्युः; तेषामपि तदविशेषात् । न हि तेऽपि तैरात्मानं मिश्रयन्ति तद्भेदापरिज्ञानप्रसङ्गात्, तथा च गामानयेति चोदितेन तत्रापि प्रवर्त्तितव्यम् । तदविशेषेऽपि खण्डादय एव गावः तत्रैव वाहदोहादेरेककार्यस्य भावात्, न तृणादयो विपर्ययादिति चेत्; तत्रैव कुतस्तद्भावः ? तदपोहादिति चेत; न; तृणादावपि तत्प्रसङ्गात् । शक्तिसाम्यादिति चेत्; तदेव तर्हि सामान्यं न तदपोहः, सतोऽपि तस्य वनगुल्मादौ तादूप्याभावात् । तदाह—**'न तथा'** इत्यादि । **न** तदपोहः सामान्यं **तथा** तेन सामान्यरूपप्रकारेण **अप्रतिपत्तितो** वनतृणादौ तस्यापरिज्ञानात् । कथं पुनः शक्तिसाम्यमपि सामान्यम् ? कथं च न स्यात् ? तस्य वस्तुष्वेकस्याभावात् शक्तिमदभेदात् सामान्यस्य चैकरूपत्वादिति चेत्; कथमिदानीं तत एकं कार्यम् ? शक्तिभेदे तद्भेदस्यैवोपपत्तेः । मा भूदिति चेत्; कथमिदमुक्तम् —

"एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने ।" [प्र० वा० ३।७२] इति ?

तदपि वस्तुतो भिन्नमेव, अभेदस्तु तत्राप्यन्यस्मादेवैककार्यादिति चेत्; न; तस्यापि तदभेदभेदस्यैवोपपत्तेः । तस्याप्यन्यस्मात् तत एकत्वकल्पनायामनवस्थादोषात् । न जैनस्यैकरूपत्वादेव सामान्यम्, अपि तु तत्प्रयोजनात्, तच्चानेकत एव सदृशादुपपन्नम् । अत एव वक्ष्यति—**"नानेकत्र न चैकत्र वृत्तिः सामान्यलक्षणा"** [न्यायवि० श्लो० २००] इति । अपि च, के नामापोहिनो येषां तदपोहः सामान्यमुपकल्प्येत ? प्रसिद्धा एव खण्डादय इति चेत्; न; तेषां तत्त्वतोऽसम्भवात्, अवयविवादप्रतिषेधात् । संवृत्या सम्भव इति चेत्; न तर्हि तदपोहः; तेषामवस्तुत्वाद् वस्तुसतामेव क्वचित्तत्त्वान्यत्वयोर-

१ तस्याव–आ०, ब०, प० । २–यन्तीति त–आ०, ब०, प० । ३ तृणगुल्मादिषु । ४–सामान्यादि–आ०, ब०, प० । ५–सामान्यमपि आ०, ब०, प० । ६ शक्तिमदभेदे । ७ सम्प्रत्यवमर्श–आ०, ब०, प० ।

पपत्तेः "**वस्तुन्येष विकल्पः**" [ ] इत्यादि वचनात्। वस्त्वेकत्वावसायात्तेऽपि वस्तुसन्त एवेति चेत्; न; तस्य निषिद्धत्वात्। तदेवाह—'**न**' इत्यादिना। अपोहिनामिति। कुतः? **तथा** तेनापोहिनामिति प्रकारेण खण्डादीनाम् '**अप्रतिपत्तितः**' इति। भवन्तु स्वलक्षणरूपा एवापोहिन इति चेत्; कुतस्तत्परिज्ञानम्? निर्विकल्पाद्दर्शनादिति चेत्; न; तस्यापि व्यवहारिप्वभावात्। न हि ते तद्दर्शनं विकल्पयन्तो दृश्यन्ते, निश्चयस्यैव बहिरन्तश्च स्थूलाकारगोचरस्य तैरवकल्पनात्। विकल्पैकत्वावसायात्तस्य तैरनवकल्पनं नाभावादिति चेत्; न; पृथगवगतस्य तदवसायानुपपत्तेः। तदवगमः सन्नप्यसत्कल्प एव निर्विकल्पत्वादिति चेत्; न तर्हि ततस्तस्यास्तित्वं व्यवहारविषयैः सुप्तस्येव तद्भेदनात्। अनुमानात्तदस्तित्वं तद्विषय इति चेत्; न; प्रत्यक्षतो बहिरन्तश्चासम्भवतोऽनुमानादप्यप्रतिपत्तेः, तस्य तत्पूर्वकत्वात्। तदुक्तम्—

"**ब्रुवन् प्रत्यक्षमभ्रान्तं बहिरन्तरसम्भवम्।**
अनुमानबलाद् व्यक्तमनात्मज्ञस्तथागतः॥" [सिद्धिवि० परि० १] इति।

तन्न अपोहिनः स्वलक्षणरूपा अपि। तदाह—'**न**' इत्यादि। **न** परमतं **तथा** तेन परोक्तासाधारणप्रकारेण। **अप्रतिपत्तितः** अपोहितां [नां] खण्डादीनामिति। ततो यदुक्तम्—

"**स च सर्वपदार्थानामन्योन्याभावसंश्रयः।**
तेनान्यापोहविषयो वस्तुलाभस्य चाश्रयः॥" [प्र० वा० २।७९] इति;

तत्प्रतिविहितम्; वस्तुन एव परपरिकल्पितस्याभावात्। सति हि तस्मिन् समानाकारविकल्पः पारम्पर्येण तस्मादात्मलाभात् तल्लाभस्याश्रयो भवेन्नासति खरविषाणवत्। तन्न अतद्धेतुफलापोहः सामान्यम्, सदृशपरिणामस्यैव तत्त्वोपपत्तेः।

कुतः पुनस्तत्परिणामो भावानाम्? विशेषपरिणामः कुतः? तत्प्रत्ययात्; परोऽपि तत एवास्तु विशेषाभावात्। ततः समानेतरपरिणामात्मानो भावास्तथैव प्रतिपत्तेरिति न्याय्यम्। प्रत्यक्षतो न तस्य प्रतिपत्तिः; ततो बहिरन्तश्चासाधारणस्यैवाकारस्य प्रतिपत्तेः, तत्प्रतिपत्तिस्तु वासनापरिपाकजन्मनो विकल्पादेव, तस्य चावस्तुविषयत्वान्न ततस्तद्व्यवस्थापनं न्याय्यमिति चेत्; अत्राह—

यन्न निश्चीयते रूपं जातुचित्तस्य दर्शनम्। इति।

यत् पराभिमतं रूपं दृश्यस्य दर्शनस्य च, **न निश्चीयते** न संशयादिव्यवच्छेदेनावधार्यते। **जातुचित्** प्रतिसंहारवेलायामन्यदा वा। न हि तस्य तद्वेलायां निश्चयः; निश्चयस्यैव तदा विकल्पत्वेनासम्भवात्। नाप्यन्यदा; अनुमानवैफल्यापत्तेः, निश्चिते समारोपाभावाच्च। **तस्य** रूपस्य। **दर्शनमुपलम्भनम्**। '**न**' इत्यावृत्त्या सम्बन्धः। न ह्यनिश्चितं दृष्टं नाम, अन्यथा 'सत्तामात्रस्यैव दर्शनं सर्वत्र, भेदप्रतिपत्तिस्तु तदविद्यापरिपाकजन्मनो विकल्पादेव' इति विकल्प्येत। भवतु निश्चितस्यैव तस्य दर्शनमिति चेत्, अत्राह—

---

१ भवतः स्व—आ०, ब०, प०। २ तस्याप्यपहा—आ०, ब०, प०। ३ निर्विकल्पस्य। ४ तैरवक—आ०, ब०, प०। ५—या स्युस्तस्य आ०, ब०, प०। ६ अनुमानस्य। ७ "स्वलक्षणप्रकारेण"—ता० टि०। ८ अपोहितानां आ०, ब०, प०। ९ न हि तदभिमतस्य आ०, ब०, प०।

यथानिश्चयनं तस्य दर्शनं तद्वशात्किल ॥ २६ ॥ इति ।

निश्चयनस्यानतिक्रमात् **यथानिश्चयनम्**, पञ्चम्यन्तमेतत् । **तस्य** रूपस्य । **दर्शनं किल**[1] मेति यावत् । **किल**शब्दस्यारुचिवाचिनो निषेधपरत्वात् । कीदृशात्तत्तस्तद्दर्शनं न रुच्यत इति चेत् ? **तद्वशात्** सदृशेतरात्मकवस्तुवशात् । न ह्यन्यवशान्निश्चयादन्यदर्शनम्, नीलनिश्चयात् पीतादेरपि तत्प्रसङ्गात् । कुतः पुनस्तद्वशत्वं निश्चयस्येति चेत् ? स्वतस्तस्य बहिरन्तश्च जात्यन्तरविषयतयैव प्रसिद्धेः । असाधारणविषयत्वे तु निश्चय एव न भवेद्दर्शनवत् । तत्र चोक्तम्—**"अनिश्चितस्य न दर्शनम्"** [ ] इति । पुनर्निश्चयान्तरपरिकल्पनायामनवस्थानं पूर्वप्रसङ्गानतिवृत्तेः। ततस्तद्वश एवायं तथाप्रसिद्धेः। एतदेव **किल**शब्देन प्रसिद्धिवाचिना दर्शयति । तद्वशत्वेऽपि निश्चयस्य कथं दर्शनस्य तत्त्वम् ? न हि तदनुसार्येव निश्चयो विपरीतस्यापि दर्शनात् । मरीचिदर्शनात्तोयनिश्चयवदिति चेत्; भवतु तत्रैवं यत्र बाधकप्रत्ययः, न चेहासावस्ति । जात्यन्तरविलक्षणविषयस्य कस्यचिदपि[2] तस्यानुपलम्भात् । जात्यन्तरविषयमपि न किञ्चिदुपलभ्यत इति चेत्; न; निश्चयस्यैव दर्शनात्, तस्य विकल्पेतरात्मकतया विकल्पान्तरसदृशेतरात्मकतया च स्वत एवोपलम्भात् । दर्शनं तद्विषयं नोपलभ्यते यदनुसारी निश्चय इति चेत्; न; तस्यापि संस्कारप्राग्भाविनः अवायस्योपदर्शनात्[3] । निश्चयरूपत्वे तस्य[4] किं संस्कारेण तद्रूपेणेति चेत् ? निश्चयतारतम्यात् प्रयोजनविशेषाच्च । विचारितञ्चैतत् प्रथमप्रस्ताव इति नेह विचार्यते । ततः समानपरिणाम एव सामान्यं निर्बाधप्रत्ययत्वान्नापरं विपर्ययात् । तत्परिणामोऽपि यद्यनेकवृत्तिरेकः[5]; कथं तस्य ग्रहणम् ? अनेकविशेषदर्शनादिति चेत्; न; सन्निहितवर्त्तमानविशेषदर्शनस्य तदन्यत्राप्रवृत्तेः, तद्वतो विश्ववेदित्वापत्तेः, तथा च किं तस्य शब्देनानुमानेन वा ? यतस्तदर्थेन परिणामिनि सम्बन्धपरिकल्पनेन किं क्लिश्येत ? न च तदनुपलम्भे तद्गतस्य तत्परिणामस्य प्रतिपत्तिः; व्यापकप्रतिपत्तेर्व्याप्यप्रतिपत्तिर्विना[6]ऽनुपपत्तेः । भवतु दृष्टे तस्य ग्रहणम्, अग्रहणञ्चान्यत्रेति चेत्; न; विरुद्धधर्माध्यासेन भेदे[7] स्वरूपविरहापत्तेः । सत्यपि तस्मिन् गृहीतेतरात्मना तस्याभेदे[8] विशेषाणामपि परस्परं तत्प्रसङ्गः; तथा चासन्निहितवत्तदव्यतिरेकात्र सन्निहितस्यापि तस्य दर्शनम् । दर्शने वा तत एवासन्निहितस्यापि सर्वस्य दर्शनमिति प्रतीतिप्रत्यनीकमापद्येत । विशेषेभ्यो भिन्न एव तत्परिणामः, ततो न दर्शनादर्शनाभ्यां तत्र तत्कल्पनमुपपन्नमिति चेत्; अस्तु नामैवं तथापि कथं स[9] कश्चित् खण्डादीनामेव न कर्कादीनामपि । तैरेवोपकारादिति चेत्; न; तस्य बहुभिरेकस्यासम्भवात् । अनेकत्वे तु तत्परिणामस्यापि तदव्यतिरेकादनेकत्वं कार्यत्वञ्चेति कथमसावेको नित्यश्चोपगम्येत ? व्यतिरेके स एव प्रसङ्गः कथं स तस्येति ? तेनापि तदपरस्य करणादिति चेत्; न; तत्रापि तथा प्रसङ्गादनवस्थादोषाच्च । नोपकारवशात् स तेषाम्, अपि तु तदभिव्यङ्ग्यत्वात् तत्रावस्थानात्, तैस्तत्पातप्रतिषेधाद्वेति चेत्; न; अभिव्यङ्ग्यत्वादीनामप्युपकारविशेषत्वेनानुपकारिभिरसम्भवात् । तदेकस्तत्परिणामः सम्भवति यस्य दर्शनं यतो वा सामान्यप्रयोजनमुपकल्प्येत । तदेवाह—

---

१ किलेति आ०, ब०, प० । २ निश्चयरूपप्रत्यक्षस्य । ३ अवायस्य । ४ समानपरिणामोऽपि । ५-दितात्र-आ०, ब०, प० । ६ विना कृत्वानुप-आ०, ब०, प० । ७ भेदस्व-आ०, ब०, प० । ८ विरुद्धधर्माध्यासे । ९ कथमसौ यः क-आ०, ब०, प० ।

समानपरिणामश्चेदनेकत्र कथं दृशिः । इति ।

समानपरिणामः सादृश्यपर्यायः, एकवचनादेकत्वस्य प्रतिपत्तेः । **चेत्** यदि । **अनेकत्र** बहुषु विशेषेषु । **कथं** न कथञ्चित् **दृशिः** दृष्टिः उक्तन्यायात् । भवतु प्रतिविशेषं भिन्न एव स इति चेत्; कथमिदानीमसौ सामान्यम् असाधारणत्वात् विशेषवदसम्भवाच्च विशेषाव्यतिरेकात् । व्यतिरेके सम्बन्धाभावात् तस्येति व्यपदेशानुपपत्तिः । तदाह—

न चेद् विशेषाकारो वा कथं तद्व्यपदेशभाक् ॥ २७ ॥ इति ।

न चेत् न यदि **समानपरिणामोऽनेकत्र, कथं** न कथञ्चित्, स एव सामान्यमिति व्यपदेशः, तस्य वा विशेषस्य स इति व्यपदेशस्तद्व्यपदेशस्तं भजतीति **तद्व्यपदेशभाक्** । अत्र निदर्शनम्—**विशेषाकारो वा** विशेषाकार इव । 'वा' शब्दस्येवार्थत्वात् । यथा तदाकारस्यासाधारणत्वान्न तत्र सामान्यमिति व्यपदेशो नाप्यसौ तदपरस्येति ततो[1] भिन्नत्वात् तथा समानपरिणामेऽपीति परो मन्यते । प्रतिविधानमत्राह—

सदृशासदृशात्मानः सन्तो नियतवृत्तयः । इति ।

सदृशश्चासदृशश्च सदृशासदृशौ समानासमानपरिणामौ **आत्मानौ** येषां खण्डादीनां ते तथोक्ताः । सदृशात्मान इति बहुवचनमनेकवर्तिन एकस्य तत्परिणामस्य निषेधार्थम्, असदृशात्मान इति तु निदर्शनार्थम् । यथैवं तेष्वसदृशात्मसु नैकोऽनेकवर्तितत्स्वभावः तथाप्रतीत्यभावात् तथा सदृशात्मस्वपि तत्स्वभाव इति[2] । ततः**'समानपरिणामश्चेत्'** इत्यादि न दूषणमनभ्युपगमादिति भावः ।

यद्येवं भेदाविशेषात्कथमसौ सामान्यमितरवदिति चेत् ? न; तत एव सामान्यप्रयोजनस्य भावात्, अनेकवर्तित्वेऽपि तत एव तदुपपत्तेः[3], अन्यथाऽतिप्रसङ्गस्य वक्ष्यमाणत्वात् । आत्मग्रहणं तयोः परस्परभेदार्थम् । तद्भेदे तदात्मनः खण्डादेरपि तत्प्रसङ्गात् । न चैवमप्रतीतेः । **नियतवृत्तयः** नियता सङ्कीर्व्यतिकरविकला वृत्तिरात्मलाभो येषां ते तथोक्ताः । अनेन **"चोदितो दधि"** [प्र० वा० ३।१८] इत्यादि चोद्यं प्रत्युक्तम्; दधिद्रव्यस्य स्वगतैरेव सदृशपर्यायैरात्मलाभान्न करभगतैः तथैव प्रतीतेः । न च तादृशस्ते बुद्धिपरिकल्पिता एव अपि तु **सन्तः** परमार्थतो विद्यमानाः । कुत एतत् ? **दृशिर्यतः**, दृशिरित्यस्यानुवर्तनात् । निदर्शनमपि तेषामत्यन्तविसदृशतयैवेति चेत्; न; नीलतज्ज्ञानयोः सदृशतयापि तद्भावात्, **"सारूप्यमस्य प्रमाणम्"**[4] [न्यायवि०पृ०२५] इति वचनात् । न च तत्र कल्पितमेव तत्; ज्ञानस्य प्रत्यक्षत्वव्यापत्तेः । तन्न प्रत्यक्षादत्यन्तविसदृशभावप्रतिपत्तिः । नापि विकल्पात्; तस्यातद्विषयत्वात् । नातद्विषयेण तत्प्रतिपत्तिः; अतिप्रसङ्गात् । नायं दोषः, प्रतिबन्धविषयस्यैव ततः सिद्धेरिति चेत्; न; प्रतिबन्धस्य प्रत्यक्षतोऽप्रतिपत्तेः तस्यासाधारणविषयस्याभावात् । न हि तदविषयात्तत्र कस्यचित्प्रतिबन्धपरिज्ञानम् । नापि विकल्पान्तरात्तत्प्रतिपत्तिः; तस्यापि तदविषयत्वात् । प्रतिबन्धेन तद्विषयत्वेऽनवस्थापत्तिः, तत्राप्यन्यतो विकल्पात् प्रतिबन्धपरिज्ञानात् । ततो न युक्तम्—**"स्वस्वभावव्यवस्थितयो भावाः"**[5] [ ] इति[6]; अत्यन्तविसदृशस्वभावव्यवस्थितेरपरिज्ञानात् । सदृशाकारस्यापि कथं परिज्ञानम् ?

१ तथाभिन्नत्वात्तया आ०, ब० । २ 'अनेकवर्ती नैकः' इत्यन्वयः । ३ तत्त्वोपपत्तेः आ०, ब० प०, । ४ "अर्थसारूप्यमस्य प्रमाणम्"—न्यायवि० । ५ नाविक-आ०, ब०, प०, । ६ "सर्व एव हि भावाः स्वरूपस्थितयो नात्मानं परेण मिश्रयन्ति ।"—प्र० वा० स्ववृ० ३।४२ ।

कथं च न स्यात् ? शावलेयप्रत्यक्षेण वाहुलेयादेरप्रतिपत्तेः । न हि तदप्रतिपत्तौ तत्प्रतियोगितया तदाकारस्य सम्भवति प्रतिपत्तिरिति चेत्; किमिदानीं प्रत्यर्थनियता एव बुद्धयः ? तथा चेत्; तद्बहुत्वमपि न भवेत्, अप्रतिपत्तेः । मा भूत्, एकव्यक्तिकस्यैव संवेदनस्याभ्युपगमादिति चेत्; न; तस्यापि निष्कलपरमाणुरूपस्याप्रतिवेदनात् । नानाकारमेकं तदिति चेत्; सिद्धं नः समीहितम् । एकेनानेकस्य व्याप्तिवत् ग्रहणस्याप्युपपत्तेः । ततः शावलेयदर्शनेन वाहुलेयादेरप्युपलम्भादुपपन्नं परस्परप्रतियोगितया ततस्तत्सदृशाकारस्य परिज्ञानं विसदृशाकारवत् । कथं पुनः स एव सदृशो विसदृशश्चेति चेत् ? न; दृष्टत्वात्, दृष्टे चानुपपत्तिपरिप्रश्नायोगात्[1] । ततः सूक्तम्–'सन्तस्ते दर्शिर्यतः' इति । अतश्च ते सन्त इत्याह–

तत्रैकमन्तरेणापि[2] सङ्केताच्छब्दवृत्तयः ॥ २८ ॥ इति ।

तत्र इत्यत्रावधारणं द्रष्टव्यम् । **तत्रैव** तेषु सदृशासदृशात्मस्वेव । **शब्दवृत्तयो** वचनव्यापारा यतस्ततः **ते सन्तः** इति । न हि निर्भागे भावे तत्सम्भवः । यदि [3]स्यात् एक इव सा [4]स्यात् न वहवः [5] । [6]बहवश्च दृश्यन्ते शब्द इत्यनित्य इति कृतक इति च । न हि शब्दत्वादिसदृशेतरधर्मबहुत्वमन्तरेण एकत्रानेकतत्प्रवृत्तिः पर्यायत्वापत्तेः । तदभावेऽपि व्यावृत्तिभेदात्[7] तत्प्रवृत्तिरिति चेत्; न; [8]तद्भेदस्य वस्तुसत्त्वे निरंशवादव्याघातात् । अवस्तुसतश्च प्रत्यक्षेणानवगमात् । विकल्पेनावगम इति चेत्; न; ततोऽपि वस्तुपराङ्मुखत्वेन वस्तुगतत्वेनाऽनवगमात् । अवस्तुगतत्वेनावगमस्यापि वैफल्याद् व्यवहारानुपयोगात् । वस्त्वेकत्वाध्यवसायात्तस्य तदुपयोग इति चेत्; न; तस्य निषिद्धत्वात् । तत्र एकत्रानेकशब्दवृत्तिः[9] असङ्गावे सम्भवति । एतदर्थमेव 'शब्दवृत्तयः' इति बहुवचनम् । कथं पुनर्वस्तुवशत्वे [10]तत्प्रवृत्तेः [11]देवदत्तादावेकत्रैव 'आत्मानमात्मना वेत्ति' इति कारकभेदस्यापोद्धारा इति, कलत्रे जलविन्दौ[12] च बहुत्वस्य वचनमिति चेत् ? अत्रोत्तरम्–**एकमन्तरेण** एकधर्मं विना अनेकधर्मभावेनेत्यर्थः । भवति हि तत्र [13]शक्तिभेदरूपोऽवयवनानात्वादिलक्षणश्च धर्मभेद इत्युपपन्नैव तद्वाच्ये[14] तद्वचनप्रवृत्तिः । न चैवम्, तत्र देवदत्त इति जलमिति कलत्रमिति चैकवचनस्याप्रयोगः, एकस्यापि शक्तिम[15]दादिरूपस्य तद्वाच्यस्य भावात् । एतत् अपिशब्देनैकत्वसद्भावं समुच्चिन्वता दर्शयति । यद्येवं किन्न कलत्रादिपदवद् दारादिपदेनाप्येकार्थकथनं यतस्तत्रैकवचनं न भवेदिति चेत् ? न; प्रायशस्तस्य बहुत्व एव सङ्केतात् । न हि शब्दाः स्वसामर्थ्यादेव वस्तुवाच्यमावेदयन्ति, यतो दारादिभिरेकत्वमप्यावेद्येत, अपि तु सङ्केतवलात् । सङ्केतश्च वृद्धानां यत्र यथा तत्र तथैव तन्मार्गप्रवृत्तेरनुसर्त्तव्यः, तद्व्यतिक्रमे प्रयोजनाभावात् । तच्चोक्तम्–'सङ्केतात्' इति ।

---

१ 'प्रत्यक्षेण प्रतीतेऽर्थे यदि पर्यनुयुज्यते । स्वभावैरुत्तरं वाच्यं दृष्टे काऽनुपपन्नता ॥ इति सौगतैः स्वयमेवाभिधानात् ।–'ता०टि० । २ सन्तो यच्छब्द-ता० । ३ न्यायेकाकेकसाध्यस्यान्न बहवश्च प० । ४ शब्दवृत्तिः । ५ 'वेदक्तिनौ ङी (शा०सू० १।३।५८) इत्यनुवर्तने सति बह्वादेः (शा०सू० १।३।६ ।) इति सूत्रेण विकल्पेन ङीप्रत्ययः तेन बहवः बह्व्यः इति रूपद्वयम् ।"–ता० टि० । ६ शब्दवृत्तयः । ७–दात्र–आ०, ब०, प० । ८ व्यावृत्तिभेदस्य । ९ सदृशेतरधर्मबहुत्वाभावे ।–स्तित्रभावे आ०, ब, प० । १० शब्दवृत्तेः । ११ देवदत्तादावनेकत्रैव आ०, ब०, प० । १२–न्दौ ब–ता० । १३ भक्ति–आ०, ब०, प० । १४–च्ये वस्तुनि बहुवचनप्रवृ–आ०, ब०, प० । १५ 'दादिशब्देन अवयवादिः ।' –ता० टि० ।

शब्दप्रवृत्तिसङ्केतात् सदृशासदृशात्मसु ।
विचित्ररूपा दृष्टेयं न निषेध्या विपश्चिताम् ॥ १३५४ ॥

तत इदं प्रत्युक्तम्—

"न चादृष्टार्थसम्बन्धः शब्दो भवति वाचकः ।
तथा चेत्स्यादपूर्वोऽपि सर्वः सर्वं प्रकाशयेत् ॥"
[मी० श्लो० शब्दनि० श्लो० २४२] इति ।

सङ्केतादेव शब्दस्यार्थप्रतिबन्धपरिज्ञानात् । ततोऽपि कथमनित्यस्य तत्परिज्ञानम्, उपलब्धस्य सङ्केतकालेऽनवस्थानात् ? अवस्थितस्य तत्परिज्ञानसिद्धौ नित्यत्वमेव तस्य कालान्तरावस्थितिलक्षणत्वात् । सत्यपि कथञ्चित्तत्परिज्ञाने न प्रयोजनं परिज्ञातप्रतिबन्धस्य व्यवहारेऽनन्वयात्, तत्कालभाविनश्च ततोऽन्यत्वात् । न चान्यस्य तत्परिज्ञाने तदन्यस्य वाचकत्वम्; गोशब्दस्य तत्प्रतिपत्तौ अश्वशब्दस्यापि तत्त्वापत्तेः । [1]गोशब्दाद् गवाश्वशब्दयोः भेदेऽपि गोशब्द एव स्वाभाव्याद्वाचकः खण्डादीनां तथाप्रतीतेः, नाश्वशब्दो विपर्ययात् । दृष्टं चैतत् तेजसः कस्यचित् रूपसम्बन्धपरिज्ञानेऽपि तदपरस्यापि तेजस एव रूपप्रकाशकत्वं नापरस्येति चेत्; भवेदेवं यदि तत्र किञ्चिन्निबन्धनम्, तदभावे कोऽसाविति तन्निश्चयानुपपत्तेः । भवतु प्रतीतिरेव तत्र निबन्धनम्—यस्मिन्नुच्चारिते सत्यसौ भवन्ती व्यवहारमवकल्पयति स एवाभिधित्सितस्य वाचको नापर इति तन्निश्चयोपपत्तेरिति चेत् ; इत्थं भवतु[2] वा श्रोतुस्तदुपपत्तिर्न तु वक्तुः, उच्चारणात् पूर्वं तन्निबन्धनाभावात् । अनुत्पन्नतन्निश्चयश्च कथमसौ[3] शब्दं नियतार्थोपदर्शनार्थमुच्चारयेत् ? अथ सोऽपि जानात्येव 'अयमेवास्य वाचकः' इति; यद्येवं प्रागपि तेनायमवधारित एव तत्क्षणप्रत्युत्पन्नशरीरे तथापरिज्ञानानुपपत्तेः, एवञ्च नित्य एवायम् । यत्तूक्तम्—'दृष्टं चैतत्, इत्यादि; तदपि न युक्तम्; न हि तेजसः सम्बन्धपरिज्ञानात् प्रकाशकत्वम्, अपि तु चक्षुरादीनां सन्निधिमात्रेण सहकारित्वात् । ततो यदुक्तम्—"अतिनवस्यापि तस्य तत्त्वं न शब्दस्य ।" [ ] तत्र तत्परिज्ञानस्यावश्यापेक्षत्वात् । तस्य चानित्यशब्दवादिनामुक्तन्यायेनासम्भवात् । उक्तञ्चैतत्—

"सम्बन्धदर्शनञ्चास्य नानित्यस्योपपद्यते ।
सम्बन्धज्ञानसिद्धिश्चेद् ध्रुवं कालान्तरस्थितिः ॥१॥
अन्यस्मिन् ज्ञातसम्बन्धे न चान्यो वाचको भवेत् ।
गोशब्दे ज्ञातसम्बन्धे नाश्वशब्दो हि वाचकः ॥२॥
अथान्योऽपि स्वभावेन कश्चिदेवावबोधकः ।
तत्रानिबन्धने न स्यात्कोऽसाविति विनिश्चयः ॥३॥

---

१ सङ्केतिताद् गोशब्दात् । २ रसादेः । ३–तु हि श्रो–आ०,ब०,प० । ४ वक्ता । ५–तार्थप्रदर्श–आ०, ब०, प० ।

यतः प्रत्यय इत्येवं व्यवहारोऽवकल्पते ।
श्रोतॄणां स्यादसावित्थं वक्तॄणां नावकल्पते ॥४॥
अज्ञात्वा कमसौ शब्दमादावेव विवक्षितम् ।
जानाति चेदवश्यञ्च पूर्वं तेनावधारितः ॥५॥
तेजःप्रत्यक्षशेषत्वान्नूनेऽपि प्रकाशकम् ।"

[मी० श्लो० शब्दनि० श्लो० २४२–४७]

इति चेत्; अत्राह—

तत्रैकमभिसन्धाय समानपरिणामिषु ।
समयस्तत्प्रकारेषु प्रवर्त्तेतेति साध्यते ॥२९॥ इति ।

समय ईदृश ईदृशस्य वाच्यो वाचकश्चेति संवित्तिः प्रतिपाद्यस्य । **साध्यते** निष्पाद्यते गणधरदेवादिभिः । किं कृत्वा ? **तत्र** तेषु पूर्वं निरूपितेषु **समानपरिणामिषु** सदृशविवर्त्तनशीलेषु वाच्येषु वाचकेषु च **एकं** वाच्यं वाचकञ्च **अभिसन्धाय** दर्शनस्मरणाभ्यां प्रत्यवमृश्य । तथाप्युपलब्धशब्दानुस्मरणेनाभिसन्दधानः तथाविधस्यैव प्रतिपाद्यस्य सङ्केतयति—'योऽसौ त्वयाऽभिसन्धीयते तादृशादीदृशः प्रत्येतव्यः' इति । ततो न युक्तम्—'सम्बन्ध' इत्यादि, कालान्तरानवस्थितावप्यभिसन्धानविषयस्य सम्बन्धज्ञानसिद्धेः । 'अन्यस्मिन्' इत्याद्यपि न सङ्गतम्; अन्यस्यापि प्रतिपन्नसम्बन्धसदृशस्यैव वाचकत्वान्नापरस्य । 'अथ' इत्याद्यपि न साधीयः; सादृश्यस्य तन्निश्चयनिबन्धनस्य भावात् । प्रत्ययस्य तु तत्त्वं नेष्यत एव, यतो 'यतः प्रत्यय' इत्यादि ब्रूयात् । एवम् 'अज्ञात्वा' इत्यादिकमपि तज्ज्ञानस्य निषेधितत्वात् । न चायं जानन्नप्येकत्वेन जानाति सदृशतयैव प्रतिपत्तेः । ततो 'जानाति चेत्' इत्याद्यपि दुर्व्याहृतमेव, नित्यत्वप्रसङ्गाभावात् ।

सादृश्याद्वाचक इत्ययुक्तम्, तस्यैव दुरवगमत्वेनाभावात् । भावेऽपि कस्य सादृश्यादुत्तरस्य वाचकत्वमवकल्प्येत ? अनर्थकस्येति चेत्, नः तस्योत्तराविशेषात् । अर्थवतश्चेत्; कुतस्तस्य तावान् क्षणो यावताऽर्थवत्त्वंप्रतिपत्तिः । न हि द्वित्रादिक्षणानवस्थितस्यार्थवत्त्वं शक्यावसायम्, इत्यप्यचोद्यम्, सादृश्यपरिज्ञानस्य सुलभत्वात्, अनर्थकसादृश्यस्य चानभ्युपगमात्, द्विस्थिरप्रतिपत्तिकत्वेऽर्थवत्त्वप्रतिपत्तेर्निरूपितत्वात् । तत इदमपि दुर्भाषितमेव—

"सदृशत्वात्प्रतीतिश्चेत्तद्द्वारेणाप्यवाचकः ।
कस्य वैकस्य सादृश्यात् कल्प्यतां वाचकोऽपरः ॥१॥
अदृष्टसङ्गतित्वेन सर्वेषां तुल्यता यदा ।
अर्थवान् पूर्वदृष्टश्चेत्तस्य तावान् क्षणः कुतः ॥२॥

१–नशरीरेषु आ०, ब०,प०। २ संकेतो यदि आ०, ब०, प०। ३ इतीति त–आ०, ब०, प०। ४ इत्येतदपि आ०, ब०, प०। ५ ततो आ०, ब०, प०। ६ तानप्येक– आ० ब०, प०। ७ –र्थसद्– आ०, ब०, प०। ८ द्विः प्रवृत्तिक– आ०, ब०, प०।

द्विस्त्रिर्वानुपलब्धो हि नार्थवान् सम्प्रतीयते।"

[मी०श्लो०शब्दनि०श्लो०२४८-५०]

'अर्थवान्' इत्यादेः पुनरुक्तत्वाच्च तदर्थस्य 'सम्बन्धदर्शनञ्चास्य' [ ] इत्यनेनापि प्रतिपादितत्वात्।

[1]सादृश्यादर्थवत्त्वमशब्दान्तरवेदिनं प्रति न भवेत्, तेन तत्सादृश्यस्यापरिज्ञानात्। भवतु [2]तदन्तरवेदिनं प्रत्येवेति चेत्; अद्भुतमेतत्—स एवार्थवानन्यथा च, इति विरोधात्। अतद्वेदिनं प्रत्यर्थवानेवायं स्वत एव केवलमुपायाभावान्न जानातीति चेत्; उत्तरोऽपि तर्हि स्वत एव वाचक इति किं तत्र सादृश्याद्वाचकत्वकल्पनया? तन्नानन्यश्रुतिं प्रत्युत्तरस्यार्थवत्त्वमुपपन्नम्। अनर्थवत्त्वे तु पूर्वस्यापि स्यात्; तत्राप्यनन्यश्रुतिसद्भावात्, इत्यनर्थकत्वमेव सर्वस्यापि शब्दप्रबन्धस्य प्राप्तम्।

अपि च, शब्दान्तरवेदिनामर्थवत्सदृशत्वेन योऽसावभिमतः स एवातद्वेदिनां मुख्यो भवेत्, तत्रैव प्रथमं तैरर्थवत्त्वप्रतिपत्तेः, तथा चायं पूर्वस्मान्मुख्यादभिन्न एव भवेत् मुख्यत्वात्तद्रूपवदिति न शब्दे नित्यत्वप्रतिक्षेपः; इत्यपि न चोद्यम्; अनेकान्तवादिनः क्वचिदर्थवत्त्वेतरयोरपेक्षाभेदेनाऽविरोधात्, दृश्येतरत्ववत्। नहि [3]चक्षुरन्यतोऽप्यदृश्यमेव; तद्व्यवहारविलोपापत्तेः। न च स्वशक्तितः पूर्वस्यार्थवत्त्वं यत उत्तरस्यापि तथैव वाचकत्वात् 'सादृश्याद्वाचकः' इति कल्पनं न भवेत्, अपि तु सङ्केतादेव सादृश्यविशेषालम्बनात्, तद्वदुत्तरस्यापि। न चानन्यश्राविणं प्रत्यनर्थकत्वेऽपि [5]वचनप्रबन्धस्य सर्वथाऽनर्थकत्वम्; प्रतिपन्नसङ्गतिं प्रत्यर्थवत्त्वप्रतिपत्तेः। न च 'मुख्य' इत्येव पूर्वस्मादुत्तरस्याभेदः, कालविच्छेदेन तयोर्भेदाध्यवसायात्। तन्न तत्र नित्यत्वप्रसक्तिः। तत इदमप्यपर्यालोच्य जल्पितम्—

"अप्रतीतान्यशब्दानां तत्का[6]लेऽसावनर्थकः।
प्रतीतान्यश्रुतीनां स्यादर्थवानिति विस्मयः ॥१॥
अथास्य विद्यमानोऽपि कैश्चिदर्थो न गृह्यते।
तत्तुल्यमुत्तरस्येति किं सादृश्येन वाचकः ॥२॥
अनर्थकत्वमस्य स्यादथानन्यश्रुतीन् प्रति।
पूर्वस्मिन्नपि तत्सत्त्वात् सर्वस्यानर्थता भवेत् ॥३॥
अर्थवत्सदृशत्वेन यो वा श्रुतवतां मतः।
मुख्योऽसावश्रुतीनां [8]स्यान्नित्यत्वेन प्रयुज्यते ॥४॥"

[मी० श्लो० शब्दनि० श्लो० २५०-५४] इति।

धूमादौ हेतावप्यस्य समानत्वाच्च। नहि तस्यापि सादृश्यादन्यतो गमकत्वम्। तत इदं तत्र वक्तव्यम्—

१—वत्तत्त्वम— आ०, ब०, प०। २ तदनन्तरवे— आ०, ब०, प०। ३ चक्षुष्मता द— आ०, ब०, प०। ४ स्वशक्तित एव। ५—वचनप्रतिबन्धस्य प्रति—आ०, ब०, प०। ६ —लोऽसाव— ता०। ७ "स एवान्यश्रुतीनाम्"— मी० श्लो०। ८ अर्थवान् स— आ०, ब०, प०। ९ "स्याच्चदेकत्वेन युज्यते"— मी० श्लो०।

न सादृश्येन धूमादिर्गमकस्तदवेदनात् ।
कस्य वैकस्य सादृश्याद्गमकः कल्प्यतां परः ॥१३५५॥
अदृष्टसङ्गतत्वेन सर्वेषां तुल्यता यदा ।
गमकः पूर्वधूमश्चेत्तस्य तावान् क्षणः कुतः ॥१३५६॥
द्वित्रिर्वानुपलब्धो हि गमको नावगम्यते ।
अप्रतीतान्यधूमानां न चायं गमकस्तदा ॥१३५७॥
प्रतीतापरधूमानां भवेदित्येष विस्मयः ।
गमकत्वं सदप्यस्य यदि कैश्चिन्न गृह्यते ॥१३५८॥
तत्तुल्यमुत्तरस्येति सादृश्याद्गमकः कथम् ।
अथास्यागमकत्वं स्यादनन्यगमकं प्रति ॥१३५९॥
पूर्वस्मिन्नपि तत्सत्त्वात् सर्वोऽप्यगमको भवेत् ।
गमयन् सदृशत्वेन यो वा तद्वेदिनां मतः ॥१३६०॥
मुख्योऽसावपरेषां स्यान्नित्यत्वेन प्रयुज्यते ।
न चादृष्टार्थसम्बन्ध इत्याद्यपि पुरोदितम् ॥१३६१॥
एवमत्रापि वक्तव्यं समानन्यायवेदिभिः । इति ।

भवतु नित्यत्वमेव हेतुर्ष्विति चेत्; न; व्यक्तितस्तदभावात् । सामान्यत इति चेत्; न ततो विशेषप्रतिपत्तिः तत्प्रतिबन्धस्य दुरवबोधत्वात् । प्रतिपत्तिरपि सामान्यस्यैवेति चेत्, न तर्हि ततो विशेषे तदर्थिनां प्रवृत्तिः अपरिज्ञानात् । लक्षितलक्षणे चानवस्थानात् । निरूपितञ्चैतत् **'तद्धर्मचोदिते'** [2]इत्यादिना । ततो व्यक्तीनामेव [3]सदृशरूपतया हेतुत्वमिति कथन्न तत्राप्ययं प्रसङ्गो यदनुमानमव्याकुलं भवेत् ।

लिङ्गेन चेत् प्रसङ्गोऽयं न शब्देऽप्यविशेषतः ।
ततः प्रलाप एवायमनालोचितकल्पनः ॥१३६२॥
तुल्यकक्ष्यत्वमेवैवं प्रवक्तुं शब्दलिङ्गयोः ।
अनुमानाधिकारेऽपि कृतं शब्दनिरूपणम् ॥१३६३॥

यदि न शब्दस्य कालान्तरावस्थितिः किमिति तत्र समयः साध्यते व्यवहारानुपयोगादिति चेत् ? अत्रोत्तरम्—

'तत्प्रकारेषु' तस्य साध्यमानसमयस्येव प्रकारः परिणतिविशेषो येषां तेषु शब्देषु । तैस्तदर्थप्रतिपादनाय तदर्थेषु च तैस्तत्प्रयोजनाय **प्रवर्त्तेन** प्रवृत्तिं कुर्वीत लोकः इति एवं न तत्र साध्यते न पुनस्तेनैव तस्यैव पुनरपि प्रतिपत्त्यर्थम् । लिङ्गमेवात्रोदाहरणम् ।

---

१ सर्वोऽस्य ग–ज्ञा०, व०, प० । २ इति विशेषे प्र– ज्ञा०, व०, प० । ३ सदृशरू० इत्यो० . . . . । इति न ज्ञा०, व०, प० । ४ सादृश्यरूप– ज्ञा० ।

धूमादिकं यथा किञ्चिदभिसन्धाय कुत्रचित् ।
सम्बन्धस्तत्प्रकारेषु प्रवर्त्तेतेति साध्यते ॥१३६४॥
तथा वचः क्वचित्किञ्चिदभिसन्धाय सूरिभिः ।
समयस्तत्प्रकारेषु प्रवर्त्तेतेति साध्यते ॥१३६५

उपसंहरन्नाह—

तज्जातीयमतः प्राहुर्यतः शब्दा निवेशिताः । इति ।

अतोऽनन्तरोक्तान्यायात् । आ (**प्रा**) **हुः** प्रतिपादयन्ति गवाश्वादयः । किम् ? **तज्जातीयं** तत्प्रकारम् । **यतो** यस्मिन् खण्डक्कर्कादौ **निवेशिताः** स्थापिताः **शब्दा** इति । किं पुनरिदं शब्दानां तत्र निवेशनम् ? सम्बन्धकरणमेव । सर्गादावीश्वरेण तत्करणस्य प्रसिद्धेरिति चेत्; न; नित्यत्वे तदयुक्तेः "तदुक्तम्" [शाबरभा० १।१।१८] इत्यनेन [1]भाष्येण प्रतिपादनात्। अनित्यत्वेऽपि विशेषतः सम्बन्धस्य दुष्करत्वात् । न हि शब्दस्यासत्युच्चारणे तदनन्तरनाशे वा तत्करणं निर्विषयत्वापत्तेः प्रयोजनविरहाच्च । ततः पूर्वस्यासम्बद्धस्यैव नाशादुत्तरस्य चाकृतसम्बन्धत्वादुर्विज्ञानमेवार्थवत्त्वम् । न चैकदैवोच्चारणं सम्बन्धकरणं व्यवहारश्च सम्भवति, तत्क्रियाणां क्रमस्वभावत्वेन युगपत्करणायोगात् । भवत्नपि कर्तृमुखनिष्क्रान्तः शब्दः कृतसम्बन्धो नैकः श्रोतॄणां सिद्ध्यति, तैर्देशकालादिभिन्नैः शब्दान्तरस्यैव श्रवणात्, अन्यथा तस्य नित्यव्यापित्वापत्तेः । तन्न सम्बन्धस्य करणं निवेशनम् । नापि [2]कथनम्; तस्याप्येवं निराकृतेः । न हि तदपि नष्टे सति वर्तमाने वा सम्भवति उक्तायाएवोपपत्तेः । उक्तञ्चैतत्—

"सम्बन्धकरणे युक्तिस्तदुक्तमिति कथ्यते ।
शब्दानित्यत्वपक्षे हि विशेषेण स दुष्करः ॥१४॥
शब्दं तावदनुच्चार्य सम्बन्धकरणं कुतः ।
न चोच्चारितनष्टस्य सम्बन्धेन प्रयोजनम् ॥२॥
तेनासम्बद्ध्य नष्टत्वात् पूर्वस्तावदनर्थकः ।
उत्तरोऽकृतसम्बन्धो विज्ञायेतार्थवान् कथम् ॥३॥
शब्दोच्चारणसम्बन्धकरणव्यवहारिकाः ।
क्रियाः क्रमस्वभावत्वात् कः कुर्याद्युगपत्क्वचित् ॥४॥
देशकालादिभिन्नानां पुंसां शब्दान्तरश्रुतेः ।
पूर्वं कृत्रिमसम्बन्धोऽप्येकः शब्दो न सिद्ध्यति ॥५॥

---

१ "कस्यचित्पूर्वस्य कृत्रिमसम्बन्धो भविष्यतीति चेत्; तदुक्तं सदृश इति चावगते व्यामोहात्प्रत्ययो व्यावर्त्तेत शालाशब्दान्मालाप्रत्यय इव ।"— शाबरभ० १।१।१८। २ —सम्बन्धिनि श्रो—ब०, व०, प०। ३ —"सम्बन्धश्चेत्येतदत्रापि सम्बन्धनीयम् ।"— ता० टि० ।

सम्बन्धकथनेऽप्यस्य स्यादेषैव निराक्रिया ।
नष्टासद्वर्तमानेषु नाख्यानस्य हि सम्भवः ॥६॥"

[मी० श्लो० शब्दनि० श्लो० २५४-५९]

इति चेत्; न, शब्दस्योच्चारणानन्तरनाशेऽपि सङ्कलनबुद्ध्यवस्थापितत्वेन तत्र सम्बन्धकरणतत्कथनयोरुपपत्तेरभिहितत्वात् ।

यत्तूक्तम्—'देशाकालादिभिन्नानाम्' इत्यादि, तदपि न समीचीनम्; वक्तृमुखनिष्क्रान्तस्यैव शब्दपर्यायिणः पुद्गलस्कन्धस्यानेकद्वाराकारेण प्रतिश्रोतृ श्रोत्रप्रदेशं प्रवेशाद् देवदत्तस्यायं शब्द इति प्रतीतेरस्खलनात् । उच्चारणानन्तरविनाशस्यापि तत्प्रवेशानन्तरभङ्गाभिप्रायेणैवाभिधानात् । कथञ्चैवं ध्वनीनामपि वर्णसम्बन्धो यतस्तदभिव्यक्तये तदुपादानं क्रियेत ? शक्यं हि वक्तुम्—

सम्बन्धकरणे युक्तिस्तदुक्तमिति कथ्यते ।
ध्वन्यनित्यत्वपक्षेऽपि विशेषेण स दुष्करः ॥१३६६॥
ध्वनिं तावदनुत्पाद्य सम्बन्धकरणं कुतः ।
न चोत्पादितनष्टस्य सम्बन्धेन प्रयोजनम् ॥१३६७॥
तेनासम्बद्ध्य नष्टत्वात् पूर्वस्तावदवर्णवान् ।
उत्तरोऽकृतसम्बन्धो वर्णवान् वेद्यते कथम् ॥१३६८॥
ध्वन्युत्पादनसम्बन्धकरणव्यावहारिकाः ।
क्रियाः क्रमस्वभावत्वात् कः कर्याद्युगपत्क्वचित् ॥१३६९॥
देशकालादिभिन्नानां पुंसां ध्वन्यन्तरश्रुतेः ।
न प्राक्कृत्रिमसम्बन्धो ध्वनिरेकोऽपि सिध्यति ॥१३७१॥
सम्बन्धकथनेऽप्यस्य स्यादेषैव निराक्रिया ।
नष्टासद्वर्तमानेषु नाख्यानस्य हि सम्भवः ॥१३७१॥इति

यच्चेदमपरमपरस्य[5] वचनम्[6]—

"अर्थवान् कतरः शब्दः श्रोतुर्वक्त्रा[7] च कथ्यताम् ।
यदपूर्वश्रुतं शब्दं नासौ शक्नोति भाषितुम् ॥
न तावदर्थवन्तं स ब्रवीति सदृशं वदेत् ।
नार्थवत्सदृशः शब्दः श्रोतुस्तत्रोपपद्यते ॥
अर्थवद्ग्रहणाभावान्न चासावर्थवान् स्वयम् ।
वक्तुः श्रोतृत्ववेलायामेतदेव प्रसज्यते ॥

---

१ -णानाशे- आ०, ब०, प० । २ -लनाबु- आ०, ब०, प० । ३ -पारा- आ०, ब०, प० । ४ प्रदेशादौ दे- आ०, ब०, प० । ५ -परं पर- आ०, ब०, प० । ६ "शब्दस्यार्थवत्त्वं स्वतो वेति विकल्पद्वयं मनसिकृत्याह"- ता० टि० । ७ श्रोत्रे आ०, ब०, प० ।

एवञ्च सर्ववक्तॄणां न शब्दः कश्चिदर्थवान् ।"

[मी० श्लो० शब्दनि० २६०-६३] इति

तदप्यत्र समानम् । तथाहि—

वर्णवान् कतरो नादः श्रोतुर्वक्त्रा निवेद्यताम् ।
यदपूर्वोद्भवं नादं नासौ शक्नोति भाषितुम् ॥१३७२॥
न तावद्वर्णवन्तं स ब्रवीति सदृशं वदेत् ।
न वर्णवत्समो नादः श्रोतुस्तत्रोपपद्यते ॥१३७३॥
वर्णवद्ग्रहणाभावान्न चासौ वर्णवान् स्वयम् ।
वक्तुः श्रोतृत्ववेलायामेतदेव प्रसज्यते ॥१३७४॥
एवञ्च सर्ववक्तॄणां न नादः कोऽपि वर्णवान् ।

इति कृतं प्रसङ्गेन ।

साम्प्रतमुक्तार्थस्मरणार्थम् **'सदृशासदृशात्मानः'** इत्यादि व्याचक्षाण आह—

नानेकत्र न चैकत्र वृत्तिः सामान्यलक्षणम् ॥३०॥ इति ।

अनेकत्र अनेकस्मिन् खण्डादौ **वृत्तिः** वर्त्तनं समवायो **न सामान्यस्य** गोत्वादे-
१५ **र्लक्षणम्** । **न च** नापि । **एकत्र** एकस्मिन्निति । अत्र हेतुमाह—

अतिप्रसङ्गतः [तत्त्वादन्यत्रापि समानतः] । इति ।

कार्यद्रव्यसंयोगादेरनेकवृत्तित्वेन कर्मणश्चैकवृत्तित्वेन सामान्यरूपत्वापत्तेरिति दोषात्, मीमांसकं प्रत्यनेकवृत्तेरसम्भवाच्च । तदाह—'तत्त्वात्' इति तत्त्वं सामान्यस्य व्यक्तिभ्योऽनर्थान्तरत्वं ततः, न तस्यानेकत्र वृत्तिस्ततश्च न तल्लक्षणम् । तथा हि—

२० व्यक्तिवत्तदभिन्नस्य तस्यानेकत्र वर्त्तनम् ।
कथं स्यादन्यथा तस्य तदभेदः कथं भवेत् ॥१३७५॥
सामान्यं तद्विशेषेभ्यो भिन्नाभिन्नं मतं यदि ।
कथं सावयवं न स्याद्येनेदमभिलप्यते ॥१३७६॥
"कात्स्न्यैवयवशो वृत्तिः प्रष्टुं जातौ न युज्यते ।
२५ **नहि भागविनिर्मुक्ते कात्स्न्यैवयवकल्पनम् ॥ १३७७॥** इति ।
दृश्यादृश्यात्मकञ्च स्याद् भिन्नाभिन्नात्म तद्यदि ।
तथा सत्यन्तरालेषु नाग्रहात्तन्निषेधनम् ॥१३७८॥
"व्यक्तिष्वेव च सामान्यं नान्तरा गृह्यते यतः ।"
इति सर्वत्र तद्वृत्तेः प्रागेवोत्तरमीरितम् ॥ १३७९ ॥

---

१ श्रोतुस्तत्रोप- आ०, ब०, प० । २ -वक्तृश्रो- आ०, ब०, प० । ३ -पत्तेरतिव्याप्ते मी- आ०, ब०, प० । ४ सामान्यस्य । ५ मी० श्लो० वन० श्लो० ३३ । ६ मी० श्लो० आकृति० श्लो० २५ ।

तस्मादेकस्वभावं तद्यद्यभिन्नं विशेषतः ।
तत्रैव न परत्रेति सामान्यं तन्न युज्यते ॥ १३८० ॥

कथं तर्हि सामान्यम् ? इत्याह—**'अन्यत्रापि समानतः'** इति[1] । अन्यत्र खण्डवत् मुण्डादावपि **समानतः** सदृशपरिणामात् सामान्यमिति । सर्वतः सर्वस्य व्यावृत्तत्वेन विलक्षणत्वात् कथं तत्परिणाम इति ? अत्राह—

व्यावृत्तिं पश्यतः कस्मात् सर्वतोऽनवधारणम् ॥ ३१ ॥ इति

सर्वतः सजातीयाद्विजातीयाच्च **व्यावृत्तिं** स्वलक्षणानां विच्छेदं **पश्यतः कस्मात् अनवधारणम्** अनिश्चयनम् । एवं मन्यते—दर्शनविषयत्वे व्यावृत्तेर्निश्चयेन[2] भवितव्यं नीलादिवत्, तथा च व्यर्थमनुमानं निश्चिते समारोपाभावादिति । न दृष्टमित्येव निश्चयः, तत्रापि सादृश्याद्भ्रमोपपत्तेः मायागोलकवदिति चेत्; अत्राह—

सादृश्याच्चदि साधूक्तं [तर्हि व्यावृत्तिमात्रकम्] । इति ।

सादृश्याच्चदि अनवधारणं व्यावृत्तेस्तर्हि **साधूक्तं** जैनेन **'अन्यत्रापि समानतः'** इति । सादृश्यमपि व्यावृत्तिरूपमेवेति चेत्; आह—**'तर्हि व्यावृत्तिमात्रकम्'** इति । तत् सादृश्यम् । **किं नैव, व्यावृत्तिरेव** तन्मात्रकम् अपि त्वन्यदेव । एवं मन्यते—यद्यन्यव्यावृत्तिरेव हेतुफलयोर्घटक्षणयोः सादृश्यं घटकपालक्षणयोरपि तद्भावान्नान्त्यक्षणेऽपि व्यावृत्तिनिश्चय इति । "अन्ते क्षयदर्शनादापि क्षयः" [ ] इति प्लवेत । ततो यदभावात् सत्यामपि तद्व्यावृत्तौ अन्त्यक्षणे[4] तन्निश्चयस्तदेव सादृश्यं न तन्मात्रमिति । परमाशङ्कते परिहर्तुम्—

एकान्ते चेत्तथाऽदृष्टेरिष्टं [वक्तुरकौशलम्] ॥ ३२॥ इति ।

एकोऽसहायोऽन्तः स्वभावो यस्य तस्मिन् वस्तुनि तथा तेन जैनोक्तेन[5] प्रकारेण अदृष्टेः अदर्शनात् सादृश्यस्य इष्टम् अभ्युपगतम् 'व्यावृत्तिमात्रकं तत्' इति । अत्रायमभिसन्धिः- वस्तु तावदेकस्वभावमेव । स्वभावान्तरकल्पनायां तत्स्वभावप्रच्युतेः । न ह्यप्रच्युततत्स्वभावं तदन्तरवद् भवति, तथापि तदेकस्वभावमेव पुनस्तदन्तरकल्पनायामव्यवस्थापत्तेः । एकश्चान्तो वैलक्षण्यमेव अन्यथा सङ्करापत्तेः । अतो नान्यस्य सादृश्यस्य दर्शनमिति व्यावृत्तिमात्रकमेव तत् इति । चेत् इति पराकूते । अत्रोत्तरमाह—'वक्तुरकौशलम्' इति । एकान्तं वदतो न कौशलं तत्र प्रमाणाभावात् प्रत्यक्षानुप्रवेशात् । तथा हि—वैलक्षण्यैकान्ते परत इव स्वतोऽपि तस्यैव भावादभाव एव भावानामिति न तत्त्वादिनः कौशलमव्यवस्थितवस्तुवादित्वात । तदाह—

सर्वैकत्वप्रसङ्गो हि [तद्दृष्टं भ्रान्तिकारणम्] । इति ।

---

१ इति अन्यस्मादन्यत इत्यन्यत ब्रा०, द०, प० । २ "अवस्तुनिश्चयात्मकमेव ता० टि० । ३-ये भ- ता० । ४-नेन त- ब्रा०, द०, प० । ५ जैनोक्तप्रकार- ब्रा०, द० प० । ६-गन्तव्यम् ब्रा०, द०, प० ।

सर्वैकत्वम् अभावमात्रत्वेनाभिन्नत्वं तस्य **प्रसङ्गः** प्रसञ्जनं **हि** यतस्ततः प्रागुक्तम्। अथ न स्वतो वैलक्षण्यं न तर्हि तदेकान्त इति तत्कल्पनं विभ्रमात्। एतदेवाह—**'तद्दृष्टं भ्रान्तिकारणम्'** इति। **तस्य** वैलक्षण्यैकान्तस्य **दृष्टं** दर्शनं कल्पनारूपं **भ्रान्तिः** दुरागमजनितो विभ्रमस्तत्**कारणं** तन्निबन्धनम्। यदि वचन (यदि च न) सादृश्यं वस्तुतः कुतस्तत्प्रतिभासः? व्यावृत्तिबलादेवेति चेत्; न; तस्य सर्वत्र भावात्, गवादिव्यवहारसाङ्कर्यापत्तेः। ततोऽपि विशिष्टादेवेति चेत्, कस्तद्विशेषोऽन्यत्र वस्तुभूतात्सादृश्यात्। सोऽप्यतात्त्विक एव अन्यतस्ततोऽवकल्पनादिति चेत्, न, तत्राप्यविशेषविशेषयोः पूर्ववत्प्रसङ्गादनवस्थोपनिपाताच्च। ततो वस्तुभूतमन्यदेव व्यावृत्तेः सादृश्यं निर्बाधप्रतीतिगोचरत्वात्। तथापि तदवस्तुत्वे वैलक्षण्येऽप्यनाश्वासात् सर्वैकत्वमेव तात्त्विकं प्रसज्येत। तदाह **'सर्व'** इत्यादि। तत्प्रसङ्गाद्वैलक्षण्यं वदतो न कौशलं तदव्यवस्थितेरिति भावः। सति वैलक्षण्यप्रतिभासे कथं सर्वैकत्वमिति चेत्? सति सादृश्यप्रतिभासे वैलक्षण्यमपि कथम्? तस्य भ्रान्तिकारणत्वादिति चेत्, न, अन्यत्रापि तुल्यत्वात्। तदाह—**'तद्'** इत्यादि। **तस्य** वैलक्षण्यस्य **दृष्टं** दर्शनं कल्पनारूपं **भ्रान्तिकारणम्**—अविद्यानिबन्धनं विभ्रमादेव परमात्मापरिज्ञानरूपात् प्रतिभासः स्वगाद्यपरिज्ञानात् सर्पादिप्रतिभासवत् सर्पादिरूपेण स्वगादिवच्च भेदरूपेण तदात्मैवाविद्यावतामवभासत इति च ब्रह्मवादिभिरभिधानात्। तथा च तदीयं वार्तिकम्—

"सर्वैकत्वं परं ब्रह्म परमात्मेति यद्विदुः।
तन्मोहभाजां सर्वेषां न तत्त्वं परमार्थतः॥ १॥
तदज्ञानैकवेद्यत्वात्तेनैव परमात्मना।
तदन्यान्यात्मवन्ति स्युः सर्पादीनि स्वजा यथा॥ २॥
उक्तात्मच्युतदृष्टीनां तदबोधैकहेतुतः।
आब्रह्मस्थाणुभेदोऽयं नामरूपक्रियात्मकः॥ ३॥
अविद्याकृत एव स्यात् न यथावस्तुधीकृतः॥"

[बृहदा०वा० १।४।११३८-४१] इति

ननु चाविद्यैव सर्वैकत्वे तद्व्यतिरिक्ता न सम्भवति तद्ग्राहकविलोपात्। न च तदेवाविद्या; तस्य सत्यज्ञानत्वेनोपगमात् "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्ति० २।१।१] इति श्रवणात्। कथन्ततो भेदप्रतिभास इति चेत्? न; तस्या अवस्तुत्वेन भेदेतराभ्यामनिर्वचनीयत्वात्। अवस्तुनः कथं प्रतिभासकारणत्वमिति चेत्? न; प्रतिभासस्यापि तादृशत्वात्। नहि स्वप्नात्तदन्तरानुपपत्तिः दृष्टत्वात्। अथैवं नेष्यते न कश्चिदप्यन्यथा प्रतिभासहेतुर्भवेत् नौयानादीनामपि निरंशवादिनामसम्भवात्। मा भूदिति चेत्; एतदेवाह—

---

१ सर्वभा- आ०, ब०, प०। २ -विकल्पयाः। ३ कल्पनं भ्रा- आ०, ब०, प०। ४ ये वि- आ०, ब०, प०। ५ तन्मोहजानां आ०, ब०, प०। ६ सक्तत्वं आ०, ब०, प०। ७-कहेतुत्वात्तेव आ०, ब०, प०। ८ स्वजो यथा आ०, ब०, प०। ९ अविद्यायाः। १० प्नात्तदनु- आ०, ब०, प०। ११ तथैव ने -आ०, ब० प।

नो चेद्विभ्रमहेतुभ्यः प्रतिभासोऽन्यथा भवेत् ॥ ३३ ॥ इति ।

तेषामेवाभावादिति भावः । बहुवचनं नौयानादिभेदेन तेषां बहुत्वात् । अत्रोत्तरमाह—

तदकिञ्चित्करत्वं न निश्चिनोति स किं पुनः । इति ।

स धर्मकीर्तिः **पुनरिति** शिरःकम्पे **किं** कस्मात् **न निश्चिनोति** । किम् ? **तदकिञ्चित्करत्वं** तेषां विभ्रमहेतूनामकिञ्चित्करत्वमन्यथाप्रतिभासं प्रत्यकारणत्वम्, न च निश्चितवान् स्वशास्त्रे [1]तेषां तत्कारणत्वस्यैव तेन निश्चयात्[2], अन्यथा[3]अभ्रान्तपदवैयर्थ्यापत्तेः । संवृत्यैव तन्निश्चयो न वस्तुत इति चेत्; जीवन्तु ब्रह्मविदस्तेषामप्यविद्यायां तयैव तदुपपत्तेः । भवत्वेवं तथापि किम् ? इत्यत्राह—

तथा हि दर्शनं न स्याद्भिन्नाकारप्रसङ्गतः ॥ ३४ ॥ इति ।

तथा तेनाविद्यानिबन्धनभेदप्रतिभासप्रकारेण **हीति** सौष्ठवे **दर्शनं** सौगतस्य विलक्षणमेव सर्वमिति मतं **न स्यात्** न भवेत् । अत्र हेतुः— **भिन्नस्तन्मताद्विलक्षण आकारः** स्वरूपं यस्य अद्वैतात्मनस्तस्य **प्रसङ्गतः** प्राप्तेः, भेदस्य भ्रान्तत्वे तदन्यप्राप्तेरवश्यम्भावात् । विशेष एव परमार्थसंज्ञः तस्यैव दृष्टेः नाविशेषः परमार्थो विपर्ययादिति चेत्; अत्राह—

न च दृष्टेर्विशेषो यः प्रतिभासात् परो भवेत् । इति ।

न च नैव **दृष्टेर्दर्शनाद् विशेषः** परस्परविलक्षणरूपः सिद्ध्यतीति शेषः । कीदृशो न सिद्ध्यति ? **यो** विशेषः **प्रतिभासात्** परमात्मनः **"तमेव भान्तमनुभाति सर्वम्"** [कठो० ५।१५] इति तस्य प्रतिभासरूपत्वश्रवणात् **परो** विभिन्नो **भवेत्**, स दृष्टेर्न सिद्ध्यति तस्या एव तत्राभावादिति भावः । भवतु तर्हि यथादर्शनं वस्तुव्यवस्थेति चेत्, अत्राह—

प्रतिभासभिदैकत्र तदनेकात्मसाधनम् ॥ ३५ ॥ इति ।

तत् तस्मादविशेषवत् विशेषस्यापि तद्दर्शनबलादव्यवस्थानात् एकत्र एकस्मिन् घटादौ **अनेकस्य** समानेतरस्थूलेतरादेः **आत्मनः** स्वभावस्य **साधनं** सिद्धिः **'भवतु'** इत्याकृष्य सम्बन्धः । कया तत्साधनम् ? **प्रतिभासस्य** दृष्टेर्भिदा विशेषेण एकान्तवैमुख्यरूपेण । अनेकान्तेऽपि दुर्लभैव दृष्टिरिति चेत्; आह—

अदृष्टिकल्पनायां स्यादचैतन्यमयोगिनाम् । इति ।

अनेकान्तस्याप्यदृष्टिरनुपलब्धिस्तत्कल्पनायां **स्यात्** भवेत् **अचैतन्यं** चैतन्यवैकल्यम् **अयोगिनां** संसारिणाम् । तेषां तदन्यदृष्टेरभावात् तद्दृष्टेश्चापलापात् । भवतु तेषां तद्दृष्टिः, न तावता तत्सिद्धिः, योगिभिरन्यथा दर्शनात् **"व्याख्यातारः खल्वेवं विवे-**

१ नौयानादीनाम् । २ न्यायवि० पृ० १६ । ३ प्रत्यक्षलक्षणे । ४ तस्य एव आ०, ब०, प० । ५ –पि वि–आ०, ब०, प० ।

चयन्ति" [प्र० वा० स्व० १।७२] इति वचनात् । योगिदृष्टस्यैव परमार्थसत्त्वोपपत्तेरिति चेत् ; न ; अत्र प्रमाणाभावात् ।

योगिनः परिपश्यन्ति सौगतोक्तं स्वलक्षणम् ।
किं वा तदन्यदेवेति प्रमाणान्नात्र दृश्यते ॥ १३८१ ॥

वाङ्मात्रात्तेषु तद्दृष्टावतद्दृष्टिस्ततो न किम् ?
तामवस्थां गतानां तु न विद्मः किं भविष्यति ॥ १३८२ ॥

उपसंहरन्नाह—

तस्मादभेद इत्यत्र समभावं प्रचक्षते ॥ ३६ ॥ इति ।

तस्मात् उक्तन्यायाद् **अभेदः** तिर्यक्सामान्यम् **इति** एवम् **अत्र** विचार्यमाणे **समभावं** सदृशपरिणामं **प्रचक्षते** तद्रूपत्वेन तत्त्ववेदिनः । कथं पुनस्तं प्रचक्षीरन् तस्य विसदृशपरिणामे सति विरोधेनासम्भवादिति चेत् ? तदाह—

नेक्षते नाविरोधोऽपि [न समानाः स्युरन्यथा] । इति ।

समभावमित्यनुवर्तते **तं नेक्षते न** किन्तु वीक्षत एव । कस्तन्नेक्षते ? **नाविरोधः** तत्परिणामयोः परस्परापरिहारः कथञ्चिद् वस्तुषु तस्य सद्भावात्, अन्यथा वस्तुत्वहानेरिति भावः । केवलमविरोध एव तन्नेक्षते न इति **अपि**शब्दः ।

तयोः कथञ्चित्तादाम्यादविरोधस्तमीक्षते ।
यथा तथैव नानात्वाद्विरोधोऽपि तमीक्षते ॥ १३८३ ॥

तदनभ्युपगमे दोषमाह—**'न समानाः स्युरन्यथा'** इति । **अन्यथा** अन्येनाविरोध एव विरोध एव वा तमीक्षत इति प्रकारेण **समानाः** सदृशा **न स्यु**र्भावाः । तथा हि—यदि भावेषु विसदृशा एव धर्मा नापरे विरोधात् ; कथं तत्र समानप्रत्ययो विषयाभावात् ? विभ्रमादिति चेत् ; न ; तन्निषेधात् । तथा यदि सदृशा एव ; तदापि सर्वथा सादृश्येन भेदाभावात् कथं तत्प्रत्ययः ? तस्य भेदोपाधित्वेन प्रतीतेः । भवन्ति च समानास्तत्प्रत्ययाः । ततः सूक्तम्—**'नेक्षते न'** इत्यादि । **'नानेकत्र'** इत्यादयो व्याख्यानश्लोकाः सदृशपरिणामस्य प्रागुक्तस्यैव तैरभिधानात् ।

कथं पुनः शब्दानामर्थवत्त्वं तदभावेऽपि प्रवृत्तेः प्रधानादिशब्दानाम् ? तेषामपि तत्त्वे न कश्चिदप्यनृतवादी तीर्थंकर इति प्रामाण्यमेव सर्वप्रवादानाम् । न च तदुपपन्नं परस्परविरुद्धार्थत्वात् । ततः प्रधानेश्वरादिशब्दवदन्येऽप्यनृतार्था एवेति चेत् ; अत्राह—

अक्षज्ञानेऽपि तत्तुल्यम् [अनुमानवदिष्यते] ॥३७॥ इति ।

अक्षाणां चक्षुरादीनां कार्यं रूपादिविषयं ज्ञानम् **अक्षज्ञानं** तत्राऽपि न केवलं शब्दे **तद्** अनृतार्थत्वं तुल्यं सदृशम्, तस्याऽपि केशमशकादावनृतार्थत्वाऽवगमात् । अस्तु बहिस्तद-

---

१ –रप– आ०, ब०, प० । २ –वः न के– आ०, ब०, प० । ३ सर्वदा सा– आ०, ब०, प० । ४ अक्षज्ञानस्यापि ।

नृतार्थं नान्तः,अन्यथा तदसत्यत्वस्याप्रतिपत्तेरिति चेत् ; तर्हि तत एव बहिरपि तत् किञ्चित् सत्यार्थमङ्गीकर्तव्यम् । सत्यार्थमेकचन्द्रादिज्ञानमन्तरेण द्विचन्द्रादावज्ञानस्यापि मिथ्यार्थत्वानवगमात् । भवत्वेवं तत्प्रामाण्यस्योपगमादिति चेत् ; कथमिदम्[२] इतरस्मादविशेषात् ? नाविशेषः तस्यार्थकार्यत्वात् इतरस्य विपर्ययादिति चेत् ; सिद्धं नः समीहितम्– शब्दस्यापि तत्कार्यस्यार्थवत्त्वोपपत्तेः । विवक्षात एव शब्दो नार्थादिति चेत् ; न, परम्परया ततोऽपि भावात् 'यथा धूमश्चायम्' इत्यस्य । अत्र हि धूमस्य दर्शनं ततो विवक्षा ततोऽप्ययंशब्दः, एवमन्योऽपि । यदि पुनरस्यापि तत्कार्यत्वं नेष्यते कथमतो धूमप्रतिपत्तिः परस्य, यतोऽनुमानम् ? अप्रतिपन्नात्तदनुपपत्तेरिति कदर्थित एव परार्थानुमानव्यवहारः । ततो युक्तं पारम्पर्येणार्थादुत्पत्तेस्तद्वत्त्वं शब्दानाम् । अतीतानागतयोस्तर्हि कथं तेषां प्रतिबन्धः, तयोरेकस्य नष्टत्वेनान्यस्यानुत्पन्नत्वेनावस्तुत्वात् । अवस्तुनि च प्रतिबन्धानुपपत्तेरिति चेत् ; आह–**'अनुमानवदिष्यते'** इति । **अनुमानमत्र** लिङ्गं तन्निमित्तत्वात्, तस्येव तद्वत्, **इष्यते** अतीतादौ तेषां प्रतिबन्ध इत्यर्थः । नहि लिङ्गमतीतादावप्रतिबन्धमेव तद्गमयत्यतिप्रसङ्गात् । गमयच्च दृश्यते–कृत्तिकोदयादतीतस्य भरण्युदयस्य अनागतस्य च शकटोदयस्याविगानेन प्रतिपत्तेः । ततो यथा लिङ्गस्य तत्र प्रतिबन्धस्तथा शब्दानामपि, भाविकार्यत्वस्यापि लिङ्गवत्तत्रोपपत्तेः । योग्यत्वादेवास्य तत्र प्रतिबन्धो न तत्कार्यत्वादित्यपि न वाच्यम् ; शब्देष्वपि सदृशत्वात् । सत्यपि प्रतिबन्धे ततस्तत्प्रवृत्तिर्मिथ्यैवास्पष्टत्वादिति चेत् ; न, अनुमितावपि तुल्यत्वात् । सापि[६] तथैवेति चेत् ; किमिदानीं प्रमाणम् ? प्रत्यक्षमिति चेत् ; न; तस्यापि प्रवृत्तिविषये भाविनि स्नानादावस्पष्टत्वात् । सन्निहिते त्वप्रवर्तकत्वेन प्रामाण्यानभ्युपगमात् । व्यवहर्त्रभिप्रायात् प्रत्यक्षानुमानयोः प्रामाण्ये शब्दस्यापि स्यात् ; तदन्तरेण क्षणमपि व्यवहर्तृणामाश्वासोऽनु(सानु)पपत्तेः । तथा च कस्यचित् सुभाषितम्—

"इँदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते ॥" [ ] इति ।

तदेवाह—

ततः सम्भाव्यते शब्दः सत्यार्थप्रत्ययान्वितः । इति ।

ततस्तस्मान्न्यायात् सम्भाव्यते अवकल्प्यते **शब्दः** । कीदृशः ? **सत्यश्चासावर्थप्रत्ययश्चार्थज्ञानं तेनान्वितः** सम्बद्ध इति । अवश्यं चैतदभ्युपगन्तव्यम् "[१०]"**नार्थान् शब्दाः स्पृशन्त्यमी**" [ ] इत्यादेरप्यनर्थकत्वेन तद्वादिनो निग्रहापत्तेः । अपि

---

१ द्विचन्द्रादिज्ञा– आ०, ब०, प० । २ तत्प्रामाण्यम् । ३ एकचन्द्रज्ञानस्य । ४ सत्यार्थोऽनुमान– आ०, ब०, प० । ५ अनुमानं तदीप्स– आ०, ब०, प० । ६ सापि त– आ०, ब०, प० । अनुमितिरपि । ७ इदं मन्दं तमः आ०, ब०, प० । ८ जायते आ०, ब०, प० । ९ –र्थः प्र– आ०, ब०, प० । १० "उद्धृतमिदम्–विकल्पयोनयः शब्दा विकल्पाः शब्दयोनय । तेषामन्योन्यसम्बन्धे सत्यर्थान् शब्दाः स्पृशन्त्यमी ॥–" न्यायकुमु० पृ० ५३७। दि० भा।

च यस्यायं[1] निर्बन्धः "विवक्षाजन्मानः शब्दास्तामेव गमयेयुर्न बहिरर्थम्" [ ] इति । तत्राह-

सत्यानृतार्थताऽभेदो विवक्षाव्यभिचारतः ॥ ३८ ॥ इति ।

सत्यानृतार्थौ ययोस्तयोर्भावस्तत्ता तयाऽभेदो भेदाभावः सत्यार्थं सुगतवचनम्, अनृतार्थं वेदादिवचनमित्ययं भेदो न भवेत्, सर्वस्य सत्यार्थतैव स्यादित्यर्थः । कुत एतत् ? **विवक्षा** वक्तुमिच्छा तस्याम् **अव्यभिचारतः** अविप्रतिसारतः शब्दस्य । शब्द इत्यागतस्य विभक्तिपरिणामेन सम्बन्धात् । नहि तस्य तद्व्यभिचारे तत्कार्यत्वम्, अतिप्रसङ्गात् ।

शब्दार्थश्चेद्विवक्षैव तस्यामव्यभिचारतः ।
अर्थवानेव सर्वोऽपि शब्दः स्यान्न निरर्थकः ॥ १३८४ ॥
एवञ्च सौगतं वाक्यं प्रमाणं नान्यदित्ययम् ।
विभागो न भवेदेव विवक्षावाच्यवादिनाम् ॥ १३८५ ॥

नहि विवक्षाया भावाभावाभ्यां शब्दस्य सत्यार्थत्वमन्यत्वं वा येनायं प्रसङ्गः किन्तु विवक्षितस्यार्थस्य, तद्भावश्च सुगतवचन एव तदर्थस्यानित्यादेरुपपत्तिमत्त्वात्, नान्यत्र तद्विषयस्य नित्यादेः विपर्य्ययात्, ततो भवत्येव तद्विभाग इति चेत् ; न; अर्थस्यातद्विषयत्वात् । न ह्यर्थः शब्दस्य विषयो यतस्तद्भावाभावाभ्यां सत्यानृतविभागस्तत्र कल्प्येत । अविषयधर्माभ्यां तु ताभ्यां तत्कल्पने अतिप्रसङ्गात् । तद्विवक्षाया विषय एवार्थ इति चेत्, तर्हि एव तर्हि स विभागोऽस्तु कथं शब्दे ? विवक्षागतस्य तत्राप्यारोपादिति चेत्; अनृतार्थमेव स्यात्, विवक्षायामप्यर्थासंस्पर्शित्वेन तस्यैव भावात् । नायं दोषः तद्धेतोर्विकल्पस्यार्थवत्त्वात्, तस्य च तस्यामध्यारोपादिति चेत् , न, तस्याप्ययथार्थत्वात् । प्रतिपत्रभिप्रायाद् यथार्थ एव विकल्पः, प्रतिपत्तृभिर्दृश्यविकल्प्ययोरेकीकारेण व्यवहारादिति चेत्, न; तदेकीकारस्य दर्शनादसम्भवात्, तस्य विकल्प्याविषयत्वात् । विकल्पाच्च;[10] तस्यापि दृश्यागोचरत्वात् । उभयवेदिनश्च प्रत्ययस्यानभ्युपगमात् । सत्यमेतत्, केवलम् 'इदमेव दृश्यम्' इति विकल्प एव स्ववासनाप्रकृतेः स्वाकारमदृश्यमपि दृश्यतया व्यवस्यन्नुपजायते, ततस्तदभिप्रायभावाभावाभ्यां सत्यानृतार्थत्वयोर्विकल्पे सम्भवात्—तज्जन्मनि विवक्षायां तत्प्रसवे शब्देऽपि[11] तदुभयोपपत्तिरिति चेत् , न ; विकल्पस्य स्वाकारे प्रत्यक्षत्वेन[12] अन्यथाध्यवसायासम्भवात्, विविक्तसम्भ्रमस्यैव[13] तत्त्वोपपत्तेः । विकल्पान्तरात्तत्र तदध्यवसाय इति चेत् ; न ; तेनापि तदाकारस्याग्रहणात्, ग्रहणेऽपि अनिश्चयात् । अथ निश्चयेऽप्यतदाकारतया ग्रहणे[14] स्वमतविरोधात् । तदाकारे तु स्वाकार एव तदध्यवसायो नान्यत्र । स चायुक्त एव उक्तोत्तरत्वात् । विकल्पान्तरात्तत्रापि तदध्यवसायेऽनवस्थापत्तेः । तत्र

---

१ "नान्तरीयकताभावाच्छब्दानां वस्तुभिः सह । नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचकाः ॥"... ते हि वक्तुर्विवक्षावृत्तित्वात् तन्नान्तरीयकतया तयैव गमकाः स्युः ।"— प्र० वा० स्व० १ । २१६ । तत्त्वसं० पृ० ७०२ । तर्कभा० मो० पृ० ४ । २ तयोर्भेदो आ०, ब०, प० । ३ सत्यार्थमन्यद्वा आ०, ब०, प० । ४ विवक्षितार्थसद्भावः । ५–वचनमेव । ६ विवक्षायामेव । ७ अनृतार्थत्वस्यैव । ८ न नापि।त– आ०, ब०, प० । ९– करणव्य– आ०. ब०, प० । १० 'असम्भवात्' इति सम्बन्धः । ११ शब्दे तदु –ता० । १२ अन्यया व्यव– आ०, ब०, प० । १३ भेदे विभ्रमवतः । १४ स्वयमविरो– आ०, ब०, प० ।

तदभिप्रायः। सत्यपि तस्मिन् कथन्नाम स्वतोऽनर्थकस्य तद्वशादर्थवत्त्वम्? गुडस्यापि विषाभिप्रायाद्विषत्वापत्तेः। अतिप्रसङ्गाच्च—तदभिप्रायस्य नित्यत्वादिविकल्पेष्वपि तद्वादिनां भावात्। भावेष्वनित्यादिविकल्पानामेवाविसंवादकत्वेनार्थवत्त्वं न तेषां विपर्ययादिति चेत्, गतमिदानीं [1]तद्वशात्तद्वत्त्वकल्पनम्। अविसंवादोऽपि तेषामेवेति कुतः? वस्तुनि प्रतिबन्धादिति चेत्, वस्तुदर्शनाद् विकल्पस्ततो विवक्षा ततोऽपि शब्द इति प्रणालिकया शब्दस्यापि तत्र प्रतिबन्ध इति कथं नियमेनातत्प्रतिबन्धत्वं तस्योपकल्प्येत? ५
भवतु प्रतिबन्धः, तथापि तस्य विकल्प्याकारे सामान्य एव सङ्केतात्, तस्य चावस्तुत्वान्न वस्तुविषयत्वमिति चेत्; तँदेव तस्य कस्मात्? दर्शनेनाग्रहणात्, तद्गृहीतस्यैव वस्तुत्वोपपत्तेरिति चेत्, कथमतद्विषयस्यँ विकल्पेनापि तज्जन्मना प्रतिपत्तिः? अन्यथा नीलादेरप्यतद्गोचरस्यैव ततँः प्रतिपत्तेर्निराकारमेवँ दृश्यं तद्दर्शनञ्च प्राप्तम्। नीलादेः दर्शनेऽपि प्रतिभासनमुपलभ्यत इति चेत्; न; एकान्तविसदृशस्य तदप्रतिवेदनात्। कथञ्चित् सदृशात्मन इति चेत्, तर्हि विकल्पेनापि तस्यैव ग्रहणात् कथमवस्तुसत्त्वं १०
दृष्टे तदनुपपत्तेर्नीलादिवत्? वस्तुविषयत्वे विकल्पस्य वैशद्यमेव स्याद् दर्शनवत्, न चैवम्, दर्शनस्यैव तत्प्रतीतेः, ततो दर्शनाद्भिन्नविषय एव विकल्पः तद्भिन्नप्रतिभासित्वात्ँ रूपदर्शनाद्रसादिज्ञानवदिति चेत्, न; हेतोर्व्यभिचारात्—आसन्नपादपदर्शनात् दूरतद्दर्शनस्याविशदत्वेन भिन्नप्रतिभासत्वेऽपि एकविषयत्वप्रवृत्तेः। निरूपितञ्चैतत्— **"दूरदूरतरादिस्थैः"** इत्यादौ[9]। ततस्तयोरिव दर्शनविकल्पयोरप्यावरणमलविश्लेषविशेषादेकविषयत्वेऽपि विशदेतरभावोपपत्तेः उपपन्नमेव १५
वस्तुविषयत्वं विकल्पस्य, एवं शाब्दज्ञानस्यापि। शब्दस्य [10]सत्यर्थे प्रयुक्तस्य तदभावेऽपीच्छया प्रयोगदर्शनात् कथमर्थविषयत्वमिति चेत्? विवक्षाविषयत्वमपि कथम्? तदभावेऽपि गोत्रस्खलनादौ तत्प्रयोगस्यापि प्रतिपत्तेः। तत्र विवक्षाविशेषस्याभावेऽपि तन्मात्रमस्त्येवेति चेत्; न, अन्यत्राप्यर्थमात्रस्यानिवारणात्। तन्मात्रे न शब्दविशेषस्य प्रयोग इति चेत्, विवक्षामात्रेऽपि न भवेत्। ततो विवक्षाया अपि तदर्थत्वानुपपत्तेः तालवादिपरिस्पन्द एव तदर्थः स्यात्, तत्र शब्दस्याव्यभिचारात्। २०
विवक्षायां तु व्यभिचारः; योगिनः [11]तन्मात्राभावेऽपि तत्प्रवृत्तेः। कथं पुनः शब्दज्ञानेऽनवभासमानस्य तस्य[12] तदर्थत्वमिति चेत्? अभिप्रायस्य कथम्? श्रवणे वक्तुरयमभिप्राय इत्यवगमादिति चेन्? न; तस्यानुमानत्वेनाशाब्दत्वात्, अनुमानस्य च परिस्पन्देऽप्यविशेषात्। ततो न कश्चिदपि शब्दार्थ इति प्राप्तम्।

एवमेतत्, तद्व्यवहारस्तु विभ्रमादेव स्वप्नवत्। अस्ति हि स्वप्ने तदभावेऽपि तद्व्यवहारः— २५
'ममायमाह, मया चैतद्वचनात् प्रतीयते' इति तद्दर्शनादिति चेत्; न; अतो वचनात्प्रकृतार्थप्रतिपत्तौ[13] अर्थवत एव शब्दस्योपपत्तेः। अप्रतिपत्तौ किमस्योच्चारणं वैफल्यात्। तदपि विभ्रमादेव न वस्तुत इति चेत्, न; अस्यापि तुल्यचोद्यत्वात्। पुनर्विभ्रमकल्पनायामनवस्थापत्तेः। ततः कस्यचित् किञ्चित्

१ अभिप्रायवशादर्थवत्त्वकल्पनम्। २ अर्थे। ३ अवस्तुत्वमेव। ४ दर्शनादिविषयम्। ५ विकल्पात्। ६ प्रत्यक्षाग्राह्यमेव। ७– भासत्वात् आ०, ब०, प०। ८ दूरदूर– आ०, ब०, प०। ९ न्यायवि० श्लो० २।१३। १० सत्यार्थे ता०। ११ सामान्यविषयाऽभावेऽपि। १२ तालवादिपरिस्पन्दस्य। १३– तार्थवत एव शब्द–आ०, ब०, प०।

निरूपयता शब्दस्य तद्विषयत्वमङ्गीकर्तव्यम् अन्यथा तदनुपपत्तेः। कथं पुनर्विषयत्वे[1] तदभावेऽपि प्रयोग इति चेत् ? न ; तस्य ततोऽन्यत्वात्। [2]गुणनिबन्धनो हि शब्दो विषयवान्न तस्य तदभावे प्रयोगः। यस्य तु प्रयोगः स तस्माद् भिन्न एव दोषोपनीतत्वात्। सोऽपि स एव, स एवायमिति प्रत्यभिज्ञानादिति चेत् ; न ; तस्य सादृश्यमात्रभावित्वेन विभ्रमत्वात् केशनखादिप्रत्यभिज्ञानवत्। गुणदोषविवेक एव वक्तरि दुष्करो वीतदोषस्यापि सदोषवत् सदोषस्य वीतदोषवच्चेष्टासम्भवादिति चेत् ; न; परीक्षया तस्यापि सुकरत्वात्, अन्यथा चेष्टाव्यत्यासस्याप्यनवबोधे "[4]नवीतदोषस्य" [प्र० वार्तिकाल० २।२८६] इत्यादेरवचनप्रसङ्गात्।

तस्मादनर्थकत्वेऽपि शब्दानां दोषजन्मनाम्।
अर्थवत्त्वं भवत्येव गुणालङ्कृतजन्मनाम्॥ १२८६॥

साम्प्रतं **'तत्रैकमभिसन्धाय'** इत्यादि प्रपञ्चेन श्लोकैर्व्याचिख्यासुः सङ्केतनिबन्धनं प्रत्यभिज्ञानम् एकत्र स इति अयमिति च स्मरणदर्शनरूपयोर्विरुद्धाकारयोरनुपपत्त्या निराकुर्वन्तं प्रत्याह—

सहशब्दार्थदृष्टावप्यविकल्पयतः कथम्।
समयः [तत्प्रमाणत्वे क्व प्रमाणे विभाव्यताम्]॥ ३९॥ इति।

सह युगपत् **शब्दाश्च** गौरित्यत्र गकारादयो वर्णा **अर्थाश्च** रूपादयः तेषां **दृष्टौ** दर्शने, न केवलमदर्शने इत्यपिशब्दः, **अविकल्पयतो** विकल्पमनाचक्षाणस्य। तात्पर्यमत्र-यथा न प्रत्यभिज्ञानमयमाचष्टे विरुद्धधर्माध्यासात् तथा विकल्पमप्यभिलाप्येतराकारमिति तस्य **कथं** न कथञ्चित् **समयो**ऽनुगमो गकारादिगोरूपादिसमुदायवेदनं यतो गौरित्युच्चारयेत् खण्डादिरिति वा व्यवहरेत्, अस्ति च समयः, भवितव्यं ततो विकल्पेन तथा प्रत्यभिज्ञानेनापीति। एवं भवन्नपि विकल्पो न प्रमाणं तथा प्रत्यभिज्ञानमपीति चेत् ; न, ततः समयायोगात्। सोऽपि प्रत्यक्षादेवेति चेत्; न; वक्ष्यमाणत्वात्। प्रमाणत्वे तु प्रत्यभिज्ञानस्यापि तद्वत्प्रामाण्यात् युक्तस्तद्विषये सङ्केतः। किञ्च, प्रत्यभिज्ञानस्य भवत्यस्माकं परोक्षेऽन्तर्भावः, भवतस्तु क्व विकल्पस्य ? न प्रत्यक्षे; विकल्पत्वात्। नानुमाने; अलिङ्गजत्वात्। प्रमाणान्तरत्वे तु न प्रमाणद्वयनियमः। इदमेवाह—**'तत्प्रमाणत्वे क्व प्रमाणे विभाव्यताम्'** इति। **तस्य** विकल्पस्य **प्रमाणत्वे क्व** स **विभाव्यताम्** ? न क्वचित् प्रत्यक्षानुमानयोस्तदनुपपत्तेः। प्रमाणान्तरत्वे **क्व प्रमाणे** द्वे ? न क्वचित् तृतीयस्यापि भावात्। किं पुनर्विकल्पेन समुदायपरिज्ञानस्य प्रत्यक्षादेव भावादिति चेत् ? अत्राह—

तदर्थदर्शनाभावात् [मिथ्यार्थप्रतिभासिषु]। इति।

तस्य समुदायात्मनोऽर्थस्य **दर्शनं** तस्याभावात्। नहि क्रमभाविषु गकारादिष्वेकं[8] दर्शनम् ; तन्नित्यत्वापत्तेः। नापि नानादेशेषु रूपादिषु, देशव्याप्त्या निरंशवादव्यापत्तेः। दर्शनसमुदा-

---

१ शब्दस्य। २ निरर्थकशब्दस्य। ३ गुणिनि— आ०, ब०, प०। ४ "न वीतरागस्य वचो योषिदालिङ्गनादिजम्। वीतद्वेषस्य तु कृतः शत्रुसेनाविमर्दजम्॥"— प्र० वार्तिकाल०। ५— नमेव तत्र आ०, ब०, प०। ६— व्यज्ञानं न आ०, ब०, प०। ७— ष्वेवं द— आ०, ब०, प०। ८ एकं दर्शनमिति सम्बन्धः।

स्यात् तत्परिज्ञानमित्यपि न युक्तम्; तत्समुदायस्याप्येकदर्शनागोचरत्वात्। दर्शनान्तरसमुदायस्य च तद्विषयस्यानभ्युपगमात्। ततो विकल्पादेव तत्परिज्ञानम्, तस्य च स्वविषयेणार्थवत्त्वे प्रत्यभिज्ञानस्यापि तदुपपत्तेः। अर्थ एव सङ्केतो न ज्ञानाकारेषु इत्याह—

मिथ्यार्थप्रतिभासिषु।
ज्ञानाकारेषु सङ्केत इति केचित्प्रचक्षते ॥४०॥ इति।

मिथ्या वितथो **योऽर्थ** एकत्वसादृश्यलक्षणस्तत्**प्रतिभासिषु ज्ञानाकारेषु** ज्ञानं प्रत्यभिज्ञानं तदाकारेषु **सङ्केत इति** एवं **केचित्** कुत्सिताः; कुत्सितत्वञ्च तदर्थस्य सत्यार्थस्यैव मिथ्यार्थत्वप्रतिपादनात्, **प्रचक्षते** कथयन्ति शाक्याः, तत्रः; तदाकारेष्वेवं[1] सङ्केतशक्तेः, तद्वचनाद्बहिरप्रवृत्तिप्रसङ्गाच्च एकत्वाध्यवसायस्य प्रतिक्षेपात्। क्व तर्हि सः? इत्याह—

वागर्थदृष्टिभागेषु गृहीतग्रहणेष्वपि।
सत्याकारावबोधेषु सङ्केतमपरे विदुः ॥४१॥ इति।

वाक् च शब्दः **अर्थश्च** वाच्यो **दृष्टिश्च** तत्प्रत्ययः त एव **भागा** वचनविषयस्य तेषु **सङ्केतं** शब्दसमयम् **अपरे** जैना **विदुः** जानन्ति न ज्ञानाकारमात्रे दोषवचनात्। कीदृशेषु? **सत्याकारैः** सत्यनिश्चयः **अवबोधो** येषां तेषु अपिशब्दस्यात्रापि सम्बन्धात् 'असत्याकारावबोधेषु' इत्यपि द्रष्टव्यम्, ततश्च शब्देषु सत्यानृतार्थत्वविभागोपपत्तिः। केषु तेषां तदवबोधत्वम्? **गृहीतानां** दर्शनविषयीकृतानां **ग्रहणानि** परामर्शरूपाणि तेषु सत्सु। बहुवचनं विषयभेदेन तेषां बहुत्वात् **अपि**शब्दाद् अगृहीतग्रहणेष्वपि। ततो गृहीतग्रहणेषु सत्याकारावबोधत्वम्, इतरत्र तदन्यावबोधत्वमित्युक्तं भवति।

भवतु तर्हि वागादिभेदेष्वेव समय इति चेत्; न तत्र समयविषयस्यान्यतः प्रतिपत्तिः, भेदान्तरे च समयस्याभावेन फलाभावात्। नापि तेष्वेव सामान्यवत्सु, तत एव। अभिहितञ्चैतत्-**'सम्बन्धो यत्र'** इत्यादिना। नापि केवले सामान्ये; तस्यार्थक्रियायामशक्तेः, 'विशेषे वैयर्थ्यात्'। लक्षितलक्षणयाँ ततो विशेषाधिगमेऽप्युक्तम्—**'तद्वत्यचोदिते'** इत्यादिना। न च भेदादौ शक्यक्रियः सम्बन्धः; तस्यैवैकान्तरूपस्य प्रमाणाविषयत्वात्। निरूपितञ्चैतत्। एतदेवाह—

न भेदेषु न सामान्ये केवले न च तद्वति।
फलाभावादशक्तेश्च समयः सम्प्रवर्तते ॥ ४२ ॥ इति।

सुबोधमेतत्। किन्निबन्धनः पुनः सङ्केतोऽयमपरे विदुरिति चेत्? अत्राह—

स एवायं समश्चेति प्रत्ययस्तन्निबन्धनः।
वितथोऽवितथश्चापि तत्रैकत्वनिबन्धनः ॥ ४३ ॥ इति।

१—वं श—आ०, ब०, प०। २—स्या प्र—आ०, ब०, प०। ३—राम—आ०, ब०, प०। ४—तु वा त—आ०, ब०, प०। ५ न्यायवि० श्लो० २।२३। ६ 'नापि केवले विशेषे' इत्यस्यतः। ७ शब्देन लक्षितं सामान्यं तेन च लक्ष्यते विशेष इति। ८ न्यायवि० श्लो० २।२२।

प्रतिपादितमेव प्रत्यवमर्शनिबन्धनत्वं तस्य गृहीतग्रहणेऽपीति[1], तत्किमनेनेति चेत्; न; तस्यैवानेन विस्तरतः कथनात्। **स एव** पूर्वगृहीत एव **अयं** प्रतीयमानो नापरः, **समश्च** सदृशश्च तेन 'अयम्' **इति** एवं यः **प्रत्ययः** प्रत्यवमर्शः **तन्निबन्धनस्तद्धेतुकः 'सभयः'** इति गतेन सम्बन्धः। स च प्रत्ययो **वितथोऽवितथश्चापि** प्रातीतिकमेतत्। क पुनस्तस्यायं विभागः प्रतिपत्तव्य इति चेत्? उक्तं **तत्र** तेषु वागादिषु भिन्नदेशेषु **एकत्वनिबन्धनः** एकत्वविषयः प्रत्ययो मीमांसकस्य वितथः; तदेकत्वाभावस्य निरूपणात्, स्वस्तिकरुचकादौ त्ववितथ एव तदेकत्वस्यावस्थापनात्। तथा 'समत्वनिबन्धनः' इत्यपि द्रष्टव्यम्, अस्योपलक्षणत्वात्। [2]सोऽपि तत्रोपादानोपादेयरूपेषु सादृश्यमात्रविषयो मिथ्या तदेकत्वस्यापि वास्तवत्वात्, शबलशाबलेयादावमिथ्या तत्सादृश्यस्य [3]निर्बाधत्वात्।

न केवलमेकत्वसमत्वयोरेवेयं प्रक्रिया अपि तु तदन्यत्रापीत्याह—

तथा तत्प्रतिषेधेऽपि वैलक्षण्यादिशब्दवत्। इति।

तथा तेनोक्तप्रकारेण **तयोरेकत्वसमत्वयोः** 'स देवदत्तोऽयं जिनदत्तो न भवति, स कर्कोऽनेन खण्डेन समानो न भवति' इति **प्रतिषेधेऽपि** न केवलं विधौ यः प्रत्ययस्तन्निबन्धनश्च सङ्केतः। तथा स वितथोऽवितथश्चापि तत्रोपादानोपादेयेष्वेकत्वनिषेधी वितथः शरीरचैतन्ययोरवितथः। तथा शबलशाबलेयादौ सादृश्यनिषेधी वितथः, खण्डकर्कादौ त्ववितथः, सादृश्यविशेषस्य तत्राभावात्। तत्रोदाहरणम्— **वैलक्षण्यं** सादृश्याभावः **आदि**शब्दादेकत्वाभावः तयोः **शब्दस्तत्रैव** तद्वदिति।

साम्प्रतं सङ्केतितस्य शब्दस्य प्रवृत्तिप्रकारं दर्शयति—

तत्समानासमानेषु तत्प्रवृत्तिनिवृत्तये ॥४४॥
संक्षेपेण क्वचित्कश्चिच्छब्दः सङ्केतमश्नुते ॥ इति।

तत् तस्मात् **समानासमानेषु** सदृशासदृशेषु वस्तुषु **तत्प्रवृत्तिनिवृत्तये** तेषु प्रवृत्त्यर्थमनित्य इति निवृत्त्यर्थं नौनित्य इति **संक्षेपेण** समासेन **क्वचित्** शब्दादौ **कश्चित्** शब्दादिलक्षणः **शब्दः सङ्केतं** समयम् **अश्नुते** इति। न केवलमेक एव अपि तु अनेकोऽपि। इत्याह—

तथाऽनेकोऽपि तद्धर्मनानात्वप्रतिपादने ॥ ४५ ॥ इति।

तथा उक्तप्रकारेण शब्दः श्रावणोऽनित्य इत्यादि क्वचिद्धर्मिणि सङ्केतमश्नुते इति सम्बन्धः। किन्निमित्तम्? **तस्य** धर्मिणो **धर्माः** कृतकत्वादयस्तेषां **नानात्वस्य प्रतिपादने** तन्निमित्तम्। कथं पुनरेकत्रानेकधर्मसद्भावः? इत्यत्राह—

एकत्र बहुभेदानां सम्भवान्मेचकादिवत् ॥ ४६ ॥ इति।

निरूपितमेतद् बहुशः इति न प्रतन्यते।

---

१ श्लोकांशेन। २ समत्वनिबन्धनः प्रत्ययः। ३ तन्निबन्धनत्वान्न केवलमेतयोरेव आ०, ब०, प०। ४ न नित्य आ०, ब०, प०। ५— त्वमनेकत्वस्य प्र- आ०, ब०, प०। ६ इत्याह ता०।

कथं पुनः सामान्यस्य व्यक्तिव्यतिरिक्तस्याभावे तद्व्यवहार इति चेत् ? अत्राह—

समानं केनचित्किञ्चिदपरञ्च तथाविधम् ।
भेदिवद् धर्मिणः कृत्वा समानाकारकल्पना ॥ ४७॥ इति ।

भेदिवत् भेदिनमिव **कृत्वा** निश्चित्य । कुतः ? **धर्मिणः** शब्दादेः । किम् ? **समानं** सदृशपरिणाममनित्यादिव्यपदेशविषयं **किञ्चित्** न सर्वम्, सर्वस्य भेदिवत्करणे [1]धर्मिणोऽनवशेषात्, तस्य तद्व्यतिरेकेणाभावात् **अपरं** च तमेवान्यतस्तत्परिणामादनर्थान्तरं च **कृत्वा** । कीदृशम् ? **तथाविधम्** अन्यगततत्परिणामप्रकारम्, अनेन तदपरत्वकरणे निमित्तमुक्तम् तथाविधत्वात्तदपरं कृत्वेति; कृतिरपि केनचिदपोद्धारन[3]येन । ततः किम् ? **समानाकारकल्पना** सामान्यव्यवहारः ।

तदपरत्वकारिणं नयं दर्शयति—

तदन्यत्र समानात्मा स एवेति [तथाविधे] । इति ।

तस्मात् शब्दादेरन्यत्र घटादौ यः **समानात्मा** समानः स्वभावो नित्यत्वादिः **स एव**[4] यः शब्दाधिगतः तदात्मैव नापर इति एवं केनचिदपरं कृत्वा तत्कल्पनेति । ततो यदुक्तं कुमारिलेन—

"तथा भिन्नमभिन्नं वा सादृश्यं व्यक्तितो भवेत् ।
एवमेकमनेकं वा नित्यं वाऽनित्यमेव वा ॥
भिन्नत्वैकत्वनित्यत्वे जातिरेव प्रसज्यते ।"
[मी०श्लो०शब्दनि० २७१-२७२] इति;

तत्प्रतिविहितम्; भिन्नत्वादेरपोद्धारनयार्पणयैव भावात् । तदपेक्षया च सादृश्यं 'जातिरेव प्रसज्यते' इत्यस्येष्टत्वेनादोषत्वात् । अकल्पिततद्रूपाया एव तस्या अनभ्युपगमात् । प्रमाणार्पणया तु न तत्र भिन्नत्वादिकम् [5]अभेदानित्यनानारूपतयैव तया तस्य प्रतीतेः । विशेष एवैवं शब्दार्थः स्यान्न सादृश्यं तस्य तद्व्यतिरेकेणाभावात्, ततो व्यक्तिवादात् प्रागुक्तान्न सादृश्यवादस्य विशेषः । तदुक्तम्—

अभेदानित्यनानात्वे पूर्वोक्तेनैव तुल्यता ।" [मी० श्लो० शब्दनि० २७२]

इति चेत्; न सारमेतत्; प्रमाणतस्तस्याऽभेदादिरूपत्वेऽपि नयवशात्तदन्यरूपत्वस्यापि भावात् पूर्वोक्तेन तुल्यत्वानुपपत्तेः । [6]प्रमाणतोऽप्येकान्ततस्तत्राभेदादेरप्रतिपत्तेरित्यलं बहुजल्पितेन; तं प्रति अपोद्धृतभेदेषु समानाकारेषु तन्निबन्धनं प्रयोजनमाह—

तथाविधे ।
व्यवच्छेदस्वभावेषु विशेषणविशेष्यधीः ॥ ४८ ॥
तत्तन्निमित्तकः शब्दस्तथान्यत्रापि योज्यताम् । इति ।

तथा तेन प्रकारेण **विधा** विधानं तदाकारापोद्धा रणं यस्मिन् तस्मिन् धर्मिणि शब्दादौ

---

१ धर्मिणो न विशे- आ०, ब०, प० । २– मान– आ०, ब०, प० । ३ भेदद्दष्ट्या । ४ एवायं श-ता० । ५ अभेदनित्यतानाना- प० । ६ प्रमाणेप्ये–आ०, ब०, प० । ७ तदान्यत्रा– आ०, ब०, प० । ८–ण वा विधानं आ०, ब०,प० ।

योज्यताम् सम्बद्ध्यताम्, **विशेषणविशेष्यधीः** विशेषणधीरित्य इति विशेष्यधीः शब्द इति। केषु सत्सु सा तत्र योज्यताम्? **व्यवच्छेदस्वभावेषु** व्यवच्छेदो विपरीतव्यावर्तनं स्वभावो येषां तेषु समानाकारेष्वपोढृतेषु, तदभावे निमित्ताभावेन तत्र तद्योजनानुपपत्तेः। अतद्रूपाव्यवच्छेदे च तेषां न ततो विशेषणादिबुद्धिः, तेषामेवाव्यवस्थितेरिति व्यवच्छेदपदम्। स्वभावग्रहणं तु तेषामपोहरूपत्वनिषेधार्थम्, अपोहस्य नीरूपत्वेन स्वभावत्वासम्भवात्, अस्वभावस्य च तद्बुद्धिनिमित्तत्वानुपपत्तेः। न केवलं तद्धीरेवापि तु **शब्दो** विशेषणादिश्रुतिः तत्र योज्यताम्। कीदृशः तत्तन्निमित्तकः स स समानाकारविशेषो निमित्तं यस्य स **तत्तन्निमित्तकः**। वीप्साद्विरुक्तस्य तच्छब्दस्य निमित्तपदेन बहुव्रीहिः। न केवलं धर्मिण्येव **तथान्यत्र** घटादावपि **योज्यताम्** उक्तरूपा बुद्धिः[1] शब्दश्च।

अस्तु वस्तुतः सादृश्ये ते[2] नित्यसदृशे नित्यसदृशस्य शब्दस्य योजनम्, सादृश्यञ्च न वस्तुन्यवस्थितं सम्भवति, प्रत्युत्पत्तिविलक्षणे वस्तुनि चिरापक्रान्तसङ्केतविषयापेक्षया पश्चाद्भाविनि सादृश्यस्य निर्मूलतो विनाशात्। विशेषणशब्दे स्वरव्यञ्जनादिभेदेन तत्रात्यन्तवैसादृश्यस्य प्रतीतेः, यथा शालाशब्दान्मालेत्यादौ अपकृष्यमाणस्य वेश्येत्यत्रात्यन्तिकविनाशः, तथान्यत्रापि तत्सम्भवमुत्पश्यतां कथं कस्यचित्प्रयोगः सतोऽप्यर्थवत्? सदृशाच्छब्दात्तत्प्रतीतिः भ्रान्तिरेव धूमसदृशाद्वाष्पादेरिव पावकप्रतीतिः। भवेत्[3]वेवमिति चेत्, न, बाधकविरहात्। तावता तर्हि तत्प्रतीतेरपि भ्रमत्वमिति चेत्, तथा शब्दनित्यत्वमपि सिध्येत्, तज्ज्ञानस्यापि तद्विरहाविशेषात्। तदुक्तम्—

"वस्तुन्युत्पत्तिभिन्ने च दूरादारभ्य कल्पितम्[4]।
स्तोकस्तोकविशेषेण सादृश्यं विप्रकृष्यते॥
स्वरव्यञ्जनमात्रादिभेदाच्छब्दे विशेषतः।
शाला माला बला वेला वेश्येत्यादि विकल्पनात्॥
सदृशात्प्रतिपत्तौ च भ्रान्तिज्ञानं प्रयुज्यते।
धूमे दृष्टेऽग्निसम्बद्धे वाष्पादिव कृशानुधीः॥
एवमस्त्विति चेद् ब्रूयान्नैतद्बाधकवर्जनात्।
तावता सिद्धमिति चेच्छब्दाभेदोऽपि सिध्यतु॥"

[मी० श्लो० शब्दनि० श्लो० २६७–७०]

इति चेत्, न; अपकर्षातिशयेऽपि सादृश्यस्य क्वचिदत्यन्तनाशस्यासम्भवात् क्वचिदपरिज्ञातसादृश्यस्यापि तत्प्रसङ्गात्। दृश्यते हि तस्यापि तदतिशयः भस्मादेः एकेन्द्रियजीवे, ततोऽपि द्वीन्द्रिये, ततोऽप्यन्यत्र [6]यावच्छास्त्रार्थवेदी पुरुषः। यत्र च तस्यात्यन्तनाशस्तस्य सर्ववेदित्वेन धर्मेऽपि प्रामाण्यात् न "धर्मे चोदनैव प्रमाणम्" [ ] इत्यवतिष्ठेत। न च सादृश्या-

---

१–द्विश्च श– आ०, ब०, प०। २ विशेषणविशेष्यधियौ। ३ भवत्येव–आ०, ब०, प०। ४ कल्पनं आ०, ब०, प०। ५–ब्दाद्भेदो– आ०, ब०, प०। ६ यावान् शा– आ०, ब०, प०।

प्रतिपत्तिर्भ्रान्तिरेव, विशेषावधारणे तदभावात् । तदनवधारणाच्च प्रतिपत्तुरेव दोषान्न सादृश्यस्य । कथञ्चैवम् अहमिव सर्वे पुरुषाः प्रतिनियतार्थमिन्द्रियैः पश्यन्ति इत्युपमानमभ्रान्तम् ? सादृश्यादेव तस्यापि भावात् । ततो विभ्रमविलासादेव **'वस्तुनि'** इत्याद्यभिजल्पितं न परिशुद्धज्ञानसामर्थ्यात् । **'तावता'** इत्याद्यपि न सुभाषितम् ; शाब्दज्ञानवत् शब्दैकत्वज्ञाने [1]बाधविवर्जनस्याभावात्, तस्य च यथावसरं निरूपणात् । ५

[2]तथा, वाचकत्वं शब्दस्य अर्थवता तदन्तरेण सादृश्यात्, अर्थवत्त्वञ्च सम्बन्धात् । स च न क्षणिकत्वे सम्भवति दुरवबोधत्वात् । सम्भवेऽपि सर्गादौ सर्वज्ञकृतस्य तद्वतः शब्दस्यास्माभिरनवलोकनात् कथं तत्र तत्सदृशे बुद्धिः ? यदि मतम्–तत्कालीनैः पुरुषैः तत्सदृशप्रतिपत्त्या तन्निबन्धनो व्यवहारः प्रबन्धेन प्रवर्तितः ततोऽनुमीयते मुख्यः कश्चिदर्थसम्बन्धः शब्द आसीत्, ततः सुगमैव तत्सादृश्यपरम्परा परापरशब्देषु प्रसज्यत इति; तन्न; एवमपि तद्विशेषस्यानवगमात् कथं क्वचिद्विशिष्टस्य सादृश्यस्यावगमो यतो विशिष्टार्थप्रतिपत्तये तत्प्रतियत्न इति चेत् ? न; लिङ्गेऽप्येवं प्रसङ्गात् । नहि तस्यापि सादृश्यादन्यतो गमकत्वं सामान्यप्रतिक्षेपात्, तत्र च सम्बन्धाभावस्य सत्यपि सर्गादिकृते सम्बन्धे तद्वतोऽन्यत्र तत्सादृश्यापरिज्ञानस्य च शब्दवदुपनिपातात् । तत इदमपि वेदवादिनो बालविलसितमेव– १०

"[3]सम्भवेद्यदि सम्बन्धः सर्गादौ कस्यचित्कृतः । १५
तस्मिन्नबुद्धे नैव स्यादस्माकं सदृशे मतिः ॥
अथ तत्कालजैः पुंभिस्तस्मिन् शब्देऽवधारिते ।
प्रवृत्तेरनुमीयेत तत्सादृश्यपरम्परा ॥
तत्र सम्बन्धमात्रेण पूर्वोक्तेन प्रयुज्यते ।
स्मार्य्यं तन्मूलसादृश्यं तदधीनार्थनिश्चये ॥" २०

[मी०श्लो०शब्दनि० २६४–६६] इति ।

न च सर्वज्ञकृतसम्बन्धशब्दसादृश्यादेव अधुनातनस्य वाचकत्वम् ; उपाध्यायोपदर्शितप्रतिबन्धगोशब्दसादृश्यादपि तदपरगोशब्दस्य [4]गवादौ तदर्थप्रयोगोपपत्तेः । उपाध्यायस्यापि तत्र तत्प्रयुक्तिः तदपरोपदर्शिततत्सादृश्यादपीति न किञ्चिदाद्यसादृश्यपरिज्ञानप्रयासेन ? ततो युक्तमुक्तम्–**'शब्दः प्रयुज्यताम्'** इति । २५

यदि न पुनः सदृशपरिणाम एव सामान्यं तस्य व्यक्तिवदनेकत्वात् कथं तत्र सत्तेत्येकतया व्यवहार इति चेत् ? अत्राह—

ततः सत्तेति [साध्यन्ते सन्तो भावाः स्वलक्षणाः] ॥४९॥

ततस्तस्मादपोद्धारनयात् सत्तेति उपलक्षणमिदं तेन द्रव्यत्वं गुणत्वमित्याद्यपि भवतीति शेषः । नन्विदमुक्तमेव **'समानम्'** इत्यादिनेति चेत् ; न तस्यैवानेनोपसंहारात् । ततः किम् ? ३०

---

१ विवर्जितस्या– आ०, ब०, प० । २ अथा वा– ता० । ३ भवेद्यदि च स– आ०, ब०, प० । ४ वागादौ आ०, ब०, प० । ५ सामान्यमि–ता० ।

इत्याह—**साध्यन्ते सन्तो भावाः स्वलक्षणाः** इति तत इत्यत्रागतम्। ततस्तस्मात् सामान्यस्यैकस्याभावात् 'अस्ति बहिरर्थः' इत्यादौ **भावाः** घटादयः **सन्तो** विद्यमानाः **साध्यन्ते** नैका सत्ता तदभावात्। अन्यथा पृथिव्यादिषु तत्साधनादेव रूपादावपि तत्सिद्धेः, द्रव्यतत्साधनात् पृथग्गुण[1]तत्साधनप्रयासो व्यर्थ इति मन्यते। निरूपितश्चैतत्—**'नित्यं सर्वगतम्'** [ ] इत्यादिना[2]। कीदृशास्ते सन्तः? **स्वलक्षणाः** स्वा (**स्वम्** आ) त्मीयमपरामिश्रणं **लक्षणं** सदृशेतरपरिणामरूपं येषां ते तथोक्ताः। एकान्ततः सादृश्ये वैलक्षण्ये च सत्त्वप्रतिक्षेपात्।

पुनरपि तन्नयात् सिद्धं दर्शयति—

नानैकवचनाः शब्दाः [तथा सङ्केतिता यतः] इति।

एकत्रापि जलकर्णिकादौ[3] वस्तुसतोऽनेकस्यैकस्य च धर्म्मस्यापोद्धारे यथाक्रममपोद्धाराः[4] जलं कलत्रमिति **नानावचना एकवचनाश्च** भवन्ति **शब्दाः**। कुतः पुनरवादयः एकवचना कलत्रादयश्च नानावचना न भवन्तीति चेत्? अत्राह—**'तथा सङ्केतिता यतः'** इति। नानैकवचनप्रकारेण सङ्केतिता वृद्धैर्यतस्ततो नानैकवचना नान्यथेति मन्यते। ततो न युक्तमेतत्—

"विवक्षापरतन्त्रत्वान्न शब्दाः सन्ति कुत्र च।" [प्र० वा० १।१८] इति।

अर्थवतोऽपि वृद्धव्यवहारातिक्रमेण न प्रयोगोपपत्तिः सुतरामनर्थकस्य अन्यथा विवक्षेत्यादेरपि सर्वत्र शब्दाभाव एव विवक्षया प्रयोग इति शङ्कायां कथमतः सर्वत्रातत्सद्भावप्रतिपादनं यतोऽसाधनाङ्गवचनात्तद्वादिनो न निग्रहावाप्तिः? ततो युक्तं **'तथा'** इत्यादि। **'सह'** इत्यादयो व्याख्यानश्लोकाः।

यदि समानप्रत्यवमर्शात्सामान्यं तर्हि जलयोरिव जलमरीचिकाचक्रयोरपि तद्भवेत्—'इदं जलमिदमपि जलम्' इति, तत्रापि समानप्रत्यवमर्शादिति चेत्, न; तच्चक्रे तत्प्रत्यवमर्शस्य बाध्यत्वेन मिथ्यात्वात्। न हि मिथ्याप्रत्ययात् तद्विषयसिद्धिः; द्विचन्द्रादिज्ञानादपि तत्प्राप्तेः। ततो निर्बाधादेव प्रत्यवमर्शात्तत्सिद्धिः। एतदेवाह—

प्रत्यभिज्ञा द्विधा [काचित्सादृश्यविनिबन्धना] ॥५०॥ इति।

[6]प्रत्यभिज्ञा प्रत्यवमर्शः। प्रस्तावात्[7] सामान्यविषयैव गृह्यते नैकत्वविषया, विपर्ययात्, तस्याः निरूपितत्वाच्च। सामान्यप्रत्यभिज्ञापि निरूपितैव **'स एवायं समश्च'** इत्यत्रेति चेत्, सत्यम्, तथापि सम्यङ्मिथ्यार्थप्रतिपादनार्थमिदमुक्तम्। सा **द्विधा** मिथ्या तथ्या चेति द्विप्रकारा। ततस्तथ्याया एव सामान्यसिद्धिरिति मन्यते। सामान्यमपि समानाकार[8] एव, स च जलवत्तच्चक्रस्यापि विद्यत एव तत्कथं तत्प्रत्यवमर्शो मिथ्येति चेत्? न, तद्विशेषस्यैव तत्त्वेनोपगमात्, न तन्मात्रस्य। स च जल एव; तत्रैव निर्बाधात्प्रत्यवमर्शत्वात् न तच्चक्रे विपर्य्ययात्। तन्मात्रापेक्षया तु भवत्येव स तत्रापि तथ्य एव चैकचिक्यादेः सत एव तदाकारस्य तेनाधिगमात्। कथं पुनः स एव तद्विशेषतन्मात्रापेक्षया मिथ्या तथ्यश्चेति[10] चेत्? बाधकभावेतराभ्यामिति ब्रूमः। कथन्न विरोध

१—णादौ त—आ०, ब० प०। २ न्यायवि० श्लो० १।१५४। ३—कर्णिका—आ०, ब०, प०। ४—वचनेनान्य—आ०, ब०, प०। ५ रानति—आ०, ब०, प०। ६ प्रत्यभिज्ञा नाम प्र—ब०। प्रत्यभिज्ञानानामप्र—प०। ७ "अवसरात्, प्रस्तावः स्यादवसर इत्यमरः"—ता० टि०। ८ न्यायवि० श्लो० २।४३। ९ सामान्याकार आ०, ब०, प०। १०—ति चा—आ०, ब०, प०।

इति चेत् ? न; दृष्टत्वात् । तत्रापि तत्कल्पनायां न किञ्चिद्बाधेत् । ततो निर्बाधाया एव प्रत्यभिज्ञायाः तत्सिद्धिर्नान्यतः । सा च काचिदेव तदेवाह–**'काचित्सादृश्यविनिबन्धना'** इति । **काचित्** जलविषया न तच्चक्रादिगोचरा **सादृश्यस्य** विशेषेण तन्मात्रातिशायिना रूपेण **निबन्धनं** व्यवस्थापनं यस्याः सा तथेति । सैव कस्मात्तथा ? इत्याह–

प्रमाणपूर्विका नान्या [दृष्टिमान्द्यादिदोषतः ।] इति । ५

प्रमाणं प्रत्यक्षादि **पूर्वं** कारणं यस्याः सा काचिदेव **नान्या** तच्चक्रविषया यतः, इत्यनेन कारणशुद्ध्या तस्याः सत्यत्वोपदर्शनात् सैव तद्विनिबन्धना नापरेत्युक्तं भवति । कुतः पुनरस्या भवति ? इत्याह–**'दृष्टिमान्द्यादिदोषतः'** इति । **दृष्टेर्मरीचिकादर्शनस्य मान्द्यं** यथावस्थिततत्परिच्छित्तिं प्रत्यपाटवम् **आदिर्यस्य** जलाभिलाषादेः स एव **दोषस्तत** इति । अनेनापि दोषवत्कारणत्वेनासत्यत्वान्न सा तन्निबन्धनेति निवेदितम् । १०

स्यान्मतम्–खण्डादौ सामान्यप्रत्यभिज्ञावत्[1] एकत्वप्रत्यभिज्ञाप्यस्ति कथं समान एवाकारः सामान्यं नैक इति ? तन्न; समानप्रत्यभिज्ञाया एव प्रत्यक्षपूर्वकत्वेन तत्संवादनात् प्रामाण्योपपत्तेर्न परस्याः । तदाह– **'प्रत्यभिज्ञा'** इत्यादि । यद्यपि समानैकविषयभेदेन द्विधा खण्डादौ **प्रत्यभिज्ञा** तथापि **काचित् सा** समानविषया **दृश्यविनिबन्धना** दृश्यो दर्शनवेद्यः समानाकारस्तद्विनिबन्धना तद्गोचरा । तत एव **प्रमाणपूर्विका** च तत्र प्रमाणं **नान्या** नैकत्वविषया तद्विपर्ययात् । नहि सामान्यमेकं शक्यदर्शनम् । १५ तथाहि– यदि तदेकम्; व्यक्तिवदन्तरालेऽपि स्यात् । अनुपलम्भान्नेति चेत्; कथमेकम् ? प्रत्यन्तरालं विच्छेदे व्यक्तिवन्नानात्वस्यैवोपपत्तेः । विच्छिन्नमप्येकमेव एकप्रत्यवमर्शादिति चेत्; अहो महती विवेकशक्तिः कुमारिलस्य यदसौ मृतमपि जीवन्तमभिधत्ते । कथञ्चैवं लूनपुनर्जातकेशादिरप्येको न भवेत् 'स एवायं केशादिः' इति प्रत्यवमर्शात् ? लवनप्रत्ययेन बाधनान्नेति चेत्, न; अन्यत्रापि विच्छेदप्रत्ययेन[2] तस्यावश्यम्भावात् । विच्छेदं पश्यतोऽपि[3] एकप्रत्यवमर्शो न निवर्त्तत इति चेत्; २० सौगतादेः शब्दं नित्यं पश्यतोऽप्यनित्यप्रत्ययस्यानिवर्त्तनाद् वेदादेरनित्यत्वमेव स्यात् । दुरागमाभ्यासोपनीतस्य मनोदोषस्याभावे निवर्त्तनमन्यत्रापि । ततः—

"व्यक्तिष्वेव च सामान्यं नान्तरा गृह्यते यतः ।" [मी०श्लो० आकृति० श्लो० २५]
इति ब्रुवाणस्य स्ववचनविरुद्धमेतत्—

"तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धनः ।
सामान्यशब्दः [6]सत्तावदेकाधिकरणेन वा ॥"[7] [मी० श्लो० आकृति० २४] इति । २५

न वस्तुतो भिन्नेषु तदेकम् अनेकस्यापि कुतश्चिदेकबुद्धिकरणादेवैकत्वस्योपगमात्, 'एकाधिकरणेन वा' इत्यस्यैव पक्षस्य परिग्रहादिति चेत्; न किञ्चिद् व्याहतम्, स्याद्वादिभिरप्यपोद्धारनयेन तदुपगमात् । निवेदितञ्चैतत्–**'समानं केनचित्'** इत्यादिना । तन्न व्यक्तिगतं तदेकम् । सर्वगत-

---

१ – ज्ञानव– आ०, ब०, प० । २ – यात्तर्हि विपर्ययात्तर्हि सा– आ०, ब०, प० । ३ बाधनस्य । ४ – तो ह्येकत्र प्र– आ०,ब०,प० । ५ – नित्यस्यानि– आ०,ब०, प० । ६ सत्तावदभावे कथं करणेन आ०, ब०, प० । "सत्तादावेकधीकरणेन" मी०श्लो० । ७ न्यायवि० श्लो० २।४७ ।

मेकमिति चेत्;अन्तराले किन्न तदुपलब्धिः ? अनभिव्यक्तेरिति चेत्; व्यक्तिष्वपि[1] न भवेत् । नहि तदेव क्वचिदभिव्यक्तमनभिव्यक्तञ्चोपपन्नं विरोधिरूपाधिकरणत्वेन भेदापत्तेः । इष्टैव तदापत्तिः कथञ्चित्, कथञ्चिदेव तदधिकरणत्वस्यापि भावादिति चेत्; न; तस्य सावयवत्वप्रसक्त्या **"विभुत्वावयवाभावौ प्रतिपाद्यौ च शब्दवत् ।"** [मी० श्लो० वन० ३१] इति व्यापत्तेः । कुतश्च व्यक्तिषु तस्याभिव्यक्तिः ? स्वशक्तित इति चेत्; तदन्तरालेऽपि स्यात् । सति तस्मिन् शक्तेरप्यवश्यम्भावादभेदात् । भेदे कथं सा तस्येति व्यपदेशः ? सम्बन्धादिति चेत्; तथापि कथन्न सा तदन्तराले ? निरवयवेन सम्बन्धे 'व्यक्तिगत एव तत्र सानान्तरालगते' इति विभागानुपपत्तेः । कथञ्चैवम् **"व्यक्ति [:] शक्त्यनुरोधतः"** [मी० श्लो० आकृति० २६] इत्युक्तम् ? स्वशक्तितस्तदभिव्यक्तौ तदनुपपत्तेः । अस्तु व्यक्तिशक्तित एव तदभिव्यक्तिरिति चेत्; किमभिव्यक्तेनापि तेन ? अशक्तत्वेन[3] क्वचिदनुपयोगात् । शक्तमेव तदपि बाहदोहादौ, न चैवं विशेषवैयर्थ्यं विशेषाणामपि तदात्मनामेव तत्र व्यापारान्न केवलानामिति चेत् ; उच्यते—यदि विशेषशक्तिरेव तस्यापि शक्तिः कथन्न तद्भेदे विशेषवत्तस्यापि नानात्वम् ? तद्भेदेऽप्येकत्वस्याविरोधादिति चेत्, विशेषाणामपि तदेव[4] स्यात् । न तथा प्रतिभासनमिति चेत्; समानमेतत्सामान्येऽपि । न हि तस्याप्यविच्छिन्नस्य प्रतिभासनम् अन्तराले विच्छिन्नविग्रहस्यैव तस्य तदुपलब्धेः । अन्यैव तस्य शक्तिरिति चेत्; तन्नानात्वे कार्यनानात्वस्य तत एव भावाद् व्यर्थं व्यक्तिषु तन्नानात्वकल्पनम् । तदेकत्वं वा न कार्यनानात्वं शक्त्यभेदेन तदनुपपत्तेः । व्यक्तिशक्तीनां नानात्वात्तन्नानात्वमिति चेत्; आगतं काचपच्यं सामान्यशक्तित एकत्वम्, नानात्वञ्च व्यक्तिशक्तितः इति । तन्न बाहादौ तस्योपयोगः । स्वप्रतिपत्ताविति चेत् ; न ; तस्यापि व्यक्तित एव भावात् **"व्यक्तिशक्त्यनुरोधतः"** [मी० श्लो०] इत्यभिधानात् । ततस्तत्समवायिन एवाभिव्यक्तिर्न व्यापिनः । व्यापिनस्तु तदभिव्यक्तात्स्वरूपादेवेति चेत् ; कथं पुनस्तत्समवायिरूपं व्यापिसामान्यस्य ? यतस्तदभिव्यक्तिस्तस्य स्यात् । तस्यैव समाप्त्या तत्र समवायादिति चेत्; कथं व्यापित्वं समाप्तौ तदयोगात् ? अन्यत्रापि तस्यैव प्रतीतेरिति चेत् , न , युगपत्तदसम्भवाद् व्यक्तिवत् । क्रमेणेति चेत् ; न ; तदविशेषात् व्यक्तीनामपि विभुत्वात् । ततो न युक्तमेतत्—

"यथा च व्यक्तिरेकैव दृश्यमाना पुनः पुनः ।
कालभेदेऽप्यभिन्नैवं जातिर्भिन्नाश्रया सती ॥" [मी०श्लो०वन० ३२] इति ।

क्रमव्याप्तावेव व्यक्तेरुदाहरणत्वोपपत्तेः । युगपत् युगपदपि तत्र तत्र तस्य प्रतिपत्तिर्दृश्यत[5] इति चेत् , न; दृष्टाया अपि समाप्तिप्रत्ययबाधितत्वेन विभ्रमत्वात् । तस्मादवस्त्वेव मीमांसकस्य सामान्यमशक्तेरविज्ञानाच्च ।

तत एव नैयायिकादेरपि ; तस्यास्त्येव परिज्ञानं गौरयमयमपि गौरिति प्रत्ययादिति चेत् , न , तस्य विशेषगोचरत्वात् । भिन्नेषु कथमभिन्नप्रत्यय इति चेत् , भवतः कथम् ? अभिन्नसामान्य[6]सम्बन्धादिति चेत्; न , तेनापि तत्र भेदस्यानपाकरणात् साङ्कर्य्यापत्तेः । अभिन्नप्रत्ययमेव तत्र स

१– पि तु भ– आ०,ब०, प० । २ साधना– आ०, ब०,प० । ३– त्वे क्व– आ०,ब०, प० । ४ तदेव तत्स्या–आ०, ब०, प० । ५ युगपदपि आ०, ब०, प० । ६– त्वमेव तत्सा– आ०, ब०, प० ।

करोतीति चेत् ; स तर्हि विभ्रम एव अतस्मिंस्तद्ग्रहणत्वात्। ततः कथं सामान्यसिद्धिः ; तन्मात्रे सम्यक्त्वादिति चेत् ; न ; एकत्र सम्यक्त्वविभ्रमयोर्विरोधात्। अविरोधे वा समानाकारे तस्य सम्यक्त्वं तदेकत्वे तु विभ्रम एव बाधाविशेषात्। तन्न सामान्यस्यैकत्वमाकारः। कुतस्तर्हि तत्प्रत्यभिज्ञा ? इत्याह—**'दृष्टि'** इत्यादि। **दृष्ट्या** स्वमतश्रद्धया **मान्द्यं** बुद्धेर्वस्तुविचारं प्रत्यपाटवम् **आदि**शब्दादेकसामान्यसंस्कारादिः स एव **दोषः** तत इति।

स्वमताभिनिवेशादेः सर्वं सर्वत्र विद्यते।
इति बुद्धिर्यथैवेयं पारमर्षैः प्रकल्प्यते ॥१३८७॥
मीमांसकादिभिस्तद्वदेकं सामान्यमित्यपि।
कल्प्यते बुद्धिरीदृक्षा दृष्टिमान्द्यादिदोषतः ॥१३८८॥

कथमेवं समानपरिणामे समर्थिते विशेषपरिणामो यत इदमवतिष्ठेत—**'तत्समानासमानेषु'** इत्यादीति[1] चेत् ; न ; विशेषप्रत्यभिज्ञया तस्यापि समर्थनात् तदाह—**'प्रत्यभिज्ञा द्विधा'** इति। कुतो द्विधा ? **काचित्सादृश्यविनिबन्धना।** काचिदिति वचनादन्या [2]वैसदृश्यनिबन्धना यत इति। सापि **प्रमाणपूर्विका** प्रमाणतः प्रत्यक्षादेः सामान्यविशेषात्मकवस्तुविषयादुत्पत्तेः **नान्या**। या त्वन्या सादृश्याद्येकान्तप्रत्यभिज्ञा न सा तत्पूर्विका प्रत्यक्षादिना तद्विषयस्याप्रतिपत्तेः। ततो न ततस्तत्समर्थनमप्रमाणत्वादिति मन्यते। कुतस्तर्हि सा ? तत्रोत्तरम्—**'दृष्टि'** इत्यादि व्याख्यानं पूर्ववत्। ततो यदुक्तम्—

"सर्वज्ञानानि मिथ्या च प्रसज्यन्तेऽत्र कल्पने।" [मी०श्लो०आकृति०७२] इति।

तद्यदि सामान्यज्ञानवद्विशेषज्ञानानामपि समानाकारपराङ्मुखत्वात् अभिमतमेव तन्मिथ्यात्वं तदभिमुखतयैव सम्यक्त्वोपपत्तेः, तत्र निर्बाधत्वादन्यत्र विपर्ययात्। ततः सिद्धं शब्दानां वस्तुविषयत्वं समानपरिणामे सङ्केतात्, तस्य च वस्तुत्वेनावस्थापनात्। गौरेव कश्चिन्न प्रसिद्धस्तदन्यतो विशेषाग्रहणात् कथं तत्सादृश्येन खण्डादौ गोशब्दस्य सङ्केतः ? तदुक्तम्—

"विशेषग्रहणाभावादेका गौः कश्च कल्प्यताम्।" [मी०श्लो०आकृति०७३] इति।

इति चेत्, न; तस्य वृद्धव्यवहारविषयस्य प्रसिद्धत्वात्। वृद्धानाञ्च तदपरव्यवहारविषयसादृश्यात्तदुपपत्तेः। अतद्व्यवहारद्वीपादागतं तु प्रतिपत्तारं प्रति न प्रसिद्धसादृश्यात्सङ्केतः किन्तु सादृश्यविशेषाधिष्ठानेषु खण्डादिषु 'एते गाव इति प्रतिपत्तव्याः' इति। ततो निरवद्यं तेषां तद्विषयत्वं [3]लिङ्गवत्। लिङ्गादवस्त्वेव प्रतीयत इति चेत्; न; अप्रतिबन्धात्। नहि तस्य तस्मादुत्पत्तिः; अशक्यत्वात्। नापि तादात्म्यम्; स्वयमवस्तुत्वापत्तेः, अनेकान्तस्य चानभ्युपगमात्। ततस्ततोऽपि साध्यस्य वस्तुन एव प्रतिपत्तिः।

कथं तर्हि बहिरर्थादिवत् प्रधानस्यापि सत्त्वं ततो न साध्यते ? अनन्वयादिति चेत्; न; अन्वयस्य[4] भवन्मतेनालिङ्गलक्षणत्वादिति। अत्राह—

---

१ न्यायवि० श्लो० २।४४। २ वैसाद्दृ- प०। ३ "लिङ्गस्य यया साध्याख्यवस्तुविषयत्वम्" सा० टि०। ४- स्य च तन्म-आ०, व०, प०।

अस्ति प्रधानमित्यत्र लक्षणासम्भवत्वतः ॥५१॥ इति ।

अस्ति विद्यते **प्रधानं** सत्त्वरजस्तमसां साम्यावस्थानम् इति एवं[1] न साध्यते 'साध्यन्ते' इत्यनुवृत्तस्य नेत्यनेनाप्यनुवृत्तेनैव (नैक) नपरिणामेन सम्बन्धात् । कुतो न साध्यते ? **अत्र** अस्मिन् साध्ये **लक्षणस्य** 'साध्यं शक्यम्' इत्यादेः[3] **असम्भवत्वतः** सम्भवतो भावः सम्भवत्वं तदभावात् । न ह्यभिप्रेतमप्रसिद्धमित्येव लक्षणमपि तु शक्यञ्च । न च प्रधानं शक्यम् ; तस्यैककारणरूपस्य जगत्कारणानेकत्वग्राहिणा प्रत्यक्षादिना प्रतिक्षेपात् अनुष्णाग्निवत् । अथवा **अत्र** अस्मिन् परप्रतिपादिते भेदानां परिमाणादौ तल्लिङ्गे **लक्षणासम्भवत्वतो** लिङ्गलक्षणस्याभावात् न साध्यत इति । त्रैरूप्यमेव [6]तल्लक्षणं तदभावादेव तर्हि तन्न साध्यत इति चेत् ; न ; तस्यालक्षणत्वेन वक्ष्यमाणत्वात् । ततोऽन्यथाऽनुपपन्नत्वस्यैवाभावात्ततस्तन्न साध्यते । तदभावश्च प्रधानानपेक्षे भोगे तदभावात् । अस्ति हि विषयानुभवात्मनि भोगे परिमाणादिः, न च तस्य प्रधानं कारणम् अचेतनत्वापत्तेः । अचेतन एव वस्तुतो भोगो [8]बुद्धेर्विषयाकारपरिणामस्यैव तत्त्वात्, चेतनत्वं तु तत्र पुरुषसम्बन्धनिबन्धनाद्विभ्रमादेवेति चेत् ; न ; एवं पुरुषस्यैवासिद्धेः । नासिद्धिः, सङ्घातपरार्थत्वाल्लिङ्गात् प्रतिपत्तेरिति चेत् ; कः पुनः पुरुषस्य सङ्घातेनार्थः ? भोग इति चेत् ; न ; तस्य बुद्धावेव भावात् । विभ्रमात्पुरुषेऽपीति चेत् ; न ; विभ्रमस्यैव पुरुषासिद्धावसिद्धेः । तत्सिद्धौ सिद्धिरिति चेत् ; न, चक्रकदोषात् । तत्सिद्धौ तस्य बुद्धिसंसर्गात्तत्र भोगविभ्रमः तेन च सङ्घातस्य तादर्थ्यम्, ततश्च तत्सिद्धिरिति । किञ्च—

विभ्रमोऽचेतनश्चेन्न तेन भोगमतिर्नरे ।
अन्यथा व्यर्थमेव स्यात् क्वचिच्चैतन्यकल्पनम् ॥१३८९॥
तत्रापि चेतनत्वं चेद्विभ्रमादवकल्प्यते ।
अनवस्थानदोषस्त्वां जीवन्तन्नावमुञ्चति ॥१३९०॥
न च विभ्रममालेयमेकभोगानुबन्धिनी ।
प्रतीतिपथमाप्नोति प्रीत्यै या तव कल्प्यते ॥१३९१॥
वस्तुनश्चेतनत्वे तु [10]भोगचिद्विभ्रमात्कथम् ।
विभ्रमस्यापि भोगत्वादन्यथानुभवात्मनः ॥१३९२॥
ततो न परिमाणादेः प्रधानास्तित्वसाधनम् ।
अन्यथानुपपन्नत्ववैकल्याद् व्यभिचारिणः ॥१३९३॥
साधनादिप्रयोगस्य न चैवं व्यभिचारिता ।
यतस्ततो न सिद्धिः स्याद् बहिर्भावादि वस्तुनः ॥१३९४॥

---

१ एतन्न सा—आ०, ब०, प० । २—स्य तेने—आ०, ब०, प० । ३ न्यायवि० इलो०२।१ । ४ तस्यैव का—आ०, ब०, प० । ५ "भेदानां परिमाणात्समन्वयात् शक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूपस्य ॥"—सांख्यका० १५ । ६ लिङ्गलक्षणम् । ७ बुद्धिविपर्ययाका—आ०, ब०, प० । ८ भोगे । ९ सांख्यका० १७ । १० भोगविद्धि—आ०, ब०, प० ।

ननु अन्यथानुपपन्नत्वमपि सत्येव पक्षधर्मत्वादौ भवति ततस्तदेव हेतुलक्षणं तदसत्त्वादेव च प्रधानास्तित्वमप्यसाध्यमिति चेत् ; न, [1]तदभावेऽपि क्वचित्तदुपलम्भात्। तदाह—

तत्रान्यत्रापि वासिद्धं यद्विना यद्विहन्यते ।
तत्र तद्गमकं [तेन साध्यधर्मी च साधनम्] ॥ ५२ ॥ इति ।

अपिशब्दो भिन्नप्रक्रमोऽसिद्धमित्यस्यानन्तरं द्रष्टव्यः । ततोऽयमर्थः—**तत्र** तस्मिन् विवक्षिते धर्मिणि **असिद्धमपि** न केवलं[2]सिद्धम् **अन्यत्र** [3]**वा** अन्यस्मिन् दृष्टान्तधर्म्मिणि इव । **वा**शब्दस्य इवार्थत्वात् । तत्किम् ? **तत्** साधनं **गमकं** [4]ततः पक्षधर्म्मत्वादेरतल्लक्षणत्वमव्यापकत्वादिति मन्यते । क ? **तत्र** साध्ये । कीदृशं तत् तत्रेति तदिति चोच्यते कुतो वा तदगमकम् ? अत्रोत्तरम्—**यद्विना** यदन्तरेण **यद्विहन्यते** यद्विघटते । एतदुक्तं भवति— यत्स्वयं निवर्त्तमानं लिङ्गं निवर्त्तयति तत्तत्रेति, यच्च यन्निवृत्त्या नियमेन निवर्त्तते तत्तदिति, तन्निवृत्त्या निवृत्तिनियमश्च गमकत्वे निबन्धनमिति। ननु तदेव नास्ति यत्र पक्षधर्म्मत्वादिरहिते तन्निवृत्त्या निवृत्तिनियमः ततो गमकत्वञ्चेति चेत्; न, तस्य बहिरर्थादिसाधनस्य साधनदूषणप्रयोगादेः सविस्तरं निरूपितत्वात् । तस्यैवानुस्मरणार्थं मन्दानुग्रहबुद्ध्या पुनरस्य वचनात्। अथवा तत्रेति अत्रावधारणमपीति, एतच्चान्यत्रेत्यत्र द्रष्टव्यम् । अत्राप्ययमर्थः—**तत्रैव** धर्म्मिण्येव **सिद्धं** न दृष्टान्तधर्म्मिणि **यद्विना यद्विहन्यते तत्र तद्गमकम्** । किमिव ? **अन्यत्रापि वा** इति । **अन्यत्र** दृष्टान्ते धर्म्मिणि **अपि**शब्दात् साध्यधर्मिण्यपि **सिद्धमिव वा**शब्दस्य पूर्ववदिवार्थत्वात् । यथा पक्षसपक्षयोः सिद्धं सत्त्वकृतकत्त्वादि गमकमविनाभावनियमात् तथा पक्ष एव सिद्धं श्रावणत्वादिकञ्चेत्यर्थः । युक्तं- कृतकत्वादेर्गमकत्वम् अन्वयबलादविनाभावपरिज्ञानात्, न श्रावणत्वस्य विपर्य्ययात् । नहि तस्य क्वचिदनित्यत्वेनान्येन वा शक्यमन्वयदर्शनं शब्द एव भावात्, तत्र च तयोर्विवादात् । तन्न तद्गमकत्वं संशयं तु कुर्वीत वस्तुसतस्तदुभयपरिहारेणानवस्थानात् । उभयोरन्यतरस्मिन्नप्यप्रतिपत्तेरिति चेत्; न; [5]सत्त्वस्याप्येवमगमकत्वप्रसङ्गात्। नहि तस्यापि क्वचित् क्षणिकत्वेनान्वयः । विद्युत्प्रदीपादावपि क्षणभङ्गं प्रति वावदूकानां विवादात्, अविवादास्पदस्यैव सपक्षत्वोपपत्तेः । पक्ष एव विपक्षे बाधकप्रत्ययबलादविनाभावप्रत्तिपत्तेस्तस्य गमकत्वमिति चेत्, अनुकूलमाचरसि, श्रावणत्वस्याप्येवं गमकत्वापत्तेः[6]। । श्रावणत्वं हि श्रवणज्ञानविषयत्वम्, तच्च तज्ज्ञानकारणस्यैव **"नाकारणं विषयः"** [ ] इति वचनात् । न च नित्यस्य कारणत्वम्; कार्य्यानुपरमप्रसङ्गादिति निरूपितं **"कारणस्य"** इत्यादौ[7] । ततो निश्चितनित्यव्यावृत्तिकं तत् शब्दे धर्म्मिण्युपलभ्यमानमनित्यत्वं गमयत्येव न संशाययति सत्त्ववत् । यदि पुनः श्रवणज्ञानकारणत्वात् श्रावणत्वम् तर्हि[8] 'कारणत्वात्' इत्येव हेतुरस्तु तावता साध्यप्रतिपत्तेः व्यर्थं तज्ज्ञानेन तद्विशेषणमिति चेत्, तावतापि कथं तत्प्रतिपत्तिः अन्वयाभावस्याविशेषात् ? क्षणभङ्गेनानन्वयेऽप्यनित्यत्वमात्रेणास्त्येव विद्युत्प्रदीपादौ

---

१ पक्षधर्मत्वाद्यभावेऽपि । २ सिद्धमेव वासिद्धम् आ०, ब०, प० । ३ तद्वृत्तं तत्रेति आ०, ब०, प० । ४ तदागम— आ०, ब०, प० । ५ सत्त्वस्यावगम— आ०, ब०, प० । ६ —कत्वापत्तेः आ०, ब०, प० । ७ न्यायवि० श्लो० १०६ । ८ तत्तर्हि आ०, ब०, प० ।

तस्यान्वय इति चेत्, न, तत्र विवादाभावात् । मीमांसकस्य तत्रापि विवाद एव शब्दे क्षणिकत्वव-त्तस्यापि तेनानभ्युपगमादिति चेत्; न ;

"तेनेयं व्यवहारात् स्यादकौटस्थ्येऽपि नित्यता ।" [मी० श्लो० शब्दनि० २८९]

इति कौटस्थ्याभावमभ्युपजानतोऽपि तस्याभ्युपगमात् । तन्मात्रादन्यस्य तदभावस्याभावाद्विवादा-
५ पन्नमपि कथं तव तत्साध्यम् अनभिप्रेतत्वात् ? अभिप्रेतमेव हि तदापन्नमपि साध्यं नापरमतिप्रसङ्गात् । न च भवतस्तदभिप्रेतं क्षणक्षयस्यैव तत्त्वात् । तदप्यभिप्रेतमेव साधितात्तत: क्षणभङ्गसाधनादिति चेत् ; न, तत्राप्यन्वयाभावस्याविशेषात् । ततोऽप्यपरानित्यत्वसाधनेन तत्साधनपरिकल्पनायामनवस्थापत्तेः । तन्न कारणत्वस्याप्यन्वयबलाद्गमकत्वम् । व्यतिरेकनिर्णयात्तु तत्त्वं सविशेषणस्यापि न विरुद्धम् । निर्विशेषण-स्यैव तत्त्वे किं विशेषणेन तद्वादिनो व्यर्थवादित्वेन निग्रहावाप्तेरिति चेत् ; अत्यल्पमिदमुच्यते,
१० कृतकत्वादिनापि किमिति वक्तव्यं सत्त्वस्यापि तद्विशेषणरहितस्यैव गमकत्वात् । शिष्यव्युत्पत्तिवैचि-त्र्यार्थं सत्त्वमेव[1] शुद्धम्, अविशुद्धञ्च भिन्नविशेषणं कृतकादि, अभिन्नविशेषणञ्चोत्पत्तिमत्त्वादि गमकमुप-दिश्यत इति चेत् ; अहो महानयमनुग्रहः शिष्येषु भवतो यतो निग्रहनिबन्धनेषु तेषां गमकत्वव्युत्पत्ति-राकल्प्यते । वैयर्थ्येऽपि कृतकत्वादीनां[2] तन्निबन्धत्वे प्रतिज्ञादीनामपि स्यादविशेषात् । को वा विशेष: कृतकत्वादीनां यतस्त एव सत्त्वविशेषाः शिष्यव्युत्पत्तये ऽवकल्पन्ते न कारणत्वविशेषः श्रावणत्वमिति
१५ प्रतिपत्तिः । यदुक्तम्-अन्यत्रापि सिद्धमिव धर्मिण्येव सिद्धमपि गमकमिति, तन्न युक्तम् ; वैषम्यात् । अन्यत्रापि सिद्धस्य तदंशव्याप्तिनिर्णयादितरस्य विपर्ययादिति चेत्; न; तदंशव्याप्तेस्तत्रैव निर्णये वैफल्यात् तत्र साध्यस्य प्रमाणान्तरादेवावगमात् । तन्निर्णयादेवावगमे परस्पराश्रयात्—साध्यसिद्ध्या तन्निर्णय: तस्माच्च तत्सिद्धिरिति । तत्राप्यन्यत्र तन्निर्णये ऽनवस्थापत्तेः । साकल्येन तन्निर्णये तु पक्षेऽप्य-यमवश्यम्भावी तदभावे सामस्त्येन तदनुपपत्तेः । ततोऽन्तर्व्याप्तेरवश्यम्भावादन्यत्र सिद्धस्यापि तथैव
२० च गमकत्वोपपत्तेरुपपन्नं तद्वदितरस्यापि गमकत्वोपवर्णनम् । अन्तरपि व्याप्तिनिर्णये तत एव साध्यस्या-प्यवधारणाद् व्यर्थमनुमानमिति चेत्, इदमपि " द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् " [प्र०वार्तिकाल० १।१] इति ब्रुवाणस्यैव दूषणं न स्याद्वादिनाम् ; तैः साध्यापरिज्ञानेऽपि तत्सम्बन्धस्य लिङ्गस्वरूपत्वेन तन्मात्रग्रहणेऽपि तन्निर्णयोपगमात् । तदुक्तम्—

" लिङ्गात्मग्राहकं मानमूहो मतिनिबन्धनः । " [ ] इति ।

२५ प्रथमदर्शिनोऽपि किन्न तन्निर्णय इति चेत् ? सामर्थ्यभावात् क्षणक्षयादिनिर्णयवदिति ब्रूमः । ततो युक्तम्-अन्यथानुपपत्तिबलाच्छब्दानित्यत्वे श्रावणत्वस्य गमकत्वं तथा रूपाद्यनित्यत्वे चाक्षुप-त्वादेरपि प्रतिपत्तव्यं तदविशेषात् । तद्बलेन गमकत्वमन्यस्यापि दर्शयति–' तेन साध्यधर्मी च साधनम् ' इति । तेन यद्विना यद्विघातेन साध्यश्चासौ अनित्यत्वविशिष्टतया साध्यमानत्वात् धर्मी च शब्दादिः साध्यधर्मी साधनं गमकं शब्दानित्यत्वस्य । न केवलं स एवापि तु साध्यधर्मोऽपीति

---

१ "यत् सत् तत्सर्वमनित्यं यथा घटादिरिति शुद्धस्य स्वभावहेतोः प्रयोगः । स्वभावभूतधर्मभेदेन स्वभावस्य प्रयोगः । यत् कृतकं तदनित्यमित्युपाधिभेदेन । " —न्यायवि० पृ०६५-६६ । २-नामतन्नि-ता० । ३ ततो न व्या- आ०, ब०, प० ।

चशब्दः । कीदृशं तदुभयमपीति चेत् ? उत्तरम्—'तत्र' इत्यादि । **तत्र सिद्धः** साध्यधर्मी तदन्यत्र सिद्धः साध्यधर्म इति सिद्धमित्यस्य लिङ्गपरिणामेन सम्बन्धः । कथं पुनः साध्यधर्मिणस्तदाधारत्वमाधेयत्वञ्च सत्येव भेदे तदुपपत्तेरिति चेत् ? न; सामान्यविशेषरूपतया भेदस्यापि भावात् । **'अपि वा'** इति निपातसमुदायेन पक्षधर्मत्वादावनादरं सूचयति । तत्सूचनञ्च सतोऽपि तस्यासाधनाङ्गत्वात् । तदयमत्र प्रयोगः—अनित्यः शब्दः शब्दत्वादिति । ५

यदि धर्मी साध्यः, कथं साधनम् ? अप्रसिद्धस्य साध्यत्वात् प्रसिद्धस्य च साधनत्वात्, तयोश्चैकत्र विरोधादिति चेत्; न; समुदायान्तःपातिन एव तस्य तद्रूपतया साध्यत्वेनासिद्धत्वात् न केवलस्य, केवलस्य च साधनत्वं सिद्धत्वात्, अन्यथा धर्मित्वमपि न भवेत् प्रसिद्धस्यैव [1]तत्त्वोपपत्तेः । ततः समुदायतदेकदेशरूपेणासिद्धेतरविभागविषयेण ज्ञाप्यज्ञापकभावोपपत्तेर्न धर्मिणः स्वसाधने हेतुभाविनोऽप्यसिद्धत्वमिति दुर्भाषितमेतत्— १०

"ज्ञाप्यज्ञापकयोर्भेदाद्धर्मिणो हेतुभाविनः ।
असिद्धेर्ज्ञापकत्वस्य धर्म्यसिद्धः स्वसाधने ॥" [प्र० वा० ४।१८०] इति ।

यदि धर्मी हेतुः, 'अनित्यः शब्दः' इत्येवास्तु न शब्दत्वादिति वैयर्थ्यात् । न वैयर्थ्यं हेत्वन्तराकाङ्क्षानिवर्त्तनार्थत्वात्, भवति हि 'अनित्यः शब्दः' इत्युक्ते 'कुतः' इति तदाकाङ्क्षा प्रतिपत्तुः अतस्तन्निवृत्त्यर्थं धर्मितया निर्दिष्टस्यापि हेतुत्वेन निर्देशे न पौनरुक्त्यदोषः फलवत्त्वादिति चेत्; १५
न; धर्मितया निर्दिष्टस्यैव साध्यप्रत्यायनसामर्थ्ये तदन्तराकाङ्क्षानुत्पत्तेरनर्थकत्वात्, अन्यथा हेतुभावेन निर्देशेऽपि तदुत्पत्तेः पुनरपि तद्भावेन निर्देशः तन्निवृत्तये कर्तव्यः, पुनरप्येवमिति न क्वचिदवस्थितिः स्यात् । अथ तथा निर्दिष्टस्य न तत्सामर्थ्यम्; हेतुतया निर्दिष्टस्यापि न स्यात्, तन्निर्देशेनाप्यसमर्थस्य सामर्थ्यानापादनात् । तदुक्तम्—

"यदि शब्दस्य सामर्थ्यं हेत्वन्तरमनर्थकम् । २०
अथासामर्थ्यमस्यास्ति पुनरुक्तेन तेन किम् ॥" [प्र० वार्तिकाल० ४।१७९] इति ।

सत्यमस्त्येव धर्मितया निर्दिष्टस्यापि हेतुत्वं तत्तु धर्मपरतया पञ्चम्या च निर्देशाभावे न प्रतीयत इति चेत्; न, धर्मिपरे प्रथमानिर्देशेऽपि तत्प्रतिपत्तेः वृक्षोऽयं शिंशपा यत इति, अनित्योऽयं कृतको यत इति च । ततः पुनर्वचने यद्विवक्षितं तदत्र नास्तीत्यसिद्धो[3] हेतुरिति चेत्, न सम्यगेतत्; एवं हि 'विषाणवानयं पिण्डो नाश्वो विषाणवत्त्वात्' इत्यपि न हेतुर्भवेत् प्रतिज्ञार्थैक- २५
देशत्वेनासिद्धत्वात् । पिण्डस्यैव तदेकदेशत्वं न तद्विशेषणस्य विषाणवत्त्वस्येति चेत्, न, तत्रापि तस्यावश्यम्भावात्, कथमन्यथा तद्विशिष्टस्य पिण्डस्यापि तदेकदेशत्वम् ? वा मा भूत्तस्य तत्त्वम्, तथापि विशेषणतया निर्देशादेव हेतुभावस्यापि प्रतिपत्तेः,विषाणवत्त्वादिति किं पुनर्वचनेन हेत्वन्तराकाङ्क्षायाः प्रकृतवदत्राप्यनवक्लृप्तेः तन्निवर्तकस्यापि पुनर्निर्देशेफलस्याभावात् । ततोऽत्राप्येवं वक्तव्यम्—

---

१ धर्मित्वोपपत्तेः । २ धर्मितया । ३ "प्रतिज्ञार्थैकदेशासिद्धः ।" —ता० टि० । ४—शे फ—आ०, ब०, प० ।

शक्तिर्विषाणिनश्चेत् स्याद्धेत्वन्तरमनर्थकम् ।
शक्तिर्यदि न तस्यास्ति पुनरुक्तेन तेन किम् ॥ १३९५ ॥ इति ।

ततोऽत्रापि पुनर्वचने विवक्षिताभावादसिद्ध एवायं हेतुः । नेह विशेषणस्यैव तत्पिण्डगत-विशेषात्मनः पुनर्वचनम् ; अपि तु तदन्यस्यैव तदतद्गतस्य विषाणवत्त्वसामान्यस्य, तस्यैव च हेतुत्वं ततोऽयमदोष इति चेत्; कथं तर्हीदमलङ्कारवचनमविरुद्धम्–"**यदि नाम पक्षविशेषणं विषाणित्वं पिण्डान्तरव्यवच्छेदाय तथापि तस्य हेतुत्वं न विरुद्ध्यते ।**" [प्र० वार्तिकाल० ४।१८७] इति । अनेन तद्विशेषणस्यैव हेतुत्वप्रतिपादनात् । तन्नायमत्र परिहारः ।

स्यान्मतम्–यस्य विशेषणनिर्देशादेव तत्र हेतुभावप्रतिपत्तिः प्रज्ञातिशयसम्पत्तेस्तं प्रति मा भूत्तस्य पुनर्वचनं वैयर्थ्यात्, यस्य तु नास्ति कोमलप्रज्ञस्य तं प्रति फलवदेव तद्वचनं तत्तस्य तद्भावप्रतिपत्तेः । न च पुनरुक्तत्वम्; अनवगतवचनात्[1], अवगतवचनत्वात्तस्यावकाशादिति, तदेतदुपकारायैवास्माकं शब्दस्याप्येवं निर्दोषतया हेतुत्वेनावस्थितेः । ततो यथा साध्यविशेषणत्वेऽपि तेन साध्यप्रतिबन्धस्याप्रतिपादनाद्धेतुरेव विषाणवत्त्वं न प्रतिज्ञार्थैकदेशासिद्धम्; धर्मितद्विशेषणभावेन प्रतिज्ञार्थादर्थान्तरत्वाद्, तथा शब्दत्वमपि,[3] धर्मित्वेऽपि तेन तत्साध्यप्रतिबन्धस्याप्यप्रतिक्षेपात् समुदायकैकदेशात्मना तदर्थान्तरस्यापि भावात् । भवत्वसिद्धिरेव विषाणवत्त्वस्यापि, तत्कथं तदवष्टम्भेन शब्दत्वे तत्परिहार इति चेत् ? किं पुनरिदं धर्मकीर्तेर्बुभुक्षाव्याकुलितस्य वचनम्[4]–

"**पक्षाङ्गत्वेऽप्यबाधत्वान्नासिद्धिर्भिन्नधर्मिणि ।**
यथाऽश्वो न विषाणित्वादेष पिण्डो विषाणवान् ॥" [प्र०वा०४।१८७] इति ।

यत्पुनरत्र पक्षान्तरम्- न साध्यसमये विशेषणमस्ति साध्यमुपलक्ष्य तस्य प्रागेव निवृत्तेः निवृत्तस्य च तदेकदेशित्वायोगान्नासिद्धत्वमिति । तदुक्तम्—

"**साध्यकालं गतो वा न निवृत्तेरुपलक्ष्यते (तत्) ।**"
[प्र० वा० ४। १८८] इति,

तदपि न; शब्दत्वेऽप्येवं तद्दोषानवकल्पेः । शक्यं हि वक्तुं शब्दत्वमपि साधनमेव न साध्यम् अनित्यैः शब्दत्वादिति अनित्यत्वस्यैव साध्यत्वात् ततो न तदपि तदेकदेशत्वेनासिद्धमिति कदानीमनित्यत्वं साध्यं निराधारस्य धर्मस्यासम्भवादिति चेत्[5] ? अग्निमान् धूमवत्त्वादित्यत्र काग्निमत्वम् ? सामर्थ्याद्धूम एव, तदन्यत्र तत्साधने हेतोरसामर्थ्यादिति चेत्; तत एवानित्यत्वमपि शब्द एवास्तु । कथमिदानीं न तस्य तदेकदेशत्वमिति चेत् ? न; हेतुत्व (का)लात्पूर्वं[6] तदभावात् । पश्चात्तु भवतोऽपि हेतोरदूषणात् । नहि तद्बलोपनीतमेव तद्दूषणाय भवत्यतिप्रसङ्गात्, स्वयं चाभावापत्तेः । तथा हि—

नहि दोषवतो हेतोस्तत्सिद्धिरवकल्पते ।
तत्सिद्धौ वा कथं नाम हेतुर्दोषी[7] भवेदयम् ॥ १३९६ ॥

---

१ –चनस्याव– ता० । २ पुनरुक्तत्वस्य । ३ धर्मित्वेन त– आ०, ब०, प० । ४ –त्यः शब्दः श– आ०, ब०, प० । ५ चेत्तदग्निमान् आ०, ब०, प० । ६ –दोषो भे– आ०, ब०, प० ।

हेतोश्च दोषमन्विच्छन्नन्विच्छत्यपि तद्बलात् ।
साध्यसिद्धिमिति ह्येषा महती बोधदीधितिः ॥ १३९७ ॥

ततो हेतुरिव शब्दत्वं सिद्धत्वादन्यथानुपपत्तेश्च, तथा रूपाद्यनित्यत्वे रूपत्वादिकमप्यविशेषात्। धर्मिण इव किन्न साध्यधर्मस्यापि हेतुत्वमिति चेत् ? न, तस्य समुदायगतस्येव केवलस्याप्यसिद्धत्वात् । तदन्यगतः सिद्ध एवेति चेत्; इष्टमेवैतद् 'अनित्यः शब्दः तदन्यस्य सर्वस्यानित्यत्वात्' इति । चशब्देन तत्समुच्चयस्याभिधानात्। कथमन्यथानुपपन्नत्वं शब्दनित्यत्वेन[1] तदन्यानित्यत्वस्य हि भिन्नाधिकरणत्वेन विरोधाभावात्, [2]विरोधोपायत्वाच्च तत्प्रतिपत्तेरिति चेत् ? न; शब्दस्य नित्यत्वे [3]तद्वत्त्वेनैव तदन्यस्यापि वस्तुनो व्याप्तेरेकाधिकरणतया विरोधोपपत्तेः । न च वस्तुनः कस्यचिन्नित्यत्वम् अन्यस्यानित्यत्वं व्यापकमित्युपपन्नम्; सत्त्वादेरपि व्यभिचारेणागमकत्वप्रसङ्गात् । तस्मादनित्यत्वमेव साकल्येन तस्य व्यापकम्, तच्च क्वचिद्धवदन्यत्रापि तद्विपर्ययं प्रतिक्षिपति तद्व्याप्तं शब्दत्वादिकमपि । इत्युपपन्नमभिहितम्—'तत्र' इत्यादि । यद्यनन्वयमपि श्रावणत्वादिकं गमकं किन्न प्राणादिमत्त्वमपीति चेत् ? क तस्य तत्त्वम् ? आत्मनि नित्यादिरूपे प्राणादेस्तत्कार्यत्वेन तत्राविनाभावादिति चेत्; न, नित्यत्वेन हेतुत्वस्य निषेधात् । अनिषेधेऽपि किन्न शरीरवदन्यत्रापि प्राणादिः, आत्मनस्तत्रापि भावात् ? तद्धेतोर्विशेषस्य शरीर एव भावात् बहिश्च विपर्ययादिति चेत्, न; तस्य[4] तत्स्वभावत्वे बहिरपि प्रसङ्गात् व्यापिनस्तदपरस्वभावानुपपत्तेः, अन्यथा तावानेवात्मा भवेत् आत्मप्रयोजनस्य तत्रैव भावान्न बहिर्भावी तद्भागो विपर्ययात् । अथायं[5] तत्स्वभावो न भवति, आत्ममनःसंयोगादित्वेन[6] ततो भिन्नत्वादिति चेत्; ततोऽपि[7] कुतस्तत्रैव प्राणादिः ? तदवच्छिन्न एवात्मप्रदेशे तस्य[8] भावादिति चेत्, न; आत्मनो निष्प्रदेशत्वात्, कल्पितस्तु प्रदेशो न तत्सहायोऽपि तद्धेतुः, अवस्तुत्वाद्वन्ध्यासुतादिवत् । कथं[9] वा तत्रैव[10] भवताऽदृष्टेन विप्रकृष्टात्[11] पश्चादा (पश्चाद्या) कृष्टिर्यतस्तदनुमानम् ? कथं वा [12]तस्यात्मकार्यस्य तत्रैव भावो न बहिरपि ? तद्धेतोरपि विशेषस्य तत्रैव भावादिति चेत्, तस्य पूर्ववदनर्थान्तरत्वे [13]ततोऽपि कुतस्तन्मनःसंयोगादिस्तत्रैव ? तस्यापि तदवच्छिन्न एव तत्र प्रदेशे भावादिति चेत्, न, 'आत्मनो निष्प्रदेशत्वात्' इत्यादेरावृत्तेरनवस्थापत्तेश्च । नायं दोषः, सहकारिणां हेतुफलभावेन क्रमभाविनामनवस्थितेरेव[14] रूपत्वादिति चेत्; एवमपि सहकारिणामिति कुतो न स्वतन्त्राणामिति ? तत्सहायादात्मन एव प्राणादेर्भावान्न तेभ्य[15] एवेति चेत्, कथं पुनस्तेषामेव[16] निवृत्त्या घटादेर्निवर्त्तमानः तेभ्य एव स[17]न भवेत् ? आत्मापि ततो निवृत्त एवेति चेत्, न, विभुत्वात् । सहकारिसहितो निवृत्तश्चेत्; न, तत्साहित्यस्य

---

१ विपक्षभूतेन सह । २ विपक्षविरोधकारणकत्वात् । ३ नित्यत्वेनैव । तद्वत्तेनैव आ०, ब०, प० । ४ प्राणादिसद्भावकारणस्य विशेषस्य । ५ प्राणादिहेतोर्विशेषस्य आत्मस्वभावत्वे । ६ प्राणादिहेतुर्विशेषः बहिर्भावविभागस्वभावः । ७ आत्ममनःसंयोगादेः । ८ आत्ममनःसंयोगादेः । ९ कथं त— ता० । १० शरीरदेशे एव । ११ दूरदेशात् । विप्रकृष्टत्वात् आ०,ब०,प० । १२ आत्ममनःसंयोगादेः । १३ -त्वेपि ततः कु— आ०,ब०, प० । १४ सन्तानापेक्षया अनन्तत्वस्यैव । १५ सहकारिभ्य एव स्वतन्त्रेभ्यः । १६ आत्ममनःसंयोगादीनामेव । १७ प्राणादिः ।

तत्स्वभावत्वे तदनुपपत्तेः । अतत्स्वभावत्वे तु सहकारिण एव तदिति सिद्धा तन्निवृत्तित एव ततस्तद्व्यावृत्तिः । अतो नात्मनि प्राणादिमत्त्वस्य गमकत्वमन्यथानुपपत्तिवैकल्यात् ।

अस्तु तर्हि [1]बुद्ध्यात्मन्येव तस्य गमकत्वमविनाभावादिति चेत्, कुतोऽविनाभावः ? तस्य स्वशरीरे तत्पूर्वकत्वेन प्रतिपत्तेरिति चेत्; कीदृशस्तदात्मा ? निश्चयविकल इति चेत्; कथं तद्-
५ स्तित्वव्यवहारः ? निर्विकल्पादेव स्ववेदनादिति चेत्; न; क्षणभङ्गादावपि तत एव तद्भावेनानुमानवैफल्यात्[3] । व्यवहारसमर्थे च तद्वेदने[4] विपरीतारोपणस्यानुपपत्तेः । तत्र तस्यान्वयमुखेनाविनाभावः ।

नापि व्यतिरेकबलेन अनिश्चितास्तित्वस्य कुतश्चिन्निवृत्तेरपरिज्ञानात् । भवतु नीलमिदं पीतमिदमित्युपजायमानो निश्चय एव स इति चेत्; स एव कुतः ? निर्हेतुकत्वे नित्यसत्त्वादिप्रसङ्गात् । पूर्वस्मान्निश्चयादेवेति चेत्; कुत इदमवगन्तव्यम् ? तयोरेवान्यतरस्मादिति चेत्; न; तेन परस्परस्या-
१० विषयिकरणात् । नाप्यन्यतः, तेनापि तदन्यतरकालेनेतरस्य तत्कालासम्भविनोऽपरिज्ञानात्, उभयकालव्यापिनश्च क्षणभङ्गभङ्गभयेनानभ्युपगमात् । 'तदुभयपृष्ठभाविनो विकल्पात्' इत्यपि नोत्तरम्, तुल्यचोद्यत्वात् 'कुतस्तस्य तत्पृष्ठभावित्वमवगम्यते' इति ? विकल्पान्तरकल्पनायामनवस्थानदौःस्थ्यभयापत्तेश्च । न चोभयापरिज्ञाने तद्धेतुफलभावप्रतिपत्तिः; **"द्विष्ठसम्बन्ध"** [प्र० वार्तिकाल० १।१] इत्यादेर्विरोधात् । तन्न नैरात्म्यवादिनां निश्चयोऽपि तदात्मा यतः प्राणादयो भवेयुः ।

१५ सत्यपि तस्मिन् कुतः सुषुप्तादौ तदुत्पत्तिः ? तदापि निश्चये तद्दशाविलोपात् । जाग्रतो निश्चयादिति चेत्, भवतु नामानन्तरः, परस्तु क्रमभावी कुतः ? प्राणादेरेव पूर्वपूर्वस्मादिति चेत्; कथमिदानीं ततः परश्चैतन्यवित्तिर्व्यभिचारात् ? न व्यभिचारः-चैतन्यप्रभवात् प्राणादेस्तत्प्रभवस्य[8] वैलक्षण्यात् अग्निप्रभवादिव धूमात् तत्प्रभवस्य[9] धूमस्येति चेत्, न; तदनवधारणात् । कथमन्यथा सव्याजेयं सुषुप्तिरव्याजा वेति संशयः ? न हि द्रुतबहलादिविशेषविकलतयोपलभ्यमानाद्धूमाद्धूमध्वजं सशयानाः परिदृश्यन्ते प्रतिपत्तारः । किञ्च, तदा[10]निश्चयवैकल्ये कुतः [11]प्रबोधः ? सोऽपि जाग्रत एव निश्चयादिति चेत्; कथं
२० क्रमभाविप्राणादिः प्रबोधश्चाक्रमादेव तन्निश्चयात् ? **"नाक्रमात् क्रमिणो भावः"** [प्र० वा०१।४५] इत्यस्य व्याप्तेः । कुतो वा मृतशरीरेऽपि तत एव न प्रबोधः ? सहकारिणोऽदृष्टस्याभावादिति चेत्; एतदपि कुतः ? [12]तत्र प्रबोधस्यानाविर्भावादिति चेत्, न; विषमूर्च्छितादौ पक्षमेकमनाविर्भवेऽपि तस्य पुनस्तत्रैव प्रयत्नबलादाविर्भावप्रतिपत्तेः अत्रापि तदाशङ्काऽनिवर्त्तनात्[13] न निश्चितस्तदनाविर्भाव
२५ इति कथमदृष्टाभावः ? कथञ्च दाहादिसाहसमाचरितव्यं पातकित्वप्रसङ्गात् । ततो न मृतशरीरवत् सुषुप्तादावपि जाग्रज्ज्ञानात्तदुत्पत्तिरिति सन्निहित एव कश्चिद्धेतुर्वक्तव्यः । स चात्मैव उपयोगपरिणामी

---

१ "सौगताङ्गीकृते चित्तसन्ततिरूपे ।"– ता० टि० । २ निर्विकल्पकादेव । ३ "दृष्टेऽपि क्षणभङ्गादौ विपरीतसमारोपसम्भवात्तद्व्यवच्छेदार्थस्यानुमानस्य साफल्यम् । तदुक्तम्–तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः । भ्रान्तेर्निश्चीयते नेति साधनं सम्प्रवर्तते ॥ इति । इत्याशङ्कायामाह ।" –ता० टि० । ४ निर्विकल्पवेदने । ५ "...संवित्तिः नैकरूपप्रवेदनात् ।" –प्र० वार्तिकाल० । ६ प्राणादिः । ७ प्राणादेः । ८ प्राणादिप्रभवस्य । ९ धूमप्रभवस्य । १० सुषुप्तादौ । ११ प्रबन्धः आ०, ब०, प० । १२ तत्र बो– आ०, ब० प० । १३ –शंकाविनि वर्तनात् आ०, ब०, प० ।

नापर इति, तत्रैव तस्य गमकत्वमन्यथानुपपत्तिसम्भवात् । तस्यापि निर्णयात्मन[1] एव सन्निधाने कथं सुषुप्तिरिति चेत् ? न; तदा तस्यादृष्टवशान्निर्णयविकलस्यैव भावात्, प्रबुद्धस्यैव निर्णयरूपतया प्रतिपत्तेः। कथमेकस्य निर्णयश्चेतरश्च स्वरूपमिति चेत् ? तथैवाधिगमाद्विकल्पज्ञानवत् । एतदेवाह —

अप्रत्यक्षः सुषुप्तादौ बुद्धः प्रत्यक्षलक्षणः ।
जीवतीति यतः सोऽयं जीव आत्मोपयोगवान् ॥ ५३ ॥ इति ।

न विद्यते प्रत्यक्षं निर्णयरूपं यस्य सः **अप्रत्यक्षो जीवः**' इति सम्बन्धः । क ? **सुषुप्तः** स्वप्नदर्शी निद्रावान् **आदिर्यस्य** मूर्च्छितादेस्तस्मिन्निति । सदा तर्हि सोऽप्रत्यक्ष एव कपिलादेरप्यात्मा परोक्ष एवेति केषाञ्चिदभ्युपगमादिति चेत्, न, **बुद्धो** निद्राप्रबन्धाद् व्युत्थितः । **प्रत्यक्षलक्षणः** प्रत्यक्षं निर्णयात्मकं स्वसंवेदनम्, **"व्यवसायात्मकं ज्ञानं प्रत्यक्षम्"** [ ] इति वचनात्, तल्लक्षणं स्वरूपं यस्य तेन वा लक्ष्यत इति तल्लक्षण इति । अनेन तत्परोक्षत्ववादस्य प्रत्यक्षबाधनमुपदर्शितम् । भवतु **बुद्धो जीवः** प्रत्यक्षतोऽवगमात्, सुषुप्तादिस्तु कथमिति चेत् ? उत्तरम्—**जीवतीति यतः** इति । यतो लोकस्य सुषुप्तादिरपि जीवतीति प्रत्ययः ततः सोऽप्यस्त्येव अन्यथा तत्प्रत्ययायोगात् । कुतोऽयं प्रत्ययः ? मृते मृतप्रत्ययोपि कुतो यतो दाहादिस्तत्र कल्प्येत ? स्पर्शादिविशेषाल्लिङ्गादिति चेत्, न; [2]जीवनप्रत्ययस्यापि तत एव भावात् । [3]जीवनप्रतिबन्धस्यापि तद्विशेषस्य निरुच्छ्वासमूर्च्छितेऽपि लोकैरध्यवसायात् । सोऽपि जाग्रत एव जीवनान्न तादात्विकादिति चेत्; तदहर्जातस्य व्याहारादिरपि प्राच्यभवजीवनादेवेति कथं ततस्तच्चैतन्यप्रतिपत्तिर्यतोऽयं परिपोषणादिनाऽनुगृह्येत । ततो यथा तदानीन्तनादेव जीवनात्तद्व्याहारादिः, अन्यथा सन्तानान्तरव्यवहारविरहापत्तेः, तथा सुषुप्तादेः स्पर्शादिविशेषोऽपीत्यलमाग्रहवैशसेन । कथं पुनरेवमपि सुषुप्तादिना प्रबुद्धस्यैकत्वं यतः **'अप्रत्यक्षः'** इत्याद्युच्यत इति चेत् ? अत्रोत्तरम्—**'सोऽयम्'** इति । अत्रापि **इति यत** इति सम्बन्धनीयम् । तदयमर्थः- सः सुषुप्तादिः अयं प्रतीयमान इति एवं प्रत्यभिज्ञानं यतस्ततः स एव **अप्रत्यक्षः** पूर्वं पुनः प्रबुद्धश्च प्रत्यक्ष इति । ननु स इत्यतीतस्य निर्देशः, तस्य च कुतः प्रतिपत्तिः ? स्मरणादिति चेत्; तस्याप्यनुभूतवस्तुगोचरत्वेन तद्विषयत्वम् अतीतेऽनुभवाभावात् । नहि वस्तु किञ्चिदतीतत्वेनानुभवे परिस्फुरति । अतद्गोचरत्वे तु न स्मरणम्, अनुभवपृष्ठभाविन एव प्रत्ययस्य [4]तत्त्वोपगमात् । तदुक्तम्—

"अनुभूतार्थविषया स्मृतिश्चेत् नष्टता कथम् ?
नानुभूतार्थविषया यदि सा स्मृतिता कथम् ॥" [प्र० वार्तिकाल० ४।१९७] इति ।

अनुभूतमेवानुभवादपक्रान्तमतीतमिति चेत्, न; युगपत् विरोधेन तदसम्भवात् । पर्यायेण तत्सम्भवे तु तदपक्रान्तादन्यदेवानुभूतमिति कथं तदेवातीतमिति व्यपदेशः ? ततः केवलं वासनाबलादेव स्मरणमिति ततोऽवसीयमानमवस्त्वेवातीतं प्रधानादिवत् । तदप्युक्तम्—

---

१ —नः सन्निपातेपि क— आ०, ब०, प० । २ जीवप्रत्य— आ०, ब०, प० । ३ "जीवनेन सह प्रतिबन्धः सम्बन्धो यस्य स जीवनप्रतिबन्धस्तस्य ।" —ता० टि० । जीवनप्रबन्धस्यापि आ०, ब०, प० । ४ मरणत्वोपगमात् । ५ —दप्रतिक्रान्तमिति आ०, ब०, प० ।

"यदातीतं न तद्ग्राह्यं यदा ग्राह्यं न तत्तथा ।
स्मर्यमाणेन रूपेण तदतीतं न वस्तु[1] तत् ॥" [प्र० वार्तिकाल० ४।१९७] इति ।

तत्कथमवस्तुनैकत्वं वस्तुनः प्रत्यक्षविषयस्येति चेत् ? न; सच्चेतनादिरूपेणानुभवविषयस्यैव तेन[2] ग्रहणात्; तस्य च वस्तुत्वात् । कथमिदानीमतद्विषयस्यातीतत्वस्य तेन ग्रहणमिति चेत् ? भवतु तावता तस्यास्मरणत्वम् अपूर्वार्थत्वात् । तदेव कथं स्मरणमस्मरणञ्चेति चेत् ? "तदेव स्वरूपे प्रमाणमितरत्राप्रमाणमितिवत्" [ ] इति ब्रूमः । ततः प्रमाणमेव स्मरणं कथञ्चिदपूर्वार्थत्वादविसंवादाच्च । अस्ति[3] हि तत्राविसंवादः, ततोऽपि प्रवृत्तस्य विषयप्राप्तेः । कथमतीतस्य प्राप्तिः ? कथं वर्तमानस्य[4] ? प्राप्तिकाले तस्याप्यभावात् । प्राप्त इत्यभिप्रायादिति चेत्; न; इतरत्रापि तुल्यत्वात् । सांवृतमेवैवं स्मरणस्य प्रामाण्यमिति चेत्; प्रत्यक्षस्यापि स्यात् । तदपि तादृशमेव वस्तुत इति चेत्; नेदानीमतीतस्यैवावस्तुत्वं वर्तमानस्यापि तत्त्वात् । तत्कुतस्तत्रैव तन्निर्बन्धः । ततस्सदेवातीतमपि वर्तमानवदिति कथं न तदेकत्वं प्रत्यक्षविषयस्य ? तस्मादनालोचितवचनमेवेदम्— "स्मर्यमाणेन रूपेण तदतीतं न वस्तु तत्" [प्र० वार्तिकाल०] इति । असत्यपि वस्तुत्वे कथन्न तदेकत्वं तद्वत्तद्गतस्य तस्याप्यवस्तुत्वात् धर्मिरूपानुसारित्वाद्धर्मस्य । नैकान्तेनावस्तुत्वं वस्तुभूतवर्त्तमानपर्य्यायगतत्वेन वस्तुत्वस्यापि भावादिति चेत्; न तर्हि तदेकमेकत्वं भवेत्, अपि त्वतीतगतमन्यद्वस्तुरूपम् अन्यच्च वर्तमानगतं वस्तुभूतमिति भिन्नस्यैवोपपत्तेः । तन्नातीतेतरयोरेकत्वं तस्यैवैकस्यासम्भवात् । तदुक्तम्—

"यदि धर्मवशेन स्यात्तस्यासत्यतया स्थितिः ।
एकमेव तदातीतं वर्तमानतया मृषा ॥" [प्र० वार्तिकाल० ४।१९७] इति ।

" इति चेत्; उच्यते—

अवस्तुत्वादतीतस्य तदैक्यं चेन्न वस्तुनः ।
तद्धेतुत्वं कथं तस्य वर्त्तमानस्य कल्प्यताम् ॥ १३९८ ॥
अवस्तुनोऽपि हेतुत्वे हेतुत्वं वस्तुलक्षणम् ।
अर्थक्रियासमर्थं यत्तत्सदित्युच्यते[5] कथम् ॥ १३९९ ॥
अतीतं चेन्न तद्धेतुस्तदहर्जातचेतनात् ।
अतद्रूपादतत्कार्यात्प्राग्भवानुमितिः कथम् ॥ १४०० ॥
कुतो वा वस्तुनो जन्म भव्याच्चेद्वस्तु तत्कुतः ।
प्रत्यक्षगोचरत्वस्याभावात्तत्राप्यतीतवत् ॥ १४०१ ॥
पश्चात्तद्गोचरत्वाच्चेद्वस्तु तत्प्रतिवाञ्छितम् ।
तन्न तत्रापि यद्वक्तुमेवं शक्यं मनीषिणाम् ॥ १४०२ ॥

---

१ वस्तुतः आ०, ब०, प० । २ स्मरणेन । ३ अस्त्विह आ०, ब०, प० । ४ "प्रत्यक्षविषयस्य" —ता० टि० । ५ धर्मिव— ता० । "यदि धर्मवशेनास्याः सत्यासत्यतया स्थितिः । वर्तमानतया सत्याऽवर्तमानतया मृषा ॥" ६— प्र० वा २।३ । प्र० वार्तिकाल० ।

यदा भव्यं न तद्ग्राह्यं यदा ग्राह्यं न तत्तथा ।
अनुमागम्यरूपेण भव्यं तन्न च वस्तु तत् ॥ १४०३ ॥ इति ।
समकालात्तु तज्जन्म न त्वयैवोपगम्यते[1] ।
तस्मादहेतुकं वस्तु ततश्च ध्रुवमापतेत् ॥ १४०४ ॥
नित्यत्वमेवं तद्ध्वंसप्रयत्नादप्यवस्थितम् । ५
प्रज्ञाकरपदं व्यर्थं त्वयि शाक्य प्रकल्पयेत् ॥ १४०५ ॥

न वस्तुतः किञ्चित् कस्यचित् कार्य्यं कारणं नित्यमनित्यमन्यद्वा, सकलविकल्पापक्रान्तस्याद्वैतस्यैव भावात् । तदभ्युपगमस्तु संवृत्यैवेति चेत्; नन्वियं लोकबुद्धिरेव,

"केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते ।" [प्र० वा०२।२१९] इति वचनात्, तथा च कथमतीतादेरवस्तुत्वम् वस्तुतयैव तत्र लोकबुद्धेर्भावात् । भवत्वेवं तथापि कथं प्रत्यभि- १० ज्ञानात्तदेकत्वम् ? कथं च न स्यात् ? असत्यपि तस्मिंस्तस्य भावात् लूनपुनरुत्पन्ननखकेशादाविति चेत्, अक्षज्ञानादपि कथं क्वचित्पीतादिः[2] ? तदभावेऽपि शुक्लशङ्खादौ तस्य भावात् । निर्बाधादेव ततस्तद्भावो न सर्वस्मात्, बाधितञ्च प्रकृतं पुनर्भाविना शुक्लप्रतिभासेनेति चेत्; न; प्रत्यभिज्ञानेऽपि समानत्वात् । लूनपुनरुत्पन्नकेशादौ किं तस्य बाधकम् ? मध्ये लूनतादर्शनमिति चेत्, ननु लूनता नाम विच्छेदः[3], स च पूर्वस्योत्तरेणासङ्घटनम् । तच्च लूनवदन्यत्रापि समानं तत्कथं क्वचिदपि १५ तस्य निर्बाधित्वम् ? तदुक्तम्—

"लूनता नाम विच्छेदः परासङ्घटनं स च ।
ततः पूर्वपरित्यागाद्वित्तिः सङ्घटिते कुतः ॥
असङ्घटितदृष्टिश्च समा दार्ष्टान्तिकेतरे ।" [प्र० वार्तिकाल० ४।१९७]

इति चेत्; न; असङ्घटितत्वस्य दार्ष्टान्तिके कथञ्चिदेवावगमान्न सर्वथा । न च तेन कथ- २० ञ्चिदेकत्वप्रत्यभिज्ञानस्य बाधनम्; अविरोधात् । अथ कथञ्चिदिति न क्षम्यते तस्यान्धपदत्वात्[4], न तर्हि प्रत्यभिज्ञानमपि तदाकारयोरपि स इत्ययमिति चासङ्घटितयोरेवावभासनादेकत्वस्यानुपपत्तेः; तद्रूपत्वाच्च प्रत्यभिज्ञानस्य । न हि स इति प्रत्यभिज्ञानं स्मरणत्वात् । नाप्ययमिति प्रत्यक्षत्वात् । तदपि मा भूदिति चेत्; कथं तर्हीदमुक्तम्—**"एकार्थक्रियाकारितयैकत्वं प्रत्यभिज्ञानविषयो न तत्त्वतः ।"** [प्र० वार्तिकाल० ४।१९७] इति ? सत्येव तस्मिंस्तद्विषयचिन्तनस्योपपत्तेः । तदपि कल्पनादेव २५ न तत्त्वत इति चेत् ; ननु तदपि प्रत्यभिज्ञानमेव योऽयं स इति स एवायमित्ययमाकार[5] इत्युपजननात्, तच्च कथञ्चिद्वादविद्वेषे नास्ति । तत्कथम[6] सतैवासतः परिकल्पनम् ? तदपि परिकल्पनादेवेति चेत् ; न; अनवस्थाप्रसङ्गात् । ततो दूरं गत्वापि तत्त्वत एव सङ्घटिताकारं तदङ्गीकर्तव्यम् ।

---

१ –पपद्यते आ०, व०,प० । २ पीतादेस्त– आ०,व०,प० । ३ –दतः स आ०, व०, प० । ४ "कथञ्चिदित्यन्धपदमेतत्"– हेतुवि० टी० पृ० ८४ । ५ –रमित्यु– आ०, व०, प० । ६ –सत्येवास– आ०, व०, प० ।

तथा च तद्वदेवातीतादेरपि सङ्घटनोपपत्तेरुपपन्नम्—'प्रत्यभिज्ञानात्कथञ्चिदसङ्घटनेऽपि तदेकत्वपरिज्ञानम् ।' ततः कथञ्चित्पदस्यान्धत्वाभिधानमन्धतमसानुवन्धादेव न परीक्षावलादिति निश्चिन्वन्ति विपश्चितः । ततः सूक्तम्—'**स एवायम्** ।' इति । यतस्ततः सुषुप्तादिरेव प्रबुद्ध इति ।

भवतु तादृशो जीवो न त्वात्मा तस्य नित्यशुद्धत्वेन सुषुप्तादिभावानुपपत्तेरिति चेत्; उत्तरम्—'**आत्मा**' इति । अत्र **सोऽयमिति** योजयितव्यम् । तदयमर्थः—**स** प्रकृतो **जीवोऽयं** प्रत्यवमर्शेन व्यवस्थाप्यमान **आत्मा** नापरः । कुत एतत् ? **उपयोगवान्** यतः उपयोगो ज्ञानदर्शनरूपो व्यापारो विद्यते अस्येत्युपयोगवान् । नित्ययोगे तादात्म्यलक्षणे मतुः । एतदुक्तं भवति—आत्मनोऽप्युपयोगवत्त्वमेव लक्षणम् "**सत्यं ज्ञानमनन्तं ब्रह्म**" [तैत्ति० २।१।१] इति वचनात् । तस्य च जीव एव दर्शनात् स एवात्मेति तत्र दर्शनमपि परमात्माविवेकादेव न स्वतस्तत्त्वात्, "**तमेव भान्तमनु भाति सर्वम्** [कठो० ५।१५] इत्याम्नायादिति चेत्; न, तत्र दृष्टस्यान्यत्र कल्पनायामनवस्थापत्तेः, तदन्यत्रापि तदनिरावरणात् । आम्नायबाधनान्नेति चेत्, प्रत्यक्षबाधनादाम्नायोक्तेऽपि न भवेत् । ततो जीव एवात्मा "**अनेन जीवेनात्मना**" [छान्दो० ६।३।२] इति जीवाभेदेन तस्याम्नायाच्च । आत्माभेदेन जीवस्यैवायमाम्नायो न तदभेदेनात्मन इति चेत्, तस्यैवाम्नाये को दोषः ? जीवादन्यो नात्मा स्यात्, अस्ति चासौ मुक्तरूपः, न च तस्य जीवत्वं प्राणधारणस्याभावात्, सत्येव तस्मिन् जीवत्वोपपत्तेरिति चेत्; न, तस्यापि भूतपूर्वगत्या[3] तत्त्वात्, जीवितपूर्वो जीव इति व्युत्पत्तेः, विग्रहगतावपि[4] जीविष्यतीति जीव इति व्युत्पादनात् । कथं पुनरुपयोगवत्त्वे तस्य सुषुप्त्यादिः सत्यज्ञानस्वभावस्य तदसम्भवादिति चेत् ? न; कर्मवशात्तस्यापि तदुपपत्तेः । तत्राह—

कर्मणामपि कर्ताऽयं तत्फलस्यापि वेदकः । इति ।

कर्मणां ज्ञानावरणादीनामयं जीवः कर्ता न केवलमुपयोगवानेवेत्यपिशब्दः । ततश्च तेषां यत्फलं तत्परिपाकोपनीतं सुषुप्त्यादिलक्षणं तस्य **वेदक**स्तद्रूपतयापि वृत्तेरनुभविता । न केवलं कदाचिदवेदक इत्यपिशब्दः । परमपि तत्फलं दर्शयति—

संसरेत् [परिणामात्ततश्च्यवते वा ततः पुनः] ॥ ५४ ॥ इति ।

तत्कर्तृत्वादेव परापरशरीरादिपरित्यागोपादानक्रमेण देवतिर्यगादिगतिषु परिभ्रमेदयं जीव इति । तत्कर्तृत्वे निबन्धनमाह—'**परिणामात्तः**' इति । **परिणामो** मिथ्यादर्शनादिर्विकारः तेनात्तः परिगृहीतः, ततस्तेषां कर्ता स एव उपयोगवतः कुत इति चेत् ? कर्मभ्य एव । न चैवं परस्पराश्रयः 'कर्मभ्यस्तद्दर्शनादिस्ततोऽपि कर्माणि' इति, अनादित्वात्तत्प्रबन्धस्य । तस्य च सयुक्तिकत्वेन तृतीये निरूपणात् । न तर्हि कर्मभ्यस्तत्करणस्वभावस्य मुक्तिः तत्स्वभावपरिहाण्या जीवस्यैव परिहाणिप्रसङ्गादिति चेत्; आह—'**मुच्यते वा ततः पुनः**' इति । **मुच्यते** अपवृज्यते **ततः** कर्मभ्यो जीवः स च न सर्वः किन्तु भव्य एवेति दर्शनार्थं **वेति** विकल्पवचनम् । मुच्यमानोऽपि न सर्वदा

---

१ –धनादिति आ०, ब०, प० । २ मुक्तस्यापि । ३ जीवत्वात् । ४ नूतनशरीरधारणार्थं गतिः विग्रहगतिः । ५ सुषुप्तादि– ता०, ब० ।

किन्तु पुनः तदुपायानुष्ठानस्य पश्चात्, पूर्वं तु संसार एव, तदभावे मुक्तेरनुपपत्तेः तदपेक्षत्वात् ।

मुक्तिः संसारतस्तस्मिन्न चासत्यवकल्पते ।
पाशबन्धाद्विनिर्मुक्तेस्तस्मिन् सत्येव दर्शनात् ॥ १४०६ ॥
अविद्याकल्पितास्त्येव संसृतिः प्रागपीति चेत् ।
तदा तस्माद्विनिर्मुक्तिर्जीवस्य कथमुच्यताम् ॥ १४०७ ॥ ५
न हि संसारनिर्मुक्तो तमोदीपप्रभे इव ।
निष्पर्य्यायं क्वचिज्जीवे युज्येते गृहगर्भवत् ॥ १४०८ ॥
सत्त्वेऽपि प्रागवस्तुत्वात्संसृतेर्मुक्तिरेव चेत् ।
अवस्तुनः कुतो वित्तिर्यदि वस्तुदृशिः पुमान् ॥ १४०९ ॥
कल्पनापि कथं तस्य न चेद्वित्तिः कुतश्चन । १०
वित्तिरेव यतो भ्रान्ता कल्पनेति प्रकल्प्यते ॥ १४१० ॥
न च भ्रमोऽस्ति जीवस्य यतः स्यात्तत्र कल्पनम् ।
भ्रमे वा तत्र निर्मुक्तिरनादिः कल्प्यतां कथम् ॥ १४११ ॥
भ्रमोऽपि विभ्रमादेव प्राच्यात्प्राच्योऽपि तादृशात् ।
अनादिस्तत्प्रबन्धोऽयमिति चासन्मतं मतम् ॥ १४१२ ॥ १५
चेतनादन्यतस्तस्य व्यवस्थाकारिणोऽत्ययात् ।
चेतनस्य च शुद्धस्य तद्वित्तावप्रवर्तनात् ॥ १४१३ ॥
तस्मात्संसारमिच्छद्भिरशुद्धिस्तस्य तात्त्विकी ।
वक्तव्या प्रागनादिस्तन्निर्वाणं नोपपद्यते ॥ १४१४ ॥

वस्तुसत्त्वे संसारस्य न निवर्तनं जीवस्वरूपवदिति चेत्; अवस्तुसत्त्वेऽपि न भवेत् २०
तस्यैवोक्तन्यायेनासम्भवात् । ततो निवर्तनं न क्वचिदिति प्राप्तम् । ततो वस्तुसत एव निवर्तनम् । अनर्थान्तरस्य कथमिति चेत्; न; तस्यापि तद्धेतुनिवर्तनेन निवृत्तिदर्शनात् कलधौतद्रवत्वादिवत् । ततः सूत्रितम्–**'पुनर्मुच्यते'** इति । पुनरपि कुतो मुच्यते ? अत्राप्युत्तरम्– **'परिणामात्तः'** इति । सम्यग्दर्शनादिपरिणामपरिगृहीतो यत इति । सति तत्परिपाके तद्विरोधिमिथ्यादर्शनादिनिवृत्तेस्तन्निबन्धनपरिक्षयादपवृज्यते इति यावत् । २५

नन्वात्मा कर्म तत्फलं संसारो मुक्तिरिति च सत्येव भेदे, न चायमस्ति तदवस्थापनोपायाभावात् । ततोऽद्वैतबोध एव परमार्थः, तस्य स्वत एवाधिगमात् **"स्वरूपस्य स्वतो गतिः"** [प्र० वा० १।६] इति वचनादिति चेत्, अत्राह—

आत्मादिव्यतिरेकेण कोऽपरोऽध्यक्षतां व्रजेत् । इति ।

अपर इत्यद्वैतबोध उच्यते तस्याविद्यमानत्वपरत्वात् । स कः किंरूपोऽध्यक्षतां स्वसं- ३०

वेदनविषयतां **व्रजेत्** प्राप्नुयात् ? न कश्चित् । सकलविकल्पातीतस्य [1]तद्व्रजनात् केन तदाक्षेप इति ? अत्रोत्तरम्—**आत्मादि** । आदिशब्देन कर्मादि, तस्मादिव **व्यतिरेको** व्यावृत्तिरध्यक्षतायास्तेनेति । इवार्थगर्भोऽत्र पञ्चमीतत्पुरुषः । तदयमर्थः[2]—

भेदरूपाद्यथात्मादेरध्यक्षं विनिवर्त्तते ।
तथोक्तरूपाद्द्वैतात्तदसम्प्रतिपत्तितः ॥ १४१५ ॥
सर्वनैरात्म्यमायातं तस्मादद्वैतवादिनाम् ।
तच्च प्रमाणशून्यत्वात्प्रागेव प्रतिवारितम् ॥ १४१६ ॥

भवतु नीलधवलादिभिराकारैश्चित्रस्यैव तस्य तद्व्रजनमिति चेत्, सिद्धस्तर्हि जीवो युगपदिव क्रमेणापि बोधात्मनश्चित्रस्यानिषेधात्, तस्यैव परमार्थतो जीवत्वात् । तदाह—

नानायं क्रमशो वृत्तेः [न चेदत्राभिधास्यते] ॥ ५५ ॥ इति ।

अयं प्रतीयमानो बोधात्मा **नाना** कथञ्चिदवग्रहादिपर्यायैः शबलः । कुतः ? **वृत्तेः** प्रवृत्तेः । कीदृशैः ? **क्रमशः** क्रमसाकल्येन भवद्भिरिति । नास्त्येव तादृशो बोधः प्रत्यक्षतस्तस्याग्रहणात्, तत्र सन्निहितस्यैव सच्चेतनादेरवभासनात् न कालव्यापिनः तस्य मरणावधेर्ग्रहणप्रसङ्गात् । तदुक्तम्—

"यदि कालकलाव्यापि वस्तुग्रहणमक्षतः ।
सर्वकालकलालम्बे ग्रहः स्यान्मरणावधेः ॥" [प्र० वार्तिकाल० ४।१९७]

इति चेत् ; अत्राह—**न चेत् अत्राभिधास्यते** । **न चेत्** न यदि क्रमशबलो बोधः, **अत्र** एतस्मिन् अक्रमशबले बोधात्मनि **अभिधा** तदस्तित्ववादः **अस्यते** निराक्रियते तत्रापि देशव्यापिनि प्रत्यक्षस्यावृत्तेः ।

यदि देशकलाव्यापि वस्तुग्रहणमक्षतः ।
सर्वदेशकलालम्बे ग्रहः स्यात्सागरावधेः ॥ १४१७ ॥

इति दोषात् । योग्यतया नियमस्येतरत्रापि सुकरत्वात् । प्रत्यक्षायोग्यस्य च तद्गतस्यानुमानात्प्रतिपत्तेरद्वैतभागवत् । न हि तत्रापि 'नानुमानम्-[3]चित्रप्रतिभासाप्येकैव बुद्धिरशक्यविवेचनत्वात्' इति तस्य दर्शनात् । तेनापि विप्रतिपत्तिरेव निवार्यते न तद्भागस्य ग्रहणम्, प्रत्यक्षत एव सर्वात्मना तस्य ग्रहणादिति चेत् ; न; विप्रतिपत्तिविवेकस्याग्रहणात्, ग्रहणेऽनुमानस्य वैफल्यात्[5] । ततोऽनुमानादेव तस्य प्रतिपत्तिः तद्वदनाद्यनन्तत्वस्यापि । ततो युक्तं प्राणादिमत्त्वात् परिणामिन एवात्मनः साधनं न कूटस्थस्य नापि[6] विज्ञानसन्तानस्य तत्र तस्य विरुद्धत्वात् ।

परिणामित्यपि विरुद्ध एवायं शरीरोपक्लृप्तादेव चैतन्यादुत्पत्तेरिति चार्वाकः । तदेवाह—

---

१ तत्परिज्ञा—आ०, ब०, प० । २ तस्मादेव प० । ३ —मत्रार्थः आ०, ब०, प० । ४ "चित्रप्रतिभासापि बुद्धिरेकैव बाह्यचित्रविलक्षणत्वात् । शक्यविवेचनं चित्रमनेकमशक्यविवेचनाश्च बुद्धेर्नीलादयः ।" प्र० वार्तिकाल० पृ० ३९५ । ५ वैफल्यात्तेः आ०, ब०, प० । ६ नापि ज्ञान— आ०, ब०, प० ।

भूतानामेव केषाञ्चित् परिणामविशेषतः ।
कायश्चित्कारणं सोऽपि कथं नैव संसारमुक्तिभाक् ॥ ५६ ॥ इति ।

कायः शरीरं **भूतानां** पृथिव्यादीनाम् **एव**कारान्न परमाण्वादीनां कार्यत्वेन सम्बन्धी, तेषामपि न सर्वेषाम्; सर्वेषां कायमयत्वप्रसङ्गात्, अपि तु **केषाञ्चित्** । भूतत्वाविशेषे कथमिदमिति ? अत्रोत्तरम्–**परिणामविशेषतः** । तेषामेव समुदायलक्षणोऽवस्थाविशेषस्तस्मात्तत इति केषाञ्चिदेव तद्विशेषभावात्तेषामेव स इत्यभिप्रायः । भवति चात्रसूत्रम्–**"तत्समुदाये शरीरेन्द्रियविषयसंज्ञाः"** [ ] इति[1] । भवतु नामैवं तथापि कः प्रकृतोपयोगः ? तत्रोत्तरम्–**चित्कारणं** चितश्चेतनस्य दर्शनस्मरणादेः कारणं **काय** इति सम्बन्धः **"तेभ्यश्चैतन्यम्"** [ ] इति वचनात् । प्रयोगश्चात्र–यस्मिन् सत्येव यद् भवति तत्तस्य कार्यं यथा किण्वादेर्मदशक्तिः, सत्येव च काये भवति चेतन इति । तदुक्तम्– **"मदशक्तिवद्विज्ञानम्"** [ ] इति[2] । भवतु तद्धेतुः काय एवात्मा **'चैतन्यविशिष्टः पुरुषः"** [ ] इत्यभिधानात्, स एव च संसरति मुच्यते चेति चेत्, उत्तरम्– **सोऽपि** कायोऽपि न केवलं परः **कथं** नैव **संसारमुक्तिभाक्** ? तस्य जन्मनः पूर्वं मरणाच्चोर्ध्वमभावेन तदनुपपत्तेरिति भावः । तत्रोत्तरमाह–

शक्तिभेदे तथा सिद्धिः [संज्ञा केन निवार्यते] इति ।

तथा तेन कायश्चित्कारणमिति प्रकारेण **सिद्धिः** निर्णीतिः भवतीति शेषः । कदा ? **शक्तेः** सामर्थ्यस्य **भेदे** तदन्यासम्भविनि विशेषे सति । तात्पर्यमत्र–कायात्मनः पृथिव्यादेश्चैतन्यं प्रत्यभिव्यञ्जकत्वेन कारणत्वमिति मते तद्भेदस्तस्य वक्तव्योऽन्यथा तदयोगात् भूतान्तरवत् । किं तेन कायत्वादेव तदुपपत्तेरिति चेत् ? न, मृतेऽपि देहे तत्प्रसङ्गात् । विशेषादिति चेत्; स तर्हि तद्भेद एव नापर इति सिद्धः स एव तद्भेदाधिष्ठानं जीवः, तदपरस्तु भावः पुद्गलादिस्तत्र दर्शनस्मरणप्रत्यभिज्ञानादेरात्मधर्मस्याभावात् तदधिष्ठाने च विपर्ययात् । ततः संज्ञयैव तस्य भूतत्वं नार्थतः । न च सा तत्र निवार्यते अनेकसंज्ञासमावेशस्यैकत्राविरोधात् । तदाह–**'संज्ञा केन निवार्यते'** इति । यदि तस्य तच्छरीरतयैव जीवत्वमविनष्टैव दृष्टिर्नास्तिकानामिष्टत्वात् । अपरशरीरत्वेनापीति चेत्, कथमत्यक्ततच्छरीरस्य तत्सम्भवेत् युगपदेकत्र तदनुपलम्भात् । त्यक्ततच्छरीरस्येति चेत्; न; तस्यापि भस्मभावेनात्रैवोपलभ्यमानस्य तद्भस्त्वाप्रतिपत्तेरिति चेत्, मा भून्नाम स्थूलस्य तद्भस्त्वं सूक्ष्मस्य तु न कथं तस्य शरीरान्तरवत्त्वमनुभवतोऽप्यप्रतिपत्तेरविरोधात् । नाविरोधादेव तदस्तित्वमतिप्रसङ्गात्, अपि तु प्रमाणादेव, तच्चेह नास्तीति चेत् ; न; तस्यापि भावात् । तथाहि–विवादापन्नः पृथिव्यादिः तदन्तरवान् चैतन्याभिव्यञ्जकशक्तिभेदवत्त्वात् बालदेहपृथिव्यादिवत् । प्रसिद्धं हि बालदेहपृथिव्यादेस्तथाविधस्य तदन्तरवत्त्वं तत्रैव युवादिदेहभावस्य प्रतिपत्तेः । कथं पुनस्तद्देहस्य बालदेहाद् भेद इति चेत् ?

---

१ "पृथिव्यापस्तेजोवायुरिति तत्त्वानि तत्समुदाये शरीरेन्द्रियविषयसंज्ञा इत्यादि" तत्त्वोप० पृ० १ । न्या० कु० टि० पृ० ३४१ । २ 'तेभ्यश्चैतन्यामिति । तत्र केचिद् वृत्तिकारा व्याचक्षते—उत्पद्यते तेभ्यश्चैतन्यम् । अन्ये– अभिव्यज्यते इति ।" तत्त्व सं० पं० पृ० ५२० । न्या० कु० टि० पृ० ३४२ । ३ तत्त्वान्तरत्वेन भेदः ।

प्रतिभासभेदादेव पुरुषान्तरदेहवत् । सत्यपि तस्मिन्नात्यन्ताय तत्र भेद इति चेत् ; न; अस्माभिरप्यत्यन्तभेदेन तदन्तरवत्त्वस्यासाधनात् । एवमपि कथं मरणतिरोहितचिद्रूपस्य पुनराविर्भूततद्रूपतया तदन्तरवत्त्वं स्थूलरूपस्यापि तस्य तत्प्रसङ्गादिति चेत् ? कथं भवतोऽपि जन्मनः पूर्वमनभिव्यक्तचिद्रूपस्य तथा प्रकृतदेहवत्त्वं भूतमात्रस्यापि तत्प्रसङ्गेन सर्वस्य प्राणिमयत्वापत्तेः । नायं दोषस्तत्रैव तन्निबन्धस्य शक्तिविशेषस्य भावान्न तन्मात्रे इति समानमन्यत्रापि समाधानम् । तदेवाह—

यथाभूताविशेषेऽपि प्रज्ञादिगुणसंस्थितिः ।
तथा भूताविशेषेऽपि भवद्भूतादिसंस्थितिः ॥ ५७ ॥ इति ।

यथा येन शक्तिभेदभावाभावप्रकारेण शरीरभाविनोऽन्यस्य च पृथिव्यादेर्भूतत्वं भावप्रधानत्वान्निर्देशस्य, उपलक्षणञ्चेदं तेनानभिव्यक्तचेतनत्वमपि तस्याविशेषस्तस्मिन्नपि न केवलं तद्भावे, **प्रज्ञादिगुणसंस्थितिः** इति अत्यन्तविस्मृतस्य पूर्वसंस्कारादभ्यूहनं प्रत्येकगृहीतानामन्योऽन्ययोजनेन वानुस्मरणं प्रज्ञा सादिर्यस्य मेधाशरीरभावादेः, मेधा गृहीताविस्मरणं पृथग्गृहीतानां तथानुस्मरणं वा, स एव **गुणस्तस्य संस्थितिः** सम्यक् शरीरभाविन्येव पृथिव्यादौ नान्यत्र स्थितिरतिव्याप्तिपरिहारेणावस्थानम् । न हि तत्रैवं शक्यं वक्तुम्-शरीरभाव्यपि पृथिव्यादिर्न तत्संस्थितिमान् भूतत्वादनुन्मीलितचेतनत्वाद्वा तदितरपृथिव्यादिवदिति, तत्त्वाविशेषेऽपि शक्तिभावेतराभ्यां तत्संस्थितिमत्त्वस्योपपत्तेः । **तथा** तेन प्रकारेण **भूताविशेषेऽपि** भूतत्वतदुपलक्षिततिरोहितचेतनत्वाभेदेऽपि स्थूलस्य इतरस्य च पृथिव्यादेः **भवद्भूतादिसंस्थितिः** भवन् भाविशरीरप्रज्ञादिस्तस्य वर्तमानसमीपत्वेन तत्प्रत्ययविषयत्वात्, भूतश्च वर्तमानस्तत्रापि तच्छब्दस्य रूढेः अन्यथा भूतपूर्वशब्दवैयर्थ्याद् भूतपदादेव तदर्थपतिपत्तेः । तदयमर्थः—**भूतः** साम्प्रतिकः पृथिव्यादिः **आदिः** कारणमभिव्यञ्जकत्वेन यस्य स भूतादिः भवन्नेव भूतादिस्तस्य **संस्थितिः** सूक्ष्महेतुकतयैव न स्थूलभस्मादिनिमित्ततयावस्थानम् । ततो न तत्रापीदं वक्तव्यम्—विवक्षितोऽपि न पृथिव्यादिस्तद्धेतुः भूतत्वात्तिरोभूतचेतनत्वाद्वा स्थूलभस्मादिवदिति, तस्यापि सामर्थ्यभावेतराभ्यामेव परिहारात् । भवतु भाविरूपतया तस्यैवं जीवत्वं न भूतरूपतयेति चेत्; न; तस्याप्यनुमानादवगमात्-साम्प्रतिकः शरीरादिरतीतकायपृथिव्यादिहेतुकः शरीरादित्वात् वृद्धशरीरादिवत् । तदाह—भवदित्यादि । व्याख्यानमत्र भवन् वर्तमानः स एव **भूतादिरतीतकायपृथिव्यादिनिबन्धनत्वात्तस्य संस्थितिः** पूर्ववत् । तदेवं कायकारणत्वेऽपि चैतन्यस्याप्रतिक्षेप एव जीवस्य, तस्य कालत्रयभावित्वेनावस्थापनात्, न तावता तस्य तत्त्वमनाद्यनन्तत्वेन तदुपगमात्, तस्य च नानुमानं तस्यानन्तरपूर्वादावेव[3] पर्यवसानात्, ततोऽपि नः (न) परस्य तस्यानुमितिरिति चेत्; न; एवमनवस्थाप्रसङ्गाद् विपरिणामवासच्चारापत्तेः यावज्जीवं तत्रैवाभिनिवेशादिति चेत्; नन्वयं भवत एव पर्यनुयोगः पृथिव्यादेः प्रत्यक्षतोऽनवगमात्, तस्य सन्निहितार्थगोचरतयैव प्रतीतेः, अनुमानस्य

१ तत्परिज्ञा

१ स्थूलेतरस्य च आ०, ब०, प० । २ —नन्तर[illegible] आ०, ब०, प० । ३ —"आदिपदेन अनन्तरोत्तरस्य ग्रहणम्"— ता० टि० ।

चानिष्टेरिष्टस्याप्युक्तदोषानतिवृत्तेः । तदनेन सौगतस्याप्यनाद्यनन्तत्वपरिज्ञानाभावः प्रतिपत्तव्यः । स्याद्वादिनस्तु नायं दोषः कतिपयतदनुमानपर्यवसाने तद्बलादेव क्षयोपशमविशेषसापेक्षादित्थमनादिरनन्तश्चायं प्रबन्ध इति तर्काभिधानस्य प्रमाणस्योत्पत्तेः । ततो युक्तं कायकारणत्वेऽपि चैतन्यस्यानाद्यनन्तत्वावस्थितेः संसारमुक्ती तस्येति । कीदृशश्चायं चेतनो यस्य शरीरेणाभिव्यक्तिः ? तदात्मेति चेत् ; न; तस्य तद्विन्नलक्षणत्वात् । ज्ञानदर्शनलक्षणो हि चेतनो न शरीरं तस्य रूपादिलक्षणत्वात् । न हि तद्विन्नलक्षणस्य तत्रान्तर्भावः पृथिव्यादौ जलादेरपि तत्प्रसङ्गात् । तन्निश्चये ऽनिश्चयाच्च । अस्ति हि निश्चितेऽपि शरीरे [1]तद्विकले संशयः किमयं मूर्खः किं वा पण्डित इति, अन्यथा तत्परीक्षावैयर्थ्यापत्तेः । व्यभिचारी हेतुः शब्दादिधर्मिनिश्चयेऽपि अनिश्चितस्याऽनित्यत्वादेस्तदन्तर्भावादिति चेत् , न; तत्र कथञ्चिद्भेदस्यापि भावात् । चेतनेऽप्येवमिति चेत् ; न; जैनोक्तौ **"परस्परविरुद्धयोरेकत्रासम्भवात्"** [ ] इति सूत्रेण स्वयं तद्वादस्य निराकरणात् । तन्न तदात्मनस्तेनाभिव्यक्तिः । तद्गुणस्येति चेत् , न; तदाश्रयत्वात्तद्गुणत्वे घटादौ प्रसङ्गात् , तस्य भूम्याश्रयत्वात् । सर्वदा तदभावान्नेति चेत् ; अवयविनि प्रसङ्गः; तस्य शश्वदवयवाश्रयत्वात् । क्रियावत्त्वादिना द्रव्यत्वान्नेति चेत् ; न; उत्पन्नमात्रे क्रियावत्त्वादेरसम्भवात् । तत्कार्यत्वात्[3] , न हि कार्यकारणयोः समकालः प्रादुर्भावः सव्यापसव्यवालविलासिनीकुचचूचुकवत् परस्परमनुपकारात् । पश्चाद्भाविना च तेन[4] पूर्वं द्रव्यत्वम्[5]; पूर्वभाविना द्रव्याश्रयत्वादिना पश्चादपि गुणत्वस्यैव प्रसङ्गात् । कथञ्चैवं गन्धादेरपि गुणत्वम् ? गुणवत्त्वेन द्रव्यत्वस्यैवोपपत्तेः । अस्ति हि तत्र तद्वत्त्वम्, द्वौ गन्धौ षड्रसा इति सङ्ख्याभेदप्रतिपत्तेः । वक्ष्यति चैतत्—**"गुणानाम्"** इत्यादिना । तन्न तद्गुणस्यापि तेनाभिव्यक्तिः । नापि तत्कार्यस्य; वक्ष्यमाणोत्तरत्वात् । कथमेवं गुणनिषेधे **"गुणवद्द्रव्यम्"** इत्युपपन्नं भवतोऽपीति चेत् ? न, परकीयस्य तल्लक्षणस्यैवातिव्याप्त्यादिना प्रतिषेधान्न गुणस्य । कथं तर्हि तदुपपत्तिरिति चेत् ? आह—

तस्मादनेकरूपस्य कथञ्चिद्ग्रहणे पुनः ॥ ५९ ॥
तद्रूपं भेदमारोप्य गुण इत्यपि युज्यते । इति ।

तस्मादुक्तन्यायाद**नेकरूपस्य** युगपज्ज्ञानदर्शनादिनानास्वभावस्य **क्रमेण** स्वापप्रबोधसुखदुःखादिभेदात्मनश्चेतनस्य **कथञ्चित्** केनचित् न सर्वात्मना प्रकारेण **ग्रहणं** प्रत्यक्षादिना परिच्छेदः । न हि तेन तस्य सर्वात्मना परिज्ञानं स्वापादौ प्रबोधादेस्तत्र च स्वापादेरप्रतिवेदनात् । न चैवं तस्यापि न प्रतिपत्तिः; तस्याः प्रत्यभिज्ञाबलेन व्यवस्थापितत्वात् । ततः कथञ्चिदेव ग्रहणम् , तस्मिन् सति, **पुनः** पश्चात् **तद्रूपं** गृहीतागृहीतरूपं **भेदं** नानात्वम् **आरोप्य** नयबुद्ध्याभिसन्धाय **गुण इत्यपि** शब्दाद् गुणीत्यपि कल्पनं **युज्यते** उपपद्यते । सति भेदे चेतनात् स्वापादीनां ते तस्य गुणास्तदाश्रय-

---

१ शरीरभिन्ने चैतन्ये इत्यर्थः । २ चेतनेष्वेवमि– आ०, ब०, प० । ३ अवयविकार्यत्वाद्गुणस्य अतो न गुणत्वमवयविनः । ४ गुणेन । ५ यदि स्यात् इति सम्बन्धः । ६ न्यायवि० श्लो० २३० । ७ न्यायवि० श्लो० ११७ ।

त्वात् स च गुणी तदधिकरणत्वादिति प्रतीतिबलादुपपन्नो गुणतद्भावः[1] इत्यर्थः । गुणतद्वतोरेकान्ततः[2] एव भेदो न कथञ्चित् तद्वादस्य विरोधादिदोषादिति चेत् ; अत्राह—

यदि स्वभावाद्भावोऽयं भिन्नो भावः कथं भवेत् ? ॥ ६० ॥
अनवस्थानतोऽभेदे सकलग्रहणं भवेत् । इति ।

अत्रायमभिप्रायो यथा गुणी गुणात् स च गुणिनो भिद्यते तथा यदि न स्वभावादपि ; नानेकान्तवादान्निर्मुक्तिः अन्यतो भेदस्य स्वतश्चाभेदस्य भावे तस्यावश्यम्भावात् । तथा गुणगुणिरूपतयैव वरं तदभ्युपगमः प्रतीतिभावादिति । भिद्यते चेत् ; उत्तरम्-**यदि चेत् स्वभावात्** स्वात्मनोऽयं भाव-श्चेतनोऽन्यो वा भिन्नो व्यतिरिक्तः **भावः कथं नैव भवेत्** खरशृङ्गादिवत् । भिन्नस्यापि पुनः स्वभावान्तरे-णावस्थितिरिति चेत् ; न ; ततोऽपि तद्भेदस्यावश्यम्भावात्, अन्यथा अनेकान्तवादादनिर्मुक्तेः । पुनस्तद-न्तरेण तदवस्थाने चानवस्थानात् । तदेवोक्तम्-'अनवस्थानत' इति । भिन्नस्यापि स्वभावात् सत्तासम्ब-न्धेन सत्त्वम्; इत्यप्ययुक्तम् ; अनवस्थानत एव स्वभावनिष्क्रान्ते सम्बन्धस्यैव निर्विषयत्वेनानवस्थितेः व्योमकुसुमादिवत्[3] । तन्न क्वचिदैकान्तिको भेदः प्रमाणबाधनात् । भवत्वभेद एवैकान्तिक इति चेत् , उत्तरम्- **'सकल'** इत्यादि । सकलस्य स्वरूपादेरिव पररूपादेरपि **ग्रहणं** तादात्म्येन भावस्य **भवेत्** कदा ? **अभेदे**, क्वचिदपि भेदस्याभावे ।

तदेवं सति चार्वाकः कथं भूतचतुष्टयम् ।
कणादः षट्पदार्थान् वा कथं नामावकल्पयेत् ॥ १४१८ ॥
प्रागेव ब्रह्मवादोऽपि प्रतिषिद्धः सविस्तरम् ।
भेदाभेदात्मकं वस्तु तत्प्रतीत्योपगम्यते ॥ १४१९ ॥
तच्चानेकात्मकं वस्तु गुणगुण्यादिरूपतः ।
संशयाद्यनुपलीढं (पालीढं) भवतीत्याह शास्त्रकृत् ॥ १४२० ॥

तदनेकात्मकं तत्त्वं [न हि ज्ञानात्मना क्वचित्] ॥ ६१ ॥ इति ।

स्पष्टमेतत्[4] । अत्रायं भावः—स्याद्वादबलभाविभूतचातुर्विध्यमभ्युपगम्य तद्वादिनं प्रति गौरेवायं केवलमस्य विषाणे न स्तः इत्युपहासमवकल्पयन् भूतवादी महाभूतेनैवाविष्टो न विशिष्टया प्रज्ञयाधिष्ठित इति । भवतु स एव वादः, तत्रैव चेतनो देहस्य गुण इति चेत्; अत्राह—

न हि ज्ञानात्मना क्वचित् ॥
शरीरग्रहणं यैन तद्गुणः परिकल्प्यते[5] । इति ।

न हि नैव **ज्ञानात्मना** शुक्लाद्यात्मना पटग्रहणवत् **क्वचिदन्तर्बहिर्वा शरीरग्रहणमस्ति**

---

१ गुणवद्भाव आ०, ब०, प० २ । –कान्त एव आ०,ब०,प० । ३ –मवत् आ०,ब०,प० । ४–ष्टमेव तत् ता० । ५ लवादी आ०, ब०,प० । ६ परिकल्पते आ०, ब०, प० ।

येन तथा तद्ग्रहणेन तद्गुणः [1]परिकल्प्यते ज्ञानात्मेति विभक्तिपरिणामेन सम्बन्धः। गुण-द्रव्ययोः कथञ्चिदप्यभेदे द्रव्यवद् गुणस्यापि गुणवत्त्वप्रसङ्गः तद्धर्मानुपाते सत्येव तदभेदोपपत्तेरिति चेत्; न; अभेदार्पणया तथेष्टत्वात्। न चैवम् "द्रव्याश्रया निर्गुणा गुणाः" [त० सू० ५।४०] इति सूत्रविरोधः; तस्य भेदाभिसन्धिनिबन्धनत्वात्। वैशेषिकादेस्तु "अगुणवान् गुणः" इति [2] ब्रुवाणस्य न गन्धादेर्गुणत्वं गुणवत्त्वात्। तदेवाह— ५

गुणानां गुणसम्बन्धो गन्धादेः सङ्ख्यया ग्रहात् ॥६२॥ इति।

सङ्ख्यायाश्च गुणत्वं गुणसूत्रे[3] [4]तत्त्वेन पाठादिति भावः। सत्यं सङ्ख्यावत्तस्य ग्रहः, सा तु गुण एव न भवति [5]भाक्तत्वेनावस्तुसत्त्वात्, वस्तुसत्त्व एव तस्या गुण[6]त्वोपपत्तेरिति चेत्; अत्राह—

तादात्म्यं केन वार्येत [नोपचारप्रकल्पनम्]। इति।

स गुण आत्मा स्वभावो यस्य तस्य भावः **तादात्म्यं** गुणात्मत्वं सँङ्ख्याया इति षष्ठी-परिणामेन सम्बन्धः। **केन** न केनचित् **वार्येत** प्रतिक्षिप्येत। ननूक्तं भाक्तत्वेन तन्निवारणमिति चेत्; अत्राह— १०

नोपचारप्रकल्पनम्।

अत्रान्यत्रापि तुल्यत्वात् [आधारस्यैकरूपतः] ॥६३॥ इति।

अत्र अस्यां गन्धादिसङ्ख्यायाम् **उपचारस्य** असदाकाराद्यारोपस्य **कल्पनं** समर्थनम्। कुत एतत्? **अन्यत्रापि** पृथिव्यादावपि **तुल्यत्वात्**तत्कल्पनस्य। तथा च न क्वचित् सङ्ख्याया गुणत्व-मिति मन्यते। नायं दोषः, तत्र वस्तुत एव तस्या भावात् निर्बाधप्रतिपत्तिविषयत्वादिति चेत्; अत्राह—**अन्यत्रापि** गन्धादिसङ्ख्यायामपि **तुल्यत्वात्**तद्विषयत्वस्य[7] बाधकस्य कदाचिदप्यप्रतिपत्तेः। वस्तुतो निर्गुण एव गन्धादिरद्रव्यत्वात् कर्मादिवत् इत्यनुमानं बाधकमिति चेत्; न, कर्मादावपि 'पञ्च कर्माणि द्विविधं सामान्यम्, एकः समवायो बहवो विशेषाः' इति[8] सङ्ख्यया गुणवत्त्वस्यैव प्रतीतेः, साध्य-वैकल्याद्धेतोश्चासिद्धत्वात्, गुणवत्त्वे तस्यापि द्रव्यत्वात्। तदेवाद्रव्यत्वेनेति चेत्; न; 'अगुणवत्त्वाद् द्रव्यत्वम्, ततश्च तत्' इति परस्पराश्रयस्य स्पष्टत्वात्। ततः सूक्तम् 'अन्यत्रापि' इत्यादि। १५ २०

क्व चेयं प्रसिद्धा सङ्ख्या यस्या गन्धादावुपचारः? तदाधार इति चेत्; न; पृथिव्यादेरेकत्वा-देकसङ्ख्याया एव तत्र तदापत्तेः। तदाह—

आधारस्यैकरूपतः ॥ २५

तत्रैकत्वं प्रसज्येत [सङ्ख्यामात्रं यदीष्यते]। इति।

आधारस्य पृथिव्यादेः **एकरूपत** एकत्वेन निरूपणात् तत्र गन्धादौ **एकत्वं प्रसज्येत** तथा च 'द्वौ गन्धौ' इत्यादि व्यपदेशाभाव इति मन्यते। भवत्वनाधारसङ्ख्यायास्तत्रोपचार इति चेत्; न; प्रत्यासत्तेस्तन्निबन्धनस्याभावात्। सङ्ख्यासामान्यस्याधारेतरगतस्योपचारस्तत्र तद्भावादिति

१ परिकल्पते आ०,ब०,प०।२ वैशे० सू० १।१।१६। ३ वैशे० सू० १।१।६। ४ संख्यात्वेन। ५ "औपचारिकत्वेन" —ता० टि०। ६ —णवत्त्वो— आ०, ब०,प०। ७ संख्यया आ०, ब०, प०। ८ —यस्य आ०, ब०,प०। ९ एवं संख्यया गु— आ०, ब०, प०।

चेत्: तदेव तर्हि स्यात् कथं विशेषः ? सामान्येन तस्याक्षेपादिति चेत्; न; आधारेतरगतयोरेकत्व-नानात्वयोर्युगपदाक्षेपेण गन्धादौ तद्व्यपदेशस्यापि युगपत्प्राप्तेः, ततो यदि तत्कल्पनं सामान्यमेव न विशेषस्तदेवाह–**'सङ्ख्यामात्रं यदीष्यते'** इति । **यदि** चेत्; **इष्यते** तत्कल्पनं सङ्ख्यैव विशेष-रहिता तन्मात्रं स्यात् । न च तेन कल्पितेनापि प्रयोजनं स्यात्, द्विव्यपदेशस्य तस्मादनुपपत्तेः । उप-चरितत्वे च गन्धादौ सङ्ख्यायास्तद्वदेव पृथक्त्वस्यापि स्यात्, सङ्ख्यावत्तस्यापि गुणत्वेन वस्तुत-स्तत्रासम्भवात् । ततः किमिति चेत् ? आह–

नानात्मविभ्रमादेवं न पृथग्गुणिनो गुणाः ॥६४॥ इति ।

नानात्मा नानास्वभावः पृथक्त्वमिति यावत्, तस्य **विभ्रमः** कल्पितत्वं तस्मात् । एवं गन्धादिसङ्ख्यावत् । **न पृथग्** न भिन्ना **गुणिनः** पृथिव्यादेर्[1] **गुणाः** रूपादयः **स्युः** । उपलक्षणमिदम्, तेन कर्मसामान्यादयोऽपि तद्वतो न पृथगिति प्रतिपत्तव्यम्, वस्तुतः पृथक्त्वाभावे तदनुपपत्तेः[2] । तदभावेऽप्याकारभेदात्ते ततः पृथगिति चेत्; एतदेवाह–

प्रसक्ता रूपभेदाच्चेत् [भेदो नानात्वमुच्यते] । इति ।

रूपभेदात् स्वाकारभेदात्ते ततः पृथक् **प्रसक्ताः** प्रवृत्ताः **चेत्** यदि । तत्रोत्तर-माह – **'भेदो नानात्वमुच्यते'** इति । भेद इत्यपि **नानात्वं** पृथक्त्वमेव न स्वरूपवैलक्षण्यम् **उच्यते**, अन्यथा पृथिव्यादिष्वपि पृथक्त्वकल्पनावैकल्यप्रसङ्गात् । ततो गुणादीनां तद्वतो भेदमि-च्छता पृथक्त्वं तत्र तात्त्विकमेवाङ्गीकर्तव्यम् इत्यव्यापकमेव **"अगुणवान्"** इति[3] गुणलक्षणम् । तदनेन **"गुणवत्"** इति [4]द्रव्यलक्षणस्यातिव्यापकत्वमुक्तं भवति गन्धादेरपि गुणवत्त्वेन तत्त्वापत्तेः, समवा-यस्य चैकत्वेन तस्यापि तद्वत्त्वात् । नास्त्येव [5]तत्रैकत्वं केवलं भावसादृश्यात्तत्र तद्व्यवहारः । तदुक्तम्– **"तत्त्वं भावेन व्याख्यातम्"** [वैशे० ७।२।२८] इति , तदेवाह–

एकता भावसाम्याच्चेत् [उपचारस्तथा भवेत्] ॥६५॥ इति ।

भावः सत्त्वं तेन **साम्यं** साधर्म्यं[6] सत्सदितिवत् समवायः समवाय इत्यविशिष्टज्ञानविषयत्वं तस्मात्, **एकता** एकत्वं समवायस्येति शेषः । **'चेत्'** इति पराकूतद्योतने । तत्रोत्तरमाह–**'उपचारस्तथा भवेत्'** इति । **तथा** तेन तत्साम्यप्रकारेणोपचार एकत्वस्य **भवेत्** सादृश्यगुणोपनीतत्वात् माणवके [6]सिंहत्ववत् । तथा च तत्र नानात्वमेव स्यात् । वस्तुत एकत्वाभावे तस्यावश्यम्भावात् । यदि च, तत्र गुणवत्त्वभयान्न वास्तवमेकत्वं पृथक्त्वमपि न भवेत्, तदपि कुतश्चित् कार्यविशेषादेरुपचरितमेव स्यात् । तदेवाह–

भेदेऽपि [वस्तुरूपत्वात् न चेदन्यत्र तत्समम्] । इति ।

भेदः समवायस्य तदन्यत्वान्नानात्वं तस्मिन्नपि न केवलं तदेकत्व एव, **उपचारः तथा**

---

१ तदा व्यपदे– आ०, ब०, प० । २ पृथक्त्वाभावेऽपि । ३ वैशे० सू० १।१।१६-४ "क्रिया-गुणवत्समवायिकारणमिति द्रव्यलक्षणम्"–वैशे० सू० १।१।१५ । ५ समवाये । ६ सिंहत्वत्ववत् आ०, ब०, प० ।

भवेत्' इति सम्बन्धः । तथा च तस्य वस्तुतो भावादप्यभेदात् न युक्तमेतत्–'एकता भावसाम्यात्' इति, साम्यस्य भेदे सत्येवोपपत्तेः[1] । इतरः प्राह–'वस्तुरूपत्वान्न चेत्' इति । वस्तुनः समवायस्य रूपत्वात् स्वभावत्वाद्भेदस्य **न चेत्** न यदि तत्रोपचार इति; तत्राह–'**अन्यत्र तत्सम्**' इति । अन्यत्र तदेकत्वे **तत्** वस्तुरूपत्वं **समं** सदृशम् तस्यापि निरवद्यप्रत्ययवेद्यतया स्वयमभ्यनुज्ञानात्, तथा च सिद्धमेकत्वादिना तस्य गुणवत्त्वम् । [2]अर्थान्तरत्व एव स गुणो न वस्तुरूपत्वे इति चेत्; आह– 'अन्यत्र' इत्यादि । **अन्यत्र** पृथिव्यादौ **तत्** वस्तुरूपत्वमेकत्वादेः **समं** तत्रापि तदपरस्य प्रमाणतो ऽनवगमादिति न क्वचिदेकत्वादिर्गुणः[3] स्यात् । अथवा, '**न पृथग्गुणिनो गुणाः**' इत्युक्तं[4] तदेवाभ्युपगमात् वदतः सङ्ग्रहवादिनो मतम् 'एकता' इत्यादिना आशङ्क्य 'उपचारः' इत्यादिनोत्तरमाह । न हि भावसादृश्यात् सन्मात्राविशेषादेकता सर्वभावानामुपचार एव तथा भवेत् सन्मात्रस्यापि सर्वव्यक्तिष्वेकस्याभावात् उपचारत एव तदेकत्वस्यावस्थापितत्वादिति मन्यते । हेत्वन्तरमाह–'**भेदेऽपि**' इत्यादि । न हि भेदस्यापि वस्तुरूपत्वे वस्तुतस्तदेकत्वमुपपन्नम्, भेदो न वस्तुरूपः तत्त्वात् मरीचिकातोयवदिति चेत्; तदेवाह–'**न चेत्**' इति । न यदि भेदे वस्तुरूपत्वमिति । तत्रोत्तरम्– अन्यत्र अभेदे **तत्** वस्तुरूपत्वं नेति **समम्**–सोऽपि[5] न तद्रूपस्तत्त्वात् लूनपुनरुत्पन्नकेशाद्यभेदवदिति अनुमितिभावात् । भवतु बाधितस्य तस्यातद्रूपत्वं नापरस्य । न हि [6]बाधवतो धर्मस्तदन्यत्र योजनमर्हत्यतिप्रसङ्गादिति चेत्; न, भेदेऽपि समानत्वात् । अत एवोक्तम्–'**अन्यत्र तत् समम्**' इति । तन्न गुणगुण्यादीनामपृथक्त्वम् ।

भवतु पृथक्त्वमेव प्रतिभासादिभेदादिति चेत् ; अत्राह–

एतेन भिन्नविज्ञानग्रहणादिकथा गता ॥६६॥ इति ।

भिन्नविज्ञानग्रहणं भिन्नप्रतिभासावलम्बनम् **आदि**शब्दाद् भिन्नाभिधानकारणादि तस्य **कथा गता** न सम्भवति इत्यवगता । केन ? **एतेन** अनन्तरन्यायेन । विज्ञानादावपि भेदस्य सत्येव पृथक्त्वे सम्भवात् , तस्य च निराकृतत्वात् । तत्रापि भिन्नविज्ञानग्रहणादिना भेदकल्पनायामनवस्थापत्तेः । तन्न गुणो नाम कश्चिन्निश्चितो यतश्चेतनोऽपि गुणः स्यात् ।

मा भूद्धर्मस्तु तर्हि[7] तस्य[8] स्यात् तदवष्टम्भेनावस्थानाच्चित्रवत् कुड्यस्य, ततो यथा कुड्यापाये न चित्रं तत्र तिष्ठति नाप्यन्यत्र गच्छति नश्यत्येव परं तथा शरीरापाये चेतनोऽपीति मन्वानस्य मतमुपदर्शयन्नाह–

जीवच्छरीरधर्मोऽस्तु चैतन्यं व्यपदेशतः ।
यथाऽचैतन्यमन्यत्रेत्यपरः प्रतिपन्नवान् ॥६७॥ इति ।

जीवतः प्राणान् धारयतः शरीरस्य **धर्मोऽस्तु चैतन्यं व्यपदेशतः** 'सचैतन्यमिदं

---

१ –त्तेरिति ततः प्रा– आ०, ब०, प० । २ अनर्थान्त–आ०, ब०, प० । ३ –दिनिर्गु– आ०, ब०, प० । ४ –क्तेन तदैवाभ्युपगमाच्च ततः आ०, ब०, प० । ५ अभेदोऽपि । ६ बाधावतो आ०, ब०, प० । ७ तर्हि स्यात् आ०, ब०, प० । ८ "शरीरस्य" – ता० टि० ।

जीवच्छरीरम्' इत्यभिधानतो यथा येन व्यपदेशप्रकारेण अचैतन्यं चित्रादि अन्यत्र कुड्यादौ धर्म इति एवम् अपर चार्वाकः प्रतिपन्नवान् । तत्रोत्तरमाह—

अप्रत्यक्षेऽपि देहेऽस्मिन् स्वतन्त्रमवभासनात् ।
प्रत्यक्षं तद्गुणो ज्ञानं नेति सन्तः प्रचक्षते ॥६८॥ इति ।

बहलतमःपटलपरिपिहितलोचनदशायाम् अप्रत्यक्षेऽपि विस्पष्टप्रतिभासाविषयेऽपि न केवलं विपुलविलसदालोकपरिकलितप्रदेशदशायां प्रत्यक्षेऽपीत्यपिशब्दः । कस्मिन् ? देहे शरीरे अस्मिन् आत्मीये प्रतीयमाने प्रत्यक्षं स्पष्टावभासं ज्ञानम् । कुत एतत् ? स्वतन्त्रं यथा भवति तथा अवभासनात्[1] । तत् किम् ? तद्गुणः तस्य देह [स्य] गुणस्तदाश्रयं[2] नेति सन्तः प्रचक्षते कथयन्ति । नहि तस्मिन्नप्रत्यक्षेऽपि प्रत्यक्षस्य तद्गुणत्वं रूपादेराकाशगुणत्वप्रसङ्गात् । शब्दस्य कथं तादृशस्याकाशगुणत्वमिति चेत् ? न, तस्य निषेधात् । स्पर्शस्य वायुगुणत्वं कथमिति चेत् ? न; स्पर्शविशेषस्यैव वायुत्वात्, तस्य च प्रत्यक्षत्वात् । तस्य तदर्थान्तरत्वे गुणगुणिभावाभावस्य निवेदनात् । तन्न देहगुणत्वं ज्ञानस्य । ततः किम् ? इत्याह—

तद्दृष्टहानिरन्येषामदृष्टपरिकल्पना । इति ।

तत् तस्मात् तस्य गुणत्वाभावात् अन्येषां लौकायतिकानां दृष्टहानिः प्रत्यक्षवेद्यस्य स्वतन्त्रज्ञानस्य प्रतिक्षेपात्, अदृष्टपरिकल्पना परतन्त्रस्य तस्यादृष्टस्यैवोपगमात् । तदेवाह—

स्वातन्त्र्यदृष्टेर्भूतानामदृष्टेर्गुणभावतः ॥६९॥ इति ।

दृश्यते हि स्वातन्त्र्यं ज्ञानस्य । नहि [4]देहभूताभूतसम्बन्धितया गुणभावः । ततो दृष्टहानिरदृष्टकल्पना चान्येषामिति । भवतु [5]तस्य तदात्मत्वं तद्गुणत्वं तद्धर्मत्वं वा, तथापि न संसारमोक्षयोरभाव इत्याह—

तत्सारतरभूतानि कायापायेऽपि कानिचित् । इति ।

तदित्यत्र अपिशब्दो द्रष्टव्यः । तदयमर्थः—तदपि तस्य तद्गुणत्वादिप्रकारेणापि 'जीवः संसारमुक्तिभाग्' इति दूरादाकृष्य सम्बन्धनीयम् । कथमेतत् ? देहपाते सह तेन तस्यापि प्रलयादिति चेत् ? तन्न; यतः कायापायेऽपि न केवलं तद्भावे कानिचित् न सर्वाणि शरीरान्तरपरिणामभाञ्जि भवन्ति पूर्वोक्तन्यायात् । कीदृशानि कानिचित्तानीति चेत् ? सारतरभूतानि तैश्चैतन्यस्य प्रागभिव्यक्तत्वात् तेभ्योऽपि साराणि पुनरप्यभिव्यञ्जकत्वात् भूतानि सूक्ष्मरूपाणि पृथिव्यादीनि, ततो निषिद्धमेतत्—"[6]यावज्जीवेत् सुखं जीवेत्" [ ] इत्यादि । ततस्तस्य तदात्मकत्वादिकल्पनं प्रयासमात्रमेव चार्वाकस्य संसारमोक्षप्रोस्तदर्थस्यानुष्ठानस्य च तथापि निषेधाभावादिति मन्यते । तस्मादित्यादयश्च व्याख्यानश्लोकाः यथेत्यादिना व्यवस्थापितस्यैवात्मनः तैर्व्याख्यानात् ।

---

१ –तदे– आ०, ब०, प० । २ –तृकि– आ०, ब०, प० । ३ –यान्नेति आ०, ब०, प० । ४ देहभूतस्य– आ०, ब०, प० । ५ ज्ञानस्य । ६ यावन्नीवं सुखं आ०, ब०, प० । "यावन्नीवेत् सुखं जीवेन्नास्ति मृत्योरगोचरः । भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥"– ता० टि० ।

मतान्तरमुपदर्शयति दूषयितुम्—

कार्यकारणयोर्बुद्धिकाययोस्तन्निवृत्तितः ॥७०॥

कार्याभावगतेर्नास्ति संसार इति कश्चन । इति ।

कारणं हि कायो बुद्धेर्बुद्धिस्तु तस्य **कार्यं** तद्भाव एव भावात्, धूमादेरपि तत एवाग्नि-कार्यत्वात् । न च तत्कार्यमन्यतोऽपि यतस्तदभावेऽपि स्यात् । स्यादेव शालूकवत् । शालूकं हि शालूकादिव गोमयादपि दृश्यते इति चेत् ; न; तस्य तज्जन्मनः तदन्यतो वैलक्षण्यात् । बुद्धिरपि विलक्षणा तदन्यतः स्यादिति चेत् ; न, तस्या एवाप्रतिपत्तेः । शालूकवत् सम्भाव्यत इति चेत् ; धूमोऽपि पर्वतगतः किन्न तथा सम्भाव्येत ? दृष्टसदृशतयैव तस्य प्रतीतेरिति चेत् , न, बुद्धावपि समानत्वात् ! तादृश्येव तदन्यतोऽपि किन्न भवतीति धूमोऽपि किन्न स्यात् ? तत्रैव तद्भाव-भावस्य नियमात्, अन्यत्राभावात्, भावे सोऽपि पावक एव स्यात् तन्नियमाधिष्ठितस्यैव तत्त्वात् । तदुक्तम् —

"अग्निस्वभावः शक्रस्य मूर्धा यद्यग्निरेव सः ।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत् ॥" [प्र० वा० ३।३५] इति ।

अन्यतोऽपि तस्य भावे निर्हेतुकत्वमेव स्यात् तन्नियमादन्यस्य सहेतुकत्वनिबन्धनस्याभावात्, तस्य चातथात्वेनावस्थापनात् । तदप्युक्तम्—

"धूमः कार्यं हुतभुजः कार्यधर्मानुवृत्तितः ।
सम्भवस्तदभावेऽपि हेतुमत्तां विलङ्घयेत् ॥" [प्र० वा० ३।३३]

इति चेत् ; न; बुद्धावपि तुल्यत्वात् । तथा हि—

कायस्वभावो यद्यन्यः काय एव तथा हि सः ।
अथाकायस्वभावोऽसौ बुद्धिस्तत्र कथं भवेत् ॥१४२१॥
बुद्धिः कार्यं हि कायस्य कायधर्मानुवृत्तितः ।
साऽसती तदभावेऽपि हेतुमत्तां विलङ्घयेत् ॥१४२२॥

ततः कायस्यैव कार्यं बुद्धिः । तथा च **कार्यकारणयोर्बुद्धिकाययोः** मध्ये **तस्य** कारणस्य **निवृत्तितो** विनिपातात् **नास्ति संसारः** कायान्तरसञ्चारः । कुतो नास्ति ? बुद्धेरवस्थानात् तस्या एव तदुपगमादिति चेत्; न; **कार्यस्य** बुद्धेः **अभावगतेः** अभावप्राप्तेरभावनिर्णयाद्वा । न हि कारणनिवृत्तौ कार्यस्यावस्थानमतत्कार्यत्वापत्तेः । **इति एवं कश्चन** चार्वाकविशेषोऽविद्धकर्णः । तत्रोत्तरमाह—

तस्यापि देहानुत्पत्तिप्रसङ्गः [अन्योन्यसंश्रयात्] ॥७१॥ इति ।

तस्याप्यविद्धकर्णस्यापि न केवलं पुरन्दरादेः **देहानुत्पत्तिः** देहादनुत्पत्तिः पर्युदासेन तदन्यस्मादुत्पत्तिर्बुद्धेस्तस्याः **प्रसङ्गः** प्राप्तिः । तथा हि—यथा निवृत्तेऽपि पावके धूमो धूमादेवोत्प-

१ "अग्नेः सकाशादन्यत उत्पत्तिप्रकारेण"—ता० टि० । २ —तयैतस्य ता० । ३ अग्नेःस्व—आ०, ब०, प० ।

यते तथा कायपरिपाते बुद्धिरपि बुद्धेरुत्पद्येत किमवष्टम्भा तदुत्पत्तिः ? अनवष्टम्भे मुक्तत्वेन संसारविरहापत्तेरिति चेत्, आकाशावष्टम्भेन धूमस्येव भूतविशेषावष्टम्भेनेति ब्रूमः । तथा च सूत्रम्—"विग्रहगतौ कर्मयोगः" [त० सू० २।२५] इति । तदवष्टम्भविनाशे तद्विनाश इति चेत्; न, पुनरपि तदन्तरावष्टम्भेन तस्योत्पत्तेः । धूमवत् किन्न तस्य निर्मूला निवृत्तिरिति चेत्; न, धूमेऽपि तदसिद्धेः, अकिञ्चित्करत्वेन तत्सन्तानावस्तुत्वापत्तेः निरूपितत्वात् । अनिवृत्तः किन्नोपलभ्यत इति चेत् ? न; सूक्ष्मरूपसमापत्तेः । सैव कथं स्थूलस्य विरोधादिति चेत् ? न; तथाऽपरिणामात् अग्निमतोऽनग्निमत्त्ववत् । ततः स्थितं बुद्धेर्देहानुत्पत्तिप्रसङ्ग इति । एतदेव स्पष्टयन्नाह—'अन्योऽन्यसंश्रयात्' इति । अन्यो मरणादूर्ध्वभावी संसारो बुद्धिविवर्तरूपः सोऽन्यसंश्रयादन्यः प्राच्य[1]एतत्संसारः तत्संश्रयात् कारणत्वेन तदाश्रयणात् । अथवा न भवत्युत्पत्तिर्यस्मात् असावनुत्पत्तिः देहश्चासावनुत्पत्तिः देहानुत्पत्तिः तत्प्रसङ्गोबुद्धेर्देहोऽनुत्पादक इति यावत् । तथा हि- न देहो बुद्धेरुत्पादको देहत्वात् मृतदेहवत् । [2]तद्विशेष एव तस्या उत्पादकस्तत्रैव तद्भावभावनियमान्न तन्मात्रम् अग्निविशेषवद्धूमस्य । न च तस्य तद्व्यभिचारस्तदयमप्रसङ्ग इति चेत्; कः पुनरसौ तस्य विशेषः ? प्राणापानपरिग्रह इति चेत्; सोऽपि कुतः ? तत एवेति चेत्, न, मृतेऽपि प्रसङ्गात् । प्रयत्नादिति चेत्, न; तस्य बोधप्रदेशपरिस्पन्दादपरस्याप्रतिपत्तेः । भवतु स एवेति चेत्; न; तत्परिग्रहे देहात्प्रयत्नोत्पत्तिस्ततश्च तत्परिग्रह इति परस्पराश्रयात् । तदेवाह—'अन्योऽन्यसंश्रयात्' इति । यदि वा देहस्यैवानुत्पत्तिस्तत्प्रसङ्गः कारणाभावात् । पृथिव्यादिः कारणमिति चेत्, न; सर्वस्य देहरूपत्वापत्तेः । परिणामविशेषवानेव स [3] तद्धेतुर्न सर्व इति चेत्, न, तद्विशेषस्यापि तत एव भावेऽतिप्रसङ्गस्यानिवृत्तेः । तत्रापि तदपरतद्विशेषकल्पनायामनवस्थानात् । अथ स्वभाव एवायं तस्य यदविशिष्टोऽपि कश्चिदेव तद्धेतुर्न सर्व इति चेत्, कार्यस्यैवायं स्वभावो यदहेतुकमपि तत् क्वचित् कदाचिदेव भवतीति किन्न कल्प्यते ? तथा तदप्रतिपत्तेरिति चेत्; न; अविशिष्टमपि किञ्चिदेव कारणमित्यस्याप्यप्रतिपत्तेः । कथं वा पृथिव्यादिहेतुकत्वे तस्य बुद्धौ तद्भावनियमः, अन्यथा बुद्धेरप्यन्यहेतुकत्व एव काये तन्नियमः स्यात् । न चासौ तत्र नास्ति, [4]बुद्ध्यपगमे गर्भगतस्यापि कायस्य गलनात् । अस्तु [5]बुद्धेरेव तदुत्पाद इति चेत्; न; अन्योऽन्यसंश्रयात्—बुद्धिभावे ततः कायः कायाच्च तद्भाव इति । न सहभाविन्या एव बुद्धेः कायस्तस्य प्राग्भाविन्या एव भावात्, सापि कायवत्येव तत्त्वात्तदुत्तरबुद्धिवदिति चेत्; तर्हि तत्कायस्यापि तथाविधप्राच्यबुद्धितो भावः, तत्राप्येवमिति सिद्धोऽनादिः संसारः, अनन्तश्च पूर्वभवान्त्यबुद्धेरैहिकाद्यकायस्य ऐहिकान्त्यबुद्धेरप्युत्तरभवाद्यकायस्य, तदन्त्यबुद्धेरपि तदुत्तरभवाद्यकायस्य प्रादुर्भावात् । एतदेवाह—

उत्तरोत्तरदेहस्य पूर्वपूर्वधियो भवः । इति ।

सुबोधमेतत् । उपसंहरन्नाह—

अत एव विरुद्धत्वादलं [प्रायस्तथा भवात्] ॥७२॥ इति ।

---

१ एव तत्सं- आ०,ब०, प० । २ देहविशेष एव । ३ पृथिव्यादिः । ४ बुद्ध्युपगमे आ०, ब०, प० । ५ बुद्धिरेव आ०, ब०, प० ।

अलं पर्याप्तं बुद्धेः कायकार्यत्वसाधनेन । कुतः ? विरुद्धत्वात्तत्साधनस्य । तदपि कुतः ? अत एव संसारानाद्यनन्तत्वविधेरेव ।

संसाराभावविध्यर्थात् कायकार्यत्वसाधनात् ।
संसार एव सिद्धोऽयं तदलं तेन साम्प्रतम् ॥१४२३॥

भवतु संसारस्यानादित्वं कार्यस्य कारणाव्यभिचारनियमात्, नानन्तत्वं कारणस्य कार्यवत्त्वनियमाभावात् प्रदीपादेश्चरमभाविनस्तद्विकलस्याप्युपलब्धेरिति चेत्; अत्राह—'प्रायस्तथा भवात्' इति । तथा पूर्ववत् पश्चादप्युत्तरोत्तरदेहस्य पूर्वपूर्वधियो भवः । कुतः ? भवात् जननात् । अयमर्थो यद्यैहिकमरणचित्तं न देहान्तरमनुसन्दधीत कारणस्य कार्यवत्त्वनियमाभावात् तदा पूर्वभवान्त्यचित्तमपि नैहिकभवाद्यकायमन्वियात् तस्यापि तत्कारणत्वात्, तथा तत्पूर्वभवान्त्यबुद्धावपि वक्तव्यमिति भव एव न भवेत् । अस्ति च भवः ततः पूर्ववत् पश्चादपि तदनुसन्धानं तस्या वक्तव्यं ततो दुर्भाषितमेतत्— "नावश्यं कारणानि कार्यवन्ति भवन्ति" [प्र० वा० स्ववृ० १।६] इति[1] । स्वयं च—

"चित्तान्तरानुसन्धाने को विरोधोऽन्त्यचेतसः" [प्र० वा० १।४७]

इति मरणचित्तस्य चित्तान्तरानुसन्धानं ब्रुवन्नेव **नावश्यमित्यादिकमप्यभिधत्त** इति सत्यं भङ्गुरप्रज्ञो धर्मकीर्तिः । यद्येवं न कस्यचिन्निर्मुक्तिः, [2]बुद्धिमात्रस्य देहानुसन्धाननियमादिति चेत् ; न, प्रायस्तदभ्युपगमात् । नहि सर्वस्य बुद्धितत्त्वस्य तन्नियमः; क्लेशकर्मानुविद्धस्यैव तत्प्रतिपत्तेः । [3]तदनुव्याघवैकल्ये तु बुद्धिर्बुद्धिमेवानुसन्धत्ते न देहमिति कथं निर्मुक्त्यभावः ? किञ्च[4], कायः कारणमात्रम्, तद्विशेषो वा बुद्धेः ? तन्मात्रमिति चेत् ; न तर्हि तन्निवर्तमानमपि कार्यस्य बुद्धेः सत्त्वं निवर्तयति; निवृत्तेऽपि सहकारिणि कार्यस्यावस्थितिप्रतिपत्तेः, यथा मृतेऽपि स्थपतौ प्रासादगोपुरादेः । इदमेवाह—

तन्न कारणमित्येव कार्यसत्तानिवर्तकम् ।
स्वनिवृत्तौ तथा तक्षो गोपुराट्टालकादिषु ॥७३॥ इति ।

[5]प्रतीतव्याख्यानमेतत् । भवतु परिणामित्वेन कारणविशेष एव स तस्या इति चेत् ; अत्राह—

युगपद्भिन्नरूपेण बहिरन्तश्च भासनात् ।
न तयोः परिणामोऽस्ति यथा गेहप्रदीपयोः ॥७४॥ इति ।

तयोर्बुद्धिकाययोः **परिणामो** विवर्तभावो बुद्धेः विवर्तिभावश्च कायस्य, स नास्ति । कुतः ? **युगपत्** एककालं **भिन्नरूपेण** अमूर्तिज्ञानादिमत्त्वेन बुद्धेः वर्णादिमत्त्वेन कायस्य **भासनात्** । नहि

---

१ "नाकारणानि तद्वन्ति वैकल्यप्रतिबन्धसम्भवात्"—प्र० वा० स्ववृ० । "नावश्यं कारणानि कार्यवन्ति भवन्तीति न्यायात्"— प्र० वार्तिकाल० २।२ । २ मुक्तिमात्र— ब०, प० । ३ "तदनुविद्धतावैकल्ये ।"— ता० टि० । ४ "कार्यकारणयोर्बुद्धिकाययोरित्याद्युक्तं पूर्वं चार्वाकेण तत्र विकल्पद्वयपूर्वकं दूषणमाह"— ता० टि० । ५ "तन्निवृत्तितः कार्याभावगतेर्नास्ति संसार इति चार्वाकेण प्रागुक्तमनुक्तमित्यर्थः ।"— ता० टि० ।

परिणामे[1] तथा भासनमुपपन्नं मृच्छिवकयोः परस्पराभेदेनैव प्रतिभासावलोकनात्। [2]पिण्डशिवकयोः क्रमेण रूपभेदेन प्रतिभासेऽपि परिणामसद्भावात् व्यभिचार इति चेत्, न; युगपद्ग्रहणेन तद्व्यवच्छेदात् बहिः शरीरमन्तर्बुद्धिरिति देशभेदेन प्रतिभासनाच्च न तयोः परिणामः। यथेत्यादिकमुभयत्रापि दृष्टान्तः। स्पष्टश्चायम्। अतश्च न तयोः परिणाम इत्याह—

५ **प्रमितेऽप्यप्रमेयत्वाद्विकृतेरविकारिणि[3]।**
[4]निर्हासातिशयाभावान्निर्हासातिशये धियः ॥७५॥
बलीयस्यबलीयस्त्वाद्विपरीते विपर्ययात्।
काये [तस्मान्न ते तस्य परिणामाः सुखादयः]॥७६॥ इति।

प्रमितेऽपि परेण प्रत्यक्षप्रतिपन्नेऽपि काये अप्रमेयत्वात् अपरिच्छेद्यत्वात् धियो बुद्धेः १० नासौ तस्य विवर्तः। न हि विवर्तिनः प्रतिपत्तौ विवर्तस्याप्रतिपत्तिः स्वर्णप्रतिपत्तौ रुचकादेरवश्यंतया प्रतिपत्तेः। अविकारिणि विकारविकले काये विकृतेर्विकरणाच्च। न ह्युपादानविकारमन्तरेण तदुपादेयस्य विकारः, सत्येव कुतश्चित्तन्तुविकारे पटविकारस्योपलम्भात्। न चैवमत्र, शास्त्रश्रवणादिना बुद्धिविकारस्य अविकृत एव शरीरे दर्शनात्। विकृतेऽपि तस्मिन् दृश्यत एव तद्विकारो मृष्टेताराहाराभ्यां देहस्यानुग्रहोपसङ्घातयोः बुद्धावपि प्रीतिपरितापयोरुपलम्भादिति चेत्; न; सौमनस्य- १५ दौर्मनस्याभ्यामेव तद्भावात्, तदभावे सतोरपि तयोस्तदप्रतिपत्तेः। विपर्ययदर्शनाच्च, दृश्यते हि तदनुगृहीतदेहस्यापि इष्टानवाप्तौ परितापः, तद्विपरीतस्य चाभ्यस्तशास्त्रहृदयनिर्णयादपरिमिता प्रीतिः। कथं तर्हि चक्षुरादिविकारे तद्विकारः? दृश्यते हि काचकामलादिना विकृते चक्षुरादौ बुद्धेरपि मन्दप्रतिभासविभ्रमादिरूपो विकार इति चेत्, न; तस्यापि चित्तविकारादेव शक्तिवैगुण्यलक्षणादुत्पत्तेः, प्रगुणशक्तिकत्वे चित्तस्य सत्यपि तद्विकारे सत्यस्वप्नवदवितथस्पष्टावभाससंवित्तेरप्रतिषेधात्। किमिदानीं २० विकृतेन चक्षुरादिनेति चेत्? न, तस्य तत्र कारणमात्रत्वात् अविकृतवत्। न हि तस्य[5] तन्मात्रत्वं प्रतिषिद्ध्यते, शरीरवदुपादानत्वस्यैव प्रतिक्षेपात्। अनुपादानत्वे कथं तन्निवृत्त्या बुद्धिनिवृत्तिरिति चेत्? न, तया गवाक्षनिवृत्तिवत् बुद्धे रूपाद्याभिमुख्यस्यैव विवर्तनान्न स्वरूपस्य, अन्यत्र वृत्तिदर्शनात्। अन्यैव सा बुद्धिरिति चेत्; कथमेवं प्रतिविषयं बुद्धिभेदे कर्कटीभक्षणादौ 'रूपादिकं युगपदहमेवानुभवामि' 'य एव रूपमुपलप्सि स एवाधुना स्पर्शादिकमुपलभे' इति च प्रतिसन्धानं सन्ता- २५ नान्तरवद्भेदे तदनुत्पत्तेः। तदपि विकल्पादेव कुतश्चिन्नेन्द्रियबुद्धीनामन्योऽन्यतादात्म्यात्, प्रतिभासभेदेन तदनुपपत्तेरिति चेत्; न, विकल्पकेऽपि तदविशेषात् परस्परविकल्पलक्षणरूपादिपरामर्शभेदाधिष्ठानत्वात्। तथापि तदेकत्वे तद्बुद्धीनामपि स्यादविशेषात्। ततो युक्तं विकृतेरविकारिणीति। तथा निर्हासातिशये शरीरस्य व्याध्यादिरसायनादिना क्षयपरिपोषणप्रकर्षे धियस्तदतिशयाभावाच्च नासौ तस्य परिणामः। न हि शरीरस्य निर्हासो बुद्धिमन्वेति पुष्टिर्वा, [6]कृशतरशरीराणामपि सातिश-

---

१ परिणामेन ब०, प०। २ खण्डशिव–ब०,प०। ३ तुलना—तत्त्वसं० का० १९३४। तत्त्वसं०पं० पृ० ५२७। ४ तुलना–प्र० वा० २।७३। अकलङ्क० टि०पृ० १६३। ५ चक्षुरादेः। ६ कृतश– ब०,प०,।

यप्रज्ञानां महाकायानामपि मतङ्गजादीनामल्पप्रज्ञानामवलोकनात्। **बलीयसि** च करिवराहादीनां काये तस्या **अबलीयस्त्वात्** **विपरीते** चाबलीयसि स्त्रीबालादीनां **विपर्ययात्** बलीयस्त्वात् स्थितिसारत्वात् न तस्यास्तद्विवर्तत्वम्। उपसंहरन्नाह—**तस्मान्न ते तस्य परिणामाः सुखादयः** इति। स्वपदव्याख्यातमेतत्। यत्रापि परिणामतद्भद्भावो घटकपालादौ तत्रापि **प्रमितेऽपीत्यादि** विद्यते ततो व्यभिचार इति चेत्; आह— ५

एतदत्र घटादीनां न तु जातुचिदीक्ष्यते। इति।

एतत् प्रमितेऽपीत्यादि अत्र लोके **घटादीनां** परिणामतद्भद्भावेन प्रसिद्धानां **न तु** नैव **जातुचित्** कदाचित् **ईक्ष्यते** दृश्यते। ततो न व्यभिचार इति भावः।

अथ गुणदूषणमत्राप्यतिदिशन्नाह—

तुल्यश्च गुणपक्षेण [तत्तथा परिणामतः] ॥७७॥ इति। १०

सदृशश्चायं **गुणपक्षेण** परिणामपक्षस्ततो यथा तत्रोक्तं 'न हि ज्ञानात्मना' इत्यादि तथा अत्रापि वक्तव्यम्—'न हि ज्ञानात्मना क्वचित् शरीरग्रहणं येन तद्विवर्तः प्रकल्प्यताम्।' इति। निगमयति—'तत्तथाऽपरिणामतः' इति। **तत्** तस्मात् **अपरिणामतो** धियः कायविवर्तत्वाभावात् सा **तथा** तेन 'संसरेत्' इत्यादिना प्रकारेण भवति। किञ्च, परलोकिनमात्मानमनिच्छतश्चार्वाकस्य कुत इदं संसारवैचित्र्यम्—कस्यचिद्विकृतमिन्द्रियं दुर्भगसंस्थानं संहननं दुःखप्रचुरं जीवनम् अन्यस्याविकलं चक्षुरादि मनोनयनाभिरामं शरीरसंस्थानमभिनन्दनीयञ्च जीवनम् अपरस्य तदुभयप्रकारशबलमिति? न चेदं दृष्टादेव कारणात्, सर्वत्र व्यभिचारात् इष्टाहारविहारसेवाकृष्यादौ समानेऽपि क्वचिदिन्द्रियविकारादेरन्यत्र तद्विपर्ययस्य च प्रतिपत्तेः। स्वभावत एव [1]सत्त्वज्ञेयत्वादेर्जलबुद्बुदवदिति चेत्, कस्यासौ स्वभावः? तद्वैचित्र्यस्येति चेत्, न; अनुत्पन्नस्य तदभावात्। उत्पन्नस्येति चेत्; न; उत्पत्तौ स्वभावस्ततश्चोत्पत्तिरिति परस्पराश्रयात्। तत्कारणस्य पृथिव्यादेरिति चेत्; न, ततोऽप्येकस्वभावादेकप्रकारस्यैव निकायस्योत्पत्तिप्रसङ्गात्। न चैवम्, वरिश्र(षा,स्रावणाशुद्धाद[2]प्यम्भसः परिवासितात्कस्यचिदा[3]रक्तशिरसोऽपरस्य पीतमस्तकस्यान्यस्याल्पवपुषोऽपरस्य विपुलविग्रहस्य जीवनिवहस्य प्रादुर्भावप्रतिपत्तेः। न ह्येकस्वभावात् पद्मादिबीजाद्विचित्रस्तत्प्रसवो दृष्टः। नापि तत्र स्वभावभेदः; प्रत्यक्षतोऽप्रतिपत्तेः। तद्वैचित्र्यादेवानुमीयत इति चेत्; न; तस्यापि सम्भूय[4] इति कार्यमुपयोगे तदाकारवर्णसाङ्कर्यस्यावुद्धिगोचरस्य प्रसङ्गात्। कस्यचित्कचिदव्यापारे नियामकं वक्तव्यं तदन्तरेण तदसम्भवात्। तद्भत एवान्यस्तद्भेदो नियामक इति चेत्, न; तत्राप्यन्यतस्तद्भेदान्नियमकल्पनायामनवस्थानदोषात्। नायं दोषः; पूर्वपूर्वस्मादुत्तरोत्तरस्य नियमादनादित्वात् तत्प्रबन्धस्येति चेत्; आगतं तर्हि तद्विषयस्य जीवस्याप्यनादित्वं विषयिणस्तस्य तदभावेऽनुपपत्तेरिति सिद्धो नः सिद्धान्तः- जीवस्य परलोकिनोऽप्रतिक्षेपात्, तस्य च कर्मण एव तद्वैचित्र्यात्, तदनुबन्धिनः

१ सत्त्वज्ञेयत्वादेः' इति पदं सम्पातादायातमिति भाति। २ परिश्रवणाशु— आ०, व०, प०। वर्षापतितात् शुद्धाज्जलात्। ३ तुलना— "तथाहि रक्तशिरसः पीतकायादयः परे। जलादिप्राणिनो दृष्टाः स आकारः कुतो भवेत्॥" —प्र० वार्तिकाल० १।३७। ४ मिलित्वा कार्ये प्रत्युपयोगे।

पृथिव्यादिस्वभावभेदप्रबन्धस्यैव कर्मत्वेनास्माभिरभिधानात् । एतदेवाह —

अक्षादीनां विकारोऽयमात्मकर्मफलं भवेत् ।
अन्यथा नियमायोगात् [प्रतीतेरपलापतः] ॥७८॥ इति ।

अक्षाणामिन्द्रियाणाम् आदिशब्दः पाणिपादादीनां विकारो मन्दाविलकुणिखञ्जादिः अयं प्रतीयमानः । उपलक्षितमिदं तेन लाभालाभसुखदुःखादिरपि आत्मनो यत् कर्म तस्य फलं कार्यं भवेत् । अन्यथा तत्फलत्वाभावप्रकारेण नियमस्य कस्यचिदेव कश्चित् तद्विकारादिः न सर्वस्येत्यवधारणस्य अयोगात् सर्वस्यापि तत्प्राप्तेः ।

अत्रैव हेत्वन्तरमाह— 'प्रतीतेरपलापतः' इति । प्रतीतिः कर्मविषया आनुमानिकी बुद्धिः तस्या अपलापतोऽपह्नवाच्च स तत्फलमिति सम्बन्धः । तथाहि[1] तदहर्जातस्य तद्विकारादिः जीवशरीरव्यतिरिक्तजीवसम्बन्ध(द्ध)द्रव्यान्तरपूर्वकः तत्त्वात् विषमाहाराद्युपयोगजनिततद्विकारवत् । न मन्त्रादिनिमित्तेन तेन व्यभिचारः, तस्यापि द्रव्यान्तरसम्बन्धे सत्येवोपपत्तेः, अन्यथा न क्वचित्तद्व्यभिचारः स्यात् । न चैवं मन्त्रादेर्वैयर्थ्यम्, तस्य तत्सहकारित्वात्[2] कृष्यादिवत् । यच्च तद् द्रव्यान्तरं तत्कर्म शुभमशुभञ्चेति । कथमियमानुमानिकी तत्प्रतीतिः स्वाभाविकतद्विकारवादिभिर्नापलप्येत ? न च तँदपलापे क्षणमपि जीवनम्, पृथिव्यादेरप्यव्यवस्थितिप्रसङ्गात् । ननु यदि तस्य पृथिव्यादिहेतुत्वं तँदोक्तनीत्या कर्मफलत्वम् । तदेव तु मा भूदिति चेत्; किन्निमित्तं तर्हि तत् स्यात्, कार्यस्यानिमित्तस्याभावात् ? कार्यमपि तन्नेति चेत् ; कथं देशादिनियमः ? स्वभावादेव मयूरचित्रादिवदिति चेत् ; न, तस्यापि मयूरादिहेतोरेव भावात्, तदन्वयव्यतिरेकनियमात् , तल्लक्षणत्वादन्यत्रापि हेतुफलभावस्य । कथं पुनश्चित्रकारादिनिमित्तं तत् अन्यत इति चेत् ? न, वैलक्षण्यात् । विलक्षणं हि चित्रकारादिनिमित्तात् ततो मयूरचित्रादि, तत् कथं तस्य तदन्यतो भावः ? स्वाभाविकत्वे वा चैतन्यस्यापि निषिद्धमेतत्—"तेभ्यश्चैतन्यम्" [ ] इति । तस्मात् स्वभावकल्पनायां सामर्थ्यस्य युक्तिरूपस्याभावात् कर्मफलमेव तद्वैचित्र्यम् । तदेवाह—

कल्पनायामसामर्थ्यात् इति ।

तदेवं तदहर्जातस्य परलोकित्वे कर्मसिद्ध्या सिद्धे यत् सिद्धं तदाह—

ततस्तद्विकृते ऋते ।
पारम्पर्येण सात्म्याच्च नास्ति विज्ञानविक्रिया ॥७९॥ इति ।

ततस्तस्माद्विज्ञानस्य रूपादिविषयस्य विक्रिया मन्दाविलत्वादिः, उपलक्षणमिदं तेन प्रीतिपरितापादिश्च नास्ति न भवति । कुतः ? तद्विकृतेः तस्यात्मनो विकृतेर्विकारात् दौर्मनस्यादिलक्षणात् ऋते विना । तस्यां तु भवति । तस्याः कर्मफलत्वात् कथं तद्विक्रियातो भाव इति चेत् ? उत्तरम्—**पारम्पर्येण** इति । तात्पर्यमत्र—कर्मापि तद्विकृतेरेव विज्ञानविक्रियादिनिबन्धनत्वात् उपयुक्त-

---

१ तथापि आ०, ब०, प० । २ –त् स्वकृप्या– आ०, ब०, प० । ३ अनुमानापलापे । ४ तयोक्त– प० । तथोक्त– ब०, आ० । ५ धर्मसि– ता० ।

मदिरादिवत् । प्रसिद्धं हि मदिरादेस्तदभिलाषादिपुरुषविकारोपनिबन्धनत्वमिति न वैकल्यं साध्यस्य । नापि साधनस्य; ततो विज्ञानविकारादिप्रतिपत्तेः । ततः पारम्पर्येण तद्विकृतेरेव सा इति, ततः सिद्धा तदहर्जातस्य तस्य पौर्वभविकी विकृतिः इह तदप्रतिपत्तेरिति । न केवलं पारम्पर्यात् अपि तु साक्षाच्च अव्यवधानाच्च । तस्या ऋते न तद्विक्रिया । शोकविषादादेः साक्षादपि तस्याः प्रतिपत्तेः तदापि कर्मभावात् । ततः सा किन्नेति चेत् ? क एवमाह—नेति, शोकादेरपि कर्मसहकारिण एवं भावात् । तन्न शरीरपरतन्त्रोऽपि जीवः तदुपरमेऽप्यवस्थानात् तदहर्जातवत् । कुतो वा तस्य तत्परतन्त्रत्वम् ? तद्धेतुत्वादिति चेत्; न; ततः केवलादुत्पत्तौ मृतेऽपि प्रसङ्गात् । इन्द्रियसहायादिति चेत्, इन्द्रियाणामपि समुदायेन तत्सहायत्वम्, प्रत्येकं वा ? प्रथमविकल्पं निराकुर्वन्नाह—

कारणं नाक्षसङ्घातस्तत्प्रत्येकं विना भवात् ।
विकल्पानां [विशेषाच्च तत्राद्यति विरोधतः] ॥८०॥ इति ।

अक्षाणां चक्षुरादीनां सङ्घातः समुदायः शरीरसहकारित्वेन न कारणम् । केषाम् ? विकल्पानां मनोविज्ञानानाम् । तेषामेवान्वितक्रमाणां जीवत्वाज्जीवस्येति गम्यते । कुतो न कारणम् ? तत्प्रत्येकं तद् अक्षं प्रत्येकम् एकं विना अन्तरेण भवात् उत्पत्तेर्विकल्पानाम् । नहि सङ्घातकार्यं तदभावे युक्तम् । न च सङ्घातिनामन्यतमापाये सङ्घातः, तस्य तत्साकल्यरूपत्वात् । भवन्ति च प्रत्येकं तदभावेऽपि विकल्पाः, अन्यथा अन्धादीनां मरणापत्तेः । भवतु प्रत्येकमेव तत् तेषां तत्सहायतया कारणमिति चेत्, तदपि न नियतविषयतया, तदप्रतिपत्तेः । न हि नियतविषया विकल्पाः प्रतीयन्ते, रूपादिपञ्चकपरामर्शात्मतयैव तेषां प्रतिपत्तेः । तादृशामेव तथा तत् कारणमिति चेत्; अत्राह—'विशेषाच्च' इति । अत्र 'तत्प्रत्येकम्' इति 'न कारणम्' इति चानुवर्तते । ततोऽयमर्थः—तदिन्द्रियं प्रत्येकं तेषां न कारणम् । कुतः ? विशेषात् । शेषस्याभावो विशेषम्, अर्थाभावेऽव्ययीभावः, तस्मात्, शेषेन्द्रियाभावप्रसङ्गादिति यावत् । तथाहि —

एकस्मादेव चेदक्षात् रूपादिविषया इमे ।
विकल्पा व्यर्थमेव स्यात् तदन्याक्षप्रकल्पनम् ॥१४२४॥
न चैवं कश्चिदन्धादिर्जीवो भवितुमर्हति ।
चशब्देनैतदेवाह शास्त्रकारः परोत्तरम् ॥१४२५॥

स्यान्मतम्—अक्षान्तरं तेषां तत्तद्विषयाभिमुख्यार्थमतो व्यर्थमिति; तन्न; तस्यापि तदनर्थान्तरत्वेन प्रकृतादेवाक्षादुपपत्तेः, अन्यथा विवक्षिताभिमुख्यमपि ततो न भवेत् । भवतु मनोमात्रमेव तत इति चेत्; न, विषयाभिमुख्यविकलस्य तस्याप्रतिपत्तेः । तन्न कायकार्यत्वं तेषामिति न युक्तमेतत्—"मदशक्तिवद्विज्ञानम्" [ ] इति । मदशक्तौ गुडादिकार्यत्ववद्विज्ञाने शरीरकार्यत्वस्याभावात् । कथं पुनः कायेन सह अतत्परतन्त्र-

---

१ —रादावपि प्र— आ०, ब०, प० । २ पूर्वभाविक— आ०, ब०, प० । ३ भूतेन आ०, ब०, प० । ४ एव तन्न ता० । ५ जीवस्य । ६ जीवहेतुत्वात् शरीरस्य । ७ इन्द्रियाभावेऽपि । ८ इन्द्रियम् । ९ विकल्पानाम् । १० इन्द्रियम् । ११ तावदक्ष— आ०, ब०, प० । १२ तद्वि— प० ।

स्यावस्थानमिति चेत् ? न; उक्तोत्तरत्वात्–'आत्मकर्मफलं भवेत्' इति । न च पारतन्त्र्यादेव सहावस्थानम् पृथिव्यादिषु चक्षुरादीनां तदभावेऽपि तद्भावात् । उपसंहरति–'तद्वति विरोधतः' इति । तत् तस्मात् तद्वति अक्षवति शरीरे निमित्ते विरोधतो विकल्पोत्पत्तेर्विरोधात् '[1]तद्विकृतेः' इति सम्बन्धनीयम् । अथवा विकल्पानां विशेषाद् अभियोगोपनीतादतिशयात् । चेति भावनायाम् । तेषामक्षसङ्घातः तदक्षं प्रत्येकं वा न कारणम् । सोऽपि तद्विशेषादेवेति चेत्, आह–'तत्तद्वति' इति । 'विना भवात्' इत्येतदत्र द्रष्टव्यम् 'विशेषात्' इति च । तदयमर्थः–तच्चाक्षं तद्वच्च शरीरं तत्र विशेषात् विना भवात् तेषाम् , विशेषस्येति विभक्तिविकारेण सम्बन्धः । न हि तद्विशेषोत्पत्तौ अक्षे शरीरे वा विशेषनियमो प्रच्युतप्राच्याकारेऽपि तस्मिंस्तदुपलम्भात् । भवत्वेवं तथापि तस्य तदेव कारणमिति चेत्; न; विरोधतः । विरुद्धं हीदम्–अविशिष्टेऽपि कारणे कार्यं विशिष्यत इति, विशिष्टादेव तन्त्वादेः पटादिप्रतिपत्तेः । ततः सजातीयादेवाभियोगसंस्कृतात्तस्योत्पाद इति युक्तमेतत्–'तद्विकृतेः' इत्यादि ।

अत्रैव हेत्वन्तरमाह–

जातिस्मराणां संवादादपि [संस्कारसंस्थितेः] । इति ।

जातेः पूर्वभवस्य स्मर्तारो **जातिस्मराः** तेषां **संवादः** अविप्रतिसारः तस्मादपि, न केवलं पूर्वस्मादेव हेतोः तद्विकृतेरित्यादि (देः)। जातिस्मरत्वे कारणमाह–'**संस्कारसंस्थितेः**' इति । संस्कारस्य पौर्वभविकानुभवनिबन्धनस्य स्मरणहेतोः धारणाज्ञानस्येहापि जन्मनि सम्यगवैपरीत्येन **स्थितेः** । जातिस्मरा एव नोपलभ्यन्ते तत्कथं तेषां संवाद इति चेत् ? न; प्राग्भावीयस्य बन्धुभृत्यादेर्निक्षेपादेश्च कैश्चिदपि दर्शनात् , तदहर्जातस्य च जातिस्मरत्वाभावे स्तनादौ प्रवृत्तेरनुपपत्तेः ।

तदापि[2] तदभावकल्पनायां दूषणमाह–

अन्यथा कल्पयन् लोकमतिक्रामति केवलम् ॥८१॥ इति ।

अन्यथा अन्यथात्वं भावप्रधानत्वान्निर्देशस्य, तच्च जातिस्मराणामजातिस्मरत्वमेव तत्कल्पयन् प्रतीत्यपलापेन[3] संपादयन् चार्वाको **लोकं** जीवनिकायं·भूतचतुष्टयं वा **अतिक्रामति** अपह्नुते **केवलं** नापरं करोति । नहि तदपलापः क्वचिदेव शक्यनियमो यतो जातिस्मरवन्न लोकेऽपि स्यात्, ततः तस्याप्यतिक्रमात् लोकायतत्वमस्य नश्यति, लोकबुद्ध्यनुगम एवं तत्त्वोपपत्तेरिति मन्यते । ततो लोकवज्जातिस्मराणामपि प्रतीतिभावेनानतिक्रमात् सिद्धस्तत्संवादः । प्रतीतिश्च तेषामनुमानात्, तथाहि—तदहर्जातस्य स्तनादौ प्रवृत्तिः तदभिलाषात्, सापि स्तनादेरभिलषितार्थनियमितत्ववितर्कात्, स च तेनायं समान इति प्रत्यभिज्ञानात्, तदपि स्मरणात्, तदप्यनुभवात्, प्रवृत्त्यादित्वात् [5]अवलग्नप्रवृत्त्यादिवत् । न चेहजन्मनि तदहर्जातेन स्तनादिरपरस्तथाभूतो दृष्टोऽस्ति यतोऽनुस्मरणादिक्रमेण तत्सदृशे प्रवृत्तिः । ततः पौर्वभविकस्यैव तस्य तेन स्मरणमिति कथन्न जातिस्मराणां संवादः ? एतदेवाह–

---

१ तत्प्रकृते–आ०,ब०,प०। २ तथापि आ०,ब०,प० । ३संवादवच्चा– प०। ४ एवात– आ०,ब०,प०। ५ मध्यावस्थाकालीनप्रवृत्तिवत्। "मध्यमञ्चावलग्नञ्च मध्योऽस्त्री द्वौ परौ त्रयोः ।–इत्यमरः ।"–ता०टि० ।

नाऽस्मृतेरभिलाषोऽस्ति न विना सापि दर्शनात् ।
तद्धि जन्मान्तरान्न [अयं जातमात्रेऽपि लक्ष्यते] ॥८२॥ इति ।

अस्मृतेः स्मरणाभावात् उपलक्षणमिदं तेनाप्रत्यभिज्ञानानूहाच्चेति द्रष्टव्यम् । ततो **नाभिलाषोऽस्ति** स्मृत्यादेरेवास्तीत्यर्थः । **सापि** स्मृतिर्न **विना दर्शनात्** दर्शनादेवास्ति । **तद्धि** तदपि दर्शनं **जन्मान्तरात्** न विना जन्मान्तरादेव पूर्वभवभाविनश्चक्षुरादेर्भवति । ततोऽभिलाषादेर्दर्शनपर्यन्तस्य तर्कादेरनुमितिरविनाभावनियमनिश्चयात् अवलग्नदशावदिति सिद्धो जातिस्मराणां संवाद इति मन्यते । तदहर्जातस्याभिलाष एव नास्ति तत्कुतस्तदनुमितिरिति चेत् ? अत्राह—'**अयं जातमात्रेऽपि लक्ष्यते**' इति । जात एव **जातमात्रः** तस्मिन्नपि न केवलं चिरजीविते **अयमभिलाषो लक्ष्यते** प्रवृत्तेर्लिङ्गात्प्रतीयते,तस्याः तत्पूर्वकत्वेनात्मनि प्रतिपत्तेः ततोऽस्ति तदनुमानमिति भावः । सत्यं लक्ष्यते, स तु न पौर्वभविकादनुभवाद्[1] अपि तु गर्भभाविन एव । तदाह—

गर्भे रसविशेषाणां ग्रहणादिति कश्चन । इति ।

'**कश्चन**' इत्येतद्वक्ष्यमाणात् '**प्रवर्तितः**' इत्यतः परं द्रष्टव्यम्, तत्रैव च व्याख्येयम् । इतरद्व्याख्यायते—**गर्भस्तदाधारत्वात्** गर्भाशयस्तस्मिन् **रसविशेषाणां** माधुर्यादीनां **ग्रहणाद्** अनुभवान्न पूर्वभवे 'जातमात्रेऽयं क्वचिल्लक्ष्यते' इति सम्बन्धः । तत्रापि[3] तद्ग्रहणमभिलाषादेव[2] स च प्राग्भवीयादनुभवादिति सिद्धयत्येव[4] सँ इति चेत् ; अत्राह—

तदादावभिलाषेण विना जातु यदृच्छया ॥८३॥ इति ।

तद् रसविशेषाणां ग्रहणम् **आदौ** गर्भगतस्य प्रथमसमये **अभिलाषेण** काङ्क्षया **विना** 'जातु' इत्यवधारणेति निपातत्वात् । कथं तर्हि तद्ग्रहणम् ? **यदृच्छया** काकतालीयेन मात्रा भुक्तानां तेषां प्रतिस्रोतः स्वत एव प्रवेशादिति यावत् । ततः परं कथमभिलाष इति चेत् ? आह—

तत्संस्कारान्वयेच्छत्वाद्भूयो भूयः प्रवर्तितः[7] । इति ।

तस्य तद्ग्रहणस्य संस्कारस्तत्कृता धारणा स चान्वयोऽनुगमः स च संस्कारस्यैव अन्यस्याश्रुतेः, तस्मिन् सति ईक्षत्वमवेक्षितृत्वं **तत्संस्कारान्वयेक्षत्वं** तस्मात् **भूयो भूयः** पुनः पुनः **प्रवर्तितो**ऽभिलाषः प्रवृत्तिमानिति यावत् । प्रवर्त्तशब्दात् प्रवृत्तिवाचिनः "**तारकादिभ्य इँतः**" [शाकटा० ३।३।१।४] इति प्रवर्तित इति रूपात् । एतदुक्तं भवति—गर्भगतस्य प्रथमं यदृच्छया तद्ग्रहणं पुनस्तत्संस्कारात् भूयो भूयस्तत्राभिलाषो गर्भनिष्क्रान्तस्य तु तदन्वये सति विषयदर्शित्वादनुस्मरणादिक्रमेणेतीत्येवं कश्चन चार्वाकः । तत्रोत्तरमाह—

कोशपानं विधेयं [न समं भूयस्तथा दृशः] ॥८४॥ इति ।

कोशस्तन्निर्लुलितं[8] जलं तस्य **पानं विधेयं** विधातव्यम्, अस्यार्थस्य प्रत्यक्षतोऽप्रतिपत्तेः ।

१—नुमानाद्—आ०, ब०, प० । २ गर्भेऽपि । ३ अभिलाषः । ४ प्राग्भवः । ५ ज्ञात्वावधारणेति नि— आ०, ब०, प० । ६ प्रवर्त्तते आ०, ब०, प० । ७ इति प्रेतप्रवर्तित आ०, ब०, प० । ८ —तं तस्य आ०, ब०, प० ।

न हि गर्भगतः प्रत्यक्षादेवं प्रत्येति 'यदृच्छया मे रसादिग्रहणम्' इति कोशपानस्यैवात्रापि शरणत्वात् मात्रादेरेवमन्यवहारात्। न च प्रत्यक्षाभावेऽनुमानम्; तस्य तत्पूर्वकत्वात्। भवतोऽपि समानमिदं गर्भगतस्यापि पौर्वभविकादेवानुभवादेः स्मरणादिरित्यत्रापि प्रमाणाभावादिति चेत्; आह—'न समं भूयस्तथादृशः' इति। न समं न सदृशं कोशपानं विधेयमिति। कुतः? भूयः प्राचुर्येण तथा तेन 'दर्शनात् संस्कारस्ततः स्मृतिः' इत्यादिना प्रकारेण दृशो दर्शनादवलग्नवेलायाम्। तदुक्तम्—

"अक्षज्ञानैरनुस्मृत्य प्रत्यभिज्ञाय चिन्तयन्।
आभिमुख्येन तद्भेदान् विनिश्चित्य प्रवर्तते॥" [सिद्धिवि०परि०१] इति।

ततः प्रागपि तथैवासौ प्रतिपत्तव्यः, अन्यथा, हेतुफलभावस्य[1] क्वचिदपि निर्णयनियमाभावात् कथं जलादावपि पानाद्यर्थिनां प्रवृत्तिः? कथं वा शुभाशुभकर्माभावनिर्णयेन [2]निरारेकं वैरिवधाभिलाषिणां नास्तिकशास्त्रोपादानं यत इदं सूक्तं भवेत्—

"इदममरगुरुर्जगौ महात्मा सुरपतये किल वृत्रनाशनाय।" [ ] इति।

ततः स्थितं भूयोदर्शनबलाद्गर्भगतस्यापि स्मरणादिरनुभवादेरेवेति। ततो न युक्तं शौल्लकदृष्टान्तेन तस्यानुभवादेरन्यतोऽपि भाव इति, चैतन्यस्यापि कायादिवान्यतोऽपि भावप्रसङ्गात्। शाल्लकस्य च शाल्लकेतरजन्मनो वैलक्षण्यात् स्मरणादेश्च तदभावात्।

पुनरपि गर्भं इत्यादि निराकुर्वन्नाह—

रूपादिदर्शनाभावात् तत्सम्बन्धस्मृतिः कथम्। इति;

रूपं स्तनादिगतमादिर्यस्य तत्कार्यस्य क्षीरादेस्तस्य दर्शनं तदभावो गर्भे तस्मात्। तयो रूपतत्कार्ययोः **सम्बन्धो**ऽविनाभावस्तस्य **स्मृतिः** स्मरणं गर्भनिष्क्रान्तस्य **कथम्**? न कथञ्चित्। न हि दृष्टेऽपि स्तनादौ प्रागदृष्टस्य तस्य स्मरणम्, नालिकेरद्वीपादागतस्य धूमे पावकसम्बन्धवत्। सापि माभूदिति चेत्; न; प्रवृत्तिदर्शनात्, गर्भेऽपि रूपादिदर्शनमस्तीति चेत्, न; तत्र स्तनादेरभावात्, नयनादिव्यापाराभावाच्च। तदेवाह—

नावश्यं चक्षुरादीनां सर्वत्रोन्मीलनादयः॥८५॥ इति।

चक्षुरादीनामादिपदात् जिह्वादीनाम् **उन्मीलनादय** आदिशब्दात् उच्चर्वणादयश्च **नावश्यं** न नियमेन। क? **सर्वत्र** सर्वस्मिन् जराव्याधिपरिपिहिते प्राणिनि तत्कथं गर्भे रूपादिदर्शनं यतः पश्चात्तत्सम्बन्धस्मरणम्? अस्ति च बालकस्य स्तनादिदर्शनात् तत्र रसविशेषार्थितया प्रवृत्तिः, अतोऽवगम्यते जन्मान्तरे तस्य तद्दर्शनमिति। पुनरपि तद्विकृतेरित्यादि समर्थयितुमाह—

तथा रागादयो दृष्टाः सङ्कल्पाद्यविनाभुवः। इति।

रागः शरीरेन्द्रियादावभिरतिरादिर्येषां द्वेषादीनां ते **रागादयो दृष्टाः** प्रवृत्तिविशेषतोऽवगताः 'जातमात्रेऽपि' इति सम्बन्धः। कीदृशाः? सङ्कल्पो ममेदमहमिदमिति चाभिनिवेश आदिर्यस्य

१—लस्य ता०। २ निराकारैकं आ०, ब०, प०। निःशङ्कम्। ३ कन्दः।

रागाद्यभ्यासादेः, तेन विना न भवन्तीति सङ्कल्पाद्यविनाभुवः। ततो न युक्तमेतत्[1]–"कफप्रकृते[2] रागः तन्मूलश्चानुनयादयः। पित्तप्रकृतेर्द्वेषः तदाश्रयाश्चासूयादयः, वातप्रकृतेर्मोहः तन्निमित्ताश्च चापल्यादयः।" [ ] इति ; तेषां[3] सङ्कल्पादिनिबन्धनतयैवावलग्नवेलायां प्रतिपत्तेः। व्यभिचाराच्च कफप्रकृतावपि द्वेषादीनामुपलम्भात्। अथ तत्प्रकृतेरन्यापि प्रकृतिरस्ति तासां साङ्कर्यादिति, तन्न; द्वेषादिवत् सर्वस्यापि प्रकृत्यन्तरकार्यस्य तत्प्रकृतौ प्रसङ्गात्। न चैवम्, कस्यचिदेव दर्शनात्। दृष्टस्यैव तदन्तरं कारणं नान्यस्येति चेत्, तर्हि सत्त्वान्तरेऽपि कुतस्तद्भवेत्? तत एवेति चेत्, प्रकृतेऽपि स्यात् अविशेषात्। अन्यत इति चेत्; सिद्धो व्यभिचारः–पित्तादेर्दृष्टस्यापि तस्यान्यतो भावात्। तन्न तत्साङ्कर्यात् तत्प्रकृतौ द्वेषादिः। अथ सोऽपि तत्प्रकृतेरेव कार्यम्; व्यर्थं तर्हि प्रकृत्यन्तरकल्पनं कार्याभावात्। तदन्तरस्यापि तदेव सर्वं कार्यमिति चेत्; एवमपि तन्निर्ह्रासातिशयसाम्ये तत्प्रकृतेः सर्वस्यापि समान एव रागादिः प्राप्नुयात्। न हि कारणस्याविशेषे विशेषः कार्यस्य, तस्यातद्धेतुकत्वापत्तेः। न चैवम्, सत्यपि तत्साम्ये क्वचिद्रागादेरुत्कर्षस्यान्यत्रापकर्षस्य च तारतम्येन प्रतीतेः। नायं दोषः, तत्साम्येऽपि स्वहेतुबलनिबद्धात् परिणतिविशेषात्तदुपपत्तेरिति चेत्; न; तस्यापि दृश्यस्य तदव्यभिचारात्। न ह्यसौ रागादौ क्वचिदेव नियतो द्वेषादेरपि तत एवोपलम्भात्। ततो द्वेषादिवद्विलक्षणपरिणामजन्यस्यापि तत एवोपपत्तेः कथं[4] तस्मान्नैव तत्प्राप्तिर्भवेत्? [5]अथ अदृश्य एव तद्विशेषो रागादिवैषम्यहेतुः; स तर्हि सङ्कल्पादावेव कार्यविशेषादुन्नेतव्यः तस्यैव तद्धेतुतया दृष्टेन कफादौ विपर्ययात्, अन्यथा पर्वतादौ धूमहेतुरपि विशेषः क्वचिदन्यत्रैवावकल्प्येत इति न पावक इति न क्वचिन्नियतो हेतुफलभावः। तन्न तद्विशेषकल्पनमुपपन्नम्। तदभावे च न कफादे रागादिविशेषस्तदविशेषात्। अविशिष्टादपि कारणात् कार्यवैषम्यं दृश्यत एव यथा पृथिव्यादे[6] रूपसंस्थानादिभेदः शरीरस्येति चेत्, न, तत्रापि तथैव चोद्यात्-कथं तदविशेषे तद्भेद इति? तव कस्मान्न भवतीति चेत्? न, अदृष्टविशेषसहायात् [7]ततस्तदुपगमात्। अत एवोक्तम्[8]–

"अक्षादीनां विकारोऽयमात्मकर्मफलं भवेत्।" इति।

धर्मकीर्तिनाप्युक्तम्–

"व्यभिचारान्न वातादिधर्मः प्रकृतिसङ्करात्।
अदोषश्चेत्तदन्येऽपि धर्मः किं तस्य नेष्यते[9]॥
न सर्वधर्मः सर्वेषां समरागप्रसङ्गतः।

---

१ "चार्वाकवचः" - ता० टि०। तुलना–"वातप्रकृतेर्मोहः, पित्तप्रकृतेर्द्वेषः, कफप्रकृते राग इति"– प्र० वार्तिकाल० १।१४। "केचिदाहुः–श्लेष्मणः सकाशाद्रागः पित्ताद् द्वेषो वातान्मोह इति"– तत्त्वसं० पं० पृ० ५४८। २ 'कफः प्रकृतिः स्वभावो यस्य गर्भादिमरणपर्यन्तस्यात्मनः"– ता० टि०। ३ "रागादीनाम्"– ता० टि०। ४ –तुवत्त्वाप– आ०, व०, प०। ५ कथन्न साम्येव त– आ०,व०, प०। ६ अन्यथा दृश्यत एव आ०, व०, प०। ७ –वे न क– आ०,व०, प०। ८ –व्यादिरू– आ०, व०, प०। ९ पृथिव्यादेः। १० न्यायवि० श्लो० २४६। ११ नेच्छते आ०, व०, प०।

रूपादिवददोषश्चेत् तुल्यं तत्रापि चोदनम् ॥
आधिपत्यं विशिष्टानां यदि तत्र न कर्मणाम् ।" [प्र०वा०१।१५०-५२]

इत्यलं निर्बन्धेन । ततः सङ्कल्पादेरेव रागादयस्ते च तत्कृतप्रवृत्तिविशेषादवधृतसन्निधानाः तद्धेतुं सङ्कल्पादिकमवगमयन्ति प्राग्भवीयमेव इहभवे तस्य तदभावादित्युपपन्नमेतत्-तद्विकृतेरित्यादि । यदि पुनर्भवान्तरानुभूतस्य स्मरणं किन्न[1] सर्वस्य ? किं वा सामान्यवन्न विशेषस्यापीति चेत् ? भवत्येव[2] यदि तादृशसंस्कारः, केषाञ्चित् स्वजात्यभिजनादिविशेषेऽपि तत्प्रतिपत्तेः । सामान्यमात्रे तु संस्कारे तस्यैव स्मरणं न विशेषादेः । तत्रापि तदभावे न कस्यचित् । कथं तर्हि सामान्यस्मरणाद्विशेषे प्रवृत्तिरिति चेत् ? न; तस्य तस्मादव्यतिरेकात् दृष्टत्वाच्च । तदेवाह—

तदाहारादिसामान्यस्मृतितद्विप्रमोषयोः ॥८६॥
भावोऽभावश्च वृत्तीनां भेदेष्विह च दृश्यते । इति

तच्च तत्प्रागनुभूतमाहारादि, आदिशब्दात् स्तनादि च, तदेवेह सामान्यं तस्य स्मृतिश्च संस्कारात्, तस्याः स्मृतेर्विप्रमोषश्चानुत्पादस्तदभावात् **तदाहारादिसामान्यस्मृतितद्विप्रमोषौ** तयोः सतोर्यथाक्रमं **वृत्तीनां** विषयोपसर्पणादीनां **भावः** स्मृतौ **अभावश्च** तद्विप्रमोषे स च न केवलं बालवेलायामपि **इह च** मध्यदशायामपि, तच्चोभयं **भेदेषु** विशेषेषु न केवलं सामान्यमात्रे । कथमेतत् ? तेषामस्मरणादिति चेत्; न; दृश्यते यतः । न हि दृष्टे पर्यनुयोगोऽतिप्रसङ्गात् । दृश्यते हि बन्धुरयं भवति न जाने पितृवर्गिणो मातृवर्गिणो वेति बन्धुत्वसामान्यस्मरणादपि लोकस्य तद्विशेषे प्रवृत्तिः, तद्वद् बालकस्यापि आहारादिविशेषे इति न कश्चिदुपालम्भः । नन्वत्र तत्स्मृतौ तत्र तद्भाव एव वक्तव्यस्तत्रैव चोद्यात्, न तद्विप्रमोषे तदभावो[3] विपर्ययादिति चेत्, नः; प्रवृत्तीनां तदन्वयव्यतिरेकानुविधानप्रतिपादनेन कार्यत्वज्ञापनार्थत्वात् तद्वचनस्य । एवमपि 'भूयस्तथा[4] दृशः' इत्यत्रेदं वक्तव्यं स्मरणप्रस्तावात् न रागाद्यभिधानात् परत इति चेत्; न; स्मरणस्यापि रागादिव्यवधानेनैव तत्कारणत्वमिति निवेदनार्थत्वात्, तथा वचनस्य । न हि स्मरणमात्रात् क्वचिद् व्यवहारो रागाद्यभावे । तत एवोक्तम् 'स्मरणादभिलाषे व्यवहारः' इति । उपसंहरन्नाह—

तस्मात् संसारवैचित्र्यं नियमान्न विहन्यते ॥८७॥ इति ।

तस्मादात्मनोऽनादिनिधनस्याप्रतिक्षेपात् कर्मणश्च संसारहेतोरवकल्पनात् **संसारस्य**[5] वैचित्र्यं सकलविकलेन्द्रिययोर्विकलसकलेन्द्रियत्वं तिर्यगादेर्मनुष्यादित्वं मनुष्यादेस्तिर्यगादित्वमित्यादिरूपवैश्वरूप्यं **न विहन्यते** न विघातं गच्छति । कुतः ? **नियमात्** प्रमाणतस्तद्विघातस्य निषेधात् । व्याहतमेव पिपीलिकाजीवस्य तच्छरीरपरित्यागेन हस्तिशरीरसञ्चरणम् अल्पीयसस्तस्य तद्व्याप्त्यसम्भवात् तद्व्यापिनश्च जीवस्य[6] भवद्भिरभ्युपगमादिति[7] चेत्; अत्राह—

---

१ किन्न सा– आ०,ब०, प० । २ भवतु आ०, ब०,प० । ३ चोद्याभावात् । ४ –था तादृश आ०, ब०, प० । ५ –सारवै– आ०, ब०, प० । ६ –स्य च शरीरवद्भिः आ०, ब०, प० ।
७ "जीवो उवओगमओ अमुत्ति कत्ता सदेहपरिमाणो । –ता० टि० ।

न च कश्चिद्विरोधोऽस्ति देहान्तरपरिग्रहे । इति ।

पूर्वस्माद्देहादन्यो देहस्तदन्तरं तस्य **परिग्रहे न च** नैव **कश्चिद**निर्दिष्टनामा **विरोधोऽस्ति** विद्यते । तथाहि—न तत्र प्रमाणबाधो विरोधः, प्रमाणेन तस्यावस्थापनात् । नाप्यल्पेन[1] महतो व्याप्त्याऽनुपपत्तिः, महतो महत्त्वेनैव व्यापनात् । तदेवाल्पस्य सतः कुत इति चेत् ? प्रदेशविसर्पणादिति ब्रूमः । न चेदं वाङ्मात्रम्, इहापि दर्शनात् । दृश्यते हीदम् इहापि बालजीवस्य युवादिदेहव्यापित्वं तद्विसर्पणात्, तद्वत् पिपीलिकाजीवस्यापि हस्त्यादिशरीरव्यापित्वम्, एवं महतस्तस्याल्पशरीरमात्रावस्थानं तदुपसंहारादिति प्रतिपत्तव्यम्, उपसंहरणविसर्पणधर्मत्वाज्जीवस्य । न चैवं तदुपसंहारविसर्पणयोरक्रमः; [2]तत्सचिवस्य कर्मणः सूक्ष्मबादरस्वभावस्य क्रमात् क्रमस्यैवोपपत्तेः प्रदीपवत् । दृश्यते हि प्रदीपे [3]तत्क्रमात् तयोरपि क्रमः । तदुक्तम्—"**प्रदेशसंहारविसर्पाभ्यां प्रदीपवत्** ।" [त०सू० ५।१६] इति । तदेवम् 'इह च दृश्यते' इत्यनेन तत्परिग्रहमुपपाद्य तदन्तरेणाप्युपपादयन्नाह-

तदभावे हि तद्भावप्रतिषेधो न युक्तिमान् ॥ ८८ ॥ इति ।

तस्य देहान्तरपरिग्रहस्याभावे हि यस्मात्तद्भावस्य तत्परिग्रहभावस्य **प्रतिषेधो न युक्तिमान्** । अतस्तत्र न कश्चिद्विरोध इति । तथाहि—तस्य प्रतिषेद्धा न तावदचेतनः[4], चेतनोऽपि न क्षणक्षयी; तस्यापि लोकान्तरवदप्रतिपत्तेः । अक्षणिक एव गर्भमरणावधिरिति चेत्; न; बालादिशरीरत्यागेन कुमारादिशरीरान्तरपरिग्रहाभावे तस्यासम्भवात् । भवत्वयम् [5]ईदम्भविनो[6] दृष्टत्वात् न भवान्तरिणः, तस्यैवासिद्धेरिति चेत्; इदम्भविनोऽपि कुतः सिद्धिः ? प्रत्यक्षादेव स्वसंवेदनलक्षणादिति चेत्; न; तेनापि मरणावधेरप्रतिपत्तेः, अन्यथा जीवितव्यप्रमाणे न कस्यचिदपि सन्देहः स्यात्—'कियान् मम जीवितव्यकालः' इति । नापि तत्कालभाविषु सेवाकृष्यादितद्व्यापारेषु[7], इति व्यर्थं तत्परिज्ञानाय ज्योतिर्विदाद्युपासनम् । तन्न बालकस्य प्रत्यक्षतो भाविदशाप्रतिपत्तिः यतः तात्कालिकापरापरशरीरोपादानं तद्दृष्टितयाभीष्टयेत । नापि वृद्धस्य ततः प्राच्यदशापरिज्ञानम्; तात्कालिकीनां तच्चेष्टानामवधारणापत्तेः । भाभूत् ततस्तद्ग्रहणं प्रत्यभिज्ञानात्तु भवत्येव 'स एवाहं वृद्धो यो बालादिरभूवम्' इति तस्योत्पत्तेरिति चेत्; न; तस्यापि प्रत्यक्षत्वे पूर्ववद्दोषात्, प्रमाणान्तरत्वस्य चानभ्युपगमात् इति । अपि चैवं सिद्धो भवान्तरी, तस्यापि तत एवाधिगमस्याभिहितत्वात् । तथापि तस्याभावे नेदम्भव्यपि कश्चिच्चेतन इति कुतस्तत्परिग्रह[8]-प्रतिषेधः तस्य प्रतिषेद्धुरभावेऽनुपपत्तेः । ततः [11]प्रतिषेधादपि सिद्धः प्रतिषेद्धुरिव[12] तस्यापि तत्परिग्रहः । तसिद्धौ कथं प्रतिषेधो यतस्तत्साधनं विरोधादिति चेत् ? न; तदभिनिवेशस्य तत्त्वेनाभिधानात् त य च तत्राविरोधात् । ततः स्थितम्—'**तदभावे हि**' इत्यादि । जातीत्यादयश्च व्याख्यानश्लोकाः, '**कारणं**

---

१ नाप्यकल्पेन आ०, ब०, प० । २ तज्जीवस्य आ०, ब०, प० । ३ सहकारिक्रमात् संहारविसर्पयोरपि । ४—नो नापि क्षण- ता० । ५—वधेरि— आ०, ब०, प० । ६ इहभवभाविनः । ७ सन्देह इत्यन्वयः । ८—मष्टानामनवधार—आ०, ब०, प० । ९ भवान्तरे त—आ०, ब०, प० । १० जन्मान्तरपरिग्रह । ११ प्रतिषेद्धापि सि— आ०, ब०, प० । १२—द्धुरेव त—आ०, ब०, प० ।

नाक्षसङ्घातः" इत्यादेरर्थस्य तैर्व्याख्यानात् । तस्माद्बुद्धिरियं पुरुषस्यैव स्वभावो न पृथिव्यादेः ।

चार्वाकस्तत्स्वभावत्वे दूषणमाह—

बुद्धेः पुरुषतन्त्रत्वे नित्यत्वात्तदनुक्रिया ।
[न भवेत्परिणामित्वाद्विनाशानुपलक्षणात्] ॥ ८९ ॥ इति ।

बुद्धेरवग्रहादिज्ञानस्य, पुरुष आत्मा तन्त्रं प्रधानं यस्यास्तस्या भावः **पुरुषतन्त्रत्वम्** । "गुणस्त्वते" [शाकटा० २।२।४५] इति पुम्भावः, यस्य वा इत्यन्यपदार्थसामान्येन व्युत्पाद्य पुनर्भावप्रत्ययान्तस्य बुद्धेरित्यनेन सम्बन्धः, तस्मिन् **पुरुषतन्त्रत्वे** बोद्धा पुरुष इति तद्विशेषणत्वे सति **तदनुक्रिया** तेषां बुद्धिकार्याणाम् अनु क्रमेण क्रिया करणं **न भवेत्** एकदैव स्यात् । कुतः ? **नित्यत्वात्** । बुद्धेरिति सम्बन्धः । एवं मन्यते बुद्धेरात्मस्वभावत्वमभ्युपगन्तव्यम् तत्तन्त्रत्वात्[1], भेदे तदनुपपत्तेः । समवायाद्भेदेऽपि तदुपपत्तिरिति चेत्; न; सत्यपि तस्मिन् 'तत्र बुद्धिः' इत्येव स्यात् तस्य इहेदम्प्रत्ययहेतुत्वात्, न तु 'स बोद्धा' इत्यविष्वग्भावस्यावगमः । सोऽपि तत[2] एव नाविष्वग्भावादिति चेत्, बुद्धिस्वरूपेऽपि[3] तर्हि तत एव तदवगम इति नैका[4] बुद्धिर्भवेदित्यनुपपन्नमिदम्—"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायसू० १।१।१६] इति युगपदेव तदुत्पत्तेरेवं सम्भवात् ? बाधकाभावान्न नैत्रायं प्रसङ्ग इति चेत्; न; इतरत्रापि तुल्यत्वात् । न हि पुरुषबुद्ध्योरप्यविष्वग्भावे बाधकमुत्पश्यामः । पुरुषस्य बुद्धिरिति भेदप्रत्ययो बाधक इति चेत्; न; तस्य प्रत्यक्षरूपस्याभावात्, कल्पनारूपस्य चावस्तुविषयत्वात्, बुद्धेर्व्यापार इत्यपि तद्भावात् । तन्न भेदे तस्यास्तन्त्रत्वमित्यभेद एवाभ्युपगन्तव्यः । तत्र च पुरुषवत् बुद्धेरपि नित्यत्वात् न तत्कार्याणां क्रमः तत्करणस्वभावायास्तस्या अक्रमात् । ततो भिन्न एव परापरस्तत्करणस्वभाव इति चेत्, कथमसौ तस्याः ? तत्र समवायाच्चेत्; न, तन्निषेधात् । तत्कार्यत्वाच्चेत्; न, तस्य अक्रमायास्ततोऽनुत्पत्तेः[5] । तस्याप्यपरतस्तत्स्वभावात् उत्पत्तिकल्पनायामनवस्थादोषात् । तत एव कार्योत्पत्तौ[6] अव्यवस्थाच्च बुद्धिः प्राप्नुयात् । ततो बुद्धेरेव [7]तदुत्पत्तिरिति परापरतत्कार्याणां युगपदेव प्रादुर्भविष्णु भवितव्यं तथा च कथं तस्याः संसारः ? परापरदेहेन्द्रियादिसञ्चारे सत्येव तदुपपत्तेरिति । युगपच्च कार्योत्पत्तौ अवस्तुत्वं च तस्याः पश्चादाप्नोति निर्व्यापारत्वात् व्योमकुसुमादिवत् । तदेवाह—**तदनु** तदनुत्पत्त्यनन्तरं **क्रिया** व्यापारो न बुद्धेरिति । एतच्च समानश्रुतिकत्वादेकोच्चारणगम्यमन्यदेव वाक्यम् । तथा च यतः सर्वकार्याणां युगपदुत्पादः ततस्तदनन्तरं क्रिया नेति पूर्वोत्तरयोस्तदर्थयोर्हेतुहेतुमद्भावः प्रतिपन्नो भवति । एवं चार्वाकोक्तमिति चेत् इत्याशङ्क्य समाधानमाह—**'परिणामित्वात्'** इति । अत्र नेत्यनुवृत्तम् । तदयमर्थः—यदुक्तं नित्यत्वादिति, तन्न; कुतः ? **परिणामित्वात्** पूर्वाकारपरित्यागाजहद्वृत्तोत्तराकार-

---

१—द्भेदे चतदनु— आ०, ब०, प० । २ समवायादेव । ३ बुद्धिस्वरूपस्य बुद्धेरविष्वग्भावावगमार्थम् इहेदम्प्रत्ययमूलकसमवायबुद्धिरन्वेष्या इत्यनेकत्वं बुद्धेः । ४ बुद्धिस्वरूपे । ५— नुपपत्तेः आ०, ब०, प० । ६— परतस्त्व— आ०, ब०, प० । ७ —त्तौ व्यवस्था च आ०, ब०, प० । ८ तदुपपत्तेरिति आ०, ब०, प० ।

गमनवत्त्वाद् बुद्धेरिति । न हि बुद्धेरन्यस्य वा तदभावे वस्तुत्वम् । अर्थक्रियया हि[1] वस्तुत्वम् । न च नित्ये तत्क्रिया; युगपत्तद्भावे पश्चादवस्तुत्वस्योक्तत्वात् । अक्रमाच्च ततः[2] क्रमतस्तदयोगात् । युज्यत एव ततोऽपि तत्क्रमः सहकारिक्रमादिति चेत्; कथं पुनस्तत्क्रमाद्भवन् ततोऽपीति[3] । न ह्यन्यतो भवंस्तदन्यस्मादपि[4]; अतिप्रसङ्गात् । तत्क्रमस्यापि[5] नित्यसहितस्यैव तत्र व्यापारादिति चेत्; तर्हि तदेक्रमादक्रमः[6] सहकारिक्रमाच्च क्रम इत्यागतं तत्क्रियायां काचपच्यम् । सहकारिक्रमानुकूल्येनैव नित्यस्य तत्र व्यापारो न स्वकीयक्रमानुकूल्येन ततोऽयमदोष इति चेत्; नेदानीं तँस्य[7] तत्कारणत्वं स्वभावानुकूल्येन प्रवृत्तावेव तदुपपत्तेः, अन्यथातिप्रसङ्गात् । किञ्च, तस्य तदानुकूल्यं यदि तत्क्रमात्, प्रागपि कुतो न कार्यम् ? तत्क्रमस्याऽभावादिति चेत्; व्याहतमेतत्—स च नास्ति तदानुकूल्यं च तस्यास्तीति, आनुकूल्यस्य आनुकूलयितव्ये सत्येवोपपत्तेः । तत्क्रमकाल एव तदपीति चेत्; कथं नित्यस्य नित्यत्वम् ? तत्स्वभावकादाचित्कत्वे तँदनुपपत्तेः[8] । स्वभावोऽपि तँत्तस्य[9] न भवति भिन्नत्वादिति चेत्; कथं तेन नित्यमेव तत्क्रममनुकूलयति न सहकारी तदक्रमम् । नित्य एव तस्य सम्बन्धादिति चेत्; न; अनुत्पन्नस्य तदयोगात् । उत्पत्तिश्च यदि नित्यादेव; कथं तस्यापि क्रमः ? सहकारिक्रमादिति चेत्; न; तत्रापि अपरानुकूल्यकल्पनायाम् अनवस्थापत्तेः । अन्यतस्तु उत्पत्तौ न हि तन्नित्यस्य । समवायस्यापि तदुत्पन्नस्यैव तत्रोपपत्तेः । तन्न तदानुकूल्येन तस्य प्रवृत्तिरिति न निवृत्तिः काचपच्यात् ।

एतेन सामग्री कारणमिति प्रत्युक्तम्; तस्या अपि नित्यतत्सहकारिकारणव्यतिरेकेणाभावात् । भावे वा तत एव तदुत्पत्तेः कथं नित्यस्य तत्सचिवस्य वा वस्तुत्वम् ? तस्या अपि तँत्सहिताया[10] एव तत्र व्यापारादिति चेत्; अनिवृत्तकाचपच्यैव पुनरपि तदुत्पत्तिर्भवेत् । अपि च, सामग्र्या अपि न नित्यत्वम्, तस्याः स्वतः परापेक्षतया च हेतुत्वे पूर्ववत् प्रसङ्गात् । सामग्रीतत्सचिवेष्वपि सामग्र्यन्तरपरिकल्पनायाम् अव्यवस्थितेश्च । अनित्यैव सा, नित्याच्च सहायवत् उत्पद्यते इति चेत्; न ततः सामग्र्यन्तरव्यवहितात्; अनवस्थाप्रसङ्गात् । तदव्यवहिताच्चेत्; व्यर्थैव सामग्री ततस्तद्धेतोस्तत्र भावात्, सहकारिप्रतीक्षायाश्च तत्कृतोपकारस्वीकारित्वेनाविरोधात् । नित्यत्वे तु न तथा तत्प्रतीक्षणं तद्व्याघातात् । इत्युपपन्नमुक्तम् **'परिणामित्वात्'** इति ।

नित्यत्ववत् परिणामित्वमपि न सम्भवति भावेषु, तस्य संशयादिदोषप्रसङ्गनिगलितसकलाङ्गत्वात्, तत एकान्तभङ्गुरत्वमेव तत्राङ्गीकर्तव्यमिति चेत्; अत्राह— **'विनाशानुपलक्षणात्'** इति । **विनाशो** बुद्धेर्निरन्वयो विच्छेदः तस्योपलक्षणं निर्णयः **तदभावात्** परिणामित्वम्, [11]ततश्च नित्यत्वमित्यनुगमः । न खलु तदस्ति प्रमाणं यतस्तस्योपलक्षणम् ।

---

१ हि तन्न च आ०, ब०, प० । २ नित्यात् । ततस्तदयो—आ०, ब०, प० । ३ सहकारिक्रमाद्भवन् । ४— स्मादतिप्र— आ०, प० । ५ सहकारिक्रमस्यापि । ६ नित्यवस्तुनोऽक्रमात् । ७ नित्यस्य । ८ नित्यत्वानुपपत्तेः । ९ तद्गतस्तस्य आ०, ब०, प० । १० नित्यसहितायाः । ११ ततश्च न नि— ता० ।

प्रत्यक्षमस्तीति चेत्; कथं समारोपः ? उपलक्षिते तदयोगात् नीलादिवत् । मा भूदिति चेत्; कथं संसारः तस्य सत्त्वदृष्टिनिबन्धत्वात्, तदृष्टेश्च आरोपरूपत्वात् । सोऽपि माभूदिति चेत्; व्यर्थस्तर्हि मुमुक्षूणां प्रयासः तस्य तन्निवर्त्तनार्थत्वात्, **"मिथ्याध्यारोपहानार्थं यत्नोऽसत्यपि मोक्तरि"** [प्र० वा० १।१०४] इति वचनात् । प्रयासोऽपि नास्त्येव, वस्तुतः सकलप्रयासविकलस्यैतत्संवेदनस्यैव भावादिति चेत्; न; तस्य क्षणिकत्वे क्षणान्तरापेक्षणस्यावश्यम्भावात् अद्वैतरूपत्वानुपपत्तेः, अक्षणिकत्वस्य चानभ्युपगमात् । न क्षणान्तरव्यावृत्त्या तस्य क्षणिकत्वं यतस्तदपेक्षणम् अपि तु स्वत एवेति चेत्; न; नित्यत्वमपि स्वत एव न तदन्तरानुवृत्त्येनिप्रसङ्गात् । स्वतः स्वयमेव भवति न नित्यत्वमिति चेत्; क्षणिकत्वमपि न भवेत् । न भवत्येव, क्षणिकाक्षणिकादिसकलविकल्पजालबालविलासावलेपनानुकल्पितरूपत्वात्तस्येति चेत्, तिष्ठतु तर्हि भवान्, क्षणभङ्गवादिनाऽस्माकमिदानीं विवादप्रवृत्तेः । तस्य च प्रत्यक्षतस्तदुपलक्षणे प्रक्रान्तदोषानप्रक्रमात् । मा भूत् तत्तस्योपलक्षणं ग्रहणं तु भवत्येव निर्णयविकलमिति चेत्; न; तस्यापि सत्त्वग्रहणवदनुपलक्षितस्याभावात् । उपलक्ष्यत एव तद्विचारादिति चेत्,

विचारात् तद्विनाशस्य यदि नास्ति प्रवेदनम् ।
प्रत्यक्षात्तद्ग्रहस्तेन कथं नामावगम्यताम् ? ॥ १४२६ ॥

विषये हि गृहीते तद्विषयिग्रहणं भवेत् ।
सम्बन्धग्रहणं यद्वत् सति सम्बन्धवद्ग्रहे ॥ १४२७ ॥

ग्रहणे तेन तस्यापि कथञ्चास्त्युपलक्षणम् ।
निर्णयात्मा विचारो यद्भवतोऽपि प्रसिद्धिमान् ॥ १४२८ ॥

तथा सति समारोपः कथं तत्रोपजायताम् ।
नास्त्येव चेन्न दृष्टत्वाद्विचारमपि कुर्वतः ॥ १४२९ ॥

अन्यथा स्वकलत्रादौ कथं तस्य प्रवर्तनम् ।
आत्मात्मीयग्रहादेव यतस्तत्परिदृश्यते ॥ १४३० ॥

आहार्यस्तस्य नास्त्येव समारोपो विचारिणः ।
ततस्तु सहजादेव संसारे तस्य चेष्टितम् ॥ १४३१ ॥

निर्णयारोपमनसोर्बाध्यबाधकभावतः ।
अभ्यासोपचितादेव तस्य नाशस्ततो यदि ॥ १४३२ ॥

अनभ्यासे कथं तस्य निर्णयात्मत्वमुच्यताम् ।
तद्विनाशस्वभावोऽयं निर्णयो लोकसम्मतः ॥ १४३३ ॥

---

१ क्षणान्तरानुवृत्त्या । २ क्षणिकमपि आ०, ब०, प० । ३– नुपकल्पित– आ०, ब०, प० । ४ प्रत्यक्षतः । ५ द्रष्टव्यम्–प्र० वा० ३।४८ ।

प्राङ्निर्णयोऽपि मा भूच्चेत्, हन्त तेन कथं भवान् ।
विनाशं तत्र चाध्यक्षं निश्चिन्वीत प्रवृत्तिमत् ॥ १४३४ ॥
निश्चाययेद् वा तं सभ्यान् वादोऽयं न निगृह्यताम् ।

तन्न प्रत्यक्षतस्तस्य ग्रहणमुपपन्नम् उपलक्षणवत् । अनुमानात्[1] तु तदुपलक्षणं दुरुपपादम्; प्रत्यक्षाभावे तत एव लिङ्गलिङ्गिसम्बन्धस्याऽप्रतिपत्तेः[2] । अन्यानुमानतः प्रतिपत्तौ अनवस्थानस्योपकल्पनात् । कश्चासौ विनाशो यस्य कुतश्चिदुपलक्षणम् ? क्षणावस्थानमिति चेत्, न; तस्यानवधृतस्य नित्येऽप्यविरोधात् । क्षण एव स्थानमित्यवधृतमेव[3] तदिति चेत् ; तर्हि सामर्थ्यात् क्षणान्तरे तस्यास्थानं विनाश इति प्राप्तम् । एवमिति चेत्; तदपि यदि तुच्छम्; उपपन्नमुक्तम्–**'विनाशानुपलक्षणात्'** इति, तुच्छे तत्र प्रत्यक्षादेः प्रतिबन्धाभावेनाप्रवृत्तेः । वस्तुनश्च तस्मात् अनन्यत्वे[5] कथं क्षण एव स्थानं तदन्तरेऽपि तद्भावात् । अन्यत्वं चेत्; कुत एतत् ? तस्य क्षण एव स्थानादिति चेत्, न; तत्रापि क्षणान्तरभाविनोऽस्थानस्य अर्थादापत्तेः पूर्वप्रसङ्गानतिक्रमात्, अनवस्थोपनिपाताच्च ।

एतेन अतुच्छं तदित्यपि प्रत्युक्तम्, तुल्यदोषत्वात् । अथ न किञ्चित्तस्य क्षणान्तरे भवति, **"न तस्य किञ्चिद्भवति न भवत्येव केवलम्"** [प्र० वा० ३।२७७] इति वचनादिति चेत्; किमिदानीमवधारणेन ? व्यवच्छेदस्य तत्फलस्याभावात् । अस्त्येवायम्, न[6] तु क्षणान्तरे, प्रागेव भावादिति चेत्, नेदानीमसौ कस्यचिदपि स्यात् । तथा हि– न तावत्तदन्तरस्थितेः; तदानीमभावात् । न ह्यन्यकालः स तस्या इत्युपपन्नम्, अन्यथा घटगतेनैवाभावेन तदन्यदेशस्य सर्वस्याप्यभाव इति भावनैरात्म्यप्रसङ्गात् ? नापि प्राच्यक्षणस्थितेः; स्वयं तदुपगमादिति व्यर्थमेवावधारणम् । अतः पश्चादेवासौ वक्तव्यो **'न भवत्येव केवलम्'** इत्यस्यापि तथैवोपपत्तेः । न हि तत् तत्क्षणापेक्षमेव तन्नीरूपत्वप्रसङ्गादिति[7] नोपक्रान्तप्रसङ्गादि (दं) तिक्रमः परस्य । भवतोऽपि कः पुनरसौ[8] विनाश इति चेत् ? न कश्चित्, निश्चितनिःश्रेयसमार्गस्य[9] तदनुपपत्तेः । भवत एव तु मिथ्यादृष्टेः प्रतिक्षणविनाशः समुपस्थायिवस्तुविनाशः पर्यनुयुज्यत इति चेत्, सोऽपि न कश्चिदन्यत्रान्यथाभावात् । निरूपयिष्यते चैतत् नातिदूरतः । इति सूक्तम्–**'परिणामित्वात् विनाशानुपलक्षणात्'** इति । तदपि कथम् ? विरोधादिति चेत्; न; प्रतीतेः । न हि प्रतीतमन्यथाभवत्यतिप्रसङ्गात् । व्यवहारस्य च प्रवृत्तिप्राप्त्यादेः तत्रैव सम्भवात् ।

अत्यन्तविनाशेऽपि सन्तानापेक्षया तत्सम्भवं मन्यमानस्य मतमाशङ्कते—

परस्याप्यविरोधश्चेत् फलहेतुव्यपोहनः ।
प्रवृत्तेर्व्यवहाराणाम् [अविनाशेऽपि सम्भवात्] ॥ ९० ॥ इति ।

१–मानात्तदु– ता० । २ –त्तेरनुः– ता० । ३– तमेतदि–आ०, ब०, प० । ४ अन्यदन्यत्वे आ०, ब०, प० । ५ अनन्यत्वं आ०, ब०, प० । ६ ननु च– आ०, ब०, प० । ७– दितिक्रमः परस्य आ०, ब०, प० । ८ पुनरस्यावि– आ०, ब०, प० । ९– श्चिते नि– आ०, ब०, प० । १० मिथ्यादृष्टयनुपपत्तेः ।

अपि इति परामर्शाभिमुख्ये । **परस्य** सौगतस्य सम्बन्धिनां **व्यवहाराणां** पानभोजनादीनामविरोधो विरोधाभावः । कुतः ? फलञ्च हेतुश्च **फलहेतू**, हेतुशब्दस्य ध्यन्त्यत्वेऽपि न पूर्वनिपातः, स्वकल्पे **"लक्षणहेत्वोः"** [पाणिनि० ३।२।१२६] इति प्रयोगदर्शनात् । तयोर्व्यपोहः तदहेतुफलव्यावृत्तिपरिकल्पितः सन्तानस्तत्कल्पिते तद्व्यपदेशात्ततः तमाश्रित्य **प्रवृत्तेः** पानादिहेतुषु लोकस्य प्रवर्तनात् । यावत्ततः तावत्तात्त्विकादिव हेतुफलतादात्म्यात् किन्न प्रवृत्तिरिति चेत् ? अत्रापि इदमेव कृतानुवृत्तिकमुत्तरम्–**'फलहेतु'** इत्यादि । अयमर्थः–**फलहेत्वोर्व्यपोहः** परस्परात्मन्यभावस्ततः **प्रवृत्तेः** अन्यथा तदयोगात् । तथा हि–यदि हेतौ च फलम् ; न प्रवृत्तिः, तद्वत्तस्यापि दर्शनात्, प्रवृत्तेश्च तदर्थत्वात्, दृष्टेऽपि प्रवृत्तौ अनवस्थानात् । फलेऽपि यदि हेतुः, कथं प्रवृत्तिः ? फलवत्तस्याप्यनुपलम्भात्, तदुपलब्धावेव तदुपपत्तेः, आकाशचर्वणस्य प्राकृतेष्वप्यप्रतिवेदनात् । ततः प्रवृत्तेर्हेतुफलयोरन्योऽन्यात्मन्यभाव एव । तथापि कथमन्यदर्शनादन्यार्थितया प्रवृत्तिरिति चेत् ? न; सन्तानादिति दत्तोत्तरत्वात् । ततोऽपि कथं भेदाविशेषादिति चेत् ? न; दृष्टत्वात् । दृष्टा हि लोकस्यामेदकल्पनायां प्रवृत्तिरिति । **'चेत्'** इत्याशङ्क्य परिहरन्नाह– **'अविनाशेऽपि सम्भवात्'** इति । अत्र सिंहावलोकितेन वक्ष्यमाणस्य नञः सम्बन्धः । ततो यत् **'परस्य'** इत्यादि, तन्न; कुतः ? एकान्तविनाशात् अन्यत्वात् कथञ्चिद्विनाशो **अविनाशः** तस्मिन्नपि न केवलं तदपोहे **सम्भवात् प्रवृत्तेः** तदपोहे तदभ्युपगमः परस्य चित्तभरणायैव न वस्तुतः तस्यैवाभावात् । अविनाशस्य च निरूपितत्वात् निरूपयिष्यमाणत्वाच्च । इदमेव श्लोकैः व्याचिख्यासुः **'फलहेतुव्यपोहतः'** इत्यस्य द्वितीयमर्थं दर्शयन्नाह–

यथाऽजनकजन्येषु न सन्ति कलशादयः ।
तथा जनकजन्येषु ततस्तत्त्वं निरन्वयम् ॥ ९१ ॥ इति ।

यथा येन दृश्यानुपलब्धिप्रकारेण **न सन्ति** न विद्यन्ते **कलशादयः** । क ? **अजनकजन्येषु** अतद्धेतुफलेषु कुलिशकरणादिषु **तथा** तेन प्रकारेण **जनकजन्येषु** तद्धेतुफलेषु पिण्डकपालादिषु **न सन्ति कलशादयः** इति सम्बन्धः । प्रयोगश्च–यद्यत्रोपलब्धिलक्षणप्राप्तं नोपलभ्यते तत्तत्र नास्ति यथा अतद्धेतुफलेषु कलशादयः, उपलब्धिलक्षणप्राप्ताश्च ते नोपलभ्यन्ते तद्धेतुफलेष्वपीति । **ततस्तस्मात् निरन्वयम्** अन्वयान्निष्क्रान्तं तत्त्वं स्वरूपम् , कलशादीनामिति विभक्तिव्यत्ययेन सम्बन्धः । सत्येवं यत्सिद्धं तदाह–

तत्र नाशादिशब्दाश्च समिताः समनन्तरे । इति ।

तत्र तेषु जनकजन्येषु **नाश आदिर्येषां** प्रागभावादीनां तेषां **शब्दाः समिताः** सङ्गताः भवन्तीति शेषः । न केवलं प्रवृत्त्यादिरेवेति चशब्दः । सत्येव हि तदभावे प्रागभावोपादानादिशब्दा

---

१ –कल्पल- ता० । २ कृतानिवृत्ति– आ०, ब०, प० । ३– तस्मादप्यनु– आ०, ब०, प० । ४ "विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।"– ता० टि० । प्रकृते- आ०, ब०, प० । ५ करिणादि– ता० । वज्रशरीरेन्द्रियादिषु । ६ ततस्तत्त्वं नि- ता० ।

जनकेषु, जन्येषु च नाशोपादेयादिव्यपदेशाः लोकसङ्केतप्रसिद्धाः संङ्गच्छन्ते नान्यथेति परस्य भावः। कस्मिन् सति ? **समनन्तरे** समानि सदृशानि अनन्तराणि अव्यवहितानि जनकजन्यानि यस्मिन् सन्ताने तस्मिन्निति। पररूपत्वमत्र शकन्धूवत्[1] प्रतिपत्तव्यम् उपसर्गस्य[2] सदृशार्थत्वम्। अनेन **'फलहेतुव्यपोहतः'** इत्यस्य प्रथमोऽर्थो दर्शितः।

तदेवं परमतमुपदर्श्य अल्पवक्तव्यत्वात् तत्रेत्यादि निराकुर्वन् विनाशं पृच्छति— ५

अन्यस्यान्यो विनाशः किं [किन्न स्यादचलात्मकः] ॥९२॥ इति।

अन्यस्य कलशादेः **अन्यः** कपालादिर्**विनाशः**। उपलक्षणमिदं तेन प्रागभावोऽप्यन्यो मृत्पिण्डादि। **किम्** इति प्रश्नयित्वा दूषणमाह—**'किन्न स्यादचलात्मकः'** इति। **किं न स्यात्** ? स्यादेव, **अचलात्मकः** अचलस्वभावः कलशादिः। नहि तदन्यप्रादुर्भावे तस्य[3] विनाशः; त्रैलोक्यस्यापि[4] तत्प्रसङ्गात् तदविशेषात्। नापि तदन्यभावः तत्प्रागभावः; जगतोऽपि तदेकप्रागभावत्वापत्तेः। तथा च १० तदुपमर्दनादेव तस्योत्पत्तेः तदेकसन्तानत्वमिति नावकाशः तन्नानात्वकल्पनस्य। ततः प्रागभावादिवैकल्ये सति विद्यमानत्वाद् अवश्यंभाविनी तस्य कूटस्थता। इत्युपपन्नमेतत्— **'किन्न स्यादचलात्मकः'** इति। पर इदं परिहरन्नाह—

तद्विवेकेन भावाच्चेत् [कथन्नातिप्रसज्यते]। इति।

तस्य कलशादेर्**विवेकेन** पूर्वापरविच्छेदेन **भावो** भावनमवधारणम्, ण्यन्तादच्प्रत्ययः १५ तस्मात् **'न स्यादचलात्मकः'** इति सम्बन्धः। न हि विविक्ततया भाव्यमानस्याचलात्मकत्वं पूर्वापराविवेके सत्येव तदुपपत्तेः। अत्र **'चेत्'** इत्याशङ्क्योत्तरमाह—

कथं नातिप्रसज्यते।
सदापि [सर्वभावानां परस्परविवेकतः] ॥ ९३ ॥ इति।

सदापि सर्वकालमपि पूर्वापरकालवत् मध्यकालेऽपि **कथं** तद्विवेके **नातिप्रसज्यते** अति- २० प्रसज्यत एव। एवं मन्यते—न तावत्तस्य तद्विवेकः पूर्वापरक्षणलक्षणः; तस्य प्रतिक्षिप्तत्वात्। अतः स एव तस्य प्रागभावः प्रध्वंसश्चेति, स्वतोऽपि तस्य विवेकान्न क्षणभङ्गवादः शून्यवादमतिशेते इति। परमप्यतिप्रसङ्गं दर्शयति—**सर्वभावानाम्'** अत्रापि **सदापीति** सम्बध्यते मध्येकरणात्। तदयमर्थः— आस्तिर्व्यास्तिः पूर्वापरानुगमः आपः स विद्यतेऽस्येति **आपि** तदन्वयिरूपं **सत्** विद्यमानं न कल्पितं **कथं नातिप्रसज्यते** ? केषाम् ? **सर्वभावानां** चेतनेतरात्मनामर्थानाम्। अत्र हेतुमाह— २५ **'परस्परविवेकतः'** इति। **परस्परमन्योऽन्यं** जैनसौगताभ्यां **विवेकतो** विनिश्चयात् **'सदापिनः'** इति विभक्तिविक्रियया सम्बन्धः। अस्ति जैनवत् सौगतस्यापि तद्विनिश्चयः, अन्यथा क्षणविवेके निर्विवादात् अनुमानकल्पनावैफल्यापत्तेः। सतोऽपि तस्य[5] लूनपुनरुत्पन्नकेशादिवद् भ्रान्तत्वान्न

---

१ "शकन्ध्वादिषु पररूपं वाच्यम्"- कात्या०वा०१।१।६४। २ 'सम्' इत्युपसर्गस्य। ३ अत्र आ०, ब०, प०। ४ त्रैविध्यस्या- आ०, व०, प०। ५ -त एवं आ०, व०, प०। ६ अन्वयस्य।

तद्विपयस्य सत्त्वमिति चेत्, विवेकस्यापि न स्यात्, तन्निश्चयस्याप्यसत्येव तस्मिन् द्विचन्द्रादौ दर्शनात्। बाध्यमानत्वात्तत्रैव तस्य भ्रान्तत्वं नान्यत्रेति चेत्, न; अनुगमेऽपि तुल्यत्वात्—तन्निश्चयस्यापि तत्केशाद्यनुगम एव बाधोपलम्भात् न पूर्वापरानुगम इति। तत्र तत्र विवेकभावनादचलात्मकत्वपरिहारः शून्यवाद-प्रसङ्गाद्विपर्ययसिद्धेश्च।

५ साम्प्रतं विवेकमभ्युपगम्य 'जनकजन्येषु' इत्येतन्निराकुर्वन्नाह—

न चानन्तरमित्येव भावस्तद्व्यपदेशभाक्। इति।

न च नैव अनन्तरम् अव्यवधानम् **इत्येव** हेतोः **भावः** पिण्डकपालादिः **तद्व्यपदेशं** कलशाद्यपेक्षया जनकजन्यव्यपदेशं भजत इति **तद्भाक्**, सर्वस्यापि तत्पूर्वापरकोटिगतस्य जगत्क्षणस्य तद्भाक्त्वापत्तेः आनन्तर्याविशेषादिति भावः।

१० परो विशेषं दर्शयति—

तत्प्रतीत्य समुत्पादात् [भावश्चेत् स कुतो मतः] ॥९४॥ इति।

तत् पिण्डादिकं **प्रतीत्य** समनन्तरप्रत्ययं कृत्वा कलशादेः, तच्च प्रतीत्य कपालादेः **समुत्पादाद्भावः तद्व्यपदेशभाक्** न च सर्वं प्रतीत्य तस्योत्पादो यतस्तद्भाक्त्वस्यातिप्रसङ्ग इति मन्यते। तमेवेति **'चेत्'** इत्याशङ्क्य प्रश्नयन्नाह—**'स कुतो मतः'** इति। स प्रतीत्यसमुत्पादः कुतः कस्मान्नि-१५ मित्तात् नियतविषयो मत इति।

परस्तदाह—

सादृश्यात् [प्रत्यभिज्ञानं न सभागनिबन्धनम्]। इति।

सादृश्यं पिण्डकपालादीनां सारूप्यं तस्मात् स मत इति। तत्रोत्तरमाह—**'प्रत्यभिज्ञानं न सभागनिबन्धनम्'** इति। न हि सादृश्यं प्रत्यभिज्ञानादन्यतः शक्यमवगन्तुं प्रत्यक्षस्यासाधारणविषयत्वेन २० तत्राप्रवृत्तेः, अनुमानस्य च तत्पूर्वकत्वात्, न च तत्परस्य सम्भवति। कुतः? **सभागनिबन्धनं** सहभागयोः तदिदमिति चांशयोर्निबन्धनेन एकत्वरूपेण वर्तमानं निबन्धनं यत इति। तथापि कथं तन्न परस्येति चेत्? न; अनेकान्तविद्वेषात् स्वयं च तद्भागभेदवत् तस्यापि भेदकल्पनया निराकरणात्। चित्रज्ञानवादिन सम्भवत्येव तदिति चेत्, अत्राह—

विशेषकल्पनायां स्यात् परस्याव्यभिचारिता ॥९५॥ इति।

२५ **विशेषस्याकारभेदस्य** प्रत्यभिज्ञाने **कल्पनायां परस्य** अक्रमानेकान्तादन्यस्य क्रमानेकान्तस्य **स्यात्** भवेत् **अव्यभिचारिता** सर्वभावेष्वविचलितत्वं युगपदिव क्रमेणाप्यनेकान्तस्य प्रतिषेद्धुमशक्यत्वात्। कथमशक्यत्वं यावता नित्यानित्ययोरेकत्वे तदुपपत्तिः, नित्यानित्ययोरिति चोपलभ्यानुपलभ्ययोरित्यर्थः, तयोश्चैकत्वमसम्बद्धम्। तदुक्तम्—

१—तितद्वि-प०। २ भ्रान्तत्वान्नान्य—आ०, ब०, प०। ३—द्भावकस्यापि प्रसङ्गत इति आ०, ब०, प०। ४ तत्रतीतेः प०। ५—ल्पनायां नि— आ०, ब०, प०।

"यदि नित्यमनित्यं चैकमेव तदा प्रतिपन्नमप्रतिपन्नं चैकमिति प्रसक्तं तथा च असम्बद्धं प्रतीयमानमेकत्वेनान्यथा[1] न शक्यं प्रतिपत्तुं नाप्रतीतमेव प्रतीतम् ।" [प्र० वार्तिकाल० १।२०५] इति चेत्; तदसङ्गतम्, यस्मात् नं[2] ह्युपलभ्यत्वं नित्यत्वम्, अनित्यत्वं वा तद्विपर्ययः; स्वलक्षणस्यापि नित्यत्वापत्तेः, अनित्यत्वे वाऽनुपलभ्यत्वानुषङ्गात्, अपि त्वनुगमान्नित्यत्वं व्यावृत्तेश्चानित्यत्वम् अनुगमव्यावृत्ती च सुवर्णरुचकाद्यपेक्षया नैकत्रापि विरुद्धे । न च रुचकादेर्व्यावृत्तिमतः प्रतीतस्येतरस्य च परस्परमेकत्वं जैनस्य सम्मतम्; प्रत्यभिं[3]ज्ञानाकारयोरिव भेदस्यैव भावात् । ततः 'प्रतिपन्नमप्रतिपन्नं चैकम्' इति परमतानभिज्ञानादेव प्रतिपादितम् । रुचकादेः परस्परमिव सुवर्णादपि भेदे नैकं नित्यानित्यम्, अभेदे परस्परमप्यभेद एव अभिन्नादभिन्नस्य गत्यन्तराभावात्, तथा च नित्यमेव तत् नानित्यमपीति चेत्; न; प्रत्यभिज्ञानस्यापि एवमव्यवस्थितिप्रसङ्गात्—तदाकारस्यापि स इत्यादेः परस्परमिव ततोऽपि भेदे नैकं चित्रं सन्तानान्तरवत्, अभेदेऽपि स एव दोषस्तदन्यतमाकारवदिति अनवधारितस्यैव भेदेतरभावस्याभ्युपगमाददोष इति परिहारस्तु क्रमचित्रत्वमपि भावेषु परिपुष्णाति । सत्यमिदं यदि तथा प्रतिपत्तिः, न चैवम् । तदुक्तम्—

"केनचित्तस्य रूपेण नोपलब्धिः परान्यथा ।
अवित्तिर्येन रूपेण तदस्येति कथं मतम् ? ॥
पूर्वं[4] तेनास्य वित्तिश्चेत् पूर्वमेव तथा भवेत् ।
इदानीं नैव, तद्रूपमस्येति कथमेकता ? ॥
एकं पूर्वपराभ्यां चेद्रूपाभ्यामवियोगतः ।
वियोगे दृश्यमानेऽपि वियोगो न कथं मतः ॥
क्रमेणास्यावियोगश्चेद्वियोगोऽपि तथा भवेत् ।
अत एवोभयात्मत्वमवियोगवियोगतः ॥
यथैवास्याक्रमं सत्त्वं दृष्टिरस्य तथा भवेत् ।
अक्रमस्य च सत्त्वस्य न योगः क्रमभाविकः ॥" [प्र०वार्तिकाल० १।२०५]

इति चेत् ; नेदानीं प्रत्यभिज्ञानमपि । तत्राप्यस्य तुल्यत्वात् । तथा हि—

स इत्येवं प्रतीतस्य ज्ञानस्यैवायमित्यपि ।
अप्रतीतः कथं नाम त्वयाकारः प्रकल्प्यताम् ॥ १४३५ ॥
तस्याप्यन्यत्र वित्तिश्चेदन्यत्रैव भवेदसौ ।
स इत्यत्र तु नास्तीति कथं तस्य तदेकता ॥ १४३६ ॥
तँदतद्देशकाभ्यां तदेकं चेदवियोगतः ।
वियोगे दृश्यमानेऽपि वियोगो न कथं मतः ? ॥ १४३७ ॥

---

१ -था वा श- ता० । २ न.नुपलभ्यत्वं नित्यमनित्यं वा आ०, ब०, प० । ३ -ज्ञाकार- आ०. ब०, प० । ४ पूर्वत्वेनाप्यवित्ति- आ०, ब०, प० । "पूर्वत्वेनास्य वित्तिः" वार्तिकाल० । ५ तदतद्देशकालाभ्यां वैकं आ०, ब०, प० ।

देशक्रमादवीयोगे वियोगस्तत्क्रमान्न किम् ।
अत एवोभयात्मत्वमवियोगवियोगतः ॥ १४३८ ॥
यथा तदक्रमं सत्त्वं दृष्टिरस्य तथा भवेत् ।
अक्रमस्य च सत्त्वस्यावियोगस्तत्क्रमात् कथम् ॥ १४३९ ॥ इति ।

ततो यथा प्रत्यभिज्ञानमितरेतरदेशपरिहारप्रतिपत्तैस्तदाकारैरेकं तथा सुवर्णादिकम् अन्योऽन्यकालपरिहारगतैरिति प्रतिपत्तव्यम् । कुतः पुनः रुचकादीनां पूर्वापरीभावस्य प्रतीतिः ? पूर्वापरप्रत्ययाभ्यामिति चेत्; तद्भेदस्य कुतः ? स्वसंवेदनादिति चेत्; कथं ततो द्वित्वप्रतिपत्तिः अन्यगतस्यान्यत्राप्रवृत्तेः ? एकस्य च पूर्वपरीभूतस्याभावात् । एकमेव तत्तथाविधमिति चेत्; न, एकत्वे साक्षात्करणविषयतया पौर्वापर्यानुपपत्तेः । तदुक्तम्—

"यदि पूर्वापरीभावः केन तस्य प्रतीयताम् ।
प्राक्परप्रत्ययाभ्यां चेत्तयोर्भेदगतिः कुतः ॥
स्वसंवेदनभावाच्चेन्न स्याद् द्वित्वगतिस्ततः ।
न चाप्यविद्यमानस्य परपूर्वस्य तद्गतिः ॥
एकं संवेदनं तच्चेत् परपूर्वतयेष्यते ।
एकत्वे परपूर्वत्वं साक्षात्कृततया कथम् ? ॥" [प्र० वार्ति ।ल० १।२०५]

इति चेत्, न; प्रत्यभिज्ञानेऽप्येवं प्रसङ्गात् । तथा हि—

सोऽयमित्यनयोर्देशभेदो गम्यः कुतस्त्वया ।
ताभ्यामेवेति चेद्द्वित्वं तयोर्विज्ञायतां कुतः ॥ १४४० ॥
स्वसंवेदनभावाच्चेन्न स्याद्द्वित्वगतिस्ततः ।
नचाप्यविद्यमानस्य भिन्नदेशस्य तद्गतिः ॥ १४४१ ॥
एकं संवेदनं तच्चेद्भिन्नदेशतयेष्यते ।
एकत्वे भिन्नदेशत्वं साक्षात्कृततया कथम् ? ॥ १४४२ ॥ इति ।

ततो यथा प्रत्यभिज्ञानं स्वाकारे कचिदाभिमुख्यमजहदेव तदन्तरं प्रत्येति युगपत्, तथा क्रमेणापि रुचकादिपर्यायपरिग्रहाभिमुख्यमपरित्यजदेव तदन्वयज्ञानमपरापरानपि स्वस्तिकादिपर्यायान् परि छनत्तीति सुभाषितमेतत्—

विशेषकल्पनायां स्यात् परस्याव्यभिचारिता । इति ।

माभूत्प्रत्यभिज्ञानम्, युगपदपि चित्रैकस्यानभ्युपगमादिति चेत्, अत्राह—

तस्मात् सभागसन्तानकल्पनापि न युज्यते ॥ ९६ ॥
न चेत् [स परिवर्तेन हेतुरेव फलात्मना] । इति ।

१–दवियोगे आ०, ब०, प० । "घञि उपसर्गस्य चेति सूत्रेण विकारस्य दैर्घ्यं च भवति, अतिचारः अतीचार इत्यादिवत् ।"–ता० टि० ।

प्रत्यभिज्ञानमित्यनुवर्तते। **न चेत्** न यदि प्रत्यभिज्ञानम्, **तस्मात्** प्रत्यभिज्ञानात् **सभागानां** सदृशापरापरक्षणानां **सन्तानस्य कल्पनापि अपि** शब्दाद् व्यवहारश्च **न युज्यते**। एवं मन्यते सति हि प्रत्यभिज्ञाने तदवगतसादृश्यायत्तोत्तत्प्रतीत्यसमुत्पादात् हेतुफलभावनियमः, ततश्च तत्सन्तानकल्पना न चासतीति। संवृत्यैव तत्कल्पना न प्रत्यभिज्ञानादिति चेत्; न; संवृतेरपि तद्रूपत्वात्। सा हि 'स एवाहं जलं पिबामि यः पूर्वं तदद्राक्षम्' इति मतिरेव। कथन्न प्रत्यभिज्ञाक्षणानां पौर्वापर्य्यकल्पनं संवृतिरिति चेत्? न; तत्रापि अस्मादिदं पूर्वमतश्चेदं परमिति प्रतिपत्तेः प्रत्यवमर्शत्वात् किं पौर्वापर्यस्य कल्पनेन? तत्त्वत एवं भावात्, अन्यथैकक्षणमेव जगत्प्राप्तम्। तथा चेत्; न कारणं कार्यं वा कस्यचिदिति कथं वस्तुत्वं यतो व्योमकुसुमादिकमतिशयीत? कथं वा सुगतक्षणानां पौर्वापर्यं यत इदं शोभेत—

"तिष्ठन्त्येव पराधीना येषां तु महती कृपा।" [प्र० वा १।२०१] इति। १

कल्पितमेव तत्रापि तदिति चेत्; न; स्वयं तस्याकल्पत्वात्। तस्माद्वासनोपप्लवाधिष्ठितो लोक एव तदपि कल्पयति। अत एवोक्तम्—

"न च पश्यति सन्तानं नापि कश्चित्प्रवर्तते।
न तिष्ठति प्रमाभावात् केवलं भवतो भ्रमः॥" [प्र० वार्तिकाल० १।१९६]। इति।

इति चेत्, तात्त्विकमेव तत्र अन्यद्द्रव्यात् तत्कस्मान्न भवति? तत्र प्रमाणस्य **'यदि** १
पूर्वापरीभावः' इत्यादिना प्रतिक्षेपादिति चेत्; ननु सोऽपि प्रश्नस्तदुत्तरभावप्रवृत्तापरापरज्ञानरूप एव कथं कचित् तद्भावं प्रतिक्षिपेत्? स्वयं तत्त्वतस्तद्रूपात्तदयोगात्। तस्यापि तद्रूप्यमारोपादेव, वस्तुतस्तत्रापि तस्य यदि इत्यादिनैव प्रतिक्षेपादिति चेत्, न; अनवस्थोपनिपातात्। ततो दूरं गत्वापि तात्त्विकमेव तत्र पौर्वापर्यमिति सिद्धस्तदात्मा परमार्थत एव सन्तानः। तस्य च न प्रत्यभिज्ञानादन्यतः प्रतिपत्तिः। तथा च सिद्धं तद्वदेव क्रमतोऽपि वस्तुषु वैचित्र्यम्। तदेवाह—**'स परिवर्त्तेत** २
हेतुरेव फलात्मना' इति। स कलशाऽवग्रहादिरेव हेतुरेव कारणमेव **परिवर्त्तेत** परिणमे **फलात्मना** कपालेहादिफलरूपेण, न हेतोरन्य एव फलात्मेत्येवकारः। एतेन 'अविनाशेऽपि' इति व्याख्यातम्।

कथं पुनर्हेतोः फलात्मना परिवर्त्तनं प्रत्यक्षबाधनात्, तेन निरन्वयस्यैव विनाशस्य प्रतिपत्तेरिति चेत्? अत्राह—

तस्माद्भावविनाशोऽयं फलीभावः [तदग्रहः] ॥ ९७ ॥इति। २

तस्मात् पूर्वोक्तात्तुच्छविनाशाभावात्। उक्तं हि पूर्वम्—'न तुच्छो विनाशस्तस्य स्वप्रतिपत्तावप्यसामर्थ्यादसम्बन्धाच्च। न हि वस्तुना संयोगः सम्बन्धः; अद्रव्यत्वात्। नापि समवायः; तदधिकरणतया तस्याप्रतिपत्तेः। न च विशेषणभावः; 'तत्प्रतिपत्तौ तदनुरक्तस्य वस्तुनोऽपि नीलानु-

१ —तात्प्रती- ता०। २ प्रत्यवमर्शात् प०। ३ तत्त्व एवं ता०। ४-व तवान्यत्र वा तत्तस्मा—आ०, ब०,प०। ५ ततस्तस्यापि तत्र य— आ०, ब०, प०। ६ कलशः कपालरूपेय अवग्रहश्च ईहारूपेण। ७ न्यायवि० श्लो० २।९०। ८ —नास्य संयो— आ०, ब०, प०।

रक्तोत्पलवत् प्रतीतिप्रसङ्गात्' इति। नित्यश्चासौ भवेदकार्यत्वात् आकाशादिवत्। कार्यमेवासौ मुद्गरादेरुत्पत्तेरिति चेत्; कुतस्तत्प्रागभावस्य विनाशः ? तदभावे तदुत्पत्तेरयोगात्। तत एव मुद्गरादेरिति चेत्; न; पुनस्तत्प्रागभावविनाशस्यापि तत एव भावे युगपदनेकविनाशप्रतीतिप्रसङ्गात्। न चैकहेतुका युगपदनेककार्योत्पत्तिः; सामग्रीभेदादेव तदुपदर्शनात्। घटादिरेव तस्य प्रागभाव-
५ स्ततस्तद्विनाश एव तस्यापि नाश इति चेत्; नन्वेवं विनाशोऽपि भावरूप एव स्याद् अभावत्वात् प्रागभाववत्। ततः कलशादिरेवायं न तुच्छः। **तस्मात्** भावस्य घटादेर्विनाशोऽयम् उभयसम्मतः **फलीभावः** अफलस्य सतः फलतया भवनम्। कुतः पुनः च्विग्रहणं न 'फलभावः' इत्येवोच्येत, फलस्यैव हेतुविविक्तस्य तद्विनाशत्वादिति चेत् ? न; दत्तोत्तरत्वात् —'**अन्यस्यान्यो विनाशः किम्**' इत्यादिना[3]। फलभावप्राप्तिरेव विनाश इति ज्ञापनार्थमुपपन्नं तद्ग्रहणम्। अथवा
१० **तस्मादिति** सभागसन्तानकल्पनादिति प्रतिपत्तव्यम्। न हि तत्कल्पनं हेतोः फलभावपरिवर्त्तनामन्तरेण सम्भवति। सम्भवत्येव हेतुफलविविक्तस्य भावादिति चेत्; न; सुगतेतरज्ञानयोरपि तत्प्रसङ्गात्। अनुपादानोपादेयत्वान्नेति चेत्; तदेव कुतः ? सादृश्याभावादिति चेत्; न, सुगतज्ञानेनेतरस्याप्रवेदनोपनिपातात्[4]। सादृश्यविशेषाभावादिति चेत्; कस्तर्हि तद्विशेषोऽन्यत्र कथञ्चिदभेदादिति युक्तं तत्कल्पनादपि तस्य तदात्मना परिवर्तनोपादानम्, प्रत्यक्षप्रतिपत्तेरपि तत्र समर्थनात्।
१५ ततः किम् ? इत्याह—

तदग्रहः।

तद्ग्रहः [प्रतिषेधाऽस्य केवलं तन्निबन्धनः]। इति।

तस्य भावस्याग्रहोऽप्रतिपत्तिः **तद्ग्रहः** फलीभावस्य ग्रहो[5] न ग्रहनिवृत्तिमात्रम्। नाप्यन्यग्रह इति यावत्। एवमपि भवतु तत्र फलीभावव्यवहारः, विनाशव्यवहारस्तु कथम् ? तद्भावस्याविनाश-
२० रूपत्वात्। अत्राह-'**प्रतिषेधोऽस्य केवलं तन्निबन्धनः**' इति। **प्रतिषेधः** तद्व्यवहारः अस्य भावस्य **केवलं** नान्यनिमित्तोऽपि तु **तन्निबन्धनः** फलीभावग्रहनिमित्तकः तत एव लोकैस्तद्व्यवहारस्य प्रवर्तनादिति भावः।

साम्प्रतं हेतुफलयोः पराभिप्रेतमन्यत्वव्यवस्थापनं दर्शयति—

अन्यथात्वं यदीष्येत हेतोरपि फलात्मनः ॥ ९८ ॥
२१ **अन्य एवेति किन्नेष्टमिति केचित्प्रचक्षते।**

अन्यथात्वम् अन्यप्रकारत्वं **यदि** चेत् **इष्येत हेतोः** विवक्षितफलजनकस्य अतज्जनकादिति सामर्थ्याद् गम्यते। किमिति तदिष्यते इति चेत् ? अन्यथा हेतुत्वासम्भवात्। न हि शालि-

---

१ ततश्च त- आ०, ब०, प०। २ फलीभाव इत्यत्र च्विप्रत्ययग्रहणम्। स एव ग्रह- प०। ३ न्यायवि० श्लो० २।९०। ४ तदाकारत्वाभावादिति शेषः। ५ ग्रहो नाग्रह इति आ०, ब०, प०। ६ एतदपि भ- आ०, ब०, प०।

बीजस्यातद्बीजादन्यथात्वमन्तरेण तदङ्कुरहेतुत्वं तद्बीजवदेव तद्धेतुत्वप्रसङ्गात्। तथा च न नियतो हेतुभाव इत्यभिमतसिद्धये यत् किञ्चिदुपादातव्यं भवेत्। इष्यत एव तर्हि तस्य ततोऽन्यथात्वं प्रतिभासप्रयोजनव्यपदेशादिभेदादिति चेत्; अत्रोत्तरम्—'**अपि फलात्मनः**' इति। फलमेव फलात्मा सुबुद्ध्यात्मवत्, ततोऽपि न केवलमतद्धेतोरेव 'हेतोरन्यथात्वमिष्येत' इति सम्बन्धः, प्रतिभासादिभेदस्य तत्रापि भावात्। ततः किमिति चेत्? उत्तरम्—अन्य एव फलात्मनो भिन्न एव हेतुरिति प्रथमापरिणामेन सम्बन्धः। इति एवं **किन्नेष्टम्** इष्टमेव भवति जैनस्यापि प्रमाणोपपत्तेः। तथाहि—यद् यस्मादन्यथाभूतं तत्ततोऽन्यदेव यथा शालिबीजमतद्बीजात्, अन्यथाभूतं च तत्फलादपि तत्। तथापि तस्य तस्मादनन्यत्वं चेत्; अतद्बीजादपि स्यादिति तदपि तस्यैव विवर्तः स्यात्। एवं च—

शालिबीजविवर्त्तत्वं देशकालादिभेदिनः।
जगतः सम्प्रसज्येत स्याद्वादमुपजीवताम्॥ १४४३॥
तन्मा भूदिति मन्वानैरतद्बीजादिव स्फुटम्।
तत्फलादपि तद्बीजस्यान्यत्वमुपगम्यताम्॥ १४४४॥
तन्न हेतुफलैकत्वं कथमप्युपपत्तिमत्।
इत्येवं केचिदज्ञानमलदिग्धाः प्रचक्षते॥ १४४५॥

तत्रोत्तरमाह—

अन्यथात्वं न चेत्तस्य भवेद् ध्रौव्यम् [अलक्षणात्]। इति।

तस्य भावस्य **ध्रौव्यं** कौटस्थ्यम्। कदा? **न चेत्** न यदि **अन्यथात्वं** फलरूपतया परिवर्तनम्, **तस्येत्यत्रापि** सम्बन्धनीयम्। कुतः? इत्यत्राह—

अलक्षणात्।

अभावस्यापि [अभावोऽपि किन्नेत्यन्ये प्रचक्षते]॥ ९९॥ इति।

अलक्षणात् अप्रतीतेः **अभावस्य** तद्विनाशस्य न केवलमन्यथात्वस्येत्यपिशब्दः। कथं पुनस्तस्यालक्षणं कार्यस्य प्रत्यक्षत एव प्रतिपत्तेः, तद्रूपत्वाच्च विनाशस्येति चेत्? कस्यासौ विनाशः? कारणस्येति चेत्; न; तस्य कार्येण समकालत्वे विनाशतद्वतोर्योगपद्यप्रसङ्गात्। तत्पूर्वकालत्वे तु कुतस्तस्य ग्रहणम्? अग्रहणे तस्येत्ययोगात्। प्रत्यक्षत इति चेत्; न; तेनापि तत्कालेन वर्तमानतयैव प्रतिपत्तेः। कार्यकालादिति चेत्; न; तस्य पूर्वत्राप्रवृत्तेः। प्रवृत्तौ वा तदपि तद्विषयत्वात् कथं वर्तमानं कार्यवत्? स्वकालापेक्षयैव वर्तमानत्वं न कार्यकालापेक्षयेति चेत्? कथं तर्हि प्रत्यक्षतस्तज्जन्मनः स्मरणाच्च पूर्वभावस्याग्रहणमुक्तं यत इदं शोभेत—

"संवेदनं न पूर्वं तत्पूर्वत्वग्रहणे क्षमम्।
न परं तेन पूर्वत्वं स्मरणान्नैव साध्यते॥" [प्र० वार्तिकाल० १।२०५] इति।

---

१ –णातद्– ता०। २ अन्यथात्वं यदि न स्यात् तदा यवबीजवत् यवाङ्कुरहेतुत्वं स्यादिति भावः। ३– भासनादि– ता०। ४ चैतद्बीजा– आ०, ब०, प०। ५–ब च वि–आ०, ब०, प०। ६ इत्याह प०।

कथं वा द्रव्यरूपस्याप्रतिपत्तिः ? पूर्वापरयोरिव प्रत्यक्षत एव तदनुगमस्यापि प्रतीतेः द्रव्यस्य तद्रूपत्वात् । तदेवाह–**'अभावोऽपि किन्न** इति । **अः** आत्मा मतिश्रुतादिपर्यायानुरूपः तस्य **भावः अपि**शब्दात् पृथिव्याद्यन्वयरूपपुद्गलादिभावोऽपि **किं** कस्मान्न ? स्यादेव, प्रत्यक्षविषयस्याभावायोगात् । तथा चान्यथात्वमेव विनाशः कारणस्य, नैकान्ततस्तद्विविक्तं कार्यमिति मन्यते । यदि वा, यदुक्तम्–**"कार्यवज्जगदपि सर्वस्याकारणस्य परिवर्तः स्यादन्यथात्वाविशेषात् ।"** [ ] इति; तत्राह–**'अभावोऽपि किन्न'** इति । **अभावोऽपि** न केवलं परिवर्तः तत्तस्य कार्यवत् **किन्न** स्यात् ? स्यादेव, अन्यत्वाविशेषात् । तथा च—

जगतः समकालस्य नाशे सति परस्परम् ।
कार्यकालवदेवास्य स्यादभावः तदापि वः ॥ १४४६ ॥
तनश्च भावनैरात्म्यमनिषेध्यं प्रसज्यते ।
कार्यस्यैव विनाशत्वं तथैव यदि बुद्धितः ।
विवर्तत्वं च तस्यैव स्यादित्यपि च वक्ष्यते ॥ १४४७ ॥

प्रकृतस्योपसंहारमाह–**'इत्यन्ये प्रचक्षते'** इति । **इति** एवम् **अन्ये** जैनाः **प्रचक्षते** प्रमाणोपपन्नं प्रतिपादयन्ति ।

साम्प्रतं व्यवहारस्यातिप्रसङ्गमपरत्र तदभावप्रसङ्गमिव परिहरन्नाह–

स्वस्वभावस्थितो भावो भावान्तरसमुद्भवे ।
नष्टो वा नान्यथाभूतः [ततो नातिप्रसज्यते] ॥ १०० ॥ इति । ।

भावो दध्यादिः **अन्यथा** स्वप्रकारादन्यप्रकारेण **न भूतो** न जातः । एतच्च न तत्कार्यतक्रादिप्रादुर्भावेऽपि तु **भावान्तरस्य** तदन्यस्योष्ट्रादेः **समुद्भवे** प्रादुर्भावे सति, तस्मिन् तद्रूपेण न परिवृत्त इति यावत् । **स्वः** असाधारण उष्ट्राद्यसम्भवी **स्वभावस्तेन स्थितो** यत इति । **भावान्तरसमुद्भवे** इत्यत्रापि योज्यम् । तदयमर्थः–यस्मादुष्ट्रादिप्रादुर्भावेऽपि स्वभावस्थित एवायं प्रतीयते तस्मान्न तद्रूपापत्त्या अन्यथाभूत इति । प्रतीतिश्चात्र स्वभावस्थितत्वस्य हेतुत्वाभिधानादेव लभ्यते, अन्यथा तदनुपपत्तेः । अत्रैव **'नष्टो वा'** इति दृष्टान्तः । **'न'** इत्यत्रापि सम्बध्यते मध्येकरणात् । **वा**शब्दश्चेवार्थः । तदयमर्थः–यथा भावान्तरसमुद्भवे भावो न नष्टः तदापि स्वस्वभावस्थितस्यैव तस्य प्रतीतेः, नाशे तदनुपपत्तेः, तथा तत एव न तद्रूपापत्त्याऽन्यथाभूत इति । ततो यथा तत्रायं प्रसङ्गः—

अन्यस्य हि विनाशित्वे सर्वदा दध्यसम्भवात् ।
चोदितो दधि खादेति कथं तत्रापि वर्तताम् ॥ १४४८ ॥
को वा प्रवर्ततां तत्र प्रवृत्तिरपि का भवेत् ।
न किञ्चित्ते न तत्त्वं स्यादन्यनाशप्रवादिनाम् ॥ १४४९ ॥ इति ।

---

१ तदुपगम– आ०, ब०, प० । २ य आ– आ०, ब०, प० । ३ श्रुतावधिप– आ०, ब०, प० । ४ तथापि आ०, ब०, प० । ५ जनाः प्र– आ०, ब०, प० । ६ एव तच्च आ०, ब०, प० । ७ –पि स्वभा– आ०, ब०, प० ।

कार्यान्यस्यान्यत्वाविशेषेऽपि तद्विनाशित्वाभावात्, तथाऽयमपि न प्रसङ्गः—

"सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ।
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ॥" [प्र० वा० ३।१४२ इति

विशेषनिराकृतेरभावात् । दध्यादेर्हि तक्राद्यपेक्षयैवोभयरूपत्वप्रतिपत्तेर्नोष्ट्राद्यपेक्षया । तदेवाह— 'ततो नातिप्रसज्यते' इति । ततस्तस्मात्प्रतीतिसिद्धात् विशेषात् **नातिप्रसज्यते** दधिवदुष्ट्रादौ, दधिकामस्य [1]प्रवृत्तिर्न भवतीत्यर्थः ।

तदेवं प्रपञ्चतः साध्यमुपदिश्य साधनस्वरूपं दर्शयन्नाह—

साधनं प्रकृताभावेऽनुपपन्नं [ततोऽपरे] ॥ १०१ ॥ इति ।

साध्यतेऽनेनेति **साधनं** लिङ्गम् । तत् **प्रकृतं** शक्यत्वादिलक्षणं तस्याभावे **अनुपपन्नम्** असम्भवि । 'निश्चितम्' इत्यपि द्रष्टव्यं वृत्तौ अन्यत्र च तद्वचनात् । कथमेवमन्यत्रानुपपन्नत्वमेव हेतुक्षणं निश्चयस्यापि तदन्यस्य भावात् ? न, तस्य साधारणत्वात् । साधारणः खलु निश्चयः तस्य हेतुवदन्यत्रापि भावात् । असाधारणेन च लक्षणेन भवितव्यम्, तच्चान्यथानुपपन्नत्वमेव हेतावेव तस्य नियमात् । तदपि साधारणमेव अहेतावपि प्रत्यक्षादौ स्वार्थापेक्षया भावात्, भवति हि प्रत्यक्षादि स्वार्थापेक्षयाऽन्यथानुपपन्नम्, न च हेतुः । कस्मात् ? साध्याभावात् । न हि तद्विषयस्य साध्यत्वं प्रसिद्धत्वात् । अप्रसिद्धत्वे प्रत्यक्षादेरपि न प्रसिद्धिः विषयप्रसिद्ध्यैव तस्यापि प्रसिद्धेः' । ततो यदि तस्य प्रसिद्धिः; प्रसिद्धिरेव विषयस्यापीति न तस्य हेतुत्वम् । कथमिदानीम् 'अस्ति आत्मोपलब्धेः' 'नास्ति घटोऽनुपलब्धेः' इति च प्रत्यक्षस्यैव हेतुत्वप्रतिपत्तिरिति चेत् ? न; विषयापेक्षया तदभावात् । विषयो हि तस्यात्मास्तित्वं घटाभावश्च, न तत्रैव हेतुत्वं प्रसिद्धत्वात्, अपि तु तद्व्यवहारे, तत्र च न प्रत्यक्षत्वमुपलम्भादेरविषयत्वात् । कथं पुनस्तत्रापि हेतुत्वम् असति तदनुपपत्तेः । सतो हि लिङ्गं ज्ञापकं भवति नासतः खरशृङ्गवत् । सत्त्वेऽपि न किञ्चिल्लिङ्गेन, विनापि तेन तत्प्रसिद्धेः, निश्चयाभिधानात्मा हि व्यवहारः, तस्य प्रत्यक्षत एव स्वसंवेदनादेरवगमात्, किं तेन ? कृतस्य करणायोगात् । असन्नेव [3]तेनायमुत्पाद्यते विषयोपदर्शनेनेति चेत्; न; साध्यं प्रति[4] तस्य कारणत्वाभावात् । भवतु तर्हि व्यवहारयोग्यत्वे तस्य लिङ्गत्वमिति चेत्, कस्य तद्योग्यत्वम् ? तद्विषयस्यैवेति चेत्; सिद्धं तर्हि तस्य तत्रैव कथञ्चिद्धेतुत्वमिति कथमतिव्यापकत्वं लक्षणस्य ? नन्वेवमनवस्थितिः प्रत्यक्षवदनुमानस्यापि तदुत्थापितस्य पुनस्तदुत्थापितस्य लिङ्गत्वप्राप्तेः । यत्राविप्रतिपत्तिस्तस्य व्यवस्थैव साध्याभावादिति चेत्; तत्र तर्हि सिद्धमन्यथानुपपन्नत्वमहेतुत्वेऽपि इति कथञ्चातिव्याप्तिरिति चेत् ? न; तन्मात्रस्यालक्षणत्वात् । प्रकृतापेक्षं हि तत्तल्लक्षणम्, तच्च नाविप्रतिपत्तौ सम्भवति, प्रकृतस्य विप्रतिपत्तिविषयत्वात् । यत्र तु सम्भवति तल्लिङ्गमेव प्रत्यक्षादिकमपि । कथं पुनः सति तस्मिन् विप्रतिपत्तिर्यतः प्रकृतसम्भव

---

१ प्रतीतिर्न भ— प० । २ "साध्यार्थासंभवाभावनियमनिश्चयैकलक्षणो हेतुः ।"—प्रमाणसं० पृ० १० २ । ३ हेतुना । ४ प्रतीतस्य कारकाभा— प० । प्रतीतस्य कारकत्वाभा— आ०, ब० ।

इति चेत् ? न; दत्तोत्तरत्वात्[1]–'भ्रान्तेः पुरुषधर्मत्वात्' इति । ततो युक्तम्–'अस्त्यात्मा उपलब्धेः' इत्यादि । न चैवं क्षणक्षये तथावभासनस्यापि हेतुत्वं साध्यवत् तस्यापि असिद्धेः । आत्मोपलब्धिरपि असिद्धैवानात्मवादिनं प्रति इति चेत्; न; सोऽहमिति बुद्धेस्तेनाप्यभ्युपगमात्, अन्यथा आत्मारोपाभावादनुपायसिद्धा मुक्तिरिति व्यर्थ एव तदर्थः[2] प्रयासः स्यात् । [3]तद्बुद्धिरेव चात्मोपलब्धिः, तत्प्रति भासिनः संवेदनान्वयस्यैवात्मत्वात् । न चैवं क्षणक्षयावभासनमात्रोधिमार्गावतारात् कस्यचिदपि विपश्चितो निश्चयकुटीरकोटरमुपढौकितमस्ति यस्य लिङ्गत्वमात्मोपलब्धिवत् प्रतिपद्येमहि । ततो युक्तम्–'प्रकृत' इत्यादि ।

अत्र प्रकृतस्यैव, अभाव एव, अनुपपन्नमेवेति चावधारयितव्यं सावधारणत्वात् वाक्यानाम् । तत्र प्रथमेनावधारणेन विरुद्धस्य व्युदासः[6], नह्यसौ[7] प्रकृतस्यैवाभावेऽनुपपन्नः, अपि तु तद्विपरीतस्यैव । द्वितीयेनासिद्धस्य[8] । नह्ययमपि प्रकृताभाव एवानुपपन्नः, तद्भावेपि तँथात्वात् । न तर्हि धूम-प्रयत्नानन्तरीयकत्वादिरपि हेतुः, साध्यस्य मुर्मुरदहन-वनकुसुमानित्यत्वादेर्भावेऽपि तस्याभावादिति चेत्; न; तस्यासाध्यत्वात् । साध्यं हि शक्यत्वादिविशेषणं पर्वताग्न्यादिकमेव तत्रैवाभिप्रेतत्वादेर्भावात् न [9]मुर्मुराग्न्यादौ विपर्ययात्, अतस्तत्र साध्याभावादेव तस्याभावः । कथं तर्हि महानसाग्न्यादावपि तस्य भावः तस्याभिप्रेतत्वाद्यभावेनासाध्यत्वात् । [10]भावे वा कथन्न व्यभिचारः ? तत्सदृशस्यैव तत्र भावादिति चेत्; न; सर्वत्र एवमेव व्यभिचारात् अन्यथा तदप्रतिपत्तेः । न हि 'प्रयत्नानन्तरीयको ध्वनिः अनित्यत्वात्' इत्यत्रापि ध्वनिगतस्यैव अनित्यत्वस्य विद्युदादौ भावाद् व्यभिचारः, अपि तु तत्सदृशस्यैव, सामान्यस्यैकस्य प्रतिक्षेपादिति चेत्; न; अन्तर्व्याप्तिनिर्णयाभावादेव [10]तदुपपत्तेः, न साध्याभावे तत्तुल्यभावात् । कुत एतदिति चेत् ? सति तन्निर्णये [11]तथापि गमकत्वप्रतीतेः । प्रतीयते हि धूमादिविशेषस्य तन्निर्णये पावकादिविशेषं प्रति गमकत्वम्, तत्तुल्यस्य चान्यत्राग्न्यादिमात्रे भावः । तद्विशेषवैकल्ये कथं तस्य तत्तुल्यत्वमिति चेत् ? धूमादित्वमात्रेण न तद्विशेषेणापि, अन्यथैकत्वमेव स्यात् सर्वाकारसाम्यादन्यस्य [12]तस्याभावात् । कथमेवं प्रयत्नानन्तरीयकत्वमपि शब्दस्यानित्यत्वविशेषात् नावगम्यत इति चेत्; क एवमाह–'नावगम्यते' इति तद्विशेषावसाये तदप्रतिक्षेपात्, तदभाव एव व्यभिचारावकल्पनात्–किमनित्यत्वात् प्रयत्नानन्तरीयकः शब्दो घटवत्, आहोस्वित् अन्यथा वनकुसुमादिवदिति । तन्न साध्याभावे तत्सदृशस्याभावेऽपि व्यभिचारः तस्याभावात् । ततो युक्तं प्रकृताभाव एवेति ।

---

१ न्यायवि० श्लो० १०४ । २ तदर्थप्र–आ०, ब०, प० । ३ तद्बुद्धेरेव आ०, ब०, प० । ४ "ह्रस्वा कुटी कुटीरः । कुटी शुण्डाद्र इति सूत्रेण ह्रस्वार्थे रप्रत्ययविधानात् ।"–ता० टि० । ५ विरुद्धः । ६ "व्युदासः"– ता० टि० । ७ अनुपपन्नत्वात् । –ता० टि० । ८ –राग्न्यादि वि– आ०, ब०, प० । ९ "महानसाग्न्यादौ धूमादिभावे"–ता० टि० । १० व्यभिचारोपपत्तेः । ११ "साध्याभावे तत्तुल्यभावप्रकारेण"– ता० टि० । १२ एकत्वस्य ।

एवमनुपपन्नमेवेत्यपि, तेनानैकान्तिकस्य व्यवच्छेदात् । न हि तस्य तदभावेऽनुपपत्तिरेव उपपत्तेरपि भावात्, प्रयत्नानन्तरीयकत्वेऽनित्यवत् ।

साम्प्रतं तानवधारणव्यवच्छिन्नान् हेत्वाभासानुपदर्शयति—

ततोऽपरे ।

विरुद्धासिद्धसन्दिग्धा अकिञ्चित्करविस्तराः । इति । ५

अत्रापरे इत्येतद्विरुद्धेत्यादेः परतोऽपि द्रष्टव्यम् । तदयमर्थः—**विरुद्धासिद्धसन्दिग्धा अपरे** हेत्वाभासा एव न केवलं त एवापि तु **अकिञ्चित्करविस्तराश्च** । अत्रैवोपपत्तिः—**ततः** तस्मादुक्तलक्षणात् साधनादपरे तल्लक्षणविकलतया विभिन्ना यत इति । तत्र विरुद्धस्य तदाभासत्वं साध्यस्याभाव एव भावात् । असिद्धस्य सत्यपि तस्मिन् अभावात्, सतोऽप्यनिश्चयात् । सन्नपि अनिश्चितोऽसिद्ध एव सिद्धकार्याकरणात्त अतस्तदाभासः । निश्चयाभावोऽपि अव्युत्पत्त्यादिना, १०
वादिप्रतिवादिनोरन्यतरस्योभयस्य वा तत्राव्युत्पन्नस्याज्ञातासिद्धः, संशयानस्य सन्दिग्धासिद्धः विपर्यस्तस्य विपरीतासिद्ध इत्यनेकधा स भिद्यते । सन्दिग्धो व्यभिचारी किमित्थं[1]मन्यथा[2] वेति ततः साध्यसंशयात्तस्य तदाभासत्वं तत्रैव[3] नियमाभावात् । अकिञ्चित्करः पुनः सिद्धोपस्थायी यथा शब्दानित्यत्वे कृतकत्वेन निश्चिते तत्रैवापरः प्रयत्नानन्तरीकत्वादिः । कुतस्तस्याकिञ्चित्करत्वम् ? ततस्तन्निर्णयस्यानुत्पत्तेरिति चेत्; सापि कुतः ? कृतकत्वादेव तस्य भावादिति चेत्; न; तत्कार्यस्या- १५
न्यतोऽनुत्पत्तेः । तादृशस्योत्पत्तिरिति चेत्; अस्तु; न तावता शक्तस्य स्वव्यापारादुपरतिः, पावकान्तरवद्धूमान्तरकृतेः । शक्तिरेव न तस्येति चेत्; तदपि यदि हेतुलक्षणवैकल्यात्, तदा विरुद्धादावेवान्तर्भावः, प्रतिपादितावधारणविपर्ययादेव तद्वैकल्यसम्भवात्, तद्विपर्ययस्य च विरुद्धादावेव नियमात् । विषयाभावान्न ततस्तन्निर्णय इति चेत्; न; लक्षणपरिपुष्टौ तदनुपपत्तेः । कथं वा तदभावः ? शब्दानित्यत्वस्य भावात् । प्रागेव निर्णीतमिति चेत्; न; तत्राप्यनुपहतस्वरूपत्वेन तदन्तरस्यापि २०
प्रवेशात् प्रकाशिते प्रकाशान्तरवत् । न चैवं छिदेरपि छिन्ने प्रवेशः; छेद्याभावात् । किं तत्प्रवेशेन व्यवहारस्य पौरस्त्यादेव भावादिति चेत्, न समर्थात् ततोऽपि तस्यावश्यम्भावात् । व्यवहारिणस्तदभिलापस्याभावान्नेति चेत्; नेदानीमाद्यस्यापि लिङ्गत्वं ततोऽपि तन्निर्णये झटित्यन्यत्रगतचित्तस्य तदव्यवहारासम्भवात् । भवतु तदा तस्याप्यकिञ्चित्करत्वमिति चेत्; न, "**सिद्धेऽकिञ्चित्करो हेतुः**" [प्रमाणसं० श्लो० ४४] इति तल्लक्षणात् आद्यस्य चासिद्ध एव भावात् । निर्णयमात्रेण तु तस्य[4] हेतुत्वं २५
द्वितीयस्यापि स्यात् । तस्मात्तदभावादेव तस्याकिञ्चित्करत्वम्, तच्च साधनलक्षणवैकल्यादेव । ततो विरुद्धादय एवाकिञ्चित्करविस्तरा इति केचित् । अन्ये पुनः 'तत्रैवाप्रवृत्तहेत्वन्तरे त एव सम्यक्हेतव इति नातीव विरुद्धादित्वमनुभवन्ति, अतोऽन्य एव ते तेभ्यः तदाभासाः' इति प्रतिपन्नाः । यदि साधनं प्रकृते सत्येव न तदा सपक्षेऽपि स्यात् तत्र प्रकृताभावात्, ततश्च न तस्य तदविनाभावपरिज्ञानं सपक्ष एव तत्सम्भवात्, न पक्षे तत्र अद्यापि प्रकृतस्यानिश्चयादिति चेत्; अत्राह— ३०

१ "साध्यसद्भावप्रकारेण ।" —ता०टि० । २ "साध्याभावप्रकारेण"—ता० टि० । ३ "साध्य एव" —ता० टि० । ४ आद्यस्य । ५ —प्रवृत्तेर्हेत्व— आ०, व०,प० ।

तथार्थेऽसत्यसम्भूष्णुर्धर्मो न बहिरङ्गतः ॥ १०२ ॥
सर्वथैकान्तविश्लेषे साध्यसाधनसंस्थितेः । इति ॥

बहिर्भावाभावौ साध्यसाधनयोः बहिः तादवस्थ्यात् तद्व्यपदेशोपपत्तेः[1] तस्य अङ्गनम् अङ्गः अवगमः तस्मात्ततः 'न भवति' इति शेषः । कः कीदृशो न भवति ? धर्मः पराश्रयः प्रमेयत्वादिः अर्थेऽर्थक्रियासमर्थे असति अविद्यमाने असम्भूष्णुः साधुसम्भवविकलः । कुत एतत् ? तथा तेन बहिरङ्गतस्तस्य तथात्वप्रकारेण साध्यसाधनयोस्तद्भावस्य भावप्रधानत्वात् निर्देशस्य, समन्तादतिव्याप्त्या स्थितेः । तथा हि—विवादापन्नः पुरुषः किञ्चिज्ज्ञो रागादिमान् वा पुरुषत्ववक्तृत्वादेः रथ्यापुरुषवदित्यस्यापि गमकत्वप्रसङ्गः सत्येव रथ्यापुरुषे किञ्चिज्ज्ञत्वादौ तस्योपलम्भात् असति च पाषाणादौ अनुपलम्भात् अविनाभावप्रतिपत्तेरुपनिपातात् । न बहिर्दर्शनमात्रात् तस्याविनाभावोऽपि तु तादात्म्येन तदुत्पत्त्या वा प्रतिबन्धात्, न चायमिहास्ति प्रमाणाभावात् । न हि किञ्चिज्ज्ञत्वादेः स्वभावः कार्यं वा पुरुषत्वादिकमिति प्रमाणमस्ति, सर्वज्ञत्वादौ तद्विपक्षेऽपि तस्याविरोधादिति चेत्; किमिदानीं[4] शिंशपात्वधूमादावपि प्रमाणं यतः प्रतिबन्धसिद्ध्या गमकत्वम् ? तदेव भूयःप्रवृत्तं बहिः प्रत्यक्षं—तद्व्यावृत्तिद्वितयमिति चेत्, न, प्रकृतेऽपि तस्य भावात् । विपक्षे तद्बाधकप्रवृत्तिरिति चेत् ? तस्या अपि तद्भूपत्वे न किञ्चित् परिहृतम् । अतद्भूपत्वे कुतस्तदुत्पत्तिः ? तत एवेति चेत्; अनिवृत्तः प्रसङ्गः । तदन्यत इति चेत्, न तर्हि क्वचिदपि बहिरुपलम्भतद्व्यावृत्त्योरुपयोग इत्यसङ्गतमेतत्—**"बाधस्य कार्यहेतोः स्वभावविशेषस्य च क्वचिदाधारे प्राक्प्रवृत्तगृहीतविस्मृतप्रतिबन्धसाधकप्रमाणस्मृतये अन्यत्र प्रवृत्तिरपेक्षणीया ।"** [ ] इति । ततो दर्शनतन्निवृत्तिलक्षणमेव विपक्षे तत्सत्ताबाधनद्वारेण धूमशिंशपात्वादावपि तादात्म्यादिप्रतिबन्धसाधकं प्रमाणमित्यङ्गीकर्तव्यम् । तच्च प्रकृतेऽप्यस्तीति कथन्नातिव्याप्तिः ?

'सर्वथा' इत्याद्यत्रैवाव्याप्तिप्रदर्शनपरमुपपत्त्यन्तरम्—**सर्वथा** सर्वप्रकारेण नित्यमेव अनित्यमेव स्थूलमेव सूक्ष्ममेव परस्परभिन्नं तदद्वितयमेवेत्यादयः **एकान्ताः सर्वथैकान्ताः** तेषां **विश्लेषो** यस्मिन्नसौ **सर्वथैकान्तविश्लेषोऽनेकान्तः** तस्मिन् साध्ये **साध्यसाधनसंस्थितेस्तद्भावस्य** सम्यगवस्थानात् **'अर्थे सति'** इत्यादिना सम्बन्धः । तथाहि—सर्वमनेकात्मकं प्रमेयत्वादित्यत्र न बहिरुपलम्भ-तद्व्यवच्छेदौ सपक्षविपक्षयोरेव, सर्वस्य पक्षीकरणेन असम्भवात् । न चेहाविनाभावो नास्ति, विपक्षे बाधकसामर्थ्यात् तदवगतेः । बाधकमप्यूहज्ञानं बहिर्दर्शनादर्शनाभ्यामेव, अन्यत्र तथाभिधानात् तत्कथमिह तदभावे तत्सम्भव इति चेत् ? न; नियमाभावात् । न ह्ययं

---

१ ताच्छब्द्योपप— आ०, ब०, प० । २ तस्यां गमनं गोऽवगमः आ०, ब०, प० । ३ सम्मतादिति व्याप्त्यासिद्धेः प०, समन्तादिति व्याप्त्या आ०, ब०,। ४ —ङ्गं त— प० । ५ प्रत्यक्षतद्व्यावृत्तिद्वितयरूपत्वे । ६ —तच्चास्यकार्य— आ०, ब०, प० । ७ "सम्भवप्रत्ययतर्कः प्रत्यक्षानुपलम्भतः ।" —प्रमाण सं० का० १२। "अन्यान्तरे अकलङ्कदेवैस्तथाभिधानात्, तदनुसारिभिर्माणिक्यनन्दिभिरुक्तं यथा उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः ।" —ता० टि० ।

नियमस्ताभ्यामेव तदिति, तदभावेऽपि क्षयोपशमविशेषोपनिपातात् कुतश्चिदतिशयात् तदुत्पत्तेः, ताभ्यां तद्भावेऽपि तदतिशयस्य अवश्यापेक्षणीयत्वात् अन्यथा तद्विषयमात्रपर्यवसायित्वेन तस्यानर्थकत्व-प्रसङ्गात् । क तर्हि तस्य[1] ताभ्यामुत्पत्तिरिति चेत् ? धूमादावेव, सपक्षविपेक्षयोस्तत्र सम्भवात् । कथं तत्रापि सपक्षत्वं महानसादेः[2] साध्यस्य तत्राभावात् ? सत्येव तस्मिन् तदुपपत्तरिति चेत्; न तद्भावात् सपक्षत्वम् , अपि तु पर्वतादिवदग्न्यादिभावात्, पर्वतादेरपि तत एव पक्षत्वात् । एवमप्यग्न्याद्यविना-भावस्यैव ततः प्रतिपत्तिर्न साध्याविनाभावस्य, प्रमाणीकृतं च तत्र तदूहज्ञानं शास्त्रकारेण, तस्मात् प्रत्यक्षानुपलम्भजन्मा तत्रोहः प्रमाणयितव्य इति चेत्; न; अग्न्याद्यविनाभावग्रहणे साध्याविनाभाव-स्यापि ग्रहणात्, अग्न्यादेरेव शक्यत्वादिविशिष्टस्य साध्यत्वात् । यश्च यादृक् चाग्न्यादिर्न तेन विना धूमादिरिति तदव्यापारात् । ततः सम्भवापेक्षं[3] तस्य तज्जन्यत्वमुक्तं न नियमत इति वयं प्रतिपन्नाः । अथवा,

देवस्य शासनमतीवगभीरमेतत्तात्पर्यतः क इव बोद्धुमतीव दक्षः ।
विद्वान्न चेत् स गुणचन्द्रमुनिर्न विद्यानन्दोऽनवद्यचरणः सदनन्तवीर्यः ॥१४५०॥

कथमत्र[4] विपक्षे बाधनमिति चेत् ? उच्यते–विपक्षो नित्याद्येकान्तः, तत्र नित्यस्य प्रमेयत्वं यदि तज्जन्मना प्रमित्या नित्यं[5] तत्प्रसङ्गः प्रमितेरनुपरमात् । अन्यजन्मना चेत्; तत्रापि प्रमिति-सन्निधौ यदि न प्राग्रूपस्य परित्यागः कथं प्रमेयत्वं प्राग्वदेव ? परित्यागे वा कथं नित्यत्वम् अतादव-स्थ्यात् । प्रमितिप्रागभावस्यैव तदा परित्यागो न नित्यरूपस्य, न चैवमप्रमेयत्वं प्रमितिभावदिति चेत्; न; सर्वस्यापि तत्तत्त्वं[6]प्रसङ्गात् । अप्रतिभासनान्नेति चेत्; सिद्धस्यापि किं प्रतिभासनम् ? तदन्तर्भाव एवेति[7] चेत्; अनिवृत्तः प्रसङ्गः । विषयभावापत्तिरिति चेत्; कथं प्राग्रूपस्यापरित्यागः ? इति न किञ्चिदेतत् ।

भवतु अनित्यमेव तत्त्वमिति चेत्; तदपि अयोग्यमप्रमेयमेव [8]व्योमकुसुमवत् । योग्यञ्चेत् ; कुतो न [9]सर्वस्यापि [10]प्रमेयम् ? नियतं प्रत्येव योग्यत्वादिति चेत्; स यदि संसारी न सर्वज्ञस्य प्रमेयम् । सर्वज्ञश्चेत् ; न संसारिणः । उभयोरपीति चेत्; संसारिणः सर्वज्ञत्वं सर्वज्ञयोग्यवस्तुप्रमितौ तेन सर्वज्ञस्य तच्च प्रमिण्वता तद्विषयस्यापि सर्वस्य प्रमितेः, अन्यथा तस्य तद्योग्यस्य च वस्तुनः प्रतिपत्तुम-शक्यत्वात् । नासौ वस्तुनस्तद्योग्यत्वं प्रत्येतीति चेत्; किं पुनः स्वयोग्यत्वादन्यदेव तत् ? तथा चेत्; वस्त्वपि तर्हि तद्भेदाद्भिन्नमेवेति कथं सर्वज्ञवेद्ये तदुपदेशादपि संसारिणः प्रतिपत्तिः जात्यन्धस्येव रूपे चक्षुष्मदुपदेशात् ? तयोरपि कथञ्चिदेव भेद इति चेत्; सिद्धं तर्हि प्रतीतम-

---

१ ऊहस्य । २ "शक्यमभिप्रेतमप्रसिद्धमिति विशेषविशिष्टस्याग्नेः" –ता० टि० । ३ द्रष्टव्यम्–पृ०...टि०...। ४ "सर्वमनेकान्तात्मकं प्रमेयत्वादित्यत्र" ।–ता० टि० । ५ "अनवरतम् । नित्यानवरता-ऽस्रमित्यमरः ।" –ता० टि० । ६ 'प्रमेयत्व' –ता० टि० । ७ –ति स चेत् आ०, ब०, । तदन्त-र्भावादेवेति इति स चेत् प० । ८ गगनकु– आ०, ब०, प० । ९ "जनस्य" –ता० टि० । १० "जनम्" –ता० टि० ।

प्रतीतश्चैकं परस्यापीति यदुक्तमनेकान्तवादिनं प्रति–"अप्रतीतं प्रतीतं चेत्तदेतदतिसाहसम्" [प्र० वार्तिकाल० १।२०५] इत्यादि; तत्प्रज्ञाकरस्य स्वगृहं प्रति प्रत्यावृत्तम्। ततो यथाभिमतं निरंशमेव तत्त्वम्, तत्र च—

सर्वात्मना दृशौ तस्य सर्वविद्वेद्यता दृशेः।
सिद्धः सर्वोऽपि सर्वज्ञो वृथा ते बुद्धकल्पनम् ॥१४५१॥
ज्ञानवान् मृग्यते कश्चिदित्यादिं प्रवदन्नतः।
धर्मकीर्तिः स्ववाचोऽपि तात्पर्यं तन्न बुद्ध्यते ॥१४५२॥
तद्वेद्यत्वमदृश्यं चेददृश्यं सर्वथैव तत्।
खण्डशो न हि दृश्यत्वं निरंशस्योपपत्तिमत् ॥१४५३॥
तन्नैकान्तादनित्यस्य प्रमेयत्वं प्रतीतिमत्।
नापि स्थूलस्य वस्तुत्वं यन्न तस्य स्वयं मतम् ॥१४५४॥
निष्कलाणुस्वभावं यत्तत्त्वं बौद्धोकल्पितम्।
काकदन्तोपमं तत्तत्प्रमेयत्वञ्च तादृशम् ॥१४५५॥
एकान्तभिन्नयोर्नापि स्थूलसूक्ष्मस्वभावयोः।
प्रमाणप्रत्तिवेद्यत्वं तदभेदप्रवेदनात् ॥१४५६॥
ते तन्तवः पटो यन्न तेभ्योऽन्य इति यज्जनः।
प्रत्येति वक्ति सर्वोऽपि विवादपरिवर्जितम् ॥१४५७॥
पटस्तन्तुष्विहेत्यादि शब्दा एव परं तथा।
न प्रत्ययो यतस्तेनाभेदप्रत्ययबाधनम् ॥१४५८॥
शब्ददृष्टिकृतेनापि तेन तस्य विबाधने।
सर्वैकत्वधिया बाधः सर्वभेदधियो भवेत् ॥१४५९॥
ततो द्रव्यादिभावानां तात्त्विकानामभावतः।
अवैशेषिकमेवेदं जगत् सर्वमुपस्थितम् ॥१४६०॥

तन्न सर्वथैकान्तस्य प्रमेयत्वमिति। विपक्षे बाधकसामर्थ्यादेव ततस्तद्विश्लेषस्य साधनात्, उपपन्नमेतत्–'सर्वथैकान्तविश्लेष' इत्यादि।

ननु प्रमेयत्वं यतः प्रमाणात् तस्य तदेकान्तविषयत्वे नातस्तद्विश्लेषस्य साधनम्, तत्पक्षस्य प्रमाणतः प्रतिक्षेपात्। तद्विश्लेषविषयत्वे तु व्यर्थमनुमानं तत एव तत्सिद्धेः, अन्यथा तत्प्रमितेऽपि तदपरकल्पनयाऽनवस्थापत्तेः। तदपि प्रमाणमनुमानमेवेति चेत्; न; परस्पराश्रयापत्तेः–अनुमानात्प्रमेयत्वमतश्चानुमानमिति – इति चेत्, न; प्रमाणमात्रादेव अविवक्षितविषयभेदात् तदुप-

---

१ प्र० वा० १।३२। २ चेत्तदृश्यं आ०, ब०, प०। ३ प्र० वा० २।१४९। ४ स्वाष्टपष्टिकृतेनापि आ०, ब०,प०। ५ "सर्वथैकान्तविश्लेपस्य"–ता० टि०। ६ अनुमानप्रमितेऽपि।

गमात्, वादीतरयोस्तत्राविप्रतिपत्तेः, अन्यथेष्टसिद्धेरसम्भवादिति । निरूपितं चैतत्[1]—'सन्ति प्रमाणानि इष्टसाधनात्' इति । तत्र व्यर्थमनुमानमनवस्थितिर्वा, अनुमानादेव विप्रतिपन्नं प्रति तद्विश्लेषस्य साधनात् तत्र चापरस्यानपेक्षणात् । कथमेवं प्रत्यक्षादपि[2] तत्साधनमुक्तम् "न पश्यामः क्वचित् किञ्चित्" [सिद्धिवि० परि० २] इत्यादिना ? न हीदमविप्रतिपन्नविषयम्, तत्र विवादाभावात् । विप्रतिपन्नविषयत्वे तु सति प्रत्यक्षे किमनुमानेनेति चेत्; न, प्रतिपादनप्रकारस्य वैचित्र्यात्, कदाचित् प्रत्यक्षादेव प्रमाणात कदाचिदनुमानत इति । किं पुनस्तत् प्रमाणं यतः सर्वस्य प्रमेयत्वमिति चेत् ? व्यक्तिज्ञानमेव, तस्य परैरप्यङ्गीकारात्, अन्यथाऽनुमानाऽनवकल्प्तेः । कथं पुनरनेकान्तस्य प्रमेयत्वम् तस्यैकान्तनिवृत्तिरूपत्वेनावस्तुत्वात् ? तत्र च प्रमाणस्याव्यापारादिति चेत्, न, तन्निवृत्तिविशिष्टस्य जात्यन्तरस्यैव तत्त्वात् । न च तादृशं किमपि दृष्टमस्ति यतः संविस्रम्भं[3] चेतः स्यादिति चेत्, आह—

एकं चलं चलैर्नान्यैर्नष्टैर्नष्टं न चापरैः ॥१०३॥
आवृतैरावृतं भागै रक्तै रक्तं विलोक्यते । इति ।

एकं शरीराद्यवयवि **चलैः** भागैः पाणितलादिभिः **चलं** परिस्पन्दात्मकम्, **नान्यैरचलैः** पादादिभिः । तदेव कथं चलमचलं च युगपदिति चेत् ? उत्तरम्—**विलोक्यत** इति । दृश्यते हि चलैरचलैश्चावयवैः तदेव चलमचलं च । न च दृष्टमनुपपन्नं सर्वत्र प्रसङ्गात् । भ्रान्तं तद्दर्शनम् अवयवचलनस्यावयविन्यारोपादिति चेत्; न; अदृष्टे तदयोगात् व्योमकुसुमवत् । दर्शनं च तस्य न परं चलनदर्शनात् । अप्रतिपत्तेः अस्तु तदेवेति चेत्; न; तद्विषयत्वे चलनवत्[6] अवयविनोऽप्यवस्तुत्वापत्तेः । अभ्रान्तमेवावयविनि तदिति चेत्; कथमेकमेवाभ्रान्तं तदूर्ध्वं[7] च विरोधात् ? अविरोधे वा किमेकमेवावयवि चलमचलं च न भवेत्, अस्यापि प्रतीतेः ? भ्रान्तं[8] च तद्दर्शनं तदा भवति यदि चलेष्वेव भागेषु कदाचिदवयविरूपमचलमुपलभ्येत, न चैवम् तच्चलने नियमतस्तस्यापि चलत एव प्रतिपत्तेः । तथापि विभ्रमे चलनावयवेऽपि स्यात् । ततो न क्वचित् क्रिया नाम तात्त्विकीति निर्विषयं तल्लक्षणप्रणयनम् । ततो भागवद्भागिनोऽपि चलनमितरच्च तात्त्विकमेव दृष्टत्वात् ।

तथा हि तदेवैकं **नष्टैः** छेदभेदादिप्रध्वस्तैरङ्गुल्यादिभिर्**नष्टं न च** नैव **अपरैः** अनष्टैः पाणिपादादिभिः । कुत एतत् ? **विलोक्यते** प्रतीयते यत इति । नष्टमेव तत् कारणविनाशे कार्यस्यापि विनाशात् । कारणं हि अवयविद्रव्यस्यावयवसंयोगः, "संयोगानां द्रव्यम्" [वैशे० सू० १।१।२७] इति सूत्रात् । तस्य च कर्मजात् तद्विरोधिनोऽवयविविभागात् विनाशे कथं न तत्कार्यस्य विनाश इति चेत् ? किमेक एव तस्य तत्संयोगो हेतुः ? तथा चेत्; न; "संयोगानां द्रव्यम्" इत्यस्य विरोधात् । अन्येऽपीति चेत्; तेषामप्येकतत्संयोगेन सह विनाशे कथमिदमुक्तम्—"एकाव-

---

१ न्यायवि० श्लो० २ । २ -त्तादावपि तत्सा—आ०, ब०, प० । ३ "संविद्विश्वासम्, सम्भो विस्रम्भविश्वासौ इत्यमरः ।"—ता० टि० । ४ स्यादित्याह प० । ५ अविप्रतिपत्तेस्तु आ०, ब०, प० । ६ भ्रान्तभेव । ७ "अवयविनि दृश्यमानस्य चलनस्य भ्रान्तदर्शनविषयत्वेनावस्तुत्वं यथा ।"—ता० टि० । ८ भ्रान्तञ्च ।

यवसंयोगविनाशात् पूर्वद्रव्यविनाशे अवस्थितसंयोगेभ्यः अवयवेभ्यः द्रव्यान्तरमुत्पद्यते ।" [ ] इति ? कुतश्च तेषां विनाशः ? विभागादेव कर्मजादिति चेत्; न; निष्क्रियेषु तस्याभावात् । सक्रियेषु सम्भवतोऽपि तत्संयोगस्यैव नाशात्, तत एव तदन्ताणामपि विनाशे परमाणुपर्यन्तस्ततप्रसङ्ग इति न घटविनाशे कपालान्यप्युपलभ्येरन् । अविनाशे कथं कार्यविनाशः सति हेतौ तदनुपपत्तेः ? एकस्य तस्य विनाशादिति चेत्; आश्चर्यमेतदेकस्य विनाशात् तस्य विनाशो न बहूनाम् अवस्थानादवस्थितिरिति ? अवस्थितौ कथं विनाश इति चेत् ? विनाशेऽवस्थितिरपि कथम् ? मा भूदिति चेत्; विनाश एव मा भूत् । दृश्यत इति चेत्; अवस्थितिरपि दृश्यत एव 'सैवायं देवदत्तश्छिन्नाङ्गुलिरपि' इति लोकस्य प्रतीतेः । पूर्वद्रव्यविनाशे द्रव्यान्तरस्याशु प्रादुर्भावेन भेदानवधारणात् भ्रान्तैवेयमेकत्वप्रतिपत्तिरिति चेत्; स्थूलघटादिप्रतिपत्तिरपि तथा किन्न भवति ? परमाणुष्वेव कुतश्चित् प्रत्यासत्तेः तदुत्पत्तिरिति कैश्चित्[2] परिकल्पनात् । बाधकाभावान्नेति चेत्; न; इतरत्रापि तुल्यत्वात् । कुतः पुनः कार्यद्रव्यस्याविनाशे सति तदीयस्यावयवस्याकाशादेर्विभागः ? छेदभेदादेः कर्मण एवेति चेत्; न तर्हि तस्यावयवान्तरविभागहेतुत्वम् आकाशादिविभागहेतुत्वात् नर्त्तकावयवकर्मवत्; अस्ति तस्य तदन्तरविभागहेतुत्वं [3]छेदादौ सत्यङ्गुल्यादेर्विभागप्रतिपत्तेः । ततो न तस्मात्तद्विभागः । तज्जन्मनो विभागादिति चेत्, न; तस्यापि स्वतन्त्रावयवगतस्यैव तद्धेतुत्वोपपत्तेर्न द्रव्यसम्बन्धा(द्धा)वयवगतस्य । कुत एतत् ? तदाकाशादिविभागस्य द्रव्यविनाशसहचरितस्यैव दर्शनात् । न हि तस्य द्रव्यावयववृत्तिः स हेतुः, तस्यापि सद्रव्यस्यैव दर्शनापत्तेः । ततोऽस्ति द्रव्यविनाशो विभागस्य विभागान्तरकारिणः तदपेक्षत्वात् । ततः पुनरुत्पन्नं द्रव्यान्तरमेवेति भ्रान्तैव तत्रैकत्वप्रतिपत्तिर्बाधकाभावादिति चेत्, नैवमपि भ्रान्तिः अन्तरा भेदनिर्णये तत्प्रतिपत्तेरेवासम्भवात् । दर्शनमेव भेदस्य निर्णय इति चेत्, न; तस्यापि निर्णयस्यैव भवद्भिरभ्युपगमात् न सौगतवन्निर्विकल्पस्य । निर्णयस्यापि द्रव्यान्तरप्रादुर्भावाशुभावेनाभिभवात् एकत्वप्रतिपत्तिरिति चेत् व्याहतमेतत् 'निर्णयश्च अभिभवश्च' इति, निर्णयस्याभिभवविरोधित्वात् । अभिभूतं वा कथं तत्सिद्धम् यत एकत्वप्रतिपत्तेर्भावः, अतिप्रसङ्गात् । तथा हि—

सर्वस्यापि भवेदेवं वादिनः स्वेष्टदर्शनम् ।
ततो लोक-सिद्धानां बुद्धीनामपि बाधनम् ॥१४४१॥
मा भूदेकत्वबुद्धिश्चेत्, काणादत्वं तदा कथम् ।
अन्तरा भेदमुत्पश्यन् कलत्रादौ प्रवर्तसे ॥१४६२॥
कलत्रादि न तद्यस्य न भेदः कण्टकादिना ।
न भेदोऽप्यस्ति तादृग् यो द्रव्यनाशोत्तरो न ते ॥१४६३॥
यच्चाशुजं कलत्रादि तन्न भेदेन वेदिनः ।
अस्वकीयप्रवृत्तौ च कथं दोषैर्न लिप्यसे ॥१४६४॥

१ स चैवा– आ०, ब०, प० । २ बौद्धैः । ३ चेदादौ आ०, ब०, प० । ४ –नाशात्ततो न आ०, ब०, प० ।

एकत्वज्ञानमेष्टव्यं व्यवहारं तदिच्छता ।
भेददृष्टिस्तदा नास्ति तैर्कैथं तस्य विभ्रमः ॥१४६५॥

यदप्युक्तम्–'न तर्हि इत्यादि; तत्र कस्मात् नृत्यतः हस्तकर्मादेरवयवविभागो न भवति ? तस्याप्रतीतेरिति चेत्; किं पुनरेकावयवनाशे सर्वात्मनाऽवयविनो नाशः प्रतीयते ? तथा चेत्; तत-स्तद्विभागोऽपि प्रतीयताम् । कथमेवं 'स एवायं नर्त्तकः' इति प्रत्ययः तद्विभागात् संयोगस्य तद्धेतुकस्य शरीरस्यापि नाशादिति चेत् ? न; तस्याप्येकावयवविनाशवत् अवस्थितसंयोगावयवात् द्रव्यान्तर एव भावात् । ततो न युक्तमेतत्–'छेदभेदादिकर्म न स्वाश्रयस्याकाशादेर्विभागमारभते द्रव्यारम्भकसंयोग-विरोधिविभागजनकत्वात्, यत्तत्तस्य तमारभते न तत्तज्जनकं यथा नृत्यतोऽवयवकर्म, तज्जनकञ्चेदं तस्मान्न ततस्तस्य तमारभते' इति ; साध्याव्यावृत्तत्वेन नृत्यतोऽवयवकर्मणो वैधर्म्यदृष्टान्तत्वानुपपत्तेः । ततो यथा निरवद्यप्रत्यभिज्ञानगोचरत्वान्न तदवयविनो न विनाशः तथा नष्टद्वित्रावयवस्यापि । कथं पुनरविनष्टस्य नष्टैरपि तैर्नाशो विरोधादिति चेत् ? उक्तमत्र 'कथमेकस्य प्रत्ययस्याभ्रान्तस्यैव भ्रान्तत्वम्' इति । प्रतीतेर्विरोधाभावस्येतरत्रापि तुल्यत्वात् । ततः सूक्तमेतत् **'नष्टैर्नष्टं न चापरैः ।'** इति ।

तथेदमपि, **'आवृतैरावृतं भागैः'** इति । अत्रापि **'नापरैः'** इति **'विलोक्यते'** इति च योजयितव्यम् । कथं पुनरवयवस्यावारकमवयविनमावृणुयात् अल्पत्वात् कर्पटखण्ड इव गण्डशैलमिति चेत् ? किं पुनस्तस्य तेन संयोगो नास्ति ? तथा चेत्; न; **"कारणसंयोगिना कार्यमवश्यं संयुज्यते"** [प्रश० भा० पृ० ६४] इत्यस्य विरोधात् । अस्ति चेत्; कथं नावृणोति अवयवस्यापि तत एव तेनावरणात् । ततोऽपि व्यापकादेव तस्यावरणं नाव्यापकात्, अव्यापकश्च तस्यावयवावारकेण संयोग इति चेत्; न, यावति संयोगस्तावतः स्वल्पेनापि तदुपपत्तेः । यावत्तावदिति च भेदापेक्षम्, तत्कथं निर्भेदेऽवयविनीति चेत् ? कथं तत्र संयोगस्य कस्यचिदव्याप-कत्वम् ? स्वतस्तस्य स्वल्पत्वादिति चेत्; न; स्वल्पत्वस्य गुणत्वेन संयोगेऽनवक्लृप्तेः; अवक्लृप्तावपि कथं तदधिष्ठितस्य तदव्याप्यत्वम् ? अवयविनः तदतिरेकेणापि प्रतीतेरिति चेत्; कथं तदतिरिक्तस्य तस्मादभेदो यत् सभाग एवायं न भवेत् ? कल्पितात् तर्हि तद्भेदात्तस्य तदव्यापकत्वमिति चेत्, न; तस्य द्रव्यत्वेन संयोगानाश्रयत्वात्, कल्पितद्रव्यवादे मतान्तरानुप्रवेशापत्तेः । अवयव्येव तस्याश्रयः, अभेदस्तु तस्याव्यापकत्वमात्रमवकल्पयतीति चेत्, न; व्योमकुसुमादिवे कल्पितात् ततस्तदनुपपत्तेः । ततो वस्तुभूतादेव भेदात् तस्य तदव्यापकत्वमित्युपपन्नं तदेवावृतमनावृतं चैकमिति, तथाविलोकित-स्यान्यथाकरणायोगात् । एवं तदेवैकं रक्तं रक्तैर्भागैर्नापरैः तथाविलोकनादेव प्रतिपत्तव्यम् ।

अथ मतं चलादेस्ततोऽर्थान्तरत्वात् अचलादिकमेव तत्त्वतस्तत्, ततो न चलाचलादि-रूपवत्तया जात्यन्तरस्यावलोकनमिति । तत्राह—

अन्यथा तदनिर्देश्यम् [नियमस्याप्यसम्भवात्] ॥१०४॥ इति ।

---

१ –स्याविना– ता० । २ "साधनाव्यावृत्तत्वेनेति पाठः ।"–ता० टि० । ३ किन्तु विनाश एवेति भावः । ४ बौद्धमतप्रवेशापत्तिः । ५ –दिवत्कल्पि– आ०, ब०,प० ।

अन्यथा चलादेर्न तद्द्रव्यमपि तु व्यतिरेक इति प्रकारेण **तत् द्रव्यम् अनिर्देश्यं** पादे चलं पाणावारक्तं विनष्टं चाङ्गुष्ठ इति व्यपदेश्यं न भवेत्, अर्थान्तरेण तदसम्भवात्, अन्यथा-आकाशादावपि तदापत्तेः। तदेवाह–**'नियमस्याप्यसम्भवात्'** इति। 'शरीरादिकमेव चलादि नाकाशादिकम्' इति **नियमस्य अपिशब्दात्** तदभेदप्रतिभासस्य च **असम्भवात्**। सम्भव एव समवायादिति चेत्; तस्य निषेधात्। अभ्युपगम्याप्याह—

वृत्तावपि [न तस्येदं विश्वरूपं विभाव्यते] इति।

वृत्तौ समवायसंज्ञायां सत्यामपि **'नियमस्याप्यसम्भवात्'** इति सम्बन्धः तस्याः शारीरादिवदाकाशादावपि भावात्, तथा तदर्थान्तरभावस्याप्रतिक्षेपाच्चेति मन्यते। तत्रैवोपचयमाह–**'न तस्येदं विश्वरूपं विभाव्यते'** इति। **तस्यैकस्येदं** प्रस्तुतं **विश्वरूपं** द्रव्यं क्रियादिः समवाय इत्येकान्तभिन्नानेकान्तरूपत्वं **न विभाव्यते** कथञ्चित्तस्य तदभेदेनैव विभावनादिति मन्यते।

तदनभ्युपगमे दोषमाह —

सम्यग्ज्ञानं व्यवस्थाया हेतुः सर्वत्र तत्पुनः ॥१०५॥
प्रत्यक्षं यदि बाध्येत लक्षणं प्रतिरुद्ध्यते ।इति।

सम्यक् निरुपप्लवं **ज्ञानं व्यवस्थाया** इत्थम्भावेन वस्तुव्यवस्थितेः **हेतुर्निमित्तम्**। विनापि तेन तद्व्यवस्थायां न कश्चिदपि समीहितसिद्धविकलः स्यात्। ततो न विभ्रमवादादिकमुपपन्नं तत्र तस्याभावात्। भावे वा तद्वादानु (दानु) पपत्तिरिति मन्यते। तच्च सर्वत्र बालावलादिप्रसिद्धनीलपीतादावपि तद्धेतुर्न केवलमनेकान्तात्मनि, तथा च सिद्धा तद्वदेव तस्यापि व्यवस्था सम्यग्ज्ञानमुख्यस्य प्रत्यक्षस्यापि तत्रैव भावात्। भवदपि तत्तत्र बाध्यत इति चेत्; उच्यते–**तत्पुनः** सम्यग्ज्ञानं **प्रत्यक्षमनेकान्तविषयं यदि** चेत् तद्विपर्ययकल्पनया **बाध्येत** तल्लक्षणनीलादेरपि सैतन्तस्मात् विषयीकरणं प्रतिरुद्ध्यते तत्रापि तस्य कैश्चित् स्वप्नादितः प्रतिभासवत् बाधपरिकल्पनात्। कल्पनमेव तत्केवलं न कदाचिदपि निराकारस्य वस्तुनः प्रतिपत्तिरिति चेत्; इतरत्रापि समानमेतत्–एकान्तव्यतिभिन्नस्य द्रव्यादेरपि अप्रतिवेदनात्। कथं पुनरनेकान्तस्तात्त्विकः ? कथं च न स्यात् ? तस्य संशयादिदोषेणोपघातादिति चेत्; अत्राह–**'सम्यग्ज्ञानम्'** इत्यादि। **व्यवस्थायाः** संशयादिदोषपरिकल्पनायाः **सम्यग्ज्ञानमेव हेतुः**। वाङ्मात्रात्तद्व्यवस्थायामतिप्रसङ्गात्। तथापि किमिति चेत् ? उच्यते-**तत्पुनः** अनेकान्तरूपं **सर्वत्र** बहिरिव संशयादिविकल्पेष्वपि **प्रत्यक्षं** स्वसंवेदनवेद्यं तँस्यैव तत्र सम्यग्ज्ञानत्वात्। तथा हि–संशयस्तावत् व्यभिचारीतरतत्प्रतिभासद्वयात्मकत्वात् अनेकान्तात्मकः अभिलाप्येतराकारत्वाच्च, तथा विरोधादिविकल्पा अपि। तदात्मकत्वञ्च तत्र सर्वत्र स्वसंवेद्यं **"सर्वचित्ताचैत्तनाम्"** [न्यायवि० पृ० १९] इत्यादि वचनात्। तत्रापि तद् **यदि बाध्येत लक्षणम्** अनेकान्ते दोषदर्शनं प्रतिरुद्ध्यते तथा सति

---

१ चलितं पा– आ०,ब०,प०। २ चलनादि आ०,ब०,प०। ३ व्यवस्थाहेतुसन्यग्ज्ञानस्य। ४ तद्बाधानुप–ता०। ५ सतस्तेन तद्विप– आ०,ब०,प०। ६ नीलप्रतिभासवत्। ७ "स्वसंदेनस्यैव"–ता०टि०।

संशयादेरेव असम्भवात्। कुतश्च तत्रापि तद् बाध्येत ? तदन्यतः संशयादेरिति चेत्; न; तत्रापि तदन्यतः तद्बाधने अनवस्थापत्तेः। न बाध्यत एव तत्र तत्[1]। संशयाद्यनुपक्रान्तस्यैव तत्र तस्य निर्णयादिति चेत्; अनुकूलमाचरसि, परत्रापि तादृशस्यैव प्रतिपत्तेः। पुनरपि तदनभ्युपगमे दूषणमाह—

साङ्कर्यं व्यवहाराणां सन्निवेशविशेषतः ॥१०६॥ ५
नानैकपरिणामोऽयं यदि न व्यवतिष्ठते । इति ।

न व्यवहाराणां प्रवृत्त्यादिरूपाणां **साङ्कर्यम्** इष्टे प्रवृत्त्यादिवत् इतरस्य अनिष्टेऽपि निवृत्त्यादिवत् तद्विपर्ययस्य 'भावः स्यात्' इत्युपस्कारैः[2]। कदा ? **नानैकपरिणामोऽयं** प्रतीयमानो **यदि न व्यवतिष्ठते** तद्व्यवस्थितौ न स्यादिति भावः। तथा हि—तदनवस्थितौ कस्य[3] प्रवृत्तिः ? चित्तक्षणस्येति चेत्; न; पूर्वापरीभावप्रसङ्गात् प्रवृत्तेस्तद्रूपत्वात्। तत्सन्तानस्येति चेत्; न; वस्तुत- १० स्तस्यासत्त्वात्। कल्पनया सन्नेव स इति चेत्; न; तस्यापि वन्ध्यासुतवत् तदसम्भवात्। सापि कल्पनयैवेति चेत्; अप्रवृत्तिरपि तयैव स्यात्। प्रवृत्तिमेव कल्पयति लोक इति चेत्; तँदनुसरणेन[4] नानैकपरिणामस्यैव सिद्धिः स्यात् "भूतग्रामः स एवायं भूत्वा भूत्वा निवर्तते।" [ ] इति तन्मतप्रसिद्धेः।

किञ्च, कल्पनं सन्तानस्य हेतुफलभावादेव सादृश्योपाधिकात्। तत्र[5] चोक्तं सुगतेतर- १५ ज्ञानयोरपि तत्कल्पनमिति। सुगतवत् इतरस्याप्रवृत्तिरितरवच्च सुगतस्य प्रवृत्तिरिति सुव्यक्तं तत्साङ्कर्यम्। क्व वा प्रवृत्तिः ? द्रव्यादाविति चेत्; न; तस्य निरंशाणुरूपस्याप्रतिपत्तेः। तदणुव्यूहरूप इति चेत्; न; तस्य वस्तुवृत्तेनासत्त्वात्। कल्पनया सत्त्वमिति चेत्; न; तत इष्टसिद्धेरसम्भवात्। सम्भवे तद्व्यूहान्तरादपि करभाभिधानात् तत्प्रसङ्गः। तथा च—

कल्पनासत इष्टं चेत् तद्विशेषनिराकृतेः। २०
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ?॥१४६५॥
विशेषः कल्पनातश्चेदविशेषस्ततो न किम् ?
प्रवृत्तीतरसाङ्कर्यं यतो न स्याद् द्वयोरपि[6] ॥१४६६॥
विशेष एव तत्रास्ति यदि लोकधिया तदा।
नानैकरूपं तत्त्वं स्यात्तन्मत्येति निवेदितम् ॥१४६७॥ २५

तथा, यौगादेरपि तत्साङ्कर्यं दधनि दधित्ववत् करभत्वस्य करभेऽपि करभत्ववत् दधित्वस्य तद्धेतोः समवायेन भावात्। नहि नियामकस्याविशेषे नियमः, नियाम्यस्य तस्यातन्निबन्धनत्वप्रसङ्गादिति सूक्तम्—'साङ्कर्यं व्यवहाराणाम्' इति। नानैकपरिणामेऽपि कुतो न साङ्कर्यं दध्नः स्वपर्यायैरिव

---

१ 'अनेकान्तरूपम्" —ता० टि०। २ "अध्याहारः, सम्पर्युपात् कृञः सङ्भूषत्तमवाये, [शाकटा० ४।२।२११] उपाद्विकारप्रतियत्नवाक्याध्याहारे [४।२।२१२] सङ्" —ता० टि०। ३ तत्र आ०, ब०, प०। ४ तदनुसारेण आ०, ब०, प०। तदनुसारेणैव। ५ पृ०...टि०..। ६ "दध्नुष्ट्रयोः" —ता० टि०।

तेषां च तद्द्रव्येणेव करभादिपर्यायद्रव्यैरपि तत्परिणामस्यानिवारणादिति चेत्; न; स्वद्रव्यपर्यायापेक्षयैव वस्तुषु तस्य प्रतीतेः, तत एव तत्र तस्य निवारणात् । निरूपितं चैतदसकृत् । अत एवोक्तम्-**'सन्निवेशविशेषतः'** इति । अयमर्थः—**सन्निवेशो** नानैकरूपयोः कथंचिदविष्वग्भावस्तस्य **विशेषः** प्रतीतिप्राप्तं साङ्कर्यादिवैकल्यं ततः **तत्परिणाम** इति । कुतश्चायं निरंशवादे वस्तुषु स्थूलप्रतिभासः ? न चायं नास्ति; प्रसिद्धत्वात् । एकार्थकारित्वादिति चेत्; न; अर्थस्याप्यणुरूपस्याप्रतिवेदनात् । स्थूलप्रतिभासरूप एव सोऽपीति चेत्; न; तस्याप्यन्यतस्तत्कारित्वात् प्रतिभासकल्पनायामनवस्थानात् । तन्न तत्कारित्वम्, सत्यपि तस्मिन् न ततस्तत्प्रतिभासो व्यभिचारात् । अस्ति हि तत्कारित्वमिन्द्रियालोकादीनाम्, न च तत्र स्थूलैकप्रतिभासः, विषये चोदिता प्रवृत्तिरिन्द्रियादावपि स्यात् । एतदेव दर्शयन्नाह—

सत्यप्येकार्थकारित्वेऽसंश्लेषपरिणामतः ॥१०७॥
इन्द्रियादिषु नैकत्वं यदि किं वा विरुद्ध्यते । इति ।

वाशब्दोऽयमिवार्थः, इन्द्रियादिष्वित्यस्यानन्तरं द्रष्टव्यः । तदयमर्थः—**सत्यपि** विद्यमानेऽपि **एकार्थकारित्वे** एकप्रत्यवमर्शाद्येकप्रयोजननिष्पादकत्वे दध्यादिव्यपदेशविषयेषु **नैकत्वं** नैकप्रत्ययविषयत्वम् । कस्मात् ? **असंश्लेषपरिणामतः** ऐकान्तिकात् नानात्वपरिणामात् **'इन्द्रियादिषु वा'** इत्यत्र दृष्टान्तः । तथा हि—न प्रकृताः परमाणवः एकप्रत्ययविषया एकान्ततो विश्लिष्टत्वात् इन्द्रियादिवत्' इत्यत्र परस्य पर्यनुयोगः **'यदि किम्'** इति । यदि नैकत्वं किम् ? न् किञ्चिद्दूषणमिति । अत्रोत्तरम्—**विरुद्ध्यते** इति । व्यवहार इति **'व्यवहाराणाम्'** इत्यस्य विभक्तिवचनपरिणामेन सम्बन्धः । तथा हि—यदि विश्लेषेऽपि विवक्षितेष्वणुषु प्रवृत्तिः किन्न व्यूहान्तरगतेषु ? तैरेव तदभिमतस्य करणादिति चेत्; उक्तमत्र—दध्नि चोदिता प्रवृत्तिरिन्द्रियादावपि स्यात् तदविशेषादिति । ततो वस्तुषु व्यवहारनियममिच्छता तात्त्विकमेव तेष्वेकत्वमभ्युपगन्तव्यम् । तदपि न संयोगसाहाय्यात् ; यतः संयोगस्य कात्स्न्यैकदेशाभ्यामयोगात् तदयोगः प्रकल्प्येत अपि तु तथैव परिणामात् । न हि तत्र तत्साहाय्येन किञ्चित्, अन्यथा तत्परिणामेऽपि तदपरपरिणामोपकल्पनायामनवस्थापत्तिः । न चैवं **"भेदसङ्घाताभ्यां स्तत्क्षुषः"** [त० सू० ५।२८] इति सूत्रविरोधः; सङ्घातशब्देनापि तत्परिणामसमर्थव्यवधानेत्यादिलक्षस्य वस्तुस्वरूपस्यैवाभिधानात्, नैकदेशादिना परस्परानुप्रवेशे स्वतः सांशत्वमणूनां पिण्डस्य स्थायात्मात्रत्वम् । वक्ष्यति चैतत्-**"नैरन्तर्यनिरंशानाम्"** इत्यादिना । ततः सति सङ्घाते तस्मादसति संशयादिभादेव स्कन्धस्योत्पत्तिः, अत एव भेदग्रहणम् । न हि भेदात्तदुत्पत्तौ सङ्घातः, घटस्कन्धादेव व्यभिचारीतेकस्य कपालस्कन्धस्योत्पत्तिदर्शनात् । अभिन्नात्तर्हि कथमभिन्नस्योत्पत्तिः सूत्रेण तदनुक्तेरिति

करणा अपि द्विद्रव्येणेव । २ साङ्कर्यस्य । ३ "एकप्रत्यवमर्शाद्येकप्रयोजन-निष्पादकत्वात्" ता०टि० । ४ —इत्यादि वचनात्व०,प० । ५ —तत्कार्यत्वात् आ०,व०,प० । ६ एकत्वमपि । ७ "सर्वात्मना" —ता० टि० । ———: आ०, व० । प्रवेश्यस्ततः प० । ९ "एकदेशेन सम्बन्धे परमाणोः षडंशता । सर्वात्मना तु १ च ादणुमात्रकः ।" —ता० टि० । १० न्यायवि० श्लो० २८३। ११ तथापरिणामरूपात् तद्बाधानुप—ता० । अभिन्नात् मृत्पिण्डादेः अभिन्नस्य शिवकादेः" —ता० टि० ।

चेत् ? न; सङ्घातशब्देन अभेदस्याप्यभिधानात् । [1]द्विविधो हि सङ्घातो नैरन्तर्याभेदविकल्पात् । ततो नाऽयुक्तम् अणोरण्वन्तरस्येव स्कन्धादपि स्कन्धस्योपजननम् । ततो न स्वलक्षणैकान्तवादसम्भवः । कथं पुनः स्कन्धादपि स्कन्धस्योत्पत्तिः ? कथं च न स्यात् ? 'विवादापन्नः स्कन्धस्तदवयवसंश्लेषपूर्वकः स्कन्धत्वात् पटवत्' इत्यनुमानेन तत्प्रतिक्षेपादिति चेत्; न; शिवकस्य पिण्डादेवोत्पत्तिदर्शनात् ? [2]तदेव तेन प्रतिक्षेपादप्रमाणमिति चेत् ; तन्तुपटभेददर्शनमपि[3] स्यात् सर्वाभेदस्यापि [4]कैश्चिदनुमानात् । ५
तथा च कथन्न साध्यसाधनविकलो दृष्टान्तः स्यात् ? अपरिस्खलद्रूपतया [5]लोकैः परिगृहीतत्वात् , [6]तद्भेददर्शनमेव तस्य प्रतिक्षेपकं न तत्तस्येति चेत्; समानमितरत्रापि ।

किञ्च, शिवकस्य तदवयवाः सहजन्मानः, पूर्वजन्मानो वा हेतवः स्युः ? पूर्वजन्मान इति चेत्; कुतस्तथा नोपलब्धिः तन्तुवत् ? अस्त्येवेयं केवलमाशुभाविन्या शिवकोपलब्ध्या तिरोधानान्नोपलक्ष्यत इति चेत्; अनुपलक्षिता कथमस्ति ? भवति चैवमतिप्रसङ्गः—'शिवकोऽपि प्रागेवास्ति, १०
तदुपलब्धिरपि केवलं कुतश्चित्तिरोभावान्नोपलक्ष्यते' इति वदतोऽपि दुर्निवारत्वात् । तर्हि मा भूदुपलब्धिरेव तेषाम् अयोग्यत्वादिति चेत्; आरब्धशिवकानामपि न भवेत् तदापि तद्रूपापरित्यागात् । तत्परित्यागे वा कथन्न परिणामवादः—तत्परित्यागेन तद्योग्यस्वभावोपादानात् ? [7]तयोस्ततो भेदान्नेति चेत्; कथमेवं तौ तस्य ? तत्र समवायादिति चेत्; सोऽपि यदि युगपत्; तदुपलब्ध्यनुपलब्ध्योरपि यौगपद्यप्रसङ्गः । क्रमादिति चेत्; कुतः क्रमः ? स्वकारणादिति चेत्; ननु अवयवा एव तत्र समवायिकारणम् , १५
ततश्चाक्रमात् कथं तत्क्रमः तदक्रमस्यैवोपपत्तेः, अन्यथा तस्य निर्हेतुकत्वप्रसङ्गात् वक्तव्य एव कारणस्यापि क्रम इति कथन्न तद्वादः ? तत्क्रमस्यापि क्रमान्तरसम्बन्धादेवाभ्युपगमे अनवस्थापत्तेः । ततः पश्चादपि तस्यापरित्याग एवेति कथं शिवकस्याप्युपलब्धिः अवयवोपलम्भविकलस्य तस्याप्रतिपत्तेः क्षणिकस्वलक्षणवत् । तन्न पूर्वजन्मनां तेषां तद्धेतुत्वम् । नापि सहजन्मनाम्; अनिष्पन्नानां तदयोगात्। निष्पन्नानाञ्च सहनिष्पन्नं प्रत्यनुपयोगात् । तन्न तस्य तदवयवसंश्लेषपूर्वकत्वसाधनमुपपन्नं प्रत्यक्ष- २०
प्रतिपन्नस्य स्कन्धपूर्वकत्वस्यैवोपपत्तेः । कथं तर्हि तत्र अवयवावयविव्यपदेशो जन्यजनकभावाभावे तदयोगादिति चेत् ? न; तदभावेऽपि तथापरिणामादेव तद्व्यवस्थितेः । ततः सूक्तम्—साङ्कर्यं व्यवहाराणाम्' इत्यादि । अस्यैव तात्पर्यं विस्तरतो व्याख्यातुकाम आह—

तदनेकार्थसंश्लेषविश्लेषपरिणामतः ॥१०८॥
स्कन्धस्तु सप्रदेशोऽशी बहिः साक्षात्कृतो जनैः । इति । २५

तत् तस्मादनन्तरन्यायात् अनेकोऽवयवोऽर्थोऽवयवी तयोः संश्लेषश्च सङ्घातः श्लेषश्च भेदः परिणामश्चाकारान्तरागमनं तेभ्यस्ततः स्कन्धः । तु शब्दोऽवधारणे तत एवायं न

---

१ विविधो आ०, व०, प० । २ शिवकस्य पिण्डोत्पत्तिदर्शनमेव । ३ "अप्रमाणं स्यादिति बन्धः" —ता० टि० । ४ वेदान्तिभिः । ५ लोके परि— आ०, व०, प० । ६ ततो भेद—आ०,व०,प० । "उपलब्ध्ययोग्यत्वतद्योग्यत्वस्वभावयोः" — ता० टि० । ८ 'तत्येति जात्येकवचनम्, शिवकावयवानामर्थः ।" —ता० टि० । ९ —यवार्थोऽव— आ०, व०, प० ।

प्रकारान्तरादिति । तत्र संश्लेषोऽनेकस्य विश्लेषपरिणामावर्थस्येति प्रतिपत्तव्यम् । दृश्यते हि तद्विश्लेषादपि स्कन्धो घटभेदजन्मनः कपालस्कन्धस्य प्रतीतेः । घटकालेऽपि तत्स्कन्धो विद्यत एवेति चेत्, सत्यम्; तदा तदात्मनो[1] भावो न केवलस्य, तस्य तु तत एवोत्पत्तिः तथा दर्शनात्, अन्यथा न कस्यचिदपि कुतश्चिदुत्पत्तिः । एवमपि किं विश्लेषग्रहणेन परिणामत इत्येव गतत्वात्, कपालस्कन्धस्यापि प्राक्तनतदवयव्यभिन्नाकारपरिहारेण तद्भिन्नाकारस्योत्पत्तेरिति[2] चेत् ; न; [3]विश्लेषस्यापि तद्विशेषत्वात् , किमर्थं तर्हि पृथग्वचनमिति चेत् ? मुद्गरादिसन्निपातात् केवलं नाश एव घटस्य कपालस्कन्धस्तु प्रागपि विद्यते इति मतव्युदासार्थम् । तत्परिणामात्तु तदुत्पत्तिरभिहितैव । अनेकसंश्लेषात्[4]तु तद्वचनं दृष्टान्तार्थम्, परस्यापि प्रसिद्धत्वात् । तत्रायं प्रयोगः—यद् यतो दृश्यते तत्तत एवोत्पत्तिमत्, यथा अनेकसंश्लेषाद् दृश्यमानस्तत एव स्कन्धः, दृश्यते चार्थविश्लेषपरिणामाभ्यामपि कपालशिवकादिस्कन्ध इति ।

स च स्कन्धः **सप्रदेशः** स्वतः कथञ्चिदभिन्नावयवः सहशब्दस्याभेदवाचित्वात् , अत एव **अंशी** न भिन्नावयवसमवयात् , तस्य निराकरणात् । न चात्र विप्रतिपत्तिः प्रामाणिकस्य साक्षादेव निरीक्षणात् । अत एवोक्तम्— **'बहिः साक्षात्कृतो जनैः'** इति ।

इदानीं तत्साक्षात्करणेनैव विपक्षाभ्युपगमं प्रतिक्षिपन्नाह—

नानाकारैकविज्ञानं स्वाधारे बदरादिवत् ॥१०९॥
तादात्म्येन [पृथग्भावे सति वृत्तिर्विकल्प्यते ।] । इति ।

आकारो भागः ततो भागाद् भिन्नम् अनाकारमेकमवयविद्रव्यं तस्य **विज्ञानं** स्वबुद्ध्या कल्पनम् । क्व तत् ? **स्वाधारे** अवयवकलापे । किंवत् ? **बदरादेरिव** तद्वत् । यथा बदरादेः स्वाधारे विज्ञानं कुण्डे बदरादिरिति तथा अवयविनोऽपि कपालेषु घट इति यद्विज्ञानं परस्य तत् **न** । केन ? **तादात्म्येन** । तादात्म्यमवयवतद्वतोः कथञ्चिदभेदः तज्ज्ञानमिह तादात्म्यं विषयशब्देन विषयिणोऽभिधानात् । तेन नहि तत्राभेददर्शने भेदकल्पनमुपपन्नम्, सर्वत्र दृष्टविपर्ययकल्पनापत्तेः । भेददूषणान्तरमप्याह—**'पृथग्भावे सति वृत्तिर्विकल्प्यते'** इति । अवयवतद्वतोरेकान्ततः **पृथग्भावे** हि **वृत्तिर्**भागेषु तद्वतः सम्बन्धो **विकल्प्यते**— 'किमेकदेशेन सर्वात्मना वा' इति । तत्र च दोषोभवति अनवस्थानादिति मन्यते । नास्ति तत्र तद्विकल्पः तस्य भेदनिष्ठत्वात् अवयविनश्च निर्भेदत्वात् ततो न देशतो नापि कात्स्न्यतस्तस्य तत्र वृत्तिरपि तु स्वरूपेणैव तथा दर्शनादिति चेत्; भवेदेवेदं यदि तथादर्शनं लभ्येत । न चैवम्, कथञ्चित्तदभेदस्यैवोपलम्भात् । तदेवाह—

दर्शनादर्शने स्यातां सप्रदेशाप्रदेशयोः ॥११०॥ इति ।

सप्रदेशो जैनस्यावयवी यौगस्य **अप्रदेशः**[6] तयोर्यथाक्रमं **दर्शनमदर्शनं** च **स्याताम्** ।

---

१ "घटात्मनः" –ता० टि० । २ –त्पत्तिरिति आ०, ब०, प० । ३ संश्ले– आ०,ब०, प० । ४ पात्तद्व– आ०, ब०, प० । ५ "त्वतः कथञ्चिदभिन्नावयवः" –ता० टि० । ६ "प्रदेशेभ्योऽवयवेभ्यो भिन्नः अप्रदेशः" –ता० टि० ।

विधिपदं तदस्तित्वज्ञापनार्थं विधेरज्ञातज्ञापनार्थत्वात्, ततो न स्वरूपेणापि वर्तनं तस्येत्यभाव एवेति मन्यते । अथवा **दर्शनमवयविनोऽवयवेषु वृत्तिरिति मतम्** । **अदर्शनं** तद्विपर्ययस्ते **स्याताम्** । कयोः ? । **सप्रदेशाप्रदेशयोः** भावप्रधानोऽयं निर्देशः । ततः सप्रदेशत्वे दर्शनमप्रदेशत्वे च अदर्शनमित्यर्थः । नहि प्रदेशनिष्क्रान्तस्य केवलस्य तत्र वृत्तिर्नाम । असिद्धस्तन्निष्क्रम इति चेत्; न; पाणेराकाशाद्विभागेऽपि देहस्य तदविभागेन तत्प्रसिद्धेः । न हि पाणेस्तद्विभाग एव देहस्यापि तद्विभागः तस्य तत्कार्यत्वात् । **"पाण्याकाशविभागात् तत्संयोगविनाशसव्यपेक्षात् देहाकाशविभागः ।"** [ ] इति स्वयमभ्युपगमात् । ततो विभक्तेऽपि तस्मिन् स्वयमविभक्तस्य न तत्र वृत्तिः द्रव्यान्तरवत् । विभज्यत एव सोपि तस्मादिति चेत्; न; पाणिविभागावस्थायां तदभावात् । न चैकस्यैव निष्पर्यायं तत्र वृत्तिरवृत्तिश्चोपपन्ना विरोधात् वृत्तिरेव नावृत्तिः । सप्रदेशवृत्तेरेव तस्यापि वृत्तित्वात्, इतरत्रावृत्तिरेव तस्याप्यवृत्तिः किन्न स्यात् ? वृत्तेरेव तत्र दर्शनादिति चेत्; न; इतरत्रापि विपर्ययस्यैवोपलम्भात् । तयोस्तत्राविरोधे वा अवयवभेदाभेदात्मकत्वस्याप्यविरोधाद्व्यर्थं तदेकान्तभेदकल्पनमिति मन्यते । भवतु तर्हि भवत्परिकल्पितस्यापि स्कन्धस्याभावो भेदाभेदयोरेकत्र विरोधादिति चेत्; अत्राह—

विरोधानुपलम्भेन किल स्कन्धो विरुद्ध्यते । इति ।

स्कन्धोऽवयवी विरुद्ध्यते विघट्यते **किल** 'नेति' इत्यर्थः । किलशब्दस्यारुचिसूचकस्य तात्पर्यतो नञर्थत्वोपपत्तेः । केन न विरुद्ध्यते ? **विरोधस्य** सहानवस्थानादेरनुपलम्भोऽदर्शनं तेनेति । तथा हि—न तयोः सहानवस्थानम्; सहैव प्रतिपत्तेः । नापि परस्परपरिहारः; कथञ्चित्तदपरिहारस्यापि प्रतीतेः, कथञ्चित् परिहारस्य च तत्सिद्ध्यनुकूलत्वात् । कथं पुनस्तादृशस्यापि दर्शनम् ? कथं च न स्यात् ? अर्वाग्भागदृष्ट्या परभागादेरपि दर्शने तदनुमानाभावप्रसङ्गात् । अदर्शने तदभेदात् अर्वाग्भागस्याप्यदर्शनमित्यनुपलम्भादभावस्यैव प्राप्तेरिति चेत्; अत्राह—

सम्भवत्यपि मात्राणां दर्शनादर्शनस्थितिः ॥१११॥

इदं विज्ञानमन्यद्वा चित्रमेकं यदीक्ष्यते । इति ।

योग्यपेक्षया केवलं न सम्भवत्यपि तु छद्मस्थापेक्षया **सम्भवत्यपि दर्शनादर्शनयोरुपलम्भानुपलम्भयोः स्थितिरविचलनम्** । कासाम् ? **मात्राणां** स्कन्धभागानाम् । कुत एतत् ? **इदं** पुरोवर्ति स्तम्भादि **चित्रं** नानारूपमेकं च **यत्** यस्मात् **ईक्ष्यते** दृश्यते इति । तात्पर्यमत्र यद्येकान्तेन मात्राणामभेदस्तदा भवति दर्शनमेवान्यदेव वा इत्येकान्ते, न चैवम्, कथञ्चित्तासां भेदस्यापि प्रतिपत्तेः । ततो नाऽयुक्तं तासामर्वाचीनानां दर्शनम्, अदर्शनं च परावीनानामितीक्ष्यते इति । अनेनापि-

"चित्रं तदेकमिति चेदिदं चित्रतरं ततः" [प्र० वा० २।२००] इति प्रतिक्षिप्तम्; ईक्षिते अनुपपत्तेरसम्भवात् । तदपि युक्त्यसङ्गतमनुपपन्नमेवेति चेत्; न; ईक्षणस्यापि युक्तित्वात्,

---

१ देहाकाशविभागस्य । २ पाण्याकाशविभागकार्यत्वात् । ३ –ति किं– आ०, ब०, प० । ४ नार्थ– प० । ५ " सौगतवैशेषिकप्रश्नयोः" –ता० टि० । ६ दृष्टे वस्तुनि । ईक्षितेरनुप– आ०,ब०,प० ।

अन्यथाऽनुमानस्यापि न तत्त्वं तदुपाश्रयादेव तस्याप्यवस्थितेः, ततो दुर्भाषितमिदम्[1] ।

"युक्त्या यन्न घटामुपैति तदहं दृष्ट्वापि न श्रद्दधे ।" [ ] इति ।

दृष्टावश्रद्धायां युक्तेरेवानुमितिरूपाया असम्भवात्, तया गगनकमलिन्येव कस्यचिद्घटनाघटनयोरनुपपत्तेः । तत्सम्भवे वा कथं दृष्टावश्रद्धानम् ? यतः, दृष्ट्वापीत्यादि शोभेत । किञ्च,

युक्तिरप्यन्यया युक्त्या श्रद्धेया घटनाद्यदि ।
तदान्ययैव साप्यन्येत्यनवस्था प्रसज्यते ॥१४६८॥
स्वत एव यदि श्रद्धा युक्तौ दृष्टा न किं तथा ।
व्यभिचारावलोकाच्चेद्युक्तौ[2] किन्नैष विद्यते ॥१४६९॥
हेत्वाभासोपजातायां तस्यां भूयस्तदीक्षणात् ।
युक्तिरेव न सा तस्या युक्त्या भासत्वतो यदि ॥१४७०॥
दृष्ट्याभासैव सापि स्याद्यत्रास्ति व्यभिचारिता ।
तथा च सति दृष्ट्वेति जाघटीति न ते वचः ॥१४७१॥
दृष्ट्याभासावबुद्धस्य दृष्टत्वानवकल्पनात् ।
लोकरूढ्या तथोक्तिश्चेत् साक्षाद्दृष्टं न दुर्घटम् ॥१४७२॥

निदर्शनमत्र[3] 'विज्ञानमन्यद्वा' इति । प्रत्यक्षविषये किं तेनः अन्यथा तत्रापि तदन्तरकल्पनेऽनवस्थाप्रसङ्ग इति चेत् ? सत्यम्; तथापि प्रत्यक्षव्यापारमतिक्रम्य वैयात्याद् दोषमुद्घोषयतो निवारणार्थं तद्वचनम् । न चैवमनवस्थानम्; अविप्रतिपत्तिस्थाने तदन्तरस्याऽनवकल्पनात् । तादृशं च परस्य[4] विकल्पेतरविभ्रमेतराद्यात्मकं चित्रविज्ञानम्[5] । तथा वैशेषिकस्य विज्ञानाद् अन्यत् पटचित्ररूपम् । न हि तदेकमेव; चित्रावभासनात् । नाप्यनेकम्; **"युगपदेकत्र बहूनि कर्माणि न वर्तन्ते सजातीयत्वे समानेन्द्रियग्राह्यत्वे एकद्रव्यत्वे च सत्यविभुद्रव्यवृत्तित्वात् रूपवत्"** [ ] इत्यत्र निदर्शनस्य बाध्यवैकल्यापत्तेः । ततः शबलैकस्वभावमेव तत् । निरूपितं चैतत् स्वयमेव–**"गुणाश्च गुणान्तरम्"** [वैशे० सू० १।१।१०] इत्यत्र सूत्रे । चाशब्दोऽयमिवार्थः, ततो यथा तद्विज्ञानं तच्च रूपं चित्रैकस्वभावमपि संशयादिना नोपपीड्यते, तस्यैव[6] तदनुभवेनोपपीडनात्, तथा स्तम्भादिकमपि तथाविधमिति तात्पर्यम् । भवतु चित्रमेकवस्तु तथापि कुतः कस्मिन् सति मात्राणां दर्शनादर्शनस्थितिरिति चेत् ? अत्राह—

अवान्तरात्मभेदानामानन्त्यात् सकलाग्रहे ॥११२॥ इति ।

सकलविषयसाक्षात्कारिज्ञानसम्पन्नात् आत्मनोऽन्ये आत्मानो **अवान्तरात्मानः** संसारिणः **तेषां भेदाः** शक्तिरूपा विशेषाः **तेषामानन्त्यात्**[7] अन्तो विषयस्य परभागादिः स न

---

१ उद्धृतमिदम्– अष्टश० अष्टसह० पृ० २३४ । २ – युक्तेः किं– आ०, ब०, प० । ३ "इदं चित्रमेकं यदीक्ष्यते इत्यत्र" –ता० टि० । ४ "सौगतस्य" –ता० टि० । ५ चित्रं वि– आ०, ब०, प० । ६ संशयादेरेव । ७ अन्त्यो आ०, ब०, प० ।

विद्यते विषयत्वेन येषां तेषां भावात् **आनन्त्यात्** सन्मात्रवस्तुधर्मे तेषामप्रवृत्तेः । **सकलाग्रहे** सति तासां तत्स्थितिरिति । कथमेवमपि दृष्टस्यैवादृष्टोऽपि भाग इति प्रतिपत्तिः ? न तदूदर्शनादेव; तस्य तत्राप्रवृत्तेः । नापि तद्विषयात् दर्शनान्तरात्; तस्य दृष्टे प्रवृत्त्यभावात् । अत एव नोभाभ्यामपि । न च तदेकं तद्विषयमस्ति । सकृत्तस्य भावे दृष्टेतरविभागानुपपत्तेः । क्रमेण भावे परापरतत्कारणवैफल्यम् आदितद्व्यापारादेव तस्योत्पत्तेरिति चेत्; अत्राह—

नानाकारणसामर्थ्याज्ज्ञानं भेदेन भासते ॥११३॥ इति ।

नाना यत् **कारणं** परापरचक्षुरादिव्यापारलक्षणं तस्य **सामर्थ्यात् ज्ञानं** रूपादिप्रत्यक्षं **भेदेन** तदुत्पन्ननानातिशयक्रमरूपेण **भासते** । भासत इत्यनुभवप्रसिद्ध मिदं न स्वरुचिविरचितमिति दर्शयति । तत्क्रमस्य तस्मादभेदे तदवस्थं तद्वैफल्यमुत्पत्तिभेदाभावात् । भेदे वा स कुतस्तस्य ? ततोऽपि तत्क्रमस्यापरस्य भावात्; न; अनवस्थापत्तेरिति चेत्; अत्राह— १

भेदसामर्थ्यमारोप्य [प्रत्यासत्तिनिबन्धनम्] इति ।

भेदश्च तत्क्रमात् तस्यार्थान्तरत्वम् **सामर्थ्यं** चैकत्वम्, सङ्गतस्यैकस्यार्थस्य भावः सामर्थ्यमिति व्युत्पत्तेः । तदुभयमारोप्य आत्मन्यवस्थाप्य ज्ञानं भासत इति सम्बन्धः । तात्पर्यमत्र—नैकान्ततस्तस्य तस्मादभेदो भेदो वा यतः प्रागुक्तदूषणम् अपि तु कथञ्चिदेव । ततः सत्यप्यभेदे नोत्पत्तिभेदाभावः; भेदापेक्षया तदुपपत्तेः । तथा न भेदेऽपि तस्येतरेतरविषयासङ्क्रमः; तस्याप्यभेदापेक्षया १ सुलभत्वात् । ततो युक्तं तदूबलेन दृष्टस्यैव अदृष्टमपीति । ज्ञानमिति यया प्रत्यासत्त्या तत्क्रमस्तद्विज्ञानरूपमेव एकमाकारमात्मसात्करोति नापरं साङ्कर्यापत्तेः; तया तत्फलमेव कुर्वीतेति पर्याप्तं तज्ज्ञानेन प्रयोजनाभावात् पारम्पर्यदोषाच्च । इत्येतदेवाह परः—

प्रत्यासत्तिनिबन्धनम् ।
चोद्यं महति [नीलादौ तुल्यं तद्विषयाकृति] ॥११४॥ इति । २

महाविषयत्वात् प्रकृतं विज्ञानं **महत् तत्र चोद्यम्** उक्तरूपं प्रत्यासत्तिप्रयुक्तं भासते इति सम्बन्धः । तत्रोत्तरमाह—**'नीलादौ तुल्यं तद्विषयाकृति'** इति । तच्चोद्यं नीलधवलादौ विषयाकारे च विज्ञाने सदृशम् । तथा हि—यया प्रत्यासत्त्या वस्तुरूपं विज्ञानं च नियतमेव नीलाद्याकारं विषयाकारं च आत्मसात्करोति नापरं साङ्कर्यस्य सर्वग्रहणस्य च प्रसङ्गात्, तयैव स्वयमतदाकारमपि तत्फलमेव कुर्वीतेति विजयेरन् निराकारतद्विज्ञानवादिनः । तथाविधं वस्तु विज्ञानं वा दृश्यत इति चेत्; न; अतत्क्रमेऽपि तुल्यत्वात् । न हि तस्यापि कथञ्चिदेकत्वरहितस्य प्रतिपत्तिः । निवेदितं चैतत्—**'भेदज्ञानात्'** इत्यादिना[6] । सति चैवमनुपप्लवदर्शनविषयत्वे स्कन्धस्य यज्जातं तदाह—

सर्वथा श्लेषविश्लेषे नाणूनां स्कन्धसम्भवः ।
अन्यथा नाप्रदेशादीत्यपरैर्दत्तमुत्तरम् ॥११५॥ इति ।

---

१ न दर्श- आ०, व०, प० । २ ज्ञानात् । ३ -त्तिभावा- ता० । ४ -वादनवस्था- ता० । ५ "स्वस्मिन्" -ता० टि० । ६ न्यायवि० श्लो० ११४ ।

स्कन्धस्यावयविनो न सम्भवः। कस्मिन् सति ? **श्लेषविश्लेषे** सङ्घातविघटने। केषाम् ? **अणूनाम्**। न हि तेषां तद्विश्लेषे स्कन्धोऽतिप्रसङ्गात्। तदविश्लेषे तत्सम्भवं इति चेत्; उच्यते—**अन्यथा** तदविश्लेषप्रकारेण प्रदेशरहितत्वम् **अप्रदेशो** भावप्रधानत्वात् निर्देशस्य, तदादिर्यस्य पिण्डाणुमात्रत्वादेः तद् **अप्रदेशादि न** स्यात्। सप्रदेशाद्येव स्यात्। कथम् ? **सर्वथा** सर्वप्रकारेण। तथा हि—यद्येकदेशेन तेषां संश्लेषः; सांशत्वम्। कात्स्न्येन चेत्; पिण्डस्याणुमात्रत्वम्। अर्थान्तरसंश्लेषसम्बन्धात् तेषु तत्सम्भव इति चेत्; सर्वेषु तत्प्रसङ्गस्तदविशेषात्, तथा च जगदेकस्कन्धं प्राप्नुयात्। इति एवम् **अपरैः** सौगतैः **दत्तं** दूषणमिति शेषः। तत् किम् ? **'उत्तरम्'** इति। स्कन्धवादमित्युत्तरम्। **नेति** सम्बन्धः। तथा हि—इदमपि दूषणं शब्दात्मकं तदुत्पाद्यज्ञानात्मकं वा यदि स्कन्धरूपम्; कथं तद्वादमतिक्रमेत् ? तद्वदेव स्कन्धान्तरस्यापि कथञ्चिदवस्थितेः। न[1] ह्यात्मानं तद्रूपमनतिक्रमदेव तादृशमपरमतिक्रमितुमर्हति। निरंशैकाणुरूपं चेत्; न; शब्दस्य तादृशस्य अवाचकत्वात्, अशक्यसमयत्वात्। वाच्यत्ववत्[2] तदेव कल्पितस्कन्धरूपतया वाचकमिति चेत्; न, कल्पितस्य नित्यादिवत् अर्थक्रियानुपयोगात्, ज्ञानं च तदुत्पन्नं कथन्नाम अणूनां षडंशत्वादिकं प्रतिपद्येत ? निरंशैकस्वभावस्यानेकाकारगोचरत्वासम्भवात्। कल्पनया सांशस्य तत्सम्भव इति चेत्; न; कल्पितदूषणेन वस्तुतः प्रतिक्षेपायोगात्। ततः तात्त्विकमेव शब्दस्य तज्जनितज्ञानस्य च स्कन्धात्मकत्वमभ्युपगन्तव्यमिति कुतः स्कन्धवादस्योत्तरणम् ? कथं तर्हि स्कन्धस्तेषां श्लेषाभावे अतिप्रसङ्गादिति चेत्; न; तद्दर्शनादेव श्लेषस्यापि तदनुगुणस्यावकल्पनात्। स च नैरन्तर्यमेव संसर्गविकल्पादेः तत्रानवतारात्। अन्यथा अणुवादेऽपि न ततो निर्मुक्तिरणूनां येन केनचिन्निरन्तराणामेव सम्भवात्। ततो निर्दोषत्वात् स एव तदनुगुणः श्लेष इति कथं तदभावः ? इदमेवाह—

नैरन्तर्यं निरंशानां स्वभावानतिरेचनम्। इति।

निरंशानामणूनां तेष्वेव **"नाणोः"** [त० सू० ५।११] इति प्रदेशमतिषेधात् **नैरन्तर्यं** व्यवधानवैकल्यम्। तत्किम्[1] अतिरेचयति षडंशत्वाद्यापादने नाधिकं करोति पिण्डाणुत्वापादेन वा। अतीव रेचयति इत्यतिरेचनं स्वभावस्य नातिरेचनं **स्वभावानतिरेचनम्**। अतः स एव तेषां तदनुगुणः श्लेष इति भावः। ननु यदि स्कन्धात्तदवयवानां तेभ्यो वा स्कन्धस्यामेद एकान्ततः, एक एव नानैव वा स इति कथमेकानेकात्मकत्वमस्य ? इत्यत्राह—

चित्रचैत्तविचित्राभदृष्टभङ्गप्रसङ्गतः ॥११६॥
स नैकः सर्वथा श्लेषात् नानैको भेदरूपतः। इति।

सः स्कन्धः **नैको नाप्यनेकः**। कथम् ? **सर्वथा**। कुतः ? **श्लेषात्**, ततो भागानां तेभ्यश्च तस्य श्लेषस्यामेदस्य भावात्। सर्वथेति योज्यमत्रापि। **अश्लेषोऽपि भेदरूपतः** कथञ्चिदवयवतद्वतां भेदस्य भावात्। अनवस्थादिना एवंविधोऽप्ययं दुष्यतीति चेत्; न; तस्य बहुकृत्वः प्रतिक्षेपात्।

---

१ न स्वात्मानं आ०, ब०, प० । २ वाच्यवत् आ०, ब०, प० ।

अन्यथा स्वयमभिमतस्य निर्णयेतरादिरूपतया **चित्रस्य चैत्तस्य** विकल्पस्य रूपरसादिविषयतया **विचित्राभस्य** च **दृष्टस्य** कर्क्कटीभक्षणकालभाविनो दर्शनस्य **भङ्गप्रसङ्गतः**, तद्दोषस्य तत्रापि प्रवेशात् । ततः किम् ? इत्याह—

स्कन्धो मात्रानुरोधेन व्यवहारेऽवधार्यते । इति ।

स्कन्धोऽवधार्यते निश्चीयते । केनात्मना ? **मात्रानुरोधेन मात्राणां** तद्भागानामनुरोधः कथञ्चित्परस्परावि[1]ष्वग्भावः तेन न तत्समवेतेन रूपान्तरेण, ततो निश्चयनिराकृतं तत्कल्पनमिति भावः । किन्निमित्तं तदवधारणम् ? **व्यवहारे** । व्यवहारनिमित्तम् । ततोऽन्यत्र तत्कल्पनमपि प्रतिक्षिप्तमिति मन्यते । कुतः पुनरन्योऽन्यात्मगमनेनैव तस्यावधारणं न रूपान्तरेणेति चेत् ? अत्राह—

सङ्ख्यादिसमभावेऽपि तत्स्वभावविवेकतः ॥११५॥ इति ।

सङ्ख्यानं सङ्ख्या तच्च गोचरविषयं न स्वरूपगोचरं तत्र [2]भेदस्य भावात् । आदिशब्दाद्रूपादिकम् , तस्य **समभावो** भागेभ्यस्तत्त्वतो भेदः तस्मिन् सत्यपि **तत्स्वभावस्य** स्कन्धस्वरूपस्य **विवेकतो** विनिश्चयात् तेनैव सोऽवधार्यत इति । रूपान्तरेण तदवधारणे तत्साम्यानुपपत्तेः । निरूपितं चैतत्—"**तुलितद्रव्यसंयोगे**" इत्यादिना[3] ।

तथापि तमनभ्युपगच्छतो दूषणमाह—

अतादात्म्यस्वभावे वा ह्यानर्थक्यादलं परैः । इति ।

अतादात्म्यम् अमात्ररूपत्वं सर्वथा तद्व्यतिरेकात् **स्वभावो** यस्य तस्मिन् वा स्कन्धे **परैस्तद्भागैरलं** पर्याप्तम् । कस्मात् ? **आनर्थक्यात् आफल्यात्**, एतच्च जलाहरणव्रीहिधारणादेः फलस्य स्कन्धादेव भावात् । ततोऽपि तत्सहायादेव तत न केवलादिति चेत्; न; केवलस्यैव सामर्थ्ये तदनपेक्षणात् । असामर्थ्ये न तत्सहायादपि व्योमकुसुमादेरपि तत्प्रसङ्गात् । तत एव सामर्थ्यं तस्येति चेत्; न; व्यतिरेके तस्येत्ययोगात् । अव्यतिरेके तत इत्यनुपपत्तेः । कथञ्चिद्व्यतिरेके वा स्कन्धः परिणामी स्यात्- असमर्थरूपपरित्यागेन समर्थरूपोपादानात् । तथा च क्रमवद्युगपदपि नानात्मकत्वोपपत्तेः नैकान्तमवयवव्यतिरेकः तस्य । स्वतः समर्थस्य सहायापेक्षणं बहुकृत्वोऽपि प्रतिक्षिप्तम् । [4]न च पक्षान्तरेऽप्ययं दोषः, सहकारीतरकारणकलापस्य परस्परा[5]पादितातिशयस्यैव कार्ये व्यापारात् । वक्ष्यति चैतत्—"**अर्थस्यानेकरूपस्य**"[6]इत्यादिना । तन्न जलाद्याहरणं तेषां फलम् । तदाधारतया स्कन्धस्य स्थापनमिति चेत्; ननु स्थितिकरणं स्थापनम्, स्थितिस्वभावस्य च किं तत्करणेन स्वयमेव स्थितेः ? अतत्स्वभावस्याप्यवश्यम्भाविनिपातत्वात् । तत्स्वभावतया तत्करणमिति चेत्; न, तदन्यस्वभावापरित्यागेन तदयोगात् । तत्परित्यागे परिणामवादप्रसङ्गात् । यदि च तस्य तैः स्थापनं कथं विनाशः ? तद्धेतोरिति चेत् ; कुत एतत् ? तत्र तस्य सामर्थ्यात्, स्थापकसामर्थ्यात् स्थितिरपि

---

१ तेन तत्स–आ०, ब०, प० । २ भेदस्वभा–आ०,ब०,प० । ३ न्यायवि० श्लो० १।१०९ । ४ अवयवाद्भिन्नत्वम् । ५ न पक्षा–ता० । ६ न्यायवि० श्लो० २९९ ।

स्यात्। स्थापकस्यैव ततो नाश इति चेत्, न; पटविनाशेऽपि तन्तूनां प्रतीतेः। तत्सामर्थ्यस्य नाश इति चेत्; न; तस्य तदव्यतिरेकात्। व्यतिरेके वा कथं तेषामेव न सर्वस्यापि? तत्रैव स्थितेरिति चेत्; न तर्हि तस्य विनाशः तैरवस्थापनात्। तत्स्थापनसामर्थ्यमपि तेषां नाश्यत इति चेत्, न; तस्य तदव्यतिरेकादित्यादेरनुषङ्गात् अव्यवस्थापत्तेश्च। तत्र तत्रैव स्थिते(ति)स्तेषाम्। तत्सहायत्वादिति चेत्; न; स्वतः सामर्थ्येतरयोस्तदपाकरणात्। सहायस्यापि तदवस्थापकसहाय-विनाशद्वारेण विनाशकल्पनायामपरावस्थानप्रसङ्गाच्च। तत्र स्थापकसामर्थ्यनाशनेन स्थाप्यनाशन-मुपपन्नम्। ततो न भागानां भागवदवस्थापनं प्रयोजनम्; सत्सु तेषु तदविनाशापत्तेः। नापि तदुपलम्भनम्; अनुपलब्धानां परभागादिवत्तदसम्भवात्, इन्द्रियसन्निकर्षस्यापि तत्र दुरवबोधत्वात्। नाप्युपलब्धानाम्; अष्टाणुकादेः तदवयवोपलम्भाभावेनानुपलब्ध्या परापरतदवयविनामुपलम्भस्यैवा-सम्भवात्। ततो न युक्तमेतत्–"महत्यनेकद्रव्यत्वात् रूपाच्चोपलब्धिः" [वैशे० सू० ४।१।६] इति। ततः सूक्तम्–'आनर्थक्यात्' इत्यादि।

अथवा, अतादात्म्यमन्योऽन्यभेदः स एव स्वभावः तस्मिन् वेति पूर्वत्रात्र च पक्षान्तरद्योतने। हीति स्फुटार्थे। परैः परमाणुभिरलम् आनर्थक्यात्। तथाहि–तेषां यद्यातपावारणादिकं फलम्; अविशेषेण स्यात्। संसर्गिणामेवेति चेत्; न; संसर्गस्यैव संहतित्वात्। अन्यैव ततः संहतिः

"विनापि परमाणूनां संसर्गात् संहतिः परा।
आघातेऽपि पृथग्भावे यस्या नैव समस्ति सा॥" [प्र० वार्तिकाल० १।९१]

इत्यलङ्कारवचनादिति चेत्; सा तर्हि का परा स्यात् अन्यत्र कथञ्चित्तेषामभेदात्, तत्रैव घनैकाकारप्रत्ययोपलब्धेः। तदभावेऽपि तत्प्रत्ययो दृश्यते विरलकेशेषु, ततस्तदभेदात् अन्यैव संहतिस्तत्रेति परमाणुष्वपीति चेत्; मा नाम भूत्तत्र तदभेदो बाधकसद्भावात्, न परत्र विपर्ययात्, अस्मदादिप्रत्यक्षस्य स्वयमेव तत्प्रत्ययत्वेन तदबाधकत्वात्, तस्यापि योगिप्रत्यक्षं बाधकम् "अत्राप्य-तीन्द्रियदर्शियोगिप्रत्ययो भवति बाधकः" [प्र० वार्तिकाल० १।९१] इत्यलङ्कारवाक्या-दिति चेत्; यदि योगी न स्यात् का गतिः? अबाध एव तस्येति चेत्; सिद्धो नः सिद्धान्तः। सन्देह इति चेत्; न तर्हि परमाणुष्वपि निर्णय इति सुस्थितं तत्र संहतिवशात् आतपावारणादिपरि-कल्पनम्। विद्यत एव योगीति चेत्; न, "यदि योगी भवेत्" [प्र० वार्तिकाल० १।९१] इति स्वयमेव तत्र सन्देहवचनात्। सत्यपि योगिनि कथं तत्प्रत्ययेन तस्य बाधः? तेन संहति-विकलानामेव तेषां दर्शनादिति चेत्; कथं तस्य शरीरं तत्संहतेरेव तत्त्वात्, अशरीरस्य च नोपदेश इति व्यर्थं तदन्वेषणम्। तन्न तेन तस्य बाधनम्। 'विवादापन्ना संहतिर्मिथ्या तत्त्वात् दूरकेशवत्' इत्यनुमानेन बाध इति चेत्; न; 'विवादाकलितं नीलादि मिथ्या तत्त्वात्तैमरिकनीलादिवत्' इत्यनेन

---

१ नाशेन आ०,ब०,प०। २ अवयवेषु। ३ "अथ सौगतमतदूषणपरत्वेन कारिकां योजयति।" –ता० टि०। ४ "स्याद्वादिपक्षादन्यः पक्षः पक्षान्तरम्, तस्य द्योतने।"–ता० टि०। ५ तत्रैव आ०, [illegible]। ६ नापरत्र आ०, ब०, प०। ७ "बाधकाभावात्"–ता० टि०। ८ योगिनः।

नीलादेरपि तदापत्तेः, ततः परमाणवोऽपि न स्युः। नीलादिव्यतिरेकेण तदभावादिति कथं तदेकान्तेऽपि निर्बन्धः? तन्नानुमानादपि तद्बाधनं[1] यतस्तदन्यैव संहतिः। अन्यापि यदि तेषां साधारणी; न स्कन्धविलोपः। प्रत्यणु भिन्नायास्तु न संहतिव्यपदेश इति न तद्वशादणूनां व्रीहिधारणादावुपयोगः। स्वशक्तित इति चेत्; न; प्रत्येकं तत्प्रसङ्गात्, "संहतौ हेतुता तेषाम्" [प्र० वार्तिकाल०] इत्यस्य विरोधाच्च। तस्मादुपपन्नमुक्तम्-'अलं परैः' इति। ततोऽवश्यवक्तव्यः स्कन्धः तायैव तदुपयोगात्। स च रूपादीनामन्योऽन्याभेद एव नापर इत्याह-

स्पर्शोऽयं चाक्षुषत्वान्न न रूपं स्पर्शनग्रहात्॥ ११६ ॥ इति।

च शब्दो वक्ष्यमाणः स्पर्श इत्यादाववधारणार्थो द्रष्टव्यः। **अयम्** उपलभ्यमानो मातुलुङ्गादिस्कन्धः **स्पर्श एव न**। कस्मात्? **चाक्षुषत्वात्**। न हि तन्मात्रत्वे चक्षुर्वेद्यत्वम्। नापि **रूपमेव**। कुतः? **स्पर्शनग्रहात्** स्पर्शनेनापि प्रतिपत्तेः। न च तन्मात्रस्य तेन ग्रहः सम्भवति। अस्ति च तस्य नयन-स्पर्शनाभ्यां प्रतिपत्तिः। अतो रूपस्पर्शस्वभावस्यैव प्रत्यक्षविषयत्वमिति भावः। रूपादेर्भिन्न एव कस्मान्न भवतीति चेत्? अत्राह-

रूपादीनि निरस्यान्यं न चाभ्युपलभेमहि। इति।

स्वपदव्याख्यातमेतत्। एतदेव कस्मादिति चेत्? अत्राह-

सामग्रीविहितज्ञानदर्शिताकारभेदिनः॥ ११७॥
प्रायेणैकस्य तादूप्यं [पृथक्सिद्धौ प्रसङ्गतः]॥ इति।

एकस्य रूपाद्यन्वयिनः स्कन्धस्य। कथमेकस्य? **प्रायेण** कथञ्चित् **तादूप्यं** रूपाद्यात्मकत्वम् 'उपलभेमहि' इत्याकृष्य सम्बन्धः। ततो 'रूपादीनि' इत्युपपन्नम्। कीदृशस्य तस्य तादूप्यम्? **सामग्रीविहितज्ञानं** चक्षुरादिव्यापारोपजनितं प्रत्यक्षं तद्दर्शिता रूपादय आकारा-स्तद्भेदिनः प्रायेणेत्यत्रापि योज्यम्। पृथगेव कस्मान्नेति चेत्? आह-**पृथक्सिद्धौ प्रसङ्गतः** इति। **पृथक्सिद्धौ** निष्पत्तौ तस्य **प्रसङ्गतः** प्रागुक्तदोषस्येति।

नन्वेवमेकस्मिन्नपि इन्द्रिये तस्य तथैव प्रतिभासात् इन्द्रियान्तरमनर्थकमिति चेत्? अत्राह-

अल्पभूयःप्रदेशैकस्कन्धभेदोपलम्भवत्॥ ११८॥ इति।

अल्पश्च भूयांश्च तौ च तौ वातायनादिरूपौ **प्रदेशौ** च ताभ्याम् **एकस्कन्धस्य** पर्वतादेः **भेदेनाल्पत्वबहुत्वादिना उपलम्भः** तद्वत् स्कन्धस्य तादूप्यम्, उपलभेमहीत्यनुगमनीयम्। एतदुक्तं भवति-यथा सुधागृहमध्यवर्त्ती पुरुषः पर्वतादिकमल्पेन वातायनादिनाऽल्पमेव पश्यति भूयसा च भूयांसम्, एवमयमपि शरीरागारमध्यमध्यासीनो जीवश्चक्षुरादिनैकैकेन रूपाद्यन्यतमात्मकमल्पमेव तमवलोकयति भूयसा च तत्समुदायेन भूयांसं रूपस्पर्शाद्यात्मकमिति न वैफल्यं तदन्तरस्येति। निदर्शनानन्तरमपि परप्रसिद्धमाह—

---

१ तद्भावनं आ०, ब०, प०। २ इत्यवधारणा-आ०, ब०, प०।

अन्यथा स्वात्मनि ज्ञानमन्यथा चानुमीयते । इति ।

अन्यथा अन्येन अनुमानेन गम्यात् प्रकारात् **प्रकारेण**[1] **स्वात्मनि** दानादिचित्तस्वरूपे **ज्ञानं** प्रत्यक्षम्, न हि तेन स्वर्गप्रापणशक्त्यादेर्ग्रहणं तदनुमानवैफल्यापत्तेः,[2] खण्डशः समारोपस्य तद्व्यवच्छेदस्य च प्रतिक्षेपात्, **अन्यथा च** तच्छक्त्यादिप्रकारेण च **अनुमीयते** स्वात्मेति विभक्ति-वैपरीत्येन सम्बन्धः । ततो यथा दर्शनेनाल्पतया अनुमानसहायेन भूयस्तया तदात्मनो ग्रहणं न तदन्यतरस्यानर्थक्यम्, एवं स्कन्धप्रतिपत्तौ इन्द्रियान्तरस्येति । एवमेते व्याख्यानश्लोकाः । ततो युक्तं सर्वस्यानेकान्तात्मकत्वं विचारप्रसिद्धेः अनुमानप्रसिद्धेश्च । तच्चेदमनुमानम्—सत् सर्वमनेकान्तात्मकं प्रमेयत्वादिति । सतः प्रमेयत्वे तस्य च सति नियमे स्यादिदमनुमानम् नान्यथा हेतुदोषसम्भवादिति मन्यमानस्य मतमादर्शयति—

सत्प्रमेयत्वयोर्नास्ति सर्वथा नियमो यदि ॥ ११९ ॥ इति ।

सत्प्रमेयत्वयोर्नियमः सत्प्रमेयमेव नाप्रमेयं प्रमेयत्वं च सत्येव नासतीति निर्धारणं स **नास्ति** । कथम्भूतः ? **सर्वथा** सर्वेण सन्निहितेनेव इतरेणापि देशादिप्रकारेण । न हि सन्निहित-देशादिकमिव तदपरमपि प्रमेयं प्रमातुः सर्वस्य सर्वदर्शित्वापत्तेः,[3] अविरोधाच्च । वस्त्वपि स्यान्न प्रमित्यवलम्बनमपीति ततो भागासिद्धो हेतुः[7] । योगिनः प्रमेयमेव सर्वमिति चेत्; न; तस्यापि[4] चतुरार्यसत्यमात्रवेदिनस्तदभावात्, सर्वसर्ववेदिनि सौगतस्य विप्रतिपत्तेरिति तदवस्थं तदसिद्धत्वम्[5] । न च सदेव प्रमेयम् । असतोऽपि[6] प्रागभावादेस्तत्त्वात् । न च तस्यानेकान्तात्मकत्वम्; तस्य भाव-धर्मत्वेन तत्रासम्भवात्, अन्यथा तस्यापि भावत्वेनाभावव्यवहारविलोपात् । अतोऽनैकान्तिकश्चायं हेतुरिति नातः साध्यसिद्धिरिति भावः परस्य । **'यदि'** इति तदवद्योतने । तत्रोत्तरमाह—

अप्रवृत्तेः फलाभावात्तत्र वृत्तेर्निषेधतः । इति ।

नास्तीत्यनुवर्तते । ततोऽयमर्थः—यदुक्तं तयोर्नियमो नास्तीति, तन्नास्ति; कस्मात् । **अप्रवृत्तेः** । प्रमेयमेव सदित्यनियमे संज्ञानशब्दादिप्रवृत्तेरसम्भवात् । असम्भवत्प्रवृत्तिकमेव तत्सदिति चेत्; कुतो न व्योमकुसुमादिकम् ? तदर्थक्रियाविरहादिति चेत्; स एव कस्मात् ? कस्यचिदपि तत्र तदप्रतीतेरिति चेत्; इतरत्र तर्हि कस्यचित्तत्प्रतिपत्तिर्वक्तव्या अन्यथा तद्विरहापत्तेः, तथा च कथमप्रमेयत्वम् अर्थक्रियावत्त्वेन प्रतीतस्य तदयोगात् ? एवमपि नियतप्रतिपत्रपेक्षमेव तस्य प्रमेयत्वं न सर्वापेक्षमिति चेत्; भवतु, प्रमेयत्वमात्रस्यापि हेतुत्वात् । यदप्याकूतम्—सर्वसर्वज्ञे विप्रतिपत्तेस्तदपेक्षं प्रमेयत्वमपि विप्रतिपन्नमेवेति, तदपि नाऽति; तद्विप्रतिपत्तेः तत्साधनेन[8] प्रत्याख्यानात् । तत्र भागासिद्धत्वम् सन्दिग्धादिसिद्धत्वं वा साधनस्य, सतः सर्वस्य प्रमेयत्वनियमात् । नापि व्यभिचारित्वम्;

---

१ अन्येन प्रकारेण इत्यन्वयः । २ "ननु प्रत्यक्षेण स्वर्गप्रापणशक्त्यादेरग्रहणेऽपि न तदनुमानवैफल्यम्. समारोपव्यवच्छेदार्थत्वात् । तदुक्तम्-'तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः । भ्रान्तेर्निर्णीयते नेति साधनं सम्प्रवर्तते' इति वदन्तं सौगतं प्रत्याह—"-ता० टि० । ३ तस्यातो आ०, ब०, प० । ४-पि च प्रा-आ०, ब०, प० । ५ अनेकान्तात्मकत्वस्य । ६ सर्वसर्वज्ञसाधनेन । ७ भागादिसि-आ०, ब०, प० ।

सत्येव प्रमेयत्वस्य नियमान्नासति। कस्मात्? **तत्र** तस्मिन्नीरूपाभावे **वृत्तेः** प्रमाणव्यापारस्य **निषेधतो** निवारणात्। सोऽपि कस्मात्? **फलाभावात्** सकलशक्तिविरहिणि तस्मिन् कस्यचिदपि फलस्याभावात्। मा भूत् फलं तथापि कुतो न तत्र तत्प्रवृत्तिः? न हि प्रमाणस्यैवं प्रेक्षावत्त्वमस्ति फलवत्येव मया प्रवर्तितव्यं नापरत्रेति। पुरुषस्यात्मीयेति चेत्; न; तस्य तत्प्रवृत्तिनिषेधार्थत्वात्। सापि तदधीनैवेति चेत्; न, तस्याः स्वहेत्वधीनत्वात्। अन्यथा भावेऽपि अभिमते तदभावप्रसङ्गादिति चेत्; कस्तर्हि तत्र तत्प्रवृत्तेर्हेतुः? शक्तिर्विषयस्येति चेत्; न; अभावस्य तदभावात्। इदमेव तर्हि वक्तव्यम्, किं 'फलाभावात्' इति? न; तेनाप्यस्यैवोपलक्षणत्वात्। पुरुषप्रवृत्तिनिषेधार्थत्वाच्च, सफलेऽपि प्रवृत्तेस्तदभावादेवं तदुपपत्तेः प्रमाणस्यैवेति चेत्; न; वक्ष्यमाणोत्तरत्वात्। ततः स्थितम्—अप्रवृत्तेरित्यादि। किं वा प्रमाणं यतः प्रमेयत्वमभावस्य? प्रत्यक्षमिति चेत्; अत्राह—

प्रमाणमर्थसम्बन्धात् प्रमेयमसदित्यपि ॥ १२० ॥
केवलं ध्यान्ध्यमेवैतत् [किन्न सन्तं समीक्षते]। इति।

अर्थेन विषयेण **सम्बन्धात्** तज्जन्मादेः **प्रमाणं** प्रत्यक्षमिति गम्यते, अनुमानस्य वक्ष्यमाणत्वात्। ननु तदप्यविसंवादादेव प्रमाणमिति चेत्; न; तस्यापि सम्बन्धादेव भावात्, "**अविसंवादः तस्मादात्मलाभात्**" [ ] इति वचनात्। तस्य च प्रत्यक्षस्य **प्रमेयम् असदपि** अविद्यमानमपि प्रागभावादि[3] न केवलं विद्यमानमेव, अपिशब्दस्य भिन्नप्रक्रमत्वेनासदित्यत्र दर्शनम्। **इति** एवम् **ध्यान्ध्यमेव** चेतोविह्वलतैव केवलं न तत्त्वचिन्तनम्। एतत्परमतम्। तथा हि—यदि सम्बन्धात्प्रमाणं कथमसति तद्भवेत्? न हि तस्य तस्मादुत्पत्तिः, अशक्तेः, अन्यथा वस्तुत्वापत्तिः वस्तुनस्तल्लक्षणत्वात्। नापि तादात्म्यम्; प्रमाणस्यापि तद्रूपत्वप्रसङ्गात्। तस्यापि परतस्तत्स्वभावात् प्रतिपत्तावनवस्थितेः। न तादात्म्यादेस्तस्य तद्विषयत्वमपि तु योग्यत्वादिति चेत्; न; तस्य तदभावात्। प्रमाणस्येति चेत्; अत्राह—'**किं न सन्तं समीक्षते**' इति। **सन्तं** वर्तमानविषयं **किं** कस्मात् **न समीक्षते** समीक्षत एव प्रत्यक्षं योग्यत्वस्य तत्राप्यविशेषात्, अतिप्रसङ्गस्येतरत्रेव तत्रापि तन्नियमादेव निवृत्तेः। ततो नयुक्तम्—"**भिन्नकालम्**" [प्र० वा० २।२४७] इत्यादिना अतीतस्य तद्धेतोर्विषयत्ववर्णनमिति भावः। अथवा **नेति** नन्वित्यर्थे न्यासे बहुलं तथा दर्शनात्। ततोऽयमर्थः—**किं नैव न ननु सन्तं समीक्षते** प्रमाणमिति। तथा हि—कथं नाम प्रमाणमभावगोचरं भावे स्यात्? भावगोचरं भावान्तरे कथमिति चेत्? तस्य सम्भवात्। तत्रापि तस्य योग्यत्वात्, नैवमत्र, अभावे सति भावस्यैवासम्भवात्। तदुपमर्दने सम्भव इति चेत्; न; उपमर्दनस्य सत्येव दर्शनात् पिण्डादौ नासति व्योमकुसुमादिवत्। तथा प्रच्छादनस्यापि। किं च, तस्य प्रच्छादनं यदि कार्यस्य स्वरूपमेव; तत्कथमसत्प्रच्छादनं भवेत्? सदेव तत् प्रच्छादनादिति चेत्; न परस्पराश्रयात्-तत्प्रच्छादनात् सत् ततश्च तत्प्रच्छादनमिति। कुतो वा तत्तस्य प्रच्छादनम्? तत्परिहारात्मकत्वादिति चेत्; न; सति

---

१ "प्रमाणप्रवृत्तिः"—ता० टि०। २ फलाभावादेव निषेधोपपत्तेः। ३-दिति न आ०,च०, प०। ४ धान्ध्य-ता०। ५- नः सद्भ-प०। ६ "तादृप्यम्"—ता० टि०।

तस्मिन् भवतस्तदसम्भवात्, अन्यथा तत्तस्य[1] अभाव एव स्यान्न प्रच्छादनम्, तच्च न युक्तम्, तद्भावस्य भावात्मकत्वे निःस्वभावाभावकल्पनावैफल्योपनिपातात्। उपलब्धिप्रतिबन्धकरणादिति चेत्; न; तत्समये तस्याप्युपलब्धिप्रसङ्गात्। न हि तदा तस्य तत्प्रतिबन्धः; पश्चादेव तेन तस्य तत्करणात्। तथा च कथमुपलभ्यमाने तदभावे तदभावस्तदुपलब्धिर्वेति सूक्तमेतत्–'किन्न' इत्यादि। तत्र प्रत्यक्षतः प्रमेयत्वमभावस्य। नाप्यनुमानात्; तस्यापि प्रतिबन्धसव्यपेक्षस्यैव प्रामाण्यात्, अभावे च प्रतिबन्धस्यासम्भवात्। तदेवाह–

सत्प्रत्यक्षं परोक्षेऽर्थे साधनं त्रिविधं द्वयम् ॥१२१॥
हेत्वात्मनोः परं हेतुः तज्ज्ञानव्यवहारयोः। इति।

अनुमानं हि साधनात् साध्यविज्ञानम्। साधनं च परोक्षेऽर्थे एव नाऽनर्थे नीरूपाभावे। कुतः? यतः सत्प्रत्यक्षं सति[2] विद्यमाने प्रत्यक्षं तत्प्रतिपन्नम्। इदमुक्तं भवति–यतो निदर्शने सत्येव साध्ये तत्प्रतिपन्नं नासति नीरूपे, ततो धर्मिण्यपि तत्रैव तत्, नापरत्रातिप्रसङ्गात्। प्रतिषेधाच्च न तत्र तत्। तथाहि–त्रिविधं तत्, तत्र च द्वयं कार्यस्वभावलक्षणं हेत्वात्मनोः कारणस्वभावयोः कार्यं हेतोः स्वभावश्चात्मनः तद्[3]व्यतिरिक्तस्य साधनम्। न चाभावः कस्यचिद्धेतुः; अशक्तेः, अन्यथा भावत्वप्रसङ्गः। नाप्यात्मा, तस्यापि तद्रूपत्वापत्तेः। न च तदुत्पत्तितादात्म्याभ्यामपरः प्रतिबन्धो यतस्तत्रापि किञ्चित्साधनं भवेत्। परं चानुपलब्धिलक्षणं साधनं हेतुः। कयोः? तज्ज्ञानव्यवहारयोः तत्रैवार्थे यौ ज्ञानव्यवहारौ सदसज्ज्ञानशब्दलक्षणौ तयोः, नाभावे।

कुत एतत्? इत्यत्राह–

परसत्त्वमसत्ताऽस्यादर्शनं परदर्शनम् ॥१२२॥ इति।

यद्यभावोऽपि भावात्मैव न भवेत् भवेदपि तत्रैव ज्ञानादिरनुपलम्भात्[4], न चैवम्, यतः परसत्त्वमेवासत्ताऽस्य[5] केवलभूतलस्यैव घटाद्यभावतया प्रत्यक्षतोऽवगमात् नापरस्यानुपलम्भात्। तस्यैवावगम इति चेत्; क तस्य तेन सम्बन्धग्रहणम्? तदन्यत्रेति चेत्; न; तत्रापि प्रत्यक्षतस्तस्याप्रतिपत्तेः। अनुपलम्भादेवेति चेत्; न; तत्रापि पुनरन्यत्र तद्ग्रहणकल्पनायामनवस्थापत्तेः। तन्न परसत्त्वादन्यदसत्त्वं निषेध्यस्य[6]। नापि तद्दर्शनादन्यददर्शनम् अनुपलम्भः। दर्शननिवृत्तिमात्रमेव किन्न तदिति चेत्? न; तस्य क्वचित् साधनत्वानुपपत्तेः, व्योमकुसुमवदप्रतिपत्तेश्च। तस्यापि तन्निवृत्तेरन्यतः प्रतिपत्तौ अनवस्थोपनिपातात्, असम्बन्धाच्च। न हि तस्य साध्येन भावात्मनेतरेण वा कथञ्चिदपि सम्बन्धः; तस्य[7] वस्तुनियततयैवाध्यवसायात्। असम्बद्धाच्च ततस्तत्प्रतिपत्तिः प्रमाणान्तरमेव स्यान्नानुमानं तल्लक्षणातिपातात्।

एवमेतत्, अभावप्रमाणतया तस्योपगमादिति कश्चिद्विपश्चिन्मन्यः[8]; सोऽपि प्रष्टव्यः–

१– स्य भा–आ०, ब०, प०। २ प्रतिपद्य–आ०, ब०, प०। ३ तदव्यतिरेकस्य–आ०, ब०, प०। ४ "अनुपलब्धिलक्षणात् साधनात्"– ता० टि०। ५ "निषेध्यस्य"–ता० टि०। ६ सम्बन्धस्य। ७ मीमांसकः।

किं तस्य प्रयोजनमिति ? असाङ्कर्यपरिज्ञानं भावानाम् । अत एवोक्तम्–

"वस्त्वसङ्करसिद्धिश्च तत्प्रामाण्यं समाश्रिता ।" [मी० श्लो०अभाव०श्लो० २] इति ।

इति चेत्; किं पुनः प्रमाणान्तरेण स्वविषयस्यान्यसङ्कीर्णस्यैव परिज्ञानम् ? तथा चेत्; कथं वेदाद्धर्मे प्रवृत्तिः अधर्मसङ्कीर्णस्यैव ततस्तस्य प्रतिपत्तेः ? निवृत्तिर्वा कथमधर्मात् ? इतरसङ्कीर्णस्यैव तस्यापि ततोऽध्यवसायात् । अभावप्रमाणसहायादन्योऽन्यासङ्करेणैव तयोस्ततोऽवगम इति चेत्, कथं स्वतः प्रामाण्यं स्वविषयपरिच्छित्तौ प्रमाणान्तरसव्यपेक्षस्य तदयोगात् ? तन्निरपेक्षादेव ततो विषयासङ्कर-परिज्ञाने प्रत्यक्षादेरपि स्यादिति व्यर्थमेव तदर्थं तत्कल्पनम् । यदि चायं निर्बन्धः ततः एव तत्परिज्ञानमिति; तस्य तर्हि कुतो भावप्रमाणाऽसङ्करः ? तदप्रतिपत्तौ तस्यैवाव्यवस्थितेः । तदन्यस्मादिति चेत् ; न; तत्रापि तदन्यतस्तत्कल्पनायामनवस्थाप्रसङ्गात् । न तत्र तदन्तरापेक्षणं विषयवत् स्वरूपेऽपि तत एवान्यविवेकस्याध्यवसायादिति चेत् ; न; ततः प्रत्यक्षाद्यनुत्पत्तिरूपान्नीरूपात् तदयोगाद्व्योमकुसु-मादिवत् । आत्मनस्तत्सङ्करज्ञानपरिणतिविकलादिति चेत् ; तत्स्वसंवेदनस्य भावविषयस्य कथम-भावांशे प्रवृत्तिः ? ततस्तस्याप्यव्यतिरेकादिति चेत् ; किमेवमन्यत्राप्यभावेन तत्रापि प्रत्यक्षादिनैव तद-व्यतिरेकिणस्तदन्यविवेकस्य प्रतिपत्तेः ।

यदपि मतम्–'अन्यवस्तुनि विज्ञानं तत्प्रमाणम्' इति; तदपि न विज्ञानमिन्द्रियजम् ; "न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः । [मी० श्लो० अभाव० श्लो० १८] इत्यस्य विरोधात् । मानसमिति चेत् ; कुतस्तदुत्पत्तिः ? वस्तुग्रहणनिषेध्यस्मरणाभ्यामिति चेत्; कथं वस्तु-ग्रहणम् ? निषेध्यसङ्करेणेति चेत् ; न तर्हि तन्निषेधः, गृहीते तदयोगात्, वस्तुन्यपि प्रसङ्गात् । न तत्सङ्करेण नाप्यन्यथा अपि तु वस्तुत्वमात्रेणेति चेत् ; तथापि न निषेधो वस्तुत्वमात्रस्य सर्वत्र भावात् । तद्विशेषस्य निषेध इति चेत् ; न, तस्यास्मरणात् । न हि वस्तुग्रहणबलभाविस्मरणं तद्विशेषमवगाहितु-मर्हति; निरवशेषविशेषावगाहप्रसङ्गात् । भवतु असङ्करेणैव तद्ग्रहणमिति चेत् ; न; इन्द्रियज्ञानेन तदसम्भ-वस्योक्तत्वात् । मानसज्ञानेनैवेति चेत् ; न; तत एव तस्यानुत्पत्तेः । तथा हि–यदि सत्; किमुत्पत्त्या सति तद्वै-यर्थ्यात् ।असत् चेत्; कथं हेतुर्यत उत्पत्तिः ? अन्यदेव तन्मानसमिति चेत्; न; तत्रापि कुतस्तदुत्पत्तिरित्या-देरनवस्थोपनिपातप्रसङ्गस्योपनिपातात् । सति वा तस्मिन् किमन्येन मानसेन तत एव निषेधसिद्धेः ? निषेध्यान्तरनिषेधार्थं तदिति चेत्; न; तस्यापि तदसङ्करग्राहिणस्तत एव सिद्धेः । पुनस्तदन्तर-निषेधार्थं तत्कल्पनमनवस्थानमुपनयतीति न सुव्यवस्थितमेतत्–

---

१ वेदात् । "सर्वप्रमातृसम्बन्धिप्रत्यक्षादिनिवारणात् । केवलागमगम्यत्वं लक्ष्यते पुण्यपापयोः ॥" –ता० टि० । २ अभावप्रमाणादेव असाङ्कर्यपरिज्ञानम् । ३ अभावात् । 'प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते । आत्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि ॥ [मी० श्लो०] इत्येतत्कारिकोक्तमभावप्रमाण-स्वरूपत्रयं मनसिकृत्याह"–ता० टि० । ४ चेत्त्वसं–आ० । ५ ततस्तस्याव्यतिरेकादिवन्तुग्रहणनिषेध्यस्मर-णाभ्यामिति आ०, ब०, प० । ६ "अभावप्रमाणेन"–ता० टि० । ७ तान्या–आ०, ब०, प० । ८ व्यं हि हे–आ०, ब०, प० ।

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिता ज्ञानं जायतेऽक्षानपेक्षया ॥" [मी०श्लो०अभाव०श्लो०२७] इति।

तत्र अन्यवस्तुनि विज्ञानमभावप्रमाणं सम्भवति। सम्भवतोऽपि न भावनिष्कृष्टतया तस्मादभावस्य प्रतिपत्तिः तदप्रतिवेदनात्। तदनिष्कृष्टतया तु प्रतिपत्तौ सिद्धं भावस्यैवाभावत्वमिति न तत्प्रमाणादपि तस्य[१] सिद्धिः। तथाऽनुमानादपीति न युक्तमेतत्—"अन्यत्सामान्यं सोऽनुमानस्य विषयः।" [न्यायवि० पृ० २४-२५] इति। नीरूपस्य सामान्यसम्बन्धाभावेन तद्विषयत्वायोगात्। न नीरूपं तत्[२]। वस्तुमात्रस्यैवान्यव्यावृत्तिविशिष्टस्य तत्त्वादिति चेत्; किमत्र मात्रपदस्य व्यवच्छेद्यम्? सजातीयविवेक इति चेत्, कथं तदवेदने वस्तुप्रवेदनम्? "तस्माद्दृष्टस्य भावस्य" [प्र० वा० ३।४४] इत्यादि विरोधात्। ततो दुर्व्याहृतमिदम्—

"अतद्रूपसंवृत्तवस्तुमात्रप्रवेदनात्[३]।
सामान्यविषयं प्रोक्तं लिङ्गं भेदाऽप्रतिष्ठितेः ॥" [ ] इति

कथं वा वस्तुरूपत्वे तस्योक्तम्—

"अर्थानां यच्च सामान्यमन्यव्यावृत्तिलक्षणम्।
यन्निष्ठास्त इमे शब्दा रूपं तस्य न किञ्चन" [प्र० वा० २।३०] इति।

शब्दविषयस्यैव तस्य[४] नीरूपत्वमुक्तं नानुमानविषयस्येति चेत्; किं पुनस्तद्विषये न सन्ति शब्दाः? तथा चेत्; कथं तत्प्रतिपादनं यतः परार्थानुमानमिति दुष्परिहारमेवेदं परिस्खलितं परस्येति पर्याप्तमनुषङ्गेण। ततो न व्यभिचारी हेतुः, अभावस्यापि भावान्तरस्वरूपतया ऽनेकान्तात्मकत्वात्।

यदि भावान्तरमेवाभावस्तत्र कथमसज्ज्ञानादिप्रवृत्तिरिति चेत्? अत्राह—

सदसज्ज्ञानशब्दाश्च केवलं तन्निबन्धनाः। इति।

सद्भूतलम् असत् घट इति य एते बुद्धयः शब्दाश्च तेषामपि तदेव भावान्तरं निमित्तं तथैव प्रमाणप्रवृत्तेर्न व्यतिभिन्नौ भावाभावौ[५] विपर्ययात्। भावस्यैवाभावात्मकत्वे प्रसिद्धमुदाहरणमाह—

अग्निः स्वपररूपाभ्यां भावाभावात्मको यथा ॥ १२३ ॥ इति।

अग्निर्दहनात्मा पदार्थो **भावाभावात्मको यथा** येन प्रतीतिप्रकारेण तथान्योऽपीति। स च तदात्मकः **स्वपररूपाभ्यां** रूपग्रहणमुपलक्षणं क्षेत्रादेरपि। ततः स्वरूपादिना[६] भावात्मकः पररूपादिना अभावात्मक इति प्रतिपत्तव्यः। भावस्यैवाभावत्वे स्वरूपादिनेव इतरेणापि तदात्मकत्वमेवेति भावैकान्तवादः। अभावस्यैवं[७] वा भावत्वेऽपि शून्यैकान्तवादः पररूपादिनेवेतरेणापि तदात्मकत्वस्यैव भावात् नोभयात्मकत्वमिति चेत्; अत्राह—

अन्वयव्यतिरेकाभ्यां [शब्दबुद्ध्याऽवधार्यते।] इति।

---

१ अभावस्य। २ सामान्यम्। ३ आह चात्र—अतद्रूप···"—प्र० वार्तिकाल० १।२। ४ सामान्यस्य। ५ "तथा प्रमाणाप्रवृत्तेः।"—ता० टि०। ६—ना च भा—आ०, ब०, प०। ७—ब भा—आ०, ब०, प०।

अन्वयो 'भावाभावयोः परस्परमेकत्वं व्यतिरेको भेदस्ताभ्याम् अग्निस्तदुभयात्मक इति न प्रकृतो दोषः, एकान्ताभेद एव तस्य भावात्। अन्वयग्रहणेनापि "तयोर्व्यतिरेके द्वे वस्तुनी स्यातां नोभयात्मकत्वमेकस्य" [ ] इति प्रतिक्षिप्तम्; एवमपि भावाभावयोरितरेतरनिष्कर्षणासम्भवात् कथं स्वरूपादेर्भावोऽभावश्च तद्विपर्ययादिति तथा व्यपदेश इति चेत्? अत्राह—'शब्दबुद्ध्याऽवधार्यते' इति। शब्दबुद्धिः नयबुद्धिः तया स्वविषये शब्दस्य समर्पणात्तयाऽवधार्यते सत्त्वं स्वरूपादेरसत्त्वमन्यत इति पृथक्कारेण निर्णीयते। निरूपितं चैतत् प्रथमप्रस्तावे।

यदप्यत्र चोद्यम्—"यदि भावान्तरमेवाभावस्तदा पर्युदासात् प्रसज्यप्रतिषेधस्याविशेषः" [ ] इति; तदप्येतेन प्रतिविहितम्; नयबुद्धिवशादभावौदासीन्येन भावस्य तदौदासीन्येन चाभावस्य प्राधान्यसमर्पणे पर्युदासप्रसज्ययोर्विशेषस्यावकल्पनात्। तन्नाभावेन व्यभिचारः तस्य प्रमाणतोऽनवगमात्। नयतोऽवगमेऽप्यप्रमेयत्वात्, अन्यथा प्रमाणनययोरविशेषापत्तेः। प्रमेयत्वेऽपि भावरूपत्वात्। कुत एतत्? ननु निरूपितमिदं यदि न तावता परितोषः पुनरपि वदामः। इत्याह—

अप्रमेयं प्रमेयं चेदसत्किन्न सदात्मकम्॥ १२४॥ इति।

'यथैव हि अभावो भावमपेक्षते तत्प्रच्युतिरूपत्वात् तथा तत एव प्रमेयमपि अप्रमेयम्। तत्र यत्तदप्रमेयं तच्चेत् यदि प्रमेयं प्रमाणवेद्यम् असत् अविद्यमानं किं कस्मान्न सदात्मकम्? सदात्मकमेव प्रतिषेधद्वयेन प्रकृतप्रतिपत्तेः। प्रयोगश्चात्र—यद्यत्प्रत्यनीकं तत्तद्वर्गीयं यथा अप्रमेयं प्रमेयवर्गीयम्, सत्प्रत्यनीकं च असदिति नात्यन्तायासतो भिन्नवर्गत्वं तस्य। अथ तत्प्रमेयं न भवति कथं तद्व्यवहारः; सर्वप्रमाणव्यापारातिक्रान्ते तदयोगात् परिगणनातिक्रान्तपदार्थवत्। ततः प्रकृतप्रमाणापरामर्शेऽपि प्रमाणान्तरपरामृष्टमेव तदभ्युपगन्तव्यम्। ततः प्रमेयमेवाप्रमेयं तथा सदेवासदपि। तस्यापि प्रकृतरूपेणासत्त्वेऽपि रूपान्तरेण सत एवोपपत्तेः। अथ सदेवासादिति व्यवहारो नास्ति, तदेवाह—

अथ न व्यवहारोऽयम् 'इति।

अत्रोत्तरमाह—

अन्यत्रापि निरङ्कुशः। इति।

अन्यत्र परपक्षेऽपि प्रमेयमेवाप्रमेयमिति व्यवहारो नेति प्रसङ्गो निरङ्कुशो निवारकरहित इत्यर्थः। लोकस्तत्राङ्कुश इति चेत्; न; अन्यत्रापि तुल्यत्वात्। ततः स्थितमव्यभिचारित्वं प्रमेयत्वस्य।

सम्प्रति सर्वत्र प्रमेयत्वस्य सद्भावमुपसंहृत्य तस्य गमकत्वे निमित्तं दर्शयन्नाह—

सत्प्रत्यक्षं परोक्षार्थगतिस्तत्रैकलक्षणम्॥ १२५॥
साध्येऽसति विरोधः [अयमतस्तर्केण साध्यते।] इति।

प्रकृतं प्रमेयत्वं **सत्** अस्ति सर्वत्रेति शेषः। किं रूपम्? **प्रत्यक्षं** तत्परिच्छेदयोग्यरूपम्। तथा **परोक्षा** अस्पष्टा **अर्थगतिः** स्मरणादिः, अत्रापि तद्योग्यमेव रूपं तद्विषयत्वादुच्यते। ततः प्रत्यक्षपरोक्षप्रमाणव्यापारयोग्यत्वं प्रमेयत्वम्, अर्हार्थत्वात् कृत्यस्य। तत्र तस्मिन् प्रमेयत्वे **एकलक्षणं** प्रधानं हेतुरूपं सदिति सम्बन्धः। तच्च **साध्येऽनेकान्तात्मकत्वे असति** अविद्यमाने **विरोधो** विघटनं प्रमेयत्वस्य, नापरं ततस्तस्य गमकत्वमिति मन्यते।

स्यान्मतम्—तद्विरोधस्याप्यन्वयव्यतिरेकाभ्यामेव प्रतिपत्तिर्महानसादौ तदुपलम्भस्मरणाभावे पर्वतादौ प्रतिपन्नेऽपि[4] धूमे तदभावात्, ततोऽन्यत्र[5] तदुपलम्भाय दृष्टान्तो वक्तव्य इति; तन्न; दृष्टान्तेऽपि विप्रतिपत्तावत एव साध्यस्य व्यवस्थापनात्। तत्रापि तदन्तरबलात्[6] तत्प्रतिपत्तौ अनवस्थाप्रसङ्गात्। अस्ति च तत्रापि चित्रज्ञानादौ विप्रतिपत्तिः—"**किं स्यात् सा चित्रतैकस्याम्**" [प्र० वा० २।२१०] इत्यादि वचनात्। कथं तर्हि तत्प्रतिपत्तिरिति चेत्? विपक्षे बाधकबलादेव। तच्च प्रतिपादितमेव पूर्वमिति नेह प्रतन्यते। निदर्शनबलात्तत्प्रतिपत्तावतिप्रसङ्गश्च—'विवादापन्नः पुरुषो न सर्वज्ञो वचनादेरथ्यापुरुषवत्' इत्यादावपि तदुपनिपातात्, वचनादेः किञ्चिज्ज्ञ एव दृष्टस्यापि विरोधाभावात् साध्यविपक्षेऽपि सम्भावनायां धूमादेरपि किन्न स्यात्? तस्य पावकादावेव तत्कार्यत्वेन नियमात्। न चैवं वचनादिरसर्वज्ञस्यैव कार्यं सर्वज्ञेऽप्यनुपलब्धिलक्षणप्राप्तत्वेनाशक्यभावनिश्चये तदाशङ्काऽनिवृत्तेः। ज्ञानकार्यं हि वचनं तच्च यथाऽल्पं तद्धेतुस्तथा प्रकर्षवदपि। न हि कारणप्रकर्षः कार्यविरोधी। ततो न तस्य[10] तत्र[11] नियम इति चेत्; न; प्रकर्षवतोऽपि किञ्चिज्ज्ञस्यैव तत्कारणत्वप्रतिपत्तेः, [12]तद्रूपपरित्यागे ज्ञानमेव तन्न भवेत्।[13] अन्यथा उष्णस्पर्शादिविशेषपरित्यागेऽपि दहनादेरदहनादित्वाभावात्, ततोऽपि धूमादिसम्भवे कथं तदनुमानेऽपि दाहाद्यर्थिनस्तत्र प्रवृत्तिः स्यात्? न तादृशो दहनादिरनुपलम्भादिति चेत्; न; तादृशे ज्ञानेऽपि तुल्यत्वात्। तथापि तस्य[14] भावे पावकादेरपि स्यादविशेषात्। हन्तैवं तत्कार्यं धूमादिरपि विलक्षणमेव स्यात् हेतुवैलक्षण्ये तद्वैलक्षण्यस्यावश्यकत्वात्। न च तस्य प्रसिद्धपावकादिव्यभिचारे[15] तज्जन्मनो व्यभिचार इति चेत्; न; काष्ठादिविलक्षणादपि [16]मण्यादेरविलक्षणस्यैव पावकादेरुत्पत्तेः। तत्राप्यस्त्येव वैलक्षण्यं प्रतिपत्तुरशक्त्या तु तदपरिज्ञानमिति चेत्, परिज्ञाने का वार्ता? ततो विलक्षणस्यैव हेतोरनुमानम् "**तज्जन्यविशेषग्रहणेऽभिमतत्वात्**" [हेतुवि० पृ० १५२] इति हेतुबिन्दुवचनादिति चेत्; न; तस्य बहिरभावेनान्वयापरिज्ञानात्। पक्ष एव तत्परिज्ञानं विपक्षे बाधकबलादिति चेत्;

---

१ "कृत्यप्रत्ययस्य, प्रत्ययस्य त्य इति संज्ञा जैनेन्द्रव्याकरणे।"—ता० टि०। २ सत्यपि वि-आ०, ब०, प०। ३ "पक्षधर्मत्वसपक्षसत्त्वादिकम्"—ता० टि०। ४-पि अग्नौ आत्मे तद्-आ०, ब०, प०। ५ "पर्वतादि पक्षादन्यत्र"-ता० टि०। ६ दृष्टार्थे ब-आ०, ब०, प०। ७ दृष्टान्तान्तर। ८ एवं आ०, ब०,प०। ९ ज्ञानम्। १० वचनस्य। ११ असर्वज्ञे। १२ वचनकारणत्वपरित्यागे। १३ अन्यदोषस्प-आ०, ब०, प०। १४ "विलक्षणकार्यस्य"—ता० टि०। १५ प्रसिद्धपावकोत्पन्नधूमस्य। १६ मण्यादेरपि विल-आ०, ब०, प०।

इदं तर्हि हेतुबिन्दुं व्याचक्षाणेनाप्यर्चटेन किमिति नावधारितम् ? अवधारितमेव "**अगरुधूमग्रहणेन भवत्येव तदग्नेरनुमानम्**" [हेतुवि० टी० पृ० १५२] इति तेनाप्यभिधानादिति चेत्; तर्हि इदं तस्य शिथिलीभवति--"**कार्यहेतोस्तु पक्षीकृते धर्मिणि कस्यचिच्च स्वभावहेतोः प्रत्यक्षानुपलम्भसाधनः प्रतिबन्धः कथं परोक्षे साध्यधर्मे गृह्यते**" [हेतुवि० टी० पृ० १६] इति । यदि च, कार्येऽपि क्वचित् पक्ष एव तत्परिज्ञानम् अन्यथा देशनाविशेषात् सुगतप्रामाण्यापरिज्ञानापत्तेः; तर्हि व्यर्थं तदर्थं प्रमेयत्वादावपि तदपेक्षणं विपक्षे तदारोपपरिहारपरायणात् तर्कज्ञानादेरेव तदुपपत्तेः । एतदेवाह--'**अयमतस्तर्केण साध्यते**' इति । अत एतस्मात् प्रत्यक्षादेर्भवता **तर्केण साध्यते** निर्णीयते **अयं** साध्याभावे विरोधः साधनस्य न बहिर्दर्शनादर्शनाभ्यां व्यभिचारात् । नापि तादात्म्यतदुत्पत्तिभ्याम्; तयोस्तद्विरोधादेव सिद्धेश्च, न पुनस्ताभ्यां तस्य तदभावेऽपि भावात् । वक्ष्यति चैतत्--"**तुलोन्नामरसादीनाम्**" इत्यादिना । तन्न बहिरन्वयादिना किञ्चित् विनापि तेन ततस्तन्निर्णयात् । न च सर्वत्र तत्सम्भवो यतः तस्मादेव स भवेत्। इत्याह—

सर्वत्र परिणामादौ हेतुः सत्त्वादिः [अन्यथा] ॥ १२६ ॥ इति ।

न हि चेतनेतरसकलवस्तुगोचरतया परिणामादीनामन्यतमे साध्ये क्वचित् सत्त्वकृतकत्वादेरन्वयः सर्वस्य विप्रतिपत्तिविषयत्वेन निदर्शनत्वानुपपत्तेः । न चैवमसौ अहेतुरेव; अन्तर्व्याप्तिनिश्चयात् । किमर्थमादिग्रहणम् ? न हि शास्त्रकारस्य क्षणभङ्गादिसाधनमिष्टमिति चेत्; न; दृष्टान्तार्थत्वात्--अन्यथा क्षणभङ्गादौ स निरन्वयोऽपि हेतुः, तथा परिणामेऽपीति । नैतदस्ति प्रदीपादौ तस्य तदन्वयग्रहणादिति चेत्; न प्रत्यक्षतस्तद्ग्रहणम्, पक्षेऽपि स्यादिति कोऽर्थस्तत्रापि हेतुना ? समारोपव्यवच्छेद इति चेत्; न; समारोपस्य प्रदीपादावपि भावात् । सत्यम्, सन्नप्यसौ तँत्र 'यदि प्रदीपादिः प्रथमतैलादिव्यापारादेवोत्पन्नः परापरस्तद्व्यापारो व्यर्थः' इत्यादिना विचारेण व्यवच्छिद्यत इति चेत्; न; अप्रमाणात्तद्व्यवच्छित्तौ प्रमाणकल्पनैवैयर्थ्यात् । प्रामाण्यमपि न प्रत्यक्षत्वेन अविचारकत्वापत्तेः । अनुमानत्वे तु तत्रापि निदर्शनान्तरमन्वयार्थमर्थयितव्यम्, पुनस्तत्समारोपस्यापि विचारान्तरादनुमानाद् व्यवच्छित्तौ पुनस्तदन्तरं तदर्थमर्थयितव्यमिति कथमनवस्थितवस्तुवादिनस्तथाऽनवस्थादौस्थ्यान्निर्मुक्तिः ? विचारस्यानन्वयस्यापि गमकत्वे सत्त्वादेरपि स्यादविशेषात् ।

भवतु निरन्वयविनाश एव सर्वहेतुर्न परिणाम इति चेत्; न; तस्य निरपेक्षस्य नित्यत्वापत्त्या कार्यद्रव्यादेर्वा तयापि अव्यवस्थितेः । साक्षेप एवासौ मुद्गरादिव्यापारादुत्पत्तेरिति चेत्; न; नीरूपस्य तदयोगात् । न हि नीरूपं किञ्चित् कुतश्चिदुत्पत्तिमन्नाम, प्रागिव तद्व्यापारेऽपि तदविशेषात् । न च तेन भावो नष्टो नाम सर्वदा प्रसङ्गात् । यदैवासौ तदैव नष्ट इत्यपि न युक्तम्; नीरूपे

---

१ अत एव कस्मात् आ०, ब०, प० । २ साध्याभावे विरोधादेव । ३ विपक्षे विरोधस्य । ४ न्यायवि० श्लो० ३३८ । ५ तर्कात् । ६ सत्त्वस्य । ७ प्रदीपे । ८-सप्रवृ-आ०, ब०, प० । ९ तदविशेषान्न च स्यादविशेषात्-आ०, ब०, प० । १० सत्त्वादिः । ११ विनाशस्य । १२ विनाशः । १३ नीरूपत्वाविशेषात् ।

कालसम्बन्धस्यैवासम्भवात्। अभावं करोति मुद्गरादिर्भावं न करोति इति क्रियाप्रतिषेधाच्च न नीरूपाभावादिना भावविनाश इति सर्वं कूटस्थमेव जगत्प्राप्तम्। न चैतद् दृष्टमिष्टं वा परस्य; कस्यचिद्विनाशिनोऽपि तस्य तेनोपगमात्। 'न नीरूपो विनाशो भावान्तरस्वभावत्वात्' इत्यपि न युक्तम्; अतद्रूपत्वे अतिप्रसङ्गात्। निवेदितं चैतत्–"अन्यस्यान्यो विनाशः किम्" इत्यादिना। तन्न सहेतुको विनाशो यत्रायं हेतुः। नापि निर्हेतुकः; तस्यापि नीरूपस्याप्रतिपत्तेः, वस्तुन्येव सम्बन्धभावेन प्रमाणव्यापारात्। वस्त्वेव विनाशोऽपि क्षणस्थितिधर्मणो भावादव्यतिरेकादिति चेत्; न तर्हि निर्हेतुकत्वं भाववदेव, भावस्य वा तद्धेतुत्वमिति नित्यं सत्त्वप्रसङ्गः। तथा च 'विनाशनियतो भावस्तं प्रत्यनपेक्षणात्' इति विरुद्धो हेतुः अविनाशनियमस्यैव साधनात्। सहेतुक एवासौ भावहेत्वपेक्षया, निर्हेतुकत्वं तु मुद्गराद्यपेक्षयेति चेत्; ननु तयापि तत्त्वं यदि तस्यैव भावस्य सिद्धसाधनं निष्पन्नस्यापराधीनत्वे विवादाभावात्। तद्विनाशस्येति चेत्; न; तस्यापि तद्व्यतिरिक्तस्याभावात्। कल्पनया भाव इति चेत्; कथं तर्हि तथापि निर्हेतुकत्वं कल्पनारूपाद्धेत्वन्तरादेव तस्य भावात्। व्यतिरेक एव तस्य कल्पनया न स्वरूपमपीति चेत्, न; व्यतिरेकस्यैव तत्स्वरूपत्वात्, सत्येव तस्मिन् विनाशव्यवहारप्रतीतेः। सत्यपि निर्हेतुकत्वे तस्य कथं तन्नियतत्वं भावस्य? कथं च न? स्यादेतत् व्यभिचारात्, स्थैर्यस्य निर्हेतुकत्वेऽपि भावस्य तन्नियमाभावात्। शक्यं हि वक्तुम्–

स्थितिस्वभावो भावश्चेत् तस्य किं स्थितिहेतुना।
यद्यस्थितिस्वभावोऽसौ तस्य हेतोः(हेतोस्तस्य)स्थितिः कथम् ॥ १४७३ ॥
न हि स्वभावातद्रूपस्तद्रूपः परतो भवेत्।
परतश्चेतनोऽपि स्यादन्यथा किमचेतनः ॥ १४७४ ॥

स्यादेतत्–यदि स्थैर्यस्य प्रतीतिस्तदा शक्यमिदं वक्तुम्–'स्थैर्यनियतो भावः स्थैर्यं प्रत्यनपेक्षणात्' इति, अन्यथा हेतोरसिद्धिप्रसङ्गात्। न चैवम्, प्रतीतावपि स्थिरात्मनो भावस्यासामर्थ्यादिति; तन्न; क्षणभङ्गिन्यपि तदविशेषादिति निवेदनात्। अपि च, यद्यन्यतः तदसामर्थ्यं प्रतिपन्नम्; व्यर्थमेतत्–'विनाशनियतो भावो विनाशं प्रत्यनपेक्षणात्' इति, तत एवान्यतस्तन्नियमस्यावगमात्। अक्षणिकसामर्थ्याभावज्ञानस्य क्षणिकसामर्थ्यज्ञानस्वभावत्वात्। अत एव तत्प्रतिपत्तौ परस्पराश्रयः–सत्यां तस्याम् अव्यभिचारात् अतस्तन्नियमसिद्धिः, अतश्च तत्प्रतिपत्तिरिति। तन्न नश्यदात्मैव नाशः।

---

१ 'तथाहि प्रसज्यप्रतिषेधे सति नञः करोतिना सम्बन्धात् अभावं करोति भावं न करोतीति क्रियाप्रतिषेधादकर्तृत्वं नाशहेतोः प्रतिपादितम्।"–तत्त्वसं० पं० पृ० १३६। २ न्यायवि० श्लो० २।९१। ३ अभाववच्चिर्हेतुकत्वम्। ४ "यद्भावं प्रति यन्नैव हेत्वन्तरमपेक्षते। तत्तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्॥ निर्निबन्धा हि सामग्री स्वकार्योत्पादने यथा। विनाशं प्रति सर्वेऽपि निरपेक्षाश्च जन्मिनः॥–तत्त्वसं० श्लो० ३५४–५५। हेतुवि०टी० पृ० १४३। ५ हेतुतः वि-आ०,ब०,प०। ६ निर्हेतुकत्वम्। ७ विनाशनियतत्वम्। ८ नित्यस्यासामर्थ्यम्। ९ अक्षणिकासामर्थ्यसिद्धौ। १० नश्यत्तादात्म्येव आ०, ब०, प०।

तत्फलात्मेति चेत्; सोऽपि यदि सदृशपर्यायः, सत्यं तत्र निरपेक्षत्वं तन्नियतत्वं च भावस्य, किन्तु निरन्वयत्वमसिद्धम्, अन्वयस्यापि प्रतीतेः । निवेदितं चैतत्–"भेदज्ञानात्" इत्यादिना[1] । अत एव न विसदृशपर्यायोऽपि । न च तस्य निर्हेतुकत्वम्; काष्ठादौ भस्मादितत्पर्यायस्य पावकादेरेव दर्शनात् । ततः सान्वयविनाश एव भावात् सत्त्वादेस्तत्रैव हेतुत्वमित्युपपन्नं परिणामसाधनत्वम्, अन्वयाभावाच्च । ५

सर्वत्र तस्य[2] तद्धेतुत्वे दूषणमाह—

अन्यथा ॥

शब्देऽपि साधयेत् केन तस्मान्नान्वयतो गतिः । इति ।

अन्यथा सर्वत्रेत्याद्यभावप्रकारेण **शब्देऽपि** न केवलं सर्वत्र **साधयेत्** परिणामादिकं **केन** न केनचित् । दृष्टान्तेऽपि विप्रतिपत्तौ तत्राप्यन्वयस्य दुर्लभत्वादिति मन्यते । **'तस्मान्नान्वयतो गतिः'** इत्यनन्वयोपसंहारः । तथा हि–न क्वचिदन्वयात् साध्यगतिः अविनाभावादेव तदुपपत्तेः । न चासावन्वय एव, क्वचित् सत्यपि तस्मिन्नभावात्[3], अत एव न तज्ज्ञाप्योपि[4] । नापि तन्नियतः; तदभावेऽपि भावस्योपदर्शनात् । इत्युपपन्नं 'तस्मात्' इत्यादि ।

साम्प्रतं विपक्षव्यवच्छेदेन परिणामहेतुत्वमेव सत्त्वादेर्विस्तरेण व्याचक्षाण आह —

सिद्धमर्थक्रियाऽसत्त्वं सर्वथाऽविचलात्मनः ॥१२७॥ १५

निरन्वयविनाशेऽपि [साधनं नोपचारतः] ॥ इति ।

सिद्धं निश्चितं पूर्वम् **अर्थक्रियाऽसत्त्वं** कार्याभावः । कस्य ? **सर्वथाऽविचलात्मनः** कूटस्थनित्यस्य भावस्य । न केवलं तस्यैवापि तु **निरन्वयविनाशेऽपि** क्षणिकैकान्तेऽपि निरन्वयो विनाशो यस्मिन्निति व्युत्पत्तेः । सत्यं वस्तुतस्तत्र तदसत्त्वम् "अशक्तं सर्वम्" [प्र० वा० २।४] इति वचनात् । संवृत्तिसिद्धं तु तत्सत्त्वं सिद्धमसिद्धं वा तत्र[5] हेतुरिति चेत्, अत्राह–**साधनं नोपचारतः'** इति । नह्युपचारोपनीतस्य हेतुत्वं ततो विनश्वरवदविनश्वरस्यापि सिद्धिप्रसङ्गात्; ततो निराकृतमेतत्–"संवृत्यास्तु यथा तथा" [प्र० वा० २।४] इति । २०

ननु यथा[6] नित्याद्येकान्ते अर्थक्रियाऽभावः तथाऽनेकान्तेऽपि, तस्यापि तत्कुर्वतः कुतश्चिदप्रतिपत्तेरिति चेत्; अत्राह–

अवश्यं बहिरन्तर्वा प्रमाणमवगच्छताम् ॥१२८॥ २५

सिद्धमेकमनेकात्मपरिणामव्यवस्थितम् । इति ।

एकं चेतनमितरद्वा **सिद्धं** निश्चितम् । कीदृशम् ? **अनेको** नाना य **आत्मा** स्वभावः स एव **परिणामस्तेन व्यवस्थितं** लब्धात्मलाभम् । क तथा तद्व्यवस्थितम् ? **बहिरन्तर्वा** । वेति

---

१ न्याय वि० श्लो० १।११८। २ तत्पात–आ०, व०, प० । ३ अन्वये । ४ तद्भावस्यापि आ०, व०, प० । ५ अविनाभावः । ६ शुद्धमशुद्धं वा आ०, व०, प० । ७ तत्र प० । ८ अनित्यादेकान्ते तथा आ०, व०,प० ।

समुच्चये । कथं सिद्धम् ? अवश्यं नियमेन । केषाम् ? प्रमाणमवगच्छताम् अवधारयताम् । एतदुक्तं भवति—तथाविधं वस्तु निराकुर्वतां प्रमाणमेव शरणं विना तेन विधिवत् क्वचिन्निषेधस्याप्यनवकल्पनात् । ततोऽपि यदि बहिस्तन्निराकरणं बहिर्मुखत्वं तस्य वक्तव्यम् । न च तद् अन्तर्मुखत्वमन्तरेण, "अप्रत्यक्षोपलम्भस्य" [ ] इत्यादेर्व्यापत्तेः । तथा च सिद्धं तदेव बहिरन्तर्मुखस्वभावद्वयाविभ्राड्भूतमेकम् अनेकात्मपरिणामव्यवस्थितम् । अन्तरेव ततस्तन्निराकरणं न बहिः, बहिर्भावस्यैवाभावादिति चेत् ; कुत एतत् ? तत एवेति चेत् ; वक्तव्यं पुनरपि तस्य बहिर्मुखत्वम् , अन्यथा ततस्तस्यानुपपत्तेः । अन्तर्मुखत्वादेवोपपत्तौ चार्वाकस्यापि इहलोकाद्यभिमुखात् प्रत्यक्षादेव परलोकादिप्रतिषेधोपपत्तेः, "[3]प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ।" [ ] इति प्लवेत । अन्तरपि कीदृशं वस्तु यत्र तन्निराकरणम् ? निराकारं संवेदनमिति चेत्; न; तस्य स्वयमेवानभ्युपगमात् । नीलाद्याकारमेवेति चेत् ; न; तस्याप्यचितः प्रतिभासासम्भवात् । चित्स्वभावमपीति चेत् ; सिद्धं पुनरपि नीलादि-चैतन्यरूपतया तदेव द्विरूपमेकं वस्तु । संवेदनमेव तत्र वस्तुसत् न नीलादि तस्य भ्रान्तत्वादिति चेत् ; न ; तथापि विभ्रमेतरात्मतया द्वैरूप्यस्यानतिक्रमात् । विविक्तमेव तत् नीलादेरिति चेत्; न; तद्विवेकस्यावभासे विभ्रमाभावापत्तेः । अनवभासे चैतन्येऽपि तदुपनिपातात्, अन्यथा सङ्गृहीतेतररूपतया द्वयात्मकत्वस्यानिवारणात् । भवतु अन्तस्तत्परिणामव्यवस्था "चित्रप्रतिभासाऽप्येकैव बुद्धिः" [प्र० वार्तिकाल० २।२१९] इति वचनात्, न बहिः तत्र परमाणूनामेव प्रतिक्षणक्षीणानां परस्परविलक्षणानाञ्च भावादिति कश्चित्[4] । अवयवावयव्यादीनामेवेत्यपरः[5] । तत्राह—

परापरविवेकैकस्वभावपरिनिष्ठितः ॥ १२९ ॥

परमाणुरतोऽन्यो वा बहिरन्तर्न बुद्ध्यते । इति ।

परमाणुः सौगतकल्पितो न बुद्ध्यते नोपलभ्यते । क्व ? बहिः । कीदृशः ? परापरौ परापरदेशकालगतौ तयोर्विवेको विश्लेषः स एवैकोऽसहायः स्वभावस्तेन परिनिष्ठितः समाप्तः, कथञ्चिदभेदस्थूलप्रतिभासादिति मन्यते । प्रत्यक्षपृष्ठभावी विकल्प एवायमारोपिताकारो न दर्शनम् , दर्शनं तु क्षणिकपरमाणुविषयमेवेति चेत् ; न, पृथक् तस्याप्रतिवेदनात् । अप्रतिविदितमपि विचारादवगम्यत इति चेत् ; न, विचारस्यानुमानाद्[6]यस्याभावात् प्रमाणसङ्ख्याव्यापत्तेः, अनुमानस्य च दर्शनाभावेऽसम्भवात् । दर्शनालिङ्गिततत्साध्यसम्बन्धप्रतिपत्तावेव तदुत्पत्तेः । अनुमानान्तरात् तत्प्रतिपत्तावनवस्थाप्रसङ्गात् । अप्रमाणाच्च विचारात्तदवगतौ प्रमाणान्तरान्वेषणप्रयासवैफल्यात्, अतिप्रसङ्गाच्च । ततः स्थितम्—'परमाणुर्न बुध्यते' इति । न केवलं स एव बहिर्न बुद्ध्यते अपि तु अतः परमाणोः अन्योऽवयव्यादिरपि वा । शब्दस्य अपि शब्दार्थत्वात् । न हि तस्यापि परस्परमेकान्तविवेकेन

---

१ प्रमाणतोऽपि । २ बहिर्विषयत्वम् । ३ "प्रमाणेतरसामान्यस्थिते रन्यधियो गतेः ।" इति पूर्वार्धम्—ता० टि० । ४ बौद्धः । ५ नैयायिकः । अनुमानात् पृथक् विचारस्य प्रमाणत्वे । ६ लिङ्गसाध्यसम्बन्धप्रतिपत्तौ ।

अन्योऽपि कथञ्चिदविवेकस्याप्यवगमात् तस्याप्यारोपितविषयत्वकल्पनायां पूर्ववद्दोषात् । ततो युक्तम्–'अन्योऽपीति' इति । 'अन्तः' इति दृष्टान्तार्थम्--अन्तरिव बहिरपि स तथाविधो न बुद्ध्यत इति । तत्र विपक्षे क्वचिदपि सत्त्वादिः परिणामिन्येव भावात् । तस्यापि[1] स्वतोऽर्थक्रियासामर्थे किं सहकारिप्रतीक्षयेति चेत् ? अत्राह–

अर्थस्यानेकरूपस्य कदाचित् कस्यचित् क्वचित् ॥ १३० ॥
शक्तावतिशयाधानमपेक्षातः प्रकल्प्यते ॥ इति ।

कस्यचित् चेतने (नस्य) तरस्य वा **अनेकरूपस्य** उक्तनीत्या[3] नानास्वभावस्य **अर्थस्य** न कल्पितस्य **शक्तौ** अपिशब्दोऽत्र द्रष्टव्यः, स्वत एवार्थक्रियासामर्थ्ये सत्यपि तद्विशेषरूपस्य **अतिशयास्याधानमपेक्षातः** सहकारिणां **प्रकल्प्यते** प्रकर्षेण निष्पाद्यते । तच्च **क्वचित्** विसदृशपरिणामे कर्तव्ये, **कदाचित्** न सर्वदा, तत्परिणामस्य कदाचिदेव भावात् । यदि अर्थस्य स्वभावोऽतिशयः; तर्हि तद्धेतोरेव सिद्धेरपेक्षया न किञ्चित् । असिद्धौ तु न तत्स्वभावत्वं सिद्धासिद्धयोर्विरुद्धधर्माध्यासेन भेदस्यैवापत्तेरिति चेत्; अत्राह–

स्वभावातिशयाधानं[5] विरोधान्न परीक्ष्यते ॥ १३१ ॥
तत्र सिद्धमसिद्धं वा [तस्माज्जातिर्न हेतुतः ॥] इति ।

स्वभावातिशय एवाधानम् आधीयमानत्वात्, **तत् न परीक्ष्यते** । कथम् ? **तत्र** अर्थे **सिद्धमसिद्धं वा** इति । कुतः ? **विरोधात्** परीक्षाया एवेति भावः । तथा हि--परीक्षेयमर्थस्यानेकातिशयनिराकरणार्था सती यदि स्वयमेकस्वभावैव, कथम् 'सिद्धमसिद्धं वा' इति 'भिन्नमेव न स्वभावः, इति च नानाकारपरामर्शिन्यवकल्प्येत ? प्रत्याकारं तद्भेदे वा यत्सिद्धं तदनपेक्षमिति कथं सङ्कलनम्? सत्येवानेकपरामर्शे तत्सम्भवात् । ततो युक्तं तन्निराकरणाय परीक्षायां तस्या एव विरोधात् न तदाधानं परीक्ष्यते इति । न चैवं परीक्षायां कुतश्चित् कस्यचिदुत्पत्तिरपि । तथा हि–यदि तत्सिद्धम्, किं हेत्वपेक्षया सिद्धस्य निराशंसत्वात् ? असिद्धं चेत्, तथापि कथं तदपेक्षणम् तस्य[6] वस्तुधर्मत्वात् ? इदमेव तदपेक्षणं यत्तत उत्पत्तिरिति चेत्; न; तद्रूपेण तदभावात्[7], तस्य प्रागपि भावात् । रूपान्तरेण तूत्पत्तिस्तस्यैव स्यान्नासतः । न तस्यापि, सिद्धवदसिद्धस्याप्यपेक्षाऽयोगात् । तत्रापि 'इदमेव वा' इत्यादिवचने परिनिष्ठापरिच्युतेः । एतदेवाह–'तस्माज्जातिर्न हेतुतः' इति । **तस्मात्** परीक्षणात् **जातिः** जननं **न हेतुतो** न कारणात् कार्यस्येति शेषः । सापि मा भूदिति चेत्, किमर्थं तर्हि परीक्षणम् ? तदाधानदूषणार्थमिति चेत्; व्याहतमेतत्–'ततो न तज्जातिस्तदर्थं च तत्' इति । कल्पनयैव तादर्थ्यं तस्य न परमार्थत इति चेत्; वस्तुतस्तर्हि[8] दूषणाभासमेतदिति कथन तद्वादिनो निग्रहस्थानम् ? भवतु तत्त्वतः एतद् दूषणम्, भवति तस्य हेतुत्वमिति चेतः कुत एतत् ?

---

१ परिणामिनोप्यर्थस्य । २ उक्तरीत्या प० । ३–यादानं आ०, ब०, प० । ४ आदीद–आ०, ब०, प० । ५ अवेक्षणस्य । ६ तद्भावा–प० । ७ दूषणनाह भावमेव तदिति–आ०, ब०, प० । ८ एवतदनन्त–आ०, ब०, प० ।

आनन्तरीयरूपात् सन्निधानादिति चेत्; न; अहेतावपि तदविशेषात्। तदुत्पत्तौ परीक्षणस्येव सकलजगत्क्षणस्यापि तद्भावात्, अन्यथा तदवसरे परीक्षणमात्रमेव जगन्न बहिरन्तर्वा परमिति निर्विषयमेव तद्भवेत्। ततो भवत्येव सर्वोऽपि तद्धेतुर्न देशतः। असन्निधानादिति चेत्; परीक्षणमपि न भवेत्, वस्तुतस्तत्रापि देशस्याभावात्। कल्पनया भावस्य सर्वत्राविशेषात्। इदमेवाह—

सन्निधानं हि सर्वस्मिन्नव्यापारेऽपि तत्समम्॥ १३२॥ इति।

सन्निधानं देशकालैरन्तर्यं **तत्** परप्रसिद्धं **समं** सदृशं हेतुवत् **अव्यापारेऽपि** अहेतावपि, कार्यव्यापारविकलस्याव्यापारत्वात्। किं क्वचित्? न; **सर्वस्मिन्** निरवशेषं **हि** यस्मात् 'तस्माज्जातिर्न हेतुतः' इति। किं सर्वथा ततो न जातिः? नेत्याह—

न चेत् स परिवर्तेत भाव एव फलात्मना। इति।

न चेत् न यदि **स** परीक्षणात्मा **भाव एव फलात्मना** दूषणज्ञानरूपेण **परिवर्तेत**। तदात्मना परिवृत्तौ तु भवत्येव ततो जातिः, तथा विरुद्धैव परीक्षा, स्वयं फलरूपपरिवर्तिन्या तया तदाधानस्यैव व्यवस्थापनात् न तदभावस्येति मन्यते।

सम्प्रति यदुक्तम्—'विनाशनियतो भावस्तत्रानपेक्षणात्' इति; तस्य विरुद्धत्वं दर्शयन्नाह—

परिणामस्वभावः स्याद्भावस्तत्रानपेक्षणात्॥ १३३॥ इति।

स्पष्टमिदम्। न चैवम् 'अपेक्षातः प्रकल्प्यते' इत्यस्य व्यापत्तिः, तद्विशेषणं (पं) प्रत्येव तदभिधानान्न तन्मात्रं प्रति। कुतः पुनर्निरन्वयविनाशस्यैव ततो न सिद्धिरिति? अत्राह—

अयमर्थक्रियाहेतुरन्तरेण निरन्वयम्। इति।

अयं भावोऽर्थक्रियाहेतुः कार्यकारी। कथम्? **अन्तरेण** विना **निरन्वयं** निरन्वयविनाशं तदभावतः। ततः **'परिणाम'** इत्यादिसम्बन्धः। तात्पर्यमत्र-निरन्वयविनाशे अर्थक्रियाविरहाद्भाव एव न किञ्चिदिति क[३]तत्साध्यं क वा हेतुरिति? परिणामे भावसाङ्कर्यं कस्यचित् स्वपर्यायैरिव परपर्यायैरप्यविशेषात् तदापत्तेरिति चेत्; अत्राह—

भेदाभेदात्मनोऽर्थस्य भेदाभेदाव्यवस्थितिः॥ १३४॥
लोकतो वानुगन्तव्या [सभागविसभागवत्]। इति।

भेदाभेदात्मनः परिणामस्वभावस्य **अर्थस्य** यावितौ परात्मपर्यायापेक्षया यथाक्रमं भेदाभेदौ नानात्वैकत्वे तयोर्व्यवस्थितिरसङ्करेणावस्थानमनुगन्तव्यम्। कुतः? **लोकतो वा** लोकादिव। लोकश्चात्र प्रत्यक्षादिप्रमाणपर्यायपरिणत आत्मैव तत्त्वावस्यैव (तत्स्वभावस्यैव, तत्त्वावलोकनात्। निदर्शनमाह—**'सभागविसभागवत्'** इति। **सभागः** सदृशक्षणप्रबन्धसन्तानो **विसभागस्तदन्यस्तयोर्यथा** व्यवस्था लोकतस्तथा प्रकृतापि **अनुगन्तव्येति**। तात्पर्यमत्रापि लोकस्तावदुक्तरूपः परेणापि

---

१ परीक्षणम्। २ स्वतः प०। ३ तत्साध्यं साधनं क्व प०। तत्साधनं क्व ब०, मू० ता०।

वक्तव्यः, अन्यथा सभागेतरसन्तानयोस्तद्व्यवस्थायाश्चासम्भवादिति पूर्वं निरूपणात् । ततस्तेन प्रकृत-व्यवस्थापि तदै[थै]वानुभवात् । ततस्तत्साङ्कर्यपरिकल्पनमनात्मज्ञत्वं परस्य निवेदयतीति । 'सिद्धम्' इत्यादयो विवरणश्लोकाः । तदेवं भावधर्मविशेषव्यापिनः प्रमेयत्वादेः परिणामहेतुत्वमभिधाय साम्प्रतं तद्विशेषाणामपि तद्धेतुत्वं तद्व्यापकस्य वचनादवगतमपि विनेयानुग्रहणा[हा]र्थं दर्शयन्नाह—

सामान्यभेदरूपार्थसाधनस्तद्गुणोऽखिलः ॥१३५॥ इति ।

सामान्यभेदरूपस्य सामान्यविशेषात्मनोऽर्थस्य शब्दादेः **साधनस्तद्गुणस्तस्य** भावस्य गुणस्तदाश्रयी कृतकत्वादिः । किं कश्चिदेव ? न, **अखिलो** निरवशेषः । कुतस्तत्साधन एवायं न क्षणिकत्वादिसाधनोऽपीति चेत् ? अत्राह—

अन्यथाऽनुपपन्नत्वनियमस्यात्र सम्भवात् । इति ।

सुगममिदम् । न हि क्षणिकत्वादौ हेतोस्तत्सम्भवात्त (वस्त) थाहि— क तत्साधनम् ? शब्दादाविति चेत्; कुतस्तत्प्रतिपत्तिः? प्रत्यक्षादिति चेत्; न; ततो व्यतिरिक्तस्यानवगमात् । अव्य-तिरिक्तस्य चाधर्मित्वं परं प्रत्यसिद्धेः । नापि तत्प्रत्यक्षगतस्यापि; वादिनं प्रत्यसिद्धेः । तथा चान्यतरं प्रति आश्रयासिद्धस्य तद्गुणस्य कथमन्यथाऽनुपपन्नत्वम् [**"अन्यथानुपपन्नत्वम्**] **असिद्धस्य न सिध्यति ।"** [सिद्धिवि० द्वि० परि०] इति न्यायात् । न तदाकारस्य धर्मित्वमपि तु तदल्प (र्प) कस्य बाह्यस्यैव, तस्य तदाकारादेव लिङ्गादवगमादिति चेत् ; न ; उभयसाधारणस्य तदाकारस्याभावात् । प्रत्यात्मनियताच्च नोभयात्तत्परिज्ञानम् ; इतरस्येतरं प्रत्यसिद्धेः । यथास्वं प्रसिद्धात्तत्परिज्ञानेऽपि कथं तदर्पकत्वस्यैकत्वं कार्यभेदे भेदस्यैव कारणेऽप्युपपत्तेः ? अन्यथा सर्वस्याप्येकहेतुकत्वापत्तेः । दूरेतरदेशयोश्च धूमयोरेकत्रैव पावके लिङ्गत्वशङ्कायां न जानीमः क पावकार्थिना प्रवर्तितव्यमिति पावकदेशापरिज्ञानं निराकारज्ञानवादे । भवत्येव तत्र तत्साधनमुभा-भ्यामपि तस्य प्रत्यक्षतोऽवधारणादिति चेत्; न ; तत्राप्यकारणस्याग्रहणात् । कारणमेव स तत्प्रत्य-क्षयोरिति चेत् ; कथमेकस्वभावात् ततः कार्यभेदः ? तथा स्वहेतोरेव तस्योत्पत्तेः, अन्यथा नाना-स्वभावस्याप्यपरेण तेन स्वीकारेऽनवस्थापत्तेः । स्वकारणादेव तत्स्वभावतयोत्पत्तौ नानाकार्यतयापि स्यादविशेषादिति व्यर्थमदृष्टस्य तन्नानात्वस्य कल्पनम् । तथोक्तमलङ्कारे—

"यथैव कारणादेव नानाशक्तिर्भवत्यसौ ।
नानाकार्योऽपि किन्नेष्टः किमदृष्टं प्रकल्प्यते ॥
कार्यनानात्वदृष्टेश्च नानाशक्तिप्रकल्पना ।
यदि तान्येव सन्त्वत्र स्वभावनियमोऽस्य सः ॥" [प्र० वार्तिकाल० १।१६२] इति ।

'यदै (घे) कैव शक्तिर्भावस्य मन्त्रादिना तत्प्रतिषेधे पावकात् क्वचिदपि दाहो न भवेत्, न चैवम्, अङ्गुल्यादावदाहेऽपि काष्ठादौ तद्दर्शनात् । ततस्तत्र भिन्ना एव शक्तयः, 'तद्वदन्यत्रापिः इत्यत्रापि न पर्यनुयोगः, तथापि तस्य स्वहेतोरेवोत्पत्तेः । स्वकारणादेव स खलु भाव एकस्त-

---

१ अन्यथानुपपन्नत्वनियमसम्भवः । २ प्रतिवादिप्रत्यक्ष । ३ अन्तर्बहिरुभय । ४ 'यथैवकारणादेव" —प्र०वार्तिकाल० ।

थोत्पन्नो यदेकशक्तिक एव मन्त्रादिरहितः सर्वत्र दाहं करोति तत्सहितस्तु विभागेनेति । तदप्युक्तं तत्रैव—

"जातः स्वकरणादीदृग्येन मन्त्रादिसंयुतः ।
विभागात्कार्यकरणे समर्थः शक्तयो वृथा ॥
पावकस्सर्वदहने विना मन्त्रेण कारणात् ।
स एव कस्यचिद्दाहसमर्थो मन्त्रसंयुतः ॥" [प्र० वार्तिकाल० १।१६२]

इति चेत्; न; नित्यस्याप्येक (व) मेकस्वभावस्यैवानेककार्यप्रसङ्गात् । तत् सर्वमेककालमेव किन्न भवतीति चेत् ? क्षणिकादपि एकदेशं किन्न भवति ? तथा तस्य स्वभावो यदेकदेशमनेकदेशं च करोतीति चेत्; इतरस्यापि तथैव स्वभावो यदेककालमनेककालं च तत्करोति । ततो न कार्यभेदात् प्रतिक्षणं तद्भेदकल्पनमुपपन्नम् । तदुक्तम्—

"यद्यदा कार्यमुत्पित्सुस्तत्तदोत्पादनात्मकम् ।
कारणं कार्यभेदेऽपि न भिन्नं क्षणिकं यथा ॥" [सिद्धिवि० तृ० परि०] इति ।

वार्तिकविरुद्धं चेदं शक्त्येकत्वकल्पनं भावानाम् । तत्र साधारणेतरभावेन शक्तिभेदस्यापि—

"रूपादिशक्तिभेदानामनाक्षेपेण वर्तते ।
तत्समानफलाहेतुव्यवच्छेदे घटश्रुतिः ॥" [प्र० वा० १।१०२] इत्यभिधानात्, "रूपादीनां प्रतिनियतशक्तिभेदमनाक्षिप्य तेषु समानोदकधारणशक्त्याक्षेपेण घटश्रुतिः प्रवर्तते ।" [प्र० वार्तिकाल० १।१०२] इति स्वयं च तस्य प्रज्ञाकरेण विवरणात् । न च तदेव व्याचक्षाणस्य स्वकीयमपि विवरणपदं विस्मृत्य तद्विरुद्धं वस्तुपरिकल्पनमुपपन्नम्; प्रेक्षावत्त्वव्यापत्तेः । ततो नानाशक्तिरेव भावतो भावः । तथा च सिद्धं प्रस्तुतार्थसाधनमन्यथाऽनुपपन्नत्वं तद्गुणस्य । स्वशक्त्यभेदेन च भावस्य सामान्यभेदरूपत्वात्, युगपदिव क्रमेणापि भावस्य तादूप्यात्प्रतिक्षेपात् । तन्न क्षणिकस्य साधनं ततः ।

नापि नित्यस्य; तस्यैवापरिज्ञानात् । कालत्रयानुपाती स इति चेत्; न सकृत्तदनुपातस्तत्त्रयस्य युगपदभावात् । क्रमेणेति चेत्; सोऽपि न कालभेदः, तदनुपातादन्यस्य तस्यैवाभात् । भावे तदनुपातोऽप्यपरेण तद्भेदेनेत्यनवस्थानप्रसङ्गात् । स्वभावभेद इति चेत्; न; कौटस्थ्येन तदसम्भवात् । परिणाम इति चेत्; प्रकृतमनुपालिनं (तम्) । ततः स्थितम्—'सामान्यभेद' इत्यादि ।

कीदृशो वा शब्दादिर्यत्र क्षणभङ्गसाधनम् ? निष्कलपरमाणुरूप इति चेत्, न; तस्याप्रतिवेदनात् । प्रत्येकदशायामेव तस्य तन्न सञ्चयदशायामिति चेत्; न; विशेषाभावात् । सञ्चय एव विशेष इति चेत्; न, तेनापि सौक्ष्म्यस्यानपाकरणात् । दशान्तरेऽपि ततँ एव तदप्रतिपत्तेः । सञ्चयाभावादेव तदापि [न] तत्प्रतिपत्तिर्न सौक्ष्म्यादिति चेत्; सञ्चये तर्हि सौक्ष्म्येणैव तेषां प्रतिपत्तिः स्यात् तत्स्वभावत्वात्, तथा च कथमेकघटादिव्यवहारः ? विकल्पारोपितादेव स्थौल्यात् क्षणभेदव्यवहारवदिति चेत्; एतदेव दर्शयति—

१ कालत्रयस्य । २ कालात् । ३ अप्रतिवेदनम् । ४ सौक्ष्म्यादेव ।

प्रत्यक्षेऽपि समानान्यनिर्णयः प्रतिरुध्यते ॥१३६॥

यथा क्षणक्षयेऽणूनाम् [इत्यात्मासौ विडम्बयेत्] इति ।

प्रत्यक्षं कल्पनापोढं ज्ञानं तस्मिन् सत्यपि । केषाम् ? **अणूनां प्रतिरुध्यते** बाध्यते । केन कः ? **समानान्यनिर्णयः** समानस्य सञ्चयगतसाधारणस्य स्थूलाकारस्य **अन्यः** तद्ग्राहको विकल्पः प्रत्यक्षापेक्षया तस्यैवान्यत्वात् तेन **निर्णयः** । स केषाम् ? **अणूनाम्** एतदपेक्षस्यापि निर्णयपदस्य गमकत्वाद (दा) वृत्तिः । **'यथा'** इत्यादि निदर्शनम् । **अणूनां-क्षणक्षयेऽपि** निर्णयस्य तदेकत्वविकल्पेन प्रतिरोधात् । अत्रोत्तरमाह– **'इत्यात्मासौ विडम्बयेत्'** इति । **इति** एवं ब्रुवाणो धर्मकीर्तिः **आत्मानमाप्तं** च सुगतं **विडम्बयेत्** दूषणवन्तं प्रकटयेत् । तथाहि– यदि तद्विकल्पेन सर्वथा तन्निर्णयः प्रतिरुद्ध्यते; तदा सौक्ष्म्येणै (णे) व नीलादिनापि तदभावात् निरवकाशमेवैतत्–**"वस्तुस्वभावोऽयं यदनुभवः पटीयान् क्वचिदेव स्मृतिबीजमाधत्ते ।"** [ ] इति ; नीलादिव्यतिरेकेण तदाधानविषयस्याभावात् । ततः सिद्धमात्मविडम्बनं निर्विषयवचनवादात् । अथ सौक्ष्म्येणैव तत्प्रतिरोधो [न] नीलादिना तदा निश्चितेतरस्वभावाविरोधे स्थूलमपि रूपं सौक्ष्म्यस्याविरुद्धमिति तदालम्बना एव पञ्चापि विज्ञानकायाः स्युः । तथा चेत्; आप्तवचनमपि निर्विषयमेव **"सञ्चितालम्बनाः पञ्चविज्ञानकायाः"** [ ] इति सिद्धमाप्तविडम्बनमपि । तन्नायमारोपितः स्थूलाकारः तत्प्रत्ययव्यतिरेकेण प्रत्यक्षस्याप्रतिवेदनात्, एकत्वाध्यवसायाच्च तत्कल्पनस्य प्रतिक्षेपात् । एतदेवाह–

अपृथग्वेद्यनियमादभिन्नाः परमाणवः ॥१३७॥ इति ।

अपृथग् अभेदेन प्रत्यक्षादिभिर्वेद्यं वेद्यत्वं भावप्रधानत्वान्निर्देशस्य, तस्य **नियमाद्** अवश्यम्भावाद् **अभिन्नाः** परस्परं कथञ्चिदव्यतिरेकिणः **परमाणव** इति ।

दृष्टमप्यपृथक्त्वं चेदारोपितमतात्त्विकम् ।
नीलाद्यपि तथैवेति शून्यवादो विजृम्भताम् ॥१४७५॥

अथवा यदुक्तम्–**'यथा क्षणक्षये'** इत्यादि; तदपनुदन्नाह–**'अपृथग्'** इत्यादि । **अणवः** सञ्चयगताः क्रमभाविनोऽभिन्नाः परस्परमव्यतिरेकिणः । कस्माद् ? अपृथक् अपृथक्त्वेन वेद्यं वेदितव्यं येन तद् **अपृथग्वेद्यं** तदेवेदमिति प्रत्यभिज्ञानं तस्य **नियमः** तदभेदादन्यत्राभावस्तस्मादिति । नायं नियमः, कार्यकारणभावादपि तस्य भावादिति चेत्; न; सत्यपि तस्मिन् मुद्गलकपालयोरभावात् । सादृश्यादिति चेत्; न; यमलकयोरदर्शनात् । कार्यकारणभावोपाधिकादिति चेत्; न; पितापुत्रयोरप्रतिपत्तेः । ततः कथञ्चिदेकत्वपरिणामादेव तत्, काष्ठभस्मादौ तावतैव सादृश्याभावेऽपि भावात् । वासनामात्रादेव भावान्न तन्निबन्धत्वमपीति चेत्; न; अस्खलद्रूपत्वात् । न हि तादृशस्य

---

१ "सञ्चितः समुदायः सः सामान्यं तत्र नान्यधीः । सामान्यशुद्धिश्चावस्तुं विकल्पेनानुवर्ण्यते ॥" प्र० वा० २।१९४ । २ सुगतं च बि–प० । ३ भेदारोपित– आ०, व०, प० । ४ प्रत्यभिज्ञाननियमः । ५ तावत्येव–आ०, व०, प० । ६ एकत्वपरिणामनिबन्धनत्वमपि । ७ तादृशं न वा–आ०, व०, प० ।

वासनाहेतुकत्वं नीलादिज्ञानवत् । तदपि स्खलत्येव भेदज्ञानेन बाधनादिति चेत्; नीलादिज्ञानमपि किन्न स्खलति निराकारवस्तुज्ञानेन बाधनात् ? तदेव नास्ति, साकारस्यैव वस्तुनो दर्शनादिति चेत्; इतरदपि न भवेत्, सान्वयस्यैव दर्शनात् । व्यतिरेकोऽपि पिण्डशिवकादिरूपेण प्रतीयत इति चेत्; निराकारमपि प्रतीयत एव सन्नीलं सत्पीतमिति । न हि नीलेतरयोरन्यतरदेव सत्, इतरत्र [1]तज्ज्ञानाभाव-
५ प्रसङ्गात् । न नीलादेरन्यत् सत्त्वमिति चेत्; सत्त्वादन्यच्च नीलाद्यपि । कथं तत्प्रत्यय इति चेत् ? इतरप्रत्ययः कथम् ? नीलादावेव स इति चेत्; तत्प्रत्ययोऽपि सत्त्व एवेति किन्न स्यात् ? अतद्रूपे तदनुपपत्तेरिति चेत्; कथमभेदप्रत्ययः ? तत्रैव तदारोपादिति चेत्; नीलादिप्रत्ययोऽपि सत्त्व एव, तत्रैव तदारोपादिति किन्न स्यात् ? न कदाचिदपि नीलादिविकलं सत्त्वमुपलभ्यत इति चेत्; क पुनरभेदविकलस्य भेदस्योपलब्धिः ? विकल्पसंहारदशायामिति चेत्; तत्रैव सत्त्वस्यापि ।
१० "सदेव सौम्येदमग्र आसीत्" [छान्दो० ६।२।१] [2]इत्यादि श्रुतेः । वाङ्मात्रमेवेदंनैवं कदाचिदप्यनुभव इति समानमेकान्तभेदेऽपि । ततो यथा नीलादिज्ञानस्य निराकारज्ञानेनाबाधनं केवलस्य तद्विषयस्याप्रतीतेः, एवं भेदज्ञानेनापि इतरज्ञानस्य, इत्युपपन्नमुक्तम्–'अपृथग्' इत्यादि । किं पुनरेवमभेद एव न भेदोऽपि तज्ज्ञानस्यापि भावात् ? कथमेवं तयोरेकत्र भावः ? कालविकल्पेनेति चेत्; न; वस्तुनि तदभावात् । न ह्येकमेव कदाचिन्नीलमन्यदा[3]न्यदिति चेत्; मा भूद्विकल्पः समुच्चयस्तु स्यात् । स एव
१५ कथमेकत्र विरुद्धयोरिति चेत् ? कथं विभ्रमेतरयोः ? न चेदमसिद्धम्–"नौयानादिषु" इत्यादिना निरूपितत्वात्[4] । कथं वा विकल्पेतरयोः ? अन्यथा विकल्पाभावेन सर्वव्यवहारोच्छेदादिति निरूपणात् । ततो यथा विभ्रमेतरविकल्पेतरादीनामेकत्र समुच्चयस्तथा वस्तुस्वाभाव्यादेव सूक्ष्मेतरभेदेतराणामपि । एतदेवाह–

देशकालान्तरव्याप्तिः स्वभावः क्षणभङ्गिनाम् । इति ।

२० 'अणूनाम्' इत्यनुवृत्तम् । ततस्तेषां **देशान्तरव्याप्तिः** भिन्नदेशकलापाविष्वग्भावः **स्वभावः** ततो देशदैर्घ्यम्, क्षणभङ्गिनां **कालान्तरव्याप्तिर्भिन्नकालपर्यायाभेदः स्वभावस्ततश्च** कालदैर्घ्यमिति भावः । देशदैर्घ्यस्य निरूपितस्याप्युपादानं तद्वत् कालदैर्घ्यस्याप्यविरोधदर्शनार्थम् । अत्रैवोपपत्त्यन्तरमाह–

सम्प्रत्यस्तमिताशेषनियमा हि प्रतीतयः ॥१३८॥ इति ।

२५ सम्यक् **प्रत्यस्तमिताः** प्रलीना **अशेषनियमाः** स्थूलमेव सूक्ष्ममेव नित्यमेवानित्यमेव वेत्यादय एकान्ता यासु तास्तथोक्ताः । काः पुनस्ताः ? **प्रतीतयः** प्रत्यक्षादिबुद्धयो हि यस्मात्, तस्माद् 'देश' इत्यादि । तथा हि–

नैकान्तनियता काचित् प्रतीतिरनुभूयते ।
अनेकान्ततिरस्कारं यद्बलाद्विदधीमहि ॥१४७६॥

---

१ सज्ज्ञाना–आ०, ब०, प० । २ स्वत एव–आ०, ब, प० । ३ इति 'श्रु–आ० ब०, प० । ४ –दा तदन्यदि–आ०, ब०,प० । ५ न्यायवि० श्लो० १४८ । ६ समुच्चय इति शेषः ।

प्रतीतं प्रविलुम्पेम यद्यन्यस्य प्रकल्पनात् ।
लभेमहि कथं तत्त्वं किमप्येवं तदर्थिनः ॥१४७७॥
ततः प्रतीतिसामर्थ्याद्देशकालान्तरान्वयी ।
स्वभावो भावतो भावो भावज्ञैरभ्युपेयताम् ॥१४७८॥

न चेदमत्र चोद्यम्–**"तथाविधस्य भावस्य सर्वात्मना प्रत्यक्षत एव प्रतिपत्तेर्न तत्र प्रमाणान्तरं शब्दान्तरं वा प्रवृत्तिमत् ।"** [ ] इति; कस्मात् ? अर्वाग्दर्शिभिरसकलपर्यायस्यैव ततस्तस्य प्रतिपत्तेः । एवं सति स एव गृहीतश्चागृहीतश्च भवेदिति चेत्; नायं दोषः, तथाप्यनेकान्तस्यानुपद्रवात् । एकान्तवादस्य तु भवत्येव समुपद्रवः । तत्र सर्वात्मना ग्रहणमेव नेतरदिति चेत्, न; भाववच्छक्तावपि तत्प्रसङ्गादव्यतिरेकात् । तथा च किं तत्रोपदेशाद्यपेक्षया ? निर्णय इति चेत्; न; प्रत्यक्षस्यैव निर्णयरूपस्योपगमात् । व्यतिरिक्तैव ततः शक्तिः तस्याः सामग्रीरूपत्वादिति चेत्; व्यतिरिक्ता कथं तस्य ? तत्कार्ये व्यापारादिति चेत्; न; अशक्तस्य कार्याभावात् । शक्त एवासौ सामग्र्येति चेत्; न; परस्पराश्रयात्–'सामग्र्या शक्तस्य कार्यम्, तद्व्यापाराच्च सा तस्य शक्तिः' इति । तत्र तत्र व्यापारात् तस्यास्तच्छक्तित्वम् । तदुपकारादिति चेत्; न; अशक्तेस्तदसम्भवात् व्योमकुसुमवत् । स्वतोऽपि शक्त एव भाव इति चेत्; तस्य तर्हि प्रत्यक्षत एवं निर्णयात् कथं शृङ्गवेरदर्शने संशयः शृङ्गवेरं विषमेवेति विपर्ययो वा ? तस्मादगृहीतैव शक्तिर्भावग्रहेऽपीति कथमेकान्तवादस्यानुपद्रवः ? तस्मादक्रमवत् क्रमेणापि अनेकान्तात्मक एव भावः, तथा प्रत्यभिज्ञानात् । ननु च प्रत्यभिज्ञानं प्रत्यक्षविषय एव प्रवृत्तिमन्नान्यत्र अतिप्रसङ्गात् । न च प्रत्यक्षस्य परापरपर्यायेषु प्रवृत्तिर्यतस्तेषां कथञ्चिदभेदप्रतिपत्त्या तस्यानेकान्तविषयत्वात् प्रत्यभिज्ञानं तत्र स्यादिति चेत्; अत्राह–

अग्रहः क्षणभङ्गोऽपि [ग्रहणे किमनिश्चयः] । इति ।

न केवलमक्षणिकत्वमपि तु क्षणिकत्वमप्यविद्यमानग्रहणमेव । न हि परापराविज्ञाने तस्यापि ग्रहणं तदपेक्षत्वात् । स्वभाव एव भावस्य क्षणभङ्गः तत्किं तद्ग्रहणे पूर्वापरग्रहणेनेति चेत् ? सिद्धं तर्हि तद्वदभेदस्यापि ग्रहणं तस्यापि कथञ्चित् तत्स्वभावत्वाविशेषात् । किमिदानीं प्रत्यभिज्ञानेन प्रत्यक्षादेव तस्य प्रतीतेरिति चेत्; न; तस्यैव परापरपर्यायविशिष्टतया प्रत्यभिज्ञानेनाधिगमात् । अपि च, भवतोऽपि किमनुमानेन प्रत्यक्षादेव क्षणभङ्गस्यापि ग्रहणात् । निश्चय इति चेत्; न; निश्चयस्यापि नीलादिवत् प्रत्यक्षादेव भावात् । एतदेवाह– **ग्रहणे किमनिश्चयः** इति । **ग्रहणे** क्षणभङ्गस्य कस्मादनिश्चयो निश्चय एव स्यात् । न प्रत्यक्षमित्येव निर्णयहेतुर्बुद्धिपाटवादौ सत्येव तस्य तत्त्वात्, क्षणभङ्गे च तदभावादिति चेत्; नीलादेरपि न निर्णयः स्यात्, निरंशे खण्डशः पाटवादेरसम्भवात् । एवं च कथमनुमानं धर्मिहेत्वादीनामसिद्धेः । ततो विशिष्टनिर्णयार्थत्वमेवोत्तरम् । तच्च प्रत्यभिज्ञानेऽपि समानम् । नेदमत्रोत्तरम्, समारोपनिरासार्थत्वस्य तत्त्वादिति चेत्; अत्राह–

१ प्रत्यक्षात् । २ ततोऽपि आ०, ब०, प० । ३ एव ततो नि–आ०, ब०, प० । ४ आर्द्रं शुण्ठीति यावत् । ५ –परापरज्ञा–आ०,ब०, प० । ६ क्षणिकत्वग्रहो । ७ –क्तित्वमा–आ०, ब०, प० ।

आकृतिभ्रमवद्यद्वद्विषमज्ञैर्विलोकितम् ॥१३९॥ इति ।

आकृतिर्विपरीताकारः तत्रैव भ्रमोपपत्तेः तस्य भ्रम आरोपः स विद्यतेऽस्मिन्निति तद्वत् ग्रहणं निरंशक्षणिकवेदनं 'ग्रहणे' इत्यस्य विभक्तिपरिणामेन योजनात्, किं नैव 'किम्' इत्यस्यानुवृत्तेः । न हि सर्वात्मना तस्य स्वविषयनिश्चयनिबन्धनत्वे तद्वत्त्वमुपपन्नं विरोधात् । ततो न आरोपस्याभावात् तन्निरासार्थत्वमनुमानस्येति मन्यते । यद्वदित्यादि तद्वत्त्वे निदर्शनम् । तस्याप्युपन्यासः परं प्रत्यभावज्ञापनार्थः । न ह्यज्ञैः तन्निश्चयविकलैरवलोकितं विषमपि तद्विपर्ययभ्रमवदुपपन्नं यतो निदर्शनं स्यात्, तदवलोकनस्यापि तन्निर्णयजननस्वभावत्वेन तद्वत्त्वानुपपत्तेः । ततः प्रागुक्तमेवोत्तरम्[1], प्रत्यभिज्ञानवत् । अपि च, सत्यपि दर्शने यदि निश्चयाद् व्यवहारः, स एव प्रमाणमस्तु किं दर्शनेन ? स एव तदभावे कुत इति चेत् ? तदपि कुतः ? विषयविषयिसन्निपातादिति चेत्; तत एव सोऽप्यस्तु । तदेवाह—

न चैतेऽर्थविदोऽर्थात् केवलो[2] व्यवसीयते । इति ।

किमित्यनुवृत्तम्, अर्थः पुरोवर्तिनीलादिः किं कस्मात् न च नैव व्यवसीयते व्यवसीयत एव । कथम् ? अर्थविदो निर्विकल्पदृष्टेः ऋते विना । कुतो व्यवसीयते ? अर्थात् विषयिसन्निहितात् स्वलक्षणात् । निश्चयो नामाभिलापवान् प्रत्ययः, तद्वत्त्वं च तस्य न विषयगतेनाभिलापेन तत्र तदभावात्; अन्यथा सङ्केतवैफल्यम्—स्वत एव वाचकानुविद्धस्य सर्वस्यापि वस्तुनः प्रतिपत्तेः । स्मरणोपनीतेन तु तद्वत्त्वे भवितव्यमेवार्थविदा पूर्वम्, अन्यथा स्मरणासम्भवादिति । अत्रोत्तरम्—'केवलः' इति । तात्पर्यमत्र—यद्यभिलापसम्बन्धेनैवार्थो व्यवसीयते युक्तं तथा भवितव्यमिति, न चैवम्, तत्सम्बन्धविकलस्य केवलस्यैव तस्य व्यवसायात् । तद्वैकल्ये व्यवसायत्वं कथमिति चेत् ? अभिलापानुस्मरणस्य कथम् ? तत्सम्बन्धादेव तदपीति चेत्; तत्रापि तदभिलापस्मरणान्तरमङ्गीकर्तव्यम्, तदुपनीतेनैवाभिलापेन तस्यापि तद्वत्त्वात्, पुनस्तत्राप्यपरं तदिति कथं नानवस्थानम् ? भवतु तन्निर्विकल्पकमेव तत्सम्बन्धाभावादिति चेत्; न तर्हि तद्विषयस्यान्यत्र योजनं स्वलक्षणस्यावाचकत्वादशक्यत्वाच्चेति विकल्पविकलं जगत्प्राप्तम्, अशब्दयोजनस्य तस्यानभ्युपगमात्[3] । तदुक्तम्—

"सदृशार्थाभिलापादिस्मृतिर्नाप्यभिलापिनी[4] ।
तावतैवाविकल्पत्वे स्वल्पा धीः स्याद्विकल्पिका[5] ॥" [सिद्धिवि० प्र०परि०] इति ।

ततस्तत्सम्बन्धाभावेऽपि व्यवसायात्मकमेव तद्वक्तव्यम् । अस्तु, तद्योग्यतया तदुपगमादिति चेत्; किमेवं नेन्द्रियज्ञानम्[6] ? तस्य असाधारणविषयत्वेनातद्योग्यत्वादिति चेत्; कुतस्तद्विषयत्वम् ? अतद्योग्यत्वात् । तदपि कुतः ? तद्विषयत्वादिति चेत्; परस्पराश्रयस्य सिद्धेः । स्वतस्तद्विषयत्वेनावभासनात्, अत एवोक्तम्—"प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति ।" [प्र० वा० २।१२३]

---

१ -त्तरं प्रत्यभिज्ञानेऽपि समानं नेदमत्रोत्तरम्— समारोपनिरासार्थत्वस्य प्रत्यभिज्ञानान्यवदपि च आ०, ब०, प० । २ केवलं व्य—आ०, ब०, प० । ३ "विकल्पो नामसंश्रयः" इति वचनात् । स्वाभिधानविशेषापेक्षा एव निश्चयैर्निश्चीयन्ते इति वचनाच्च ।"—ता० टि० । ४ अर्थविदा । ५ अभिलापानुस्मरणम् । ६ विकल्पस्य । ७ विकल्पकमिष्टमिति शेषः । ८ शब्दसम्बन्धायोग्यत्वात् ।

इति चेत्; न; "व्यवसायात्मकं ज्ञानं प्रत्यक्षं स्वत एव नः" [ ] इत्यपि वचनात्, स्वतश्च तस्यैवावभासनात्। लोकस्यापि तत्रैव सम्मतेः, नेतरत्र, अन्यथा "तयोरैक्यं व्यवस्यति" [प्र० वा० २।१३३] इत्यस्य विरोधात्। कथं पुनः अर्थाद्व्यवसायः ? निर्विकल्पात्तदनुपपत्तेरिति चेत् ? तद्विदोऽपि कथं तदविशेषात्। वासनात एव व्यवसायः, तद्बोधनद्वारेण तु तद्विदस्तद्धेतुत्वमिति चेत्; अर्थस्यापि तथैव तदस्तु। 'वासनाकार्यस्य कथमर्थविषयत्वम् ?' इत्यपि न चोद्यम्; अर्थस्यापि तद्धेतुत्वात्। कथं पुनर्वासनाबोधतः प्राग् अतद्धेतोस्तस्य[2] पश्चात्तद्धेतुत्वम् उपयोगाविशेषात् ? ततोऽर्थाभावेप्यक्षज्ञानेन भवितव्यम्, अहेतोरनपेक्षणात्। तदुक्तम्— ५

"यः प्रागजनको बुद्धेरुपयोगाविशेषतः।
स पश्चादपि तेन स्यादर्थापायेऽपि नेत्रधीः[3] ॥" [ ] इति। चेत्; कथमेवं तद्विदो व्यवसायहेतुत्वमपि।[4] शक्यं हि वक्तुम्— १०

या प्रागजनिका दृष्टिर्व्यवसायस्य सा कथम्।
पश्चादप्यविशेषात् स्यात् तदपायेऽपि तन्मतिः ॥ १४७९ ॥ इति।

वासनाबोधस्य तु पश्चात्तद्विशेषत्वमर्थेऽपि समानम्। कथं पुनरदृष्टस्य तद्बोधकत्वमिति चेत् ? दर्शनहेतुत्वं कथम् ? तदपि दृष्टस्यैवेति चेत्; न; अपूर्वदर्शनाभावप्रसङ्गात्। तथास्वभाव्यं तद्बोधकत्वेऽपि[5]। तन्न व्यवसायार्थमपि दर्शनकल्पनमुपपन्नम्। १५

भवतु व्यवहारार्थमेव तद्, अभ्यासदशायां दर्शनादेव व्यवसायनिरपेक्षात् व्यवहारप्रवृत्तेरिति चेत्; अत्राह—

भावान्तरसमारोपेऽभाविताकारगोचराः ॥ १४० ॥
समक्षसंविदोऽर्थानां सन्निधिं नातिशेरते ॥ इति।

विषयेषु सम्मुखमक्षमिन्द्रियं **समक्षं** तस्य **संविदः** तत्कार्या बुद्धयः **अर्थानां** रूपादीनां २० **सन्निधिम्** इन्द्रियसम्प्रयोगं **नातिशेरते** न ततो विशिष्यन्ते, तत इव ताभ्योऽपि न व्यवहार इत्यर्थः। कुतस्तथेति चेत् ? अनिश्चितस्वभावाधिष्ठानत्वादेव। अत एवोक्तम्—'अभाविताकारगोचराः' इति। हेतुपदं चेदम्। यत एवं ततस्तं नातिशेरत इति। निश्चयविरहेऽपि बोधात्मकत्वेन तासां तदतिशयोपपत्तेः कुतो न व्यवहारनिबन्धनत्वमिति चेत् ? उत्तरम्—**भावान्तरस्य** तद्विषयादन्यस्य भावस्य **समारोपस्तत्रैवाध्यारोपस्तस्मिन्निति**। न हि बोधरूपत्वेऽपि तदन्तरसमारोपे तन्निबन्धनत्वं क्षणभङ्गादावपि तत्प्रसङ्गेनानुमानवैफल्यापत्तेः। मा भूत् ततस्तत्र व्यवहारो नीलादौ तु स्यात्तद्भावादिति चेत्; न; दर्शनादेव तत्रापि तद्भावात्, क्षणक्षयादावप्यन्यतस्तदनभ्युपगमात्। उपपन्नः क्षणे क्षणान्तरस्य तत आरोपः सादृश्यातिशयात्, नीलादौ तु कथं पीतादेः विपर्ययादिति चेत् ? मा भूत् पीतादेः, नीलादेरेवापरस्य स्यात्[6] तद्भावात्। तथा च कथं तत्परिहारेण दर्शनविषय एव व्यवहारो २५

१ निर्विकल्पकबोधादपि। २ अर्थस्य। ३ उद्धृतोऽयम्—अष्टसह० पृ० १२२। ४ तुलना—"यः प्रागजनको बुद्धेरुपयोगाविशेषतः। स पश्चादपि तेनार्थबोधाभावेऽपि कल्पना ॥ इति प्रतिपादनात्।" —अष्टसह० पृ० १२२। ५ समानमिति शेषः। ६ सादृश्यातिशयतद्भावात्। ७ नीलादेरपरिहारेण

यतस्तन्नियमो लोकतः प्रसिद्धोऽवकल्प्येत ? नीलादिर्नीलादेरप्यत्यन्तविलक्षण एव ततो न तदारोपस्तत्रेति चेत्; क्षणे क्षणान्तरस्यापि[1] स न स्यात्तदविशेषात् ? तथा च नित्यनिर्मुक्तं जगद्ब्रवेत संसारबीजस्य आरोपात्मनः[2] सत्त्वदृष्टेरभावात् । एवञ्च निर्विषयमिदम्--"उत्खातमूलां कुरुत सत्त्वदृष्टिं मुमुक्षवः ।" [प्र० वा० १।२५९] इति । क्षणक्षयासम्भवी दर्शनस्य नीलादावस्ति विशेषस्ततो न तत्र तदारोपमुपरचयतीति चेत्, स तर्हि कोऽपरः स्यादन्यत्र व्यवसायादिति तदात्मिकैव दृष्टिः । अन्यथा तस्यास्तद्विषयस्य चानवकल्पनात्, इत्यावेदयन्नाह--

अणवः क्षणिकात्मानः किल स्पष्टावभासिनः ॥ १४१ ॥ इति ।

भेदपर्यन्तप्राप्ता नीलादय[3] एव **अणवः** त एव प्रतिसमयं निरन्वयविनश्वराः **क्षणिकात्मानः स्पष्टावभासिनो** निर्विकल्पकदर्शनवेद्याः **'किल'** इत्यत्रारुचिद्योतनं चैं । तच्च तथाविधस्य दर्शनस्य तत्प्रतिभासिनां [च] तेषामप्यप्रतिवेदनात् । न ह्यनुपक्रान्तसंवेदनव्यापारं तत्त्वम् इत्थम्भावेन कथ्यमानमपि तथ्यं भवति मिथ्यावादविरहापत्तेः । परमरुचिविषयं दर्शयति--

अतत्फलपरावृत्तार्थाकारस्मृतिहेतवः । इति ।

न विद्यते तद्विवक्षितं जलाहरणादिफलं येषां ते **अतत्फलाः** पटादयस्तेभ्यः **परावृत्तार्थाः** घटादिव्यपदेशभाजः परमाणवः तेषाम् । **आकारः** कल्पितस्थूलनीलादिः तस्य **स्मृतिर्घटोऽयं घटोऽयमित्यादिनिर्णयः** परप्रसिद्ध्या तस्य स्मृतित्वात्, तस्याः **हेतवो** यथोक्ताः परमाणवः । **'किल'** इत्यत्रापि योजनादश्रद्धेयत्वं बोद्धव्यम् । न हि विशेषरूपस्यानुभवगोचरस्यापि सामान्याकारस्मरणहेतुत्वमुपपन्नम्; अनीलस्यापि नीलनिर्णयकारणत्वप्रसङ्गात् । नीलवासनाप्रबोधस्यापि अनीलादेर्बोधापत्तेः विशेषात् सामान्यवासनाप्रबोधवत् । तथा च यथा न वस्तुनि सामान्याकारस्तन्निर्णयात् तथा नीलाकारोऽपि मा भूत् । 'ततस्तदाकारो[6] दर्शनादेव तस्य भावात्' इत्यपि नोत्तरम्; उक्तोत्तरत्वात्, निरंशस्य तस्यासंवेदनादिति । ततो निराकारमेव तत्त्वं प्राप्तमिति मन्यते । ततो यथा तन्निर्णयात् तंत् तथा साधारणरूपमपीति तस्यैव प्रत्यक्षवेद्यत्वम् । एतदेवाह--

स्थूलस्पष्टविकल्पार्थाः स्वयमिन्द्रियगोचराः ॥१४२॥ इति ।

स्थूलाश्च ते क्रमाक्रमाभ्यां नानावयवसाधारणत्वात् स्पष्टाश्च विशदप्रतिभासत्वात् **स्थूलस्पष्टास्ते** च ते **विकल्पार्थाश्च** घटादयः परमसिद्ध्या तेषां विकल्पज्ञानविषयत्वात् । ते किम् ? **इन्द्रियं** तज्ज्ञानं तस्य **गोचरा विषया न विरुध्यन्ते 'न विरुध्यते'** इति वक्ष्यमाणस्य वचनपरिणामेनान्वाकृष्य सम्बन्धात् । कथं ते तद्गोचराः ? **स्वयम्** आत्मनैव न दर्शनैकत्वाध्यवसायेन, प्रथमतस्तद्विषयस्यैव ज्ञानस्यानुभवात् । न च तस्यारोपितगोचरत्वम्; स्पष्टत्वात्, वस्तुसन्निधावेव भावात्, प्रतिविकल्पानिवर्त्यत्वाच्च । अभावादेव[7] प्रतिविकल्पस्य तदनिवर्त्यत्वं न तु स्वयं वस्तुविषयत्वादिति

---

१ –पि न आ०, ब०, प० । २ –रोपात्मकस-प० । ३–यः कुत एव आ०,ब०, प० । ४ 'च' इति सम्पातादायातम् । ५ –कारात्–आ०, ब०, प० । ६ तदाकारस्तथा आ०, ब०, प० । ७ "निरंशक्षणिकविकल्प"–ता० टि० ।

चेत्; कुतस्तदभावः ? कारणाभावादिति चेत्; न; दर्शनस्यैव स्वलक्षणविषयस्य तत्त्वात् । अभ्यासपाटवादेर्नीलादिवत् क्षणभङ्गादावप्यविशेषात् । न च सादृश्यातिशयेन तस्य प्रतिरोधः; सत्यपि तस्मिन् मृगतृष्णिकादौ तन्निर्णयस्य तेन जलाद्यारोपनिवर्तनस्य च दर्शनात् । तन्न तस्य मानसत्वम्, ऐन्द्रियत्वस्यैवोपपत्तेः । तथा च यत्सिद्धं तदाह—

समानपरिणामात्मशब्दसङ्केतहेतवः । इति । ५

समानपरिणामात्मनः सदृशपरिणामरूपस्य **शब्दस्य सङ्केतो** वाचकत्वेन निवेशनं तस्य **हेतवः** प्रतिपादिता एवार्थाः न क्षणक्षीणाः परमाणवः । एतदुक्तं भवति—न शब्दार्थयोरसाधारणयोर्वाच्यवाचकभावः सङ्केतासम्भवात्, अपि तु समानपरिणामस्वभावयोः । तयोरपि नाप्रतिपन्नयोः सङ्केतः; अतिप्रसङ्गात् ? न च असाधारणदृष्ट्या तत्प्रतिपत्तिः, नापि तज्जन्मना विकल्पेन; ततस्तुत्पत्तेर्निषेधात् । तत इन्द्रियबुद्धिरेव तद्विषया वक्तव्या शाब्दव्यवहारस्यान्यथानुपपत्तेः । सैव तद्व्यवसायात्मिका बुद्धिर्न ततोऽन्येति । १०

साम्प्रतं तस्यास्ततोऽन्यत्वेऽपि तत्त्वसंवेदनवदिन्द्रियप्रत्यक्षस्यापि व्यवसायात्मकत्वं दर्शयन्नाह—

स्वभावव्यवसायेषु निश्चयानां स्वतो गतेः ॥१४३॥

नाशस्यैकार्थरूपस्य प्रतीतिर्न विरुद्धयते । इति ।

नाशस्य क्षणभङ्गस्य **प्रतीतिर्निर्णयात्मेन्द्रियबुद्धिः** इतरत्र परस्याविवादात् **न** विरुद्धयते १५ न प्रमाणेन बाध्यते । कीदृशस्य ? **एकार्थरूपस्य** एको भागसहायविकलोऽर्थो नीलादिस्तद्रूपस्य तत्स्वभावस्य । विशेषणमप्येतत्साधनं द्रष्टव्यं तद्रूपत्वात् । तदयमत्र प्रयोगः—प्रत्यक्षनिर्णयो नाशो नीलादेरव्यतिरेकात् तत्स्वरूपवत् । न हि निर्णये तदव्यतिरिक्तस्यानिर्णयः, तद्वेदने अवेदनस्यापि प्रसङ्गात् । ततो यथेदमुच्यते—

"एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् । २०

कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते ॥" [प्र०वा० ३।४२] इति ।

तथेदमपि वक्तव्यम्—

एकस्यार्थस्वभावस्य निर्णीतस्य सतः स्वयम् ।

कोऽन्योऽनिर्णीतभागो यन्निश्चयः क्रियतां परैः ॥१४८०॥ इति ।

नीलादेरपि न प्रत्यक्षान्निर्णयः तज्जन्मनो निश्चयान्तरादेव तद्भावात्, ततः साध्यविकल- २५ मुदाहरणमिति चेत्; निश्चयस्य तर्हि कुतो निश्चयः तदनिश्चये नीलादेरनिश्चयात् तदवित्तावित्तिवत् ? निश्चयान्तरात् तस्यापि निश्चयेऽनवस्थोपनिपातान्न नामापि निश्चयस्य सिध्येत् । विदितत्वादेव [1]तस्य निश्चयो न निश्चितत्वादिति चेत्; अस्तु नामैवम्, तदेव तु वेदनं कुतः ? स्वसंवेदनादेव प्रत्यक्षादिति चेत्; न; तस्यानिश्चयरूपस्य निश्चयात्मनि विरोधात्, अनेकान्तस्य चानभ्युपगमात् । निश्चयात्मैव तदपीति चेत्; सिद्धं तर्हि तद्वदेव नीलादिप्रत्यक्षमपि तदात्मकमिति न तत्स्वरूप- ३० वदिति निदर्शनस्य साध्यवैकल्यम् । तदेवोक्तम्—'निश्चयानाम्' इत्यादिना । निश्चयानां

---

१ निश्चयस्य । २ निश्चयात्मकमिति ।

नीलादिविकल्पानां **स्वतो** न निश्चयान्तरापेक्षया **गतेः** निर्णीतेः। तां दृष्टान्तत्वेनाश्रित्य **नाशस्यैकार्थ-रूपस्य प्रतीतिर्न विरुध्यते** इति। कदा पुनस्तेषां गतिर्निर्णीतिरिति चेत्? उत्तरम्-'स्वभाव' इत्यादि। **स्वभावाः** सचे(सच्चे)तनादयो विकल्पधर्मास्ते च ते **व्यवसायाश्च** नाव्यवसाया-स्तेषां तेषु विरोधात्, **स्वभावव्यवसायास्तेषु** सत्सु। न हि सकलतत्स्वभावानां व्यवसायात्मकत्व-[२]नियमे निर्णीतिरन्या स्वतस्तेषां गतिः सम्भवति। ततो न बहिरन्तर्वा प्रमाणान्तरकल्पनमर्थवत्, प्रत्यक्षादेव समीहितसिद्धेरिति मन्यते। भवतोऽपि स्वपरनिर्णयात्मनो ज्ञानस्य स्वत एव सचेत-नादिवत् प्रतिक्षणपरिणामादेरपि निर्णयात् किं तत्र प्रमाणान्तरेणेति चेत्? अत्राह-

व्यामोहशबलाकारवेदनानां विचित्रता ॥१४४॥ इति।

व्यामोहयति विकलयति चित्तमिति **व्यामोहः** आवरणात्मको विशेषस्तेन **शबलो** मेचक आकारः स्वभावो येषां तानि च तानि **वेदनानि** च ज्ञानानि तेषां **विचित्रता** [३]विविधां चितं प्रति-भासमात्मनि त्रायमाणानां भावः, विविधप्रतिभासत्वं भवति इति शेषः। एतदुक्तं भवति-भवत्येव सूक्ष्माणामपि ज्ञानाकाराणां निर्णयो यदि कर्मसामर्थ्यात् असकलनिर्णयपरिणामो न भवेत्। अस्ति चायमिति। एतदेवाह-

साकल्येन प्रकाशस्य विरोधः सम्प्रतीयते। इति।

साकल्येन स्वभावसामस्त्येन **प्रकाशो** ज्ञानाकाराणां तस्य **विरोधः** कर्मसामर्थ्येन प्रतिरोधः तद्व्यवस्थापकात् प्रमाणात् वक्ष्यमाणात् **सम्प्रतीयत** इति। ततो नास्माकं तत्र प्रमाणान्त-रस्यावृत्तिः, अप्रतिविदितस्यापि तस्य विषयस्य भावात्। न चैवमेकान्तवादे, तत्र प्रतिपन्नस्य तत्सामस्त्येनैव प्रतिपत्तेः, अन्यथा तद्वादविरोधात्। नन्वेवमगृहीताकारसम्भवे कुतस्तदस्तित्व-मित्यत्राह-

सम्भावितान्यरूपाणां समानपरिणामिनाम् ॥१४५॥
प्रत्यक्षाणां परोक्षात्मा प्रमाणान्तरगोचरः। इति।

सम्भावितं सम्भवज्ञानावलम्बनम् **अन्यत्** प्रतीतादर्थान्तरं **रूपं** येषां तेषां **समानपरिणा-मिनां** सदृशपर्यायवतां ज्ञानानामर्थानां च तेष्वपि तत्सम्भवनाभावात्, तेषां **परोक्षात्मा** अप्रत्यक्ष-विषयः स्वभावः सूक्ष्मपरिणामादिः **प्रमाणान्तरस्यानुमानादेर्गोचरः** ततोऽस्तीति भावः। कीदृशानां तेषां स तद्गोचरः? **प्रत्यक्षाणां** सच्चेतनादिना स्थूलनीलादिना च स्पष्टज्ञानविषयाणाम्। कुतः पुनरिदमवगन्तव्यं प्रमाणान्तरगोचर आत्मा प्रत्यक्षाणामिति? प्रत्यक्षस्य तत्र तद्विषये च प्रमाणान्तर-स्यावृत्तेः, उभयविषयस्य च कस्यचिदभावादिति चेत्; अत्राह-

प्रत्ययः परमात्मानमपि च प्रतिभासयेत् ॥१४६॥
सत्यं परिस्फुटं येन तत्र प्रामाण्यमश्नुते। इति।

---

१ स्पष्टा चेतना-ता०। २ -नियमनिर्णी-आ०, ब०, प०। ३ विविधं चित्रं प्र-आ०, ब०, प०। ४ तत्संभवात्तेषां आ०, ब०, प०।

प्रत्ययः आत्मा 'प्रतिगतः परापरपर्यायान् अयो बोधः प्रत्ययः' इति व्युत्पत्तेः, तादृशस्य बोधस्यैवात्मत्वात् । स **तत्र** तस्मिन् **'प्रत्यक्षाणां परोक्षात्मा'** इत्यत्र **प्रामाण्यमविसंवादकत्वम् अश्नुते** प्राप्नोति । एतदुक्तं भवति—बोधात्मैव कश्चित् प्रत्यक्षरूपेण परिणतः तद्विषयाभिमुख्यं परित्यजन्नेव पुनः प्रमाणान्तररूपेण परिणम्य परोक्षाकारस्य प्रत्यक्षविषयाविष्वग्भावमनुभवतीति । कथं पुनरेकस्य प्रत्यक्षेतरपरिणाम इति चेत् ? स्वपरवेदनपरिणामोऽपि कथम् ? नास्त्येव, [1]स्ववेदनस्यैव एकस्यानुभवादिति चेत्; न; परवेदनस्याप्यनुभवात् । न चायं विभ्रम एव, स्वरूपेऽपि प्रसङ्गात् । तद्विभ्रमे बाह्यविभ्रमो न सिद्ध्यतीति चेत्; एवमपि कथमविभ्रमस्य विभ्रमाकारो विरोधाविशेषात् ? अन्य एव स तस्मादिति चेत्; तस्य तर्हि तेन यथावस्थितस्य ग्रहणे सिद्धं परवेदनमपि । सत्यमेव, तद्ग्रहणस्यापि विभ्रमत्वे स एव प्रसङ्गः—'कथमविभ्रमस्य' इत्यादिरनवस्थापत्तिश्च । ततो गत्वापि दूरमविभ्रममपि परवेदनमभ्युपगन्तव्यम् । 'अस्तु तदेव न स्ववेदनम्' इत्यपि न युक्तम्; [3]तदभावे तस्याप्यसम्भवादिति निवेदितत्वात् । ततः सिद्धः स्वपरवेदनपरिणामः तथा प्रत्यक्षेतरपरिणामोऽपि । तदेव **'परम्'** इत्यादिना दर्शयति । **परं** बाह्यम्, **आत्मानं** स्वरूपम् **'अपि च'** इति समुच्चये **प्रतिभासयेत्** प्रकाशयेत्, **प्रत्ययः** । कीदृशम् ? **सत्यमवितथम्**, अन्यथा विभ्रमैकान्तस्य प्रसिद्धेः । **परिस्फुटं** विशदम्, अनेन तत्परिणामिनः प्रत्यक्षव्यपदेशविषयत्वं दर्शयति, स एवैकः प्रत्यय आत्मनः परिस्फुटस्य प्रतिभासनात् स्वसंवेदनप्रत्यक्षम्, परस्येन्द्रियप्रत्यक्षमिति । **'येन'** इति तस्य तत्प्रतिभासनेन तथानुभवसमुत्पत्तिं दर्शयति । तद्वचनाच्च तेनेति लभ्यते यत्तदोः सम्बन्धात् । तेन तथानुभवेन **स तत्र प्रामाण्यमश्नुते** इति । अस्ति ह्यनुभवो देशव्यापिन इव कालव्यापिनोऽपि प्रत्ययस्य । तत्र स्वपरवेदनभावस्येव प्रत्यक्षपरोक्षभावस्यापि प्रतिभासभेदनिबन्धनस्य तद्भेदस्य सामग्रीवैचित्र्यात् उपपत्तेः । ततः सूक्तम्-**'तत्र'**—इत्यादि ।

'परम्' इत्याद्ययुक्तम्, एकस्य स्वपरप्रतिभासिनः स्वभावद्वयस्यासम्भवात् । अत आत्मानमेव प्रत्ययः प्रतिभासयतीति चेत्; अत्राह—

आसादितविशेषाणामणूनामतिवृत्तितः ॥१४७॥ इति ।

न तावदसावेकपरमाणुरूप एव सकलजगत्संव्यवहारेण तन्मात्रस्याऽशक्यावस्थापनत्वात् । सञ्चयगतानेकपरमाणुरूपत्वे च **आसादितः** प्राप्तः अतिशयश्चैतन्यलक्षणो बाह्यासम्भवी **विशेषो** यैस्तेषाम् **अणूनाम् अतिवृत्तिः** स्वरूपातिक्रमेणान्यत्रापि प्रवृत्तिः तत एव तद्बहुत्वस्यापि परिज्ञानात् तस्यास्ततः । **'परमात्मानमपि च प्रतिभासयेत्'** इति सम्बन्धः । स्वत एव तेषां यथास्वमवगमात् किमतिवृत्त्येति चेत् ? ननूक्तम्—'एकस्य तद्विषयस्याभावे न तद्बहुत्वावगमः' इति । एतदेव दर्शयति—

एकाकारविवेकेन नैकैकप्रतिपत्तयः । इति ।

एकोऽनेकविषय **आकारः** प्रत्ययात्मा तस्य **विवेकोऽभावस्तेन कृत्वा एकैकाः** परस्परामिश्राः **प्रतिपत्तयो न** सम्भवन्तीति शेषः । भवति हि प्रत्ययनिष्ठत्वात् प्रमेयव्यवस्थायाः (स्था), तदभावे

---

१ स्वयंवेद-आ०, ब०, प० । २ परवेदनम् । ३ स्ववेदनाभावे । ४ परस्परमि-आ०,ब०,प० । ५ प्रत्ययव्य-आ०, ब०, प० ।

तदभावः; अन्यथा अतिप्रसङ्गात् । ततस्तद्बहुत्वं व्यवस्थापयता तद्विषयमेकमभ्युपगन्तव्यमिति सिद्धं स्वपरावभासित्वं तस्य । तद्वदन्येषामपीति नाणुस्वभावं किमपि संवेदनम् । भवत्वेवं युगपच्चित्रमेव, न तत्क्रमेण क्षणिकत्वादिति चेत्; न; चित्रस्यापि क्षणक्षीणशरीरस्याप्रतिवेदनात् । एतदेवाह–

कालापकर्षपर्यन्तविवर्तोत्तिशया गतिः ॥१४८॥ इति ।

कालस्यापकर्षपर्यन्तो हानिपर्यवसानम् अत्यन्तसूक्ष्मः कालस्तत्र विवर्तस्य वस्तुजन्मनोऽतिशयस्तत्रैव भावः तस्याऽगतिः अप्रतिपत्तिः । अत्रोपपत्तिं दर्शयन्नाह–

अशक्तेरणुवत् [सेयमनेकान्तानुरोधिनी] । इति ।

यथा ज्ञानस्यान्यस्य वा अणोरगतिः तद्ग्रहौ शक्त्यभावात् तथोक्तस्यापि तदतिशयस्य । का पुनरियमशक्तिर्नाम यतस्तदगतिः ? इत्यत्राह– **'सेयमनेकान्तानुरोधिनी'** इति । **सा** परमाणुतदतिशयपरिच्छेदाशक्तिः **इयमेव,** पर्युदासवृत्त्या न परा । इयमर्थमावेदयति–**'अनेकान्तानुरोधिनी'** इति । **अनेकान्तः** क्रमाक्रमाभ्यामनेकधर्माधिष्ठायी भावः तस्यानुरोधो बुद्ध्या स्वीकारः स विद्यते यस्यां सा तदनुरोधिनी तद्ग्राहिका शक्तिरिति यावत् । सा च तत्प्रतिपत्तेरेव लोकप्रसिद्धायाः प्रसिद्ध्यतीति मन्यते ।

ननु यद्यपि नामास्मदादीनां न परमाणुक्षणिकप्रतिपत्तिः अल्पप्रज्ञत्वेनासामर्थ्यात्, महामतीनां तु भवत्येव । अत एवोक्तम् – **"व्यवस्यन्तीक्षणादेव सर्वाकारं महाधियः ।"** [प्र० वा० २।१०७] इति चेत्; कुतस्तेषां महामतित्वम् ? न स्वभावादेव; अनभ्युपगमात् । **"नित्यं प्रमाणं नैवास्ति ।"** [प्र० वा० १।१०] इत्यभिधानात् । अनुमानाभ्यासादिति चेत्; अत्राह–

अंशग्रहविवेकत्वान्मन्दाः किमतिशेरते ॥१४९॥ इति ।

मन्दाः पूर्वमल्पप्रज्ञाः सन्तः पश्चात् **किं** नैव **अतिशेरते** प्रज्ञाधिक्यप्राप्त्यतिशयन्तो भवन्तः कस्मान्न भवन्ति ? **अंशस्य** वस्तुधर्मस्य क्षणक्षयादेर्ग्रहः प्रतिवेदनं तस्माद्विवेकोव्यावृत्तिर्यस्य तदनुमानस्य तस्य भावादिति । तात्पर्यमत्र–महामतित्वं हि तेषां क्षणभङ्गादिविषयं तद्विषयस्यैव अनुमानस्याभ्यासादुपपन्नं नातद्विषयस्य, अन्यथा नित्यादिविषयस्यापि तत एव तस्य प्रसङ्गात् । न चानुमानस्य तद्विषयत्वम्; विकल्पत्वेन अवस्तुसंस्पर्शित्वात् । तथापि क्षणक्षयादावेव तस्य प्रतिबन्धात् तत्रैव तदभ्यासतो महामतित्वं न नित्यादाविति चेत्, ननु प्रतिबन्धोऽपि महाधियामेव विषयो नान्येषाम्, ते च तत्रैव तं प्रतियन्ति नान्यत्रेति कुतः ? तत्रैव निर्णयात् । एतदपि कस्मात् ? प्रतिबन्धस्य तत्रैवावगमादिति चेत्; न; परस्पराश्रयप्रसङ्गात् । सत्यपि तदभ्यासाद् बहिस्तेषां सर्वाकारनिर्णये नान्तः तत्सम्भव इत्याह–

निर्णयेऽनिर्णयान्मोहो बहिरन्तश्च तादृशः । इति ।

---

१ –ष्ठानभावः आ०, ब०, प० । २ प्रज्ञादित्यप्राप्त्यतिशयवन्तो न भ–आ०, ब०,प० । ३ तत्रैव प्रतिबन्धस्यावगमे तत्रैव निर्णयः, सति च तस्मिन् तत्रैव प्रतिबन्धावगमः । ४ नातः आ०, ब०, प० ।

च शब्दः अपिशब्दार्थो भिन्नप्रक्रमश्च 'निर्णये' इत्यत्र द्रष्टव्यः । **निर्णयेऽपि** न केवलं तदभावे । क ? **बहिः** नीलधवलादौ **अनिर्णयात्** निर्णयाभावात् । क ? **अन्तः** निर्णयस्वरूपे । न हि तत्र तेषामपि निर्णयः परतः; अनवस्थानात्, स्वतश्च निर्विकल्पत्वात् । ततश्च **मोहः** प्रज्ञामान्द्यलक्षणः **तादृशः** तदभ्यासेऽपि यादृशः पूर्वम् । स्वरूपानिर्णये[1] परनिर्णयस्याप्यभावादिति मन्यते । भवन्मतेऽपि कथं महामतित्वम् ? श्रुतज्ञानपरिशीलनादेव तद्भावात्, तज्ज्ञानस्य चावस्तुविषयत्वादिति चेत् ? न; तस्यापि वस्तुगोचरत्वेन व्यवस्थापनात्, सकलस्यापि शास्त्रप्रयासस्य तदर्थत्वात् । न च तदभ्यासान्महामतित्वम्, जीवस्य स्वशक्तित एव तद्भावात् । प्राणिमात्रस्यापि कुतो न भवतीति चेत् ? भवत्येव; कथमन्यथा 'सत् सर्वमनेकान्तात्मकम्' इत्यादि व्याप्तिज्ञानम् ? प्रतिक्षणपरिणामादिसकलसूक्ष्मविशेषेष्वपि किन्नेति चेत् ? स्यादेव यद्यसौ अनावृतः स्यात् । एतदेव दर्शयति—

जीवः प्रतिक्षणं भिन्नश्चेतनो यदि नावृतः ॥१५०॥
सकलग्रहसामर्थ्यात्तथात्मानं प्रकाशयेत् । इति ।

जीवो व्याख्यातस्तथा तेन सकलप्रकारेण **आत्मानं** स्वरूपम्, उपलक्षणमिदं तेन परमपि । **प्रकाशयेत्** स्पष्टप्रतिभासं विदध्यात् । कुतः ? **'सकलग्रहसामर्थ्यात्'** इति । स्पष्टमिदम् । इदञ्च व्याप्तिज्ञानबलादेवावगम्यते । कदा प्रकाशयेत् ? **यदि नावृतः** कर्मविशेषेण प्रच्छादितो यदि न भवेत् । तत्प्रच्छादितश्चायं स्वविषयेऽप्यप्रवृत्तिमत्त्वात् कामलिवत् । कामली हि स्वविषयेऽपि चन्द्रैकत्वादौ कामलावरणवत्त्वादेव अप्रवृत्तिमान् प्रसिद्ध इत्युपपन्नो दृष्टान्तः । तस्य तद्विषयत्वं चावरणात् पूर्वं पश्चाच्च तेनाधिगतेः । प्रतिक्षणपरिणामादेरपि विशेषस्य जीवविषयत्वम्, सामान्येन व्याप्तिज्ञाने प्रतिभासनात् चन्द्रैकत्वादिवदेव । तद्धि कामलिज्ञाने चन्द्रत्वादिना सामान्येन प्रतिभासमानं योग्यतया तद्विषय एव, अन्यथा तदावरणापायेऽप्यविषयत्वप्रसङ्गादिति निरवद्यमुदाहरणम् । सत्यप्यावरणे जीवस्य नित्यत्वेन सकलग्रहणशक्तेरपरिक्षयात् कथं स्वविषयेऽप्यवृत्तिरिति चेत् ? न; एकान्तेन नित्यत्वाभावात् । प्रतिक्षणपरिणामिनश्च तद्वशात् तत्परिक्षयस्योपपत्तेः । सकलग्रहणसामर्थ्यमपि तस्य अर्थान्तरज्ञानसमवायादेव न स्वत इति कैश्चित्[2]; तन्न; स्वतश्चेतनस्य तद्वैयर्थ्यात् । चेतनत्वमपि ततः[3] एवेति चेत्; न; आकाशादावपि तत्प्रसङ्गात् तदविशेषात् । अथास्ति कश्चिद्विशेषो यतो जीवस्यैव तत्तत्त्वं नाकाशादेः; स तर्हि जीवस्वभावो भवंश्चेतनत्वान्नापर इति व्यर्थमेव तत्समवायस्य कल्पनमिति एतत् **चेतन**पदेन दर्शितम् । तदेवं जीवस्यावरणवशादसकलज्ञत्वम्, तदपगमे तु स्वत एव सकलज्ञत्वेन महामतित्वं न श्रुतज्ञानपरिशीलनात् । तत्तु तदावरणस्यैव तदात्मनिर्मोक्षद्वारेण परिक्षयार्थमिति सर्वं समञ्जसम् । प्रतिक्षणपरिणामे जीवस्य क्षणिकत्वमेव न नित्यत्वमिति चेत्, न; तस्यापि प्रत्यभिज्ञानबलेन तत्र व्यवस्थापितत्वात्, तदपि सदृशापरापरोत्पत्तिविभ्रमादेव न तात्त्विकादेकत्वादिति चेत्; अत्राह—

---

१ –निर्णयैरपर–ब्रा, च०, प० । २ वैशेषिकः । ३ समवायादेव । ४ समवायार्थत्वात् । ५ श्रुतज्ञानपरिशीलनम् । ६ "प्रत्यभिज्ञानं ।"–ब्रा०टि० ।

तादात्म्यात् प्रत्यभिज्ञा न सदृशापरहेतुतः ॥१५१॥
अवस्थान्तर्विशेषोऽपि बहिरन्तश्च लक्ष्यते । इति ।

तादात्म्यात् परापरक्षणेषु कथञ्चिज्जीवस्य अभेदात् **प्रत्यभिज्ञा** स एवाहमिति परामर्शो न नैव **सदृशश्चासावपरश्च** अपरापर उपादानोपादेयप्रबन्धः दीप्सापरत्वान्निर्देशस्य, स एव हेतुस्तस्मादिति । 'अवस्था' इत्यादिरत्रैवोपपत्तिः । **अवस्थानां** परापरचित्तक्षणलक्षणानाम् अन्तः अन्तर्गतः सन्तानान्तरासम्भावितया तत्रैव नियतो **विशेषो** हेतुफलभावः सोऽपि न केवलं वक्ष्यमाणो **लक्ष्यते** निश्चीयते । क ? **बहिरन्तश्च** अर्थे ज्ञाने च । एतदुक्तं भवति– सत्येव परापरपरिज्ञाने तेषु तद्विशेषलक्षणं तत्परिज्ञानञ्च जीवादेव, न क्षणनियतादर्शनात्, तस्य पूर्ववृत्तेरुत्तरत्र तदवृत्तेश्च पूर्वत्राभावात् । नापि तदुभयदर्शनजन्मनः तदिदमित्याकारात्प्रत्यभिज्ञानात्; तस्यैवाभावात् । भावे वा नाभेदप्रत्यभिज्ञानं तत्र; विरोधादिति कुतः सन्तानकल्पनं यतः संसारतत्कारणादिकमवकल्प्येत ? जीवादपि कथं तल्लक्षणं तत्रापि भेदस्यानवभासनादिति चेत् ? न ; कथञ्चित्तस्यापि भावात् । न चैवं प्रत्यभिज्ञाने भेदवत् अभेदस्यापि प्रतिभासः तस्यापि तात्त्विकत्वेनेष्टसिद्धिप्रसङ्गात् । भेदस्यैव तात्त्विकत्वे प्रत्यभिज्ञानमेव न भवेत् विभ्रमेतरयोरेकत्र विरोधात् । अविरोधे भेदेतरात्मापि भावस्तात्त्विक एव स्यात् । इत्युपपन्नं जीवादेव तल्लक्षणम् । तदभावे प्रत्यभिज्ञानस्याप्यव्यवस्थितेः । पुनरपि 'तादात्म्यात् प्रत्यभिज्ञानम्' इत्यत्रोपपत्तिमाह–

सूक्ष्मस्थूलतरा भावाः स्पष्टास्पष्टावभासिनः ॥१५२॥
वितथेतरविज्ञाने प्रमाणेतरतां गते । इति ।

सूक्ष्माश्च स्थूलतराश्च, स्थूला एव स्थूलतराः स्वार्थिकत्वात्तरप्रत्ययस्य अल्पाच्तरवत् । **सूक्ष्मस्थूलतरा भावा** बदरसहकारनालिकेरपनसफलादयः । तथा स्पष्टाश्चास्पष्टाश्च ते च ते अवभासिनश्च **स्पष्टास्पष्टावभासिनो** भावाः समीपदूरदेशवर्तिनो वनस्पत्यादयः । अत्र लक्ष्यन्ते इति वचनपरिणामेन सम्बन्धनीयम् । तथा **वितथं** च द्विचन्द्रादिविषयम् **इतरच्च** एकचन्द्रादिगोचरं ते च ते **विज्ञाने** च तथोक्ते, अत्र लक्ष्येते इति द्विवचनपरिणामेन । कीदृशे ते लक्ष्येते ? **प्रमाणेतरतां गते** प्रमाणतां गतमवितथम्, इतरतामप्रमाणतां गतं तु वितथमिति । तल्लक्षणं[1] चात्र बदरादिभ्यः सहकारादयः स्थूलास्तेभ्यश्च बदरादयः सूक्ष्माः इति दूरपर्वतादिभ्यः समीपाः नीपकूपादयः[3] स्पष्टावभासिनः तेभ्यस्तत्पर्वतादयोऽस्पष्टावभासिन इति । वितथादितरत् प्रमाणम्, इतरस्माच्च वितथमप्रमाणम् इति च परामर्श एव । न चायं तादात्म्याभावे सम्भवति; दर्शनस्योभयविषयस्याभावात्, भावेऽप्यपरामर्शरूपत्वात् । मा भूत् स्वयं परामर्शरूपं दर्शनम्, परामर्शस्य कारणं तु भवति संस्कारप्रबोधसहायमिति चेत्, अत्राह–

यस्मिन्नसति यज्ज्ञातं कार्यकारणता तयोः ॥१५३॥
भेदिनां प्रत्यभिज्ञेति रचितोऽयं शिलाप्लवः । इति ।

---

१ तत इद–ता० । २ लक्षण-ता० । ३ वापीकूपा–प० ।

यस्मिन् दर्शने असति अविद्यमाने, कार्यकाले सतः कारणत्वानभ्युपगमात्, यज्ज्ञातं परामर्शज्ञानं **कार्यकारणता तयोः** कार्यता तज्ज्ञानस्य कारणता दर्शनस्य **इति एवं रचितो** निर्मितः [१]सौगतेनायमपूर्वः **शिलाप्लवः** तत्कार्यकारणभाव एवाश्रद्धेयतया शिलाप्लववतुल्यत्वात् तच्छब्देनोक्तः। नापि तद्भावस्य श्रद्धेयत्वम्; असतो नीरूपत्वेन कारणत्वायोगात्। कार्य एव तस्य नीरूपत्वं न पूर्वमिति चेत्, ननु पूर्वमित्यपि तस्य प्रध्वंस एवोच्यते नापरः कालोऽनभ्युपगमात्। तत्र च कथमस्तित्वं विरोधात्? दृष्टत्वमेव तस्य पूर्वत्वं न नाशः **"दृष्टताऽतीतकालत्वं दृश्यता वर्तमानता।"** [प्र० वार्तिकाल० १।१३८] इति वचनादिति चेत्; किं पुनरिदं दृष्टत्वं नाम? अतीतं दर्शनमेवेति चेत्; तस्यापि किमिदमतीतत्वम्? अपरं दृष्टत्वमिति चेत्; तत्रापि किं पुनरित्यादेः प्रसङ्गादनवस्थापत्तेश्च। तस्योपरतिरेव अतीतत्वमिति चेत्; भावस्यापि सैव तदिति किं दृष्टत्वेन? अतीतं नष्टमिति च लोकव्यवहारात्। किञ्च, एवमतीतं कारणमिति दृष्टं कारणमिति भवेत्, तथा च कथं खलविलान्तर्गतबीजादेः तत्त्वमदृष्टत्वात्। दृष्टमेव तदपि योगिनेति चेत्; न तर्हि तस्यातीतत्वम्। **"दृश्यमानतया वर्तमानमेव"** [प्र० वार्तिकाल० १।१३८] इति वचनात्। अन्यैरदृश्यत्वात् अतीतमपीति चेत्, नादृश्यत्वादतीतत्वम्, अपि तु दृष्टत्वात्, तच्च [२]तस्यात्मापेक्षया नास्त्येव। अदृश्यत्वादप्यतीतत्वमिष्टमेव **"तस्मादतीतादि योगी पश्यतीति कोऽर्थः? अन्येनादृश्यमानं पश्यति।"** [प्र० वार्तिकाल० १।१३८] इत्यलङ्कारवचनादिति चेत्; न; तत्राप्यतीतस्यैव तद्दर्शनस्य वर्तमानतन्निषेधेनाभिधानात्, अन्यथा **"दृष्टताऽतीतकालत्वम्"** [प्र० वार्तिकाल०] इत्यस्य व्याघातात्। किञ्च,

अन्यादृष्टेरतीतत्वात् वर्तमानत्वतोऽपि च।
योगिदृष्ट्या स एव स्याद्धेतुरन्योऽपि चाक्रमात् ॥१४८१॥

अन्यैरदृश्यमानत्वेन तस्यातीतत्वात् कारणत्वमकारणत्वं निष्पर्यायं प्राप्तं योगिना वर्तमानतया दर्शनादिति सङ्कटप्रवेशः—तत्कार्यस्य युगपदेवोत्पादानुत्पादयोरुपनिपातात्। अथ योगिनोऽपि [३]समाधानकाल एव तद्वर्त्तमानं न तस्मादुत्थितस्य, अत एवोक्तम्—**"योगिना च समाधानादुत्थितेनातीततया व्यवहारात्।"** [प्र० वार्तिकाल० १।१३८] इति चेत्; न; तथापि [४]तत्प्रवेशस्यानिवृत्तेः योग्यन्तरं प्रवृत्तसमाधानं प्रति तस्यैव वर्तमानत्वात्, योगिनाञ्च बहुत्वात्। न चायमपि नियमस्तेषां समकालमेव समाधानं तस्मादुत्थानं चेति, अन्यथापि तदविरोधात्। अपि च, योगिदर्शनस्यापि कारणमेव तद्विषयः, कारणत्वं च दृष्टत्वात्, तदपि यदि तद्दर्शनापेक्षं परस्पराश्रयः—दृष्टादृर्शनं ततो दृष्टमिति। दर्शनान्तरापेक्षमिति चेत्; तदपि यदि तस्यैव योगिनः, स एव प्रसङ्गः तस्यापि तद्दृष्टादेवोत्पत्तेः, पुनर्दर्शनान्तरदृष्टात् तदुत्पत्तावनवस्थाप्रसङ्गात्। दर्शनान्तरं परस्यैव योगिन इति चेत्; किं तत्काले [५]प्रकृतस्य तस्य [६]तद्दर्शनं नास्ति? तथा चेत्, कथं सर्ववेदनम्? तदपि समाधानादुत्थितस्य नास्त्येवेति चेत्; न; तदुत्थानस्य तदप्रतिबन्धित्वात्, अन्यथा दोष एव स इति [७]

१ सुगते—आ०, ब०, प० । २ त्यादिद्र— आ०,ब०, प० । ३ तत्समाधात्मा—आ०, ब०,प० । ४ ध्यानकाले । ५ सङ्कटप्रवेश । ६ —स्थानस्र— आ०, ब०, प० । ७— स्त दर्श—आ०, ब०, प० ।

न 'सुगतः' इत्यत्र अपुनरावृत्तिरुपसर्गार्थः[२] स्यात्, दोषस्यैव पुनरावृत्तित्वात्। तस्मादस्त्येव तदापि तस्य तदिति। कथं वा तदन्यदर्शनेदृष्टादपि तद्दर्शनस्योत्पत्तिः समकालात्तदनुपपत्तेः? "**नातोऽर्थः स्वधिया सह**" [प्र० वा० २।२४६] इत्यस्य व्याघातात्। तद्व्याघातात्पूर्वं तद्दृष्टात् तदुत्पत्तिरिति चेत्; न; तदापि तस्य भावात्; पुनस्तत्पूर्वेत्यादि वचने अनवस्थानोपनिपातात्। तत्र दृष्टमतीतम्, अपि तु नष्टमेव। तस्य च न कारणत्वं नीरूपत्वात्। एतेन भाविनोऽपि तँत्त्वं निषिद्धम्; तस्याप्यनुत्पन्नस्य नीरूपत्वात्। नाऽनुत्पादाद्भावित्वमपि तु द्रक्ष्यमाणत्वात्; ननु तदपि भाव्येव दर्शनम्, तँस्यापि भावित्वं यद्यन्यतो द्रक्ष्यमाणत्वात्; तदेवानवस्थानम्। अनुत्पादादिति चेत्; विषयस्यापि तत एव तदिति किं द्रक्ष्यमाणत्वेन? अन्यथा प्रागपि तद्भावप्रसङ्गात्। एवमन्यदपि प्रकृतमत्र वक्तव्यम्। तन्न द्रक्ष्यमाणत्वं भाँवित्वमिति दुर्भाषितमेतम्—

"भाविता द्रक्ष्यमाणत्वमिति कालव्यवस्थितिः।"

[प्र० वार्तिकाल० १।१३८] इति।

ततो नासतः कारणत्वमतीतादेः, नापि तत्कार्यत्वं प्रत्यभिज्ञानादेरिति तत्र तत्कल्पनमश्रद्धेयतया शिलाप्लव एवेति स्थितम्। कः पुनरेवमाह—असत्कारणमिति, सौगतैः सतएव तँत्त्वोपगमात्, कार्यत्वमेव तु असत तँत्काले तैरुपगम्यते, सत्त्वं कारणवैफल्यादिति चेत्, असत्यपि किं तँद्व्यापारेण? तद्रूपस्य तन्निरपेक्षत्वात्, अन्यथा सहेतुकत्वमभावस्य भावस्य तु स्वरसभावित्वमिति कथमिष्टविपर्ययो न भवेत्? अथासत इति 'पश्चात् सतः' इत्यर्थो न नीरूपस्येति, तदयमदोषः; तन्न; यस्मात्—

पश्चात्सत्त्वानुवादेन कार्यत्वं [१०]तत्र चेद् भवेत्।
भवतापि हि किं तेन सति तद्व्यर्थतास्थितेः? ॥१४८२॥
कार्यत्वादेव तत्सत्त्वं ततो न व्यर्थतेति चेत्।
कार्यत्वात् [११]सततः कार्यमित्यन्योऽन्याश्रयो न किम्? ॥१४८३॥

सत्यपि कार्यत्वे यदि तद्व्यापारस्तद्रूपं स्पृशति; न क्षणभङ्गः। न स्पृशति चेत्; कथं ततस्तदिति? तदनन्तरनियमादिति चेत्; न; तस्य सकलजगत् क्षणापेक्षयापि भावात्। एवमहेतुकत्वे तस्य नित्यं सत्त्वादि किन्नेति चेत्? सहेतुकत्वेऽपि कस्मान्न सर्वहेतुकत्वम्? अथायं तस्य स्वभावो यतस्तँ[१२]न्नियमाविशेषेऽपि कुतश्चिदेव भवतीति; यद्येवम्, अयमपि तस्यैव स्वभावो यन्निर्हेतुकमपि नित्यं न भवतीति। तन्न पश्चात्सतोऽप्यसतः कार्यत्वम्, तदभावान्न सतोऽपि कारणत्वमिति तत्र तत्कल्पनं शिलाप्लव एव। तदेवाह—'**यस्मिन्**' इत्यादि। **यस्मिन्** पश्चाद्भावि-

---

१ "सुष्ठु अपुनरावृत्त्या गतः सुगतः"—ता० टि०। २ "अपुनरावृत्त्यर्थं सुनष्टज्वरवत्।"—प्र० वार्तिकाल० पृ० १। 'सुगतः' इत्यत्र सूपसर्गस्य अर्थः। ३ —दर्शनंदृ—आ०, ब०, प०। कारणत्वम्। ५ दर्शनस्यापि। ६ —त्वमपिदु—आ०, ब०, प०। ७ कारणत्वोपगमात्। ८ कारणकाले। ९ कारणव्यापारेण। १० कुत्रचिद्भ—आ०,ब०, प०। ११ सततः आ०, ब०। सततं प०। १२ तदनन्तरनियम।

न्यसति तद्व्यपदेशविषये यज्जातं ततः प्राक् स्वलक्षणं **कार्यकरणता तयोः** कार्यत्वमसतः कारणत्वं जातस्येति । शेषं पूर्ववत् । न चायमस्मन्मते दोषः, न हि तत्र पिण्डादिर्घटादौ सत्यसति वा व्याप्रियते यदयं प्रसङ्गः स्यात्, अपि तु स्वयं तद्रूपो भवति । स एव खलु भावस्तत्र यत्प्रतिक्षण-परिणामो नाम । तस्य यदन्यत्र सत्यसति च व्यापारनिषेधात् कारणत्वप्रतिक्षेपः, प्रतिक्षिप्यताम्; न काचित् क्षतिः, तावतैव तत्र वस्तुत्वस्यावस्थानात् । अथ परिणाम एव ततस्तस्य प्रतिक्षिप्यते; तन्न; तस्य तदनायत्तत्वात् । स्वभावतो हि तस्य परिणामो नान्यत्र व्यापारात् । अत एवोक्तम्[1]—"**परिणाम-स्वभावः स्याद् भावः**" इति "**अयमर्थक्रिया हेतुः**" इत्यपि[2] तद्रूप्यापेक्षयैवोक्तं नान्यत्र व्यापारात् । कथमेवं घटादौ चक्रचीवरादेः कारणत्वम् ? अतत्परिणामत्वादिति चेत् ? तत्रापि सन्निधिमात्रेणोप-कारात् तद्व्यवहारो न मुख्यतः । मुख्यतस्तु पिण्डादेरेव तत्त्वं तत्परिणामत्वादिति न किञ्चिदसमञ्ज-समुत्पश्यामः ।

'**भेदिनाम्**' इत्यादिना परमपि परस्य शिलाप्लवं दर्शयति—**भेदिनाम्** अन्योऽन्यविल-क्षणानां **प्रत्यभिज्ञा**[3] तदेकत्वपरामर्श इति । अथवा, भिद्यन्ते सजातीयादन्यतश्चेति भेदाः निरंशा भावास्ते सन्त्येषामिति **भेदिनस्तद्वादिनः** तेषां **प्रत्यभिज्ञा इति अयं रचितः । शिलाप्लव** एव । पूर्वत्र सुगतेतरज्ञानयोरपि तत्प्रसङ्गादुत्तरत्रासम्भवात् । न हि निरंशवादिनां सांशं वस्तु सम्भवति तद्वा-दित्वव्यापत्तेः । सांशा च प्रत्यभिज्ञा[4] नानापरामर्शरूपत्वात् । तदपि कल्पनयैव[5] तस्येति चेत्; यतस्त-त्कल्पनं तस्य तर्हि कथम् ? अतद्रूपेण तत्कल्पनानुपपत्तेः । तस्यापि कल्पनयैवेति चेत्; न; अनवस्था-प्रसङ्गादिति पर्याप्तं प्रबन्धेन ।

तदेवं पक्षधर्मत्वादिकमन्तरेणापि अन्यथानुपपत्तिबलेन हेतोर्गमकत्वं तत्र तत्र स्थाने प्रतिपाद्य नेदं स्वबुद्धिपरिकल्पितमपि तु परागमसिद्धमित्युपदर्शयितुकामो भगवत्सीमन्धरस्वामि-तीर्थकरदेवसमवसरणात् गणधरदेवप्रसादादासादितं देव्या पद्मावत्या यदानीय पात्रकेसरिस्वामिने समर्पितमन्यथानुपपत्तिवार्त्तिकं तदाह—

अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ? ॥१५४॥
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ? । इति ।

अन्यथा अन्येन साध्याभावप्रकारेण **अनुपपन्नत्वम्** असम्भवनियमो **यत्र** हेतौ **तत्र त्रयेण** पक्षधर्मत्वादित्रितयेन किं न किञ्चित् फलं विनापि तेन गमकत्वात् । तत्र पक्षधर्मत्वेन विना[8] गमको यथा अस्ति सर्वज्ञः सुनिश्चितासम्भवद्बाधकप्रमाणत्वात्, अस्त्यात्मा उपलब्धेरित्यादिः । समदश-सत्त्वादिना[7] शब्दानित्यत्वादौ श्रावणत्वादिः । न ह्यस्य सत्यपि सपक्षे सत्त्वं घटादेरश्रावणत्वात् । नापि व्यतिरेकः; तदुपदर्शनविषयस्य कस्यचिदपि दृष्टान्तस्याभावात् । तत्त्रितयेनापि विना; यथा सन्ति प्रमाणानि इष्टसाधनात्, सन्ति बहिरर्थाः साधनदूषणप्रयोगादित्यादि । समर्थितं चैतेषामन्यथा-

१ न्यायवि० श्लो० २।१३३। २ न्यायवि० श्लो० २।१३४ । ३ -ज्ञानं त- आ०,ब०, प० । ४ -नानांप-आ०, ब०, प० । ५ कल्पनयैवेति आ०,ब०,प० । ६ -बालभेदं आ०,ब०,प० । ७ -दादा-पादितं आ०, ब०, प० । ८ 'विना गमकः' इत्यन्वयः ।

नुपपन्नत्वं गमकत्वनिबन्धनमत्रान्यत्र च। ततो युक्तं तत्रेत्यादि। ननु यत्र सम्भवस्तत्र तदपि लक्षणमेव, तत्सहितस्यैवान्यथानुपपन्नत्वस्यापि गमकत्वादिति चेत्; न; सम्भवमात्रेण तल्लक्षणत्वे धूमादौ पाण्डिमादेरपि तत्प्रसङ्गात्। तस्याऽहेतावपि भावान्नेति चेत्; समानं पक्षधर्मत्वादावपि, हेत्वाभासेषु तस्यापि भावात्। समुदितमेव तत्तस्य लक्षणं तच्च नान्यत्रेति चेत्; न; असर्वज्ञसाधने वचनादौ तस्यापि भावात्। निश्चितान्वयव्यतिरेकौ न तत्रेति चेत्; न; कृतकत्वादावपि तदभावस्य निवेदनात्। तन्न सम्भवमात्रेण तस्य तल्लक्षणत्वम्। अथवा, 'त्रयेण' इत्यत्र इतिशब्दो द्रष्टव्यः, त्रयेणेति किं कस्मात्? 'चतुष्टयादिरूपेण हेतुः' इति वक्तव्यं रूपान्तरस्यापि भावादिति भावः। तत्तावत् प्रथममन्यथानुपपन्नत्वम्। न च तत्त्रैरूप्यमेव; तदभावेऽप्युक्तेषु[2] हेतुषु भावात् तद्भावेऽपि वचनादावभावात्। तथा ज्ञातत्वमपि। नह्यज्ञातस्य गमकत्वम्, अतिप्रसङ्गात्। ज्ञातत्वं नाम ज्ञानमेव ज्ञातव्यव्यवहारस्य तन्निबन्धनत्वात् तत्कथं हेतो रूपम् अर्थान्तरत्वादिति चेत्? न; ज्ञानं प्रति कर्मभावस्य तत्त्वात्[3]। तदपि कथं रूपान्तरं त्रैरूप्यादव्यतिरेकादिति चेत्; न; अज्ञातव्यावृत्तिरूपतया तदन्यव्यावृत्तिरूपात्[4] ततस्तस्य व्यतिरेकात्। यदि च ततस्तस्याव्यतिरेकात् न रूपान्तरत्वम्; अन्वयव्यतिरेकयोरपि परस्परतो न भवेत् तदविशेषात्। व्यतिरेक एव तयोः[6], भावाभावरूपत्वात्—सपक्षे भावो ह्यन्वयो विपक्षे चाभावो व्यतिरेक इति चेत्; कथमेवमितरवचनादितरस्यापि प्रतिपत्तिः? नियमवतस्तद्वचनस्य तथा सामर्थ्यात्, नियमवत् खलु तद्वचनं सपक्ष एवास्ति विपक्षे च नास्त्येवेति, तस्य तादृशी शक्तिर्यदेकमप्युभयं गमयतीति चेत्; कथं पुनर्वस्तुन्यसतो नियमस्य तेनाभिधानम्? तथा स्वरूपस्याप्यसत एव तत्प्रसङ्गात्। तथा च न तस्यापि लिङ्गरूपत्वम्, असतस्तदनुपपत्तेरित्येकं पक्षधर्मत्वमेव तद्रूपमवशिष्येत। ततः स्वरूपवत् सत एव तस्याप्यभिधानमिति कथन्न परस्परं तयोरव्यतिरेकः? नियमवतोऽन्वयस्यैव व्यतिरेकत्वाद् व्यतिरेकस्यैव चान्वयत्वात्। भवतु नियमवत इतरस्याव्यतिरेकादरूपान्तरत्वं न केवलादिति चेत्; न; केवलस्येतरस्य चालिङ्गलक्षणत्वात्। व्यतिरेकोऽपि तद्वत इतरस्यास्त्येव विधिनिषेधरूपतयेति चेत्; युक्तमत्र ज्ञातत्वस्यापि त्रैरूप्याद् व्यतिरेकः तद्विलक्षणव्यावृत्तिरूपत्वात्। तथापि तद्वचनादेव तदवगम्यते ज्ञातस्यैव तस्य तल्लक्षणत्वात्; अज्ञातस्य गमकाङ्गत्वायोगात्। अतो [ऽ] रूपान्तरं तदित्यपि न सङ्गतम्; अन्वयादेरपि तत्त्वापत्तेः। अन्यतरवचनाभिधेयत्वस्य स्वयमेवोपगमात्। पक्षधर्मत्वादित्रयस्य वा[10] परस्परं तस्यापि कृतमनित्यं प्रयत्नान्तरीयमनित्यमिति हेतुवचनादेवाधिगतेः, हेतोर्विना तेनासम्भवात्। अत एवोक्तम्—"विदुषां वाच्यो हेतुरेव हि केवलः।" [प्र० वा० ३। २६] इति। अशक्तितः तद्वचनात्; तदनवगच्छतां पृथगेव तस्याभिधानाद्रूपान्तरमेव ततस्तदिति चेत्; न; ज्ञातत्वेऽप्येवं तत्त्वोपपत्तेः। अतो रूपान्तरमेव तद्वक्तव्यम्।

एवमबाधितविषयत्वमपि, तदन्यस्यागमकत्वात्। नन्वबाधितत्वं नाम बाधकस्य

---

१ पक्षधर्मत्वादिकमपि। २ –षु भा– आ०,ब०,प०। ३ ज्ञातत्वात्। ४ "अत्र त्रैरूप्यव्यावृत्तिरूपात्" –ता०टि०। ५ त्रैरूप्यात्। ६ अन्वयव्यतिरेकयोः। ७ उत्तरमत्र आ०,ब०, प०। ८ –णतद्व्या –आ०, ब०, प०। ९ अरूपान्तरत्वम्।

निवृत्तिः, अनुपलब्धिर्वा भवेत ? निवृत्त्यापि साध्याभावस्य निवर्तने व्यर्थो हेतुः, तावता साध्यसिद्धेः, अभावनिवर्तनस्य भावविधानरूपत्वात् । अनिवर्तने तु न तन्निवृत्तिः तल्लक्षणं तदनिवर्तनात् तत्प्रवृत्तिवत् । तन्न तस्य निवृत्तिरबाधितत्वम् । अनुपलब्धिस्तदिति चेत्; ततोऽपि यदि बाधकस्य निवृत्तिप्रसङ्गः पूर्ववत् । संशयश्चेत्; सिद्धः सत्यपि बाधके हेतुप्रयोगः, संशये पाक्षिकस्य तस्य भावात्, अन्यथा तदसम्भवात् । तन्न तदनुपलब्धिरप्यबाधितत्वं तद्रूपम् । तदुपलब्धावप्येवं तत्प्रयोगस्यानिवारणात् बाधोपगमस्येतरत्राप्यविशेषादिति चेत्; कथमेवमविनाभावोऽपि हेतुलक्षणम ? कथं च न स्यात् ? उच्यते—स हि तावन्न साध्याननुपातिनो निश्चयस्य विषयः; तदपेक्षत्वात् । तदनुपातित्वे तु निश्चयस्य व्यर्थो हेतुस्तत एव साध्यसिद्धेः । स्यादयं प्रसङ्गो यदि धर्मिण्येव तन्निश्चयो न चैवं दृष्टान्ते तदुपगमादिति चेत्; धर्मिण्येव कुतो न तन्निश्चयः ? तत्र साध्याभावेऽपि हेतुसम्भवात्; न तर्हि तत्र ततः साध्यसिद्धिः, [1]सत्यपि साध्ये शक्त्यभावादिति चेत्; कथं तर्हीदमेर्चटेनोक्तम्—"**तस्मात् स्वसाध्यप्रतिबन्धाद्धेतुस्तेन व्याप्तः सिद्ध्यति, स च विपर्यये बाधकप्रमाणवृत्त्या साध्यधर्मिण्यपि सिद्ध्यतीति न किञ्चिदन्यत्रानुवृत्त्यपेक्षया ।**" [हेतुवि० टी० पृ० २५] इति ? सत्यामपि तत्र तन्निश्चयेन साध्यसिद्धौ न भवत्येव हेतोः प्रयोगः । समारोपव्यवच्छेदार्थ इति चेत्; न; निश्चिते समारोपाभावात्; अन्यथा बाधाविरहनिर्णयादपि तत्सिद्धौ तदर्थ एव तत्प्रयोगः स्यादिति न युक्तमेतत् हेतुबिन्दावुक्तम्—' **तत्किमिदानीं हेतोः सामर्थ्यम्बाधयैव साध्यसिद्धेः ।**" [हेतुवि० पृ० २०८] इति । तस्मादबाधितविषयत्वमपि रूपमेव हेतोरविनाभाववत् । तदभावे को दोषो येन तदपि तस्य रूपं परिकल्प्येत ? बाधितविषयस्यापि हेतुत्वं प्रसज्येतेति चेत्; न; सत्यविनाभावे तद्विपर्यत्वस्यैवासम्भवात् । सम्भवे तेन साध्यस्य निषेधोऽपि विधिश्चाविनाभावेनेति दुस्तरमेव दौस्थ्यं तस्यापद्येतेति चेत्; उच्यते—पक्षधर्मत्वादेरप्यभावे किं भवेत् यतस्तस्य तद्रूपत्वकल्पनम् ? अपक्षधर्मत्वादेरपि हेतुत्वं प्राप्नोतीति चेत्, न; असत्यविनाभावे तदसम्भवात् । सत्येवेति चेत्; तथापि कथं तस्याहेतुत्वम् ? त्रैरूप्याभावादिति चेत्; तदेव दौस्थ्यं तत्राप्यापतितं तदभावादहेतुत्वम् अविनाभावाच्च विपर्यय इति । अविनाभावोऽपि तदभावे नास्त्येव तस्य तत्रैव नियमादिति चेत्; न; तस्य निषेधात् । ततो न त्रैरूप्यस्यापि कल्पनमर्थवत् व्यवच्छेद्याभावात् । सम्भवमात्रेण तु कल्पनम्[3] अबाधि [त] विषयत्वेऽपि, सर्वत्र सम्भवेन ततस्तस्य विशेषाच्च ।

एवमसत्प्रतिपक्षत्वमपि रूपान्तरम् । किं पुनरिदमसत्प्रतिपक्षत्वम् ? असम्भवत्प्रतिहेतुत्वमिति चेत्; कुतस्तन्निश्चयः ? प्रतिहेतोरदर्शनात्; न; दर्शनेन भावस्याव्याप्तौ अदर्शनादभावनिश्चयस्यानुपपत्तेः । न च दृष्टप्रतिहेतुसदृशे ततस्तन्निश्चयः, संशयस्यैव सम्भवात्—तत्रेदानीमपि किं भवति प्रतिहेतुः किं वा न वेति । तद्विलक्षण इति चेत्; तदेव तर्हि वैलक्षण्यं स्वलक्षणमस्तु हेतोः, तत्र

---

१ तस्यापि आ०,ब०,प० । २ -मर्चटेनो- आ०,ब०,प० । ३ -मत्रापि- आ०,ब०,प० ।

एव तस्यासाध्यव्यावृत्त्या साध्यनिश्चयकारित्वात् व्यर्थमसत्प्रतिपक्षत्वम् । 'अप्रदर्शितप्रतिहेतुत्वम् असत्प्रतिपक्षत्वम्' इत्यपि न युक्तम्; प्रज्ञावता पुरुषेण कदाचित् तत्प्रदर्शनस्यापि सम्भवात् । यावत्तदप्रदर्शनं तावत् गमकत्वमेवेति चेत्; स तर्हि हेतुः [1]वस्तूनि स्वसाध्यप्रकृतीनि कृत्वा तत्प्रमाणकान् पुरुषानभ्युदयनिःश्रेयसाभ्यां संयोजयति, पुनश्च प्रतिभावता पुरुषेण प्रतिहेतूपदर्शनेनोत्कीलितसाधनसामर्थ्यः तानि [2]वस्तूनि तांश्च पुरुषान् तद्भावसम्पदः स्वसाध्यप्रकृतित्वसम्पदोऽभ्युदयनिःश्रेयससम्पदश्च प्रच्याव्य भ्रष्टराज्य इव राजा तपोवनं गच्छेत् । कथं वा स्वयमतत्साध्यनियतस्तदुपदर्शनात् प्रागपि तत्र हेतुः ? तत्साध्ये नियते च कथं प्रतिहेतोः सम्भवः प्रदर्शनं वा विरोधात् ? अतो नासत्प्रतिपक्षत्वं हेतुरूपमुपपन्नमिति चेत्; कुतः पुनरेवं ब्रुवतस्तथापि हेतोर्गमकत्वम् ? प्रतिबन्धादेव तादात्म्यादेरिति चेत्; न; तन्निश्चयस्याप्यशक्यत्वेन वक्ष्यमाणत्वात् । ततो न कश्चिदपि [3]हेतुः, तस्यापि सन्दिग्धस्यातल्लक्षणत्वात् । यदप्युक्तम्—तत्साध्यनियते चेत्यादि; तदपि न सङ्गतम्; विनाशनियतेऽपि तद्भावं प्रत्यनपेक्षणे परिणामसाधनतया तस्यैव प्रतिहेतोः सम्भवात् । प्रतिपादितं[3] चैतत् **"परिणामस्वभावः स्यात्"** इत्यादिना । अभिप्रेतं च विनाशनियतत्वं तस्य स्वयं ततस्तत्साधनात् । ततो [4]नातन्निश्चयमात्रादेव प्रतिहेत्वभावाभाव इति पृथगेवासौ तल्लक्षणतया वक्तव्यः इत्युपपन्नम्-अन्यथानुपपन्नत्वादिभिश्चतुर्भिः पक्षधर्मत्वादिभिश्च सप्तलक्षणो हेतुरिति **त्रयेणेति किम्** इति ।

अथवा **त्रयेण** कार्यस्वभावानुपलम्भरूपेणेति व्याख्येयम् । न हि तेनापि किञ्चित्, रूपान्तरेणापि हेतोर्भावात् । कार्यादिरूपादेवाविनाभावः ।

"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमो दर्शनान्न न दर्शनात् ॥" [प्र० वा० ३।३०] इति वचनात्, तदभावे कथमविनाभावो यतो रूपान्तरेणापि हेतुत्वमिति चेत् ? कुतः पुनरिदं तत एव न तद्भाव (तदभाव) इति ? न तावत्तद्रूपत्वात्; रसादिकृत्तिकोदयादेः रूपादिशकटोदयादिसाधनस्य तदभावेऽपि तद्भावात् । न हि तादृशस्य तादृप्यम्; अतिप्रसङ्गात् । वक्ष्यते[5] चैतत्—**"तुलोन्नाम"** इत्यादिना । नापि तज्ज्ञाप्यत्वात्; तत्र तदभावेऽपि तज्ज्ञप्तेर्भावात् । अपि च ,

प्रत्यक्षत्वेन तत्तस्य ज्ञापकं नोपपत्तिमत् ।
अज्ञत्वात् पञ्चमस्यापि प्रत्यक्षस्य प्रसङ्गतः ॥१४८४॥
लिङ्गत्वाच्चेत् परस्तत्राविनाभावः प्रकल्प्यताम् ।
तस्यापि ज्ञप्तिरन्यस्मात् कार्यत्वादेस्ततो भवेत् ॥१४८५॥
एवं सत्यनवस्थानात् क्व तज्ज्ञप्तिः प्रकल्प्यताम् ।
लभ्यतेऽनुमितिर्यस्याः क्षणभङ्गादिसाधनी ॥१४८६॥
प्रमाणान्तरभावेन ततस्तज्ज्ञप्तिकल्पनम् ।
तव पथ्यं न वेत्येवं भवतैवावधार्यताम् ॥१४८७॥

१ वस्तुनि आ०,व०,प० । २ हेतुरस्यापि आ०,व०,प० । ३ न्यायवि०श्लो० २।१३३। ४ न तन्नि- आ०, व०, प० । ५ -त्वभाव इति आ०, व०, प० । ६ न्यायवि० श्लो० ३३८ ।

अप्रमाणात् ततस्तस्य ज्ञप्तिं कल्पयता त्वया ।
प्रमाणचिन्तावैयर्थ्यं सर्वत्र स्यात् समर्थितम् ॥१४८८॥
कुतो वा तस्य संवित्तिः कार्यादिर्यत्ततो भवेत् ।
अविनाभावसंवित्तिरज्ञातात्तदसम्भवात् ॥१४८९॥
अविनाभावतश्चेत् स्यात्तस्यापि प्रतिवेदनम् ।
प्रत्यक्षादिविकल्पोक्तो दोषः सर्वोऽनुषज्यते ॥१४९०॥
कार्यादेरविनाभाववित्तिस्तस्याश्च तद्गतिः ।
इत्यन्योऽन्याश्रयो दोषो दुस्तरः प्रसजत्ययम् ॥१४९१॥
प्रत्यक्षात्तस्य संवित्तौ वक्ष्यामो वयमुत्तरम् ।
लिङ्गात्तु तत्परिज्ञानमनवस्थानमुद्वहेत् ॥१४९२॥
लिङ्गं तदविनाभावात् कार्यत्वादेश्च तद्गतिः ।
तस्यापि लिङ्गतोऽन्यस्मादविनाभाविनो गतिः ॥१४९३॥ इति ।

तन्न तज्ज्ञाप्यत्वात्तत एव स इति युक्तम्, ज्ञाप्यस्य ज्ञापकनियमाभावाच्च । ततो युक्तमन्यथापि हेतुभावात् कार्यादित्रयेण किमिति । एवं पूर्ववदादिना[1] संयोग्यादिना[2] वीतादिना[3] च त्रयेण किमिति व्याख्येयम् ? वक्ष्यते चैतत्–'एतेन' इत्यादिना[4] ।

भवतु नाम यत्रान्यथानुपपन्नत्वं तत्र त्रयेण किमिति,तेनैव पर्याप्तत्वात्, अन्यथापि हेतुभावाद्यत्र नास्ति न तत्र, तत्र त्रैरूप्यस्यैव गमकत्वात् । हेतोश्च त्रिविधस्यैव भावादिति चेत्; न; अन्यथानुपपत्त्यभावे गमकत्वस्यासम्भवात् अतिप्रसङ्गात् । अगमकधर्मणश्च अहेतुत्वात् । एतदेव 'नान्यथा' इत्यादिना दर्शितम् । 'स्वपरप्रसिद्धं चैतद्,अत्र चोदाहरणं सकलमपि क्षणभङ्गाद्येकान्तसाधनं प्रतिपत्तव्यम् । तस्यान्यथानुपपत्तिवैकल्यञ्च यथाप्रतिभासमनेकान्तस्यैव ततः सिद्धेर्विरुद्धत्वात् यथाकल्पनमसिद्धेः इष्टवदितरत्रापि भावेन व्यभिचाराच्च । तदुक्तम्—

"असिद्धः सिद्धसेनस्य विरुद्धो देवनन्दिनः ।
द्वेधा[5] समन्तभद्रस्य हेतुरेकान्तसाधनः[6] ॥" [सिद्धिवि० परि० ६] इति ।

तस्मादन्यथानुपपन्नत्वादेव हेतुः । सत्यसति च तस्मिन् त्रिरूपत्रैविध्ययोर्वैयर्थ्यात् । कुतस्तर्हि तत्प्रतिपत्तव्यमिति चेत् ? ननु नोक्तमेव वैतत्–"साध्ये सति" इत्यादिना[7] । यद्येतावता न परितोषः, वक्ष्यामः । भवतस्तु स्वभावादिरूपस्य हेतोः कुतः प्रतिपत्तिः ? प्रत्यक्षादेवेति चेत्; न; ततः साकल्येन तदसम्भवात् । न हि तत् 'सर्वत्र सर्वदा शिंशपादिः वृक्षादिस्वभाव एव, धूमादिरग्न्या-

---

१ "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतोदृष्टं च ।" –न्या० सू० १।१।५। २ "संयोगिसमवाय्येकार्थसमवायि विरोधि च ।" –वै० सू० ३।१।९। ३ "तत्र प्रथमं तावद्द्विविधम्–वीतमवीतं च ।" –सां० त० कौ० का० ५। ४ न्यायवि० श्लो० ३४२ । ५ अनैकान्तिकः । ६ "....समन्तभद्रस्य सत्त्वादिरचलात्मनि ।" –प्रमाणसं० पृ० ११४। "....विरुद्धो मल्लवादिनः ।...."–जैनतर्कवा० १४२ । स्या० र० पृ० १०३२ । ७ न्यायवि० श्लो० २।१२६ ।

दिजन्मैव' इतीयतो व्यापारान् कर्तुं समर्थम्; देशकालव्याप्त्या स्वयमप्रवृत्तेः, प्राणिमात्रस्यापि सर्वदर्शित्वप्रसङ्गात् । अन्यत्र वृत्तं तत्र करोत्येव तानिति चेत्; न; तत्राप्यपरामर्शरूपत्वात् । किंवा तत्र तत्करणेन ? तत एव साध्यस्यापि सिद्धेरनुमानवैयर्थ्यात् । उक्तञ्चैतत्–"सम्बन्धो यत्र" इत्यादिना । ततः सामस्त्येनैव तत्करणमभ्युपगन्तव्यम् । तच्च ततो न सम्भवति । तदेवाह–

प्रत्येति न प्रमा हेतुं [प्रत्येति पुनरप्रमा] ॥१५५॥ इति ।

प्रमा प्रत्यक्षरूपा तदन्यरूपाया वक्ष्यमाणत्वात्, न **प्रत्येति** न परिच्छिनत्ति **हेतुम्** उक्तरूपमुक्तादेव न्यायात् । मा सा तं प्रतिगात्, तज्जन्मा तु विकल्पः प्रत्येति तद्व्यावृत्तेः परामर्शरूपत्वादिति चेत्; न; तस्यागृहीतग्रहाविसंवादाभ्यां प्रत्यक्षानुमानयोरतल्लक्षणत्वेनानन्तर्भाविनः प्रमाणान्तरत्वप्रसङ्गात् । अप्रमाणत्वे वा कुतस्ततो हेतुप्रतिपत्तिः ? एतदेवाह–**'प्रत्येति पुनरप्रमा'** इति । नेति हेतुमिति चानुवृत्तम् । पुनरिति । पुनर्भावी विकल्पः **पुनः प्रत्येति हेतुम्** । कस्माद् **अप्रमा** प्रमाणं यत इति । मा भूत् प्रमाणात् तस्य प्रतिपत्तिरप्रमाणादेव भवत्विति चेत्; अत्राह–

प्रमाहेतुतदाभासभेदोऽयं सुव्यवस्थितः । इति ।

प्रमा च हेतुश्च तयोराभासौ च **प्रमाहेतुतदाभासाः** प्रमातदाभासौ हेतुतदाभासौ चेत्यर्थः । तेषां **भेदो** नानात्वम् **अयं** प्रतीयमानः **सुव्यवस्थितः** 'न व्यवस्थितः' इत्यर्थः । उपहसनपरत्वात्तद्वचनस्य । तथा हि–

यदि प्रमाणतो हेतुः कुतश्चिन्नावगम्यते ।
नानुमानं तदा तस्य हेतोरेव समुद्भवात् ॥१४९४॥
तदभावे कथन्नाम तदाभासव्यवस्थितिः ।
सौगतैरवकल्प्येत प्रत्यक्षात्तदसम्भवात् ॥१४९५॥
अन्यथा तद्व्यवस्थायाः कथं मानान्तरास्थिता ।
प्रमाणेतरसामान्यस्थितेरित्यादिनोच्यताम् ॥१४९६॥
अप्रमाणाद् गतौ हेतोस्तदात्म्यादिसमन्वयी ।
हेतुरन्यस्तदाभासः संयोग्यादिरशेषतः ॥१४९७॥
इति हेतुतदाभासभेदस्यावस्थितिः कथम् ।
प्रमाणादेव तद्युक्तेरन्यथा नियमक्षतेः ॥१४९८॥

भवतु तर्हि प्रमाणादेवानुमानाद्धेतुप्रतिपत्तिरिति चेत्; अत्राह–

नियमेन न गृह्णाति निःशङ्कं चतुरस्रधीः ॥१५६॥
अन्यथाऽसम्भवेऽज्ञाने [ह्यर्थश्चात्मव्यवस्थितः] । इति ।

चतुरस्रधीरनुमानबुद्धिः सकलव्यवहारनिबन्धनत्वेन तस्या एव चतुरस्रतोपपत्तेः **न गृह्णाति न**

१ तानीति आ०,ब०,प० । व्यापारान् । २ न्यायवि०श्लो० २।२३। ३ प्रत्यक्षप्रमा । ४ हेतुम् ।

प्रत्येति 'हेतुम्' इति गतेन सम्बन्धः । ग्रहणं किंविशिष्टम् ? **निःशङ्कं** शङ्कायां निष्क्रान्तम् । उपलक्षणमिदं [1]तेन निर्विपर्ययमपि । कदा न गृह्णाति ? **अन्यथासम्भवे** साध्याविनाभावे हेतोरज्ञाने अविद्यमानपरिच्छेदे सति । केन कारणेन तदापि सा न तं गृह्णातीति चेत् ? **नियमेन** नियमः तदा सैव नास्तीति योगः तेन[2] । न तत्परिज्ञानजन्मा तद्धीस्तदभावे भवति,[3] अभवन्ती च कथं गृह्णीयात्, सत्येव धर्मिणि तद्धर्मोपपत्तेः ? सत्येव तस्मिन् तज्ज्ञाने सा तं गृह्णातीति चेत्; अत्राह—'**नियमेन**' इत्यादि । **चतुरस्रधीःन हेतुं निःशङ्कं गृह्णाति । कदा ? अन्यथासम्भवे** यज्ज्ञानं तस्मिन् सति । केन ? **नियमेन** । यम उपरमस्तस्याभावो नियमं निश्चितवत्, तेन । चतुरस्रधिय इति विभक्तिपरिणामेन सम्बन्धः । तात्पर्यमत्र-यतस्ते तज्ज्ञानात्तद्धीः, तद्यदि तत एव परस्परात्रयः—सत्यां तस्यां तज्ज्ञानं तस्मिंश्च तद्धीरिति । अन्यतस्तद्धिय इति चेत्, आगतस्तर्हि तदनुपरमः तन्निमित्तस्यापि ज्ञानस्यान्यतस्तद्धियो भावात्, पुनस्तन्निमित्तस्यापि तज्ज्ञानस्येत्येवं क्वचिदप्यवस्थानात् । तन्नानुमानमपि हेतुं प्रत्येति ।

मा भूत् प्रमाणतदाभासादिभेदः स्वयमप्यलङ्कारकृता तन्निरासस्येष्टत्वात्, अविचारितरम्यया कल्पनयैव तदुपगमात्, तत्त्वतस्तु संविदद्वैतमेव तस्य तत्त्वम्, तस्य च प्रमाणेतरविकल्पातिपातिनः स्वसंवेदनादेव प्रतिपत्तिरिति चेत्; अत्राह—'**ह्यर्थश्चात्मव्यवस्थितः**' इति । हि स्फुटम् **अर्थश्च** न केवलं तदेव ज्ञानम् **आत्मना** स्वभावेन न कल्पनया **व्यवस्थितः** तत्कथमद्वैतम् ? अर्थव्यवस्थितौ द्वैतस्यैवोपपत्तेरिति भावः । कुतस्तद्व्यवस्थितिरिति चेत् ? ज्ञानवत्प्रतीतेरेव, इयांस्तु विशेषः स्वतो ज्ञानस्यार्थस्य तु ततः इति । तत इत्यपि कुत इति चेत् ? स्वत इत्यपि कुतः ? तथानुभवात् समानमन्यत्र । तथापि न तद्व्यवस्थितिस्तत्प्रतीतेर्भ्रान्तत्वात् स्वप्नतत्प्रतीतिवदिति चेत्; ज्ञानस्यापि न व्यवस्थितिः, तत्प्रतीतेरपि बाह्यप्रतीतिवद् भ्रान्तत्वात् । प्रतीतित्वेऽपि बाह्यस्यैव प्रतीतिर्भ्रान्ता न ज्ञानस्येति चेत्; अनुकूलमाचरसि—बाह्यप्रतीतिरपि स्वप्नगतैव भ्रान्ता न परेत्यभिमतसिद्धेः । कथं चेदमनुमानमद्वैतवादे ? कथं च न स्यात् ? हेतुजन्मना तेन[4] हेतुफलभावस्य तद्वादप्रत्यनीकस्यान्वाकर्षणात् । नायं दोषः परिकल्पितत्वात्तद्भावस्येति चेत्; तर्हि तन्निबन्धमनुमानमपि कल्पितमेवेति कथं ततः क्वचिद्विभ्रमस्य विधिरविभ्रमवत् ? कथं वा क्षणक्षयादेरेव ततः प्रतीतिर्न नित्यादेरपि यतः संवृत्यापि स एव सन्न नित्यादिरिति व्यवस्था शोभामनुबोभवीति ? तत्र कल्पितस्तद्भाव उपपन्नः । तदाह—

प्रतिव्यूढस्तु तेनैव प्रभवोऽनलधूमयोः ॥१५७॥
प्रत्यक्षेऽर्थे प्रमाणेन विकल्पेन प्रकल्पितः । इति ।

प्रतिव्यूढः प्रतिक्षिप्तः तुरिति वितर्के । कः ? **प्रभवः** कार्यकारणभावः । कयोः ? **अनलधूमयोः** उपलक्षणमिदमन्येषामपि लिङ्गलिङ्गिज्ञानादीनाम् । कीदृशः ? **प्रमाणेन विकल्पेन प्रकल्पित** इति । सुबोधमेतत् । न चेदमसम्मतमेव परस्य—"**निष्पत्तेरपराधीनमपि कार्यं स्वहेतुना । सम्बध्यते कल्पनया ।**" [प्र० वा० २।२६] इत्यभिधानात् । केन प्रतिव्यूढः ? **तेनैव** प्रागुक्तेनानुमानतदाभासभेदानवस्थितिन्यायेनैव नापरेण । तथा हि—

---

१ तेन विप- आ०, ब०, प० । २ तेन तर्हि प० । तेन नाहित- आ०, ब० । ३ -ति न भ- आ०, ब०,प० । ४ अनुमानेन ।

कल्पितप्रभवाधीनं क्षणिकाद्यनुमानवत् ।
नित्यत्वाद्यनुमानं च तदाभासि भवेत् कथम् ॥१४९९॥
तद्वद्वा पूर्वकस्यापि तदाभासत्वसम्भवात् ।
अनुमानंतदाभासभेदोऽयं सुलभः कथम् ॥१५००॥

न केवलं तयोरेव प्रतिव्यूढोऽपि तु प्रत्यक्षे स्पष्टवेदने अर्थे तद्विषये च, अर्थतत्प्रत्यक्षयोरपीत्यर्थः । अत्र 'तेनैव' इति निर्विकल्पेतरभेदानवस्थानेनेति व्याख्येयम् । तथा हि—

प्रत्यक्षं निर्विकल्पं चेत् कल्पितादर्थजन्मनः ।
सविकल्पकमप्येवं तत एव कथन्न तत् ॥१५०१॥
नास्त्यर्थः सविकल्पश्चेन्निर्विकल्पोऽस्त्यसौ कथम् ?
प्रत्यक्षात्तत्प्रतीतेश्चेद्विकल्पमलवर्जितात् ॥१५०२॥
नाविकल्पात्ततः सिद्धात् सिद्धयत्यर्थोऽविकल्पकः ।
तस्माच्च सिद्धात्तत्सिद्धिरित्यन्योऽन्यसमाश्रयात् ॥१५०३॥
अध्यक्षादन्यतोऽर्थश्चेदविकल्पः प्रसिद्धिमान् ।
अन्यस्याप्यविकल्पत्वे कथं नाध्यक्षमेव तत् ॥१५०४॥
विकल्पत्वे कथं तस्मादविकल्पार्थवेदनम् ।
विकल्पोऽवस्तुनिर्भासी यतो वः स मतोऽखिलः ॥१४०५॥
कल्पनातः सतोऽप्यर्थात् प्रत्यक्षं यद्यकल्पकम् ।
सविकल्पकमेवातस्तन्न कस्मान्निगद्यते ॥१५०६॥
लोकस्य यत्तदेवेष्टं प्रत्यक्षमविगानतः ।
न लोकातिक्रमी युक्तस्तत्कल्पो लोकमिच्छताम् ॥१५०७॥
ततोऽर्थजन्मनः कल्पात् प्रत्यक्षं निर्विकल्पकम् ।
विकल्पकमुतेत्येवं भेदोऽयं दुर्विनिश्चयः ॥१५०८॥

तस्मात्तद्भेदनिश्चयमभ्युपगच्छता तत्त्वत एवार्थज्ञानयोरनलधूमादेश्च प्रभवोऽयमभ्युपगन्तव्यः । एवमेव[1] तत् प्रमाणतः प्रत्यक्षादेव तत्प्रतिपत्तेः । एतदेव दर्शयति—

प्रत्यक्षानुपलम्भाभ्यां यदि तत्त्वं प्रतीयते ॥१५८॥ इति ।

तत्त्वमनलधूमयोर्हेतुफलभावः प्रतीयते प्रत्यक्षादेव अनुपलम्भसहायात् अनुपलम्भाद्वा प्रत्यक्षसहायात्, ततस्तात्त्विक एवायम् । दृश्यते हि प्रागनलाभावेऽनुपलब्धो धूमः, तद्भावे दृष्टोऽपि तद्भावे[2] पुनर्न दृश्यते च तदभावे, तस्मात् स तस्यैव कार्यम् अकार्यस्य[3] ततः सकृदप्यसम्भवादिति भावः । परस्य तत्रोत्तरमाह—

---

१ एवमेतत् आ०, ब०, प० । २ तदभावे आ०, ब०, प० । 'तद्भावे' इति पदं व्यर्थम् ।
३ अकारणस्य आ०, ब०, प० ।

अन्यथाऽनुपपन्नत्वमतः किन्न प्रतीयते । इति ।

अत एतस्मात् प्रत्यक्षादनुपलम्भाच्च **अन्यथाऽनुपपन्नत्वं** साध्याविनाभावित्वं हेतोः **किन्न प्रतीयते** ? प्रतीयत एव । तात्पर्यमत्र न तावत्प्रत्यक्षं धूमस्यान्यतो भावमव्यवच्छिन्नदृद् अनलात्तदुत्पत्तिमवगन्तुमर्हति । परतोऽपि तदाशङ्कायां तत एवेति नियमायोगात् । ततो दृश्यमानः कथमन्यतोऽप्याशङ्क्यतेति चेत् ? अस्ति तर्हि ततोऽन्यथाऽनुपपत्तिपरिज्ञानं तद्व्यवच्छेदपरिज्ञानस्यैव तत्परिज्ञानत्वात् । तथा च तावतैवानुमाननिष्पत्तेर्व्यर्थं तदर्थं तत्रानलप्रभवत्वपरिज्ञानम् । एतेन शिंशपादौ साध्यतादात्म्यपरिज्ञानमपि चिन्तितम् । तत्राप्यतत्तादात्म्यव्यवच्छेदप्रतिपत्तित एव अनुमानोपपत्तेः । मा भूद् व्यवच्छेदज्ञानादन्यत्रानुमानम्, तत्र तु तत्कथं यावन्न तत्प्रतिबन्धज्ञानमिति चेत् ? न; तज्ज्ञानस्यैव प्रतिबन्धज्ञानत्वात्, न तदुत्पत्त्यादिज्ञानस्य, तस्य सतोऽपि व्यवच्छेदमजानतयै वानुमापकत्वात्, अन्यथा व्यभिचारशङ्काऽनिवृत्तेः, व्यवच्छेदज्ञानस्य तु विनापि तेनेति निवेदयिष्यते इति । अपि च, प्रतिबन्धो यद्यसाधारणः; न तस्मादनुमानम् । यत्र तत्सिद्धिः प्रत्यक्षात् साध्यस्यापि तत्र तत एव सिद्धेः, अन्यत्र चाविद्यमानत्वात् । साधारणश्चेत्; न तर्हि स विषयः प्रत्यक्षस्य स्यात्, तस्य स्वलक्षण एव नियमात् । अतः प्रमाणान्तरस्यैव विषयो वक्तव्यः । तदेवाह—

प्रमाणसाधनोपायः प्रमाणान्तरगोचरः ॥१५९॥

व्याप्यव्यापकभावोऽयमेकत्रापि विभाव्यते । इति ।

व्याप्यव्यापकभावः साध्यसाधनयोरविनाभावः **अयं** विचार्यमाणो **विभाव्यते** निश्चीयते । कस्मिन् ? **एकत्र** एकस्मिन् महानसादौ, न केवलं सर्वत्रेत्यपिशब्दः । एकत्रापि कीदृशः स विभाव्यते ? **प्रमाणान्तरस्य** प्रत्यक्षानुमानाभ्यामन्यस्य तर्काभिधानस्य प्रमाणस्य **गोचरो** विषयः । कुतस्तद्गोचर एव स विभाव्यते नापर इति चेत् ? न; प्रमाणसाधनोपायत्वात् । इष्टं हि तस्य अनुमानप्रमाणनिष्पत्त्युपायत्वम् । तच्च तद्गोचरस्यैव नातद्गोचरस्य । अपरिज्ञातस्य तदुपायत्वे अतिप्रसङ्गात्— नालिकेरद्वीपादागतस्यापि धूमादेः पावकादिप्रतिपत्त्यापत्तेः । नाप्यन्यगोचरस्य; तत्त्वस्यैवाभावात् । प्रतिविहितं हि तस्यानुमानगोचरत्वम् अनवस्थापरस्पराश्रयाभ्याम्; प्रत्यक्षविषयत्वञ्च साधारणत्वात् । न कश्चित्तात्त्विकः साधारणाकारः सम्भवति प्रत्यक्षेऽपि तत्प्रतिभासप्रसङ्गात्, अन्यथाऽन्यत्रापि तदनुपपत्तेः, तस्य तद्बलभावित्वात् । ततो विशेषस्यैव साधारणत्वं तस्यैव प्रत्यक्षविषयस्य विकल्पज्ञाने व्यक्त्यन्तरसाधारणतया प्रत्यवभासनात् । ततो गृहीतग्रहणात्तद्विषयस्य तर्कविकल्पस्य प्रामाण्यमेव दुरुपपादं तत्कथं [२]तदन्तरत्वं यतस्तद्गोचर इत्युच्यत इति चेत् ? न; एवं तस्य प्रमाणसाधनोपायत्वव्यापत्तेः । न हि तस्य विशेषणरूपेणैव प्रत्यक्षावभासिना तदुपायत्वम्; तस्य पर्वतधूमादौ अभावात् । नापि विकल्पितेन; तस्य तत्र भावेऽपि ततः प्रमाणस्यानुत्पत्तेः । तथा हि—

कल्पितात्प्रतिबन्धाच्चेत् क्षणभङ्गानुमोदयः ।
तत एव भवेत् किन्न नित्यत्वाद्यनुमोदयः ? ॥१५०९॥

---

१ अग्नेः । २ प्रमाणान्तरत्वम् ।

कल्पितोऽपि क्षणक्षीणे वस्तुन्येव स सम्भवी ।
तस्य प्रत्यक्षतः सिद्धेर्न नित्यादौ विपर्ययात् ॥१५१०॥
इत्यप्ययुक्तं प्रत्यक्षात्तस्याप्यप्रतिपत्तितः ।
जात्यन्तरगतत्वेन तस्य पूर्वं निवेदनात् ॥१५११॥
ततः साधारणात्मापि प्रतिबन्धोऽस्तु तात्त्विकः ।
प्रमाणमनुमानं हि नान्यथा स्यात्तदुद्भवम् ॥१५१२॥

तस्य च तर्कादेवाधिगतिर्न प्रत्यक्षात् । तस्याऽतद्विषयत्वे वा कस्यायं व्यापारः स्यात् ?

"अग्निस्वभावः शक्रस्य मूर्द्धा यद्यग्निरेव सः ।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत् ? ॥
धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान् ।
अधूमहेतोर्धूमस्य भावे स स्यादहेतुकः ॥" [प्र० वा० ३।३५-३६] इत्यादि ।

प्रत्यक्षस्यैवेति चेत्; न; तस्याविकल्पस्यास्यैवं परामर्शासम्भवात् । तज्जन्मनो विकल्पस्येति चेत्; तथापि किमर्थं तन्निरूपणम् ? प्रतिबन्धस्यैव निर्णयार्थम्, प्रत्यक्षप्रतिपन्नस्यापि तस्यानिर्णीतस्य पुरुषार्थं प्रत्यनुपयोगादिति चेत्; विकल्पस्यापि तर्हि कथं तन्निर्णयं प्रत्युपयोगः । न हि तस्यापि स्वतः परतो वा निर्णय इति । अभिहितश्चैतत्—अनिर्णीतोऽपि स तत्रोपयुज्यते दृष्टत्वात्, एवं न प्रतिबन्धः' इति । किं कृतमेतत् ? समारोपभावाभावकृतमिति चेत्; तर्हि प्रतिबन्धे प्रतिबन्धसमारोपनिवारणार्थं तन्निरूपणमिति कथं तद्व्यापारवान् विकल्पो न प्रमाणम् ? अप्रमाणात्तन्निवारणायोगादनुमानवत् ।

एतदेवाह—

सत्यप्यन्वयविज्ञाने स तर्कपरिनिष्ठितः ॥१६०॥
अविनाभावसम्बन्धः साकल्येनावधार्यते । इति ।

अन्वयः प्रतिबन्धस्तस्य विज्ञानं प्रत्यक्षं तस्यैव परैरिष्टेस्तस्मिन् । कथम्भूते ? **साकल्येन** देशकालान्तरवर्तिसाध्यसाधनव्यक्तिसामस्त्येन अन्यथा सतोऽपि तस्यानुपयोगात् । **सत्यपि** विद्यमानेऽपि अपिशब्दः सम्भावनायां तत्त्वतः तदभावात्, अन्यथा प्राणिमात्रस्यापि सुगताविशेषेणानुमानवैफल्यप्रसङ्गात् । **स** प्रसिद्धः **स** वा पात्रकेसरिस्वामिना निरूपितः **अविनाभाव** एव **सम्बन्धो** हेतुसाध्ययोर्न तादात्म्यादिस्तस्याव्यापकत्वात् । **अवधार्यते** निश्चीयते । कीदृशः ? तर्केण परितो नारोपयता निष्ठितो लब्धप्रतिष्ठः **तर्कपरिनिष्ठितः** इति । साकल्येनेत्यत्रापि वक्तव्यं तथा च [1]किमन्वयविज्ञानेन सत्यपि तस्मिन् तर्कप्रामाण्यस्याशवयप्रतिक्षेपत्वात् अन्यथा समारोपस्याव्यवच्छेदात् । ततः स एव प्रतिबन्धे प्रमाणयितव्यः परस्यापि "अग्निस्वभावः" [प्र० वा० ३।३५] इत्यादि ब्रुवाणस्य प्रसिद्धत्वान्न तद्विज्ञाने विप्रतिपत्तिरिति मन्यते । पुनरपि तर्कस्यैव प्रामाण्यं दृढयन्नाह—

१ किमन्वयिवि- प० ।

सहदृष्टैश्च धर्मैस्तं न विना तस्य सम्भवः ॥१६१॥ इति ।

तस्य अविनाभावस्य **सम्भवः** । कैः ? **सहयुगपद्दृष्टैर्धर्मैः** साध्यस्वभावैः रूपादिभिः रसादीनां चशब्दात् क्रमदृष्टैरपि शकटोदयादिभिः कृत्तिकोदयादीनाम् । स किम् ? **तं न विना** तर्कमन्तरेण न अवधार्यते इति गतेन सम्बन्धः । सहक्रमदर्शनस्य तदभावेऽपि सम्भवात् न ततस्तदवधारणमिति भावः । तर्कस्य यदि न स्वविषये प्रतिबन्धः कथं प्रामाण्यम् ? प्रत्यक्षस्यापि तत एव तद्भावात् । प्रतिबन्धे वा सोऽप्यनुमानमेव तन्निर्णयादुत्पत्तेः प्रसिद्धानुमानवत् तत्कथं तस्य प्रमाणान्तरत्वमिति चेत् ? अत्राह–

इति तर्कमपेक्षेत नियमेनैव लैङ्गिकम् । इति ।

इत्येवं **तर्कमेव** एवकारस्यात्र सम्बन्धात् नापरं तस्य प्रतिबन्धाविषयत्वाद् **अपेक्षेत** किम् ? **लैङ्गिकम्** अनुमानं लिङ्गादागतत्वात् कथमपेक्षेत ? **नियमेन** अवश्यम्भावेन । तदनपेक्षत्वे तदनुत्पत्तेः । ततो न स लैङ्गिकं तत्कारणत्वात् । कार्याच्च कारणस्यार्थान्तरत्वात् । अनर्थान्तरमेव ततस्तल्लैङ्गिकमिति चेत्; न; तस्यापि प्रतिबन्धनिर्णयकृतस्तर्कादेवोत्पत्तेः , अन्यतस्तन्निर्णयस्यासम्भवात् । सोऽपि ततोऽपरं लैङ्गिकमेवेति चेत्; न; अनवस्थाप्रसङ्गेन लैङ्गिकवार्तायाः अपि विलोपनात् । ततो न तस्य लैङ्गिकत्वम् । प्रतिबन्धे कथमतत्त्वमिति चेत् ? प्रत्यक्षेऽपि कथम् ? निर्णयनिरपेक्षत्वादिति चेत्; समानमिदं तर्केऽपि । कस्तर्हि तस्य स्वविषये प्रतिबन्ध इति चेत् ? योग्यतयैव प्रत्यक्षवत् । प्रत्यक्षेऽपि प्रतिबन्धान्तरस्य तर्दुत्पत्त्यादेर्निषेधात् । ततो योग्यतयैव प्रमाणं तर्कः । तदेवाह–

तस्माद्बस्तुबलादेव प्रमाणं [मतिपूर्वकम्] ॥१६२॥ इति ।

तस्मात्तदभावे लैङ्गिकस्यासम्भवात् **प्रमाणं** तर्क इति विभक्तिपरिणामेन सम्बन्धः । स्वतो वस्त्वेव न कल्पितं यद्बलं योग्यतालक्षणं तस्मादेव न तदुत्पत्त्यादेः ।

यद्येवं भवतोऽपि तत्तृतीयं प्रमाणं प्राप्तं प्रत्यक्षवत् परोक्षेऽप्यनन्तर्भावादिति चेत्; आह–

मतिपूर्वकम् ॥

बहुभेदं श्रुतं साक्षात् पारम्पर्येण चेष्यते ।

श्रुतमित्यस्पष्टज्ञानमुच्यते "श्रुतमस्पष्टतर्कणम्" [त० श्लो० १।२०] इति वचनात् । अस्पष्टं परोक्षमेव । ततः श्रुतमिष्यते तर्क इत्यर्थः । मतिपूर्वकमित्यस्पष्टज्ञानस्य श्रुतव्यपदेशे[1] निमित्तमुक्तम् 'मतिपूर्वं श्रुतम्' इति, स्मृत्यादौ अस्पष्टज्ञान एव तद्व्यपदेशस्य [3]सूत्रे कृतत्वात् । [4]मतिश्चेयमवग्रहादिधारणापर्यन्तज्ञानमुच्यते "तन्मतिज्ञानं चतुर्विधम्" [लघी०श्लो० ६] इति वचनात् । सा पूर्वं कारणं यस्य तत्तथोक्तं श्रुतमिति । तथापि न तर्कस्य श्रुतत्वम् । मतेः स्मृत्यादिना तस्य व्यवधानादिति चेत्; न;साक्षादिव परम्परयापि तत्पूर्वस्य तर्दुपगमात् । अत एवोक्तम्–'साक्षात् पारम्प-

---

१ –देशनि– आ०, ब०, प० । २ –ज्ञानमेव आ०, ब०, प० । ३ "श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्" –त० सू० १।२० इत्यत्र । ४ मतिश्चेहावग्र– ता० । ५ –स्तं ज्ञान– आ०, ब०, प० । ६ श्रुतत्वोपगमात् ।

र्येण च' इति । तच्च सूत्रे पूर्वग्रहणादवगतम्, तस्य व्यवहितत्वेऽपि प्रवृत्तिदर्शनेन तत्परिग्रहार्थत्वात्, अन्यथा 'मतिनिमित्तम्' इत्येव सूत्रे वार्तिके च कृतं भवेत् । बहुविधत्वं च तर्कश्रुतस्य क्वचिदेकत्रैव साधनधर्मे तत्सामान्यस्य साध्यसामान्येन पुनः क्षयोपशमवशात्तद्विशेषग्रहणे तस्य साध्यविशेषेण पुनस्ततोऽपि सूक्ष्मस्य तद्विशेषस्यावधारणे तस्यापि तादृशेन तद्विशेषेण अविनाभावनिर्णयात् । यदपेक्षयेदं बौद्धेनोक्तम्- "**सर्वाकारानुमानं यत् प्रत्यक्षात् तन्न भिद्यते ॥**" [प्र० वार्तिकाल० १।१३८] इति । तथा देशादिव्यवहितस्य शब्दकृतकत्वादिधर्मिहेतुकलापस्यापि तत एव प्रतिपत्तेः ऊहापोहरूपत्वाच्च प्रतिपत्तव्यम् । ततो न तस्य प्रमाणान्तरत्वं परोक्ष एवान्तर्भावात् । बहुभेदत्वमेव तस्य दर्शयितुं तद्व्यापारानाह-

अर्थमात्रावबोधेऽपि यतो नर्ते प्रवर्तनम् ॥१६३॥
स युक्तो निश्चयो मुख्यं प्रमाणं [तदनक्षवत्] । इति ।

अर्थस्य नीलादेः **मात्रा** निरंशक्षणिकावस्था तस्या **अवबोधः** निर्विकल्पदर्शनम्, तस्मिन्नपि न केवलं तदभावे **स** प्रसिद्धो निश्चयो नीलादिव्यवसायो **युक्तः** उपपन्नः । किम् ? **प्रमाणम्** । कथम् ? **मुख्यं** नौपचारिकम् । कुत एतत् ? **यतो** यस्मान्निश्चयात् **ऋते न प्रवर्तनं** जलादौ तदर्थिन इति । एतदुक्तं भवति-प्रवर्तकमेव प्रमाणं परस्याप्यभिमतम्, "**धीप्रमाणता, प्रवृत्तेस्तत्प्रधानत्वात्**।" [प्र० वा० १।५] इति वचनात् । प्रवृत्तिश्च निश्चयादेव न तदवबोधनात् क्षणक्षयादिवत् । अतः स एव मुख्यं **प्रमाणम्** । तथा च "**कल्पनापोढम्**" [प्र० समु० श्लो० ३] इति प्रत्यक्षलक्षणमसम्भवदोषं निश्चये तदभावात्, निर्विकल्पस्य मुख्यतः प्रामाण्याभावात् । एतदेवाह-'**तदनक्षवत्**' इति । तदिति निपातः स इत्यत्रार्थे । **सोऽर्थमात्रावबोधः** अक्षादन्यत्वात् सन्निकर्षादिरनक्षं तद्वदिति । एतदुक्तं भवति-यथा सन्निकर्षादेः मुख्यप्रामाण्याभावाद् न तत्र तल्लक्षणं तथा तदवबोधेऽपीति । कदा पुनर्निश्चयात् प्रवर्तनम् ? अभ्यास इति चेत्; न; तदा दर्शनादेव तद्भावान्न निश्चयात्, तस्यैवाभावात् । नानभ्यासे, तदाप्यनुमानादेव तद्भावादिति चेत्; कथं तर्हि "**गृहीतग्रहणान्नेष्टं सांवृतम्**" [प्र० वा० १।५] इत्यनेन तस्याप्रामाण्यमुक्तम् ? क्वचिदप्यसतस्तदयोगात् । तदयं तमेव नेच्छति तस्याप्रामाण्यं च वक्तीति कथमनुन्मत्तः ? भवतु तर्हि तस्य गृहीतग्रहणादेवाप्रामाण्यमिति चेत्; किं पुनः सामान्यं दर्शनविषयो येनैवं स्यात् ? सत्यम्, दृश्यविकल्प्ययोरेकत्वाध्यवसायादिति चेत्; वस्तुतस्तर्हि अपूर्वार्थ एव स इति कथन्न प्रमाणम् ? तद्विषयस्य सामान्यस्यावस्तुत्वादिति चेत्; एवं तर्हि वक्तव्यम्-'अवस्तुविषयत्वं न प्रमाणम्' इति, न पुनरेवं 'गृहीतग्रहणात्' इति हेतोरसिद्धिदोषात् । एकत्वाध्यवसायान्नासिद्धिरिति चेत्, न; एकत्वादवस्तुभूताद्वस्तुतो गृहीतग्राहित्वासम्भवात् । तदपि तादृशमेवेति चेत्; वस्तुतस्तर्हि नासिद्धिदोषः परिहृत इति न किञ्चिदेतत् । अस्तु तस्यावस्तुविषयत्वादेवाप्रामाण्यमिति चेत्; न; अनुमानेऽपि तत्प्रसङ्गः । समारोपव्यवच्छेदादेः प्रयोजनविशेषस्य ततो भावादिति चेत्;

---

१ अत एवं आ०, ब०, प० । २ तथा आ०,ब०, प०। ३ नाप्यन- आ०, ब०,प० । ४ परिगृहीत आ०, ब०, प० । ५ अनुमानतः ।

तदेवं निश्चयेऽपि समानमिति तद्व्यापारान्तरोपन्यासेन दर्शयति–

लिङ्गसांवृतयोस्तुल्या गृहीतग्रहणादपि ॥१६४॥
व्यवच्छेदाविसंवादव्यवहर्तृप्रवृत्तयः । इति ।

लिङ्गं क्षणभङ्गाद्यनुमानं लिङ्गोऽर्थत्वात्, **सांवृतं** निश्चयज्ञानं तयोः **'प्रामाण्यम्'** इति वक्ष्यमाणेन सम्बन्धः । **'तुल्यम्'** इति वचनपरिणामेन । कुतस्तुल्यमिति ? तयोर्यतः **तुल्याः** समानाः । काः ? **व्यवच्छेदश्च** समारोपस्य **अविसंवादश्चाविप्रतिसारं व्यवहर्तृप्रवृत्तिश्च** व्यवहारिप्रवर्तनं ताः । कुतोऽपि तास्तुल्याः [1]तद्वा तुल्यं तयोः **गृहीतग्रहणादपि** अपिशब्दात् अवस्तुविषयत्वात् । अत्रापि तुल्यत्वादिति विभक्तिपरिणामेन सम्बन्धनीयम् । अयमर्थो यदि गृहीतग्रहणमाश्रित्यापि अनुमानस्य प्रामाण्यं व्यवच्छेदादेः प्रयोजनात्, तत् निश्चयेऽपि तुल्यं तदाश्रयणस्य तत्प्रयोजनस्य च तत्रापि तुल्यत्वादिति । अविसंवादव्यवहारयोर्निश्चये[2] परस्यापि प्रसिद्धत्वात् । तत्र व्यवच्छेदं दर्शयन्नाह–

शब्दाद्ययोगविच्छेदे तत्प्रामाण्यं न किं पुनः ॥१६५॥ इति ।

शब्द आदिर्यस्य घटादेस्तस्य **अयोगः** स्वरूपेणाघटनम् अभेदवादिपरिकल्पितस्तस्य **विच्छेदो** निश्चयात् । न हि निश्चितस्यायुक्तिरभेदेऽपि तत्प्रसङ्गादिति तस्मिन् **तत्प्रामाण्यं** निश्चयप्रामोण्यं **न किम् ?** भवत्येव । **पुनरिति** वितर्के । तद्विच्छेदस्याप्यनुमानादेव भावात् किं निश्चयेनेति चेत् ? अत्राह–

अनुमानं तु हेतोः स्यात् [अविनाभावनिश्चयात्] ।इति ।

तात्पर्यमत्र–**हेतोः अनुमानं** स च भेदरूपत्वेन परं प्रत्युक्त एवेति कथं ततोऽनुमानम् अन्यतरासिद्धेः ? तदयुक्तेरप्यनुमानान्तराद् व्यवच्छेदे तदेवोत्तरम्–**'अनुमानं तु हेतोः स्यात्'** इति । पुनस्तदयुक्तेरपि तदन्तराद्व्यवच्छेदेऽनवस्थाप्रसक्तिरिति । ततो निश्चयादेव तद्व्यवच्छेद इत्युपपन्नमिदं **'तत्प्रामाण्यं न किं पुनः'** इति । ननु निश्चयस्यापि भेदरूपस्यायुक्तिर्यदि निश्चयान्तराद् व्यवच्छिन्ना अनवस्थानमिति चेत्; न; अभेदनिश्चयवत् स्वत एव तस्य युक्ततया[3] अवस्थानात् । हेतुरूपप्रतिपादनव्याजेन पुनरपि तद्व्यापारं दर्शयन्नाह–**'अविनाभावनिश्चयात्'** इति । स्पष्टमिदम् । अत्र हेतुरिति विभक्तिपरिणामेन सम्बन्धः । स्यान्मतम्–तन्निश्चयस्यापि तदुत्पत्त्यादिनिश्चयादेव भावात् तत एव हेतुरिति वक्तव्यमिति; तन्न, एवमतिप्रसङ्गात् । यथैव हि धूमादेर्विशेषधर्मैः कण्ठाक्षविकारकारिभिर्गमकत्वं तथा सामान्यधर्मैरपि मूर्तत्वादिभिर्भवेत् तैरपि तस्यान्यादिकार्यत्वात्, तथा च किं तद्विशेषावधारणार्थेन प्रयत्नेन ? यत इदं सूक्तम्–"इष्टं विरुद्धकार्येऽपि देशकालाद्यपेक्षणम् ।" [प्र०वा०२।५] इति । विशेषरूपैरेव गमकत्वं तत्रैवाव्यभिचारनियमादतो न व्यर्थस्तदवधारणार्थो यत्न इति चेत्; न; तन्नियमस्यापि कार्यत्वादेव भावात् तस्य च रूपान्तरेण्यन्य-

---

१ तद्वत्तुल्यं प० । २ -चेपि प- आ०, ब०, प० । ३ -तया व्यव- आ०, प० । ४ तदनि- आ०, ब०,प० ।

विशेषात् । अन्यथा तेषामहेतुकत्वेन नित्यत्वप्रसङ्गात् । अग्निं प्रत्येव तेषामहेतुकत्वं न हेत्वन्तरमपीति चेत्; न तर्हि तेषां धूमरूपत्वं सामग्र्यन्तरादुत्पत्तेः पदार्थान्तरवत् । हेत्वन्तरमप्यनलादिसामग्र्यन्तर्गतमेवेति चेत्; सिद्धमनलं प्रत्यपि तेषां कार्यत्वमिति कथन्न ततस्तत्र तन्नियमः ? तथाप्यभावे न तन्निर्णयात्तन्निर्णयः सत्यपि तस्मिन् तदभावात् । विशिष्टस्यैव तस्य निर्णयान्निर्णयतस्तन्नियमस्य न तन्मात्रस्येति चेत्; ननु विशेषोऽपि तस्य तन्नियम एव नापरस्तस्येतरत्रापि सम्भवात् । तथा च निर्णयेपि[2] तन्नियमस्य तद्विशिष्टतया कार्यनिर्णयस्ततोऽपि तन्नियमस्येति परस्पराश्रयणं नाम प्रतिषेधमनुपतति । अन्यतस्तन्निर्णये[3] वा तावता गमकत्वाद् व्यर्थं तदर्थं कार्यत्वकल्पनम् ; तथा तत्स्वाभाव्यकल्पनम् । ततो हि गमकत्वे प्रयत्नजन्यत्वं प्रत्यनित्यत्वस्यापि तद्भवेत्, तन्मात्रानुबन्धिनस्तस्य घटादौ प्रतिपत्तेः, तदनुबन्धिन्येव साध्यधर्मे कृतकत्वादेरपि हेतुत्वस्य परैरिष्टत्वात् । तस्य तदनुबन्धित्वमेव नास्ति विद्युदादौ सत्यपि तस्मिन्नभावादिति चेत्; तदा अनित्यत्वमपि क्वचित् कृतकत्वादौ सत्यपि तथा न भवेत् । भवत्येव तथा दर्शनादित्यपि न युक्तम्; घटादिभाविनस्तस्य प्रयत्नजन्यत्वेन व्यभिचारात्, सर्वत्र भाविनश्च तस्यावगन्दर्शिष्वभावात् । तथापि कथमदृष्टस्तद्भावः क्वचित् कल्प्यत इति चेत्; न कल्प्यते किन्तु संशय्यते तज्जातीये प्रयत्नजन्यत्वे दर्शनात् । अथ तादृशस्तस्य नियमोऽस्ति यत् सति तस्मिन् भवत्येवेति ततो न संशयस्तत्रेति चेत्; सोऽपि कुतः तदनुबन्धादिति चेत्; ? न; अन्योऽन्यसंश्रयात्—ततो नियमो नियमाच्च स इति । अन्यतो नियमनिर्णये वा 'तावता' इत्यादेर्दोषात् । तन्न तदुत्पत्त्यादिनिर्णयात्[4] हेतुः पृथगविनाभावनिश्चयादेव तदुपपत्तेः । तदेवं कार्यादावन्यथानुपपन्नत्वादेव हेतुत्वमवस्थाप्य अनुपलम्भेऽपि तत एव तदवस्थापयन्नाह—

यथा कार्यं स्वभावो वाप्यन्यथाऽक्वयसम्भवः ।१६६॥
हेतुश्चानुपलम्भोऽयं तथैवेत्यनुगम्यताम् । इति ।

कार्यं धूमादिः **स्वभावः** कृतकत्वादिः 'वा' इति समुच्चये । **यथा** येनोक्तन्यायप्रकारेण **अन्यथाशङ्क्यसम्भवः** साध्याभावेनाशङ्कनीयात्मलाभौ **हेतुर्न** तदुत्पत्त्यादिप्रतिबन्धात् **तथैवानुपलम्भोऽपि** चशब्दस्य अपिशब्दार्थस्यात्र सम्बन्धात् । **अयं** प्रसिद्धो **हेतुरित्यनुगम्यताम्** अन्यथाशङ्क्यसम्भव एवेति । तथा च दृश्यविशेषणस्येवेतरस्यापि तादृशस्य गमकत्वमिति मन्यते । युक्तं चैतत्; कथमन्यथा क्वचिद्विज्ञानादिनिरोधलक्षणस्य मरणस्य ततः प्रतिपत्तिः ? न हि विज्ञानादेर्दृश्यत्वम्; दर्शनप्रत्ययसाकल्येऽपि[5] स्वभावविशेषस्याभावात्, तदुभयरूपत्वाच्च दृश्यत्वस्य । अस्त्येव स्वशरीरे तत्तस्येति चेत्; किं पुनः शरीरान्तरे तन्निषेधो मरणम् ? तथा चेत्; न; सर्वदा तत्प्रसङ्गात् । तज्जातीयत्वात्तदन्तरगतमपि[7] दृश्यमेवेति चेत्; किमिदानीमदृश्यं नाम यत्रानुपलम्भात् संशयः स्यात् ?

---

१ अपरस्येतर- ता० । २ -ये हि त- आ०,ब,प० । ३ -येन ता- आ०,ब०,प० । ४ तदनुसन्धिनैव आ०, ब०.प० । ५ -यत्वे तु आ०, ब०, प० । ६-यः सा -ता० । ७ -त्तदनन्तरगतम- आ०, ब०, प० । शरीरान्तरगतमपि ।

पिशाचादेरपि तथा दृश्यत्वोपपत्तेः । ततो न स्वभावानुपलम्भात्तन्निषेधः । नापि कार्यानुपलम्भात्, ततोऽपि तदुपलम्भनिषेधादेव तन्निषेधात् । "**अनिषिद्धोपलम्भस्याभावासिद्धेः**" [ ] इत्यभिधानात् । न चादृश्यस्य तन्निषेधेऽपि निषेधः संशयोपगमात् । भवन्नपि व्याहारादिकार्यानुपलम्भात्तस्य निषेधः अप्रतिबद्धशक्तिकस्यैव स्यान्नापरस्य, तत्कथं तद्विवेकानिश्चयाद्धाहादिसाहसकरणं पातकप्रसङ्गात् । अथ व्याहारादौ तत् प्रतिबन्धविकलमेव ततो भवत्येव तदनुपलम्भात्तस्य निषेधः, सति तस्मिन् तस्यासम्भवादिति चेत्; आगतोऽसि पन्थानम्; अदृश्यविशेषणस्यापि तस्यान्यथानुपपत्त्या गमकत्वोपगमात् । इदमेव केवलमपरीक्षितमुक्तवानसि "**नावश्यं कारणानि कार्यवन्ति भवन्ति**" [हेतुबि० टी०पृ० २०१] इति । अवश्यं तद्वतोऽपि विज्ञानादेः भावात्, अन्यथा तत्प्रभवादनुपलम्भात्तन्निषेधानुपपत्तेः । तच्चावश्यम्भावितद्वत्त्वं तर्कादेव[1] शक्यनिर्णयमुपायान्तराभावात् । तदेवमदृश्यानुपलम्भस्य गमकत्वमन्यथानुपपत्तिबलेनोपपाद्य दृश्यानुपलम्भस्यापि तत एव[2] तत्, न तदन्तरेणेति दर्शयन्नाह—

प्रत्यक्षानुपलम्भश्च विधानप्रतिषेधयोः ॥१६७॥
अन्तरेणेह सम्बन्धमहेतुरिव लक्ष्यते । इति ।

उपलभ्यत इति उपलभ्यतेऽनेनेति वा उपलम्भः तदन्यः **अनुपलम्भः** भावान्तरमुपलम्भयोग्यं तज्ज्ञानं वा । **प्रत्यक्षस्य** दृश्यस्य स च सोऽपि न केवलं कार्यादेरेव **अहेतुरिव** अगमक इव **लक्ष्यते** । कथम् ? **इह** अन्यथानुपपत्तौ **सम्बन्धं** साङ्गत्यमन्तरेण विनेति । क्व स तथा लक्ष्यते ? **विधानप्रतिषेधयोः** विधानं प्रदेशादेः प्रतिषेधो घटादेस्तयोरिति । तथा हि—न तावत् प्रतिषेधः कस्यचित्तुच्छोऽनभ्युपगमात् । प्रदेशादिभावान्तरस्वभावत्वेऽपि न तत्र अनुपलम्भस्याऽप्रतिपन्नस्य हेतुत्वम्; असिद्धस्यान्यथानुपपत्तिवैकल्यात् । प्रतिपत्तिरपि तस्य यदि प्रतिषेधरूपत्वेनान्यतोऽनुपलम्भात्; अनवस्थापत्तिः । स्वतोऽपि यद्यनिश्चयरूपा[3]; तदेवाहेतुत्वम् । निश्चयात्मिकायां तु व्यर्थं तस्य तत्र हेतुत्वम्; तन्निश्चयादेव प्रतिषेध्याभावस्यापि निश्चयात्, तद्विषयतयैव तत्र तदुत्पत्तेः । न तन्निश्चयार्थं तस्य तत्त्वमपि तु तत्रासदिति ज्ञानार्थम्; इत्यपि न युक्तम्; अनुपलम्भस्यैव[4] तदसज्ज्ञानत्वात् । ततोऽपि तदन्तरकल्पनायामनवस्थादोषात् । तदभिधानार्थमित्यपि नोत्तरम्; उत्पत्तावेव निश्चयरूपस्य तस्य साभिधानत्वात् । अनभिधानत्वेऽपि कुतस्तस्य तादर्थ्यम् ? तस्य करणात्, ज्ञापनाद्वा ? करणादिति चेत्; न; ज्ञापकस्याकारकत्वात् । ज्ञापनादिति चेत्; तथापि कथं तज्ज्ञापकस्य प्रतिषेधज्ञापकत्वम् ? तस्यापि तद्विषयस्यैव ज्ञापनादिति स चेत्; यद्यस्ति, किं ततस्तज्ज्ञापनेन ? प्रत्यक्षादेव ज्ञप्तेः । अथ नास्ति; नास्ति ज्ञापनमसतस्तदयोगात् । प्रतिषेधस्य तद्योग्यत्वज्ञापनमेव तज्ज्ञापनमिति चेत्; न; असति तस्मिन् योग्यत्वस्यापि तदपेक्षस्यासम्भवात् । सम्भवेऽपि किमर्थं तज्ज्ञापनम् ? अभिधानादिव्यवहारार्थमिति चेत्; स किमनुपलम्भविषयादेव ततो न भवति येन ततस्तज्ज्ञापनं[5] ततश्च स इति पारम्पर्यं परिकल्प्यते ? तथा चेत्; अनुपलम्भेऽपि तदन्यज्ञापितादेव स

---

१ तत्कार्यादेव आ०, ब०, प० । २ गमकत्वम् । ३ यद्यपि निश्चयरूपात्तदे- आ०,ब०, प० । ४ तद्वत्स- आ०, ब०, प० । ५ -पकंत- आ०, ब०, प० ।

ततो भवति तदन्यत्राप्येवमिति कथमनवस्थातो निर्मुक्तिः ? तत्र स्वतःसिद्धादेव ततस्तद्भावे दृश्याभावेऽपि तत्सिद्धादेव स भवतीति व्यर्थं ततस्तज्ज्ञापनम् । कथं च तज्ज्ञापनमेव व्यवहारस्य ज्ञापनम् ? अविनाभावादिति चेत्; सर्वत्र हेतुज्ञापनमेव साध्यज्ञापनमित्यनुमानमुद्रा दोद्रूयेत । कथं वा तदविनाभावित्वं तस्य स्वयं तत्कारणत्वेनातत्कार्यत्वात् ? अत एव अतत्स्वभावत्वाच्च । स्वहेतोस्तथैवोत्पत्तेरिति चेत्; कुत इदमवगन्तव्यम् ? तदुत्पत्त्यादेरवगमोपायस्याभावात् । विचारादेव कुतश्चिदिति चेत्; सिद्धं तर्हि तद्विषयादेकलक्षणबलादेवानुपलम्भस्य हेतुत्वं न तदन्तरेणेति । ततः सूक्तम्–'अन्तरेण' इत्यादि । विधानेऽपि तस्य तत एव हेतुत्वोपपत्तेः । कस्य पुनर्विधानं यत्र तस्य हेतुत्वम् ? निषेध्यस्यैवेति चेत्; न; असति तस्मिन् तस्यैव विरोधात् । भूतलादेरिति चेत्; न, तस्याविप्रतिपत्तित्वेनासाध्यत्वात् । न हि साङ्ख्यस्यापि तत्र विप्रतिपत्तिः "सर्वं सर्वत्र विद्यते" [ ] इत्यागमारोपितसंस्कारस्य दृश्यनिषेध एव तस्य स तद्भावात्, अतः स एव तेन साध्यते–यद्यत्र दर्श नलक्षणप्राप्तं न दृश्यते तत्तत्र नास्ति यथा चेतनात्मनि प्रधानरूपत्वम्, न दृश्यते च तादृशो घटादिः प्रदेशादिविशेषे इति, ततस्तत्रैव हेतुत्वं तस्य न तद्विधान इति चेत्; न, तथा कार्यस्वभावयोरपि 'नेहानग्निः धूमात्, नेह नित्यत्वं कृतकत्वात्' इत्यनग्न्यादिप्रतिषेध एव तद्विप्रतिपत्तिविषये हेतुत्वप्रसङ्गात् नाग्न्यादिविधौ अविप्रतिपत्तेः । एवं च कथमिदं सङ्गतम्–"तत्र द्वौ वस्तुसाधनौ" [न्यायवि० पृ० ३९] इति । तदारोपितानग्न्यादिविविक्ते अग्न्यादौ वस्तुन्येव तस्य हेतुत्वादिति चेत्; निषेध्यविविक्ते प्रदेशे वस्तुन्यनुपलम्भस्यापि किन्न तथा हेतुत्वं यत इदं सूक्तं भवेत्–"एकः प्रतिषेधहेतुः" [न्यायवि० पृ० ३९] इति । ततो युक्तं विधावप्येकलक्षणबलात्तस्य हेतुत्वम् ।

इदानीं तत्प्रपञ्चं दर्शयति—

प्रपञ्चोऽनुपलब्धेर्नापक्षे प्रत्यक्षवृत्तितः ॥१६८॥
प्रमाणं सम्भवाभावाद्विचारस्याप्यपेक्षणात् । इति ।

अनुपलब्धेः प्रपञ्चः स्वभावानुपलब्ध्यादिरूपो भेदः **प्रमाणं** भवतु प्रतिषेधविपक्षे विधौ तद्विरुद्धस्योपलम्भस्य प्रत्यक्षापरव्यपदेशस्य प्रवृत्तित इति चेत्; न; **अपक्षे प्रत्यक्षवृत्तितः** किन्तु सम्भवाभावात्तत्रानुपलम्भस्य । सोऽपि तत्र तद्वृत्तिरेव ततस्तत एव प्रमाणमिति चेत्; न; प्रतिषेधे नियमस्यैव तत्त्वात् । तन्नियमोऽपि तद्वृत्तित एवावगम्यते इति चेत्; न; निरूपितरूपात् विचारादेव तदवगमात् । अत एवाह–'**विचारस्याप्यपेक्षणात्**' इति । **अपिः** अवधारणे विचारस्यैव तदवगमं प्रत्यपेक्षणात् । तत एव सप्रमाणं न तत्र तद्वृत्तित इति । तत्र स्वभावानुपलब्धिर्यथा 'न भावेषु क्षणक्षयैकान्तोऽनुपलब्धेः' इति । असिद्धानुपलब्धिः प्रत्यक्षतः सर्वत्र तस्यैवोप-

---

१ –भावादितीति आ०, ब०, प० । २ 'यो वा सांख्योऽत्यन्तविमूढः सर्वं सर्वत्र विद्यते इत्याग्रहवान् ।" –प्र० वार्तिकाल० ४।२६३। ३ प्रदेशवस्तु–आ०, ब०, प० । ४ विधानस्याप्ये– आ०, ब०, प० । ५ –धविषयस्यैव आ०, ब०, प० ।

लब्धेरिति चेत्, किमिदानीं तत्रानुमानेन[1] ? आरोपव्यवच्छेदं[2] इति चेत्; तेनापि किम् ? सत्यप्यारोपे प्रवृत्त्यादिव्यवहारस्य प्रत्यक्षादेव तत्समर्थादुपपत्तेः । तं[3]दसमर्थेऽपि तस्मिन् न किञ्चित् तद्व्यवच्छेदेन; सत्यपि तस्मिन् व्यवहारस्यासम्भवात् । अथ सँ एव तँस्य तत्सामर्थ्यं तदयमदोषः; कथमर्थान्तरं स तस्य सामर्थ्यमतिप्रसङ्गात् ? सम्बन्धादिति चेत्, न; भेदे सत्युपकारादन्यस्य तँस्यासम्भवात्[4] । न च तस्योपकार्यत्वं नित्यवत् क्षणिकस्यापि निरंशस्य तदयोगात्[5] । भवत्वनुमानादेव तँस्योपलब्धिरिति चेत्; न; तस्याप्यनिर्णयरूपस्याप्रामाण्यात् तत्क्षणक्षयसंवेदनवत् । निर्णयरूपमेव तदिति; कुतस्तस्य परिज्ञानम् ? स्वत इति चेत्; [6]तत्तस्यानिश्चयरूपमेव [7]प्रत्यक्षत्वात् नीलादिप्रत्यक्षवत् । स्वाभिमुखमेव रूपं तस्यानिर्णयस्वभावं न बाह्याभिमुखमिति चेत्; तस्य तर्हि कुतः परिज्ञानम् ? स्वाभिमुखात्तदयोगात् । स्वत एवेति चेत्; तदप्यनिश्चयमेव पूर्ववत् प्रत्यक्षत्वादिति न निश्चयरूपं तस्योत्पश्यामः । [9]पुनस्तदन्तरकल्पनायामनवस्थाकल्पनात्[10] । निश्चयान्तरात् तत्परिज्ञानमेतेन प्रतिव्यूढम् । तन्न ततोऽपि तस्योपलब्धिरिति कथमसिद्धिरनुपलब्धेः ?

तथा न क्षणक्षयैकान्ते कार्यं कारणानुपलम्भात् । न हि तत्र कारणत्वं कस्यचित्; तत्समये [11]कार्यानुपगमात्, [10]सन्तानाभावप्रसङ्गाच्च । नापि भिन्नसमये; स्वयं तदानीमसत्त्वात् । तथा हि— यत्कार्यकाले नास्ति न तत्तत्कारणं यथा अनुत्पन्नम्, नास्ति च तत्काले प्रध्वस्तमिति ।

अपि च, असतोऽपि कारणत्वे यथा ततोऽनन्तरं कार्यं तथा ततः पुनस्ततोऽपि पुनः[13] किन्न स्यात् ? असतः तदापि तस्याविशेषात् । एवं च कथं [14]तस्यानित्यत्वमनुपरमात् ? कारणस्यानुपरतिहेतोरेव[15] भावात् । अथ तदपहस्तस्य स्वयमेवोपरतिः; एवं सति उपरतिवत् उत्पत्तिरपि तस्य स्वाधीनैव स्यात् । तादृगुत्पत्तिर्नित्यैव भवेदिति चेत्; उपरतिरपि स्यात् ।

तथा च हेतुसामर्थ्यादुत्पत्त्या तस्य भूयताम् ।
स्वतः किं वोपरत्येति दुस्तरं दौस्थ्यमापतेत् ॥१५१३॥
क्षणादेवोर्ध्वमस्थानं तस्य चेत् स्यात् स्वशक्तितः ।
क्षण एव ततः स्थानं तस्य कस्मान्न कल्प्यते ॥१५१४॥
उत्पन्नस्य स्वतः शक्तिः शक्तादुत्पत्तिरित्यतः ।
अन्योऽन्याश्रयदोषाच्चेन्नैष [16]पक्षोऽवकल्पते ॥१५१५॥

---

१ "सर्वं क्षणिकं सत्त्वादित्यादिना"– ता० टि० । २ "तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः । भ्रान्तेर्निश्चीयते नेति साधनं सम्प्रवर्तते ।" इति वचनात् । ३ व्यवहारासमर्थेऽपि । ४ "आरोपव्यवच्छेद एव ।" –ता० टि० । ५ प्रत्यक्षस्य । ६ सम्बन्धस्य । ७ क्षणिकत्वस्य । ८ तस्यानि–आ०,ब०, प० । ९ "सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमिति वचनात् ।"–ता० टि० । १० पुनरतत्त–आ०, ब०, प० । ११ कार्येऽनुपग– ता० । १२ यदि कारणकाले कार्यं स्यात्तदा सर्वस्योत्तरोत्तरक्षणस्य आद्यक्षणवृत्तित्वप्रसङ्गः; अनन्तरंच नाशात् सन्तानाभावः स्यादिति भावः । १३ उत्तरोत्तरक्षणेषु । १४ तस्यान्तिकत्वमनु–आ० ब०, प० । १५ यतः कारणादनुपरतिः तस्य कारणस्य तद्भावात् । १६ पक्षोऽत्र क– प० ।

नित्यं सत्त्वमहेतोरित्येवं तर्हि वृथा वचः[1] ।
अहेतूत्पत्तिसद्भावे सत्येवैवं वचः स्थितेः ॥१५१६॥

अनुत्पन्नमपि पूर्वस्य कारणमेव ततः साध्यविकलं निदर्शनमिति चेत्; न; तस्य तत्कार्यत्वात् । न हि कार्यादेव कारणम्; अन्योऽन्याश्रयदोषात् । अन्योऽन्यमविनाभावादेव हेतुफलव्यपदेशो नान्योऽन्यस्मादुत्पत्तेस्तदयमप्रसङ्ग इति चेत्; उत्पत्तिस्तर्हि कुतः ? न कुतश्चित्; कथं सत्त्वम् ? उपलम्भादेव, "उपलम्भः सत्ता" [प्र० वार्तिकाल० २।५४] इति वचनात् । नित्यं तत्किञ्चेति चेत्; नित्योपलम्भाभावादेव । ततो न तस्य कार्यत्ववत् कारणत्वमपि व्याहतमिति चेत्; न; एवमपि भवतो व्याघातस्य प्रसङ्गात् । तथा हि—

कार्यत्वादाद्यचित्ते स्यादविनाभावनिश्चयः ।
व्यभिचारविशङ्कापि हेतुत्वेन प्रसज्यते ॥१५१७॥
तच्छङ्कया ततो न स्यादनुमा पूर्वजन्मनि ।
तन्निर्णये भवेच्चापि सैषा[2] ते दुस्त्यजा रुजा ॥१५१८॥
कार्यत्वादनुमासिद्धौ तच्छङ्का क्रियते न चेत् ।
न हेतुबलभाविन्याः स्वेच्छया वारणात्ययात् ॥१५१९॥

तस्मात् प्राग्जन्मचित्तस्य तत् कार्यमेव न कारणम्, उत्तरस्य च कारणमेवं[3] पूर्वत्वात् प्रकृतचित्तवत्, तदपि तदुत्तरस्य तावदेवं यावदन्त्यं [4]चित्तम्, तदपि भाविभवाद्यचित्तस्य । कथं पुनः कारणात्तत्तस्तदनुमानमिति चेत् ? [5]कार्यादिवाविनाभावनिर्णयादिति ब्रूमः । चतुर्थं तल्लिङ्गं स्यादिति चेत्; यद्येतन्न्यायादापतति किमत्र कुर्मः ? तन्न प्राग्भाविनो हेतुत्वमिति भवत्येव असतस्तदभावे स दृष्टान्तः । ततः—

अन्योऽन्याश्रयणादौ चेदुक्तं गजनिमीलनात् ।
कारणं भावि वक्तव्या तथा तस्य क्षणस्थितिः ॥१५२०॥
कुतो वा तस्य सा शक्तिर्यतः प्रध्वंसते स्वतः ।
स्वहेतोश्चेदवस्थानप्रध्वंसौ युगपन्न किम् ॥१५२१॥
तादृशी यदि शक्तिः सा [6]सैतस्तौ क्रमभाविनौ ।
'नाक्रमात्क्रमिणो भावाः' इत्येतद्दुर्घटं भवेत् ॥१५२२॥
तन्नानुपरतौ हेतौ तस्योपरतिरात्मनः ।
इत्यनित्यत्ववार्ता ते तत्र दूरं पलायते ॥१५२३॥
इदमेवोदितं पूर्वैः स्याद्वादन्यायवेदिभिः ।
देवोऽपि कुरुते येषु विनयालङ्कृतं वचः ॥१५२४॥

---

१ "नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।" –प्र०वा० ३।३४ । २ तेषां ते आ०,ब०,प० । ३ –वमपू– आ०, ब०, प० । ४ चित्तं भावि–आ०, ब०, प० । ५ कार्यादेवावि– आ०, ब०, प० । ६ स्वतस्तौ आ०, ब०, प० । ७ प्र० वा० १।४५।

"प्रध्वस्तस्य न हेतुत्वं यथैव प्रागभाविनः ।
असतश्चेह भावेऽथ पश्चात्किन्न भविष्यति ॥" [ ] इति ।

अप्राग्भाविनोऽपि इष्टमेव हेतुत्वं भाविजन्मादद्यचित्तादाधुनिकस्य मरणचित्तस्योत्पत्तेः, अन्यथा ततस्तदनुमानासम्भवात्, कथमसौ असतो हेतुत्वे दृष्टान्त इति चेत्? नन्वेवं मरणचित्तं कस्य हेतुः? अहेतोः अवस्तुत्वप्रसङ्गात्। तत्पूर्वस्येति चेत्; तदपि तर्हि तत्पूर्वस्य तदप्येवं यावदाद्यचित्तमिति। ततः कथं प्राग्भवचित्तस्यानुमितिः कारणलिङ्गस्यानुपगमात्? अन्यथा मरणचित्तस्यापि तल्लिङ्गत्वादेव गमकत्वात् कार्यत्वकल्पनं वृथैव स्यात्। अथ तत् उत्तरचित्तस्येव प्राग्भवचित्तस्यापि कार्यमेव तदयमदोषः; तर्हि न कस्यचिदपि कारणमिति न वस्तु भवेत्। अथ तदपि तयोरन्यतरस्य हेतुरेव न तर्हि ततस्तस्यानुमानम्। ततो नासतः कारणत्वमिति सिद्धा कारणानुपलब्धिः।

तथा कार्यानुपलब्धिरपि। तद्यथा, न तदेकान्ते कारणं कार्यानुपलम्भात्। नहि तस्य सत्कार्यम्; निरपेक्षत्वात्। नाप्यसत्; विनापि तेनाभावात्। रूपान्तरेण तत्तस्य कार्यमिति चेत्; तदपि सत्; कथं तस्य? असच्चेत्; स एव प्रसङ्गो 'विनापि' इत्यादिरनवस्था च। यदि चासत् सद्रूपमापद्यमानं तस्य कार्यम्;न क्षणभङ्गः,तस्य पूर्वापरीभूतस्यैकस्योपगमात्। न पक्षान्तरेऽपि अयं प्रसङ्गः; क्रमेण चित्रवस्तुन्येव तत्र हेतुफलव्यवहारात्। तस्य च चित्रैकज्ञानवत् प्रतीत्युपारूढत्वात्, न तथा तदेकान्तस्य। ततः कार्यानुपलब्धिरपि गमिकैव। व्यभिचारशङ्कया तदगमकत्वकल्पनायां नित्यादेरनिषेधापत्तेः।

तथा विरुद्धोपलब्धिरपि। तद्यथा– न नित्यो जीवः परिणामादिति। नित्यत्वविरुद्धस्य परिणामस्य जीवे दर्शनात् तत्र नित्यत्वप्रतिषेधोपपत्तेः क्वचिदुष्णत्वोपलब्ध्या शीतप्रतिषेधवत्।

तथा विरुद्धव्याप्तोपलब्धिरपि। तद्यथा, नेदं निरात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति। नैरात्म्यविरुद्धेन सात्मकत्वेन व्याप्तस्य प्राणादिमत्त्वस्य जीवच्छरीरे दर्शनात् तत्र नैरात्म्यप्रतिषेधोपपत्तेः, क्वचिच्छूरत्वस्य वनस्पतित्वविरुद्धवृक्षत्वव्याप्तस्य दर्शनात् वनस्पतित्वप्रतिषेधवत्।

एवं विरुद्धकार्योपलब्धिरपि। तद्यथा कल्पनापोढमभ्रान्तमपि ज्ञानं न प्रमाणं विसंवादादिति। प्रामाण्यस्योक्तविशेषणे ज्ञाने तद्विरुद्धाऽप्रामाण्यकार्यस्य विसंवादस्योपलम्भेन निषेधोपपत्तेः, क्वचिद्रोमहर्षादिविशेषस्य शीतकार्यस्योपलम्भेन तद्विरुद्धपावकप्रतिषेधवत्। न चासिद्धा विसंवादोपलब्धिः; तत्र निरंशादिरूपेण दृष्टस्यापि विषयस्य स्थूलादिरूपेण प्राप्तेः, अयथादर्शनप्राप्तेश्च विसंवादार्थत्वात्। एवमन्या अप्यनुपलब्धयो वृत्तिप्रतिपादिता गमिकाः प्रतिपत्तव्याः।

स्यान्मतम्–यदि क्षणक्षयैकान्तादेर्न प्रतिपत्तिः कथं स क्वचिन्नास्तीति तदनुवादी निषेधः? 'नास्तीह घटः' इति प्रतीतस्यैव तस्य तद्दर्शनात्। प्रतिपत्तौ तु कथमनेकान्तनियमो भावेष्विति?

---

१ क्षणिकैकान्ते। २ असद्रूपत्वात्। ३ असत्। ४ असतः। ५ "स्याद्वादिपक्षे" –ता० टि०। ६ क्षणिकैकान्तस्य। ७ क्वचिदुष्ण– आ०, ब०, प०। क्वचिदुपल– ता०। ८ शालत्वस्य। शूरः शालवृक्षविशेषः। ९ –वादस्योप– आ० ,ब०, प०। १० दृष्टस्याद्यस्यापि प०, ता०। ११ घटस्य। १२ निषेधदर्शनात्।

तन्न सारम्; एवं नित्येऽर्थक्रियानिषेधेऽपि चोद्यात् । न ह्यप्रतिपन्ने तत्र तन्निषेधः, प्रतिपन्न एव प्रदेशे मशकादिनिषेधोपलम्भात् । न च तस्य प्रतिपत्तिः प्रमाणात्; क्षणभङ्गवादव्याघातात् । कल्पनातश्चेत्, निषेध्यत्वमपि तद्विपर्ययस्यैव स्यात्, अर्थक्रियाया अपि तादृश्या एव तत्त्वात् । प्रत्यक्षत एव तस्याः[3] क्षणभङ्गे प्रतिपत्तिरिति चेत्; नैवम्; अनिश्चयात् । निश्चये वा किं नित्ये तन्निषेधेन ? स हि ततस्तद्भङ्गसाधनाय, निश्चिते च किं तत्साधनेन ? समारोपस्यापि तत्रानुपपत्तेस्तद्व्यवच्छेदस्याप्यसम्भवात् । अनिश्चयेऽपि यदि प्रतिपत्तिः, तथापि किमर्थं तत्साधनम् ? व्यवहारार्थमिति चेत्; न; तस्यापि तत एव भावात्, कथमन्यथा ततो नित्ये तन्निषेधव्यवहारः । तन्न प्रत्यक्षतस्तत्र तस्याः[3] प्रतिपत्तिः, इत्यारोपिताया एव निषेधस्तथा तद्भङ्गादेरपीति सूक्तम्–**'नापक्षे प्रत्यक्षवृत्तितः'** इति ।

यत्पुनरेतत्-वैशेषिकादेः[6] 'सामान्यसमवायादिकं निराकुर्वन्[7] यदि न प्रतिपद्यते तन्निषेधहेतोराश्रयासिद्धत्वम् । प्रतिपद्यते चेत्; कथं निषेधः ? तत्प्रतिपत्त्या बाधनात्' इति; तदप्यनेन प्रतिविहितम्; प्रमाणतः प्रतिपत्तावेव तदनुपपत्तेर्न कल्पनातः । तत्प्रतिपन्नस्य च तस्य परैः[8] निषेधः कल्प्यते । अभ्युपगन्तव्यं चैतत्; कथमन्यथा स्वयमपि क्षणभङ्गादेर्निराकरणम् । न हि तस्यापि सौगतादिकल्पितस्य क्वचित् प्रमाणतः प्रतिपत्तिः बुद्ध्यादावपि षट्क्षणस्थायित्वादेरेव स्वयमवगमात् । अथ न तस्य निषेधः; कथं तद्वादी पराजीयताम् ? अप्रतिक्षिप्तपक्षस्य तदनुपपत्तेः । तद्विपर्यस्य नित्यादेर्विधानादेवेति चेत्; न; अप्रतिपन्ने तस्मिन् तद्विपर्ययत्वस्यैव क्वचिदनधिगमात् । ततः कल्पनयैव तस्यापि प्रतिपत्तिरित्यलमनुबन्धेन ।

साम्प्रतम् उन्नामादेस्तदुत्पत्त्याद्यभावेऽपि गमकत्वोपदर्शनेन हेतुत्रैविध्यमपि विध्वंसयन्नाह–

तुलोन्नामरसादीनां तुल्यकालतया न हि ॥१६९॥
नामरूपादिहेतुत्वं न च तद्व्यभिचारिता । इति ।

तुलाया **उन्नाम**श्चोर्ध्वगमनं **रस**श्च तावादौ येषामर्वाग्भागसास्नादीनां तेषां **न हि** स्फुटम्। किम् ? **नाम**श्चाधोगमनं **रूपं** चादिर्येषां परभागविषाणादीनां त एव **हेतवो** येषां तेषां भावस्तत्त्वम्। कया युक्त्या तत्तेषां न ? **तुल्यकालतया** समसमयतयेति । न हि समसमयत्वे युक्तो हेतुफलभावः परस्परमनुपयोगात्, सव्येतरनारीकुचचूचुकवदनभ्युपगमात्। न चैवमहेतुत्वम्;[10] अव्यभिचारात् । न हि नामादेरुन्नामादिव्यभिचारो निर्व्यभिचारायाः एव ततस्तत्प्रतिपत्तेरुपलम्भात् । न ततस्तस्य प्रतिपत्तिरपि तु गौरवादेः तस्य तत्कारणत्वात्, ततस्तु नामादिसहभाविन उन्नामादेरिति चेत्; तथापि व्याघात एव त्रैविध्यस्य कारणस्यापि [11]लिङ्गत्वोपगमात्, तथा रसादे रूपाद्यधिगमाच्च । ततोऽपि न तस्याधिगमः अपि तु तत्कारणस्यैव पूर्वरसादिस्तवकस्येति चेत्; न; रूपादेरेव समसमयस्य तद्दर्शनात् । तत्कारण-

---

१ नित्ये । २ अर्थक्रियायाः । ३ अर्थक्रियायाः । ४ "अथ यदि परेण प्रमाणात्प्रतिपन्नः तेनैव बाध्यमानत्वादनुत्थानं विपरीतानुमानस्य ।..."– प्रश० व्यो० पृ० ४६ । ५ "जैनादिः"– ता० टि० । ६– त्तावेदनुप– आ०,व०,प० । ७ "जैनैः" ता०टि० । ८ "वैशेषिकादिना"–ता०टि० । ९–विशेषणा– आ०, व०, प० । १० –तुरव्यभि– आ०, व०, प० । ११ लिङ्गस्योप– आ०, व०,प० ।

प्रतिपत्तिरेव (त्तेरेव) तत्प्रतिपत्तिस्तस्य रूपादिजननधर्मतया ततः प्रतीतेः । अत एवोक्तम्—

"एकसामग्र्यधीनस्य रूपादे रसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवत् ॥" [प्र० वा० ३।८]

इति चेत्; कथं पुनस्तद्धर्मणः प्रतीतेरेव तत्प्रतीतिः ? अव्यभिचारादिति चेत्; उक्तमत्र—'हेतुप्रतिपत्तिरेव साध्यस्यापि प्रतिपत्तिरित्यनुमानमुत्सीदेत्' इति । न च प्रतिपन्नात्ततस्तत्प्रतिपत्तिः; कारणलिङ्गप्रसङ्गात् । नचैवं पारम्पर्यप्रतिपत्तिः—रसादेस्तत्कारणस्य ततोऽपि रूपादेरवगम इति; रूपादेरेव झटिति ततस्तद्दर्शनात् । सत्यम्, स तु न [२]स्वतोऽविनाभावात्,अपि तु तदुत्पत्तिप्रयुक्तादेव । तदुक्तमर्चटेन—"**रूपादिनापि रसादेरव्यभिचारो न स्वतः किन्तु स्वकारणाव्यभिचारद्वारकः ।**" [हेतुबि० टी० पृ०८] इति चेत्; किं पुनरेवं नियमः 'स्वकारणमव्यभिचरतस्तत्कार्येणाव्यभिचारः' इति ? तथा चेत्; न; असता तदयोगात् । सतैवेति चेत्; कुतः सत्त्वम् ? कारणभावादिति चेत्; न; नियमाभावात् "**नावश्यम्**[3]" [हेतुबि० टी० पृ० २१०] इत्यादिवचनात् । नियम एव रसादेस्तस्यानुमानात्, अन्यथा तदयोगादिति चेत्; न; परस्पराश्रयात्—सति तत्सत्त्वनियमे तत्र रसादेस्तदव्यभिचारद्वारकोऽविनाभावः, ततश्च तदनुमानात्तन्नियम इति । तन्नियमस्यान्यतः प्रतिपत्तौ तु व्यर्थमेव रसादिलिङ्गं भवेत् । तस्मात् स्वत एव तस्य तत्र अविनाभावो न तँस्मात्, नापि तत्कारणादुत्पत्तेः ।

यत्पुनरत्रोक्तं तेनैव– "**आकस्मिकस्तर्हि सर्ववस्तूनां स्वभाव इति न कस्यचित् स्यात् । नह्यहेतोर्देशकालद्रव्यनियमो युक्तः ।**" [हेतुबि० टी० पृ० ९] इति; तन्न; स्वहेतुप्रकृतेरेव नियतविषयतया तस्योत्पत्तेः, तत एव तत्प्रकृतेरप्यवगमात् । नियतविषया हि तदुत्पत्तिः कुतश्चिदवगम्यमाना तत्प्रकृतिमवगमयत्येव, उत्पत्तिनियमस्य तदन्यत्रापि तदधीनत्वात् । अत इदमपि तँस्यायुक्तमेव–"**तच्चाव्यभिचारकारणं यथोक्तादन्यन्न युज्यते ।**" [हेतुबि० टी० पृ०९] इति; तदुत्पत्त्यादेरुक्तादन्यस्यापि तँत्प्रकृतेर्भावात् ।

किञ्चेदं तस्य तत्कारणत्वम् ? उत्पादकत्वमिति चेत्; न तर्हि तस्मिन् सत्यप्यव्यभिचारः कारणे कार्यभावस्यानियमात् । ततो यथेदमुच्यते–

"**संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः ।**
न ते हेतव इत्युक्तं व्यभिचारस्य सम्भवात् ॥" [प्र० वा० ४।२०३] इति ।

तथेदमपि वक्तव्यम्–

धूमादावपि यत्रास्ति प्रतिबन्धः स तादृशः ।
न सोऽपि हेतुर्वक्तव्यो व्यभिचारस्य सम्भवात् ॥१५२५॥ इति

---

१ कारणं लि– आ०,ब०,प० । २ स्वतोपि भावात् आ०,ब०,प० । ३ "नावश्यं कारणानि कार्यवन्ति भवन्तीति सौगतवचनम्"–ता० टि० । ४ "उत्पत्तेरित्ययं शब्दोऽत्रापि सम्बन्धनीयः ।" –ता० टि० । ५ अर्चटस्य । ६ तत्प्रकृतेभा– आ०, ब०, प० ।

तन्नोत्पादकत्वं कारणत्वम्। अस्तु तन्नियामकत्वम्, तन्निवृत्तौ नियमेन तस्यापि निवृत्तेः; इत्यपि न युक्तम्; कारणत्वादन्यभावे तस्याप्ययोगात्।

"तस्मात् तन्मात्रसम्बन्धः स्वभावो भावमेव वा।
निवर्तयेत्कारणं वा कार्यमन्यभिचारतः॥" [प्र० वा०३।२२] इति वचनात्।

भवतु कारणत्वस्योक्तसमाधित्वात् स्वभावत्वादेव तस्य तन्नियामकत्वमिति चेत्, न; तन्मात्रसम्बन्धाभावात्। न ह्यव्यभिचारमात्रस्य तेन व्याप्तिः; असत्यपि तस्मिन् रूपादौ तद्भावात्। ततो यदुक्तम्–"यस्य येन सह तादात्म्यतदुत्पत्ती न स्तो न स तदविनाभावी यथा प्रमेयत्वादि (दे) नित्यत्वादिना, न स्तश्च केनचित्तादात्म्यतदुत्पत्ती स्वभावकार्यव्यतिरेकिणामर्थानामिति व्यापकानुपलब्धिः" [हेतुवि० टी० पृ०९] इति; तत्प्रतिविहितम्; तदभावेऽपि रसादे रूपादन्यविनाभावव्यवस्थापनेनानुपलब्धेर्व्यभिचारात्। तन्न नियामकत्वमपि कारणत्वम्। ज्ञापकत्वं तु प्रागेव प्रतिविहितम्। ततो न किञ्चिदपि कारणार्थमुत्पश्यामः। ततः स्थितं रसादेरकार्यस्यापि हेतुत्वान्न त्रैविध्यमिति।

तथा अवाग्भागसास्नादेरपि। न हि तस्यापि परभागविषाणादिकार्यत्वं तुल्यकालत्वाविशेषात्। तथापि कार्यमेव सत्येव तस्मिन् भावादिति चेत्; न किञ्चिदिदानीमकार्यलिङ्गं सर्वस्य साध्ये सत्येव भावात्। अभेदे स्वभावहेतुरपीति चेत्; न; तदा हेत्वधिगमेनैव साध्यस्याप्यधिगमात्, अन्यथा भेदापत्तेः। न कृतकत्वादेस्तदव्यतिरिक्तमनित्यत्वं साध्यम्, अपि तु तद्व्यवहारस्तदन्यव्यवच्छेदो वेति चेत्; सिद्धं तर्हि तस्य तत्कार्यत्वं व्यतिरेके सत्यविनाभावादिति न स्वभावहेतुर्नाम कश्चित्। [1]किञ्चैवं कार्यत्वकल्पनेन? अविनाभावनिर्णयादेव गमकत्वोपपत्तेः। ततो न तुलोन्नामादीनां तदुत्पत्त्या गमकत्वम्। नापि तादात्म्येन; तदभावात्। कथं पुनस्तदभावो यावता तुलादिद्रव्यादव्यतिरेकादस्त्येव कथञ्चित् तेषामन्योऽन्यमपि तादात्म्यमिति चेत्; अत्राह–

तादात्म्यं तु कथञ्चित् स्यात् ततो हि न तुलान्तयोः॥१७०॥ इति।

तुलान्तयोरुन्नामावनामवतोस्तुलाग्रयोः **तादात्म्यमभेदो न तु** नैव [2]तोरवधारणार्थत्वात्। कुत एतत्? **ततः** तस्मात् तुल्यकालत्वात् **हि** स्फुटम्। न हि तादात्म्ये तुल्यकालत्वं तस्य [3]भेदित्वनिष्ठत्वात्। सर्वथा भेद एव तद्विरुद्धं न कथञ्चिदिति चेत्; न; तथा स्वमतव्यापत्तेः, एकान्तनिरंशक्षणक्षीणस्वलक्षणवादविलोपस्यावश्यम्भावात्। ततः'**कथञ्चित्**' इत्यत्र **अपि**शब्दो द्रष्टव्यः, ततः **कथञ्चिदपि** न केवलं सर्वथा **स्यात्** भवेत् तादात्म्यं तुलान्तयोः। नत्विति सम्बन्धः। न केवलं तुल्यकालत्वात् कथञ्चिद्भावे चानिष्टापत्तेस्तुलान्तयोरेव न तादात्म्यमपितु अन्येषामपीत्याह–

"[5]सास्नाविषाणयोरेवं चन्द्रार्कपरभागयोः। इति।

प्रसिद्धार्थमेतत्। तदेवमुन्नामादेरकार्यस्वभावस्यापि लिङ्गत्वोपपादनेन त्रैविध्यनियमं प्रतिपिप्य पात्रकेसरिस्वामिनापि तन्नियमः प्रतिषिद्ध इति दर्शयँस्तद्वचनमाह–

---

१ किं चैवं आ०, ब०,प०। २ तुशब्दस्य। ३ भेदित्वबदनिष्ठ–आ०,ब०,प०। भेदनिष्टत्वात्। ४ सर्वदा स्वा– आ०, ब०, प०। ५ सास्नादीनां च–आ०, ब०, प०।

उपलब्धेश्च हेतुत्वादन्तर्भावात् स्वभावतः ॥१७१॥
तयोरनुपलम्भेषु नियमो न व्यवस्थितः । इति ।

उपलब्धेः उपलम्भस्य न केवलं कार्यादेरेवेति । अपिशब्दार्थः चशब्दः । हेतुत्वात् गमकत्वात् नियमः कार्यादिभेदेन त्रिविधमेव लिङ्गमित्यवधारणं न व्यवस्थितः । न हि कार्यादेरन्यस्यापि हेतुत्वे तन्नियमोपपत्तिः । अस्ति च तस्या हेतुत्वम् 'अस्त्यात्मोपलब्धेः' इत्यात्मसद्भावस्य ततः प्रतीतेः । आत्मनो यद्यन्यतः प्रतिपत्तिरस्ति किमुपलब्ध्या कर्तव्यं सिद्धोपस्थायित्वात् ? अथ नास्ति न तस्या हेतुत्वमाश्रयासिद्धेरिति चेत्; भवेदेवं यद्याश्रयबलेन गमकत्वम् । न चैवम्, अन्यथानुपपत्तित एव तद्भावात् । निवेदितं चैतत्–'असिद्धधर्मिधर्मत्वेऽपि'[1] इत्यादिना[2] । कथं पुनस्तदपरिज्ञाने कुतश्चित्तदन्यथानुपपत्तेरप्यवगमः ? इत्यपि न चोद्यम्; कार्यादावपि तत्प्रसङ्गात् । अप्रतिपन्नेऽपि साध्ये तस्य तत्स्वभावत्वात् भवत्येव परिज्ञानम्' इत्यपि समाधानम् उपलम्भेऽपि न विमुखभावमाविर्भावयति । कथं पुनरुपलब्धेर्गमकत्वं व्यभिचारस्यापि दर्शनात् ? न ह्युपलब्धिरित्येव भावास्तथा भवन्ति विभ्रमाभावापत्तेरिति चेत्; नः[3] तन्मात्रस्य हेतुत्वानभ्युपगमात्, अन्यथानुपपत्तिसंवलितशरीराया एव तस्यास्तदभ्यनुज्ञानात् । न च तस्या व्यभिचारोऽनुपलब्धिवत् । का पुनरियमुपलब्धिर्यतस्तदस्तित्वं साध्यत इति चेत् ? इयमेव येयं तत्र तत्र बुद्धिर्विवर्तेष्वन्वितरूपतया अहमिति प्रतिभाति । न तत्र कश्चिदात्मा नाम तद्व्यतिरिक्तः प्रतिभातीति चेत्; सत्यम्; तस्या एवात्मत्वोपगमात् । न चैवमुपलब्धेर्वैयर्थ्यम्; व्यवहारसाधनार्थत्वादनुपलब्धिवत् । एवमप्युपलब्धेस्तद्विषयाविष्वग्भावेन स्वभाव[4] एवान्तर्भावात् कथं तया [5]नियमाव्यवस्थितिरिति चेत्: अनुपलब्धिवत् [6]साध्यभेदेनेति ब्रूमः । ततो भवत्येव तया तदव्यवस्थितिः अन्यथाऽनुपलब्धेरपि तत्रैवानुप्रवेशात् द्वैविध्यमेव स्यात् । तथा तयोः कार्यस्वभावयोः स्वभावतः स्वरसतोऽन्तर्भावादनुप्रवेशात् । क ? अनुपलम्भेषु त्रैविध्यनियमो न व्यवस्थितः सर्वस्यानुपलम्भत्वेन ऐकविध्यस्यैवोपपत्तेः । तथा हि–परस्यायं स्वभावहेतुः अनित्यः शब्दः प्रयत्नान्तरीयकत्वादिति । तत्र प्रयत्नानन्तरीयकत्वं यदि प्रयत्नानन्तरं निष्पत्तिः; इयं विरुद्धव्याप्तोपलब्धिरेव नित्यत्वविरुद्धेन अनित्यत्वेनास्य व्याप्तत्वात् । अथ तज्ज्ञानम्; तथापि विरुद्धकार्योपलब्धिरेव तस्य नित्यविरुद्धानित्यकार्यत्वात् । ततः कथमनुपलम्भेषु तयोरन्तर्भावो विरुद्धविधेरनुपलम्भभेदत्वेन स्वयमभ्युपगमात् । बहुवचनं कार्यादिबहुत्वेन तद्रूपानुपलम्भानामपि बहुत्वात् ।

स्यान्मतम्–यदा निषेधपरः प्रयोगो न नित्य इति तदा भवतु तत्रान्तर्भावः, यदा तु विधिपर एव अनित्य इति तदा स्वभावादित्वेन तयोर्हेतुत्वान्न तन्नियमाव्यवस्थितिरिति, तन्न; सर्वदा लिङ्गस्य सामान्यविषयतया तन्निषेधपरतयैवावस्थानात्, अन्यथा तद्विषयत्वायोगात् । न हि सामान्यं नाम अन्यव्यवच्छेदादपरं परस्य सम्भवति । तथा चोक्तम्[7]– "अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात् ।" [ ] इत्यादि । विधिपरत्वे वा कथन्न वस्तुविषयत्वम् ? इष्टमेव[8] लेशतस्त-

---

१ न्यायवि०श्लो० २।६। २ उपलब्धिमात्रस्य । ३ "स्वभावहेतौ"–ता०टि० । ४ "वैविध्यनियमाव्यवस्थितिः" –ता०टि० । ५ साध्याभेदेनेति आ०,ब०,प०। ६ "यदुक्तं धर्मकीर्तिना–अतद्रूपपरावृत्त..." –अष्टसह० पृ०२८ । "आह चात्र–अतद्रूप"–प्र० वार्तिकाल० १।२। ७ –व तत्तदर्शीति आ०,ब०, प०।

दपीति चेत्; न; निरंशे वस्तुनि लेशाभावात् । तत एवोक्तम्–"एकस्यार्थस्वभावस्य" [प्र० वा० ३।४२] इति । यद्येवमिदं कथमुक्तम्–"वस्तुलेशस्य चाश्रयः" [ ] इति ? पर एवेदं प्रष्टव्यो य एवमन्योऽन्यव्याहतमभिव्याहरति । ततः प्रतिषेधपर एव प्रयोगो युक्तः । कार्यहेतोरपि सामान्यविषयस्यातत्परतयैव स्वयं प्रतिज्ञानात् । ततो न सङ्गतमिदम्–"तत्र द्वौ वस्तुसाधनौ" [न्यायवि० पृ० ३९] इति । न न सङ्गतम्; तद्विषयस्य सामान्यस्य वस्त्वेकत्वाध्यवसायादिति चेत्; न; अनुपलम्भस्यापि तत्साधनत्वापत्तेः । अभावस्यापि भावाव्यतिरेकिण एव लौकिकैर्व्यवसायात् । तत इदं व्याहतम्–"एकः प्रतिषेधहेतुः" [न्यायवि० पृ० ३९] इति । ततोऽनुपलम्भत्वेन सर्वस्यापि प्रतिषेधहेतुत्वादसङ्गतमेव तत्रेत्यादि ।

पुनरपि [1]नियममेव विधुरयितुं लिङ्गान्तरमुपदर्शयन्नाह—

अभविष्यत्यसम्भाव्यो धर्मो धर्मान्तरे क्वचित् ॥१७२॥
शेषवद्धेतुरन्योऽपि गमकः सुपरीक्षितः । इति ।

धर्मः कृत्तिकोदयादिः क्वचित् कस्मिंश्चित् धर्मान्तरे शकटोदयादौ साध्ये हेतुः । कीदृशः ? अभविष्यति अजनिष्यमाणे धर्मान्तरे तस्मिन् असम्भाव्योऽसम्भवितया[2] कल्पनीयः तदविनाभावितया निश्चित इति यावत् । कथं हेतुः ? शेषवत् शेषं परोक्तात् कार्यत्वादन्यदकार्यत्वादि तद्वद्यथा भवति । कार्यमेव कृत्तिकोदयः शकटोदयस्येति चेत्; कुत एतत् ? तत उत्पत्तेरिति चेत्, न; ततः प्रागेव निष्पत्तेः । निष्पन्ने च किं तेन कर्तव्यम् ? अकिञ्चित्करस्य कारणत्वेऽतिप्रसङ्गात् । तदविनाभावात् तत्कार्यमिति चेत्; नन्वेवमपि तस्य स्वभाव एव स्यात्, साध्यस्य तस्मिन्नर्थान्तरनिरपेक्षत्वेन भावात् अन्त्यक्षणप्राप्तकारणवत् । अन्यथा तत्कारणस्यापि कार्यत्वादेव लिङ्गत्वोपपत्तेः किमिति स्वभावत्वेन तदुपपादितं यत इदमर्थवत्–

"हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः ॥" [प्र०वा० ३।६] इति ।

[3]कीर्तिनैव तथा तदुपपादितं न प्रज्ञाकरेण भाविकारणवादिनेति चेत्; किं पुनः[4] कीर्तिस्तद्वादी न भवति ? तथा चेत्; कथं तद्ग्रन्थ एव "सत्तोपकारिणी" [प्र०वा० १।५१] इत्यादिस्तद्वादपरतया अलङ्कारकृता व्याख्यातः[5] ? तदपि तस्यानभिप्रेतार्थमेव व्याख्यानमिति चेत्; नेदानीं तत्कारणत्वं शास्त्रार्थः शास्त्रकारानभिप्रेतत्वादिति कथं तद्बलेन तदुदयस्य लिङ्गान्तरत्वप्रतिक्षेपान्नियमविघाते तत्प्रत्यवस्थानम् ? कथं वा तन्मतमुपपादयितुं प्रवृत्तेन तदनभिप्रेतस्य क्वचिदुपपादनं नित्यादेरपि प्रयोजनवशात् क्वचित् तत्प्रसङ्गात् । भवत्येव कीर्तिरपि तद्वादी,तथापि नान्त्यकारणस्य स्वभावत्वकल्पनं व्याहतं तत्र उभयधर्मसद्भावादिति चेत्; तथापि कथं तन्नियमः ? केवलात् कार्यात् स्वभावाच्च तदुभयात्मनस्तस्य

---

१ नियमेन आ०,ब०,प० । २ –यावक– आ०,ब०, प० । ३ धर्मकीर्तिना । ४– नः स की– आ०, ब०, प० । ५ भाविकारणवाद । ६ "तदेतदानन्तर्यमुभयापेक्षयापि समानम्, यथैव भूतापेक्षया तथा भाव्यपेक्षयापि । न चानन्तर्यमेव तत्त्वे निबन्धनं व्यवहितस्यापि कारणत्वात् ।" –प्र० वार्तिकाल० १।५१ ।

हेत्वन्तरत्वात् । भवतु स्वभाव एव कृत्तिकोदयादिरपीति चेत्; न; धूमादेरपि तत्त्वप्रसङ्गात्, अविनाभावस्य तद्व्यवस्थाहेतोः तत्रापि भावात् । भेदप्रतिभासान्नेति चेत्; तदुभयादेरपि न भवेदविशेषादिति सूक्तम्–'शेषवत्' इति । तद्वद् **अन्योऽपि** कृत्तिकोदयादेरपरोऽपि [1]पक्ष्यादिरपि **गमकः** प्रत्यायकः साध्यस्य । कीदृशः ? **सुपरीक्षितः** सुष्ठु साध्यनिष्ठानियमवत्त्वेन परीक्षितः तर्केण विचारित इति । अस्ति ह्याकाशे पक्षिदर्शनात् अधः छायामण्डलस्य, तद्दर्शनाच्चोपरि पक्षिणः प्रतिपत्तिः । न ह्यत्र कार्यत्वम्; तुल्यकालत्वात् । न स्वभावत्वम्; भिन्नदेशत्वात् । परीक्षया तु अविनाभावाद् गमकत्वमतो न [2]तन्नियमः । सत्यप्यत्र कार्यादित्वे न तद्व्यवस्थितिः, पक्षधर्मत्वैकल्येन तद्गतोऽस्य भेदात्, न ह्यत्र पक्षिणः पक्षधर्मत्वम्; भूप्रदेशे तस्यासम्भवात् । तस्य[3] हि पक्षत्वं छायावत्त्वेन साधनात् । नापि तन्मण्डलस्य; आकाशे तस्याभावात् । न च भूप्रदेशाकाशसमुदायस्य[4] पक्षत्वम्; तत्र हि अत्रेति निर्देशः स्यात् साध्यस्य न पुनर्यत्र लिङ्गं तत ऊर्ध्वमधस्ताद्वेति । तथैव च तत्प्रतिपत्तिर्दृश्यत इति । १०

साम्प्रतं नैयायिकादिकल्पितमपि तन्नियममतिदेशेन विधुरयन्नाह–

एतेन पूर्ववद्वीतसंयोग्यादौ कथा गता ॥१७३॥ इति ।

पूर्ववद्वीतसंयोगिशब्दानामादिशब्देन बहुव्रीहिः । तस्य च प्रत्येकमभिसम्बन्धात् पूर्ववदादिः वीतादिः संयोग्यादिरिति[5] भवति । [6]तत्राद्येन शेषवत्-सामान्यतोदृष्टयोः, द्वितीयेन अवीतवीतावीतयोः, तृतीयेन समवाय्येकार्थसँमवाय्य (यि) विरोधिनामवरोधः, तस्मिन् **पूर्ववद्वीतसंयोग्यादौ** या **कथा** हेतुत्वनियमान्वाख्यानं सापि **एतेन** पूर्वोक्तेन न्यायेन **गता** निवृत्ता । नह्येवं नियमः–'पूर्ववदादिरूपेण त्रिविधमेवानुमानम्' इति; अधिकस्यापि कस्यचिद्भावात् । तथा हि–पूर्ववदिति कारणात् कार्यस्यानुमानम्, पूर्वं कारणमस्यास्तीति व्युत्पत्तेः । शेषवदिति कार्यात् कारणस्य, कार्यस्यैवोपयुक्तकारणादन्यतया शेष[7]शब्देनाभिधानात् । सामान्यतोदृष्टमिति चाकार्यकारणादकार्यकारणस्य । न च 'अस्त्यात्मा उपलब्धेः' इत्यादि सत्तासाधनम् एतेषामन्यतममपि; सामान्यतोदृष्टेऽपि तस्यापक्षधर्मत्वादित्वेनानन्तर्भावात् । तद्गमकत्वस्य च समर्थितत्वात् । २०

किञ्च, पूर्ववदादेर्गमकत्वं त्रैरूप्यात्, पाञ्चरूप्याद्वा, तदन्यतरत्रैवाविनाभावपर्यवसानादिति स्वयमभ्युपगमात् ? तथा च यदेतत् पूर्ववतो भाष्यकारेणोदाहरणमुक्तम्–"**मेघोन्नत्या भविष्यति वृष्टिः**" [न्यायभा० १।१।५] इति, तत्कथं गमकम् अपक्षधर्मत्वात् ? नह्यत्र वृष्टेः पक्षत्वम् असिद्धेः, सिद्धौ चानुमानवैफल्यात् । मेघस्य च सिद्धत्वेऽपि न पक्षत्वम्, असाध्याधिकरणत्वात् । न हि वृष्टेस्तदधिकरणत्वं भावित्वात् । यत् पुनरत्र विश्वरूपेण समाधानमुक्तम्–"**कारणस्यैव मेघादेः सिद्धत्वात् धर्मित्वं तद्वृष्ट्युत्पादकत्वं साध्यो धर्मः उन्नतत्वादिना तद्धर्मेणैवानुमीयते ।**" [ ] इति; तन्न सम्यक्; न ह्येवमपि कारणे पक्षधर्मत्वस्यावस्थापनमपि तु तद्धर्म एवोन्नतत्वादौ ।

---

१ पक्षादिरपि आ०, व०, प० । २ त्रैविध्यनियमः । ३ तस्य प्रत्यक्ष ह्या– आ०, व०, प० । भूप्रदेशस्य । ४ –स्य सप– आ०, व०, प० । ५ न हि तर्ह्यत्र प० । ६ –ति प्रभ– प० । ७ –समवायवि– प० । ८ –मित्यादिकस्या– आ०, व०, प० । ९ द्रष्टव्यम्– न्यायभा०, न्यायवा०, न्यायवा० ता०१।१।५। १० शेषवत्त्वेनाभि– आ०, व०, प० ।

तदपि न कार्ये साध्ये किन्तु कारणधर्म एव तदुत्पादकत्वे । तथा चान्यत्र प्रश्ने अन्यत्रोत्तरं ब्रुवतः पश्यत विश्वरूपस्य न्यायकौशलम् ! भाष्यविरोधश्चैवम्–तत्र कारणेन कार्यस्यैवानुमानवचनान्न कारणधर्मेण तद्धर्मान्तरस्य । तेन तदन्तरानुमानमेव कार्यानुमानं भाष्यस्याप्येवमभिप्रायत्वादिति चेत्, कथं पुनः तदुत्पादकत्वस्यानुमानं वृष्टेः ? न तावदभेदात्; कार्यस्य कारणधर्मादवश्यन्तया भेदात् । अविनाभावादिति चेत्; व्यर्थमिदानीं तदुत्पादकत्वस्याप्यनुमानम् उन्नतत्वादितल्लिङ्गज्ञानस्यैव तज्ज्ञानत्वोपत्तेरविनाभावाविशेषात् ।

लिङ्गज्ञानस्य तत्साध्यज्ञानत्वे प्रलयं व्रजेत् ।
सिद्ध्यत्यत्रैवानुमानं त्रैविध्यं यत्र कथ्यते ॥१५२६॥

तदुत्पादकत्वात् वृष्ट्यनुमानोपपत्तेः तदनुमानमेव वृष्ट्यनुमानमुच्यत इति चेत्; ततोऽपि कथं व्यधिकरणात् तदनुमानम् ? उन्नतत्वादिवत्ततोऽपि कारणधर्मस्यैवापरस्यानुमानेन तदनुमानकल्पनायां चानवस्थापत्तेः । तन्नाविनाभावात्तदनुमानमेव वृष्ट्यनुमानम् । तद्विशिष्टत्वादिति चेत्; स्यादेतत् वृष्ट्युत्पादकत्वं वृष्टिविशिष्टम् अतः तज्ज्ञानमेव वृष्टेरपि ज्ञानमिति; तन्न; ततोऽपि भेदस्यानपाकरणात् । नहि तद्विशिष्टमित्येव तस्य ततोऽनर्थान्तरत्वम्; तद्विशिष्टत्वस्यैवाभावप्रसङ्गात् । तदनपाकरणे तु कथं तज्ज्ञानं तदर्थान्तरस्य विशिष्टस्य विशेषणापेक्षणादिति चेत्; एवमपि भवति तज्ज्ञानाद्विशेषणस्यानुमानं न तु तदेव तस्येति अन्यथा कारणस्यापि कार्यापेक्षत्वात् तज्ज्ञानमेव कार्यस्यापि ज्ञानमिति व्यर्थं पूर्ववल्लिङ्गकल्पनं भवेत् । अनुमानं तु ततस्तस्यानवस्थयैव दत्तोत्तरम् । तन्न तदुत्पादकत्वानुमानमेव वृष्टिपरिज्ञानम् । ततो दुर्भाषितमिदं परस्य–"भविष्यद्वृष्ट्युत्पादकत्वं धर्मो यदानुमितं तदा वृष्टेरनुमानं कथ्यते ।" [ ] इति ।

यदपीदं शेषवत उदाहरणं भाष्ये प्रदर्शितम्–"पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वश्च स्रोतसो [1]दृष्ट्वाऽनुमीयते भूता वृष्टिः [न्यायभा० १।१।५] इति । अत्रापि विश्वरूपेण तात्पर्यमुक्तम् –"नदीशब्दवाच्यो गर्तविशेषो धर्मी तस्य उपरि वृष्टिमद्देशसम्बन्धित्वं साध्यो धर्मो धर्मिगतेन पूर्णत्वादिना धर्मेणानुमीयते ।"[ ] इति । तत्रापि तदेव वक्तव्यम्–कथं पुनः कार्यधर्मस्यैवानुमानं तदर्थान्तरस्य भूताया वृष्टेरपीति ? अविनाभावादिति चेत्; उक्तमत्र लिङ्गज्ञानस्येत्यादि । ततः पुनस्तदनुमानेऽप्यभिहितमेवानवस्थानं विशिष्टस्य तद्धर्मस्य तद्वृष्टिविशेषणापेक्षत्वादित्यपि प्रतिविहितम् 'एवमपि' इत्यादिना । तन्न उपरिवृष्टिमद्देशसम्बन्धित्वपरिज्ञानमेव भूतवृष्टिपरिज्ञानमप्युपपन्नम् ।

यदपि सामान्यतोदृष्टस्य भाष्ये प्रतिपादितम्–आदित्यव्रज्यानुमानमुदाहरणप्रतिनिधित्वेनावस्थाप्य [4]स्वयमुदाहरणमुक्तं रूपेण स्पर्शानुमानमिति; तत्रापि पक्षधर्मत्वादिकमपेक्षितव्यम्, अन्यथाऽविनाभावाभावेन गमकत्वायोगात् । सत्यम्, अपेक्ष्यत एव, रूपमिदं स्पर्शाविनाभावि रूपत्वात् प्रतिपन्नरूपवदिति तत्प्रवृत्तेरिति चेत्; तर्हि तदेवात्रापि वक्तव्यम्–कथन्नाम रूपस्य स्पर्शाविनाभावित्वस्य परिज्ञानं तदर्था-

१ –ष्टस्यै– आ०, ब०, प० । २ कारणज्ञानमेव । ३ दृष्टावनुमी– आ०, ब०, प० । ४ विश्वरूपेण ।

न्तरस्य स्पर्शस्येति ? अविनाभावादेः पूर्ववदेव प्रत्यवस्थानम् । भवतोऽपि कथं धूमोऽयमग्निमान् धूमत्वादित्यग्निमत्त्वज्ञानमेवाग्निज्ञानमिति चेत् ? अग्नितद्धर्मविषयतया लिङ्गादेव तस्योत्पत्तेः । न चैवं भवन्मते सम्भवति; लिङ्गस्य अन्यपेक्षया व्यधिकरणत्वेनापक्षधर्मत्वात् । स्याद्वादिमते तु अपक्षधर्मस्यापि गमकत्वात् । न चाविनाभावस्य पक्षधर्मत्वादावेव पर्यवसायः; 'सन्ति प्रमाणानि इष्टसाधनात्, उदेष्यति शकटं कृत्तिकोदयात्' इत्यादौ तदभावेऽपि भावात् । तन्न कारणादिभेदेन लिङ्गत्रैविध्यस्य सम्भव इति । ५

वार्तिककारेण तु 'पूर्ववच्छेषवत् सामान्यतो दृष्टम्' इत्येतदेवं त्रिसूत्रीकृत्य तद्विषयतया अन्वय्यादिभेदेन त्रैविध्यं लिङ्गस्योक्तम् । तत्र पूर्ववच्छेषवदित्येकं सूत्रम् । पूर्वशब्दः पक्षवाची पक्षस्यैव कथात्रयेऽपि पूर्वमभिधीयमानत्वेन पूर्वत्वात्, सं व्याप्त्या विद्यतेऽस्येति पूर्ववत् पक्षे विद्यमानमित्यर्थः । शेषः सपक्षः तस्यैव लिङ्गाङ्गत्वेन प्रस्तुतयोः पक्षसपक्षयोः पक्षस्योपयोगे सत्युद्धरितत्वेन शेषत्वोपपत्तेः स विद्यतेऽस्येति शेषवत्, सपक्षे देशतः कात्स्न्र्यतो वा विद्यमानमिति १० यावत् । अनेनान्वयी हेतुरुक्तः । पूर्ववत्सामान्यतोऽदृष्टमिति द्वितीयम् । पूर्ववदिति व्याख्यातम् । विपक्षे सामस्त्येनान्यथा वा यत्र दृष्टं तत् सामान्यतोऽदृष्टम् अनेन व्यतिरेकिसाधनमभिहितम् । पूर्ववच्छेषवत्सामान्यतोऽदृष्टमिति तृतीयम् , अनेन चान्वयव्यतिरेकीति । तत्र सपक्षैकदेशवृत्तेरन्वयिन उदाहरणम्—परमाण्वादयः कस्यचित् प्रत्यक्षाः सत्तासम्बन्धित्वात् घटादिवत् । तद्वृत्तित्वं चास्य घटादावेव सपक्षे भावात्, सपक्षेऽपि सामान्यादौ विपर्ययात् । न चेदमत्राशङ्कनीयम्—'त्रैरूप्यादेरत्रास- १५ मग्रत्वादहेतुत्वमन्वयिन इति; तत्समग्रताया अन्वयव्यतिरेकिण्येवाभ्युपगमात्, इतरयोस्तु यथासम्भवं तदुपगमात् । अत एव चित्रभानोर्वचनम्—"**अन्वयादीनि रूपाणि साकल्येन अन्यतमवैकल्येन वा यत्र सन्ति तदनुमानम्**" [ ] इति । तत्रोच्यते—यद्यन्वयिनोऽविनाभावो नास्ति कथं गमकत्वं व्यभिचारसम्भवात् ? अथास्ति; क तस्य प्रतिपत्तिः ? पक्षधर्म एव तस्याबाधितविषयत्वासत्प्रतिपक्षत्वाभ्यां प्रतीयमानस्याविनाभावितयैव प्रतिपत्तेरिति चेत्; न किञ्चिदिदानीं २० सपक्षे सत्त्वेन ? अविनाभावाधिगमादेव हेतोर्गमकत्वात् । तस्य च विनैव तेन भावात् । भवतु सपक्षे सति तत्प्रतिपत्तिरिति चेत् ; न तत्राप्यन्वयस्यैव सति सत्त्वलक्षणस्य प्रतीतेर्नाविनाभावस्य । न चान्वय एवाविनाभावः असत्यसत्त्वस्य तत्त्वात्, अभावस्य च भावभेदिन एवाभ्युपगमात् । अथाबाधितविषयत्वादिकमेव अविनाभावित्वम्, तच्चान्वयिनः स्वरूपमेव, ततः सपक्षे तत्प्रतिपत्तिरेवाविनाभावित्वस्यापि प्रतिपत्तिरिति; तत्रोच्यते—किं तद्विषयत्वादिना तस्याक्षेपात्तदेव तदित्युच्यते, किं वा ततोऽर्थान्तरं तन्नेति ? २५ प्रथमविकल्पे कथमाक्षिप्तविनाभावस्यैवान्वयस्य प्रतीतेः अन्वयव्यतिरेक्येवायं हेतुर्न भवेत् ? अविनाभा-

---

१ मतेनास्त्वत्त्व- आ०, व०, प० । २- व सू- आ०, व०, प० । ३ "त्रिविधमिति अन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति"—न्यायवा० पृ० ४० । तुलना-"तदनेन न्यायवार्तिकटीकाकारव्याख्यानमनुमानसूत्रस्य त्रिसूत्रीकरणेन..."-त० श्लो० पृ० २०६ । प्रमेयक० पृ० ३६२ । ४ वादजल्पवितण्डालक्षणकथात्रयेऽपि । तथाऽत्र योपि आ०, व०, प० । ५ सत्त्वव्या- आ०, व०, प० । ६ अवशिष्टत्वेन । ७ सपक्षैकदेशवृत्तित्वम् । ८ तत्र सम- आ०,व०,प० । ९ अन्वय्यादी- ता० । १०—क्षे तत्र- आ०, व०, प० । ११ अविनाभावत्वात् । १२ कथमाक्षिप्तौ वि- आ०, व०, प० ।

वस्य व्यतिरेकत्वात् । अन्वयिनि तदाक्षेपरहिते निदर्शनान्तरे तदप्रतिपत्तेरिति[1] चेत्; अन्वय्यपि न भवेत् घटादौ अनाक्षिप्तव्यतिरेके अन्वयस्याप्यप्रतिवेदनात् । अन्वयस्य प्राधान्यात् अन्वय्येवायमिति चेत्; न; साध्यप्रतिपत्तावविनाभावस्यैव प्राधान्यात्, सत्येव तस्मिन् व्यभिचारनिवृत्तेर्निर्णयात् । तदाक्षेपकत्वेन दृढमन्वयस्यैव प्राधान्यमिति[2] चेत्, अस्तु तर्हि पक्षधर्मस्यैव प्राधान्यम्, असति तस्मिन् अन्वयस्याकिञ्चित्करत्वात् । ततो न तदाक्षेपात् तदेव तदित्युपपन्नम् । नापि ततोऽर्थान्तरं तन्नेति; व्यतिरेक्यादौ अर्थान्तरस्यैव तस्य भावात् । विपक्षव्यावृत्तिरूपं खल्वविनाभावित्वमेव तत्र व्यतिरेकः । तच्चाबाधितविषयत्वादेः अर्थान्तरमेव, अन्यथा रूपभेदेन लिङ्गलक्षणत्वानुपपत्तेः । तत्राप्यबाधितविषयत्वादिकमेवाविनाभावित्वं विपक्षव्यतिरेकस्तु तन्निर्णयार्थ एवेति चेत्; कुतस्ततस्तस्य निर्णयः ? सति तस्मिन् तस्यावश्यम्भावात्; तर्हि साध्यस्यैव स्यात् तदविशेषात्, तत्किमन्तर्गडुनाऽबाधितविषयत्वादिना साध्यसद्भावनियमाभावे तस्यापि दुर्लभत्वात् । ततस्तस्मादर्थान्तरमेवाविनाभावित्वम्, तस्य चान्वयिन्याक्षेपे अन्वयव्यतिरेकित्वमेव तस्य नान्वयित्वम् ।

असिद्धत्वाच्च[3] । तच्च अर्थान्तरस्य सत्तायास्तत्सम्बन्धस्य च प्रतिक्षिप्तत्वात् । सिद्धस्यापि न गमकत्वं व्यभिचारात् । सँ च तेनैव प्रत्यक्षेण, यद्विषयत्वं साध्यं परमाण्वादीनाम्, सत्यपि तस्यँ सत्तासम्बन्धित्वे प्रत्यक्षत्वाभावात् । प्रत्यक्षमेव तदप्यन्येन प्रत्यक्षेणेति चेत्; तेन तर्हि व्यभिचारः स्यात् । तस्यापि तदन्तरेण प्रत्यक्षत्वे तदेव वक्तव्यमनवस्थानं च । तेन सर्वस्य[5] प्रत्यक्षत्वम्, तस्य त्वन्येन तन्नानवस्थानमिति चेत्; न; तेन स्वविषयस्य प्रत्यक्षत्वे स्वरूपवेदनप्रसङ्गात् । [6]न हि स्वरूपमप्रतिपद्यमानं तद्विषयतया परं प्रत्यक्षयितुमर्हति । भवतु तर्हि स्वत एव तस्य प्रत्यक्षत्वमिति चेत्; न; स्वसंवेदनस्यासन्निकर्षजत्वेनाप्रत्यक्षत्वे ततः कस्यचित् प्रत्यक्षत्वानुपपत्तेः । परप्रसिद्ध्या प्रत्यक्षमेव स्वसंवेदनं स्पष्टावभासित्वादतो न व्यभिचार इति चेत्; [7]स्वप्रसिद्ध्या तर्हि तदभावाद्व्यभिचारश्चेति दुस्तरं व्यसनमापतितम् । तन्नेदमुदाहरणमुपपन्नम् ।

यदप्यन्वयिनः [8]सपक्षव्यापिनस्तदुपदर्शितम्—परमाण्वादयः कस्यचित् प्रत्यक्षाः प्रमेयत्वात् कुम्भादिवदिति; तदपि न युक्तम्; व्यभिचारस्य तत्राप्यविशेषात् । अपि च, यदि [10]प्रमितिरेव प्रमेयत्वम्; न पक्षधर्मत्वम्, तस्याः प्रमातृनिष्ठत्वेन परमाण्वादिष्वभावात् । तत्सम्बन्धः तदिति चेत्; तस्य यदि प्रत्यक्षत्वेऽपि न प्रमेयत्वं न सपक्षव्यापित्वं प्रमेयत्वे[11] तत्राप्यपरस्तत्सम्बन्धः तस्यापि प्रमेयत्वे[12] पुनरपरस्तत्सम्बन्धः इत्यपर्यवसायी तत्प्रबन्धः प्राप्नुयात् । न चैवं प्रतीतिः प्रमेयत्वस्यानवस्थितेः । अथ स एव न स्वप्रमितिसम्बन्धं तेषां प्रतिपद्यते यतोऽयं प्रसङ्गः, अपि तु पर एव, तेनापि स्वतत्सम्बन्धस्य न प्रतिपत्तिः, ततोऽपि परेणैव प्रतिपत्तेरिति; तन्न; स्वयमप्रमितस्याज्ञातासिद्धत्वप्रसङ्गात्[13] । अस्त्येव वादिना परमाण्वादिषु तस्य प्रतिपत्तिस्तत्सम्बन्ध एव तस्य तेनाप्रतिपत्तिरिति चेत्;

१–त्तिरि–आ०, व०, प० । २ चेत्तर्हि आ०, व०, प० । ३–च्च तदर्था– आ०,व०, प० । ४ व्यभिचारः । ५ कस्यचित् प्रत्यक्षस्य । ६ वस्तुनः । ७ तर्हि आ०, व०, प० । ८ परप्र– आ०, व०, प० । ९ स्वप–आ०,व०,प० । १० प्रमितेरेव प० । ११–यत्वात् आ०, व०, प० । १२– त्वेन प– आ०, व०, प० । १३ –द्धस्यासिद्धत्वप्र– आ०, व०, प० ।

न; पक्षीकृते तत्रापि तदप्रतिपत्तौ तदवस्थत्वात् भागतस्तदसिद्धत्वस्य। तदपक्षीकरणे तु नात्र कस्यचिदिति सर्वदर्शी निर्दिष्टः स्यात्, भवतु कस्यचित् सातिशयज्ञानस्य योगिन एव तथानिर्देश इति चेत्; न; अत्रापि व्यभिचारसम्भावनस्यानिवृत्तेः। शक्यं हि वक्तुं यथा तस्य विद्यमानोऽपि तत्सम्बन्धो न प्रत्यक्षस्तथा परमाण्वादयः प्रमेया अपि [२]विरोधाभावात्, कुम्भादौ विद्यमानस्यापि साध्यान्वयस्यास्याप्रतिपत्तेरविशेषात्। ततो योगिनोऽपि स प्रत्यक्ष एव वक्तव्यः इति तस्याप्रमेयत्वे न सपक्षव्यापित्वम्। प्रमेयत्वेऽपि तस्य स्वयमप्रमितौ भागासिद्धत्वम्। प्रमितौ पुनः तत्सम्बन्धस्यापि स्वयमेव प्रमितिः पुनरपि तत्सम्बन्धस्येति कथन्न तस्यापर्यवसायिन एव प्राप्तिः? पर्यवसाने वा तद्वर्तिनस्तस्याप्रमेयत्वमेव प्रत्यक्षत्वेऽपीति न सपक्षव्यापित्वमस्य।

यदपि व्यतिरेकिण उदाहरणमुपपादितम्[४]—नेदं निरात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्, यत्तु निरात्मकं न तत्प्राणादिमत् यथा लोष्टादि, प्राणादिमच्च जीवच्छरीरम्, अतो निरात्मकं नेति; तत्र [५]यद्यात्मा न प्रतिपन्नः कथं 'यत्र नैरात्म्यं न तत्र प्राणादिः' इति तन्निवृत्त्या प्राणादिनिवृत्त्युपदर्शनम्? अप्रतिपन्नस्य निवृत्त्युदर्शनायोगात्। प्रतिपन्नश्चेदन्यतः, व्यर्थमिदम्, अतोऽपि तत्प्रतिपत्तेरेव साध्यत्वात्। उपायवैचित्र्यान्न दोष इति चेत्; भवेदेवं यदि तदनपेक्षयैवायमुपायः स्यात्, न चैवं तदपेक्षयैवात्राप्यात्मनिवृत्त्युपदर्शनात्। अत एव तु तत्प्रतिपत्तौ भवति परस्पराश्रयः—सत्यामतस्तत्प्रतिपत्तौ व्यतिरेकनिर्णीतेः, ततश्च तत्प्रतिपत्तेः। अथ मा भूत् तत्प्रतिपत्तिः, तथापि भवितव्यं तेन विशेषेण यो लोष्टादौ स्वनिवृत्त्या प्राणादीन्निवर्तयति। स्वरसतस्तन्निवृत्तौ जीवच्छरीरेऽपि प्रसङ्गात्। तस्यैव चेह साध्यत्वम्, आत्मव्यपदेशस्यापि तत्रैव करणादिति; तदपि न युक्तम्; चार्वाकदृष्ट्या भूतपरिणामस्य सौगतकल्पनया चित्तसन्तानस्य च तद्विशेषस्य सम्भवात्। तस्य निषेधात्तदन्य एव स विशेष इति चेत्; तन्निषेधोऽपि यद्यन्यत्वमात्रे पर्यवसितः, तस्यैव तन्निवर्तकत्वं नाभिमतस्य। अतत्पर्यवसायित्वे तु सिद्धस्तत एवात्मेति तदवस्थमस्य वैयर्थ्यम्। नन्वतः प्रतीतस्यैव तन्निषेधादपि विशेषावधारणं तत्कथमस्य वैयर्थ्यमिति? तन्न; तथापि साक्षादस्य तत्प्रतिपत्तावनुपायत्वात्। अथ अत एव तन्निषेधसहितात्ततस्तत्प्रतिपत्तिः; न तर्हि पूर्वं विशेषमात्रस्य परिज्ञानमिति कथं निषेधावतारः? तस्य तत्परिज्ञाने पुनस्तद्विशेषप्रतीक्षायामेवोपपत्तेः। कथं वा तत्सहायादपि अतस्तत्प्रतिपत्तिः? कथं च न स्यात्? स्वनिवृत्त्या लोष्टादौ प्राणादिनिवर्तकस्यैव तदुपपत्तेः। न च भवदनुमतस्य तत्रापि निवृत्तिः सर्वगतत्वात्। स्वरूपतस्तदभावेऽपि सम्बन्धविशेषतोऽस्त्येव [६]सेति चेत्; तस्यैव तर्हि साध्यत्वं निवर्तकत्वात्, नात्मनः। सत्यमिदम्, तस्यैवात्मशरीरसंयोगभेदात्मनो जीवच्छरीरे साधनादिति चेत्; कथमात्मनि विप्रतिपत्तौ तमसाधित्वा[७] तद्विशेषस्य साधनम्, आत्मान् पृष्टस्य [८]कोविदाराख्यानवदुपपन्नम्? अप्रस्तुताभिधानेन निग्रहाप्तेश्च। विप्रतिपत्तिरपि तत्रैवेति चेत्; न, तथाप्यात्मन्यसाधिते तत्साधनस्यायोगात्। आत्मगतो हि धर्मस्तत्सिद्धावेव शक्यसाधनो नान्यथा।

---

१ पक्षेकृते आ०, ब०, प०। २ विरोधात् आ०, ब०, प०। ३– न्वयस्य– आ०, ब०, प०। ४ "नेदं निरात्मकं जीवच्छरीरंप्रमाणादिमत्त्वप्रसङ्गात्"। न्यायवा० पृ० ४६। ५ यद्यात्मनप्र– आ०, ब०, प०। ६ निवृत्तिः। ७ तमसावहितत्वात्त– आ०,ब०,प०। ८ 'कचनार' इति भाषायाम्।

प्रमाणान्तरावगतत्वादात्मनो नायुक्तं तत्साधनमिति चेत्; न; तथाप्यतिप्रसङ्गात् । तथा हि—यथा प्राणादेर्घटादिव्यावृत्तस्य दर्शनाज्जीवच्छरीरे तद्विशेषस्य साधनं तथा बालशरीरादिव्यावृत्तस्य विशेषतारतम्याधिष्ठानस्य[1] तस्य युवादिशरीरे दर्शनात् पूर्वपूर्वविलक्षणैः[2] सम्बन्धविशेषस्तत्र साधयितव्यः प्राप्नुयात् । प्राप्नोतु न कश्चिद्दोष इति चेत्; शास्त्रं तर्हि न्यूनं प्राप्तं तथा तस्यानिरूपणात् । न प्राप्तं प्रकृतविशेषनिरूपणादेव तस्यापि तज्जातीयत्वेनाभ्यूहोपपत्तेरिति चेत्; आत्मनिरूपणादेव तर्हि प्रकृतस्यापि तद्धर्मत्वेनाभ्यूहात्तन्निरूपणमपि न भवेत् । तदपि न क्रियत एव प्रज्ञाशालिनं प्रति मन्दानुग्रहायैव तत्करणादिति चेत्; तदर्थं तर्हि परापरस्यापि तत्साधनस्य निरूपणं कर्तव्यमिति कथं शास्त्रमतत्करणात् न्यूनमेव न भवेत् ? कुतश्चासौ तद्विशेषो जीवच्छरीरे एव न लोष्टादावपि तत्कारणस्यात्मनस्तत्रापि भावात् ? न ह्यविकले कारणे कार्यानुत्पत्तिः, नित्यस्य सहकारिप्रतीक्षायाश्च प्रतिक्षेपात । तन्नेदं व्यतिरेकिलिङ्गमुपपन्नम् ।

यदप्यन्वयव्यतिरेकिणः सपक्षैकदेशवृत्तेरुदाहरणम्[3]—अनित्यः शब्दः [सामान्यवत्त्वे सति] अस्मदादिबाह्यकरणप्रत्यक्षत्वात् कुम्भवदिति; तत्र कः पुनरसौ अस्मदादिः ? आत्मैव संसारीति चेत्; किं तस्य बाह्यकरणेन कर्तव्यं यतस्तेन विशिष्येत[4] ? विषयोपलब्धिरिति चेत्; सापि[5] तस्येति कुतः सम्बन्धात् ? समवायादिति चेत्; तस्य यदि सम्बन्धत्वमेव रूपम्; समवायादिति निर्विषया श्रुतिरर्थाभावात् । सम्बन्धत्वस्यैव तादर्थ्ये पौनरुक्त्यम् । यदि पुनः समवायशब्दाद्वाच्यमन्यदेव तस्य रूपम्; तदपि न युक्तम्; सम्बन्धश्रुतौ पूर्ववद्दोषात् । कुतश्चैवं तस्य प्रतिपत्तिः ? इहेदंप्रत्ययत्वात्[6] लिङ्गादिति चेत्; क्व तस्य तेन व्याप्तिः ? इह कुण्डे दधीति प्रत्यय इति चेत्; न; तस्य संयोगादेव भावात्, तस्य च समवायविलक्षणत्वात् । अविलक्षणत्वमपि सम्बन्धत्वेनेति चेत्; अस्ति तर्हि तत्र सम्बन्धत्वं साधारणं च समवायशब्दवाच्यं रूपम् । तयोश्च कस्तत्र सम्बन्धः ? समवाय एवेति चेत्; न; तस्यैकस्यैवोपगमात् । अनेकत्वेऽनवस्थाप्रसङ्गात् । संयोग इति चेत्; न; तस्य गुणत्वेन द्रव्याश्रयत्वात्, समवायतद्रूपयोश्चाद्रव्यत्वात् । तद्विशेषणत्वमिति चेत्; न; तस्य सम्बन्धायत्तत्वेन स्वयमसम्बन्धत्वात् दण्डादिवत् । सम्बन्धत्वेऽपि तस्य समवायतद्रूपाभ्यामन्यत्वे कुतस्तयोरिति व्यपदेशः ? पुनरप्यन्यतः तद्विशेषणत्वादिति चेत्; कथमनवस्थातो निर्मुक्तिः ? भवत्वभेद एव तत्र तयोः सम्बन्ध इति चेत्; न; तस्याप्येकान्तेन भावे स एवेहेति दोषात्, अनेकान्तस्य च भवद्भिरनभ्युपगमात् । तत्र समवायो नाम सम्बन्धो येनास्मदादेस्तदुपलब्धिः । तत्कार्यत्वात्[7] सा तस्येति चेत्; व्यर्थं तर्हि बाह्यकरणम्, अस्मदादेरेव तद्भावात् । ततोऽपि तत्सहायादेव[8] न केवलादिति चेत्; सापि द्वयोरेव स्यात् न केवलस्य । एवञ्च—

१—स्य यु—आ०, ब०, प० । २—णः स—आ०, ब०, प० । ३ "अनित्यः शब्दः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात् ।" —न्यायसा० पृ० ६ । ४ विशेष्येत आ०, ब०, प० । ५—पि क्व त—आ०, ब०, प० । ६ "इह तन्तुषु पट इत्यादिप्रत्ययः सम्बन्धपूर्वकः इहेदंप्रत्ययत्वात् इह कुण्डे दधीति प्रत्ययवत्" —ता० टि० । ७ अस्मदादिकार्यत्वात् उपलब्धिः अस्मदादेः । ८ बाह्यकरणसहायादेव ।

द्वयोरेवोपलब्धृत्वं न प्रत्येकं तथा सति ।
जीव एवोपलब्धेति व्यवहारः कथं भवेत् ? ॥१५२७॥
तत्रैव समवायाच्चेदुपलब्धेर्न तत्क्षतेः ।
कारणत्वाविशेषात् स करणेऽपि कुतो न वः ? ॥१५२८॥
केवलस्यैव हेतुत्वं तस्मात्तस्योपवर्ण्यताम् । ५
उपलब्धौ ततः प्राप्तं वृथैव करणं बहिः ॥१५२९॥
हेतुत्वादपि तस्योपलब्धिस्तन्न व्यवस्थिता ।
तत्कथं तत्कृते तस्य करणं बाह्यमुच्यताम् ? ॥१५३०॥

तस्मादस्मदादिसम्बन्धविशिष्टस्य बाह्यकरणस्यासम्भवात् असिद्धमेव तत्प्रत्यक्षविषयत्वं लिङ्गमिति कथमस्यान्वयव्यतिरेकित्वम् ? सिद्धस्यैव तदुपपत्तेः । १०

यदपि सपक्षव्यापिनस्तस्योदाहरणम्—अनित्यः शब्दः कृतकत्वात् घटादिवदिति । तद्व्यापित्वं चास्य सर्वत्रानित्ये भावात् । पूर्वकस्य तु तदेकदेशवृत्तित्वं चानित्यत्वेऽपि बुद्ध्यादावविद्यमानत्वादिति प्रतिपत्तव्यमिति । अत्रोच्यते—नास्य सपक्षव्यापित्वम् ; अनित्येऽपि प्रागभावे भावात् । नित्य एव स इति चेत्; कुतः कार्यकालेऽपि नोपलब्धिः ? तस्याः कार्येण प्रतिबन्धादिति चेत्; न; विषयस्य तज्जननशक्तौ तदयोगात् । कार्यमपि प्रतिबन्धे शक्तमेवेति चेत्; उभयं तर्हि युगपत्प्राप्तमुपलब्धिस्तत्प्रतिबन्धश्चेति । न चैतन्न्याय्यं व्याघातात् । शक्तिरेव तेन तस्य प्रतिबध्यते इति चेत्; सिद्धं तर्हि तस्यानित्यत्वं शक्तिप्रतिबन्धस्यैव तत्प्रतिबन्धत्वात् तस्यास्तदव्यतिरेकात् । व्यतिरेके शक्तिशक्तिमद्भावस्य प्रतिषेधादिति कथन्न सपक्षैकदेशवृत्तित्वमस्यापि । न चास्य गमकत्वं प्रध्वंसेन व्यभिचारात्, तस्य कृतकत्वेऽप्यनित्याभावात् । किं पुनरस्य कृतकत्वमिति चेत् ? प्रागसतः कुतश्चिदात्मलाभ एव घटादिवत् । प्रागसतः सत्तासम्बन्ध एव कृतकत्वं नात्मलाभ इति चेत्; न; अनात्मलाभे तत्सम्बन्धस्यायोगात् तस्य द्विष्ठत्वेन तदभावेऽनुपपत्तेः । सत्यात्मलाभे किं तेन भावव्यवहारस्य तावता सिद्धेरिति चेत्; यद्येवं जानासि निर्मुच्यतां तत्र निर्बन्धः । कथमर्थान्तरतत्सम्बन्धाभावे सन्ति द्रव्यादय इति विशिष्टप्रत्ययो दण्डीत्यादेरर्थान्तरदण्डसम्बन्धनिबन्धनस्यैव तस्य दर्शनादिति चेत्; न; तत्रापि तन्निबन्धनत्वस्य प्रतिक्षिप्तत्वात् । कथं वा तत्सम्बन्धे सत्प्रत्ययः ? तत्र तदन्यस्याभावात् अनवस्थापत्तेः । अस्ति चायम्—अस्ति सत्तासम्बन्ध इति भवतां व्यवहारात् । उपचारादयं तत्रेति चेत्; किं पुनर्वस्तुतः स नास्त्येव ? तथा चेत्; कथं विशेषणम् ? स्वरूपतो विद्यमानत्वादिति चेत्; ननु स्वरूपतो विद्यते इत्यपि विशिष्टप्रत्यय एव, अर्थान्तरव्यवच्छेदेन तद्विद्यमानत्वस्य स्वरूपेण विशेषणात् । तथा च कथं द्रव्यादिष्वपि विशिष्टप्रत्ययादर्थान्तरसत्तासिद्धिः ? अनेन व्यभिचारात् । तत्र सत्तासम्बन्धः कृतकत्वम्, आत्मलाभस्यैव तत्त्वात् । तथा च कृतक एव प्रध्वंसः कारणादात्मलाभात् । भवत्वनित्य एव स इति १५ २० २५

१ उपलब्धा ज्ञाता ज्ञायकः इति यावत् । २ कारणे-आ०, ब०, प० । ३ तस्मा- आ०, ब०, प० । ४ कारणं आ०, ब०, प० । ५ तस्यात्म- आ०, ब०, प० । ६ सत्तासम्बन्धे । ७ निश्चय सत्तासम्बन्धस्य । ८ प्रध्वंसः ।

चेत्; न तर्हि मुक्तेर्नित्यत्वं तस्या अपि सकलवैशेषिकगुणविच्छित्तिरूपायाः प्रध्वंसत्वात्। तथा च कथं तदर्थितया प्रेक्षावतां तत्त्वज्ञानाधिगमाय प्रवृत्तिर्यतः शास्त्रप्रणयनं फलवद्भवेत्? अस्त्येव निर्वाणस्याप्यनित्यत्वं तथापि न संसारस्योन्मज्जनं तदनित्यत्वस्यापि तद्विरोधादिति चेत्; न, तद्विरोधिविरोधिनः[1] तद्विरोधित्वानुपपत्तेः। तस्य हि संसारस्य विरोधि निर्वाणं तद्विरोधि चानित्यत्वं कथन्नाम संसारस्य विरोधि स्यात्? अन्यथा नैरात्म्यविरोधिनस्तत्प्रतिषेधस्य आत्मविरोधित्वमपि स्यादिति कथमात्मसिद्धिः? मा भूच्च भवतां व्यतिरेकलिङ्गोपक्रमेण तत्साधनप्रवृत्तिः, साधितेऽपि तस्मिन् आत्मसिद्धेः तस्य तद्विरोधित्वेनाभावात्। तथा च कथं चित्रमता उक्तम्–"**शरीरादौ च तद्विरहप्रतिषेधात् स एव प्रसिद्ध्यति प्रतिषेधस्य प्रतिषेधाद्विधिस्वभावः[2] सत्त्वात् (स्यात्)**" [ ] इति? ततो यथा तत्प्रतिषेधस्य नात्मना विरोधः तद्विरोधित्वात् तथा निःश्रेयसस्यानित्यत्वस्यापि संसारेणेति भवितव्यमेव तदा तदुन्मज्जनेन। तदनिच्छता च न प्रध्वंसस्यानित्यत्वमभ्युपगन्तव्यमिति स्यादेव तेन व्यभिचारात् अस्यागमकत्वम्। तन्न अन्वय्यादयोऽपि हेतवः।

नापि तथा त्रैविध्यनियमः, उन्नामादीनामपूर्वत्वेन तत्रानन्तर्भावात्। पूर्ववतामेव स्वयमन्वय्यादीनां व्याख्यानात्।

भवतु तर्हि वीतादिभेदेन तन्नियमः। वीतं[3] हि नाम विधिमुखेन साध्यसाधनम्, अवीतं प्रतिषेधपरम्, उभयपरं च वीतावीतमिति, न चान्यथोन्नामादीनामपि तत्साधनं सम्भवतीति चेत्; तन्न; वीतेन विपक्षस्याप्रतिषेधे पक्षस्याप्यसिद्धेः, निराकृतप्रतिपक्षतया सिद्धस्यैव पक्षस्य सिद्धत्वोपपत्तेः, अन्यथा कुतश्चिज्जलादेः सिद्धावपि तद्विपक्षसद्भावाशङ्कया तदर्थिनामपि तत्राप्रवृत्तिप्रसङ्गात्, प्रतिवादिनश्च पराजयाभावापत्तेः। प्रतिषिद्धप्रतिपक्षत्वं तस्य अवीतादवगम्यत इति चेत्, न तर्हि वीतस्य हेतुत्वम्, अवीतादेव विशिष्टस्य साध्यस्य सिद्धेः। न चैवं तस्याप्यवीतत्वम्, प्रतिषेधाधिष्ठानतया विधिमुपस्थापयतो वीतत्वस्यैवोपपत्तेः। किं वा वीतत्वादिभेदकथनेन कर्तव्यं गमकत्वस्यान्यथानुपपन्नत्वादेवोपपत्तेः। सत्यम्, न तदर्थं तत्कथनम्, अपि तु व्यापारभेदेन लिङ्गभेदप्रतिपादनार्थमिति चेत्; न, तथापि त्रैविध्यस्यानवस्थानात्। त्रिविधस्य सतः कालभेदापेक्षया नवविधत्वस्य, नवविधस्यापि पुनरव्युत्पन्नसन्दिग्धविपर्यस्तरूपप्रतिपाद्यापेक्षया सप्तविंशतिविधत्वस्यापि सम्भवात्। तन्निबन्धनं भेदमनपेक्ष्य व्यापारमात्रकृतेन भेदेन त्रैविध्यमुच्यत इति चेत्; तमप्यनपेक्ष्य अन्यथानुपपत्तिनिबन्धनमेकविधत्वमेव तर्हि वक्तव्यम्। विस्तरेण शिष्यव्युत्पादनस्य नवविधत्वसप्तविंशतिविधत्वाभ्यामपि सम्भवात्। तन्न वीतादिभेदकल्पनमप्युपपन्नम्।

तथा संयोग्यादिभेदकल्पनमपि, तत्रापि प्रागुक्तहेतूनामनन्तर्भावात्। न हि कृत्तिकोदयः शकटोदयस्य संयोगी; कालव्यवधानेन परस्परमप्राप्तेः। यदपि संयोगिन उदाहरणं[4] वह्निर्धूम इति,

---

१ तद्विरोधिनः आ०, ब०, प०। २– त्वादिति ता०। ३ "अन्वयमुखेन प्रवर्तमानं विधायकं वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्"– सा० त० कौ० का० १-५। ४ "तथा धूमोऽग्नेः संयोगी"– प्रश० व्यो० पृ० ५७२।

तदपि न युक्तम् ; विभिन्नान्तरालादपि तस्मादविनाभावनिर्णये पर्वतशिरसि पावकस्य प्रतिपत्तेः[1] । [2]तद्व्यवधानादेव नासौ[3] तस्यं समवायी । यत्पुनरत्रोदाहरणम्—समवायी गोर्विषाणमिति; तन्न युक्तम्, विषाणे गोसमवायस्य निषिद्धत्वात् । अनिषेधेऽपि गवयादावपि तद्भावेन व्यभिचारात् । नायं दोषोऽवधारितविशेषस्यैव गमकत्वादिति चेत्; न; समवायित्वादेव तदवधारणासम्भवात् । अन्यतस्तत्सम्भवे च तत एव गमकत्वात् किं समवायित्वेन ? यद्यप्युदाहरणान्तरं समवायी शब्द आकाशस्येति; तदपि न युक्तम्; शब्दस्य पुद्गलपर्यायत्वेनाकाशसमवायस्य प्रतिषेधात् । कथं वा तत्र तत्समवाये तद्विकलमप्याकाशम् ? व्याप्त्या तत्र तस्यासमवायादिति चेत्; कथमव्याप्तिः ? तदवष्टब्धादन्यस्याकाशरूपस्याभावात् । तँदवष्टम्भोऽपि तत्प्रदेशस्यैवेति चेत्; न; प्रदेशवत्त्वे तस्य कार्यत्वेनानित्यत्वप्रसङ्गात् घटादिवत् । न चैतदिष्टम्, "द्रव्यत्वनित्यत्वे वायुना[4] व्याख्याते ।" [वैशे० २। १। २८] इत्यस्य व्याघातात् । न व्याघातः कल्पनयैव प्रदेशोपगमादिति चेत्; प्रदेशस्यैव तर्हि तदवष्टब्धस्य लिङ्गं शब्द इति न युक्तमिदं सूत्रम्—"शब्दो लिङ्गमाकाशस्य" [वैशे० २। १। २७] इति, प्रदेशस्याप्याकाशत्वात् ।

यदप्येकार्थसमवायिलिङ्गस्योदाहरणमुक्तम्—रूपं स्पर्शस्य एकार्थसमवायिलिङ्गम् । एकत्र कारणे तेजस्यर्थे तत्कार्ययोः साधनसाध्ययोः रूपस्पर्शयोः समवायात्, पाण्यादिकं वा पादादेर्लिङ्गम्, एकस्य तत्कार्यस्यार्थस्य शरीरस्य तयोः समवायादिति; तदपि न युक्तम्; रूपात्तेजसि स्पर्शवत् गन्धादेरप्यनुमानापत्तेः, तेनापि तस्यैकार्थसमवायित्वस्य पृथिव्यादावुपलम्भात् । तस्य तत्रासम्भवदनुभवत्वान्नेति चेत्; न; तादृशस्यापि उष्णस्पर्शस्य सुवर्णादावनुमितेः । तज्जातीये सम्भवदनुभव एव स इति चेत्; समानं गन्धादावपि, पृथिव्यादौ तस्यापि तथाविधत्वात् । कुतः पुनः पृथिव्यादेस्तज्जातीयत्वमिति चेत् ? तेजसोऽपि हेमजातीयत्वं कुतः ? भासुराद्रूपादिति चेत्; रूपमात्रादितरस्यापि स्यात् । नन्वेवं वाय्वादावपि स्पर्शादेव गन्धादेरप्यनुमानोपपत्तेः कथं पृथिव्यादिभेदेन भूतानां चातुर्विध्यमिति चेत् ? न; उद्भवापेक्षया तदुपपत्तेः । यत्र हि स्पर्शस्यैवोद्भवः स वायुः, यत्र तु सरूपस्य तत्तेजः, यत्र सरूपरसस्य ता आपः, यत्र सरूपरसगन्धस्य सा पृथिवीति । ततो न युक्तमिदम्—"रूपरसगन्धस्पर्शवती पृथिवी रूपरसस्पर्शवत्य आपो द्रवा स्निग्धाश्च तेजो रूपस्पर्शवत् वायुः स्पर्शवान् ।" [वैशे० २।१।१-४] इति; रूपादीनां सर्वेषामपि सर्वत्र भावात् ।

यदपि पाण्यादिकं पादादावेकार्थसमवायिलिङ्गमुक्तम्; तदप्यनुपपन्नम्; व्यभिचारात्, पादाद्यभावेऽपि पाण्यादेः सम्भवात् । यदेव निश्चितान्यभिचारं तदेव लिङ्गम्; अत एव न रूपादपि तेजसि गन्धादेरनुमानं स्पर्शान्यभिचारस्यैव तत्रापि निश्चयादिति चेत्; न; एकार्थसमवायात्तन्निश्चये[10] प्रकृतान्[11]परित्यागात् । अन्यतस्तन्निश्चये तत्समवायकल्पनवैफल्यात् । न तन्निश्चयार्थं संयोग्यादित्वकल्पनं तस्य

---

१ प्रतिपत्तिप्रसङ्गात् । २ कालव्यवधानादेव । ३ कृत्तिकोदयः । ४ शकटोदयस्य । ५ महिषादिव्यावृत्तं विशिष्टं विषाणम् । ६ शब्दसमवाये । ७ शब्दावष्टम्भोऽपि । ८ चानुमा ता० । ९ "परिशेषाल्लिङ्गमाकाशस्य" —वैशे० सू० । १०–वायानिश्चये आ०,ब०,प० । ११ प्रकृतस्य एकार्थसमवायिलिङ्गव्यभिचारस्य तदवस्थत्वात् ।

लिङ्गभेदप्रदर्शनार्थत्वादिति; अत्राप्युक्तम्—नवविधत्वेन सप्तविंशतिविधत्वेन च तद्दर्शनं कर्तव्यमिति। कथं चैवं कृत्तिकोदयादेः गमकत्वम्, संयोगिसमवायिनोरिव एकार्थसमवायिन्यपि तस्यानन्तर्भावात्? न हि तदुदयादितत्साध्ययोः क्वचिदेकत्र समवायः, नापि तयोः कस्यचित् तत्कार्यस्येति। तन्न संयोग्यादिभेदेनापि त्रैविध्यवर्णनमुपपन्नम्। ततः स्थितम्—'एतेन' इत्यादि। न केवलं तेषां भेद एवैवं प्रत्याख्यातव्योऽपि तु लक्षणमपीत्याह—

तल्लक्षणप्रपञ्चश्च निषेद्धव्यो दिशाऽनया। इति।

तेषां पूर्ववदादीनां **लक्षणम्** असाधारणं रूपं तस्य **प्रपञ्चः** पक्षव्यापित्वे सत्यन्वयव्यतिरेकावबाधितविषयत्वमसत्प्रतिपक्षत्वं चेतिरूपः सोऽप्यनया सौगतहेतुलक्षणं निराकरणरूपया **दिशा निषेद्धव्यः** इति। तथाहि—

अन्यथानुपपत्तिश्चेत् पाञ्चरूप्येण किं फलम्?
विनापि तेन तन्मात्रात् हेतुभावावकल्पनात् ॥१५३१॥
नान्यथानुपपत्तिश्चेत् पाञ्चरूप्येण किं फलम्?
सताऽपि व्यभिचारस्य तेनाशक्यनिराकृतेः ॥१५३२॥
अन्यथानुपपत्तिश्चेत पाञ्चरूप्येऽपि कल्प्यते।
[1]पाङ्रूप्यात् पञ्चरूपत्वनियमो नावतिष्ठते ॥१५३३॥
पाञ्चरूप्यात्मिकैवेयं नान्यथानुपपन्नता।
पक्षधर्माद्यभावेऽपि चास्याः सत्त्वोपपादनात् ॥१५३४॥

ततः **तल्लक्षण** इत्याद्यपि स्थितम्। सम्प्रति हेत्वाभासं दर्शयन्नाह—

अन्यथानुपपन्नत्वरहिता ये विडम्बिताः ॥१७४॥
हेतुत्वेन परैस्तेषां हेत्वाभासत्वमीक्ष्यते। इति।

परैः एकान्तवादिभिः [2]**ये** न हेतवः अपि तु **हेतुत्वेन विडम्बिताः** कल्पिताः **तेषां हेत्वाभासत्वं** हेतुवदाभासमानत्वम् **ईक्ष्यते**। कुत एतत्? **अन्यथानुपपन्नत्वरहिता** [3]यत इति। अथ अन्यथानुपपत्तिवैकल्येऽपि हेतुत्वम्; तदाभासत्वमेव न क्वचिद्भवेत्, कल्पनया सर्वत्र हेतुत्वस्यैवोपपत्तेः। कथं पुनस्तद्विडम्बितानां तद्रहित्वमिति चेत्? उक्तमेतत्—'असिद्धत्वादिदोषस्य तेषु सर्वेषु[4] सम्भवात्' इति। इदमत्रोदाहरणं यथा क्षणिकः शब्दः सत्त्वादिति। न हि क्षणिकं सन्नाम अर्थक्रियायास्तत्रासम्भवात्। निरूपितं चैतत्—'**यस्मिन्नसति यज्जातम्**' इत्यादौ[5]। तत्कथं तस्यान्यथाऽनुपपन्नत्वम्? '**अन्यथाऽनुपपन्नत्वमसिद्धस्य न सिद्ध्यति**' [सिद्धिवि० परि० २] इति न्यायात्। सिद्धमेव तत्रापि तत् संवृत्येति चेत्; न; नित्येऽपि [6]तया तद्भावात्। तथापि कथमन्यथाऽनुपपन्नत्वम्? व्यभिचाराद्विरुद्धत्वाच्च, वस्तुतः सत्त्वस्य परिणाम एव भावात्। निवेदयिष्यते

१—दप्रतिद—आ०, ब०, प०। २ ताद्रूप्यात् ब०। ३ ये हेतवः ता०। ४ य इति त्रय—आ०, ब०,प०। ५—षु भावादिति ता०। ६ न्यायवि० श्लो० १५३। ७ संवृत्या।

चैतत्–'सत्ता सम्प्रतिबद्धैव परिणामे' इत्यादिना । तदनेन कृतकत्वादयोऽपि तदाभासतया प्रतिवक्तव्याः तेषां सत्त्वविशेषत्वात् । यद्यन्यथानुपपत्तिवैकल्यमेकान्ततः सत्त्वादीनाम्, क्षणभङ्गादिवत् परिणामेऽपि न तेषां हेतुत्वं स्यादिति चेत्; न; एकान्ततः तदभावात् । एतदेवाह–

विरोधादन्वयाभावाद् व्यतिरेकाप्रसिद्धितः ॥१७५॥
कृतकः क्षणिको न स्यात् नैकलक्षणहानितः ॥ ५

अपेक्षितपरव्यापारो भावः कृतकः । उपलक्षणमिदं तेन सन् प्रयत्नजन्यश्च शब्दादिः । किम् ? क्षणिको न स्यात् क्षणमात्रवृत्तिर्न भवेत् । कुत एतत् ? अन्वयाभावात् । न हि क्षणिकत्वेन तस्य क्वचिदन्वयः, प्रदीपादावपि तस्यानिश्चयात् । कथमन्यथा परापरतैलादिव्यापारवैफल्यप्रकल्पनेन तत्र तदुपपादनम्, अविप्रतिपत्तिविषये तदनुपपत्तेः ? भवतु तेनैव तत्र तदुपपादनमिति चेत्; न; तस्य क्वचित्तेनानन्वयात्, तन्निदर्शनेऽपि तस्यासिद्धेः । पुनस्तत्रापि परापरतत्कारणव्यापारवैफल्येन १०
तदुपपादने अनवस्थापत्तेः । तदुपपादनमननुमानमेव तदयमदोष इति चेत्; न तर्हि प्रमाणं परामर्शात्मकत्वेन प्रत्यक्षत्वस्याप्यभावात् । प्रमाणान्तरत्वे च प्रमाणद्वयसङ्ख्यानियमव्यापत्तेः । अप्रमाणाच्च तत्प्रतिपत्तावन्यत्रापि प्रमाणकल्पनावैफल्यात् । मा भूदन्वयो व्यतिरेकादेव गमकत्वोपपत्तेरिति चेत्; न; अन्वयाभावे तस्यैवासिद्धेः । न हि क्वचित् क्षणभङ्गेनान्वयस्याप्रतिपत्तौ तन्निवृत्त्या क्वचिद्धेतुव्यावृत्तेः शक्योऽवगमः, [२]बुद्धिसंस्पर्शविरहिणस्तस्यैव निवृत्तेरनवगमात् । कथं पुनरन्वय- १५
व्यतिरेकयोरभावेऽपि कृतकत्वादेरहेतुत्वं ताभ्यां हेतुत्वस्य अव्याप्तेरिति चेत्; सत्यमिदं[३] वस्तुवृत्त्या, परेण तु तयोस्तद्व्याप्तेरभिधानादेवमुक्तम् । वस्तुतस्तर्हि तस्य कुतः क्षणिकत्वं प्रत्यगमकत्वम् ? अन्यथाऽनुपपत्तिवैकल्यादिति चेत्; तत् तर्हि तस्यैकान्तिकमिति कथं परिणामेऽपि तस्य हेतुत्वमिति चेत् ? अस्य समाधानम्–'नैकलक्षणहानितः' इति । एकस्य लक्षणस्यान्यथाऽनुपपन्नत्वस्य येय- २०
मेकान्ततो हानिः ततः कृतकः क्षणिको न स्यादित्येतत् न अपि तु क्षणक्षयाद्यपेक्षयैव कथञ्चिद्भाविन्य इति यावत् । अत्रैवोपपत्तिः 'विरोधात्' इति । तात्पर्यमत्र–यतः क्षणक्षयादिव्यावृत्त्या तद्विरुद्धस्य परिणामस्य ततः साधनं ततो नैकान्ततः तत्र तद्भावनिरिति । कथं पुनरप्रतिपन्ने क्षणभङ्गे तदन्वयव्यतिरेकयोरिव क्वचित्तद्विरोधस्यापि प्रतिपत्तिः ? तथापि तद्भावे किमन्वयव्यतिरेकाभ्यामपराद्धं यतस्तावपि न प्रतीयेते इति चेत् ? न; प्रतिपत्तेरपि तल्लक्षणानुगमेन तत्र भावात्, केवलं प्रमाणतत्त- २५
दनवगमादेव तदन्वयव्यतिरेकयोर्निषेधात् नित्यान्वयव्यतिरेकवत् । विरोधमेव दर्शयन्नाह–

सत्ता सम्प्रतिबद्धैव परिणामे क्रियास्थितेः ॥१७६॥
निर्व्यापारो हि भावः स्यान्नित्यत्वे वा निरन्वये । इति ।

एवकारो भिन्नप्रक्रमः परिणाम इत्यत्र दर्शनात् । ततः सत्ता सत्त्वं सम्यक् प्रतिबद्धा । क्व ? परिणाम एव न क्षणभङ्गादौ । ततस्तत्रैव सा हेतुरित्यर्थः । एतदेव कुतः ? क्रियास्थितेः, परिणाम

---

१ "अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक इति ।" –न्यायवि० मू० ६० ।
२ बुद्धसं–आ०,ब०,प० । ३–मिदमव–आ०,ब०,प० । ४–स्तनि–आ०,ब०,प० । ५ चेन्तर्हि आ०,ब०,प० ।

एव क्रियायाः कार्यकारणस्य स्थितेः अवस्थानात्। एतदपि कस्मात्? निर्व्यापारो व्यापारान्निष्क्रान्तो हि यस्मात् भावः चेतनादिः स्यात् भवेत्। कस्मिन् सति? निरन्वये क्षणभङ्गे। केव? नित्यत्वे वा नित्यत्व इव, वाशब्दस्य इवार्थत्वात्। निरन्वय इव वा नित्यत्वे इति। कुतः पुनर्निरन्वये निर्व्यापारत्वं भावस्योच्यते? तस्य यद्युत्पत्तेरूर्ध्वं व्यापारः कथं निरन्वयत्वं स्वयमपि तदा तस्य भावात्। व्यापार एव तदा न भाव इति चेत्; व्याहतमिदम्—स नास्ति तद्व्यापारोऽस्तीति। कथं वा स तस्य व्यापारः? तत्कार्यत्वादिति चेत्; तत्रापि तर्हि कार्यवद् व्यापारान्तरं मृगयितव्यम्। तस्यापि पश्चाद्भाविनः कथं तद्व्यापारत्वम्? तत्कार्यत्वादेवेति[1] चेत्; न; 'तत्रापि'इत्यादेः प्रसङ्गादनवस्थितेश्च दोषात्, व्यापारस्याव्यापारादेव भावाद्भावे व्यर्थं व्यापारकल्पनं कार्यस्यापि तत एव भावात्। अथोत्पत्तिसमय एव व्यापारः उत्पत्तेरेव[2] तत्त्वात्; तर्हि तदैव कार्यतद्व्यापारौ पुनः तत्कार्यतद्व्यापारावपीत्येकक्षणमेव जगत्व्याप्नुवत् सन्तानस्य तन्निबन्धनस्य प्रवृत्त्यादिव्यापारस्य चाभावमाविर्भावयेत्। अथायं कार्यस्य स्वभावो यत्सत्यपि तद्व्यापारे पश्चादेव भवतीति तदयमप्रसङ्ग इति; कथं पुनः उपरतव्यापारे तस्मिन् भवतस्तस्य तत्कार्यत्वम्? यदि स्यात्; नित्यकार्यत्वमपि स्यात्। अतत्कार्यस्य कथं देशादिनियम इति चेत्? तत्कार्यस्यापि कथं तत्कालादिक्रमः? तथास्वाभाव्यादिति चेत्; अत एव तन्नियमोऽपि स्यात्। असति च कारणे भवत्कार्यं पश्चादिव प्रागपि किन्न स्यात् अभावाविशेषात्? भवत्येव, भाविनो राज्यादेः प्रागेव तत्कार्यस्य हस्तरेखादेर्दर्शनादिति चेत्; तर्हि सुगतत्वमपि तदुपायाभियोगात् प्रागपि भवेदिति पूर्वं सुगतः पश्चात् संसारीति प्राप्तम्, संसारिण इव तदभियोगसम्भवात्। किं वा पुनस्तदभियोगस्य फलं निष्पन्ने ओदने पाकवत्? तन्न निरन्वयस्य सव्यापारत्वम्। नापि नित्यस्य।

"भवतु निर्व्यापारत्वं तस्य, न हि तस्य व्यापारवत्त्वेन कार्यकारित्वं सहकारिसहितान्निर्व्यापारादेव तदुपपत्तेः। तथा हि व्यापारो नाम शक्तिरतीन्द्रिया, क्रिया वा भवेत्? तयोश्च किं पदार्थेन सहोत्पन्नयोर्यावत्पदार्थभावित्वम्, आहोस्वित् सामान्यवत्तयोस्तेन सहानुत्पन्नयोस्तत्र सद्भावः? पक्षद्वयेऽपि कार्यस्य सततोदयप्रसङ्गः। न हि शक्तेर्व्यापारविष्टे च कारणे कार्यस्य क्षेपः। अथैतन्मा भूदिति तयोस्तत्र कादाचित्कत्वं कार्यवत्तत्रापि वक्तव्यम्। कादाचित्कत्वे तयोः कारणपूर्वकत्वमवश्यम्भावि। तत्र सति विकल्पद्वयम्—किं स्वाश्रयपदार्थकारणमात्रभावित्वं तयोः, उतस्वित् सहकारिकारणापेक्षत्वम्? पूर्वस्मिन् पक्षे पुनरपि सर्वदा कार्योत्पत्तिप्रसङ्गः। सहकारिकारणापेक्षत्वे कार्यमेव कारणद्वयात् सम्मिलितादस्तु किं शक्तिव्यापाराभ्याम्" [ ] इति विश्वरूपः; तन्न युक्तम्; अशक्तस्य कारणत्वे व्योमकुसुमादौ प्रसङ्गात्। तस्य नीरूपत्वान्नेति चेत्; न; अशक्तित एव तस्यापि तत्त्वात्, तस्याश्च नित्येऽप्यविशेषात्। शक्तमेव नित्यम्, केवलमतीन्द्रियशक्तिप्रतिषेधादेवाशक्तं तदुच्यत इति चेत्; ऐन्द्रियी तर्हि तच्छक्तिः, विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानाविनाभावात्। तथा च

१-स्वादिति आ०, ब०, प०। २ व्यापारत्वात्।

कथं तत्राव्युत्पत्त्यादिः प्रत्यक्षादेव तन्निर्णये तदनुपपत्तेः। अस्ति चासौ वस्तुदर्शनेऽपि कस्यचित् तत्रानिश्चयात् अपरस्य संशयात् अन्यस्य विपर्ययाच्च। कथमन्यथा तत्परिज्ञानाय तद्विदुपासनम्? सामग्रीसन्निपाते नास्त्येव तत्राव्युत्पत्त्यादिः[2] तदैव ततस्तन्निर्णयात्। अतएव तेनोक्तम्–"सामग्री तु यदा कार्यं जनयति तदा तस्याः कारणत्वं निश्चीयते, द्वयोरपि कार्योत्पादकाले सामग्रीकार्ययोर्निश्चयात्।" [ ] इति [3]चेत्; अन्यदा तर्हि भावस्याप्यनिश्चयः तदनिश्चयात्। कथमन्यथा स्वरूपमेव शक्तिः निश्चितादनिश्चितायाः अर्थान्तरत्वस्यैवोपपत्तेः। अथास्त्येव तदापि तन्निश्चयः केवलं कार्यतयैव शक्तेर्भेददर्शनात्, तत् तदाभिमुख्यमेव तस्या न निश्चीयते; अत एवाऽव्युत्पत्त्यादेरपि तत्रैव भाव इति; तदपि न समीचीनम्; [4]कस्मात्?

तत्तत्कार्याभिमुख्यं चेच्छक्ते रूपं स्वभावतः।
अनिश्चये कथं तस्य निश्चिता शक्तिरुच्यताम् ॥१५३५॥
आभिमुख्यं स्वरूपं च विना तेन च निश्चयः।
शक्तेरिति [5]क आहैवं विश्वरूपात् परो बुधः ॥१५३६॥
आभिमुख्यं ततो यस्मिन् यस्मिन् कार्ये यया यया।
सामग्र्या सर्वथा तस्याः सर्वदा स्याद्विनिश्चयः ॥१५३७॥
तथा च वैद्यशास्त्रादौ व्यर्थ एव परिश्रमः।
विनापि वस्तुशक्तीनां तेन निश्चयसम्भवात् ॥१५३८॥
सर्वदर्शित्वमप्येवं सर्वस्य प्राणिनो भवेत्।
जगद्व्यपेक्षयैकत्र शक्त्यशक्त्योर्विनिश्चयात् ॥१५३९॥

तथा हि–यद्येकं वस्तु कतिचिदेव देशकालावस्थाभेदिनः कार्यग्रामानपेक्ष्य तत्तत्सामग्रीश्च शक्तम्, तदपरापेक्षया तर्हि तदशक्तम्, तच्च तथा कुतश्चिन्निश्चीयमानमपेक्ष्य निश्चयमन्वाकर्षति विना तेन स्वयमनिश्चयात्। तथापि तन्निश्चये कारणनिश्चयमन्तरेणापि क्वचित्तत्कार्यत्वनिश्चयः स्यादिति न युक्तमिदं तस्य वचनम्–"न च सम्बन्धग्रहणे प्रमाणान्तरेण कार्यकारणयोः सम्बन्धग्रहः" [ ] इति। तस्मादतीन्द्रियैव शक्तिः। यदप्यत्र तेनोक्तम्–"कारणस्य शक्तस्य व्यापारवतश्च कार्यकर्तृत्वाभ्युपगमे तयोरपि कार्यत्वात् परव्यापारशक्त्यन्तरकल्पना तत्राप्यन्या तत्राप्यन्येत्यनवस्था।" [ ] इति; तदपि नित्यैकान्तमभ्युपगम्य तद्वादिनामेव दूषणं न स्याद्वादिनाम्, तन्मतेन पूर्वपूर्वस्मादेव शक्तिव्यापारपरिणामात् उत्तरोत्तरस्य तस्योत्पत्तेः। न चावस्थानमत्र [6]दूषणम्; अनादित्वेनानवस्थानस्यैव तत्प्रबन्धस्वभावत्वात्। कुतः पुनरतीन्द्रियायाः शक्तेः प्रतिपत्तिः? कार्यादेव लिङ्गादिति चेत्; क तया सह तस्याविनाभावप्रतिपत्तिः? तदन्यत्रेति चेत्;

---

१ तज्ज्ञानान्वेषणम्। २–दिस्तन्नि–आ०, ब०, प०। ३ चेत्तर्हि आ०, ब०, प०। ४ कस्मात् आ०, ब०, प०। ५ "कः आह इति पदच्छेदः" – ता० टि०। कथा ह्येवं आ० ब० प०। ६ "मूलक्षतिकरीमाहुरनवस्थां हि दूषणम्। वस्त्वानन्त्येऽप्यशक्तौ च नानावस्था विचार्यते॥"–ता० टि०।

न; तत्रापि प्रत्यक्षतस्तदग्रहात्। कार्यादेव तु ग्रहणेऽनवस्थापत्तेरिति चेत्; इदमपि न दूषणं पक्ष एवास्माभिः सम्बन्धग्रहणस्याभ्युपगमात्, सम्बन्धस्य कार्यस्वरूपत्वेन अप्रतिपन्नायामपि शक्तौ शक्यावसायत्वात्। प्रमाणस्य च तत्र तर्काभिधानस्य निवेदितत्वात्। तत्र शक्तेः प्रतिषेधो न्याय्यः।

नापि व्यापारस्य, तथा हि—यदि नित्यस्य सामग्रीसन्निपातेऽपि प्राच्यस्वभावापरित्यागः कथं कारणत्वं पूर्ववत्। तत्परित्यागे वा कथमव्यापारत्वं तत्परित्यागस्यैव व्यापारत्वात्। नास्त्येव तस्य तत्परित्यागो नित्यत्वहानेः कारणत्वं तुतदा[1] तस्य तत्सन्निधानादिति चेत्; तर्किं पूर्वं नास्ति? तथा चेत्; कथं नित्यत्वम्? अस्ति चेत्; कुतो न कार्यम्? सहकार्यभावादिति चेत्; कुतस्तदभावे तदभावः? तस्य तत्कारणत्वादिति चेत्; यथा तर्हि सहकारी तत्कारणत्वात् स्वनिवृत्त्या कार्यं निवर्तयति तथा तत एव [3]नित्यमपि स्वप्रवृत्त्या तत्प्रवर्तयेत्। न चेत्; तदपि न निवर्तयेदिति वक्तव्यम्। प्रवृत्तिनिवृत्तिभ्यां निर्मुक्तस्य कीदृशी तदा कार्यस्य गतिरिति? न नित्यस्य केवलस्य कारणत्वं यदेवं स्याद्, अपि तु सहकारिसहितस्यैव। न च तत्सहितं [4]तत्प्रागस्ति यतः कार्यं स्यादिति चेत्; तथापि कथं नित्यत्वं तत्सहितस्य तत्स्वभावस्यैव पूर्वमभावात्। सहकार्यभाव एव तत्सहिताभावो न तत्स्वभावाभाव इति चेत्; तत्सद्भाव एव तत्सहितसद्भावोऽपि स्यात्, तथा च तत्सहितं नित्यं कारणमिति सहकार्येव कारणमित्युक्तं स्यात्। न नित्यं सहकारि वा केवलं कारणम् अपि तु तत्समुदाय इति चेत्; एकैव तर्हि तद्रूपा शक्तिरिति कथं तद्भेदकल्पनं सहकारिशक्तिः स्वरूपशक्तिरिति च। तद्भेदे वा कथं प्रत्येकमेव न कारणत्वं (णं) शक्तित एव तत्त्वात्। समुदायस्यैव कारणत्वे च न नित्यस्य सहकारिणो वा वस्तुत्वम् अकारणत्वात्। समुदायकारणत्वमेव तयोरपि कारणत्वं तद्व्यतिरेकेण तदभावादिति चेत्; तथापि समुदायतयैव वस्तुत्वं न पृथगिति कथन्न (कथं) नित्यं वस्तु पृथगेव स्यात्? ततः प्रत्येकं भावानां वस्तुत्वमुररीकुर्वता समुदायदशायां प्राच्यरूपपरित्यागात्मा व्यापारस्तेषां कारणत्वोपपादी वक्तव्य एव। स च नित्यत्वे तेषामनुपपन्न एव, सति तस्मिन् तत्प्रच्युतेः। ननु यदि शक्तिः किं व्यापारेण? तस्मिन् वा किं शक्त्या? तदन्यतरत[5] एव कार्यनिष्पत्तेरिति चेत्; न, शक्तेरेव कार्यं प्रत्युन्मीलनस्य व्यापारत्वात्। तदुन्मीलने च शक्तेरेव कार्यनिष्पत्तिः न व्यापारादिति चेत्; न; शक्तेरेव सत्युन्मीलने व्यापारत्वात्। ततो युक्तं निरन्वयविनाशनित्यत्वयोर्भावस्य निर्व्यापारत्वात् परिणाम एव क्रियाया अवस्थितिरिति। कः पुनरयमन्वयो नाम यतो निरन्वयो निर्व्यापारत्वमुच्यते इति चेत्? अत्राह—

अवस्थादेशकालानां भेदेऽभेदव्यवस्थितिः ॥१७७॥
या दृष्टा सोऽन्वयो लोके व्यवहाराय कल्पते। इति।

अवस्थादयः प्रसिद्धाः; तेषां भेद आमः पक्व इति परभागोऽवाग्भाग इति नवः पुराण इति च नानात्वं तस्मिन् सति या दृष्टा प्रतिपन्ना अभेदस्य कथञ्चित्तादात्म्यस्य व्यवस्थितिः साङ्कर्यादिपरिहारेणावस्थानं लोके लोकग्रहणेन तद्दृष्टेर्लोकप्रसिद्धतया अशक्याऽपह्नवत्वं दर्शयति। स तद्व्यवस्थितिरन्वयः कल्पते। किमर्थोऽसौ? व्यवहाराय तन्निमित्तमिति। ततो [6]यत्परमतम्—नामपक-

१ तथा तत्र आ०, ब०, प०। २ सहकार्यभावे कार्याभावः। ३ नित्योऽपि प०। ४ नित्यम्। ५– तर एव आ०, ब०, प०। ६ वैशेषिकमतम् (प्रश० व्यो० पृ० ४४८)।

योर्घटयोरेकत्वमिति; तत्प्रतिविहितम्; एकत्वप्रत्ययेन तस्य व्यवस्थितेः। नैतदस्ति [1]बाधकत्वात्। अस्ति ह्यत्र बाधः। तथा हि–आमादर्थान्तरं पक्वो घटस्तदारम्भकसंयोगविलक्षणसंयोगारब्धत्वात् पाषाणवत्। आमस्य हि घटस्यारम्भकोऽवयवसंयोगः प्रशिथिलरूपो निबिडश्च पक्वस्य कठिनतयैव तस्य प्रतीतेः। अतो न तत्राभेदव्यवस्थितिस्तात्त्विकीति चेत्; उच्यते–यदि न प्रतिपत्तिः पक्वस्य तस्य हेतोराश्रयासिद्धिः। प्रतिपत्तिश्चेत्; न तस्य आमादर्थान्तरत्वं शक्यसाधनं तत्प्रतिपत्त्यैव बाधनात्। प्रतिपत्तिर्हि तस्य [2]कुतश्चिदामादनर्थान्तरस्यैव नात्यन्ताय विभिन्नस्य, अन्यथा तत एव साध्यसिद्धेर्व्यर्थमिदमनुमानं भवेत्। विप्रतिपत्तेश्चाभावात्, भावे तद्घटेऽपि तदापत्तेः नाश्रयासिद्धेः प्रतिक्षेपः स्यात्। न तत्र तदापत्तिर्निश्चयादिति चेत्; न; साध्येऽपि तुल्यत्वात्। अन्यथैकैव प्रतिपत्तिः निश्चयेतरात्मा भवेत्। तथा च कथमामपक्वात्माऽप्येके भावो न भवेत्? आमस्तदारम्भकसंयोगनिवृत्त्या निवृत्त एव कथं तस्य कथञ्चिदप्यवस्थानमिति चेत्; न; तत्संयोगनिवृत्तेरप्युत्तरनिबिडसंयोगादर्थान्तरस्याप्रतिपत्तेः। तद्रूपत्वे च कथं निवृत्तिर्यतस्तदारब्धस्य आमस्यापि निवृत्तिः? कथञ्चित्तु या तन्निवृत्तिः तयाऽस्त्येव तस्यापि निवर्तनम्? अभेदवत् आमपक्वयोर्भेदस्यापि प्रतिपत्तेः। एतेन तण्डुलान्निबिडावयवसंयोगात् ओदनस्य शिथिलावयवसंयोगत्वेन यदत्यन्ताय भेदकल्पनम्; तदपि प्रतिक्षेप्तव्यम्, तुल्यत्वान्न्यायस्य।

यदपीदं पैठरस्य[3] मतम्–सत्यम्, आम एव पच्यते घटः केवलं तस्य रूपादय एवाग्निसंयोगात् नश्यन्ति तद्विलक्षणानामेव तेषां पश्चात् प्रादुर्भावादिति; तन्न बुद्ध्यामहे। तथा हि–घटो नाम तत्परिणतिविशेष एव नापरः, तस्याऽप्रतीतेः प्रतिक्षेपाच्च, ततः कथं तेषां विनाशस्तस्यैव तत्प्रसङ्गात्? तदात्माऽपि स तिष्ठति ते च नश्यन्तीति विरोधात्। ततो युक्तम्–आमस्यैव घटस्याग्निसम्पर्कात् अन्यथाभावेनावस्थानम्, अवस्थाभेदिनो लोकप्रसिद्धः सोऽन्वय इति, एवं देशभेदेऽपि प्रतिपत्तव्यम्। तत्राप्यवस्थितिः स एवायमर्वाग्भागेऽपि घटो यः परभाग इति प्रतीतेः। तत्र समवेतस्यैव तस्य तथा प्रतीतिर्न तदात्मन इति चेत्; न; तस्य निषेधात्। एवं स एवायं घटः पुराणो जातो यो मया नवो दृष्टः इति प्रतिपत्तेः कालभेदिनोप्यवस्थानं प्रतिपत्तव्यम्। उक्तमर्थं श्लोकाभ्यां संगृह्णन्नाह–

सर्वसन्तानविच्छेदः सति हेतौ फलोदयः ॥१७८॥
अन्यथा नियमाभावादानन्तर्यं विरुद्ध्यते।

सति क्षणिके नित्ये च यदा हेतौ फलोदयस्तदा सर्वस्य कार्यस्य यः सन्तानः क्रमवान् प्रबन्धः तस्य विच्छेदो विरहः तत्कार्यत्वात् कार्यकार्यस्यापि परापरस्य, यदि वा परापरस्यापि कार्यस्य सहैव भावात्, कारणस्याक्रमे कार्यक्रमस्यायोगात्। अन्यथेति यद्यसति हेतौ फलोदयो यदि वा नित्ये सद्विच्छेदः तदा यदेतदानन्तर्यं कारणानन्तरभावित्वं कार्यस्य यद्वायं नित्यस्य प्रत्यासन्नत्वं तत्सन्तानस्य तद्विरुद्ध्यते

---

१ बाधकत्वा–आ०, ब०। २ "प्रमाणविशेषात्"–ता० टि०। ३ [illegible] नैयायिकस्य। ४–द्वेः सो–आ०, द०। ५ प्रतिपत्तिर्न आ०, ब०, प०।

न; तत्रापि प्रत्यक्षतस्तदग्रहात्। कार्यादेव तु ग्रहणेऽनवस्थापत्तेरिति चेत्; इदमपि न दूषणं पक्ष एवास्माभिः सम्बन्धग्रहणस्याभ्युपगमात्, सम्बन्धस्य कार्यस्वरूपत्वेन अप्रतिपन्नायामपि शक्तौ शक्यावसायत्वात्। प्रमाणस्य च तत्र तर्काभिधानस्य निवेदितत्वात्। तत्र शक्तेः प्रतिषेधो न्याय्यः।

नापि व्यापारस्य,तथा हि—यदि नित्यस्य सामग्रीसन्निपातेऽपि प्राच्यस्वभावापरित्यागः कथं कारणत्वं पूर्ववत्। तत्परित्यागे वा कथमव्यापारत्वं तत्परित्यागस्यैव व्यापारत्वात्। नास्त्येव तस्य तत्परित्यागो नित्यत्वहानेः कारणत्वं तुलदा[1] तस्य तत्सन्निधानादिति चेत्; तर्किं पूर्वं नास्ति ? तथा चेत्; कथं नित्यत्वम् ? अस्ति चेत्; कुतो न कार्यम् ? सहकार्यभावादिति चेत्; कुतस्तदभावे तदभावः ? तस्य तत्कारणत्वादिति चेत्; यथा तर्हि सहकारी तत्कारणत्वात् स्वनिवृत्त्या कार्यं निवर्तयति तथा तत एव [3]नित्यमपि स्वप्रवृत्त्या तत्प्रवर्तयेत्। न चेत्; तदपि न निवर्तयेदिति वक्तव्यम्। प्रवृत्तिनिवृत्तिभ्यां निर्मुक्तस्य कीदृशी तदा कार्यस्य गतिरिति ? न नित्यस्य केवलस्य कारणत्वं यदेवं स्याद्, अपि तु सहकारिसहितस्यैव। न च तत्सहितं [4]तत्प्रागस्ति यतः कार्यं स्यादिति चेत्; तथापि कथं नित्यत्वं तत्सहितस्य तत्स्वभावस्यैव पूर्वमभावात्। सहकार्यभाव एव तत्सहिताभावो न तत्स्वभावाभाव इति चेत्; तत्सद्भाव एव तत्सहितसद्भावोऽपि स्यात्, तथा च तत्सहितं नित्यं कारणमिति सहकार्येव कारणमित्युक्तं स्यात्। न नित्यं सहकारि वा केवलं कारणम् अपि तु तत्समुदाय इति चेत्; एकैव तर्हि तद्रूपा शक्तिरिति कथं तद्भेदकल्पनं सहकारिशक्तिः स्वरूपशक्तिरिति च। तद्भेदे वा कथं प्रत्येकमेव न कारणत्वं (णं) शक्तित एव तत्त्वात्। समुदायस्यैव कारणत्वे च न नित्यस्य सहकारिणो वा वस्तुत्वम् अकारणत्वात्। समुदायकारणत्वमेव तयोरपि कारणत्वं तद्व्यतिरेकेण तदभावादिति चेत्; तथापि समुदायतयैव वस्तुत्वं न पृथगिति कथन्न (कथं) नित्यं वस्तु पृथगेव स्यात् ? ततः प्रत्येकं भावानां वस्तुत्वमुररीकुर्वता समुदायदशायां प्राच्यरूपपरित्यागात्मा व्यापारस्तेषां कारणत्वोपपादी वक्तव्य एव। स च नित्यत्वे तेषामनुपपन्न एव, सति तस्मिन् तत्प्रच्युतेः। ननु यदि शक्तिः किं व्यापारेण ? तस्मिन् वा किं शक्त्या ? तदन्यतरत[5] एव कार्यनिष्पत्तेरिति चेत्; न, शक्तेरेव कार्यं प्रत्युन्मीलनस्य व्यापारत्वात्। तदुन्मीलने च शक्तेरेव कार्यनिष्पत्तिः न व्यापारादिति चेत्; न; शक्तेरेव सत्युन्मीलने व्यापारत्वात्। ततो युक्तं निरन्वयविनाशनित्यत्वयोर्भावस्य निर्व्यापारत्वात् परिणाम एव क्रियाया अवस्थितिरिति। कः पुनरयमन्वयो नाम यतो निरन्वयो निर्व्यापारत्वमुच्यते इति चेत् ? अत्राह—

अवस्थादेशकालानां भेदेऽभेदव्यवस्थितिः ॥१७७॥

या दृष्टा सोऽन्वयो लोके व्यवहाराय कल्पते। इति।

अवस्थादयः प्रसिद्धाः; तेषां भेद आमः पक्व इति परभागोऽवयवभाग इति नवः पुराण इति च नानात्वं तस्मिन् सति **या दृष्टा** प्रतिपन्ना **अभेदस्य** कथञ्चित्तादात्म्यस्य **व्यवस्थितिः** साङ्कर्यादिपरिहारेणावस्थानं **लोके** लोकग्रहणेन तदृष्टेर्लोकप्रसिद्धतया अशक्याऽपह्नवत्वं दर्शयति। स तद्व्यवस्थितिरन्वयः **कल्पते**। किमर्थोऽसौ ? **व्यवहाराय** तन्निमित्तमिति। ततो [6]यत्परमतम्—नामपक्व-

१ तथा तस्य आ०,ब०, प०। २ सहकार्यभावे कार्याभावः। ३ नित्योऽपि प०। ४ नित्यम्। ५– तर एव आ०, ब०, प०। ६ वैशेषिकमतम् (प्रश० व्यो० पृ० ४४८)।

योर्घटयोरेकत्वमिति; तत्प्रतिविहितम्; एकत्वप्रत्ययेन तस्य व्यवस्थितेः। नैतदस्ति [1]बाधवत्त्वात्। अस्ति ह्यत्र बाधः। तथा हि–आमादर्थान्तरं पक्वो घटस्तदारम्भकसंयोगविलक्षणसंयोगारब्धत्वात् पाषाणवत्। आमस्य हि घटस्यारम्भको ऽवयवसंयोगः प्रशिथिलरूपो निबिडश्च पक्वस्य कठिनतयैव तस्य प्रतीतेः। अतो न तत्राभेदव्यवस्थितिस्तात्त्विकीति चेत्; उच्यते–यदि न प्रतिपत्तिः पक्वस्य तस्य हेतोराश्रयासिद्धिः। प्रतिपत्तिश्चेत्; न तस्य आमादर्थान्तरत्वं शक्यसाधनं तत्प्रतिपत्त्यैव बाधनात्। प्रतिपत्तिर्हि तस्य [2]कुतश्चिदामादनर्थान्तरस्यैव नात्यन्ताय विभिन्नस्य, अन्यथा तत एव साध्यसिद्धेर्व्यर्थमिदमनुमानं भवेत्। विप्रतिपत्तेश्चाभावात्, भावे तद्घटेऽपि तदापत्तेः नाश्रयासिद्धेः प्रतिक्षेपः स्यात्। न तत्र तदापत्तिर्निश्चयादिति चेत्; न; साध्येऽपि तुल्यत्वात्। अन्यथैकैव प्रतिपत्तिः निश्चयेतरात्मा भवेत्। तथा च कथमामपक्वात्माऽप्येके भावो न भवेत्? आमस्तदारम्भकसंयोगनिवृत्त्या निवृत्त एव कथं तस्य कथञ्चिदप्यवस्थानमिति चेत्; न; तत्संयोगनिवृत्तेरप्युत्तरनिबिडसंयोगादर्थान्तरस्याप्रतिपत्तेः। तद्रूपत्वे च कथं निवृत्तिर्यतस्तदारब्धस्य आमस्यापि निवृत्तिः? कथञ्चित्तु या तन्निवृत्तिः तयाऽस्त्येव तस्यापि निवर्तनम्? अभेदवत् आमपक्वयोर्भेदस्यापि प्रतिपत्तेः। एतेन तण्डुलान्निविडावयवसंयोगात् ओदनस्य शिथिलावयवसंयोगत्वेन यदत्यन्ताय भेदकल्पनम्; तदपि प्रतिक्षेप्तव्यम्, तुल्यत्वान्न्यायस्य।

यदपीदं पैठरस्य[3] मतम्–सत्यम्, आम एव पच्यते घटः केवलं तस्य रूपादय एवाग्निसंयोगात् नश्यन्ति तद्विलक्षणानामेव तेषां पश्चात् प्रादुर्भावादिति; तन्न बुद्ध्यामहे। तथा हि–घटो नाम तत्परिणतिविशेष एव नापरः, तस्याऽप्रतीतेः प्रतिक्षेपाच्च, ततः कथं तेषां विनाशस्तस्यैव तत्प्रसङ्गात्? तदात्माऽपि स तिष्ठति ते च नश्यन्तीति विरोधात्। ततो युक्तम्–आमस्यैव घटस्याग्निसम्पर्कात् अन्यथाभावेनावस्थानम्, अवस्थाभेदिनो लोकप्रसिद्धेः सोऽन्वय इति, एवं देशभेदेऽपि प्रतिपत्तव्यम्। तत्राप्यवस्थितिः स एवायमर्वाग्भागेऽपि घटो यः परभाग इति प्रतीतेः। तत्र समवेतस्यैव तस्य तथा प्रतीतिर्न तदात्मन इति चेत्; न; तस्य निषेधात्। एवं स एवायं घटः पुराणो जातो यो मया नवो दृष्टः इति प्रतिपत्तेः कालभेदिनोऽप्यवस्थानं प्रतिपत्तव्यम्। उक्तमर्थं श्लोकाभ्यां संगृह्णन्नाह–

सर्वसन्तानविच्छेदः सति हेतौ फलोदयः ॥१७८॥
अन्यथा नियमाभावादानन्तर्यं विरुद्ध्यते।

सति क्षणिके नित्ये च यदा हेतौ फलोदयस्तदा सर्वस्य कार्यस्य यः सन्तानः क्रमवान् प्रबन्धः तस्य विच्छेदो विरहः तत्कार्यत्वात् कार्यकार्यस्यापि परापरस्य, यदि वा परापरस्यापि कार्यस्य सकृदेव भावात्, कारणस्याक्रमे कार्यक्रमस्यायोगात्। अन्यथेति यद्यसति हेतौ फलोदयो यदि वा नित्ये तदविच्छेदः तदा यदेतदानन्तर्यं कारणानन्तरभावित्वं कार्यस्य यद्वायं नित्यस्य प्रत्यासन्नत्वं तत्सन्तानस्य तद्विरुद्ध्यते

---

१ बाधकवत्त्वा–आ०, ब०। २ "प्रमाणविशेषात्"–ता० टि०। ३ अवयविपाकवादिनो नैयायिकस्य। ४–द्धेः सो–आ०, ब०। ५ प्रतिपत्तिर्न आ०, ब०, प०।

कस्मात् ? **नियमाभावात्**– असतो हेतोरनन्तरमेव कार्यं न पूर्वं नापि पश्चादित्यवधारणस्याभावात् तदसत्त्वस्य तदाप्यविशेषात् । ततश्चिरव्यवधानेन प्रागपि च तद्भवेदिति मन्यते । यदि वा, हेत्वायत्तमेव कार्यमित्यस्य नियमस्य अभावात् । न हि समर्थे नित्यहेतावनुत्पन्नस्य पुनः स्वेच्छया यथाकालं भवतस्तदायत्तत्वमुपपन्नमतिप्रसङ्गात् इत्याशेते । ततः क्षणिकादेरर्थक्रियाव्यावृत्तिनिर्णयात् तदात्मकं सत्त्वं कृतकत्वादयस्तु तद्विशेषास्तत्साधनाय प्रयुक्ता विरुद्धा एव; परिणामस्यैव साधनादित्यावेदयति–

सत्त्वमर्थक्रियाऽन्ये वा वस्तुधर्माः क्षणक्षये ॥१७९॥

हेत्वाभासा विरुद्धाख्याः परिणामप्रसाधनाः । इति ।

सत्त्वमित्यस्यैव **अर्थक्रियेति** व्याख्यानम् अर्थक्रियात एव सत्तासम्बन्धस्यापि सम्भवात् नान्यथा व्योमकुसुमादिवत् । अतोऽर्थक्रियैव सत्त्वम् **अन्ये वा** कृतकत्वादयश्च, वेति समुच्चयात् ते हेत्वा**भासा विरुद्धाख्याः क्षणक्षये** । उपलक्षणमिदं तेन नित्येऽपि । कुतस्ते तथा ? **परिणामप्रसाधना** यत इति ।

सम्प्रत्यनैकान्तिकान् तदाभासानाह–

सर्वज्ञप्रतिषेधे तु सन्दिग्धा वचनादयः ॥१८०॥ इति ।

वचनमादिर्येषां पुरुषत्वादीनां ते **सन्दिग्धाः** अन्यथानुपपत्त्येति शेषः । ततोऽनैकान्तिका एव निश्चितान्यथानुपपत्तीनामेवैकान्तिकत्वोपपत्तेः । क्व पुनस्ते तथा ? **सर्वज्ञस्य** यावज्ज्ञेयव्यापिज्ञानसम्बन्धिनः पुरुषस्य, उपलक्षणमिदं तेन परिक्षीणदोषस्य च **प्रतिषेधे** साध्ये इति । निवेदयिष्यते च तेषां तत्र सन्दिग्धत्वम् । येषां तु त्रैरूप्याद् गमकत्वं तन्मत्या हेतव एवेत्याह–

रागादिसाधनाः स्पष्टा एकलक्षणविद्विषाम् । इति ।

रागादेरादिशब्दादसर्वज्ञत्वस्य **साधना** वचनादयः । केषाम् ? **एकलक्षणविद्विषां** सौगतादीनां सन्दिग्धाः, तेषामपि कथं ते तथेति चेत् ? न; **स्पष्टाः** पक्षधर्मत्वादौ सन्देहविकला यत इति । तथा हि–'सुगतो रागादिमान् सर्वज्ञो वा न भवति, वक्तृत्वादेः रथ्यापुरुषवत्' इति । अत्र तावत् स्पष्टमेव पक्षधर्मत्वम्; सुगते पुरुषत्वादिवत् वक्तृत्वस्यापि भावात् । कुड्यादावेव तन्न सुगत इति चेत्; न; "ज्ञानवान् मृग्यते" [प्र० वा० १।३२] इत्यादिना सुगत एव तस्योक्तेर्न कुड्यादौ तस्याचेतनत्वात् । कुड्यादिगतमेव तत्तत्रोच्यते उपचारान्न तत्त्वत इति चेत्; तत्त्वतः तत्र तत् कस्मान्न भवति ? रागादेस्तद्धेतोरभावादिति चेत्; कुड्यादावपि न भवेत् । तत्र तदभावेऽपि भवति न सुगत इति निर्निबन्धनैव कल्पना । तन्न पक्षधर्मत्वमप्रसिद्धम् । नापि सपक्षे सत्त्वम्; रथ्यापुरुषे रागादिमत्यसर्वज्ञे च दर्शनात् । नापि विपक्षाद्व्यावृत्तिः; पाषाणादौ तस्याप्रतिपत्तेरित्युपपन्नमेव तत्र तेषां गमकत्वम् । परकीयं तत्रोत्तरं दर्शयति–

---

१ सुगतसन्निधानात् कुड्यादिभ्यः देशना निस्सरन्तीति मनसिकृत्य सौगतः प्राह । २ "ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये । अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥"–ता० टि० । ३ वक्तृत्वम् । ४ कुड्यादौ । ५ रागाद्यभावेऽपि ।

धर्मिधर्मस्य सन्देहे व्यतिरेके ततो भवेत् ॥१८१॥
असिद्धिः प्रतिबन्धस्येत्यपरे प्रतिदिपेरे । इति ।

भवतु नाम पाषाणादौ वक्तृत्वाद्यभावो रागादिनिवृत्तेः, न तावता व्यतिरेकनिश्चयः क्वचित् सत्यामपि तस्यां [2]तद्भावस्याविरोधात् ।

निवृत्तरागः सर्वज्ञो वक्त्रादिर्नोपलभ्यते । ५

इति चेत्; मा नामोपलम्भि न तावता तस्याभावः, अनुपलब्धिलक्षणप्राप्तानुपलम्भात् अभावासिद्धेः । ततो धर्मिधर्मस्य सुगतलक्षणे धर्मिणि विद्यमानस्य वक्तृत्वादेर्योऽसौ ततो विपक्षाद्व्यतिरेके सन्देहः तस्मिन् सति भवेदसिद्धिः अनिश्चयः प्रतिबन्धस्य तादात्म्यतदुत्पत्तिरूपस्याविनाभावस्य । न हि सन्दिग्धव्यतिरेके तत्सिद्धिः, निश्चित एव तस्मिन् तदुपपत्तेः । तदसिद्धौ च न रागादिसाधनत्वं वचनादीनाम् इति एवं मन्यमानाः अपरे सौगताः प्रतिपेदिरे प्रतिपन्ना इति । १० अत्रोत्तरमाह—

वाचो विरुद्धकार्यस्य सिद्धिः सर्वज्ञबाधनी ॥१८२॥
शिरःपाण्यादिमत्त्वाद्या विरुद्धव्याप्तसिद्धयः । इति ।

इदमेवासिद्धं यद्वाचो विरुद्धकार्यत्वं शिरःपाण्यादिमत्त्वादेर्वा विरुद्धव्याप्तत्वम्; सर्वज्ञलक्षणे विपक्षे तद्व्यावृत्तेः सन्देहेन तदसिद्धेर्निरूपितत्वात् । अथ अत एव विपक्षाभावस्य निश्चये १५ तत्सन्देहस्य निवृत्तिः; तदयुक्तम्; परस्पराश्रयात्—सिद्धावतो विपक्षनिषेधस्य तद्द्वारेण तन्निवृत्तिः, ततोऽपि तत्सिद्धिरिति चेत्; न; तद्व्यावृत्तेः सपक्षदर्शनादेव निश्चयाद् धूमादिवत् । न हि धूमादेरप्यन्यदेव विपक्षव्यावृत्तिनिश्चये निमित्तम् अन्यत्र सपक्षदर्शनात् । तच्च वचनादावपि, रागादिमत्यसर्वज्ञ एव रथ्यापुरुषादौ तस्य दर्शनात् । तथापि तस्यान्यत्र भावे धूमादेरपि स्यादिति कथं निश्चिता ततोऽपि पावकादिप्रतिपत्तिः ? ततो यथा न धूमादिः शिंशपात्वादिर्वा[3] पावकादेर्वृक्षादेर्वाऽन्यत्र २० भवति भूयस्तन्निष्ठतयैवोपलब्धेरेवं न वचनादिशिरःपाण्यादिमत्त्वादिकं वा किञ्चिज्ज्ञादेरन्यत्र, भूयोऽपि तन्निष्ठतयैव तस्यापि दर्शनात् । अथ सर्वज्ञादिरपि किञ्चिज्ज्ञादेरन्यो न भवति चेतनत्वादिना तुल्यजातीयत्वात् तत्कथं तत्र तदभाव इति ? तर्हि द्रव्यान्तरमपि न पाकादेर्वृक्षादेर्वा अन्यदेव मूर्तत्वादिना समानजातीयत्वादिति तत्रापि धूमादिना शिंशपात्वादिनापि भवितव्यम् । अवान्तरभेदापेक्षया तस्य तद्विजातीयत्वं प्रकृतेऽपि समानम् । ततो युक्तं विरुद्धकार्यत्वं वाचः, सर्वज्ञविरुद्धात् किञ्चिज्ज्ञादेव २५ तस्या उत्पत्तेः । ततस्तस्याः सिद्धिर्भवत्येव सर्वज्ञस्य बाधनी[4] तया तद्विरुद्धं किञ्चिज्ज्ञत्वमुपानयन्त्या तस्य प्रतिक्षेपात् यथा धूमसिद्धिः शीतस्पर्शस्य । एवं शिरःपाण्यादिमत्त्वमाद्यम् आदौ भवं

---

१ रागादिनिवृत्तौ । २ वक्तृत्वस्य । ३-पादिर्वा आ०, ब०, प० । ४ बाधनीयतया आ०, ब०,प० ।

यासां पुरुषत्वादीनां[1] सिद्धीनां ता अपि सर्वज्ञस्य बाधन्य इति वचनपरिणामेन[2] सम्बन्धः। कुतस्तास्तद्बाधन्य इति चेत्; विरुद्धेन निषेध्यप्रत्यनीकेन किञ्चिज्ज्ञत्वेन व्याप्तास्ता एव सिद्धय इति उपलब्धयो यत इति। तत्रोदाहरणं यथा न वेदाः प्रमाणं दृष्टेष्टविरोधादिति। प्रामाण्यविरुद्धं खल्वप्रामाण्यं तद्व्याप्तश्च दृष्टेष्टविरोध इति। प्रसिद्धं चेदं बौद्धस्येति न निवृत्य कथ्यते। तदेवं विरुद्धकार्योपलब्धिं विरुद्धव्याप्तोपलब्धिं च प्रतिपाद्य व्यापकविरुद्धोपलब्ध्यादिनाऽपि तद्बाधनं दर्शयन्नाह—

सत्सम्प्रयोगजत्वेन विरुद्धः सकलग्रहः ॥१८३॥
स्वभावकारणासिद्धिरेकलक्षणविद्विषाम्। इति।

सद्भिर्विद्यमानैरर्थैः अक्षाणां यः समीचीनप्रयोगः तस्माज्जातं तस्य भावः सत्सम्प्रयोगजत्वं तेन प्रत्यक्षज्ञानधर्मेण विरुद्धः सकलस्य देशादिविप्रकृष्टस्य ग्रहः सकलवेदित्वम्। तस्य हि व्यापकमसत्सम्प्रयोगजत्वं तद्विरुद्धश्चेदं सत्सम्प्रयोगजत्वं तथागतेऽपि प्रत्यक्षे प्रतीयमानं स्वप्रत्यनीकाऽसम्प्रयोगजत्वव्यावर्तनद्वारेण तद्व्याप्यं सकलग्रहं व्यावर्तयतीति युक्ता व्यापकविरुद्धोपलब्धिः। यथा नात्र तुषारस्पर्शो वह्नेरिति। वह्नेर्हि शीतस्पर्शविरुद्धस्योपलब्ध्या तद्व्याप्यस्य तुषारस्पर्शस्यात्र प्रतिक्षेप इति प्रसिद्धमेवात्र तद्विरुद्धोपलब्धित्वम्। अथ तथागते ज्ञाने सत्सम्प्रयोगजत्वमसिद्धम्; भावनाप्रकर्षपर्यन्तादेव तस्योत्पत्तेरिति; तन्न; तस्यापि प्रत्यक्षत्वादेव साधनात्। तथागतमपि प्रत्यक्षं सत्सम्प्रयोगजं प्रत्यक्षत्वात् अस्मदादिप्रत्यक्षवदिति। एतदपि स्वसंवेदनप्रत्यक्षेण व्यभिचारीति चेत्; न; निरंशवस्तुवादिनः स्वसंवेदनमर्थवेदनं चेति स्वभावद्वयस्यैकत्रासम्भवात्।

तथा, स्वभावकारणासिद्धिरपि बाधनी[3] तत्र भवेत्। नन्वेवं स्वभावासिद्धिः स्वभावानुपलब्धिः; यथा नास्ति सर्वज्ञोऽनुपलब्धेरिति। कथं पुनरदृश्यानुपलब्धेर्गमकत्वं सत्यपि वस्तुनि सम्भवात् परचेतोवृत्तिविशेषवदिति चेत्; किं पुनः सर्वज्ञस्य अदृश्यत्वम्? तथा चेत्; न; स्वयमपि तत्प्रसङ्गात्। परापेक्षतयैवादृश्यत्वमिति चेत्; न; निरंशैकान्ते स एव दृश्यश्चादृश्यश्चेति स्वभावद्वयानुपपत्तेः, ततो दृश्य एवासाविति कथं तदनुपलब्धिरदृश्यानुपलब्धिर्यतो न गमिका भवेत्? नन्वेवं न काचित्[5] दृश्यानुपलब्धिः; सर्वस्य केनचिद्दृश्यस्य सर्वैरपि दर्शनादिति चेत्; अयमपि भवत एव निष्फलवस्तुवादिनो दोषः।

तथा कारणसिद्धिः कारणानुपलब्धिः। यथा नातीतादिविषयं योगिप्रत्यक्षं तदभावात् इति, अतीतादिकं हि तत्प्रत्यक्षस्य कारणं "नाकारणं विषयः" [ ] इत्यभिधानात्। न चातीतादेर्भावः; प्रध्वस्तत्वेनातीतस्य अनागतस्य चानुत्पन्नत्वेनाभावग्रस्तत्वादिति। एवमेते वचनादयः कार्यस्वभावानुपलम्भरूपतया त्रैविध्यमपरित्यजन्तोऽप्यन्यथाऽनुपपत्तिवैकल्यादेव अगमकाः। तदेव दर्शयति—

कथन्न सम्भवी वक्ता सर्वज्ञस्तस्य तेन नो ॥१८४॥
यावत् प्रकृष्यते रूपं तावत् कार्यं विरुध्यते। इति।

१—दीनां ता आ०, ब०, प०। २—न कृतः स—आ०, ब०, प०। ३ तत्र स्वभा— आ०, ब०, प०। ४ परचेतोनिवृ— आ०, ब०, प०। ५ —चिददृश्या— आ०, ब०, प०।

वचनस्य विज्ञानमेव कारणम्, असति तस्मिन्निच्छायामपि तदभावादिति निवेदनात्। तच्च तस्य यावत् यत्प्रमाणं प्रकृष्यते रूपं तावत् तत्प्रमाणं कार्यं वचनं तेन नो विरुद्ध्यते अपि तु तदपि प्रकृष्यत एव। सति विशिष्टे वह्निप्रकर्षे धूमेऽपि तत्कार्ये प्रकर्षस्यैव दर्शनात्। ततः प्रकर्षपर्यन्तगतेऽपि ज्ञाने वचनस्याविरोधात् कथन्न सम्भवी वक्ता सर्वज्ञः? किन्तु सम्भव्येव सकलवेद्यपि वक्ता। तन्नान्यथाऽनुपपत्तिरत्र। स्यादेवं यदि विज्ञानाद्वचनम्, न चैवं विवक्षायास्तत्कारणत्वात्। सा च रागविशेषत्वेन दोषात्मा सती विधूताशेषदोषतो निःशेषतत्त्वज्ञानान्निवर्तमाना वचनमपि निवर्तयत्येव, तत्कथं नान्यथाऽनुपपत्तिर्यतस्तत्सुगतादौ अनिवर्तितप्रसरतया प्रवर्तमानं विवक्षादोषोपस्थापनेन निःशेषवेदित्वं न व्यापादयेदिति चेत्? अत्राह—

विवक्षामन्तरेणापि वाग्वृत्तिर्जातु वीक्ष्यते ॥१८५॥
वाञ्छन्तो वा न वक्तारः शास्त्राणां मन्दबुद्धयः। इति।

न सर्वदा वक्तुकामतयैव वचनप्रवृत्तिर्विनापि तया गोत्रस्खलनादौ तदुपलब्धेः, तदापि प्रमादनिबन्धनत्वात् तस्या न विज्ञानहेतुकत्वम्। ततो यदि विवक्षातः प्रमादाद्वा तत्प्रवृत्तिरुभयथापि दोषजातेरनतिवर्तनात् भवत्येव ततः क्वचिद्दोषोपस्थापनद्वारेण सकलज्ञत्वप्रतिक्षेप इति चेत्; इदमप्ययुक्तम्; तदुभयाभावेऽपि तत्प्रवृत्तेर्दर्शनात्। यथा तीव्राभियोगवतो निरन्तरा संस्कृतप्रवृत्तिः। नहि तत्र प्रमादः; लक्षणस्य क्रियाकारकान्वयस्य चापरिभ्रंशात्। नापि इच्छाऽनुगमः; अतः परमिदमुच्चारयामीत्यभिनिवेशाभावात्। ततो विज्ञानस्यैव तद्धेतुत्वं निर्ह्रासातिशयानुविधानात्। अनुविधत्ते हि तत्प्रवृत्तिर्विज्ञानस्य निर्ह्रासातिशयञ्च, मन्दे तस्मिन् मन्दायाः पटीयसि च पटीयस्याः तस्या अपि प्रतिपत्तेः। अपि च, यदि वाञ्छायाः तद्धेतुत्वं मन्दमतयोऽपि शास्त्राणां व्याख्यातारो भवेयुः। न चैवम्, वाञ्छतामपि तेषां तदप्रतिपत्तेः। अतो विज्ञानहेतुकैव तत्प्रवृत्तिः एतदेव दर्शयन्नाह—

प्रज्ञा येषु पटीयस्यः प्रायो वचनहेतवः ॥१८६॥
विवक्षानिरपेक्षास्ते पुरुषार्थं प्रचक्षते। इति।

येषु बुद्धयः पटीयस्यो भवन्ति पुरुषेषु प्रायः सामस्त्येन वचनहेतवः कदाचिदपि तदभावे तदप्रवृत्तेः ते प्रचक्षते कथयन्ति। किम्? पुरुषार्थं धर्मस्तत्प्रयोजनादिकम्। कीदृशाः? विवक्षानिरपेक्षास्ते वक्तुकामतानिर्व्यपेक्षाः। तत एवोक्तम्—

"आसिसिपादिविरहितः स्वासनगमनप्रभाषणस्थानाद्यैः।
निरवद्यचित्ररचितैः प्रवरगुण त्वमसि चित्रचरितो नाम्ना।।" [ ] इति।

भवतु वा विवक्षा तथापि न दोष इत्याह—

अप्रमत्ता विवक्षेयमन्यथा नियमात्ययात् ॥१८७॥ इति।

इयं सकलवेदिनि परैः परिकल्प्यमाना **विवक्षा** वक्तुमिच्छा **अप्रमत्ता** प्रमादरहिता कस्मात् ? **अन्यथा** अन्येन प्रमत्तप्रकारेण योऽसौ **नियमस्तत्कृतस्य** वचनप्रबन्धस्य स्थानत्रयेऽपि अविसंवादावधारणं तस्या **अत्ययो**ऽभावस्तस्मात्। नहि प्रमादवद्धेतुनिबन्धनस्य तन्नियमः सम्भवति, अस्ति चायं प्रत्यक्षविषये प्रथमेन अनुमानवेद्ये द्वितीयेन अत्यन्तपरोक्षे च तृतीयेन प्रस्तावेन तन्नियमस्य प्रसाधनात्। ततः सा प्रमादरहितैव ततो न दोषवतीत्याह—

इष्टं सत्यं हितं वक्तुमिच्छा दोषवती कथम् । इति ।

इष्टं श्रेयोऽर्थिभिरभिलषितं संसारतत्कारणादिकं **सत्यं** न सौगतादिवत् कल्पितम्। अत एव **हितं** पुरुषार्थभूतं **वक्तुमिच्छा** कथयितुकामता **कथं दोषवती** न कथञ्चिदिति ? कुतः पुनः कस्यचित् सकलज्ञानं यतः कथमित्याद्युच्यत इति चेत् ? अत्राह—

प्रज्ञाप्रकर्षपर्यन्तभावः सर्वार्थगोचरः ॥१८८॥ इति ।

प्रज्ञायाः सकलश्रुतार्थबुद्धेर्योऽसौ **प्रकर्षो** भाव्यमानाया अतिशयगमनस्य (नं तस्य) यः **पर्यन्तभावः** परिस्फुटव्यापारात्मा स **सर्वार्थगोचरः** सर्वदेशकालादिव्यवहितोऽर्थो जीवादिर्गोचरो यस्य स तथोक्त इति। एतदुक्तं भवति—सकलश्रुतार्थभावनायां तत्पर्यन्ते सा परिस्फुटसकलवस्तुप्रभाववती भवति कामिन्यादिभावनावत्। तद्वांश्च सर्वज्ञ इति। भवतु वक्ता सर्वज्ञः तद्वचनस्य तु कथं यथार्थत्वं यतस्तत्त्वज्ञानार्थिनामयमन्वेषणीयः स्यात् ? स्वरसत एव शब्दानामयथार्थबुद्धिहेतुत्वेन तदुक्तानामपि वस्तुगोचरत्वानुपपत्तेरिति चेत्; अत्राह—

तत्कार्योत्कर्षपर्यन्तभावः सर्वहिताभिधा । इति ।

तस्य तत्पर्यन्तभावस्य **कार्यं** वचनं तस्योत्कर्षः एकान्तप्रवादापेक्षोऽतिशयोऽविप्रतिसारलक्षणः तस्य **पर्यन्तभावः** स्वविषये सर्वत्र सत्त्वम्, **सर्वेभ्यो** हितस्य श्रेयसः तन्मार्गस्य च **अभिधा** प्रकाशनमिति। तात्पर्यमत्र—

वाचां हि तत्प्रयुक्तानामविसंवादभावतः ।
प्रतीयते यथार्थत्वं कथं तेनायथार्थता ॥१५४०॥
अयथार्थं वचः सर्वमिदं चेदर्थवद्वचः ।
अयथार्थं वचः सर्वमिति सन्धा विलिप्यते ॥१५४१॥
इदमप्ययथार्थं चेद्यथार्थं स्याद्वचः परम् ।
अयथार्थायथार्थत्वे यथार्थत्वव्यवस्थितेः ॥१५४२॥
यथार्थत्वे स्वतः सर्वं वचः किन्न तथेति चेत् ।
चक्षुरादि तथा किन्न सर्वमर्थवदुच्यताम् ॥१५४३॥
अर्थवद्गुणवत्तच्चेन्मिथ्यार्थमितरन्मतम् ।

---

१ "स्थानत्रयाविसंवादि श्रुतज्ञानं हि वक्ष्यते।" —त० श्लो० पृ० १३। प्रत्यक्षानुमेयाऽत्यन्तातीन्द्रियलक्षणे स्थानत्रये। २—यमुन्मेयणी—आ०, व०, प०।

वचस्यपि विभागोऽयं प्रशस्यः कल्प्यतां त्वया ॥१५४४॥
सर्वज्ञश्चेन्न वक्तव्यः कल्पितः किं त्वयाऽप्यसौ ।
प्रयोजनं विना यस्मान्न मन्दोऽपि प्रवर्तते ॥१५४५॥
तत्सन्निधानतस्तत्त्वज्ञानं स्यादिति चेत् कुतः ।
तज्ज्ञानं येन तत्सन्निधानादित्यभिजल्पसि ॥१५४६॥
तत्त्वज्ञानोदयाच्चेत् स क्व पुनस्तत्कृतो[1] गतः ।
निरन्वयस्य यद्धेतोर्गमकत्वं न वाञ्छसि ॥१५४७॥
कुतो वा सन्निधिस्तस्य नियतेष्वेव सम्भवी ।
अदृष्टनियमाच्चेत् स्यात् तत्त्वज्ञानं ततो न किम् ? ॥१५४८॥
तन्न तत्सन्निधानेन किञ्चिदस्ति प्रयोजनम् ।
विनाप्येवं यतस्तेन तज्ज्ञानमुपपत्तिमत् ॥१५४९॥ इति ।

ततो न युक्तमिदं राहुबलकीर्तेः--"चिन्तारत्नोपमानो जगति विजयते विश्वरूपोऽप्यरूपः ।" [ ] इति । तदुपमानत्वस्यैव सन्निधिबलात् तत्त्वज्ञाननिबन्धनरूपस्यानवगमात् । [2]ततो नोपमानादेव तत्त्वपर्यवसायिनस्तस्य परिज्ञानमिति कथन्न वक्तृत्वं तस्य कथं चायथार्थत्वं वचसाम् ? इत्युपमन्नमुक्तम्-'तत्कार्य' इत्यादि । तदेवं वक्तृत्वस्य सर्वज्ञत्वेनाविरोधमुपपाद्य पुरुषत्वादेरप्युपपादयन्नाह-

यथा वचनसर्वज्ञकार्यकारणभूतयोः ॥१८९॥
अविरोधेन [3]वाग्वृत्तेराद्रेकस्तन्निषेधने ।

तथैव पुरुषत्वादेरक्षयाद्बुद्धिविस्तरे ॥१९०॥

तथैव हि[4] वा [ग्] वृत्तेः हेतोस्तस्य सर्वज्ञस्य निषेधेन केवलम् आद्रेकः शब्दोत्साह एवार्थरहितः । मीमांसकस्य [5]स एवेति । केनेति चेत् ? **वचनसर्वज्ञकार्यकारणभूतयोरविरोधेन** वचनस्य सर्वज्ञस्य च योऽयमुक्तन्यायेन कार्यकारणभूतयोरविरोधस्तेनेति । **तथैव पुरुषत्वादेरादि**शब्दात् शिरःपाण्यादिमत्त्वादेरपि **तन्निषेधने आद्रेक** इति सम्बन्धः । एतदेव कुत इति चेत् ? तस्यैव पुरुषत्वादेर्[6] **बुद्धिविस्तरे** प्रज्ञाप्रकर्षे सत्यपि **अक्षयादिति** । यदि हि तस्य तेन विरोधः सति बुद्धिप्रकर्षतारतम्ये[7] तदप्यपकृष्यमाणमुपलभ्येत उष्णातिशयतारतम्ये शीतवत् । न चैवम्, अतो न तस्य तेन विरोध इति । केवलं [8]ततोऽपि तन्निषेधनमाद्रेक एव । स्यान्मतम्- नियतविषया एव निसर्गतो बुद्धयः तत्कथं तासां भावनाबलादपि सकलं तद्विषयं (सकलतद्विषयत्वम् ?) न

---

१ तत्कुतो आ०, व०, प० । २ ततोऽनुपमा- आ०,व०,प० । ३ वा वृ- ता० । ४ हिमवान् आ०, व०, प० । ५ आद्रेक एव । ६- तम्येनैव त- आ०, व०, प० । ७ पुरुषत्वादेरपि ।

हि तोयस्य पावकत्वेन परिभावितस्यापि पावकमयत्वमिति; तन्न; स्वशक्तित एव तासामशेषविषयत्वात्, अन्यथा व्याप्तिज्ञानानुपपत्तेरिति निवेदितत्वात्। किमिदानीं [1]तद्बलेनेति चेत्? न; तेन तद्गतस्यैव स्पष्टासाधारणाकारप्रतिभासप्रत्यर्थिनः कर्ममलस्यैव प्रत्याख्यानात्, चैतन्योन्मीलनप्रत्यर्थिनो विषोपलेपस्येवामृतध्यानबलेन। अत एवामनन्ति–"तपसा निर्जरा च" [त० सू० ९।३] इति। तदेव दर्शयति–

सर्वप्रकाशसामर्थ्यं ज्ञानावरणसंक्षयात्। इति।

ज्ञानमावियते येन तज्ज्ञानावरणं कर्म वक्ष्यमाणसद्भावं तस्य संक्षयः समन्तात् परिक्षयः श्रुतविषयभावनात्। ततः सर्वस्य यः प्रकाशः स्पष्टासाधारणाकारप्रतिभासरूपः तत्र सामर्थ्यं बुद्धीनामिति शेषः। एतदेव स्पष्टयन्नाह–

अक्षयात् पुरुषत्वादेः प्रतिपक्षस्य संक्षयात् ॥१९१॥
सर्वतोऽक्षमयं ज्योतिः सर्वार्थैः सम्प्रयुज्यते। इति।

ज्योतिर्ज्ञानमेव प्रभास्वरत्वाद् अक्ष आत्मा प्रकृतः प्रकर्षेण निश्चितो यस्मिन्नित्यक्षमयम् आत्मस्वरूपं स्वरूपादन्यत्र तन्निश्चयानुपपत्तेः। तत् सर्वार्थैः ग्राहकत्वेन सम्प्रयुज्यते। किमेकस्मिन्नेव मुखे? न; सर्वतः सर्वात्मना ऊर्ध्वमधस्तादग्रतः पृष्ठतः सर्वतश्च। कुतस्तथा? प्रतिपक्षस्य ज्ञानावरणस्य संक्षयात् निःशेषापगमात्। तथा च प्रवचनम्–

"निरावरणवाभासद्दिव्यबोधमहोमयी।
प्रख्यायोर्ध्वमधस्तिर्यक् प्रतिव्यक्ति प्रकाशते॥" [ ] इति।

प्रतिपक्षपरिक्षये तदाहितविशेषस्य ज्ञानस्यापि परिक्षयात्। कथं तस्य[2] पुनः सर्वार्थैः सम्प्रयोग इति चेत्? न; [3]तदापि तद्विशेषस्यैवास्पष्टप्रतिभासविभ्रमरूपस्य व्यावृत्तेः न ज्ञानमात्रस्यापि, निरन्वयायां वस्तुनिवृत्तौ प्रमाणाभावात्। अत एवेदम्–'अक्षयात् पुरुषत्वादेः' इति। पुरुषत्वमन्वितं जीवरूपम् आदिशब्दाच्चेतनत्वादीति तस्यैवेति चेत्; [4]ननु चेतनत्वमेव पुरुषत्वं तत्कथं तदन्यत् यत आदिपदेन सङ्ग्रह इति चेत्? न; तदापि तद्विशेषस्यैवास्पष्टप्रतिभासविभ्रम [रूप] पुरुषत्वस्य[5] साधारणेतरस्वभावस्य अचिद्रूपतन्मात्रत्वात्, चेतनत्वस्य चोपयोगव्यपदेशस्य असाधारणरूपत्वात्। अत एवोक्तम्–"उपयोगस्वात्मान्यो वस्तुत्वादिस्तदुभयभावो जीवः" [ ] इति। यदि प्रतिपक्षपरिक्षयाज्ज्योतिः छद्मस्थानां तदभावात् कथं रूपादिवेदनमिति चेत्? अत्राह–

कथञ्चित् स्वप्रदेशेषु स्यात् कर्मपटलाच्छता ॥१९२॥
संसारिणां तु जीवानां यत्र ते चक्षुरादयः। इति।

---

१ भवनाबलेन। २ पुनस्तस्य आ०, ब०,प०। ३ तथापि आ० ब० प०। ४ न चेत– आ०,ब०,प०। ५ –पस्य ता०।

भवेदयं प्रसङ्गोऽपि यदि संसारिणां तु छद्मस्थानामपि जीवानां स्वप्रदेशेषु कथञ्चित् कर्मपटलस्य ज्ञानावरणपरव्यपदेशस्य अच्छता रूपादिवेदनप्रतिबन्धिशक्तिवैकल्यलक्षणपरिणतिविशेषो न स्यात् । अस्ति चेयम्, अतोऽयं न प्रसङ्ग इति । यद्येवं तदच्छताया एव स्वरूपादिग्रहणोपपत्तेः किं चक्षुरादिभिरिन्द्रियैरिति चेत्; अत्रोत्तरम्–यत्र येषु तत्प्रदेशेषु कर्मपटलाच्छतेति सम्बन्धः । ते चक्षुरादय आदिशब्दाद्रसनादयश्च नापर इति । न हि गोलकादेरिन्द्रियत्वमन्यत्रोपचारात् । मुख्यतः क्षयोपशमविशेषस्यैव तत्त्वात् । अत एव गवाक्षसमत्वं तेषां तत्त्वविदः प्रतिपद्यन्ते[1] । यदि तेषां न मुख्यत इन्द्रियत्वं किन्न तदभावेऽपि तद्वेदनमिति चेत् ? भवत्येव तदच्छतायाम् । कथमन्यथा पिहितगोल(पिहितगोल)कादिव्यापारस्यापि स्वप्नादौ सत्यरूपादिवेदनम् ? निरूपितं चैतत् प्रथमप्रस्तावे ।

'सर्वार्थैः' इत्युक्तम् । सर्वे चार्था वर्तमानवदतीतानागताश्च । न च तेषां ग्रहणं ज्ञानकाले अविद्यमानत्वात्, कथमिदं तैः सम्प्रयुज्यत इति चेत् ? अत्राह–

साक्षात्कर्तुं विरोधः कः सर्वथावरणात्यये ॥१९३॥
सत्यमर्थं तथा सर्वं यथाऽभूद्वा भविष्यति । इति ।

तात्पर्यमत्र–यदि ज्ञानेन तत्कालासन्निहितस्याग्रहणं तर्हि तदात्मतद्देशयोरप्यसन्निहितस्याग्रहणात् न स्वरूपादन्यत्प्रमेयं नाम भवेत् । [2]यदि न तत्सन्निधानात् प्रयोजनमावरणापाये [3]ताभ्यामसन्निहितस्यापि परिज्ञानादिति; तर्हि कालसन्निधानस्यापि न किञ्चित् फलम्, अतीतादेरपि तदपायादेव प्रतिपत्तेरित्यावेद्यते । यथा[4] येन अनादित्वेनानन्तत्वेन च प्रकारेण **अभूत्** भूतं **भविष्यति** भावि च वेति समुच्चयार्थत्वात्, **तथा** तेन प्रकारेण **सत्यमविप्रलब्धं यथा** भवति **सर्वं साक्षात्कर्तुं को विरोधो** न कश्चित् । कदा ? **सर्वथावरणात्यये** इति ।

कालेनाऽसन्निकृष्टस्य न चेत् सर्वविदा ग्रहः ।
वेदेनापि तदर्थस्य भाविनः स्यात् कथं ग्रहः ॥१५५०॥
आनन्त्यात् भाविनोऽर्थस्य वेदार्थस्यापि तत्समम् ।
सर्वज्ञेनैव तज्ज्ञानं तद्वेदेनापि दुष्करम् ॥१५५१॥
तदर्थानन्त्यवित्तिश्चेन्नास्ति वेदादितीष्यते ।
[5]सतस्तस्य ततो वित्तौ कुतस्ते तत्प्रवेदनम् ॥१५५२॥
नास्त्येव तच्चेद्वेदोऽपि स्यादनन्तः कथं तव ?
तथापि तस्यानन्त्ये स्यात् अर्थशून्या व्यवस्थितिः ॥१५५३॥
ततो यथा स्वकालस्थमपि वेदोऽर्थवेदनम् ।
वेदार्थानन्त्यवित्तद्वत्सर्वज्ञोऽपीति गम्यताम् ॥१५५४॥

---

१ "अनेकगवाक्षान्तर्गतप्रेक्षकवत्"– प्रश० भा० पृ० ३३ । २ अथ न आ०, ब०, प० । ३ तदात्मतद्देशाभ्याम् । ४–थानादि– ता० । ५ समंतस्य–आ०, ब०, प० ।

यदि परदुःखादिकं सर्वज्ञो न जानाति कथं तज्ज्ञत्वम् ? जानाति चेत्,कथन्न दुःखादिमान् ? नहि परस्यापि तत्साक्षात्करणादपरं दुःखादिमत्त्वमिति चेत् ; अत्राह—

[1]परदुःखपरिज्ञानादुःखितः स कथं भवेत् ॥१९४॥
स्वतो हि परिणामोऽयं दुःखितस्य न योगिनः । इति ।

परेषां छद्मस्थानां दुःखं तस्य, उपलक्षणमिदं तेन रागादेश्च **परिज्ञानात् दुःखितः** सः सर्वज्ञः **कथं** नैव **भवेत्** ? न हि दुःखपरिज्ञानादेव दुःखितत्वम् अपि तु स्वतस्तथा परिणामात् । न चायमस्ति **योगिनः** अपि तु **दुःखितस्य** संसारिण एव । ततः स एव दुःखी न तज्ज्ञानमात्रेण योग्यपि । न हि पितुरपि पुत्रदुःखपरिज्ञानादेव दुःखित्वं किन्तु स्वतस्तथापरिणामादेव,अन्यथा दुश्चरितपुत्रपरिक्लेशपरिज्ञानादपि तस्य दुःखितत्वं प्राप्नुयात् ।

किं पुनर्भावनापाटवात् कुतश्चिद् बुद्धिप्रकर्षो दृष्टोऽस्ति यतः सकलवेदनमपि ततो भवेदिति चेत् ? बाढमस्तीत्याह—

भावनापाटवाद् बुद्धेः प्रकर्षोऽयं [मलक्षयः] ॥१९५॥ इति

वैद्यकादिशास्त्रार्थस्य चेतसि भूयः परिमलनं **भावना** तस्याः **पाटवं** शक्तिविशेषस्ततो **बुद्धेः** साध्यासाध्यरोगविभागतन्निदानादिप्रतिपत्तेः **प्रकर्षो**ऽतिशयपर्यन्तप्राप्तिः **अयं** प्रसिद्धो लोके, तथा सर्वोऽपि जीवादिपदार्थनिवहः प्रवचनोपनीतया प्रज्ञयोपसंगृह्य परिभाव्यमानः तत्प्रकर्षकाष्ठामधितिष्ठतीति भावो देवस्य[2] । तथा हि—विवादापन्ना बुद्धिः स्वविषये प्रकर्षमधितिष्ठति, भाव्यमानत्वात्, वैद्यकादिबुद्धिवत् । प्रकर्षस्वरूपमाह—**'मलक्षय'** इति । **'अयम्'** इत्यत्रापि योज्यम्; अयमुच्यमानः प्रकर्षो **मलस्य** प्रकाशावरणादेः पर्यन्ते **क्षयो** नापरम्, स्वरसासम्भविरूपापादनं[3] भावनाशतेनापि तस्याशक्यत्वात् । कुतः पुनस्तत्क्षय एव स इति चेत् ? उच्यते—विवक्षितो बुद्धिप्रकर्षो मलक्षयरूपस्तत्त्वात् काचकामलाद्युपशमरूपपाटवादिबुद्धिप्रकर्षवत्[4] । तत्क्षयः किम् ? इत्याह—

कारणासम्भवाक्षेपविपक्षः सम्प्रतीयते । इति ।

कारणस्य सकलज्ञेयप्रतिपत्तिनिमित्तस्य **असम्भवाक्षेपः** स्वीकारस्तस्य **विपक्षो** विरोधी **सम्प्रतीयते** निश्चीयते । तथाहि—यस्य यत्र मलक्षयः स तं साक्षात् करोति यथा कश्चिदपगतलोचनमलोचनमलो नीलधवलादि, मलक्षयश्च कस्यचिद्[5] जीवादिनिखिलागमार्थविषय इति । किं पुनस्तद्बुद्धेः मलं यत्परिक्षयो हेतुः? न तावदयं रागादिः; सत्यपि तस्मिन् बुद्धेर्भावात् । नापि शरीरादिः; सकलवेदिन्यपि तदभ्युपगमात् । अत एव न दूरदेशादिरपीति चेत्; न; शरीरेन्द्रियादिव्यतिरिक्तस्य आत्मसमवायिपुद्गलपरिणतिविशेषस्य तत्त्वात् । कुतस्तदस्तीति चेत् ? उच्यते— 'यत स्वविषये ज्ञानमस्पष्टं तत्तादृशमलनिमित्तं यथा मदिरोपयोगिनः सन्निहितेऽपि घटादौ अस्पष्टवेदनम्, अस्पष्टं च सर्वत्रापि स्वविषये प्रवचनज्ञानम् ।'

---

१ तुलना—"संवेदनाद्रागिता चेत् स्त्रीमान् स्यात्तन्निरूपणात् । सम्बन्धाद्रागिता तस्य न तु रागादिवेदनात् ।" —प्र० वार्तिकाल० १। २३३। २ अकलङ्कदेवस्य । ३—सम्भवी रूपादा— आ०, ब०,प० । ४—पपाटवादि— ता० । ५—चिदपिजी— आ०,प० ।

इति मलसद्भावादुपपन्नं तत्परिक्षयस्य सकलज्ञेयप्रतिपत्तौ कारणत्वमिति सूक्तम्– **'कारण'** इत्यादि । तदेवमनैकान्तिकत्वं वक्तृत्वादीनामभिधाय साम्प्रतमसिद्धमपि हेत्वाभासं दर्शयन्नाह–

असिद्धश्चाक्षुषत्वादिः शब्दानित्यत्वसाधने ॥१९६॥ इति ।

शब्दस्य यत् अनित्यत्वं तस्य **साधने** कर्तव्ये **चाक्षुषत्वं** चक्षुर्ग्राह्यत्वमादिर्यस्य रासनत्वादेरसौ **असिद्धः**, असिद्धिः शब्दे धर्मिण्यसम्भवात् । 'चक्षुःश्रवसो भुजङ्गाः' इति तु प्रवादमात्रमिदं न वस्तुबलप्रवृत्तम्, अन्यथा पिहितलोचनानां पन्नगानां न शब्दश्रवणं भवेत् । अस्ति च तत्तेषाम्, रूपमपश्यतामपि शब्दश्रवणेन पलायनोपलम्भात् । भवतु शब्दे तस्यासम्भवः तथापि सिद्ध एव घटादौ भावात्, अन्यथा व्यर्थैव चक्षुरादिकल्पना भवेदिति चेत्; न; तत्र सतोऽपि शब्दानित्यत्वं प्रत्यगमकत्वात् । घटाद्यनित्यत्वस्य हि तन्नान्तरीयकत्वेन ततः प्रतिपत्तिर्न शब्दानित्यत्वस्य, तदभावात् ।

ननु तदभावोऽपि[1] नापक्षधर्मत्वात्; सत्यपि तस्मिन्[3] कृत्तिकोदयादौ तदभावात्[4]। 'न ह्युदेष्यति शकटं कृत्तिकोदयात्' इत्यत्र पक्षधर्मत्वम्; शकटे तदुदयवत् कृत्तिकोदयस्याभावात् । कृत्तिकासु वा तदुदयवत् इतरोदयस्यासम्भवात् । कालादेश्च धर्मिणः[6] सौगतकल्पितस्य शास्त्रकारेणैव प्रतिक्षेपात्[6] । तत्र अपक्षधर्मत्वेन तदभावः । शब्दानित्यत्वाभावेऽपि तत्र भवतो बाधकाभावादेव तर्हि तस्य भवतु तदभाव इति चेत्; नेदानीं तस्यासिद्धत्वम्, सिद्धस्यैव एवमगमकत्वप्रतिपादनादिति चेत्; सत्यम्; घटादिगतस्य तस्यैवमगमकत्वं शब्दगतस्य तु नैवम्, असिद्धत्वादेव तस्यागमकत्वात्, अन्यथाऽनुपपत्तिवैकल्यस्य तत्र तन्मूलत्वात् । कः पुनः शब्दगतत्वेनैव चाक्षुषत्वादिकं हेतुमभिदध्यात् अनिभिहितस्यासिद्धितोद्भावनाऽनुपपत्तेरिति चेत् ? 'सर्वं सर्वत्र' इति ब्रुवन् साङ्ख्य एवेति ब्रूमः । न च तस्य शब्दानित्यत्वमनभिप्रेतम्; आविर्भावादिरूपेण तदभ्युपगमात् । असिद्धत्वञ्चैतस्य तत्राप्रतिपत्तेः । नह्यप्रतिपन्नं सिद्धं नाम अतिप्रसङ्गात् । ततः स्थितम्–'असिद्ध' इत्यादि । हेत्वाभासत्वमन्यथानुपपत्तिवैकल्यात् । तस्य चैकविधत्वात् तदाभासानामप्येकविधत्वमेव प्राप्नोति, बहुविधत्वञ्चेष्यते तत्कथमिति चेत् ? अत्राह–

अन्यथासम्भवाभावभेदात् स बहुधा स्मृतः । इति ।

अन्यथासम्भवाभावः अन्यथाऽनुपपन्नत्वस्याभावः तस्य **भेदो** नानात्वं तस्मात् स हेत्वाभासो **बहुधा** बहुप्रकारः **स्मृतो** मत इति । कैः कृत्वा स बहुधेत्याह–

विरुद्धासिद्धसन्दिग्धैरकिञ्चित्करविस्तरैः ॥१९७॥ इति ।

१– श्रवणभु– आ०, ब ०, प०. । २ अविनाभावाभावः । ३ नान्तरीयकत्वे । ४ पक्षधर्मत्वाभावात् । ५ "यदा च स एव कालो धर्मी तत्रैव च साध्यानुमानं चन्द्रोदयश्च तत्सम्बन्धीति कथमपक्षधर्मत्वम् ?"–प्र० वा० स्ववृ० पृ० ११ । ६ "कालादिधर्मिकल्पनायामतिप्रसङ्गः" –प्र० सं० पृ० १०४ । "यदि पुनराकाशं कालो वा धर्मी तस्य उदेष्यच्छकटवत्त्वं साध्यं कृत्तिकोदयः साधनं पक्षधर्म एवेति मतम् ; तदा धरित्रीधर्मिणि महोदध्याधाराग्निमत्त्वं साध्यं महानसधूमवत्त्वं साधनं पक्षधर्मोऽस्तु, तथा च महानसधूमो महोदधौ अग्निं गमयेदिति न कश्चिदपक्षधर्मो हेतुः स्यात् ।" –प्रमाणपरी० पृ० ७१ । अक० टि० पृ० १७५ । ७ शब्दादिनि –ता० ।

व्याख्यातं प्रागेवेदम्। तत्र विरुद्धो नाम साध्याऽसम्भव एव भावी। स च द्वेधा विपक्षव्यापी तदेकदेशवृत्तिश्चेति। तत्र तद्व्यापी निरन्वयविनाशसाधनः सत्त्वकृतकत्वादिः, तेन परिणामस्यैव तद्विपक्षस्य साधनात्, सर्वत्र च परिणामिनि भावात्। तदेकदेशवृत्तिः प्रयत्नानन्तरीयकत्वश्रावणत्वादिः, तस्य [१] तत्साधनस्यापि विद्युदादौ परिणामिन्यप्यभावात्? तथा साध्ये सत्यसति च यस्यासिद्धिरसौ असिद्धो नाम। [२] स तु अनेकधा चायम्—अज्ञातसन्दिग्धस्वरूपाश्रयप्रतिज्ञार्थैकदेशाऽसिद्धविकल्पात्। तत्राज्ञातसिद्धः सर्वोऽप्येकान्तवादिपरिकल्पितो हेतुनिवहः, तत्परिज्ञानस्य "परोक्ष [ज्ञान] विषय" इत्यादिना [३] "विमुखज्ञानसंवेदः" इत्यादिना [४] च प्रतिक्षेपात्। सन्दिग्धासिद्धो यथेह निकुञ्जे मयूरः केकायितादिति। तत्र हि यदा स्वरूप एव सन्देहः किमयं मयूरस्यैव स्वरः आहोस्वित् मनुष्यस्येति? तदाश्रये वा किमस्मान्निकुञ्जात् केकायितापात आहोस्विदन्यत इति तदा भवत्येव सन्दिग्धासिद्धत्वमस्य।

स्वरूपासिद्धो यथा—"सहोपलम्भनियमादभेदो नीलतद्धियोः" [ ]. इत्यत्र [५] यदि युगपदुपलम्भनियमो हेत्वर्थः; सोऽसिद्ध एव विषयदर्शनेऽपि सन्तानान्तरगतस्य तज्ज्ञानस्य कुतश्चित्तत्प्रतिपत्तावपि तद्विषयविशेषस्य अनवगतेरिति प्रथमप्रस्तावे निरूपितत्वात्। अथैकोपलम्भनियमः; सोऽपि तादृश एव। न ह्येकस्य ज्ञानस्यैवोपलम्भो बहिरर्थस्यापि तद्भावात्। कः पुनरयं बहिरर्थो नाम यस्योपलम्भात् [६] एँकोपलम्भस्यासिद्धिः? नीलधवलादिरिति चेत्; न तन्मात्रेण तत्त्वमपि तु ज्ञानादर्थान्तरत्वे तद्वेद्यत्वे च; तन्मात्रस्य ज्ञानत्वेऽप्यविरोधात्। न च नीलादेरन्यज्ज्ञानं पश्यामो यतोऽर्थान्तरत्वं तद्वेद्यत्वं वा तस्य भवेत्। अव्यतिरेके तु न तस्य बहिरर्थत्वं सुखादिवत् ज्ञानत्वस्यैवोपपत्तेः। अथ नीलमहं पश्यामीति प्रतीतेः कथमर्थान्तरस्य ज्ञानस्याभावः अहंबुद्धिवेद्यस्य [७] तत्त्वादिति? तदपि न युक्तम्; कर्तृकर्मक्रियारूपस्यापि विभागस्याविभागरूपे नीलादावेव कल्पितरूपत्वात्, शिलापुत्रस्य शरीरमित्यादिवत् अतात्त्विकत्वात्। न हि तत्त्वतोऽहम्प्रत्ययस्य तत्र व्यापारः। व्यापारे वा तत्रापि तद्वेद्ये व्यापारान्तरेण भवितव्यं तत्राप्यपरेणेत्यनवस्थानं भवेत्। व्यापारमव्यापार [८] एव स प्रत्येति चेत्; नीलादि किन्न तथा प्रत्येति? प्रत्येतु को दोष इति चेत्; सर्वं तर्हि प्रतीयात् अविशेषात्। न चाहमित्यपि शरीरादन्यः, स्थूलोऽहमिति तत्सामानाधिकरण्येन प्रतीतेरन्यथाऽसम्भवात्। शरीरस्य च ग्राहकत्वे ग्राह्यमपि तदेवेति सिद्धं नीलादितज्ज्ञानयोरनर्थान्तरत्वमिति कथं तस्य बहिरर्थत्वमिति चेत्? उच्यते—तदेव तदर्थान्तरं ज्ञानं यस्यायं भवद्विचारो व्यापारः। सोऽपि नीलादीनामन्यतमस्यैवेति चेत्; न; तस्य स्वरूपादन्यत्राऽप्रवृत्तेः। न हि तत् नीलादिकमशेषमविषयीकुर्वत् तद्व्यतिरिक्तज्ञानाभावप्रतिपत्तौ

---

१ अनित्यत्वसाधनस्यापि। २ 'स तु' एते पदे व्यर्थे। त्वनेक— ता०। ३ न्यायवि० श्लो० १।११। ४ न्यायवि० श्लो० १।१९। ५ "धर्मश्च नीलाकारतद्धियौ तयोरभिन्नत्वं साध्यधर्मः ययोक्तः सहोपलम्भो हेतुः। ईदृश एव आचार्यीये प्रयोगे हेत्वर्थोऽभिप्रेतः।" —तत्त्वसं० पं० पृ० ५६७। प्र० वा० ३।३८७। ६ —यसन्द— प०। ७ एतत्योप— आ०,ब०,प०। ८ —वत्तज्ज्ञा— आ०, ब०, प०। ९ —व्यत्वस्य आ०,ब०,प०। १० ज्ञानत्वादिति। ११ एव प्र— आ०, ब०, प०।

समर्थम्, व्यतिरिक्तभावप्रतिपत्तेर्व्यतिरेचयितव्यवस्तुप्रतिपत्तिनान्तरीयकत्वात्। अथ तदेव नीलादिकं यथा-स्वमात्मनि ज्ञानान्तराभावमवैति तत्किं तदर्थेन व्यतिरिक्तज्ञानेनेति चेत् ? न; विना तेन तदेवेत्यादेरपि दुरवबोधत्वात्। न ह्येकेन तस्य सर्वस्याऽनवगमे युक्तमिदं तदेवेत्यादिकम्, एकज्ञानव्यापारतयैवास्य प्रतीतेः। ततोऽस्त्येव ज्ञानमर्थान्तरं नीलादेः। कथं पुनस्तेनाप्यव्यापारेण तस्य ग्रहणम् ? सव्यापारत्वेऽनवस्थानस्य प्रतिपादनादिति चेत्; न; स्वत एव तस्य व्यापारत्वेन व्यापारान्तरकल्पनावैफल्यात्। स्वतोऽपि सर्वग्रहणव्यापारमेव तत् कस्मान्न भवतीति चेत् ? नीलमपि स्वतो नित्यं व्यापि च कस्मान्न भवति ? स्वहेतोरेव नियतकालदेशतयोत्पत्तेरिति चेत्; न; अन्यस्यापि तत एव नियततद्व्यापारत्वेनोत्पत्तेरविशेषात्। यत्पुनरुक्तं मस्तकस्फोटविज्ञानप्रकरणे—

"अदृष्टं पश्यतीत्येतत् सुतरामतिदुर्घटम्।
दृष्टं च पश्यतीत्येतत् व्यर्थकत्वात् सुदुर्घटम्॥" [ ] इति।

तदपि न युक्तम्; अदृष्टस्यैव पावकादेरनुमितस्य पुनर्दर्शनात्। तदपि दृष्टमेव दृष्टतयैव तत्रानुमानस्यापि प्रवृत्तेरिति चेत्; न; दर्शनाभावे दृष्टत्वस्यासम्भवात्। दर्शनभावे व्यर्थतैव अनुमानस्य सन्निहिततद्रूपवदिति निवेदितमेव तत्पूर्वं सविस्तरमिति नातीव निबध्यते[1]। कुतश्च दृष्टत्वं नीलादेर्यतः परेण तद्दर्शनं व्यर्थमुच्यते ? स्वत एवेति चेत्; न; परस्य तद्विषयस्य दर्शितत्वात्। सतोऽपि परस्य कथं तद्विषयत्वं तत्र व्यापाराभावात् ? न हि सममसमयस्य तत्प्रतिभासस्य तदायत्तत्वमुपपन्नम्, अन्यथा दीपप्रतिभासोऽपि तुल्यकालतदन्तरायत्तः प्राप्नुयात्। तन्नेदं समञ्जसमुपकल्पितम्। अभिहितं चेदं तत्रैव प्रकरणे—

"समानकालयोरेव कार्यकारणता यदि।
भवेदेवं यदि भवेद्व्यापार इह कस्यचित्॥
प्रदीपयोरपि भवेत् ग्राह्यग्राहकता तथा।
घटयोरपि तेनेदमसमञ्जसवृत्तिकम्॥" [ ]

इति चेत्; अहो भवान् अश्वारूढोऽपि अश्वं न पश्यति, यतोऽनेन विचारेण नीलतज्ज्ञानद्वयं पश्यन्नपि परतस्तत्प्रतिपत्तिं प्रतिषेधति। न हि विचारस्यातद्विषयत्वे तेन तत्र ग्राहकभावस्यान्यस्य वा निराकरणमुपपन्नम् अप्रतिपन्ने भूतले कलशनिषेधवत्। ततो यथा स्वहेतुतस्तथोत्पत्तेर्विचारस्य तद्विषयत्वं तद्भावनिषेधविषयत्वं वा सममसमयस्यापि तथा दर्शनस्यापि नीलादिगोचरत्वमुररीकर्तव्यं तथाप्रतीतेः। न प्रदीपादिभिरतिप्रसङ्गापादनं तत्र तत्प्रतीतेरभावात्। ततोऽस्ति बाह्यस्याप्युपलम्भ इत्यसिद्धिरेवैकोपलम्भस्य हेत्वर्थस्य।

तथा पृथगनुपलम्भस्यापि। न हि तत्र किञ्चित्प्रमाणम् अप्रतिबन्धात्। न हि तत्र तस्य तादात्म्यम्; तद्व्यावृत्तिरूपत्वापत्तेः। तस्यापि पुनःप्रमाणान्तरेण तदात्मना ग्रहणेऽनवस्थापत्तेः। नापि तस्मात्

---

१ निर्बध्यते आ०, ब०, प०। २ -पयदर्शनात् प०।

उत्पत्तिः; अवस्तुन्येव तस्याहेतुत्वात् । न च प्रतिबन्धान्तरम् । अप्रतिबद्धस्य च न तद्विषयत्वमतिप्रसङ्गादिति ।

आश्रयासिद्धो यथा भावमात्रानुपङ्गी विनाशो भावानां निर्हेतुकत्वादिति । निरन्वयो ह्यत्र भावप्रध्वंसो धर्मी निर्दिष्टः स चासिद्ध एव । अन्यथा किमनेन हेतुना तस्यैवातोऽपि साधनात् ? तत्कथमसिद्धावस्य सिद्धिः सिद्ध एव धर्मिणि तद्धर्मसिद्धेरुपपत्तेः । असिद्धिश्चास्य सान्वयस्यैव विनाशस्य प्रतीतेः, यथा बाल्यादेर्यौवनादौ । न हि तत्रान्वयो नास्ति, 'स एवायम्'इत्यपरिस्खलितात् प्रत्ययात् । हेतुफलभावादेवायं[1] नान्वयादिति चेत्; न; तन्निमित्तत्वेऽतिप्रसङ्गस्याभिहितत्वात् । भवतु तर्हि सान्वयनिरन्वयविशेषविवक्षारहितं तदुभयसाधारणं विनाशमात्रं धर्मी सिद्धत्वादिति चेत्; न; विशेषद्वयस्य असम्भवात् । न हि निरन्वयोऽपि विनाशः क्वचिदवगतिपथप्रस्थायी सान्वयस्यैव प्रतीतेः, तत्कथं तयोः किञ्चित् सामान्यं नाम यस्य हेतुं प्रत्याश्रयत्वमुपकल्प्येत ? तदेवाह—

सर्वथा नास्ति सामान्यं परिणामविनाशयोः ।
यो हेतोराश्रयः [अनिष्टेरिष्टः स्वात्मा विशेषतः] ॥१९८॥ इति ।

व्यक्तमेतत् । भवतु तर्हि परिणामात्मैव विनाशो धर्मीति चेत्; आह—**अनिष्टेरिति** । न हि परिणामः सौगतस्येष्टो यतस्तस्य भावमात्रानुपङ्गित्वं साध्यते । न च तत्साधनमुपपन्नं जैनं प्रति विवादाभावात् । कस्तर्हि सौगतस्येष्टः? इत्याह—**'इष्टः स्वात्मा विशेषतः'** इति । विशेषेण हि निरनुगमलक्षणेन सौगतस्येष्टो वस्तुस्वभावो न परिणामेन । स च प्रमाणाभावादसिद्ध इति कथमस्याश्रयासिद्धत्वं न भवतीति मन्यते ? निरंशवस्तुवादिनः सत्त्वादिः सर्वोऽपि प्रतिज्ञार्थैकदेशासिद्धः । तद्यथा अनित्यः शब्दः सत्त्वात् कृतकत्वात् उत्पत्तिमत्त्वाच्चेति । प्रतिज्ञार्थो हि[2] अत्र धर्मिसाध्यधर्मसमुदायः । तदेकदेशः पुनः शब्दोऽनित्यत्वं च, तत्र यथा अनित्यत्वस्य न हेतुत्वं साध्यत्वेनासिद्धत्वात् तथा शब्दस्यापि । अत एव शब्दत्वादेस्तत्स्वभावस्य परैस्तत्त्वमनभिप्रेतं तद्वत्सत्त्वादेरपि भवेत्, शब्दस्वभावस्य सत्त्वादिनानाधर्मस्याभावात्,अन्यथा निष्कलनिखिलवस्तुप्रतिज्ञाव्यापत्तेः । वस्तुरूप एव तत्र न विद्यत एव नानाधर्मो व्यावृत्तिरूपस्तु विद्यत एव व्यावर्त्यभेदेन तद्भेदस्य प्रतिष्ठितेः, **"यावन्ति पररूपाणि तावत्यस्तन्निवृत्तयः ।"** इति [ ][3] वचनादिति चेत्; न; तद्भेदस्याप्येकस्वभावनिबन्धनस्य कार्यभेदवदसम्भवात् अनेकस्वभावस्य च शब्दे वस्तुन्यभावात् । भाव एव व्यावृत्तिरूपस्येति चेत्; न; तन्निबन्धनस्यापि पुनस्तद्रूपानेकस्वभावस्य कल्पनायामनवस्थापत्तेः । सत्यमेतत्, केवलं विकल्पा एवाविचारितरम्या व्यावृत्तिभेदेन तद्भेदमुपकल्पयन्तीति चेत्; न तर्हि ततः कस्यचित् सिद्धिरवस्तुसस्पर्शित्वात्,अन्यथा ततः साध्यस्यैव सिद्धेरनर्थकं लिङ्गसमर्थनम् । तत्र कल्पनासिद्धस्य सिद्धत्वमित्यसिद्ध एव सत्त्वादिः । एतदेवाह—

साध्यसाधनभावो न शब्दे नाशित्वसत्त्वयोः । इति ।

---

१ स एवायमिति प्रत्ययः । २ अर्थध— आ०, ब०, प० । ३ "तस्मादेकस्य भावस्ययावन्ति पररूपाणि तावत्यस्तदपेक्षया व्यावृत्तयः ।" —प्र० वा० स्ववृ० पृ० ११९ ।

न हि शब्दे धर्मिणि नाशित्वस्य साध्यभावः साधनभावो वा सत्त्वस्य उपलक्षणमिदं तेन कृतकत्वादेश्च,तस्य वस्तुतः कल्पनया चावस्तुत्वात् । अत्रैव प्रतिवस्तूपमया दृष्टान्तमाचष्टे–

अनलः पावकोऽग्नित्वात् [इत्यनेकान्तविद्विषाम्] ॥१९९॥ इति ।

यथैव हि अनले धर्मिणि पावकत्वाग्नित्वयोर्न साध्यसाधनभावः शब्दभेदेऽपि वस्तुभेदाभावात् तथा प्रकृतयोरपि । न हि तत्रापि वस्तुभेदो विकल्पभेदस्यैव भावात् । केषां पुनस्तत्र तयोर्न तद्भावः ? इत्याह–'इत्यनेकान्तविद्विषाम्' इति । विकल्पबुद्धौ अनेकान्तं ये विद्विषन्ति तेषामिति। न हि अत्राभिलाप्येतराकारस्यानेकान्तस्याभावे विकल्पो नाम, यतः विकल्पिताऽपि हेतुसिद्धिर्भवेत् । भवतु कल्पितस्तत्र अनेकान्त इति चेत्; न; अनवस्थादोषस्योद्घोषितत्वात् । भवतः कथं तत्र तयोस्तद्भाव इति चेत् ? आह–

सर्वान्यसदृशः शब्दः सत्त्वादिपरिणामतः ।
सर्वान्यार्थासमः शब्दः शब्दादिपरिणामतः ॥२००॥ इति ।

साधारणेतरस्वभावो हि शब्दः स्याद्वादिनां प्रतीतिबलात् । प्रतीयते हि तत्र साधारणस्वभावत्वं सत्त्वज्ञेयत्वादिना परिणामेन, तद्रूपेण तस्य सर्वापरपदार्थसादृश्यात्, असाधारणरूपत्वं च शब्दत्वश्रावणत्वादिना, तस्य तदन्यत्र सर्वत्राभावात् । अतः शब्दानित्यत्वसाधनेन तेषां सत्त्वादेः प्रतिज्ञाऽर्थैकदेशासिद्धत्वम् । शब्दादसाधारणपरिणामात्मनस्तस्य तद्विपरीतत्वेन न निरंशवादिनामिति भावः । शब्दस्य परिणामत्वे परिणामिना भवितव्यं तस्य तद्धर्मत्वात् । न चासौ कश्चिदपि अस्तीति चेत्; न; पुद्गलपरमाणूनां भावात् । एतदेवाह–

अणूनां श्रुतयोग्यत्वातिशयादानहानयः ।
शब्दोत्पत्तिविनाशाः [तत्साध्यसाधनसंस्थितिः] ॥२०१॥ इति ।

शब्दस्य हि उत्पत्तिर्नाम पुद्गलपरमाणूनां तालवादिभिः श्रवणज्ञानविषयभावयोग्यस्कन्धरूपातिशयोपादानमेव, विनाशोऽपि कुतश्चिदतिशयपरिहाणिरेव, नासतः सर्वथा प्रादुर्भावो नापि नोरूपः प्रध्वंसः प्रमाणाभावात् । ततो युक्तं परिणामत्वं शब्दस्य पुद्गलपर्यायत्वात् । न चेदमसिद्धमवबोद्धव्यं तृतीये निरूपयिष्यमाणत्वात् । बहुवचनं तु उभयत्रापि व्यक्तिबहुत्वापेक्षं प्रतिपत्तव्यम् । ततः किम् ? इत्याह–तत्साध्यसाधनसंस्थितिः । तत् तस्मात् साधारणेतरस्वभावसद्भावात् साध्यसाधनानामनित्यत्वसत्त्वादीनां संस्थितिरस्तीति शेषः । एवमन्येऽप्यसिद्धा हेत्वाभासा अभ्यूहितव्याः ।

सम्प्रत्यनैकान्तिकस्तदाभास उच्यते । कथं पुनर्विरुद्धेत्यादौ[1] कारिकायामनुक्तस्तदाभासः कथ्यते तदुक्तस्यैव विवरणीयत्वादिति चेत् ? न; सन्दिग्धशब्देन तस्यैव अभिधानात् । सन्दिग्धसाध्यविषयत्वेन तत्र तच्छब्दोपपत्तेः । स च यथा तनुकरणभुवनादिकं बुद्धिमद्धेतुकम् अचेतनोपादानत्वात् सन्निवेशविशिष्टत्वाच्च घटादिवदिति ।

स्यान्मतम्–सत एव साध्ये तद्विपक्षे च भावादनैकान्तिकत्वम् । न च तन्वादौ तादृशम-

१ न्यायवि० श्लो० २।१९७ ।

चेतनोपादानत्वादिकमस्ति यस्य घटादौ साध्यानुगमः प्रतिपन्नः । यदि स्यात् जीर्णप्रासादादिवत् तत्रापि प्रतिपत्तुः स्वयमेव कृतबुद्धिः स्यादिति व्यर्थमेवेयमनुमानकल्पनाभिर्भवेत् । ततोऽसिद्ध एव तत्रायं हेतुवर्ग इति कथमनैकान्तिकत्वम् ? तदुक्तम्—

"सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत् ।
सन्निवेशादि तद्युक्तं तस्माद्यदनुमीयते ॥" [प्र० वा० १।१३] इति;

तदयुक्तम्; प्रत्यवमर्शेन तत्रापि तत्सिद्धेः । अस्ति हि घटादाविव तन्त्वादावपि प्रत्यवमर्शः—'अयमचेतनोपादानः, अयमचेतनोपादानः' इत्यादिः, तत्कथं जीवति तस्मिंस्तत्र तदसिद्धत्वकल्पनम् ? व्यपदेश एवायं केवलं न प्रत्यवमर्श इति चेत्; न; कृतकत्वादावपि एवं प्रसङ्गात् । शक्यं हि वक्तुं घटः कृतकः शब्दोऽपि कृतक इति व्यपदेशमात्रमेवेदं नात्रापि सामान्यप्रत्यवमर्शः कश्चित् । तथा चात्रासावपि असिद्ध एवेति न कश्चिदपि हेतुः सिद्धः स्यात् । ततो यथा कृतकत्वादौ प्रत्यवमर्श एव सामान्यविषयः, तद्वदचेतनोपादानत्वादावपि इति सिद्ध एवायम्, केवलं साध्याभावेऽपि भावात् अनैकान्तिकः । तथा हि—बुद्धिमतो हेतोर्यच्छरीरं तद्यदि तेनैव बुद्धिमता बुद्धिमद्धेतुकं तन्निर्माणेऽपीति[1] तस्य शरीरान्तरं पुनस्तन्निर्माणे[2]पीति न क्वचिदवस्थितिस्तच्छरीराणाम् । अन्येन बुद्धिमता तद्धेतुकं तदित्यपि न युक्तम्; तच्छरीरस्यापि तदन्येन तद्धेतुकत्वकल्पनायामव्यवस्थापत्तेः । अथाशरीर-बुद्धिमद्धेतुकमेव तच्छरीरं तदयमप्रसङ्गः; तन्न; तन्त्वादावपि तद्धेतुकस्यैव प्रसङ्गात् । अस्तु तर्हि तत्[3] अतद्धेतुकमेवेति चेत्; सिद्धं तर्हि तेन व्यभिचारित्वम् अचेतनोपादानत्वादेः असिद्धे बुद्धिमति तच्छरीरस्याप्यसिद्धत्वात् कथं तेन व्यभिचारकल्पनम् ? सिद्धे सिद्धमेव तदिति चेत्; तथापि किं तत्कल्पनेन सिद्धस्य तेन[4] प्रत्यख्यानानुपपत्तेरिति चेत्; सत्यं यदि प्रमाणसिद्धेन तेन[5] तत्कल्पनम्; न चैवं पराङ्गीकारमात्रसिद्धेनैव तदुपपादनात्, तदङ्गीकारस्य अप्रमाणत्वात् कथं तद्विपर्ययेण व्यभिचार इति चेत् ? कथं तादृशेनैव क्षणक्षयादिना[6]ऽनुपलम्भस्य पक्षधर्मत्वं यतो 'नास्ति क्षणक्षयादिरनुपलम्भात् व्योमकुसुमादिवत्' इत्यनुमानमुज्जृम्भेत ? तदभावो न भावेषु साध्यते किन्तु तद्विरुद्धधर्मनि (द्धं नि) त्यत्वमात्रं कौटस्थ्यमेवेति चेत्; अप्रतिपन्ने तस्मिन्[7] कथं तत्र तद्विरुद्धत्वप्रतिपत्तिः ? पराङ्गीकाराद[8]प्रतिपन्नव्यभिचारबुद्धेरिति स्वरुचिविरचितदर्शनप्रदर्शनमात्रम् । तस्य नास्त्येव शरीरमिति केचित् । तैरपि तत्र निदर्शनं वक्तव्यं यतोऽशरीरस्यैव तस्य तन्त्वादिकर्तृत्वं प्रतीयेत इति । उच्यत एव गाढसुप्तः तेन अशरीरेणापि स्वशरीरविक्षेपादेः करणादिति चेत्; अबुद्धिमताऽपि तर्हि तेन तत्करणाद् बुद्धिमत्त्वमपि तस्य न स्यात् । कुविन्दादेः बुद्धिमत एव दर्शनात् तस्यापि बुद्धिमत्त्वे सशरीरत्वमपि स्यादविशेषात् । किमर्थं वा बुद्धिमतोऽपि तस्य तन्त्वादिकरणम् ? क्रीडार्थमिति चेत्; न; क्षीणक्लेशस्य क्रीडाऽसम्भवात् । क्लेशोऽपि विद्यत एव तस्य रागादिरिति चेत्;

१— रेऽपि तस्य शरीरान्तरं पुनस्तन्निर्माणेरीति प० । २ शरीरम् । ३ व्यभिचारकल्पनेन । ४ शरीरेण । ५ पराङ्गीकारमात्रसिद्धेनैव । ६ क्षणिकत्वाभावः । ७ क्षणिकत्वे । ८ —दविप्रतिपन्ने व्य— आ०, ब०, प० ।

कथं तर्हि तस्य[1] दुस्तरासारसंसारघोरासातसागरोदरनिपातनिमित्ततां प्रतिपद्यमान एव तत्प्रयुक्तः क्रीडायां प्रवर्तेत ? बालप्रज्ञामलीमसमानसस्यैव तदुपपत्तेः । प्राकृतस्यैव[2] सोऽपि तन्निमित्तं न विश्वलोकातिशयिशक्तयधिष्ठानस्य महेश्वरस्य, न हि यथा पन्नगविषं मानुषाय [3]प्रतपत्येवं मयूरायापीति चेत्; न; तत्क्लेशेऽपि क्लेशत्वस्याविशेषात् । तथापि प्राकृतक्लेशस्यैव तन्निमित्तत्वं न तस्येति कल्पनायाम् अचेतनोपादानत्वाद्यविशेषेऽपि कलशमुशलादिकमेव बुद्धिमद्धेतुकं न तन्वादीति किन्न विभाग- ५
कल्पनं यतो व्यभिचारदोषो दुष्परिहारो न प्राप्नुयात् ? किञ्च,

मुक्तानामपि तन्वादि कुर्वन् क्रीडति किन्न सः ।
प्रभावः स्यात् परं चैवमशक्यार्थोपकल्पनात् ॥१५५५॥
कर्मणां तन्निमित्तानामभावान्नेति चेदसत् ।
तेषामपि तदायत्तप्रादुर्भावतया स्थितेः ॥१५५६॥ १०
अचिन्त्यां बिभ्रतः शक्तिं किं वा तेषामपेक्षया ।
सहायापेक्षिणी शक्तिरचिन्त्या वा कथं भवेत् ? ॥१५५७॥
तन्न क्रीडापरत्वेन युक्ता तन्वादिनिर्मितिः ।
प्राणिनामुपभोगाय तत्कृतिर्यदि कल्प्यते ॥१५५८॥
उपभोगोऽपि कर्तव्यः प्रीतिरेव तनूभृताम् । १५
यद्यनुग्रहबुद्ध्याऽसौ तत्क्रियायां प्रवर्तते ॥१५५९॥
तथा च दुःखजन्मैषां न तत्कार्यतया स्थितम् ।
व्यभिचारेण तद्धेतून् योजयत्यपसंशयम् ॥१५६०॥
अस्ति निग्रहबोधोऽपि यदि तस्य मनीषिणः ।
द्रोहः कैस्तैः कृतो येन स तत्र परिकल्प्यताम् ॥१५६१॥ २०
द्रुह्यते सोऽपि चेदन्यैः सत्त्वैरत्यल्पशक्तिभिः ।
तत्प्रभावप्रवादाय त्वं प्रयच्छ जलाञ्जलिम् ॥१५६२॥
अद्रोहकृत्सु तन्नायं निग्रहस्तेषु युज्यते ।
कर्तुं बुद्धिमता देवैरिदमन्यत्र भाषितम् ॥१५६३॥

"तन्वादिकरणात् सत्त्वान् भवक्लेशेन योजयेत् । २५
बुद्धिमानीश्वरः कस्मात् स्वयं द्रोहमकुर्वतः ॥" [सिद्धिवि० परि०७] इति।

निग्रहोऽपि तेषामुपकारायैव, फलोपभोगेन कर्मपरिक्षये निर्वाणपुरप्राप्तेर्भावादिति चेत्; अपरिपक्वानामेव तर्हि तेषां[6] परिक्षयः कर्तव्यः स्यात् । एवं हि तेन जगदनुगृहीतं[7] भवति, प्रभुर्य-

---

१ तस्य स दु- आ०, ब०, प० । २ साधारणजनस्यैव । ३ प्रभवत्येवं आ०. ब०, प० । ४-शयः आ०, ब०, प० । ५-प्रभावाय आ०, ब०, प० । ६-पां क्षयः कः परि- आ०, ब०, प० । ७ जनानुगृहीतं आ०, ब० प० ।

देवेच्छति तत्करोतीति चानुसृतं भवति । यदि वा, कृत्वा परिशोधनात् कर्मणामकरणमेवोपपन्नम् "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" [ ] इति न्यायात् । तत्कर्मणामविद्यामलीमसाः प्राणिन एव कर्तारो न महेश्वरः स तु तेषां फलमेवोचितं परिकल्पयतीति चेत्; तन्वादीनामपि त एव किन्न कर्तारो यतस्तेषामीश्वरकर्तृत्वमुच्यते । प्राणिनामज्ञत्वादिति चेत्; न; कर्मस्वपि समानत्वात् । तथा हि—यथा ते तन्वाद्युपादानादिकं न जानन्ति तथा कर्मवैचित्र्यनिमित्तमपि, अन्यथा दुष्कर्मकरणासम्भवात् । मा भूवंस्तेऽपि तेषां कर्तार इति चेत्; आगतस्तर्हि तैरपि हेतूनां व्यभिचारदोषोऽप्रतिविधानः । तन्नोपकारायापि निग्रहकरणमुपपन्नम् ।

प्रयोजननिरपेक्षमेव तस्य जगत्करणं स्वाभाव्यादिति चेत्; कथं तर्हि तत्कस्यचिदनुग्रहाय अपरस्योपघाताय च ? महेश्वरस्यैवं नाभिसन्धिर्जगत्स्वभावादेव तद्विभाग इति चेत्; अनुबद्धस्तर्हि तेन व्यभिचारदोष इत्युपपन्नमनैकान्तिकत्वमचेतनोपादानत्वादीनाम् ।

तथा तत्पुत्रत्वादीनामपि । 'स [1]श्यामः तत्पुत्रत्वादितरतत्पुत्रवत् । पक्का एते तण्डुलाः एकस्थाल्यन्तर्गतत्वात् उपमृष्टतण्डुलवत्' इत्यादयोऽपि तद्विपक्षे बाधकवैधुर्येण अन्यथाऽनुपपत्तिवैकल्यादेव अगमकत्वपदवीमासादयन्ति न पुनस्त्रैरूप्यवैकल्यात् । अस्ति ह्यत्र पक्षधर्मत्वं देशान्तरगते देवदत्तादौ तत्पुत्रत्वस्य भावात् । सपक्षे सत्त्वञ्च, पार्श्ववर्तिनि पुरुषे श्यामे तदुपलम्भात् । विपक्षव्यतिरेकश्च तत्पुत्रत्वस्य अश्यामस्याप्रतिपत्तेः, अश्यामपुत्रस्य चातत्पुत्रत्वात् । नन्वत्र साध्यप्रतिबन्धो नास्ति—[2]न तत्पुत्रत्वं श्यामत्वस्य कार्यम्; ततः प्रागेव भावात्, विशिष्टाहारदेशादिबलेन पश्चादेव हि ततः श्यामत्वं भवति तत्कथं तद्धेतुकत्वं तत्पुत्रत्वस्य ? कथं वा तत्स्वभावत्वमिति प्रतिबन्धवैकल्यादेव अगमकत्वमत्र नान्यथाऽनुपपत्तिविरहादिति चेत्; कथं पुनस्त्रैरूप्ये सति तद्वैकल्यं कृतकत्वादावपि अविश्वासप्रसङ्गात् ? तदेवात्र नास्ति विपक्षव्यावृत्तेरभावात् अश्यामेऽपि बालावस्थायां तत्पुत्रत्वस्योपलम्भादिति चेत्; शिंशपात्वेऽपि तन्न स्यात्, अङ्कुरदशायामवृक्षत्वेऽपि तद्भावेन विपक्षव्यावृत्तेरभावात् । वृक्षपरिणामयोग्यतयाङ्कुरस्यापि वृक्षत्वे श्यामपरिणामशक्तितया बालकस्यापि किन्न श्यामत्वं यतो विपक्षव्यतिरेको न भवेत् ? ततस्तन्मात्रानुबन्धित्वात् साध्यधर्मस्योपपन्नमस्य स्वभावहेतुत्वं शिंशपात्वादिवदिति न प्रतिबन्धवैकल्यादगमकत्वम्, अन्यथाऽनुपपत्तिविरहादेव तदुपपत्तेः ।

सम्प्रति चिरन्तनाचार्यानुस्मरणेन पुण्यातिशयावाप्तिमभिसन्दधानः श्रीमत्पात्रकेसरिवचनेन हेत्वाभासानामुपसंहारं दर्शयन्नाह—

अन्यथाऽनुपपन्नत्वरहिता ये त्रिलक्षणाः ।
अकिञ्चित्कारकान् सर्वान् तान् वयं सङ्गिरामहे ॥२०२॥ इति ।

अन्यथाऽनुपपत्तिविरहादेव हि तत्पुत्रत्वादयोऽन्येऽपि हेत्वाभासाः साध्यप्रत्यायनवैकल्यात् अकिञ्चित्करा न त्रैरूप्यविरहात् । तदविरहस्योक्तरीत्या समर्थनादिति वयं स्याद्वादन्यायवेदिनः प्रतिपादयामहे ।

---

१ पश्या— आ०, ब०, प० । २ नहि त— आ०, ब०, प० ।

तदेवमुपदर्श्य हेतुतदाभासान् सम्प्रति दूषणाभासं दर्शयन्नाह–

तत्र मिथ्योत्तरं जातिः [यथाऽनेकान्तविद्विषाम्] । इति ।

प्रमाणोपपन्ने साध्ये धर्मे यस्मिन् **मिथ्योत्तरं** भूतदोषस्योद्भावयितुमशक्यत्वेनासद्दूषणोद्भावनं सा **जातिरिति** । तत्केषामित्याह–**'यथाऽनेकान्तविद्विषाम्'** इति । यथेत्युदाहरणप्रदर्शने । अनेकान्तविद्विषः सौगतादयस्तेषामिति । कीदृशं तत् ? इत्याह– ५

दध्युष्ट्रादेरभेदत्वप्रसङ्गादेकचोदनम् ॥२०३॥ इति ।

दधि चोष्ट्रश्चादिर्यस्य कर्कगुडादेस्तस्य एकचोदनमेकशब्दाभिधेयत्वम् । कुत एतत् ? अभेदत्वस्य दध्युष्ट्रादेरेकत्वस्य **प्रसङ्गात्** । प्रसज्यते हि अनेकान्तवादिनो यथा क्षीरविकारस्य दधित्वं तथा करभत्वमपि, अन्यथा 'सर्वो भावस्तदतत्स्वभावः' इति [1]सिद्धान्तव्यापत्तेः । तथा च दुधिशब्देनैव क्षीरविकारस्येवोष्ट्रस्यापि तदेकतामापन्नस्याभिधानात् दधि खादेति चोदितेन करभेऽपि तद्भक्षणाय १० प्रवर्तितव्यम् । तदुक्तम्–**"सर्वस्योभयरूपत्वे"** [प्र० वा० ३। १८१] इत्यादि । विद्यत एव दधनि कश्चिद्विशेषो यतो न करभत्वं तस्येति चेत्; तर्हि स एव दधीति वक्तव्यं तत एव तत्फलस्य तृप्त्यादेर्भावात्, स च न करभादौ अस्तीति कथं तदतत्स्वभावत्वं भावानां यत एकान्तवाद एव प्रशस्तो न भवेत् ? इदमप्यभिहितम्–

"अथास्त्यतिशयः कश्चित् येन भेदेन वर्तते ।' १५

स एव दधि सोऽन्यत्र नास्तीत्यनुभयं वरम् ।" [प्र० वा० ३। १८२] इति ।

कथं पुनरस्यासदुत्तरत्वं यतो जातित्वमिति चेत्? प्रमाणबलावलम्बिन्यनेकान्ते प्रवृत्तेः। प्रतिपादितं हि तदवलम्बितत्वमनेकान्तस्य प्रत्यक्षतः,सत्त्वादिसाधनसमुद्भवादाभिनिबोधिकादपि तस्यैव प्रतिपत्तेः सविस्तरं समर्थितत्वात् । न च प्रमाणपरिशोधिते वस्तुनि दूषणसम्भवः । तथा हि–तदपि [2]तदतदात्मके वस्तुनि दूषणमुद्भाव्यमाणं न तावत् सामान्यविशेषात्मके भवितुमर्हति; दध्याद्यन्वयिनः सामान्यस्यैकस्या- २० भावात् । सदृशपरिणामो हि सामान्यम्, तच्च दध्यादिपर्यवसितमेव न किञ्चिदपि सत्त्वमन्यद्वा समन्वितमस्ति नीलतज्ज्ञानयोः सारूप्यवत् । तत्कथं दध्युष्ट्रयोरेकत्वं यत एकचोदनायामन्यत्रापि प्रवृत्तिः । नापि द्रव्यपर्यायात्मके; दधिद्रव्यस्य स्तब्ध-स्तब्धतरादिभिः स्वपर्यायैरेव अभेदात् नोष्ट्रपर्यायैः । एवमेव निर्बाधायास्तत्प्रतीतेरनुभवात्, अन्यथा विकल्पज्ञानस्यापि स्वगतेनेव तदन्तरगतेनाप्यभिलाप्याकारेणाभेदापत्तेः न भार्याविकल्पो मातृविकल्पाद्विद्येत, तथा च तद्विकल्पप्रयुक्तस्य भार्यायामिव मातर्यपि प्रवृत्ति- २५ र्भवेत्। ततः स्याद्वादिमतमनवबुद्ध्य तत्रेदमुच्यमानं धर्मकीर्तेर्विदूषकत्वमावेदयति–**"पूर्वपक्षमविज्ञाय दूषकोऽपि विदूषकः ।"** [ ] इति प्रसिद्धेः । भवतु वा दधिकरभयोः सामान्यपरायामेव चोदनायां दधिवत् करभेऽपि प्रवृत्तिः,न च दधिचोदनायास्तत्परत्वं क्षीरविकारविषयतया विशेषपरताया एव तत्रोपलम्भात्, तद्विकाराच्च करभरूपस्य विशेषस्यार्थान्तरत्वात् । एतदेव परप्रसिद्धेन निदर्शनेन दर्शयन्नाह–

---

१ "सदेव सर्वं को नेच्छेत् स्वरूपादिचतुष्टयात् । असदेव विपर्यासात्···"–आप्तमी० श्लो० १५ ।
२ तदात्म–आ०, ब०, प० । ३ विकल्पान्तर ।

सुगतोऽपि मृगो जातो मृगोऽपि सुगतः स्मृतः ।
तथाऽपि सुगतो वन्द्यो मृगः खाद्यो यथेष्यते ॥२०४॥
तथा वस्तुबलादेव भेदाभेदव्यवस्थितेः ।
चोदितो दधि खादेति किमुष्ट्रमभिधावति ॥२०५॥ इति ।

सुगतोऽपि न केवलमन्यो जातः पूर्वस्मिन् भवे मृगः मृगोऽपि न केवलं मनुष्य एव सुगतः स्मृतोऽनुमतः तदुत्तरभवे शाक्यैः । ततः किम् ? तथाऽपि मृगसुगतभवयोः उपादानोपादेयतयैकसन्तानत्वेऽपि सुगतो वन्द्यो न मृगो मृगस्तु खाद्यो न सुगत इति यथा येन अवस्थाभेदप्रकारेण इष्यते सौगतैः, तथा वस्तुबलादेव वस्तुशक्तित एव भेदाभेदयोरसाङ्कर्येण व्यवस्थिते चोदितो दधि खादेति कस्मात् उष्ट्रमभिधावति सत्येव तत्साङ्कर्ये तदुपपत्तेः ।

सम्प्रति जात्यन्तरं दर्शयन्नाह—

अत्रैवोभयपक्षोक्तदोषारेका [अनवस्थितेः] । इति ।

अत्रैव भेदाभेदव्यवस्थितावेव **उभयपक्षः** नित्यैकान्तपक्षः क्षणिकैकान्तपक्षश्च तत्र य **उक्तः** स्याद्वादिना दोषः **"अर्थक्रिया न युज्येत नित्यक्षणिकपक्षयोः"** [लघी० श्लो० ८] इत्यादिः तस्य **आरेका** संशीतिर्जातिरिति वक्ष्यमाणेन सम्बन्धः । कुत इत्याह--**अनवस्थितेः** तदारेकायाः प्रमाणबाधितत्वेन स्थित्यभावात् । अन्यथा सर्वस्यापि प्रमाणस्य निर्विषयतापत्तेः । पुनरपि तदन्तरमाह—

अनन्वयादिदोषोक्तेः प्रपञ्चो वा [अनया दिशा] इति ॥२०६॥

वा इति समुच्चये **अनन्वयः** सर्वानेकान्तसाधने सपक्षैवैकल्यम् **आदि**शब्दात् अपक्षधर्मत्वं सत्त्वादिसाधने हेतुसाध्ये[1] व्यावृत्त्यभावश्च स एव दोषस्तदुक्तेः **प्रपञ्चः** प्रबन्धो जातिरिति पूर्ववत्सम्बन्धः । कथोपपत्त्येत्याह—**'अनया दिशा'** इति । **अनया** पूर्वप्रतिपादितया **दिशा** अन्वयाद्यभावेऽपि गमकत्वोपपत्तिवर्त्मनेति ।

ननु यथाऽन्यापि साधर्म्यादिसमा जातिर्नैयायिकादिना कथ्यते तथा त्वया किन्नेति चेत् ? अत्राह—

मिथ्योत्तराणामानन्त्याच्छास्त्रे वा विस्तरोक्तितः ।
साधर्म्यादिसमत्वेन जातिर्नेह प्रतन्यते ॥२०७॥ इति ।

न पुनरिह शास्त्रे **साधर्म्यवैधर्म्मादिसमा** तथाऽपि **जातिर्विस्तरेण** निरूप्यते । कस्मादिति चेत् ? **मिथ्योत्तराणां** पुरुषाभिप्रायनिबन्धनत्वेनेयत्तापरिच्छेदाभावात् त्रिलक्षणकदर्थने वा **शास्त्रे विस्तरेण** श्रीपात्रकेसरिस्वामिना प्रतिपादनादित्यलमभिनिवेशेन ।

तदेवमनुमानतदाभासभेदे निरूपिते यथा जयेतरव्यवस्था तथा दर्शयन्नाह—

प्रकृताशेषतत्त्वार्थप्रकाशप्रदुवादिनः ।
विब्रुवाणोऽब्रुवाणो वा विपरीतो निगृह्यते ॥२०८॥ इति ।

---

१ –त्वासत्तासा– आ०, ब०, प० । २ –साध्याव्यावृत्त्यभा– आ०, ब०, प० । –साध्याव्यावृत्त्या भा– ता० । ३ न्यायसू० ५।१।१–३७ ।

प्रकृतो विधिमुखेन निषेधमुखेन वा साधयितव्यतया प्रक्रान्तो यः अशेषः समग्रः साध्य-साधनरूपः, तत्त्वार्थो न सौगतवत् कल्पितस्वभावस्तस्य प्रकाशः सभ्यचेतसि समर्पणं तत्र पटुवादिनः सकाशात् यो विपरीतः तत्प्रकाशपाटवविकलः स निगृह्यते पराजयं प्राप्नोति । तथाहि—यदा जैनो वादी सम्यक्हेतुप्रयोगेण स्वपक्षं प्रकाशयति—परिणामी भावोऽर्थक्रियाकारित्वात् । न हि नित्यैकान्ते तत्कारित्वं क्रमयौगपद्यविरोधात्, क्षणिकैकान्ते सदसत्समयविकल्पायोगाच्च । न च तदुभयविकल्पानाघ्रातं प्रकारान्तरं सम्भवति यतस्तदेकान्ते तत्कारित्वावस्थितिस्तस्य बहिरन्तश्चाप्रतिपत्तेरिति तदा सौगतादिः प्रतिवादी पराजीयते । यदा वा जैन एव प्रतिवादी प्रकृतमेव हेतुं परंप्रयुक्तं विरुद्धमुद्भाव्य ततः स्वपक्षमवद्योतयति तदापि परस्यैव पराजयावाप्तिस्तद्विपरीतत्वेनेति प्रतिपत्तव्यम् । अथ [1]यदा सौगतादिरेव वादी प्रतिवादी वा स्वपक्षे परपक्षे च साधनं वा किञ्चित् समीचीनमनवलोकयन् छलादिना प्रत्यव-तिष्ठते सभाभीरुतया तूष्णीं वा तिष्ठति तदा तदनुद्भावने जैनस्यैव निग्रह इति चेत्; न; प्रकृतार्थ-प्रत्यायने सति तदनुद्भावनस्यादोषत्वात् । यदि च तत्प्रत्यवस्थानादिना जयः परस्य पराजयश्च तदनु-द्भावनेन जैनस्य किमर्थास्तर्हि पक्षप्रतिपक्षपरिग्रहादयो विनापि तैस्तत्सम्भवात् । तदुक्तम्—

"वादिनो गुणदोषाभ्यां स्यातां जयपराजयौ ।
यदि साध्याप्रसिद्धौ च व्यर्थाः साधनादयः ॥" [ ] इति ।

किञ्च, अनुद्भावितमेवास्य [2]तदनुद्भावनं यदि ।
निग्रहाय छलाद्येवं किन्न स्यात् प्रतिवादिनः ? ॥१५६४॥
उद्भावितं चेत् केनास्य करुण्यमुद्भावनं त्वया ।
सभ्यैश्चेत् किन्न ते कुर्युश्छलाद्युद्भावनं तथा ॥१५६५॥
तद्वादिनैव चेत् सोऽयं स्वकौपीनप्रकाशनम् ।
कुर्वन् कथं जयी नाम न परस्यास्ति सम्भवः ॥१५६६॥
तदुद्भावनतस्तस्य गुणतश्चेज्जयस्तदा ।
पक्षविक्षेपणाद्दोषादजयोऽपि सकृद्भवेत् ॥१५६७॥
न च तौ युगपद्युक्तौ जन्ममृत्यू [3]इव क्वचित् ।
यथा वा तमआलोकौ यथा वा स्थितिविभ्रमौ ॥१५६८॥

ततो न परिक्षीणपक्षस्य तदुद्भावनं गुण इति पराजय एव तस्योपपन्न इति सूक्तमिदं विब्रुवाणो विसदृशं दूषणमभिदधानः अब्रुवाणो वा तूष्णीमासीनो वा विपरीत एव निगृह्यत इति । तदनेनासिद्धानैकान्तिकहेत्वाभासोद्भावनमपि न पक्षसिद्धिविकलस्य गुण इति प्रतिपादितं प्रति-पत्तव्यम्, अङ्गीकृतनिर्वहणस्यैव सर्वथा गुणत्वोपपत्तेः, तद्भावाभावाभ्यामेव जयपराजययोः सम्भवात् ।

किमर्थं तर्हि तदाभासोद्भावनमिति चेत् ? परस्यानुपायपक्षतां प्रतिपाद्य पुनः स्वपक्षव्यव-स्थापनार्थम् । अत एवोक्तम्—

---

१ यथा आ०, ब०, प०। २–त्वितमेवा– आ०. ब०, प०। ३ इह आ०, ब०, प०।

"विरुद्धं हेतुमुद्भाव्य वादिनं जयतीतरः ।
आभासान्तरमुद्भाव्य पक्षसिद्धिमपेक्षते"[1] ॥ [ ] इति ।

तस्मादेकस्य प्रकृतसिद्धेरेव परस्य निग्रहो न प्रकारान्तरेण । तदेवाह–

असाधनाङ्गवचनमदोषोद्भावनं द्वयोः ।
न युक्तं निग्रहस्थानमर्थापरिसमाप्तितः ॥२०९॥ इति ।

सिद्धिः सिषाधयिषितवस्तुनिर्णीतिः **साधनं तस्याङ्गं** निर्वर्तकं प्रत्यक्षकं लिङ्गं वा तस्या- **वचनमनुच्चारणं** वादिनो निग्रहस्थानं वादमभ्युपगम्य तूष्णीम्भवतो गत्यन्तराभावादिति । एतत् **न युक्तम्** । कस्मात् ? **अर्थस्य** वादप्रयोजनस्य साध्यनिर्णयलक्षणस्य **अपरिसमाप्तितः** तदा हि तस्य निग्रहस्थानमुपपन्नं यदा प्रतिवादिनः पक्षनिर्णयफलपरिसमाप्तिः, तदा तस्य जयाद्वादिनः पराजयो- पपत्तेः, पराजयस्य जयसव्यपेक्षत्वात् । न च विना तत्परिसमाप्तेस्तस्य जयः तदर्थत्वात्तद्व्यापारस्य । न च वादिनस्तूष्णींभावादेव तस्य तत्परिसमाप्तिः; प्रमाणकल्पनावैफल्यात् । न तत्परिसमाप्तेः तस्य जयः किन्तु वादिदोषस्योद्भावनादिति चेत्; उक्तमत्र पक्षपरिग्रहादेर्वैफल्यमिति । कथं वादिनस्तूष्णी- म्भावो दोषः, तावता तत्पक्षस्यापरिक्षयात् । शक्तिपरिक्षयादिति चेत्; न; शक्तस्यापि कुतश्चिज्जिह्वा- कीलनादेस्तत्सम्भवात् । तस्मात् स्वपक्षं व्यवस्थाप्य जयवाञ्छया प्रवृत्तो यदि तन्न व्यवस्थापयति मा भूज्जय एव तस्य, कस्मात् पुनः पराजयः ? स्वपक्षासाधनादिति चेत्; न; साधनस्य जयनिमित्तत्वेन जयस्यैव तदभावे भावात् । तदभाव[2] एव पराजय इति चेत्; न; तस्य प्रतिवादिन्यपि पक्षसिद्धि- विकलत्वेन भावात् । न च द्वयोः पराजयः कस्यचिज्जयाभावे तदनुपपत्तेः ।

यदप्यत्र व्याख्यानम्[3]–"प्रत्यक्षाविषयस्यार्थस्य सिद्धेरङ्गं त्रिविधं लिङ्गं तस्य वचनं समर्थनम्, तच्च यत्कृतकं तदनित्यं दृष्टं यथा घटादिकमिति साध्यसाधनयोः साकल्येन विपक्षे बाधकसामर्थ्यात् व्याप्त्युपदर्शनम्, अप्रदर्शितव्याप्तिकस्यानुक्तकल्पत्वेनागमकत्वात्। पक्षधर्मप्रदर्शनं वा, कृतकश्च शब्द इति, तदनुपदर्शनेऽपि गमकत्वासम्भवात् चाक्षुषत्वा- दिवत् । तस्यावचनमसाधनाङ्गवचनम् । तदुद्भाव्यमानं वादिनो निग्रहस्थानम् ।" [ ] इति; तदपि न समीचीनम्; तदुद्भावनमात्रेण स्वपरपक्षसिद्धिप्रतिक्षेपयोरभावात्, तन्निबन्धनत्वाच्च जयेतरव्यवस्थायाः । यदि च, व्याप्तेरवचनमसाधनाङ्गवचनम्; कथं तदपरिज्ञातं (त) तत्प्रतिबन्धं प्रति तदवचनं न दोषायेत्यभ्युपगमः ? यत इदं शोभेत–

---

१ "अकलङ्कोऽप्यभ्यधात्–विरुद्धं हेतुमुद्भाव्य...."–रत्नाकरा० पृ० ११४१ । उद्धृतोऽयम्– त० श्लो० पृ० २८० । सन्मति० टी० पृ० ७५९ । प्रमाणमी० पृ० ६५ । २ जयाभाव । ३ "साधना- ङ्गस्यासमर्थनाद्वा । त्रिविधमेव हि लिङ्गमप्रत्यक्षस्य सिद्धेरङ्गम्–स्वभावः कार्यमनुपलम्भश्च । तस्य समर्थनं साध्येन व्याप्तिं प्रसाध्य धर्मिणि भावसाधनम्। यथा यत्सत्कृतकं वा तत्सर्वमनित्यं यथा घटादि,सत्कृतको वा शब्द इति...तस्यासमर्थनं साधनाङ्गवचनं तद्वादिनः पराजयस्थानमारब्धार्थाप्रसाधनात् । (पृ०१२) साधनं त्रिरूपहेतुवचनसमुदायः तस्याङ्गं पक्षधर्मादिवचनम्..."–वादन्या० पृ० ६१ । ४–ज्ञानम् आ०, ब० ।

"तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
ख्याप्येते विदुषां वाच्यो हेतुरेव हि केवलः ॥"[प्र०वा०२।३६] इति । अपरिज्ञातप्रतिबन्धं प्रति तदवचनमसाधनाङ्गवचनमेवेति चेत्; तस्य तर्हि न प्रतिवादिनोद्भावनम् आत्मीयापरिज्ञानप्रकटनदोषात् । अथ सम्बन्धाभावमेवासौ तदानीमुद्भावयति; तर्हि साधनव्यभिचार-दोषादेव वादिनो निग्रहो न व्याप्त्यनुपदर्शनादिति न किञ्चिदेतत् । ५

तथा नापक्षधर्मवचनमपि असाधनाङ्गवचनम् ; तद्वचनस्यैव तत्त्वात् । न हि सर्वं कृतक-मनित्यमिति प्रतिपद्यमानः शब्दस्यापि कृतकस्यानित्यत्वं न प्रतिपद्यते सर्वानित्यताप्रतिपत्तेरेवाभाव-प्रसङ्गात्, तत्किं तद्वचनेन विनापि तेन साध्यसिद्धेः उपनयादिवचनवत् । परं प्रत्यर्थादापन्नस्यापि तस्य वचने परिज्ञातप्रतिबन्धं प्रति व्याप्तिवचनमपि स्यादिति असङ्गतमेतत्–"विदुषां वाच्यो हेतुरेव हि केवलः ।" [प्र०वा०३।२६] इति । ततो नेदं व्याख्यानमुपपन्नम् । १०

इदं तर्हि स्यात्–"साध्यते विवादापन्नोऽर्थोऽनेनेति साधनं लिङ्गं तस्याङ्गं पक्ष-धर्मत्वादिकं तस्यावचनं वादिनो निग्रहस्थानम् । रूपस्यैव अवचने पक्षसिद्धेरनुपपत्तेः ।" [ ] इति चेत्; नेदमप्युपपन्नम् ; प्रतिवादिनः परपक्षासिद्धिमात्रेण स्वपक्षसिद्धेरभावात् जयानुपपत्तेः ।

इदं तर्हि व्याख्यानं[2] शोभनम्–"यत्साधनाङ्गं न भवति प्रतिज्ञोपनयादि तदसाध- १५
नाङ्गं तस्य वचनं साधनवाक्ये तदङ्गत्वेनोपपादनम् । यथा अनित्यः शब्दः, कृत-कत्वात्, यत्कृतकं तदनित्यं दृष्टं यथा घटादि, कृतकश्च शब्दस्तस्मादनित्यः इति । तदिदं वादिनो निग्रहाधिकरणमनर्थकाभिधानात् । अनर्थकं हि प्रतिज्ञादिकं विनाऽपि तेन 'यत्कृतकं तदनित्यं यथा घटादि कृतकश्च शब्दः' इत्येतावतैव शब्दानित्यत्वस्य प्रतीतेः, प्रतीतार्थस्याप्यभिधानेऽतिप्रसङ्गः प्रतिज्ञादिभिः पञ्चावयवस्येवान्वयव्यतिरेकाभ्यां षडवय- २०
वस्य संशयजिज्ञासाप्रयोजनशक्यप्राप्तिसंशयव्युदासैर्दशावयवस्यापि साधनवाक्यस्याभि-धानोपनिपातात् ।" [ ] इति चेत्; अत्रोच्यते–

कृतकत्वं समर्थं[3] चेच्छब्दानित्यत्वसाधने ।
प्रतिज्ञादिवचस्तस्य निग्रहाय कथं भवेत् ॥१५६९॥
प्रतीतार्थत्वदोषाच्चेत् पक्षसिद्धिमपीडयत् । २५
[3]प्रतीतार्थत्वमात्रेण दोषस्तत्कथमुच्यताम् ॥१५७०॥
अन्यथा त्वं[4]त्वयोगेऽपि स्वार्थिकस्तद्धितस्तथा ।
यत्तत्पदं च दोषः स्यात् प्रतीतार्थतया स्थितेः ॥१५७१॥

---

१ तुलना–वादन्या० पृ० ६० । २ "तस्यैव साधनस्य यन्नाङ्गं प्रतिज्ञोपनयनिगमनादि तत्सा-साधनाङ्गस्य साधनवाक्ये उपादानं वादिनो निग्रहस्थानं व्यर्थाभिधानात् "–वादन्या० पृ० ६१। ३ तत्प्रतीतार्थमा– आ०, ब०, प० । ४ त्वत्प्रयो–आ०, ब०, प० । ५ 'कृतकत्वात्' इत्यत्र ।

कृतं सर्वमनित्यं हि दृष्टं यद्घटादिकम् ।
कृतश्च शब्द इत्येतन्मात्रात् साध्यस्य निर्णयात् ॥१५७२॥
संक्षेप्तव्यं ततस्तेन विनाऽपि वचनं त्वया ।
अन्यथा निग्रहादुक्तमिदं सिद्धिविनिश्चये ॥१५७३॥
"सर्वनाम्ना विना वाक्यं तद्धितेन विना पदम् ।
संक्षेप्तव्यं समासार्थनिग्रहस्थानभीरुणा[1] ॥१५७४॥" इति
तावन्मात्रेण तज्ज्ञप्तावशक्तं पुरुषं प्रति ।
सार्थत्वात् स्वार्थिकाद्युक्तिर्न दोष इति चेत्तथा ॥१५७५॥
प्रतिज्ञादिवचः कस्माददोषो न प्रकल्प्यते ।
यतस्तद्वादिनो वादे निग्रहायोपदर्श्यताम् ॥१५७६॥
निग्रहश्चेत् प्रतीतार्थात् प्रकृतानुपयोगतः ।
शब्दालङ्कारदोषोऽपि निग्रहः किन्न कल्प्यते ॥१५७७॥
इयत्तानियमो येन निग्रहेष्वभिधीयताम् ।
न हि शब्दादिदोषाणां गणना काऽपि विद्यते ॥१५७८॥

केन वा तस्य तद्वचनान्निग्रहः कर्तव्यः ? प्राश्निकैरिति चेत्; साधु तेषां प्राश्निकत्वं यत् स्वपक्षसाधनसमर्थसाधनप्रयोगोदात्तगुणाधिष्ठानमप्यनल्पदोषेण[2] निगृह्णन्तीति ? जयमपि ते तस्य तद्गुणेन कल्पयन्तीति चेत्; उक्तमत्र युगपत्तयोरेकत्रासम्भवादिति । ततस्तैस्तस्य गुणभूयसो जय एवापादयितव्यो न निग्रहः, निरर्थकवचनदोषस्य सतोऽप्यसत्कल्पत्वात्, "कणिका विषस्य न दूषिका शीतशिवाम्बुराशौ" [बृहत्स्व० श्लो० ५८] इति न्यायात् । तन्न तैस्तस्य निग्रहणम् । नापि प्रतिवादिना; गुणवतस्तेनापि निगृहीतुमशक्यत्वात् । ततो न स्वपक्षसिद्धिसम्पन्नस्य तद्वचनं निग्रहस्थानम् । तत्सिद्धिविकलस्येति चेत्; नेदानीमधिकवचनेन किञ्चित् तद्वैकल्यस्य निग्रहत्वात् । उभयमपि निग्रह एव "द्विर्[3]बद्धं सुबद्धम्" [ ] इति न्यायात् चेत्; न; हेतुद्वयेऽप्यदोषापत्तेः । एकस्यैव साध्यप्रत्यायनसामर्थ्ये किं द्वितीयेन हेतुनेति चेत् ? न; दोषेणापि किं द्वितीयेन ? एकस्मादेव वादिनो निग्रहनिष्पत्तेरिति साम्यात् । तदुक्तम्—

"वादिनोऽनेकहेतूक्तौ निगृहीतिः किलेष्यते ।
नानेकदूषणस्योक्तौ वैतण्डिकविनिग्रहः ॥" [सिद्धिवि०परि०५] इति ।

तदनेन छलादिकमपि, स्वार्थसिद्धिसम्पन्नस्य तद्विपरीतस्य चोक्तन्यायेन निग्रहाऽनुपपत्तेः । यत्पुनरेतत्[4]—"अन्वयवचनसामर्थ्यात् व्यतिरेकस्य तद्वचनसामर्थ्याच्चान्वयस्य प्रति-

---

१ सिद्धिवि० परि० ५ । २ न विद्यते अल्पो यस्यादसौ अनल्पः इति यावत् । ३ द्विर्बुद्धं सुबुद्धं प० । ४ "अन्वयव्यतिरेकवचनयोर्वा साधर्म्यवति वैधर्म्यवति च साधनप्रयोग एकस्यैवाभिधानेन सिद्धेर्भावात् द्वितीयस्यासामर्थ्यमिति तस्याप्यसाधनाङ्गस्याभिधानं निग्रहस्थानं व्यर्थाभिधानादेव ।"—वादन्या० पृ० ६५ ।

पत्तौ पुनः स्वशब्देन तद्वचनं प्रतीतार्थत्वेन निग्रहस्थानम्" [ ]इति[1]; तदपि न युक्तम्; त्रिरभिहितस्याप्यप्रत्युच्चारणे प्रतिवादिनो निग्रहप्रसङ्गात् परोक्तापरिज्ञानस्यापि दोषत्वात्। अथ परोपरोधार्थो न महतां जल्पारम्भोऽपि तु परप्रतिपादनाय तत्र किं त्रिरेवेति नियमेन तावदभिधातव्यं यावत्परः साध्यं प्रत्यायितो भवति न पुनः त्रिरुच्चारितस्याप्रत्युच्चारणेन निगृहणीय इति चेत्; न; अस्यान्वयादिवचनेऽपि तुल्यत्वात्। शक्यं हि वक्तुं सामर्थ्यप्रापितमर्थं प्रतिपत्तुमशक्नुवन्तं प्रति तत्प्रतिपिपादयिषया तत्परं वचनमुच्चारयन्नपि वादी न निग्रहेण योजयितव्यो वचनवैफल्याभावात्।

परमप्यत्र व्याख्यानम्–"संशयादिरहितत्वेन प्रतिपत्तव्यं[2] साधनम् कर्मस्थे भावे प्रत्ययविधानात्, तदङ्गं स्वरूपं यस्य तत्साधनाङ्गं विवादापन्नं साध्यमेव, तस्मादन्यदसाधनाङ्गं तस्य वचनम्। तद्यथा आत्मनि विवादे नास्त्यात्मेति वयं बौद्धाः। के बौद्धाः? ये बुद्धशासनमुपगताः। को बुद्धः? यस्य शासने भदन्ताश्वघोषः प्रव्रजितः। कः पुनर्भदन्ताश्वघोषः? यस्य राष्ट्रपालं नाम नाटकम्। कीदृशं च तन्नाटकमिति प्रसङ्गमारचय्य नान्द्यन्ते ततः प्रविशति सूत्रधार इत्यारभ्य नाटकग्रन्थं पठति नृत्यति गायति च, अपरस्य व्यामोहमनुवादे शक्तिव्याघातं च कर्तुमिति, तदपि वादिनो निग्रहस्थानमप्रस्तुताभिधानात्" [ ] इति; तदपि न प्रेक्षावतां प्रमोदमापादयति; तादृशात् प्रसङ्गपरम्परा[4]करणात् कथाविच्छेदस्यैवोपपत्तेः न पराजयस्य, तस्य प्रतिवादि[5]विजयसव्यपेक्षस्य तदभावेऽनुपपत्तेः। न हि तस्य तत्करणोद्भावनादेव जयः, तावता पक्षसिद्धेरभावात्। एवमन्यदपि तत्कारणमनिग्रहस्थानत्वेन प्रतिपत्तव्यम्। तन्नासाधनाङ्गवचनं वस्तुनिर्णयं कुतश्चित् कुर्वाणस्य निग्रहाधिकरणमुपपन्नं जयस्यैवोपपत्तेः। नापि तदुद्भावयतोऽपि प्रतिवादिनो जयः; पक्षसिद्धिविकलतया पराजयस्यैवोपपत्तेः। एतदेव दर्शयति–

वादी पराजितो युक्तो वस्तुतत्त्वे व्यवस्थितः।
तत्र दोषं ब्रुवाणो वा विपर्यस्तः कथं जयेत् ॥२१०॥ इति।

वस्तुनः शब्दादेस्तत्त्वमनित्यादिकं तत्रैव व्यवस्थितः प्रमाणबलेन कृतोऽर्थो वादी कथं नैव पराजितः पराजयसम्बद्धो युक्तः,

वस्तुतत्त्वे स्थितस्यापि यदि वाचा कयाचन।
पराजयो जयो लोके हन्त कस्योपकल्प्यताम् ॥१५७०॥

तथा तत्र वादिनि दोषं प्रतिज्ञावचनादिकं ब्रुवाणश्च न केवलमब्रुवाणो विपर्यस्तः पक्षसिद्धिविकलः प्रतिवादी कथं जयेत् नैव जयेदिति। अयमन्तरश्लोकः।

यत्पुनरिदम्–अदोषोद्भावनमिति। तत्र व्याख्यानम्[6]–"वादिना साधने प्रयुक्ते स्वयमभ्युपगतोत्तरपक्ष एव प्रतिवादी यदा तत्र दोषान्नोद्भावयति तदा तदनुद्भावनं तस्य निग्रह-

---

१ द्रष्टव्यम्–वादन्या० पृ० ६६। २–व्यं तन्नासाधनाङ्गवचन कर्मस्थभा–आ०, व०, प०। ३ यस्य स्वराष्ट्रपालनं ना– आ०, व०। यस्य सुराष्ट्रपालनं ना–प०। ४–रात्कार–आ०, व०, प०। ५–दिनो वि–आ०, व०, प०। ६ द्रष्टव्यम्– वादन्या० पृ० ६९।

स्थानं प्रतिपत्तव्यम् । दोषाश्च अवयवन्यूनत्वं प्रतिज्ञावचनादिकमसिद्धत्वमनैकान्तिकत्वं विरुद्धत्वं दृष्टान्तदोषाश्चाष्टादश वक्ष्यमाणाः" [ ] इति; तदप्यनुपपन्नमेव; यदि वादिनः सम्यक्साधनप्रयोगः, सति तस्मिन् दोषाणामसत्त्वेनानुद्भावनसम्भवात् प्रकृतार्थपरिसमाप्त्या तस्य जयस्य प्रतिवादिनः पराजयस्याप्युपपत्तेः । दोषवत्यपि साधने तस्य पराजय एव सतोऽपि दोषस्यापरिज्ञानेनानुद्भावनोपपत्तेरिति चेत्; न; तस्य वादिन्यपि भावात्, कथमन्यथा दोषवत्साधनप्रयोगः, जानत एव दोषं तदसम्भवात् ? वादोपक्रमेण प्रवृत्तो यदि स्वपक्षे सम्यक् हेतुमपश्यन् तदन्यदपि न प्रयुञ्जीत स्यादैकान्तिकः पराजयः । तत्प्रयोगे तु यदि प्रतिवादी दोषमुद्भावयेत् भवति तस्य जयः, अन्यथा तु तदनुद्भावनात् तस्यैव पराजय इति निश्चितपराजयपरिहाराय सम्भवत्येव जानतोऽपि तस्य तत्प्रयोग इति चेत्; किं पुनस्तस्योद्भावित एव दोषः पराजयाय ? तथा चेत्; प्रतिवादिनोऽपि तदनुद्भावनमुद्भावितमेव तदर्थम् । तथा चेत्; कस्तस्योद्भावकः ? वाद्येवेति चेत्; न; तदसम्भवात् । न हि मया दोषवत्साधनं प्रयुक्तं त्वया तु न परिज्ञातमिति तस्य सचेतसो वचनं सम्भवति स्वयमेवात्मनो निग्रहाकर्षणात् । परोपदर्शितादेव दोषात् तस्य निग्रहो न स्वयं प्रकाशितादिति चेत्; न; चौर्यादेः स्वयं दर्शितादपि तदुपलब्धेः । भवतु प्राज्ञिका एव तस्योद्भावका इति चेत्; किं ते वादिदोषं न जानन्ति ? तथा चेत्; न प्राज्ञिकत्वम्, सिद्धान्तद्वयवेदिनां तत्त्वात् । जानन्तोऽपि प्रतिवादिनः तदुद्भावनेनैव तं निगृह्णन्ति न स्वयमुद्भावनेनाप्रत्यनीकत्वादिति चेत्; न; एवमनवस्थाप्रसङ्गात् । शक्यं हि वक्तुं यथा ते वादिनः सत्यपि दोषे प्रतिवादिनस्तदुद्भावनमपेक्षन्ते तथा तत्रापि वादिनः परिहारं पुनस्तत्रापि परस्य तदुद्भावनं तावदेवं यावदनवधिस्तत्प्रबन्ध इति कथं तदुद्भावनापेक्षयापि ते वादिनः पराजयमारचयेयुः ? कथं वा स्वयमप्रत्यनीकत्वेन वादिनो दोषमनुद्भावयन्तः प्रतिवादिन एव तमुद्भावयेयुः ? अनुद्भावितादेव दोषात्तस्य निग्रहो (हे) वादिनोऽपि स्यात् अविशेषादिति निरवसर एव प्रतिवादिनो निग्रहः । तन्नासम्यक्साधनवादिनि दोषानुद्भावनात् प्रतिवादिनो निग्रहोपपत्तिः । कः पुनरसौ दृष्टान्तो यद्दोषानुद्भावनं प्रतिवादिनो निग्रहं सङ्कल्पयन्ति सौगता इति चेत् ? अत्राह—

सम्बन्धो यत्र निर्ज्ञातः साध्यसाधनधर्मयोः ।
स दृष्टान्तस्तदाभासाः साध्यादिविकलादयः ॥२११॥ इति ।

यत्र यस्मिन् साध्यसाधनधर्मयोरविनाभावस्य सम्बन्धस्य प्रतिपत्तिः स दृष्टान्तः । स च द्वेधा साधर्म्येण वैधर्म्येण च । तत्र साधर्म्येण कृतकत्वादनित्यत्वे साध्ये घटः, तत्रान्वयमुखेन तयोः सम्बन्धप्रतिपत्तेः । वैधर्म्येणाकाशं तत्रापि व्यतिरेकद्वारेण तयोस्तत्परिज्ञानात् । तद्वत् दृष्टान्तवदाभासन्त इति तदाभासाः ते च साध्यमादिर्यस्य साधनादेस्ते विकलाः ते चादयो येषां सन्दिग्धसाध्यादीनां ते साध्यादिविकलादयः प्रतिपत्तव्याः । तत्र नित्यः शब्दोऽमूर्तत्वादिति साधने कर्मवदिति साध्यविकलं निदर्शनम् अनित्यत्वात् कर्मणः । परमाणुवदिति साधनविकलं मूर्त्तत्वात् परमाणूनाम् । घटवदित्युभयविकलम् अनित्यत्वान्मूर्तत्वाच्च घटस्य । 'रागादिमान् सुगतः कृतकत्वात्' इत्यत्र रथ्यापुरुषवदिति

१ हेतुं पश्यन्नपि आ०, ब०, प० । २ वादिनः ।

सन्दिग्धसाध्यं रथ्यापुरुषे रागादिमत्त्वस्य निश्चेतुमशक्यत्वात्, प्रत्यक्षस्याप्रवृत्तेः व्यापारादेश्च रागादिप्रभवस्यान्यत्रापि सम्भवात्, वीतरागाणामपि सरागवच्चेष्टोपपत्तेः। 'मरणधर्माऽयं रागादिमत्त्वात्' [1]इत्यत्र सन्दिग्धसाधनं तत्र रागादिमत्त्वाऽनिश्चयस्योक्तत्वात्। अत एव असर्वज्ञोऽयं रागादिमत्त्वादित्यत्र सन्दिग्धोभयम्। रागादिमत्त्वे वक्तृत्वादित्यनन्वयम्, रागादिमत्त्वस्यैव तत्रासिद्धौ तदन्वयस्यासिद्धेः। अप्रदर्शितान्वयं यथा शब्दोऽनित्यः कृतकत्वात् घटादिवदिति। न ह्यत्र 'यद्यत्कृतकं तत्तदनित्यम्' इत्यन्वयदर्शनमस्ति। विपरीतान्वयं यथा यदनित्यं तत्कृतकमिति। तदेवं नव साधर्म्येण दृष्टान्ताभासाः।

वैधर्म्येणापि नवैव। तद्यथा नित्यः शब्दः अमूर्तत्वात्, यन्नित्यं न भवति तदमूर्तमपि न भवति परमाणुवदिति साध्याव्यावृत्तं परमाणुषु साधनव्यावृत्तावपि साध्यस्य नित्यत्वस्याव्यावृत्तेः। कर्मवदिति साधनाव्यावृत्तं तत्र साध्यव्यावृत्तावपि साधनय अमूर्तत्वस्यावृत्तेः। आकाशवदित्युभयाव्यावृत्तम् अमूर्तत्वनित्यत्वयोरुभयोरप्याकाशादव्यावृत्तेः। सन्दिग्धसाध्यव्यतिरेकं यथा सुगतः सर्वज्ञोऽनुपदेशादिप्रमाणोपपन्नतत्त्ववचनात्, यस्तु न सर्वज्ञो नासौ तद्वचनो यथा वीथीपुरुष इति तत्र सर्वज्ञत्वव्यतिरेकस्यानिश्चयात् परचेतोवृत्तीनामित्थम्भावेन दुरवबोधत्वात्। सन्दिग्धसाधनव्यतिरेकं यथा अनित्यः शब्दः सत्त्वात्, यदनित्यं न भवति तत्सदपि न भवति यथा गगनमिति, गगने हि सत्त्वव्यावृत्तिरनुपलम्भात् तस्य च न गमकत्वमदृश्यविषयत्वात्। सन्दिग्धोभयव्यतिरेकं यथा संसारी हरिहरादिरविद्यादिमत्त्वात्, यस्तु न संसारी स न तद्वान् यथा बुद्ध इति, बुद्धात् संसारित्वाविद्यादिमत्त्वव्यावृत्तेः अनवधारणात्। तस्य च तृतीये प्रस्तावे निरूपणात्। अव्यतिरेकं यथा नित्यः शब्दः अमूर्त्तत्वात् यन्न नित्यं न तदमूर्तं यथा घट इति घटे साध्यनिवृत्तेर्भावेऽपि हेतुव्यतिरेकस्य तत्प्रयुक्तत्वाभावात् कर्मण्यनित्येऽप्यमूर्त्तत्वभावात्। अप्रदर्शितव्यतिरेकं यथा अनित्यः शब्दः सत्त्वात् वैधर्म्येण आकाशवदिति। विपरीतव्यतिरेकं यथा अत्रैव साध्ये यत्सन्न भवति तदनित्यमपि न भवति यथा व्योमेति साधनव्यावृत्त्या साध्यनिवृत्तेरुपदर्शनात्। त इमे पूर्वसूचिता अष्टादशाऽपि दृष्टान्ताभासाः। कुतः पुनरेषामनुद्भावा(वना)त् न निग्रहस्थानमिति चेत्? अत्राह—

सर्वत्रैव न दृष्टान्तोऽनन्वयेनापि साधनात्।
अन्यथा सर्वभावानामसिद्धोऽयं क्षणक्षयः॥ २१२। इति।

न खलु सर्वत्रापि प्रतिपाद्ये दृष्टान्तेन प्रयोजनं विनाऽपि तेन परिज्ञातसम्बन्धस्य हेतुनैव साध्यस्य साधनात्। यथोक्तम्—"तद्भावहेतुभावौ हि" [प्र०वा० ३।२६] इत्यादि। तत्कथमनपेक्षितस्य दोषानुद्भावनं निग्रहायातिप्रसङ्गादिति भावः। यदि वा, सर्वत्र सर्वस्मिन् हेतौ नवैव दृष्टान्तोऽनन्वयेन सपक्षसत्त्वविकलेन अपिशब्दाद् असपक्षासत्त्वरहितेनापि[3] साध्यस्य साधनात्, अत्रापि तात्पर्यं यदि हेतुवद् दृष्टान्तोऽपि साध्यसिद्धेरङ्गं तदा [4]भवत्यपि तद्दोषानुद्भावनं निग्रहस्थानम्।

---

१ रथ्यापुरुषवदिति। २ अनित्यत्वप्रयुक्त। ३ सर्वमभिधेयं ज्ञेयत्वात् इत्यादौ सर्वस्य पक्षत्वेन व्यतिरेकप्रदर्शनाभावात्। ४ भवितव्यमित्यपि आ०, ब०, प०।

न चैवमिति । अस्यानभ्युपगमे दूषणमिदम्–'अन्यथा' इत्यादि । अन्यथाऽन्येन सर्वत्र दृष्टान्तान्वेषणप्रकारेण सर्वभावानाम् अयं पराभिमतः क्षणक्षयोऽसिद्धः सिद्धो न भवेत्; तत्र सर्वेषां धर्मित्वेन सपक्षविपक्षयोरभावत्वेन द्विविधस्यापि दृष्टान्तस्याभावात् । तत्र दोषस्यानुद्भावनमिति व्याख्यानमुपपन्नम् ।

तथा, न दोषादन्यस्योद्भावनमित्यपि; दूषणादन्यदपि[1] हि प्रतिज्ञाहान्यादिकमुद्भाव्यमानं साधनवादिनः पक्षसिद्धौ यदि परस्य निग्रहस्थानम्, उपपन्नमेव, तद्वादिनो जयप्राप्त्या तन्निग्रहस्य न्यायादापत्तेः । [2]तदसिद्धौ पुनरनुपपन्नम्, पराजयस्य जयसव्यपेक्षत्वेन तदभावे दुरुपपादत्वात् । न तत्सिद्धया तस्य तत्प्राप्तिरपि तु प्रत्यर्थिनो दोषादिति चेत्; स्वदोषात्तर्हि पराजयोऽपीति युगपदुभयं प्राप्तम्, तच्चायुक्तं विरोधादित्युभयोरपि साम्यमेव न जयः पराजयो वा कस्यचित्, तन्न सौगतोक्तं निग्रहस्थानम् ।

नापि नैयायिकपरिकल्पितं प्रतिज्ञाहान्यादिकम्; तस्यासद्दूषणत्वात् । अन्यथा वादेऽपि किन्न तदुद्भावनं यतो न्यूनाधिकापसिद्धान्तहेत्वाभासपञ्चकमित्यष्टावेव वादे निग्रहस्थानानीति नियमः[3] ? तस्य गुर्वादिभिः शिष्टैः सह प्रवृत्तेरिति चेत्; किं पुनस्ते सताऽपि दोषेण न निग्राह्याः ? तथा चेत्; न्यूनादिनाऽपि न निगृह्णेरन्नविशेषात् । को वा विशेषोऽयं नान्यस्य शस्त्रेण व्यापादनं मुष्टियुद्धेन वेति । कथं वा गुर्वादीनां[4] शिष्टत्वम् ? मतभेदाभावादिति चेत्; कथं तैर्वादस्तस्य तद्भेद एव सम्भवात् । **"प्रतिपक्षपरिग्रहो वादः"** [न्यायसू० १।२।१] इति तल्लक्षणश्रवणात् । अमत्सरित्वादित्यप्ययुक्तम्; तत्परिग्रहे मत्सरस्याप्यवश्यम्भावात् अन्यथा सौगतादेरपि न भवेत् । कस्य वा तदुद्भावनात् निग्रहस्थानम् ? सौगतादेरेवेति चेत्; कुत एतत् ? तत्र तद्धान्यादेः सम्भवादिति चेत्; न; गुर्वादिष्वपि तदविशेषात् । तत्र[5] सतोऽपि निवारणबुद्ध्यैवोद्भावनं न निग्रहबुद्ध्येति चेत्; [6]इतरत्र कुतस्तद्बुद्ध्या तदुद्भावनम् ? तस्य दस्युत्वादिति चेत्; तदेव कस्मात् ? तत्त्वविघटनादिति चेत्; यदि प्रमाणतः; कथं दस्युत्वं तस्य ? कथं वा निग्रहः प्रामाणिके अनुग्रहस्यैवोपपत्तेः ? अप्रमाणतश्चेत्; तदिति कुतश्चिच्छक्यनिश्चयम् ? तत एव तस्य निग्रहात् किं प्रतिज्ञाहान्यादिना कर्तव्यम् ? यष्टिन्यायेन द्वाभ्यामपि तस्य निग्रह इति चेत्; उक्तमत्र-**'वादिनोऽनेकहेतूक्तौ'** इत्यादि । यदि न शक्यनिश्चयम्; तर्हि तद्विघटनं न प्रमाणत इति रिक्ता वाचो युक्तिरिति । तन्न तद्धान्यादिकं निग्रहस्थानमुपपन्नम् ।

छलादिकं तु प्रागेव निषिद्धमिति न सङ्गतमेतत्–**"यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः"** [न्यायसू० १।२।२] इति । कुतो वा निवारणबुद्धयैव वादे तदुद्भावनम् ? गुर्वादेस्तत्त्वाभिनिवेशेनादस्युत्वादिति चेत्; कथं तैर्विवादः ? स्वयं तन्मताभ्यनुज्ञानस्यैवोपपत्तेः । तदपि

---

१ वादन्या० पृ०७२ । २ वादिपक्षासिद्धौ । ३ न्यायभा०१।२।१। ४–नां विशि–आ०,ब०,प० । ५ वादे । ६ इतरत्तत्कुतः आ०,ब०,प० ।

विचर्यैव क्रियते न पूर्वमिति चेत्; तदा तर्हि तेषां तदभिनिवेशापरिज्ञानात् दस्युत्वसम्भावनोपपत्तेः निग्रहबुद्ध्याऽपि तदुद्भावनं भवेत्। तथा च न युक्तमिदम्–"**प्रमाणतर्कसाधनोपलम्भो वादः**" [न्यायसू० १।२।१] इति, निग्रहस्थानसाधनोपालम्भत्वस्यापि सम्भवात्। तन्न यौगस्यापि निग्रहस्थानमुपपन्नम्। किं पुनस्तर्हि तदुपपन्नमिति चेत्? उक्तमेवेदम्–

"**स्वपक्षसिद्धिरेकस्य निग्रहोऽन्यस्य वादिनः।**" [ ][1] इति। ५

कः पुनरसौ वादो नाम यत्रेदं निग्रहस्थानमित्यत्राह वादलक्षणम्–

प्रत्यनीकव्यवच्छेदप्रकारेणैकसिद्धये।
वचनं साधनादीनां वादः सोऽयं जिगीषतोः ॥२१३॥ इति।

अप्रसिद्धवस्तुनिर्णयनिबन्धनं प्रत्यक्षादिकं **साधनं** तस्य **आदि**शब्दात् दूषणतदाभासानामपि **यद्वचनं स वादः**। स च **जिगीषतोः** परस्परं जेतुमिच्छतोः वादिप्रतिवादिनोः। १०
द्विवचनान्नैकस्य न बहूनामपि। न ह्येकस्य वादः। स हि विप्रतिपन्ने वस्तुनि साधनादेः स्वयंप्रसिद्धस्य वचनम्। न च तत्प्रसिद्धौ विप्रतिपत्तिः विरोधात्। अथ पूर्वं विप्रतिपत्तिः पश्चात् तत्प्रसिद्धिः; तथाऽपि किं वचनेन? प्रसिद्धिरपि तत एव तस्येति चेत्; तस्यापि तर्हि साधनत्वेन तदन्तरादेव प्रसिद्धौ अनवस्थापत्तेः। न कदाचिदपि मौलस्य तस्य वचनं यत एकस्यापि वादो भवेत्। वचनसाधनं विनाऽपि तदन्तरेण प्रसिद्ध्यति न प्रत्यक्षादिसाधनमिति स्वमतानुरागमात्रम्। १५
तन्नैकस्य वादः। नापि बहूनाम्; युगपत्तेषां तद्वचने कलकलमात्रश्रुत्या तदर्थानवधारणप्रसङ्गात्, तच्छ्रुतिमात्रेण कस्यचिदिष्टसिद्धेरयोगादतिप्रसङ्गाच्च[2]। परिपाट्या तद्वचने तु द्वयोरेव तत्पर्यवस्यतीत्युपपन्नं द्विवचनं जिगीषावचनं च,[3] अन्यथा निग्रहाभावप्रसङ्गात्। अस्ति च वादेऽपि न्यूनाऽधिकादेः परैरपि वचनात्। निग्रहोऽपि तत्र अजिगीषायामेवेति चेत्; व्याहतमेतत्-अजिगीषा च निग्रहश्चेति, अन्यथा शिष्यादावपि स्यात्। भवत्विति चेत्; कथं तत्रानुग्रहः? सति निग्रहे तदयोगात्, निग्रहानुग्रहयोः परस्परपरिहारस्थितिरूपत्वात्। तथा च न विद्यागमः कस्यापीति नष्टः शिष्यादिव्यवहारः। ततो विजिगीषाविरहाच्छिष्यादेः सतो दोषान्न निग्रहस्तथा गुर्वादेरपि न भवेत्। अस्ति च, तस्माद्विजिगीषुविषय एव वादोऽपि। जल्पादिवदिति न युक्तमिदम्–"**तं गुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयुभिरभ्युपेयात्**" [न्यायसू ४।२।४८] इति, साभ्यसूयैरेव तस्याभ्युपगमोपपत्तेः। तस्य फलप्रदर्शनार्थं'**प्रत्यनीक**'इत्यादि। अत्रैकस्मिन्निति द्रष्टव्यम् तत्रैव साध्यतत्प्रत्यनीकयोर्विरोधोपपत्तेः। २५
न भिन्नधर्मिणि यथा जले शैत्यम् औष्ण्यगमनाविति। तदयमर्थः–एकस्मिन्नभिन्ने धर्मिणि **प्रत्यनीक**स्य साध्यविरोधिनो नित्यत्वादेर्धर्मस्य **व्यवच्छेदप्रकारेणैकस्य** तस्मादन्यस्यानित्यत्वादेर्धर्मस्य या **सिद्धि**र्निर्णीतिः तस्यैतदर्थमिति। एतेन तत्सिद्धेरन्यत्र[4] लाभादिकं तत्फलम्। वादिना च द्वयं कर्तव्यं

---

१ उद्धृतोऽयम्– अष्टसह० पृ० ८७। प्रमेयक० पृ० ६७१। २– सङ्गात् प–आ०, ब०, प०।
३ "उपपन्नमिति सम्बन्धः"–ता० टि०। ४ –रप्यत्रला–आ०, ब०, प०।

परपक्षप्रतिषेधः स्वपक्षविधिश्चेत्येतच्च प्रतिपादितं प्रतिपत्तव्यम्। यदि प्रत्यनीकव्यवच्छेद एव परस्य निग्रहः कथमुक्तम्–"**स्वपक्षसिद्धिरेकस्य निग्रहोऽन्यस्य वादिनः**।" [ ] इति चेत्; न; तद्व्यवच्छेदस्य तत्सिद्धेः कथञ्चिदनर्थान्तरत्वाभिप्रायेण तदभिधानात्। भेदनयेन तु तद्व्यवच्छेदे एव तस्य निग्रहः। सोऽपि न निग्रहो मिथ्याध्यारोपनिषेधस्य निःश्रेयसहेतुत्वेन अनुग्रहरूपत्वात्। ततो लाभाद्यभाव एव निग्रहो वक्तव्य इति चेत्? अत्राह–

आस्तां तावदलाभादिरयमेव हि निग्रहः।
न्यायेन विजिगीषूणां स्वाभिप्रायनिवर्तनम्॥ २१४॥ इति।

लाभस्य ग्रामहेमादिप्राप्तेरादिशब्दात् पूजादेश्चाभावः **अलाभादिः** स परस्य **निग्रह** इत्यास्तां तस्य मुख्यवृत्त्या वादफलत्वाभावात्। प्रतिपन्नवस्तुप्रत्यस्तमयादिव ततः परस्य परिषदि पीडातिशयस्यापि अनुत्पत्तेः। तस्मादन्यदेव **विजिगीषूणां** परतिरस्कारकाम्यया प्रवृत्तानां **न्यायेन** प्रमाणबलेन **स्वाभिप्रायस्य** तत्सम्बन्धिनोऽभिनिवेशस्य **निवर्तनम्**। **अयमेव निग्रहो** वादोपक्रमस्यापि तत्परत्वेनास्यैवान्तरङ्गत्वात्। लाभादेश्चैतन्निबन्धनत्वेन मुख्यफलत्वाभावात्। कथं पुनर्मिथ्याज्ञाननिवर्तनस्य निग्रहत्वम्? निःश्रेयसहेतुत्वादिति चेत्; सत्यमिदम्; वस्तुवृत्त्या निग्रहत्वं तु तस्याभिप्रायकृतमौषधपानवत्, यथैव हि कश्चित् भेषजद्वेषी रोगी क्षीरादिव्याजेनौषधं पायितेनानुगृहीतमात्मानं मन्यते तथा तत्त्वविद्वेषी परोपि युक्तिबलेन मिथ्याऽभिनिवेशादवरोप्यमाणो निग्रहापन्नमात्मानमभिमन्यते, तेजस्वितया प्रवृत्तश्च साक्षिसमक्षं स्वपक्षपरिक्षयात् मनसि किञ्चित् परितप्यते, ततः तदभिप्रायादेव तस्य निग्रहत्वं न तत्त्वतः। कथं पुनस्तस्य परितापकारिणः करणमपि परमकारुणिकत्वात् जिनमतावलम्बिनामिति चेत्? न; तस्य गुणानुबन्धित्वेनादोषगुणत्वात् (नादोषत्वात्) गुणानुबन्धि खलु तत्करणं महतः संसारदुःखस्य ततो निस्तरणात्। अन्यथा हि अनिवर्तितमिथ्याऽभिनिवेशप्रबलान्धकारपरिवर्तनपरः परिवर्द्धितामय इव अमायावी[2] को जानीयात् कीदृशीं दुःखपरम्परां प्राप्नुयादिति? ततोऽध्ययनार्थो बालकनिग्रह इव तन्निग्रहोऽपि अदोषबुद्धया प्रतिपत्तव्यः उपकारभूयस्त्वात्।

सम्प्रति वादाभासं दर्शयति–

तदाभासो वितण्डादिः [अभ्युपेताव्यवस्थितेः।] इति।

वितण्डा जल्प एव पक्षस्थापनारहितः "**स प्रतिपक्षस्थापनाहीनो वितण्डा**।" [न्यायसू० १।२।३] इति वचनात्। **आदि**शब्दात् जल्पश्च "**यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः**" [न्यायसू० १।२।२] इति लक्षितः **तदाभासो** वादाभासः सम्यग्वादो न भवति। कस्मात्? इत्याह–'**अभ्युपेताव्यवस्थितेः**' इति। **अभ्युपेतं** यत् वैतण्डिकादिना शब्दानित्यत्वादिकं तस्य वितण्डादेः सकाशात् **अव्यवस्थितेः**। तथा हि–वितण्डादौ यदि अभ्युपेतव्यवस्थायाः

१–पदादिपी– प०। २ यथार्थवक्ता।

नियमः, तदा वाद एव, तन्नियमादेव जयपराजययोर्भावात् । अनियमेऽपि तद्व्यवस्थाभावे वाद एव । तदभावे तु कथं वैतण्डिकादेर्जयः पक्षसिद्धिविकलतया परस्मादविशेषात् ? छलादिप्रयोगतदुद्भावनलक्षणाद् गुणादिति चेत्; परस्यापि तद्गुणसद्भावे का गतिः ? द्वयोरपि साम्यमिति चेत्; नेदानीं कथारम्भेण प्रयोजनं विनाऽपि तेन साम्यस्य भावात् ? कथं वा तस्य गुणत्वम् ? परत्रासम्भवादिति चेत्; न, तस्य छलजात्यादेरन्यस्यापि बहुलं सम्भवात् । तथा हि—

वर्णं विहाय गद्येन कश्चित् पद्येन चापरः ।
अन्यासम्भविना वक्ति सङ्गीतध्वनिना परः[1] ॥१५८०॥
प्रवाहान्तरसंश्लिष्टं पराऽशक्यं परः कृती ।
एवं विचित्रा वक्तारः सन्त्यभ्यासबलाश्रयाः ॥१५८१॥
जयिनस्तद्गुणैस्ते स्युरन्यासम्भविभिर्न किम् ।
भवन्त्येवेति चेत्; सैषा कथा तुर्या प्रसज्यते ॥१५८२॥
कथात्रयोक्तौ यत्तेषां जयहेतौ न संग्रहः ।
प्रकृतानुपयोगाच्चेन्न तेभ्यो जयसम्भवः ॥१५८३॥
छलादावपि तत्तुल्यं तस्मादपि कथं जयः ।
ऋषिणाभिहितत्वाच्चेद् गीतादावपि तत्समम् ॥१५८४॥
नारदादिर्यतिः प्राह गीताज्जयमभीप्सितम् ।
ऐकस्मादपि साधूक्ताच्छब्दात्पापक्षयं परः ॥१५८५॥
दुरपोहं महत्पापं येन जेयमुदीरितम् ।
तस्य वाद्यपि जेतव्यः प्रोक्त एव महर्षिणा ॥१५८६॥

तन्न मुनिप्रणीतत्वमात्रेण छलादेर्जयनिबन्धनत्वमतिप्रसङ्गात् । एतदेवाह—

तदात्मोत्कर्षणायैव वाचो वृत्तिः [अनेकधा] ॥२१५॥ इति ।

तदिति तस्मिन्नित्यर्थे निपातत्वात् । वाचः वचनस्य वृत्तिः छलादिप्रयोगतदुद्भावनलक्षणा सा आत्मनो वैतण्डिकादेर्यदुत्कर्षणं तत्प्रयोगाद्यतिशयरूपं परासम्भवि तस्मा एव न जयायेत्येवकारः । कुत इत्यत्राह—'**अनेकधा**' इति । यतश्छलादिना अन्येन च रूपेण अनेकप्रकारा वाचो वृत्तिः ततोऽन्यप्रकारेणेव छलादिप्रकारेणापि सा तदुत्कर्षायैव न जयाय । अन्यथा चतुर्थ्या अपि कथायाः प्रसङ्गादिति भावः । ततः सूक्तम्—'**अभ्युपेताव्यवस्थितेस्तदाभासो वितण्डादिः**' इति ।

साम्प्रतं प्रत्यक्षादिज्ञानानां सङ्ख्यादिकथननिरूपणे प्रयोजनमुपदर्शयितुकामः परेण प्रश्नं कारयति—

---

१ यतः आ०,ब०, प० । २ "एकः शब्द सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति ।" —महाभा० ६।१।८४।

प्रामाण्यं यदि शास्त्रगम्यमथ न प्रागर्थसंवादनात्
सङ्ख्यालक्षणगोचरार्थकथने किं कारणं चेतसाम् ।
आ ज्ञातं [सकलागमार्थविषयज्ञानाविरोधं बुधाः
प्रेक्षन्ते तदुदीरितार्थगहने सन्देहविच्छित्तये ॥२१६॥] इति ।

चेतसां प्रत्यक्षादिज्ञानानां सङ्ख्या च प्रत्यक्षं परोक्षमिति द्वैविध्यं **लक्षणं** च विशदं ज्ञानं प्रत्यक्षम् अविशदं परोक्षमिति, **गोचरश्च** अनेकान्तात्मा जीवादिर्भावः **अर्थश्च** प्रयोजनमव्यवधानेन स्वार्थव्यवसायो व्यवधानेनोपादानादिबुद्धिप्रवृत्त्यादिस्तेषां **कथने** शास्त्रारोपिततया निरूपणे **किं कारणं** निमित्तम् **आज्ञातं** न किञ्चित् । लोकत एव तेषां प्रसिद्धेः । तदुक्तम्–

"प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥" [न्यायावता० श्लो० २]

प्रसिद्धानामेव तेषामनुवादः तदविसंवादेन प्रवचनप्रामाण्यनिर्णयार्थमिति चेत्; न; तेषामपि तन्निर्णयाय तदन्येषामनुवादप्रसङ्गादनवस्थापत्तेः । तन्निर्णयस्य तदविसंवादात् प्रागेवाभ्यासबलादुत्पत्तेर्न तदर्थस्तदनुवाद इति चेत्; न; तथा आगमप्रामाण्यनिर्णयस्यापि सम्भवात् । तदेवोच्यते– **'प्रामाण्यं यदि शास्त्रगम्यम्'** शास्त्रं तज्जनितं तदर्थज्ञानं तेन **गम्यं** निश्चेतव्यं **प्रामाण्यमवञ्चकत्वम्** । तदपि प्रत्यासत्तेः तस्यैव कथमवगम्यम् ? **प्राक्** पूर्वम् । कुतः ? **अर्थसंवादनात्** अर्थस्यागमाभिधेयस्य यत्संवादनं प्रत्यक्षादिनिबन्धनमविप्रतीसाररूपं तत इति । **यदि** चेत् इति । एतदुक्तं भवति–यथा प्रत्यक्षादौ प्रामाण्यनिर्णयस्ततः प्रागेव तथा यद्यागमज्ञानेऽपि व्यर्थं तदर्थाविसंवादनार्थं तेषां तत्कथनमिति । पक्षान्तरं द्योतयति–**'अथ न'** इति । अथ यदि ततः प्राक् शास्त्रगम्यं तत्प्रामाण्यं न भवति पश्चादेवागमादिति; अत्रोत्तरम्–**'संख्या'** इत्यादि । **चेतसाम्** आगमज्ञानानां संङ्ख्याद्वैत्र्येकादिरूपं परिगणनम् । **लक्षणमिति** मतिपूर्वत्वादि, **गोचरः** ससंसारतत्कारणादिः अर्थो हेयोपादेयपरित्यागोपादानादिस्तेषां **कथने किं कारणमाज्ञातं** न किञ्चित् । तथा हि–

कृत्वाऽपि यदि तच्चेतःसङ्ख्यादिकथनं त्वया ।
तदर्थनिर्णयेऽपेक्ष्यं प्रत्यक्षादिप्रमान्तरम् ॥१५८७॥
तत एवेष्टसं सिद्धेर्व्यर्थं तत्कथनं भवेत् ।
अर्कादेव मधुप्राप्तौ पर्वतारोहणेन किम् ॥१५८८॥

अतो न युक्तं तत्कथनमिति । अत्रोत्तरमाह–**सकलागमार्थविषयज्ञानाविरोधं बुधाः प्रेक्षन्त** इति । **सकलो** निरवशेषो य **आगमस्यार्थः** प्रत्यक्षादिस्थानत्रयगोचरस्तद्विषयं यज्ज्ञानमागमजनितमेव तस्याविरोधं प्रत्यक्षादिभिरबाधनं **बुधाः प्रेक्षन्ते** प्रकर्षेण निर्णयरूपेण

---

१ द्विभेदम्–अङ्गप्रविष्ट–अङ्गबाह्यभेदात् । अङ्गप्रविष्टं द्वादशविधम् अङ्गबाह्यमनेकविधम् ।
२ –णनञ्ज –ता० । ३– मस्तत्यार्थः आ०, ब०, प० ।

पश्यन्ति तत्कथनेन ततस्तस्मिन् तदुत्प्रेक्षणं कारणमिति मन्यते । तदपि किमर्थमिति चेत् ? अत्राह– 'तदुदीरितार्थगहने सन्देहविच्छित्तये' इति । तेनागमेनोदीरितोऽर्थो जीवादिः स एव गहनं बलवत्प्रज्ञाविकलानां दुरवगाहत्वात् तत्र यः सन्देह उपलक्षणमिदं तेन विपर्यासादिश्च तस्य विच्छित्तये विनाशाय । यदि हि तत्कथनेन तदविरोधं नोत्प्रेक्षेरन् बुधाः स्वामिसमन्तभद्रादयस्त[1]दा यथास्वं परिकल्पितलक्षणैरध्यक्षादिभिरेकान्तवादिनस्तज्ज्ञानस्य विरोधं साधयन्तः सुकुमारप्रज्ञानां सन्देहादिकं तद्गहने परिकल्पयेयुः, सन्देहादिग्रहगृहीताश्च ते श्रेयसः प्रच्यवेरन् । अतो युक्तं परकीयलक्षणनिराकरणेन प्रत्यक्षादिकं व्यवस्थापयतां तत्सङ्ख्यादिकथनेन तद्विषयज्ञानस्याविरोधोत्प्रेक्षणं सन्देहादिविच्छित्तेरेतस्य फलत्वात् । नन्वेवं प्रत्यक्षादिविषयेऽपि तद्विच्छित्तये परप्रत्यक्षादिभिरविरोध उत्प्रेक्षितव्यः पुनस्तत्राप्येवमित्यनवस्थाप्रसङ्ग इति चेत्; सत्यम्, तत्रापि विवादविषये तदविरोधात् तद्विच्छित्तिः, न चैवमनवस्थितिः ; किमप्यन्तरमनुसृत्य तद्विच्छित्तिहेतोरविवादास्पदस्य प्रतिलम्भात् । निवेदितमेतत् प्रथमप्रस्तावे सविस्तरमिति नेह प्रतन्यते ।

कुतः पुनर्न्यायदर्शनादि निःश्रेयसनिबन्धनतया प्रसिद्धमपि शास्त्रान्तरं परित्यज्य पुरुषार्थसिद्धये भगवदाम्नाय एव भवतामभिरतिरिति चेत् ? अत्राह–

शास्त्रं शक्यपरीक्षणेऽपि विषये सर्वं विसंवादकं ।
मिथ्यैकान्तकलङ्कितं [बहुमुखैरुद्वीक्ष्य तर्कागमैः ।
दाहार्तैः परिणामकल्पविटपिच्छायागतैः साम्प्रतं
विस्रब्धैरकलङ्करत्ननिचयन्यायो विनिश्चीयते ॥२१७॥] इति ।

सदसन्नित्यानित्यादद्यसदेकान्तप्रवादमलीमसं हि सकलमपि परोपकल्पं शास्त्रं परीक्षाशक्येऽपि प्रत्यक्षादिविषये विसंवादबहुलं तत्कथं तदभियोगे श्रेयस्कामानामभिरतिरिति भावः । तादृशं शास्त्रं किं कृत्वा पुनः किं क्रियते ? इत्याह– 'बहुमुखैरुद्वीक्ष्य तर्कागमैः दाहार्तैः परिणामकल्पविटपिच्छायागतैः साम्प्रतं विस्रब्धैरकलङ्करत्ननिचयन्यायो विनिश्चीयते ।' इति । आदितः प्रभृत्यापर्यवसानं विसंवादकमेव तत्कलङ्कितं शास्त्रमित्युद्वीक्ष्योर्ध्वमवलोक्य । कैः ? तर्कागमैः तर्कैस्तदुत्पाद्यतया तच्छब्दवाच्यैः प्रत्यक्षादिभिरागमैश्च तत्पूर्वापरभागैः बहुमुखैः अनेकप्रकारैः साम्प्रतमिदानीं विनिश्चीयते स्थानत्रयेऽपि प्रमाणया निर्णीयते । कोऽसौ ? अकलङ्करत्ननिचयन्यायो रत्नानीव रत्नानि सम्यग्दर्शनादीनि पुरुषार्थहेतुत्वात्तेषां निचयो निवहो यस्मिन् न्याये प्रवचनरूपे रत्ननिचयन्यायः स चाकलङ्कानां[2]मर्हतां नापौरुषेयः तदभावस्य निवेदनात् । कैः स विनिश्चीयते ? परिणामकल्पविटपिच्छायागतैः अनेकान्तरूपकल्पपादपच्छायामुपाश्रितैः । कुतश्छायागतैः ? दाहार्तैः संसारघर्मोपतापग्लपितमानसैः, तेषां तच्छायागमनमन्तरेण तद्दाहोपशम-

---

१ –स्तथा य– आ०, ब०, प० । २ –नामार्हतानां पै–आ०, ब०, प० ।

नासम्भवात् विस्रब्धैरिति च विशेषणं तेषां तच्छायागतत्वादेवोपपन्नं प्रतिपत्तव्यम् ।

कृत्वा निश्चयमेकलक्षणतया हेतुं विविच्यानुमां
हेत्वाभासमतः परं परमतो वादोचितं निग्रहम् ।
वादं तन्निभमप्यतश्च विवृतः सम्यग् द्वितीयो मया
प्रस्तावो भवतां दिशत्वनुदिनं रत्नत्रयाभ्युन्नतिम् ॥१५८९॥
यैरेकान्तकृपालुभिर्मम मनोनेत्रं समुन्मीलितं
शिक्षारत्नशलाकया हितपथं[1] पश्यत्यदृश्यं परैः ।
ते श्रीमन्मतिसागरो मुनिपतिः श्रीहेमसेनो दया-
पालश्चेति दिविस्पृशोऽपि गुरवः स्मृत्याऽभिरक्षन्तु माम् ॥१५९०॥

इत्याचार्यस्याद्वादविद्यापतिविरचिते न्यायविनिश्चयविवरणे द्वितीयः प्रस्तावः ॥

---

१ पदं आ०, ब०, प० ।

तृतीयः प्रवचनप्रस्तावः

पायान्नः परमागमामृतरसाद्वादेन संतृप्तवान्
प्रद्युम्नारिमदच्छिदार्द्रकृपया सम्पूर्णदिव्याकृतिः ।
वागीशः कमलापतिर्गुणनिधिः श्रीमल्लिषेणो मुनिः
सोऽयं श्रीपरवादिमल्ल इति यस्त्रैलोक्यचूडामणिः ॥ १५९१ ॥

तदेवं प्रस्तुतप्रस्तावाभ्यां प्रत्यक्षानुमानयोः प्रामाण्यं निश्चित्य साम्प्रतं प्रवचनस्य तन्निश्चयमतीतप्रस्तावान्त्यवृत्तेन सूचितं दर्शयितुमाह— ५

सकलं [सर्वथैकान्तप्रवादातीतगोचरम् ।
सिद्धं प्रवचनं सिद्धपरमात्मानुशासनम् ॥ १ ॥] इत्यादि ।

प्रकृष्टं वचनं **प्रवचनं** तच्च विषयत्वलक्षणस्य प्रकर्षनिबन्धनस्य गुणस्य भावात्, नापरतीर्थकरशासनं तत्र तदभावात् । एतदेवाह—**'सर्वथैकान्तप्रवादातीतगोचरम्'** इति । १०
सर्वथा सर्वेण धर्मिप्रकारेणेव धर्मप्रकारेणापि **एकान्तो** निष्कलस्वभावो भावो येषां ते **सर्वथैकान्ताः** मिथ्यावादिनः तेषां **प्रवादा** अनेकान्ते संशयादिदोषाभिलापाः तदन्याभिलापानामतिक्रमानुपपत्तेः, तान् **अतीतोऽ**तिक्रान्तोऽनेकान्तात्मा जीवादि**र्गोचरो** विषयो यस्य तत्तथोक्तम् । तदतिक्रमोऽपि तद्विषयस्य स्वयं प्रत्यक्षादिप्रमाणान्तरापरिपीडितशरीरत्वमेव । न हि प्रत्यक्षमन्यद्वा प्रमाणान्तरं तत्परिपीडनपरमुपलभ्यते तत्पोषणपरस्यैव तस्य प्रतीतेः । तदुक्तम्— १५

"तदेव च स्यान्न तदेव च स्यात्तथाप्रतीतेस्तव तत्कथञ्चित्" [बृहत्स्व० श्लो० ४२] इति ।

न चैवं सर्वथैकान्तशासनस्य[1] तत्परिपोषितविग्रहविषयत्वम्, प्रत्यक्षादेः प्रमाणस्य तद्विषयपराङ्मुखस्यैव प्रतीतेः । ततो हि न स्वशास्त्रपरिकल्पितात् तस्य परिपोषणम्; तस्यैव निष्कलस्य स्वतोऽप्रतिवेदनात् । अन्यतो निष्कलादेव तस्यापि प्रतिवेदने पर्यनुयोगानतिवृत्तेरनवस्थापत्तेश्च । नापि लोकप्रसिद्धात्; ततोऽपि स्वयं स्वपरभावाभिमतानेकवस्तुगोचरानेकनिश्चयव्यापारात्मनोऽनेकान्त- २०
स्यैव परिपोषणोपपत्तेः, तद्विपरीतस्य च तस्य लोकप्रसिद्धस्याभावात् । ततो युक्तं प्रमाणान्तरापरिपीडितविषयतया भगवदर्हच्छासनमेव प्रवचनमिति । यदि पुनः प्रत्यक्षादेरपि प्रवचनार्थस्य परिपोषणं किं तत्र प्रवचनस्य प्रामाण्यनिश्चयेन प्रयोजनाभावादिति चेत् ? न; तत्र प्रमाणान्तराविसंवादेन तन्निश्चये सति तन्निदर्शनेन अत्यन्तपरोक्षेऽपि विषये निर्विवादस्य तन्निश्चयस्योपपत्तेः । अत एव प्रत्यक्षादेः प्रमाणान्तरस्य तदविसंवादोपदर्शनार्थं प्रागेव निरूपणं कृतम् । अनिरूपिते तस्मिन् तद- २५
विसंवादोपदर्शनासम्भवादित्यलं प्रसङ्गेन ।

१—यतया ल-आ०, व०, प० । २—स्यैतत्परि-आ०, व०, प० ।

प्रवचनमिति धर्मिनिर्देशः, **सकल**मित्यपि तस्यैव विशेषणम् । न हि वेदवचनवत् प्रवचनस्य कश्चिदेव विभागः प्रतिपादितेऽर्थे प्रमाणमपरस्य तु प्रतिपादितार्थासम्भवात् अर्थवादत्वमित्ययं विभागः, सर्वस्यापि प्रतिपादितार्थे प्रामाण्यात् । तदाह—**सिद्ध**मिति । **सिद्धं** प्रमाणमित्यर्थः । सिद्ध्यति निर्णयविषयतां गच्छत्यनेनार्थ इति **सिद्ध**म् इति, करणे "**कृतव्युटो बहुलम्**" [ ] इति बहुलग्रहणेन निष्ठाविधानात् । सिद्धत्वं च तस्य सिद्धेः निर्णीतेः निमित्तत्वेनोपचारात्, मुख्यतो निर्णयात्मनो ज्ञानस्यैव सिद्धत्वात् । साधनं तत्र निर्बाधत्वम् । तथा हि—यत् स्वविषये निर्बाधं तत्प्रमाणं यथा प्रत्यक्षादि, निर्बाधं च स्वविषये जीवादौ प्रवचनमिति । निरूपितं जीवाजीवयोस्तस्य निर्बाधत्वम्, निरूपयिष्यते चास्रवादाविति । 'सिद्धमेतत् साधनमेव'इति च **सर्वथे**त्यादिना प्रतिपादितम् । हेत्वन्तरमाह—'**सिद्धपरमात्माऽनुशासनम्**'इति । **सिद्धो** निश्चितः **परमात्मा** सकलवस्तुयाथात्म्यदर्शी पुरुषविशेषोऽ**नुशासनः** काले देशे च कचिदुत्सन्नस्योत्सन्नस्य **अनु** पश्चाच्छासनः शास्ता यस्य तत्तथोक्तम् । यत एवं प्रवचनं ततः सिद्धमिति । प्रवचनस्य वेदवत् अपौरुषेयत्वात् असिद्धं तदनुशासनत्वमिति चेत्; न; वेदस्यापौरुषेयत्वासिद्धेः। तथा हि—पौरुषेयो वेदः स्वार्थप्रतिपादनात् भारतादिवत् । स्वशक्तित एव तस्य तत्प्रतिपादनं न पौरुषेयत्वादिति चेत्; नियतार्था तच्छक्तिः, अनियतार्था वा ? द्वितीयकल्पनायां सर्वस्यापि ततः सर्वार्थप्रतिपत्तिर्भवेत् । तथा च,

नियोगमेव तस्यार्थं कथं ब्रूयात् प्रभाकरः ।
भावानामेव भट्टोऽपि तदर्थान्तरसम्भवे ॥ १५९२ ॥
समयापेक्षिणी शक्तिर्वेदार्थप्रतिपादिनी ।
समयश्च न सर्वत्र भट्टादेरिति चेत् कथम् ॥ १५९३ ॥
अन्यस्यान्यमतावित्तौ तत्र दूषणकल्पनम् ।
तन्मतप्रतिपत्तौ वा समयासम्भवः कथम् ॥ १५९४ ॥
समयोऽप्येष वेदज्ञेत्तादृशस्यापि तादृशात् ।
समयात्प्रतिपत्तौ स्यादनवस्था कथन्न वः ॥ १५९५ ॥
समयः कृत्रिमश्चेत्तत्कर्ता वेदार्थविन्न चेत् ।
पृथग्जनवदेवासौ कुर्वीत समयं कथम् ॥ १५९६ ॥
विनाऽपि समयात्तस्य तद्वेदित्वे वृथैव सः ।
स्वकृतात् समयाद्वित्तौ भवेदन्योऽन्यसंश्रयः ॥ १५९७ ॥
सिद्धे वेदार्थवेदित्वे समयस्तत्कृतो भवेत् ।
तत्कृतात् समयात्तस्य तद्वेदित्वमिति स्फुटम् ॥ १५९८ ॥
नरान्तरकृतात्तस्य ततस्तद्वित्तिकल्पने ।
नरान्तरं तदर्थावित् कथं तत्कर्तृतां व्रजेत् ॥ १५९९ ॥

१—दुत्पन्नस्यानु आ०, ब०, प० ।

यदि तस्यापि तद्वित्त्वं नरान्तरकृतात्ततः ।
तत्राप्येवं प्रसङ्गे स्याद्व्यवस्थितिरञ्जसा ॥ १६०० ॥
समयानादिभावेन नैषा दोषाय चेत् कथम् ।
तादृशादर्थसंवित्तिः समीची समयाद्भवेत् ॥ १६०१ ॥
यतो नरक्रमादेषा ह्यनादेरप्यतद्दृशः ।
समयस्थितिरुत्पन्ना भवत्यन्धपरम्परा ॥ १६०२ ॥
तादङ्नरोपक्रमा हि सा तदर्थावगाहिनी ।
ना तदर्थदृगायत्ता म्लेच्छाधीनेव[1] तत्कृतिः ॥ १६०३ ॥

ततो न तादृशसमयापेक्षणमनेकार्थप्रतिबन्धायाः शक्तेरुपपन्नं यतो नियतार्थप्रत्यायनमिति भवितव्यमेव ततः सर्वस्यापि सर्वार्थप्रतिपत्तौ तद्वादित्वेन[2] । न चैवम् , अतो न द्वितीयकल्पनोपपन्ना ।

नापि प्रथमकल्पना; नियतार्थप्रतिबद्धत्वे शक्तेः समयवशादप्यर्थान्तरे प्रवृत्त्यभावप्रसङ्गात् धूमादिवत् । न हि धूमादेर्नियतपावकादिप्रतिबन्धत्वस्य[3] समयशतेनापि तदन्यत्र प्रवृत्तिः, न चैवम् , वेदवचनस्याग्निहोत्रादिवाक्यस्य मीमांसकपरिकल्पितादर्थादर्थान्तरेऽपि श्वमांसभक्षणादौ बौद्धसमयवशात् प्रवृत्तिदर्शनात् । तदुक्तञ्च—

"तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतेः ।
खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा ॥" [प्र०वा० ३।३१८] इति ।

समयस्यैव तत्र[4] प्रवृत्तिस्तत एव तत्प्रतिपत्तेर्न तद्वाक्यस्येति चेत्; मीमांसकाभिमतेऽपि न स्यात् , तस्यापि समयप्राधान्यादेव प्रतिपत्तेः, अन्यथा व्याख्यानवैयर्थ्यप्रसङ्गात् । न हि स्वशक्तित एव स्वार्थमवद्योतयतो व्याख्यानापेक्षणमुपपन्नम् । व्याख्यायमानस्य वाक्यस्यैव तत्र प्रवृत्तिस्तदनपेक्षायां व्याख्यानस्यैव निर्विषयत्वेनासम्भवादित्यपि समानं श्वमांसभक्षणेऽपि; तत्रापि परव्याख्यानविषयस्याग्निहोत्रादिवाक्यस्यैव प्रवृत्तेः, अन्यथा तद्व्याख्यानस्याप्यसम्भवात् न नियतार्थोऽपि नैसर्गिकी शक्तिर्वाक्यानां सम्भवति यतः पुरुषबलानपेक्षमभिधेयप्रतिपादनं तेषां सम्भाव्येत ।

स्यान्मतम् , वृद्धव्यवहारदर्शिनः प्रतिपत्तुरन्वयव्यतिरेकाभ्यां पदतदर्थव्युत्पत्तौ पुनस्तत एव वाक्यतदर्थयोरपि व्युत्पत्तिः पदतदर्थान्वयस्यैव वाक्यतदर्थान्वयत्वोपपत्तेः, ततः किं तदर्थेन पुरुषबलान्वेषणेनेति ? तदपि न साधीयः; तथा सति पदवाक्यव्युत्पत्तिकृतो व्याकरणस्य तदुभयार्थव्युत्पत्तिनिबन्धनस्य विचारग्रन्थस्य च वैयर्थ्यापत्तेः । ततः पुरुषबलादेव वेदस्यापि स्वार्थप्रतिपादनं न स्वशक्तित इति युक्तं तस्य पौरुषेयत्वं तद्वत् प्रवचनस्यापि भवेत्[5] । तस्य कश्चिदनुशास्ताऽस्तु, कुतो निरवशेषवस्तुयाथात्म्यदर्शित्वेन परमात्मेति चेत् ? तददर्शिनस्तदनुशासित्वायोगात् पृथग्जनवत्[6] ।

१–च्छादीनेव आ०, ब०, प० । २ तद्वेदित्वेन आ०, ब०, प० । ३–तसाधनादिप्र–आ०, ब०, प० । ४ अर्थान्तरे । ५ प्रतिवचन–आ०, ब०, प० । ६ "विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।"–ता० टि० ।

तस्याप्युपदेशबलेनोपपद्यत एव तदिति चेत्; उपदेष्टुस्तद्दर्शित्वे स एवास्मदभिमतः परमात्मा भवेत्। तदभावे कथमुपदेष्टृत्वम्? तद्वदेव तस्याप्यन्योपदेशबलेन तदिति चेत्; न; अन्यस्मिन्नप्युपदेष्टर्यवं-प्रसङ्गात्। पुनरन्योपदेशबलपरिकल्पनायां तदुपदेशपारम्पर्येणोपकल्पितत्वात् म्लेच्छादिधर्मोपदेश-प्रबन्धवत्। भवतु तर्हि तदनुशासिनस्तद्वेदित्वमस्मदादिप्रत्यक्षेणानुमानेन वा, नातीन्द्रियप्रत्यक्षेणेति चेत्; न; तन्निबन्धनस्य तत्परिज्ञानस्यात्यन्तपरोक्षाविषयत्वात् कथमयं तदर्थमुपदिशेन्नाम? प्रतिपन्नवदे-वाऽप्रतिपन्नेऽपि तत्परिकल्पनोपपत्तेः, अन्यथा सकलानुमानव्यवहारविलोपप्रसङ्गादित्युपपन्नं तस्य लोकोत्तरप्रत्यक्षबलेनैव निरवशेषपदार्थसार्थसाक्षात्करणसामर्थ्यसमन्वयेन परमात्मत्वम्। कथं पुनः पुरुषत्वाविशेषेऽप्यस्मदादेः प्रतिनियतविषयं परिज्ञानं तस्य तु सकलार्थविषयमित्ययं विभाग इति चेत्? न; अस्मदादावपि सकलार्थविषयस्य तस्य भावात्। कथमन्यथा साकल्येन साध्ये साध्य-साधनव्याप्तिपरिज्ञानम्? निरूपितं चैतत् मङ्गलव्याख्यायाम्। इयांस्तु विशेषः—अस्मदादेः तज्ज्ञानमस्पष्टं स्पष्टं तु परमात्मन इति। स्पष्टत्वं च तस्य अस्पष्टत्वनिबन्धनस्य आवरणस्य निर्मूलात् प्रलयात्। तच्चावरणमनुमानसिद्धम्,। तथा हि—सत् सर्वमनेकान्तात्मकमित्यादि व्याप्तिज्ञानं सावरणम्, अस्पष्टत्वात्, रजोनीहाराद्यन्तरितपादपादिज्ञानवत्। विवादापन्नं मिथ्याज्ञानं सावरणं मिथ्याज्ञानत्वात् विषाद्युपयो-गिनः उपलशकलादौ कलधौतज्ञानवदिति। तस्य क्वचिन्निर्मूलप्रहाणिरप्यनुमानादेव। तच्चेदम्—विवा-दापन्नमावरणं क्वचिन्निर्मूलं प्रहीयते, प्रकृष्यमाणहानिकत्वात्, यत्प्रकृष्यमाणहानिकं तत्क्वचिन्निर्मूलं प्रहीयमाणमुपलब्धं यथा हेमादौ किट्टकालिमादिकम्, प्रकृष्यमाणहानिकं च यथोक्तमावरणम्, तस्मात् क्वचिन्निर्मूलं प्रहीयत इति। न च प्रकृष्यमाणहानिकत्वमसिद्धम्, तस्यापि जीवेषु विज्ञानातिशय-दर्शनादेवानुमितेः। विज्ञानातिशयस्य च तत्कार्यदर्शनोपनीतप्रतीतिकस्याविप्रतिपत्तिविषयत्वात्। तदुक्तम्—

"जीवानामसहायाक्षादा शास्त्रार्थविदः क्रमात्।
विज्ञानातिशये विद्वान्न वै विप्रतिपद्यते॥" [सिद्धिवि० परि० ८] इति।

भवतु तस्य क्वचिन्निर्मूलं प्रहाणिः ततस्तु तन्निबन्धनमस्पष्टत्वमेव निवर्तेत 'कारणाभावात् 'कार्याभावः' इति न्यायात्, स्पष्टभावस्तु कथमिति चेत्? न; तन्निवृत्तेस्तद्भावरूपत्वात् भावान्तरस्व-भावत्वेनाभावस्य व्यवस्थापितत्वात्। ततो युक्तं तन्निर्मूलप्रहाणौ विज्ञानस्य परिस्फुटत्वं तादृशनिरवशेष-वस्तुगोचरप्रत्ययाधिकरणस्य च पुरुषस्य परमात्मत्वम्। अतः सूक्तमिदम्—

सकलं सर्वथैकान्तप्रवादातीतगोचरम्।
सिद्धं प्रवचनं सिद्धपरमात्मानुशासनम्॥ इति।

भवतु नाम कश्चित् विश्वदर्शी परमवीतरागश्च, स तु कुतः प्रतिपत्तव्यः? प्रत्यक्षादिति चेत्; न; तस्य परचेतोवृत्तावप्रवृत्तेः। व्यापारव्याहारादिलिङ्गोपजनितादनुमानादिति चेत्; न; व्यापारादेर्नि-र्दोषभाविनो दोषवत्यपि सम्भवेन व्यभिचारात्, 'सरागा अपि वीतरागा इव चेष्टन्ते' इति प्रसिद्धेः।

१ तदुपदेशप्रबन्धो पा-ता०। २ "हेमज्ञानवत्। कलधौतं रूप्यहेमणोरिति नानार्थवर्गे।" -ता० टि०। ३-नाद्यतिश-आ०, ब०, प०।

न च प्रमाणान्तरमस्ति यतस्तत्प्रतिपत्तिः, अतः कथं तस्य प्रवचनानुशासित्वेन पर्येषणं प्रेक्षावद्भिरिति चेत् ? अत्राह—

तथाऽन्यगुणदोषेषु संशयैकान्तवादिभिः ।
पुरुषातिशयो ज्ञातुं यद्यशक्यः किमिष्यते ॥२॥ इति ।

तथा तेन प्रमाणाभावप्रकारेण **अन्यस्यात्मान्तरस्य ये गुणाः** यथार्थदर्शनवैराग्यादयो ये च **दोषा** मिथ्याज्ञानरागादयस्तेषु **संशयस्यैकान्तो** नियमस्तं **वदन्तीत्येवंशीलाः** सौगताः । ननु प्रमाणाभावे तेषु तदभाववादित्वमेवोपपन्नं नित्यादिवत् तत्कथं तदेकान्तवादित्वमिति चेत् ? न; तदभावादपि दृश्यानुपलम्भरूपादेवाभावसिद्धेः आत्मान्तरगुणादेरश्रादृश्यत्वेन तदनुपलम्भस्य संशयहेतुत्वात् तद्वादित्वस्यैवोपपत्तेः । तैः **पुरुषस्य** तथागतस्यान्यस्य वा **अतिशयः** परिशुद्धज्ञानवैराग्यादिलक्षणो गुणप्रकर्षो **ज्ञातुं** प्रमाणतो निश्चेतुं **यदि** चेत्, **अशक्यः** शक्यो न भवति **किं** कस्मात् **इष्यते** मृग्यते ? पुरुषार्थत्वसिद्धये हि तदन्वेषणम्, न चाशक्यपरिज्ञानात् ततस्तत्सिद्धिः यतः प्रेक्षावतां तदन्वेषणम् । ततो दुर्भाषितमेतत्—

"ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये ।" [प्र०वा० १।३२] इति ।

न दुर्भाषितं संवृतिसिद्धस्य तस्य तदर्थमन्वेषणात्, परमार्थतस्तु न तस्यान्वेषणं दुरवबोधत्वादिति चेत्; कथं पुनः सत्यनुमाने तस्य दुरवबोधत्वम् ? तल्लिङ्गव्यापारादेस्तदन्यतोऽपि भावेन व्यभिचारादिति चेत्; ननु तदन्यतो भावोऽपि संवृत्यैव, **"निष्पत्तेरपराधीनम्"** [प्र० वा० २।२६] इत्यादिवचनात् । ततः संवृतिसिद्धव्यभिचारालिङ्गात्तस्य दुरवबोधत्वेनानिष्टत्वमपि संवृत्यैव न परमार्थतः । तच्चायुक्तं निष्पर्यायं तस्य संवृत्यैवेष्टत्वानिष्टत्वयोर्विरोधात् । कथं वा तदव्यापारादेरन्यत्रापि भाव इच्छावृत्तित्वात् ? सत्यपि पुरुषातिशये तस्येच्छातो भावो न तन्मात्रादेव सर्वदा तत्प्रसङ्गात्, इच्छायाश्च तदतिशयविकलेऽपि भावादुपपन्नस्तत्रापि तद्भाव इति चेत्; न तर्हि तद्विकलव्यापारादेस्तद्गति सम्भवः तस्य तदिच्छाया असम्भवात् । सम्भवे वा तद्गत्वविरोधात् । न हि दोषवदव्यापारं परोपतापपैशून्यादिकं चिकीर्षतस्तद्गत्वं नाम तच्चिकीर्षाभावरूपत्वात् तदतिशयस्य । ततो दुरालाप एवायम् 'वीतरागा अपि सरागा इव चेष्टन्ते' इति । या तु तस्य हितमधुरभाषणादिविषयेच्छा नासौ रागादिमतः सम्भवतीति कथं तन्निबन्धनस्य व्यापारादेस्तत्र भावः ? इच्छासामान्यभावादिति चेत्; पुद्गलसामान्यभावात् पाषाणादेरपि कुतो न धूमस्याभावः कार्यधर्मादिक्रमेणाहेतुकत्वप्रसङ्गात् । अन्वयव्यतिरेकानुविधाननियमो हि तद्धर्मः, न चैवमसौ पावके तस्य सम्भवति पाषाणादेरपि भावात् । नापि पाषाणादौ पावकादप्युत्पत्तेरिति तद्धर्माऽतिक्रमेणाहेतुकत्वमेव प्राप्तम् । तदुक्तम्—

"धूमः कार्यं हुतभुजः कार्यधर्मानुवृत्तितः ।
सम्भवंस्तदभावेऽपि हेतुमत्त्वं विलङ्घयेत् ॥" [प्र० वा० ३।३३] इति ।

१—द्विनिर्णयो यतः आ०, ब०, प० । २ "निष्पत्तेरपराधीनमपि कार्यं स्वहेतुतः । सम्बध्यते कल्पनायां किमकार्यं कथञ्चन ।"—प्र० वा० । ३—शयेन त—आ०, ब०, प० । ४ कुतो धूमस्याभावः आ०, ब०, प० ।

न चैवम्, अतो न दहनादन्यतस्तस्य भाव इति चेत्; तर्हि पुरुषातिशयभावी व्यापारादिरपि कथमन्यतो भवेत् ? तन्निर्हेतुकत्वस्याप्येवमुक्तन्यायेन सम्भवात्। तथा हि—

कार्यधर्मान्वयाद्यो हि पुरुषातिशयोद्भवी।
व्यापारादिर्विना तेन स चेन्निर्हेतुको भवेत् ॥ १६०४ ॥ इति।

दृश्यत एवान्यतोऽपि तद्व्यापारादिरिति चेत्: किं पुनः शक्रमूर्धनि धूमोऽपि न दृश्यते ? यदि दृश्यते तन्मूर्धाप्यग्निरेव, अनग्निस्वभावाद् धूमस्यानुत्पत्तेः। तदुक्तम्—

"अग्निस्वभावः शक्रस्य मूर्धा चेदग्निरेव सः।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत् ॥" [प्र० वा० ३।३५] इति।

न चैवम्, अतो न तत्र धूमः, यस्तु दृश्यते बहलपाण्डरादिरूपः स वाष्पादिरेव न धूम इति चेत्; कथमिदानीं पुरुषातिशयजन्मा व्यापारादिः ? तदन्यतो दृश्यमानस्य च वाष्पादिवत् तद्विलक्षणत्वात्। अत एव तत्र विप्रलम्भव्याहारं तद्विदो निवेदयन्ति भूतविशेषे वाष्पादिव्यवहारवत्। ततो न रागादिमति तदन्यव्यापारादिर्यतः ततः पुरुषातिशयप्रतिपत्तिव्यभिचारिणी न भवेत्। एतदेवाह—

परोक्षोऽप्यविनाभावसम्बद्धैर्गुणदोषयोः।
शास्त्रैर्निर्वर्तितैः शास्त्रकारवत् सम्प्रतीयते ॥ ३ ॥ इति।

परोक्षोऽपि प्रत्यक्षाविषयोऽपि गुणवांस्तद्विपरीतश्च **सम्प्रतीयते** सम्यगवगम्यते। कैः ? **शास्त्रैर्वचनप्रबन्धैः निर्वर्तितैः** निष्पादितैः सामर्थ्याद् गुणदोषवद्व्यामिति गम्यते, अन्यनिर्वर्तितैस्तैस्तत्परिज्ञानानुपपत्तेः। वाग्व्यापारोपदर्शनमिदम्। उपलक्षणं चेदं तेन कायव्यापारविशेषैरित्यपि द्रष्टव्यम्। तैरपि दोषोपशमपरानुग्रहनिबन्धनैस्तद्विपरीतैश्च गुणवतो दोषवतश्च पुरुषविशेषस्य परिमुक्तारेकतया परिज्ञानात्। कीदृशैस्तैः स सम्प्रतीयते ? **अविनाभावेनान्यथाऽनुपपत्त्या सम्बद्धैः**। क ? **गुणदोषयोः** यो यथार्थदर्शनवैराग्यातिशयपरमवत्सलत्वादिलक्षणो गुणो योऽपि तद्विपर्ययरूपो दोषस्तयोरिति।

शास्त्रैर्गुणाविनाभावसम्बद्धैः[2] भगवान् जिनः।
गुणवत्त्वेन बोद्धव्यस्तन्मुखाम्भोजनिर्गतैः ॥ १६०५ ॥
विदाङ्कुर्वन्ति विद्वांसस्तेषामपि गुणान्वयम्।
दृष्टागमाविरुद्धार्थप्ररूपणतया स्थितेः। १६०६ ॥
प्रत्यक्षं तन्निमित्तं च स्मरणाद्यनुमान्तिमम्[3]।
दृष्टं तेन तदर्थस्य न विरोधो हि दृश्यते ॥ १६०७ ॥
तदर्थालम्बनत्वेन तस्यापि प्रतिपत्तितः।
नाप्यागमेन तस्यापि पूर्वापरविभागिनः ॥ १६०८ ॥

१-यपुरुषवत्सल-आ०, ब०। -यपुरुषवत्सकल-प०। २-सम्बन्धैः ता०। ३-न्तिकम् आ०, ब०, प०।

परस्पराविसंवादरूपेणैव व्यवस्थितेः ।
बन्धुरेव भवेल्लोके किं रिपुः शक्यकल्पनः ॥ १६०९ ॥
दृष्टागमविरुद्धार्थविषयैः शासनैस्तथा ।
दोषवन्तोऽवगन्तव्याः सर्वथैकान्तवादिनः ॥ १६१० ॥
तच्छासनानां तादर्थ्यं प्रागुक्तं वक्ष्यतेऽपि च ।
देवागमे त एवोक्तं निर्मलन्यायवेदिभिः ॥ १६११ ॥

"त्वन्मतामृतबाह्यानां सर्वथैकान्तवादिनाम् ।
आप्ताभिमानदग्धानां स्वेष्टं दृष्टेन बाध्यते ॥" [आप्तमी०श्लो० ७] इति ।

भवतु नाम तेषां तद्विरुद्धार्थत्वं न तावता तैस्तत्प्रणेतृणां दोषवत्तापरिज्ञानं परविप्रलम्भनाय गुणवद्भिरपि तत्प्रणयनसम्भवादिति चेत्; न; तद्विप्रलम्भनस्यैव दोषत्वात् । मिथ्याज्ञानोपजननं हि तद्विप्रलम्भनम् । मिथ्याज्ञानं चानर्थनिमित्तम् अहिविषादौ हारगुडादिविज्ञानवत् । अर्थोपरतिनिबन्धनं च हारगुडादौ अहिविषादिज्ञानवत् । अतः कथं तदुपजननं न दोषः परप्रत्ययवायकारणत्वात् व्याधादेस्तदुपजननवत् । तस्यापि तत्कथं दोष इति चेत् ? अशुभपुद्गलप्राप्तिनिमित्तत्वादेव । तथा हि-व्याधादेः परविप्रलम्भनमशुभपुद्गलप्राप्तिनिबन्धनं विप्रलम्भनत्वात् आत्मविप्रलम्भनवत् । दृष्टा खल्वात्मविप्रलम्भनादशुच्यादौ शुच्याद्यभिनेवशरूपात् तत्प्राप्तिरिति न साध्यवैकल्यमुदाहरणस्य । या चासौ तत्प्राप्तिः सोपायप्राप्तिः घोरदुःखसंसारसरित्पातनिबन्धनीति सिद्धं तन्निबन्धनस्य विप्रलम्भनस्य दोषत्वम् । भवतु नाम व्याधादेस्ततस्तत्प्राप्तिर्न शास्त्रकृतां योगसामर्थ्येन तत्प्रतिबन्धादिति चेत्; विप्रलम्भनस्यैव कुतो न तेन प्रतिबन्धः ? एवं हि ते महायोगिनो भवन्ति यदि परेषामहितं नानुतिष्ठेयुः, तत्प्रतिबन्धनतत्सामर्थ्यमिति चेत्; तत्कार्यप्रतिबन्धेऽपि न भवेदिति किञ्चिदेतत् । तन्न गुणवतां मिथ्यार्थं शास्त्रप्रणयनं सम्भवति दोषवतामेव तत्सम्भवादित्युपपन्नं ततो दोषवत्त्वपरिज्ञानं सम्यगर्थात्ततो गुणवत्त्वपरिज्ञानवत् । **शास्त्रकारवदित्यत्रैव** निदर्शनम् । यथैवमपि अर्हतः सुगतादेश्चान्योऽपि वैद्यकादिशास्त्रकारः चिरापक्रान्तोऽपि तच्छास्त्रैरेव सुविवेचितगुणदोषसम्बद्धैः गुणदोषवत्तया सम्प्रतीयते तद्वत्प्रकृतोऽपीत्यर्थः ।

सम्प्रति सर्वथैकान्तवादिनः सुगतादेर्दोषवत्त्वमेव तदृव्यापारसमधिगम्यमावेदयन्नाह—

सिद्धहिंसानृतस्तेयाब्रह्मचर्यप्रवृत्तितः ।
स प्रत्यस्तमिताशेषदोषो नेति प्रतीयते ॥ ४ ॥ इति ।

सः सुगतादिः **प्रतीयते** निश्चीयते । कथम् ? **प्रत्यस्तमिताशेषदोषः** प्रक्षीणनिरवशेषमिथ्याज्ञानकषायमलोपलेपो नेति । एवं कुतः प्रतीयते ? **सिद्धहिंसानृतस्तेयाब्रह्मचर्यप्रवृत्तितः** ।

---

१ किं पुनः श-आ०, व०, प० । २ परप्रत्ययका—आ०, व०, प० । ३ परप्रत्ययवायोपजननवत् । ४-क्षिपरिज्ञाननिमि-आ०, व०, प० । ५ सावायप्रा-प० । ६-नविप्र-प० । ७ यथैवाप्यभ्यर्हतः आ०, व० । यथैवाप्यभ्यर्हितः प० ।

सिद्धाः प्रमाणतो निश्चितास्तास्ताश्च हिंसा चानृतं च [स्तेयं च] अब्रह्मचर्य तास्तथोक्ताः ताभ्यस्तत इति। तत्र प्रमादवता योगेन कायवाङ्मनोव्यापारात्मना य नामिन्द्रियादीनां प्रच्यावनं सा हिंसा। **"प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा"** इति वचनात्। सा च सुगतस्य साक्षाद्भाविनी तावदस्ति—बुभुक्षापरिपीडितां मृग तन्मुखे तेन स्वशरीरं निपातितमिति तन्मत एव श्रवणात् अथात्मवधो दोषो न भव मित्तत्वेन गुणत्वात्; परवधोऽपि तर्हि दोषो न भवेच्छागादिवत् अस्यापि तन्निमित्त म्भवात्। छागादेः पीडनाद् दोष एवेति चेत्; आत्मनः पीडनात् तद्वधोऽपि कुतो न दो योगिनं तत्पीडा नोपसर्पति योगबलेन प्रतिरोधात्; तर्हि योगिनः परस्यापि वधो न दो परोपकारस्य सम्भवात् तन्निमित्तस्य च परिपीडनस्य योगबलेनैव प्रतिरोधात्। तथा चेत् यदि योगिनोऽपि व्यापादयेत्। ततो यथा परहिंसा[2] दोषः तद्वदात्महिंसाऽपीत्यस्त दोषस्तस्य। तथा परम्पराभावी च, स्वयं तस्य पिशितभक्षिणाम[3]ग्रगण्यत्वात्।। तद्ध धिक्कार[4]प्रेरकत्वेन वनमृगादिव्यापादनहेतुत्वात्, तदभावे तद्व्यापादनासम्भवात्।

"भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते।" [

तथा तस्य अनृतमप्यस्ति सकलविनेयवर्गं प्रत्यपायनिबन्धनव्यापारोपकल्पन प्रमाणानुपपन्नत्वेनासत एव तेनाभिधानात्, अनृतस्य च तल्लक्षणत्वात्। **"असदभि** [त० सू० ७।१४] इति वचनात्। सदभिधानमपि तस्य दृश्यत एव नष्टमुष्टयाद यस्य तद्वचनस्याविसंवादप्रतीतेरिति चेत्; न; निरंशक्षणिकपरमाणुरूपे तदर्शन तत्र तदभावात्, तत्र प्रमाणाभावस्य प्रतिपादितत्वात्। क्रमाक्रमानेकान्तात्मनीति चेत् भगवतः स्याद्वादन्यायनायकस्यैव न तथागतस्य। तदुक्तम्—

"सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तिसम्पद तवैव ताः पूर्वमहार्णवोत्थिताः जगत्प्रमाणं जिनवाक्यविप्रुषः

[सिद्ध० द्वात्रिं०

स्वशास्त्रत्वेन तु तस्य प्रकाशनं चौर्यमेव अदत्तापहारसद्भावात् चौर्यस्य च तदुक्तम्—**"अदत्तादानं स्तेयम्"** [त० सू० ७।१५] इति। तद्वदब्रह्माऽपि तस्य भावात्। **"मैथुनमब्रह्म"** [त० सू० ७।१६] इति च तल्लक्षणाभिधानात्। न च सिद्धः; स्वयमनेकमूत्रविवरपरिवीतविग्रहतया गर्दभीभूत्वा मदनशरपरिपीडितेन ग मैथुनमचीकरोदिति तदीयानामेव प्रसिद्धेः। कामाभिनिवेशेन तत्करणमेव दोषो न कृपया, कृपया च तत्करणं बुद्धस्येति चेत्; न; जननीगुरुपत्न्यादावपि "तज्ज्वरप तत्करणस्यादोषत्वेन पृथग्जनस्यापि तत्कारिणो दण्डाभावापत्तेः। 'पृथग्जनः कृपय

---

१ प्राणिप्राणव्य—ता०। २—साद्दिोषः आ०. ब०. प०। ३ भक्षणानाम—आ०,

स्वयं कामाभिनिवेशेन वा' इति न निश्चयः परचेतोवृत्तीनां दुरन्वयत्वादिति चेत्; न; तथागतेऽपि तुल्यत्वात्। तदुक्तम्–

"अभवत् सुगतः खरो खराणां स्वयमुत्पाद्य भगान् समन्ततः।
कृपया स तु कामपीडया वा न वयं तत्र विनिश्चयं गताः॥" [ ] इति।

योगित्वादेव तस्य तत्पीडा न भवतीति चेत्; न; तस्यैव चित्तधर्मत्वेन दुरवबोधत्वात्। यदि चायं योगी तर्हि तत्त्वदर्शनादुन्मार्गतः प्राणिनां निवारणमेव कर्तव्यं कथं तत्र प्रवर्तनं साधुचेष्टाया अनेवंविधत्वात्। निवार्यमाणा अपि न व्यवतिष्ठन्त इति चेत्; औदासीन्यमेव तर्हि कर्तव्यं न स्वयमयुक्ताचरणम्। तथा च कस्यचित् सुभाषितम्–

"अपारयन् वारयितुं पृथग्जनानसत्प्रवृत्तेष्वपि नासदाचरेत्।
अशक्नुवन् पीतविषं चिकित्सितुं पिबेत् विषं कः स्वयमप्यबालिशः॥"
[ ] इति।

ततः तत्पीडयैव तस्य तत्करणमिति सुनिश्चितोऽस्याब्रह्मचर्यदोषः।

तथा परिग्रहदोषोऽपि कषायपरिधानबोधितरुच्छायामण्डलादौ ममेदम्भावरूपाया मूर्च्छाया अस्तस्य भावात् तल्लक्षणत्वाच्च परिग्रहस्य, "मूर्च्छा परिग्रहः" [त० सू० ७।१७] इति सूत्रात्। कारिकायां च देवैस्तस्यैव प्रवृत्तिशब्देनाभिधानात्। कथमेवं भगवत्यपि तद्दोषपरिहारः छत्रचामरहरिविष्टरादेर्महापरिग्रहस्य तत्रापि भावादिति चेत्? न; निरतिशयपुण्यप्रभावप्रेरितैरमरपतिभिरुपकल्पिते तस्मिन् भगवतो ममेदम्भाववुद्धेरभावात्। तदुक्तम्–

"प्रातिहार्यविभवैः परिष्कृतो देहतोऽपि विरतो भवानभूत्।"
[बृहत्स्व० श्लो० ७३] इति।

तदभावस्य दृष्टागमाविरोधिनस्तत्प्रवचनादेव अध्यवसायात्। न च तादृशं किञ्चित् शुद्धोदनतनयस्य वचनमस्ति यतः तस्यापि तदभावपरिज्ञानात् 'सन्नपि कषायकर्पटाद्युपश्लेषः कुतश्चिदन्यत एव न मूर्च्छातः' इति निश्चिन्वन्ति विपश्चितः। मूर्च्छात इत्यपि कुतो निश्चय इति चेत्? इमे ब्रूमहे–तथागतस्य तदुपश्लेषो मूर्च्छानिबन्धनः तत्त्वदर्शनविकलसम्बन्धित्वे सति तदुपश्लेषात्, पृथग्जनस्य तदुपश्लेषवत्। तद्विकलत्वं च तस्य तच्छास्त्रेणैवावसीयत इति निरूपितमनन्तरमेव। ततः परिग्रहदोषोऽपि तस्य विद्यत एव। हरिहरादेस्तु सकलजनसंवादविषयो हिंसादिर्दोष इति न विविच्य व्याख्यायते। ततो हिंसादयो दोषाः सर्वथैकान्तवादिनां सन्तीत्यत्र न संशीतिरस्ति वस्तुविवेकिनाम्। भवतु नाम सुगतस्तथाविधस्तथाऽपि किम्? इत्यत्राह–

हेयोपादेयतत्त्वस्य सोपायस्य किलेदृशः।
प्रवक्ता [धिगनात्मज्ञं तदसाध्यमसाधनम्] ॥५॥ इति।

ईदृशोऽप्रत्यस्तमिताशेषदोषतया प्रतीयमानस्तथागतः प्रवक्ता प्रतिपादयिता किलेत्यरुचिवचनेन न प्रवक्तेति कथयति। कस्यासौ न प्रवक्ता? हेयोपादेयतत्त्वस्य हेयं च पञ्चस्कन्ध-

---

१–तस्तस्याब्रह्म–आ०, व०, प०। २ मूर्च्छाया एव।

सन्तानरूपं दुःखसत्यम् **"दुःखं संसारिणः स्कन्धाः"** [प्र० वा० १।१४९] इति वचनात्। उपादेयं च तस्यैव निःशेषप्रहाणस्वरूपं निरोधसत्यं हेयोपादेयं तदेव तत्त्वं तस्य **सोपायस्य** हेयतत्त्वस्योपायोऽविद्यातृष्णारूपं समुदयसत्यम्, **"दुःखे विपर्यासमतिस्तृष्णा वा तस्य कारणम्"** [प्र० वा० १।८३] इति वचनात्। उपादेयतत्त्वस्य[1] नैरात्म्यभावनारूपं मार्गसत्यं तत्सहितस्येति। न हि दोषवत्त्वेन निर्ज्ञातस्य तत्त्वदर्शनं शक्यसम्भावनं यतस्तस्यासौ प्रवक्ता भवेदिति भावः। यदि वेदृश इति परोपकल्पितरूपो विधूतकल्पनाजाल इति प्रतिपत्तव्यं तस्यापि प्रवक्तृत्वानुपपत्तेः। कथमिति चेत्; विकल्पाभावादेव, विकल्पकार्यं हि वचनम् **"विकल्पयोनयः शब्दाः"** [ ] इति वचनात्। कथं तदभावे भवेत्? विकल्पादेव चिरापक्रान्तादिति चेत्; न; ततो विकल्पस्यापि दुर्भावेन तस्य विधूतकल्पनाजालत्वाभावापत्तेः। चिरापवृत्तादपि ततो वचनमेव न तज्जातीयो विकल्प इति नियमहेतोरशक्योपदर्शनत्वात्। तत्कालभाविन एव विकल्पसंस्कारात् तस्य वचनमित्यपि वाचोयुक्तिः न चतुरविचारसङ्गमोचितं सौभाग्यमुद्वहति; ततो वचनवद्विकल्पस्यापि प्रसङ्गेन प्रकृतदोषानतिवृत्तेः। तत्संस्कारस्य च विकल्पत्वे न तस्य विधूताशेषविकल्पत्वम्, अविकल्पत्वे च न ततो वचनम्। न च विकल्पाविकल्पव्यतिरेकेणापरः कश्चित्तत्स्वभावः। तद्भावे वा न ततो वचनम्। विकल्पकार्यत्वेन निश्चितस्यान्यतो भावे निर्हेतुकत्वापत्तेरिति दुष्परिहारोऽयं दोषोपनिपातः परस्य। तन्न यथागतस्य प्रवक्तृत्वं यतस्तदुक्तप्रतिपत्त्यर्थं प्रेक्षावतां तदन्वेषणं भवेत्।

अथ कुड्यादीनां प्रवक्तृत्वमेव तस्यापि प्रवक्तृत्वं तस्य[3] तत्सन्निधिनिबन्धनत्वादिति चेत्; अहो महदिदमद्भुतं यत्सकलज्ञानाधिष्ठानादपि तस्मादनुत्पन्नं ज्ञानगन्धेनापि शून्यात् कुड्यादेर्भवतीति! नायं दोषः तथागतप्रभावस्य तादृशत्वादिति चेत्; ततस्तर्हि कुतस्तस्य स्वयमेव न प्रवक्तृत्वम्? एवं हि पारम्पर्यं परिहृतं भवति—सुगतात् कुड्यादेः प्रभावस्ततो वचनमिति। मा भूत्तस्य वचनम्, प्रवक्तृत्वं तु तस्य विनेयानां[5] तत्सन्निधानात्तत्त्वज्ञानप्रादुर्भावादिति चेत्; तज्ज्ञानं यदि न प्रमाणं कथं तत्त्वविषयं विरोधात्? प्रामाण्यमपि न तस्य प्रत्यक्षत्वेन; इन्द्रियादिप्रत्यक्षेष्वनन्तर्भावात्। न हि तदिन्द्रियज्ञानम्; इन्द्रियादनुत्पत्तेः। नापि मानसम्; इन्द्रियज्ञानादप्रसूतेः, तस्य[6] तद्विषयानन्तरविषयमात्रागोचरत्वाच्च। नापि योगिज्ञानम्; भावनाप्रकर्षनिरपेक्षत्वात्। नापि स्वसंवेदनत्वेन[7]; सत्यचतुष्टयविषयत्वाभावापत्तेः। प्रत्यक्षान्तरत्वे च तज्ज्ञानचातुर्विध्यनियमव्यावर्णनव्याघातोपनिपातात्। नाप्यनुमानत्वेन[8]; लिङ्गाभावात्। सुगतसन्निधानमेव लिङ्गमिति चेत्; सुगत एव तर्हि तच्चतुष्टयस्यानुमितिर्भवेत् तत्रैव लिङ्गान्न सत्त्वान्तरेषु पक्षधर्मत्वाभावात्, न च तत्र तदस्ति; तस्य शुद्धज्ञानस्वभावतया दुःखादिरूपत्वानभ्युपगमात्। न प्रमाणान्तरत्वेनापि; प्रमाणद्वयनियमोपगमात्। तन्न तत्सन्निधानात् तत्त्वज्ञानं विनेयानामुपपन्नं यतस्तदेव तस्य प्रवक्तृत्वं भवेदिति सूक्तम्—'हेय'इत्यादि, सर्वथा तस्य प्रवक्तृत्वाव्यवस्थितेः।

---

१ "उपाय इति अत्रापि सम्बन्धः।" —ता० टि०। २ तत्सन्धानानि—आ०, ब०, प०। ३ सुगतात्। ४ प्रवादस्त—आ०, ब०, प०। ५ विनेयज्ञानस्य। ६ —त्रगो—प०। ७ तस्य प्रामाण्यमिति सम्बन्धः।

पुनरपि तदेव प्रतिक्षिपन्नाह–**'धिगनात्मज्ञं तदसाध्यमसाधनम्'** इति। तात्पर्यमत्र-विद्यमानस्यैव हेयादितत्त्वस्य सुगतोऽपि प्रवक्ता भवेन्नापरस्य व्योमकुसुमादिवत्। विद्यमानत्वं च न तस्य कार्यत्वेन, असति कारणे तदनुज्ञानात्[1], असति च तदयोगान्निर्हेतुकत्वापत्तेः[2]। नापि कारणत्वेन; कार्यकालमप्राप्य निवृत्तस्य चिरापक्रान्तवत्तदनुपपत्तेः। निरूपितं चैतत् सविस्तरमिति। पदार्थः कथ्यते-**तत्** हेयादितत्त्वम्। **असाध्यं** कस्यचिदप्यकार्यम् **असाधनम्** अकारणं च प्रतिसमयविलयप्राप्तिविग्रह-स्योक्तनीत्याऽनुपपत्तेः। अन्वयरूपत्वे तदुपपत्तिरिति चेत्; स्यादेतदेवं यद्यन्वयवादी सुगतः, न चैवम्। एतदेवोक्तम्–**'अनात्मज्ञम्'** इति। **'आत्मा'**इत्यन्वय एवोच्यते अतति गच्छति तांस्तान् पर्यायानित्यात्मेति व्युत्पादनात्। तन्न जानाति नोपैति इत्यनात्मज्ञः सुगतस्तं तस्येत्यर्थः। **धिक्**-शब्देन योगे षष्ठीविषय एव द्वितीयाविधानात्। तदयमर्थः–यतस्तदनात्मज्ञस्य सम्बन्धि तस्माद् **असाध्यमसाधनम्** अतः **धिक्** कुत्सनमनात्मज्ञस्य तस्य वा। यदि वा, **तदसाध्यं** साधयितुम-शक्यम्। कुत एतत्? **असाधनम्** अविद्यमानप्रमाणं यत इति। एतदपि कस्मात्? **'अनात्मज्ञम्'** इति। आत्मा जीवः स चासौ ज्ञश्च जैनोपगतो न यौगकल्पितः आत्मज्ञः स न विद्यते यस्य सोऽयम् **अनात्मज्ञो** बुद्ध एव तस्य सम्बन्धी यत इति।

ज्ञानमेव हि तस्य स्यात् साधनं तच्च नासति।
ज्ञस्वभावे नरेऽस्तीति पूर्वमेतन्निवेदितम् ॥१६१२॥
अज्ञातमप्रमाणत्वादकार्यत्वादितोऽप्यसत्।
कथं हेयादिकं तत्त्वं बुद्धो वक्तुं प्रवर्तताम्? ॥१६१३॥
तस्मादयमसद्वादैर्बालिशान्[3] विप्रलम्भयन्।
धिक्[4] कर्तव्यः कथं नाम न भवेन्न्यायवेदिनाम् ॥१६१४॥

पुनरप्यत्रैवोपचयमाह–

सर्वथाऽसदुपादेयं हेयं सत् [तदकारणम्]। इति।

सर्वथा सर्वेण सकलरागादिक्लेशप्रकारेणैव परिशुद्धज्ञानरूपेणापि **असत्** अविद्यमानं निरोधसत्यम्। **उपादेयं** पुरुषार्थबुद्ध्या परिग्राह्यम् **'धिगनात्मज्ञम्'** इति सम्बन्धः। कुतो धिक्कार इति चेत्? अनात्मज्ञत्वादेव। आत्मेति निरोधसत्यस्य स्वभावस्तस्य ज्ञानं बुद्धिः स न विद्यते यस्मिन् तद् **अनात्मज्ञं** तत्सत्यमेव यत एवं ततो धिगिति। तथा हि–निरुद्धसकलाकारं निर्वाणं न तावत् प्रत्यक्षतः प्रतिपत्तव्यं प्रतिबन्धाभावात्। न हि तस्य तत्कार्यत्वम्; नीरूपस्याकारणत्वात्, अन्यथा नीरूपत्वायोगात्। नापि तत्स्वभावत्वम्, स्वयं नीरूपत्वप्रसङ्गात्। न च नीरूपादेव तस्य परिज्ञान-कल्पनं विज्ञानकल्पनावैफल्योपनिपातात्। पुनरन्यतः प्रत्यक्षात् तत्परिज्ञानकल्पनायां प्रकृतपर्यनुयो-गानतिवृत्तेः अनवस्थादोषविषमविषधरव्यापारभयपरिपातस्य च परिहर्तुमशक्यत्वात्। न चाप्रति-बद्धादेव ततस्तत्परिज्ञानम्, अनभ्युपगमात्, प्रतिबन्धान्तरस्य च[5]। तन्न प्रत्यक्षस्य तज्ज्ञानत्वम्[6]।

१ कार्योत्पादानुज्ञानात्। २ कार्योत्पादायोगात्। ३ अज्ञान्। "शिशावज्ञे च बालिशः। इत्यमरः"–ता० टि०। ४ धिक्कर्तव्यः–आ०, व०, प०। ५ "अनभ्युपगमादिति सम्बन्धः।"–ता० टि०। ६ निर्वाणविषयकज्ञानत्वम्।

नाप्यनुमानस्य; प्रत्यक्षाभावे तस्य तत्पूर्वकत्वेनाप्रवृत्तेः। लिङ्गस्य च तत्कार्यस्य तत्स्वभावस्य च विचारासहत्वेनाव्यवस्थितेः। ततो युक्तं तत्सत्यस्य अनात्मज्ञत्वम्, अतश्च तदुपादेयं धिगेव प्रमाणपथाऽतिवर्तिनो वस्तुवृत्तेनानुपादेयत्वात्। तथा **सत्** प्रशस्तं परिशुद्धज्ञानस्वभावं बुद्धस्य **"प्रभास्वरमिदं चित्तम्"** [प्र० वा० १।२१०] इति वचनात्। तत् हेयं नैरात्म्यभावनापरिपाकबलेन परित्याज्यमित्यपि धिगेव, प्रशस्तस्य परित्यागानुपपत्तेः निर्वाणवत्। कथं वा तस्य तत्परित्यागे परात्मपरिज्ञानं यतः तदुपतापपरिहारपरवशतया तदुपायाभियोगमात्मसात्कुर्वीत नीरूपत्वेन तदनुपपत्तेः। एतदेवोक्तम्—**'अनात्मज्ञम्'** इति। आत्मा विनेयसन्तानरतस्य ज्ञो तद्बुद्धिरतस्या अभावेऽनात्मज्ञम्, अर्थाभावेऽव्ययीभावात्। एतदुक्तं भवति-सतोऽपि स्वभावस्य परित्यागे तस्य परपरिज्ञानं न भवेत् अतस्तस्य हेयत्वं निन्दितमिति। नास्त्येव तस्य तत्परित्यागः **"तिष्ठन्त्येव पराधीना येषां तु महती कृपा।"** [प्र० वा० १।२०१] इति वचनादिति चेत्; कथं पुनर्नैरात्म्यभावनापरिपाके तत्कारणे सति तदभावः खड्गादेरपि ततस्तदभावप्रसङ्गात्? अथ तत्परिपाकोऽपि कृपासम्पर्कविकल एव तद्धेतुः स खड्गादेरेव न महामुनेः, तस्य परार्थपरतया महाकृपालुत्वादिति चेत्; खड्गादेः कस्मादकृपालुत्वम्? परार्थवृत्तेरभावादिति चेत्; अस्तु नाम तस्य परत्राकृपालुत्वमात्मनि तु भवत्येव स्वार्थवृत्तेरवश्यम्भावात्, अन्यथा निर्वाणायोपक्रमानुपपत्तेः। अथ तस्य निर्वाणेनैवार्थित्वं नावस्थानेनेति। कुत एतत्? तस्य निर्दोषत्वात् समानमिदमनव (मव) स्थानेऽपि, तस्यापि सकलमलविकलप्रभास्वरचित्तरूपत्वेन अभ्युपगमात्। अथ तच्चित्तेनावस्थितेनापि न किञ्चित् फलमिति न तत्रार्थित्वं तस्य; तर्हि तन्नाशेऽपि न भवेत् ततोऽपि कस्यचित् फलस्याभावात्, प्रत्युत तदेव मुमुक्षूणां फलं यत् सकलक्लेशपरिशुद्धज्ञानरूपतयाऽवस्थानम्, तच्चेत् कुतश्चित् सम्प्रपद्येत किमन्येन? फलेऽपि फलान्तरप्रतीक्षायामनवस्थापत्तेः। ततो युक्तं तत्रैव तस्यार्थित्वम्। अथ सत्यपि तत्र तस्यार्थित्वे न तस्यावस्थानं तदपरित्यागे तत्परिमिश्रक्लेशपरित्यागासम्भवात् अन्नापरित्यागे तत्परिमिश्रविषपरित्यागासम्भववदिति चेत्; न; तथा तथागतस्य चित्तस्यापि परित्यागप्रसङ्गात्। अथास्ति कश्चित् तस्योपायो यतोऽवस्थितेऽपि चित्ते तत्क्लेशपरित्यागः तस्य भवेत्; स तर्हि खड्गादेरपि तेन वक्तव्यो येन न तच्चित्तमप्यवस्थितमेव परिगलितनिखिलक्लेशभयपरिनिर्वाणपदं प्राप्नुयात्। एवं हि तेनात्मनस्तायित्वमपि सुस्पष्टं प्रतिष्ठापितं भवति स्वयं परिदृष्टमार्गोपदेशस्यैव तत्त्वात्, **"तायः स्वदृष्टमार्गोक्तिः"** [प्र० वा० १।१४७] इति वचनात्। ततो यदि कृपामाहात्म्यात् अवस्थानं बुद्धचित्तस्य खड्गादिचित्तस्यापि स्यात्। न चेत्; इतरस्यापि न स्यादित्युपपन्नमुक्तम्—**'हेयं सत्'** इति। यदि वा, **सत्** विद्यमानं संसारिचित्तं **हेयं धिगिति** व्याख्येयम्, तस्य सत्त्वासिद्धेः, सत एव हेयत्वो-

---

१ तत्सत्त्वस्य प० । २ जातवु—आ०, ब, प० । ३ "निर्वाणेऽपि परे प्राप्ते कृपाद्रीकृतचेतसः"। इति पूर्वार्धम्। ता० टि०। ४ वचनादेवेति प० । ५ –देर्न क–आ०, ब०, प० । ६ निर्वाणस्य। ७ अवस्थानपरित्यागाभावे। ८ तथाग आ, ब०, प० । ९ तच्चित्तस्यो –आ०, ब०, प० । १० –पित्तो न आ०, ब०, प० । ११ "प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने।" –ता० टि०।

पपत्तेरिति मन्यते । तदसत्त्वे निमित्तमाह–**'तदकारणम्'** इति । **तत्** उक्तरूपं चित्तम् **अकारणम्** अपूर्वमुत्तरस्याजनकम्, अन्यथा चरमक्षणेऽपि स्यादिति निर्वाणाभाव इति भावः । तदानीं विजातीयस्यैव योगिज्ञानादेस्तत्कारणं न सजातीयोत्तरचित्तस्य तदयमदोष इति चेत्; कथमिदानीं परचैतन्यप्रतिपत्तिः ? शक्यं हि वक्तुम्–अतीतजन्मान्तिमचित्तं विजातीयमेव प्राणापानादिकं सजातीयोत्तरजनकं जनयित्वा प्रतिनिवृत्तं न सजातीयं चित्तं चरमक्षणवत् । ततो न प्राणादेः परशरीरे निश्चितात् तत्प्रतिपत्तिः, व्यभिचारशङ्कायां तदनुपपत्तेरिति । तथा चेत्; कथं सुगतभाविनः[2] पुरुषस्य परदुःखपरिज्ञानं यतस्तदक्षमतया प्रेरितस्तत्परिहारोपायाभियोगी स भवेदित्यसङ्गतमिदमवलोकयामः–

"निष्पन्नकरुणोत्कर्षः परदुःखात्तमेरितः ।
दयावान् दुःखहानार्थमुपायेष्वभियुज्यते ॥" [प्र०वा० १।१३३] इति ।

ततो यथा सजातीयं जनयत एव परचित्तस्य विजातीयजनकत्वं तथा चरमचित्तस्यापीति न सम्भवत्येव चित्तोच्छेदलक्षणं निर्वाणम् । तत्सम्भवे वा तच्चित्तमकारणमेव सजातीयवद्विजातीयस्यापीत्युपनतं तस्यावस्तुत्वमर्थक्रियाविरहात्, तथा तत्पूर्वस्यापि, अवस्तुनोऽर्थक्रियारूपत्वायोगेन तस्यापि तद्विरहाविशेषात्, तथा तत्पूर्वस्यापीत्यशेषस्यापि चित्तप्रबन्धस्य क्वचिदप्यनुपयोगात् उपपन्नमुक्तम्–**'तदकारणम्'** इति । भवत्वकारणत्वादसन्नेव तत्प्रबन्ध इति चेत्; तर्हि नित्यसिद्धत्वान्निर्वाणस्य किं तदर्थेन तपश्चरणरागादिना प्रयत्नेन ? तदेवाह–

तदर्थोऽयं प्रयासश्च [इत्यहो सत्यव्यवस्थितिः] ॥ ६ ॥

तदर्थो नित्यसिद्धनिर्वाणार्थोऽयं परप्रसिद्धः **प्रयासस्तपश्चरणादिरूपः 'च'** इति समुच्चये । न केवलं पूर्वोक्तमेव किन्त्वयमपि धिगिति, सिद्धे[4] प्रयासवैफल्यादिति धिक्कर्तुरभिप्रायः ।

चित्तप्रबन्धाभावे च प्रयासश्चेतनात्मकः ।
कथं विद्येत येन स्यान्मार्गसत्यव्यवस्थितिः ॥ १६१५ ॥

तदेवाह–**'इत्यहो सत्यव्यवस्थितिः'** इति । एवमुक्तन्यायेन **सत्यस्य** मार्गरूपस्य **व्यवस्थितिरवस्थानम् अहो** नैवेत्युपहसनपरेण अहोशब्देन दर्शयति । यदि वा, तच्चित्तसन्तानोच्छेदलक्षणं निर्वाणमकारणमहेतुकमभावरूपत्वेन अनपेक्षत्वात् तत्किं तदर्थेन नैरात्म्यभावनादिना प्रयासेन ? तदेव दर्शयति–**'तदर्थोऽयं प्रयासश्च'** इति । **धिक्**शब्दानुवृत्त्या, व्याख्यानं पूर्ववत् ।

स्यान्मतम्–न साक्षात् तत्सन्तानोपमर्दनेन प्रयासस्य तादर्थ्यमपि तु तत्सहायं पूर्वपूर्वचित्तमुत्तरोत्तरचित्तं सजातीयकार्यं प्रत्यसमर्थादिरूपं जनयति ततः चरमस्यात्यन्तासमर्थत्वेन ततः चित्तान्तरस्यानुत्पत्तेः चरमप्रच्युतेश्च प्राच्यस्य स्वरसभङ्गुरत्वेन प्रलयात् प्रशान्तनिर्वाणोपपत्तेः पारम्पर्येणैव तस्य तादर्थ्यमिति; तदपि न साम्प्रतम्; विचारानङ्गत्वात् । तथा हि प्रयासोऽयमुच्छेद्यसन्तानवर्ती, तदन्यसन्तानवर्ती वा ? प्रथमविकल्पे स एव न सम्भवति; चरमस्यावस्तुत्वेन सन्तानावस्तुत्वे तद्वृत्ति-

---

१ –ता तत्र–आ०, ब०, प० । २ सुगतस्य" –ता० टि० । ३ –त्वं नि–प० । ४– द्धेः प्र–आ०, ब०, प० । ५ –पसंहासप– आ०, ब०, प० । ६ –मप्रच्युतेश्च आ०, ब०, प० ।

नस्तस्याप्यवस्तुत्वात् तादृशस्य पारम्पर्येणापि तादर्थ्यानुपपत्तेः व्योमकुसुमादिवत् । चरमस्यापि वस्तुत्वे न निर्वाणं तस्यापि सन्तानात्, अन्यथा वस्तुत्वायोगस्य निवेदितत्वात् । ततः

निर्वाणं चेत् प्रयासो न प्रयासश्चेन्न निर्वृतिः ।
निर्वाणं च प्रयासश्चेत्येतदन्योन्यपीडितम् ॥ १६१६ ॥
अत एवोपहासेन यैर्लब्धं निर्वाणसत्ययोः ।
तदित्यादिकया श्रुत्यादिवैरस्थितिरुच्यते (?) ॥ १६१७ ॥

भवतु तदन्यसन्तानवर्त्येव प्रयास इति चेत् ; तत्सन्तानोऽपि न निर्वातुरन्यत्र, तद्वर्तिनः प्रयासात् तस्य निर्वाणानुपपत्तेरतिप्रसङ्गात् । निर्वातर्येवेति चेत्; न; तदनुच्छेदेऽपि निर्वाणायोगात् । तदुच्छेदोऽपि यद्यन्यसन्तानवर्तिनः प्रयासात् कथमनवस्थापरिहारः? तत्रापि प्रकृतप्रसङ्गानतिवृत्तेः । एतदे-
१० वोक्तम्—'इति' इत्यादिना । इति एवमपरापरसन्तानवर्तिप्रयासपरिकल्पनाप्रकारेण अहो नैव सत्यस्य प्रयासापरनाम्नो मार्गसत्यस्य व्यवस्थितिरनवस्थैव भवेदित्यर्थः । ततः स्थितमिदम्—

सर्वथा सदुपादेयं हेयं सत्तदकारणम् ।
तदर्थोऽयं प्रयासश्चेत्यहो सत्यव्यवस्थितिः ॥ इति ।

इदमेव श्लोकैर्विवरीतु माह—

१५ **करुणा स्वपरज्ञानसन्तानोच्छेदकारणम् ।**
इति नः करुणा [अत्यन्तं परदुःखं न गोचरः] ॥७॥ इति ।

सत्त्वदृष्टिनिषेधार्थो बुद्धस्याभिप्रायवृत्तिः **करुणा** । **"तथाभूतसत्त्वग्रहपरित्यजनाय य आशयः स दया"** [प्र० वार्तिकाल० १।१९५] इत्यलङ्कारात्। यद्येवं कथं तस्य सर्वथा विकल्प-विकलत्वं तदाशयस्य विकल्पत्वात् । न ह्यमुमनेन त्याजयामीति परामर्शवतस्तस्याविकल्पत्वम् । न
२० तस्यैवं तद्वत्त्वं संस्काररूपतयैव भावात् । **"अक्षीणशक्तिसंस्कारो येषां तिष्ठन्ति तेऽनया"** [प्र० वा० १।२००] इति वचनात्; इत्यपि न युक्तम्; संस्कारस्य चेतनोपादानस्याचेतनत्वायोगात् । चेतनत्वेऽप्यविकल्पत्वे न ततः श्रेयःकथनं तस्य विकल्पयोनित्वेनोपगमात् । ततश्च तत्कथनमभिमतं **"दयाया (दयया) श्रेय आचष्टे"** [प्र० वा० १।२८४] इति वचनादिति चेत्; सत्यम्; अयमपि परस्य पर्यनुयोगः । सा च **करुणा** स्वश्च योगी **परश्च** विनेयवर्गः तयोर्ज्ञानानि
२५ तेषां **सन्तानास्तेषाम् उच्छेदोऽत्यन्तविनाशस्तस्य कारणमिति** एवं **नोऽस्माकं** कृपालूनां **करुणा** कृपा वर्त्तत इति शेषः । भवति हि महापुरुषाणां मन्दप्रज्ञानवलोक्य कृपोत्पत्तिः । अस्ति च प्रज्ञामान्द्यं सौगतानां तैः स्वपरसन्तानविनाशिन्या जिघांसाया एव करुणात्वेन प्रतिपत्तेः । करुणैव साक्षादसौ तथा सकलदुःखपरिक्षयरूपस्य तदुच्छेदस्य करणादिति चेत्; न; सकलसुखपरिक्षयरूपस्यापि तया तस्य करणात् । न च सुखमेव संसारे नास्ति तस्यापि दुःखवदनुभवात्, सदपि तद् दुःखमेव दुःखच्छिद्रपा-

---

१ यत्तन्निर्वा–आ०, ब०, प० । यत्सत्यं मार्गसत्यम् । २ दयावत्त्वम् । ३ "तेऽनया:" प्र० वा० । ४ कथं तस्य आ०, ब०, प० । ५ कथनस्य । ६ 'दयया'–प्र० वा० ।

तित्वादिति चेत्; दुःखमपि सुखमेव स्यात् तच्छिद्रपातविशेषात्। विवेकिनां नैवमभिप्रायस्तेषां सर्वत्र दुःखाभिनिवेशस्यैव भावात्, **"सर्वं दुःखं विवेकिनः"** [योगसू० २।१५] इति वचनादिति चेत्; विवेकस्तर्हि पापीयांस्तेन सर्वत्र तदभिनिवेशकरणादिति तस्यैव तयोच्छेदः कर्तव्यो न ज्ञानसन्तानस्य, तदुच्छेदे तस्य सर्वत्र सुखबुद्ध्यैवावस्थानोपपत्तेः। यदि च तदभिप्रायवशात् सर्वं दुःखम्; सर्वं सुखमेव किन्न स्यात्? वासीचन्दनकल्पानां सर्वत्रौदासीन्यरूपस्य सुखस्यैव भावात्। सुखं च तद्रूपमनुकूलवेदनीयत्वात् प्रसिद्धसुखवत्। ततो नाभिप्रायवशादपि सर्वं दुःखमेवेति शक्योपपादनं यतः तदुच्छेदकरणात् करुणैवेयमिति प्रतिपत्तिः। इदमेवाह—**'अत्यन्तं परदुःखं न गोचरः'** इति। परैः सौगतैः कल्पितं **दुःखं न गोचरो** न विषयः प्रमाणस्य। कीदृशम्? **अत्यन्तम्** अन्तमतिक्रान्तम्। अन्तशब्देन सुखमत्रोच्यते तस्य दुःखं प्रत्यन्तत्वोपपत्तेः, सर्वथा सुखविकलं दुःखमेव न तद्विषयः सुखस्यापि तद्विकलस्य तद्विषयप्रतिपत्तेरित्यर्थः। तथा च कस्यचित् सुभाषितम्—**"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा"** [उ० मेघदू० श्लो० ४६] इति। ततः सुखापहारकरणत्वादुपपन्नं तस्याजिघांसत्वम्। नैकान्ततस्तस्यास्तत्त्वं दुःखापहारकरणत्वेन करुणात्वस्यापि भावादिति चेत्; न; जिघांसाकरुणयोरेकत्वविरोधात् तमःप्रकाशवत्। व्यतिरेके च तयोः परित्याज्य एव सुगतेन जिघांसाभागस्तस्यान्यथा महाकारुणिकत्वव्यापत्तेः। तथा च कथं तत्करुणया ज्ञानसन्तानस्य निर्मूलोच्छेदः सुखभागिकस्य तस्यावस्थानोपपत्तेः। करुणयैव तस्याप्युच्छेदो दुःखभागिकस्याप्यन्यथा तदयोगात्, मृष्टभोजनादिसुखप्रतिषेधेन विना प्रत्यग्रप्रवृत्तज्वरादिदुःखनिषेधायोगवदिति चेत्; उपपन्नमेवैतत्; परहितप्रवृत्तानां यदि ज्वरादिविनिर्मुक्तपुरुषवद्विगलितनिखिलदुःखव्याधेरपि कस्यचित् चित्तभागस्यावस्थानं प्रतिलभ्येत, अन्यथा मृत्युविधायिनो भिषज इव तदुच्छेदविधायिनोऽपि परहितत्वानुपपत्तेः। कथं वा करुणया तदुच्छेदः, तया दुःखप्रवर्तकवृत्तिनिमित्तसत्त्वदर्शनप्रत्यनीकस्य नैरात्म्यभावनारूपस्योपायाभियोगस्योपसमर्पणात्। ततश्च परिस्फुटस्य तत्त्वज्ञानादेः प्रादुर्भावात्तेनापि तत्त्वदेशनया विनेयवर्गस्य मार्गप्रवर्तनादिति चेत्; ननु तत्त्वं नाम सत्यचतुष्टयमेव भदन्तानामभिमतम्। तच्च न योगिप्रत्यक्षेण समसमयम्; तस्य तद्विषयत्वाभावप्रसङ्गात्, समसमयस्याकारणत्वात्, कारणस्यैव च विषयत्वोपगमात्। तस्यापि कारणत्वे समुदयमार्गयोरपि तथाविधयोरेव दुःखनिरोधहेतुत्वापत्तेः यदैव समुदयस्तदैव दुःखं यदैव मार्गस्तदैव निरोध इत्यसमञ्जसं प्राप्नुयात्। अथ तयोर्भिन्नसमययोरेव तत्कारणत्वं कथमिदानीं तच्चतुष्टयस्य योगिप्रत्यक्षेणापि समकालत्वम्? दुःखादेस्तत्त्वे समुदयादेस्तदसम्भवात्, तस्य तत्त्वे वा दुःखादेस्तदनुपपत्तेः। अथ तत्प्रत्यक्षं प्रत्यभिन्नकालवद्भिन्नकालमपि कारणमिष्यते; तन्न; क्रमवतः कारणादक्रमस्य कार्यस्यानुत्पत्तेः, अन्यथा कारणादप्यक्रमात् कार्यस्य क्रमवतः प्रसङ्गात् असङ्गतमिदं भवेत्—**"नाक्रमात् क्रमिणो भावाः"** [प्र० वा० १।४५] इति। तस्मादभिन्न-

---

१ सर्वत्र दु- आ०, व०, प०। २ वार्षीचन्दन- आ०, व०, प०। ३ -प्रामाण्यस्य आ०, व०, प०। ४ सर्वदा ता०, व०। ५ -तत्परदु-आ०, व०, प०। ६ भावस्त- आ०, व०, प०। ७ ज्ञानसन्तानस्य। ८ -दो दुःखभागिकस्याप्युच्छेदो दुःख- आ०, व०, प०। ९ -त्प्रवृ- आ०, व०, प०। १० -त्र वि-ता०। ११ समकालयोरेव। १२ -मक्रा- आ०, व०, प०।

कालत्वमेव तस्य तेन भवितुमर्हतीति व्यवस्थितमेवासामज्ञस्यम्। भवतु तर्हि तच्चतुष्टयस्य परस्परतस्तत्प्रत्यक्षादपि[1] भिन्नकालत्वम्; इत्यपि न युक्तम्; तन्नेत्यादिना दत्तोत्तरत्वात्। सत्यपि तादृशस्य तत्कारणत्वे नातदाकारस्य तस्य तद्विषयत्वम् आकारवादसमर्थनवैयर्थ्यापत्तेः। तदाकारत्वे च—

अक्रमेणार्पयन्त्यर्थाः स्वाकारांस्तत्र सक्रमान्।
क्रमेण वाऽर्पयन्त्यन्या गतिरत्र न विद्यते ॥ १६१८ ॥
यद्यक्रमेण बाह्यस्याप्यक्रमस्यैव विद्धवेत्।
अकारानुगुणत्वेनैवार्थरूपप्रवेदनात् ॥ १६१९ ॥
आकारातिक्रमादर्थवित्तौ नीलाकृतेर्विदः।
पीताद्यशेषविज्ञानात् सर्वः सर्वज्ञतां व्रजेत् ॥ १६२० ॥
क्रमेणैवार्पणे तेषां बुद्धिरेका तदात्मिका।
वहन्ती कालतो दैर्घ्यं भवेदात्मैव तत्त्वतः ॥ १६२१ ॥
आत्मदृष्टिभयं त्यक्तुमुपायं तस्य तन्वतः।
तदेव पुनरग्रेऽभूदहो दैवं दुरत्ययम् ॥ १६२२ ॥
बुद्धिरेका न चेत्तस्याः प्रत्याकारं विभेदतः।
तत्सर्वज्ञत्ववादाय देयस्तर्हि जलाञ्जलिः ॥ १६२३ ॥

तथा हि—न तावदेकया बुद्ध्या तस्य सर्वज्ञत्वम्; तयैकाकारयैकयैव प्रतिपत्तेः। नाप्यनेकया; पृथग्जनस्यापि तया तत्प्रसङ्गात्। अपि च, अनेकत्वमप्रतिपद्यमानस्तस्याः कथमसौ तया सर्ववेदी भवेत्? **"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति"** [ ] इत्यस्य विरोधात्। प्रतिपद्यत एव तदपि तदर्पितक्रमवदनेकाकारया परया बुद्ध्येति चेत्; न; आत्मदृष्टिभयपरिहाराभावस्य पुनरपि प्राप्तेः। नायं दोषस्तद्बुद्धेरपि प्रत्याकारं भेदादिति चेत्; न तर्हि तयाऽप्येकया अनेकवेदनम्, उक्तान्न्यायात्। नाप्यनेकया; तत्परिज्ञानेऽपि पूर्वप्रसङ्गानतिवृत्तेरनवस्थाप्राप्तेः। अथ बुद्धीनां नानात्वं नापरबुद्धिवेद्यं यतोऽयं प्रसङ्गः किन्तु ताभ्य एव[2] स्वसंवेदनत्वात् तासामिति; तन्न; स्वसंवेदनस्य स्वरूपादन्यत्राप्रवृत्तेः, तेन[3] नानात्वप्रतिपत्तेः दुरुपपादत्वात्। तच्च तदुत्पत्तिसारूप्याभ्यां तत्त्वज्ञानं तथागतस्य। नाप्यतदुत्पन्नमतदाकारं च; स्वसिद्धान्तपरित्यागदोषात्। किञ्च,

तस्याप्यनेकशक्तित्वे युगपत्क्रमतस्तथा।
तद्वत्त्वसम्भवात् प्राप्तमात्मदृष्टिभयं पुनः ॥ १६२४ ॥
एकशक्ति यदि ज्ञानं न तेनानेकवेदनम्।
अन्यथा तादृशाद्धेतोः कार्यं नाना न किं भवेत्? ॥ ॥१६२५ ॥
तथा सति न नित्योऽर्थो दूषितो भवति त्वया।
निराकारमपि ज्ञानं तन्न तस्योपपत्तिमत् ॥ १६२६ ॥

---

१ –क्षादभिन्न– आ०, ब०, प०। २ उक्तन्या– आ०, ब०, प०। ३ –भ्यः स्वसं– आ०, ब०, प०। ४ नानात्वप्रवृत्तेः आ०, ब०, प०।

तदभावे न वैराग्यवत्सलत्वादिसम्भवः ।
इति तद्धेतुना नैव कृपा या युक्तिमृच्छति ॥ १६२७ ॥

तदेवाह—

तत्त्वज्ञानाद्यनुत्पादहेतुरुन्मार्ग एव सः । इति ।

सः करुणाभिधानो बुद्धस्याशय **उन्मार्ग एव** न मनागपि मार्ग इत्येवकारः । कुत एतत् ? **तत्त्वस्य** दुःखादेर्**ज्ञानमादिर्यस्य** वैराग्यादेस्तस्या**नुत्पादहेतुः** तदुत्पादस्य पारम्पर्येण निमित्तं न भवति यत इति । तत्त्वज्ञानादेरेवोक्तयुक्तिवैश्वानरपरिशोषभस्मभावोपनीतत्वेनासम्भवादिति भावः ।

स्यान्मतम्—न तत्त्वतः सुगतज्ञानस्य बहिर्विषयत्वं स्वसंवित्तिमात्रपर्यवसितत्वात्, अत एव न तेन कस्यचित् सन्तानस्य दर्शनं यतस्तद्दुःखपरिहरणाय तस्य प्रवृत्तिः कृपापारवश्येनावस्थितिर्वा सर्वस्मिन्नस्मिन्नर्थे प्रमाणाभावात् केवलं संवृतिविभ्रमादेव तत्र सर्वमिदमवकल्प्यते । तदुक्तम्—

"न च पश्यति सन्तानं नापि कश्चित् प्रवर्तते ।
न तिष्ठति प्रमाभावात् केवलं भवतो भ्रमः ॥" [प्र० वार्तिकाल० १।१९८] इति ।

तत्राह—'**तत्त्वज्ञान**' इत्यादि । **स** सुगत **उन्मार्ग एव** मार्गणीयो न भवत्येव । कुत एतत् ? **तत्त्वज्ञानस्य** सोपायहेयोपादेयभावपरिज्ञानस्यादिपदात् तदभ्यासस्य **चानुत्पादहेतुत्वात्** । न हि विकल्पारोपितस्य तद्धेतुत्वं स्वप्नोपलब्धतथागतवत् । न च तदर्थं तस्य प्रेक्षावद्भिरन्वेषणम् तद्धेतुत्वव्याप्तेः । सत्यं न तेषां तदन्वेषणम्, तेषां प्रहीणात्मदर्शनानां दुःखस्यैवाभावात्, तन्निवृत्त्यर्थत्वाच्च तदन्वेषणस्य, तस्मान्मूढानामेव तदन्वेषणम्, अन्यथा तेषामात्मदर्शनप्रहाणासम्भवेन आत्मस्नेहदुःखनिबन्धनस्य दुःखप्रबन्धस्यानुच्छित्तेः स्वस्थत्वेनावस्थानानुपपत्तेः । तदुक्तम्—

"यावदात्मनि न स्नेहो हानिः तं[3] वरिवस्यति ।
तावद्दुःखितमारोप्य न च स्वस्थोऽवतिष्ठते ॥" [प्र० वा० १।१९३] इति ।

ते तर्हि कुतो हरिहरादीनामन्यतमं तत्त्वज्ञानाय नान्वेषयन्ति ? तेषामपि आत्मदर्शनवत्त्वेन मूढत्वादिति चेत्; न; सुगतस्यापि विकल्पारोपितरूपत्वेन तदविशेषात् । परिशुद्धज्ञानप्रबन्धरूपत्वान्न तदारोपितत्वं तस्येति चेत्; न; तत्प्रबन्धस्यैव पूर्वापरात्मनो विचारासहत्वस्य निवेदितत्वात् । ततः तस्यापि तदारोपितत्वेन मूढतया तत्त्वज्ञानाद्यनुत्पादहेतुत्वाविशेषेण ईश्वरादिवदन्वेषणीयत्वानुपपत्तेः उपपन्नमुक्तम्—'**उन्मार्ग एव सः**' इति ।

यत्पुनरेतत्'—**यो हि बद्धो न तस्य मोक्षोऽस्ति तत्स्वभावत्वात्, मुक्तस्यापि न बन्धः सदा तस्य मुक्तस्वभावत्वात्, केवलं चित्तसन्तानस्य अपरिशुद्धस्य सतः सामग्र्याविशेषतः परो भागो विशुद्ध उत्पद्यते ।**" [प्र० वार्तिकाल० १।१९०] इति । तत्राह—

१—खकरणाय आ०, ब०, प० । २ क्रमाभा—आ०, ब०, प० । ३ "स परित्स्यति"—प्र० वा० । सम्प्रतिरस्यति आ०, ब०, प० । ४ बन्धस्तदा प० ।

मिथ्याविकल्पविज्ञानभावनापरिपाकतः ॥ ८ ॥
तत्त्वज्ञानमुदेतीति कुतस्तत्त्वविनिश्चयः । इति ।

क्षणक्षयनैरंश्यादिविषयमनुमानज्ञानं **मिथ्याविकल्पविज्ञानं** तत्रावस्तुसामान्यविषयतया मिथ्याविकल्पभावस्य भावात्, परिशुद्धज्ञानकारणतया परेण च तस्याभ्युपगमात् । तस्य **भावना** चेतसि परिमलनं तस्याः **परिपाकः** सामर्थ्यात् अतिशयगमनं ततः **तत्त्वस्यार्यसत्यचतुष्टयस्य ज्ञानमखिलाविद्यातृष्णामद(मल)विकलम्—उदेति** उत्पद्यते **इति** एवमस्य **तत्त्वस्य विनिश्चयो** निर्णयः **कुतो** न कुतश्चित् । तथाहि—न तावत् सुगतस्ततः तदुत्पत्तिमवैति; तेन मलिनभागेनेतरभागस्याग्रहणात्, तदाकारतया तस्यापि निर्मलत्वापत्तेः । पुनस्तस्याप्यन्येन तद्भागेन ग्रहणे स एव तत्प्रसङ्गः पुनरप्येवमित्यनादिपरिशुद्ध एव चित्तसन्तानः प्रसज्येत । तत इदमेव सूक्तम्—'**मुक्तस्यापि**'इत्यादि, एतत्तु दुरुक्तमेव '**केवलम्**'इत्यादि, स्वतोऽनादिशुद्धस्य सामग्रीनिरपेक्षत्वात् । तथा न निर्मलभागेनापि मलिनभागस्य ग्रहणम्; तस्यापि तदाकारतया मलिनतापत्तेः । तस्यापि पुनरन्येन तद्भागेन ग्रहणे स एव तत्प्रसङ्गः, पुनरप्येवमिति निरवधिरेवापरिशुद्धस्तत्रापद्येत । तदत्रापि '**यो हि**'इत्यादिकमेव सूक्तम् । '**केवलम्**'इत्यादिकं तु दुरुक्तमेव । निरवधित्वे मलबन्धस्य तत्प्रच्युतिहेतोः सामग्रीविशेषस्यैवासम्भवात् । न च मलबन्धतत्परिशुद्धिभ्यामपरामृष्टं ज्ञानान्तरं सम्भवति यतस्तदुभयपरिज्ञानम् । तदभावे च न तत्सम्बन्धस्य हेतुफलभावस्य प्रतिपत्तिः, सम्बन्धप्रतिपत्तेः सत्यामेव सम्बन्धिद्वयप्रतिपत्तावुपपत्तेः । "**द्विष्ठसम्बन्धसंवित्तिः**" [प्र० वार्तिकाल० १।१] इत्यादेः स्वयमेवाभिधानात् । तन्न सुगतेन तस्य निश्चयः । नापि विनेयवर्गेण; तज्ज्ञानेनापि तन्मलिनभागवर्तिना तत्परिशुद्धभागस्य, तद्भागवर्तिना च तन्मलिनभागस्याप्रतिवेदनात् । क्रमभावितदुभयाकारैकज्ञानसम्भवे चात्मसिद्धिदोषस्यापरिहारात् प्रतितद्भागं तज्ज्ञानभेदकल्पनायां तु कुतस्तज्ज्ञानमपि पौरस्त्यं परिशुद्धिमदुत्पन्नम् ? स्वाकारमर्पयतस्तथागतादेव तत्त्वज्ञानादिति चेत्; नेदानीमनुमानविकल्पात्मकमार्गाभियोगादेव परिशुद्धिमत्त्वं तत्त्वज्ञानस्य प्रकारान्तरादपि तद्भावात् । तथा च व्याहृतमेतत्—

"**उक्तो मार्गस्तदभ्यासादाश्रयः परिवर्तते ।**" [प्र०वा० १।२०७] इति ।

आश्रयस्याप्यविद्यातृष्णाधिकरणस्य चित्तसन्तानस्य परिवृत्तेः परिशुद्धिलक्षणायाः[1] तदभ्यासादन्यतोऽपि भावात् । भवतु तर्हि तदभ्यासादेव तज्ज्ञानमपि तथाविधमिति चेत्; कस्य तत्रापि ततस्तदुत्पत्तेः निश्चयः ? न तस्यैव विनेयवर्गस्य; सुगतवद्दोषात् । नापि तद्वर्गान्तरस्य; 'नापि विनेयवर्गेण'इत्यादेस्तत्रापि प्रसङ्गादनवस्थोपनिपाताच्च । कुतश्चेदं मिथ्याज्ञानं यद्भावनापरिपाकात्तत्त्वज्ञानमुत्पद्यते ? पूर्वस्माद्विकल्पसंस्कारादेव, निर्विकल्पस्य तद्विजातीयत्वेन तदनुपादानत्वात् । तत्संस्कारस्यापि तत्पूर्वमभाविनः तत एवोत्पत्तेः अनादित्वात् प्रबन्धस्येति चेत्; कुतस्तदनादित्वमवगन्तव्यम् ? प्रत्यक्षस्य तत्राप्रवृत्तेः । अनुमानादिति चेत्; न; लिङ्गाभावात् । सत्संस्कार एवोत्तरोत्तरो लिङ्गमिति चेत्; न; तस्य यथास्वं[3] कारणापेक्षयैव लिङ्गत्वात् न तदनादित्वापेक्षया । तदनादित्वापेक्षयाऽपि

---

१ तथापि आ०, ब०, प० । २ –णायां त–आ०, ब, प० । ३ स्वकारणा–आ०, ब०, प० ।

तत्प्रबन्धस्यास्त्येव लिङ्गत्वम्, एकैकस्यैव तस्य तदभावादिति चेत्; न; एकैकव्यतिरेकेण प्रबन्धस्याभावात्। भावेऽपि कुतस्तस्योत्पत्तिः ? प्रबन्धादेव प्राच्यात् तस्यापि तत एव प्राच्यात्, तत्प्रबन्धस्याप्यनादित्वादिति चेत्; न; तत्रापि 'कुतस्तदनादित्वम्' इत्यादेर्दोषादनवस्थाऽनुषङ्गाच्च। तन्न अनादिसंस्कारसम्भवः, तदपरिज्ञानात्। एतदेवाह—

अनादिवासना न स्यात् [त्रैलोक्यमविकल्पकम्] ॥९॥ इति ५

अनादिश्चासावादिरहिता वासना च विकल्पसंस्कारो **न स्यात्** न भवेत् तत्र प्रमाणाभावात्। तथा च कुतः सत्त्वदर्शनात्मा मिथ्याविकल्पो यत इदं निर्विषयं न भवेत्—

"तस्मादनादिसन्तानतुल्यजातीयबीजिकाम्।
उत्खातमूलाङ्कुरतां सत्त्वदृष्टिं मुमुक्षवः॥" [प्र० वा० १।२५८] इति।

कुतो वा सुगतभाविनः सन्तानस्य भूयोऽभ्याससहायतया निःशेषगुणदोषसाक्षात्करण- १०
परिशुद्धज्ञानप्रादुर्भावकारी कश्चित् अनुमानात्माऽपि तद्विकल्पः ? यत इदमपि निरालम्बनं न भवेत्—

"बहुशो बहुधोपायं कालेन बहुनास्य च।
गच्छन्त्यभ्यस्यतस्तस्य गुणदोषाः प्रकाशताम्॥" [प्र० वा० १।१३८] इति।

एतदेवाह-'त्रैलोक्यमविकल्पकम्' इति। विकल्परहितमेव सकलं जगदित्यर्थः सत्यप्यनुमानविकल्पे कथं तदभ्यासपरिपाकेनात्मदर्शनस्योच्छेदः ? कथं च न स्यात् ? तद्दर्शनस्य १५
प्रत्यक्षत्वेन प्रमाणत्वात्, प्रमाणस्य च प्रमाणान्तरेण प्रतिक्षेपायोगात्। ननु आत्मा पूर्वापरकालव्यापितया नित्यो भावविशेषः। तस्य च न प्रत्यक्षेण ग्रहणम्, तेन क्षणक्षीणविग्रहतया पूर्वापरकालावलोकनविकलशक्तिकेन तत्कालव्यापिनो नित्यस्य दुःशक्यप्रतिपत्तिकत्वात्, व्यापकप्रतिपत्तेः व्याप्यप्रतिपत्तिमन्तरेणानुपपत्तेरिति चेत; कथं तादृशेन विकल्पेनापि तस्य ग्रहणम् ? न हि तस्याप्यक्षणिकत्वं स्वमतव्याघातात्। सत्यम्, न तेनापि तस्य तदग्रहणम्, तत्प्रतिभासविकल्पस्यैव स्वतस्तस्य प्रतिवेद- २०
नात्, अन्यथा तत्तत्संवेदनस्यासदाकारानुविद्धविषयत्वेनाप्रत्यक्षत्वप्रसङ्गात्, केवलं विकल्पान्तरोभिप्रायात् तेन तदग्रहणमुच्यत इति चेत्; न; विकल्पान्तरस्यातद्विषयत्वे[2] तदभिप्रायादपि तद्वचनानुपपत्तेः। तद्विषयत्वे तु तत्रापि 'कथं तादृशेन' इत्यादेः दोषस्यानुषङ्गात् अनवस्थानदौःस्थ्यस्य च दुस्तरस्योपस्थानात्। ततो दूरं गत्वाऽपि तेन[3] तदग्रहणमङ्गीकर्तव्यम्, अन्यथा तदुच्छेदार्थस्य नैरात्म्यदर्शनाऽभियोगस्य वैयर्थ्यापत्तेः। तथा प्रत्यक्षेणापि। विशेषानवलोकनात् परापरप्रत्यक्षाणां २५
वैयर्थ्यम् आदित एव ततस्तद्ग्रहणसिद्धेरिति चेत्; परापरविकल्पानामपि तत्किन्न भवेत् ? तत्र लोकस्य भेदबुद्धेरभावात् तेषामेवैकत्वाध्यवसायविषयाणामात्मदृष्टित्वादिति चेत; समानमिदं प्रत्यक्षेऽपि, तेषामपि कथञ्चिदभेदस्य प्रतीतेः, तस्यैवात्मत्वोपगमात्। न चैवमपरापरतत्कारणानां वैयर्थ्यम्; तथा-

---

१ —न्तराभिहितेन आ०, ब०, प०। २ —त्वेन तद्—आ०, ब०, प०। ३ विकल्पेन।
४ आत्मनित्यत्वग्रहणम्। ५ तद्ग्रहणमङ्गीकर्तव्यमिति सम्बन्धः। ६ कथञ्चिद्भेद—आ०, ब०, प०।

विधविकल्पहेतूनामपि तदापत्तेः। तेषां कथञ्चित् सार्थकत्वसमर्थनस्य इतरत्रापि[1] समानत्वात्। ततः प्रत्यक्षत्वादात्मदर्शनस्य न तद्विपरीतैरनुमानविकल्पैरुपपन्ना बाधा[2]परिकल्पना। तदाह—

निरुपद्रवभूतस्य बाधाऽयुक्ता विपर्ययैः। इति।

परपरिकल्पितादुपद्रवादर्थक्रियावैकल्यादेः निष्क्रान्तो **निरुपद्रवः** कथञ्चिन्नित्य आत्मा तदुपद्रवस्यैकान्तनित्यत्व एव सम्भवात् [तस्मिन्] भूतं तद्गोचरत्वेन प्राप्तं प्रत्यक्षमन्यद्वा प्रमाणं **निरुपद्रवभूतं** तस्य **विपर्ययैः** प्रतिसङ्ख्यानविकल्पैः **अयुक्ता** अनुपपन्ना तदुच्छित्तिलक्षणा **बाधा**। तेनैव भूतार्थत्वेन तेषां बाधोपपत्तेरिति भावः। किञ्च, तैस्तद्बाधने किमवशेषवत्[3] यन्निर्वाणव्यपदेशं प्रतिलभेत? न तावत्तदभावमात्रम्; तत्र प्रमाणाभावस्य निवेदनात्। अत एव न परिशुद्धमपरापरज्ञानमपि; तत्राप्यस्मदादिप्रत्यक्षाऽप्रवृत्तेः, अनुमानस्य चावस्तुविषयत्वात्। योगिप्रत्यक्षस्य च योगिन्येव भावात् 'तेन योगी परापरतया तत्पश्यति अन्यथा वा' इति निश्चयासम्भवात्।

"तामवस्थां गतानां तु न विद्मः किं भविष्यति" [प्र० वार्तिकाल० १।२३४] इति स्वयमेवाभिधानात्। भवतु तर्हि संविदद्वैतमेवावशेषवत् "यद्यद्वैते न तोपोऽस्ति[4] मुक्त एवासि सर्वथा" [प्र० वार्तिकाल० १।३६] इत्यभिधानादिति चेत्; अत्राह—

विच्छेदो वरमुच्छेदाद्विदस्तत्पक्षपाततः ॥१०॥ इति

विविधस्य भेदप्रपञ्चस्य छेदो विलयो विद्यानिबन्धनो यस्मिन्नसौ **विच्छेद** औपनिषदः स एव **वरमुत्कृष्टं** निर्वाणम्। कुतः तद्वरम्? **उच्छेदात्**, छिद्यन्ते परस्परतो व्यतिरिच्यन्त इति छेदाः सदसन्नित्यानित्यहेतुफलभावादिविकल्पाः ते येनोल्लङ्घितास्तत् **उच्छेदं** परपरिकल्पितं सविकल्पकत्वाद्वृत्तं संविदद्वैतं तत इति। कुतस्तस्य तस्मादुत्कृष्टत्वमिति चेत्? **विदो** विद्वज्जनस्य **तस्मिन्** विच्छेदे **पक्षपातात्** सकलशोकपरावृत्तपरमानन्दरूपत्वेनाभिमुख्यात्। तदुक्तम्—"तीर्णो हि तथा सर्वान् शोकान् हृदयस्य भवति" [बृहदा० ४।३।२२] "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" [तैत्तिरी० २।९] इति। न चैवमुच्छेदस्य तात्त्विकत्वं यतस्तत्रापि तस्य स भवेत्, निखिलविकल्पव्यतिक्रमव्याघातात्। असति संसारे कस्यासौ निर्वाणं तस्य तत्प्रच्युतिरूपत्वात्? सति वा कथमद्वैतं संसारनिर्वाणभेदे द्वैतस्यैवोपपत्तेः? इत्यपि न चोद्यम्; अन्यत्रापि तुल्यत्वात्। 'तत्र[5] सांवृत एव संसारस्तस्य च विचारासहत्वान्न विद्याप्रत्यनीकत्वम्' इति समाधानमितरत्रापि न पक्षपातं परित्यजति, तत्रापि तस्याविद्याविलासरूपत्वेन विचारासहत्वाविशेषात्। कुतः पुनस्तथाविधस्यात्मनः प्रतिवेदनमिति चेत्? संवेदनस्य कुतः? स्वत एव, "स्वरूपस्य स्वतो गतिः" [प्र०वा० १।६] इति वचनादिति चेत्; आत्मनोऽपि तत एव। "अत्रायं पुरुषः स्वयं ज्योतिर्भवति" [बृहदा० ४।३।९] इति श्रवणात्। यद्वा पुनरिदमलङ्कारे—"प्रहीणसमुदयस्य न त एव रागादय इति समत्वादविरोधिनि सकलेनैव सत्त्वसङ्घातेन" [प्र० वार्तिकाल० १।१९४] इति। तत्र न

---

१ प्रत्यक्षकारणेष्वपि। २ बोद्धापरिक-आ०, ब०, प०। ३ किमवशिष्टम्। ४ दोषोक्ति-आ०, ब०, प०। ५ विर्तीर्णो आ०, ब०, प०,। ६ संविदद्वैते। ७ —रापहत्वा—आ०, ब०, प०। ८—समुदायस्य न तदैव आ०, ब०, प०। "प्रहीणसमुदयस्य न रागादय इति समताऽविरोधिना सकलेनैव सत्त्वसन्धानेन।"—प्र० वार्तिकाल० १।१९४।

तावद्द्वैतात्मनः सुगतस्य प्रहीणसमुदयस्य समतोपपन्ना तदा तद्विषयस्य संवृत्यापि तत्सङ्घातस्याभावात्। चित्तसन्तानावस्थितिरूपस्य तस्य तेन समता तदवस्थितिश्च करुणयेति चेत्; तदाह—

यस्तावत्करुणावत्त्वात् तिष्ठत्येव हि चेतसाम्।
सन्तानः। इति।

स्वपदव्याख्यातमिदम्।

अत्र दूषणमाह—

स परोच्छेदान्न समत्वं प्रपद्यते ॥ ११ ॥ इति

तात्पर्यमत्र—स तद्वत्त्वात् अवतिष्ठमानः परस्य विनेयवर्गस्योच्छेदायावतिष्ठते सन्तानिरोधस्य निर्वाणस्य वचनात्[४] तस्य परिशुद्धपरापरज्ञानसन्तानकरणाय वा तद्रूपस्यापि निःश्रेयसस्याभिधानात्? तत्राद्ये विकल्पे दूषणमिदम्—**सः** अवस्थायी सन्तानः **समत्वं** रागादिवैकल्यरूपं सर्वसत्त्वेषु **न प्रपद्यते** सति तस्मिन् परोच्छेदविरोधात्। अस्ति च तस्य तदुच्छेदः, ततो न स तत् प्रपद्यते इति। द्वितीयेऽपि विकल्पे न तावदसौ निरन्वय एव सन्तानः तदा हेतुफलभावाभावेन तत्प्रवाहरूपस्य तस्यैवानवस्थानात्। निरूपितं चैतत्पूर्वम्। तत्कथं तस्य शुद्धिरशुद्धिर्वा कल्प्यते असतस्तदनुपपत्तेः वन्ध्यापुत्रवत्। ततो यथेदमात्मनि नित्ये कथ्यते—

"दुःखोत्पादस्य हेतुत्वं बन्धो नित्यस्य तत्कुतः?
अदुःखोत्पादहेतुत्वं मोक्षो नित्यस्य तत्कुतः॥" [प्र० वा० १।२०४] इति।

तथेदमपि कथयितव्यम्—

संसारदुःखसम्बन्धः सन्तानस्यासतः कथम्?
मोक्षोऽपि तदसम्बन्धः सन्तानस्यासतः कथम्? ॥१६२८॥ इति।

ततः कथञ्चिदन्वय्येवासौ। तथा चेत्; आह—

तथा निरास्रवीभावः संसारान्मोक्ष उच्यते।
सन्तानस्यात्मनो वा [इति शब्दमात्रं तु भिद्यते] ॥१२॥ इति।

'यः सः' इत्यनुवर्तते। यः परेण संसारान्मोक्ष उच्यते। कस्य? सन्तानस्य। कथं कीदृशश्च? **तथा** तेन कथञ्चिदन्वयस्य कल्पनाप्रकारेण **निरास्रवीभावः** सकलमिथ्याज्ञानरागादि-

---

१ समवता आ०, ब०, प०। २-स्थितश्च ता०। ३ करुणावत्त्वात्। ४ "इह हि भगवता उपितब्रह्मचर्याणां तथागतशासनप्रतिपन्नानां धर्मानुधर्मप्रतिपत्तियुक्तानां पुद्गलानां द्विविधं निर्वाणमुपवर्णितं सोपधिशेषं निरुपधिशेषं च। तत्र निरवशेषरत्नाविद्यारागादिक्लेशगणस्य प्रहाणात् सापधिशेषं निर्वाणमिष्यते। तत्रोपधीयतेऽस्मिन्नात्मस्नेह इत्युपधिः। उपधिशब्देन आत्मज्ञानिमित्ताः पञ्चोपादानस्कन्धा उच्यन्ते। शिष्यत इति शेषः। उपधिरेव शेषः उपधिशेषः। सह उपधिशेषेण वर्तते इति सोपधिशेषम्। किं तन्निर्वाणम्। तच्च स्कन्धमात्रकमेव केवलं सत्कायदृष्ट्यादिक्लेशतस्करैरहितमवशिष्यते निहताशेषचौरगणग्राममात्रावस्थानसाधर्म्येण, तत्सोपधिशेषं निर्वाणम्। यत्र तु निर्वाणे स्कन्धमात्रकमपि नास्ति तन्निरुपधिशेषं निर्वाणम्। निर्गत उपधिशेषोऽस्मिन्निति कृत्वा। निहताशेषचौरस्य ग्राममात्रस्यापि विनाशसाधर्म्येण।"—माध्यमिकवृ० पृ० ५१९। ५ -दसत एवसौ आ०, ब०, प०।

क्लेशनिष्कमलक्षणः स **आत्मनो वा** आत्मन एव। वाशब्दस्य अवधारणार्थत्वात्। अन्वितज्ञान-प्रवाहस्यैव चात्मत्वेन स्याद्वादिभिरभीष्टत्वात्। ततो नात्मसन्तानयोरस्ति वस्तुतो भेदः, अन्यत्र 'सन्तानः' इति 'आत्मा' इति शब्दमात्रभेदात्। तदेवाह—**'इति शब्दमात्रं तु भिद्यते'** इति वस्तुतोऽपि भेद एव, अन्वयस्य कल्पनोपरचितस्य सौगतैरभ्युपगमात्, स्याद्वादिभिश्च तात्त्विकस्येति चेत्; न; तात्त्विकस्याभावे कल्पनयापि तदनुपपत्तेः। न हि तयापि क्षणिकया तदुपरचनं परापर-तद्भागेषु तदवृत्तेः। तया तदग्रहणे च तदाधारतया अन्वयोपरचनानुपपत्तेः। अस्त्येवान्वयस्तत्क्षणा-नामपि कल्पनारचित इति चेत्; न; अनवस्थाप्रसङ्गेनान्वयस्य दुरापत्वापत्तेः। ततो यदुक्तम्—

"नैकाधिकरणत्वं चेत् प्रसक्तं बन्धमोक्षयोः।
संवृत्यैकाधिकरणभावो नैव निवार्यते" ॥ [प्र० वार्तिकाल० १।२०३] इति।

तत्प्रतिविहितम्; कल्पनया तदेकत्वोपरचनानुपपत्तौ तया बन्धमोक्षयोरेकाधिकरणत्वस्य दुरुपपादत्वात्। ततो दूरमनुसृत्यापि कल्पनाक्षणानां तत्त्वत एवान्वयसम्भवे मुक्तेतरचित्तक्षणानामेव तथा स वक्तव्य इति कथं संवृत्या तयोस्तदधिकरणत्वं तत्त्वत एव भावात्। न मुक्तस्य तत्काले बन्धो विरोधात्, न च तदा तस्य किञ्चित् फलं तदभावस्यैव फलत्वात्। प्रागासीत् तस्य बन्ध इति चेत्; न; तस्यापि विनष्टत्वेन क्वचिदनुपयोगात्। कथं वा स्वयं परिशुद्धः सत्त्वपरिशुद्धेन प्राच्याकारेणैकत्वं निश्चिनुयात् अप्रेक्षावत्त्वापत्तेः? तदुक्तम्—

"यो मुक्तस्तस्य बन्धो न तदा किं वा प्रयोजनम्।
प्राग्बन्धमासीदिति चेत्, तदपि क्वोपयुज्यताम्॥
अप्रेक्षापूर्वकारी स्यात् प्रागेकत्वस्य निश्चयात्।
अयुक्तं चैतदिति चेदतदिष्यत एव हि॥" [प्र० वार्तिकाल० १।२०३] इति।

तन्न बन्धमोक्षयोस्तत्त्वत एकाधिकरणत्वं संवृत्यैव तदुपपत्तेरिति चेत्; न; तत्त्वतस्तदभावे तयापि तदनुपपत्तेर्निवेदितत्वात्। न च पुरुषार्थवशाद्भावानां तथात्वमन्यथात्वं वा; स्वहेतुप्रकृतेरेव तदुपपत्तेः, अन्यथा तादर्थ्यविलो न कश्चिदपि भावो भवेत्। तदाह व्याहतमिदम्—

"सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु।" [प्र० वा० १।३५] इति।

तद्विकलतयाऽनिष्टेऽपि वस्तुनि सत्येवैवंवचनोपपत्तेः। भवतु नाम मुक्तस्य बन्धैकत्वं निश्चिन्वतोऽ-प्रेक्षावत्त्वं बद्धस्य तु नैवं तस्य मोक्षैकत्वनिश्चये सत्येव तदर्थस्य प्रयासस्य प्रेक्षापूर्वकत्वव्यवस्थि-

---

१ तदवृत्तेः आ०, ब०, प०। २ तदग्रहणे आ०, ब०, प०,। ३ -परवचना-आ०, ब०, प०। ४ कल्पनायां आ०, ब०, प०,। ५ विशिष्ट-आ०, ब०, प०,। ६ "पूर्वं ममासीदिति चेत्तदपि क्वोपयुज्यते"-प्र० वार्तिकाल०। ७-ति तदेतदि-आ०, ब०, प०। ८ वा स्वस्वहे-आ०, ब०, प०। ९ तथा व्या-आ०, ब०, प०। १० "दूरं पश्यतु"-प्र० वा० १।३५।

तेरन्यथाऽनुपपत्तेः । वक्ष्यते चैतत्–"अहं ममास्रवो बन्धः" इत्यादिना । ततस्तदेकत्वस्य फलवत्त्वात् सन्तानव्यवस्थाऽन्यथाऽनुपपत्त्या निश्चितत्वाच्च तात्त्विकमेव तयोरेकाधिकरणत्वमिति सूक्तम्–'आत्मन एव मोक्षः' इति, 'सन्तानात्मनोः शब्दमात्रमेव भिद्यते' इति च ।

तदेवं सौगतमते 'सर्वथा सदुपादेयम्' इत्यादिना प्रागभिहितसत्यचतुष्टयाभावं 'करुणा' इत्यादिभिः सविस्तरं व्याख्याय सुगतस्य तत्प्रवक्तृत्वं प्रत्याख्यातम् । साम्प्रतं साङ्ख्यादिमते वेदस्य तत्प्रचिख्यासुराह–

नित्यस्यापि सतः साक्षाददृश्यानुभवात्मनः ।
सुखादिर्विषयः शब्दाद्यविशेषो धियाऽन्यथा ॥१३॥
प्रदर्श्यः [पुनरस्यैव गुणयोगनिवृत्तितः ।] इति ।

'आत्मनः' इत्यनुवर्तते, तस्य नित्यसामान्यवचनेऽपि कूटस्थस्येति,[2] तस्यैव साङ्ख्यैरभ्युपगमात् । **सुखादिः** आदिशब्दात् दुःखादिः **विषयो** वेद्य[3] इति 'साहसम्' इति वक्ष्यमाणेन सम्बन्धः । कुतः पुनरेवं परमतं साहसमिति चेत् ? असम्भवदर्थत्वात् । तथा हि–

सत्त्वमेव न तस्यास्ति क्रमाक्रमविकल्पतः ।
अर्थक्रियाया यत्तत्र तद्व्यापिन्या न सम्भवः ॥१६२९॥
इति विस्तरतः पूर्वमस्माभिः सुविवेचितम् ।
प्रमाणाभावतश्चास्य न सत्त्वमुपपत्तिमत् ॥१६३०॥
प्रत्यक्षतो न तस्यास्ति कूटस्थस्य प्रवेदनम् ।
तथाऽनुभववैकल्यात् क्षणक्षीणाणुबोधवत् ॥१६३१॥
लिङ्गतोऽपि न तस्यास्ति प्रतीतिस्तदसम्भवात् ।
सङ्घातस्य परार्थत्वं तल्लिङ्गं प्राङ्निराकृतम् ॥१६३२॥

त्रिगुणादिविपर्ययस्तत्र लिङ्गं तस्य त्रिगुणादिनैव व्यवस्थापनात् । तथा हि-प्रधानस्य व्यक्तेरविभेदस्य त्रिगुणादि तद्विपर्ययापेक्षं तथात्वात् प्रकाशादिवत् । यत्र तद्विपर्ययः स पुरुषस्तस्य स्वतन्त्रस्याभावात् प्रकाशादिविपर्ययस्य तमःप्रभृत्यधिष्ठानस्यैवोपलब्धेः । तत्र त्रैगुण्यादेव सङ्घातसम्भवात्[7] तस्यैव च कर्तृत्वोपपत्तेः, तद्विपर्ययात् पुरुषस्यासङ्घातत्वमकर्तृत्वं च, अविवेकविपर्ययाच्च रजस्तमःकालुष्यविवेकात् कैवल्यम्, अचेतनविपर्ययाच्च द्रष्टृत्वम्, अतश्च साक्षित्वं विषयविपर्ययाच्च, स्वपरवेद्यत्ववैधुर्यात् माध्यस्थ्यञ्च सिद्धमवबोद्धव्यम् । तदुक्तम्–

"तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥" [सांख्यका० १९] इति चेत्; तन्न; त्रिगुणादेः तद्विपर्ययाविनाभावासम्भवात् प्रकृतिपुरुषसामान्यवत् । न हि तस्य

---

१ न्यायवि० श्लो० ४३७ । २ 'एकरूपतया तु यः कालव्यापी स कूटस्थः–इत्यमरः ।" ता० टि० । ३ वेद्यते इति आ०, ब०, प० । ४ संघातपरमार्थत्वं आ०, ब०, प० । ५ व्यक्तिरपि मे–आ०, ब०, प० । ६ महदाद्यभेदस्यैव प्रधानत्वात् । ७ –वात् संघातस्यैव आ०, ब०, प० ।

तद्विपर्ययाविनाभावः, अन्यथा ततस्तदुभयविलक्षणपदार्थान्तरप्रसिद्धेः 'व्यक्ताव्यक्तज्ञरूपमेव जगत्' इति स्वमतव्यापत्तिर्भवेत्। अस्ति च तयोः सामान्यं वस्तुशक्तिमत्त्वाद्युभयनिष्ठम्, अन्यथा तदन्यतरविलोपापत्तेः। तन्न त्रिगुणादिविपर्ययस्य तत्र लिङ्गत्वम्। नाप्यधिष्ठानस्य; अकर्तुरधिष्ठातृत्वानुपपत्तेः, कर्तृविशेषतयैव तस्य लोकप्रसिद्धत्वात्। तत इदमयुक्तम्—"चेतनाधिष्ठितं महदादि प्रवृत्तिमत् [अचेतनत्वात् वास्यादिवत्"] इति; हेतोरिष्टविपर्ययसाधनेन विरुद्धत्वात्, कर्तृविशेषस्यैवाधिष्ठातुरतः प्रत्यायनोपपत्तेः, साङ्ख्यैश्च तस्यानिष्टत्वात्। तन्नाधिष्ठानस्य लिङ्गत्वम्। नापि भोक्तृत्वस्य[3]; निषेत्स्यमानत्वात्। न च कैवल्यार्थस्य प्रवर्तनस्य[3]; तदतद्भूतविकल्पानतिक्रमात्। न हि पुरुषगतमेव तत्तत्र लिङ्गम्; पुरुषासिद्धौ तस्यैवासिद्धेः। अन्यतरतत्सिद्धावस्य वैफल्यात्। अत एव तत्सिद्धौ परस्पराश्रयापत्तेः—अतस्तत्सिद्ध्या लिङ्गसिद्धिः, अतश्च तत्सिद्धिरिति। बुद्धिगतमेव तत्तत्र लिङ्गमिति चेत्; तत्रापि कस्य तत्कैवल्यं यदर्थं प्रवर्तनम्? पुरुषस्येति चेत्; न; तत्कैवल्यस्य गुणविवेकरूपस्य नित्यत्वेनासाध्यत्वात्। अथासौ[5] तद्विविक्तोऽपि अविविक्त इव भवति विवेकादर्शनात्, ततो विभ्रमनिवर्तनेन स्पष्टतामुपनीयमानं तत्कैवल्यं साध्यमिव भवतीति सङ्गतमेव तस्य तदर्थत्वमिति चेत्; कस्येदं विवेकादर्शनं यतो विभ्रमः? पुरुषस्येति चेत्; तद्यदि तस्य स्वरूपमेव; तर्हि तद्वदेव नित्यमिति कथं तन्निबन्धनस्य विभ्रमस्य निवर्तनम्? सति समर्थे हेतौ तत्प्रसवस्य कुतश्चिन्निवर्तनानुपपत्तेः। निवर्तकमपि समर्थमेवेति चेत्; तर्हि प्रवृत्तिनिवृत्त्योरक्रमप्रसङ्गः संसारकैवल्ययोरपीति महानयं परस्य सङ्कटप्रवेशः, तत्प्रसङ्गस्य विरोधविधुरितविग्रहस्य कुतश्चिदपि निश्चेतुमशक्यत्वात्। अथासमर्थमेव प्रवर्तकम्; तर्हि दैवादेव विभ्रमस्याभावात् कथं तन्निवर्तनार्थं (र्थत्वं) प्रवर्तनस्य? सामर्थ्यमेव तस्य निवर्तकेन प्रतिरुध्यत इति चेत्; न; पुरुषरूपस्यानित्यत्वापत्तेः, समर्थस्यासमर्थत्वेन भावात्, "तदतद्भावादनित्यत्वम्" [ ] इति न्यायात्। अथ तत्तस्य स्वरूपं न भवति बुद्धिस्वरूपत्वात्, केवलं विवेकादर्शनादेव, तदपि तस्यैव भवतीति चेत्; न; तत्रापि 'कस्येदम्' इत्यादेः प्रसङ्गादनवस्थानोपस्थानाच्च। तन्न विवेकादर्शनं पुरुषस्य। भवतु बुद्धिसत्त्वस्यैवेति चेत्; तस्यापि कुतस्तदापन्नम्? स्वयं जडत्वादिति चेत्; कथमिदानीं प्रवर्तनमपि, जडत्वस्य (जडस्य) स्वतस्तदसम्भवात्। सांसर्गिकाच्चैतन्यादिति चेत्; विवेकदर्शनमेव ततः किन्न स्यात्। तत्तत्र क्षमं न भवतीति प्रवर्तन एव क्षमत्वात् प्रवर्तनादूर्ध्वमपि कथं तस्य तत्क्षमत्वं यतः प्रवर्तनमर्थवद्भवेत्? यमनियमाद्यनुष्ठानरूपात् प्रवर्तनादशुद्धिक्षये ज्ञानस्यातिशयनादिति चेत्; तेन तज्ज्ञाड्यापवर्तने चितिकल्पनावैफल्यम्। अनपवर्तने कः प्रागवस्थातस्तस्य विशेषो यतः तदा विवेकदर्शनम्? चितिरेव तदा तेन तत्क्षमाक्रियते इति चेत्; न; तदनित्यत्वापत्त्या दत्तोत्तरत्वात्। ततो न सङ्गतमिदम्—"योगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः"

---

१ "एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तसंज्ञानि"—सांख्य० माठर० का० ९। २ "न ह्यन्तरेणाधिष्ठातारं भवति वस्तुजातम्। तद्यथा इहलोके लङ्घनप्लवनसमर्थैरश्वैर्युक्तो रथः सारथिनाऽधिष्ठितः प्रवर्तते।"—सांख्यका० माठर० १७। ३ लिङ्गत्वमिति सम्बन्धः। ४ कैवल्यार्थं प्रवर्तनम्। ५ पुरुषः। ६ प्रवर्तमानस्य सामर्थ्यमेव कस्यचिन्निवर्तकेन प्रतिपद्यत इति आ०, ब०, प०। ७ कैवल्यम्। ८ चेति कल्प—आ०, ब०, प०। ९ "योगाङ्गानुष्ठानात्"—योगसू०।

[योगसू० २।२८] इति । तन्न सांसर्गिकादपि चैतन्यात्तस्य तदर्थं प्रवर्तनमुपपन्नम्, सति तस्मिन् सर्वदा विवेकस्यैव दर्शनेनाविवेकविभ्रमस्याप्रसङ्गात्, अन्यथा पश्चादपि तद्दर्शनाभावस्य निवेदितत्वात् । भवतु अचेतनस्यैव तस्य तदर्थं प्रवर्तनं वत्सवृद्धिनिमित्तं क्षीरस्येव । तदुक्तम्-

"वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥" [सांख्यका० ५७]

इति चेत्; तन्न[1] सारम्; तत्प्रवर्तनेन चेतनाधिष्ठानसाधनस्य पूर्वोक्तस्य विरोधात् । तदयं तदधिष्ठितस्यैव प्रवृत्तिमभिधाय पुनरन्यथाऽपि तां ब्रुवाणो विस्मरणशील एवेश्वरकृष्ण इति सुनिश्चितं नश्चेतः । तन्न तदर्थस्य प्रवर्तनस्यापि तत्र लिङ्गत्वमिति न सुभाषितमेतत्-

"सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥" [सांख्यका० १७] इति ।

तन्नानुमानं पुरुषे प्रमाणम् ।

नापि- "महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्नापरं किञ्चित् सा काष्ठा सा परा गतिः ॥" [कठो० ३।११]

इत्यादिरागमः; तेनापि पुरुषस्वभावस्य तदस्तित्वज्ञानस्याकरणात्, तन्नित्यत्वव्यापत्तेः । बुद्धेश्चाचेतनत्वेन तज्ज्ञानत्वानुपपत्तेश्चेति । सम्पर्कस्य च तत्र निषेत्स्यमानत्वात् । अन्यस्य च प्रमाणस्यानभ्युपगमादसन्नेव पुरुषः प्रमाणातिवर्तीति कथं तस्य सुखादिर्विषयो यतस्तन्मतं साहसमेव न भवेत् ? सतोऽपि तस्य स विषय इति साहसमेवेति न मन्वानेन इदमुक्तम्-**'अपि साक्षात्'** इति । **साक्षात्** अव्यतिरिक्तया सत्तया न वैशेषिकादिवत् व्यतिरिक्तया **सतोऽपि** विद्यमानस्यापि **नित्यस्यात्मनः स विषय** इति साहसमेव । तथा हि तदुन्मुखमात्मरूपं सर्वदेति सुखादिरपि सर्वदा भवेत्, असति तथा तस्मिन् तथा तदनुपपत्तेः, अन्यथा सकृदपि तदभाव एव तत्सम्भवान्न ततः सुखादिस्वरूपस्यापि व्यवस्थापनमिति निर्विषयमेवेदम्-"बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते" [ ] इति । न च तस्य नित्यत्वम्; "हेतुमदनित्यम्" [सांख्यका० १०] इति तदनित्यत्ववचनविरोधात् । न साक्षादात्मरूपं तदुन्मुखं[3] यतोऽयं प्रसङ्गः किन्तु तदभिमुखचिच्छायासङ्क्रमद्वारेणैव । तच्छायायाश्चात्मनोऽर्थान्तरत्वेनानित्यत्वादुपपन्नमेव अनित्यत्वं सुखादेरिति चेत्; न; तस्या अचिद्रूपत्वे कलशादिवत् तदुन्मुखत्वासम्भवात्, अन्यथा सुखादेरेव स्वात्मनि उन्मुखत्वसम्भवात् व्यर्थैव तत्सङ्क्रमकल्पना भवेत् । चिद्रूपत्वे च पुरुषत्वेनानित्यत्वानुपपत्तेः "चैतन्यं पुरुषस्य स्वरूपम्" [योगभा० १।९] इति वचनात् । चिच्छायासङ्क्रमादेव तत्रापि तद्रूपत्वं न साक्षात्तदयमदोष इति चेत्; तदसारम्; यस्मात्-

तत्सङ्क्रमादचिद्रूपात्तत्र चिद्रूपता कथम् ।
अन्यथा लोहितत्वं स्यात् स्फटिके पीतसङ्क्रमात् ॥ १६३ ॥

---

१ अचैतन्यस्यैव आ०, ब०, प० । २ न तत्सारं प० । ३-मुख्यं ब-प० ।

तत्सङ्क्रमेऽपि तद्रूपः परतत्सङ्क्रमात् यदि ।
परतत्सङ्क्रमोऽप्येवं विचारादनवस्थितिः ॥ १६३४ ॥
तन्न तद्द्वारतोऽप्यस्ति सुखादावुन्मुखं वपुः ।
आत्मनो येन तस्यासौ विषयः परिकल्प्यताम् ॥ १६३५ ॥
को वा तत्सङ्क्रमं तत्र सुखादौ विदधीत वः ।
आत्मैव चेत् कथं तस्याकर्तुस्तद्विधि[1]सम्भवः ॥ १६३६ ॥
कर्तृप्रधानसंसर्गात् कर्तैवात्मेति चेदसत् ।
औपचारिकतः कर्तुर्वस्तुतत्सङ्क्रमस्थितेः ॥ १६३७ ॥
तत्सङ्क्रमोऽप्यवस्त्वेव यदि तद्वशतः कथम् ।
पारमर्षैः प्रकल्प्येत पुंसि तत्त्वेन [2]संसृतिः ॥ १६३८ ॥
संसारोऽप्युपचाराच्चेन्मुक्तौ किन्न स कथ्यते ।
[3]तदाऽपि तत्संसर्गस्य नित्यव्यापिनि सम्भवात् ॥ १६३९ ॥
तत्संसर्गो न कर्तृत्वाद्युपचाराय चेत्तदा ।
पूर्वमप्यविशेषेण न स्यादेवं भवः कथम् ॥ १६४० ॥
उपचारेण कर्तृत्वादात्मा तत्सङ्क्रमावहः ।
यतस्तद्विषयत्वोक्तिः सुखादौ साहसं न वः ॥ १६४१ ॥

इदमेव चेतसि कृत्वेदमुक्तम्—**'अदृश्यानुभवात्मनः'** इति । दृश्यस्य दर्शनविषयत्वेनाभिमतस्य सुखादेर्योऽनुभवः साक्षादुपचारेण वा तस्यात्मा स्वभावो **दृश्यानुभवात्मा** स न विद्यते यस्येति । साहसान्तरं दर्शयितुमिदमुक्तम् । **'शब्दाद्यविशेषः'** इति शब्द आदिर्यस्य रूपादेस्तस्मादचेतनत्वादिना धर्मेणाविद्यमानविशेषः सुखादिरिति साहसमिति पदयोजनम् । कथमिति चेत् ? स्वानुभवरूपतया तस्य संवेद्यमानस्याचेतनत्वप्राकृतत्वादेरनुपपत्तेः । चिच्छक्तिसम्पर्कादेव तस्य तथा संवेदनं न स्वत इति चेत् ; न; तच्छक्तेरपि स्वानुभवाभावात् ।

माध्यस्थ्यपदेन तत्र स्वपरविषयत्वस्य प्रतिक्षेपात् । तथा च तत्र कस्यचित् व्याख्यानम्—**"इह कश्चित् स्वसंवेद्यत्वाद् विषयो यथा बौद्धीयं विज्ञानम्, कश्चित् परवेद्यत्वात् यथा वैशेषिकीय आत्मा अस्मदन्तःकरणं वा, अयं तु नोभयथेति मध्यस्थः ।"** [ ] इति; तत्रायमेव स्वानुभवो यत् परनिरपेक्षं प्रतिभासनम् न स्वतः स्वस्य यतो विषयत्वप्रसङ्ग इति; न; तस्य स्वापेक्षत्वे तत्प्रसङ्गस्य दुर्निवारत्वात् । निरपेक्षत्वे च व्यवच्छेद्याभावेन परिग्रहणवैयर्थ्यात् ।

भवतु तदुभयनिरपेक्षमेव तदिति चेत्; न; आत्मन्यसति तस्यैवाभावात् । सति चेत्; कथं निरपेक्षत्वं तद्भावाभावानुविधानस्यैव तदपेक्षालक्षणत्वात्, तदपेक्षप्रतिभासनस्यैव च बौद्धैरपि

---

१ तद्विदिसंभ— आ०, ब०, प० । २ संस्कृतिः आ०, ब०, प० । ३ तथापि आ०, ब०, प० । ४ सुखादेरिति आ०, ब, प० । ५ —स्यपदेव आ०, ब०, प० ।

स्वसंवेद्यत्वेनोपगमात्[1]। तन्न तत्सम्पर्कात् सुखादेः स्वानुभवात्मत्वमुपपन्नम्। सत्यपि तच्छक्तेस्तद्रूपत्वे[2] न तत्सम्पर्कादेव सुखादेरपि तद्रूपत्वं तच्छक्तेरपि सुखादिसम्पर्केण जडरूपत्वापत्तेः। नायं दोषः आविवेकख्यातिप्रादुर्भावाद् विषयसारूप्यस्य तत्रेष्टत्वादिति चेत्; तर्हीदं दुर्भगं[4] भवेत्—"बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते"[ ] 'जडश्च' 'चेतयते' इति च व्याघातात्। न व्याघातः विभ्रमेतराकारयोर्युगपत्सम्भवात् सर्परज्जुवदिति चेत्; उपपन्नः सर्पाकारः सत्यप्याकारान्तरे तस्य प्रतिपत्तन्तराधीनत्वात्, नैवमत्र, तच्छक्तेरेव जडरूपतापत्तेः, तस्यां च चितिप्रच्युतेरावश्यकात्। नास्त्येव तत्र तदापत्तिरिव भवतीति चेत्; तन्न; यस्मात्— ५

यदि तत्र न तद्रूपमित्यर्थः कथमत्र ते ?।
यदि तत्रापि तद्रूपमित्यर्थः कथमत्र ते ॥ १६४२ ॥

यदि वस्तुतस्तत्र तदापत्तिर्नास्ति कथम् इवप्रयोगस्तदर्थाभावात् ? कथमिदानीं रज्जुशकले सर्प इवेति व्यवहार इति चेत् ? न; सर्पविभ्रमदशायां तदभावात्। अविभ्रमदशायां तु तद्भावो दैर्घ्यादेः सर्पसादृश्यस्य भावात्। तथा यदि तत्र तत्त्वतस्तदापत्तिः कथम् इवप्रयोगः ? न हि तदेव तदिवेति भवति, तस्यैवाभावप्रसङ्गात्। यदा यद्भवेत् तत्तदा तदित्येवावस्थानात् न तदिवेति। तदभावे न तदिवेत्यपि सम्भवति, तस्य तदपेक्षत्वात्। १०

स्यान्मतम्—नास्त्येव वस्तुतस्तत्र तदापत्तिरपि तु विभ्रमादेव, सापि न तच्छक्तेर्बुद्धिधर्मत्वात्। बुद्धिरेव हि तत्र अविद्यमानामपि तदापत्तिमुपदर्शयति विभ्रमदोषात्, ततो न किञ्चित् तस्यां बुद्ध्यादिसम्पर्कादुत्पद्यते, स्वस्थैव सर्वदा तच्छक्तिरिति; यद्येवं तच्छक्तिसम्पर्कात् बुद्ध्यादावपि न चितिरूपापत्तिरविशेषादिति कथं बुद्धेर्विभ्रमकल्पनम् ? कथञ्चिदपि तत्र चिद्रूपासम्भवे कलशादिवत्तदनुपपत्तेः। उपपन्ना चितिसम्पर्कात् बुद्ध्यादेस्तदाकारापत्तिः परिणामित्वात् न चितेस्तत्सम्पर्केऽपि[3] ताद्रूप्यापत्तिः कौटस्थ्येन विपर्ययादिति चेत्; अनुकूलमाचरसि, तथा सति वस्तुत एव बुद्धिसुखादेश्चेतनत्वव्यवस्थितेः तथापि परिणामात्। न हि तथापरिणतमन्यथेति शक्योपकल्पनम्, बुद्धित्वाद्यपेक्षयापि तत्कल्पनाप्रसङ्गेन[5] गुणप्रतिष्ठाविलोपापत्तेः। न चैवं तद्व्यतिरिक्तात्मकल्पनमप्यर्थवत्, तस्य स्वहेतुप्रकृतेरेव तत्परिणामोपपत्तेः। तन्न सुखादेः शब्दादिविशेषत्वं चेतनेतररूपतया विशेषस्यैवोपपत्तेः। १५ २०

यच्चेदं परस्य मतम्—सुखादिरप्यर्थान्तरबुद्ध्युपदर्शित एव पुरुषस्य विषयो न साक्षादिति, तद्दर्शनार्थमिदमुक्तम्—'धियाऽन्यया प्रदर्श्यः' इति। तत्रापि 'साहसम्' इत्यभिसम्बद्धव्यम्। कुत एतदिति चेत् ? उक्तनीत्या सुखादेः स्वानुभवसिद्धौ तदनुभाविनः पुरुषस्य तदुपकरणस्य बोधस्य च व्यर्थस्यैव स्वसिद्धान्ताभिनिवेशपरवशतया प्रतिपादनात्। किञ्च, २५

बुद्धिं न चेन्नरः पश्येत् सुखादिं नैव तद्गतम्।
दर्पणं न ह्यपश्यन्तो मुखं पश्यन्ति तद्गतम् ॥ १६४३ ॥ ३०

---

१ "एतदेव स्वसंवेदनं यदन्यागोचरत्वे सति प्रकाशनं नाम।"—प्र० वार्तिकाल० ३।४६६। २ चैतन्यरूपत्वे। ३ चेतनत्वम्। ४ दुर्भागं आ०, ब०, प०। ५ गुणप्रति- आ०, ब०, प०।

बुद्ध्यन्तराद्दृते तां च पश्यन् पश्येत् तया विना ।
सुखादिकं तथा चासौ त्वत्सिद्धान्तो विरुद्ध्यते ॥ १६४४ ॥
"[1]आत्मनं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ १६४५ ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।" इति ।
बुद्धिसारथिनैवासौ यदि तामपि धावति ॥ १६४६ ॥
तत्सारथीनामानन्त्यमनवस्थानतो भवेत् ।
ततो न पुंसि भोगोऽयं कथमप्यवकल्प्यते ॥ १६४७ ॥
तदभावान्न कैवल्यं भोगप्रच्युतिलक्षणम् ॥
तदेतद्भोगकैवल्यमार्गमस्याभिजल्पतः ॥ १६४८ ॥
प्रामाण्यं साहसादेव न्यायात्नेत्याह शास्त्रकृत् ।
[प्रदर्श्यः] पुनरस्यैव गुणयोगनिवृत्तितः ।
निर्वाणमाह वेदोऽयं प्रमाणमिति साहसम् ॥१४॥ इति ।

पुनरिति वितर्कार्थम् **अस्यैव** कूटस्थस्य चेतनस्यात्मन एव नाचेतनस्य न क्षणिकचित्तप्रवाहस्य **निर्वाणम्**, उपलक्षणमिदं तेन संसारं च **आह** कथयति **वेदोऽयम्**"[2]न हि (ह) वै सशरीरस्य प्रियाप्रिययोरुपहतिरस्ति अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः ।" [छान्दो० ८।१।२।१] इत्यादिः । कुतः [3]सं ते तस्याह ? **गुणानां** सत्त्वादीनां **योग**श्चात्मना सम्बन्धो भोगोपकल्पनालक्षणो **निवृत्ति**श्च तेषामेव तत्कल्पनादुपरमः ताभ्यां ततः । स चागमः **प्रमाणमिति साहसम्** असम्भवदर्थाभिधायिनस्तस्य साहसादन्यतः प्रामाण्यकल्पनानुपपत्तेः ।

अथवा **नित्यस्य** यौगपरिकल्पितस्यात्मनः । कीदृशस्य ? **अपि सतः** विद्यमानस्यापि वस्तुतस्तस्याविद्यमानत्वम् अपिशब्देनाभ्युपगमवाचिना द्योतयति । तथा तदभावश्च सत्त्वव्यापिकाया अर्थक्रियायाः क्रमयौगपद्याभ्यामुपपत्त्या तत्रासम्भवाच्च । कथं पुनः तदभावो यावता प्रत्यक्षमेव 'अहम्' इति प्रसिद्धोल्लेखं तत्र प्रमाणमिति चेत्; न; तत्र तद्व्यतिरिक्तरयाऽप्रतिभासनात् । न हि नित्यो व्यापी तद्व्यतिरिक्तश्च कश्चित् परपरिकल्पित आत्मा तत्रावभासते तथैवासम्प्रतिपत्तेः साङ्ख्यपरिकल्पितचिच्छायाधिष्ठानबुद्धिसत्त्ववत् । प्रतिभासनेऽपि कथं तत्सामानाधिकरण्यम् 'अहमात्मा'इति ? व्यतिरेके तदवलोकनात् घटतत्प्रत्यक्षवत् । तत्रापि समवायात्तदुपपत्तिरिति चेत्; न; तेनापि व्यतिरेकस्यानिराकरणात् । तन्निर्णयस्य तेन निराकरणमिति चेत्; आत्मन्यपि स न स्यात् तस्य व्यतिरेकात् । अव्यतिरेकाद् व्यतिरेके तदव्यतिरेकस्यानिष्टस्य प्रसङ्गात् । तस्मात् कथञ्चिद्भेद एव सामानाधिकरण्यम् । भेदेऽपि प्रत्यासत्तिविशेषादुपपन्नमेव तत्, तत्कथं तत्र तदभाव इति चेत् ? न; 'द्रव्यत्वादिकं सामान्यविशेषः, संयोगादिः सम्बन्धः' इत्यादावभेदादेव तस्य प्रसिद्धेः न

१ कठो० ३।३।४।२ नचवै ता० । २ सति त– आ०, ब०, प० । ३ –दौ भेदा– आ०, ब०, प० ।

तद्विशेषात्, तस्य[1] संयोगादिरूपस्य तत्रानभ्युपगमात्। कल्पितमेव तत्र सामानाधिकरण्यं तत्त्वत उभयरूपाभावात्, तस्य चोभयरूपापेक्षत्वादिति चेत्; न; द्रव्यत्वादावनुवृत्तव्यावृत्तप्रत्ययनिबन्धनतयोभयरूपसद्भावस्य परप्रसिद्धस्यैव **'सदसज्ज्ञानसंवाद'**इत्यादि श्लोकव्याख्याने[3] निरूपितत्वात्। संयोगसमवाययोश्च परस्परविलक्षणयोरविलक्षणस्य तत्त्वत एव सम्बन्धरूपस्य[4] बाधात्। तदभावे न कस्यचित् क्वचिद्वस्तुतः सम्बन्ध इति तन्निबन्धनः[5] सकलोऽपि संसारादिव्यवहारो विलोपमापनीपद्येत। कल्पितस्य च तस्योपगमे मतान्तरापत्तिः, ततो विलक्षणेतररूपतया वास्तवमेव तस्य द्वैरूप्यमिति कथं कल्पितत्वं तत्र सामानाधिकरण्यस्य विषयसद्भावात्? एवमपि कथं तस्याभेदे भेदरूपत्वमिति चेत्? न; तस्यैव प्रतीतेरन्यस्य स्वयमप्यनभ्युपगमात्। तद्वदात्माऽहंप्रत्ययोरपि तादूप्य एव तदिति सोपपत्तिकमत्यन्तव्यतिरेके तदनुपपत्तिप्रतिपादनम्। तन्नाहमिति प्रत्यक्षमात्मनि प्रमाणम्।

नाप्यनुमानम्; लिङ्गाभावात्। शब्दादिज्ञानमेव तत्र लिङ्गम्। प्रयोगश्चात्र [6]तज्ज्ञानं क्वचिदाश्रितं गुणत्वात् रूपादिवत्। समवायिकारणपूर्वकं वा कार्यत्वात् तद्वदेवेति चेत्; न; ततोऽप्याश्रयमात्रादेरेव प्रसिद्धेः। तस्य शरीरादेरपि सम्भवात् कथं तद्विशेषस्यात्मनस्ततोऽनुमानम्? न शरीरादिस्तद्बुद्धेराश्रयः स्वयमज्ञत्वात्। तथा च प्रशस्तकरस्य वचनम्—[7]**नासौ शरीरेन्द्रियवाङ्मनसामज्ञत्वात्"** [प्रश० भा० पृ० ३०] इति। ततः पारिशेष्यादात्मैव तदाश्रय इति चेत्; न; आत्मनोऽपि तदविशेषात्। न हि तस्यापि स्वतो ज्ञत्वं ज्ञानसमवायकल्पनावैफल्यापत्तेः। तत्समवायात् ज्ञ एव स इति चेत्; न; परस्पराश्रयात्—ज्ञत्वे तत्समवायः, ततो ज्ञत्वमिति। स्वतो न तस्य ज्ञत्वं यतस्तत्समवायवैयर्थ्यम्, नाप्यज्ञत्वं यतो न तदाश्रयत्वम् अपि त्वनुभयरूपत्वमिति चेत्; न सारमेतत्; यतः—

अन्योऽन्यच्युतिरूपत्वमज्ञत्वज्ञत्वयोर्यदि।
एकाभावे कथन्न स्यादितरत्तत्र तात्त्विकम्॥ १६४९॥
तद्रूपत्वं तयोर्नो चेत् यौगपद्यं प्रसक्तिमत्।
अज्ञस्यापि ततः प्राप्तं कायादेर्ज्ञप्तिकल्पनम्॥ १६५०॥
तत्कथं पारिशेष्येण बुद्धेरात्मैव संश्रयः।
कायादिनाऽपराद्धं किं स तथा येन नेष्यते॥ १६५१॥

शरीरस्य तदाश्रयत्वेन प्रतिसन्धानं परस्परविलक्षणपरापरपरिणामभेदेन, तस्यापि तदव्यतिरिक्ततया भिद्यमानस्यानवस्थानात्, अवस्थितस्य च प्रतिसन्धायित्वमुपपन्नम्, भेदवतः परापरशरीरसम्बन्धिनो दर्शनस्मरणादेस्तदपररयात्मान्तरवत्ता(वत्तद)नुपपत्तेः, ततस्तदुपलभ्यमानमवस्थायिनमेव बुद्धेराश्रयमवकल्पयति, स चाऽत्मैव, न शरीरम्। नापि चक्षुरादिकमिन्द्रियम्; तस्यापि शरीरवदेव परापरतया भेदवत्त्वेनावस्थायित्वासम्भवात्। मनसोऽवस्थायित्वेऽपि करणत्वेन बुद्धि प्रत्याश्रयत्वानुपपत्तेरिति चेत्; किमिदं प्रतिसन्धानं नाम यतस्तद[10][धिष्ठान]स्यात्मनः कल्पनम्? स एवायमि-

१ -पोक्तस्य आ०, ब०, प०। २ प्रत्यासत्तिविशेषस्य। ३ पृ० ११६। ४-स्य भावे आ०, ब०, प०। ५ -नः संसा-आ०, ब०, प०। ६ शब्दादिज्ञानम्। ७ "न शरीरेन्द्रियमनसामज्ञत्वात्"-प्रश० भा०। ८ विद्यमा-आ०, ब०, प०। ९ -रमत्ता-ता०। १० तदस्यात्मावच्छ-ता०।

त्युल्लेखद्वयाधिष्ठानं पूर्वाऽपरैकत्वज्ञानमिति चेत्; कुतस्तस्य तदधिष्ठानत्वम् ? तस्य तत्र समवायादिति चेत्; तदुभयमपि यदि जडमेव न तद्बलेन पूर्वापरपरामर्शो रूपादिनाऽपि तदापत्तेः। अजडत्वे तु ज्ञानद्वयमेव तदिति[1] कथं तस्य ज्ञाने समवायः, गुणस्य निर्गुणस्यैवोपगमात् ? तन्न समवायात्तस्य तत्त्वम्। अभेदादिति चेत्; न; तयोल्लेखद्वयादभेदे तन्नानात्वं[2] स्यात्, अन्वयस्य च तस्मादभेदे तद्वदेक [त्व] स्य चापत्तेः कथमुभयोल्लेखिविज्ञानसम्भवः ? कथञ्चिद्भेदस्य च स्याद्वादन्यायविद्वेषिभिरनभ्युपगमात्। अभ्युपगमे युगपदिव क्रमेणापि परापरोल्लेखैविवर्ताधिष्ठानैकज्ञानसम्भवस्याविरोधात् तदात्मैवात्माऽवस्थायीति तस्यैव प्रतिसन्धानोपपत्तेः तदन्यात्मकल्पनं विफलकल्पनतया परामर्शवैकल्यं परस्यावकल्पयति। तन्न प्रतिसन्धानबलादपि शरीरादेरन्य एव बुद्धिलिङ्गादनुमातव्य इति सिद्ध्यति तद्बलस्यैवासम्भवात्। तन्नानुमानमपि तत्र प्रमाणमिति तस्याऽभ्युपगमादेव सत्त्वमिति सूक्तम्—'अपि सतः' इति। कथं सतः ? **साक्षात्** स्वत एव, अर्थान्तरसत्तासम्बन्धात् सत्त्वे अतिप्रसङ्गादेर्दोषस्य प्रथमप्रस्तावे निवेदितत्वात्। तस्य च **सुखादिर्विषय इति साहसम्**। कुत एतत् ? तस्य स्वतोऽचेतनत्वादर्थान्तरस्य च ज्ञानस्य तत्रासम्भवात्। न हि तत्र व्याप्त्या तस्य वृत्तिः; व्याप्यस्य नित्यव्यापित्वेन तस्यापि सर्वत्र सर्वदा सत्त्वापत्तेः। नाप्यव्याप्त्या; तदधिष्ठितानधिष्ठितरूपतया तस्य भेदापत्तेः। अन्यथा अधिष्ठितमेव सर्वथा तद्रूपमिति कथमव्याप्तिः ? अनधिष्ठितमेवेति कथं तस्य तत्र वृत्तिः ? तत्प्रदेशे वृत्तेरिति चेत्; न; तत्त्वतस्तत्र तैर्द्वत्त्वस्याभ्युपगमात् घटादिवत् कार्यत्वेनानित्यत्वापत्तेः। कल्पनया तद्भावे च स एवात्मा स्यात् बोधाऽधिकरणत्वात्। न चैतत्पथ्यं भवताम्, कल्पितात्मवादस्य बौद्धसिद्धान्तत्वात्। तन्नार्थान्तरमपि ज्ञानं तस्य यतः सुखादिर्विषयः स्यात्। कथं वा तेन सताप्यदृश्येन तस्य सुखादिवेदनम् आत्मान्तरज्ञानेनापि तदापत्तेः। दृश्यत्वमपि न तस्य स्वत एव; अनभ्युपगमात्, नान्यतोऽनवस्थापत्तेः। एतदेवोक्तम्—'अदृश्यानुभवात्मनः' इति। अनुभव एवानुभवात्मा बुद्ध्यात्मवत्[6] सोऽदृश्यः स्वपराभ्यामप्रत्यक्षो यस्य तस्येति। तन्न सत्यपि ज्ञाने स तस्य विषय इति साहसमेव परं तत्कल्पने निबन्धनम्। ततो यदुक्तम्—"**सुखादिरात्मविशेषगुणनिमित्त आत्मविशेषगुणत्वात् विशेष्यज्ञानादिवत्**" [ ] इति; तत्प्रतिव्यूढम्; सुखादेरात्मनश्चाप्रतिपत्तौ हेतोराश्रयस्वरूपासिद्धेर्दृष्टान्तस्य च साध्यसाधनवैकल्यात्। एवमनुमानान्तरेऽपि सर्वत्र वक्तव्यम्।

परमपरस्य साहसमुपदर्शयति—'शब्द' इत्यादिना। शब्द आदिर्यस्य रूपादेस्तस्मादविशेषः सुखादिः अचेतनत्वेन तत्सदृश इत्यर्थः। तदेव कुतः ? **धिया** बुद्ध्या **अन्यया** स्वतो भिन्नया **प्रदर्श्यो** यत इति। तथा हि—अचेतनः सुखादिः भिन्नबुद्धिप्रदर्श्यत्वात् शब्दादिवत्। तद्बुद्धिप्रदर्श्यश्चासौ प्रदर्श्यत्वात्तद्वदेवेति। कुतः पुनरिदं साहसमिति चेत् ? सुखादेरनुभवात्मतयैव प्रतीतेः, तदचेतनत्वकल्पनस्य अनुभवबाधितत्वात्, अनुभवैकार्थसमवायितया तस्य तदात्मत्वेन[8] प्रतीतेः। विभ्रम एवेति चेत्; न; बाधावैधुर्यात् सर्वदा तदात्मतयैव प्रतीतेः। तथापि तद्विभ्रमकल्पनायां न काचिदविभ्रमा

१—ति चेत् का०, थं आ०, ब०, प०। २ —त्वं तदन्व—आ०, ब०, प०। ३—खवत्ताद्विष्टैकज्ञान— आ०, ब०, प०। ४ तदन्तरस्यानभ्युप—आ०, ब०, प०। प्रदेशवत्त्वस्य। ५ तादृशेन आ०, ब०, प०। ६ —त्मात्मादृश्यः आ०, ब०, प०। ७ अचित्तत्वेन दृश्य इ—आ०, ब०, प०। ८ अनुभवात्मत्वेन। ९ प्रतीतिः प०।

प्रतीतिः भवेत्। अनैकान्तिक [श्च] भिन्नबुद्धिप्रदर्श्यात्मत्वं चेतनेऽपि भावात्। 'अनर्थविषयत्वे सति' इति विशेषणान्नेति चेत्; न; तदात्मन्यपि अस्वसंवेदने तद्विषयत्वस्य निरूपितत्वात्।

यदपि तत्प्रदर्श्यत्वे साधनं प्रदर्श्यत्वादिति; तदपि व्यभिचारी, स्वसंवेदनेऽपि तस्याविरोधात्।

साहसान्तरमपि 'पुनः'इत्यादिना निवेदयति। **पुनरिति** पूर्ववत्, **अस्यैव** नित्यस्यात्मनो **निर्वाणं** निःश्रेयसम्, अरयोपलक्षणत्वेन संसारमपि **आह** कथयति **वेदः** पूर्वोक्त **एवायं** प्रतीयमानः। कुतस्तदुभयं स तस्य इत्याह—**गुणस्य** प्रियाप्रियविकल्पस्य बुद्ध्यादेः **योगश्च** तस्यैव प्रत्यासत्तेः **निवृत्तिश्च** ताभ्यां तत इति स च वेदः प्रमाणमिति साहसम् असम्भवदर्थवादिनस्तस्य साहसादन्यतः प्रामाण्यकल्पनाऽनुपपत्तेः। तथा हि—

आत्मनो गुणसम्बन्धात् संसारित्वप्रकल्पने। १०
सम्बन्धस्यापि तत्कृत्सिस्तत एवोच्यतां त्वया॥ १६५२॥
सम्बन्धिभ्यां न सम्बन्धस्तस्य चेत्तौ कथं तदा।
सम्बन्धिनौ तयोस्तस्य भावे सत्येव तच्छ्रुतेः॥ १६५३॥
असम्बद्धोऽपि सम्बन्धः समवायस्तयोर्यदि।
संयोगोऽपि तथैव स्यात् सम्बन्धो दधिकुण्डयोः॥ १६५४॥ १५
तथा च समवायस्य तत्सम्बन्धस्य कल्पनम्।
अप्रेक्षापूर्वकारित्वं यौगवोक (लोक)स्य कल्पयेत्॥ १६५५॥
सम्बद्ध एव संयोगः समवायोऽन्यथाऽपि चेत्।
सम्बन्धत्वं प्रपद्येत वस्तुवैचित्र्यसम्भवात्॥ १६५६॥
इहेदंप्रत्ययोऽप्येवं कश्चित् सम्बन्धपूर्वकः। २०
अन्यथाऽपि भवेत् कश्चिदिति वैचित्र्यमुच्यताम्॥ १६५७॥
तथा च समवायस्य तल्लिङ्गादव्यवस्थितेः।
कथं स गुणसम्बन्धः पुरुषस्योच्यतां त्वया॥ १६५८॥
मुक्तात्मानोऽपि किन्नैवं त्वया संसारिणो मताः।
गुणयोगस्य तत्रापि व्यापित्वेन व्यवस्थितेः॥ १६५९॥ २५
गुणो न तत्र तद्योगे सत्यपीत्यपि दुर्मतम्।
तद्योगोऽस्ति स नास्तीति वचोव्याघातदर्शनात्॥ १६६०॥
तद्योगोऽपि न चेत्तन्न कथं सामान्यसङ्क्रमः।
द्रव्यमात्मेति वा तत्र प्रख्योपाख्या च यद्भवेत्॥ १६६१॥
अन्य एव स योगश्चेत् कथमेकत्वकल्पनम्। ३०

---

१ सद्योगोऽस्तीति सन्नास्ति वचो आ०, ब०, प०।

समवायस्य तत्तत्र "तत्त्वम्"इत्यादि शोभताम् ॥ १६६२ ॥
ततो न गुणसम्बन्धात् संसारः क्वापि सम्भवी ।
"न च वै सशरीरस्य"इत्यादि[2] तस्मादसद्वचः ॥ १६६३ ॥
निर्वाणमपि संसाराभावे दुरुपकल्पनम् ।
संसारच्युतिरूपं यन्निर्वाणं तद्विदो विदुः ॥ १६६४ ॥
कथं वा गुणयोगस्य नित्यस्यास्ति निवर्तनम् ।
यत्तन्निवृत्तिनः प्राह वेदो निर्वाणमात्मनः ॥ १६६५ ॥
गुणस्यैव [3]निवृत्तेश्चेन्निर्वाणं परिकल्प्यते ।
तस्यैव सति तद्योगे निवृत्तिः सम्भवेत् कथम् ॥ १६६६ ॥
तद्योगेऽपि निवृत्तिश्चेन्निवर्तकबलात्ततः ।
प्रवृत्तिरपि[4] तद्योगाभागे किन्न प्रवर्तकात् ॥ १६६७ ॥
योगाभावे कथं पुंसि प्रवृत्तिस्तस्य चेत् कथम् ।
योगे सति ततस्तस्य निवृत्तिरपि कथ्यताम् ॥ १६६८ ॥
निवर्तकस्य नियमः कुतो वा परिकल्प्यताम् ।
सर्वात्मनां[5] यतस्तस्मान्न तद्योगनिवर्तनम् ॥ १६६९ ॥
समवायान्न नियमस्तद्विभुत्वादितीरितम् ।
तद्विशेषप्रकृप्तिस्तु तदेकत्वोपबाधिनी ॥ १६७० ॥
नियामकस्याभावेन नियमस्याव्यवस्थितेः ।
नियमेन प्रतीतिश्च तत्र वः सुलभा कथम् ॥ १६७१ ॥
तत्त्वज्ञानादि तन्नास्ति नियतं तन्निवर्तकम् ।
निवृत्तेर्नियमो यस्मान्निर्वाण[6]नियमावहः ॥ १६७२ ॥
ततश्चानियमात् सर्वगुणयोगनिवर्तने ।
प्राप्तं सर्वात्मनिर्वाणमेकनिर्वाणकारणात् ॥ १६७३ ॥
ततश्च "नियतं श्रेयो निःश्रेयसम्"इति स्वयम् ।
त्रिलोचनादेर्व्युत्पत्तिकरणं भूतमुद्रया ॥ १६७४ ॥
तन्न निर्वाणवादोऽयं युज्यते युक्तिकान्तया ।
ततः, 'अशरीरं वा'[7]इत्यादिश्रुतिरप्यसदर्थका ॥ १६७५ ॥
प्रामाण्यवादस्तत्रायं तन्न युक्तिसुकल्पनः ।
इत्याशयवता प्रोक्तं वेद इत्यादिकं वचः ॥ १६७६ ॥

---

१ "तत्त्वं भावेन"–वैशे० सू० ७।२।२७ । २ छान्दो० ८।१२।१ । ३ निवृत्तिश्चे–आ०, ब०, प० । ४ निवृ–आ०, ब०, प० । ५ सर्वं नाशयतस्तस्मा–आ०, ब०, प० । ६ –र्णनि–आ०, ब०, प० । ७ छान्दो० ८।१२।१ ।

ततो न तथागतागमवत् साङ्ख्याद्यागमस्यापि तत्त्वतः सोपायहेयोपादेयगोचरत्वमुपपन्नम्। प्रवचनस्य तु तदुपपत्तिमदेव प्रामाण्यात्, तस्य च अविसंवादादेव लिङ्गादवगमात्। कथमिदानीं तस्यात्यन्तपरोक्षे धर्मादौ तदवगमः तत्राविसंवादस्याप्रतिपत्तेः? कालान्तरे तत्रापि प्रतिपत्तिरिति चेत्; न[1]; सति प्रामाण्यावगमे ततस्तद्विषये धर्मादौ प्रवृत्तिः, ततश्चाविसंवादोपलम्भः, ततोऽपि तदवगम इति चक्रकदोषात्। तत्र तत्र तदवगम इति चेत्; न; प्रत्यक्षादेरप्येवं तदवगमाभावप्रसङ्गात्। न हि तत्रापि तदुत्पत्तिसमय एव संवादः संशयाद्यभावापत्तेः, प्रवृत्तिवैयर्थ्याच्च, अर्थक्रियायाः संवादरूपत्वेन तदैव प्राप्तेः। कालान्तरभाविनि च संवादे चक्रकदोषस्य तादवस्थ्यात्। कारणशुद्धिपरिज्ञानात्तत्र तदवगमो न संवादादिति चेत्; न; तत्परिज्ञानेऽप्यन्यतस्तत्परिज्ञानात् तदवगमे अनवस्थानसक्तेः। प्रत्यक्षादेः प्रामाण्यावगमाच्चच्छुद्धिपरिज्ञाने च परस्पराश्रयात्—तदवगमात् कारणशुद्धिपरिज्ञानम्, ततश्च तदवगम इति। प्रसिद्धप्रामाण्यापरप्रत्यक्षादिसमानसामग्री-प्रभवत्वेन तत्र तन्निर्णय इति चेत्; अनुकूलमाचरसि, प्रवचनेऽपि तेनैव तन्निर्णयात्। विद्यते हि तत्राप्यत्यन्तपरोक्षविषये निश्चितप्रामाण्यप्रत्यक्षादिविषयप्रवचनसमानसामग्रीप्रभवत्वम्, उभयत्रापि सम्प्रदायाविच्छेदेन समानकर्तृत्वप्रतिपत्तेः। समानस्यापि कर्तुः क्वचिद्विप्रलम्भसम्भवे चक्षुरादावप्यनाश्वासापत्तेः। एतदेवाह—

विश्वलोकाधिकज्ञाने विप्रलम्भनशङ्किनः।
प्रामाण्यं कथमक्षादौ चञ्चले प्रमिमीमहे ॥ १५ ॥ इति।

विश्वः सर्वः लोकः प्राणिवर्गः, लोकयति पश्यतीति लोक इति व्युत्पत्तेः, तस्मादधिकं सर्वद्रव्यपर्यायतत्त्वसाक्षात्कारित्वेनोत्कृष्टं केवलाख्यं ज्ञानं यस्य पुरुषविशेषस्य स **विश्वलोकाधिकज्ञानः** पूर्वं निर्णीतो निर्णेष्यमाणश्च तत्र **विप्रलम्भनं** वञ्चनं वीतरागाणामपि सरागवच्चेष्टासम्भवात्, **आशङ्कन्त** इत्येवं शीला वयं वादिप्रतिवाद्यादयः **प्रामाण्यम्** अविप्रलम्भनम् **अक्षादौ** आदिपदात् लिङ्गादावपि **कथं** न कथञ्चित् **प्रमिमीमहे** निश्चिनुमहे, तत्रापि कदाचिद्विप्रलम्भस्योपलम्भात् अन्यथा इन्द्रियादिभ्रान्त्याभा (न्त्यभा) वापत्तेः। दोषवत्येव तत्र तदुपलम्भो न निर्दोष इत्यपि न युक्तम्; पुरुषेऽपि तुल्यत्वात्। दोषवानेव सर्वोऽपि पुरुष इति चेत्; इन्द्रियादिरपि सर्वस्तथा किन्न भवति? बहुलमविप्रलम्भस्यापि तत्रोपलम्भादिति चेत्; न; पुरुषस्यापि प्रत्यक्षानुमानविषये सर्वत्राप्यविप्रलम्भस्यैव प्रतिपत्तेः। तत्राविप्रलम्भनेऽपि स्वर्गादौ भवत्यपि विप्रलम्भनः पुरुषाणां विप्रलम्भेतरनियमासम्भवेन चञ्चलत्वादित्यपि न युक्तम्; अक्षादावपि तन्नियमाभावेन चञ्चलत्वस्याविशेषात्। अत एवोक्तम्—**'चञ्चले'** इति। भवतु तत्राक्षादेर्विप्रलम्भनं यत्र तज्ज्ञाने बाधकप्रत्ययोपनिपातः, यत्र तु स नास्ति तत्राविप्रलम्भनमेवाङ्गीकर्तव्यम्, अन्यथा प्रवृत्तिनिवृत्त्यादिसकलव्यवहारविलोपप्रसङ्गादिति चेत्; इष्टं चेष्टितम्; स्वर्गादावपि भगवतस्तद्वचने तदभावादेव अविप्रलम्भप्रतिपत्तेः। न हि तत्रापि

१ न सति वचनस्य प्रा—आ०, व०, प०। २ —भ्रान्तो भावा—ता०। ३ भवति वि—आ०, व०, प०। ४ बाधकप्रत्ययाभावादेव।

तद्वचनस्य प्रत्यक्षादिना बाधनम्; तस्यातद्विषयत्वात्। यदि हि प्रत्यक्षादेः स्वर्गादिविषयत्वं भवत्यपि तेन तस्य बाधनम्—'अयमन्यथा स्वर्गादिरन्यथा चानेन प्रतिपादितः' इति, न चैवम्, तस्यात्यन्तपरोक्षत्वात्। नापि शास्त्रेण; तस्यापि तदवयवस्य पूर्वापरभागभाविनः परस्परविरोधिन एव प्रतिपत्तेः। शास्त्रान्तरमपौरुषेयं तस्य बाधकम् अन्यथैव तेन स्वर्गादेरभिधानादिति चेत्; न; तदसम्भवास्य (वात् अस्य) सम्भवतोऽप्यगुणवद्वक्तृत्वेनाप्रामाण्यस्य निवेदनात्। 'कीदृशात् पुनर्बाधकाभावात् तद्वचने विश्वासः? तात्कालिकादिति चेत्; न; प्रत्यागमेऽपि तत्सम्भवात्। सार्वकालिकादिति चेत्; न तर्हि बहुनाऽपि कालेन तद्विश्वासः परापरकालभावितदभावप्रतीक्षायामेव संसारस्योपक्षयात्' इत्यपि न केवलं प्रवचनप्रामाण्यं प्रतिरुणद्धि प्रत्यक्षादावप्यस्याविशेषात्। सत्यम्, अत एवाविचारसहमपि, तत्प्रामाण्यं व्यवहारादभ्युपगम्यते **"प्रामाण्यं व्यवहारेण"** [प्र० वा० १।७] इति वचनादिति चेत्; किं पुनस्तदभ्युपगमस्य फलम्? तन्निबन्धनो व्यवहार एवेति चेत्; न तर्हि शास्त्रमर्थवत्, तस्योभयस्यापि लोकव्यवहारादेव प्रतिपत्तेः। न सर्वस्य ततस्तत्प्रतिपत्तिः केषाञ्चिद् व्यामोहात्, अत एव परस्परविरुद्धं तेषां तल्लक्षणप्रणयनम्। तदुक्तम्—

"न सर्वो व्यवहारेण प्रामाण्यमवगच्छति।
प्रमाणलक्षणं तेन परस्परविरोधवत्॥" [प्र० वार्तिकाल० १।७] इति।

ततो यथावस्थितव्यवहारोपदर्शनेन तद्व्यामोहव्यवच्छेदाय फलवदेव शास्त्रम्, **"शास्त्रं मोहनिवर्तनम्"** [प्र० वा० १।७] इति वचनादिति चेत्; का पुनस्तदनिवर्तने परिग्लानिः? प्रमाणसाध्यस्य पुरुषार्थस्याप्राप्तिरेव, अनिवर्तितव्यामोहात् प्रमाणात्तदनुपपत्तेरिति चेत्; न; तद्विपरीतस्यापि तस्य विचारासहत्वेन ततस्तात्त्विकस्य पुरुषार्थस्यासिद्धेः, अन्यथा तदसहत्वविरोधात्। अतात्त्विकस्य विभ्रमोपदर्शितकलधौतकलशराशिवदशक्यैव प्राप्तिरिति न किञ्चिद्व्यामोहनिवर्तनेन यतस्तदर्था शास्त्रप्रवृत्तिः। अपि च, अविचारसहस्यापि यदि प्रत्यक्षादेर्व्यवहारात् प्रामाण्यं प्रवचनस्यापि स्यात्। न हि व्यवहारी क्वचिदाप्तवचनं न प्रमाणयत्येव, बहुलं ततोऽपि तद्विषये प्रवृत्त्यादिव्यवहारस्योपलम्भात्। अक्षोदक्षमत्वान्न तत्र तत्क्षममिति विलक्षणभाषितम्, अस्याक्षादावपि तुल्यत्वात्। मा भूत्तदपि प्रमाणम्, अद्वैतसंवेदनस्यैव तत्त्वतः प्रमाणस्योपगमात्, शास्त्रस्यापि तन्निरूपणार्थत्वादिति चेत्; कस्य पुनः शास्त्रेण तन्निरूपणम्? विनेयस्येति चेत्; उच्यते—

विनेयस्तदनन्यश्चेत् व्यर्थं शास्त्रं ततो गतेः।
अन्यश्चेत् कथमद्वैतं विरोधेनोपपीडनात्॥१६७७॥
अन्यः कल्पनयैवासौ न तत्त्वेनेति चेत् कथम्।
कल्पनाऽपि तदद्वैते तदन्या शक्यकल्पना॥१६७८॥
साऽपि कल्पनयैवान्या न तु वस्तुत इत्यपि।
दुर्मतं दुर्विदग्धानामनवस्थोपबृंहणात्॥१६७९॥

---

१ तदसम्भवस्य सं-ता०। २ -णत्वोप-प०।

तत्त्वान्यत्वविकल्पाभ्यामवक्तव्यैव कल्पना ।
अवस्तुत्वाद्विकल्पस्य वस्तुनैव (वस्तुन्येव) च सम्भवात् ॥१६८०॥
इति चेत्तदवाच्यत्वविकल्पेऽपि कथं तदा ।
तत्र यत्तव शोभेत तदवाच्यत्ववागियम् ॥१६८१॥
कथं वा कल्पितस्यास्ति शास्त्रेण प्रतिबोधनम् ।
किं वन्ध्यासुतबोधार्थं शास्त्रं किमपि वीक्षितम् ? ॥१६८२॥

तन्नाद्वैतनिरूपणं शास्त्रात् । प्रत्यक्षादेस्तु ततो निरूपणे विचारसहमेव तदेष्टव्यम्, अन्यथा तद्वैयर्थ्यात् । तत्र यदि वचनं तत्प्रणेतरि विप्रलम्भनशङ्कनात् न प्रमाणं प्रत्यक्षादिकमपि न भवेत्, तद्धेतावक्षादावपि तच्छङ्कनाविशेषात् । एतदेव त्रिभिरन्तरश्लोकैः व्याचिख्यासुराह—

परीक्षाक्षमवाक्यार्थपरिनिष्ठितचेतसाम् ।
अदृष्टदोषाशङ्कायाममानं सकलं भवेत् ॥१६॥ इति ।

परीक्षां प्रसिद्धप्रत्यक्षादिरूपां क्षमत इति **परीक्षाक्षमः** स चासौ **वाक्यस्य** प्रवचनस्यार्थो जीवादिस्तत्र **परिनिष्ठितं** परि समन्तान्निष्ठितमचलप्रवृत्तिकं **चेतो** ज्ञानं येषां तेषां भगवताम् **अदृष्टे** प्रत्यक्षाद्यविषये धर्मतत्कारणादौ **अदृष्टस्य** वा तद्विषयस्य **दोषस्याशङ्कायां** पुरुषाणां विचित्राभिसन्धित्वेन प्रत्यक्षादिविषये विप्रलम्भासम्भवेऽप्यतद्विषये तत्सम्भवस्यारेकायाम् **अमानमप्रमाणं सकलं** प्रत्यक्षमन्यद्वा **भवेत्** तत्कारणेऽपि चक्षुरादावदृष्टपूर्वे तद्विषये तदाशङ्कनस्यानिवृत्तेः । अथ प्रत्यक्षादौ निश्चितप्रामाण्यतदन्तरसादृश्यविशेषात् विशेषप्रतिपत्तेर्न तत्कारणेषु तदाशङ्कनम्, प्रवचनेऽपि समानमेतत्—तत्रापि प्रत्यक्षानुमेयविषयनिश्चितप्रामाण्यतदन्तरसदृशभावप्रतिपत्तेरविशेषात् । एतदेवाह—

प्रत्यक्षागमयोरिष्टं प्रामाण्यं गुणदोषयोः ।
दर्शनादर्शनाध्यासात् क्वचिद् वृत्तसमत्वतः ॥ १७ ॥ इति ।

प्रत्यक्षमित्यनुमानस्यापि ग्रहणं तत्पूर्वकत्वात् तच्च **आगमश्च** तयोः **क्वचित्** अपूर्वार्थेऽत्यन्तपरोक्षे च **प्रामाण्यमिष्टं** युगपद्वचनं तयोस्तुल्यत्वप्रतिपादनेन प्रवचनस्याप्रामाण्ये प्रत्यक्षादेरपि तदवश्यमिति प्रतिपादनार्थम् । कुतस्तयोः प्रामाण्यम् ? **वृत्तेन** प्रमाणतया निश्चितेन तदन्तरेण समत्वात् । तदेव कुत इति चेत् ? **गुणदोषयोर्ये दर्शनादर्शने** तयोरध्यासात् । यथैव हि अपूर्वार्थे प्रत्यक्षादौ तस्य तत्कारणस्य वा गुणदर्शनाद्दोषस्य चादर्शनात् प्रामाण्यम्, एवं प्रवचनस्यापि तदेपितव्यमित्यर्थः । नं प्रत्यक्षादौ गुणकृतं प्रामाण्यं तत्कारणे तदभावादिति चेत्; न; तस्याप्यञ्जनसंस्कारादेस्तत्रोपलम्भात् । सताऽपि तेन दोष एवापोद्यते न प्रामाण्यमापाद्यते, दोषाभावादेव प्रामाण्यस्यौत्सर्गिकस्यैवापत्तेरिति चेत्; उच्यते—यदि न तेन तस्यापवादः किं स्यात् ? अप्रामाण्यमिति चेत्: न;

---

१ -शङ्किनां न आ०, ब०, प०। २ वाक्यस्य-आ०, ब०, प०। ३ भगवद्विषयस्य। ४ -ऽभास-आ०, ब०, प०। ५ सकलम्-आ०, ब०, प०। ६ युगपच्च-आ०, ब०, प०। ७ -स्तुल्यकृत्व-आ०, ब०, प०। ८ मीमांसकः प्राह।

प्रामाण्यकारणे समर्थे सति तदनुपपत्तेः । अप्रामाण्यदोषोऽपि समर्थ इति चेत् ; युगपत्तर्हि तदुभयं प्राप्नुयात् ।

तथा च भ्रान्तविज्ञानात्तदर्थे वृत्त्यवर्त्तने ।
युगपत् प्राप्नुयातां ते प्रमाणत्वेतरत्वतः ॥१६८३॥
अक्षादिकं प्रमाणत्वे दोषे यदि न शक्तिमत् ।
ज्ञानं कथं तदा तस्मादप्रामाण्यं यदाश्रयम् ? ॥१६८४॥
प्रामाण्ये तस्य सामर्थ्यं नष्टं न ज्ञानजन्मनि ।
यदि स्वतः प्रमाणत्वं तदा तस्योच्यतां कथम् ? ॥१६८५॥
ज्ञानसामर्थ्यतो भावि प्रामाण्यं चेत् तदा भवेत् ।
स्वतो यदन्यतः शक्तिस्तदा तत्परतो न किम् ? ॥१६८६॥
सामर्थ्यात् परतस्तच्चेत् गुणतः परतो न किम् ? ।
यतो गुणेभ्यो दोषाणामपवादः प्रकल्प्यते[2] ॥१६८७॥

सति[3] च ततस्तदपवादे गुणत एव प्रामाण्यं तदपवादस्यैव गुणत्वात् । न तस्य तत्त्वमभावरूपत्वाच्चेत्; तर्हि नियमवैकल्यस्यापि हि हेतोर्न दोषत्वमिति कथमनुमानाभावस्य प्रामाण्यमपि दोषतः स्यात् ? तद्वैकल्यस्य दोषत्ववद् गुणत्वमपि तदपवादस्येति तत एव प्रामाण्यं न स्वतः ।

ततो गुणादिदृष्ट्यादेरध्यक्षादिवदञ्जसा ।
प्रामाण्यमागमेऽपीति सूक्तमुक्तं स्वयं बुधैः ॥१६८८॥

न हि प्रवचनकारणैर्गुणस्य तदर्थज्ञानस्य दोषस्य रागादेरसिद्ध एव दर्शनादर्शनाध्यासो निर्बाधत्वेन तत्सिद्धेः । तथा हि—यत्स्वविषये निर्बाधं वचनं तद्गुणवन्निर्दोषकारणकं यथा किञ्चिज्ज्ञलक्षैत्यादिविषयमस्मदादिवचनम्, तथा च विवादापन्नं प्रवचनम् । न चेदमसिद्धमेव प्रत्यक्षादिना तद्विषये प्रवचनेन तदगोचरे तस्य बाधनात् । तदेवाह—

तज्ज्ञानपूर्वकं तर्क्यमनुज्ञानसमीक्षितम् । इति ।

तज्ज्ञानं गुणवन्निर्दोषज्ञानं **तत्पूर्वकं** प्रवचनमनुमानेन **समीक्षितं** सम्यगवलोकितम् । तदेव कुतः ? **तर्क्यं** तर्कज्ञानवेद्यं यत इति । न हि यन्निर्बाधं वचनं तदुक्तज्ञानपूर्वकमिति तर्काभावे सम्भवत्यनुमानमिति भावः ।

यत्पुनरत्र प्रज्ञाकरचोद्यम्—

"बाधकस्य पुरो भावः सर्वविज्ञानसम्भवी ।
परं तु बाधकाभावः तत्राप्याकाङ्क्ष्यते न किम् ? ॥ [प्र० वार्तिकाल० १।१] इति;

---

१ "यदा स्वतः प्रमाणत्वं तदान्यत्रैव गृह्यते" –मी० श्लो० चोदना० श्लो० ५२ । २ "तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः । अप्रामाण्यदृशस्तस्य..."– मी० श्लो० चोदना० श्लो० ६५ । ३ "अथ गुणतो दोषापवादमभ्युपगम्याह"—ता० टि० । ४ तज्ज्ञान– आ०, ब०, प० ।

तन्न युक्तम्; परापरसकलकालभाविनो बाधाविरहस्य प्रथमत एव तर्कज्ञानबलेनाध्यवसायात् तद्विषयपरापराशंसानुपसर्पणेनानवस्थादोषानुत्पत्तेः साधनासिद्धिकल्पनस्यानवकाशात् । न तर्कादप्यप्रमाणात् प्रवचनस्य बाधाविरहनिश्चयोऽतिप्रसङ्गात्, प्रामाण्यं च तस्य निर्बाधनत्वात्, तदप्यन्यतस्तर्कात्, तत्राप्येवं कल्पनायामनवस्थानात् कथं प्रवचने तद्विरहनिश्चयो यतो यथोक्तसाध्यसिद्धिरिति चेत् ? अत्राह— ५

मानं वस्तुबलादेव [सर्ववस्तुनिबन्धनम्] ॥ १८ ॥ इति

मानं प्रमाणं तर्क इति तर्क्यग्रहणेन तर्कस्याक्षेपात् । वस्तुशब्देन च स एव तर्क्य उच्यते तस्य **बलं** सामर्थ्यं तत इति । एतदुक्तं भवति—

निर्बाधत्वं हि तर्कस्य वेद्यते चेत् तदन्यतः ।
अनवस्थानदोषः स्यान्नैवं तस्य स्वतो गतेः ॥ १६८९ ॥ १०
इत्थमेतदवश्यं च प्रपत्तव्यं मनीषिणाम् ।
वितर्कमिच्छतां नो चेत् वितर्को नावतिष्ठते ॥ १६९० ॥
विना च न वितर्केण किञ्चिदिष्टं प्रसिद्ध्यति ।
मानमेव व्यवस्थायाः तत्प्रसादादवस्थितेः ॥ १६९१ ॥

ततो युक्तं वस्तुबलादेव मानं तर्क इति । तस्य स्वरूपमाह—**'सर्ववस्तुनिबन्धनम्'** १५ इति । **सर्वं** निरवशेषं **वस्तु** साध्यसाधनभावाभिमतं **निबद्ध्यते** विषयत्वेन यस्मिन् तत्तथोक्तम्, अन्यथा अनुमानानुपपत्तेरिति । निरूपितं चैतत् । अथवा **वस्तु** प्रवचनं तस्य **बलं** ततः, **मानं** तदेव प्रवचनम्, न पुनर्निर्दोषगुणवज्ज्ञानपूर्वकत्वात्, तस्यैव तत्रापौरुषेयत्वेनासम्भवादिति मतं मीमांसकस्य । तत्रेदं दूषणम्—**'सर्ववस्तुनिबन्धनम्'** इति । **सर्वं** प्रवचनप्रतिपाद्यं विधिनियोगभावनाद्यनेकविकल्पं **वस्तु** तन्निबन्धनं तद्विषयं **मानं** भवेत् प्रवचनम् । कथं हि नाम सर्वस्यापि २० विध्यादेस्ततः प्रतिपत्तौ तदन्यतमस्यैव तदर्थत्वम् ? तस्यैव निःश्रेयसहेतुत्वादिति चेत्; कुत एतत् ? वेदादेवेति चेत्; न; तेन हि तदपरत्रापि तद्धेतुत्वप्रतिपादनात् । सम्प्रदायादिति चेत्; न; सम्प्रदातुरसर्वदर्शित्वे ततोऽपि तदनुपपत्तेः । सर्वदर्शित्वे तु कथं पुरुषगुणस्याभावः प्रवचने येन तत्कृतमेव प्रामाण्यं न भवेत् ? ततो युक्तं यथोक्तज्ञानपूर्वकत्वं प्रवचनस्य । यदि अपौरुषेयस्यापि पुरुषविशेषगुणबलादेवार्थतत्त्वनिश्चयः प्रवचनस्य पौरुषेयत्वमेव किन्न भवति ? इति मन्वान आह— २५

आगमः पौरुषेयः स्यात् प्रमाणमतिलौकिके । इति ।

आगच्छति गुरुपर्वक्रमेणागमयत्यनेन संसारतत्कारणादितत्त्वमिति वा **आगमः** प्रवचनं स **पौरुषेयः** पुरुषकृतः **स्यात्** भवेत्, तत्र पुरुषगुणसम्बन्धस्य सर्वथा परिहर्तुमशक्यत्वात्, अत एव च **प्रमाणम्** । यदि प्रत्यक्षादिविषये सिद्धसाधनमिति चेत् ; न; **अतिलौकिके** लोके जातं लौकिकं प्रत्यक्षादि तदतिक्रान्तम् **अतिलौकिकम्** अत्यन्तपरोक्षं तत्रेति । कुत एतदिति चेत् ? अत्राह— ३०

---

१ –त्तर्कादेस्त– प० । २ तर्क्यप्रमाणेन आ०, द०, प० । ३ –नं पौ–आ०, द०, प० । ४ "तर्हि"–ता० टि० । ५ ज्ञातं आ०, द०, प० । ६ "जाते इति सूत्रेण जातार्थे ठक्"–ता० टि० ।

संवादासम्भवाभावात् [समयाविप्रलम्भने] ॥ १९ ॥ इति ।

संवादः अर्थतथाभावः तस्याऽ**सम्भवः** तस्य**ाभावात्** संवादभावादिति यावत् । नेदानीं तत्र तद्भावोऽनुपलम्भात्, कालान्तरभाविनश्च ततः कथमिदानीं प्रामाण्यनिर्णयो यतः प्रवृत्तिरिति चेत् ? प्रत्यक्षादौ कथम् ? तत्रापि पश्चादेव तद्भावात् । अत एव अनिर्णीतप्रामाण्यादेव ततः प्रवृत्तिरिष्यते तद्विषयस्य जलादेरप्राप्तावपि पीडाबाहुल्याभावात् । न चैवं प्रवचनादपि [1]तादृशादेव तपश्चरणादौ प्रवृत्तिकल्पनमुपपन्नम् । [2]तद्बाहुल्यावलोकनादिति चेत्; न; तस्य प्रत्यक्षादावपि तुल्यत्वात् । तथा हि—

अर्कक्षीरादजक्षीरमविविच्यैव यः पिबेत् ।
तस्य भूयान् परिक्लेशः किं त्वया नावलोक्यते ॥ १६९२ ॥
हारसर्पविभागेन दीर्घं किञ्चिदनिश्चितम् ।
कण्ठे समासजन्मर्त्यः किन्न मृत्युमपि व्रजेत् ? ॥ १६९३ ॥

ततो यथा तत्र पश्चाद्भाविनोऽपि तद्भावस्य कारणपरिशुद्धिज्ञानादध्यवसाये ततः प्रागेव तन्निर्णयः तथा प्रवचनेऽपि । तदेवाह—**'समयाविप्रलम्भने'** इति । **समयः सम्** समीचीनः प्रवचनहेतुः **अयो** बोधस्तस्य **अविप्रलम्भनम**विप्रतीसारः तस्मिन्, **'संवादासम्भवाभावात् आगमः प्रमाणमतिलौकिके'** इति ।

स्यान्मतम्[3]—यदि क्वचित् सर्वज्ञः सम्भवति भवत्यपि तदा तज्ज्ञानपूर्वकत्वेन प्रवचनस्याविसंवादसम्भवः, न चैवं प्रमाणाभावात् । न हि तत्र प्रत्यक्षं प्रमाणम्; तस्यासर्वविषयत्वे तेन तज्ज्ञत्वस्य क्वचिदप्रतिवेदनात्, विषयिप्रतिपत्तेः विषयप्रतिपत्तिमन्तरेणानुपपत्तेः । सर्वविषयत्वे तु तत्प्रत्यक्षवतोऽपि सर्वज्ञत्वम् । तथा तमप्यन्यस्य प्रत्यक्षादवगच्छतः सर्वज्ञत्वमिति सर्वज्ञमेकमन्विच्छतः सर्वज्ञबहुलत्वमव्याहतप्रवाहमापद्येत । तदुक्तम्—

"सर्वज्ञोऽयमिति ह्येवं तत्कालेऽपि बुभुत्सुभिः ।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥
कल्पनीयाश्च सर्वज्ञा भवेयुर्बहवस्तव ।
य एव स्यादसर्वज्ञः स सर्वज्ञं न बुद्धयते ॥"
[मी० श्लो० चोदना० श्लो० १३४—१३५] इति ।

प्रत्यक्षाभावे[4] च नानुमानम्; तस्य प्रत्यक्षतः साध्यसाधनसम्बन्धप्रतिपत्तौ सत्यामेवोत्पत्तेः । साध्यस्य च सकलवेदिनः प्रत्यक्षेणाग्रहणे ततस्तल्लिङ्गसम्बन्धस्याशक्यप्रतिपत्तिकत्वादिति, तदतिदुर्मतम्; प्रत्यक्षाविषयेऽपि तस्मिन्ननुमानप्रवृत्तेः "**परोक्षोऽपि**"[5]इत्यादिना[6] प्रतिपादनात् ।

यदपि परस्य दुर्विलसितम्—प्रत्यक्षादेः प्रमाणपञ्चकस्य वस्तुसत्तावबोधकस्य सर्ववे-

---

१ अनिर्णीतप्रामाण्यादेव । २ पीडाबाहुल्यक । ३ मीमांसकस्य । ४ —वे नानु—आ०, ब०, प० । ५ "गृहीतसम्बन्धस्यैकदेशदर्शनादभिलप्तेऽर्थे बुद्धिरनुमानमिति मीमांसकाः ।"—ता० टि० । ६ न्यायवि० श्लो० ३।३ ।

दिन्यप्रवृत्तेः तदप्रवृत्तिलक्षणादनुपलम्भात् अभाव एव तस्येति; तत्र न तावत्तस्याभावो नीरूप एव; तस्य प्रमाणाविषयत्वात्। न ह्यसौ अतद्रूपादव्यावृत एव तद्विषयः, तदतद्विभागाभावापत्तेः। व्यावृत्तश्चेत्; न; व्यावृत्तिशक्तिवैकल्ये तदनुपपत्तेः। तच्छक्तिभावे च नीरूपत्वव्यापत्तेः, शक्तिप्रधानरूपत्वात् भावानाम्। भवतु पर्युदासवृत्त्या किञ्चिज्ज्ञत्वमेव तदभाव इति चेत्; तदपि न प्रतिनियतपुरुषाधिष्ठानम्, तस्य तदभावत्वेनाभीष्टत्वात्। सकलदेशकालवर्तिपुरुषपरिषदधिष्ठानस्य तु तस्य कथं निरवशेषतत्परिज्ञानविकलेन प्रतिवेदनम्? अधिष्ठानप्रतिवेदन एवाधिष्ठेयप्रतिवेदनोपपत्तेः। तत्परिज्ञानवत्त्वे तु कस्यचित् कथन्न तस्यैव निरुपद्रवं सकलवेदित्वमापद्येत यतः "सर्वज्ञोऽयमिति ह्येवम्" [मी० श्लो०] इत्यादि मीमांसकस्य परत्र चिन्तितं दूषणं स्वगृहं प्रत्युपगतं न भवेत्। तन्नानुपलम्भादपि अभावापरनामधेयात् सर्वत्र सर्वदा सर्वज्ञाभावसाधनमुपपन्नम्। किञ्च, अयमनुपलम्भो वादिनः स्वस्य वा भवेत्, सर्वस्य वा गत्यन्तरासम्भवात्? तत्रोभयत्रापि दोषमावेदयन्नाह—

सकलज्ञस्य नास्तित्वे स्वसर्वानुपलम्भयोः।
आरेकासिद्धते तस्याप्यर्वाग्दर्शनतोऽगतेः ॥२०॥ इति।

न हि सर्वज्ञाभावसाधने स्वानुपलम्भस्य गमकत्वम्; तस्य परचेतोवृत्तिविशेषे सत्यपि भावेन व्यभिचारिणः संशयहेतुत्वात्। न हि तत्र नियोगतः प्रत्यक्षादीनामन्यतमस्य प्रवृत्तिरेव, प्रथमदर्शन एव तदवधारणात् 'मूर्खोऽयं पण्डितो वा' इत्यादिविमर्शाभावापत्तेः। न चानवधारितोऽपि सँ नास्त्येव, पुनः कुतश्चित् कार्यविशेषात् तदस्तित्वस्य निर्णयात्। नापि सर्वसम्बन्धिन; तस्यैवासिद्धेः। तदेवाह—**'तस्याप्यर्वाग्दर्शनतोऽगतेः'** इति। **तस्यापि** सर्वसम्बन्धिनोऽनुपलम्भस्यापि, **अपि** शब्दान्न केवलं सर्वज्ञस्य **अगतेः** अगतिश्च **तस्यार्वाग्दर्शनतः**। अर्वाचो हि वस्तुभागस्य दर्शनमस्मदादिप्रत्यक्षं तत्कथं तस्य सर्वविषयत्वं यतः सर्वसम्बन्धिनोऽनुपलम्भस्य ततोऽवगतिः।

यत्पुनरत्रानुमानम्—सर्वेऽपि सर्वज्ञं नोपलभन्ते पुरुषत्वादे रथ्यापुरुषवदिति; तदपि न सम्यक्; सर्वेषामर्वाग्दर्शनतोऽनवगमेन हेतोराश्रयासिद्धेः। न चास्ति पुरुषत्वादेः सर्वज्ञत्वोपलम्भेन विरोधः, सोऽर्वाग्दर्शिनि सम्भवन्नपि न सर्वज्ञे स्यात्, तेनात्मनोऽन्यस्य च सर्वज्ञतया दर्शनसम्भवात्। स एव नास्तीति चेत्; न; अन्यतः तन्नास्तित्वेऽनुपलम्भस्य वैफल्यापत्तेः। तत एव सर्वसम्बन्धिन इति चेत्; न; परस्पराश्रयात्—सिद्धे तन्नास्तित्वे तदनुपलम्भस्य ततोऽपि तन्नास्तित्वस्य सिद्धेः। अतो नानुमानादपि सिद्धिस्तदनुपलम्भस्येति न तस्मादभावः सर्वज्ञस्य।

नापि वक्तृत्वादेः; द्वितीयप्रस्तावे तन्निषेधस्याप्यभिहितत्वात्। भावस्तु तस्यानुमानतो निरूपितो निरूपयिष्यते च। कथं पुनः सर्वज्ञविज्ञानस्याक्षजत्वे सूक्ष्मान्तरितदूरगोचरत्वमस्मदादि-

---

१ –वृत्तेश्चेत् आ०, ब०, प०। २ –पपरीक्षाधि–आ०, ब०, प०। ३ संशयाभावापत्तेः। ४ परचेतोवृत्तिविशेषः। ५ –ज्ञसम्बन्धिनस्तस्यैवासिद्धेः य–आ०, ब०, प०। ६ –लम्भेन वि–आ०, ब०, प०। ७ –धस्ततोऽर्वाग्द–आ०, ब०, प०। ८ –दर्शिन्यसंभवान्नापि सर्वज्ञे आ०, ब०, प०। ९ सत्त्वादि–आ०, ब०, प०।

प्रत्यक्षवदिति चेत् ? कथं गृद्धवाराहादिप्रत्यक्षस्य ? तस्यास्मदादिप्रत्यक्षविलक्षणत्वेन तद्धर्मयोजनस्यासम्भवादिति चेत्; न; सर्वज्ञप्रत्यक्षस्यापि तद्विलक्षणत्वाविशेषात् । कथमेवमपि एकेन्द्रियोपजनितस्यैव तस्याशेषेन्द्रियार्थविषयत्वं गृद्धवराहादौ तस्य स्वविषयानतिक्रमेणैव दूरसूक्ष्माद्यवलोकनातिशयभावात् नेन्द्रियान्तरविषयनिरूपणेनेति चेत् ? इन्द्रियजत्वाविशेषे स एव तदतिशयः कस्मात् ? तदीयादिन्द्रियशक्तिविशेषादिति चेत्; तर्हि तत एव सार्वज्ञं प्रत्यक्षमिन्द्रियान्तरार्थविषयमपि भवेत् । नन्विदमनुपपन्नम्, शक्तिविशेषादपि स्वार्थानतिलङ्घनेनैवेन्द्रियज्ञानस्यातिशयोपपत्तेरिति चेत्; स्वेन्द्रियानतिलङ्घनेनैवेत्यपि भवेत् । तथा चेत्, न; सत्यस्वमादावन्यथाऽपि तदतिशयदर्शनात् । तदतिलङ्घने वा स्वार्थातिलङ्घनमप्यविरुद्धम्, अत एव 'चक्षुःश्रवसो भुजङ्गाः' इति कविप्रवादोऽपि । ततो दुर्भाषितमिदम्—

"यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
दृष्टं सम्प्रति लोकस्य तथा कालान्तरेऽप्यभूत् ॥
यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितः ॥"

[मी० श्लो० चोदना० श्लो० ११३–१४] इति ।

किमर्थं तर्हि तत्रेन्द्रियभेदपरिकल्पनम् एकस्मादेव तस्मात् सकलेन्द्रियार्थप्रतिपत्तेरिति चेत् ? न; कदाचिदतः (ततः) कदाचिदन्यतः कदाचित्ततः सर्वादपि तत्प्रतिपत्तेः । अन्यथाऽस्मदादौ वामेतरनयनभेदोऽपि न भवेत् प्रयोजनभेदाभावात् । तथापि स्वहेतुबलायातस्तद्भेदो भवत्येवेति समानं भवेदिन्द्रियाभेदेऽपि । केवलमभ्युपगम एवायं न च तस्याक्षजत्वमिप्रेतं जैनस्य । "बहिरन्तरप्युभयथा च करणमविघाति नार्थकृत् ।" [बृहत्स्व० श्लो० १२९] इत्यायात् । कथं तर्हि तत्र प्रत्यक्षव्यपदेशः तस्याक्षप्रतिगमानादेवोपपत्तेरिति चेत् ? न; तस्य व्युत्पत्तिमात्रनिमित्तत्वात्, वैशद्यस्यैव तदुपलक्षितस्य प्रवृत्तिनिमित्तत्वात्, सति तस्मिन् तदभावेऽपि गोत्वादेव गोव्यपदेशवत् । वैशद्यमपि तत्प्रतिगमनादेव रूपादिवेदने दृष्टं तत्कथं तदभावेऽपि चेत् ? आस्तामेतत्, कथं पुनरिन्द्रियनिरपेक्षं न प्रत्यक्षम् ? तद्भावभावनियमस्य दर्शनादिति चेत्; तत एव आलोकनिरपेक्षमपि न भवेत् । भवत्येव जातिविशेषाणां संस्कृतचक्षुषां च तदभावेऽपि तत्प्रतिपत्तेरिति चेत्; समानमन्यत्र, सुखादिवेदनस्येन्द्रियाभावेऽपि प्रतिवेदनात् । तदपि तदपेक्षमेव प्रत्यक्ष-

---

१ प्रत्यक्षस्य । २ एतदति–ता० । ३ –यविशे–आ०, ब०, प० । ४ इन्द्रियात् । ५ कदाचित्ततः आ०, ब०, प० । ६ सर्वस्मादपि आ०, ब०, प० । ७ सर्वज्ञज्ञानस्य । ८ "अभ्युपगम्य चाक्षजत्वं सर्वज्ञज्ञानस्यातीन्द्रियार्थसाक्षात्कारित्वं समर्थितं नार्थतः, तज्ज्ञानस्य घातिकर्मचतुष्टयक्षयेद्भूतत्वात् ।"–प्रमेयक० पृ० २५९ । ९ "अक्षाश्रितत्वञ्च व्युत्पत्तिनिमित्तं शब्दस्य न तु प्रवृत्तिनिमित्तम् । अनेन तु अक्षाश्रितनैकार्थसमवेतमर्थसाक्षात्कारित्वं लक्ष्यते तदेव च शब्दस्य प्रवृत्तिनिमित्तम् ।"–न्यायवि० टी० प्र० ११ । न्यायकुमु० पृ० २६, टि० २ । १० –क्षं प्र–आ०, ब०, प० । ११ तद्भावाभाव–आ०, ब०, प० । १२ "नक्तञ्चराणां मार्जारादीनाम्"–ता० टि० । १३ सुखादिवेदनम् ।

त्वात् रूपादिप्रत्यक्षवदित्येतत् नक्तञ्चरादिप्रत्यक्षस्यालोकापेक्षत्वमपि व्यवस्थापयेत्। प्रतीतिबाधनान्नेत्यपि तुल्यमन्यत्रापि[1]।

किञ्च तदिन्द्रियं यतः सुखादिवेदनम्? मन इति चेत्; क तस्य सम्प्रयोगः[2]? सुखादावेवेति चेत्; न; अनुत्पन्ने तस्मिन् तदयोगात्। उत्पन्नेऽपि वैयर्थ्यात्, तदुत्पत्तावेव तदनर्थान्तरतया तत्प्रत्यक्षस्याप्युत्पत्तेः। अथ तत् तद्विषयादर्थान्तरं तत्त्वात् रूपादिप्रत्यक्षवदित्युच्यते; तन्न; अभेदानुभवेन पक्षस्य बाधनाद्धेतोश्च तत एव कालात्ययापदिष्टत्वात्। किञ्च,

यदि तद्वेदनात् पूर्वमस्ति पुंसः सुखादिकम्।
किन्न संह्लादतापादिलिङ्गं तद्वपुषीक्ष्यते ॥१६९४॥
कार्यस्य नियमाभावान्न चेदनियमान्न किम्।
न चैवं वेदनात् पूर्वं[3] कदाऽपि तदवीक्षणात् ॥१६९५॥
न ह्यवेदयतो ह्लादं रोमहर्षादिसम्भवः।
नापि ताप[4] परिम्लानवदनत्वादि दृश्यते ॥१६९६॥
अथार्थं तत्स्वभावो यज्ज्ञातमेव स्वकार्यकृत्।
ज्ञानात्मैव तदा ह्लादतापादिः परिकल्प्यताम् ॥१६९७॥
सत्येव तस्मिन् तत्कार्यादन्यथा त्वव्यवस्थितेः।
रूपं नीलादितोऽप्यन्यदेवमप्यवकल्पनात् ॥१६९८॥
तन्न भिन्नं सुखादेस्तत्प्रत्यक्षमुपपत्तिमत्।
[5]जातिरिन्द्रियतो यस्य भवता परिकल्प्यते ॥१६९९॥

ततो युक्तं सुखादिप्रत्य[क्ष]वदक्षनिरपेक्षं सार्वज्ञमपि प्रत्यक्षं बाधकाभावात्।

'यद्येवमात्मनिरपेक्षमपि तद्भवेत्, को वा नियमहेतुः यत्करणत्वाविशेषेऽपि तस्येन्द्रियादावेवानपेक्षत्वं नात्मनि' इत्यपि न चोद्यम्; उपादानत्वेन[6] नियमात्। न ह्युपादाननिरपेक्षं किमपि कार्यमुपलब्धपूर्वं यतः प्रत्यक्षमपि तथाऽवकल्प्येत। उपादानहेतुश्च तस्यात्मैव न चक्षुरादिकम्, प्रतिसन्धानाभावप्रसङ्गात्। अस्ति च प्रतिसन्धानम् 'अहमेव रूपदर्शी रसादिकमप्यनुभवामि' इति। न चेदं चक्षुराद्युपादानत्वे सम्भवति; सन्तानान्तरवत् चक्षुरादेर्भेदात्। एकशरीरात्मकत्वात् अभेदोऽप्यस्त्येवेति चेत्; शरीरभेदे न भवेत्। अस्ति च पूर्वशरीरानुभूतस्याप्युत्तरशरीरे प्रत्यभिज्ञानम्—'य एव पूर्वजन्मनि क्षत्रियो जातः स एवाधुना ब्राह्मणोऽस्मि' इति। तन्न शरीरादेः तदुपादानत्वमुपपन्नं यतस्तदभावे तन्न भवेत्। सहकारित्वे तु नायं नियमः सत्यस्वप्नादौ तदभावेऽपि तस्य दर्शनात्। उपादानत्वेऽपि कथं नियमो बीजाद्यभावेऽपि कदल्यादेः कन्दादौ दर्शनादिति चेत्; न; तादृशस्याऽसम्भवात्। न हि यादृशं कदल्यादिबीजादेरुपादानात् तादृशं कन्दादेरपि, तद्विलक्षणस्यैव तस्य

१—मत्रापि आ०, व०, प०। २ "सन्निकर्षः"—ता० टि०। ३ "क्षवेदयतः"—ता० टि०। ४ सत्का—ता०। ५ "उत्पत्तिः, जातिः सामान्यजन्मनोः"—ता० टि०। ६—त्वे तत्रिय आ०, व०, प०।

तत्त्वज्ञैरवलोकनात्। अतत्त्वज्ञप्रतिपत्त्यपेक्षया तु तदनियमकल्पनमनुपपन्नम् अतिप्रसङ्गात। सहकारित्वेऽपि किमेवं न नियमः इन्द्रियज्ञानविलक्षणस्यैव सत्यस्वप्नादावपि प्रत्यक्षस्यावेक्षणादिति चेत्? किमेवं तत्र विलक्षणप्रतीतिर्योगिप्रत्यक्षे न भवति? भवत्येव, अन्यथा सत्यस्वप्नज्ञानेऽपि तदभावापत्तेरिति चेत्; तर्हि **"यज्जातीयैः प्रमाणैः"** [मी० श्लो०] इत्यादि दुरवबोध-
५ विजृम्भितं भवेत्। तन्न किञ्चिदेतत्।

कथं पुनरात्मनस्तदुपादानत्वं तस्याचेतनत्वे चिद्रूपतया परिणामासम्भवात्? न परिणामादुपादानत्वम् अपि तु समवायिकारणत्वमिति चेत्; किं पुनस्तत्कारणत्वं नाम? स्वात्मन्यारम्भ इति चेत्; कीदृशस्तस्यात्मा? नित्यो व्यापीति चेत्; न; तदारब्धस्यापि नित्यसर्वगतत्वप्रसङ्गात्, क्वचित् कदाचिच्च तस्य भावे न तदात्मन्यारम्भः स्यात्, तस्य क्वाचित्कादिरूपाभावात्, अनभ्युपगमात्।
१० अस्त्येव देशतस्तदभ्युपगम इति चेत्; न; वस्तुतो देशवत्त्वे तस्य[2] कार्यत्वेन घटादिवदनित्यत्वापत्तेः[3]। कल्पनया तद्वत्त्वे तु उपादानत्वमपि कल्पितमेवेति निरुपादानमेव तत्त्वतः प्रत्यक्षादिज्ञानमनुज्ञातं भवेत्। तन्न समवायिकारणत्वेन तस्यैव उपादानत्वमुपपन्नम्। कुतो वा नित्यः पृथिव्यादिरेव तस्य समवायिकारणं न भवेत् यतोऽयमायासः, आत्मकल्पनायाम् अचेतनत्वस्याविशेषात्? 'न
१५ पार्थिवादिपरमाणुसमवेतं ज्ञानम् अस्मदादिप्रत्यक्षत्वात्, यत्तत्समवेतं न तत्तथा यथा तद्रूपादि, तथा च ज्ञानम्, तस्मान्न तत्समवेतम्' इत्यनुमानेन प्रतिबन्धादिति चेत्; आत्मसमवेतमपि न भवेत्, तत्सर्वगतत्वादिवदेवास्मदादिप्रत्यक्षत्वाभावापत्तेः। न हि तत्सर्वगतत्वमस्मदादेः प्रत्यक्षम्, अविवादेन **"सर्वगत आत्मा सर्वत्रोपलभ्यमानगुणत्वात्"** [ ] इत्यादेरनुमानस्य वैफल्योपनिपातात्। साधनाव्यतिरेकी च दृष्टान्तः मानसप्रत्यक्षविषयतया परमाणुरूपादेरप्यस्मदादिप्रत्यक्षत्वात्, अन्यथा
२० 'यावान् कश्चिद् गुणः स सर्वोऽपि क्वचिदाश्रितः' इति व्याप्त्यपरिज्ञानात् कथमिदमनुमानम्— **"बुद्ध्यादयः क्वचिदाश्रिता गुणत्वाद्रूपादिवत्"** [ ] इति? अथास्मदादिबाह्येन्द्रियप्रत्यक्षत्वादिति हेतुः; तन्न; असिद्धत्वात्। न हि तत्प्रत्यक्षत्वं बुद्धेरस्ति शरीरदर्शनेऽपि तद्विकल्पे संशयात्। तन्नानुमानप्रतिबन्धात् ज्ञानस्य तत्परमाणुसमवायैः[4] शक्यप्रतिबन्धः, यत आत्मैव तत्र समवायहेतुरिति कल्प्येत। भवतु चेतन एवात्मा तन्नोपादानं तस्य तथापरिणामोपपत्तेरिति चेत्; तस्यापि कथञ्चन
२५ गोलकादिवत् शरीरे सर्वत्रापि दर्शनव्यापारः? तत्स्वभावस्यान्यथात्वायोगादिति चेत्; सत्यमिदम्; यदि न किञ्चिदपि तस्यावरणं भवेत्। भवति च तदस्तित्वस्यावेदितत्वात्, गोलकादौ तु तद्व्यापारः तत्र कर्मपटलस्य स्वच्छत्वेनाप्रतिरोधकत्वात्। अभिहितं चैतत्[5]—**"कथञ्चित्स्वप्रदेशेषु स्यात् कर्मपटलाच्छता"** इति। ततो युक्तमक्षानपेक्षं केवलिनः प्रत्यक्षम्, तत्र वैशद्यस्य तल्लक्षणस्य पुष्कलत्वात्। तस्य चावरणविवेकनिबन्धनत्वेन अक्षव्यापारपराधीनत्वाभावात्। एतदेवाह—

---

१ तस्याभावेन आ०, ब०, प०। २ आत्मनः। ३ -पत्तिः क-आ०, ब०, प०। ४-य-शक्यं प्रतिबन्धनं य-आ०, ब०, प०। ५ न्यायवि० श्लो० ३६१।

विज्ञानमञ्जसा स्पष्टं विप्रकृष्टे विरुद्ध्यते ।
न स्वप्नेक्षणिकादेर्वा ज्ञानावृतिविवेकतः ॥२१॥ इति ।

विज्ञानं सकलवेदनं **विप्रकृष्टे** देशकालस्वभावव्यवहिते[1] वस्तुनि **अञ्जसा** प्रवृत्तं **स्पष्टं** परिस्फुटं **न विरुद्ध्यते** । कुत एतत् ? **ज्ञानावृतेः** ज्ञानावरणस्य **विवेकतः** विश्लेषत इति । तात्पर्यमत्र-सति अवैशद्यसम्भवे [2]तेन विरुद्ध्येत, न चायमस्ति, तन्निमित्तावरणस्य तत्राभावात् , तदभावस्य च निरूपणात् । अत्रैव 'स्वप्न' इत्यादि निदर्शनम् । **स्वप्नश्च** स्वाप **ईक्षणिकाश्च** ग्रामडाकिन्यः **स्वप्नेक्षणिकास्त** आदयो यस्य समाहितचित्तादेस्तस्य **वा** तस्येव । **वा** शब्दस्येवार्थत्वात् । यथैव हि सत्यस्वप्नादौ विज्ञानं विप्रकृष्टविषयमपि स्पष्टं तदावरणविगमे तद्विरोधिनस्तदस्पष्टत्वस्याभावात् , तथा सकलज्ञविज्ञानमपीति भावः । न च सत्यस्वप्नादिज्ञानं तादृशमसिद्धमेव; कार्यतो लोकप्रसिद्धत्वात् ।

साम्प्रतं प्रतिपादितार्थसङ्ग्रहार्थं श्लोकानाचक्षाणः प्रथममात्मनो ज्ञानात्मकत्वे सर्वस्य सर्वदर्शित्वपर्यनुयोगम् आवरणविवेकवैचित्र्येण परिहरन्नाह—

ततः संसारिणः सर्वे कथञ्चिच्चेतनात्मकाः ।
तत्तत्स्वभावतो ज्ञानं सर्वत्र शबलायते ॥२२॥ इति ।

संसारिणो भवप्रबन्धानुबन्धिनो जीवाः **कथञ्चित्** न सर्वात्मना **चेतनात्मकाः** स्वपरविषयपरिज्ञानस्वभावाः । कुत एतत् ? **ततोऽनन्तरोक्ताज्ज्ञानावृतिविवेकात्** । **'कथञ्चित्'** इत्यत्रापि योज्यम् । **कथञ्चित्** केनचित् क्षयोपशमविशेषप्रकारेण भवतो न सर्वात्मना, ततः सर्वात्मनैव[3] तदात्मत्वोपपत्तेः । यत एवं **तत्तस्मात् ज्ञानं** प्रक्रमात् संसारिसम्बन्धि **सर्वत्र** सर्वस्मिन् स्वरूपे अर्थरूपे च **शबलायते** स्पष्टास्पष्टतरतमादिविविधप्रतिभासरूपतया चित्रीभवति । तदपि कुतः ? **तत्स्वभावतः** तस्य तद्विवेकस्य स्वभावः शबलज्ञानजननहेतुः शक्तिभेदस्तत इति ।

बोधावरणविश्लेषवैचित्र्ये सति जन्मिनाम् ।
भवति ज्ञानवैचित्र्यं स्पष्टास्पष्टादिरूपतः ॥१७००॥
मणौ प्रकाशवैचित्र्यं मलविश्लेषभेदतः ।
विलोकयन्तो[4] नैवात्र विवदन्ते विपश्चितः ॥१७०१॥[5]
ततो युक्तमशेषज्ञस्वभावस्यापि देहिनः ।
कथञ्चिज्ज्ञत्वमप्युक्तमुपपत्तिसमन्वयात् ॥१७०२॥

भवतु नामैवमिदम् , परं तत्र वक्तव्यम्-यत्तदावरणं तदपि चेतनमेव **"कर्मजं लोकवैचित्र्यं चेतना मानसं च तत् ।"** [अभिध० को० ४।१] इति वचनात् । ततो न तत्र मदिरादि-

---

१-हितत्व-आ०, व०, प० । २ तस्येन आ०, व०, प० । ३-मन्येव त-आ०, व०, प० । ४ प्राणिप्रका-आ०, व०, प० । ५-यन्तु नै-आ०, व०, प० । ६ बौद्धः प्राह ।

सादृश्योपकल्पनमुपपन्नमिति कश्चित्[1] ; सोऽप्यनिश्चितवस्तुवादी; तथा सति निर्विवादापत्तेः । तथा हि—यदि चेतनं कर्म तर्हि तस्याभ्युदयप्रत्यवायनिबन्धनतया स्वत एवाधिगमात् न कस्यचिदपि तत्र विवादः स्यात् । अस्ति च, अनुष्ठानरूपं तदिति कस्यचित्[2], [3]प्राकृतमित्यन्यस्य[4], आत्मगुण-विशेष इत्यपरस्य[5], बहुलं तद्दर्शनात् । अधिगतेऽपि तस्मिन्ननन्तरफलादर्शनाशक्त्यारोपतो विवादः सम्भवतीति चेत् ; उच्यते—

अतस्मिन् तद्ग्रहत्वं चेदारोपो नाधिगच्छति ।
आत्मनस्तस्य बोधत्वमरवसंवेदिनः कथम् ॥१७०३॥
अधिगच्छति चेत्तस्माद्विवादोपजनिः कथम् ।
अविवादानुकूलं यत्तथा तस्यात्मवेदनम् ॥१७०४॥
आरोपान्तरतस्तस्याधिगतस्याप्यनिश्चयात् ।
विवादोत्पत्तिहेतुत्वं यदि तत्रोपकल्प्यते ॥१७०५॥
तदारोपान्तरेऽप्येवं प्रसङ्गस्यानिवर्तनम् ।
अनवस्थाभयाद्वाहि[7] कथं शक्यनिराक्रियम् ॥१७०६॥
तस्मादचेतनं कर्म तत्त्वज्ञैरनुमन्यताम् ।
तत्रानुष्ठानरूपत्वं यत्परैः परिकल्पितम् ॥१७०७॥
तदयुक्तमनुष्ठानादत्रैवोपक्षयं गतात् ।
परलोके फलोत्पत्तेर्वार्तयाऽप्यव्यवस्थितेः ॥१७०८॥
नापि तत्कृतं तस्य तत्प्रकृत्यैव सङ्गतेः ।
तस्याश्चाचेतनत्वेन तत्फलानुभवात्ययात् ॥१७०९॥
चिच्छायासङ्क्रमात् साऽपि चेतनैवेति चेतसात् (चेदसत्) ।
विस्तरेण पुरा तत्र तत्सङ्क्रान्तेर्निषेधनात् ॥१७१०॥
प्रकृतौ कर्मभोगस्तन्नास्ति तस्य कथं पुनः ।
पुंसि कल्पनया भावो यत्स भोक्तेति कथ्यताम् ॥१७११॥
तत्त्वतो न हि पुंसोऽस्ति तद्भोगोऽनभ्युपागमात् ।
नेदानीमुपचाराच्चेत्यभोक्तैव स सर्वथा ॥१७१२॥
न च भोगमकुर्वाणं कर्मातीवप्रसङ्गनात्[8] ।
तन्न साङ्ख्योदितं कर्म युक्तियुक्तमुदीक्ष्यते ॥१७१३॥

---

१ कश्चिद्वैपश्चिन्मान्यसेप्यनि–आ०, ब०, प०। २ "मीमांसकस्य"–ता० टि०। ३ "प्रकृतेः प्रधानस्य विकारः प्राकृतम्"–ता० टि०। ४ "सांख्यस्य"–ता० टि०। ५ "वैशेषिकस्य"–ता० टि०। द्रष्टव्यम्–न्यायकुमु० टि० पृ० ३। ६ "स्वस्य"–ता० टि०। ७–स्थापयावाहि आ०, ब०, प०। ८ "अतिप्रसगादित्यर्थः"–ता० टि०।

नापि वैशेषिकाभीष्टं तस्याचेतनधर्मणः ।
चेतनात्मगुणत्वस्य निषेधादव्यवस्थितेः ॥१७१४॥
आत्मनश्चेतनत्वञ्च यथास्थानं निवेदितम् ।
निवेदयिष्यते चातस्त्यज्यतां तत्र विभ्रमः ॥१७१५॥

ततः स्याद्वादिपरिकल्पितमेव पौद्गलिकं कर्मोपपन्नं तस्यैव चेतनात्मविभ्रमनिबन्धनतया मदिरादिनिदर्शनबलेन प्रतिपत्तेः । कथं पुनश्चेतन आत्मा तादृशमनर्थमूलं कर्मारभेत तत्परित्यागस्यैव तत्रोपपत्तेः, न च तस्य परप्रभुपारवश्यम्, अनभ्युपगमात् ; इत्यप्यचोद्यम् ; मिथ्याज्ञानवलेन तस्यापि तदुपपत्तेः । तथाहि— विवादापन्नं कर्म मिथ्याज्ञानोपनिबद्धम्, आत्मनि तद्विभ्रमहेतुत्वात्, तदुपयुक्तविषादिवत् । न चाश्रयासिद्धत्वं साधनस्य; कर्मसद्भावस्य निवेदितत्वात् । तन्निबन्धनतया विभ्रमस्यापि निरूपितत्वान्न स्वरूपासिद्धत्वमपि । यथाऽवस्थितस्वपरज्ञानस्वभावस्यात्मनो मिथ्याज्ञानमेव कथं यतस्तदुपनिबद्धमात्मनि कर्म भवेदिति चेत् ? न; तस्यापि तत्पूर्वोपार्जितकर्मबलादुत्पत्तेः[1], तस्यापि तत्प्राक्कालभावि मिथ्याज्ञानात्, एवमनादित्वात् मिथ्याज्ञानतदुपनिबद्धकर्मप्रबन्धस्येत्युपपन्नं चेतनस्याप्यात्मनः कर्मोपकल्पनम् । कथं पुनरमूर्त्तस्यात्मनो मूर्त्तेन कर्ममलेनाभिसम्बन्धो मूर्त्तस्यैव मण्यादेर्मूर्त्तमलसम्बन्धस्योपलम्भादिति चेत् ? न; आकाशस्यामूर्तस्यापि मूर्त्तेन जलधरपटलादिनाऽभिसम्बन्धप्रतिपत्तेः । न च मण्यादावपि मूर्त्तिरेव मलसम्बन्धनिबन्धनम्; तन्मात्रे तत्प्रसङ्गात् । न चैवम्, उपकल्पितविशुद्धिविशेषे तदभावात् । अपि तु तद्गतः कश्चित् स्निग्धत्वादिरूपः परिणतिविशेष[2] एव, तस्य चात्मन्यपि मिथ्याज्ञानादिस्वभावस्य भावात्, उपपन्न एव कर्ममलाभिसम्बन्धः । न चैकान्तेनामूर्त्त एव संसारी जीवः तस्यानादिमूर्तकर्मसम्बन्धात् तत्प्रदेशानुप्रवेशरूपात् कथञ्चिन्मूर्त्तत्वस्यापि भावात् । तदेवाह—

अभिन्नो भिन्नजातीयैर्जीवः स्याच्चेतनः स्वयम् । इति ।

जीवः प्राणभृदात्मा प्रक्रमवशात्तस्यैव जीवपदेनाभिधानात् । **भिन्नजातीयैः** पुद्गलपरिणामरूपतया स्वतो विलक्षणैः कर्ममलैः **अभिन्नो**ऽविष्वग्भूतः **स्यात्** भवेत् । **स्यात्** कथञ्चिद्वा[3] बन्धप्रकारेण । यद्येवं मूर्त्तो जीवस्तर्हि तन्मलबन्धवदचेतन एव स्यादिति चेत्; न; तस्य **स्वयं** स्वलक्षणतश्चेतनत्वात्, अन्यथा संसारानुपपत्तेः । दुःखानुभवप्रबन्धो हि संसारः, स कथमचेतनस्य स्याद् घटादिवत् ? स्यादेव चिच्छायासङ्क्रमादिति चेत् ; न; तस्य निराकरणात् । अत एव न चेतनासमवायादपि । अपि च,

चेतनासमवायेन[4] संसारी व्योम किन्न वः ।
तत्रापि समवायस्य भावान्नित्यविभुत्वतः ॥१७१६॥
समवायस्य भावेऽपि चेतना तत्र नास्ति चेत् ।
जीवे कुतः ? स्वहेतोश्चेत् समवायो वृथा भवेत् ॥१७१७॥

१–दुपपत्तेः ता० । २–पणवत्त—आ० ब०, प० । ३–द्वा प्रबन्ध—आ०, द, प० । ४– दे च सं–आ० ब०, प० ।

विनाऽपि तस्मादत्रेदमिति हेतोर्व्यवस्थिते (तौ) ।
न च तस्याः परं किञ्चित् समवायप्रयोजनम् ॥१७१८॥
तस्मादिहेदम्भावस्य समवायनिमित्तताम् ।
ब्रुवता व्योम्नि चैतन्यं जीववत् परिकल्प्यताम् ॥१७१९॥
अदृष्टाभावतस्तत्र संसारो नास्ति चेदसत् ।
चेतनावददृष्टस्य समवायादवस्थिते ॥१७२०॥
सत्यप्येवं स्वतस्तस्याचेतनत्वादसंसृतौ[1] ।
स्वतश्चैतन्यमायातं जीवे संसारिणि स्फुटम् ॥१७२१॥

स तर्हि कस्मात् सर्वतो न प्रकाशते सर्वविषयतयेति चेत् ? अत्राह—

मलैरिव मणिर्विद्धः कर्मभिर्न प्रकाशते ॥२३॥ इति ।

यथा समन्ततः प्रकाशात्माऽपि जात्यो **मणिः मलै** रजः-कर्दमादिभिः **विद्धो न प्रकाशते** तथा जीवोऽपि **कर्मभिरा**वरणापरनामधेयैर्**विद्धः** परस्परप्रदेशानुगमप्रबन्धेन बद्धो **न प्रकाशते** । यदा तु तदावरणमलानां तदुपादानकारणप्रत्यनीकात् उपायाभियोगात् निःशेषवृत्त्या जीवतो विश्लेषस्तदा प्रकाशत एवासौ समन्ततः सर्वार्थसाक्षात्करणरूपतया च । तदुक्तम्[2]—

"ज्ञो ज्ञेये कथमज्ञः स्यादसति प्रतिबद्धरि ।
दाह्येऽग्निर्दाहको न स्यादसति प्रतिबद्धरि ॥" [योगवि० श्लो० ४३१]

तदेवाह—

सर्वार्थग्रहसामर्थ्यचैतन्यप्रतिबन्धिनाम् ।
कर्मणां विगमे कस्मात् सर्वानर्थान्न पश्यति ॥ २४ ॥ इति ।

जीवः **सर्वानर्थान् कस्मान्न पश्यति** पश्यत्येव । कदा ? **विगमे** निःशेषविश्लेषे । केषाम् ? **कर्मणाम्** आवरणमलानाम् । कीदृशानाम् ? **सर्वो** निरवशेषो योऽर्थो देशादिविप्रकृष्टस्तस्य **ग्रहः** परिज्ञानं तत्र समर्थमेव **सामर्थ्यं** तच्च **तच्चैतन्यं** च **तत्प्रतिबध्नन्ती**त्येवं शीलानामिति । कः पुनरयं तैस्तस्य प्रतिबन्धो नाम ? पटवत् विषयप्रच्छादनमिति चेत्; ततः कथमग्रहणं विषयस्य ? तदापि विप्रकृष्टग्रहणस्य तत्स्वभावस्यापरिम्लानात् तेषाञ्च[3] दर्शनप्रसङ्गः पटवत् । असामर्थ्यान्नेति चेत्; न; वेदनसमर्थप्रतिज्ञाव्यापत्तेः । आवरणान्तरैः प्रतिबन्धान्नेति चेत्; न; तत्राप्येवं प्रसङ्गादनवस्थापत्तेश्च । तन्न तत्प्रच्छादनं प्रतिबन्धः । शक्तिप्रध्वंस इति चेत्; उच्यते—

एकैव ज्ञानशक्तिश्चेत् सा च तैर्ध्वस्यते यदि ।
जीव एव भवेद् ध्वस्तस्तदा गत्यन्तरच्युतेः ॥१७२२॥

---

१ आकाशस्य । २ उद्धृतोऽयम्—अष्टसह० पृ० ५०। जयध० पृ० ६६। ध० आ० प० ५५३ ।
३ कर्मणाम् ।

कर्मावरणविश्लेषस्तस्य ध्वस्तासतः[1] कथम् ।
येन सर्वार्थदर्शित्वं ततस्तस्योपवर्ण्यते ॥ १७२३ ॥
अनेका तस्य[2] शक्तिश्चेदेकशः[3] सर्ववेदिनि ।
तस्याः साकल्यविध्वंसे जीवध्वंसः पुनर्भवेत् ॥ १७२४ ॥
असाकल्येन विध्वंसे शक्त्याऽवस्थितया कथम् ।
सर्वार्थदर्शनं तस्य न स्यात् संसारवर्तिनः ॥ १७२५ ॥
प्रत्यर्थनियता शक्तिरनेका तस्य चेत्तया ।
अज्ञातया कथं तस्य सर्वार्थग्रहसम्भवः ॥ १७२६ ॥
ज्ञातत्वमपि तस्या न शक्त्या युक्तमनेकया
अनवस्थाभयावेशस्यातिदूरोपसर्पणात्[4] ॥ १७२७ ॥
एकया तत्परिज्ञाने शक्तिभेदे वृथा भवेत् ।
बाह्यस्याप्येकयैवार्थजातस्य प्रतिवेदनात् ॥ १७२८ ॥
अत्र चोक्तमिदं जीवध्वंसेनं सोपपत्तिकम् ।
इति ये चोदयन्त्यत्र तेऽपि न न्यायवेदिनः ॥ १७२९ ॥
तच्छक्तेर्बहुरूपायाः स्वत एव प्रवेदनात् ।
अनवस्थाभयोत्पत्तिप्रसङ्गाभावनिश्चितेः ॥ १७३० ॥
ताभिरेव हि ताः शक्तीर्जीवो वेत्ति तदात्मकः ।
बाह्यानपि पदार्थौघानिति हि प्राङ्निवेदितम् ॥ १७३१ ॥
तासां च[5]ऽसकलध्वंसे जीवध्वंसः कथं भवेत्
अध्वस्तशक्त्यवस्थस्य तस्याध्वंसोपपत्तितः ॥ १७३२ ॥
कथञ्चिज्जीवविध्वंसकल्पनं तु न दूषणम् ।
स्थित्युत्पत्तिविनाशात्मविश्वतत्त्वप्रवादिनाम् ॥ १७३३ ॥

ततो युक्तं जीवस्य ग्रहणशक्तिविध्वंसकरणमेव कर्मणां तत्प्रतिबन्धत्वमिति । न चैवं तेषां दर्शनप्रसङ्गः विषयवत्; तत्रापि तैरेव तच्छक्तेः प्रतिबन्धनात् । भवत्वेवं तथाऽपि यथा परिगलित-निखिलजलधरपटलपरिवेष्टनस्यापि भानुमतः पुनः कुतश्चित् तदुपनेपसम्भवः तथा निरवशेषनिर्धूत-बोधावरणमलस्यापि केवलिनः पुनः कुतश्चित्तदभिसम्बन्धसम्भवात् अनर्थोपनिबन्धः किन्न भवतीति चेत् ? अत्राह—

प्रभुः साक्षात्कृताशेषप्रपञ्चभुवनत्रयः ।
अनर्थैः परमात्मानमत एव न योजयेत् ॥ २५ ॥ इति ।

---

१ ध्वस्तत्वेन असतः अविद्यमानस्य जीवस्य । २ अनेकान्तस्य आ०, ब०, प० । ३-कतः स-आ०, ब०, प० । ४-भयादेश-आ०, ब०, प० । ५ ध्वंसाध्वंसोपपत्तिः आ०, ब०, प० । ६-च सकल-आ०, ब०, प० ।

यतोऽयं परमात्मा सकलावरणमलापगमे सति साक्षात्कृताशेषप्रपञ्चभुवनत्रयो जातः **अत एव** अस्मादेव हेतोः **परमात्मानं च अनर्थैः** संसारदुःखैः तत्कारणैश्च रागादिभिः **न योजयेत्**। निरवशेषतत्त्वविषयविशुद्धज्ञानात्मनस्तत्र तद्वियोजनस्यैवोचितत्वात्। मा भूदात्मनि तद्योजनं परत्र भवत्येव क्रीडासुखार्थत्वादिति चेत्; न; क्रीडाया रागिधर्मत्वेन भगवत्यसम्भवात्, नैसर्गिक-निरतिशयानन्दरूपतया तस्य तत्सुखनिरपेक्षत्वाच्च। तन्न तत्सुखार्थत्वेन तत्र तद्योजनम्। कर्मप्रेरितत्वेनेति चेत्; न स्वकर्म तस्य तत्र प्रेरकम्; तस्यानुग्रहपरस्यैव भावात्। परकर्मेति चेत्; न; तेनापि तस्याप्रेरणात्, प्रभुत्वव्यापत्तेः। कर्मण एव ततोऽपि प्रभुत्वमधिकमिति चेत्; किमिदानीं तस्य तत्प्रेरणया अनर्थयोजनस्य तत एव सम्भवात्? चेतनाधिष्ठितादेव ततस्तत्सम्भवो न केवलादिति चेत्; कथमिदानीं ततस्तत्प्रेरणम्? तदपि तदधिष्ठितादेवेति चेत्; न; परस्पराश्रयात्—

चेतनाधिष्ठितं कर्म प्रेरकं चेतनस्य तत्।
चेतनस्तदधिष्ठाता भवेत् तत्प्रेरणादिति ॥ १७३४ ॥
कर्मान्तरप्रणुन्नस्य तस्याधिष्ठानतो यदि।
कर्मान्तरेऽपि चिन्तेयमनवस्थाकरी भवेत् ॥ १७३५ ॥

तन्न कर्मणा तस्य प्रेरणम्। नाप्यपरेण प्रभुणा; तस्यैव तदधिकस्याभावात्। भावे तेन मुक्तात्मनामप्यनर्थकरणे किन्न प्रेरणम्? **"प्रभुर्यदेवेच्छति तत्करोति"** [ ] इति न्यायात्। एवञ्च,

पुनरावृत्तिसद्भावे मुक्तानामपि तद्भवात्।
मुक्तिकामितया न स्यादनुष्ठानं मनीषिणाम् ॥ १७३६ ॥

न तेषामसौ प्रेरको निमित्ताभावादिति चेत्; स्वस्ति तर्हि तत्प्राभवाय[4]। निमित्तपारवश्ये तदनुपपत्तेः। ततः सूक्तम्—**प्रभुः** इत्यादि।

कुतः पुनः प्रभोर्निरवशेषप्रपञ्चभुवनत्रयसाक्षात्करणमिति चेत्? अत्राह—

एवं यत्केवलज्ञानमनुमानविजृम्भितम्।
नर्ते तदागमात् सिद्ध्येत् [न च तेन विनाऽऽगमः] ॥ २६ ॥ इति।

एवम् अनन्तरमुपवर्णितप्रकारं भगवतो **यत्केवलज्ञानमनुमानेन** पूर्वोक्तेन वक्ष्यमाणेन **च विजृम्भितं** निष्प्रत्यनीकं प्रवृत्तं **तदागमात्** आगममूलात् सम्यग्दर्शनाद्यभ्यासात् **ऋते** विना **न सिद्ध्येत्** न निष्पद्येत, तत एव निष्पद्यत इत्यर्थः।

तदनेन माहेश्वरं तज्ज्ञानमनागमाभियोगपूर्वकमिति[5] प्रत्युक्तम्; तथा हि—तदपि तत्पूर्वकं पुरुषातिशयत्वात् शास्त्रज्ञानपुरुषादितदतिशयवत्। तदविशेषेऽपि[6] तत्प्रकर्षादिरेव[7] तत्पूर्वको न तज्ज्ञानमिति

१ प्रागुक्तव्याप-आ०, ब०, प०। २ कर्मणः। ३-पि ह्येतेद-आ०, ब०, प०। ४ तत्प्रभावाय आ०, ब० प०। ५ नित्यशुद्धज्ञानवत्त्वान्महेश्वरस्य। ६ पुरुषातिशयत्वाविशेषेऽपि। ७ आगमाभ्यासपूर्वकः। ८ माहेश्वरं ज्ञानम्।

चेत्; कार्यत्वाद्यविशेषेऽपि घटादिकमेव बुद्धिमद्धेतुकं न तनुकरणादिकमित्यपि विभागस्तथा भवेदिति कथमीश्वरसिद्धिर्यतः तज्ज्ञानमतत्पूर्वमुच्येत ? तन्न किञ्चिदेतत् । नन्वेवमागमस्य तत्पूर्वकत्वं न भवेत्, ततोऽपि पूर्वं तस्याभावादिति चेत्; अत्राह—**'न च तेन विनागमः'** इति । **तेन** केवलज्ञानेन **विना आगमः** तदर्थानुष्ठानहेतुः **न च** नैव **सिद्धचेत्** । तस्यापौरुषेयस्य निषेधात् । न चैवमन्योन्यसंश्रयः; हेतुहेतुमद्भावेन परमागमकेवलज्ञानसन्तानस्य बीजाङ्कुरवदनादित्वात् । एतदेव दर्शयन्नाह—

सत्यमर्थबलादेव पुरुषातिशयो मतः ।
प्रभवः पौरुषेयोऽस्य प्रबन्धोऽनादिरिष्यते ॥२७॥ इति ।

सत्यम् अवितथम् । किं तत् ? **पुरुषातिशयः** पुरुषस्यातीन्द्रियार्थदर्शनादिरूपः प्रवचनहेतुरतिशयः प्रकर्षो **मतोऽभ्यनुज्ञातः** । इतिशब्दोऽत्र द्रष्टव्यः । तदभ्यनुज्ञानं च अर्थस्य आगमप्रामाण्यलक्षणस्य अन्यथाऽनुपपत्तिलक्षणात् **बलादेव**, न हि तत्पुरुषातिशयमन्तरेणोपपन्नमिति [1]निरूपितम् । एवञ्च अस्य प्रवचनस्य **प्रभवः** क्वचित् कदाचिच्चोच्छेदवतः पुनरुन्मज्जनं **पौरुषेयः** पुरुषकृतः **प्रबन्धस्तु** सन्तानापरनामा **अनादिरिष्यते** । तथा तदिष्टौ कस्यचिद् बाधकस्याभावात् । न केवलं तद्बलादेव तदभ्यनुज्ञानम्, अपि तु अनुमानादपि । तच्चेदम्[2]—यो यत्रानुपदेशालिङ्गानन्वयव्यतिरेकाविसंवादि वचनोपक्रमः स तत्साक्षात्कारी यथा सुरभिचन्दनगन्धादौ अस्मदादिः, तथाविधवचनोपक्रमश्च कश्चित् ग्रहनक्षत्रादिगतिविकल्पे मन्त्रतन्त्रादिशक्तिविशेषे च तदागमप्रणेता पुरुष इति । तदागमस्यापौरुषेयत्वेन प्रणेतुरभावादाश्रयासिद्धः तदभिधेयविषयस्तथाविधवचनोपक्रम इति चेत्; न **'वेदस्य'** इत्यादिना तत्रोत्तरस्य वक्ष्यमाणत्वात् । एवमप्यसिद्धं तद्विशेषणमनुपदेशत्वम्, उपदेशात् कस्यचित् तदुपक्रमसम्भवादिति चेत्; न; उपदेष्टुस्तदर्थदर्शनाद्यतिशयसम्भवे तस्यैव निखिलविषयविज्ञानाधिष्ठानत्वेनास्मदिष्टप्रतिष्ठानात् तस्याप्युपदेशबलादेव उपदेष्टृत्वपरिकल्पनायामनादिः उपदेशप्रबन्धः परिकल्पितो भवति । तत्र च **'अनादिसम्प्रदायश्चेत्'** इत्यादिना दोषं वक्ष्यामः । तन्नानुपदेशत्वमसिद्धम् । नाप्यलिङ्गत्वम्; न हि लिङ्गबलात् तस्य तद्विकल्पाद्युपदेशः, लिङ्गस्यैव तत्र कस्यचिदसम्भवात् । सम्भवेऽपि तस्य प्राकृतपुरुषविषयत्वे सर्वस्यापि ततस्तत्प्रतिपत्तिसम्भवात् दैवज्ञत्वमविशिष्टं भवेत् । विशिष्टप्रतिपत्तृगोचरत्वे तु सिद्धं तत्प्रतिपत्तुरतीन्द्रियार्थसाक्षात्करणं तदपरस्य तद्वैशिष्ट्यस्यायोगादिति नासिद्धमलिङ्गत्वम्[4] । नापि अनन्वयव्यतिरेकित्वम्; न हि अन्वयव्यतिरेकाभ्यां ग्रहचारादेः सम्भवति प्रतीतिः, तस्य चूतमञ्जर्यादेर्मधुमासादिवत् देशकालादिनियमाभावात् । नापि तस्याविसंवादित्वम्[3] ; सति तद्वाच्यसम्बन्धपरिज्ञाने तत्र संवादस्यैव प्रतीतेः । कदाचित् विसंवादप्रतीतिस्तु प्रतिपत्तुरेव यथावत्तत्सम्बन्धपरिज्ञानसामर्थ्यवैकल्यलक्षणादपराधात्, न तद्वचनोपक्रमस्य । ततो युक्तं तदन्यथाऽनुपपत्त्या क्वचित् तद्विषयसाक्षात्करणसाधनम् । एवमपि ग्रहगत्यादिविषयमेव ततस्तत्सिद्धचेत् नाशेषविषयमिति चेत्; न; तद्विषयस्यैव तस्यागेषविषयतोपपत्तेः । ग्रहगत्यादयो हि देशकालजातीयविकल्पेन प्राणिनां श्रेयःप्रत्यवायोपनिपातपिशुनतया प्रतीयमाना निःशेषानपि देशकालविशेषान् तन्निवासिनः त्रसस्थावरांश्चनेकविकल्पान्

१ निरूपमेवञ्च ता०, आ०, व० । २ "सूक्ष्माद्यर्थोपदेशो हि तत्साक्षात्कृतिपूर्वकः । परोपदेशलिङ्गज्ञानपेक्षाविसंवादित्वतः ॥" —त० श्लो० पृ० ११ । ३ —त्वाच्चापि आ०, व०, प० । ४ 'असिद्धम्' इति सम्बन्धः ।

प्राणिनस्तदधिकरणान् अदृष्टविशेषानपि तद्धेतुफलविकल्पेन प्रत्याययन्ति, अन्यथा तत्पिशुनतया[1] तत्प्रतिपत्तेरनुपपत्तेः तत्कथमशेषविषयमेव ततस्तन्न साधितं भवेत् ? एतदेवाह--

ग्रहादिगतयः सर्वाः सुखदुःखादिहेतवः ।
येन साक्षात्कृतास्तेन किन्न साक्षात्कृतं जगत् ॥ २८ ॥ इति ।

ग्रह आदित्यादिरादिर्येषां तारकादीनां तेषां **गतय**श्चारविशेषाः । उपलक्षणमिदम्-लतागुल्माद्योषधिगता रसवीर्यादयो मन्त्रध्यानादिगता वशीकरणशक्त्यादयोऽपि **सर्वाः** निरवशेषाः **येन** प्रतिपादितवचनोपक्रमवता **साक्षात्कृतास्तेन** पुरुषेण **किन्न साक्षात्कृतम्** इत्यर्थः ? **सुखदुःखादिहेतव** इत्यत्रैवोपपत्तिः, यतः तद्गतयो रसवीर्यविपाकादयश्च जगतः प्रीतिपरितापलाभालाभजीवितमरणादेर्ज्ञापकतयोत्पादकतया चोपजाताः ततः तत्साक्षात्कारिणा तदपि साक्षात्कृतमेव, अन्यथा तत्साक्षात्करणानुपपत्तेरिति मन्यते । ततः स्थितं तद्गत्यादिसाक्षात्कारिज्ञानोपनिबन्धन एव तस्य प्रतिपादितो वचनोपक्रम इति ।

साम्प्रतं परस्य निर्बन्धात् लिङ्गबलोपनिबन्धनत्वे सत्यपि तस्य सूक्ष्मादिपदार्थसाक्षात्करणमवश्यम्भावीति दर्शयन्नाह-

सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा ।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः[2] ॥ २९ ॥ इति ।

सूक्ष्माः परचेतोवृत्तिविशेषमन्त्रौषधिशक्त्यादयः **अन्तरिता** देशकालव्यवहिता जीवितमरणलाभालाभादयो **दूराः** मन्दरमकराकरादयस्त एव **अर्थाः** ते **कस्यचित्** तद्विषयानुभावतः[3] पुरुषस्य **प्रत्यक्षा** विशदज्ञानविषया इति साध्यन्ते **अनुमेयत्वात्** अनुमानज्ञानगोचरत्वात् । यदि ते प्रत्यक्षाः किमनुमानेन प्रत्यक्षाविषय एव तदुत्पत्तेः, **"प्रत्यक्षबुद्धिः क्रमते न यत्र तल्लिङ्गगम्यम्"** [युक्त्यनुशा० श्लो० २२] इति भवतामप्यभ्युपगमादिति चेत्; यदि न प्रत्यक्षाः, तथाऽपि कथमनुमानम् । कथं च न स्यात् ? व्याप्त्यपरिज्ञानात् । न हि प्रत्यक्षादन्यत् साध्यसाधनव्याप्तिप्रतिपत्तौ [4]तस्य प्रमाणम् । अनुमानतस्तदवगतौ, तत[5] एव; परस्पराश्रयात् । अन्यतश्चानवस्थानात् । अर्थापत्तेश्चानुमानविशेषत्वात् । उपमानस्य च प्रत्यक्षविषय एव सादृश्योपाधिकतया प्रवृत्तेः । आगमात् तत्प्रतिपत्तौ व्यर्थमनुमानं साध्यस्यैव ततः परिज्ञानात् । ततः प्रत्यक्षमेव तत्र प्रमाणम् । तेन च व्याप्तिमवद्योतयता सूक्ष्मादयोऽप्यवद्योतयितव्या एव, अन्यथा तल्लिङ्गव्याप्तेस्ततोऽवद्योतनानुपपत्तेः । **"प्रत्यक्षबुद्धिः"** इत्यादिकं तु प्रमाणान्तरात् व्याप्तिप्रतिपत्त्यभिप्रायेणाभिहितं ततो न दोषस्तद्वचनस्य ।

यच्चोक्तम्-यदि ते प्रत्यक्षाः किमनुमानेनेति; तदपि मीमांसकस्यैव चोद्यं यः प्रत्यक्षविषयेऽपि अनुमानमन्विच्छति नास्माकम्, अस्माभिस्तु केवलं तत्प्रसञ्जितेनानुमानं तेषां प्रत्यक्षविषयत्वं प्रत्याय्यते । अत[6]एवेदं प्रसङ्गसाधन[7]मामनन्ति मनीषिणः । भवेदिदं प्रसङ्गसाधनं यदि प्रत्यक्षविषय एवानुमानम् । न चैवम्, इन्द्रियशक्त्यादिवत् सूक्ष्मादेरप्यतद्विषयस्यैव कुतश्चित् कार्यव्यतिरेकात् अनुमानोपपत्तेरिति चेत्; न; तच्छक्त्यादेरपि अनिश्चितप्रतिबन्धात् अनुमानानुपपत्तेरतिप्रसङ्गात् । प्रतिबन्धनिश्चये प्रत्यक्षतः कथमतीन्द्रियत्वं तच्छक्त्यादेरिति चेत् ? अयमपि भवत एव पर्यनुयोगो यस्य प्रत्यक्षात् तन्निश्चयो

---

१ तत्सूचकतया । २ तुलना- आप्तमी० श्लो० ५ । ३ -नुमानवतः आ०, ब०, प० । ४ परस्य आ०, ब०, प० । ५ तत एवानुमानात् स्वीयव्याप्तिप्रतिपत्तौ । ६ -नमनुमानमिति मनी-आ०, ब०, प० ।

न स्याद्वादिनः, तेनाप्रत्यक्षादेवोहविकल्पतस्तदुपगमात्[1]। भवतु सूक्ष्मादावपि तत एव तन्निश्चय इति चेत्; न; [2]तत्प्रामाण्ये षट्प्रमाणनियमविनिपातात्। को वा तद्विकल्पोपगमे भवतो लाभः? सूक्ष्मादिप्रत्यक्षत्वाभाव एवानुमातुरिति चेत्; न; [3]तद्विकल्पस्यैव देशकालानवच्छिन्नव्याप्तिप्रतिवेदिनो वैशद्यकोटिप्राप्तौ सूक्ष्मादिप्रत्यक्षत्वोपपत्तेः। भवति हि तस्य तत्प्राप्तिः, आवरणापाये तन्निमित्तस्यावैशद्यस्य व्यपगमात्। प्रतिपादितं च तस्य[4] तन्निमित्तत्वं क्वचिन्निरवशेषनिवृत्तिश्च। तन्न तदुपगमेऽपि तत्प्रत्यक्षप्रसङ्गभयात् निर्मुक्तिः इन्द्रियशक्त्यादेरपि स्पष्टभावाधिष्ठानतद्विकल्पशेमुषीविषयभावमुपासेदुषः प्रत्यक्षत्वाभ्यनुज्ञानस्यादूषणात्। ततः प्रसिद्धप्रत्यक्षापेक्षयैव कस्यचित् सूक्ष्मादयोऽर्थाः प्रत्यक्षाः पावकादयः इवेत्युपपन्नम्, अन्यथा तल्लिङ्गप्रतिबन्धनिर्णयानुपपत्त्या तदनुमानाभावप्रसङ्गात्। का पुनरेवं भवतस्तत्प्रत्यक्षसाधनप्रयासेन समीहितसिद्धिरिति चेत्? निरवशेषतत्त्वदर्शिनः पुरुषस्य निर्बाधत्वेनावस्थितिरेव। अत एवोक्तम् **'इति सर्वज्ञसंस्थितिः'** इति।

भवत्येव तत्प्रसङ्गसाधनं यदि ग्रहगत्यादि[5]कमनुमानतः प्रतिपद्य कश्चिदुपदिशेत्, न चैवम्, तच्छास्त्रस्य [6]वेदाङ्गत्वेनापौरुषेयस्योपदेष्टुरेवाभावात्। एतदेवाह--

वेदस्यापौरुषेयस्य स्वतस्तत्त्वं विवृण्वतः।
आयुर्वेदादि यद्यङ्गं [यत्नस्तत्र निरर्थकः] ॥३०॥ इति।

[7]वैद्यकमा**युर्वेदः आदि**शब्दात् ज्योतिःशास्त्रादि **यदि** चेत् **अङ्गम**वयवः। कस्य? **वेदस्य**। कीदृशस्य **अपौरुषेयस्य** अपुरुषकृतस्य। पुनरपि तद्विशेषणं **स्वतः** पुरुषनिरपेक्षतया **तत्त्वम्** आत्मानं स्वर्गतद्धेतुसम्बन्धांश्च[8] **विवृण्वतो** व्यञ्जयत इति। अत्रोत्तरमाह-- **यत्नस्तत्र निरर्थकः** इति। **तत्र** तस्मिन्नायुर्वेदादौ **यत्नस्ताल्वादिव्यापारलक्षणः** तदर्थव्याख्यानरूपश्च प्रयासो **निरर्थको** निष्फलः। तथा हि--

न तावत् कण्ठताल्वादिव्यापारस्तत्स्वरूपकृत्।
नित्यस्याकरणात्तस्य नापि तद्व्यक्तिकारणम् ॥१७३७॥
व्यक्तिस्तस्मादभिन्ना चेत् नित्यैवेति न तत्कृतिः।
भिन्ना चेद्भेदतो व्यक्तिस्तस्येति कथमुच्यताम् ॥१७३८॥
तयापि तस्य चेत् व्यक्तिस्तत्राप्येवं प्रसञ्जनात्।
अनवस्थाभयावेशान्निर्मुच्येत कथं भवान् ॥१७३९॥

अथ मतमुपलब्धिरेव व्यक्तिः, "**उपलब्धिनिमित्ताच्च नान्यद् व्यञ्जकमुच्यते।**" [ ] इति वचनात्। सा च विषयविषयिभावात् सम्बन्धादेव वेदस्येत्युच्यते नाभेदात् नापि तदन्तरकरणादिति; तन्न; उपलब्धेः प्रयत्नकार्यत्वेनानित्यत्वे तद्विषयभावस्यापि तदपेक्ष्यत्वेनानित्यत्वप्रसङ्गात्। अनित्य एव स इति चेत्; वेदः कथं नित्यः? तस्य तस्माद् व्यतिरेकादिति चेत्; स एव वेदस्येति कथम्? व्यतिरिक्तादेव कुतश्चित् सम्बन्धादिति चेत्; न; तत्रापि पूर्ववत्प्रसङ्गात् अनवस्थापत्तेश्च। तन्नोपलब्धेर्व्यक्तित्वम्, आविर्भावस्यैव तदनर्था-

---

१ व्याप्तिनिश्चयस्वीकारात्। २ ऊहस्य प्रामाण्ये। ३ ऊहविकल्पस्यैव। ४ आवरणस्य अवैशद्यनिमित्तत्वम्। ५ -दिक्रममनु-आ०, ब०, प०। ६ "शिक्षा कल्पोऽथ व्याकरणं निरुक्तं ज्योतिषं तथा। छन्दसां विचितिश्चेति षडङ्गो वेद उच्यते ॥"- ता० टि०। ७ वैद्यकमायुर्वे-आ०, ब०, प०। ८ -स्वर्गं च आ०, ब०, प०।

न्तरस्य तदुत्पत्तेः, तस्य च वेदवत् स्वतःसिद्धेरुपपन्नमेतत् **'यत्नस्तत्र निरर्थकः'** इति । न चैवम् । अत इदमुच्यते—पौरुषेय आयुर्वेदादिः प्रयत्नसाफल्यादिति । व्यभिचारी हेतुर्वाचक-पुरुषापेक्षया भारतादेरपौरुषेयत्वेऽपि तत्साफल्यादिति चेत्; न; तदपेक्षया वस्तुतस्तस्य पौरुषेयत्वात् । कथं तर्हि 'स तेन वाच्यते' इति व्यवहारः ? 'क्रियते' इत्येव तदुपपत्तेरिति चेत्; न; प्रागपि तादृशस्य प्रबन्धस्य भावात्, तदेकत्वाध्यारोपेण तद्व्यवहारोपपत्तेः । 'त एवामी शालयो भुज्यन्ते ये परुद् भुक्ताः' इति व्यवहारवत् । व्यासाद्यपेक्षया तु [1]तदव्यवहारः, ततः पूर्वं तादृशस्याभावात् । भवत्वेवमायुर्वेदादेरपि गुर्वादिभिर्भाषितस्यैव सदृशतया शिष्यादिभिरपि भाषणादनुभाष्यत्वमेव न पौरुषेयत्वं मूलस्य कस्यचित् कर्तुरभावात् । अत एवोक्तम्—

"वक्ता न हि क्रमं कश्चित् स्वातन्त्र्येण प्रपद्यते ।
यथैवास्य परैरुक्तस्तथैवैनं विवक्षयति ॥
परोऽप्येवं ततश्चास्य सम्बन्धवदनादिता ।
तेनेयं व्यवहारात् स्यादकौटस्थ्येऽपि नित्यता ॥
यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता ।"

[मी० श्लो० शब्दनि० श्लो० २८८–९०]

इति चेत्; तदसत्यम्; प्रत्येकमस्वतन्त्रत्वेऽपि पुरुषाणां तत्प्रबन्धस्य तत्र स्वातन्त्र्यात् सत्यंव तस्मिन् तद्भावात् । इदमेव हि तस्य तत्र स्वातन्त्र्यं नाम [2]यत्तद्भावाभावनियमानुविधायित्वमायुर्वेदादेः, अतः कथमपौरुषेयत्वम् ? सत्यमेतत्, अपौरुषेयत्वं तु कस्यचिदतीन्द्रियदर्शिनस्तत्कर्तुरभावादिति चेत्; कथमिदानीं तत्राप्रामाण्यनिवृत्तिनिर्णयः सति पौरुषत्वे दोषपरिशङ्कनस्यानिवृत्तेः ? **"दोषाः सन्ति न सन्तीति पौरुषेयेषु शङ्क्यते"** [ ] इति स्वयमेवाभिधानात्[3] । कुतो वा तत्र तादृशः कर्तुरभावः ? प्रत्यक्षादिति चेत्; न; चिरकालव्यवहितस्य ततो भाववत् अभावस्याप्यप्रतिपत्तेः । इदानीं ततस्तदभावप्रतिपादनं तु न दोषाय, अभीष्टत्वात् ।

कर्तुरस्मरणाल्लिङ्गादिति चेत्; किमिदमस्मरणम् ? अपरिज्ञानमिति चेत्; न; **'सकलज्ञस्य'** इत्यादिना[4] दत्तोत्तरत्वात् । अनभ्युपगम इति चेत्; किं पुनरभ्युपगमेन भावव्याप्तिर्यतस्तदभावे न भवेत् ? तथा चेत्; सर्वस्य सर्वमिष्टं सिद्धचेत्, अनिष्टस्यानभ्युपगमादेवाभावोपपत्तेः । न तन्मात्रादेवाभावः अपि तु प्रमाणमूलादिति चेत्; किं तर्हि तत् प्रमाणं यदनभ्युपगमस्य मूलं भवेत् ? इदमनुमानमिति चेत्; न; परस्पराश्रयात्—अनभ्युपगमादनुमानम्, अनुमानादनभ्युपगम इति । ततोऽप्यनुमानमन्यदेवेति चेत्; न; तस्यापि भावग्राहिणस्तन्मूलत्वानुपपत्तेः । अभावग्राहित्वे तु तत एवाभावसिद्धेः व्यर्थमिदमनुमानं भवेत् । किं वा तदन्यत् प्रमाणम् ? 'आयुर्वेदादिप्रबन्धो मूलकर्तृविकलः अनादित्वात् मनुष्यप्रबन्धवत्' इत्यनुमानमिति चेत्; तदनादित्वं यदि प्रमाणान्तरात्; तत एव तदकर्तृकत्वसिद्धेः व्यर्थमिदम् । अत एव चेत्; उक्तं परस्पराश्रयत्वम् । तन्नातस्तद्वैकल्यसिद्धिः[5] ।

आगमादिति चेत्; न; तेन तत्र प्रजापतिकर्तृकत्वस्य **"एवं वा अरे अस्य महतो**

---

१ वाच्यते इति व्यवहाराभावः । २ यत्तद्भावा–आ०, ब०, प० । ३ "दोषाः सन्ति न सन्तीति पौरुषेये तु शङ्क्यते । वेदे कर्तुरभावाच्च दोषाशङ्कैव नास्ति नः ॥"– तत्त्वसं० श्लो० २४९५ । ४ न्यायवि० श्लो० ३।२० । ५ तद्वैकल्यस्य सिद्धि–आ०, ब०, प० ।

भूतस्य निश्वसितमेव तद् (मेतत्) यत् ऋग्वेदो यजुर्वेदः" [बृहदा० २।४।१०] इत्यादिना श्रवणात्। [1]तत्र तन्न प्रमाणमिति चेत्; व्याहतमेतत्–तस्यैव प्रामाण्यं साधयितुमुपक्रान्तेन तदेव प्रविरुद्धचत इति।

नोपमानादपि तत्सिद्धिः; तादृशस्य प्रबन्धान्तरस्याभावात्। अस्त्येव मनुष्यप्रबन्ध इति चेत्; न; तस्यापि "मुखतो ब्राह्मणमसृजत्" [ ] इत्यादेरागमात् समूल- ९
कर्तृकस्यैवाधिगमात्। एतेनानन्तरप्रयोगे निदर्शनस्य साध्यवैकल्यं प्रतिपत्तव्यम्।

अर्थापत्तेस्तत्सिद्धिरिति चेत्; कुतस्तदुत्पत्तिः? प्रामाण्यादिति चेत्; तदपि कस्मात्? न तावत्तद्वैकल्यात्; परस्पराश्रयात्। नापि संवादात्; प्रत्यागमेऽपि ततस्तद्वैकल्य-सिद्धिप्राप्तेः। न हि तत्र संवाद एव नास्ति, तद्विषयेऽपि तस्य बहुलमुपलब्धेः। न सर्वत्रेति चेत्; न; प्रकृतेऽपि तुल्यत्वात्। तदनेन "स्वतः" [मी० श्लो०] [2]इत्यपि प्रत्याख्यातम्। १०

कथं वा तस्य प्रामाण्यमचेतनत्वात् कलशादिवत्? सत्यमेतत्, मुख्यतस्तत्त्वज्ञानस्यैव तत्त्वात्, तत्कारणत्वेन तूपचरितमेव शब्दस्य तदुच्यत इति चेत्; न स्वतस्तस्य तत्कारणत्वं व्याख्यावैफल्यात्। न वैफल्यं तया तत्र विप्रतिपत्तेः निराकरणादिति चेत्; सैव कुतः? [3]समयान्तराभियोगादिति चेत्; अनभियुक्ततदन्तरस्य तर्हि [4]तन्निरपेक्षमेव स तत्कारणं सम्भवेत्। न चैवम्, सम्प्रदायबलादेव तत्रापि तस्य तत्त्वदर्शनात्। अत एव "आचार्यवान् ११
पुरुषो वेद" [छान्दो० ६।१४।२] इति श्रुतिः। कथं वा तदभियोगाद्विप्रतिपत्तिः? सत्यपि तस्मिन् शब्दस्य तत्करणशक्तेरपरिक्षयात्। परिक्षये स एव परिक्षीणः स्यात् अभेदात्। भेदे तु तदपेक्षणात् स्वतस्तस्य तद्धेतुत्वं व्याहन्यते। परिक्षीणाच्च कथं ततस्तत्त्वज्ञानम् असतस्तदनुपपत्तेः? न तत एव तत्त्वज्ञानमपि तु पुनरन्यतस्तादृशादिति चेत्; नः तस्याप्य-न्यतस्तदभियोगादेव परिक्षयात्, पुनरप्यन्यतस्तत्कल्पनायामनवस्थापत्तेः। अतो न शब्द- १०
सामर्थ्ये विप्रतिपत्तिरिति न तन्निराकरणात् तस्याः साफल्यम्, अपि तु शब्दस्य शक्ति-करणादेव। कथं पुनः स्वतोऽसती तच्छक्तिरन्यतो भवति? "न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते" [मी० श्लो० चोदना० श्लो० ४७] इति न्यायादिति चेत्; मिथ्या-ज्ञाने शक्तिः कथम्? न हि [5]साऽपि शब्दस्य स्वत एव; 'अप्रामाण्यं परतः' [6]इत्यस्य व्याघातात्। अथ तज्ज्ञाने परस्यैव व्यापारो न शब्दस्य; यद्येवं परमेवाप्रमाणं न शब्द इति २०
सर्वस्यापि तस्य प्रामाण्यमेव भवेत्।

परस्यापि स्वतस्तत्र व्यापारो यदि सम्मतः।
तदप्रामाण्यमायाति स्वत एव तदा न किम् ॥१७४०॥
तत्परस्यैव तत्रापि व्यापारपरिकल्पने।
प्राच्यप्रश्नानतिक्रान्तिरव्यवस्थितिमावहेत् ॥१७४१॥ ३०
परतो न क्वचित्तस्मादप्रामाण्यव्यवस्थितिः।
इति साऽपि स्वतः प्राप्ता निवार्येत कथं त्वया ॥१७४२॥

दूरमनुस्मृत्याऽपि परस्य परोपकल्पितया शक्त्या तत्कारणत्वं वृद्धागेन शब्दस्यैव

---

१ तत्र तत्र प०। २ "स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्"–मी० श्लो० चोदना० श्लो० ४७। ३ समवायान्त–ब्रा०, प०, प०। ४ व्याख्यानिरपेक्षमेव। ५ "अप्रामाण्यं क्रिया भिन्ने मिथ्यात्वाज्ञानसंशयैः। वस्तुत्वाद् द्विविधस्यात्र संभवो दुष्टकारणात् ॥" –मी० श्लो० चोदना० श्लो० ५१।

तथा तद्वक्तव्यमविशेषादिति कथं तच्छक्तिरन्यतो न भवेत् यतः सत्यज्ञानशक्तिरपि [1]तथा परतो नावकल्प्येत । स च परः पुरुषस्तदर्थसाक्षात्कार्येव नापरः, ततः तदनवकल्पनस्य वक्ष्यमाणत्वात् । तदेव दर्शयन्नाह--

शास्त्रज्ञानं तथैव स्यात् सामग्रीगुणदोषतः । इति ।

एवकारो हेतुपदानन्तरं द्रष्टव्यो भिन्नक्रमत्वात् । तदयमर्थः-**शास्त्राद्वेदादन्यतो यज्ज्ञानं** तदर्थविषयं तत् **स्यात्** भवेत् । कथम् ? **तथा** तेन सत्यमिथ्यात्वात्मना प्रकारेण । कुतस्तथा तत् स्यात् ? **सामग्री** शास्त्रमेव तस्या यौ **गुणदोषौ** पुरुषविशेषापादितसत्यमिथ्याज्ञानजननशक्तिरूपौ तत एव ताभ्यामेव । दोषग्रहणं निदर्शनार्थम्, यथा दोषतो मिथ्यात्वेन भावस्तथा सत्यत्वेन गुणत इति । सतोऽपि गुणस्य दोषापाकरण एव व्यापारो न सत्यज्ञाने, तस्य शास्त्रादेव भावादिति चेत्; किमेवं दोषस्यापि गुणापाकरण एव व्यापारात् मिथ्याज्ञानमपि शास्त्रादेव न भवेत् ? दोषतः पूर्वं गुणस्यैवाभावादिति चेत्; गुणतः पूर्वं दोषस्याप्यभावात् न ततोऽपि तदपाकरणं स्यात् । सम्भवनियमे वा दोषस्य गुणस्यापि स्यादविशेषात् । ततो युक्तं तज्ज्ञानस्य पुरुषायत्तगुणोपनिबन्धनत्वेन परत एव प्रामाण्यम् किं पुनर्वेदे तदर्थदर्शिना पुरुषेण ? न हि तेन तस्य करणं नित्यत्वात्, नापि तदर्थज्ञानस्य; तस्यापि जैमिन्यादिसम्प्रदायपरम्परात एवोपपत्तेरिति चेत्; नः प्रयत्नसापेक्षत्वेन तत्र नित्यत्वविरोधस्याभिधानात् । तदविरोधेऽपि दूषणमाह-

अविरोधेऽपि नित्यस्य भवेदन्धपरम्परा ॥ ३१ ॥
तदर्थदर्शिनोऽभावान्म्लेच्छादिव्यवहारवत् । इति ।

अन्धवत् **अन्धो** जैमिन्यादिसम्प्रदायः तस्यातीन्द्रियस्वर्गयागसम्बन्धादिवेदार्थसंस्पर्शवैमुख्यात् तस्य **परम्परा** प्रवाहो **भवेत्** । कदापि ? **अविरोधेऽपि** विरोधाभावेऽपि । कस्य ? **नित्यस्य** वेदस्य । कुतो भवेत् ? **तदर्थदर्शिनो** जैमिन्यादीनां मध्ये तदर्थं वेदार्थं पश्यतीत्येवंशीलस्य कस्यचिदपि **अभावात्** । अत्र निदर्शनम्-**म्लेच्छाः** [2]प्रत्यन्तवासिनो बलाकादयः, **आदि**शब्दादन्येऽपि तादृशा व्याधादयः तेषां **व्यवहारो** मातृविवाहादिस्तत्रैव तद्वदिति । प्रसिद्धं हि परस्यापि मातृविवाहादेः श्रेयोहेतुत्वदर्शिनः कस्याप्यभावात्, अतदर्शिसम्प्रदायस्य च तद्विमुखत्वादन्धप्रवाहत्वं तथा प्रकृतस्यापीत्युपपन्नो दृष्टान्तभावः ।

सत्यपि तदर्थाभिमुख्ये अनादिसम्प्रदायत्वे वेदागमस्य भवितव्यं तदर्थदर्शिना पुरुषेणेति प्रतिपिपादयिषुः पूर्वपक्षयति-

अनादिसम्प्रदायश्चेत् आयुर्वेदादिरागमः ॥ ३२ ॥ इति ।

सुबोधमिदम् । अत्रोत्तरमाह--

कालेनैतावताऽनाप्तः कथन्न प्रलयं गतः । इति ।

एतावता अनादिरूपेण **कालेन कथन्न प्रलयं गतः** तदागमः । कीदृशः ? **अनाप्तः** अविद्यमानतदर्थ[3]साक्षात्कारिपुरुषः । प्रलयं गतोपपत्त्येव (गत एव उपपत्त्या) रागाद्युपहतचेतस्कतया प्रज्ञावलवैकल्यादिना च अर्वाग्दर्शिनामनुपदेशान्यथोपदेशादेः अप्रतिवेदनान्यथाप्रतिवेदनादेश्च प्रतिपुरुषमुपक्षीयमाणस्य सर्वत्रापि देशे अनादिना कालेन निर्मूलोन्मूलनस्य सम्भवात् ।

---

१ तदा आ०, ब०, प० । २ 'प्रत्यन्तो म्लेच्छदेशः स्यात्' इत्यमरः । ३ -तदर्थाभिमुखेऽसाक्षा- आ०, ब०, प० ।

दृश्यते हि इदानीन्तनानामपि नैपथ्यादिव्यवहाराणां बहुजनपरिगृहीतानामपि निर्मूलप्रलयः किं पुनस्तथा तदागमस्यादिकालीनस्य न भवेत् । न चैवम्, ततो यत्सिद्धं तदाह–

सिद्धं श्रुतेन्द्रियातीतं त्रिकालविषयं स्फुटम् ॥३३॥ इति ।

'शास्त्रज्ञानम्' इत्यनुवृत्तम् । शास्त्रस्यायुर्वेदादेः ग्रन्थतोऽर्थतश्च यज्ज्ञानम् उच्छेदगतस्य पुनःप्रवृत्तिनिमित्तं तत् **सिद्धं** क्वचित् पुरुषे निश्चितम्, अन्यथा तत्प्रलयगमनाभावानुपपत्तेः । तच्च **श्रुतातीतम्** उपदेशानपेक्षत्वात् अन्यथा **भवेत्**[1] इत्यादिदोषात् । **इन्द्रियातीतं** च तदधीनत्वे तज्ज्ञानत्वानुपपत्तेः । अत एव **त्रिकालविषयम्** इन्द्रियद्वारतयैव तस्य कालनियमसम्भवात् । आवरणपरिक्षयाच्च **स्फुटमिति** स्पष्टमिति । तर्हि तथाविधस्य तज्ज्ञानस्य सुगतादिष्वेव भावात् त एव तद्वेदादेः प्रवर्त्तका[2] इति चेत्; अत्राह–

तथा न क्षणिकादीनां सर्वथाप्तगुणात्ययात् । इति ।

क्षण इति क्षणभङ्गवाद उच्यते विषयिणि विषयोपचारात्, तद्वत्त्वेन **क्षणिकः** [3]सुगतः **आदिशब्दादीश्वरादयस्तेषां तथा** तेनोक्तप्रकारेण **न** शास्त्रज्ञानम् । कस्मात् ? **आप्तस्य यो गुणः** अज्ञानरागादिदोषाभावलक्षणः **"आप्तिं दोषक्षयं विदुः"** [ ] इति वचनात्[4], **तस्यात्ययात्** अभावात् । भवतु नाम क्षणभङ्गादौ प्रमाणपथातिवर्तिनि तेषां तदत्ययो न नीलादौ तस्य तदनतिवर्तिन एव तैरुपदेशादिति चेत्; न; तस्यापि क्षणभङ्गाद्यव्यतिरेकेण तदतिवर्तित्वाविशेषात् । अत एवोक्तं **'सर्वथा'** इति । ततो न तेषां तत्प्रवर्त्तकत्वं भगवत एव तदुपपत्तेः । उपसंहरन्नाह–

तद्विरम्य विरम्यैतद् युक्तं शास्त्रप्रवर्त्तनम् ॥३४॥ इति ।

तत्तस्मादुक्तरूपात् ज्ञानात् **एतत्** प्रतीयमानं **शास्त्रस्यायुर्वेदादेः प्रवर्तनं युक्तमुपपन्नम्** । कथम् ? **विरम्य विरम्य** वीप्सया अन्तराऽन्तरा विच्छेदं गत्वेति दर्शयति । प्रसिद्धश्च परस्यापि तथा तद्विच्छेदः, विच्छिन्नस्य पुनः कुतश्चित् तदर्थदर्शनवतः प्रवर्तनं च । 'वामदेवेन दृष्टं [5]साम कठेन प्रोक्तम्'[6] इत्यादिव्यवहारात्, स्वयं प्रतिपन्नस्य प्रथमोक्तस्य च दृष्टत्वप्रोक्तत्वोपपत्तेः । [7]तत्तस्मैव (तत्तेऽस्त्येव) तदर्थदर्शी पुरुषः तदभावे शास्त्रस्यैव प्रलयप्रसङ्गात् ।

तदेवं तस्य शास्त्रं प्रत्युपयोगमभिधाय तत्र प्रवृत्तेरर्थवत्त्वं प्रत्यभिधित्सुराह–

तादृशोऽभावविज्ञाने शास्त्रे [8]वृत्तिरनर्थिका । इति ।

तादृशोऽतीन्द्रियदर्शिनो वीतदोषस्य च पुरुषस्य प्रणेतुः **अभावविज्ञाने शास्त्रे** आयुर्वेदादौ या वेदवादिनां प्रवृत्तिः सा **'अनर्थिका** निष्प्रयोजना भवेदिति शेषः । नैतदस्ति, शास्त्रात्तदर्थप्रतिपत्तेस्तत्प्रयोजनत्वादिति चेत्; न; शास्त्रस्यावोधकत्वेन[9] ततस्तत्प्रतिपत्तेरनुपपत्तेः, अन्यथा यतः कुतश्चित् तत्प्रसङ्गेन शास्त्रस्यैव वैयर्थ्यापत्तेः । भवतु बोधकादेव

---

१ 'भवेदन्धपरम्परा' इत्यादिदोषात् । २ –कार्पैरिति आ०, व०, प० । ३ स्फुटितः ता० । ४ "आप्तं दोषक्षयाद्विदुः"– सांख्यका० माठर० पृ० १३ । यत्ना० उ०.....। ब्राह्मत्व०.....। ५ साधुकण्ठेन आ०, व०, प० । ६ ऐतरेयोपनिषदि (२।५) प्रोक्तं यत् वामदेवो गर्भे वयमनेव सर्वमहं वेद इत्युवाच । ७ तत्ते स्मैव ता० । ८ –नर्थका ता० । ९ –त्वे त– ता० ।

ततः प्रतिपत्तिरिति चेत्; न; स्वतो बोधकत्वस्य प्रत्याख्यानात्। परतश्चेत्; कस्तर्हि स परः अन्यत्रातीन्द्रियज्ञानादिसम्पन्नात् पुरुषोत्तमात्, तत्सम्प्रदायादेव तस्य यथार्थप्रतीतिनिबन्धनत्वोपपत्तेः। जैमिन्यादिसम्प्रदायादेव तस्य तन्निबन्धनत्वमिति चेत्; नः तत्रान्धपरम्परादोषस्य भाषितत्वात्। ततः शास्त्रस्य तदर्थज्ञानं प्रति साफल्यमभ्युपगच्छता तदर्थोपदेशकारी निर्दोषोऽनक्षार्थसाक्षात्कारी च वक्तव्यः, अन्यथा ततोऽयथार्थस्य तस्य ज्ञानस्यापत्त्या प्रवृत्तिवैफल्यापत्तेः। एवमपि किं शास्त्रेण पुरुषादेव तादृशात् हेयोपादेयतत्त्वपरिज्ञानभावादिति चेत्; न; ततोऽपि शास्त्रमुखेनैव तदुपपत्तेः, तद्बुद्धचैव विनेयानां तदसम्भवात्। भवति स वक्तव्यो यदि कुतश्चित्तादृशस्य पुरुषस्य निश्चयो भवेत्, न चायमस्ति, तत्र बाधकवत् साधकस्याप्यसम्भवेन संशयस्यैवोपपत्तेरिति चेत्; अत्राह-

सन्देहेऽपि च सन्देहस्ततस्तत्त्वं निरूप्यते ॥३५॥ इति।

सन्देहेऽपि च तादृशः पुरुषस्य सन्देहः शास्त्रेऽपि किमिदं तेन पौरुषेयमुत नेति, किमस्य तद्गुणतः प्रामाण्यमुत स्वत इति, किमिदमेव धर्मे प्रमाणमुत सोऽपीति च संशयः प्राप्नुयात्। न चायं परस्य पथ्यः। सति संशये "यद्वा कर्तुरभावेन" [मी० श्लो० चोदना० श्लो० ६३] इत्यादेः "स्वतः सर्वप्रमाणानाम्" [मी० श्लो० चोदना० श्लो० ४७] इत्यादेः; "धर्मे चोदनैव प्रमाणम्" [ ]इत्यवधारणस्य च विलोपसम्पातात्। ततः तस्मादुक्तन्यायात् तत्त्वं तस्य तादृशस्य भावः निरूप्यते विचार्यते, तदपरीक्षायामुक्तदोषानतिवृत्तेः।

तदेवं वेदाऽत्रयवत्त्वेनायुर्वेदादेः नित्यत्वे दोषमभिधाय साम्प्रतं शब्दमात्रस्य नित्यत्वे तं दर्शयन्नाह-

स्वतन्त्रत्वे तु शब्दानां प्रयासोऽनर्थको भवेत्। इति।

स्वतन्त्रत्वमन्यानपेक्षत्वमनेन नित्यत्वं दर्शयति सत्येव तस्मिन् तदुपपत्तेः तस्मिन् सति। केषाम्? शब्दानां लौकिकानामन्येषां च प्रयासः तालवादिपरिस्पन्दरूपः प्रयत्नोऽनर्थको विफलो भवेत्। तु शब्दादवधारणं प्रतिपत्तव्यम्। नानर्थकस्तेषां तेन व्यक्तेरिति चेत्; न; प्रयासदेश एव तत्प्रसङ्गात्, प्रदीपाद्यालोकदेश एव घटाद्यभिव्यक्तेरप्युपलम्भात्। तथा च न परेण शब्दस्य श्रवणम् अश्रोत्रप्राप्तस्य तदसम्भवात्। अथ प्रयासाद् व्यञ्जका वायवः श्रोतुः श्रोत्रप्रदेशं यावदभिसर्पन्तस्तत्रापि तदभिव्यक्तिं कुर्वन्ति प्रयासस्य तु तत्कारित्वोपकल्पनं तद्द्वारकमेव न साक्षात्। न चैवं सर्वत्र तदभिव्यक्तिः; व्यञ्जकानां सर्वत्राभावादिति। तन्न सत्यम्, एवमभिव्यक्ताऽनभिव्यक्तरूपतया तत्र भेदापत्तेः। नायं दोषः क्वचिदभिव्यक्तेरेव अन्यत्रानभिव्यक्तित्वेन तल्लक्षणस्य रूपान्तरस्याभावादिति चेत्; कथमेवमन्यत्रानभिव्यक्तिरेव क्वचिदभिव्यक्तिरपि न भवेत्, तथा च व्यवस्थितमिदं भवेत्-'प्रयासो निरर्थको भवेत्' इति, अनभिव्यक्तिवत् तद्रूपायामभिव्यक्तावपि प्रयासस्यानुपयोगात्। कथं पुनरनभिव्यक्तिः अभिव्यक्तिः, अभावस्य भावरूपत्वानुपपत्तेरिति चेत्; अभिव्यक्तिरपि अनभिव्यक्तिर्न भवेत् भावस्यापि अभावरूपत्वायोगात्। देशभेदापेक्षया तस्य तादूप्यस्येतरत्रापि तुल्यत्वात्। ततो निरवयवस्य क्वचिदभिव्यक्तौ सर्वत्राभिव्यक्तिरेवेति नष्टो दूरादश्रवणव्यवहारो दिक्पारवर्तिभिरपि व्यापिनि तत्र

१ ज्ञानस्योपपत्त्या आ०, ब०, प०। २ शास्त्रं किं-आ०, ब०, प०। ३ चोदनैव प्रमाणञ्चेत्येतद् धर्मेऽवधारितम्-मी० श्लो० चोदना० श्लो० ६। ४ तूत्तरकारित्वोपकल्पनं तद्द्वारकमेव आ०, ब०, प०। ५ शब्दे। ६-स्य मा-आ०, ब०, प०। ७ शब्दे।

श्रवणस्यैव सम्भवात् । कुतो वा प्रयासस्य व्यञ्जकत्वमेव न कारकत्वम् ? ततः[1] प्रागपि शब्दस्य भावादिति चेत्; श्रोत्रज्ञानविषयत्वमपि भवेत् तस्य तल्लक्षणत्वादिति व्यर्थ एव प्रयासः स्यात्-तेनापि[2] तस्यैवाभिव्यक्त्यपरनामधेयस्य करणात्, तस्य च विनाऽपि तेन सत्त्वात्, सतश्च करणे तदपरिनिष्ठप्रसङ्गात् । तज्ज्ञानयोग्यत्वेनैव प्राक् तस्य भावो न तद्विषयत्वेनेति चेत्; न; तत्रापि तद्वैयर्थ्याविशेषात् । तथा हि-

योग्यः प्रागपि शब्दश्चेत् स्वज्ञानजननं प्रति ।
प्रयासापेक्षया तत्र किमन्यत् फलमुच्यताम् ॥१७४३॥
[3]स प्रयासव्यपेक्षश्चेत् स्वज्ञानजननक्षमः ।
प्रयासाधीनतच्छक्तिस्ततः पूर्वं कथं भवेत् ॥१७४४॥
शक्तिस्तस्य तदायत्ता न चेत् किं तद्व्यपेक्षया ।
व्यक्ता (क्त्या) स्यमेव कार्यं चेत् न स्वशक्तेस्तदुद्भवात् ॥१७४५॥
केवला सा न हेतुश्चेत् जह्याच्छक्तित्वमात्मनः ।
कार्यशून्याऽपि शक्तिश्चेत् शक्तिः स्याद् व्योमपद्मिनी ॥१७४६॥
जहातु नाम कैवल्ये तत्साहित्ये तु नेति चेत् ।
तदैव तर्हि सा शक्तिर्न ततः प्राक्, ततः कथम् ॥१७४७॥
श्रोत्रवेदनयोग्यस्य शब्दस्य प्रागपि स्थितेः ।
तद्व्यक्तावेव सर्वोऽयं प्रयास इति कथ्यताम् ॥१७४८॥

कुतो वा तस्य प्रयासात् प्रागपि भावः ? ततोऽभिव्यक्तेरिति चेत्; सैव ततः कस्मान्न निष्पत्तिरेव । प्रागपि ततस्तस्य भावादिति चेत्; नः परस्पराश्रयात् । प्रत्यभिज्ञानात् तर्हि तदा तद्भावः ।

"शब्दोऽपि प्रत्यभिज्ञानात् प्रागस्तीत्यनुमीयते ।" [मी० श्लो० शब्दनि० श्लो० ३३] इति ।

इति चेत्; किं पुनरिदं प्रत्यभिज्ञानं नाम ? स एवायमिति पूर्वापरयोरेकत्वपरिज्ञानमिति चेत्; नः सर्वथैकत्वे पूर्वापरभावस्यानुपपत्तेः, तत्र हि पूर्वभाव एव वा भवेत्, उत्तरभाव एव वा ? तत्र पूर्वविकल्पे पूर्वतयैव तस्याभिव्यक्तिरिति न साम्प्रतिकतया प्रतिपत्तिर्भवेत् । पूर्वस्यापि ततः पूर्वभावे न पूर्वतयापि प्रतिपत्तिः, ततोऽपि पूर्वतयैव तत्सम्भवात्, एवं तत्रापि वक्तव्यमिति न क्वचिदवस्थिता प्रयासतस्तदभिव्यक्तिर्भवेत् । उत्तरविकल्पे तु प्राग्भावस्याभावात् न प्रयासात् 'तस्याभिव्यक्तिः । कथञ्चिदेकत्वे तु पूर्वस्मादुत्तरस्य श्रोत्रबोधानुपातिनो[8] भेदोऽप्यस्तीति 'तत्कादाचित्कत्वे कारणमभिधातव्यम्, अन्यथा तदयोगात् । तच्च न प्रयासाद् अपरमुपलभ्यत इति कथं तत्कार्यतैव तत्र न भवेत् ? सत्यपि तस्य प्राग्भावे प्रयासोपनीतैर्ध्वनिभिः कथमप्रतीतैरभिव्यक्तिः ? प्रतीतैरेव प्रदीपालोकादिभिः घटादीनां तदुपलब्धेः । न प्रतीतिरभिव्यक्तावङ्गं शक्तेरेव तत्त्वात्, मन्त्रादिना तन्निषेधे तदालोकादीनामपि अनभिव्यञ्जकत्वात् । न च तस्यामपि[9] पर्यनुयोगः-'कीदृशी[10] सा' इति ? कारकशक्तावपि प्रसङ्गात्, तत्रापि अतीन्द्रियत्वेनाप्रतीतेरविशेषात् । न चैतावताऽसौ निष्प्रमाणिकैव कार्यदर्शनेन कारकशक्तिवत् व्यक्तिदर्शनतो व्यञ्जकशक्तेरप्यवस्थापनात् ।

१ प्रयासात् प्रागपि । २ प्रयासेनापि । ३ शब्दः । ५ -स्याप्यभा-आ०, व०, प० । ६ तदभिव्यक्तेः क-आ०, व०, प० । ७ शब्दस्य । ८ शब्दनित्यत्वे । ९ शक्तावपि । १० सतीति ता० ।

तस्मादिन्द्रिय[1]गोचरातिपातिन्यैव शक्त्या तादृशीमेव शक्तिं श्रोत्रेन्द्रियस्यादधाना ध्वनयः शब्दाभिव्यक्तेर्हेतव इत्युपपन्नमुत्पश्यामः । तदुक्तम्–

"न च पर्यनुयोगोऽत्र [2]केनाकारेण संस्कृतः (तिः) ।
उत्पत्तावपि तुल्यत्वात् शक्तिस्तत्राप्यतीन्द्रिया ॥
[3]नित्यं कार्यानुमेया च शक्तिः किमनुयुज्यते ।
तद्भावाभावमात्रं हि प्रमाणं तत्र गम्यते ॥
[4]अतोऽतीन्द्रिय एवैते शक्त्या शक्तिमतीन्द्रियाम् ।
इन्द्रियस्यादधानाः स्युः शब्दाभिव्यक्तिहेतवः ॥"
[मी० श्लो० शब्दनि० श्लो० ४३–४५]

इति चेत्; उच्यते–तस्याल्पत्वमहत्त्वादिभिर्विशेषैरुपश्लिष्टस्य, अनुपश्लिष्टस्य वा [5]तेऽभिव्यञ्जकाः कल्प्यन्ताम् ? न तावदनुपश्लिष्टस्य; अप्रतीतेः । न हि तादृशः क्वचिद् व्यक्तोऽव्यक्तो वा शब्दः प्रतीतिपथमुपसर्पति यत्राल्पत्वादीनामन्यतमस्यापि विशेषस्यानुपश्लेषः, सर्वदा तदुपश्लेषिण एव तस्य प्रतीतेः । भवन्तु तदुपश्लेषिण एव तस्य ते व्यञ्जका इति चेत्; [6]अत्रापि–

शब्दस्यैव स्वभावश्चेदल्पत्वादिस्तदा कथम् ।
[7]तद्भेदे सत्यवर्णेषु तवैकत्वप्रकल्पनम् ॥१७४९॥
प्रत्यभिज्ञानशक्तेश्चेत् घटेष्वपि न तत्कथम् ।
घटो घटोऽयमित्येवं व्यक्तं तत्रापि तद्दृशेः ॥१७५०॥
व्यक्तिरेव कुलालादेस्तेषामपि तथेत्यतः ।
कारकव्यवहारोऽयं क्वापि न स्थितिमाप्नुयात् ॥१७५१॥
वैलक्षण्याद्विशेषाणां भेदस्यैवोपपत्तितः ।
[8]जात्येकत्वनिमित्तं चेत् तत्र प्रत्यवमर्शनम् ॥१७५२॥
अवर्णेष्वपि सैवेयं प्रक्रिया परिकल्प्यताम् ।
तत्राप्यल्पादिरूपेण व्यक्तिभेदव्यवस्थितेः ॥१७५३॥

अथासौ[9] शब्दधर्मो न भवति ध्वनिधर्मत्वात् । शब्द एव तद्धर्मा तथाप्रतीतेरिति चेत्; न; अतद्धर्मिणि शब्दत्वेऽपि तथाप्रतिपत्तिभावेन व्यभिचारात्, व्यक्तिगतस्यैव अल्पत्वादेस्तेनानुविधानात् । तत्र तत्प्रतिपत्तिर्विभ्रमादिति चेत्; नः शब्देऽपि तदविशेषात्, ध्वनिगतस्यैव तेनापि तस्यानुविधानात् । ततः शब्द [10]एवाल्पत्वादिः तद्रूपतया विज्ञानादिति न साधुसाधनं शब्दत्वेनानेकान्तात् । मुखेन च; दृश्यते हि मुखेऽपि व्यञ्जकाल्पत्वादिना तद्रूपविज्ञानमतत्स्वभावेऽपि । तदुक्तम्–

"अथ तद्रूप्यविज्ञानं हेतुरित्यभिधीयते ।
तयाऽपि व्यभिचारित्वं शब्दत्वेऽपि हि तन्मतिः ॥
व्यक्त्यल्पत्वमहत्त्वे च तद्यथाऽनुविधीयते ।
तथैवानुविधाताऽयं ध्वन्यल्पत्वमहत्त्वयोः ॥

---

१ –यागो–ता० । २ कार्यः कारणसंस्मृतेः ता० । ३ नित्या आ०, ब०, प० । ४ ततो आ०, ब०, प० । ५ ध्वनयः । ६ अत्राह–ता० । ७ अल्पत्वादिभेदे सति अकारादिवर्णेषु एकत्वकल्पनं कथम् । ८ घटत्वादिजाति । ९ अल्पत्वादिः । १० एवोपाधिः आ० ।

[1]व्यंङ्ग्यानां चैतदस्तीति[2] मुखे नैकान्तिकं ततः ।
दर्पणेऽल्पमहत्त्वे च [3]दृश्येते न तु तन्मुखे[4] ॥"
[मी० श्लो० शब्दनि० श्लो० २१३-१६] इति ।

तदयमत्यन्तपरामर्शपराङ्मुखस्यैवोल्लासः; ध्वनिधर्मत्वेऽल्पत्वादेस्तद्वदेवाप्रतीतिप्रसङ्गात् । अप्रतीताश्च "न च पर्यनुयोगः" [मी०श्लो० शब्दनि० श्लो० ४३] इत्यादिना ध्वनयः प्रतिपादिताः । न चाप्रतीतौ विभ्रमः, विभ्रमस्य प्रतीतिरूपत्वात् । प्रतिपाद्यत एव तेषामपि कैश्चित् प्रतीतिः—"**ध्वनीनां श्रोत्रगम्यत्वं तस्मात् केचित् प्रचक्षते ।**" [मी० श्लो० शब्दनि० श्लो० २२३] इति वचनादिति चेत्; अतद्गम्यत्ववादिनां तर्हि कथं तत्प्रतीतिः यतः शब्दे तद्विभ्रमः ? न हि दर्पणाल्पत्वादेरप्रतीतौ वदने तद्विभ्रम इति तद्विकलस्यैवावर्णादेस्तदा [5]तद्गम्यत्वं प्राप्नुयात् । न चैवं सर्वदा तदुपश्लिष्टविभ्रमस्यैव तस्योपलम्भात् ।

अपि च, ध्वनीनां श्रोत्रगम्यत्वेऽपि यदि वाचकशक्तिः, व्यर्थं तद्व्यङ्ग्यस्य शब्दान्तरस्य परिकल्पनं तत्प्रयोजनस्य ध्वनिभ्य एव निष्पत्तेः । अवाचकत्वे तद्धर्मस्य वृद्धिह्रासादेरपि वाचकत्वं न भवेत् । तथा च—

वृद्ध्यादिव्यतिरेकेण शब्दस्याप्रतिवेदनात् ।
[6]अवाचकं जगत्प्राप्तं ततः किं केन कथ्यताम् ॥१७५४॥
न हि वृद्ध्यादिशून्यस्य प्रत्यभिज्ञाऽपि वेदिका ।
वाचकत्वं यतस्तस्य कल्पयेम निराकुलम् ॥१७५५॥
वृद्धिह्रासादितादात्म्यं विभ्रतश्च तया गतौ ।
अवाचकत्वं वृद्ध्यादेरशक्यपरिकल्पनम् ॥१७५६॥
अन्यथा सर्वकार्येऽपि सर्वभेदविवर्जितम् ।
सन्मात्रं प्रत्यभिज्ञेयमुपयोगीति कल्पनात् ॥१७५७॥
स्वर्गादावपि तस्यैव कारणत्वव्यवस्थितेः ।
यजनादिक्रियाभेदे प्रवृत्तिर्व्यर्थिका भवेत् ॥१७५८॥
भेदात्मनस्ततो यद्वत् सतोऽर्थकरणं तथा ।
ह्रस्वाद्यात्मैव शब्दोऽपि वाचकत्वाय [7]कल्पते ॥१७५९॥
अन्यथा तस्य संस्कारं पाणिनिप्रमुखाः कथम् ।
वाचकं शब्दमुद्दिश्य प्रवृत्तं कुर्वते बुधाः ॥१७६०॥

सत्यम्, ह्रस्वाद्यात्मन एव शब्दस्य वाचकत्वम्, तत्तु तदात्मत्वं ध्वनिधर्मस्यैव ह्रस्वादेरनुपातात् न तत्त्वतः, इति चेत्; कथमतात्त्विकेन तद्रूपेण वाचकत्वं वर्णस्य स्वरूपेणापि तथाविधेनैव तत्प्रसङ्गात् । एवं च—

अतात्त्विकस्य वर्णस्य नित्यत्वादिप्रसाधनम् ।
वन्ध्यास्तनन्धयस्येव सौरूप्यगुणवर्णनम् ॥१७६१॥
संवृत्या वाचकं शब्दं कल्पयन्नपि याज्ञिकः ।
कल्पयेत् कारकं तद्वदिति बौद्धमतं भवेत् ॥१७६२॥

---

१ व्यंगाना-आ० । २ कालो नै—आ० । ३ दृश्यते आ० । ४ तन्मुखम् आ० । "व्यङ्ग्यानां चैतदस्तीति लोकेष्यैकान्तिकं न तत् । दर्पणाल्पत्वमहत्त्वे हि दृश्यतेऽनुपतन्मुखम् ॥ —मी० श्लो० । ५ श्रोत्रगम्यत्वम् । ६ आध्वाचकं जगद्व्याप्तं आ० । ७ कल्प्यते आ० ।

तस्मात्तात्त्विक एवायं ह्रस्वादिः शब्दगोचरः।
मन्दविस्पन्दितं तस्य ध्वनिधर्मत्वकल्पनम् ॥१७६३॥

ततो निराकृतमेतत्–

"एवं ध्वनिगुणान् सर्वान् नित्यत्वेन व्यवस्थिताः।
वर्णा अनुपतन्तः स्युरर्थभेदाववोधिनः॥
आनुपूर्वी च वर्णानां ह्रस्वदीर्घप्लुताश्च ये।
कालस्य प्रविभागात्ते जायन्ते ध्वन्युपाधयः॥"
[मी० श्लो० शब्दनि० श्लो० ३०१–२] इति।

यत्पुनस्ताद्रूप्यविज्ञानस्य हेतोः शब्दत्वेन व्यभिचारित्वमुपदर्शितम्; तदल्पमतिविलसितम्; व्यक्त्यविष्वग्भावेन तत्रापि तत्त्वत एव वृद्ध्यादेर्भावात्। व्यक्तिव्यतिरेकिणश्च शब्दत्वादेर्नित्यसर्वगतस्य च प्रत्याख्यानाद् दर्पणेत्यादिकमपि तादृशमेव। न हि दर्पणस्य अल्पत्वादिना मुखे तत्प्रतिपत्तिः, तत्प्रतिपत्तिसंक्रम एव तस्योपलम्भात्। तस्य च दर्पणाधिष्ठानत्वेन मुखात्तदन्तरत्वात्। मुखमेव भ्रमात् तदधिष्ठानमुपलभ्यत इति चेत्; न; तदानीमेवातदधिष्ठानस्यापि तस्योपलम्भात्। न चैतन्न्याय्यम्–

अन्योऽन्याभावरूपत्वात् विभ्रमेतररूपयोः।
युगपत् सम्भवाभावादेकत्र ग्राह्यवस्तुनि ॥१७६४॥
सदप्यविभ्रमज्ञानं विभ्रमं चेन्न बाधते।
विभ्रमध्वस्तये पुंसां प्रयासोऽनर्थको भवेत् ॥१७६५॥

तन्न मुखस्य तदधिष्ठानत्वम्, दर्पणपरिणामविशेषस्यैव तत्प्रतिसंक्रमापरनामधेयस्य तत्त्वात्। तन्न मुखेनापि तस्य व्यभिचारित्वम् औपाधिकस्याल्पत्वादेस्तत्राप्यप्रतिवेदनात्। ततः शब्द एव दीर्घादिः निर्बाधतत्प्रत्ययविषयत्वात् घटादिवत्। अतस्तस्य तालवादिव्यापारादुत्पत्तिरेवोपपन्ना नाभिव्यक्तिः।

कथं वा [1]तद्व्यापारस्याभिव्यञ्जकत्वे ततो नियमेन शब्दस्याभिव्यक्तिः प्रदीपादावेवमदर्शनात्? युक्तः प्रदीपादौ सत्यपि घटादेस्तन्नियमाभावः तस्यानित्यत्वात् अविभुत्वाच्च, न शब्दस्य विपर्ययादिति चेत्; न; तस्याल्पत्वमहत्त्वादिना भेदवत्त्वेन तद्वत् अनित्यत्वाद्यविशेषात्। प्रत्यभिज्ञानात् [2]तन्नित्यत्वादिप्रतिपत्तेः घटादावपि तुल्यत्वात्। वक्ष्यति चैतत्–"**यदि चैवंविधो नित्यः**" [3]इत्यादिना। ततः शब्दवत् घटादेरपि चक्रचीवरादेरभिव्यक्तिरेवेति गतः प्रसिद्धोऽपि तत्र [4] हेतुफलव्यवहारः। व्यञ्जकान्तरस्य प्रदीपादेस्तत्र [5] भावादुत्पत्तिरेव [6]ततस्तस्येति चेत्; तर्हि शब्दस्यापि प्रस्तुतप्रयासात् [7]सैवास्तु श्रोत्रप्रणिधानतद्योग्यदेशादेर्व्यञ्जकान्तरस्य तत्रापि भावात्। तत्प्रणिधानादौ तथाविधस्य व्यञ्जकत्वस्याभावात्तदन्तरत्वं तत्र नास्तीति चेत्; तर्हि प्रदीपादावपि तथाविधस्य तस्याभावात् तद्धेतोरभिव्यक्तिरेव प्राप्नुयादिति नित्य एव सोऽपि भवेत्। तन्न अभिव्यक्तिकरणात् प्रयासस्य शब्दे साफल्यम्, अभिव्यक्तेरुपलब्धिरूपायाः श्रोत्रादेरेव भावात्। आवरणविश्लेषकरणात् तत्र तस्य साफल्यमिति चेत्; न; [8]चक्रचीवरादिव्यापारेऽपि तत एव तत्कल्पनापत्तेः।

---

१ ताल्वादिव्यापारस्य। २ शब्दनित्यत्वादि। ३ न्यायवि० श्लो० ३।४०। ४ घटादौ। ५ चक्रचीवरादेः। ६ तत्पत्तिरेवास्तु। ७ न कदाचिद्व्या—आ०।

किञ्च, यद्यावरणं व्यवधानात्; तन्न कालतः; नित्यत्वात्। नापि देशतः; विभुत्वात्। नाप्युपलम्भस्य प्रतिबन्धात्; तज्जन्मनि शब्दस्यासामर्थ्ये दैवादेव तदभावात्। न ततस्तत्प्रतिबन्धेनापि; सामर्थ्ये सति तस्मिन् नित्यत्वेनाशक्यप्रध्वंसे तत्कार्यस्यावश्यकात्। आवरणमपि तत्प्रतिबन्धे योग्यमेवेति चेत्; उपलब्धेस्तर्हि युगपद्भावाभावोपनिपातात्—तदैवोपलब्धोऽनुपलब्धश्च शब्द इति प्रतीतिपथातिवर्तिनी भवन्मतिप्रवृत्तिरापद्येत। तन्न, शब्दस्यावरणं नाम। सतोऽपि तस्य प्रयासाद् विश्लेषे शब्दस्योपलब्धिर्यदि व्यापकेन रूपेण; व्याप्यमपि जगत् तया प्रतिपत्तव्यम्, तत्प्रतिपत्तिमन्तरेण व्यापकप्रतिपत्तेरनुपपत्तेः। तथा च श्रोत्रव्यापारस्यैवाशब्देऽपि[1] जगति प्रवृत्तिमभ्युपगच्छन् कथमिदमभिदध्यात् **"न रूपे श्रोत्रवृत्तितः"** [मी० श्लो० चोदना० श्लो० ११४] इति। व्याप्यमप्रतिपद्यापि व्यापकप्रतिपत्तौ तु सकलं जगदप्रतियतोऽपि कस्यचित् तद्विषयज्ञानवतः प्रतिपत्तिसम्भवात् **"सर्वज्ञोऽयमिति ह्येवम्"** [मी० श्लो० चोदना० श्लो० १३४] इत्यादि परस्य पर्यालोचितवचनतां परित्यजेत्। अथ न तद्रूपेण तस्योपलब्धिरकारादिरूपत एव तद्भावादिति; तन्न; निरंशस्योपल[2]भ्येतरस्वभावतया भेदानुपपत्तेः। तदुपपत्तौ वा सांशतया वृद्धिह्रासादेरपि सम्भवात् असम्भवदर्थमेतदापद्येत—

"वर्णोऽनवयवत्वात्तु वृद्धिह्रासौ न गच्छति।
व्योमादिवदतोऽसिद्धा वृद्धिरस्य स्वरूपतः॥"
[मी० श्लो० शब्दनि० श्लो० २१३] इति।

ततो नावरणविश्लेषादपि किञ्चित्, यतस्तत्करणेन प्रयासस्य साफल्यमवकल्प्येत। भवतु तर्हि संस्कारकरणात् तस्य तदवकल्पनमिति चेत्; उच्यते—

न तावदावृतिध्वंसः संस्कारस्तस्य दूषणात्।
नाभिन्नातिशयाधानं कौटस्थ्ये तदसम्भवात्॥१७६६॥
भिन्नस्त्वतिशयस्तस्य शब्दस्येति कथं भवेत्?
तेनाप्यतिशयाधानमनवस्थानमुद्वहेत्॥१७६७॥
सन्नप्यतिशयस्तस्य यदि व्यापी तदा भवेत्।
यावद्व्योमप्रवृत्तस्य शब्दस्य श्रवणं जनैः॥१७६८॥
न चैवमस्ति कस्यापि प्रतीतिः शब्दवस्तुनि।
प्रत्यासन्नाल्पदेशस्य सर्वैस्तस्योपलम्भनात्॥१७६९॥
अव्यापी यदि तेनापि वित्तिरव्यापिनो भवेत्।
न हि ते तादृशो वर्णः कश्चिदस्ति मनीषितः[3]॥१७७०॥

यद्ययमव्याप्येवाऽतिशयः प्रदेशवृत्तित्वात् न वर्णे भवेत्, तद्वृत्तिविषयस्य तत्प्रदेशस्याभावात्। उपाधिवशादस्त्येव तद्भाव इति चेत्; न; उपाधिनाऽपि व्यापिना तदसम्भवात्। अव्याप्येव सोऽपि प्रदेशवृत्तित्वादिति चेत्; न; तत्रापि 'न वर्णे भवेत्' इत्यादेरावृत्त्या चक्रकात् अनवस्थापत्तेश्च। न तत्प्रदेशवृत्तित्वात् अव्यापित्वमतिशयस्य; अपि तु स्वत एवेति चेत्; तथाऽपि कथमसौ वर्णे भवेत्? सम्बन्धादिति चेत्; न; तेनापि व्यापिना तस्याव्यापित्वानुपपत्तेः। अव्याप्येव सोऽपीति चेत्; कुतस्तस्याव्यापित्वम्? प्रदेश-

१ शब्दशून्येऽपि। २ —लब्धेतर—आ०। ३ स्वीकृत इति यावत्।

वृत्तित्वादिति चेत्; न; दत्तोत्तरत्वात्। स्वत एवेति चेत्; न; तत्रापि 'कथम्' इत्यादेर्दोषात्। तस्यापि पुनः सम्बन्धाद् वर्णे वृत्तिकल्पनायां चक्रकदोषस्यानवस्थाप्रसङ्गस्य चाविचलनात्। कथमेवं व्यापित्यप्याकाशे तूलादिसम्बन्धस्याव्यापित्वमिति चेत्? न; तस्य तत्प्रदेशवृत्तित्वेन तदुपपत्तेः। प्रदेशवत् खल्वाकाशमस्मन्मते प्रसिद्धम्–"आकाशस्यानन्ताः प्रदेशाः [त० सू० ५।९] इति सूत्रात्। तस्यापि निष्प्रदेशत्वपरिकल्पनायां प्रवृत्तप्रसङ्गानतिवृत्तेः। तन्नातिशयस्याव्यापिनः सम्भवः। सम्भवेऽपि न तेन वर्णस्य व्यापितयोपलब्धिः। अव्यापिना तु उपलब्धेनापि न किञ्चित् तावन्मात्रस्य अवाचकत्वात्। नायं दोषः, तावन्मात्रस्यापि वर्णतया परिपूर्णत्वात्। न हि तस्यावयवाः सन्ति यतस्तस्य प्रत्याकाशप्रदेशं भागशो वृत्तिरुपलब्धिर्वा भवेत् तन्निषेधात्। न [1]चैतावता तस्याव्यापित्वम्, एकत्रैवापरतत्प्रदेशेष्वपि[2] तदैव तस्य सर्वत्र सर्वात्मनाऽपि प्रवृत्तेः। तदुक्तम्–

"यो यो गृहीतः सर्वस्मिन् देशे शब्दो हि विद्यते।
न चास्यावयवाः सन्ति येन वर्तेत भागशः॥
शब्दो वर्तत इत्येवं तत्र सर्वात्मकश्च सः।
व्यञ्जकध्वन्यधीनत्वात् तद्देशे स च गृह्यते॥"

[मी० श्लो० शब्दनि० श्लो० १७१-७२] इति।

ततस्तावतोऽपि वर्णतया परिपूर्णत्वात् तथैवोपलब्धत्वाच्चोपपन्नमेव वाचकत्वमिति चेत्; उच्यते–

ध्वनिदेशस्थवर्णस्य देशान्तरगतात्ततः[3]।
विच्छेदे व्यापिता तस्य विरोधान्नोपपद्यते॥१७७१॥
अविच्छेदे तु तेनापि तद्देशे तस्य वर्तनात्।
देशान्तराभिसम्बन्धो न शक्यपरिकल्पनः॥१७७२॥
तेनात्मना न चेत्तस्य तत्र वृत्तिः कथं तदा।
सर्वात्मनैकदेशेऽपि तस्य वृत्तिः प्रकल्प्यताम्॥१७७३॥
वाचकत्वं यतस्तस्य परिपूर्णस्य दर्शनात्।
कल्पयेम ततस्तस्य भागेनैव प्रवर्तनम्॥१७७४॥

न च भागस्योपलब्धस्यापि वाचकत्वम्। वाचकत्वे वा व्यर्थं तत्र व्याप्तिकल्पनम्, वाचकमात्रस्यैव वर्णत्वोपपत्तेः। तावदेव हि वर्णस्य स्वरूपमुपपन्नं यावता तत्प्रतियोजनं नापरं तेन तदभावात्। तथाऽपि तत्कल्पनायां घटादावपि तत्प्रसङ्गात् न कश्चिदव्यापी नाम भावो भवेत् प्रत्यभिज्ञानस्याविशेषात्। तत्र संस्कारकरणादपि साफल्यं प्रयासस्य[4]।

नाप्यभिधेयप्रतिपादनात्; ततस्तद्भावे शब्दकल्पनावैफल्यापत्तेः। तत्सहायाच्छब्दादेव तद्भाव इति चेत्; न; कूटस्थस्य सहायापेक्षायाः प्रतिक्षेपात्। एतदेवाह–

व्यक्त्यावरणविच्छेदसंस्कारादिविरोधतः॥३६॥ इति।

व्यक्तेश्चावरणविच्छेदश्च संस्कारश्च आदिशब्दादभिधेयप्रतिपादनादिश्च तस्य विरोधतः प्रतिपादितप्रकारेण नित्यव्यापिनि प्रयासनिबन्धनस्यासम्भवात्। 'प्रयासोऽनर्थको भवेत्' इति पदसङ्गतिः प्रतिपत्तव्या।

---

१ चैव तावता आ०। २ –पि तस्य ता०। ३ –गतास्ततः आ०। वर्णात्। ४ तालवादिप्रयत्नस्य।

मा भूदेवं वर्णसंस्कारो विचारप्रदीपव्यापारदुरुपपादत्वात्, श्रोत्रसंस्कारस्तु न दुष्यति श्रोत्रस्य भागवत्त्वेन प्रदेशतः संस्कारसम्भवादिति चेत्; न; तत्संस्कारादपि वर्णस्य व्यापिन एवोपलब्धिर्भवेत् नाव्यापिनस्तस्याभावात् ।

असतोऽप्युपलब्धिश्चेत् भ्रान्तिरेव प्रसज्यते ।
श्रोत्रबुद्धिः समस्ताऽपि व्योमपद्मादिबुद्धिवत् ॥१७७५॥
संस्कृतादपि च श्रोत्राद्यर्थैकस्योपलम्भनम् ।
वर्णस्य तद्वदन्येषां तद्देशत्वात् प्रसज्यते ॥१७७६॥
न हि चक्षुर्घटं द्रष्टुं तद्वताऽर्पितसंस्क्रियम् ।
तद्देशस्तम्भकुम्भादि न पश्यति पुरःस्थितम् ॥१७७७॥
यथा चाशेषवर्णानां सर्वदा युगपद्गतेः ।
तदेकैकप्रतीतिस्ते प्रसिद्धाऽपि न सिद्ध्यति ॥१७७८॥
एकैकस्यैव संवित्तौ श्रोत्रं यदि च शक्तिमत् ।
कथं सङ्ग्रामरङ्गादौ जनकोलाहलश्रवः ॥१७७९॥

एकहेलया बहुविधानेकशब्दसन्दोहश्रवणं हि कोलाहलश्रवणं प्रसिद्धम् । न चैतत् एकैकवर्णश्रवण एव संस्कृतस्यापि श्रोत्रस्य सामर्थ्ये शक्यसम्भावनमिति दूरापसारितस्तद्व्यवहारः स्यात् । तत्रापि क्रमवदेव तच्छ्रवणम्, यौगपद्याभिमानस्तु तदाशुभावनिबन्धनाद्विभ्रमादेवेति चेत्; तदसारम्; अतिप्रसङ्गात् । तमेव दर्शयन्नाह–

वंशादिस्वरधारायां संकुलाप्रतिपत्तितः ।
क्रमेणाशुग्रहेऽयुक्तः सकृद्ग्रहणविभ्रमः ॥३७॥ इति ।

कोलाहलश्रवणदशायां यः **सकृद्ग्रहणे विभ्रमः** शब्देषु अयम् **अयुक्तो**ऽनुपपन्नः । कस्मिन् निमित्ते सति भवन्नसा [व] युक्तः ? **क्रमेणाशुग्रहे** परिपाट्या शब्दानां शीघ्रमुपलम्भे सति । **वंशे**त्यादिरत्र हेतुः । **वंश आदिर्यस्य** वीणारावणहस्तादेस्तस्य **स्वरः** षड्जादिस्तस्य **धारा** कालकृता दीर्घता । सा च षड्जस्य चतुःश्रुतिः, एवं प्रत्येकं पञ्चममध्यमयोर्द्विश्रुतिः, निषादगान्धारयोः ऋषभधैवतयोस्तु त्रिश्रुतिः । तदुक्तम्–

"चतुश्चतुश्चतुश्चैव षड्जपञ्चममध्यमाः ।
द्विर्द्विर्निषादगान्धारौ त्रिस्त्रिश्चर्षभधैवतौ ॥" [ ] इति ।

तस्यां **सङ्कुलं** सङ्कुलत्वं भावपरत्वान्निर्देशस्य तस्य **अप्रतिपत्तितः** । **'क्रमेणाशुग्रहे'** इत्यत्रापि योज्यम् । एतदुक्तं भवति–

आशुग्रहेण शब्देषु यौगपद्यभ्रमो भवन् ।
वंशादिस्वरधारायामपि स्यात्तदभेदतः ॥१७८०॥
तथा चादिश्रुतावेव द्वितीयादेः प्रवेशनात् ।
चतुःश्रुत्यादिभेदेन स्वरभेदग्रहः कथम् ॥१७८१॥
तदभावे च गीतस्य स्वरभेदावलम्बिनः ।
प्रसिद्धस्यापि ते बुद्ध्या जीवनं पश्य नश्यति ॥१७८२॥

ततो न प्रतीत्याशुभावात् शब्देषु यौगपद्यविभ्रमः, सत्यपि तस्मिन् वंशादिस्वरधारायां तदभावात् । न चेदमत्र वक्तव्यम्–आशुभावस्तत्प्रतीतौ तादृशो नास्ति यतस्तद्विभ्रम इति; तदतिशायिनः तद्भावस्य[1] प्रतीतेः ।

१–स्याप्र–आ० ।

अथवा, वंशवद्वंशोऽक्षरसमाम्नायः समस्तस्यापि वाङ्मयस्य तत्प्रभवत्वात्, तस्यादिस्वरः अवर्णस्तत्प्रथमत्वेन लोके तस्य पाठात्, तस्य धारा मात्राद्यवच्छिन्नकालानुवृत्तिः तस्यां संकुलाप्रतिपत्तित इति व्याख्येयम् । अत्रापीदमैदम्पर्यम्—आशुप्रतिपत्त्या शब्देषु यौगपद्यभ्रमकल्पनायाम् अवर्णस्याप्यतिसूक्ष्मसमयावच्छिन्नाद्यश्रुतावेव उत्तरोत्तरसमयसमनुयायिनीनामपि श्रुतीनामाशुभावेन अनुप्रविष्टतया प्रतीत्युपस्थानात् संकुलप्रतिपत्त्या भवितव्यम् । एवम् इवर्णादावपि वक्तव्यम्, आदिस्वरग्रहणस्योपलक्षणत्वात् । एवं चैकमात्रादिभेदेन अचामर्धमात्रतया हलामपि प्रतिपत्तेरभावात् प्रसिद्धोऽपि व्यक्तवाग्व्यवहारः प्रध्वस्तो भवेत्, तस्य अच्-हल्विभागप्रतीतिपुरस्सरतया तदभावेऽनुपपत्तेः ।

आशुग्रहेण शब्देषु यौगपद्यभ्रमं ब्रुवन् ।
व्यक्तवाग्व्यवहाराय देहि भद्र जलाञ्जलिम् ॥१७८३॥
तदभावे च वेदस्य तद्विशेषस्य लुप्तितः ।
तत्प्रामाण्यं कथं धर्मे भवता परिचिन्त्यताम् ॥१७८४॥

तन्न प्रतिपत्त्याशुभावनिबन्धनत्वेन कोलाहलश्रुतेर्विभ्रमत्वमुपपन्नं बाधारहितत्वेन तात्त्विकत्वस्यैवोपपत्तेरिति । भवतु नाम बहुजनतालवादिव्यापारप्रेरितोपसर्पदनेकभेदाभिध्वानजनितनानारूपसंस्काराधिकरणदेशभेदाधिष्ठानतया श्रोत्रस्य कलकलश्रुतिवेलायां युगपदनेकशब्दोपलब्धिनिबन्धनत्वं न पुनरेकाभिध्वानोपजनितसंस्कारक्रोडीकृतैकप्रदेशस्य, तस्यैकशब्दोपलब्धावेव निमित्तभावोपपत्तेरिति चेत्; अत्राह—

तालवादिसन्निधानेन शब्दोऽयं यदि जायते ।
को दोषो येन नित्यत्वं कुतश्चिदवकल्प्यते ॥३८॥ इति ।

तालवादेरादिशब्दाज्जिह्वामूलादेर्यत् **सन्निधानं** कार्योत्पत्तौ आनन्तर्यं तेन शब्दोऽयं प्रतीयमानो **यदि जायते** निष्पद्यते **को दोषो** येन दोषेण **नित्यत्वं** कौटस्थ्यं **कुतश्चित्** प्रत्यभिज्ञानादन्यतो वा शब्दस्यावकल्प्यते सम्भाव्यते इति । तात्पर्यमत्र तालवादिसन्निधानात् यदि शब्दस्य व्यक्तिः; समानदेशस्य सर्वस्यापि श्रोत्रविषयस्य स्यात् तन्निबन्धनस्य श्रोत्रसंस्कारस्यापि तथैवोपपत्तेः; इन्द्रियान्तरे तथैव प्रतिपत्तेः । न चैवम्, अतो व्यञ्जकधर्मानुपलब्धेः जनकत्वमेव तस्योपपन्नमिति, तज्जनकत्वे कार्यत्वेन शब्दस्यानित्यत्वात् कथं सम्बन्धोपदर्शनं यतो वाचकत्वेन व्यवहारोपयोग इति चेत् ? नित्यत्वेऽपि कथं 'पूर्वो ह्रस्वः परो दीर्घः' इति भेदप्रतिपत्तिः ? व्यञ्जकध्वानस्य[1] तद्धर्मणस्तत्रोपधानात् न तत्त्वभावादिति चेत्; तस्यापि तत्त्वतो ह्रस्वादिभेदधर्मत्वे कथं स एवायं देवदत्तस्य ध्वनिरित्येकत्वप्रतिपत्तिः, यतः स्वरेण पुत्रप्रतिपत्तिरानुमानिकी ? तत्रापि ध्वन्यन्तरोपधानाधीनप्रादुर्भावैव तद्भेदप्रतिपत्तिरिति चेत्; न; ध्वन्यन्तरेऽपि प्रकृतप्रसङ्गानतिवृत्तेरनवस्थापत्तेश्च । यदप्युक्तम्—

"ध्वनीनां भिन्नदेशत्वं श्रुतिस्तत्रानुरुद्ध्यते ।
अपूरितान्तरालत्वात् विच्छेदश्चावसीयते ॥
तेषां चाल्पकदेशत्वात् शब्दस्याविभुता मतिः ।
गतिमद्वेगवत्त्वाभ्यां ते चायान्ति यतो यतः ॥
श्रोता ततस्ततः शब्दमायान्तमिव मन्यते ।"
[मी० श्लो० शब्दनि० श्लो० १७८-७६] इति ।

---

१ –निर्ध्वानस्य आ० ।

तदप्यत एव पर्युदस्तम्; ध्वनीनामपि कालभेदिनामिव देशभेदिनामपि प्रत्यभिज्ञाप्रत्ययबलादेकत्वनिश्चये व्यापित्वस्यैवोपपत्तेः, तत्त्वतो भिन्नदेशत्वादेरसम्भवात् तदुपधानबलेन शब्दे तत्परिज्ञानस्याशक्यकल्पनत्वात्। तत्राप्यपरतदुपधानवशात् देशभेदादिपरिकल्पनायां चानवस्थानदोःस्थ्यस्य दुस्तरस्यैवोपस्थानात्। तात्त्विक एव ध्वनौ ह्रस्वादिधर्मो बाधकाभावादिति चेत्; न; शब्देऽपि तुल्यत्वात्। प्रत्यभिज्ञाने तद्बाधस्य ध्वनिवदेव निवारणात्। ननु यदि ध्वनिधर्मस्य ह्रस्वादेरननुभूतस्यैव स्वप्ने स्वशिरोविशरणादेरिव शब्दे विभ्रमः, तर्हि सकलस्यापि बहिर्भावस्य स्वप्ने विभ्रमदर्शनात् जाग्रद्दशायामपि तत्कल्पनोपनिपातेन बहिरर्थवादः प्रध्वस्तो भवेत्। अनुभवास्वादितपूर्वस्यैव तस्य तत्र विभ्रमे क्व तस्यानुभवः? व्यक्तिविधायिनि ध्वनावेवेति चेत्; तस्यापि तर्हि श्रोत्रविषयत्वं वक्तव्यम्, अन्यथा तद्धर्मस्य ह्रस्वादेरपि तदनुपपत्तेः। तथा च स एव तत्त्वतस्तालवादिस्थानविभागसन्निपातोपनिपातोपनीतह्रस्वदीर्घादिस्वभावभेदाधिष्ठानतया बुद्धिविषयतामध्यासीनो वर्णतया वर्णयितव्यो नापरस्तदप्रतीतेः। तथाऽपि तत्परिकल्पनायां ततोऽप्यपरस्ततोऽप्यपर इति न क्वचिदवस्थिता तत्प्रकल्पप्तिर्भवेत्। [1]न चेदृश्यपि नित्यत्वाप (त्यत्वप) रिकल्पनम्, भेदवत्त्वेनाप्यध्यवसायात्। तदुक्तं मण्डनेन—

"श्रवणग्राह्यतायां तु मरुतः कोष्ठजन्मनः।
तालवादिप्रविभक्तस्य शब्दत्वं स च भेदवान्॥"
[ ] इति।

सत्यमयमप्यस्ति परस्य पर्यनुयोगः। तन्न व्यञ्जकधर्मोपधानात् वर्णेषु दीर्घादिभेदप्रतिपत्तिः [2]बाधविरहात्। न हि प्रत्यभिज्ञयाऽपि तस्या बाधोऽस्ति तयाऽपि तदनुविद्धतयैव तेषामनुभवात्। तदन्यथा तत्कल्पनायामनुभवापलापदोषापत्तेः। न चानित्यत्वे तेषां[3] सम्बन्धदर्शनाद्यनुपपत्तिः; अग्रतस्तदुपपत्तेरवकल्पनात्। ततो युक्तं तालवादिसन्निधानेन शब्दस्योत्पत्तेरनित्यत्वमेव दोषस्य कस्यचिदप्यभावात्, न नित्यत्वम्, तत्र सति सर्वदैवोपलब्धिप्रसङ्गात्। भवतोऽपि तदुपादानस्य प्राग्भाविनः कुतो नोपलब्धिरिति चेत्? अत्राह—

उपादानस्य सूक्ष्मत्वाद् युक्तं चानुपलम्भनम्। इति।

यत् खलु शब्दस्योपादानं परिणामिकारणं भाषावर्गणात्मकपुद्गलस्कन्धरूपं तस्य युक्तमुपपन्नम्; अनुपलम्भनं न केवलं शब्दस्य जायमानत्वमेवेति चशब्दः। कुतस्तदुपपन्नम्? सूक्ष्मत्वात् श्रवणयोग्यपरिणामाभावात्। न चैवं नित्यत्वेऽपि समाधानम्; तत्र सर्वदा तस्य तद्योग्यस्यैव भावात्। प्रत्यभिज्ञानात् तत्र नित्यत्वमेवोपपन्नं न भेदः, तत्प्रतिपत्तेस्तेनैव प्रतिक्षेपादिति चेत्; अत्राह—

सादृश्यान्नैकरूपत्वात् स एवायमिति स्थितिः॥३९॥ इति।

भवत्येव तेन तत्प्रतिक्षेपो यदि तत्त्वतस्तस्य तदेकत्वावलम्बनत्वम्, न चैवम्, तत्र 'स्वतन्त्रत्वे तु' इत्यादिना[4] बाधोपदर्शनात्। अतः सत्यपि तत्र **स एवायमिति** प्रत्यभिज्ञारूपा **स्थितिः** पूर्वापरयोर्वर्णयोर्यमलकयोरेव (रिव[5]) सदृशपरिणामोपाश्रयतया प्रवर्तमाना न तत्प्रतीतिप्रतिक्षेपायालम्। यदि चायं निर्बन्धः तथाभूतयाऽपि प्रत्यभिज्ञया तत्प्रतिक्षेपात् नित्य एव शब्द इति। तत्राह—

१ न चेते दृश्य—आ०। २ बाधकविर—आ०। ३ शब्दानाम्। ४ पृ० ३०४। ५ सहजातयोरिव।

यदि चैवंविधो नित्यो नित्यास्ते विद्युदादयः । इति ।

एवंविधस्तालवादिव्यापारोपरचितस्वरूपनिष्पत्तिरपि शब्दो यदि चेत् नित्यः 'च' इत्यवधारणे, तदा नित्या अविचलितरूपास्ते तव मीमांसकस्य विद्युदादयः आदिपदात् प्रदीपादयोऽपि भवेयुः, तत्रापि तादृशप्रत्यभिज्ञासम्भवादिति भावः । यदि च कालभेदेऽपि शब्दस्य तद्वलादेकत्वं देशभेदेऽपि स्यात् तदविशेषात् । अभिमतमेवैतत्–देशभेदतस्तद्भेदानुमानस्य प्रत्यक्षात्मना तदभेदप्रत्यभिज्ञानेनैव बाधोपपत्तेर्न तेन तस्य । तथोक्तम्–

"देशभेदेन भिन्नत्वमित्येतच्चानुमानिकम् ।
प्रत्यक्षं तु स एवेति प्रत्ययस्तेन बाधकः ॥
पर्यायेण यथा चैको भिन्नान् देशान् व्रजन्नपि ।
देवदत्तो न भिद्येत तथा शब्दो न भिद्यते ॥
ज्ञातैकत्वो यथैवासौ दृश्यमानः पुनः पुनः ।
कालभेदेन नानेकस्तथा शब्दोऽपि देशतः ॥"

[मी० श्लो० शब्दनि० श्लो० १९७-२००]

इति चेत्; न; विद्युदादावप्येवंप्रसङ्गात् । शक्यं हि वक्तुम्–

यथा देशादिभेदेऽपि देवदत्तो न भिद्यते ।
ज्ञातैकत्वस्तथैवासौ विद्युदादिर्न भिद्यते ॥१७८५॥
तत्राप्येकत्वसंवित्तेस्तद्वत्प्रत्यवमर्शनात् ।
तद्भेदानुमितेश्चापि तेनैव प्रतिबाधनात् ॥१७८६॥ इति ।

ततो विद्युदादौ तद्भेदानुमानमेव 'स एवायम्' इत्यस्य बाधकं निश्चितावि नाभावाल्लिङ्गादुत्पत्तेः, नेदम्, तस्य सादृश्यदर्शननिबन्धनत्वेन विभ्रमत्वात्, तथा शब्देऽपीति प्रतिपत्तव्यम् । अस्ति हि तत्रापि तदनुमानम्, तथाहि–यदेकेन युगपद्भिन्नदेशतयोपलभ्यते तद्भिन्नमेव यथा विद्युदादि, तथोपलभ्यते च शब्द इति । न चात्र क्रमेण भिन्नदेशतयोपलभ्यमानेन देवदत्तादिना व्यभिचारः; युगपद्विशेषणात् । ततो नेदमुपपन्नम्–"पर्यायेण यथा चैकः" इत्यादि । नापि [1]बहुभिर्नानादेशतया प्रतीयमानेन सूर्यादिना; 'एकेन' इति विशेषणात् । तत इदमप्यसङ्गतम्–

"प्राग्भागो यः सुराष्ट्राणां मालवानां स दक्षिणः ।
प्राग्भागः पुनरेतेषां तेषामुत्तरतः स्थितः ॥
तेन [2]सूर्योदितेर्देशौ भिन्नावुभयवासिनाम् ।
दृष्टौ सवितुरेकत्वेऽप्यतोऽनैकान्तिको भवेत् ॥"

[मी० श्लो० शब्दनि० श्लो० १६३-६५] इति ।

सवितुरेकेनैव भिन्नदेशत्वेन प्रतीतेरभावात् । एवमपि व्यभिचार एव जलपरिपूर्णेषु शरावेषु युगपदेकस्यापि सवितुरेकेनैव[3] भिन्नदेशतयोपलम्भनात् । अत एवोक्तम्–

"जलपात्रेषु चैकेन नानेकः सवितेक्ष्यते ।
युगपन्न च भेदोऽस्य प्रमाणं तुल्यवेदनात् ॥"

[मी० श्लो० शब्दनि० श्लो० १७८]

---

१ पुरुषैः । २ सूर्योदयादित्यर्थः । ३ पुरुषेण ।

इति चेत्; न; अत एव विद्युदादावपि अतो भेदप्रतिपत्तेरभावप्रसङ्गात् ।

अपि च, न जलपात्रेषु सवितुरवेक्षणं तत्र तस्याभावात्, यश्च तत्रावेक्ष्यते तत्प्रतिनिधिः स भिन्न एव प्रतिपात्रमिति कथं तेन व्यभिचारः ? सपक्षेणैव तदनुपपत्तेः । भवेदाकूतं भवतः पात्रावस्थिते पयसि परिस्फुरता भानुमतस्तेजसा चाक्षुषं तेजः प्रति तत्पयः प्रवर्त्यमानं व्योमगतमेव मरीचिमालिनं प्रतिपात्रमनेकधा भिद्यमानमवद्योतयति । न चैवमपि वस्तुतो भेद इति व्यभिचार एवेति; तदिदं दुराकूतम्; एवमनुभवाभावात् । न हि जलपात्राणि पश्यतो व्योमगतविवस्वदवलोकनस्यानुभवः, तत्प्रतिबिम्बावलोकनस्यैव तद्भावात् । तथाऽपि तदपह्नवेन इतरपरिकल्पनायां न क्वचिन्नियता तत्परिक्लृप्तिर्भवेत् । कथं चैवं **'जलपात्रेषु'** इत्याद्यविरुद्धम्, स्वदेशगतस्यैव सवितुरवेक्षणे तत्पात्रेषु तदवेक्षणवचनस्यानुपपत्तेः ? ततो यदुक्तम्–

"अत्र ब्रूमो वयं तावज्जले सौर्येण तेजसा ।
स्फुरता चाक्षुषं तेजः प्रतिस्रोतः प्रवर्तितम् ॥
स्वदेशभिन्नं गृह्णाति सवितारमनेकधा ।
भिन्नमूर्तिं यथापात्रं तदाऽस्यानेकता कुतः ।"
[मी० श्लो० शब्दनि० श्लो० १८०-८२] इति ।

तत्प्रतिविहितम्; अनुभवप्रत्यनीकत्वात् स्ववचनविरोधाच्च । यदप्यन्यदुक्तम्–

"अप्सूर्यदर्शिनां नित्यं द्वेधा चक्षुः प्रवर्तते ।
एकमूर्ध्वमधस्ताच्च [1]तत्रोर्ध्वं सम्प्रदर्शितम् ॥
[2]अधिष्ठातृऋजुस्थत्वात् साक्षात् सूर्यं प्रपद्यते ।
पारम्पर्याऽर्पितं सन्तमवाग्वृत्या तु बुद्ध्यते ॥
एवं वृत्तितदेकत्वादवागिव च मन्यते ।
अधस्तादेव तेनार्कः सान्तरालः प्रतीयते ॥"
[मी० श्लो० शब्दनि० श्लो० १८६-८९] इति ।

तत्रापि योऽसौ चक्षुषोऽवाग्वृत्त्या सूर्यस्यावागवबोधः स चेदभ्रान्तः कथमेतद् **'अवागिव च मन्यते'** इति ? विभ्रमविकलात्ततः तथा मननासम्भवात् । अथ भिन्नमेव तद्बोधात् तथा तन्मननम्, अत एव **'अवाग्वृत्त्या तु बुद्ध्यते'** इत्यतः पृथगेव **'अवागिव च मन्यते'** इत्युक्तम् । न ह्यभेदे पृथग्वचनमुपपन्नं पौनरुक्त्यदोषात् । [3]ततोऽन्यदेव तथा तन्मननं न प्रत्यक्षमिति चेत्; न; तथाऽसम्प्रत्ययात् । न हि प्रत्यक्षमन्यत्–यथाऽवस्थितमरीचिमालिगोचरम्, तदनन्तरं च तदवाग्भावविभावनं मननमवलोकयामः, चक्षुर्व्यापारानन्तरम् अवाचीनस्यैव तिग्मरुचिरूपस्य निरूपणात् । तथाऽपि तत्कल्पनायां सुखं जीवन्तु सौगताः, बहिरन्तश्च निरंशक्षणिकपरमाणुदर्शनस्य तदनन्तरभाविनः स्थूलैकविकल्पस्य च तत्परिकल्पितस्यापि एवमव्याकुलमवस्थितेः, [4]अतोऽयं भ्रान्त एव, न तर्हि **'पारम्पर्याऽर्पितम्'** इत्याद्युपपन्नम्, विभ्रमविषयस्य सत्त्वानुपपत्तेः । न सूर्ये तस्य विभ्रमो देशभेद एव तद्भावादिति चेत्; न; तत्रापि बाधाभावात् । सूर्यसम्बन्धिनि बाध एवेति चेत्; न; सूर्येऽपि तत्सम्बन्धिनि तदविशेषात् । न तन्मात्रे बाध इति चेत्; न; तस्याप्रतिभासनात् । न हि तन्मा-

---

१ तत्रोर्ध्वांशप्रदर्शितम्–मी० श्लो० । २ अतिष्ठातृजलत्वाज्ञाना सूर्यं आ० । अधिष्ठानानृजुत्वाच नात्मा सूर्यं–मी० श्लो० । ३ ततोऽन्यसदेव आ० । ४ यथायं आ० ।

त्रस्य बोधे प्रत्यवभासनम्, अननुभवात् । [1]अप्रत्यवभासित्वे च बाधतदभावयोः कश्चिन्नावकाशः । ततो देशभेदवत् सूर्येऽपि विभ्रमस्यैवोपपत्तेः 'पारम्पर्य' इत्यादेरशक्यापाकरणैवानुपपत्तिः । कथं वा विभ्रमात्मना भानुमद्देशभेदोपलम्भेन शब्दविषयव्यावर्णिततदुपलम्भव्यभिचारः ? प्रत्यभिज्ञानेऽपि प्रसङ्गात् । शक्यं हि वक्तुम्—न[2] घटादिषु प्रत्यभिज्ञानादेकत्वप्रतिपत्तिः, लूनपुनरुत्पन्नरोमनखादिप्रत्यभिज्ञानेन व्यभिचारादिति । तदेवाह—

प्रत्यभिज्ञाऽप्रमाणं स्यात् युगपद्भिन्नदेशयोः ॥४०॥ इति ।

प्रत्यभिज्ञा 'स एवायं गकारो योऽन्यत्र श्रूयते' इति प्रत्यवमर्शः । सोऽयं **युगपत्** अक्रमेण **भिन्नदेशयोर्वर्णयोः** प्रवर्तमाना तदेकत्वसिद्धौ **अप्रमाणं स्यात्** भवेत् व्यभिचारभावादिति भावः । ततो भेदवदभेदस्यापि वर्णेष्वव्यवस्थितेः तदभाव एव प्राप्तो भेदाभेदविकलस्य वस्तुन एवाप्रतिपत्तेः । न च विभ्रमतोऽपि जलपात्रेषु भिन्नदेशतयोपलब्धिर्गभस्तिमालिनः; निर्विभ्रमतया तत्प्रतिसङ्क्रम एव तत्प्रतिपत्तेः । तथाऽपि तत्र तत्कल्पनायामव्यवस्थैव, ततोऽप्यन्यत्र पुनस्ततोऽप्यन्यत्र प्रवृत्तेरनिवारणात् ।

भवतु तत्प्रतिनिवेरेव तत्रोपलब्धिस्तथाऽपि व्यभिचारः तस्याप्यभिन्नस्यैव भिन्नदेशतया प्रतीतेः, अभेदस्य समानबुद्धिगम्यत्वेन व्यवस्थापनात् । अत एवोक्तम्—

"अनेकदेशवृत्तौ वा सत्यपि प्रतिबिम्बने ।
समानबुद्धिगम्यत्वान्नानात्वं नैव बुध्यते ॥"

[मी० श्लो० शब्दनि० श्लो० १९०]

इति चेत्; तन्न; जलतत्पात्राणामप्येवमभेदापत्तेः समानबुद्धिगम्यत्वस्य भावात् । इदमेवाह—**'प्रत्यभिज्ञा'** इत्यादि । **प्रत्यभिज्ञा** समानबुद्धिः सा **युगपद्भिन्नदेशयोर्जलयोस्तत्पात्रयोश्च** प्रवर्तमाना तदेकत्वसाधनं **प्रमाणं स्यात्** । नायं दोषः, तत्र न्यूनाधिकभावेन तद्बुद्धिगम्यत्वाभावादिति चेत्; न; प्रतिबिम्बेऽपि तुल्यत्वात्—तस्याप्यल्पमहतोरधिकरणयोरल्पमहत्त्वेनैव प्रत्यवलोकनात् । प्रतिबिम्बरूपतया अस्त्येव तत्रापि तद्बुद्धिगम्यत्वमिति चेत्; न; जलादावपि जलत्वादिना तदविशेषात् । भवतु ततस्तत्रापि अभेदप्रतिपत्तिरिति चेत्; अत्राह—

सर्वार्थानामनादित्वे स विशेषो निराश्रयः ।
योऽन्यथासम्भवी शब्दघटाद्याख्योऽवभासते ॥४१॥ इति ।

शब्दश्च घटादिश्च तयोराख्या कथनं यस्यासौ शब्दघटाद्याख्यः शब्दे घटादौ च कथ्यमान [3]इत्यर्थः । कोऽसौ ? **विशेषः** [4]तयोरेव वैलक्षण्यम् । कथम्भूतः ? **अन्यथासम्भवी** शब्दादन्येन प्रकारेण घटादौ सम्भवी, स चानित्यत्वमव्यापित्वमनेकव्यक्तिकतयासामान्याधिष्ठानत्वमित्यादिः, घटादेरप्यन्येन प्रकारेण शब्दे सम्भवी, सोऽपि नित्यत्वं व्यापित्वमेकव्यक्तिकत्वेन सामान्यवैकल्यमित्यादिः, **योऽवभासते** मीमांसकस्य चेतसि परिस्फुरति । **निराश्रयः** प्रमाणात्मन आश्रयान्निष्क्रान्तो भवेत् । कदा ? **सर्वेषां** शब्दवत् घटादीनामपि **अर्थानाम् अनादित्वे** प्रत्यभिज्ञानबलात् नित्यत्वे व्यापिनि सति । उपलक्षणमिदं तेन व्यापित्वेऽपीति । तथा हि—

---

१ अप्रत्यवभासते च आ० । २ नगरादिषु आ० । ३—मानमित्य—आ० । ४ तयोर्वैल—आ० ।

नित्यादिरूपाः सर्वेऽर्थाः प्रत्यभिज्ञानतो यदा ।
घटादौ प्रागुपन्यस्तो विशेषः स्यान्निराश्रयः ॥१७८७॥
सामान्यविषयात्तत्र प्रत्यभिज्ञा ततो न चेत् ।
तत्र नित्यादिरूपत्वं शब्देऽप्यस्त्वेष ते नयः ॥१७८८॥
तथा च घटवत्तत्र भेदज्ञानाद्विभेदिनी । ५
[1]नित्यत्वादिविशेषोक्तिस्तव स्यादप्रमाणिका ॥१७८९॥

'सर्व' इत्यादिकम् । अत्रैवं [2]व्याख्येयम्–सर्वव्यवहारहेतुत्वात् **सर्वार्थाः**, शब्दाः, तेषां घटादिवदेव अनादित्वम्–पुरुषपूर्वकत्वम् 'अन' इति पुरुषपर्यायत्वात्, तदादित्वञ्च तद्भवेव [3]तद्भावाभावनियमात् तस्मिन् सतीति । शेषं पूर्ववत् । भेदज्ञानाच्च तत्र भेदाभावे नाभेदोऽपि तज्ज्ञानात्, न सत्त्वादिकमपि तत्प्रत्ययादिति न शब्दो नाम भवेत् । तदाह–'सर्व' इत्यादि । १०
स विशेषो निराश्रयो निष्प्रमाणः । कोऽसौ ? **यः शब्दघटाद्याख्यः** शब्द इति घटादिरिति व्याख्यायमानः **अवभासते** लोके प्रतीयते । घटादिग्रहणं शब्दवत् तत्राप्यभावस्यैवोपपत्तेः । कीदृशोऽसौ ? **अन्यथा** अभावादन्येन भावात्मना प्रकारेण **सम्भवी** । कदा स निराश्रयः ? **सर्वार्थानां** भेदादिप्रत्ययानां सर्वो भेदादिरर्थो ग्राह्यो येषामिति व्युत्पत्तेः, तेषा**मादित्वं** ग्राह्यादानादिकरणत्वम्, अनादित्वमतद्भावः तस्मिन् सतीति । सिद्धं च तेषां तदनादित्वं १५
सतामपि तद्व्यवस्थापकत्वाभावात् । ततो निष्प्रमाणत्वेन सर्वेषु नीरूपत्वमेवोपस्थितम् । तदनिच्छता चाभेदवत् शब्दे भेदोऽपि तज्ज्ञानात् प्रतिपत्तव्यः । तत्रेदं स्यात्–[4]सतोऽपि (सत्यपि) भेदज्ञाने न तस्य भेदः, तस्योपाधिनिबन्धनत्वात्, तदपि [5]गव्यक्तिरूपस्य शब्दस्य तद्व्यक्त्यन्तराविच्छेदेनाभिन्नतयैव प्रतीतेः । तत एवोक्तम्–

"तत्र द्रुतादिभेदेऽपि न भिन्ना सम्प्रतीयते । २०
गव्यक्त्यन्तरविच्छिन्ना गव्यक्तिरपरा स्फुटा ॥
तेनैकत्वेन वर्णस्य बुद्धिरेकोपजायते ।
विशेषबुद्धिसद्भावो भवेद् व्यञ्जकभेदतः ॥"
[मी० श्लो० स्फो० श्लो० २२-२३]

तत्रोत्तरम्– २५

शब्दश्चेद् व्यञ्जकाद् भिन्नः शङ्खः पीतादिव स्फुटम् ।
प्रतीयेत कथं तत्र [6]पीतवर्णादिविभ्रमः ॥१७९०॥
विभिन्नश्चेन्न गम्येत न गम्येतैव सर्वथा ।
गम्यागम्यात्मना तस्य यन्नैरंश्यान्न युज्यते ॥१७९१॥
तेनैकत्वेन वर्णस्येत्यादि तस्मादयुक्तिमत् । ३०
अप्रतीतिपथप्राप्ते तस्मिन्नित्युक्त्यसम्भवात् ॥१७९२॥
तत्प्रतीतिस्ततो वाच्या द्रुतादिभ्रमवर्जिता ।
तथा चासंगतं प्राप्तं कौमारिलमिदं वचः ॥१७९३॥
"यथैव तव गत्यादि गम्यमानं द्रुतादिभिः ।
विशेषैरपि नानेकमेवं वर्णोऽपि नो भवेत् ॥ ३५

---

१ आदिपदेन व्यापित्वादिपरिग्रहः । २ व्याख्येयम् ता० । ३ कार्यकारणभावनियमादित्यर्थः । ४ सतोऽपि आ०, ब०, प०, ता० । ५ गोव्यक्ति–आ० । ६ पीतवर्णादिविभ्रम-आ० ।

त्वयापि व्यञ्जकव्यक्तिभेदाद्भेदोऽभ्युपेयते ।
ममापि व्यञ्जकैर्नादैर्भेदवद्भिर्भविष्यति ॥" इति ।

[मी० श्लो० स्फो० २४–२५]

तत्र भेदबुद्धेः नादनिबन्धनत्वम्, तत्त्वतः तद्भेदादेव तदुपपत्तेः । तात्त्विकत्वञ्च तस्य बाधाभावात् । नहि प्रत्यभिज्ञानात् तस्य बाधः, तेन सामान्यविषयतया विद्युदादिवत् तदनुपप्लवात् । अर्थापत्त्या तस्य बाधनम्; तया निर्भेदस्यैव प्रतिपत्तेः । 'सा चेयम्–नित्यः शब्दो दर्शनस्य तदुच्चारणस्य परार्थत्वात् । परप्रतीतये हि तस्योच्चारणम् । न चासावुच्चारितोऽप्यपरिज्ञातवाच्यसम्बन्धः तत्प्रतिपत्तिमावहति; अश्रुतपूर्वादपि शब्दमात्रात्तदापत्तेः । न चानित्यत्वे तत्परिज्ञानम्, अश्रुतस्य तदयोगात्, श्रुतस्यापि तत्कालेऽनन्वयात् । ततो यदि तत्परिज्ञानम् अवश्यम्भावि कालान्तरावस्थितिः । कथमेवमपि नित्यत्वं द्वित्रादिक्षणावस्थितावपि तत्परिज्ञानोपपत्तेरिति चेत् ? न; तस्यैव व्यवहारकालेऽपि पुनः पुनरन्वयात् । अन्य एव तत्कालभावी शब्द इति चेत्; कथमन्यस्य सम्बन्धपरिज्ञानमन्यस्य प्रत्यायकत्वमतिप्रसङ्गात् ? तदुक्तम्–

"न ह्यदृष्टार्थसम्बन्धः शब्दो भवति वाचकः ।
तया चेत्स्यादपूर्वोऽपि सर्वः सर्वं प्रकाशयेत् ॥
सम्बन्धदर्शनं चास्य नानित्यस्योपपद्यते ।
सम्बन्धज्ञानसिद्धिश्चेद् ध्रुवं कालान्तरे स्थितिः॥
अन्यस्मिन् ज्ञातसम्बन्धे न चान्यो वाचको भवेत् ।
गोशब्दे ज्ञातसम्बन्धे नाश्वशब्दो हि वाचकः ॥"

[मी० श्लो० शब्दनि० २४१-४३] इति ।

ततस्तदुच्चारणस्य पारार्थ्यान्यथानुपपत्त्या नित्य एव शब्द इति चेत्; उत्तरमाह–

स वर्णपदवाक्यानां कालदेशादिभेदिनाम् ।
सदृशानां प्रवन्धोऽयं सर्वेषां न विरुद्ध्यते ॥४२॥ इति ।

स लोकप्रसिद्धः प्रवन्धो वाचकात्मा प्रवाहः न विरुद्धयते । केषाम् ? 'वर्णपदवाक्यानाम् । कीदृशानाम् ? देशकालादिभेदिनाम् । आदिशब्दात् द्रुतविलम्बितादिभेदिनामपि । यद्येवं भेदाविशेषात् गोशब्दे परिज्ञातसम्बन्धे अश्वशब्दोऽपि वाचको भवेदिति; अत्रोत्तरम्–'सदृशानाम्' इति । क्वचिन् सम्बन्धपरिज्ञाने हि भेदिनोऽपि तत्सदृशस्यैव वाचकत्वोपपत्तेः कुतोऽतिप्रसङ्ग इति भावः । 'लौकिकानामेव सदृशानां न विरुद्धयते न वैदिकानाम्' इत्यत्र समाधानम्–'सर्वेषाम्' इति । न हि वैदिका नाम लौकिकेभ्यो विशिष्यन्ते । "य एव लौकिकाः त एव वैदिकाः" [शाबरभा० १।३।३०] इति प्रसिद्धेः । ततः सादृश्यबलादपि दर्शनस्य पारार्थ्योपपत्तेः न ततः शब्दनित्यत्वप्रतिपत्तिः, अन्यथानुपपत्तेरभावात् । तत्रार्थापत्त्यापि तस्य बाधनम् । 'सर्वेषाम्' इत्यनेन इदमप्यावेदयति । सादृश्य-

---

१ "नित्यस्तु स्याद् दर्शनस्य परार्थत्वात्"–जैमिनिसू० १।१।१८ । न्यायकुमुद० टि० पृ० २०१ ।
२ सवर्ण–आ० ।

निबन्धनादपि स एवायमित्यभेदसमारोपवतः प्रत्यभिज्ञानादर्थापत्तेर्वा वैदिकानां यदि नित्यत्वपरिकल्पनं प्रत्यागमानामपि भवेत् तदविशेषात्, इत्यपौरुषेयतया तेषामपि धर्मादौ प्रामाण्यात् "धर्मे चोदनैव प्रमाणम्" [मी० श्लो० चो० श्लो० ४] 'इत्यवधारणमनवधारणप्रयुक्तमिति न तेषां ततो नित्यत्वप्रतिपत्तिः तदागमवतामनित्यत्वाभ्युपगमेन बाधनात्। न तर्हि वैदिकेष्वपि स्यात् "लक्षणमुक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यात्" [प्रमाणवार्तिकालं० ३।७१] इति न्यायात् तत्रापि तेषां तदभ्युपगमभावाच्च। तन्न प्रत्यभिज्ञानादेः शब्दे नित्यत्वप्रतिपत्तिः। आत्मादौ तु ततस्तत्परिज्ञानमनुपद्रवत्वादिति न किञ्चिदसमञ्जसमासज्यते। कथं पुनरसति नित्यत्वे शब्दस्य प्रामाण्यमिति चेत्? क एवमाह—तस्य प्रामाण्यमिति, सम्यग्ज्ञानस्यैव तत्त्वात्, शब्दस्य तु तत्त्वं तत्कारणत्वेनोपचारात्। न च तद्धेतुत्वमपि नित्यत्वात्, अपि तु तदर्थवेदिपुरुषपूर्वकत्वात्। एतदेव दर्शयन्नाह—

वाचः प्रमाणपूर्वायाः प्रामाण्यम्। इति।

प्रमाणमिह वागर्थवेदिनः पुरुषस्य ज्ञानं तत्पूर्वाया वाचो वचनस्य प्रामाण्यं न नित्यत्वापरनामधेयादपौरुषेयत्वात्। अत्रैवोपपत्तिमाह—

वस्तुसिद्धये।
स्वतः सामर्थ्यविश्लेषात् सङ्केतं हि प्रतीक्षते ॥४३॥ इति।

वस्तु वागर्थ एव तस्य सिद्धिः ज्ञप्तिः तदर्थं हि यस्मात् सङ्केतं समयं प्रतीक्षते वाक्, अतः तत्पूर्वाया एव तस्याः प्रामाण्यम्। तत्प्रतीक्षत्वमपि कुतस्तस्या इति चेत्? स्वतोऽन्यनिरपेक्षत्वेन सामर्थ्यस्य वस्तुसाधनशक्तेः विश्लेषादभावात्। ननु समयप्रतिपत्तिरपि शब्दस्य शब्दादेव, तस्यापि समयप्रतीक्षत्वे तत्रापि तत्प्रतिपत्तिरन्यतः शब्दात्, तत्राप्यन्यतस्ततः इति परापरशब्दप्रतीक्षायामेव कालोपक्षयान्न प्रकृते तत्प्रतिपत्तिर्भवेत्। तस्य तदनपेक्षत्वे तु सिद्धं स्वतोऽपि सामर्थ्यम्,अन्यथा ततस्ततप्रतिपत्तेरसम्भवात्। तथा च शब्दान्तरस्यापि तदविरोधाद् व्यर्थं तत्प्रतीक्षणमिति चेत्; न; शब्दादेव तत्प्रतिपत्तिरिति नियमाभावात्। भवति हि बालकादेर्वृद्धव्यवहारदर्शनादपि पदतदर्थादिसम्बन्धप्रतिपत्तिः। कस्यचित् जन्मान्तरसंस्कारोन्मीलनादपि अश्रुतपूर्वस्याख्यानकृतोऽपि दर्शनात्। कस्यचित् स्वबुद्धिबलादपि यथा पाणिने :—'आदैचो वृद्धिः' इति, अदेङो गुणः' इति, "वृद्धिरादैच्" [पा० सू० १।१।१] इति "अदेङ् गुणः" [पा० सू० १।१।२] इति च तेनैवाभिधानात्। यथा वा तत्रैव पूज्यपादस्य भगवतः 'ऐविति 'एविति च "आदैजैप्" [जैनेन्द्र० १:१।१५] इति "अदेङेप्" [जैनेन्द्र० १।१।१६] इति च तस्यैव वचनात्। तदेवमनेकधा समयप्रतिपत्तिसम्भवेनोपपन्नं तत्प्रतीक्षयैवार्थप्रत्यायकत्वं वचनस्य। तदनेकत्वमेव दर्शयन्नाह—

स पुनर्बहुधा लोकव्यवहारस्य दर्शनात्। इति।

स सङ्केतः। पुनरिति वितर्के। बहुधा कथितेन प्रतिपत्तिप्रकारबहुत्वेन बहुप्रकार इत्यर्थः। कुत एतत्? तथैव लोकव्यवहारस्य तत्प्रतिरूपस्य दर्शनाद्पलम्भादिति।

साम्प्रतं वाच्यवाचकयोर्विकल्पेनापि सङ्केतस्य भेदं दर्शयन्नाह—

---

१ चोदनालक्षणोऽर्थो धर्मः'—जैमिनि० १।१।२। चोदनैव प्रमाणं चेत्येतद् धर्मेऽवधारितम्—' मी० श्लो०। २ एभित्यैभिति च ज्ञा०।

शब्दार्थयोर्विकल्पेन, [सन्निवेशोऽनुवर्तते ॥४४॥] इति ।

शब्दो वाचकः तस्य विकल्पो नामाख्यातनिपातोपसर्गादिरूपो भेदः, अर्थो वाच्यस्तस्यापि जातिद्रव्यगुणक्रियादिरूपो भेद एव[1] विकल्पस्तेन सङ्केतो बहुधा शब्दादेः, तद्विषयस्य विकल्पे तस्यापि विकल्पोपपत्तिरिति भावः । यदि वा तयोर्विकल्पो भेदाभेदयोर्गुणमुख्यभावाभ्यां परामर्शस्तेन बहुधेति । तत्र गुणभावेन भेदविकल्पे अस्यान्नस्य प्राणा इति वाचकमिति । अभेदविकल्पे च इदमन्नं प्राणा इति च सङ्केतः । गुणभूतं चान्नस्य प्राणत्वम् प्राणस्थितिहेतुत्वेन प्राणत्वस्य तत्रोपचारात् । अतः प्राणशब्दस्य तद्वाचकत्वमपि गुणत एव । मुख्यतस्तदुभयविकल्पस्तु एवां निःश्वासादीनां प्राणा इति वाचकम्, एते वा निःश्वासादयः प्राणा इति च सङ्केतः ।

कथं पुनः सङ्केतस्य करणं यस्यायं प्रपञ्चः ? कथन्न स्यात् ? अनुपलब्धस्य शब्दस्य तदयोगात् । उपलब्धस्याप्युच्चरितप्रध्वंसित्वेन सङ्केतकालेऽनन्वयादिति चेत्; मा भूत् प्रत्यक्षतः तत्काले तस्य प्रतिपत्तिः, प्रत्यक्षस्यैव विषयसन्निधिसव्यपेक्षत्वेन तदभावेऽनुपपत्तेः । तदुत्तरकालभाविना तु विकल्पेन भवत्येव प्रतिपत्तिस्तस्य सन्निहितवत् विप्रकृष्टेऽपि प्रवृत्तेः । तत्प्रामाण्यस्य च द्वितीये व्यवस्थापितत्वात् । एतदेवाह–'शब्द' इत्यादि । शब्दार्थयोः यस्सङ्केतोऽयमस्य वाचको वाच्यश्चायमस्येति समयः स विकल्पेन ऊहापरनामधेयेन प्रमाणेन । यद्येवं सर्वस्यापि शब्दस्य प्रमाणविषये एव सङ्केतात् सत्येवार्थे प्रवृत्तिः, नास्ति समयान्तरभेदिनि प्रधानादौ तत्र सङ्केतस्यैव तन्निबन्धनप्रमाणाभावेनासत्त्वात् । तदुक्तम्–

"परमार्थैकतानत्वे शब्दानामनिबन्धना ।
न स्यात् प्रवृत्तिरर्थेषु समयान्तरभेदिषु ॥" [प्र० वा० ३।२०६]

इति चेत्; न; विकल्पेनापि प्रमाणेनैव सङ्केत इति नियमाभावात्, मिथ्याविकल्पेनापि प्रायशस्तत्क्रियादर्शनात् । तद्विकल्पस्य च परपरिकल्पनायाः समयान्तरभेदिष्वर्थेषु भावात् । ततो 'विकल्पेन' इति सामान्येन ब्रुवतः शास्त्रकारस्यायमभिप्रायः-भावाभावतदुभयविषयत्वात् विकल्पस्य तदुपकल्पित-सङ्केतसामर्थ्यादर्थविषयत्वमावहतां शब्दानामपि तद्विषयत्वमेवोपपन्नम्, न परमार्थैकतानत्वमिति । न च कस्यचित् तस्य परमार्थविषयत्वमिति सर्वस्यापि तत्कल्पनमुपपन्नम्, बुद्धिष्वपि प्रसङ्गात् । शक्यं हि वक्तुं

परमार्थैकतानत्वे बुद्धीनामनिबन्धना ।
न स्यात् प्रवृत्तिरर्थेषु समयान्तरभेदिषु ॥१७९४॥ इति ।

ततो यथा बुद्धित्वाभेदेऽपि सामग्रीगुणदोषाभ्यां भावाभावादिविषयत्वं बुद्धीनां तद्वच्छब्दानामपीति समञ्जसम् । ततो न सङ्केतस्याकरणम्, तत्कालेऽपि विकल्पविषयतया शब्दस्यापकान्तस्यापि परिस्फुरणात् । एतदेवाह–सन्निवेशोऽनुवर्तते इति । सन्निवेशः सम्बन्धः, स च वर्णानामेव प्रक्रमादनुवर्तते विकल्पम् तद्विषयत्वेनानुसरति । यदि पुनः शब्दस्य वस्तुनि स्वत एव योग्यत्वं को दोषो येन सङ्केतः तत्रापेक्ष्यत इति चेत् ? उच्यते–तत्सर्वविषयम्, नियतविषयं वा ? पूर्वविकल्पे ततो युगपत् सर्वार्थप्रतीतिप्रसङ्गः । तथा च न ततो नियतविषयः प्रवृत्त्यादिरिति व्यवहारविलोपः । तत आह–

न सर्वयोग्यता साध्वी सङ्केतान्नियमो यदि । इति ।

---

१ एवं आ० ।

सर्वार्थे शब्दस्य या **योग्यता** सा न **साध्वी** इति निवेदिताद् दोषात् । नायं दोषः, तस्याः सङ्केतात् विषयनियमोपपत्तेः । एतदेवाह–

'सङ्केतान्नियमो यदि' । इति ।

अत्रापि तदेव दूषणम्–तदन्तरस्यानभिधानात् । तथा हि–यदि सत्यामपि योग्यतायां सङ्केतस्यापेक्षा स एव तर्हि–शब्दस्य तदर्थप्रत्यायने शक्तिरिति न स्वतो योग्यता साध्वी । द्वितीयेऽपि विकल्पे दोषमाह–

सम्बन्धनियमेऽन्यत्र समयेऽपि न वर्तताम् ॥४५॥ इति ।

सम्बन्धस्य योग्यतारूपस्य **नियमो** नियतविषयत्वम् तस्मिन् **अन्यत्र** अर्थान्तरे **समयेऽपि** शब्दो **न वर्तताम्** न प्रवर्तेत । वर्तते च उर्वश्यादिशब्दस्य देवगणिकादौ प्रसिद्धस्य दर्व्यादावपि सङ्केतवशात् प्रवृत्तिप्रतिपत्तेः । तन्न शब्दार्थयोरपौरुषेयः सम्बन्धः सम्भवति । तदेवाह–

ततः शब्दार्थयोर्नास्ति सम्बन्धोऽपौरुषेयकः । इति ।

सुबोधमेतत् । कस्तर्हि तयोः सम्बन्धः ? इत्याह–

स हि शब्दार्थसम्बन्धो यतोऽर्थः सम्प्रतीयते ॥४६॥ इति ॥

यतो यमाश्रित्य शब्दादर्थप्रतिपत्तिः स एव तयोः **सम्बन्धो** भवितुमर्हति । स च सङ्केत एव, तद्बलादेव शब्दार्थप्रतिपत्तेरुपलम्भात् न स्वतो योग्यत्वम् । यद्येवं शास्त्रकारेण कथमन्यत्र प्रतिपादितम् ?

"योग्यः शब्दो विकल्पो वा सर्वः सर्वत्र चेत्स्वतः ।
मिथ्यात्वं परतस्तस्य चक्षुरादिधियामिव ॥"
[सिद्धिवि० परि० ५] इति ।

इति चेत्; न; यतो न हि तत्रापि स्वतो योग्यत्वेन तस्य तात्पर्यम्, अपि तु तदभ्युपगमेन शब्दस्यार्थविषयत्वमिति निवेदन एव तत्रापि तात्पर्यम्, अन्यथा कथमत्रेदमभिदध्यात्–**'स्वतः सामर्थ्यविश्लेषात्'** इति[1] ? कथं चेदम् **'वाचः प्रमाणपूर्वायाः प्रामाण्यम्'** इति ? स्वतः शब्दस्य योग्यत्वे प्रामाण्यस्य स्वत एवोपपत्तेः, सतोऽपि पुरुषस्य गुणस्य तन्मिथ्यात्वापाकरण एव व्यापारात् । तन्न शास्त्रकारस्य तत्र तात्पर्यम्, सङ्केत एव तच्छक्तित्वेन तात्पर्यात् ।

स्यादाकूतम्–व्यवहाराय सङ्केतः, न चानित्यत्वे शब्दस्य ततो व्यवहारः, कृतसङ्केतस्य तस्य तत्समयेऽनन्वयात्, अन्यस्य तदा सम्भवतोऽप्यकृतसङ्केतत्वेनार्थवत्त्वापरिज्ञानादिति; तन्न; सङ्केतस्य विकल्पावभासिशब्दोपदर्शनद्वारेण देशकालानविच्छिन्नसकलतत्सदृशशब्दविषयतयैव ईदृशमीदृशस्य गमकमितिवत् वाचकमिति च प्रतिपादनेन लिङ्गान्तरस्येव शब्दान्तरस्याप्यर्थवत्त्वपरिज्ञानात् कुतो न व्यवहाराय सङ्केतः स्यात् ? ततो निषिद्धमेतत्–

"शब्दं तावदनुच्चार्य सम्बन्धकरणं कुतः ।
न चोच्चरितनष्टस्य सम्बन्धेन प्रयोजनम् ॥

---

१ द्रष्टव्यम्–पृ० ३१९ ।

तेनासम्बन्ध[1] (स्वद्धच)नष्टत्वात् पूर्वस्तावदनर्थकः।
उत्तरोऽकृतसम्बन्धो विज्ञायेतार्थवान् कथम् ॥"
[मी० श्लो० शब्दनि० श्लो० २५५-२५६]

निवेदितेन न्यायेन सङ्केतकरणस्योत्तरशब्दार्थवत्परिज्ञानस्य च भावात्। लिङ्गेऽपि विद्युदादावस्य प्रसङ्गाच्च। शक्यं हि तत्रापि वक्तुम्–

लिङ्गं तावदनादर्श्य सम्बन्धकथनं कथम्।
न च दर्शितनष्टस्य सम्बन्धेन प्रयोजनम् ॥१७९५॥
तेनासम्बन्ध्य(स्वद्धच)नष्टत्वात् पूर्वं तावदनर्थकम्।
परं चानुक्तसम्बन्धं विज्ञायेतार्थवत् कथम् ॥१७९६॥ इति।

यदप्यन्यदुक्तम्–

"अर्थवान् कतमः शब्दः श्रोतुर्वक्त्रा च कथ्यताम्।
यदा पूर्वं श्रुतं शब्दं नासौ शक्नोति भाषितुम् ॥
न तावदर्थवन्तं स ब्रवीति सदृशं वदेत्।
नार्थवत्सदृशः शब्दः श्रोतुस्तत्रोपपद्यते ॥
अर्थवद्ग्रहणाभावात् न चासावर्थवान् स्वयम्।"
[मी० श्लो० शब्दनि० २६०–६२] इति।

तदपि तादृशमेव। तथा हि–

अर्थवत् कतमल्लिङ्गं ज्ञातुर्वक्त्रा प्रदर्श्यताम्।
पूर्वं ज्ञातं यदा नासौ लिङ्गं दर्शयितुं क्षमः ॥१७९७॥
नार्थवद् दृश्यते तेन सदृशं दृश्यते यदि।
नार्थवत् सदृशं लिङ्गं ज्ञातुस्तत्रोपपद्यते ॥१७९८॥
अर्थवद्ग्रहणाभावात् न स्वयं चेदमर्थवत्। इति।

ततो यथा लघुविनाशिन्यपि विद्युदादौ विकल्पावभासिनि सम्बन्धप्रतिपत्तौ परापरकालभाविनि तत्सदृशे सर्वत्रापि तत्प्रतिपत्तेः, पूर्वोपलब्धस्य अनुपदर्शनेऽपि परस्योपदर्श्यमानस्य अर्थवत्त्वप्रतिपत्तिः, अन्यथा ततो वातादिसाध्यप्रत्यायनानुपपत्तेः। अस्ति चेदम्–

"वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥"
[पा० महा० २।३।१३]

इति प्रसिद्धेः। तथा शब्दस्यापीति न तत्राप्ययं दोषो भाषितव्यः। ततो युक्तं परापरस्यापि शब्दस्य वाचकत्वम्। इदमेव कारिकाखण्डेन दर्शयति–

तादृशो वाचकः शब्दः सङ्केतो यत्र वर्तते। इति।

यत्र यस्मिन् शब्देऽर्थे वा सङ्केतोऽयमस्य वाचको वाच्य इति समयः प्रवर्तते तादृशस्तत्समानः शब्दो वाचकः तादृशस्यार्थस्य तादृश इति पष्ठ्यन्तस्याप्यावृत्त्या सम्बन्धात्। सादृश्याच्च वाचकत्वं वर्णस्य वर्णान्तरेण पदस्य पदान्तरेण एवं वाक्यादावपि। ततो न

---

१ असम्बद्धचेति सम्बन्धमगत्वा इत्यर्थः।

शालाशब्दे सम्बन्धपरिज्ञानात् मालादिशब्दस्यापि तदर्थवाचकत्वम्, वर्णमात्रेण सादृश्येऽपि पदरूपतया तदभावात् । यदप्युक्तम्–

"सादृश्यात् प्रतिपत्तौ च भ्रान्तिज्ञानं प्रसज्यते ।
धूमे दृष्टेऽग्निसम्बन्धे वाष्पादिव कृशानुधीः ॥"

[मी० श्लो० शब्दनि० श्लो० २६९] इति । ५

तत्रोपपन्नं वाष्पादग्निज्ञानं भ्रान्तमिति धूमस्यैव तत्र प्रतिबन्धपरिज्ञानम्, तत्सादृश्यस्य शब्दस्य तु तदन्तरसदृशस्यैव तदर्थे तत्परिज्ञानात् । कुतस्ततः तज्ज्ञानस्य विभ्रमत्वम् ? अपि च, एवं धूमान्तरादपि दहनज्ञानं भ्रान्तं भवेत्, तस्यापि सादृश्यादेव गमकत्वात् । सामान्यस्य तदर्थान्तरस्य प्रत्याख्यानात् । अप्रत्याख्यानेऽपि वाष्पादनलज्ञानं भवतोऽपि कुतो भ्रान्तम्, धूमसामान्यस्य तत्राभावादिति चेत् ? न; पाण्डुत्वादेर्भावात् । तद्विशेषस्याभावादिति १०
चेत्; ममापि तर्हि सादृश्यविशेषाभावात् भवतु ततस्तज्ज्ञानं भ्रान्तम्, न तद्वतः शब्दात् तदर्थज्ञानमिति समः समाधिः । ततः सूक्तम्–'तादृशो वाचकः' इत्यादि ।

भवतु तादृशस्य वाचकत्वं शब्दस्य मयापि तथा तदभ्युपगमादिति सौगतः; तन्न तन्मते शब्दस्यैवासम्भवात् । स हि पदादिरूपो न विना वर्णव्यवस्थितिमवस्थातुमर्हति । वर्णक्रमसन्दोहस्य पदत्वात्, पदक्रमसङ्घस्य च वाक्यत्वात् । स च वर्णः क्षणक्षीणैकध्वनि- १५
स्वभावः, क्षणपर्यायप्रवृत्तानेकध्वनिरूपो वा प्रकारान्तरानिरूपणात् ? न तावदाद्यो विकल्पः; अनभ्युपगमात्, क्रमप्रवृत्तासङ्ख्येयध्वनिभागपरिनिष्ठितात्मा ह्येकैकोऽपि वर्णस्तस्याभिप्रेतः । तत्रासङ्ख्येयक्षणनिमेषपरिसमाप्तिरिति वार्तिके[1] श्रवणात् । नापि द्वितीयो विकल्पः; ध्वनिक्षणानां निरन्वयविनाशे हेतुफलभावानुपपत्त्या तन्निबन्धनस्य पौर्वापर्यस्यासम्भवात् । निरूपिता च तत्र तदनुपपत्तिः । सम्भवत्यपि तस्मिन् कथं बहुष्वेकव्यपदेशोऽयमकारो २०
गकारो वेति ? तेष्वेकत्वस्य कल्पनात् तद्रूपत्वाच्च वर्णादिरिति चेत्; ननु कल्पनमपि शब्दादेव "विकल्पाः शब्दयोनयः" [ ] इति वचनात् । स शब्दो यदि स एवाकारादिः तर्हि 'विकल्पात्तस्य, ततो विकल्पस्य निष्पत्तिः' इति परस्पराश्रायात् नोभयस्यापि सम्भवः स्यात् । अथान्य एव स शब्दो यतो विकल्प इति; तन्न; तस्यापि तत एव कल्पने तथैव दोषात् । पुनरप्यन्यतः तत्कल्पितादेव शब्दात् तद्विकल्पपरि- २५
कल्पनायामितरेतराश्रयप्रवाहप्राप्तेः । विकल्पान्तरकल्पितात् ततस्तत्कल्पनमित्यपि न युक्तम्; तदन्तरस्यापि स्वकल्पितादेव शब्दादपरापरस्मादुत्पत्तिपरिकल्पनायां पूर्ववद्दोषात्, तस्यापि तदन्तरकल्पितात् ततस्तत्परिकल्पनायामनवस्थाप्राप्तेः । नायं दोषो हेतुफलभावेनानादित्वात् शब्दाकारावभासिनो विकल्पप्रवाहस्येति चेत्; न; एवमपि तदसम्भवात् । तथा हि–

अवस्तुसन् यदा वर्णः तदा तत्कल्पनाकरी । ३०
बुद्धिस्तन्मात्ररूपत्वात्कथं वस्तुसती भवेत् ॥१७९९॥
यतः शब्दस्य सा हेतुस्तस्याः शब्दोऽपि वा फलम् ।
न ह्यसत्कस्यचिद्धेतुः कार्यं वा व्योमपुष्पवत् ॥१८००॥

---

१ "सर्वान्त्योऽपि हि वर्णात्मा निमेषतुलितस्थितिः । स च क्रमादनेकाणुसम्बन्धेन नितिष्ठति ॥" –प्र० वा० २।४९५ । "स चाक्षिनिमेषकालस्थायी अकारादिः अनेकेषामाकाशतमःसंज्ञितानां पञ्चमात्राद्वयवर्तिनामणूनां सम्बन्धेनाक्रमणेन निमेषकालसंज्ञितेन क्रमाद् भूयः क्षणव्यवधानात् नितिष्ठति परिसमाप्यते ।"–मनोरथन० ।

रूपं यदपि सत्तस्याः स्ववेदनमभीप्सितम् ।
न तस्य निर्विकल्पत्वात् शब्दकारणकार्यता ॥१८०१॥

तत्र शब्दस्यावस्तुसत्त्वे विकल्पसम्भव यतस्तत्कल्पनमित्यपुक्तमिदम्–"**विकल्पयोनयः शब्दाः**" [ ] इति । तन्न सौगतमते शब्दस्य सम्भवः, वर्णस्यैवानवस्थितौ तत्क्रमात्मनः पदादेरप्यव्यवस्थितेः । एतदेवाह–

क्रमेणोच्चार्यमाणेषु ध्वनिभागेषु केषुचित् ॥४७॥
न वर्णपदवाक्याख्या अविकारेष्वसम्भवात् । इति ।

न हि सूक्ष्मसमयावसायिततोपजायमानेषु केषुचिन्नादरूपेष्ववयवेषु वर्णादिव्यपदेशाः सम्भवन्ति; तेषामेव निरन्वयविनश्वरतया विकार[1]विकलानां हेतुफलभावानधिश्रयतया व्योमारविन्दमकरन्दप्रख्यानामप्रख्याभूमित्वेन तत्र तत्त्वतः कल्पनया च वर्णादिव्यवस्थापनानुपपत्तेः ।

एतेनैतदपि प्रत्युक्तं यदुक्तं केनचित्[2]–"**क्षणिकः शब्दः अस्मदादिप्रत्यक्षत्वे सति विभु[3]द्रव्यविशेषगुणत्वात् सुखादिवत् ।**" [ ] इति; तथा हि शब्दस्याप्रतिपत्तावाश्रयासिद्धिः लिङ्गस्य । प्रतिपत्तौ तत्र तस्य कारणत्वं वक्तव्यम् "**अर्थवत् प्रमाणम्**" [न्यायभा० १।१।१] इत्यत्र कारण [त्व] स्यैव विषयत्वव्याख्यानात् । तस्य च न सहजन्मनस्तत्कारणत्वं तस्य तत्प्रतिपत्त्या युगपन्निष्पन्नयाऽनपेक्षणात् । न प्रागधिगतजन्मनोऽपि तदुत्पत्तिसमयमप्राप्य निवृत्तस्य; [4]अनधिगतजन्मनोऽपि तस्य तद्धेतुत्वप्रसङ्गात् । न हि किञ्चिदत्र निबन्धनं यदुत्पद्याभूतमेव कारणं नानुत्पद्याभूतमिति नीरूपत्वस्योभयत्राप्यविशेषात् । ततस्तत्समयप्राप्तस्यैव तस्य[5] तत्कारणत्वम् । तथा च न क्षणिकत्वं प्रागिव पश्चादपि तस्य समयान्तरप्राप्तेरवश्यम्भावात्, अन्यथा प्रागपि तदभावोपनिपातात् ।

एतेन क्षणषट्कस्थायित्वं क्षणिकत्वमिति प्रत्युक्तम् । यतः–

क्षणात् क्षणान्तरं गच्छन्नित्यो यद्युक्तमार्गतः ।
क्षणषट्कक्रमस्थायी सुतरां नित्यतां व्रजेत् ॥१८०२॥

कथमेवं चलत्वं कस्यचिच्छब्दस्य यदि तस्यापि समयान्तरप्राप्तिरावश्यकात्त(वश्यिका त) दभाव[6] एव तदुपपत्तेरिति चेत्; न; तत्प्राप्तावनुपलभ्यत्वेनापि [7]तदुपपत्तेः । न चोपलभ्येतरयोरेकत्वानुपपत्तिः; युगपदिव क्रमेणापि तदविरोधात् । अस्ति च युगपत्तयोरेकत्वम्, उपलभ्यस्यैव शब्दस्य[8] क्षणक्षयात्मनाऽनुपलभ्यत्वात् । तेनाप्युपलभ्यत्वे प्रकृतस्यानुमानस्य वैफल्यात् । विप्रतिपत्तिनिवर्तनार्थत्वान्नेति चेत्; कुतस्तस्य तदर्थत्वम् ? निश्चयरूपत्वादिति चेत्; न; प्रत्यक्षस्यापि तद्रूपस्यैव भवतां प्रसिद्धेः । तथापि तद्विषये विप्रतिपत्तावनुमानविषयेऽपि स्यादिति पुनस्तन्निवर्तनार्थं प्रमाणमन्यदन्वेषणीयम्, तत्राप्येवमनवस्थितेर्न कदाचिदपि तन्निवृत्तिर्भवेत् । ततोऽनुपलभ्यतद्रूपविज्ञानार्थत्वमेव तस्योपपन्नमिति सिद्धमुपलभ्येतरस्वभावयोरेकत्वं युगपत् । एवं क्रमेणापि श्रावणस्य तत्स्वभावपरिहारेण शब्दपरिणामिनो भावस्य पुनरवस्थितिसम्भवात् । तत्र प्रकृतादनुमानादेकान्ततः शब्दे

---

१ –रविकल्पानाम् आ० । २ वैशेषिकेण । ३ विभुद्रव्यमाकाशम् । ४ अनुत्पन्नस्यापि । ५ शब्दस्य प्रतिपत्तिकारणत्वम् । ६ समयान्तरप्राप्त्यभावे एव चलत्वोपपत्तेः । ७ चलत्वोपपत्तेः । ८ शब्दस्य लक्षण– आ० ।

क्षणिकत्वसाधनमुपपन्नम् । कथञ्चित् तत्साधनेन विरुद्धत्वादनैकान्तिकत्वाच्च । व्यभिचारि हीदमनुमानं भावनादिना, तस्यात्मगुणविशेषस्याक्षणिकत्वेऽप्यस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात् । न चायमपि क्षणिक एव कालान्तरे तदभावेन तत्फलस्यानुदयप्रसङ्गात् । न चैवम् । भावनाधर्माधर्माणां भवान्तरेऽपि फलदायित्वेन परस्यापि प्रसिद्धेः । नापि तत्र हेतुविशेषणम् 'अस्मदादिप्रत्यक्षत्वम्' असिद्धम्; मानसेन प्रत्यक्षेणास्मदादिभिरपि तस्य प्रत्यक्षीकरणात् । कथमन्यथा 'यावान् कश्चिद् गुणः स सर्वोऽपि गुण्याश्रितः' इति साकल्येन व्याप्तिप्रतीतिः ? यतः "**द्रव्याश्रिता बुद्ध्यादयो गुणत्वात् रूपादिवत्**" [ ] [1]इत्यनुमानमुदयवदबुद्ध्येत यत आत्मसिद्धिः । यदि पुनरेवं विशेषणम्–'अस्मदादिबाह्येन्द्रियप्रत्यक्षत्वे सति' इति, न चैवं व्यभिचारो भावनादौ तदभावादिति; न तर्हि सुखादिवदिति निदर्शनमुपपन्नं साधनवैकल्यात्, तदपि तद्विशेषणकस्य विभुद्रव्यविशेषगुणत्वस्य तत्राभावात् । कुतो वा श्रोत्रस्य बाह्येन्द्रियत्वं यतस्तद्विषयस्य शब्दस्य बाह्येन्द्रियप्रत्यक्षत्वमवकल्प्येत ? अनन्तःशरीरवृत्तेरिति चेत्; न; कर्णशष्कुल्यवगुण्ठितत्वेन तदन्तर्वर्तिन एवाकाशस्य श्रोत्रत्वोपगमात् । आत्मना तस्याऽसंयोगादिति चेत्; न तर्हि नयनादेर्बाह्येन्द्रियत्वं तत्र तत्संयोगभावात्, अन्यथा आत्मनोऽसर्वगतत्वप्रसङ्गो मूर्तैरपि नयनादिभिरनभिसम्बन्धात्, तत्सम्बन्धलक्षणत्वाच्च व्यापित्वस्य[2]। भवतु तर्हि मनोऽधिष्ठितत्वादेव नयनादेरिव श्रोत्रस्यापि बाह्येन्द्रियत्वमिति चेत्; तदनधिष्ठाने को दोषो यतस्तत्परिकल्पनम् ? युगपद्ज्ञानोत्पत्तिरेव, रूपादीनां युगपदपि सन्निधानसम्भवादिति चेत्; न; तदुत्पत्तिक्रमनियमस्यादृष्टवशादपि शक्यकल्पनत्वात्, सत्यपि मनसि तस्यावश्यापेक्षणीयत्वात्, अन्यथा सर्वकार्येषु तस्य[3] साधारणहेतुत्वानुपपत्तेः । न चैवं मनस इव नयनादेरपि वैयर्थ्यम्; तस्य गोलकादिरूपस्य दृष्टत्वेनाशक्यप्रतिषेधत्वात् । शक्तिरूपस्य शक्य एव प्रतिषेधः, तत्प्रसवाभिमतस्य रूपादिज्ञानभेदस्यादृष्टभेदादेवोपपत्तेरिति चेत्; यद्येवं प्रतिपद्यसे न किञ्चिदनिष्टं [4]तद्भेदस्यैव क्षयोपशमविशेषापरनामधेयस्य साक्षान्नयनादित्वेनास्माभिरभिधानात्, गोलकादेस्तदधिष्ठानतया गवाक्षस्थानीयस्यैवोपचारादेव रूपादिज्ञानहेतुत्वपरिकल्पनात् । ततः श्रोत्रस्य बाह्येन्द्रियत्वानुपपत्तेः अस्मदादिप्रत्यक्षत्वमेवावशिष्यत इति तदवस्थो व्यभिचारः, तद्विशेषणस्य हेतोर्भावनादौ साध्यविपर्ययेऽपि भावात् ।

असिद्धश्चायं हेतुः विभुद्रव्यविशेषगुणत्वादिति, आकाशे तस्य तत्कार्यतया समवायाद्धि तद्गुणत्वम्, न चासौ तस्यास्ति अनुपरमप्रसङ्गात् । निरूपितं चैतत्– "**कारणस्याक्षये**" [5]इत्यादौ । एतेन सुखादेरप्यात्मकार्यत्वेन तद्विशेषगुणत्वं प्रतिषिद्धं बोद्धव्यम् । ततो नातः क्षणिकत्वप्रतिपत्तिः शब्दस्य असिद्धत्वात्, निदर्शनस्य साधनवैकल्याच्च । तन्न यौगमतेऽपि सम्भवः शब्दस्य । स्वमते तु तत्सम्भवं दर्शयन्नाह–

शब्दभागाः स्वहेतुभ्यः समानोन्नयहेतवः ॥४८॥ इति ।

श्रोत्रग्रहणयोग्याः परिणामाः **शब्दाः** त एव प्रतिदिशमनेकरूपतया विभज्यमानत्वात् **भागास्ते समानस्य** सदृशस्य प्रतिश्रोत्रमात्मप्रापणस्य **उन्नयस्य हेतव** इति । कुतः

---

१ "सुखादयः क्वचिदाश्रिता गुणत्वाद्रूपादिवत्" –प्रश० व्यो० पृ० ४०६ । २ सर्वमूर्तमद्द्रव्यसंयोगित्वं व्यापित्वम् । ३ अदृष्टस्य । ४ अदृष्टविशेषस्यैव । ५ न्यायवि० श्लो० १।१०६ । पृ० ४१० ।

पुनस्ते स्वयं भवन्तस्तदुन्नयस्य हेतव इति चेत् ? स्वहेतुभ्य एव। स्वहेतवश्च तेषामुपादानतया पुद्गलविशेषाः, सहकारितया च तालवादिस्थानप्रयत्नभेदास्तेभ्य एव। कथमेवमपि युगपत् समानानेकवर्णोत्पत्तिरिति चेत् ? यौगपद्येन बहुभिरुपलम्भादेव। न चायमेकत्वे वर्णस्य सम्भवति, एकश्रोत्रप्रविष्टस्य तदैव तदन्तरप्रवेशासम्भवात्। एकस्यापि व्यापिनः सम्भवत्येव युगपदनेकतत्प्रवेश इति चेत्; न; तथापि समग्रस्य तदसम्भवात्, असमग्रोपलब्धस्य च वाचकत्वानुपपतेः। एतदेवाह—

सकलाग्रहणात् [तेषां युक्ता हि श्रोत्रगोचराः]। इति।

सकलस्य समग्रशब्दपरिणामस्य यद् **अग्रहणम्** एकत्वाभ्युपगमे प्राप्तं तस्मात् **समानोन्नयहेतव** एव त इति। यद्येवं कथमेक एव शब्दोऽस्माभिरश्रावीति तदुपलब्धिभ्रमतां संवाद इति चेत् ? न; सादृश्यादपि तदुपपत्तेः। दृश्यते हि ततोऽपि तथासंवादः—यथैक एवाहारः पङ्क्तिगतानामिति। ततो युगपत् सकलाकारतया भिन्नदेशव्यवस्थितानेकप्रतिपत्तृगोचरत्वादनेक एव शब्द।

श्रोत्रस्याप्राप्यकारित्वेनैकस्यापि शब्दस्य तथा तद्विषयत्वोपपत्तेः नातस्तज्ज्ञानात्वप्रतिपत्तिरिति चेत्; न; तत्प्राप्यकारित्वस्यानुमानतः प्रतिपत्तेः। प्राप्यकारि श्रोत्रं प्रत्यासन्नग्रहणात् साधर्म्येण घ्राणवत्, वैधर्म्येण नयनवत्। न चैवं दिग्विभागस्य दूरादिभावस्य चाप्रतिपत्तिरेव; श्रोत्रं प्रति शब्दस्याभिपतनविशेषादेव प्राच्योऽयमुदीच्योऽयं प्रत्यासन्नोऽयमन्यथा वेति तत्र प्रतिपत्तेः सम्भवात्, प्राप्यकारिण्यपि घ्राणेन्द्रिये तत एव तद्भावात्। कथमन्यथा पिपीलिकादीनां गन्धाभिपतनदिगभिमुखतया प्रत्यासन्ने दूरे वा गन्धद्रव्ये प्रवृत्तिः ? एवं तर्हि दूरत्वस्यासत एव तत्र प्रतिभासनात् श्रोत्रज्ञानं कथमभ्रान्तमिति चेत् ? न; शब्दरूपस्य सत एव तत्र प्रत्यवभासनात्। भ्रान्तेतरात्मकत्वमेकत्र विरुद्धमिति चेत्; न; दृष्टत्वात्। कथमन्यथा साकारज्ञानवादिनस्तवाप्ययं न दोषः—ज्ञानान्तर्गतत्वेनादूरस्यैव नीलादेर्दूरतया प्रत्यवभासनात्। न हि तद्विषयं ज्ञानमपि दूरमेव शरीरस्य निर्ज्ञानत्वापत्तेः। ज्ञानान्तरेण तस्य सज्ञानत्वमिति चेत्; न; तस्य निर्विषयस्याभावात्, सविषयस्य पूर्ववद्दूरत्वापत्तेः, पुनरपि ज्ञानान्तरेण तस्य सज्ञानत्वकल्पनायामव्यवस्थितिप्रसङ्गात्। तत्र शरीराद् बहिर्ज्ञानकल्पनमुपपन्नं निःशरीरस्य ज्ञानस्याप्रतिवेदनात्। ततो दुष्परिहरमेवाप्राप्यकारि श्रोत्रादिकं ब्रुवतोऽपि तज्ज्ञाने विभ्रमेतरात्मकत्वमिति न तेन वयं पर्यनुयोक्तव्याः। ततो युक्तं श्रोत्रस्य घ्राणादिवत् प्राप्यकारित्वम्, अन्यथा नयनादिवत् प्रत्यासन्नग्राहित्वाभावप्रसङ्गात्। अस्ति च तत्रेदम्—कोटकव्यानादेः कर्णविवरान्तर्वर्तिनोऽपि तेन प्रतिवेदनात्। न चैतदप्राप्यकारिणि चक्षुषि दृष्टं तदन्तर्गतस्याञ्जनादेस्तेनाप्रतिपत्तेः। तथा च कस्यचित् सुभाषितमपि "न स्वमलमक्षि पश्यति शशिनि कलङ्कं निरूपयिष्यति" [ ] इति।

चक्षुरपि प्राप्यकार्येव [1]बाह्येन्द्रियत्वात् त्वगादिवदिति चेत्; अत्र चक्षुर्यदि गोलकमेव न तर्हि तत्र प्राप्यकारित्वसाधनमुपपन्नम्, तत्पक्षस्य अनुष्णाग्निपक्षवत् प्रत्यक्षेण बाधनात्, विषयविप्रकृष्टस्यैव हि गोलकस्य प्रत्यक्षेण प्रवेदनं न तत्प्राप्तस्य। रश्मिद्वारेण तत्प्राप्तस्यास्त्येव तस्यानुमानतः प्रतिपत्तिः। तच्चेदमनुमानम्—रश्मिकलापालङ्कृतं चक्षुः तैजसत्वात्

---

१ "चक्षु-श्रोत्रे प्राप्यार्थं परिच्छिन्दाते बाह्येन्द्रियत्वात् त्वगिन्द्रियवत्" —न्यायवा० ता० पृ० ७३। न्यायकुमु० द्वि० पृ० ७५ टि० २।

प्रदीपवत्। [1]तैजसं च तत् रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् तद्वदेव। ततो गोलकादभिसर्पतस्तत्कलापस्य विषयप्राप्तेः प्राप्यकार्येव चक्षुरिति चेत्; अत्र यदि गोलकस्य स्वतो रूपप्रकाशकत्वं रश्मिकलापकल्पनस्य वैयर्थ्यम्। तत्कलापद्वारकमेव तस्य तदिति चेत्, कथं तदसिद्धौ तस्य तद्द्वारकं तत्प्रकाशकत्वम्? तत्सिद्धिश्च यद्यन्यतः; तदेवोच्यतां किं तैजसत्वेन? तैजसत्वादेवेति चेत्; तर्हि तस्मात् तत्कलापसिद्धौ तद्द्वारकं तस्य रूपप्रकाशकत्वं ततोऽपि तैजसत्वं सिद्धचतीति कथन्न परस्पराश्रयः स्यात्? तन्न तत्कलापसिद्धिरिति न तद्द्वारकमपि चक्षुषः प्राप्यकारित्वम्। कथं वा प्राप्यकारित्वे तस्य व्यवहितविषयत्वं प्राप्त्यभावात्। दृश्यते च शुद्धस्फटिकघटीभित्तिव्यवहितस्यापि वस्तुनस्तेन प्रकाशनम्। तस्यास्त्येव तेन प्राप्तिः तद्भित्तेर्निर्भेदादित्यपि न सङ्गतम्; तदन्तर्गतस्य जलादेर्बहिरवस्रंसनप्रसङ्गात् तच्छिद्रानुपलब्धेश्च। न तस्य तेन प्रकाशनं तत्प्रतिबिम्बस्यैव बहिरपक्रान्तस्य प्रकाशनादित्यपि मन्दमतेरेव स्पन्दितम्; अन्तर्गतस्य बहिष्प्रतिबिम्बापक्रमानवलोकनात्। तस्मादप्राप्यकार्येव चक्षुः। तथा चोपपन्नं श्रोत्रस्य प्राप्यकारित्वे तस्य वैधर्म्योदाहरणत्वं साध्याव्यावृत्तिदोषाभावात्। ततः श्रोत्रं प्राप्यकार्येव उक्तान्न्यायात्। एतदेवाह—

तेषां युक्ता हि श्रोत्रगोचराः। इति।

तेषां शब्दभागानां मध्ये **युक्ताः** श्रोत्रेण सम्बद्धा **हि**रवधारणे **श्रोत्रस्य गोचरा** विषया अन्यथा प्रत्यासन्नग्राहित्वाभावप्रसङ्गादिति मन्यते। किं पुनरिदं श्रोत्रेन्द्रियस्य प्राप्यकारित्वोपकल्पनम्? आकाशमिति कश्चित्[2]; तन्न; तस्य विभुत्वेन दूरभूतानामपि शब्दानां प्राप्त्यविशेषेण ग्रहणप्रसङ्गात्, तस्यैकत्वेन सर्वेषामेकश्रोत्रत्वापत्त्या सर्वविषयस्यैकेन एकविषयस्य सर्वैरपि ग्रहणापत्तेश्च। न च तस्य[3] प्रदेशवत्त्वं यतोऽदृष्टविशेषोपनिबद्धसंस्काराधिकरणस्य तत्प्रदेशस्य श्रोत्रत्वात्, तेन च दूरभूतानामप्राप्तेर्न प्रथमो दोषः, नापि द्वितीयस्तस्य प्रतिप्राणिभेदेन श्रोत्रनानात्वस्यैवोपपत्तेरिति व्यवस्थाद्वयं परिकल्प्येत; निष्प्रदेशस्यैव तस्याभ्युपगमात्। कल्पितस्य च तत्प्रदेशस्याकिञ्चित्करत्वात्। तदुक्तं कुमारिलेन—

"आकाशश्रोत्रपक्षे तु विभुत्वात्प्राप्तितुल्यता।
दूरभावेऽपि शब्दानामिति ज्ञानं प्रसज्यते॥
श्रोत्रस्य चैवमेकत्वं सर्वप्राणभृतां भवेत्।
तेनैकश्रुतिवेलायां शृणुयुः सर्व एव ते॥
तस्यानवयवत्वाच्च न धर्माधर्मसंस्कृतः।
नभोदेशो भवेच्छ्रोत्रं व्यवस्थाद्वयसिद्धये॥"

[मी० श्लो० शब्दनि० ५६--५९] इति।

ततः क्षयोपशमविशेषाधिकरणजीवप्रदेशावष्टब्धः कश्चिच्छरीरावयव एव श्रोत्रमिति स्याद्वादिनः, तत्संस्पर्शेनैव शब्दस्य प्रत्यवभासनात्। शब्दावभासनं हीन्द्रियं श्रोत्रम्। तच्च तदवयव एव युक्तः, तत्सम्बन्धादेव तस्योपलम्भात् तदभावे च विपर्ययात्। तथा च 'पुद्गलपर्यायः शब्दः शरीरावयवसम्बन्धेनोपलभ्यमानत्वात् शीतातपादिवत्' इत्यनुमानविजृम्भणात् नाकाशगुणत्वं तस्य तद्वदेवेति प्रतिपादितं भवति। एतदेव दर्शयन्नाह—

---

१ "तैजसत्वं तु तस्य रूपादिषु मध्ये नियमेन रूपस्यैवाभिव्यञ्जकत्वात् प्रदीपवत्'—प्रश० कन्द० पृ० ४०। न्यायकुमु० पृ० ७६ टि० २। २ वैशेषिकः। ३ आकाशस्य।

वर्त्तिन्योः, वारेति रावेति च प्रवाह-नक्षत्रविशेषयोः [1]तदतत्क्रमाधिष्ठानतया तद्वर्णानामेव [2]तद्भावभेदप्रतिपत्तेः प्रतीयमानत्वात् । एकवक्तृकत्वं तु तेषां तद्भावनिमित्तमिति नायं नियमः, भिन्नवक्तृकत्वेऽपि तत्क्रमभावे पदभावेन प्रत्यायकत्वप्रतिपत्तेः । प्रतीयते हि भिन्नवक्तृकपूर्वापर[3]भागादपि पद्यादेस्तच्छ्राविणां तदर्थप्रतिपत्तिः । वर्णानां पदत्वे कथम् शब्दादर्थं[4] प्रतिपद्यामहे' [5]इति ? कथञ्च न स्यात् ? तेषां बहुत्वेन [6]तद्वाचिनः शब्दशब्दाद् बहुवचनस्यैवोपपत्तेरिति चेत्; न; तत्साधारणस्य वाचकत्वसामान्यस्य तदभिधेयत्वात्, तस्य चैकत्वेनैकवचनस्यैवाबाधाच्च । यद्येवं कथम् 'गकारौकारविसर्जनीयाः शब्दः' इति[7] तद्व्यक्तिवाचिभिस्तस्य सामानाधिकरण्यं तद्व्यक्तीनां तेनानभिधानादिति चेत् ? न; उपसर्जनभावेन तासामपि तेन प्रत्यायनात्, अन्यथा तत्सामान्यस्य तेन तदनुपपत्तेः, तद्व्यक्तिसङ्ख्यानुपादानं तु मुख्यतस्तत्सामान्यस्यैव तेनाद्योतनात् । ततो 'युक्तम् 'शब्दादर्थं प्रतिपद्यामहे' इति, न 'अनुपाश्रितव्यावृत्तयो व्यक्तयो जात्यात्मना'[8]; निषेधात् ।

अपि च, अयं पदादिस्फोटात्मा शब्दो नित्यो निरवयवश्च त्वदभिप्रेतः;[9] स यदि स्वत एवेन्द्रियसम्प्रयोगात् प्रतीतिप्रेयसीसम्पर्कमुपसर्पति पौरुषेयः प्रयासो विफलः स्यात् । न विफलस्तस्य तदभिव्यक्तिनिबन्धनत्वात् । स खलु प्रयासः परापरसमयभावी प्रयत्नापरनामा तादृशमेवानेकध्वनिभेदमाविर्भावयति, ततश्च तस्याभिव्यक्तिः । सापि नावयवशो निरवयवत्वात् । नापि प्रथमत एव नादात् तस्य सर्वात्मनाऽभिव्यक्तेः नादान्तरकल्पनावैफल्यम्; अभिव्यक्तिविशेषोपपत्तेः । अपरिस्फुटा हि तस्य प्रथमान्नादादभिव्यक्तिः, तदुपजनितभावनासहायात्तु द्वितीयस्मात्ततो विलक्षणा, तावदेवं यावदन्त्यो ध्वनिः, ततस्तु प्रावर्तननिरवशेषध्वनिविशेषोपजनितप्रत्ययोपनिबद्धभावनानिवहसचिवसद्वितीयाद् अत्यन्तपरिस्फुटतमा तदभिव्यक्तिराविर्भावं बिभर्त्ति । न चैतावता तस्य प्रत्यभिव्यक्ति भेदः; आवृत्त्या भेदेऽप्यनुवाकादेरिवोपलब्धिभेदेऽपि तस्यैकतयैव प्रत्यवभासनात् । उक्तं चैतत्-

"यथानुवाकः[11] श्लोको वा सोढत्वमुपगच्छति ।
आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते ॥
प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥
नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवभासते ॥"

[वाक्यप० १।८३-८५]

इति चेत्; उच्यते-

[12]स व्यक्तः प्रथमान्नादादर्थप्रत्ययकृच्चदि ।
व्यर्थः परापरो नादस्तद्व्यक्तय्यै परिकल्पितः ॥१८०६॥

---

१ पूर्वापरविपर्यस्तवर्णरूपेण प्रतीयमानतया । २ तदभाव-आ०, ब०, प० । ३ -भाविप -आ०, ब०, प० । ४-दनर्थं आ०, ब०, प० । ५ 'प्रयोगः' इति सम्बन्धः । ६ वर्णवाचिनः । ७ "अथ गौरित्यत्र कः शब्दः ? गकारौकारविसर्जनीया इति भगवानुपवर्षः"-शाबरभा० १।१।५ । ८ यदुक्तं आ०, ब०, प० । ९ 'इति युक्तम्' इति सम्बन्धः । "न चानुपाश्रितव्यावृत्तयो व्यक्तयो जात्यात्मना निर्दिश्यन्त इति साम्प्रतम्' -स्फोटसि० पृ० ७१ । १० 'नित्यत्वमविकल्प्यं तु सत्त्वादेर्वास्य जातिवत् ।" -स्फोटसि० का० ३४ । ११ अनुवाको वैदिकः, श्लोकस्तु लौकिकः, सोढत्वं जितत्वं वशतामिति यावत् । १२ सम्यक्त्वः आ०, ब०, प० ।

अर्थावगतये तस्मात्तद्व्यक्तिरभिवाञ्छिता ।
सा चादिव्यवितः सिद्धा व्यक्त्या किं परया ततः ॥१८०७॥
सोऽर्थप्रत्ययकृन्नो चेत् कुत एतदशक्तितः ।
पश्चादपि न तत्कृत्स्यादिति तत्कल्पनं वृथा ॥१८०८॥
सङ्केतविरहाच्चेन्न सोऽर्थसंवित्तिकृन्मतः ।
प्रतीतिभावे सङ्केतः स एव न कुतो भवेत् ॥१८०९॥
अव्यक्ततत्वात्प्रतीतेश्च नासौ सङ्केत्यतेऽनया ।
तयैवासौ कथं तर्हि सिद्ध इत्यपि कथ्यताम् ॥१८१०॥
सिद्धत्वाय समर्थोऽसौ सङ्केतायैव नेत्ययम् ।
स्वरुच्या कल्पितो भेदो विद्वद्भ्रुचो नाभिरोच्यते ॥१८११॥
आदावेव ततो व्यक्तौ सङ्केतस्यापि सम्भवात् ।
अर्थप्रतीतेः व्यक्तिः सा विफलैवोत्तरोत्तरा ॥१८१२॥

अपि च, अयमन्त्यायां बुद्धावबधार्यमाणो न तावदखिलविपर्यासविकल एवावधार्यते, परमर्षीणामेव तथा तदवधारणस्य तदन्येषां तैस्तत्सम्प्रदायस्य चोपगमात्। अत एवोक्तम्–

"**अपरदर्शितविषयास्तु परमर्षयः साक्षात्कृतधर्माणोऽव्याहतान्तःप्रकाशा विधूतविपर्यासं वाक्तत्त्वं प्रतिपेदिरे प्रतिपादयामासुः प्रतिज्ञायते**" [स्फोटसि० पृ० १५४] इति। भवतु तत्रापि सविपर्यासस्यैव तस्यावधारणं संवेदनवत्। यथैव हि संवेदनस्याविभागस्याप्यावोधिमार्गावतारात् ग्राह्याद्याकारविभागविपर्यासोपरक्तस्यैव प्रकाशनमन्यथा तदनवलोकनात् तथा तादृशस्य शब्दात्मनोऽपि विभ्रमोपदर्शितगकारादिवर्णक्रमविपर्यासोपश्लेषिणा[1] गौरित्याकारेण प्रतिपत्तिः आपरमर्षिपदप्राप्तेः, अन्यथा तस्याप्यप्रतिवेदनात्। अत एवोक्तम्–

"**ज्ञानस्येव च वाचोऽयं लोके ध्रुवमुपप्लवः।**"
[स्फोटसि० पृ० १५०]

इत्यपि नातीव चतुरस्रमुत्पश्यामः। एवं हीदमसङ्गतं स्यात्–"**पश्चिमस्तु पुरस्तनध्वनिनिवन्धनाव्यक्तपरिच्छेद[2]प्रभावितसकलभावनाबीजसहकारी परिस्फुटतरविनिविष्टस्फोटा[3]लम्बमेव प्रत्ययमभिव्यक्ततरपरिच्छेदमुद्भावयति।**" [स्फोटसि० पृ० १३०] इति; विपर्यासोपश्लिष्टतत्प्रत्ययस्याभिव्यक्ततरपरिच्छेदत्वानुपपत्तेः। न हि पीतादिविप्लवोपालिङ्गितशङ्खादिप्रत्ययस्य तत्परिच्छेदत्वं प्रतियन्ति प्रेक्षावन्तः, तदन्यतत्प्रत्ययस्यैव तैस्तत्प्रतिपत्तेः। तदयमभिव्यक्ततरप्रत्ययत्वं तस्याभिधाय पुनर्विप्लवोपश्लिष्टप्रत्ययगोचरतयाऽन्यथात्वमप्याचक्षाणः स्वोक्तमपि न प्रत्याकलयति इति कथन्नाम मण्डनः पण्डितगोष्ठ्यां पाण्डित्यरूढिं दृढमुद्वोढुं परिवृढतामुपढौकेत ? कथं चासौ शब्दो भेदरूपविपर्यासोपरक्तप्रतिभास एवार्थप्रतिपत्तये प्रेक्षावद्भिराद्रियेत ? न हि सर्पोपप्लवप्रत्ययविषयभावमनुभवन्त्येव रज्जुर्वन्धनकार्याय कैरप्युपादीयमानोपलभ्यते, विनिवृत्ततदुपप्लवप्रतिभासाया एव तस्यास्तदर्थमुपादानोपलम्भनात्। वर्णवत्स्यादिति चेत्; स्यान्मतं यथा वर्णवादिना वर्णस्याक्रमस्याप्यनेकक्षणक्रमालिङ्गितप्रतिभासगोचरस्यैक तदर्थप्रतिपत्तये प्रत्यवेक्षणम्, एवं शब्द-

---

१–श्लेषेण गौ- आ०, व०, प०,। २–दः प्र– आ०, व०, प०। ३–टावलम्बनमिव आ०, व०, प०। स्फोटविम्बमिव–स्फोटसि०।

स्यापि स्यादिति; सत्यम्; इदमक्रमवर्णवादिनं प्रत्युत्तरं न स्याद्वादिनं प्रति, तेन वर्णस्य तत्त्वतः कथञ्चित्क्रमवत एवाभ्यनुज्ञानात्। तर्हि ज्ञानवत् स्यात्, ज्ञानस्याविभागस्यापि ग्राह्याद्याकारविभागोपप्लवकवलितस्यैव स्वार्थप्रतिपत्तये प्रतिग्रहात्; इत्यपि नोपपत्तिमत्; तस्यापि [1]ग्राह्यानुरागपराङ्मुखस्यैव नियतविषयनिर्णयनिबन्धनतया[2] प्रथमप्रस्तावे व्यवस्थापनात्। तन्न क्रमोपप्लवकलुषिताया एव वाचोऽर्थप्रत्यायनमुपपन्नम्। अतो दुर्भाषितमिदम्–

"भेदानुकाराज्ज्ञानस्य वाचश्चोपप्लवो ध्रुवः।
क्रमोपसृष्टरूपा वाक् ज्ञानं ज्ञेयव्यपाश्रयम्॥"
[वाक्यप० १।८७]

"ज्ञेयेन न विना ज्ञानं व्यवहारेऽवतिष्ठते।
नालब्धक्रमया वाचा[3] कश्चिदर्थोऽभिधीयते[4]॥" [ ] इति।

अपि च,

विप्लवाद्यदि शब्दस्य विवेकः प्रतिवेद्यते।
विप्लवप्रतिभासस्य कथं तत्रावकल्पनम्॥१८१३॥
न हि पीतविवेकेन शङ्खः प्रत्यवभाति यः।
तत्र पीतभ्रमः क्वापि दृष्ट इष्टोऽपि वा बुधैः॥१८१४॥
नास्त्येव तद्विवेकस्य प्रतीतिर्यदि विप्लवात्।
कथं तस्मादभिन्नस्य शब्दस्यापि प्रवेदनम्॥१८१५॥
शब्दस्य तद्विवेकाच्चेत् कथञ्चित् भेदभावतः।
निर्विभागवचस्तत्त्वप्रतिज्ञा ते विलुप्यते॥१८१६॥
किञ्चाविभागसंवित्तौ विभागस्यापि वेदने।
तात्त्विकत्वं विभागस्य किन्न स्यादविभागवत्[5]॥१८१७॥
अविभागेन बाधाच्चेत् विभागेनेतरस्य च।
प्रतीतेन प्रतिक्षेपान्नोभयं तात्त्विकं भवेत्॥१८१८॥

उभयातात्त्विकत्वे तु कुतो वाक्यप्रतिपत्तिः अतात्त्विकात्तदयोगादिति चेत्? किमतः कर्त्तव्यम्? अविभागस्य शब्दरूपस्य तात्त्विकत्वमिति चेत्; विभागस्यैव कुतो न तत्क्रियताम्? अविभागाभावे ततो वाच्यप्रतिपत्तेरभावादिति चेत्; तस्यापि तर्हि न तत्कर्त्तव्यं विभागाभावे ततोऽपि तत्प्रतिपत्तेरभावात्, "नालब्धक्रमया" इत्यादिना स्वयमेव तथाभिधानात्। मा वा भूदुभयस्यातात्त्विकत्वात् ततस्तत्प्रतिपत्तिः, तज्ज्ञानात्तु भवत्येव, कथमन्यथा उपप्लुतादपि वर्णभेदक्रमज्ञानादक्रमस्य शब्दतत्त्वस्य प्रतिपत्तिर्यत इदं सुभाषितं भवेत्?

"असतश्चान्तराले यः शब्दो नास्तीति मन्यते।
प्रतिपत्तुरशक्तितः सा ग्रहणोपाय एव सः॥"
[वाक्यप० १।८६] इति।

न चैवं शाब्दी तत्प्रतिपत्तिर्न भवति शब्दादनुत्पत्तेरिति वक्तव्यम्; ज्ञानादपि शब्दोपसंपृक्तादेव तत्प्रतीतेर्भावेन तत्र शाब्दव्यपदेशस्याविरोधात्। तत्र "प्रत्यक्षे विभागाव-

---

१ ग्राह्यादिज्ञानं व्यवहारेऽवतिष्ठतेऽनुराग–आ०, ब०, प०। २–या वाचा कश्चिदर्थोऽभिधीयते इति प्र–आ०, ब०, प०। ३ उद्धृताविमौ–स्फोटसि० पृ० १६२। ४–गतः आ०, ब०, प०। ५ प्रत्यक्षो वि–ता०।

भासिनः शब्दतत्त्वस्य प्रतिपत्तिः । नाप्यविभागावभासिनः शब्दतत्त्वस्य प्रतिपत्तिः; तस्यैवाप्रतिवेदनात् । ततस्तदप्रतिपत्तौ च कुतस्तत्र [1]साक्षित्वमनुमानस्य यतः "स खलु" [ ] इत्यादि सूक्तमवकल्प्येत । ततो न परपरिकल्पिता निरवयवनित्यस्फोटात्मानः पदवाक्यादयः शब्दाः, तेषां प्रत्यक्षानुमानाभ्यामिवागमादप्यनध्यवसायात् । तदागमस्य "साक्षात्कृतधर्माण ऋषयो बभूवुः" [निरुक्त० १।२०] इत्यादेः प्रमाणान्तरप्रतिक्षिप्तार्थतया प्रामाण्याभावात् । ततो वर्णा एव क्रमविशेषसम्बन्धोपाधयः शब्दाः तद्व्यतिरिक्तानां तेषामभावात् । एतदेवाह-

अभावादतिरेकिणाम् । इति ।

अतिरेकिणः पुद्गलस्कन्धपरिणामविशेषेभ्योऽर्थान्तरभूता नित्या वर्णपदादयस्तेषाम् उक्तन्यायेन **अभावात्** तद्विशेषा एव ध्वनय इति ।

साम्प्रतं प्रकरणार्थमुपसंहृत्य दर्शयन्नादितः शब्दानामपौरुषेयत्वे दोषमावेदयति-

वाचामपौरुषेयीणामाविर्भावो न युज्यते ॥५०॥ इति ।

वाचां वर्णात्मनां पदादिस्फोटात्मनां **चापौरुषेयीणां** नित्यानाम्, अनित्यानामपौरुषेयत्वायोगात्, **आविर्भावो** व्यक्तिर्न **युज्यते** न घटते । स्वतोऽनाविर्भावात्, सहकारिप्रतीक्षायाश्च तत्र प्रतिक्षेपात्[2] । अतो ध्वनयो न तदात्मान इति शेषः । कथम् ? नियतं यथा भवति तथा । नियतत्वं चात्र विप्लवविवेकेन स्वरूप एवावस्थानम् । विप्लवस्य वर्णेषु ह्रस्वदीर्घादिः पदेषु च वर्णक्रमस्य पुरुषप्रयत्नोपनीतनाद[3]भेदनिबन्धत्वेन पुरुषनिरपेक्षत्वे शब्दस्यासम्भवात् । न च तथा कश्चिदपि[4] चायमुपलभ्यते (?) ह्रस्वाद्युदात्तादिभेदोपरक्तस्यैव वर्णस्य वर्णक्रमोपसंपृक्तस्यैव पदस्य तत्क्रमाद्युपश्लिष्टस्यैव च वाक्यादेः प्रतीतिपथप्रस्थायिनः प्रत्यवलोकनात् । ततो नापौरुषेयस्य निरवयवात्मनः शब्दस्य वाचकत्वम् अप्रतीतेः ।

पौरुषेयस्यापि वाचकत्वमभिमतवदनभिमतस्यापि किन्न स्यादिति चेत् ? अत्राह-

सम्यग्ज्ञानाङ्कुशः सत्यः पुरुषार्थाभिधायकः ।
इति [अत्रापौरुषेयत्वं जातु सिद्धमनर्थकम् ॥५१॥] इति ।

न हि सर्वोऽपि पौरुषेयः शब्दः पुरुषार्थस्य [5]श्रेयस्तत्कारणस्याभिधायकोऽपि तु **सत्यो** विप्रतिसारविकलः । न च सर्वोऽप्यसौ तद्विकल एव अपि तु **सम्यक् ज्ञानाङ्कुशः** सम्यग्ज्ञानं तत्प्रणेतुः पुरुषस्य तदर्थविषयं निरुपप्लवं ज्ञानं तदेवाङ्कुशो नियामको यस्य स एव, स चायमेव स्याद्वादामोघलाञ्छनो वचनप्रबन्धो नापरः, तत्प्रणेतॄणां तज्ज्ञानाभावस्य निवेदनात् । न चैवमपौरुषेयत्वमेव शब्दस्याविप्रतिसारतया नियामकमिति शक्यमुपपादयितुम्; अपौरुषेयस्यापि दहनादेर्नीलोत्पलादौ विपर्ययोपदर्शितत्वेन विप्रतिसारप्रतिपत्तेः । एतदेवाह-

अत्रापौरुषेयत्वं जातुसिद्धमनर्थकम् । इति ।

अत्र दहनादौ यदपौरुषेयत्वं तद् **जातु** कदाचिन्नीलोत्पलादिसन्निधानवेलायां **सिद्धं** निर्णीतम् । कीदृशम् ? **अनर्थकमविद्यमानार्थं** तदुपदर्शितपीताद्याकारस्य वस्तुतो नीलोत्प-

---

१ सापेक्षित्व-आ०, ब०, प० । २-त् नित्यत्वञ्चात्र आ०, ब०, प०, । ३-नीतध्वनिभेद-आ०, ब०, प०, । ४-दपि नयन्नुपल-आ०, ब०, प०, । ५-निःश्रेयसस्तत्का-आ०, ब०, प० ।

लादावभावात् । ततो निषिद्धमेतत्–

"वेदे कर्तुरभावात्तद्दोषाशङ्कैव नास्ति नः ।" [ ] इति । असत्यपि कर्तरि दहनादिवत्तत्र तच्छङ्काया अनिवृत्तेः, सदोष एव हि दहनादिरपौरुषेयोऽपि, अन्यथा ततो मिथ्याप्रतीतेरनुत्पत्तेः । किं पुनः तत् सत्यं यदभिधायित्वेन शब्दः सत्य उच्यते इत्यत्राह–

सर्वार्थानामनेकात्मपरिणामौ व्यवस्थितौ ।
मार्गस्तद्विषयश्चेति मतं सत्यं चतुर्विधम् ॥५२॥ इति ।

अनेकश्चासावात्मा च **अनेकात्मा** युगपद्भावी नानारूपो वस्तुस्वभावः, स च **परिणामश्च** प्राच्याकारपरित्यागाजहद्वृत्तोत्तराकारोपादानलक्षणो विवर्त्तस्तावनेकात्मपरिणामौ द्वौ सत्यौ, तौ च सर्वेषामेव जीवादीनामर्थादीनां **व्यवस्थितौ** तद्विकलानामवस्तुत्वापादनात् । तत्रानेकात्मनः प्रागुपादानम्, परिणामं प्रति तस्य साधनत्वात् । प्रतिपादितं हि विप्रतिपन्नं प्रति तस्य तत्साधनत्वमवश्याभ्युपगमत्वञ्च अन्यथा निष्फलस्याऽप्रतिपत्तेः सर्वाभावप्रसङ्ग इति । तथा **मार्गो** निःश्रेयसप्राप्त्युपायः, स च सम्यग्दर्शनादिविकल्पत्रयात्मक एव एकशस्तस्य तदनुपायत्वात् । न हि सम्यग्दर्शनस्यैव तदुपायत्वं सम्यग्ज्ञानाभावे तत्त्वार्थविषयस्य तदभिनिवेशलक्षणस्य तस्यैवासम्भवात् । नापि तद्विशिष्टस्य तत्त्वार्थाधिगमलक्षण[1]सम्यग्ज्ञानस्यैव तत्कारणत्वमुपपन्नम्, उत्पन्नतत्त्वज्ञानस्यापि शरीरेन्द्रियादिसम्बन्धापरिच्युतेः, अन्यथा न कस्यचिदप्युपदेष्टृत्वं प्रत्युत्पन्नतत्त्वज्ञानस्य शरीरपातेन तदनुपपत्तेः । अपरिपतितशरीरस्यापि तत्त्वपरिज्ञानाभावात् । एवं च निर्विषयैवेयं श्रुतिः स्यात्– "आचार्यवान् पुरुषो वेद" [छान्दो० ६।१४।२] इति । आत्मविषयश्च सम्यग्दर्शनाद्यभ्यासो विफलः स्यात्, अनुपसम्पृक्ततदभ्यासादपि "तत्त्वमसि" [छान्दो० ६।८।७] इत्यादि वाक्यसामर्थ्योपनीतादात्मज्ञानादात्मनोऽपि निःश्रेयसोपपत्तेः ।

कश्चिदाह[2]–"**निश्चितेऽपि वस्तुनि विपर्ययानुवृत्तिरुपलभ्यते यथा चन्द्रादौ द्वित्वादिः, तद्वदागमप्रामाण्यान्निर्णीतेऽप्यात्मनि नित्यशुद्धादिरूपेण विपर्ययोपप्लवसंभवात् तन्निवृत्तिपरस्तद्दर्शनाद्यभ्यासः "आत्माऽयं द्रष्टव्यः"** [बृहदा० २।४।५] **इति, इत्यादिना वेद्यमानो न वैफल्यदोषाय कल्पते ।"** [ ] इति; तत्प्रतिषिद्धम्; न तत्त्वज्ञानमेवादरोपाधिकं निःश्रेयसनिमित्तम्, अपि तु चारित्रसव्यपेक्षमिति । आत्मादितत्त्वाभ्यासस्यैव चारित्रतयाऽस्माभिरभ्यनुज्ञानात् । ततः समुदित एव सम्यग्दर्शनादिर्निःश्रेयसस्याङ्गम्, अन्यतमापायेऽपि[3] तदनुपपत्तेः । अत एव सूत्रे **"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः"** [त० सू० १।१] इति समुदायरूपेण सम्यग्दर्शनादेरेकीभूतस्य निःश्रेयसनिमित्तत्वनिवेदनार्थमुत्तरपदमेकवचनान्तमेवोपदर्शितम् ।

तस्य मार्गस्य विषयो गोचरस्तद्विषयः । स च सप्तधा–"**जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ।**" [त० सू० १।४] इति सूत्रात् । तस्य च तद्विषयत्वं श्रद्धेयत्वादिना न प्राप्यत्वेन, [4]ततो मोक्षस्यैव तत्त्वात् । चशब्दः समुच्चये । ताविमौ द्वौ सत्यौ प्राच्यावुभौ **इति** एवं **मतमभ्युपगतं सत्यं चतुर्विधं** चतुःप्रकारं सर्वस्यापि सत्यस्यात्रैवान्तर्भावात् । तत[5] एतत्सत्यचतुष्टयप्रतिपादनात् प्रवचनं सत्यमवगन्तव्यम्, जीवादीनां च मार्गविषयत्वप्रतिपादनमपरिज्ञाततद्रूपस्य प्रेक्षावतो मोक्षार्थायाः प्रवृत्तेरनुपपत्तेः । अत एव आह–

१–ण्यस्यैव स–ता० । २–ह सुनि–आ०, ब०, प० । ३–ये तद्–आ०, ब०, प० । ४ प्राप्यत्वेन्या । ५ तत एव तत्स–आ०, ब०, प० ।

अहं ममास्रवो बन्धः संवरो निर्जरा क्षयः ।
कर्मणामिति सत्कृत्य प्रेक्षाकारी समीहते ॥५३॥ इति ।

समीहते संसारविनिवृत्तिं प्रति यतते । कः ? **प्रेक्षाकारी** विचा[1]रकरणशीलः । कथं समीहते ? **सत्कृत्य** सादरं निश्चित्य । निश्चयप्रकारं च **'अहम्'** इत्यादिना दर्शयति । प्रत्येकमत्र इति शब्दस्य सम्बन्धो मम शब्दस्य चास्रवादिभिः । अहमिति, ममास्रव इति, मम बन्ध इति, मम संवर इति, मम कर्मणां निर्जरेति, मम तेषां क्षय इति च । तत्रात्मानमहमिति निर्दिशति अहम्प्रत्ययवेद्यत्वात् । तस्यासत्कारे कस्य संसारो मोक्षो वा ? को वा तदुपाये प्रवर्त्तेत ? क्षणक्षीणचित्तप्रवाहस्य[2] प्रतिक्षेपात् । तथा तस्यास्रवोऽपि कायवाङ्मनकर्मलक्षणः सत्कर्त्तव्य एव, तदभावे बन्धनिवर्त्तनाय समीहानुपपत्तेः । सत्कृते हि बन्धकारणे तस्मिन् तस्य तत्प्रत्यनीकानुष्ठानेन निवर्त्तने निवर्तितो भवति बन्धो नान्यथा, कारणानिवर्त्तने कार्यनिवृत्तेरनुपपत्तेः ।

[3]तन्निवर्त्तनाय प्रकृतिरेव समीहते नात्मा बन्धतत्कारणयोरपि तत्रैव भावादिति चेत्; न; **"कैवल्यार्थं प्रवृत्तेश्च"** [सांख्यका० १७] इत्यनेनात्मन्येव तत्प्रतिपादनात्, अन्यथा तत आत्मव्यवस्थापनानुपपत्तेः । न हि अन्यव्यापारादन्यव्यवस्थापनमतिप्रसङ्गात् । नापि तत्रौपचारिकी समीहा; ततः परमार्थतः आत्मसिद्धेरसम्भवात् । अन्यतस्तथा तत्सम्भवे तत्प्रतिपादनवैयर्थ्यात् । प्रकृतिगतमेव बन्धं निवर्त्तयितुं प्रवृत्तिरपि [4]तस्येति चेत् तदनिवर्त्तने [5]किं तस्य स्यात् ? अन्यथा मुक्तवत्प्रवृत्तेरयोगात् । दुःखप्राप्तिरिति चेत्; सिद्धस्तर्हि बन्धादेस्तत्रैव[6] सत्कारो भावान्तरसत्कृतात्ततस्तस्य [7]तत्प्राप्तेरयोगात् । सापि विभ्रमादेव न तत्त्वत इति चेत्; न; आत्मनि [8]तदभावात् । सोऽपि[9] विभ्रमादेवेति चेत्; न; तस्याप्यात्मन्यभावात् । सोऽपि विभ्रमादेवेति चेत्; न; अनवस्थाप्रसङ्गात् । तात्त्विक एव तत्र विभ्रम इति चेत्; न; तस्य नित्यत्वे निर्मोक्षभावप्रसङ्गात् । अनित्यत्वे तु सिद्धस्तत्रैव बन्धादेः सत्कारः तदभावे विभ्रमानुपपत्तेः । तथा कर्मनिर्जरापरिक्षययोरपि तदेकदेशसकलविश्लेषलक्षणयो:,[10] अन्यथा तदुपाये संवरे तस्याप्रवृत्तेः । नहि प्रेक्षावतः कस्यचित् परपरिशुद्धये स्वशरीरप्रक्षालनमुपलब्धम् । कथं पुनरास्रवादेः [11]सत्कर्तव्यत्वे कुतश्चिद् विनिवर्तनं सत्कृतस्य तदयोगात् आत्मवत् । अस्ति च विनिवर्त्तनं तस्य अन्यथा तन्निबन्धनस्य संसारस्याप्यनिवृत्त्या निःश्रेयसाभावापत्तेः । अतो रज्जुसर्पादिवत् असन्नेवास्रवादिरिति चेत्; असतः कुतस्तस्य प्रत्यवभासनम् ? आत्मन इति चेत्; न; तस्य तत्त्ववेदित्वेन तदनुपपत्तेः, रज्जुतत्त्ववेदिनस्तत्र सर्प्पप्रतिभासस्यानवलोकनात् । प्रसिद्धं च तस्य तत्त्ववेदित्वम्–**"सत्यं ज्ञानमनन्तं ब्रह्म"** [तैत्ति० २।१।१] इत्यादेः श्रवणात् । तन्नात्मनस्तस्यावभासनम् । जीवत इति चेत्; न; तस्यापि तत्त्वज्ञानरूपत्वे तदनुपपत्तेः । मिथ्याज्ञानरूपत्वे तस्य तद्रूपं तत्प्रसवप्रबन्धश्च यदि सन्नेव सन्नेवास्रवादिः तस्यैवास्रवादित्वात् । असन्नेवेति चेत्; कथमसौ जीवस्य ? असतस्तद्रूपत्वानुपपत्तेः । इत्थमेतत्, केवलमविवेकज्ञानादतद्रूपमपि तद्रूपमिव प्रतिभातीति चेत्; न; अविवेकज्ञानस्यापि तत्त्वतस्तद्रूपत्वे स एव प्रसङ्गः तात्त्विक एवास्रवादिरिति, तज्ज्ञानतत्प्रसवप्रवाहस्यैवास्रवादित्वात् । तस्याप्यतात्त्विकत्वे तद्रूपत्वाव्यवस्थितेः । तस्याप्य

---

१ विचारेण करण–ता० । २–हप्रति–ता० । ३ सांख्यः प्राह । ४ तस्यैवेति आ०, ब०, प० । ५ किन्न स्यात् आ०, ब०, प० । ६ पुरुष एव । ७ पुरुषस्य । ८ तद्भावा–आ०, ब०, प० । विभ्रमाभावात् । ९ विभ्रमोऽपि । १० 'तत्रैव सत्कारः' इति सम्बन्धः । ११ तत्क– आ०, ब०, प० ।

विवेकज्ञानान्तरात्तद्रूपवत्प्रतिभासनपरिकल्पनायामनवस्थापत्तेः । अपि च–

मिथ्याज्ञानाद् विवेकश्चेत् स्वभावो जीववस्तुनः ।
कथं स्ववेदिनस्तस्य तत्राज्ञानं प्रवर्तताम् ॥१८१९॥
अस्वसंवेदने तस्य परसंवेदनात्ययात् ।
कथं भोगोऽवकल्प्येत संसारी यदसौ भवेत् ॥१८२०॥
तस्मान्निरंशरूपस्य तस्य स्वग्रहणात्मनः ।
तद्विवेकाग्रहाभावान्मिथ्याज्ञानमयुक्तिमत् ॥१८२१॥

ततो यदुक्तम्–

"सर्पहारादिभावानामबुद्धा रज्जना यथा ।
कारणं जगतस्तद्वदबुद्धं तत्त्वमेव हि ॥
भान्ति रज्वामसन्तोऽपि सर्पहारादयो यथा ।
चिद्धातोस्तद्वदाकाराः स्वरूपस्याग्रहादमी ॥"[ ] इति ।

तत्प्रतिविहितम्; स्वरूपस्याग्रहात् सिद्धत्वात् । स्यान्मतम्–नैकान्ततस्तस्य स्वाग्रहः कथञ्चिदेव तद्भावात्, ततो मिथ्याज्ञानविवेकस्याग्रहणेऽपि भेदादिरूपस्य ग्रहणाद्भोगोपपत्ते-रुपपन्नमेव संसारित्वमितिः तर्हि सिद्धं तद्विवेकापरिज्ञानस्य सत्कृतस्यापि कुतश्चिन्निवर्तनम्, अन्यथा जीवस्य निःश्रेयसाभावापत्तेः, तद्वदास्रवादेरपि स्यादविशेषात् । ततो युक्तम्–आत्मन्यास्रवादिसत्कारपुरस्सरमेव निःश्रेयसार्थिनस्तदपाये[1] प्रवर्तनम्, अन्यथा तदनुपपत्तेः ।

अत्र चोद्यम्–'कर्मक्षयान्मोक्षः' इति मतं तदनुपपन्नम्, कर्मणां विपक्षासम्भवेन क्षय-स्याभावात् । अशक्यक्रियश्च तत्परिक्षयः, तृष्णायां तद्धेतौ पुनरपि तेषामुत्पत्तेः । [2]अथ कर्म-वत्तृष्णाया अपि कुतश्चित् परिक्षयः, तर्हि स एवास्तु व्यर्थः कर्मक्षये परिश्रमः, तृष्णापरिक्षये[3] हि सतामपि कर्मणामकिञ्चित्करत्वेन संसारानुत्पत्तेः । कथं पुनः कर्मणामविपक्षत्वं यावता कायपरिक्लेशरूपं तप एव तेषां विपक्ष इति चेत्; नः ततोऽप्येकरूपात् विचित्रशक्तीनां कर्मणां परिक्षयायोगात् । अवगतं हि विचित्रशक्तित्वं कर्मणां फलवैचित्र्यदर्शनात् अन्यथा तदयोगात् । ततो भवन्नपि तपसा कर्ममलस्य प्रतिरोधः तज्जातीयस्यैव स्यान्न विजातीयस्य ।

स्यादयमाशयः–तपस एव शक्त्या कर्मशक्तयः सङ्कीर्णाः क्रियन्ते परिक्षीणा वा, ततो निःशेषस्यापि कर्ममलस्याक्लेशात् तपोलेशतोऽपि चैकरोमोत्पाटनादिलक्षणात् परिक्षयो भवतीति; भवत्ययं शोभनो यदि तत्तपः क्लेशादर्थान्तरम् । तथा चेद्व्यर्थस्तर्हि [4]तप्तवन-शिलारोहणादिपरिक्लेशः तदन्यतस्तपस एव कर्मक्षयोपपत्तेः । क्लेशादव्यतिरिक्तमेव तप इति चेत्; न तर्हि ततः कर्मशक्तीनां सङ्करादिः तस्य कर्मफलत्वेन ततस्तदसम्भवादिति । तत्राह–

तत्त्वज्ञानप्रभावेण तपःसंवरणं नृणाम् ॥ इति ।

तत्त्वं जीवादिः तस्य ज्ञानं याथात्म्यनिर्णयस्तस्य **प्रभावो** भावनया प्रकर्षगमनं तेन यत् **संवरणं** बाह्याभ्यन्तरशुभाशुभरूपव्यापाराणां निवारणम् औदासीन्यापरनामधेयं तदेव **तपः**, तस्याल्पसत्त्वपुरुषापेक्षया तापत्वेन प्रतिभासनात्[5], तच्च **नृणां** मनुष्याणां न तिर्यग्जीवा-दीनां भव्यानामपि तेषां तदसम्भवात् । तदेव च तपो विपक्षः कर्मणां तन्निदानप्रत्यनी-कत्वात् । यो यन्निदानप्रत्यनीकः त तस्य विपक्षो यथा व्याधिविशेषनिदानवातादिप्रत्यनीकः

१ तदुपा–आ०, ब०, प० । आस्रवादिनाशे । २ कथं क– आ०, ब०, प० । ३–ये स–ता० । ४ "तपोवन इति पा०"–ता० टि० । ५ –नाच्च आ०, ब०, प० ।

क्रियाविशेषः तद्व्याधिविशेषस्य, कर्मनिदानरागाद्यास्रवप्रत्यनीकं च तपः, तस्मोत्तदपि तद्विपक्ष इति । कुतः पुनः कर्माणि कुतो वा तेषां तदास्रवनिदानत्वं यदेवमुच्यते इति चेत् ? आस्तामेतत्, अनन्तरमेव निरूपणात् । तथापि कथं तादृगास्रवप्रत्यनीकत्वं तपस इति चेत् ? तत्प्रकर्षविशेषे तदास्रवस्याप[1]कर्षविशेषात् । न चायं तस्य तत्प्रत्यनीकत्वाभावे सम्भवति, क्रियाविशेषस्य प्रत्यनीकस्यैव सतः प्रकर्षविशेषाद् वातादेरपकर्षविशेषप्रतिपत्तेः । ५

भवत्वेवमागन्तूनां तन्निदाननिवारणेनोत्पादप्रतिषेधः, कर्मणामुत्पन्नानां तु कथं परिहाणिः ? तपसो हचुत्पादप्रतिषेध एवोक्तेन वर्त्मना सामर्थ्यं न चोत्पन्नानां प्रतिषेधे, अविरोधादिति चेत्; का पुनस्तेषां परिहाणिः या तपःसामर्थ्यान्न भवतीति ? उच्यते– स्वरूपप्रच्युतिरिति चेत्; न; तस्यास्तेषामनभ्युपगमात् । आत्मसम्बन्धानां तेषां ततो विश्लेष इति चेत्; सिद्धं तर्हि तत्रापि तपस एव सामर्थ्यम् । सति तत्प्रभावे तदुपश्लेष- १० वाहिनो रागादिस्नेहस्य प्रध्वंसात् तेषां ततो विश्लेषोपपत्तेः । विश्लिष्टानाञ्च फलदान-शक्तिविकलतया कर्मभावप्रच्यवनात् । ततो युक्तमुपात्तकर्मापेक्षयापि तपस एव विपक्षत्वम् । तदेवाह–

तपसश्च प्रभावेण निर्जीर्णं कर्म जायते ॥५४॥ इति ।

तपसो निरूपितरूपस्य यः **प्रभावः** सामर्थ्यं तेनैव, **च**शब्दस्यावधारणत्वात् १५ **निर्जीर्णं** निरवशेषगलितं **कर्म** ज्ञानावरणादि **जायते** भवति । ततो यदुक्तं धर्मकीर्तिना–

"असम्भवाद्विपक्षस्य न हानिः कर्मदेहयोः ।
अशक्यत्वाच्च[2] तृष्णायांस्तद्धेतौ पुनरुद्भवात् ॥
द्वयक्षयार्थं यत्ने च व्यर्थः कर्मक्षये श्रमः ।
फलवैचित्र्यदृष्टेश्च शक्तिभेदोऽनुमीयते ॥ २०
कर्मणां तापसंक्लेशान्नैकरूपात्ततः क्षयः ।
फलं कथञ्चित्तज्जन्यमल्पं स्यान्न विजातिमत् ॥
अथापि तपसः शक्त्या शक्तिसङ्करसंक्षये ।
क्लेशात् कुतश्चिद्धीयेताशेषमक्लेशलेशतः ॥
यदीष्टमपरं क्लेशात्तत्तपः क्लेश एव चेत् । २५
तत्कर्मफलमित्यस्मान्न शक्तेः सङ्करादिकम् ॥"

[प्र० वा० १।२७५–८०] इति ।

तत्प्रतिविहितम्; यथोक्ते तपसि कर्मविपक्षे तदसम्भवस्याभावात् । तत्प्रभावादेव तृष्णाया अपि स्थित्यभावे तद्वलेन पुनः कर्मोत्पत्तेरसम्भवात्, तृष्णापहारादपरस्य च कर्मक्षयपरिश्रमस्यानभ्युपगमात् । न च कायपरितापरूपं तपः कारणं कर्मनिवर्हणस्य; अपि तु ३० [3]उक्ततपःपरिबृंहणस्यैव ।

"बाह्यं तपः परमदुश्चरमाचरँस्त्वमाध्यात्मिकस्य तपसः परिबृंहणार्थम् ।" [बृहत्स्व० श्लो० ८३] इति वचनात् । ततस्तत्र तन्निवर्हणकारणबुद्ध्या "फलवैचित्र्यदृष्टेः" इत्यादि-वचनं जैनमतानभिज्ञत्वमेव [4]तस्यावेदयति ।

१–स्याप्रकर्ष–आ०, ब०, प० । २–च जीवानां तृष्णायां पु– आ०,ब०,प० । "–च तृष्णायां स्थितायां पुन–" प्र० वा० । ३ संवर-रूपतपःपरिवर्धनस्यैव कारणमित्यर्थः । उक्तं तपः–ता० टि० । ४ धर्मकीर्तेः ।

यदपीदं प्रज्ञाकरस्य–"न च क्लेश एव तपस्तस्य कर्म्मफलत्वात् । न च कर्मफलमेव तपः शीतातपसेविनां पश्वादीनामपि तापसत्वप्रसङ्गात्" । [प्र० वार्तिकाल० १।२७७] इति; तदपि तादृशमेव; क्लेशस्य मुख्यवृत्त्या तपोभावानभ्युपगमात् । तया तत्त्वज्ञान-प्रभावोपनीतसंवरणस्यैव तदभ्युपगमात् । तत्र च न सौगतस्य विवादः । नापि तस्य कर्मनिर्जराकारणत्वे । तत एवोक्तम्–

"तत्रैव तद्विरुद्धार्थतत्त्वाकारावरोधिनी ।
हन्ति सानुचरा(रां)तृष्णां सम्यग्दृष्टिः सुभाविता ॥
त्रिहेतोर्नोद्भवः कर्मदेहयोः स्थितयोरपि ।
एकाभावाद्विना बीजे ना(जं ना)ङ्कुरस्येव सम्भवः ॥"

[प्र० वा० १।२७३–७४] इति ।

कथं पुनर्जीवादिज्ञानस्य तत्त्वज्ञानत्वे तत्प्रभावात् संवरणम्, सति तत्र जीवस्नेहादे-रास्रवस्यैवोपपत्तेः । तथाहि–यस्तावज्जीवं विद्यमानतयाऽवलोकयति तस्य तत्रावश्यम्भावी स्नेहः, तस्य तत्सत्तावलोकनमात्रनिबन्धनतयैव बालपश्वादावप्युपलब्धेः । जीवे च स्निह्यन् तत्सुखसाधनेष्वभिलाषी सतोऽपि तद्दोषांस्तिरोधाय गुणानेवारोप्य पश्यति । तद्गुणदर्शी च तानि ममेदंबुद्धया परापराणि सुखोपभोगायादत्त एवेति न संसारोपरतिः कदाचिदपि । तन्न जीवतत्त्वज्ञानात् संवरणम् । नाप्यजीवतत्त्वज्ञानात्; तत्रापि सत्यात्मदर्शिनस्तदुपकारिषु स्रक्चन्दनादिषु तदपकारिषु चाहिविषादिषु परिग्रहद्वेषयोस्तत्प्रतिबद्धानां चानुपग्रहोपपा-(घा)तादीनामशेषदोषाणामवश्यम्भावेन प्रादुर्भावात् । तदुक्तम्–

"यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतस्नेहः ।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्करुते ॥
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते ।
तेनात्माभिनिवेशो यावत्तावत्स संसारी ॥
आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ ।
अनयोः सम्प्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥"

[प्र० वा० १।२१९-२२] इति ।

ततोऽ[1]युक्तं तत्त्वज्ञानेत्यादीति चेत्; अत्राह–

रागद्वेषौ विहायैव गुणदोषवतोस्तयोः ।
मोक्षज्ञानात् प्रवर्त्तन्ते मुनयः समबुद्धयः ॥५५॥ इति ॥

समा सदृशी वासीचन्दनयोर्बुद्धिर्येषां ते **समबुद्धयः मुनयः प्रवर्त्तन्ते** निःश्रेयसो-पायानुष्ठाने प्रवृत्ताः भवन्ति । किं कृत्वा ? **तयोः** स्वपरविभागबुद्धिविषययोः **रागद्वेषौ** प्रीत्यमर्षौ **विहायैव** परित्यज्यैव न कदाचिदप्यविहायेत्येवकारः । कथम्भूतयोः ? **गुणदोषवतोः** गुणश्चोपकारो दोषश्चापकारस्तौ विद्येते ययोस्तयोरिति । अथ मतम्–गुणदोषावेव निबन्धनं रागद्वेषयोस्तद्भाव[2]भावप्रतिपत्तेः, अतो न यत्र तौ भवतु नाम तत्र तयोः परि-त्यागः, यत्र तु स्तः तत्र प्रवर्तनमेव कारणभावादुपपन्नं न परिवर्जनमिति; तन्न युक्तम्; यस्मान्न ह्युपकारापकारावेव तयोर्निमित्तम्, अपि तु [3]तन्मनसिकारोऽपि । अत एव निराका-

१ ततो यदुक्तं आ०, ब०, प० । २ –द्भावाभा –आ०, ब०, प० । ३ तदिच्छा ।

ऽक्षस्योपकारिण्यपकारिण्यपि क्षमावतस्तन्मनस्कार[1]विकलस्य [2]तदाभाव (तदभाव) प्रसिद्धेः[3]। स च तन्मनस्कारस्तादात्विकमेवोपभोगं पुरुषार्थतया निश्चिन्वतः चित्ततल्पमुपसर्पं[4]स्तदुपभोगोपयोगिष्वनुरागं तद्व्याघातकारिषु विद्वेषं च पोषयति न त्वात्यन्तिकं पुरुषार्थविशेषं पश्यतः, तस्य तत्कारणेष्वेव [5]मनस्कारस्य सम्भवात् न तात्कालिकसुखनिबन्धनेषु। तथा च कस्यचिद्विदुषः सुभाषितम्– ५

तदात्वसुखसंज्ञेषु भावेष्वज्ञोऽनु[6]षज्यते ।
हितमेवानुरुद्ध्यन्ते प्रपरीक्ष्य परीक्षकाः ॥"

[ ] [7]इति ।

तस्मादन्यत्र गुणादिभावेऽपि रागादिकं परित्यज्य निरतिशयज्ञानादिस्वभावस्य पुरुषार्थस्य परिज्ञानात् तदुपाय एव मुनयः प्रवर्त्तन्ते । तत एवोक्तम्–**'मोक्षज्ञानात्'** इति । १०
[8]तदुपायेऽप्युपकारित्वादेवानुरागः, तदविशेषात् परत्रापि [9]कस्मान्न भवतीति चेत् ? न; तत उपकारस्यैवाभावात् । दृश्यत एवेन्द्रियादेरन्यतोऽपि विषयोपभोगादिरुपकार इति चेत्; न; तस्याऽतत्त्ववेदिभिरुपकारबुद्ध्या परिगृहीतस्यापि विवेकावलोकविनिवेशितप्रज्ञावैशारद्यैः जातिजरामरणप्रबन्धलक्षणपरितापकारणस्य तृष्णाभिवर्द्धनस्य निबन्धनतया अपकारपक्ष एवोपक्षेपात् । तत इदं प्रत्युक्तम्– १५

"यद्यप्येकत्र दोषेण तत्क्षणं चलिता मतिः ।
तथापि न विरागोऽत्र कामीव वनितान्तरे ॥"

[प्र० वा० १।२४१] इति ।

विवेकवतः पुरुषस्य संयोगसम्बन्धेषु भावेष्वात्यन्तिकस्यैव दोषस्य दर्शनेन सर्वदापि तत्र [10]विरक्तिभावस्योपपत्तेः । यद्येवम् आत्मन्यपि वैराग्येण भवितव्यम्, इन्द्रियादेरिव २०
तस्याप्युक्तेन वर्त्मना संसारपरितापकारणत्वस्याविशेषात् । इन्द्रियादिभिर्विना न तस्य तत्कारणत्वमतो न तत्र वैराग्यमिति चेत्; इन्द्रियादिष्वपि न भवेत्, तेन[11] विना तेषामपि तत्कारणत्वाभावात् । अत एवोक्तम्–

"न तैर्विना दुःखहेतुरात्मा चेत्तेऽपि तादृशाः ।
निर्दोषं द्वयमप्येवं वैराग्यं तत्र तत्कुतः ॥" २५

[प्र० वा० १।२२७]

इति चेत्; सत्यम्; आत्मनोऽपि मिथ्याज्ञानादिदोषपर्यायपरिणतस्य तत्परितापकारणतया परिभाव्यमानस्य वैराग्यविषयत्वेनाभ्युपगमात् । कथमेवं तस्यैव निःश्रेयसे स्थापनायामास्था[12]परत्रेवात्मन्यपि विरक्तिविषये तदनुपपत्तेः ? तदास्थायां वा स एव रागः । **सुखेषु स्थापनास्थैव राग आग्रहलक्षणः ।"** [प्र० वार्तिकाल० १।२३८] इति वचनात् । ततो ३०
नात्मनि वैराग्यस्य सम्भव इति चेत्; न; दोषपर्यायापेक्षया तत्सम्भवात्, तत्पर्याये च न

---

१ –नसिकार–आ०, ब०, प० । मनस्कारश्चेतस आभोगः अभिमुखीभाव इति यावत् । द्रष्टव्यम्–अक० टि० पृ० १५६ । २ तद्भावप्रसिद्धेः आ०, ब०, प० । ३ –सिद्धिः ता० । ४ तन्मनसिका–आ०, ब०, प० । ५ –नुषुज्यते आ०, ब०, प० । ६ उद्धृतोऽयम्–न्यायकुमु० पृ० ८४२ । स्या० र० पृ० ११११९ । ७ तदुपाये तूप–आ०, ब०, प० । ८ कुतस्तन्न भ–आ०, ब०, प० । ९ विरक्तभाव–ता० । १० आत्मना । ११ "प्रयत्नः । आस्थानी-यत्नयोरास्था" इत्यमरः–ता० टि० ।

कस्यचिदपि [1]विदुषः [2]तदास्था, द्रव्य एव तद्भावात्। तत्र च न वैराग्यम्, अतो द्रव्यरूपतयैवात्मा दोषपर्यायोपमर्दनेन शुद्धज्ञानादिरूपतया स्थापयितुमास्थीयमानो न दोषाभिनिवेशिनं वैराग्योदयं प्रतिरुणद्धि। कथं पुनरात्मन्यपि रूपान्तरापादानं दोषोपमर्दने तदव्यतिरेकेण तस्याप्युपमर्दनात्, उपमृदितस्य च [3]दोषवदसम्भवादिति चेत्; नः [4]एकान्ता- ५ व्यतिरेक एव दोषात्। कथञ्चिद् व्यतिरेके च संवेदनस्य विकल्पेतराद्याकारभेदवत् क्रमेण मिथ्याज्ञानादिभेदस्याप्युपपत्तेरुपपन्नमेव तत्र दोषरूपोपमर्दनेऽपि तदन्तरापादनम्। विकल्पेतराद्यात्मनश्च संवेदनस्यानभ्युपगमे न किञ्चित् स्यात् सर्वस्य संसारतत्कारणादिव्यवहारस्य तन्नान्तरीयकत्वादिति [5]बहुशो निरूपितत्वात्। ततो निराकृतमेतत्–

"न हि तस्यान्यथाभावो नाप्यन्यस्य तथा स्थितिः।
१० [6]सर्वात्मनैकदेशेन सर्वथा दुर्घटत्वतः॥
एकस्य नैकदेशोऽस्ति नैकदेशेऽस्त्यभिन्नता।
यस्यैकदेशः सोऽन्यः स्यात्तथा सत्यनवस्थितिः॥
स्यादनन्यः कथञ्चिच्चेत्तथाप्यस्त्यनवस्थितिः।
परापरविकल्पानां तत्रापरिसमाप्तितः॥"

१५ [प्र० वार्तिकाल० १।२३८] इति।

विकल्पेतर-विभ्रमेतरादिभिराकारैरेकस्यैव संवेदनस्य तथा चान्यथा च भावमभ्युपगम्य पुनरेवं ब्रुवतः स्वमतापरिज्ञानदोषोपनिपातात्। तत्संवेदनवदात्मन्यप्याकारभेदसंभवेन विरागाविरागयोरप्रतिषेधादिदमपि प्रतिपिद्धम्–

"नात्मात्मनि विरक्तः किं यथास्ति स विरज्यते।
२० न तथा न यथा सोऽस्ति तथापि न विरज्यते॥"

[प्र० वार्तिकाल० १।२३८] इति।

तत आत्मादौ विपरीताभिनिवेशवत एवात्मस्नेहसुखतर्पणादिर्न विवेकिनः तस्य तत्त्वनिर्णये विपरीताभिनिवेशनिवृत्तौ कारणाभावात्तदनुत्पत्तेः। एतदेवाह–

सज्ज्ञानपरिणामात्मतत्त्वसम्प्रतिपत्तितः।
२५ **पीतदोषाऽस्रवाकारो विपरीतग्रहक्षयः॥५६॥** इति।

आत्मनि योऽसौ **विपरीतग्रहः** भौतिक एव, अचेतन एव, चेतनोऽप्यविकल्प एव, नित्य एव, अनित्य एवेत्यादिर्मिथ्याभिनिवेशस्तस्य **क्षयो** विनाशो विवेकिन इति शेषः। तस्य विशेषणं पीतेत्यादि। **दोषाणामात्मस्नेहसुखतर्पणादीनाम् आ** समन्तात्[7] **स्रवणम् आस्रवः** स एवाकारः स **पीतोऽन्तर्भावितः** स्वरूपत्वेनावस्थापितो येन स तथोक्तः। ३० कारणस्य हि परिक्षयः कार्यमपि क्षयरूपतयावस्थापयति, अन्यथा तस्य तत्कार्यत्वानुपपत्तेः। कुम्भकारादिक्षयेण व्यभिचारः, तेन तत्कार्यस्य कुम्भादेरपरिक्षयकरणादिति चेत्; नः उपादानक्षयाभिप्रायेणैवमभिधानात्। विपरीतग्रहोपादाना हि जीवस्नेहसुखतर्पणादयः तत्परिक्षयान्न भवन्तीति। 'सज्ज्ञान'[8] इत्यादिरत्रैव हेतुः। सतो विद्यमानस्य

---

१ विद्वेषः आ०, ब०, प०। २ तदाश्रय द्रव्य–आ०, ब०, प०। ३ दोषवेदवदस–आ०, ब०, प०। ४ एकान्ताव्यतिरेके च प०। ५ –दिति च ब–आ०, ब०, प०। ६ सर्वात्मन्येक–आ०, ब०, प०। ७–पास्रवा– आ०, ब०, प०। ८–ताच्छ्रवणं स्रवः आ०, ब०, प०। ९ संज्ञाने– आ०, ब०, प०।

जीवादेः ज्ञानं **सद्ज्ञानं** तेन यः **परिणामः** प्रतिसमयं तद्रूपतयैवावस्थानं स एवात्मनो जीवस्य **तत्त्वं**[1] स्वरूपं तस्य **सम्प्रतिपत्तिः** युक्ततो निर्णयः तत इति। न हि तत्तत्त्व[2]-निर्णये विपरीतग्रहः संभवति विरोधात्। ततः सति तस्मिन् क्षय एव तस्य भवति रज्जु-निर्णये सर्पग्रहवत्। ततो यथा[3]वस्थितनिरवशेषजीवादिपदार्थज्ञानपरिणामरूपमात्मानं निश्चिन्वतो मिथ्याभिनिवेशादिदोषकलिलस्य व्यपगमादात्यन्तिकी शुद्धिः बुद्धिमधिरोहति। तत इदं प्रत्युक्तम्— ५

"विशिष्टसुखसंगात् स्यात्तद्विरुद्धे विरागिता।
नैराश्ये तु यथालाभमात्मस्नेहात्प्रवर्त्तते॥"

[प्र० वा० १।२३४-३५] इति।

यथोक्तस्यात्मन एव विशिष्टसुखत्वेन तन्निश्चयवतस्तद्विरोधिनि सुखे वैराग्य- १०
नियमेन प्रवृत्त्ययोगात्। कुतस्तर्हि तथाविधस्यात्मनो मिथ्याभिनिवेशादयो दोषा यतो घोरदुःखकुकूप[4]कुहरपरिभ्[5]वर्त्तनम्? न तावत्तत एव; अनिर्मुक्तिप्रसङ्गात्, तेषामविशेषा-पत्तेश्च। विशिष्टा हि ते पाटवादिगुणतारतम्याधिष्ठानतया प्रतीतेः। नहि कारणाविशेषे तद्विशेषो निर्हेतुकत्वापत्तेः।

एतेन 'नित्यादात्मादेस्ते' इति प्रत्युक्तम्; ततोऽपि हि न केवलात्तत्संभवः। नाप्य- १५
दृष्टसहायात्; अदृष्टस्यापि तत्कार्यत्वेनाविशिष्टस्यैव सम्भवात्[6], तद्विशेषाद् दोषविशेषा-नुपपत्तेः। तद्विशेषस्याप्यन्यतस्तत्कार्यादेव कुतश्चित् कल्पनायाम् अनवस्थाप्रसङ्गात्।

भवन्तु तर्हि वातादिभ्य एव ते, [7]वातप्रकृतेर्मोहः पित्तप्रकृतेर्द्वेषः कफप्रकृते रागः, तथा ये मोहादिमूलाः प्रलापमात्सर्यानुनयादयः सर्वेऽप्युत्तरदोषास्तेऽपीति चेत्, न; व्यभि-चारात्, मोहादेर्वातादिवत् प्रकृत्यन्तरेऽपि[8] दर्शनात्। न हि तद्व्यभिचारिणस्तत्कार्यत्व- २०
मतिप्रसङ्गात् प्रकृत्यन्तरेऽपि प्रकृति[9]सांकर्येण वातादेर्भावादेव मोहादिः, अतो न व्यभिचार इति चेत्; तर्हि [10]प्रतीतवदपरमप्रतीतमपि वातादिकार्यं तत्र किन्न स्यात्? प्रकृत्यन्तरेण वातादेः शक्तिप्रतिबन्धादिति चेत्; प्रतीतमपि ततो न भवेत्, अप्रतीतवत् प्रतीतेऽपि प्रतिबद्धशक्तिकस्य कारणत्वायोगात्। तन्न वातादिकार्यत्वं मोहादेः। वातादिप्रकर्षाद्य-नुविधानाभावाच्च, यद्धि यस्य कार्यं तत्तदुत्कर्षाद्यनुविधायि दृष्टं यथा तन्त्वादेः पटादिकम्। २५
न चैवमत्र, वातादेरुत्कर्षेऽपि मोहादावपकर्षस्य[11] अपकर्षेऽप्युत्कर्षस्य प्रतीतेः। अथ शक्तिस्तत्र-कारणं तस्याश्च वाताद्युत्कर्षादावप्यपकर्षादिसम्भवात्, तत्प्रसवे मोहादौ तत्प्रतिपत्तिर्न-विरुध्यत इति चेत्; न; शक्तेः पृथग्भावे तत एव कार्योत्पत्त्या[12] वातादेरहेतुत्वप्रसङ्गात्। अपृथग्भावे च तदुत्कर्षादावप्यपकर्षादेरशक्यव्यवस्थापनत्वात्। ततो [13]वातादेरुत्कर्षादौ तदात्मनि शक्तावपि तद्भावात्, तत्प्रभवेऽपि स एव भवेत्। न चैवम्, अतो वाताद्युत्कर्ष- ३०

---

१ तत्त्वं तस्य आ०, ब०, प०। २ -त्त्वं निर्णये आ०, ब०, प०। ३-वस्थितिनि -आ०, ब०, प०। ४ "कुहरं विवरं बिलम्।"-ता० टि०। ५ -वर्तिनं आ०, ब०, प०। ६ -वात्तदविशिष्टादोष-आ०, ब०, प०। ७ तुलना-"नाभ्यासजा रागादयः किन्तु वातादिजाः तथाहि-वातप्रकृतेर्मोहः पित्तप्रकृतेर्द्वेषः कफप्रकृते राग इति··· तदप्यसत्; व्यभिचारान्न वातादिधर्माः प्रकृतिसङ्करात्।"-प्र० वार्तिकाल० १।१४८। तत्त्वसं० पृ० ५४८। ८-पि तद्दर्श-आ०, ब०, प०। ९-तीनां कार्येण आ०, ब०, प०। १० प्रतीतपरम-तमपि आ०, ब०, प०। ११-कर्षस्याप्युत्कर्ष-आ०, ब०, प०। १२-त्यादेरेव वातादे-आ०, ब०, प०। १३ वातादा उत्कर्षादौ आ०, ब०, ता०।

भावेऽपि मोहादौ तद्विपर्ययात् वातादिप्रभवत्वं न मोहादौ शक्यकल्पनम् । ततोऽन्यदेव तस्य कारणं वक्तव्यम्, अहेतुकत्वे कालदेशस्वभावभेदानुपपत्तेः । तच्चाभ्यास [1]एव । मोहाद्यभ्यासादेव हि मोहादिः; तत्पाटवाद्यनुविधायिनस्तस्य प्रतिपत्तेः अतद्धेतुकत्वे तदनुपपत्तेः । अतः सजातीयाभ्यासनिबन्धना एव मोहादय इति सौगतः; सोऽपि न युक्तवादी; दीर्घनिद्रादिना अभ्यासव्यवधाने पुनस्तदुत्पादाभावप्रसङ्गात् । व्यवहितस्यापि हेतुत्वान्न तत्प्रसङ्ग इति चेत्; कथमिदानीं सुगतेऽपि जन्मदोषसमुद्भवलक्षणा पुनरावृत्तिर्न भवेत् । तद्धेतोः आत्मदर्शनस्य तदानीमभाविनोऽपि चिरापक्रान्तस्य तद्धेतुत्वसम्भवात् । तथा च न सुभाषितमिदम्–

"आत्मदर्शनबीजस्य हानादपुनरागमः ।"[प्र० वा० १।१४३] इति । तन्न अभ्यासस्यापि [2]मोहादिकारणत्वम् । कर्मणां तु पौद्गलिकानां तदुपपन्नं [3]प्रमाणभावात् । तथा हि– यथावस्थितस्व[4]परपरच्छिदात्मनो जीवस्य स्वविषये मोहादिः शरीरेन्द्रियव्यतिरेकिजीवोपश्लिष्टपुद्गलपरिणामपूर्वकः, तत्त्वात्, धत्तूराद्युपयोगिनस्तन्मोहादिवत् । कर्म[5]पुद्गलोपश्लेषोऽपि जीवस्यापरमोहादिपूर्वकः, तत्त्वात्, धत्तूरादिरसोपश्लेषवदिति सिद्ध आस्रवो बन्धश्च, तदुपश्लेषस्य बन्धत्वात् तद्धेतोश्च मोहादेरास्रवत्वात् । एतदेवाह–

रागादयः सजातीयपरिणामाभिवृद्धयः ।
सूचयन्ति हि कर्माणि स्वहेतुप्रकृतीनि च ॥५७॥ इति ।

सजातीयः सदृशः **परिणामः** परापरविवर्त्तः स एवाभिनवा पूर्वापेक्षया [6]प्रत्यग्रत्वात् अभ्यधिका[7] कालोपचयवत्त्वाद्वृद्धिर्येषां ते तथोक्ताः । ते चैवम्भूता **रागादयो** रागः स्नेहात्मा मोहविशेषः तदादयो द्वेषादयः । किं कुर्वन्ति ? **सूचयन्ति हि** स्फुटम् । कानि ? **कर्माणि** निरूपितरूपाणि । कीदृशानि ? **स्वहेतुप्रकृतीनि** स्वस्य रागादेर्हेतुः कारणं प्रकृतिः स्वभावो येषां तानीति । **च**शब्दो हेतु[8]परत्वमस्यावद्योतयति । यतो रागादीनां हेतुप्रकृतीनि कर्माणि ततः सूचयन्ति, कार्यात् कारणप्रतिपत्तेरव्यभिचारात् । अथवा स्वे रागादयो हेतुप्रकृतयो येषामिति व्याख्येयम् । कथं पुनरत्र व्याख्याने तेषां तत्सूचकत्वम् कारणानामवश्यम्भाविकार्यत्वाभावादिति चेत् ? सत्यम्; तत्र सापेक्षत्वे तन्नियमाभावः, अपेक्ष्यासन्निधाने कार्यानुत्पत्तेः । न चैवम्, रागादीनां स्वत एव तद्धेतुत्वस्य प्रकृतिग्रहणेन ज्ञापनात् । एवं हि ते प्रकृत्या तद्धेतवो भवन्ति यदि तत्र नापरमपेक्षेरन्, आपेक्षिकस्य हेतुभावस्य प्राकृतत्वानुपपत्तेः । प्राकृते च तद्भावे नियम एव कार्यस्य तृष्णायामिव कर्मणः । तथा चालङ्कारवाक्यम्–

"अथ तृष्णास्ति नैवास्ति कर्मणोऽस्य परिक्षयः ।
सतृष्णस्यास्य हि भवेत् पुनः कर्म परापरम् ॥"
[प्र० वार्तिकाल० १।१९०] इति ।

कथमेवं कारणस्याप्यव्यभिचारिणो लिङ्गत्वसम्भवात् कार्यादिभेदेन [9]लिङ्गत्रैविध्यकथनम् ? इति चेत्; सत्यम्; अस्त्ययं सौगतस्य तद्वादिनो दोषः, कारणलिङ्गस्य स्वभा-

---

१ एव न मो–आ०, ब०, प० । २ मोहाधिकरणत्वं आ०, ब०, प० । ३ प्रमाणाभावात् आ०, ब०,प० । ४–स्वपरस्य स्वावि–आ०, ब०, प० । स्वपरस्य वि – प० । ५ पुद्गलश्लेषो–आ०, ब०, प० । ६ प्रत्यक्षत्वा–आ०, ब०, प० । ७ –का वा का–आ०, ब०, प० । ८ पदत्वमप्याव –आ०, ब०, प० । ९ प्र० वा० ३।१ ।

वान्तर्भावप्रत्यायनात्। तदेवं क्लेशकर्मकतिपयव्यक्तिविशेषगतस्य कार्यकारणभावस्यानुमानतः परापरभेदात् प्रतिपत्तावनादिरेव स व्यवतिष्ठते, तदनुमानबलभाविना तर्कज्ञानेन तथैव तत्र प्रतिपत्तेः। तत्प्रामाण्यस्य च निरूपितत्वात्।

साम्प्रतं तत्त्वज्ञानेत्यादिनोक्तमपि कर्मनिर्जरणं विनेयानुजिघृक्षया स्पष्टमभिधित्सुराह- ५

सात्मीभावाद्विपक्षस्य सतो दोषस्य संक्षये।
कर्माश्लेषः [प्रवृत्तानां निवृत्तिः फलदायिनाम्] ॥५८॥ इति।

भवति हि सतो विद्यमानस्य **दोषस्य** रागादेः **संक्षयः** सामस्त्येन विनाशः,[1] तद्विपक्षस्य रागादिप्रत्यनीकस्य निरूपितस्य तपसः **सात्मीभावात्**, अनात्मरूपस्यात्मरूपतया भावनात्। सति च तत्संक्षये **कर्मभिरागन्तुभिरश्लेषोऽसम्बन्धः** आत्मनः, तेषां दोषनिदानत्वेन १० दोषाभावेऽनुत्पत्तेः, अनुत्पन्नैश्च सम्बन्धस्यासम्भवात्। प्रवृत्तानां तर्हि कर्मणां कथं निवृत्तिः? इत्यत्राह-

प्रवृत्तानां निवृत्तिः फलदायिनाम्। इति।

प्रवृत्तानां पूर्वोपात्तानां कर्मणां **निवृत्तिरात्मनो** विश्लेषः। कीदृशानाम्? **फलदायिनाम्**। विशेषणमप्येतद्धेतुत्वेन द्रष्टव्यं फल[2]दायित्वादिति। दृश्यते च फलदायित्वेनोपात्तस्यापि मदिरादेर्विनिवृत्तिः तथा कर्मणामपि। फलञ्च तेषां स एव रागादिर्दोषः, तथाऽन्तरमेव निरूपणात्। तदेवमात्मनः कर्मसम्बन्धाभावे तत्सम्बन्धतिरोहितस्यानन्तज्ञानादिस्वभावस्याविर्भावात् भवत्येव परमा निर्वृतिः। कथं पुनरात्मनः कर्मसम्बन्धाभावे कर्तृत्वभोक्तृत्वे तयोस्तदुपनिबन्धनत्वात्? [3]तदभावे चात्मैव न भवेत्, तस्य तल्लक्षणत्वात्, अतो न तत्सम्बन्धाभावेन तस्य निःश्रेयसकल्पनमात्मवादिनामुपपन्नमिति चेत्[4]; तन्न; यथावस्थितस्वपरविषयपरिशुद्धज्ञानस्यैव तल्लक्षणत्वात्। तत्र च **"प्रभास्वरमिदं चित्तम्"** [प्र० वा० १।२१०] इति ब्रुवतः सौगतस्यापि विवादाभावात्[5]। चित्तस्यैव कथञ्चिदन्वयिनः आत्मत्वेन व्यवस्थापनात्। ततः क्रियाभोगयोरभावेऽपि न परिहाणिरिति दुर्व्याहृतमेतत्-

"आत्मीयमेव यो नेच्छेद्भोक्ता इव न विद्यते।
आत्मापि न तदा तस्य क्रियाभोगौ हि लक्षणम्॥"
[प्र० वा० १।२५७] इति।

कुतः पुनर्विपक्षस्य सात्मीभाव इत्याह-

प्रतिपक्षस्थिरीभावः प्रायः संस्कारपाटवात्। इति।

प्रतिपक्षो रागादीनां तत्त्वज्ञानभावनारूपं तपः तस्य **स्थिरीभावः** आत्ममयत्वं **संस्कारस्य** तद्भावनोपनीतवासनाविशेषस्य **पाटवात्**। स च ततः **प्रायो** बाहुल्येन कदाचिदसत्यपि तस्मिन् क्षयोपशमविशेषादेव भावात्। के पुनस्ते दोषा येषां तद्भावना विपक्षभावेनोपक्षिप्यते? इति चेत्; अत्राह-

निर्ह्रासातिशयौ येषां तत्प्रकर्षापकर्षयोः॥५९॥ इति।

तस्य तत्त्वज्ञानाभ्यासस्य **प्रकर्षापकर्षावुपचयापचयौ** तयोः सतोर्येषां रागादीनां **निर्ह्रासातिशयौ** हानिवृद्धी तेषां स विपक्ष इति प्रतीयते, अन्यथा तत्प्रकर्षादौ तन्निर्ह्रासादेरनु-

१ -शः स च त- आ०, ब०, प०। २ -दायित्वमिति आ०, ब०, प०। ३ तद्भावे आ०, ब०, प०। ४ चेन्न प०। ५ -वात्तस्यैव आ०, ब०, प०।

पपत्तेः। [1]तथा च यत् यत्पाटवे सत्यपहीयते तत्तस्यात्यन्तपाटवान्निर्मूल[2]मपहीयते यथा दहनपाटवाच्छीतस्पर्शः, तत्त्वज्ञानपाटवादपहीयन्ते च रागादय इति [3]सिद्धः संवरस्तत्त्वज्ञानात्मा। ततश्च दोषापहानादनागतकर्मानुत्पत्तौ उत्पन्नानाञ्च [4]तदपहातव्यक्लेशमात्रफलप्रदानेनापक्रमाद्भवति परिशुद्धिः, [5]या सिद्धिरात्मनः काष्ठागतात्तत्त्वज्ञानपाटवात् दोषाणां समूलतलप्रहाणादात्मनोऽपि स्यात् अव्यतिरेकात्, अन्यथा दोषाणामपि न भवेदिति चेत्; न; आत्मन एव तद्रूपस्य प्रहाणात्। प्रहीणस्य कथमवस्थितिः, यतः कैवल्यमिति चेत्? तथापि प्रतीतेरेव। निरूपितं च स्थित्यादित्रयात्मकत्वं सर्वस्यापि भावस्य। ततो नेदं जैनं प्रति दूषणम्—

"यस्यात्मा वल्लभस्तस्य स नाशं कथमिच्छति।"

[प्र० वा० १।२३६] इति।

सन्नेव ह्यात्मा कस्यचिद्वल्लभः। न च कौटस्थ्ये तस्य सत्त्वम्, तत्र क्षणभङ्गैकान्तवदर्थक्रियाशक्तिवैकल्यस्य निरूपणात्। परिणामिनि च विनाशस्यावश्यम्भावात् तमिच्छत एव तद्वल्लभत्वोपपत्तेः। न तत्र कथमिति प्रश्नोपपत्तिः, अनुपपत्तिविषय एव [6]तदुपपत्तेः। अथ सौगतेनापि तत्त्वज्ञानं भावनाधिष्ठितं निःश्रेयसनिबन्धनमभिहितं कस्मान्नेष्यते? इति चेत्; किं पुनस्तस्य तत्त्वज्ञानम्? [7]सत्त्वादिलिङ्गोपजनितमनुमानमिति चेत्; कुतः तत्सिद्धम्? असिद्धस्य ज्ञानत्वानुपपत्तेः। स्वसंवेदनादिति चेत्; न; तस्य प्रत्यक्ष[8]विशेषत्वेन स्वलक्षणविषयत्वात्, अनुमानस्य च सामान्याकारत्वात्, अन्यथा शब्दसम्बन्धयोग्यत्वानुपपत्तेः। स्वतः स्वलक्षणात्मैवानुमानं सामान्याकार[9]स्तु तत्र विकल्पान्तरोपनीत इति चेत्; न; तदन्तरस्याप्यविदितस्याज्ञानत्वात्, स्वसंवेदनाच्च सामान्याकारत्वेन विदितत्वायोगात्। तत्रापि तदाकारस्य विकल्पान्तरोपनीतत्वकल्पनायां प्रकृतप्रसङ्गानतिवृत्तेः अनवस्यापत्तेश्च। सत्यपि तत्र स्वसंवेदने कथमनारोपात्तत्प्रतिपत्तिः न [10]चारोपस्यैवानुत्पत्तिः "[11]**परोक्षा नो बुद्धिः**" [ ] इति ब्रुवतां[12] तत्रास्वसंवेदनसमारोपस्य[13] प्रादुर्भावात्। स्वसंवेदनेनैव तदुत्पत्तेः प्रतिबन्धादिति चेत्; न; [14]अनन्वयेऽपि चित्त-[15]प्रबन्धे तेनैव[16]कत्वारोपजन्मनः प्रतिबन्धात्, अनारोपप्रतीतिभावेनानुमानवैकल्योपनिपातात्। अनुमानान्तरात्तत्राप्यनारोपप्रतीतिकत्वकल्पनायाम् अनवस्थानम् अनुमानपरम्परायाः [17]अपरिसमाप्तेः। ततो नानुमानस्य सम्भवो निरारोपायास्तत्प्रतीतेरभावात्।

सम्भवतोऽपि कस्तस्य भावयिता? विना तेन भावनाऽनुपपत्तेः। न चित्तक्षण एव; कस्यचित्तस्य परापरकालावस्थायित्वेन [18]परमताप्रसिद्धेः। क्षणविनाशिनश्च भूयोवृत्त्या [19]तद्भावकत्वानुपपत्तेः। सन्तान इत्यपि न युक्तम्; अन्वयिनस्तस्यापि वस्तुवृत्तेर्नाभावात् अवस्तुवृत्त्या सम्भवतश्च भावनादौ वन्ध्यास्तनन्धयवदनुपयोगात्। तन्न तस्य भावना। तत्सम्भवेऽपि न किञ्चित् फलमित्यावेदयति—

---

१ यथा च प०। २ -मुपजायते आ०, ब०, प०। ३ सिद्धिः आ०, ब०, प०। ४ तदा हातव्य आ०, ब०, प०। ५ वा सि -ता०। ६ प्रश्नोपपत्तेः। ७ स्वत्वादि आ०, ब०, प०। ८ विषयत्वेन आ०, ब०, प०। ९ -रस्तत्र वि -प०। -रस्तु वि -आ०, ब०। १०-रोपादस्यैवा -प०। ११ "तस्मादप्रत्यक्षा बुद्धिः"-मी० भा० १।१।५। १२ "मीमांसकानाम्"-ता० टि०। १३ -स्य विदितस्य प्र -आ०, ब०, प०। १४ अन्वयेपि आ०,ब०,प०। १५ प्रबन्धेनैवैक -आ०,ब०,प०। १६ एकत्वारोपोत्पत्तेः -ता० टि०। १७ अपि स -आ०,ब०,प०। १८ "सौगतमतेऽप्रसिद्धेः"-ता० टि०। १९ तद्भावकत्वा-आ०,ब०,प०।

यद्यप्यनात्मविज्ञानभावनासम्भवस्ततः ।
न निरोधो निरोधे वा न प्रयोजनमीक्ष्यते ॥६०॥ इति ।

[1]आत्मेति कथञ्चिदन्वयः, तदभावे भावानां नैरात्म्यस्याभि[2]मतस्यावश्यम्भावात्, स न विद्यते येषां तानि च तानि **विज्ञानानि** च तेषां सम्बन्धिनी **भावना** क्षणभङ्ग-नैरंश्या[3]द्यनुमानाभ्यासवृत्तिः तस्या **यद्यपि सम्भवः** अपिशब्दस्तदभ्युपगमं सूचयन् वस्तुतस्तदभावं निवेदयति । **ततस्तत्सम्भवात्, न निरोधो** न विनाशो [4]मिथ्यारोपस्य । तन्निरोधाय हि तत्सम्भवः परस्याभिमतः **"मिथ्याध्यारोपहानार्थं यत्नः"** [प्र० वा० १।१९४] इति वचनात् । न चानुमानात्तन्निरोधः तस्यावस्तुविषयत्वात् । वस्तुविषयस्य[5] हि ज्ञानस्य तदन्यत्प्रतिनिरोधकत्वं यथा रज्जुज्ञानस्य सर्पवेदनं प्रति, नावस्तुवेदनस्य यथा तस्यैव सर्पज्ञानस्य [6]सम्भ्रमान्तरं प्रति । सामान्यावलम्बनत्वेनावस्तुवेदनस्यापि तस्य वस्तुनि प्रतिबन्धात्, भावनापरिकलितस्य तदध्यारोपप्रत्यनीकवस्तुस्वलक्षणदर्शनप्रत्युपस्थापनद्वारेणोपपद्यत एव तन्निरोधकत्वमिति चेत्; न; प्रतिबन्धस्यैव प्रमाणाभावेन प्रतिक्षिप्तत्वात् । तन्न ततो भाव्यमानादपि वस्तुस्वलक्षणस्य दर्शनम्, अपि तु तद्विषयस्यैव मिथ्याकारस्य । अथापि कथञ्चित् ततस्तद्दर्शनं तथा वैराग्यदर्शनमपि दुःखभावनायां किन्न भवेत् ? यत इदं दुरुक्तं न भवेत्–

"दुःखभावनयाप्येष दुःखमेव विभावयेत् ।"
[प्र० वा० १।२४०] इति ।

तन्न मिथ्याज्ञानाभ्यासवतोऽपि मिथ्यात्वस्य निवृत्तिः मद्यपानान्मदस्येव, तदुक्तम्–

अतत्त्वं भावयन् भिक्षुः कथं तत्त्वेन युज्यते ।
पिबन्मद्यं मदाभावं कथन्नु प्रतिपद्यते ॥"
[ ] इति ।

अथवा ततो न निरोधो निरोध्यस्याभावात् । कथं पुनस्तस्याभावः ? सुखदुःख-हर्षविषादादिपरापरचित्तक्षणेषु[7] एकत्वज्ञानस्यैव निरोध्यत्वादिति चेत्; सत्यम्; यदि तस्यारोपितविषयत्वम्, न चैवम्, भेदज्ञानवत्तस्यापि निर्बाधत्वेन तत्त्वविषयत्वात् । न च तत्त्वज्ञानमेव निरोध्यम्, भेदज्ञानस्यापि तत्त्वापत्तेः । न किञ्चित्तत्त्वज्ञानं विचारासहत्वात् सामान्यं तु व्यवहारेण, ततो भेदज्ञानमपि निरोध्यमेवेति चेत्; उच्यते–तद् ज्ञानं यदि वस्तुतो नास्ति न भावनासम्भवतस्तस्य निरोधः, स्वत एव भावात् । अस्ति चेत्: कथन्न तत्त्वज्ञानं[8] तत् ? तेन स्वरूपस्य [9]सत एव प्रतिवेदनात् । न च तस्य सन्तानस्य निरोधः; चरमवर्त्तिनः सजातीयानवक्लृप्तौ विजातीयेऽप्यनुपयोगात् नित्यवदवस्तुत्वापत्तौ तदुपादानप्रवाहस्यापि तत्त्वापत्तेः । तत्र चोक्तम्–'स्वत एव [10]तस्याभावात् किं तन्निरोध-प्रयासेन इति । तन्न तस्य निरोधः । **निरोधे वा** यत्किञ्चिन्मुमुक्षुप्रयासस्य फलं परिशुद्ध-परापरचित्तलक्षणं **प्रयोजनं** परामिमतं तत् **न** सम्भवति । संवृत्या सम्भवति तत एव तस्य

---

१ "आत्मशब्दस्य कथमन्वयवाचकत्वम् ? इति चेदुच्यते, अतति सातत्येन गच्छतीत्यात्माऽन्वयः"–ता० टि० । २ –मतः अवश्य –ता० । ३ –श्यादनु–प० । ४ "अध्याहार्यमिदम्"–ता० टि० । ५ –स्यानिज्ञान –आ०, ब०, प० । ६ "विभ्रमानन्तरम्"–ता० टि० । ७ –षु तत्त्वज्ञानस्यास्यैव आ०, ब०, प० । ८ –नं तत्त्वेन आ०, ब०, प० । ९ स्वत आ०, ब०,प० । १० तस्य भावात् आ०, ब०, प० ।

मोक्षत्वेन, तत्फलत्वं च वस्तुतः [1]पुनस्तस्यापि निरोध एव मोक्ष इति चेत्; न तर्हि तस्य प्रणीतत्वम्, [2]तद्धि मोक्षान्तरप्रतिक्षेपेण तस्यैवेष्टत्वम्। सम्प्रति [3]तदन्तरस्यापि प्रतिपादनेन तस्य [4]तल्लक्षणाभावात्। यदि वा, **निरोधे वा** मोक्षे तत्र **प्रयोजनं** प्रमाणं 'प्रयुज्यते प्रकर्षेण युक्तं क्रियतेऽनेनेति प्रयोजनम्' इति व्युत्पत्तेः **तन्नेक्ष्यते**[5] न सम्भवति। सम्भवे तत्रैव तन्न भवेत्, नापि तस्यायुक्ति[6]विकलत्वं [7]तदविकलत्वादेव [8]सांवृतत्वोपपत्तेः। ततो दुर्भाषितमिदम्—

"परितुष्ट[:]क्षणो यस्य सम्भवत्यपरापरः।
तस्य मोक्षः प्रणीतोऽसौ भ्रान्त्ययुक्तिविनाकृतः॥"
[प्र० वार्तिकाल० १।२०३] इति।

भवतु तर्हि नीरूपस्यैव निरोधस्य प्रणीतत्वेन मोक्षत्वमिति चेत्; अत्रोत्तरं **निरोधे वा** इत्यादि। एतदुक्तं भवति—निरोधमभ्युपगच्छता तत्परिच्छित्तये प्रमाणं वक्तव्यम्, अन्यथा तीर्थान्तरमोक्षवत्तस्य प्रणीतत्वाव्यवस्थितेः। तच्च न तावन्मुक्तस्यैव, निःसरणाभावानुषङ्गात्। निःसरणं हि मुक्तस्य पुनः संसाराभावः। न च प्रमाणे सति तदभावः; तस्यैव निरोधिनः संसारत्वात्। तन्न मुक्तस्य प्रमाणम्। संसारिण इति चेत्; तदपि न प्रत्यक्षम्, तस्य तद्बलभाविन[9] एव तद्विषयत्वम्, निरोधस्य च नीरूपत्वेन बलवैकल्यात्। अतदाकारस्य च न [10]तद्विषयत्वम्, आकारवादव्यापत्तेः। तदाकारत्वे च न प्रत्यक्षत्वमभावत्वात्। पुनः प्रत्यक्षान्तरेण तत्प्रतीतिकल्पनायामनवस्थापत्तेः। तन्न प्रत्यक्षं तत्। नाप्यनुमानम्; प्रत्यक्षाभावे तस्याप्यनवकल्पनात्। नापि प्रमाणान्तरम्; अनभ्युपगमात्। तन्न निर्वाणस्य निरोधाकारः प्रमाणाभावात्। अत एव न तत्र रागाद्युपशमरूपः शान्ताकारः; प्रमाणपथातिवर्तिनि[11] तस्मिंस्तदाकारस्याशक्यकल्पनत्वात् प्रणीतत्वाद्याकारवत्। ततो यदुक्तम्—[12]"**निरोधः शान्तता प्रणीतता [13]निःसारभावश्चेति चतुराकारं निरोधसत्यम्**" [ ] इति; तत् प्रतिव्यूढम्। तन्न सन्ताननिरोधो निर्वाणम्। सति वा तस्मिन् न प्रयोजनं फलं मुमुक्षूणामीक्ष्यते। न च निष्फले तस्मिन् प्रेक्षावतामभिरुचिरुपपन्ना तद्वत्तावि[14]रोधात्। अन्यथा ब्रह्मविदां जीवविनाशलक्षणे[15] मोक्षे तद्वदभिरुच्युपपत्तेः। यत्तत्र प्रहसनं प्रज्ञाकरस्य **"न च तादृशा मोक्षेण किञ्चित् प्रयोजनमित्यहो महत्प्रेक्षापूर्वकारित्वं योगिनाम्"** [प्र० वार्तिकाल० १।२३४] इति तन्न युक्तं भवेत्। तन्न सौगतकल्पितो मोक्षः, तदभावात् न तन्मार्गत्वम् अनात्मविज्ञानाभियोगस्य नैरात्म्यज्ञानस्य मिथ्यात्वाच्च न तदभ्यासस्य मार्गत्वमित्यादर्शयति—

---

१ पुरः ता०। २ तद्विमोक्षा—आ०, ब०, प०। ३ तदन्तवत्तस्यापि निरोधे आ०, ब०, प०। ४ प्रणीतत्वलक्षणाभावात्। प्रणीतत्वम् "अतः परोऽपि संभवति मोक्षताऽतिक्षेपेण प्रणीतत इत्याकारः।" —प्र० वार्तिकाल० १।७९१। ५ —तेऽसम्भवे आ०, ब०, प०। ६ —विकल्पत्वं आ०, ब०, प०। ७ तद्विकलत्वा—आ०, ब०, प०। अयुक्तयविकलत्वादेव। ८ सांप्रतत्वो—आ०, ब०, प०। ९ "नाकारणं विषय इति सौगतैरभिधानात्" —ता० टि०। १०—तद्विषयवत्समाकार—आ०, ब०, प०। ११—पदातिवर्तीति त—आ०, ब०, प०। १२ "निरोधतः, शान्ततः, प्रणीततः, निःसरणतश्चेति चत्वार आकाराः"— प्र० वार्तिकाल० १।१९१। निरोधः शान्ततः प्रणीता निःसारतश्चेति आ०, ब०, प०। १३ निःसंसार—ता०। १४—लक्षणेऽपि मोक्षे आ०, ब०, प०।

हेयोपादेयतत्त्वार्थविपरीतव्यवस्थितेः ।
मिथ्याज्ञानमनात्मज्ञं मैत्र्यादिप्रतिरोधतः ॥६१॥ इति ।

सौगतेन हि यदनात्मज्ञम् आत्मवेदनविमुखं **ज्ञानं** [1]विज्ञानमभ्यनुज्ञातं तन्मिथ्यैव । कुत एव तत् (एतत्) तत्त्वेन तद्भावेनार्थ्यते इति **तत्त्वार्थौ**, **हेयोपादेयौ** च[2] तौ **तत्त्वार्थौ** च तयोः या तद्विज्ञानबलात् **विपरीता** हेयस्योपादेयतया उपादेयस्य हेयतया **व्यवस्थितिः** तत इति । न चेयं नास्त्येव सर्वथा फलविकलतया कथञ्चित्तद्वत्तया च यथाक्रमं त्याज्योपादेययोश्चित्तसन्ताननिर्मूलोच्छेदावस्थानयोस्तज्ज्ञानेन विपरीतस्थितेरवकल्पनात् । अथवा तद्[3] ज्ञानं मिथ्येत्यसम्भवीति व्याख्येयम् । अत्र निमित्तमाह–'**मैत्र्यादिप्रतिरोधतः**' इति । **मैत्री** तत्त्वमात्रे समताभावनम् **आदि**र्यस्य गुणोत्कृष्टादिविषयस्य प्रमोदादेः तस्य यः **प्रतिरोधः** तज्ज्ञानसम्भवे प्रतिनिवृत्तिः तत इति । तथाहि–न तावत्तज्ज्ञानं विनेयानां स्वत एव; सुगतकल्पनावैफल्यप्रसङ्गात् । सुगतादेव तत्तेषामादितः परार्थानुमानरूपमिति चेत्; न; ततोऽपि तज्ज्ञानवतः तदसम्भवात् । स हि कृपया तत्तेषामुपदिशति । न च तज्ज्ञानवतः कृपा विषयाभावात्, सर्वस्यापि तेन विनेयवर्गस्य तत्त्वतो नीरूपतयैव ज्ञानात् । तदध्यारोपस्यापि तदभावतत्त्वज्ञानवत्यसम्भवात् । ततो यदि सुगतस्य करुणावत्त्वमप्रतिरोधं[4] न तस्य तदभावज्ञानम् । तथा विनेयलोकस्यापि, इति युक्तं तस्यासम्भवित्वम्, असम्भवतश्चानभ्यासभूमित्वेनानिर्वाणमार्गत्वमपीति ।

साम्प्रतं स्वमते प्रमोदादेर्विषयभावादिना विधानमुपपन्नमिति दर्शयन्नाह–

तत्त्वार्थदर्शनज्ञानचारित्रेषु महीयसाम् ।
आत्मीयेषु प्रमोदादिरत एव विधीयते ॥६२॥ इति ।

तत्त्वेनार्यन्त इति **तत्त्वार्था** जीवादयः तेषां यानि **दर्शनज्ञानचारित्राणि** श्रद्धानाधिगमतत्स्थैरीभावलक्षणानि तेषु **प्रमोदादिः** हर्षादिः, आदिपदात् मैत्रीपरिग्रहः स **विधीयते** "**मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्वगुणाधिकक्लिश्यमानाविनेयेषु**" [त० सू० ७।११] इति प्रवचनेन । कुतः स तेषु विधीयते ; इति चेत्; **अत एव** अतोऽस्मात्तत्त्वार्थदर्शनादीनां भावात् परमते च तद्विषयस्याभावात्, तस्य च चारित्रविकल्पत्वेन[5] निःश्रेयसकारणत्वात् । एवकारान्निमित्तान्तरव्युदासः । केषां स विधीयते ? **महीयसां** प्रत्यासन्ननिःश्रेयससम्पदाम् । तेषामेव सांसारिकभोगनिस्पृहव्यापारतया महीयस्त्वोपपत्तेः । कीदृशेषु तेषां स विधीयत इति चेत् ? **आत्मीयेषु** । उपलक्षणमिदम्, तेन परकीयेषु चेति प्रतिपत्तव्यम् । न चैवमवस्थितस्यापि सुगतस्य क्वचिन्मैत्र्यादिकं सम्भवति इत्याह–

यस्तावत् [करुणावत्त्वात्तिष्ठत्येव हि चेतसाम् ।
सन्तानः स परोच्छेदान्न समत्वं प्रपद्यते] ॥६३॥ इत्यादि ।

नन्विदमुक्तमेव पूर्वं किमर्थं पुनरुच्यते इति चेत् ? बालधियां परिचयस्थैर्यार्थम् । एवमुत्तरत्रापि । न चैवं सर्वत्रप्रसङ्गः अनयैव दिशाऽन्यत्रापि तत्स्थैर्याभ्यासस्य[6] कर्त्तव्यताया:

---

१ विज्ञानमस्य तु ज्ञान–आ०, ब०, प० । २ च तत्त्वार्थौ आ०, ब०, प० । ३ तज्ज्ञानमिथ्ये–आ०, ब०, प० । ४ –रोधात्र आ०, ब०, प० । ५ –न च नि– आ०, ब०, प० । ६ –भ्यासकर्त्त –आ०, ब०, प० ।

सूचनात्। तावदिति वाक्यालङ्कारे। यश्चेतसां सन्तानः सुगतानामा तिष्ठत्येव न निर्वाति। कुतः ? करुणावत्त्वात् स समत्वं मैत्रीरूपम् उपलक्षणमिदम्, तेन प्रमोदादिकमपि न प्रपद्यते न कर्तृत्वेन प्राप्नोति विषयाभावात्। अस्त्येव सन्तानान्तरं विषयः तत्र सत्त्वमात्रे मैत्र्या व्रतचारिणि प्रमोदस्य क्लेशवति करुणाया निर्घृणादावुपेक्षायाश्च तेन 'प्रपत्तेरिति चेत्; न; तत्र सर्वत्रापि[1] तेन नैरात्म्यज्ञानप्रधानेनोच्छेदस्यैव करणात्[2]। न च तद्गोचरं मैत्र्यादिकं व्योमकुसुमादिवत्। न यदा मैत्र्यादिकं तदा तत्रोच्छेदः पश्चादेव तस्य भावादिति चेत्; न; वस्तुसति पश्चादपि तद्भावस्य निषेधात्। अवस्तुसतश्च पूर्वमपि कस्तस्योच्छेदाद्विशेषः यतो [3]मैत्र्यादेर्विषयः स्यात् ? अध्यारोपतः सत्त्वमिति चेत्, न; अवस्तुसति तस्यैवाभावात्। तस्यापि[4] ततो भावेऽनवस्थापत्तेः। सुगतस्यैव तदध्यारोप इति चेत्; तेन तर्हि तत्र सत्त्वमध्यारोप्य पुनस्तदुच्छेदकरणात्तदेव नाध्यारोपयितव्यम्, "**प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्**" [प्र० वार्तिकाल० १।१४७] इति न्यायात्। तन्न अवस्तुसतः पूर्वमपि तद्विषयत्वम्। वस्तुसत्त्वे तु कथं तत्रैव मैत्र्यादिरुच्छेदश्च विरोधात् ? न विरोधः, रागादिदुःखोपशमरूपत्वेनोच्छेदस्यैव परेषामिष्टत्वादिति चेत्; न; अभीष्टत्वेऽपि स्वसन्तानवद्वस्तुसत्युच्छेदस्याशक्यत्वात्। तन्न तदुच्छेदात्मा मोक्षः सम्भवति। कस्तर्हि वक्तव्य[5] इत्याह—

तस्मात् [निरास्रवीभावः संसारान्मोक्ष उच्यते।
सन्तानस्यात्मनो वेति शब्दमात्रं तु भिद्यते] ॥६४॥ इत्यादि।

तस्मात् उक्तस्य मोक्षस्यासम्भवात् **निरास्रवीभावो** मिथ्याज्ञानरागादेरास्रवादनिष्क्रान्तस्य[6] निष्क्रान्तस्य भावो भवनं **संसारान्मोक्ष उच्यते** मोक्षवेदिभिः। भवतु **सन्तानस्य** इति परः। तत्रोत्तरम्—**आत्मनो वा** इति, आत्मन एवेत्यर्थः। वाशब्दस्यावधारणार्थत्वात् आत्मन एव 'कथञ्चित् संवेदनान्वयरूपस्य सन्तानत्वोपपत्तेः, निरन्वयज्ञानप्रवाहस्याश्रयकल्पनत्वेन निरूपितत्वात्। कस्तर्हि सन्तानात्मनोर्भेद इति चेत् ? न कश्चिदर्थतः। केवलं सन्तान इति आत्मेति च '**शब्दमात्रं तु भिद्यते**' इति। कथं पुनर्निरास्रवस्याप्यात्मनः परापरशरीरसञ्चाराभावः, तत्सञ्चारकारिण एव तस्य [10]प्राग्लब्धत्वात्। पश्चादतत्कारित्वे तु परापरज्ञानपर्यायकारित्वमपि न भवेदिति स एवोच्छेदभावः पुनरप्यागत इति चेत्; न; तत्र कारणाभावात्। न हि आत्मैव [11]तत्सञ्चारे कारणम्, अपि तु अविद्यातृष्णादिरपि। तत्त्वज्ञानपरिपाकवतश्च तदभावेन सामग्रीवैकल्यान्न युक्तं तत्सञ्चारकारणत्वम्। आत्मनः परापरपरिशुद्धज्ञानपर्यायापेक्षया तु निरपेक्षत्वेन कारणत्वस्यैवोपपत्तेः न तदुच्छेदवादप्रत्यावृत्तिरपि।

न चैवं तस्यानवस्थितपरापरपरिमाण[12]स्याप्यवकल्पनम्, तत्रापि कर्ममन्त्रिवशस्यैव तस्य कारणत्वात्, अधिगतनिःश्रेयसस्य च कर्माभावात्। ततः परित्यक्तकायपरिच्छिन्नतया अवस्थितमेव तस्य परिमाणम्। तदपि कर्मविपत्त्येनोपनिबद्धं तदभावे कथमिति चेत् ?

---

१ प्रतिपत्ते—आ०, ब०, प०। २ —पि न नैरा —आ०, ब०, प०। ३ —णायां न चरद्गो—आ०, ब०, प०। ४ मैत्र्यादिवि— आ०, ब०, प०। ५ —पि भावे— आ०, ब०, प०। ६ कर्तव्य इ—आ०, ब०, प०। ७ —स्य भवनं आ०, ब०। —स्य निष्क्रान्तस्य भवनं प०। पूर्वमनिष्क्रान्तस्य पश्चान्निष्क्रान्तस्य। ८ कथं चेत् आ०, ब०, प०। ९ —पत्तेरन्वय— आ० ब०, प०। १० प्राग्बद्धत्वात् आ०, ब०, प०। ११ तत्सञ्चारिका —आ०, ब०, प०। १२ —ण्यप्यक —आ०, ब०, प०।

असत्यपि कुम्भकारे तदुपनिबद्धं घटपरिमाणमिवेति ब्रूमः, कर्मणोऽपि कुम्भकारवत् तत्र सहकारित्वस्यैव भावात्। कथमेवं कर्मकृतमसकलज्ञत्वमपि तदभावे निवर्तते इति चेत्, ? न; सकलज्ञानस्य संसारिण्यपि व्याप्तिज्ञानबलेन व्यवस्थापनात्। केवलं तस्य विशेषाभिमुखनिरोधानमेव कर्मभिः, तच्च तन्निवृत्तौ निवर्तत एव तद्व्यापारत्वात्[1]। ततो युक्तं मुक्तस्यावस्थितमेव परिमाणम्। न चैवं संसारिदशायाम्; तदा तत्प्रदेशोपसंहारविसर्पणपरिणामसहकारि[2]कारणस्य कर्मास्रवस्यानवस्थितत्वेन सूक्ष्मसूक्ष्मतरादिविकल्पगोचरस्यानवस्थितस्यैव तत्परिमाणस्य[3] सम्भवात्। ततो यदत्र ब्रह्ममीमांसायां सूत्रम्–**"अन्त्याऽवस्थितेश्चोभयनित्यत्वादविशेषः"** [ब्र० सू० २।२।३६] इति, यच्च भाष्यं भागवतम्–**"अन्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैः तद्वत्पूर्वयोरपि आद्यमध्यमयोः जीवपरिमाणयोर्नित्यत्वप्रसङ्गात् अविशेषप्रसङ्गात् एकपरिमाणशरीरतैव स्यात्, न उपचितापचितशरीरान्तरप्राप्तिः"** [ब्र० सू० शा० भा० २।२।३६]; इति; तत्प्रतिविहितम्; असङ्ख्यातप्रदेशस्य जीवस्य कर्मवशात् प्रदेशानामुपसंहार-विसर्पणातिशयक्रमसम्भवे सति अपचयोपचयातिशयक्रमाधिष्ठानपरापरशरीरप्राप्तेरविरोधात्। यदप्यत्र दूषणं भाष्यकारस्य– **"तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्येत वा न वेति वक्तव्यम्। प्रतिघाते तावत् न अनन्तावयवाः परिच्छिन्ने देशे सम्मीयेरन् अप्रतिघातेऽपि एकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेः जीवस्याणुमात्रत्वप्रसङ्गः।"** [ब्र० सू० शा० भा० २।२।३४] इति; तदपि तस्य जैनमतानभिज्ञत्वमावेदयति; न हि तत्र तेषामप्रतिघात एव, समुद्घातदशायामत्यन्तविसर्पणेन परस्परप्रतिघातवतामेव भावात्। तेषां चासङ्ख्यातलोकाकाशप्रदेशसमवायित्वेन परिच्छिन्नप्रदेशसमवायित्वाभावात्। नापि सप्रतिघाता एव उपसंहारपर्यन्तप्राप्तावेकप्रदेशसमवायित्वेनैव परमाणुरूपतया मध्ये चानेकविकल्पतया तेषामवस्थानात्। ततो युक्तं[4] मुक्तस्यावस्थितपरिमाणत्वम्, अन्यथाभावे हेत्वभावात्। कथमेवं घटादिवदनित्यत्वं न भवेदिति चेत्? न; कथञ्चित् तस्येष्टत्वात्, एकान्तनित्यत्वे[5] विनश्वरैकान्तवन्निर्वाणस्यैवाभावप्रसङ्गात्। एतदेवाह–

नित्यस्येच्छा-प्रधानादियोगोऽनित्यः किमात्मनः।
मिथ्याज्ञानादनिर्मोक्षस्तथाऽनेकान्तविद्विषाम् ॥६५॥ इति।

यः खलु यौगपरिकल्पितस्यात्मन इच्छाद्वेषादिना, साङ्ख्योपगतस्य शरीरेन्द्रियादि[6]विवर्तिना **प्रधानेन**, ब्रह्माद्वादिसम्मतस्य स्वपरविभागादिभेदावद्योतविधायिन्याऽविद्यया **योगः** समवायादिरूपः सम्बन्धः, कीदृशस्य ? **नित्यस्य** कूटस्थस्य, परिणामिनोऽनभ्युपगमात्, स **किमनित्यः** ? नैव। तथा हि–

तत्सम्बन्धस्ततोऽन्यश्चेत् तस्येति कथमुच्यताम्।
मुक्तात्मवत् परस्माच्चेत् सम्बन्धादनवस्थितिः ॥१८२२॥
अनन्यश्चेत् स नित्यः स्यात् नित्यादव्यतिरेकतः।
तथा च नित्या एव स्युरिच्छाद्वेषादयोऽपि ते ॥१८२३॥

---

१ "न हि व्यापारवतो विवृत्तौ व्यापारस्य सम्भवः।" –ता० टि०। २ –कारणकर्मा –आ०, ब०, प०। ३ –णामस्य प०। ४ युक्तमवस्थित–आ०, ब०, प०। ५ –त्यत्वेन वि–आ०, ब०, प०। ६ –दिनिवर्तना प०। –दिविवर्तना –आ०, ब०।

सम्बन्धे सति यत्तेषां तद्वतां न निवर्तनम् ।
निवर्तने वा सम्बन्धो विना तैः स कथं भवेत् ॥१८२४॥

ततो नित्या एव ते । **तथा च अनेकान्तविद्विषामे**कान्तवादिनां सम्बन्धिन आत्मनो जीवस्या**निर्मोक्षो** निश्रेयसाभावः संसार एव स्यात् । कुतः ? **मिथ्याज्ञानात्** तत्त्वे अतत्त्वज्ञानात्, तन्निबन्धनत्वात् संसारस्य, तस्य चेच्छादिवन्नित्यत्वात् । तदनित्यत्वमिच्छता चात्मनोऽपि तत्सम्बन्धात्मनः कथञ्चिदनित्यत्वमेषितव्यम्, अन्यथाऽनुपपत्तेः। ततः परिणामात्मन एवात्मनो मोक्षः, हेतुफलभावस्य तत्रैव सम्भवात् नैकान्तनित्यादिस्वभावस्य, विपर्ययात् । तथा च व्यवस्थितं सर्वभावेषु क्रमाक्रमानेकान्तयोर्मार्गतद्विषययोश्च चतुष्टयस्य प्रतिपादनात् प्रवचनं प्रमाणमिति । तच्च स्वविषये सप्तभङ्ग्या प्रवर्तत इति तद्विनिश्चयं कुर्वन्नाह–

द्रव्यपर्यायसामान्यविशेषप्रविभागतः ।
स्याद्विधिप्रतिषेधाभ्यां सप्तभङ्गी प्रवर्तते ॥६६॥ इति ।

द्रव्यमन्वयिरूपं **पर्याया** व्यावृत्तिधर्माणः **सामान्यः** [1]सदृशः परिणामो **विशेषो** विसदृशस्तेषां **प्रविभागस्तेन** यौ **स्यात्** कथञ्चिद्विवक्षितधर्मस्य **विधिप्रतिषेधौ** भावाभावौ ताभ्यां **सप्तभङ्गी** सप्तानां भङ्गानां समाहारः तद्वचसि **प्रवर्तत** इति । विधिप्रतिषेधयोर्द्वित्वात् तदुपाश्रयौ भङ्गावपि द्वावेव स्यातां तत्कथं ते सप्तेति चेत्; न; तयोरेव प्रति[2]पत्तुः प्रत्येकोभयादिविकल्पेन सप्तधा प्रतिपित्सायां तथा [3]तत्प्रतिपादिनो वचनस्यापि सप्तविषयत्वोपपत्तेः। तथा हि जीवे धर्मिणि त इमे तद्विध्यादिविषयाः सप्त भङ्गाः–स्यादस्त्येव जीवः, स्यान्नास्त्येव, स्यादस्ति च नास्ति चैव, स्यादवक्तव्य एव, स्यादस्ति अवक्तव्य एव, स्यान्नास्ति अवक्तव्य एव, स्यादस्ति नास्ति चावक्तव्य एव इति । तत्र प्रथमद्वितीयौ तद्भावाभावयोः प्रत्येकं प्रतिपित्सायाम्, तृतीयस्तदुभयजिज्ञासायाम् । तदेवाह–

तदतद्वस्तुभेदेन वाचो वृत्तेस्तथोभयम् । इति ।

तच्चास्तित्वम् **अतच्च** नास्तित्वं ताभ्यां यो **वस्तुनो** जीवस्य **भेदः** कथञ्चिन्नानात्वं तेन **वाचः** प्रत्येकं तत्प्रतिपादिन्याः श्रुतेर्**वृत्ते**राद्यौ भङ्गौ **तथा** तेनोभय[4]वेदनप्रकारेण वाचो वृत्तेरु**भयं** तृतीयो भङ्ग इति यावत् । चतुर्थस्तु युगपत्तत्प्रतिपित्सायां वचनप्रवृत्तेरसम्भवात्, तदेवाह–

तदतद्वागवृत्तेश्च [सह तद्वागवृत्तिना]॥६७॥ इति ।

तदतदोर्या **वाचः** वचनस्य **अवृत्तिः** यौगपद्येन अन्यथानुपपत्तेः तस्याः, चेति समुच्चये । पञ्चमादिभङ्गत्रयं तु प्रथमादेः प्रत्येकं जिज्ञासया चतुर्थेन सम्मिलनात् । तदेव निवेदयति–**'सह तद्वागवृत्तिना'** इति । वृत्तेरिति वर्तते । तदिति च निपातस्तेषा[5]मित्यर्थे । तदयमर्थः–**वाग(ग्)**वचनम् **अवृत्ति**रविद्यमान[6]वृत्तिर्यत्रावक्तव्यविषये, अनेन सह तेषां स्यादस्त्यादीनां वृत्तेरिति । तथाहि प्रथमस्य चतुर्थेन सह वृत्तौ [7]पञ्चमो भङ्गो, द्वितीयस्य षष्ठः, तृतीयस्य सप्तमः । न चैवं भङ्गान्तरपरिकल्पनं सम्भवति यतः "**सप्तभङ्गीप्रसादेन शतभङ्ग्यपि जायते**" [ ] इत्युपालभ्येत । तथाहि–

---

१ सदृशपरि –आ०, ब०, प० । २ –पत्त्रा प्रत्ये–आ०, ब०, प० । ३ तत्प्रतिवादि–आ०, ब०, प० । ४ –वेदिनं प्र– आ०, ब०, प० । ५ –पातनस्ते –आ०, ब०, प० । ६–मानावृत्ति –आ०, ब०, प० । ७ पञ्चमम –आ०, ब०, प० ।

प्रथमस्य द्वितीयेन मिलने तृतीयत्वम्, तृतीयेन पौनरुक्त्यमेकस्य अस्तिपदस्याधिक्यात्। चतुर्थेन पञ्चमत्वम्, पञ्चमसप्तमाभ्यां पौनरुक्त्यं पूर्ववत्। षष्ठेन सप्तमत्वम्। एवं द्वितीयादावपि वक्तव्यम्। तन्न भङ्गान्तरपरिकल्पनं तन्निबन्धनस्य प्रतिपित्साप्रकारस्य सप्तधैव स्थितत्वात्। एवं प्रमेयत्ववस्तुत्वामूर्त्तत्वादिसप्रत्यनीकापरधर्मापेक्षयाप्यात्मनि पुद्गलादावपि तदस्तित्वनास्तित्वादिधर्मविकल्पोपनिबन्धना सप्तभङ्गीसमालिङ्गिता वचनप्रवृत्तिः प्रतिपत्तव्या। ५

तत्र किमर्थोऽयं स्यादेवकारप्रयोगः विनापि तेन भङ्गविकल्पानामुपपत्तेः इति चेत्? उच्यते—यदि 'अस्ति जीवः' इत्यस्तिपदमनेवकारप्रयोगम्; अनुक्तसमं[1] भवेत् अप्रवृत्तिनिमित्तत्वात्। नहि जीवास्तित्वं तदभाव[2]व्यवच्छेदेनाप्रतिपाद[3]यतस्तस्य जीवे तत्प्रयोजनकामिनं प्रति प्रवृत्त्यङ्गत्वम्, जीवस्यैव तदानीमप्रतिपन्नत्वात्। तदेव हि १० प्रतिपन्नं नाम यदभावव्यवच्छेदेन[4]। न चानेवकारात् पदात्तथा तत्प्रतिपत्तिः। सति चैवकार[5]-प्रयोगे जीवस्यास्तित्व एवावधारणादैकान्तिकी तदभावव्यवच्छित्तिरिति। 'स्वरूपादिनेव पररूपादिनापि तत्र भाव एव' इति ब्रह्मवादप्रत्युज्जीवने स्यादिति निपातस्यापि प्रयोगः। तेन कथञ्चित् स्वरूपादिनैव तदस्तित्वम[6]द्योतयता पररूपादिना तद्व्यवच्छेदात् ब्रह्मवाद[7]-प्रत्याख्यानोपपत्तेः। तथा नास्तीत्यपि पदमनेवकारमनुक्तकल्पमेव, भावव्यवच्छेदेन ततोऽप्य- १५ भावस्याप्रतिपत्तेः। एवं भङ्गान्तरेऽपि प्रत्यनीकव्यवच्छेदाभावादनुक्तकल्पत्वमनेवकारत्वे। ततो नास्त्येवेत्यवधारणे जीवस्य नास्तित्व[8] एव नियमात् पररूपादिनेव स्वरूपादिनाप्य-भावापत्तौ शून्यवादस्याविर्भावे तन्निवर्त्तनं स्यात्पदात्। स्यादेव हि तस्याभावे नियमो न सर्वथेति। तथास्त्येव नास्त्येवेत्यत्रोभयथाप्य[9]स्तित्वनास्तित्वयोरवधारणबलात् प्राप्तौ ततस्तन्निवर्त्तनमनुवर्त्तव्यम्। अवक्तव्य एवेत्यत्रापि सर्वथा तस्यावक्तव्यतायाः[10] नियमप्राप्तिः २० स्यात्पदेन प्रतिक्षेप्तव्या। तथा च प्रतिषिद्धमेतत्—"**नार्थान् शब्दाः स्पृशन्त्यमी**" [ ] इति। तेषामेकान्ततोऽर्थासंस्पर्शित्वे अस्यापि वचनस्य वैयर्थ्येन तद्वादिनो निग्रहापत्तेः। तदसंस्पर्शित्वप्रतिपादनार्थत्वे च प्रतिज्ञाभङ्गदोषप्रसङ्गात्। एकान्ता-वाच्यत्वं च भावानां श्रायसलोपमापादयति। श्रायसं हि प्रेक्षावतां तदुपायानुष्ठानात्। न च स्वरसतस्तेषां तदुपायप्रतिपत्तिः आप्तागमपरिकल्पनावैकल्यप्रसङ्गात्। आगमाच्च २५ तदवाच्यत्वे तस्याप्रतिपतेः। "ततो लुप्यत एव मुमुक्षूणां मोक्षावाप्तिरुपायाभियोगासम्भवात्। तदुक्तम्—"**अवाच्यता श्रायसलोपहेतुः**" [युक्त्यनु० श्लो० ४४] इति। ततः "**तरति शोक-मात्मवित्**" [छा० ७।१।३] "**ब्रह्मविदाप्नोति परम्**" [तै० २।१।१] इत्यादेरागमादेव निःश्रेयसनिबन्धनमात्मवेदनमधिगन्तुकामेन नैकान्तेनात्मावाच्यत्वमध्यवसातव्यम्। अतः प्रत्याख्यातमेतत्— ३०

---

१ —क्तमसम्भवे —आ०, ब०, प०, । २ —भावेन व्य —आ०, ब०, प० । ३ —दनं यत —आ०, ब०, प० । ४ "प्रतिपन्नमिति प्रागुक्तस्य पदस्यात्रापि सम्बन्धः।" —ता० टि० । ५ —कारप्रयो —आ०, ब०, प० । ६ —मव्यद्यो —आ०, ब०, ।—मप्यद्यो —प० । ७ "आकाशादीनां ब्रह्मविवर्तत्वमिच्छता ब्रह्मवादिनाऽऽत्मनः पररूपादिनास्तित्वमभ्युपगतम्। अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो, विवर्ता यस्यैते वियदनिल-तेजोऽवनयः। यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं ममामस्तद्ब्रह्मापरिमितसुखज्ञानमस्तम्।" —ता० टि० । ८ —त्वमेव नि —आ०, ब०, प० । ९ —प्यस्तित्वयोर —आ०, ब०, प० । १० —तायां निय— आ०, ब०, प० । ११ ततोऽप्यत एव आ०; ब०, प० ।

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" [तै० २।४–५] इति। ततो युगपदत्सदसत्त्वाभ्यां [1]तस्य वक्तुमशक्यत्वात् अवाच्यत्वम्, न क्रमेण नापि धर्मान्तरैः, युगपदपि पदद्वयेनैव। एकपदेन तु शतृशानचोः सच्छब्देनेव सकृदपि ताभ्यां तस्य वचनसम्भवादिति स्याद्वादस्यायमुल्लासः। तथा 'अस्ति अवक्तव्य एव' इत्यत्र अस्त्येवेति वचनात् स्वरूपादिवत् पररूपादिनाऽपि अस्तित्वस्य, अवक्तव्य एवेत्यभिधानाच्च तयोः क्रमेणेव अक्रमेणापि अवक्तव्यत्वस्य प्रसक्तौ स्यात्पदेन प्रत्यवस्थापनम्। तेन स्वरूपादिनैवास्तित्वम्, यौगपद्येनैवावाच्यत्वं चावद्योतयता विपर्ययेणास्तित्वावाच्यत्वयोः प्रत्याख्यानात्। एवमुत्तरत्रापि वक्तव्यम्। ततो युक्तो भङ्गविकल्पेषु स्यात्कारस्य प्रयोगः फलवत्त्वात्। नन्वेवं घटमानयेत्यादेर्लौकिकस्य शास्त्रीयस्य च **"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः"**[2] [त० सू० १।१] इत्यादेर्वचनमार्गस्य स्यादेवकारप्रयोगवैकल्यात्तत्पक्षभावी दोषः प्राप्नोतीति चेत्; सत्यम्; यदि तदापि तदर्थस्य [3]प्रतिपत्तिर्न भवेत्। न चैवम्, प्रकरणादिना तदापि [4]तद्भावात्। तदेवाह–

प्रयोगविरहे जातु पदस्यार्थः प्रतीयते। इति।

जातु कदाचित् प्रकरणादिसन्निधिसमये **पदस्य** स्यादित्यादेः **प्रयोगस्य विरहोऽनुच्चारणं** तस्मिन् सति **अर्थः** स्यात्कारादेरभि[5]धेयः अतिप्रसङ्गानुक्तकल्पत्वनिवृत्तिलक्षणः **प्रतीयते** प्रकरणादिसहायादेव शब्दादवगम्यते। तत्र तत्र तद्विरहभाविदोषः तद्विरहेऽप्यर्थ[6]त एव तस्य निवर्त्तनात् तदर्थस्य तद्विरहे प्रतीतेः। कथमिदानीं तस्य तदर्थत्वम्? अन्यतः प्रतीयमानत्वादिति चेत्; किमेतावता तदर्थत्वाभावः? क्वचित्सैन्धवशब्दादवगतस्यापि लवणस्य लवणशब्दार्थत्वानिवृत्तेः। ततो यथा प्रकरणादिबलादवधृतस्यापि लवणस्य लवणशब्दार्थत्वं तच्छब्दस्य तत्र प्रयोगार्हत्वेन शब्दतदर्थतत्त्ववेदिभिरभ्यनुज्ञानात्, तथातिप्रसङ्गादिनिवर्तनस्यापि स्यात्कारादेरर्थत्वं तदविशेषात्। एतदेवाह–

स हि शब्दार्थतत्त्वज्ञैस्तस्येति व्यपदिश्यते ॥६८॥ इति।

स तन्निवृत्तिरूपोऽर्थो हि यस्मात् तस्य स्यादित्यादेः पदस्य इति व्यपदिश्यते शब्दार्थतत्त्वज्ञैः शब्दार्थयोस्तत्त्वं वाच्यवाचकभावं जानद्भिर्न बालावलादिभिः तेषां गतानुगतिप्रवृत्तानां तद्व्यपदेशशक्त्यभावात्। तस्मात् स तस्येति प्रतिपत्तव्यम् *अन्यत्रापि* [7]*तद्व्यपदेश*[8]*निबन्धनत्वाच्छब्दार्थसम्बन्धप्रतिपत्तेरिति मन्यते*। कुतः पुनरयं नियमः सर्वत्र कुतश्चित् प्रतिपत्तव्य एव स्यात्कारादेरर्थ इति चेत्? उक्तमत्र–'अन्यथातिप्रस[9]ङ्गादिनिवर्तनस्यासम्भवात्' इति। तथाहि–सम्यग्दर्शनादिवाक्ये [10]यद्यनवधारणं तदा सम्यग्दर्शनादिरेव नापरो मोक्षमार्ग इत्यन्ययोगव्यवच्छेदस्य, स च [11]"मोक्षस्य मार्ग एव नामार्ग इत्ययोगव्यु[12]दासस्य, तस्य मार्गो भवत्येवेत्यन्तायोगव्यपोहस्य चाप्रतिवेदनादनुक्तकल्पं वाक्यं भवेत्, स्वार्थस्यास्वार्थव्यवच्छेदेनानभिधानात्। ततो विद्यत एव नियमादेवकारार्थस्य प्रतिपत्तिः, व्यवच्छेदस्यैव तदर्थत्वात्। तथा स यदि मार्ग एव मोक्षस्य सर्वदा किन्न स्यात् परिणति-

---

१ तस्यावक्तुम– आ०, ब०, प०। २ –कवाक्यस्य आ०, ब०, प०। ३ –मार्गस्य स्यादेव – आ०, ब०, प०। ४ –पत्तिर्न चैवं आ०, ब०, प०। ५ –तद्भावस्तदे –आ०, ब०, प०। ६ धेयातिप्रसङ्गादुक्त– आ०, ब०। ७ –प्यर्थ एव आ०, ब०, प०। ८ "तद्व्यपदेशता" –ता० टि०। ९ –सङ्गादेर्निव –आ, ब०, प०। १० यद्यव– आ०, ब०। यदव– प०। ११ मोक्षमार्ग प०।

विशेषादेरपेक्षणीयस्य सर्वदाप्यभावादिति [1]चेत्; सिद्धा तर्हि स्यात्पदस्यापि नियमतो विषयप्रतिपत्तिः, अपेक्षणीयस्य तद्विशेषादेरेव तद्विषय[2]त्वात्। तदत्रापि सम्यग्दर्शनादिर्मोक्षस्य स्यान्मार्ग एव, स्यादमार्ग एव, स्यादुभय एव, स्यादवक्तव्य एव, स्यान्मार्गोऽवक्तव्य एव, स्यादमार्गोऽवक्तव्य एव, स्यादुभयोऽवक्तव्य एव, इति सप्तभङ्गी प्रतिपत्तव्या। [3]तथा अन्ययोगात्यन्तायोगव्यवच्छेदेऽपि[4]। इति सप्तभङ्गी[5]दुरवगाहो वचनमार्गः सम्भवति सर्वत्र स्यादेवकारयोरर्थतः सन्निधिप्रतीतेः। यदि पुनः प्रकरणादेरप्यवधारणादिप्रतीतिः तर्हि स एवास्तु तस्य सर्वत्रापि सुलभत्वात्, किं स्यात्कारादेः प्रतीतार्थस्य प्रयोगेणेति चेत्; नायमुपालम्भः, लोके प्रतीतार्थानामपि प्रयोगप्रतीतेः। इदमेवाह—

अहमस्मीति वाक्यादौ सिद्धावन्यतरस्थितेः।
उभयोक्तिवदत्रोक्तावुपालम्भो विरुद्ध्यते ॥६९॥ इति।

अहमस्मि त्वं भवसि **इत्यादौ वाक्ये** येयम्[6] **अन्यतरस्य** 'अहम्' इत्यस्य 'अस्मि' इत्यस्य वा प्रयोज्यतया **स्थितिः** तत एव **सिद्धौ** अर्थप्रतीतौ येयम्[7] **उभयोक्तिः** तत्रैव **तद्वत्** अत्र अस्यां [8]स्यात्कारादिविषयायाम् **उक्तौ** पौनरुक्त्येनोपालम्भो **विरुद्ध्यते** इति।

प्रकारान्तरेणापि स विरुद्ध्यत इति दर्शयति।

यदि केचित् प्रवक्तारो वृत्तिवाक्यार्थयोरपि।
सूत्रेष्वेव तयोरुक्तौ त्रैलोक्यं किन्न वर्तते ॥ इति।

यदि नाम **केचित्** प्रज्ञातिशयशालिनः पुरुषाः **सूत्रेष्वेव** वृत्त्यर्थस्य वाक्यार्थस्य च वार्तिकार्थस्य प्रतिपादयितारः **किं** तावतैव सर्वो जनः **तयोः** वृत्तिवाक्ययोः **उक्तौ न वर्त्तते** वर्त्तत एव, वृत्त्यादिकरणस्य तथापि प्रतीतेः। सूत्रादेव तदर्थमधिगन्तुमशक्तान् प्रति तत्करणं फलवदेव,

"सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ वार्तिकेऽपि च।
उदाहरणं [9]मन्दस्य प्रत्युदाहरणं पशोः॥" [ ]

इति वचनादिति चेत्; तर्हि स्यात्कारादिप्रयोगोऽपि सफल एव तद्विषयेऽपि मन्दमतीनां भावात्। एतदेवाह—

केवलं प्रतिपत्तारः स्याद्वादे जडवृत्तयः। इति।

प्रतिपत्तारः सौगतादयः **स्याद्वादे** तदर्थेऽनेकान्तरूपे **जडवृत्तयो** जडव्यापारा न मनागप्यजडवृत्तय इति **केवलार्थः**। ततस्तान्प्रति सफल एव निपातप्रयोग इति मन्यते। परत्रापि जडवृत्तय इति दर्शयति—

जातितद्वदपोहादिवादं च न हि जानते ॥७०॥ इति।

जातिः सामान्यं **तद्वान्** विशेषः तावेवापोहस्वभावत्वादपोहः स **आदिः** यस्य क्षणभङ्गादेस्तस्य **वादं च न हि जानते** न प्रतियन्ति[10]। तात्पर्यमत्र यथा तदपोहादिक[11]मपरोपदेश-

---

१ चेत्तर्हि आ०, ब०, प०। २ —यत्वादत्रापि आ०, ब०, प०। ३ "अयोगव्यवच्छेदे उक्तप्रकारेण" —ता० टि०। ४ "सप्तभङ्गी प्रतिपत्तव्येति सम्बन्धः" —ता० टि०। ५ "भा" —ता० टि०। ६ योयमन्यत्तस्या— आ०, ब०, प०। ७ योऽयमु— आ०, ब०, प०। ८ स्यात्तारादि— आ०, ब०, प०। ९ —मन्धस्य ता०। १० प्रतीयन्तेति आ०, ब०, प०। ११ —दिमप-आ०, ब०, प०।

मवगच्छता व्याख्यातॄन् प्रति विफलमपि तद्वादप्रणयनं तदवगमविकलप्रतिपत्रपेक्षया सफलं तथा स्यात्कारादिनिपातप्रयोगोऽपि ।

के तर्हि स्याद्वादमनुरुन्धते यदि तत्र सौगतादयो जडवृत्तय इति चेत् ? अत्राह—

सर्वथैकान्तविश्लेषतत्त्वमार्गव्यवस्थिताः ।
व्याख्यातारो विवक्षातः स्याद्वादमनुरुन्धते ॥७१॥ इति ।

व्याख्यातारः परप्रत्यायनप्रवृत्ताः **स्याद्वादं** स्याच्छब्दम्, उपलक्षणमिदं तेनैवकारमपि **अनुरुन्धते** स्वीकुर्वन्ति **विवक्षातो** विवक्षया तेन विषयावद्योतनेच्छया । कीदृशास्ते ? **सर्वथैकान्तविश्लेषो** व्यपोहो यस्मिंस्तत्त्वे[1] तस्य **मार्गोऽन्वेषणं** प्रत्यक्षादिरूपं तत्र **व्यवस्थिता** इति । जात्यन्तरं तत्त्वमेकान्तव्यवच्छेदेन प्रत्यक्षादिना निश्चिन्वन्तो व्याख्यातारः तदवद्योतनाय स्याद्वादमवलम्बन्त इति यावत् ।

प्रमाणप्रसिद्धत्वादेवानेकान्ते संशयादिदोषप्रसङ्गोऽपि प्रेक्षावतां नावतरतीत्याह—

अनेकलक्षणार्थस्य प्रसिद्धस्याभिधानतः ।
संशयादिप्रसङ्गः किं स्याद्वादेऽमूढचेतसः ॥७२॥ इति ।

संशय आदिर्यस्य विरोधादेस्तस्य **प्रसङ्गः किं** नैव । क्व[2] कस्य ? **स्याद्वादेऽनेकान्तवादे अमूढचेतसः** प्रबुद्धबुद्धेः । कुतः स न ? इति चेत्, अनेकलक्षणस्य क्रमाक्रमानेकरूपस्य अर्थस्य चेतनेतरवस्तुनः प्रसिद्धस्य प्रमाणनिर्णीतस्य **अभिधानतः** स्याद्वादेन प्रतिपादनात् । ततस्तत्र संशयादिकमुपलोकयन्नर्चतादि[3]रमूढचेता न भवतीति मन्यते । हेयोपादेयतत्त्वमेव सोपायं प्रयत्नतः प्रतिपादयितव्यं पुरुषार्थोपयोगात् किमनेकान्त[4]प्रतिपादनेन विपर्ययात्[5] इति चेत् ? नास्ति विपर्ययः सर्वस्यापि वस्तुतत्त्वस्यानेकान्तपर्यवसितत्वज्ञापनेन एकान्तशासनेषु हेयादि[6]तत्त्वसत्त्वाभावनिवेदनार्थत्वात् तत्प्रतिपादनस्य । तदेवाह—

साकल्येनेह सामान्यविशेषपरिणामधीः ।
मिथ्यैकान्तप्रवादेभ्यो विदुषो विनिवर्तयेत् ॥७३॥ इति ।

मिथ्यैकान्ताः सर्वथैकान्ताः तेषां **प्रवादाः**[7] 'सर्वमपि तत्त्वं सामान्यरूपमेव विशेषात्मैव परस्परविविक्तोभयस्वभावमेव विचारायोगादुपप्लुतमेव सांवृतमेव' इत्यादयो वचन[8]प्रबन्धाः तेभ्यो **विदुषो** विद्वज्जनान्[9] **विनिवर्तयेत्** निःश्रेयसार्थितया तत्प्रतिपादितोपायानुष्ठाने [10]प्रवृत्तान् प्रतिनिवर्त्तयेत् । का पुनरेवमिति चेत् ? **सामान्यविशेषपरिणामधीरेव**[11] । सामान्यं द्विविधं [12]तद्भवसामान्यं तिर्यक्सामान्यं च, विशेषोऽपि द्विविधः एकद्रव्यगतोऽनेकद्रव्यगतश्च[13] तावेव परिणामस्तस्य [14]बुद्धिः । क्व सा तादृशीति चेत् ? इह अस्मिन् चेतनेतरात्मन्यर्थकलापे । कथम् ? **साकल्येन** सामस्त्येन । तदनेनानुमानिकी [15]तद्बुद्धिरिति प्रतिपादितं भवति,

---

१ गच्छतौ आ०, ब०, प०। २ स्तत्त्वे स तस्य आ०, ब०, प०। ३ तस्य आ०, ब०, प०। ४ द्रष्टव्यम् —हेतुवि० टी० पृ० ९८, १०४। अक० टि० पृ० १८२। ५ —न्तप्रवादेन आ०, ब०, प०। ६ "पुरुषार्थानुपयोगात्" —ता० टि०। ७ —तत्त्वगत्वा—आ०, ब०, प०। ८ वादः आ०, ब०, प०। ९ —पात्मभावमेव आ०, ब० प०। १० —प्रसङ्गाः आ०, ब०, प०। ११ —नाद्विनिव— आ०, ब०, प०। १२ प्रवृत्ता प्रवर्त— आ०, ब०, प०। १३ —धीरेवं आ०, ब०, प०। १४ तद्भव सा— आ०, ब०, प०। १५ —तश्च परि— आ०, ब०, प०। १६ बुद्धेः आ०, ब०, प०। १७ तद्बुद्धेरिति आ०, ब०, प०।

प्रत्यक्षस्य निरवशेषसूक्ष्मान्तरितदूरार्थेषु [1]तद्विषयस्यास्मदादीनामसम्भवात् । अनुमानसम्भवस्तु सुनिश्चित[2]तत्त्वपरिणामा[3]विनाभावस्वभावस्य [4]सत्त्वकृतकत्वादेरशेष[5]व्यापिवस्तुधर्मस्य [6]सुविवेचितप्रामाण्यतर्कज्ञानबलेन तत्र सर्वत्राप्यध्यवसायात् । [7]तदियमानुमानिकी बुद्धिः सर्वत्रसामान्यविशेषपरिणामं तद्विपर्ययव्युदासेन व्यवस्थापयन्ती सर्वथैकान्तशासनानां मिथ्यात्वनिवेदनेन तद्विषयमादरं प्रेक्षावतां प्रतिक्षिपतीति [8]न पुरुषार्थानुयोगः; तत्परिणामस्य तदात्मन एव श्रेयोमार्गस्योपपत्तेः । ५

कथं पुनः शासनत्वाविशेषेऽपि शासनान्तरपरिहारेण भगवदर्हच्छासनस्यैव प्रामाण्यमित्यारेकायां तथा तद्दर्शयन्नाह–

आप्तवादः स एवायं यत्रार्थाः समवायिनः ।
प्रमाणमविसंवादात् [प्रणेता यदि शङ्क्यते] ॥७४॥ इति । १०

यत्र यस्मिन् **अर्था** अनेकात्मपरिणाममार्गतद्विषयलक्षणाः **समवायिनोऽभिधेयत्वेन** [9]सम्बद्धाः **स एवायमाप्तवादः** आगमः **प्रमाणं** नापरः । कुत एतत् ? **अविसंवादादस्यैव** इति विभक्तिव्यत्ययेन सम्बन्धः निरूपितश्चान्ययोगव्यवच्छेदेना[10]ऽस्याविसंवादः । स्यान्मतम्– भागासिद्धो हेतुः प्रत्यक्षानुमानविषय एव भावात्, न देशादिविप्रकृष्टेष्वत्यन्तपरोक्षेषु इति; तन्न; तत्रापि तदनुसारेण तस्य प्रतिपत्तेः । नहि प्रत्यक्षादिविषयमशेषमप्यविसंवादाधिष्ठानमादिशतः पुरुषस्य तदपरत्रान्यथोपदेशे कारणमस्ति [11]रागादेरभावात् । भावे तद्विषयेऽपि तन्नियमाभावप्रसङ्गात्, रागादिमतां तत्रापि[12] प्रायोविप्रलम्भस्योपलम्भात् । अथवा कस्मादयमेवागमः[13] आप्तवादो **न** प्रत्यागमोपि ? इत्यत्रेदमाह–**आप्तवाद** इत्यादि । [14]**यत्रार्था** निरूपितरूपाः **समवायिनः स एवायमाप्तस्य** रागादिदोषविकलस्य **वादो** नापरः । कस्मात् ? अयमेव प्रमाणं यतः इति । न ह्यनाप्तवादत्वेऽस्य प्रामाण्यम्, अपौरुषेयत्वस्य प्रत्याख्यानात्, प्रामाण्यमपि **अविसंवादात्** । न हि प्रत्यागमेषु तल्लेशोऽप्यस्ति । ततोऽनाप्त एव सुगतादिः विसंवादिवचनत्वादुन्मत्तादिवत् । न चेदमसिद्धम्; प्रत्यक्षादिनिबद्धनिश्चयेऽपि बहिर्भावहेतुफलभावतत्परिणामतत्त्वादौ तद्वचनस्यान्यथैव भावादिति निरूपितत्वान्नेह प्रतन्यते । १५ २० २५

कथं पुनः दृष्टागमविरोधविकलतया प्रमाणमप्यनेकान्तवादो विगलितनिखिलदोषकलापस्य सकलवेदिन एवेति निश्चयः ? सम्भवति हि तदपरस्यापि तादृशी वचनवृत्तिः, सरागाणामपि वीतरागवद्व्यवहारोपपत्तेः । कथं वा यथोक्तगुणोपपन्नोऽपि क्वचिन्मिथ्यावचनानामप्रणेतैवेति निर्णयो वीतरागाणामपि सरागवच्चेष्टासम्भवात् ? एतदेव दर्शयति–

प्रणेता यदि शङ्क्यते । इति ।

प्रणेता प्रवचनस्य प्रवक्ता **शङ्क्यते** दोषवानपि तस्य प्रणेता दोषविकलोऽपि भवति मिथ्यावादीति संशय्यते । **यदि** इति पराभिप्रायद्योतने । तत्र प्रथमशङ्कायामुत्तरमाह– ३०

आत्मा योऽस्य प्रवक्तायमपरालीढसत्पथः । इति ।

---

१ 'बसः'–ता० टि० । बहुव्रीहिसमास इत्यर्थः । २ –तपरिणा– आ०, ब०, प० । ३ –मादिनाभाव–आ०, ब०, प० । ४ तत्त्वकृत– आ०, ब०, प० । ५ –पस्यापि आ०, ब०, प० । ६ सुविवेचयत्येव प्रा–आ०, ब०, प० । ७ तदीय– आ०, ब०, प० । 'तत् इयमिति पदच्छेदः'–ता० टि० । ८ नापुरु – आ०, ब०, प० । ९ सम्बन्धाः आ०, ब०, प० । १० –दे सामान्यावि–आ०, ब० । –दे सान्यवि–प० । ११ 'तस्यानृतकारणं नास्ति' –ता० टि० । १२–पि यस्मिन्नर्था प्रायो आ०, ब०, प० । १३ –मः प्राप्ताप्तवादो आ०, ब०, प० । १४ यत्रानिरूपित– आ०, ब०, प० ।

य आत्मा पुरुषः अस्य वचनस्य सम्बन्धी कर्तृत्वेनायं **प्रवक्ता** प्रकर्षेणातीन्द्रिय-ज्ञानवैराग्यादिरूपेण वक्ता, न तद्विपर्ययेण। कुत एतत्? **अपरालीढसत्पथो** न परैः सौगतादिभिः दोषोक्ति[1]जिह्वया **आलीढ** आस्वादितः **सत्पथः** सम्यग्दर्शनादिरूपः सन्मार्गो यस्य सः **अपरालीढसत्पथो** यत एवमतः प्रवक्तेति। नहि सम्यग्दर्शनादिकं स्वर्गापवर्गादि-
५ निरवशेषपुरुषार्थप्राप्त्युपायतया सत्पथव्यपदेशम् अनन्यगोचरम् अखिलापरतीर्थकरपरि-कल्पितदोषप्रवादैः स्वरूपतो विपर्ययतः परतश्च दुरुपपीडं प्रत्यासन्ननिष्ठभव्यनिकायसंसार-दुःखनिस्तरणकारणमादिशतः पुरुषोत्तमस्य प्रकर्षविपर्ययेण प्रवक्तृत्वकल्पनमुपपन्नम्, तद्विपर्यये तद्वचने प्रवृत्तेरेवासम्भवात्। तदेवाह--

नात्यक्षं यदि जानाति नोपदेष्टुं प्रवर्त्तते ॥७५॥ इति।

१० अत्यक्षमतीन्द्रियं चेत् **न जानाति**, उपलक्षणमिदम्, तेन वैराग्यातिशयवानपि न भवति **नोपदेष्टुम्** उक्तरूपं सत्पथमभिधातुं **प्रवर्त्तते** अत्यक्षज्ञानादिविकलस्य तदुपदेशशक्त्य-सम्भवात् बालकादिवदिति भावः। द्वितीयशङ्कायामप्याह--

परीक्षाक्षमवाक्यार्थपरिनिष्ठितचेतसाम्।
अदृष्टदोषाशङ्कायामन्यत्रापि प्रसज्यते ॥७६॥ इति।

१५ **परीक्षां** प्रसिद्धप्रत्यक्षादिरूपां **क्षम** इति परीक्षाक्षमः, स चासौ **वाक्यस्य** प्रवचनस्य **अर्थो** जीवादिः तेन **परि** समन्तात् स्वविषये **निष्ठितं** निरावाधस्थितं **चेतः** तदर्थज्ञानं येषां भगवतां ते तथोक्ताः। नहि तेषां जीवादितत्त्वज्ञानमन्तरेण तत्प्रणीतस्य वाक्यस्य परीक्षाक्षम[2]तत्त्वप्रणयनमुपपन्नं बालोन्मत्तादिवाक्यवत्। अस्ति [3]च तत्। ततस्तदेव [4]तेषां तज्ज्ञानं परिनिष्ठापयति[5]। सति च तज्ज्ञाने [6]तेषां निर्दोषा एव [ते]। यत्र तद्विरुद्धं तत्र
२० तन्नास्ति यथोष्णस्पर्शवति शीतम्, अस्ति च भगवत्सु दोषविरुद्धं तत्त्वज्ञानमिति स्वभाव-विरुद्धोपलब्ध्या तथैव निर्णयात्। तेषां च परीक्षाशक्ये विषये स्वयमदृष्टस्यापि विप्रलम्भ-**दोषस्याशङ्कायां** किमत्र विप्रलम्भनमस्ति उत नेति संशीतौ **अन्यत्र** प्रत्यक्षादावपि **प्रसज्यते** तदाशङ्केति विभक्तिव्यत्ययेन सम्बन्धः। तथा हि पुरोवस्थितं[7]जलमवलोकयतोऽपि कुतो निःशङ्कित्वम्[8]? न तावदुपलम्भादेव; तस्य विप्रलम्भिनोऽपि सम्भवात् स्वप्नादिवत्।
२५ नापि संवादात्; उत्पत्तिसमय एव तस्यानवसायात्। अवसायेऽपि विसंवादस्यापि [9]तदैव तद्भावान्न तद्वतो दर्शनात् कस्यचिदपि प्रवृत्तिः स्यात्। प्रवृत्तितः तदवसाय इति चेत्; न; तदभावे ततः प्रवृत्तेरेवायोगात् आगमवत्। प्रत्यक्षादेरनवसितसंवादादपि प्रवृत्तिः बहुवित्तव्ययपरिक्लेशाभावात् नागमतो विपर्ययादिति चेत्; न; प्रत्यक्षादेरपि सेवा-कृष्यादौ प्रवृत्तस्य तदुपलम्भात्। तन्न प्रवृत्तितोऽपि तदवसायः। सुनिश्चितसंवाददर्शनान्तर-
३० समानसामग्रीप्रभवत्वादिति चेत्; न; तदन्तरेऽपि तथाविधतदन्तरसमानसामग्रीप्रभवत्वेन तदवसायकल्पनायामनवस्थाप्रसङ्गात्। सामग्री च तस्यार्थगर्भैव[10] अर्थकार्यज्ञानवादिनः।

---

१ -क्तिजिह्वया आ०, ब०, प०। २-क्षमत्व प्र- आ० ब०, प०। ३ च ततस्त-आ०, ब०, प०। ४ तेषां ज्ञानं आ०, ब०, प०। ५ -पयति च आ०, ब०, प०। ६ तेषां च नि- आ०, ब०, प०। ७ -तं बलमवलम्ब्यतोऽपि आ०, ब०, प०। ८ -शङ्कितत्वं प०। ९ तथैव आ०, ब०, प०। १० -गर्भैवार्थ -आ०, ब०, प०।

न च तत्प्रभवत्वमुत्पत्तिसमये शक्यावसायम्, तदानीं तद्गर्भत्वा[1]ऽतद्गर्भत्वयोरविवेचनात्। [2]प्रवृत्तितः शक्यावसायमेव तदिति चेत्; न; दोषाशङ्कायां प्रवृत्तेरेवासम्भवात्। तन्न प्रत्यक्षं निःशङ्कम्। एवमनुमानमपि। तस्यासम्भवाच्च। नहि निःशङ्कप्रत्यक्षस्याभावे ततः सम्बन्धप्रतिपत्तिः, यतोऽनुमानं सम्भवेत्। सत्यपि तस्मिन् कथं ततः साकल्येन तत्प्रतिपत्तिः? तस्य सन्निहितवस्तुमात्रविषयत्वात्। अनुमानतस्तत्प्रतिपत्तावनवस्थापत्तेः। प्रादेशिक- ५
तत्प्रतिपत्तेश्च व्यभिचारेणानुमानकारणत्वायोगादिति चेत्; सत्यम्; अयमपि परस्य पर्यनुयोगः। तन्न प्रत्यक्षानुमानयोर्निरारेक[3] प्रामाण्यं वस्तु[4]प्रतिबन्धनिश्चयाभावात्। एवमेतत्, तथापि व्यवहर्तृजनाभिप्रायेणा[5]विसंवादा[6]त्तयोः प्रामाण्यमभ्यनुज्ञायते। अन्यथा सकलव्यवहा[7]रविलोपप्रसङ्गादिति चेत्; प्रवचनस्यापि तथैव तदभ्यनुज्ञातव्यम्, तदभावेऽपि तदर्थानुष्ठानादिव्यवहारस्याभावप्रसङ्गात्। तन्न व्यवहारतोऽपि प्रमाणद्वैविध्यकल्पन- १०
मुपपन्नं [8]तदन्तरस्यापि भावात्। तर्हि प्रवचनवत् प्रत्यक्षानुमानयोरपि तन्मा भूत्, संविद-द्वैतस्यैव पारमार्थिकस्य प्रमाणस्य भावादिति चेत्; तस्यापि कथं प्रामाण्यम्? स्वरूप-प्रकाशनस्य गुणस्य दर्शनादिति चेत्; प्रवचनस्यापि स्यात्, तत्रापि [9]सत्यचतुष्टयप्रकाशनस्य तस्य दर्शनात्। प्रत्यागमेन व्यभिचार इति चेत्; भवतोऽपि भेदप्रकाशेन कस्मान्न भवति? तत्र विचारासहत्वदोषस्य भावात्। तस्य चाद्वैतसंवित्तावदर्शनादिति चेत्; समानमितरत्रापि। १५
ततः स्वसंवेदनं प्रमाणयता प्रवचनमपि प्रमाणमभ्युपगन्तव्यमविशेषात्। एतदेवाह-

प्रत्यक्षागमयोरिष्टं प्रामाण्यं गुणदोषयोः।
उपलब्ध्यनुपलब्धिभ्यां क्वचिद्वृत्तसमत्वतः ॥७७॥ इति।

क्वचित् विषययोरद्वैतचतुःसत्ययोः यथाक्रमं **प्रत्यक्षागमयोः** स्वसंवेदनप्रवचनयोः **प्रामाण्यमिष्टं** अभ्युपगतम्। तदिच्छाया निष्पन्नत्वेनाशक्यचालनत्वज्ञापनार्थं निष्ठायां २०
निर्देशः। कुतस्तदिष्टम्? **वृत्तसमत्वतः वृत्तम्** अनन्तरव्यावर्णितं यत्प्रत्यक्षागमयोः **समत्वं** सादृश्यं तत इति। तदेव कुतः? इति चेत्; गुणदोषयोः **उपलब्ध्यनुपलब्धिभ्यामिति**, व्याख्यातमिदं पातनिकयैव। तदेवं प्रवचनस्य प्रामाण्ये यत्सिद्धं तदाह-

तथा साक्षात्कृताशेषशास्त्रार्थोऽज्ञानपेक्षणात्।
सद्वृत्तकेवलज्ञानः सर्वज्ञः सम्प्रतीयते ॥७८॥ २५

तथा तेन प्रवचनप्रामाण्यप्रकारेण तस्य प्रणेता **सर्वज्ञः** सकलवेदी **सम्प्रतीयते** प्रणेतुः सर्वज्ञत्वाभावे तत्प्रामाण्यानुपपत्तेः निरूपणात्। कीदृशोऽसौ सर्वज्ञः इति चेत्? [10]स्यादेवं यदि नियतार्थमेव प्रवचनम्, न चैवम्, तस्यापि प्रत्यक्षानुमेयात्यन्तपरोक्षलक्षणस्थानत्रयपरिवर्त्ति-पदार्थजातविषयत्वेनाशेष[11]गोचरत्वात् तज्ज्ञानादेव सर्वज्ञत्वोपपत्तेः। यद्येवं छद्मस्थादर्हतः को विशेषः? तस्याप्यागमतो सर्वज्ञत्वसम्भवादिति चेत्; सर्वविषयसाक्षात्करणमेव[12]। ३०
अतएवोक्तं **साक्षात्कृताशेषशास्त्रार्थः** इति। अशेषस्य शास्त्रार्थस्य साक्षात्करणं भगवत्येव, सकलावरणपरिक्षयस्य तन्निबन्धनस्य तत्रैव भावात् न छद्मस्थे विपर्ययात्। निरूपितश्च तस्य

---

१ -त्वात्तद्गर्भत्वयो- आ०, ब० प०। २ प्रवृत्तिः शक्या- आ० ब०, प०। ३ -रेकप्रामा- आ०, ब०, प०। ४ वस्तुनिश्च -आ०, ब०, प०। ५ -येण वि -आ०, ब०, प०। ६ -दाभिसंज्ञातयोः आ० ब० प०। ७ प्रवचनस्य। ८ दुःखसत्यम्, समुदयसत्यम्, निरोधसत्यम्, मार्गसत्यमिति सत्यचतुष्टयम्। ९ स्यादेवं प्रश्नः। १० -पदोपगो- आ०, ब०, प०। ११ "विशेष इति सम्बन्धः" -ता०टि०।

तत्राभाव इति न पुनरुच्यते। तत्परिक्षयनिबन्धनत्वादेव तस्य करणक्रमव्यवधानातिवर्त्तित्वेन केवलत्वमपि प्रत्येयम्, तदनतिवर्तिनि तत्परिक्षयस्यास्मदादिवदसम्भवात्। अत इदमुक्तम्– **अक्षानपेक्षणात्** इति। अक्षाणामिन्द्रियाणाम्। उपलक्षणमिदम्, तेन देशकालपरिपाटीलक्षणस्य क्रमस्य देशकालस्वभावतिरोधानलक्षणस्य व्यवधानस्य चानपेक्षणादिति प्रत्येयम्। तेषामनपेक्षणं च तदतिक्रमेण प्रवृत्तिरेव। अक्षापेक्षमेव साक्षात्करणमस्मदादौ प्रतिपन्नम्, तत्कथं तदनपेक्षायामिति चेत्? न; अस्मदादावपि[1] मलविश्लेषविशेषादेव सत्यस्वप्नादौ तत्प्रतिपत्तेः। यद्येवं जाग्रतोऽपि किं तत्रापेक्षयेति चेत्? तत्रैव गोलकादिरूपे साक्षात्क्रियाहेतोर्मलापगमविशेषस्य भावात्, न पुनः तस्यैव तद्धेतुत्वात्। उक्तं चैतत्–"[2]**कथञ्चित्स्वप्रदेशेषु**" इत्यादिना[3]। तत्र तद्धेतुत्वव्यवहारश्चोपचारात्। ततो युक्तं भगवतस्तदनपेक्षमेव तदर्थसाक्षात्करणम्, ततश्च प्रवचनबलात् तदर्थवेदिनो गणधरदेवादेश्च विशेष इति।

सकलावरणपरिक्षयाविर्भूतमपि कथं तदशेषविषयमिति चेत्? अत्राह–

ज्ञस्यावरणविच्छेदे ज्ञेयं किमवशिष्यते। इति।

ज्ञस्य सकलस्वपरविषयपरिज्ञानस्वभावस्य अन्यथा व्याप्तिज्ञानासम्भवेनानुमानाभावप्रसङ्गात्, **ज्ञेयं** साक्षाद्वेद्यं **किं नाम अवशिष्यते** न किञ्चित् सर्वमपि तस्य साक्षात्कर्तव्यमेव। न चैवमतिप्रसङ्गः, सकलबोधावरणविश्लेष एव तदनवशेषत्वसम्भवात्। अत एवोक्तम् **आवरणविच्छेदे** इति। यद्येवमशुचिरसादेरपि साक्षात्करणात् तस्य तद्भक्षणादिदोषः स्यादिति चेत्; सत्यम्, यदीन्द्रियप्राप्तस्य साक्षात्करणम्, न चैवम्, भगवतोऽक्षानपेक्षदर्शनत्वात्। तदाह–

अप्राप्यकारिणः [तस्मात् सर्वार्थानवलोकते] ॥७९॥ इति।

इन्द्रियेण विषयमप्राप्य करोति निश्चिनोतीत्येवं शीलस्येत्यर्थः। सम्प्रत्युपसंहरति–

तस्मात् सर्वार्थानवलोकते। इति।

सुबोधमेतत्। [4]सर्वार्थावलोकनमेव दर्शयन्नाह–

शास्त्रे दुरवगाहार्थतत्त्वं दृष्टं हि केवलम्।
ज्योतिर्ज्ञानादिवत्सर्वं स्वत एव प्रणेतृभिः ॥८०॥ इति।

शास्त्रे प्रवचने यदभिधेयत्वेनावस्थितं प्राकृतप्रज्ञैर्दुरवबोधत्वाद् **दुरवगाहमर्थानां** सूक्ष्मान्तरितदूराणां **तत्त्वम्** आत्मीयं रूपं तत्सर्वं निरवशेषं **दृष्टं हि** दृष्टमेव। हिरवधारणे। कैः? **प्रणेतृभिः** तच्छास्त्रकारैः। कथं प्रणेतृभिः? **केवलम्** उपदेशाद्यनपेक्षं **ज्योतिर्ज्ञानं** ज्योतिःशास्त्रम् **आदि**शब्दादायुर्वेदादि **तत्रेव तद्वत्**। यथा ज्योतिःशास्त्रादौ ततत्त्वं दृष्टं तैः तद्दर्शनस्य समर्थितत्वात्, तद्वदन्यदपि सर्वं ततैर्दृष्टमेव, अन्यथा तद्विषयानुपदेशालिङ्गानन्वयव्यतिरेकाविसंवादिशास्त्रप्रणयनानुपपत्तेः।

अनुपदेशादयः प्रणयनविशेषणत्वेन संहता[5] एव कस्माद्धेतवः, न प्रत्येकमपि? इति चेत्; अत्राह–

संघातो हेतुरेतेषां पृथगन्यत्र सम्भवात्। इति।

---

१ –पि तु मल– आ०, ब०, प०। २ –न्यायवि० भा० २ पृ० २२२। ३ –ना न तत्र तत्त्वे तुल्यत्वेन –आ०, ब०, प०। ४ सर्वार्थानवलो– आ०, ब०, प०। ५ –ता एकस्माद्धेतवो आ०, ब०, प०।

एतेषां केवल[1]शब्दात् प्राप्तानामनुपदेशादीनां **सङ्घात** एव तीर्थकृतां दुरवगाहतदर्थदर्शनसाधने **हेतुः** न प्रत्येकम्[2]। कस्मात्? प्रत्येकतद्विशिष्टस्य प्रणयनस्य **अन्यत्र** तद्दर्शनविकलेऽपि **सम्भवात्**। तथा हि-अनुपदेशे लिङ्गात्, तदभावे चान्वयादेः प्रतिपद्य प्रणयनमसर्वदर्शिन्यपि सम्भवति। ततः सङ्घात एव तेषां तत्साधने हेतुः, [3]तच्च तत्त्वदर्शनं भगवतां स्वत एव, नार्थान्तरदर्शनसम्बन्धात्,[4] आकाशादेरपि[5] ततः तत्प्रसङ्गादविशेषात्। स्वतोऽपि न निर्विकल्पात्; ततः प्रणयनानुपपत्तेः, अतः स्वत इति निर्णयस्वभावादित्यर्थः। तत्स्वभावत्वं चार्हतामेव। ततो न सुगतादीनां प्रणेतृत्वं तदभावात्। तत्र च दोषमाह—

एवं हि सुगतादिभ्यो वरमीक्षणिकादयः ॥८१॥ इति।

एवम् अतत्त्वदर्शित्वादप्रणेतृत्वे **हि** स्फुटं **सुगतादिभ्यः** आदिपदात् कपिलादिभ्यश्च **वरमीक्षणिकादयः** तैः परचित्तादेरुपलक्षणादुपदेशाच्च, इतरेषां तदभावात्। अर्हतामपि किं तत्त्वदर्शित्वकल्पनया शास्त्रादेवानुष्ठेयार्थप्रतिपत्तेः, तस्य च संवादादेव प्रामाण्यावगमात्, संवादस्य च प्रत्यक्षादिविषयवत्तृतीयस्थानसङ्क्रान्तेऽपि तदेकदेशत्वेन प्रतिपत्तेः। तत्त्वदर्शिबलात् तत्र [6]प्रामाण्यावगमे परस्पराश्रयात्—तदवगमात् तत्त्वदर्शी सिद्धः, ततोऽपि तदवगम इति। ततो निष्फलं तत्कल्पनमिति चेत्; अत्राह—

शास्त्रं तल्लक्षणव्याप्तं सर्वज्ञादेरबाधनात्। इति।

शास्त्रं हि **सर्वज्ञादेव आदेर्मूलकारणात्** तस्यापौरुषेयस्य प्रत्याख्यानात्। पौरुषेयमपि तत्तत एव। कीदृशम्? **तस्य** शास्त्रस्य **लक्षणं** स्वार्थप्रत्यायनं तेन **व्याप्तं** क्रोडीकृतम्। न हि तद्व्याप्तिस्तस्य स्वत एव सम्भवति व्याख्यात्रपेक्षानियमात्। भवतु व्याख्याताऽस्मदादिरेव न सर्वज्ञः तस्य बाधनादिति चेत्; न; असर्वविदा ज्ञानेन तस्य देशकालसाकल्येन बाधस्यासम्भवात्। सर्वविदा च तस्यैव प्रसाधनात्। अस्मदादेश्च स्वतस्तत्त्वदर्शनविकलस्य व्याख्याने न प्रेक्षावतां प्रत्ययो म्लेच्छादिव्याख्यानवत्। व्याख्याभेदसम्भवे च कुतोऽयमेवार्थः पुरुषहितो नापर इति निर्णयः? यतस्तत्परिहारेण हित एव प्रवृत्तिः स्यात्। सर्वदर्शिनस्तु व्याख्याने स्यात्, तेन हितेतरविभागेन सर्वस्यापि साक्षात्करणात्। तदाह—

अपौरुषेयवृत्तान्तोऽप्यत एव विरुद्ध्यते ॥८२॥ इति।

अपौरुषेयः पुरुषहितादन्यः तदहितः तस्य **वृत्तान्तो** [7]धात्वर्थोऽस्मदादिभेदविकल्पनया शास्त्रार्थत्वेन कथनम्। सोऽपि न केवलमस्वार्थप्रतिपादनमेव। **अत एव** सर्वज्ञादेरेव **विरुद्ध्यते** व्यपोह्यते। ततो युक्तं भगवति सर्वज्ञत्वपरिकल्पनम्, असति तस्मिन् शास्त्रस्य तल्लक्षण-[8]व्याप्त्याद्ययोगात्। संवादस्यैव दुरवग्रहत्वात्, असत्यार्थव्यवच्छेदस्य चानुपपत्तेः तत्कल्पनाया वैफल्याभावात्। सम्प्रति शास्त्रार्थमुपसंहरन्नाह—

प्रत्यक्षमञ्जसा स्पष्टमन्यच्छ्रुतमविप्लवम्।
प्रकीर्णं प्रत्यभिज्ञादौ प्रमाणे इति संग्रहः ॥८३॥ इति।

---

१ —शब्दग्राह्य—आ०, ब०, प०। २ —कं तस्मात् आ०, ब०, प०। ३ तच्च तद्दर्शनं आ०, ब०, प०। ४ "यौगाभ्युपगतात्" —ता० टि०। ५ —पि तत्प्रस— आ०, ब०, प०। ६ प्रामाण्योपगमे आ०, ब०, प०। ७ धात्वर्थास्मदादिभेद— ता०। ८ "सर्वज्ञाख्यमूलकारणादेवः" —ता० टि०। ९ —व्याप्त्ययोगात् आ०, ब०, प०।

प्रमाण[1]मिति विभक्तिपरिणामाल्लब्धं ज्ञानमिति च वक्ष्यमाणमत्रापि सम्बध्यते। ततो यत्प्रमाणं तद् ज्ञानम् अन्यथा तदनुपपत्तेरित्युक्तं भवति। द्विचन्द्रादिज्ञानस्यापि प्रामाण्यप्रसङ्गे तन्निवृत्त्यर्थम् **अविप्लवग्रहणम्**। 'व्यवहारत एव केवलमविप्लवत्वं वस्तुतः सर्वज्ञानानां स्वप्नादिवत्सविप्लवत्वात्' इत्यस्य व्युदासार्थम् **अञ्जसा** ग्रहणम्। वस्तुतः क्वचिद[2]प्यविप्लवाभावे। सर्वज्ञानविप्लवस्यापि दुरुपपादत्वेन निरूपितत्वात्। तच्च प्रमाणं द्विविधं प्रत्यक्षं परोक्षमिति। **प्रत्यक्षं स्पष्टं** परिस्फुटम्। तदपि द्विविधम्—मुख्यसंव्यवहारविकल्पात्। मुख्यमप्यवधिमनःपर्ययकेवलभेदात् त्रिविधम्। व्यावहारिकमपि द्विविधम्—इन्द्रियप्रत्यक्षमनिन्द्रियप्रत्यक्षमिति च निरूपितरूपम्। **अन्यदिति** परोक्षम्। तत्कीदृशम्? **श्रुतं** [3]अस्पष्टोल्लेखम्। "**श्रुतमस्पष्टतर्कणम्**" [त० श्लो० पृ० २३७] इति वचनात्। तच्च **प्रत्यभिज्ञादौ** स्मरणादौ। प्रत्यभिज्ञापदेन तत्कारणत्वेन स्मरणस्याभिधानात्। **प्रकीर्णं** प्रक्षिप्तं न बहिर्भूतम्, उपमानादेरपि तद्बहिर्भावे[4] परपरिकल्पितप्रमाणसङ्ख्यानियमाभावस्य निरूपणात्। ततो द्वे एव प्रत्यक्षपरोक्षरूपे **प्रमाणे इति सङ्ग्रहः** सङ्क्षेपतः प्रतिपत्तिः शास्त्रार्थस्य।

सम्प्रति परोक्षविकल्पानां प्रागुपवर्णितमपि प्रामाण्यमनुस्मरणार्थं पुनरुपदिदर्शयिषुः प्रथमं तदाद्यत्वात् स्मरणज्ञानस्योपदर्शयति—

इदमेवमिति ज्ञानं गृहीतग्रहणेऽपि नः। इति।

द्विविधं च स्मरणम् 'इदमेवम्' इत्येकम्, 'एवम्' इति च द्वितीयम्। तदुभयम् 'इदमेवम्' इत्युच्यते, परस्याप्येवम्पदस्य समानश्रुतिकत्वेनैकोच्चारणगम्यस्यात्र भावात्। तत्र यदवग्रहादेरक्षज्ञानस्यानन्तरमर्थाभिलापस्मरणेन 'नीलमिदं पीतमिदम्' इत्याकारं [5]ज्ञानं तदिदमेवमिति स्मरणम्। तदस्माकं प्रमाणमविसंवादात् प्रत्यक्षवत्। अपूर्वार्थाभावान्नेति चेत्; न; प्रत्यक्षगृहीतस्य तेन ग्रहणेऽपि कथञ्चिदपूर्वार्थत्वात् शब्द[6]संसृष्टत्वस्यागृहीतस्यैव प्रतिपत्तेः। प्रत्यक्षविषयस्य क्षणिकत्वेनापक्रमात् कथं तस्यैव पुनस्तत्संसृष्टत्वेन ग्रहणमिति चेत्? न; एकान्ततः क्षणिकत्वस्य प्रतिक्षिप्तत्वात्। कथञ्चिदक्षणिकत्वेऽपि पूर्वाकारस्यातीतत्वेनाग्रहणात्। कथं तस्यैव पुनर्विशिष्टस्य ग्रहणमिति चेत्; न; शक्तिविशेषे क्षयोपशमलक्षणे [7]सत्यतीतत्वादेरकिञ्चित्करत्वात्। क्षणिकत्वेऽपि भावानां कथमस्याप्रामाण्यम्? अस्वलक्षणविषयत्वादिति चेत्; अनुमानस्यापि स्यात्। स्वलक्षणप्रतिबन्धान्नेति चेत्; न; अत्रापि तुल्यत्वात्, पारम्पर्येण स्वलक्षणादुत्पत्तेरविशेषात्। ततोऽवश्यं प्रमाणयितव्यं व्यवहारसिद्धत्वाच्च। अन्यथा "**प्रामाण्यं व्यवहारेण**" [प्र० वा० १।७] इत्यसङ्गतं स्यात्। तथा यदेवमिति ज्ञानमतीतमात्रस्मरणं तदपि प्रमाणं तद्वदेवाविसंवादात्। गृहीतग्राहित्वान्नेति चेत्; अनुमानं कथम्? समारोपव्यवच्छेदादिति चेत्; न; स्मरणादप्यदर्शनसमारोपव्यवच्छेदेन व्यवहारप्रसिद्धेः। ततो युक्तं तस्यापि प्रामाण्यं कथञ्चिदपूर्वार्थत्वस्यापि भावात्, सन्निहिततया हि तद्ग्रहणमक्षज्ञानेन अतीततया च स्मरणेनेति।

साम्प्रतं तर्कस्य प्रामाण्यं दर्शयितुमाह—

प्रत्यक्षेऽर्थेऽन्यथारोपव्यवच्छेदप्रसिद्धये ॥८४॥

अनुमानम् [अतो हेतुव्यवच्छेदेऽनवस्थितिः] इति।

---

१ —णमितीति आ०, ब०, प०। २ —दविप्लवा— आ०, ब०, प०। ३ —मतिपूर्वं श्रुतं प्रोक्तमविस्पष्टार्थतर्कणम्। —त० सा० श्लो० ४५। ४ —त्वे परिक— आ०, ब०, प०। ५ —कारं तदि— आ०, ब०, प०। ६ —संसृष्टत्व— आ०, ब०, प०। ७ सत्यमीत— आ०, ब०, प०।

न हि **अनुमानं** वस्तुप्रतिपत्तये [1]परैरभ्यनुज्ञानम् वस्तुनः सर्वात्मना प्रत्यक्षतः एवाधिगमात्। **"तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः।"** [प्र० वा० ३।४४] इति वचनात्। अपितु **प्रत्यक्षेऽर्थे** क्षणिकनिरंशस्वलक्षणे योऽन्यथारोपो नित्यादिविकल्पः तस्य **व्यवच्छेदः** तस्य **प्रसिद्धये** **"भ्रान्त्या निश्चीयते नेति साधनं सम्प्रवर्त्तते।"** [प्र० वा० ३।४४] इत्यभिधानात्। ५

भवत्येवं तथापि किमिति चेत्? उच्यते; लिङ्गादनुमानं सम्बन्धप्रतिपत्तौ। न च तत्र प्रत्यक्षस्य सामर्थ्यम्; सन्निहितमात्रविषयत्वात्, साकल्येन च तत्प्रतिपत्तावनुमानोपपत्तिः, अन्यथाव्यभिचारसम्भवात्। सकलविषयमेव योगिप्रत्यक्षमिति चेत्; न; तस्यापि विषयकार्यत्वेन कारण[2] एव प्रवृत्तेः। कारणमेव तस्य सर्वमिति चेत्; तर्हि तत्समदेशकालमेव सकलमपि जगत्तत्कार्यं भवेत्, एकसामग्र्यधीनत्वात्, अन्यथा रूपादिकमपि तथा न भवेदिति न रसदेशादौ रूपादेरनुमानं भवेत्। सत्यपि ततस्तत्प्रतिपत्तिरसत्कल्पैव निर्विचारत्वात्, [3]क्षणभङ्गादिवदिति न ततोऽनुमानमुपपन्नम्। नापि मानसप्रत्यक्षतस्तत्प्रतिपत्तिः; ततः स्वरूपवेदविकलादर्थज्ञप्तेरेव **"विमुखज्ञान"** इत्यादिना[4] प्रतिक्षिप्तत्वात्। एतदेवाह–**अतो हेतुव्यवच्छेदेऽनवस्थितिः** इति। १०

भावप्रधानमत्र हेतुपदम्। **हेतोर्हेतुत्वस्य** साध्यसम्बन्धस्य **अतः** प्रकृतात्प्रत्यक्षात्, **व्यवच्छेदे** विशेषेण साकल्यलक्षणेनावच्छेदोऽवबोधः [5]तस्मिन् अवस्थितेरुत्पत्तेरभावोऽनवस्थितिः अनुमानस्येति विभक्तिपरिणामेन सम्बन्धः। भवत्वनुमानादेव तद्व्यवच्छेद इति चेत्; न; तत्रापि तदतद्विकल्पात्तदभ्युपगमेऽनवस्थितेरेव दोषात्। तदाह–**अत** इत्यादि। **अतः** प्रकृतादनुमानात्–'तस्मादेव तद्व्यवच्छेदेऽनुमानम्, अनुमानाच्च तद्व्यवच्छेदः' इति परस्पराश्रयादनवस्थितिः, उभयोरप्यप्रतिष्ठानात्। अन्यतस्तद्व्यवच्छेदे तत्राप्यन्यतस्तद्व्यवच्छेद इत्यनवधेरनुमानपरम्परायाः प्राप्तेः ततोऽन्यदेव तत्र प्रमाणमभ्यनुज्ञातव्यम्। तदाह–**अत** इत्यादि। **अतः** आभ्यां प्रत्यक्षानुमानाभ्याम् **अहेतुव्यवच्छेदे** हेतुव्यवच्छेदाभावे **नवस्य** प्रत्यग्रस्य सम्बन्धप्रतिपत्तिनिबन्धनस्य प्रमाणस्य **स्थितिः** अविचलनम्। न च तत्तर्काभिधानं प्रत्यक्षमेव; विचारकत्वात्, प्रत्यक्षस्य च विपर्ययात्। नानुमानमपि; अलिङ्गजत्वात्। अतस्ताभ्यामन्यदेव प्रमाणं निरूपित[6]स्मरणवत्। ततः प्रतिषिद्धमिदम्–**"न प्रत्यक्षानुमानव्यतिरिक्तं प्रमाणम्"** [ ] इति; स्मरणतर्कयोस्तद्व्यतिरिक्तयोरेव[7] प्रमाणत्वात्। १५ २० २५

साम्प्रतमुपमानस्य प्रत्यभिज्ञाविशेषत्वेन प्रमाणान्तरत्व[8]मपाचिकीर्षुस्तदेव तावत्पर[9]परिकल्पनया दर्शयति–

उपमानं प्रसिद्धार्थसाधर्म्यात्साध्यसाधनम् ॥८५॥ इति। ३०

गोदर्शनाहितसंस्कारस्याटव्यां पर्यटतः **प्रसिद्धोऽर्थो** गवयः तस्य **साधर्म्यं** सादृश्यं ततो गवानुस्मरणसहायात् **साध्यस्य** सादृश्यविशिष्टस्य गोः, तद्विशिष्टस्य वा सादृश्यस्य यत्

---

१ "बौद्धैः– ता० टि०। २ "नाकारणं विषयः इति सौगतैरुक्तत्वात्"– ता० टि०। ३ "प्रत्यक्षात् क्षणभङ्गादिप्रतिपत्तिर्यथा"– ता० टि०। ४ न्यायवि० श्लो० १।१९। ५ "प्रत्यक्षात् साध्यसम्बन्धस्यावबोधे सौगतैरङ्गीक्रियमाणे इत्यर्थः।"– ता० टि०। ६ –पितं स्मर– आ०, ब०, प०। ७ –रेव प्रमाण– आ०, ब०, प०। ८ –मुपाचि– आ०, ब०, प०। ९ –कल्पनाया आ०, ब०, प०। न्यायसू० १।१।६।

साधनम् अध्यवसायः तदुपमानं प्रमाणम् । न चेदमप्रमाणमेव, प्रत्यक्षस्मरणविषयत्वादिति शक्यं वक्तुम्; प्रत्यक्षेण सादृश्यस्यैव स्मरणेनापि गोरेव केवलस्य ग्रहणात्, न तयोरन्यतरस्येतरविशिष्टस्य । तत्र तूपमानमेव प्रमाणं तत एव तस्य प्रतिपत्तेः । तदुक्तम्–

"तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितम् ।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥
प्रत्यक्षेणाववुद्धेऽपि सादृश्ये गवि च स्मृते ।
विशिष्टस्यान्यतः सिद्धेरुपमानप्रमाणता ॥"

[मी० श्लो० १।१।५ उप० श्लो० ३७, ३८]

यदि वा, पूर्वं 'गौरिव गवयः' इत्यतिदेशवचनात् पुनरटवीगतेन च प्रत्यक्षतः प्रतिपन्नः प्रसिद्धोऽर्थो गवयः तस्य साधर्म्यात्तद्वचनादिसहायात् यत् साध्यस्य 'सोऽयं गवयशब्दवाच्योऽर्थः' इति संज्ञासंज्ञिसम्बन्धस्य साधनं प्रतिपत्तिः तदुपमानं तत्फलम्, 'साक्षात्प्रत्यक्षागमसामग्र्या एवोपमानत्वात् । न चेदं प्रत्यक्षमेव; आगमव्यपेक्षणात् । नाप्यागम एव; ततः सामान्येनैव साध्यस्य, अतश्च विशेषतः प्रतिपत्तेः, उपक्रमभेदादागमादस्यार्थान्तरत्वोपपत्तेः, उपमानतयैव प्रमाणत्वावकल्पनमस्येति मीमांसका नैयायिकाश्च प्रतिपन्नाः । तान्प्रत्यतिप्रसङ्गं दर्शयन्नाह–

यदि किञ्चिद्विशेषेण प्रमाणान्तरमिष्यते ।
प्रमितार्थे प्रमाणानां बहुभेदः प्रसज्यते ॥८६॥ इति ।

प्रमितार्थो मीमांसकस्य गवादिः प्रत्यक्षादिना तस्यावगमात् नैयायिकस्य संज्ञासंज्ञिसम्बन्धः, तस्याप्यागमतोऽध्यवसायात् । तत्र यदि किञ्चिद्विशेषेण अल्पभेदेन प्रमाणान्तरं प्रत्यभिज्ञानादुपमानमन्यत्प्रमाणम् इष्यते तदा प्रमाणानां बहु यथा भवति तथा भेदो नानात्वं प्रसज्यते । तथाहि गवय एव गोः समान इतिवत् तमालात्तालद्रुमो दीर्घः बिल्वादामलकमल्पं क्षीरादपीक्षुरसो मधुरतरो माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादिज्ञानं प्रत्यक्षस्मरणविषयविशिष्टदीर्घाल्पादिभेदोपावितालामलकादिगोचरम् उपमानादन्योऽन्यतश्चानन्तर्भावेन भिन्नजातीयमेव प्रमाणमिति न षट्प्रमाणनियमव्यवस्थापनं मीमांसकस्योपपन्नं भवेत् । तथा गवयदर्शिन एव तद्विसदृशो महिष इति च ज्ञानस्य प्रमाणान्तरत्वात् । शक्यं हि वक्तुम्–

प्रत्यक्षेणाववुद्धेऽपि वैधर्म्ये महिषे स्मृते ।
विशिष्टस्यान्यतः सिद्धेस्तस्यैवात्र प्रमाणता ॥१८२५॥ इति ।

तथा नैयायिकस्यापि न प्रमाणचतुष्टयनियमकल्पनं प्रसिद्धसाधर्म्यादिवान्यतोऽप्यनेकधा संज्ञासंज्ञिप्रतिबन्धबुद्धेर्भावात् । तथाहि–'क्षीरनीरविभागकारी हंसः, षट्चरणो मधुकरः, एकविषाणो गण्डकः, श्वेतच्छत्रसिंहासनालङ्कृतो राजा', इति विश्वस्तवचनात् प्रतिपद्य पुनर्हंसादिकं पश्यतः स एष हंसादिवाच्योऽर्थ इति प्रतिपत्तेर्बहुलमुपलम्भात् । प्रत्यभिज्ञैवाल्पत्वादिज्ञानं प्रागुपलब्धस्यैव तस्य पुनर्विशिष्टतया सङ्कलनादिति चेत्; सिद्धमुपमानस्यापि तत्त्वमविशेषात् । भवतस्तर्हि स्मरणादि किन्नाम प्रमाणमिति चेत् ? आह–

---

१ साक्षात्तत्प्र– आ०, ब०, प० । २ प्रमितार्थः प्र– आ०, ब०, प० । ३ –न्यस्यास्यगतोऽध्य– आ०, ब०, प० । ४ –रसा मधुरा माथुराः पा– आ०, ब०, प० । ५ –चरादुप– आ०, ब०, प० । ६ –ति नष्टं प्रमा– आ०, ब०, प० । ७ गवं तु दर्शि– आ०, ब०, प० । ८ प्रतिसम्बन्धप्रसिद्धेर्भा– आ०, ब०, प० । ९ –तयापि स– आ०, ब०, प० ।

सर्वमेतच्छ्रुतज्ञानम् [अनुमानं तथागमः] । इति ।

सर्वं निरवशेषम् **एतत्** प्रकृतं स्मरणप्रत्यवमर्शतर्कलक्षणं **श्रुतज्ञानं** परोक्षप्रमाणम् अस्पाष्ट्यात् । इदमेवमिति ज्ञानं स्पष्टमेव सन्निहितविषयत्वादिति चेत्; न; तस्यापि [1]सङ्केतिताभिलापयोजनायामस्पष्टत्वात् । कथं तर्हि तच्छ्रुतमेव स्पष्टांशस्यापि भावात् ? न चेदं ज्ञानद्वयमेव, एकस्यैव विकल्पेतरतयेव स्पष्टेतरतयापि प्रत्यवभासनात्, अन्यथा सन्तानान्तरवदप्रतिसन्धानप्रसङ्गादिति चेत्; सत्यमिदं श्रुतत्वकथनं तु तत्र साभिलाप[2]-विषयप्रतिपत्तौ तदंशस्यैव प्राधान्यात् । ततो युक्तं स्मरणादेः [3]परोक्षत्वम् ।

अर्थापत्तिस्तर्हि प्रमाणान्तरमिति चेत्; न; तस्या अनुमानत्वात् व्याप्तिसामर्थ्या-दुत्पत्तेः । बहिर्व्याप्तेरभावादर्थापत्तिरिति चेत्; न; अनुमानस्याप्यन्तर्व्याप्तेरेव गमकत्वस्य निरूपणात् । एतावता च भेदे पक्षधर्मवत्यास्ततस्तद्विकला किन्न प्रमाणान्तरम् ? अन्यथा- १०
नुपमत्तेरविशेषादिति चेत्; अत एवानुमानादपि न भक्तेः ।

अभावज्ञानं तु भूतलादौ कैवल्यमात्रे प्रत्यक्षम्, निषेध्यविशेषोपहिते प्रत्यभिज्ञानम्, अविनाभावापेक्षायामनुमानम्, वचनमूलत्वे चागम इति न प्रमाणान्तरम् । अनुमानागमयो-श्चास्पष्टप्रतिभासत्वान्न परोक्षाद्भेदः । तदाह-'**अनुमानं तथागमः**' इति । न केवलं स्मृत्यादिकमेव श्रुतज्ञानम्, अपि त्वनुमानं तद्वदागमश्चेति । १५

कथं पुनरागमः प्रमाणमिति चेत् ? आह-

सम्प्रदायाविघातेन यदि तत्त्वं प्रतीयते ॥८७॥ इति ।

सर्वज्ञोपदेशमूलमुपदेशपारम्पर्यं **सम्प्रदायः** तस्या**विघातो**ऽविच्छेदस्तेन **तत्त्वम्** आगमवाच्यं **यदि प्रतीयते** प्रमाणमागमो नान्यथा । तथा च तत्प्रतिपत्तिर्भगवत्प्रवचनादेव, शक्यपरिच्छेदे वस्तुनि प्रत्यक्षादिना संवादस्यान्यत्र विसंवादानवभासस्य च शास्त्रलक्षणस्य[4] २०
तत्रैव प्रतिपत्तेः, प्रत्यागमेषु च विपर्ययात् । ततः स्थितं प्रत्यक्षं परोक्षं चेति द्वे एव प्रमाणे इति । किं पुनः प्रत्यक्षं किं वा परोक्षमित्यत्राह-

आद्ये परोक्षमपरं प्रत्यक्षं प्राहुराञ्जसम् । इति ।

"**मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्** ।" [त० सू० १।९] इत्यत्र पाठापेक्षयाऽऽदौ भवत्वात् **आद्ये** मतिश्रुते ते **प्राहुः** प्रतिपादयन्ति सूत्रकारादयः । किम् ? **परोक्षं** प्रमाणम् । २५
परोक्षत्वञ्च तयोरिन्द्रियसन्निकर्षलिङ्गादिभिरुत्पाद्यमानत्वात् 'परैरुक्ष्यते सिच्यते इति परोक्षम्' इति व्यत्पत्तेः । **अपरं** ताभ्यामुत्तरम् अवधिमनःपर्ययकेवलभेदं ज्ञानं **प्रत्यक्षं** प्राहुः । प्रत्यक्षत्वमात्ममात्रापेक्षत्वात् अक्षमात्मानं प्रति गतं कारणत्वेनाश्रितं प्रत्यक्षम्' इति व्युत्पत्तेः । न चैवं मतिज्ञानादेरपि प्रत्यक्षत्वम् आत्ममात्रापेक्षस्यैव तत्त्वोपगमात्, मत्यादौ च तदभावात् । तदिदमुभयमपि प्रमाणम् **आञ्जसं** न व्यवहारमात्रपरिकल्पितम्, ३०
परमार्थतः प्रमाणस्याभावे कल्पनयापि तदसम्भवस्य निरूपितत्वात् । कथं तर्हि मतिज्ञान-[5]स्यैवमवग्रहादिभेदस्य प्रत्यक्षत्वमुक्तम् । आत्ममात्रापेक्षत्वाभावादिति चेत् ? अत्राह-

केवलं लोकबुद्ध्यैव मतेर्लक्षणसंग्रहः ॥८८॥ इति ।

---

१ सङ्केताभिला- आ०, ब०, प० । २ -लापिवि- आ०,ब०,प० । ३ -त्तमर्थाप- आ०,ब०,प० । ४ -णस्य च त- आ०, ब०, प० । ५ -नस्यैवावग्र- आ०, ब०, प० ।

केवलम् आगमनिरपेक्षं[1] लोकस्य व्यवहर्तुः[2] जनस्य बुद्धचैव मतेः अवग्रहादिज्ञानस्य लक्षणेन प्रत्यक्षोक्तेन सङ्ग्रह इति। एतदुक्तं भवति—व्यवहर्तुर्मतिज्ञानेऽपि [3]लक्षणलेशदर्शनात् प्रत्यक्षप्रसिद्धेः तदनुरोधेन तदपि प्रत्यक्षतया सङ्गृहीतं न मुख्यतः। मुख्यतः[4] पुनरवध्यादिज्ञानमेव प्रत्यक्षम्, समग्रस्य स्पष्टतालक्षणस्य तत्रैव भावात्। एवमपि तथाविधाल्लक्षणादेव प्रत्यक्षव्यपदेशात् किमात्ममात्राश्रितत्वेन कल्पनमिति चेत्; न; प्रवृत्ति[5]निमित्तवत् व्युत्पत्तिनिमित्तेनापि तत्र तद्भावनिवेदनार्थत्वात् तथातत्कल्पनस्य। ततः स्थितं केवलमित्यादि। कथमागमस्य परोक्षत्वमुक्तम् 'अनुमानं तथागमः' इति, तस्याज्ञानत्वात्, ज्ञानस्यैव चागमे परोक्षत्वकथनादिति चेत् ? अत्राह—

स्याद्वादः श्रवणज्ञानहेतुत्वाच्चक्षुरादिवत्।
प्रमा [प्रमितिहेतुत्वात्प्रामाण्यमुपगम्यते] ॥८९॥ इति।

श्रवणं शब्दविषयं प्रत्यक्षं तस्य कार्यं यत् यथार्थमभिधेयज्ञानं तस्य हेतुत्वात् स्याद्वादो भगवत्प्रवचनं प्रमाणमुपचारात् न मुख्यतः। मुख्यतस्तज्जनितस्य ज्ञानस्यैव प्रामाण्याच्चक्षुरादिवत्। प्रसिद्धं हि चक्षुरादेरुपचारादेव प्रामाण्यं वस्तुतस्तज्जनितस्य ज्ञानस्यैव रूपादौ प्रामाण्यात्[6]। तत्त्वत एव स्याद्वादे कुतो न प्रामाण्यमिति चेत्[7]; न; मुख्यतो ज्ञानप्रामाण्यस्यैव नैयायिकस्योपगमात्। प्रमितिहेतुत्वात्तु[8] प्रामाण्यमुपगम्यत एव उपचारस्याप्रतिक्षेपात्[9]। तदेवाह—

प्रमितिहेतुत्वात्प्रामाण्यमुपगम्यते इति। सुबोधमेतत्।

न चैवं प्रमेयस्य तत्प्रतिषेधो युक्तः तस्यापि "**अर्थवत्प्रमाणम्**" [न्यायभा० १।१।१] इत्यत्र तद्धेतुत्वेन व्याख्यानात्, न्यायोपस्थापितस्य वचनमात्रेण निषेधायोगात्। ततः स्थितं ज्ञानमेव प्रमाणमिति।

किमिदानीं प्रमाणफलमित्याह—

प्रमाणस्य फलं तत्त्वनिर्णयादानहानधीः। इति।

आदानं च हानं च तयोर्धीः बुद्धिः **आदानहानधीः** उपलक्षणमिदम्, तेनोपेक्षाधीरित्यपि प्रतिपत्तव्यम्। तत्त्वस्य जीवादेः निर्णयः संशयादिव्यवच्छेदरूपोऽधिगमः तेन सहादानहानधीः **तत्त्वनिर्णयादानहानधीः** सा **प्रमाणस्य** उक्तलक्षणस्य फलं प्रयोजनम्। तच्चाव्यवहितं[10] तत्त्वनिर्णयः, व्यवहितमादानहानबुद्धिः प्रमाणतस्तत्त्वनिर्णये पश्चाद्भावात्, तत्त्वनिर्णय एव प्रमाणं "**प्रामाण्यं चेतसां स्वार्थव्यवसायः**" [ ] इति वचनात्। स एव कथं तस्य फलं भेदाभावेन तत्साध्यत्वाभावादिति चेत्; न; कथञ्चिद्भेदस्यापि भावात्। तथाहि न स्वनिर्णय एव प्रमाणम्, स्वपरविभागादेरनिर्णयविषयेत्वेनाभावप्रसङ्गात्। अद्वैतस्य च प्रतिक्षेपात्। नापि परनिर्णय एव; स्वनिर्णयाभावे तस्याप्यनुपपत्तेः। उभयनिर्णये च सिद्धः स्वनिर्णयात्मनस्तस्य परनिर्णयात् तदात्मनश्च

---

१ —र्थं केवलस्य व्य— आ०, ब०, प०। २ —हर्तुः ज्ञानस्य आ०, ब०, प०। ३ लक्षणे लेश— आ०, ब०, प०। "प्रत्यक्षमञ्जसा स्पष्टमिति प्रागुक्तस्पष्टत्वस्य।"— ता० टि०। ४ —तः पुनरवध्यादिज्ञा— आ०, ब०, प०। ५ —त्तिर्न निमित्तवदुत्पत्ति— आ०, ब०, प०। ६ —एयात्तत एव आ०, ब०, प०। ७ —मिति नैया— आ०, ब०, प०। ८ —त्वात्प्रामा— आ० ब०, प०। ९ —पात्र चैवं आ०, ब०, प०। १० —हितनिर्णयो आ०, ब०, प०।

स्वनिर्णयाद्भेदोऽपीति युक्तं तत्साध्यतया निर्णयस्य तत्फलत्वम्। कथं पुनः सहभाविनः प्रमाणान्निर्णय इति चेत् ? प्रदीपात्तमोऽपहारः कथम् ? सत्येव तस्मिंस्तद्भावादिति चेत्; समानमन्यत्रापि। न च 'तत्सहभावनियमः, प्रमाणस्य प्रागपि भावात्। तदन्यदेवेति चेत्; न; अभेदस्यापि प्रत्यभिज्ञानात्। आत्मन्येव तत्प्रत्यभिज्ञानं न प्रमाणे इति चेत्; न; प्रमाणादन्यस्य तस्य प्रतिक्षेपात्। तर्हि निर्णयः फलं कथं तेन प्रमाणस्य व्यपदेशः "**प्रमाणं स्वतो निर्णयः**" [सिद्धिवि० परि० १ श्लो० २] इत्यादौ तन्निष्पादनरूपेणैव तद्व्यपदेशोपपत्तेरिति चेत्; सत्यम्; शक्तिभेदेनैव क्षयोपशमापरनाम्ना प्रमाण[२]भावस्याभ्यनुज्ञानात्। निर्णयेन तु तद्भावकथनं तेनैवाव्यतिरेकेणाफलेन [३]तद्भावो न निर्विकल्पेनाधिगमेनेति ज्ञापनार्थम्। तेनापि तदवस्थितावतिप्रसङ्गः अकिञ्चित्करादावपि दर्शने तत्प्रसङ्गात्। तथा च व्यर्थमव्युत्पत्त्यादिव्यवच्छेदाय तत्र ज्ञानान्तरपरिकल्पनम्। अधिगमादपि तद्व्यवच्छेदरूपादेव तद्व्यवस्थितिश्चेत्; सिद्धस्तर्हि निर्णयादेवासौ, तादृगधिगमस्यैव निर्णयत्वात्। कथं पुनरेकस्यैव ज्ञानस्य प्रमाणफलभावेन भेदः ? सर्वस्यापि वस्तुनः स्वस्वभावव्यवस्थित्या निरंशस्यैवोपपत्तेः। सारूप्याधिगमे भेदेन क्वचित्तद्भावकल्पनं तु व्यावृत्तिभेदादेव न तत्त्वत इति [४]चेत्; न; तद्भेदस्यापि क्वचित्तत्त्वतोभावेऽनेकान्तवादप्रत्युज्जीवनात्। तस्याप्यन्यतस्तद्भेदात् परिकल्पनायामनवस्थाप्रसङ्गात्। ततो दूरं गत्वापि तत्त्वत एव व्यावृत्तिभेदमभ्युपगच्छता क्वचित्प्रमाणफलभावे[५] तद्भेदोऽभ्युपगन्तव्यः प्रतीतिबलस्याविशेषात्। वस्तुतो निर्भेदमेव ज्ञानं स्वतोऽवभासते, ग्राह्यादिभेदस्तु तत्र विप्लवकृत इति चेत्; न; विप्लवस्यापि विप्लवान्तराद्भेदप्रतिभासित्वेऽनवस्थादोषस्य दुष्परिहरत्वात्। स्वतस्तत्प्रतिभासित्वे [६]तु न निर्भागज्ञान[७]प्रतिष्ठानिष्ठितिः। अतो निराकृतमेतत्—"**अविभागोऽपि बुद्ध्यात्मा**" [प्र० वा० २।३५४] इत्यादि। तन्न अनेकान्तप्रद्वेषे सौत्रान्तिकादेः कल्पनयापि प्रमाणफलव्यवस्थापनमुपपन्नम्। भवतु तर्हि प्रमाणादिसकलविकल्पापरामृष्टमेव तत्त्वमिति चेत्; न; तस्य प्रपञ्चतः प्रतिक्षिप्तत्वात्। ततः स्थितं तत्त्वनिर्णयः साक्षात्, आदानादिबुद्धिस्तु पारम्पर्येण फलं प्रमाणस्येति।

परमपि तत्फलं दर्शयन्नाह—

निःश्रेयसं परं प्रायः [केवलस्याप्युपेक्षणम्] ॥९०॥ इति।

निःश्रेयसं कैवल्यं **परं** प्रकृष्टं पश्चिमं वा प्रमाणस्य फलमिति सम्बन्धः। सति हि प्रमाणतः तत्त्वनिर्णये मिथ्यादर्शनादिपरित्यागेन सम्यग्दर्शना[८]द्यभ्यासतः प्रादुर्भवन्निःश्रेयसं परम्परया प्रमाणस्य फलमिति मन्यते, **प्रायो** बाहुल्येन तत्फलं सर्वत्राभावात्। सम्प्रति केवलज्ञानस्य फलं दर्शयति—**केवलस्याप्युपेक्षणम्** इति। सकलद्रव्यपर्यायगोचरं निरतिशयं ज्ञानं **केवलं** तस्य **उपेक्षणं** सर्वत्रौदासीन्यं फलं [९]तदपोहादिकफलान्तरस्याभावात्। अपिशब्दात् सर्वविषयो निर्णयश्च "**अज्ञाननाशो वा सर्वस्यास्य स्वगोचरे**" [आप्तमी० श्लो० १०२] इति वचनात्, अज्ञाननाशस्य निर्णयरूपत्वात्।

[१०]सत्यं प्रमाणस्य निर्णीतिः फलं सा तु तत्कार्यत्वेन ततो भिन्नैव नानर्थान्तरम्

---

१ तत्सहायनि- आ०, ब०, प०। २ -माणाभाव- आ०, ब०, प०। ३ तद्भावो निर्वि- आ०, ब०, प०। ४ चेत्तन्न त- ता०। ५ -फलतद्भेदो- ता०। ६ तु निर्भाग -आ० ब०, प०। ७ -प्रतिष्ठानिष्ठितः आ०, ब०। -निष्ठतः प०। ८ -नाभ्यासतः आ०, ब०, प०। ९ तदभ्युपगादिक- ता०। १० स्वत्वं प्रमा- आ०, ब०, प०।

अत एवोक्तम्–"यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" [ ] इति । इति चेत्; अत्राह–

प्रत्यक्षं श्रुतविज्ञानहेतुरेव प्रसज्यते । इति ।

श्रुतमभिलापस्तन्मिश्रं **विज्ञानं श्रुतविज्ञानं** दध्योदनादिवद्[1]वृत्तिः तस्य नीलमिद-
५ मित्यादिरूपस्य **हेतुरेव** कारणमेव प्रत्यक्षं निर्विकल्पदर्शनं **प्रसज्यते** न प्रमाणमित्येवकारः । तथाहि न तस्य स्वतः प्रामाण्यम्; अनिर्णयस्वभावत्वात् अकिञ्चित्करवत् । नापि निर्णय-हेतुत्वात्; निर्णयस्य विकल्पत्वेनावस्तुविषयत्वात् । तज्जननात् प्रामाण्ये संशयादिजननादपि तत्प्रसङ्गात् । वस्तुविषय एव [2]निर्णयः, व्यवहर्त्रा तद्विषयस्य वस्तुतयैवाध्यवसायादिति चेत्; किं पुनर्भवतो व्यवहर्त्तरि विश्वासः ? बाढम्, "**प्रामाण्यं व्यवहारेण**" [प्र० वा० १।७]
१० इति वचनादिति चेत्; तर्हि निर्णयस्यैव प्रामाण्यं स्याद् व्यवहर्तुस्तत्रैव तदभिप्रायात्, न निर्विकल्पदर्शनस्य, तत्र तद्गन्धस्यापि व्यवहर्त्रानाघ्राणात् । ततो निराकृतमेतत्– "**गृहीतग्रहणान्नेष्टं सांवृतं प्रमाणम्**" [प्र० वा० १।५] इति । यदि तत्प्रामाण्ये न तत्र विश्वासो नियत[3]वस्तुविषयत्वेऽपि न भवेद[4]र्थजातीयानुपपत्तेः । कथं वा प्रत्यक्षं निर्णयस्य हेतुः विकल्पत्वात्[5] ? अथ तद्वासनैव हेतुर्निर्णयस्य प्रत्यक्षं तु केवलं तद्बोधकमिति
१५ चेत्; नेदानीं प्रत्यक्षेण किञ्चित्, अर्थस्यैव चक्षुरादिकमभिपततस्तद्बोधकत्वोपपत्तेः अचेतनस्य कथं तद्बोधकत्वमिति चेत् ? कथं दर्शनहेतुत्वम् ? सामर्थ्यादिति समानमन्यत्र । तन्न प्रत्यक्षान्निर्णयसम्भवो यतस्तत्प्रमाणम् । संभवेऽपि मुख्यतः तस्यैव प्रामाण्यात्, प्रत्यक्षं सन्निकर्षादिवत्तस्य हेतुरेव न प्रमाणमिति स्थितम् ।

प्रमाणवन्नयानामप्य[6]धिगमहेतुत्वम् "**प्रमाणनयैरधिगमः** [त० सू० १।६] इति
२० सूत्रे, [7]कामतस्तेऽपि विप्रतिपत्तिनिरासेन निर्णतव्या इति चेत्; अत्राह––

इष्टं तत्त्वमपेक्षातो नयानां नयचक्रतः ॥९१॥ इति ।

स्याद्वादप्रविवेचितार्थैकदेशगोचरः[8] प्रतिपत्त्रभिप्रायो नयः । स च द्विधा अर्थनयः शब्दनयश्चेति । प्राच्यः पुनश्चतुर्धा नैगमः सङ्ग्रहो व्यवहार ऋजुसूत्र इति । पश्चिमस्त्रेधा– शब्दः समभिरूढः एवम्भूत इति । तत्र यस्मिन् द्वयोर्भेदगमनं स नैगमः नैकं गमो नैगमः इति
२५ व्युत्पत्तेः, यथा गुणगुणिनौ क्रियातद्वन्तौ सामान्यविशेषौ च भिन्नाविति । सम्यक् एकत्वेन सर्वग्रहणं सङ्ग्रहः, यथा सर्वमेकं सदविशेषादिति । सङ्ग्रह[9]विषयस्य पुनर्व्यवहरणं विभजनं व्यवहारः, यथा यत्सत्तद्द्रव्यं गुणः कर्म[10] चेति । ऋजु प्रगुणं सूत्रणमृजुसूत्रः, यथा सर्वं वर्त्तमानमात्रमेव न पूर्वं नापि पश्चादिति । कालादिभेदादर्थभेदकारी शब्दः । तत्र कालभेदात् अभूद्भवति भविष्यतीति, कारकभेदात् वृक्षं पश्य, वृक्षाय जलं देहीति, लिङ्गभेदादर्थभेदः[11]
३० इति । पर्यायभेदादर्थभेदकृत् समभिरूढः, यथा शक्तादेव शक्रो न पूर्दारणात्, ततोऽपि पुरन्दर एव न शक्र इति । क्रियाश्रयस्त्वेवम्भूतः, पुरं दारयन्नेव पुरन्दरो नान्यदेति । तदेतेषां सप्तविकल्पानामवान्तरविकल्पादनेकप्रकाराणां नयानाम् अपेक्षातः प्रतिपत्त्रौदासीन्य-

---

१ –दिव वृत्तिः आ०, ब०, प० । समासः । २ निर्णये व्यव– आ०, ब०, प० । ३ –यतो-वस्तुविषयेपि ता० । ४ –र्थजातीया– आ०, ब०, प० । ५ –त्वादर्थवद्वासनैव आ०, ब०, प० । ६ –मप्यधि– आ०, ब०, प० । ७ कालतस्ते आ०, ब०, प० । ८ –चरप्रति– आ०, ब०, प० । ९ –हनयस्य आ०,ब०,प० । १० कर्मेति चेति आ०, ब०, प० । ११ –दादर्थभर्थैः प– आ०,ब०,प० ।

लक्षणयाऽपेक्षया **तत्त्वं** श्रुतविकल्पत्वेन प्रमाणत्वम् **इष्टमभ्युपगतम्**, अन्यथा दुर्नयत्वेन तदनुपपत्तेः। तच्च तेषां तत्त्वं विस्तरतो **नयचक्रतः** तन्नामधेयाच्चिरन्तनशास्त्रात् प्रतिपत्तव्यम्।

तदेवं व्यवस्थापितप्रामाण्यस्य प्रवचनस्य शास्त्रान्ते प्रयोजनमाह—

मिथ्यात्वं सौगतानां कणचरसमयं कापिलीयं प्रमेयं
प्रागल्भ्यं शाबराणां जिनपतिविहिताशेषतत्त्वप्रकाशे। ५
पर्याप्तत्वं व्यपोहन्नुपहसनमयं प्रस्तुवन्न्यायमार्गे
स्याद्वादः सर्ववादप्रवणगुणगणः श्रेयसे नोऽस्तु नित्यम् ॥९२॥ इति।

अयमस्मिन्प्रस्तावे निरूपितः **स्याद्वादो** भगवत्प्रवचनं **श्रेयसे नोऽस्तु नित्यम्**। कीदृशः? **सर्वस्मिन् वादे** प्रत्यक्षा[1]दिस्थानत्रयलक्षणे **प्रवणं** समग्रं **गुणानां** निर्दोषत्वादीनां **गणः** समूहो यस्मिन् स तथोक्तः। किं कुर्वन्निति चेत्? उच्यते, सुगतस्येमे **सौगताः** तेषाम्, १०
बहुवचनादन्येषामपि तादृशानां **यन्मिथ्यात्वं** सर्वं स्वप्नादिवद्भ्रान्तमेव न तत्त्वतः[2] किञ्चिदिति, यश्च कणचरस्य वैशेषिकतन्त्रकृतः समयः परस्परव्यतिरिक्त-द्रव्यगुणादिपदार्थोपदेशः, अक्षपादसम[3]यस्यापृथग्वचनं कणचरसमयादविशेषात्। यदपि **कापिलीयं** कपिलशिष्याणां प्रमेयं व्यक्ताव्यक्तज्ञातृविकल्पम्, यच्चापि शाबराणां प्रागल्भ्यं स्वतः प्रामाण्यादिपरिक[4]ल्पनपाटवं सर्वमेतद्**व्यपोहन्न**पाकुर्वन् इति। न केवलमिदमेव अपितु योऽसौ १५
जिनपतेः सम्बन्धी "**विशेषेण हितो** विनेयलोकस्याशेषाणां सूक्ष्मादिभेदानां **तत्त्वानां प्रकाशः**तस्मिन् यदुपहसनम्—**एवं यत्केवलज्ञानम्**"—[मी० श्लो० चो० श्लो० १४१] इत्यादिमीमांसकस्य, "**तस्मादनुष्ठेयगतम्**" [प्र० वा० १।३३] इत्यादि सौगतस्य तदपि व्यपोहन्निति। किं कुर्वन् व्यपोहति? **न्यायमार्गे** प्रत्यक्षादिरूपे **पर्याप्तत्वं** भावानां सौगतादिकल्पनाविपर्ययेण यत् **परि** समन्तात् **आप्तत्वं** तत्**प्रस्तुवन्** प्रकटयन्, अन्यथा तद्व्यपोहनानुपपत्तेः। किं पुनस्तच्छ्रेयो यदर्थत्वं स्याद्वादस्याशास्यते इति चेत्? सकलावरणपरिक्षयविजृम्भितं केवलज्ञानमेव। तदेवाह— २०

नैकान्तक्षायिकाणाम् [अतिशयमवदन्नैव नानार्थसाध्यम्,
नैष्किञ्चन्यं तपो वाऽविगलितसकलक्लेशराशेर्विनाशे।
निष्पर्यायं प्रवृत्तं सकलविषयगं केवलं वेद नित्यम्, २५
योऽयं तस्मै नमास्त्रिभुवनगुरवे शम्भवे शान्तये ते ॥]९३॥ इत्यादि।

नैकान्तोऽनेकान्तः नञ्शब्देन समासात्। अनेकान्तेनाऽनेकप्रकारेण क्षया एव कर्म्मणां **क्षायिकाः** स्वार्थिकत्वात्प्रत्ययस्य तेषाम् **अतिशयं** तारतम्यं **अवदन्नैव** प्रतिषेधद्वयेन विधिप्रतिपत्तेः। स एवातिशयः कुतः सिद्ध इति चेत्? तन्निबन्धनात्[5] ज्ञानातिशयादेव। अस्ति चायम्—असहायेन्द्रियादारभ्य आशास्त्रविदः प्रतीयमानत्वात्, अतश्च तत्प्रतिपत्तिः। ३०
अत एवाह—**नानार्थसाध्यम्** इति नाना चासावतिशयवत्त्वादर्थश्च प्रयोजनं ज्ञानलक्षणं **नानार्थस्तेन साध्यमनुमेयं** तेषामतिशय[6]मवदन्नैवेत्यनेन [7]हेतूक्तः (तुरुक्तः)। साध्यं पुनरस्य

---

१ —क्षाधिष्ठान— आ०, व०, प०। २ —तः कथञ्चिदिति आ०, व०, प०। ३ —यस्य पृथ— आ०, व०, प०। ४ —कल्पितेन आ०, व०, प०। ५ विशेषहितो ता०। ६ —बन्धनज्ञानाति— आ०, व०, प०। ७ —यवदन्येवे— आ०, व०, प०। ८ हेत्यूक्तः साध्यं ता०।

क्वचित्तदतिशयस्य परिनिष्ठितत्वम् । तथा हि यदतिशयवत् तत् क्वचित्परिनिष्ठितं यथा [1]परिमाणम्, अतिशयवांश्च कर्मणां क्षय इति । यत्र च तत्परिनिष्ठा तज्ज्ञानं सर्वविषयं भवति । तथाहि–यद्यत्र व्यपगतावरणं ज्ञानं तस्य तद्ग्राह्यं यथा नीहाराद्यपगमे प्रत्यक्षस्य वृक्षादि, व्यपगतावरणं च कस्यचिद् ज्ञानं सर्वत्रेति । तदेवाह–**अविगलितेत्यादि** । योऽयमेवमवदन्नैव [2]**वेद** वेत्ति **सकलविषयगं केवलं** केवलज्ञानं **नित्यम**विनश्वरं **निष्पर्याय**मक्रमम् । उपलक्षणमिदं तेन निष्करणं निर्व्यवधानं च । कदा तत्प्रवृत्तम् ? **अविगलितो** यः **सकलानां क्लेशानां** कर्मतदास्रवरूपाणां **राशिस्तस्य विनाशे प्रवृत्तम्** । कुतस्तद्विनाशोऽयीति चेत् ? तपस एव । तदाह–**नैष्किञ्चन्यं तपो वा** इति । **वे**ति समुच्चये । तपो हि बहिरन्तर्विकल्पं तद्विनाशोपायं योऽयं वेद । कीदृशम् ? **नैष्किञ्चन्यम्** । ननु तत्त्वज्ञानभावनं तपस्तत्कथं नैष्किञ्चन्यमिति चेत् ? न; सत्येव तस्मिन्निस्पृहत्वरूपे तदुपपत्तेः । अत एवोक्तम्–

"**समाधितन्त्रस्त[3]दुपोहपत्तये, द्वयेन नैर्ग्रन्थ्यगुणेन चायुजम्**।" [ ] इति । **तस्मै** योऽयं वेदेत्युक्ताय **नमाम** इत्यादि सुगमम् । चतुर्थी तु सर्वत्र "**गल्हादिभिर्बहुलम्**" [शाक० १।३।१३९] इति । ततः सूक्तम्–

नैकान्तक्षायिकाणामतिशयमवदन्नैव नानार्थसाध्यम्,
नैष्किञ्चन्यं तपो वाऽविगलितसकलक्लेशराशेर्विनाशे ।
निष्पर्यायं प्रवृत्तं सकलविषयगं केवलं वेद नित्यम्,
योऽयं तस्मै नमामस्त्रिभुवनगुरवे शम्भवे शान्तये ते ॥

पुनरपि शासनस्याराध्यत्वं फलवत्त्वेन दर्शयन्नाह–

युक्तायुक्तपरीक्षणक्षमधियामत्यादराराधिनाम्,
संसेव्यं परमार्थवेदसकलध्यानास्पदं शाश्वतम् ।
लोकालोककलावलोकनबलप्रज्ञागुणोद्भूतये
आभव्यादकलङ्कमङ्गलफलं जैनेश्वरं शासनम् ॥९४॥ इति ॥

जिनेश्वरस्येदं **जैनेश्वरं शासनम्** । कीदृशम् ? **परमार्थस्य** जीवादेर्यो **वेदो** बोधो यच्च **सकलं** [4]**धर्मशुक्लविकल्पं ध्यानं** तयोरास्पदं शाश्वतं प्रवन्धतो नित्यम् । पुनरपि कीदृशम् ? **अकलङ्कमङ्गलफलं** निर्दोषप्रशस्तविविधकल्पाभ्युदयप्रयोजनम् । आकुतस्तथेति चेत् ? आह–[5]**वूदभवस्य** (अभवस्य) भाव आभव्यम् आ तस्मादाभव्यादा[6]**मुक्तिपदादिति** । तत्किम् ? **संसेव्यमभियोक्तव्यम्** । केषाम् ? **युक्तायुक्तपरीक्षणक्षमधियाम्** उपपन्नेतरवस्तुविचारपटुतरप्रज्ञानाम्[7] । कीदृशानाम् ? **अत्यादरारा**[8]**धिनां** प्रशस्तश्रद्धया आराधनशीलानाम् । तत्तेषां किमर्थं संसेव्यम् ? अत्रोत्तरं **लोके**त्यादि । **लोकालोकयोः** याः **कला** विविधविकल्पाः अणुप्रभृतिप्रतिपत्तिवेद्या भागाः तासामवलोकनं निरवशेषदर्शनं तत्र **बलं** यस्य **प्रज्ञागुणस्य तस्योद्भूतये** इति ।

---

१ परिणाममति– आ०, ब०, प० । २ –द्विवेत्ति आ०, ब०, प० । ३ –दुपोपपत्तये आ०, ब०, प० । ४ धर्म्यशुक्ल– आ०, ब०, प० । ५ व्यादभवस्य भाव आभव्यमित्यपि पाठः । भव्यस्य आ०, ब०, प० । ६ –मुक्तिपादादि– ता० । ७ –नामत्यादरा– आ०, ब०, प० ।

श्रीमन्न्यायविनिश्चयस्तनुभृतां चेतोदृगुर्वीनलः,
सन्मार्गं प्रतिबोधयन्नपि च तान्निःश्रेयसप्रापणम् ।
येनायं जगदेकवत्सलधिया लोकोत्तरं निर्मितो
देवस्तार्किकलोकमस्तकमणिर्भूयात्स वः श्रेयसे ॥१॥
विद्यानन्दमनन्तवीर्यसुखदं श्रीपूज्यपादं दया-
पालं सन्मतिसागरं कनकसेनाराध्यमभ्युद्यमी ।
शुद्धन्नीतिनरेन्द्रसेनमकलङ्कं वादिराजं सदा,
श्रीमत्स्वामिसमन्तभद्रमतुलं वन्दे जिनेन्द्रं मुदा ॥२॥
भूयो भेदनयावगाहगहनं देवस्य यद्वाङ्मयं
कस्तद्विस्तरतो विविच्य वदितुं मन्दप्रभुर्मादृशः ।
स्थूलः कोऽपि नयस्तदुक्तिविषयो व्यक्तीकृतोऽयं मया,
स्थेयाच्चेतसि धीमतां मतिमलप्रक्षालनैकक्षमः ॥३॥
व्याख्यानरत्नमालेयं प्रस्फुरन्नयदीप्तिभिः[1] ।
क्रियतां हृदि विद्वद्भिस्तुदन्ती मानसं तमः ॥४॥
श्रीमत्सिंहमहीपतेः परिषदि प्रख्यातवादोन्नति-
स्तर्कन्यायतमोपहोदयगिरिः सारस्वतैः[2] श्रीनिधिः ।
शिष्यः श्रीमतिसागरस्य विदुषां पत्युस्तपःश्रीभृतां
भर्त्तुः सिंहपुरेश्वरो विजयते स्याद्वादविद्यापतिः ॥५॥

इत्याचार्यवर्यस्याद्वादविद्यापतिविरचितायां न्यायविनिश्चयतात्पर्यावद्योतिन्यां व्याख्यानरत्नमालायां तृतीयः प्रस्तावः समाप्तः ।

समाप्तं च शास्त्रम् ।

ॐ नमो वीतरागाय । ॐ नमः सिद्धेभ्यः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

१–दीधितिः इत्यपि पाठः । २–स्वतं श्री–ता० ।